- Title – रणवीर व्रत रत्नाकर
- Accession No – Title –
- Accession No –
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning –
- End –
- Colophon-
- Illustrations -
- Source -
- Subject -
- Revisor -
- Author -
- Remarks- द्वादश मासान्तर्गत व्रतानां वर्णनम् ।

रणवीर व्रत रत्नाकर ग्रन्थ प्रारम्भ

Chandramani.

(1)

कीमत १

रणवीरव्रतरत्नाकरग्रन्थप्रारम्भः

पृ 133

गुरुकुल का. गड़ी

मलमासप्रारम्भः

गुरुकुल कांगड़ी

५

[illegible]

[illegible]

S

॥ श्रीरघुनाथोजयति ॥

अथमलमासमुख्यप्रकीर्णव्रतानि भविष्योत्तरे श्रीरुवाच

देवदेवजगन्नाथभुक्तिमुक्तिप्रदायक कथयस्वप्रसादेनलोकानांहितकाम्यया मुनीश्वरावदंतीहकृष्णद्वैपायनादयः
अदत्तंनैवलभ्येतदत्तंचैवोपतिष्ठति यथावंध्यागृहस्थस्यपतिवंशविनाशिनी तथादानविहीनस्यजन्मसर्वंनिरर्थकं
मलिम्लुचेतुसंप्राप्तेक्रियाःकर्य्याःकथंप्रभो श्रीभगवानुवाच क्षौरंमौंजीविवाहादिव्रतंकाम्योपवासकं मलिम्लुचेस
दात्याज्यंगृहस्थेनविशेषतः श्रीरुवाच अधिमासेचसंप्राप्तेकिंकार्यंब्रूहिमेप्रभो कस्योद्देशेनदातव्यंवदकिंचप्र
देयकं शृणुदेविमहाभागेसर्वलोकस्यहेतवेस्वयंदातास्वयंभोक्तायोददातिद्विजातये नान्योदातानभोक्ताच
इहलोकेपरत्रच येचमासाः ससंक्रांतास्तेषांस्वामीरविःस्मृतः असंक्रांतास्तुयेमासास्तेषांस्वामीजनार्दनः
असंक्रांतितुसंप्राप्तेमामुद्दिश्यव्रतंचरेत् अधिमासस्याधिपत्येअहंवैपुरुषोत्तमः स्नानंदानंजपोहोमः स्वाध्यायः
पितृतर्पणंदेवार्चनमथान्यच्चयेचकुर्वंतिमानवाः अक्षयंतद्भवेत्सर्वंममोद्देशेनयत्कृतं मलमासोगतः शून्यो
यदिदेविप्रमादतः दारिद्र्यपुत्रशोकंचपातकंचाविगर्हितं मर्त्यलोकेभवेज्जन्मतेषांदेविभवेत्सदा यदाम
लिम्लुचोमासः प्राप्यतेमानवैःप्रिये महोत्सवस्तदाकार्यआत्मनोहितमिच्छता कृष्णपक्षेचतुर्दश्यांनवम्यां
वासुरेश्वरि अष्टम्यांवाप्यकर्तव्यंव्रतंशोकाविनाशनं यथालब्धोपहारेणमासेचास्मिन्मालिम्लुचे पुण्येह्निप्रातरुत्था

गुरुकुल कांगड़ी

यकृत्वापौर्वाह्निकींक्रियां गृह्णीयान्नियमंपश्चाद्वासुदेवंहृदिस्मरन् उपवासस्यनक्तस्यएकभक्तस्यभामिनि एकस्यनिश्चयंकृत्वाततोविप्रान्निमंत्रयेत् सपत्नीकान्सदाचारान्सुवृत्तान्छुभवेषकान् श्रुताध्ययनसंपन्नात्कुलीनान्जातिसंभवान् ततोमध्यान्हसमयेलक्ष्मीयुक्तंजनार्दनम् स्थापयेदव्रणकुंभेवेदमंत्रैर्द्विजोत्तमैः पूरयेत्परयाभक्त्यागोत्रिभिः सपितामहं सपितामहंब्रह्मणोध्यानमंत्रसाहितं गंधतोयेनसंस्थाप्यपंचामृतयुतेनच चंदनेनतुगंधेनपुष्पैर्नानाविधैःप्रिये मिष्टान्नैश्चवनैवेद्यैर्धूपादिभि तांद्रितः आच्छादनंतुवस्त्रैश्चपीतवस्त्रैर्विशेषतः घंटामृदंगनिर्घोषैः शंखभेरीसमन्वितैः आरार्त्तिकंव्रतीकृत्वाकर्पूरागुरुचंदनैः अलाभेयेनकेनापिफलस्यानंत्यहेतवे ताम्रपात्रस्थितैस्तोयैश्चंदनाक्षतपुष्पकैः अर्घ्यंदद्यात्सपत्नीकःप्रहृष्टेनांतरात्मना मंत्रेणानेनदेवेशिब्राह्मणैःसहमांस्मरन् नारंगैर्नारिकेलैश्चफलैनानाविधैःशुभैः पंचरत्नसमायुक्तैर्जानुनीकृत्यभूतले आरोप्यभालेहस्ताभ्यांश्रद्धाभक्तिसमन्वितः अर्घ्यदानमंत्रोयथा देवदेवमहाभागप्रलयोत्पत्तिकारक कृष्णसर्वेशभूतेशजगदानंदकारक गृहाणार्घ्यमिमंदेवकृपांकृत्वाममोपरि प्रार्थनामंत्रः स्वयंभुवेनमस्तुभ्यंब्रह्मणेमिततेजसे नमोस्तुतेश्रियानंददयांकुरुममोपरि एवंसंप्रार्थ्यगोविंदंपूजयेद्ब्राह्मणैःसह सपत्नीकान्छुचीन्स्नातान्लक्ष्मीनारायणौस्मरन् पूजयित्वाविधानेनसपत्नीकंस्मरन्विभुं स्मर्त्तव्योद्विजरूपेणपत्नींश्रियमनुस्मरन् परिधाप्ययथाशक्त्या वस्त्रालंकारकुंकुमैः द्राक्षाम्रैश्चकपित्थैश्चपनसैःकदलीफलैः नारिकेलैश्चनारंगैःकूष्मांडैर्दाडिमैःप्रिये घृतपक्वान्नगोधूमैःशुभ्रैःसौहालिकैर्वटैः सक्षीरैर्घृतपूरैश्चफाणितैःखंडमंडितैः वृंताककर्कटीशाकैःशृंगवेरैःसमूलकैः अन्यैश्चविविधैःशाकैरम्यपाकैःपृथक्पृथक् भक्ष्यभोज्यैश्चलेह्यादिखंडकानिविशेषतः गोरसानिविचित्राणिवासितानिघृतादिभिः अथान्यान्यपिदेयानिदानानिविविधानिच वित्तशाठ्यंनकर्त्तव्यमात्मनः श्रेयमिच्छता

7

यथावसरसंप्राप्तमुपविश्यमृदुब्रुवन् इदंस्वादुइदंभोज्यंभवदर्थंप्रकल्पितं याच्यतांरोचतेयच्चयन्मयापाचितं प्रभो धन्योस्म्यनुगृहीतोस्मिकृतंसार्थंचमंदिरं विसर्जयेत्ततोविप्रान्दत्वातांवूलदक्षिणां पत्राणिपूगखंडानि चूर्णंचखदिरंशुभं चतुर्भिर्मिलितंदेवितांवूलंममवल्लभं एलालवंगकर्पूरजातीफलतजत्वचः मृगनाभिमरीचानिसुरगांसनखांस्तथा योददातिद्विजाग्रेभ्यः सभवेत्सुभगोत्तरः सुभगाचशुभाचाराश्चंद्राभेभवनेशुभे पुत्रसौभाग्यसंयुक्तातांबूलाज्जायतेबला पत्रैस्तुकेशवःप्रीतःपूगैरीशःसहांबया चूर्णेनशुक्त्याह्यमलःखदिरेणचमन्मथः चतुर्भिर्विश्वरूपोसौयःपुष्णातिजगत्त्रयं परितोष्यसपत्नीकांहस्तेदद्याच्चदक्षिणांआसीमांतमनुब्रज्यभुंजीतबंधुभिःसह असंक्रांतव्रतेनारीयाकरोतिजगत्त्रये दारिद्र्यंपुत्रशोकंचवैधव्यंनभवेत्कचित् नरोप्येवंविधोदेवियदिकुर्यान्मलिम्लुचे मलिम्लुचंप्राप्यनपूजितोयैःश्रीनाथदेवःपरयैवभक्त्या कथंभवेत्तेषुसुखंचसंपत्पुत्राःसुहृत्सेवकवच्चभार्या इतिभाविष्योत्तरेमलमासव्रतकथा ॥ अन्यदपिकथानकंदेवीपुराणे श्रीईश्वरउवाच शृणुष्वदेविमाहात्म्यंमलमासस्यपार्वति येचमासाःससंक्रांतास्तेषांस्वामीरविस्तथा असंक्रांतास्तुयेमासास्तेषांस्वामीजनार्दनः तमुद्दिश्यचयत्किंचित्स्वल्पंवायदिवाबहु अक्षयंतद्भवेत्कर्त्तुर्जन्मनामयुतंध्रुवंमलिम्लुचेतुसंप्राप्तेयोनकुर्यात्स्वशक्तितःदानंवाथव्रतंवापिविप्रभोजनमेवच मलिम्लुचेनृदेहेषुसयातिनिरयंनरः एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनकुर्वंतिमलमालसंप्रयत्नतःदानेवाथव्रतेचापीयस्यशक्तिर्नविद्यते शरीरपोषणंतेनकर्त्तव्यंतीर्थसेवनं शुश्रूषाद्विजमुख्यानांसर्वव्रतफलंलभेत् सर्वव्यापीयथाविष्णुःसर्वभूतक्रियापरः मलिम्लुचेतथादानंलोकद्वयसुखावहं श्रीदेव्युवाच भाग्यहीनस्तुयेमर्त्याःपापबाह्विचरंतिते विवेकोनास्तिवैयेषांकिंकार्य्यंवैमलिम्लुचे निर्धनाश्चदुराचाराःपरभाग्योपजीविनःश्रीईश्वरउवाच दानेव्रते तथाभुक्ते

आयासैकायशोषणे सर्वस्यनास्तिसामर्थ्यंकर्त्तव्यंविप्रसेवनं साधूनांसेवनंदेविसर्वतीर्थफलप्रदं कृष्णेनलभ्यतेतीर्थंसद्यौवैसाधुसेवनात् साधूनांदर्शनंचैवकीर्त्तनंश्रवणंतथा मलमासेसदादेविकर्त्तव्यंश्रेयइच्छता पुण्यव्ययेनसंप्राप्ताःसंपदोविविधागृहे ताभिः पुनः प्रकर्त्तव्यःसंचयःपुण्यकर्मणां अन्यायेनयथादेवियःप्राप्तोधनसं. क्षयः यथाकर्मक्षयात्वेहप्राप्यतेपुण्यसंचयः तस्मात्पाणिसंप्राप्तेद्रव्यपात्रेषुकल्पयेत् यथावीजांकुरन्यायौ विद्वद्भिर्धर्मतत्परैः विचार्यानिश्चयः प्राप्तो धर्मादर्थोनसंशयः धर्मोबीजंफलंवार्थोफलंवीजेसुरक्षितं कर्त्तव्यंतत्प्रयत्नेनप्ररोहार्थंभवेभवे बीजांकुरंततोभक्षेद्योनदद्याद्धनंद्विजे लक्ष्मीनारायणंपूज्यभोजयेच्चद्विजोरमान् सकर्थंचान्ययोनीषुभुंज्यादर्थादिजंसुखं इतिदेवीपुराणेमलमासव्रतम् ॥ अथमलमासव्रतविधानम् ॥ हेमाद्रौ पाद्मे देवेशंशंकरंदेवंसर्वदेवनमस्कृतं षडाननोमहातेजाःप्रणम्यपर्य्यपृच्छति स्कंदउवाच देवदेवमहादेवसर्वधर्मप्रवर्तक व्रतानिवहुपुण्यानिश्रुतानित्वत्प्रसादतः नतृप्तिमधिगच्छामिधर्मतत्वेसुरश्वेर व्रतांतरंमहापुण्यंकथयस्वमहाप्रभो श्रीईश्वरउवाच शृणुवत्सप्रवक्ष्यामिव्रतंपापहरंशुभं यस्यानुष्ठानमात्रेणतुष्टोभवतिभास्करः दुःखंहरतियत्क्षिप्रंप्रदद्यात्सौख्यमुत्तमं स्कंदउवाच किंव्रतंकस्यवैदानंकस्यदेवस्यपूजनं केनचादौपुराचीर्णंतत्सर्वंकथस्वनः श्रीईश्वरउवाच मलमासव्रतंस्कंदसर्वपापहरंनृणां सकांस्यमन्नदानंतु तुष्टयेभास्करस्यच यस्यानुष्ठानमात्रेणपुत्रदौहित्रवान्नरः धनधान्यसमायुक्तः सर्वपापैः प्रमुच्यते आसीत्पुरा महाराजानहुषः पृथिवीतले धर्मप्रियस्तपोनिष्ठोदेवपूजनतत्परः प्रजानांपालकोनित्यमतिथीनांचपूजकः गंतुशक्रपदंसोथब्राह्मणान्नरवाहने योक्तुकामारयद्देवाद्दगस्त्यंमुनिपुंगवंयुक्त्वासमारुहत्सोथतदानीमिंद्रमायया मोहिते नतुतेनैव युक्तोब्रह्मविदांवरः सर्पसर्पेतिमूढेनताडितश्चमुनिस्तदा क्रुद्धेनमुनिनातेनशापितःकुंभयोनिना

9

सर्पोभवेतिहेपापमहासर्पस्तदाभवत् राजाशप्तस्तदास्कंदसर्पत्वमतिदारुणं महारण्येमहाप्राज्ञसर्वसंतोषवर्जितः
देहभावेनतेनापिकृतास्तुपापराशयः एकदातुमहारण्येकृष्णद्वैपायनोमुनिः आजगाममहाभागस्तस्यभा
ग्येनचोदितः तयोस्तुसंगतमभूदरण्येतरुसंकुलतद्दर्शनात्ससस्मारपूर्वजन्मविचेष्टितं ततश्चविह्वलीभूतःप्र
णम्यशिरसामुनिं प्रणम्यदंडवत्सर्पइदंवचनमब्रवीत् दयातवमहीपृष्ठेपापिदंडक्षमप्रभो मादृशानांतुपापानां
त्वमेवशरणंसदा अस्माद्दुःखात्प्रमुंचेहंकृपांकुरुमयिप्रभो इतिश्रुत्वावचस्तस्यसमुनिःकरुणान्वितः उवाचवच
नंसर्पशृणुष्वमनसेप्सितं पूर्वकर्मविपाकेनत्वयादुःखमुपार्जितं सर्पउवाच तातकेनविमुंचेहमनंताद्दुःखसागरात् मु
क्तिर्भवेद्विभोस्माकंकस्येदंकर्मणः फलं व्यासउवाच पूर्वजन्मनिराजेंद्रमलमासेसमागते नार्चितोभास्करोवि.
ष्णुर्विधिनानकृतंव्रतं तत्कर्मपरिपाकेनवुद्धिस्तेविप्रयोजनेशिविकायांसमभवच्छक्रमायासहायतः तस्मात्सर्वप्र
यत्नेननृपत्वंव्रतमाचर यस्यानुष्ठानमात्रेणस्वपदंप्राप्स्यसेध्रुवं केनतावद्विधानेनकर्त्तव्यंव्रतमीदृशं किंदेयंहिव्रतेचे
हतत्सर्वंकथयस्वनः व्यासउवाच विष्णुरूपंसहस्रांशुंमलमासेप्रपूजयेत् पूजितेचसहस्रांशौविष्णुर्भवतिपूजितः
मलमासस्तुमासानांमलिनःपापसंभवः तस्यपापविशुद्ध्यर्थंमलमासव्रतंचरेत् दिनेदिनेप्रदेयानित्रिविधान्नानि
भक्तितः दक्षिणावृतपक्वानिकांस्यपात्रमयानिच मंत्रः विष्णुरूपीसहस्रांशुःसर्वपापप्रणाशनः अपूपान्नप्रदा
नेनममपापंव्यपोहतु अधिमासेतुसंप्राप्ते गुडसार्पियुतानिच दद्यादनेनमंत्रेण त्रयस्त्रिंशदपूपकान् त्रय
स्त्रिंशदपूपानि दातव्यानिदिनेदिने साज्यानिगुडमिश्राणि अधिमासेनृपोत्तम यावंतितत्राछिद्राणि अपू
पस्थानिपार्थिव तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते चंद्रांशुनिर्मलापूपाःशालितंडुलमिश्रिताःआहारःसर्व
देवानांतेप्रकुर्वंतिमंगलं सहिरण्यान्घृताभ्यक्तांस्त्रयस्त्रिंशदपूपकान् अधिमासेतुसंपूज्यत्रयस्त्रिंशत्तुदेवताउद्दि

श्यापूपदानेनपृथ्वीदानफलंलभेत् मासाधिकेतुसंप्राप्तेयावत्संख्यानपूपकान् तावद्वर्षमवाप्नोतिविष्णुलोकंसनातनं त्रयास्त्रिंशदपूपावैकांस्यपात्रेनिधायच सघृतंसहिरण्यंचब्राह्मणायनिवेदयेत् नारायणजगद्बीजभास्करप्रतिरूपकव्रतेनानेनपुत्रांश्चसंपदंचाभिवर्धय इतिप्रार्थना अत्राशक्तविषयेविशेषः अधिमासेयदाराजन्द्वादशीवाथ पूर्णिमा व्यतीपातदिनेवापिदद्यादन्नंस्वशक्तितः साज्यपात्रान्हिसगुडांस्त्रयस्त्रिंशदपूपकान् कांस्यपात्रेविनिःक्षिप्यसहिरण्यान्सवस्त्रकान् उपानच्छत्रसंयुक्तान्विप्रायविनिवेदयेत् इदंचसर्वाधिमासव्रताशक्तपरं तत्रमंत्रः यस्यहस्तेगदाचक्रंगरुडोयस्यवाहनं शंखःकरतलेयस्यसमेविष्णुःप्रसीदतु ॥१॥ कलाकाष्ठादिरूपेणनिमेषघटिकादिना योवंचयतिभूतात्मातस्मैकालात्मनेनमः ॥ २ ॥ कुरुक्षेत्रमयंदेशः कालःसर्वद्विजोहरिः पृथ्वीसममिमंदानंगृहाणपुरुषोत्तम ॥ ३ ॥ मलानांचविशुद्ध्यर्थंपापप्रशमनायच पुत्रपौत्राभिवृद्ध्यर्थंतवदास्यामिभास्कर ॥ ४ ॥ मंत्रेणानेनवैदद्यात्त्रयस्त्रिंशदपूपकान् अन्नदानात्परंदानंमलमासेनविद्यते गृहेतस्यस्थिरालक्ष्मीर्योदद्यात्सूर्यसन्निधौ दारिद्र्यंनभवेत्तस्यरोगशोकविवर्जितः व्याधिभ्योमुच्यतेरोगीमूकोवाचस्पतिर्भवेत् एवंतुविधिनाराजन्मलमासव्रतंचरेत् पुत्रपौत्रैःसमायुक्तोमोदतेपालयन्महीं ईश्वरउवाच इत्युक्त्वासमुनिःस्कंदतत्रैवांतरधीयत नहुषोमानसंसर्वंव्रतमेतच्चकारह व्रतस्यास्यप्रभावेनसद्योमानुषतांगतः पुनर्व्रतंचकारेदंमुनिवर्य्योदितंयथा विमानवरमारुह्यजगामेंद्रस्यमंदिरं तस्मात्स्कंदनरैःकार्य्यंव्रतमेतदनुत्तमं व्रतेनतोषितोदेवोभास्करोभक्तवत्सलः ददातिविपुलांलक्ष्मींपुत्रपौत्रादिसंपदः इतिपाद्मोक्तंमलमासव्रतं अथाधिमासेजपनीयमंत्रोब्रह्मांडपुराणेपुरुषोत्तमोपाख्याने मंत्रराजमिदंविप्रशृणुमेवाच्मिदुर्लभं सुराणामपियच्छ्रुत्वामुच्यतेब्रह्महत्यया वर्गाद्योनकुलारूढःशक्तिविंदुविभूषितः ङेंतःकृष्णोनमश्चांतेनकुलीवरदासनः सर्वदेवेश्वरोविंदुयुतोग

रुडगामिने वन्हिप्रियांतोमंत्रोयंकोटिदुष्कृतनाशकृत् सतारःषोडशर्णोयमनुर्ब्रह्मांडदीपकः लक्षमेकंजपेदेनम सेस्मिन्ममदुर्लभे सितामधुतिलाद्यैश्चजहुयान्निर्जरानने देवतामुखेअग्नावित्यर्थः तर्पणंब्रह्मभोज्यंचमार्जनादिदशांशतःनारदोऋषिरत्रास्तिछंदोनुष्टुप्प्रकीर्तितम् देवकीनंदनःकृष्णोदेवोबीजंशिवोदितः नमःशक्तिःसर्वसिद्ध्यैविनियोगःप्रकीर्तितः षड्दीर्घभाजाकामेनषडंगेषुन्यसेत्सुधीः जपन्नविरतंमंत्रंमनसाभवमोचनंचतुर्वर्गलभेद्वीरोह्यनायासेनसर्वदा क्लांक्लींक्लूंक्लैंक्लौंक्लः इतिषडंगन्यासः सदाध्यायन्निमंरूपंश्यामवर्णंचतुर्भुजं शंखचक्रगदापद्महस्तंभुवनभूषणंमंत्रोयथा ओंक्लींकृष्णायनमः ह्लांगरुडगामिनेस्वाहा इमंमंत्रंलक्षंजपेत् सितामधुतिलाज्यैःपालाशार्ककपित्थादिसमिद्भिर्दशांशहोमंकुर्य्यात् तर्पणमार्जनब्राह्मणभोजनादीनांदशांशकल्पनाकार्य्या अथव्रतविधिःमलमासस्यशुक्लप्रतिपदि अथवाकृष्णपक्षेव्रतारंभंकुर्यात् अथवाकृष्णपक्षे· चतुर्दश्यांत्रयोदश्यां अष्टम्यांनवम्यांवाऽन्यतमातिथौकार्यं तिथ्यादिसंकीर्त्य आत्मनःदारिद्र्यपापदुःखनाशपूर्वकसत्पुत्रप्राप्ति अतुलसौभाग्यभोगासिद्धिद्वारासावितृरूपजनार्दन प्रीत्यर्थंमलमासव्रतंकरिष्ये इतिसंकल्प्य-आचार्य्यंवृत्वा मध्याह्नेसर्वतोभद्रस्यकलशोपरिहैमंलक्ष्मीयुतंजनार्दनं पुरुषसूक्तमंत्रैः षोडशोपचारपूजां सामान्यपद्धतिक्रमेणकुर्य्यात् तत्रपुष्पपूजांतेविशेषपूजां मत्स्यादिनाममंत्रैःकुर्यात् ओंमत्स्याय-नमः सहस्रशीर्ष्णेनमः देवायनमः सहस्राक्षपादायनमः हरयेनमः लक्ष्मीकांतायनमः मुनीश्वरायनमः स्वयं-भुवेनमः अमिततेजसेनमः ब्रह्मप्रियायनमः देवायनमः ब्रह्मगोप्त्रेनमः ततोलक्ष्मींनाममंत्रैःपूजयेत् लक्ष्म्यै नमः कमलायैनमः श्रियैनमः पद्मवासायैनमः हरिवल्लभायैनमः क्षीराब्धितनयायैनमः इतिगंधाक्षतफलैः संपूज्य ततोधूपदीपम् नैवेद्यांतंसंपूज्य अर्घ्यंदद्यात् तत्रमंत्रः पुराणपुरुषेशानसर्वशोकनिकृंतन अधिमास

व्रतेप्रीत्यागृहाणार्घ्यंश्रियासह पुराणपुरुषेशानजगद्धातःसनातन सपत्नीकोददाम्यर्घ्यंसृष्टिस्थित्यंतकारिणेदेवदेवमहाभागप्रलयोत्पत्तिकारक गृहाणार्घ्यमिमंदेवदयांकृत्वाममोपरि इतिविशेषपूजा ततःसपत्नीकं ब्राह्मणंवस्त्रादिनासंपूज्य त्रयस्त्रिंशदपूपान्कांस्यपात्रेनिधायसघृतं सहिरण्यंवायनं ब्राह्मणायनिवेदयेत् तत्रमंत्रः मलमासस्तुमासानांमलिनःपापसंभवः तस्यपापविशुद्ध्यर्थमपूपान्नंददाम्यहं ॥ १ ॥ विष्णुरूपीसहस्रांशुःसर्वपापप्रणाशनः अपूपान्नप्रदानेनममपापंव्यपोहतु ॥ २ ॥ अधिमासेतुसंप्राप्तेत्रयस्त्रिंशदपूपकाः चंद्रांशुनिर्मलापूपाःशालितंडुलामिश्रिताः ॥ ३ ॥ आहारःसर्वदेवानांतेमेकुर्वंतुमंगलं अधिमासेतुसंप्राप्तेत्रयास्त्रिंशत्तुदेवताः ॥ ४ ॥ उद्दिश्यापूपदानेनपृथ्वीदानफलंलभेत् ॥ ४ ॥ नारायणजगद्बीजभास्करप्रतिरूपक व्रतेनानेनपुत्रांश्चसंपदंचाभिवर्धय ॥ ५ ॥ अत्राशक्तस्य विशेषः अधिमासेयदाराजन्द्वादशीवापिपूर्णिमा व्यतीपातदिनेवापिदद्याद्दानंहिभक्तितः साज्यपात्रंचसगुडंत्रयास्त्रिंशदपूपकान् कांस्यपात्रेविनिःक्षिप्यहिरण्येनसमन्वितान् उपानच्छत्रसंयुक्तान्विप्रायविनिवेदयेत् तत्रमंत्रः यस्यहस्तेगदाचक्रंगरुडोयस्यवाहनं शंखःकरतलेयस्यसमेविष्णुः प्रसीदतु कलाकाष्ठादिरूपेणनिमेषघटिकादिना योवंचयतिभूतानितस्मैकालात्मनेनमः कुरुक्षेत्रमयोदेशः कालःसर्वद्विजोपरि पृथ्वीसममिमंदानंगृहाणपुरुषोत्तम मलानांचविशुद्ध्यर्थंपापप्रशमनायच पुत्रपौत्रादिवृद्ध्यर्थंतवदास्यामिभास्कर अत्रत्रयास्त्रिंशद्देवताःश्रुत्युक्ताः अष्टौवसवः ८ एकादशरुद्राः ११ द्वादशादित्याः १२ प्रजापातिर्वषट्कारश्च ततोऽग्निंप्रतिष्ठाप्यअन्वादध्यात् अत्रप्रधानम् इदंविष्णुःआकृष्णेन १० षोडशाक्षरोमंत्रः एतान्सितामधुतिलघृतपायसैर्हुत्वा ततस्त्रयास्त्रिंशद्देवतानाममंत्रैर्होमंकुर्यात् आपायनमः अध्वरायनमः सोमायनमः ध्रुवायनमः अनिलाय० अनलायनमः प्रत्यूषायनमः प्रभासायनमः ८ इतिवसवः वीरभद्रायनमः

शंभवेनमः गिरीशायनमः अजैकपदेनमः अहिर्बुध्न्यायनमः पिनाकिनेनमः भुवनाधीशायनमः कपालिनेनमःविशांपतयेनमःस्थाणवेनमः भर्गायनमः११इत्येकादशरुद्राःइंद्रायनमःविष्णवेनमःभगायनमःत्वष्ट्रेनमः वरुणायनमः अंशायनमः अर्यम्णेनमः रवयेनमः पूष्णेनमः मित्रायनमः यमायनमः पर्जन्यायनमः इतिद्वादशादित्याः १२ प्रजापतयेनमः वषट्कारायनमः इतित्रयस्त्रिंशतिदेवताः ३३ अपूपदानेगंधादिभिःपूजनीयाः सघृतंसहिरण्यंचब्राह्मणायददाम्यहं अपूपस्यप्रदानेनविष्णुर्मेप्रीयतामितिएवंहोमंसमाप्य छत्रोपानहभूषणाछादनयुतां शय्यापीठगांचआचार्य्य.यदत्वा अन्यान्यपियथाशक्तिदानानूदद्यात् इतिसोद्यापनं मलमासव्रतम् अथमलमासेतिथिविशेषकृत्याभावात्तिथिसमान्यकृत्यमुच्यते तत्रादौशुक्लकृष्णभेदेनतिथिध्यानानिहेमाद्रौ तिथयोह्यधुनोच्यंतेप्रतिपद्द्विभुजारुणा मेषगाशक्तिपात्रासासितपक्षादिमामता वह्निदैवत्वादियंमेषवाहना शु- प्र. धूसराकृष्णपक्षाद्याभाससंस्थाचतुर्मुखा अक्षसूत्रंस्रुवंसूक्तंवान्नंधरेचतुर्भुजेति कृ. प्र. इयमप्यग्निदैवत्याअक्षसूत्रादिधरा १ अथद्वितीयाध्यानम् द्वितीयामासगाशुभ्रापात्रपुस्तकधारिणी द्वितीयाकुमुदाभासावृषस्थासाक्षकुंडिकेति इयंब्रह्मदैवत्याहंसवाहनादिरूपा २ अथतृतीयाध्यानं तृतीयावृषगागौरीशूलपात्रधरासिता तृतीयातार्क्ष्यगानीलाशंखपात्रधराद्विदोः द्विदोःद्विभुजा इयंगौरीदैवत्या ३ अथचतुर्थीध्यानं नीलोत्पलदलश्यामाचतुर्थीमूषकस्थिता परशुंविभ्रतीपात्रंपीतवस्त्रादिसंयुता शु. च. चतुर्थीवकुलाभासामहिषस्थाचतुर्भुजा धत्तेक्षमालिकांदंडंचतुर्थीयाचदंष्ट्रिणी अस्यांगणपतिदैवत्वान्मूषकवाहनादिमत्वं कृष्ण च.अथपंचमीध्यानम् ग्राहस्थाचंद्रगौरास्यापंचमीसाक्षकुंडिकेति शु.प.पंकजस्थाप्रवालाभाफणामस्तकभूषणा कृ.पं. इयंनागदैवत्या ५ अथषष्ठीध्यानं मयूरगारुणाषष्ठीपात्रकुक्कुटधारणी शु.ष.कृष्णपक्षे त्र्यक्षामयूर

गारक्ताशक्तिकुक्कुटधारिणी एकास्याद्विभुजाषष्ठीरक्तवस्त्रसुभूषणा नीलकुंतलकंठासाजटासार्धेन्दुभूषणा इयंस्कंदस्वामिदैवत्या ६ अथसप्तमीध्यानं ताम्रवर्णासाज्यपात्रासप्तमीहयगामता शु. स. नीलकुंतलकंठासाजटाखंडेंदुभूषणा इभस्थासप्तमीगौरीद्विभुजावज्रपात्रिणी कृ. स. इयंसूर्यदैवत्या अथाष्टमीध्यानं घंटापात्रधरागोस्थागोक्षीरधवलाष्टमीशु.अ.प्रेतगाचाष्टमीरक्ताकृष्णग्रीवासितांशुका अक्षंखड्गंतथाखेटंपात्रंधत्तेचतुर्भुजेतिकृ.अ. इयंशिवदैवत्या ८ अथनवमीध्यानम् नवमीसिंहगाशुभ्रापाशपात्रपराशुभा शु.न. अक्षंखड्गंतथाखेटंपात्रंधत्तेचतुर्भुजा सर्पगानवमीनीलादंष्ट्रिणीपात्रतर्जिनी कृ.न- इयंदुर्गादैवत्या ९ अथदशमीध्यानंसिंहासनास्थिताशुभ्रादशमीपीतकुंडला ज्ञानमुद्राभयाचेयंपीतवस्त्राब्जमालिनी शु-द· कृष्णवर्णालुलायस्थादशमीदंडपात्रिणी इयंधर्मराजदैवत्या १० अथैकदशीध्यानम् एकादशीवृषस्थातुनीलशुभ्रात्रिशूलिनी ताम्रवर्णारथारूढापात्रखेटासिपंकजा शु-ए- एकादशीमृगाब्जस्थातुलाकर्त्तरिकायुता सिंहाननारुणगलातुंदिनीलासिनीपरेति कृष्ण.ए.इयंरुद्रदैवत्या ११ अथद्वादशीध्यानम् द्वादशीगरुडारूढामेघवर्णाब्जपात्रिणी आरंचक्रं शु-द्वा- द्वादशीशुभ्रवस्त्रेयंनीलकुंतलभूषिता कृ.द्वा. इयंहरिदैवत्या १२ अथत्रयोदशीध्यानम् चापबाणधरागौरीमयूरस्थात्रयोदशी अशोककालिकाबाणचापपात्रात्रयोदशी शु.त्र. मेचकाब्जासनाश्यामाहरिद्वस्त्रामदालसा गदापात्रधरागौरीनिधिस्थाचत्रयोदशी कृ.त्र. इयंशिवकामदैवत्या १३ अथचतुर्दशीध्यानम उक्षस्थापाटलाभासाफलपात्रसुरामृता नीलकंठेंद्रगोपाभलोचनेयंचतुर्दशी शु.च. द्विभुजातुरगारूढाकृष्णवर्णाचतुर्दशी खड्गभल्लधरानीलकुंडलाशुभ्रभूषणा कृ.च. इयंशिवदैवत्या १४ अथपौर्णमासीध्यानम् शशिगापूर्णिमाशुभ्रामौक्तिकाभरणान्विता सुधापूर्णाषडाधारवामदक्षिणवाहुका इयंचंद्रदैवत्या १५ अथामावास्याध्यानं

खड्गभल्लधरानीलकुंतलांशुकभूषणा अमावास्याविधातव्याद्विदोर्मरकतप्रभा दर्भासनास्थिताचेयंदर्भपिंडधराकृशेति इयंपितृदेवत्या ३० इतिप्रतिपदादिसमस्तध्यानानि सकलतिथिव्रतेषुयथासंभवंयोज्यानि अथाधिमासांतर्गतशुक्लैकादशीव्रतकथा भविष्योत्तरे युधिष्ठिरउवाच भगवन्श्रोतुमिच्छामिव्रतानामुत्तमंव्रतम् शुक्लपक्षेधिकेमासेपुरुषोत्तमपूजनम् पुरुषोत्तममासस्यकथांब्रूहिजनार्दन कोविधिः किंफलंतस्याः कोदेवस्तत्रपूज्यते अधिमासेतुसंप्राप्तेशुक्लाह्येकादशीव्रतम् कस्यदानस्यकिंपुण्यंकिंकर्त्तव्यंनृभिः प्रभो कथंस्नानंचकिंपुण्यंकिंदानंकस्यपूजनं किंचभोज्यमभोज्यंवामासेत्रपुरुषोत्तमे श्रीकृष्णउवाच कथयिष्यामिराजेंद्रतवस्नेहस्यकारणात् अधिमासेशुक्लपक्षेकामदैकादशीभवेत् तस्याव्रतस्यकरणात्कमलासन्मुखीभवेत् ब्राह्ममुहूर्त्तेचोत्थायस्मृत्वाचपुरुषोत्तमं स्नात्वाचैवविधानेननियमान्कारयेद्व्रती गृहेत्वेकगुणंजप्यंनद्यांतुद्विगुणंस्मृतं गवांगोष्ठेदशगुणमग्नयागारेदशाधिकं पुण्यक्षेत्रेषुतीर्थेषुदेवानांचैवसान्निधौसहस्रशतकोटीचफलंस्याद्द्विजसन्निधौ पक्षेपक्षेमहाराजयेनराविष्णुपूजकाः तेषांपापहरंपुण्यंव्रतमेकादशीस्मृतं दशम्यामेकभक्तंचएकादश्यामुपोषणं द्वादश्यांपारणंकृत्वा मुक्तिभागीभवेन्नरः श्रद्धावान्कुरुतेयस्तुमलमासेतुकामदा वांछितंलभतेमोक्षंनात्रकार्याविचारणा पुरुषोत्तमोधिकेमासि पूजनीयः प्रयत्नतः षोडशैरुपचारैश्चपूजयेत्पुरुषोत्तमं कांस्यंमांसंमसूरान्नंचणकन्कोद्रवान्मधु शाकंचैवपरान्नंचपुनर्भोजनमैथुनं वैष्णवोव्रतकर्त्ताचदशम्यांदशवर्जयेत् द्यूतंक्रीडांतथानिंदांतांबूलंदंतधावनं परापवादंपैशून्यांहिंसांस्तेयंतथारातिं व्यायामंचप्रवासंचपुनर्भोजनमैथुनं घृष्टंपिष्टंपरान्नंचद्वादश्यांशयनंदिवा अनेनविधिनाराजन्कामदायेनवैकृता रात्रौजागरणंकृत्वा पूजितः पुरुषोत्तमः सर्वपापविनिर्मुक्तः सयाति परमांगतिं पठनाच्छ्रवणाद्वापिगोसहस्रफलंलभेत् इतिश्रीभविष्योत्तरेऽधिकमासेशुक्लाकामदैकादशीव्रतकथा

16

व्र०र०
मलमास
॥ ६ ॥

अथाधिमासस्यकृष्णपक्षेकमलैकादशीव्रतम् युधिष्ठिरउवाच श्रुतानिबहुधर्माणिव्रतानिचजगत्प्रभो एकादशीव्रतं ।किंचिन्नश्रुतंवैजनार्दन परंत्वेकादशींब्रूहिमलमासेऽसितांममयांकृत्वामानवोलोकेप्राप्नुयात्परमंपदम् ॥ श्रीकृष्णउवाच ॥ शुक्लावायदिवाकृष्णानत्याज्यैकादशीवुधैः कर्त्तव्यासाप्रयत्नेनमलमासेपिमोक्षदा एकादशीकलौ राजन्भवबंधविमोचिनी कामदासर्वलोकानांभुक्तिमुक्तिविधायिनी रविवारेचमांगल्येसंक्रांतौचतथैवच एकादशीसदोपोष्यापुत्रपौत्रविवर्द्धिनी मोक्षदंधनदंराजन्नित्यमेकादशीव्रतं यथोक्तविधिनाकृत्वा नराःस्युर्विष्णुमूर्त्तयः जीवन्मुक्तानराराजन्जायंतेनात्रसंशयः युधिष्ठिरउवाच जीवन्मुक्ताः कथंकृष्ण विष्णुरूपाः कथंहरे पापरूपाश्चकथ्यंतेपरंकौतूहलंमम श्रीकृष्णउवाच एकादशींप्रकुर्वंतिस्वशक्त्यायेनरोत्तमाः सहस्रशतकोटीनांयज्ञानांफलभागिनः अवंत्यामभवत्कश्चित् शिवधर्माद्विजोत्तमः तस्यपुत्राश्चपंचाशत्कनिष्ठः पापमूर्त्तिमान् पित्राथवांधवैःसर्वैःपरित्यक्तःस्ववंधुभिः वनंगतस्ततोदैवात्तीर्थराजेततःस्वयं क्षुत्क्षामःपूर्वपुण्येनत्रिवेण्यांस्नानमाचरेत् ऋषीणामाश्रमांस्तत्रविचचारक्षुधार्दितः हरिमित्रमुनेस्तत्रचाश्रमंसददर्शह उपोषिताच कमला पूजितः पुरुषोत्तमःकथाश्रुताश्चविविधाभुक्तिमुक्तिविधायिनी व्रतंकृतंचतैःसार्धंस्थित्वाशून्यालयेतदा निशीथेसमनुप्राप्तेकमलास्वयमागता वरंगृहाणभोविप्रकामदायाःप्रभावतः विप्रउवाच कात्वंकस्यासिरंभोरुप्रसन्नाचकथंमम इंद्रस्यशंकरस्यापिचंद्रेसूर्येप्रभातथा गांधर्वीकिन्नरीवापित्वत्समानास्तिभूतले लक्ष्मीरुवाच प्रसन्नाहंस्वयंजातावैकुंठादिहमागता प्रेषिताहरिणाशीघ्रंकमलाव्रतकारणात् पुरुषोत्तममासस्यशुक्लपक्षेतुया स्मृता तस्याव्रतंत्वयाचीर्णंप्रयागेमुनिसान्निधौ व्रतस्यास्यप्रभावेणवशगाहंनसंशयः तववंशेभविष्यंतिहरिवासरसेवकाः हरिपूजारतामर्त्याःपुराणश्रवणेरताः

17

यत्कथासुप्रवर्त्ततेसज्जनाःपंडिताजनाः ॥ लक्ष्मीरुवाच ॥
॥ विप्रउवाच ॥ प्रसन्नायदिमेदेविव्रतंविस्तरतोवद दुःस्वप्ननाशनंपुण्यंग्रहपापहरंशुभं योनरःश्रद्धयायुक्तोश्लोकंश्लोकार्धं
श्रोतॄणांपरमंश्लाघ्यंपवित्राणामनुत्तमं
मेवच पाठेनश्रवणेनैवकुलकोटिंसमुद्धरेत् मार्गशीर्षोहिमासानांपक्षिणांगरुडोयथा नदीनांचयथागंगाति
थिष्वेकादशीतथा अद्यापिनिर्जराःसर्वेभारतेजन्मलिप्सवः समर्चयंतिविबुधानारायणपरायणाः हरिनाम
पराःपंचपूजाभक्तिपरायणाः तेकृथार्थाःकलियुगेसत्यंसत्यंवदाम्यहं शुक्लावायदिवाकृष्णायदात्वेकादशीभवेत्
गृहस्थानांतुपूर्वास्याद्यतीनामुत्तरासदा एकादशीद्वादशीचरात्रिशेषेत्रयोदशी तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपा
रणे अद्यस्थित्वानिराहाराःसर्वभोगविवर्जितः श्वोभोक्ष्येपुंडरीकाक्षशरणंमेभवाच्युत व्रतंकृत्वाप्रयत्नेनमाध
वायनिवेदयेत् गीतवाद्यैःपुराणैश्चस्तुतिभिर्जागरंचरेत् पंचामृतेनसंस्नाप्यहरिंपापैःप्रमुच्यते ततःप्रातःसमु
त्थायस्नात्वाविष्णुंसमर्चयेत् अज्ञानतिमरांधस्यव्रतेनानेनकेशव प्रसादसुमुखोभूत्वाज्ञानदृष्टिप्रदोभव एवंविज्ञा
प्यदेवेशंदेवदेवंचचक्रिणं ब्राह्मणान्भोजयेद्भक्त्यादद्यात्तेभ्यश्चदक्षिणां कृत्वापंचमहायज्ञान्भोक्तव्यंबंधुभिःसह
एवंयःप्रयतःकुर्यात्पुण्यमेकादशीव्रतं सयातिविष्णुभवनंपुनरावृत्तिदुर्लभं इत्युक्त्वाकमलातस्मैवरंदत्त्वादिवं
ययौ धनधान्यसमायुक्तोविप्रोसावभवत्तदा एवंयःकुरुतेराजन्कमलैकादशीव्रतं श्रुत्वापठित्वामर्त्योहिवि
ष्णुसायुज्यमाप्नुयात् इतिब्रह्मांडपुराणे अधिकमासेकमलैकादशीव्रतकथा ॥ नारदीया
दिसकलपुराणसंदर्भोक्तएकादशीकल्पोविधीयते तत्रादौविष्णुभवनद्वारेध्वजारोपणव्रतम् ॥ नारदीये ॥
सनकउवाच ॥ अन्यद्व्रतंप्रवक्ष्यामिध्वजारोपणमुत्तमं सर्वपापहरंपुण्यंविष्णुप्रीणनकारणं यःकुर्याद्वि
ष्णुभवनेध्वजारोपणमुत्तमं संपूज्यतेविरंच्याद्यैःकिमन्यैर्बहुभाषितैः हेमभारसहस्त्रंतुयोददातिकुटुंबिने

तत्फलंस्वल्पमात्रंस्याध्वजारोपणकर्मणः ध्वजारोपणतुल्यंस्याद्गंगास्नानमनुत्तमम् ॥ अथवातुलसीसेवाशून्यालिंगप्रपूजनं अहोपूर्वमहोपूर्वमहोपूर्वमिदंद्विज सर्वपापहरंकर्मध्वजारोपणसंज्ञितं यानिकार्य्याणिसर्वाणिध्वजारोपणकर्माणि तानिसर्वाणिवक्ष्यामिशृणुष्वगदतोमम कार्त्तिकस्यसितेपक्षेदशम्यांसंयतोनरः स्नानंकुर्यात्प्रयत्नेनदंतधावनपूर्वकं एकादश्यांब्रह्मचारीस्वयंनारायणंस्मरन् धौतांबरधरः शुद्धोविप्रनारायणाग्रतः ततःप्रातःसमुत्थायस्नात्वाचम्ययथाविधि नित्यकर्माणिनिर्वर्त्यपश्चाद्विष्णुंसमर्चयेत् चतुर्भिर्ब्राह्मणैःकृत्वाकृत्वाचस्वस्तिवाचनं नांदीश्राद्धंप्रकुर्वीतध्वजारोपणकर्मणि ध्वजस्तंभौचगायत्र्याप्रोक्षयेद्वस्त्रसंयुतौ सूर्यंचवैनतेयंचहिमांशुंतत्पटेर्चयेत् धातारंचविधातारंपूजयेद्ध्वजदंडके हरिद्राक्षतगंधाद्यैःशुक्लपुष्पैर्विशेषतः ततोगोचर्ममात्रंतुस्थंडिलंचोपलिप्यवै आधायाग्निंस्वगृह्योक्तमाज्यभागादिकंक्रमात् जुहुयात्पायसंचैवसाज्यमष्टोत्तरंशतं प्रथमंपौरुषंसूक्तंविष्णोर्नुकमिरावतीं ततश्चवैनतेयायस्वाहेत्यष्टाहुतीस्तथा सोमोधेनुमुदुत्यंचजुहुयाच्चततोद्विज सौरमंत्रान्जपेत्तत्रशांतिसूक्तानिशक्तितः रात्रौजागरणंकुर्य्यादुपकंठंहरेःशुचिः ततःप्रातःसमुत्थायानित्यकर्मसमाप्यच गंधपुष्पादिभिर्देवमर्चयेत्पूर्ववत्क्रमात् ततोमंगलवाद्यैश्चसूक्तपाठैःसुशोभनैः नृत्यैश्चस्तोत्रपाठैश्चगीतवाद्यैर्नयेद्ध्वजं पादपेद्वारदेशेवाशिखरेवामुदान्वितः सुस्थिरंस्थापयेद्विप्र. ध्वजंसुस्तंभसंयुतं गंधपुष्पाक्षतैर्देवंगंधदीपैर्मनोहरैः भक्ष्यभोज्यादिसंयुक्तैर्नैवेद्यैश्चहरिंयजेत् एवंदेवालयेस्थाप्यशोभनंध्वजमुत्तमं प्रदक्षिणमनुव्रज्यस्तोत्रमेतदुदीरयेत् नमस्तेपुंडरीकाक्षनमस्तेविश्वभावन नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज येनेदमखिलंजातंयत्रसर्वंप्रतिष्ठितं लयमेष्यतियत्रैवतंप्रपन्नोस्मिकेशवं नजानंतिपरंभावंयस्यब्रह्मादयःसुराःयोगिनोयंनपश्यंतितंवंदेब्रह्मरूपिणं यन्मुखाद्ब्राह्मणाजातायद्बाहोरभवन्नृपाः

वैश्यायस्योरुजातावै पद्भ्यांशूद्राश्चजज्ञिरे मायासंगममात्रेण वदंतिपुरुषंजनाः स्वभावविमलंशुद्धं निर्विकारंनिरंजनं क्षीराब्धिशायिनंदेवमनंतमपराजितं सद्भक्तवत्सलंविष्णुंभक्तिगम्यंनमाम्यहं पृथिव्यादीनिभूतानितन्मात्राणींद्रियानिच सूक्ष्मसूक्ष्मानियेनासंस्तंवंदेसर्वतोमुखं यद्ब्रह्मपरमंधामसर्वलोकोत्तमोत्तमं निर्गुणंपरमंसूक्ष्मंप्रणतोस्मिपुनःपुनः अविकारमजंशुद्धंसर्वतोव्याप्तमीश्वरं यमामनंतियोगीशंसर्वकारणकारणं योदेवःसर्वभूतानामंतरात्माजगन्मयः निर्गुणःसच्चिदानंदःसमेविष्णुःप्रसीदतु जगद्धितार्थंयेदेहाध्रियंतेलीलयाहरेः तानर्चयंतिविबुधाःसमेविष्णुःप्रसीदतु ज्ञानिनांकर्मिणांचैवतथाभक्तिमतांनृणां फलंददातिविश्वेशःसमेविष्णुःप्रसीदतु यइदंकीर्तयेन्नित्यंस्तोत्राणामुत्तमोत्तमं सर्वपापविनिर्मुक्तोविष्णुलोकंसगच्छति इतिस्तुत्वानमेद्विष्णुंब्राह्मणांश्चप्रपूजयेत् आचार्यंपूजयेत्पश्चाद्दक्षिणावसनादिभिः ब्राह्मणान्भोजयेत्पश्चाद्भक्त्यावित्तानुसारतः पुत्रमित्रकलत्राद्यैः स्वयंचसहबंधुभिः कुर्वीतपारणंविप्रनारायणपरायणः यस्त्वेतत्कर्मकुर्वीतध्वजारोपणमुत्तमं तस्यपुण्यफलंवक्ष्येशृणुष्वसुसमाहितः पटोध्वजस्यविप्रेंद्रयावच्चलतिवायुना तावंतिपापजालानिनश्यंत्येवनसंशयः महापातकयुक्तोवायुक्तोवासर्वपातकैः ध्वजंविष्णुगृहेकृत्वामुच्यतेसर्वपातकैः यावद्दिभातितिष्ठेतध्वजोविष्णुगृहेद्विज तावद्युगसहस्राणिहरिसामीप्यभाग्भवेत् आरोपितंध्वजंदृष्ट्वायेभिनंदंतिधार्मिकाः तेपिसर्वेविमुच्यंतेह्यतिपातकसंचयैः आरोपितंध्वजंविष्णुगृहेधुन्वन्परंस्वकं कर्तुःसर्वाणि, पापानिधुन्वंतिनिमिषार्धतः यस्त्वारोप्यध्वजंविष्णोर्गृहेनित्यमुपाचरेत् सदेवयानेनदिवंयातिवैसुमतिर्यथा इतिनारदीयेपूर्वभागेध्वजारोपणव्रतम् अथकथा नारदउवाच भगवन्सर्वधर्मज्ञसर्वशास्त्रार्थपारग सर्वकर्मवरिष्ठंचत्वयोक्तंध्वजधारणम् यस्तुवैसुमतिर्नामध्वजारोपकरोमुने त्वयोक्तस्तस्यचरितंविस्तरेण

समादिश सनकउवाच शृणुष्वेकमनाःपुण्यमितिहासंपुरातनं ब्राह्मणाकथितंमह्यंसर्वपापप्रणाशनं श्रासीत्पुराकृतयुगेसुमतिर्नामभूपतिः सोमवंशोद्भवःश्रीमान्सप्तद्वीपैकनायकः धर्मात्मासत्यसंपन्नःशुचिर्वैश्योतिथिप्रियः सर्वलक्षणसंयुक्तःसर्वसंपाद्विभूषितः सदाहरिकथासेवीहरिपूजापरायणः हरिभक्तिपराणांचशुश्रूषुर्निरहंकृतिः पूज्यपूजापरोनित्यंसमदर्शिगुणान्वितः सर्वभूताहितःशांतोधर्मज्ञःकीर्त्तिवर्धनः तस्यभार्य्यामहाभागासर्वलक्षणसंयुता पतिव्रतापतिप्राणानाम्नासत्यवतीमुने तावुभौदंपतिनित्यंहरिपूजापरायणौ जातिस्मरौमहाभागौसत्यज्ञौसत्परायणौ अन्नदानरतौनित्यंजलदानपरायणौ तडागारामवप्रादीनसंख्यातन्वितेनतुः सातुसत्यवतीनित्यंशुचिर्विष्णुगृहेसती नृत्यतीपरिसंतुष्टामनोज्ञामंजुवादिनी सोपिराजामहाभागोद्वादशीद्वादशीदिने ध्वजमारोपयत्येवमनोज्ञंवहुविस्तरं एवंहरिपरंनित्यंराजानंधर्मकोविदं प्रियांसत्यवतींचास्यदेवाअपिसदास्तुवन् त्रिलोकेविश्रुतौज्ञात्वादंपतीधर्मकोविदौ आययौवहुभिःशिष्यैर्द्रष्टुकामोविभांडकः तमायांतंमुनिंश्रुत्वासतुराजाविभांडकं प्रत्युद्ययौसपत्नीकःपूजाभिर्वहुविस्तरं कृतातिथ्यक्रियाशांतकृतासनपरिग्रहं नीचासनास्थितोभूपःप्रांजलिर्वाक्यमब्रवीत् राजोवाच भगवन्कृतकृत्योस्मित्वदभ्यागमनेनवै सतामागमनंसंतःप्रशंसंतिसुखावहं यत्रस्यान्महतांप्रेमतत्रस्युःसर्वसंपदः तेजःकीर्तिर्धनंपुत्राइतिप्राहुर्विपश्चितः तत्रवृद्धिमुपायांतिश्रेयांस्यनुदिनंमुने यत्रसंतःप्रकुर्वंतिमहतींकरुणांप्रभो योमूर्द्ध्निधारयेद्ब्रह्मन्महत्पादजलंरजः सस्नातः सर्वतीर्थेषु पुण्यात्मानात्रसंशयः ममपुत्राश्चदाराश्चसंपच्चेयंसमर्पिता ममाज्ञापयविप्रेंद्रकिंप्रियंकरवाणिते विनयावनतंभूपंसानिरीक्ष्यनरेश्वरः स्पृशन्करेणतंप्रीत्याप्रत्युवाचातिहर्षितः विभांडकउवाच ॥

21

राजन्यदुक्तंभवतातत्सर्वंत्वत्कुलोचितं विनयावनतःसर्वोबहुश्रेयोलभेदिह धर्मश्चार्थश्चकामश्चमोक्षश्चनृपसत्तम विनयाल्लभ्यतेमर्त्यैर्दुर्लभंकिंमहात्मनां प्रीतोस्मितवभूपालसन्मार्गपरिवर्त्तिनः स्वस्तितेसततंभूयाद्यत्पृच्छामितदुच्यतां पूजावहुविधाःसंतिहरितुष्टिविधायिकाः तासुनित्यंध्वजारोपेवर्त्तसेत्वंसदोद्यतः भार्यापितवसाध्वीयंनित्यंनृत्यपरायणा किमर्थमेतद्वृत्तांतंयथावद्वक्तुमर्हसि राजोवाच शृणुष्वभगवन्सर्वंयत्पृच्छामिवदामितत् आश्चर्यभूतंलोकानामावयोश्चरितंत्विह अहमासपुराशूद्रोमालिनिर्नामसत्तम कुमार्गनिरतोनित्यंसर्वलोकाहितेरतः पिशुनोधर्मविद्वेषीदेवद्रव्यापहारकः गोघ्नश्चब्रह्महाचौरःसर्वप्राणिवधेरतः नित्यंनिष्ठुरवक्ताचपापीवेश्यापरायणः एवंस्थितःकियत्कालमनाश्रितमहद्वचः सर्ववंधुपरित्यक्तोदुःखीवनमुपागतः मृगमांसाशनोनित्यंतथापांथविलुंपकः एकाकीदुःखवहुलोनिदाघार्त्तःपिपासितः जीर्णदेवालयंविष्णोरपश्यंविजनेवने हंसकारंडवाकीर्णंतत्समीपेमहत्सरः पर्यंतवनपुष्पौघछादितंतन्मुनीश्वर अपिवंतत्रपानीयंतत्तीरेविगतश्रमः फलानिजग्ध्वाजीर्णानिस्वयंक्षुद्विनिवारिता तस्मिन्जीर्णालयेविष्णोर्निवासंकृतवानहंजीर्णंस्फुटितसंधानंतस्यनित्यमकारिषं पर्णैस्तृणैश्चकाष्ठौघैर्गृहंसम्यक्प्रकल्पितं स्वसुखार्थंतुतद्भूमिर्मयालिप्तामुनीश्वर तत्राहंव्याधवृत्तिस्थोहत्वावहुविधान्मृगान् आजीवंवर्त्तयन्नित्यंवर्षाणांविंशतिस्थितः अथेयमागतासाध्वीविंध्यदेशसमुद्भवा निषादकुलजाविप्रनाम्नाख्याताचकोकिला वंधुवर्गपरित्यक्तादुःखिताजीवविग्रहा क्षुत्तृट्घर्मपरिश्रांताशोचंतीस्वकृतंत्वघं दैवयोगात्समायाताभ्रमंतीविजनेवने ग्रीष्मतापार्दितावाह्येस्वांतेचाधिप्रपीडिता इमांदुःखार्दितांदृष्ट्वाजातामेविपुलादया दत्तमयाजलंचास्यैवन्यमूलफलानिच गतश्रमात्वियंब्रह्मन्मयापृष्टायथातथं अवेदयत्स्ववृत्तांतंतच्छृणुष्वमहामुने अहंकोकिलनीनाम्नानिषादकुलसंभवा दारुक

स्यसुताचाहंविंध्यपर्वतवासिनी परस्वहारिणीनित्यंसदापैशून्यनादिनी पुंश्चलीत्येवमुक्तातुवंधुवर्गैःसमुज्झिता कियत्कालंततःपत्याभ्रष्टाहंलोकानिंदिता दैवात्सोपिगतोलोकंयमस्यात्रविहायमां कांतारेविजनेचैकाभ्रमंतीदुःखपीडिता दैवात्त्वत्सन्निधिंप्राप्ताजीविताहंत्वयाधुनाइत्येवंस्वकृतंकर्ममह्यंसर्वंनिवेदितं ततोदेवालयेतस्मिन्दंपतीभावमाश्रितौ स्थितौवर्षाणिदशचआवांमांसफलाशिनौ एकदामद्यपानेनप्रमत्तौनिर्भरंमुने तत्रदेवालयेरात्रौमदिरामांसभोजनात् वस्त्रावस्त्रापरिज्ञानौनृत्यंचाक्रिवमोहितौ प्रारब्धकर्मभोगांतमावांयुगपदागतौ यमदूतास्तदायातापाशहस्ताभयंकराः नेतुमावामघवतांसुघोरांयमयातनां ततःप्रसन्नोभगवान्कर्मणाममममानद देवावसथसंस्कारसंचितेनाकृतात्मनः सदूतान्प्रेषयामासस्वभक्तावनतत्परः तेदूतादेवदेवस्यशंखचक्रगदाधराः सहस्रसूर्यसंकाशाःसर्वेचारुचतुर्भुजाः किरीटकुंडलधराहारिणोवनमालिनः दिशोवितिमिराश्चकुर्वंतःस्वेनतेजसा भयंकरान्पाशहस्तान्दंष्ट्रिणोयमकिंकरान् आवयोर्ग्रहणेप्राप्तानूचुःकृष्णपरायणाः विष्णुदूताऊचुः भोभोक्रूरादुराचाराविवेकपरिवर्जिताः मुचध्वमेतौनिष्पापौदंपतीहरिवल्लभौ विवेकस्त्रिषुलोकेषुसंपदामादिकारणं अपापेपापवीर्यस्तुतांविद्यात्पुरुषाधमं यमदूताऊचुः युष्माभिःसत्यमेवोक्तंकिंत्वेतौपापिसत्तमौ यमेनपापिनोदंडयास्तन्नेष्यामोयमांतिकं श्रुतिप्रणिहितोधर्मोह्यधर्मस्तद्विपर्ययः धर्माधर्मविवेकोयंतन्नेष्यामोयमांतिकं एतच्छ्रुत्वातुकुपिताविष्णुदूतामहौजसः प्रत्यूचुस्तान्यमवरानधर्मेधर्ममानिनः विष्णुदूताऊचुः अहोकष्टंधर्मदृशामधर्मःस्पृशतेसभां सम्यग्विवेकशून्यानांनिदानंह्यापदांमहत् तर्केणस्वविकृष्टेणनरकाध्यक्षतांगताः यूयंकिमर्थमद्यापिकर्त्तुंपापानिसोद्यमाः स्वकर्मक्षयपर्यंतमहापातकिनोपिच तिष्ठंतिनरकेघोरेयावच्चंद्रार्कतारकं पूर्वसंचितपापानामदृष्टानिष्कृतिंवृथा किमर्थंपापकर्माणिकरिष्यथपुनःपुनः श्रुतिप्रणिहितोधर्मःसत्यंस

त्यंनसंशयः किंत्वाभ्यांचरितान्धर्मान्प्रवक्षामोयथातथं एतौपापविनिर्मुक्तौहरिशुश्रूषणेरतौ हरिणाभ्य
र्च्यमानौचमुंचध्वमाविलंबितं एषाचनर्तनंचक्रेतथैषोध्वजरोपणं अंतकालेविष्णुगृहेतेननिष्पापतांगतौ अं
तकालेतुयन्नामश्रुत्वोक्त्वापिचवैसकृत् लभतेपरमंस्थानंकिमुशुश्रूषणेरतः महापातकयुक्तोवायुक्तोवाह्युपपातकैः
कृष्णसेवीनरोंतेपिलभतेपरमांगतिं यतीनांविष्णुभक्तानांपरिचर्य्यापरायणाः तेदूताःसहसायांतिपापिनोपि
परांगतिं मुहूर्त्तंवामुहूर्त्तार्धंयास्तिष्ठेद्धरिमंदिरे सोपियातिपरंस्थानंकिमहोमासवत्सरान् उपलेपनकर्त्तारौसं-
मार्जनपरायणौ एतौपरिगृहेहनित्यंजीर्णशीर्णाधिरोपकौ जलसेचनकर्त्तारौदीपदौहरिमंदिरे कथंनेतौमहाभा-
गौयातनाभोगमर्हतः इत्युक्त्वाविष्णुदूतास्तेछित्वापाशांस्तदैवहि आरोप्यावांविमानाग्र्यं ययुर्विष्णोः परंपदं
तत्रसामीप्यमापन्नौदेवदेवस्यचक्रिणः दिव्यान्भोगान्भुक्तवंतौतावत्कालंमुनीश्वर दिव्यान्भोगान्विष्णुलोकेभु
क्त्वायातौमहीमिमां अत्रापिसंपदतुलाहरिसेवाप्रभावतः अनिच्छयाकृतेनापिसेवनेनहरेर्मुने प्राप्तमीदृक्फ-
लंविप्रदेवानामपिदुर्लभं इच्छयाराध्यविश्वेशंभक्तिभावेनमाधवं प्राप्स्यावःपरमंश्रेयइतिहेतुर्निरूपितः अवशे
नापियत्कर्मकृतंस्यात्सुमहत्फलं जायतेभूमिदेवेंद्रकिंपुनःश्रद्धयाकृतं एतदुक्तंनिशम्याथसमुनींद्रोविभांडकः
प्रणम्यदंपतीतौतुप्रययौसतपोवनं तस्माज्जानीहिदेवर्षेदेवदेवस्यचक्रिणःपरिचर्य्यातुसर्वेषांकामधेनूपमास्मृताह
रिपूजारतानांतुहरिरेवसनातनः ददातिपरमंश्रेयःसर्वकामफलप्रदः यइदंपुण्यमाख्यानंसर्वपापप्रणाशनं
पठेद्वाशृणुयाद्वापिसोपियातिपरांगतिम् इतिश्रीनारदीयेपूर्वभागेध्वजारोपणव्रतकथा ॥

अथ वर्षसाध्यं पचाहैकादशीव्रतं नारदीये

सनातनउवाच अन्यद्व्रतंप्रवक्ष्यामिशृणुनारदतत्त्वत दुर्लभंसर्वलोकेषुविख्यातंहरिपंचकम् नारीणांचनराणांच सर्वदुःखनिवारणं धर्मकामार्थमोक्षाणांप्रापकंमुनिसत्तम सर्वाभीष्टप्रदंचैवसर्वव्रतफलप्रदं मार्गशीर्षसितेपक्षे दशम्यांविजितेंद्रियः कुर्यात्स्नानादिकंकर्मदंतधावनपूर्वकंकृत्वादेवार्चनंसम्यक्तथापंचमहाध्वरान् एकादशीभवेत्तस्मिन्दिनेनियममास्थितः ततःप्रातःसमुत्थायएकादश्यांमुनीश्वर स्नानंकृत्वायथाचारंहरिमेवार्चयेद्गृहे स्नापयेद्देवदेवेशंपंचामृतविधानतः अर्चयेत्परयाभक्त्यागंधपुष्पादिभिःक्रमात् धूपैर्दीपैश्चनैवेद्यैस्तांबूलैश्चप्रदक्षिणैः संपूज्यदेवदेवेशमिमंमंत्रमुदीरयेत् नमस्तेज्ञानरूपायज्ञानदायनमोस्तुते नमस्तेसर्वरूपायसर्वसिद्धिप्रदायिने एवंप्रणम्यदेवेशंवासुदेवंजगत्पतिं वक्ष्यमाणेनमंत्रेणउवासंसमर्पयेत् पंचरात्रंनिराहारोह्यद्यप्रभृतिकेशव त्वदाज्ञयाजगत्स्वामिन्ममाभीष्टप्रदोभव एवंसमर्च्यदेवेशमुपवासंजितेंद्रियःपौर्णमास्यांप्रकर्तव्यमेवंविष्णवर्चनंमुने एकादश्यांपौर्णमास्यांकर्त्तव्यंजागरंतथा पंचामृतादिपूजातुसामान्यादिनपंचके क्षीरेणस्नापयेद्विष्णुंपौर्णमास्यांचशक्तितः तिलहोमस्तुकर्तव्यस्तिलदानंतथैवच ततःषष्ठेदिनेप्राप्तेनिर्वर्त्यस्वाश्रमाक्रियां संप्राश्यपंचगव्यंचपूजयेद्विधिवद्धरिं ब्राह्मणान्भोजयेत्पश्चाद्विभवेसत्यवारितं ततोस्यवंधुवर्गेणस्वयंभुंजीत वाग्यतः एवंपौषादिमासेषुकार्त्तिकांतेषुनारद शुक्लपक्षेव्रतंकुर्यात्पूर्वोक्तविधिनानरः एवंसंवत्सरंकार्यंव्रतं पापप्रणाशनं पुनः प्राप्तेमार्गशीर्षे कुर्यादुद्यापनंव्रती एकादश्यांनिराहारोभवेत्पूर्वमिवद्विज द्वादश्यांपंचगव्यंचप्राशयेत्सुसमाहितः गंधपुष्पादिभिः सम्यग्देवदेवंजनार्दनं अभ्यर्च्योपायनंदद्याद्ब्राह्मणाय जितेंद्रियः पायसंतिलसंमिश्रंघृतयुक्तंफलान्वितं सुगंधजलसंयुक्तंपूर्णकुंभंसदाक्षिणं वस्त्रेणाच्छादितंकुंभं

पंचरत्नसमन्वितं दद्यादध्यात्मविदुषेब्राह्मणायमुनिश्वर सर्वात्मन्सर्वभूतेशसर्वव्यापिन्सनातन परमा
न्नप्रदानेनसुप्रीतोभवमाधव अनेनोपायनंदत्त्वाब्राह्मणान्भोजयेत्ततःशक्तितोबंधुभिस्सार्द्धंस्वयंभुंजीतवाग्यतः ब्र
तमेतत्तुयःकुर्य्यात्हरिपंचकसंज्ञितं नतस्यपुनरावृत्तिर्ब्रह्मलोकात्कदाचन ब्रतमेतत्प्रकर्त्तव्यमिच्छद्भिर्मोक्षमुत्तमं
समस्तपापकांतारदावानलसमप्रभं गवांकोटिसहस्रैस्तुदत्तैयत्फलमाप्यते तत्फललभ्यतेपुंभिरेतस्मादुपवा
सतः यस्त्वेतच्छृणुयाद्भक्त्यानारायणपरायणःसमुच्यतेमहाघोरैः पातकानांचकोटिभिः इतिनारदीयपुराणो
क्तहरिपंचकब्रतम् अथध्वजारोपणप्रयोगविधिः तत्रकार्त्तिकशुक्लदशम्यांनियमान्वितःएकादश्यामुपोषित.
विष्णुकीर्त्तनश्रवणादिपरोभवेत् द्वादश्यांयथाविधिस्नात्वा नित्यकर्मनिर्वर्त्यसंकल्पंकुर्यात् तिथ्यादिसंकीर्त्य
अखिलपापक्षयसकलाभीष्टसिद्धिपूर्वकविष्णुसायुज्यकामोविष्णुद्वारेध्वजारोपंकरिष्ये ततःपुण्याहवाचनादिकृ
त्वा आचार्य्यंऋत्विजश्चवृत्वा तैःसहदेवालयेविष्णुंषोडशोपचारैःपुरुषसूक्तेनसंपूज्य ततअत्युच्चस्तंभोगाय
त्र्याप्रोक्ष्य ध्वजयुक्तौकृत्वा तत्रवैनतेयंधातारंविधातारंचनाममंत्रैरावाह्यसंपूज्य ध्वजंचहरिद्राक्षतगंधपुष्पादि
भिःपूजयित्वा शुद्धभूमौस्थंडिलेग्निंप्रतिष्ठाप्यअन्वादध्यात् अत्रप्रधानंविष्णुंअष्टोत्तरशतंपायसाहुतिभिःसूर्यं
वैनतेयंहिमांशुंधातारंविधातारंचअष्टाष्टसंख्ययापायसाज्याहुतिभिःशेषेणस्विष्टकृतामित्यादिहोममंत्राः षोडश
पुरुषसूक्तेनविष्णोर्नुकं इरावतीत्येतैरष्टादशमंत्रैःषडावृत्याष्टोत्तरशतंहोमः उदुत्यंजातवेदसंसूर्यस्वसामध्वनिशरी
रस्कमितिसूर्यस्य सोमोधेनुरितिसोमस्य धातुंधाताददातुनो गायनीशानोजगतस्पतिः सनपुण्येनखनविधा
तु योनःपिताजनितायोविधातायोनः ततोअभ्यासजनातइति ततःसौरमंत्रान् शांतिसूक्तानिचपठित्वा जा
गरणादिनारात्रिंनिनयेत् ततोदेवंस्वमंत्रैःसंपूज्यसूक्तपाठैःस्तोत्रपठनैर्नृत्यमंगलवाद्यघोषैः सहदेवंप्रदक्षिणीकृत्य

देवालयेध्वजौसमानीय देवस्यद्वारदेशेशिखरंवास्थिरीकृत्वा ध्रुवसूक्तंपठित्वा तौसंपूज्य पुनर्देवालयेदेवंसंपूज्यप्रार्थयेत् देवेशसर्वलोकेशमहापुरुषपूर्वज यत्रैवसकलंजातंयत्रसर्वंप्रतिष्ठितं लयमेष्यतियत्रैवतंप्रपन्नोस्मिकेशवं १ नजानामिपरंभावं यत्रब्रह्मादयः सुराः योगिनोयंनपश्यंतितंवंदेब्रह्मरूपिणम् २ यन्मुखाद्ब्राह्मणाजातायद्बाहोरभवन्नृपाः वैश्यायस्योरुतोजाताः पद्भ्यांशूद्रोऽव्यजायत ३ मायासंगममात्रेणवदंतिपुरुषंत्वयं स्वभावविमलंशुद्धंनिर्विकारंनिरंजनं एकोविष्णुर्महद्भूतंपृथग्भूतान्यनेकशः त्रैलोक्यंव्याप्यसर्वात्मा समेविष्णुः प्रसीदतु योदेवः सर्वभूताना मंतरात्माजगन्मयः निर्गुणः परमानंदः समेविष्णुः प्रसीदतु चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच हूयतेचपुनर्द्वाभ्यांतस्मैयज्ञात्मनेनमः ८ परेशः परमानंदः परात्परतरः प्रभुः चिद्रूपश्चित्परिज्ञेयः समेविष्णुः प्रसीदतु ८ ज्ञानिनांकर्मिणांचैवतथाभक्तिमतांनृणां गतिंददातिविश्वात्मा समे विष्णुः प्रसीदतु ९ यइदंकीर्त्तयेन्नित्यंस्तोत्राणामुत्तमोत्तमं सर्वपापविनिर्मुक्तः परंसायुज्यमाप्नुयात् इतिपठित्वा ततोद्वादशब्राह्मणान्सदेन्नेनसंभोज्यदक्षिणादिनाप्रतोष्या शिषोगृहीत्वाभुंजीत इतिध्वजारोपणव्रतम् एवमेवशिवादीनामपि तत्रगरुडस्थानेवृषादिवाहनपूजा त्र्यंबकं कदुद्रायेत्यादिसूक्तपाठः इतिनारदीयोक्तध्वजारोपणव्रतविधानम् अथहरिपंचकव्रतम् विष्णुधर्मोत्तरे तत्र व्रतग्रहणविधिः शुक्लद्वादश्यांकृष्णद्वादश्यांवा मार्गादिमासेवाश्रवणर्क्षंभवति तद्दिनमारभ्यकार्यमेकस्मिन्मासेपंचउपोषणानि श्रवणयुतेकादशीद्वयंप्रारभ्य अमायांपूर्णिमायांवाविष्णुंसंपूज्यउपवसेत् एवंसंवत्सरंकुर्यात् अंतेउद्यापनंकुर्य्यात् तद्यथा तिथ्यादिसंकीर्त्यात्मनः पंचमहापातकोपपातक क्षयपूर्वकविष्णुलोकप्राप्तिद्वाराश्रीविष्णुप्रीत्यर्थंआचरितस्यवर्षपर्यंतंविष्णुपंचकव्रतस्यपूर्णतासिद्ध्येतदुद्यापनंकरिष्ये इतिसं

कल्प्य आचार्य्यादिवरणांतेसर्वतोभद्रे तदुपरिसौवर्णीर्विष्णोः पंचप्रतिमाः मंत्रपंचकेनप्रतिष्ठापयेत् तत्रक्रमेणमंत्राः त्रीणिपदानिश्रवणर्क्षकलशे १ तद्विष्णोरितिशुक्लैकादश्याः कलशे २ तद्विप्राः सोविपण्यवोपूर्णिमायांकलशे ३ अतोदेवेतिकृष्णैकादश्यांकलशे ४ इदंविष्णुरितिअमायांकलशे ५ ततः क्रमेण कलशपंचके द्वादशतत्रदेवताः परितआवहयेत् गोवर्धनाय १ अनंताय २ पुंडरीकाक्षाय ३ नित्याय ४ वेदगर्भाय ५ यज्ञाय ६ पुरुषाय ७ सुब्रह्मण्याय ८ जयाय ९ शौरये १० वैकुंठाय ११ गरुडध्वजाय १२ इतिश्रवणर्क्षेदेवताः १२ केशवाय १ नारायणाय २ माधवाय ३ गोविंदाय ४ विष्णवे ५ मधुसूदनाय ६ त्रिविक्रमाय ७ वामनाय ८ श्रीधराय ९ हृषीकेशाय १० पद्मनाभाय ११ दामोदराय १२ इतिशुक्लैकादश्यांदेवताः १२ विष्णवे १ शशिने २ शशांकाय ३ चंद्राय ४ सोमाय ५ उडुपाय ६ मनोरमाय ७ अमृताय ८ पावनाय ९ हिमकृते १० निशाकराय ११ आप्यायनाय १२ इतिपूर्णमायांदेवताः १२ संकर्षणाय १ वासुदेवाय २ प्रद्युम्नाय ३ अनिरुद्धाय १ पुरुषोत्तमाय ५ अधोक्षजाय ६ नारसिंहाय ७ अच्युताय ८ जनार्दनाय ९ उपेंद्राय १० हरये १४ कृष्णाय १२ इतिकृष्णैकादश्यांदेवताः १२ महीधराय १ जगन्नाथाय २ वेदेंद्राय ३ देवकीसुताय ४ चतुर्भुजाय ५ गदापाणये ६ सुरेशाय ७ सुलोचनाय ८ चार्वंगाय चक्रपाणये सुरमित्राय ११ असुरांतकाय १२ इतिअमायांद्वादशदेवताः १२ एवंपंचकलशेषुषोडशोपचारैः पूर्वोक्तमंत्रैः संपूज्य षष्ठिनामभिःषष्ठिनमस्कारान् कृत्वारात्रिंनिनयेत् जागरणंकृत्वा प्रातः अग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानंविष्णुंघृताक्तपायसातिलद्रव्यैः प्रत्येकमष्टोत्तरशतसंख्याकाहुतिभिः १ श्रवणदेवताघृताक्तपायसद्रव्यैः २ पूर्णिमादेवताघृतपा

यसाभ्यां ३ कृष्णैकादशीदेवताः पंचामृततिलोदनैः ४ अमादेवताश्चतिलयुक्तगुडोदनैः प्रत्येकंएकैकयाज्याहुत्याब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्षे ततआचार्यंसंपूज्य व्रतपूर्त्त्यैगांचदद्यात् विभवेसतिसस्यवर्तीभूमिंचदत्त्वा अन्यच्च पंचब्राह्मणेभ्योगोमेदंपुष्परागंवैडूर्य्यंनलिं माणिक्यंचेतिपंचरत्नयुताः पंचांगुलीयभूषणानिदक्षिणापुरःसरं सहिरत्नानीतिमंत्रेणदत्त्वा षष्टिब्राह्मणान्परमान्नेनसंतर्प्यआशिषोगृहीत्वाभुंजीत एवकृतेपंचमहापातकादिभ्योमुक्तोभवति इतिविष्णुपंचकव्रतोद्यापनम् अथमासोपवासव्रतम् अन्यद्व्रतंपरंवक्ष्ये तच्छृणुष्वसमाहितः सर्वपापहरंपुण्यंसर्वलोकोपकारकं आषाढेश्रावणेवापितथाभाद्रपदेपिच तथात्राश्विनकेमासिकुर्य्याद्देवव्रतंद्विजएतेष्वन्यतमेमासिशुक्लपक्षेजितेंद्रियः प्रातर्दशम्यांस्नायीतदंतधावनपूर्वकं नित्यंदेवार्चनंकुर्य्याद्विधिवत्सुसमाहितः एकादश्यांब्रह्मचारीभूमिशायीजितेंद्रियः प्राशयेत्पंचगव्यंचस्वपेद्विष्णुसमीपतः ततःप्रातःसमुत्थायनित्यंकर्मसमाप्यच श्रद्धयापूजयेद्विष्णुंवशीक्रोधविवर्जितः विद्वद्भिःसहितोविष्णुमर्चयित्वायथोचितं संकल्पंतुततःकुर्य्यात्स्वस्तिवाचनपूर्वकं मासमेकंनिराहारोह्यद्यप्रभृतिकेशव मासांतेपारणंकुर्य्यांदेवदेवतवाज्ञया तपोरतनमस्तुभ्यंतपसांफलदायक ममाभीष्टपदंदेहिसर्वविघ्नान्निवारय एवंसमर्प्यदेवस्यविष्णोर्मासव्रतंशुभं ततःप्रभृतिमासंतंनिवसेद्धरिमंदिरे प्रत्यहंस्नापयेद्देवंपंचामृतविधानतः दीपंनिरंतरंकुर्य्यात्तस्मिन्मासेहरेर्गृहे प्रत्यहंखादयेत्काष्ठमपामार्गसमुद्भवं अपामार्गदंतधावनम् क्षुत्तृट्निवृत्त्यर्थंकुर्यात् ततःस्नायीतविधिवन्नारायणपरायणः ततस्तंस्नापयेद्विष्णुंपूर्ववत्प्रयतोर्चयेत् ब्राह्मणान्भोजयेच्छक्त्याभक्तियुक्तः सदक्षिणं स्वयंचबंधुभिःसार्धंभुजीतप्रयतेंद्रियः एवंमासोपवासांश्चव्रतीकुर्य्यात्त्रयोदश वर्षांतेवेदविदुषेमांप्रदद्यात्सदक्षिणां भोजयेद्ब्राह्मणांस्तत्रद्वादशैवविधानतः शक्त्याचदक्षिणांदद्याद्वस्त्राण्याभरणानिच मासो

पवासत्रितयंयःकुर्यात्संयतेंद्रियः भक्त्यासोमस्ययज्ञस्यद्विगुणंफलमश्नुते चतुःकृत्वःकृतंयेनमासकंमुनिसत्तम सलभेत्परमंपुण्यमष्टाग्निष्टोमसंभवं पंचकृत्वोव्रतमिदंकृतंयेनमहात्मना अत्यग्निष्टोमजंपुण्यंद्विगुणंप्राप्नुयान्नरः मासोपवासषट्कंयःकरोतिसमाहितः ज्योतिष्टोमस्ययज्ञस्यफलंसोष्टगुणंलभेत् मासोपवासान्यःकुर्य्यादष्टकृत्वोमुनीश्वर नरमेधाख्ययज्ञस्यफलंपंचगुणंलभेत् यस्तुमासोपवासांश्चनवकृत्वःसमाचरेत् गोमेधमखजंःपुण्यंलभतेत्रिगुणंनरः दशकृत्वस्तुयःकुर्य्यात्पराकंमुनिसत्तम सब्रह्ममेधयज्ञस्यत्रिगुणंफलमश्नुते एकादशपराकांश्चयःकुर्यात्संयतेंद्रियः सयातिहरिसारूप्यंसर्वभोगसमन्वितः एवंद्वादशकृत्वापिसायुज्यंलभतेनरः त्रयोदशपराकाख्यंयःकुर्यात्प्रयतोनरः सयातिपरमानंदंयत्रगत्वानशोचते मासोपवासनिरतागंगास्नानपरायणाः धर्ममार्गप्रवक्तारोमुक्ताएवनसंशयः अवीराभिश्चनारीभिर्यतिभिर्ब्रह्मचारिभिः मासोपवासःकर्त्तव्योवनस्थैश्चविशेषतः नारीभिःपुरुषैर्वापिव्रतमेतत्सुदुर्लभं कृत्वामोक्षमवाप्येतयोगिनामपिदुर्लभं गृहस्थोवानप्रस्थोवाव्रतीवाभिक्षुरेवच मूर्खोवापंडितोवापिश्रुत्वैतन्मोक्षभाग्भवेत् इदंपुण्यव्रताख्यानंनारायणपरायणःशृणुयाद्वाचयेद्वापिसर्वपापैःप्रमुच्यते इतिनारदीयपुराणेमासोपवासव्रतविधानम् अथैकादशीव्रतमाहात्म्यं सनकउवाच इदमन्यत्प्रवक्ष्यामिव्रतंत्रैलोक्याविश्रुतं सर्वपापप्रशमनंसर्वकामफलप्रदं ब्राह्मणक्षत्रियविशांशूद्राणांचैवयोषितां मोक्षार्थंकुर्वतांभक्त्याविष्णोःप्रियकरंद्विज एकादशीव्रतंनामसर्वाभीष्टप्रदंनृणांकर्त्तव्यंसर्वथाविप्रविष्णुप्रीतिकरंयतः एकादश्यांनभुंजीतपक्षयोरुभयोरपि योभुंक्तेलोकपापीसःपरत्रनरकंव्रजेत् उपवासफलंप्रेप्सुर्जह्याद्भुक्तिचतुष्टयं पूर्वापरदिनेरात्रावहोरात्रंतुमध्यमे एकादशीदिनेयस्तुभोक्तुमिच्छतिमानवः सभोक्तुंसर्वपापानिस्पृहयालुर्नसंशयः भवेद्दशम्यामेकाशीद्वादश्यांचमुनीश्वर एकादश्यांनिराहारोयदिमुक्तिमभीप्सति यानिकानि

चपापानिब्रह्महत्यादिकानिच अन्नमाश्रित्यतिष्ठंतितानिविप्रहरेर्दिने ब्रह्महत्यादि पापानांकथंचिन्निष्कृतिर्भवेत् एकादश्यांतुयोभुंक्तेतस्यनैवास्तिनिष्कृतिः महापातकयुक्तोवायुक्तोवासर्वपातकैः एकादश्यांनिराहारःस्थित्वा यातिपरांगतिं एकादशीमहापुण्याविष्णोःप्रियतरातिथिः संसेव्यासर्वथाविप्रैःसंसारच्छेदालिप्सुभिः दशम्यांप्रातरुत्थायदंतधावनपूर्वकं स्नापयेद्विधिवद्विष्णुंपूजयेत्प्रयतेंद्रियः एकादश्यांनिराहारोनिगृहीतेंद्रियोभवेत् शयीतसन्निधौविष्णोर्नारायणपरायणः एकादश्यांतथास्नात्वासंपूज्यचजनार्दनं गंधपुष्पादिभिःसम्यक्ततस्त्वेवमुदीरयेत् एकादश्यांनिराहारःस्थित्वाद्याहंपरेहनि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत इमंमंत्रंसमुच्चार्य्यदेवदेवस्यचक्रिणः भक्तिभावेनतुष्टात्माउपवासंसमर्पयेत् देवस्यपुरतःकृत्वाजागरंनियतोव्रती गीतवाद्यैश्चनृत्यैश्चपुराणश्रवणादिभिः ततःप्रातःसमुत्थायद्वादश्यांदिवसेव्रती स्नात्वाचविधिवद्विष्णुंपूजयेत्प्रयतेंद्रियः पंचामृतेनसंस्नाप्यएकादश्यांजनार्दनं द्वादश्यांपयसाविप्रहरिसारूप्यमश्नुते अज्ञानतिमिरांधस्यव्रतेनानेन केशव प्रसादसुमुखोभूत्वाज्ञानदृष्टिप्रदोभव एवंविज्ञाप्यविप्रेंद्रमाधवंसुसमाहितः ब्राह्मणान्भोजयेच्छक्त्या दद्याद्वैदक्षिणांतथा ततःस्ववंधुभिःसार्धंनारायणपरायणः कृतपंचमहायज्ञःस्वयंभुंजीतवाग्यतः एवंयःप्रयतःकुर्यात्पुण्यमेकादशीव्रतं सयातिविष्णुभवनंपुनरावृत्तिदुर्लभं उपवासव्रतपरोधर्मकार्यपरायणः चंडालान्पतितांश्चैवनेक्षेदपिकदाचन नास्तिकान्भिन्नमर्यादान्वृषलीपतिमेवच अयाज्ययाजकंचैवनालपेत्सर्वदाव्रती कुंडाशिनंगायकंचतथादेवलकाशिनं भिषजंकाव्यकर्त्तारंदेवद्विजविरोधिनं परान्नलोलुपंचैवपरस्त्रीनिरतंतथा व्रतोपवासनिरतोवाङ्मात्रेणापिनार्चयेत् इत्येवमादिभिःशुद्धोवशीसर्वहितेरतः उपवासपरोभूत्वापरांसिद्धिमवाप्नुयात् नास्तिगंगासमंतीर्थंनास्तिमातृसमोगुरुः नास्तिविष्णुसमोदेवस्तपोनानशनात्परं नास्तिक्षमा

समामातानास्तिकीर्त्तिसमंधनं नास्तिज्ञानसमोलाभोनचधर्मसमःपिता नविवेकसमोवंधुर्नैकादश्याःपरंव्रतं अ
त्राप्युदाहरंतीमामितिहासंपरातनं संवादंभद्रशीलस्यतात्पितुर्गालवस्यच पुराहिगालवोनाममुनिःसत्यपरा
यणः उवासनर्मदातीरेशांतोदांतस्तपोनिधिः वहुवृक्षसमाकीर्णेगजवल्लीनिषेविते सिद्धचारणगंधर्वयक्षवि
द्याधरान्विते कंदमूलफलैःपूर्णेमुनिवृंदनिषेविते गालवोनामविप्रेंद्रोनिवासमकरोच्चिरं तस्याभवद्भद्रशील
इतिख्यातःसुतोवशी जातिस्मरोमहाभागोनारायणपरायणः बालक्रीडनकालेपिभद्रशीलोमहामतिः मृदा
चविष्णुप्रतिमांकृत्वापूजयतेक्षणं वयस्थान्वोधयच्चापिविष्णुःपूज्योनरैः सदाएकादशीव्रतंचैवकर्त्तव्यमपिपंडितैः
एवंतेवोधितास्तेनशिशवोपिमुनीश्वर हरिंमृदैवनिर्मायपृथक्संभूयवामुदा अर्चयंतिमहाभागाविष्णुभक्तिपरा
यणाः नमस्कुर्वन्भद्रमतिर्विष्णवेसर्वजिष्णवे सर्वेषांजगतांस्वस्तिभवेदित्थंव्रवीतिच क्रीडाकालेमुहूर्त्तंवामुहूर्त्ता
र्धमथापिवा एकादशीतिसंकल्प्यव्रतंयच्छतिकेशवं एवंसुचरितंदृष्ट्वातनयंगालवोमुनिः अपृच्छद्विस्मयाविष्टःस
मालिंग्यतपोनिधिः गालवउवाच भद्रशीलमहाभागभद्रशीलोसिसुव्रत चरितंमंगलंयत्तेयोगिनामपि
दुर्लभं हरिपूजापरोनित्यंसर्वभूतहितेरतः एकादशीव्रतपरोनिषिद्धाचारवर्जितः निर्द्वंद्वोनिर्ममःशांतोहरिध्या
नपरायणः एवमेतादृशीवुद्धिःकथंजातार्भकस्यते विनापिमहतांसेवांहरिभक्तिर्हिदुर्लभा स्वभावतोज
नस्यास्यअविद्याकामकर्मसु प्रवर्ततेमतिर्वत्सकथंतेलौकिकीकृतिः सत्संगेपिमनुष्याणांपूर्वपुण्यातिरेकतः
जायतेभगवद्भक्तिस्तदहंविस्मयंगतः पृच्छामिप्रीतिमापन्नस्तद्भवान्वक्तुमर्हति सनकउवाच भद्रशी
लोमुनिश्रेष्ठःपित्रैवंसुविकल्पितः जातिस्मरःसुचित्तात्माहृष्टःप्रहसिताननः स्वानुभूतंयथावृत्तंसर्वंपित्रेन्यवेद
यत् भद्रशीलउवाच शृणुतातमुनिश्रेष्ठह्यनुभूतंमयापुरा जातिस्मरत्वाज्जानामियमेनपरिभाषितं एतच्छ्रु

त्वामहाभागोगालवोविस्मयान्वितः उवाचप्रीतिमापन्नोभद्रशीलंमहामतिं गालवउवाच कस्त्वंपूर्वंमहाभाग किमुक्तंचयमेनते कस्यवाकेनवाहेतोस्तत्सर्वंवक्तुमर्हसि भद्रशीलउवाच अहमासंपुरातातराजासोमकुलोद्भवः धर्मकीर्त्तिरितिख्यातोदत्तात्रेयेणशासितः नववर्षसहस्राणिमहींकृत्स्नामपालयम् अधर्माश्चतथाधर्मा मयातुवहवःकृताः ततःश्रियाप्रमत्तोहंबहुधर्ममकारिषम् पाखंडजनसंसर्गात्पाखंडचरितोभवं पुरार्जितानि पुण्यानिमयातुसुबहून्यपि पाखंडैर्बोधितोहंतुवेदमार्गंसमुज्झितं मखाश्चसर्वेविध्वस्ताःकूटयुक्तिविदामया अधर्मेनिरतंमांतुदृष्ट्वातद्देशजाःप्रजाः विरक्तादुःखिताभूत्वामामवमन्यंतसर्वशः मृगयाभिरतोभूत्वाह्येकदाप्राविशंवनं ससैन्योहंवनेतत्रहत्वाबहुविधान्मृगान् क्षुत्तृट्परिवृतःश्रांतोरेवातीरमुपागमं रवेस्तीक्ष्णातपक्लांतो रेवायांस्नानमाचरं अदृष्टसैन्यएकाकीपीड्यमानःक्षुधाभृशं समेतास्तत्रयेकेचिज्जनास्तत्तीरवासिनः एकादशिव्रतपरा मयादृष्टानिशामुखे निराहारश्चतत्राहमेकाकीतज्जनैःसह जागरंकृतवांश्चापिसेनयासहितोनिशि अध्वश्रमपरिश्रांतःक्षुत्पिपासाप्रपीडितः तत्रैवजागरांतेहंतावत्पंचत्वमागतः ततोयमभटैर्बद्धोमहादंष्ट्राभयंकरैः अनेकक्लेशमापन्नः प्रापितोहंयमांतिकं दंष्ट्राकरालवदनमपश्यंयममूर्जितं अथकालश्चित्रगुप्तमाहूयेदमभाषत अस्यशिक्षाविधानंचयथावद्वदपंडित एवमुक्तश्चित्रगुप्तोधर्मराजेनसत्तम चिरंविचारयामासपुनश्चेदमभाषत असौपापरतःसत्यं तथापिशृणुधर्मप एकादश्यां निराहारः सर्वपापैः प्रमुच्यते एषरेवातटेरम्येनिराहारोरवेर्दिने जागरंचोपवासंचकृत्वानिष्पापतांगतः यानिकानिचपापानिकृतानिसुबहून्यपि तानिसर्वाणिनष्टानिह्युपवासप्रभावतः एवमुक्तोधर्मराजश्चित्रगुप्तेनधीमताननामदंडवद्भूमौममाग्रेतातकंपितः पूजयामासमांतत्रभक्तिभावेनधर्मराट् ततश्चस्वभटान्सर्वान्समाहूयेदमब्रवीत्

धर्मराजउवाच शृणुध्वमद्वचोदूताहितंवक्ष्याम्यनुत्तमम् धर्ममार्गरतान्मर्त्यानानयध्वममातिकं येविष्णुभक्तिनिरताःमनुजाः कृतज्ञा एकादशीव्रतपराविनितेंद्रियाश्च नारायणाच्युतहरेशरणंभवेति नाम्नावदंतिसततंकिलतांस्त्यजध्वं नारायणाच्युतजनार्दनकृष्णविष्णोपद्मेशपद्मजपितःशिवशंकरेति नित्यंवदंत्यखिललोकहिताःप्रशांतादूराद्भटास्त्यजततान्ममैषशिक्षाः नारायणार्चनकृतान्हरिभक्तिभाजः स्वाचारमार्गनिरतान्गुरुसेवकाश्च नित्यान्नदाननिरतांश्चसुदीपपालान्दूतास्त्यजध्वमनिशंहारिनामसक्तान् पाषंडसंगरहितान्द्विजभक्तिनिष्ठान्सत्संगलोलुपनरांश्चतथातिथेयान् शंभोहरौचसमवुद्धिमतस्तथैवदूतास्त्यजध्वमुपकारपरांजनानां येवर्जिताहरिकथामृतसेचनेननारायणस्मृतिपरायणमानसैश्च विप्रेंद्रपादजलसेवनतोपकृष्टास्तान्पापिनोममभटागृहमानयध्वम् येमातृतातपरितर्जनशीलिनश्चकर्मद्विषोहितजनाहितकर्मणश्च देवस्वलोभनिरतान्जननाशकर्तृन्तानानयध्वमपरांश्चममाद्यदूताः एकादशीव्रतपराङ्मुखमुग्रशीलंलोकापवादनिरतंपरनिंदकंचग्रामस्यनाशनपरंपरवैरयुक्तंदूताःसमानयतविप्रधनेषुलुब्धं येविष्णुभक्तिविमुखाःप्रणमंतिनैवनारायणंहि शरणागतपालकंच विण्वालयंचनाहियांतिनराःसुमूर्खास्तानानयध्वमतिपापपरान्प्रसह्य एवंश्रुतंमयातत्रयमेनपरिभाषितंमयानुतापदग्धेनस्मृतंतत्कर्मनिंदितं असत्कर्मानुतापेनसद्धर्मश्रवणेनच तत्रैवसर्वपापानिनिःशेषानिगतानिमे पापशेषाद्विनिर्मुक्तःहारिसारूप्यतांगतं सहस्रसूर्यसंकाशंप्रणनामयमश्चमां एवंदृष्ट्वाविस्मितास्तेयमदूताभयोत्कटाः विश्वासंपरमंचक्रुर्यमेनपरिभाषिते ततःसंपूज्यमांकालोविमानशतसंकुलं सद्यःसंप्रेषयामासताद्विष्णोःपरमंपदं विमानकोटिभिःसार्धंसर्वभोगसमन्वितैः कर्मणातेनविप्रर्षेविष्णुलोकंमयोषितं कल्पकोटिसहस्राणिकल्पकोटिशतानिच स्थित्वाविष्णुपदेपश्चादिंद्रलोकमुपागतः तत्रापिसर्वभोगाढ्यःसर्वदेवनमस्कृतः तावत्कालं

दिविस्थित्वाततोभूमिमुपागतः अत्रापिविष्णुभक्तानांजातोहंभवतांकुले जातिस्मरत्वाज्जानामिसर्वमेतन्मुनीश्वर तस्माद्विष्णवर्चनोद्योगंकरोमिसहबालकैः एकादशीव्रतमिदमितिनज्ञातवान्पुरा जातिस्मृतिप्रभावेनतद्ज्ञातंसांप्रतंमया अवशेनापियत्कर्मकृतंतस्यफलंत्विदं एकादशीव्रतंभक्त्याकुर्वतांमुतप्रभो तस्माच्चरिष्ये विप्रेंद्रशुभमेकादशीव्रतं विष्णुपूजांचाहरहःपरमस्थानकांक्षया एकादशीव्रतंयेतुकुर्वंतिश्रद्धयानराः तेयांति विष्णुभुवनंपरमानंददायकं एवंपुत्रवचःश्रुत्वासंतुष्टोगालवोमुनिः अवापपरमांतुष्टिंमनसाचातिहर्षितः मज्जन्म सफलंजातंमद्वंशःपावनीकृतः यतस्त्वमद्गृहेजातोविष्णुभक्तिपरायणः इतिसंतुष्टचित्तस्तुतस्यपुत्रस्यकर्मणा हरिपूजाविधानंचयथावत्समबोधयत् इत्येतत्तेमुनिश्रेष्टयथावत्कथितंमया संकोचविस्तराभ्यांचकिमन्यच्छ्रोतुमिच्छसि ॥ इतिनारदीयपुराणेएकादशीव्रतमाहात्म्यम् ॥ अथत्रिस्पृशैकादशीमाहात्म्यम् पद्मपुराणे नारदउवाच त्रिस्पृशाख्यंव्रतंब्रूहिसर्वेश्वरविशेषतः यच्छ्रुत्वामुच्यतेलोकेकर्मबंधनतःक्षणात् श्रीमहादेवउवाच सर्वपापौघशमनंमहादुःखविनाशनं शृणुकृष्णावतारत्वंत्रिस्पृशाख्यंमहाव्रतं कामदंसस्पृहानांतु निस्पृहानांतुमोक्षदं त्रिस्पृशाख्यंव्रतंविप्रशृणुष्वगदतोमम प्रत्यक्षमर्चितस्तेनकालेकालेचकेशवः त्रिस्पृशांकीर्त्तितांनित्यंयःकरोतिमहामुने नपुनश्चरणैश्चीर्णैःसर्वपापक्षयोभवेत् त्रिस्पृशानाममात्रेणक्षीयतेपापसंचयः नागमैर्नपुराणाद्यैर्नमखैस्तीर्थकोटिभिः बहुभिर्व्रतसंघैस्तुपूजितैस्त्रिदशैरपि मोक्षोभवतिविप्रेंद्र त्रिस्पृशानकृता यदि मोक्षार्थंदेवदेवेनसृष्टावैवैष्णवीतिथिः द्विजानांदुःखदंसांख्यंकलिकालेविशेषतः अनिग्रहाच्चेंद्रियाणां स्थिरत्वंमानसेनहि विषयैर्विप्रयुक्तानांप्राणधारणवर्त्तिनां कामभोगप्रसक्तानांत्रिस्पृशामोक्षदायिनी मया चैवपुराप्रोक्ताचतुर्वक्त्रस्यसागरे क्षीरोदेप्रणतानांतुकथ्यमानातुचक्रिणा त्रिस्पृशांयेप्रकुर्वंतिविषयैरपिनिर्जिताः

35

तेषामपिमयादत्तंमोक्षंसांख्याविवर्जितम् कुरुष्वत्वंमुनिश्रेष्ठत्रिस्पृशांमोक्षदायिनीं वहुभिर्मुनिसंघैश्चकृतेयं
चमहामुने कार्त्तिकेशुक्लपक्षेतुत्रिस्पृशाजायतेयदि सोमेनसोमजेनापिहत्याकोटिविनाशिनी यस्याउपोषणं
कृत्वाहत्यायुक्तोमहेश्वरः हस्ताद्ब्रह्मकपालंतुतत्क्षणात्पातितंभुवि कलिकल्मषपापौघैर्मुक्तादेवीत्रिमार्गगा उप
देशान्माधवस्यात्रिस्पृशासमुपोषणात् विलयंयातिविप्रेंद्रपापेष्वन्येषुकाकथा जीवोपदेशाच्छक्रस्यहत्यानमु
चिसंभवा विनष्टामुनिमुख्येंद्रत्रिस्पृशासमुपोषणात् नप्रयागेनकाश्यांतुगोमत्यांकृष्णसन्निधौ मोक्षोभवति
विप्रेंद्रत्रिस्पृशायदिनकृता मरणाच्चप्रयागेतुमुक्तिःकाश्यांतथैवतु स्नानमात्रेणगोमत्यांमुक्तिर्भवतिशाश्वती
गृहेपिजायतेमुक्तिस्त्रिस्पृशासमुपोषणात् विषयैर्वर्त्तमानस्यकामभोगान्वितस्यच निवृत्तविषयस्यापिमुक्तिसांख्ये
नदुर्लभा तस्मात्कुरुष्वविप्रेंद्रत्रिस्पृशांमोक्षदायिनीम् ॥ नारदउवाच ॥ कीदृशंतन्मुनिश्रेष्ठत्रिस्पृशाख्यंमहा
व्रतं मुक्तिदंयद्द्विजातीनांत्वयाप्रोक्तंममाधुना ॥ महादेवउवाच ॥ जाह्नव्यग्रेपुराविप्रत्रिस्पृशामाधवेनतु प्राची
सरस्वतीतीरेकथितात्वनुकंपया ॥ जाह्नव्युवाच ॥ कलिकल्मषपंकौघैर्ब्रह्महत्यायुतैरपि कलिकालेहृषीकेशस्ना
नकुर्वंतिमज्जले तेषांपापशतैर्घोरैर्मदेहंकलुषीकृतं कथंयास्यतिमेदेवपातकंगरुडध्वज प्राचीमाधवउवाच क
थयामिनसंदेहोमापुत्रिरोदनंकुरु श्रीमत्स्थलंचमेस्थानंप्राचीदेवीममाग्रतः वहतेब्रह्मतनयादृष्ट्वाग्रेचसुरेश्वरि
स्नानंकुरुष्वानित्यंत्वंतत्रपूताभविष्यसि यत्रब्रह्मसुताप्राचीतत्राहंनात्रसंशयः तीर्थकोटिशतैर्युक्तःसुरैःसहव
साम्यहं पवित्रंमात्प्रियंस्थानंहत्याकोटिविनाशनं संतुष्टेनमयादत्तंयस्मात्प्राणाधिकासिमे तत्रनश्यंतिपापा
नियत्रप्राचीसरस्वती विशेषतोममाग्रेतुकलिकालेतुजान्हवि तीर्थकोटिसहस्राणिनित्यंतिष्ठंतिजान्हवि प्राची
सरस्वतीतोयेसर्वदैवममाज्ञया ब्रह्मावधात्सुरापानात्गोवधाद्वृषलीवधात् ब्रह्मदेवस्वहरणान्मातापित्रोरपूज

नात् चक्रेयावद्गुरुद्रोहादभक्षस्यचभक्षणात् सर्वपापस्यकरणात्प्राचीब्रह्मसुतामुने व्यपोहयतिपापानिसकृत्स्नानेममाग्रतःकुरुस्नानंसुरश्रेष्ठेविपापात्वंभाविष्यसि जान्हव्युवाच नाहंशक्नोमिदेवेशंप्रागंतुंनित्यमेवहि कथंनश्यंतिपापानिकथयस्वेहमाधव प्राचीमाधवउवाच नशक्नोषियदागंतुंतत्रत्वंनित्यमेवहि तदान्यत्संप्रवक्ष्यामि यस्मान्मत्पादसंभवा सरस्वत्यधिकायाचतीर्थकोटिशताधिका मखकोटयधिकाचापित्रिस्पृशाक्रियतांशुभे जपहोमाधिकायावच्चतुर्वर्गफलप्रदा सांख्ययोगापिसायाचत्रिस्पृशाक्रियतांशुभे यस्मिन्मासेसमायातिसितावायदिवासिता कर्त्तव्यासासरिच्छ्रेष्ठेकृतेपापात्प्रमुच्यते जान्हव्युवाच कीदृशीत्रिस्पृशादेवममाख्याहिसुमाधव ईदृशीमहिमायस्यत्वयाप्रोक्तामममाधुना दशम्येकादशीभद्रादिनैकस्मिन्यदाभवेत् त्रिस्पृशांभावयेद्वव अन्यथावदसिप्रभो प्राचीमाधवउवाच आसुरीत्रिस्पृशादेवियात्वयापरिकीर्तिता वर्जनीयाप्रयत्नेनयथा नारीरजस्वला यथारजस्वलासंगोदूषितोज्ञानवर्त्तिनां तथैवदशमीयुक्तंमद्दिनंदूषितंनृणां हत्यायुतशतं हंतित्रिस्पृशासमुपोषिता एकादशीद्वादशीचरात्रिशेषेत्रयोदशी त्रिस्पृशासातुविज्ञयादशमीसंयुतानहि कृत्वापापंप्रमुच्येतप्रायश्चित्तैः कृतैर्नरः दशमीवेधजंदोषंनलभामिसुरापगे ॥

भुक्तंहालाहलंतेनस्वाविष्टाभक्षणंकृतं दशमीमिश्रितंयेनकृतमेकादशीव्रतं इतिमत्वानकर्त्तव्यंमद्दिनंदशमीयुतं जन्मकोटिकृतंपुण्यंसंतानंयातिसंक्षयं पातयेत्स्वकुलान्स्वर्गात्प्रापयेद्रौरवादिषुषडहं शोधयित्वातुकर्त्तव्योममवासरः वृषौत्याज्यौविनावौवान्श्रवणादिषुसंयुतः जन्मपुण्यक्षयंयातिएकादश्युपवासिनां सवृद्धौतुविशेषेणसंदेहेसमुपस्थिते ममाज्ञयाचकर्त्तव्याद्वादशीवल्लभामम जान्हव्युवाच करिष्येहंजगन्नाथत्रिस्पृशांवचनात्तव सर्वपापविनिर्मुक्ताभविष्यामितवाज्ञया श्रीभगवानुवाच स्वस्थानंगच्छभद्रंतेमाभीःकार्याकदाचन तव

देविसरिच्छ्रेष्ठेनपापंसंक्रमिष्यति स्नात्वासरस्वतीतोयेअर्चयित्वातुमाधवं प्रणमंतिजगन्नाथंप्रयांतिपरमांगतिं जान्हव्युवाच विधानंमेब्रूहिब्रह्मन्सर्वंयेनकरोम्यहं प्रसादयामिदेवेशंपरमानंददायिनं श्रीभगवानुवाच दामोदरोहैममयःकार्य्योवित्तानुसारतः पात्रंताम्रमयंकार्य्यंतिलैस्तुपरिपूरितं सजलंतुघटंशुभ्रंपंचरत्नसमन्वितं वेष्टितंपुष्पमालाभिःकर्पूरागुरुवासितं न्यसेद्दामोदरंपश्चात्स्नापयित्वाविलेप्यच परिधानंततःकार्य्यंपुराणसमुदीरितं पुष्पैःकालोद्भवैःशुभ्रैस्तुलसीपत्रकोमलैः छत्रंतुविष्णवेदद्यात्पादुकेनवसंयुते नैवेद्यानिमनोज्ञानिफलानिसुबहून्यपि उपवीतंतुदातव्यंसोत्तरीयंदृढंनवं वैणवंदापयेद्दंडंस्वरूपंसोन्नतंशुभं दामोदरायवैपादौ जानुनीमाधवायच गुह्यंकामप्रदायेतिकटिंवामनमूर्त्तये हृदयेज्ञानगम्यायकंठंवैकुंठगामिने सहस्रवाहवेबाहूचक्षुषीयोगरूपिणे संपूज्यविधिवद्भक्त्यादद्यादर्घ्यंविधानतः शुभ्रेणनारिकेलेनशंखोपरिस्थितेनच सूत्रेण वेष्टितेनैवहस्तयोरुभयोरपि स्मृतोहरसिपापानियादनित्यंजनार्दन दुःस्वप्नदुर्निमित्तानिमनसादुर्विचिंतितं नरकंतुभयंदेवभयंदुर्गतिसंभवं भयमस्मान्महादेवऐहिकंपारलौकिकं तेनदेवेशमांरक्षगृहाणार्घ्यंनमोस्तुते सदाभक्तिर्ममैवास्तुदामोदरतवोपरि धूपंदीपंचनैवेद्यंकुर्य्यान्नीराजनंततः शिरोपरिमुनिश्रेष्ठभ्रामयेद्वारिजंहरेः कृत्वाविधानमेतद्धिपूजयेत्स्वगुरुंततः दद्याद्वस्त्राणिशुभ्राणिसोष्णीषंचैवकंचुकं उपानहौचछत्रंचमुद्रिकांचकमंडलुं भाजनंचैवधान्यंचसप्तधान्यंसदक्षिणं ततःसंपूज्यदेवेशंकुर्य्याज्जागरणंहरेः गीतनृत्यसमायुक्तमुपचार. समन्वितं निशांतेदेवदेवेशदत्त्वाचार्घ्यंविधानतः भूमिक्रमादिकंकुर्य्याद्भुंजीयाद्ब्राह्मणैःसह अनेनविधिनाब्रह्मन्त्रिस्पृशासंभवंव्रतं यःकरोतिनरोभक्त्याशृणुवक्ष्यामितत्फलं गंगावगाहनेब्रह्मन्वाराणस्यांचयत्फलं मन्वंतरसहस्रैस्तुत्रिस्पृशाकरणेहितत् प्राचीयामुनस्नानेनवर्षकोटिषुयत्फलं तत्फलंसमवाप्नोतित्रिस्पृशाव्रतकृन्नरः

यत्फलंतुकुरुक्षेत्रेसूर्यग्रहणकोटिभिः हेमभारशतैर्दत्तैस्त्रिस्पृशाकरणेनतत् पापकोटिसहस्राणिहत्याकोटिशतानिच एकेनैवोपवासेनप्रदहेत्त्रिस्पृशाकृता त्रिस्पृशायाव्रतंयत्तुअगतीनांगतिप्रदं विनिर्गच्छंतिविप्रर्षेमहापापशतानिच स्वयंकृष्णेनकथितंपाराशर्यममाग्रतः प्रकाशयव्रतंचेदंलिखित्वावैष्णवेद्विजे पापौघैर्ग्रथितस्यापितस्यमुक्तिर्भविष्यति पुण्यैरवाप्यतेविद्वन्संवत्सरशतैरपि त्रिस्पृशादुर्लभालोकेप्राप्यतेनैवमानवैः कलौचेत्त्रिस्पृशांलब्ध्वानकुर्वंतिनराधमाः तेषांवैनिष्फलंजन्मजीवितंनिष्फलंभवेत् प्रेतत्वंतैःसमुत्तीर्णविनाश्राद्धं विनासुतैः कृतायैस्त्रिस्पृशाविद्वन्सकृत्प्राप्यकलौयुगे इतिपाद्मेउत्तरखंडेउमापतिनारदसंवादेत्रिस्पृशैकादशीव्रतम् ॥

अथनित्यैकादशीव्रतंभविष्योत्तरे युधिष्ठिरउवाच एकादशीव्रतंदेवनित्यंवैकाम्यमेववा कथंवाक्रियतेदेवनियमाश्चात्रकीदृशाः कृत्वावाकिंफलंजंतुःप्राप्नोतिपुरुषोत्तम अकृत्वावाकिमाप्नोतिपापंवैमधुसूदन एतत्सर्वंसमासेनप्रसादाद्वक्तुमर्हसि श्रीकृष्णउवाच अहंतेकथयिष्यामिशृणुपांडुकुलोद्वह नित्यमेतद्व्रतंनामकर्तव्यंसार्ववर्णिकं सर्वाश्रमाणांसामान्यंसर्वधर्मेष्वनुत्तमं एकादशीव्रतपरंनास्तिपुण्यतमंभुवि अपिपापसहस्राणिकुर्वन्नपिसदानरः एकादशीतिथिंसम्यगुपोष्यससुखीभवेत् रटंतीहपुराणानिश्रुतयःस्मृतिभिः सह नभोक्तव्यंनभोक्तव्यंसंप्राप्तेहरिवासरे भीतानांयमदूतेभ्यःछिंधिभिंधीतिजल्पनात् नभोक्तव्यंनभोक्तव्यंसंप्राप्तेहरिवासरे वाल्याच्चकृतपापौघंदग्धुंसंयतचेतसा नभोक्तव्यंनभोक्तव्यंसंप्राप्तेहरिवासरे दुर्गमार्गेहियेस्वर्गंजिगीषंतेहितैर्नरैः नभोक्तव्यंनभोक्तव्यंसंप्राप्तेहरिवासरे एकादश्यांनभोक्तव्यंपक्षयोरुभयोरपि भुंक्तेगोमांसभक्षस्यपापमाप्नोतिमानवः शुक्लांवायदिवाकृष्णांसमुपोष्यसुखीभवेत् भुंजेत्सुरापानसमंपापमाप्नोतिमानवः यथाशुक्लातथाकृष्णायथाकृष्णातथेतरा विभेदमनयोःकुर्वन्विष्टायांजायतेकृमिः यथागोतिलवि

प्राणांकृष्णलंनैवदूषणं तथैवैकादशीराजन्नुपोष्यापक्षयोर्द्वयोः उभयोःपक्षयोराजन्नेकादश्यांद्विजन्मवान् यो
भुंक्तेतरुजन्मासौप्रेत्यचंडालतांव्रजेत् ब्रह्मचारिगृहस्थोवावानप्रस्थोथवायतिः एकादश्यांतुभुंजानोभुंक्तेगोमां
समेवहि ब्रह्मघ्नस्यसुरापस्यस्तेयिनोगुरुतल्पिनः सर्वेषांनिष्कृतिःप्रोक्तानैकादश्यन्नभोजिनः विष्णुरहस्ये
पि यदीच्छेद्विष्णुसायुज्यंश्रियंसंपदमात्मनः एकादश्यांनभुंजीतपक्षयोरुभयोरपि यानिकानिचपापानि
ब्रह्महत्यासमानिच अन्नमाश्रित्यातिष्ठंतिसंप्राप्तेहरिवासरे तानिसर्वाण्युपाश्नातिभुंजानोहरिवासरे नेदृशं
पावनंलोकेनराणामिहविद्यते यादृशंपद्मनाभस्यादिनंपातकहानिदं । अश्वमेधसहस्राणिवाजिपेयशतानिच
एकादश्युपवासस्यनार्हंतिषोडशींकलां एकादशेंद्रियैःपापंयत्कृतंभवतिक्वचित् एकादश्युपवासेनतत्सर्वंविल
यंव्रजेत् एकादशीसमंकिंचित्पापत्राणंनविद्यते स्वर्गमोक्षप्रदाह्येषाराज्यपुत्रप्रदायिनी सुकलत्रप्रदाह्ये
षाशरीरारोग्यदायिनी नगंगायमुनाभूपनकाशीनचपुष्करं नचापिकौरवंक्षेत्रंनरेवानचदेविका यमुनाचं
द्रभागाचतुल्याहारिदिनेनतु अनायासेनराजेंद्रप्राप्यतेवैष्णवंपदं चिंतामणिसमाह्येषाह्यक्षयस्यानिधेःसमा
कल्पपादपतुल्याथवेदवादोपमातथा नारदीयेमांधातारंप्रतिवशिष्ठोक्तम् एकादशीसमुत्थेनवह्निनापातकेंधनं
भस्मतांयातिराजेंद्रप्राप्यतेवैष्णवंपदं तत्रैवब्रह्माणंप्रतियमोक्तम् एकादश्युपवासीयःसमांत्यक्त्वाहरिंव्रजेत
कुलत्रयंसमुधृत्यआत्मनासहपद्मज तत्रैवमोहिनींप्रतियमोक्तम् एकयाह्यपिवामोरुएकादश्यासुचीर्णया ह
त्यायुतंविनश्येतसर्वंयज्ञफलंलभेत् अत्रायंशास्त्रार्थः एकादश्यांनभुंजीतपक्षयोरुभयोरपीति भोजननिषेध
रूपविधिश्रवणात् तथाचैकादशीमुपवसेदित्युपवासविधिश्रवणाच्च एकादश्यामुपवासोविधीयतेसचाहोरात्र
व्यापीभोजनाभावोदोषाभावविशिष्टः सचोपावृत्तस्तुदोषेभ्यइत्यादिपरिभाषितः तस्यचाकरणेनिंदाश्रव

णात् करणाच्चजीवितपुत्रफलकामाद्यधिकारिकः तत्रच संक्रांत्यामुपवासंचकृष्णैकादशिवासरे चंद्रसूर्य्यग्रहेचैवनंकुर्य्यात्पुत्रवान्गृही इंदुक्षयेर्कसंक्रांतादेकादश्यांसितेतरे उपवासंनकुर्वीतयदीच्छेत्संततिंध्रुवं संक्रांत्यामुपवासेनपारणेनयुधिष्ठिर एकादश्यांतुकृष्णायांज्येष्ठपुत्रोविनश्यति इत्यादिस्मृत्यापुत्रवतांगृहस्थानांकृष्णेकादश्युपवासोनिषिध्यते तथाच शयनीबोधिनीमध्येधाकृष्णैकादशीभवेत् सैवोपोष्यागृहस्थेननान्याकृष्णाकदाचनेत्यादि भविष्योत्तरवचने नान्यासामष्टकृष्णैकादशीनांगृहस्थमात्रप्रतिनिषेधेसिद्धे हरिशयनालिंगितादिविष्णुवचनेनापुत्रगृहस्थानांनतत्फलकामनोदये चतसृषुहरिशयनालिंगितासुकृष्णासु अधिकारइतिनिर्गलितं अतएव एकादश्यांनभुंजीतपक्षयोरुभयोरपि वनस्थयतिधर्मोयंशुक्लामेवसदागृहीतिविष्णुधर्मवाक्यात् शुक्लैवगृहस्थानांनित्यातत्रैच यानिकानिचपापानीत्यादयोऽर्थवादाःशतशःसंत्येव अथकाम्यान्येकादशीव्रतानि तत्रनरसिंहपुराणे एकादश्यांनरश्रेष्ठउपवासोविधीयते नरसिंहंसमभ्यर्च्य सर्वपापैःप्रमुच्यते सर्वपापैःप्रमुच्यतेइत्यर्थवादान्मुक्तिरभिधीयते श्रीभगवद्वाक्यं मच्छयनेमदुत्थानेमत्पार्श्वपरिवर्त्तनं पयोमूलंफलाहारीहृदिशल्यंममार्पति तस्मादवश्यमत्रोपोषणंविधातव्यमितिवाक्यार्थः ब्रह्मपुराणे एकादश्यामुभेपक्षे निराहारः समाहितः स्नात्वासम्यग्विधानेनधौतवासाजितेंद्रियः स्तोत्रैर्नानाविधैर्दिव्यैर्गीतैर्वाद्यैर्मनोहरैः दंडत्प्रणिपातैश्चजयशब्दैस्तथोत्तमैः एवंसंपूज्यविधिवद्रात्रौकृत्वाप्रजागरं कथयागीतकान्विष्णोर्गायंतोविष्णुतत्पराः नारदीयेमांधातारंप्रतिवासिष्ठः एकादशीसमुत्थेनवन्हिनापातकेंधनं भस्मतांयातिराजेंद्रप्राप्यतेहरिमंदिरं रात्रौजागरणंकृत्वासमुपोष्यहरेर्दिनं दशैवमातृकेपक्षेदशैवपितृपक्षके प्रियायादशपक्षेचपुरुषानुद्धरेन्नरः आत्मनासहराजेंद्रनयतेवैष्णवंपदं तेह्ववाहवोनित्यंनित्यंनागारिवाहनाः स्त्रग्विनः

पीतवासाश्चप्रयांतिहरिमंदिरं वाराहपुराणे एकादश्यांनिराहारोयेभुंक्तेद्वादशीदिने शुक्लावायदिवाकृ
ष्णातद्व्रतंवैष्णवंमहत् एतद्विद्वन्सुघोराणिहंतिपापानिपार्थिव अत्रद्वादशीभोजनश्रवणात् द्वादशीपारणपर्यंत
मिदंव्रतं तत्रैवभविष्यपुराणे पारणंतुत्रयोदश्यां यःकरोतिनराधमः द्वादशद्वादशींहंतिनात्रकार्यावि
चारणा स्कंदपुराणे यद्वाभवेदतीवाधोद्वादशीपारणादिने प्रातरेवतदाकुर्यात्कर्ममाध्याह्निकंचयत् देव
लोपि संकेटनियमानेतुपारणंतुभवेत्कथं आदिस्तुपारणंकुर्य्यात्पुनर्भोक्तुर्नदोषभाक् पारणायोग्यद्वादश्यलाभे
वायुपुराणे कलाप्येकादशीयत्रपरतोद्वादशीनचेत् पुण्यंक्रतुशतस्योक्तंत्रयोदश्यांतुपारणं अत्रकानिचि
न्नियमानि ब्रह्मपुराणे कांस्यंमांससुरांक्षौद्रंलोभंवितथभाषणं व्यायामंचविवासंचादेवास्वप्नमथांजनं शि
लापिष्ठंमसूरंचद्वादशैतानिवैष्णवाः द्वादश्यांवर्जयेन्नित्यं सर्वपापैःप्रमुच्यते पुनर्भोजनमध्वानंभारमा
याममैथुनं उपवासफलंहन्याद्दिवानिद्राचपंचमी वृहस्पतिरपि दिवानिद्रापरान्नंचपुनर्भोजनमैथुने क्षौद्रं
कांस्यामिषंतैलंद्वादश्यामष्टवर्जयेत् एकादश्यांश्राद्धेसतिश्राद्धशेषभोजनप्रतिपत्तिरंगं तद्यथा श्राद्धंकृत्वा
तुयोमोहान्नभुंक्तेथकदाचन अकृतंतद्भवेच्छ्राद्धंपितृहाचोपजायते तन्मतेपितदाहारंविनैवश्राद्धेसिद्धेरनन्यगतिकत्वा
त्तदाजिघ्रेदितिसंप्रदायविदः उपवासोयदानित्यः श्राद्धंनैमित्तिकंभवेत् उपवासंतदाकुर्य्यादाजिघ्रेत्पितृसे
वितमिति वाराहपुराणवचनात् उपवासाशक्तौ एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनभैक्ष्येणनैवद्वादशिको
भवेदिति व्रतस्यानित्यतापादनं अत्राप्यशक्तौप्रतिनिधयः असामर्थ्येशरीरस्यव्रतेचसमुपस्थिते कारयेद्धर्म
पत्नींवापुत्रंवाविनयान्वितं भ्रातरंभगिनींशिष्यंब्राह्मणंदक्षिणादिभिः उपवासोव्रतंतीर्थंजपहोमादिकंचयत् वि
प्रैः संपादितंयस्य संपन्नंतस्यतत्फलमिति काम्यव्रतविधिमाहविष्णुः मार्गशुक्लैकादश्यांसमुपोषितो द्वा

दश्यांभगवंतंवासुदेवमभ्यर्चयेत् पुष्पधूपानुलेपनदीपनैवेद्यैर्वह्निब्राह्मणतर्पणैर्व्रतमेतत्संवत्सरंकृत्वा पापेभ्यः पूतोभवति यावज्जीवंकृत्वाश्वेतद्वीपमवाप्नोति उभयपक्ष द्वादशीष्वेवंसंवत्सरंकृत्वास्वर्गलोकं यावज्जीवंकृत्वाविष्णुलोकं अत्रयद्यपिएकादश्यामुपोषितइत्युक्तं तथापिद्वादशीपूजायाः प्रधानस्यानुरोधात् यत्रद्वादशीत्रुटिता तत्रपूर्वदिनेएकादशीव्यतिरिक्तेनोपवासः कर्त्तव्यः पूजाहोमादितुवासुदेवपदेनैवश्रुतिबलात् इदंतुप्रतिशुक्लद्वादशीवत्सरांतमेकंयावज्जीवमपरं प्रत्युभयद्वादशीवत्सरांतमेकंयावज्जी.वमपरमितिचतुष्टयंकाम्यचेदंफलश्रवणात् श्वेतद्वीपश्चवैष्णवोपभोग्यः क्षीराब्धितीररूपः सचभारतीयनारायणोपाख्यानेप्रपंचितः अत्रपूजाच उँनमोभगवतेवासुदेवायेत्यनेननमोंतेनस्वाहांतेनचहोमः कार्य्यः होमेवव्हाहुतयः ब्राह्मणाअपिबहवो भोज्याःउभयत्रबहुत्वानुरोधात् मत्स्यपुराणे द्वादशद्वादशीर्यस्तुसमाप्नोपोषणैःपुनः गोवस्त्रकांचनैर्विप्रान्भोजयेद्भक्तितोनृप रम्यंपदमवाप्नोतिविष्णुव्रतमिदंस्मृतं अत्रद्वादशद्वादशीशुक्लाःसमाप्येत्यर्थः विष्णुः पितृमातृपतिभ्रातृस्वसृगुर्वादिभूभुजां अदृष्टार्थमुपोष्यापिस्वयंचफलभाग्भवेत् अत्रानुकल्पउक्तोवायुपुराणे उपवासानिषेधनर्किंचिद्भक्ष्यंप्रकल्पयेत् नदुष्यत्युपवासंतुउपवासफलंलभेत् तथाप्रोक्तं नक्तंहविष्यान्नमनोदनं वाहविस्तिलाःक्षीरमथांवुचाज्यं यत्पंचगव्यंयदिवापिवायुः प्रशस्तमत्रोत्तरमुत्तरंच एतेषांसमूलत्वेपिअधिकारिश्रुतेर्यत्रैवव्रतेविशेषस्तद्विषयत्वं तथैवद्वादशीव्रतस्याविष्णवादौदर्शनात् देवी.पुराणे केशव १ नारायण २ माधव ३ गोविंद ४ विष्णु ५ मधुसूदन ६ त्रिविक्रम ७ वामन ८ हृषीकेश ९ पद्मनाभ १० वासुदेव ११ दामोदरान्पूजयेत् युधिष्ठिरउवाच परिम्लुचस्यमासस्यकावाएकादशीभवेत्किंनामकोविधिस्तस्याः कथयस्वजनार्दन श्रीकृष्णउवाच मलमासस्ययापुण्याप्रोक्तानाम्नाचपद्मिनी सोपोषिता

४३ 43

प्रयत्नेनपद्मनाभपुरंनयेत् मलमासेमहापुण्याकीर्त्तिताकल्मषापहा तस्याःफलंकथयितुंनशक्तश्चतुराननःनारदायपुराप्रोक्तंविधिनाव्रतमुत्तमम् पद्मिन्याःपापराशिघ्नंभुक्तिमुक्तिफलप्रदं श्रुत्वावाक्यंमुरारेस्तुप्रोवाचातिमुदान्वितः युधिष्ठिरोजगन्नाथंविधिंपप्रच्छधर्मवित् श्रुत्वाराज्ञस्तुवचनंप्रत्युत्फुल्लांबुजेक्षणः शृणुराजन्प्रवक्ष्यामिमुनीनामप्यगोचरं दशमीदिवसेप्राप्तेव्रतारंभोविधीयते कास्यंमांसमसूरांश्चचणकान्कोद्रवांस्तथा शाकंमधुपरान्नंचदशम्यांदशवर्जयेत् हविष्यान्नंचभुंजीतअक्षारलवणंतथा भूमिशायीब्रह्मचारीभवेच्चदशमीदिने एकादशीदिनेप्राप्ते प्रातरुत्थायसादरं विधायचमलोत्सर्गंनकुर्य्याद्दंतधावनं गंडूषान्द्वादशान्कृत्वाशुचिर्भूत्वासमाहितः सूर्योदयेशुभेतीर्थेस्नानार्थंप्रव्रजेत्सुधीः गोमयंमृत्तिकागृह्यतिलान्दर्भान्शुचिस्थलात् चूर्णैरामलकीभूतैर्विधिनास्नानमाचरेत् उद्धृतासिवराहेणकृष्णेनशतबाहुना मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता त्वंमेकुरुपवित्रांगंलग्नानेत्रशिरोरुहे हरिपूजनयोग्यंमांमृत्तिकेकुरुतेनमः सर्वौषधिसमुत्पन्नंगवोदरमधिष्ठितंपवित्रकरणंभूमेर्माणवंयत्तुगोमयं ब्राह्मष्टीवनसंभूताधात्रीभुवनपावनी संस्पृष्टापावयांगंमोनिर्मलंकुरुतेनमः देवदेवजगन्नाथशंखचक्रगदाधर देहिविष्णोममानुज्ञांनवतीर्थावगाहने वारुणांश्चजपेन्मंत्रान्स्नानंकुर्याद्विधानतः गंगादितीर्थंसंस्मृत्ययत्रकुत्रजलाशये पश्चात्संमार्जयेद्गात्रंविधिनानृपसत्तम मुखेपृष्ठेचहृदयेबाहोशिरसिचाप्यधः परिधायसुखंवासोशुक्लंशुचिह्यखंडितं ततःकुर्य्याद्धरेःपूजांमहापापंविनश्यति संध्यामुपास्यविधिनातर्पयित्वापितॄन्सुरान् हरेर्मंदिरमागम्यपूजयेत्कमलापतिं स्वर्णमाषकृतंदेवंराधिकासहितंहरिं पार्वत्यासहितंदेवंपूजयेद्विधिपूर्वकं कुंभोपरिन्यसेद्देवंताम्रपात्रेथमृण्मये दिव्यवस्त्रसमायुक्तेदिव्यगंधानुवासिते तस्योपरिन्यसेत्पात्रंताम्रंरौप्यंहिण्ययं तस्मिन्संस्थापयेद्देवंविधिनापूजयेत्ततः संस्नाप्यसलिलैःश्रेष्ठैर्गंधधूपादिवा

सितैः चंदनागुरुकर्पूरैःपूजयेद्देवमीश्वरं नानाकुसुमकस्तूरीकुंकुमेनासितांबुजैः तत्कालजातैःकुसुमैःपूजयेत्पर
मेश्वरं नैवेद्यैर्विविधैःशक्त्यातथानीराजनादिभिःधूपैर्दीपैःसकर्पूरैःपूजयेत्केशवंशिवं नृत्यंगीतंतदग्रेतुकुर्याद्भक्तिपुरः
सरं नालपेत्पतितात्पापान्तास्मिन्नहनिनस्पृशेत् नानृतंहिवदेद्वाक्यंसत्यपूतंवचोवदेत् रजस्वलांनपश्येतनानिंद
द्ब्राह्मणंगुरुं पुराणंपुरतोविष्णोःशृणुयात्सहवैष्णवैः निर्जलासाप्रकर्त्तव्यायाचशुक्लेमलिम्लुचे जलपानेनवाकुर्य्या
दुग्धाहारेणनान्यथा रात्रौजागरणंकुर्याद्गीतवादित्रसंयुतं प्रथमेप्रहरेपूजानारिकेलार्चमुत्तमं द्वितीयेश्रीफलै
श्चैवतृतीयेबीजपूरकैश्चतुर्थेपूजयेत्पूगैर्नारंगैश्चविशेषतः प्रथमेप्रहरेपुण्यमग्निष्टोमस्यजायते द्वितीयेवाजपेयस्यतृ
तीयेहयमेधजं चतुर्थेराजसूयस्यजाग्रतोजायतेफलं नातःपरतरंपुण्यंनातःपरतरामखाः नातःपरतराविद्यानातः
परतरंतपः पृथिव्यांयानितीर्थानिपुण्यान्यायतनानिच तत्स्नातानिचदृष्टानियेनाकारिहरेर्व्रतम् एवजागर
णंकुर्याद्यावत्सूर्योदयोभवेत् सूर्योदयेशुभेतीर्थेगत्वास्नानंसमाचरेत् स्नात्वैवागत्यभवनेपूजयेद्देवमीश्वरं पूर्वो
दितेनाविधिनाभोजयेद्ब्राह्मणाञ्छुभान् कुंभादिकंचयत्सर्वंप्रतिमांकेशवस्यच पूजयित्वाविधानेनब्राह्मणायस
मर्पयेत् एवंविधंव्रतंयोवैकुरुतेभुविमानवः सफलंजायतेतस्यव्रतंमुक्तिफलप्रदं एतत्तेसर्वमाख्यातंयत्पृष्टोहं
त्वयानृप मलिम्लुचस्यमासस्यशुक्लायाविधिमुत्तमम् पद्मिन्याःप्रीतियुक्तोयःकुरुतेव्रतमुत्तमम् व्रतानितेनची
र्णानिसर्वाणिनृपनंदन कृष्णायामलमासस्यविधिस्तस्यापितादृशः परमासातुविज्ञेयासर्वपापक्षयंकरी अ
त्रतेकथयिष्यामिकथामेकांमनोरमां नारदायपुलस्त्येनविस्तरेणनिवेदिताम् कार्त्तवीर्येणकारायांनिक्षिप्तंवीक्ष्य
रावणं विमोचितःपुलस्त्येनयाचयित्वामहीपतिं तदाश्चर्यंतदाश्रुत्वानारदोदिव्यदर्शनः पप्रच्छचयथाभ
त्त्यापुलस्त्यंमुनिपुंगवं दशाननेनाविजिताःसर्वेदेवाःसवासवाः कार्त्तवीर्येणविजितःकथंरणविशारदः नारदस्य

वचःश्रुत्वापुलस्त्योमुनिरब्रवीत् शृणुवत्सप्रवक्ष्यामिकार्त्तवीर्यसमुद्भवम् पुरात्रेतायुगेराजन्माहिष्मत्यांम
हत्तरः हैहयानांकुलेजातःकृतवीर्योमहीपतिः सहस्त्रंप्रमदास्तस्यनृपस्यप्राणवल्लभाः नतासांतनयंकिंचिल्ले
भेराज्यधुरंधरं यजन्देवान्पितॄन्सिद्धान्प्राचिकित्सामहत्तरान् तेषांवाक्याद्व्रतंकुर्वन्नलब्धस्तनयस्तदा सुतंवि
नातदाराज्यंनसुखायमहीपते क्षुधितस्ययथाभोगानभवंतिसुखप्रदाः विचार्यचित्तेनृपतिस्तपस्तप्तुंमनोदधे
तपसैवसदासिद्धिर्जायतेमनसेप्सिता इत्युक्त्वासौसभार्यश्चचीरवासाजटाधरः तपस्तप्तुंगतःसद्योगृहेन्यस्यसुं
मंत्रिणं निर्गतंनृपतिंवीक्ष्यपद्मिनीप्रमदोत्तमा हरिश्चंद्रस्यतनयाइक्ष्वाकुकुलसंभवा पतिव्रताप्रियंदृष्ट्वास्त
पस्तप्तुंकृतोद्यमं भूषणानिपरित्यज्यचीरमेकंसमाश्रयत् जगामपतिनासार्धंपर्वतेगंधमादने गत्वातत्रतप
स्तेपेवर्षाणामयुतंनृपः नलेभेतनयंराजाध्यायन्देवंगदाधरं अस्तिस्नायुमयंकांतंदृष्ट्वासाप्रमदोत्तमा अनुस
यांमहासाध्वींपप्रच्छविनयान्विता भर्तुःप्रतपतःसाध्विवर्षाणामयुतंगतं तथापिनप्रसन्नोभूत्केशवःकष्टनाशनः
व्रतंमममहाभागेकथयस्वयथातथं येनप्रसन्नोभगवान्ममभक्त्याप्रजायते येनमेजायतेपुत्रश्चक्रवर्तीमहत्तरः
श्रुत्वातस्यास्तुवचनंपतिव्रतपरायणा यंप्रव्रजंतंनृपतिंस्वयंप्रव्राजदीक्षितं तदाप्रोवाचसंतुष्टापद्मिनीपद्मलोचना
स्नात्वामलिम्लुचेसुभ्रुमासद्वादशसंमितं द्वात्रिंशद्दिनैश्चभवतिमासःपूर्णःशुभानने तन्मध्येद्वादशीयुग्मंपद्मिनी
परमातथा उपोष्यातत्प्रकर्त्तव्यंविधिनाजागरैःसमम् शीघ्रंप्रसन्नोभगवान्भविष्यतिसुतप्रदः इत्युक्त्वाक
थयत्सर्वंमयापूर्वोदितंनृपं विधिंव्रतस्यविधिवत्प्रसन्नाकर्दमांगजा श्रुत्वाव्रतविधिंसर्वंयथोक्तमनुसूयया चक्रे
राज्ञीचतत्सर्वंपुत्रप्राप्तिमभीप्सती एकादश्यांनिराहारासदाजाताचनिर्मला जागरेणयुतारात्रौगीतनृत्यसमन्विता
पूर्णेव्रतेचवैशीघ्रंप्रसन्नःकेशवःस्वयं वभाषेगरुडारूढोवरंवरयशोभने श्रुत्वावाक्यंजगद्धातुःस्तुत्वाप्रीत्याशु

चिस्मिता यथाबेद्यवरंब्रूहिममभर्तुर्महत्तरं पद्मिन्यास्तद्वचःश्रुत्वाकृष्णःप्रीतःप्रियंवदां त्वयाहंतोषितोभद्रे प्रत्युवाचजनार्दनः मलिम्लुचश्चमासोसौनान्योमेप्रीतिदायकः तन्मध्येकादशीरम्याममप्रीतिविवर्धना सात्वयोपोषितासुभ्रुयथोक्तविधिनाशुभे तेनत्वयाप्रसन्नोहंकृतोस्मिसुभगानने तवभर्तुःप्रदास्यामिवरंयन्मनसेप्सितं इत्युक्त्वानृपतिंप्राहविष्णुर्विश्वार्तिनाशनः वरंवरयराजेंद्रयत्तेमनसिकांक्षितं संतोषिताहंप्रियययातवसिद्धिचिकीर्षया श्रुत्वातद्वचनंविष्णोःप्रसन्नोनृपसत्तमः वव्रेसुतंमहाबाहुंसर्वलोकनमस्कृतम् नदेवैर्मानुषैर्नागैर्दैत्यदानवराक्षसैः जेतुंशक्योजगन्नाथविनात्वांमधुसूदन इत्युक्तोवाढमित्युक्त्वातत्रैवांतरधीयत नृपोपिसुप्रसन्नात्माहृष्टःपुष्टःप्रियायुतः समायात्स्वपुरंरम्यनरनारीमनोरमं सपद्मिन्यांसुतंलेभेकार्त्तवीर्यमहाबलं नतेनसदृशःकश्चित्त्रिषुलोकेषुमानवः तस्मात्पराजितःसंख्येरावणोदशकंधरः नतंजेतुंसमर्थोस्तित्रिषुलोकेषुकश्चन विनानारायणंदेवंचक्रपाणिंगदाधरं नत्वयाविस्मयःकार्योरावणस्यपराजये मलिम्लुचप्रसादेनपद्मिन्याश्चाप्युपोषणात् दत्तोदेवाधिदेवेनकार्त्तवीर्योमहाबलः इत्युक्त्वाप्रययौविप्रःप्रसन्नेनांतरात्मना श्रीकृष्णउवाच ॥ एतत्तेसर्वमाख्यातंयत्पृष्टोहंत्वयानघ मलिम्लुचस्यमासस्य शुक्लायाः संभवोमहान् येकरिष्यंतिमनुजास्तेयास्यंतिहरेःपदं त्वमेवंकुरुराजेंद्रयदिचेष्टमभीप्ससिकेशबस्यवचःश्रुत्वाधर्मराजोतिहर्षितः चक्रेव्रतंविधानेनवंधुभिःपरिवारितः ॥ सूतउवाच ॥ एतत्तेसर्वमाख्यातंयत्पृष्टोहंपुराद्विज पुण्यंपवित्रंपरमंकिंभूयःश्रोतुमिच्छसि एवंविधंयेपिव्रतंमनुष्याभक्त्याकरिष्यंतिमालिम्लुचस्य उपोषितायैस्तुसुखप्रदात्रीयाशुक्लपक्षेभुवितेपिधन्या श्रोष्यंतियेतस्यविधिंसमग्रांतेप्यंशभाजोमनुजाःप्रशस्ताः येवैपठिष्यंतिकथांसमग्रांतेवैगमिष्यंतिहरेर्निवासं ॥ इतिश्रीअधिकशुक्लाएकादशीसमाप्ता ॥ अथअधिककृष्णाएकादशीकथा ॥ युधिष्ठिर

उवाच ॥ मलिम्लुचस्यमासस्यकृष्णाकाकथ्यतेविभो किंनामकोविधिस्तस्याःकथयस्वजगत्पते ॥ श्रीकृष्ण उवाच ॥ परमेतिसमाख्यातापवित्रापापहारका भुक्तिमुक्तिप्रदान्नृणांस्त्रीणांचापियुधिष्ठिर पूर्वोक्तविधिना कार्यायाकृष्णैकादशीजनैः पूजयेत्परयाभक्त्यानाम्नादेवंनरोत्तमं अत्रतेकथयिष्यामिकथामेतांमनोरमां कांपिल्पनगरेजातांमुनीनामग्रतःश्रुतां आसीद्द्विजवरःकश्चित्सुमेधानामधार्मिकः तस्यपत्नीपवित्राख्यापातिव्रत्यपरायणा कर्मणाकेनचिद्विप्रोधनधान्यविवर्जितः नक्कापिलभतेभिक्षांयाचन्नपिपरान्बहून् नभोज्यंलभतेतादृङ्नवस्त्रंनैवमंडनं रूपयौवनमाधुर्यैनारीशुश्रूषतेपतिं अतिथिंपूजयेत्क्कापितदासाक्षुधितागृहे इष्टंत्वेवविशालाक्षीचाम्लानमुखपंकजा विलोक्यभार्यांसुदतींकर्षतींस्वकलेवरं नभर्त्तारंक्कचिच्चैवनास्त्यन्नमितिभाषते विचार्यब्राह्मणश्चिरंभार्यायाःप्रेमबंधनं निंदन्भाग्यंस्वकंविप्रःप्रोचेवाक्यंप्रियंवदां कांतेकरोमिकिंकार्यंनमया लभ्यतेधनं याचयामिनरान्भव्यान्नयच्छंतिचमेधनं किंकरोमिक्कगच्छामित्वांमेकथयशोभने विनाधनेनसुश्रोणिगृहकार्यंनासिद्ध्यति देह्याज्ञांपरदेशायगच्छामिधनलब्धये यस्मिन्देशेचयत्प्राप्यंभाग्यंतत्रैवलभ्यते उद्यमेनविनासिद्धिःकर्मणांनोपलभ्यते तस्माद्बुधःप्रशंसंतिसर्वथैवशुभोद्यमं श्रुत्वाकांतस्यवचनंसाश्रुनेत्राविचक्षणा प्रोवाचप्रांजलिर्भूत्वाविनयानतकंधरा त्वत्तोनास्तिसविज्ञातात्वयाज्ञाताब्रवीम्यहं हितैषिणोनराब्रूयुःशश्वत्साधुह्यसाध्वपि पूर्वदत्तंहिलभ्येतयत्रकुत्रमहीतले विनादानंनलभ्येतमेरौकनकपर्वते पूर्वदत्ताहियाविद्यापूर्वदत्तंहियद्धनं पूर्वदत्ताहियाभूमिरिहजन्मनिलभ्यते यद्धात्रालिखितंभालेतत्तत्रैवाहिलभ्यते विनादत्तेनकिंक्कापिलभतेनैवाकिंचन पूर्वजन्मनिविप्रेंद्रनमयानत्वयाक्कचित् सत्पात्राणांकरेदत्तंस्वल्पंभूर्यपिसद्धनं इहदेशपरेवापिदत्तंसर्वत्रलभ्यते अन्नमात्रंतुविश्वेशोविनादत्तेनयच्छति तस्मादत्रैवविप्राग्र्यस्थातव्यंभवतामया भव

द्विनानतिष्ठामिक्षणमात्रंमहामुने नमातानपिताभ्रातानश्वश्रूःश्वशुरोजनः नसत्कुर्वंतितांकेपिस्वजनाश्चापरे कुतः भर्तृहीनांविनिंदंतिदुर्भगेतिवदंतितां तस्मादत्रस्थिरोभूत्वाविहरस्वयथासुखं भवतोभाग्ययोगेनप्राप्तिश्चात्रभविष्यति श्रुत्वातस्यास्तुवचनंस्थितस्तत्रविचक्षणः तावत्तत्रसमायातःकौंडिन्योमुनिसत्तमः दृष्ट्वासमागतंहृष्टःसमेधाद्विजसत्तमः सभार्यःसहसोत्थायनमामाशिरसासकृत् धन्योस्म्यनुगृहीतोस्मिसफलंजीवितं मम यद्दृष्टोसिमहद्भाग्यादित्युवाचमुनीश्वरं दत्त्वासुविष्टरंतस्मैपूजयामासतंद्विजं भोजयित्वाविधानेपप्रच्छप्रमदोत्तमा विद्वन्केनप्रकारेणदारिद्र्यस्यक्षयोभवेत् विनादत्तंकथंलभ्येद्धनंविद्यांकुटुंबिनीं मांमेभर्त्तापरित्यज्यगंतुकामोद्यवर्त्तते अन्यदेशेपरान्लोकान्याचितुंपरपत्तने रक्षितोस्तिमयाविद्वन्हेतुवाक्यैर्महत्तरैः नादत्तंलभतेकिंचिदित्युक्त्वासनिवारितः ममभाग्यान्मुनींद्राद्यत्वमत्रैवसमागतः त्वत्प्रसादाद्दरिद्रंमेशीघ्रंनश्यत्यसंशयं केनोपायेनविप्रेंद्रदारिद्र्यंनश्यातिध्रुवं कथयस्वकृपासिंधोव्रतंतीर्थंजपादिकं श्रुत्वातस्याःसुशीलायाभाषितंमुनिपुंगवः प्रोवाचप्रवरंचित्तेविचार्यव्रतमुत्तमं मलिम्लुचेमहाभागेव्रतानामुत्तमंव्रतं सर्वपापौघशमनंदुःखदारिद्र्यनाशनं परमानामविख्याताविष्णोस्तिथिरनुत्तमा मलिम्लुचेतुयाकृष्णाभुक्तिमुक्तिफलप्रदा तस्यामुपोषणंकृत्वाधनधान्ययुतोभवेत् विधिनाजागरैःसाकंगीतवादित्रसंयुतं धनदेनपुराचीर्णंव्रतमेतत्सुशोभनं तदाहृष्टेनरुद्रेणधनानामधिपःकृतः हरिश्चंद्रेणचकृतंपुराक्रीतंसुतेनवै पुनःप्राप्ताप्रियातेनराज्यंनिहतकंटकं तस्मात्कुरुविशालाक्षिव्रतमेतत्सुशोभनं विधिनाविधियुक्तेनसमंजागरणेनच इत्युक्तातद्विधिंसर्वंकथयामासवाडवः प्रीत्यापरमसंतुष्टस्ततोभक्त्याप्रसादितः पुनःप्रोवाचतंविप्रंपंचरात्रव्रतंशुभं यस्यानुष्ठानमात्रेणभुक्तिर्मुक्तिश्चप्राप्यते परमादिवसेप्रातःकृत्वापूर्वाह्निकंविधिं कुर्यात्सुनियमान्शक्त्यापंच.

रात्रव्रतादरात् प्रातःकृत्वानिराहारोयास्तिष्ठेद्दिनपंचकं सगच्छेद्वैष्णवंस्थानंपितृमातृप्रियायुतः एकाशनस्तुयोभूयाद्दिनानांपंचकंनरः भोजितंतेनविधिनासदेवासुरमानुषं पूर्णकुंभंतुतोयेनयोददातिद्विजातये दत्तंतेनैवसकलंब्रह्मांडंसचराचरं तिलपात्रंतुयोदद्याद्ब्राह्मणायविपश्चिते तिलसंख्यावसेत्स्वर्गेसनरोनाकमंडले घृतपात्रंतुयोदद्यात्स्नात्वापंचदिनंनरः सभुक्त्वाविपुलान्भोगान्सूर्यलोकेमहीयते ब्रह्मचर्येणयस्तिष्ठेद्दिनानांपंचकंनरःसस्वर्गेभुंजतेभोगान्स्वर्वेश्याभिःसमंमुदा एवंविधंव्रतंसाध्विकुरुत्वंपतिनाशुभे धनधान्ययुताभूत्वास्वर्गंयास्यतिसुव्रते इत्युक्त्वासाव्रतंचक्रेकौंडिन्येनयथोदितं भर्त्रासमंभावयुतास्नात्वामासिमलिम्लुचे पंचरात्रव्रतेपूर्णेपरायाःप्रियसंयुतासापश्यद्राजभवनादायांतंनृपनंदनं दत्त्वानवीनंभुवनंदिव्यवस्तुसमन्वितम् वासयामासविधिनाविधिनाप्रेरितास्वयं दत्त्वाग्रामंवृत्तिकरंब्राह्मणायसुमेधसे प्रसन्नस्तपसाराजासंस्तुत्वास्वगृहंययौ मलिम्लुचस्यमासस्यपरायाःपरमादरात् कृष्णाह्युपोषणात्सद्यःपंचरात्रव्रतेनच सर्वपापविनिर्मुक्तःसर्वसौख्यसमन्वितः भुक्त्वाभोगान्प्रियासार्धमंतेविष्णुपुरंययौ येकरिष्यंतिमनुजाःपरायाव्रतमुत्तमं पंचरात्रभवंपुण्यंमयावक्तुंनशक्यते पुष्कराद्यानितीर्थानिगंगाद्यासरितस्तथा धेनुमुख्यानिदानानितेनचीर्णानिसर्वथा गयाश्राद्धंकृतंतेनपितरःपरितोषिताः व्रतानितेनचीर्णानिव्रतखंडोदितानिवै द्विपदांब्राह्मणःश्रेष्ठोगौर्वरिष्ठाचतुष्पदां देवानांवासवःश्रेष्ठस्तथामासोमलिम्लुचः मलिम्लुचेपंचरात्रंमहापापहरंस्मृतं पंचरात्रेचपरमापद्मिनीपापशोषिणी साप्यशक्तैःप्रकर्त्तव्यायथाशक्त्याविचक्षणैः मानुषंजनुरासाद्यनस्नातोयैर्मलिम्लुचः तेजन्मघातिनोनूनंनोपोष्यंतिहरेर्दिनं चतुराशीतिलक्षाणिकामंतेयोनिसंकटे प्राप्यतेमानुषंजन्मदुर्लभंपुण्यसंचयैः तस्माकार्य्यंप्रयत्नेनपरमायाव्रतंशुभम् ॥ **श्रीकृष्णउवाच** ॥ एतत्तेसर्वमाख्यातंयत्पृष्टोहंत्वयानघमलिम्लुचस्य

मासस्यपरमायाःसमुद्भवं तत्सर्वंतेसमाख्यातंशृणुष्वावहितोनृप श्रुत्वैतद्यदुपतिनोदिततंतद्विप्रायद्विजमुनिनातथाकरोच्च भक्त्यासौदिविभुविदुर्लभांश्चभोगान्नितोसौसुरवरमंदिरंसुहृष्टः येप्येवंभुविमनुजामलिम्लुचस्य सुस्नाताःशुभविधिनाव्रतंचरंति तेभुक्त्वाभुविविभवंसुरेंद्रतुल्यंगच्छयुस्त्रिभुवनवंदितस्यगेहम्

इतिश्रीअधिकमासकृष्णैकदशीपरानाम्नामाहात्म्यम्

अथाग्निप्रियाचतुर्दशीव्रतम् भविष्योत्तरे श्रीकृष्णउवाच चतुर्दशीमहाराजहुतभुग्दयिताशुभा नष्टस्तदाहव्यवाहःपुनरग्नित्वमाप्तवान् युधिष्ठिरउवाच कथमग्निःपुरानष्टोदेवकार्येह्युपस्थिते केनाग्नित्वंकृतंतेनकथंहिविहितोनलः एतद्वदस्वदेवेशसर्वंहिविदितंतव श्रीकृष्णउवाच पुरासुरामहाराजतारकेणपराजिताः अपृच्छन्विश्वकर्माणंतारकंकोवधिष्यति उवाचसचिरंध्यात्वारुद्रोमाशिशुसंभवः गंगास्वाहाग्नितेजोत्थःशिशुर्दैत्यंवधिष्यति एतच्छ्रुत्वाततोदेवायत्रशंभुःसहोमया प्रणम्यतेतमूचुर्हियदुक्तंब्रह्मणातदा प्रतिपन्नंहिरुद्रेणउमयासहितेनच प्रयत्नमकरोत्तत्रयदुक्तममरैस्ततः दिव्यंवर्षशतंसाग्रंगतकालोथमैथुने न चाप्युपरमस्तत्रतयोरासीत्कथंचन भयंचसुमहत्तेषांदेवानांसमजायत रुद्रोमासंभवोयोवैभविष्यतिमहावलः स दैत्यान्दानवगणान्वधिष्यतिनसंशयः केनकालेनभवितारतोर्विरतिरेतयोः एतद्विचिंत्यप्रहितौदेवैस्तत्रानिलानलौ गतौतौचोमयादृष्टौसमस्थोविषमस्थया अशपच्चतदादेवीदेवान्सर्वान्विलज्जिता यस्मान्मेजनितंविघ्नमपत्यार्थंदिवौकसैः तस्मादपुत्राःसर्वेपिभविष्यथनसंशयः उदतिष्ठत्तदादेवीलज्जितात्रिदिवौकसांअग्नेगृहाणवीर्यंमेसंभृतंसुचिरंहियत् एवमुक्तोहिरुद्रेणनष्टोग्निर्देवसंकुलात् नखस्थोनादवस्थोवानसूर्यस्थोनचानिले दे

वाह्यन्वेषणेयत्नमकुर्वन्नग्निदर्शने कृमिकीटपतंगाश्चपप्रच्छुस्त्रिदिवौकसः हंहोभेकार्भकावह्निर्युष्माभिर्लक्षितः
क्वचित् हेगजाःसात्विकाब्रूतयदिवोविदितोनलः गजाःप्रोचुरितोवन्हिःशीघ्रंशरवनंगतः शशापाग्निर्गजान्
जिह्वाविगुणावोभविष्यति शप्त्वाविनिर्गताश्चाग्निर्वनात्तस्माद्द्रुतंगतः देवाश्चानुग्रहंचक्रुस्तेषांसानुग्रहास्थिताः
संज्ञयाचेष्टयाप्रोक्तंविदितंवोभविष्यति अनुग्राह्यचतान्देवाअपृच्छच्छुकशारिकाः ताऊचुर्वंशमध्येग्निर्गत्वापश्यत
नैपुण्यंनष्टःशशापतानग्निर्विपरीताभविष्यथ सदैवजिव्हायुष्माकंवदतांचास्पुटाक्षरं देवैरनुगृहीतास्तेह्रियमाणा
भविष्यति दृष्ट्वाचविबुधाःसर्वेपक्षिणंपक्षिणांवरं जीवजीवकनामानंभोभोसत्यंवदस्वनः क्वचिद्दृष्टस्त्वया
वन्हिर्वनेस्मिन्चरतासदा नभद्रंवाप्यभद्रंवाकिमिदंचवचोब्रवीत् भूयोभूयोपिपृष्टश्चनान्यांसोच्चारयद्गिरं तु
ष्टस्तदाब्रवीद्वह्निश्चिरंजीवददामिते यस्मान्नकिंचिदुक्तंतेतस्माच्चित्रतनूरुहः जीवंजीवपुनर्जीवदयावदिच्छात
वायुषः द्वितीयंतेवरंदाग्निजीवंजीवकशोभनं व्यक्तातेमानुषीवाचास्फुटार्थाचभविष्यति कश्चिद्यदितवाधस्ता
ह्रदःस्नानंकरिष्यति सप्तधाषोडशाब्दांभःक्षणात्स्नातोभविष्यति मांसंयश्चत्वदीयंवैभक्षयिष्यत्यनिंदितं अ
जरश्चामरश्चैवसर्वकालंभविष्यति एवंदत्त्वावरांस्तस्यवन्हिर्वंशमथाविशत् विबुधाःप्राप्यतत्रैवमपश्यन्वंशम
ध्यगं ऊष्मणाज्ञातकल्माषंज्ञात्वासंहृष्टमानसाः तुष्टावंशमथोचुस्तेदेवास्त्रिभुवनेश्वराः ऊष्मणाकलुषोभू
त्वात्रग्निगर्भंधरिष्यासि यांगृहीवैष्णवोयष्टिंब्रह्मचारीचनैष्ठिकः पंचाग्निपालनेपुण्यंयद्घृष्ठवेदवादिभिः
वहन्कल्मषयष्टिंतप्राप्नोतीहद्विजोत्तमः वंशस्यानुग्रहंकृत्वादेवावन्हिमथाब्रुवन् दह्यमानस्तुतेनाग्नि
गंगायाः प्राक्षिपज्जले दह्यमानोज्झितवतीगंगाशरवनेचतत् तत्रजातोकुमारोसौगंगाग्निहरसंभवः
शक्त्याजघानतंदुष्टंतारकंदैत्यसत्तमं एतत्तेसर्वमाख्यातमग्नेर्नाशस्यकारणम् ॥ युधिष्ठिरउवाच ॥

यदाग्निनष्टोदेवानांकेनाग्नित्वंतदाकृतं भूयोपिकेनकालेनअग्निरग्नित्वमाप्तवान् ॥ श्रीकृष्णउवाच ॥ उतथ्यांगिरसोर्वैरमासीद्व्यतिकरोमहान् अहंविद्यातपोभ्यांवैतथाध्यायश्रुतेनच उतथ्येनैवमुक्तस्तुअंगिराः प्राहतंमुनिं गच्छावोब्रह्मसदनंनिश्चयस्तत्रनौभवेत् तौगत्वाब्रह्मसदनंमरीचिप्रमुखैर्द्विजैः उपेतंचान्यमुनिभिर्ब्रह्माराजर्षिसत्तमैः उतथ्यःप्राहसब्रह्मकानृषींस्तप्तमानसः ज्यायान्वैकोधमोस्माकमिति नौकथ्यतांस्फुटं अथोवाचमुनीब्रह्मातावुभौक्रुद्धमानसौ आनयध्वंद्रुतंगत्वाविबुधान्भुवनेश्वरान् ततोविवादंपश्यामिभवतांतैः समेत्यच ततस्तौसहितौगत्वऋषीन्देवान्समानयत् लोकपालान्महेंद्रादीन्सयमान्वरुणानिलौ स्वाध्यान्मरुद्गणान्विश्वानृषीन्भृग्वत्रिनारदान् गंधर्वान्किन्नरान्यक्षान्राक्षसान्दैत्यदानवान् नायातस्तत्रतिग्मांशुः सर्वेचान्येसमागताः दृष्ट्वाचविबुधान्सर्वान्ब्रह्माप्रोवाचतानृषीन् आनयध्वमितः सूर्यं साम्नावान्येनवापुनः एवमुक्तोगतस्तावदुतथ्यः सूर्यमंडलं सगत्वाप्राहमार्त्तंडशीघ्रमेह्यर्कसंसदं सउतथ्यमथोवाचकथंब्रह्मन्ब्रजाम्यहं तपिष्यतिचकोह्यत्रभुवनंमयिनिर्गते एवमुक्तेमुनिः प्रायाद्यत्रदेवसमागमः आचचक्षेचयत्रोक्तंभास्वतातपनंप्रति उवाचांगिरसंब्रह्मात्वमेनंशीघ्रमानय सतथोक्तोगतस्त्वत्रयत्रासौतपतेरविः एह्येहि भगवन्सूर्यतपिष्येभुवनेष्वहं एवमुक्तोगतः सूर्य्यो यत्रदेवसमागमः स्थित्वामुहूर्त्तंप्रोवाचकिंवाकार्यमुपस्थितं पृष्टंतमेवमार्त्तंडंब्रह्माप्रोवाचसादरं गच्छशीघ्रंनदहतिभुवनंयावदंगिराः दग्धप्रायस्तुगोलोकोवर्त्ततेकृष्णपिंगलः पाटलोहरितः शोणः श्वेतोवर्णः प्रतापतः शाकद्वीपं कुरुद्वीपंक्रौंचद्वीपंसपत्तनं दग्धमंगिरसासर्वंभूयोपिप्रदहिष्यति यावन्नसर्वंदहतिभुवनंतद्वदंगिराः गच्छतावदितःशीघ्रंस्वस्थानेतिष्ठभास्कर एवमुक्तोथतपनःस्वस्थानमधिरूढवान् विसृष्टवानंगिरसंसकाशममृताशिनां गत्वांगिराउवाचेदंब्रूतांकिंकरवाण्यहं

देवाआंगिरसंप्राहुस्तेजोराशिमकल्मषं संप्रणम्योचुरग्निस्त्वंकुरुतावन्महीतले पूर्वंयथाग्निःकृतवान्तथात्वमपिसत्तम यावदग्निंप्रपश्यामःक्वासौनष्टःक्वतिष्ठति एवमुक्तःसदेवैस्तुअग्निस्त्वंकृतवांस्तदा देवैर्दृष्टोथदाह्यग्निस्तैस्तंसर्वंनिवेदितं देवकार्य्येकृतेतस्मिन्देवावह्निमथाब्रुवन् अयेग्निस्त्वंकुरुष्वत्वमंगिरास्तुयथापुराएवमुक्तःसुरैर्वह्निश्चिंतयामासदुःखितः केनमेपहृतंतेजःकेनाग्निस्त्वंकृतंत्विह अथाग्रेंगिरसंदृष्ट्वातेजोराशिमकल्मषं मुंचाद्यःमुंचमेस्थानंवचस्तोषकरंश्रृणु अहंततनयःश्रेष्ठो भविष्येप्रथमोमुने बृहस्पतीतिनाम्नावैतथान्येवहवःसुताः एवमुक्तोमुनिस्तुष्टोवहूनजनयत्सुतान् वन्हीन्सोजनयामासपुत्रान्पौत्रांस्तथांगिराः अवापपुनराग्निस्त्वमग्निरस्यांतिथौनृप सर्वमेवचतुर्दश्यांसंजातंहव्यवाहने हव्यवाहनदेवानांभूतानांगुह्यचारिणा तेनेष्टेयंतिथिस्तस्मैरुद्रेणप्रतिपादिता पूजितेयंतिथिर्देवैर्दिविस्थैश्चनृपैरपि वलिमांधातृमन्वाद्यैरन्यैश्चनहुषादिभिः प्रियाशस्त्रहतानांचसंग्रामेयत्रकुत्रचित् अज्ञाततिथयोयेचव्यालैर्येचापिहिंसिताः नदीप्रवाहेपतिताःसमुद्रेपर्वतेध्वनि येचवैपतितानांचतोयाग्निदहनेमृताःउद्बंधघातिनोयेचयेवैचात्महनोजनाः तेषांशस्तंचतुर्दश्यांश्राद्धंसर्वसुखप्रदम् श्राद्धानिचैवदत्तानिदानानिसुवहून्यपि प्रभूतफलभोज्यानिउपतिष्ठंतितान्नरान् एवंतिथिरियंराजन्नाग्नेयीपठ्यतेद्विजैः अस्यांमनोरथंयंयंसमुद्दिश्यह्युपोषति ददातितस्यतद्वह्निः साग्रेसंवत्सरेगते चतुर्दश्यांनिराहारः समभ्यर्च्यत्रिलोचनं पुष्पधूपादिनैवेद्यैरात्रौजारणेनच पंचगव्यंनिशिप्राश्यस्वपेद्भूमौविमत्सरः श्यामाकानथवाभुक्त्वातलक्षारविवर्जितं होमःकृष्णातिलैःकार्य्यः शतमष्टोत्तरंनृप अग्नयेहव्यवाहायसोमायांगिरसेनमः ततःप्रभातेविमलेस्नाप्यपंचामृतैः शिवं पूजयित्वाविधानेन होमंकृत्वातथैवच उदीरयेन्मंत्रमेनंकृत्वाशिरसिचांजलिं नमस्त्रिमूर्त्तयेतुभ्यंनमःसूर्याग्निरूपिणे पुत्रान्यच्छसुखंयच्छमोक्षंयच्छनमोस्तुते नीराजनंततः

कृत्वा भोजयित्वाद्विजोत्तमान् शक्तितोदक्षिणांदत्त्वा पश्चाद्भुजीतवाग्यतः एवंसंवत्सरस्यांते कृत्वासर्वंयथोदितं सौवर्णंकारयेद्देवंत्रिनेत्रंशूलपाणिनं वृषस्कंधगतंसोमंसितवस्त्रयुगान्वितं चंदनेनानुलिप्तांगं सितमाल्योपशोभितं स्थापयित्वाताम्रपात्रेब्राह्मणायनिवेदयेत् सर्वकालिकमेतत्तेकथितंव्रतमुत्तमं संवत्सरसमाप्तिर्हिव्रतस्यतुयदाभवेत् चीर्णेव्रतेस्मिन्यत्पुण्यंतन्निबोधजनाधिप कालेगतेबहुतिथेतीर्थेचमरणंभवेत् मृतश्च दिव्यदेहस्थोदिव्यालंकारभूषितः दिव्यनारीगणवृतोविमानवरमास्थितः दिविदेवैःपरिवृतःक्रीडतेत्रिपुरेचिरं इहागत्यचकालांतेजातोजातोनृपोभवेत् दातायज्वाकृतीदक्षोब्रह्मण्योब्राह्मणप्रियः श्रीमानग्निसमोधीमान्पुत्रपौत्रसमन्वितः पत्नीगणसमायुक्तश्चिरंभद्राणिपश्यति येदुर्लभाभुविसुरोरगजंगमानांकामाअनामयगुणेनयुताः सदैव तानाप्नुवंतिशिवभूततिथौसुरेशंसंपूज्यसोमतिलकंविधिवन्मनुष्यः इतिभविष्योत्तरेशिवाग्निप्रियचतुर्दशीव्रतम् अथपूर्णिमाव्रतंनारदीये सनकउवाच अन्यद्व्रतवरंवक्ष्येशृणुष्वमुनिसत्तम सर्वपापहरंपुण्यं सर्वदुःखनिवर्हणं ब्राह्मणक्षत्रियविशांशूद्राणांयोषितांतथा समस्तकामफलदंसर्वव्रतफलप्रदं दुःस्वप्ननाशनंधन्यंदुष्टग्रहनिवारणं सर्वलोकेषुविख्यातंपूर्णिमाव्रतमुत्तमं येनचीर्णेनपापानांराशिकोटिः प्रणश्यति मार्गशीर्षेसितेपक्षे पूर्णायांनियतः शुचिः स्नानंकुर्याद्यथाचारंदंतधावनपूर्वकं शुक्लांबरधरः शुद्धो गृहमागत्यवाग्यतः प्रक्षाल्यपादावाचम्यस्मरन्नारायणंशुभं नित्यंदेवार्चनंकृत्वापश्चात्संकल्पपूर्वकं लक्ष्मीनारायणंदेवमर्चयेद्भक्तिभावतः आवाहनासनाद्यैश्चगंधपुष्पादिभिर्व्रती ओंनमोनारायणायेतिपूजयेद्भक्तितत्परः गीतैर्वाद्यैश्चनृत्यैश्चपुराणपठनादिभिः स्तोत्रैराराधयेद्देवंव्रतकृत्सुसमाहितः देवस्यपुरतः कृत्वा ष्टांगुलंचतुरस्त्रकं अरत्निमात्रंतत्राग्निस्थापपेद्गृह्यमार्गतः आज्यभागांतपर्यंतंकृत्वापुरुषसूक्ततः वरुणायतिलैश्चापि

होमंकुर्यात्प्रयत्नेननसर्वपापनिवृत्तये प्रायश्चित्तादि
घृतेनजुहुयात्तथा एकवारंद्विवारंवा त्रिवारंवापिशक्तितः पश्चाद्देवंसमागम्य पुनः पूजांप्रकल्पये
कंसर्वंस्वगृह्योक्तविधानतः होमंसमाप्यविधिवत् शांतिसूक्तंजपेद्बुधः भोक्षामिपुंडरीका
त् तथोपवासंदेवायह्यर्पयेद्भक्तिसंयुतः पौर्णमास्यांनिराहारः स्थित्वादेवतवाज्ञया क्षीरोदा
क्षपरेन्हिशरणंभव इतिविज्ञाप्यदेवायअर्घ्यंदद्यात्तथेंदवे जानुभ्यामवनींगत्वाशुक्लपुष्पाक्षतान्वितं प्रार्थयेत्प्रांजलि
र्णवसंभूतआत्रिगोत्रसमुद्भव गृहाणार्घ्यमयादत्तंरोहिण्यासहितप्रभो एवमर्घ्यंप्रदायेंदोः रोहिणीपतयेतुभ्यं
स्थितः तिष्ठन्पूर्वमुखोभूत्वापश्यन्निंदुंचनारद नमः शुक्लांशवेतुभ्यं द्विजराजायतेनमः पाखंडालोकवार्जितः त
लक्ष्मीश्चात्रेनमोस्तुते ततश्चजागरंकुर्य्यात्पुराणश्रवणादिभिः जितेंद्रियश्चसंशुद्धः ब्राह्मणान्भोजयेद्भक्त्या
तः प्रातः प्रकुर्वीत स्वाचारंचयथाविधि पुनः संपूजयेद्देवं यथाविभवविस्तरं एवंपौषादिमासेषपूर्णमास्यामुपोषितः अ
ततश्चप्रयतोनरः वंधुभृत्यादिभिःसार्धं स्वयंभुंजीतवाग्यतः मंडपंकारयेद्दिव्यंचतुरस्रंसुमंगलं
चंयेद्भक्तिसंयुक्तोनारायणमनामयं एवंसंवत्सरंकृत्वाकार्त्तिक्यांपूर्णिमादिने दर्पणैश्चामरैश्चैव
शोभितंपुष्पमालाभिः पताकाध्वजराजितं बहुदीपसमाकीर्णं किंकिणीजालशोभितं पिधाय
कलशैश्चसमावृतं तन्मध्येसर्वतोभद्रंपंचवर्णविराजितं जलपूर्णंततः कुंभं न्यसेत्तस्योपरिद्विज लक्ष्मीनारायणंदेवंकृत्वातस्योप
कुंभंवस्त्रेणसुसूक्ष्मेणविशोभितं हेम्नावारजतेनापि तथाताम्रेणवाद्विज भक्तितः संयतेंद्रियः जा
रिन्यसेत् पंचामृतेनसंस्नाप्य भ्यर्च्यगंधादिभिः क्रमात् भक्ष्यभोज्यादिनैवेद्यं आचार्य्यायप्रदातव्याप्रतिमा
गरंचतथाकुर्य्यात्सम्यक्श्रद्धासमन्वितः परेन्हिप्रातर्विधिवत्पूर्ववद्विष्णुमर्चयेत् कुर्य्याद
दक्षिणान्विता ब्राह्मणान्भोजयेच्छक्त्याविभवेसत्यवारितं तिलदानंप्रकुर्वीतयथाशक्त्यासमाहितः

ग्नौचविधिवत्तिलहोमंविचक्षणः एवंकृत्वानरःसम्यक् लक्ष्मीनारायणव्रतं इहभुक्त्वामहाभोगान्पुत्रपौत्रसमन्वितः
सर्वपापविनिर्मुक्तः कुलायुतसमन्वितः प्रयातिविष्णुभवनंयोगिनामपिदुर्लभं इतिनारदीयपुराणेपूर्णिमाव्रतम्
अथप्रतिपदादितिथिषुकृत्यविशेषोभविष्योत्तरे ॥ श्रीकृष्णउवाच ॥ तिथिकृत्यमिदानींतेकथयामियुधिष्ठिर
सर्वपापप्रशमनंसर्वविघ्नविनाशनं मानसंवाचिकंवापिकर्मजंयदघंभवेत् सर्वंप्रशममायातिदानेनानेनपांडव
श्रावणेकार्त्तिकेचैववैशाखेफाल्गुनेतथा सितपक्षात्प्रभृतितद्दातव्यंपुण्यवर्धनम् वित्तश्रद्धासहायस्तुपात्रप्राप्ति
स्तथैवच दानकालःसदैवेहकथितस्तत्त्वदर्शिभिः तीर्थेवायतनेगोष्ठेगृहीत्वानियतात्मवान् योददातिनरश्रेष्ठत
दानंत्वायकल्प्यते अग्निमिष्ट्वाचहुत्वाचप्रतिपद्यमितंघृतं हविष्यंसर्वधान्यानिप्राप्नुयादमितंधनं प्रतिपत्सुद्वि
जान्पूज्यपूजयित्वाप्रजापतिं सौवर्णमरविंदंचकारयित्वाष्टपत्रकं कृत्वाचौदुंबरेपात्रेसुगंधघृतपूर्वकं पुष्पैर्धूपैः
पूजयित्वाविप्रायप्रतिपादयेत् अनेनविधिनादत्त्वाकमलंकमलालयाम् ईप्सितांल्लभतेकामान्निष्कामोब्रह्मचा
प्नुयात् ब्रह्माणंचद्वितीयायांसंपूज्यब्रह्मचारिणं भोजयित्वाचविद्यानांसर्वासांपारगोभवेत् वन्हिंपूज्यद्विती
यायांभूर्भुवःस्वरितिक्रमात् तिलाज्येनशतंहुत्वादत्त्वापूर्णाहुतिंततः वैश्वानरंतुसौवर्णंस्थापयेताम्रभाजने गुडाज्य
पूरितेराजंस्तोयपूर्णघटोपरि पूजयित्वावस्त्रमाल्यैर्भक्ष्यभोज्यैरनेकधा ततस्तद्ब्राह्मणेदद्याद्वन्हिर्मेप्रीयतामिति या
वज्जन्मकृतात्पापान्मुच्यतेनात्रसंशयः मृतोवन्हिपुरंयातिप्राहेदंनारदोमुनिः तृतीयायांचावित्तेशंधनाढ्योजाय
तेभृशं क्रयादिव्यवहारेणलाभोबहुगुणोभवेत् तृतीयायांमहाराजगौरींस्वर्णमयींशुभां स्थापयित्वाताम्र
पात्रेलवणोपरिविन्यसेत् वस्त्रैःपुष्पैःपूजयित्वानैवेद्यंविनिवेद्यच ततस्तुब्रह्मणेदद्याद्गुडंपार्श्वेनिवेदयेत् रक्तवस्त्र
युगच्छन्नंकुंकुमेनाविभूषितं पुष्पैर्धूपैःसनैवेद्यैःपूजयित्वाद्विजातये दत्त्वायत्फलमाप्नोतिपार्थतत्केनगण्यते प्रासाद।

यत्रसौवर्णा नद्यःपायसकर्दमाः गंधर्वाप्सरसोन्यत्रतत्रतेयांतिमानवाः स्वर्गादिहैत्यसंसारेसुरूपःसुभगोभवेत् दाताभोक्ताबहुधनःपुत्रपौत्रसमन्वितः नारीवातद्गुणैर्युक्ताभवतीहनसंशयः गणेशःपूजितःकुर्य्याच्चतुर्थ्यांसर्वकर्मसु अविघ्नंविदुषेविघ्नंकार्येचास्यनकर्हिचित् चतुर्थ्यांवारणंहैमंपलादूर्ध्वंसुशोभनं कारयित्वांकुशयुतंतिलद्रोणोपरिस्थितं वस्त्रैःपुष्पैःपूजयित्वानैवेद्यंविनिवेद्यच ततस्तुब्राह्मणेदत्वागणेशःप्रीयतामिति कार्य्यारंभेषुसर्वेषु तस्यविघ्नंनजायते वारणाःसप्तजन्मानिभवंतिमदविह्वलाः वरुणेंद्रसमोलोकेत्रैलोक्यविजयीभवेत् ४ नागानिष्ट्वाचपंचम्यांनविषैरभिभूयते स्त्रियंवालभतेपुत्रंश्रियंचपरमांलभेत् ५ पंचम्यांपन्नगंस्वर्णंस्वर्णेनैकेनकारयेत् क्षीराज्यपात्रमध्यस्थंपूज्यविप्रायदापयेत् द्विजंसंपूज्यवसुभिःप्रणिपत्यक्षमापयेत् इहलोकेपरेचैवदानमेतत्सुखावहं नागोपद्रवशांत्यर्थंसर्वदुष्टनिवर्हणं प्रायश्चित्तमपिप्रोक्तंनागदष्टस्यशंभुना संपूज्यकार्तिकेयंचाद्विजःषष्ठ्यांप्रजापते मेधावीरूपसंपन्नोदीर्घायुःकीर्तिवर्धनः षष्ठ्यांशक्तिसमोपेतंकुमारंशिखिवाहनं कारयित्वायथाशक्तिहेममालाविभूषितं तंडुलद्रोणशिखरेवासोभिःपूज्यशक्तितः नमस्कृत्यततोदद्याद्ब्राह्मणायकुटुंबिने शूद्रोब्राह्मणतामेतिब्राह्मणश्चेष्टलोकभाक् ६ सप्तम्यांपूज्यऋक्षेशंचित्रभानुंदिवाकरं सूर्यलोकमवाप्नोति सूर्येणसहमोदते गंधर्वास्तुष्टिमायांतिदानेनानेनपांडव ७ अष्टम्यांपूजितोदेवोगोभूतावरणोहरः ज्ञानंददातिविपुलंकामान्संयच्छतेगुणान् मृत्युहाज्ञानदश्चैवपापहाचप्रपूजितः ८ अष्टम्यांवृषभस्यैवपृष्ठेगंगाधरंधुरं सितवस्त्रयुगच्छन्नंघंटाभरणभूषितं दद्यात्प्रणम्यविप्रायप्रीयतांवृषभध्वजः प्रदक्षिणांततःकृत्वाअग्रतस्तमनुव्रजेत् दानेनानेनजुषतेशिवलोकंसुदुर्लभं वृषस्कंधेप्रतिष्ठंतिभुवनानिचतुर्दश तस्माद्वृषप्रदानेनदत्ताभवतिभूरियं ८ दुर्गांसंपूज्यदुर्गाणिनवम्यांतरतीच्छता संग्रामेऽव्यवहारेचसदाविजयमादिशेत् नवम्यांकां

चनंसिंहंकारायित्वास्वशक्तितःमुक्ताफलाष्टकयुतंनीलवस्त्रावगुंठितं द्विजातिप्रवरायेत्थंसर्वान्कामानवाप्नुयात् कांतारायनदुर्गेषुचौरव्यालाकुलेपथि हिंसकातंनहिंसंतिदानस्यास्यप्रभावतः मर्त्योदेविपुरंयातिपूज्यमानःसुरासुरैःपुण्यक्षयादिहागत्यराजाभवतिधार्मिकः९दशम्यांधर्मराजश्चसर्वव्याधिहरोध्रुवं नरकादपमृत्योश्चसमुद्धरतिमानवम् १० दशम्यांनृपशार्दूलदशेषाःस्वर्णनिर्मिताः लवनेनगुडक्षीरनिष्पावांबुतिलैस्तथा गव्यत्रयंतंडुलैश्चमाषान्नेनसमन्विताः संपूज्यवस्त्रपुष्पाद्यैर्द्विजायप्रतिपादयेत् अनेनविधिनायस्तुपुमांस्त्रीवाथवापुनः निर्वापयतिराजेंद्र तस्यपुण्यफलंशृणु इहकामानवाप्नोतिप्रीत्यास्वर्गेमहीयते सफलास्तस्यसर्वाशायाःकाचिन्मनसाकृता ततः स्वर्गादिहागत्यकुलेमहतिजायते एकादश्यांयथोद्दिष्टाविश्वेदेवाःप्रपूजिताः प्रजांपशून्धनंधान्यंप्रयच्छंतिमहीं तथा ११ एकादश्यांहरिंमर्त्यःकारयित्वाहिरण्मयं यथाशक्त्याताम्रपात्रघृतेनपरिपूरितं पंचाग्निनिरतंविप्रं पुराणज्ञंविशेषतः दत्वाकिंबहुनोक्तेनविष्णुलोकेमहीयते १२ द्वादश्यांविष्णुमिष्ट्वाचसर्वदाविजयीभवेत् पूज्यश्चसर्वदेवानांयथागोपतिगोहरः गोवृषंमाहषंहेमसप्तधान्यानियानिच पुष्पाणिचपवित्राणिगंधांश्चोच्चावचांस्तथा यथाशक्त्याप्यलंकृत्यवस्त्रेणाच्छाद्यतन्नरः द्वादश्यांद्वादशैतानिब्राह्मणेभ्योनिवेदयेत् एकस्यत्वामहाराजतत्फलंत्वंनिशामय इहकीर्त्तिपरांप्राप्यभुक्ताभोगान्यथेप्सितान् अंतेविष्णुपुरींयातिपूज्यमानोप्सरोगणैः कर्मक्षयादिहागत्यराजाभवतिधार्मिकः यज्ञयाजीदानपतिर्जीवेच्चशरदांशतं कामदेवंत्रयोदश्यांसर्वैश्वर्यसमन्वितः बहुपुत्रोबहुधनस्तथास्यान्नात्रसंशयः १३ स्नापयित्वाब्राह्मणांस्तुत्रयोदश्यांत्रयोदश तान्प्रछाद्यनवैर्वस्त्रैर्गंधपुष्पैस्तथार्पयेत् भोजयित्वातुमिष्टान्नंदक्षिणांविनिवेदयेत् प्रेतनाथायरौद्रायतथावैवस्वतायच यमायचनमस्तेस्तुनमस्तेकर्मसाक्षिणे उच्चार्य्यश्रद्धयायुक्तःप्रणिपत्याविसर्जयेत् यःकरोतिमहाराजपूजा

मेतांमनोरमां यमायससुखंमर्त्यःस्थित्वाव्याधिविवर्जितः यममार्गेनतापंचदुःखमाप्नोत्यसौपुमान् नपश्यतिप्रेत
मुखंपितृलोकंसगच्छति कर्मक्षयादिहागत्यसुखीचपुत्रवान्भवेत् दृष्ट्वेश्वरंचतुर्दश्यांसर्वैश्वर्यसमान्वितः बहुपुत्रोवहु
धनोनरःस्यान्नात्रसंशयः १४ माहेयंचशुभंकुंभंचतुर्दश्यांपयोभृतं सुवर्णेनचसंयुक्तंनववस्त्रविभूषितं घंटा
भरणशोभाढ्यंवृषभेनसमन्वितं योदद्याच्छिवभक्तायब्राह्मणायकुटुंबिने एतद्दत्वानरश्रेष्ठशिवलोकेमहीयते तत्र
स्थित्वाचिरंकालंक्रमादेत्यमहीतले आरोग्यधनसंयुक्तोकुलेमहतिजायते सर्वकामसमृद्धार्थोयावज्जन्मशतत्रयं
१४ पौर्णमास्यांचयःसोमंपूजयेद्भक्तिमान्नरः सर्वैश्वर्यसमायुक्तःकांतिमानभिजायते १५ पौर्णमास्यांवृषोत्स
र्गंकारयित्वाविधानतः चंद्रंराजतनिष्पन्नंपलेनैकेनशोभनं पूजयेद्गंधकुसुमैर्नैवेद्यंविनिवेद्यच दद्याद्विप्रायस
त्कृत्यवासोलंकारभूषणैः मंत्रेणानेनराजेंद्रतन्निबोधनृपोत्तम क्षीरोदार्णवसंभूतत्रैलोक्यगणदीपक उमापते
शिरोरत्नशिवंयच्छनमोनम. दानेनानेननृपतेभ्राजतेचंद्रवद्दिवि अप्सरोभिःपरिवृतोयावदाभूतसंप्लवं १५
।पितरःस्वदिनेपिंडैरिष्टाःकुर्वंतिसर्वदा प्रजावृद्धिंधनंरक्षांमानुष्यंफलमेवच ३० अत्रपितृव्रतंहेमाद्रौवाराहे स
र्गादौब्राह्मणासृष्टास्तमूचुःपितरस्तदा वृत्तिंनोब्रूहिभगवन्कंवर्त्तामहेवयं ब्रह्मोवाच अमावस्यादिनंवोस्तु
तस्यांकुशतिलोदकैः तर्पितामानुषैस्तृप्तिपरांगच्छतनान्यथा तिलोदयास्तथैतस्यामुपोष्यपितृभक्तितः चिरस्य
तस्यसंतुष्टावरंयच्छतमाचिरं तस्मादस्यांतिथौविद्वान्दानमेतत्समाचरेत् उपवासंविनाप्येतेभवंत्युक्तफलप्रदाः
पूजयाजपहोमैश्चतोषिताःशक्तितःसदाइति दानान्यमूनिविधिवत्क्रमशोनरेंद्रयच्छंतियेद्विजवरायविशुद्धसत्वाः
तेब्रह्मविष्णुभुवनेषुसुखंविहृत्ययांत्येकतांसहशिवेननसंशयोमे इतिश्रीभविष्योत्तरोक्तंसकलतिथिकृत्यानि अथ
प्रतिपदादितिथीनांदेवतापूजादिमंत्राः त्वन्नोअग्नेइत्यस्यहिरण्यस्तूपऋषिस्त्रिष्टुप्छंदः त्वन्नोअग्नेवरुणस्यवि

द्वान्देवस्यहेडोअवयासिसीष्टाःयजिष्टोवन्हितमःशोशुचानोविश्वेद्वेषांꣳसिप्रमुमुग्ध्यस्मत् अग्निस्तुस्वर्णवर्णाभः सप्तर्चिःसप्तहस्तकःस्वाहासखोमेषवाहः शक्त्यन्नस्रुक्स्रुवादिधृक् अग्नयेनमः १ द्वितीयायांब्रह्मा ब्रह्मयज्ञानमित्यस्य गौत्तमोवामदेवश्चऋषिस्त्रिष्टुप्छंदः ब्रह्मादेवता ब्रस्तयज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवःसुबुध्न्यउप मास्यविष्ठाशतश्चयोनिमसतश्चविव ब्रह्मणेनमः पद्मासनस्थोजटिलोब्रह्माध्येयश्चतुर्मुखः अक्षमालांस्रुवं विभ्रत्पुस्तकंचकमंडलुं वासःकृष्णाजिनंतस्यपार्श्वेहंसस्तथैवच २ तृतीयायागौरी गौरीमिमायेतिदीर्घतमऋषिः त्रिष्टुप्छंदः गौरीदेवता गौरीमिमायसलिलानि तक्षत्येकपदीद्विपदीचतुष्पदी अष्टापदीनवपदीबभ्रवुवी सहस्राक्षपरमेव्योमन् गौरींशंखेंदुवर्णाभांशर्वरीशनिषेवितां कृष्णपद्मासनासीनांसाक्षसूत्रकमंडलुं वरदांज्ञानरूपांतांसर्वमाल्यप्रियांसदा गौर्य्यैनमः ३ चतुर्थ्यांगणपतिः गणानांत्वेत्यस्यगृत्समदऋषिर्जगतीछंदः गणपतिर्देवता गणानांत्वागणपतिꣳहवामहे प्रियाणांत्वाप्रियपतिꣳहवामहे निधीनांत्वानिधिपतिꣳहवामहे वसोममआहमजानिगर्भधमात्वमजासिगर्भधं पाशांकुशकल्पलतांविषाणंदधच्चतुंडाहितबीजपूरः रक्तस्त्रिनेत्रस्तरुणेंदुमौलिर्हारोज्वलोहस्तिमुखोवताद्वः गणपतयेनमः ४ पंचम्यांनागाः नमोस्तुसर्पेभ्यइत्यस्यप्रजापतिऋषिः अनुष्टुप्छंदः सर्पादेवताः नमोस्तुसर्पेभ्योयेकेचपृथिवीमनुयेअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः सर्पा रक्तास्त्रिनेत्राश्चद्विभुजाःपीतवस्त्रकाः फलकासिधराःश्लक्ष्णाभास्वत्फणविभूषिताः सर्पेभ्योनमः षष्ठ्यांस्कंदः यदस्कंदइतिमेधातिथिऋषिर्गायत्रीछंदः स्कंदोदेवता यदस्कंदःपृथिवीजायमानउद्यत्समुद्रादुतवापुरीषात् श्येनस्यपक्षाहरिणस्यबाहुउपस्तुत्यंमहीजातंतेअर्वन् वराभयकरःसाक्षाद्द्विभुजःशिखिवाहनः किरीटीकुंडलीदेवोदिव्याभरणभूषितः कुमारःषण्मुखोध्येयः शिखंडकविभूषणः पताकावैजयंत्याचशक्तिश्चैवतुवामयोः

कुमारायनमः ॥ ६ ॥ सप्तम्यारविः आकृष्णेतिहिरण्यस्तूपऋषिर्गायत्रीछंदः सूर्योदेवता आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतंमर्त्यंचहिरण्ययेनसवितारथे नादेवोयातिभुवनानिपश्यन् पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः सप्ताश्वरथसंस्थश्चद्विभुजःस्यात्सदारविः सूर्य्यायनमः ॥ ७ ॥ अष्टम्याशिवः त्र्यंबकमितिवशिष्टऋषिर्गायत्रीछंदः रुद्रोदेवता त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं उर्वारुकमिववंधनान्मृत्योर्मुक्षीयमामृतात् पंचवक्त्रोवृषारूढःप्रतिवक्त्रंत्रिलोचनः कपालहस्तःखट्वांगीचंद्रमौलिःसदाशिवः शिवायनमः ॥ ८ ॥ नवम्यादुर्गा अंबेअंबालिकेइत्यस्यप्रजापतिऋषिः अनुष्टुप्छंदः दुर्गादेवता अंबेअंबिकेअंबालिकेनमानयातकश्चनससत्यश्वकः सुभद्रिकांकांपीलवासिनीं कालाभ्राभांकटाक्षैररिकुलभयदांमौलिबद्धेंदुरेखां शंखंचक्रंकृपाणंत्रिशिखमपिकरैरुद्वहंतींत्रिनेत्रां सिंहस्कंधाधिरूढांत्रिभुवनमखिलंतेजसापूरयंतीं ध्यायेदुर्गांजयाख्यांत्रिदशपरिवृतांसेवितांसिद्धिकामैः दुर्गायैनमः ॥ ९ ॥ दशम्यांयमः यमायेतिविवस्वान्ऋषिः त्रिष्टुप्छंदः यमोदेवता यमायत्वामखायत्वासूर्य्यस्यत्वातपसे देवस्त्वासवितामध्वानक्तुपृथिव्याःसं॰ चर्मभृच्चवरप्रदः धर्मराजायनमः ॥ १० ॥ एकादश्यांविश्वेदेवाः ओमासश्चर्षणीतिमधुच्छंदः ऋषिर्गायत्रीछंदः विश्वेदेवादेवता ओमासश्चर्षणीधृतोविश्वेदेवासआगताः दाश्वांसोदाशुषःसुतं विश्वेदेवाश्चसर्वेपिदक्षिणेवाणपाणयः ध्यातव्यावामपाणौतुशरासनयुताःसदा विश्वेभ्योदेवेभ्योनमः ॥ ११ ॥ द्वादश्यांविष्णुः इदंविष्णुरित्यस्य मेधातिथिऋषिर्गायत्रीछंदः विष्णुर्देवता इदंविष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपांसुरे विष्णुःकौमोदकीखड्गपद्मशंखकरःक्रमात् प्रदक्षिणंदक्षिणाधःकरादारभ्यनित्यशः विष्णवेनमः त्रयोदश्यांकामः ओंकामगायत्र्याःसंमोहनऋषिर्गायत्रीछंदः

कामोदेवताकामार्चनेविनियोगः पुष्पवाणायविद्महेकामदेवायधीमाहितन्नोनंगःप्रचोदयात् नमोस्तुपुष्पवाणायजगदाह्लादकारिणे मन्मथायजगन्नेत्रेरतिप्रीतिप्रदायिने आप्यायस्वेतिचंद्रमंत्रेणचंद्रपूजावा ॥ १३ चतुर्दश्यांशिवः त्र्यंवकमितिमंत्रस्यवासिष्ठऋषिर्गायत्रीछंदः शिवोदेवताशिवार्चनेविनियोगः त्र्यंवकंयजामहे० पंचवक्रोवृषारूढःप्रतिवक्रांत्रिलोचनः कपालहस्तःखट्वांगीचंद्रमौलिःसदाशिवः १४ अमायांपितरःउदीरितेतिमंत्रस्यशंखऋषिः स्वधादेवता त्रिष्टुप्छंदःपितृगणामर्चनेविनियोगःउदीरिताउत्परासउन्मध्यमाःसौम्यासत्रसुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु ३० पूर्णिमायांशशी आप्यायस्वेतिमंत्रःश्वेतःश्वेतांवरधरोदशाश्वःश्वेतभूषणः गदापाणिर्द्विबाहुश्चकर्त्तव्योवरदःशशी अथमलमासव्रतानि युधिष्ठिरउवाच कथंवाचरितंब्रह्मन्मलमासव्रतादिकं तत्सर्वंब्रूहिमेविप्रसर्वलोकहितायच मार्कंडेयउवाच विस्तरेणार्चनफलंकाविभिर्नैवशक्यते वक्तुंजनार्दनस्येदंकिंपुनःप्राकृतैर्जनैः प्रतिपत्तिथिमारभ्यमासमेकंजनार्दनं अर्चयेद्गंधपुष्पाद्यैःपायसेनससर्पिषा विप्रांस्तुभोजयेत्पश्चाद्दक्षिणाभिश्चतोषयेत् एवंव्रतंमासमेकंकुर्य्याद्दानैर्विचित्रकैः अंतेभूतादिनेप्राप्तउपोष्यसुसमाहितः पुण्येह्निप्रातरुत्थायकुर्य्यात्पूर्वान्हिकींक्रियां गृहीत्वानियमंपश्चाद्वासुदेवंहृदिस्मरन् त्रिंत्रिंशद्धर्मनिरतान्ततोविप्रान्निमंत्रयेत् सपत्नीकान्सदाचारान्सुरूपांश्चसुविद्यकान् वेदाध्ययनसंपन्नान् कुलीनज्ञातिसंभवान् ततोमध्याह्नवेलायांकृत्वामाध्यान्हिकीःक्रिया पुष्पमंडपिकांकृत्वाविचित्रैस्तोरणादिभिः तस्मिन्सुशोभितेसर्वेमंडलेतूर्यनादिते सुलक्षणंलिखेत्तत्रसर्वतोभद्रमंडलं स्थापयेदव्रणंकुंभंपंचरत्नसमन्वतं तस्योपरिन्यसेत्पात्रंदेवंतत्रप्रपूजयेत् आदौस्वस्त्ययनंकृत्वापूजांतत्रसमारभेत् प्राणानायम्यविधिवन्मनःसंकल्पपूर्वकं उपचारैःषोडशभिःपूजयेच्चजनार्दनं गंधतोयेनसंस्नाप्यशुभैः पंचामृतैस्तथा स्थापयेद

त्रणंकुंभवस्त्रयुग्मेनवेष्टितं ततस्त्रिंशच्चनामानिपूजयेच्चयथाविधी जिष्णुंविष्णुंमहाविष्णुंहरिं कृष्णमधोक्षजं केशवं माधवं राममच्युतं पुरुषोत्तमं गोविंदं वामनं श्रीशं श्रीकंठं विश्वसाक्षिणं नारायणं मधुरिपुमनिरुद्धं त्रिविक्रम वासुदेवं जगद्योनिं शेषतल्पगतंतथा संकर्षणंचप्रद्युम्नंदैत्यारिंविश्वतोमुखं जनार्दनं धराधारं श्रीधरंचसमर्पयेत् कुंभस्थितेकांस्यपात्रे पूजयेच्चजनार्दनं आच्छाद्यवस्त्रयुग्मेनपीतेनचयथाविधि विष्णवेचततोदद्यादुपवीतेचशोभने चंदनेनसुगंधेनपुष्पैर्नानाविधैर्नृप धूपैर्नानाविधैर्दीपैःपूजयेच्चयथाविधि मिष्टान्नैःश्वेतनैवेद्यैर्नागवल्लिदलान्वितैः घंटामृदंगनिर्घोषैःशंखध्वनिसमन्वितैः आरार्तिकंप्रकुर्वीतकर्पूरागुरुचंदनैः प्रदक्षिणनमस्कारान्मंत्रपुष्पंयथाविधि ताम्रपात्रस्थितंतोयंचंदनाक्षतपुष्पकैः अर्घ्यंदद्यात्सपत्नीकःप्रहृष्टेनांतरात्मना नारंगैर्नालिकेलैश्चफलैर्नानाविधैःशुभैः पंचरत्नसमायुक्तंजानुनीस्थाप्यभूतले आरोप्यजालेहस्तौचश्रद्धाभक्तिसमन्वितः अधिमासेतुसंप्राप्तेशुभेसूर्य्याधिदैवते देवदेवमहादेवप्रलयोत्पत्तिकारक गृहाणार्घ्यंमयादत्तंकृपांकृत्वाममोपरि स्वयंभुवेनमस्तुभ्यंब्रह्मणेमिततेजसे नमोस्तुतेप्रियानंतब्राह्मणानांदयांकुरु एवंस्तुत्वाजगन्नाथंगंधपुष्पोपहारकैः पूजयित्वाजगन्नाथंचतुर्षुप्रहरेषुच तथा जागरणंकुर्यात्कीर्त्तनश्रवणादिभिः ततःप्रभातसमयेअमावास्यादिनेनृप विष्णुंचपूजयेद्भक्त्यापश्चाद्धोमंसमाचरेत् समित्तिलाज्यचरुणापायसेनहुनेन्नृप अतोदेवेतिषट्केनअयुतंवासहस्रकं पूर्णाहुतिंततःकृत्वाहोमम्शेषंसमापयेत् गुरोःपूजांततःकुर्य्याद्वसुधान्यादिसप्तकैः प्रदद्याद्धेनुनासार्द्धंप्रतिमांचतथानृप त्रयस्त्रिंशदपूपांश्चकांस्यपात्रसमन्वितान् प्रदद्याद्गुरवेराजन्घृतशर्करयासह अधिमासेतुसंप्राप्तेपापमुक्त्यैजनार्दनं उद्दिश्यापूपदानेनघृतेनसहरुक्मकं विष्णुप्रीत्यैप्रदद्याच्चपृथ्वीदानफलंलभेत् त्रयस्त्रिंशदपूपांश्चदानार्हांश्चादिनोदिने

सुवर्णगुडसंयुक्तान्कांस्यपात्रेनिधायच अधिमासेतुसंप्राप्तेपापमुक्त्यैजनार्दनं उद्दिश्यापूपदानेनघृतेनसहरुक्मकंविष्णुप्रीत्यैप्रदद्याच्चपृथ्वीदानफलंलभेत् अधिमासेतुसंप्राप्तेशुभेसूर्याधिदैवते नरकोत्तारणायैवमयादत्तंप्रदीयते त्रयस्त्रिंशदपूपांश्चघृतशर्करयासह सदक्षिणामयातुभ्यंकांस्यपात्रेणदापिता. दत्तादिवाकरोदेवोगृहीताचदिवाकरः दानेनानेनविप्रेंद्रसूर्योमेप्रीयतामिति प्रीयतांदेवदेवेशाब्रह्माशंभुजनार्दनाः तेषांप्रसादात्सकलाममसंतुमनोरथाः गृहाणपरमान्नेनकांस्यपात्रंप्रपूरितं सघृतगुडसंयुक्तंप्रीतोभवदिवाकर त्वयादत्तमिदंप्राप्तंपरमान्नेनपूरितं . सघृतंप्रतिगृह्णामिप्रीयतांमेदिवाकरः ब्राह्मणान्पूजयेत्पश्चाद्वस्त्रालंकारचंदनैः अपूपदानदद्याच्चकांस्यपात्रसमन्वितं धेनुंसवत्सांदद्याच्चवस्त्रालंकारभूषिता कांस्यदोग्धींरौप्यखुरींदक्षिणासहितांनृप नत्वातुवाचयेद्विप्रान्सफलंचास्तुमेव्रतं ऋत्विग्भ्योवाससीदद्यात्त्रयस्त्रिंशच्चकुंभकान् कांस्यपात्रसमायुक्तानपूपान्घृतसंयुतान् वटकैःसहराजेंद्रयथाशक्त्याचदक्षिणां ब्राह्मणान्भोजयेत्पश्चाच्छर्कराघृतपायसैः द्वादश्यामलमासस्यक्षयेयातेशुभेन्हिवा दुर्बलेनापिकर्तव्यंत्रयस्त्रिंशदपूपकं मलमासेतुसंप्राप्तेएकस्मिंश्चशुभेदिने निष्किंचनेनदातव्यंघृतशर्करयासह मासानांमलमासोयंमलिनःपापसंभवः तस्यपापस्यशांत्यर्थमन्नदानंकरोतियः यावंतिचैवछिद्राणिअपूपादिषुपांडव तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते मलमासव्रतंनारीयाकरोतीहभारत दारिद्र्यंपुत्रशोकंतुनवैधव्यंलभेतसा यइदंधर्मसर्वस्वंकुर्य्याल्लोकैःपुराकृतं ब्रह्महत्यादिपापघ्नंप्राप्नुयाद्वैष्णवंपदम् एवंप्रार्थ्यचगोविंदंपूजयेद्ब्राह्मणान्नव सपत्नीकान्शुचिस्नात्वालक्ष्मीनारायणौस्मरन् पूजयित्वाविधानेनभोजयेद्घृतपायसैःभोजयित्वाविधानेनसत्नीकंस्मरन्विभुं स्मर्तव्योद्विजरूपेणपत्नीरूपेणवैद्विज परिधाययथाशक्त्यावस्त्रालंकारकुंकुमैः द्राक्षाम्रैश्चकपित्थै

श्चपनसैःकदलीफलैःनारिकेलैश्चनारंगैःकूष्मांडैर्दाडिमीफलै उर्वारुकैःकर्कटैश्चशृंगवेरैःसमूलकैः अन्यैश्चाविविधैः शाकैरर्चयेच्च पृथक्पृथक्घृतपक्कान्नगोधूमैःशुभैःसौहालिकैर्वटैः शर्कराघृतपूरैश्चफाणितैःखंडमंडितैः भक्ष्यभोज्यैश्चलेह्यादिकंदुकानिविशेषतः गोरसानांविचित्राणिवासितानिइलादिभिः अन्यान्यपिचदानानिदेयानिविविधानिच वित्तशाठ्यंनकर्त्तव्यमात्मनःश्रेयइच्छता यथावत्सरसंप्राप्यपरिवेश्यमृदुब्रुवन् इदंस्वादुइदंभोज्यभवदर्थंविचिंतये याच्यतांरोचतेयच्चयन्मयापचितंप्रभो धन्योऽस्म्यनुगृहीतोऽस्मिपावितंममंदिरं विसर्जयेत्ततोविप्रान्दत्त्वातांबूलदक्षिणे आसीमांतमनुव्रज्यभुंजीतबंधुभिःसह असंक्रांतव्रतंनारीयाकरोतिहरिप्रियं दारिद्यपुत्रशोकंचवैधव्यंनभवेत्कदा एवंविधोपिपुरुषोयदिकुर्यान्मलिम्लुचे मलिम्लुचंप्राप्यनपूजितोयैःश्रीनाथदेवः परयैवभक्त्या कथंभवेच्छ्रेयसुखंचसंपत्पुत्रः सुहृत्स्वजनाश्चापिभार्या कदाचिन्नकृतंपापैर्मलमासव्रतंनरैः तेषांपापिष्टतानित्यंब्रह्महत्यापदेपदे मार्कंडेयउवाच एतत्तेकथितंपार्थगुह्याद्गुह्यतरंपरं वाजपेयक्रतुफलंश्रोतावक्तालभेद्ध्रुवम्॥इतिश्रीभविष्योत्तरपुराणेमलमासव्रतोद्यापनम्॥ स्वस्तिश्रीरणवीरसिंहधरणीपालेवदान्याग्रणी०

१ रणवीरसिंहभूपेशकारितेकृत्यसागरे मलमासादिसंकीर्णकृत्यरत्नसमुच्चयः २ अथसंक्रांतिव्रतानि तत्रादौधान्यसंक्रातिव्रतम् स्कंदपुराणे नंदिकेश्वरउवाच अथातःसंप्रवक्ष्यामिधान्यव्रतमनुत्तमं यत्कृत्वाहिनरोराजन्सर्वान्कामानवाप्नुयात् अयनेविषुवेचैवस्नानंकृत्वाविचक्षणः उपचारैःपूजयेच्चध्यात्वादेवंदिवाकरं करिष्यामिव्रतंदेवत्वद्भक्तस्त्वत्परायणः तदविघ्नेनमेयातुत्वत्प्रसादाद्दिनेश्वर इत्युच्चार्यलिखेत्पद्मंकुंकुमेनाष्टपत्रकं भास्करंपूर्वपत्रेतुआग्नेय्यांतुरविंतथा विवस्वंतंतथायाम्येनैर्ऋत्येपूषणंतथा आदित्यंवारुणेपत्रेवायव्येतपनंतथा मार्त्तंडमितिकौबेरेचैशान्येभानुमर्चयेत् एवंचक्रमशोभ्यर्च्योविश्वात्मासर्वदेशजैः कृतांजलिपुटोभूत्वात्व

र्घ्यंदद्यात्समंत्रकं उँकालात्मासर्वभूतात्मावेदात्मासर्वतोमुखः व्याधिशोकजरामृत्युसंसारभयनाशनः इत्य
र्घ्यमंत्रः पुष्पैर्धूपैःसमभ्यर्च्यशिरसाप्रणिपत्यच रविंध्यात्वाततोदद्यात्धान्यप्रस्थंद्विजातये एवंसंवत्सरे
पूर्णेकुर्यादुद्यापनक्रियां अर्घ्यपात्रंहिसौवर्णंकारयेत्पटलेशुभं द्विभुजंपूजयेद्भानुंरक्तवस्त्रयुगान्वितं
धान्यद्रोणेनसहितंतदर्धेनस्वशक्तितः स्वर्णशृंगींरौप्यखुरांकांस्यदोहांपयस्विनीं रविरूपंद्विजंध्यात्वातस्मै
वेदविदेतथा विद्यापात्रायविप्रायतत्सर्वंविनिवेदयेत् अग्निष्टोमसहस्राणांफलंप्राप्नोतिमानवः सप्तजन्म
सहस्राणिधनधान्यसमन्वितः निर्व्याधिर्नीरुजोधीमान्रूपवानपिजायते इदंव्रतंवर्षात्मकं तत्रव्रतविधिः
संक्रांतिदिनेप्रातःशुक्लतिलैःस्नात्वागोमयेनोपलिप्तशुद्धदेशे कुंकुमादिनाष्टदलंपद्मंविरच्य पूजासमग्रींसंपा
द्यसकल्पंकुर्य्यात् तिथ्यादिसंकीर्त्यममाग्निष्टोमादिफलप्राप्तिपूर्वकसप्तजन्मसु धनधान्यपुत्रपौत्रादिसमन्वित
निर्व्याधिनिरुजत्वादिसिद्धिद्वाराश्रीसावितृरूपपरमेश्वरप्रीत्यर्थंधान्यसंक्रांतिव्रतंकरिष्ये इतिसंकल्प्य गणेशंसं
पूज्य पूर्वनिर्मितपद्मकर्णिकायां विश्वात्मनेनमइतिनाममंत्रेणावाह्यपूजयेत् अष्टपत्रेषुपूर्वादिक्रमेणदेवताआ
वाहयेत् भास्करं १ रविं २ विवस्वंतं ३ आदित्यं ४ तपनं ५ मार्त्तंडं ६ भानुं ७ पूषणं ८ मध्येविश्वात्मानं
आवह्यसंपूज्यचांते अर्घ्यदानमंत्रःकालात्मन्सर्वदेवात्मन्विश्वात्मन्विश्वतोमुखव्याधिमृत्युजराशोकसंसारभय
नाशन ततःप्रस्थमितंधान्यंसदक्षिणं ब्राह्मणायदत्त्वा मौनेनस्वयंभुंजीत पुत्रवतोगृहिणउपवासनिषेधात्
संवत्सरांतेउद्यापनंकुर्य्यात् उक्तमंडलेपूर्ववद्देवता आवाह्य सुवर्णादिपात्रेणार्घ्यंदत्त्वासंपूज्य द्रोणपरिमित
धान्यंतदर्धार्धंवा आचार्य्यायदत्त्वा पीठसहितांगांचदत्त्वा ब्राह्मणान्संभोज्यस्वयंभुंजीत अत्रहोमादिसामान्य
विधिनाकार्य्यं इतिधान्यसंक्रांतिव्रतं अथरूपसंक्रांतिव्रतम् स्कांदे अथान्यदपितेवच्मिरूपसंक्रांतिमुत्तमं

संक्रांतिवासरेतैलस्नानंकृत्वाविचक्षणः हेमपात्रेघृतंकृत्वाहिरण्येनसमन्वितं स्वरूपंवीक्ष्यतत्पात्रंब्राह्मणायनिवेदयेत् एकभक्तंततःकृत्वाभक्त्याचैवसमन्वितं व्रतांतेकांचनंदद्याद्घृतधेनुसमन्वितं अश्वमेधसहस्राणांफलमाप्नोतिमानवः रूपयौवनसंपत्याआयुरारोग्यसंपदा लक्ष्मींचविपुलान्भोगान्भुनक्तीहनसंशयः सर्वंपापविनिर्मुक्तःस्वर्गलोकंसगच्छति अस्यविधिः तिथ्यादिसंकीर्त्य आत्मनःकमनीयरूपप्राप्तिपूर्वकश्रीपरमेश्वरप्रीत्यर्थंरूपसंक्रांतिव्रतंकरिष्ये इतिसंकल्प्य पूर्ववत्लिखितपद्मेभानुंसंपूज्य कांस्यपात्रेसघृतेस्वरूपंवीक्ष्यपात्रंब्राह्मणायदद्यात् एवंप्रतिसंक्रांतौकुर्यात् वत्सरांतेउक्तमंडलेसौवर्णंभानुंसंपूज्य कांस्यपात्रस्थघृतंहिरण्यसहितमाचार्य्यायदत्त्वागांचदद्यात् फलभूयस्त्वकामोघृतधेनुमपिदत्त्वा ब्राह्मणान्भोजयित्वास्वयमपिभुंजीत इतिस्कंदोक्तरूपसंक्रांतिव्रतं २ अथभोगसंक्रांतिव्रतम् तत्रैव संक्रांतिदिवसंप्राप्ययोषितस्तुसमाह्वयेत् कुंकुमंकमलंचैवसिंदूरंकुसुमानिच सुगंधानिचद्रव्याणितांबूलंशालितंडुलान् तंडुलान्फलसंयुक्तांस्त्वाभ्योदद्याद्विचक्षणः दद्यात्प्रहृष्टमनसामिथुनेभ्यःप्रयत्नतः भोजयित्वायथाशक्तिवस्त्रयुग्मप्रदापयेत् एवंसंवत्सरस्यांतेरविंसंपूज्यपूर्ववत् धेनुंसदक्षिणांदद्यात्सपत्नीकाद्विजातये स्यात्सुखीसर्वमर्त्येषुभोगीजन्मनिजन्मनि अस्याविधिः तिथ्यादिसंकीर्त्य आत्मनोऽनेकविधभोगप्राप्तिपूर्वकश्रीपरमेश्वरप्रीत्यर्थंभोगसंक्रांतिव्रतंकरिष्ये इतिसंकल्प्य पूर्ववत्भानुंपद्मैःसंपूज्यत्रिभ्योअधिकानिमिथुनानिसंपूज्य वायनानि कुंकुमकज्जलसिंदूरसुगंधिपुष्पतांबूलशालितंडुलदक्षिणायुतानिदत्त्वाभुंजीत वत्सरांतेपूर्वोक्तमंडलेसौवर्णंभानुंसंपूज्य द्वादशमिथुनेभ्यःपूर्वोक्तवस्त्रयुग्मसहितानिसौभाग्यद्रव्याणिदत्त्वाब्राह्मणायगांचदत्त्वाभोजयेत् इतिस्कांदोक्तंभोगसंक्रांतिव्रतं अथलवणसंक्रांव्रितं तत्रैव अथातःसंप्रवक्ष्यामिलवणसंक्रांतिमुत्तमं संक्रांतिवासरंप्राप्यस्नानं

कृत्वाशुभैर्जलैः वस्त्रालंकारसंभूतैर्भक्तिभावसमन्वितः कुंकुमेनलिखेत्पद्ममष्टपत्रंसकर्णिकं भास्करंपूजये
द्भक्त्याधान्यप्रस्थसमन्वितः तदग्रेलववणपात्रंसगुडंस्थापयेद्बुधः पूजितस्त्वंयथाशक्त्याप्रसीदममभास्कर
लवणंसगुडंशय्याब्राह्मणायनिवेददेत् एवंसंवत्सरेपूर्णेभानुंकुर्थाद्धिरण्मयं रक्तवस्त्रयुगच्छन्नंरक्तचंदनचर्चितं
कमलंलवणपात्रं धेन्वासार्धंद्विजातये प्रदद्याद्भानुमुद्दिश्यविश्वात्माप्रीयतामिति एवंकृत्वातुयत्पुण्यंप्राप्य
तेभुविमानवैः तत्केनगदितुंशक्यंवर्षकोटिशतैरपि लवणाचलदानस्यफलंप्राप्नोतिमानवः सर्वकाम
समृद्धात्माविमानवरमास्थितः सूर्यलोकेवसेत्कल्पं पूज्यमानः सुरासुरैः अथास्यविधिः तिथ्यादिसं
कीर्त्यानेकविधसुखप्राप्तिपूर्वकसूर्यलोकप्राप्तिश्रीपरमेश्वरप्रीत्यर्थंलवणसंक्रांतिव्रतंकरिष्ये पूर्ववत्पद्मेभास्करंसं
पूज्य तदग्रेसगुडंलवणपात्रंनिधायदेवंप्रार्थयेत् पूजितस्त्वंमयाभक्त्याप्रसीदममभास्कर व्रतंसंपूर्णतांयातुत्व
त्प्रसादाद्दिवाकर ततः सगुडंलवणयुतंपात्रंदत्त्वा ब्राह्मणान्भोजयेत् वत्सरांतेपूर्ववदुद्यापनंकुर्य्यात् इति
लवणसंक्रांतिव्रतम् ४ अथतेजःसंक्रांतिव्रतम् शालितंडुलसंयुक्तंकरकंकारयेच्छुभं तन्मध्येदीपकंस्थाप्यप्र
ज्वलंतंस्वतेजसा तन्मध्येमोदकंस्थाप्यब्राह्मणायनिवेदयेत् अर्घ्यंपूर्वोक्तवत्कुर्य्यादेकभक्तंचपूर्ववत् संवत्सरे
तुसंपूर्णेकुर्य्यादुद्यापनंबुधः शोभनंदीपकंकार्य्यंसुवर्णेनतुनारद ताम्रेणकरकंकार्य्यंतन्मध्येदीपकंन्यसेत् कपि
लासहदातव्याकरकेणद्विजातये अत्रविधिः आत्मनोअतितेजस्त्वप्राप्तिपूर्वकसवितादेवताप्रीत्यर्थंतेजःसंक्रां
तिव्रतंकरिष्ये इतिसंकल्प्यपूर्ववत्कमलेसवितारंसंपूज्य पुरतःशालितंडुलसंपूर्णंकरकंनिधाय तन्मध्येमोदकं
तत्पादेदीपंप्रज्वलितंकृत्वा ब्रह्माणंसंपूज्यदद्यात्संवत्सरांते सौवर्णंभानुंमंडलेसंपूज्य पुरतःशालितंडुलपू
र्णंकरकेसुवर्णनिर्मितंदीपकंकृत्वा ब्राह्मणायदत्त्वाकपिलांगांचदत्त्वाद्विजान्भोजयेत् इतितेजःसंक्रांतिव्रतम् ५

अथसौभाग्यसंक्रांतिव्रतम् पूर्ववद्भानुमभ्यर्च्यतथाचैवसुवासिनीः पूर्ववत्भोगसंक्रांतिसुवासिनीश्चसंपूज्याः सौभाग्याष्टकसंयुक्तंवस्त्रयुग्मंतुयोषिते विप्रायवेदविदुषेभक्त्यातत्प्रतिपादयेत् एवंसंवत्सरेपूर्णेकृत्वाब्राह्मणवाचनं पर्वतंलवणंकृत्वायथाविभवसारतः लवणपर्वतंशक्त्योत्तममध्यमकानिष्ठंकृत्वेत्यर्थः कांचनंकमलं कृत्वाभास्करंचैवकारयेत् गंधपुष्पादिनापूज्याविप्रायप्रातिपादयेत् सौभाग्याष्टकंतु इक्षवोराजिकातद्वान्निष्पावाश्चसुशोभनाः धान्यकंजीरकंचैवकौसुंभंकुंकुमंतथा लंवणंचाष्टमंप्रोक्तंसौभाग्याष्टकमुच्यते अस्यविधिः ॐमद्यात्मनोअतुलसौभाग्यप्राप्तिपूर्वक भानुदेवप्रीत्यर्थंसौभाग्यसंक्रांतिव्रतंरिष्ये। इतिसंकल्प्य पूर्ववत्पद्मेभानुंसंपूज्य गांचसंपूज्य सपत्नीकायाद्विजाय सौभाग्याष्टकयुक्तंवस्त्रयुग्मसहितंवायनंदत्त्वा अलवणंमौनीभुंजीत वत्सरांतेसौवर्णंभानुंमंडलेसंपूज्य तत्पुरतः यथाशक्तिलवणाचलंकृत्वाकांचनकमलंकृत्वासंपूज्य सुरभिसहितंविप्रायप्रतिपादयेत् इतिसौभाग्यसंक्रांतिव्रतम् ६ अथतांबूलसंक्रांतिव्रतम् अथान्यत्संप्रवक्ष्यामितांबूलव्रतमुत्तमं तांवूलंचंदनाढ्यंचप्रगृह्याज्ञांद्विजोत्तमात् एवंसंवत्सरेपूर्णेरात्रौरात्रौततःपरं तांवूलं भक्षयेद्विप्रैः कारयेद्देवतांतरं वत्सरांतेचकमलंकृत्वाचैवतुकांचनं पर्णकोशंचकुर्वीततथानंतफलाप्तये चूर्णभांडंचकुर्वीतपूगप्रस्फोटनंतथा मुखवासादिपूर्णानांभांडानिचाद्विजर्षभ द्विजदांपत्यमावाह्यसर्वोपस्करसंयुतं दत्त्वैवतत्पूजयेद्भक्त्याषड्रसैर्भोजयेद्द्विजान् उपकल्पितंचयत्किंचिद्ब्राह्मणायानिवेदयेत् एवंक्रमेणयानारीतांवूलास्यंव्रतोत्तमं धनपुत्रैश्चपौत्रैश्चमोदतेस्वगृहेसदा अत्रविधिः तिथ्यादिसंकीर्त्यात्मनोभर्त्रासहअतुलसुखप्राप्तिपूर्वकसावित्रप्रीत्यर्थंतावूलसंक्रांतिव्रतंकरिष्ये इतिसंकल्प्य पूर्ववत्पद्मेभानुंसंपूज्य ततोद्विजदंपतीचंदनादिनासंपूज्य तस्मैएलालवंगजातीपत्रकंकोलखादिराप्रत्येकभांडेनिधाय रौप्य मयंचूर्णपात्रंपूगप्रस्फोटनंचपूगी

फलानिनागवल्लीदलानिच सतिमामर्थ्येस्वर्णनिर्मितानिकानिचित् नागवल्लीदलानिचरौप्यादिपात्रे निधायसंकल्पपूर्वकंदद्यात् दानमंत्रः तांवूलंश्रीकरंभद्रंब्रह्माविष्णुशिवात्मकं प्रदानाद्देवदेवेशपूर्णाःसंतुमनोरथाः इतिदत्त्वागांचदत्त्वाब्राह्मणान्भोजयेत् अथप्रकारांतरेणतांवूलव्रतंभाविष्ये तत्रग्रहणविधिः आषाढशुक्लदशम्यांचातुर्मास्यव्रतं तत्रतिथ्यादिसंकीर्त्यतांबूलव्रतस्यपूर्वोक्तफलावाप्तयेचातुर्मास्येतांवूलव्रतंकरिष्ये इति संकल्प्यपीठेफणान्वितशेषनागकन्यायुतंहरिंपुरुषसूक्तेनसंपूज्य तदग्रेद्विजंसपत्नीकंचसंपूज्य सोपस्करंतांवलवीटिद्वयंदेवायद्विजायचदत्त्वाप्रणमेत् एवंप्रतिदिनं ऋतेकार्त्तिकशुक्लैकादश्यांपौर्णिमायांवाउद्यापनंकुर्य्यात् तद्यथा अद्येत्यादितिथ्यादिसंकीर्त्यात्मनः अनेकदानफलप्राप्तिसकलभोगयुतनारायणप्रीत्यर्थं आचरितचातुर्मास्येतांबूलव्रतोद्यापनंकरिष्ये इतिसंकल्प्यगणेशपूजनादिविधायआचार्य्यंवृणुयात् अथाचार्यःपूर्ववत्मंडले ब्रह्मादिदेवताः संस्थाप्यतदुपरिकलशेरौप्यमयशेषेहाटकनिर्मितं नारायणंनागकन्यायुतं सहस्रशीर्षेतिमंत्रेणसंस्थाप्य ततःपूर्वादिदिक्षु ब्रह्माणंईशंदुर्गां क्षेत्रपालंचतत्तन्मंत्रैरावाह्य पुरुषसूक्तेनपंचामृताभिषेकपुरःसरंपूजयेत् नानाविधभक्ष्यभोज्ययुतपायसोपहारंनिवेदयेत् देवाग्रेशतसंख्यापूगानियथाशक्तिवानागंफणायुतं चसंस्थाप्यदेवंस्तोत्रैःस्तुवीत ततोदशनवीनताम्रपात्राणिक्रमुकपूगयुक्तानिरौप्यमयानिवातावंतिचूर्णपात्राणि रौप्यमयानिचतत्तद्द्रव्यपूरितानि पक्षेशूर्पनवकेनिधाय वस्त्रद्वयेनसंवेष्ट्यसप्तधान्योपरिदेवाग्रेनिधाय तत्रदेवंनागरूपंध्यात्वाप्रार्थयेत् नवनागमहाराजपत्न्यास्तवप्रपूजनात् ईप्सितंदेहिमेकामंसर्वसौख्यप्रदोभव ततोगीतवाद्यपुराणपठनादिभिर्जागरणेनरात्रिंनीत्वा प्रातर्देवंसंपूज्य अग्निंप्रतिष्ठाप्यअन्वादध्यात् तत्रप्रधानंनारायणं अतोदेवेतिमंत्रेणखंडमिश्रितमाज्यपायसचरुद्रव्येणाष्टोत्तरशतसंख्याकाहुतिभिर्ब्रह्मादिदेवताश्चैकै

कयाहुत्यायक्षे एवंहोमंसमाप्य दंपतीनवकंवस्त्रादिनासंपूज्यपूर्ववत्स्थापितंशूर्पनवकंनवब्राह्मणेभ्योदद्यात् तत्रमंत्रः तांवूलंश्रीकरंभद्रंब्रह्माविष्णुशिवात्मकं अस्यप्रदानाद्देवेशसफलंमेस्तुवांछितं ततस्तेभ्योनवगोदानानि तदभावेमौल्यंवादक्षिणात्वेनदत्त्वादेवंप्रार्थयेत् तांवूलदानमाहात्म्यात्प्रीतोभवजनार्दन संपूर्णंकुरुमे देववांछितंपुरुषोत्तम ततः पीठमाचार्य्यायचदत्त्वाकपिलांगांचदत्त्वा ब्राह्मणभोजनपुरःसरंस्वयंभुंजीत इति तांवूलव्रतम् ७ अथमनोरथसंक्रांतिव्रतम् गुडेनपूर्णंकुंभंचसवस्त्रंचस्वशक्तितः संक्रांतिगसरेदद्याद्ब्राह्मणायकुटुंविने एवंसंवत्सरेपूर्णेस्वशक्त्योद्यापनंचरेत् गुडेनपर्वतंकृत्वावस्त्ररत्नैश्चभूषितं अयनेचोत्तरे दद्याद्वित्तशाठ्यंनकारयेत् यंयंकामयतेकामंतंतंप्राप्नोतिपुष्कलं अथविशोकसंक्रांतिव्रतविधिः तिथ्यादिसंकीर्त्यात्मनोविशोकत्वसमन्वितः पुत्रपौत्रादिवृद्धिद्वाराश्रीसवितृदेवताप्रीत्यर्थंविशोकसंक्रांतिव्रतंकरिष्ये इतिसंकल्प्य पद्मेपूर्ववत् भास्करंताम्रपात्रेसंस्थाप्यसपूज्यचरक्तवस्त्राभ्यांपरिवेष्ट्य पूर्ववत्अर्घ्यंदत्त्वा ब्राह्मणायगुडपूर्णंकुंभंसदक्षिणंदद्यात् वत्सरांतेमंडलेहैमंभास्करंताम्रपात्रेसंपूज्य गुडपूर्णंकुंभंसदक्षिणंदद्यात् गुडपर्वतेनसहपीठंकपिलासहितंदद्यात् अथातः संप्रवक्ष्यामि विशोकसंक्रांतिमुत्तमां अयनेविषुवेचैवव्यतीपातोभवेद्यदि एकभक्तंतदाकुर्य्याज्जलदानप्रपूर्वकं कांचनंभास्करंकृत्वायथाविभवशक्तितः स्नापयेत्पंचगव्येनगंधपुष्पैस्तुपूजयेत् संछाद्यरक्तवस्त्राभ्यांताम्रपात्रेनिधायच भास्करायनमः पादौजंघेतुरवयेनमः आदित्यायनमोजानूउर्वोर्दिनकरायच अर्यम्णेचकटिंपूज्य मानवंचोदरेतथा नमःपूष्णेचवाहुभ्यामर्यम्णेवैपुनस्तनौ विवस्वतेनमःकंठंमुखंपूज्यसहस्रांशवे प्रभाकरायवैचाक्ष्णोस्तेजोराशेनमः शिरः वरुणायनमः केशान्पादादौपूजयेद्धरिं अर्घ्यंचपूर्ववत्कार्यंब्राह्मणायनिवेदयेत् एवंसंवत्सरेपूर्णेकांचनेनादि

72

वाकरं सपद्महस्तंसंपूज्ययथाविभवशक्तितः कारयेत्पूजयेद्भक्तोरक्तवस्त्रेणवेष्टयेत् ततोहोमंप्रकुर्वीतसूर्यमंत्रेणनारद द्वादशकपिलादद्याद्वस्त्रालंकारसंयुता अशक्तःकपिलामेकांवित्तशाठ्यविवर्जितः आयुरारोग्यमैश्वर्यं भार्य्यापुत्रसमन्वितः इतिविशोकसंक्रांतिव्रतम् ॥ ९ ॥ अथायुःसंक्रांतिव्रतं अथान्यांसंप्रवक्ष्यामिआयुःसंक्रांतिमुत्तमां संक्रांतिदिवसेपुर्ववत्समर्च्यादिवाकरं कांस्येक्षीरंघृतंदद्यात्सहिरण्यंस्वशक्तितः पृथक्पृथक्प्रदानेनपूजामेवप्रकीर्त्तिता सक्षीरंसुरभीजातंपीयूषसमसर्पियुक् आयुरारोग्यमैश्वर्यमतोदेहिदिवाकर इति मंत्रः अनेनविधिनावर्षंसर्वंदद्यातंद्रितः उद्यापनादिकंसर्वंधान्यसंक्रांतिवद्भवेत् निर्व्याधिश्चैवदीर्घायुस्तेजस्वीकीर्त्तिमांस्तथा अपमृत्युभयंनास्तिजीवेच्चशरदांशतं अथधनसंक्रातिव्रतम् हेमाद्रौस्कांदे संक्रांतिदिवसेपूज्यभास्करंतुविधानतः कलशंनिर्व्रणंग्राह्यंवारिपूर्णंनिधापयेत् सुवर्णपुरुषंकृत्वाप्रतिमासंतुदापयेत् विधिनानेनवर्षांतेप्रीयतांमेदिवाकरः पूजाविधानंसर्वंतुधान्यसंक्रांतिवद्भवत् सौवर्णंकलशंकृत्वासूर्य्यंचोपरिविन्यसेत् हस्तेसुवर्णघटितंपंकजंवैनिवेशयेत् गोदानंतत्रदातव्यमेवंसंपूर्णतांव्रजेत् यतात्माशतसाहस्रंधनयुक्तोभवेन्नरः आयुरारोग्यसंपन्नःसूर्यलोकेमहीयते इतिधनसंक्रातिव्रतम् ओमद्यात्मनोविपुलधनप्राप्तिपूर्वक आयुरारोग्यपुत्रपौत्रादिकामनयाधनसंक्रांतिव्रतंकरिष्ये पद्मवारिपूर्णंकलशंनिधायसुवर्णपात्रेभानुंसंपूज्य सुवर्णधेनुसहितंपीठंद्विजाय दत्वासदन्नेनद्विजान्भोजयेत् शेषंधान्यसक्रांतिवत् ॥ ११ ॥ अथस्कंदपुराणोक्तमाज्ञासंक्रांतिव्रतम् ब्रह्मोवाच आज्ञासंक्रांतिमाहात्म्यंशृणुस्कंदविधानतः यांकृत्वासर्वलोकेषुआज्ञावान्जायतेनरः संक्रांतिदिवसेपुण्येप्रारभेन्नियमंव्रती पद्ममष्टदलंकृत्वाकुंकुमेनसुशोभनं पूजयेन्मंत्रमुच्चार्य्यविधिवद्गुरुसान्निधौ आज्ञांतेजस्करींएष्टप्रभादीप्तियशस्करीं आज्ञांसर्वत्रगांदेवममदेहिनमोस्तुते संपूज्यैवंकुंकुमेनदद्याद्विप्रायभोजनं उद्यापने

तुचंडांशुसौवर्णसरथंतथा एकचक्रंचसप्ताश्वमरुणेनसमन्वितं यःकुर्याद्विधिनानेनआज्ञासंक्रांतिमुत्तमं आज्ञास्यास्खलितालोकेसूर्यभक्तश्चजायते इतिस्कांदेआज्ञासंक्रांतिव्रतम् ॥ १२ ॥ अथापापसंक्रांतिव्रतम् नंदीकेश्वरउवाच ॥ वक्ष्याम्यपापसंक्रांतिंशृणुस्कंदविधानतः संक्रांत्यांनियतोभूत्वातिलैःश्वेतैःसमन्वितैः करकंवर्धमानंचप्रतिमासंनिवेदयेत् वर्द्धमानंशरावम् मंत्रेणानेनतुस्नायाद्भक्तिभावसमन्वितः भक्तिरंतःकरणस्यतदाकारवृत्तिःभावोविश्वासः तिलोमांपातुपापेभ्यस्त्वदेवप्रसादतः त्वंचमांरक्षदेवेशवाङ्मनःकायकल्मषात् उद्यापनेचदेवस्यसौवर्णीमाषकेनतु द्विभुजाप्रतिमाकार्य्यारजतेनाथकारयेत् देवस्यसूर्य्यस्यस्वर्णमाषकेणसंमितेतिशेषः अथवा अयंचशक्ताशक्तविषयत्वेनव्यवस्थितोविकल्पः तिलधेनुःप्रदातव्याव्रतेस्मिन्नात्रसंशयः सर्वपापप्रणाशायआयुरारोग्यहेतवे एतत्सर्वंपुराप्रोक्तंब्रह्मणाविष्णवेतथा विष्णुरिंद्रायजगदेतथोमांशंभवेव्रतं शंभुश्चैवनमाचष्टमयाप्रोक्तंतवप्रभो सर्वसंक्रांतिदिवसेप्रारभेद्व्रतमुत्तमं दक्षिणोत्तरसंक्रांतौसर्वास्वितिचकेशव अध्रुवत्वाच्छरीरस्ययौगपद्यंप्रशस्यते नचात्रविधिलोपःस्यात्सर्वत्रैकंतुदैवतं नानादेवव्रतानांतुएककालंप्रशस्यते इतिस्कंदपुराणोक्तमपापसंक्रांतिव्रतम् १३ अथकीर्त्तिसंक्रांतिव्रतम् नांदिकेश्वरउवाच कीर्त्तिसंक्रांतिमाहात्म्यंशृणुस्कंदविधानतः संक्रांतिवासरंप्राप्यरविबिंबंलिखेद्भुवि तस्यमध्येस्तितंदेवंपूजयेत्सूर्यमंत्रतः यथाविभवसारेणततोविप्रायदक्षिणां प्रतिमासंतुवैश्वेतवस्त्रयुग्मंप्रदापयेत् उद्यापनेतुरौप्यंचसूर्यमत्रप्रदापयेत् श्वेतवस्त्रयुगच्छन्नंब्राह्मणायनिवेदयेत् एवंकृतेपराकीर्त्तिर्जायतेचापिवह्निवत् फलंनशक्यतेवक्तुंगीष्पतेरपिजिव्हया विमलाकीर्त्तिराज्यंचजायतेनात्रसंशयः आयुरारोग्यसंपन्नोजीवेद्वर्षशतंनरः इतिस्कंदपुराणोक्तंकीर्त्तिव्रतम् ॥ १४ ॥ अथोत्तरायणदक्षिणायनसंक्रांतिमारभ्यकर्त्तव्यंशीलव्रतम् पुलस्त्यउ

वाच अयनाद्यनंयावद्वर्जयेत्पुष्पसर्पिषी तदंतेकांचनंपुष्पंघृतधेनुसमन्वितं दद्याच्छिवपुरंयातिविप्रायघृतपायसं एतच्छीलव्रतंनामशीलारोग्यसुखप्रदं - इतिपद्मपुराणोक्तशीलव्रतम् १६ अथराज्यव्रतम् कृष्णउवाच उत्तरेत्वयनेप्राप्तेघृतप्रस्थेनयोहरिं स्नापयित्वाब्राह्मणायवडवांसंप्रयच्छति सर्वपापविनिर्मुक्तः सूर्यलोकेवसेच्चिरं ततोभवतिभूपालःप्रजानंदविवर्धनः राज्यव्रतमिदंप्रोक्तंपरंतुष्टिकरंहरेः इतिभविष्योत्तरोक्तंराज्यव्रतम् अथोत्तरायणेघृतस्नपनव्रतम् पुलस्त्यउवाच अयनेचोत्तरेप्राप्तेयःस्नापयतिकेशवम् घृतप्रस्थेनपापंसःसकलंचव्यपोहति कपिलांविप्रमुख्यायददात्यनुदिनंचयः स्नानंदेवस्ययच्छतियेघृतेनोत्तरायणे तेयांतिविष्णुसायुज्यंसर्वपापविवर्जिताः इतिविष्णुधर्मोत्तरोक्तंघृतस्नपनव्रतम् १७ अथवृंताकत्यागव्रतम् भविष्योत्तरे वृंताकस्यविधिंवक्ष्येशृणुपार्थसमाहितः संवत्सरंवाषण्मासान्त्रीन्मासान्वासमाहितः अस्योद्यापनं वृंताकमप्रतिहतंवरहेमसिद्धंदद्याद्द्विजायघृतवस्त्रसमन्वितंयः कृत्वातुवर्षमपिमासमथैकमेवयाम्यंनपश्यतिपुरंपुरुषःकदाचित् अथैतस्यविधिः अस्यभरण्यांमघायांवाएकरात्रोपवासंकृत्वास्थंडिलेदेवानाहूय गंधपुष्पधूपदीपनैवेद्यादिभिर्भरण्यांमघायांवापूजयेदितिसंबंधः आवाहनप्रकारमाह दर्भपाणिर्गंधोदकेनावाहयेत् यमराजमावाहयामि कालमावाहयामि नीलमावाहयामि चित्रगुप्तमा- वैवस्वतमावाह- मृत्युमा. परमेष्ठिनमावाहयामि ततोग्निमुपसमाधाय तिलाज्यंजुहुयात् यमराजायस्वाहा कालाय स्वाहा नीलायस्वाहा चित्रगुप्ताय. वैवस्वतायस्वाहा मृत्यवेस्वाहा परमेष्ठिनेस्वाहा अग्निर्मूर्धेत्याहुतीरष्टोत्तरशतंजुहुयात् प्रायश्चित्तंहुत्वा ब्राह्मणःस्वयमितरेषामाचार्यः अथस्वशक्त्या सौवर्णंवृंताकंविप्रायदद्यात् कृष्णांगांवृषभंचतथैवकर्णवेष्टांगुलीयकेछत्रोपानहौकृष्णवस्त्रयुगं कृष्णकंबलंचदद्यात् ब्राह्मणा

न्संभोज्याशिषोवाचयेत् अनेनविधिनायस्तुवृंताकंसंप्रयच्छति त्रीन्मासान्वाषण्मासंवावर्षमेकंवानभक्षयेत् अथचैनंविधिंकृत्वाजन्मावधित्यागंयःकरोतिसविष्णुलोकंप्रयाति पुंडरीकाश्वमेधफलमाप्नोति सप्तजन्मसहस्राणिनाकपृष्ठेमहीयते सप्तजन्मांतरंयावद्यमलोकंनपश्यतीति जन्मावधिवृंताकत्यागपक्षेपि होमादिकंपर्ववदेव इतिवृंताकत्यागविधिः १८ अथशत्रुनाशनव्रतम् विष्णुधर्मोत्तरे रामंप्रतिपुष्करउवाच कृतोपवासोयाम्यर्क्षेकृत्तिकासुसदैवहि पूजयेद्वासुदेवंतुकुंकुमेनसुगंधिना श्वेतैश्चकुसुमैर्हद्यैर्धूपंदद्याच्चगुग्गुलुं घृतेनदीपंदद्याच्चरक्तवस्त्रंतथैवच निवेदनीयंदेवायतथासर्वंनिवेदयेत् होतव्याश्चसमिद्धेग्नौतथैवासुरसर्षपाः आसुरसर्षपोराजिका आयुधानिचदेयानिब्राह्मणेभ्यश्चदक्षिणा ॥ कर्मैतदुक्तंरिपुनाशकारिकार्य्यंसदाशत्रुगणप्रमाथीकृत्वैतदग्र्यं रिपुनाशमाशुप्राप्नोतिमर्त्योनहिसंशयोत्र इतिशत्रुनाशनव्रतम् १९ अथमौनव्रतंशिवधर्मे नंदिकेश्वरउवाच शृणुवत्सप्रवक्ष्यामिमौनंसर्वार्थसाधकं मौनव्रतंमहापुण्यंहुंहुंतत्रविवर्जयेत् पुंसांभोजनकालेतुहुंकारोयदिनिर्गतः सर्वमेवसुरामांसंतस्मान्मौनंविवर्जयेत् कर्मणामनसावाचापरहिंसांविवर्जयेत् मौनस्यास्यप्रभावेणऋषयास्त्रिदिवंगताः अब्दमेकंचरेन्मौनंयःषण्मासमथापिवा मासत्रयंसमायुक्तोमासमेकंतथैवच मासार्द्धंतुपुनःकुर्य्याद्दिवसान्द्वादशाथवा षट्पंचवाथत्रीण्येकंमौनंभुंजीतयत्नतः समाप्तेतुव्रतेतस्मिन्मौनव्रतसमाहितः लिंगंचंदनजंकृत्वाषडंगेनतुप्रोक्षयेत् षडंगंयथा गोमूत्रंगोमयंसार्पिःक्षीरंदधिचरोचना षडंगमेतत्परमंमंगलंसर्वदागवामितिपरिभाषितं गोरोचनांसमालभ्यलब्धगंधैस्तुपूजयेत् धूपंचागुरुकंदद्यान्नमस्कारांस्ततःपुनः करपादशिरोभिस्तुप्रणिपत्यविसर्जयेत् आत्मवित्तानुसारेणहेमघंटाप्रदापयेत् शिवाग्रतोनिबध्नीयाच्छिवस्यातीववल्लभां कांस्यलोहमयींवापिएकांवाशक्तितस्तथा शिवस्यपुरतोवेद्यांशिवभक्तांश्चभोजयेत् पाय

संमधुसंमिश्रंमधुमांसपरिप्लुतं अनेकभक्ष्यभोज्यान्नैर्लेह्यपेयसपिच्छिलैः सर्जिकाघृतसंमिश्रैर्मंडकैःसुसमाहितैः भोजयित्वाप्रव्राजितान्निरुद्वेगःसमाशयेत् शक्त्याचदक्षिणांदद्याद्वित्तशाठ्यंविवर्जयेत् क्रमेणचीर्यतेविप्रयस्ययस्यतुयद्भवेत् शिवभक्ताव्रतोनित्यंशांतिवाक्यंपुनःपुनः शक्त्याहिदक्षिणांदद्याच्छिवभक्त्यान्नमेततः ताम्रपात्रेतुताल्लिंगंस्थापपुष्पैरलंकृतं शिरसाधार्यतत्पात्रंस्वयंमौनीसमाहितः संगच्छेन्नृपमार्गेणयावत्तुशिवगोचरं प्रदक्षिणीकृत्याशिवंत्रीन्वारांश्चसमंततः नमस्कारैस्ततःकुर्य्यात्प्रणम्याशिरसाभुवि मौनस्यैषविधिःप्रोक्तोमया तवमहामते अस्यमौनस्यमाहात्म्याद्देवताःशिवतांगताःएतन्मौनव्रतंप्रोक्तंसर्वकामार्थसाधकं भुविसर्वासमर्थानांसुकरंप्रकटीकृतम् इतिशिवधर्मेमौनव्रतमाहात्म्यम् अथसंक्रांत्युद्यापनेफलं यदक्षयंपरंलोकेपुराणकवयोविदुः विषुवेअयनेवापिसंक्रांतिव्रतमाचरेत् पूर्वेद्युरेकभक्तेनदंतधावनपूर्वकं संक्रांतिवासरेप्राप्तेतिलैःस्नानंविधीयते अभिसंक्रमणेभूमौचंदनेनाष्टपत्रकं पद्मंसकर्णिकंकुर्याचास्मिन्नावाहयेद्रविं कर्णिकायांन्यसेत्सूर्यमादित्यंपूर्वतस्ततः सप्तार्चिषमथाग्नेय्यांयाम्येऋङ्मंडलायच नमःसावित्रेनैर्ऋत्यांवारुणेवरुणंयजेत् सप्तसप्तिंचवायव्येयजेत्प्रयतमानसः मार्त्तंडमुत्तरेविष्णुमीशानेविन्यसेत्ततः गंधमाल्यफलैर्भक्ष्यैःस्थंडिलेपूजयेत्ततः चंदनोदकपुष्पैस्तुदेवायार्घ्यंन्यसेद्भुवि अथार्घ्यमंत्रः नमोनमस्तेसूर्य्यायविश्वधाम्नेस्वयंभुवे नमोनमस्तेवरदऋक्सामयजुषांपते अनेनविधिनादत्त्वादेवायार्घ्यंनरोत्तम द्विजायसोदकंकुंभंतिलपात्रंहिरण्मयं कमंडलुंयथाशक्त्याकारयित्वानिवेदयेत् विधिनानेनकर्त्तव्यंमासिमासिनरोत्तम एकभक्ताशनैःपुंभिःसर्वमेतद्यथाविधि एकस्मिन्नन्हिकर्त्तव्यंवत्सरांतेथवापुनः अत्रव्रतेत्रयःपक्षाःमासिमासिकर्त्तव्यमित्येकः संवत्सरमध्येएकस्मिन्कर्त्तव्यमितिद्वितीयः संवत्सरांतेकर्त्तव्यमितितृतीयः एतेचशक्ताशक्तत्वेनव्यवस्थिताः संवत्सरांतेघृतपायसेन-

संतर्प्यैवमन्हिद्विजपुंगवांश्च कुंभान्पुनर्द्वादशधेनुयुक्तान्सरत्नहैरण्मयपद्मगर्भान् पयस्विनीःशीलवतीश्चरौप्यखुराःसवस्त्राःखलुहैमशृंगीः गावोवृषाःसप्तसकांस्यदोहामाल्यांबरावाचतुरोप्यशक्तः द्वेधान्ययुक्तेकपिलामथैकांनिवेदयेद्ब्राह्मणपुंगवाय हैमींचदद्यात्पृथिवींसशेषामाकर्षरौप्यामथवापिताम्रां सशेषांशेषनागसहितांपैष्टीमशक्तोवसुधांविधायसुवर्णरौप्येणसमंप्रदद्यात् पैष्टींपिष्ठनिर्मितां नवित्तसाठ्यंपुरुषोत्रकुर्य्यात्कुर्वन्नधोयातिनसंशयोत्र यावन्महेंद्रप्रमुखाःसुरेंद्राःपृथ्वीचसप्ताब्धियुतेहतिष्ठेत् तावत्सगंधर्वगणैरशेषैःसंपूज्यतेनारदनाकपृष्ठे ततश्चकर्मक्षममाप्यसप्तद्वीपाधिपःस्यात्कुलशीलयुक्तः नाकस्यपृष्ठेससखःसभार्य्यःप्रभूतपुत्रान्वयवंदितांघ्रि इति पठतिशृणोतियोतिभक्त्याविधिमखिलंरविसंक्रमेणपुण्यं मतिमपिचददातिसोपिदेवैरमरपतिप्रमुखैर्वृतस्तुसःस्यात् इतिमत्स्यपुराणोक्तंसंक्रांतिव्रतोद्यापनम् अथवारव्रतानि नंदिकेश्वरउवाच येत्वादित्यदिनेब्रह्मन्पूजयंतिदिवाकरं स्नानदानादिनातेषांकिंफलंस्याद्ब्रवीहिमे ब्रह्मोवाच येत्वादित्यदिनेप्राप्ते श्राद्धंकुर्वंतिमानवाः सप्तजन्मानितेप्राज्ञाःसंभवंतिविरोगिणः नक्तंकुर्वंतियेतत्रमानवास्तंसमाश्रिताः जपमानाःपरंजप्यमादित्यहृदयंपरं आरोग्यमिहसंप्राप्यसूर्यलोकंव्रजंतिते उपवासंतुकुर्वंतियेत्वादित्यदिनेसदा जपंतियेमहाश्वेतांतेलभंतियथेप्सितं अहोरात्रेणनक्तेनात्रिरात्रनियमेनच जपमानोमहाश्वेतामीप्सितंलभतेफलं विशेषेणादित्यदिनेजपमानोगणाधिप षडक्षरंमहाश्वेतांगच्छेद्वैरोचनंपदं तंसमाश्रिताआदित्यमाश्रिताइत्यर्थः ॥ श्रीकृष्णउवाच ॥ रविसंक्रमणेचेत्स्याद्रविवारोनराधिप सज्ञेयोहृदयोनामआदित्यहृदयप्रियः तत्रभक्तंसमाश्रित्यदेवंसंपूज्ययत्नतः गत्वाचायतनेभानोरादित्यायतनेस्थितः जपेदादित्यहृदयंसंख्ययाष्टशतंबुधः योत्रसंपूजयेद्भानुंभक्त्याश्रद्धासमन्वितः सकामांल्लभतेसर्वानादित्याद्धृदयेस्थितान् आदित्यहृदयमंत्रः घृणिसूर्यआदित्योमहाश्वेतांह्रांह्रींस

इतिमंत्रः खखोल्कायनमइतिषडक्षरमंत्रः ह्रांह्रींसः सूर्य्यायइतिकेचित् योवैसूर्यदिनेभक्त्याभानुंसंपूज्यश्रद्धया नक्तंकरोतिपुरुषःसयात्यमरलोकतां इदंव्रतमेकदिनसमाप्यमितिरत्नाकरःतथाच आदित्यउवाच योऽदमेकंप्रकुर्वीतनक्तंममादिनेरतः ब्रह्मचारीजितक्रोधोममार्चनपरःखग संवत्सरांतेचमृगान्मद्भक्तांश्चैववैद्विजान् भोजयित्वाततोब्रूयात्प्रीयतांमेदिवाकरः मृगान्दिव्यब्राह्मणान् एवंभक्तिसमायुक्तोममलोकसगच्छति नचमानुष्यकंलोकमध्रुवंप्राप्नुयान्नरः इत्यादित्यवारेनक्तादिव्रतानि अथादित्यवारव्रतविधिः सौरधर्मे तत्रादौमासपक्षाद्युल्लिख्य ममसमस्तरोगनिरासार्थमायुष्यादिसकलमनोभिलषितकामनासिद्ध्यर्थं श्रीसूर्यनारायणप्रीत्यर्थंयथाशक्तिसूर्यनारायणपूजनसहितमादित्यव्रतमहंकरिष्ये ताम्रपात्रेरक्तचंदनेनाष्टदलंकृत्वातत्रदेवंपूजयेत् ध्यानम् तेजोरूपंसहस्रांशुंसप्ताश्वरथगंरविं द्विभुजंवरदंपद्मलांछनंसर्वकामदं ध्यायामीतिशेषः आगच्छभगवन्सूर्यमंडलेस्मिन्स्थिरोभव यावत्पूजासमाप्येततावत्त्वंसन्निधौभव आवाहनम् हेमासनंमहादिव्यंनानारत्नविभूषितं आसनंगृह्यतांदेवदिवाकरनमोस्तुते आसनं गंगाजलंसमानीतंपरमंपावनंमहत् पाद्यंगृहाणदेवेशधामरूपनमोस्तुते पाद्यं ३ सोमसूर्याग्निरूपायब्रह्मविष्णुस्वरूपिणे अर्घ्यमंजलिनादत्तंगृहाणपरमेश्वर अर्घ्यं ४ गंगादितीर्थजंतोयंजातिपुष्पैश्चवासितं ताम्रपात्रस्थितंदिव्यंगृहाणाचमनीयकं आचमनं ५ जान्हवीजलमत्यंतंपवित्रकरणंपरं स्नानार्थंचमयानीतंस्नानंकुरुजगत्पते स्नानं ६ स्नानांतेआचमनंपूर्वोक्तमंत्रेण ७ शुद्धवस्त्रयुगंदेवरक्तवर्णंदुकूलकं तवभक्त्यामयादत्तंगृहाणकमलाकर वस्त्रं ८ नमःकमलहस्तायविश्वरूपायतेनमः उपवीतंमयादत्तंगृहाणत्वंदिवाकर यज्ञोपवीतम् ९ कुंकुमागुरुकस्तूरीसुगंधश्चंदनादिभिः रक्तचंदनयुक्तंसुगंधंगृह्णप्रभाकर गंधम् १० जपाकदंबकुसुमंरक्तोत्पलमनुत्तमं पुष्पाणिगृह्यतांदेवसर्वकामप्रदोभव

पुष्पाणि ११ दशांगगुग्गुलुंधूपंकालागुरुसमन्वितं आघ्रेयंसर्वदेवानामिमंधूपंगृहाणमे धूपं १२ कार्पा
सवर्त्तिकायुक्तंगोघृतेनसमन्वितं दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहं दीपं १३ पायसंघृतसंयुक्तंनानापक्वा
न्नसंभवं नैवेद्यं गृह्यतांदेव शांतिंकुरुजगत्पतेनैवेद्य १४ कर्पूरवासितंतोयंमंदाकिन्याःसमाहृतं आचम्यतांजगन्ना
थप्रसीदपरमेश्वर आचमनं १५ इदंफलंमयादत्तंस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि
फलं ॥ १६ ॥ एलालवंगकर्पूरखादिरादिसमन्वितं तांबूलंगृह्यतांदेवमुखाभरणमुत्तमं तांबूलं ॥ १७ ॥ यानि
कानिचपापानिजन्मांतरकृतानिच विलयंयांतुतानीहप्रदक्षिणपदेपदे प्रदक्षिणा ॥ १८ ॥ ताम्रपात्रेस्थितं
तोयंफलपुष्पसमन्वितं गृहाणार्घ्यंमयादत्तंसर्वकामप्रदोभव अर्घ्यं ॥ १९ ॥ नमःपंकजहस्तायनमःपंक
जमालिने नम.पंकजनेत्रायभास्करायनमोनमः नमस्कारः ॥ २० ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः
अनंतपुण्यफलदमतःशांतिंप्रयच्छमे दक्षिणा ॥ २१ ॥ वज्रमाणिक्यवैडूर्य्यमुक्ताविद्रुममेवच पुष्परागेण
संयुक्तंहेमपुष्पंगृहाणमे सौवर्णपुष्पम् ॥ २२ ॥ पंचवर्त्तिसमायुक्तंसर्वमंगलदायकं नीराजनंगृहीत्वातुमि
त्रोमेसंप्रसीदतु नोराजनं ॥ २३ ॥ तंडुलैपूरितंपात्रंहिरण्येनसमन्वितं रक्तवस्त्रयुगोपेतंब्राह्मणायनिवेदयेत्:
वायनदानं ॥ २४ ॥ यस्योदयेस्याज्जगतःप्रबोधोयःकर्मसाक्षीभुवनस्यगोप्ता कुष्टादिव्याध्यौघविनाशकोय
सभास्करोमेदुरितंनिहन्यात् इतिप्रार्थना इतिपूजा ॥ अथकथा ॥ मांधातोवाच ॥ भगवन्ज्ञानिनांश्रे
ष्ठकथयस्वप्रसादतः त्वद्वक्त्राच्छ्रोतुमिच्छामिव्रतंपापप्रणाशनं सर्वकामप्रदंचैवसर्वामयविनाशनं पूजार्घ्य
दानसहितंनैवेद्यप्राशनान्वितं एतत्कथयसर्वंत्वंप्रसन्नोयदिमेप्रभो वसिष्ठउवाच शृणुराजन्प्रवक्ष्यामियद्गुह्यं
व्रतमुत्तमं सर्वकामप्रदंपुंसांकुष्ठादिव्याधिनाशनं भानोस्तुष्टिकरंराजन्भुक्तिमुक्तिप्रदायकं यस्योदयेसुरगणा

मुनिसंघाः सचारणाः दानवामानवगणाःकुर्वंतिसततार्चनं यस्योदयेनुसर्वेषांप्रबोधोनृपसत्तम तस्यदे
वस्यवक्ष्यामिव्रतंराजन्सविस्तरं पूजार्घ्यप्राशनंदानंनैवेद्यंशृणुतत्त्वतः सर्वतीर्थेषुयत्पुण्यंसर्वयज्ञेषुयत्फलं सर्व
दानेनतपसायत्पुण्यंसमवाप्यते प्रातःस्नानेनयत्पुण्यंतत्पुण्यंरविवासरे मार्गशीर्षादिमासेषुद्वादशस्वपिभू
पते सूर्य्यव्रतंकरिष्यामियावद्वर्षंदिवाकर व्रतंसंपूर्णतांयातुत्वत्प्रसाद्दिवाकर ॥ इतिव्रतग्रहणम् ततःप्रातः
समुत्थायनद्यादौविमलेजले स्नात्वासंतर्पयेद्देवान्पितॄंश्चवसुधाधिप उपलिप्यशुचौदेशेसूर्यंतत्रसमापयेत्
विलिख्यतत्रपद्मंतुद्वादशारंसकर्णिकं ताम्रपात्रेतथापद्मरक्तचंदनवारिणा ततःसंपूजयेद्देवंदिननाथंसुरेश्वर
मासेमासेचयेराजन्विशेषांस्तान्शृणुष्ववै मार्गशीर्षेयजेन्मित्रंनारिकेलार्घ्यमुत्तमं नैवेद्यंतंडुलादेयाःसाज्याश्च
सगुडाःस्मृताः पत्रत्रयंतुलस्यास्तुप्राश्यतिष्ठेज्जितेंद्रियः दद्याद्विप्रायभोज्यंतुदक्षिणासहितंनृप पौषेविष्णुं
समभ्यर्च्यनैवेद्यंकृशरंतथा वीजपूरेणचैवार्घ्यंप्राश्यंचूतदलत्रयं दद्याद्घृतंतुविप्रायभोजनेनसमन्वितं माघे
वरुणनामानं संपूज्याज्यंतिलान्गुडं भोजनंदक्षिणांदद्यान्नैवेद्यंजातिकाफलं अर्घ्यंतेनैवदत्त्वातुप्राश्यमुष्टित्रयं
तिलान् फाल्गुनेसूर्यमभ्यर्च्यजंवीरार्घ्यंनिवेदयेत् पलत्रयंदधिप्राश्यनैवेद्यंसघृतंदधि दधितंडुलदानंचभो
जनेसमुदाहृतं चैत्रेभानुंतुसंपूज्यनैवेद्यंघृतपूरिका फलंतुदाडिमंप्रोक्तंप्राश्यंदधिपलत्रयं विप्रायभोजनंदद्या
न्मिष्टान्नंतुसदक्षिणम् वैशाखेतपनंपूज्यमाषाद्यंसघृतंतथा अर्घ्यंदद्यात्तुद्राक्षाभिःप्राशनेगोमयंस्मृतं कुर्या
न्माषान्नदानंचसघृतंवैसदक्षिणां ज्येष्ठेइंद्रंयजेद्धीमान्नैवेद्यंचकरंभजं अर्घ्यंचसहकारेणप्राश्यंतोयांजलित्रयं
दध्योदनसमायुक्तंभोजनंब्राह्मणायतु आषाढेरविमभ्यर्च्यदद्याच्चिभिरकंतथा चिभरकंबालुकमितिभाषयाप्र
सिद्धं विप्रायभोजनंदद्यात्प्राशनेमरिचत्रयं गभस्तिश्रावणेमासित्रपुसीफलमेवच मुष्टित्रयंचसक्तूनांप्राशने

समुदाहृतं विप्राग्र्यभोजनं दद्या द्दक्षिणासाहितंनृप यमंभाद्रपदेपूज्यकूष्मांडंतंडुलाज्यकं गोमूत्रंप्राश-
नैप्रोक्तं तथाब्राह्मणभोजनं हिरण्यरेतसानिषेनैवेद्यंशर्करास्मृतं दाडिमैलार्घ्यदानंतुप्राश्यंखंडपलत्रयं
विप्रायपरयाभक्त्याभोजनेशालिशर्करा दिवाकरः कार्त्तिकेच रंभायाःफलमेवच पायसंचैवनैवेद्यंपा-
यसंप्राशयेत्शनैः एवंव्रतंसमाप्यैतत्तदुद्यापनमाचरेत् ततोगुरुगृहेगत्वागृह्णीयाच्चरणावुभौ उद्यापनं
करिष्येहमागच्छममवेश्मनि माषकेनसुवर्णस्यप्रतिमांकारयेद्रवेः रथोरौप्यमयः कार्य्यः सर्वोपस्क-
रसंयुतः कृत्वाद्वादशपत्रंतुकमलंरक्ततंडुलैः स्थापयेदव्रणंकुंभंपंचरत्नसमन्वितं तस्योपरिन्यसेत्पात्रं
ताम्रंतंडुलपूरितं रक्तवस्त्रसमाछन्नंपुष्पमालाविभूषितं पंचामृतेनस्नपनमग्न्युत्तारणपूर्वकं प्रतिष्ठांचततःकृत्वा
पूजांदेवस्यकारयेत् चंदनैःकुसुमैरन्यैर्विविधैःकालसंभवैः अखंडपट्टवस्त्रंचकमंडलुमुपानहौ वर्द्धनीत्रितयंतत्रस्था
पयेद्रविसन्निधौ वर्द्धनीघटिः घटीतुवर्द्धनीतिमेदिनीकोशात् संज्ञायावस्त्रयुग्मंचकौसुंभंचमहीपते प्रतिपात्रं
पुसंपूज्याःसूर्य्याद्वादशनामभिः मित्रोविष्णुःसवरुणः सूर्योभानुस्तथैवच तपनेंद्रौरविःपूज्योगभस्तिःशमन
स्तथा हिरण्यरेतादिनकृत्पूज्याएतेयथाक्रमं मध्येसहस्रकिरणःसंपूज्यःसंज्ञयासह पूगीफलैर्धूपदीपैर्वस्त्रैनैवे
द्यसंयुतैः नारिकेलनैचैवार्घ्यंदद्याद्देवस्यभक्तितः मंत्रेणानेननराजेंद्रव्रतस्यपरिपूर्त्तये नमःसहस्रकिरणसर्वव्या
धिविनाशन गृहाणार्घ्यंमयादत्तंसंज्ञयासहितोरवे इत्यर्घ्यमंत्रः ततआरार्त्तिकंकृत्वापूजासांकल्प्यमेवच सां
कल्प्यंचततःश्राद्धं कार्य्यंवैसूर्य्यदैवतं ब्राह्मणान्भोजयेत्भक्त्यामिष्टान्नैर्द्वादशप्रभो दंपत्योर्भोजनंदेयंपरमान्न
समन्वितं ततस्तुदक्षिणादेयासमभ्यर्च्यस्रगादिभिः उपहारादितत्सर्वंगुरवेप्रतिपादयेत् गुरुंतत्रैवसंतोष्य-
ब्राह्मणांश्चविसर्जयेत् मंत्रहीनंक्रियाहीनंविधिहीनंतुयत्कृतम् तत्सर्वंपूर्णतांयातुभूमिदेवप्रसादत अनुव्रज्यगु

रुविप्रान्भोजनंतुसमापयेत् वृद्धैश्चबंधुभिःसार्द्धंनत्वादेवंदिवाकरं एवंयःकुरुतेमर्त्यो वित्तशाठ्यविवर्जितः सूर्यव्रतंमहाराजतस्यपुण्यफलंशृणु ब्राह्मणोलभतेविद्यांक्षत्रियोराज्यमाप्नुयात् वैश्योधनसमृद्धिंचशूद्रःसुखमवाप्नुयात् अपुत्रोलभतेपुत्रंकुमारीलभतेपतिं रोगार्त्तोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात् यंयंचिंतयतेकामंसतस्यभवतिध्रुवं यइदंशृणुयाद्भक्त्याप्येकचित्तोनराधिप सर्वान्कामानवाप्नोतिप्रभावाद्भास्वतोनृप इतिसौरधर्मोक्तंसूर्यव्रतम् अथास्यप्रयोगः ओमद्येतितिथ्यादिसंकीर्त्यात्मनोऽखिलपापक्षयपूर्वकरोगक्षयपुत्रलाभादिपूर्वकाभीष्टकामसिद्ध्यर्थंवर्षात्मकंसूर्यव्रतंकरिष्ये इतिसंकल्प्य गोमयेनोपलिप्तभूमौपंचरंगैर्द्वादशारंपद्मंविलिख्य तत्रताम्रपात्रंनिधायतन्मध्येरक्तचंदनादिनापद्मंविलिख्य तत्रवक्ष्यमाणरीत्यासूर्यंपूजयेत् मार्गशीर्षादिमासेषुक्रमेणदेवतानामर्घ्यनैवेद्यंभक्षणंदानंचज्ञेयं तत्रादौमार्गशीर्षे मित्रायनमः नारिकेलार्घ्यं साज्यगुडतंडुलंनैवेद्यं तुलस्याःपत्रत्रयभक्षणं साज्यगुडभक्तदानं १ पौषे विष्णवेनमः बीजपूरार्घ्यं पलत्रयघृतस्यनैवेद्यं प्राश्यंचूतदलत्रयं २ माघे वरुणायनमः पूगीफलार्घ्यं तिलगुडनैवेद्यं मुष्टित्रयतिलप्राशनं सगुडतिलकुडवदानं ३ फाल्गुने सूर्यायनमः जंबीरार्घ्यं सघृतदधिनैवेद्यं पलत्रयंदधिप्राशनं दधितंडुलदानं ४ चैत्रे भानवेनमः दाडिमार्घ्यं घृतपूरिकानैवेद्यं पलत्रयदुग्धप्राशनम् मिष्टान्नदानं ५ वैशाखे तपनायनमः द्राक्षार्घ्यं घृतमन्ननैवेद्यं गोमयप्राशनं माषान्नदानं ६ ज्येष्ठे इंद्रायन.सहकारार्घ्यंदानं करंभकंअंजलित्रयप्राशनं दध्योदनदानं ७ आषाढे रवयेनमःजातीफलार्घ्यं पृथुकनैवेद्यं दानंच ८ श्रावणे गभस्तयेनमः त्रपुसीफलार्घ्यं यवसक्तुनैवेद्यं तदेवपलत्रयप्राशनं अथवायथेष्टभोजनंदानंच ९ भाद्रपदे यमायनमः कूष्मांडार्घ्यंदानं तंडुलाज्यनैवेद्यं पलद्वयगोमूत्रप्राशनं तंडुलाज्यदानं १० आश्विने हिरण्यरेतसेनमःदाडिमार्घ्यं

शर्कराभक्तनैवेद्यं शर्करापलत्रयप्राशनं शर्कराभक्तदानं ११ कार्त्तिकेदिवाकरायनमः रंभाफलार्घ्यदानं पायसंनैवेद्यम् तदेवप्राश्नीयात् दद्याच्च १२ एवंवर्षमात्रंव्रतंचरित्वा अंतेमार्गशीर्षापररविवारे उद्यापनंकुर्य्यात् तद्यथा आचार्य्यवरणंविधाय सर्वतोभद्रेकलशंप्रतिष्ठाप्य तदुपरिरक्ताक्षतयुतं ताम्रमयपूर्णपात्रंनिधाय तत्रद्वादशारंकमलंविरच्य तन्मध्येरौप्यमयंरथंप्रतिष्ठाप्य तदुपरिहैमंसंज्ञासहितंसहस्रकिरणं आकृष्णेनेतिमंत्रेणप्रतिष्ठाप्यपरितोद्वादशकमलेषुद्वादशमासाधिपान् क्रमेणपूजयेत् तद्यथा ॐमित्रं १ विष्णुं २ वरुणं ३ सूर्य्यं ४ भानुं ५ तपनं ६ इंद्रं ७ रविं ८ गभस्तिं ९ यमं १० हिरण्यं ११ दिवाकरं १२ आवाह्य रक्ताक्षतपुष्पादिभिः संपूज्य परमान्नंनैवेद्यंदत्त्वा विशेषार्घ्यंनारिकेलयुतंदद्यात् मंत्रः ॐनमः सहस्रकिरणसर्वव्याधिविनाशन गृहाणार्घ्यंमयादत्तंसंज्ञयासहितोरवे एवंपूजांसमाप्य ततः सूर्य्यदैवतंश्राद्धंकृत्वा तत्रमासाधिपनामभिः पिंडदानंपूजासहितंकुर्य्यात् सूर्य्यायनमः १ धात्रेनमः २ वरुणायनमः ३ माधवायनमः ४ हरयेनमः ५ रवयेनमः ६ रुद्रायनमः ७ भर्गायनमः ८ स्वर्णरेतसेनमः ९ अर्य्यम्णेनमः १० भानवेनमः ११ भास्करायनमः १२ एषपिंडोनमः पूजांते आचार्य्यैः अग्निंप्रतिष्ठाप्य अन्वादद्यात् संज्ञासहितंभास्करंपायसद्रव्येण अष्टोत्तरशतसंख्याकाहुतिभिःपरिवारदेवताब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्षे इतिहोमंसमाप्य ततोद्वादशब्राह्मणान्पूर्वोक्तद्वादशनामभि वैरुदक्षिणादिभिःसंपूज्य आचार्य्यायपीठंगांचदत्त्वा परमान्नेन ब्राह्मणान्संतर्पयेत् इतिसौरपुराणोक्तंसोद्यापनमादित्यव्रतम् अथाश्विनादिरविवारेषुआशादित्यव्रतम् स्कांदे स्कंदउवाच शृणुदिव्यंपरंपुण्यमादित्याराधनं परं यत्कृत्वासर्वकामानांसकलंफलमाप्नुयात् समुद्रतीरेविप्रेशपुरीद्वारावतीशुभा वासुदेवोयदुवरोयत्रराज्यं

प्रशासति दुर्वासः शंकरस्यांशआजगामावलोकितुं कृष्णेनपूजितस्तत्रअर्घ्यपाद्यासनादिभिः भोजनंतस्यत
द्दत्तंयथाभिलषितंमुने संपूजितः सकृष्णेनयावद्गच्छत्यसौमुनिः सांबेनहसितस्तस्यसुतेनसहसाकिल क्रुद्धो
पिमुनिशार्दूलःकोपंसंहृतवान्स्वयं पूजितेनमयेदानीमपकर्त्तुंकथंक्षणः सगत्वानारदंप्राहसांबेनहसितोस्मिभो
प्रभासेचरतस्तस्यकार्य्यंशिक्षापनंत्वया इत्युक्तोनारदःप्रायाद्द्वारिकांकृष्णसन्निधौ स्वकंसैन्यंदर्शयस्वममदेवकि
नंदन देवयात्रामिषंकृत्वाहस्त्यश्वरथसंकुलं नारदेनैवमुक्तस्तुतथैवकृतवान्प्रभु दर्शनेतुबलस्याहनावसांबःप्र
दृश्यते मयैवानीयतेशीघ्रंद्वारवत्यास्तवांतिकं गत्वैवमुक्तोमुनिनादृष्टोजांबवतीसुतः सशृंगारस्तथानीतोमकर
ध्वजदर्शनः गत्वालिंग्यचुचुंबुस्तंगोप्यःकृष्णपरिग्रहाः नारदःप्राहभगवन्दुश्चरित्रंतवानघ क्रुद्धेनशौरिणा
शप्तःकुष्ठीभवनराधिप एवमुक्तस्तथापुत्रःकुष्ठरोगातुरोभवत् सांबःप्रणम्याहपितः किमर्थंशपितस्त्वया स्व
शक्त्याज्ञानदृष्ट्यानुविचारयविनिश्चियं ध्यानाद्दुर्वाससोज्ञात्वाविक्रियामत्रकारणं अनुग्रहोमयापुत्रकार्यस्ते
स्वजनेशुभे आदित्यस्यव्रतंचैवकुरुकुष्ठविनाशनं सांबउवाच कथंतातमयाकार्य्यंव्रतंसर्वफलप्रदं किंविधानं
चकेमंत्राकिंदानंकिंचपूजनं श्रीकृष्णउवाच मासमाश्वयुजंप्राप्ययदारविदिनंभवेत् तदाव्रतमिदंग्राह्यंनरैः
स्त्रीभिर्विशेषतः यावत्संवत्सरंतावद्विधिनानेनपुत्रक गोमयेनक्षितौकुर्य्यान्मंडलंवर्त्तुलंपुनः रक्तपुष्पैरक्षताभिर
र्घ्यंतत्रप्रदापयेत् मंत्रेणानेनभास्वंतमाचार्य्यःप्रतिवासरं यथाशाविमलाःसर्वाःसूर्यभास्वरभानुभिः तथाशाः
सकलामह्यंकुरुनित्यंममाशुताः इत्यर्घ्यमंत्रः एवंतमर्च्चयेत्तावद्यावद्वर्षंसमाप्यते समाप्तेतुव्रतेवत्सकुर्य्यादुद्याप
नेविधिं गोमयेनानुलिप्तायांभूमौमंडलमालिखेत् रक्तचंदनरेखाभिःकुंकुमेनविशेषतः तन्मध्येद्वादशदलंप
द्मसंकाशयेद्बुधः सिंधूरपूरितदलंजपाकुसुमपूजितं तन्मध्येस्थापयेत्कुंभंप्रवालांकुरसन्निभं शालितंडुलसंपूर्णं

शर्कराचंदनान्वितं तस्योपरिन्यसेत्पात्रंताम्रशक्त्याविनिर्मितं सौवर्णंभास्करंकृत्वापद्महस्तंस्वशक्तितः रक्तवस्त्रयुगोपेतंपात्रोपरिनिवेशयेत् अथपंचामृतेनादौजपाकुसुमलेपनैः रक्तपुष्पैस्तुनैवेद्यैःफलैः कालोद्भवैस्तथा पूजयेज्जगतामीशंधूपदीपैस्तथोत्तमैः ॐसूर्य्यायनमः १ वरुणाय- २ माधवाय- ३ धात्रे- ४ हरये- ५दुर्गाय-६ सुवर्णरेतसे- ७ अर्यम्णे. ८ दिवाकराय. ९ भानवे- १० तपनाय- ११ हंसायनमः १२ इतिद्वादश नामभिः पूजा कार्य्यावैव्रतिभिःसदा नमोनमः पापविनाशनाय विश्वात्मनेसप्ततुरंगमाय सामर्ग्यजुर्धामनिधावेधात्रे भवाब्धिपोतायनमःसावित्रे इत्यर्घ्यम् एवंसंपूज्यभानुंतुनक्तंभुंजीतवाग्यतः आचार्य्यं पूजयित्वातुवस्त्रैराभरणैः शुभैः तस्मैतांप्रतिमांकुंभं साहिरण्यंप्रदापयेत् प्रीयतांभगवन्देवोममसंसारतारकः ब्राह्मणान्भोजयेत्पश्चाद्द्वादशान्नादिविस्तरैः तेभ्यस्तुकलशान्दद्याद्यथाशक्त्यातुदक्षिणां एवंयः कुरुतेसम्यग्व्रतमेतदनुत्तमं आशादित्येतिविख्यातंतस्यपुण्यफलंमहत् निर्व्याधिरतितेजस्वीपुत्रपौत्रसमन्वितः भुक्त्वाचविपुलान्भोगानमरैश्चापिदुर्लभान् देहांतेरविसायुज्यप्राप्नुयादुत्तमोत्तमं प्राप्स्यसेपरमामृद्धिं विमुक्तः कुष्ठरोगतः आशाभंगोनतस्यास्तिकदाचिदपिजन्मनि एतस्मात्कारणाद्वत्सकुरुष्वव्रतमुत्तमं एतच्छ्रुत्वावचः सांबः पित्राकृष्णेनभाषितं व्रतंचरित्वासंप्राप्तः सर्वसिद्धिंसुदुर्लभां इदंयः शृणुयाद्भक्त्या श्रावयेद्वापिमानवः तावुभौपुण्यकर्माणौरविलोकमवापतुः इतिस्कंदपुराणोक्तमाशादित्यव्रतम् अथप्रयोगः आश्विनाद्यरविवारमारभ्यप्रतिवारंवर्षपर्यंतंकुर्यात् तत्रादौ तिथ्यादिसंकीर्त्यात्मनः सकलरोगनिर्वासनपूर्वकपुत्रपौत्रधनधान्यसकलाभीष्टसिद्धिकरश्रीसवितृप्रीत्यर्थंआशादित्यव्रतंकरिष्ये इतिसंकल्प्य गोमयेनोपलिप्तभूमौरक्तचंदनादिना वर्त्तुलंमंडलंविरच्य तत्रमाशाधिपंदेवमावाह्य षोडशोपचारैः संपूज्य रक्त

पुष्पाक्षतादियुक्तंसजलंताम्रपात्रेणअर्घ्यंभूमौजानुनीनिपात्यदद्यात् तत्रमंत्रः यथाशाविमलाः सर्वा स्तवभास्करभानुभिः तथाशाविमलामह्यंकुरुनित्यममार्घ्यतः ततोनमस्कारः नमोस्तुतेपापविनाशनाय विश्वात्मनेसप्ततुरंगमाय सामर्ग्यजुर्धामनिधिविधात्रेभवाब्धिपोतायनमः सवित्रे अनेनमंत्रेणा शाधिपनाममंत्रे एवापूजाकार्य्या एवंप्रतिभानुवारंवर्षपर्यंतंचरित्वा अंतेआश्विनाद्यरविवारेउद्यापनंकुर्य्यात् तत्रपूर्वोक्त संकल्पांते आचार्यंवृत्वा सर्वतोभद्रेरक्तवस्त्रवेष्टितंताम्रकलशंप्रतिष्ठाप्य तत्रताम्रमयंपूर्णपात्रंनिधाय तत्ररक्ताक्षतैर्द्वादशारंकमलंविरच्य तन्मध्येरौप्यरथस्थंहैमंसवितारं आकृष्णेनेतिमंत्रेणसंस्थाप्यपरितः पूर्वोक्तान्द्वादशमासाधिपान्संस्थाप्य उक्तप्रकारेणपूजयित्वा ततः अग्निंप्रतिष्ठाप्यहोमंकुर्यात् तत्रप्रधानम् सवितारंपायसद्रव्येण अष्टोत्तरशतसंख्याकाहुतिभिः मासाधिपद्वादशदेवताः ब्रह्मादिदेवताश्चैकैयाज्याहुत्यायक्ष्ये होमंसमाप्य पूर्वोक्तद्वादशमासाधिपनामाभिर्द्वादशब्राह्मणान्संपूज्य तेभ्यःशालितंडुलसंभवपक्वान्नेर्वापूरितान्रक्तकलशान् रक्तवस्त्रवेष्टितान्सदक्षिणान्दत्वा आचार्य्यायपीठंव्रतपूर्त्तयेगांचदत्त्वा सदन्नेनब्राह्मणान्तर्पयित्वा आशिषोगृहीत्वास्वयंभुंजीत अत्रपायसपूरितताम्रपात्रदानमुक्तंहोमोप्युक्त एवंकृते सर्वव्याधिमुक्तोभवति इतिस्कंदपुराणोक्तंसोद्यापनमाशादित्यव्रतोद्यापनविधिः अथभविष्योत्तरादादित्यपीडाशांतिव्रतम् अतःपरंप्रवक्ष्यामिरहस्यंह्येतदुत्तमं येनलक्ष्मीर्धृतिस्तुष्टिःपुष्टिःकांतिश्चजायते आदित्यवारं हस्तेनपूर्वंगृह्यविचक्षणः मंत्रोक्तविधिनासर्वंकुर्य्यात्पूजादिकंरवेः प्रत्यर्कंसप्तनक्तानिकृत्वाभक्तिपरोनरः ततस्तुसप्तमेप्राप्तेकुर्य्याद्ब्राह्मणवाचनं भास्करंशुद्धसौवर्णंकृत्वायत्नेनमानवः ताम्रपात्रेस्नापयित्वारक्तपुष्पैःप्रपूजयेत् घृतेनस्नापयित्वाचलड्डुकान्विनिवेद्यच होमोघृततिलैश्चैवसमिधश्चार्कवृक्षजाः मंत्रेणानेनविदुषेब्राह्म

णायनिवेदयेत् आदिदेवनमस्तुभ्यंसप्तसप्तेदिवाकर त्वंरवेतारयस्वास्मानस्मात्संसारसागरात् व्रतेनानेन राजेंद्र भवेदारोग्यमुत्तमं द्रव्यसंपत्सुखप्राप्ति रितिपौराणिकाविदुः अविसंपादिनीचेयं शांतिःपुष्टिः सदानृणाम् सूर्यपीडासुघोरासुकृताशांतिःशुभप्रदा इत्यादित्यशांतिव्रतम् अथादित्यहृदयस्तोत्रंवाल्मीकीयेरामायणेयुद्धकांडे ततोयुद्धपरिश्रांतंसमरेचिंतयास्थितं रावणंचाग्रतोदृष्ट्वायुद्धायसमुपस्थितं देवतैश्चसमागम्यद्रष्टुमभ्यागतोरविः उपगम्याब्रवीद्राममगस्त्योभगवांस्तदा अगस्त्यउवाच रामराममहाबाहोशृणुगुह्यंसनातनं येनसर्वानरीन्वत्ससमरेविजयिष्यसि आदित्यहृदयंपुण्यंसर्वशत्रुविनाशनं जयावहंजपन्नित्यमक्षयंपरमंपदं सर्वमंगलमांगल्यंसर्वपापप्रणाशनम् चिंताशोकप्रशमनंचायुर्वर्द्धनमुत्तमं ॐअस्यश्री आदित्यहृदयस्तोत्रस्यअगस्त्यऋषिरनुष्टुप्छंदः परंब्रह्मरूपीभगवान्नादित्योदेवता निर्विघ्नतया ब्रह्मविद्या जपादिसिद्ध्यैविनियोगः अथकरषडंगन्यासः रश्मिमंतं १ समुद्यंतं २ देवासुरनमस्कृतं ३ विवस्वंतं ४ भास्करं ५ भुवनाधिपं ६ अथध्यानम् ध्येयःसदासवितृमंडलमध्यवर्त्ती नारायणः सरसिजासनसन्निविष्टः केयूरवान्मकरकुंडलवान्किरीटी हारीहि रण्मयवपुर्धृतशंखचक्रः १ पद्मासनःपद्मकरोद्विबाहुःपद्मद्युतिःसप्ततुरंगवाहः दिवाकरोलोकगुरुःकरीटीमयिप्रसादंविदधातुदेवः २ इतिध्यानम् रश्मिमंतंसमुद्यंतंदेवासुरनमस्कृतं पूजयस्वविवस्वंतंभास्करंभुवनेश्वरं सर्वदेवात्मकोह्येषतेजस्वीरश्मिभावनः एषदेवासुरगणान्लोकान्पातिगभस्तिभिः एषब्रह्माचविष्णुश्चशिवःस्कंदःप्रजापतिः महेंद्रोधनदःकालोयमःसोमोह्यपांपतिः पितरोवसवःसाध्याअश्विनौमरुतोमनुः वायुर्वह्निःप्रजाःप्राणःक्रतुःकर्ताप्रभाकरः आदित्यासवितासूर्य्यःखगः पूषागभस्तिमान् सुवर्णसदृशोभानुर्हेमरेतादिवाकरः हरिदश्वःसहस्रार्चिःसप्तसप्तिर्मरीचिमान् तिमिरोना

थनःशंभुस्त्वष्टामार्तंडकोंशुमान् हिरण्यगर्भःशिशिरस्तपनोहस्करोरविः अग्निगर्भोदितेःपुत्रःशंखःशिशिरनाशनः व्योमनाथस्तमोभेदीऋग्यजुःसामपारगः घनवृष्टिरपांमित्रोविंध्यवीथिप्लवंगमः आतपीमंडलीमृत्युःपिंगलःसर्वतापनःकविर्विष्णोमहातेजारक्तःसर्वभवोद्भवः नक्षत्रग्रहताराणामधिपोविश्वभावनः तेजसामपितेजस्वीद्वादशत्मन्नमोस्तुते नमःपूर्वायागिरयेपश्चिमायाद्रयेनमः ज्योतिर्गणानांपतयेदिनाधिपतयेनमः जयायजयभद्रायहर्यश्वायनमोनमः नमोनमःसहस्रांशोआदित्यायनमोनमः नमउग्राययवीरायसारंगायनमोनमः नमःपद्मप्रबोधायप्रचंडायनमोस्तुते ब्रह्मेशान च्युतेशायशूरायादित्यवर्चसे भास्वतेसर्वभक्षायरौद्रायपुरुषेनमः तमोघ्नायाहिमघ्नायशत्रघ्नायामितात्मने कृतघ्नायापदेशायज्योतिषांपतयेनमः सप्तचामीकराभायहरयेविश्वकर्मणे नमस्नमोभिनिघ्नायरुचयेलोकसाक्षिणे नाशयत्येषवैभूतंतमेवसृजतिप्रभो पालयन्नेषतपतिवर्षत्येषगभस्तिभिः एषसुप्तेषुजागर्तिभूतेषुपारिनिष्ठितः एषचैवाग्निहोत्रंचफलंचैवाग्निहोत्रिणां देवाश्चक्रतवश्चैवक्रतूनांफलमेवच यानिकृत्यानिसर्वेषुपरात्मापरमःप्रभुः १२५ इतिसूर्यनामामानि एनमापत्सुकृच्छ्रेषुकांतारेषुभयेषुच कीर्त्तयन्पुरुषःकश्चिन्नावसीदतिराघव पूजयस्वैनमव्यग्रोदेवदेवंजत्पतिं एतत्त्रिगुणितंजप्त्वायुद्धेषुविजयिष्यसि अस्मिन्क्षणेमहाबाहोरावणंनिहनिष्यसि एवमुक्त्वाततोगस्त्योजगामसयथागतं एतच्छ्रुत्वामहातेजानष्टशोकोभवत्तदा धारयामासकंठाग्रराघवःप्रयतात्मवान् आदित्यप्रेक्ष्यजप्त्वेदंपरंहर्षमवाप्तवान् त्रिराचम्यशुचिर्भूत्वाधनुरादायवीर्यवान् रावणंप्रेक्ष्यहृष्टात्माजपार्थंसमुपागमत् सर्वयत्नेनमहतावृतस्तस्यवधेभवत् अथरविरवदन्निरीक्ष्यरामंमुदितमनाःपरमंप्रहृष्यमाणः निशिचरपतिसंक्षयंविदित्वासुरगणमध्यगतोवचस्त्वरेति इत्यार्षेरामायणेयुद्धकांडेषडुत्तरशततमः सर्गः १०६ अथापरंसूर्यस्तोत्रं महाभारतेवनपर्वणि धौम्यउवाच

सूर्य्योर्य्यमाभगस्त्वष्टापूषार्कःसवितारविः भगास्तिमानजःकालोमृत्युर्धाताप्रभाकरः १ पृथिव्यापस्तथातेजःखंवायुश्चपरायणं सोमोवृहस्पतिःशुक्रोवुधोंगारकएवच २ इंद्रोविवस्वान्दीप्तांशुःशुचिःशौरिःशनैश्चरः ब्रह्माविष्णुश्चरुद्रश्चस्कंदोवैश्रवणोयमः ३ वैद्युतोजाठरश्चाग्निरैंधनस्तेजसांपतिः धर्मध्वजोवेदकर्त्तावेदांगोवेदवाहनः ४ कृतंत्रेताद्वापरश्चकालिःसर्वामराश्रयः कलाकाष्ठामुहूर्त्ताश्चपक्षोमासऋतुश्चयः ५ संवत्सरकरोश्वत्थःकालचक्रंविभावसुः पुरुषःशाश्वतोयोगीव्यक्तोऽव्यक्तःसनातनः ६ लोकाध्यक्षःसुराध्यक्षोविश्वकर्मातमोनुदः वरुणःसागरोंशश्चजीमूतोजीवनोरिहा ७ भूताशयोभूतपतिःसर्वभूतनिषेवितः स्रष्टासंवर्त्तकोवन्हिःसर्वस्यादिकरोऽव्ययः ८ अनंतःकपिलोभानुःकामदःसर्वतोमुखः जयोविशाखोवरदःसर्वधातुनिषेवितः ९ मनःसुपर्णोभूतादिःशीघ्रगःप्राणधारणः धन्वंतरिर्धूमकेतुरादिदेवोदितेःसुतः १० द्वादशात्मारविंदश्चपितामातापितामहः स्वर्गद्वारंप्रजाद्वारंमोक्षद्वारंत्रिविष्टपं ११ वेदकर्त्ताप्रशांतात्माविश्वात्मासर्वतोमुखः चराचरात्माभूतात्मामैत्रेणवपुषान्वितः १२ १०८ एतद्वैकीर्त्तनीयश्चसूर्यस्यामिततेजसः नाम्नामष्टशतंप्रोक्तंशक्रेणसुमहात्मना १३ शक्राच्चनारदःप्राप्यधौम्येनतदनंतरं धौम्याद्युधिष्ठिरःप्राप्यसर्वान्कामानवाप्तवान् १४ सुरपितृगणयक्षसेवितमसुरनिशाचरसिद्धवंदितं वरकनकहुताशनप्रभंत्वमपिनमस्वाहितायभास्करं १५ सूर्य्योदयेयःपठतेसमाहितःसपुत्रलाभंधनरत्नसंचयं लभेतजातिस्मरतांसदानरःस्मृतिंचमेधामपिविंदतेपुमान् १६ इमंस्तवंदेववरस्ययोनरःप्रकीर्त्तयेच्छुद्धमना समाहितः समुच्यतेपातकराशिसागरात् लभेतकामान्मनसायथेप्सितान् १७ इत्यारण्यपर्वणिसूर्यस्तवः इत्यादित्यवारव्रतविधिः अथादित्यनक्तव्रतम् भविष्योत्तरे युधिष्ठिरउवाच यदारोग्यकरंपुंसांयदनंतफलप्रदं तद्व्रतंब्रूहिगोविंदसर्वपापप्रणाशनं श्रीकृष्णउवाच यत्तद्विश्वात्मकंधामपरंब्रह्मसनातनं सूर्याग्निचंद्ररूपेणतत्त्रिधाजगतिस्थितं तमा

90

राध्यपुमान्किंन्नप्राप्नोतिकुरुनंदन तस्मादादित्यवारेणसदानक्ताशनोभवेत् उत्पद्यतेयदाभक्तिर्भानोरुपरिशा
श्वती तदारभ्यसदाकार्य्यंनक्तमादित्यवासरे पूर्वोक्तविधिनाराजन्पूजयित्वाद्विजोत्तमान् आशादित्यव्रतोक्त
विधिनेत्यर्थः ततोस्तसमयेभानोरक्तचंदनपंकजं विलिख्यद्वादशदलंपूजयेदर्कनामभिः सूर्येतिप्रथमंपूज्यपू
र्वतश्चप्रभाकरं दिवाकरंतथाग्नेय्यांविवस्वंतमतःपरं भगंतुनैर्ऋतेदेवंवरुणंपश्चिमेदले माहेंद्रंमारुतदलेत
थादित्यमथोत्तरे शांतमीशानभागेतुनमस्कारेणविन्यसेत् कर्णिकायांपूर्वदलेसूर्य्यस्यतुरगान्यजेत् दक्षिणेयजमा
ननुमार्तंडपश्चिमेदले उत्तरेणरविंदेवंकर्णिकायांचभास्करं अर्घ्यंदद्यात्तदापार्थसातिलारुणचंदनं फलाक्षतयु
तंतद्वदिमंमंत्रमुदीरयेत् कालात्मासर्वभूतात्मावेदात्मासर्वतोमुखः यस्मादग्नींदुरूपस्त्वमतःपाहिप्रभाकर अग्निमीले
नमस्तुभ्यमिषेत्वोर्जेचभास्कर अग्नआयाहिवीतित्वंशन्नोदेवीनमोस्तुते अर्घ्यंदद्याद्विसृज्याथनिशितैलविवर्जितः
भुजीतभावितमनाभास्करंसंस्मरन्मुहुः प्रागेतस्मिन्शनैश्चान्हितैलाभ्यंगंविवर्जयेत् वत्सरांतेकारयित्वाकां
चनंकमलोत्तमं संकल्पयित्वापुरुषंसपद्मंदद्यादनेनाविधिनाव्रतनायकाय अव्यंगरूपायजितेंद्रियायकुटुंबि
नेनित्यमनुव्रताय नमोस्तुऋक्सामयजुर्विधात्रेजगत्प्रबोधायजगत्सवित्रे त्रयीमयायत्रिगुणात्मनेचत्रैलोक्य
नाथायनमोनमस्ते इत्यनेनविधानेनवर्षमेकंतुयोनरः नक्तमादित्यवारेणकुर्यात्सनिरुजोभवेत् धनधान्यसमा
युक्तःपुत्रपौत्रसमन्वितः मर्त्योस्थित्वाचिरंकालंसूर्यलोकमवाप्नुयात् कर्मसंक्षयमवाप्यपार्थिवःशोकदुःखभय
रोगवर्जितः स्यादमित्रकुलकालसन्निभोधर्ममूर्त्तिरपितेजसायुतः याचभर्तृगुरुदेवतत्परावेदमूर्त्तिदिननक्तमा
चरेत् सापिलोकममरेशपूजितायातिकौरववर्यनसंशयः यःपठेदथशृणोतिवानरःपश्यतीदमथवानुमोदयेत
सोपि शक्रभुवनेदिवौकसैःकल्पकोटिशतमेकमीड्यते इतिभविष्योत्तरेआदित्यनक्तविधिः ॥

अथसोमवारव्रतानि तत्रादौचंद्रपीडाशांतिकरंसोमवारनक्तव्रतंभविष्ये

तद्वच्चित्रासुसंगृह्यसोमवारंविचक्षणः तद्वत्हस्तार्कवत् आगमोक्तविधिनाकुर्य्यात्पूजादिकंविधोः सप्तमेतुततः प्राप्तेकुर्य्याद्ब्राह्मणभोजनं सप्तमेनक्तेप्राप्तेइत्यर्थः कांस्यपात्रेतुसंस्थाप्यसोमंरजतसंभवं श्वेतवस्त्रयुगच्छन्नंश्वेतगंधैःसुपूजितं पादुकोपानहच्छत्रंभोजनासनसंयुतं होमंघृतातिलैःकुर्य्यात्सोमनाम्नाचमंत्रवित् समिधोष्टोत्तरशतमष्टाविंशतिरेववा होतव्यामधुसर्पिभ्यांदध्नाचैवघृतेनच दध्नाघृतेनचभिन्नोहोमः समिधःपालाश्यः राजतंशशिनंकृत्वाब्राह्मणायानिवेदयेत् तत्रमंत्रःमहोदयोजातिमल्लीपुष्पगोक्षीरपांडुर सोमसोम्योभवास्माकंसर्वदा। तेनमोनमः एवंकृतेमहासौम्यः सोमस्तुष्टिकरोभवेत् संतुष्टेत्रसुतेतस्मिन्सर्वेसानुग्रहाग्रहाः इतिचंद्रशांतिकरंसोमवारव्रतम् अथचंद्रस्तोत्रं तत्रादौध्यानम् श्वेतांबरःश्वेतविभूषणश्चश्वेतद्युतिर्दंडधरोद्विबाहुः चंद्रामृतात्मावरदःकिरीटीमयिप्रसादंविदधातुदेवः १ हिमगोक्षीरवर्णायशंखकुंदनिभायचवालचंद्रायचंद्रायपूर्णचंद्रनमोनमः नमश्चंद्रायसोमायनमःकुमुदबांधवे विलोहितायशुक्लायशुक्लांबरधरायच त्वमेवसर्वलोकस्यचाप्यायनकरःसदा क्षीरोद्भवायदेवायनमःशंकरशेखरयुगानांयुगकर्त्तात्वंनिशानांचनिशापतिः संवत्सराणांमासानामृतूनांचतथैवच ग्रहाणांचत्वमेकोहिरोहिणिपतयेनम. इदंतुपठतेस्तोत्रंप्रातरुत्थाययोनरः नभयंविद्यतेतस्यकार्यसिद्धिर्भविष्यति दिवावायदिवारात्रौदुःखेचसतियोनरः अहोरात्रकृतंपापंतत्क्षणादेवनश्यति ॥ इतिचंद्रस्तोत्रम् ॥ अथशिवप्रीतिकरंसोमवारव्रतं स्कंदपुराणे ॥ नारदउवाच ॥ अथान्यदपिमेब्रूहिये नाहंप्राप्नुयांपदं अविच्छिन्नाशिवेभक्तिः पुत्रसौभाग्यसंपदः ॥ नंदिकेश्वरउवाच ॥ सोमवारव्रतंपुण्यंक

थ्यमानंनिबोधमे श्रावणेचैत्रवैशाखेज्येष्ठेवामार्गशीर्षके प्रथमेसोमवारेचगृह्णीयाद्व्रतमुत्तमं यदाश्रद्धाभवेत्कर्तुंसोमवारव्रतंप्रति तदावापिपुरस्कृत्यश्रद्धाभक्तिसमन्वितः सुस्नातश्चशुचिर्भूत्वाशुक्लांबरधरःशुचिः कामक्रोधाद्यहंकारद्वेषपैशून्यवर्जितः आहरेत्श्वेतपुष्पाणिमालतीमाल्लिकादिकं श्वेतपद्मानिदिव्यानि चंपकानितथैवच कुमुदोत्पलजैःपुष्पैःपद्मैश्चशतपत्रकैः आचार्येणोमयासार्धंशंकरंलोकशंकरं मायोद्भवेन. धूपेनपूजयेत्पार्वतीपतिं अन्यानियान्यभीष्टानितानिसर्वाणिदापयेत् नागपुष्पैश्चधूपैश्चपूजयेत्पार्वतीपतिं कामिकेनतुमंत्रेणव्यापकेनमहेश्वरं पूजयेन्मूलमंत्रेणत्र्यंबकेनततःपरं भवायभवनाथायमहादेवायधीमहि उग्रायचोग्रनाथायशर्वायशशिमौलये रुद्रायनीलकंठायशिवायभवहारिणे शंकरायनमोजंघेशिवायेतिचजानुनी शूलपाणिंनमोगुह्येकट्यांशंभुंप्रपूजयेत् गुह्येस्वयंभुनामानंपूजयेत्पार्वतीपतिं महादेवायइतिचपूजयेन्नाभिमंडलं उदरेविश्वकर्त्रेतिपार्श्वयोः सर्वतोमुखं स्थाणुंतनौचसंपूज्यनीलकंठायकंठतः मुखेसंपूजयेद्देवंश्रीकंठायशिवायचत्रिनेत्रायनमोनेत्रेमुकुटेशशिभूषणं नमोदेवाधिदेवायसर्वांगेपूजयेद्विभुं एवंसंपूज्यदेवेशमुपहारैर्मनोरमैः यथाविभवसारेणतस्यपुण्यफलंशृणु सोमवारेयजंतेयेपार्वत्यासहशंकरं तेलभत्यक्षयांल्लोकान्पुनरावृत्तिदुर्लभान् एकभक्तस्ययत्पुण्यंकथयामिसमासतः सप्तजन्मार्जितंपापमभेद्यंदेवदानवैः नश्यतेचैकभक्तेननात्रकार्य्याविचारणा मासैकस्यतुयत्पुण्यंशृणुयत्नेननारद अभाग्योजातभाग्यःस्यादुर्भगःसुभगोभवेत् पुत्रार्थीलभतेपुत्रान्धनार्थीलभतेधनं कन्यार्थीलभतेकन्यांरूपलावण्यशालिनीं यंयंचिंतयतेकामंतंतंप्राप्नोतिमानवः इहलोकेचिरंस्थित्वाभुक्त्वाभोगान्मनोरमान् विमानवरमारुह्यलोकेशैवमहीयते यथात्मनंतथादेवंयथादेवंतथागुरुं तोषयेच्चपरंभक्त्यातेनपूर्णंभवेद्व्रतं उपवासेनयोदेवंसमाचरतिमानवः यदाचित्तं

चवित्तंचजायतेपुरुषस्यवै तदेवोद्यापनंकुर्य्याद्व्रतसंपूर्त्तिहेतवे चलंचित्तंचलंवित्तंचलंजीवितमेवच एवंज्ञात्वाप्रयत्नेनव्रतस्योद्यापनंचरेत् उमामहेश्वरौहैमौवृषभेनसमन्वितौ यथाशक्त्याप्रकर्त्तव्यौवित्तशाठ्यंनकारयेत् मंडलंकारयेद्दिव्यंलिंगोद्भवसमुद्भवं कलशंपयसापूर्णंश्वेतवस्त्रयुगान्वितं ताम्रपात्रंवेणुपात्रंकुंभयोरुपरिन्यसेत् स्थापयेन्मंडलेदिव्यंकलशंकनकोज्ज्वलं तस्योपरिन्यसेद्देवमुमयासहितंशिवं पूर्वोक्तैरेवमंत्रैस्तुपूजयेत्पार्वतीपतिं नानापुष्पैःफलैर्दिव्यैर्नानारत्नैःसमर्चयेत् श्वेतवस्त्रयुगेनैवनाममंत्रैर्महेश्वरं उपवीतंसोत्तरीयंभक्ष्याणिविविधानिच अन्यानियान्यभीष्टानितानिचान्यानिकल्पयेत् रात्रौजागरणंकुर्य्याद्गीतवादित्रनिःस्वनैः स्वगृह्योक्तविधानेन कृत्वाग्निस्थापनंततः ततोहोमंचशर्वाद्यैर्मंत्रैःकार्य्योष्टभिःसदा पलाशशमीसमिद्भिर्गु[illegible] आप्यायस्वेतिमंत्रेणपृषदाज्ययुतस्तदा यवव्रीहितिलाज्येनपूर्णंपूर्णंपृथक्पृथक् पूर्णाहुतिंततोद[illegible]ष्टकृदादिकं होमांतेचगुरुंपूज्यसपत्नीकंसमाहितः वस्त्रैराभरणैःश्रेष्ठैर्गृहोपकरणादिभिः श्वेतागौःकपिला[illegible]पिसुशीलाच पयस्विनी सवस्त्रारत्नपुच्छाचघंटावस्त्रविभूषिता दक्षिणासहिता[illegible]याशिवोमेप्रीयतामिति धेनुर्वैजगतांमातानित्यंविष्णुपदेस्थिता सवत्साचमयादत्ताशिवोमेप्रीयतामिति ब्राह्मणान्भोजयेद्विद्वान्त्रयोदशसुशोभनान् वस्त्रालंकारछत्राद्यंसदक्षिणास्त्रयोदश घटादेयावंशपात्रैर्भक्ष्यभोज्यसमन्विताः सफलावस्त्रसंयुक्तायज्ञसूत्रसमन्विताः पूजितंतुततोदेवंदेवोपकरणानिच आचार्य्यायततोदद्यात्प्रणिपत्य पुनः पुनः इमंदेवंगृहाणत्वंसर्वोपस्करसंयुतं परिपूर्णंव्रतंमेस्यात्शिवोमेप्रीयतामिति तत्रग्रहणमंत्रः गृह्णामिदेवदेवेशत्रयाणांजगतांगुरुःशांतिरस्तुशिवंचास्तुव्रतस्याविकलंफलं यद्भक्त्यादेवदेवेशमयाव्रतमिदंकृतं दानंवाथक्रियाहानीपरिपूर्णंतदस्तुमे इतिसंप्रार्थ्यतंदेवंद्विजंचैवपुनःपुनः भुंजीयात्सहधर्मात्माशिष्टैरिष्टैश्चबंधुभिः अनेनैवविधानेनयइदं-

व्रतमाचरेत् यंयंचिंतयतेकामंतंतंप्राप्नोतिमानवः दातासुखीचतेजस्वीत्रिषुलोकेषुजायते विमानवरमारुह्यसोमलोकेमहीयते मनूनांचशतंयावत्तावदत्रैवमोदते शिवलोकंततोगत्वाशिवेनसहमोदते क्रीडतेशंभुरूपेणपुनरावृत्तिदुर्लभं कृष्णेनाचरितंपूर्वंसोमवारव्रतंशुभं नृपैरन्यैस्समाचीर्णमास्तिकैर्धर्मतत्परैः इति पठतिरहस्यंयः शृणोतीहनित्यं त्वनुवदतियइत्थंश्रद्धयान्यस्यलोकेसकलकलुषहीनोवंद्यमानोगणाद्यैः शिवविमलविमानैर्यातिशैवंपुरंसः इतिस्कंदपुराणेसोद्यापनसोमवारव्रतम् अथान्यद्वषसाध्यंसोमवारव्रतम् स्कंदपुराणे ईश्वरउवाच अथव्रतविधानंहिकथयामिसमासतः यथाभवंतिमनुजाःसिद्धिंसर्वार्थकामदां व्युत्क्रांतिकार्तिकेमासिशुक्लेमार्गेदिनेभवेत् प्रथमःसोमवारस्तुतंनक्तेनप्रपूजयेत् यदाश्रद्धाभवेत्कर्तुस्सोमवारव्रतंप्रतितदासर्वंकारयित्वाब्राह्मणाद्यैःसमाचरेत् मार्गेमाघेतथाचैत्रेगृह्णीयात्सोमवारकं यस्मिन्मासेप्रारभेततस्मिन्नुद्यापयेद्व्रतं सुस्नातोथशुचिर्भूत्वाशुक्लांबरधरोनरःकामक्रोधाद्यहंकारद्वेषपैशून्यवर्जितः आहरेच्छ्वेतपुष्पाणिमाल्लिकांमालतींतथा श्वेतपद्मानिदिव्यानिचंपकंबिल्वपाटलाः कुंदमंदरजैःपुष्पैःपुन्नागशतपत्रकैः अर्चयेच्चंदनेनाथदिव्यधूपेनधूपयेत् अन्यानियान्यभीष्टानितानिसर्वाणिदापयेत् पूजयेद्भक्तिभावेनसोमनाथंजगत्पतिं कामिकेनतुमंत्रेणप्रापकेनमहेश्वरं निवेदयेत्सर्वमेवशृणुमंत्रवरंशुभं ॐनमोदशभुजायत्रिनेत्रायचत्रिशूलिने श्वेतवृषभारूढायसर्वाभरणभूषिताय उमादेहार्धसंस्थायनमस्तेसर्वमूर्तये अनेनैवतुमंत्रेणपूजाहोमंतुकारयेत् सिद्ध्यंति सर्वकार्य्याणिमनसाचिंतितानिच पूजयेन्नक्तवेलायामृक्षाणांदर्शनेनतु प्रदायभोजनंपूर्वंब्राह्मणायसुभक्तितः एतद्विधिसमायुक्तोरागद्वेषविवर्जितः एकभक्तस्ययत्पुण्यंकथयामिसमासतः शतजन्मार्जितंपापमभेद्यंदेवदानवैः नश्यतेह्येकभक्तेननात्रकार्य्याविचारणा मासस्यैकस्ययत्पुण्यंशृणुतत्त्वेनसुं-

दरि आरोग्यंजायतेभाग्यंदुर्भगासुभगाभवेत् पुत्रार्थीलभतेपुत्रान्दरिद्रोधनवान्भवेत् गृहेतस्यवरारोहेसौख्यानिविविधानिच तदंशोधनभागीस्याद्विघ्नहीनःक्षितिंचरेत् अश्वमेधसहस्रस्यफलंप्राप्नोतिमानवः स्वर्गे भुक्त्वावरान्भोगान्जायतेमानवोत्तमः नक्तानिसोमवारेतुपौषेमासेमहेश्वरि तेषांपुण्यफलंवक्ष्येसंक्षेपेणतवाग्रतः अग्निष्टोमस्ययज्ञस्यफलंशतगुणभवेत् तत्फलंलभतेदेविभक्तिभावसमन्वितः माघस्यैवतुमासस्यसोमवारेणपूजयेत् स्नापयेन्मधुदुग्धाभ्यांतथैवेक्षुरसेनतु द्विजहत्यादिपापानि तानिसर्वाणिनाशयेत् विशुद्धतेजसायुक्तोजायतेत्यंतनिर्मलः वहुस्वर्णस्ययत्पुण्यंदुर्लभंयत्सुरैरपि लभतेनात्रसंदेहोममभक्तिप्रचोदितः फाल्गुनेकथयिष्यामिसोमवारफलंशुभं कृतेनक्तेतुकल्याणिगुणांस्तेविस्तरेणतु गवांलक्षस्यदत्तस्यचंद्रसूर्यग्रहेप्रिये फलमस्याधिकंतत्रलभतेनात्रसंशयः चैत्रेपिशृणुकल्याणिममेदंवदतोवचः सोमवारेणनक्तेनकृतेनसुरसुंदरि यत्फलंलभतेनारीलक्षैकेनतुपार्वति गंगोदकस्यनीतस्यसोमनाथस्यसन्निधौ घृतस्यमधुनोवापि शतधाहिकृतंफलं गुग्गुलोश्चतथापंचसहस्रंपरमेश्वरि तत्पुण्यंचभवेत्तस्यमानवस्यनसंशयः वैशाखेकारयेन्नक्तंसोमवारेनसंशयः वैशाखेकारयेन्नक्तंसोमवारेनसंशयः पूजयेच्छ्वेतपुष्पैश्चतथालब्धैःसुरेश्वरि अपूपाहि प्रदातव्याः कदलीफलसंचयाः एकचित्तेनभावेननिर्मलेनयशस्विनि कन्यानांवरयोग्यानांसहस्रेणवरानने दत्तानांविधिवद्देविनराणांरूपशालिनां एतद्दानेनयत्पुण्यंलभतेमानवोभुवि तत्फलंलभतेतत्रसोमवारव्रतेनतु ज्येष्ठेमासिमहादेविसोमवारव्रतस्यतु चीर्णस्ययद्भवेत्पुण्यंतत्सर्वंकथयामिते गवांसुवर्णशृंगीणांपुष्करेविधिवत्प्रिये दत्त्वादशसहस्राणांफलंप्राप्नोतिमानवः पदंचलभतेपुण्यंदुर्लभंदेवदानवैः ईशस्यकल्पमतुलंक्रीडतेतत्रसुंदरि आषाढेसोमवारस्यभावितात्माचरेद्व्रतं विधिपूर्णंतुकल्याणिमत्तःशृणुवदामिते नरमेधशतैकेनविधियुक्ते

नयत्फलं तद्भवेन्मानवेदेवि पुण्यंसर्वशुभान्वितं साधितुंनैवशक्येतदेविनक्तमिदंततः तस्माद्व्रतमिदंसारंयतः कष्टेनसिध्यति श्रावणेतुमहादेवंसोमवारेणपूजयेत् रात्रौतभोजनंकुर्य्यान्मदकौटिल्यवर्जितः भवेद्राजवरः प्राणीजीवमानोमहेश्वरः इहलेतादृशींचेष्टापरत्रकथयामिते अश्वमेधशतस्यायंपुण्यंप्राप्नोतिमानवः ममलोकेसवमतियावच्चंद्रार्कतारकाः भाद्रेचभावसंयुक्तः पूजयेत्परमेश्वरि पुण्यंचानुत्तमंतस्यशृणुदेविविशेषतः गवांकोटिप्रदानस्यसवत्सानांसुशीलिने यत्फलंतत्समाप्नोतिमानवोनात्रसंशयः आश्विनेकथयिष्यामिअग्निष्टोमफलंशतं रसधेनुसहस्रस्यगुडधेनुशतस्यच सूर्यग्रहेकुरुक्षेत्रेब्राह्मणेवेदपारगे दत्तस्यफलमाप्नोतिमानवोनात्रसंशयः कार्त्तिकेवरदंदेविकामिकंमोक्षदायकं स्मरणात्पापसंघानांभेदकंपरमेश्वरि सोमवारव्रतधराविधिवत्पूजयेच्छिवं नक्ताशीश्रद्धयायुक्तोदयासत्यसमन्वितः दत्तस्यवेदपारज्ञेरथानांचशतस्यचवाजिभिःशुद्धचित्तैश्चप्रयुक्तैश्चमहात्माभिः चतुर्वेदेषुविप्रेषुप्रदत्तस्यचयत्फलम् तत्फलंलभतेदेविमानवोभक्तिसंयुतः व्रतांतेप्रतिमांकुर्य्याद्रौप्यंसोमंचतुर्भुजं त्रयोदशघटांश्वेतवस्त्रयुग्मसमन्वितान् सपूर्णानिसुभक्ष्यैश्चवंशपात्राणिपार्वति तेषामुपरियत्नेनस्थापयेत्त्रिदशेश्वरि सघृतेनसुगंधेनसुस्निग्धेनोज्वलेनच भक्तेनघृतपक्वैश्चसुद्गशाकघृतैस्तथा ब्राह्मणानथसंभोज्यभक्तियुक्तेनचेतसा त्रयोदशघटान्दद्याद्गाश्चश्वेतामनोरमा यथोक्तेनविधानेनविप्रावस्त्रविचित्रिताः उपानहयुताःकार्य्याश्चित्तवित्तानुसारतः दद्यात्स्वाचरसंपन्नस्त्वाचार्य्यमुपवेशयेत् नगुरोःसदृशीमातानगुरोःसदृशःपिता संसारादुद्धरेद्घोराद्व्रतदानोपदेशतः [illegible] गोस्वामीपूजितोयस्मात्पार्वत्यासहितप्रभुः तस्मात्संपूजयेद्भक्त्यागुरुंभार्य्यासमन्वितं आचार्य्यंप्रथमेतत्रपूजयापादसेवया दद्याद्वस्त्राणिदिव्यानिसुवर्णाभरणानिच अमूल्यानिचरत्नानिग्रामक्षेत्रपुराणिच नगराणिगृहांदिव्यधनधान्यंदापिसुंदरि वाहनानि

विचित्राणिगजवाजिरथादिकं अन्यानियान्यभीष्ठानितानिसर्वाणिदापयेत् गौर्गुरोःसंप्रदातव्यासवस्त्रातुस्वरूपिणी स्वर्णशृंगीरौप्यखुराकांस्यपात्रोपदोहिनी ताम्रपृष्ठीसुशीलाचवस्त्रप्रावृतदेहका अभ्यर्च्यविधिवद्द्या व्रतं संपूर्णमेतिच सप्तधान्यंयथाशक्त्यादापयेत्प्रयतोव्रती दीपदानंप्रकर्त्तव्यंगुरवेज्ञानदायिने एवं गुरुंप्रणम्याथशक्त्यादद्याच्चदक्षिणां शक्त्यादद्याच्चतत्सर्वंपुरायदुपककल्पितं ततस्तपस्विनादेविममदर्शनहेतुना सुगंधघृतसंमिश्र धूपैःकृशर पायसैः धारिकाशोकवर्त्तीभिः पूरिकामंडकैस्तथा दधिदुग्धसमोपेतं भोजनंदापयेत्सुधीःतपस्विनोब्राह्मणाश्चलिंगमूर्त्तिश्चतुर्विधं ममरूपमिदंयस्मात्तस्मात्पूज्यंचतुष्टयं शिवांकितैश्च शास्त्रज्ञैर्देशिकैर्धर्मचिंतकैः जटामुद्रादिसंयुक्तैर्भस्मोद्धूलितविग्रहैः ब्रह्मचर्यरतैः शांतैर्लोभमत्सरवर्जितैः ईदृशैः शिवपात्रैश्चभुक्तैः फलमनुत्तमं भोजनंतेषुदातव्यं तांबूलंमुखवासकं श्वेतचंदन कर्पूरं दत्त्वातांश्चाविसर्जयेत् शक्त्यातुभोजनंदत्त्वायथावित्तानुसारतः कृपणानाथदीनानांसुहृदांयावतामपि एवंविधिसमायुक्तोगच्छेतपरमंपदं भोगान्भुंक्तेसर्वलोकेएनः कोटिगुणांस्तरेत् कन्याभिर्वेष्टितोदेविस्वेच्छयारमतेप्रिये ममलोकेवसेत्तावद्यावदाभूतसंप्लवं ममवीर्यबलोपेतस्त्रिनेत्रःशूलपाणिकः माहात्म्यात्सोमवारस्यअंतेमुक्तिमवाप्नुयात् पूर्वंकृष्णेनसंचीर्णंतथावैपद्मयोनिना देवदानवगंधर्वपिशाचोरगराक्षसैःऋषिभिःक्षितिपैस्तद्वत्स्वायंभुवमुखैःप्रिये अन्यैश्चमानवैःशुद्रैरास्तिकैर्धर्मतत्परैः नदेयंदुष्टचित्तायवुद्धिहीनायकर्हिचित् शास्त्रधर्मद्विषेचैवविडंबकजनायतु आचार्यदेवप्राणाययतीनांव्रतशालिनां वन्हेर्वेदसुतीर्थानांनिंदकायनवैक्वचित् आर्त्तेनापिनतत्त्याज्यं व्रतं परमदुर्लभं व्रतत्यागान्महादोषाइतिज्ञात्वासमाचरेत् गुरोःसमीपेकुर्वीतव्रतमेतन्नसंशयः अन्यथागुरुहानिःस्यान्निष्फलंजायतेव्रतं संदेहःसर्वकार्येषुगुरुहीनस्यवैभवेत् तस्मात्सर्वप्रयत्नेनगुरुमेवस-

माश्रयेत् अथसंक्षेपतोवक्ष्येव्रतमाहात्म्यमुत्तमं येचरंतिनरादेविस्त्रिय:स्वामिसुभाविता: तेषांजन्मसहस्रोपिनशोकोजायतेक्कचित् नदारिद्र्यंनरोगाश्चसंततिच्छेदएवच कुलकोटिंसमुद्धृत्यस्थापयेदिंद्रसद्मनि इत्थंशृणोतिमाहात्म्यंपठ्यमानंव्रतस्यतु श्रावयेद्भक्तियुक्तस्तुरुद्रस्यानुचरोभवेत् क्रिमाणंतुय:पश्येद्व्रतमेतन्ममाप्रियं भक्तियुक्तोनर:श्रुत्वायश्चैवानुप्रमोदते मतिंददातियश्चापिसयातिपरमंपदम् इतिस्कंदपुराणेसोमवारव्रतं अथ सोमवारनक्तेसामान्यपूजाक्रमोलिख्यते तत्रादौदेशकालौसंकीर्त्य आत्मनोऽशेषपापक्षयपूर्वकसत्पुत्रप्राप्तिधनधान्यैश्वर्यादिगुणराज्यवृद्ध्याप्तिद्वारा अमुककामनयासोमवारव्रतंकारिष्ये इतिसंकल्प्य ध्यायेन्नित्यंमहेशमितिध्यानंपठित्वा अथवा चतुर्बाहुंद्विबाहुंवात्रिनेत्रंवाद्विलोचनं कुंडलालंकृतार्द्धेन्दुशेखराभरणान्वितं २ महादेव समागच्छसहगौर्य्याजगत्पते इमांमयाकृतांपूजांगृहाणसुरसत्तम शिवरूपेनमस्तुभ्यंशिवायैसततंनमः न । स्तेब्रह्मरूपिण्यैजगद्धात्र्यैनमोस्तुते इत्यावाहनम् ॐनमःपञ्चवक्त्रायदशबाहुत्रिनेत्रिणे श्वेतवृषभमारूढश्वेताभर । भूषित उमादेहार्धसंयुक्तसर्वमूर्त्तेनमोनमः इतिपूजामंत्रःकार्त्तस्वरमयंदिव्यंनानामणिगणान्वितं आसनंदेवदेवेश गृहाणानंतशक्तिक इत्यासनं गंगादिसर्वतीर्थेभ्यःसमानीतमिदंमया तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां इति पाद्यं वरेण्ययज्ञपुरुषप्रजापालनतत्पर नमःसदात्मदेवायगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यम् पाटलोशीरकर्पूरवासितंस्वादुशीतलं तोयमाचमनीयार्थंनिर्मलंप्रतिगृह्यतां इत्याचमनीयम् मधुपर्कमिदंपुण्यंमधुरत्रयसंयुतं दधियुक्तंशुभंदेवप्राश्यतांकृपयाप्रभो इतिमधुपर्कम् मंदाकिन्याःसमानीतंहेमांभोरुहवासितं स्नानार्थंतेमयानीतं शुभंस्वीकृयतांप्रभो इतिस्नानं स्नानंपंचामृतंचापिपयोदधिघृतंमधु शर्करासलिलोपेतंगृहाणपरमेश्वर इतिपंचामृतस्नानं पूर्वोक्तमंत्रेणशुद्धस्नानम् पुरुषसूक्तेनकार्य्यं शुभंकर्पूरसंयुक्तंजनकल्याणकारकं पुनराचम्य

तांदेवगंगाजलमिदंप्रभो इतिपुनराचमनं राजतंब्रह्मसूत्रंचकांचनंचोत्तरीयकं यज्ञोपवीतंपरमंनमस्तेप्रतिगृह्यता शुभ्रवस्त्रयुगंयस्माद्देवानामतिवल्लभं पार्वत्यासहितोदेवप्रीयतांवस्त्रदानतः इतिवस्त्रं मलयाचलसंभूतंघनसारसमन्वितं हृदयानंदनंचारुचंदनंप्रतिगृह्यतां इतिचंदनं रंजितान्कुंकुमाद्येनाखंडितान्गणितान्नवान् गृहाणपूजांकृपयास्वक्षतान्वृषभध्वज इत्यक्षताः पुष्पाणिसुरभीण्यत्रमालत्यादीनिवैप्रभो मयाहृतानिचित्राणिपूजार्थंप्रतिगृह्यतां इतिपुष्पाणि अमृतोद्भवंश्रीवृक्षंशंकरस्यातिवल्लभं विल्वपत्रंप्रयच्छामिप्रीतोभवमहेश्वर त्रिदलंत्रिगुणाकारंत्रिनेत्रंत्रिविधायुधं त्रिजन्मपापसंहारंविल्वपत्रंशिवार्पणं इतिविल्वपत्रं तुलस्यमृतनामासिसदात्वंकेशवप्रिये करोमिशिवपूजार्थंवरदाभवमेसदा इतितुलसीपत्राणि दूर्वासिशतपर्वासिशतमूलाशतांकुरा शतंहरतिपापानिशतायुष्यप्रवृद्धये इतिदूर्वा दशांगोगुग्गुलुर्धूपःसुगंधःसुमनोहरः आघ्रेयःसवदवानांधूपोयंप्रतिगृह्यतां इतिधूपं आज्यंसद्वर्त्तिसंयुक्तंवह्निनायोजितंमया दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहं इतिदीपं अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं नैवेद्यंलेह्यचोष्यंचदेवेशप्रतिगृह्यतां इतिनैवेद्यं कर्पूरवासितंतोयंमंदाकिन्याःसमाहृतं आचम्यतांमहादेवशुभंपानीयकंकुरु इतिपुनराचमनं पूगीफलंसकर्पूरंनागवल्लीदलैर्युतंखदिराचूर्णसहितंतांवूलंप्रतिगृह्यतां इतितांवूलं हिरण्यगर्भगर्भस्थंहेमवीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे इतिदक्षिणा इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि इतिनारिकेलंदत्त्वादक्षिणादानंकुर्य्यात् ततआवरणपूजांकुर्य्यात् प्रागादिक्रमेण ओंब्रह्मणेनमः विष्णवेनमः स्कंदायनमः महाकालायनमः शूलिनेनमः उमायैनमः महेश्वरायनमः नंदिकेश्वरायनमः ८ ओंशर्वायक्षितिमूर्त्तयेनमः भवायजलमूर्त्तयेनमः रुद्रायाग्निमूर्त्तयेनमः उग्रायवायुमूर्त्तयेनमः भीमायआकाशमूर्त्तयेनमः

पशुपतयेयजमानमूर्त्तयेनमः महादेवायसोममूर्त्तयेनमः ईशानायसूर्यमूर्त्तयेनमः इत्येतादेवताआवाहनाद्युपचारैःसंपूज्याःततआप्यायस्वसमेतुते इतिमंत्रेणैशान्यांचंद्रमावाह्य पंचोपचारैः सोमायनमः इतिसंपूज्य ततः प्रार्थनांकुर्य्यात् ॐनमःपंचवक्त्रायदशबाहुत्रिनेत्रिणे श्वेतंवृषभमारूढश्वेताभरणभूषित उमादेहार्धसंयुक्त सर्वमूर्त्तेनमोनमः त्राहिमांकृपयादेवशरणागतपालक ततःपुष्पाणिगृहीत्वाअंगपूजाकार्य्या तत्प्रकारोयथा देवाधिदेवायनमःपादयोःपूजयामि शंकरायनमःजंघयोःशिवायनमःजान्वोः शूलपाणयेनमःगुल्फयोःशंभवेनमः कट्यां स्वयंभुवेनमः गुह्ये महादेवायनमः नाभौ विश्वकर्त्रेनमः उदरे सर्वतोमुखायनमः पार्श्वयोः स्थाणवेनमः स्तनयोः नीलकंठायनमः कंठे देवायनमः मुखे त्रिनेत्रायनमः नेत्रेषु शर्वायनमः ललाटे शशिभूषणायनमः शिरसि देवाधिदेवायनमः सर्वांगे तत उभाभ्यांकराभ्यांजलिमादाय लोकात्मन्सर्वभूतात्मन्कलाकाष्ठादिसंभव जन्ममृत्युजराव्याधिसंसारभयनाशन नमस्तेदेवदेवेशनमस्तेसुरसत्तम नमस्तेसर्वलोकेशनमस्तेत्राहिमांसदा मंत्रहीनंक्रियाहीनंभक्तिहीनंचशंकर भगवंस्त्वत्प्रसादेनसंपूर्णंचास्तुमेव्रतं क्षमस्वदेवदेवेशशिव शंकरशाश्वत वरंदेहिसुरश्रेष्ठदासोहंसर्वदातव इतिनमस्कारसहितांपुष्पांजलिंदद्यात् ततउमामहेश्वररूपौद्विजदंपतीसंपूज्य ब्रह्मोत्तरखंडोक्तांचंद्रांगदसीमंतिन्यादिरूपांसोमवारकथांश्रुत्वागीतवाद्यादिमहोत्सवेजागरणेनरात्रिंनयेत् इतिसोमवारनक्तव्रतपूजाविधिः इदंव्रतंच श्रावणेचैत्रेवैशाखेज्येष्ठेचमार्गशीर्षके एषामन्यतमेमासेशुक्लपक्षेविशेषतः इंदुवारयुताष्टम्यांवाग्राह्यं अथवाचैत्रादिमासेषुप्रतिमासंप्रथमेसोमवारेयावज्जीवमिदंकार्य्यं अथवाष्टवर्षपर्यंतंकार्य्यंतदंतेउद्यापनंकुर्य्यात् तद्यथा ॐतत्सदद्येतितिथ्यादिसंकीर्त्यआत्मनोशेषपापक्षयपूर्वकसत्पुत्रपौत्रप्राप्तिधनधान्यासंपत्यारोग्यराज्यवृद्ध्यभिलषितासिद्धिद्वारा श्रीसोमेश्वरमहादेवप्रीत्यर्थं

यथाविधिसमाचरितसोमवारव्रतस्यसांगतासिद्धयेतदुद्यापनंकरिष्ये इतिसंकल्प्य आचार्य्यादिवरणंविधाय चतुर्द्वारोपशोभितमंडपांतरेष्टादशांगुलोत्सेधांवितस्तिद्वयविस्तृतां समचतुरस्त्रांमृदावेदिकांविधाय तत्रशुक्लतंडुलैःषोडशारंकमलंविरच्य अथवापंचरंगशोभितं यथाशक्तिलिंगतोभद्रंविरच्य तत्रमंडलोक्ताब्रह्मादिदेवताआवाह्यतदुपरिअक्षतपुंजेश्वेतवस्त्रयुगोपेतंकलशंप्रतिष्ठाप्य तदुपरिसाक्षतंपूर्णपात्रंनिधाय तत्रहैमंशिवंत्र्यंबकमितिमंत्रेण हैमींगौरींचगौरीमिमाय इतिमंत्रेणपुरतःराजतंवृषभं इमारुद्रायइतिमंत्रेणप्रतिष्ठाप्य परितः पूर्वादिक्रमेण अनंत १ शिवं २ उग्रं ३ त्रिमूर्त्तिं ४ रुद्रं ५ श्रीकंठं ६ शिखंडिनं पुनराग्नेयादिषु दिक्षु गणेशं मातृकाः दुर्गां क्षेत्रपालं लोकेशांश्च तत्तन्नाममंत्रैर्वेदिकैर्वाप्रतिष्ठाप्य पूर्वोक्तांसावरणांसर्वोपचारपूजांकृत्वा रात्रिंजागरणादिनानीत्वा प्रातःअग्निंप्रतिष्ठाप्यअन्वादध्यात् तत्रप्रधानंसोमं शिवंत्र्यंबकमितिमंत्रेण पलाशसमिद्भिःआप्यायस्वेतिमंत्रेणपृषदाज्येनत्वंसोममितिमंत्रेण यवव्रीहिपायसतिलाज्यद्रव्यैः प्रत्येकंअष्टोत्तरशतसंख्याकाहुतिभिःपरिवारदेवताब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्येकेचनगौरीहोमंपृथक् नेच्छंति एवंहोमंसमाप्य ततःषोडशत्रयोदशब्राह्मणान्वक्ष्यमाणनामभिःसंपूज्य तावतःफलपक्वान्नैःपूरितान्घटान् अभावेतंडुलैरेवपूरितान्दक्षिणायुतान्दद्यात् तत्रषोडशनामानि सोमेश्वर १ स्तथेशानः २ शंकरो ३ गिरिजाधिपः ४ महेशः ५ सर्वभूतेशः ६ स्मरारि ७ स्त्रिपुरांतकः ८ शिवः ९ पशुपतिः १० शंभुः ११ त्र्यंबकः १२ चंद्रशेखरः १३ गंगाधरो १४ महादेवो १५ वामदेवश्च १६ षोडश त्रयोदशपक्षेतु भवः शर्वः रुद्रः पशुपतिः उग्रः महान् भीमः ईशानः सद्योजातः वामदेवः अघोरः तत्पुरुषः ईशानः पुनरावृत्याइति १३ त्रयोदश एवंसंपूज्य ततःपीठंगांचव्रतपूर्त्तयेधवलां यथाविधिआ

चार्घ्यायदत्त्वा सतिसंभवेसोपकरणांशय्यामपिदत्त्वा आशिषोगृहीत्वा सदन्नेनान्यानपिब्राह्मणान् यथाशक्तिभोजयित्वा स्वयंबंधुयुतोभुंजीत इतिसोमवारनक्तव्रतोद्यापनविधिः अथप्रभासखंडोक्तंसोद्यापनंसोमवारव्रतम् तत्रव्रतकर्तायजमानोयस्मिन्वापूर्वोक्तेमासिशुक्लपक्षेअष्टम्यांसोमवारे प्रातःपालाशार्द्रकाष्ठेनदंतधावनंविधाय शरीरशुद्धिंनिर्वर्त्य स्नात्वासंध्यादिनित्यंसमाप्य सुसमेभूतलेसकल सामग्रींसंपाद्य कदलीस्तंभावितानध्वजचामर शोभितेसम्यक्संमार्जितेशुद्धेसाधारणेभूमौ कलशंचंदनदध्यादिभिर्वर्हिश्चार्चितं धातुमयंमृण्मयंवानिधाय शुद्धजलेनापूर्य आम्रादिपंचपल्लवान्निक्षिप्य फलरत्नवस्त्रयुतंविधाय तदुपरिराजतवृषभस्थंउमयासहितंसोमनाथंशिवंसौवर्णंनिधाय श्वेतवस्त्रयुगान्वितंसर्वाभरणभूषितंविधाय अष्टौविद्याअष्टावीश्वरान् अष्टदिक्षुनिधाय नानाफलपुष्पपक्कान्नशोभितंरचयित्वा ओंनमस्तेपंचवक्त्रायदशबाहुः त्रिनेत्रिणे श्वेतंवृषभमारूढश्वेताभरणभूषित उमादेहार्धसंयुक्तसर्वमूर्त्यैनमोनमः इत्यनेनमंत्रेण आवाहनासन पाद्य अर्घ्य मधुपर्क आचमनीय स्नान वस्त्र यज्ञोपवीत गंध अक्षत पुष्प विल्वपत्र तुलसी दूर्वादल धूप दीप नैवेद्य पुनराचमनीय फल तांबूल नीराजन चामर प्रदक्षिणदक्षिणापूगफलंदत्त्वा वीजपूरयुतार्घ्यदानांतंविधाय अनुक्तेऽष्टोत्तरशतंजप्त्वा विल्वपत्रतिलाज्यैरष्टोत्तरशतं हुत्वा पूजांसमाप्य अनुक्तेकाले प्रदोषेविसृज्य रात्रौदर्भशय्यायांचंदनंप्राश्य सोमनाथंहृदिध्यायन्स्वपेत् पुनःप्रभातेदेवपूजादिकंनिर्वर्त्य ब्राह्मणान्संभोज्यतैरनुज्ञातःस्वयंभुंजीत एवंकृतेऽष्टादशकुष्ठानांनिवृत्तिर्भवेत् ॥ १ ॥ पुनर्द्वितीयसोमवारेकारंजंदंतधावनंविधाय स्नात्वानित्यंकर्मनिर्वर्त्यरौप्यवृषभस्थंज्येष्ठासहितंसोमनाथं ज्येष्ठायनमः ओंनमःपंचवक्त्रायेतिमंत्रेणसौवर्णंपूर्ववत्सर्वोपचारैःशतपत्रपुष्पैः पक्कान्नादिभिःसं-

पूज्य नारंगफलयुतार्घ्यंदत्त्वाविसृज्यमधुप्राश्यस्वपेत् पुनःप्रभातेनित्यकर्मसमाप्यदेवंसंपूज्यभुंजीत एवंकृतेद्वितीयेतुगोलक्षफलंभवति ॥ २ ॥ पुनस्तृतीयेअपामार्गदंतकाष्ठंविधायनित्यकर्मसमाप्य वृषभस्थंसिद्धिसहितमेकवक्त्रंसौवर्णंनिधाय पूर्ववज्जातिपुष्पैःसंपूज्यदाडिमफलेनार्घ्यंदत्त्वा अगुरुंप्राश्यस्वपेत् पुनःप्रभातेनित्यंनिर्वर्त्यभुंजीत एवंकृतेपूर्वोक्तफलंलभेत् ॥ ३ ॥ पुनश्चतुर्थेसोमवारेखादिरंदंतधावनंविधाय नित्यंनिर्वर्त्यवृषभस्थंसूक्ष्मायुतंगौरीशंदमनपुष्पैःसंपूज्य नारिकेलार्घ्यदानंकृत्वा देवंविसृज्यशर्करांप्राश्यस्वपेत पुनःप्रभातेनित्यंनिर्वर्त्यभुंजीत पूर्वोक्तफलंलभेत ॥ ४ ॥ पुनःपचमेसोमवारेपैप्पलंदंतधावनंविधायनित्यंनिर्वर्त्य वृषभस्थंभूतियुक्तंगणाधिपंसौवर्णंविधाय पूर्ववत्कुंदपुष्पैःपूजयेत् । द्राक्षयार्घ्यफलंदत्त्वारात्रौमौक्तिकोदकंप्राश्यस्वपेत् प्र.तर्नित्यंनिर्वर्त्यभुंजीत अश्वमेधफलंलभेत् ॥ ५ ॥ पुनःषष्ठसोमवारेवैजयंत्यादंतकाष्ठंविधाय अलाभेयाज्ञियकाष्ठेननित्यंसमाप्य वृषभस्थंद्राक्षायुतंसुरूपंसौवर्णंनिधाय पूर्ववत्संपूज्य जातिफलार्घ्यं अलाभेनारिकेलार्घ्यंफलंचदत्त्वा रात्रौकर्पूरंप्राश्यस्वपेत प्रातर्नित्यंसमाप्यभुंजीतपूर्वोक्तफलंलभेत् ॥ ६ ॥ पुनःसप्तमेसोमवारेमल्लिकादंतकाष्ठंविधायनित्यंसमाप्य दीप्त्यायुतंसवाहनं सर्वज्ञंसौवर्णंनिधायपूर्ववन्मालतीपुष्पैःसंपूज्य जंबीरफलार्घ्यंफलंचदत्त्वारात्रौलवंगंप्राश्यस्वपेत् प्रातर्नित्यंसमाप्यभुंजीत यथोक्तफलंलभेत् ॥ ७ ॥ पुनरष्टमेसोमवारेयाज्ञियकाष्ठेनदंतकाष्ठंविधायनित्यंसमाप्य अमोघायुतमीश्वरंसौवर्णंनिधाय पूर्ववन्मरुवकपुष्पैःसंपूज्य कदलीफलार्घ्यंदत्त्वा रात्रौदुग्धंपीत्वास्वपेत् प्रातर्नित्यंसमाप्यभुंजीत अग्निष्टोमफलंलभेत् ॥ ८ ॥ गंगास्नानेकृतेसम्यक्कोटिधायत्फलंस्मृतं दशहेमसहस्राणांकुरुक्षेत्रेरवेर्ग्रहे ब्राह्मणेवेदविदुषेयद्दत्त्वाफलमश्नुते तत्फलंकोटिगुणितमस्मिन्नाचरितेव्रते गजानांतुशते

दत्ते लक्षे थरथवाजिनां यत्फलंकोटिगुणितंसोमवारेव्रतेकृते गुग्गुलैर्धूपनंकृत्वाकोटिशोयत्फलंलभेत् तत्पुण्यंतुभवेत्तस्यसोमवारव्रतेकृते सर्वैश्वर्य्यसमायुक्तःशिवतुल्यपराक्रमः रुद्रलोकेवसेत्तावद्ब्राह्मणःप्रलयावधि ततोव्रतकर्त्तानवमेसोमवारेउद्यापनेच्छु र्मंडपस्थंडिलंवाहोमार्थंप्रागुदीच्यांविधाय चतुर्दिक्षुपताकाध्वजशोभितंतोरणयुतंचविधाय मध्येलिंगतोभद्रं तन्मध्यस्थाष्टपत्रेषुअष्टौकलशान्वस्त्रवेष्ठितग्रीवान्सपल्लवपंचरत्नफलसहितान्विधाय तदुपरिपूर्वेवामाशक्तियुतायवामायनमः ॥ १ ॥ आग्नेयेज्येष्ठाशक्तियुतायज्येष्टायनमः २ दक्षिणेरौद्रीशक्तियुतायरुद्रायनमः ॥ ३ ॥ नैर्ऋत्येकालीशक्तियुतायकालायनमः ॥ ४ ॥ पश्चिमेकलविकरिणीशक्तियुतायकलविकरणायनमः ॥ ५ ॥ वायव्येबलाविकरणीशक्तियुतायबलविकरणायनमः ॥ ६ ॥ उत्तरेबलप्रथमनीशक्तियुतायबलप्रमथनायनमः ॥ ७ ॥ ईशानेसर्वभूतदमनीशक्तियुतायसर्वभूतदमनायनमः ८ इत्यष्टपत्रेषुसंस्थाप्य मध्येकर्णिकायांमधुपूरितंसुवर्णपात्रंनिधाय तदुपरिसुवर्णशय्यामास्तीर्य्य उपरिवितानमावद्ध्य तत्पार्श्वेपर्यंकंसतूलकंछत्रवंशपात्रचामरदर्पण दीपमालाधूपादिसहितंसंस्थाप्य ततःपूर्वेउमाशक्तियुतायसोमनाथायनमः ॥ १ ॥ आग्नेयेज्येष्टाशक्तियुतायसूक्ष्मनाथायनमः ॥ २ ॥ दक्षिणेसिद्धिशक्तियुतायएकनाथायनमः ॥ ३ ॥ नैर्ऋत्येसूक्ष्माशक्तियुतायगौरीसनाथायनमः ॥ ४ ॥ पश्चिमेविभूतिशक्तियुतायगणाधिपायनमः ॥ ५ ॥ वायव्येभद्राशक्तियुतायसुरूपनाथायनमः ॥ ६ ॥ उत्तरेदीप्तिशक्तियुतायसर्वज्ञनाथायनमः ॥ ७ ॥ ईशानेअमोघाशक्तियुतायईश्वरायनमः ॥ ८ ॥ इतिप्रतिसोमवारकृतपूजनप्रतिमायांकलशोपरिपूजयेत् कर्णिकास्थस्वर्णशय्यास्थप्रतिमायां ॐमनोन्मनीशक्तियुतायश्रीसोमेशायमहाप्रभावाय सदाशिवायनमः इतिमध्येपूजनं तत्रक्रमः पूर्वेप्रतिष्ठा ततोध्यानम् ध्यायेन्नित्यंमहेशमित्यादि ततोदशो

पचारैःसर्वेषांपूजा पाद्यं १ अर्घ्यं २ आचमनं ३ स्नानं ४ वस्त्रं ५ गंधः ६ अक्षताः ७ पुष्पं ८ विल्वपत्रं ९ धूपः १० दीपः ११ नैवेद्यं १२ इत्यादिसर्वोपचारपूजां क्रमेणध्यानपूर्वकंकुर्य्यात् मध्येस्वर्णशय्यास्थंदेवंप्रतिष्ठाप्य शक्तौचतुःषष्टिअशक्तौद्वात्रिंशत्षोडशोपचारैःपूजयेत् देवंआसनादिनैवेद्यप्रत्यापोशानांतंकृत्वा आचार्यायक्षितिमूर्त्तयेनमइत्याद्यष्टमूर्त्तिपूजांविधाय पर्य्यंकेसमुपवेश्य वस्त्रालंकारछत्रचामरतांबूलदक्षिणादर्पणपुष्पमालासमर्पणांतंकृत्वा ओंनमःपंचवक्त्रायदशबाहुत्रिनेत्रिणे श्वेतंवृषभमारूढश्वेताभरणभूषित उमादेहार्धसंयुक्तसर्वमूर्त्तेनमोनमः इतिमंत्रेण अष्टोत्तरशतंहुत्वा उद्यापनांगंचहुत्वा ओंअनंतायनमः१ सूक्ष्मेशायनमः २ शिवेशायनमः ३ एकपादेशायनमः ४ एकरुद्रेशायनमः ५ त्रिमूर्त्तीशायनमः ६ श्रीकंठेशायनमः ७ वामदेवायनमः ८ मध्येसदाशिवायनमः ९ इतिपंचोपचारैःसंपूज्य नीराजनंकृत्वा जपंसमाप्यसघृतंपायसंमाषान्नंतिलान्नंषट्पंचाशदधिकंशतद्वयपलेनपूर्णपात्रंविधाय पृथक्संस्थाप्यश्रीसदाशिवायसावरणायबलिंसमर्पयेत् इतिजलंदत्वा पुष्पांजलिंचदत्वा रात्रौपंचगव्यंप्राश्य सोमेश्वरंहृदिध्यायन् गीतवादित्रैःकथाश्रवणस्तोत्रसहस्रनाम्नांपाठादिभिर्जागरणंचरेत् पुनःप्रभातेस्नात्वानित्यकर्मसमाप्य कांडानुसमयेनपदार्थानुशयेनवासंपूज्यसंप्रार्थ्यविसर्ज्यच अज्ञानाद्यदिवाज्ञानाज्जपपूजादिकंमया कृतंतदस्तुसफलंकृपयातवशंकर स्व स्वशत्त्यानुसारेण व्रतमेत त्कृतंशिव कृतंतदस्तुसफलंप्रसादात्तवशंकर इतिदेवंविसर्ज्य ततोयथासक्तिभत्त्याब्राह्मणान्संपूज्य क्षीरखंडादिनिर्मितभक्ष्यभोज्यैरनेकविधैःसंतर्प्य प्रत्येकवस्त्रयुग्मदक्षिणायुतानवप्रतिमाःसोपकरणाआचार्य्यायपौराणिकादिनवभ्योदद्यात् गाश्चअन्येभ्योदीनानाथेभ्योपि तदंतेबंधुयुतोभुंजीत एवंचीर्णेव्रतेसम्यक्लभतेपुण्यमक्षयं धनधान्यसमायुक्तःपुत्रदारसमन्वितः नकुलेजायतेतस्यदरिद्रोदुःखितो

पिवा अपुत्रोलभतेपुत्रान्वंध्यापुत्रवतीभवेत् काकवंध्यातथानारीमृतवत्साचदुर्भगा कन्याप्रसूतयाकार्य्यंरोगिभिस्तुविशेषतः एवंकृतेविधानेतुदेहपातेशिवंव्रजेत् कल्पकोटिसहस्राणिकल्पकोटिशतानिच भुंक्तेसौविपुलान्भोगान्यावदाभूतसंप्लवं इतिस्कांदेप्रभासखंडेसोद्यापनंसोमवारव्रतं अथश्रावणेमासिसोमवारेकेदारनाथपूजनमुक्तम् शिवरहस्ये तस्यकेदारनाथस्यश्रावणेसोमवासरे पूजाकार्य्याविशेषेणसाधनैर्विविधैःशुभैः सोमवारेव्रतंकार्य्यंप्रयत्नेनयथाबिधि शक्तेनोपोषणंकार्य्यमथवानिशिभोजनमिति अथाभिनवचंद्रार्घ्यदानविधिर्भविष्ये ॥ श्रीकृष्णउवाच ॥ पार्थपार्थिवद्यूतश्रीमुखपंकजसद्रवेः शृणुष्वाभिनवस्येंदोरुदयेर्घ्यविधिपरं रवेर्द्वादशभिर्मासैर्वारुण्यांदृश्यतेशशी प्रदोषसमयेराजन्नर्घ्यंदद्यात्तदाविधोः द्वितीयायांसितेपक्षेसंध्याकालेह्युपस्थिते संस्थाप्याभिनवंचंद्रंभूमौगोमयमंडले रोहिणीसहितंचंद्रं चंदनेनसुशोभनं राजतेवाथकांस्येवाभाजनेश्वेततंडुलैः पुष्पचंदनधूपैश्च दीपाक्षतजलैःशुभैः दूर्वांकुरैरत्नवरैर्दध्नावस्त्रैश्चपांडुरैः मंत्रेणानेनराजेंद्र क्षत्रियः सपुरोहितः नवोनवोमासिमासि जायमानःपुनः पुनःआप्यायस्वसमेतुतेसोमराजनमोस्तुते अनेनाबिधिनाचार्घ्यंसर्वकामफलप्रदं यःप्रयच्छतिकौंतेयमासिमासिसमाहितः सकीर्त्यायशसाकांत्याधृत्याचभुविमानवः पुत्रपौत्रैःपरिवृतोगोधान्यधनसंकुलःस्थित्वावर्षशतंमर्त्येततः सोमपुरंव्रजेत् तत्रास्तेदिव्यवपुषाभुंजन्भोगान्मनोरमान् वरस्त्रीभिःसदात्यर्थंयावदाभूतसंप्लवं धर्म्यांसमृद्धिमतुलांयदिवांछसित्वंमासानुमासमिहमद्वचनंकुरुष्व सोमस्यसोमकुलनंदनपुष्पधूपैरर्घ्यंप्रयच्छविधिनाभिनवोदितस्य इतिभविष्योत्तरेभिनवचंद्रार्घ्यदानविधिः अथभौमवारव्रतानि तत्रादौभौमपीडाशांतिकरं भौमवारव्रतंभविष्ये अथातःसंप्रवक्ष्यामिरहस्यंह्यतिदुर्लभं येनलक्ष्मीर्धृतिस्तुष्टिःपुष्टिःकांतिश्चजायते स्वात्यामंगारकंगृ-

ह्यक्षमायांनक्तभोजनः क्षमायांभूमावित्यर्थः क्षपयेन्नक्तभोजनेनयावत् वीरांभत्रोदये सप्तमेत्वथसंप्राप्तेहेमताम्रेनिवेश्यतं रक्तवस्त्रयुगाछन्नंकुंकुमेनानुलेपितं नैवेद्यंशुद्धकासारंधूपपुष्पाक्षतादिभिः होमंघृततिलैःकुर्यात्कुजनाम्नाचमंत्रवित् सामिधोत्तरशतमष्टाविंशतिरेवच होमयेन्मधुसर्पिभ्यांदध्नाचैवघृतेनच खादिर्य्यःसमिधस्त्वत्रहोतव्याविधिवत्तथा मंत्रेणानेनतंदद्याद्ब्राह्मणायकुटुंबिने कुजकुप्रप्रवोंगित्वं मंगलः परिपठ्स्ते अमंगलंनिहत्याशुसर्वदायच्छमंगलं एवंकृतेव्रतेभौम दोषः शांतिमवाप्नुयात् कर्त्तव्यंभौमपीडासुतस्मात्प्रयतमानसैः पद्मपुराणे भौमोयमीश्वरादत्रपृथिव्यांजनितोमहान् रूपेणैवसदारम्योवरदानाद्दिवौकसां अस्यैवदिवसेप्राप्तेताम्रपात्रंसुशोभनं परिपूर्णगुडेनैववर्षमेकंप्रदापयेत् व्रतांतेदापयेद्धेनुंयथोक्तविधिसंयुतां ब्राह्मणायसुरूपायअव्यंगायजितात्मने अथव्रतविधिः भौमवारेअरुणोदयवेलायांअपामार्गेणदंतधावनंविधाय आचम्य तिलामलकचूर्णेननद्यादौगृहेवास्नात्वारक्तवस्त्रंपरिधाय रक्तोत्तरीयंचपरिदध्यात् ततस्ताम्रपात्रेरक्ताक्षतपुष्परक्तचंदनानिनिक्षिप्य अग्निर्मूर्धेतिमंत्रेणार्घ्यमष्टोत्तरशतवारंदद्यात् ततोगृहमागत्यरक्तगोवृषगोमयेनोपलिप्तेशुद्धभूप्रदेशेपुत्रधनार्थीऋणमोक्षकामोवापूजामारभेत् तत्रविधिः ॐमद्येत्यादिमासपक्षाद्युल्लिख्यऋणव्याधिनाशधनपुत्राद्यवाप्तयेभौमव्रतंकरिष्ये व्रतांगत्वेनभौमपूजनंचकरिष्ये ॐमद्यकुजतेभक्त्याकरिष्येव्रतमुत्तमं ऋणव्याधिविनाशायधनसंतानहेतवे पात्रोपरिस्थितंभौमंपूजयेत् तत्रादौभौमपूजार्थं यंत्रकल्पनप्रकारमाह त्रिकोणंपूर्वमुद्धृत्यपंचधाविभजेत्ततः तृतीयरेखाचिह्नाभ्यांलांछयेत्समभागतः आद्यरेखाग्रयुगलेतृतीयाचिन्हयोर्न्यसेत् द्वितीयाग्रंसमाकृष्यतृतीयाचिन्हयोर्न्यसेत् तुर्य्यरेखांतृतीयांतुसमंभक्त्वासमांशतः तुर्य्यांचिन्हद्वयेनाथत्रिभिश्चिन्हैस्तुपंचमी तृतीयाग्रंप्रकुर्वीतपंचम्यामध्यचिन्हिते तुर्य्याग्रेयोजयेत्सम्यक्पंचम्याचिन्हयोर्द्व-

योःचिन्हैस्तुपंचमींदद्यात्सूत्रयुग्मंविचक्षणः एवमेकाधिकासम्यक्कोणानांविंशतिर्भवेत् तृतीयातुर्ययोर्मध्यात्स्थितिचिन्हेगृहेर्चयेत् देवंतदग्रतोमंत्रीत्रिकोणेदक्षिणाक्रमात् मंगलाद्यान्तारपूर्वान्नमोंतानेकविंशतिः एकविंशतिकोष्ठेषुनाममंत्रान्समालिखेत् नाममंत्रायथा मंगलो १ भूमिमिपुत्रश्च २ ऋणहर्त्ता३धनप्रदः ४ स्थिरासनो ५ महाकायः ६ सर्वकर्मावरोधकः ७ लोहितो ८ लोहिताक्षश्च ९ सामगानांकृपाकरः १० धरात्मजः ११ कुजो १२ भौमो १३ भूमिदो १४ भूमिनंदनः १५ अंगारको १६ यमश्चैव १७ सर्वरोगापहारकः १८ वृष्टिकर्त्ता पहर्त्ताच२० सर्वकामफलप्रदः २१ ततःपूजाप्रकर्तव्यापुत्रसंतानहेतवे पूजाप्रकारमाह एहिमेभगवन्भौमअंगारकमहाप्रभा त्वयिसर्वंसमायातंत्रैलोक्यंसचराचरं भौममावाहयिष्यामितेजोमूर्त्तिंदुरासदं रुद्ररूपमनिर्देश्यंवक्रंच रुधिरप्रियं अग्निर्मूर्धेतिमंत्रेणगायत्र्यामंगलस्यवा अस्यगायत्रीयथा अंगारकायविद्महेशक्तिहस्तायधीमहि तन्नोभौमः प्रचोदयात् अथपूजाविधिः मंत्रमहोदधौ मार्गशीर्षेवैशाखेवाशुक्लपक्षे भौमवारेअरुणोदयकाले अपामार्गकाष्टेनदंतधावनंविधाय नद्यादौस्नात्वारक्तवस्त्रंपरिधाय मासपक्षाद्युल्लिख्य ऋणछेदायपुत्रावाप्तयेच भौमव्रतंकरिष्ये इतिसंकल्प्यप्रार्थयेत् अथदेवशतेभक्त्याकरिष्येव्रतमुत्तमं ऋणव्याधिविनाशायधनसंतानहेतवे ततः कर्त्तास्वदेहेन्यासंकुर्य्यात् पादौमंगलायनमः जानुनी भूमिपुत्रायनमः ऊर्वो ऋणहर्त्रेनमः कटिदेशेधनप्रदायनमः गुह्येस्थिरासनायनमः उरसिमहाकायायनमः बामबाहौसर्वकर्म्मावरोधकायनमः दक्षिणबाहौलोहितायनमः गलेलोहिताक्षाय- मुखेसामगानांकृपाकराय- नासिकयोः धरात्मजाय- नेत्रयोःकुजाय- ललाटेभौमाय- भ्रुवोर्मध्येभूमिदाय- मस्तकेभूमिनंदनाय- शिखायामंगारकाय- सर्वांगेयमाय-कवचेसर्वरोगापहारकाय- मस्तकादिपादांतंवृष्टिकर्त्रे-पादादिमस्तकांतंवृष्ट्यपहर्त्रे- सर्वदिक्षुसर्वकाम

फलप्रदायनमः नाभौआरायनमः वक्ष्यसिवक्रायनमः मूर्द्धनिभूमिजायनमः अथकरषडंगन्यासः ॐअंगुष्ठाभ्यांनमः ह्रौंतर्जनिभ्यांस्वाहा हंमध्यमाभ्यांवषट् सःअनामिकाभ्यांहुं खंकनिष्ठिकाभ्यांवौषट् खःकरतलकरपृष्ठाभ्यांफट् एवंहृदयादिषडंगन्यासोपि अथास्यभौममंत्रस्यविरूपाक्षऋषिर्गायत्रीछंदः भौमोदेवता इति वैदिकमंत्रेपि अथध्यानम् रक्तमाल्यांबरधरः शक्तिशूलगदाधरः चतुर्भुजोमेषगमोवरदस्स्याद्धरासुतः रुद्ररूपमनिर्देश्यंवक्रेणरुधिरप्रियं उज्जयिन्यांसमुत्पन्नंभौममावाहयाम्यहं अग्निर्मूर्द्धेतिमंत्रेण भौमगायत्र्याच अंगारकायविद्महे शक्तिहस्तायधीमहि तन्नोभौमः प्रचोदयात् इतिआसनादिपुष्पांतंपूजांकृत्वा यंत्रस्यैकविंशतिकोष्ठेष्वेकविंशतिनाममंत्रैरेकविंशत्यंगानिपूजयेत् तद्यथा मंगलायनमःपादौपूजयामि भूमिपुत्रायजानुनी- ऋणहर्त्रेऊरू- धनप्रदाकटिदेशं स्थिरासनायगुह्यं- महाकायायउरः सर्वकर्मावरोधकायवामबाहुं लोहितायदक्षिणबाहुं सामगानांकृपाकरायमुखं- धरात्मजायनासिकां कुजायनेत्रे- भौमायललाटं- भमिदायभ्रूमध्यं- भूमिनंदनायमस्तकं- अंगारकायशिखांपू॰ यमायसर्वांगं- सर्वरोगापहारकायकवचं- वृष्टिकर्त्रेमस्तकादिपादांतंपू- वृष्ट्यपहर्त्रेपादादिमस्तकांतं- सर्वकामफलप्रदाय॰ सर्वदिक्षुसर्वांगंपूजयामि मंगलोभूमिपुत्रश्चेत्याद्येकविंशतिनामपारायणंकृत्वा कवचंपठेत् शिखायांमंगलःपातुभूमिपुत्रश्चमूर्द्धनिललाटेऋणहर्त्ताचचक्षुषोश्चधनप्रदः स्थिरासनःश्रोत्रयोश्चमहाकायश्चनासिके आस्यदंतोष्ठजिह्वासुसर्वकर्मावरोधकः हनूनेलोहितःपातुलोहिताक्षश्चकंठके स्कंधयोरुभयोरक्षेत्सामगानांकृपाकरः धरात्मजोभुजौरक्षेत्कुजोरक्षेत्करद्वयं भौमोमेहृदयंरक्षेद्भूमिदस्तुतथोदरे भूमिनंदनकोनाभौगुह्येत्वंगारकोवतु ऊरूममयमोरक्षेज्जान्वोरोगापहारकः जंघयोर्वृष्टिकर्त्ताचअपहर्त्ताचगुल्फयोः पादांगुष्ठौचपादौचसर्वकामफलप्रदः शक्तिर्मेपूर्वतो

रक्षेच्छूलंरक्षेद्वदक्षिणे पश्चिमेतुधनुःपातुउत्तरेचशरस्तथा ऊर्ध्वंषडाननःपातुचाधस्तात्पृथिवीमम एवंन्यस्तशरीरेपिपूजयेद्भूमिनंदनं अरुणजमरुणवर्णंरक्तमाल्यांगरागमरुणकमलमालामालिनंविश्ववंद्यं अतिललितकराभ्यांशक्तिशूलेवहंतंभजतधरणिसूनुंमंगलंमंगलानां इतिध्यात्वा अग्निर्मूर्द्धादिवः ककुदित्यष्टोत्तरशतंजपेत् अंगारकायविद्महेशक्तिहस्तायधीमहितन्नोभौमः प्रचोदयात् इतिगायत्रीजपांतेस्तोत्रंपठेत् मंगलोभूमिपुत्रश्चऋणहर्ताधनप्रदः स्थिरासनोमहाकायः सर्वकर्मविरोधकः लोहितोलोहिताक्षश्चसामगानांकृपाकरः धरात्मजःकुजोभौमोभूमिदोभूमिनंदनः अंगारकोयमश्चैवसर्वरोगापहारकः वृष्टिकर्तापहर्ताचसर्वकामफलप्रदः एतानिकुजनामानिनित्यंयःप्रयतःपठेत् ऋणंनजायतेतस्यसंतानंवर्धतेसदा एकविंशतिनामानिपठित्वानुदिनांतिके रूपवान्धनवांश्चैवजायतेनात्रसंशयः एककालंद्विकालंवायःपठेत्सुसमाहितः एवंकृतेनसंदेहोऋणहर्ताधनीभवेत् इतिस्तोत्रम् धरणीगर्भसंभूतं विद्युत्कांतिसमप्रभं कुमारंशक्तिहस्तंचमंगलंप्रणमाम्यहम् ॥ इतिनमस्कारः ॥ ततःखदिरांगारेणरेखात्रयंकृत्वा अंगारकमहीपुत्रभगवन्भक्तवत्सल त्वांनमस्यामिनिःशेषंऋणमाशुविनाशय ऋणरोगादिदारिद्र्यपापक्षुत्तापमृत्यवः भयक्लेशमनस्तापानश्यंतुममसर्वदा ऋणदुःखविनाशायपुत्रसंतानहेतवे मार्जयाम्यसितारेखास्तिस्रोजन्मत्रयोद्भवाः दुःखदौर्भाग्यनाशायसुखसंतानहेतवे कृतरेखात्रयंवामपादेनमार्जयाम्यहं ततःप्रार्थनांकुर्य्यात् ऋणहर्त्रेनमस्तुभ्यंदुःखदारिद्र्यनाशक सुखसौभाग्यधनदोभवमेधरणीसुत तप्तकांचनसंकाशतरुणार्कसमप्रभ सुखसौभाग्यधनदऋणदारिद्र्यनाशक ग्रहराजनमस्तेस्तुसर्वकल्याणकारक प्रसादात्तवदेवेशसदाकल्याणभाजन देवदानवगंधर्वयक्षराक्षसपन्नगाः प्राप्नुवंतिशिवंसर्वेसदापूर्णमनोरथाः प्रसादं

कुरुमेभौमसौभाग्यमंगलप्रद   वालःकुमारकोयस्तुसभौमःप्रार्थितोमया   उज्जायिन्यांसमुत्पन्नोभौमोभौमश्चतुर्भुजः   भरद्वाजकुलेजात शूलशक्तिगदाधरः   वरदोमेषमारूढःस्कंदप्रायस्तडित्प्रभः   स्योनापृथिवीमंत्रेणदलेयाम्येप्रतिष्ठितः   भूमिपुत्रोमहातेजा कुमारोरक्तवस्त्रकः   ज्वलदंगारसदृशोभौमःशांतिंप्रयच्छतु   इतिपूजामंत्राः   प्रसीदममदेवेशविघ्नहर्त्तधनप्रद   गृहाणार्घ्यंमयादत्तंममशांतिंप्रयच्छवै   भूमिपुत्रमहातेजःस्वेदोद्भवपिनाकिनः   सुतार्थिनीप्रपन्नात्वांगृहाणार्घ्यंनमोस्तुते   रक्तप्रवालसदृशंजपाकुसुमसन्निभं   महीसुतमहाबाहोगृहाणार्घ्यंनमोस्तुते   एवमेकविंशतिवारमेकविंशतिनामभिरर्घ्यंशक्त्यादद्यात्   प्रदक्षिणाविधातव्यास्तावत्योधरणीसुते   इत्यर्घ्यदानांतेतावंतएवनमस्काराअपिकार्य्याः   पुनःस्तोत्रंपठित्वावायनदानंदद्यात्   तिलगुडसहितानेकविंशतितंडुलान्   गोधूमान्नफलदक्षिणासहितानेकविंशतिविप्रेभ्योवाएकस्मैवेदविदुषेदद्यात्   तत्रदानमंत्रः   मंगलायनमस्तुभ्यंसर्वमंगलकारक   वायनेनचसंतुष्टोमंगलःप्रीयतामितिवायनंदद्यात्   ततःपुष्पांजलिकरस्तुवीतधरणीसुतं   ध्यात्वा तच्चरणांभोजं पूजासांगत्वासिद्धये   धरणीगर्भसंभूतंविद्युदाग्निसमप्रभं   कुमारंशक्तिहस्तंतंमंगलंप्रणमाम्यहं   ऋणहर्त्रेनमस्तुभ्यंदुःखदारिद्र्यनाशिने   नभासिद्योतमानायसर्वकल्याणकारिणे   देवदानवगंधर्वयक्षराक्षसपन्नगाः   सुखंयांतियतस्तस्मैनमोधरणिसूनवे   योवक्रगतिमापन्नोनृणांदुःखंप्रयच्छति   पूजितःसुखसौभाग्यंतस्मैक्ष्मासूनवेनमः   प्रसादंकुरुमेनाथमंगलप्रदमंगल   मेषवाहनरुद्रात्मन्पुत्रान्देहिधनंयशः   एवंसंस्तूयसंपूज्यगृह्णीयाद्ब्राह्मणाशिषः   गुरवेदक्षिणांदत्त्वाभुंजीतान्नंनिवेदितं   प्रतिभौमदिनंकुर्य्यादेवंसंवत्सरावधि   तिलैर्विधापयेद्धोमंशतार्द्धंभोजयेद्द्विजान्   माहेयमूर्त्तिंसौवर्णींसुरभिमाचार्य्यायनिवेदयेत्   मंडलस्थेपरेभ्यर्च्यसुतसौभाग्यसिद्धये   एवंव्रतपरानारीप्राप्नुयात्सुभगान्सुतान्   धनाप्त्यैऋणनाशायव्रतंकुर्य्यात्पुमा

नपि अग्निमूर्द्धेतिमंत्रंतुवैदिकंब्राह्मणोजपेत् तथांगारकगायत्रींसर्वाभीष्टप्रसिद्धये अंगारकायशब्दांतेविघ्नहेपदमुच्चरेत् शक्तिहस्तायचपदंधीमहीतिततोवदेत् तन्नोभौमःप्रचोदयाद्दद्यादितिप्रकीर्त्तयेत् इतिमंत्रमहोदधिप्रणीतंभौमवारव्रतम् अथकथा भविष्योत्तरे श्रीकृष्णउवाच यदुक्तंकथयिष्यामिसर्वकामार्थसिद्धये ग्रहाणामधिपंभौमंपूजयेद्भौमवासरे मंगलोभूमिपुत्रश्चऋणहर्त्ताधनप्रदः स्थिरासनोमहाकायःसर्वकर्माविरोधकः लोहितोलोहिताक्षश्चसामगानांकृपाकरः धरात्मजःकुजोभौमोभूमिदोभूमिनंदनः अंगारकोयमश्चैवसर्वरोगापहारकः वृष्टिकर्तापहर्त्ताचसर्वकामफलप्रदः एतानिकुजनामानिनित्यंयःप्रयतःपठेत् ऋणंनजायतेतस्यधनंप्राप्नोत्यसंशयं त्रिकोणंतुसदाकुर्यात्मध्येबिंबंप्रकल्पयेत् कुंकुमेनसदालेख्यंरक्तचंदनकेनवा कोणेकोणानि संपाद्यत्रीणि नामानिभूमिपआरंवक्रंभूमिजंतुरक्तगंधैःप्रपूजयेत् स्थापयेदव्रणंकुंभंजलपूर्णंसचक्रके रक्तधान्यैस्तुनैवेद्यैःरक्तैः रक्तोत्पलैस्तथा रक्तपुष्पैश्चगंधैश्चधूपदीपादिभिस्तथा मंगलंपूजयेद्भक्त्यामंगलेहनिसर्वदा ऋणरेखाःप्रकर्त्तव्याअंगारेणतदग्रतः तास्तुप्रमार्जयेत्पश्चाद्वामपादेनसंस्पृशन् एकविंशतिनामानिपठित्वातुतदंतिके रूपवान्धनवांश्चैवजायतेनात्रसंशयः एककालंद्विकालंवायःपठेत्सुसमाहितः एवंकृतेनसंदेहोऋणंहित्वासुखीभवेत् पूजितोदेवदेवेशोमंगलोमंगलप्रदः उज्जयिन्यांसमुत्पन्नोभौमोभौमश्चतुर्भुजः भारद्वाजकुलेजातः शक्तिशूलगदाधरः वरदोमेषमारूढःस्कंदप्रायस्तडितत्प्रभः स्योनापृथिवीतिमंत्रेणदलेयाम्येप्रतिष्ठितः भूमिपुत्रोमहातेजाःकुमारोरक्तवस्त्रकः ज्वलदंगारसदृशोभौमःशांतिंप्रयच्छतु पूजामंत्राः प्रसीददेवदेवेशविघ्नहर्त्तर्धनप्रद गृहाणार्घ्यंमयादत्तंममशांतिंप्रयच्छवै पूजितोदेवदेवेश्चमंगलोमंगलप्रदः गौत्तमेनपुरापृष्टोलोहितांगोमहाग्रहः गौत्तमउवाच कथयस्वमहाभागगुह्यंपूजनमुत्तमं मंत्रमाराधनंदानं सर्वपापप्रणाशनं रूपंसुवर्ण-

संकाशंवाहनायुधसंयुतं येनपूजनमात्रेणजायतेसुखमुत्तमं धर्मार्थकाममोक्षाणांकालेनैवफलप्रदं सर्वपापप्रशमनं सर्वव्याधिविनाशनं सर्वसौभाग्यदंब्रह्महत्यापातकनाशनं सर्वयज्ञफलंपुण्यंसर्वकामफलप्रदं तपसांजपदानानांफलंयेनतुलभ्यते तद्व्रतंब्रूहिमेदेवलोहितांगमहाग्रह यस्मिन्नाराधितेमर्त्यःसर्वसौभाग्यवान्भवेत् मंगलउवाच शृणुविप्र महाभाग सर्वज्ञऋषिगौत्तम व्रतंचपूजनंदानंयद्व्रतंभुवनत्रये आसीत्पूर्वंहिसर्वज्ञो ब्राह्मणोवेदपारगः तस्यभार्य्यासुनंदाचनाम्नाख्यातासुलोचना तस्यापत्यंनसंजातंवृद्धत्वेवृद्धभावतः तेनान्यस्यसुतापुण्यागृहीत्वापोषिताभृशंब्राह्मणस्यकुलेजातासुरूपारूपसंयुता सर्वलक्षणसंपन्नाप्रयत्नेनैवगौत्तम जन्मांतरेतयाचाहेकभावेनपूजितःतांपुत्रींस्वगृहेनीत्वाब्राह्मणीपर्यपालयत् नित्यंनिष्ठीवतेस्वर्णमष्टांगैःकनकाकृतिःस्वर्णेनतेनविप्रोसौधनाढयो बलगर्वितः कोटिकोटीश्वरोजातोराजतेभूमिमंडले वर्षैःकतिपयैर्विप्रसाकन्यारूढयौवना दृष्ट्वानंदकविप्रेण दशवर्षातपस्विनी विवाहार्थंचविप्रेणदत्तासोमेश्वरस्यच वेदोक्तविधिनानेनविवाहमकरोत्तदा वर्षैःकतिपयैस्तांतुकन्यांसुप्रौढयौवनां आदायश्वशुरगृहान्निर्गतःशुभवासरे ततःस्वदेशमार्गेणव्रजन्विप्रोप्यहर्निशं निशांतेचाध्वनिघोरेरण्येपर्वतमस्तके सुनंदीचवनेतस्मिन्नतिलोभेनभावितः मार्गेचलतिविप्रोसौघातितुंविट्पतिंस्वकं विट्पतिर्जामाता तेनासौघातितोविप्रश्चौररूपेणसाहसात् पतिंमृतंचसंदृष्ट्वासानारीभयपीडिता पतिनासह विप्रेणमरणेकृतनिश्चया यावत्प्रक्षिप्यकाष्टानांमध्येचैवहुताशनं पतिदेहमुपादायचिक्षेपचितिमध्यतः पतिंब्रह्ममयंदेवंध्यायंतीसापदेपदे पतिंप्रदक्षिणीकृत्यचितायाश्चसमीपतः स्थितायावत्प्रविशतितदाहमवदंचतां तस्मिन्कालेचतुष्टोहंयाचस्ववरमुत्तमं ब्राह्मण्युवाच यदितुष्टोसिमेदेवतदाजीवतुमेपतिः मंगलउवाच अजरोप्यमरोवापिभर्त्तातवभविष्यति अन्यंब्रूहिमहासाध्विवरंत्रिभुवनोत्तमं ब्राह्मण्युवाच यदितुष्टोसिमेदेवग्रहाणाम

धिपप्रभो येत्वापट्टेसमालिख्यरक्तचंदनचर्चितं रक्तपुष्पैश्चसंपूज्यप्रत्यूषेभौमवासरे वैधव्यंव्याधिशोकंचराज चौरभयंतथा सर्पाग्निग्रहसंबाधंवियोगंस्वजनैःसह माकुरुष्वमहापुत्रयादितुष्टोसिमेप्रभो मंगलउवाच एकविंशतिभौमांश्चचरेद्भक्त्याजितेंद्रियः एकाहारेणचान्नेनचतुर्द्वीपान्वितेगृहे अर्घ्यंतुसफलंमंत्रैर्वेदपौराणिकैरपि स्वशक्त्याभोजनंविप्रेदातव्यंसहिरण्यकं युवानंरक्तवृषभंसर्वोपस्करसंयुतं दद्यादितिशेषः तेषांपीडाग्रहभवानभवेत्तुकदाचन भूतवेतालशाकिन्यःप्रभवंतिनहिंसकाः एकविंशतिभौमाश्चकर्त्तव्याएकभावतः आपदोविलयंयांति सुखंचैवप्रवर्धते यःशृणोतिव्रतंविप्र मानवः संयतेंद्रियः तस्यमासकृतंपापंविलयं यातितत्क्षणात् सदानियमसंयुक्तः प्रत्यूषेभौममास्थितः यावज्जीवंव्रतंपुण्यंकरोतिभुवनत्रये सुसमृद्धोभवेद्विप्रः पुत्रपौत्रैस्तुवर्द्धितः अतेचापिपरंस्थानंयत्रसूर्यादयोग्रहाः एवमुक्तातदातत्रमंगलोपिदिवंगतः इदं व्रतंतवाख्यातंसर्वसौख्यप्रदायकं इदंव्रतंकरिष्यंतितेषांपिडानजायते स्त्रीभिर्व्रतंप्रकर्त्तव्यंपुरुषैश्चविशेषतः तेषांमुक्तिर्नसंदेहः स्वर्गवासोनसंशयः इतिभौमवारव्रतकथा अथोद्यापनविधिर्भविष्ये ॥ गौत्तमउवाच ॥ उद्यापनविधिंसम्यङ् ममब्रूहिप्रसादतः येनज्ञातेनजगतउपकारोमहान्भवेत् ॥ मंगलउवाच ॥ विज्ञेयो मंडपस्तस्मिन्नष्टहस्तप्रमाणतः स्थंडिलंमध्यतःकार्य्यमेकहस्तप्रमाणतः स्थंडिलंतुप्रकर्त्तव्यमारक्तंरक्तशालिना पूर्वोक्तानिचनामानिमंडलेपूजयेत्ततः तन्मंडलंतुकर्त्तव्यंपत्रैर्विंशतिभिर्द्विज द्वारोपद्वारसहितंवीथिकाकरकैर्युतं पूजातत्रप्रकर्त्तव्यारक्तचंदनपूर्वका जपापुष्पंप्रदातव्यंव्रतोद्यापनसिद्धये कुंभेमेप्रतिमास्थाप्यासौवर्णीसास्वशक्तितः रक्तवस्त्रेणसंछाद्यपूज्यापूर्वोक्तमंत्रतः अष्टोत्तरशतंहोमंपूजांतेकारयेद्बुधः जपायाः कुसुमानांतुघृतस्यतुयथाविधितिलाक्षतानामाचार्य्यऋत्विग्भिर्वेदपारगैः अग्निर्मूर्द्धेतिमंत्रेणरक्तशालेयकैस्तथा शांतिकंतुप्र

कर्त्तव्यंयथोक्तेनविधानतःपद्मनध्येकर्णिकायांमममूर्त्तिमतंद्रितं पूजयेद्यजमानस्तुशेषनामानिमध्यतः मंगलाययजेत्पादौभूमिपुत्रायजानुनी ऊर्वोश्चऋणहर्त्रेचकटिदेशेधनप्रदं स्थिरासनंगुह्यदेशेमहाकायायचोरसिसर्वकामप्रदात्रेतुवामबाहुंप्रपूजयेत् लोहितंदक्षिणेवाहौलोहिताख्यायकंठके आस्येसंपूजयेन्मांचसामगानांकृपाकरं धरात्मजंनासकायांकुजंचनयनद्वये भौमंललाटपट्टेचभूमिजायनमोभ्रुवौ भूमिनंदननाम्नाचमूर्द्धानिमांपूजयेत्ततः अंगारकंशिखायांतुयमंकवचदेशतः सर्वरोगापहर्त्तारमस्त्रेमांपूजयेत्सदा आकाशवृष्टिकर्त्तारंतद्धर्त्तारमधस्तथा सर्वांगेषुचपूज्योस्मिसर्वकामफलप्रदःएवंपंचोपचारेणपूजांतेव्रतपारणात् अच्छिद्रंयाचनीयंतुभक्तियुक्तेनचेतसाआचार्य्याऋत्विजोब्रूयुर्व्रतंसंपूर्णमस्त्विति व्रतांतेपूजयेद्विप्रंगुरुंपत्नीसमन्वितं रक्तवस्त्रंपरीधाप्यंपदंदद्याद्यथोचितं पदंभोजनभाजनादि शय्यांसोपस्करांचैवभोजनंविविधंतथा भक्त्याद्द्यादनड्वाहंव्रतांतेममतुष्टये ऋत्विजोपितदापूज्या प्रीत्यर्थंचास्यशक्तितः भोजनाछादनाद्यैश्चसत्कारैर्विविधैर्गिरा इत्थमुद्यापनंयेतुकुर्वंतिव्रतकारका तेषांपीडाकदाप्यस्यग्रहस्यनभविष्यति भूतवेतालशाकिन्यःप्रभवंतिनहिंसकाः नऋणंचभवेत्तेनदुःखंचभवेद्ध्रुवं येषांसंतानवांछास्यात्तेलभंतेबहून्सुतान् इत्युक्त्वागौत्तमस्याग्रेदिवंप्राप्तोमहाग्रहःव्रतंचरंति येलोकाःपीडिताविपदांगणैः आपदोविलयंयांतिसर्वास्तेषांतुतत्क्षणात् सदानियममारूढःप्रत्यूषेसुसमाहितः यावज्जीवंव्रतंपुण्यंकरोतिभुवनत्रयं सुसमृद्धोभवेद्विप्रःपुत्रपौत्रैःप्रवर्धते अंतेयातिपरंस्थानंयत्रसूर्य्यादयोग्रहाः कृतस्यसततंसम्यक्व्रतस्यास्यप्रभावतः यावज्जीवंनशक्नोतिव्रतंकर्त्तुंनरोयदि उद्यापनंविधायैवभोक्तव्यंव्रतिभिर्नरैः उद्यापनंतुशास्त्रोक्तंकर्त्तव्यंसुसमाहितैः अशक्तोब्राह्मणानुज्ञांगृहीत्वातुविसर्जयेत् अन्यथाकुरुतेयस्तुकुष्ठीचांधःप्रजायते तस्मात्सर्वप्रयत्नेनब्राह्मणानुज्ञयाव्रतं कर्त्तव्यंतुसुसंपूर्णमुद्यापनसमान्वितं धरामराणांवच

नैरवास्थितादिवौकसस्तीर्थव्रतैःसमेताः नलंघयेच्चापिवचांसितेषांश्रेयोभिकामीपुरुषोविजानन् इतिश्रीभविष्योत्तरोक्तंसोद्यापनंभौमवारव्रतम् अथप्रकारांतरेणसोद्यापनंभौमव्रतपूजनम् तत्रप्रातरपामार्गदंतधावनं तिलामलकचूर्णेनांगोद्वर्त्तनं नद्यादौ स्नानंसंध्यामुपास्यरक्तचंदनपुष्पाक्षतैस्ताम्रपात्रेणैकविंशति नामभिरर्घ्यदानम् भौममंत्रेणतद्गायत्र्याचाष्टोत्तरशतवारंजपः गृहमागत्यरक्तसुरभिगोमयेनभूमिलेपनं तत्ररक्तचंदनेनत्रिकोणमंडलंकृत्वा तत्रगोधूमप्रस्थोपरिताम्रकलशोपरि तत्रताम्रमयंभूर्जपत्रमयंचैकविंशतिकोष्ठात्मकंपत्रंपूर्वोक्तयंत्रोद्धारोक्तंयंत्रंनिधाय आचम्यसंकल्पंकुर्य्यात् ॐतत्सत्अद्यआत्मनऋणापहृतिपूर्वकधनधान्यपुत्र पौत्राद्यभीष्टसिद्धिद्वारामंगलप्रीत्यर्थंमंगलव्रतंकरिष्ये इतिसंकल्प्य गणेशपूजापूर्वकंपुण्याहवाचनादिविधायपूजामारभेत् तत्रादौप्रार्थना अथदेवेशतेभक्त्याकरिष्येव्रतमुत्तमं ऋणदुःखादिनाशाय धनसंतानहेतवे अभीष्टान्कुरुदेवेशममपूर्णान्मनोरथान् ततोभूतशुद्ध्यादिकृत्वान्यासान्कुर्य्यात् मंगलायनमः शिखायां भूमिपुत्रायमूर्द्धनि- २ ऋणहर्त्रेललाटे ३ धनप्रदायनेत्रयोः ४ स्थिरासनायकर्णयोः ५ महाकायायनासिकयोः ६ सर्वकर्मावरोधकायमुखे ७ लोहितायस्तनयोः ८ लोहिताक्षायकंठे ९ सामगानांकृपाकरायस्कंधयोः १० धरात्मजायवाह्वोः ११ कुजायहस्तयोः १२ भौमायहृदये १३ भूमिदायउदरे १४ भूमिनंदनायनाभौ १५ अंगारकायकट्यां १६ यमायऊर्वोः १७ सर्वरोगापहारकायजान्वोः १८ वृष्टिकर्त्रेजंघयोः १९ वृष्ट्यपहर्त्रेगुल्फयोः २० सर्वकामफलप्रदायपादयोः २१ ततो मां मीं मूं मैं मौं मः इतिकरषडंगन्यासः स्ववामभागेकलशाराधनम् तत्पाश्चिमतः स्ववामे त्रिकोणषट्कोणवृत्तचतुरस्त्रमंडले साधारमर्घ्यपात्रे गंधपुष्पाक्षतयुतेनजलेनापूर्य्य मूलेनगायत्र्यावाष्टवारमभिमंत्र्य तद्दक्षिणेत्रिकोणे साधारंसजलं

पूर्णपात्रंसंस्थाप्य गंधपुष्पाक्षतादिदत्त्वा मूलेनाष्टवारमभिमंत्र्य तद्दक्षिणेत्रिकोणेसाधारमर्घ्यपात्रस्थ
जलंकिंचिन्निक्षिप्य धेनुमुद्रांप्रदर्श्य प्रोक्षणीपात्रस्थजलेनात्मानंपूजाद्रव्यंचप्रोक्ष्य देवंध्यायेत् पिंगाक्षं
रक्तवर्णंसुरतरुदलभंरक्तवस्त्रेणयुक्तं मेषारूढंग्रहेंद्रंह्यमलाकिसलयैः पूजितंसुप्रसन्नं ध्यायेदेतान्दधानं
वरदकरयुतंशूलशक्तिंगदांतु भौमंचैश्वर्य्यसिंधुनिधिनिकरविभुंमंगलंचिंतयामि ॥ १ ॥ एह्येहिभगवन्भौ
मस्थानेचात्रस्थिरोभवत्वयिसर्वमिदंप्रोतंत्रैलोक्यंसचराचरं उज्जयिन्यांसमुद्भूतशूलशक्तिगदाधर भारद्वाज
कुलोत्पन्नस्कंदविद्युत्ताडित्प्रभ यावत्पूजासमाप्येततावत्त्वंसुस्थिरोभव इमांमयाकृतांपूजांगृहाणवरदोभव
ॐह्रांश्रींम्लूंमंगलायनमः अयंमूलमंत्रः अंगारकायविद्महेभूमिपुत्रायधीमहि इयंगायत्री अग्निर्मूर्धेतिवैदि
कोमंत्रः मंगलायनमः मंगलंसांगंसपरिवारमावाहयामि इतिपंचवारंमंत्रत्रयंपठेत् ॥ १ ॥ भूमिपुत्रायआसनं
२ ऋणहर्त्रेपाद्यं ३ धनप्रदायआचमनं स्थिरासनायअर्घ्यं मंगलायदधिमधुसर्पियुतंमधुपर्कंमहाकायायपु
नराचमनं ५ ऋणहर्त्रेपंचामृतस्नानं ६ ततोगंधादिभिःसंपूज्य पुरुषसूक्तेनअभिषेकंकुर्य्यात् सर्वकर्मावरो
धकायशुद्धोदकस्नानं ८ ततःपूर्वस्थापितकलशेप्रतिष्ठापयेत् परितःपूर्वादिक्रमेणपारिवारान्स्थापयेत् पूर्वे
शक्तिं १ आग्नेयेशूलं २ दक्षिणेधनुः ३ नैर्ऋत्यांशरं ४ पश्चिमेगदां ५ वायव्येवरदं ६ उत्तरेषडाननं ७
ईशान्यांपृथिवीं ८ आवाह्यसहैवपूजयेत् लोहितायवस्त्रं लोहिताक्षायउपवीतं सामगानांकृपाकरायगंधं
धरात्मजायपुष्पं अथएकविंशतिकोष्ठेषुअंगान्येकविंशतिनामभिःपूजयेत् मंगलायनमःपादौपूजयामि भूमिपु
त्रायगुल्फौ- ऋणहर्त्रेजंघे - धनप्रदायजानुनी - स्थिरासनायऊरू· महाकायायकटिं सर्वकर्मावरोधकायनाभिं
लोहितायउदरं- लोहिताक्षायहृदयं' सामगानांकृपाकरायकरौपू· धरात्मजायबाहू· कुजायस्कंधौ भौमायकंठं

भूमिदायहनुं भूमिनंदनायमुखं अंगारकायनासिकां यमायकर्णौ सर्वरोगापहारकायचक्षुषी वृष्टिकर्त्रेललाटं वृष्ट्यपहर्त्रेमूर्द्धानं सर्वकामफलप्रदायशिखांपूजयामि ततोनानापरिमललेपार्पणं कुजायधूपं भौमायदीपं भक्तिदायगुडमिश्रंगोधूमान्ननैवेद्यं सोपस्करंवा भूमिनंदनायफलं अंगारकायतांबूलं यमायदक्षिणां सर्वरोगापहारकाय नीराजनं वृष्टिकर्त्रेपुष्पांजलिः वृष्ट्यपहर्त्रेप्रदक्षिणा सर्वकामफलप्रदाय नमस्कारः भूमिपुत्रमहातेजःस्वेदोद्भवपिनाकिनः धनार्थीत्वांप्रपन्नोस्मिगृहाणार्घ्यंनमोस्तुते अनेनमंत्रेणरक्तपुष्पाक्षतैरक्तचंदनताम्रपात्रस्थजलेनएकविंशतिनामभिरर्घ्याणिदद्यात् ओंमंगलायनमइदमर्घ्यंसमर्पयामि एवंभूमिपुत्रायनमइत्याद्येकविंशतिनाम्नामूहःकार्य्यःततोजपंकुर्य्यात् अस्यश्रीभौममंत्रस्यब्रह्माऋषिस्त्रिष्टुप्छंदः मंगलोदेवता महेश्वरइतिशक्तिः ममऋणमोचनाद्यभीष्टसिद्ध्यर्थमेकशताधिकंद्विसहस्रपरिमितजपमहंकरिष्ये ओंमांमींमूंमैंमौंमः अनेनमंत्रेणकरषडंगन्यासौविधाय पिंगाक्षंरक्तदेहमित्यादिध्यात्वा २१०० मूलमंत्रजपंकृत्वा अंतेपूर्ववत्करषडंगन्यासंकृत्वाकवचंपठेत् शिखायांमंगलःपातुभूमिपुत्रस्तुमूर्द्धनि ललाटेऋणहर्त्ताचचक्षुषोस्तुधनप्रदः स्थिरासनःश्रवणयोर्महाकायस्तुनासिके आस्यदंतोष्ठजिह्वासुसर्वकर्मावरोधकः हनौमांलोहितःपातुकंठेलोहितलोचनः स्कंधयोरुभयोरक्षेत्सामगानांकृपाकरः धरात्मजोभुजौपातुकुजोरक्षेत्करद्वये भौमोमांहृदयेपातुभूमिजस्तुतथोदरे भूनंदनोथनाभौचकट्यामंगारकोवतु सक्थिनीमेयमोरक्षेज्जान्वोरोगापहारकः जंघयोर्वृष्टिकर्त्ताचअपहर्त्ताचगुल्फके पादांगुष्ठौचपादौचसर्वकामफलप्रदः शक्तिर्मेपूर्वतोरक्षेच्छूलंरक्षतुदक्षिणे पश्चिमेमांधनूरक्षेदुदरेचशरस्तथा ऊर्ध्वषडाननःपातुचाधस्तात्पृथिवीसदा यएवंकवचंजप्त्वापश्चाद्भौमंसमाचरेत् ओंमद्येत्यादिसंकीर्त्यमंगलव्रतांगभूतकृतजपदशांशेनहवनंकरिष्ये इतिसंकल्प्य देवाग्रे शुद्धमृदा त्रिकोणं स्थंडिलंकृत्वा

स्वगृह्योक्तविधिनाऽग्निंप्रतिष्ठाप्य अन्वादिंध्यात् अत्रखदिरादिसमिधोहोमद्रव्यं तत्रप्रधानंमंगलंगुडाज्यमिश्रित तिलद्रव्येणकृतजपदशांशेनयक्ष्येमूलमंत्रेणजहुयात् खर्जूरीफलेनपूर्णाहुतिंहुत्वा गायत्र्यावैदिकमंत्रेणापियथाशक्तिहुत्वाहोमशेषंसमापयेत् अत्रैकविंशतिनाममंत्रैरपिखर्जूरीफलैर्होमोविधीयते ततोगायत्रींपठित्वामंगलंतर्पयामीत्याद्येकविंशति नामभिस्तर्पणं कार्य्यं ऊँअनृणाअस्मिन्ननृणापरस्मिंस्तृतीयेलोकेअनृणस्याम यद्देवयानाउतापितृयानासर्वान्यथा अनृणाअक्षीयेम इतिमंत्रंपठित्वामार्जनंकुर्य्यात् ततोवायनदानं मंगलरूपिणेद्विजायइदंपाद्यमित्यादिसंपूज्य तांबूलदक्षिणासहितानेकविंशतिसंख्याकान् गुडमिश्रिततिलल्लड्डुकान्दद्यात् तत्रमंत्रः ॥ मंगलायनमस्तुभ्यंसर्वमंगलकारक वायनेनचसंतुष्टोममकामान्प्रपूरय अनेनवायनदानेनऋणहर्त्ताभौमःप्रीयतां ततःखदिरांगारकेणऋणत्रयसंज्ञिकास्तिस्रोरेखाःकार्य्याः ताश्चवामपादेनमार्जयेत् तत्रमंत्रः ॥ दुःखदौर्भाग्यनाशायधनसंतानहेतवे मार्जयाम्यसितारेखास्तिस्रोजन्मत्रयोद्भवाः ततोमंगलोभूमिपुत्रश्चेत्यादिःसर्वकामफलः एतानिकुजनामानिनित्यंयःप्रयतःपठेत् ऋणंनजातेतस्यधनंयच्छतिवांछितं ततउत्तिष्ठब्रह्मणस्पतेइतिमंत्रेणोत्थाप्यविसर्जयेत् कथांश्रुत्वाब्राह्मणभोजनपुरःसरं सगुडंगोधूमान्नंमौनंभुंजीत एवमुक्तप्रकारेणप्रतिभौमवासरंएकविंशतिकुर्य्यात् ततोद्वाविंशतितमेभौमवासरे उद्यापनंकुर्य्यात् तद्यथाऊँतत्सत्अद्येत्यादितिथ्यादिपंचांगस्मृत्वा अभीष्टकामनासिद्ध्यर्थंमयाचरितंयत्भौमव्रतं तस्यसंपूर्णताफलावाप्तयेभौमव्रतोद्यापनंकरिष्ये ततोवृताचार्यःउक्तविधिना सर्वतोभद्रस्थकलशप्रतिष्ठांतंसामान्यविधिंकृत्वा ततोहैमंमंगलंपूर्वोक्तपूजाविधिनासंपूज्य सुवर्णपुष्पैःमंगलायनमइत्यादिविशेषपूजांकृत्वा पुराणपठनादिनाजागरंकुर्यात् प्रातःअग्निंप्रतिष्ठाप्यअन्वादध्यात्

अत्रप्रधानंमंगलंगुडाज्यमिश्रितातिलद्रव्येणअष्टोत्तरशतसंख्याकाहुतिभिर्मूलमंत्रेणगायत्र्यावावैदिकेनापिएकविंशतिमंत्रैः परिवारदेवताश्चतेनैवद्रव्येण अष्टाष्टसंख्याकाहुतिभिः ब्रह्मादिदेवताश्चैकयाज्याहुत्यायक्ष्ये मंगलोभूमिपुत्रश्चेत्याद्याएकविंशतिदेवतास्तासांनाममंत्रेणहोमः एवंहोमंसंपाद्य पूर्वोक्तैकविंशतिनामभिरेकविंशतिद्विजान्संपूज्यैकविंशतिकलशान्दद्यात् तत्रमंत्रः मंगलःप्रतिगृह्णातुमंगलोवैददातिच मंगलस्तारकोभाभ्यांमंगलायनमोनमइतिदत्त्वा आचार्य्यंरक्तवस्त्रादिनासंपूज्य तस्मैपीठंव्रतपूर्त्तयेरक्तांसुरभिंरक्तंवृषभंचदत्त्वा विभवेसतिसोपस्करांशय्यांचदत्त्वा सदन्नेनभूदेवान्संतर्प्य दक्षिणाभिःप्रतोष्य आशीषोगृहीत्वा इष्टजनैः सहभुंजीत इतिसोद्यापनंभौमवारव्रतम् अथमंगलागौरीव्रतम् तत्रादौकामाक्षींप्रकृत्यतत्रापिश्रावणेमासिप्रत्यहं विधिवज्जनैःपूजाकार्य्याविशेषेणसर्वथाभौमवासरे इतिमंगलागौरीव्रतंभविष्ये ॐमद्यतिथ्यादिसंकीर्त्यआत्मनोऽशेषपापक्षया वैधव्यपुत्रपौत्राद्यनेकनानाविधभोगप्राप्तिपूर्वकगौरीलोकप्राप्त्यर्थंपंचवर्षात्मकंमंगलागौरीव्रतं श्रावणेमासिशुक्लपक्षेप्रथमेभौमवासरे मंगलागौरीव्रतांगत्वेनपूजनंकरिष्ये पंचवर्षात्मकाचरितमंगलागौरीव्रतफलसंपूर्णतावाप्तयेचतदुद्यापनंकरिष्ये ततोगौरीतिलकोक्तैकलिंगतोभद्रमंडलेकलशोपरिहैमींगौरींप्रीतमांगौरीमिमायेतिमंत्रेण सर्वमंगलमांगल्येइत्यादिपौराणिकमंत्रेणचप्रतिष्ठाप्य ताभ्यामेवमंत्राभ्यांश्रीसूक्तेनवापूजयेत् परितःपिष्टजान्डमरुकाकारान् षोडशतंतुवर्त्तियुतान्षोडशदीपान्प्रज्वाल्य समान्साग्रान्षोडशपर्वयुतान् दूर्वांकुरान्समर्प्य सौभाग्यवस्तुजातंसमर्प्य कथाश्रवणादिभिःरात्रिंनयेत् प्रातरग्निंप्रतिष्ठाप्यअन्वादध्यात् अत्रप्रधानंगौरींफलाक्षताविल्वदलैःप्रतिद्रव्यं अष्टोत्तरशतसंख्याकाहुतिभिर्ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये इतिहोमंसंपाद्य ततःषोडशाष्टौचतुरोवादंपतीन् अभावेएकंवासंपूज्य सौभाग्यवस्त्रदक्षिणा

तांवूलफलादियुतंपक्कान्नपूरितंवंशपात्रं उद्यापनमिदंदेवइतिमंत्रं पठित्वा तेभ्योदत्त्वा ततआचार्य्यंसंपूज्य
रौप्यपात्रसौवर्णवर्त्तिसंयुतंप्रज्वालितंदीपंकृत्वा आचार्य्यायदत्त्वासोपस्करंपीठंव्रतपूर्त्तयेगांचदत्त्वा परमान्नेन
भूदेवान्संतर्प्याशिषोगृहीत्वा मौनीइष्टजनैस्सहभुंजीत इतिसोद्यापनंमंगलागौरीव्रतम् अथबुधव्रतंभ
तिष्ये अथातःसंप्रवक्ष्यामिरहस्यंह्येतदुत्तमं येनलक्ष्मीर्धृतिस्तुष्टिःपुष्टिःकांतिश्चजायते विशाखासुवुधं
सप्तव्रतनक्तान्यथाचरेत् वुधंहेममंकृत्वास्थापितंकांस्यभाजने शुक्लवस्त्रयुगच्छन्नंशुक्लमाल्यानुलेपनं गुडोद
नोपहारंतुब्राह्मणायनिवेदयेत् तत्रमंत्रः वुधत्वंवुद्धिजननोधनदःसर्वदानृणां तत्त्वाववोधंकुरुषेसोमपुत्रनमो
स्तुते होमंघृततिलैःकुर्य्याद्बुधनाम्नाचमंत्रवित् समिधोष्टोत्तरशतमष्टाविंशतिरेववा होतव्यामधुसर्पिर्भ्यां
दध्नाचैवघृतेनच अत्रसमिधो अपामार्गस्यग्राह्या वुधशांतिरितिप्रोक्तावुधवैकृतनाशिनी वुधदोषेतुकर्त्तव्ये
वुधशांतिकपौष्टिके इतिभविष्योत्तरोक्तावुधशांतिः अथवुधस्तोत्रम् ॐनमोवुधायविज्ञायसोमपुत्रायतेनमः
रोहिणीगर्भसंभूतकुंकुमच्छविशोभन सोमप्रियसुतानेकशास्त्रपारगवित्तम रौहिणेयनमस्तेस्तुनिशाकामुकसू
नवे पीतवस्त्रपरीधानसुवर्णस्त्रग्विराजित सुवर्णमालाभरणस्वर्णदानवरप्रद नमोप्रतिमरूपायवुधानांप्रिय
कारिणे विष्णुभक्तिमतेतुभ्यमुडुराजप्रियंकर इत्येतत्स्तोत्रमुत्थायप्रभातेमानवस्तुयः वुधस्यपठतेनित्यंवुद्धि
भाक्सभवेन्नरः इतिवुधस्तोत्रम् अथगुरुवारव्रतं अथातःसंप्रवक्ष्यामिरहस्यंह्येतदुत्तमं येनलक्ष्मीर्धृतिस्तु
ष्टिःपुष्टिःकांतिश्चजायते गुरुंचैवानुराधायांपूजयेद्भक्तितोनरः पूर्वोक्तविधियोगेनसप्तनक्तान्यथाचरेत् हैमंहेमम
येपात्रेस्थापयित्वावृहस्पतिं पीतांवरयुगाच्छन्नंपीतयज्ञोपवीतिनं पादुकोपानहच्छत्रकमंडलुविभूषितं
भूषितंपीतकुसुमैःकुंकुमेनानुलेपितं धूपदीपादिनैवेद्यैःफलैश्चंदनखंडकैः खंडखाद्योपहारांश्चगुरोरग्रेनिवेदयेत्

प्रार्थनामंत्रः धर्मशास्त्रार्थतत्त्वज्ञज्ञानविज्ञानपारग विबुधार्त्तिहराचिंत्यदेवाचार्यनमोस्तुते हौमेघृंतातलिःकुर्य्याद्गुरुनाम्नाचमंत्रवित् समिधोष्टोत्तरशतमष्टाविंशतिरष्टवा होतव्यामधुसर्पिभ्यां दध्नाचैवघृतेनच पिप्पल्यः समिधोज्ञेयाःशास्त्रांतरनियोगतः एतद्व्रतंमहापुण्यंसर्वपापहरंशिवं तुष्टिपुष्टिकरंन्दृणांगुरुवैकृतनाशनं विषमस्थेगुरौकार्य्याजीवशांतिरियंबुधैः इतिभविष्योत्तरोक्तगुरुवारव्रतम् अथगुरुस्तोत्रम् दंडाक्षसूत्रधारीचकमंडलुधरःसदा हस्त्यारूढश्चतुर्बाहुःपातुमांवाक्पतिःसदा चराचरगुरुंस्तौमिगुरुंसर्वोपकारकं यस्यसंकीर्त्तनादेवक्षणादिष्टंप्रजायते वृहस्पतिःसुराचार्य्योनीतिज्ञोनीतिनायकः गुरुर्जीवोथवागीशोवेदवेत्ताविदांवरः सौम्यमूर्त्तिःसुधादृष्टिःपीतवासाःपितामहः अग्रवेत्तादीर्घश्मश्रुर्हेमांगःकुंकुमच्छविः सर्वज्ञःसर्वदःसर्वःसर्वपूज्योग्रहेश्वरः सत्यधामाक्षमाशीलोग्रहपीडानिवारकः पंचविंशतिनामानिगुरुंस्मृत्वातुयःपठेत् आयुरारोग्यमैश्वर्य्यंधनधान्यसमन्वितं जीवेद्वर्षशतंसाग्रंसर्वव्याधिविवर्जितः कर्मणामनसावाचायत्पापंसमुपार्जितं तदेतत्पठनादेव दहत्यग्निरिवेंधनं गुरोर्दिनेर्चयेद्यस्तुपीतवस्त्रानुलेपनैः धूपदीपोपहारैश्चविप्रभोजनपूर्वकं पीडाशांतिर्भवेत्तस्य स्वयमाहवृहस्पतिः अथगुरुशांतिःस्कांदे पिप्पलादोवाच गुरुपूजांप्रवक्ष्यामियथोक्तांब्रह्मणापुरा लोकानामुपकारायसर्वोपद्रवशांतये कन्याविवाहकालेतुशुद्धिर्यस्यानविद्यते ब्राह्मणस्योपनयनेयस्यस्याद्दुःस्थितोगुरुःएभिः पूजागुरोः कार्य्याविधिवद्भक्तिभावितैःमदंतीकामपुष्पाणिपत्रंपालाशसर्षपाः मदंतीयूथिकाकामोदमनंचविशेषतः गुडूचीवस्त्यपामार्गीविडंगंशंखिनीवचा सहदेवीविष्णुक्रांतासर्वौषध्यःशतावरी कुंभस्योपरिभागेतुस्थापयित्वावृहस्पतिं सौवर्णपात्रेसौवर्णींप्रतिमांतांयुधिष्ठिर कारयेत्तुयथाशक्त्यावित्तशाठ्यविवर्जितः पीतवस्त्रयुगाच्छन्नांपीतयज्ञोपवीतिनीं पूजयेद्गंध पुष्पाद्यैस्ततोहोमंसमाचरेत् समिधोश्वत्थवृक्षस्यहोतव्याष्टोत्तरंशतं तिल

व्रीहियवैर्वीमश्रहोतव्यंतुयथाक्रमं वृहस्पतेइतिमंत्रेणऋषिछंदसमन्वितं मंत्रेणानेनजुहुयाद्धान्यपूर्वंचयत्नतः ततो होमावसानेतुपूजयित्वावृहस्पतिं पीतगंधैस्तथापुष्पैर्धूपदीपैश्चभक्तितः दध्योदनंचनैवेद्यफलतांबूलसंयुतं मंत्रेणानेनकौंतेयसमभ्यर्च्ययुधिष्ठिर नमस्तेंगिरसांनाथवाक्पतेथवृहस्पते क्रूरग्रहैःपीडितानाममृतायनमोनमः पूजयित्वासुराचार्य्यंपश्चादर्घ्यंनिवेदयेत् गंभीरदृढरूपांगदेवेज्यसुमनाःप्रभो नमस्तेवाक्पतेशांतगृहाणार्घ्यं वृहस्पते इत्यर्घ्यमंत्रः अर्घ्यंदत्त्वासुरेशस्यजपंहोमंसमापयेत् भक्त्यायत्तेसुराचार्य्यहोमपूजादियत्कृतं तत्त्वं गृहाणशांत्यर्थंवृहस्पतेनमोनमः मंत्रेणानेनसंकल्प्यपश्चात्त्वंप्रार्थयेन्नृप जीवोवृहस्पतिःसूरिराचार्य्योगुरुरंगिराः वाचस्पतिर्देवमंत्रीशुभंकुर्य्यात्सदामम इतिप्रार्थना एवंसंप्रार्थयेद्देवमाचार्य्यंचप्रपूजयेत् सर्वोपस्करसंयुक्तां प्रतिमांतांयुधिष्ठिर प्रणम्यचगवायुक्तामाचार्य्यायनिवेदयेत् अथाचार्य्यस्तुनियतोवेदवेदांगपारगः यजमानंसपत्नीकंशांतचित्तंजितेंद्रियं कुंभोदकंगृहीत्वातुमंत्रैरेतैःप्रासिंचयेत् इदमापोथमंत्रेणसामग्रीतिऋचंतथा याओषधीरश्वावतीःकूष्मांडैश्चाभिषेचयेत् पश्चात्संभोजयेद्विप्रान्यथाशक्त्यायुधिष्ठिर एवंकृत्वागुरोःपूजांसर्वान्कामानवाप्नुयात् संक्रांतावपिकौंतेयतथास्याभ्युदयेनवा कुर्वन्वृहस्पतेःपूजामभीष्टंफलमाप्नुयात् संक्रांतागुरोः राश्यंतरसंक्रमे इतिभविष्योत्तरोक्तंगुरुपूजाव्रतम् अथस्कंदपुराणे गुरुस्तोत्रम् वृहस्पतिःसुराचार्य्योदयावान्शुभलक्षणःलोकप्रियोगुरुःश्रीमान्सर्वज्ञःसर्वदोविभुः सर्वेशःसर्वदातुष्टःसर्वगःसर्वपूजितःअक्रोधनोमुनिः श्रेष्ठोनीतिकर्त्ताजगत्प्रियःविश्वात्माविश्वकर्त्ताचविश्वयोनिरयोनिजः भूर्भुवःस्वःपिताचैवभर्त्ताजीवोमहाबलः पंचविंशतिनामानिपुण्यानिशुभदानिच प्रातरुत्थाययोनित्यंकीर्त्तयेत्सुसमाहितः वियद्गतोपिभगवान्प्रीतस्तस्यवृहस्पतिः नंदगोपगृहेयच्चविष्णुनापरिकीर्त्तितं पठेत्तुयोगुरुस्तोत्रंचिरंजीवीनसंशयः गोसहस्रफलंपुण्यंविष्णुर्वच

नमब्रवीत् वृहस्पतिःसुराचार्य्यःसुरासुरसुपूजितः अभीष्टफलदाःश्रीमान्शुभग्रहनमोस्तुते इतिस्कंदपुराणोक्तंगुरुस्तोत्रम् अथशुक्रवारव्रतम् अतःपरंप्रवक्ष्यामिरहस्यंह्येतदुत्तमं येनलक्ष्मीर्धृतिस्तुष्टिःपुष्टिःकांतिश्चजायते शुक्रंज्येष्ठासुसंप्राप्यपूजयेन्नक्तभोजनैः पूर्वोक्तक्रमयोगेनद्विजानांतर्पणेनतु सप्तमेत्वथसंप्राप्तेसौवर्णंकारयेत्सितं रौप्येवाकांस्यपात्रेवास्थापयित्वाभृगोःसुतं संपूज्यपरयाभक्त्याश्वेतवस्त्रानुलेपनैः अग्रेतस्यप्रदातव्यं पायसंघृतसंयुतं दद्यादनेनमंत्रेणब्राह्मणायविचक्षणः भार्गवोभृगुशिष्यस्त्वंश्रुस्मृतिविशारदः हृत्वाग्रहकृतान्दोषानायुरारोग्यदोभव इतिभविष्योत्तरोक्तंशुक्रवारव्रतं अथशुक्रस्तोत्रम् नमःशुक्रायदैत्यानामाचार्य्यायनमोनमः काव्यायोशनसेतुभ्यंभार्गवायनमोनमः वृषपर्वार्चितायाथदैत्यानुग्रहकारिणे कवयेदैत्यदनुजासुरवंदितमूर्त्तये देवयानीकृतेदासीकृतासुरसुतायच दानवाधिपगोप्त्रेचतृणीकृतसुरायच मायाधिपतयेतुभ्यंनीतिशास्त्रप्रयोगिने भृगुगोत्रवरिष्टायगीर्वाणैर्वंदितायच श्वेतवस्त्रायश्वेतायश्वेतपुष्पप्रियायच शशांकतुल्यमहसेभृगूणांपतयेनमः इत्येवंशुक्रनामानिशुक्रवारेतुयःपठेत् ससर्वशास्त्रनिपुणःशुक्रस्यस्यात्प्रसादतः इतिशुक्रस्तोत्रम् अथशुक्रशांतिः वृद्धवासिष्ठोक्ता शुक्रेचास्तंगतेयात्रागुरावस्तमुपागते तयोवाल्येवार्धकेच सायात्राभयरोगदा प्रतिशुक्रंप्रतिवुधंप्रतिभौमंचगार्हिता तीर्थयात्राविधौतेषांप्रतिशुक्रोनविद्यते काश्यपेषुवसिष्ठेषुभृगुष्वांगिरसेषुच भरद्वाजेषुवत्सेषुप्रातिशुक्रोनाविद्यते अन्येषांसन्मुखेदोषःप्रातिशुक्रस्यसर्वदा कृत्वाशांतिप्रयत्नेनपश्चात्सर्वंसमाचरेत् उपोष्यगुरुवारेचयावच्छुक्रोदयंव्रतं रजतेनचशुद्धेनकारयेत्प्रतिमांभृगोः उपचारान्निवेद्याथशुक्रंअन्यदित्यृचा तन्मंत्रेणजपंकुर्य्यात्सम्यगष्टोत्तरंशतं क्षीरगंगाक्षतैःपुष्पैर्भक्त्याचार्घ्यं निवेदयेत् दैत्यमंत्रीदिवादर्शीचोशनाभार्गवःकविः श्वेतोथमंडलीकाव्योविधिज्ञोभगवन्नमः दत्त्वेत्यर्घ्यंप्रयत्नेन

प्रार्थयेच्चैवभक्तितः त्वत्पूजयानयाशुक्रसन्मुखत्वसमुद्भवं दोषंविनाशयक्षिप्रंरक्षमांतेजसांनिधे दैवज्ञायततोदद्यात्प्रतिमांश्वेतगोयुतां एवंकृतेनदोषःस्यात्प्रतिशुक्रसमुद्भवः मात्स्येपिविशेषउक्तः अथातःशृणुभूपालप्रतिशुक्रप्रशांतये यात्रारंभेवसानेचतथाशुक्रोदयेसति शुक्रपूजाप्रकर्त्तव्यातांनिशामयभारत राजतेवाथसौवर्णेकांस्यपात्रेथवापुनः शुक्लपुष्पांबरयुतेश्वेततंडुलपूरिते निधायराजतंशुक्रंशुचिमुक्ताफलान्वितं महाश्वेतगवायुक्तंसामगायनिवेदयेत् सहतेनसवत्सांगांदत्त्वाविप्रायप्रार्थयेत् नमस्तेसर्वलोकेशनमस्तेभृगुनंदन कवेसर्वार्थसिद्ध्यर्थंगृहाणार्घ्यंनमोस्तुते दत्त्वैवार्घ्यंतुकौंतेयप्रणिपत्यविसर्जयेत् यावच्छुक्रस्यनकृतापूजासौहालिकैःशुभैः पोलिकाभिश्चगोधूमैस्तंडुलैश्चणकैरपि तावत्फलंकथंलभ्यंस्त्रीभिःकामार्थसिद्धये एवंशुक्रोदयेकुर्वन्यात्रादिषुचभारत अथवामौक्तिकान्येवसुवृत्तानिमहांतिच भार्गवांगिरसौचिंत्यतान्येवप्रतिपादयेत् भक्त्यामौक्तिकदानेनयेज्ञनकुरुनंदन कुरूपंतादृशंपुंसांनकदाचित्प्रजायते येभार्गवोदयमवाप्यसवस्त्रपुष्पंकुर्वंत्यनन्यमनसोंगिरसश्चपूजां तेषांनृणांप्रवसतांप्रतिशुक्रजातं विघ्नंनसंभवतिभारतपुण्यभाजां इति शुक्रशांतिविधानम् अथशुक्रवारेवरलक्ष्मीव्रतम् तच्चकर्कटराशिस्थसूर्येश्रावणस्यांतिमशुक्रवारेकार्य्यमितिकथायामुक्तंतत्रपूजाविधिः ॐमद्येतितिथ्यादिसंकीर्त्यात्मनोमृषावादादिजनितकुष्ठादिरोगनिवृत्तिपूर्वकधनसंपत्पुत्रादिलाभार्थंश्रावणांतिम शुक्रवासरेवरलक्ष्मीप्रीत्यर्थं पूजनंकरिष्ये इति संकल्प्य पूजार्थंगृहंतोरणरंगमालादिभिरलंकृत्य तत्रगृहस्यपूर्वभागेऐशान्यांवाभूमौप्रस्थमितान्तंडलान्निक्षिप्य तदुपरिकलशंसुवर्णपंचरत्नफलवस्त्रादियुतंसंस्थाप्य तत्रचतुर्भुजांहैमींप्रतिमांसंस्थाप्यपूजांकुर्य्यात् क्षीरसागरसंभूताक्षीरवर्णसमप्रभा क्षीरार्णवसमंवस्त्रंदधानाहरिवल्लभा ब्राह्मीहंससमारूढासुकमंडलुधारिणी विष्णुते-

जोधिकेदेविसमागच्छवरप्रदे इत्यावाहनम् १ मासेश्वरिमहादेविआसनंतेददाम्यहं महैश्वर्यसमायुक्ते ब्रह्माणिब्रह्मणः प्रिये इत्यासनम् २ तीर्थोदकैर्महादिव्यैः पापसंहारकारकैः अर्घ्यंगृहाणदेवेशिदेवानामुपकारिणि इत्यर्घ्यम् ३ कुमारशक्तिसंपन्नाकौमारीशिखिवाहनापाद्यंददाम्यहंदेविवरदेवरलक्षणे इतिपाद्यम् ४ वैष्णवीविष्णुसंयुक्ताअसंख्यायुधधारिणि आचम्यतांदेवपूज्येवरदेसुरमार्दिनि इत्याचमनम् ५ स्नानंपंचामृतैः शुद्धैः स्नापयिष्येहरिप्रियेवरदेशक्तिसंभूते वरंदेहिहरिप्रिये इतिपंचामृतस्नानम् ६ गंगाजलंसमानीतंसुगंधिद्रव्यसंयुतं स्नानार्थंतेमयादत्तगृहाणपरमेश्वरि इतिस्नानम् ७ रजताद्रिसमं दिव्यंक्षीरसागरसन्निभं चंद्रप्रभासमंदिव्यंवसनंतेददाम्यहं इतिवस्त्रं ८ मांगल्यमणिसंयुक्तंमुक्ताफलसमन्वितं दत्तंमंगलसूत्रंतेगृहाणसुरवल्लभे इतिमंगलसूत्रं ९ यज्ञोपवीतमिति यज्ञोपवीतंसौवर्णंदद्यात् सुवर्णभूषणं दिव्यंनानारत्नसुशोभितं त्रैलोक्यभूषणेदेविगृहाणाभरणंशुभं इत्याभरणम् १० रक्तगंधसुगंधाढ्यमष्टगंधसमन्वितंदास्यामिदेविवरदेलक्ष्मिदेविप्रसीदमे गंधं ११ महाव्रीहिसमुद्भूतानक्षतानपिषोडश मुक्ताविशेषजमुखान् गृहाणपरमेश्वरि इत्यक्षताः १२ नानाविधानिपुष्पाणिनानावर्णयुतानिच पुष्पाणितेप्रयच्छामिभक्त्यादेविवरप्रदे इतिपुष्पम् १३ अथांगपूजा वरलक्ष्म्यैनमः पादौपूजयामि कमलवासिन्यैनमः गुल्फौपू- पद्मालयायैजंघेपू. श्रियैनमः जानुनीपू. इंदिरायैनमः ऊरूपू. हरिप्रियायैनमः नाभिंपूज. लोकमात्रे नमः स्तनौपू. शंखनिधयेनमः हस्तौपू. विधात्र्यैनमः कंठंपू. धात्र्यैनमः नासांपू. पद्मनिधयेनमः नेत्रेपू. भार्गव्यैनमः कर्णौपू. क्षिरसागरजायैनमः ललाटंपू. श्रीवरलक्ष्म्यैनमः शिरःपू. श्रीमहालक्ष्म्यैनमः सर्वांगंपू. धूपंदास्याम्यहंदेविगोघृतेनसमन्वितं प्रयच्छामिमहादेविभक्तानांवरदे

शुभेइतिधूपं १४ आज्यंसद्वार्त्तिसंयुक्तंवह्निनाप्रतियोजितं दीपंगृहाणवरदेत्रैलोक्यतिमिरापहे इतिदीपं १५
नैवेद्यंपरमान्नंतेदृष्टिप्रीतिकरंशुभं भक्ष्यभाज्यादिसंयुक्तसर्वतृप्तिकरंपरं इतिनैवेद्यम् १६ कर्पूरनागवल्लीच
क्रमुकंचूर्णसंयुतं वरलक्ष्मिगृहाणत्वंतांबूलंतेददाम्यहम् इतितांबूलं १७ सुवर्णंसर्वधातूनांश्रेष्ठंदेविप्रकीर्त्ति
तं भक्त्याददामिवरदेस्वर्णवृष्टिंप्रदेहिमे इतिसुवर्णदक्षिणा १८ नीराजनंसमांगल्यंकर्पूरेणसमान्वितं चं
द्रार्कवह्निसदृशंप्रभेदेविनमोस्तुते इतिनीराजनम् १९ सर्वमंगलमांगल्येसर्वपापप्रणाशिनि डोरकंतेप्रय
च्छामिसुप्रीताहरिवल्लभे इतिडोरकार्पणं २० करिष्यामिव्रतंदेवित्वद्भक्त्यात्वत्परायणः श्रियंदेहियशोदे
हिसौभाग्यंदेहिमेशिवे इतिडोरकबंधनम् २१ क्षीरार्णवसुतालक्ष्मीचंद्रस्यैवसहोदरि गृहाणार्घ्यंमहालक्ष्मी
देहितुभ्यंनमोस्तुते इतिपुनरर्घ्यं २२ श्रीवृक्षस्यदलंदेविमहादेवप्रियंसदा बिल्वपत्रंप्रयच्छामिपवित्रंतेसु
निर्मलं इतिबिल्वपत्रं २३ इहजन्मनियत्पापंसप्तजन्मांतरेषुच निवारयमहादेविलक्ष्मीनारायणप्रिये
इतिप्रदक्षिणा २४ दामोदरिनमस्तुभ्यंनमस्त्रैलोक्यनायके हरिकांतेनमस्तुभ्यंत्राहिमांपरमेश्वरि इतिनमस्का
रः २५ क्षीरार्णवसमुद्भूतेकमलेकमलालये प्रयच्छसर्वकामांश्चविष्णुवक्षस्थलालये इतिव्रतसमर्पणं २६
छत्रचामरमांदोलव्यजनंदर्पणंतथा गीतवादित्रनृत्यैश्चविष्णुवक्षस्थलालये इतिछत्रादिसमर्पणं २७ शु
क्रवारेसमभ्यर्च्यक्षमप्यचमहेश्वरि वरलक्ष्मिमहादेविसर्वकार्य्यप्रदायिनि इतिक्षमापनं २८ प्रयच्छपुत्र
कामांश्चविष्णुवक्षस्थलेनघे पुत्रान्देहियशोदेहिसौख्यसौभाग्यमेवच त्रैलोक्यजननित्राहिवरदेभक्तवत्सले
इतिप्रार्थना एकविंशतिपक्वान्नघृतशर्करयायुतं इंदिरेप्रीयतांदेवि अतः शांतिंप्रयच्छमे इतिवायनं ३०
इंदिराप्रतिगृह्णातिइंदिरावैददातिच इंदिरातारकोभाभ्यामिंदिरायैनमोनमः इतिवायनग्रहणमंत्रः ३१ इ

तिवरलक्ष्मीपूजाविधिः अथकथा सूतउवाच कैलासशिखरेरम्येसर्वदेवनमस्कृतेगौर्य्यासहमहादेवोदिव्यैर
क्षैर्विनोदितः जितोसित्वंजितेत्याहपार्वतीपरमेश्वरं सोपित्वंचजितेत्याहसुविवादस्तयोरभूत् चित्रनेमिस्त
दादृष्टोमृषावादमभाषत तदाकोपसमाविष्टागौरीशापंददौतदा कुष्टीभवमृषावादिन्चित्रसेनहतप्रिय नान्त
तेनसमंपापंकापिदृष्टंश्रुतावपि चित्रनेमिर्विशेषज्ञः सत्यंवदतिनोमृषा प्रसादः क्रियतांदेवि देवीमाहवृषध्वजः
प्रसादसुमुखीतस्मैविशापंचजगादसा यदासरोवरेरम्येकरिष्येतितपः शुचिःततःस्वर्गणिकाः सर्वाः वक्ष्यंति
त्वासमाहिताःतदाभवान्विशापःस्यादित्युक्तः सपपातह ततोदिनैश्चकतिभिश्चित्रनेमिः सरोवरे कुष्टीभूत्वावसं
स्तत्रददर्शस्वर्विलासिनीः देवतापूजनेयुक्ताः पप्रच्छप्रणिपत्यताः किमेतद्भोमहाभागाः किंपूजायांतुवां
छितं किंचास्माभिरनुष्ठेयमिहामुत्रसुखाप्तये इतिव्रतांचित्रनेमिश्चक्रेप्येवंसुलोचनाः येनास्माद्गिरिजाशापा
न्मोक्ष्यसेचिरदुःखितः ताऊचुः क्रियमाणंते व्रतमेतदनुत्तमं वरलक्ष्मीव्रतंदिव्यंसर्वकामसमृद्धिदं यदार
वौकुलीरस्थेमासेचश्रावणोत्तमे गंगायमुनयोर्योगस्तुंगभद्रासमस्तदा तस्मिन्नेवश्रावणेमासिशुक्लांतेतुभृगोर्दि
ने प्रारब्धव्यंव्रतंतत्रमहालक्ष्म्यायतात्मभिः सुवर्णप्रतिमांकुर्य्याच्चतुर्भुजसमन्वितां पूर्वंगृहमलंकृत्यतोर-
णैरंगवाल्लिभिः गृहस्यपूर्वदिग्भागेऐशान्यांचाविशेषतः तंडुलान्प्रस्थसंख्याकान्भूमौनिक्षिप्यपूजयेत् संस्था-
प्यकलशंतत्रतीर्थतोयैःप्रपूरयेत् फलानिपरिनिःक्षिप्यसुवर्णंतत्रनिःक्षिपेत् पल्लवांश्चापिनिःक्षिप्यवस्त्रेणा-
च्छाद्ययत्नतः प्रतिमांस्थापयेत्तत्रपूजयेच्चयथाविधि अग्न्युत्तारणपूर्वंतुशुद्धस्नानंयथाक्रमं पंचामृतेनस्नपनंका-
रयेन्मंत्रपूर्वकं शुद्धस्नानंपुनःकृत्वादेवीसूक्तेनवैततः अष्टगंधैःसमभ्यर्च्यपल्लवैश्चसमर्चयेत् अश्वत्थवटबि-
ल्वादिचूतदाडिममालतीएतेषांपत्रमादायएकविंशतिसंख्यया नानाविधानिपुष्पाणिमालत्यादीनिवैततः धूप-

दीपैर्महालक्ष्मींपूजयेत्सर्वकामदां पायसंसर्वमन्नंचसर्वभक्ष्यैश्चसंयुतं एकविंशतिसंख्याकैरपूपैःपूजयेच्छ्रियं देव्यैसर्वंसमर्प्याथवरंसंवृणुयात्ततः एवंसंपूजयित्वातांतांवूलाद्यैश्चषोडश उपचारैर्वहुविधैर्नानासम्माननैस्तथा नृत्यगीतादिसहितंदेवींसंप्रार्थयेच्छ्रियं उमासरस्वतीमाताशचीचप्रियवादिनी एताभिश्चकृतंसम्यग्व्रतंसर्वसमृद्धिदं पूजावसानपर्यंतंचित्रनेमिरभूत्ततः होमधूपंसमाघ्रायघृतदीपप्रभावतः गतकुष्ठस्स्वर्णतेजाःशुचिस्तद्गतमानसः तस्मिन्नेवव्रतेसम्यङ्मनःसंधायसर्वदा पंचवायनकंदत्त्वाकथांशृण्वीतवाग्यतः तथामौनंगृहीत्वातुआरातिंपरिकल्पयेत् व्रतंप्रकुर्वतांहस्तादेकंपूगफलंतथा पर्णैकंचूर्णसहितंवर्द्धनीयंप्रयत्नतः आरक्तमासिसंजातेकुर्य्याद्व्रतमनुत्तमं नोचेनक्तव्रतंकार्य्यंसर्वदाशुभमिच्छता अनेनैवक्रमेणैवसंगृह्णीयात्प्रयत्नतः अहंत्वस्यांकरिष्यामिव्रतंसर्वसमृद्धिदं इत्युक्त्वासर्वदेव्यस्ताःकारयामासुतत्क्षणात् सुवर्णनिर्मितांदेवींवस्त्रालंकारसंयुतां पूर्वोक्तेनविधानेनपूजांकृत्वाप्रयत्नतः पंचवायनकंदत्त्वाकृत्वा तेभ्योयथाक्रमं विप्रायवटवेचैवदेव्यैचव्रतचारिणे सुवासिन्यैततस्त्वेकमार्पितंचित्रनेमिना एवंसम्यक्क्रमेणैतान्दत्त्वावायनपंचकं ततोगृहंगतंतेनदेवींनत्वायथाक्रमं ततोह्यनुज्ञांसंप्राप्यभक्षयित्वाततोव्रती नागवल्लीदलंत्वेकंक्रमुकंचूर्णवर्जितं भक्षयित्वातुचैकांतेप्रभातेतंनिरीक्ष्यच आरक्तेचततोजातेव्रतस्यास्यप्रभावतः अद्याहंगतपापोस्मिदेवीदर्शनमागतः एवंसम्यग्व्रतंचीर्णंकृतयन्मेयथाश्रुतं चित्रनेमिर्व्रतंकृत्वाकैलासंशंकरालयं गत्वाप्रणम्यदेवेशंदेवींसादरपूर्वकम् पार्वतीचतदाप्राहचित्रनेमेस्वपुत्रवत् पालनीयोमयात्वंहिसत्यमित्यवधार्य्यतां चित्रनेमिस्तदाप्राहपार्वतींहरवल्लभां तवपादांबुजंदृष्टंवरलक्ष्मीप्रसादतः महादेवस्ततःप्राहचित्रनेमिंशुचिव्रतं अद्यप्रभृतिकैलासे भुंक्ष्वभोगान्यथेप्सितान् पश्चाद्गंतासिवैकुंठंव्रतस्यास्यप्रभावतः पार्वत्यायत्कृतंपूर्वंपुत्रलाभार्थयातया दृष्टश्च

130

यएमुखस्तत्रततश्चसुमहाव्रतम् नंदिश्चविक्रमादित्ये राज्यंप्राप्तंतदाज्ञया नंदिश्चकांतयाहीनःकांतालब्धाप्रसादतः तद्याचैतद्व्रतं कृत्स्नं कृतंवैपुत्रहेतुतः पुत्रंचसुषुवेसापित्रैलोक्यभरणक्षमं इहमानुषलोकेहिव्रतंचीर्णंसुविस्तरं तदाप्रभृतियेनेदंवरलक्ष्मीव्रतंशुभं व्रतंपुण्यंनरोवापिकुर्य्याच्चैवतथांगना भक्त्याकरोतिविपुलान्भोगान्प्राप्यश्रियंव्रजेत् व्रतानामुत्तमंपुण्यंवरलक्ष्मीव्रतंशुभं तत्कृत्वाचनरोनारीतौवरौनात्रसंशयः यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः धनधान्यमवाप्नोतिवरलक्ष्मीप्रसादतः इतिभाविष्योत्तरेवरलक्ष्मीव्रतम् इतिशुक्रवारव्रतानि अथशनिवारव्रतानिभाविष्योत्तरे ॥ श्रीकृष्णउवाच ॥ अथातःसंप्रवक्ष्यामिरहस्यंह्येतदुत्तमं येनलक्ष्मीर्धृतिस्तुष्टिःपुष्टिःकांतिश्चजायते मूलेनसूर्यतनयंगृहीत्वाभरतर्षभ तस्मिन्दिने पूजनीयंग्रहात्रितयमादरात् शनैश्चरश्चराहुश्चकेतुश्चकेतुमान्नृप होमंघृतात्तिलैःकुर्य्यात्ग्रहनाम्नातुमंत्रवित् प्रथमाष्टोत्तरशतमष्टाविंशतिरेववा होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच यथाक्रमंशमीदूर्वाकुशानांसमिधः स्मृताः सप्तमेचैवसंप्राप्तेनक्तेसूर्यसुतस्यच ग्रहास्त्रयोपिकर्त्तव्याराजन्लोहमयाःशुभाः लोहपात्रेस्थिताःसर्वेसौवर्णेवाकुरूद्वह व्रतांतेइतिशेषः कृष्णवस्त्रयुगच्छन्नान्दद्यादेकैकशःक्रमात् तत्रशनिरूपंतु कृष्णवासास्तथाकृष्णः शनिःकार्य्यःशिराततः दंडाक्षमालासंयुक्तःकरद्वितयभूषितः कार्ष्णायसरथेकार्य्यस्तथैवाष्टतुरंगमे राहुकेत्वोःस्वरूपंतुमत्स्यपुराणे करालवदनःखड्गचर्मशूलवरप्रदः नीलासिंहासनयुतोराहुरत्रप्रशस्यते धूम्राद्विवाहवःसर्वेगदिनोविकृताननाः गृध्रासनगतानित्यंकेतवःस्युर्वरप्रदाः इति मृगनाभ्यासमानाभ्योधूपंकृष्णागुरुंतथा दत्त्वाकासारनैवेद्यंब्राह्मणायोपपादयेत् शनैश्चरनमस्तुभ्यंनमस्तेराहवेतथा केतवेथनमस्तुभ्यंसर्वशांतिप्रदोभव एवंकृतेभवेद्यत्तुतान्निबोधद्विजोत्तम यदिभौमोरवि-

सुतोभास्करोराहुणासह केतुश्चमूर्द्धनितिष्ठतिसर्वैपीडाकराग्रहाः अनेनकृतमात्रेणसर्वैशाम्यंत्युपग्रहाः यएवंकुरुतेराजासदाभक्तिसमन्वितःतस्यसानुग्रहाःदेवाशांतिंयच्छंतिभूपतेः सूर्यःशशीकुजबुधौगुरुशुक्रसौरीन् हस्तादिऋक्षसहितानुदितक्रमेण संपूज्यहेमघटितान्द्विजपुंगवायदत्वापुमान्ग्रहगणेननपीड्यतेत्र शशीति द्वितीयार्थेप्रथमा शनैश्चरंराहुकेतूलोहपात्रेऽ्यवस्थितान् कृष्णागुरुःस्मृतोधूपोदक्षिणात्वात्मशक्तितःइतिभविष्योत्तरोक्तंशनिव्रतम् श्रीकृष्णउवाच कदाचिदाश्रमपदंपिप्पलादस्यनारदः जगामकामचारेणपर्य्यटन्नवनीतलं तथातिथेयंश्रेयोर्थीपिप्पलादोथनारदं विहितायांसपर्य्यायांयोगज्ञंतमथाब्रवीत् मुनेवनेचिरंकालमालंऽ्यास्थितवानहं अथास्यवृक्षमक्षीणछायंस्थानमनुत्तमं क्वगतौमांबिहायैहमदीयौपितरौमुने तमाहनारदः पूर्वं सर्वलोकानलः शनिः पीडयामासवसुधांसर्वैषामसुधारिणां रोगांश्चकारदेहेषुगृहेषुचधनक्षयं तदापुराण्यरण्यानिपरिश्रम्यफलादिकं आदायकायपोषायसायमायातितेपिता क्लीवभावंपुरस्कृत्यशनैश्चरसमीक्षितः त्वांविहायसचापत्सुगतईचतस्ततःक्वचित् एवमुक्तःशिशुःक्रोधाज्ज्वलन्निवहुताशनः आलोक्यगगनाद्भूमौपातयामासवैशनिं पतमानोगिरेःशृंगीलग्नःखंजोबभूवह धरण्यांपतितंदृष्ट्वाभास्करात्मजमातुरं ननर्त्ताभुजमुत्क्षिप्यनारदोहृष्टमानसः हृष्टो देवांस्तथाहूयदर्शयामासतंशनिं अथदेवास्तदाप्राप्ताब्रह्मरुद्रेंद्रपावकाःतत्कृतेसात्वयामासुःक्रोधमुग्धंमुनिंचते स्वस्तितेस्तुमहाभागापिप्पलादमहामुने अतस्त्वंपिप्पलादेतिलोकेख्यातिंगमिष्यसि अतस्त्वांपूजयिष्यंति स्नात्वापुष्पाक्षतादिभिः गृहाश्रमपदेरम्येयक्षिपेयुर्भुविभाविताः सप्तजन्मानुगंसौख्यंपुत्रपौत्रानुगामिनी तेषांलक्ष्मीर्नदूरस्थाभविष्यतिकदाचन स्मरिष्यंतिचयेपित्वांपिप्पलादेतिनामतः तेषांशनैश्चरकृतानपीडापिभविष्यति क्षमस्वास्यमहाभागनिर्दोषोयंग्रहाग्रणीः वरवृक्षनमस्कारैःशांतोभवतिपूजितः अतोर्थमस्य

दिवसेस्नानमभ्यंगपूर्वकं कार्य्यंदेयंतुविप्रायतैलमभ्यंगहेतवे यस्तुसंवत्सरंयावत्प्राप्तेशनिदिनेनरः तैलं ददातिविप्राणांस्वशक्त्यान्यजनस्यतु ततःसंवत्सरस्यांतेप्राप्तेतस्यादिनेनरः तैलंददातिविप्राणांस्वशक्त्यान्यजनस्यतु ततःसंवत्सरस्यांतेप्राप्तेतस्यादिनेपुनः लोहेनघटितंशौरिं तैलकुंभेविनिःक्षिपेत् लोहेवा मृण्मयेवाथकृष्णवस्त्रयुगच्छदं कृष्णगोदक्षिणायुक्तं कृष्णकंबलशायिनं तिलतैलेनचस्नानंकृष्णपुष्पैस्तिलोदनैः पूजयित्वासूर्यपुत्रंब्राह्मणायनिवेदयेत् कृष्णाय द्विजमुख्यायेतरस्मैतदभावतः मंत्रेणानेनब्रह्मर्षेशन्नोदेवीतिभक्तितः इतरेषांतुवर्णानांशृणुमंत्रंद्विजोत्तम क्रूरावलोकनवशाद्भुवनंनाशयातियोग्रहोदुष्टः तुष्टोधनकनकसुखंददातिनःशनैश्चरःपातु यःपुराभ्रष्टराज्यायनलायप्रददौकिल स्वप्नेतस्यनिजंराज्यंसमेशौरिःप्रसीदतु केशनीलांजनप्रख्यंमंदचेष्टाप्रसारिणं छायामार्त्तंडसंभूतंतंनमामिशनैश्चरं नमोर्कपुत्रायशनैश्चरायनीहारवर्णांजनमेचकाय श्रुत्वारहस्यंभवकामदश्चफलप्रदोमेभवसूर्यपुत्र नमोस्तुप्रेतराजायकृष्णदेहायवैनमःशनैश्चरायवैतद्वच्छुद्धबुद्धिप्रदायिनेयएवंनामभिःस्तौतितस्यतुष्टोददात्यसौ तदीयंतुभयंतस्यस्वप्नेपिनभविष्यति एवमुक्त्वासुराःसर्वेप्रतिजग्मुर्यथागतं शनैश्चरोवेधसापिग्रहत्वेनप्रतिष्ठितःपिप्पलादोपिब्रह्मर्षिर्ब्रह्माज्ञांपरिपालयन् शनैश्चरंतुसंपूज्यतुष्टावरचितांजलिःकौणस्थःपिंगलोबभ्रुःकृष्णोरौद्रांतकोयमः शौरिःशनैश्चरोमंदःप्रीयतांमेग्रहोत्तमः शनैश्चरमितिश्रुत्वापिप्पलादोमहामुनिःज्वलन्खेवैविमानस्थोदृश्यतेद्यापिमानवैःइदंशनैश्चराख्यानंयेश्रोष्यंतिसमाहिताः तेषांकुरुवरश्रेष्ठशनिपीडानजायते कृष्णायसेनघटितांग्रहराजमूर्त्तिंलोहेनिधायकलशेतिलतैलपूर्णेयोब्राह्मणायरविजंप्रददातिभक्त्यापीडाशनैश्चरकृतानहिबाधतेतं इतिभविष्योत्तरेशनिव्रतं अथान्यदपि शनिव्रतविधानम् मदनरत्नेस्कंदपुराणे श्रावणेमासिसंप्राप्तेशोभनेशनिवासरे लोहरूपंशनिंकृत्वास्नापयपंचामृतेनवै

गुरुकुल कांगड़ी

पुष्पैरष्टविधैर्धूपैःफलैश्चैवविशेषतः नामभिःपूजयेदेतैःक्रमेणग्रहसत्तमं कोणस्थःपिंगलोबभ्रुःकृष्णोरौद्रोंतको यमः सौरिःशनैश्चरोमंदःपिप्पलादेनसंस्तुतः शन्नोदेवीतिमंत्रेणवैदिकेनचपूजयेत् पूजयित्वाचनैवेद्यंततःकुर्यात्क्रमेणतुसमाषभक्तंप्रथमेद्वितीयेपायसंशुभं तृतीयेत्वंबलीकार्याचतुर्थेपूरिकाशुभा प्रथमादिशब्दैःशनिवासराः शुक्लादिकृष्णांतश्रावणमासगताउच्यंते तप्ततंडुलपिष्टकृतायवागूरंबलीतिप्रोक्ता अथदशरथकृतशनिस्तोत्रंस्कंदपुराणे श्रीपार्वत्युवाच द्वादशाष्टमजन्मस्थेशनौसर्वग्रहेश्वरे किंकर्त्तव्यंनरैःस्वामिन्विधानंक्लेशशांतये शंकरउवाच रघुवंशेतिविख्यातोराजादशरथःपुरा चक्रवर्त्तीसविज्ञेयःसप्तद्वीपाधिपःस्मृतः कृत्तिकांतेशनिंज्ञात्वादैवज्ञैर्ज्ञापितोहिसः रोहिणींभेदयित्वातु शनिर्यास्यतिसांप्रतं शाकटोनामभेदोयं सुरासुरभयंकरः द्वादशाब्दंतुदुर्भिक्षंभविष्यतिसुदारुणं एतच्छ्रुत्वाततोवाक्यं मंत्रिभिः सहपार्थिवः चिंतयामासकिमिदंभयंकरमुपस्थितं देशाः सनगरग्रामा भयभीताः समंततः पृथ्व्याः सर्वतोलोकाः क्षयस्तेषांसमागतः आकुलंतुजगत्सर्वंपौरजानपदादिकं पप्रच्छप्रयतोराजावसिष्ठप्रमुखान्द्विजान् दशरथउवाच समाधानंकिमत्रास्तिब्रूतमेऋषिसत्तमाः वसिष्ठउवाच प्रजारक्ष्याः प्रयत्नेन तस्मिन्भिन्नेकुतः प्रजाः असाध्यः खलुयोगोयं ब्रह्मविष्णुशिवैरपि इतिसंचिंत्यमनसासाहसंपरमंययौ समादायधनुर्दिव्यंदिव्यायुधसमन्वितः रथमारुह्यवेगेनगतोनक्षत्रमंडलं सपादयोजनानांतुलक्षंसूर्योपरिस्थितं रोहिणीपृष्ठमासाद्यराजादशरथस्तदा रथेतुकांचनेदिव्येमणिरत्नविभूषिते हंसवर्णहयैर्युक्तेमहाकेतुसमन्विते दीप्यमानेमहारत्नैः किरीटमुकुटोज्ज्वलः व्यराजततदाकाशेद्वितीयइवभास्करः आकर्णचापमाकृष्यसंहारास्त्रंप्रयोजयत् कृत्तिकांतेशनिः स्थित्वा प्राविशत्किलरोहिणीं दृष्ट्वादशरथंचाग्रतस्थौसभ्रुकुटीमुखः संहारास्त्रंश

निर्दृष्टासुरासुरनिषूदनं हसित्वातद्भयात्सौरिरिदंबचनमब्रवीत् शनिरुवाच पौरुषंतवराजेंद्रदृष्टंचातिभयंकरं देवासुरमनुष्याश्चसिद्धविद्याधरोरगाः मयाविलोकिताः सर्वे भस्मतांचव्रजंतिते तुष्टोहंतवराजेंद्रतपसापौरुषेणच वरंब्रूहिप्रदास्यामिमनसायदभीप्सितं दशरथउवाच रोहिणींभेदयित्वातुनगंतव्यं त्वयाशने याचितंतुमयासौरेनान्यमिच्छामितेवरं एवमस्त्वितितंचोक्त्वा बरंदत्त्वाशनिः स्थितः प्राप्य चापिवरंराजाकृतकृत्योभवत्तदा द्वादशाब्दंचदुर्भिक्षंनाभवच्चकदाचन एवंवरंतुसंप्राप्तोहृष्टरोमासपार्थिवः रथोपरिधनुः स्थाप्य भूत्वाचैवकृतांजलिः ध्यात्वासरस्वतींदेवीं गणनाथंविनायकं राजादशरथः स्तोत्रंसौरेरिदमथाकरोत् दशरथउवाच नमः कृष्णायनीलायशितिकंठनिभायच नमोनीलमयूखायनीलोत्पलनिभायच नमोनिर्मांसदेहायदीर्घश्मश्रुजटायच नमोविशालनेत्रायस्थूलरोम्णेनमोनमः नमोदीर्घायशुष्कायकालदंष्ट्रनमोनमः नमस्तेकोटराक्षायदुर्निरीक्षायवैनमः नमोघोरायरौद्रायभीषणायकरालिने नमस्तेसर्वभक्ष्यायबलीमुखनमोस्तुते सूर्यपुत्रनमस्तेस्तुसर्वातकर्यनमोस्तुते नमःकालाग्निरुद्रायकृतांतायचवैनमः नमोमंदगतेतुभ्यंनिस्त्रिंशायनमोनमः तपसादग्धदेहायनित्यंयोगरतायच ज्ञानचक्षुर्नमस्तेस्तुकश्यपात्मजसूदन तुष्टोददासिवैराज्यंरुष्टोवैहरसिक्षणात् देवासुरमनुष्याश्चसिद्धविद्याधरोरगाः त्वयाविलोकिताःसर्वेदैन्यमाशुव्रजंतिते ब्रह्माशक्रोमनुश्चैवऋषयस्सप्ततारकाः भ्रष्टराज्याःपतंत्येतेतवदृष्ट्याविलोकिताः देशाश्चनगरग्रामादिशश्चैवद्रुमास्तथा त्वयाविलोकिताःसर्वेनाशंयांतिसमूलतः प्रसादंकुरुमेसौरेवरार्थेतवसंस्थितः एवंस्तुतस्तदासौरिर्ग्रहराजोमहाबलः अब्रवीच्चशनिर्वाक्यंहृष्टरोमासपार्थिवं शनिरुवाच तुष्टोहंतवराजेंद्रस्तवेनानेनमानद वरंब्रूहिप्रदास्यामिस्वेच्छयारघुनंदन दशरथउवाच प्रसन्नस्त्वंयदासौरेवरंब्रूहिममेप्सितं अद्यप्रभृतिसौरेतेपीडाकार्य्यानक

135

स्यचित् देवासुरमनुष्याणांपशुपक्षिशरीरिणां शनिरुवाच ग्रहाणांसग्रहोज्ञेयोयस्तुपीडाकरःस्मृतः अदेयोहि वरोयस्तुतुभ्यंचैवददामिते त्वयाप्रोक्तंचमेस्तोत्रंयेपठिष्यंतिमानवः एककालंद्विकालंवापीडांमुंचामितस्यैवै देवासुरमनुष्याणांसिद्धविद्याधररक्षसां मृत्युस्थानगतोवापिजन्मस्थानगतोपिवा यःपुनःश्रद्धयायुक्तःशुचिस्नातः समाहितः भक्त्योपचारैःसंपूज्यप्रतिमांलोहजांमम माद्दिनेतुविशेषेणस्तोत्रेणानेनपूजयेत् पूजयित्वाजपंस्तोत्रंभूत्वाचैवकृतांजलिः माषोदनंतिलैर्मिश्रंदद्याल्लोहंचदक्षिणां कृष्णांगांवृषभंवापिदद्याद्विप्रायधीमते तस्यपीडांनचैवाहं करिष्यामिकदाचन गोचरेजन्मलग्नेवादशास्वंतर्दशासुच रक्षामिसततंतस्य पीडामन्यग्रहैः कृताम् अनेनैवविधानेनपीडामुक्तंजगद्भवेत् वरद्वयंतुसंप्राप्यराजादशरथस्तदा स्वस्थानंचततोगत्वाप्राप्तकामोभवन्नृपः इतिस्कंदपुराणेदशरथकृतंशनिस्तोत्रम् ॥ अथान्यदपिशनिः स्तोत्रम् शौरिः शनैश्चरोमंदो यमः खजो महीरुहः छायासुतश्चरविजः पातंगिश्चांतकोनलः सुरारिर्ज्वरहंताचरक्ताक्षोदंडभृत्तथा कृतांतः सस्यघातोच क्षयःकालोनलाप्रियः इतिविंशतिनामानि त्रिसंध्यंयः पठेत्सदा शनैश्चरभयंतस्यस्वप्नेपिनभविष्यति गर्गश्चकौशिकश्चैवपिप्पलादोमहामुनिः शनैश्चरकृतान्दोषान्नाशयंतिनसंशयः इतिविंशतिशनिनामात्मकंशनिस्तोत्रम् अन्यच्च कोणांतकोरुद्रयमोथबभ्रुः कृष्णःशनिः पिंगलमंदसौरिः नित्यंस्मृतोयोहरतेच पीडां तस्मैनमः श्रीरविनंदनाय १ नरानरेंद्राः पशवोगजेंद्राः सरीसृपाः कीटपतंगभृंगाः पीडयंतिसर्वेविषमास्थितेच तस्मैनमः श्रीरविनंदनाय २ सुरासुराः किंपुरुषागजेंद्रगंधर्वविद्याधरपन्नगाश्च पीडयंतिसर्वेविषमास्थितेच तस्मैनमः श्रीरविनंदनाय ३ देशांश्चदुर्गाणिवनानियेनग्रामाश्चदेशाः पुरपत्तनानिपीडयंतिसर्वेविषमास्थितेचतस्मैनमः ४ स्त्रष्टास्वयंभूर्भुवनत्रयस्यत्राणेहरिः संहरणेमहेशः एक

स्त्रिधाऋग्यजुसाममूर्त्ते स्तस्मैनमः श्रीरविनंदनाय ५ प्रयागकूलेयमुनातटेचसरस्वतीपुण्यजलेगयायांयो
योगिभिर्ध्येयशरीरसूक्ष्म स्तस्मैनमः श्रीरविनंदनाय ६ अन्यप्रदेशात्स्वगृहंप्रविष्टायदीयवारसुखिनोनं
राः स्युः गृहागतायेनपुनः प्रयांति तस्मैनमः श्रीरविनंदनाय ७ तिलैर्यवैर्माषगुडान्नदानैर्लोहेन
नीलांबरदानतोवा प्रीणातिमंत्रैर्निजवासरेण तस्मैनमः श्रीरविनंदनाय ८ शन्यष्टकंयः पठति प्रभा
ते नित्यंसभृत्यैः पशुबांधवैश्च करोतिराज्यंभुविभूरिसौख्यंप्राप्नोतिनिर्वाणपदंतथांते ९ इतिशनिस्तो
त्रम् ॥ अन्यच्च स्कांदे ततःकृतांजलिःभूत्वास्तुतिंचक्रेसबालकः पिप्यलादोद्विजःश्रेष्ठः प्रणिप
त्यमुहुर्मुहुः नमोस्तुकोणसंस्थायपिंगलायनमोस्तुते नमस्तेवभ्रुरूपायकृष्णायचनमोनम.नमस्तेरौद्रदेहायनम
स्तेचांतकाच नमस्तेयमसंज्ञायनमस्तेसौरयेविभो नमस्तेमंदसंज्ञायशनैश्चरनमोस्तुते प्रसादंकुरुदेवेशदीन
स्यप्रणतस्यच शनैश्चरउवाच परितुष्टोस्मितेवत्सस्तोत्रेणानेनसांप्रतं वरंवरयभोवत्सयेनयच्छामिवांछितं
पिप्यलादउवाच अद्यप्रभृतिवैपीडाबालानांरविनंदन त्वयाकार्य्यामहाभागनस्वकीयाकथंचन यावद्वर्षाष्टकं
जातंममवाक्येनसूर्यज स्तोत्रेणानेनयोन्यस्त्वांस्तूयात्प्रातरुपस्थितः तस्यपीडानकर्त्तव्यादेयोलाभोमहाग्रह अर्धा
ष्टसाप्तिकेयोगेतावत्कंसंस्थितोनरः तववारेतुसंप्राप्तेयस्तिलांलोहसंयुतान् भक्त्याददातिनोतस्यपीडाकार्य्या
त्वयाविभो कृष्णांगांयस्तुविप्रायतवोद्देशेनयच्छति अर्धाष्टसाप्तिकीपीडातस्यकार्यात्वयानच शमीसमि
द्भिर्योहोमंतवोद्देशेनानिर्वपेत् तथाकृष्णतिलैश्चैवकृष्णपुष्पानुलेपनैः पूजांकरोतियस्तुभ्यंधूपैर्वैगुग्गुलंदहेत् कृ
ष्णवस्त्रेणसंवेष्ट्यतस्यत्याज्यात्वयाऽन्यथा सूतउवाच एवमुक्तःशनिस्तेनवाढमित्येवजल्प्यच नारदंसमनुज्ञाप्य
जगामनिजसंश्रयं इतिशनिव्रतविधानं अथस्कंदपुराणोक्ताशनिपूजाविधिः श्रावणेमासिशुक्लपक्षस्यप्रथमे

शनिवारेकार्य्यां तत्रविधिः प्रातःशमीकाष्टेनदंतधावनंकृत्वा तिलतैलाभ्यंगंविधाय नद्यादौस्नात्वा नित्यकर्मनिर्वर्त्य पूजासामग्रींसंपाद्य शमीमूलंतदभावेअश्वत्थमूलंगत्वा तत्रमृदावेदिकांविधाय तस्यांधनुषाकारंमंडलंविलिख्य कृष्णातिलैर्द्रोणमितैःपरिपूर्य्य तदुपरिकृष्णायसानिर्मितां महिषासनांद्विभुजांदंडपाशधरां शनैश्चरमूर्त्तिंनिधायकृष्णवस्त्रवेष्टितांकृत्वा एवंपीठिकांसंपाद्य संकल्पंकुर्य्यात् ॥ तद्यथा ओमद्येतितिथ्यादिसंकीर्त्य आत्मनोऽखिलदुःखदौर्भाग्यनिरसनपूर्वकइहजन्मनिजन्मांतरेच सुखसौभाग्यपुत्रपौत्रधनधान्याद्यभिवृद्धिद्वाराशनैश्चरप्रीत्यर्थंशनिवारव्रतंकरिष्ये इतिसंकल्प्य तत्रादौगणेशपूजनादिविधाय शनिप्रतिमायांप्राणप्रतिष्ठांकृत्वाध्यायेत् शनैश्चरंदीर्घदेहंदंडपाशधरंतथा पिंगलंसूक्ष्मदेहंवाध्यायामिरविनंदनं इतिध्यात्वा शमग्निरितिमंत्रेणशन्नोदेवीतिऋचाशनैश्चरायनम इतिनाममंत्रेणवापूजामारभेत् तिलतैलेनपुरुषसूक्तेनशनिसूक्तेनच अभिषेकंकुर्य्यात् कृष्णवस्त्रेणसप्ततंतुभिश्च वेष्टयेत् एवंपूर्वोक्तमंत्रैरावाहनासन पाद्यार्घ्याचमनीयमधुपर्कपुनराचमनीय स्नानंपंचामृतस्नातशुद्धस्नानेन अथवाकेवलेनातिलतैलेनैवस्नानंकारयित्वा वस्त्रयज्ञोपवीतगंधपुष्पांतंपूजायित्वांगपूजांकुर्य्यात् ओंकोणस्थायनमःपादौपूजयामि पिंगलायगुल्फौपूज. बभ्रवेजानुनीपूज. कृष्णायजंघेपू. रौद्रायऊरूपूज. अंतकायगुह्यंपू. यमायकटिंपू. शौरयेनाभिंपूजयामि शनैश्चरायहृदयंपू. मंदायकंठंपू. पिप्पलादसंस्तुताय मुखं चर्षणगात्रायश्रोत्रंपू. स्थूलरोम्णेने. तपसादग्धदेहाय भ्रूमध्यंपूजयामि नित्ययोगरताय. ललाटंपू.ज्ञाननेत्रायशिरःपूज. काश्यपाय. शिखांपू. अर्कसूनवेनमः सर्वांगंपूजयामि ततोधूपं दीपं नैवेद्यं पुनराचनीयं फलंतांबूलं दक्षिणांचदत्त्वा सप्तप्रदक्षिणा सप्तनमस्कारान्कृत्वास्तुवीत नमःकृष्णायनीळायशि

तिकंठनिभायच नमस्तेमंदसंज्ञायशनैश्चरनमोस्तुते ततोनारदप्रोक्तंस्तोत्रंपठेत् इतिस्तुत्वा विप्रंसंपूज्य प्रस्थतिलान्नंवायनंसदक्षिणांदद्यात् कृष्णवर्णःकृशांगश्चनीलजीमूतसन्निभः शनैश्चरः सूर्यसुतःसशौरिः प्रीयतांनम शनैश्चरे दद्यातीदंप्रतिगृह्णातिचांतकः सएवतारकोभाभ्यांशनिरूपायवैनमः ततस्तांविसृज्यगृहमागत्यातिलमिश्रामिष्टान्नंब्राह्मणायदत्त्वा स्वयंचभुंजीत ॥ इतिशनिव्रतविधिः ॥ एवमुक्तप्रकारेणत्रयस्त्रिंशच्छनिवारपर्यंतंकृत्वा असामर्थ्येतुश्रावणशनिवारेषुकृत्वा अंतेउद्यापनंकुर्य्यात् तत्रादौपूर्वोक्तंसंकल्पंपठित्वा पूर्वोक्तपीठे सौवर्णशमीपत्रेषु हैमंशनैश्चरंद्विभुजंप्रतिष्ठाप्यसप्ततंतुनिर्मितंरुक्मोत्तरीयं वस्त्रसप्तकंचसमर्प्यपूजयेत् ततःस्थंडिलेऽग्निंप्रतिष्ठाप्य अन्वादध्यात् तत्रप्रधानंशनैश्चरंशमीसमिद्भिस्तिलाज्यद्रव्यैःप्रत्येकं अष्टोत्तरसंख्याकाहुतिभिर्ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ततःसप्तद्विजान्संपूज्यतेभ्योदक्षिणायुतानिसप्ततिलपात्राणिदत्त्वा आचार्य्यायपीठंगांचदत्त्वाप्रार्थयेत् नमस्तेकोणसंस्थायपिंगलायनमोस्तुते नमस्तेवभ्रुरूपायकृष्णायचनमोस्तुते नमस्तेरौद्रदेहायनमस्तेचांतकायच नमस्तेयमसंज्ञाय. नमस्तेशौरयेविभो नमस्तेमंदसंज्ञायशनैश्चरनमोस्तुते नमस्तेघोररूपायपिप्पलादेनसंस्तुतनमश्चर्षणगात्रायस्थूलरोम्णेनमोनमः तपसादग्धदेहायनमस्तेयोगधारिणे नमस्तेज्ञाननेत्रायकाश्यपायार्कसूनवे प्रसादंकुरुदेवेशदीनस्यप्रणतस्यच इतिस्तुत्वा तिलमिश्रितपक्वान्नेनभूदेवान्संतर्प्याशिषोगृहीत्वाप्रणमेत् नीलांजनसमाभासंरविपुत्रंयमाग्रजं छायामार्त्तंडसंभूतंतंनमामिशनैश्चरं चतुर्भुजंमंदगतिंशूलिनंगृध्रवाहनं किरीटिनंधनुष्मंतंचिंतयामिशनैश्चरं इतिशनिवारेसोद्यापनंसौरिनक्तविधानम् अथसूर्यारुणसंवादोक्तंशनिपूजाविधानम् श्रीसूर्यउवाच पादहीनस्तथाकृष्णःशनिःकार्य्यःशरीरतः दंडाक्षमालासंयुक्तः कराद्वित

यभूषितः कांस्यासनेरथेलोहमयेचाष्टतुरगमे पूजयित्वा।शनिंदेवंनित्यंगंधादिभिस्ततः प्रदद्याद्दविदुषेसर्वदोषापनुत्तये अधोमुखंशनेरूपंकृत्वास्वर्णमयंशुभं वरयेद्ब्राह्मणान्विज्ञान्वस्त्राभरणकांचनैः संपूज्यगंधपुष्पाद्यैःषोडशैरुपचारकैः संस्थाप्यकलशेपूर्णेनीलचैलपरावृते कोटिलक्षायुतंजप्त्वाशनिमंत्रंप्रयत्नतः तदग्रेहोमयेद्यत्नात्स्वगृह्योक्तविधानतः माषैस्तिलैःसर्षपैश्चघृतेनापिशमीफलैः जपोपकल्पितां दद्याद्दक्षिणांचाहिरण्मयीं पूर्णाहुतिंततःकुर्य्यात्कर्त्ताशुचिरलंकृतः वलालोध्रतिलैःकृष्णाशतपुष्पघनांजनैः सलाजैःप्लवनंकुर्य्याल्लोहपात्रशतस्थितैः शनिदोषोपशांत्यर्थंयजमानःप्रयत्नतः कृष्णांगांविधिवद्दद्यात्कपिलां वापयस्विनीं सालंकारांसुवर्णाढ्यांशनिप्रीतिकरांशुभां ब्राह्मणान्भोजयेत्पश्चाच्छक्त्यादद्याच्चदक्षिणां यएवंकुरुतेसूतशनिशांतिविधानतः नतस्यदुरितंकिंचिच्छनैश्चरसमुद्भवम् जन्माष्टद्वादशेतुर्येद्वितीयेचयदास्थितः महाविघ्नकरःसौरोदुष्टांगस्थोपिभावतः छत्रेंसिहासनेदुर्गेदेशकर्माश्रितेतथा राज्यभंगप्रदोजन्मात्पंचमेपुत्रविघ्नकृत् सर्वमेतत्फलंदष्टाद्दष्ट्याचापिचतुर्विधः नकिंचिद्भयमाप्नोतिशनियोगप्रभावतःराज्यभ्रष्टोलभेद्राज्यंशस्त्रीस्यात्सर्वतोभृशं अथलोहमयंसर्वमष्टांगुलमितं शुभं लिखित्वातुनराकारंपादहीनमधोमुखं स्नापयित्वातुतैलेननीलचैलपरावृतं संस्थाप्यतैलपात्रेतुशनिमंत्रेणयत्नतः एवंसंपूजयेन्नित्यंशनिवारेविशेषतः जप्त्वाहुत्वाप्रयोगांतेब्राह्मणायसमर्प्पयेत् अनेनविधिनायस्तुसूर्य्यपुत्रंप्रपूजयेत् तुष्टिंयातिनसंदेहोपपीडामुक्ताशनैश्वरः इतिसूर्य्यार्णवसंवादेशनिपूजाविधानम् तत्रैवराहुकेतुपूजाविधानमपिद्रष्टव्यम् एवं सूर्य्यादीनामपितत्रैवज्ञेयमितिदिक् अथराहुस्तोत्रम् ओंनमस्तेदैत्यरूपायदेवारिंप्रणमाम्यहं नमस्तेभद्ररूपायघोररूपायवैनमः त्वंब्रह्मावरुणाकाशौत्वंविष्णुस्त्वंहरिःशिवः मर्त्यलोकेभवान्प्रीतिसंसारजनतारकः

कूटपर्वतदुर्गाणिनगराणिपराणिच यस्यक्रोधवशाद्भस्मोभवंतिक्षणमात्रतः धूम्रवर्णोमहाभीमोरक्ताक्षः पिंगलोचनः क्रूरग्रहस्तथाराहुर्यमरूपोमहावलः यस्यस्थानेपंचमेस्तिषष्ठेचैवतृतीयके दशमेकादशेचैवतस्यश्रेयःकरोतिच गोदानंभूमिदानंचअन्नंवस्त्रंचदापयेत् अस्यस्तोत्रस्यमाहात्म्याद्राहुपीडाप्रशाम्यति इतिराहुस्तोत्रम् ॥ अथकेतुस्तोत्रम् ॥ धूम्राद्विबाहवःसर्वेगदिनोविकृतानना गृद्धासनगतानित्यंकेतवःस्युर्वरप्रदाः नमोघोरस्वरूपायमहाघोरस्वरूपिणे नमआनंददेशायजगदानंददायिने नमोभक्तजनानंददायिनेविश्वभाविने विश्वेशायमहेशायकेतुरूपायतेनमः नमोरौद्रायसर्वायवरदायाचिदात्मने अक्षायविनिवासायनमःसंकटनाशिने त्रिपुरेशायदेवायभैरवायमहात्मने नमोचिंत्यायचिंत्यायनमश्चैतन्यरूपिणे नमःशर्वायसर्वायदर्शनीयायतेनमः नमोचित्यस्वरूपायमहाभैरवरूपिणे नमोनमोमहादेवव्यापिने परमात्मने नमोलांगूलरूपायचंद्रसूर्यग्रहायच ममआपद्विनाशायभूयोभूयोनमोनमः अग्निपुत्रोमहातेजःकेतुःसर्वग्रहांतकः क्षोभयेद्यःप्रजाःसर्वाःसकेतुःप्रीयतांमम इतिकेतुस्तोत्रम् अथतिथिनक्षत्रयोगेवारव्रतानि कालांतरागमेनक्षत्रतिथियोगेनतिथीनांग्रहयोगतः पुनरेवप्रवक्ष्यामिव्रतानितुयथास्थितं रोहिण्यांचंद्रवारेणाष्टमीयोगोयदाभवेत् अथवासोमसंयोगेविशेषात्पूज्यवैशिवं पायसंघृतसंयुक्तंशिवायाविनिवेदयेत् धूपदीपोपहारैश्चपूर्ववत्पूजयेच्छिवं घृतस्यप्राशनंकार्य्यंसर्वकाप्रदंव्रतं आदित्यरेवतीयोगश्चतुर्द्दश्यांयदाभवेत् तथाष्टम्यांमघायोगेशिवंसंपूज्यपूर्ववत् तिलास्तुप्राशनेप्रोक्ताआदित्यव्रतमीरितं आरोग्यंजायतेतस्यपुत्रबंधुजनैःसह इत्यादित्यव्रतम् अश्विनीभौमसंयोगश्चतुर्दश्यांयदाभवेत् अष्टमीभरणीयोगस्तदाभौमव्रतंभवेत् संपूज्यपरयाभक्त्याशिवंपंचोपचारतः रक्तोत्पलप्राशनात्तुसाम्राज्यंप्राप्नुयान्नरः इतिभौमव्रतम् रोहिणीबुधसंयोग श्चतुर्दश्यांयदाभवेत्

अष्टम्यांवामहासेनबुधव्रतसमागमः शिवःपूज्योविधानेनमहास्नानपुरःसरं महाव्रतीसमोपेतंप्राशयेःपायसंघृतं पुत्रार्थदारपशवोवर्धंतेतस्यनान्यथा इतिबुधव्रतम् रेवतीगुरुसंयोगश्चतुर्दश्यांयदाभवेत् अष्टम्यांतिष्यसंयोगाद्गुरुव्रतमिदंभवेत् प्राशनंकपिलाज्यंतुब्राह्मीक्षिरिसमाश्रिनं वागीशत्वमवाप्नोतिव्रतस्यास्यप्रभावतः इतिगुरुव्रतम् श्रवणंभार्गवयुतंचतुर्दश्यांयदाभवेत् शुक्रव्रतंसदादेविपुनर्वस्वष्टमीयदा संपूज्यपरमेशानंयथाविभवविस्तरैः प्राशनंमधुनश्चात्रकर्त्तव्यंसंयतात्मना महाफलमवाप्नोतिव्रतस्यास्यप्रभावतः इतिशुक्रव्रतम् ॥ भरणीशनियोगस्तुचतुर्दश्यांयदाभवेत् आर्द्रायोगेयदाष्टम्यांतदामंदव्रतंभवेत् शिवंसंपूज्यविधिवत्प्राशनंसस्यमेवहि शनिरेकादशस्थोहिफलंयच्छातिशोभनं विरुद्धस्थोहिदुष्टश्चतथेदव्रतमाचरेत् हेमरूप्यंप्रवालंच सुवर्णंमौक्तिकंतथा शंखंसतारलोहंचक्रमाद्यत्नेनधारयेत् यथासंवदतोवस्त्रमाचार्य्यायप्रयत्नतः इतिशनिव्रत इतिथिनक्षत्रयुक्तानिवारव्रतानि अथनक्षत्रव्रतानि अश्विन्यामश्विनाविष्ठादीर्घायुजायतेनरः व्याधिभिर्मुच्यतेक्षिप्रमत्यर्थंव्याधिपीडितः १ भरण्यांयममभ्यर्च्यकुसुमैरसितैःशुभैः गंधादिभिस्तथाशुद्धैरपमृत्युर्विमुच्यते २ अनिलंकृत्तिकायांतुवृद्धिसंपूजितःपरं रक्तमाल्यादिभिर्दद्याद्घृतहोमेनचध्रुवं इष्टःप्रजापतिःप्रीतइष्टान्दद्यात्पशूंस्तथा रोहिण्यांदेवशार्दूलगोजाविहयकुंजरान् ४ मृगशीर्षेतथासोमंजयमारोग्यमेवच ५ आर्द्रायांचशिवंपूज्यपशून्विजयमश्नुते सितैःपद्मादिभिर्दिव्यैर्दैवतंपाथसांशुभं शिवंदैवतमितिसंबंधः ६ पुत्रान्पुनर्वसौदद्याच्चरुणापूजितादिति ७ तिष्येवृहस्पतिर्वृद्धिंददातिविपलंधनं ८ भोगान्गंधादिभिर्नागाअश्लेषायांसुखावहाः तर्पिताश्चप्रयच्छंतिभक्षाद्यैर्मधुरैःशुभैः ९ रक्षाविषादिदोषेभ्यः प्रीताःकुर्य्युःसदैवहि मघासुपितरःसर्वे हव्यैःकव्यैश्चपूजिताः प्रयच्छंतिधनंधान्यं भृत्यान्पुत्रान्पशूंस्तथा १० पूर्वायांविजयंदद्या

द्गगोदेवः सुपूजितः ११ भक्त्याप्रपूजितोदद्यादुत्तरायांतथार्यमा भर्त्तारमीप्सितंनार्य्यैपुंसश्चवरयोषितं
इहजन्मनिचायुष्यंरूपद्रावेणसंपदः १२ पूजितःसविताहस्तेविश्वतेजोनिधिः सदा वस्त्रैःपुष्पादिभि
श्चैवददातिविपुलंधनं १३ राज्यंतुष्टाचचित्रायांनिःसपत्नंप्रयच्छति १४ इष्टःसंपजितः स्वात्यां तथावायुर्वरंप
रं १५ इंद्राग्नीतुविशाखायांपीतरक्तैः प्रपूज्यतु धनंराज्यंतुलब्ध्वेहतेजस्वीनिवसेत्सदा १६ रक्तैर्भिन्नमनूराधा
स्विहसंपूज्यभक्तितः प्रियोभवंतिसर्वेषांचिरंजीवित्वमाप्नुयात् १७ गुणैःसर्वैश्चसंपूर्णःकर्मणाचधनेनच ज्ये
ष्ठयामिंद्रमभ्यर्च्यमानवःसंप्रजायते १८ मूलेननिर्ऋतिर्मिष्ठ्वाभक्ष्यैश्चपललादिभिः पूर्ववत्फलमाप्नोतिस्व
स्थानेचध्रुवोभवेत् १९ अप्यदृष्टांबुजैःश्वेतैर्हुत्वापूर्वासुपूर्ववत् संतापान्मुच्यतेक्षिप्रंशारीरान्मानसात्तथा आ
षाढासुतथाविश्वांनुत्तराषाढयोगतः विप्रान्संपूज्यपुष्पाद्यैःस्वर्गमाप्नोति मानवः २१ श्रवणेतुसितैर्विष्णुंपुष्पैर्धूपै
श्चशक्तितःसंपूज्यश्रियमाप्नोतिपरंविजयमेवच २२ धनिष्ठासुवसूनिष्ट्वानभयंजायतेक्वचित् महतोपितथाश्वेतैर्गं
धपुष्पादिभिःशुभैः२३ वरुणंशतभिक्ष्वर्च्यव्याधिर्मुंचतिवैनरःआतुरःपुष्टिमाप्नोतिस्वास्थमैश्वर्य्यमेवच २४ अजं
भाद्रपदायांतुशुद्धस्फटिकसन्निभं संपूज्यमुक्तिमाप्नोतिनात्रकार्य्याविचारणा २५ उत्तरायामहिर्बुध्न्यंपरांशांतिम
वाप्नुयात् अहिर्बुध्न्यसंपूज्येत्यनुषंगः २६ रेवत्यांपूजितःपूषाददातिविविधान्पशून् सितैःपुष्पैःस्थितिंचैवधृ
तिंविजयमेवच २७ एतेवैतेसमाख्यातायज्ञाःसंक्षेपतोमया नक्षत्रदेवतानांचसाधकानांहितायवै भक्त्यावित्ता
नुसारेणभवंतिफलदास्मृताः गंतुमिच्छेद्यदान्यत्रकार्य्यंप्रारभ्यमेवच नक्षत्रदेवतायज्ञंकृत्वातत्सर्वमाचरेत् ए
वंकृतेहितत्सर्वंयात्राफलमवाप्नुयात् क्रियाफलंचसंपूर्णमित्युक्तंभानुनास्वयं यज्ञाभावेजपंकुर्य्यात्क्रियांकुर्वन्य
थेप्सितां तद्देवतामंत्रजपं इतिनक्षत्रदेवतापूजाव्रतानि अथनक्षत्रपुरुषव्रतम् भविष्योत्तरे युधिष्ठिरउवाच

सुरूपतामनुष्याणांस्त्रीणांचयदुसत्तम कर्मणाजायतेकेनतत्समाख्यातुमर्हसि सुरूपाणांसुगात्राणांसुवेषाणांतथैवच न्यूनंतथाधिकंचापियथानांगंप्रजायते समस्तैःशोभनैरंगैर्नराःकेचिद्यदूत्तम काणाःकुब्जाश्चजायंतेत्रुटितश्रवणास्तथा नराणांयोषितांचैवसमस्तांगसुरूपता कर्मणायेनभवतितत्सर्वंकथयस्वमे लावण्यगतिवाक्यानिसतिरूपेमहामते कुर्वंत्यभ्यधिकांशोभांसमस्तःपरमोगुणः वाक्यलावण्यसंस्कारविलासललितागतिः विडंवनाकुरूपाणांहास्यायैवप्रजायते रूपेहिकारणीभूतकर्मणाप्रयतोभवेत् तस्मात्तन्मेसमाचक्ष्वकर्मयच्चस्वरूपदम् ॥ श्रीकृष्णउवाच ॥ सम्यक्पृष्टंत्वयाहीदमुपवासाश्रितंनृप कथयामियथाप्रोक्तंवासिष्टेनमहात्मना वसिष्ठमृषिमासीनंसप्तर्षिप्रवरंद्विजं पप्रच्छारुंधतीचैवंयथैवभवतामम तस्यास्तुपरिपृच्छंत्याजगादमुनिसत्तमः यत्तच्छृणुष्वकौंतेयममेदंवदतोखिलं ॥ वसिष्टउवाच ॥ श्रूयतांयदहंपृष्टस्त्वयैतद्वरवर्णिनि सुरूपतानृणांयेनयोषितांचैवजायते अनाराध्यतुगोविंदमनाराध्यचकेशवं रूपाधिकागुणाःकेनप्राप्यंतेन्येनकर्मणा तस्मादाराधनीयोग्रेविष्णुरेवयशस्विनि पारमप्राप्तकामेनरूपसंपत्समादिकं यस्तुवांछतिधर्मज्ञोरूपंसर्वांगसुंदरं नक्षत्रपुरुषस्तेनसंपूज्यःपुरुषोत्तमः नक्षत्रांगंयताहारःसंपूजयातियोच्युतं भक्त्यायोषिन्नरोवापिस्वरूपांगः प्रजायते योषिताहिपरंरूपंवांछंत्याजगतःपतिः सएवाराधनीयोग्रेनक्षत्रांगोजनार्दनः अरुंधत्युवाच नक्षत्ररूपीभगवान्पूज्यतेपुरुषोत्तमः मुनेयेनविधानेनतत्समाख्यातुमर्हसि वसिष्ठउवाच चैत्रमासात्समारभ्याविष्णोःपादानुपूजनं यथाकुर्वीतपूजांतुतन्निशामयसुव्रते नक्षत्रमेकमेकंवैस्नातःसम्यगुपोषितः नक्षत्रपुरुषस्यांगंपूजयेतविचक्षणः मूलेपादौतथाजंघेरोहिण्यामर्चयेच्छनैः जानुनीचाश्विनीयोगेआषाढेचोरुसंज्ञिते फाल्गुनीद्वितयेगुह्यंकृत्तिकासुतथाकटिं पार्श्वेभाद्रपदायुग्मेकुक्षौवैरेवतीषुच अनुराधा

खुरःपृष्ठधनिष्ठासुतथानखान् पुष्येमुखंतथास्वातौदंतान्नाभिंचपूजयत् आस्यंशतभिषायोगेमघायोगेतुनासिके मृगोत्तमांगेनयनेपूजयेद्भक्तियोगतः चित्रायोगेललाटेचभरणीषुतथाशिरः संपूजनीयंविद्वद्भिरार्द्रायांचतथाशिरः उपोषितोनरः कृत्वास्नानमभ्यंगपूर्वकं वर्जनीयंप्रयत्नेनरूपघ्नंतद्विनिर्दिशेत् पूजयेत्तच्चनक्षत्रंनक्षत्रस्यचदैवतं सोमंनक्षत्रराजानंस्वमंत्रैःपूजयेद्बुधः प्रतिनक्षत्रयोगेनरूपघ्नंतद्विनिर्दिशेत् पूजयेत्तच्चनक्षत्रंदानंदद्यात्स्वशक्तितःअंतरायेसमुत्पन्नेसूतकाशौचकारिते उपोष्येवोपाविशेन्ननक्षत्रपुरुषंपुनः एवंमघावसानेतुव्रतपारंसमाप्यतेसमाप्तेचव्रतेदद्याच्छय्यांसोपस्करांशुभां नक्षत्रपुरुषंहैमंपूजयेत्तत्रभक्तितः ब्राह्मणंब्राह्मणींचैव वस्त्रालंकारभूषणैः शय्यायांतुसमासीनौपूज्यौमाल्यानुलेपनैः सप्तधान्यंयथालाभंगांसवत्सांपयस्विनीं छत्रोपानद्युगंचैवघृतपात्रंतथैवच मंत्रेणानेनविप्रायसुशीलायनिवेदयेत् यथानविष्णुभक्तानांवृजिनंजायते क्वचित् यथास्वरूपतारोग्यंसुखसंपदिहास्तुते यथानलक्ष्म्याशयनंतवशून्यंजनार्दन शय्याममाप्यशून्यास्तुतथाजन्मनिजन्मनि एवंनिवेद्यतत्सर्वंप्रणिपत्यक्षमापयेत् शक्तिहीनस्तुगांदद्याद्घृतपात्रसमन्वितां नक्षत्रपुरुषाख्योयंयथावत्कथितस्तव याचानार्च्यंत्रकुरुतेसम्यक्संशृण्वतीसती अंगोपांगानिनैवास्याःपादादीन्यखिलान्यपि सुरूपाण्यभिजायंतेसप्तजन्मांतराणिवै सर्वाणिचैवभद्राणिशरीरारोग्यमेवच संततिंमनसः प्रीतिंरूपंचातिविशोभनं वाङ्माधुर्यंतथाकांतिंयच्चान्यदपिवांछति ददातिनक्षत्रपुमान्पूजितश्चजनार्दनः वसिष्ठनयथाख्यातं सर्वंतत्ते निवेदितं नक्षत्रपुरुषंनामव्रतानामुत्तमोत्तमं येपादजानुजघनोरुनितंबभारान् रुक्मैःप्रकल्प्यसुतनुंपुरुषोत्तमस्य संपूजयंतिजितकोपमनोविकाराः कौंतेयतेननुभवंतिसुरूपदेहाः इतिभविष्योत्तरोक्तंनक्षत्रपुरुषांगपूजाव्रतम् अथमत्स्यपुराणोक्तंनक्षत्रपुरुषव्रतम् ॥ सूतउवाच ॥ कैलासशिखरासीन

मपृच्छन्नारदःपुरा त्रिशूलिनमनंगारि मंगनार्धधरंहरं नारदउवाच श्रीमदारोग्यरूपायुर्भोगसौभाग्यसंपदा संयुक्तसत्ववान्विष्णोःपुमान्भक्तःकथंभवेत् नारीचाविधवासर्वगुणसौभाग्यसंपदा क्रमान्मुक्तिप्रदंदेवव्रतंकिंचिदिहोच्यतां ईश्वरउवाच सम्यक्पृष्टंत्वयाब्रह्मन्सर्वलोकहितावहं श्रुतसर्वैनयच्चान्यैस्तद्व्रतं शृणुनारद नक्षत्रपुरुषंनामव्रतंनारायणार्चनं पादादिकुर्य्याद्विधिवद्विष्णोर्नामानुकीर्त्तनं प्रतिमांवासुदेवस्य मूलर्क्ष्याद्यभिपूजयेत् चैत्रमासंसमासाद्य कृत्वाब्राह्मणवाचनं मूलंनमोविश्वधरायचेति पादावनंतायचरोहिणीषु जंघेहिपूज्येवरदायचेतिद्विजानुनीचाश्विकुमारकर्क्षे पूर्वोत्तराषाढगतेतथोरूनमःशिवायेत्यथपूजनीयौ पूर्वोत्तराफाल्गुनीपुहृद्वंमेढ्रंनमः पंचशरायपूज्यं कटिंनमःशार्ङ्गधरायदेवंसंपूजयेन्नारद-कृत्तिकासु तथार्चयेद्भाद्रपदाद्वयेचपार्श्वेनमःकेशिनिसूदनाय कुक्षिद्वयंनारदरेवतीपुदामोदरायेत्यभिपूजनीयंऋक्षेनुराधासुचमाधवायनमस्तथोरःस्थलमेवपूज्यं पृष्ठंधनिष्ठासुचपूजनीयमघौघविध्वंसकरायतद्वत् श्रीशंखचक्रासिगदाधरायनमोविशाखासुभुजाभिपूज्या हस्तेग्रहस्तौमधुसूदनायनमोभिपूज्यद्व्रतकैटभारेः पुनर्वसावंगुलिपर्वभागाः सामामधीशायनमोभिपूज्यः भुजंगनक्षत्रदिने नखान्हिसंपूजयेन्मर्त्यशरीरधातुः कूर्मस्यपादौशरणंव्रजामि ज्येष्ठासुकर्णौहरिरर्चनीयः श्रोत्रेवराहायनमोभिपूज्य जनार्दनस्यश्रवणेनसम्यक् पुष्येमुखंदानवसूदनाय नमोनृसिंहायचपूजनीयं नमोनमःकारणवामनायस्वातीषुदंताग्रमथार्चनीयं आस्यंहरेर्भार्गवनंदनायसंपूजनीयंद्विजवारुणेन नमोस्तुरामायमघासुनाम्नासंपूजनीयंरघुनंदनस्य मृगोत्तमांगेनयनेहिपूज्येनमोस्तुतेरामविघूर्णिताक्ष बुद्धायशांतायनमोललाटेचित्रासुसंपूज्यतमोमुरारिः शिरोभिपूज्यंभरणीषुविष्णोर्नमोस्तुविश्वेश्वरकल्किरूप आर्द्रासुकेशाःपुरुषोत्तमस्यसंपूजनीयाहरये

नमस्ते उपोषितश्चर्क्षेदिनेषुशक्त्यासंपूजनीयाद्द्विजपुंगवास्तु पूर्णेव्रतेसर्वगुणान्वितायवाग्रूपशीलायचसामगाय हैमीविशालायतबाहुदंडांमुक्ताफलेंद्रोपलवज्रयुक्तां गुडस्यपूर्णेकलशेनिविष्टामर्चांहरेर्वस्त्रगवासहैव शय्यांतथोपस्करभाजनादियुक्तांप्रदद्याद्द्विजपुंगवाय यद्यास्त्रियांकिंचिदिहास्तिदेयंदद्याद्द्विजायात्महितायसर्वं मनोरथान्नःसफलीकुरुष्वहिरण्यगर्भाच्युतरुद्ररूप सलक्ष्मीकंसभार्य्यंचकांचनंपुरुषोत्तमं शय्यांदद्यान्नमंत्रेणग्रंथभेदविवर्जितं यथानविष्णुभक्तानांवृजिनंजायतेक्वचित् तथाशुपरमारोग्यंवसुदद्याच्चकेशवः यथानलक्ष्म्याशयनंतवशून्यंजनार्दन शय्याममाप्यशून्यास्तुकृष्णजन्मनिजन्मनि एवंनिवेद्यतत्सर्वंवस्त्रमाल्यानुलेपनं नक्षत्रपुरुषज्ञायविप्रायाथविसर्जयेत् भुंजीतातैललवणंसर्वर्क्षेष्वप्युपोषितः इतिनक्षत्रपुरुषमुपोष्यविधिवत्स्वयं सर्वान्कामानवाप्नोतिविष्णुलोकेमहीयते ब्रह्महत्यादिकंकिंचिदिहामुत्रचयत्कृतं आत्मनावाथपितृभिस्तत्सर्वंनाशमाप्नुयात् इतिपठतिशृणोतिचातिभक्त्यापुरुषवरोव्रतमंगनाथकुर्य्यात् कलिकलुषनिवारणं नराणांसकलभूतिफलप्रदंचविष्णोः इतिमत्स्यपुराणोक्तंनक्षत्रपुरुषव्रतम् अथशैवसौरनक्षत्रपुरुषव्रतम् मत्स्यपुराणे नारदउवाच उपवासेष्वशक्तानांतदेवफलमिच्छतां अनभ्यासेनरोगित्वाकिमिष्टफलमुच्यतां ईश्वरउवाच उपवासेष्वशक्तानांनक्तभोजनमिष्यते अस्मिन्व्रतेतदाप्यत्रश्रूयतांद्विजसत्तम आदित्याराधनंनामयथावच्छंकरार्चनं येषुनक्षत्रयोगेषुपुराणज्ञाःप्रचक्षते यदाहस्तेनसप्तम्यामादित्यस्यदिनंभवेत् सूर्यस्यवाथसंक्रांतिस्तिथिःसासार्वकामिकी उमामहेश्वरस्यार्चां पूजयेत् सूर्यनामभिः सूर्य्यार्च्चांशिवलिंगंचनागृहीपूजयेदतःउमापतेरवेश्चापिनभेदःक्वचिदिष्यते यस्मात्तस्मान्मुनिश्रेष्ठगृहीशंकरमर्च्चयेत् हस्तौतुसूर्य्यायनमोस्तुपादावर्क्कायचित्रासुचगुल्फदेशं स्वातीषुजंघेपुरुषोत्तमस्यधात्रेविशाखासुचजानुदेशं तथानुराधासुनमोभिपूज्य

मूरुद्वयंदेवसहस्रभानोः ज्येष्टास्वनंगायनमोस्तुगुह्य मिंद्रायसोमायकटिंचमूले पूर्वोत्तराषाढयुगेचनाभिंत्वष्ट्रेनमः सप्ततुरंगमाय तीक्ष्णांशवेचश्रवणे नकुक्षिंस्तनौधनिष्टासुविकर्त्तनाय वक्षस्थलंध्वांतविनाशनायजलाधिपर्क्षेपरिपूजनीयम् पूर्वोत्तराभाद्रपदद्वयेचवाहूनमश्चंडकरायपूज्यौ साम्नामधीशायकरद्वयंचसंपूजनीयंद्विजरेवतीच नखानिपूज्यानितथाश्विनीषु नमोस्तुसप्ताश्वधुरंधराय कठोरधाम्नेभरणीषुपृष्टंदिवाकरायेत्यभिपूजनीयं ग्रीवाग्निऋक्षेवदनेंशुमंतंसंपूजयेन्नारदरोहिणीषु मृगोत्तमांगेदशनाः पुरारेःसंपूजनीयाहरयेनमस्ते नमः सबित्रेइति शंकरेतुनासाभिपूज्याचपुनर्वसौच ललाटमंभोरुहवल्लभायपुष्यर्क्षकेवेदशरीरधारिणे सार्प्येणमौलिंविबुधप्रियाय मघासुकर्णावितिगोगणेशं पूर्वासुगोब्राह्मणनंदनायनेत्राणिसंपूज्यतमानिशंभोः अथोत्तराफाल्गुनिभेभ्रुवौच विश्वेश्वरायेतिचपूजनीयंनमोस्तुपाशांकुशपद्मशूलिन्कपालसर्पेन्दुधनुर्धराय गजासुरानंगपुरांधकादिविनाशशीलायनमःशिवाय इत्यादिचत्वारितुपूजयित्वाविश्वेश्वरायेतिशिरोभिपूज्यं भोक्तव्यमन्नंचवितैलशाकंत्रमांसमक्षारमभुक्तशेषं इत्येवंद्विजनक्तानिकृत्वादद्यात्पुनर्वसौ शालेयतंडुलप्रस्थमौदुंवरमयेघृतं संस्थाप्यपात्रेविप्रायसहिरण्यंप्रदापयेत् सप्तमेत्वथसंप्राप्तेपारणेत्वधिकंभवेत् चतुर्दशेतुसंप्राप्तेपारणेनारदाव्दिके ब्राह्मणान्भोजयेद्भक्त्यागुडक्षीरघृतादिभिः कृत्वाथकांचनंपद्ममष्टरंगदलांछितं शय्यांसोपस्करांकृत्वाविरुद्धग्रंथिवर्जितां सोपधानांसविश्वेशांसुवर्णरचितांश्रिया भाजनोपानहच्छत्रचामरासनदर्पणैः भूषणैरपियुक्तांतांफलवस्त्रानुलेपनैः तस्यांनिधायतत्पद्ममलंकृत्यगुणान्वितं कपिलांवस्त्रसंयुक्तामतिशीलांपयस्विनीं हेमशृंगींरौप्यखुरांसवत्सांकांस्यदोहनीं दद्यान्मंत्रेणपूर्वान्हेइतिवाचमुदीरयन् यथैवादित्यशयनमशून्यंतवसर्वदाकांत्याधृत्याश्रियाराज्ञातथामेसंतुसिद्धयः

यथानदेवाश्रेयांसत्वदन्यपरमंविदुः तथामामुद्धराशेष दुःखसंसारसागरात् ततः प्रदक्षिणीकृत्य संप्रणम्यविसर्जयेत् शय्यासनादितत्सर्वंद्विजस्यसदनंनयेत् नैतद्विशीलायनदांभिकायकुतर्कदुष्टायसमत्सराय प्रकाशनीयंव्रतमिंदुमौलेर्यश्चापिनिंदामधिकांकरोति भक्तायशांतायचगुह्यमेतदाख्येयमानंदकरंशिवस्य इदं महापातकहन्नराणामप्यक्षरंवेदविदोवदंति स्ववंधुपुत्रैश्चबलैश्चयुक्ताः पत्नीभिरानंदयितुः सुराणां नाभ्येतिरोगंनचशोकदुःखं याचापिनारीकुरुतेतिभक्त्या इदंवासिष्ठेनपुरार्जुनेनकृतंकुवेरेणपुरंदरेण संकीर्त्तनादप्यखिलानिनाशमायांतिपापानिनसंशयोस्ति इतिपठतिशृणोतिवायइत्थंरविशयनंपुरुहूतवल्लभः स्यात् अपिनरकगतान्पितॄन् नशेषांनाभिदिवमातयतीहयः करोति इतिमत्स्यपुराणोक्तमादित्यशयनंनक्षत्रपुरुषव्रतं अथयोगव्रतानिहेमाद्रौ भविष्योत्तरे विष्कुंभादिषुयोगेषुभवेदेकाशनोनरः योददातिक्रमात्पार्थघृतं १ तैल २ फले ३ क्षवः ४ यव ५ गोधूम ६ चणक ७ निष्पावान् ८ शालितंडुलान् ९ लवंगं १० दधिदुग्धंच १२ वस्त्रं १३ कनकमेवच १४ कंबलं १५ गां १६ वृषं १७ छत्र १८ मुपानद्युगमेवच १९ कर्पूरं २० कुंकुमं २१ चैवचंदनं २२ कुसुमानिच २३ लोहं २४ ताम्रंच २५ कांस्यंच २६ रौप्यंचेति २२ युधिष्ठिर स्नातः स्वशक्त्याविधिवत्सर्वपापैः प्रमुच्यते नवियोगमवाप्नोतियोगव्रतमिदंस्मृतमिति विष्कुंभादियोगव्रते प्रातः स्नात्वाएकाशनव्रतंकुर्य्यात् घृतादिदानंदद्यात् अत्र पूजोद्यापनादिसाधारणपूजोद्यापनादिक्रमेणकार्य्यं विशेषस्तुव्यतीपातयोगव्रतेज्ञेयः अथव्यतीपातव्रतम् वाराहपुराणे धरण्युवाच यस्त्वयोक्तोव्यतीपातस्तस्यकर्मवदस्वयत् कस्यपुत्रःकथंपूज्यःपूजितेतत्र किंफलं वाराह उवाच यदावृहस्पतेर्भार्यांतारांजग्राहशीतगुः मित्रत्वात्प्राहतंसूर्य्यस्त्यजभार्य्यांवृहस्पतेः चक्रेचंद्रोनतद्वाक्यंहित

शिक्षासमन्वितं यदारुष्टस्वदादित्योदीप्तदृष्ट्याभ्युदैक्षत तावत्सोमोपिरुष्टोस्यततोन्योन्यमवेक्षतां उभयोर्दृष्टि संपातेक्रुद्धयोसोमसूर्ययोःउद्यदास्योभवद्घोरःपुरुषःपिंगलेक्षणः दष्टोष्टदीर्घदशनोभृकुटीकुटिलाननःकपिलः श्मश्रुकेशांतोलंबभ्रूःसकृशोदरः शिखालोदीर्घजिह्वश्चसूर्याग्नियमसन्निभः सभोक्तुकामस्त्रैलोक्यंरवींदुभ्यांनिवारितः क्रोधक्षुधेमांबाधेतेकन्नैतेपात्यतेमया रवींदूऊचतुः कोपदृष्टोनौविघातादतिपाताद्भवानभूत् व्यतीपातस्ततोभीमभवान्भुविभविष्यति यस्मिन्कालेत्वदुत्पत्तिस्तदाकल्याणकारिणः व्यतीपातायभद्रंतेत्वयियःपापकारकःतदन्नं क्षुधितोभुंक्ष्वतत्रकोपोनिपात्यतां व्यतीपातउवाच नमोवांपितरौमेस्तुक्रोधपातःसभोजनः दत्तोभवद्भ्यामधुनाप्रसादःक्रियतांमम रविचंद्रावूचतुःस्नानदानजपहोमपूजनयस्त्वदीयसमयेसमाचरेत् तस्यपुण्यमिहतेप्रसादतोनंतमस्तुसुततेस्त्वनुग्रहःत्वत्कालेतवविदधातिपूजनंयस्तस्येष्टंभवतुभवेत्सभद्ररूप पुत्रायुर्धनसुखकीर्त्तिभोगरूप्यरोग्याद्यंगुणिजनवल्लभेष्टपूर्वं वाराहउवाच एतस्मात्कारणाद्भूमौव्यतीपातोर्च्यतेनरैः अर्चितेचफलंयत्स्यात्तदुक्तंच समासतःविस्तरेणार्चनफलंगदितुंकेनशक्यते यथार्च्यतेव्यतीपातःसविधिःश्रूयतामिह शुभेव्यतीपातदिनेविगाहयेत्सपंचगव्येनमहानदीजलं उपावसेद्वैपचमानजापकोजपेतशूद्रोव्यतिपाततेनमः छादितेताम्रपात्रेणशर्करापूरितेघटे कांचनाब्जेप्रतिष्ठाप्यहैममष्टभुजंनरं अष्टभुजमष्टादशभुजं अस्योत्पत्तिवाक्ये द्वादशभुजत्वश्रवणात् उत्पत्तिवाक्यानुसारित्वाच्चविनियोगवाक्यस्ययथाभगवद्गीतासुचत्वारोमनवस्तथेत्यत्रचत्वारश्चतुर्दशेत्यर्थःगंधपुष्पाक्षतैर्धूपदीपवस्त्रनिवेदनैःभक्ष्यैर्भोज्यैःफलैश्चित्रैर्मासिमार्गशिरेर्चयेत् नमस्तेस्तुव्यतीपातसोमसूर्यसुतप्रभो यद्दानादिकृतंकिंचित्तदनंतमिहास्तुते इत्युक्त्वापंचरत्नाढ्यंसपुष्पाक्षतमंजलिं प्रक्षिपेत्तत्क्षणादेवसर्वपापक्षयोभवेत् यदि द्वितीयेचदिनेव्यतीपातोभवेन्माहि तदापूर्णोपवासस्तुस्यात्तत्सकलंगुरोः पारणंव्यतिपातांतेकुर्य्यात्संप्राश्यगोमयं

अथैकस्मिन्दिनेधात्रेव्यतीपातोभवेद्यदि तत्रैवाहितदादत्वाउपवासंसमाचरेत् कुर्य्यादेवंमासिमासिव्यतीपातास्त्रयोदश चतुर्दशेतुसंप्राप्तेकुर्य्यादुद्यापनंबुधः व्यतीपातायस्वाहेतिक्षीरवृक्षसमिच्चरुं आज्यक्षीरतिलानांचहोतव्यंवैशतंशतं शर्करापूर्णकुंभंचसहसोपस्करंपरं शय्यामुपस्करैर्युक्तांप्रदद्याद्व्रतदेशिने वंदेव्यतीपातमहंमहांतं रवींदुसूनुंसकलेष्टलब्ध्यै समस्तपापस्यममक्षयोस्तुपुण्यस्यचानंतफलंममास्तु इतिसमर्च्यगुरुः परिपूज्यतेकटककुंडलकंठविभूषणैः सकलमेवसमर्प्ययथोदितयदुपलभ्यामिहशृणुतन्नहि धेनुंपयस्विनींदद्यात्सुवर्णांवरदक्षिणां तस्मैशय्यांसमासाद्यसारदारुमयींदृढां दंतपत्राचितांरम्यांहेमपद्मैरलंकृतां हंसतूलीप्रतिच्छन्नांशुभगंडोपधानिकां प्रच्छादनपटीयुक्तांधूपगंधाधिवासितां तांबूलकुंकुमक्षोदकर्पूरागुरुचंदनैः दीपकोपानहच्छत्रंप्रदद्याच्चामरासनं देहांतेसूर्यलोकायविमानैरत्नसप्रभैः अप्सरोगणसंभोग्यैर्नृत्यगीतविलासिभिः गत्वा कल्पार्बुदशतंमोदतेत्रिदशार्चितः तदंतेराजराजः स्याद्रूपसौभाग्यभाग्भवेत् कीर्त्याढ्योगुणपुत्रायुरारोग्यधनधान्यवान् प्रतापाज्ञामहैश्वर्ययुक्तोभोगीबहुश्रुतः जनसौभाग्यसंपन्नोयावज्जन्माष्टकायुतं दर्शेशतगुणंदानं तच्छतघ्नंदिनत्रयेशतघ्नंतच्चसंक्रांतौशतघ्नंविषुवेततःयुगादौतच्छतगुणमयनेतच्छताहतं सोमग्रहेतच्छतघ्नंतच्छतघ्नं रविग्रहे असंख्येयंव्यतीपातेदानंवेदविदोविदुःव्यतीपातेवैधृतौचदानस्यांतोनाविद्यतेव्यतीपातोविशेषेणसहिशक्तः प्रकीर्त्तितःउत्पत्तौलक्षगुणंकोटिगुणंभ्रमणताडिकायांतु अर्बुदगुणितंपतनेजपदानाद्यक्षयंपातिते जन्मद्वाविंशनाड्योभ्रमणंत्वेकविंशतिः व्यतीपातस्यपतनंदशसप्तस्थितिंविदुःसमर्पितंयद्व्यतिपातकालेपुनःपुनस्त्वद्रविशीतरश्मौ प्रयच्छतःकल्पशतार्बुदानिविवर्द्धतेतन्नहिहीयतेक्वचित् तस्मान्महित्वंव्यतिपातपूजांकुरुष्वचेत्पुण्यमनंतमिष्टं यदिस्थिरत्वंतववांछितंचेत्समस्तधारित्वमभीप्सितंते गणयित्वाव्यतीपातेतत्कालंवेत्तियोनरःसर्वपापहरौतस्यभवते

भानुभेश्वरौ पठतिलिखतियःशृणोतिचैतत्कथयतिपश्यतिकारयत्यवश्यं रविशशिदिवमाप्यसोऽपिदेवैश्चिरस
मयंपरिपूज्यमानआस्ते इतिवाराहपुराणोक्तंव्यतीपातयोगव्रतं अथव्यतीपातव्रतांतरंभविष्ये युधिष्ठिर
उवाच येनव्रतेनचीर्णेननपश्येद्यमशासनं परिपृच्छाम्यहंब्रह्मन्पापघ्नंव्रतमुत्तमं तद्व्रतंब्रूहिविप्रर्षेकृत्वाजगति
वैकृपां मार्कंडेयउवाच शृणुराजन्व्रतमिदंहयश्वेनपुराकृतं तेनैवराज्ञातद्दत्तंसूकरायचदुःखिने एकदामृग
यासक्तोहयश्वोराजसत्तमः श्रांतश्चरन्वनेराजन्दृष्टात्तत्रैवसूकरं दग्धपादकटिंचैवदग्धग्रीवमुखोदरं दृष्ट्वात
थाविधतनुंकृपांचक्रेदयापरः केनकर्मविपाकेनअवस्थांप्राप्तवानयं अहोकष्टमहोकष्टंशूकरेणेहभुज्यते अव
श्यमनुसर्त्तव्यंकृतंकर्मशुभाशुभं इत्युक्तातत्स्वरूपेणराजातंप्राहसूकरं इयतीकिमवस्थातेतन्ममब्रूहिसूकर त
च्छ्रुत्वान्नृपतेर्वाक्यंनिश्वसन्सूकरोब्रवीत् स्मृत्वापुराकृतंकर्मप्रत्युवाचाथतंनृपं राजन्नासमहंपूर्ववैश्योनिश्वस
खाभवं आशाकृद्योनदाताहमाश्रितेभ्यश्चकिंचन श्रुताश्चबहवोधर्माःपुराणश्रुतिचोदिताःतथापिपापबुद्ध्याहंनकरो
म्यात्मनोहितं आशापाशमनुप्राप्ताभग्नाशास्तेविनिर्गताःकृतंतुपापमेवाहनाकिंचित्सुकृतंकृतं एकदातुद्विजःकश्चिद्य
तोपातेगृहंमम आगतोयाचतेमांचनाकिंचिद्दत्तवानहं ततश्चकुपितोविप्रोममशापमथाददात् आशाग्नि
दह्यतेयद्वन्ममांगानिपृथक्पृथक् तथैवतवचांगानिदावाग्निःपुरुषाधम अरण्येनिर्जलेदेशेनिर्जनेद्रुमवर्जिते तत्र
शूकरयोनौत्वंप्रसूतिंसमवाप्नुहि प्रसादितोमयाविप्रःपुनरप्युक्तवांस्तदा ज्ञानित्वंशूकरत्वेपिइत्युक्त्वाथजगाम
सः तेनशापेनराजेंद्रशूकरत्वमवाप्तवान् अहंदुःखीतुसंजातोनिर्जनेनिर्जलेवने राजोवाच केनत्वंमुच्य
तेपापान्ममाचक्ष्वहशूकर केनशक्योसमाकर्त्तुंतवपापस्यसंक्षयः शूकरउवाच श्रूयतांममराजेंद्रमुक्तिःस्या
द्येनकर्मणा व्यतीप।तव्रतंनामकृतंराजंस्त्वयापुरा यथामातासुतस्येहसर्वथाहितकारिणी तथाराजन्व्रतमिद

मिहलोकेपरत्रच यथैवभ्युदितःसूर्य्यसमग्रंचतमोदहेत् इदंव्रतंतथैवेहसर्वपापंव्यपोहतिसकृत्स्मृतोयथाविष्णुर्नृणांपरमानिर्वृतिं ददात्येवनसंदेहस्तथाव्रतमिदंशुभं शतमिंदुक्षयेदानंसहस्रंतुदिनक्षये विषुवेशतसाहस्रंव्यतीपातेत्वनंतकं व्यतीपातव्रतस्यास्याविधानंशृणुतत्त्वतः माघेवाफाल्गुनेवापिमासेप्यस्मिन्यथाथिवा व्यतीपातादिनेयस्मिन्प्रारभेद्व्रतमुत्तमं तिलपूर्णंशरावंचसगुडंगुरवेर्प्पयेत् एवंद्वितीयेदातव्यंतृतीयेतुसमापयेत् सघृतंपायसंचैवदातव्यंचोत्तरत्रये एवंसंवत्सरस्यांतेदेवस्यार्चांतुकारयेत् शंखचक्रगदापाणिंपद्महस्तंहिरण्मयं वस्त्रयुग्मेनसंवेष्ट्यपूजयद्गरुडध्वजं गोक्षीरेणैवसंपूर्णंकांस्यभाजनमुत्तमं स्थापयेद्देवदेवस्यस्थानंतत्रैवकल्पयेत् शय्यांचसन्निधौतस्यस्थाप्यदेवमनुस्मरेत् अनंतशयनंदेवमनंतफलदंप्रभुं लक्ष्म्यासमन्वितंविष्णुंभक्त्यासंपूजयेद्गुरुं वैदिकेनैवमंत्रेणजातीपुष्पैःसमर्चयेत् पायसेनैवनैवेद्यंदेवायप्रार्थयेद्व्रती व्यतीपातव्रतंदेवतवानंतसमार्पितं भवत्वनंतफलदममजन्मनिजन्मनि देवदेवंहृषीकेशंप्रार्थयित्वाततोव्रती तत्सर्वंगुरवेदद्यात्श्रोत्रियायकुटुंबिने व्रतोपदेष्ट्रेविदुषेब्राह्मणायविशेषतः भूमिंवाथसुवर्णंवादक्षिणातुविधीयते ब्राह्मणान्भोजयित्वातुव्रतमेतत्समापयेत् इदंव्रतंत्वयादेवगृहीतंपूर्वजन्मनि स्वर्गापवर्गदंनृणांचानंतफलदंशुभं मुच्येयंकिल्विषात्तस्माच्छूकरत्वान्नसंशयः तेनैवमुक्तोहर्य्यश्वःशूकरंवाक्यमब्रवीत् मयाकृतमिदंपूर्वंतत्फलंतेददाम्यहं एवमुक्त्वानृपश्रेष्ठःशूकरायफलंददौ तत्क्षणात्तेनपुण्येनशूकरोमुक्तकिल्विषः मुक्तःशूकरदेहात्ससर्वाभरणभूषितः दिव्यंविमानमास्थायवाक्यंचेदमुवाचह हेजनाःकिंनजानीध्वंव्यतीपातव्रतोत्तमं इत्युक्त्वास्वर्गगःसोथराज्ञोवैपश्यतस्तदा तंदृष्ट्वाविस्मितोभूत्वाराजापिश्रद्दधेव्रतं ततोराजापुरंगत्वाव्रतंचाकारयज्जनान् सर्वश्चकृतवांस्तत्रव्यतीपातव्रतंशुभं ततोराज्यंचिरंकृत्वादेवदेवस्यचाक्रिणः हर्यश्वःप्राप्तवांस्तेनविष्णोस्तत्परमं

पदं अतस्त्वंकुरुराजेंद्र व्यतीपातव्रतोत्तमं सर्वपापक्षयकरंनृणामिहसुखप्रदम् इदंयःकुरुतेमर्त्यःश्रद्धाभावसमन्वितः सर्वपापविनिर्मुक्तोविष्णुलोकमवाप्नुयात् ययातुपुत्रकामिन्याकृतंसालभतेसुतान् स्त्रीकामिनेहतद्वत्सलभेन्नारीमनुत्तमां व्यतीपातव्रतमिदंव्यतीपातदिनेपठेत् ज्ञानवान्धनवान्श्रीमानिहैवचसुखीभवेत्यइदंशृणुयाद्भक्त्याविष्णुलोकेमहीयते इतिनारदीयपुराणोक्तंव्यतीपातव्रतम् अथव्रतविधिः तत्रमार्गशीर्षादिशुभमासेयदाव्यतीपातयोगः तद्दिनेनद्यादौव्रतीस्नात्वा पावमानादिजप्त्वा संकल्पंकुर्य्यात् तद्यथाओमद्येत्यादिसंकीर्त्यात्मनः निरतिशयैहिकसुखप्राप्तयेसकलपापक्षयपूर्वकदिव्यविमानारोहणगीतनृत्यविलासिअप्सरोगणवीज्यमानसकलभोगयुतकल्पकोटिसूर्यलोकनिवासोत्तरंपुत्रपौत्रादिसकलसंपत्सहितमहदैश्वर्य्यादिगुणयुक्तराजराजन्यकामोयथाभिलषित कामोव्यतीपातयोगव्रतंकरिष्ये इतिसंकल्प्य गणेशपूजादिसर्वांगनिर्वर्त्य शुद्धभूमौपंचरंगोपेतकमलेकलशस्थापनप्रकारेणशर्करापूरितताम्रकलशंप्रतिष्ठाप्य तत्रताम्रमयेपूर्णपात्रेकांचनेनाब्जेअष्टादशभुजंकांचनंव्तीपातस्वरूपंनाममंत्रेणप्रतिष्ठाप्यपूजयेत् षोडशोपचारपूजांपुरुषसूक्तमंत्रैः सामान्यपूजावत्कुर्य्यात् ततःपंचरत्नान्वितपुष्पांजलिं दद्यात् तत्रमंत्रः नमस्तेस्तुव्यतीपातसोमसूर्य्यसुतप्रभो यद्दानादिकृतंकिंचित्तदनंतमिहास्तुते इतिदत्त्वा यथाशक्तिसुवर्णपुष्पादिसमर्प्य पुराणपठनादिनारात्रिं नयेत् तद्दिनेउपवासमेवकुर्य्यात् प्रातः स्नात्वानित्यंनिर्वर्त्यदेवंसंपूज्य तत्पीठंसुवर्णसहितंतस्मैदत्त्वा ब्राह्मणपुरस्सरःस्वयंभुंजीत एवंमासिमासिव्यतीपातदिनेव्रतंत्रयोदशव्यतीपातपर्यंतंव्रतंकृत्वा चतुर्दशेव्यतीपाते कुर्य्यादुद्यापनंनरः इतिकथायामुक्तम् तद्यथापूर्वोक्तसंकल्पांतेआचरितव्यतीपातव्रतस्यसांगता पूर्वकयथोक्तफलसिद्धयेव्यतीपातव्रतोद्यापनंकरिष्ये इतिसंकल्प्यआचार्य्यंकृत्वासर्वतोभद्रकलशेताम्रमयंपूर्णपात्रंशर्करासहि

तंनिधाय तत्राष्टादशभुजंसौवर्णंव्यतीपातविग्रहंसंपूज्य अग्निंप्रतप्य अन्वादध्यात् तत्रप्रधानंव्यतीपातं पायससघृतातिलपूगीफलद्रव्यचतुष्टयेनप्रत्येकमष्टोत्तरशतसंख्याकाहुतिभिः ब्रह्मादिदेवताश्चैकैकयाज्याहुत्या यक्ष्ये एवंहोमंसंपाद्य ततःआचार्यंसंपूज्य तस्मैसोपस्करांशय्यांपीठंचदद्यात् तत्रमंत्रःवंदेव्यतीपातमहं महांतंरवींदुसूनुंसकलेष्टसिद्ध्यै समस्तपापस्यममक्षयोस्तुपुण्यस्यवृद्धिर्ममसर्वदास्तु इतिदत्त्वा व्रतपूर्त्तयेगांच दत्त्वा ब्राह्मणान्भोजयेदिति अथप्रकारांतरेण नारदीयपुराणोक्तंव्यतीपातव्रतविधानं ओमद्यात्मनःसकलपापक्षयपूर्वकाभीष्टसिद्ध्यनंतरविष्णुसायुज्यकामःव्यतीपातव्रतंकरिष्ये व्यतीपातदिनेप्रातः स्नानादिकृत्वा पंचरंगोपेतवेद्यांगोक्षीरपूरितकांस्यभाजनंचतुर्भुजंचक्राद्यायुधोपेतंसौवर्णंपद्महस्तलक्ष्म्यान्वितंविष्णुं विष्णोरराटमसीतिमंत्रेणसंस्थाप्य जातीपुष्पादिनापुरुषसूक्तेनसंपूज्य शर्करोपेतंपायसोपहारंनिवेद्य देवंप्रार्थयेत् व्यतीपातदिनेदेवतवसर्वंसमर्पितं भवत्वनंतफलदंममजन्मनिजन्मनि ततोद्विजंसंपूज्य तिलपूर्णशरावंसगुडंससुवर्णंदत्त्वा सोपस्करांशय्यांपीठंगांचदत्त्वा ब्राह्मणान्भोजयित्वाभुंजीत इतिव्यतीपातपुरःसराणियोगव्रतानि व्यतीपातयोगेब्रह्मांडदानमुक्तंनारदीयेमत्स्यपुराणेच ब्रम्हाब्रह्मांडमाहात्म्यमाधिकृत्याब्रवीत्पुनः तद्ब्रह्मांडपुराणंतुब्रह्मणासमुदाहृतं योहिदद्याद्व्यतीपातेऊर्णावस्त्रयुगान्वितं राजसूयसहस्रस्यफलमाप्नोति मानवः इतिब्रह्मांडपुराणदानं अथबवादिकरणव्रतानि शुक्लप्रतिपदायाःपरार्धमारभ्यबवादिसप्तकरणानिप्रतिपत्तिथिभागद्वयेकरणद्वयंभवति तानिचबव बालव कौलव तैतिल गर वणिज विष्टिरितिसप्तचकरणानि एतानिचकृष्णपक्षचतुर्दशीपूर्वार्धयावद्भवंति कृष्णचतुर्दशीपरदलादारभ्यशकुनिकरणंभवति अमावास्यादलद्वयंचतुष्पदनागाख्येकरणेभवतः शुक्लप्रतिपदायाःपूर्वार्धेकिंस्तुघ्नकरणंभवति अथैषांव्रतविधान

155

हेमाद्रौ माघशुक्लपक्षेप्रतिपदोत्तरभागेनवकरणोपवासः कलशेताम्रपात्रंनिधाय तत्रकर्षमितसुवर्णप्रतिमायानच्युतंगंधादिभिःपूजयित्वा अष्टाक्षरमंत्रंजपेत् एवंषड्वारंव्रतंकृत्वा सप्तमेउद्यापनंकुर्य्यात् सप्तब्राह्मणान्भोजयित्वादक्षिणांदद्यात् एवंबालवादिविष्ट्यंतेषु सप्तकरणेषुव्रतंकुर्य्यात् एवंकृतंराजसूयाश्वमेधयोःफलं भवतीति अथभविष्योत्तरोक्तंभद्राव्रतं युधिष्ठिरउवाच भद्रानामेतिकाप्येषाकथंवापूज्यतेनरैः कथाविधानंकिंतस्याव्रतस्यममकथ्यतां श्रीकृष्णउवाच सुतामार्तंडदेवस्यछायायांजनितापुरा शनैश्चरस्यभगिनी साःसौदर्यभयंकरी साजातमात्राभुवनंग्रस्तुंसमुपचक्रमे निर्य्यातियादिकार्य्येपिकाश्चित्तस्यपुरःस्थिता विघ्नंकरोतिस्वपतोभुंजानस्यास्थितस्यच सर्वविघ्नकरीरौद्रासमाजोत्सवनाशिनी नित्योद्वेगकरीपार्थविनाशयातिया जगत् तांतुदुर्विनयासक्तांदृष्ट्वादेवोदिवाकरः चिंतयामासकस्यापियच्छाम्येनांसुमध्यमां कन्यादुर्विनयाद्गेहे पितादोषेणगृह्यते तस्मात्सर्वप्रयत्नेनकन्यादेयाविजानता चिंत्यैवमशुभांभद्रांयस्ययच्छतितांरविः जनयत्येषविलयंसुरराक्षसाकिन्नरं मंडपंमंडपारंभेविनाशयतितत्क्षणात् साबिताचिंतयामासकस्येयं प्रतिपाद्यतां विरूपादुष्टहृदयागर्दभास्यात्रिपादिका ऊर्द्धरोमामहादंष्ट्रास्वेच्छाचारविहारिणी दत्ताप्येषातुसौख्याय भवतीहनाकिंचन एवंवितर्कयन्देवआस्तेयावद्दिवस्पतिः तावत्तयाजगत्सर्वंदुष्टयासमभिद्रुतं अथाजगामसवितुःपार्श्वेंब्रह्मांडसंभवः उपालंभंददौचाथविष्टेर्दौष्ट्यमशेषता भास्करस्तमुवाचेदंस्वयंभूर्भुवनेश्वरः भवान्कर्त्ताचहर्त्ताचकस्मादेवंप्रभाषते एवमुक्तस्तदाब्रह्माभास्करेणामितद्युतिः उवाचाविष्टिमानाद्यशृणुभद्रेमयोदितं करणैःसहवर्त्तस्वववबालवकौलवैः सप्तमेर्द्धदिनप्राप्तेयदभीष्टंकुरुष्वतत् यात्राप्रवेशमांगल्यकृषिवाणिज्यकादिकं भक्षयस्वाभिमुखगान्नरानुन्मार्गगामिनः नोद्वेजनीयोहिजनोभवत्यादिवसत्रयं पूज्यासुरासुराणांत्वंदिवसार्द्धंभ

विष्यति उल्लंघ्ययेप्रवर्त्तंतिभद्रांत्वांनिर्भयानराः तेषांविनाशयशुभंकार्याकार्येसुनिश्चितं एवमुक्त्वागतोब्रह्माभद्रापिभुवनत्रयं बभ्रामोद्भ्रांतहृदयाभीषयंतीसुरासुरान् एवमेषासमुत्पन्नाविष्टिरिष्टविनाशिनी निर्वेदितेयंकौंतेयतस्मात्तांपरिवर्जयेत् सिंहग्रीवासप्तभुजात्रिपदापुच्छसंयुता खरोत्तमांगवदनाप्रेतारूढाकृशोदरी ज्वलच्चक्षुःसंदधती हस्तैःपाशासिशक्तिकाःनरमुंडाश्चमालांश्चमुद्राःसप्तविधास्मृताःसजलजलदवर्णादीर्घनासोष्ठदंष्ट्रा विपुलहनुकपोलापिंडकोद्बद्धजंघा अनलशतसहस्त्रंचोद्गिरंतीसमंतात्पततिभवनमध्येकार्यनाशायविष्टिः१ भानोःसुताकेतुशताग्रजाताकृशांगयष्टिःसततंकुचैला देवैर्नियुक्ताकरणांतसंस्थाविष्टिस्तुसर्वत्रविवर्जनीया २ मुखेस्याद्घटिकाःपंचद्वेतुकंठेयदास्थिते हृदिचैकादशप्रोक्ताश्चतस्त्रोनाभिमंडले पंचकट्यांतुविज्ञेयाःपुच्छेतिस्त्रोजयावहाः मुखेकार्यविनाशायग्रीवायांधननाशिनी हृदिप्राणहराज्ञेयानाभ्यांतुकलहावहा कट्यामर्थपरिभ्रंशोविष्टिपुच्छेध्रुवंजयः पृथिव्यांयानिकार्य्याणिअशुभानिशुभानिच तानिसर्वाणिसिध्यंतिविष्टिपुच्छेनृपोत्तम यमानिलेंदुक्रूरेशयाम्यवातेंद्रादिक्क्रमात् संख्यासमानप्रहरैर्विष्टदुष्टमुखंयतः करालीनंदिनीरौद्रासुमुखीदुर्मुखी तथा त्रिशिराभैरवीहंसीत्वष्टापैतास्तुविष्टयः धन्यात्वधोमुखीभद्रामहामारीखरानना कालरात्रिर्महारात्रिर्विष्टिश्चकुलपुत्रिका भैरवीचमहाकालीअसुराणांक्षयंकरी द्वादशैतानिनामानिप्रातरुत्थाययःपठेत् नचव्याधिभयंतस्यरोगीरोगात्प्रमुच्यते ग्रहाःसर्वेनुकूलास्युर्नचविघ्नादिजायते रणेराजकुलेद्यूतेसर्वत्रविजयोभवेत् यश्चपूजयतेनित्यंशास्त्रोक्तविधिनानरः तस्यसर्वार्थसिद्धिस्तुजायतेनात्रसंशयः तस्मान्नरेणकौंतेयवर्जनीयाफलार्थिनायेनोपवासविधिनाव्रतेनचयुधिष्ठिर पूजितातोषमायातितद्देवकथयामिते यस्मिन्दिनेभवेद्भद्रातस्मिन्नहनिभारत उपवासस्यनियमंकुर्य्यान्नारीनरोथवा यदिरात्रौभवेद्विष्टिरेकभक्तंदिनत्रयं कार्य्यस्ते

नोपवासःस्यादितिपौराणिकाविदुः प्रहरस्योपरियदादिवाविष्टिःप्रजायते उपवासस्तदाकार्य्यएकभक्तमतो
न्यथा सर्वौषधिजलैःशुद्धैःसुगंधामलकैस्तथा नद्यांतडागेथगृहेस्नानंसर्वत्रशस्यते देवान्पितॄन्समभ्यर्च्यत
तोदर्भमयींशुभां विष्टिंकृत्वापुष्पधूपैर्नैवेद्यादिभिरर्चयेत् होमंनामभिर्विष्टेःशतमष्टोत्तरंनृप भुंजीतदत्त्वावि
।यतिलान्पायसमेवच सतैलंकृशरंभुक्त्वापश्चाद्भुंजीतकामतः छायासूर्यसुतेदेविविष्टेदुष्टार्थनाशिनी पूजि
तासिमयाभक्त्याभद्रेभद्रप्रदाभव उपोष्याविधिनानेनदशसप्तयथाक्रमात् उद्यापनंततःकुर्य्यात्पूर्ववत्पूज्यभान
वीं स्थापयित्वायसेपीठेकृशरान्नंनिवेदयेत् परिधाप्यंकृष्णयुगंस्तुत्वामंत्रेणतांपुनः ब्राह्मणायपुनर्दद्याल्लोहंतै
लंतिलांस्तथा कृष्णांसवत्सांगामेकांतथैवंकृष्णकंबलं दक्षिणांचयथाशक्त्यादत्त्वाभद्रांविसर्जयेत् यएवंकुरुते
पार्थसम्यग्भद्राव्रतंनरः विघ्नोनजायतेतस्यकार्य्यारंभेकदाचन राक्षसावापिशाचावापूतनाशाकिनीग्रहाः नपी
डयंतितंमर्त्यंयोभद्राव्रतमाचरेत् नचैवेष्टवियोगःस्यान्नहानिस्तस्यजायते देहांतेयातिसपदंभास्करस्यनसंशयः
सूर्य्यात्मजातिभयदाभगिनीशयनेर्यामर्त्यान्भ्रमत्यातिरपाकरणक्रमेण तांकृष्णभासुरमुखींसमुपोष्यविष्टिमिष्टार्थ
सिद्धिमबुधोपिनरोभ्युपैति ॥ इतिभविष्योत्तरोक्तंभद्राव्रतम् अथतत्रैवोक्तंभद्राव्रतांतरम् ॥ कृष्णउवाच ॥
अथान्यदपितेवच्मिविष्टिव्रतमनुत्तमं यत्कृत्वाविष्टितोनस्याद्भयंक्वापियुधिष्ठिर सुकरंसुगुणंचेष्टंसर्वकामार्थदंनृ
णां परंप्रीतिकरंभानोःसर्वविघ्नोपशांतिदं मार्गशीर्षेमलेपक्षेचतुर्थ्यामारभेद्बुधः संपूज्यब्राह्मणंश्रेष्ठंविघ्नादौभ
रतर्षभ प्रागुक्तांपूज्यतांदेवींमंत्रमेतदुदीरयेत् भद्रेभद्रायतेभद्रंकरिष्येव्रतमित्यहं निर्विघ्नंकुरुमेदेविकार्य्य
सिद्धिंविभावय सुस्नातःपूज्यतामेवंब्राह्मणंचस्वशक्तितः ततोभुंजीतराजेंद्रयावद्भद्रानजायते अथचांते
पिभद्रायाकामतोकाम्यतःशुचिः नाकिंचिद्भक्षयेत्प्राज्ञोयाद्भद्राप्रवर्त्तते अनेनविधिनापार्थप्रतिभद्रंसमाच

रैत् नरोवायदिवानारीसर्वकामार्थसिद्धये संवत्सरेतुसंपूर्णेप्रतिमांकारयेद्बुधः लौहींशिलामयींवापि दारुजांवस्वशक्तितः शक्त्याचोद्यापनंकृत्वास्थापयित्वायथाविधिपूजयेद्भक्तिमान्विप्रोमंत्रैरेभिरुदारधीः पूजितासियथापूर्वमिंद्रेणधनदेनच विष्णुनाशंकरेणाथतथात्वांपूजयाम्यहं निर्विघ्नेनार्थसंसिद्धिर्यथातेषांकृतापुरा तथामपापिभक्तस्यभद्रेत्वंभद्रदाभव अज्ञानादथवादर्प्पात्त्वामुल्लंघ्यकृतंहियत् तत्क्षमस्वाशु भोमातर्दीनस्यशरणार्थिनः इतिकुर्य्याद्यथाशक्त्यावित्तशाठ्यविवर्जितः अशक्तःपरकीयांवापूजयित्वानराधिप अभावेलेखजांकृत्वाविधिंनिष्पादयेद्बुधःएवंहिकुरुतेयस्तुभक्त्याभद्राव्रतंनरः भद्रायामपिकार्य्याणितस्यासिद्ध्यंत्यसंशयं इहलोकेसुखंभुक्त्वादीर्घायुर्व्याधिवर्जितः ततोंतेस्वर्गतिंप्राप्यमोदतेसुरराडिव एतत्पुरामहेंद्रेणचीर्णंवृत्रजिघांसया विमानार्थंकुवेरेणनीतंयत्त्रिदशारिणा शंभुनात्रिपुरांतायपांचजन्यायविष्णुना भद्रासुभद्रंभवतीहतेषांयेभक्तिपूर्वकमिदंव्रतमादरेण भद्राभिधानमभिधायमनोनुगंयेकुर्वंतितेवृजिनमेवनचाप्नुवंति इतिभविष्योत्तरोक्तंद्वितीयंभद्राव्रतम् स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृतद्रघुपतेःपादांवुजार्चारतोजीयात्पुत्रकलत्रमित्रसहितः संपालयन्क्ष्मांचिरम् १ रणवीरसिंहभूपेशकारितेकृत्यसागरेअभूत्संक्रांतिवारादिकृत्यरत्नसमुच्चयः इतिश्रीमत्सूर्यवंशावतंसरघुकुलतिलकश्रीरणवीरसिंहमहाराजकारितेकृत्यरत्नाकरेसंक्रांतिवारादिकृत्यरत्नसमुच्चयः समाप्तः

अथमत्स्यपुराणोक्तानिषष्टिव्रतानि

नंदिकेश्वरउवाच ॥ अथातः संप्रवक्ष्यामि व्रतषष्टीमनुत्तमां रुद्रेणाभिहितांदिव्यांमहापातकनाशिनीं नक्तमब्दंचरित्वातुगवासार्धकुटुंबिने हेमचक्रंत्रिशूलंचदद्याद्विप्रायवाससी शिवारुद्रौनतोस्मीतिशिवलोकेमहीयते एतद्देवव्रतंनाममहापातकनाशनम् ॥ इतिदेवव्रतम् ॥ यस्त्वेकभक्तेनसमाक्षिपेद्धेमवृषान्वितां दत्त्वा तिलमयींधेनुंसयातिशांकरंपदं एतच्छिवव्रतंनामपापशोकविनाशनम् ॥ इतिशिवव्रतम् २ यस्तुनीलोत्पलंहैमंशर्करापात्रसंयुतं एकांतरितनक्ताशीसमांतेवृषसंयुतं सपदंवैष्णवंयातिलीलाव्रतमिदंस्मृतम् ॥ इतिलीलाव्रतम् ॥ ३ आषाढादिचतुर्मासमभ्यंगंवर्जयेन्नरः भोजनोपस्करंदद्यात्सयातिभुवनंहरेः जनप्रीतिकरंनामप्रीतिव्रतमिहोच्यते ॥ इतिप्रीतिव्रतम् ॥ ४ वर्जयित्वामधौयस्तुदधिक्षीरघृतैक्षवान् दद्याद्वस्त्राणि सूक्ष्माणि रसपात्रैः सुसंवृतं संपूज्यविप्रमिथुनंगौरीमेप्रीयतामिति कल्पंविष्णुपदेस्थित्वा विशोकः स्यात्पुमान्नृपः एतत्कामव्रतंनामसदाशोकविनाशनम् ॥ इतिकामव्रतंनामगौरीव्रतम् ॥ ५ आषाढादौव्रतीयस्तुवर्जयेन्नखकर्त्तनं वार्त्ताकांश्चचतुर्मासानथसर्पिघटादिकं कार्त्तिक्यांतत्पुनर्हैमंब्राह्मणायानिवेदयेत् सरुद्रलोकमाप्नोतिरुद्रव्रतमिदंस्मृतम् ॥ इतिरुद्रव्रतम् ॥ ६ वर्जयेद्यस्तुपुष्पाणिहेमंतेशिशिरऋतू पुष्यत्रयेतुवारुण्यांकृत्वाशक्त्याथकांचनं दद्याद्विकालवेलायांप्रीयेतांशिवकेशवौ दत्त्वापरंपदंयातिसौम्यव्रतमिदंस्मृतं इतिवारुण्यांसौम्यव्रतम् ॥ ७॥ फाल्गुनादितृतीयायांलवणंयस्तुवर्जयेत् समांतेशयनंदद्याद्गृहंचोपस्करान्वितं संपूज्यविप्रमिथुनंभवानीप्रीयतामिति गौरीलोकेवसेन्नित्यंसौभाग्यव्रतमुच्यते ॥ इतिसौभाग्यव्रतम् ॥ ८

संध्यामौनेननरः कृत्वा समांतेघृतकुंभकं वस्त्रयुग्मंतिलंघंटांब्राह्मणायनिवेदयेत् सारस्वतंपदंयातिपुनरावृत्तिर्दुर्लभं एतत्सारस्वतंनामरूपविद्याप्रसाधकम् ॥ इतिसारस्वतव्रतम् ॥ ९ लक्ष्मीमभ्यर्च्चयपंचम्यामुपवासी भवेन्नरः समांतेहेमकलशंदद्याद्धेनुसमन्वितं सवैष्णवंपदंयातिलक्ष्मीवान्स्याच्चजन्मनि एतत्संपद्व्रतंनामसर्वपापप्रणाशनं इतिसंपद्व्रतम् १० कृत्वोपलेपनंशंभोरग्रतःकेशवस्यच यावदब्दंपुनर्दद्याद्धेनुंकालघटान्वितां जन्मायुतंशतायुःस्यात्ततःशिवपुरंव्रजेत् एतत्सर्वव्रतंनामसदापापविनाशनम् इतिसर्वव्रतम् ११ अश्वत्थंभास्करंगंगाप्रणम्यैकत्रवाग्यतः एकभक्तंनरःकुर्य्यादब्दमेकंविमत्सरः व्रतांतेविप्रमिथुनंपूज्यधेनुत्रयान्वितं वृक्षंहिरण्मयंदद्यात्सोश्वमेधफलंलभेत् एतत्कीर्त्तिव्रतंनामभूरिकीर्त्तिफलप्रदं इतिकीर्त्तिव्रतम् १२ घृतेनस्नपनंकुर्य्याच्छंभोर्वाकेशवस्यवा अक्षताभिःसमंकुर्य्यात्पद्मंगोमयमंडले समांतेहेमकमलंतिलधेनुसमन्वितं शुद्धमष्टांगुलंदद्याच्छिवलोकेमहीयते सामगायततश्चैवसामव्रतमिहोच्यते इतिसामव्रतम् १३ नवम्यामेकभक्तंच कृत्वाकन्याश्चशक्तितः भोजयित्वासमादद्याद्धेनुंकांचनवाससी हेमसिंहंचविप्रायदत्त्वाशिवपदंव्रजेत् जन्मावुंदंसुरूपःस्यात्शत्रुभिश्चापराजितः एतद्वीरव्रतंनामनैवारीणांसुखप्रदं इतिवीरव्रतम् १४ यावत्समाभवेद्यस्तुपंचदश्यांपयोव्रतः समाप्तेश्राद्धकृद्दद्याद्गावःपंचपयस्विनीः वासांसिचपिशंगानिदधिकुंभयुतानिच सयातिवैष्णवंलोकेपितॄणांतारयेच्छतं कल्पांतेराजराजःस्यात्पितृव्रतमिदंस्मृतं इतिपितृव्रतम् १५ चैत्रादिचतुरो मासान्जलंदद्यादयाचितं व्रतांतेमणिकंदद्यादन्नवस्त्रसमन्वितं तिलपात्रंहिरण्यंचब्रह्मलोकेमहीयते कल्पांतेभूपतिर्भूयादानंदव्रतमुच्यते इत्यानंदव्रतम् १६ पंचामृतेनस्नपनंकृत्वासंवत्सरंप्रभोः वत्सरांतेपुनर्दद्यात्सुवर्णंविधिवन्नरः विप्रायदद्यात्शंखंचसपदंयातिशांकरं राजाभवतिकल्पांतेघृतिव्रतमिदंस्मृतम् इतिघृतिव्रतं १७

अर्चयित्वापुनर्मासमब्दांतेगोप्रदोभवेत् तद्वद्धेममृगंदद्यात्सोऽश्वमेधफलंलभेत् अहिंसाव्रतमित्युक्तंकल्पांतेभू
पतिर्भवेत् ॥ इत्यहिंसाव्रतम् ॥ १८ माघेमास्युषसिस्नानंकृत्वादांपत्यमर्चयेत् भोजयित्वायथाशक्त्यामा
ल्यवस्त्रविभूषणैः सूर्यलोकेवसेत्कल्पंसूर्यव्रतमिदंस्मृतम् ॥ इतिसूर्यव्रतम् ॥ १९ आषाढादिचतुर्मासंप्रातः
स्नायीभवेन्नरः विप्रेषुभोजनंदत्त्वाकार्त्तिक्यांगोप्रदोभवेत् सवैष्णवंपदंयातिविष्णुव्रतमिदंस्मृतम् ॥इतिविष्णुव्रतम्
॥ २० अयनादयनंयावद्वर्जयेत्पुष्पसर्पिषी तदंतेपुष्पदानानिघृतधेन्वासहैवतु दत्त्वाशिवपदंयातिविप्रा
यघृतवाससी एतच्छीलव्रतंनामशीलारोग्यफलप्रदम् ॥ इतिशीलव्रतम् ॥ २१ संध्यादीपप्रदोयस्तुसमांतेतैलंव
र्जयेत् समाप्तेदीपिकांदद्याच्चक्रशूलेचकांचने वस्त्रयुग्मंचविप्रायसतेजस्वीभवेदिह रुद्रलोकमवाप्नोतिदीपव्रतमि
दंस्मृतम् ॥इतिदीपव्रतम् ॥ कार्त्तिकादितृतीयायांप्राश्यगोमूत्रयावकं नक्तंचरेदब्दमेकंसमांतेगोप्रदोभवेत् गौरी
लोकेवसेत्कल्पंततोराजाभवेदिहएतद्भद्रव्रतंनामसदाकल्याणकारकम् ॥ इतिभद्रव्रतम् २३ वर्जयेच्चैत्रमासेषुसदा
गंधानुलेपनंशुक्तिंगंधभृतांदत्त्वाविप्रायसितवाससी वारुणंपदमाप्नोतिदृढव्रतमिदंस्मृतम् ॥ इतिदृढव्रतम् २४
वैशाखेपुष्पलवणेवर्जयित्वातुगोप्रदः भूत्वाविष्णुपदेकल्पंस्थित्वाराजाभवेदिह एतत्कांतिव्रतंनामकांतिकीर्त्तिफ
लप्रदम् ॥ इतिकांतिव्रतम् ॥ २५ ब्रह्माणंकांचनंकृत्वातिलराशिसमन्वितं त्र्यहंतिलप्रदोभूत्वावह्निंसंत
र्प्यसद्विजं संपूज्यविप्रदांपत्यौमाल्यवस्त्रविभूषणैः शक्तितस्त्रिपलादूर्ध्वंविश्वात्माप्रीयतामिति पुण्येह्निपद्म
शयनंब्रह्मयात्यपुनर्भवं एतद्ब्रह्मव्रतंनामनिर्वाणफलदंनृणाम् ॥ इतिब्रह्मव्रतम् ॥ २६ यश्चोभयमुखींदद्यात्प्रभूतक
नकावृतां दिनंपयोव्रतस्तिष्ठेत्सयातिपरमंपदं एतद्धेनुव्रतंनामपुनरावृत्तिदुर्लभम् ॥ इतिधेनुव्रतम् ॥ २७
त्र्यहंपयोव्रतः स्थित्वाकांचनंकल्पपादपंपलादूर्ध्वंयथाशक्त्यातंडुलंसूपसंयुतं दत्त्वाब्रह्मपदंयातिकल्पवृक्षव्रतंस्मृतं

इतिकल्पवृक्षव्रतं २८ शक्तितस्त्रिपलादूर्ध्वंमहींकृत्वाचकांचनीं दिनंपयोव्रतस्तिष्ठेद्रुद्रलोकेमहीयते धराव्रतमिदंप्रोक्तंसप्तकल्पशतानुगं इतिधराव्रतम् माघेमास्यथचैत्रेवागुडधेनुप्रदोभवेत् गुडव्रतस्तृतीयायांगौरीलोकेमहीयते महाव्रतमिदंनामपरमानंदकारकं इतिमहाव्रतं ३० पक्षोपवासीयोदद्याद्विप्रायकपिलाद्वयं सब्रह्मलोकमाप्नोतिदेवासुरसुपूजितं कल्पांतेराजराजःस्यात्प्रभाव्रतमिदंस्मृतं इतिप्रभाव्रतम् ३१ वत्सरंत्वेकभक्ताशीसभक्ष्यजलकुंभदः शिवलोकेवसेत्कल्पंप्राप्तिव्रतमिदंस्मृतं इतिप्राप्तिव्रतम् ३२ नक्ताशीत्वष्टमीषुस्याद्वत्सरांतेचगोप्रदः पौरंदरंपदंयातिसुगतिव्रतमुच्यते इतिसुगतिव्रतम् ३३ यश्चेंधनानिविप्रायवर्षादिचतुरोऋतून् घृतधेनुप्रदोंतेचसपरंब्रह्मगच्छति वैश्वानरव्रतंनाम्नसर्वपापप्रणाशनं इतिवैश्वानरव्रतम् ३४ एकादश्यांचनकाशीयश्चक्रंविनिवेदयेत् समांतेवैष्णवंहोमंसविष्णोःपदमाप्नुयात् एतद्विष्णुव्रतंनामकल्पांतराज्यभाग्भवेत् इतिविष्णुव्रतम् ३५ पायसाशीसमांतेतुददद्विप्रायगोयुगं लक्ष्मीलोकेवसेत्कल्पमेतद्देवीव्रतंस्मृतं इतिदेवीव्रतम् ३६ सप्तम्यांनक्तभुग्दद्यादब्दांतेगांपयस्विनीं ससूर्यलोकमाप्नोतिभानुव्रतमिदंस्मृतम् ॥ ३७ ॥ चतुर्थ्यांनक्तभुग्दद्यादब्दांतेहेमवारणं व्रतंवैनायकंनामशिवलोकफलप्रदं इतिविनायकव्रतम् ॥ ३८ ॥ यश्चोपवासीसप्तम्यांसमांतेहेमपंकजं गाश्चस्वशक्तितोदद्याद्व्रतांतेहेमसंयुताः एतत्सौरव्रतंनामसूर्यलोकफलप्रदं इतिसौरव्रतम् ३९ द्वादशद्वादशीर्यस्तुसमांतेपोषिता पुनःगोवस्त्रकांचनैर्विप्रान्पूजयेद्भक्तितोनरःपरमंपदमाप्नोतिहरिव्रतमिदंस्मृतम् इतिहारिव्रतम् ॥ ४० ॥ चतुर्दश्यांचनक्ताशीसमांतेगोयुगप्रदः शैवंपदमवाप्नोतिवृषव्रतमिदंस्मृतम् इतिवृषव्रतम् ॥ ४१ ॥ कृच्छ्रंकृत्वागोप्रदःस्याद्भोजनंशक्तितःपरं विप्राणांशांकरंयातिप्राजापत्यमिदंव्रतम् ॥ इतिप्राजापत्यव्रतम् ॥ ४२ ॥ चतुर्दश्यांचनक्ताशीसमांतेगोयुगप्रदः

शैवंपदमवाप्नोतित्रैयंबकमिदंव्रतम् इतित्रैयंबकव्रतम् ४४ सप्तरात्रोषितोदद्याद्घृतकुंभंद्विजायच घृतव्रतमिदंप्रा
हुर्ब्रह्मलोकफलप्रदम् इतिघृतव्रतम् ४५ आशाकाशैःसमंदद्याद्धेनुमन्नंपयास्विनीं शक्रलोकेवसेत्कल्पमिदमिं
द्रव्रतंस्मृतम् इतींद्रव्रतम् ४६ अनाग्निपक्वमश्नातितृतीयायांतुयोनरः गांदत्त्वाशिवमभ्येतिपुनरावृत्तिवर्जितं इ
दमानंदकृत्पुंसांश्रेयोव्रतमिदंस्मृतम् इतिश्रेयोव्रतम् ४७ हैमंपलद्वयादूर्ध्वरथमश्वयुगान्वितं एतत्कृत्वोपवासी
स्याद्दिविकल्पशतंवसेत् कल्पांतेराजराजःस्यादश्वव्रतमिदंस्मृतं इत्यश्वव्रतम् ४८ तद्वद्धेमरथंदद्यात्कार्त्तिक्यां
संयतोनरः सत्यलोकेवसेत्कल्पसहस्रमथभूपतिः भवेदुपोषितोभूत्वारथव्रतमिदंस्मृतम् इतिहारिरथव्रतम् ४९
मुखवासंपरित्यज्यसमांतेगोप्रदोभवेत् यक्षाधिपत्यमाप्नोतिसुमुखव्रतमुच्यते इतिसुमुखव्रतम् ५० चांद्रा
यणंतुयःकुर्याद्धेमचंद्रंनिवेदयेत् चंद्रलोकफलप्रदंचंद्रव्रतमिदंस्मृतं इतिचंद्रव्रतम् ५१ ज्येष्ठेपंचतपाःसायंहेमधे
नुप्रदोदिवं यात्यष्टमीचतुर्दश्योरौद्रव्रतमिदंस्मृत इतिरौद्रव्रतम् ५२ सकृद्वितानकंदद्यात्तृतीयायांशिवालये समां
तेधेनुदोयातिभवानीव्रतमुच्यते इतिभवानीव्रतम् ५३ माघमास्यार्द्रवासःस्यात्सप्तम्यांगोप्रदोभवेत् दिविकल्पमु-
षित्वेहराजास्याद्भुवनत्रये इतिभुवनव्रतम् ५४ त्रिरात्रोपोषितोदद्यात्फाल्गुण्यांभुवनंशुभं आदित्यलोकमाप्नो
तिधामव्रतमिदंस्मृतं इतिधामव्रतम् ५५ त्रिसंध्यंपूज्यदंपत्योरुपवासीविभूषणैः ददेद्धाममवाप्नोतिमोक्षमैंद्रव्रता
दिह इत्यैंद्रव्रतम् ५६ दत्त्वासितद्वितीयायामिंदोर्लवणभाजनं समांतेगोप्रदोयातिविश्रामंशिवमंदिरे कल्पांतेराज
राजःस्यात्सोमव्रतमिदंस्मृतं इतिसोमव्रतम् ५७ दशम्यामेकभक्ताशीसमांतेदशधेनुदः दिशश्चकांचनीर्दद्याद्ब्र
ह्मांडाधिपतिर्भवेत् एतद्विश्वव्रतंनाममहापातकनाशनम् इतिविश्वव्रतम् ५८ पंचपंचदशीःस्थित्वाएकभ
क्तेनमानवः संपूज्यपूर्णिमांदेवींलिखित्वाचंदनेनच ततःपंचघटान्पूर्णान्पयोदधिघृतेनच मधुनासितखंडेन

ब्राह्मणायोपपादयेत् पंचकुंभप्रदानेनभूतानांतुष्टिरस्नुते एतत्पंचघटंनामव्रतंपुष्टिप्रदायकं इतिपंचघटव्रतम् ५९ यातुनारीपिबेत्तोयंजलधारांनिपातयेत् समांतेघृतसंपूर्णांददद्वर्द्धनिकांनवां एतद्धाराव्रतंनामसर्वरोगहरंपरं कांतिसौभाग्यजननंसपत्नीदर्पनाशनम् इतिधाराव्रतम् ॥ ६० ॥ यःपठेच्छृणुयाद्वापिषष्टिव्रतमनुत्तमं मन्वंतरशतंसोपिगंधर्वाधिपतिर्भवेत् षष्ठिव्रतंनारदपुण्यमेतत्तवोदितंविश्वजनीनमन्यत् श्रोतुंतवेच्छातदुदीरयाशुप्रियेषुकिंवाकथनीयमन्यत् इतिमत्स्यपुराणोक्ताव्रतषष्टिः ॥ ६० ॥ भविष्योत्तरेत्वेतान्येवपंचाशीतिव्रतानीत्युक्तम् ॥ श्रीकृष्णउवाच ॥ शृणुभारतवक्ष्यामिपंचाशीतिव्रतानिते नोक्तानियानिकस्यापिमुनिभिर्धर्मदर्शिभिः भविष्यमत्स्यमार्कंडपुराणांतरतोमया वाराहाच्चैवसंगृह्यकथ्यंतेतानिपांडव नकथ्यतेधर्मजातांकिंतुनारदवर्त्तिनां श्रुतिस्मृतिपुराणेभ्योयन्मयाह्यवधारितं तत्तेवच्मिकुरुश्रेष्ठकस्यान्यस्योपदिश्यते स्नात्वाप्रभातेसंध्यायामुपगृह्यचपिप्पलं घृतपात्राणियोदद्यान्नसशोचेत्कृताकृते व्रतानामुत्तमंह्येतत्सर्वपापप्रणाशनं पात्रव्रतमितिख्यातंनाख्यातंकस्यचिन्मया पात्रव्रतम् ॥ १ ॥ सुशुद्धस्यसुवर्णस्य सुवर्णंयःप्रयच्छति पुण्येन्हिविप्रकथितेप्रणिपत्यगुणान्वितं व्रतंवाचस्पतेरेतद्बलबुद्धिप्रदायकं वृत्रघ्नस्यपुराख्यातगुरुणासर्वकामदं इतिवाचस्पतिव्रतं ॥ २ ॥ लवणंकटुहुंडंचजीरकंमरिचानिच हिंगुशुंठीसमायुक्तंसर्वंपरिचयस्तथा चतुर्थ्यामेकभक्ताशीसकृद्दत्वाकुटुंबिने गृहेषुसप्तपुतदाशिलायुक्तानिभारत एतच्छिलाव्रतंनामलक्ष्मीलोकप्रदायकं कर्त्तव्यमतियत्नेनमुखपाटवकारकं इतिशिलाव्रतम् ॥ ३ ॥ नक्तमब्दंचरित्वातुगवासार्धंकुटुंबिने हैमंचक्रंत्रिशूलंचदद्याद्विप्रायवाससी प्रणम्यभक्त्या देवेशौप्रीयेतांशिवकेशवौ एतद्देवव्रतंनाममहापातकनाशनं इतिदेवव्रतम् ॥ ४ ॥ कृत्वैकभक्तंवर्षांतेशक्त्याहेमवृषान्वितं धेनुंतिलमयीं

दद्यात्सर्वोपस्करणैर्युतां एतद्रुद्रव्रतंनामपापशोकप्रणाशनं यःकरोतिनरोराजन्सपदंयातिशांकरं इतिरुद्रव्रतम् ५ सर्वौषध्युदकैःस्नातःपंचम्यांपूज्यपद्मजं सर्वोपस्करदानंचयःकरोतिगृहाश्रमे गृहोद्दालःखलंसूर्पंपशिलास्थालीचपंचमी उदकुंभंचचुल्लीचएतेषामनुगंचयत् एतानिगृहिणांगेहेप्रस्थाप्यपुरुषोत्तम एतद्गृहव्रतंनाम सर्वसौख्यप्रदायकं अत्रिणाअनसूयायाःकथितंपांडुनंदन गृहव्रतम् ६ यस्तुनीलोत्पलंहैमंशर्करापात्रसंयुतं ददातिश्रद्धयोपेतोब्राह्मणायकुटुंबिने सवैष्णवंपदंयातिलीलाव्रतमिदंस्मृतं लीलाव्रतम् ७ आषाढादिचतुर्मासमभ्यंगंवर्जयेन्नरः पंचमेचपुनर्दद्यात्तिलतैलघटंनवं भोजनंपायसाढ्यंचसयातिभुवनंहरेः लोकप्रीतिकरंचैतत्प्रीतिव्रतमिहोच्यते प्रीतिव्रतम् ८ वर्जयित्वामधौयस्तुदधिक्षीरघृतैक्षवं दद्याद्वस्त्रयुगंसूक्ष्मंरसपात्रैश्चसंयुतं संपूज्यविप्रमिथुनंगौरीमेप्रीयतामिति एतद्देवीव्रतंनामभवानीलोकदायकं देवीव्रतम् ९ पुष्पादितस्त्रयोदश्यांकृत्वानक्तमथोपुनः संवत्सरांतेतास्मिन्वादिवसेविप्रपूजनं विप्रायवस्त्रयुग्मंचप्रद्युम्नःप्रीयतांमम कल्पंविष्णुपुरेस्थित्वाविशोकःस्यात्पुनर्नरः एतत्कामव्रतंनामसर्वशोकविनाशनं कामव्रतम् १० आषाढादिचतुर्मासंवर्ज्जयेन्नखकर्त्तनं वृंताकभक्षणंचैवमधुसर्पिघटान्वितं कार्त्तिक्यांतुपुनर्हैमंब्राह्मणायनिवेदयेत् एतच्छिवव्रतंनामशिवलोकप्रदायकं शिवव्रतम् ॥ ११ ॥ पंचपंचदशीःस्थित्वाचैकभक्तेनमानवः संपूज्यपूर्णिमांदेवींलिखित्वा चंदनेनच ततःपंचघटान्पूर्णान्पयोदधिघृतेनच मधुनासितखंडेनब्राह्मणायोपपादयेत् मनोरथान्पूरयित्वा संपूर्णान्पूर्णिमाह्यसि पंचकुंभप्रदानेनभूतानांतुष्टिरस्तुमे द्विजानेवंनमस्कृत्यसर्वान्कामानवाप्नुयात् एतत्पंचघटंनामव्रतंपुष्टिप्रदायकं पंचघटव्रतम् ॥ १२ ॥ वर्जयेद्यस्तुपुष्पाणिहेमंतशिशिरावृतू पुष्पत्रयंचफाल्गुण्यांकृत्वाशय्यांचकांचनं दद्याद्वैकालवेलायांप्रीयेतांशिवकेशवौ शिरःसौगंध्यजननंसदानंदकरंनृणां कु

त्वापरंपदंयातिसौगंध्यंव्रतमुत्तमं सौगंध्यव्रतं ॥ १३ ॥ फाल्गुनादितृतीयायांलवणंयस्तुवर्जयेत् समांते शयनंदद्याद्गृहंसोपस्करान्वितं संपूज्यविप्रमिथुनंगौरीमेप्रीयतामिति गौरीलोकेवसेत्कल्पंसौभाग्यव्रतमुत्तमं सौभाग्यव्रतम् ॥ १४ ॥ संध्यामौनंनरःकृत्वासमांतेघृतकुंभदः वस्त्रयुग्मंचघंटांचब्राह्मणायनिवेदयेत् सारस्वतंपदंयातिपुनरावृत्तिदुर्लभं एतत्सारस्वतंनामरूपविद्याप्रदायकं सारस्वतव्रतम् ॥ १५ ॥ लक्ष्मीमभ्यर्च्यपंचम्यामुपवासीभवेन्नरः समांतेहेमकलशंदद्याद्धेनुसमन्वितं सवैष्णवंपदंयातिलक्ष्मीःस्याज्जन्मजन्मनि एतल्लक्ष्मीव्रतंनामदुःखशोकविनाशनं लक्ष्मीव्रतम् ॥ १६ ॥ यातुनारीपिवेत्तोयंजलधारांनिपातयेत् समांतेघृतसंपूर्णांदद्याद्वर्द्धनिकांनवां एतद्धाराव्रतंनामसर्वोद्वेगहरंपरं कांतिसौभाग्यजननंसपत्नीदर्प्पनाशनं धाराव्रतम् ॥ १७ ॥ गौरीसमन्वितंरुद्रंलक्ष्म्यासहजनार्दनं राज्ञीसमन्वितंसूर्य्यंप्रतिष्ठाप्य यथाविधि धूपाक्षेपेणसहितांसुघंटांपात्रसंयुतां योददातिद्विजेंद्राणांपुष्पैरभ्यर्च्यपांडुरैः दक्षिणासहितं कृत्वाप्रणम्यचविसर्जयेत् एतद्देवव्रतंनामदिव्यदेहप्रदायकं देवव्रतम् ॥ १८ ॥ कृत्वाविलेपनंशंभोरग्रतः केशवस्यच यावदब्दंपुनर्दद्याद्धेनुंजलघृतान्वितां जन्मायुतंचराजास्यात्तत शिवपुरंव्रजेत् एतच्छुक्लव्रतंनाम सर्वकल्याणकारकं ॥ शुक्लव्रतम् ॥ १९ ॥ अश्वत्थंभास्करंगंगांप्रणम्ययस्तुवाग्यतः एकभक्तंनरःकुर्य्यादब्दमेकंविमत्सरः व्रतांतेविप्रमिथुनंपूज्यधेनुत्रयान्वितं वृक्षंहिरण्मयंदद्यात्सोश्वमेधफललंभेत् दिविदिव्यविमानस्थःसेव्यतेप्सरसांगणैः एतत्कीर्त्तिव्रतंनामभूतिकीर्त्तिफलप्रदं ॥ कीर्त्तिव्रतं ॥ २० ॥ घृतेनस्नपनंकृत्वाशंभोर्वाकेशवस्यवा ब्रह्मणोभास्करस्यापिगौर्य्यालंबोदरस्यवा अक्षतैस्तुसमंकुर्य्यात्पद्मंगोमयमंडले समांते हेमकमलंतिलधेनुसमन्वितं शुद्धमष्टांगुलंदद्याच्छिवलोकेमहीयते सामगायतुयश्चैतत्सामव्रतमिहोच्यते

सामव्रतं ॥ २१ ॥ नवम्यामेकभक्ताशीकृत्वाकन्याश्चशक्तितः भोजयित्वासमंदद्याद्धेमकंचुकवाससी हेमसिंहंच विप्रायदत्त्वाशिवपुरंव्रजेत् जन्मार्बुदंसुरूपःस्याच्छत्रुभिश्चापराजितः एतद्वीरव्रतंनामनारीणांचसुखप्रदम् ॥ वीरव्रतम् ॥ २२ ॥ यावत्समारभेद्यस्तुपंचदश्यांपयोव्रतः समांतेश्राद्धकृद्दद्याद्गाश्चपंचपयस्विनीः वासांसि चपिशंगानीजलकुंभयुतानिच सयातिवैष्णवंलोकंपितृणांतारयेच्छतं कल्पांतेराजराजःस्यात्पितृव्रतमिदंस्मृतं पितृव्रतम् ॥ २३ ॥ तांबूलसमयेनित्यंगौरीपत्रंददातिया पूर्णचूर्णसमायुक्तंस्त्रियैवापुरुषस्यवा वर्षस्यांतेतुसौवर्णीकारयित्वाफलान्वितं मुक्ताफलमयंचूर्णंत्रितयंवाप्रयच्छति नसाप्राप्नोतिदौर्भाग्यंनदौर्गंध्यंमुखस्यच एतत्पत्रव्रतंनामसौगंध्यजननंपरं ॥ सौगंध्यव्रतम् ॥ २४ ॥ चैत्रादिचतुरोमासान्जलंदद्यादयाचितं ज्येष्ठंवाषाढमासंवापक्षंवापांडुनंदन व्रतांतेमणिकंदद्याद्धेनुवस्त्रसमन्वितं घृतेनसहितंतद्वत्सप्तधान्यसमन्वितं तिलपात्रं हिरण्यंचब्रह्मलोकेमहीयते कल्पांतेराजराजःस्याद्वारिव्रतमिदंस्मृतं वारिव्रतं ॥ २५ ॥ पंचामृतेनस्नपनंकृत्वाविष्णोःशिवस्यच वत्सरांतेपुनर्दद्याद्धेनुंपंचामृतैर्युतां विप्रायकनकंशंखंसपदंयातिशाश्वतं राजाभवति कल्पांतेधृतिव्रतमिदंस्मृतं इतिधृतिव्रतम् ॥ २६॥ वर्जयित्वापुमान्मांसंमासंसंवत्सरंतथा व्रतांतेहेमहरिणंकृत्वा शक्त्याविचक्षणः तद्वत्सवत्सांगांदत्त्वासोश्वमेधफलंलभेत् अहिंसाव्रतमित्येतत्सर्वशांतिप्रदंनृणां अहिंसाव्रतं २७ माघेमास्युषसिस्नानंकृत्वादांपत्यभोजनं सूर्यलोकेवसेत्कल्पंसूर्यव्रतमिदंस्मृतम् इतिसूर्यव्रतम् २८ आषाढादिचतुर्मासंप्रातःस्नायीभवेन्नरः विप्रायभोजनंदद्यात्कार्त्तिक्यांगोप्रदोभवेत् घृतकुंभंततोदद्यात् सर्वान्कामानवाप्नुयात् वैष्णवंव्रतमित्युक्तंविष्णुर्लोकमवाप्नुयात् वैष्णवव्रतम् २९ अयनादयनंयावद्वर्जयेत्पुष्पसर्पिषी तदंतेपुष्पदानानिघृतधेन्वासहैवतु दत्त्वाशिवपदंयातिदत्त्वाचघृतपायसं एतच्छीतलव्रतंनामशी

लारोग्यफलप्रदं शीलव्रतं ३० संध्यादीपप्रदोयस्तुमासंतैलविवर्जयेत् समांतेदीपिकांदद्याच्चक्रंशूलंच
कांचनं वस्त्रयुग्मंचविप्रायसतेजस्वीभवेदिह एतद्दीपव्रतंनामसदाकांतिप्रदायकं दीपव्रतं ३१ एकभक्ते
नसप्ताहंगौरिर्णींयस्तुपूजयेत् सपूज्यपार्वतींभक्त्यागंधपुष्पविलेपनैः एतत्सुवासिनींभव्यांकंकुमेनाविलेपयेत्
पुष्पैर्विभूषणैर्यस्तुकर्पूरागुरुचंदनैः तांवूलंशोभनंदत्त्वानारिकेलफलंतथा प्रीयतांकुसुमादेवीप्रणिपत्यविसर्ज
येत् एकैकांपूजयेद्देवींसप्ताहंयावदेवतु पुनस्तुसप्तमेपूर्णेसप्तैवाविनिमंत्रयेत् षड्रशंभोजयित्वान्नंयथाशक्त्या
विभूषणैः भूषयित्वावस्त्रमाल्यैःकर्णवेष्टांगुलीयकैः कुमुदामाधवीगौरीभवानीपार्वतीउमा कालीचदर्पणंहस्ते
प्रत्येकंविनिवेदयेत् एवंनिवेदयेदेकं वाच्यंसंपन्नम स्तुमे सप्तसुंदरकंनामव्रतमेतद्युधिष्ठिर करोतिसुंदरंदेहं
सौभाग्यंयच्छातिध्रुवं सप्तसुंदरकंव्रतम् ॥ ३२ ॥ वर्ज्जयेच्चैत्रमासेतुयस्तुगंधानुलेपनं शुक्लंगंधभृतां
दत्त्वाविप्रायधृतवाससी शक्त्याचदक्षिणांदत्त्वासर्वान्कामानवाप्नुयात् वारुणंपदमाप्नोतितदेतद्वारुणंव्रतं
वारुणंव्रतम् ॥ ३३ ॥ वैशाखमासेलवणंवर्जयित्वायतव्रतः मासांतेचततोदद्यात्सवत्सांगांद्विजातये स्थित्वा
विष्णुपदेकल्पंततोराजाभवेदिह एतत्कांतिव्रतंनामकांतिकीर्तिप्रदायकं कांतिव्रतं ॥ ३४ ॥ ब्रह्मांडंकांचनं
कृत्वातिलद्रोणोपरिस्थितं त्र्यहंतिलव्रतीभूत्वावन्हिंसंतर्प्यसद्विजं संपूज्यविप्रदांपत्यंमाल्यवस्त्रविभूषणैः शक्ति
तस्त्रिपलादूर्ध्वंविश्वात्माप्रीयतामिति एतद्ब्रह्मव्रतंनामनिर्वाणफलदंनृणां ब्रह्मव्रतम् ॥ ३५ ॥ यश्चोभयमु
खींदद्यात्प्रभूतकनकान्वितां दिनंपयोव्रतास्तिष्ठेत्सयातिपरमंपदं त्र्यहंपयोव्रतास्तिष्ठेत्कांचनंकल्पपादपं पला
दूर्ध्वंयथाशक्त्यातंडुलैस्तूयसंयुतं छादितंवरवासोभिःपुष्पमालाविभूषितं दत्त्वास्वर्गेवसेत्कल्पंकल्पव्रतमिदं
स्मृतं कल्पव्रतम् ॥ ३६ ॥ यस्तुवश्वत्वरींभव्यांकंठाभरणभूषितां सुपर्याणवृतापृष्टांखलीनालंकृताननां

मोदकोदकपात्रेणतांबूलेनसमन्वितां स्थपथिकांस्थापयेत्पृष्ठेमृगामोदाहिमान्वितां ईदृग्विधांव्यतीपातेग्रहणे
वायनद्वये अयाचितेयथाशक्त्यातततोदद्याद्द्विजातये एतद्वातव्रतंनाममायाखेदाविनाशनं परलोकाध्वगमने
क्लांतिश्रमहरंपरं वातव्रतम् ॥ ३७ ॥ नक्ताशीत्यष्टमीषुस्याद्वत्सरांतेचगोप्रदः पौरंदरंपदंयातिसुगतिव्रतमु
च्यते सुगतिव्रतम् ॥ ३८ ॥ यश्चैंधनप्रदोराजन्हेमंतेशिशिरावृतू घृतधेनुप्रदश्चांतेपरंब्रह्माधिगच्छति
आरोग्यजननंभूतिधृतिकांतिप्रदायकं वैश्वानरव्रतंनामसर्वपापप्रणाशनं वैश्वानरव्रतम् ॥ ३९ ॥ एका
दश्यांतुनक्ताशीयश्चक्रंविनिवेदयेत् तद्वच्छंखंचसौवर्णंचैवविचित्रासुपांडव यएवंकुरुतेभक्त्यासाविष्णोःपदमुत्तमं
एतद्विष्णुव्रतंनामकल्पादौराज्यलाभभाक् विष्णुव्रतम् ॥ ४० ॥ पयोव्रतस्तुपंचम्यांसमातेगोयुगप्रदः
लक्ष्मीलोकेवसेत्कल्पंदेवीव्रतमिदंस्मृतम् ॥ देवीव्रतम् ॥ ४१ ॥ सप्तम्यांनक्तभुग्दद्यात्समांतेगांपय
स्विनीं सूर्यलोकमवाप्नोति भानुव्रतमिहोच्यते भानुव्रतम् ॥ ४२ ॥ चतुर्थ्यांनक्तभुग्दद्यादब्दांतेहेमवार
णं व्रतंवैनायकंनामसर्वविघ्ननिवारणं विनायकव्रतम् ॥ ४३ ॥ महाफलानियस्त्यक्त्वाचतुर्मासंद्विजातये
हैमानिकार्त्तिकेदद्याद्गोयुगेनसमंनरः सितवस्त्रयुगेनाथसंपूर्णाज्यघटेनच एतत्फलव्रतंनामफलावाप्तिकरं
सदा फलव्रतम् ॥ ४४ ॥ यश्चोपवासीसप्तम्यांसमांतेहेमपंकजं धेनुंस्वशक्तितोदद्यात्सवत्सांकांस्यदो
हनां भक्त्याविप्रायराजेंद्रवाचकायनिवेदयेत् एतत्सौरव्रतंनामसूर्यलोकप्रदायकम् सौरव्रतम् ॥ ४५ ॥
द्वादशद्वादशीर्यस्तुनामप्राशनसंयुतः समुपोष्यसमांतेतुसवस्त्रान्नोदकान्घटान् द्वादशात्रप्रदद्याच्चसर्वकामस
मृद्धयेगोविंदव्रतमित्येतद्गोविंदप्रीतिदायकम् गोविंदव्रतम् ४६ कार्त्तिक्यांयोवृषोत्सर्गंकृत्वानक्तंसमाचरेत् स्वर्ग
लोकमवाप्नोतिवृषव्रतमिदंस्मृतं वृषव्रतं ४७ कृच्छ्रांतेगोप्रदोदद्याद्भोजनंशक्तितःपरं विप्राणामत्रकथितंप्राजा

पत्यमिदंव्रतं प्राजापत्यव्रतं ४८ चतुर्दश्यांतुनक्ताशीसमांतेगोयुगप्रदः शैवंपदमवाप्नोतिविज्ञेयंत्र्यंवकंव्रतं त्र्यंवकव्रतं ४९ सप्तरात्रोषितोदद्याद्घृतकुंभंद्विजातये ब्रह्मव्रतमिदंप्राहुर्ब्रह्मलोकप्रदायकं ब्रह्मव्रतम् ५० आकाशाशीसमंदद्याद्धेनुमंतेपयस्विनीं शक्रलोकेवसेत्कल्पंशक्रव्रतमिदंस्मृतं शक्रव्रतम् ५१ कार्त्तिकेशुक्लपक्षेचचतुर्दश्यांनराधिप सोपवासःपञ्चगव्यंपिवेद्रात्रौविचक्षणः कापिलायास्तुगोमूत्रंकृष्णायागोमयंतथा सितधेन्वास्तथाक्षीरंरक्तायास्तुततोदधि गृहीत्वाकर्बुरायास्तुघृतमेकत्रमेलयेत् वेदोक्तमंत्रैराजेंद्रकुशोदकसमन्वितं ततःप्रभातसमयेस्नात्वासंतर्प्यदेवताः ब्राह्मणान्भोजयित्वातुभुंजीतवाग्यतःशुचिः ब्रह्मकूर्चव्रतंह्येतत्सर्वपापप्रणाशनं यद्वाल्येयच्चकौमारेवार्द्धकेवापियत्कृतं ब्रह्मकूर्चोपवासेनपापंनश्यतितत्क्षणात् ब्रह्मकूर्चव्रतम् ५२ अनग्निपक्वमश्नीयात्तृतीयायांतुयोनरः गांदत्त्वाशिवमभ्येतिपुनरावृत्तिवर्जितं एतद्रूपव्रतंनामसर्वकल्याणकारक रूपव्रतं ५३ हैमंपलत्रयादूर्ध्वंरथमश्वयुगान्वितं दत्त्वाकृतोपवासस्तुदिविकल्पशतंवसेत् तदंतेराजराजःस्यादश्वव्रतमिदंस्मृतं अश्वव्रतम् ५४ तद्वत्पलत्रयादूर्ध्वंकरिभ्यांसंयुतंरथं हैमंरथंनरश्रेष्ठसर्वोपकरणान्वितं सत्यलोकेवसेत्कल्पंसहस्रमथभूपतिःभवेदुपोषितोवापिकरिव्रतमिदंस्मृतं करिव्रतं ५५ मुखवासंपरित्यज्य समांतेगोप्रदोभवेत् यज्ञाधिफलमाप्नोतिसुमुखव्रतमुच्यते सुमुखव्रतं ५६ निशिकृत्वाजलेवासंप्रभातेगोप्रदोभवेत् वारुणंलोकमाप्नोतिवारुणंव्रतमुच्यते वारुणव्रतम् ५७ चांद्रायणंतुयःकुर्याद्धैमंचंद्रंनिवेदयेत् चंद्रव्रतमिदंप्रोक्तंचंद्रलोकप्रदायकं चंद्रव्रतम् ५८ ज्येष्ठेपंचतपाःसायंहेम धेनुप्रदोदिवं यात्यष्टमीचतुर्दश्योरुद्रव्रतमिदंस्मृतं रुद्रव्रतम् ५९ अनुलेपनंतुयःकुर्यात्तृतीयायांशिवालये समांतेधेनुदोयातिभवानीव्रतमुच्यतेभवानी।व्रतं ६०माघमास्यार्द्रवासाःस्यात्सप्तम्यांगोप्रदोभवेत् दिविलोकेवसेत्कल्पंराजास्यात्तापनंव्रतम् ॥ तापनव्रतं ६१

त्रिरात्रोपोषितोदद्यात्फाल्गुण्यांभुवनंशुभं आदित्यलोकमाप्नोतिधामव्रतमिदंस्मृतं धामव्रतं ६२ त्रिसंध्यंपूज्यदांपत्यमुपवासीविभूषणैः पौर्णमास्यामवाप्नोतिमोक्षमिंदुव्रतादिह इंदुव्रतं ६३ दत्त्वांसितद्वितीयायामिंदोर्लवणभाजनं कांस्यंसवस्त्रंराजेंद्रदक्षिणासहितंद्विजे समांतेगोप्रदोयातिविप्रायाशिवमंदिरं कल्पांतेराजराजःस्यात्सोमव्रतमिदंस्मृतं सोमव्रतं ६४ प्रतिपद्येकभक्ताशीसमांतेकपिलाप्रदः वैश्वानरपदंयातिव्रतमाग्नेयमुच्यते आग्नेयव्रतं ६५ एकादश्यांमाघमासेचतुर्दश्यष्टमीषुच एकभक्तेनयोदद्याच्चोलकान्व्यजनानिच उपानहौकंबलांश्चचैत्रे छत्रादिकतथा करपात्रिकातथादद्याद्यथाशक्त्यासदक्षिणा ब्राह्मणानांमहाराजसोश्वमेधफलंलभेत् एतत्सौख्यव्रतंनामसर्वसौख्यप्रदायकं सौख्यव्रतम् दशम्यामेकभक्ताशीसमांतेदशधेनुदः दिशश्चकांचनीर्दद्यान्नारीरूपायुधिष्ठिर तिलद्रोणोपरिगताब्रह्मांडाधिपतिर्भवेत् एतद्विश्वव्रतंनाममहापातकनाशनं विश्वव्रतं ६७ संपूज्यसितसप्तम्यांभानुंधान्यानिसप्तच ददातिनक्तभुग्राजन्लवणेनसमंद्विजे सतारयतिसप्ताष्टौकुलान्यात्मानमेवच एतद्धान्यव्रतंनामधनधान्यप्रदायकं धान्यव्रतं ६८ मासोपवासीयोदद्याद्धेनुंविप्रायशोभनां सवैष्णवंपदंयातिभीमव्रतमिदंस्मृत भीमव्रतं ६९ पक्षोपवासीयोदद्याद्विप्रायकपिलाद्वयं सब्रह्मलोकमाप्नोतिपूजितःसुरसत्तमैः एतत्पक्षव्रतंनाममहापातकनाशनं पक्षव्रतं ७० दद्याद्विंशपलादूर्ध्वंमहींकृत्वातुकांचनीं कुलाचलाद्रिसहितांतिलवस्त्रसमन्वितां दिनंपयोव्रतस्तिष्ठेदिंद्रलोकेमहीयते एतन्महीव्रतंनामसप्तकल्पानुवर्त्तकं महीव्रतं ७१ माघेमास्यथवाचैत्रेगुडधेनुप्रदोभवेत् गौरीलोकमवाप्नोतिपूज्यमानोप्सरोगणैः मल्लव्रतमिदं प्रोक्तं संततानंददायकं मल्लव्रतम् ७२ वत्सरंत्वेकभक्ताशीसभक्षजलकुंभदः शिवलोकमवाप्नोतिप्राप्तिव्रतमिदंस्मृतं प्राप्तिव्रतं ७३ कार्त्तिकादितृतीयायांप्राश्यगोमूत्रयावकं नक्तंचरेदब्दमेकंसमांतेगोप्रदोभवेत् गौरीलोकेवसे

त्कल्पंततोराजाभवेदिह एतद्रुद्रव्रतंनामसदाकल्याणकारकम् रुद्रव्रतम् ॥ ७४ ॥ चैत्रेत्रिरात्रंनक्ताशीनद्यांस्नात्वाददातियः अजाःपंचपयस्विन्योदरिद्रायकुटुंबिने नजायतेपुनरसौजीवलोके कदाचन एतद्बलिव्रतंनामसर्वव्याधिविनाशनं बलिव्रतम् ॥ ७५ ॥ कन्यादानंतुयःकुर्य्यादुद्वाहंकारयेच्चयः एकविंशकुलोपेतोब्रह्मलोकंसगच्छति कन्यादानात्परंदानंनचास्मादधिकंक्वचित् येकरिष्यंतिमनुजास्तेषांलोकोक्षयोदिवि कन्यादानव्रतम् ॥ ७७ ॥ तिलपिष्टमयंकृत्वागजंहेमविभूषितं कक्षांकुशयुतंतद्वदारोहकसमन्वितं नक्षत्रमालासहितंचामरापीठधारिणं दशनाग्रवद्धनेत्रंरक्तवस्त्रयुगासनं ताम्रपात्र्यांकुंडकेचकृतंदत्त्वाचमोदकं प्रदद्याद्द्विजदांपत्यंपूज्यमालाविभूषणैः कंठप्रमाणमाविश्यजलंमलविवर्जितं कांतारतरणंह्येतत्कथितंतेयुधिष्ठिरं कांतारगिरिदुर्गेषुतारयत्पतिदुष्कृतीन् इहलोकेपरेचैवनात्रकार्य्याविचारणा येकुर्वंतिदिनेपुण्येव्रतंपौरंदरंनराः तेषांपौरंदरोलोकोभवेदाभूतसंप्लवं पौरंदरव्रतम् ॥ ७८ ॥ पयोव्रंततुपंचम्यांदत्त्वानागंद्विजातये सौवर्णीसर्पजनितंभयंतेषांनजायते नागव्रतम् सिताष्टम्यांश्वेतवृषंसोपवासःप्रयच्छति सितवस्त्रयुगच्छन्नंघंटाभरणभूषितं शिवलोकेवसेत्कल्पंततोराजाभवेदिह वृषव्रतमिदंप्रोक्तंसर्वधर्मप्रदायकं वृषव्रतं ८ उत्तरेत्वयनेप्राप्तेघृतप्रस्थेनयोहरिं स्नापयित्वाब्राह्मणायवडवांयःप्रयच्छति ससर्वकामसंयुक्तःपुत्रभ्रातृसमन्वितः सूर्यलोकेवसेद्राजन् राशि व्रतमिहोच्यते राशिव्रतम् ८१ सकृन्नवम्यांनक्तेनपूजयेद्विंध्यवासिनीं पुष्पैर्धूपैस्तथाददद्यात्पंजरंशुकशोभितं हैमंविप्रायशांतायसवाग्मीजायतेनरः एतदाग्नेयकंनामव्रतमग्निपदप्रदं आग्नेयव्रतम् ८२ द्वादश्यांगृह्यनक्ताशीफलमैक्षवसंयुतम् विप्रायभोजनंदद्यात्सयातिभवनंहरेः द्वादशीव्रतम् ८३ विष्कुंभादिषुयोगेषुएकभक्तरतोनरः योददातिक्रमात्पार्थघृतं १ तैलं २ फलै ३ क्षवं ४ यव ५ गोधूम ६ चणका ७

निष्पावान् ८ शालितंडुलान् ९ लवणं १० दधि ११ दुग्धंच १२ वस्त्रं १३ कनकमेवच १४ कंबलं १५ गां १६ वृषं १७ छत्र १८ मुपानद्युगलंतथा १९ कर्पूरं २० कुंकुमंचैव २१ चंदनं २२ कुसुमानिच २३ लोहं २४ ताम्रंच २५ कांस्यंच २६ रौप्यंचेतियुधिष्ठिर २७ विष्कुंभः १ प्रीति २ रायुष्मान् ३ सौभाग्यः ४ शोभनंतथा ५ अतिगंडः ६ सुकर्माच ७ धृतिः ८ शूलंतथैवच ९ गंडो १० वृद्धि ११ ध्रुवश्चैव १२ व्याघातो १३ हर्षणस्तथा १४ वज्रः १५ सिद्धि १६ व्यतीपातो १७ वरीयान् १८ परिघः १९ शिवः २० सिद्धः २१ साध्यः २२ शुभः २३ शुक्लो २४ ब्रह्मेंद्रौ २५ वैधृतिस्तथा २७ स्नातःस्वशक्त्याविधिवत्सर्वपापैःप्रमुच्यते न वियोगमवाप्नोतियोगव्रतमिदंस्मृतम् योगव्रतम् ८४ पौर्णमास्यांपौर्णमास्यांकौंतेयबहुदक्षिणाः पौषमाघादिमासेषुसौवर्णाःसर्वएवहि क्रमेणराशयःसर्वेवस्त्रमाल्याविभूषिताः एतद्राशिव्रतंनामसर्वोपद्रवनाशनं सर्वाशापूरकंचैतत्सोमलोकप्रदायकं राशिव्रतम् ८५ पंचाशीतिव्रतानांतेकथितापांडुनंदन याःश्रुत्वाब्रह्महागोघ्नःपितृहामातृहातथा मुच्यतेतत्क्षणादेवपातकैःसोपपातकैः पंचाधिकातवमयाकथिताव्रतानांराजन्नशीतिरिहसौख्यधनप्रदानां एताःसमाचरतियःशृणुयात्पठेद्वाहस्ताग्रलग्नइवतस्यसुरेंद्रलोकः ३ इतिभविष्योत्तरोक्तानि पंचाशीतिव्रतानि अथवेश्याविलासिनीव्रतम् मत्स्यपुराणे वर्णाश्रमाणामाचारःपुराणेषुश्रुतोमया समाचारश्चभगवन्धर्मशास्त्राविनिर्णयः पश्यस्त्रीणांसमाचारंश्रोतुमिच्छामितत्त्वतः ईश्वरउवाच तस्मिन्नेवयुगेब्रह्मन्सहस्राणितुषोडश वासुदेवस्यनारीणांभविष्यंत्यंबुजोद्भव ताभिर्वसंतसमयेकोकिलालिकुलाकुले पुष्पितोपवनोत्फुल्लकल्हारसरसस्तटे निर्भरापानगोष्ठीषुप्रसक्ताभिरलंकृतः कुरंगनयनःश्रीमान्मालतीकृतशेखरः गच्छन्समीपमार्गेणसाबःपरपुरंजयः साक्षात्कंदर्परूपेणसर्वाभरणभूषितः अनंगरसतप्ताभिःसाभिलाषमवेक्षितः .बुद्धोम

न्मयस्तासांभविष्यातियदात्मानि तदावेक्ष्यजगन्नाथःसर्वतोध्यानचक्षुषा सांववक्ष्यतिताःसर्वावोहरिष्यंतिदस्यवः
मत्परोक्ष्यंयतःकामाल्लौल्यमीदृग्विधंकृतं ततःप्रसादितोदेवइदंवक्ष्यतिशार्ङ्गभृत् ताभिःशापाभितप्ताभिर्भगवा
न्भूतभावनः उत्तारयित्वाभूभारसमुद्रेस्वांपुरींप्रियां यदात्पक्षाम्यथात्मानंभा विकर्मणिभावके भवतीनामृषिर्दा
लभ्योयद्व्रतंकथयिष्यति तदेवोत्तारणायालंदासत्वेसंभविष्यति इत्युक्त्वाताःपरित्यज्यगतेद्वारवतीश्वरे ततःकाले
नमहताभारावतरणेकृते निवृत्तेमौशलेतद्वत्केशवेदिवमागते शून्येयदुकुलेसर्वैश्चौरैरपिजितेर्जुने हृतासुकृष्णपत्नी
षुदासभोग्यासुचार्बुदे तिष्ठत्सुदुःखदौर्भाग्यसंतप्तासुजनार्दनं आगमिष्यतियोगात्मादाल्भ्योनाममहातपाः
तास्तमर्घ्येणसंपूज्यप्रणिपत्यमुहुर्मुहुः लालप्यमानाबहुशोवाष्पपर्य्याकुलेक्षणाः स्मरंत्योविविधान्भोगान्दि
व्यमाल्यानुलेपनात् भर्तारंजगतामीशमनंतमपराजितं दिव्यानुभावांचपुरींनानारत्नगृहाणिच द्वारिकावा
सिनःसर्वान्देवरूपान्कुमारकान् प्रश्नमेवंकरिष्यंतिमुनेरभिमुखास्थिताः दस्युभिर्भगवन्सर्वाःपरिष्वक्तावयंव
लात् स्वधर्मच्यवनेस्माकमस्मिन्नःशरणंभव आदिष्टोसिपुराब्रह्मन्केशवेनमहात्मना कस्माद्दैवेनसंयोगंप्रा
प्यवेश्यात्वमागताः वेश्यानामपियोधर्मस्तन्नोब्रूहितपोधन कथयिष्यत्यतस्तासांसदाल्भ्यश्चैकचेतनः ॥ दाल्
भ्यउवाच ॥ जलक्रीडाविहारेषुपुरासरासमानसे भवतीनांसगर्वाणांनारदोभ्यासमागतः हुताशनसुताःस
र्वाभवत्योप्सरसःपुरा अप्रणम्यावलेपेनपरिपृष्टःसयोगवित् कथंनारायणोस्माकंभर्तास्यादित्युपोषणे तस्मा
द्व्रतप्रदानंचशापश्चायमभूत्पुरा शय्याद्वयप्रदानेनमधुमाधवमासयोः सुवर्णोपस्करोत्सर्गाद्द्वादश्योःशुक्लप
क्षतः भर्त्तानारायणोनूनंभविष्यत्यन्यजन्मनि यदकृत्वाप्रणामंमेरूपसौभाग्यमत्सरात् परिपृष्टोस्मितेना
शुवियोगोवोभविष्यति चौरैरपहृताःसर्वावेश्यात्वंसमवाप्स्यथ एवंनारदशापेनकेशवस्यचशापतः वेश्यात्वमागा

ताःसर्वाभवत्यःकाममोहिताः इदानीमपियद्वक्ष्येतच्छृणुध्वंवराननाः पुरादेवासुरेयुद्धेहतेषुशतशःसुरैः दानवासुरदैत्येषुराक्षसेषुततस्ततः तेषांनारीसहस्राणिशतशोथसहस्रशः परिणीतानितानिस्युर्बलाद्भुक्तानियानिवः तानिसर्वाणिदेवेशः प्रोवाचवदतांवरः वेश्याधर्मेणवर्त्तध्वमधुनानृपमंदिरे भुक्तिमत्योवरारोहास्तथादेवकुलेषुच भोजनंस्वामिनस्तुल्यंसूतकंचापितत्समं भविष्यतिचसौभाग्यंसर्वासामपिशक्तितः ब्राह्मणेभ्योवरारोहाः कार्य्याणिविविधानिच यच्चाप्यन्यद्व्रतंसम्यगुपदेश्याम्यहंततः अविचारेणसर्वाभिरनुष्ठेयंव्रतंततः संसारोत्तारणायालमेतद्वेदाविदोविदुः यदासूर्य्यादिनेहस्तः पुष्योवाथपुनर्वसुः भवेत्सर्वौषधिस्नानंसम्यङ्नारीसमाचरेत् कथाः पंचशरस्यापिसन्निधानत्वमिष्यते अर्चयेत्पुंडरीकाक्षमनंगस्यानुकीर्त्तनैः कामायपादौसंपूज्यजंघेवैमोहकारिणे मेढ्रंकंदर्पनिधयेकटिंप्रीतिमतेनमः नाभिंसौख्यसमुद्रायवामायाथतथोदरं हृदयंहृदयेशायस्तनावाह्लादकारिणे उत्कंठायेतिवैकंठमास्यमानंदकारिणे वामांशंपुष्पचापायपुष्पबाणायदाक्षिणं नमोनंगायवैमौलिंविलोलायेतिमूर्धजान् सर्वात्मनेशिरस्तद्वद्देवदेवस्यपूजयेत् नमः शिवायशांतायपाशांकुशधरायच नमोनारायणायेतिकामदेवात्मनेनमः नमः शांत्यैनमःप्रीत्यै नमोरत्यैनमः श्रिये नमस्तुष्ट्यैनमः पुष्ट्यै नमः सर्वात्मसंविदे एवंसंपूज्यगोविंदमनंगात्मकमीश्वरं गंधमाल्यैस्तथा धूपनैवेद्येनचकामिनी ततआहूयधर्मज्ञंब्राह्मणंवेदपारगं अव्यंगोथवरः पूज्योगंधधूपार्चनादिभिः शालीयतंडुलप्रस्थंघृतपात्रेणसंयुतं तस्मैविप्रायसंदद्यान्माधवः प्रीयतामिति यथेष्टाचारभोक्तारंतमेवाद्विजसत्तमं रत्यर्थंकामदेवोयामितिचित्तेवधार्यतां यद्यदिच्छातिविप्रेंद्रस्तत्तत्कुर्याद्विलासिनी सर्वभावेनचात्मानमर्चयेत्स्मितभाषिणी एवमादित्यवारेणसदातद्व्रतमाचरेत् तंडुलप्रस्थदानंचयावन्मासास्त्रयोदश ततस्त्रयो

दशेमासिसंप्राप्तेतस्यभामिनी विप्रस्योपस्करैर्युक्तांशय्यांदद्यात्सुलक्षणां सोपधानकविश्रामांस्वास्तरावरणांशुभां दीपिकोपानहच्छत्रपादुकासनसंयुतां सपत्नीकमलंकृत्यहेमसूत्रांगुलीयकैः सूक्ष्मवस्त्रैःसकटकैर्धूपमाल्यानुलेपनैः कामदेवंसपत्नीकंगुडकुंभोपारिस्थितं ताम्रपात्रासनगतंहेमनेत्रपटान्वितं सकांस्यभाजनोपेतमिक्षुदंडसमन्वितं दद्यादनेनमंत्रेणतथैकांगांपयस्विनीं यथांतरंनपश्यामिकामकेशवयोःसदा तथैवसर्वकामाप्तिरस्तुविष्णोःसदामम यथानकामिनीदेहात्प्रयातितवकेशव तथाममापिदेवेशशरीरंस्वीकुरुप्रभो तथाचकांचनंदेवंप्रतिगृह्णन्द्विजोत्तमः कंवःकामंददामीतिवैदिकंमंत्रमीरयेत् ततःप्रदक्षिणीकृत्यविसृज्यद्विजपुंगवं शय्यासनादिकंसर्वंब्राह्मणस्यगृहंनयेत् ततःप्रभृतियोन्योपिरत्यर्थंगृहमागतः सामान्यःपूर्वंचारेणसमंपूज्योभवेत्सदा एवंत्रयोदशंयावन्मासमेकंद्विजोत्तमं तर्पयेतयथाकालंप्रोषितेन्यंसमाचरेत् तदारूपंशीलवंतंयावदत्यागमोभवेत् आत्मनोपियदाविघ्नोगर्भसूतकराजतः देवोवामानुषोवास्याउपरागेणवैततः सोवारानष्टपंचाशद्यथानैवतुप्राशयेत् एतद्विकथितंसम्यग्भवतीनांविशेषतः स्वधर्मोयमतोभव्याःपश्यतास्विह सर्वदा पुरुहूतेनयत्प्रोक्तंदानवेषुमयापुरा सदिदंसांप्रतंसर्वंभवतीष्वपियुज्यते कल्याणिनीनांकथितंतत्कुरुध्वंवराननाः करोतियाशेषमखंडमेतत्कल्याणिनीमाधवलोकसंस्था सापूजितादेवगणैरशेषैरानंदनंस्थानमुपैतिशंभोःतपोधनःसोप्यभिधायचैवंतदाचतासांव्रतमंगनानां संस्थानमेष्यंतिसमस्तमित्थंव्रतंकरिष्यंतिचदेवयोनौ

इतिमत्स्यपुराणोक्तंवैश्याचारेअनंगव्रतम्

स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणी० १
श्रीरणवीरसिंहभूपेशकारितेकृत्यसागरे षष्ठ्यशीतिव्रतादीनामभूद्रत्नसमुच्चयः ॥ २ ॥

॥ ॐश्रीगणेशायनमः ॥ ॐनमःशिवाय ॥ अथलक्षपूजाविधानम् ॥

शिवपुराणे ऋषयऊचुः व्यासशिष्यमहाभागकथयत्वंप्रमाणतः कैः पुष्पैः पूजितः शंभुः फलंकिंकिंप्रयच्छति ॥ सूतउवाच ॥ सर्ववैकथयाम्यद्यश्रूयतांमुनिसत्तमाः कमलैर्विल्वपत्रैश्चशतपत्रैस्तथापुनः शंखपुष्पैस्तथादेवंलक्ष्मीकामोर्चयेत्सदा एतैश्चलक्षसंख्याकैर्लक्ष्मीः स्यान्नात्रसंशयः राज्यस्यकामुकोयोवैपार्थिवानांचपूजया तोषयेच्छंकरंदेवंदशकोट्यामुनीश्वराः प्रतिशिवंतथापुष्पमखंडंतंडुलंतथा चर्चितंचंदनेनैवजलधारांतथापुनः प्रातिरूपंतथामंत्रैर्बैल्वदलमनुत्तमं अथवाशतपत्रंवाकमलंवातथापुनः शंखीपुष्पैस्तथा प्रोक्तंविशेषेणपुरातनैः धूपंदीपंचनैवेद्यमर्घ्यंचारार्त्तिकंतथा प्रदक्षिणंनमस्कारंक्षमापनाविसर्जने कृत्वासांगंतथा सर्वंकृत्यंयेनभवेदिह तस्यवैसर्वथाराज्यंशकरोलोकशंकरः प्राधान्यकामुकोयोवैतदर्धेनार्चयेत्पुमान् कारागृहगतोवापिलक्षेणैवार्चयेद्धरं रोगग्रस्तोयदास्याद्वैतदर्धेनार्चयेच्छिवं कन्याकामोभवेद्योवैतदर्धेनाशिवंपुनः विद्याकामोभवेद्योवैतदर्धेनार्चयेच्छिवं वाणीकामोभवेद्योवैसोयुतेनशिवंयजेत् उच्चाटनार्थंशत्रूणांतथैवपूजनंहरेः मारणेचैवलक्षेणमोहनेचतदर्धकं सामंतानांजयेचैवकोटिपूजाप्रशस्यते वशीकार्येतथाराज्ञामयुतंचप्रशस्यते यशसेचतथातत्रपूजयेच्छंकरंतदा वाहनाप्त्यैसदापूज्यः सहस्रेणशिवस्तदा मुक्तिकामोभवेद्योवैपंचकोट्याशिवंयजेत् ज्ञानार्थीचतथादेवंकोट्यावैपूजयेच्छिवं शिवदर्शनकामोवैतदर्धेनप्रपूजयेत् तथामृत्युंजयेजाप्यःकामनाफलरूपतः पंचलक्षाद्यदाजातःप्रत्येकंतुसदाशिवःलक्षेणभजतेकश्चिद्द्वितीयेजातिसंभवःतृतीये कामनाजातंचतुर्थेतंप्रपश्यति पंचमंतुयदालक्षंफलंयच्छत्यसंशयं अनेनैवतुमंत्रेणदशलक्षफलंलभेत् मुक्तिकामोभवेद्योवैसदर्भैः

पूजनंचरेत् लक्षसंख्यातुसर्वत्रज्ञातव्यामुनिसत्तमाः आयुष्कामोभवेद्योवै दूर्वाभिःपूजनंचरेत् पुत्रकामोभवेद्यो वैधत्तूरैःपूजनंचरेत् अर्कपुष्पैःप्रतापश्चकुब्जकल्हारकैस्तथा जपाकुसुमपूजातुशत्रूणांमृत्युदास्मृता रोगोच्चाटनकामोहकरवीरैःसुपूजयेत् वंधूकैर्भूषणावाप्तिर्जात्यावाहनसंभवः अतसीकुसुमैरेवविष्णुवल्लभतामियात् शमीपत्रैस्तथामुक्तिःप्राप्यतेपुरुषेणवै मल्लिकाकुसुमैरेवास्त्रियंशुभतरांलभेत् यूथिकाकुसुमैर्लक्ष्मीर्गृहंनैवविमुंचति कर्णिकारैस्तथावस्त्रसंपत्तिर्जायतेनृणां निर्गुंडीकुसुमैर्लोकेमनोनिर्मलताभवेत् बिल्वपत्रैस्तथालक्षैः सर्वकामानवाप्नुयात् शृंगारहारपुष्पैस्तुवर्धंतेसर्वसंपदः तद्वेलाविद्यतेपुष्पंयन्नैवांशिववल्लभं चंपककेतकीहित्वाअन्यत्सर्वांशिवेर्पयेत् एतद्वःकथयिष्यामिकारणंदुष्करंनृणां यदालक्षंशिवेदद्यात्तदाचविपुलंफलं तिलपुष्पाणिदत्तानिमुक्तिदानिनसंशयः राजिकाकुसुमानीहशत्रूणांमृत्युदानिच अतःपरंचधान्यानांफलंशृणुतसत्तमाः तंडुलारोपणैर्नृणांलक्ष्मीवृद्धिःप्रजायते प्रस्थानांचैवषट्केनतदर्धेनतथापुनः पलद्वयंतथातेषांलक्षमानमुदाहृतं पूजांरुद्रविधानेनकृत्वावस्त्रंसुशोभनं शिवोपरिन्यसेत्तत्रगंधपुष्पादिभिस्ततः रोपयित्वाचधूपादीन्दत्वापूजाफलंलभेत् प्राजापत्यद्वयंरौप्यमाषसंख्याचदक्षिणा देयातदुपदेष्टारंशक्त्यावादक्षिणामला आदित्यसंख्ययातत्रब्राह्मणान्भोजयेन्नरः लक्षपूजायदाजातासांगाथमंत्रपूर्वकं शतमष्टोत्तरंतत्रमंत्रोविधिरुदाहृतः तिलानांचयथालक्षंमहापातकनाशनं एकादशपलैश्चैवलक्षमानमुदाहृतं पूर्ववत्पूजनंतत्रकर्त्तव्यंहितकाम्यया भोज्यावैब्राह्मणास्तत्र तस्मात्कार्य्यंनरेणहि महापातकजंदुःखं नश्यतितत्क्षणाध्रुवं यवपूजातथाप्रोक्ता लक्षेणपरमाशिवे प्रस्थानामष्टकंचैवप्रस्थार्धेनयुतंपुनःपलद्वययुतंतत्रमानमेतत्पुरातनं यवपूजातथाप्रोक्ता स्वर्गसौख्यविधायिनी प्राजापत्यंब्राह्मणानां कर्त्तव्यंफलमीप्सुना गोधूमानांतथापूजा प्रशस्तामुनिसत्त

मा: संततिर्वर्धतेत्रापि यदिलक्षावधिःकृता द्रोणार्धेनभवेल्लक्षं विधानंविधिपूर्वकंपुनश्चब्राह्मणानांहिप्राजापत्यंभवेदिह मुद्गानांपूजनाच्चैवाशिवोयच्छतिवैसुखं प्रस्थानांसप्तकेनैवप्रस्थार्धेनाथवापुनः पलद्वययुतेनैवलक्षमेकंविदुर्बुधाः माषाणांचतथापूजारोगनाशकरीमता प्रस्थानामष्टकेनैवलक्षमेकंप्रकीर्त्तितं ब्राह्मणानांतथाभोज्यंरुद्रसंख्याविधीयते प्रियंगुपूजनंचैवसर्वाध्यक्षेपरात्मनि धर्मार्थवर्द्धिनीचैवपूजासर्वसुखावहा प्रस्थानांतुत्रयेणोक्तंलक्षमेकंपुरातनैः ब्रह्मभोज्यंतथाप्रोक्तमर्कोणांसंख्ययामुने राजिकापूजनंप्रोक्तं शत्रोर्मृतिकरंपरं प्रस्थेनपलयुक्तेनलक्षमेकंतथास्मृतं एकागौश्चात्रदातव्यावलीवर्दस्तथैवच मरीचिसंभवा पूजाशत्रोर्नाशकरीमता अतोपिविविधैर्धान्यैःपूजनंशंकरस्यच आढकीनांदलैश्चैवमहिमावर्धतेनृणां केसरैरंजितंधान्यंविविधंचार्पयेच्छिवे नानासुखकरीपूजाह्येषाचमुनिसत्तमाः इत्येतद्वचनंश्रुत्वापुनरूचुर्मुनीश्वराः लक्षमानंतुपुष्पाणांवदत्वंचहितावहं इतिश्रुत्वावचस्तेषांपुनर्वचनमाददे सूतउवाच श्रूयतांऋषभश्रेष्ठाःकथयामियथामतिः प्रस्थानांनवभिर्भागैःशंखपुष्पैःसमुद्भवं लक्षंप्रोक्तंतुमानेनसूक्ष्ममानेविचक्षणाः एकादशभिः प्रस्थैस्तुजातिमानंप्रकीर्त्तितं यूथिकायास्तथामानंकरवीरभवंतथा निर्गुंडीकुसुमानांतुतथैवकथितंबुधैः कर्णिकारेतथामानंशिरीषकुसुमैस्तथाबंधुजीवेतथामानंप्रस्थानांदशकेनतु इत्याद्यैर्विविधैर्माल्यैर्दृष्ट्वाचपूजनंचरेत् सर्वकामसमृद्ध्यर्थंपूजयेत्परमेश्वरं अतःपरंप्रवक्ष्यामिधारापूजामहंतुवः यस्याश्रवणमात्रेणकल्याणंजायतेनृणां विधानपूर्विकांकृत्वापूजांचैवशिवस्यच पश्चाच्चजलधाराचकर्त्तव्याचमुनीश्वराः ज्वरतापप्रशांत्यर्थंजलधाराशुभावहा शतरुद्रियमंत्रेणरुद्रैकादशकेनच रुद्रजाप्येनवातत्रपुरुषसूक्तेनवापुनः षडंगेनाथवातत्रसहस्त्रमृत्युंजयेनच गायत्र्याप्यथवाविप्रानामभिर्वाविशेषकैः अथवाप्यागमोक्तैर्वाजलधारादिकंतथा सुखसंपत्तिसिद्ध्यर्थं धारापूजनमुत्तमं

घृतधाराशिवेकार्य्यायावन्मंत्रसहस्रकंतदावंशस्य बिस्तारोजायतेनात्रसंशयः एवंचायुतमंत्रेणकार्यैवैशिवपूजनं प्रमेहरोगशांत्यर्थंप्राप्नुयात्मनसेप्सितं षंडत्वंयदिसंजातंतदाघृतसुपूजनं ब्रह्मभोज्यंतुतत्रोक्तंप्राजापत्यंमुनीश्वरैः केवलंदुग्धधारावैतदाकार्य्याविशेषतः शर्करामिश्रिताकार्य्यायदाबुद्धिर्जडाभवेत् केनापिकात्रिमंचैवशरीरेपरिकल्पितं यावन्मंत्रायुतंस्याद्वैतावद्धाराप्रपूजनं यदाचोच्चाटनंदेहेजायतेकारणंविना यत्रकुत्रापिवाप्रेमदुःखंचपरिकल्पितं स्वगृहेकलहोनित्यंयदाचैवप्रजायते तस्यांचैवकृतायांवैसर्वंदुःखंविलीयते शत्रूणांतापनार्थायतैलधाराशिवायवै वासितेनैवतैलेनभोगवृद्धिःप्रजायते तस्यांचैवकृतायांवैसर्वदुःखंविलीयते सार्षपेणैवतैलेनशत्रुनाशोभवेदिह मधुनायक्ष्मरोगोवैगच्छेद्धिशिवपूजनात् इक्षोरसस्यवैधारासर्वसौख्यकरीमता गंगाजलसमुद्भूताधारामोक्षफलप्रदा एतासर्वाश्चयाःप्रोक्ताधाराजयफलावहाः अयुतेनकृतास्तास्तुपूर्वोक्तविधिनाखिलाः कर्त्तव्यंब्राह्मणानांतुभोजनंरुद्रसंख्यया तदावैसकलंसिद्धंभवत्येवनचान्यथा एतद्वःसर्वमाख्यातंयत्पृष्टोहंमुनीश्वराः एवंपूजाविधिंकृत्वासर्वपापैःप्रमुच्यते एतद्वैसकलंलोकेसर्वकामाहितायवै स्कंदोमासहितंशभुंसंपूज्यविधिनासकृत् यत्फलंलभतेमर्त्यस्तद्वदामियथाश्रुतं अत्रत्यंभोगमैश्वर्यंभुक्त्वापुत्रादिकंशुभं अंतेवैजायतेयत्तच्छ्रूयतांमुनिसत्तमाः कोटिसूर्यप्रतीकाशैर्विमानैःसार्वकामिकैः रुद्रकन्यासमाकीर्णैर्गेयवाद्यसमन्वितैः शिववत्क्रीडतेभोगीयावदाभूतसंप्लवं इतिशिवपुराणेवायवीयसंहितायांलक्षपूजाभिषेकादिविधानम् ॥

अथशैवागमोक्तालक्षपूजा ॥ ईश्वरउवाच ॥ लक्षपूजाविधिंदेविकथयामिसमासतः यांकृत्वाप्राणिनःसर्वेममसन्निधिभाजनाः भवतीतिशेषः शिवरात्रौतथाष्टम्यांसोमवारेसमारभेत् शुभेन्यस्मिन्दिनेवापिशिवभक्तंद्विजोत्तमं सपत्नीकंसपुत्रंतमनूचानमनिंदकं धर्मज्ञंदोषरहितंसंतुष्टंपरिपूज्यच

आचार्य्यंवरयेत्प्राज्ञःसुस्नातोभूषितोव्रती ह्रस्वंचपृष्टलंदीनमतिदीर्घंजडंतथा देवताभक्तिरहितंवधिरंदीर्घलिंगिनं वेदहीनंदुराचारंमलिनंवहुभाषिणं निंदकंपिशुनंदुष्टंमंधकंचाविवर्जयेत् नित्यंनिर्वृत्यसकलसंकल्पमनसेप्सितं पंचकैर्मल्लिकापुष्पैर्जातीकिंशुकपाटलैः नंद्यावर्त्तैःश्रियावर्त्तैर्द्रोणपुष्पैःकदंबकैः अन्यैःशिवागमप्रोक्तैर्विल्वशाखादलैस्तथा नागवल्लीदलैर्वापिरत्नैर्नानाविधैरपि अन्यैश्चविविधैःशुद्धैःरखंडैर्व्रीहितंडुलैः लक्ष्यपूजांप्रकुर्वीतमूलमंत्रेणशंभवे स्वर्णपुष्पप्रत्ययुतंकर्पूरावर्त्तिकंभवेत् इत्येकास्मिन्दिनेवापिद्वयोर्वात्रिदिनेपिवा पुष्पलाभानुसारेणवहुभिर्वादिनैर्यजेत् पुष्पांजलित्रयंदत्त्वास्तुत्वास्तुत्वापुनःपुनः सप्राप्तौचशिवायैकंसौवर्णंपुष्पमर्चयेत्क्षमाप्यचमहादेवंप्रार्थयेत्तदनंतरं भवःशर्वस्तथारुद्रस्तपःपशुपतिःस्मृतः उग्रोमहांस्तथाभीमईशानश्चाष्टनामभिः पुष्पांजलित्रयंस्वर्णविल्वशाखासमन्वितम् प्रार्थनामंत्रः विरूपाक्षमहेशानविश्वरूपमहेश्वर मयाकृतंलक्षपूजांगृहीत्वावरदोभव ततोनमस्कारः मृत्युजयाययज्ञायदेवदेवायशंभवे आश्रितशायशर्वायमहादेवायतेनमः इतिनमस्कारमंत्रः इतिशैवागमेलक्षपूजाविधिः अथोद्यापनम् पंचामृतेनस्नपनंपलेनशतकेनवै नारिकेलार्घ्यदानंचपताकाध्वजएवच श्वेतवस्त्रद्वयंदेयंपूजायांचशिवस्यच पूजातेचतथाहोमांतेलद्रव्येणकारयेत् देवस्यानंतरंपूजामाचार्य्यस्यैवकारयेत् ततःप्रार्थनामंत्रः नमःशिवायशांतायसगणायनमोनमः

सर्वेश्वरायदेवायकारणत्रयहेतवे निवेदयामिचात्मानंत्वंगतिःपरमेश्वर भूमौस्खलितपादानांभूमिरेवावलंवनम् त्वयिजातापराधानांत्वमेवशरणंप्रभो ततोविप्राभोजनीयाःशक्त्यावापिदशाथवा आचार्य्यंपूजयेत्पश्चाच्छक्त्यादद्याच्चदक्षिणां पूर्णांतद्वचनात्कृत्वाममसान्निधिभाग्भवेत् यद्वारेमत्तमातंगावायुवेगास्तुरंगमाः पूर्णेंदुवदनाचार्य्योलक्षपूजाविधेःफलम् ॥ इतिब्रह्मांडपुराणेलक्षपूजोद्यापनम् ॥ अथैतस्यप्रयोगः तत्रादौ

पूजाविधिः ब्रह्मांडपुराणात् माघादिपुण्यमासेषुचातुर्मास्येथवापुनः श्रावणेतुविशेषेण चंद्रानुकूल्यदिने प्रातर्नद्यादौस्नात्वानित्यकर्मनिर्वर्त्य देवागारंप्रविश्य पुण्यतिथ्यादिसंकीर्त्य आत्मनअखिलपापक्षयपूर्वकैहिकामुष्मिकनिरवधिसुखसौभाग्यनिरवधिशिवलोकानिवासमहदैश्वर्य्यप्राप्तिद्वारा अमुककामनया वामासहितसदाशिवप्रीत्यर्थममुकपुष्पादिनालक्षपूजांकरिष्ये ॥ इतिसंकल्प्य पीठेशिवंयथाविधिसंपूज्य सहस्रनामभिर्मूलमंत्रेणवातत्तद्द्रव्येणपूजयेत् प्रत्यहंपंचामृतेनाभिषेकः कर्पूरेणार्त्तिक्यं दध्योदनोपहारः प्रथमदिनेयावतीसंख्यातावत्येवसंख्यासमाप्तिपर्यंतं अयुतांतेसुवर्णपुष्पं असंभवेलक्षांतेसमाप्तिदिनेविशेषेणशिवंसंपूज्य शतपलपरिमितपंचामृतेनस्नपनं नारिकेलार्घ्यदानंच ततःपुष्पांजलित्रयदानं अष्टाभिर्नाममंत्रैरिति ॐभवायनमः १ ॐशर्वायनमः २ ॐरुद्रायनमः ३ ॐपशुपतयेनमः ४ ॐउग्रायनमः ५ ॐमहतेदेवायनमः ६ ॐभीमायनमः ७ ॐईशानायनमः ८ इतिपुष्पांजलीर्दत्त्वाप्रार्थयेत् विरूपाक्षमहेशानविश्वरूपमहेश्वर मयाकृतां लक्षपूजांगृहीत्वावरदोभव ततःप्रणमेत् मृत्युंजयाययज्ञायदेवदेवायशंभवे आश्रितेशायसर्वायमहादेवायतेनमः॥ नमःशिवायशांतायसगणायससूनवे सोपस्करायदेवायकारणत्रयहेतवे ततोयथाशक्तिब्राह्मणान्भोजयेत् शक्त्याव्रतपूर्त्तयेगांचदद्यात् अत्रपूजाद्रव्याणि चंपकंमालतीपुष्पंजातीकिंशुकपाटलैः द्रोणपुष्पैः कदंबैश्चबिल्वशाखादलैस्तथा नागवल्लीदलैर्वापिकरवीरकुसुमैरपि तत्कालोद्भवैः पुष्पैः पल्लवैः कमलैरपि धान्यैश्चविविधैः पुष्पैः रखंडैर्व्रीहितंडुलैः लक्षपूजाप्रकर्त्तव्यानामभिर्मूलमंत्रतः एतेषांपूजाद्रव्याणांमंत्राः दानखंडादिषुद्रष्टव्याः रत्नपूजापितत्रैव विद्रुमाणांप्रदानेनरुद्रलोकंव्रजेन्नरः सर्वपापविनिर्मुक्तोमुक्तादानेनजायते लोकानाप्नोतिदानेननरोवज्रस्यवज्रिणः तथाप्रदत्तैर्गोमेदैर्मोदतेनंदनेवने सर्वेग्रहाःप्रतुष्यंतिपुष्प

रागप्रदानतः गारुत्मतैर्गरुत्मंतानियतंजयातिश्रिया वैडूर्य्यैः स्वर्गलोकंच पद्मरागैररोगता प्रदानादिंद्रनीलैश्चनीलानांसतुभाजनं सुखीशंखप्रदानेनशक्तिशुक्तिप्रदानतः इतिस्कंदेभिधानात् तत्रमुक्ताप्रदानमंत्रः ताम्रपर्ण्यर्णवोद्भूतावर्णाढ्याकल्पवर्णिताः मुक्ताः शुक्त्युद्भवाः संतुभुक्तिमुक्तिप्रदामम एवंसर्वेषामेवरक्तधान्यादीनांमंत्राग्रंथांतरतोवसेयाः इतिप्रकारांतरेणलक्षपूजाविधिः अथाग्निपुराणोक्तंसोद्यापनम् लक्षपूजाविधानम् तत्रपूर्ववद्देवंसंपूज्य ततः सहस्रनामाभिः ॐनमः शिवायेतिमंत्रेणपुष्पादिभिरेकरूपतयासमाप्तिपर्यंतमभ्यर्च्य तदंतेशुभदिनेउद्यापनंकुर्य्यात् तत्रादौ तिथ्यादिकीर्त्तनांतेआत्मनोऽनेकजन्मार्जितसमस्तदुरितानिवृत्तिपूर्वकैहिकपुत्रपौत्रा दिवृद्धिविविधसुखप्राप्त्यनंतरंशिवलोकानिवासकामकृतंयदमुकद्रव्यसमर्पणलक्षपूजनं तत्संपूर्णफलावाप्तयेतस्योद्यापनंकरिष्ये इतिसंकल्पः कार्य्यः ततोगणेशपूजा आचार्यवरणादि पूर्वांगंविधाय वेदिकायांलिंगतोभद्रेकलशैर्धान्यपूरितपूर्णपात्रमध्येसौवर्णंमहेशं नमः शंभवायेतिमंत्रेणसौवर्णींगौरीं गौरीमिमायेतिमंत्रेणपुरतः राजतंवृषभंतन्मंत्रेणसंस्थाप्य परिवारदेवताश्चसंस्थाप्य पूर्वादिदिक्षुधर्मज्ञानवैराग्यैश्वर्यानाग्नेयादिविदिक्षुच अधर्माज्ञानवैराग्यानैश्वर्यान्पीठेसंपूज्य मध्येमहेश्वरंसंपूज्य तद्बहिऐशान्यांईशानवक्त्रायनमः पूर्वेतत्पुरुषवक्त्रायनमः दक्षिणेअघोरवक्त्रायनमः पाश्चिमेसद्योजातवक्त्रायनमः उत्तरेवामदेववक्त्रायनमः पुनःपूर्वादितः वामायैनमःज्येष्ठायै.श्रेष्ठायै.रौद्रायै.काल्यै.कलविकारिण्यै-बलायै. बलविकरण्यै. मनोन्मन्यै. सर्वभूतदमन्यै. इतिदशदिक्षु ॥ १० ॥ पुनःपूर्वमारभ्यईशानपर्यंतं अजैकपदेनमः अहिर्बुध्न्याय. भवाय. शर्वाय. उमापतये. रुद्राय. पशुपतये. शंभवे. वरदाय. शिवाय. ईश्वरायनमः ॥ ११ ॥ पुनःपूर्वेनंदिकालौ. दक्षिणेभृंगिचंडौ. पश्चिमेवृषस्कंधौ. उत्तरेईशकालौ. ततइंद्रादिलोकेशान्सायु

धान्संस्थाप्यपूजयेत् अथशिवपूजाध्यानम् शुद्धस्फटिकसंकाशंत्रिनेत्रंचंद्रभूषणं भस्मोद्धूलितसर्वांगं ह्यचिंत्यंभक्तवत्सलं ॐनमःशिवायइतिमंत्रेणपूजयेत् लक्षपूजायांदशएकंवासुवर्णपुष्पंसमर्प्य ॥ प्रार्थयेत् ॥ नमःशिवायशांतायसगणायससूनवे सनंदिनेसगांगायसवृषायनमोनमः इतिनमस्कारः पुराणपठनादिना रात्रिंनीत्वा प्रातःस्वगृह्योक्तमग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानं सोमं महेशं नमः शंभवायचमयोभवायचेतिमंत्रेणाज्यासिक्ततिलद्रव्येणायुतसंख्याकाहुतिभिः सहस्रपरिमिताभिर्वापरिवारदेवतामंडलदेवताश्चैकयाज्याहुत्यायक्षे स्थापनमंत्रेणहोमः पुष्पसमर्पणंवा होमांतेसपत्नीकमाचार्य्यंसंपूज्यपीठंगोमिथुनंचप्रतिपाद्य अधिकफलाप्तयेसोपस्करांशय्यांदत्त्वा षोडशद्विजान्विशेषाकारेणसंपूज्य दक्षिणांचदत्त्वा ॥ सदन्नेनसहस्रंशतंवायथाविभवंसदन्नेनद्विजांस्तर्पयेदिति इतिलक्षपूजोद्यापनविधिः अथविष्णुलक्षपूजाविधिः अग्निपुराणे लक्षपूजाविधिंभूयःशृणुनान्यमनाःक्वचित् यांकृत्वामुच्यतेपापैर्नारीवाथनरोपिवा ब्रह्महागुरुगामीचमद्यपोवाधनापहः सकृत्पूजनमात्रेणमुच्यतेकिमुतान्यतः नातःपरतरंकिंचित्त्रिषुलोकेषुविद्यते किंकुलेनकिमाचारैः किंशीलेनगुणेनच योहरिंपूजयेत्सम्यक्सकुलीनः सबुद्धिमान् जंबूद्वीपेमहापुण्यंजन्मयः प्राप्यमामवः इमामकृत्वामूढात्माकोन्यस्तस्मादधोगतिः धर्महीनस्यमर्त्यस्यादिनान्यायांतियांतिच सलोहकारभस्त्रवतस्यजन्मनिरर्थकं पूजयेत्पूजयेद्विष्णुंभूयोभूयोपिपूजयेत् माघेवाकार्त्तिकेचैत्रेआषाढेश्रावणेपिवा अन्येषुपुण्यमासेषुव्रतमेतत्समाचरेत् देवपूजागृहंवापिदेवालयमथापिवा गोमयेनानुलिप्याथधातुनामृण्मयेनवा चतुर्भिर्ब्राह्मणैःसार्द्धंकृत्वाचस्वस्तिवाचनं नांदीश्राद्धंप्रकुर्वीतलक्षपूजाविधौद्विज प्राणायामत्रयंकृत्वादेशकालौपठेत्सुधीः सुसंकल्प्ययथाशक्त्याप्रत्यहंपूजयाम्यहं एवंसंकल्प्यविधिवन्मंत्रमेतमुदीरयेत् गृहीतेस्मिन्व्रतेदेवपंचत्वं

यदिमेभवेत् तदाभवतुसंपूर्णं त्वत्प्रसादाज्जगद्गुरो एवंसंप्रार्थ्यदेवेशंनियमं तुलसीदलैःपंचामृतैःस्नापयित्वाशालिग्रामशिलांशुभां गंधपुष्पाक्षतैर्भक्त्याप्रथमंपूजयेद्बुधः प्रत्यहंयावतीपूजातावत्प्रणतिभिर्व्रती पद्मान्यपिचतावंतिलिखेत्पंचाभिधातुभिः महाव्रतामिदंब्रह्मन्देवानामपिदुर्लभं तुलसीदलैर्नवैस्सस्यैरव्रणैरतिशोभनैःकूष्मांडवर्जितैर्देवंपूजयेत्तस्यनामभिःविष्णोर्नामसहस्रेणअथवाशतनामभिःसंख्यापूर्णफलासंख्यामंत्रहीनातुनिष्फलातस्थिरोमौनवान् भूत्वाविष्णुलोकपरायणः एवंसंपूज्यविधिवत्पूजांतेहोममाचरेत् सहस्रनामभिर्होमंस्वाहाकारसमन्वितं मधुमिश्रैस्तिलैर्लाजा मिश्रितैः कृमिवर्जितैः होमसंख्याविधानेन लक्षसंख्यायदाभवेत् पूर्णाहुतिंततः कृत्वा प्रणिपत्यक्षमापयेत् लक्ष्मीनारायणंदेवंशंखचक्रगदाधरं सुवर्णप्रांतिमांकृत्वावित्तपूर्वंविचक्षणः ब्राह्मणायसुशांतायस्वदारनिरतायचपत्नीपुत्रवतेदानमक्षयंफलमश्नुते जलशायीब्रह्मपितापद्मनाभः सनातनः अनंतभोगशयनःप्रीयतांपरमःपिता इतिदानमंत्रः तुलस्यभावेपुष्पैर्वाबिल्वैर्वाव्रणवर्जितैः सुगंधैर्ऋतुसंभूतैस्सस्यैःपादपपल्लवैः सहस्रंद्विसहस्रंवात्रिसहस्रंयथाविधि उपक्रमदिनेयावत्प्रत्यहंतावतीभवेत् उपक्रमदिनेवापिह्यवमानेपितावती उद्यापनंप्रकुर्वीतपूर्वोक्तेनैवमार्गतः अन्यथादोषमाप्नोतिहीनांगोजायतेभुवि एवंयःकुरुतेमर्त्योनारीवागतभर्तृका देहांतेज्ञानवान्भूत्वाविष्णुलोकमवाप्नुयात् ब्राह्मणान्भोजयित्वातुस्वयंभुंजीतवाग्यतः तुलसीदर्शनंस्पर्शोनमस्कारःप्रदक्षिणा दानंचहरिपूजाचधारणंतज्जलंचयत् भक्षणंदर्शनंचैवविष्णुलोकप्रदायकं महापातकसंयुक्तोयुक्तोवासर्वपातकैः विष्णुपूजाविधानेनजीवन्मुक्तोनसंशयः इत्याग्निपुराणोक्तंविष्णोर्लक्षपूजोद्यापनम् ॥ भविष्योत्तरेतु लक्षतुलसीव्रतोद्यापनम् कार्त्तिकेमाघेवाप्रत्यहंतुलसीदलान्यर्पयेत् ततोवैशाखेमाघेवाउद्यापनंकर्त्तव्यम् तत्रादावाचार्यवरणपूर्वकंपूर्वेद्युः स्वस्तिवाचनंकृत्वाप्रभातेस्थंडि

लंकृत्वा अग्निमुखांतेस्वगृह्यविधिनासंपाद्य घृतपलाशसमिद्भिश्चरुसहितंपंचशाखाद्यंजुहुयात् अष्टाक्षरषडक्षरद्वादशाक्षरैःप्रणवेनवा यथासंख्यंमंत्रविनियोगः दलार्पणसंख्यादशांशेनहोमः तद्दशांशेनतर्पणमार्जनादि तदंतेआचार्यायगांदत्वास्विष्टकृतंकृत्वा होमशेषंसमाप्य तद्दशांशेनविप्रान्भोजयेत् विप्रायविष्णुसहस्रनामदानमपिकुर्य्यात् ततःसुवर्णवृंदावनेतुलसींसमारोप्य विष्णुरूपायाचार्य्यायदद्यादिति तुलसीदलोद्यापनम् अग्निपुराणीयसोद्यापनोलक्षपूजाप्रकारप्रयोगः चातुर्मास्यसमाप्तौतुलक्षपूजांसमापयेत् माघादिषट्सुमासेषुलक्षपूजाहरेःस्मृता यद्यद्दत्तोभवेत्पुष्पंविष्णवेतत्तदर्प्यते अतसीतुलसीधात्रीपद्मंदूर्वांकुरास्तथा करवीरंकर्णिकारंशतपत्रंचकेतकं चंपकंतगरंचैवसौवीरंकनकंतथा जातीपुष्पंपाटलकंपुन्नागंबकदंबकं वदरंचामलंपूगंफलैरन्यैश्चपूजयेत् सुगंधैर्ऋतुसंभूतैःसर्वैःपादपपल्लवैइति यद्यत्समर्प्पयेद्द्रव्यंतस्यरूपंहिरण्मयं कारयेत्सततंचैकंसहस्रंवापिकारयेत् लक्षंवादापयेद्धीमान्यथावित्तानुसारतः विष्णोर्नामसहस्रेणगायत्र्यामूलमंत्रतः सहस्रंद्विसहस्रंवात्रिसहस्रंयथाविधि उपक्रमदिनेयावत्प्रत्यहंतावतीभवेत् तत्रादौतिथ्यादिकीर्त्तनांतेऽखिलनानाविधपातकनिरसनपूर्वकैहिकामुष्मिकनिरतिशयभोगानंदप्राप्तिद्वाराश्रीलक्ष्मीनारायणप्रीत्यर्थंतुलस्यादिलक्षपूजांकरिष्ये इतिसंकल्प्यपीठपुरुषसूक्तेनदेवंसंपूज्य नाममंत्रैस्तुलस्यादिसमर्प्पयेत् लक्षादिसमाप्तावुद्यापनंकुर्य्यात् सर्वसंकल्पांतेअमुकलक्षपूजोद्यापनंकरिष्ये इतिसंकल्प्य आचार्य्यवरणांते देविकायांसर्वतोभद्रेब्रह्मादिदेवतास्थापनपूर्वककलशंप्रतिष्ठाप्य तत्रदेवंपूजयेत् तत्रायंक्रमः सर्वतोभद्रेब्रह्मादिदेवताःस्थाप्य तदुपरिप्रस्थंसप्तधान्यपुंजंतदुपरिप्रस्थगोधूमपुंजं तदुपरिप्रस्थपरिमितशुद्धतंडुलराशिंकृत्वा तत्रकुंकुमेनअष्टदलपद्मंविरच्य तन्मध्येताम्रमयेपात्रेपिसप्तधान्यसहितंताम्रकलशंप्रतिष्ठाप्य तत्रसौ

वर्णंचतुर्भुजंलक्ष्म्यालिंगितवामांगंनारायणंसहस्रशीर्षेतिमंत्रेणसंस्थाप्य पुरतःसौवर्णंराजतंगरुडंसामध्वनिशरीरस्तंवाहनं परमेष्ठिनःविषपापहरोनित्यमतःशांतिंप्रयच्छमे ततईशानादिशानादिदिक्षुशंखंचक्रंगदापद्मं ततःपरितःलोकेशान्संस्थाप्यपूजयेत् प्रातःअग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानंलक्ष्मीनारायणं ऊँनमोनारायणायेत्यष्टाक्षरमंत्रेणमधुलाजामिश्रित तिलपायसघृतशर्कराद्यन्यतमचरुद्रव्यचतुष्टयेनप्रतिद्रव्यमष्टोत्तरसहस्राहुतिभिर्वासहस्रनाममंत्रैर्यक्ष्ये इत्येवंहोमंसमाप्य ततआचार्यायपीठंअनेनमंत्रेणदद्यात् जलशायीब्रह्मपितागर्भेयस्यचराचर अनंतभोगशयनःप्रीयतांमेजनार्दन इतिदत्त्वागांपयस्विनींचदत्त्वा अधिकफलाप्तयेसोपस्करांशय्यांदत्त्वा दशाधिकारान् द्विजान्सदन्नेनभोजयेत् एवमेवविधानेनगणेशांबिकयोर्नृप तत्तन्मंत्रेणपूजातुतत्तन्नामसहस्रकैः गणेशेलड्डुकैर्होमंपंचखाद्यैस्तथापिवा पायसेनतुदेव्याश्चतिलैर्वाकेवलैरपि एवं कृत्वाविधानेनस्वर्गलोकेमहीयते इतिविष्णुलक्षपूजोद्यापनम् गणेशांबिकयोरपिलक्षपूजोद्यापनं अथलक्षनमस्कारव्रतम् भविष्योत्तरे अंबरीषउवाच इक्ष्वाकूणांकुलगुरोब्रह्मन्धर्मंसविस्तरं ब्रूहिपापक्षयकरंव्रतंसर्वोत्तमंचमे ब्रह्मघ्नस्यसुरापस्यगुरुदाराभिमर्षिणः सुवर्णस्तेयिनश्चैवतेषांसंसर्गिणामपि संकीर्णपापिनांचैवसकलीकारिणांतथा असमंपश्यतोभार्य्याद्वयंदुष्टेनचेतसा श्वश्रूणांजनयित्रीणांकामिनांकामतोऽपिवा गुरौविश्वासहीनस्यब्रह्मघ्नस्यचपापिनः संध्याकर्मविहीनस्यजगदुन्मादवर्त्तिनः दासीवेश्यासंगमिनश्चांडालीगामिनस्तथा परस्वहारिणश्चैवदेवद्रव्यापहारिणः ब्राह्मणेभीष्टदस्यैववृत्तिच्छेदकरस्यवा परस्वलोलुपस्यापिरहस्यकृतपापिनः पंचयज्ञविहीनस्यदुःशास्त्रनिरतस्यवा गुरुनिंदादिसंश्रोतुर्गुरुद्रव्यापहारिणः नारीणांचविशेषेणप्रायश्चित्तं यदीप्सितं तदालक्षनमस्कारव्रतंकुरुमहीपते संकरीकरणानांचमलिनीकरणस्यच अपात्रीकरणानांच

प्रायश्चित्तंयदीच्छसि तदाल. ॥ ३ ॥ भ्रातृपत्नीसुतानांचगामिनः कामिनस्तथा स्वसृस्वमातृबंधूनामिच्छयागमनस्यच दासीवेश्यासंगमस्यसंक्षयंयदिवांछासि तदाल. ४ परस्वहरणस्यापिदेवस्वहरणस्यच रहस्यभेदकस्यापिरहस्यकृतपापिनः त्यागस्यपंचयज्ञानामसच्छास्त्राधिपस्यच गुरुनिंदाश्रुतेश्चापिगुरुस्वहरणस्यच लेह्यानांचैवचोष्याणांसंक्षयंयदिवांछसि तदाल. ॥ ५ ॥ कृतस्यजन्मसाहस्त्रैर्मेरुविंध्यसमस्यच अत्युत्कटस्यपापस्य इहजन्मकृतस्यच सर्वस्यपापजातस्य संक्षयंयदिवांछासि तदालक्षनमस्कारव्रतं कुरुमहीपते ॥ ६ ॥ शृणुभूपविधिंवक्ष्येसंकल्पनियमादिकम् चातुर्मास्येसमायातेकेशवेशयनं गते आषाढस्यसितेपक्षेएकादश्यांसमाहितः संकल्प्यदेवदेवस्यपुरतश्चक्रपाणिनः ममलक्षनमस्कारव्रतस्यपुरुषोत्तम निर्विघ्नेनव्रतंसांगंकुरुत्वंकृपयाहरे पापपंकनिमग्नंमांपापकोशस्यभाजनम् व्रतेनानेनसुप्रीतःसद्यएवजगत्पते इतिसंकल्प्यमनसाकार्त्तिक्यांतुसमापयेत् प्रातःस्नात्वाव्रतंकुर्य्यादामध्यान्हंसदामुनिः यद्वातद्वानभुंजीतभुंजीतलघुभोजनम् अनृतंनवदेत्क्कापिनापध्यायीतकञ्चन देवतानांजपंहोमंनत्यजेतकथंचन अतिथिंपूजयेन्नित्यं यथाशक्त्यानुसारतः कार्त्तिकेमासिसंप्राप्तेपौर्णमास्यांततःपरम् संस्थाप्यकलशंपूर्णंसवस्त्रंसापिधानकम् विष्णोश्चप्रतिमांतत्रपूजयेद्विष्णुनामभिः नामभिःकेशवाद्यैश्चअंगपूजाविधीयते नैवेद्यांतेसमभ्यर्च्यकुर्य्यात्पश्चाच्चतर्पणम् पौरुषेयेणसूक्तेनतिलगोधूमतंडुलैः देबदेवजगन्नाथसर्वव्रतफलप्रद व्रतेनानेनसुप्रीतोगृहाणार्घ्यंनमोस्तुते इतिचार्घ्यत्रयंदत्त्वा पश्चाद्धोमंसमाचरेत् पौरुषेनसूक्तेन शतमष्टोत्तरंसदा होमशेषंसमाप्याथपूर्णाहुतिमतःपरम् आचार्य्यंपूजयेत्पश्चाद्दद्याद्गोमिथुनंगुरोः ब्राह्मणान्भोजयेत्पश्चाच्छतंविंशतिपंचवा दक्षिणांचयथाशक्त्यावाचयेदाशिषस्ततः अनुज्ञातश्चतेभ्योवैस्वयं

भुंजीतबंधुभिः इदंव्रतंमहापुण्यंपापारण्यदवानलं पापपर्वतवज्रंचपापाब्धितरणोडुपम् सर्वपापहरं सद्यः सद्योविष्णुप्रसादनम् नानेनसदृशंकिंचित्त्रिषुलोकेषुविद्यते सर्वेषामाश्रमाणांचविहितंश्रुतिचोदितम् नारीणांसधवानांचविधवानांविशेषतः सर्वेषामेवपापानांप्रायश्चित्तमिदंभवेत् ॥

इतिश्रीभविष्योनरेवसिष्ठांबरीषसंवादेलक्षनमस्कारव्रतविधानम्

अथैतस्यप्रयोगः मार्गशीर्षेतथामाघेचैत्रवैशाखयोरपि अस्तादिदोषरहितेपौर्णमास्यांसमापयेत् तत्रविधानम् तिथ्यादिसंकीर्त्तिनांतेममानेकजन्मार्जितनानाविधपातकशमनपूर्वकअतुलभोगप्राप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थं श्रीविष्णोरमुकदेवस्यवालक्षनमस्कारव्रतमहंकरिष्ये इतिसंकल्प्य ततोदेवालयेअश्वत्थमूलेगंगातीरे अन्यत्राश्रमस्थलेदेवालयेपितद्देवताप्रीतयेतद्व्रतम् तंदेवंपीठेपुरुसूक्तेनसंपूज्य नमोस्त्वनंतायेतिस्तुत्वा तद्देवतानामसहस्रेणतद्देवताप्रकाशकवैदिकमंत्रेण मूलमंत्रेणसाष्टांगंपंचांगंवाप्रत्यहंनियतसंक्षयानस्कारान्विधाय व्रतांतेतदुद्यापनंकुर्यात् पूर्वोक्तसंकल्पांतेअमुकदेवतायाः कृतलक्षनमस्कारव्रतस्यसांगतासिद्धयेतदुद्यापनंकरिष्ये इतिसंकल्प्य आचार्यवरणांतेसर्वतोभद्रकलशोपरिहैमंदेवंतद्देवतामंत्रेणसंस्थाप्यपूजयित्वा विशेषार्घ्यंवयंदद्यात् देवदेवजगन्नाथसर्वक्रतुफलप्रदव्रतेनानेनसुप्रीतोगृहाणार्घ्यंमयार्पितम् ततअग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानंदेवंविष्णुं अमुकंदेवंवासप्ताहुत्यापौरुषसूक्तेनद्वादशोत्तरैकशताहुतिभिश्चरुतिलव्री

हिपालाशसमित्सार्पिर्द्रव्यैःप्रतिद्रव्यंयक्ष्ये ब्रह्मादिदेवताभ्यश्चैकैकयाज्याहुत्यायक्ष्ये इतिहोमं ततःपीठंगांचाचार्य्यायदत्त्वा अष्टोत्तरशताधिकान्द्विजान्यथाशक्तिभोजयेत् इतिलक्षपुष्पोद्यापनम् लक्षनमस्कारव्रतोद्यापनमपि अथलक्षप्रदक्षिणाविधानम् अथलक्षप्रदक्षिणाविधानंसोद्यापनम् विष्णुधर्मोत्तरे श्रीकृष्ण उवाच चातुर्मास्येचसंप्राप्तेपरिक्रम्यशुचिर्भवेत् स्वकृतंपापमुच्चार्य्यज्ञानंचसकलंभवेत् तत्रमंत्रः यानि कानिचपापानिजन्मांतरकृतानिच तानिसर्वाणिनश्यंतुप्रदक्षिणपदेपदे संकल्प्यंकुर्य्यान्नियतः कार्त्तिक्यांतुजितेंद्रियः लक्षंसमाप्यपश्चात्तुकुर्य्यादुद्यापनंव्रती आचार्य्यंवरयेद्विद्वान्ब्राह्मणानृत्विजस्तथा स्वस्तिवाचनपूर्वेणवालरूपंजनार्दनम् वस्त्रेणपरिधानेनानिर्व्रणेकलशेर्चयेत् हुत्वातुविष्णुगायत्र्याशतमष्टोत्तरंचरुम् कपिलांचततोदद्यादाचार्य्यायसदक्षिणाम् ब्राह्मणानृत्विजश्चैवयथान्यायंप्रपूजयेत् पायसंजुहुयात्तत्रसहस्रंविजितेंद्रियः अहोमुखैश्चदेवनसूक्तेनप्रतृचंवुधः ब्राह्मणान्भोजयेत्पश्चाद्दद्यात्तेभ्यश्चदक्षिणाम् एवंकृत्वाव्रतमिदंपवित्रंपापनाशनम् पूर्वजन्मार्जितैःपापैरिहजन्मार्जितैरपि आगामिजन्मजैश्चैवमुच्यतेनात्रसंशयः इतिविष्णुधर्मोत्तरोक्तंलक्षप्रदक्षिणाव्रतोद्यापनम् अथास्यविधानम् आषाढशुक्लैकादश्यांपूर्णिमायांवाप्रारंभः कार्त्तिक्यांसमापनम् अथवायास्मिन्वाशुभेमासेप्रारंभः व्रतांतेसमापनम् अत्रप्रदक्षिणास्थानानि सुरालयेश्वत्थमूलेतुलस्यागोव्रजेतथा कुर्य्यात्प्रदक्षिणांसर्वांपूजयित्वायथाविधि तत्रादौतिथ्यादिसंकीर्त्तनांतेआत्मनः सकलपापक्षयरोगपीडानिरसनपूर्वकामुकाभीष्टसिद्धयेश्रीपरमेश्वरप्रीत्यर्थं श्रीविष्णोरमुकदेवस्यवालक्षप्रदक्षिणाव्रतंकरिष्ये इतिसंकल्प्य गणेशादीन्पूजयित्वा पूजासामग्रींगृहीत्वा अश्वत्थादिसमीपेगत्वा पुरुषसूक्तेनसंपूज्य सहस्रनामादिपठन्करचालनादिरहितः कृतांजलिरेकाग्रचित्तः प्रदक्षिणाएकरूपतयासमाप्तिपर्य्यंतंकुर्य्यात् व्र

तांतेउद्यापनंकुर्य्यात् तत्रादौदेशकालादिकीर्त्तनांतेअमुककामनयाकृतायालक्षप्रदक्षिणास्तत्साद्गुण्यार्थंतदुद्यापनंकरिष्ये ततआचार्य्यवरणांतेसर्वतोभद्रस्थकलशोपरिहैमंप्रदक्षिणादैवतंतन्मंत्रेणसंपूज्य साष्टांगंप्रणम्य ततअग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानंविष्ण्वादिदेवंतस्यगायत्र्याअष्टोत्तरशतंचर्वाहुतिभिः ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ततोहोमांतेपीठंकपिलांचाचार्य्यायसंपूज्यदत्त्वा यथाशक्तिब्राह्मणान्भोजयेत् अत्रयस्यदैवतस्यप्रदक्षिणाव्रतं तस्यैवमंत्रोहोमपूजादौग्राह्यः इतिलक्षप्रदक्षिणाव्रतोद्यापनम् अथप्रकारांतरेणअश्वत्थप्रदक्षिणाविधिः भविष्ये संकल्पादिपूर्ववत् इयान्विशेषः आदौआराधयेद्विष्णुंध्यानावाहनपूर्वकम् तथैवपिप्पलतरुंनारायणस्वरूपिणं सदापुरुषसूक्तेनउपचारैश्चपूजयेत् ततःप्रदक्षिणांकुर्य्यात्तत्सर्वंसफलंभवेत् लक्षमेकंद्विलक्षंवात्रिचतुःपंचलक्षकम् कार्य्यस्यगौरवाद्ज्ञेयंद्वादशांतंसमाचरेत् ब्रह्मचारीहविष्याशीत्वधःशायीजितेंद्रियः मौनीध्यानपरोभूत्वासघृतंपायसंहुनेत् तर्पणंतुदशांशेनभोजनंतद्दशांशतः होमादौविष्णुगायत्रीतथानामसहस्रकं तत्रद्रोणपरिमिततंडुलपुंजोपरिपलादधिकरौप्यपीठोपरिसुवर्णादधिकंहैमअश्वत्थतरुंसंस्थाप्य श्वेतवस्त्रेणसंछाद्यसंपूज्यद्विजायदद्यात् तत्रमंत्रः पिप्पलोवृक्षराजेंद्रह्यग्निगर्भस्त्वमेवहि प्रभुर्वनस्पतीनांत्वंपूर्वजन्मनियत्कृतम् अघौघंनाशयक्षिप्रंतवरूपप्रदानतः ततोद्विजंप्रार्थयेत् अमुंतरुंगृहाणत्वंविष्णुरूपंद्विजोत्तम स्वीकृत्यदुष्कृतंक्षिप्त्वाविष्णुरूपंप्रयच्छमे ततोव्रतपूर्त्तयेशुक्लांगांदद्यात् अधिकफलप्राप्तयेसोपस्करांशय्यांचदद्यात् इत्यश्वत्थप्रदक्षिणोद्यापनम् अथलक्षवर्त्तिव्रतविधानम् कार्त्तिकेमाघेवैशाखेवाचातुर्मास्येवालक्षवर्त्तिव्रतविधानंकार्य्यम् तत्रमासपक्षादिकीर्त्तनांते अमुकाभीष्टप्राप्तिकामोलक्ष्मीसहितंविष्णुमुमासहितंशिवंयथामिलितोपचारैःपूजयिष्ये षोडशोपचारैःसंपूज्यलक्षवर्त्तिविधानंकुर्य्यात्

तत्रकथा सूतउवाच आर्यावर्त्तेपुराकाचिद्वेश्याभूल्लक्षणाभिधा तस्याभुजंगःशूद्रोभूद्दासोनाममहावली तां लक्षणांतुसुस्नातांस्थितांगोदावरीतटे बालवैधव्यदोषेणरुदंतींकुररीमिव मृतंपतिंपुरास्थाप्यबंधुभिःपरिवारिताम् आक्रंदंतींततोवीक्ष्यशनैस्तांप्रत्यपद्यत लुठंतींभुविकायेनमुहुर्घ्नंतीमुरोबहुः जडानामपिकारुण्यंजायतेतातुपश्यताम् तदासालक्षणावाक्यंस्वभुजंगमुवाचह कुलजानांतुनारीणांदशेयमतिदारुणा अवस्थात्रयमेतासांतत्रेयंतुसुदारुणा कन्यात्वंजीवभर्तृत्वंविधवात्वमितित्रिधा पारवश्यंचनारीणांदुःखमामरणांतिकम् अनापत्यत्ववैधव्येतथैवापुत्रतास्त्रियः असह्यमेतत्त्रितयंवैधव्यंतत्रचोत्तरम् शोचंतीनांचनारीणांकस्येदंकर्मणःफलं निर्वर्त्ततेथकेनेदंपृच्छंतीमितितामथ उवाचदासनामासौभुजंगःसूनृतंवचः शृणुभद्रेप्रवक्ष्यामित्वायापृष्टाद्विजातयः देवानांचैवलोकानांहितार्थेमंत्रकोविदाः शास्त्रज्ञानात्स्वभावाच्चजीवानांयत्पुराकृतम् जानंतिकर्मजफलंतेप्रष्ठव्याधृतव्रताः भुजंगवचनंश्रुत्वातथैवोमितिसापुनः तत्रागतमहावृद्धंद्विजंपप्रच्छतंतदा प्रणम्यसादीनतराप्रश्रयातुरमानसा मुनेत्वहंदुराचारावेश्यास्मिलक्षणाह्वया तथापितेदयापात्रंपृच्छंतींमांप्रबोधय साधूनांसमचित्तानांजनाःसर्वेसमाभुवि दुर्गंधोवासुगंधोवायथावायुःसुखोभवेत् मुनेदशेयंनारीणांतृतीयातीवदुःसहा कर्मणाजायतेकेनकेनवाविनिवर्त्तते एतद्विचार्य्यमेब्रह्मन्कृपयावदसुव्रत इतितस्यवचःश्रुत्वायाजकोवाक्यमब्रवीत् दैवेकर्मणिपित्र्येचनार्य्यःकेनव्यवस्थिताः अकस्माच्चरजोदुष्टाःस्पृष्ट्वाभांडाद्युपस्करान् अज्ञानाद्ज्ञानतोवापिकामलोभात्क्वचित्क्वचित् अबोधयित्वागच्छंतितेनदुष्यंतिसत्क्रियाः क्रियालोपगताह्येताःपापात्तस्मात्सुदुस्त्यजात् दशामिमांप्राप्नुतिसर्वाअपिनसंशयः बाल्येवायौवनेवापिवार्धकेवाकदाचन तत्रायातिदुराचारापरानेवाभिवांछति श्वश्रोश्वपतिबंधूनामतिचारात्सुदुःसहात् दशामिमांप्राप्नुवंतिसर्वाअपिनसंशयः सा

तत्कर्मसहायेनरजसादूषिताचसा मृतपत्यातथाभूत्वावैधव्ययौवनेव्रजेत् यानारीतुरजोदुष्टासर्वभांडानिसंकरम् कुरुतेयदिसानारीवैधव्यवार्धकेव्रजेत् याचानुकूल्यरहितापतिधर्मेषुसर्वदा वालवैधव्यमापन्ना गतिहीनाभवत्यलम् सर्वासामपिवैधव्येनिदानंपुष्पितानघ तस्यशांतिंप्रवक्ष्यामिकर्मणश्चापिलक्षणे कृतेतुमुनिपंचम्याव्रतेपापंतुयोषिताम् क्षयंगच्छातिनारीणामितिबेदविदोबिदुः शूर्पसवायनंदत्त्वाकृतेलक्ष्मीव्रतादिके मूलावशेषंव्रजतिरजोदोषोनसंशयः निर्मूलंतुव्रजत्याशुलक्ष वर्त्तिव्रतेकृते रजसोत्थमहापापंनारीणांनात्रसंशयः इतितद्वचनंश्रुत्वापुनः पप्रच्छलक्षणा मनसाशंकिताभूत्वासादरंमुनिसत्तमम् साधुसाधुमहाभागचित्तंमेभयविह्वलम् लक्षवर्त्तिव्रतस्यास्यविधानंकीदृशंवद कस्मिन्मासेतुकर्त्तव्यंकस्यवातत्समर्पणम् उद्यापनंकथंकार्य्याकिं फलंतस्यवामुने तयापृष्टोयाजकोपिलोकानांहितकाम्यया फलंविधानंतत्सर्वमवदद्वदतांवरः॥ मुनिरुवाच॥ लोमशस्यमुनीनांचसंवादंकथयामिते कालोस्यकार्त्तिकोमासोवैशाखोमाघएवच सहस्रगुणितंधत्तेकार्त्तिकेविद्धितद्व्रतम् तस्मात्कोटिगुणंधत्तेमाघमासेव्रतोत्तमम् तस्मादनंतगुणितंफलंवैशाखमासके एतस्मिन्मासत्रितये यस्मिन्मासेसमाप्यते तस्मान्मासद्वयात्पूर्वप्रारब्धव्यमिदंव्रतम् अंतेमासिप्रकुर्वीततत्समाप्तिंविचक्षणः सहस्रवर्त्तिभिः कुर्य्या दारार्त्तिंविष्णवेध्रुवम् गोघृतेनाथतैलेनसम्यगुक्तैर्मनोहरैः यस्मिन्मासेसमाप्तिः स्यात्पौर्णमास्यांसमाचरेत् उद्यापनंविधानेनव्रतसंपूर्णकारकम् प्रातः स्नात्वाशुचिर्भूत्वापंचगव्यंतुप्राशयेत् पुण्याहवाचनंकृत्वाआचार्य्यवरयेत्ततः त्रयोदशार्त्विजोभद्रेसाग्निकान्वृणुयात्ततः सतिलैश्चयवैः कुर्य्या दग्नेनयक्षचाद्विजाः वर्त्यादशांशतः कुर्य्या त्तर्पणंतुविचक्षणः तर्पणस्यदशांशेनहोमंकुर्य्याद्विचक्षणः तर्पणोक्तेनमंत्रेणपायसंचघृतान्वितं पालाशसमिधश्चैवमंत्रणानेनवैष्णवैः तंघ्रूचविष्णुगायत्र्याहोमस्यायंविधिरस्मृतः कलशेषुत

धास्थाप्यसपिधानंसवस्त्रकम् सुवर्णप्रतिमांकृत्वाअग्न्युत्तारणपूर्वकम् प्राणप्रतिष्ठयाः स्थाप्याः प्राणस्तस्यांसमाहितः आवाहनादिपुष्पांतंपूजांकुर्य्याद्यथाविधि ततस्त्रयोरुक्ममयाः प्रतिमाः कारयेत्ततः श्रियाचसहितंदेवंमध्यगंपूजयेद्धरिम् तद्दक्षिणेचतुर्वक्त्रं सावित्र्यासहितंतथा उत्तरेचोमयाशंभुपुरतोगरुडंतथा कालोविष्णुस्तथावन्हीरविदीप्तोनिशाकरः रुद्रः शेषोजगद्व्यापीतेजोरूपमिहेश्वरः निरंजनः कलाध्यक्षोविश्वरूपीजगत्प्रभुः स्वप्रकाशः स्वयंज्योतिश्चतुर्बाहुर्जलाशयः परंब्रह्मेतिदशभिर्नामभिः पूजयेद्धरिं शिरोललाटकेनेत्रेकर्णेनासेमुखंतथा कंठस्कंधौतथावाहूस्तनौवक्षस्तथोदरम् नाभौचकट्यांजघनेऊर्वोर्जानौचगुल्फके पादौतुक्रमशस्त्येतान्यंगान्येवंतुपूजयेत् धूपंदीपंततोदत्त्वानैवेद्यंचनिवेदयेत् यद्द्रव्यंलक्षपूजायास्तद्द्रव्यंकनकस्यच कृत्वानिवेदयेत्तस्मैपश्चात्पूजांसमाचरेत् भक्त्याचजगदात्मानमथदेवंक्षमापयेत् देवदेवजगन्नाथभक्तानांकार्य्यकारकत्वत्प्रसादादहंयाचेशीघ्रंकार्य्यप्रदोभव अनेनैवविधानेनलक्षपूजांकरोतियः पुत्रैः पौत्रैः प्रपौत्रैश्चसुखंप्राप्नोतिनिश्चितम् आचार्य्यंपूजयेत्पश्चाद्ब्राह्मणानृत्विजस्तथा गौर्देयाचसवत्सावैसालंकारागुणान्विता त्रिंशत्पलंकांस्यपात्रंघृतेनपरिपूरितम् सुवर्णवर्त्तिसंयुक्तमाचार्य्यायनिवेदयेत् अथवातद्दशपलंतथाघृतसमन्विम् अथवातद्यथाशक्तिदद्यादावश्यकंत्विदम् व्रताभावेतुवैदद्यात्कांस्यंवैघृतपूरितम् यावज्जीवंजीवपतिर्भवत्येवनसंशयः रजोदोषविमुक्तिः स्यात्पौर्णमास्यांददातिया ब्राह्मणान्भोजयेत्पश्चाद्वित्तशाठ्यंनकारयेत् एवंकरोतियानारी तस्याः पुण्यफलंशृणु अथसर्वाणिपापानिरहस्यानिकृतानिवै नश्यंतितानिसर्वाणिव्रतस्यास्यप्रभावतः चंडालगामिनीवापितथाशूद्राभिगामिनी कारूकरजकादीनांगामिनीदुष्टचारिणी ब्रह्मक्षत्रियविट्शूद्रप्रतिलोमानुगामिनी मातुलेयपितृव्यादिभ्रातृपुत्राभिगामिनी बालघ्नीवापतिघ्नीमातापित्रोर्वधरता

गोघ्नीवातस्करीवापिरजःसंकरकारिणी एवमादिमहापापैर्वृतावापिकुलांगना कृत्वाचैतद्व्रतंसम्यक्मुच्यते नात्रसंशयः व्रतानामुत्तमंचैतत्स्त्रीणामावश्यकंत्विदम् एवंवर्त्तिप्रदानेनविष्णोरमिततेजसः कोटयोव्रह्महत्यानामगम्यागमकोटयः तथैवात्युग्रपापानांकोटयोथसहस्रशः नश्यंतिनात्रसंदेहोनारीणांतुनरस्यवाकिं लक्षववर्त्तिभिर्विष्णोःकृतेवारार्त्तिकार्प्पणे किमत्रबहुनोक्तेननानेनसदृशंव्रतम् पुरुषोपिव्रतंकृत्वापूर्वोक्तैःपापसंचयैः मुच्यतेनात्रसंदेहःप्रसादान्मधुशासितुः एतद्व्रतंसमाख्यातंपृच्छतस्तवमानदे व्रतंकुरुसुखंवातिष्ठयथातेरोचतेमनः इतितद्वचनंश्रुत्वापुनःपप्रच्छलक्षणा अज्ञानाद्दुष्टभावाद्वानविचारोममेहवै प्रत्ययार्थंममब्रह्मन् प्रत्यक्षंकुरुमेधुना इतितस्यावचःश्रुत्वायाजकोवाक्यमब्रवीत् कथंतत्प्रत्ययोभूयात्कथ्यतांकरुणानिधे साप्युवाचमुनिंविप्रंविस्मयोत्फुल्ललोचना नचवैधव्यमापन्नारोदित्येषाकुमारिका अस्याःपतिःकथंजीवेद्वैधव्यंचैव गच्छति तथाकुरुमुनिश्रेष्ठदयाशमवतांधनम् इतितस्यावचःश्रुत्वाविस्मितोवाक्यमब्रवीत् अद्यवैमकरंप्राप्तोभास्करोलोकभास्करः माघोयंचवरोमासोनेकक्रतुफलाधिकः अद्यगत्वाकुरुस्नानंगंगायामघहारिणीं स्नानंकृष्णार्चनंकृत्वादेहितस्मैमृतायवै तेनजीवेदयंनूनंव्रह्मघ्नोयसुरापवः तस्मादयंराजयक्ष्मरोगेणतुमृतिंगतः तथापिमाघमासस्यपुण्याद्वैजीवतेध्रुवम् दापयित्वातथावर्त्तिंकांस्यपात्रंविधानतः जीवपत्नीभवेदाशुयावदामरणांतकम् लक्षणातद्वचःश्रुत्वाजलंस्पृष्ट्वाचवाग्यतःस्नात्वाकृष्णार्पणंकृत्वाददौतस्यैफलंततःतत्पुण्यस्यप्रभावेनतत्क्षणादेवचोत्थितम् स्वभुजंगं प्रेषयित्वा सघृतंकांस्यपात्रकम् कुमार्य्यादापयामासवैधव्यस्यापनुत्तये एतत्पुण्यप्रभावेणकुमारीसापिशोभना तदाभवज्जीवपत्नीबभूवबहुपुत्रका कुमारी शोभनानाम तत्पतिःकणभोजकः तद्बांधवस्तदासवेंतुष्टुवुस्तांसुलक्षणाम् याजकंचापिसंप्रीत्याजग्मुस्तेस्वंनिकेतनं लक्षणापिचदोषेणभुजंगेनचसंयुता माघस्नानंततः

कृत्वा व्रतमेतच्चकारसा ततस्तुमरणंप्राप्तेदासस्तस्याःसहायकृते गयोनाममहाराजश्चक्रवर्तीबभूवहंसालक्षणाच तत्पत्नीसर्वलक्षणसंयुता बभूवलोकाविख्याताजीवभर्त्तासुपुत्रिका तस्माद्योमाघमासस्यसाहाय्यंचकरिष्यतिधर्मस्यतत्फलंप्राप्यमुच्यतेनात्रसंशयः नित्यस्नातुमशक्यश्चेत्कुर्य्यात्सतुदिनत्रयम् द्वादश्यांरथसप्तम्यांपौर्णमास्यांतथैवचसोऽपिपूर्णफलंप्राप्यविष्णुलोकेमहीयते तदेवंकर्मजफलंमहापातकनाशनं योनस्नातिनरोमाघमकरस्थे दिवाकरे ब्रह्महासतुविज्ञेयःसर्वकर्मसुगर्हितः नारीवाऽपिनरोवाऽपिनस्नायादरुणोदये रौरवंनरकंप्राप्ययावदाभूतसंप्लवं रोगाद्यपहतोयस्तुपादौप्रक्षाल्यवाग्यतः धौतवस्त्रंपरीधायात्रिराचम्यचवारिणा गायत्र्यामंत्रितयांभःप्रोक्षयेमूर्द्धनिसद्विजः सोऽपिस्नानफलंप्राप्यमोदतेविष्णुमंदिरे येचशृण्वंतिसततंयेपठंतिनरोत्तमाः ते सर्वपापानिर्मुक्तायास्यंतिपदमव्ययम् ॥ इतिवायुपुराणोक्ताविष्णुर्लक्षवार्तिकथा अथप्रयोगः ॥ श्रावणशुक्लप्रतिपदमारभ्यकार्त्तिकपौर्णमासीपर्यंतं प्रत्यहमेकसहस्रवर्त्तिकादीपनंकार्य्यं व्रतांतेउद्यापनं अथवा माघवैशाखपौर्णमास्योर्लक्षवर्त्तिकोद्यापनं एतेषामभावे अन्यदाशुभकालेकार्य्यंतिथ्यादिकीर्त्तनांते आत्मनः रजःसंपर्कादिविविधपातकसंपाद्यागम्यागमनकोटिनाशविविधैहिकपुत्रपौत्रादिसुखप्राप्तिपूर्वक विष्णुलोकप्राप्तिद्वारापरमेश्वरप्रीत्यर्थं आचरितंयल्लक्षवर्त्तिकाव्रतंतत्संपूर्णफलावाप्तयेतदुद्यापनंकरिष्यइतिसंकल्प्य आचार्य्यवरणांते सर्वतोभद्रेकलशंप्रतिष्ठाप्य तन्मध्येइदंविष्णुरितिमंत्रेणविष्णु तद्दक्षिणेसावित्रीसहितंब्रह्माणं ब्रह्मयज्ञानमितिमंत्रेण तदुत्तरेगौरीसहितंशंभुं नमःशंभवायेतिमंत्रेणशंभुमिति क्रमेणदेवतात्रयंसंस्थाप्य पुरतोराजतंगरुडंसंस्थाप्य सामध्वनिशरीरस्त्वंवाहनंपरमेष्ठिनः विषपापहरोनित्यमतःशांतिंप्रयच्छमे इतिमंत्रेणगरुडंपूजयेत् चंदनंपुष्पपूजांते अंगपूजा कालायनमः शिरःपूजयामि विष्णवेललाटंपू. वन्हयेनेत्रंपू.

रवयेकर्णौपू. तेजोरूपायस्तनौपू. महेश्वरायवक्षः पू- निरंजनायउदरं पू- फलाध्यक्षायनाभिं पू- विश्वरूपिणेकटिंपू-जगत्प्रभवेगुह्यंपू स्वप्रकाशायऊरूपू-स्वयंज्योतिषेजानुनीपू-चक्षुर्ग्यूहायगुल्फौपू-जनाधिपायपादौपू-परब्रह्मणेसर्वांगंपू. ततोविशेषपूजोपहारादिसमर्प्यरात्रिंजागरणेनसमाप्य प्रातःसतिलैर्यवैः अग्नेनयसुपथेति वर्त्यादशांशतोहोमतर्पणादिकुर्य्यात् तत्रअग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानंदेवंलक्ष्मीसहितंविष्णुंघृतान्वितपायसपलाशसमित्घृतद्रव्यैः सहस्रसंख्याकाहुतिभिस्तथाब्रह्माणंशंभुंचइदंविष्णुर्ब्रह्मयज्ञानंनमःशंभवायेतिमंत्रैः प्रत्येकमष्टोत्तरशतमष्टाविंशत्याहुतिभिर्गायत्र्याचघृतंहुनेत् ततःपीठस्थंदेवंसंपूज्यगोघृतलोडितसहस्रवर्त्तिकांकृत्वा तत्रआचार्य्यंसंपूज्यपीठंविंशत्पलघृतपूरितकांस्यपात्रंचयथाशक्तिवा तथाच सुवर्णवर्त्तिसंयुक्तरौप्यंदीपकंकांस्यपात्रसहितंदद्यात् तत्रमंत्रः रौप्यपात्रस्थितंदीपंहेमवर्त्तिसमन्वितं कांस्यपात्रेणपिहितं ददामिव्रतपूर्त्तये ततोधिकफलाप्तयेगांचदत्वा दशाधिकान्द्विजान्सदन्नेनभोजयेदिति एवमेवमाणिक्यलक्षवर्त्तिव्रतं पूर्वोक्तेनविधानेनकुर्य्यात्सर्वमतंद्रितइतिवामनपुराणोक्तंलक्षवर्त्तिव्रतं अत्रैवलक्षदीपदानमुक्तं भविष्य दीपानांलक्षकंयस्तुकुर्य्यात्परमधार्मिकः यावत्कालंप्रज्वलंतिदीपास्तोलिंगसन्निधौ ब्रह्मणोयुगसाहस्रंदातास्वर्गेमहीयते कौसुंभवर्त्तिसंयुक्तादीपादत्ताःशिवालये सुरलोकेचकैलासेतिष्ठंतिशिवमूर्त्तयइति इदमुपलक्षणमिदंचसर्वदेवतानांदेवालयेष्वपिविधेयमिति अथवापुराणोक्तंतत्रलक्षवर्त्तिव्रतं ॥ नारदउवाच ॥ श्रुतानिदेवदेवेशव्रतानिनियमास्तथा तीर्थानिचमहादेवयज्ञदानान्यनेकशः नास्तिमेनिश्चयोदेवभ्रामितोहंत्वयापुनः कथयस्वमहादेवयद्गोप्यंव्रतमुत्तमं ॥ शिवउवाच ॥ शृणुनारदयत्नेनयद्गोप्यंव्रतमुत्तमं लक्षवर्त्यामहापुण्यंसर्वोपद्रवनाशनं सुखसंपारिदंचैवपुत्रराज्यसमृद्धिदं शंकरप्रीतिजननंशिवलोकप्रदंशिवं स्वभर्त्रासहसंबंधंमहा

स्नेहकरंपरं शृणुनारदयत्नेनागिरीशोयेनतुष्यति यत्कृत्वाकृतकृत्याःस्युर्देवासुरनरेश्वराः येवैज्ञात्वानकुर्वंति तज्ञेयादुःखभागिनः रुद्रवर्त्तिसमंनास्तित्रिषुलोकेषुव्रतं अतएवसदाकार्य्यंव्रतमेतत्सुदुर्लभं मयाख्यातंव्रतमिदंकिमन्यच्छ्रोतुमिच्छसि ॥ नारदउवाच ॥ पूजाविधिंचमेब्रूहिकिंविधानंवदस्वमे ॥ ईश्वरउवाच ॥ शृणुब्रह्मन्महाभागयत्वंश्रोतुमिहार्हसि कार्प्पासतंतुभिःकार्य्यादीपवर्त्तिःशिवप्रिया लक्षसंख्याचकर्त्तव्यागव्याज्येनपरिप्लुताः देयाशिवालयेनित्यंभक्तियुक्तेनचेतसा अस्याविधानं तिथ्यादिकीर्त्तनांते अखिलदुरितनाशाभीष्टसिद्धिपूर्वकशिवलोकप्राप्तिद्वारासांबशिवप्रीत्यर्थंयथाविध्याचरितरुद्रलक्षवर्त्ति व्रतस्यसांगफलाप्तये तदुद्यापनंकरिष्ये इतिसंकल्प्य आचार्यवरणांते लिंगतोभद्रेताम्रकलशोपरिहैमंसांबरुद्रंकद्रुद्रायेतिमंत्रेण प्रतिष्ठाप्यपुरतोराजतंवृषभंसंपूज्य पुराणश्रवणादिभीरात्रिमतिवाह्य प्रातरग्निंप्रतिष्ठाप्यअन्वादध्यात् अत्रप्रधानंसांबरुद्रंरुद्रसूक्तेननमःशंभवायेतिमंत्रेणवा घृतपायसबिल्वद्रव्यैः सहस्राहुतिभिर्मंडलदेवताश्चैकैकयाज्याहुत्यायक्ष्येतत पीठंगांचदीपंचपूर्वोक्तविधिनाचार्यंसंपूज्यदत्त्वा एकादशाधिकान्विप्रान्सदन्नेनभोजयेत् अत्रचवर्त्तिदशांप्रातः होमंतद्दशांशदशांशतोद्विजभोजनंच होमदशांशतःसाधारणंतर्पणंकांस्यपात्रेदीपदानंचपूर्ववत्कांस्यपात्रसहितंकार्य्यम् इतिरुद्रलक्षवर्त्तिव्रतोद्यापनं अथागमोक्तं विष्णुलक्षवर्त्तिव्रतोद्यापनं तिथ्यादिकीर्तनांतेअखिलपापक्षयाशिवलोकप्राप्तिकामनया आचरितरुद्रलक्षवर्त्तिव्रतोद्यापनंकरिष्ये आचार्यंवरणांतेपीठेसांबरुद्रं नमोभवायचेतिमंत्रेणसंस्थाप्यपूजयेत् प्रातःअग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानंरुद्रं नमोभवायेतिमंत्रेणतिलाज्याहुतिभिः सहस्रंमंडलदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ततः पीठंगांचदीपंचदत्वा एकाधिकान्द्विजान्भोजयेत् होमंमंत्रश्चस्थापनोक्तएव ॥ इतिरुद्रलक्षवर्त्तिविधानम् ॥

अथदीपविधानं विष्णुधर्मोत्तरे पंचायेतनदवतानांस्वाराध्यदेवताग्रतः चातुर्मास्येथसंप्राप्तेशुभेमासिचभूमिप प्रत्येकमेकदीपंचपीतगव्यघृतेनच तिलतैलेनवाकुर्य्यात्कर्पूरेणसमन्वितं दीपंप्रज्वाल्यविधिवत्सर्वकार्य्यसमं भुवा एकसूत्र्याद्विसूत्र्यावाविल्वाख्यामणिकान्विता एवंप्रकारेणलक्षदीपदानं देवाग्रेकृत्वा कार्त्तिक्यांउद्यापनंकुर्य्यात् ॥ तद्यथा ॥ ओंमद्यतिथ्यादिकीर्त्तनांते आत्मनोविविधपापक्षयपूर्वकाभीष्टसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंयथाविध्याचरितस्यदीपदानव्रतस्यसांगतासिद्ध्यर्थंतदुद्यापनं आचार्य्यवरणांते सर्वतोभद्रकलशेहैमं पूज्यदेवंतत्तन्मंत्रेणसंस्थाप्ययथोपचारैःसंपूज्य रात्रौजागरणंविधायप्रातः अग्निंप्रतिष्ठाप्य अन्वादध्यात् ॥ अत्रप्रधानं देवंघृताक्ततिलद्रव्येणसहस्राहुतिभिर्मंडलदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ततःपीठंस्वर्णवर्त्तिसंयुक्तरौप्यदीपंघृतपूरितकांस्यपात्रसहितंब्राह्मणायदत्वा गांचप्रतिपाद्यद्विजान्भोजयेदितिचातुर्मास्यादौविष्णुधर्मोक्तं लक्षदीपव्रतोद्यापनं अथमार्गादिमासेचातुर्मास्यादौचफलत्यागव्रतोद्यापनं मत्स्यपुराणे नंदिकेश्वरउवाच फलत्यागस्यमाहात्म्यंभवेत्तच्छृणुनारद यदक्षयंपरेलोकेसर्वकामफलप्रदं मार्गशीर्षेशुभेमासितृतीयायांमुनिव्रतः द्वादश्यामथवाष्टम्यांचतुर्दश्यामथापिवा आरभेच्छुक्लपक्षस्यकृत्वाब्राह्मणवाचनं अन्येष्वपिचमासेषुपुण्येषुमुनिसत्तम सदक्षिणंपायसेनशक्तितोभोजयेद्द्विजान् अष्टादशानांधान्यानामन्यत्रफलमूलकं वर्जयेदब्दमेकंतुविनैवौषधकारणं सद्वृषंकांचनंरुद्रंधर्मराजंचकारयेत् कूष्मांडंमातुलुंगंचवार्ताकंपनसंतथा आम्रालातकपिंगानिकालिंगमथवारुकं कर्दमंदाडिमंशक्त्याकलधौतानिषोडश मूलकामलकंजंवुतिंतिणीकरमंदकं कंकोलैलककुंडीरकरीर कुटजंशमी उदुंवरंनारिकेलंद्राक्षाथवृहतीद्वयं रौप्यानिकारयेच्छक्त्याफलानीमानिषोडश ताम्रंतारफलंकुर्य्यादगस्त्यंफलमेवच पिंढकंकाश्मर्यफलंतथासूरणकंदजं रक्तालुकाकलालंचचरकाश्मीरचार्वटं चित्रवल्लीफलं

तद्वत्कूटशालिपकाफलं ग्राम्यनिष्पावमधुकावटेंगुदपटोलकं ताम्राणिषोडशैतानिकारयेच्छक्तितोनरः उदकुंभद्वयंकुर्य्याद्धान्योपरिसवाससं भक्ष्यपात्रद्वयोपेतंहेमरुद्रद्वयान्वितं धेन्वासहैवशांतायविप्रायाथकुटुंविने सपत्नीकायसंपूज्यपुण्येन्हिविनिवेदयेत् यथाफलेषुसर्वेषुवसंत्यमरकोटकाः तथासर्वफलत्यागव्रताद्भक्तिः शिवेस्तुमे यथाशिवश्चधर्मश्चसदानंदफलप्रदौ इत्युक्तफलदानेनममस्यातांवरप्रदौ यथाफलानांकामाःस्युःशिवभक्तेषुसर्वदा तथानंतफलावाप्तिर्मेस्तुजन्मनिजन्मनि यथाभेदंनपश्यामिशिवविल्वर्कपद्मजान् तथाममास्तुविश्वात्माशंकरःशंकरःसदा इतिदत्त्वाचतत्सर्वमलंकृत्यचभूषणैः शक्तश्चेच्छयनंदद्यात्सर्वोपस्करसंयुतं अशक्तश्चफलान्येवयथोक्तानिविधानतः तथोदकुंभसंयुक्तौशिवधर्मौचकांचनौ विप्रायदत्त्वाभुंजीतवाग्यतस्तैलवर्जितं अन्यानपियथाशक्त्याभोजयेद्द्विजपुंगवान् एतद्भागवतानांतुसौरवैष्णवयोगिनां शंभोःसर्वफलत्यागोव्रतंवेदविदोविदुः नारीभिश्चयथाशक्त्याकर्तव्यंव्रतमुत्तमं एतस्मान्नपरंकिंचिदिहलोकेपरत्रच व्रतमस्तिमुनिश्रेष्ठयदनंतफलप्रदं सौवर्णरौप्यताम्रेषुयावंतःपरमाणवः भवंतिगण्यमानेषुमुनिसत्तमसर्वथा तावद्युगसहस्राणिरुद्रलोकेमहीयते एतत्समस्तखलुपापहरंजनानामाजीवनायमनुजेषुचसर्वदास्यात् जन्मांतरेष्वपिनपुत्रवियोगदुःखमाप्नोतिधामचपुरंदरदेवजुष्टं योवाशृणोतिपुरुषोल्पधनंपठेद्वादेवालयेषुभुवनेषुचधार्मिकामान् पापैर्विमुक्तवपुरेतिपुरंमुरारेरानंदकृत्पदमुपैतिमुनींद्रसोपि इतिमत्स्यपुराणोक्तफलत्यागव्रतमाहात्म्यमष्टाविंशोध्यायः

अथपार्थिवलिंगोद्यापनं तत्रादौकामनाभेदेनपूजाप्रकारः सचफाल्गुनकृष्णचतुर्दश्यांशिवरात्रिव्रतविधानेप्राक्प्रपंचितस्तथापि सुवोधायात्रापिप्रपंच्यते सहस्रंचाथलक्षंवाकोटिंचाथविधानतः लिंगानांपूजयित्वाचसर्वान्कामानवाप्नुयात् मृल्लिंगंपार्थिवंश्लक्ष्णंभुक्तिमुक्तिकरंवरं त्रिसंध्यंयोर्चयेल्लिंगंकृत्वाबिल्वेनपार्थिवं एकादश

शतंवापिसर्वाभीष्टमवाप्नुयात् शुद्धदेशेसमीभूतांमृदमादाययत्नतः शुद्धेनवारिणाभ्युक्ष्यसंघट्टयापितथापुनः लिंगानांसंख्ययाकुर्य्यात्पृथक्पिंडान्यथाक्रमं पलद्वयंचकर्त्तव्यंन्यूनंनैवसदैवहि अखंडंतुवरंलिंगंद्विखंडंस्थावरंस्मृतं लिंगमादौविधायाथपीठंवाकारयेत्ततः पक्कजंवूफलाकारंलिंगंकुर्य्यान्मनोहरं वर्त्तुलंचतुरस्रंवासमपीठद्वयंशुभं दर्शनादेवलिंगस्यदेवगंधर्वकिन्नराः तत्क्षणंरचयित्वाशुमुंचंतिनात्रसंशयः साक्षतंस्थापयेत्तस्मान्निर्माणक्षणएवतत् ॥ अथपार्थिवलिंगस्यपूजाधारस्थानंस्कांदे पाषाणेदारुदेशेवादर्भास्तारितभूस्थले पुष्पप्राकारसंकीर्णेपाणौवावेदिकास्विति सबिल्वेताम्रपात्रेवास्थापयेत्पार्थिवंशिवं मृल्लिप्तहस्तकोवापिसंक्षालितकरोथवा तत्रोपचाराः पंचाष्टषोडशप्रोक्ताद्वात्रिंशदुपकारकाः यस्तुपूजयतेभक्त्यालिंगेत्रिभुवनेश्वरं सस्वर्गराज्यमोक्षाणांक्षिप्रभवतिभाजनं आदौगणेशंकृत्वातुलिंगंकुर्य्यात्ततःपरं पश्चाच्छक्तिंततःस्कंदंततोलिंगान्यथापिच पार्थिवपूजायांनाममंत्राः पार्थिवचिंतामणौ हरोमहेश्वरःशंभुःशूलपाणिःपिनाकधृक् शिवःपशुपतिश्चैवमहादेवइतिक्रमात् मृदानयनसंघट्टप्रतिष्ठाह्वानमेवच स्नापनंपूजनंचैवक्षमस्वेतिविसर्जनं ॥ अस्याःकामनापरत्वेन एकादशप्रकारः पार्थिवचिंतामणौ ऋणमोचनकामश्चएकादशदिनपर्यंतंप्रत्यहमेकलिंगंकृत्वा बृहतीपुष्पं घृताक्तंनैवेद्यं अनृणाअस्मिन्नितिऋचं १०८ अष्टोत्तरशतंजपेत् ऋणान्मुक्तोभवतिइत्येकः प्रकारः १ पुत्रकामस्तुद्विशतादिनपर्यंतंप्रत्यहं लिंगद्वयंकृत्वा पंचामृताभिषेकः मल्लिकापुष्पं गुडोदनंनैवेद्यं कांडात् कांडात्प्ररोहंति इत्यष्टोत्तरशतं १०८ ततउँपासनेनप्रतनोषि इत्यनेनचाष्टोत्तरशतदूर्वार्पणेनपुत्रोभवति इतिद्वितियःप्रकारः २ कन्याकामस्तुत्रिशद्दिनपर्यंतंप्रत्यहंलिंगत्रयंकृत्वा करवीरपुष्पंशर्करानैवेद्य यावीरवीकन्येतिमंत्रमष्टोत्तरशतं १०८ जपेत् पाशमेनेतिदूर्वार्पणेनकन्याभवति इतितृतीयप्र॰ ३ द्रव्यका

मस्तु चतुःशतदिनपर्यंतंप्रत्यहंचत्वारिलिंगानिपूजयेत् किंशुकपुष्पं कदलीफलंनैवेद्यं श्रीसूक्तंप्रत्यहंशतवारंजपेत् द्रव्यागमोभवति इतिचतुर्थप्र· ४ विवाहकामस्तुपंचशतदिनानिप्रत्यहंपंचलिंगानिकृत्वापूजयेत् चंपकपुष्पं पायसंनैवेद्यं गौरीमिमायेतिऋचमष्टोत्तरशतं १०८ जपेत् विवाहोभवति इतिपंचमप्र० कलहानिवृनिकामस्तुत्रिंशत्दिनपर्यंतं षट्लिंगानिप्रत्यहंपूजयेत् वकुलपुष्पं मधुयुतंनैवेद्यं मुंचामीतिसूक्तंप्रत्यहंदशधाजपेत् कलहान्मुक्तोभवति इतिषष्ठःप्र० ६ तीर्थयात्राकामस्तु पंचशतदिनपर्यंतं सप्तलिंगानिकृत्वा शतपत्रपुष्पं दध्योदनंनैवेद्यंरुद्रैकादशनींजपेत् तीर्थयात्राभवति इतिसप्तमप्र० ७ विद्याकामस्तुत्रिंशद्दिनपर्यंतंप्रत्यहमष्टालिंगानिकृत्वा दध्योदनंनैवेद्यं यश्छंदसामृषभोविश्वरूपंइत्यनुवाकंदशधाजपेत् विद्यावान्भवेत्.इत्यष्टमप्र. ८ अपमृत्युहरणकामस्तुएकशतदिनपर्यंतंनवलिंगानिकृत्वा धत्तूरपुष्प दध्योदननैवेद्यं त्र्यंवकमितिमंत्रमाद्यंतप्रणवसहितमष्टोत्तरसहस्त्रंजपेत् अपमृत्युनाशनंभवति ९ दूरगतसुहृदागमकामस्तुप्रत्यहंवर्षमेकं दशलिंगानिकृत्वा कांचनपुष्पं अपूपनैवेद्यं योरुद्रोअग्नाविति अष्टोत्तरशतंजपेत् दूरगतस्यागमनंभवति इतिदशम प्र १० सर्वदारिद्यनिवृत्तिकामस्तु षण्मासपर्यंतंप्रत्यहमेकादशलिंगानिकृत्वा रक्ताब्जंद्रोणपुष्पंसर्वान्ननैवेद्यंगोघृताक्तं नमोहिरण्यवाहवेइतिमंत्रमष्टोत्तरशतंजपेत्दारिद्यान्मुक्तोभवति इत्येकादशप्रकारः ११ कारागृहमोचनेन्योप्यत्रविशेषः एकविंशतिदिनपर्यंतमेकोत्तरलिंगानिकृत्वा तावत्प्रत्यहंरुद्रैकादशन्याअभिषेकः पलाशपुष्पं दधिमधुघृतमिश्रितमन्नंनैवेद्यं अष्टसहस्त्ररुद्रंजपेत् निगडान्मुक्तोभवति अथलिंगसंख्याफलभेदमाह एकंपापहरंलिंगंद्विलिंगंश्रीकरं तथा त्रिलिंगंसर्वकामाप्तौकारणंपरमंमतामित्यादि विद्याकामेसहस्त्रंचस्त्रीकामेपंचशतं पुत्रकामेपंचदशायुतानि कन्याकामेअयुतत्रयं भूकामेसहस्त्रंसुरूपकामेत्रि

सहस्र राज्यकामेलक्षं मारणेसप्तसहस्रं उच्चाटेस्तंभनेत्रिसहस्रं जारणेद्विसहस्रं कारागृहमोचनेअयुतं निगड मोचनेसार्द्धमयुतं डाकिन्यादिभयेपंचशतंराजभयेअयुतं दारिद्र्यमोचनेपंचसहस्रं सर्वकामेसप्तायुतानि मोक्ष कामेलक्षं परमसायुज्यकामेकोटिलिंगानि अथकामनाभेदेनलिंगभेदानाह सौवर्णलिंगंसौभाग्यकरं राजतं यशस्करं ताम्रमयंतुष्टिकरं पित्तलमयंपुष्टिकर कांस्यमयं कीर्तिकरं लोहमयंशत्रुमरणकरं सीसमयमायुष्करं पाषाणमयंपुण्यकरं मुक्तामयंश्रेयस्करं काश्मीरंश्रीकरं मारकतं शांतिकरं स्फटिकंबहुस्वामित्वप्रदं इंद्रनीलमयंपोषणकरं पारदंसर्वसिद्धिकरं चंदनजंज्वरनाशकरं कर्पूरजं शांतिकरं कस्तूरीजसौगंध्यकरं गोरोचनजंरूपकरं कर्पूरागुरुकस्तूरीकंकोलंयक्षकर्दमः यक्षकर्दमजंप्रीतिकरं गोमयजंसर्वरोगहरं भस्मोद्भवंमोक्षदं हारिद्रंप्रीतिवर्द्धनं नवनीतजंकीर्त्तिकरं दधिजंलक्ष्मीकरं दुग्धजंसुखकरं शर्करोत्थंपुत्रकरं लवणोत्थंसर्वलोकवशकरं कृष्णतिलोद्भवंलोकप्रदं उक्तंह्येतेषुलिंगेषुपार्थिवंक्षिप्रसिद्धिदं कृतेमणिमयंलिंगंत्रेतायांहेमसंभवम् द्वापरेपारदंश्रेष्ठंपार्थिवंतुकलौयुगे इतिलिंगपूजानिर्णयः ॥ अथपूजारंभकालः शैवागमे कार्त्तिक मार्गशीर्षेवामाघेवैशाखसंज्ञके श्रावणेवहुलेपक्षेव्रतस्यारंभणंभवेत् स्थलविशेषमाह पुण्येपुण्यंनदीतीरेपर्वताग्रे शिवालये श्रीवृक्षाश्वत्थतुलसीधात्रीष्वायतनेचवै गोष्ठेगृहेवादेवाग्नि सूर्यगोविप्रसन्निधौ शिवपूजाविधातव्यापूर्वंपूर्वमहाफलं अथसमाप्तिकालःकार्त्तिकादिशुभमासिलिंगानांचसमापनं चतुर्दशीदर्शयुक्ताअष्टमीनवमीयुता समाप्तिस्तत्रकर्त्तव्यारौद्रयुक्तेपुनर्वसौ अन्येष्वपिचकालेषुशुभेषुचसमापनम् ॥ अथपार्थिवलिंगोद्यापनं रुद्रयामले अथातः संप्रवक्ष्यामि प्रतिष्ठांलैंगिकस्यच प्रतिष्ठापदमुद्यापनपरं येनयस्यविधानेनव्रतंसंपूर्णतामियात् सहस्रंवाथलक्षंवापूजयित्वायथाविधि कोटिंवाथविधानेन कामनावाप्रपूर्य्यते समाप्तेतुव्रते

राजन्विनिर्मायमहेश्वरं स्थापयित्वातुकलशे संपूज्या र्घ्यादिभिः क्रमात् गंधैर्माल्यैस्तथाधूपैर्नैवेद्यैर्विविधैस्तथा हिरण्यगावोवासांसिशिवायाविनिवेदयेत् दंडवत्प्रणतोभूत्वास्तुत्वाचैवाविशेषतः एकाग्रमानसोभूत्वाततोमंत्रमुदीरयेत् अंगहीनंमंत्रहीनंक्रियाहीनंमहेश्वर पूजितोसिमयादेवक्षमस्वपरमेश्वर यद्वार्घ्यापहृतैः पुष्पै रशस्तैर्भावदूषितैः केशकीटापविद्धैश्चपूजितोसिमयाप्रभो मंत्रेणाक्षरहीनेनक्रियाहीनेनवाप्रभो मनोवाक्कायदुष्टेनपूजितोसित्रिलोचन यद्यपहृतपात्रेणकृतमर्घ्यादिकंमया तामसेनस्वभावेनतत्क्षमस्वममप्रभो मंत्रेणाक्षरहीनेनपुष्पेणाविकलेनवा पूजितोसिमहादेवतत्सर्वंममक्षम्यतां व्रतंसंपूर्णतांयातु फलंचाक्षयमस्तुमे एवंस्तुत्वानमस्कृत्यविसृज्यचमहेश्वरं नैवेद्यादिचतत्सर्वंभस्मांगायनिवेदयेत् ब्राह्मणान्भोजयित्वातुदद्यात्तेभ्यश्चदक्षिणां यथाशक्त्याधेनुवस्त्रंहिरण्यंव्रतदक्षिणां अथान्यप्रकारोभाविष्ये नारदउवाच ॥ कथमुद्यापनंचास्यकिंप्रकारंमहाफलं कथमाशुमहादेवलोकानामुपकारकम् ॥ ईश्वरउवाच ॥ यः शिवंसमुपास्यैवलिंगप्राप्तेमनोरथः तत्प्रमाणंतुसौवर्णंयथाशक्त्याथवासुधीः रौप्यंताम्रमथापिस्यादष्टम्यांच महाफलं चतुर्दश्यांचभद्रायांसोमेवाथप्रयोजयेत् उद्यापयेदित्यर्थः मंडलेलिंगतोभद्रंकलशंतत्रविन्यसेत् उपोष्यप्रथमेचाह्निसंपूज्यपरमेश्वरं जातवादित्रनिर्घोषैर्जागरंतत्रकारयेत् स्तोत्रैश्चविविधैः सूक्तैः पूजयेत्परमेश्वरं चतुर्दशीदर्शयुक्ताचाष्टमीनवमीयुता पारणंतत्रकर्त्तव्यंरौद्रयुक्तेपुनर्वसौ पंचकंदशकंद्वाभ्यामधिकाविंशतिः पराः चत्वारिंशच्चतुर्भिश्चब्राह्मणान्भोजयेत्ततः आचार्य्यंप्रथमंपूज्यब्राह्मणांश्चततः परं गणेशंचगिरीशंचपूजयेच्चविधानतः वस्त्रेणदक्षिणाभिश्चपूजयेच्छिवतत्परान् मृत्युंजयेनमंत्रेणअग्नौहुत्वाथपायसं हुत्वाथशक्तितइत्यपिक्वचित्पाठः अस्मिन्पाठेघृतमेवद्रव्यं रुद्रेणाप्यथवाहुत्वानमोमंत्रेणवापुनः नमो

मंत्रेण नमोभवायेतिमंत्रेण रुद्रेणयदाहोमस्तदाप्रतिमंत्रेण यदामृत्युंजयमंत्रस्तदाकृतलिंगपूजादशांशेनहोमः तद्दशांशेनतर्पणं तद्दशांशेनमार्जनं लिंगंतत्पूजयायुक्तमाचार्य्यायनिवेदयेत् तत्रमंत्रः शिवशक्त्यात्मकंयस्माज्जगदेतच्चराचरं तस्माद्देतेनमेसर्वंकरोतुभगवान् शिवः कैलासवासीगौरीशोभगवान्भगनेत्रहा चराचरात्मकोलिंगरूपोदिशतुमेशिवं ततश्चदक्षिणांदत्त्वानमस्कुर्य्यात्पुनः पुनः सोद्यापनंव्रतंकृत्वाप्राप्नुयात्परमंपदं शिवलोकंसमासाद्यनिवसेत्तत्रवैध्रुवं इतिपार्थिवलिंगोद्यापनं अथोद्यापनविधानप्रयोगः तत्रादौपूजाप्रयोगः ॐमद्येत्यादितिथ्यादिकीर्त्तनांतेअमुककामनामुद्दिश्यकृतानांपार्थिवलिंगानांयथासंख्यपूजायाः संपूर्णफलावाप्तयेतदुद्यापनंकरिष्ये इतिसंकल्प्य पुण्याहवाचननांदीश्राद्धादिविधायआचार्यंवृत्वा ततआचार्य्यः यदत्रसंस्थितंभूतमित्यादिमंत्रपाठांतेभूतानुत्सार्य्य द्वारपूजांकुर्य्यात् चतुर्द्वारोपशोभितमंडपैशानभागेस्थितसदाशिवमंडपायनमः प्राग्द्वारपार्श्वयोः नंदिनेनमः महाकालायनमः चिच्छक्त्यैनमः वास्तुपुरुषायनमः दक्षिणद्वारपार्श्वयोः गणेशायनमः वृषभायनमः चिच्छक्त्यैनमःवास्तुपुरुषा- पश्चिमद्वारपार्श्वयोः भृंगिरिटये.स्कंदाय- चिच्छक्त्यै. उत्तरद्वारपार्श्वयोः दंडिने चंडीश्वराय. चिच्छक्त्यै- द्वारश्रिये. वास्तुपुरुषाय. ततः पश्चिमद्वारेप्रविश्य वेदिपश्चिमतउपविश्य लिंगतोभद्रे ब्रह्मादिदेवतास्थापनपूर्वकं कलशं प्रतिष्ठाप्य तदुपरि देवंस्थापयित्वा तत्रादौन्यासान्कुर्य्यात् ललाटेशिवायनमःकंठेरुद्राय.नाभौईशानाय. जान्वोःशंकराय.पादयोः सदाशिवायनमःअथयजुर्वेदोक्तान्महान्यासान्कुर्य्यात् यातेरुद्रशिवातनूरघोरापापकाशिनी तयानस्तन्वाशंतमयागिरिशंताभिचाकशीहि शिखायां अस्मिन्महत्यर्णवेअंतरिक्षेभवाअधितेषाꣳसहस्रयोजनेवधन्वानितन्मासि शिरसि २ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः तासामीशानोभगवः पराचीना

मुखाक्ताधि ललाटे ३ हंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसतन्नृषद्वरसद्दतसद्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत् भ्रुवोर्मध्ये ४ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनं ऊर्वारुकमिववंधनान्मृत्योर्मुक्षीयमामृतात् त्र्यंबकंयजामहेसुगंधिंपतिवेदनं ऊर्बारुवामिबवंधनादितोमुक्षीयमामुत इतिनेत्रयोः ५ अग्निर्ज्योतिर्ज्योतिरग्निस्वाहा सूर्य्योज्योतिर्ज्योतिःसूर्य्यःस्वाहा अग्निर्वर्चोज्योतिर्वर्चःस्वाहा सूर्य्योवर्चोज्योतिर्वर्चःस्वाहा ज्योतिःसूर्य्यःसूर्य्योज्योतिःस्वाहा तृतीयनेत्रे ६ नमःश्रुत्यायचपथ्यायच नमःकट्यायचनीप्यायच नमःकुल्याचसरस्यायच नमोनादेयायचवैशंतायच कर्णयोः ७ मानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः मानोवीरान्रुद्रभामिनोवधीर्हविष्मंतःसदामित्वाहवामहे नासिकयोः ८ अवतत्यधनुष्ट्वꣳसहस्राक्षशतेषुधे निशीर्य्यशल्यानांमुखाः शिवोनासुमनाभव मुखे ९ नमोवंचतेपरिवंचतेस्तायूनांपतयेनमः नमोनिनिषंगिणइषुधिमतेतस्कराणांपतयेनमः नमःसृकायिभ्योजिघाꣳसद्भ्योमुष्णतांपतये नमःनमःसिमद्भ्योनक्तंचरद्भ्योविकृंतानांपतयेनमः ग्रीवायां ॥ १० ॥ नीलग्रीवाःशितिकंठादिवꣳरुद्राउपाश्रिताः तेषाꣳसहस्रयोजनेवधन्वानितन्मासि कंठदेशे ॥ ११ ॥ नमस्तआयुधायानाततायधृष्णवे उभाभ्यामुततेनमोवाहुभ्यांतवधन्वने वाह्वोः १२ यातेहेतिर्मीढुष्टमहस्तेवभूवतेधनुः तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुजउपवाह्वोः १३ येतीर्थानिप्रचरंतिसृकाहस्तानिषंगिणःतेषाꣳसहस्रयोजनेवधन्वानितन्मसि हस्तयोः १४ सद्योजातंप्रपद्यामिसद्योजातायवैनमः भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः अंगुष्ठयोः ॥ १ ॥ वामदेवायनमःज्येष्ठायनमः श्रेष्ठायनमःरुद्रायनमः कालायनमः कलविकरणाय. बलाय. विलविकरणाय. वलप्रमथनाय. ममोन्मनाय. सर्वभूतदमनायनमः तर्ज्जन्योः अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्वेभ्यः सर्वसर्वेभ्योनमस्ते

अस्तुरुद्ररूपेभ्यः मध्यमयोः ३ तत्पुरुषायविद्महे महादेवायधीमहि तन्नोरुद्रः प्रचोदयात् अनामिकयोः
४ ईशानःसर्वविद्यानामीश्वरः सर्वभूतानाब्रह्माधिपतिर्ब्रह्मणोधिपतिः शिवोमेअस्तुसदाशिवओम् कनिष्ठिक-
योः ५ नमोवःकिरिकेभ्योदेवानांहृदयेभ्योनमोविचिन्वतेभ्यो नमोविक्षन्वत्केभ्यो नमआनिर्हतेभ्यः हृदये १५
नमोगणेभ्योगणपतिभ्यश्चवोनमः नमोव्रातेभ्योव्रातपतिभ्यश्चवोनमः नमोगृत्सेभ्योगृत्सपतिभ्य
श्चवोनमः नमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमः ॥ १६ ॥ विकिरिद्रविलोहितनमस्तेअस्तुभगवः या
स्तेसहस्रꣳहेतयोन्निवपंतुताः उदरे ॥ १७ ॥ नमोहिरण्यवाहवेसेनान्येदिशांचपतयेनमः नमोवृक्षेभ्योह
रिकेशेभ्यः पशूनांपतयेनमः नमः शष्पिंजरायत्विषीमतेपथीनांपतयेनमः नमोहरिकेशायोपवीतिनेवृक्षा
णांपतयेनमः पार्श्वयोः ॥ १८ ॥ नमःशंभवायचमयोभवायच नमःशंकरायचमयस्करायचनमः शिवा
यचशिवतरायच दक्षिणकुक्षौ ॥ १९ ॥ द्रापेअंधसस्पतेदरिद्रनीललोहितः आसांप्रजानामेषांपशूनांमा
भेर्मारोङ्मोचनार्किंचनाममत् वामकुक्षौ ॥ २० ॥ हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीत्
सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम नाभौ ॥ २१ ॥ मीढुष्टमशिवतमशिवोनः सुमनाभव
परमेवृक्षआयुधंनिधायकृत्तिंवसान आचरपिनाकंविभ्रदागहि कटयाम् ॥ २२ ॥ शिवोनामासिस्वधितिस्ते
पिता नमस्तेअस्तुमामाहिꣳसिनिवर्त्तयाम्यायुषेनाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्य्याय लिंगे
॥ २३ ॥ यभूतोनामधिपतयोविशिखासः कपर्दिनः तेषाꣳसहस्रयोजनेवधन्वानितन्मसि गुह्ये ॥ २४ ॥
इमारुद्रायतपसेकपर्दिनेक्षयद्वीरायप्रवरामहेमती यथानःशमसद्द्विपदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्ननातुरम्
पुनर्गुह्ये ॥ २५ ॥ इषेत्वोर्जेत्वावायवस्थदेवोवःसविताप्रार्पयतुश्रेष्ठतमायकर्मणः आप्यायध्वमघ्न्याइंद्राय

भागंप्रजावतीरनमीवा अयक्ष्मावस्तेनईशतमाघशꣳसोध्रुवाअस्मिन्गौपतौस्यातवह्वीर्यजमानस्यपशून्पाहि २६
येन्नेषुविविध्यंतिपात्रेषुपिवतोजनान् तेषाꣳसहस्रयोजनेवधन्वानितन्मासिइतिद्वयंवृषणयोः २७ जातवेतसेसुनवा
मसोममरातियतोनिदहातिवेदः सनः पर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः गुदे ॥ २८ ॥
मानोमहांतमुतमानो अर्भकंमानउक्षंतमुतमानउक्षितं मानोवधीःपितरं मोतमातरं मानःप्रियास्तन्वो
रुद्ररीरिषः ऊर्वोः ॥ २९ ॥ एषतेरुद्रभागःसहस्वस्रांविकया तंजुषस्वस्वाहेषतेरुद्रभागआखुस्तेपशुः जानुनोः
॥ ३० ॥ नमोज्येष्ठायचकनिष्ठायच नमःपूर्वजायचापरजायचनमोमध्यमायचापगल्भायच नमोजघन्यायचप्रबु
ध्न्यायच जंघयोः ३१ नमोह्रस्वायचवामनायच नमोवृहतेचवर्षीयसेचनमोवृद्धायचसवृद्धतेच नमोग्र्यायचप्रथ
मायच गुल्फयोः ३२ येपथांपाथिरक्षयऐलवृदाआयुर्युधाः तेषाꣳसहस्रयोजनेवधन्वानितन्मासि पादयोः ३३ अ
ध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् अहींश्चसर्वान्जंभयन्त्सर्वाश्चयातुधान्योधराचीःपरासुव कवचं ३४ नमोवि
ल्मिनेचकवचिनेच नमोवर्मिणेचवरूथिनेच नमःश्रुतायचश्रुतसेनायच नमोदुंदुभ्यायचाहनन्यायच उपकवचं
॥ ३५ ॥ विज्यंधनुःकपर्दिनोविशल्योवाणवांउत अनेशन्नस्ययाइषवआभुरस्यनिषंगधिः धनुः ॥ ३६ ॥
यत्रवाणाःसपतंतिकुमाराविशिखाइव तन्नइंद्रोवृहस्पतिरदितिः शर्मयच्छतुविश्वाहाशर्मयच्छतु वाणः ॥ ३७
विकिरिद्रविलोहितनमस्तेअस्तुभगवः यास्तेसहस्रꣳहेतयोऽस्मान्निवपंतुताः तासामीशानोभगवःपराचीनामुखा
कृधि खड्गः ॥ ३८ ॥ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे अथोयेअस्यसत्वानोहंतेभ्योकरंनमः नेत्रत्र
यायवौषट् ॥ ३९ ॥ प्रमुंचधन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् याश्चतेहस्तइषवः पराताभगवोवप इत्यस्त्रं ॥ ४० ॥
यएतावंतश्चभूयाꣳसश्चदिशोरुद्रावितास्थिरे तेषाꣳसहस्रयोजनेवधन्वानितन्मासि दिग्बंधनं ॥ ४१ ॥ एवं

न्यासविधिंकृत्वाशिवोहमितिभावयेत्   ॐनमोभगवतेरुद्रायइतिदशाक्षरमूलमंत्रेणवर्णन्यासः ॐशिरसि नंललाटे मंनासिकायां भंमुखे गंकंठे वंहृदि तेदक्षहस्ते हवामहस्ते द्रानाभौ यःजंघयोः सद्योजातायपादयोः वामदेवायऊर्वोः अघोरायहृदि तत्पुरुषायमुखे ईशानायशिरसि अथसंपुटीकरणं ॥ त्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳ शूरमिंद्रमाह्वयामिशक्रंपुरुहूतमिंद्रं इतिपूर्वे तन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडो अवयासिसीष्ठाः यजिष्ठोवन्हितमःशोशुचानो विश्वेद्वेषाꣳसिप्रमुमुग्ध्यस्मत इत्याग्नेये यमायसोमꣳसनतवमायजुहुताहविः यमंयमज्ञोगच्छत्यग्निदूतोअरंकृतः इतियाम्ये असुन्वंतमयजमानमिक्षुस्तेनसेत्यांतस्करस्यान्वेद्धिअन्यमस्मदित्यसात् इतिनैर्ऋते तत्वायामिब्रह्मणावंदमानस्तदाशास्ते यजमानोहविर्भिः अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषि इतिपश्चिमे आनोनियुद्भिः शतनीभिरध्वरंसहस्रिणीभिरुपयाहियज्ञं वायोआस्मिन्हविषिमादयस्व यूयं यातःस्वस्तिभिः सदानः इतिवायव्ये वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः प्रजावंतःसचेमहि इत्युत्तरे तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं पूषानोयथावेदसारक्षितापायुरदब्धःस्वस्तये इतीशाने अस्मैरुद्राःपर्वतामेहनासोवृत्रहत्ये भरहूतौसजोषायसꣳसतेस्तुवतेधाविपज्ञइंद्रज्येष्ठाअस्माअवंतुदेवाः इत्यूर्द्धे स्योनापृथिवीनोभवानृक्षरानिवेशनीयच्छानःशर्मसप्रथा इत्यधस्तात् इतिसर्वतः कृतांजलिः पठेत् संपुटीकरणन्यास इतिन्यासान्विधाय ध्यायेन्नित्यमित्यादिपठन्देवंध्यायेत् ततअस्मिन्नूर्जमित्यनुवाकेनपयोधारयावासुवर्णलिंगस्याग्न्युत्तारणंकुर्य्यात् अत्रलिंगप्रमाणंतुयावत्प्रत्यहंक्रियते तावन्मानमर्द्धंवातदर्द्धंवासौवर्णंराजतंवाकुर्य्यात् ततःप्राणप्रतिष्ठां कुर्य्यात् ॐआंह्रींक्रौंयंरंलंवंशंषंसंहंसःसांबशिवस्यप्राणाइहप्राणास्संतिष्ठंतुपुनः आंह्रींक्रौमित्यादिसांबशिवस्यजी वइह

पुनः आंह्रींक्रौंमित्यादि सांबशिवस्यसर्वेंद्रियाणिवाक्पाणिपादपायूपस्थश्रोत्रत्वक्चक्षुर्जिंव्हाप्राणादीनिइहागत्य यथासुखंचिरंतिष्ठंतु एवंप्राणप्रतिष्ठांविधाय पंचामृतेनाभिषेकंकृत्वा नमःशंभवायचमयोभवायच नमःशंकरायचमयस्करायच नमःशिवायचशिवतरायच पंचाक्षरेणवाकलशोपरिसंस्थाप्यतद्वामभागे गौरीमिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदीअष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन् ओंनमोभगवत्यैउमादेव्यैशिवप्रियायैनमइत्यागममंत्रेणवाहैमींगौरींतद्वामभागेप्रतिष्ठाप्यदक्षिणभागेतु तत्पुरुषायविद्महेमहासेनायधीमहि तन्नःषण्मुखःप्रचोदयात् इतिमंत्रेणस्कंदंप्रतिष्ठाप्य पुरतःराजतंवृषभंऋषभमितिमंत्रेणसंस्थाप्यपरितइंद्रादीन्लोकेशान्संस्थाप्यपूजयेत् ॥ अथध्यानं ॥ मंगलायतनंदेवंभवंकामंमनोहरं ध्यायेत्कल्पतरोर्मूलेसमासीनंसहोमया तत.सहस्राणिसहस्रशोवाह्वोस्तवहेतयः तासामीशानोभगवःपराचीनामुखाकृधि ॥ इतिध्यात्वा ॥ ओंनमोभगवतेरुद्रायेति लिंगोपरिअक्षतान्क्षिपेत् अथपूजांकुर्य्यात् नमस्तारायच इत्यासनं नमःशंभवायचमयोभवायच इतिपाद्यं नमःशंकरायचमयस्करायच इत्यर्घ्यं नमःशिवायचशिवतरायच इत्याचमनीयं नमस्तीर्थ्यायचकुल्यायचेति समस्तेनरुद्रसूक्तेनचस्नानं भवंदेवंतर्पयामि १ शर्वंदेवंत. २ रुद्रंदेवंत. ३ पशुपतिंदेवंत. ४ उग्रंदेवंत. ५ महांतंदेवंत. ६ भीमंदेवंत. ७ ईशानंदेवंत. ८ मानस्तोकेतनयेमानआयुषिमानोगोषुमानो अश्वेषुरीरिषःमानोवीरान्रुद्रभामिनोवधीर्हविष्मंतःसदामित्वाहवामहे ॥ इतिवस्त्रं ॥ नमोहिरण्यवाहवेसेनान्येदिशांचपतयेनमः ॥ इतियज्ञोपवीतम् ॥ नमोवृद्धायचसवृद्धिनेच ॥ इतिभूषणं ॥ नमःश्वभ्यःश्वपतिभ्यश्चवोनमः ॥ इतिगंधम् ॥ नमःसेनाभ्यःसेनानीभ्यश्चवोनमः ॥ इत्यक्षताः ॥ नमः पार्य्यायचावार्य्यायच ॥ इतिपुष्पम् ॥ कपर्दिनेचव्युप्तकेशायच ॥ इतिधूपं ॥ नमःआशवेचाजिरायच ॥ इतिदीपं

नमोवभ्लुशायव्याधिनेऽन्नानांपतयेनमः ॥ इतिनैवेद्यम् ॥ नमःपार्य्यायचावार्य्यायच ॥ इतितांबूलं ॥ नमोदुंदुभ्यायचाहनन्यायच ॥ इतिदाक्षिणा ॥ नमोहिरण्यायचप्रपथ्यायच नमोमीढुष्टमायचेषुमतेच नमोह्रस्वायचवामनायच नमोवृहतेचवर्षीयसेच इतिपुष्पांजल्यष्टकंदद्यात् एषतेरुद्रभागःसहस्वस्रांविकया तंजुषस्वस्वाहैषतेरुद्रभागआखुस्तेपशुः इतिप्रदक्षिणा नमोरुद्रेभ्य इतिनमस्कारः ततःस्तोत्रंपठेत् ओंनम ओंकाररूपायनमोक्षरवपुर्धृते नमोनादात्मनेतुभ्यंनमोविंदुकलात्मने अलिंगालिंगरूपायरूपातीतायतेनमः त्वंमातासर्वलोकानांत्वमेवजगतःपिता त्वंभ्रातात्वंसुहृन्मित्रंत्वंपितात्वंपितामहः नमस्तेभगवान्रुद्रभास्करामिततेजसेनमोभवायरुद्रायउमयासाहितायच शर्वायक्षितिरूपायसदासुरभिणेनमः पशूनांपतयेचैवपावकामिततेजसे सोमायव्योमरूपायशब्दरूपायतेनमः महादेवायसोमायअमृतायनमोनमः उग्राययजमानायनमस्तेकर्मयोगिने पार्थिवानांचलिंगानांयन्मयापूजनंकृतं तेनमेभगवन्रुद्रोवांछितार्थंप्रच्छतु इतिस्तुत्वाअंगहीनंक्रियाहीनंविधिहीनंमहेश्वर पूजितोसिमहादेवक्षमस्वजगतःपते इतिक्षमाप्य पुराणपठनश्रवणगीतवाद्यादिभिर्जागरणं प्रातर्नित्याविधिंक्षमाप्य देवंसंपूज्य अग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानं सोमंशिवं कृतलिंगदशांशेन पायसमधुशर्कराघृततिलाक्षतविल्वपत्रशतपत्रद्रव्याष्टकेनकेवलपायसेनवा नमःशंभवायमर्याभवायचेतिमंत्रेणपंचाक्षरेणवायक्ष्ये तथागौरीगणेशंषण्मुखंचैतैरेवद्रव्यैः प्रतिद्रव्यंदशदशाहुतिभिः वृषभलोकेशान् ब्रह्मादिदेवताश्चैकैकमेकादशाहुतिभिर्द्वारदेवताश्चैकैकयाज्याहुत्यायक्ष्ये शेषेणस्विष्टकृतमित्यादिहोमंसमाप्य पूर्णाहुत्यादिकर्मशेषंसमापयेत् ततःसऋत्विक्होमदशांशेनतर्पणं तद्दशांशेनमार्जनंकृत्वा विशेषाकारेणपीठस्थं शिवंसंपूज्य आचार्यंचसंपूज्य सर्वंपीठमाचार्यायदद्यात् तत्रमंत्रः पीठंगृहाणभूदेवसर्वशक्त्या

दिसंयुतं वांछितार्थंप्रच्छाशुदेहिमेव्रतजंफलं ततोव्रतपूर्त्तयेगांचदत्त्वा मार्जनंदशांशेनयथाशक्तिवाब्राह्मणान्सद
न्नेनसंतर्प्य दक्षिणांदत्त्वाव्रतपूर्णतांचवाचयित्वा आशिषोगृहीत्वा इष्टजनैःसहभुंजीतअत्रपूजनेत्रैवर्णिकानामेवा
धिकारःस्त्रीशूद्राणांतुपूर्वोक्तोद्यापनजैःसिद्धिरिति ॥ इतिशैवागमोक्तंपार्थिवलिंगानांलक्षव्रतोद्यापनम् अथपा
र्थिवगणेशलक्षव्रतोद्यापनंरुद्रयामले श्रीमहादेवउवाच यथापार्थिवलिंगंतुसर्वसिद्धिविधायकं तथाविघ्नेश्वरोदेवः
पार्थिवःसर्वकामदःनिर्विघ्नंजायतेकार्य्यंसर्वसिद्धिंपुमान्लभेत् षट्कर्माणितथावक्ष्येशृणुष्वैकमनाभव रक्तोपचारैः
सिंदूरैरक्तमाल्यांबरैस्तथा करवीरैर्जपापुष्पैःकमलैःक्षीरपायसैः संपूज्यवश्यतांयातियंयंचिंतयतेनरः शुक्लमाल्यैः
शुक्लपुष्पैर्भोजनैर्दधिमिश्रितैःमालतीकुसुमैर्धूपैर्दशांगैःशांतिलब्धये कवितायाःपटुत्वंचजायतेनात्रसंशयः मोहने
मधुभिस्तर्प्यंमधुपायसमर्पयेत् असितैःकुसुमैःपूज्योदमनेनासितागुरुं समारोप्यार्चयेद्भक्त्यात्रैलोक्यंवश्यमानयेत्
स्तंभनेनिशयायुक्तैरुपचारैःसमर्चयेत् मारणेमाहिषेचर्मण्यास्थायासितकंवलंधत्तूरैरर्चयेत्पुष्पैःसर्षपाक्षतमि
श्रितैः नैवेद्यंगुडसंमिश्रंमहिषीक्षीरसंयुतं भक्तंशाल्युद्भवंदेयंछागमांससमन्वितं अभिषेकस्तुतैलेनमहागण
पतेर्भवेत् धूपःश्मशानजद्रोणपुष्पैःसद्यःसमर्चयेत् एवंगणाधिपंकृत्वापूजयेत्पार्थिवंनरः यंयंकाममम
भिध्यायेत्तंतंसर्वमवाप्नुयात् पाद्मेविशेषःसहस्त्रंदशसाहस्त्रंलक्षकोटिंतथैवच यःकरोतिगणेशानांपार्थिवानां
नरोत्तमसर्वसिद्धिमवाप्नोतिनात्रकार्य्याविचारणा अथकामनाभेदाः कारागृहमोचनकामः एकविंशति
दिनपर्यंतं एकोत्तरवृद्ध्यापार्थिवगणेशान्कृत्वा वक्ष्यमाणप्रकारेणसंपूज्य पुनःद्वाविंशद्दिनपर्यंतं
गणेशान्कृत्वा यावद्गणेशाभवंतितावत्यहंगणेशार्द्धक्षीराभिषेकः मूलमंत्रस्यापितावत्सहस्त्रजपः अभी
प्सितसिद्धिर्भवति एकविंशतिपुष्पाणि दाडिमीचजटामांसीशंवरीनागचंदकः वृहतीचतथामी

वीभृंगराजस्तथैवच मालतीकुसुमैश्चैवतुलसीमाधवीतथा पारिजातंतथापुष्पंवकुलंचैकविंशति पुष्पाभावेपत्रं ग्राह्यं अपूपशर्करामिश्रंनैवेद्यंकदलीफलं नारिकेलंचसिंदूरंदूर्वागुग्गुलधूपकं इदंप्रत्यहंसाधारणं अथसर्वसाधारणपूजोच्यते ॐमद्यतिथ्यादिकीर्त्तनानंतरंममाभीष्टसिद्ध्यर्थंपार्थिवगणेशपूजामहंकरिष्ये इतिसंकल्प्य अश्वत्थमूलजांशुद्धस्थलजांवामृदमानीय पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता त्वंचधारयमांदेविपवित्रंकुरुचासनं इत्यासनपूजांविधाय गंगणेशायनमः जलसेचनं ॐगूंहेरंभायनमः संघट्टनं गैंधरणीधरायनमः प्रतिष्ठापनं गौंक्षिप्रप्रसादनायनमः चतुर्भुजामेकदंतांसुंदरांमूर्त्तिंकृत्वा गः सर्वसिद्धिप्रदायकायनमः गणेशोपरिरक्ताक्षतान्दत्त्वा हृदिस्थंदेवंमानसोपचारैःसंपूज्यनासारंध्रेणदेवमंजालिस्थपुष्पाक्षतैःसंयोज्यपुनर्देवमस्तकोपरिपुष्पादिनिधाय प्राणप्रतिष्ठांकुर्य्यात् अस्यश्रीगणपतिप्राणप्रतिष्ठामंत्रस्यब्रह्म विष्णुमहेश्वराऋषयः ऋग्यंजुःसामानिछंदांसि प्राणशक्तिर्देवता आंवीजं ह्रींशक्ति क्रौंकीलकं श्रीमहागणपतिप्राणप्रतिष्ठाकंविनियोगः ॐआंह्रींक्रौंयंरंलंवंशंषंसंहंलंक्षंहंसः पार्थिवगणपतिःप्राणइहप्राणाः पुनःश्रीपार्थिवगणपतेः सर्वेंद्रियाणिइहागत्यसुखंचिरंतिष्ठंतु इतिप्राणप्रतिष्ठांकृत्वा ततोमूलमंत्रेणस्वदेहेन्यासान्कुर्य्यात् अस्यश्रीगणपतिमंत्रस्य गणकऋषि निघृत् गायत्रीछंदः गणपतिर्देवता गंबीजं श्रींशक्तिः स्वाहाकीलकं गणपतिन्यासादौविनियोगः गां अंगुष्ठाभ्यांनमः गींतर्जनीभ्यांनमः गूंमध्यमाभ्यांनमः गैंअनामिकाभ्यांनमः गौंकनिष्ठिकाभ्यांनमः गः करतलकरपृष्ठाभ्यांनमः अथध्यानं रक्तोरक्तांगरागांशुकसकलतनुस्तुंदिलश्चंद्रमौलिर्नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणोबीजपुरात्तनामः हस्ताग्रैःक्लृप्तपाशांकुशरदवरदोनागवक्त्रोहिभूषोदेवः पद्मासनोसौवहुसुरनमितोभूतयेविघ्नराजः इतिध्यात्वा मूलमंत्रेणनाममंत्रेणपूजयेत् ॐनमोभगवतेहेरंवमदमोहितममसंकटान्निवारयनिवारयस्वाहा। ॐग

ऐशायनमः आवाहनं ॐगणपतये आसनं हेरंबाय पाद्यं धरणीधरायअर्घ्यं महागणपतये मधुपर्कं यज्ञेश्वराय आचमनीयं क्षिप्रप्रसादनायमलापकर्षं स्नानं अमोघसिद्धये पंचामृतस्नानं अमृताय शुद्धस्नानं रुद्रेणगाणपत्यसूक्तेनच अथर्वशिरसामहाभिषेकः तद्यथा अथगणेशोपनिषत् ॐदेवाहवैरुद्रमब्रुवन् कथमेतस्योपासनं सस्तानुवाच रुद्रोगणकानिघृत् गायत्रीश्रीगणपतेरेनंमंत्राराजमन्यान्वाभिदात् प्रणवरूपस्यास्यपरमात्मानोंगानिजानातिसोमृतत्वंगच्छतियोधितेसोधीतेयोजपतिसजपतिसमृत्युंतरतिसपाप्मानंतराति सब्रह्महत्यांतरति ससर्वहत्यांतरति ससर्वंतरति एनंमंत्रराजं गणपतिःसर्वमिदंनित्यंजपतिसोग्निंस्तंभयति सवायुंस्तंभयति सआदित्यंस्तंभयति ससर्वंस्तंभयति सदेवांस्तंभयति इत्युपनिषत् १ एनंमंत्रराजंनित्यमधीते विघ्नंसविघ्नानाकर्षयति देवान्यक्षान्नागान्मनुष्यान् सर्वानाकर्षयति सभूलोकंजयति सभुवोलोकंजयति सस्वर्लोकंजयति समहर्लोकंजयति सजनलोकंजयति सतपोलोकंजयति ससत्यलोकंजयति सपुण्यान्यधीते संकल्पान्यधीते सगाथाअधीते सोग्निष्टोमेन सोक्पेन षोडशेन सवाजपेयेनसोत्रिरात्रेणससोमपीथेन सर्वैःक्रतुभिर्यजते १ यएतंमंत्रराजंवेदससवेद ससर्वसमः सदेवसमः समुनिसमः सनागसमः ससूर्यसमः सोग्निसमः इत्युपनीतसममनुपनीतैवाधिकशतं गृहस्थमसममुपनीतैकाधिकशतंवानप्रस्थैः समंगृहस्थैकाधिकशतंयतीनांसवानप्रस्थैकाशतंरुद्रजापकसमंयतीनामेकाधिकशतमथर्वाशिरासिशिक्षाध्यायंएकसमरुद्रजापकैकाधिकशतमनो विद्यातत्कार्य्यहीनस्वात्मबंधराहितोवैंतराहितो निरस्ताविद्यातमोमोहांधकारप्रधानमहमेवसर्वमितिसंभाव्यवैघ्नराजंब्रह्मण्यजतेतत्तेजोमये परंज्योतिमये सदानंदमये स्वप्रकाशेसदोदितेनित्येशुद्धेमुक्तेईश्वरेपरब्रह्मणिरमते ॥ ७ ॥ यएनंमुनिपदंवेद संसारंतरति घोरंतरति दुःखं-

तरति विघ्नान्नुत्तरति महोपसर्गंतरति आनंदोभवति सनित्योभवति सशुद्धोभवति समुक्तोभवति ईश्वरोभवति ससुखीभवति ध्यानावहनादिस्वयंभवति योहमात्माब्रह्मसोहमात्माचतुष्पात्वहिप्रज्ञस्वस्थस्वच्छभुक्तेतेजसोयच्छन्नसुप्तो नकंच नकामयते नकंचनस्वप्नंपश्यतितत्सुप्तंतत्रैकीभूतः प्रज्ञानंदघनएवानंदभुक्चेतोमुखः प्रज्ञयैषः सर्वेश्वरः सर्वतोमुखोंतर्यामीएषयोनिः सर्वभूतानांवहिःप्रज्ञमंतः प्रज्ञनोभयप्रज्ञंप्रज्ञानघनमव्यय मनिर्देश्यमव्यवहार्य्यमग्राह्यमलक्षणमचिंत्यमेकात्म्यमप्रत्ययंप्रपंचसारंप्रपंचोपशममवैतंशैवं चतुष्पादंध्यायेत् सएवात्मात्मरतितरतिसआत्माविज्ञेयः सदोह्यथर्वाशिरः शिखाध्यएकैकाधिकशतंगणेश तापनीयोपनिषदध्याय एकसममेतद्वेकाधिकशतंमंत्रराजजापकंरामंततोदः परमधाममंत्रसुजपापकस्ययत्ररविसोमोनतपति यत्रवायुर्नक्षत्राणिनवांतिनभांतियत्राग्निमृत्यूनदहतिनप्रविशति यत्र मोहोनदुःखं सदानंदपरमानंदॐशतॐशाश्वतंसदाशिवंब्रह्मादिवंदितं योगिध्येयंपरमपदंचिन्मात्रंब्रह्मणरूपतिमेकाक्षरमेवतंपरमात्मानंब्रह्म तेजोधामहदादिसप्तमांतेस्यकिंचिज्जप्त्वाततोनजपोनमालानासनंभवति सवैश्वानरोभवतिसतैजसोभवति सप्राज्ञोभवति ससाक्षीभवति ससर्वोभवति सहर्षोनमानजानायशत्रेमशिभिपाद्यं इत्यभिषेकंकृत्वा मंत्रायवस्त्रं चिंतामणयेउपवीतं निधयेगंधं सुमंगलाय अक्षताः वीजायपुष्पं वासनिधानायफलं ढुंढीविनायकाय नीराजनं सर्वसंकष्टनाशनाय मंत्रपुष्पं कुमारगुरवे प्रदाक्षिणा अघनाशनाय नमस्कारः एवंचतुर्विंशन्युपचारान्समर्प्य ततोगणेशादारभ्य ढुंढिविनायकांतंविशेषार्घ्यंदत्वा क्षमापयेत् अगहीनंक्रियाहीनंविधिहीनंगणेश्वर पूजितोसियथादेवतत्क्षमस्वजगत्पते इतिशैवागमोक्तापार्थिवगणेशपूजाविधिः एवमुक्तप्रकारेण सहस्रं अयुतं लक्षं कोटिं

216

व्र०र०
मलमास
॥१०६॥

वा पार्थिवान्गणेशान्कृत्वा अंतेमाघादिशुभेकाले उद्यापनंकुर्य्यात् तद्यथा ॐमद्यतिथ्यादिसंकीर्त्यमम अमुकस्यवामुकफल कामनयाकृतानांनानापार्थिवगणेशानांसंपूर्णताफलावाप्तये तदुद्यापनंकरिष्ये इति संकल्प्य आचार्यवरणंविधाय चतुर्द्वारोपशोभितमंडपवेदिकायांसर्वतोभद्रेब्रह्मादिदेवतास्थापनपूर्वकंकलशंप्रतिष्ठाप्य तत्रदेवस्थापनंकुर्य्यात् तत्रादौपूर्वोक्तान्न्यासान्कृत्वा अस्मिन्नूर्जमित्यनुवाकेनपयोधारयावा प्रतिमायाअग्न्युत्तारणंकुर्य्यात् प्रतिमाप्रमाणंतुयावन्मानंप्रत्यहं गणेशंमृदाक्रियते तावन्मानेनतदर्धार्धेन वासौवर्णैराजतंवादेवंकुर्य्यात् तत्रप्राणप्रतिष्ठांकृत्वा गणानांत्वेतिवैदिकेनमूलमंत्रेणवा प्रतिष्ठाप्ययथामिलितोपचारैः संपूज्य आवरणानिपूजयेत् पूर्वादिक्रमेण ॐवक्रतुंडायनमः एकदंतायनमः गजाननाय- महोदराय. विकटाय- विघ्नराजाय- . धूम्रवर्णाय- हेरंबायनमः ८ तद्बाह्येपूर्वादिक्रमेणब्राह्म्यैनमः माहेश्वर्य्यै- वाराह्यै· इंद्राण्यैनमः चामुंडायै· वैनायक्यैनमः वैष्णव्यैनमः ८ तद्बाह्ये इंद्रादिलोकेशान् ८ वज्रादिप्रहरणान् ८ संपूज्य अत्रपूर्वोक्तएवपूजाप्रकारः पुष्पोत्तरं अंगपूजा गणनाथायनमः पादौपूजयामि गणेशायजानुनीपूजयामि गणप्रियायकटिंपूजयामि वक्रतुंडायहृदयंपूजयामि गजाननायस्कंधौपूजयामि हेरंबायहस्तौपूजयामि विकटायआस्यंपूजयामि विघ्नराजायनेत्रेपूजयामि धूम्रवर्णायशिरः पूजयामि सर्वसिद्धिप्रदायनमः सर्वांगंपूजयामि ततः स्तोत्रैः स्तुत्वा पुराणश्रवणादिनाजागरणंविधाय प्रातरग्निंप्रतिष्ठाप्यअन्वादध्यात् तत्रप्रधानंदेवंमहागणपतिंपायसतिलाज्येन रक्ताक्षतमोदकपंचखाद्यशमीदूर्वाद्रव्याष्टकतिलपायसेनवा कृतपार्थिवगणेशसंख्यादशांशेनसमांशेनवायक्ष्ये होमांतेदेवंसंपूज्य दशांशतस्तर्पणं द्दशांशतोमार्जनंचकृत्वा आचार्यंसंपूज्यपीठंगांचतस्मैनिवेद्यएकविंशति

गुरुकुल कांगड़ी

ब्राह्मणान्संपूज्य पक्वान्नपूरितकलशं वस्त्रयुग्मसहितंसदक्षिणंप्रत्येकंतेभ्यः पुष्पांजलिं चैकविंशतिनामभिर्दत्वा मार्जनदशांशतोयथाशक्तिवाब्राह्मणभोजनंसंकल्प्यभूयसींदत्वासदन्नेनद्विजान्संतर्प्यव्रतसंपूर्णतांवाचयित्वा इष्टजनैःसहभुंजीतइतिरुद्रयामलोक्तंपार्थिवगणेशोद्यापनं अथशौनकोक्तमश्वत्थोद्यापनं शौनकउवाच शौनकोहंप्रवक्ष्यामिअश्वत्थस्योपनायनं स्थापनादष्टमेवर्षेद्वादशैकादशेपिवा मुक्तकालास्तथाप्रोक्ताः कुर्य्युस्तस्योपनायनं तत्रोत्तरायणंश्रेष्ठंगुरुशुक्रप्रकाशिते माघफाल्गुनयोःकुर्य्याच्चैत्रेवैशाखमासयोः क्षयमासाधिमासेचवर्जयेन्मौंजिवंधनं नकुर्य्याच्छेदितेष्वन्येविद्युतावाग्निनाहते उद्यापनंप्रकुर्वीतस्कंधैःपर्णांकुरान्वितैःशुक्लपक्षे शुभेर्क्षेचसुवारेतिथिलग्नके चंद्रानुकूलेकर्त्तुश्चदिवाकुर्य्यात्प्रयत्नतः दंतानांधावनंकुर्य्यात्कुर्य्यात्स्नानंसचैलकंकृत्वाचनित्यकर्माणिपूज्याश्चैवेष्टदेवता नांदीश्राद्धंप्रकुर्वीतगृहेपुण्याहवाचनं तस्मिन्नेवदिनेकुर्य्याद्धान्नहेमफलादिभिःकृत्वाशीर्वचनंपूर्वंततोगच्छेत्प्रयत्नतः तूर्यघोषैश्चविविधैः पण्यस्त्रीभिः समन्वितः ब्राह्मणैर्वेदघोषैश्चगीतवादित्रनिःस्वनैः वस्त्रंयज्ञोपवीतंचमौंजीदंडाजिनादिकं पूजाद्रव्यंचहोमंचगृहीत्वाश्वत्थसन्निधौ ततःप्रक्षालितांघ्रिश्चाचम्योपविशेद्भुवि अश्वत्थेशानदिग्भागेकृत्वापुण्याहवाचनं आचार्यंवरयेत्पश्चात्कुलीनंवेदपारगं त्रिपंचदशहस्तेनगोमयेनोपलिप्यच धान्यपिष्टेनसंमार्ज्यगंधमाल्यादिशोभनैः वस्त्रोपवीतगंधाद्यैरंगुलीयककुंडलैः कर्त्तासुपूजयेद्भक्त्यावित्तशाठ्यंनकारयेत् तेनैवकारयेद्विद्वानश्वत्थस्योपनायनं कुर्य्यात्पंचामृतस्नानंतत्तन्मंत्रैःपृथक्पृथक् अस्वत्थपूर्वदिग्भागेहोमंकुर्य्यात्स्वशाखया उल्लेखनादिकंतत्रचरुंतत्रप्रकल्पयेत् वस्त्रयुग्मंततोदद्युर्युवंवस्त्राणिमंत्रतः यज्ञोपवीतंदद्याच्च यज्ञोपवीतमित्यपि मेखलांचत्रिरावेष्ट्यप्रावेपामीतिमंत्रतः तूष्णींकृष्णाजिनंदंडंप्रदद्यात्तुयथाक्रमंगंधपुष्पाक्षतैःशुक्लैरश्वत्थस्यचपश्चिमे अश्वत्थेवोनिषदनमित्यृचापूजयेत्सुधीः तिसृ

भिर्जुहुयादाज्यंममश्रायुष्यनुक्रमात् पुरस्तादुपरिष्टाच्चहुत्वाव्याहृतिभिस्त्रिभिः याओषधीयाः फलिनीरश्वत्थेवइतित्यथ वनस्पतेशतवल्कोद्वासुपर्णेतिमंत्रतः समिद्भिश्चरुणाचैवपालाशीभिःपृथकपृथक् हुत्वाथदशभिः सम्यगेकाहुत्यासमाहितः अश्वत्थपश्चिमेभागेप्राङ्मुखश्चोपविश्यच दक्षिणेनैवहस्तेनस्पृष्ट्वाश्वत्थंद्विजोत्तमः ओंभूर्भुवः पूर्वांतुसावित्रींत्रिजपेदथ निरीक्षयेत्ततोश्वत्थंदेवस्यत्वेतिमंत्रतः आत्वेतिध्रुवसूक्तेनव्याहृतित्रितयेनच अश्वत्थनामउच्चार्य्यविभक्त्याचद्वितीयया शलाकयासुवर्णस्यस्थापयेतिपदंवदेत् हुत्वास्विष्टकृतंपश्चाद्धोमशेषं समापयेत् गंधाक्षतैः स्वर्णपुष्पैर्धूपदीपोपहारकैः भक्ष्याद्यैःफलतांबूलैस्ततोश्वत्थंप्रपूजयेत् धेनुंसवत्सकां दद्यादाचार्य्यायसदक्षिणां अश्वत्थछादितंवस्त्रमाचार्य्यायप्रदापयेत् अन्येषामपिविप्राणास्वशक्त्यापूजयेत्ततः ब्रह्मणेदक्षिणांदद्याद्धेमवित्तानुसारतः ब्राह्मणान्भोजयित्वातुभुंजीतबंधुभिःसह यएवंकुरुतेतस्यवर्द्धतेश्रीरसंशयं कुलकोटिंसमुद्धृत्यब्रह्मसायुज्यमाप्नुयात् इतिशौनकोक्तमश्वत्थोद्यापनं अथमंत्राणामृष्यादिकं युवंवस्त्राणीत्यस्य दीर्घतमाऋषिः परमात्मादेवता त्रिष्टुप्छंदः यज्ञोपवीतधारणेविनियोगः माघेयामइत्यस्य अक्षऋषिः सोमोदेवता त्रिष्टुप्छंदः मौंजीधारणेविनियोगः माघेयामव्याहृतीनांविश्वामित्रजमदग्निभरद्वाजाऋषयः अग्निवायु सूर्योदेवताः दैवीगायत्रीदैव्युष्णिक्दैवीबृहत्यःछंदांसि हवनेविनियोगः अग्नआयूंषिपवसइतितिसृणांशतवैखानसाऋषयः अग्निमानोदेवता गायत्रीछंदः कर्त्तव्यार्थेविनियोगः अश्वत्थेवोअनुष्टुप् याओषधीरितिद्वयोस्त्रिष्टुप् बासुपर्णादीर्घतमाविश्वेदेवास्त्रिष्टुप् आत्वाहार्षमितिषण्णांध्रुवइंद्रोनुष्टुप् ततोभूरिदक्षिणाआशीर्वादः अथापवर्गचिंतामणौ अश्वत्थोद्यापनं अरोपितस्यवृक्षस्यकुर्य्यादुद्यापनेविधिं नांदीश्राद्धादिकर्त्तव्यंपिप्पलोद्यापनेविधौनवग्रहमखं चादौ विदधीतयथावसु सहस्रपर्णसंपत्तौ सत्यांवोधितरौध्रुवं जातकर्मादिकादीनि कुर्य्याद्गोदानकावधि

कार्य्यमुद्यापनंनूनं विवाह्यविधिवन्नरैः लक्षशाखांसमारोप्य समीपेपिप्पलस्यतु आलवालं जलंक्षिप्त्वाशतकुंभमितंशुभं सशाखः सचवृक्षश्चवस्त्रयुग्मेनवेष्टितः सिंचयेदथदुग्धेनमाहिषेणघृतेनच तथा शाखान्मयान्हस्तान्चतुरःपरियोजयेत् त्रिसूत्रेणत्रिवृत्तेनसव्यहस्तांप्रवेशयेत् ब्रह्मवर्णस्यवृक्षस्याविधिरेष सनातनः क्षत्रियस्यतुवृक्षस्यशरोग्राह्यःपरस्परं वैश्येप्रतोदमादद्यात्तुरीयेपल्लवग्रहः तथायाज्ञवल्कीये धर्मशास्त्रे पाणिर्ग्राह्यःसवर्णासुगृन्हीयात्क्षत्रियाशरं वैश्याप्रतोदमादद्याद्वेदनेत्वग्रजन्मनः संयोज्यविधिवत्तौ तुलक्षाश्वत्थौनिवेशितौ कृत्वाग्निवदतंसम्यग्जुहुयात्तिलसर्पिषी प्रधानदेवताब्रह्मावृक्षस्यास्यनसंशयः तत्र मंत्रोद्वासुपर्णाइति अष्टोत्तरसहस्रंतुजुहुयात्तिलसर्पिषा तथाव्याहृतिभिर्होमंविदध्याच्चयथारुचि चरुंसाज्यं चजुहुयाद्विद्वान्स्विष्टकृतंसमं समंसमग्रमित्यर्थः अथप्रकारांतरेणाश्वत्थोद्यापनं अश्वत्थः सर्ववृक्षाणां राजाब्राह्मणवर्णकः अश्वत्थःपूजितोयेनसर्वंसंपूजितंभवेत् अकृतेमौंजिबंधेतुविवाहेचतथाकृते नैवसे वांप्रकुर्वीतनसमर्चेत्कदाचन अश्वत्थरोपणंकृत्वात्रिवर्षेवाथपंचमे उपवीतंप्रकुर्वीतमुहूर्तेज्योतिषांविधौ पुण्याहवाचनंकृत्वानांदीश्राद्धंसमाचरेत् प्राणसंस्थाविधिंकुर्य्यादभिषेकादिपूर्वकं प्राणेंद्रियैर्जीवकला मनोभिःसाहितोभव अयंसजीवः एतस्य जीवकलाः प्राणापानव्यानोदानसमस्त वाक्श्रोत्रत्वक्चक्षु घ्राणपाणिपादोदरोपस्थगुह्येंद्रियाणिसर्वाणिआगत्यसुखांचिरंतिष्ठंतुस्वाहा सर्वप्राणैःप्रतिष्ठितोभवेत्यश्वत्थं दक्षिणपाणिनास्पृष्ट्वाजपेत् अश्वत्थसर्ववृक्षोसिनारायणसमाश्रय नारायणस्वरूपेणपाहिमांसर्वतोशुभात् महासंसारवृक्षोसिअश्वत्थब्रह्मनामक महासंसारमग्नंमामुद्धरस्वशुभंकुरु विष्णुर्ब्रह्माशिव शुक्रःसूर्यश्चंद्रोवृहस्पतिः ऋषयोवेदमंत्राश्चसर्वेत्रस्थुःसदास्थिराः इतिप्राणंप्रतिष्ठाप्यजातकर्मादिकारयेत् चैलांतंनामतःकृत्वा

स्थापयेल्लौकिकानलं स्वगृह्योक्तविधानेनहारिद्रातैललेपनं वस्त्रयुग्मंचोपवीतंदंडंकृष्णाजिनंतथा दत्त्वासमि
द्भिश्चरुणातिलाज्यैश्चपृथक्पृथक् हुत्वाव्याहृतिभिःशत्त्याब्रह्मलोकेमहीयते इत्यश्वत्थोद्यापनं अथप्रका
रांतरेणाश्वत्थसेवनविधिः अद्भुतसारे अथर्वशाखोक्तअश्वत्थप्रदक्षिणाव्रतकल्पः तत्रादौ ओमद्येत्यादिति
थ्यादिकीर्त्तनानंतरं अमुकाभीष्टप्राप्तिकामोविष्णुस्वरूपमश्वत्थतरुममुकसंख्याकाभिः प्रदक्षिणाभिःसेवयि
ष्ये इतिसंकल्प्य ततोऽश्वत्थतरुंपुरुषसूक्तेनषोडशोपचारैः संपूज्यलक्षादिसंख्ययाप्रदक्षिणाःकुर्य्यादितिसं
क्षेपः ॥ पिप्पलादउवाच ॥ भगवन्सर्वधर्मज्ञसर्वशास्त्रविशारद स्त्रीणांपुत्रविहीनानांनराणांसुखसंततेः उपा
यंचैवमेब्रूहिसुखसिद्धिःकथंभवेत् ॥ अथर्वणउवाच ॥ पुराब्रह्मादयोदेवाःसर्वेविष्णुसमाश्रिताः अपृच्छन्देव
देवेशंराक्षसैःपीडितावयं कथंदुःखोपशमनमुपायंब्रूहिनःप्रभो ॥ विष्णुरुवाच अहमश्वत्थरूपेणसंभवामिम
हीतलेतस्मात्सर्वप्रयत्नेनकुरुध्वंतरुसेवनं तेनसर्वाणिकार्याणिभविष्यंतिनसंशयः विष्णुर्यदुक्तवांस्तेभ्यस्तद्ब्र
तंतेवदाम्यहं नदानैर्नतपोभिश्चनाध्वरैर्भूरिदाक्षिणैः अश्वत्थसेवनादन्यत्कलौनास्तिपराक्रिया तद्विधानंनि-
मित्तानिसंख्याकृतिंव्रतंतथा व्रताधिकारिणस्तत्रविधानंचविशेषतः एतत्सर्वंपिप्पलादवक्ष्यामितवसुव्रत
दारुणेविविधोत्पातेदिव्यभौमांतरिक्षके परचक्रभयेदेशविप्लवेशत्रुविग्रहे दुःस्वप्नेदुर्निमित्तेचसंग्रामेद्भुतदर्शने
मारीभयेराजभयेतथाचौराग्निजेभये क्षयापस्मारकुष्ठादिप्रमेहेविविधेज्वरे जलोदरेमूत्रकृच्छ्रेगृहस्थश्चतदेवहि
एतेषांसर्वनाशायकुर्य्यादश्वत्थसेवनं प्रातरुत्थायनद्यादौस्नात्वासम्यक्कृतक्रियः अश्वत्थदेशमाश्रित्यगोमये
नोपलेपयेत् तमश्वत्थमलंकृत्यशुद्धेणगैरिकादिना पूजाद्रव्याणिसंपाद्यपुण्याहंवाचयेत्ततः ऋत्विजावरणं
कृत्वाततःपूजांसमाचरेत् आदावाराधयेद्विष्णुंध्यानावाहनपूर्वकं तथैवपैप्पलतरुंनारायणमयंद्विज श्वेतगं

धाक्षतैःपुष्पैर्धूपदीपनिवेदितैः अर्चापुरुषसूक्तेनतथैवध्यानपूर्वकं तेनैवहवनंकार्य्यंतर्पणंचनमस्कृतिःश्वेतवर्णं सलक्ष्मीकंचिंतयेत्पुरुषोत्तमं इतिध्यात्वावाहनाद्यैरुपचारैस्तुषोडश प्रणत्पात्रऽदक्षिणैवग्राह्या तत्राश्वत्थमिमं आरातइत्यस्यसूक्तस्य अग्निकांडांततःपातित्वादाग्निर्ऋषिर्वनस्पतिर्देवताऽनुष्टुप्छंदः वनस्पत्याभिमंत्रेणाविनियोगः आरातेअग्निरस्त्वारात्परशुरस्तुतेवर्तित्वाभिवर्षतुस्वास्तितेस्तुवनस्पतेस्वस्तिमेस्तुवनस्पते अक्षिस्पंदंभुजस्पंदं दुःस्वप्नंदोषचिंतितंशत्रूणांचसमुत्पन्नमश्वत्थशमयस्वमे [illegible]त्रूणां संबंधित्वेनसमुत्पन्नंभयंचशमयस्वेत्यर्थः ततःप्रदक्षिणंकुर्य्याचत्सर्वंसफलंभवेत् ब्रह्मचारीहविष्याशी ह्यधःशायीजितेंद्रियः मौनीध्यानपरोभूत्वा पिप्पलस्यस्तुतिंपठेत् विष्णोर्नामसहस्रंच पौरुषंवैष्णवंतथा वेदत्रयेणपुण्यानि सूक्तानिचपठेत्तथा तस्यलक्षदशांशेन सघृतंपायसंचतं जुहुयात्प्रत्यृचंवन्हौस्वगृह्योक्तविधानतःतत्संख्ययातर्पणंच कुर्य्यादेतेनवापुनः ततःषोडशऋत्विग्भिर्कुर्य्याद्धोमंयथाविधि हव[illegible]दशांशेनमिष्टान्नंभोजयेद्द्विजान् ब्राह्मणानां स्वयंकुर्य्याद्यथोक्तंनियमंतथा असमर्थःस्वयंकर्त्तुंसर्वम[illegible]नकारयेत् उक्तप्रमाणादधिकंफलंदशगुणं भवेत् ततश्चतुर्गुणंपीठंराजतंचतुरस्रकं द्रोन्यामर्द्धंतदर्द्धंवातिलोपरिविनिक्षिपेत् श्वेतवस्त्रेणसंछाद्यपूर्ववत्पूजयेद्गुरुं दरिद्रायसुशीलायश्रोत्रियायकुटुंबिने उदङ्मुखायविप्रायस्वयंपूर्वमुखःस्थितः सौवर्णंवृक्षराजंचमंत्रेणप्रतिपादयेत् इहजन्मानिवान्यास्मिन्वाल्ययौवनवार्द्धके मनोवाक्कायजेदोषेह्ययमेवस्मृतोविधिः आर्य्यस्त्रीणांनाधिकारोह्येवंविप्रेणकारयेत् इत्थंकृतस्यतस्यांतेंव्रतस्यपारिपूर्त्तये हैमांश्वत्थंतरुंदद्यात्शुक्लांगावा पयस्विनीं स्वर्णशृंगींरौप्यखुरांवस्त्रादिभिरलंकृतां पल[illegible]कंतदर्द्धंवातदर्द्धार्द्धेनवापुनः हैमरौप्यतरुंकुर्य्यात्स्कंधशाखासमन्वितं उत्तमःप्रथमःकल्पो द्वितीयोमध्यम :स्मृतः तृतीयकल्पअप्युक्तः संप्रदानायपैप्पलः

अथैतस्यदानमंत्रः पिप्पलोवृक्षराजेंद्रह्यग्निगर्भस्त्वमेवहि प्रभुर्वनस्पतीनांचपूर्वजन्मनियत्कृतं अघौघंनाशयाक्षिप्रंतवरूपप्रदानतः विप्रप्रार्थनामंत्रः अमुंवृक्षंगृहाणत्वंविष्णुरूपद्विजोत्तम स्वीकृत्यदुःकृतंघोरंक्षिप्रंशांतिप्रयच्छमे एवंव्रतंयःकुरुतेतस्यपुण्यफलंशृणु पुत्रार्थीलभतेपुत्रंधनार्थीलभतेधनं राज्यार्थीलभतेराज्यंवद्धोमुच्येतबंधनात् क्षयापस्मारकुष्ठाद्यैःसर्वरोगैःप्रमुच्यते मानसींशत्रुपीडांचनचराजभयंतथा इहजन्मनिचान्यस्मिन्कृतैःपापैःप्रमुच्यते यंयंकामयतेकामंतंतंप्राप्नोत्यसंशयः इहैवभोगानाप्नोतिविष्णोसायुज्यमाप्नुयात् ॥

इत्याथर्वकल्पोक्तमश्वत्थप्रदक्षिणोद्यापनं अथाश्वत्थारोपणोद्यापनप्रयोगः शौनकीये स्थापनादष्टमेवर्षेद्वादशैकादशेपिवा उत्तरायणेगुरुशुक्रोदये माघफाल्गुनेचैत्रेवैशाखेमासे शुक्लपक्षेशुभऋक्षेशुभवारेतिथिलग्नादिशुद्धौ स्कंदशाखापर्णान्विते विद्युदावाग्निनाऽनभिहते अश्वत्थोद्यापनंकुर्य्यात् तत्रादौकनककुंडलेकनकसूत्रंकनकमौंजींहोमद्रव्याणि सर्वसंभारान्यथासंभवंसंभृत्य अश्वत्थस्यचतुरस्त्रांवेदिकांदृढां अश्वत्थमूलेवर्त्तुलंचतुरस्त्रंवा आलवालंकृत्वा तत्रतुलसीं प्लक्षशाखां शमींचरोपयित्वा अश्वत्थवेदिकांविधाय चतुर्द्वारंचतुर्हस्तंअधिकंवामंडपमश्वत्थात् पूर्वपश्चिमेउत्तरेवाउक्तलक्षणं अन्यंवाकृत्वा सुग्रहेज्योतिर्विदादिष्टेप्रधानसंकल्पंकुर्य्यात् तद्यथा ओंतत्सत् अद्यतिथ्यादिकीर्त्तनांते आत्मनः अखिलपापक्षयाभीष्टसिद्धिपूर्वक आत्मनासहएकविंशतिस्वकुलपुरुषोद्धरणकामः श्रीपरमेश्वरप्रीत्यर्थं अश्वत्थवृक्षोद्यापनंकरिष्ये तदंगविहितंगणेशपूजनं पुण्याहवाचनंमातृकापूजनं नांदीश्राद्धं आचार्य्यादिवरणंचकरिष्ये इतिसंकल्प्य तानिचस्वगृह्यविधिनाकृत्वाआचार्य्यादीन्वृणुयात् ओंमद्यास्मिन्कर्मण्याचार्यत्वेनत्वामहंवृणेवृतोस्मीत्याचार्य्योवदेत् एवंब्रह्मत्वेनत्वामहंवृणे तथाउपद्रष्टारं तथैवऋत्विजोपिवृत्वा तानाचार्यादीन् मधुपर्कादिनासंपूज्यप्रार्थयेत् अस्य

यागस्यनिष्पत्त्यैभवंतोभ्यर्थितोमया सुप्रसन्नैश्चकर्त्तव्यमेतत्कर्मयथोदितं कर्मेदंविधिपूर्वकमित्यपिपाठः ततः स्वगृहेएवगृहमखादिविधाय ततःसऋत्विजोयजमानः फलपुष्पगंधाक्षतपूजितपूर्णकलशहस्तः भद्रंकर्णेभिरितिमंत्रेणमंगलतूर्यघोषेणसह अश्वत्थमंडपप्रादक्षिण्येन मंडपपश्चिमद्वारमागत्यतत्रओंमद्यदेशकालकीर्त्तनांते तत्रधरांसंपूज्यप्रविश्यकलशमश्वत्थसमीपेनिधाय निर्ऋतिवरुणमध्येस्वासने उपविश्य ततआचार्य्यः ओं तत्सद्यातिथ्यादिकीर्त्तनांते आचार्य्यकर्माहंकरिष्ये इतिसंकल्प्य शरीरशुद्ध्यादिपौरुष सूक्तजपंचकृत्वा यदत्रसंस्थितंभूतंस्थानमावृत्यसर्वदा स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु इतिपठन्सर्षपलाजान्विकीर्य्यपंचगव्येनकुशैश्चप्रोक्षणंकुर्य्यात् आपोहिष्ठामयोभुवः उत्तरनारायणेन ततोदेवाआयांतुयातुधानाअपयांतुविष्णोदेवयजनंरक्षस्वेति स्वस्त्ययनंतार्क्ष्यमरिष्टनेंमिरितिपठेत् ततोयथोक्तमंडपाकरणे साधारणक्रमेणमंडपपूजनं तत्रायंक्रमः प्राग्द्वारे अमंत्रकंचूतपल्लवतोरणं १ दक्षिणे प्लक्षपल्लवतोरणं २ पश्चिमेवटपल्लवतोरणं ३ उत्तरेअशोकपल्लवतोरणंबध्वा ४ तथैवप्रागादिद्वारचतुष्टये ऋग्वेदादिक्रमेणद्वौद्वौविप्रौएकमेकंवाजपार्थंब्राह्मणान् ततआचार्य्यअश्वत्थस्यहरिद्रातैलारोपणादिलौकिकाचारंकुर्य्यात् तत्रभद्रंकर्णेभिरित्यादिमंत्रपाठः अश्वत्थवेदिकायां ईशानप्रदेशे सर्वतोभद्रंविलिख्य तत्रब्रह्मादिदेवतास्थापनंकरिष्ये इतिसंकल्पांते उक्तप्रकारेणनाममंत्रैः स्थापनंकुर्य्यात् मध्ये ओंब्रह्मणेनमः ब्रह्माणमावाहयामिएवमग्रेपिस्थापनप्रकारः पूर्वेइंद्रायनमः इंद्रमा. २ आग्नेय्यां अग्नये. अग्निमा. ३ दक्षिणेयमाय. यममा. ४ नैर्ऋते निर्ऋतये. निर्ऋतिमा. ५ पश्चिमे वरुणाय. वरुणमा. ६ वायव्ये वायवे. वायुमा. ७ उत्तरे सोमाय सोममा. ८ ईशाने ईशानाय. ईशानमा. ९ ईशानेंद्र. मध्ये वसुभ्यो. वसूना. १०

ब्र०२०
लमास
।११०॥

आदित्यान् आदित्याना. १२ यमानिर्ऋति
इंद्राग्निमध्ये रुद्रान् रुद्राना. ११ अग्नियममध्ये. आदित्यान् आदित्याना. १२ यमानिर्ऋति
मध्येसाध्यान् १३ निर्ऋतिवरुणमध्ये विश्वान्देवान् १४ वरुणवायुमध्ये साध्यान् १५ वायुसोम
मध्ये अश्विनौ. १६ सोमेशानमध्येस्कंदमा. १७ ब्रह्मेशमध्ये विष्णुं १८ ब्रह्माग्निमध्येगणपतिं
१९ ब्रह्मयममध्येपितॄन् २० ब्रह्मनिर्ऋतिमध्येगंधर्वाप्सरसः २१ ब्रह्मवरुणमध्येसप्तमातॄः २२
ब्रह्मवायुमध्येसर्पान् २३ ब्रह्मसोममध्येदुर्गां २४ ब्रह्मेशानमध्येगंगादिनदीभ्योनमः २५ ततोमंडलांतः
ब्रह्मेशानदलादारभ्यवलयग्राष्ठकेषु ईशान्यांदक्षादीन्प्रजापतीन् २६ पूर्वेपुरुषायनमः २७ आग्नेय्यां
दुर्गायै. २८ दक्षिणस्यांस्वधायै. २९ नैर्ऋत्यांमृत्यवे. ३० पश्चिमेसर्पेभ्यो. ३१ वायव्यांसप्तसा
गरेभ्यो. ३२ उत्तरेमरुद्भ्यो. ३३ ब्रह्मणः पादमूले गणपतये. ३४ कर्णिकायां भूम्यै. ३५
तदुपरिमेरवे. ३६ परितःपूर्वादिक्रमेण ऋग्वेदाय. ३७ दक्षिणे यजुर्वेदाय. ३८ पश्चिमे सामवेदा
य. ३९ उत्तरे. अथर्ववेदायनमः ४० मंडलाद्बाह्ये. पूर्वादिक्रमेण पूर्वेवज्रायनमः ४१ शक्तये. ४२
दंडाय. ४३ खड्गाय. ४४ पाशाय. ४५ अंकुशाय. ४६ गदायै. ४७ त्रिशूलाय. ४८
पुनर्वाह्येऐरावताय. ४९ मेषाय. ५० महिषाय. ५१ प्रेताय. ५२ मत्स्याय. ५३ एणाय.५४
नराय. ५५ वृषभाय. ५६ पुनःपूर्वादिक्रमेण गौतमाय. ५७ भरद्वाजाय. ५८ विश्वामित्राय. ५९
कश्यपाय. ६० जमदग्नये. ६१ अत्रये. ६२ वासिष्ठाय. ६३ अरुंधत्यै. ६४ तद्बाह्येपूर्वादिक्रमेण आ
दित्याय. ६५ चंद्रमसे. ६६ भौमाय. ६७ वुधाय. ६८ गुरवे ६९ शुक्राय. ७० शनये. ७१ राहवे.
७२ केतवे. ७३ तद्बाह्ये पूर्वादिक्रमेण ऐंद्र्यै. ७४ कौमार्य्यै. ७५ ब्राह्मै. ७६ वाराह्यै. ७७ चामुंडायै. ७८

वैष्णव्यै. ७९ माहेश्वर्य्यै. ८० वैनायक्यैनमः वैनायकीमावाहयामि एवंसर्वत्र चतुर्थ्यंतनामभिःप्रणम्य द्वितीयांतैरावाह्य पुनश्चतुर्थ्यंतनामभिः प्रत्येकंसंपूज्य ततःसर्वतोभद्रोपरि अक्षतपुंजे अर्चाप्रदेशे अग्न्युत्तारण पूर्वकं सौवर्णीप्रतिमायां इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं समूढमस्यपांसुरे इतिविष्णुंसंपूज्य तद्वामतः अध स्थाजोषणेतिमंत्रेणरुक्मिणीं तद्दक्षिणतः सत्यासत्येतिमंत्रेणसत्यभामां ततःपृक्षोदशाध्यायस्येतिमंत्रेणसरस्वतीं गणानांत्वा आतूनइंद्रेतिवागणपतिं चावाह्यपौरुषेणसूक्तेनसंपूज्य ततःअश्वत्थस्यपरितः अष्टौकलशान् कलशस्थापनप्रकारेण संस्थाप्य ततःपूर्वेकलशेशुद्धोदकं तत्रआपोहिष्ठेत्यादिनवर्चसूक्तं द्वितीयेगंधोदकं आनोभद्रेतिदशर्चसूक्तं तृतीयेक्षीरोदकं स्वस्तिनोमिमीतेतिपंचर्चसूक्तं चतुर्थेपंचगव्येनशन्नइंद्राग्नीतिपंचदशर्चं पंचमेहारिद्रोदकं आनोभद्रेतिऋचं षष्ठकलशे सर्वौषध्युदकं समुद्रज्येष्ठाइतिचतसृभिः सप्तमेकुशोदकं यादिव्याइतिऋचं अष्टमे गंधोदकं पशुपच्चायइतिनवर्चसूक्तंपठित्वा कलशस्थापनंपूर्वपात्रनिधानांतंकृत्वा ततस्तेषुकलशेषु पूर्वादिक्रमेण इंद्रादीन् तत्तन्मंत्रैरावाह्यपूजयेत् ततअश्वत्थपुरुषसूक्तेन अग्निरातइतिपूर्वोक्ताथर्वशिरसा वसंशोध्य पंचामृताभिषेकंचकृत्वा कषायवस्त्रयुग्मेनावेष्ट्य ततःपूर्वादिक्षु चत्वारिस्थंडिलानिविधाय तेषुहोमार्थंचतुरआचार्य्यान्वृत्वा स्वगृह्यविधिनाअग्निंस्थापयेत् अत्रकेचन ईशानपूर्वयोर्मध्येग्रहहोमादिकंतुपंचमस्थंडिलमिच्छंतिबहवःपूर्वंग्रहप्रधानहोमादिकंकुर्वीत पूर्वमकृतेग्रहयज्ञे ईशान्यां वेदिकायांस्वगृह्यप्रकारेणग्रहानावाह्यसंपूज्य अन्वादध्यात् तत्रपूर्वकुंडेआदित्यादिनवग्रहान् अमुकसंख्यया अर्कादिसमिच्चर्वाज्यद्रव्यैः अधिदेवताः प्रत्यधिदेवताश्चामुकसंख्ययातैरेवद्रव्यैः ततआनोभद्रेतिमंत्रेणविश्वान्देवान्चरुद्रव्येण अष्टोत्तरशतसंख्यया तथा दामोदरादिपीठदेवता अश्वत्थसमिच्चर्वादिद्रव्यैरष्टोत्तरशतसंख्यया

ब्रह्मादिदेवतालोकपालांश्चैकैकयाज्याहुत्यायक्ष्ये पंचमकुंडपक्षे आदौतत्रअग्निप्रणयनं तस्मात् चतुर्षुअग्निप्रणयनंतत्रग्रहहोमः दामोदरादीनांहोमः ब्रह्मादीनांपूर्वकुंडेविश्वेदेवानांलोकपालानांचहोमः अश्वत्थदक्षिणकुंडेगणपतिंतिलाज्यद्रव्यैः अष्टोत्तरशतसंख्यायायक्ष्ये ततउत्तरकुंडेउत्तरनारायणं अष्टोत्तरशतसंख्यासहस्रशीर्षेतिप्रत्यृचंआज्याहुतिभिर्यक्ष्ये एवंतन्मंत्रैर्होमंसंपाद्य स्विष्टकृदादिबलिदानांतंकृत्वा अधिवासयेत् पुराणश्रवणादिभिरात्रिंनयेत् केचित्तुकषायवस्त्रदानांतंकृत्वापरेद्युरेवहोमादिकामिच्छंति प्रातःपीठदेवतासंपूज्य अष्टकलशदेवताविसृज्य अष्टभिर्ब्राह्मणैस्तान्ग्राहयित्वा ततआचार्य्यः पवमानःसुवर्जनस्वानुवाकेनच अश्वत्थंत्रिःपरिषिच्य किंचिदवशिष्टोदकान् पूर्वस्थानेषुस्थापयेत् ततोयजमानःआचार्योवा अश्वत्थपश्चिमस्थंडिलेग्निसंस्कारहोमंकुर्य्यात् तद्यथा अश्वत्थस्यव्याहृतिद्वारा पुंसवनादिसमावर्त्तनांतान्संस्कारान्करिष्ये इतिसंकल्पः अग्निंपवमानंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानम् अग्निंवायुंसूर्यंप्रजापतिंआज्यद्रव्येणप्रतिसंस्कारंचतुश्चतुःसंख्याकाहुतिभिर्यक्ष्ये प्रतिसंस्कारहोमांतेस्खलइतिमंत्रेण अश्वत्थंस्पृशेत् एवमुपनयनपर्यंतंकृत्वा यजमानश्चस्वस्याश्वत्थस्यचांतरालेपटंधृत्वा सुमुहूर्त्तेमंडलपाठपुरःसरंदेवलग्नमितिपठित्वा अतः पटंनिः सार्य्यध्रुवसूक्तंपठित्वा येयज्ञेनेतिवर्गपंचकशाखांतमंत्रांश्चपठित्वा कौपीनंयज्ञोपवितंकनकमयींमेखलांदंडंचतत्तन्मंत्रैर्दत्त्वा सप्रणवांसव्याहृतिकांसशिरस्कांगायत्रीमुपदिशेत् इत्युपनयनम् ततोमहानाम्न्यादिसमावर्त्तनांतंकृत्वा कनककुंडलअलंकारांश्चदत्त्वा आयुष्यंब्रह्मवर्चसमितिपठित्वामौंजीविसर्जनांतंकृत्वा त्वमग्नेइतिसूक्तंपठेत् ततःस्विष्टकृदादिहोमशेषंसमापयेत् अथविवाहः अश्वत्थालवालेयवास्तोशतकुंभमितंशुद्धंजलंक्षिप्त्वा दुग्धमधुघृतकुंभैश्चक्षिप्त्वा वस्त्रयुग्मेनांतराश्वत्थस्यविवाहादिविधिंकरिष्ये

इतिसंकल्प्य पूर्वसंस्कारहोमस्थंडिलोत्तरप्रदेशेस्थंडिलंविधाय योजकनामाग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानंद्वौसुवर्णौसयुजौसखायौसमानंवृक्षंतरिषस्वजातेतिमंत्रेण अष्टोत्तरशतसंख्ययातिलाज्यद्रव्येणतथामहाव्याहृतिभिस्तिलाज्यद्रव्येणअष्टोत्तरशतसंख्ययायक्ष्ये महाव्याहृतिभिस्तुभूःअग्नयेपृथिव्यैमहतेचस्वाहा भुवोवायवेचांतरिक्षायचमहतेस्वाहा ओंस्वरादित्यायदिवेचमहतेस्वाहा ओंभूर्भुवःस्वश्चंद्रमसेचनक्षत्रेभ्यश्चमहद्भ्यःस्वाहा एवंहोमंसंपाद्यतुलस्यश्वत्थयोश्चतुरःशाखामयान्हस्तान् गृभ्णामीतिमंत्रेणयोजयेत् ततःस्विष्टकृदादिहोमशेषंसमाप्य ततोऽश्वत्थंपुरुषसूक्तेनषोडशोपचारैःसंपूज्यअश्वत्थंतुलसींचप्रार्थयेत् अश्वत्थत्वंजगन्नाथपुरादेवैर्विनिर्मितःपापात्संत्राहिनोदेवपुण्यंदेहिमहाफलं इत्यश्वत्थप्रार्थनामंत्रः अथतुलसीप्रार्थना क्षीरोदधिसमुद्भूतेतुलसीहरिवल्लभे अश्वत्थोद्यापनंपुण्यंमह्यंदेहिश्रियेनमः ततआचार्य्यःक्षेत्रपालवलिंदत्त्वा सर्वैऋत्विजआचार्यैश्चस्वस्वकुंडेषुपूर्णाहुतीर्दत्त्वा कर्मशेषंसमापयेयुःततोयजमानःपीठपूजादिविविधकृतस्यअश्वत्थोद्यापनस्यसांगतासिद्ध्यर्थं आचार्य्यादिभ्योदक्षिणाप्रदानमहंकरिष्ये इतिसंकल्प्य पूजापूर्वकंतेभ्योदक्षिणांदत्त्वाआचार्य्योथपूर्वस्थापितकलशोदकंदूर्वापल्लवैःसपत्नीकंयजमानमभिषिंचेयुःतत्रमंत्राः आनोभद्राइति दशर्चंसूक्तं अस्यवामेतिद्विपंचाशतृचांसूक्त मुंचामीतिपंचर्चंसूक्तं परोमंत्रेतिचतुर्दशर्चंसूक्तं समुद्रज्येष्ठाइत्यादयः ततः पौराणिकाःसुरास्त्वामभिषिंचंत्वित्याद्याः एवमभिषिक्तोयजमानःतिलकादिंधृत्वा अग्निंपीठदेवतांचसंपूज्य उत्तिष्ठब्रह्मणस्पतेति उत्थाप्य सोपस्करंपीठमाचार्य्यायदत्त्वा कृतस्यकर्मणः संपूर्णतासिद्धयेगांचदत्त्वा मंडपंच सऋत्विक्सदस्यायाचार्य्यायचदत्त्वा भूयसींदक्षिणांदत्त्वा परमेश्वरार्पणंसंपाद्य सप्ताधिकान् ब्राह्मणान्संभोज्य आशिषोगृहीत्वाअश्वत्थोद्यापनसंपूर्णतांवाचयित्वा इष्टजनैः सहभुंजीत यएवंकुरुतेतस्यवर्धतेश्रीयशः सुखं

कुलकोटिसमुद्धृद्धिर्विष्णुलोकेमहीयते इतिशौनकीयेअश्वत्थोद्यापनम् अथवटोद्यापनम् भविष्यस्कांदयोः तच्चोदगयनेसुमुहूर्त्तेस्थिरलग्नेचंद्रानुकुल्यदिनेरम्यप्रदेशे नाभिमात्रगर्त्तेगृहादौप्रतिष्ठामंत्रेणवटपादपारोपणंकार्य्य तद्वदेवसर्वपादपारोपणम् अष्टमेवर्षेद्वादशेवावर्षेशाखापत्रांकुरितेवटवृक्षेउदगयानादिशुभकालेवटोद्यापनंकुर्यात् वटस्यपरितः चतुर्हस्तांदृढांवेदिकांविधाय वटमूलेचतुरस्रंवर्त्तुलंवाआलवालंकृत्वा तत्रकांडात्कांडादितिमंत्रेणदूर्वाआरोपयेत् वटपरितः चतुर्हस्तंपंचहस्तंवासुदृढं चतुर्द्वारंमंडपंकुर्य्यात् सामर्थ्येसति वटस्यपश्चिमेउत्तरेवा यथोक्तप्रकारेणहोमार्थं नवपंचकुंडाद्युपेतंमंडपंकुर्य्यात् असामर्थ्ये वटवेदिकायामेव तत्रप्रागादिद्वारचतुष्टये आम्रोदुंबरप्लक्षाशोकपल्लवकृतानिचत्वारितोरणानि तथाद्वारचतुष्टयेश्वेतकृष्णहरितपीतवर्णाश्चत्वारोध्वजाः पताकाश्चवटशिरसि सर्ववर्णध्वजः कार्यः एवंसंभृतसंभारोयजमानः ज्योतिर्विदादिष्टेसुमुहूर्त्तेप्रधानसंकल्पंकुर्यात् तद्यथा ओमद्यतिथ्यादिकीर्त्तनांतेआत्मनः सकलपापक्षयकुलकोटिसमुद्धरणऐहिकामुष्मिकसुखप्राप्तिपूर्वकब्रह्मपदप्राप्तिकामोवटोद्यापनंकरिष्ये तथाच अभीष्टदातृत्वसिद्ध्यर्थंसर्वप्राणिसुखनिवासार्थंचवटसंस्कारमहंकरिष्ये स्वगृह्योक्तविधिनातानिचकृत्वा आचार्य्यादीन्वृणुयात् अस्मिन्कर्मणिआचार्यंत्वामहंवृणे तदंगविहितंगणेशपूजनपुण्याहवाचन नांदीश्राद्धआचार्यादिवरणंकरिष्ये वृतोस्मीतितेनोक्ते एवंब्रह्माणं सदस्यंउपद्रष्टारंच ऋत्विजश्चसातिसंभवेमधुपर्कादिनासंपूज्य प्रार्थयेत् अस्ययागस्यनिष्पत्तौभवंतोभ्यर्थितामया सुप्रसन्नैश्चकर्त्तव्यंकर्मैतद्विधिपूर्वकं ततः सऋग्यजमानः पूर्णकलशहस्तः मंगलादितूर्यघोषेणसह शाकुंतसूक्तंपठेत् वटमंडपप्रादक्षिण्येनपश्चिमद्वारमागत्य तत्रमहीद्यौरितिमंत्रेणधरांसंपूज्य सुवर्णादिनिर्मितांवा आचार्य्यायदत्त्वाप्रविश्यच वटसमीपे

कलशंनिधाय वरुणनिर्ऋतिमध्येउपाविशेत् ततआचार्य्यआचार्यकर्माहंकरिष्ये इतिसंकल्प्य भूतशुद्ध्या दिविधाय मडपांतः गौरसर्षपलाजान् यदत्रसंस्थितंभूतमित्यादिमंत्रेणविकीर्य साधितपंचगव्येनकुशैः आपोहिष्ठेत्यादिमंत्रैः सर्वत्रप्रोक्षणंकृत्वा देवाआयांतुयातुधानाअपयांतु विष्णोदेवयजनंरक्षस्व ततः स्वस्त्ययनंतार्क्ष्यमरिष्टनेमिमितिमंत्रंपठेत् यथोक्तमंडपेतु उक्तप्रकारेणमंडपपूजांकुर्य्यात् साधारणमंडपेतु तोरणपताकाध्वजशांतिसूक्तजपार्थं वेदक्रमेणद्वौद्वौएकमेकंवाब्राह्मणं प्रागादिक्रमेणवृत्वायथास्थानंनिवेशयेत् ततोब्रह्मादिदेवतासर्वतोभद्रेआवाह्य तदुपरिअक्षतपुंजेकलशत्रयंप्रतिष्ठाप्य ततोमध्यकुंभेब्रह्मयज्ञानमिति ब्रह्माणं तद्दक्षिणेइदंविष्णुरितिविष्णुं तदुत्तरं त्र्यंबकंयजामहे इतिरुद्रं आग्नेयादिकोणेषुगणानांत्वेतिगणपतिं जातवेदसेइतिदुर्गां यज्ञानामितिमातॄः क्षेत्रस्यपतिनाइतिक्षेत्रपालं ततः परितः लोकेशान् तत्तन्मंत्रैरावाह्यसंपूज्य वेदिपरितः अष्टौकलशान्स्थापनक्रमेणसंस्थाप्य तत्रपूर्वादिकलशेषु पंचगव्यं सप्तमृदः चंदनं पंचरत्नानि क्षीरं सर्वौषधीः गंगोदकंच क्षिप्त्वा शुद्धोदकेनापूर्य्य पूर्णपात्रप्रत्येकंनिधाय तेषुइंद्रादीनावाह्य संपूजयेत् हरिद्रातैलरोपणादिवटस्यकृत्वावस्त्रेणवेष्टयेत् इत्यधिवासनम् अपरेद्युः प्रातर्नित्यकर्मसमाप्य पीठदेवताः संपूज्य प्रागादिद्वारचतुष्टयेषुचतुरश्चतुरश्चकुंभान्संस्थाप्यतेषुउदकपंचरत्नपंचपल्लवादिनिधायतेषुइंद्रयमवरुणसोमान् तत्तन्मंत्रैरावाह्यसंपूज्य चतुर्वेदाविदोद्विजाः शांतिसूक्तानिपठेयुः ईशान्यां कुंडेस्थंडिलेवा अग्निंप्रतिष्ठाप्य तदुत्तरवेदिकायांउक्तप्रकारेणग्रहानावाह्यसंपूज्य ईशान्यांकलशंसंस्थाप्यप्रतिष्ठाप्य अथाचार्यंब्रह्माणंचवृणुयात् ततोद्वारस्थाआचार्य्याश्चत्वारःस्वस्वकुंडेस्वस्वगृह्यविधानेन आचार्य्यकुंडात् श्रोत्रियागाराद्वाअग्निंप्रणीयस्थापयेयुःकुंडचतुष्टयेप्रत्येकंब्रह्मविष्णुरुद्रान् घृताक्तंदूर्वाज्यद्रव्येणअष्टोत्तरशतस

म्मिताहुतिभिःयक्ष्ये पूर्वेइंद्राद्यष्टौलोकपालान् समित्चर्वाज्यद्रव्यै रष्टाविंशतिसंख्ययायक्ष्ये दक्षिणेगणपतिंदुर्गांसप्तमातृः क्षेत्रपालंघृताक्तद्रव्येणअष्टाविंशतिसंख्याहुतिभिर्यक्ष्ये पश्चिमकुंडेसाधिप्रत्यधिदेवतानादित्यादिग्रहानर्कादिसमिच्चर्वाज्यतिलव्रीहिद्रव्यैरष्टाविंशतिसंख्याकाहुतिभिर्यक्ष्ये उत्तरकुंडेसोमंधेनुमितिमंत्रेणघृताक्तचरुद्रव्यसमिद्द्रव्यैः अष्टोत्तरशताहुतिभिः ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये एवंतत्तन्मंत्रैर्होमंसंपाद्य ततआचार्य्यःवटस्यहरिद्रातैलादिदत्त्वा पंचोपचारैःसंपूज्य स्थापिताष्टकलशान् ब्राह्मणान्ग्राहयित्वा आपोहिष्ठामयोभुवःसमुद्रज्येष्ठाः इमाआपः यतोन्विद्रमिति प्रत्येकंयजमानो वटस्याभिषेकंकुर्य्यात् ततआचार्यः प्रतीच्यांवटस्यसंस्कारहोमार्थं स्थंडिलनिर्मायसंकल्पंकुर्य्यात् ओमद्यास्यवटस्यपुंसवनादिविवाहांतान्संस्कारान्व्याहृतिहोमद्वाराकरिष्ये इतिसंकल्प्य अग्निप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानं अग्निंवायुंसूर्यं प्रजापतिआज्यद्रव्येण प्रतिसंस्कारंचतुश्चतुःसंख्याहुतिभिर्यक्ष्ये ओंभूरग्नयेपृथिव्यैमहतेस्वाहा ओंभुवोवायवेंतरिक्षायमहतेस्वाहा ओंस्वरादित्यायदिवेमहतेस्वाहा ओंभूर्भुवः स्वश्चंद्रमसेचनक्षत्रेभ्यश्चमहतेस्वाहा एवंहोमंकृत्वा प्रतिसंस्कारहोमांते वनस्पतेसातेवल्वशाइतिमंत्रेणवटंस्पृशेत् एवमुपनयनपर्यंतंकुर्यात् ततोयजमानःवटांतरालेपटंधृत्वा सुमुहूर्त्तंतदेवलग्नमितिपठिते अंतर्पटंनिःसार्यध्रुवसूक्तंयेयज्ञेनेतिपठित्वाकौपीनंयज्ञोपवीतं मेखलांदंडंचतत्तन्मंत्रैर्दत्त्वा ब्रह्मोपदेशवत्गायत्रींचदत्त्वाप्रणमेत् इत्युपनयनंततोमहानाम्नादिसम वर्त्तनांतंकर्मकृत्वा अलंकारान्दत्त्वा आयुष्यंब्रह्मवर्चसमितिमौंजींविसर्जयेत् ततोवटंदूर्वांचदुग्धादिनासिंच्य वटंदूर्वांचवस्त्रयुग्मेनसंवेष्ट्यवस्त्रकंचुक्यादिआभरणानिचदत्त्वा पूर्ववत् हुत्वागृभ्णामितेहस्तमितिमंत्रेणवटदूर्वयोःपल्लवमयान्हस्तान् योजयेत् आदित्योब्रह्मरूपायमध्यतोविष्णुरूपिणे अग्रतःशिवरूपायवटवृक्षायतेनमः अकारमूलरूपायउकारः

स्कंदरूपिणे मकारफलपुष्पायवटवृक्षायतेनमः इतिवटंनमस्कृत्य दूर्वांसिशतपर्वांसिशतमूलाशतांकुराशतंहरासिपापानांशतमायुःप्रवर्धते इतिवटवृक्षंदूर्वांचसंप्रार्थ्य ततआचार्यःक्षेत्रपालबलिंदत्त्वा सर्वेआचार्य्याःस्वस्वकुंडेषुपूर्णाहुतीर्दत्त्वा ततोयजमानःवटोद्यापनसंपूर्णतासिद्धये आचार्य्यादिभ्योदक्षिणांदास्ये इतिसंकल्प्य क्रमेणसर्वेभ्योदक्षिणांदत्त्वा ततःसर्वेऋत्विजःस्वस्वकलशोदकैर्यजमानं समुद्रज्येष्ठाइत्यादिमंत्रेणाभिषिंच्य कर्मशेषंसमापयेयुः ततोयजमानःपीठदेवतांसंपूज्य उत्तिष्ठब्रह्मणस्पतेइत्युत्थाप्ययांतुदेवगणाःसर्वेइतिविसृज्य पीठंसोपस्करमाचार्य्यायसंकल्प्यदद्यात् संभारानृत्विगाचार्य्यादिभ्योविभज्यदत्त्वाशताधिकान्ब्राह्मणान्भोजयिष्ये इतिभूयसीदक्षिणादानपूर्वकंकुर्य्यात् सदन्नेनदक्षिणादिनासंतोष्य वटोद्यापनसंपूर्णतांवाचयित्वा इष्टजनैःसहभुंजीत इतिवटोद्यापनविधिः अथवृक्षसामान्योद्यापनविधिर्हेमाद्रौमात्स्ये ऋषयऊचुः पादपानांविधिंसूतयथावद्वदविस्तरात् विधिनाकेनकर्त्तव्यंपादपोद्यापनंबुधैः येचलोकाःस्मृतास्तेषांतानिदानींवदस्वनः सूतउवाच पादपानांप्रतिष्ठांचतथैवोद्यानभूमिषु तडागविधिवत्सर्वमासाद्यजगतीश्वरः ऋत्विग्मंडपसंभारमाचार्य्यश्चापितादृशः पूजयेद्ब्राह्मणांस्तद्वद्धेमवस्त्रानुलेपनैः सर्वौषध्यादिसंसिक्तान्पिष्टातकविभूषितान् वृक्षान्माल्यैरलंकृत्यवासोभिरभिवेष्टयेत् सूच्यासौवर्णयाकार्य्यंसर्वेषांकर्णवेधनं अंजनंचापिदातव्यंतद्वद्धेमशलाकया फलानिसप्तवाष्टौवाकालधौतानिकारयेत्कालधौतानिरौप्यानिसौवर्णानिचकार्याणि प्रत्येकंसर्ववृक्षाणांवेद्यांतान्यधिवासयेत् धूपोवगुग्गुलुःश्रेष्ठस्ताम्रपात्रैराधिष्ठितान् सर्वधान्यकृतान्कृत्वावस्त्रगंधानुलेपनैः कुंभान्सर्वेषुवृक्षेषुसुस्थापयित्वानरेश्वरः साहिरण्यानशेषांस्तान्कृत्वाबलिनिवेदनं तथाचलोकपालानामिंद्रादीनांविधानतः वनस्पतेश्चविद्वद्भिर्होमःकार्योद्विजातिभिः ततःशुक्लांवरधरोसौवर्णकृतभूषणां कांस्यदोहांतुसौवर्णशृं

गाभ्यामतिशीलिनीं पयस्विनींवृक्षमध्यादुत्सृजेद्गामुदङ्मुखीं ततोभिषेकंमंत्रेणवाद्यगीतकमंगलैः ऋग्यजुःसाममंत्रैश्चवारुणैरभितस्तदा तैरेवकुंभैस्स्नपनंकुर्य्युर्ब्राह्मणपुंगवाः स्नात्वाशुक्लांवरधरोयजमानोपिपूजयेत् गोभिर्विभवतःसर्वान्नृत्विजःसुसमाहितः हेमसूत्रैःसकटकैरंगुलीयपवित्रकैः वासोभिःशयनीयैश्चतथोपस्करपादुकैः क्षीराभिषेचनंदद्युर्य्यावद्दिनचतुष्टयं होमश्चसर्पिषाकार्योयवकृष्णतिलैस्तथा पालाश्यःसामिधःशस्ताश्चतुर्थेन्हितथोत्सवः दक्षिणाश्चपुनस्तद्वद्देयातत्रापिशक्तितः यद्यदिष्टतमंकिंचित्तत्तद्दद्यादमत्सरः आचार्य्यैद्विगुणंदत्वाप्रणिपत्यविसर्जयेत् अनेनाविधिनायस्तुकुर्य्याद्वृक्षोत्सवंबुधः सर्वान्कामानवाप्नोतिपदंचानंत्यमश्नुते यश्चैकमपिराजेंद्रवृक्षंसंस्थापयेन्नरः सोपिस्वर्गेवसेद्राजन्यावादिंद्रायुतत्रयम् भूतान्भव्यान्मनुष्यांश्चतारयेन्निरयास्थितान् परमांसिद्धिमाप्नोतिपुनरावृत्तिदुर्लभां इतिसामान्यवृक्षोद्यापनाविधिः ॥ स्वस्तिश्रीरणवीरसिंहधरणिपालोवदान्याग्रणीः ॥ १ ॥ रणवीरसिंहभूपेशकारितेकृत्यवारिधौ लक्षपूजावृक्षपूजाकृत्यरत्नसमुच्चयः ॥ ३२ ॥

अथप्रसंगादत्रतरुपुत्रकविधिः मत्स्यपुराणे दशकूपसमावापीदशवापीसमोह्रदः दशह्रदसमःपुत्रोदशपुत्रसमोद्रुमः नंदिपुराणे ततःपुत्रंतुयःकुर्य्याद्विधिवद्वन्हिसन्निधौ समहापातकैर्युक्तःसमुद्धृत्यकुलद्वयं नरकेभ्योनरोयातिप्रजापतिपुरंप्रभो स्कंदपुराणे इत्येवंरुद्रमहीषीभूमिरुहसुतस्तवंस्तुत्वापतिंत्रिलोकेशमिदमाहपतिव्रता देव्युवाच भगवन्केनविधिनाविधीनांसारसागरःपुत्रप्रतिकृतिर्वृक्षःक्रियतेचंद्रभूषण सलीलमितिसर्वज्ञात्पृच्छंती।विधिमुत्तमं महादेवोमहादेवीमिदंवचनमब्रवीत् ॥ ईश्वरउवाच ॥ देविनागेंद्रनासोरुनागेंद्रमदगामिनी शृणुष्वयेनविधिनागृह्यतेवनिजःसुतः अवनिजोवृक्षः स्वपुत्रार्थंभूमिरुहंग्रहीष्यामीतिपार्वति सोपवासाभवेन्नारीशुचिवस्त्राशुचिव्रता ततश्चैवसहस्रांशावस्तशृंगगतेनिशि उदितेविमलेचापितथेंदाविंदुसन्निभे विप्रानामंत्रयेद्रावौ

233

पावनान्वेदपारगान् विप्रानामंत्रयित्वातुशुचिवस्त्राशुचिव्रता शर्थीतसनमस्कारासदर्भांभूमिमाश्रिता
गमयित्वातुतांरात्रिसवितर्युदितेसतिभक्ष्यभोज्यंसमाद।यत्रजेद्यत्रभवरारुः ततस्तंस्नापयित्वातुसातपत्रंसभूषणं
तंतरुंतरुणीकृत्य तच्छायामनुगामिनः यथोपपन्नमन्नंतद्भोजयित्वाद्विजांस्ततः पुण्येन्हिस्नापयित्वातुऋत्वि
जश्चतुराननः तृप्तानांब्राह्मणानांवेतस्त्वेनाकृत्यमात्मनः निवेद्यकृतमुद्दिश्यसद्भावेनपरेणहि अपुत्राभगवंतोहं
पुत्रप्रतिकृतिंतरुं ग्रहीष्यामिममानुज्ञांकर्त्तुमर्हथसत्तमाः ततस्तैरभ्यनुज्ञातंततरुंतरुणाकृतिं भूमिदेवसमक्षंवै
गृन्हीयात्तत्रसुव्रते भूमिदेवसमक्षंतुविधेयंब्राह्मणाग्रतः अनेनविधिनायस्तुगृहीतस्तरुपुत्रकः पितृणांनर
कस्थानामधुधारांसवर्षति गृहीतोविधिनानेनशुभभूमिरुहात्मजः सतुसुखायभवतिविपरीतेनदुःखदः सपुत्रा
णांशतचापिपीनश्रोणिपयोधरे एकोभूमिरुहःश्रेष्ठःपुत्रस्त्वेकल्पितस्ततः इत्येवंतन्मयादिष्टमिष्टदुष्टेनवारिणा
यथाभूमिरुहः पुत्रोविशिष्टोप्येककःशनैः ततःशोकापहादेवीतमशोकंबिभावर्त। अलंकृत्यसहृष्टात्माह्यलं
कारैःपृथग्विधैः आतपत्रंततस्तस्यमुक्ताचंचलभास्वरं उत्थापयामासशिरोमयूरांगरुहैर्नवैः नानावर्णैन
चाप्यस्यचंदनेनसुगंधिना आमूलात्प्रददौदेवीकरंपद्मानितस्ततः जांबूनदमयैश्चापि पट्टैरत्नविराजितैः
सर्वतोभूषयामासतमशोकरुहंसुतं तस्यशाखाग्रशाखासुमुक्तादामानिपार्वती आवबंधसतैर्भातिनक्षत्रै
रिवभास्करः तथावासोयुगेनापितमशोकंगुहारणी वासयामासलोकानांजननीपुत्रलालसा ततो
न्वगुरुणाचारुगुग्गुलुंघृतमेवच समवाययुतंधूपंचारयधूपनार्चिताः ततःशंखनिनादेनदेवतूर्यरवेणच नंद
नाद्यसमानीताब्राह्मणाब्रह्मणासमाः वाचयित्वाथपुण्याहंदत्त्वागाःस्वर्णमेवच ततःपुण्याहघोषंतेदत्त्वाचाशीर्द्वि
योरपि अनुमन्यपतिंदेवीऋषींश्चाप्रीणयत्तदा ब्रह्मवैवर्त्तेश्रीभगवानुवाच अतःपरंप्रवक्ष्यामिवृक्षस्योद्यापने

विधिं सर्वपापप्रशमनंसर्वाशुभनिवर्हणं अपुत्रयापुरापार्थपार्वत्यामंदराचले अशोकंशोकशमनःपुत्रत्वेपरिकल्पितः जातकर्मादिकास्तस्य याःक्रियाः बुद्धिमान्किल अत्रिर्मुनिःपुराणोक्ताःशृणुष्वैवयुधिष्ठिर धेनूर्बलोधनवलोतथैवमृदुपल्लवः शीतवातातपसहःसंस्कार्य्यस्तरुपुत्रकः स्त्रीनामाकंटकीकुब्जःकीटखातःसकोटरः नोद्याप्यःपादपःसर्वशिष्टानांयोनसंमतः आलवालेसुविहितेशुभेचार्घचतुष्पथे शोधयित्वातमुद्देशं प्रशस्तंकारयेत्ततः ततश्चोद्यापनंपार्थपादपानांप्रदिश्यते शुभेह्निविप्रकथितेग्रहनक्षत्रसंयुते पताकालंकृतंवृक्षंपूर्वेद्युराधिवासयेत् पुष्पितैस्नापितंस्वर्णसर्वौषध्याचपादपं स्थापयेत्सर्वतःकुंभांश्चतुर्दिक्षुविचक्षणः पताकालंकृताः सर्वेकार्य्यास्तत्सान्निभा द्रुमाः मूलाविन्यस्त्यकलशारत्नसूत्रावगुंफिताः रक्तपीतासितश्वेतचर्चिताः सुमनोहराः कलधौतमयान्यत्रफलानिदशपंचवा ताम्रपात्रेसबीजानिसरत्नान्यधिवासयेत् तूर्यमंगलघोषेणचतुर्दिक्षुक्षिपेद्बलीः इंद्रादिलोकपालानांतन्मंत्रैर्मंत्रविद्गुरुः ततःप्रभातेविमलेकुंडंकृत्वासमेखलं ग्रहयज्ञविधनेनशांतिकर्मसमारभेत् सुवर्णालंकृतान्कृत्वासर्वान्ब्राह्मणपुंगवान् चतुरोष्टौयथाशक्त्यावासोभिरभिपूजयेत् तिलाज्येनतुहोमः स्यात्तुष्टिपुष्टिकरःसदा मातरःस्थापयित्वातुपूजयेत्कुसुमाक्षतैः स्नापयित्वातरुं सम्यक्पयसाथपरिप्लुतं होमयेज्जातकर्मादिगोदानंयावदेवहि पादपंस्नापयेत्तत्रसमंत्रैस्तीर्थवारिभिः जातकंनामकरणमन्नप्राशनमेवच सुवर्णसूच्याकुर्वीतकर्णवेधंविधानतः जातरूपक्षुरेणाथचूडाकर्मयथाक्रमं वघ्नीयान्मेखलांमौंजींवासश्चपरिधापयेत् कुर्य्यादेतदशेषेणकृत्वागोदानमंगलं विवाहंकेचिदिच्छंतिमालतीलतया तरोः मालत्यासहामलक्याजंवूवाशाल्मलींविदुः संस्कृत्यैवंतुसंस्कारैःपादपंचयथार्थवत् एषप्रतिष्ठानामेतिमंत्रेणाशीःप्रयोजयेत् यजमानस्ततस्नात्वाशुक्लांवरधरःशुचिः पुष्पांजलिंसमादायमंत्रमेनमुदीरयेत् मं

त्रे यथा येशाखिनःशिखरिणांशिरसांविभूषायेनंदनादिषुवनेषुकृतप्रतिष्ठाः येकामदा.सुरनरोरगकिन्नराणांते मेनतस्यदुरितार्त्तिहराभवंतु एतेद्विजाविधिवदत्रहुतोहुताशाः पस्यत्यथोशिशिरदाधितिरंबरस्थः त्वंवृक्षपुत्रपरिकल्पनयाघृतोसिकार्य्यंसदैवभवताममपुत्रकार्य्यं इत्येवमुक्त्वातंवृक्षंपुत्रत्वेपरिकल्प्यच घृतपात्रेस्ववदनंदृष्ट्वाशीःसंप्रयोजयेत् अंगादंगात्संभवासिहृदयादभिजायसेआत्मैवपुत्रनामासित्वंजीवशरदांशतंब्राह्मणानांतथादेयादक्षिणाहृष्टमानसैः स्थापकायशुभांधेनुदद्यात्कुर्य्यान्महोत्सवं दीनानाथजनानांचभोजनंचानिवारितं इतरेषांतुदातव्यंसंतुष्टेनसुरासवं ज्ञातिबंधुजनैःसार्धंस्वयंभुंजीतकामतः तथाकर्मकराःसर्वेभोजनीयाःस्वशक्तितः एवंयाकुरुतेपार्थवृक्षाणांसुमहोत्सवं सर्वान्कामानवाप्नोतिइहलोकेपरत्रच पद्मपुराणे अपुत्रस्यहिपुत्रत्वंपादपाइहकुर्वते यच्छंतिरोपकेभ्यस्तेसतीर्थेतर्पणादिकं सत्तीर्थेषुपुत्रकृतंतर्पणादिजन्यतृप्त्यादिफलंरोपकस्यप्रयच्छंतीत्यर्थः यत्नेनापिचराजेंद्रपिप्पलारोपणंकुरु सतुपुत्रसहस्राणामेकएवकरिष्यति तर्पणादिकृत्यमितिशेषः पुत्रैर्विनाशुभगतिर्नभवेन्नराणांदुःपुत्रकैरपितथोभयलोकनाशः एतद्विचार्य्यसुधियापरिपाल्यवृक्षाः पुत्रा पुराणविधिनापरिकल्पनीयाः इतितरुपुत्रकविधानसहितंवृक्षसामान्योद्यापनम् ॥

अथशिष्टपरिगृहीतंसत्यनारायणकथाविधानम् तत्रादौकृतनित्यक्रियोयजमानादिः सायंकालेब्राह्मणैरमात्यादिभिःसह ॐतत्सदद्येत्याद्युच्चार्य्ययथावर्त्तमानेदेशकालेअमुकशर्मावर्मावामनोवांछितफलावाप्तिकामोदुखःदौर्गत्याद्यखिलसंकटनिवृत्तयेगणेशादिपूजापूर्वकं सत्यनारायणपूजासहितंकथाश्रवणमहंकरिष्ये ततोभूशुद्धिप्राणायामादिकृत्वा सामान्यार्घ्यस्थापनंग्रहस्थापनंशंखस्थापनंचविधाय त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे नमितःसर्वदेवैश्चपांचजन्यनमोस्तुते १ आगमार्थंतुदेवानांगमनार्थंतुराक्षसां कुर्वेघंटारवंतस्माद्देवताऽह्वानलक्षणं इतिशंखंघंटांचसंपूज्य शंखोदकेनस्वात्मानंपूजोपकरणादिकंचाभ्युक्ष्य गणेशंग्रहांश्चयथाविधिसंपूज्य ततःसत्यनारायणध्यानं नारायणंसांद्रघनावदातंचतुर्भुजंपीतमहार्हवाससं प्रसन्नवक्त्रांवुचलोचनंतंसनंदनाद्यैरुपसेवितंभजे १ शांताकारंभुजगशयनं २ शुक्लांबरधरंविष्णुं ३ इतिध्यात्वामानसैरुपचारैःसंपूज्य पुनर्ध्यात्वा शालिग्रामशिलांपीठोपरिसंस्थाप्य अथवासुवर्णादिप्रतिमांसर्वतोभद्रस्थकलशोपरिसंस्थाप्य पुरुषसूक्तेनपंचामृताभिषेकसहितषोडशोपचारैर्यथाशक्तिभक्ष्यभोज्यनैवेद्यवस्त्रैर्भूषण फलदक्षिणादिभिर्भक्तिपुरःसरंमहोत्सवंकृत्वा ॐनमोभगवतेसत्यनारायणानमः इत्यनेनसर्वोपचारान्समर्पयेत् तत्रसपादकसेटकमात्रशर्करावृतपाचितगोधूमचूर्णमयंनैवेद्यंप्रथमंदत्त्वा महानैवेद्यंयथाशक्तिमहोत्सवार्थंयथारुचिदद्यात् नैवेद्यांतेतांबूलादिसमर्पणं वाचकंश्रोतृजनांश्चतिलकपुष्पमालादिरभ्यर्च्यालंकुर्य्यात् यथाशक्तिमूलमंत्रमष्टोत्तरशतादिकसंख्याजप्त्वा कथांशृणुयात् सूतउवाच नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींव्यासंततोजयमुदीरयेत् नवांभोजनेत्रंरमाप्रेमपात्रंचतुर्वाहुचामीकरंचारुगात्रं जगत्त्राणहेतुंरिपुध्वांतवन्हिंसदानारायणंदेवमीडे श्रीरामंलक्ष्मणंसकरुणंसीतापतिंसात्विकं वैदेहीमुखपद्मलब्धमधुपंपौलस्त्यसंहारिणं वंदेवंद्यपदांबुजंसुरवरंभक्ता

नुकंपापरं शत्रुघ्नहनूमताचभरतेनासेवितंराघवं कलिकलुषविनाशंवांछितार्थप्रकाशं सुरनरसुखदासंभूसुरे
शप्रकाशं विबुधबुधविलासंशास्त्रचर्य्याविशेषं नृपतिवरचरित्रंभोश्रृणुष्वेतिहासं कृतत्रेताद्वापरेषुपूज्यतेनेक
रूपतः कलौप्रत्यक्षफलदः सत्यनारायणोहरिः कृपयाब्राह्मणद्वारेप्रकटीकृतविग्रहः इतिहासमिमंवक्ष्ये
संवादंहरिविप्रयोः काशीपुरमितिख्याततत्रासीद्ब्राह्मणोत्तमः दांतोगृहाश्रमीनित्यंभिक्षुः कुलकलत्रवान्
शतानंदइतिख्यातोविष्णुव्रतपरायणः एकदापथिभिक्षार्थंचरतस्तस्यश्रीपतिः पीडितस्यातिशांतस्यसंबभूवाक्षि
गोचरः वृद्धब्राह्मणरूपेणपप्रच्छतंद्विजंहरिः कथास्यासिद्विजश्रेष्ठवृत्तिकामेनकथ्यतां ब्राह्मणउवाच॥ भि
क्षावृत्तिरहंसौम्यकलत्रापत्यहेतवे याचितुंधनिनांद्वारेव्रजामिधनमास्तिनो सत्यनारायण.भिक्षाविप्रैःसदाग्राह्या॥वि
शेषेणकलौद्विज ममोपदेशतोविप्रसत्यनारायणंभज दारिद्र्यशोकत्रिविधसंतापहरणंहरिं कुशलाःशरणंयांतिनेतरे
विषयैषिणाःशरण्यंशरणंयाहिमोक्षदंमलमोचनं एवंसंबोधितोविप्रोहरिणाकरुणात्मना पुनःपप्रच्छविप्रोसौक्कास्ते
नारायणोविभुः सत्यनारायणउवाच॥ बहुरूपः सत्यसंधः सर्वव्यापीनिरंजनः इदानींविप्ररूपेणतवप्रत्य
क्षतागतः दुःखोदधिनिमग्नानां तरणंचरणंहरेः आहृत्यपूजासंभारं हितायजगतोद्विज अर्चांस्तव
कथाध्यायांस्त्वमेवप्रकटीकुरु इतिब्रुवंतंविप्रोसौददर्शपुरुषोत्तमं जलदश्यामलंचारुचतुर्बाहुंगदादिभिः पी
तांबरंनवांभोजलोचनंस्मितसुंदरं वनमालामधुव्रातचुंबितांघ्रिसरोरुहं निशम्यपुलकांगोसौप्रेम्णापूर्णाश्रुलो
चनः स्तुवन्गद्गदयावाचादंडवत्पतितोभुवि शतानंदउवाच॥ प्रणमामिजगन्नाथंजगत्कारणकारणं अना
थनाथंशिवदंतापत्रितयमोचनं नमः सत्यनारायणायास्यकर्त्रे नमः शुद्धसत्त्वायविश्वस्यभर्त्रे करालायकाला
त्मकायास्यहर्त्रेनमस्तेजगन्मंगलायात्तमूर्त्ते धन्योस्म्यद्यकृतार्थोस्मिभवोद्यसफलोमम वाङ्मनोगोचरोयस्त्वंममप्र

त्यक्षमागतः दिष्ट्याकिंवर्णयाम्यद्यनजानेकस्यमेफलम् क्रियाहीनस्यमंदस्यममप्रत्यक्षमागतः क्वाकिंचनोहंभगवन्ककुजातेरमापते विधिनाकेनकृपया तदाज्ञापयमांविभो हरिस्तमाहमधुरंसास्मितंविश्वमोचनंपूजयाममविप्रेंद्रलप्स्यसेत्वंधनंवहु अनायासेनलब्धेनश्रद्धामात्रेणमांभज गतोग्राहोजामिलोवायथाभून्मुक्तवंधनः विधानंशृणुविप्रेंद्रमनसाकामजंफलं पूजांसंभृतसंभारः कुर्याद्भक्त्यायथाविधि गोधूमचूर्णपादोर्धसेटकादिप्रमाणतः दुग्धेनतावतायुक्तंमिश्रितंशर्करादिभिः गंधपुष्पादिनैवेद्यैर्भोज्याद्यैश्चमनोरमैः धूपैश्चदीपावलिभिरत्नैश्चविविधोसमैः अन्नमिष्टान्नतांवुलैः पूजयेद्भक्तितत्परः ब्राह्मणैः स्वजनैश्चैव वेष्ठितः श्रद्धयान्वितः मयासार्धंममकथांशृणुयात्परमादरात् इतिहासंतथाराज्ञोवणिजोखिलतःपरं कथांतेप्रणमेद्भक्त्याप्रसादंविभजेत्तथालब्धंप्रसादंभुंजीतमानंनैवविचारयेत् द्रव्यादिभिर्नमेप्रीतिर्भक्त्याकेवलयातथा विधिनानेनमानेनपूजयिष्यंतियेनराः पुत्रपौत्रधनैर्युक्ताभुक्त्वाभोगान्यथेप्सितान् अंतेसान्निध्यमासाद्यमोदंतेतेमयासह यंयंकामंकामयंतेप्राप्नुयुस्तेममार्चनात् इत्युक्त्वांतर्दधेविष्णुर्विप्रोपिहृष्टमानसः प्रणम्यागाद्यथादिष्टंमनसाकौतुकाकुलः अद्यभैक्ष्येणलब्धेनपूज्योनारायणोमया इतिनिश्चित्यमनसिभिक्षार्थीनगरंगतः विनादेहीतिवचनंलब्धवान्विपुलंधनं कौतुकाविष्टमनसाजगामनिजमंदिरं कौतुकात्सर्वमाख्यातंब्राह्मण्यासान्वमोदत सादरंद्रव्यसंभारमाहरद्भर्तुराज्ञया आहूयबंधुमित्राणितथासान्निध्यवासिनः सत्यनारायणंदेवंयजामिस्वगुणावतः भक्त्यातुतोषभगवान्सत्यनारायणःस्वयं कामंदित्सुःप्रादुरासीत्कथांतेभक्तिवत्सलः वव्रेविप्रोभिलषितामिहामुत्रफलप्रदंभक्तिंपरांभगवतितथातत्संगसंगिनां रथंकुंजरामंदिरंमंजुलंचहयंचारुचामीकरालंकृतंच धनंदासदासीगणंगांमहींचलुलायंसदुग्धंहरेदेहिदास्यं तथास्त्वितिहरिःप्राहस्वयमंतर्दधेततः विप्रोपिकृतकृत्योभूत्सर्वैर्लोकाविसि

स्मिरे प्रणम्यभुविकायेनप्रसादंचापुरादरात् स्वंस्वंधाममथाजग्मुर्धन्यधन्येतिवादिनः प्रचचारततोलोकेसत्यनारायणार्चनं कामसिद्धिप्रदंभुक्तिमुक्तिदंकलुषापहम् ॥ इतिश्रीमदितिहाससमुच्चयेसूतशौनकसंवादेसत्यनारायणार्चनेप्रथमोध्यायः ॥ १ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

सूतउवाच ॥ अथेतिहासंशृण्वानःसतुविप्रःकृतार्थितः विचरंतोवनेकामंनिषादाः काष्ठवाहकाः वनात्काष्ठानिविक्रेतुंपुरींतांप्रययुःक्वचित् एकस्तृषाकुलोजातोविष्णुदासाश्रमंययौ ददर्शविपुलैस्तत्रसेवितंतद्द्विजेरितं जलंपीत्वाविस्मितोभद्भिक्षुकस्यकुतोधनम् प्राग्दृष्टोकिंचनोविप्रोदृश्यतेद्यमहाधनः इतिपप्रच्छभूदेवंप्रणम्यप्रांजलिर्मुदा ऐश्वर्यंतेकुतोब्रह्मन्दुर्गतिस्तेकुतोगता आज्ञापयमहाभागश्रोतुमिच्छामितत्त्वतः शतानंदउवाच सत्यनारायणस्यांगसेवयाकिंनलभ्यतेनाकिंचित्सुखमाप्नोतिविनातस्यानुकंपया ॥ निषादउवाच ॥ सत्यनारायणस्यांगसेवासायुज्यदायिनी अहोकिमितिमाहात्म्यंसत्यनारायणार्चने विधानंसोपचारंत्वमुपदेष्टुमर्हसि साधूनांसमाचित्तानामुपकारवतांसतां इतिपृष्टोविधिंवक्तुमितिहासमथाब्रवीत् शतानंदउवाच राजासोद्धार्मिकःकश्चित्केदारमणिपूरके चंद्रचूडइतिख्यातःप्रजापालनतत्परः शांतोमधुरवाग्धीरोनारायणपरायणः ममाश्रमंसमायातः सत्यनारायणार्चने विधानंश्रोतुकामोसौमामाहसादरंवचः मयापिकथितंतस्मैतन्निबोध निषादज संकल्प्यमनसाकामं निःकामोवाजनःक्वचित् पूजासंभारमाहृत्यकृतनित्यार्चनाक्रियः देवालयेस्थंडिलेवामध्येपूजांसमारभेत् सायंकालेशिलांस्थाप्य पूर्णकुंभसमन्वितां आचार्य्यंस्वांगनेचैवसमाहूयसुहृज्जनान् गोधूमचूर्णपादार्धसेटकादिप्रमाणतः दुग्धेनतावतायुक्तंशर्कराज्यसमन्वितम् पायसापूपसंयाव

दधिक्षीरमथाहरेत् इतिनिश्चित्यमनसानिषादः काष्ठविक्रयात् चतुर्गुणंधनंलब्ध्वास्वंस्वंभुवनमाययुः उच्चावचैः फलैःपुष्पैर्धूपदीपैर्मनोरमैः संपूज्यदेवंभक्त्याद्धि विभवेसतिविस्तरैः नतुष्येद्द्रव्यसंस्कारैर्भक्त्याकेवलयायथा भगवान्सर्वतःपूर्णो नधनंतृणतेक्वचित् दुर्योधनकृतांत्यक्त्वाराज्यपूजांजनार्दनः विदुरस्याश्रमावःसमातिथ्यमकरोद्विभुः सुदाम्नस्तंडुलकणान्जग्ध्वामर्त्यसुदुर्लभाः संपदादाद्धरिःप्रीत्या भक्तिमात्रमयेनतं गोप्योगृध्रोवणिग्व्याधोहनुमांश्चविभीषणः एतच्छ्रुत्वाद्विजमुखात्सत्यनारायणार्चनं कृतकृत्योनिषादोभूत्प्रणम्य द्विजपुंगवं सगत्वास्वगणान्प्राहमाहात्म्यंहरिसेवनं तेहृष्टमानसासर्वेसमयंचक्रुरादृताः सत्यनारायणःपूज्यः काष्ठलाभेनयावता मृदास्त्रीभ्यः समाचख्युर्वृत्तांतंसर्वमादितः ताःश्रुत्वाहृष्टमनसापूजासंभारमादरात् भर्तृणामाज्ञयाचक्रुर्यथाश्रुतविधानतः ततोमिलित्वास्वगणैः पूजांचक्रुर्यथोदितां कथावसानेतेभक्त्याप्रणेमुर्गतपातकाः स्वजातिभ्यः परेभ्यश्च प्रसादंबुभुजुस्ततः पूजाप्रभावतोभिल्लाः पुत्रदारादिर्युताः भुक्त्वाभोगान्यथेष्टंवैष्णवंधामलेभिरे इतिश्रीमदितिहाससमुच्चयेसत्यनारायणार्चनेनिषादगणकथानकंनामद्वितीयोध्यायः २॥

॥ सूतउवाच ॥ अत्रतेवर्णयिष्यामिगाथांसाधूपचारितां साधुसार्थः कृतार्थोभून्नृपोपदेशतोवणिक् मणिपूरपतीराजाचंद्रचूडोमहायशाः सहप्रजाभिरानर्चसत्यनारायणंप्रभुं ददर्शबहुलंलोकंनानादेशसमागतं मणिमुक्ताविरचितं वितानैः समलंकृतं वेदवादांश्चशुश्रावगीतवादित्रसंयुतान् रम्यस्थानंसमालोक्यकर्णधारंसमादिशत् विश्रामयात्रतरणिमिदंपश्यामिकौतुकं भक्तिंदृष्ट्वातथाचक्रे कर्णधारःसपत्तने तरणिंच समुत्तीर्य्यर्थमंदलीलाविलासिनः कर्णधारानुगाः सर्वे युयुधूरासलीलया सुखमुत्तीर्य्यसामात्योलोकान्पप्रच्छ

241

सादरं यागस्थानंसमालोक्यप्रशस्तंतमुदंययौकिमत्रक्रियतेसौम्याभवद्भिर्लोकपूजितैः सभ्याः प्रोचुरनेनात्रसत्यनारायणोविभुः पूज्यतेवंधुभिः सार्धं राज्ञालोकानुकंपया त्वमप्यत्रक्षणंतिष्ठप्रसादंभुंक्ष्वसादरं कथांश्रुत्वारीतिरियंसत्यनारायणार्चने इतिश्रुत्वालोकमुखाद्विस्मयोत्फुल्ललोचनः साधुः पप्रच्छकरणे किंफलंकोविधिस्तथा सभ्याः प्रोचुरमुष्यालंफलंवक्तुंचतुर्मुखः विस्तारंशृणुसंक्षेपंकथयामस्तवाग्रतः निर्धनोपि धनाढ्यः स्यादपुत्रः पुत्रवान्भवेत् भ्रष्टराज्योलभेद्राज्यमंधोपिस्यात्सुलोचनः मुच्यतेवधनाद्बद्धोनिर्भयःस्याद्भयातुरः मनसाकामयेद्यंयंलभेत्तत्तत्स्वकामतः विधानंतुततः श्रुत्वा चैलंबध्वागलेवणिक् दंडवत्प्रणिपत्याहकामंसभ्यान्प्रमोदरात् अनपत्योस्मिभगवन्वृथैश्वर्योवृथोद्यमः पुत्रंवायदिवाकन्यां लभेयंत्वत्प्रसादतः पताकांकांचनींकृत्वापूजयिष्येकृपानिधिं सभ्याः सर्वेन्वमोदंतांकामनासिद्धिरस्तुमे सभ्याः प्रत्युत्तरंचक्रुरेवमस्त्वितिसादरं हरिंप्रणम्यसभ्यांश्च प्रसादंवुभुजेत्ततः जगामस्वालयंसाधुर्मनसाचिंतयन्हरिं स्वगृहान्नागतेतस्मिन्नार्योमंगलपाणयः मंगलानिविचित्राणि यथोचितमकुर्वत विवेशांतः पुरंसाधुस्तदापरमकौतुकी ऋतुस्नातासतीलीलावतीपर्यचरत्पतिं गर्भंधृतवतीसाध्वीसमयेसुषुवेतुसा कन्यां कमललोलाक्षींवांधवामोदकारिणीं साधुःपरांमुदंलेभेविततारधनंवहु विप्रानाहूयवेदज्ञान्कारयामासमंगलं लेखयित्वाजन्मपत्रंनामचक्रेकलावती कलानिधिकलेवासौववृधेसाकलावती साधुःप्रौढांतुतांदृष्ट्वाविवाहार्थमचिंतयत् नगरेकांचनपुरेवणिक्शंखपतिःश्रुतः कुलीनोरूपसंपन्नः शीलौदार्यगुणान्वितः वरयामासतंसाधुर्दुहितुःसद्भिसद्वरं शुभलग्नेवहुधनैर्मंगलैरग्निसन्निधौ वेदवादित्रनिनदैर्ददौकन्यांयथाविधिमणिमुक्ताप्रवालानिवसनंभूषणान्वितं महामोदमनाःसाधुर्मंगलार्थंददौवहु प्रेम्णानिवासयामासस्वांतेजामा-

तरंततः तमेनेपुत्रवत्साधुः सतस्यपितृवत्सुधीः अतीतेबहुकालेतुसत्यनारायणार्चनं विस्मृत्यसहजामात्रावाणिज्यार्थंययौपुनः देशाद्देशांतरंगच्छन्ददर्शसुमनोहरं नगरंनर्मदातीरेतत्रवासंचकारसः कुर्वन्क्रयंविक्रयंचविरत्नासोमहामनाः मनसावचसाचैवनकृतंहरिसेवनं तेनकर्मविपाकेनतापमापाचिराद्वणिक् एकस्मिंश्चदिनेराज्ञोगेहेरात्रौतस्करैर्वृंदे ज्ञात्वानिद्रागतान्सर्वान् हृतंचौरैर्महाधनं मुक्तामालाश्चविविधास्तैर्नीताश्चंद्रसन्निभाः प्रभातेबोधितोराजासूतमागधवंदिभिः प्रातःकृत्यंसमास्थायसदसिराजसन्निधौ इतस्ततःसमायाताः किंकराराजवल्लभाः प्रोचुःसर्वेमहाराजभोःशृणुष्वमहीपते चौरैरंतःपुरगतंहृतंसर्वंमहाधनं इतिविज्ञापितोराजाक्रोधादनिलसन्निभः यूयंगत्वाप्रगृह्याथसचौरंद्रव्यमागत नोचेद्घानिष्येसगणानितितान्ससमादिशत् इतिवाक्यंसमाकर्ण्यप्रजग्मुराजकिंकराः धनंकुत्रापिनप्राप्तंसचौरंराजकिंकराः हंतानःसगणान् राजा किंकुर्मोनःकुतःसुखं अदृष्टंविचरन्रात्रौदूतराजश्चचारसः निर्देशितास्यावाणिज्येददर्शविपुलंधनं मुक्ताहारंगलेतस्यलुंठितंवणिजस्तदा चौरोयमितितंज्ञात्वासबबंधात्मरक्षणात् सधनंसहजामात्राराज्ञोंतिकमुपानयत् प्रतिकूलेहरौतस्मिन्राज्ञापिनविचारितं धनागारेधनंनीत्वाबद्धौसौतेनदुर्मती कारागारेलोहमयैःशृंखलैर्गलपादयोः इतिराजाज्ञयादूतास्तथाचक्रुर्निबंधनं जामात्रासहितासाधुर्विललापानिशंमुहुः हापुत्रताततातेतिजामातःक्वगतंधनं क्वचसावर्त्ततेभार्यापश्यधातुर्विपर्ययं निर्दयेनविधात्रावाहेतुशून्येनछद्मना निमग्नोदुःखजलधौकोवात्रास्यातिसंकटात् बहुलंधातुपर्य्यायंनजानामिपुराकृतं कर्मणश्चविपाकोयंनजानेकस्यवाफलं समाःश्वशुरजामात्रोर्द्वादशैयुर्विषादिनोः प्रतिकूलेहरौतस्मिन्धनंयत्तद्गृहस्थितं दिनानिबहुजातानिविक्रीयबुभुजेकिल नास्तितत्पच्यतेकिंचित्तदासौकष्टमावहत् अथैकस्मिन्दिनेक

न्याकलावत्यथतत्प्रसूः गत्वाविप्रगृहेऽपश्यत्सत्यनारायणार्चनं प्रार्थयंतीजगन्नाथंदृष्ट्वासाप्रार्थयद्धरिं सत्यनारायणहरेपिताभर्त्ताचमेगृहे आगच्छत्यर्चयिष्यामिभवंतमित्युवाचह तथास्तुब्राह्मणैरुक्तंततःसास्वगृहंययौ मात्रानिर्भर्त्सिताचेयंतंकालंकुत्रास्थिताशुभे वृत्तांतकथयामाससत्यनारायणार्चनं कलौप्रत्यक्षफलदंसर्वदाक्रियतेनरैः कर्त्तुमिच्छाम्यहंमातरनुज्ञातुंत्वमर्हसि देवमेयातुजनकःस्वामीचममकामदः मात्रासहेतिनिश्चित्याभिक्षार्थंनगरंययौ अनायासेनसंप्राप्तंद्रव्यंबहुगुणान्वितं तेनसंभृतसंभारापूजांचक्रेकलावती लीलावतीसहतया भक्त्याचक्रेप्रपूजनं पूजनेनविशेषेणतुष्टोनारायणःस्वयं नर्मदातीरनगरेराज्ञःस्वप्नंददर्शह रात्रौसुप्तेस्वपर्य्यंकेनिद्रांकुर्वतिराजनि उवाचविप्ररूपेणबोधयन्श्लक्ष्णयागिरा उत्तिष्ठोत्तिष्ठराजेंद्रतौसाधूपरिमोचय अपराधंविनाबद्धौनोचेच्छंनभवेत्तव इत्युक्त्वांतर्दधेविष्णुर्विनिद्रोन्नृपतिस्तदा विस्मितःसहसोत्थायदध्यौब्रह्मसनातनं कारागारेततोगत्वाददर्शवणिजौततः कुत्रत्यौवांकुलंकिंवावसतिःकस्यवापुरे कथमत्रसमायातौकेनापिचदशामिमां साधूप्रोचतुः रत्नपुरेनिवसतौवणिग्जातौजनिर्मम वाणिज्यार्थंमहाराजवाणिज्यंजीविकामम मणिमुक्तादिविक्रेतुमागतंत्विहतेपुरे येनराज्यसमानीतौबद्धौचौराविमाविति आवांनचौरौराजेंद्रतत्त्वतस्त्वंविचारय प्रतिकूलेविधौकोपादृशामेतांसमागतौ विनापराधंराजेंद्रबद्धौमिथ्यापवादतः निवेदितंविशेषेणपुण्यश्लोकशिखामणे युक्तंयत्कुरुराजेंद्रेत्युक्त्वातूष्णींबभूवतुः श्रुत्वातन्निश्चयंकृत्वातयोर्बंधनमोचनं कारयित्वापरिष्कारंकारयामासनापितैः तैलैःसुरभिभिश्चक्रेस्नपनंतुगुणार्हतः भोजयित्वासुभोज्येनराजालंकारवाहनैः महार्हवस्त्राभरणैःपूजयामासभूपतिः अब्रवीत्पूजितौराजासहजामातृतौमुदा ॥ साधुरुवाच ॥ कारागारेबहुविधंदुःखमाप्तमतःपरं आज्ञापयमहाराजदेशंयातुंकृपानिधे श्रुत्वासाधुवचोराजाप्राहकोष्ठाधिकारिणं

तरणीभ्योधनंनीतंतेनताःपरिपूरय राजकिंकरतःश्रुत्वातथाचक्रेविलंबितः प्रेम्णातौज्ञापयामासस्वदेशंधरणीपतिः जामात्रासहितःसाधुर्गीतवादित्रमंगलैः स्वदेशंचलितोद्यापिनकृतंहरिपूजनं सत्यनारायणोदेवःप्रत्यक्षफलदःकलौ गच्छतस्तस्यमार्गेवैप्रत्यक्षोभूज्जनार्दनः सहरिस्तापसोभूत्वाचक्रेसाधुविडंवनं इतिश्रीमदितिहाससमुच्चयेसत्यनारायणार्चनेसाधुवणिजोपाख्यानेतृतीयोध्यायः ॥ ३ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥

॥ तापसउवाच ॥ धनंकिंनौषुतेसाधोमामनादृत्ययासिभोः प्रत्युत्तरंनदात्सोपिक्षिपन्नौकांतुगच्छति सोपितद्विधविप्रोभूद्विरोधेनात्रकिंफलं धनंनौकासुनास्तीतिसाधुश्चिंतापरोभवत् किमिदंकस्यवाहेतोर्धनंकुत्रगतंमम इत्थंमूर्च्छांगतःसाधुर्विललापपुनःपुनः जामात्राबोधितःसाधुस्तापसंतंजगामह गलेवसनमाधायप्रणनामसतापसं कोभवानितिपप्रच्छदेवोगंधर्वएववा देवदेवोथवाकोपिनजानेतवविक्रमं आज्ञापयमहाभागमद्विडंबनकारणं ॥ तापसउवाच ॥ आत्माशत्रुस्तथाशत्रुरात्मामित्रममित्रक त्यजमौर्ख्यंमहासाधोप्रवादंवावृथाकुरु एवंनिषेधितःसाधुर्नोवाचतापसंपुनः एवंसतापसःप्राहकृपयापूर्वकर्मतत् चंद्रचूडोयदानर्चसत्यनारायणंनृपः अनपत्येनसुचिरंपुत्रकामार्थिनात्वया प्रार्थितंतत्सुसंपन्न मिदानीं प्रार्थितेनाकिं सत्यनारायणोदेवोविश्वव्यापीफलप्रदः तमनादृत्यदुर्बुद्धेकुतःशंभवितातव इतिविज्ञापितस्तेनतापसंतंददर्शह प्रणम्यभुविकायेनपरिक्रम्यपुनःपुनः तुष्टावतंपरंसत्यंसत्त्वालंवितमानसः ॥ साधुरुवाच ॥ सत्यरूपंसत्यसंधंसत्यनारायणंपरं यत्सत्यंमनसासत्यंसत्यसत्यंनमाम्यहं त्वन्मायामोहितात्मानोनपश्यंत्यात्मनोहितं दुःखांबुधौसदामग्नादुःखेचसुखमानिनः मूढोहंधनगर्वेणमदांधीकृतलोचनः नजानेत्वात्मनःक्षेमंकथंपश्यामिमूढधीः क्षमस्वममदौरात्म्यंनमोधाम्नेहरेविभो आज्ञापयात्मदास्यंमेयेनतेचरणंस्मरे इति

स्तुत्वालक्षमुद्रादत्त्वास्वात्मपुरोधासि गत्वावाढंपूजयिष्येसत्यनारायणंविभुंसत्यनारायणोदेवःपुनःप्रोवाचसादरं
पुत्रपौत्रसमायुक्तोभुक्त्वाभोगाननुत्तमान् मामर्चयेत्सदाभक्त्यामत्सानिध्यंगमिष्यति स्तोष्यतेत्वत्कृतेनेनस्तो
त्रेणभुविमानवः तुष्टोहंतस्यदास्यामिकामंयेनाखिलंवजेत् इत्युक्त्वांतर्दधेविष्णुःसाधुश्चस्वाश्रमंययौ जगाम
नगराभ्यासेप्राहिणोद्दूतमाश्रमं गृहमागत्यदूतोपिप्राहलीलावतींप्रति जामात्रासहितःसाधुःकृतकृत्यःसमागतः
सत्यनारायणार्चायांस्थिताःसाध्व्यसकन्यकाःतत्समाप्यमुदासातुकृतकौतुकमंगला सखीगणैःपरिवृतानौकांनीरा
जितुंययौपातुंपतिमुखांभोजंचकोरीवादिनात्यये अवज्ञानात्प्रसादस्यनौकासंप्रतिसंप्लुता निमग्नाजलमध्येतुसजामा
तापितत्क्षणात् मग्नंजामातरंसाधुर्विललापमहारवं हाहतोस्मीतिकेनेदंकृतंमेकिंविडंबनं कारागारेबहुविधदुःखं
तत्रसमागतं सत्यंवक्ष्येस्वयंतातहाहाकिंविधिनाकृतं जामातस्ताततातेतिक्वगतोसिमहामते पुत्रहीनोयथा
ख्यातःपुरैवाहंविडंबितः त्वयासुतेनससुतःहतःकिंजीवितेनमे अथलीलावतीतत्रगतामंगलसंयुता जामा-
तुर्मरणंश्रुत्वापपातभुविमूर्छिता सुतामालिंग्यव्यलपद्धाहतास्मीतिवादिनी कलावतीचारुकलाश्रुलोचनाप्रवालह
स्तापिकलासुकोशला सरोजनेत्राश्रुकणान्विमुंचतीमुक्तालताभिः स्तनकुंकुमावती क्वयास्यामिक्वतिष्ठामिकिं
करोमिकथंसुखं शरणंकिंकरोम्यद्यकोमेदुःखंव्यपोहति अर्धांगंपुरुषस्यस्त्रीवेदवादइतिश्रुतिः तत्पुरार्धगतस्त
स्मादर्धांगीजीवनंकथंकलावतीबहुविधंविललापातिदुःखिता तथालीलावतीतावत्साधुंप्रत्यादिशत्ततःशुश्राववा
चमाकाशेसाधोस्तवकलावती भक्त्याप्रसादंगृह्णीयात्पतिंप्राप्स्यतिसत्वरं इत्याकाशवचःश्रुत्वाविस्मयंप्रच-
कारसा नारायणस्यकृपयास्तराणिस्तत्क्षणात्स्वयं उत्तस्थौसाधुसहितासाधुनातिसमुत्थिता जामातरंसमालिं
ग्यमुमुदेसगणोभृशं मृतःपुनःसमायातिइतिलोकाविसिस्मिरे तत्रैवसाधुःसाह्लादोभक्त्यापरमयामुदा पूजासं

भारमाहर्तुंलोकानाज्ञापयनतःआनयामासविप्राग्र्यान्सामात्यान्मित्रबांधवान् पूर्वस्थापितमुद्राभिःफलैर्नानाविधैःशुभैःमणिमुक्तास्वर्णपुष्पैःपद्मपंकजजातिभिःउत्सवंकारयामासुर्नानालंकारतोरणैःविमानैर्वहुवर्णैश्चनानारूपामरप्रभैः भक्ष्यभोज्यैश्चमिष्टान्नैर्नागवल्लीदलादिभिः पूजयित्वाविधानेनपरिक्रम्यकृपानिधिः स्तुवन्गद्गदयावाचा प्रणनामपुनःपुनः साधुरुवाच प्रणमामिसत्यसंधंसत्यनारायणंप्रभुं ममापराधिनोमौढ्यंविनाशयदयानिधे सुरासुरनरानागादुराचाराकृपालवः सर्वेत्वदंगसंजाताश्चापराधान्क्षमस्वमे इतिस्तुत्वाजगन्नाथंदंडवत्पतितोभुवि प्रेमाश्रुपूर्णोविमलोहृष्टस्तनुरुहःप्रभुं ब्राह्मणान्भोजयेन्भक्त्यास्वजात्यामात्यबांधवान् प्रसादंसगणोभुक्त्वाधनपुत्रादिभिर्वृतः इहलोकेसुखंप्राप्यअंतेचगतिमुत्तमां विधिनानेनयोभक्त्यासत्यनारायणार्चनं कृत्वाकामानवाप्नोतिविधिनार्चिततान्सदा अपुत्रःपुत्रमाप्नोतिनिर्धनोधनमाप्नुयात् विधवाशृणुयाद्भक्त्यावैधव्यंनान्यजन्मनि कुमारीसत्पतिंचैवलभतेनात्रसंशयः वृद्धोवातरुणोवापिपूजयेत्सततंहरिं इहभुक्त्वाखिलान्भोगानंतेमोक्षमवाप्नुयात् इतिहासमिमंभक्त्याशृणुयाद्वापियोनरः सोपिविष्णोःप्रियतरःकामासिद्धिमवाप्नुयात् इति श्रीमदितिहाससमुच्चये सूतशौनकसंवादे सत्यनारायणार्चने साधुवैश्यवरप्रदानंचतुर्थोध्यायः ॥ ४ ॥

अथसर्वकामावाप्तये हरिनामस्मरणमेवमहाव्रतम् तथाचोक्तम् श्रीविष्णुनामरहितावाणीविदुषांनशोभतेत्यर्थं तन्नामसंयुताचेदधिविश्वंविराजतेसैव हरेर्नामैवनामैवनामैवममजीवनं कलौनास्त्येवनास्त्येवनास्त्येवगतिरन्यथेत्याभियुक्तोक्तेरुत्क्रमस्यतत्तद्भगवन्नामस्मरणं कस्मिन्कालेकेनाधिकारिणाकथंस्मर्त्तव्यमित्यतउक्तं हेमाद्रिविष्णुधर्मोत्तरादिषु चक्रिणंहलिनंचैवशार्ङ्गिनंखड्गिनंतथा मोक्षार्थीप्रवसंश्चैवदिक्षुप्राच्यादिषुस्मरेत् अच्युतंचापिनंचैवसर्वंसर्वेश्वरंविभुं संस्मरेत्पुरुषंभक्त्या व्यवहारेषुसर्वदा कूर्मंवराहंमत्स्यंच जलप्र

तरणेस्मरेत् भ्राजिष्णुमस्मिञ्जननेजपेन्नामत्वतंद्रितः संग्रामाभिमुखोगच्छन्संस्मरेत्त्वपराजितं केशवंपुंडरी
काक्षंपुष्कराक्षंतथाजपेत् तत्रबाधासुसर्वासुहृषीकेशंतथाजपेत् अच्युतंचामृतंचैवजपेदौषधकर्मणि गरुडध्वजा
नुस्मरणादापद्भ्योमुच्यतेनरः ज्वरदोषंशिरोरोगंविषवीर्यंप्रशाम्यति ग्रहनक्षत्रपीडासुदेवबाधाटवीषुच
दस्युवैरनिरोधेषुव्याघ्रसिंहादिसंकटे अंधकारेतथातीव्रेनरसिंहेतिकीर्त्तयेत् नारायणंशार्ङ्गधरंश्रीधरंगज
मोक्षणं वामनंखड्गिनंचैवदुःस्वप्नेषुनरःस्मरेत् अग्निदाहेसमुत्पन्नेसंस्मरेज्जलशायिनं बलभद्रंतुयुद्धार्थेकृष्या
रंभेहलायुधंउत्तिष्ठन्कीर्त्तयेद्विष्णुंप्रस्वापेमाधवंतथा भोजनेचैवगोविंदंसर्वत्रमधुसूदनं नारायणंसर्वकालंक्षुतप्र
स्खलनादिषु स्नानेदेवार्चनेहोमेप्रणिपातेप्रदक्षिणे कीर्त्तयेद्वासुदेवंचत्वनुक्तेष्वपियादवं कार्य्यारंभेतथाराज
न्यथेष्टंनामकीर्त्तयेत् जगतोमंगलंविष्णुंमांगल्येषुचकीर्त्तयेदिति अथसर्वरोगनिवृत्तये नामत्रयमंत्राः अस्य
श्रीनामत्रयमंत्रस्य वसिष्ठकश्यपनारदाऋषयः महाविष्णुर्महानरसिंहोमहावराहोदेवता अनुष्टुप्गायत्रीसु
तलानिछंदांसि विहितार्थेनामत्रयजपेविनियोगः ॐअच्युतायनमः ॐअनंतायनमः ॐगोविंदायनमः
शैवागमेतु प्रभवेनमः ॐशंभवेननः ॐपशुपतयेनमः इतिविष्णोःशिवस्यचनामत्रयमंत्राः स्वस्तिश्री
रणवीरसिंहधरणीपालोवदान्याग्रणीः ० १ रणवीरसिंहभूपेशकारितेकृत्यसागरे ० तरुपुत्रसत्यनारायणक
थाव्रतसमुच्चयः इतिश्रीमत्सूर्यवंशावतंसरघुकुलश्रीरणवीरसिंहमहाराजकारितेकृत्यरत्नाकरेअभवल्लक्षपूजा
दिकृत्यरत्नसमुच्चयः २३ अथकलिकल्मषनाशार्थंगंगास्नानंहरिनामस्मरणमेवमहाव्रतमित्युच्यते तथापुराणेषु
अग्निहोत्रादिकर्माणिसपापानिकलौयुगे गंगास्नानंहरेर्नामनिरपायमिदंद्वयम् भविष्योत्तरे ध्यानंकृतेमोक्षहेतुस्त्रे
तायांतच्चवैतपः द्वापरेतुद्वयंयज्ञाःकलौगंगैवकेवलं तथा कृतेतुसर्वतीर्थानित्रेतायांपुष्करंतपं द्वापरेतुकुरुक्षेत्रंकलौ

गंगाविशिष्यते कृच्छ्रातिकृच्छ्राणितथाकृत्वायत्फलमाप्यते सदाचांद्रायणंचैवतल्लभेज्जान्हवीजले संसारार्णवमग्नानांभूतानांशरणार्थिनां नान्यःशरणदःकश्चिदुपायोदृश्यतेक्कचित् विनागंगांधर्ममयींशरण्यांसर्वदेहिनां गंगापातकसंहर्त्रीसर्वतत्त्वार्थसाधिका इयंहिसर्वसत्त्वानामिहामुत्रसुखप्रदा सर्ववेदमयीगंगापरंब्रह्मस्वरूपिणी स्वानुभूतप्रमाणाद्धिभक्तिग्राह्यामहेश्वरी भावानुरूपफलदागंगासर्वजगद्धिता सर्वज्ञानमयीदेवीसर्वसंसारतारिणी सर्वोपकारिणीनित्यंसर्वतःपुण्यदायिनी ज्ञानमध्ययनंहोमोध्यानंदानंतपोमखः सर्वमंतःस्थितंभक्त्यागंगायांनात्रसंशयः अहोमहाप्रभावोयंगंगायाःश्रूयतेसदा सिद्धयःसिद्धलिंगानिरसलिंगानिसर्वशः स्पर्शलिंगानिदिव्यानितथादिव्यौषधानिच महारत्नमयान्येवप्रदानानिबहून्यपि दिव्यरत्नान्यनेकानिचिंतामणिगणास्तथा गंगाजलांतस्तिष्ठंतिनिगूढानिसहस्रशः अतएवसुसंसेव्याकलौगंगैवकेवलामिति महाभारते तिस्रःकोट्यर्धकोटीचतीर्थानांवायुरब्रवीत् सर्वदाकालिकालेतुगंगायांनात्रसंशयः पाद्मे सर्वसारमयीयाचस्वकीयानंदरूपिणी प्रीत्यैवलीलयाधत्तेस्वमूर्त्तिपरमेश्वरः योसौसर्वगतोविष्णुश्चित्स्वरूपीजनार्दनः सएवद्रव्यरूपेणगंगांभोनात्रसंशयः ब्रह्मांडे कलौतुसर्वतीर्थानिस्वंस्वंवीर्यस्वभावतःगंगायांप्रतिमुंचंतिसाधुदेवीनकुत्रचित् गंगानारदसंवादे मज्जंतिमुनयःसर्वेत्वमेकःकिन्नमज्जसि अंवत्वद्दर्शनान्मुक्तिर्नजानेस्नानजंफलं गंगास्नानात्परंस्नानंनभूतंनभविष्यतिविशेषतःकलियुगेपापहंत्रीचजान्हवी कौर्म्ये गंगायांचगयायांचपिंडदानंसमंमतं विशेषतःकलियुगे गंगापिंडःप्रशस्यते भविष्ये कलौगंगैवगंगैवकलौगंगैवकेवलं कःकलौमुक्तिमाप्नोतिगंगासेवांविनानरः अथश्रीगंगाभगवत्यासात्विकंस्वरूपंस्कांदेकेदारखंडे ऋषिभिःपृष्टोलोमहर्षणिःसूतोवसिष्ठारुंधतीसंवादेनाह अरुंधत्युवाच अक्षरंयत्परंब्रह्मयस्मिन्सर्वमिदंततं कथंतद्ज्ञायतेलोकेकिंनामममतद्वद कथंप्राप्स्यंतिचरमेयुगेविप्रादयःपरं तपोभक्ति

विहीनानांकथंकलियुगेगतिः ॥ वसिष्ठउवाच ॥ योसौसनातनोदेवःपरात्माजगदीश्वरः उवाचभक्तिसंपन्नांसारात्सारतरंप्रियां ईश्वरउवाच परात्मानिर्गुणः शांतो व्यक्ताव्यक्तोनिराश्रयः सर्वात्मासर्वभूतेशःसत्यानंदोनिरंजनः एकएवत्रिलोकात्मासत्वादिगुणवर्जितः इत्याद्युपक्रम्य तदेवपरमंब्रह्मजलात्माभगवानजः यत्रांबुनिमहादेविअपारोचितदुर्गमे ब्रह्मांडकोटयोयस्मिन्ननंताब्रह्मकोटयः उन्मज्जंतिनिमज्जंतिजलब्रह्मण्यनेकशः ब्रह्मांडेप्रतिब्रह्मादित्रयोदेवाः सवासवाः इतितद्ब्रह्मविज्ञेयमनंतंसर्वतोमुखंतदेवसर्वरूपेणब्रह्मांडेषुप्रवर्त्तते तदेतत्परमंब्रह्मद्रवरूपंमहेश्वरिगंगाख्ययापुण्यतमंपृथिव्यामागतंशिवे गांगतेतिततोदेविगंगानामवभूवह देव्युवाच यदैतद्गदितंदेवत्वयाब्रह्मांडवाह्यतः तद्द्रवस्वकथंदेवप्राप्तभूमौनिरामयं किमर्थंस्त्रीत्वसंप्राप्तिर्द्रवस्यपरमात्मनः ईश्वरउवाच शृणुदेविप्रवक्ष्यामियत्पृष्टंहिनवत्सुते उत्पत्तिंद्रवरूपस्यदेवस्यपरमात्मनः पुराप्रथमकेसर्गेजगत्यंबुमयेसति शय्यायांशेषसंज्ञायांसुष्वापभगवान्प्रभुः कल्पादौपुनरेवासौसिसृक्षुरखिलंजगत् तस्यचिंतयतोदेविकमलंनाभिमध्यतः जातंतस्मिन्महाभागेब्रह्माजातश्चतुर्मुखः लोकान्सृजसृजेत्युक्तस्तमाहपरमेश्वरं उन्मृज्याक्षीणिकेनासौभगवंतंसनातनं ब्रह्मोवाच अहंसृष्टोस्मिभवतालोकंस्रक्ष्याम्यहंप्रभो सर्वज्ञत्वंमयालब्धंकिमन्यद्वरयामिते पापिनश्चापिस्रष्टव्याः पुण्यात्मानस्तथैवच तेषांमुक्तिर्भवेद्यस्मात्तत्कुरुष्वमहाप्रभो अस्माभिरपियत्रत्वंध्येयोसिपुरुषर्षभ भविष्यतिनरालोकेमायामोहेनसंवृताः त्वांतत्वतानवेत्स्यंतिपुण्यापुण्यस्वभावतः स्वल्पेनैवाप्युपायेनतेषांमुक्तिवदप्रभो श्रीभगवानुवाच सम्यगुक्तंत्वयाब्रह्मन्कर्तव्यं वचनंतव अदित्याद्यास्तुदक्षस्यसंभविष्यंतिकन्यकाःदेवानांप्रियकामार्थमदित्यागर्भसंभवः इंद्रानुजोभविष्या

सिवामनत्वमुपागतः तास्मिन्नेवतदाकालेवालिर्नामातुदानवः ऐंद्रंपदंसमादातुंकरिष्यतिमहामखं तस्मिन्नेवमहायज्ञेछलयिष्याम्यहंवालिं पुनरन्येनरूपेणयाचयिष्येपदत्रयं पदेनैकेनजगतींहरिष्येसचराचरां द्वितीयेनरूपेणाथस्वर्महर्जनतापसान् क्रांत्वाचार्द्धेनवैराजमध्येनापूर्य्यतेवरं विष्णवांघ्रिणाप्रचरता कटाहोभेदितोवलात् अनंतकोटिब्रह्मांडाईदृशास्त्वधिकास्तथा तरंगभंगिसलोलाविचरंतिमहाजले तदेवद्रवरूपोहानित्योस्मिन्सुरनायक तेनवैनखजातेनरंध्रेनसहसातुतत् द्रवरूपातुब्रह्मांडधाराब्रह्मसमुद्भवा आयास्यतिमहाभागेयास्मृता मोक्षदायिनीगांगमिष्यतिमेधाराततोगंगाभविष्यति एकेनताद्विभागेनस्वर्गमिष्यामिपद्मज पुनःपातालमार्गंवैभूत्वाभोगवतीनदी तदानाम्नात्रिपथगा स्मरणात् पापनाशिनी तदेवमेपरंरूपंसर्वकामार्थसिद्धिदं नरादर्शनमात्रेणभविष्यंतिविकल्मषाः धन्यास्तएवमनुजामद्द्रवेभक्तितत्पराःतेषांमुक्तिर्महाभागसुलभात्मकरेस्थिताः नयोगानांशतेनापिनतपोभिर्नैकेनचित् संतुष्यामितथाब्रह्मन्यथाहंतज्जलार्चनादिति विष्णुपुराणे ततः प्रववृतेब्रह्मन्सर्वपापहरासरित् गंगादेवांगनासंगमनुलेपनपंजरा समंताद्ब्रह्मणः पुर्य्यांगंगापततिवैदिवि सातत्रपतितादिक्षुचतुर्धाप्रत्यपद्यत् सीतावालकनंदाचचक्षुर्भद्राचवैक्रमात् महाभारते महापुण्यांचगमनात्पतंतींतांमहेश्वरः दधारशिरसादेवींतामेवादिविसेवते ब्रह्मपुराणेपीयंत्रिपथगाकथिता षष्ठ्यादौकृष्णपक्षेतुभूमौसन्निहिताभवेत् यावत्पुनरमावास्यादिनानिदशनित्यशः शुक्लप्रतिपदारभ्यादिनानिदशसंख्यया पातालेसन्निधानंहिपावनीसाकरोतिहि शुक्लैकादशिकादीनिगंगास्वर्गतरंगिणी पंचम्यंतानिसादेवीसर्गेसान्निहिताभवेत् सन्निहितादिव्यरूपेणप्रत्यक्षाभवतीत्यर्थः देवानांपर्वतादीनांनदीनामपिरूपंद्वैविध्यंश्रुतिस्मृतिपुराणादिषुप्रसिद्धमेवतथाचोक्तं हिमवंतंप्रतिसप्तर्षिभिः काठिन्यंस्थावरेकायेभवतासर्वमर्पितं इदंतुतेभक्तिनम्रमर्हदाराधनंवपुरि

ति गंडकीशिलादिष्वश्वत्थादितरुषुविष्णवादीनामि वगंगाजलेगंगायाअपिब्रह्मद्रवरूपत्वंवेदितव्यम् आगमशास्त्रेदेवतानांरूपत्रयमुक्तम् स्थूलंसूक्ष्मंपरंचेतिकरचरणाशिरोवदनाद्यंग विशिष्टंस्थूलं सूक्ष्मंमंत्रादिरूपम् परं वासनामयंसर्वगतंचेति तथाचोक्तंयोगवासिष्ठे सामान्यपरमंचेतिद्वेरूपेविद्धिमेनघ पाण्यादियुक्तंसामान्यं यत्तुमूढाउपासते पररूपमनाद्यंतंयन्ममैवननागपि ब्रह्मात्मपरमात्मानित्यादिशब्दैस्तूदीर्यते सामान्यंद्विविधंप्रोक्तंस्थूलसूक्ष्माविभेदतः यत्तुगंगादीनां जलादिरूपंतत्स्थूलंस्थूलतरंवा ब्रह्मांडांतर्वर्त्तिब्रह्मांडतोवहिर्ब्रह्मद्रवमेवेतितथाचान्यत्रापिब्रह्मद्विविधंसकलंनिष्कलंचेति द्वेब्रह्मणीवेदितव्येपरंचापरमेवचेतिश्रुतेः तत्रपरंनिष्कलं अपरंसकलं तच्चापिद्विविधं जगन्नियामकंजगदात्मकंचेति यतीनांमंत्रिणांचैवज्ञानिनांयोगिनामपि ध्यानपूजानिमित्तंहितनूर्गृह्णातिमायया तथाच शिवशक्तिगणेशार्कविष्णुरूपात्सईश्वरः उपासनानुसारेणभक्तानां भोगमोक्षदइति तथाच गंगाभवानीगायत्रीकालीलक्ष्मीः सरस्वती राजराजेश्वरीबालाश्यामलाललितातथा कूर्मपुराणेदेवीवाक्यंहिमवंतंप्रति अशक्तोयदिमांध्यातुमैश्वरंपरमव्ययं तदामेसकलेरूपेकाल्याख्येनंतभेदिनि यदेवरूपंमेतातमनसोगोचरंतव तन्निष्ठस्तत्परोभूत्वातदर्चनपरोभव यत्तुमेनिष्कलंरूपंचिन्मात्रंकेवलंशिवं ज्ञानेनैकेनतल्लभ्यंक्लेशेनपरमंपदमिति एवंगंगास्वरूपंभक्तानामुपासनानुसारेणसकलपातकापहंभोगमोक्षप्रदंचप्रसिद्धं मत्स्यपुराणे क्षितौतारयतेमर्त्यान्नागांस्तारयतेह्यधः दिवितारयतेदेवांस्तेनात्रिपथगा-स्मृता तथाचैवमेतस्याः परब्रह्मद्रवरूपायादेवनद्यायथाकथंचिदुपास्यासर्वप्राणिजातस्यमोक्षप्राप्त्याऽकांडसृष्ट्युच्छेदः स्यादतोगंगाभक्तिगोपनंपुरणांतरेषूक्तं बहुदोषंमहादुःखं ज्ञात्वामानुष्यमध्रुवं मत्वाकालियुगंघोरंगंगाभक्तिस्तुगोपिता गंगाभक्तिगोपकवचांसिपुराणसंहितासूपन्यस्तानि तथाचसनत्कुमारसंहितायां कलेर्द

शसहस्रांतेहरिस्त्यक्ष्यतिमेदिनीं तदर्धंजान्हवीतोयंतदर्धंदेवतागणः इत्यादीनि अत्रायंसंदेहः कलेर्दशसहस्रांतेहरिस्त्यक्ष्यतिमेदिनीमित्यस्यार्थः एकस्मिन्कलौवाकलिसामान्येवा चतुर्युगसहस्रंतुब्रह्मणोदिनमुच्यते कृतत्रेताद्वापरकलीनामेकंयुगं तत्सहस्रंब्रह्मणोदिनं तदेवकल्पउच्यते तत्रयद्येकस्मिन्कलौहरिगंगादीनांमेदिनीत्यागउच्यते सकलिः कतमकश्चेतिज्ञातव्यं यदिकलिसामान्येहरिगंगादीनांमेदिनीत्यागउच्यते तदाब्रह्मणोदिवसेकलिसहस्रंप्रसिद्धं तत्रैकस्मिन्कलौहरिगंगादिगमनमेवसंपन्नं तदन्यतरेषुकृतादिषुभगीरथेनैवपुनर्गंगानयनादिकथं संपद्यते किंच कलेरादिमदशवर्षसहस्रादिष्वेवहरिगंगादीनामेदिनीत्यागादीयदर्थ्यंते तदा कृतेतुसर्वतीर्थानित्रेतायांपुष्करंपरं द्वापरेतुकुरुक्षेत्रंकलौगंगैवकेवलमित्यादिवचसांवैयर्थ्यमापद्यते तस्मादत्र कलेर्दशसहस्रांतेहरिस्त्यक्ष्यतिमेदिनीमित्यस्य चतुर्युगसहस्रांते यः कलिस्तस्यांतेऽतिमदशसहस्रवर्षशेषेहरिमेदिनींत्यक्ष्यति एवं तदर्धंजान्हवीदेवीतदर्धंदेवतागणइत्यपिज्ञेयम् अथैतत्समर्थयितुमत्रगंगानयनार्थंभगीरथोपाख्यानम् स्कंदपुराणेकेदारखंडे ईश्वरंप्रति ॥ भगीरथउवाच ॥ पितरोमेमहाभागकपिलाग्निसमारिताः तेगच्छंतुयथास्वर्गंतवदेवप्रसादतः गंगाख्यंपरमं ब्रह्मवर्ततेशिखरेतव तन्मेदेहिपितॄणांहिसमुद्धारायमेप्रभो कपिलाग्निविनिर्दग्धागच्छेयुःपरमांगतिं अन्येकलियुगेघोरानराःपुण्यविवर्जिताः दृष्ट्वालोकान्हिगच्छंतिपुनरावृत्तिदुर्लभान् पीत्वामृतमयंवारिमुक्तिमैश्वरमाप्नुयुः ॥ ॥ ईश्वरउवाच ॥ तद्ददामितवेदानींसर्वपापभयापहं सर्वेषांहितकामायत्वयोक्तंपरमंवचः स्फुरदिंदुकलाभास्वज्जटाटव्यांविराजितां धारांत्रैलोक्यपापघ्नींगृहाणपितृमुक्तये यस्यादर्शनमात्रेणसर्वेयांतिपरांगतिं यांदधारराब्रह्माव्यापारकलशेविभुः पुत्रीगननजंपापंधौतंतेनैववारिणा ॥ शिवउवाच ॥ मयामुक्ताहिसाधारापतिता

श्रीमुखेगिरौ तस्याः प्रवाहवेगेनखंडितावहनोद्रयः त्रिधावैपतितामर्त्येब्रह्महत्यौघनाशिनी भगीरथोपिसंप्राप्यगंगांपरमदुर्लभां मेनेकृतार्थमात्मानंप्रणनामपुनः पुनः अथराजामहाबाहुर्नंदनाद्रिसमीपतः वासुकिप्रमुखान्नागांस्तपस्तप्तुंसमागतान् तमेवार्थंचिंत्यमानान्शिवसन्यस्तमानसान् कीर्त्तयंतोहिगंगेतिगंगागंगेतिचासकृत् दृष्ट्वातान्चिंतयाविष्टोगंगांस्तोतुंमनोदधे चिंतयामासबहुधाकिंकर्त्तव्यमतःपरं पातालेनागनिलयेनायिष्यंतिसरिद्वरां किंकर्त्तव्यंकुत्रगच्छेकोमेदुःखंव्यपोहति नाम्नांसहस्रमाख्यातंगंगायास्तत्रपार्वति दिव्यरूपधरादेवीप्रत्यक्षंप्राहतंनृपम् ॥ गंगोवाच ॥ तुष्टास्मिसततंवत्सतपसातवभूपते वरंवरयभद्रंतेवरार्होसिभगीरथ ॥ भगीरथउवाच ॥ कृपांधेहिदासेस्मिन्मयिदुःखसमाकुले नगंतव्यंत्वयादेविपातालनिलयेशुभे विनामुक्तिंप्रेषयित्वामत्पितॄन्कोपदग्धकान् त्वयासमग्रभावेनस्थेयंभारतवर्षके समग्रभावेनस्थेयंभारतखंडके समग्रभावेनपातालेगंतव्यात्मभागसाहित्येनेत्यर्थः ॥ श्रीगंगोवाच ॥ भगीरथमहाप्राज्ञएवमेवभविष्यति यावच्चंद्रग्रहेशाद्यास्थास्यंत्यंबरमंडले तावत्कीर्त्तिर्महाराजभवितातेत्रिलोकके मद्रूपाकीर्त्तिस्तवस्थिरैवभवतीत्यर्थः नामापितवचश्रुत्वासर्वपापैःप्रमुच्यते कलेर्द्वितीयपादेतुगमिष्यामिपुनस्तलं तदापातालमार्गेवैभूत्वाभोगवतीनदी तत्रैवनागान्प्रति ॥ गंगोवाच ॥ भगीरथेनसततंकैलासादेववासुके निमंत्रितास्मिभूमौहिपितॄणांमुक्तिकारणात् सांप्रतंतदवश्यंहिकर्त्तव्यंभगवन्मया चरमेस्मिन्युगेभूपआगमिष्यामितस्थलं इदानींमुंचमांशीघ्रंसमुद्रेमेमतिर्गतिः चरमेऽस्मिन्आगामिनिकलियुगे द्वितीयपादेभोगवतीनदीभूत्वासमुद्रमार्गेणागमिष्यामि नतुभूमिमार्गेण एतावतात्रैदंसंपन्नं दिवितारयतेदेवान्नागांस्तारयतेह्यधः भूमौतारयतेमर्त्यांस्तेनत्रिपथगास्मृता समुद्रमार्गेणभोगवतीभूत्वापाताले

गंगागमनं नतुभूमिस्थभागीरथीरूपा गंगागमनमिति तस्मान्नास्तिकादियुक्त्युपन्यस्तपौराणवाक्यैःसर्वथागंगातिरोधानंनसंभाव्यं तथाच स्कांदेकेदारखंडेमायापुरीगंगाद्वारमाहात्म्ये धन्यानांपुरुषाणांहिगंगाद्वारस्यदर्शनं विशेषतस्तुमेषार्कसंक्रमेतीवपुण्यदं तत्रापिकुंभराशिस्थवाक्पतौमरवंदिते इत्याद्युपक्रम्योक्तं क्षेत्राणांपंचकंपृथ्व्यांस्थास्यतिप्रवरेकलौ गंगाद्वारंचकेदारंकाशीगंगागमस्तथा गंगापिसंगतायत्रसागरेणमहामते गंगापिस्थास्यतेत्रैवसत्यमेतत्शिवेरितामति जलेविष्णुस्थलेविष्णुर्विष्णुः पर्वतमस्तके ज्वालामालाकुलेविष्णुःसर्वंविष्णुमयंजगत् इतिगंगास्थितानिर्णयः अथकलेर्दशसहस्रांतेहरिस्त्यक्ष्यतिमेदिनीमित्यर्थसमर्थकःकल्पांतकालउच्यते कलेर्दशसहस्रांतेहरिस्त्यक्ष्यतिमेदिनीं तदर्धंजान्हवीतोयंतदर्धंदेवतागणः यावत्तिष्ठतिगंगावैतावत्तीर्थानिसंतिच स्वेस्वेस्थानेनृणांपापंतावदेवहरंतिच यदैवादृश्यगंगास्यात्कोवातत्पापमाहरेत् विचार्यैवंतुतीर्थानिगमिष्यंतिधरातलात् ब्रह्मांडे कलौतुसर्वतीर्थाणिस्वंस्ववीर्यंस्वभाभवतः गंगायांप्रतिमुंचंतिसातुदेवीनकुत्रचित् अथकल्पांतकालोवर्ण्यते श्रीभागवतेद्वादशस्कंधे चतुर्युगसहस्रंतुब्रह्मणोदिनमुच्यते सकल्पोयत्रमनवश्चतुर्दशविशांपते तदंतेप्रलयस्तावद्ब्राह्मीरात्रिरुदाहृता त्रयोलोकाइमेयत्रकल्प्यंतेप्रलयायाहि एषनैमित्तिकःप्रोक्तःप्रलयोयत्रविश्वसृक् शेतेनंतासनोविश्वमात्मसात्कृत्यचात्मभूः अत्रात्मभूर्हरिर्ब्रह्माच तयोरभेदविवक्षयात्रब्रह्मणोनंतासनत्वं ब्रह्मणोनिद्रांनिमित्तीकृत्यप्रवर्त्तमानोलोकत्रयप्रलयोनैमित्तिकप्रलयः अंडकोशस्तुसंघातोविघातउपसादिते पर्जन्यःशतवर्षाणिभूमौराजन्नवर्षति तदानिरन्नेह्यन्योन्यंभक्षमाणाःक्षुधार्दिताः क्षयंयास्यंतिशनकैःकालेनोपद्रुताःप्रजाः सामुद्रंदैहिकंभौमंरसंसावर्त्तिकोरविः रश्मिभिःपिबतेघोरैःसर्वंनैवविमुंचति ततःसंवर्त्तकोवन्हिःसंकर्षणमुखोत्थितः दहत्यानिलवेगो-

त्थःशून्याभूविवरानथ उपर्य्यधःसमंताञ्चशिखाभिर्वन्हिसूर्ययोः दह्यमानंविभात्यंडंदग्धगोमयापिंडवत् ततः प्रचंडपवनोवर्षाणामधिकंशतं परंसंवर्त्तकोवातिधूम्रंखंरजसावृतं ततोमेघकुलान्यंगचित्रवर्णान्यनेकशः शतंवर्षाणिवर्षंतिनंदंतिरभसःस्वनैः ततएकोदकंविश्वंब्रह्मांडविवरांतरम् ॥ तदेवगंगागमनम् नतुप्रतितिष्ययुगमितिशिवंसर्वमेवसंपन्नम् ॥

अथगंगामाहात्म्यांतरम्

मुक्ताभान्तकपालशुक्तिषुजटावल्लीषुमल्लीनिभा वन्हौलाजनिभाद्दशोर्मणिनिभाभोगोत्करेभोगिनां नृत्यावर्त्तविवर्त्तनोरितपयःसंमूर्च्छनोछालिताः खेलंतोहरिमूर्ध्नियांतुसततंगांगाःपयोबिंदवः १ नत्वाहरिहरौदेवौ रणवीरहरेर्मुदे हरिगंगासुरेशानांकलौमत्ताविविच्यते २ तथाचपुराणेषु अग्निहोत्रादिकर्माणिसापापानिकलौयुगे गंगास्नानंहरेर्नामनिरयायमिदद्वयम् ३ हरेर्नामैवनामैवनामैवखलुपावनं कलौनास्त्येवनास्त्येवनास्त्येवगतिरन्यथा ४ भविष्योत्तरे ध्यानंकृतेमोक्षहेतुस्त्रेतायांतच्चवैतपः द्वापरेतुद्वयंयज्ञाःकलौगंगैवकेवला ५ कृतेतुसर्वतीर्थाणित्रेतायांपुष्करंवरं द्वापरेतुकुरुक्षेत्रंकलौगंगाविशिष्यते भविष्ये कलौगंगैवगंगैवकलौगंगैवकेवलं कःकलौमुक्तिमापन्नोगंगासेवांविनानरः अथश्रीभगवत्यागंगायास्तात्विकंपरब्रह्मस्वरूपमुच्यते स्कांदेकेदारखंडे शौनकादिभिर्ऋषिभिःपृष्टःसौतिर्वसिष्टारुंधतीसंवादेनाह ॥ अरुंधत्युवाच अक्षरंयत्परंब्रह्मयस्मिन्सर्वमिदंततं कथंतद्ज्ञायतेलोकेकिंनामतद्वदप्रभो कथंज्ञास्यंतिचरमेयुगेविप्रादयःपरं तपोभक्तिवि

हीनानांकथंकलियुगेगतिः वसिष्ठउवाच योसौसनातनोदेवःपरात्माजगदीश्वरः उवाचभक्तिसंपन्नासारा
त्सारतरंप्रभुः ईश्वरउवाच परात्मानिर्गुणःशांतोऽव्यक्तोऽव्यक्तःनिराश्रयः सर्वात्मासर्वभूतेशःसत्यानंदो
निरंजनः एकएवत्रिलोकात्मासत्वादिगुणवर्जितः इत्याद्युपक्रम्य तदेवपरमंब्रह्मजलात्माभगवानजः यत्रां
वुनिमहादेविअपारोचितदुर्गमे ब्रह्मांडकोटयोयस्मिन्ननंताब्रह्मकोटयः उन्मज्जंतिनिमज्जंतिजलब्रह्मण्यनेकशः
ब्रह्मांडंप्रतिब्रह्मादित्रयोदेवाःसवासवाः इतितद्ब्रह्मविज्ञेयमनंतंसर्वतोमुखं तदेवसर्वरूपेणब्रह्मांडेषुप्रवर्त्तते
तदेवयत्परंब्रह्मद्रवरूपंमहेश्वरि गंगाख्ययापुण्यतमंपृथिव्यामागतंशिवे गांगतेतिततोदेविगंगानामवभूवह
॥ देव्युवाच ॥ यदेतद्भवदितंदेवत्वयाब्रह्मांडबाह्यतः तद्वदस्वकथंदेवप्राप्तंभूमौनिरामयं किमर्थंस्त्री-
त्वसंप्राप्तिर्देवस्यपरमात्मनः ॥ ईश्वरउवाच ॥ शृणुदेविप्रवक्ष्यामियत्पृष्टंहिमवत्सुते उत्पत्तिर्द्रवरूप
स्यदेवस्यपरमात्मनः पुराप्रथमकेसर्गेजगत्यंबुमयेसति शय्यायांशेषसंज्ञायांसुष्वापभगवान्प्रभुः कल्पा
दौपुनरेवासौसिसृक्षुरखिलंजगत् तस्यचिंतयतोदेविकमलंनाभिमध्यतः जातंतस्मिन्महाभागेब्रह्माजातश्चतु
र्मुखः लोकान्सृजसृजेत्युक्तस्तमाहपरमेश्वरं उन्मृज्याक्षीणिकेनासौभगवंतंसनातनं ॥ ब्रह्मोवाच ॥
अहंसृष्टोस्मिभवतालोकंस्रक्ष्याम्यहंप्रभो सर्वज्ञत्वंमयालब्धंकिमन्यद्वरयामिते पापिनश्चापिस्रष्टव्याःपुण्या
त्मानस्तथैवच तेषांमुक्तिर्भवेद्यस्मात्तत्कुरुष्वमहाप्रभो अस्माभिरपियत्रत्वंध्येयोसिपुरुषर्षभ भविष्यंतिनरा
लोकेमायामोहेनसंवृताः त्वांतत्त्वतोनवेत्स्यंतिपुण्यापुण्यस्वभावतः स्वल्पेनैवाप्युपायेनतेषांमुक्तिंवदप्रभो श्री
भगवानुवाच सम्यगुक्तंत्वयाब्रह्मन्कर्त्तव्यंवचनंतव आदित्याद्यास्तुदक्षस्यसंभविष्यंतिकन्यकाः देवार्त्ताप्रि
यकामार्थमदित्यागर्भसंभवः इंद्रानुजोभविष्यामिवामनत्वमुपागतः तस्मिन्नेवतदाकालेबलिर्नामातुदानवः

ऐंद्रंपदंसमादित्सुःकरिष्यतिमहामखंतस्मिन्नेवमहायज्ञेछलयिष्याम्यहंबालिं पदत्रयंयाचयिष्येपुण्यरूपांतरेणवै
पदेनैकेनजगतींहरिष्येभूर्भुवात्मिकां द्वितीयेनपदेनैवस्वर्महर्जनतापसान् क्रांत्वाचार्धेनवैराजमर्धेनापूर्य्यतेंवरं
विष्णंघ्रिणाप्रचरताकटाहोभेदितोबलात् अनेककोटिब्रह्मांडईदृशास्त्वधिकास्ततः तरंगभंगिसंलोलाविचरं
तिमहाजले तदेवद्रवरूपोहंचित्स्योस्मिसुरनायक तेनमेनखजातेनरंध्रेणसहसातुतत् द्रवरूपातुब्रह्मांडव्या
राब्रह्मसमुद्भवा आयास्यतिमहाभागयास्मृतामोक्षदायिनी गांगमिष्यतिमेधाराततोगंगाभविष्यति एकेन
तद्विभागेनस्वर्गमिष्यामिपद्मज पुनःपातालमार्गेवैभूत्वाभोगवतीनदी तदानाम्नात्रिपथगास्मरणात्पापनाशिनी
तदेवमपररूपंसर्वकामार्थसिद्धिदं नरादर्शनमात्रेणभविष्यंतिविकल्मषाः धन्यास्तएवमनुजामद्द्रवोभक्तितत्पराः
तेषांमुक्तिमहाभागसुलभात्मकरेस्थिताः नयोगानांशतेनापिनतपोभिर्नचेज्ययासंतुष्यामितथादेवियथाहंतज्जला
र्चनात् एतेनगंगायाःपरब्रह्मद्रवस्वरूपत्वमुक्तं तथाचभारते योसौविश्वंभरोदेवश्चित्स्वरूपीजनार्दनः स
एवद्रवरूपेणगंगांभोनात्रसंशयः अथगंगागमःप्रस्तूयते विष्णुपुराणे ततःप्रववृतेब्रह्मन्सर्वपापहरासरित्
गंगादेव्यंगनासंगमनुलेपनापिंजरा समंताद्ब्रह्मणःपुर्य्यांगंगापततिवैदिवि सातत्रपतितादिक्षुचतुर्धाप्रत्यपद्यत
सीताचालकनंदाचचतुर्भद्रेतिवैक्रमात् महाभारते महापुण्यांचगगनात्पतंतींतांमहेश्वरः दधारशिरसादेवीं
तामेवदिविसेवते एवंविधायाःपरब्रह्मद्रवपरमार्थतत्स्वरूपायाः श्रीगंगाभगवत्यायथार्थरूपतत्त्वविज्ञानात्स्मर
णदर्शनपानावगाहननाममंत्रोच्चारणार्चनादिरूपयोपस्त्यासकलजंतुनासद्योवैकुंठशिवलोकादिमोक्षप्राप्त्याकांड
एवसृष्ट्युच्छेदभयात् गंगाभक्तिगोपनंपुराणांतरवचनैरुक्तं तथाच वहुदोषंमहादुःखंज्ञात्वामानुष्यमध्रुवं मत्वा
कलियुगंघोरंगंगाभक्तिस्तुगोपिता अतोगंगाभक्तिगोपकानिवचनानि ब्रह्मवैवर्त्तादिपुराणेषूपन्यस्तानि कले

रयुतवर्षांतेहरिस्त्यक्ष्यतिमेदिनीं तदर्धेजाह्नवीदेवीतदर्धेदेवतागणइत्यादि तथाचात्रैवांचिंत्यं ब्रह्मवैवर्त्तादौ
गंगालक्ष्मीसरस्वतीनांपरस्परवादविवादेनशापद्वारानदीभावप्राप्तेरनंतरंभगवताकलौपंचवर्षसहस्रांते शापोद्धारो
विहितः ताश्चगंगाद्यादेवशक्तिविशेषागोलोकादागताः शापांतेपुनर्गोलोकंयास्यंति तत्रगंगाराधाकृष्णांगसं
भूतावर्णिता नतुब्रह्मद्रवरूपोक्ता अथचेद्भगीरथानीतैवगंगा ब्रह्मवैवर्त्तादौप्रोक्ता तथापिहरिकीर्त्तनगंगासुरे
शानांकाश्यादिस्थानानांच कलेरयुतवर्षांतादेशकालेपिभूमौदृढाऽदृढासत्ताप्यवस्थापनीया नोचेद्धरेर्नामैवना
मैवनामैवखलुजीवनं कलौनास्त्येवनास्त्येवनास्त्येगतिरन्यथा अग्निहोत्रादिकर्माणिसवद्यानिकलौयुगे गंगास्ना
नंहरेर्नामनिरपायमिदंद्वयं कलिकल्मषनाशिनी युगधर्मविवर्जितेति गंगासहस्रनामस्तवराजेपि नामद्वयमुक्तं
तयोरर्थश्चकलिकालकृतपापानांनाशिनी युगधर्मैःकलिकालधर्मैर्वर्जितेत्यादिकलिनिवर्त्तकवचसां वैयर्थ्यमाप
द्यते आमयोनिवृतस्यौषधस्यवृथोदयइत्यादिवत् तस्मात्तेषांकलिकल्मषनिवर्त्तकवचसांसाफल्यसमर्थनाय प्र
थमतः काशीपुर्य्यादिएवशापादिव्यवस्थानिश्चीयते तथाचहरिवंशे एकोनत्रिंशाध्याये वाराणसींनिकुंभ
स्तुशप्तवान्कारणांतरे दिवोदासेनराज्ञायासितायांकाशीपुर्य्यां निकुंभोगणेश्वरोनागरैःपूजयाप्रार्थितो धन
पुत्रादिसंपदोददाति राज्ञोमहिष्याप्रार्थितोपि महादेवेच्छयापुत्रनदत्तवानतोराज्ञानिकुंभस्यगणेश्वरस्यस्थानं
नाशितंततः पुर्य्यकस्मादियंशून्यातवराजन्भविष्यति अंतर्धानंकलौयातिपुरीस्तुवसतेदा पुरस्यास्तीतिपुरी
महादेवः अंतर्हितायामपिपुर्य्यां स्वयमंतर्हितःसन्सामान्यसत्तयावसति देवताप्रतिमोच्छेदेपि देवताक्षेत्रा
दौदेवतासान्निध्यंतन्निवर्त्तते इत्यर्थः कलावंतर्हितापिपुरीकृतयुगादौपुनरपिस्वमहिम्नास्फुटविलासेनवसतीत्यर्थः
अतःपुर्य्यादिवादिविनक्षत्रादर्शनवदंतर्धानमात्रं नतुसर्वतोच्छेदः किंच यावत्कलेःसंध्यांशोस्ति तावत् अत्र

द्वापरधर्माणांकियतामप्यनुवृत्तिरस्ति षट्त्रिंशद्वर्षसहस्रपर्यंतंकलावपिपुरीनांतर्भवति केवलस्यकलेः प्रवृत्तौ सत्यामेवांतर्धानं अन्यथासंप्रत्युपालंभोनयुज्यतेतिदिक् अथगंगायाअपिकलावंतर्धानव्यवस्थोच्यते केदारखंडे स्कंदपुराणे अन्यत्रपृथिवीज्ञेयागंगाद्वारोत्तरंबिना कुशावर्त्ताद्दक्षिणेतु गाधारालयःस्मृतः कलिदोषभयादेवसर्वथानैवतल्लयः गंगाद्वारोत्तरंकेदारमंडलं साभूमिर्नैव स्वर्गभूमिरेव भूमेर्भिन्नंस्थलं तथाच केदारखंडे ईश्वरउवाच इतितत्परमंस्थानंदेवानामपिदुर्लभं पंचाशद्योजनायामंत्रिंशद्योजनविस्तृतं इदंवैस्वर्गभवनंनपृथ्वींतामवेहिभो आगंगाद्वारमर्य्यादंश्वेतांतंवरवर्णिनि तामसस्तटतःपूर्वमर्वाग्बोधाचलंध्रुवं केदारमंडलंख्यातंभूम्यास्तद्भिन्नकंस्थलं पुनश्चतत्रैवोक्तं स्थानानांपंचकंपृथ्व्यांस्थास्यतिप्रवरेकलौ गंगाद्वारंचकेदारंकाशीगंगागमस्तथा गंगापिसंगतायत्रसागरेणमहामते अथस्थानविशेषेण गुण्यातिशयोमत्स्यपुराणे कुरुक्षेत्रसमागंगायत्रकुत्रावगाहिता तस्माद्दशगुणाप्रोक्तायत्रविंध्येनसंगता तस्माद्दशगुणाप्रोक्ता काश्यामुत्तरवाहिनी काश्याःशतगुणागंगागंगायाःसंगमेशतं सहस्रगुणिताचापिभवेत्सागरगामिनी भवेत्पश्चिमवाहिनीत्यपिपाठः साराजन्दर्शनादेवब्रह्महत्यांव्यपोहति अथातिप्रबलतरकलिप्रवृत्तौ म्लेच्छयवनादिनास्तिकहेतुवादकोक्तदोषदुष्टायाःकाश्याअप्यंतर्धानाद्युच्यते केदारखंडे उत्तरकाशीमाहात्म्ये ऋषयऊचुः भगवन्भूतभव्येशकृतार्थास्मोवयंप्रभो यद्भवान् दृष्टिमार्गंहिप्रापितोभक्तवत्सल कलावंतर्हिताकाशीइति शप्ताकिलाधुना तत्खेदश्रवणाप्राप्तपीडाह्यत्रसमागता कलौपापसमाविष्टेसर्वधर्मविवर्जिते कथंकाशींविनादेवगतिर्नृणांभविष्यति कलौयेषांगतिर्नास्तितेषांवाराणसीगतिः तस्यामंतर्हितायांतुकुत्रस्थानंतवप्रभो एतन्नःसंशयंछिंधियतस्त्वंकरुणानिधिः ॥ ईश्वरउवाच ॥ यदापापस्यबाहुल्यंयवनाक्रांतभूतलंभविष्य

तितदाविप्रनिवासंहिहिमाचले काश्यासहकरिष्यामिसर्वतीर्थसमन्वितः अनादिसिद्धंतत्स्थानंवर्त्ततेसर्वदैबाहि यत्रभागीरथीगंगाप्युत्तराश्रितवाहिनी असीचवरणयत्रसन्निभातेसदैवहि काश्यांह्यानितीर्थाणितानिसर्वाणितत्राहि वर्त्ततेसर्वदानूनंभुक्तिमुक्तिकराणिच अन्येपुतीर्थराजेषुकाश्यामपिद्विजोत्तमाः अंशांशभागतोविप्रानिवसामिसदानघाः केदारमंडलेविप्राःसाकल्येनस्थितिर्मम येनकेनाप्युपायेनवृत्तिमिच्छततत्रवै अमंगलंजीवितंतुमरणंयत्रमंगलं इतःप्रभृतिभोविप्रास्तत्रैवानिवसाम्यहं यावंतिकाश्यांतीर्थाणितानितत्रैवसंतिहि वहुनाकिमिहोक्तेनसामुक्तेःकारणंपरं तत्रज्ञानंविनान्यत्रमुक्तिर्नैवास्तिदुर्लभा अत्रसाप्राप्पतेदेहत्यागेनैवमहाव्रताः तस्मादस्मात्पुण्यतमंस्थानंनास्तिमहीतलेकेदारमंडलेसारात्सारमेवैषमेपुरी इयमेवकलौम्लेच्छजनसंकुलकेध्रुवं काशीतिख्यातिंयात्येवनान्यथाममभाषितं कलावंतर्हिताकाशीयवनप्रवलीभूता भविष्यतितदाह्यस्यांकाशीसंज्ञाविमुक्तिदा इदंतत्परमंयोग्यंस्थानमस्तिसुनिर्मलं पापिष्ठास्तन्नजानंतिमममायाविमोहिताः धर्मज्ञाश्चसदाचाराःसुशीलाःसत्यवादिनः एतदेवपरंस्थानंजानंतिशास्त्रनिश्चयात् लोलार्कशवोकोटीगंगाज्यानगरंधनुः कलिर्लक्षःशरोविष्णुःशिवोधन्वीपुनातुवः १ अथपुनर्गंगायामहिमात्रस्तूयते पुराणांतरेषु तस्यास्त्रिपथगात्वंप्रतिमासमप्युक्तं दिवितारयतेदेवान्नागांस्तारयतेह्यधः भूमौतारयतेमर्त्यांस्तेनत्रिपथगास्मृताषष्ठ्यादौकृष्णपक्षेतुभूमौसन्निहिताभवेत् यावत्पुनरमाबास्यादिनानिदशनित्यशः शुक्लप्रतिपदारभ्यदिनानिदशसंख्यया पातालेपित्रिपथगासन्निधानंकरोतिहि शुक्लैकादशिकादीनि गंगास्वर्गतरंगिणी पंचम्यंतानिसादेवीस्वर्गेसान्निहिताभवेत् सामान्यसत्तयात्रिपथगैवाविशेषसत्तयासन्निधानंकरोतीत्यर्थः अथगंगयाभूमावागमख्यातये संक्षेपतोभगीरथोपाख्यानमप्युच्यते केदारखंडे गंगावा

स्येतपसातोषितांशिवंप्रति भगीरथउवाच पितरोमेमहादेवकपिलाग्निसमीलिता. तेगच्छंतुपथास्वर्गंतव
देवप्रसादतःगंगाख्यंपरमंब्रह्मवर्त्ततेशिखरेतव तन्मेदेहिहिपितॄणांहिसमुद्धारायवैप्रभो कपिलाग्निविनिर्दग्धा
गच्छेयुःपरमांगतिं अन्येकलियुगेघोरा नराः पुण्यविवर्जिताः दृष्ट्वालोकान्हिगच्छंतुपुनरावृत्तिदुर्लभान्
पीत्वामृतमयंवारिमुक्तिमैश्वर्य्यमाप्नुयुः ईश्वरउवाच तद्ददामितवेदानींसर्वपापभयापहं सर्वेषांहितकामाय
त्वयोक्तंपरमंवचः स्फुरदिंदुकलाभास्वज्जटाटव्यांविराजितां धारांत्रैलोक्यपापघ्नींगृहाणपितृमुक्तये यस्याद
र्शनमात्रेणसर्वेषांतिशुभांगितियांदधारपुराब्रह्माव्यापारकलशेविभुः पुत्रीगमनजंपापंधौतंतेनैववारिणा देवीं
प्रतिशिवउवाच मयामुक्ताहिसाधारापतिताश्रीमुखेगिरौ यस्याः प्रवाहवेगेन खंडितावहवोद्रयः त्रिधा
वैपतितामर्त्यैब्रह्महत्यौघनाशनी भगीरथोपिसंप्राप्यगंगांत्रैलोक्यपावनीं मेनेकृतार्थमात्मानंप्रणनामपुनःपुनः
अथराजामहाबाहुर्नंदनाद्रिसमीपतःवासुकिप्रमुखान्नागांस्तपस्तप्तुंसमागतान् तमेवार्थंचिंत्यमानान्शिवसंन्य
स्तमानसान् कीर्त्तयंतोहिगंगेतिगंगागंगेतिचासकृत् दृष्ट्वातांश्चिंतयामासगंगांस्तोतुंमनोदधे सहस्रनामभिर्गंगांन
त्वाचैवपुनःपुनःश्चिंतयामासबहुधाकिंकर्त्तव्यमतःपरं पातालेनागनिलयेनयिष्यंतिसरिद्वराम् किंकर्त्तव्यंक्वगंतव्यं
कोमेदुःखंव्यपोहति नाम्नांसहस्रमाख्यातंगंगायास्तत्रपार्वति दिव्यरूपधरादेवीप्रत्यक्षंप्राहतंनृपं गंगोवाच ॥
तुष्टास्मिसततंवत्सतपसातवभूपते वरंवरयभद्रंतेवरार्होंसिभगीरथ राजोवाच कृपांविधेहिदासेस्मिन्मयिदुःख
समाकुलेनगंतव्यंत्वयादेविपातालनिलयेशुभे विनामुक्तिंप्रेषयित्वामत्पितॄन्कोपदग्धकान् त्वयासमप्रभावेनस्थे
यंभारतखंडके गंगोवाच ॥ भगीरथमहाभागएवमेवभविष्यति यावच्चंद्रग्रहेशाद्याः स्थास्यंत्यबरमंडले
तावत्कीर्त्तिर्महाभागभवितातेत्रिलोकके नामापितवयश्रुत्वासर्वपापैः प्रमुच्यते कलौद्वितीयपादेतुगमिष्यामिपु

262

नस्तलं तदापातालमार्गैर्वैभूत्वाभोगवतीनदी नागान्प्रत्युवाच भगीरथेनस्वर्लोकादानीतास्मीहवासुके सांप्रतंतदवश्यंहिकर्त्तव्यंभगवन्मया चरमेस्मिन्युगेभूयआगमिष्यामितेस्थलं इदनींमुंचमांशीघ्रंसमुद्रेमेगतिर्मता इत्यत्र कलेर्द्वितीयपादेसमुद्रमार्गेणपातालगमनस्वयमेवोक्तं तच्च तदर्धेजान्हवीदेवीतिकलेः पंचसहस्रवर्षांतकालेनोपपन्नं कदास्याः प्रादुर्भावकालइतिपृष्टे साप्यनेकधाभगवतोरामकृष्णादेरवतारांतरप्रादुर्भाववत्ज्ञेयः तथाहि श्रीगंगायाः प्रादुर्भावकालः कपिलाज्ञयाभगीरथतयोनिमित्तकोनवस्कंधेप्रासिद्धः सचभगीरथइक्ष्वाकुवंशजः वैवस्वतमन्वंतरेबभूव ततोपिपूर्ववैवस्वतमन्वंतरेबलेयज्ञलिंगस्यभगवतोवामपादांगुष्ठनखाग्रभिन्नब्रह्मांडकटाहविवरद्वाराब्रह्मद्रवधारादिवोमूर्धन्यवततारेतिभगीरथात्तपनात्पूर्वमेववैवस्वतमन्वंतरेश्रूयते नचदिवोमूर्द्धन्यवततारेतितेनवियद्गंगाज्ञायते साभगीरथतपनात्पूर्वंभुविनावततारेतिवाच्यंतस्याश्चपचमस्कंधस्यगद्यवाक्येनभुविआगमनप्रसिद्धिः तथासीताचालकनंदेत्यारभ्यभुवंयातीभारतवर्षं दक्षिणस्यां दिशिजलधिंप्रविशति इत्यनेनगद्येननकेवलंवैवस्वतमन्वंतरेएवगंगायाभुविआगमनंनज्ञायते एवंचसतिप्रलयेपि श्रीगंगायाः स्थितिस्तृतीयस्कंधेश्रूयते स्वर्धुन्याद्रैः स्वजटाकलापैरुपस्पृशंतश्चरणोपघातमिति श्लोके नचतस्यदैनंदिनप्रलयत्वात् स्वायंभुवमन्वंतरे श्रीगंगायाभुविप्रादुर्भावोनैवासीदितिवाच्यं चतुर्थस्कंधेस्वायंभुवमन्वंतरेपितस्याः प्रादुर्भावोलिखितः तथाहि नवध्याभवतामिंद्रायज्ञज्ञोभगवन्ननु यज्ञियांसथयज्ञेनयस्येष्टास्तनवः सुराः श्लोकेनानेनपृथुकालेस्वायंभुवमन्वंतरेनिश्चीयते तदायज्ञस्येंद्रत्वात् श्रीगंगायाविद्यमानत्वं तदातत्रैवपृथुचरिते गंगायमुनयोर्नद्योरंतराक्षेत्रमावसत् आरब्धानेवबुभुजेभोगान्पुण्यजिहासया अन्यच्चतत्रैवदक्षयज्ञांतेऽवभृथस्नानंप्रयागेविश्वसृग्भिः कृतमित्यपिचतुर्थस्कंधेश्रूयते तथाच

263

आप्लुत्यावभृथस्नानंगंगायमुनयान्विताः विरजेनात्मानासर्गैस्स्वंस्वधामययुस्ततः एतदपिस्वायंभुवमन्वंतरएवासीदितिगम्यते एवंचसति यदिस्वायंभुवमन्वंतरेश्रीगंगायाभुविप्रादुर्भाव आसीत्तर्हिवलेर्यज्ञे उद्भवःकिमितिनिरूपितस्ततोपिपश्चाद्भगीरथद्वाराश्रीगंगायाःप्रादुर्भावोनिरूप्यतइतिकथंसंगच्छते इतिसंदेहेसिद्धांतोत्रनिरूप्यते श्रीगंगायाःप्रादुर्भावस्तावत् भगवतःप्रादुर्भाववत्सदासत्वेपिसमुद्धायेशेषकारणांतरेणपुनःपुनर्वर्ण्यते यथाचगोलवर्णने उपास्योपासकभावेननवसुखंडेषुवराहाद्या अवतारावर्णिताः तेषामेवावतारास्तत्रतत्रकालेश्रूयंते यथाचभरतखंडे उपास्योनारायणउपासकोनारदः तथाअन्येष्वपिखंडेषुअवतारांतरास्तत्रोपास्योपासकभेदाःसंतिएवंचसतिस्वायंभुवमन्वंतरे दक्षसुतायांधर्मान्नरनारायणौभगवतोमूर्त्तिभेदेनावतीर्णौतौचस्वायंभुवमन्वंतरेभरतखंडेपूज्यत्वेनस्थितौ एवमन्येषामप्यवताराणांदेवभौमविलवैकुंठेषुमूर्त्तिभेदेनस्थिता यावत्कल्पाधिकारंश्रूयते तथाचपाद्मे वैकुंठभुवनेनित्यंनिवसंतिमहोज्वला अवताराःसदातत्रमत्स्यकूर्मादयोखिलाःदानोपादानरहितानैवप्रकृतिजाःक्वचित् नचपाद्मवचनेवैकुंठपदश्रवणात् भौमोविलश्चवैकुंठोनभवतीतिवाच्यंयत्रयत्रभगवान्साक्षात्तिष्ठतितत्रतत्रवैकुंठोस्तीत्यभिप्रायात् वैकुंठपदस्योपलक्षणात् यन्निकेतंतुनिर्गुणइत्येकादशस्कंधेभगवद्वाक्याच्च एवंचसति श्रीगंगायानकेवलंत्रिविक्रमपदोद्भवत्वमंगीकर्त्तव्यं तस्याःसगुणब्रह्मोद्भवत्वात् तच्चरणोद्भवत्वंच केनचिद्धेतुनाश्रीनृसिंहादिवदाविर्भावोमंतव्यः यथाभगवतआविर्भावेनिमित्तं तथागंगाया अप्याविर्भावेनिमित्तंस्वीकर्त्तव्यं तथाचगीतायां परित्राणायसाधूनांविनाशायचदुष्कृतां धर्मसंस्थापनार्थाय संभवामियुगेयुगे इतिवत्गंगायाअपिज्ञातव्यं तथाहियतःकल्पारंभतएवब्रह्मांडरचनासहभूतोभूगोलखगोलयोःप्रादुर्भावस्तत्सहभूतोभुविसप्तसमुद्रानां गंगायमुनादिनदीनांसुमेर्वादिपर्वतानांचरचनाज्ञेया अतश्चस्वा

यंभुवादिचतुर्दशमन्वंतरेषुगंगालोकेस्थास्यत्येव केनचिन्निमित्तेनतिरोभागेजाते वैवस्वतमन्वंतरेत्रिविक्रमचरणाउद्भूता ततोपिकेनचिद्धेतुनातिरोभूतासगरात्मजानुदधीर्षुर्वैवस्वतमन्वंतरेभगीरथद्वाराप्रादुर्भूता तथाचात्रसप्रमाणिकाउपपत्तिरुपन्यस्ता जन्हुनायोगबलेनक्रोधात्पीता पुनरपिवैशाखशुक्लसप्तम्यांतत्कर्णरंध्रात्प्रादुर्भूता तथा अगस्त्येनपीतःक्षारसमुद्रस्तिरोहितः तत्पुनरपिप्रस्वेदेनाविरासीत् इतितत्रपुराणांतरेषु श्रूयते अतःश्रीगंगायाअपियथातथा प्रादुर्भावेसंदेहःसुधीभिर्नकार्य्यः इत्यलम् अथैतज्जातीयकःसंदेहस्तुसप्तसमुद्राणामुत्पत्तावपिभवति सप्तसमुद्रान्विनासप्तद्वीपविभागोनस्यात् अतश्चसप्तसमुद्राःकदाउत्पन्ना इतिविचार्यते सप्तसमुद्राणामुत्पत्तिस्तावत्प्रियव्रतरथचरणखातादेवपंचमस्कंधेप्रसिद्धा ततःपूर्वंसप्तसमुद्रानासन्निति न ततोपिपूर्वतोआ सन्नमेव तृतीयस्कंधेकर्दमंप्रति भगवद्वाक्यं प्रजापतिसुतःसम्राट्मनुर्विख्यातमंगलः ब्रह्मावर्त्तेयोधिवसन् शास्तिसप्तार्णवांमहीं अतःप्रियव्रतरथखातात्सप्तसमुद्राणामुत्पत्तिर्मृषास्यात् तत्पितुर्मनोराज्येपिशास्तिसप्तार्णवामहीमित्युक्ते रित्येवंसंदेहेजायमाने अत्रोच्यते कल्पारंभेसप्तद्वीपाःससागराएवपृथ्वीप्रजापातिसिसृक्षयाउत्पन्नेतिगंगोद्भवप्रकरणोस्थितं अत्रापि सप्रमाणिकोपपत्तिस्तावदुच्यते यद्यपिसप्तद्वीपासप्तसागरामेदिनीकल्पारंभकालमारभ्य प्रलयपर्यंतस्थास्यत्येव तथापिमध्येअगस्त्यादिभिर्योगसिद्ध्यादिहेतुभिरन्यैर्वा दृष्टप्रायैःकैश्चिद्धेतुभिस्तेषांसमुद्राणां मध्येएकस्यवातिरोधानेजातेकेनचिद्धेतुनाश्रीगंगावत् अगस्त्यादिभिःप्रियव्रतादिभ्योवातेषामुत्पत्ति स्यादेव अगस्त्याख्यानंचमहाभारतादौतत्रतत्रास्त्येव तत्रअगस्त्येनजंबूद्वीपमर्य्यादाविधायकः क्षारसमुद्रएकपीतस्तत्खातश्चसिकताखातइवविलोकितः पुनश्चक्षारसमुद्रोनिःसारितः नहितादृशानांयोगिनांसमुद्रपानंतत्खातपूरणंयोगबलेनदुर्घटं अतश्चान्येषामपिषएणां

समुद्राणामाविर्भावतिरोभावेप्रमाणालाभेशंकायामुत्पद्यमानायां तत्राप्युत्तरमाह तथाहि स्वायंभुवमनुरा
कालेसप्तसमुद्राणांतृतीयस्कंधेस्थितिश्रवणात् प्रियव्रतराज्यकालेतेषामुत्पत्तिस्तिरोभावान्यथानुपपत्त्यान
स्यात् उत्तमनराज्यानंतरंकेनचिद्धेतुनातेषांतिरोधानेजातेयेतिरोभूतास्तएवप्रियव्रतरथखातात्पुनरुद्भूताइति
रीत्या तृतीयपंचमस्कंधयोः सप्तार्णवोत्पत्तौविरोधपरिहारःकृतः नचरात्रिविलोपमात्रं प्रियव्रतचरितं
स्वीकर्त्तव्यमितिचेन्न अर्कवत्परिभ्रमणेप्रियव्रतरथचरणस्यापिध्रुवेपूर्वपाशानिमध्येनसूर्यरथस्याक्षसुमेरुपर्वतस्यमू
र्द्धनिकृतस्यमूर्द्धभागमानसोत्तरपर्वतस्योपरिउत्तरभागेस्वीकृतेप्रियव्रतरथचक्रस्याप्यर्कवत्परिभ्रमणस्वीकृतेसप्तज
लधीनां भूमौस्यरथचक्रंविनाउत्पत्तेरसंभवात् अतःकर्दमविमानवत् योगमयः प्रियव्रतस्यरथःतच्चक्रंचभगव
दुपासनाबलेनचसप्तसमुद्राणामाविर्भावायैवयोगनिर्मितोविज्ञेयः पूर्वस्मात् क्षारसमुद्रकरणाद्रथचरणात् उत्तर
सप्तसमुद्रकरणायतादृशानांसमुद्राणांकरणायतादृशरथस्तच्चक्रंचसमुद्भूतं अन्यथाचक्रस्यैकप्रकारेस्वीकारेपूर्वपूर्व
स्मादुत्तरोत्तरद्वीपसमुद्राणांद्विगुणमानेनोत्पत्तिर्नसंभवतीतिभावः नचविद्युन्मालीमाहेश्वरायरक्षसारुद्रदत्तेनसौ
वर्णविमानेनसूर्य्यस्यपृष्ठतोभ्रमणेनरात्रिविलोपितकर्मवत् प्रियव्रतस्यापितावन्मात्रएवकर्मनसंभवति पृष्ठतो
भ्रमणाभावात् भूमिष्ठेनचक्रेणसूर्य्यगतितःप्रियव्रतगतरथगतेर्वैषम्यात् ब्रह्मांडप्रकाशकत्वंनस्यादितिवाच्यं
सूर्य्यवद्गतेरभावेपिचंद्रवत्प्रकाशकत्वंयोगप्रभावाच्च ब्रह्मांडप्रकाशकत्वेसंदेहोनकार्य्यः योगिनस्तावत्
दंडादिनापिसूर्य्यशेषादेःकर्मकर्त्तुंशक्ताः एवंहि आख्यायिकामहाभारतेश्रूयते तथाहि विश्वामि

त्वस्तावद्वशिष्ठादेशात्वासिष्ठादात्मनस्तपउत्कृष्टंप्रष्टुंब्रह्मणोंतिकंजगाम गत्वाचपृष्टवान् ममतपोधिकंवसिष्ठस्यैवेति तच्छ्रुत्वाब्रह्मातमाह बिश्वामित्रत्वंतावत्सूर्य्यशेषदिग्गजानत्रानय तच्छ्रुत्वाविश्वामित्रोगत्वागमनार्थंसूर्य्यमाह ततःसूर्य्यआह मयिगतेदिनरात्र्यादिव्यवहारोनभविष्यतीति शेषंप्रतिविश्वामित्रोगमनायाह ततःशेषोप्याह मयिगतेधरांकोधारयिष्यति तथैवतंदिग्गजाअप्यूचुः अस्मासुगतेषुधरानिरालंबापातालंयास्यतीति ततोविश्वामित्रस्तेषामुदंतंब्रह्माणंप्रत्याह ततोब्रह्मास्मयन्विश्वामित्रमुवाच वशिष्ठमत्रानय तथेत्युक्तेवशिष्ठेसमागते वशिष्ठमपिब्रह्मादिग्गजादीनामानयनायादिष्टवान् तथैववसिष्ठोपिगत्वातानुवाच तमपितेतथैवोचुः वसिष्ठोपितानाह ममकौपीनंसूर्यकर्मकरिष्यति शेषकर्मब्रह्मदंडो दिग्गजानांकर्मकमंडलुश्चेति तथाकृत्वावसिष्ठस्तान्सर्वान्ब्रह्मणोऽदर्शयत् ब्रह्माविश्वामित्रमाह तपसःश्रेष्ठ्यंत्वयैवज्ञातव्यं किंप्रश्नेनेतिनिरस्तोविश्वामित्रस्तूष्णींजगामेतिदिक् एवमेवाप्रियव्रतागस्त्यादीनामपियोगबलंज्ञातव्यं किंच विराट्पुरुषब्रह्मांडपुंडरीके स्थूलदेहे इडापिंगलासुषुम्णाख्यास्तिस्रोनाड्यस्ताश्चगंगायमुनासरस्वत्याख्यास्तासांबलोपःसतिब्रह्मांडेकदापिनसंभवति इदानींच यथाप्रयागेवहिर्दृष्ट्याअप्रकाशापिसरस्वती विंदुसरोवरादौप्रगटावर्त्तते तथाभरतखंडे वर्त्तमानायाःश्रीगंगायाः काश्मीरमंडलादावपिश्रौतश्रवणात् ततश्चबहूनांश्रोतसांमध्ये कस्याचित्तत्स्रोतसःकालगत्याअप्रगटत्वेपि अन्येषांसत्वात् लुप्तस्यापिस्रोतसःपुनराविर्भावसंभवात् एवंभरतखंडेपिगंगायालोपोनभवतीतिसंक्षेपः गंगायाःसुषुम्णासाम्यत्वेन

ब्रह्माद्यंतरकर्मत्वेनमुक्तिप्रदत्वे वैश्वानरंयातिविहायसागतः सुषुम्णयाब्रह्मपथेनशोचिषा विधूतकल्कोथ हरेरुदस्तात्प्रयातिचक्रंनृपशैशुमारमितीद्वितीयस्कंधे तट्टीकायांसुषुम्णानाड्यासाचदेहाद्बहिरपिविततास्तीत्याह एवंब्रह्मद्रवस्वरूपामुक्तिप्रदाश्रीगंगाभरतखंडत्यागंनकदापिकरिष्यतीतिश्रेयोर्थिभिरास्तिकवरैःश्रद्धेयमितिसिद्धांतः गंगामुक्तिप्रदानित्यासदाध्येयामनीषिभिः लोपस्तस्यानवैजातुयतोवैब्रह्मरूपिणीतिमाकेतस्योमापातीविद्वद्विमर्शः अन्यच्च नवरंगादिभिर्यवनेश्वरैरपि काशीकाश्मीरादिस्थानेषुविश्वेश्वरादिदेवतामंदिराण्युद्धृत्यस्वराध्यागाराणियज्ञोपवीतावतारणम्लेछीकरणादि महांतिदुराचरणानिकलेरयुतवर्षांतपंचसहस्रांतकालात्पूर्वमेवकृतानि तस्माद्यदापापस्यबाहुल्यंयवनाक्रांतभूतलमित्याद्युक्तप्रबलतरपवनोपद्रवएव न यष्टव्यंनहोतव्यंनदातव्यंद्विजाःक्वचित् एवंन्यवारयद्धर्मंभेरीघोषेणसर्वतः इतिवेणाज्ञादिवत् हरिःस्थितिगंगास्थिति काश्यादिस्थानानां दिविदिवानक्षत्रादर्शनवदंतर्भाव हेतुस्तथाच गंगासरस्वतीलक्ष्मीनांनदीभाव प्राप्तिरूपभगवच्छापोद्धारहेतुरपिज्ञेयः ॥ अतश्चैवंबोध्यं ॥ कलिकालेपि यदायदाहिधर्मस्यग्लानिर्भवतिभारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमिति भगवदुक्तेर्भगवतांशकलारूपश्रौतस्मार्त्तधर्मस्थापकास्तिकवरराजाद्याज्ञया यदायदाधर्मप्रवृत्तिर्जायते तदातदापुनरपिनक्तंनक्षत्रदर्शनवद्भूयोपिकाश्यादिक्षेत्राणांहरिकीर्त्तनगंगादिमाहिमोदयोभवत्येव कलेरयुतवर्षांतेहरिस्त्यक्ष्यतिमेदिनीं तदर्धे जाह्नवीदेवीतदर्धंदेवतागण इत्यादिब्रह्मवैवर्त्तादिवचनानितुकलिदोषसूचनपराण्येव कलिदोषास्तुपुराणांतरेषूपन्य

268

स्ताःप्राप्तेकलियुगेघोरे नराः पुण्यविवर्जिताःदुराचाररताः सर्वेसत्यधर्मपराङ्मुखाःपरापवादनिरताःपरद्रव्याभिलाषिणः परस्त्रीसक्तमनसःपरहिंसापरायणाः देहात्ममतयोमूढाःनास्तिकाःपशुबुद्धयः मातृपितृकृतद्वेषाःकृतघ्नाःकामकिंकराः विप्रालोपग्रहग्रस्तावेदविक्रयजीविनः धनार्जनार्थमभ्यस्तविद्यामदविमोहिताःत्यक्तस्वजातिकर्माणः प्रायशःपरवंचकाः क्षत्रियाश्चतथावैश्याःस्वधर्मत्यागशीलिनः तद्वच्छूद्राश्चयेकेचिद्ब्राह्मणाचारतत्पराः स्त्रियश्चप्रायशोभ्रष्टाभर्तृवज्ञानतत्पराः श्वशुरद्रोहकारिण्योभविष्यंतिकलौयुगे इत्यादिवत्कलिदोषसूचनपराण्येवब्रह्मवैवर्तादिवचांसिज्ञेयानि नतुनियमेनहरिस्थितिगंगास्थितिसमूलोच्छेदपराणि अन्यच्च केदारखंडे यावद्ब्राह्मणजात्यस्तियावद्गंगास्तिभूतले यावद्वेदमयोघोषस्तावन्नविशतेकलिरित्युक्त्यैवंनिश्चेतव्यं ब्राह्मणजातिर्वेदमयोघोषश्चकलेरंतिमसंधौकल्क्यवतारप्रादुर्भावादनुमीयते भागवतेप्रथमस्कंधे अथासौयुगसंध्यायांदस्युप्रायेषुराजषु जनिताविष्णुयशसोनाम्नाकल्किर्भविष्यति द्वादशस्कंधेपि इत्थंकलौगतप्राये जनेषुस्यूरधर्मिणि धर्मत्राणायसत्वेनभगवानवतरिष्यति शंबलग्राममुख्यस्यब्राह्मणस्यमहात्मनः भवने विष्णुयशसोनाम्नाकल्किर्भविष्यतीति सर्वमास्तिकबुद्ध्यानिश्चीयबिधायहरिगंगादीनामुपास्तौनकदाप्यश्रद्धेयं तथाचोक्तंसौपर्णे हरिर्भागीरथीविप्राविप्राभागीरथीहरिः भागीरथीहरिर्विप्रासारमेतज्जगत्त्रये अतश्चैतदर्थंदार्ढ्यायगंगामाहात्म्यसूचिकाश्चतस्रः श्रुतीराहमहादेवः ॥ स्कांदेकाशीखंडे श्रीमहादेवउवाच ॥

श्रुतीर्निशामयहरेर्गंगामाहात्म्यभाषिणीं विनिश्चितार्थायांज्ञात्वाश्रयेद्गंगांनरोनघां इरावतींमधुमतींपयस्वि

269

॥२७॥

प० पृ० नीममृतरूपामूर्जस्वतीं गंगाश्रितासास्त्रिदिवंव्रजंति इरावत्यादयः पंचनदीप्रभेदास्तदात्मिकां १ ऋ
१०५ षिजुष्टांविष्णुपदींपुराणांसुपुण्यधारांमनसाहिलोके सर्वात्मनाजाह्नवींयेप्रपन्नास्तेब्रह्मणः सदनंसंप्रयांति २
१०७ ब्रह्मणःसदनं वैकुंठम् २ लोकानिमान्नयतियाजननीवपुत्रान् स्वर्गंसदासर्वगुणोपपन्नान् इष्टंपदंब्राह्मममभीप्समा
१० नैर्गंगासदैवात्मवशैरुपास्या ३ उस्त्रैर्जुष्टामिषतींविश्वरूपामिरावतीं जनयित्रींगुहस्यशिष्टैः सेवाममृतांब्रह्मकांतां
१ गंगांश्रयेदात्मविशुद्धिकामः ४ उस्त्रैर्जुष्टांतेजोमयत्वात् इषतीमिच्छतीं इच्छारूपामित्यर्थः इरा-
भूवागाद्यातद्वतीं ब्रह्मकांतां ब्राह्मणानांकांतांकमनीयामभिलाषितां सावित्रीरूपांवा ४ ओंइमंमेगंगेयमुनेसर-
स्वतिशतद्रुस्तोमंसचतापरुष्ण्या असिक्नयामरुद्वृधेवितस्तयार्जीकीयेशृणुह्याशिषोमया १
पौराणिकाद्यर्थजातंकिंचिदज्ञः शिवशंकरः अकार्षीदास्तिकप्रीत्यै गंगासत्ताविवेचनं गंगाभक्त्यतिरेकेणय
न्मयात्रोपकल्पितं क्षम्यंतुतच्छोधयंतुविद्वांसः करुणार्णवाः ॥

स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृ
द्रघुपतेः पादांबुजार्चारतो जीव्यात्पुत्रकलत्रमित्रसहितः संपालयन्क्ष्मांचिरम् १ रणवीरसिंहभूपेशका
रितेकृत्यसागरे अभूद्भागीरथीगंगाकलास्थितिविनिर्णयः २ सद्वेलोविधिसेतुरुत्सवमहोच्छ्वासः प्रकारोद्भ
मो दानोर्मिर्व्रतविभ्रमोव्रतकथाकल्लोलकांतांतरः पूर्णोद्यापननौः सुपर्वणिमहादानादिकल्पद्रुमो भूयाद्व
मंजलांचितोरघुपतेरत्नाकरोऽयंमुदे २ क्षेत्रेकुरोः श्रीमतिपुंडरीकपुराद्भवेनात्रविभोर्निदेशात् चंडीसहायेनकृ
तानिसम्यक्पद्यानिप्रीत्यैशिवशंकरस्य २ सावर्णावलिसंभृतंगुरुगुणग्रामंसरीतिव्रतं युक्त्याकेप्रथितंरसांचित
पदंसालं[illegible]तंप्रमतः पश्यंतुप्रतिभाजुषोऽत्रकवयोयेपंडिताश्चादरा देतदृश्यमुदारपद्यमखिलंचंडीकलाकौशलम्

॥ १३३ ॥
[illegible]
पृ० १०

270

३ वर्षेऽक्ष्यश्विनवोडुनाथगणितेसाद्धैकमक्ष्मापते राषाढेद्वितीयातिथौरविदिनेपक्षेसितेदित्यभे पर्य्यालोच्य
चिरंचिरंतनमहाविद्वत्प्रबंधान्बुधैः प्रारब्धः शिवशंकरेणविदुषापूर्णोऽब्दरत्नाकरः ॥ ४ ॥

॥ इतिश्रीमत्सूर्यवंशावतंसरघुकुलतिलकजम्बूकाश्मीराद्यनेकदेशाधिपश्रीरण
वीरसिंहमहाराजकारितोऽयंकृत्यरत्नाकरोमहानिबंधःसमाप्तिमफा
लीत् ॥ राजास्वस्तिप्रजास्वस्तिदेशाःस्वस्तितथैवच
यजमानगृहेस्वास्तिस्वस्तिगोब्राह्मणेषुच १
पुस्तकलिखनपरिश्रमवेत्ताविद्वज्जनो
नान्यःसागरलंघनखेदंहनुमा
नेकःपरम्वेद ॥ २ ॥
शुभमस्तुलेखक
पाठकयोः ॥
श्रीरामायनमोनमः

१
१२०
१२२
१२२

प०	पृ०	पं०	सूचिपत्रम्
१०५	१	२	सर्वसाधारणपूजाप्रयोगःगणेशोपानिषत्
१०७	१	३	अश्वत्थोद्यापनं शौनकोक्तप्रकारेण
१०८	१	८	प्रकारांतरेणाश्वत्थोद्यापनं सेचनप्रकारः
१०९	२	६	अश्वत्थारोपणोद्यापनप्रयोगः
१११	२	८	अश्वत्थस्यपुंसवनादिसंस्कारार्थेहोमः
१११	२	१५	अश्वत्थविवाहःतुलसीप्रार्थना
११२	२	१	अथवटोद्यापनप्रयोगः
११४	१	८	वृक्षसामान्योद्यापनविधिःतरुपुंत्रकविधिः
११६	२	१	सत्यनारायणकथाविधानम्
१२१	२	१२	सर्वकामनाप्राप्तयेहरिनामस्मरणमेवव्रतं
१२२	१	८	सर्वरोगनिवृत्तयेहरिनामत्रयमंत्राः
१२२	१	११	तथैवशिवनामत्रयमंत्रःकृत्यरत्नसमुच्चयः
१२२	१	१४	अघसमस्तकलिकालपातकशांतयेहारिमामस्मरणंमहाव्रतम्
१२२	२	३	तत्रगंगामाहिमावर्णनम

प०	पृ०	पं०	सूचिपत्रम्
१२२	२	१४	गंगाभगवत्यासात्विकंरूपंब्रह्मद्रवत्वस्व-
१२३	२	१९	गंगायाआगमप्रस्तावः कलिकालेगंगास्थितिनिर्णयः
१३३	१	१०	श्रीमहाराजरणवीरसिंहकारितः कृत्यरत्नाकरःरत्नसमुच्चयः समाप्तः
			शुभमस्तुलेखकपाठकयोः

LIBRARY
VIDYALAYA GURUKULA KANGRI

॥श्रीरणवीरव्रतरत्नाकरः समाप्तः॥

1

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिब्बामल्लाधिकारेदशमरत्नसमुच्चयस्समाप्तः
सम्वत् १९४१ चैत्र प्र. ११

ॐश्रीगणेशायनमः श्रीगुरुंगणपंदुर्गांवटुकंशिवमच्युतं ब्रह्माणंगिरिजांलक्ष्मींवाणींवंदेविभूतये अथवर्षमासदिनादिविशेषकृत्यंनिरुप्यते तत्रादौसंवत्सरारंभस्यप्रथमोपस्थितत्वात्संवत्सरारंभप्रतिपदानिर्णीयतेसाचचैत्रशुक्लप्रतिपदा तस्यामेवसंवत्सरारंभःकार्य्यः अत्रप्रतिसूर्य्योदयव्यापिनीग्राह्या तदुक्तंब्राह्मे श्रीभगवानुवाच चैत्रेमासिजगद्ब्रह्माससर्जप्रथमेहनि शुक्लपक्षेसमग्रंतुतदासूर्य्योदयेसतीति भविष्योत्तरेपि प्रवृत्तेमधुमासेतुप्रतिपद्युदितेरवौ ब्रह्माप्रवर्त्तयामाससकालस्यकलनामपीत्यादि दिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वैवतदुक्तंज्योतिर्निबंधे चैत्रेसितप्रतिपदि योवारोर्कोदयेसवर्षेशःउदयाद्वितयेपूर्वोनोदययुगलेपिपूर्वःस्यात् यस्माच्चैत्रसितादेरुदयाद्भानोःप्रवृत्तिरब्दादेरपि वसिष्ठेनाप्युक्तं वत्सरादौवसंतादौवलिराज्येतथैवच पूर्वविद्धैवकर्तव्याप्रतिपत्सर्वदाबुधैरितिपूर्वदिनेसूर्य्योदयाविद्धाप्रतिपदित्यर्थःयदाचैत्रेमासिमलमासोभवतितदादैवकार्यस्यतत्रप्रतिषिद्धत्वाच्छुद्धेमासिसंवत्सरारंभःकार्य्यःचैत्रशुक्लादितोवत्सरारंभःसर्वसंमतःमलमासस्तुकृष्णप्रतिपदादितोभवति तस्यपूर्ववर्षएवांतर्भावःउदयसंबंधाभावोसंवत्सरारंभप्रयुक्तकार्य्यलोपप्रसक्तौपूर्वतिथिविद्धाग्राह्यत्ववचनं नतुसर्वथामायुक्तग्राह्यत्वं अत्रतैलाभ्यंगोनित्यःवत्सरादौवसंतादौवलिराज्येतथैवचतैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यतेइतिवृद्धवसिष्ठवचनात् कौस्तुभेऽस्यामेवप्रतिपदिवत्सराधिपपूजोक्ताज्योतिर्निबंधेयश्चैत्रशुक्लप्रतिपद्दिनवारोनृपोहिसः तस्यपूजाविधातव्यापताकातोरणादिभिःप्रतिगेहं ध्वजःकार्य्यःशक्त्याब्राह्मणतर्पणंनिरीक्षणंचकर्त्तव्यंशकुनानांशुभेप्सुभिरिति भविष्येचैत्रेमासिमहाबाहोपुण्यायाप्रतिपत्परा अस्यांवैनिंबपत्राणिप्राश्यसंशृणुयात्तिथिमितिशकादिश्रवणमप्यत्रोक्तंज्योतिःशास्त्रेशकवत्सरभूपमंत्रिणांरसधान्येश्वरमेघपादिनांश्रवणात्पठनाच्चवै नृणांशुभतांयात्यशुभंसहश्रियेति अस्यामेवनवरात्रव्रतारंभः तत्रप्रतिपत्परयुतैवग्राह्या अमायुक्तानकर्तव्याप्रतिपच्चंडिकार्चने मुहूर्तमात्राकर्तव्याद्वितीयादिगुणान्वितेतिदेवीपुराणात् तिस्रो

ह्येताःपराःकार्य्यास्तिथयःकुरुनंदन कार्त्तिकाश्वयुजोर्मासोश्चैत्रेमासिचभारतेतिहेमाद्रौब्राह्मोक्तेः पराःपरयुताःकार्य्याअत्रविशेषस्तु शारदनवरात्रेवक्ष्यते अत्रप्रपादानमप्युक्तं भविष्ये अतीतेफाल्गुनेमासिप्राप्तेचैत्रमहोत्सवे पुण्येह्निविप्रकथितेप्रपादानंसमारभेत् तत्रमंत्रः प्रपेयंसर्वसामान्यभूतेभ्यःप्रतिपादिता अस्याःप्रदानात्पितरस्तृप्यंतुप्रपितामहाःअनिवार्य्यंततोदेयंजलंमासचतुष्टयमिति प्रपादातुमशक्तेनविशेषाद्धर्ममीप्सता प्रत्यहंधर्मघटकोवस्त्रसंवेष्टिताननः ब्राह्मणस्यगृहेदेयः शीतामलजलःशुभः तत्र मंत्रः एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः अस्यप्रदानात्सकलाममसंतुमनोरथाइति अनेनविधिनायस्तुधर्म्मकुंभंप्रयच्छति प्रपादानफलंसोपिप्राप्नोतीहनसंशयइति इयंप्रतिपत्श्वेतकल्पादिः अत्रश्राद्धदानादिमहाफलं तदुक्तंहेमाद्रौ नागरखंडे अथकल्पादयःपुण्याःकथ्यंतेतिथयःशुभाः यासुश्राद्धेकृतेतृप्तिःपितॄणामक्षयाभवेत् चैत्रशुक्लप्रतिपदिश्वेतकल्पःपुराभवदिति अत्रब्रह्मपूजोक्ताहेमाद्रौविष्णुधर्मोत्तरे चैत्रमासस्ययापुण्याशुक्लाप्रतिपदाभवेत् तदह्निब्रह्मणःकृत्वासोपवासस्तुपूजनं संवत्सरमवाप्नोतिसौख्यानिभृगुनंदनेतिस्मृतिकौस्तुभेत्वियं मत्स्यजयंतीत्युक्तं॥ कृतेचप्रभवेचैत्रेप्रतिपच्छुक्लपक्षगा रेवत्यांयोगविष्कुंभेदिवाद्वादशनाडिकाःमत्स्यरूपीकुमार्य्यांतुअवतीर्णोहरिःस्वयमितिमात्स्यादित्युक्तं कल्पभेदादत्रव्यवस्थाज्ञेया अथात्रव्रतान्युच्यंते संवत्सरांभविधिश्चानिरूप्यते श्रीभगवानुवाच चैत्रमासिजगद्ब्रह्माससर्जप्रथमेहनि शुक्लपक्षेसमग्रंतुतदासूर्य्योदयेसति प्रवर्तयामासतथाकालस्यकलनामपि ग्रहानब्दानृतून्मासान्पक्षान्संवत्सराधिपान् ददौसभगवान्ब्रह्मासर्वदेवसमागमे ब्राह्म्यांसभायांब्रह्माणमनिर्देश्यतनुंततः यथोक्तैस्तेनमस्यंतःस्तुवंतश्चाप्युपासते ततस्तेकृतशुश्रूषागत्वाचैवस्वमालयं स्वानिस्वान्यथकार्य्याणि नित्ययुक्तास्तुचक्रिरे ब्राह्मीसभाकामरूपाविशेषणतदाज्ञया धारयत्यमलंरूपमनिर्देश्यंमनोहरा ततःप्रभृतियो

धर्मः पूर्वैःपूर्वतरैःकृतः अद्यापिरूढःसुतरांकर्तव्योसौप्रयत्नतः तत्रकार्य्यामहाशांतिःसर्वकल्मषनाशिनी सर्वोत्पातप्रशमनीकालिदुःखविनाशिनी आयुःप्रदापुष्टिकरीधनसौभाग्यवर्द्धिनी मंगल्याचपवित्राचलोकद्वयसुखावहा तस्यामादौचसंपूज्योब्रह्माकमलसंभवः पाद्यार्घ्यपुष्पधूपैश्चवस्त्रालंकारभोजनैः होमैर्वल्युपहारैश्चतथाब्राह्मणतर्पणैः ततःक्रमेणदेवेभ्यः पूजाकार्य्यापृथक्पृथक् कृत्वोंकारनमस्कारौकुशोदकतिलाक्षतैः पुष्पधूपप्रदीपाद्यैर्भोजनैश्चयथाक्रमं मंत्रसंपूजनार्थंतुवहुरूपंपरिस्पृशेत् मंत्रमितिजातावेकवचनं नानारूपान्मंत्रान्परिगृह्णीयादित्यर्थः तेतु ॐनमोब्रह्मणे ॐविष्णवेनमः ॐपरमात्मनेनमइत्येवमंत्रवृंदोपात्तादेवताशब्दाश्चतुर्थ्यंताःप्रणवादयोनमोंताःमंत्रत्वेनग्राह्याः ॐनमोब्रह्मणेतुभ्यंकालायचमहात्मने नमस्तेस्तुनिमेषायत्रुटयेचनमोस्तुते लवायचनमस्तुभ्यंनमस्तेस्तुक्षणायच नमोनमस्तेकाष्ठायैकलायैतेनमोनमः नाडिकायैसुसूक्ष्मायैमुहूर्तायनमोनमः नमोनिशाभ्यःपुण्याभ्योदिवसेभ्योनमोनमः पक्षाभ्यांचाथमासेभ्यऋतुभ्यष्षड्भ्यएवच अयनाभ्यांचपंचभ्योवत्सरेभ्यश्चसर्वदा नमस्कृत्ययुगादिभ्योग्रहेभ्यश्चनमोनमः अष्टाविंशतिसंख्येभ्योनक्षत्रेभ्योनमोनमः राशिभ्यः करणेभ्यश्चव्यतीपातेभ्यएवच अतिवर्षाधिपेभ्यश्चविज्ञातेभ्योनमोनमः नमोस्तुकुलनागेभ्यःसानुयात्रेभ्यएवच सानुयात्रेभ्यः सानुचरेभ्यः नमश्चतुर्दशभ्यश्चमनुभ्योस्तुनमोनमः नमःपुरंदरेभ्यश्चतत्संख्येभ्योनमोनमः पंचाशद्भ्योमरुद्भ्यश्चदक्षकन्याभ्यएवच नमोदेव्यैसुभद्रायैजयायैचाथसर्वदा भृशाश्वायनमस्तुभ्यंसर्वास्त्रजनकायच नमस्तेवहुपुत्रायपत्नीभिः सहितायच नमोबुद्ध्यैतथावृद्ध्यैनिद्रायैधनदायच नलकूवरयक्षायगुह्यकस्वामिने नमः नमोस्तुशंखपद्माभ्यांनिधिभ्यामथनित्यशः भद्रकाल्यैनमोनित्यंसुरभ्यैचनमोनमः वेदवेदांगवेदांतविद्यासंख्येभ्यएवच नागयज्ञसुवर्णेभ्योनमोस्तुगरुडायच सप्तभ्यश्चसमुद्रेभ्यःसागरेभ्यश्चसर्वदा उत्तरेभ्यःकुरुभ्यश्च

नमोहैरण्मयायच भद्राश्वकेतुमालाभ्यांनमःसर्वत्रसर्वदा इलावृतायचनमोहरिवर्षायचैवहि नमःकिंपुरुषेभ्यश्चभारतायनमोनमः नमोभारतभेदेभ्योनवभ्यश्चाथसर्वदा पातालेभ्यश्चसप्तभ्योनरकेभ्योनमोनमः कालाग्निरुद्रशैवाभ्यांहरयेक्रोडरूपिणे सप्तभ्यश्चाथलोकेभ्योमहाभूतेभ्यएवच मनसेबुद्धयेचैवनमःप्रकृतयेतथा पुरुषायाभिमानायनमोस्तुव्यक्तमूर्तये हिमवत्प्रमुखेभ्यश्चपर्वतेभ्योनमोस्त्वथ पौराणीभ्यश्चगंगाभ्यःसप्तभ्यश्चनमोनमः नमोस्त्वाद्यमुनिभ्यश्चसप्तभ्यश्चाथसर्वदा नमोस्तुपुष्करादिभ्यस्तीर्थेभ्यश्चपुनःपुनः निम्नगाभ्योनमोनित्यं वितस्तादिभ्यएवच चतुर्दशभ्यस्तीर्थेभ्योधरणीभ्योनमोनमः नमोधात्रेविधात्रेवछंदोभ्यश्चनमोनमः सुरभ्यैरावणाभ्यांचनमोभूयोनमोनमः नमोस्त्वथोच्चैःश्रवसेध्रुवायचनमोनमः नमोस्तुधन्वंतरये शस्त्रास्त्राभ्यांनमःसदा विनायककुमाराभ्यांविघ्नेभ्यश्चनमः सदा शाखायचविशाखायनैगमेयायवैनमः नमः स्कंदग्रहेभ्यश्चस्कंदमातृभ्यएवच ज्वरायरोगपतयेभस्मप्रहरणायच अप्सरोभ्यः सोमपेभ्योदेवेभ्यश्चनमोनमः असोमपेभ्यश्चनमस्तुषितेभ्योनमःसदा आदित्येभ्योनमोनित्यंद्वादशभ्यश्चसर्वदा एकादशभ्योरुद्रेभ्यस्तपस्विभ्योनमः सदा सदैकोनपंचाशद्भ्योमरुद्भ्यश्चनमोनमः शिल्पाचार्यायदेवायनमस्ते विश्वकर्मणे अष्टभ्योलोकपालेभ्यस्सानुगेभ्यश्चसर्वदा आयुधेभ्योवाहनेभ्योवर्मभ्यश्चनमः सदा आसनेभ्योदुंदुभिभ्योदेवेभ्यश्चनमःसदादैत्यराक्षसगंधर्वपिशाचेभ्यश्चानित्यशः पितृभ्यस्सप्तभेदेभ्योमातृभ्यश्चनमोनमःसुसूक्ष्मेभ्यश्चदेवेभ्योभावगम्येभ्यएवच नमस्तेबहुरूपायविष्णवेपरमात्मने अथकिंबहुनोक्तेनमंत्रेणानेनचार्चयेत् प्राङ्मुखोदङ्मुखोविप्रान्देवानुद्दिश्यपूर्ववत् ब्राह्मणान्देवतोद्देशेनपूर्ववत् मंत्रोक्तक्रमेणार्चयेदित्यर्थःअत्रालंविस्तरेण अर्घ्यैःपुष्पैश्चधूपैश्चवस्त्रैर्माल्यैःसुहृष्टकं सरामांचपूजयेदित्यर्थःधनधान्यानुविभवैर्दक्षिणाभिश्चसर्वदा इतिहासपुराणानां

7

प्रवक्तॄंश्चद्विजोत्तमान् कालज्ञान्वेदवेदज्ञान्भृत्यान्संबंधिबांधवान् अनेनैवतुमंत्रेणस्वाहांतेनपृथक्पृथक् प्रविशायाभयेहोमःकर्तव्यःसर्वदत्तये वेदविच्चसुवेदत्त्वास्थानप्राधानिकेसति प्रविष्टायश्रेष्ठायवेदवेदज्ञायवेदोक्तविधिज्ञायेत्यर्थः मदनरत्नेतुवेदव्रतेइतिपठितःवावेदोक्तविधिनादेयंस्यात् चक्षुषीआज्यभागौप्राधानिकेस्थानेप्रधानहोमारंभेहोमारंभेततःकुर्य्यान्मंगलालंभनंनरः मदनरत्ने शालहोमस्ततः कार्योमंगलालंभनंततः भोजयित्वाद्विजान्सर्वान्सुहृत्संबंधिबांधवान् विशेषेणतुभोक्तव्यंकार्यश्चापिमहोत्सवः नवसंवत्सरारंभःसर्वसिद्धिप्रदायकः इतिब्रह्मपुराणोक्तःसंवत्सरारंभविधिः ॥ इयंचपूजादमनकेनकार्य्येतिस्मृतिकौस्तुभे यथोक्तंदेवीपुराणे ब्रह्मोवाच चैत्रादौकारयेत्पूजांममवत्सयथाविधि गंधधूपार्चनादानैर्माल्यैश्चदमनोद्भवैरिति दमनाभावे दूर्वयाकुशाक्षतैर्वा अत्रकार्यामहाशांतिरित्युक्तत्वादत्रमहाशांतिर्लिख्यते भविष्योत्तर श्रीकृष्णउवाच महाशांतिंप्रवक्ष्यामिमहादेवेनभाषितांनृपाभिषेकेसाकार्यायात्राकालेनृपस्यतु दुःस्वप्नेदुर्निमित्तेचग्रहवैगुण्यसंभवे विद्युदुल्कानिपातेचजन्मर्क्षग्रहभेदने केतूदयेचनिर्घातेचतुर्थेचाष्टमेतथा यदास्युर्गुरुमंदाराःसूर्यश्चैवविशेषतःयुद्धेग्रहाणांसर्वेषांसूर्यशीतांशुकीलके वस्त्रायुधगवाश्वेषुभास्मितेशयनासने यदाग्निःपरिदृश्येतरात्राविंद्रधनुस्तथा वेश्मनश्चतुलाभंगेगर्भेश्वाश्वतरीषुच रविविंवद्वयेदृष्टेमहाशांतिःप्रशस्यतेरवींद्वोरुपरागेचमहोल्कापतनेषुच उत्पातेषुतथान्येषुनिमित्तेषुचसर्वतः सर्वारिष्टोपशमनीमहाशांतिर्निगद्यते सर्वाणिदुर्निमित्तानिप्रशमंयांतिसर्वथा तांकुर्य्युर्ब्राह्मणाःपंचकुलशीलसमन्विताः चतुर्वेदास्त्रिवेदाश्चद्विवेदाश्चापिपांडव आथर्वणविशेषज्ञ वहृचश्चसुसंयुताःशुचयःश्रुतसंपन्नाजपहोमपरायणाःकृच्छ्रोपवासनक्ताद्यैःकृतकायविशोधनाः पूर्वमारभ्यमंत्रांस्तुआरभेयुस्ततःक्रियाः मंत्रान्प्रयोगेवक्ष्यमाणान् दशद्वादशहस्तंवा मंडपंकारयेच्छुभंतन्मध्येवेदिकांकुर्य्याच्चतुर्हस्तप्रमाणतःआग्नेय्यांकारयेत्कुंडंहस्तमात्रंसुशोभनं मेखलात्रयसंयुक्तं

योन्याचापिसमन्वितं चारुचंदनमाल्यैचतोरणालंकृतेतथा गोमयेनोपालिप्तेचमंडपेतेद्विजातयः शुक्लांबरधराःस्नाताः
अ०र० शुक्लमाल्यानुलेपनाःकर्मकुर्य्युरितिशेषः ततश्चपंचकलशांस्तस्यां वेद्यांनिधापयेत् आग्नेयादिषुकोणेषुपंचमंमध्यमंत
चैत्र० था अष्टपत्रकृतेपद्मेचतुःपल्लवधारिणि ब्रह्मकूर्चविधानेनपंगव्यंतुकारयेत् ब्रह्मकूर्चविधानंयथा गोमूत्रताम्रवर्णाया
३ इत्यादिपरिभाषोक्तकार्य्यं ओषधीःपंचरत्नानिरोचनाचंदनंतथा सिद्धार्थकांस्तथादूर्वाःकुशान्व्रीहियवांस्तथा अपा
मार्गफलवती न्यग्रोधोदुंबरौतथाप्लक्षाश्वत्थकपित्थश्चप्रियंगुश्चूतपल्लवान् हस्तिदंतमदंचैवकोणकुंभेषुनिक्षिपेत्फ
लवतीगंधप्रियंगुः पुण्यतीर्थोदकोपेतंपंचगव्यंतुमध्यमे ऋचंवाचामितीदंहिवह्निकुंभाभिमंत्रणं आशुः शिशानोनै
ऋत्यांयद्देवावायुगोचरे ईशावास्यमितीशान्यांकुंभस्यत्वभिमंत्रणं मध्यमेत्वथजप्तव्यारुद्राःकुंभेयजुर्भवाःगंधपुष्पा
क्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः फलैश्चनारिकेलाद्यैर्दीपकैः कुंभपूजनं स्वस्तिवाचनिकंचैवकारयेत्तदनंतरं क्रमेणा
नेनशनकैराग्निकार्य्यंप्रयोजयेत् अनेनवक्ष्यमाणेन अग्निंदूतमिहाग्निंचपूर्वमेवनिधापयेत् पूर्वंकलशस्थापनात्
अग्निस्थापनानंतरंकलशस्थापनं कुर्य्यादित्यर्थः हिरण्यगर्भः समितिब्रह्मासननियोजने कयानयाप्रणीताश्च
मंत्रणविनियोजयेत् कृत्वाचास्तरणंवन्हेराज्यसंस्कारमेवच अथवासादयेदत्रद्रव्यंयस्यप्रयोजनं ततःपुरुषसूक्तेन
पायसंश्रयणंभवेत् अभिघार्याथसंसिद्धंपायसंस्थापयेद्भुवि अष्टादशप्रमाणेनदद्यादथशमीमयान् पालाशीस्स
मिधःसप्तसप्ततेइतिदापयेत् आघारावाज्यभागौतुजुहुयात्तुक्रमेणतु जुहुयादाहुतीःसप्तजातवेदसइत्यृचा स्थाली
पाकस्यजुहुयात्पूर्वंवैजातवेदसे तरत्समंदीसूक्तेनचतस्रोजुहुयात्ततः यमायेतिचसप्तान्याःस्वाहांताजुहुयात्ततः इदं
विष्णुस्ततःसप्तजुहुयादाहुतीर्नृप नक्षत्रेभ्यस्ततःस्वाहासप्तविंशतिराहुतीःनक्षत्राहुतयःस्वाहेत्यादिभिर्मंत्रैःकार्य्याः
तत्ररोहिणीद्वयपुष्पहस्तादित्रयानुराधाभिजिद्द्वयशतभिषक्स्वेकैकवचनं पुनर्वसुफाल्गुनीद्वयविशाखाश्विनीषु

द्विवचनंशेषेषुबहुवचनंयत्कर्मणेजुहुयात्ततःस्विष्टकृतेपुनः ग्रहहोमस्ततः कार्यास्तिलैराज्यप रिप्लुतैः अत्रतिलविधानंवैकल्पिकंयवादिनिवृत्त्यर्थमित्यर्थः प्रायश्चित्तंततोहुत्वाहोमकर्मसमापयेत् ततस्तुतूर्यनिर्घोषैःशंखकाहलनिःस्वनैः यजमानस्यकर्तव्योह्यभिषेकोद्विजोत्तमैः काश्मर्य्यवृक्षसंभूतेसमेभद्रासनेस्थिते काश्मर्यवृक्षःश्रीपर्णीभद्रासनं वेदिमध्यगतंकृत्वादुर्निमित्तप्रशांतये पंचभिःकलशैःपूर्णैर्मंत्रैरेतैर्यथाक्रमं सहस्राक्षंतुप्रथमंततश्चैवशतायुषा सजोषसारंद्रइतिविश्वानिवरुणेतिच द्रुपदादिवेतिचततः स्नापयेयुःसमाहिताः ततोदिशांबलीन्दद्याद्विचित्रान्नसमाश्रितान् नमोस्तुसर्ववृक्षेभ्यइमंमंत्रमुदीरयेत् स्नातस्यब्राह्मणाः सर्वेपठेयुः शांतिमुत्तमां शांतितोयेन धारांचपातयित्वासमंततः पुण्याहवाचनंकृत्वाशांतिकर्मसमापयेत् तीर्थेदेवालयेचैवगोदोहंकारयेद्बुधः क्षितिंहिरण्यंवासांसिशयनान्यासनानिच विप्रेभ्योदक्षिणांदद्यात्यथाशक्त्याविमत्सरः दीनानाथविशिष्टेभ्योदद्याच्चैवयुधिष्ठिर भोजनंचानिशंदत्त्वाततःसर्वंप्रसिद्ध्यति आयुश्चलभतेदीर्घंशत्रूंश्चजयतेक्षणात् दुर्गाणिचास्यसिध्यंतिपुत्रांश्चलभतेशुभान् यथाशस्त्रप्रहाराणांकवचंभवतिवारणं तद्वद्देवोपघातानांशांतिर्भवतिवारणं अहिंसकस्य दांतस्यधर्मार्जितधनस्यच दयादाक्षिण्ययुक्तस्यसर्वेसानुग्रहाग्रहाः। अर्थ्यान्समर्धयति वर्द्धयतेथधर्मकामंसमर्द्धयतितस्यपिनष्टिपापं यःकारयेत्सकलदोषहरांमहार्थांशांतिंप्रशांतहृदयःपुरुषस्सएव अथमहाशांतिप्रयोगः तत्रादौ वेदिसंस्कारादिमंडपाभावपक्षेकार्य्यं तत्रवेद्यां अग्निकोणेअग्निस्थापनार्थंहस्तमात्रंकुंडं स्थंडिलंवाकार्य्यं वेद्याश्चत्वारिद्वाराणिसतोरणानिपरिकल्प्यचारुचंदनपुष्पमालावस्त्रादिभिरलंकृत्ययथोक्तंपंचगव्येनआम्रपल्लवेनगायत्र्या मंडपंवेदिंवाप्रोक्ष्यासनेउपविश्यआचम्यअपवित्रःपवित्रोवासर्वावस्थांगतोपिवायःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरः शुचिः ततोदेशाचारात् सूर्यादिपूजनंविधाय संक्षिप्तसंकल्पंकुर्य्यात् ॐअद्यामुकगोत्रोअमुकशर्मा अमुकवर्माहं

सर्वपापक्षयसकलग्रहपीडासर्वोत्पातजनितसर्वारिष्टनिवृत्तिपूर्वक आत्मनोदेशकुटुंबपरिवारशरीरादौ धनधान्यसंपदारोग्यादिसर्वाभीष्टसिध्यर्थं कर्तव्यमहाशांतियागस्यपूर्वांगत्वेन गणेशपूजापुण्याहवाचनस्वस्तिवाचनमातृकापूजनाभ्युदयिकश्राद्धं च ऋत्विगादिवरणंकरिष्ये मत्स्यपुराणे प्रतिज्ञावरणंचैवस्वस्तिपुण्याहवाचनमिति आदौप्रतिज्ञा ततआचार्य्यवरणं गणपत्यादिपूजायांमंत्रपाठार्थम् ओंअद्येत्यादि महाशांतियागकर्मणः पूर्वांगत्वेन गणपतिमातृकापूजावसोर्द्धारालक्ष्म्यादिप्रतिष्ठावृद्धिश्राद्धपुण्याहवाचनग्रहस्थापनप्रतिष्ठादिकर्मकारयितुमाचार्यत्वेनत्वामहंवृणे आचार्यस्तु यथास्वर्गे शक्रादीनांबृहस्पतिः तथात्वंममयज्ञेस्मिन्भवाचार्योद्विजोत्तम इत्याचार्यवरणंविधाय भद्रंकर्णेभिः शृणुयामदेवाभद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवाꣳसस्तनुभिर्व्यशेमदेवहितंयदायुरितिमंत्रेणयजमानहस्तेकंकणबंधनं गणपतिसहितमातृकापूजनंकुर्य्यात् ओंगणानांत्वागणपतिꣳहवामहेप्रियाणांत्वाप्रियपतिꣳहवामहे निधीनांत्वानिधिपतिꣳहवामहे वसोममआहमजानिगर्भधमात्वमजासिगर्भधं ॥ १ ॥ ओंनमोगणेभ्योगणपतिभ्यश्चवोनमो नमोव्रातेभ्योव्रातपतिभ्यश्चवोनमो नमोविश्वरूपेभ्यश्चवोनमो नमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमः ओंभगवन्गणपतेइहागच्छइहतिष्ठममपूजांगृहाण ओंनमोभगवतेगणाधिपायनमः इतिसर्वोपचारैःसंपूज्य सुमुखश्चैकदंतश्चकपिलोगजकर्णकः लंबोदरश्चविकटोविघ्ननाशोविनायकः धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः द्वादशैतानिनामानियःपठेच्छृणुयादपि विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ततोमातृकास्थापनं गौरीपद्माशचीमेधासावित्रीविजयाजया देवसेनास्वधास्वाहामातरोलोकमातरः हृष्टिःपुष्टिर्धृतिस्तुष्टिरात्मनःकुलदेवता गणेशेनाधिकाःपूज्या वृद्धौषोडशमातृकाः षोडशमातृकाइहागच्छतइहतिष्ठतश्रीसहितषोडशमातृभ्योनमः एवंगंधादिनैवेद्यांतपूजा षोडशमातृकाःपूजितास्थक्षमध्वंततःकु

डयादिलग्नाःसप्तसगुडाःसप्तघृतधारावसोर्धाराः कर्तव्याः ॐलक्ष्मीः श्रीश्चधृतिर्मेधाप्रज्ञास्वाहासरस्वतीसर्वेषुवृद्धिकार्य्येषुसप्तैत।घृतमातरःलक्ष्म्यादिसप्त मातृकाइहागच्छतेत्यादिआवाह्यपूजा लक्ष्म्यादिसप्तमातृभ्योनमइतिगंधादिनैवेद्यदक्षिणांतंपूजनंरक्तवस्त्रमंगलसूत्रादिदानंअथाभ्युदायिकश्राद्धं ॐअपवित्रःपवित्रोवा देवताभ्यःपितृभ्यश्च ॐसत्यवसुसंज्ञकाविश्वेदेवाःॐभूर्भुवःस्वइदंवःपाद्यं१मातृपितामहीप्रपितामह्योनांदीमुख्यःॐभूर्भुवःस्वइदंवःपाद्यंसंपद्यतांवृद्धिः२ॐपितृपितामहप्रपित.महानांदीमुखा ॐभूर्भुवः स्वइदंवःपाद्यंसंपद्यतांवृद्धिः३ॐमातामह प्रमातामह वृद्धप्रमातामहा नांदीमुखाॐभूर्भुवःस्वइदंवःपाद्यंसंपद्यतांवृद्धिः४इदमासनंवःसंपद्यतांवृद्धिः५इदंगंधाद्यर्चनंवःसंपद्यतांवृद्धिः४मंडलं१ २परिवेषणं१ २विधापपृथिवितेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिस्वाहाइदंविष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपांसुरेविष्णो हव्यंरक्षमदीयं ॐ.सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवभ्योयुग्मब्राह्मणभोजनपर्याप्तमिदमन्नंसोपकरणंसदक्षिणंवःसंपद्यतांवृद्धिः४एवंस्थानचतुष्टयेद्वादशधादत्त्वा ॐअन्नहीनांक्रियाहीनंमंत्रहीनंविधिहीनंचयद्भवेत् तत्सर्वमाच्छिद्रमस्तु इतिजप्त्वा सत्यवसुसंज्ञकाविश्वेदेवादत्तैतदन्नपानादिभिःप्रीयंतां१मातृपितामहीप्रपितामह्यो दत्तैतदन्नपानादिभिःप्रीयंतां ३ मातामहप्रमातामह वृद्धप्रमातामहा दत्तैतदन्नपानादिभिःप्रीयंतां ४ महामहप्रमातामहवृद्धप्रमातामहादत्तैतदन्नपानादिभिःप्रीयंतां ततः गोत्रंनोवर्द्धतां दातारोनोभिवर्द्धंतांवेदाःसंततिरेवच श्रद्धाचनोमाव्यगमद्बहुदेयंचनोऽस्तु अन्नंचनोवहुभवेदतिथींश्चलभेमहि याचितारश्चनःसंतुमाचयाचिष्मकंचन इतिसंप्रार्थ्यएताःसत्याशिषोवःसंतुइतिविप्राणांप्रतिवचनं ॐमद्येत्यादि महाशांतियागकर्मणःपूर्वांगत्वेनकृतस्य विश्वेषांदेवानांनांदीमुखश्राद्धस्यप्रतिष्ठार्थमिदंद्राक्षामलकफलमूलादिद्रव्यनिष्क्रयभूतंदाक्षिणाद्रव्यं यथानामगोत्रायब्राह्मणायदातुमहमुत्सृजे एवंमातृपितामही प्रपितामहीनां पितृपितामह

पुस्तकालय
गुरुकुल कांगड़ी

प्रपितामहानां मातामह प्रमातामहवृद्धप्रमातामहानां नांदीमुखानां कृतैतदाभ्युदयिकश्राद्धस्यप्रतिष्ठार्थंमिफल
मूलेवनस्पतिदैवतेदक्षिणाद्रव्यसहितेयथानामगोत्रायब्राह्मणायदातुमहमुत्सृजेइतिवृद्धिश्राद्धंविधाय ततोयदाआ
चार्यद्वारामहाशांतियागादिकार्यं तदात्रैवपुनर्ऋत्विगादिवरणसहितमाचार्यवरणंकार्यंतत्रक्रमः पुष्पचंदनतं बूल
फलवस्त्रदक्षिणाद्रव्यमादाय कुलशीलवेदविधिसंपन्नंब्राह्मणमाहूय प्राङ्मुखमुपदिष्टंस्वयंबद्धांजलिःएतस्मिन्मत्क
र्तृकेमहाशांतियागकर्मणित्वंमेगुरुर्भवभवानितितेनोक्ते ततोवरणसंभृतिमादाय ॐमद्यास्मिन्महाशांतियागकर्म
णिमत्प्रतिनिधित्वेनसमग्रविधिंकारयितुममुकगोत्रममुकशर्माणंत्वामेभिः पुष्पचंदनतांबूलवस्त्राभरणकमंडलुदक्षि
णादिभिराचार्यत्वेनत्वामहंवृणे वृतोस्मीतिप्रतिवचने यथाविहितंकर्मकुरु करवाणीतिप्रतिवचने ततःप्रार्थनाआचा
र्यस्तुयथास्वर्गे. मंत्रमूर्तिर्भवान्नाथसंसारोच्छेदकारक देवपूजाविधानार्हांकुरुधर्म्यांगतिंचन इतिसंप्रार्थ्य ततःस्व
स्तिवाचनपुण्याहवाचनऋद्धिवाचनशांतिपाठार्थं चाग्नेयनैर्ऋत्यवायव्येशानमध्यस्थकुंभेषुऋचंवाचमाशुः शिशान
यद्देवादेवहेडनरुद्रपाठादिमंत्रैः कुंभाभिमंत्रणार्थमन्यान् ब्राह्मणान्वृणुयात् ततोवरणसंभृतिमादाय ॐमद्यास्मि
न्महाशांतियागकर्मणिनानानामगोत्रान् ब्राह्मणान्स्वस्तिवाचनऋद्धिवाचनशांतिवाचनार्थमाग्नेयनैर्ऋत्यवायव्यै
शानमध्यस्थकुंभेषुऋचंवाचमाशुःशिशानयद्देवादेवहेडनमृचंवाचंप्रपद्येतत्र शांतिपाठं कारयितुयुष्मानहंवृणेवृताः
स्मइतिप्रतिवचनेयथाविहितंकर्मकुरुतकरवामइतितैरुक्ते ततः स्वस्तिवाचनं ॐस्वस्तिनः इंद्रोवृद्धश्रवाः स्वस्ति
नःपूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिः स्वस्तिनोवृहस्पतिर्दधातु १ इत्यादिस्वस्तिवाचनेक्रियमाणेआचा
र्यादिसहितोयजमानःसपत्नीकः ॐभद्रंकर्णेभिःशृणुयामदेवाः भद्रंपश्येमाक्षिभिर्यजत्राःस्थिरैरंगैस्तुष्टुवांसस्त
नूभिर्व्यसेमदेवहितंपदायुरितिमंत्रेणमंडपंप्रविशेत् ततोयजमानाज्ञयासऋत्विक्आचार्यः मंडपाकरणेवेदिंप्रविशेत

तत्रवेदिसंस्कारंकुर्य्यात् तत्रादौसर्षपविकरणेनभूतानुत्सारयेत तत्रमंत्राः यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वतःस्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु १ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं सर्वेषामविरोधेनमहाशांतिंसमारभे २ भूताःप्रेताःपिशाचाद्याह्यपक्रामंतुराक्षसाः स्थानादस्माद्व्रजंत्वन्यदिहशांतिंकरोम्यहं ३ ततोगोमूत्रंगोमयं क्षीरंदधिः सर्पिःकुशोदकं समंत्रकंकुर्यात् तत्रमंत्राः तत्सवितुर्वरेण्यमित्यादिगायत्र्या गोमूत्रं गंधद्वारांदुराधर्षां नित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं इतिगोमयं आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यंभवावाजस्यसंगथे इति क्षीरं दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः सुरभिन्नोमुखाकिरत्प्रणआयूंषितारिषत् इतिदधि घृतंमिमक्षेघृतमस्ययोनिर्घृताश्विनौघृतमस्य धाम अनुष्वधमावहमादयस्वस्वाह घृतंवृषभवक्षिहव्यंइतिघृतं ओंआपोहिष्ठामयोभुवस्तानऊर्जेदधातन महेरणाय चक्षसे योवः शिवतमोरसस्तस्यभाजयतेहनः उशतीरिवमातरः तस्माअरंगमामवोयस्यक्षयायाजिन्वथ आपोजनयथाचनः इतिकुशोदकं गृहीत्वा गायत्र्यासर्वाण्येकीकृत्य प्रणवेनालोड्य पंचगव्येनपरिकल्पितां भूमिं प्रोक्षयेत् ततोवेदिंस्पृशेत् तत्रमंत्रः ओंवेद्यांवेदिसमाध्यक्षेवर्हिषावर्हिरिंद्रियं यूपेनयूपआप्यतेप्रणीतोअग्निरग्निना इति संस्कारः अथाचार्यः वेदिकायाद्वारचतुष्टये तोरणचतुष्टयपूजामारभेत् ओंअग्निमीलेपुरोहितंयज्ञस्यदेवमृत्विजंहोतारंरत्नधातममितिपूर्वतोरणंगत्वा प्राङ्मुखउपविश्य आचम्य वामतोरणमूले पुष्पाक्षतान्यादाय ओंभूर्भुवःस्वः मेरोइहागच्छ इति मेरुमावाह्यस्थापयित्वा मेरवेनमः इतिपाद्यासनगंधार्घपुष्पधूपनैवेद्यवस्त्रदक्षिणादिभिःसंपूज्य ततस्तोरणदक्षमूले मंदरमावाह्य पूजयेत् मंदरायनमः तोरणवामाग्रे विष्णुमावाह्यपूजयेत् ओंविष्णवेनमः तोरणोपरिमध्यभागे ओंशिवायनमः शिवमावाह्यपूजयेत् तोरणदक्षाग्रे ओंब्रह्मणेनमः ब्रह्माण

मावाह्यपूजयेत् तोरणाधःप्रदेशे ॐभूतायत्वानारातयेस्वरभिविरूयेषइच्छंहंत्वाश्वाध्यांपृथिव्यामुर्वंतरिक्षेमन्वेमिपृथिव्यास्त्वानाभौसादयामादित्वा घं उपस्थेगेहॐरिक्ष इत्यनेनपंचभूतानिइहागच्छतेहतिष्ठतेत्यावाह्यप्रतिष्ठाप्य गंधादिभिरभ्यर्च्य सुभद्रं विकटंवा चक्रांकितपंचभूतानि पूजयेत् द्वारमध्येअक्षतादिभिः कुमुदाक्षमावाह्यपूजयेत् इतिपूर्वद्वारपूजा १ ततोदक्षिणद्वारे पूर्वाभिमुखउपविश्य ॐइषेत्वोर्जेत्वावायवस्थदेवोवःसविताप्रार्पयतुश्रेष्ठतमायकर्मण आप्यायध्वमघ्न्याइंद्रायभागंप्रजावतीरनमीवाअयक्ष्मामावस्तेनईशतमाघशंसोध्रुवा अस्मिन्गौपतौस्यातबह्वीर्यजमानस्यपशून्पाहि इतिमंत्रेणदक्षिणद्वारतोरणंकृत्वा ततःपूर्ववत् क्रमेणमेरुं १ मंदरं २ विष्णुं ३ शिवं ४ ब्रह्माणं ५ तोरणस्यवाममूलेवामाग्रमध्यदक्षिणाग्राधःस्थानेषु पंचभूतपर्यंतान्पूजयेत् द्वारमध्ये पुंडरीकं वामनंच पूजयेत् ततः पश्चिमद्वारेॐअग्नआयाहि वीतये गृणानोहव्यदातये निहोतासत्सिबर्हिषिइतिमंत्रेण पश्चिमद्वारतोरणं कृत्वा तोरणदक्षमूले मेरुं उत्तरमूले मंदरं दक्षाग्रेविष्णुं मध्येशिवम् उत्तराग्रे ब्रह्माणं अधः पंचभूतानि द्वारमध्ये शंकुकर्णं सर्वनेत्रंचपूजयेत् ३ तत उत्तरद्वारे शन्नोदेवीरभिष्टये आपोभवंतुपीतये शंय्योरभिस्रवंतुनः इत्यनेनोत्तरद्वारतोरणंकृत्वा पश्चिमतोरणमूले मेरुं पूर्वमूले मंदरं पश्चिमाग्रे विष्णुं उपरिशिवं पूर्वाग्रेब्रह्माणं अधः पंचभूतानि द्वारमध्येसुमुखं सुप्रतिष्ठंच पूजयेत् ततोयजमान आचार्य्योवा पश्चिमद्वारेप्रविश्य आसनेचोपविश्य शुचिराचम्य महाशांतियागस्य प्रधानसंकल्पं कुर्य्यात् ॐतत्सत् अद्यास्मिन्वर्षे दुः स्वप्नदुर्निमित्तविद्युदुल्कानिपातकेतूदयनिर्घातसूर्याचंद्रमसोर्विंवतांतर्गतकालिकदर्शनानिशींद्रधनुर्दर्शनभूकंपमूलगंडांतप्रभृतिदुष्टसमयप्रसवयुग्मप्रसवविकृतप्रसवकाकोलूकादिवेश्मप्रवेशाकस्मिकध्वजच्छत्रवेश्मतुलाभंगाश्वतरीगर्भसंभव शय्यासनगवाश्वादिष्वाग्निदर्शनभास्मितादिदर्शनादिसर्वोत्पात

जन्यसर्वारिष्टशांतिसहित आत्मनोजन्मराशिनामराशिजन्मलग्नवर्षलग्नादिषु जन्मस्थानचतुर्थाष्टमद्वादशस्थानेषु गुरुमंदारादित्यशनिराह्वादिदुष्टग्रहादिजन्योत्पातभयपीडादिनिवृत्यनंतरनिजदेशदेहपारिवारादौधनधान्यसंपत्यारोग्यादिसदभीष्टसिद्ध्यर्थं महाशांतियागमहंकरिष्ये केचित्तु आचार्य्यादीनांवरणमत्रैवेच्छंति तत्रआचार्यत्वेन त्वामहं वृणइतिवृत्वा आचार्यस्तुयथास्वर्गेइत्यादि प्रार्थना ततोब्रह्मवरणं ॐब्रह्मत्वेनत्वामहंवृणे एवंवृत्वा यथा चतुर्मुखोब्रह्मासर्वलोकपितामहः तथात्वंममयज्ञेस्मिन्ब्रह्माभवद्विजोत्तम इतिप्रार्थना यथाग्नेयनैर्ऋत्यवायव्यैशानकोणस्थकलशेषुमध्यकलशेच ऋचंवाचं आशुशिशान ईशावास्ययद्देवादेवहेडनरुद्रपाठकर्तृन् ब्राह्मणान् पूर्वमेववृतान् प्रार्थयेत् ऋग्वेदः पद्मपत्राक्षोगायत्रः सोमदैवतः आत्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव १ काचराक्षोयजुर्वेदस्त्रैष्टुभोरुद्रदैवतः भारद्वाजस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव २ सामवेदस्तुपिंगाक्षोजागतःशक्रदैवतः कश्यपःसतुविप्रेंद्रऋत्विक्त्वंमेमखेभव ३ वृहन्नेत्रोथर्ववेदोनुष्टुभोरुद्रदैवतः वैतानगोत्रविप्रेंद्रऋत्विक्त्वंमेमखेभव ४ ऋत्विजस्तुयथापूर्वंशक्रादीनांमखेभवन् यूयंतथामेभवितुमृत्विजोर्हथसोमपाः यूयंमेऋत्विजः स्वस्थाः स्वस्थाःस्मइत्युक्ते पूर्वमाराध्यमंत्रांस्तुकर्मकुर्युर्द्विजातयइतिपूर्वमुक्तत्वात् तेच स्वस्वेस्थाने स्थिता मंत्रानावर्तयेयुः आग्नेयकोणस्थितोब्राह्मणः ऋचंवाचंप्रपद्येमनोयजुः प्रपद्ये सामप्राणंप्रपद्येचक्षुः श्रोत्रंप्रपद्येवागोजः सौहजोमयिप्राणापानौ १ यन्मेछिंद्रचक्षुषोहृदयस्यमनसोवातितृणंवृहस्पतिर्मेतद्दधातु शन्नोभवतिभुवनस्ययस्वतिः २ गायत्रीच ३ इत्यादिमध्यायंवाजपेत् १ अथनैर्ऋत्ये आशुः शिशानोवृषभोनभीमे।घनाघनःक्षोभणश्चर्षणीनां संक्रंदनोनिमिषएकवीरःशतꣳसेनाऽअजयत्साकमिंद्रइतिमंत्रंवासमग्रमध्यायंजपेत् अथवायव्ये यद्देवादेवहेडनंदेवासश्चकृमावयं अग्निर्मातस्तस्मादेनसोविश्वान्मुंचत्वंहसः१ यदिदिवायदिनक्तमेनांसिचकृमावयं वायुर्मातस्मा

देनसोविश्वान्मुंचत्वंहसः२यदिजाग्रद्यदिस्वप्नजानाꣳसिचमेमावयं सूर्योमातस्मादेनसोविश्वान्मुंचत्वंहसः३यद्ग्रामेयदरण्येयत्सभायां यदिंद्रियेणवर्ष्मणा यदेनश्चकृमावयंयदेकस्याधिधर्मणितस्यावयजनमसि४यदापोअघ्न्याइतिवरुणेतिशपामहेततोनोवरुणनोमुंचअवभृथनिचुंपणानिचेरुरसि निचुंपणःअवेवैर्देवकृतमेनोयक्ष्यवमर्त्यैर्त्यकृतं पुरुराव्णोदेवरिषस्पाहि ३अथैशानेईशावास्यमिदꣳसर्वंयत्किंचजगत्यांजगत्तेनत्यक्तेनभुंजीथामागृधःकस्यचिद्धनंइतिमंत्रंसमग्रमध्यायंवाजपेत्४अथमध्यकलशे ॐनमस्तेरुद्रमन्यवउतोतइषवेनमःबाहुभ्यामुततेनमःइतिमंत्रं षोडशऋचोवासमग्रमध्यायंजपेत् अथात्रवेदिकायामपि गणपतिपूजनमादौकर्त्तव्यंतथा ॐगणानांत्वागणपतिꣳहवामहे प्रियाणांत्वाप्रियपतिꣳहवामहे निधीनांत्वानिधिपतिꣳहवामहे वसोमम आहमजानिगर्भधमात्वमजासिगर्भधम् नमोगणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमः २ ॐभूर्भुवःस्वर्गणपतेइहागच्छइहतिष्ठेत्यावाह्यप्रतिष्ठाप्यॐगंगणपतयेनमइति मंत्रेण पाद्यासनार्घ्यस्नानवस्त्रगंधपुष्पधूपदीपनैवेद्यतांबूलफलदक्षिणाभिःसंपूजयेत्ततःस्वस्तिवाचनं पुण्याहवाचनंच कुर्य्यात् तदाह आश्वलायनः वैदिकेतांत्रिकेचादौततःपुण्याहवाचनं तच्चरूपनारायणीये इत्थंत्रीनधिकान्ब्राह्मणान्दक्षिणावासोन्नदानादिभिः परितोष्य पुण्याहंभवंतोब्रुवंतुइतिप्राङ्मुखः श्रावयेत् ॐपुण्याहपुण्याहं पुण्याहं ब्राह्मंपुण्यमहोयच्चसृष्ट्युत्पादनकारकंवेदवृक्षोद्भवंनित्यंतत्पुण्याहंब्रुवंतुनः ब्राह्मणाः पुण्याहं इतित्रिर्ब्रूयुः ततोयजमानस्यस्वयंवा पुनंतुमादेवजनाः पुनंतुमनसाधियः पुनंतुविश्वाभूतानिजातवेदःपुनीहिमां भोब्राह्मणा अस्ययजमानस्यगृहे ऋद्धिंभवंतोब्रुवंतु सागरस्यचयाऋद्धिर्महालक्ष्म्यादिभिःकृता संपूर्णासप्रभावाचतामृद्धिंसंब्रुवंतुनः ऋध्यतां ऋध्यतांऋध्यतां इतित्रिर्ब्रूयुः मंत्रः सत्रस्यऋद्धिरस्यगन्मज्योतिरमृता अभूमदिवं

पृथिव्याअध्यारुहामाविदामदेवान्स्वर्ज्योतिः क्षत्रियऋद्धिः ३ भोब्राह्मणाअस्ययजमानस्य गृहे स्वस्तिभवंतो ब्रुवंतु स्वस्तिर्याअविनाशाख्यापुण्यकल्याणवृद्धिदा विनायकप्रिया।नित्यंतांस्वस्तिंसंब्रुवंतुनःओंस्वस्तिस्वस्तिस्वस्ति इतित्रिर्ब्रूयुःस्वस्तिनइंद्रोवृद्धश्रवाः स्वस्तिनःपूषाविश्ववेदाःस्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोवृहस्पतिर्दधातु ॥ १ ॥ पयः पृथिव्यांपयओषधीषु ॥ २ ॥ विष्णोरराटमसि ॥ ३ ॥ अग्निर्देवता ॥ ४ ॥ द्यौःशांतिरंतरिक्षळ्शांतिः ॥ ५ ॥ आनोभद्राइतिदशर्चसूक्तस्यरहूगणपुत्रोगौतमऋषिः विश्वेदेवादेवता त्रिपंचायाःसप्तमीजगत्यः षष्ठीविराट्स्थानाशिष्टास्त्रिष्टुभःपाठेविनियोगः ओंआनोभद्राःक्रतवोयंतु विश्वतोदधासो अपरीतासउद्भिदः देवानांयथासदभिवृधेआसन्नप्रायुवोरक्षितारोदिवेदिवे ॥ १ ॥ इतिदशर्चसूक्तपाठः ततःकनिक्रंदइतिदशर्चशाकुनसूक्तपाठः तस्यायमाद्यमंत्रः ओंकानिक्रदंतनुषंप्रब्रुवाणइयर्त्तिवाचमरितेवनावं सुमंगलश्चशकुनेभवामिमात्वाकाचिदभिद्राद्विदत् ॥ १ ॥ इत्यादि ततःस्वस्तिनोसमीतामश्विनाभगः स्वस्तिदेव्यदितिरनर्वणः स्वस्तिपूषाअसुरोदधातनः स्वस्तिद्यावापृथिवी सचंताम् ॥ १ ॥ इत्यादिपंचर्चस्वस्त्ययनपाठः ततःओंहिरण्यवर्णांहरिणींसुवर्णरजतस्रजं चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह इतिपंचदशर्चश्रीसूक्तपाठः ओंस्वस्तिन इंद्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः स्वस्तिनोवृहस्पतिर्दधातु व्रतनियमतपः स्वाध्यायक्रतुदमदानविशिष्टानांसर्वेषां ब्राह्मणानां मनःसमाधीयतां समाहितमनसःस्मः प्रसीदंतुभवंतःप्रसन्नाःस्मयजमानस्यगृहेपुत्रकलत्रमित्रगुरुस्वसृभागिनेयसंवंधिवांधवानांदीर्घमायुरस्तु पुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तुअविघ्नमस्तु आरोग्यमस्तुशिवंकर्मास्तुकर्मसमृद्धिरस्तु पुत्रसमृद्धिरस्तु धनधान्यसमृद्धिरस्तु इष्टसमृद्धिरस्तु अरिष्टनिरसनमस्तु यत्पापंतत्प्रतिहतमस्तु यच्छ्रेयस्तदस्तु उत्तरोत्तरमहरहरभिवृद्धिरस्तु उत्तरोत्तराःक्रियाःशुभाःशोभनाःप्र

वर्तते तिथिकरणमुहूर्तनक्षत्रसंपदस्तु तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः तिथिकरणेमुहूर्तनक्षत्रेसग्रहेसदैवते प्रीयेतांअग्निपुरोगाविश्वेदेवाःप्रीयंतांइंद्रपुरोगामरुद्गणाःप्रीयंतांवासिष्ठपुरोगाऋषिगणाः प्रीयंतां माहेश्वरीपुरोगाउमामातरःप्रीयंतां अरुंधतीपुरोगा एकपत्न्यःप्रीयंतां विष्णुपुरोगाःसर्वेदेवाःप्रीयंतां ब्रह्मपुरोगाः सर्वे वेदाःप्रीयंतां श्रीसरस्वत्यौप्रीयेतां श्रद्धामेधेप्रीयेतां भगवतीकात्यायनीप्रीयतां भगवतीमाहेश्वरीप्रीयतां भगवतीऋद्धिकरीप्रीयतां भगवतीवृद्धिकरीप्रीयता भगवंतौविघ्नविनायकौ प्रीयेतां सर्वाःकुलदेवताः प्रीयंतां हता ब्रह्मद्विषः हताः परिपंथिनः हताश्चविघ्नकर्तारःशत्रवःपराभवंयांतु शाम्यंतुघोराणि शाम्यंतुपापानि शाम्यंत्वीतयः शुभानिवर्द्धंतां शिवा आपः संतु शिवा अग्नयः संतु शिवा आहुतयः संतु शिवा वनस्पतयः संतु शिवा अतिथयःसंतु अहोरात्रेशिवेस्यातांआब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः शूरऽइषव्योनिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिः पुरंधिर्योषाजिष्णुरथेष्ठाः सभेयोयुवास्ययजमानस्यवीरोजायतान्निकामे निकामेनः पर्जन्योवर्षतु फलवत्योनऽओषधयः पच्यंतां योगक्षेमोनः कल्पतां शुक्रांगारकबुधवृहस्पतिशनिराहुकेतुभौमसहिता आदित्यपुरोगाः सर्वेग्रहाःप्रीयंतां भगवान्नारायणः प्रीयतांभगवान्पर्जन्यः प्रीयतां भगवान्स्वामीमहासेनःप्रीयतां पुण्याहकालंवाचयिष्येवाच्यतां पुण्याहंभवंतोब्रुवंतुपुण्याहं ॥ ३ ॥ स्वस्तिभवंतोब्रुवंतु आयुष्मतेस्वस्ति ॥ ३ ॥ ऋचः सामानियजूंषिसाहिश्रीरमतांसतां श्रीरस्त्वितिभवंतोब्रुवंतु अस्तुश्रीः पुण्याहवाचनसमृद्धिरस्तु भगवान्प्रजापतिःप्रीयतां इतिपुण्याहवाचनं आनोभद्रा स्वस्तिनोमिमीता कनिक्रद श्रीसूक्त इत्येषांचतुर्णांसूक्तानांचात्रपाठःकार्यः प्राक्प्रमादेनालिखिताः ततोयजमान आचार्योवा अस्ययागस्यनिष्पत्त्यैभवंतोभ्यर्थितामया सुप्रसन्नैस्तुकर्तव्यंशांतिकंविधिपूर्वकं गणपतिपूजा

मातृकापूजा वसोर्द्धारात्मिकासप्तमातृपूजा अत्रपद्धतौप्रागेवालिखिता अथग्रहस्थापनं वेदिकाया मीशानकोणे ग्रहस्थापनार्थंमंडलंविरच्य ग्रहस्थापनंकुर्यात् ओंप्रणवस्यब्रह्माऋषिः देवीगायत्रीछंदः परमात्माअग्निर्देवता व्याहृतीनांक्रमेणजमदग्निभरद्वाजभृगवऋषयः अग्निवायुसूर्यादेवताः सूर्याद्यावाहनेविनियोगः ओंभूर्भुवःस्वःकलिंगदेशोद्भवकश्यपगोत्र ईश्वराधिदेवताग्निप्रत्यधिदेवतासहित वायुविनायकदुर्गाकाशाशिवपंचदेवतामध्ये वायुदेवतासहितसूर्य इहागच्छ इहतिष्ठ उदयंतंमहातेजंतेजसाचाभयंकरं सर्वदुःखहरंदेवंसूर्यमावाहयाम्यहं श्रीसूर्यायईश्वराधिदेवताग्न्यधिदेवतासहिताय नमः इमामासनपाद्यार्घ्याचमनस्नानगंधपुष्पधूपदीपनैवेद्यतांबूलवासोदक्षिणात्मकां सर्वोपचारपूजांसमर्पयामिनमः प्रार्थना भोभोसूर्यग्रहाध्यक्षकालिंगविषयोद्भवः रक्तःकाश्यपगोत्रस्त्वंद्विभुजःपद्मलोचन· सप्ताश्ववाहनागच्छपद्ममध्येवरप्रद ॥ १ ॥ उदयस्त्वंमहाभानोतेजसाचाभयंकर सहस्त्ररश्मिदीप्तश्चग्रह्यादित्यःप्रीयतांमम ॥ १ ॥ अथचंद्रपूजा ओंभूर्भुवःस्वः यमुनातीरोद्भव आत्रेयसगोत्र उमाधिदेवताअप्प्रत्यधिदेवतासहित सोमइहागच्छ इहतिष्ठ द्विजराजसमुत्पन्नस्तारागणसमन्वितः ओषधीनांचयोराजासोममावाहयाम्यहं ओंचंद्रमसे उमाधिदेवताजलप्रत्यधिदेवतासहिताय नमः आसनंपाद्यादिदक्षिणांतंसंपूज्य प्रार्थयेत् अहोचंद्रजगत्प्राणयमुनाविषयोद्भव सुश्वेतात्रेयगोत्रेयगदाभयवरप्रद द्विजराजोमहापुण्यस्तारापतिर्विशेषतः ओषधीनांमहाराजःससोमःप्रीयतांमम ॥ २ ॥ अथभौमपूजा ओंभूर्भुवःस्वः अवंतीसमुद्भवभारद्वाजसगोत्र स्कंदाधिदेवताभूमिप्रत्यधिदेवतासहित भौमइहागच्छ इहतिष्ठ भूमिपुत्रोमहाकायस्तेजस्वीचाभयंकरः ऋषिभिःस्तूयमानस्तुभौममावाहयाम्यहं ओंभौमायाधिदेवताप्रत्यधिदेवतासहितायनमः आसनपाद्यादिदक्षिणांतांसर्वोपचारपूजांसमर्पयामि प्रार्थना उज्जयिन्यांसमुत्पन्नभोभोभौमचतुर्भुज भारद्वाजकुलेजातः शूलश

क्तिगदाधरः वरदोमेषमारूढःस्कंदप्रियतडित्प्रभः स्योनापृथिवीतिमंत्रेणदलेयाम्यैप्रतिष्ठितः येनार्जैताजगत्कांतिर्भूमिपुत्रेणशाश्वती शत्रवश्चहतायेनभौमेनमहतात्मना सप्रीतयेमेभौमोद्यतुष्टोभूयाद्वरप्रदः ॥ ३ ॥ अथवुधपूजा उँभूर्भुवःस्वः मगधदेशोद्भवआत्रेयसगोत्रविष्णुनारायणाधिदेवताप्रत्यधिदेवतासहितवुधइहागच्छ इहतिष्ठ मेरुमूर्ध्निसदातिष्ठन्देवतानांपुरोहितः ब्राह्मणानांहितार्थायगुरुमावाहयाम्यहं उँबृहस्पतयेब्रह्मेंद्राधिदेवताप्रत्यधिदेवतासहितायनमः आसनपाद्यादिदक्षिणांतपूजांसमर्पयामिनमः दंडाक्षसूत्रवरदकमंडलुधरप्रभो महोइंद्रेतिसंपूज्योवीधिवच्चेतरेदले मेरुमूर्ध्निसमाक्रांतोदेवराजपुरोहितः ज्ञाताय:सर्वशास्त्राणांसगुरुः प्रीयतांमम ५ अथशुक्रपूजा उँभुर्भुवः स्वः भोजकटदेशोद्भव इंद्राधिदेवतेंद्राणीप्रत्यधिदेवतासहितशुक्रइहागच्छ इहतिष्ठप्रादीतेजाः प्रभाशूरोदानवानांपुरोहितः तेजोहासर्वशत्रूणांशुक्रमावाहयाम्यहं उँशुक्रायेंद्रेंद्राण्याधिदेवताप्रत्यधिदेवतासहितायनमः परिघाक्षावलीहस्तकमंडलुधरप्रभो शुक्रवत्पूर्वपत्रेतुशुक्रोज्योतिःस्वरूपकः सोमतुल्याप्रभायस्यचासुराणांगुरुस्तथा जेतायः सर्वशत्रूणांसकाव्यःप्रीयतांमम ॥ ६ ॥ अथशनिपूजा उँभूर्भुवःस्वः सौराष्ट्रदेदेशोद्भवकाश्यपसुगोत्रयमाधिदेवताप्रजापत्याधिदेवतादुर्गादेवतासहित शने इहागच्छ इहतिष्ठ कृष्णाक्षःकृष्णावर्णश्चकृष्णगंधानुलेपनः शनैश्चरन्नानिरीक्षश्चशनिमावाहयाम्यहं उँशनैश्चरायनमः आसनादिदक्षिणांतपूजा प्रार्थना कृष्णवर्णःकृशांगश्चनीलजीमूतसान्निभः शनैश्चरःसूर्यपुत्रःसशौरिःप्रीयतांमम त्रिशूलिन्समगच्छवरदोगृध्रवाहनः प्रजापतेतिसंपूज्योयमवद्वारुणेदले १ इतिशनिपूजा ७ अथराहुपूजा उँभूर्भुवःस्वःस्वराढिकापुरोद्भवपैठीनसीगोत्रकालाधिदेवतासर्पप्रत्यधिदेवतासहितविनायकाकाशदेवतासहितराहोइहागच्छ रक्तवर्णंमहाक्रूरं रक्ताजिनधरंतथा सिंहिकागर्भसंभूतंराहुमावाहयाम्यहं आसनादिदक्षिणांतंपूजनं प्रार्थना रक्षार्थं धूम्रवर्णाभो

विजितारिर्महाबलः अवाहुश्चांतरिक्षस्थः सराहुःप्रीयतांमम २ अथकेतुपूजा ॐभूर्भुवः स्वः अंतर्वेदीसमुद्भवजैमिनिसुगोत्र चित्रगुप्ताधिदेवताब्रह्मप्रत्याधिदेवता अश्विनीदेवतासहित केतोइहागच्छ क्रूरान्वैगमिनोइष्टाशुभाशुभफलप्रदान् एकाधिकसहस्रंतुकेतूनावाहयाम्यहं आसनादिदक्षिणांतपूजा प्रार्थना अग्निपुत्रोमहातेजाःकेतुः सर्वत्रहांतकः क्षोभयेद्यः प्रजाः सर्वाः सकेतुः प्रीयतांमम अथइंद्रादिदिक्पालपूजनं ॐ भूर्भुवः स्वःइंद्रइहागच्छ अग्नेइहागच्छ यमइहागच्छ निर्ऋतेइहागच्छ वरुणइहागच्छ वायोइहागच्छ कुवेरइहागच्छईश्वरइहागच्छ इहतिष्ठेत्यावाह्य पूजयेत् एषांमंत्राणिवलिदानपूजायामग्रेलिख्यंते ततोग्निस्थापनंत्रिभिर्दर्भैःकुंडंस्थंडिलंवापरिसमूह्यगोमयेनोदकेनोपलिप्य स्रुवमूलेनत्रिरुल्लिख्यअनामिकांगुष्ठाभ्यांरेखाभ्यः पांशुमुद्धृत्य तत्राग्निं समाधायअग्निस्थापनमंत्रः अग्निंदूतमित्यस्यमेधातिथिर्ऋषिः गायत्री छंदोग्निर्देवता अग्निस्थापनेविनियोगः अग्निंदूतंवृणीमहे होतारंविश्ववेधसंअस्ययज्ञस्यसुक्रतुं अत्रापरोमंत्रश्चअग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवेदेवानासादयादिह अथाग्नेरावाहनंआयाहिदेवपुरुषंमहांतंसुरासुरैर्ब्रह्महरीश्वराद्यैः ब्रह्मादयोयस्यमुखेवसंतिप्रविष्टकुंडेसुरलोकनाथअथध्यानंप्राङ्मुखोवसतेवन्हिःप्राङ्मुखस्याद्विजस्यच प्राक्प्रणीताश्चयेमंत्रास्तेश्चप्रत्यङमुखोभवेत् हृदयैकंद्विवक्त्रकंद्विनासिकंचषडाक्षिकंत्रिमेखलंत्रिपादंचसप्तजिव्हाभिरन्वितंमेषारूढंचतुःशृंगंजटामुकुटमंडितंदक्षिणेतुचतुर्हस्तंवामभागेत्रिहस्तकंशक्तिरग्नेस्तथाचैवस्रुक्स्रुवंदक्षिणेकरे तोमरंव्यजनंचैवधृतपात्रंचवामतः तवरूपमिदंवक्ष्येध्यानंसर्वार्थसाधकं ततअग्निपूजा अग्नयेस्वाहासहितायपाद्यादिनमःततोब्रह्मस्थापनं हिरण्यगर्भइतिमंत्रस्यब्रह्माऋषिःगायत्रीछंदःब्रह्मादेवताब्रह्मस्थापनेविनियोगःॐहिरण्यगर्भः समवर्तताग्रेभूतस्यजातः पतिरेकआसीत्सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम इत्येवंब्रह्माणमासनोपरिनिधाय आसनादिदक्षिणांतंसंपूज्य ततोब्रह्मणोवरणं

ॐतत्सत्‌अद्यास्मिन्वर्षेजनिष्यमाणादिव्यांतरिक्षभौमोत्पातवर्गदुः स्वप्नदुर्निमित्तादिसकलग्रहवैगुण्यकृतसर्वारिष्टनिवृत्तिपूर्वकस्वदेशदेहकुटुंबपरिवारवर्गादौधनधान्यसंपत्त्यारोग्यादिसदभीष्टसिद्ध्यर्थेकर्त्तव्येस्मिन्महाशांति यागहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकप्रवरममुकवेदशाखाध्यायिनममुकशर्माणमेभिःपुष्पचंदनतांबूलोपवीतपवित्रवासोदक्षिणादिभिरभ्यर्च्यब्रह्मत्वेनत्वामहंवृणे वृतोस्मीतिप्रतिवचनं यथाविहितंकर्मकुरुकरवाणीतिब्राह्मणोवदेत् अथकलशस्थापनम् तेचषट्कलशाःएकोत्तरशांतिकलशाः १ एकोवह्निकोणे २ एकोनैर्ऋत्ये ३ एकोवायव्ये ४ एकऐशाने ५ एकश्चमध्ये ६ तत्रओषधीपंचरत्नानिरोचनं चंदनंसिद्धार्थकान्शमीदूर्वा कुशान्यवव्रीहिअपामार्गफलवतीप्रियंगुन्यग्रोधोदुंबरप्लक्ष अश्वत्थपल्लवान् सकषायान् कपित्थप्रियंगुचूतपल्लवान् हस्तिदंतगजमदं सप्तमृत्तिकाश्च कोणचतुष्टयकुंभेषुनिक्षिपेत् मध्यकलशेमंत्रवत्पंचगव्यंविशेषतोनिक्षिपेत् अथैतेषांस्थापनक्रमः : ॐमहीद्यौःपृथिवीचनइमंयज्ञमिमिक्षतांपिपृतान्नोभरीमभिः इतिभूमिंस्पृशेत् धान्यमसिधिनुहिदेवान् प्राणायत्वोदानायत्वाव्यानायत्वा दीर्घामनु प्रसिति मायुषेधां देवोवःसविताहिरण्यपाणिःप्रतिगृभ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनांपयोसि इतिसप्तधान्यप्रक्षेपः तस्योपरिकलशंस्थापयेत् आजिघ्रकलशंमह्यात्वाविशंत्विंदवः पुनरूर्जानिवर्त्तस्व सानः सहस्रधुक्ष्वोरुधारापयस्वतीपुनर्माविशताद्रयिः इतिकलः शंसंस्थाप्य कलशोत्पत्तिंपठेत् उत्तरेहिमवत्पृष्ठेक्षीरोदोनामसागरः उत्पन्नःकलशस्तत्रसर्वतीर्थसमन्वितः कलंकलोहिदेवानांदानवानांतथैवच कलाभिः सकलादेवाःसौम्यमांगल्यकर्मणि निर्मितोयंतदातत्रकलशस्तेनउच्यते धारितोविश्वरूपेणकलशःकामरूपिणा कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः मूलेतस्यास्थितोब्रह्मामध्येमातृगणाःस्मृताःकुक्षौतुसागराःसप्तसप्तद्वीपावसुंधरा अर्जुनीगोमतीचैवचंद्रभागासरस्वती कावेरीकृष्णवेणीचगंगाचैव

महानदी सिप्रावेत्रवतीपूर्णाचर्मण्वतीचदेविका तापीगोदावरीचैवनर्मदाचमहानदी पराशरीपयोष्णीचसरयूर्गंडकीतथा ज्वालाक्षिप्रामहातीर्थंशोणमामरकंटकं केदारंचप्रयागंचयमुनावाराणसीतथा विंध्यपादेषुतीर्थानि श्रीपादेयानिसंतिवै प्रभासंपुष्करंचैवगंगासागरसंगमं पृथिव्यांयानितीर्थानिपातालेसंस्थितानिच तानिसर्वाणितीर्थानिकलशेनिवसंतिवै सहिरण्यं सवस्त्रंच पुष्पमालासमन्वितं ऋग्वेदोथयजुर्वेदः सामवेदस्तथैवच अथर्ववेदश्चतथाकलशेसुप्रतिष्ठिताः ईशानकोणेसंस्थाप्यरुद्रकुंभंसुशोभनं चूताश्वत्थवटप्लक्षन्यग्रोदुंबरपल्लवान् पंचपल्लवसंयुक्तंदधिचंदनचर्चितं तंडुलोपरिसंस्थाप्यसर्वतोधूपदीपनं तथैवनारिकेलंचकलशोपरिविन्यसेत् आजिघ्रेकेतिमंत्रेणकलशेतान्प्रतिष्ठयेत् इतिकलशोत्पत्तिंप्रभावंचस्मृत्वा ओंवरुणस्योत्तंभनमसिवरुणस्यस्कंभसर्जनीस्थो वरुणस्यऋतसदन्यासि वरुणस्यऋतसदनमसिवरुणस्यऋतसदनमासीद इति जलेनापूर्य्य पंचपल्लवमंत्रः अश्वत्थेवोनिषदनं पर्णेवोवसतिःकृता गोभाजइत्किलायत्सनवथपूरुषं अथदूर्वाप्रक्षेपः कांडात्कांडात्प्ररोहंतीपरुषःपरुषस्परि एवानोदूर्वेप्रतनुसहस्त्रेणशतेनच अथपूगीफलमंत्र·याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीःबृहस्पतिप्रसूतास्तानोमुंचत्वंहसः अथपंचरत्नमंत्रः कनकं १ कुलिशं २ नीलं ६ पद्मरागंच ४ मौक्तिकं प्रोक्तानिपंचरत्नानिनारदेनमहर्षिणा ओंपरिवाजपतिःकविरग्निर्हव्यान्यक्रमीतदधद्रत्नानिदाशुषेअथहिरण्यमंत्रः हिरण्यगर्भःसमवर्त्तताग्रे भूतस्यजातः पतिरेकआसीत् सदाधारःपृथिवींद्यामुतेमांकस्मैदेवायहविषाऽविधेम अथगंधद्रव्यमंत्रःगंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् अथसर्वौषधिमंत्रः याओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा मनैनुवभ्रूणासहस्त्रंशतंधामानिसप्तच अथसप्तमृत्तिकामंत्रःअश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् राजद्वाराद्गोकुलाच्चमृदमानीयानिक्षिपेत् स्योनापृथिवीनोभवानृक्षरानिवेशनीय

च्छानःशर्म्मसप्रथाःअथकुशपवित्रमंत्रःपवित्रेस्थोवैष्णव्यौसवितुर्वः प्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिःतस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयं कलशोपरि तंडुलपूर्णपात्रं पूर्णादर्विपरापतसुपूर्णापुनरापतवस्तेवविक्रीणावहा इषमूर्जꣳशतक्रतो कलशोपरिश्रीफलंनिधाय श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणि रूपमश्विनौव्यात्तं इष्णंनिषाणामुम्मइषाणसर्वलोकंमइषाण ओंमनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञꣳसमिमंदधातुविश्वेदेवासइहमादयंतामोंप्रतिष्ठओंभूर्भुवःस्वः गणेशवरुणइहागच्छ इहतिष्ठ गणानांत्वा गणपतिꣳहवामहे इतिगणपतिमावाह्य ओंतत्वायामिव्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः अहेडमानोवरुणेहवोध्युरुशꣳसमानआयुः प्रमोषी इतिषोडशोपचारैः संपूज्य कलशेषुगंगाद्यावाहनं सर्वेसमुद्राः सरितस्तीर्थानिजलदानदाःआयांतुयजमानस्यदुरितक्षयकारकाः ततः कलशानामाभिमंत्रणंकलशस्यमुखेविष्णुरित्यादिपूर्वोक्तामंत्राः कलशंतुसमाश्रिता इत्यंतंपठनीयाः ततः पुनरेवंप्रार्थयेत् देवदानवसंवादेमथ्यमानेमहोदधौ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं त्वयिसर्वाणितीर्थानिदेवाःसर्वेत्वयिस्थिताःत्वयितिष्ठंतिभूतानित्वयिप्राणाः प्रतिष्ठिताः शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः त्वयितिष्ठंतिसर्वेपियतः कामफलप्रदः त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदा इतिकलशानांप्रार्थनांतंसर्वैसर्वैर्व्राह्मणैराग्निकोणादिवेदिकामध्यस्थैश्चकार्य्यं कलशानामुपरिसूक्तदेवानांमूर्त्तिस्थापनंपूजनंचकार्य्यंऋचंवाचंप्रपद्येइतिपठित्वावह्निकोणकुंभाभिमंत्रणं १ आशुःशिशानइतिनैर्ऋत्यकुंभाभिमंत्रणं २ यद्देवादेवहेडनं वायव्यकुंभाभिमंत्रणं ३ ईशावास्यमितीशानकुंभाभिमंत्रणं ४ ओंनमस्तेरुद्रमन्यवइति मध्यकुंभाभिमंत्रणं कार्य्यं ततःसर्वेषांकलशानांगंधपुष्पाक्षतैर्घृतपाचितनैवेद्यैः नारिकेलादिफलैः वस्त्रैर्दीपकैः पुष्पमालादिभिः पृथक्

पृथक् पूजनंकार्य्यं कुंभपूजानंतरं स्वस्त्ययनपाठःसर्वैरेवकार्य्यः अथाचार्य्यःकुशंडिकाक्रमंकुर्य्यात् ब्रह्मवरणं पूर्वं नकृतंचेदत्रकार्य्यं तत्रादौ यजमानोयष्टव्यदेवपूजानंतरं होमद्रव्यत्यागंकुर्यात् ॐमद्यास्मिन्महाशांतिहोमकर्मणिमयासंपादितामिदंहोमद्रव्यंयष्टव्यसमस्तदेवताहोमार्थंमयात्यक्तमित्यभिलपेत् ततआचार्य्य अग्नेर्दक्षिणतः शुद्धमासनंदत्वा तदुपरि प्रागग्रान्कुशानास्तीर्य्य ब्रह्माणमग्निप्रदक्षिणक्रमेणानीय अत्रत्वंमेब्रह्माभवेति कल्पितासने उपवेशयेत् ततःप्रणीतापात्रंपुरतःकृत्वाजलेनापूर्य्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्य अग्नेरुत्तरतःकुशोपरिनिदध्यात् ततः परिस्तरणं वर्हिषश्चतुर्थभागमादाय आग्नेयादीशानांतंब्रह्मणोऽग्निपर्यंतंनैर्ऋत्याद्वायव्यांतं. अग्नितःप्रणीतापर्यंतंकुशानांपरिस्तरणं ततोग्नेरुत्तरतःपाश्चिमादिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनंतरगर्भंकुशपत्रद्वयंप्रोक्षणीपात्रं आज्यस्थालीस्रुवसंमार्जनार्थंकुशत्रयं उपयमनार्थवेणीरूपकुशत्रयं प्रादेशमात्रास्तिस्रःसमिधःस्रुवआज्यं षट्पंचाशदुत्तरमुष्टिशतद्वयावच्छिन्नामतंडुलपूर्णं पूर्णपात्रंपवित्रच्छेदनकुशानांपूर्वपूर्वदिशिक्रमेणासादनीयानि तस्यामेवदिशि असाधारणवस्तून्युपकल्पनीयानिततःपवित्रच्छेदनकुशैः पवित्रकरणकुशद्वयंछित्वा प्रादेशमितपवित्रद्वयकरणं सपवित्रहस्तेनप्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिधाय अनामिकांगुष्ठाभ्यां पवित्रेगृहीत्वात्रिरुत्पवनं प्रोक्षणीपात्रस्यसव्यहस्तकरणंतथैवप्रणीतोदकेनत्रिःप्रोक्षणीप्रोक्षणंप्रोक्षणीजलेनयथासादितवस्तुसेचनं आग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिधाय आज्यस्थाल्यामाज्यनिर्वापः ततोधिश्रयणं ॐकयानश्चित्रआभुवदूतीसदावृधःसखाकयाशचिष्ठयावृताततोज्वलत्तृणादिनाहविर्वेष्टयित्वाआग्निंप्रदक्षिणीकृत्य अग्नौतत्प्रक्षिपेत् इत्याज्यसंस्कारंकृत्वा ततःस्रुवप्रतपनंकृत्वा संमार्जनकुशानामग्रैःस्रुवस्यांतरतोग्रांतंमूलैर्बाह्यतो मूलांतं मध्येनमध्यं पुनःस्रुवप्रतपनंकृत्वा प्रणीतोदकेनाभ्युक्ष्यस्रुवंदक्षिणतोनिदध्यात् ततआज्यस्याग्नेरव

तारणं ततःपुरुषसूक्तेनपायसश्रयणंकुर्य्यात् ओंसहस्रशीर्षापुरुषः सहस्राक्षःसहस्रपात् सभूमिꣳ सर्वतःस्पृत्वात्यतिष्ठद्दशांगुलम् १६ इतिषोडशऋचांपाठः पायसंभुविस्थापयित्वा ततःपायसेआज्येचप्रोक्षणीवदुत्पवनंसत्यपद्रव्येतान्निरसनं पुनःप्रोक्षण्युत्युत्पवनं ततउपयमनकुशान्वामहस्तेकृत्वा उत्तिष्ठन् प्रजापतिं मनसाध्यात्वातूष्णीं घृताक्ताः समिधस्तिस्रःक्षिपेत् ततउपविश्यसपवित्रप्रोक्षण्युदकेनप्रदक्षिणक्रमेणाग्निपर्य्युक्षणंकृत्वा ओंसूर्यस्याषँ पृश्नयाःपयोसितस्यतेक्षीयमानस्यपिण्वमानंनिर्वपामि पंचानांत्वादेवाभ्यागृह्णामि गृहीत्वायजूनांभृगूणांसोमरश्मिरिति ऊर्जेत्यन्नावधिश्रयतिततउत्तार्य्यदर्भपवित्रेण उत्तानद्वयस्यांगुष्ठानामिकाभ्यांगृहीतेन ओंअग्नेजिह्वासिपूदेवेभ्योधाम्नेधाम्नेत्वायजुषेयज्वनंइतिसकृन्मंत्रेणाद्विस्तूष्णींप्रणीतापात्रपवित्रेनिधायपातितदक्षिणजानुः कुशाग्नेर्ब्रह्मणान्वारब्धःसमिद्धतमेग्नौ स्रुवेणाज्याहुतीर्जुहुयात् तत्राघारादारभ्यद्वादशाहुतिषुतत्तदाहुत्यनंतरंहुतशेषघृतस्यप्रोक्षणीपात्रेनिक्षेपःकार्य्यः अथहोमः प्रथमंकेवलाज्येन प्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा १ इंद्रायस्वाहा इदमिंद्राय इत्याघारौ २ ओंअग्नयेस्वाहा इदमग्नये ३ सोमायस्वाहा इदंसोमाय ४ इत्याज्यभागौ ओंभूःस्वाहा इदंभूः ओंभुवःस्वाहा इदंभुवः ६ ओंस्वःस्वाहा इदंस्वः ७ एतामहाव्याहृतयः ओंत्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवाह्नितमः शोशुचानोविश्वाद्वेषाꣳ सिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्निवरुणाभ्यां ८ ओंसत्वंनोअग्नेवमोभवोतीनेदिष्ठो अस्याउषसोव्युष्टौ अवयक्ष्वनोवरुणꣳरराणोब्रीहिमृडीकꣳसुहवोनएधिस्वाहा इदमग्निवरुणाभ्यां९ ओंअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्यमयाअसि अयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहा इदमग्नये १०ओंयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशाविततामहांतः तेभिर्नो अद्यसवितोतविष्णुर्विश्वेमुंचतुमरुतःस्वर्काःस्वाहा इदंसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः१२ ओंउदुत्तमं

वरुणपाशमस्मदवाधमंविमध्यमंश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा इदंवरुणाय १२
अथप्रोक्षणमंत्रः ओंआपःशिवाःशिवतमाः शांताःशांततमास्तास्तेकृण्वंतुभेषजम् इत्याघाराज्यभागौप्रायश्चित्ताहुती
र्वारुणसंज्ञकाश्चहुत्वा ततः पुरुषसूक्तसिद्धेनचरुणासप्ततेअग्नइतिमंत्रेणसप्तपालाशीः समिधोजुहुयात् ओंसप्तते
अग्नइतिमंत्रस्याग्निऋषिः जगतीत्रिष्टुप्छंदःसप्तवान् अग्निर्देवता होमेविनियोगः ओंसप्तते अग्नेसमिधः सप्त
जिह्वाः सप्तऋषयः सप्तधामप्रियाणिसप्तहोतासप्तधात्वांयजंति सप्तयोनीरापृणस्वघृतेनस्वाहा इतिसप्ताहु
तीर्हुत्वा ७ जातवेदसेइतिमंत्रेणच सप्ताहुतीर्जुहुयात् जातवेदसे इतिदुर्गामंत्रस्य कश्यपऋषिः त्रिष्टुप्छंदोग्निर्दु
र्गादेवताहोमेविनियोगः ओंजातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः सनःपर्षदतिदुर्गाणिविश्वानावेवासिं.
धुंदुरितात्यग्निःस्वाहा इतिसप्ताहुतीःपालाशीःसमिधोहुत्वा ७ पुनरपिजातवेदसे इतिमंत्रेण अष्टादशप्रमाणाः
शमीसमिधोजुहुयात् १८ स्थालीपाकचरुणैवायंसर्वोहोमःकार्य्यः ततस्तरत्समंदीसूक्तेनचतस्रआहुतीर्जुहुयात्
ओंतरत्समंदीधावतिधारासुतस्यांधसः तरत्समंदीधावति उस्रोदेववसूनांमर्त्यस्यदेव्यवसः स्वाहा १ तरत्सम
दीधावतिसुतस्यांधसः तरत्समंदीधावतिध्वस्रयोः पुरुषंत्योरासहस्राणिदद्महेस्वाहा २ तरत्समंदीधावतिधारा
सुतस्यांधसः तरत्समंदीधावति आययोस्त्रिंशतंतनासहस्राणिचदद्महेस्वाहा ३ तरत्समंदीधावतिधारासुतस्यां
धसः तरत्समंदीधावतित्रिविष्टंदेवसवितर्वर्षिष्ठैःसोमधामभिः अग्नेदक्षैः पुनीहिमःस्वाहा ४ इत्यपिशमीसमित्पौ
रुषसूक्तचरुणाहोमः यमायेतिचसप्तान्याःस्वाहांताजुहुयात्ततः ओंयमायसोमइतिमंत्रस्य यमऋषिःयमोदेवता.
त्रिष्टुप्छंदः होमेविनियोगः ओंयमायसोमंस्वधतयमायजुहुयाहविः यमेहयज्ञागच्छत्यग्निदूतोअरंकृतःस्वाहा
७ इदंविष्णुस्ततःसप्तजुहुयादाहुतीर्नृप इतिसप्ताहुतीर्जुहुयात् ओंइदंविष्णुरितिसोमऋषिर्गायत्रीछंदः विष्णु

दैवताहोमेविनियोगः ॐइदंविष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्यपाꣳसुरेस्वाहा ८ नक्षत्रेभ्यस्त
तःस्वाहा सप्तविंशतिराहुतीः २७ जुहुयात् ॐकृत्तिकाभ्यःस्वाहा १ रोहिण्यैस्वाहा २ मृगशि
रसेस्वाहा ३ आर्द्रायैस्वाहा ४ पुनर्वसूभ्यांस्वाहा ५ तिष्यायस्वाहा ६ अश्लेषायस्वाहा ७ मघाभ्यःस्वा
हा ८ पूर्वाफाल्गुनीभ्यांस्वाहा ९ उत्तराफाल्गुनीभ्यांनमः १० हस्तायस्वाहा ११ चित्रायैस्वाहा १२ स्वा
त्यैस्वाहा १३ विशाखाभ्यांस्वाहा १४ अनुराधायैस्वाहा १५ ज्येष्ठायैस्वाहा १६ मूलायस्वाहा १७ पू
र्वाषाढाभ्यःस्वाहा १८ उत्तराषाढाभ्यःस्वाहा १९ श्रवणायस्वाहा, २० धनिष्ठाभ्यःस्वाहा २१ शतभिषेस्वा
हा २२ पूर्वाभाद्रपदाभ्यःस्वाहा २३ उत्तराभाद्रपदाभ्यःस्वाहा २४ रेवत्यैस्वाहा २५ अश्विनीभ्यः स्वाहा
२६ भरणीभ्यःस्वाहा २७ यत्कर्मणाहुतं तत्कर्मणास्वाहा ॐअग्नयेस्विष्टकृतेस्वाहा ग्रहहोमस्ततः कार्यस्ति
लैराज्यपरिप्लुतैः अथग्रहहोमः तेषांसमिधः अर्कःपलाशः खदिरअपामार्गश्चपिप्पलः। इदुंवरः शमीदूर्वाकुशा
श्चसमिधःक्रमात् १ आर्कीनाशयतेव्याधिंपालाशीसर्वकामदा खादिरीचार्थलाभायअपामार्गीवहुप्रजा आश्व
त्थीचशुभंदद्यादृतंदद्यादुदंवरी शमीशमयतेपापंदूर्वामंगलवर्द्धिनी कुशाश्चपितृतृप्त्यर्थमेवंताःसमिधनव ३ अ
र्कसमिधःआकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतंमर्त्यंच हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्स्वा
हा पालाशीसमिधः इमन्देवाअसपत्नꣳसुवध्वंमहते क्षत्रायमहते ज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रियायइ
ममुष्यपुत्रममुष्यैपुत्रमस्यै विशएषवोमीराजासोमोस्माकं ब्राह्मणानाꣳराजास्वाहा इदंचंद्रमसे २ खदिरस
मिधः अग्निर्मूर्धादिवः ककुत्पतिः पृथिव्या अयं अपाꣳ रेताꣳसि जिन्वतिस्वाहा इदंभौमाय ३
अपामार्गसमिधः उद्बुध्यस्वाग्नेप्रतिजागृहीत्वामिष्टापूर्त्तेसꣳ सृजेथामयंच अस्मिन्सधस्थे अध्युत्तरस्मिन्

विश्वेदेवायजमानश्चसीदतस्वाहा इदंवुधाय ४ अश्वत्थसमिधः ऊँवृहस्पते अतियदर्य्यो अर्हाद्युमद्विभातिक्रतुमज्जनेषु यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधेहिचित्रᳫंस्वाहा इदंवृहस्पतये उर्दुवरसमिधः ऊँअन्नात्परिस्त्रुतोरसंव्रह्मणाव्यपिवत्क्षत्रंपयः सोमंप्रजापतिः ऋतेनसत्यमिंद्रियंविपानᳫंशुक्रमंधस इंद्रस्येंद्रियमिदंपयोमृतंमधुस्वाहा इदंशुक्राय ६ शमीसमिधः शन्नोदेवीरभिष्टयआपोभवंतुपीतयेशंय्योरभिस्त्रवंतुनः इदंशनैश्चराय ७ दूर्वाःऊँकयानश्चित्रआभुवदूतीसदावृधःसखाकयाशचिष्ठयावृतास्वाहा इदंराहवे ८ कुशसमिधः ऊँकेतुंकृण्वन्नकेतवेपेशोमर्य्याअपेशसे समुषद्भिरजायथास्वाहा इदंकेतवे ९ अनेनहोमेन सूर्य्यादयो नवग्रहाःप्रीयंतां अथप्रार्थना सहस्त्रकिरणःश्रीमान्सप्ताश्वोलोकवांधवः भक्तानांवरदोभानुःप्रीतोभवतुभास्करः१ वृद्धिर्यस्यासितेपक्षेसुराणाममृतंतुयः संपूर्णमंडलोवालःससोमःप्रीयतांमम २ भूमिपुत्रोमहातेजावह्निरूपीमहावलः ग्रहाणामधिपःश्रेष्ठःसभौमःप्रीयतांमम ३ सिंहासनस्थोवरदःकर्णिकारसमद्युतिः खड्गचर्मगदापाणिः सवुधोवरदोस्तुनः ४ दंडाक्षसूत्रधारीचकमंडलुधरःसदा पीतवर्णश्चतुर्वाहुःपातुनोवाक्पतिर्ध्रुवम् ५ श्वेतवर्णश्चतुर्वाहुःसाक्षसूत्रकमंडलुःसरस्वत्यापरंधामशुक्रोभूयाद्वरप्रदः ६ कृष्णवर्णःकृशांगश्चनीलजीमूतसन्निभःसशनिःसूर्यपुत्रश्चसर्वदाप्रीयतांमम ७ चंद्रार्कौग्रसतेयस्तुभीमःपर्वणिपर्वणि राहुःसदानवश्रेष्ठःसर्वदाप्रीयतांमम ८ पीडयंतेपीडयायस्यदेवगंधर्वकिन्नराः सकेतुर्धूम्रवर्णश्चसर्वदाप्रीयतांमम ९ ऊँरुद्रायस्वाहा १ उमायैस्वाहा २ स्कंदायस्वाहा ३ विष्णवेस्वाहा ४ व्रह्मणेस्वाहा ५ यमायस्वाहा ६ कालायस्वाहा ७ चित्रगुप्तायस्वाहा ८ इत्यधिदेवताहोमः ऊँअग्नयेस्वाहा १ अद्भ्यःस्वाहा २ पृथिव्यैस्वाहा ३ ऊँनारायणायस्वाहा ४ इंद्रायस्वाहा ५ इंद्राण्यैस्वाहा ६ प्रजापतयेस्वाहा ७ सर्प्पेभ्यःस्वाहा ८ व्रह्मणेस्वाहा ९ इतिप्रत्यधिदेवता

होमः ओंविनायकायस्वाहा १ दुर्गायैस्वाहा वायवेस्वाहा ३ आकाशायस्वाहा ४ अश्विभ्यांस्वाहा ५ इति विनायकादिपंचदेवताहोमः ओंइंद्रायस्वाहा १ अग्नयेस्वाहा २ यमायस्वाहा ३ निर्ऋतयेस्वाहा ४ वरुणायस्वाहा ५ वायवेस्वाहा ६ कुबेरायस्वाहा ७ ईशानायस्वाहा ८ अनंतायस्वाहा ९ ओंब्रह्मणेस्वाहा १० इतिदिक्पालहोमः प्रायश्चित्ताहुतयोमहाव्याहृतीनामाहुतयश्च अत्रापिदेयाइतिपद्धतिकारः ततःसंस्रवंप्राश्य पुनराचम्य पूर्णपात्रदानं ओमद्यकृतेस्मिन्महाशांतियागकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंसदक्षिणंप्रजापतिदैवतंयथानामगोत्रायआचार्यायतुभ्यमहंसंप्रददे ततःप्रणीताविमोकः ततोभिषेकः काश्मीर्यवृक्षसंभवभद्रासनस्थस्ययजमानस्यपंचकलशोदकैः साचार्य्यैर्ब्राह्मणैःकर्तव्यःतत्रमंत्राः सहस्राक्षमितिमंत्रस्यप्रजापतिऋषि इंद्रोदेवता त्रिष्टुप्छंदः यजमानाभिषेकेविनियोगः ओंसहस्राक्षंशतधारऋषिभिःपावनं कृतंतेनत्वामभिषिंचामि पावमान्यः पुनंतुते १ भगंतेवरुणोराजाभगंसूर्य्योबृहस्पतिः भगमिंद्रश्चवायुश्चभगंसप्तर्षयोदधुः २ यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुसर्वदा ३ सजोषा इंद्रसगणोमरुद्भिः सोमंपिव वृत्रहाशूरविद्वान्जहिशत्रूनपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः ४ सजोषाइंद्रसगणोविश्वानिवरुणेनतुशूर विद्वान्जहिशत्रूनपमृधोनुदस्वामयंकृणुहिविश्वतोनः ५ द्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव पतंपवित्रेणेवाज्यमापःशुंधंतुमैनसः ६ आपोहिष्ठामयोभुवस्तानऊर्ज्जेदधातन २ महेरणायचक्षसे ३ योवःशिवतमोरसः ४ तस्यभाजयतेहनः ५ उशतीरिवमातरः ६ तस्माअरंगमामवः ७ यस्यक्षयायजिन्वथ इतिभूमौ ८ आपोजनयथाचनः ९ ॥ अन्यैरपिवेदमंत्रैरभिषेकः अथपौराणिकमंत्राः सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा

वरुणःपवनश्चैव धनाध्यक्षस्तथाशिवः व्रह्मणासहिताः शेषोदिक्पालाःपांतुतेसदा कीर्तिर्लक्ष्मीर्धृतिर्मेधातुष्टिः श्रद्धाक्रियारतिः वुद्धिर्लज्जावपुःशांतिःपुष्टिःकांतिश्चमातरः एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः आदित्यश्चंद्रमाभौमोवुधोजीवःसितोर्कजः ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चतर्पिताःदेवदानवगंधर्वायक्षराक्षसपन्नगाः ऋषयोमनवोगावोदेवमातरएवच देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः अस्त्राणिचैवशस्त्राणिराजानोवाहनानिच औषधानिचरत्नानिकालस्यावयवाश्चये सरितःसागराःशैलास्तीर्थानिजलदानदाः एतेत्वामभिषिंचंतुधर्मकामार्थसिद्धये इत्यभिषेकः होमावसानेकृततूर्य्यनादोगुरुर्गृहीत्वावलिपुष्पधूपं आवाहयेल्लोकपतीन्क्रमेणमंत्रैरमीभिर्यजमानयुक्तः ॐएह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरामरेश संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते ॐत्रातारमिन्द्र मवतारमिन्द्रꣳहवेहवेसुहवꣳ शूरमिन्द्रम् ह्वयामिशक्रंपुरुहूतमिन्द्रꣳ स्वस्तिनोमघवाधात्विद्रः भोइंद्रइहागच्छ इहतिष्ठ इंद्रायनमः इत्यासनादीनि दत्त्वा पूजयेत् एवमिंद्रसांगसपरिवारंसायुधंसशक्तिकंपूजयेत् इहागच्छइहतिष्ठेत्यावाह्य इंद्रऐरावतारूढोवज्रपाणिर्महावलः देवतानांचयोराजाइंद्रमावाहयाम्यहं गंधाद्युपचारैःसंपूज्य इंद्रःसुरपतिश्रेष्ठोवज्रपाणिर्महावलः शतयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमः इतिनत्वा इंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकायामुंसदीपंमाषभक्तवलिंसमर्पयामिनमः भोइंद्रेमं सदीपं माषभक्तवलिं भक्ष ममयजमानस्य आयुःकर्ता क्षेमकर्ता शुभकर्ता पुष्टिकर्तातुष्टिकर्तावरदोभव ततःप्रार्थना इंद्रस्तुमहसादीप्तःसर्वदेवाधिपोमहान् वज्रहस्तोमहासत्त्वस्तस्मैनित्यंनमोनमः १ अथाग्नेरावाहनं ॐएह्येहिसर्वामरहव्यवाहमुनिप्रवारैरभितोभिजुष्ट तेजोवतालोकगणेनसार्द्धंममाध्वरंरक्षकवेनमस्ते ॐअग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे देवांआसादयादिहभोअग्नेइहागच्छह

तिष्ठत्यावाह्य अग्नये सपरिवाराय नमइतिपाद्यादिभिःसंपूज्य ततोबलिंदद्यात् अग्नयेसायुधायसशाक्ति
कायसपरिवारायामुंसदीपंमाषभक्तबलिंसमर्पयामिनमः भोअग्नेइमंसदीपंमाषभक्तबलिंभक्षममयजमानस्यसपरि
वारस्यआयुःकर्ताक्षेमकर्ताशुभकर्ता पुष्टिकर्तातुष्टिकर्तावरदोभव बलिदानात्पूर्वंपठनीयोमंत्रः सर्वतेजोधिपोदेवोर
क्तवर्णोमहाबलःशक्तिहस्तोमहावीर्योवैश्वानरनमोस्तुते बलिंदत्वाप्रार्थयेत् अग्निस्तुपुरुषोरक्तःसर्वदेवमयःप्रभुः
धूम्रकेतुरनाधृष्यस्तस्मैनित्यंनमोनमः२यमपूजा यमश्चमहिषारूढोदंडपाणिर्महाबलः सूर्यपुत्रमहाकायधर्ममादा
हयाम्यहंॐएह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितदिव्यमूर्तशुभाशुभाचारविचारसाक्षिन्शिवायनःपाहिमखंनमस्ते
भोयमसपरिवारइहागच्छ ॐयमायसपरिवारायनम इतिसंपूज्य ॐयमायसपरिवाराय.इमंसदीपंमाषभक्तबलिं
स.भोयमइमंसदीपंमाषभक्तबलिंभक्ष ममयजमानस्यायुःकर्ताक्षे- वरदोभव दंडहस्तःकृष्णवर्णोधर्माध्यक्षोमहाब
लः प्रेताधिपतयेतुभ्यंधर्मराजनमोस्तुते १ ॐयमश्चोत्पलपत्राक्षःकिरीटीदंडभृत्सदा धर्मसाक्षीविशुद्धात्मातस्मै
नित्यंनमोनमः२ अथनिर्ऋतिपूजा त्वमागच्छमहाभागखड्गपाणेमहाबल दितिपुत्रमहावेगनिर्ऋतिंपूजयाम्यहं
१ एह्येहिरक्षोगणनायकत्वंपिशाचवेतालविशालसंघैः ममाध्वरंपाहिशुभाधिनाथलोकेश्वरस्त्वंभगवन्नमस्ते १ भो
निर्ऋतेसपरिवारइहागच्छ इत्यावाह्यसंपूज्य योवैरक्षोधिपोदेवो.निर्ऋतिर्नीलविग्रहः महाखड्गधरोनित्यंतस्मै
नित्यंनमोनमः १ ॐनिर्ऋतयेसां. इमंस- माषभक्तबलिंस. भोनिर्ऋतेइमंसदीपंमाषभक्तबलिंभ. ममयज
मानस्यस- आयुःकर्ता.वरदोभव.ॐनिर्ऋतिस्तुपुमान्कृष्णःसर्वरक्षोधिपोमहान् खड्गहस्तोमहासत्वस्तस्मैनित्यं
नमोनमः ४ अथवरुणपूजनं आवाहयाम्यहदेवंवरुणंलोकपूजितं प्रतीचींकमलेपत्रेदेवमावाहयाम्यहं १ ॐएह्ये
हियादोगणवारिधीनांगणेनपर्जन्यगणाप्सरोभिः विद्याधरेंद्रामरगीयमानपाहित्वमस्मान्भगवन्नमस्ते १ भोवरुण

इहागच्छइत्यावाह्यवरुणायनमः इतिसंपूज्यशक्तिपाशधरोनित्यंजलराजोमहाबलः निम्नगःशुक्लवर्णस्तुनमोस्तुवरुणायते ॐवरुणाय- इमंस- वालिंस. भोवरुण वलिभक्ष. ममयजमानस्यआयुः कर्ता; वरदोभव वरुणः सजलोविष्णुः पुरुषोनिम्नगाधिपः पाशहस्तोमहावाहुस्तस्मैनित्यंनमोनमः ५ अथवायोरावाहनं पवनंसर्वगंदेवंसर्वदेवनमस्कृतं पवित्रंसर्वकार्येषुवायुमावाहयाम्यहं ॐएह्येहियज्ञेममरक्षणायमृगाधिरूढ सहासिद्धसंघैः समीरणप्राणगतेः सहायलोकेशपूजांभगवन्गृहाण १ भोवायोइहागच्छ आवाह्यपूजयेत् सर्वप्राणाधिपोदेवः सर्वजंतुष्ववस्थितः ध्वजहस्तोमेघवर्णस्तस्मैवातात्मनेनमः वायवे- सदीपंमाषभक्तवलिंनमः; भोवायो. सदीपंमाषभक्तवलिंभक्ष. ममयजमानस्य-वरदोभव वायुस्तुसर्ववर्णायसर्वगंधवहःशुचिः पुरुषोध्वजहस्तश्चतस्मैनित्यंनमोनमः ६ अथकुबेरपूजा दिश्युत्तरेसदास्थायीपरमात्मपदंपरं धनादिसंग्रहन्नित्यंकुबेरंपूजयाम्यहं १ ॐएह्येहियक्षेश्वरयज्ञरक्षांकुरुष्वयक्षादिगणेनसार्द्धं सर्वौषधीशैः सहभूतसंघैर्गृहाणपूजांभगवन्नमस्ते १ भोकुबेरइहागच्छ इत्यादिपूजा सर्वनक्षत्रमध्येयः सोमोराजाऽव्यवस्थितः शुक्लवर्णोगदाहस्तस्तस्मैनित्यंनमोनमः ॐसोमायकुबेराय इमंसदीपं. वालिंस. भोसोमकुबेर. वलिंभक्ष. यजमानस्य वरदोभव गौरोयस्तुपुमान्सोमः सर्वौषधिसमन्वित. नक्षत्राधिपतिःसोमस्तस्मैनित्यंनमोनमः. ७ अथशिवपूजा शिवंशंकरमीशानंद्वादशार्द्धदलोचनं उमयासहितंदेवंशिवमावाहयाम्यहं १ ॐएह्येहिविश्वेश्वरनस्त्रिशूलिन्कपालिखट्वांगिगणेनसार्द्धं भूतेशलोकेश्वरयज्ञसिद्ध्यैगृहाणपूजांभगवन्नमस्ते १ भोशिवइहागच्छ इत्यावाह्यपूजयेत् सर्वदेवाधिपोदेवईशानःशुक्लविग्रहः शूलपाणिर्वृषारूढोरुद्राधिपतयेनमः १ ईशानाय. वलिंस- भोईशान. सदीपंमाषभक्तबलिंभक्ष- ममयजमानस्य.वरदोभव ईशानःपुरुषःशुक्लःसर्वविद्याधिपोमहान् शूलहस्तोविरूपाक्षस्तस्मैनित्यं नमोनमः ८ अथानंतपूजा

एह्येहिपातालधरामरेंद्रनागांगनाकिन्नरगीयमान रक्षोगणेंद्रामरलोकयुक्तोह्यनंतरक्षाध्वरमस्मदीयं भोअनंत इहागच्छअनंतायनमइतिपूजा पन्नगाधिपतिर्देवोयोनंतोनीलविग्रहः पातालवसतिर्नित्यंतस्मैनित्यंनमोनमः अनंतायसां-सदीपंमाषंवलिंस-भोअनंत इमंसदीपंमाषभक्तवलिंभक्ष यजमानस्यायुःकर्तावरदोभव योसावनंतरूपेणब्रह्मांडेसचराचरे पुष्पवद्धारयन्मूर्ध्नितस्मैतित्यनमोनमः१ अथब्रह्मणःपूजा प्रणम्यशिरसादेवमष्टनेत्रंचतुर्भुजंगायत्रीसहितंदेवंनित्यमावाहयाम्यहं १ एह्येहिविश्वाधिपतेमुनींद्रलोकेनसार्द्धंपितृदेवताभिः चतुर्मुखस्त्वंभवनःशिवायपितामहस्त्वंभगवन्नमस्ते भोब्रह्मन् इहागच्छ·इतिसंपूज्य पलाशकुसुमाकारोब्रह्माचैवाक्षसूत्रधृक् सर्वयज्ञपतिश्रेष्ठब्रह्मणेतेनमोनमःब्रह्मणेसां इदंसदीपंमाषभक्तवलिंस. भोब्रह्मन् इमंसदीपंमाषभक्तवलिंभक्ष ममयजमानस्यायुष्कर्ताक्षेमकर्ताशुभकर्तापुष्टिकर्तातुष्टिकर्तावरदोभव पद्मयोनिश्चतुर्मूर्तिर्वेदावासः पितामहः यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मैनित्यंनमोनमःअथनवग्रहवलिः ग्रहेभ्यःसांगेभ्यःसपरिवारेभ्यः सायुधेभ्यः सशक्तिभ्यः इमंसदीपं माषभक्तवलिंसमर्पयामिं भोग्रहा इमंमाषभक्तवलिंभक्षत ममयजमानस्यायुःकर्तारः क्षेमादिकर्तारोः वरदाभवत ॐदुर्गायै एषभक्तवलिर्नमः भोदुर्गे इमं सदीपं माषभक्तवलिं भक्ष- ममयजमानस्यायुःकर्त्रीक्षेमादिकर्त्रीवरदाभव अथक्षेत्रपालवलिः दधिमाषसिंदूरकज्जलंसदीपंवलिमादाय ॐक्षेत्रपालायसपरिवारायडाकिनीशाकिनीभूतप्रेतपिशाचवेतालसहिताय इमंसदीपंमाषभक्तवलिंसमर्पयामि भोक्षेत्रपालइमंसदीपंमाषभक्तवलिंभक्ष ममयजमानस्यायुःकर्ताक्षेमादिकर्तावरदोभव पुनरपि शांतिपाठः शांतितोयेनसमंततः क्षीरनीरधारांपातयेत् ततःपुण्याहवाचनभूमिसुवर्णवस्त्रशय्यासनादिदानं यथारुचिकृत्वा पूर्णाहुतिं कुर्य्यात् तत्रादौ प्रणीतापात्रात्पवित्रेगृहीत्वा सुमित्रियानआपओषधयःसंतु इतिप्रणीताजलेनशिरःसंमार्ज्य दुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः

इतिप्रणीतापात्रमैशान्यांन्युब्जीकुर्यात्ततः परिस्तरणक्रमेणवर्हिरुत्थाप्यघृताक्तंकृत्वा तस्यहोमः ओंदेवागातविदोगातुवित्वागातुमितमनसस्पतइमंदेवयज्ञंस्वाहा वातेधाःस्वाहा अथपूर्णाहुतिमंत्रःओंमूर्द्धानमित्यस्य भरद्वाजऋषिर्वैश्वानरोदेवता त्रिष्टुप्छंदः अपूर्णपूर्णाहुतिहोमेविनियोगः ओंमूर्द्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निंकविंसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाःस्वाहा पूर्णाहुत्यनंतरंवसोर्द्धारांजुहुयात् ततः स्रुवेण भस्मानीयत्र्यायुषंजमदग्नेइतिललाटे कश्यपस्यत्र्यायुषं इतिग्रीवायांयद्देवानांत्र्यायुषं इतिदक्षिणांसे तत्तेअस्तुत्र्यायुषमितियजमानस्यत्र्यायुषकरणं आत्मनश्चतन्नोअस्तुत्र्यायुषमितिपाठः ततोवारुणकलशादभिषेकः कार्यः पंचपल्लवैःदूर्वांकुशैः तत्र आपोहिष्ठामयोभुवः ९ द्यौःशांतिरित्यादिकाअपि सुरास्त्वामभिषिंचंतु इत्यादिपौराणिकाश्च ततोऋत्विग्भ्योदक्षिणादानं ओंतत्सत् अद्यकृतैतन्महाशांतियागकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठासहितस्वस्तिवाचनपुण्याहवाचनऋद्धिवाचनाग्नेय्यादिकुंभेषु यथाविहितशांतिसूक्तपाठादिसकलकर्मणः सांगफलप्राप्त्यर्थमिमांदक्षिण नानाविधवस्त्रभूषणादिद्रव्यसहितांनानागोत्रेभ्यो ब्राह्मणेभ्योऽमुकामुकशर्मभ्यो यथाविधिविभज्यदातुमहमुत्सृजेस्वस्तिरितितेप्रत्येकंसर्वेब्रूयुःततोगोदानंकुर्य्यात् अथभूरिदक्षिणासंकल्पः ओमद्यकृतस्यास्यमहाशांतियागहोमयागस्यन्यूनातिरिक्तदोषपरिहारपूर्वकसमग्रफलप्राप्त्यर्थमिमांभूयसींदक्षिणांविष्णुदैवतांनानानामगोत्रेभ्योवालवृद्धातुरदीनानाथेभ्यो यथाविभज्यदातुमहमुत्सृजे ततोयज्ञांतदक्षिणादानं ओमद्यकृतैतद्दुस्स्वप्नदुर्निर्मित्तसर्वोत्पातजन्यसर्वारिष्टफलनिवृत्तिपूर्वकस्वदेहदेशपरिवारादौ धनधान्यसंपत्त्यारोग्यादिसमग्रशुभफलप्राप्त्यर्थंमहाशांतियागांगसमस्तदेवतावृंदप्रीत्यर्थमिमामृत्विग्दक्षिणातोद्विगुणद्रव्यकल्पितां विष्णुदैवतांदक्षिणांयथानामगोत्रायाचार्य्यायपुरोधसेचदातुमहमुत्सृजे ततोब्राह्मणेभ्योदक्षिणासहितभोजनदानसंकल्पं

अ० र०
चैत्र०
१७

कृत्वा आज्येमुखावलोकनांतेछायापात्रदानंविधायाग्निंप्रदक्षिणीकृत्यप्रार्थयेत् धर्मंदेहिधनंदेहिपुत्रपौत्रांश्चदेहिमे आयुरारोग्यमैश्वर्य्यंदेहिमेहव्यवाहन १ श्रद्धांमेधांयशः प्रज्ञांविद्यांबुद्धिमथोधनं देहिमेपुत्रपौत्रांश्चप्रीतस्त्वंहव्यवाहन २ इत्यग्निंमंडलदेवताश्चनमस्कृत्य प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् स्मरणादेवताद्विष्णोः संपूर्णंस्यादितिश्रुतिः १ यस्यस्मृत्याचनामोक्त्यातपोयज्ञाक्रियादिषु न्यूनंसंपूर्णतामेतिसद्योवंदेतमच्युतम् ॥ १ ॥

इतिश्रीमहाशांतिप्रयोगः ॥ इतिश्रीसूर्यवंशावतंसरघुवंशतिलकश्रीरणवीरसिंह
महाराजकारितेकृत्यरत्नाकरेमहाशांतिविधानंसंपूर्णम् ॥

अथास्यामेवचैत्रशुक्लप्रतिपदि भविष्योत्तरोक्तं तिलकव्रतमारंभणीयम् युधिष्ठिरउवाच ब्रह्मेशकेशवादीनांगौर्यागणपतेस्तथा दुर्गासोमाग्निसूर्य्याणांव्रतानिमधुसूदन शास्त्रांतरेणदृष्टानिभवद्बुद्धिगतानिच तानिसर्वाणिमे देवयेनदेवकिनंदन प्रतिपत्क्रमयोगेनविहितायस्ययातिथिःदेवस्ययस्ययत्कार्य्यंतदशेषेणमेवद श्रीकृष्णउवाच वसंतेकिंशुकाशोकशोभितेप्रातिपत्तिथिः शुक्लातस्यांप्रकुर्वीतस्नानंनियममास्थितः नारीनरोवाराजेंद्रसंतर्प्यपितृदेवताःनद्यास्तीरेतडागेवागृहेवातदलाभतः पिष्टातकेनविधिवद्वत्सरंपुरुषाकृतिम् पिष्टातकोगंधद्रव्यचूर्णविशेषःपिष्टातकपदवाच्यः ततश्चंदनचूर्णेनपुष्पधूपादिनार्चयेत्मासर्तुनामभिश्चैवनमस्कारांतयोजितैः मासर्तुनामभिश्चैत्रवसंतादिकनामाभिः पूजयेद्ब्राह्मणोविद्वान्मंत्रैर्वेदोदितैःशुभैः संवत्सरोसीतिपठन्मंत्रंवेदोदितंबुधःमनस्कारेणमंत्रेणशूद्रोपीत्थंप्रपूजयेत् अपिशब्दात्स्त्रीणामप्यत्रपरिग्रहः तासांविशेषविध्यभावे वैदिकमंत्रानाधिकारात् तत्रवैदिकमंत्र; संवत्सरोसि परिवत्सरोसि इडावत्सरोसीद्वत्सरोसिवत्सरोसित्वमाधिकवत्सरोसि नमस्कारेणमंत्रेण संवत्सरायनमइत्यादिना मासर्तुनामाभिर्वेदोदितैरित्युक्त मासर्तूनांवेदोदितैरित्यर्थःतेषामपिमंत्राः मधुश्चमाधवश्च

वासंतिकावृतू अग्नेंरंतःश्लेषोसिकल्पतां द्यावापृथिवीकल्पंतामापउोषधयःकल्पंतामग्नयःपृथङ्ममज्यैष्ठायसुव्रताः अग्नयःसुमनसोंतराद्यावापृथिवी इमेवासंतिकावृतू अभिसंविशंतुतयादेवतयांगिरस्वध्रुवेसीदतं १ शुक्रश्चशुचिश्चग्रैष्मावृतू अग्नेरंतःश्लेषोसि·इमेग्रैष्मावृतू- अभिकल्पमानातयादेवतयांगिरस्वध्रुवेसीदतं २ नभश्चनभस्यश्चै वार्षिकावृतू- अग्नेरंतःश्लेषोसिक. इमेवार्षिकावृतू. अग्नेरंतःश्लेषोसिक- इमेवार्षिकावृतू अभिकल्पमाना. देवतयांगिरस्वध्रुवेसीदतं ३ इषश्चोर्जश्चशारदावृतू अग्नेरंतःश्लेषोसि ३ इमेशारदावृतू. अभिकल्पमाना. देवतयांगिरस्वध्रुवेसीदतं ४ सहश्चसहस्यश्चहैमंतिकावृतू अग्नेरंतःश्लेषोसि. इमेहैमंतिकावृतू अभिकल्पमाना. देवतयांगिरस्वध्रुवेसीदतं ५ तपश्चतपस्यश्चशैशिरावृतू. अग्नेरंतःश्लेषोसि. इमेशैशिरावृतू- अभिकल्पमाना देवतयांगिरस्वध्रुवेंसीदतं ६ वसंतायनमः १ ग्रीष्मायनमः २ वर्षायैनमः ३ शरदेनमः ४ हेमंतायनमः ५ शिशिरायनमः ६ इतिनामभिःपूजा. चैत्रायनमः १ वैशाखायनमः २ ज्यैष्ठायनमः ३ आषाढायनमः ४ श्रावणायनमः ५ प्रौष्ठपदायनमः ६ आश्विनायनमः ७ कार्तिकायनमः ८ मार्गशीर्षायनमः ९ पौषायनमः १० माघायनमः ११ फाल्गुणायनमः १२ एवमभ्यर्च्य विधिवत्पश्चात्तमभिवेष्टयेत् कालोद्भवैर्मूलफलनैवेद्यमोदकादिभिः ततश्चपूजयेत्पार्थपुरःस्थित्वाकृतांजालिः प्रार्थनामंत्रः भगवंस्त्वत्प्रसादेनवर्षंक्षेममिहास्तुमे संवत्सरोपसर्गोमेविलयंयात्वशेषतः एवमुक्त्वायथाशक्त्यादत्त्वाविप्रायदक्षिणांललाटपट्टेतिलकंकुर्याच्चंदनपंकजं ततःप्रभृत्यनुदिनंतिलकालंकृतंमुखं धार्यंसंवत्सरंयावच्छशिनेवनभस्तलं एवंनरोवानारीवाव्रतमेतत्समाचरेत् सदैवपुरुषव्याघ्रभोगान्भुविभुनक्त्यसौ भूतप्रेतपिशाचाद्यादुर्वारावैरिणोग्रहाः निरर्थकाभवंत्येतेतिलकं वीक्ष्यतत्क्षणात् निरर्थकाः प्रयोजनशून्याअनिष्टकरणेऽसमर्थाइत्यर्थः इतिव्रतविधिः अथकथा श्रीकृष्णउवाच

पूर्वमासीन्महीपालोनाम्नाशत्रुंजयोजयी। चित्रलेखेतितस्याभूद्भार्य्याचारित्रभूषणा तयाव्रतमिदंचक्रेगृहीतंद्विजसन्निधौ वत्सरंपूजयित्वाचध्यात्वाहादिजनार्दनं हंतुमाक्षेप्तुकामोवासमागच्छतियःपुरा प्रयातिप्रियकृत्तस्यादृष्ट्वातुतिलकंनरः सपत्नीनांदर्पहरावशीकृतमहीतला भर्तुर्हृष्टाप्रहृष्टासासुखमास्तेनिराकुला यावज्ज्वरेणाभिभूतोभर्ता पुत्रःसवेदनः शिरोर्तिनासंप्रयातःसुहृदांसुखदायकः धर्मराजपुरात्प्राप्ताःप्रविष्टागृहमंतरा शत्रुंजयंसमानेतुंकालमृत्युपुरःसराःपार्श्वस्थितांचित्रलेखांतिलकालंकृताननां दृष्ट्वाप्रणष्टसंकल्पाःपरावृत्त्यगताःपुनःगतेषुतेषुसनृपःपुत्रेणसहभारत सानुजोबुभुजेभोगान्पूर्वकर्मार्जितान्शुभान् अक्रूरेणममाख्यातंव्रतमेतद्युधिष्ठिर एतत्त्रिलोकतिलकाख्यंविभूषणंचपुण्यव्रतंसकलदुष्टहरंपरंच इत्थंसमाचरतियःससुखंविहृत्यमर्त्यः प्रयातिपदमद्वयमिंदुमौलेः इतिभविष्योत्तरोक्तंतिलकव्रतम् अथास्यामेवप्रतिपदिसमारभ्यं विष्णुधर्मोत्तरोक्तमारोग्यप्रतिपद्व्रतम्

मार्कंडेयउवाच संवत्सरावसानेतुपंचदश्यामुपोषितः प्रातःप्रतिपदिस्नात्वाकुर्य्याद्व्रतमनन्यधीः पूजयेद्भास्करं देवंवर्णकैः कमलेकृते वर्णकैरक्तश्वेतपीतनीलादिभिः शुक्लेनगंधमाल्येनचंदनेनसितेनच तथाकुंदुरुधूपेनघृतधूपेनभार्गव कुंदुरुःसलकीनिर्यासः अपूपैःसैकतैर्दध्नापरमान्नेनभूरिणा सैकतैःशर्कराविकारैः ओदनेनचशुक्लेनसतालवणसर्पिषा क्षीरेणचफलैःशुक्लैर्वान्हिब्राह्मणतर्पणैःपूजयित्वाजगद्धामादिनभागेचतुर्थके आहारंप्रथमंकुर्य्यात्सघृतंपुरुषोत्तम सर्वंचमनुजश्रेष्ठघृतहीनंविवर्जयेत् भुक्त्वाचसकृदेवान्नमाहारंनसमाचरेत् पानीयपानंकुर्वीतब्राह्मणानुमतेपुनः प्रथममाहारंएकग्रासमात्रंप्रथमंभक्षयेत् शेषमन्नंपरित्यजेत् ब्राह्मणानुमत्याशेषमन्नंभुंजीतपानीयपानं चकुर्यादित्यर्थः ब्राह्मणानुमत्याभुंजानोपिघृतहीनंनभुंजीत घृतहीनंविवर्जयेदितिनिषेधात् संवत्सरमिदंकृत्वा

ततःसाक्षात्त्रयोदशी पूजनंदेवदेवस्यतस्मिन्नहनिभार्गव संवत्सरंयावत्सुर्वासुशुक्लप्रतिपदासुव्रतंकार्य्यं त्रयोदशीउद्यापनीयं त्रयोदशीभिरिति सवस्त्रंसहिरण्यंचततोदद्याद्द्विजातये पूजोपकरणंसर्वंभास्करप्रतिमान्वितं व्रतेनानेनधर्मज्ञरोगमेवंव्यपोहति आरोग्यमाप्नोतिगतिंतथाग्र्यांयशस्तथाग्र्यांविपुलांश्चभोगान् व्रतेनसम्यक्पुरुषोथनारीसंपूजयेद्यस्तुजगत्प्रधानं जगत्प्रधानंसूर्यं अथास्योद्यापनं तत्रादौव्रतविधानं संवत्सरंतेपंचदश्यामुपोषितः प्रातःप्रतिपदिस्नात्वाकृताह्निकः पूजासामग्रीमादाय पंचवर्णरजोभिरष्टदलंकमलं विरच्य तत्रआकृष्णेनेतिमंत्रेण सूर्यपूजांकुर्य्यात् तत्रादौ ओंमद्येत्यादिदेशकालौसंकीर्त्य आत्मनआरोग्यादिसर्वकामाप्त्यैसूर्य्यप्रीत्यर्थमारोग्यप्रतिपद्व्रतंकरिष्ये ततः सर्वोपचारैः सूर्यंसंपूज्यपायसादिनैवेद्यंदत्त्वा ब्राह्मणान् सदन्नेनसंतर्प्य दिवसस्यचतुर्थभागेसघृतमेकमेवग्रासंभक्षयेत् अवशिष्टचान्नंपरित्यजेत्ब्राह्मणानुमत्यासघृतमेवावशिष्टमन्नंभुंजीत एवंप्रतिमासेशुक्लप्रतिपदिव्रतंकुर्य्यात् वर्षांतेत्रयोदशेचैतच्छुक्लप्रतिपद्दिने उद्यापनंकुर्य्यात् तत्रादौओंमद्यमयाआरोग्यादिसदभीष्टसिद्ध्यर्थमाचरितस्यारोग्यप्रतिपद्व्रतस्यसांगफलाप्तयेतदुद्यापनंकरिष्ये आचार्यंब्रह्माणंचवृत्वा ततः आचार्योगणपतिपूजास्वस्त्ययनादिविधाय सर्वतोभद्रसहितान्सर्वान्मंडलदेवतान्संपूज्य अग्निस्थापनंविधाय आत्याधानांतमग्निकार्य्यंविधायसर्वतोभद्रेसौवर्णींसूर्यप्रतिमांसंपूज्य शक्त्याद्वादशकुंभेषुप्रतिमापूजांविधाय ओंनमःसहस्रकिरण सर्वव्याधिविनाशन गृहणार्घ्यंमयादत्तंसंज्ञयासहितप्रभो इत्यर्घ्यंदत्त्वासूर्यमंत्रेणद्वादशमालाधिपनामभिः होमंविधाय सूर्यायनमः धात्रेनमःवरुणायनमःमाधवायनमः हरयेनमः रवयेनमःरुद्रायनमः भर्गायनमः हिरण्यरेतसेनमः अर्य्यम्णेनमः भानवेभास्करायनमः स्वाहा संज्ञाहितायसहस्रकिरणायनमःस्वाहा एवंपायसेनहुत्वा सर्वताभद्रमंडलदेवताश्चैकैकयाहुत्याहुत्वाद्वादशब्राह्मणान्द्वादशनामभिःपू

ज्यद्वादशप्रतिमाश्चवस्त्रान्नकुंभदक्षिणायुतादद्यात् आचार्यायपीठंगांशय्यादिकंदत्त्वा पूर्णाहुतिमभिषेकंच कारयित्वाब्राह्मणान्पायसाद्यन्नेनतर्प्पयेत् इतिसोद्यापनमारोग्यप्रतिपद्व्रतम्

अथास्यामेवविष्णुधर्मोत्तरोक्तंविद्याप्राप्तिव्रतम्

मार्कंडेयउवाच अष्टपत्रंतुकमलंविन्यसेद्वर्णकैःशुभैः ब्रह्माणंकर्णिकायांतुन्यस्यसंपूजयेद्विभुं ऋग्वेदंपूर्वपत्रेतुयजुर्वेदंतुदाक्षिणे पश्चिमेसामवेदंतुउदक्चाथर्वणंन्यसेत् आग्नेयेचतथांगानिधर्मशास्त्राणिनैर्ऋते पुराणंचैववायव्येऐशान्यांन्यायविस्तरं एवंविन्यस्यधर्मज्ञःसोपवासस्तुपूजयेत् चैत्रशुक्लमथारभ्यसोपवासोजितेंद्रियः सदाप्रतिपदंप्राप्यशुक्लपक्षस्ययादव संवत्सरंमहाराजशुक्लगंधानुलेपनैः भूरिणापरमान्नेनधूपदीपैरतंद्रियः संवत्सरांतेगाद्द्यात्व्रतेचीर्णेनरोत्तम इदंव्रतंयस्तुकरोतिराजन्सवेदवित्स्याद्बहुविधर्मनिष्ठः कृत्वासदाद्वादशवत्सराणिविरंचिलोकंपुरुषःप्रयाति इतिमदनरत्नेविष्णुधर्मोत्तरेविद्याप्राप्तिव्रतम्

अथगरुडपुराणोक्तमस्यामेवविद्याप्राप्तिव्रतम्

सनत्कुमारउवाच अथत्वंप्रतिपत्कृत्यंशृणुसंवत्सरंव्रतं यत्कुर्वाणःश्रियंविंदेदुर्लभांमानुषैरिह शालितंडुलसंसिद्धमंडलंचतुरस्रकं श्रीशंश्रियमथोब्रह्मन्पूजयेत्सपुरःसरं अप्रच्छिन्नदलैःपाद्मैरयुतैस्तंप्रपूजयेत् सहस्रैर्वायथायोग्यं. पयसापायसेनच ततश्चविधिनाभ्यर्च्यपार्श्वेदेवींसरस्वतीं अग्रतःपूजयेदिन्दुंगुरुंपश्चादनन्यधीःपरिवारानियोगेन तांस्तुसंस्कारयेदथ अत्रमंत्रः ममविद्यांप्रदिशतुदेवीवागीश्वरोहरिः विद्याधिदैवतंदेवीविद्यादिशतुमेदश सरस्वतीप्रदिशतुवाग्वृद्धिमतिशालिनी सितांशुरपिमेपुष्टिंसर्वभोगप्रपूरिणीं पूजातुप्रणवादिनमोंतैर्नाममंत्रैरेवकार्य्या इत्येवंकारयेत्साध्यंप्रसन्नःपूजितोगुरुः साध्यंशिष्यं विधिनाचोपवासंतुकारयेद्विधिनान्वितं समभ्यर्च्याद्वितीयायां

देवदेवंश्रियःपतिं भुंजीयात्पायसान्नंतुशुचिराचम्यसन्निधौ साध्यइतिशेषः आचार्यायवरंदत्वाकुर्यात्सुप्रीणनंपुनःवरंहिरण्यामित्यर्थः अनधीतमनारब्धंतदानीमारभेद्गुरुः विद्याव्रतमिदंप्रोक्तंगुरुदैवतमित्यपि तन्मुखाद्वितदातस्य निःश्रेयससमागमः सदातदुक्तकारीस्यान्नस्यातच्छासनातिगः तिष्ठत्तिष्ठत्सुगुरुषुनचासीततदग्रतः नशयीततदासीनंकुर्वीतवचनान्यपि नलंघयीतवचनंगुरोकृत्येयतेतच निवेद्यगुरवेसर्वंकुर्य्यादादौतदाहितं एवमाचार्य्यनिष्ठस्तुमतिमान्प्राज्ञसम्मतःउत्पन्नज्ञानवैराग्योदीर्घमायुरवाप्यच यशश्चविपुलंलब्ध्वातदाचारप्रवर्तनं पुत्रपौत्रश्रियाजुष्टःपुण्यांगतिमवाप्नुयात् एवंसमापयेद्विद्वान्विद्याव्रतमुदारधीः दद्यात्फलानिविप्रेभ्योह्युत्कृष्टानिबहून्यपि कदलीचूतपनससंघानिशुचीन्यपि यस्त्वेवंकुरुतेविद्वान्विद्याव्रतमनन्यधीः समस्तविद्यानिपुणोवैष्णवंपदमृच्छति ॥

॥ इतिचैत्रशुक्लप्रातिपदाकृत्यम् ॥

अथचैत्रशुक्लद्वितीयाकृत्यानि नारदीये चैत्रशुक्लद्वितीयायांब्रह्माणंचसशक्तिकं हविष्यान्नेनगंधाद्यैःस्तोष्यसर्वक्रतोद्भवं फलंलब्ध्वाखिलान्कामान्तेब्रह्मपदंव्रजेत् अस्मिन्नेवदिनेविप्रबालेंदुमुदितंपरं समभ्यर्च्यनिशारंभेभुक्तिमुक्तिफलीभवेत् अथवास्मिन्दिनेभक्त्यादस्रावभ्यर्च्यभक्तितः सुवर्णरजतेतेद्वेप्रदद्यात्तुद्विजातये प्राणयात्राव्रतंह्यत्रदध्नाचापिघृतेनच नेत्रव्रतंद्वादशवत्सरांतेकृत्वाभवेद्भूमिपतिर्द्विजेंद्र सुरूपरूपोरिगणप्रतापीधर्माभिरामोनृपवर्गमुख्यः निर्णयामृतेप्युक्तं चैत्रशुक्लद्वितीयायामुमापूजाचकार्य्यातदुक्तंभविष्यपुराणे चैत्रशुक्लद्वितीयायामुमापूज्याफलार्थिभिः शिवपूजाग्निपूजाचकर्तव्यामुनिसत्तम देवीपुराणे उमांशिवंहुताशंचद्वितीयायांप्रपूजयेत् हविष्यमन्ननैवेद्यदेयंगंधार्चनान्वितं फलमाप्नोति विप्रेंद्र सर्वक्रतुसमुद्भवं अस्यामेवारभ्यंबालेंदुव्रतंविष्णुधर्मोत्तरे मार्कंडेयउवाच इमांतथान्यांवक्ष्यामिद्वितीयांसर्वकामदां यामुपोष्यनरःकामान्सर्वानाप्नोत्यभीप्सितान् चैत्रशुक्लद्वितीयायां

संप्राप्यनृपमानवः दिनावसानेकुर्वीतसम्यक्स्नानंनदीजले दिनावसाने संध्यासन्निहितकालेवालेंदुमंडलंकृत्वापूजयेच्छुतवर्णकैः चंद्रदर्शनकालेतुचंद्रमावाह्यपूजयेत् श्वेतपुष्पैःफलैश्चैवपरमान्नेनभूरिणा। इक्षुणेक्षुविकारैश्चशुद्धेनलवणेनच दिनावसानेदेवेशंपूजयेद्वानिशाकरं अत्रचंद्रदर्शनंविनापि गगनस्थंचंद्रमंडलंमनसिकृत्वापूजयेदित्यर्थः घृतेनहवनंकृत्वानक्तंभुंजीतवाग्यतः प्रणवादिनमोंतेनस्वाहांतेनक्रमेणतु नाममंत्रेण पूजाहोमौ तत्तैतैलैः पाचितंतुभक्षयेत्सर्वदैवतु अतैलपाचितंयावद्व्रताचरणंतावत्तैलपाचितंनभुंजीतेत्यर्थः एतद्व्रतंनरःकृत्वासम्यक्संवत्सरंशुचिः सौभाग्यंमहदाप्नोतिस्वर्गलोकंचगच्छति संवत्सरंवर्षपर्यंतंप्रतिमासंशुक्लद्वितीयायांपूजाहोमनक्तभोजनानिकार्याणि एतत्पवित्रंरिपुनाशकारिसौभाग्यदंरोगहरंचराजन् प्रोक्तव्रतंयादववंशमुख्यकार्यंप्रयत्नेनकुलस्त्रियापिइतिविष्णुधर्मोत्तरोक्तंबालेंदुद्वितीयाव्रतं

अथसर्वासुशुक्लद्वितीयासु अभिनवचंद्रार्घ्यदानविधिः भविष्योत्तरे श्रीकृष्णउवाच पार्थपार्थिवराजश्रीमुखपंकजसद्भवे शृणुष्वाभिनवस्येंदोस्तदग्रेर्घ्यविधिंपरं रवेर्द्वादशभिर्भागैर्वारुण्यांदृश्यतेशशी प्रदोषसमयेराजन्नर्घ्यंदद्यात्तदाविधोः द्वितीयायांसितपक्षेसंध्याकालेह्युपस्थिते संस्थाप्याभिनवंचंद्रंभूमौगोमयमंडलेरोहिणीसहितंचंद्रंचंदनेनसुशोभनं राजतेवाथकांस्येवाभाजनेश्वेततंडुलैः पुष्पचंदनधूपैश्चदीपाक्षतजलैः शुभैः दूर्वांकुरैरत्नवरैः दध्नावस्त्रेणपांडुरैः मंत्रेणानेनराजेंद्रक्षत्रियःसपुरोहितः नवोनवोमासिमासिजायमानःपुनःपुनः आप्यायस्वसमेत्येवंसोमराजनमोस्तुते अनेनविधिनाचार्घ्यंसर्वकामफलप्रदं यःप्रयच्छतिकौंतेयमासिमासिसमाहितं सकीर्त्यायशसाकांत्याधृत्याचभुविमानवः पुत्रः यौत्रैः परिवृतोगोधान्यधनसंकुलःस्थित्वावर्षशतंमर्त्येततः सोमपुरंव्रजेत् तत्रास्तेदिव्यवपुषाभुंजन्भोगान्मनोरमान् वरस्त्रीभिःसहात्यर्थंयावदाभूतसंप्लवं

धर्म्यांसमृद्धिमतुलांयदिवांछसित्वंमासानुमासमिहमद्वचनंकुरुष्वसोमस्यसोमकुलनंदनपुष्पधूपैरर्घ्यं प्रयच्छविधिनाभिनवोदितस्य इतिभविष्योत्तरेभिनवचंद्रार्घ्यदानविधिः अस्यामेवविष्णुधर्मोत्तरोक्तंनेत्रव्रतम् ॥

मार्कंडेयउवाच नासत्यौदेवभिषजावश्विनौपरिकीर्तितौ तावेवप्रथितौलोकेसूर्यताराभिधौनृप सूर्यचंद्ररूपावित्यर्थः अश्वयानरतौयस्मादश्विनापरिकीर्तितौ चैत्रशुक्लद्वितीयायांसोपवासोजितेन्द्रियः नासत्यौदेवभिषजौपूजयेःप्रयतःशुचिः गंधमाल्यनमस्कारैर्धूपदीपान्नसंपदा कृत्वाचमूर्त्तिनिर्माणंनासत्यौपूजयेन्नृप नासत्यमूर्त्तिस्तु विश्वकर्मोक्ता द्विभुजौदेवभिषजौगौशंगौचारुलोचनौ तयोरोषधीःकार्य्यादिव्यादक्षिणहस्तगाः सपुस्तककरौकार्य्यौदर्शनीयौतथाद्विज दीपमालांतथादद्यात्तयोर्निशिविशेषतः कनकंरजतंचापिदद्याद्विप्रेषुदक्षिणां संपूज्यनेत्रयुगलंविष्णोः संवत्सरंनृप प्रदीप्ततेजाभवतिचक्षुष्मांश्चैवजायते प्राणयात्रांप्रकुर्वीतदध्नाघृतयुतेनच नेत्रव्रतंद्वादशवत्सराणिकृत्वाभवेद्भूमिपतिःप्रदीपः सरूपरूपोरिगणप्रमाथीधर्माभिरामोनृपवर्गमुख्यः ॥

इतिविष्णुधर्मोत्तरोक्तंनेत्रव्रतम् इतिचैत्रशुक्लद्वितीयाकृत्यम्

अथचैत्रशुक्लतृतीयाकृत्यं नारदीये चैत्रशुक्लतृतीयायांगौरींकृत्वासभर्तृकां सौवर्णींराजतींवापिताम्रजांमृण्मयींद्विज अभ्यर्च्यगंधपुष्पाद्यैर्वस्त्रैराभरणैःशुभैःदूर्वाकांडैश्चविधिवत्सोपवासातुकन्यका वरार्थिनीतुसौभाग्यपुत्रभर्त्रर्थिनीतथा द्विजभार्याभर्तृमतीः कन्यकावासुलक्षणा सिंदूरांजनवस्त्राद्यैः प्रतोष्यप्रीतमानसा रात्रौजागरणंकुर्य्याद्व्रतसंपूर्तिकाम्यया ततस्तांप्रतिमांविप्रगुरवेप्रतिपादयेत् धातुजांमृण्मयींवापिनिक्षिपेच्चजलाशये एवंद्वादशवर्षाणिकृत्वागौरीव्रतंशुभं धेनूर्द्वादशसंकल्प्यदद्यादुत्सर्गसिद्धये किमत्रबहुनोक्तेनगौरीसौभाग्यदायिनी स्त्रीणां यथातथानान्याविद्यतेभुवनत्रये धनंपुत्रान्पतिंविद्यामाज्ञासिद्धिंयशःसुखं लभेतसर्वमेवेष्टंगौरीमभ्यर्च्यभक्तित इ

व्र०र०
चैत्र०
२१

तिसौभाग्यगौरीव्रतं अथास्यामेवसौभाग्यशयनव्रतं मात्स्ये वसंतमाससमासाद्यतृतीयायांजनाप्रिये सौभाग्यायसदास्त्रीभिः कार्य्यंपुत्रसुखेप्सुभिः शुक्लपक्षस्यपूर्वाह्णेतिलैः स्नानंसमाचरेत् तस्मिन्नहनिसादेवीकिलविश्वात्मनासती पाणिग्राहणिकैर्मंत्रैरूढायावरवर्णिनी तयासहैवदेवेशंतृतीयायांसमर्चयेत् फलैर्नानाविधैर्धूपैर्दीपैर्नैवेद्यसंयुतैः प्रतिमांपंचगव्येनतथागंधोदकेनच स्नापयित्वार्चयेद्गौरीमिंदुशेखरसंयुतां नमोस्तुपाटलायास्तुपादौदेव्याः शिवस्यतु शिवायेतिचसंकीर्त्य १ जयायैगुल्फयोस्तथा १ त्रिगुणायेतिरुद्रस्य २ भवान्यैजंघयोर्युगंशिवेरुद्रेश्वरायेति ३ जयायैइतिजानुनी संकीर्त्यहारिकेशाय ४ तथोक्तवरदेनमः ईशायैशंकरं ५ रत्यै शंकरायेतिशंकरं कुक्षिद्वये ६ चकोटव्यै शूलिनः शूलपाणये ७ मंगलायैनमस्तुभ्यमुदरंचापिपूजयेत् ८ सर्वात्मनेनमोरुद्रमीशान्यैचकुचद्वयंशिवंवेदात्मनेतद्वद्रुद्राण्यैकंठमर्चयेत् १० त्रिपुरघ्नायाविश्वेशमनंतायैकरद्वयं ११ त्रिलोचनायेतिहरेवाहूकालानलप्रिये १२ सौभाग्यभवनायेतिभूषणादिसमर्चयेत् ततोर्धनारीशहरमसितांगीतिनासिकां १३ नमउग्रायलोकेशंललितेतियुगंभ्रुवोः शिवायपुरहंतारंवसुदेंव्यैतथालिकं १४ नमःश्रीकंठनाथायाशिवकेशांस्तथार्चयेत् १५ भीमोग्रसौम्यरूपिण्यैशिरःसर्वात्मनेनमः १६ शिवमभ्यर्च्यविधिवत्सौभाग्याष्टकामित्यतः स्थापयेतव्रतानिशांचकुसुंभाजीजजीरकंतालराजेक्षुलवणंकुस्तुंवुरुमथासुमं दत्तंसौभाग्यकृद्यस्मात्सौभाग्याष्टकमित्यतः एवंनिवेदयेत्सर्वमग्रतः शिवयोःपुनः चैत्रेशृंगोदकंप्राश्यस्वपेद्भूमावरिंदम पुनःप्रभातेतुतथाकृतःस्नानजपःशुचिः संपूज्यद्विजदांपत्यंमाल्यवस्त्रविभूषणैःसौभाग्याष्टकसंयुक्तंसुवर्णप्रतिमाद्वयंप्रीयतायत्रललिताब्राह्मणायनिवेदयेत् एवंसंवत्सरंयावत्तृतीयायांसदामुने प्राशनेदानमंत्रेचविशेषोयंनिबोधमे गोशृंगोदकमाद्येस्याद्वैशाखे

गोमयंपुनः ज्यैष्ठेमंदारकुसुमंविल्वपत्रंशुचौस्मृतं श्रावणेदधिसंप्राश्यंनभस्येचकुशोदकं क्षीरमाश्वयुजेमासि कार्त्तिकेपृषदाज्यकं मार्गशीर्षेतुगोमूत्रंपौषेसंप्राशयेद्घृतंमाघेकृष्णतिलांस्तद्वत्पंचगव्यंचफाल्गुने ललिताविजया भद्राभवानीकुमुदाशिवा वासुदेवीतथागौरीमंगलाकमलासती उमाचदानकालेतुप्रीयतामितिकीर्त्तयेत् मल्लिका शोककमलंकंफोलानीतिमालती कुव्जकंकरवीरंचवाणमम्लातकुंकुमं सिंदुवारंचसर्वेषुमासेषुक्रमशःस्मृतं वाणंनीलकंठः जपाकुसुमकुस्तुंभमालतीशतपत्रिका यथालाभंप्रशस्तानिकरवीरंचसर्वदा एवंसंवत्सरंयावदुपोष्यविधिवन्नरः स्त्रीवाभक्ताकुमारीवाशिवावभ्यर्च्यभक्तितः व्रतांतेशयनंदद्यात्सर्वोपस्करसंयुतं उमामहेश्वरंहैमंवृषभंचगवासह स्थापयित्वाचशयनेब्राह्मणायनिवेदयेत् गोयुगंहैमं अन्यान्यपियथाशक्त्यामिथुनान्यंवरादिभिःधान्यालंकारगोदानै रभ्यर्च्यधनसंचयैः वित्तशाठ्येनरहितःपूजयेद्गतविस्मयः एवंकरोतियःसम्यक्सौभाग्यशयनं व्रतं करोतिसप्तचाष्टौवाश्रीकंठभुवनेमरैः पूज्यमानोवसेत्सम्यग्यावत्कल्पायुतत्रयं नारीवाकुरुतेवापिकुमारीवानरेश्वर सापितत्फलमाप्नोतिदेव्यनुग्रहलालिता इत्युद्यापनविधिः इतिमत्स्यपुराणेसोद्यापनंसौभाग्यशयनंगौरीव्रतं

अत्रैवगौरीदोलोत्सवउक्तः

हेमाद्रौदेवीपुराणे तृतीयायांयजेद्देवींशंकरेणसमन्वितां कुंकुमागुरुकस्तूरीमणिवस्त्रसुगर्भितां सुगंधीपुष्पधूपैश्चदमनेनसुमालिना आदोलंदोलयेद्वत्साशिवोमातुष्टयेसदा रात्रौजागरणंकार्य्यंप्रातर्देयातुदक्षिणा सौभाग्याक्षयदा स्त्रीभिःकार्य्यापुत्रसुखार्थिभिः हेमवस्त्रान्नपानानितांबूलानिस्रजस्तथा सौवर्णातुह्युमाकार्य्याराजतःशंकरस्तथा चतुर्भुजस्तुदेवेशोद्विभुजोमाप्रकीर्त्तिता इयंमुहूर्तमात्रापिपराग्राह्यागौरीदैवतत्वात् मुहूर्तमात्रसत्त्वेपिदिनेगौरीव्रतं परे इयंमन्वादिरपि श्राद्धेअपराह्णव्यापिनीग्राह्यास्नानादौपराग्राह्या ॥

इतिदेवीपुराणोक्तगौरीदोलोत्सवतृतीयायांमन्वादौश्राद्धमुक्तं मात्स्ये

अ०२०
चैत्र०
२२

कृत्वाश्राद्धंविधानेनमन्वादिषुयुगादिषुहायनानांद्विसाहस्रंपितॄणांतृप्तिदंभवेत् चैत्रशुक्लतृतीयायां श्रीरामचंद्रदोलोत्सवः श्रीरामार्चनचंद्रिकायां गारुडे मधौशुक्लतृतीयायांजानकीरमणंप्रभुं राजोपचारैःसंपूज्यमासमादोलयेत्कलौ दक्षिणाभिमुखंदेवंदोलमानंसुरेश्वरं सुपूजितंसकृद्दृष्ट्वासर्वपापैःप्रमुच्यते चैत्रेमासिसितेपक्षेतृतीयायांरमापतिं दोलारूढंसमभ्यर्च्यमासमादोलितंभुवि दोलारूढंप्रपश्यंतियेकृष्णंमधुमाधवे अपराधान्प्रहित्वाशुमुक्तास्तेनात्रसंशयः दोलारूढस्यतस्यैवयेप्रकुर्वंतिजागरं सर्वपुण्यफलावाप्तिर्निमिषनिमिषेभवेत् नित्यं

चैतद्व्रतमूर्जेमधौदोलेतिवचनात्

दोलानिर्माणं चैत्रमासकृत्येबोध्यम् इयमेवगौरीतृतीयोच्यते तत्रमुहूर्तमात्रापिपरयुताग्राह्येत्युक्तं अथास्यामारभ्यंगौरीव्रतं शिवउवाच गौरीव्रतमथोवक्ष्येस्त्रीणांसौभाग्यवर्द्धनम् चैत्रशुक्लतृतीयायांव्रतंगौर्य्यासमाचरेत् उपोष्यतुप्रयत्नेनविधानमिदमाचरेत् रक्तांबरधरोभूत्वाक्रोधलोभविवर्जितः स्थंडिलेहस्तमात्रंतुकर्तव्यंगंधमंडलं कुंकुमेंदुसुशीतेनवर्तुलंपरिवर्तयेत् इंदुःकर्पूरःसुशीतंचंदनं तत्रमध्येपूजितव्याप्रतिमाहेमसंभवा मधुजातदभावेतुपुराकेनापिनिर्मिता रक्तचंदनजावाथकर्तव्यासाप्रमाणतः पंचवृत्ताथवापूज्यातत्रमासंविधानतः पंचवृत्तापंचपिंडमयीत्यर्थः रक्तपुष्पैस्तुसंपूज्याजातीचंपकसंयुतैः पाटलाकरवीरैश्चरक्तपद्मैर्यथातथा कुंडलाभरणान्यत्ररसनादीनिदापयेत् रसनाक्षुद्रघंटिका भक्ष्याणितुक्लृप्तानिघृतखंडयुतानिच शीतलंचघनंदुग्धंमुग्धंचदधिपिच्छिलं मुग्धंमनोहरंपिच्छिलंचिक्कणं करंभंनवनीतंचतथाशिखरिणींपुनः करंभोदधिसक्तवःशिखरिणीरसाला मध्यदेशेप्रसिद्धा पानकंचैवपानीयंसचंद्रंदापयेत्ततः पानकं

हितस्त्रयीमार्गातिगोथवा सुप्रसिद्धंजगत्येतद्गोपितंकेनहतुना श्रीकृष्णउवाच भवान्धर्मार्थकुशलःसर्वज्ञइतिमेमतिः व्रतंचैतज्जगद्व्याप्तंनाख्यातंतेनतेमया यद्यास्तिश्रवणेवुद्धिःश्रूयतांपांडुनंदन कोन्यःश्रोताजगत्यास्मिन्भवतासदृशोमम जयाचविजयाचैवपार्वत्याःपरिचारिके आगत्यमुनिकन्याभिःपृष्टेभीष्टफलेच्छया भवत्यौसर्वदादेव्याश्चित्तवृत्तिविदेकिल केनव्रतोपचारेणकस्मिन्नहनिपार्वती पूजितातोषमायातिमंत्रैःकैश्चवशानने तासांतद्वचनंश्रुत्वाजयाप्रोवाचसादरं श्रूयतामभिधास्यामिसर्वकामफलप्रदं व्रतमुत्सवसंयुक्तंनरनारीमनोरमं चैत्रेमासितृतीयायांदंतधावनपूर्वकं उपवासस्यनियमंगृह्णीयाद्भक्तिभावतः अंजनंचसतांवूलंसिंदूरंरक्तवाससी विसर्जयेत्सोपवासाप्यवैधव्यकरंपरं विधवापतिमार्गेणकुमारीवायदृच्छया कुर्य्यादार्यार्चनविधिं श्रूयतामत्रचक्रमः विचित्रपटवस्त्रैस्तुकुर्य्यान्मंडपिकांशुभां कारयेत्कुसुमामोदवासितांभूषितांशुभां प्रवालालंवितप्रांतामंतर्दिव्यवितानकां विन्यस्तपूर्णकलशांपीठास्थितलसद्द्विजां पुरतःकारयेत्कुंडंहस्तमात्रंसमेखलं ततःस्नात्वाशुचिर्भूत्वापरिधायसुवाससी देवान्पितॄन्समभ्यर्च्यततोदेवीगृहंव्रजेत् नामाष्टकेनसंपूज्यगौरींशंकरवल्लभां नामाष्टकेनवक्ष्यमाणेनगोभर्तृवल्लभामितिपाठेवृषभध्वजवल्लभामित्यर्थः तत्कालप्रभवैः पुष्पैर्गंधादालिकुलाकुलैः कुंकुमेनसमालभ्यकर्पूरागुरुचंदनैः एवंसंपूज्यविधिवत्सुधूपेनाधिवासयेत् पार्वतीललितागौरीगायत्रीशांकरीशिवा उमासतीसमुद्दिष्टंनामाष्टकमिदंशुभं लड्डुकैःखंडवेष्टैश्चगुणकैः सिंहकेसरैः सोहालकैश्चेक्षुरसैर्दधिभक्तैःसपूपकैः घृतपक्वैर्बहुविधैःशुचिभिःपरिकल्पितैः दृष्टिप्राणप्रियैर्हृद्यैर्नैवेद्यैःपूजयेदुमां सिंहकेसरैःसिंहकेसरवद्वलीकृतैः धान्यकंजीरकंभव्यंकुंकुमंलवणंगुडं विकारवच्चयत्क्षारिंहारिद्रांचपुरान्यसेत् भव्यमुत्कृष्टंनारिकेलंसनारंगंवीजपूरंसदाडिमं कूष्मांडंत्रपुसंवृन्तंदधित्थपनसंतथा घृतंघृतवत्नातिपक्वमित्यर्थः त्रपुसंवालकं दधित्थंकपित्थं कालोद्भवानिचान्यानि

व्र०र०
चैत्र०
२३

शर्कराद्यादिफलरसःसचंद्रंसकर्पूरं रक्तवस्त्राणिदेयानिसंभारार्थानिचाग्रतः आचार्य्यश्चैवपूजांतिपूजनीयःप्रयत्नतः हेमवस्त्रान्नपानैश्चवित्तशाठ्यंविनासुत रात्रौजागरणंकार्य्यंकुमारींभोजयेत्तथा देवीनामानिवक्ष्यामिमासिमासि यथाक्रमं प्राशनंतुविशेषेणयथावदनुपूर्वशः गौरींउमाचललितासुभगाभगमालिनी मनोन्मनीभवानींचकामदा भोगवर्द्धनी अंधकाचतथाकृष्णारुद्राणीपूजयेत्क्रमात् इत्येताःसितपक्षेतुकृष्णपक्षेतथाशृणु रतिःप्रीतिर्धृतिर्बुद्धिर्मतिःपुष्टिश्चकीर्तिता प्रज्ञामेधातथाचार्य्याश्रीरक्ताकीर्तिरेवच सितासिताभ्यांपक्षाभ्यांव्रतंयत्नात्समाचरेत् अशक्तत्वादभावाद्वाद्रव्याणांतुस्थितंहितं प्राशनंतत्रकर्त्तव्यंशास्त्रोक्तेनचवर्त्मना तत्तन्मासोक्तद्रव्यालाभेरोगादिजनकत्वेनचप्राशनाशक्तौचक्रमेणद्वादशमासेषुयत्स्थितं यल्लभ्यंयच्चहितंतत्प्राशनीयमित्यशक्तादेरित्यर्थः प्रतिमासंप्रवक्ष्यामिशृणुवक्ष्येक्रमेणतु क्षीरंदधिघृतंचैवगोमूत्रंचकुशोदकं विल्वपत्रोदकंचैवतथान्यच्चंदनोदकं जातीपत्रोदकं चैवपद्मकेसरमेवच नागकेसरसंज्ञंचलवंगंचंद्रमेवच शुक्लपक्षेतुकथितंचैत्रात्प्रभृतिषण्मुख प्राशनंकृष्णपक्षेतुकथ्यमानंशृणुष्वतत् वलांकंकोलकंचैवप्राशयेत्तुशतावरीं घनसाघुसुरंदारुसारिपांशंखपुष्पिकां शैरीषंसुरभीयुक्तं रक्तंचमौक्तिकंतथा तथोदकंद्वादशकंप्राशनेकथितंतव इदंगौरीव्रतंख्यातंसौभाग्यस्त्रीषुपुत्रदं आयुरारोग्यदंस्त्रीणामिहलोकेपरत्रच इदंव्रतवरंत्यक्त्वास्त्रीषुनान्यव्रतंहितं तस्मात्सर्वप्रयत्नेनगौरीव्रतमुपाचरेत् अंजनंरक्तवस्त्रं चतांबूलंकुंकुमंतथा दर्पणंव्यजनंछत्रमासनंयानमुत्तमं गृहोपकरणंसर्वंहेमजंवाथताम्रजं व्रतांतेचैवदातव्यमाचार्य्यायप्रयत्नतः स्त्रीणांचैवकुमारीणांवस्त्राण्याभरणानिच दातव्यानिप्रयत्नेनयदीच्छेद्भूतिमात्मनः इत्येतत्सरहस्यंतुगौरीव्रतमुदाहृतं ॥ इतिकालांतरोक्तंगौरीव्रतं ॥ अथचैत्रभाद्रपदमाघशुक्लतृतीयासुभविष्योक्तंगौरीव्रतं युधिष्ठिरउवाच चैत्रभाद्रपदेमाघेरूपसौभाग्यसौख्यदं तृतीयात्रयमेतन्मेकृष्णकस्मान्नकीर्तितं किमहंभक्तिर

फलानिपुरतोन्यसेत् पत्रकौलूखलशिलाशूर्पाणांततिभिःसह नेत्रांजनंशलाकांचनखसाधनकानिच दर्पणंनिर्मलंघंटांभवान्यैविनिवेदयेत् शंखतूर्यनिनादैश्चगीतमंगलनिःस्वनैः भक्त्याशक्त्याचसंपूज्यदेवींशंकरवल्लभां ततोस्तसमयेभानोकुमार्य्यःकरकैर्नवैः स्नानंकुर्य्युर्मुदायुक्ताःसौभाग्यारोग्यसिद्धये कुमार्य्यइतिव्रतचारिणीनामुपलक्षणं यामेयामेगतेस्नानंदेवीपूजनमेवच तैरेवनामभिर्होमास्तिलाज्येनप्रशस्यते पद्मासनस्थितासाध्वीतेनैवार्द्रेणवाससा गौरिवक्रेक्षणगतारात्रिंतामतिवाहयेत् काश्चिद्गायंतिसंहृष्टाःकाश्चिन्नृत्यंतिहर्षिताःकथयंतिकथाःकाश्चिद्धर्मकामार्थसंश्रयाः गीततालानुसंबद्धमनुद्धतसमाकुलं नृत्यंतिचपुरोदेव्याःकाश्चिद्विलासितभ्रुवःनृत्येनतुष्यतिहरोगौरीगीतेनतुष्यति सद्भाविनाथवासर्वैर्गृह्यंतेत्रिदिवौकसः सुवासिनीभ्यस्तांबूलंकुंकुमंकुसुमानिच प्रदेयंजागरवतामन्येषामप्यवारितं नटैर्विटैर्भटैर्भद्रैःपूरणैःप्रोक्षणोत्सवैः सखीभिःसहितारात्रिंर्गीतनृत्यहसैर्नयेत् एवंप्रभातसमयेस्नात्वासंपूज्यपार्वतीं शक्त्यातुलांसमारोहेद्वस्त्रालंकारभूषिता तोलयेत्सितयात्मानंगुडेनलवणेनच सितयाशर्करया कुंकुमेनाथवाशक्त्याकर्पूरागुरुचंदनैः पर्वतानामपीच्छंतिदानंकेचिच्चसूरयः कुंडमंडपसंभारमंत्रैरधिवसेच्चतत् लवणेनतथात्मानंतोलयंत्यागुडेनच कयापिशक्तिरतयासौभाग्यमतुलीकृतं शक्तिरतया देवीरतया एवं देवींप्रणम्यार्चासमाप्यगृहमाविशेत् आमंत्र्यद्विजदांपत्यंवासोभिर्भूषणैस्तथा संपूज्यभोजयित्वाथदद्यात्तेभ्योथदक्षिणांयद्यदात्माभीष्टतमंशयनंयानमेवच वस्त्रमाभरणंगावः सर्वंतेभ्योनिवेदयेत् हेमपत्रंरत्नफलं मुक्ताचूर्णावचूर्णितं तांबूलंकेचिदिच्छंतिदीयमानं सखीजने पत्रस्थाने सुवर्णस्यपत्राणिपूगस्थानेरत्नानि चूर्णस्थाने मुक्ताफलानि एवंविधंतांबूलंसखीजनेदेयं अन्नंचमधुरप्रायंभोजयित्वासुवासिनीः स्वयंभुजीतसहिताज्ञातिबंधुजनैः स्वकैः यच्चदेव्याः पुरोदत्तंनैवेद्यादिसुशोभनं प्रतिगेहंनयेत्सर्वं विभज्याभ्रांतमानसा

दत्त्वायनकाहृष्टाकृतकृत्याभवेत्ततः विधिर्भाद्रपदेह्येषःसौख्यसंपत्प्रदायकः सप्तधान्यविरूढैश्चशूर्पस्थांपूजयेदुमां पूर्णकलशस्थानेशूर्पेइतिविशेषः गोमूत्रप्राशनंयस्मात्तस्माद्गोमूत्रसंज्ञिता माघमासेतृतीयायांविशेषः श्रूयतामयं पूर्वोक्तंसकलंकृत्वाप्रभातेयत्रसंस्तरे स्थापयित्वाकुंदपुष्पैः पूजयेत्ससुतामुमां एतेनकारणेनोक्ताचतुर्थीकुंदसंज्ञिता पूर्वोक्तंसकलंतृतीयायांकृत्वाप्रभाते चतुर्थीदिवसेससुतांविनायकसहितामुमापूजयेदित्यर्थः उमारूपंतुकर्तव्यंगोधासनगतंशुभं सौवर्णंचमहाराजसाक्षसूत्रकमंडलुं विनायकश्चकर्तव्योगजवक्त्रश्चतुर्भुजः तृतीयात्रयमेतत्तेकथितंसर्वकामदं जययामुनिकन्यानांयत्पुरासमुदाहृतं एवंयाकापिकुरुतेनारीव्रतमिदंशुभं सारूपसौभाग्ययुतामृतास्वर्गेमहीयते नदुर्भगाकुलेतस्याःकुलेभवतिभारत नदुर्विनीतश्चसुतोनभृत्योविघ्नकृद्भवेत् नदारिद्र्यंगृहेतस्मिन्नव्याधिरुपजायते यत्रसारमतेनारीधौतचामीकरप्रभा अन्याश्चयाःकरिष्यंतिब्राह्मणानुमतेव्रतं संपूज्यवाचकंभक्त्याभूषणाच्छादनाशनैः तास्ताःस्युःसुखसंपन्नाअविपन्नमनोरथाः भविष्यंतिकुरुश्रेष्ठकुलज्येष्ठनमोस्तुते माघेमहार्हमणिमंडितपादपीठांचैत्रेविचित्रकुसुमोत्करचर्चितांगीं शूर्पप्ररूढनवशष्पमयीं नभस्येसंपूज्यशंभुदयितांप्रभवंतिनार्य्यः

इतिभविष्योत्तरोक्तंगौरीतृतीयाव्रतत्रयम्

अथचैत्रशुक्लतृतीयायामरुंधतीव्रतम्

तत्रस्त्रीणामेवाधिकारः अवैधव्यादिफलश्रवणात् अत्रादौपूजा अष्टपत्रेकर्णिकायांमंडलेपूजयेद्ध्रुवं अरुंधतींमहादेवींवसिष्ठसहितांसतीं ओमद्यचैत्रशुक्लतृतीयायांसर्वपापक्षयपूर्वकावैधव्यादिसदभीष्टसिद्धये अरुंधतीव्रतांगत्वेनवसिष्ठसहितारुंधत्याःपूजनमहंकरिष्ये आगच्छवरदेदेविमंडलेस्मिन्स्थिराभव वसिष्ठेनसमायुक्तापूजांस्वीकुरुसत्कृता इत्यावाहनं अरुंधतिमहादेविसर्वसौभाग्यदायिनिदिव्यंसुचारुवेषंत्वमासनंप्रतिगृह्यतां इत्यासनं

सुचारुशीतलंदिव्यंनानागंधसुवासितं पाद्यंगृहाणदेवेशिअरुंधति नमोस्तुते इतिपाद्यं अरुंधतिमहाभागेवसिष्ठप्रियवादिनि अर्घ्यंगृहाणकल्याणिभर्त्रासहपतिव्रतेइत्यर्घ्यं गंगातोयंसमानीतंसुवर्णकलशेस्थितं आचम्यतांमहाभागेवसिष्ठसहितेनघे इत्याचमनं गंगासरस्वतीरेवापयोष्णीनर्मदाजलैः स्नापितासिमयादेविसदाशांतिंकुरुष्वमेइतिस्नानं नानारागसमायुक्तं दिव्यंचारुमनोहरं वस्त्रंगृहाणदेवेशिअरुंधतिनमोस्तुतेइतिवस्त्रं कर्पूरकुंकुमैर्युक्तंहरिद्रादिसमन्वितं कस्तूरिकासमायुक्तंचंदनंप्रतिगृह्यतांइतिगंधं अक्षताश्चसुरश्रेष्ठकुंकमाक्ताःसुशोभनाःभालालंकारसिद्ध्यर्थंप्रीत्यार्घ्यंप्रतिगृह्यतां इत्यक्षताः माल्यानिवैसुगंधीनिमालत्यादीनिवैपुनः मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यतां इतिपुष्पाणि गुग्गुलागुरुकस्तूरीचंदनादिविमिश्रितः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां इतिधूपः आज्यंत्रिवर्तिसंयुक्तंवह्निनायोजितंमया दीपंगृहाणदेवेशित्रैलोक्यतिमिरापहं इतिदीपः अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं नैवेद्यंगृह्यतांदेविप्रसादंकुरुसर्वदाइतिनैवेद्यं पूगीफलमिदंदिव्यंनागवल्लीदलैर्युतं कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्यतां इतितांबूलं इदंफलंमयादेविस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि इतिफलं हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे इतिदक्षिणा पुत्रान्देहि धनंदेहिसौभाग्यंदेहिसुव्रते अन्यांश्चसर्वकामांश्चदेहिदेविनमोस्तुते इतिप्रार्थना अरुंधतिमहाभागेवसिष्ठप्रियवादिनि सौभाग्यंदेहिमेदेविधनपुत्रांश्चदेहिमे इत्यर्घ्यं द्विभुजांचारुसर्वांगींसाक्षसूत्रकमंडलुं प्रतिमांकांचनींकृत्वानामभिःपरिपूजयेत् देववंद्यायैनमःपादौपूजयामि लोकवंद्यायैनमःजानुनीपू- संपत्तिदायिन्यैनमःकटिंपू- गंभीरनाभ्यैनमःनाभिंपू. लोकधात्र्यैनमःस्तनौपू-जगद्धात्र्यैनमःकंठंपूज. शांत्यैनमःबाहूपू. वरदायैनमःहस्तौपू. धृत्यैनमःमुखंपू. अरुंधत्यैनमः शिरःपू. सकलप्रियायैनमःशिखांपू. वसिष्ठप्रियायैनमःसर्वांगंपूजयामि ततोनीराजनं

कुर्य्यात् पुष्पांजलिंचदद्यात् वंशपात्रस्थितंपूर्णंवायनंद्रव्यसंयुतं अरुंधत्याःप्रीणनार्थंब्राह्मणायददाम्यहं इतिवायनं सुवर्णप्रतिमायुक्तांवसिष्ठेनसुशोभितां अरुंधतींवसिष्ठंचब्राह्मणायददाम्यहं इतिमूर्त्तिदानमंत्रः गच्छेदेवियथास्थानंसर्वालंकारभूषिते अरुंधतिनमस्तुभ्यंदेहिसौभाग्यमुत्तमं इतिविसर्जनं अथकथा हेमाद्रौ स्कांदे ईश्वरउवाच अरुंधतीव्रतंवक्ष्येसदासौभाग्यदायकं येनचीर्णेनवैसम्यङ्नारीसौभाग्यभाजनम् जायतेरूपसंपन्नापुत्रपौत्रसमन्विता वसंतेतुसमासाद्यतृतीयांपुरुषर्षभ स्नानंकृत्वातुवैसम्यक्त्रिरात्रोपोषितासती मिथुनानितुचत्वारि समाहूयपतिव्रता पूजयेत्पुष्पतांबूलैश्चंदनैश्चतथाक्षतैः कुंकुमागुरुकर्पूरैःसिंदूरैर्मृगनाभिभिः शिलापट्टेनसंप्राप्यजीरकंलवणान्वितं लोष्टकेनसमायुक्तंवस्त्रयुग्मेनवेष्टितं आवाहयेन्महादेवींवसिष्ठेनसमन्वितां पतिव्रतानांसर्वासांमुख्यात्वंदेवभामिनि द्विभुजांचारुसर्वांगींसाक्षसूत्रकमंडलुं प्रतिमांकांचनींकृत्वानामभिस्तांप्रपूजयेत् देववंद्यैनमःपादौजानुभ्यांलोकवंदिते कटिंसंपूजयेत्तस्याममसंपत्तिदायिनी नाभिंगंभीरनाभिंतुलोकाधात्र्यैतथारतनौ जगद्धात्र्यैतथास्कंधौबाहूशांत्यैनमस्तथा हस्तौतुवरदायैतुमुखंधृत्यैनमोनमः अरुंधतिमहापूजाशिरस्तुसकलप्रिया एवंसंपूज्यतांदेवींगंधपुष्पोपचारकैः पूजयित्वासतींदेवींततश्चार्घ्यंप्रदापयेत् अरुंधतिमहाभागेवसिष्ठप्रियवादिनि सौभाग्यंदेहिमेदेविधनंपुत्रांश्चसर्वदा उत्तरार्घ्यमंत्रः पुत्रान्देहिधनंदेहिसौभाग्यंदेहिसुव्रते अन्यांश्चसर्वकामांश्चदेहिदेविनमोस्तुते इतिप्रार्थना सुवासिन्योथसंपूज्याःसमाप्तिदिवसेतथा शुभंगंधाक्षतैःपुष्पैर्दद्यात्सूर्पान्समोदकान् होमंचैवतथाकुर्य्यात्समिद्भिश्चतिलैःपृथक् अष्टोत्तरशतंसंख्याप्रार्थनामंत्रतःसुधीः मिथुनानिचसंपूज्यभूषणाच्छादनादिभिः नानाविधोपचारैश्चचतुर्विंशतिसंख्यया आचार्य्यायसभार्य्यायसुवस्त्राभरणानिच शय्यांसोपस्करांदद्यात्कांस्यपात्रंसदीपकं आदर्शंचामरंचैवधेनुंदद्यात्पयस्विनीं शक्त्याचभोजयित्वाथास्त्रियः सू.

र्पान्समोदकान् मोदकान्कांचनंचैवतथावस्त्रंयथाविधि पोलिकाघृतपूपांश्चपूरिकाश्चविशेषतः सोहालिकाश्चदातव्याएकैकंद्विगुणंतथा भोजनद्वयपर्य्याप्तंदीनानाथांश्चतर्पयेत् एवव्रतंसमाप्याथपश्चान्नक्तंसमाचरेत् अनेनैवविधानेनमानिनीकुरुतेव्रतं अवैधव्यमवाप्नोतितथाजन्मसहस्रकं पुत्रपौत्रसमायुक्ताधनधान्यसमन्विता जीवेद्वर्षशतंसाग्रंसहभर्त्त्रापतिव्रता एवमभ्यर्चयित्वातुपदंगच्छत्यनामयं देवभार्य्यायथास्वर्गेऋषिभार्य्यातथैवच राजभार्य्यामहाभागासर्वकामफलप्रदा पुरावृत्तमिदंविप्राःशृणुध्वंव्रतमुत्तमं आसीद्विप्रःपुराविप्राःसर्वशास्त्रविशारदः तस्यैकाकन्यकाजातारूपेणाप्रतिमाभुवि ततोविवाहंसम्यग्वैपितातस्याकरोद्द्विजाः बालरंडातुसाजातानिर्वेदादगमद्गृहात् यमुनातीरमासाद्यचकारविपुलंतपः एकभक्ताशनैश्चैवकृच्छ्रचांद्रायणैस्तथा मासोपवासनियमैरा,त्मानंपावयन्सती कदाचिदागतस्तत्रभ्रमन्गौर्य्यासदाशिवः यमुनातीरमासाद्यपार्वतीतांददर्शह कृपयाचशिवागौरीमहादेवमुवाचसा पार्वत्युवाच देवकेनेदृशींप्राप्ताबालवैधव्यतोदशां वदेश्वरमहादेवकृपांकृत्वाममोपरि महादेवउवाच अयंविप्रःपुरागौरिकुलशीलयुतोभुवि तेनकन्यापरिवृतासुरूपायुवतीसती एतांविवाह्यतरुणींविदेशमगमद्द्विजःसाप्यस्यवहुतिथंकालमपश्यत्पुनरागमंनागतस्तुमहाविप्रोयावज्जीवंतुसद्विजःतस्याजन्मागमत्सर्वंविनापत्यातुनिष्फलं तेनपापेनविप्रोसौनारीत्वंप्राप्तवान्शिवे स्वनारींयःपरित्यज्यनिर्दोषांकुलसंभवां यातिदेशांतरंचाथअगाधमदनार्णवे परदाररतोवास्यादन्यांवाकुरुतेस्त्रियं सोन्यजन्मनिदेवेशिस्त्रीभूत्वाविधवाभवेत् यानारीतुपतिंत्यक्त्वामनोवाक्कायकर्मभिःरहःकरोतिवैजारंगत्वाचपुरुषांतरं भोगान्भुक्त्वाथसाद्वेषित्सादीनाप्रमदासती तेनकर्मविपाकेनसानारीविधवाभवेत् स्वपत्नींकुलसंभूतांपतिव्रतरतांसतीं अनुकूलांपरित्यज्यपरांयोयातिस्वेच्छया सपापीजायतेन्यस्मिन्स्त्रीहीनोविप्रजन्मनि अनेनसदृशंलोकेसदृशेनास्तिपातकं नवैधव्यात्परोव्याधिर्नवैधव्या

ऽपरोज्वरः नवैधव्यात्परःशोकोनवैधव्यात्परोंकुशः नरकोनचवैधव्यात्कष्टंवैधव्यतान्नृषु तेनपापेनघोरेणजातेयंवालरंडिका सूतउवाच इतिदेववचःश्रुत्वासागौरीविस्मिताभवत् पप्रच्छतंमहादेवंगौरीसाकरुणान्विता केनेदृशंमहापापंवालवैधव्यदायकं नश्यतेकर्मणायेनतन्मांवदकृपांकुरु श्रीमहादेवउवाच शृणुदेविप्रवक्ष्यामिवालवैधव्यनाशनं अरुंधतीव्रतंपुण्यंनारीसौभाग्यदायकं यत्कृत्वावालवैधव्यान्मुच्यतेनात्रसंशयः श्रुतमेतत्तदाविप्रागौर्याशंकरतोद्विजाः यमुनातीरमासाद्यउपदिष्टंतदाद्विजाः तस्यैनार्य्यैमहादेव्याकृतमेवव्रतंतया तेनपुण्येनमहताव्रतजेनमुनीश्वराः अरुंधतीव्रतमिदंतस्मात्कार्य्यंसदास्त्रिया नारिवैधव्यतोमुच्येत्सौभाग्यप्राप्नुयात्परं इतिहेमाद्रौस्कांदवालवैधव्यनाशनं सोद्यापनं अरुंधतीतृतीयाव्रतं अस्याविधानं ॐ मद्याहंसर्वपापक्षयोत्तरजन्मजन्मांतरेष्ववैधव्यस्थिरसौभाग्यरूपसंपत्तिपुत्रपौत्रसंततिसंप्राप्तिधनधान्यसंपत्त्यादिसमस्ताभीष्टकामनासिद्ध्यर्थमरुंधतीसमानपातिव्रत्यमाहमप्राप्तिकामनयाअरुंधतीतृतीयाव्रतंकरिष्येइतिसंकल्प्यचत्वारिद्विजदांपत्यमिथुनानिसमाहूयतेभ्योयथाशक्तिसौभाग्याष्टकादिद्रव्यंदत्वा अनंतरं सौवर्णीं वसिष्ठारुंधतीमूर्त्तिंषोडशोपचारैः संपूज्य वायनंदत्त्वा तृतीयामुपवासमाचरेत् चतुर्थ्यांद्विजदांपत्यानियथाशक्तिसौभाग्यद्रव्यैःपरितोष्यभोजयित्वा तांमूर्त्तिमाचार्य्याय दद्यात्तत्रमंत्रःसहृर्णप्रतिमायुक्तांवसिष्ठेनसुशोभितांअरुंधतींवसिष्ठंचब्राह्मणायददाम्यहं एवमाचार्य्यायमूर्त्तिंदत्त्वास्वयंभुंजीत एवंयथाशक्ति त्रिचतुःपंचवर्षाणिव्रतंकृत्वा अंतेउद्यापनंकुर्य्यात् पूर्वोदितसंकल्पांते अरुंधतीव्रतोद्यापनंकरिष्ये सर्वतोभद्रोपरिमूर्त्तिंप्रतिष्ठाप्य मंडलदेवतापूजनांते अग्निस्थापनंविधाय अन्वाधानांतेवसिष्ठारुंधत्योर्नाममंत्रैर्गायत्र्याचाष्टोत्तरशताहुतीर्हुत्वा मंडलदेवताभ्यएकैकयाहुत्या हुत्वा चतुर्विंशतिमिथुनानिभोजयित्वा इत्यरुंधतीव्रतोद्यापनं॥ चैत्रशुक्लचतुर्थीकृत्यंनारदीये चैत्रशुक्लचतुर्थ्यांतुवासुदेवस्वरूपिणं गणपंसम्यगभ्यर्च्य

दत्वाकांचनदक्षिणां तिथिकृत्यप्रकरणे गणेशेकारयेत्पूजांलड्डुकादिभिरादरात् चतुर्थ्यांविघ्ननाशायसर्वकामसमृद्धये अत्रैवविष्णुधर्मोक्तमाश्रमव्रतंचतुर्मूर्त्तिव्रतंच चैत्रस्यामलपक्षेतुसोपवासोजितेंद्रियः चतुर्थ्यांवासुदेवस्यकृत्वासंपूजनंशुभं कांचनंदक्षिणांदद्याद्द्विजायब्रह्मचारिणे इत्याश्रमव्रतं अथचैत्रशुक्लपंचम्यांतृतीयादिपंचम्यंतंत्रिरात्रसाध्यंहेमाद्रौ विष्णुधर्मोत्तरोक्तंश्रीव्रतं मार्कंडेयउवाच अथातः संप्रवक्ष्यामिश्रीव्रतंनामतेःव्रतम् चैत्रशुक्लतृतीयायांस्नानमभ्यंगपूर्वकं कृत्वाशुक्लांबरोराजन्शुक्लमाल्यानुलेपनः तिष्ठेद्घृतोदनाहारोभूमौस्वप्यान्निशांचताम् चतुर्थ्यांचतथास्नानंवहिरेवसमाचरेत् पंचम्यांचविशेषेणशुक्लांबरधरःशुचिःलक्ष्मींसंपूजयेत्पद्मेकृतकेकृतकेपिवा अकृतकेपद्मल्वजात्याक्रांते शुक्लेनगंधमाल्येनघृतदीपेनचाप्यथ हरिद्रयाचधान्येनआर्द्रकेनगुडेनच इक्षुणेक्षुविकारैश्चलवणेनचभूरिणा स्वशक्त्याचमहाराजभूरिणावलिकल्पनम् श्रीसूक्तेनततोवह्निंजुहुयात्कमलानितु तदलाभेचविल्वानितदलाभेतथाघृतम् ब्राह्मणान्पारसप्रायंघृतभूयिष्ठमाशयेत् आशयेद्भोजयेत् सुवर्णमाषकंदद्याद्ब्राह्मणायच दक्षिणाम् अनाहारस्ततःस्वप्यात्शुचौदेशेयथाविधि ततस्तुपंचमींप्राप्यपूर्वाह्णेपद्मिनीजले स्नात्वासंपूजनंकुर्यात्प्राग्वद्देवतथाश्रियः भूयएवद्विजेदद्यात्पूर्वं कनकमाषकम् पूर्वंदक्षिणात्वेन पूर्वोक्तं पद्माक्षमथवाविल्वंप्राश्नीयात्तदनंतरम् ततोहविष्यमश्नीयाद्वाग्यतोमानवोत्तमः संवत्सरमिदंकृत्वाव्रतंपार्थिवसत्तम फलमाप्नोतिविपुलं राजसूयाश्वमेधयोः विनाकनकदानेनव्रतमेतत्समाचरन् व्रतांतेमाषकंस्वर्णमग्निष्टोमफलंलभेत् संपूज्यसोपवासस्तुशुक्लपक्षस्यपंचमीम् नित्यमेवश्रियंदेवींश्रियमाप्नोत्यनुत्तमाम् धनमुत्तममाप्नोतिरूपमारोग्यमेवच जगत्प्रधानांवरदांचपुण्यांविभावरींसर्वगतांनरेंद्र श्रद्धान्वितःपूजयतीहयस्तुकामानवाप्नोतिससर्वकालम् ॥

अत्रैवप्रसंगात्संवत्सरपर्यंतं पद्मोक्तंशुक्लपंचम्यांलक्ष्मीव्रतं लक्ष्मीमभ्यर्च्यपंचम्यामुपवासीभवेत्तुयः समांतेहेमकमलंदद्याद्धेमसमन्वितम् सवैष्णवपदंयातिमानवःकुलनंदनि एतल्लक्ष्मीव्रतंनामदुःखशोकविनाशनमितिपद्मपुराणोक्तंलक्ष्मीव्रतं अथास्यामेवपंचम्यांचंद्रपूजनपृथ्वीपूजनंचोक्तंवीरमित्रोदयेविष्णुधर्मोत्तरे पंचम्यां पूजनंकृत्वातथाचंद्रमसोनरःआयुश्चविपुलांलक्ष्मींसर्वैश्वर्य्यंचविन्दति ॥ इतिविष्णुधर्मोत्तरोक्तंसौभाग्यव्रतं पंचम्यांपृथिवींचैवतथासंपूजयेन्नरः तामेवाप्नोत्ययत्नेननात्रकार्याविचारणेतिविष्णुधर्मोक्तंपृथिवीव्रतम् अस्यामेव चैत्रशुक्लपंचम्यांपद्मपुराणीयपातालखंडोक्तंहयपंचमीव्रतम् अश्वराडमृतोजातोवातरंहोमनोजवः उच्चैः श्रवाःपूजनीयःपंचम्यांचैत्रशुक्लके तत्रैवपूज्यागंधर्वास्तुरंगाणांतुवांधवाइत्यादि इयमेवमत्स्यपंचमीचोक्तानारदीये॥प्रोक्तामत्स्यजयंतीतुपंचमीमधुशुक्लगा अस्यांमत्स्यावतारभक्तैः कार्य्योमहोत्सवः श्रीपंचमीतिचैवोक्तातत्रकार्य्याश्रियोर्चनं गंधाद्यैरुपचारैस्तुनैवेद्यैःपायसादिभिः यस्तांसंपूजयेत्तत्रतंवैलक्ष्मीर्नमुंचति पृथ्वीव्रतंतथाचांद्रंहयग्रीवव्रतंतथा कार्य्यंतत्तद्विधानेनतत्तत्फलमभीप्सुभिः तथाचब्रह्मपुराणे शुक्लायामथपंचम्यांचैत्रेमासिशुभानना श्रीब्रह्मलोकान्मानुष्यंसंप्राप्ताकेशवाज्ञया तस्मात्तांपूजयेत्तत्रयस्तंलक्ष्मीर्नमुंचति एषाश्रीपंचमीकार्याविष्णुलोकगतिप्रदा चैत्रस्यशुक्लपंचम्यांपूजयित्वातथाश्रियं सकृदेवाप्नुयादेतत्फलंसंवत्सरोद्भवमितिहेमाद्रौविष्णुधर्मोत्तरे इयंचैत्रशुक्लपंचमीकल्पादिःहेमाद्रौ मात्स्ये ब्रह्मणोयादिनस्यादिःकल्पादिस्साप्रकीर्तिता वैशाखस्यतृतीयायांकृष्णायांफाल्गुणस्यच पंचमीचैत्रमासस्यतथावान्यातथापरा शुक्लत्रयोदशीमाघकार्तिकस्यतुसप्तमी नवमीमार्गशीर्षस्यसप्तैताः संस्मराम्यहं कल्पानामादयोह्येतादत्तस्याक्षयकारकाः अत्रसर्वेऽपिश्राद्धादिनिर्णयोमन्वादिवद्ज्ञेयः ॥

अथचैत्रशुक्लषष्ठ्यांस्कंदपूजाब्रह्मपुराणे अमावास्यांसमुद्भूतः स्कंदः पूर्वंहुताशनात् जातः पर्वणिषष्ठ्यांतुशुक्ला

यांचैत्रनामानि सेनापत्येभिषिक्तस्तुदेवानांवह्मणापुराजितवांस्तारकंदैत्यंक्रौंचंशक्त्याविभेदच तस्मात्सतत्रविधिना स्कंदमाल्यैः सुगंधिभिः दीपालंकारवस्त्रान्नकुंकुमैः पूज्यएवहि अक्षक्रीडनकैरम्यैर्घंटाचामरदर्पणैः सर्वासुशुक्लषष्ठीषुपूज्योवाश्रद्धयानरैः आरोग्यकामैर्वालानांपुत्रवृद्धिर्विशेषतः नारदीयेपि चैत्रेमासिशुक्लषष्ठ्यांकुमारव्रतमुत्तमं तत्रेष्ट्वाषण्मुखंदेवंनानापूजाविधानतः पुत्रंसर्वगुणोपेतंप्राप्नुयाच्चिरजीविनं मदनरत्ने चैत्रशुक्लषष्ठीमारभ्यप्रारभ्यंकुमारव्रतं ईश्वरउवाच चैत्रशुक्लात्समारभ्यव्रतार्थमधुनोच्यते उपोष्याविधिनाषष्ठ्यांविशेषात्षण्मुखंयजेत् मृण्मयींप्रतिमांरम्यांतदाकुर्याद्विशेषतः षण्मुखंद्वादशभुजंद्योतत्कांचनसुप्रभं मयूरवाहनंदेवंसौम्यंलावण्यपूरितं शक्तिघंटांपताकांचपाशंकुक्कुटभूषितं दंडाभयंसवरदंखड्गेषुधिशरासनं संपूज्यपरयाभक्त्याशुक्लपुष्पोपचारकैः नैवेद्यगंधवस्त्राणिशुक्लान्येवप्रदापयेत् ब्राह्मीरसंसमाधायकापित्थाज्यंफलंतथा सरस्वत्यणुनामंत्र्यसहस्राष्टोत्तरेणतु सरस्वतीमंत्रेणानुमंत्रणंकृत्वेत्यर्थः आचार्यंपूजयेद्भक्त्या वस्त्रहेमान्नवाहनैः ब्राह्मीरसंघृतंचांतेप्राशयेत्प्राशनेहितं मासिमासिप्रकर्तव्यंयावत्संवत्सरावधि ब्रह्मचर्येणशुचिनाअब्दमेकंसमाचरेत् महाकविर्भवेत्सोपिभुविवाचस्पतिर्यथा सकृद्गृह्णातिशास्त्राणिवादिनांमूर्ध्नितिष्ठति रक्षोविनायकास्तस्यनहिंसंतिकदाचन स्कंदग्रहामहाघोरास्तथापस्मारदुर्ग्रहाःनहिंसंतिमहासेनव्रतस्यास्यप्रभावतः इदंव्रतोत्तमश्रेष्ठंकर्तव्यंभूमिवर्द्धनं षण्मुखंपार्वतीपुत्रंस्कंदंग्रहकुमारकं कार्तिकेयंतथावालंतथान्यंक्रौंचसूदनं तारकारातिसंज्ञंचतथान्यंकृत्तिकासुतं वैशाखंचविशाखंचमासिमासिप्रपूजयेत् सूर्यंसूर्यकलायुक्तंशशिनामूर्ध्निभूषितं क्रमेणमंत्रावोद्धव्याद्वादशानांशिखिध्वज इतिचैत्रादिद्वादश शुक्लषष्ठीषुकुमारपूजाव्रतम् ॥

अथचैत्रशुक्लसप्तम्यांसूर्यपूजाव्रतं तत्रैवनारदीयेपि चैत्रेतुशुक्लसप्तम्यांस्नानंवहिःसमाचरेत् स्थंडिलेगोमयालिप्ते

पुस्तकालय
गुरुकुल कांगड़ी

गौरमृत्तिकयासिते लिखित्वाष्टदलंपद्मंकर्णिकायांविभावसुं विन्यसेत्पूर्वपत्रेतुद्वौदेवौकृतघातकौ आग्नेयेचन्यसेत्पत्रेद्वौदेवौकृतकारकौ दक्षिणेचन्यसेत्तत्रतथैवाप्सुरसद्वयं अकृतौद्वौन्यसेत्पत्रेनैर्ऋत्येमुनिसत्तम काद्रवेयौमहानागौपश्चिमेकृतकारकौ वायव्येयातुधानौवातूत्तरेचऋषिद्वयं ऐशान्येचन्यसेत्तत्रग्रहमेकंद्विजोत्तमते षांसंपूजनं कार्य्यंगंधमाल्यानुलेपनैः धूपदीपैःसनैवेद्यैस्तांबूलक्रमुकादिभिः एवंसंपूज्यहोमंतुघृतेनाष्टशतंचरेत् सूर्य्यस्याष्टौचचान्येषांप्रदद्यादाहुतीःक्रमात् नाममंत्रेणमेधावीततःपूर्णाहुतिंददेत् दक्षिणाचततोदेया।द्विजेभ्यःशक्तितोद्विज एवंकृत्वाविधानंतुसर्वसौख्यमवाप्नुयात् देहांतेमंडलंभानोर्भित्त्वागच्छेत्परंपदं अस्याविधिःसप्तम्यांवहिःस्नानं गौरमृदागोमयलिप्तेस्थलेऽष्टदलंपद्मंकृत्वा मध्येविभावसुंसंपूज्य दलेषुक्रमेणकृतघातकादीन्संपूज्यअग्निस्थापनंविधाय अन्वाधानांते सर्वेषांनाममंत्रैरष्टोत्तरशताहुतीर्घृतेनदद्यात्सर्वतोभद्रमंडलादिपूजापरिभाषोक्तक्रमेणकुर्य्यात् व्रतांतेपूर्णाहुत्यादिविधाय द्वादशब्राह्मणान्सहिरण्यमूर्तिकुंभदानादिभिःपरितोष्य आचार्य्यायमूर्त्तिशय्यागोदानादिकंदद्यात् इत्युद्यापनविधानं ॥ अत्रैवशुक्लसप्तम्यांदमनकादिभिःसूर्यपूजाकर्तव्या तदुक्तंनिर्णयामृते देवीपुराणे भास्करस्यतुसप्तम्यांपूजांदमनकादिभिः कृत्वाप्राप्नोतिभोगादीन्विगतारिर्महायशाइति अस्यामेवभाविष्योत्तरोक्तमनोदनसप्तमीव्रतं हेमाद्रौचैत्रशुक्लसप्तम्यांवहिःस्नानंसमाचरेत् अथैवंमंडलेष्टदलंविधायतस्मिन्नेवसूर्यपूजांविधाय दध्नापायसेनद्वादशब्राह्मणान्संतर्प्यस्वयमनोदनंद्विजभुक्तशेषंप्राश्नीयात् आचार्यपूजाहोमादिकंप्राग्वत्चरेत् इत्यनोदनसप्तमीव्रतं अस्यामेवभविष्योत्तरोक्तं नामसप्तमीव्रतं तदुक्तंहेमाद्रौ चैत्रात्प्रभृतिकर्तव्यासर्वदानामसप्तमीत्यादि ॥ अत्रचैत्रादारभ्यशुक्लसप्तमीषु द्वादशादित्यान् क्रमेणपूजयेत् धाता १ अर्यमा २ मित्रः ३ वरुण ४ इंद्रो ५ विवस्वान् ६ पर्जन्यः ७ पूषा ८ अंशुः ९ भगः १०त्वष्टा ११ जिष्णु१२ रेतान् प्रतिमासमेकैकनाम्ना

पूजयेत् वत्सरांते सर्वतोभद्रमंडले देवतापूजनमग्निकार्यंचकृत्वा अन्वाधानांते नाममंत्रैराकृष्णेनेत्यादिमंत्रैर्होमं संपाद्यपूर्णाहुत्याचार्यादिपूजांयथाविधिसमाचरेदिति नामसप्तमीव्रतं॥ अथास्यामेवविष्णुधर्मोत्तरोक्तं सूर्यव्रतम् चैत्रस्यशुक्लपक्षेतुसम्यक्षष्ठ्यामुपोषितःसप्तम्यामर्चनंकुर्य्याद्देवदेवस्यगोपतेः वहिस्स्नानंसदाकृत्वापूजनंसर्वदाचरेदिति सर्वदेतिसर्वासुशुक्लषष्ठीषूपोषणं सप्तमीषुसूर्यस्यपूजनंकुर्य्यादितिसूर्यसप्तमीव्रतं यावज्जीवनंतावत्कार्य्यं नास्योद्यापनादिविधानं नित्यपूजावदित्यर्थः ॥ अत्रचैत्रशुक्लाष्टम्यांभवान्याउत्पत्तिः तत्रनवमीयुताष्टमीग्राह्या अष्टमीनवमीयुक्तानवमीचाष्टमीयुतेति ब्रह्मवैवर्त्तात्॥अत्रभवानीयात्रोक्ताकाशीखंडे भवानींयस्तुपश्येतशुक्लाष्टम्यां मधौनरः नजातुलभतेशोकंसदानंदमयोभवेदिति तथाचनारदीये शुक्लाष्टम्यांचैत्रमासेभवान्याःप्रोच्यतेजनिः प्रदक्षिणशतंकृत्वाकार्य्योयात्रामहोत्सवः दर्शनंजगदंवायाः सर्वानंदप्रदंनृणामिति अत्रैवाशोककलिकाप्राशनमुक्तं हेमाद्रौलैंगे अशोककलिकाश्चाष्टौयेपिवंतिपुनर्वसौ चैत्रेमासिसिताष्टम्यांनतेशोकमवाप्नुयुः नारदीयेपि अत्रेवाशोककलिकाप्राशनंसमुदाहृतं अशोककलिकाश्चाष्टौनतेशोकमवाप्नुयुरितिपूर्वपाठएवमहाष्टमीतिसाप्रोक्तादेव्याः पूजाविधानतः अशोककलिकाप्राशनमंत्रस्तु त्वमशोकहरानिष्टमधुमाससमुद्भवं पिवामिशोकसंतप्तोमामशोकंसदाकुरु इत्यत्रपुनर्वसुयोगोऽनावश्यकः किंतु प्राशस्त्यातिशयार्थः तिथिःशरीरंदेवस्यतिथौनक्षत्रमाश्रितं तस्मात्तिथिंप्रशंसंतिननक्षत्रंतिथिंविनेति ज्योतिःशास्त्रात् तथाचतिथितत्त्वेस्कांदे मीनेमधोःशुक्लपक्षेअशोकाख्यांतथाष्टमीं पिवेदशोककलिकाः स्नायाल्लौहित्यवारिणि अत्रमधुश्चांद्रः पृथक्मीनग्रहणात् अत्रविशेषः पृथ्वीचद्रोदये विष्णुः पुनर्वसुवुधोपेताचैत्रेमासिसिताष्टमी लौहित्येविरजेस्नायात्सर्वपापैःप्रमुच्यते पृथिव्यांयानितीर्थानिसरितः सागरादयः सर्वेलौहित्यमायांतिचैत्रेमासिसिताष्टमीं अत्रस्नानमंत्रः ब्रह्मपुत्रमहाभागशंतनोःकुलव

द्दैन अमोघागर्भसंभूतपापंलोहितमेहरेति कालिकापुराणेपि चैत्रेमासिसिताष्टम्यांयोनरोनियतेंद्रियः स्नायाल्लौहित्यतोयेषुसयातिब्रह्मणःपदं लोहितात्सरसोजातोलौहिताख्यस्ततोभवत् चैत्रंतुसकलंमासंशुचिःप्रयतमानसः लौहित्यतोयेयः स्नायात्सकैवल्यमवाप्नुयात् ॥ इति अस्यामेवाष्टम्यांदेव्यामहापूजाकार्य्या तदुक्तं मार्कंडेयपुराणे देवीमाहात्म्ये शरत्कालेमहापूजाक्रियतेयाचवार्षिकी तस्यांममैतन्माहात्म्यंश्रुत्वाभक्तिसमन्वितः सर्वाबाधाविनिर्मुक्तोधनधान्यसमन्वितः मनुष्योमत्प्रसादेनभविष्यतिनसंशयः अत्रयाचवार्षिकीत्यनेनसैववत्सरस्यादौचैत्रशुक्लप्रतिपदमारभ्याष्टमीपर्यंतंक्रियमणापूजाविधीयते ततश्चशरद्वसंतयोस्तुल्यएवदुर्गोत्सवइतिसंप्रदायाविदःप्राहुः ॥ अथचैत्रशुक्लनवम्यांश्रीरामजयंतीव्रतंतत्रादौ ॥ रामनाममहिमास्कांदेमोक्षखंडे रुद्रगीतायांश्रीरामंप्रति रुद्रवाक्यं मुमुक्षोर्मणिकर्णांतेअर्द्धोदकनिवासिनः अहंदिशामितेमंत्रंतारकस्योपदेशतः श्रीरामरामरामेतिएतत्तारकमुच्यते अतस्त्वंजानकीनाथपरंब्रह्माभिधीयतेति भविष्योत्तरे श्रीपार्वत्युवाच धन्यास्म्यनुगृहीतास्मिकृतार्थास्मिजगत्प्रभो विच्छिन्नोमेतिसंदेहग्रंथिर्भवदनुग्रहात् त्वन्मुखाद्गलितंरामतत्त्वामृतरसायनं पिबंत्यामेमनोदेवनतृप्यतिभवापह श्रीरामस्यामृतंनामश्रुतंसंक्षेपतोमयाइदानींश्रोतुमिच्छामिविस्तरेणस्फुटाक्षरं श्रीमहादेवउवाच शृणुदेविप्रवक्ष्यामिगुह्याद्गुह्यतरंमहत्प्राप्नोतिपरमामृद्धिंदीर्घायुःपुत्रसंपदं रामनामलिखेद्यस्तुलक्षकोटिशतावधिएकैकमक्षरंपुंसांमहापातकनाशनं सकामोपिलिखेद्यस्तुनिष्कामोवापियोलिखेत् इहैवसुखमाप्नोतिमोक्षंचांतेसमाप्नुयात्रामरामेतिरामेतिसर्वस्वंममवल्लभे अथातःसंप्रवक्ष्यामिपौरश्चरणिकंविधिं विनायेननसिद्धः स्यान्मंत्रोवर्षशतैरपिप्रणवंपूर्वमुच्चार्य्यालिखेन्मंत्रंसदाप्रिये अंतेप्रणवमुच्चार्य्यलिखेन्मंत्रंसदाप्रिये अंतेप्रणवमुच्चार्य्यनमेत्सीतापतिंप्रिये आदावंतेचमध्येचव्रतस्योद्यापनंचरेत् उद्यापनंविनानैवफलसिद्धिमवाप्नुयात् तस्मात्सर्वप्रयत्नेनसम्यगुद्या

61

पनंचरेत् श्रीपार्वत्युवाच नतास्म्यहंमहादेवभक्तानुग्रहकारक उद्यापनविधिंब्रूहिविस्तरेणममप्रभो श्रीमहादेव
उवाच शृणुदेविप्रवक्ष्यामिविस्तरेणयथाविधि नाम्नामुद्यापनंचात्रभक्त्याभवदनुग्रहात् सुवर्णप्रतिमांकुर्य्यात्सी
तारामसलक्ष्मणां हनुमत्प्रतिमांतत्रचतुर्थांशेनहाटकीं सुवर्णस्यप्रमाणं तुपलाष्टकमुदीरितं अशक्तश्चेत्पलेनैवतद
र्द्धार्द्धेनवापुनः श्रीरामस्यप्रतिकृतिंवित्तशाठ्यंनकारयेत् रजतेनासनंकुर्य्यात्माषैःषोडशाभिस्ततः पीतवस्त्रेणसं
वेष्ट्यस्थापयेत्तंडुलोपरि तंडुलानांप्रमाणंतुभवेद्द्रोणचतुष्टयं शुचौदेशेगृहेतीर्थेमंडपंकारयेद्बुधः तोरणानिचद्वारेषु
बंधयेदाम्रपल्लवैः भूमौगोमयलिप्तायांसर्वतोभद्रमंडपं रचयेत्सप्तधान्यैर्वानानारंगैःसुशोभनं कुंभानष्टौचपूर्वादौ
स्थापयेदव्रणानपि कुंभमेकंमध्यदेशेस्थापयेत्तंडुलोपरि शुद्धोदकेनसंपूर्य्यपंचरत्नैःसपल्लवैः नारिकेलफलान्य
ष्टौएकंरामायदापयेत् आचार्य्यंवरयेत्तत्रवेदशास्त्रविशारदं ब्रह्मादिऋत्विग्विप्राणांवरणंकारयेत्ततः मधुपर्केणसंपू
ज्यवस्त्रालंकारभूषणैःऋत्विजःषोडशाष्टौवावरयेद्वेदपारगान् स्नात्वानित्यंविधायादौपूजयेद्गणनायकं पुण्याहंवा
चयित्वादौपूजयेद्रामभद्रकं ततोग्निंचप्रतिष्ठाप्यस्वशाखोक्तविधानतः विष्णुसूक्तेनहोतव्यंमूलमंत्रेणवापुनः नव
ग्रहांश्चदिक्पालान्मंत्रानुक्त्वाचहोमयेत् पुरुषसूक्तेनहोतव्यंसमिदाज्यंचरूंस्तिलान् अष्टोत्तरसहस्रंतुराममंत्रेणहे
मयेत् होमांतेपूजयेत्सर्वारामंचंद्रादिदेवताः पूजयित्वाततोहुत्वादत्वापूर्णाहुतिंतथा श्रेयःसंपाद्यदानंचअभिषेकंस
माचरेत् रामंनत्वार्चयित्वाचप्रार्थयित्वापुनःपुनः आचार्य्यंपूजयेत्पश्चात्सुवर्णैर्वरधेनुभिः प्रतिमांदानमंत्रेणआचा
र्य्यायनिवेदयेत् दानमंत्रः नतोस्मिदेवदेवेशबहुबुद्धिमहात्मभिः यश्चिंत्यसेकर्मपाशाद्धृदिनित्यंमुमुक्षुभिः माय
यागुणमय्यात्वंसृजस्यवसिलुंपसि अतस्त्वत्पादभक्तेषुत्वद्भक्तिरस्तुश्रियोधिका भक्तिमेवाभिवांछंतित्वद्भक्ताःसारवे
दिनः अतस्त्वत्पादभक्तेषुभक्तिरेवसदास्तुमे संसारमयभीतानांभेषजंभक्तिरेवते रामसीताससौमित्रिहनुमद्भक्ति

व्र०र०
चैत्र०
३०

त्परःदानेनानेनरामत्वंभुक्तिमुक्तिप्रदोभव प्रतिमादानसिद्ध्यर्थंशक्त्यास्वर्णंतुदापयेत् दानंयद्दक्षिणाहीनंतत्सर्वंनिष्फलंभवेत् व्राह्मणान्शतसाहस्त्रंभोजयेन्मधुसर्पिषी पक्कान्नैःपायसैःखाद्यैःकदलीशर्करान्वितैः ऋत्विग्भ्योदक्षिणांदत्त्वाभूयसींदक्षिणांयजेत् तदंतेघृतपात्रंचतिलपात्रंचदापयेत् शय्याश्वरथदानानिदशदानानिशक्तितः अशक्तश्चेत्स्वर्णमेकंदत्त्वारामंनमेत्पुनः तिलकंकारयेत्पश्चादभिषिंचेत्सपल्लवैः द्विजैस्तुचाशिषोदेयानत्वास्तुत्वाविसर्जयेत् उमामहेश्वरौपूज्यौपूजयेद्वटुकंतथा कुमारीणांत्रयंभोज्यंयोगिराजंचपूजयेत् क्षेत्रपालवलिंदत्त्वाध्यात्वारामंसदाजपेत् व्रह्मादिभिस्तुतत्पुण्यंवक्तुंशक्यंनकिंचन अश्वमेधसहस्त्राणिवाजपेयशतानिच एकेनरामनाम्नातुतत्फलंलभतेनरः नारीवापुरुषोवापिशूद्रोवाप्यधमोनरः रामनाम्नैवमुक्तास्तेसत्यंसत्यंवरानने अथध्यानं मूलेकल्पद्रुमस्याखिलमणिविलसद्रत्नासिंहासनस्थं कोदंडद्वंद्वपाणिंललितकरयुगेनार्पितंलक्ष्मणेन वामांकेन्यस्तसीताधृतभरतमहामौक्तिकच्छत्रकांतिं शत्रुघ्नंचामराभ्यांविलसितमनिशंरामचंद्रंभजेहम् ॥

इति श्रीभविष्योत्तरेपुराणे उमामहेश्वरसंवादेरामलेखनोद्यापनंसंपूर्णं

अथास्यप्रयोगः ओमद्येत्यादितिथ्यादिसंकीर्त्यात्मनोनेकपापक्षयपूर्वकसकलमनोरथावाप्तिवासनया श्रीरामप्रीत्यर्थं मयालिखितंयत्कोटिलक्षामुकावधिरामनामतत्संपूर्णतासिद्धयेतदुद्यापनाख्यंकर्मकरिष्ये इतिसंकल्प्यवृताचार्यः सर्वतोभद्रस्थकलशेसाक्षतपूर्णपात्रंषोडशमाषात्मकराजतसिंहासनेसुवर्णस्यपलेनतदर्द्धार्द्धेनवानिर्मितरामंवामतः सीतांदक्षिणतोलक्ष्मणंपुरतोहनुमंतंचसुवर्णप्रतिमास्तुसंपूज्य नाममंत्रैःपुरुषसूक्तेनच परितोष्टकलशेषु लोकेशान्संपूज्य प्रात रग्निंप्रतिष्ठाप्य अन्वाहुतिंविदध्यात् अत्रलेखनदशांशेनहोमः तत्रप्रधानंरामंसाज्यद्रव्येणलेखनदशांशेनमूलमंत्रेण परिवारदेवताब्रह्मादिदेवताश्च एकैकेकयाज्याहुत्यायक्ष्ये एवंपूर्वोक्तविधिनाहोमं

संपाद्य आचार्य्यं वस्त्रादिभिः संपूज्य सदक्षिणंपीठंप्रतिमांचआचार्य्यायदद्यात् तत्रमंत्रः सीतासौमित्रिहनुमद्युतंरामंसदक्षिणं ददामिद्विजवर्य्येभ्योरामोमेप्रीयतामिति ततोव्रतपूर्तयेसालंकारांगांगोदानविधिनादत्त्वा घृतपूरितकांस्यपात्रंससुवर्णंतिलपात्रंचदत्त्वा यथाशक्ति दशदानानिदत्त्वा योगिराजंवटुकत्रयंकुमारीश्चभोजयित्वासदन्नेनान्यानपिब्राह्मणान् दक्षिणादिभिःपरितोष्यआशिषोगृहीत्वा इष्टजनैःसहभुंजीत इतिरामनवम्यांरामनवमीव्रतसहितं रामनामलेखनोद्यापनम् ॥

अथरामनवमीव्रतमाहिमा

तदुक्तमगस्त्यसंहितायां अगस्त्यउवाच सर्वानुष्ठानसारंतेसर्वदानोत्तमोत्तमं रहस्यंकथयिष्यामिसुतीक्ष्णशृणु सत्तम चैत्रेनवम्यांप्राक्पक्षेदिवापुण्येपुनर्वसौ उदयेगुरुगौरांश्वोःस्वोच्चस्थग्रहपंचके मेषेपूषणिसंप्राप्तेलग्नेकर्कटकाह्वये आविरासीत्स्वकलयाकौसल्यायांपरःपुमान् तथाचोक्तंरामार्चनचंद्रिकायां उच्चस्थेग्रहपंचकेसुरगुरौसेंदौनवम्यांतिथौ लग्नेकर्कटकेपुनर्वसुयुतेमेषंगतेपूषणि निर्दग्धुंनिखिलाःपलाशसमिधोमध्यादयोध्यारणे राविर्भूतमभूतपूर्वविभवंयत्किंचिदेकंमहः पलाशसमिधइति पलंमांसंतदश्नंतियेतेराक्षसास्तएवसमिधस्तान्निर्दग्धुं अयोध्यैवारणिरग्निमथनकाष्ठंतन्मध्यादाविर्भूतं यत्किंचित् अनिर्वचनीयंमहस्तेजोविशेषःश्रीरामआविर्बभूवेत्यर्थः तथा च चैत्रेमासिनवम्यांतुशुक्लपक्षेरघूत्तमः प्रादुरासीत्पुराब्रह्मन्परंब्रह्मैवकेवलं तस्मिन्दिनेतुकर्तव्यमुपवासव्रतंसदा तत्रजागरणंकुर्याद्रघुनाथपरोभुवीति अन्यत्रापि तस्मिन्दिनेमहापुण्येराममुद्दिश्यभक्तितः यत्किंचित्क्रियतेकर्मभवत्यक्षयकारकं उपोषणंजागरणंपितॄनुद्दिश्यतर्पणं तस्मिन्दिनेतुकर्त्तव्यंब्रह्मप्राप्तिरभीप्सुभिः रामएवपरंब्रह्मतद्दिनं रामतोषकमित्यादि अथैतस्यव्रतस्यनित्यत्वंप्रतिपाद्यते रामार्चनचंद्रिकायां नित्यंनैमित्तिकंकाम्यंव्रतंचतिविचार्यते निःकामानां विधानात्तत् नकाम्यंतावदिष्यते मुमुक्षवोपिहिसदाश्रीरामनवमीव्रतं नत्यजंतिसुरश्रेष्ठादेवे

शोपिविशेषतः अत्रसदापदश्रवणात् यावज्जीवंरामनवमीव्रतंकर्त्तव्यमितितात्पर्य्यम् नहिनैमित्तिकंचैवसदेति श्रूयतेततः नित्यमेवभवेत्तस्मात्श्रीरामनवमीव्रतमिति नत्वस्यनचनित्यत्वंप्रत्यक्षत्वात्फलश्रुतेः सूर्यग्रहेकुरुक्षेत्रमहादानैःकृतैर्मुहुः यत्फलंसमवाप्नोतिश्रीरामनवमीव्रतादिति नारदीयेऽपि चैत्रस्यशुक्लपक्षेतुश्रीरामनवमी व्रतं सविधूयेहपापानिव्रजेद्विष्णुपदंपरं मैवंफलश्रुतेर्नित्यंलक्षणाभावतोऽथवा ननित्यतातत्रनाद्योनिग्रहोत्राविरोधतः नांत्योप्यकरणेतस्यमहादोषश्रुतेः स्फुटं प्राप्तेश्रीरामनवमीदिनेमर्त्योविरूढधीः उपोषणंनकुरुतेकुंभीपाकेषुपच्यते अकृत्वारामनवमीव्रतंसर्वव्रतोत्तमं योव्रतान्यानिकुरुतेनतेषांफलभाग्भवेत् यस्तुरामनवम्यांतु भुंक्तेमोहाद्विमूढधीः कुंभीपाकेषुघोरेषुपच्यतेनात्रसंशयइति अतश्चाकरणेदोषविधानान्नित्यतास्थिता कुर्याद्रामनवम्यांयउपोषणमतंद्रितः नमातृगर्भंप्राप्नोतिसवैरामोभवेत्स्वयं तस्मात्सर्वात्मनासर्वैकृत्वैवनवमीव्रतं मुच्यंते सर्वपापेभ्योयांतिब्रह्मसनातनमित्यादिवचनैः पापक्षयद्वारा मोक्षार्थत्वमवगम्यते संयोगपृथक्त्वाच्चनफलानित्यत्वयोर्विरोधः अत्रकेचित्तदुपासकानामेवेदंनत्वन्येषामित्याहुः अन्येत्वकरणेदोषश्रवणात् तस्मात्सर्वात्मना सर्वैःकार्यैवनवमीव्रतमिति पूर्वोक्तवचनाच्चजन्माष्टम्यादिवदिदमपिसर्वेषांनित्यमन्यथाजन्माष्टम्यादावपि तदुपासकानामेवनित्यतांबक्तुःकोवारयेतेत्याहुः इतिनित्यत्वकथनं शुद्धाविद्धेतिभेदेननवमीसाद्विधामता समान्यूनाधिकाचेतिशुद्धापिनवमीत्रिधा पुनर्नक्षत्रसंयोगावियोगाभ्यांतुषड्विधा समापिऋक्षभेदादिभेदैर्विद्धापिषड्विधा एवंद्वादशधाभिन्नानवमीतत्रानिर्णयः महाफलप्रदाशुद्धापुनर्वस्वृक्षयोगतः चैत्रमासिनवम्यांतुजातोरामःस्वयंहरिः पुनर्वस्वृक्षसंयुक्तासातिथिःसर्वकामदा श्रीरामनवमीप्रोक्ताकोटिसूर्यग्रहाधिकाचैत्रशुद्धातुनवमीपुनर्वसुयुतायदिसैवमध्याह्नयोगेनमहापुण्यतमाभवेत् केवलापिसदोपोष्यानवमीशब्दसंग्रहात् तस्मात्सर्वात्मनासर्वैःकर्त्तव्यंनवमी

व्रतम् सर्वैरितिसर्वेषामधिकारःप्रकाश्यते विद्धैवचेदृक्षयुताव्रतंतत्रकथंभवेत् विद्धानिषेधश्रवणान्नवमीचेतिवाक्यतः नवमीवाष्टमीविद्धात्याज्याविष्णुपरायणैःउपोषणंनवम्यांतुदशम्यामेवपारणामिति वैष्णवानांविशेषात्तुतत्र विष्णुपरैरिति दशम्यादिषुवृद्धित्वाद्विद्धात्याज्यैववैष्णवैः तदन्येषांतुसर्वेषांव्रतंतत्रैवनिश्चितं दशम्यामेवशब्देन दशमींनैवलंघयेत् निश्चित्यैवंविचारेणनवमीव्रतमाचरेदिति अत्रविष्णुपरायणैरितिवदताप्रातस्त्रिमुहूर्त्तानवमीचतस्मिन्नेवदिनेसमाप्यते तदास्मार्त्तानामुत्तरदिवसएकादशीनिमित्तोपवासेन नवमीव्रतांगपारणालोपोमाभूदिति तत्रस्मार्त्तैरष्टमीविद्धैवग्राह्यावैष्णवानांत्वरुणोदयप्रसंग इति द्वितीयैवतैःकार्येतिसूचितं दशमीवृद्ध्यभावेष्टमीविद्धायाःक्षयेचवैष्णवैरपि विद्धैवोपोष्येत्यर्थसिद्धं तदेवं द्वितीयदिवसेनवम्यामध्याह्नव्यापिन्यभावेप्यष्टमीविद्धायाः सर्वथात्याज्यत्वाद्वैष्णवैर्द्वितीयैवोपोष्येतिरामार्चनचंद्रिकामतं हरिभक्तिविलासे दशम्यांपारणायाश्चनिश्चयान्नवमीक्षये विद्धापिनवमीग्राह्यावैष्णवैरप्यसंशयामिति मदनरत्नादौतु इयंतिथिर्विधेयामध्याह्नव्यापिनीसैवग्राह्यालग्ने कर्कटकाव्हयइत्यगस्त्यसंहितायांनमध्यान्हस्यजन्मकालत्वाभिधानात् सवैमध्यान्हयोगेनमहापुण्यतमाभवेदिति वचनाच्च उभयत्रमध्यान्हव्यापित्वेमध्यान्हव्यापिन्यभावेवायापुनर्वसुयुतासैवग्राह्या पुनर्वस्वृक्षसंयोगः स्वल्पोपि यदिदृश्यतेचैत्रेशुद्धनवम्यांतुसापुण्यासर्वकामदेत्यगस्त्यसंहितावचनात् यद्वा दिनद्वयेपिपुनर्वसुयोगएवात्रमध्यान्हे उत्तरत्रमध्यान्हंविहायतदामध्याह्नपुनर्वसुयुक्ताग्राह्या मुख्ये श्रीरामजन्मकालेयोगस्यलाभात् यदातुपरदिनेपिमध्यान्हेनवमीपुनर्वसुयोगः यदावादिनद्वयेपिमध्यान्हंविहायमध्यान्हात्पूर्वंपुनर्वसुयोगः यदावादिनद्वयेपिपुनर्वसुभावस्तदोत्तरैवग्राह्या नवमीचाष्टमीविद्धेतिवचनादित्युक्तं निर्णयसिंधौतु दिनद्वयेपिमध्यान्हव्याप्तौतदभावेवा पूर्वदिने पुनर्वस्वृक्षयुक्तामपित्यक्त्वापरैवकार्येत्युक्तं यत्तुनव्यैः पुनर्वसुयुतामपिनवमींत्यक्त्वानवमीचाष्टमीतिवाक्य

बलात् परैवकार्येतिसिंधुकारमतमसमंजसं नवमी।चाष्टमी।विद्धेति वाक्येऋक्षपदाभावात् अत्रऋक्षपदाभावेपिनवमी
चाष्टमी।विद्धानिषेधस्यसंकोचेमानाभावात् पुनर्वस्वृक्षसंयोगइत्यगस्त्यसंहितावचनस्यपुनर्वसुयोगेप्राशस्त्यबोधक
त्वेनसंकोचकत्वमितिदिक्॥इतिकल्पद्रुमोक्तोरामनवमीनिर्णयः॥अत्रप्रसंगाद्वैष्णवलक्षणमुच्यते सांगसमुद्रंसन्या
संसऋषिच्छंददैवतं सदीक्षाविधिसध्यानंसंपन्नंद्वादशाक्षरं अष्टाक्षरमथान्यंचयेमंत्रंसमुपासते ज्ञेयास्तेवैष्णवा
लोके।विष्णवर्चनरताःसदा सदीक्षाविधिसांगवामंत्रराजंसयंत्रकं सहस्राक्षरसंयुक्तंमूलव्यूहादिभेदतः पंचायतन
रूपंचयेविप्राःसमुपासते महावैष्णवसंज्ञास्तेमहाविष्णोरतिप्रिया इति विष्णुपुराणे नचलतिनिजवर्णधर्मतोयः स
ममतिरात्मसुहृद्विपक्षपक्षे नहरतिनचहंतिकंचिदुच्चैः सितमनसंतमवेहिविष्णुभक्तं श्रीभागवतेपि त्रिभुवनविभवहे
तवेप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् नचलतिभगवत्पदारविंदाल्लवनिमिषार्द्धमपिहवैष्णवाग्र्यः इत्यादि
इतिवैष्णवलक्षणं अशक्तविषयेप्रतिनिध्यादिकंतुपरिभाषायांद्रष्टव्यं रामार्चनचंद्रिकायां सुतीक्ष्णमाहचागस्त्यः
प्रकारःसोभिधीयतेक्रमेणयोजयेत्सर्वंसौकर्यार्थिव्रतार्थिनां षडक्षरादिकैर्राममंत्रैःस्यात्पूजनंयथा सर्वेषांरानमंत्राणां
मंत्रराजःषडक्षरः तारकंब्रह्मचेत्युक्तंतेनपूजाप्रशस्यते यद्वापुरुषसूक्तेनदीक्षाविधिमजानतःवैदिकस्याप्यभावेतुना
ममंत्रैर्भवेद्ध्रुवं अष्टम्यांचैत्रमासस्यशुक्लपक्षेजितेंद्रियःदंतधावनपूर्वंतुप्रातःस्नायाद्यथाविधि नद्यांतडागेकूपेवाह्रदे
स्रवणेतथा ततःसंध्यादिकंकुर्यात्संस्मरन्राघवंहृदि गृहमागत्यविप्रोसौकुर्यादौपासनादिकं दान्तंकुटुंबिनं विप्रं
वेदशास्त्ररतंसदा श्रीरामपूजानिरतंसुशीलंदंभवर्जितं विधिज्ञंराममंत्राणांराममंत्रैकसाधनम् आहूयभक्त्यासं
पूज्यवृणुयात्प्रार्थयन्निति श्रीरामप्रतिमादानंकरिष्येहंद्विजोत्तम तत्राचार्योभवप्रीतःश्रीरामोपित्वमेवच इत्युक्त्वा
त्वर्चयेद्विप्रंस्नापयित्वाततःस्वयं तैलेनाभ्यंग्यचस्नायाच्चिंतयन्राघवंहृदि श्वेतांबरधरःश्वेतगंधमाल्यानिधारयेत्

अर्चितोभूषितश्चैवकृतमाध्याह्निकक्रियः आचार्यंभोजयेत्पश्चात्सात्विकान्नैःसुविस्तरं भुंजीतस्वयमप्येवंहृदिराममनुस्मरन् नवम्यामेकभक्तेनअंगभूतेनराघव इक्ष्वाकुवंशतिलकप्रीतोभवरघूत्तम इत्येकभक्तनिवेदनमंत्रः एकभक्तंतुनवममुहूर्तात्मकमध्याह्नोत्तरं सार्धमुहूर्त्तमध्येकर्त्तव्यं एकभक्तव्रतीतत्रसहाचार्योजितेंद्रियःशृण्वन्रामकथां दिव्यामहःशेषंनयेन्मुने सायंसंध्यादिकाःकुर्यात्क्रियाराममनुस्मरन् आचार्यसहितोरात्रावधःशायीजितेंद्रियः स्वपेत्स्वयंतथैकांतेश्रीरामार्पितमानसः आचार्यकरणेशक्तःस्वयंभुक्त्वास्वपेत्सुखं इत्यष्टमीकृत्यं अथनवमीकृत्यम् तत्रैव ततःप्रातःसमुत्थायस्नात्वासंध्यांविधायचप्रातःसर्वाणिकर्माणिशीघ्रमेवसमापयेत् उपोष्यानवमीत्वद्ययामेष्वष्टसुराघव तेनप्रीतोभवत्वंवैसंसारात्त्राहिमांहरे इत्युपवासनिवेदनमंत्रःततःस्वस्थमनाभूत्वाविद्वद्भिःसहितोनद्यस्वगृहेचोत्तरेभागेयागमंडपमारभेत् चतुर्द्वारंपताकाढ्यंसुवितानंसुशोभनं मनोरमंमहोत्सेधंपुष्पाद्यैः समलंकृतं शंखचक्रहनूमद्भिःप्राग्द्वारेसमलंकृतं गुरुत्मच्छार्ङ्गवाणैश्चदक्षिणेसमलंकृतं गदाखट्वांगकैश्चैवपश्चिमेसमलंकृतं पद्मस्वस्तिकमानैश्चकौवेरसमलंकृतं मध्येहस्तचतुष्काढ्यंवेदिकायुक्तमायतं विचित्रनृत्यगीतैश्चवाद्यैश्चैवसुसंयुतं पुण्याहंवाचयेत्तत्रविद्वद्भिःप्रीतमानसैः तत्रसंकल्पयेच्चैवराममेवस्मरन्हृदि अस्यांरामनवम्यांतुरामाराधनतत्परः उपोष्याष्टसुयामेषुपूजयित्वायथाविधि इमांस्वर्णमयींरामप्रतिमांसुप्रयत्नतः श्रीरामप्रीतयेदास्येरामभक्तायधीमते प्रीतोरामोहरत्वाशुपापानिसुबहूनिमे अनेकजन्मसंसिद्धान्यभ्यस्तानिमहांतिच इतित्रिभिःप्रतिमादानसंकल्पः शक्ताशक्तात्यशक्तस्यमूर्त्तिनिर्माणमुच्यते ततःस्वर्णमयींरामप्रतिमांपलमानितः निर्मितां द्विभुजांदिव्यांवामांकस्थितजानकीं विभ्रतींदक्षिणकरेज्ञानमुद्रांमहामते वामेनात्मकरेणाराद्देवीमालिंग्यसंस्थितां सिंहासनेराजतेत्रपलद्वयविनिर्मिते अशक्तोयोमहाभागतस्यवित्तानुसारतः पलेनार्द्धतदर्द्धेनतदर्द्धं

द्वैनवामुने ततोऽप्यशक्तोरौप्येणकारयेद्रघुनंदनं लोहेननिर्मितंकुर्यात् शिलयादारुणापिच यद्वालेख्यंविलेष्यंवामातुरंकगतंहरिं कोमलांगंविशालाक्षमिंद्रनीलमणिप्रभं दाक्षिणांगेदशरथंपुत्रान्वेषणतत्परम् ॥ पृष्ठतो लक्ष्मणंदेवसहच्छत्रंसचामरं पार्श्वेभरतशत्रुघ्नौतालवृंतकरावुभौ अग्रेव्यग्रहनूमंतंरामानुग्रहकांक्षिणं ॥ वित्तशाठ्यमकृत्वैवमूर्तिंकुर्यात्प्रयत्नतः प्रतिमाविशेषःकौस्तुभेलैंगे सद्यःप्रसूतांकौशल्यांपितरंभ्रातृभिःसह सुवर्णेनपृथक्कृत्वाश्रीरामंसीतयासह लक्षणोक्ताः सरूपास्ताःपूजयित्वायथाविधि सहेत्यनेनश्रीरामंवामांकस्थत्वंज्ञायते अतएवचंद्रिकायां ततःस्वर्णमयीमित्यादिनाप्रतिमानिर्माणमित्थमुक्तमिति भविष्ये विभवेसतियो मोहात्नकुर्याद्विधिविस्तरं नतत्फलमवाप्नोतिदेवद्रोहीसउच्यते इतिमूर्त्तिलक्षणं आसनोपरिसंविश्यन्यासजालंविधायच शंखंप्रपूजयेदग्रेगंधपुष्पाक्षतादिभिः कलशंवामभागस्थं पूजाद्रव्याणिचादरात् पात्रंचप्रोक्षयेद्भक्त्याचात्मानंमंत्रमुच्चरन् विलिखेत्सर्वतोभद्रंवेदिकोपरिसुंदरं तिर्यगूर्ध्वगतारेखाःकुर्यादेकोनविंशतीः खंडदुःत्रिपदःकोणेशृंखलाःपंचकोष्ठकैः एकादशपदावल्लीभद्रंतुनवभिःपदैः चतुर्विंशत्पदावापिःपरिधिर्विंशतिःपदैः मध्ये षोडशभिःकोष्ठैःपद्मंवाष्टदलंस्मृतं सितेंदुःशृंखलाकृष्णवर्णनीलेनपूरिता भद्रारुणासितावाप्यःपरिधिःपीतवर्णकः वाह्यांतरदलंश्वेताकर्णिकापीतवर्णिका खंडेंदुःशृंखलावापीवल्लीभद्रंतुपंचमं परिध्यावेष्टितंपद्मंवाह्येसत्त्वंरजस्तमः सर्वव्रतेसमुद्दिष्टंसर्वतोभद्रमंडलं मध्येब्रह्माणमष्टासुदिक्षुसोमादिदेवताः वायुसोमद्वयोर्मध्येवसूनष्टचकारयेत् सोमईशानयोर्मध्येरुद्रानेकादशैवतु इंद्रईशानयोर्मध्येआदित्यान्द्वादशैवतु इंद्राग्निमध्येचतथाअश्विनौपूजयेत्तथा आग्नेययमयोर्मध्येविश्वान्देवान्सपैतृकान् याम्यनैर्ऋत्ययोर्मध्येसप्तयक्षांश्चकारयेत् नैर्ऋत्यजलयोर्मध्ये नागभूतांश्चकारयेत् आप्यवायव्ययोर्मध्येगंधर्वाप्सरसःकुरु ब्रह्मसोमद्वयोर्मध्येरुद्रानेवचकारयेत् स्कंदनंदी

वृषंशूलंमहादेवंचकारयेत् ब्रह्मेशानद्वयोर्मध्येदक्षादीन्संप्रपूजयेत् ब्रह्मेंद्रयोस्तथामध्येदुर्गांविष्णुंतथैवच ब्रह्माग्निमध्येचतथास्वधांचैवप्रपूजयेत् ब्रह्मणोनिर्ऋतेर्मध्येगणपंतुप्रपूजयेत् वरुणब्रह्मणोर्मध्येअपःसंपूजयेत्तथा मध्येवायोर्ब्रह्मणश्चमरुतःसंप्रपूजयेत् ब्रह्मणःपादमूलेतुमेदिनींतत्रकारयेत् कावेरीनर्मदाचैवयमुनाचसरस्वती गंगाकृष्णातथागोदापूज्याःसप्तचसागराः क्षारक्षीरमधुस्सर्पिर्मैरेक्षुदधिसंभवाः ब्रह्मयज्ञानमित्याद्यैर्मंत्रैःस्थाप्यास्तुदेवताःगंधपुष्पादिभिःपूज्यादीपान्दद्याच्चसर्वतः सर्वत्रभद्रंयस्मात्तत्सर्वतोभद्रमुच्यते ॥ इतिसर्वतोभद्रं ॥ अथमंडलेतत्तन्मंत्रेणतत्तद्देवतास्थापनपूजाप्रयोगःतत्रमध्येब्रह्माणं ब्रह्मयज्ञानमिति गौत्तमवामदेवोब्रह्मात्रिष्टुप्ब्रह्मस्थापने पूजनेविनियोगः एवमग्रेपिब्रह्मयज्ञानं उदीचीमारभ्यवायवीपर्यंतसोमादयोवाय्वंताअष्टौलोकपालास्थापनीयाःतत्र आप्यायस्व गौत्तमःसोमोगायत्रीॐआप्यायस्वस- अभित्वाधीगतिःशुनः शेफईशानोजगती आभित्वादेवसवितः इंद्रंवोमधुच्छंद इंद्रोगायत्री ॐइंद्रंवोविश्वतः ॐअग्निंकएवामेधातिथिरग्निर्गायत्रीअग्निंदूतंयमायसोमं यमोनुष्टुप् यमायसोमंमोषुणोचौराःकण्वोनिर्ऋतिर्गायत्री ॐमोषुणः तत्वायामिशुनःशेफोवरुणस्त्रिष्टुप् ॐतत्वायामि वायोशतं गौत्तमोवायुरनुष्टुप् वायोशतंवायुसोममध्येअष्टौवसूनतथात्रमैत्रावरुणिर्वसिष्ठोवसवस्त्रिष्टुप् ज्मयाअत्रसोमेशानमध्येएकादशरुद्रान् आरुद्रासः श्यावाश्वएकादशरुद्राजगती ॐआरुद्रासः ईशानेंद्रमध्येद्वादशादित्यान्त्यानुसामंदोमत्स्यामैत्रावरुणिर्मान्योवावहवोवामत्स्याक्षपयः द्वादशादित्यागायत्रीं ॐत्यानुंक्षत्रियान् इंद्राग्निमध्ये अश्विनाराहुगणोगौत्तमोश्विनावुष्णिक् ॐअश्विनानार्ति अग्नियममध्येविश्वेदेवान्सपैतृकान् ओमासोमधुछंदोविश्वेदेवागायत्री ॐमासः यमनिर्ऋतिमध्येसप्तयज्ञान् अभित्यंदेववामदेवासप्रपक्षाप्रकृतिः अभित्यंदेवंसवितारमोण्योःकविक्रतुमर्चामि सत्यसर्वरत्नधामाभिप्रियंमतिंकविमूर्ध्वायस्यामतिर्भाअदि युतत्सर्वाम

निहिरण्यपाणिरमिमीतसुक्रतुंकृपास्वः निर्ऋति वरुणमध्येभूतनागान्आयंगौःसार्पराज्ञीसर्पागायत्री ऊँआयंगौः वरुणवायुमध्येगंधर्वाप्सरसः अप्सरवातरशनमांगंधर्वाप्सरसोनुष्टुप् ऊँअप्सरसांगंधर्वाणांयतत्रअन्यग्रंथेषुअप्सरसामैतशऋष्यशृंगइत्युक्तंतन्सावानुक्रमाविरोधादुपेक्ष्यं ब्रह्मसोममध्येस्कंदनंदीश्वरशूलमहाकालान् कुमारं कुमारस्कंदास्त्रिष्टुप् ऊँकुमारंमाः ऋषभंऋषभोवैराजाऋषभोनुष्टुप् ऊँऋषभंमाब्रह्मेशानमध्येदक्षादीन्सप्तअदितिर्लौक्यो बृहस्पतिर्दर्लानुष्टुप् अदितिर्ह्यजनिष्टब्रह्मेंद्रमध्येन्दु तामग्निवर्णासौभारिदुमा।त्रिष्टुप्ऊँतामाग्निवर्णांइदंविष्णुःकण्वोमेधातिथिर्विष्णुगायत्रीऊँइदंविष्णुर्वि- ब्रह्माग्निमध्येस्वधां उदीरताशंखःस्वधात्रिष्टुप् ऊँउदीरतामवरउत्परास ब्रह्मयममध्येमृत्युरोगान्परंमृत्योः संकुशुकोमृत्युरोगास्त्रिष्टुप् ऊँपरंमृत्योअनुपरेहिब्रह्मानिर्ऋतिमध्येगणपतिंगणानांत्वागृत्समदोगणपतिर्जगती ऊँगणानांत्वा ब्रह्मवरुणमध्येअपः शन्नोदेवींखरीःषःसिंधुद्वीपआपोगायत्री शन्नोदेवीः ब्रह्मवायुमध्येमरुतःमरुतोयस्य राहोगणोमरुतोगायत्री। ऊँमरुतोयस्य ब्रह्मणःपादमूलेकर्णिकायांपृथ्वींस्योनामेधातिथिभूमिर्गायत्री ऊँस्योनापृथिवि तत्रैवगंगादिनद्यःइमंमेसिंधुक्षित्प्रैय्यमेधादयोनद्योजगती इमंमेगंगेयमुनेतत्रैवसप्तसागरान् धाम्नोधाम्नोराजन्नितोवरुणनोमुंच यदापोअघ्न्याइतिवरुणेतिशपामहे ततोवरुणनोमुंच मैंवायोमोषधीर्हिंसीरतोविश्वन्यभूरस्त्वेतोवरुणनोमुंचतदुपरिमेरवनमइतिनाम्नामेरुम् ततोमंडलाद्बहिःसोमादिसमीपेतुक्रमेणायुधानिगदां त्रिशूलंवज्रशक्तिदंडखड्गपाशअंकुशतद्बाह्येपुनरपितेनैवक्रमेणगौत्तमंभरद्वाजंविश्वामित्रंकश्यपंजमदग्निंवसिष्ठं अत्रिंअरुंधतींतद्बाह्येपूर्वादौ ऐंद्रींकौमारींवाराहींचामुंडांवैष्णवींमाहेश्वरींविनायकींनाममंत्रैःपूजयेत् अथमंत्रः ऊँब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनआवः सवुध्न्याउपमाअस्यविष्ठाः सतश्चयोनिमसतश्चविवः १ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यंभवावाजस्य

संगथे २ अभिवादेवसवितरोशानंवार्याणां सदावन्भागमीमहे ३ इंन्द्रंवोविश्वतस्परिहवामहेजनेभ्यः अ
स्माकमस्तुकेवलः ४ अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं अस्ययज्ञस्यसुक्रतुम् ५ यमायसोमंसुनतः ६
मोषुणःपरापरानिर्ऋतिर्दुर्हणावधीत् यदीष्टतृष्णयासह ७ तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोह
विर्भिः अहेडमानोवरुणेहबोध्युरुशंसमानआयुः प्रमोषीः ८ वायोशतंहरीणांयुवस्वपोष्याणां उतवाते
सहस्रिणोरथआयातुपाजसा ९ ज्मयाअत्रवसवोरंतदेवाउरावंतरिक्षेमर्जयंतशुभ्राः अर्वाकपथः उरुज्रयः
कृणुध्वंश्रोतादूतस्यजग्मुषोवोअस्य १० आरुद्रासइंद्रवंतः सजोषुणो हिरण्यरथाः सुवितायगंतन इयं
वोअस्मत्प्रतिहर्यतेमातिस्तृष्णजेनंदिवः उत्साउदन्यवे ११ त्यानुंक्षत्रियांअवआदित्यान्वाचिषामहे समृ
डीकांअभिष्टये १२ ओमासश्चर्षणीधृतोविश्वेदेवासऽआगतदश्वाꣳ सोदासुषःसुतं १३ अभित्यंदेवंसवि
तारमोण्योः कविक्रतुमर्चामिसत्यसर्वंरत्नधामभिप्रियंमतिंकविं ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सर्वामनिहिरण्य
पाणिरमिमीतसुक्रतुं-कृपास्वः १४ आयंगौःपृश्निरक्रमीदसदन्मातरंपुरःपितरंचप्रयंत्स्वः १५ अप्सरसां
गंधर्वाणांमृगाणांचरणेचरन् कोशिकेतस्यविद्वांत्सखास्वादुमादिंतमः १६ कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे
वौचेमशंतमंहृदि १७ कुमारंमातायुवतिःसमुब्धंगुहाविमार्जैनददातिपित्रे अनीकमस्यनमिनज्जनामःपुरःपश्यं
तिनिहितमरुतौ १८ ऋषभंमासमानासपत्नीनांविषासहिं हंतारंशत्रूणांकृधिविराजंगोपतिंगवां १९ अदिति
र्ह्यनिष्टदक्षयादुहितातव तांदेवाअन्वजायंतभद्राअमृतबंधवः २० तामग्निवर्णांतपसाज्वलंतीं २१ इदंविष्णु
र्विचक्रमे. २२ उदीरतामवरउत्परास. २३ परंमृत्योअनुपरेहिपथांयस्तेस्वइतरोदेवयानात् चक्षुष्मतेशृण्वतेतेब्र
वीमिमानःप्रजांरीरिषोमोतवीरान् २४ गणानांत्वागणपतिꣳहवामहेकाविंकाविनामुप श्रवस्वमं ज्येष्ठराजंब्रह्म

णांब्रह्मणस्पतिं आनश्रनवंनो।तिभिसीदसादनं २५ शन्नोदेवीरभिष्टयें. २६ मरुतोयस्यहिक्षपेपाथा।दिवोविमहसः ससुगो।पातमोजनः २७स्योनापृथिविनोभवा. २८ इमंमेगंगेयमुनेसरस्वतीशतद्रुस्तोमंसचतापरुघ्न्या आसिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्या।शिषामया २९ धाम्नोधाम्नोराजन्नितोवरुणनो।मुच यद।पोअघ्न्यावरुणेति शपामहेततोवरुणनोमुंच ३०इतिसर्वतोभद्रमंत्राः तदुक्तंतंत्रसारे अनुक्तेकल्पयेद्यंत्रंलिखेत्पद्मंदलाष्टकंषट्कोणांतर्गतं तत्रवेदद्वारोपशोभितं कमलरचनाकारस्तु आद्य।तृतीयंततएवभूतंभूतात् द्वितीयंतनयश्चतुर्थं चतुर्थमाद्यंपुनरवेमवेयोगोभवेदष्टदलंचपद्ममिति अथोदकैःपूर्णकुंभंपंचरेखोदरंशुभं चूतपल्लव पुष्पैश्चयुक्तंसंस्थाप्यचार्चितं सौवर्णैराजते ताम्रेपात्रेषट्कोणमालिखेत् अलाभेविल्वपीठेवाकलशोपरिसंस्थिते स्थाप्योपरिवस्त्रयुग्ममच्छिन्नंसदशंशुभं दिव्यसिंहासनंतत्रस्थापयित्वार्चयेत्सुधीः ॐ।नमोभगवतेविष्णवेसर्वभूतात्मनेवासुदेवायसर्वात्मसंयोगपद्मपीठात्मनेनम इति तन्मंत्रेणतन्मध्येकुर्यात्पुष्पांजलिंपुनः इतिपीठार्चा अर्घ्यंपाद्यादिकंदद्यात्स्नानंपंचामृतेनच लेप्यादौनाभिषेकःस्याद्दद्याद्वस्त्रोपवीतकम् ततःसंस्थाप्यपीठेतंपूजांकुर्याद्यथ।विधि आवाहनंस्थापनंचसान्निधापनमेवचासन्निरोधनमेवंस्यादवरोधनमंजसा तत्तन्मुद्राभिरेवंस्यादेवंसंप्रार्थ्यभक्तितः नानारत्नविचित्राणिदद्यादाभरणानिच हिमांबुघृष्टरुचिरघनसारसमन्वितं गंधंदद्यात्प्रयत्नेनसागुरुंचसकुंकुमं कल्हारकेतकीजातीपुंनागाद्यैःप्रपूजयेत् चंपकैःशतपत्रैश्चचंदनैःसुमनोहरैः चूतपल्लवपुष्पैश्चदूर्वाभिस्तुलसीदलैः कोमलैर्विल्वपत्रैश्च अशोककुसुमैस्तथ रामस्यजननीचासिरामात्मिकमिदंजगत् अतस्त्वांपूजयिष्यामिलोकमातर्नमोस्तुते इतिकौसल्यायां नमोदशरथायेतिपूजयेत्पितरंतथा इतिपितृपूजनं ततोनुज्ञाप्यदेवेशंपरिवारान्समर्चयेत् पूर्वषट्कोणकोणेषुहृदयादीनिच क्रमात् तथावरं० हनूमंतंचसुग्रीवंभरतंसविभीषणं लक्ष्मणांगदशत्रुघ्नजांबवंतंदलेष्विमान् द्वितीयं धृष्टिंजयंतं

विजयंसुराष्ट्रंराष्ट्रवर्द्धनं अकोपंधर्मपालंचसुमंतंदलमध्यतः तृतीयंदलाग्रेलोकपालांश्चइतिचतुर्थं तदस्त्राणिततोवहिः पंचमंनाममंत्रैर्नमस्कारचतुर्थाभ्यांप्रपूजयेत्घंटांचवादयन्धूपंदीपंचास्मैनिवेदयेत् भक्ष्यभोज्यादिनाभक्त्यानैवेद्यंविधिनाचरेत्आचमनंचसतांबूलंमहानीराजनंततःनमस्कुर्यात्ततःस्तोत्रैःस्तुत्वाचपूजयेन्मनुंशृण्वन्जयंतीमाहात्म्यंदिव्यांरामकथांतथारामभक्तैःसमंयामंनयेद्रामममनुस्मरन् शंखाद्यावाहनार्चांचकुर्याद्यामेष्वतंद्रितःरामोद्वितीयःसंपूज्योमध्याह्नेजन्मभावयेत् उच्चस्थेग्रहपंचकेसुरगुरौइत्यादिमत्वैवंवादयेद्वाद्यान्दद्यादर्घ्यंजगत्पतेःफलपुष्पांबुसंपूर्णंगृहीत्वाशंखमुज्वलं अशोकचूतकुसुमैर्युक्तंचतुलसीदलैः दशाननवधार्थायधर्मसंस्थापनायच दानवानांविनाशायदैत्यानांनिधनायच परित्राणायसाधूनांजातोरामःस्वयंहरिः गृहाणार्घ्यंमयादत्तंभ्रातृभिःसहितोनघ इत्यर्घ्यमंत्रः पुनःपुष्पांजलिंदत्वायामेयामेह्यतंद्रितः पूजयेद्विधिवद्भक्त्यादिवारात्रंनयेद्बुधः इतिरामनवमीविधायकसंग्रहः अथव्रतपद्धतिः तत्रादावष्टम्यांदंतधावनपूर्वकं नद्यादौस्नात्वानित्यंनिर्वर्त्याचार्यवरणंकुर्यात् तत्रमंत्रः श्रीरामप्रतिमादानंकारिष्येहंद्विजोत्तम तत्राचार्य्योभवप्रीतः श्रीरामोपित्वमेवचेति आगतंस्नापयित्वास्वयंतैलेनाभ्यंज्य विप्रंसात्विकान्नैर्भोजयित्वास्वयंभुंजीत ततोनवम्यामेकभक्तेनअंगभूतेनराघव इक्ष्वाकुवंशतिलकप्रीतोभवरघूद्वहेत्येकभक्तंनिवेद्यसायंसंध्यांकृत्वाआचार्यसहितोरात्रावधःशयनंकुर्यात् इत्यष्टमीकृत्यपद्धतिः ततःनवम्यांप्रातः समुत्थायपर्णादिभिर्गंडूषैश्चमुखंसंशोध्यनद्यादिषुस्नात्वासंध्यांविधायनित्यपूजनादिशीघ्रमेवनिर्वर्त्य ततःसूर्यःसोमोयमःकालःसंध्येभूतान्यहःक्षपा पवनोदिक्पतिर्भूमिराकाशंखेचरानराः ब्राह्मंशासनमास्थायकल्पध्वमिहसन्निधिमितिमंत्रेणसूर्यादिदेवताभ्योव्रतंनिवेद्य अपसर्पंतुयेभूतायेभूताभुविसंस्थिताः येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञयेतिमंत्रेणभूतान्युत्सार्यओमद्यसोपवासंरामनवमीव्रतमहंकरिष्ये उपोष्यानवमींत्वद्ययामेष्वष्टसुराघव तेनप्री

तोभवत्वंभोस्संसाराग्राहिमांहरे इत्युक्त्वार्घ्यपात्रस्थंसपुष्पाक्षतंजलंक्षिपेत् ततःचतुर्द्वारपताकाढ्यमित्यादिनापूर्व
मुक्तंशंखचक्रादिभिरलंकृतंचतुर्हस्तवेदिकायुक्तं हस्तमात्रवेदिकायुक्तंवामंडपंविधायतन्मध्येसर्वतोभद्रंकमलंवावि
लिख्यतत्रकुंभस्थापनंकुर्यात् तत्रक्रमः आदौगणपतिपूजनंमातृकापूजनं पुण्याहवाचनंचकृत्वा महीद्यौरितिभू
मिंस्पृष्ट्वा ॐओषधयइतियवान्निक्षिप्य तत्रआजिघ्रेतिकलशंसंस्थाप्य इमंमेगंगइतिजलेनापूर्य्यगंधद्वारामिति
गंधंयाओषधीरितिसर्वौषधीःकांडादितिदूर्वा अश्वत्थेवोपंचपल्लवान्स्योनाःपृथिवीतिसप्तमृदःयाःफलिनीरितिफ
लंसहिरत्नानीतिपंचरत्नानि हिरण्यरूपइतिहिरण्यंचनिक्षिप्य युवासुवासाइतिवस्त्रेणावेष्ट्य पूर्णादर्वीतिपूर्णपात्रं
निधाय तत्रतत्वायामीतिवरुणंसंपूज्य कलशस्यमुखइतिपठेत् इतिकलशस्थापनविधिः ततःकलशोपरिसौवर्णादि
पात्रेषट्कोणमालिख्यतदुपरिसदशमहतंवस्त्रयुग्मंसुवर्णसिंहासनंस्थापयेत् ततःश्रीरामस्मरणंकृत्वा अस्याराम
नवम्यांतुरामाराधनतत्परः उपोष्याष्टसुयामेषुपूजयित्वायथाविधि इमांस्वर्णमयींरामप्रतिमांसुप्रयत्नतः श्रीरामप्री
तयेदास्येरामभक्तायधीमते प्रीतोरामोहरत्वाशुपापानिसुबहूनिमे अनेकजन्मसंसिद्धान्यभ्यस्तानिमहांतिच इतित्रि
भिर्व्रतसंकल्पंकुर्यात् अशक्तस्तुइमांधातुमयीमितिपठेत् स्वर्णादिमय्यामग्न्युत्तारणंलेख्यादौतुनास्तिततआसनेपृ
थ्वीतिमंत्रेणउपाविश्यतस्याधः कूर्मायनमः आधारशक्त्यैदुष्टविद्रावणायनृसिंहायनमइतिपूजयेत् अपक्रमंत्वि
तिपठित्वापार्ष्णिघातत्रयंकृत्वा भूतसंघानुत्सार्य ॐरःअस्त्रायफट् इत्युक्त्वाकरास्फालनेनछोटिकाभिश्चसर्वादिग्वंध
नंकृत्वा स्ववामेगुरुभ्योनमःदक्षिणेगणपतयेनमः मध्येस्वेष्टदेवतायैनमइतिनत्वातालत्रयंकृत्वापुनःॐरःअस्त्रायफ
ट् इत्युच्चार्यदक्षिणहस्तेजलंगृहीत्वा स्वात्मानंपरितःशमयन् अग्निप्राकारमुद्रया अग्निप्राकारंभावयेत् ततः
भूतशुद्धिंप्राणप्रतिष्ठांकेवलमातृकान्यासंचकृत्वाकेशवादिमातृकान्यासंकुर्यात् ॐकेशवादिमातृकान्यासस्य

साध्यनारायणऋषि गायत्रीछंदः लक्ष्मीनारायणोदेवताहलोवीज स्वराःशक्तिः राममंत्रांगत्वेनन्यासे विनियोगः अंगुष्ठादिषट्सु स्थानेषु वक्ष्यमाणषडंगमंत्रैर्न्यासंविधाय हृदयादिषुन्यसेत् ॐश्रीं ॐ नमोनारायणाय हंसः सोहंअंकंखंगंघंङं आंॐह्रींहंसः सोहं ॐनमोनारायणायक्रुद्धोल्कायस्वाहा ॐ श्रींदेव्यैनमः हृदयायनमः ॐनमोनारायणायहंसः सोहंइंचंछंजंझंञंईंॐह्रींहंसः सोहं ॐनमोनारायणायमहोल्कायस्वाहा श्रींपद्मिन्यैनमःशिरसेस्वाहा ॐनमोनारायणायहंसः सोहंउंटंठंडंढंणंऊंॐह्रींहंसःसोहंॐनमोनारायणायवरोल्कायस्वाहा श्रींविष्णुपत्न्यैनमः शिखायैवषट् ॐनमोनारायणायहंसः सोहंएंतंथंदंधंनंऐंॐह्रीं हंसः साहनेमोनारायणायद्व्युल्कायस्वाहा श्रींवरदायैनमः कवचायहुं ॐश्रीं ॐनमोनारायणायहंसःसोहंॐ पंफंबंभंमंऔंॐह्रींहंसः ॐनमोनारायणायसुखोल्कायस्वाहा श्रींकमलारूपायैनम इतिनेत्रं ॐश्रींनुनमोनारायणायहंसः सोहंअंयंरंलंवंशंषंसंहंलंक्षंअः ॐह्रींहंसःसोहंनुनमोनारायणाय अनंतोल्कायस्वाहात्रःशूलिन्यैनमः इतिअस्त्रं इतिकेशवादिमातृकान्यासषडंगंततोध्यानं विद्यारविंदमुकुरामृतकुंभपद्मकौमोदकीदरसुदर्शनशोभिहस्तं सौदामिनीमुकुरकांतिविभातिलक्ष्मीनारायणात्मकमखंडितमादिमूर्तिवपुरितिशेषःवामाग्रः करमारभ्यदक्षिणाधःकरपर्यंतमायुधक्रमोऽवबोद्धव्यःॐह्रींश्रींक्लीं अंक्लींश्रींह्रींॐकेशवायकांत्यैनमः शिरसि ॐह्रींश्रींक्लीं आंक्लींश्रींह्रींॐनमोनारायणायकांत्यैनमःमुखवृत्ते ॐह्रींश्रींक्लींइंक्लींश्रींह्रीं ॐमाधवायतुष्ट्यैनमःदक्षनेत्रे ॐह्रींश्रींक्लींईंक्लींश्रींह्रीं ॐ गोविंदायतुष्ट्यैनमःवामनेत्रे ॐह्रींश्रींक्लींउंक्लींश्रींह्रीं ॐविष्णवेधृत्यैनमःदक्षकर्णे ॐह्रींश्रींक्लीं ऊंक्लींश्रींह्रीं ॐमधुसूदनायक्षांत्यैनमः वामकर्णे ॐह्रींश्रींक्लींऋंक्लीं श्रींह्रीं ॐत्रिविक्रमायदयायैनमः दक्षनासापुटे ॐह्रींश्रींक्लीं ॠंक्लीं श्रींह्रीं ॐवामनायदयायैनमःवामनासापुटे ॐह्रींश्रींक्लीं लृंक्लींश्रींह्रींॐ श्रीधरायमेधायैनमःदक्षगंडेॐ ह्रींश्रींक्लींलॄं

क्लींश्रींह्रींओंहृषीकेशायहर्षायैनमःवामगंडेओंह्रींश्रींक्लींएंक्लींश्रींह्रींओंपद्मनाभायश्रद्धायैनमःऊर्ध्वोष्ठेओंह्रींश्रींक्लींऐंक्लींश्रींह्रींओंदामोदरायलज्जायैनमःअधरोष्ठे ओंह्रींश्रींक्लींओंश्रींह्रींक्लीं ओंवासुदेवायलक्ष्म्यैनमःऊर्ध्वदंतपंक्तौ ओंह्रींश्रींक्लींऔंक्लींश्रींह्रीं ओंसंकर्षणायसरस्वत्यैनमःअधोदंतपंक्तौओंह्रींश्रींक्लींअंक्लींश्रींह्रीं ओंप्रद्युम्नायप्रीत्यैनमःमूर्द्धनि ओंह्रींश्रींक्लींअःक्लींश्रींह्रीं ओंअनिरुद्धायरत्यैनमःमुखे ओंह्रींश्रींक्लींकंक्लींश्रींह्रीं ओंचक्रिणेजयायैनमःदक्षवाहुमूले ओंह्रींश्रींक्लींखंक्लींश्रींह्रीं ओंगदिनेदुर्गायैनमः दक्षकूर्परे ओंह्रींश्रींक्लींगंक्लींश्रींह्रीं ओंशार्ङ्गिणेरमायैनमः दक्षमणिवंधे ओंह्रींश्रींक्लींघंक्लींश्रींह्रीं ओंखड्गिनेसत्यायैनमः दक्षांगुलीमूले ओंह्रींश्रींक्लींङं.क्लींश्रींह्रीं ओंशंखिनेचंद्रायैनमः दक्षांगुल्यग्रेषु ओंह्रींश्रींक्लींचंक्लींश्रींह्रीं ओंहस्तिनेवाण्यैनमः वामवाहुमूले ओंह्रींश्रींक्लींछंक्लींश्रींह्रीं ओंसुमालिनेविलासिन्यैनमः वामकूर्परे ओंह्रींश्रींक्लींजंक्लींश्रींह्रीं ओंशूलिनेविजयायैनमःवाममणिवंधे ओंह्रींश्रींक्लींझंक्लींश्रींह्रीं ओंपाशिनेविरजायैनमःवामांगुलिमूले ओंह्रींश्रींक्लींञंक्लींश्रींह्रींअंकुशिनेविश्वायैनमःवामांगुल्यग्रे ओंह्रींश्रींक्लींटंक्लींश्रींह्रीं ओंमुकुंदायविमदायैनमः दक्षोरुमूले ओंह्रींश्रींक्लींठंक्लींश्रींह्रीं ओंनंदजायसुनंदनायैनमः दक्षजानुनि ओंह्रींश्रींक्लींडंक्लींश्रींह्रीं ओंनंदिनेस्मृत्यैनमः दक्षगुल्फे ओंह्रींश्रींक्लींढंक्लींश्रींह्रींनरायऋद्ध्यैनमः दक्षपादांगुलिमूले ओंह्रींश्रींक्लींणंक्लींश्रींह्रीं ओंनरकजितेसमृद्ध्यैनमः दक्षांगुल्यग्रेषु ओंह्रींश्रींक्लींतंक्लींश्रींह्रीं ओंहरयेशुद्धायैनमःवामोरुमूले ओंह्रींश्रींक्लींथंक्लींश्रींह्रीं ओंकृष्णायवृद्ध्यैनमःवामजानुनि ओंह्रींश्रींक्लींदंक्लींश्रींह्रींओंसत्यायभुक्त्यैनमः वामगुल्फे ओंह्रींश्रींक्लींधंक्लींश्रींह्रीं ओंसात्वतायमत्यैनमःवामपादांगुलिमूले ओंह्रींश्रींक्लींनंक्लींश्रींह्रीं ओंशौरयेक्षमायैवामांगुल्यग्रेषु ओंह्रींश्रींक्लींपंक्लींश्रींह्रींओंशूरायपरमायैनमः दक्षपार्श्वे ओंह्रींश्रींक्लींफंक्लींश्रींह्रीं ओंजनार्दनायउमायै-वामपार्श्वे ओंह्रींश्रींक्लींबंक्लींश्रींह्रींओंभूधरायक्लेदिन्यै.पृष्ठे ओंह्रींश्रींक्लींभंक्लींश्रींह्रीं ओंविश्वमू

लायच्छिन्नायै. नाभौॐह्रींश्रींक्लींमंक्लींश्रींह्रींॐवैकुंठायवसुदायैनमःजठरे ॐह्रींश्रींक्लींयंक्लींश्रींह्रींॐत्वगात्मनेपुरुषोत्तमायवसुधायैनमःहृदयेॐह्रींश्रींक्लींरंक्लींश्रींह्रींॐअसृगात्मनेवालिनेपरायैनमःदक्षांसेॐह्रींश्रींक्लींलंक्लींश्रींह्रीं ॐमांसात्मनेवलानुजायपरायणायैनमः ककुदि ॐह्रींश्रींक्लींवंक्लींश्रींह्रींॐमेधात्मनेवलायसूक्ष्मायै वामासे ॐह्रींश्रींक्लींशंक्लींश्रींह्रींअस्थ्यात्मने वृषांघ्रयेसंध्यायैनमः हृदादिदक्षकराग्रपर्यंतं ॐह्रींश्रींक्लींपंक्लींश्रींह्रीं ॐमज्जात्मनेवृषायसंध्यायैनमः हृदादिवामकरपर्यंतं ॐह्रींश्रींक्लींसंक्लींश्रींह्रींशुद्धात्मनेहंसप्रभायैहृदादिदक्षपादांतंह्रींश्रींक्लींहंक्लींश्रींह्रींप्राणात्मनेवराहायनिशायैनमः हृदादिवामपादांतं ॐह्रींश्रींक्लींलंक्लींश्रींह्रीं ॐशक्त्यात्मनेविमलायअमोघायैनमः हृदादिनाभ्यंतं ॐह्रींक्लींक्लींक्षंक्लींश्रींह्रीं ॐपरमात्मने नृसिंहायविद्युतायैनमः हृदादिमूर्द्धांतं यद्वा प्रणवादिकामवीजपूर्वकमातृकाक्षरादीन्वा केशवादिकादीन्नमोंतान्न्यसेत् इतिकेशवादिन्यासः अन्येच वैष्णवमंत्रन्यासारामार्चनरत्नाकरेज्ञेयाः अथशंखस्थापनं तत्रातिसूक्ष्मप्रकारोगौतमीयेअस्त्रेणशंखंप्रक्षाल्यहृन्मंत्रेणप्रपूरयेत् पूजयेत्प्रणवेनैवसामान्यार्घमिदंस्मृतं अथविस्तरेणशंखप्रतिष्ठा सामान्यार्घोदकेनस्वपुरतः त्रिकोणषट्कोणचतुरस्रमंडलंकृत्वा आधारशक्तयेकूर्मायअनंतायपृथिव्यैनमइतिसंपूज्य शंखमुद्रांप्रदर्श्यगंधपुष्पाक्षतैः आग्नेये हृदयायनमः नैर्ऋतेशिरसेस्वाहा वायव्येशिखायैवषट् ऐशानेकवचायहुं मध्येनेत्राभ्यांवौषट् पूर्वादिदिक्षु अस्त्रायफट् इतिमंडलंसंपूज्य मूलेनात्रिवेदिकांप्रक्षाल्य रंअग्निमंडलायदशकलात्मने श्रीरामार्घपात्रासनायनमः इतिमंडलोपरिआधारंप्रतिष्ठाप्यतत्रपूर्वाद्यष्टदिक्षु उपर्यधश्च अग्नेर्दशकलाःपूजयेत् पूर्वेयंधूम्रार्चिषेनमः आग्नेयेरं ऊष्मायैनमः दक्षिणेलंज्वलिन्यैनमः नैर्ऋत्येवंज्वालिन्यैनमः पश्चिमेशंविस्फुलिंगिन्यैनमःवायव्येषंश्रियैनमः उत्तरेसंसुरूपायैनमः ऐशान्येहंकपिलायैनमः पूर्वैशानयोर्मध्येलंहव्यवाहायैनमः पश्चिमनैर्ऋत्यमध्ये क्षं कव्यवा

78

अ०१०
चैत्र०
३८

हायैनमइति ततअस्त्रेणशंखंप्रक्षाल्यसंसूर्यमंडलायद्वादशकलात्मने श्रीरामार्घपात्राधारायनमः इतिपात्राधारेनिधाय शंखोपरि वृत्ताकारेणसूर्यस्यद्वादशकलाः पूजयेत् पूर्वादिप्रादक्षिण्येनकंभंतपिन्यैनमः खंबंतापिन्यै-गंफंधूम्रायै. घंपंमरीच्यै.ङंनंज्वालिन्यै. चंधंरुच्यै. छंदंसुषुम्नायै. जंथंभोगदायै. झंतंविश्वायै. ञंणंबोधिन्यै- टंठंधारिण्यै-ढंडंक्षमायैनमइति ततस्तीर्थोदकेन क्षंलंहंसंषंशंवंलंरंयंमंभंबंफंपंनंधंदंथंतंणंढंडंठंटंञंझंजंछंचंङंघ गंखंकंअः अंऔंओं ऐंएंॡंऌंॠंऋंऊंउंईंइंआंअंमूलमंत्रंचजप्त्वा शंखमापूर्य उंसोममंडलायषोडशकलात्मने श्रीरामार्घामृतायनमइतिसंपूज्य तत्रचंद्रकलाः पूजयेत् अंअमृतायैनमः आंमानदायै इंपूषायै. ईंतुष्ट्यैनमः उंपुष्ट्यैनमः ऊंमत्यैनमः ऋंधृत्यैनमः ॠंशशिन्यै. ऌंचंद्रिकायै ॡंकान्त्यै एंज्योत्स्नायैनमः ऐंश्रियै ओंप्रीत्यै औंअंगदायैनमः अंपूर्णायै-अःपूर्णामृतायैनमइति ततोब्रह्मांडोदरतीर्थानिकरैः स्पृष्टानितेरवे तेनसत्येनमेदेवतीर्थं देहिदिवाकर गंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकुरु इतिसूर्यमंडलतीर्थं अंकुशमुद्रयाआवाह्य शंखेसंयोज्य गंधपुष्पाद्यैः शंखजलंसमभ्यर्च्य शंखेपाणितलंदत्त्वामूलमंत्रमष्टधाजपेत् तज्जलंचिन्मयंसंचिंत्यअस्त्रमंत्रेणसंरक्ष्यधेनुमुद्रयाऽमृतीकृत्य शंखमुद्रांरुंडमुद्रांचप्रदर्श्यपरमीकृत्यगंधपुष्पाभ्यांशंखंसंपूज्य तेनजलेनदेवमात्मानंपूजाद्रव्याणिचप्रोक्षयेत् इतिशंखप्रतिष्ठा शंखात्पूर्वादिप्रादक्षिण्येन अर्घ्यपाद्याचमनीयमधुपर्कादिसामान्यार्घ्यविधिना स्थापयेत् ततोवामभागस्थंकलशंपूजाद्रव्याणिचप्रोक्षयेत् अथांतर्यागः स्वदेहेमंडूकादिन्यासंकृत्वा स्वहृदये धर्मकंदसमुद्भूतंज्ञाननालसुशोभितं ऐश्वर्याष्टदलंपद्मंपरंवैराग्यकर्णिकं तस्मिन्पीठेचिदात्मानंराघवंचस्वरूपिणं ध्यात्वामानसैर्धूपदीपाद्यैःसंपूज्यनैवेद्यावसरेकिंचिज्जपंकृत्वा गुह्योतिमंत्रेण. जपंसमर्पयेत्ततः स्वाधिष्ठानगतत्रिकोणकुंडेप्रज्वलितंचिदग्निं ध्यात्वा

विंदुनादप्रणवेनाहंतादिकंहुत्वाततः पूजाहोमादिकंदेवकृतंयत्त्वदनुग्रहात् तेनप्रीतोभवत्वंभोः शुद्धंमेमानसंकुरु
इतिमंत्रेणश्वासमार्गगतंतेजइत्युक्त्वाआत्मानंसमर्पयेत् ततस्तन्मयः सच्चिदानंदमयोभूत्वाक्षणंतिष्ठेत् इत्यंतर्यागः
अथपीठपूजा स्ववामभागे श्रीगुरुभ्योनमः दक्षिणेगणपतयेमध्येस्वेष्टदेवतायैपीठमध्येॐमंडूकायनमःकालाग्निरु
द्रायकूर्माय. आधारशक्त्यै. अनंता.पृथिव्यै. क्षीरसागराय. रत्नदीपाय- रत्नमंडपाय.कल्पवृक्षेभ्यो- रत्नवेदि
कायै. रत्नसिंहासनायनम इतिउपर्युपरिसंपूज्य धर्मायनमः आग्नेयेज्ञानाय.नैर्ऋत्ये.वैराग्याय-वायव्येऐश्वर्याय
ऐशान्येअधर्माय. पूर्वेअज्ञानाय.दक्षिणेअवैराग्यायपश्चिमेअनैश्वर्याय.उत्तरेततोमध्येआनंदकंदाय-संविन्नालाय.स
र्वतत्त्वकमलासनाय.प्रकृतिमयपत्रेभ्यो.विकृतिमयकेसरेभ्यो. पंचाशद्वर्णायैकार्णिकायै.अंअर्कमंडलायद्वादशकला
त्मने, ॐसोममंडलायषोडशकलात्मने. मंवन्हिमंडलायदशकलात्मने. संसत्त्वाय. रंरजसे.तंतमसे.आंआत्मने
अंअंतरात्मने-पंपरमात्मने.ह्रींज्ञानात्मने. मायातत्त्वाय. कलातत्त्वाय विद्यातत्त्वाय परतत्त्वाय ॐऊकाराद्या मोंता
योगपीठाएकैकोपरिपूजयेत् ततःपूर्वादिप्रादक्षिण्येननवशक्तीःपूजयेत् विमलायैपूर्वेउत्कर्षिण्यैआग्नेयेज्ञानायैदक्षि
णेक्रियायै नैर्ऋत्येयोगायै पश्चिमेप्रध्यै वायव्येसत्यायै उत्तरेईशानायै ऐशान्येअनुग्रहायै मध्ये॥ततःपुष्पांजलिं
गृहीत्वा पीठं मंत्रेणपुष्पांजलिंदद्यात् ॐनमोभगवतेविष्णवेसर्वभूतात्मनेवासुदेवायसर्वात्मसंयोगपद्मपीठात्मने
नमःततोमध्यान्हेजन्मभावयेत् उच्चस्थेग्रहपंचकेसुरगुरौसेंदौनवम्यांतिथौ लग्नेकर्कटकेपुनर्वसुयुतेमध्यंगतेपूषणि
निर्दग्धुंनिखिलाःपलाशसमिधोमध्यादयोध्यारणे राविर्भूतमभूतपूर्वविभवंयत्किंचिदेकंमहः ततःपूर्वोक्तमूर्तौ अयो
ध्यानगरेरम्येरत्नमंडपमध्यगे स्मरेत्कल्पतरोर्मूलेरत्नसिंहासनंशुभं तन्मध्येष्टदलंपद्मंनानारत्नप्रतिष्ठितं मातुरं
कगतंराममिंद्रनिलमणिप्रभं कोमलांगंविशालाक्षंविद्युद्वर्णवराननं भानुकोटिप्रतीकाशंकिरीटेनविराजितं रत्नग्रै

अ०र०
चैत्र०
३१

वेयकेयूररत्नकुंडलमंडितं रत्नकंकणमंजीरकटिसूत्रैरलंकृतं श्रीवत्सकौस्तुभोरस्कंमुक्ताहारोपशोभितदं क्षिणांगेदशरथंपुत्रान्वेषणतत्परंपार्श्वेभरतशत्रुघ्नौतालवृंतकरावुभौअग्रेव्यग्रंहनूमंतंरामानुग्रहकांक्षिणं एवंविधंससीतंरामंध्यात्वापुष्पांजलिंगृहीत्वामूलमुच्चार्यआत्मसंस्थमजंशुद्धंत्वामहंपरमेश्वरअरण्यामिवहव्याशंमूर्त्तावावाहयाम्यहं इतिमंत्रंपठेत् सहस्रशीर्षेत्यावाह्यावाहनींमुद्रांप्रदर्शयेत् ततःतवेयंमहिमामूर्तिस्तस्यांत्वांसर्वगंप्रभो भक्तिस्नेहसमाकृष्टंदीपसंस्थापयाम्यहमितिपठित्वा स्थापनींमुद्रांप्रदर्शयेत् सर्वांतर्यामिणंदेवंसर्ववीजमयंशुभंस्वात्मस्थमपरंशुद्धमासनंकल्पयाम्यहमित्युक्त्वापुरुषएवेत्यासनं अस्मिन्वरासनेदेवसुखासीनोक्षरात्मक प्रतिष्ठितोभवेशत्वंप्रसीदपरमेश्वरेत्युक्त्वोपवेशनंअथसन्निधापनंअनन्यातवदेवेशमूर्त्तिशक्तिरियंप्रभोसान्निध्यंकुरुतस्यांत्वंभक्तानुग्रहतत्परेत्युक्त्वामूलांतेसन्निधापनं सन्निधापनींमुद्रांप्रदर्शयेत् अथसन्निरोधनं आज्ञयातवदेवेशकृपांभोधेगुणांबुधे आत्मानंदैकतृप्तंत्वांनिरुणध्मिपितर्गुरोइत्युक्त्वा मूलांते सन्निरोधनींमुद्रांप्रदर्शयेत् अज्ञानाद्दुर्मनस्त्वाद्वावैकल्यात्साधनस्यच यदपूर्णंभवेत्कृत्यंतथाप्यभिमुखोभवेत्युक्त्वाभिमुखीमुद्रयासम्मुखीकरणं दृशापीयूषवर्षिण्यापूरयन्यज्ञविष्टरंमूर्त्तौवायज्ञसंपूर्त्तौस्थितोभवमहेश्वरेतिप्रार्थनामुद्रयाप्रार्थना अभक्तवाङ्मनश्चक्षुःश्रोत्रदूरांतरेद्युते स्वतेजःपंजरेणाशुवेष्टितोभवसर्वतइति अवगुंठनमुद्रयाअवगुंठनं ततोदेवदेहे षडंगेनसकलीकरणं धेनुमुद्रयाद्युऽमृतकिरणं महामुद्रयापरमीकरणं ततोदीपिन्याविधयादीपनं साच यथामूलमंत्रं पठित्वा ऐंवदवदवाग्वादिनिऐंक्लीं क्लिन्नेक्लेदिनिक्लेदयमहाक्षोभंकुरुकुरु क्लींसौमहाक्षोभंकुरुकुरुसौःह्सौःइतिआकारादिक्षकारान्तानांमातृकानामुच्चार्य अर्घ्योदकेनदेवंत्रिःप्रोक्ष्यदेवस्यहृदयंस्पृशन् प्राणप्रतिष्ठांकुर्यात् सायथाॐआंह्रींक्रोंयंरंलंवंशंषंसंहंहंसःसोहं श्रीभगवतः प्राणइहप्राणाॐआंह्रींक्रोंयंरंलंवंशंषंसंहंहंसःसोहंभगवतोजीवइहस्थितःॐआंह्रींक्रोंयंरंलंवंशंषंसंहंहंसः

सोहंभगवतोवाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा यस्यदर्शनमिच्छंतिदेवाःस्वाभीष्टसिद्धये तस्मैतेपरमेशायरामायस्वागतंनमः कृतार्थोऽनुगृहीतोऽस्मिसफलंजीवितंमम आगतोऽवदेवेशसुस्वागतमिदंपुनः मूलांतेश्रीरामसुस्वागतोभव ततः शंख१ चक्र २ गदा३पद्म४धेनु५गरुड७श्रीवत्स८योनि१० मुद्राःप्रदर्श्यपुष्पांजलिंगृहीत्वा मूलांतेश्रीरामायसवाहनायसपरिवारायस्वशक्तियुक्ताय पुष्पांजलिं परिकल्पयामि नम इतिसमर्पयेत् यद्भक्तिलेशसंपर्कात्परमानंदसंभवः तस्मैतेचरणाब्जायपाद्यंशुद्धायकल्प्यते एतावानस्येतिमूलांतेश्रीरामाय पाद्यंपरिकल्पयामिनमः पाद्यंपादयोर्दद्यात् तापत्रयहरंदिव्यंपरमानंदलक्षणं तापत्रयविनिर्मुक्तंत्वामर्घ्यंकल्पयाम्यहं त्रिपादूर्ध्वः मूलांते रामायइदमर्घ्यंस्वाहा इत्यर्घ्यंशिरसिदद्यात् वेदानामपिवेदायदेवानांदेवतात्मने आचमनंकल्पयामीशशुद्धानांशुद्धिहेतवे ततोविराड्मूलांतेश्रीरामायइदमाचमनीयं सुधा आचमनं मुखेदद्यात् सर्वकालेष्वहीनायपरिपूर्णसुखात्मने मधुपर्कमिमंदेवकल्पयामिप्रसीदमे मूलांतेश्रीरामायमधुपर्कंसुधाम धुपर्कंमुखेदद्यात् उच्छिष्टोप्यशुचिर्वापियस्यस्मरणमात्रतःशुद्धिमाप्नोतितस्मैतेपुनराचमनीयकमितिपुनराचमनंदद्यात् स्नेहंगृहाणस्नेहेनलोकनाथमहायशः सर्वलोकेषुशुद्धात्मन्ददामिस्नेहमुत्तममितिस्नेहसमर्पणं ततः सुगंधद्रव्यादिनाउद्वर्तनंकारयित्वा उष्णोदकेनशुद्धांबुनावास्नापयेत् अथपंचामृतस्नानं आप्यायस्वेतिपयःदधिक्राव्णइतिदधि घृतंमिमिक्षतइतिघृतं मधुवाताइतिमधु स्वादुःपवस्वेतिशर्करा ततः परमानंदबोधाब्धिनिमज्जन्निजमूर्तये सांगोपांगमिदंस्नानंकल्पयाम्यहमीशते द्रविणेनचशुद्धेनसर्वगंधजलेनच सर्वोदकस्नानं ततो मूलेन शंखोदकेनाऽभिषिच्यपुनराचमनीयं यस्यशक्तित्रयेणेदंसंप्रोतमखिलंजगत् यज्ञसूत्रायतस्मैतेयज्ञसूत्रंप्रकल्पये तस्माद्यज्ञात्सर्वहुतः संभृतमित्युपवीतं स्वभावसुंदरांगायनानाशक्त्याश्रयायते भूषणानिविचित्राणिकल्पयाम्यमरार्चितेति

भूषणानि हिमांब्बेनसारागुरुकुंकुमघृष्टंगंधंकनिष्ठयासमर्पयेत् परमानंदसौभाग्यपरिपूर्णांदिगंतर गृहाणपरमंगंधंकृपयापरमेश्वर तस्माद्यज्ञात्सर्वहुतइतिगंधंदत्त्वा तुरीयवनसंभूतंनानागुणमनोहरं अमंदसौरभंपुष्पं गृह्यतामिदमुत्तममितिपठित्वा तस्मादश्वाइति पुष्पंदत्त्वा पुष्पांजलित्रयंदद्यात् ततश्चंदनाक्षतपुष्पादिभिःसीतां सकौशल्यांपूजयेत् रामस्यजननीत्वासीरामात्मकमिदंजगत् अतस्त्वांपूजयिष्यामिलोकमातर्नमोस्तुते ततोनमोदशरथायेतिदशरथंसंपूज्यलक्ष्मणंभरतशत्रुघ्नौचसंपूज्यहनुमंतंपूजयेत् ततआवरणपूजार्थमनुज्ञाप्य षडंगपूजनंकुर्यात् इतिप्रथमावरणम् हनूमंतंचसुग्रीवंभरतंसविभीषणं लक्ष्मणांगदशत्रुघ्नान्जामवंतंदलेष्वितान् द्वितीयं धृष्टिंजयंतंविजयंसुराष्ट्रंराष्ट्रवर्धनं अकोपंधर्मपालंचसुमंतंदलमध्यतः तृतीयं दलाग्रे लोकपालांश्च चतुर्थे तदस्त्राणिततोवहिः पंचमं ततःपुष्पांजलिंदत्त्वा वनस्पतिरसोपेतोगंधाढ्यःसुमनोहरः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां यत्पुरुषंव्यदधुरितिधूपंदद्यात् सुप्रकाशोमहादीपः सर्वतस्तिमिरापहः सबाह्याभ्यंतरंज्योतिर्दीपोयंप्रतिगृह्यताम् ब्राह्मणोस्येतिदीपम् अथनैवेद्यम् मूलेनास्त्रायफडितिचसंप्रोक्ष्यचक्रमुद्रयाभिरक्ष्य मूलेनाष्टधाभिमंत्र्य धेनुमुद्रांचप्रदर्श्य मूलेनाभिमंत्र्य दक्षिणहस्तेउदकमादाय शालीभक्तंशशिकरसितंपायसापूपसूपं लेह्यंपेयंसुचोष्यंसितममृतफलंघारिकाद्यंसुखाद्यं आज्यप्राज्यसुभोज्यंनयनरुचिकरंराजिकैलामरीचं स्वादीयः शाकराजीपरिकरममृताहारजोषंजुषस्व हैमपात्रगतंदिव्यंपरमान्नंसुसंस्कृतं पंचधाषड्रसोपेतंगृहाणपरमेश्वर चंद्रमामनसइतिनैवेद्यम् अमृतोपस्तरणमसीनिजलंदत्त्वा प्राणायस्वाहेत्यादिपंचग्रासान्विकचोत्पलमुद्राभिः ग्राहयित्वा नमस्ते देवदेवेशसर्वतृप्तिकरंपरं अखंडानंदसंपूर्णगृहाणजलमुत्तममिति मध्येपानीयंदत्त्वामध्येजवनिकांकृत्वा ब्रह्मेशाद्यैः परितउरुभिःसूपविष्टैःसमेतोलक्ष्म्याशिंजद्वलयकरयासादरंवीज्यमानःनर्मक्रीडाप्रहसनपरीहासयन्पांक्तिभोक्त्द्दन्

भुंक्तेपात्रेकनकघटितेषड्रसान्श्रीरमेशइतिपठित्वा यश्रितारत्नकामद्रुमविभवभुवांमंडनंमंडलानां सर्वासांसंपदांयन्निजगतिजगतांमंगलंमंगलानां हैमामत्रस्थदूर्वादधिमधुलवणैर्दृष्टमुत्तार्यचार्थैं नीराज्योरामचंद्रोदिनकरकरजिद्रत्नदीपावलीभि रितिध्यात्वायथाशक्तिजपंकृत्वा अमृतापिधानमसीत्युत्तरापोशनंदत्त्वा विश्वक्सेनायनम इति उच्छिष्टशेषंदत्त्वा हस्तौप्रक्षाल्यकरोद्वर्त्तनंदद्यात् इदंफलमितिफलं पूगीफलमितितांबूलंहिरण्यगर्भेतिदक्षिणां मुकुटाद्याभूषणानिछत्रचामरादीनिपरिकल्प्य महानीराजनंकुर्यात् नाभ्याआसीदितिनमस्कारान्सप्तास्यासन्नितिप्रदक्षिणां यज्ञेनेतिपुष्पांजलिंदत्त्वा भगवन्प्रसीदेतिनमस्कृत्यस्तुवीत ध्येयंसदापरिभवघ्नमभीष्टदोहंतीर्थास्पदंशिवविरिंचिनुतंशरण्यंभृत्यार्तिहंप्रणतपालभवाब्धिपोतंवंदेमहापुरुषतेचरणारविंदं त्यक्त्वासुदुस्त्यजसुरेप्सितराज्यलक्ष्मींधर्मिष्ठआर्यवचसायदगादरण्यंमायामृगंदयितयेप्सितमन्वधावद्वंदेमहापुरुषतेचरणारविंदम् २ श्रीरामचंद्ररघुपुंगवराजवर्यराजेंद्ररामरघुनायकराघवेश राजाधिराजरघनंदनरामभद्रदासोहमद्यभवतःशरणागतोस्मि यस्यामलंनृपसदस्सुयशोधनायगायंत्यजस्रमृषयोदिगिभेंद्रपत्न्यः तन्नाकपालवसुपालकिरीटजुष्टपादांबुजंरघुपतेःशरणंप्रपद्ये ३ नमोब्रह्मण्यदेवायरामायाकुंठमेधसे उत्तमश्लोकधुर्यायन्यस्तदंडार्चितांघ्रये इंदीवरदलश्यामोरामोराजीवलोचनः वर्ततेमानसेयस्यास्तांसीतांप्रणमाम्यहंततःपुष्पांजलिंदत्त्वाकपिमुद्रांविधायप्रार्थयेत् यदात्रपासर्वगताहताते ध्यानेनचेतःपरितोहतंते स्तुत्यानयावाक्परताहतातेक्षमस्वसर्वंममदेवदेव अज्ञानादथवाज्ञानादशुभंयन्मयाकृतं क्षंतुमर्हसितत्सर्वंदास्येनचगृहाणमां श्रीगोविंदमुकुंदकेशवशिवश्रीवल्लभश्रीनिधे श्रीवैकुंठसुकुंठकुंठितखलस्वामिन्नकुंठोदय शुद्धध्येयविधूर्त्तधूर्त्तधवलश्रीमाधवाधोक्षज श्रद्धाबद्धविधेहिनस्त्वयिधियंश्रीरांधरित्रीधर त्वमेवभक्तिंजनयंस्त्वमेवमामुद्धरास्मात्पतितंभवाब्धेः क्लिष्टंकृपालोनदयास्तिचेत्तेचेत्तर्हिहाकर्मवशो

हतोऽस्मि गजास्यादित्यंपचास्यशक्तिसिंहास्यरूपवान् ममकृतेनसर्वात्मा रामःप्रीणातुचिद्वपुः ततउत्तरार्घ्यं दद्यात् फलपुष्पांबुसंपूर्णंगृहीत्वाशंखमुज्वलं अशोकचूतकुसुमैर्युक्तंचतुलसीदलैः अर्घ्यमंत्रस्तु दशाननवधार्थाय धर्मसंस्थापनायच परित्राणायसाधूनांजातोरामः स्वयंहरिः गृहाणार्घ्यंमयादत्तंभ्रातृभिःसहितोनघेतिततो यामियामेपुष्पांजलिंदत्त्वायथाशक्तिपूजयित्वारात्रौजागरणंकुर्यात् इतिरामनवमीपूजाविधिः अथदशमीकृत्यंततः प्रातःसमुत्थायस्नानसंध्यादिकाःक्रियाःसमाप्यविधिवद्रामंपूजयेत्पूर्ववन्मुने ततोहोमंप्रकुर्वीतमूलमंत्रेणमंत्रवित् पुर्वोक्तपीठेंकुंडेवास्थंडिलेवासमाहितः लौकिकाग्नौविधानेनशतमष्टोत्तरंततः साज्येनपायसेनैवस्मरन्नाममनन्यधीः अथविस्तरेणहोमाविधिः तत्रयजमानः कृतनित्यक्रियः शुचिःपरिहितवासादर्भपाणिः पीठोपविष्टः प्राङ्मुखोवाचंयतोद्विराचम्यप्राणानायम्यदेशकालौसंकीर्त्य रामनवमीव्रतांगसाज्यपायसहोमंकरिष्येइतिसंकल्प्य तदंगस्थंडिलादिककरिष्ये इतिसंकल्प्य शुद्धगृहेऐशान्यांचतुरंगुलोन्नतमष्टादशांगुलविस्तृतंहोमानुसारेणतदधिकंवामध्योन्नतंस्थंडिलंकुर्यात् स्थंडिलंगोमयेनोपलिप्य यज्ञियशकलेनउदगायतां पश्चात्प्रागायतां तयोर्मध्ये उदक्संस्थाः प्रागायताः प्रादेशसंमितास्तिस्र इत्युल्लेख्य तासुतच्छकलंउदगग्रंनिधायस्थंडिलमद्भिरभ्युक्ष्यशकलमाग्नेय्यां निरस्यापउपस्पृश्य ततस्तैजसेनमृण्मये नवापात्रयुग्मेन संपुटीकृत्यसुवासिन्याः श्रोत्रियागारात्स्वगृहाद्वासमिद्धमग्निमाहृत्य स्थंडिलाद्बहिराग्नेय्यांनिधाय एह्यग्नेरहूगणोगौतमोऽग्निस्त्रिष्टुप् जुष्टोदमूनाअत्रियोवसुश्रानोऽग्निस्त्रिष्टुप् अग्न्यावाहनेविनियोगः एह्यग्नइहहोतानिषीदादब्धःसुपुरएनाभवानः अवतांत्वारोदसीविश्वमिन्वेयजामहे सौमनसायदेवान् जुष्टोदमूनाअतिथिर्दुरोणइमन्नोयज्ञमुपयाहिविद्वान् विश्वाअग्नेअभियुजोविहत्याशत्रूयतामाभराभोजनानि इत्यक्षतैरावाह्याच्छादनं

दूरीकृत्य समस्तव्याहृतीनांपरमेष्ठी० प्रजापतिर्बृहती० अग्निप्रतिष्ठापनेवि. ॐभूर्भुवःस्वरित्यात्माभिमु
खपाणिभ्यांषट्सुलेखासुतत्तत्कर्मसुतन्नामकमग्निंप्रतिष्ठापयामीत्यग्निंप्रतिष्ठाप्य प्रोक्षितेंधनानिप्रक्षिप्य वेणुधम
न्य।प्रबोध्यध्यायेदेवं चत्वारिशृंगावामदेवोग्निस्त्रिष्टुप् अग्निमूर्तिध्यानेदि. चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तह
स्तासोअस्य त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेश सप्तहस्तश्चतुःशृंगीसप्तजिव्होद्विशीर्षकः त्रि
पात्प्रसन्नवदनःसुखासीनःशुचिःस्मितःस्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्तं स्रुचं
स्रुवं तोमरंव्यजनंवामेघृतपात्रंचधारयन् आत्माभिमुखमासीनएवंरूपोहुताशनः एषोहिदेवःप्रदिशोनुसर्वाःपूर्वोह
जातःसउगर्भेअंतः सएवजातःसजनिष्यमाणः प्रत्यङ्जनास्तिष्ठतिसर्वतोमुखः अग्नेवैश्वानरशांडिल्यगोत्रमेषध्वज
प्राङ्मुखममसम्मुखोभवेतिध्यात्वा ततोन्वाधानंदध्यात् क्रियमाणेरामनवमीव्रतोद्यापनहोमेदेवतापरिग्रहार्थमन्वा
धानंकरिष्यइतिसंकल्प्य समिद्द्वयमादायास्मिन्नन्वाहितेग्नौजातवेदसमग्निमिध्मेनप्रजापतिंवाघारदेवतेआज्येना
ग्नीषोमौचक्षुषीआज्येनात्रप्रधानंश्रीराममष्टोत्तरशतसंख्याकाभिः साज्यपायसाहुतिभिः सीतांरामस्यजननींदश
रथं लक्ष्मणंभरतंशत्रुघ्नंहनुमंतंहृदयंशिरःशिखांकवचं नेत्रंअस्त्रंसुग्रीवंभरतंविभीषणंलक्ष्मणं अंगदं शत्रुघ्नंजाम्बवंतं
धृष्टिं जयंतं विजयं सुराष्ट्रं राष्ट्रवर्द्धनं अकोपं धर्मपालं सुमंतं इंद्रं अग्निं यमं निर्ऋतिं वरुणं वायुं कुबेरं
ईशानं ब्रह्माणं अनंतं वज्रं शक्तिं दंडं खड्गंपाशं अंकुशं गदां शूलं पद्मं चक्रं एताःप्रधानदेवताः
प्रत्येकमष्टाविंशतिसंख्याकाभिरष्टाभिर्वासाज्यपायसाहुतिभिः शेषेणस्विष्टकृतमग्निमिध्मसन्नहनेनरुद्रमर्यम्णम
ग्निंदेवान्विष्णुंअग्निंवायुं सूर्यंप्रजापतिंचएताःप्रायश्चित्तदेवता आज्यद्रव्येणज्ञाताज्ञातदोषनिबर्हणार्थंत्रिवारमग्निं
सकृन्मरुतश्चाज्येनांगदेवताः प्रधानदेवतास्सर्वाः सन्निहिताःसंतु सांगेनकर्मणासद्योयक्ष्ये व्याहृतीनांपरमेष्ठी

प्रजापतिर्वृहती अन्वाधानसामिद्धोमेवि- ओँभूर्भुवः स्वः स्वाहा प्रजापतयेइदं इध्मवर्हिषोः सन्नहनं
तत्रायंक्रमः प्रादेशमात्रान्षट्त्रिंशद्दर्भान् रज्जुकरणार्थंगृहीत्वा तत्र द्वादशदर्भैःसंधितपवनांरज्जुप्रादक्षिण्ये
नकृत्वापुनरन्यांरज्जुंएवंरज्जुद्वयंगृहीत्वातद्रज्जुद्वयंसप्रादक्षिण्येनसमन्या पुनरन्यां रज्जुंपूर्ववत्कृत्वा प्रादक्षिण्येन
त्रिवर्त्त समस्याग्रे प्रदाक्षिण ग्रंथिंकृत्वा तां रज्जुमुदगग्रां वितत्यतत्रप्रादेशमात्रान्मुष्टिपरिमितान्दर्भान्निधायतया
रज्ज्वातान्दर्भान् द्विरावेष्ट्य रज्ज्वग्रेणतद्रज्जुमूलंसकृदावेष्ट्य तद्रज्ज्वग्रशेषं पूर्वमावेष्ट्य रज्ज्वधस्तात्रिवीयान्मि
दर्भेसदायतनस्यपश्चाद्भागंउपरिनिदध्यात् ततःपूर्ववदन्यांत्रिवृतांरज्जुंकृत्वोदगग्रांवितत्यतत्रपलाशखदिराद्यन्य
तमयज्ञियवृक्षस्यद्विप्रादेशप्रमाणं पंचदशसमिदात्मकमिध्मं प्रागग्रं निधाय तयारज्ज्वासकृदावध्यायतनस्य
पश्चाद्भागेउपरिनिधाय ततअग्निमायतनाद्बहिःसोदकेनपाणिनाग्नेयमारभ्यैशानपर्यंतंपरिसमूह्य ततःप्राच्यामुदग
ग्रैःदक्षिणस्यांप्रागग्रैःप्रतीच्यामुदगग्रैरुदीच्यांप्रागग्रैर्दर्भैःपरिस्तृणुयात् पूर्वपश्चिमपरिस्तरणमूलयोरुपरिदक्षिण
परिस्तरणाग्रहोरधस्तादुत्तरपरिस्तरणं एवमग्निपरिस्तीर्य कांश्चिदुत्तरतोदर्भानास्तीर्याग्नेरैशानी मारभ्यपूर्ववत्प
युंक्ष्यदर्भेषूत्तरतःपात्राणिन्यंचिसादयेत् दक्षिणसव्यपाणिभ्यांक्रमेणचरुस्थालीप्रोक्षण्यौदर्वीस्रुचौप्रणीताज्यपात्रे
इध्मावर्हिषीशूर्पकृष्णाजिने उलूखलमुसले प्रोक्षणीपात्रंचभानीकृत्यप्रादेशमात्रोनधायाद्भिः पूरयित्वांगुष्ठोपक
निष्ठिकाभ्यामसंसृष्टेगृहीत्वात्रिरुत्पूयपात्राण्युत्तानानिकृत्वादर्भेविस्रंस्यत्रिःप्रोक्षयेत् प्रणीतापात्रमग्नेःप्रत्यङ्नि
धायतत्रपवित्रेनिधायोदकंपूरयित्वा गंधपुष्पाक्षतान्निक्षिप्य अस्मिन्कर्मणिब्रह्माकृताकृतावे- यजमानस्तत्प्रणीता
पात्रंनासिकासमीपेनीत्वोत्तरतोग्नेर्दर्भेषुनिधाय अन्यैर्दर्भैराच्छादयेत् तेपवित्रशूर्पेनिधाय श्रीराममुद्दिश्यतूष्णींच
तुरोमुष्टीन्निरुप्येतरदेवताभ्यः सीतायैत्वाजुष्टंनिर्वपामीत्यादिचतुरश्चतुरोमुष्टीन्निर्वपेत् श्रीरामायजुष्टंप्रोक्षामीति

तथैवसीतायैत्वाजुष्टंप्रोक्षामीतिमंत्रेणप्रतिदैवतंचतुः संस्थंप्रोक्षणंपश्चात्प्रत्यग्ग्रीवेऊर्ध्वलोम्निकृष्णाजिनेउलूखलं निधायोलूखलनिरुप्तव्रीहीन्मुसलेनत्रिरवहतान् त्रिःफलीकृतांस्तंडुलान्पयसि श्रपयेत् असंस्कृताग्नौश्रपणपक्षे सूर्पादीनांचतुर्णांनिर्वापादीनांचनिवृत्तिः पर्यग्निकरणस्यतुन तेपवित्रेआज्यपात्रेनिधायाज्यपात्रं पुरतः संस्थाप्यतत्राविलीनाज्यंनिक्षिप्य ततःपरिस्तरणाद्बहिरुत्तरतोऽग्नेरंगारानपोह्य तेष्वाज्यपात्रंनिधायवामहस्तेदर्भाग्रद्वयंधृत्वाज्वलतादर्भोल्मुकेनावज्वाल्यदर्भाग्रद्वयमंगुष्ठपर्वमात्रप्रक्षालितं तत्र निक्षिप्य ज्वलतातेनैवोल्मुकेन चरुसहितंत्रिःपर्यग्निकुर्यात् उल्मुकंनिरस्यापउपस्पृश्याज्यंकर्षान्निवोदगुद्वास्यांगारानग्नौ प्रक्षिपेत् ततोंगुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यांपाणिभ्यांपवित्रेअसंहतेधृत्वा सवितुष्टाहिरण्यस्तूपः सवितापुरउष्णिक् आज्यस्योत्पवनेवि.सवितुर्वःप्रसवइत्पुनाम्याच्छिद्रेणपवित्रेणवसोः सूर्यस्यरश्मिभिः प्रागुत्पुनातिसकृन्मंत्रेणद्विस्तूष्णीं पवित्रे अद्भिः प्रोक्ष्याग्नौप्रहरेत् अग्नेःपश्चात्परिस्तरणाद्बहिरात्मनोऽग्रेभुवंप्रोक्ष्य भुविबर्हिःसन्नहनींरज्जुमुदगग्रांवितत्यतद्बहिःप्रागग्रमुदगपवर्गमास्तीर्यतत्राज्यस्थापनंकृत्वासकुशौदर्वीस्रुवावग्नौप्रताप्यभूमौदर्वींनिधायस्रुवविलग्नदर्भाग्रैःप्रागपवर्गंत्रिःसंमृज्यस्रुवपृष्ठंदर्भाग्रैरात्माभिमुखंत्रिःसंमृज्यकुशमूलेनपृष्ठादारभ्यविलपर्यंतंदंडंत्रिः संमृज्यप्रोक्ष्यप्रताप्यघृतादुत्तरतःस्थापयेत्तथैवदर्वींसंमृज्यस्रुवस्योत्तरतोनिधायतान्दर्भानद्भिःप्रोक्ष्याग्नौप्रहरेत् ततःस्रुवेणाज्यंगृहीत्वाशृतंहविरभिघार्योदगुद्वास्याग्न्याज्ययोर्मध्येननी.त्वादक्षिणबर्हिष्यासाद्यपुनरभिघार्यसहश्रपणपक्षे पात्रांतरेऽयुद्धृत्येदंश्रीरामायेत्यादिचक्रांतांपृथगभिमृश्यगंधपुष्पाक्षतैरग्निमर्चयेत् विश्वानिश्वानिनइत्यनयोर्वसुश्रुतोऽग्निस्त्रिष्टुप् अग्न्यर्चनेवि-विश्वानिनोदुर्गहाजातवेदःसिंधुननावादुरितातिसार्षि अग्नेअत्रिवनमसागृहणानास्माकंबोध्यवितानूनायस्त्वाहृदाकीरिणामन्यमानोमर्त्यंमर्त्योजोहवीमि जातवेदोयशो अस्मासुधेहिप्रजाभिरग्नेअमृतत्वमश्यामित्यृ

४४

ग्भ्यांप्रतिपादं प्रतिदिशं प्राचीरभ्यर्च्य यस्यैत्वंसुकृतइत्यस्यवसुशूनोऽग्निस्त्रिष्टुप् अग्न्युपस्थानेवि. यस्मैत्वंसुकृते जातवेदउलोकमग्नेकृणवस्योनं अश्विनंसपुत्रिणं वीरवंतंगोमंतंरयिंनशस्तेस्वस्ति इत्युपस्थायात्मानंचालंकृत्यहस्तंप्रक्षाल्येध्मसन्नहनींरज्जुंतत्रैवनिधायेध्ममादायमूलमध्येऽग्निष्वभिध्यायेयंतइध्मइत्यस्यमंत्रस्यवामदेवोजातवेदाअग्निस्त्रिष्टुप् इध्महवनेवि· इयंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्द्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहेतिहुत्वाजातवेदसेऽग्नयइदं अथस्रुवेणाज्यंगृहीत्वापरिस्तरणवायवकोणमारभ्याग्नेयीपर्यंतं प्रजापतये इतिमनसास्मरन्स्वाहेत्युच्चार्य चिच्छेदेनार्जवेनाज्यधारापद्मीग्रौइध्मग्रौइध्मदारुणिप्लावयन्हुत्वा पुनराज्यं गृहीत्वा परिस्तरणनैर्ऋत्यकोणमारभ्यैशानीपर्यंततथैवचहुत्वा उभयत्रप्रजापतयेइदंनममेतित्यजेत् पुनराज्यमादायाग्नयेस्वाहेत्युत्तरपार्श्वे पुनराज्यमादाय सोमायस्वाहेत्यग्नेर्दक्षिणपार्श्वेऽग्नयइदं सोमायेदंनममेतियथाक्रमेणत्यजेत् ततोयजमानअष्टोत्तरशतसंख्याहुतिपर्याप्तंसाज्यपायसंद्रव्यं श्रीरामायतथाप्रतिदैवतमष्टाविंशतिसंख्याहुतिपर्याप्तसाज्यपायसद्रव्यंचतुर्थ्यंतेभ्यः सीताप्रभृतिभ्योनममेतिसाक्षतजलेनत्यागंकुर्यात् ततोराममंत्रस्यऋष्यादिस्मरणपूर्वकंतेनाष्टोत्तरशतसंख्यः साज्यपायसहोमःकार्यःकारणीयोवाआचार्यहस्तेनदीक्षारहितस्तुपूजामिवहोममपिवैदिकमंत्रेणवाकुर्यात् वैदिकपक्षे तद्विष्णोरितिमंत्रस्यमेधातिथिर्विष्णुर्गायत्रीरामनवमीव्रतांगसाज्यपायसहोमेवि· तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः दिवीवचक्षुराततंस्वाहेतिहोमःकार्यः द्वितीयपक्षे उँश्रीरामायस्वाहेतिततः उँसीतायैस्वाहेत्येवंप्रणवादिस्वाहाकारांतमंत्रैः प्रत्येकमष्टाविंशतिसंख्यासाज्यपायसस्यज्याहुतीर्हुत्वास्विष्टकृद्धोमंकुर्यात् दव्यामुपस्तीर्याहविषउत्तरार्द्धात् पूर्ववदानतोभूत्वान्युब्जाभिरंगुलीभिः सैविष्टकृतमवदाज्य स्थालीस्थितमनभिघार्य दर्वींद्विरभिघार्य पदस्येत्यस्य हिरण्यगर्भऋषिः अग्निस्विष्टकृद्देवता·

कृणुतेमहित्वा आदेवीमायाःसहतेदुराषाःशिशीतिशृंगेरक्षसेविनिक्षेस्वाहा अनेनावशिष्टंसर्वंहुत्वाग्नयइदं नममेत्युक्त्वाविश्वेभ्योदेवेभ्यःस्वाहेतिसंस्त्रावंहुत्वाविश्वेभ्योदेवेभ्यइदं अथपूर्वमासादितंपूर्णपात्रंआस्तीर्णवर्हिषिदक्षिणपाणिनानिधायतत्रगंगादिपुण्यनदीःस्मृत्वा दक्षिणपाणिनाभिमृशन् पूर्णमासिपूर्णमेभूयाः सुपूर्णमसिसुपूर्णमेभूयाःसदसिसन्मेभूयाः सर्वमसिसर्वंमेभूयाः अक्षितिरसिमामेष्टाइतिजपित्वाप्राच्यादिपंचदिक्षुकुशाग्रैः प्रादक्षिण्यक्रमेणउदकमुत्क्षेत् प्राच्यांदिशिदेवाऋत्विजोमार्जयंतां दक्षिणस्यांदिशिमास्यःपितरोमार्जयंतां प्रतीच्यांदिशिग्रहाः पशवोमार्जयंतां उदीच्यांदिश्यापओषधयोवनस्पतयोमार्जयंतां उर्द्धायांदिशियज्ञःसंवत्सरःप्रजापतिर्मार्जयंतां ततःस्वशिरशिकुशाग्रैरभिषिंचेदेभिर्मंत्रैः आपोअस्मानित्यस्यदेवश्रवाआपास्त्रिष्टुप् मार्जनेविनियोगः आपोअस्मान्मातरःशुंधयंतुघृतेनमाघृतप्वः पुनंतुविश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यः शुचिरापूतएमि इदमाप इत्यस्यसिंधुद्वीपआपोनुष्टुप्मार्जनेविनि. इदमापःप्रवहतायत्किंचिदुरितंमयि यद्वामभिदुद्रोहयद्वाशेफउतानृतं सुमित्रियानआपओषधयःसंतुः दुर्मित्रास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः ततोयजमानोवामपार्श्वस्थितपत्न्यंजलौस्ववामकरेचपूर्णपात्रस्थंजलं माहंप्रजापरासिघंपानः ममावरीस्थनसमुद्रेवोनिनयानिखंपाथोअपीथेत्येकंश्रुत्योक्त्याप्रत्यङ्मुखानिषिच्यतज्जलंवर्हिषिनिषिंचेत् ताआपःसमुद्रंगच्छंतीतिध्यात्वाततोयजमानोग्नेर्वायव्यदेशेस्थितः ॐचमेस्वरश्चमेयज्ञोपचतेनमश्चयतेन्यूनंतउपयज्ञेतिरिक्तंतस्मैतेनमइत्युपस्थायपरिस्तरणानिविसृज्यपरिसमूह्यपर्युक्ष्यविश्वानिवइत्यग्निमलंकृत्य मानस्तोकेकुत्सोरुद्रोजगतीविभूतिग्रहणेवि. मानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः मानोवीरान्रुद्रभामिनोवधीर्हविष्मंतः सदमित्वाहवामहे इत्यनेनविभूतिंगृहीत्वा ॐत्र्यायुषंजमदग्नेर्ललाटे कश्यपस्यत्र्यायुषमितिकंठे अगस्त्यस्यत्र्यायुषमितिनाभौयद्देवानांत्र्या

युषमितिदक्षिणस्कंधेतन्मेअस्तुत्र्यायुषमितिवामस्कंधे शतायुषमितिशिरसि ततःस्थापितानांदेवतानांउत्तरपू
जनंकृत्वाचार्यंगंधादिभिः संपूज्यप्रतिमादानंतस्मैकुर्यात् आचार्यायदक्षिणांब्राह्मणभोजनंभूयसींचदत्त्वा यस्य
स्मृत्येतिपठित्वाकर्मेश्वरार्पणंकुर्यादिति इतिहोमविधिः समाप्तः ॥ ततोभक्त्यासुसंतोष्यआचार्यंपूजयेन्मुनेकुं
डलाभ्यांसुरत्नाभ्यामंगुलीयैरनेकधा गंधपुष्पाक्षतैर्वस्त्रैर्विचित्रैःसुमनोहरैः ततोरामंस्मरन्दद्यादेतंमंत्रमुदीरय
न् इमांस्वर्णमयींरामप्रतिमांसमलंकृतांचित्रवस्त्रयुगच्छन्नांरामोहंराघवायते श्रीरामप्रीतयेदास्येतुष्टोभवतुराघव इ
तिदत्त्वाविधानेनदद्याद्वैदक्षिणांभुवंअन्येभ्यश्चयथान्यायंगोहिरण्यादिशक्तितः दद्याद्वासोयुगंधान्यंयथाविभव
मादृतः ब्राह्मणैःसहभुंजीततेभ्योदद्याच्चदक्षिणां ततःपारणंकुर्यात् इयंचपारणायदापूर्वविद्धायामुपवास
स्तदापिनवमीमतिक्रम्यदशम्यांकर्त्तव्या दशम्यामेवपारणमित्येवकारेणान्ययोगव्य वच्छेदपरेणनवम्या
पारणस्यनिवर्तित्वात् तदनंतरंपारणनिवेदन तवप्रसादस्वीकारात्कृतंयत्पारणंमया व्रतेनानेनसं
तुष्टःस्वस्मिन्भक्तिंप्रयच्छमे इतिपारणं कृत्वैवब्रह्महत्यादिपापेभ्योमुच्यतेध्रुवं तुलापुरुषदानादिफलंप्राप्नोतिमा
नवः अनेकजन्मसंसिद्धःपापेभ्योमुच्यतेध्रुवं बहुनाकिमिहोक्तेनमुक्तिस्तस्यकरेस्थिता कुरुक्षेत्रेमहापुण्येसूर्यपर्व
ण्यनेकशः तुलापुरुषदानाद्यैर्कृतैर्यल्लभ्यतेफलं तत्फलंलभतेमर्त्योव्रतेनानेनसुव्रत ३ इतिदशमीकृत्यं अकिंच
नोपिनियतमुपोष्यनवमीदिने कृत्वाजागरणंभक्त्यापूजयेद्विधिवन्मुने जपन्राममनुंमाया रमानंगसमन्वितं
ह्रींश्रींक्लींरामायनमः एकाक्षरंवाविधिवत्सर्वन्यासकृतोन्नतिःप्रातःसंध्यांचविधिवद्दिवासंध्यादिकाःक्रियाः गोभूति
लहिरण्यादिदद्याद्वित्तानुसारतः श्रीरामचंद्रभक्तेभ्योविद्वद्भ्यःश्रद्धयान्वितः पारणंचप्रकुर्वीतब्राह्मणैःसहभक्तितःए
वंयःकुरुतेभक्त्यासर्वपापैःप्रमुच्यते गंगायांप्रक्षिपेल्लेप्यांलेख्यांमूर्तिंगृहेन्यसेत् इत्याकिंचनव्रतं शक्तस्ययद्व्रतंप्रोक्तमश

कोद्यापनंचतत् तदपिस्याद्यथाशक्त्यासांगंतुसकलंसदा एकामपिनरोभक्त्याश्रीरामनवमींमुने उपोष्यकृतकृत्यः स्यात्सर्वपापैः प्रमुच्यते अपिशक्तादशक्तस्यमूर्तिदानंतुस्वार्चितमित्याकिंचनव्रतोद्यापनं वर्षेवर्षेसमर्थस्यव्रतेनैव प्रपूर्णता नतस्योद्यापनंकिंचिद्व्रतादन्यद्विधीयते सर्वव्रतस्यपूर्त्यर्थमिदंरामव्रतंचरेत् नान्येनास्यास्तियत्पूर्त्तिरने नैवप्रपूर्णतेति इत्थंसमर्थोद्यापनं इतिरामनवमीव्रतं इदंव्रतंदिनद्वयात्मकंइयंनवमीमलमासेनैवकार्या सुजन्ममप्यजतंस्यान्नोपवासःकृतोभवेदिति नकुर्यान्मलमासेतुमहादानव्रतानिचेतिचमाधवीयेसंग्रहवचनात् इति दीक्षितप्रभृतयःवस्तुतस्तुउत्सवरूपत्वात् मदनरत्नधृतगृहप्रवेशगोदानस्थानाश्रममहोत्सवात् नकुर्यान्मलमासेपिगुरौशुक्रेतथास्तगइतिमरीचिवचनान्नभवतीतिवक्तुंयुक्तम् ॥ ॐश्रीरामायनमः अत्ररामनवमीव्रतप्रसंगात् रामाष्टोत्तरशतनामस्तोत्रं पद्मपुराणेउत्तरखंडे ईश्वरउवाचरामरामेतिरामेतिरमेरामेमनोरमे सहस्रनामभिस्तुल्यंरामनामवरानने रकारादीनिनामानिशृण्वतोममपार्वतिमनःप्रसन्नतामेतिरामनामाभिशंकया रामेत्युक्तामहादेविशंभुना सहसास्थितापप्रच्छतंमहादेवंप्रीतिप्रवणमानसा श्रीदेव्युवाच सहस्रनामभिस्तुल्यंरामनामत्वयोदितंतस्यापराणि नामानिसंतिचेद्रावणाद्विषः कथ्यतांममदेवेशतत्रमेभक्तिरुत्थिता श्रीमहादेवउवाच शृणुनामानिवक्ष्यामिरामचंद्रस्यपार्वति लौकिकावैदिकाः शब्दायेकेचित्संतिसुंदरि नामानिरामचंद्रस्यसहस्रंतेषुचाधिकं तेषुचात्यंतमुख्यंहिनाम्नामष्टोत्तरंशतं विष्णोरेकैकनामैवसर्ववेदाधिकंमतं तादृङ्नामसहस्राणिरामनामसमंमतं जपतःसर्ववेदांश्च सर्वमंत्राणिपार्वति तस्मात्कोटिगुणंपुण्यंरामनाम्नैवलभ्यते नामानिशृणुरामस्यमुख्यानिशुभदर्शने ऋषिभिः परिगीतानितानिवक्ष्यामितेप्रिये ॐश्रीरामोरामचंद्रश्चरामभद्रश्चशाश्वतः राजीवलोचनःश्रीमान्राजेंद्रोरघुपुंगवः ८ जानकीवल्लभोजैत्रोजितामित्रोजनार्दनः विश्वामित्रप्रियोदांतःशरण्यत्राणतत्परः १५ वालीप्रमथ

नीवाग्मीसत्यवाक्सत्यविक्रमः सत्यव्रतोव्रतफलःसदाहनुमदाश्रयः २२ कौशल्येयःखरध्वंसीविराधवधपंडितः विभीषणपरित्रातादशग्रीवाशिरोहरः २७ सप्ततालप्रभेत्ताचहरकोदंडखंडनः जामदग्न्यमहादर्पदलनस्ताडकांतकृत् ३१ वेदांतसारोवेदात्माभवबंधैकभेषजं दूषणत्रिशिरोरिश्चत्रिमूर्तिस्त्रिगुणाश्रयः ३७ त्रिविक्रमस्त्रिलोकात्मापुण्यचारित्रकीर्त्तनः त्रैलोक्यरक्षकोधन्वीदंडकारण्यपुण्यकृत् ४३ अहल्यापावनश्चैवपितृभक्तोवरप्रदः जितेंद्रियोजितक्रोधोजितलोभोजगद्गुरुः ५० ऋक्षवानरसंघातीचित्रकूटसमाश्रयः जपतत्रस्तवरदः सुमित्रापुत्रसेवितः ५४ सर्वदेवाधिदेवश्चमृतवानरजीवनः मायामारीचहंताचमहाभागोमहाभुजः ५९ सर्वदेवस्ततःसौम्योब्रह्मण्योमुनिसत्तमः महायोगीमहोदारःसुग्रीवस्थिरराज्यकृत् ६६ सर्वपुण्याधिकफलःस्मृतसर्वाघनाशनः आदिपुरुषोमहापुरुषःपरमःपुरुषस्तथा ७१ पुण्योदयोमहोदारःपुराणपुरुषोत्तमः स्मितवक्त्रोमितभाषीपूर्वभाषीचराघवः ७८ अनंतगुणगंभीरोधीरोदारगुणोनरः मायामानुष्यचारित्रोमहादेवाधिपूजितः ८३ सेतुकृत्जितवारीशःसर्वतीर्थमयोहरिः श्यामांगःसुंदरःशूरःपीतवासोधनुर्धरः ९२ सर्वयज्ञाधिपोयज्ञोजरामरणवर्जितः शिवलिंगप्रतिष्ठातासर्वाष्टगुणवार्जितः ९३ परमात्मापरंब्रह्मसच्चिदानंदविग्रहः परंज्योतिपरंधामपराकाशःपरात्परः परेशःपारगःपारःसर्वभूतात्मकःशिवः १०८ इतिश्रीरामचंद्रस्यनाम्नामष्टोत्तरंशतं गुह्याद्गुह्यतरंदेवितवस्नेहात्प्रकीर्त्तितं यःपठेच्छृणुयाद्वापिभक्तिप्रह्वेणचेतसा ससर्वैर्मुच्यतेपापैःकल्पकोटिशतोद्भवैः जलानिस्थलतांयांतिशत्रवोयांतिमित्रतां राजानोदासतांयांतिवादिनोयांतिसौम्यतां सानुकूल्यंचभूतानिस्थैर्यंयांतिचलाःश्रियः अनुग्रहंग्रहायांतिशांतिमायांत्युपद्रवाः पठतोभक्तिभावेननरस्यागिरिसंभवे यःपठेत्परयाभक्त्या तस्यवश्यंजगत्त्रयं यद्यत्कामंप्रकुरुतेतत्तदाप्नोतिकीर्तनात् कल्पकोटिसहस्राणिकल्पकोटिशतानिच वैकुंठेमोदते

नित्यंदशपूर्वैर्दशावरैः रामंदूर्वादलश्यामंपद्माक्षंपीतवाससं स्तुवंतिनामभिर्दिव्यैर्नतेसंसारिणोजनाः रामाय रामभद्रायरामचंद्रायवेधसे रघुनाथायनाथायसीतायाःपतयेनमः इमंमंत्रंमहादेविजपन्नेदिवानिशं सर्वपापविनिर्मुक्तोविष्णुसायुज्यमाप्नुयात्

॥ इतिश्रीपद्मपुराणेउत्तरखंडेहरगौरीसंवादेश्रीरामचंद्रस्याष्टोत्तरशतनामस्तोत्रम् ॥

श्रीरामचंद्रायनमः.

अस्यामेवनवम्यांकालोत्तरोक्तंमातृकाव्रतं चैत्रशुक्लनवम्यांतुमातृव्रतंसमाचरेत् चतुःषष्टिस्तुसंपूज्याभैरवेणसमन्विताः स्रग्गंधवस्त्रनैवेद्यैःप्रभूतैःसुसितैःशुभैरित्युपक्रम्य नवम्यांपूजयेद्यस्तुमासिचाश्वयुजेसदा अखंडितप्रभावस्तुभवेदेवनसंशयइत्यादिहेमाद्रौस्पष्टं इतिमातृव्रतं अस्यामेवभद्रकालीपूजनमुक्तंकल्पतरौब्राह्मे चैत्रेनवम्यांशुक्लायांभद्रकालीमहाबला योगिनीनांतुसर्वासामाधिपत्येभिषेचिता तस्मात्तांपूजयेत्तत्रसोपवासोजितेंद्रियः विचित्रैर्बलिभिर्भक्त्यासर्वासुनवमीषुचेति चैत्रशुक्लनवम्यांचतुष्षष्टियोगिनीपूजा तासांनामानिआगमशास्त्रादौ ॐविजयायैनमः १ मंगलायै. २ भद्रायै. ३ धृत्यै- ४ शांत्यै- ५ क्षमायै. ६ शिवायै- ७ सिद्ध्यै- ८ पुष्ट्यै. ९ उमायै. १० श्रियै. ११ रत्यै. १२ दीप्तायै. १३ कांत्यै. १४ यशस्विन्यै. १५ लक्ष्म्यै. १६ ईश्वर्यै- १७ वृद्ध्यै- १८ सिद्ध्यै. १९ जयायै. २० ब्राह्म्यै- जयंत्यै. २२ अपराजितायै. २३ जितायै. २४ मानस्यै. २५ श्वेतायै: २६ दित्यै. २७ मायायै- २८ महामायायै. २९ मोहिन्यै. ३० रतिलालसायै. ३१ तारायै. ३२ विमलायै. ३३ गौर्यै. ३४ शरण्यायै- ३५ कौशिक्यै- ३६ मत्यै. ३७ दुर्गायै: ३८ क्रियायै. ३९ अरुंधत्यै ४० घंटायै. ४१ कर्णायै- ४२ कापालिन्यै- ४३ रौद्र्यै. ४४ काल्यै- ४५ मयूर्यै. ४६ त्रिनेत्रायै. ४७ सुरूपायै. ४८

वहुरूपायै- ४९ रिपुहायै. ५० अंविकायै. ५१ चर्चिकायै- ५२ सुरपूजितायै· ५३ वैवस्वत्यै. ५४ कौमार्य्यै-५५ महालक्ष्म्यै. ५६ कार्तिक्यै. ५७ शिवदूत्यै. ५८ चांमुडायै. ५९ ब्रह्माण्यै- ६० दमायै- ६१ माहेश्वर्यै- ६२ वैष्णव्यै. ६३ वाराह्यै. ६४ ॐभैरवायनमः एताभैरवेणसहपूज्याः इतिमातृनवमीव्रतं ॥ चैत्रशुक्लदशम्या धर्मराजपूजानारदीये चैत्रशुक्लदशम्यांतुधर्मराजंप्रपूजयेत् तत्कालसंभवैःपुष्पैःफलैर्गंधादिभिस्तथा सोपवासश्चैकभक्तोपूजयित्वाद्विजोत्तमान् चतुर्दशततस्तेभ्यःशक्त्यादद्याच्चदक्षिणां एवंयःकुरुतेविप्रधर्मराजस्यपूजनं सधर्मस्याज्ञयागच्छेद्देवैःसाधर्म्यमच्युतः धर्मराजमुद्दिश्यचतुर्दशविप्राणांपूजाकार्य्या तत्रमंत्रः यमायधर्मराजायमृत्यवेचांतकायच वैवस्वतायकालायसर्वप्राणहरायच औदुंवरायनीलायदध्नायपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायवैनमः पाशहस्तायदेवेशसपरिवारायतेनमः अथचैत्रशुक्लैकादश्यांदोलोत्सवउक्तोब्राह्मे चैत्रमासस्यशुक्लायामेकादश्यांतुवैष्णवैः आंदोलनीयोदेवेशःसलक्ष्मीकोमहोत्सवैः अस्यांनृसिंहपरिचर्य्यायामपिगारुडेविशेषः चैत्रमासिसितेपक्षे दक्षिणाभिमुखंहरिं मासमादौसमभ्यर्च्य मासमांदोलयेत्कलौ दोलारूढश्चभगवानवश्यंसालोक्यार्थिभिः पापक्षयार्थिभिश्चालोकनीयः तथाचोक्तंतत्रैव दोलासंस्थंचयेकृष्णंपश्यंतिमधुमाधवे क्रीडंतिविष्णुनासार्द्धंवैकुंठेदेववंदिताः दोलारूढंचपश्यंतिकृष्णंकालिमलापहं अपराधसहस्रैस्तुमुक्तास्तेघूर्णनेकृते घूर्णमेआंदोलने दोलारूढस्यपुरतोजागरणमपिकुर्यात् तथाचतत्रैव दोलास्थितस्यकृष्णस्ययेग्रेकुर्वंतिजागरं सर्वपुण्यफलावाप्तिर्निमेषैकेणजायते पद्मपुराणे क्षणंतुयज्ञफलदंघटिकातुचतुर्गुणाः प्रहरःकोटिगुणितश्चतुःसंख्यानइष्यते इयंचैकादशी कामदा पद्मललिताख्याच तदुक्तंनारदीये चैत्रस्यशुक्लैकादश्यांसोपवासोजितेंद्रियः कृत्वाचनियमान्सर्वान्वक्ष्यमाणान्दिनत्रये द्वादश्यामर्चयेद्भक्त्यावासुदेवं

सनातनम् उपचारैःषोडशभिस्ततःसंभोज्यवाडवान् दत्त्वाचदक्षिणांतेभ्योविसृज्याश्नीतचस्वयं इयंतुकामदानामसर्वपातकनाशिनी भुक्तिमुक्तिप्रदाविप्रभक्त्यासम्यगुपोषिता अथास्याःकथा वाराहपुराणेपद्मपुराणेच युधिष्ठिरउवाच वासुदेवनमस्तुभ्यंकथयस्वममाग्रतः चैत्रस्यशुक्लपक्षेतुकानामैकादशीभवेत् श्रीकृष्णउवाच शृणुष्वैकमनाराजन्कथामेतांपुरातनीं वसिष्ठोयामकथयत्प्राग्दिलीपायपृच्छते दिलीपउवाच भगवन्छ्रोतुमिच्छामिकथयस्वममाग्रतः चैत्रमासिसितेपक्षेकिंनामैकादशीभवेत् वसिष्ठउवाच शृणुष्वकथयिष्यामिव्रतानामुत्तमंव्रतं पापंधनचयंशुष्कमार्द्रंवैवहुजन्मजं सकलंदहतेसोयंहरिवासरपावकः चैत्रस्यविशदेपक्षेतिथिरेकादशीतुया ज्ञेयाकामप्रदानाम्नासामहापापनाशिनी शृणुराजन्कथांदिव्यांपापघ्नींश्रुतिसौख्यदां पुरानागपुरेरम्येहेमरत्नविभूषिते पुंडरीकमुखानागानिवसंतिमदोत्कटाः नागस्तुपुंडरीकाख्योराजाराज्यंचकारच गंधर्वैरप्सरोभिश्चसेव्यमानोदिवानिशं वराप्सरापिललितापद्मरागोपशोभिता ललितोपिसगंधर्वोयुवाकामीमदोत्कटः उभौरागेणसंपृक्तौदंपतीकाममोहितौ रेमातेतौतुस्वगृहेधनधान्यसमाकुले ललिताचित्तसंलीनोह्यासीत्सललितस्तदा ललितस्यचस्वांतेसालग्नासाल्ललिताभृशं पुंडरीकादयोनागावर्ततेसदसिस्फुटं ललितस्तुंवुरुश्चैवकुरुतांगानमुत्तमं गानंकुर्वन्सललितःसस्मारललितांपुनः कामवाणवशंप्राप्तःपुंडरीकस्यचाग्रतः गानंकुर्वन्सस्खलितोललितामेवसंस्मरन् गंधर्वकुलरत्नंससर्वविद्याविशारदः तस्यभावंतुतत्रस्थःकर्कोटोज्ञातवांस्तदा कर्कोटउवाच शृणुत्वंपुंडरीकाख्यममवाक्यंतुसांप्रतं ललितस्यत्वयाभावोविज्ञातोदानवाग्रभो कर्कोटकवचःश्रुत्वापुंडरीकोमहोरगः ललितंभर्त्सयामासललितागतमानसं रौद्रोभूत्सतदानागोदुर्निरीक्ष्योभयंकरः शशापललितंतूर्णंक्रोधसंरक्तलोचनः राक्षसोभवदुर्वुद्धेक्रव्यादः पुरुषादकः यतःपत्नीवशोजातो

व्र०र०
चैत्र०
४६

गायमानोममाग्रतः ललितायावशंप्राप्तः किमएनस्त्वयाकृतं वचनात्तस्यनागस्यराक्षसः सोभवत्क्षणात्
रौद्राननोविरूपाक्षोदीर्घकायोभयंकरः योजनायतकायश्चकंधरांसमुखस्तथा चंद्रसूर्यनिभाक्षश्चपर्वतोपमम
स्तकः गुहाप्रतिमगंभीरनासारंध्रभयंकरः चपलोष्टस्तीक्ष्णदंतोयोजनायामविग्रहः ईदृशोराक्षसोभूत्वाकृ
च्छ्रेणविपिनंगतः चिंतयामासललितापतिंराक्षसविग्रहं ध्यायमानातमेवाभून्महादुःखाब्धिमध्यगा किंकरोमिक्वग
च्छामिपतिंशापेनमोहितः इतिसाचिंत्यललितासौख्यंनलेभतेस्मसा राक्षसःसविरूपाक्षोनागराज्ञासयोजितःभ्राम्य
माणोदिवारात्रंनसुखंलभतेस्मसः ललितातंवियोगार्ता।चिंतयंतीपतिंमुहुः बभ्रामविपिनेघोरेरुदंतीकरुणंशनैः ए
कादातुभ्रमंतीसा।विंध्यपर्वतमस्तके रम्यमाश्रममासाद्यददर्शतपसिस्थितं शृंगिसंज्ञंमुनिंतत्रसर्वभूतहितेरतं दृष्ट्वातु
तंमुनिंतंचतत्पार्श्वंसाययौशनैः मुनिंदृष्ट्वाथतस्याग्रेविनयावनताभवत् तामुवाचमुनिःशृंगीकात्वंकस्यसुताशुभे
किमर्थमिहसंप्राप्ताकथयस्ववरानने ललितोवाच गंधर्वोवीरधन्वाख्यो।योस्तितस्यसुतास्म्यहं ललिताख्या
मुनिश्रेष्टपत्यर्थमिहचागता पतिर्मेललितोनाम्नामदासक्तमनाःकुधीःपुंडरीकाख्यनागेनशप्तोराक्षसतांगतः तदा
प्रभृतिमेब्रह्मन्नूनसुखंजायतेक्वचित् तद्व्रतंमुनीशार्दूलकथयस्वप्रसादतः यस्यप्रभावात्तस्या।पिराक्षसत्वंप्रया
स्यति मुनिरुवाच चैत्रमासस्यचाद्यैवशुक्लापक्षेहिजायते नाम्ना।सापद्मललिताकथितैकादशीबुधैः त्वयासै
कादशीभद्रेक्रियतांपतिमुक्तये कृत्वाचतत्पुण्यफलंसंपूर्णंतस्यदीयतां दत्तपुण्येक्षणादेवप्रेतत्वंयास्यतिक्षयं इ
तिश्रुत्वामुनेर्वाक्यंविनयावनतास्थिता अकरोद्विधिनासम्यग्ललितैकादशीव्रतं विप्रस्यैवसमीपेतुमुरारेरग्रतो
मुदा इतिवाक्यंजगादासौपत्युःसंतारणायच मयाचयत्कृतंपुण्यंपत्येदत्ततदच्युत तेनगोविंदमेपत्युर्राक्षस
त्वंप्रणश्यतु दत्तंपुण्यंतया।पद्मललितैका।दशीभवं इतिज्ञात्वातुराजेंद्रकर्तव्यासाप्रयत्नतः राक्षसत्वंगतंतस्य

96

गंधर्वत्वमभूत्पुनः ततस्तौदंपतीहृष्टौललितोललितातदा पूर्वरूपंपुनःप्राप्तौविमानवरमास्तितौ गतौस्वर्गं तदापद्मलालितैकादशीव्रतात् इतिमत्वामहाराजकर्त्तव्यासामहाफला लोकानांतुहितार्थायकथितासामयातव इहलोकेत्रिवर्गश्चपरलोकेचमुक्तिदा ब्रह्महत्यादिपापघ्नीमहाकल्याणकारिणी कुरुत्वंतत्रशार्दूलदिलीपैकादशीव्रतं श्रीकृष्णउवाच दिलीपोपितदाचक्रेस्वपौरैर्व्रतमुत्तमम् वासिष्ठवचनात्सौख्यंप्राप्यलेभेपरंपदम् ॥

॥ इतिश्रीवाराहपुराणेचैत्रशुक्लाकामदैकादशीव्रतकथा ॥

अस्यामेवैकादश्यांस्त्रीभिःरुक्मिणीयात्राकार्य्या तदुक्तंनिर्णयामृते ब्रह्मपुराणे एकादश्यांततःस्त्रीभिर्देवीपूज्याच रुक्मिणी पुष्पालंकारधूपान्नवस्त्रब्राह्मणतर्पणैरिति ॥ अस्यामेवैकादश्यामपराह्णेवास्तुपूजाकार्य्या तथाचोक्तंनिर्णयामृते पद्मपुराणे तत्रापराह्णेवास्तुश्च वंश्यानांवंशधारकः अर्घ्यैर्माल्यैश्चवस्त्रैश्चपूज्योरंगैःसुचित्रितैरिति अथात्रसंक्षेपतोवास्तुपूजा त्रिविक्रममतानुसारेण तत्रादौअर्घ्यंसंस्थाप्याचम्यप्राणानायम्य ॐ दैकादश्यांतिथौ आत्मनोवंश्यानांवंशवृद्धयेवास्तुपूजनंकरिष्ये प्रणवस्यब्रह्माऋषिर्गायत्रीछंदोऽग्निः परमात्मा देवता व्याहृतीनांप्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छंदांस्यग्निर्वायुः सूर्योदेवता वास्तुमंडलेशिखाद्यावाहने विनियोगः ॐ भूर्भुवःस्वःशिखिन्निहागच्छ इतिपीतपदे ईशानेशिखिनेनमः १ पीतपदेपर्जन्यायनमः २ पीतपदे जयंताय. ३ पीतपदे कुलिशायुधायपूर्वे ४ रक्ते. सूर्याय. ५ श्वेते. सत्याय. ६ कृष्णे. भृशाय. ७ आग्नेयेधूम्रेवायवे. ८ रक्ते. पूष्णे. ९ पुनारक्तेवितथाय- १० पीते गृहक्षताय. ११ कृष्णपदेयमाय. १२ दक्षिणे. रक्तेगंधर्वा. १३ कृष्णे भृंगराजाय. १४ पीतेमृगाय. १५ वायव्ये रक्ते पितृगणाय . १६ पुनारक्तेदौवारिकाय. १७ शुक्ले सुग्रीवाय. १८ रक्ते पुष्पदंताय- १९

पश्चिमे श्वेतेवरुणाय. २० पीतेऽसुराय. २१ कृष्णे शोषाय.२२ पीते पापयक्ष्मणे- २३ वायव्ये रक्तेरोगा
य. २४ पुनारक्ते अये. २५ पुनारक्ते मुख्याय.२६ कृष्णेभल्लाटाय.२७शुक्ले.उत्तरेसोमाय-२८ कृष्णेसर्पाय
२९ पीतेऽदित्यै- ३०पुनःपीतेदित्यै. ३१ पर्जन्याधः श्वेते अपाय- ३२ जयंताधःश्वेते अपवत्साय- ३३
कुलिशाधःकृष्णे अर्यम्णे- ३४ सत्याधःरक्ते सवित्रे. ३५ भृशाधः शुक्लेसावित्राय.३६ सावित्राधःशुक्ले
विवस्वते.३७ तस्मादधःश्वेतेजयंताय.३८ ततउत्तरे रक्तेविबुधाधिपाय. ३९ ततोप्युत्तरेश्वेतेमित्राय- ४०
ततोप्युत्तरेरक्तेराजयक्ष्मणे. ४१ ततोप्युत्तरे रक्ते रुद्राय- ४२तदुपरिरक्ते पृथ्वीधरायनमः ४३ मध्ये श्वेते
पीतेवाब्रह्मणेनमः४४ ततोवाह्ये ईशानकोणे धूम्रेचरक्यैनमः४५पूर्वेरक्तेस्कंदायनमः४६आग्नेये रक्तपदे विदा
रिकायै· ४७ दक्षिणेकृष्णपदे अर्यम्णेनमः ४८ नैर्ऋत्ये हरितपदे पूतनायैनमः ४९ पश्चिमेरक्तपदे जृंभका
यनमः ५० वायव्ये कृष्णपदे पापराक्षस्यैनमः ५१ उत्तरेपीतपदे पिलिपिच्छायनमः५२ततोवाह्यतः पूर्वकं सा
र्वभौतिकवलिंदद्यात् तद्यथा ओंभूतेभ्योनमः ओंपितृभ्योनमः ओंराक्षसेभ्योनमः ओंपिशाचेभ्योनमः ओंमातृभ्यो
नमः ओंगणेशेभ्योनमः ओंदिव्यांतरिक्षेभ्योभूतेभ्योनमः देव्योदेवामुनींद्रश्चयेचान्येवलिकांक्षिणः तेवलिंप्रतिगृ
ह्णंतुतुष्टायांतुस्वमंदिरं ततःप्रार्थना पूज्योसित्रिषुलोकेषुयज्ञरक्षादिहेतवे त्वांविनानहिसिद्ध्यतियज्ञदानान्य
नेकशः १ अयोनेभगवन्भर्गललाटस्वेदसंभव गृहाणार्घ्यंमयादत्तंवास्तोस्वामिन्नमोस्तुते २ मंत्रहीनंक्रियाही
नंभक्तिश्रद्धाविवर्जितं यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ३नमस्तेदेवदेवेशसर्वविघ्नहरोभव शांतिंकुरुसुखंदेहिस
र्वान्कामान्प्रदेहिमे ४ इतिवास्तुपूजनं ग्रहयागसहितंकार्य्यम् गंधादिपूजनं पायसादिवलिदानं ॥ इतिचै
त्रशुक्लैकादश्यांब्रह्मपुराणोक्तं वास्तुपूजनं अस्यामेवैकादश्यां दमनोत्सवःकार्य्यःतदुक्तं मदरत्ने निर्णयामृतेच

ब्रह्मपुराणे चैत्रेमास्यथशुक्लायामित्युपक्रम्य दमनेनार्चयित्वाथरात्रौजागरणंचरेदिति नृसिंहपरिचर्य्यायामप्येवं रामार्चनचंद्रिकायांतुद्वादश्यांदमनोत्सवःकार्य्यइत्युक्तं द्वादश्यांचैत्रमासस्यशुक्लायांदमनोत्सवः बौधायनादिभिःप्रोक्तःकर्तव्यः प्रतिवत्सरंतत्रस्यात्स्वीयतिथिषुवन्ह्यादेर्दमनार्पणः वन्ह्यादयोदेवतारत्नमालायां वन्हिर्विरंच्योगिरिजागणेशः फणीविशाखोदिनकृन्महेशः दुर्गांतकोविष्णुहरीस्मरश्चशर्वः शशीचेतिक्रमेणउक्ता अत्रदेवताविशेषेणतिथिविशेषोज्योतिर्निबंधे भविष्योत्तरेपि चतुर्थीगणनाथस्यदुर्गायानवमीतथा विष्णोस्तुनवमीपुण्यातथैवद्वादशीशुभा त्रयोदशीयुतस्यैवश्रेष्ठारण्यनिवासिनः भैरवस्यैकवीरायाज्ञेयाभूताकलिप्रदा भूताचतुर्दशी पूर्णिमासर्वदेवानांश्रेष्ठादमनकार्पणइति अकरणेप्रत्यवायस्तत्रैव पद्मपुराणे ऊर्ज्जेव्रतंमधौदोलांश्रावणेऽनंतपूजनं चैत्रेचदमनारोपमकुर्वाणोव्रजत्यधइति शिवभक्तादिभिश्चतुर्दश्यादौकार्य्यं तत्रस्यात्स्वात्मातिथिष्वित्युक्तेः अथागमदीक्षावतोदमनकारोपणविधिः रामार्चनचंद्रिकायामुक्तः अस्यप्रयोगः प्रातःस्नानादिनित्यंनिर्वर्त्य प्रार्थनांकुर्यात् क्रियालोपविघातार्थंयत्त्वयाविहितंविभो नमेविघ्नोभवेदत्रकुरुनाथदयांमयि सर्वथासर्वदाविष्णोममत्वंपरमागतिः उपवासेनत्वांदेवतोषयामिजगत्पते कामक्रोधादयोह्येतेनमेस्युर्व्रतघातकाः अद्यप्रभृतिदेवेशयावद्वैशेषिकंदिनं तावद्रक्षात्वयाकार्य्यासर्वस्यास्यनमोस्तुते एवंविज्ञाप्यदेवेशंगुरुंनत्वाप्रपूज्यच ततःसंपूज्यविधिवद्देवेशंप्रयतःशुचिः गच्छेद्दमनकारण्यमेकादश्यांसुशोभनं क्रमेणस्वायतीकृत्यपूजयेच्चंदनादिनानेष्यामिरामपूजार्थमितिसंप्रार्थ्यतंनमेत् सांवत्सरिकपूजायाःपरिपूर्णत्वसिद्धये दमनत्वंसमायाहिक्षमस्ववचनमोस्तुते विष्णुकार्यंसमुद्दिश्यछेत्तव्योसिशिवाज्ञयेति दमनमामंत्रयेत् अन्यदेवतापूजनेतन्नामात्रऊहनीयं उत्पाद्यपंचगव्येनप्रोक्ष्यप्रक्ष्याल्यवारिणा ततोऽशोकमूलेदेवाग्रेस्थंडिलंकृत्वा तदुपरिकलशेषुवक्षतपुंजेवा अशोकवृक्षक।

लवसंतकामान् क्रमेणचतुर्भिर्मंत्रैःप्राणप्रतिष्ठापूर्वकंप्रपूजयेत्तत्र अशोकायनमस्तुभ्यंकामस्त्रीशोकनाशनशोकार्तिंहरसेनित्यमानंदंजनयस्वमे कालपूजामंत्रः त्रुटयादिकल्पपर्यंतःकालरूपोमहाबलः कलतेचैवयःसर्वंतस्मैकालात्मनेनमः वसंतपूजामंत्रःवसंतायनमस्तुभ्यंवृक्षगुल्मलताश्रय सहस्रमुखसंवाहकामरूपनमोस्तुते कामपूजामंत्रः नमोस्तुपुष्पवाणायजगदाल्हादकारिणे मन्मथायजगन्नेत्ररतिप्रीतियुतायते इतिदमनमुपस्थाय कामभस्मसमुद्भूतरतिवाष्पपरिप्लुत ऋषिगंधर्वदेवादिविमोहकनमोस्तुते इतिसंगृह्यदमनंपूजयेन्मनुनामुना नमोस्त्वितिपूर्वोक्तमंत्रेणदमनंसंपूज्यतस्मिन्दमनेरक्तवस्त्राभरणमाल्यानुलेपनंवामदक्षिणयोरतिप्रीतियुतं पाशांकुशेक्षुचापवाणधरंकामदेवंध्यात्वा प्राणप्रतिष्ठापूर्वकं क्लींकामदेवायनमइतिमंत्रेणगंधादिभिःपंचोपचारैःसंपूज्यकामदेवस्यवामतो रतिं गौरवर्णांरक्तवस्त्रपरिधानांसर्वाभरणभूषितां पद्मद्वयकरांध्यात्वा श्रींश्रींश्रींक्लौंरत्यैनम इतिमंत्रेणगंधादिभिःसंपूज्य कामस्यदक्षिणभागेप्रीतिं श्यामवर्णांसर्वाभरणभूषितांरक्तवस्त्रपरीधानां तांबूलकरांध्यात्वा श्रींश्रींश्रींक्लौंप्रीत्यैनमइतिमंत्रेणपंचोपचारैःसंपूज्य पूर्वोक्तनमोस्तुपुष्पवाणायेत्यनेनकामप्रार्थनांकुर्यात् ततोदमनस्यभागद्वयंकृत्वैकस्मिन्भागे ॐक्लींकामायनमइतिमंत्रेणदमनंसंपूज्य द्वितीयभागेदमनायनमइतिदमनंसंपूज्य नवेपटलेनिधाय धौतेनवाससाछाद्यघंटाध्वनिपुरुषसूक्तादिस्वनैः स्वगृहमानयेत् इतिदमनस्यगृहानयनं ततोरामाग्रेपुरतःस्थंडिलमुपलिप्य तत्राष्टदलंकृत्वासितकृष्णपीतरक्तवर्णैःसंपूर्य्य तद्बहिश्चतुःकोणंकृत्वापीतवर्णेनसंपूर्य्य तद्बहिर्वर्तुलंमंडलत्रयंविधायश्वेतरक्तपीतवर्णैः संपूर्य्यतद्बहिश्चतुष्कोणंसंपाद्यरक्तवर्णेनसंपूरयेत् तदेतत्सार्वकामिकंमंडलं यद्वासर्वतोभद्रमुद्धरेत् उपरिपंचवर्णवितानंकुर्यात् ततोदेवस्यमहापूजनंकृत्वा पूर्वोक्तमंडलेकलशंस्थाप्य तदुपरिदमनाधिवासनंकुर्यात् तत्रमंत्रः पूजार्थंदेवदेवस्यविष्णोर्लक्ष्मीपतेःप्रभोः दमनत्वमिहागच्छ

सान्निध्यंकुरुतेनमः ततोदमननकपूजांकृत्वा क्लींकामदेवायनम इतिकामसंपूज्य श्रींश्रींश्रींक्रौंरत्यैनमइतिरतिं श्रींश्रींश्रीं क्रौंप्रीत्यैनम इतिप्रीतिंचपंचोपचारैःसंपूज्य षडंगपूजांकुर्यात् क्लांहृदयायनमः क्लींशिरसेस्वाहा क्लूंशिखायैवषट् क्लैंकवचायहुं क्लौंनेत्राभ्यांवौषट् क्लःअस्त्रायफट् ततोष्टदलेषु देवाग्रमारभ्यप्रादक्षिण्येनभस्मशरीरायनमः अनंगायनमः २ मन्मथायनमः ३ कामायनमः ४ वसंतसखायनमः ५ स्मरायनमः ६ इक्षुचापायनमः ७ पुष्पास्त्रायनमः ८ इतिसंपूज्य चतुरस्रे इंद्रादीन् लोकपालान् वज्रादीन्यायुधानिचसंपूज्य पुनःकामंतन्मंत्रेणाभ्यर्च्यप्रणम्य ओंसत्स्वरूपायविद्महे कामदेवायधीमहि तन्नोनंगः प्रचोदयात् इतिकामगायत्र्याष्टोत्तरशतं दमनकमभिमंत्र्य धूपदीपाद्युपचारानुपकल्प्य हृदयायनमइतिपुष्पांजलिंदत्त्वा ओंनमोस्तुपुष्पबाणायेत्यनेनकामदेवनमस्कारं कुर्यात् ततः स्वेष्टदेवंसंपूज्य हस्तेपुष्पांजलिंगृहीत्वा आमंत्रयेत् आमंत्रितोसिदेवेशपुराणपुरुषोत्तम प्रातस्त्वांपूजयिष्यामिसान्निध्यंकुरुकेशव क्षीरोदधिमहानागशय्यावस्थितविग्रह प्रातस्त्वांपूजयिष्यामिसन्निधोभवतेनमः निवेदयाम्यहंतुभ्यंप्रातर्दमनकंशुभं सर्वथासर्वदाविष्णोनमस्तेस्तुप्रसीदमे इत्थमामंत्र्यदेवेशंदत्त्वापुष्पांजलिंपुनः पूजितंतंदमनकंकुंभस्योपरिसंस्थितं अस्त्रेणसर्वतोरक्षेत्कवचेनावगुंठयेत् रक्षेद्वाचक्रमंत्रैश्चनारसिंहेणवैपुनः ओंसहस्रारहुंफट् इतिचक्रमंत्रः नारसिंहमंत्रोयथा उग्रवीरंमहाविष्णुंज्वलंतंसर्वतोमुखं नृसिंहंभीषणंभद्रंमृत्योर्मृत्युंनमाम्यहं ब्राह्मणेभ्योनमस्कृत्यगुरुपादौप्रणम्यच गीतमंगलनिर्घोषैःकुर्याज्जागरणंततः सद्योधिवासेजातेचतत्रजागरणंनहीति दक्षिणामूर्त्तिसंहितावचनात् इतिदमनाधिवासनम् अथाधिवासोत्तरदिनकृत्यं प्रातर्नत्वाचदेवेशंकुर्यात्स्नानंयथाविधिःनित्यपूजांततःकृत्वाकुर्यान्नैमित्तिकींततः दमनंदूर्वयायुक्तंगंधाक्षतमथार्पयेत् तत्रमंत्रः देवदेवजगन्नाथवांछितार्थप्रदायक

कृत्स्नान्पूरयमेकामान्पद्मकामेश्वरीप्रिय इदंदमनकंदेवगृहाणमदनुग्रहात् इमांसांवत्सरींपूजांभगवन्पारिपूरय मूल
संपुटितोह्येषदमनारोपणेमनुः नृसिंहपरिचर्य्यायांतु ततोदमनमंजरींगृहीत्वाहृदयेनाभिमंत्र्यच सर्वरत्नमयींदे
वसर्वगंधमयींशिवां गृहाणदेवदेवेशनमस्तेस्तुनृकेसरिन् इतिमंत्रेणदेवस्यशिरस्यारोपयेत् रमापतेइत्यूहोत्रज्ञेयः
ततस्तत्वपरिभावनयादमनकमंजरीं वनमालांकृत्वाहृदयमंत्रेणाभिमंत्र्य सर्वरत्नमयींदेवदामनींवनमालिकां गृहा
णदेवपूजार्थेसर्वगंधमयींविभो इतिमूलमंत्रेण देवस्यमुकुटंसमर्प्यांगदेवताभ्यःस्वस्वमंत्रेणसमर्पयेदित्युक्तं एवंस
मर्प्यदेवायप्रार्थयेद्विष्णुमव्ययं मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयंसांवत्सरीपूजातवास्तुगरुडध्वज वन
मालांयथादेवकौस्तुभंवहसेहृदि तद्वद्दामनकींमालांपूजांचहृदयेवह जानताजानतावापिनकृतंयत्तवार्चनं तत्सर्वंपू
र्णतांयातुत्वत्प्रसादाद्रमापते जितंतेपुंडरीकाक्षनमस्तेविश्वभावन नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज मंत्रहीनंक्रि
याहीनंभक्तिहीनंजनार्दन यत्पूजितंमयारामपरिपूर्णंतदस्तुमे एवंसंप्रार्थ्यदेवेशंनिपतेद्दंडवद्भुवि अथसंपूजयेद्भ
क्त्यागुरुंवस्त्रादिकांचनैः स्वयंधृत्वाभ्यर्च्यवंधून्विप्रान्संपूज्यधारयेत् । स्यादश्वमेधजंपुण्यमित्याहभगवान्शिवः
पारणाहेनलभ्येतद्वादशीघटिकापिचेत् तदात्रयोदशीग्राह्यापवित्रदमनार्पणे नित्यंचेदं ऊर्ज्जेव्रतंमधौदोलांश्राव
णेनंतपूजनं चैत्रेचदमनारोपमकुर्वाणोव्रजत्यध इतिपाद्मात् माधवेदमनारोपःस्यान्मधौविस्मृतोयदि वैशाखेश्रा
वणेभाद्रेकर्त्तव्यंचतदर्पणमितिवचनेन गौणकालेतद्विधानात् दक्षिणामूर्त्तिसंहितायामपिचैत्रादयस्त्रयोमासाःप्रोक्ताः
पक्षौसितेतरौ एतेषांपूर्वपूर्वस्तुकालःसर्वोत्तमोभवेत् ।श्रावणावधिशुक्रास्तेकर्त्तव्यमितिनारद इतिपाठांतरं इदंच
मलमासेनकार्यं उपाकर्मोत्सर्ज्जनंचपवित्रदमनार्पणे इतिकालादर्शेमलमासवर्जेषुप्रतिपादनात् उपाकर्मचहव्यं
चकव्यंपर्वोत्सवंतथा उत्तरेनियतंकुर्यात्पूर्वेतन्निष्फलंभवेत् इतिमाधवीयेप्रजापतिवचनाच्च शुक्रास्तादौतुकार्य्यं

मेवेतिपूर्वोक्तत्वात् उपाकर्मोत्सर्जनंचपवित्रदमनार्पणं ईशानस्यबालेर्विष्णोःशयनंपरिवर्त्तनं कुर्याच्छुक्रस्यचगुरोर्मौढ्येपीतिविनिश्चय इतिदमनकपूजनारोपणविधिः अथसंक्षिप्तदमनकपूजनं प्रातःस्नात्वानित्यपूजांतंनिवर्त्य दमनकारामंगत्वा क्रमेणतमादायचंदनादिनातत्रैवपूजयेत् श्रीरामपूजार्थंत्वांनेष्यामीतिप्रणमेत् अन्यदेवतायांतु अमुकदेवतापूजार्थमित्यूहः ततःपंचगव्येनाभिषिंच्य शुद्धोदकेनप्रक्षाल्याशोकमूलं केवलंस्थंडिलेवास्थापयित्वा तत्राशोकेअशोककालवसंतकामान्गंधादिभिःप्रपूजयेत् ततःशुचौदेशेकाममात्रपूजयेत् पूजांते अशोकायनमस्तुभ्यमित्यशोकः त्रुट्यादिकल्पपर्यंतःकालरूपोमहाबलः कालात्मनेनमइतिकालंवसंतायनमस्तुभ्यमिति वसंतं नमोस्तुपुष्पवाणाय. इति कामं- कामभस्मसमुद्भूतइत्यादिदमनमुपतिष्ठेत् ततःकामायनम इति सपरिवारंमन्मथरूपिणंदमनकंगंधादिनाभ्यर्च्य ततएवसमुद्भूतदमनेनप्रपूजयेत् ततोधौतवाससाछाद्यवैणवपटलेनिधाय गीतमंगलपुरुषसूक्तादिस्वनैर्गृहमानयेत् तत्ररात्रौदेवंसंपूज्य तदाज्ञयादमनमधिवास्यदेवस्यपुरतःस्थंडिलमुपलिप्य तत्राष्टदलंसितपीतकृष्णरक्तवर्णैःकृत्वा तद्बहिश्चतुःकोणंपीतेनपूर्य्य तद्बहिर्वर्तुलमंडलत्रयंश्वेतरक्तपीतैःपूर्य्य तद्बहिश्चतुःकोणंरक्तवर्णेनपूरयेत् सर्वतोभद्रंवाकारयेत् तदुपरिपंचवर्णवितानंकृत्वा उक्तमंडले शुद्धोदककुंभं हेमरत्नफलपल्लवयुतंसंस्थाप्य पूजार्थंदेवदेवस्यविष्णोर्लक्ष्मीपतेर्विभोः दमनत्वामिहागच्छसान्निध्यंकुरुतेनम इतिदमनकपूजनं क्लीं कामदेवायनम इतिकामपूजनं श्रींश्रींश्रींक्लौंरत्यैनमः श्रींश्रींश्रीं क्लौंप्रीत्यैनम एवंरतिप्रीतीपूजन क्लांहृदयायनमःक्लींशिरसेस्वाहा क्लूंशिखायैवषट् क्लैंकवचायहुं क्लौंनेत्राभ्यांवौषट् क्लः अस्त्रायफट् इतिषडंगमभ्यर्च्य ततोदेवात्प्रादक्षिण्येन भस्मशरीरायनमः १ अनंगायनमः २ मन्मथायनमः ३ कामायनमः ४ वसंतसखायनमः ५ स्मरायनमः ६ इक्षुचापायनमः ७ पुष्पास्त्रायनमः ८ इतिसंपूज्यबहिश्चतुरस्त्रेइंद्रायनम इत्यष्टौलोके

शान् वज्रायनम इतितेषामायुधानिचाभ्यर्च्य तत्पुरुषायविद्महे कामदेवायधीमहि तन्नोऽनंगःप्रचोदयादिति कामगायत्र्याष्टोत्तरशतवारमभिमंत्र्यगंधादिभिःसंपूज्यहृदयायनम इतिपुष्पांजलिंनिवेद्य नमोस्तुपुष्पवाणायजगदाल्हादकारिणे मन्मथायजगन्नेत्रेरतिप्रीतिप्रदायते इतिनत्वा क्षीरोदधिमहानागशय्यावस्थितविग्रह प्रातस्त्वां पूजयिष्यामिसान्निधौभवतेनम इतिदेवंसंप्रार्थ्यपुष्पांजलिंदत्वा दमनमस्त्रेणसर्वतोरक्षेत् कवचेनावगुंठयेत् ततो गीतादिनारात्रिमतिवाहयेदितिदमनाधिवासनंकृत्वा प्रातर्नित्यपूजांतेपुनरनेकोपचारैःसंपूज्यसदूर्वागंधाक्षतफलांदमनमंजरींमूलेनाभिमंत्र्यकराभ्यांगृहीत्वा जयजयश्रीरामचंद्रेत्युच्चार्य्यमूलंपठित्वा देवदेवजगन्नाथवांछितार्थप्रदायक हृत्स्थान्पूरयमेविष्णोकामान्कामेश्वरप्रिय इदंदमनकंदेवगृहाणमदनुग्रहात् इमांसांवत्सरींपूजांभगवन्परिपूरयेतिजप्त्वा मूलेनभगवंतंसमर्पयेत् ततोयथाशोभंदमनकमारोप्यभगवंतंप्रार्थयेत् मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयंसांवत्सरीपूजातवास्तुगरुडध्वज वनमालांयथादेवकौस्तुभंवहसेहृदि तद्वद्दामनकींमालां पूजांचहृदयेवह जानताजानतावापिनकृतंयत्तवार्चनं तत्सर्वंपूर्णतांयातुत्वत्प्रसादाद्रमापते जितंतेपुंडरीकाक्षनमस्तेविश्वभावन नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज मंत्रहीनं- ततोदेवंनमस्कृत्य गुरुंदमनेनवस्त्रादिनासंतोष्य भगवतेकर्मनिवेद्यस्वयंचतत्प्रसादत्वेनदमनशेषंधृत्वा द्विजान्संपूज्यभोजयेत् स्वयंवंधुभिः सहभुंजीतेति इतिसंक्षेपतोदमनोत्सवविधिः अस्येदंक्रमद्वयंजयासिंहकल्पद्रुमोक्तं श्रीमन्नृसिंहदेवस्यपरिचर्य्यासकौस्तुभां रामार्चाचंद्रिकांचैवदृष्ट्वेयंपद्धतिःकृता इतिचैत्रशुक्लद्वादश्यांमदनव्रतमाचरेत् स्थापयेदव्रणंकुंभंसिततंडुलपूरितं नानाफलयुतंतद्वदिक्षुदंडसमन्वितं सितवस्त्रयुगच्छन्नंसितचंदनचर्चितं नानाभक्ष्यसमोपेतंसहिरण्यंस्वशक्तितः ताम्रपात्रं गुडोपेतंतस्योपरिनिवेशयेत् तत्रसंपूजयेद्देवंकामरूपिणमच्युतं गंधाद्यैरुपचारैस्तुसोपवासःपरेहनि पुनःप्रात

समुत्थायब्राह्मणायानिवेदयेत् ब्राह्मणान्भोजयेच्चैवतेभ्योदद्यात्तुदक्षिणां वर्षमेवं व्रतंकृत्वाघृतधेनुसमन्वितां शय्यांचदद्याद्गुरवेसर्वोपस्करसंयुतां कांचनंकामदेवंचशुक्लांगांचपयस्विनीं वासोभिर्द्विजदांपत्यंपूज्यशक्त्यातदर्पयेत् प्रीयतांकामरूपीमिहरिरित्येवमुच्चरन् यःकुर्याद्विधिनानेनमदनद्वादशीव्रतं ससर्वपापनिर्मुक्तःप्रयातिहरिसाम्यतां अथ भर्तृद्वादशीव्रतं अस्यामेवसमुद्दिष्टंभर्तृद्वादशिकाव्रतं स्वास्तृतांतत्रशय्यांतुकृत्वातुश्रीयुतंहरिं संस्थाप्यमंडपेपुष्पैस्तदुपर्य्यपिकल्पयेत् ततःसंपूज्यगंधाद्यैर्व्रतीजागरणंनिशि नृत्यवादित्रगीताद्यैस्ततःप्रातःपरेहानि संस्थाप्य श्रीहरिंहैमंद्विजाग्र्यायनिवेदयेत् द्विजान्संभोज्यविसृजेद्दक्षिणाभिःप्रतोषितान् एवंकृतव्रतस्यापिदांपत्यंजायते स्थिरं सप्तजन्मसुभुंक्तेचभोगान्लोकद्वयेप्सितान् अथचैत्रशुक्लद्वादश्यांमदनद्वादशीव्रतविधानं मत्स्यपुराणे ॥ सूतउवाच ॥पुरादेवासुरेयुद्धेहतेषुहरिणासुरैःपुत्रपौत्रेषुशोकार्तागत्वाभूलोकमुत्तमं स्यमंतपंचकेतीर्थेसरस्वत्यास्तटेशुभे भर्तुराराधनपरातपउग्रंचकारह तदादितिर्दैत्यमाताऋषिरूपेणसुव्रता फलाहारातपस्तेपेकृच्छ्रचांद्रायणान्बहून्यावद्वर्षशतंसाग्र्यंजराशोकसमाकुला ततस्सातपसातप्तावसिष्ठादीनपृच्छत कथयंतुभवंतोमे पुत्रशोकाविनाशनं व्रतंसौभाग्यफलदमिहलोकेपरत्रच ऊचुर्वसिष्ठप्रमुखामदनद्वादशीव्रतं सुतानेकोनपंचाशद्येनलेभेदितिःपुरा ॥ सूतउवाच ॥ यद्वसिष्ठादिभिःपूर्वंदितेःकथितमुत्तमं विस्तरेणतदेवेदंमत्सकाशान्निबोधत चैत्रेमासितेपक्षेद्वादश्यांनियतव्रतः स्थापयेदव्रणंकुंभंसिततंडुलपूरितं नानाफलयुतंतद्वदिक्षुदंडसमन्वितं सितवस्त्रयुगच्छन्नं सितचंदनचर्चितं नानाभक्ष्यसमोपेतंसहिरण्यंस्वशक्तितः ताम्रपात्रंगुडोपेतंतस्योपरिनिवेशयेत् तदभावेकथांकुर्य्यात्कामकेशवयोर्नरः कामनाम्नाहरेरर्चांस्नापयेदुष्णवारिणा शुक्लपुष्पाक्षततिलैरर्चयेन्मधुसूदनं कामायपादौसंपूज्यजंघेसौभाग्यदायच उरौस्मरायेतिपुनर्मन्मथायेतिवैकटिं स्वच्छोदरायेत्युदर

मनंगायेत्पुरोहरेः मुखंपद्ममुखायेतिवाहूपंचशरायवै नमःसर्वात्मनेमौलिमर्चयेदितिकेशवं एवंजागरणंकृत्वाशुक्लमाल्यांबरोव्रती ततःप्रभातेतंकुंभंब्राह्मणायनिवेदयेत् ब्राह्मणान्भोजयेद्भक्त्यास्वयंभुंजीतवंधुभिः भुक्त्वातुदक्षिणां दद्यादिमंमंत्रमुदीरयेत् प्रीयतामत्रभगवान्कामरूपीजनार्दनः हृदयेसर्वभूतानांयआनंदोभिधीयते अनेनविधिनासर्वंमासिमासिसमाचरेत् उपवासीत्रयोदश्यामर्चयेद्विष्णुमव्ययं फलमेकंचसंप्राश्यद्वादश्यांभूतलेस्वपेत् ततस्त्रयोदशेमासेघृतधेनुसमन्वितां शय्यांदद्याद्द्विजेंद्रायसर्वोपस्करसंयुतां कांचनंकामदेवंचशुक्लांगांचपयस्विनीं वासोभिर्द्विजदांपत्यंपूज्यंशक्त्याविभूषणैः सर्वंशय्यादिकंदत्त्वाप्रीयतामित्युदीरयेत् होमंशुक्लतिलैःकुर्यात्कामनामानिकीर्त्तयेत् गव्येनसर्पिषातद्वत्पायसेनचधर्मवित् विप्रेभ्योभोजनंदद्याद्वित्तशाठ्यंविवर्जयेत् इक्षुदंडांश्चयोदद्यात्पुष्पमालांस्वशक्तितः यःकुर्याद्विधिनानेनमदनद्वादशीमिमां सर्वपापविनिर्मुक्तःप्राप्नोतिहरिसाम्यतां इह लोकेवरान्पुत्रान्सौभाग्यंसुखमश्नुते यःस्मृतोविष्णुरानंददातासचमहेश्वरः सुखार्थीकामरूपेणयजेत्तंजगदीश्वरं तच्छ्रुत्वाचचकारासौदितिःसर्वमशेषतः कश्यपोव्रतमाहात्म्यादागत्यपरयामुदा वरेणछंदयामाससातुवव्रेसुतंवरं ततःसाव्रतमाहात्म्याल्लेभेगर्भमनुत्तमं कदाचिल्लब्धसंचारःशत्रुताज्जठरंदितेः प्रविश्यैकोनपंचाशत्कृत्वाशक्रोजघानतं तावंतोवालकाभूत्वारुरुदुर्नमृतिंगताः ततोवैचिंतयामासाकिमेतदितिवृत्रहा धर्मस्यकस्यमाहात्म्यात्पुनः संजीविताअमी कदाचिदनयानूनंमदनद्वादशीकृता तत्प्रभावेनजीवंतितनयानिहताअपि नूनमेतत्परिणतमधुनातत्कृतंव्रतं वज्रेणनिहताःसंतोनविनाशमवाप्नुयुः एकोप्यनेकतामापवहुधानिहतोप्यलं अहोमाहात्म्यमेतस्मिन्मदनद्वादशीव्रतं जीवपुत्रावहुसुतायेननारीप्रजायते ॥ इतिमत्स्यपुराणोक्तंमदनद्वादशीव्रतं अस्यामेवभर्तृद्वादशीव्रतं नारदाप्सरस्संवादमधिकृत्यवाराहपुराणे नारदउवाचवसंतेशुक्लपक्षस्यद्वादशीयाभवेच्छुभा तस्यामुपोष्यविधिवत्सश्रीकंहरिमर्चयेत् पर्यंकास्तरणंकृत्वानानास्तरणसंयुतं तत्रलक्ष्म्यायुतंदेवंरौप्यंकृत्वानिवेशयेत्

तस्योपरिततःपुष्पैर्मंडपंकारयेद्बुधः नृत्यवादित्रघोषैश्चजागरंतत्रकारयेत् मनोभवायेतिसिरस्त्वनंगायेतिवैकटिं कामायवाहुमूलंचकुसुमास्त्रायचोदरं मन्मथायेतिवैपादौहरयेइतिसर्वतः पुष्पैःसंपूज्यदेवेशंमल्लिकाजातिभिस्तथा पश्चाच्चतुरआदायइक्षुदंडान्सुशोभनान् चतुर्दिक्षुन्यसेत्तस्यदेवस्यप्रणतोवुधः एवंकृत्वाप्रभातेतुदापयेद्ब्राह्मणायतं वेदवेदांगयुक्तायसंपूर्णांगायधीमते ब्राह्मणांश्चतथाभोज्यव्रतमेतत्समापयेत् व्रतस्यांतेतथाविष्णुर्भर्त्तावोभविताध्रुवं अकृत्वामत्प्रणामंतुपृष्टंगर्वेणशोभनाः व्रतेनानेनदेवेशंपतिंलब्ध्वाभिमानतः अवसानेपहरणंगोपालैर्वोभविष्यति एवमुक्त्वातुदेवर्षिःप्रययौनारदःक्षणात् ताश्चाप्येतद्व्रतंचक्रुस्तुष्टश्चाप्सरसांहरिः इतिभर्तृद्वादशीव्रतं अथधरणीव्रतेषुचैत्रशुक्लद्वादश्यां वामनद्वादशीव्रतं वाराहपुराणे दुर्वासोवाच एवमेवमुनेमासिचैत्रेसंकल्प्यद्वादशीं उपोष्याराधयेद्भक्त्यादेवदेवंजनार्दनं वामनायेतिपादौतु वैष्णवेकटिमर्चयेत् वासुदेवायजठरमुरः संकर्षणायच कंठंविश्वभृतेपूज्यशिरोवैव्योमरूपिणे वाहूविश्वजितेपूज्यस्वनाम्नाशंखचक्रके अनेनविधिनाभ्यर्च्यदेवदेवंजनार्दनं प्राग्वद्रत्नोदरंकुंभंसयुग्मंपुरतोन्यसेत् वस्त्रयुग्मेनचकुंभयुग्ममित्यर्थः प्रागुक्तपात्रसंस्थाप्यवामनंकांचनंवुधः यथाशक्त्याकृतंह्रस्वंसितयज्ञोपवीतिनं कुंडिकांस्थापयेत्पार्श्वेछत्रिकांपादुकेतथा अक्षमालांचसंस्थाप्ययष्टिकांचविशेषतः एतैरुपस्करैर्युक्तंब्राह्मणायानिवेदयेत् दापयेत्प्रीयतांविष्णुर्नृस्वरूपीतिकीर्त्तयेत् मासनाम्नातुसंयुक्तंप्रादुर्भावाभिधानकं प्रीयतामितिसर्वत्रविधिरेषउदाहृतः मासनाम्नामार्गशीर्षेकेशवादिनाम्ना प्रादुर्भावाभिधानकं मत्स्यरूपीकूर्मरूपीनृसिंहरूपीतिकीर्त्तयेत् श्रूयतेचपुराराजाहर्यश्वःपृथिवीपतिः अपुत्रश्चतपस्तेपेपुत्रमिच्छंस्तपोधन तस्यैवंकुर्वतस्त्वाष्टिंपुत्रार्थेमुनिसत्तम आजगामहारिर्देवोद्विजरूपधरस्तदा सचोवाचनृपंराजन्किंतेव्यवसितंविभो पुत्रार्थमितिप्रोवाचसचतंप्रत्युवाचतं इदमेवविधानंतुकुरुराजन्प्रयत्नतः स

विप्रएवमुक्त्वाचक्षणादंतर्हितस्ततः राजाचतच्चकाराथमंत्रवित्तंद्विजातये दरिद्रायतथाप्रादाज्ज्योतिर्गर्भायधीमते मंत्रविद्यथादितेरपुत्राया इत्यादिमंत्रविज्ञः तंवामनं अनेनविधिनोक्तेनतस्यपुत्रोभवन्मुने उग्राश्वइतिविख्यातश्चक्रवर्तीमहाबलः अपुत्रोलभतेपुत्रान्धनहीनोलभेद्धनं भ्रष्टराज्योलभेद्राज्यमंतेविष्णुपुरंव्रजेत् ॥ इतिवाराहपुराणे धरणीव्रतेषुचैत्रशुक्लद्वादश्यांवामनद्वादशीव्रतं ॥ चैत्रशुक्लत्रयोदश्यांचंदनात्मककामदेवपूजनं नारदीये चैत्रशुक्लत्रयोदश्यांमदनंचंदनात्मकं कृत्वासंपूज्ययत्नेनवीजयेद्व्यजनेनतु ततःसंक्षुभितःकामःपुत्रपौत्रविवर्धनः अनंगयात्रातत्रोक्तातांनिबोधमुनीश्वर सिंदूररजनीरागैःफलकेनंगमालिखेत् रतिप्रीतियुतंश्लक्ष्णंपुष्पचापेषुधारिणं कामदेववसंतंचवाजिवक्त्रंझषध्वजं मध्याह्नेपूजयेद्भक्त्यागंधस्रग्भूषणांशुकैः भक्ष्यैर्नानाविधैश्चापिमंत्रेणानेननारद नमोरामायदेवायकामदेवस्यमूर्त्तये ब्रह्मविष्णुशिवेंद्राणांमनःक्षोभकरायवै ततस्तस्याग्रतोभक्त्यापूजयेदंगनापतिं वस्त्रमाल्यविभूषाद्यैःकामोयमितिचिंतयेत् पूजयेद्द्विजदांपत्यंगंधवस्त्रविभूषणैः एवंयःकुरुतेविप्रवर्षेवर्षेमहोत्सवं वसंतसमयेप्राप्तेहृष्टःपुष्टःसदैवसः प्रतिमासंपूजयेद्वायावद्वर्षंसमाप्यते मदनं १ हृद्भवं २ कामं ३ मन्मथंच ४ रतिप्रियं ५ अनंगं ६ चैवकंदर्पं ७ पूजयेन्मकरध्वजं ८ कुसुमायुधसंज्ञंच ९ ततःपश्चान्मनोभवं १० विषमेषुंतथाविप्र ११ मालतीप्रियमित्यपि १२ अजानांदानमप्युक्तं स्नात्वानद्यांविधानतः अजापयस्विनीर्दद्याद्दरिद्रायकुटुंबिने भूयस्त्वनेनदानेनयमलोकंनगच्छतीति अत्रैवाजादानांगत्वेननक्तव्रतारंभःकार्य्यः तदुक्तंभविष्योत्तरे चैत्रेचित्रान्ननक्ताशीनद्यांस्नात्वाददातियः अजास्तत्रपयस्विन्योदरिद्रायकुटुंबिने नजायतेपुनरसौजीवलोकेकदाचनेति अथाजादानं तत्रसुमंतः अजापालोमहीपालोह्यजादानैर्दिवंगतइत्यादि. विधितस्यप्रवक्ष्यामिविश्वामित्रेणभाषितां सर्वरत्नोपसंपन्नांसप्तधान्योपरिस्थितां वस्त्र

माल्योपमाल्यांतुभूषितांपशुजानकीं वज्रनेत्रींहेमशृंगींसदोहनसमन्वितां ससुतांरौप्यपादांचकुशौदद्यात्कुशोदकं गोदानवत्प्रयुंजीतमंत्रेणानेनसंयतः मंत्रश्च मंत्रवासेअजेश्लक्ष्णेयज्ञसंपत्करेशुभे सृष्टेत्वंदहमेपापंजन्मांतरशतैः कृतं एवंसमुच्चरेद्भक्त्याद्विजहस्तेजलंक्षिपेत् प्रीयतांपद्मनाभायवासुदेवायवैनमः एवंप्रदक्षिणीकृत्यसूर्यंसमवलोकयेत् ततश्चस्वगृहंगत्वाहरिंसंस्मृत्यमानवः येवालत्वेकृताःपापाःकामतोवाप्यकामतः यौवनेवार्द्धकोन्मादेप्रसंगेनापिपातकं अजादानस्यमाहात्म्यान्निष्पापोजायतेनरः पुत्रपौत्रसमायुक्तःसदाचारमतिश्चिरं विष्णुधर्मोत्तरेपिमंत्रः त्वंपूर्वंब्रह्मणासृष्टापवित्राभवतीपरं त्वत्प्रसूतौस्थितायज्ञास्तस्माच्छांतिकरीभव प्रतिग्रहोस्याःपृष्ठदेशेप्रोक्तः इयंचोदानकल्पादिरितिकल्पादितिथिनिर्णयेप्रागुक्तम् अत्रश्राद्धदानादिअनंतफलदं अथचैत्रशुक्लचतुर्दशीसापूर्वाग्राह्या मधोःश्रावणमासस्ययाचशुक्लाचतुर्दशी सारात्रिव्यापिनीग्राह्यानान्याशुक्लाकदाचनेति हेमाद्रौबौधायनोक्तेः परापूर्वाह्णव्यापिनीतिवापाठः अत्रकेचिद्यथाश्रुतमेवपठंति निशिभ्रमंतिभूतानि शक्तयःशूलधारकाः अतस्तत्रचतुर्दश्यांसत्यांतत्पूजनंभवेदितिब्रह्मवैवर्त्तात् हेमाद्रिमाधवादिलिखितमप्येवं संप्रदायविदस्त्वाहुः चतुर्दशीतुकर्तव्यात्रयोदश्यायुताविभोइतिस्कांदमुत्सर्गः तदपवादश्च मधोःश्रावणमासस्येति तत्रापवादाभावे पुनरुत्सर्गस्थितिरितिन्यायेनपूर्वविद्धैवग्राह्येतिसिद्ध्यति ब्रह्मवैवर्त्ततु सामान्यरूपमन्यत्रसावकाशमितिवचनेनपूर्वदिनेत्रिमुहूर्तवेधेपूर्वा अन्यथोत्तरेति नारदीयेपि चैत्रशुक्लचतुर्दश्यांकुंकुमागुरुचंदनैः गंधाद्यैर्वस्त्रमणिभिः कार्य्यार्चामहतीशिवे विमानध्वजछत्राणिदत्वापूज्याश्चमातरः एवंकृत्वार्चनंविप्रसोपवासोथवैकभुक् अश्वमेधाधिकंपुण्यंलभतेमानवोभुवि अत्रैवदमनार्चांचकारयेद्गंधपूर्वकैः समर्पयेच्चपूर्णायांशिवायशिवरूपिणे शैवागमे मधुमासेतुसंप्राप्तेचैत्रशुक्लचतुर्दशी ख्यातामदनभुंजीतिसिद्धासुरमहोत्सवा तत्रयेमूलमंत्रेणसमूलंदमनोच्चयं नि

वेदयंतिगौरीशेतेषांशैवार्चनेफलमिति अत्रलिंगपुराणेविशेषउक्तः मदनंतुत्रयोदश्यांतालवृंतानिलेनतु हंसयानसमारूढःकामोमंत्रविवर्धितः नारीभिर्वीजितश्चैवत्रैलोक्योन्मादमाचरेत् तन्निर्वापणकामेनचतुर्दश्यांमहामुने ततोत्यर्थंमयाप्रोक्तानार्यश्चाथनरास्तथा कुर्वंतिकर्दमेनैवआत्मनस्त्वनुलेपनं निर्वापितानंगपीडाभवत्येवममाज्ञया एतदर्थंसदाकार्यंक्रीडनंकर्दमेनच प्रातःप्रहरमात्रंतुकर्त्तव्यंक्रीडनंनरैः प्रक्षाल्यांगंततःकृत्वागंधमाल्यानुलेपनं वस्त्रतांबूलगीतादिरथ्याहट्टेषुचाचरेत् वादित्रघोषितंचैवनित्यंकृत्वाशिवाग्रतः सर्वकामसमृद्धस्तुवसेच्छिवपुरेनरः स्वयंतुलिंगमेकंतुदृष्ट्वातस्मिन्दिनेनरः ज्ञानलब्धशिवःसम्यग्भवेदेवनसंशयइति तथाच मधुमासेतुसंप्राप्तेतथाशुक्लचतुर्दशी प्रोक्तामदनपूजातुसिद्धिदातुमहोत्सवइति अत्रदमनोत्सवविधिःस्कंदपुराणे चतुर्दशींतुदमनांवक्ष्यामिहितकाम्यया लोकानांपुण्यजनकांसर्वसौख्यप्रदायिनीं यस्माद्दमनकैःपूजाचतुर्दश्यांविधानतः क्रियतेशांकरीतस्माद्दमनास्याच्चतुर्दशी चैत्रशुक्लचतुर्दश्यांयथावत्पूजयेच्छिवं प्रासादशोभाकृत्वैवसम्यक्संमार्जनादिभिः संस्नाप्यविधिवद्देवंक्षीरेणेक्षुरसादिभिः श्रीखंडागुरुकर्पूरकुंकुमैश्चानुलेपयेत् ततोदमनकैर्बिल्वैःपत्रैर्मरुवकैःशुभैः आलिंगपीठपर्यंतंपूजयेद्ग्रथितैस्तथा अगुरुंदेवदारुंचश्रीफलान्यथसिल्हकं तगरं महिषाक्षंचधूपंवानिर्दहेत्ततः शालिपिष्टोद्भवैर्दीपैःपंचभिर्नवभिस्तथा कुर्य्यादारार्तिकंशंभोःकांस्यपात्रेसमुज्ज्वलै विचित्रवस्त्रपूजाचकर्त्तव्यामहतीशिवे पुष्पमंडपिकांचित्रांसवितानोज्ज्वलांशुभां महोत्सवेनविधिवद्गेयंतूर्यरवेणच विविधैर्भक्ष्यभोज्यैश्चनैवेद्यंचोपकल्पयेत् संभवेसतिकार्य्यास्याद्रथयात्रापिनाकिनः प्रोक्षणीयैस्तथानृत्यैर्वाद्यपत्रैश्चभोजनैः पूजयेच्छिवभक्तांश्चविप्रानन्यांश्चशक्तितः प्रीयतांशिवइत्युक्तानक्तंभुंजीतचस्वयं वर्षेवर्षेप्रकर्त्तव्यमेतच्चैत्रोत्सवंमहत् शिवभक्तैस्तथान्यैश्चकीर्तिश्रेयोभिवृद्धये ॥ इतिचैत्रशुक्लचतुर्दश्यांशिवदमनोत्सवविधिः

अस्यामेवचतुर्दश्यांकाशीवासिभिः पशुपतीश्वरयात्राकार्य्या तदुक्तंकाशीखंडे चैत्रशुक्लचतुर्दश्यामुपोषणपरायणः पूजयित्वापशुपतिंरात्रौजागरणंचरेदिति हेमाद्रौ चैत्रशुक्लचतुर्दश्यांशिवंसंपूज्यभक्तितः रोचनापलमात्रेण ततोलिंगंविलेपयेत् नैवेद्यंपायसंप्रस्थंखंडलड्डुकसंयुतं सघृतंगुग्गुलंदद्यात्पलानांतुशतंपुनः निवेदयेत्पिष्टालिंगं तिलप्रस्थंसहेमयुक् शिवदक्षिणदिग्भागेस्थापितव्यंप्रयत्नतः भवरुद्रायनिर्वर्त्यआचार्यंपूजयेत्ततः एवंकार्यंप्रयत्नेनमोक्षमक्षयमिच्छतेति अस्यामेवचतुर्दश्यांनृसिंहदोलोत्सवःकार्यः ॥ उदुक्तंगारुडे चैत्रशुक्लचतुर्दश्यांनृसिंहंजगतःप्रभुं राजोपचारैःसंपूज्यमासमांदोलयेन्नरः ॥ तत्रैव मधौशुक्लचतुर्दश्यांनृसिंहंजगतांपतिं दक्षिणाभिमुखंदेवंदोलमानंसुरेश्वरं संपूजितंसकृद्दृष्ट्वासर्वपापैःप्रमुच्यते ॥ इतिचैत्रशुक्लचतुर्दशी ॥ चैत्रपूर्णिमासामान्यनिर्णयेपरैव अत्रविशेषोनिर्णयामृतेविष्णुस्मृतौ चैत्रीचित्रायुताचेत्स्यात्तस्यांचित्रवसुप्रदा तेनसौभाग्यमाप्नोतीति तथाच ब्राह्मे योगविशेषेणफलविशेषः मंदेवार्केगुरौवापिवारेष्वेतेषुचैत्रिका तत्राश्वमेधजंपुण्यंस्नानश्राद्धादिभिर्भवेत् अत्रसर्वदेवानांदमनपूजोक्ता तत्रैववायवीये संवत्सरकृतार्चायाःसफलायाखिलान्सुरान् दमनेनार्च्चयेच्चैत्र्यांविशेषेणसदाशिवमिति अत्रस्वीयस्वीयतिथ्यांदेवतानांदमनारोपविशेषः स्वीयतिथावकरणे चैत्र्यांसर्वेषामेव इत्यन्येदीक्षितेतरविषयमेवव्यवस्थेत्यपरे इयंमन्वादिरुक्ता मन्वादिगणनायां अत्रापिश्राद्धदानाद्यनंतपुण्यकरं तथाचपुण्यकरं नारदीयेसनातनः चैत्रपूर्णातुविप्रेंद्रमन्वादिःसमुदाहृता अस्यांसान्नोदकंकुंभंप्रदद्यात्सोमतुष्टये मन्वादितिथिःश्राद्धे पराह्णव्यापिनीग्राह्या उत्तरास्नानदानादावित्युक्तेः अत्रश्राद्धमुक्तंमात्स्ये कृतंश्राद्धंविधानेनमन्वादिषुयुगादिषु हायनानांद्विसाहस्रंपितॄणांतृप्तिदंभवेदिति इदंचाधिकमासेपिविधेयं मन्वादिकंचौपायिकंकुर्य्यान्मासक्षयेपिचेतिस्मृतिचंद्रिकोक्तेः अत्रापिपिंडदानंनास्ति तथाचकालादर्शे विषुवायनसं

क्रांतिमन्वादिषुयुगादिषु विहायपिंडनिर्वापंसर्वश्राद्धंसमाचरेदिति अकरणेप्रायश्चित्तं ऋग्विधाने त्वंभुवःप्रति मंत्रंचशतवारंजलेजपेत् मन्वादयोयदान्यूनाःकुरुतेनैवचापदि एवंषण्णवतिश्राद्धाण्यपिनित्यानि तेषामयंसंग्रमः अमामनुयुगक्रांतिधृतिपातमहालयाः अन्वष्टकंचपूर्वेद्युःषण्णवत्यःप्रकीर्त्तिताः इयंपूर्णाचित्रायोगेमहाचैत्रीभवतितदुक्तं ब्रह्मपुराणे माससंज्ञंयदाऋक्षंपौर्णमास्यांभवेत्क्वचित् महतीसातिथिःप्रोक्तास्नानदानेषुचाक्षया अक्षयत्वं कल्पांतस्थायिफलजनकत्वं अस्यामेवचेंद्रपूजार्या तदुक्तंनिर्णयामृतेदेवीपुराणे चैत्रविधिप्रक्रमे पौर्णमास्यांतथा कार्य्यासर्वकार्य्यसमृद्धयेइंद्रायसहसाध्यायकामिकंलभतेफलमिति अस्यामेवनिकुंभपूजाकार्य्यातदुक्तंहेमाद्रौ आदित्यपुराणे सनत्कुमारउवाच उपोष्यचचतुर्दश्यांपौर्णमास्यांहरिंयजेत् पौर्णमास्यांनिकुंभश्चपिशाचैःसहितोबलीयोनियोद्धुंपिशाचांश्चसिकताद्वीपवासिनइति अत्रमृण्मयंतृणमयंवापिशाचंकृत्वागंधमाल्यादिभिर्मध्याह्नेपूजयित्वास्वस्तिवाचनंकृत्वा ब्राह्मणान्विसृज्यद्वितीयदिवसेसमीपस्थपर्वतमारुह्यतत्तत्सोपकरणंविसृज्यगृहमागत्यवादित्रविशेषैर्जनकोलाहलैश्चमहोत्सवंकृत्वादृढकाष्ठैःसुवेष्टितंतृणमयंसर्पंकृत्वा सर्पापसर्पशमनंतच्चखंडगृहेगृहेपूजनीयंसुगुप्तेनरक्षितव्यंचवत्सरमित्यंतेनग्रंथेन महाचैत्रादीनांलक्षणं गार्ग्येणोक्तं माससंज्ञेचनक्षत्रेचंद्रःसंपूर्णमंडलःगुरुणायातिसंयोगंसातिथिर्महतीस्मृतेति शंकरगीतायां देवींप्रति एकराशिगतौवालेयदागुरुनिशाकरौसापूर्णमासीमहतीसर्वपापहरामता तथा पौर्णमासीषुसर्वासुमासर्क्षसहितासुच ददतामिहदानानांफलंदशगुणंभवेदिति अस्यांवाराहपुराणदानमुक्तं नारदीये इत्ययंतववाराहंप्रोक्तंपापप्रणाशनंपठतांशृण्वतांचैवभगवद्भक्तिवर्धनं कांचनंगरुडं कृत्वातिलधेनुसमन्वितं लिखित्वातच्चयोदद्याच्चैत्र्यांविप्रायभक्तितः सलभेद्वैष्णवंधामदेवर्षिगणवंदितःयोवानुक्रमणीमतांशृणोत्यपिचसादरं सोपिभक्तिंलभेद्विष्णौसंसारोच्छेदकारिणीं ॥ अथचैत्रशुक्लपक्षतिथिकृत्यान्युच्यंते ॥

तिथिकृत्येचकृष्णादिंव्रतेशुक्लादिमेवच विवाहादौचसौरादिंमासंकृत्वाविनिर्दिशेदिति ब्राह्म्यंप्रायशोनुसृत्य
चैत्रशुक्लप्रतिपदमारभ्य तिथिकृत्यनिरूपणमुचितं व्रतादिनिरूपणेचैत्रशुक्लप्रतिपदमारभ्य वत्सरारंभारोग्य
व्रतविद्याप्राप्तिब्रह्मपूजादिव्रतकृत्यनिरूपणमुचितमतः चैत्रशुक्लादितोत्रव्रतानिरूपणारंभः सकलनिवंधकृत्संप्रदा
यसिद्धःसौरेणमासेन संक्रांतेरारभ्यात्रिंशद्भिर्दिनैरंशैर्वाभुक्तैर्भवति सच पूर्वचांद्रमासस्यशुक्लादितोभवति नक
दापिप्रकृतचंद्रमासशुक्लादितः प्रकृतसौरमाससंक्रांतौ भवत्यतोत्रकृष्णपक्षादावेव सौरमाससंक्रांतेः पुण्यका
लादिनिर्णयः प्रपच्यंते तत्रादौमीनसंक्रांतौपश्चात्षोडशघटिकाःपुण्यकालः रात्रौतुनिशीथात्प्रागूर्द्धतश्चसंक्रमे
पूर्वदिनपरदिनयोः परभागपूर्वभागौपुण्यकालयुक्तौ सामान्यनिर्णये नारदःयाम्यायनेस्थिरेत्वाद्याः पराः सौ
म्येद्विमूर्त्तिभे मध्याविषुवतिप्रोक्ताःपुण्याःषोडशनाडिकाः याम्यायनेकर्कटे संक्रांतौस्थिरराशौ वृषसिंहवृश्चि
ककुंभसंक्रांतिषु संक्रांतिकालादाद्याःपूर्वानाडिकापुण्याः सौम्यायनेमकरसंक्रांतौ द्विमूर्त्तिभेद्विस्वभावराशीनां
मिथुनकन्याचापमीनराशीनांसंक्रांतिषुचपराः षोडशनाडिकापुण्याः विषुवतिमेषतुलराश्योःसंक्रमे मध्याना
डिकाःकतिचित्पुण्याइतिसामान्यनिर्णयः अथचैत्रशुक्लप्रतिपदिकृत्यविशेषः पद्मपुराणे चैत्रेमासिमहावाहोपुण्या
प्रतिपदापरा तस्यांयःश्वपचंस्पृष्ट्वास्नानंकुर्य्यान्नरोतमः नतस्यदुरितांकिंचिन्नाधयोऽव्याधयोनृप भवंतिकुरुशार्दूलत
स्मात्स्नानंसमाचरेत् नारीनीराजनंतत्रसर्वरोगविनाशनं गोमहिष्यादियत्किंचित्सर्वंतद्भूषयेन्नृपतैलवस्त्रादिभिःसर्वा
स्तोरणाधस्ततोनयेत्व्राह्मणानांततोभोज्यंकुर्य्यात्कुरुकुलोद्वहेति अत्रप्रतिपदौदयिकीग्राह्या प्रवृत्तेमधुमासेतु
प्रतिपद्युदितेरवावितिभविष्योत्तरवचनात् अत्रहोलिकादीपनाऽव्याहितोत्तरदिनंग्राह्यामितियुक्तं अतएववृद्धवसिष्ठे,
नपूर्वैवविहिता वत्सरादौवसंतादौवालिराज्येतथैवच पूर्वविद्धैवकर्त्तव्याप्रतिपत्सर्वदावुधैरिति पूर्वदिनेसूर्योदयवि

द्वाप्रतिपदित्यर्थः अत्रतैलाभ्यंगोनित्यः वत्सरादौवसंतादौवलिराज्येतथैवच तैलाभ्यंगमकुर्वाणोनरकांप्रतिपद्यते अकरणेप्रत्यवायोक्त्यातैलाभ्यंगस्यानित्यत्वंवृद्धवसिष्ठेनोक्तं अथकृष्णपक्षादिचैत्रमासस्यकृत्यंमहाभारते चैत्रंतुनियतोमासमेकभक्तेनयःक्षिपेत् सुवर्णमणिमुक्ताढ्येकुलेमहतिजायते स्कंदपुराणे यःक्षिपेदेकभक्तेनचैत्रमासं नरोत्तमः धनधान्यसमृद्धेतुकुलेमहतिजायते वामनपुराणेदानमप्युक्तं चैत्रेविचित्रवस्त्राणिशयनान्यासनानिच विष्णोः प्रीत्यर्थमेतानि देयानिब्राह्मणेष्वथ अत्रदेयानिब्राह्मणेष्वितिवहुत्वंत्रित्वमात्रपर्यवसितंकपिंजलान्यायात् मत्स्यपुराणेवर्जयेचैत्रमासेतुयस्तुगंधानुलेपनं शक्तिंगंधभृतांदद्याद्विप्रायसितवाससी वारुणंपदमाप्नोतिदृष्टव्रतमिदंस्मृतमिति गंधपूर्णाशक्तिसितवासोयुगमंतेदेयमित्युद्यापनं चैत्रादिचतुरोमासान्जलंदद्यादयाचितं व्रतांतेमणिकं दद्यान्नववस्त्रसमन्वितं तिलपात्रंहिरण्यंचब्रह्मलोकेमहीयते कल्पांतेभूपतिर्नूनमानंदव्रतमुत्तमं वर्जयित्वामधौयस्तुदधिक्षीरघृतेक्षुकान् दद्याद्वस्त्राणिसूक्ष्माणिरसपात्रैर्युतानिच संपूज्यविप्रमिथुनंगौरीमेप्रीयतामिति एतद्गौरीव्रतंनामभवानीलोकदायकं भविष्यपुराणे मासिचैत्रेतुसंप्राप्तेयःकुर्य्यान्नक्तभोजनं शाल्यन्नंपयसायुक्तं भुंजानःसंयतेंद्रियः भानवेपाटलांदद्याद्वैष्णवींतरुणींनृप पुष्परागमयैर्यानैर्नानाहंसानुयायिभिः नक्तभोजनमिदंमासव्यापिव्रतांतेतरुण्यागाःप्रदानस्त्वेविष्णुदैवतत्वेन भानुलोकप्राप्तिःफलं तथाचात्रप्रपादानमुक्तंभविष्यपुराणे अतीतेफाल्गुनेमासिप्राप्तेचैत्रमहोत्सवे पुण्येह्निविप्रकथितेप्रपादानंसमारभेदिति तत्रमंत्रः अविचार्य्यततोदेयंजलंमासचतुष्टयं तथाच प्रपादातुमशक्तेनविशेषाद्धर्मलिप्सुना प्रत्यहंधर्मघटकोवस्त्रसंवेष्टितानतः ब्राह्मणस्यगृहेदेयःसान्नःशीतजलःशुचिः तत्रमंत्रः एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः अस्यप्रदानात्सकलाममसंतुमनोरथाः अनेनविधिनायस्तुधर्मकुंभंप्रयच्छति प्रपादानफलंसोपिप्राप्नोतीहनसंशयइति इदंचैत्रकृष्णप्रतिपदानारसिंह

कल्पादि अत्रापिश्राद्धदानादिमहाफलमितित्रिंशदमीकल्पास्तिथयःपरमेष्ठिनः आरंभतिथयस्तासुयुक्ताःपुण्यतमामताः तासुश्राद्धकृतेपुण्यंकल्पांतरस्थापिकल्प्यत इतिनागरखंडात् अथचैत्रेतुकृष्णायांप्रतिपद्यपिसर्वदा। भल्लमल्लनटानांतुद्रष्टव्यंकौतुकंमहदिति चैत्रकृष्णद्वितीयायांतिथिपत्वेनब्रह्मणःपूजाकार्या। चैत्रकृष्णतृतीयायांसौभाग्यसुंदरीव्रतांगत्वेन रतिसंज्ञागौरीपूजा वलायाउदकंप्राशयेत् चैत्रकृष्णचतुर्थ्यां श्रावणकृष्णादिक्रमेण संकष्टचतुर्थीव्रतं तत्रगणपतिपूजनेचंद्रोदये चंद्रायार्घ्यदानं पंचगव्यप्राशने चैत्रकृष्णपंचम्यां काश्मीरादेवीपूजा देवीपुराणे चैत्रेतुकृष्णपंचम्यांकाश्मीरातुरजस्वला नित्यंभवतितस्मात्तांकृत्वाशैष्णमयींस्त्रियं २ अभ्यंगवस्त्रनैवेद्यैःपूजयंतिदिनत्रयं पुष्पालंकारवस्त्रैश्चगोरसंवर्जयंतिच कृष्णाष्टम्यां।द्विजैः स्नाप्यसर्वौषधियुतैर्जलैःस्नापयित्वा चतांदेवींगंधपुष्पैश्चपूजयेत् स्विष्टपिष्टैस्त्रिकोणैश्चतथाभक्तैश्चशालिजैतंत्रीवाद्यंसुमधुरंश्रोतव्यंचसदादरात्तान्निवेदितपुष्पंचग्रथितव्यंगृहेगृहे अतःपरमृतुस्नातागर्भंगृह्णातिमेदिनी चैत्रकृष्णषष्ठ्यां स्कंदपुराणोक्ता दारिद्र्यहरषष्ठीनामतिथिः पूज्या सामान्यादेवतैरपि एकभक्तेननक्तेनतथैवायाचितेनवा उपवासेनदानेनतैलक्षारविवर्जितः अयंचभगवान्देवो भास्करः सःपरद्युतिः येनशैघ्र्येणदृश्येत तद्गुह्यंकथयाम्यहं गोपनीयंव्रतंदिव्यमिहलोकेसुखप्रदं यस्मिन्कृतेव्रतेचैवदारिद्र्यंनभवेत्कुले षष्ठींतिथिंसमुद्दिश्यब्राह्मणस्यतुभोजनं शाल्योदनंचपयासिकृत्वाशर्करयायुतं वर्तुलंघृतसंयुक्तंवर्षमेकंप्रदापयेत् कुलेतस्यैवयेजातायेभविष्यंतिमानवाः अक्षयास्तेमहात्मानोव्रतेनपुण्यपावनाः ईहितंचैवगच्छंतितद्दारिद्र्यंप्रणश्यति षष्ठीमात्रसप्तमीभानुयोगपद्मकाख्योयोगउक्तोनिर्णयामृते षष्ठीचसप्तमीयोगोवारेचेदंशुमालिनः योगोयंपद्मकोनामसूर्यकोटिग्रहैःसमइति अत्रस्नानदानादियत्कृतंतदक्षयफलदंभवतीति सर्वेष्वपिमासेष्वविशेषादयंयोगोबोद्धव्यइतिनिर्णयसिंधौ अथात्रैवष

ष्टीमात्रतिथौरविवासरैयोगेलोलयात्रा काशीखंडेप्रोक्ता कृतानियानिपापानिनरैःसंवत्सरादपि नश्यंतिक्षणतस्तानिषष्ठ्यर्केलोलदर्शनात् अत्रलोलोनामलोलार्कः तत्रवार्षिकयात्राप्युक्ता काशीखंडे सामार्गशीर्षे कार्य्या पक्षद्वयगतासुसर्वमासषष्ठीषुतिथिपत्वेनस्कंदपूजा तदुक्तंषष्ठ्यांपूजागुहस्यचेति चैत्रकृष्णसप्तम्यां तिथिपत्वेनसूर्यपूजाव्रतं उक्तंचसप्तम्यांभास्करस्यचेति चैत्रकृष्णाष्टम्यां काश्यांभैरवयात्रोक्ताकाशीखंडे अष्टम्यांचचतुर्दश्यांरविभूमिजवासरे यात्रांचभैरवींकृत्वा नरः पापैःप्रमुच्यते तत्रैवदुर्गापूजाप्युक्ताअष्टम्यांचचतुर्दश्यांभौमवारेविशेषतःसंपूज्यसततंकाश्यादुर्गांदुर्गार्तिनाशिनीमित्यष्टमीसामान्यकृत्यं अथभविष्योत्तरोक्तं सोमाष्टमीव्रतं अस्यसामस्यचाष्टम्यांपक्षयोरुभयोरपि विधिवच्चंद्रचूडंतुसोमंसंपूजयेन्निशि सोमं उमयासहितमित्यर्थःपूजयेदितिशेषः इतिसोमाष्टमीव्रतं अशोकाष्टमीव्रतंचादिपुराणे भानुरुवाच अष्टमीषुचसर्वासुपूजनीयाप्यशोकिका अशोकिकाअशोकतिलका गंधमाल्यनमस्कारधूपदीपान्नसंपदा तस्मिन्नहनियोभुंक्तेनक्तमिंदुविवर्जिते इंदुवर्जितेकृष्णपक्षे भवत्यत्रविशोकासापुत्रपौत्रसुखान्विता भविष्योत्तरोक्तंचंडिकाव्रतं योऽब्दमेकंनभुंजीतचंडिकाराधनेरतः सयातिपरमंस्थानयत्रसाचंडिकास्थितेति अथाष्टम्युद्यापनं तत्रव्रतकर्ता अथाष्टम्यांप्रातःस्नानादि नित्यनैमित्तिकंविधाय मंडपशोभांविधाय पुनःसंध्यायांसायंसंध्यादिनिर्वर्त्य उद्यापनसंकल्पंविधाय गणपतिपूजादिकलशस्थापनांतंकृत्वा तदुपरिताम्रपात्रेरक्तवस्त्रोपरिमंडूकादिपरतत्वातं पीठंसंपूज्य सौवर्णीमिष्टदेवप्रतिमांसांगांनीराजनांतोपचारैः संपूज्यरात्रौजागरणंकृत्वानवम्यांपुनःपूजयित्वा आज्येनवैदिकमूलमंत्रेणवाष्टोत्तरशतसंख्ययाहोमंविधाय आचार्यायगोसर्वादिसहितं देवंदत्त्वादंपतीकुमारीश्चसंभोज्यस्वयमपिभुंजीत चैत्रकृणाष्टम्यांविष्णुधर्मोत्तरोक्तंसंतानाष्टमीव्रतम् हेमाद्रौ कृष्णाष्टम्यांचैत्रमासेस्नातो

नियतमानसइत्यादितत्रकृष्णंदेवकींचाभ्यर्च्योपोष्योत्तरदिनेपारणंकुर्यात् इतिसंतानाष्टमीव्रतं इयमेवशीतलाष्टमी स्कंदउवाच भगवन्शीतलास्तोत्रंवददेव्यामहत्फलम् अतीवभक्तिर्मेजाताव्रतंवापिव्रवीहिमे ईश्वरउवाच साधुवत्समहाभागयत्पृच्छसिव्रतोत्तमम् कथयामियथापूर्वंपार्वत्यात्वत्कृतेकृतम् सर्वोपद्रवनाशायसर्वरोगोपशांतये चैत्रमासिसितेपक्षेयाष्टमीशीतलाह्वया तामारभ्यप्रकर्त्तव्यंयावन्मासचतुष्टयम् पतिपुत्रसमेताभिर्योषिद्भिः श्रद्धयान्वितं विधानंशृणुमेवत्सयेनसम्यक्प्रपूजयेत् सुशीतलजलैःस्नात्वास्नानेगोमयलेपिते सुगंधैःशीतलैस्तोयैःकलशंलक्षणान्वितं आपूर्यविधिवत्तंचस्थापयेत्तत्रशीतलां लिखित्वावाह्यतांमूर्तिंपूजयेद्विधिनामुना पुष्पचंदनकर्पूरवासितंशीतलंजलम् पाद्यार्घ्याचमनीयंचशीतलेप्रतिगृह्यतांसर्वसंतापशमनंसुगंधिमनसःप्रियम् गृह्यतांचंदनंदेविमत्कुलंशीतलंकुरु चंदनं खरयानसमारूढेनिंबपल्लवधारिणि शीतलेकुरुकल्याणंपूजेयंप्रतिगृह्यताम् संपूज्यविधिवद्देवींशृणुयाच्छीतलाष्टकम् पूर्वंमय्येवसंप्रोक्तंतच्छृणुत्वंसमाहितः ओंनमामिशीतलांदेवींरासभस्थांदिगंबरां मार्जनीकलशोपेतांशूर्पालंकृतमस्तकाम् स्कंदउवाच भगवन्देवदेवेशशीतलास्तोत्रमुत्तमं वक्तुमर्हस्यशेषेणविस्फोटकभयापहम् ईश्वरउवाच वंदेहंशीतलांदेवींसर्वरोगभयापहां यामाराध्यनिवर्त्तेतविस्फोटकभयंमहत् शीतलेशीतलेचेतियोब्रूयाद्दाहपीडितः विस्फोटकाभयंपापंक्षिप्रंतस्यप्रणश्यति यस्त्वामुदकमध्येतुध्याध्वापूजयतेनरः विस्फोटकभयंघोरंकुलेतस्यनजायते शीतलेज्वरदग्धस्यपूतिगंधहतस्यच प्रणष्टचक्षुषःपुंसस्त्वामाहुर्जीवनौषधम् शीतलेतनुजान्रोगान्नृणांहरसिदुस्त्यजान् विस्फोटकविशीर्णानांत्वमेकामृतवर्षिणी गलगंडमहारोगायेचान्येदारुणानृणां त्वदनुध्यानमात्रेणशीतलेयातिसंक्षयम् नमंत्रंनौषधंकिंचित्पापरोगस्यविद्यते त्वमेकाशीतलेधात्रीनान्यांपश्यामिदेवताम् मृणालतंतुसदृशांना

भिहन्मध्यसंस्थिताम् यस्त्वांचिंतयेतेदेवितस्यमृत्युर्नजायते शीतलेत्वंजगन्माताशीतलेत्वंजगत्पिता शीतलेत्वंजगद्धात्रीशीतलायैनमोनमः शीतलाष्टकमेवेदंनदेयंयस्यकस्यचित् दातव्यंहिसदातस्मैश्रद्धाभक्तियुतायच श्रोतव्यंपठितव्यंच श्रद्धाभक्तिसमन्वितैः उपसर्गविनाशायपरंस्वस्त्ययनंमहत् रासभोगर्दभश्चैवखरोवैशाखदाहनः शीतलावाहनंचैवदूर्वाकंदननंदनः एतानिखरनामानिशीतलाग्रेचयःपठेत् तस्यदेहेच गेहेच शीतलारुग्नजायते शीतलाष्टकम् ॥ ततःक्षमाप्यतांदेवींदद्याद्विप्रायदक्षिणाम् सचयत्तेनतोयेनस्वात्मानंपतिपुत्रकम् भोजनंयत्प्रकर्तव्यंतच्छृणुत्वंषडानन भक्षयेद्वटकान्पूपांश्चैत्रेवैशीतलान्वितान् वैशाखेसक्तुकाषायं साज्यशर्करयान्वितम् ज्येष्ठेशष्कुलिकाःशीताःपूरिकाश्चतथाविधाः आषाढेपायसंसाज्यंसितशर्करयान्वितं एतन्मासविधानंतेकथितंपार्वतीसुत एवंयाकुरुतेनारीव्रतंवर्षचतुष्टयम् ततउद्यापनविधिर्वांछितंफलमाप्नुयात् तत्कुलेनोपसर्पंतिगलगंडग्रहादयः नचव्याधिभयंतस्यपतिपौत्रसमन्विता पतिसौख्ययुतासाध्वीचिरकालंप्रमोदते इतिस्कंदपुराणेशीतलास्तोत्रंसमाप्तम् अथचैत्रशुक्लनवम्यां वाराहजयंतीव्रतं चैत्रशुक्लनवम्यांतु हरिर्वाराहरूपधृगितिपुराणोक्तेः अत्रैवदशावतारजयंत्योऽन्याअपिनिर्णीयंते पुराणसमुच्चये मत्स्योभूद्धुतभुक्दिनेमधुसितेकूर्मोविधौमाधवे वाराहोगिरिजासुतेनभसियद्भूतेसितेमाधवे सिंहोभाद्रपदेसितेहरितिथौआवामनोमाधवे रामोगौरिरितिथावतःपरमभूद्रामोनवम्यांमधौ कृष्णाष्टम्यांनभसितपरेवाश्विनेयद्दशम्यां बुद्धःकालिकर्नभासिस्समभूच्छुक्लषष्ठ्यांक्रमेण अथैषांप्रादुर्भावादिकालाः अह्नोमध्येचाजनीरामरामौ मत्स्यःक्रोडश्चपराह्णेविभागे कूर्मः सिंहोबौद्धकल्कीचसायं कृष्णोरात्रेःकालसाम्येचपूर्वे इतिअत्रकेचित्स्फुटान्श्लोकान्पठंति चैत्रेतुशुक्लापंचम्यभगवान्मीनरूपधृक् ज्येष्ठेतुशुक्लद्वादश्यांकूर्मरूपधरोहरिः चैत्रेशुक्लनवम्यांतुहरिः

वाराहरूपभृत् नारसिंहश्चतुर्दश्यांवैशाखेशुक्लपक्षके राधशुक्लतृतीयायांरामोभार्गवनामधृक् चैत्रशुक्ल नवम्यांतुरामोदशरथात्मजः नभस्येतुतृतीयायांवलभद्रोभवद्धरिः श्रावणेवहुलेष्टम्यांकृष्णोभूल्लोकरक्षकः ज्येष्ठशुक्लतृतीयायांवुद्धकल्कीभविष्यतःकौंकणास्तुवाराहपुराणतत्वेनवाक्यानिपठंति आषाढशुक्लपक्षेतुएकादश्यांमहातिथौ जयंतीमत्स्यनाम्नीतितस्यांकार्यमुपोषणं नभोमासितृतीयायांहरिःकमठरूपभृत् वैशाखस्य चतुर्दश्यांनृसिंहःसमपद्यत वैशाखेतुतृतीयायांशुक्लपक्षेभृगूद्वहः मासिभाद्रपदेशुक्लैकादश्यांवामनोहरिः चैत्रेनवम्यांरामोभूत्कौशलायांपुरःपुमान् श्रावणेवहुलेष्टम्यांवासुदेवोजनार्दनः पौषेतुशुक्लसप्तम्यांकुर्याद्बुद्धस्यपूजनं माघशुक्लतृतीयायांकाल्किनः एतेषांपूजाकालनियमः प्रातःप्रातस्तुमध्यान्हेसायंसायंतथानिशि मध्यान्हेमध्यरात्रेचसार्धंप्रातरनुक्रमादिति तत्रसमूलत्वनिषेधेविकल्पभेदेनव्यवस्थाद्रष्टव्या एताश्चतत्तदुपासकानांनित्याः अन्येषांतुकाम्याः एषांविशेषमग्रेवक्ष्यामः धरणीव्रतेषुस्फुटीभविष्यति चैत्रशुक्लदशम्यांतिथित्वेनधर्मराजपूजाव्रतं देवीपुराणे धर्मराजंदशम्यांतुपूजयित्वासुगंधिकैःविगतारिर्निरातंकइहचांतेपरंपदमिति चैत्रशुक्लैकादशी पापमोचनिका भविष्योत्तरपुराणे मांधातोवाच आत्मनश्चाहितार्थायलोकानांचहितायच पृच्छामिलोमशाहंत्वांसदयंमुनिसत्तम चैत्रस्यप्रथमेपक्षेकिंनामैकादशीभवेत् किंनामकोविधिस्तस्याः कथयस्वममाग्रतः लोमशउवाच चैत्रस्यप्रथमेपक्षेनाम्नावैपापमोचिनी शृणुराजन्कथांदिव्यांपवित्रांपापनाशिनीं पुराचैत्ररथंनामवनंकोकिलनादितं मयूरनादसुभगंकिन्नरीभिर्विराजितं देवकन्यास्तुतत्रैवनिवसंतिमनोरथाः न परंपुण्यदंकिंचिद्वनंचैत्ररथाद्वनात् तस्मिन्वनेहिमुनयस्तपंतिपरमंतपः तत्रासीन्मुनिशार्दूलोमेधावीनामनामतः तपोरतंमुनिंश्रेष्ठंमंजुघोषाभिधाप्सराः इंद्रेणप्रेषितातत्रतत्तपोहंतुमाययौ तस्यशापभयाद्भीताक्रोशमात्रेचसाजगौ

120

कामोऽपिविजयार्थायशिवभक्तंमुनिंतदा जघानकुसुमैर्बाणैः शिववैरादनारतं तस्याभ्रुवौधनुःकृत्वातत्पक्ष्माणिगुणं तथा नयनाभ्यांतुबाणाभ्यांजघानमदनोमुनिं गायंतींतांपुरोदृष्ट्वामेधावीमुनिपुंगवः कामबाणवशंप्राप्तःशङ्कुनैव शशाकसः मंजुघोषापितंदृष्ट्वासुंदरंमुनिपुंगवं कामबाणाहतमनामंदंमंदंतदाजगौ मंजुघोषातमागत्यपुरोमेधाविनंमुनिं मोहयामासवामोरूर्हावभावैःशुचिस्मिता अथसंस्थाप्यसावीणांपरिरंभमनोदधौ वल्लीवपार्श्ववृक्षेणामिलितामुनिनातदा मेधावीचतयारेमेसतयामंजुघोषया तयासार्धंगतस्तत्रयत्रासीद्विजनंवनं शिवतत्त्वंगतंतस्यकामात्तस्यानुरागिणः रात्रिंदिनंतयासाकंस्वाश्रमेरमातिस्मसः एवंगतोमहान् कालस्तस्यमेधाविनोमुनेःमंजुघोषोत्कटीवाचरमंतंमुनीश्वरं आज्ञांमेदेहिमेधाविन्स्वर्गस्यगमनायभो महान्कालोऽव्यतीतोमेत्वत्समीपेमुनीश्वर मुनिरुवाच अद्यैवत्वंसमायाताप्रत्यूषायांपरानने प्रातःसंध्यासमायातितावत्त्वंसुस्थिराभव इतिश्रुत्वामुनेर्वाक्यंभयभीतातदाभवत् पुनःसारमयासमुनिंमेधाविनंमुदामुनेःशापभयाद्भीताबहुकालंचसारमत् पंचाशत्पंचवर्षाणिनवमासंदिनत्रयं रमित्वामंजुघोषासामुनिंप्रोवाचवैशनैःमंजुघोषोवाच प्रसादंकुरुमेब्रह्मन्ममादेशःप्रदीयतां त्वत्प्रसादान्मुनिश्रेष्ठस्वर्गेयास्यामिसत्वरं मुनिरुवाच प्रातःकालःसमायातिशृणुष्ववचनंमम प्रातःसंध्यांयावदहंकुर्वेतावत्स्थिराभव इतिवाक्यंमुनेः श्रुत्वामंजुघोषाभयावहं हसित्वासातदाविप्रंप्रत्युवाचशुचिस्मिता मंजुघोषोवाच किंप्रमाणंचविप्रर्षेतवसंध्याभविष्यति मयिप्रसादंकृत्वातुपश्चात्सर्वंविचार्य्यतां इतिश्रुत्वावचस्तस्याविस्मयोत्फुल्ललोचनः सुचिरंमनसिध्यात्वाविचारमकरोन्मुनिः सप्ताशीतिश्चवर्षाणिजातानिविफलानिमे ततश्चुकोपतस्यैसमुनिः क्रोधारुणेक्षणःनेत्राभ्यांतस्यविप्रर्षेःपेतुर्वन्हिकणाभृशं एवंविचारयामासमेधावीमुनिपुंगवःचिरार्जितंतपोहत्तंपावकप्रभयानया काष्ठवद्भस्मतांनीतंकागतिर्मेभविष्यति स्फुरदोष्ठप्रदोरोषात्प्रत्युवाचाकुलेंद्रियः मंजुघोषोषेत्रमेशापाद्

भूयास्त्वंवैपिशाचिनी धिक्कांपापदुराचारांमत्तपोनाशितंत्वया मुनेःशापेनसात्रस्ताविनयावनताब्रवीत् प्रसादंकुरु
मेब्रह्मन्शापांतंचवदस्वमे सतांसंगेमुनिश्रेष्ठनैतद्युक्तंकदाचन त्वयासहमयाब्रह्मन्नीताश्चवहवःसमाः मेधा
व्युवाच मंजुघोषेममममुखात्शृणुशापांतमात्मनः चैत्रमास्यसितेपक्षेपिशाचत्वविनाशिनी पापमोचनिकानामै
कादशीपापहारिणी यदासायातिचोपोष्यातवनश्येत्पिशाचता इत्युक्त्वातांमुनिश्रेष्ठःआजगामनिजाश्रमं आ
यांतंतंसुतंदृष्ट्वाच्यवनोवाक्यमब्रवीत् यत्तेपापंकृतंवत्सजानेतन्नात्रसंशयः किमर्थंयत्कृतंपुत्रत्वयासीत्पुण्यसंचयः
इतिवाक्यंपितुःश्रुत्वामेधावीवाक्यमब्रवीत् मेधाव्युवाच वहुपापंकृतंतातह्यप्सरोरमतामया यत्कष्टेनार्जितंपु
ण्यंतत्सर्वंमेक्षयंगतं उपायःकथ्यतांतत्रमुच्येयंयेनपापतः च्यवनउवाच चैत्रमास्यसितेपक्षेनाम्नावैपापमोचनी
कर्त्तव्यासात्वयायत्नात्ततोनश्यतितेप्ययं इतिश्रुत्वापितुर्वाक्यंकृतंव्रतमनुत्तमं कृतंपापंमुनेस्तस्यतत्क्षणात्प्रलयं
गतं शापेनमंजुघोषायादिवसावहवोगताः नष्टंपापंचतस्यापिपापमोचनिकाव्रतात् दिव्यरूपधराजातागता
स्वर्गंवराप्सरा लोमशउवाच एवमन्योपियःकश्चित्पापमोचनिकाव्रतं कुर्यात्तस्यतुराजेंद्रपापंनश्यतितत्क्षणात्
कामदात्विहलोकेसापरलोकेचमोक्षदा माहात्म्यश्रवणादस्यागोसहस्रफलंलभेत् ब्रह्महाचैवगोघ्नश्चसुरापोगुरुत
ल्पगः स्वर्णचौरश्चपूतःस्यात्पापमोचनिकाव्रतात् ॥ इतिभविष्योत्तरेचैत्रकृष्णापापमोचनिकैकादशीमाहात्म्यम्
चैत्रकृष्णाद्वादशी दर्शांतमासत्वेनवैराजकल्पादिःअत्रापिश्राद्धाद्यनंतफलंभवति इतिकल्पादितिथिनिर्णयः चैत्रशु
क्लत्रयोदशी शतभिषानक्षत्रयुतावारुणीतत्रगंगास्नानमुक्तं स्कांदे वारुणेनसमयुक्तामधौकृष्णत्रयोदशीगंगायां
यदिलभ्येतसूर्यग्रहशतैःसमेतिइयमेवशनिवारशतभिषानक्षत्रोपेतामहावारुणी तथाचोक्तंतत्रैव शनिवारसमायु
क्तासामहावारुणीमता गंगायांयदिलभ्येतकोटिसूर्यग्रहैस्समेति इयमपिशुभयोगयुतामहावारुणीसंज्ञा तदप्यु

गुरुकुल कांगड़ी

कंतत्रैव शुभयोगसमायुक्ताशनौ।शतभिषायदि महामहेतिविख्याता।त्रिकोटिकुलमुद्धरेत् इति अथास्यांवारुणीपर्व योगस्यवरुणदैवत्यादत्रवारुणमंत्रैर्होमदानादिकार्यंतस्मादत्रसप्तसागरदानंकर्त्तव्यमुक्तंमत्स्यपुराणे अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं सप्तसागरकंनामसर्वपापप्रणाशनं पुण्यंदिनमथासाद्यकृत्वाब्राह्मणवाचनं तुलापुरुषवत्कुर्य्याल्लोकेशावाहनंततः ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं कारयेत्सप्तकुंडानिकांचनानिविचक्षणः प्रादेशमात्राणितथारत्निमात्राणिवैपुनः कुर्य्यात्सप्तपलादूर्द्ध्वमासहस्राच्चशक्तितःसंस्थाप्यानिचसर्वाणिकृष्णाजिनेतिलोपरि कृष्णाजिनाभावेसकुशवस्त्रतिलोपरिस्थाप्यानि प्रथमंकारयेत्कुंडंलवणेनविचक्षणः द्वितीयंपयसातद्वत्तृतीयंसर्पिषाततः चतुर्थंतुगुडेनैवदध्नापंचममेवच षष्ठंशर्करयातद्वत्सप्तमंतीर्थवारिणा स्थापयेल्लवणस्यांतंब्रह्माणंकांचनंशुभं केशवंक्षीरमध्येतुघृतमध्येमहेश्वरं भास्करंगुडमध्येतुदधिमध्येसुराधिपं शर्करायांन्यसेल्लक्ष्मीं जलमध्येचपार्वतीम्सर्वेषुसर्वरत्नानिधान्यानिचसमंततः तुलापुरुषवच्छेषमात्रापिपरिकल्पयेत् ततोवारुणहोमांते स्नापितोद्विजपुंगवैः त्रिःप्रदक्षिणमावृत्यमंत्रान्नेतानुदीरयेत् मंत्राःप्रयोगेज्ञेयाः इतिददातिरसामृतसंयुतान् शुचिरविस्मयसागरान् अखिलकांचनवर्णमयानसौपदमपैतिहरेरमरार्चितः १ सकलपापविधौतविराजितः पितृपितामहपुत्रकलत्रकं नरलोकसमाकुलमप्ययंझटितिनेतुमलंशिवमंदिरमिति अथदानकर्त्तावर्षादिनात्पूर्वदिनेपर्वादिनेवाउ। मद्यमहामहावारुणीपर्वादिनेवाआत्मनः सकलकलुषक्षयसंभावितनरकनिवासिपितृपितामहपुत्रकलत्रादि सप्तगोत्रजत्रिकोटिकुलशिवमंदिरप्राप्ति पूर्वकरामतत्त्वविशिष्टस्वीयहरिपदप्राप्तिकामः सप्तसागरदानंकरिष्ये ततोगोविंदपूजादिगुरुविनियोगांतं प्रकृतवत्कृत्वाक्रमासादितसकुशकृष्णाजिनवस्त्रादिषुतिलद्रोणलवणदुग्धघृतगुडदधि शर्करातीर्थवारिभिः कांचनसप्तकुंडानि सप्तकलशान्वावारुण

कलशसहितान्संस्थाप्यतेषुब्रह्मकेशवमहेश्वरभास्करसुराधिपलक्ष्मी पार्वतीमूर्त्तीः स्थाप्यपरितोदशधान्यानिवितानकंचोपरिकृत्यब्रह्मादीन्सपरिवारान्संपूजयेच्च ततःकुंडसमीपस्थकलशस्थापनवनस्पतिहोमांतंकुंडेषुअष्टाविंशत्यष्टोत्तरशताष्टसहस्रान्यतमसंख्ययास्वशाखीयैर्वारुणमंत्रैस्तिलान्हुत्वास्विष्टकृदादिपूर्णाहुत्यंतमभिषेकांतंप्र· कृतंकृत्वाभिषेकांतेसप्तसागरांस्त्रिः प्रक्रम्यमंत्रान्पठेत् नमोवःसर्वसत्वानामाधारेभ्यःसनातनाः जंतूनांप्राणदेभ्यश्चसागरेभ्योनमोनमः क्षीरोदकाज्यदधिमाधुरलावणेक्षुधारमृतेनभुवनत्रयजीवसंघान् आनंदयंतिवसुभिश्चयतोभवंतस्तस्मान्ममाप्यघविघातमलंविदग्धं यस्मात्समस्तभुवनेषुभवतएवतीर्थामरासुरनिबद्धमणिप्रदानं पापक्षयामृतविलेपनभूषणायलोकस्यविभ्रतितदस्तुममापिलक्ष्मीः इत्यनुमंत्र्य पुष्पाणिनिक्षिप्यनत्वाचवेदीपश्चिमतउपविश्य ॐतत्सत् अद्येत्यादिपूर्वोक्तदेशकालादिकीर्त्तनांते सकलकलुषक्षयेत्यादिमहासंकल्पमुक्त्वाइमानिवारुणदैवतलवणदुग्धघृतगुडदधिशर्करातीर्थवारिभिः पूरितान्कांचनादिकुंडकलशादिरूपान्सप्तसागरान् विष्णुदैवतान्तुलापुरुषोक्तमत्स्यपुराणीयव्यवस्थयानानानामगोत्रेभ्योब्राह्मणेभ्योयुष्मभ्यमहंसंप्रददेनममेतिदानांतेसुवर्णदक्षिणांदद्यात् स्वल्पेष्वेकाग्निविधिरितिकेचित् सप्तकलशदानमावृत्त्यायथासंख्यमपिस्वशक्त्याकार्यमित्याहुः अत्राशक्तौश्रीगोविंदगंगावरुणमूर्त्तित्रयंकलशत्रयसहितंयथाशक्तिपूजांतेदेयमित्यावश्यकंदानम् ततःपुण्याहवाचनग्रहादिविसर्जनब्राह्मणादियथाशक्तिकुर्यादितिवारुणीपर्वानुष्ठेयंसप्तसागरदानम् चैत्रकृष्णचतुर्दशी पिशाचमोचनी पुराणसमुच्चये चैत्रकृष्णचतुर्दश्यांयःस्नायाच्छिवसन्निधौ गंगायांचविशेषेणनसप्रेतोधिजायते चैत्रशुक्लचतुर्दश्यामंगारकदिनंयदि पिशाचत्वंपुनर्नस्याद्गंगायांस्नानभोजनात् भोजनंचात्रजलपानं अत्रान्यदपि कृत्यं तत्रैव धवलितकलशन्यस्तारक्तपताकान्वितास्नुहीभवने चैत्रासितभूतदिनेपापरुजंदूरतोधत्ते अत्रब्रह्मपुरा

ण तस्यांनिशायांकर्त्तव्योनरैर्नित्यंप्रजागरः शंभुःपूज्योनिकुंभश्चापिशाचेभ्योवलिंहरेत् मत्स्यमांसानिभूरीणितथामाषोदनंशुभं वृक्षमूलेषुगोष्ठेषुतथाशून्यगृहेषुच चतुष्पथेषुरथ्यासुचत्वरेषुनदीषुच देवालयेषुपुण्येषुराजमार्गेषुनित्यशः तस्यांनिशायांरक्ष्याश्चपिशाचेभ्योथवालकाः द्रष्टव्यंपुंश्चलीनृत्यंनकुर्यात्स्त्रीनिषेवणमिति चैत्रामवास्यायांकृत्यविशेषस्तत्रैव अमायांचैवचैत्रस्यसारमेयैश्चकाश्यपैः वासुदेवाद्वरोलब्धःप्रभूतंभोजनंत्विति तस्मात्त्रपितृन्देवांस्तर्पयित्वाद्विजैःसह शुनामन्नंप्रभूतंचपश्चाद्देयंयथेप्सितं तत्रमंत्रः श्वानौद्वौश्यावशवलौवैवस्वतकुलोद्भवौ ताभ्यामन्नंप्रदास्यामिस्यातामेतावहिंसकाविति इयममावास्यामन्वादि फाल्गुनस्यत्वमावास्येतिमन्वादिगणात् साचश्राद्धे अपराह्णिकी ग्राह्येतिदर्शितमासत्वेनेयंफाल्गुनस्योक्ता अथामायांयोगविशेषेण कृत्यविशेषोहेमाद्रौ शातातपेनोक्तः अमायांतुभवेद्वारोयदाभूमिसुतस्यवै जाह्नवीस्नानमात्रेणगोसहस्रफलंलभेत् इतिभौमावास्या महाभारते अमासोमेचभौमेचगुरुवारेयदाभवेत् तत्पर्वपुष्करंनामसूर्यपर्वशताधिकं इतिसोमभौमगुरुवारेष्वमायोगः तथाशनिवारयोगेप्यमायां फलाधिक्यमुक्तं स्कंदपुराणे अवंतीमाहात्म्ये शनिवारयदामावैजायतेसर्वकामदा तस्यांस्नानंतथादानंश्राद्धंचैवचकारयेत् तस्यहस्तगतालक्ष्मीर्जायतेसर्वदाभुवीति- अथामायांविशाखानुराधाऋक्षयोगेनश्राद्धकरणेफलमुक्तं अमावास्यायदामैत्रविशाखाऋक्षयोगिनी श्राद्धेपितृगणास्तृप्तिंतदाप्नोत्यष्टवार्षिकीं अन्यच्च अमावास्यायदापुष्येरौद्रर्क्षेवापुनर्वसौ द्वादशाब्दंतदातृप्तिंप्रयांतिपितरोर्चिताः अत्रैवान्यदप्युक्तंवासवाजैकपादर्क्षेपितृणांतृप्तिमिच्छतां वारुणेचाप्यदैवत्येदेवानामपिदुर्लभा अमा इतिशेषसंबंधः मैत्रमनुराधारौद्रर्क्षमार्द्रा वासवंधनिष्ठा अजैकपात् पूर्वाभाद्रपदावारुणंशतभिषा आप्यंपूर्वाषाढा इतिनक्षत्रयोगविशेषामावास्या अथामायांपारिभाषिकयोगविशेषेणव्यतीपातयोगउक्तोभारते

अत्रांतरेगृहंतस्याःप्रथमंतनयोमृतः पुनःस्वामीमृतस्तस्याजामाताचततोमृतः आगच्छंत्यास्तदातस्याः
सोमवारान्वितातिथिः अमावास्याबभूवाथमृतसंजीविनीतिथिः साददर्शततोयांतींकांचिद्वृद्धांस्त्रियंतदा तूल
भारभराक्रांतांक्रंदमानांसुदुःखितां वृद्धोवाच अवतारयमेपुत्रितूलभारंशिरःस्थितं एतद्भारभराक्रांतांक्रंदमानां
सुदुःखितां सोमोवाच अमावास्याद्यहेपुत्रिसोमवारयुतातिथिः तूलराशिंनस्पृशामिनियमोयंमयाकृतःपुनर्द
दर्शसायांतींमूलभारवतींस्त्रियं साप्युवाचततःपुत्रिमूलभारोमहानिति अवतार्य्यक्षणंतिष्ठसंगेयास्याम्यहंतव
सोमोवाच अद्यमूलंतथातूलंनस्पृशामिकथंचन ततोश्वत्थतरुंचैवनदीतीरभवंपथि स्नात्वाविष्णुंसमभ्यर्च्य्यश
र्कराभिःप्रदक्षिणां साचकारमहाभागातदेवाष्टोत्तरंशतं भीष्मउवाच यदाप्रदक्षिणावर्त्तकृतंशर्करहस्तया
तदाजीवितवंतस्तेजामातापतिपुत्रकाः नगरंश्रीसमाकीर्णंतद्गृहंचविशेषतः अथायातामहाभागासोमास्वभवनं
प्रति जीवितंवीक्ष्यभर्त्तारंपुत्रींजामातरंतथा अतुलांस्तान्समासाद्यजगामकृतकृत्यतां प्रणिपत्यस्नुषाःसर्वाःप
प्रच्छुस्तांतपस्विनीं स्नुषाऊचुः मृतास्तेतनयादेविपतिजामातृबांधवाः जीवितास्तेकथंदेविमृतास्तेचकथंवद
सोमोवाच गुणवत्यैमयादत्तंव्रतराजप्रभावकं मृतास्तेतद्विपाकेनपतिजामातृपुत्रकाः तूलकंनमयास्पृष्टंमूल
कंचतथैवच अश्वत्थेविष्णुमभ्यर्च्य्यतदातत्रप्रदक्षिणां शर्कराहस्तयाभूयःकृतमष्टोत्तरंशतं जीवितास्ततत्प्रभा
वेणपतिजामातृपुत्रकाः सर्वाभिःक्रियतामद्यव्रतराजंविधानतः भविष्यतिनवैधव्यंसौभाग्यंसंभविष्यति स्नुषा
स्वाःकारयामासतथासोमाव्रतेश्वरं भुक्त्वाभोगान्बहूंस्तत्रपुत्रपौत्रादिभिःसह तैश्चसर्वैःपरिवृताविष्णुलोकमवाप
सा इत्येतत्कथितंपार्थविस्तरेणमयातव युधिष्ठिरउवाच माहात्म्यंव्रतराजस्यकोविधिर्वदविस्तरात् कर्त्तव्यंके
नभीष्मेदंनारीभिःपुरुषेणवा भीष्मउवाच अमावास्यातिथिःपार्थसोमवारान्वितायदा तदापुण्यतमःकालोदेवा

126

ब्र०र०
चैत्र०
६९

नामापिदुर्लभः प्रातरुत्थायव्रतिना स्नानंकार्यंजलाशये स्नात्वामौनेनकौशेयंपरिधायव्रतीततः प्रायादश्वत्थ वृक्षस्यसमीपंकुरुनंदन अश्वत्थमूलेकर्त्तव्याविष्णुपूजासमंत्रका विष्णुपूजामंत्रः व्यक्ताव्यक्तस्वरूपायसृष्टिस्थित्यंतकारिणे आदिमध्यांतहीनायविष्टरश्रवसेनमः एवंसंपूज्यगोविंदंपीतवस्त्राक्षतैःफलैः कुसुमैर्विविधैश्चैवभक्ष्यभोज्यैस्तथाविधैः अश्वत्थपूजनंकार्य्यंप्रोक्तमंत्रेणपांडव अश्वत्थपूजामंत्रः अश्वत्थाहुतमावास गोविंदस्यसदाश्रय अशेषंहरमेपापंवृक्षराजनमोस्तुते इतिसोमायनमः सोमवारायनमः सोमायैनमःएवं पूजाविधिंकृत्वाततःकुर्य्यात्प्रदक्षिणं मौक्तिकैःकांचनैरौप्यैर्हीरकैर्माणिभिस्तथा कांस्यपात्रैस्ताम्रपात्रैर्भक्ष्यपूर्णैः पृथक्पृथक् गृहीत्वाभ्रमणंकार्य्यंप्रादक्षिण्येनपिप्पले तावत्प्रदक्षिणंकार्यंयावदष्टोत्तरंशतं तद्वस्तुजातंविप्रायपुरंध्रीभ्यःप्रदीयते ततोनिरामिषाहारंकुर्य्यान्नारीजनैःसह एषतेकथितोभूयोव्रतराजविधिर्मया द्रौपदींचसुभद्रांच कारयस्वतथोत्तरांउत्तरागर्भसंस्थास्तुजीवितंलभतेचिरात् युधिष्ठिरउवाचयाचाल्पविभवानारीकांचनाद्यैर्विनाकृता साकथंलभतेपूर्णंव्रतराजफलंवद भीष्मउवाच फलैःपुष्पैस्तथाभक्ष्यैर्वस्त्राद्यैरपिपांडव कुर्य्यात्प्रदक्षिणावर्त्तंसापि पूर्णफलंलभेत् व्रतमिदमखिलंनरेंद्रविष्णोःश्रुतमनपायिपराक्रमंत्वयापि पतिसुतधनमिच्छतीपुरंध्रीसपदिकरोतुनचात्रचित्रमस्ति भीष्मउवाच शृणुपार्थप्रवक्ष्येहमुद्यापनविधिंशुभं विनायेनव्रतस्यास्यनपूर्णफलभाग्भवेत् सर्वतोभद्रमध्येतुस्थापयेत्कुंभमक्षतं वृक्षराजंसुवर्णस्यपंचरत्नसमन्वितं तन्मूलेप्रतिमांविष्णोःसौवर्णींचचतुर्भुजां लक्ष्म्यावाहनसंयुक्तामामाषात्तुपलावधि उपचारैरनेकैश्चयथाविभवविस्तरैः नैवेद्यैःपुष्पधूपैश्चदीपैश्चपरितःस्थितैः रात्रौजागरणंकुर्यात्प्रभातेहोममाचरेत् समिद्भिःपैप्पलाभिस्तुपायसेनतिलैस्तथा पूर्णाहुतिंच जुहुयाद्गांचदद्यात्पयस्विनीं द्वादशब्राह्मणाभोज्याघृतपायसमोदकैः उपवीतानिवस्त्राणितेभ्योदद्याच्चदक्षिणां

श्रवणाश्विधनिष्टार्द्रानागदैवतमस्तकैः अमाचेद्रविवारेणव्यतीपातःसउच्यते अत्रदत्तंहुतंजप्तंसर्वंकोटिगुणंभवेत् नागदैवतमश्लेषामस्तकंशीर्षकं सोमावारादियुता अमावास्यासप्तम्यष्टम्यः सूर्यग्रहसमानाउक्ताः तदुक्तं शंखेन अमावास्यातुसोमेनसप्तमीभानुनासह चतुर्थीभौमपुत्रेणसोमपुत्रेणचाष्टमी चतस्रास्तिथयोह्येताःसूर्यग्रहणसन्निभाः स्नानंदानंतथाश्राद्धंसर्वंतत्राक्षयंभवेदिति इयंसोमवारादियुता अमाद्यास्तिथयः कपिलधारातीर्थश्राद्धेश्राद्धादावतिप्रशस्तातदुक्तंकाशीखंडे अमासोमसमायोगेश्राद्धंयद्यत्रलभ्यते तीर्थेकपिलधारेस्मिन्गययापुष्करेण किं दिव्यंतरिक्षभौमानियानितीर्थानिसर्वतः तान्यत्रनिवसिष्यंतिदर्शेसोमदिनान्विते अयंचयोगोदिवैवशस्तः इतिशिष्टाः अथसोमवत्यमावास्याव्रतकथाभविष्ये युधिष्ठिरउवाच हतेषुकुरुमुख्येषुभीमसेनेनकोपिता तथापरेषुसर्वेषुहतेषुयुधिजिष्णुना दुर्योधनकुमंत्रेणजातोऽस्माकंकुलक्षयः नसंतिभुविभूपालावालवृद्धातुराहते अवशिष्टावयंपंचवंशभारतसंज्ञके एकातपत्रमपिमेनराज्यंभुविरोचते दृष्ट्वासंततिविच्छेदं संतापोहृदयेनिशं जीवितेपि जुगुप्सामेनचांगेषुरतिःक्वचित् अश्वत्थामास्त्रनिर्दग्धउत्तरागर्भसंभव अतोमेद्विगुणंदुःखंपिंडविच्छेददर्शनात् किंकरोमिक्वगच्छामिपितामहत्विहाधुना येनसंपद्यतेसद्यःसंततिश्चिरजीविनी भीष्मउवाच शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतं यस्याचरणमात्रेणसंततिश्चिरजीविनी अमावास्यायदापार्थसोमवारयुताभवेत् तस्यामश्वत्थमागत्यपूजयित्वाजनार्दनं अष्टोत्तरशतंकुर्य्यात्तस्मिन्वृक्षेप्रदक्षिणाः तावत्संख्यान्युपादायरत्नधातुफलानि च व्रतराजमिदंराजन्विष्णुप्रीतिकरंपरं उत्तरांकारयप्राज्ञगर्भेजीवमवाप्सति भविष्यतिगुणीपुत्रस्त्रिषुलोकेषुविश्रुतः श्रुत्वापितामहवचःप्रत्युवाचयुधिष्ठिरः युधिष्ठिरउवाच तद्व्रतंव्रतराजाख्यंविस्तरेणप्रकाशय केनप्रकाशितंमर्त्येकेनेदंचकृतंविभो भीष्मउवाच अस्तियासर्वविख्याताकांचीसंज्ञामहापुरी ब्रह्मक्षत्रियविट्शूद्रैःस्वकर्मनिर

तैर्वृता रजताचलसंकाशैःसौधशृंगैर्विराजिता सुवेषैर्नांगरजनैर्नारीभिरुर्शोभिता रूपचातुर्यवर्याभिर्वैश्याभिः समलंकृता अलकेवकुवेरस्यशक्रस्येवामरावती तेजोवतीवरत्नाढ्यापावकस्यमहापुरी तत्रराजारत्नसेनोवभूवामितविक्रमः तस्मिन्शासतिभूचक्रंऋद्धमासीदतीवहि तस्यदेशेवसद्विप्रोवेदवेदांगपारगः देवस्वामीतिनाम्नावैदेवतातिथिपूजकः तस्यभार्यातुविप्रस्यनाम्नाधनवतीशुभा यथार्थनामधेयासालक्ष्मीरिवसविग्रहा तस्यां संजनयामाससप्तपुत्रान्शुभान्वितान् एकांदुहितरंरम्यांनाम्नागुणवतींनृप कृतदाराश्चतेपुत्राविहरंति यथासुखंकन्याकुमारिकाचासीदनुरूपप्रियार्थिनी अत्रांतरेद्विजःकश्चिद्भिक्षार्थीसमुपागतः दीप्यमानः स्वतेजोभिर्मूर्त्तिमानिवपावकः द्वारदेशमथागत्यप्रयुयोजाशिषंतदा देवस्वामिस्नुषाः सप्तसमुत्थायससंभ्रमं भिक्षांप्रत्येकमानीयददुस्तस्मैद्विजन्मने अवैधव्याशिषः प्रादात्ताभ्यः सौभाग्यसंपदांततो गुणवतीमात्राप्राहितासहभिक्षया विप्रायभिक्षांप्रददौकृत्वापादाभिवंदनं आशिषंप्रयुजेविप्रःशुभेधर्मवती भव स्ववैलक्ष्यंगुणवतीश्रुत्वाप्रत्याययौगृहं मात्रेनिवेदयामासआशिषंतेनयोजितां श्रुत्वाधनवतीपुत्रींकरेधृत्वासमाययौ प्रणताभ्योस्नुषाभ्योमेत्वयादत्तावराशिषः अवैधव्यकराःपुत्रसुखसौभाग्यदायकाः सुतायांप्रणतायांचविपरीतंत्वयोदितं भद्रेधर्मवतीभूयाइत्युदीर्यपुनःपुनः आशीःप्रयुक्ताविप्रर्षेकारणंवदसत्वरं द्विजउवाच धन्यासित्वंधनवतिप्रख्यातचरिताभुवि यथायोग्याप्रयुक्तेयंमयाशीर्दुहितुस्तव इयंसप्तपदीमध्येवैधव्यंसमवाप्स्यति धर्माचरणमत्यर्थंकर्त्तव्यंपरमेतया यदागताभवेत्सोमागृहेचेत्तर्हिसुंदरि तस्याःपूजनमात्रेणभवेद्वैधव्यनाशनं अतोमयाशीर्दत्तेयंशुभेधर्मवतीभव श्रुत्वाधनवतीजाताचिंताकुलितलोचना उवाचवचनं दीनंप्राणिपत्यपुनःपुनः धनवत्युवाच सोमागमनमात्रेणभवेद्वैधव्यभंजनं कासासोमात्वयाप्रोक्ताकाजातिः कुत्र

संस्थितिः तस्यावदमहाभागनकालोविस्तरस्यमे द्विजउवाच सासोमारजकीजातिः स्थितिस्तस्याश्च सिंहले सायदायातितेवेश्मलदावैधव्यभंजनं इत्युक्त्वाब्राह्मणोन्यत्रगतोभिक्षाप्रतीक्षया धनवत्यपिपुत्रेभ्यः प्रोवाचवचनंतदा धनवत्युवाच इयंदुर्ललितापुत्राःस्वसागुणवतीशुभा सोमानयनमात्रेणभवेद्वैधव्यभंजनं अस्तियस्यापितुर्भक्तिर्मातुर्वचनगौरवं सप्रयातुसहस्वस्रासोमामानायितुद्रुतं पुत्राऊचुः ज्ञातंमातस्तवस्वांतं पुत्रीस्नेहवशंवदं यतोदेशांतरंपुत्रान्प्रस्थापयसिदुस्तरं अंतरादुस्तरःसिंधुःशतयोजनविस्तरः अशक्यंगमनंतत्रनक्षमागमनेवयं देवस्वाम्युवाच अपुत्रःसप्तभिःपुत्रैरहंयास्यामिसिंहलं आनयिष्यामितांसोमांपुत्रीवैधव्यनाशिनीं एवंवादिनिसक्रोधेदेवस्वामिनितत्क्षणे शिवस्वामीकनिष्ठश्चपुत्रःप्रोवाचसन्नतः मैवंवदमहाभागरोषावेशवशंगतः मयितिष्ठतिकःशक्तोगंतुंद्वीपंहिसिंहलं सयुक्तः सहसोत्थायप्रणम्याशिरसागुरुं प्रतस्थेसहितः स्वस्राद्वीपंसिंहलसंज्ञकं कियद्भिर्दिवसैर्गत्वातीरंप्राप्यसरित्पतेः तंतर्तुमंबुधिंतत्रप्रयासमकरोद्द्विजः सददर्शसविस्तीर्णन्यग्रोधद्रुममंतिके तत्कोटरेसुखासीनागृध्रराजसुतास्त्रयः तत्पादपेततःस्थित्वाताभ्यांनीतंतुतद्दिनं शावकानांकृतेमांसंगृहीत्वाशिशुभोजनं भोजनंदत्तमपितैर्भुंजतेस्मनशावकाः पप्रच्छचाग्रतोगृध्रःशावकान्स्वान्हिविह्वलः गृध्रउवाच कथंनभुंजतेपुत्राभवंतःक्षुधिताअपि आनीतंकोमलंमांसंभवद्योग्यमिदंमया शावकाऊचुः एतद्वृक्षतलेतातमानवौचातिष्ठतः अस्वीकृतेतयोस्तातकथंभुंजामहेवयं एतच्छ्रुत्वासगृध्रस्तुकरुणाहतचेतनः तयोरंतिकमागत्यवचनंप्रत्यभाषत गृध्रउवाच ज्ञातस्तुयुवयोःकामोभोजनंक्रियतामिदं पारमुत्तारयिष्यामिजलधेःप्रातरेवतु ततोरात्र्यांव्यतीतायामुदितेतुदिवाकरे पारमुत्तारितौतौतुगृध्रराजेनवेगिनासिंहलद्वीपमागत्यस्थितौसोमागृहांतिके ततःप्रत्यूषसमयेसम्मृज्यांगनमंडलं लेपनंचक्रतुस्तत्रतद्वासदिनंप्रति

एवंविदधतोस्तत्रपूर्णःसंवत्सरोययौ स्नुषाःपुत्रान्समाहूयसोमापप्रच्छविस्मिता मार्जनंलेपनंकोवाकरोतिमम कथ्यतां एकदैवाद्यजगदुःसर्वाःकार्य्यमिदंहिनः एकदारजकीसोमानिभृतासंस्थितानिशि ददर्शब्राह्मणींकन्यां मार्जयंतींगृहांगनं लिपंतमंगनंप्राप्तंभ्रातरंचसुदुर्गतं सोमापप्रच्छतौगत्वाकौयुवांकथ्यतांममऊचतुस्तौतदापृष्टावावांब्राह्मणपुत्रकौ **सोमोवाच** दग्धास्मिवतनष्टास्मिब्राह्मणौगृहमार्जकौकांगतिंवतयास्यामिपापादस्मादसंशयं पापजात्या स्म्यहंख्याता रजकीसर्वनिंदिता कथंवाब्राह्मणौभूत्वाविरुद्धंमेचिकीर्षथ **शिवस्वाम्युवाच** एषा गुणवतीनामस्वसाममसुमध्यमा इयंसप्तपदीमध्येवैधव्यंसंप्रपत्स्यते तवसान्निध्यमात्रेणभवेद्वैधव्यभंजनं अतो हेतोःसहस्वस्त्रादासकर्मकरोमिते **सोमोवाच** अतःपरंनकर्त्तव्यंयास्यामितवशासनात् इत्युक्तागृहमागत्यस्नुषाभ्यःप्रत्युवाचह यःकश्चिन्ममराज्येस्मिन्म्रियतेमानवःक्वचित् तथैवरक्षणीयोसौयावदागम्यतेमया कस्यचिद्वचनात्कोपिनदग्धव्यःकथंचन तथेत्युक्तास्नुषाभिःसासोमायातामहांबुधिपारमुत्तारयामासक्षणेनद्विजपुत्रकौस्वयमाकाशयानेनसाततारमहांबुधिं प्राप्ताःकांचींपुरींसर्वेनिमेषात्तत्प्रभावतः सोमांधनवतीदृष्ट्वातत्रपूजामथाकरोत् अत्रांतरेशिवस्वामीतदादेशांतरात्स्वसुः ब्राह्मणंरुद्रशर्माणंगुणेनसदृशंस्वसुः ततःसारजकीसोमावैवाहिकमथाकरोत् सुलग्नेचसुनक्षत्रेदेवस्वामीतुकन्यकां ददौतस्मैगुणवतींगुणिनेरुद्रशर्मणे ततोवैवाहिकैर्मंत्रैर्हूयमानेहुताशने अथसप्तपदीमध्येरुद्रशर्मामृतोभवत् रुरुदुर्बांधवाःसर्वेस्थितासोमानिराकुलाआक्रंदःसुमहानासील्लोकानांतत्रपश्यतां धनवत्यैचसातूर्णंव्रतराजप्रभावजं पुण्यंसंकल्प्यविधिवद्ददौमृतिविनाशनं रुद्रशर्मापितस्माच्चव्रतराजप्रभावतः आससादतदाजीवंसुप्तवत्सहसोत्थितः एवंविवाहंनिर्वर्त्यव्रतराजंनिवेद्यच आमंत्र्यतांधनवतींसोमाप्रायाद्गृहंप्रति एवंसारजकीसोमाजीवयित्वामृतंद्विजं चचालहर्षसंपूर्णापूर्णकामास्वमंदिरं

प्रणम्यदंडवद्भूमौप्रार्थयित्वाविसर्जयेत् ॥ इतिभविष्योक्तंसोमवत्यमावास्याव्रतं अथोद्यापनप्रयोगः तिथ्या
दिसंकीर्त्यात्मनअवैधव्यपुत्रपौत्रप्राप्तिपूर्वकातुलसौभाग्यसिद्धिद्वाराअश्वत्थरूपिनारायणप्रीत्यर्थमाचरितसोमव
त्यमावास्यसांगताफलसिद्धयेतदुद्यापनारंभकमहंकरिष्य इतिसंकल्प्य वृताचार्यः सर्वतोभद्रस्थकलशेरौप्यम
यपीठस्थसौवर्णाश्वत्थवृक्षाधस्थंहैमं लक्ष्मीनारायणं इदंविष्णुरितिमंत्रेणपूजयेत् अश्वत्थसोमादिपूजामपि
कुर्यात् तत्रमंत्राःपूर्वोक्ताएवज्ञेयाः कथाश्रवणादिनारात्रिंनयेत् प्रातःअग्निंप्रतिष्ठाप्यअन्वादध्यात् तत्रप्रधानं
लक्ष्मीनारायणमश्वत्थसमित्पायसतिलद्रव्येण प्रत्येकमष्टोत्तरशतसंख्याकाहुतिभिः ब्रह्मादिदेवताश्चैकैकयाज्य
हुत्यायक्षे एवंहोमंसमाप्यद्वादशब्राह्मणान्वस्त्रादिनासंपूज्य लड्डुकपायसमंडकादिपक्वान्नैःसंतर्प्य अश्वत्थ
प्रतिमादिकमाचार्य्यायदत्त्वागांचसोपस्करांदत्त्वाशिषश्चगृहीत्वाभुंजीत इतिसोमवत्यमावास्याव्रतोद्यापनम् ॥
अथसर्वमासेष्वमावास्यासाधारणव्रतानिहेमाद्रौ अमायांतुनिराहारअब्दमेकंसुयंत्रितः शूलंपिष्टमयंकृत्वावर्षां
तेविनिवेदयेत् अनेनभ्रूणहत्यादिपातकहानिररिनाशश्चशिवलोकप्राप्तिश्चभवतीतिशिवधर्मोक्तममायांशूलव्रतं
अथपितृव्रतं हेमाद्रौ अगस्त्यउवाच सर्गादौब्रह्मणासृष्टास्तमूचुःपितरस्तदा व्रतिंनोदेहिभगवन्यथावर्तामहे
वयं ब्रह्मोवाच अमावास्यादिनंवोस्तुतस्यांकुशतिलोदकैः तर्पितामानुषैस्तृप्तिंपरांगच्छतनान्यथा तिलांदेया
स्तथैतस्यामुपोष्यपितृभक्तितः चिरायतस्यसंतुष्टावरंयछतमाचिरं तस्मादस्यांतिथौविद्वानेतत्संवत्सरमाचरेत्
इतिवाराहपुराणोक्तममायांपितृव्रतं भविष्योत्तरोक्तंपितृव्रतंयथाब्रह्मोवाच पितरःस्वदिनेपिंडैरिष्टाःकुर्वंतिस
र्वदा प्रजावृद्धिंधनंरक्षामायुष्यंवस्तुमेवच मूलमंत्राःस्वसंज्ञाभिरंगमंत्राश्चकीर्तिताः गंधपुष्पोपहारैश्चयथा
शक्तिविधीयते पूजातुवित्तशाठ्येनकृतापितृफलप्रदाः आज्यधारासमिद्भिश्चदधिक्षीरान्नमाक्षिकैः पूर्वोक्तफलदो

होमस्ततःशांतेनचेतसा इतिभविष्यपुराणोक्तममायांपितृव्रतं अथास्यांपयोव्रतंब्रह्मपुराणे वर्षमेकंभवेद्यस्तुपं
चदश्यांपयोव्रतं पंचदश्याममावास्यायां वत्सरांतेजलकुंभयुतानिवासांसिदद्यात् तेनविष्णुलोकप्राप्तिर्भवति
इतिब्रह्मपुराणोक्तममायांपयोव्रतम् स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्र
विचारसाररसवित्सहृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेः पादांवुजार्चारतोजीव्यात्पुत्रक
लत्रमित्रसहितः संपालयन्क्ष्मांचिरं १ रणवीरसिंहभूपेशकारितेकृत्यसागरे अभव
चैत्रकृत्यानांरम्योरत्नसमुच्चयः ॥ २ ॥ इति श्रीमत्सूर्यवंशावतं
सरघुकुलतिलक श्रीरणवीरसिंहमहाराज
कारितेकृत्यरत्नाकरेचैत्र
मासकृत्यरत्न
समुच्चयः ॥

◆

134

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिवरामल्लाधिकारे चैत्रमासोमुद्रितस्समाप्तिमगमत्
संवत् १९४१ ज्यैष्ठ प्र. २०

वैशाखमासप्रारम्भः

॥ ॐस्वस्तिश्रीगणेशायनमः ॥ अथवैशाखमासेकृत्यनिर्णयः ॥ मेषसंक्रमणेपराः प्राक्चदशघटिकाः पुण्यकालः रात्रौचेत्प्रागुक्तोनिर्णयः मध्याविषुवतिप्रोक्ताइतिसामान्यनिनिर्णयेनारदीयवचनात् अत्रधर्मघटादिदानम् पृथ्वीचंद्रोदये तीर्थेचानुदिनंस्नानंतिलैश्चपितृतर्पणम् दानंधर्मघटादीनांमधुसूदनपूजनम् माधवेमासिकुर्वीतमधुसूदनतुष्टिदम् स्कंदपुराणे वैशाखेयःक्षिपेन्मासमेकभक्तेनमानवः सयातिश्रेष्ठतांलोकेपूजितोधनवानपि मत्स्यपुराणे वैशाखेपुष्पलवणंवर्जयित्वातुगोप्रदः भूत्वाविष्णुपदेकल्पंस्थित्वाराजाभवेदिह विष्णुपदेविष्णुपुरे भविष्यपुराणे वैशाखेमासिराजेंद्रयःकुर्यान्नक्तभोजनम् दध्योदनंतुभुंजानोजितक्रोधोजितेंद्रियः गोष्ठेसायमधःशायीनिशायामेकवस्त्रधृक् नियमेचयथोद्दिष्टंसामान्यंसर्वदाचरेत् महाभारते निस्तरेदेकभक्तेनवैशाखंयोजितेंद्रियः आयुष्यंब्रह्मचर्यंचमहापातकनाशनम् निस्तरेदातिवाहयेत् ब्रह्मचर्यमत्रव्रतांगम् महापातकनाशश्चात्रफलम् विष्णुधर्मोत्तरे हेमाद्रौ यःक्षिपेदेकभक्तेनवैशाखेपूजयेद्धरिम् नरोवायदिवानारीज्ञातीनांश्रेष्ठतांव्रजेत् तत्रैव मार्कंडेयउवाच चैत्र्यांतुसमतीतायांयावन्मासंदिनेदिने पूजयेद्देवदेवेशंनृसिंहमपराजितम् होमंसिद्धार्थकैःकुर्यात् प्रत्यहंप्रयतोनरः वैशाख्यांकनकंदद्यात्त्रिरात्रोपोषितोनृप ज्ञानावाप्तिकरंह्येतद्व्रतंबुद्धिविवर्द्धनमिति तथाचात्रापूपदानम् तत्रच अपूपानांप्रदानेनवैशाखेसुखमश्नुते राजमार्तंडेपि तुलामकरमेषेषुप्रातःस्नायीसदाभवेत् हविष्यंब्रह्मचर्यंचमहापातकनाशनमिति पृथ्वीचंद्रोदयेविष्णुस्मृतिपाद्मयोः ॥ अथवैशाखस्नानविधिः ॥ अत्रसौरोमासउक्तः अन्यत्रपक्षद्वयंपाद्मे मधुमासस्यशुक्लायामेकादश्यामुपोषितः पंचदश्यांतुमेधावीरमेषसंक्रमणेपिवाः वैशाखस्नाननियमंब्राह्मणानामनुज्ञया मधुसूदनमभ्यर्च्यकुर्यात्संकल्पपूर्वकम् तत्रमंत्रः वैशाखंसकलंमासमेषसंक्रमणेरवेः प्रातःसनियमःस्नास्येप्रीयतांमधुसूदनः मधुहंतुःप्रसादेनब्राह्मणानामनु

ग्रहात् निर्विघ्नमस्तुमेपुण्यंवैशाखस्नानमन्वहम् प्रार्थनाच माधवेमेषगेभानौमुरारेमधुसूदन प्रातःस्नानेनमेनाथ फलदोभवपापहन्निति तीर्थविशेषोपि तत्रैवोक्तः मेषसंक्रमणेभानोर्माधवेमासियत्नतः महानद्यांनदीतीर्थेनदे सरसिनिर्झरे देवखातेतथास्नायादथप्राप्तेजलाशये दीर्घिकाकूपवापीषुनियतात्माहरिंस्मरन्इति संकल्पेचतीर्थनामग्राह्यम् अज्ञातेतुविष्णुतीर्थमितिवदेत् तथाच तत्रैव यदानज्ञायतेनामतस्यतीर्थस्यभोद्विजाः तत्रेत्युच्चारणंकार्यंविष्णुतीर्थमिदंत्विति तीर्थस्यदेवताविष्णुसर्वत्रापिनसंशयः अथान्योपिविशेषस्तत्रैवपाद्मे तुलसीकृष्णगौराख्यातयाभ्यर्च्यमधुद्विषं विशेषेणतुवैशाखेनरोनारायणोभवेत् माधवंसकलंमासंतुलस्यायोर्चयेन्नरः त्रिसंध्यंमधुहंतारंतस्यनास्तिपुनर्भवः तथाच प्रातःस्नात्वाविधानेनमाधवेमाधवप्रिये योश्वत्थमूलमासिंचेत्तोयेनबहुनासदा कुर्य्यात्प्रदक्षिणंतंतुसर्वदेवप्रियंततः पितृदेवमनुष्यांश्चतर्पयेत्सचराचरं योश्वत्थमर्च्चयेदेवमुदकेनसमंततः कुलानामयुतंतेनतारितंस्यान्नसंशयः कंडूयपृष्ठतोगांतुस्नात्वापिजलतर्पणम् कृत्वागोविंदमभ्यर्च्यनदुर्गतिमवाप्नुयात् तथाचात्रव्रतविशेषोपि एकभक्तमथोनक्तमयाचितमतंद्रितः माधवेमासियःकुर्य्याल्लभतेपुण्यमीप्सितम् वैशाखेविधिनास्नानंदेवनद्यादिकेबहिः हविष्यंब्रह्मचर्य्यंचभूशय्यानियमास्थितिः व्रतंदानंदमोदेवमधुसूदनपूजनम् अहिजन्मसहस्रोत्थंपापंहरतिदारुणमिति मदनरत्नेस्कांदे प्रपाकार्य्याचवैशाखेदेवेदेयागलंतिकाः उपानद्व्यजनच्छत्रसूक्ष्मवासांसिचंदनम् जलपात्राणिदेयानितथापुण्यगृहाणिच यानिकानिविचित्राणिद्राक्षारंभफलानिच देयानितानिवैशाखेमधुसूदनप्रीतये तिथितत्वेच ददातियोहिमेषादौशक्तूनंबुघटान्वितान् पितृनुद्दिश्य विप्रेभ्यःसर्वपापैःप्रमुच्यते तथा वैशाखेयोघटंपूर्णंसभोज्यंवैद्विजन्मने ददातिसुरराजेंद्रसयातिपरमांगतिम् एवं संपूर्णस्नानाशक्तोप्यहंवास्नायात् तदुक्तं तत्रैवपाद्मे त्रयोदश्यांचतुर्दश्यांवैशाख्यांवादिनत्रयम् अपिसम्यग्विधानेन

नारीवापुरुषोपिवा प्रातःस्नातःसनियमः सर्वपापैःप्रमुच्यते इतितथाच तत्रैव निक्षिप्यजलपात्रेचप्रतिमाधव
मासके माधवंयेर्चयिष्यंतिदेवतास्तेनराभुवि स्वर्णपात्रेथवारौप्येताम्रेवामृण्मयेपिवा तोयस्थंयोर्चयेद्देवंशालि
ग्रामाशिलोद्भवम् प्रतिमांवामहाभागतस्यपुण्यमनंतकमिति हेमाद्रौ वामनपुराणेच वैशाखेपुष्पलवणंवर्जयित्व
चगोप्रदः एतत्कांतिव्रतंनामकांतिसौभाग्यदायकमिति विष्णुरेवात्रदेवता यदावैशाखेमलमासोभवति तदाका
म्यानां तत्रैवसमाप्तिनिषेधान्मासद्वयम् तन्नियमांश्चकर्त्तव्याः मासोपवासचांद्रायणादिसमाप्तिस्तुमलमासएव
तदुक्तंदीपिकायांनियतंत्रिंशद्दिनत्वाच्छुभेमास्यारभ्यसमापयेत् मलिनेमासोपवासव्रतमिति अत्रदानविशेषउक्तो
ऽपरार्केवामनपुराणे गंधाश्चमाल्यानितथावैशाखेसुरभीणिच देयानिद्विजमुख्येभ्योमधुसूदनतुष्टये एवंस्नानादि
नियमंविधिनाविधाय तस्योद्यापनम् तदुक्तं तत्रैव मासमेवंबहिःस्नात्वा नद्यादौविमलेजले एकादश्यांच
द्वादश्यांपौर्णमास्यामथापिवा उपोष्यनियतोभूत्वाकुर्य्यादुद्यापनंबुधइत्युद्यापनविधानम् तत्रैवाभिधास्यते अ
थवैशाखकृष्णप्रातिपदायां तिथिपत्वेनवह्निपूजाविधानं ब्रह्मपूजा वैशाखस्नानादिविधिः वैशाखकृष्णद्वितीयास
मानकल्पादि अत्रकल्पादिविधानोक्तं श्राद्धदानादिकार्यं तिथिपत्वेनब्रह्मपूजापि वैशाखकृष्णतृतीयायांगौरी
व्रतांगत्वेनप्रीतिदेव्याःपूजनं कंकोलोदकप्राशनं वैशाखकृष्णचतुर्थ्यां श्रावणादिसंकष्टव्रतांगत्वेन गणपतिव्रतंश
तपत्रप्राशनं वैशाखकृष्णपंचम्यांतिथिपत्वेननागानांपूजनं वैशाखकृष्णषष्ठ्यांतिथिपत्वेन स्कंदपूजनं वैशाखकृ
ष्णसप्तम्यांचतिथिपत्वेनसूर्यपूजनं वैशाखकृष्णाष्टम्यांचैत्रकृष्णादित्वेनशीतलाव्रतविधानम् वैशाखेशक्तुसंयावं
साज्यंशर्करयान्वितमितिस्त्रीभिःकार्यम् चैत्रवैशाखकृष्णशुक्लनवम्योश्चंडीपूजनमुक्तं भविष्योत्तरे निर्णयामृते वै
शाखेमासिराजेंद्रनवम्यांपक्षयोर्द्वयोः उपवासपरोभूत्वापूजयानश्चचंडिकां हंसकुंदेंदुसंकाशंतेजसाध्रुवसन्निभम् वि

मानवरमारुह्यदेवलोकेमहीयतइति वैशाखकृष्णदशम्यांमार्गशीर्षादारभ्योभयदशमीव्रतत्रयांगत्वेनधर्मराजपूजा दिशांपूजाचकार्या इतिविष्णुधर्मोत्तरे वैशाखकृष्णैकादशीवरूथिनी तथाचभविष्योत्तरे युधिष्ठिरउवाच वैशाखस्यासितेपक्षेकिंनामैकादशीभवेत् महिमानंकथयमेवासुदेवनमोस्तुते श्रीकृष्णउवाच सौभाग्यदायिनीराजन् इहलोकेपरत्रच वैशाखकृष्णपक्षेतुनाम्नाचैववरूथिनी वरूथिन्याव्रतेनैवसौख्यंभवतिसर्वदा पापहानिश्चभवति सौभाग्यप्राप्तिरेवच दुर्भगायाकरोत्येनांसास्त्रीसौभाग्यमाप्नुयात् लोकानांचैवसर्वेषांभुक्तिमुक्तिप्रदायिनी सर्वपापहरान्नृणांसर्वपापनिकृंतनी वरूथिन्याव्रतेनैवमांधातास्वर्गतिंगतः धुंधुमारादयःसर्वेराजानोवहवस्तथा ब्रह्मकपालनिर्मुक्तोबभूवभगवान्भवः दशवर्षसहस्राणितपस्तप्यंतियेनराः सतेषांफलमाप्नोतिवरूथिन्याव्रतादपि श्रद्धावान्कुरुतेयस्तुवरूथिन्याव्रतंनरः वांछितंलभतेसोपिपरत्रेहापिमानवः पवित्रापावनीह्येषामहापातकनाशिनी भुक्तिमुक्तिप्रदाह्येषाकर्त्तृणांराजसत्तम अश्वदानात्परंदानंनृपश्रेष्ठंगजस्यतु गजदानाद्भूमिदानंतिलदानंततोधिकं अन्नदानात्परंदानंनभूतंनभविष्यति पितृदेवमनुष्याणांतृप्तिरन्नेनजायते तत्समंकविभिःप्रोक्तंकन्यादानंनृपोत्तम धेनुदानंचततुल्यमित्याहभगवान्स्वयम् एतेभ्यःसर्वदानेभ्योविद्यादानंविशिष्यते तत्फलंसमवाप्नोति नरःकृत्वावरूथिनीं कन्यावित्तेनजीवंतियेनरःपापमोहिताः पुण्यक्षयांतेगच्छंतिनिरयंयातनायुतम् तस्मात्सर्वप्रयत्नेननग्राह्यंकन्यकाधनम् कन्यांपुण्येनयोदद्याद्यथाशक्तिरलंकृताम् तत्पुण्यसंख्यांनृपतेचित्रगुप्तोनवेत्यलम् तत्तुल्यपुण्यमाप्नोतिनरःकृत्वावरूथिनीं कांस्यंमांसंमसूरान्नंचणकान्कोद्रवांस्तथाशाकंमधुपरान्नंचपुनर्भोजनमैथुने वैष्णवोव्रतकर्त्ताचदशम्यांदशवर्जयेत् द्यूतंक्रीडांचनिद्रांचतांबूलंदंतधावनम् परापवादपैशून्यंस्तेयंहिंसांतथारतिम् क्रोधाद्यनृतवाक्यंचएकादश्यांविवर्जयेत् कांस्यंमांसंमसूरान्नंक्षौद्रंतैलंविभाषणम् व्यायामंचप्रयासंचपुनर्भोजनमैथुने

स्पृष्टास्पृष्टिंपरद्रोहं द्वादश्यांपरिवर्जयेत् अनेनविधिना राजन्विहितेयंवरूथिनी रात्रौजागरणंकुर्यात्पूजितो मधुसूदनः सर्वपापविनिर्मुक्तास्तेयांतिपरमांगतिम् तस्मात्सर्वप्रयत्नेनकर्त्तव्यापापभीरुभिः आदित्यतनयाद्भीतैर्नरैर्देववरूथिनी पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् सर्वपातकनिर्मुक्तोविष्णुलोकेमहीयतेइतिभविष्यपद्मयोर्वैशाखकृष्णावरूथिन्येकादशीव्रतकथा वैशाखकृष्णद्वादश्यांतिथीशपूजात्वेनहरिपूजाभोजनदक्षिणादिभिर्वैष्णवद्विजानांपरिचर्याकार्या वैशाखकृष्णत्रयोदशीगौरीकल्पादि अत्रापिकल्पादिकृत्यत्वेनश्राद्धदानादेरक्षयफलकल्पादिगुणप्रतिपादनात् वैशाखकृष्णचतुर्दश्यांमासशिवरात्रिचतुर्दशीव्रतांगत्वेनवर्षशिवरात्रिव्रतवदुपवासजागरणप्रहरचतुष्टयपूजादिविधानंसर्वकृष्णचतुर्दशीषुकार्य्यम् वैशाखस्यामावास्यायां श्राद्धदानादिकंविधेयम् अकरणेप्रत्यवायः आमास्याव्यतीपातपौर्णमास्याष्टमीषुच विद्वान्श्राद्धमकुर्वाणोनरकंप्रतिपद्यत इतिवैशाखकृष्णपक्षकृत्यनिर्णयः अथशुक्लपक्षकृत्यनिर्णयः वैशाखशुक्लप्रतिपदायाम् आरोग्यप्रतिपदाव्रतांगत्वेन धातृनामानंसूर्यम् पूजाव्रतंचकुर्यात्तत्रातिथिपत्वेनवन्हिपूजामपिकुर्य्यात् वैशाखशुक्लद्वितीयायांनीललोहितकल्पादि तत्रकल्पादिश्राद्धदानादिविधानंकुर्यात् अत्रविशेषोनारदीये राधशुक्लद्वितीयायांभास्करंभवनाधिपंचतुर्वक्त्रस्वरूपंचसमभ्यर्च्यविधानतःभोजयित्वाद्विजान्भक्त्याभास्करंलोकमाप्नुयात् वैशाखशुक्लतृतीया अक्षयतृतीया इयंगौरीव्रतेपूत्तराकार्या रंभाख्यांवर्जयित्वातुतृतीयांद्विजसत्तम अन्येषुसर्वकार्येषुगणयुक्ताप्रशस्यते इतिब्रह्मवैवर्त्तात् गणोत्रगणेशःतद्देवाहचतुर्थीतृतीयाविद्धातृतीयाचतयापुनः कर्त्तव्याव्रतिभिस्तातधर्मकामार्थतत्परैरितिस्कंदपुराणे द्वितीयाविद्धानिषेधप्रयोजकस्त्वत्रद्वितीयावेधोनत्रिमुहूर्तपरःकिंतुकलाकाष्ठादिरूपोपि अतएवतृतीयाहगौरीव्रतेस्वल्पापिपराकार्याव्रतांतरेषुतुत्रिमुहूर्त्तवेधेनत्याज्यत्वं द्वितीयायाअपित्रिमुहूर्त्तायाःपृथग्ग्राह्यत्वमि

तियदातुचतुर्थीयुताकिंचिदपिनलभ्यतेदागौरीव्रतंत्रिमुहूर्त्तालाभेचइतरव्रतेष्वपिद्वितीयाविद्धापिग्राह्याएकादशीतृतीयाचषष्ठीचैवचतुर्दशीपूर्वविद्धापिकर्त्तव्यायदिनस्यात्परेहनीतिवृद्धवसिष्ठवचनात् अत्रसौभाग्यगौरीव्रतांगत्वेन उमादेवीपूजादधिप्राशनं केवलगौरीव्रतांगत्वेनविजयागौरीपूजागोमयप्राशनंच इयंचत्रेतायुगादितत्रश्राद्धंनित्यं काम्यंच युगादीन्प्रक्रम्यपानीययप्यत्रातिलैर्वीमिश्रंदद्यात्पितृभ्यःप्रयतोमनुष्यइतिविष्णुपुराणात् श्राद्धेत्वियमपरान्हव्यापिनीग्राह्यातस्यापरान्हकालवचनात् कालव्याप्तिशास्त्रस्यसर्वापेक्षयाव्यापकत्वात्अतएवअमावास्याश्राद्धमुक्तंकालादर्शे एवंमन्वंतरादीनांयुगादीनांविनिर्णयःमहालयस्यपक्षस्यह्यष्टकानामपिस्मृतइति यत्तुद्वेशुक्लेद्वेतथाकृष्णेयुगादीकवयोविदुः शुक्लेपूर्वान्हिकग्राह्येकृष्णेचैवापराह्णिक इतिवचनं तदपिउपक्रमकालपरं शुक्लपक्षस्यपूर्वाह्णेश्राद्धंकुर्याद्विचक्षणःकृष्णपक्षेपरान्हेतुरौहिणंतुनलंघयेदितिवायवीयवचनात् रौहिणमुहूर्त्तंनलंघयेदित्युक्तं यद्वा शुक्लपक्षगतायुगादितिथिःपूर्वस्मिन्दिनेकुतपोत्तरादारभ्यप्रवृत्तोत्तरदिनेवृद्ध्याअपरान्हेपिकिंचित्वर्त्ततेतदासंपूर्णाया अपराह्णव्यापित्वेनपूर्वदिनेनुगतायाएवग्राह्यताप्राप्तिःतदपवादत्वेनकुतपद्वयविद्धरूपएवपूर्वाह्णव्यापिनी अपराह्णनस्पर्शिन्युत्तरापिग्राह्येतिविधीयतेनचतदापराह्णशास्त्रस्यात्यंतवाधः अपराह्णेपिकिंचित्तस्याविद्यमानत्वात् हेमाद्रिस्तुमन्वादिष्विवनिर्णयः समतयामन्वद्यायुगाद्याश्चतिथयस्तासुमानवः स्नात्वाहुत्वाच दत्वाचजप्त्वानंतफलंलभेदितिभारतोक्तेः स्नानादौतूत्तराकेचित्तुवैशाखस्यतृतीयांयःपूर्वविद्धांकरोतिवै हव्यंदेवानगृह्णंतिकव्यंचपितरस्तथेतिगोभिलवचनाच्च श्राद्धेपिपूर्वाह्णव्यापिन्युत्तराकार्य्येतिवदंति तत्कालादर्शादिविरुद्धामयुक्तंच अपरान्हःपितृणांअपरान्हेतुपैतृकं अपरान्हेपितृक्रियेत्यादिवचनैरपरान्हकालस्याभिधानात् कर्मणो यस्ययःकालस्तत्कालव्यापिनीतिथिः तयाकर्माणिकुर्वीतह्रासवृद्धीनकारणमितिवाक्यादपराह्णव्यापिन्याएवश्रा

143

द्वेग्राह्यत्वात् पूर्वलिखितगोभिलवचनंत्वनाकरं साकरत्वेपिपित्रुद्देशेनक्रियमाणतर्पणादिविषयेव्याख्येयंनारदवचनंतुद्वेशुक्लेइतिवचनाद्देव्याख्येयं इदंचयुगादिकृत्यंयुगादितिथिमध्यएवकर्त्तव्यं मन्वादौचयुगादौचग्रहणेचंद्रसूर्ययोः व्यतीपातेवैधृतौचतत्कालव्यापिनीक्रियेति स्कंदपुराणात् अत्रकृत्यमुक्तं ब्रह्मपुराणे वैशाखेमासिशुक्लायांतृतीयायांजनार्दनःयवानुत्पादयामासयुगंचारब्धवान्कृतं ब्रह्मलोकात्रिपथगांपृथिव्यामवतारयत् तस्यांकार्य्यौयवैर्होमो यवैर्विष्णुंसमर्चयेत्यवान्दद्याद्द्विजातिभ्यः स्वयंचप्राशयेद्यवान्पूजयेच्छंकरंगंगांकैलासंचहिमालयंभगीरथंचनृपतिममराणांसुखावहंस्नानंदानंतपःश्राद्धंजपहोमादिकंचयत् श्रद्धयाक्रियतेतत्रतदनंत्यायकल्प्यतेसिंधोस्तीरेविशेषेणसर्वमक्षयमुच्यते होमश्चायंविष्णवेस्वाहा उपक्रमेतथादर्शनात् यवप्राशनंतद्विकारइतिवृद्धाः विष्णुःवैशाखस्यतृतीयायामुपोषितोऽक्षतैर्वासुदेवमभ्यर्च्यतानिवदत्त्वाच पापेभ्यःपूतोभवति यच्चतस्मिन्नहनिप्रयच्छतितदक्षयत्वमाप्नोति अभ्यर्च्यतृतीयायामित्यन्वयः तेनोपवासोद्वितीयायामित्यर्थात् अक्षतैर्यवैः अक्षतास्तुयवाः प्रोक्ताइत्यादिकोशात् भविष्येयमः वैशाखेशुक्लपक्षेतुतृतीयायांतथैवचगंगातोयेनरःस्नात्वासर्वपापैःप्रमुच्यते भविष्यपुराणे इत्येषातिथिरित्येवंतृतीयालोकविश्रुता सदाविशेषतःपुण्यावैशाखेमासियाभवेत्तुवारिदानंप्रशस्तंतस्यान्मोदकानांचभारत वैशाखमासिराजेंद्रतृतीयाचंदनस्यच चंदनस्यदानंप्रशस्तमित्यनुषंगःदेवीपुराणे तृतीयायांतुवैशाखेरोहिण्यर्क्षेप्रपूज्यच उदकुंभप्रदानेनब्रह्मलोकेमहीयते कलधौतंतथाचान्नंघृतंचापिविशेषतः अस्यांदत्तमक्षय्यंस्यात्तेनेयंत्वक्षयास्मृता पूज्येतिदेवींदुर्गामिति क्रमात्तेनरोहिणीनक्षत्रयुक्तायामक्षयतृतीयायांदुर्गापूज्यापूर्वोदितकुंभदानस्यब्रह्मलोकमहितत्वंफलमित्यर्थःकलधौतंहिरण्यदानस्याप्यत्राक्षयत्वंकलधौतान्नघृतदानमत्यंतप्रशस्तमित्यर्थः तथाइत्येषाकथिताराजन्तृतीयातिथिरुत्तमा तृतीयायांतुवैशाखेब्रह्मलोकेमहीयते व

द्दनीयघटीभक्ष्यंलड्डुकादिभोज्यंशष्कुल्यादिभविष्योत्तरे वैशाखस्यतृतीयायांश्रीसमेतंजगद्गुरुंनारायणंपूजये त्पुष्पधूपविलेपनैः वस्त्रालंकारसद्भावैर्नैवेद्यैर्विविधैस्तथा ततस्तस्याग्रतोधेनुंलवणस्याढकेनतु कुर्यात्कुरुकुलश्रेष्ठचतुर्भागेनवत्सकंरुरुचर्मोपरिस्थाप्यकल्पयित्वाविधानतः श्रीधरःश्रीपतिःश्रीमान् श्रीशःसंप्रीयतामिति अनेनविधिनादत्त्वाधेनुंविप्रायभक्तितः गोसहस्रदशगुणंप्राप्नोतिहिनसंशयः नारदीयेपि तत्रराधातृतीयायामित्युपक्रम्यपुष्पधूपविलेपनैः यद्वागंगांभसिस्नातोमुच्यतेसर्वकिल्बिषैः अक्षतैःपूजयेद्विष्णुंस्नायादप्यक्षतैर्नरःसक्तून्संभोजयेद्विप्रान्स्वयमभ्यवहरेद्व्रतान् एवंकृत्वाव्रतंविप्रनरोविष्णुपरायणः विष्णुलोकमवाप्नोतिसर्वदेवनमस्कृत इति अत्रदानविशेषस्तत्रैवभविष्ये इमामक्षयतृतीयांप्रक्रम्य उदकुंभान्सकनकान्सान्नान्सर्वरसैःसहयवगोधूमचणककान्सक्तून्दध्योदनंतथाग्रैष्मिकंसर्वमेवात्रसस्यंदानेप्रशस्यते देवीपुराणे तृतीयायांतुवैशाखरोहिण्यर्क्षेप्रपूज्यचउदकुंभप्रदानेनशिवलोकेमहीयते मंत्रस्तु एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः अस्यप्रदानात्तृप्यंतुपितरोपिपितामहाः गंधोदकतिलैर्मिश्रैःसान्नंकुंभंफलान्वितं पितृभ्यःसंप्रदास्यामिअक्षय्यमुपतिष्ठतुअत्रश्राद्धंपिंडरहितंकार्य्यं अयनद्वितयेश्राद्धंतथाचविषुवद्वये युगादिषुचसर्वासुपिंडनिर्वपणादृतेइतिहेमाद्रौ पुलस्त्यवचनात् अत्ररात्रिभोजनेप्रायश्चित्तमुक्तम्ऋग्विधानेरात्रौभुंक्तेवत्सरेतुमन्वादिषुयुगादिषु आभिस्त्वष्टिमंत्रंचजपेदशनपावनमिति अपरार्केयमःकृतोपवाससलिलंयुगादिषुदिनेषुचदास्यंत्यन्नादिसहितंतेषांलोकामहोदयाइतिवैशाखेमलमासेसतितत्रैवयुगादि दिनंकार्य्यम् तथाचहेमाद्रौऋष्यशृंगः दशहराःस्वतोत्कर्षःचतुर्ष्वापियुगादिषु उपाकर्मणिचोत्सर्गेह्येतद्दृष्टंवृषादितइति कालादर्शेपि अब्दोदकुंभमन्वादिमहालययुगादिष्वतिमलमासकृत्येषुगणनात् महालयशब्देनमन्वादित्रयोदश्युच्यतेइतिमाधवस्मृतिचंद्रिकायांतु मासद्वयेप्यकर्त्तव्यमित्युक्तंयौगादिकंमासिकंचश्राद्धंचापराक्षिकं मन्वादिकं

तैर्थिकंचकुर्यान्मासद्वयेपिचेति अपरपक्षोपिकृष्णपक्षः नतुमहालयः तस्यतत्रनिषेधात् मदनरत्नेमरीचिरपिप्रतिमासंमृताहेचश्राद्धंतत्प्रतिवासरं मन्वादौचयुगादौचतन्मासोरुभयोरपीति वत्सरंक्रियमाणंकल्पादिश्राद्धमितिसएवव्याचख्यौ अत्रश्राद्धकरणेप्रायश्चित्तमृग्विधानेनयस्वपावामंत्रंचशतवारंतदाजपेत् युगादयोयदान्यूनाः कुरुते नैवचाप्ययइति अत्रसमुद्रेस्नानंप्रशस्तंतदुक्तं पृथ्वीचंद्रोदये सौरपुराणेयुगादौचनरःस्नात्वाविधिवल्लवणे दधैगोसहस्रप्रदानस्यकुरुक्षेत्रेहियत्फलं तत्फलंसमवाप्नोतिभूमिदानस्यचध्रुवमिति इयमेवतृतीयापरशुरामजयंती साप्रदोषव्यापिनीग्राह्या तदुक्तंस्कांदेभार्गवार्चनदीपिकायां वैशाखस्यासितेपक्षेतृतीयायांपुनर्वसौ निशायाः प्रथमेयामे रामाख्यसमयेहरिः स्वोच्चगैः षड्ग्रहैर्युक्तेमिथुनेराहुसंस्थिते रेणुकायास्तुयोगर्भादवतीर्णोभुविस्वयमिति दिनद्वयेतद्व्याप्तावंशतःसमव्याप्तौचपरा अन्यथापूर्वैः तदुक्तं तत्रैवचभविष्ये शुक्लतृतीयावैशाखेशुद्धोपोष्यादिनद्वयेनिशायांपूर्वयामेचेदुत्तरान्यत्रपूर्वकेति अथाक्षयतृतीयाव्रतविधिःभविष्ये श्रीकृष्णउवाच वैशाखस्यतृतीयायांश्रीसमेतंजगद्गुरुं नारायणंपूजयेथाः पुष्पधूपविलेपनैरिति योस्यांददातिकरकान्वारिवीजसमन्वितान् प्रयातिपुरुषोवीरलोकान्वैहेममालिनः वीजमन्नं हेममालिनः सूर्यस्य बहुनात्र किमुक्तेन किंवह्वक्षरमालया वैशाखस्यसितामेकां तृतीयामक्षयांशृणु अस्यांस्नानंजपोहोमः स्वाध्यायः पितृतर्पणं दानंचक्रियतेतस्यांस्वल्पंवायदिवाबहु तत्सर्वमक्षयंप्रोक्तंतस्मात्साह्यक्षयास्मृता आदिकृतयुगस्येयंयुगादिस्तेनकथ्यते सर्वपापप्रशमनी सर्वसौभाग्यदायिनी पुरामहोदयेपार्थवणिगासीत्सनिर्द्धनः तेनश्रुतावाच्यमानातृतीयारोहिणीयुता यदास्याद्बुधसंयुक्तातदासाहमहाफला तस्यांयद्दीयते किंचिदक्षयंस्यात्तदेवहि इतिश्रुत्वातुगंगायांसंतर्प्यपितृदेवताः गृहमागत्यकरकान्सान्नानुदकसंयुतान् अन्नपूर्णान्बृहत्कुंभानूजलेनविमलेनचयवगोधूमलवणान्सक्तून्दध्योदनंतथा द्राक्षाक्षीरविकरांश्चसहिरण्यान्स्वशक्तितः

व्र०र०
वैशा०
९

सुविशुद्धेनमनसाब्राह्मणेभ्योददौवणिक् भार्यया वार्यमाणोपिकुटुंबासक्तचित्तया तयातस्यास्थिरेसत्वेमत्वासर्वंविनश्वरं धर्मासक्तमतिःपार्थकालेनबहुना ततः जगामपंचत्वमसौवासुदेवमनुस्मरन् ततःसक्षत्रियोजातःकुशावत्यां युधिष्ठिर बभूवचाक्षयातस्यसमृद्धिर्द्धर्मसंयुता इयाजसमहायज्ञैःसमाप्तवरदक्षिणैः सददौगोहिरण्यानिदानान्यन्यान्यहर्निशं वुवुजेकामतोभोगान्दीनांधांस्तर्पयन्शनैः तथाप्यक्षयमेवास्यलयंयातितद्धनं श्रद्धापूर्वंतृतीयायांयद्दत्तंविभवंविना इत्येतत्तेसमाख्यातंश्रूयतामत्रयोविधिः तृतीयांतांसमासाद्यसंतर्प्यपितृदेवताः एकभावंतदाकुर्याद्वासुदेवंप्रपूजयेत् उदकुंभान्सकरकान्सान्नान्सर्वरसैःसह ग्रैष्मिकंसर्वमेवान्नंसस्यंदानेप्रशस्यते छत्रोपानत्समायुक्तंगोभूकांचनवाससां यद्यदिष्टतमंचान्यत्तद्देयमविशंकया एतत्तेसर्वमाख्यातंकिमन्यच्छ्रोतुमिच्छसि अनाख्येयंनमेकिंचित्त्स्वास्तितेस्तुसदानघ अस्यांतिथौक्षयमुपैतिकृतंतुदत्तंतेनाक्षयेतिकथिता मुनिभिस्तृतीया उद्दिश्यदैवतापितृन्क्रियतेमनुष्यैस्तच्चाक्षयंभवतिभारतसर्वमेव अथविष्णुधर्मोक्तमक्षयतृतीयाव्रतं वैशाखशुक्लपक्षेतुतृतीयायामुपोषितः अक्षयंफलमाप्नोतितेनसाप्यक्षयामता यदासाकृत्तिकोपेताविशेषेणप्रपूजिता तत्रदत्तंहुतंजप्तंसर्वमक्षयमुच्यते अक्षयासातिथिस्तस्मात्तस्यांसुकृतमक्षयं अक्षतैः पूज्यतेविष्णुस्तेनसाप्यक्षयामता अक्षतैस्तुनरःस्नातोविष्णोर्दत्वातथाक्षतान्सक्तूंश्चसंस्कृतांश्चैवदत्वाचभृगुनंदन एवमेवतृतीयायांसर्वासांतुफलंलभेत् इति वैशाखशुक्लचतुर्थीकृत्यम्नारदीये वैशाखस्यचतुर्थ्यांतुसंप्रपूज्यानिरुद्धकं यतिभ्योलांबुपात्राणिदत्वाभीष्टंलभेन्नरः चतुर्मूर्तिव्रतान्येवंकृत्वाद्वादशवत्सरं उद्यापनविधानेनकर्त्तव्यंफलमिच्छता वैशाखपंचम्यांशिवपूजोक्ता तत्रैव अथवैशाखपंचम्यांशिवंचाभ्यर्च्यभक्तितः सर्वनागगणैर्युक्तंसोभीष्टंलभतेफलमिति वैशाखशुक्लषष्ठीकृत्यंच तत्रैव वैशाखशुक्लषष्ठ्यांतुपूजयित्वाचकार्त्तिकं लभतेमातृजंसौख्यंनात्रकार्याविचारणा वैशाखशुक्लसप्तम्यांगंगोत्पत्तिर्ना

रदीये वैशाखशुक्लसप्तम्यांजन्हुनाजाह्नवीपुरा क्रोधात्पीतापुनस्त्यक्ताकर्णरंध्रात्तुदक्षिणात् तांतत्रपूजयेत्स्नात्वा प्रत्यूषेविमलेजले गंधपुष्पाक्षताद्यैश्चसर्वैरेवोपचारकैः ततोघटसहस्रंतुदेयंगंगाव्रतंत्विदं भक्त्याकृतंसप्तकुलंनयेत्स्वर्गमसंशयः गंगापूजनप्रकारस्तु दशहराप्रकरणेद्रष्टव्यः अत्रसप्तमीपूर्वान्हव्यापिनीग्राह्येतिसमयमयूखे निर्णयसिंधौतु शिष्टाचारान्मध्यान्हव्यापिनीग्राह्येत्युक्तम् अस्यामेवकमलसप्तमीव्रतं नारदीये कमलव्रतमप्यत्र प्रोक्तंतद्विधिरुच्यते तिलपात्रेतुसौवर्णंविधायकमलंशुभं वस्त्रयुग्माहृतंकृत्वागंधपुष्पादिनार्चयेत् नमस्तेपद्महस्तायनमस्तेविश्वधारिणे दिवाकरनमस्तुभ्यंप्रभाकरनमोस्तुते इतिसंप्रार्थ्यदेवेशंसूर्येचास्तमुपागते सोदकुंभं तुतत्पात्रंकपिलांतुवियोजयेत् तद्दिनेतूपवासस्तुभोक्तव्यंचपरेहनि संभोज्यब्राह्मणान्भक्त्याव्रतसाफल्यमाप्नुयात् पाद्मेतु वसंतामलसप्तम्यांस्नातःसन्गौरसर्षपैः तिलपात्रेतुसौवर्णंनिधायकमलंशुभमित्युपक्रम्य एवंसंवत्सरंकृत्वाऽन्तेसुवर्णकमलान्वितं सूर्यशयनादिचदद्यात् सर्वसौख्यान्वितोभवतीतिकमलसप्तमीव्रतम् अस्यामेवसप्तम्यांनिंबसप्तमीव्रतं भविष्योत्तरे नारदीयेपि निंबव्रतंचतत्रैवतद्विधानमिदंशृणु निंबपत्रैस्स्मृता पूजाभास्करस्य द्विजोत्तम खखोल्कायेतिमंत्रेणप्रणवाद्येननारद ओंखखोल्कायनमःअनेनसूर्यपूजनंनिंबपत्रभक्षणंचकुर्यात् निंबपत्रंततोऽश्नीयात् स्वपेद्भूमौचवाग्यतः द्विजान्परेन्हिसंभोज्यस्वयंभुंजीतबंधुभिः निंबव्रतमिदंचैतत्कर्तॄणांसर्वसौख्यदं भविष्योत्तरेच वैशाखशुक्लसप्तम्यांजितक्रोधोजितेंद्रियः निंबपत्रंततोऽश्नीयात्सप्तम्यांमंत्रतोनरः मंत्रस्तु निंबपल्लवभद्रंतेसुभद्रंतेस्तुसर्वदा ममापिकुरुभद्रंवैप्राशनाद्रोगहाभवेति इत्थंप्राश्यस्वपेद्भूमौदेवस्यपुरतोनृप अष्टम्यांभानुंपूजयित्वाब्राह्मणान्भोजयित्वास्वयंभुंजीतेति निंबसप्तमीव्रतम् अस्यामेवशर्करासप्तमीव्रतं पद्मपुराणे पुलस्त्यउवाच वैशाखेशर्करानामसप्तम्यांश्रद्धयान्वितः प्रातःस्नात्वातिलैःशुक्लैःशुक्लमाल्यानुलेपनैः

स्थंडिलेपद्ममालिख्यकुंकुमेनसकर्णिकं तस्मैनमःसवित्रेति पुष्पंधूपंनिवेदयेत् स्थापयेदव्रणंकुंभंशर्करापात्रसंयुतं शुक्लवस्त्रेणसंवेष्ट्यशुक्लमाल्यानुलेपनैः सहिरण्यंयथाशक्त्यामंत्रेणानेनपूजयेत् विश्वदेवमयोयस्माद्देवादीतिपठ्यसे त्वमेवामृतसर्वस्वमतःपाहिसनातन पंचगव्यंततःपीत्वास्वपेत्तत्पार्श्वतंक्षितौ सौरसूक्तंजपंस्तिष्ठेत्पुराणश्रवणेनवा अहोरात्रेगतेपश्चादष्टम्यांकृतनित्यकः तत्सर्ववेदविदुषेब्राह्मणायनिवेदयेत् भोजयेच्छक्तितोविप्रांछर्कराघृतपायसैः भुंजीतातैललवणंस्वयमप्यथवाग्यतः अनेनविधिनासर्वंमासिमासिसमाचरेत् वत्सरांतेपुनर्दद्यात् ब्राह्मणायसमाहितः शयनंवस्त्रसंवीतंशर्कराकृसरान्वितं सर्वोपस्करसंयुक्तंतथैकांगांपयस्विनीं गृहंचशक्तितोदद्यात्समस्तोपस्करान्वितं सहस्रेणाथनिष्काणांकृत्वादद्याच्छतेनवा दशभिर्वात्रिभिर्वापिनिष्केणैकेनवापुनः पद्मंचशक्तितोदद्याद्वित्तशाठ्यविवर्जितः पद्मसौवर्णं अत्रमंत्रः अमृतंपिबतावक्रात्सूर्यस्यामृतविंदवःनिष्पेतुर्यैःसमुत्पन्नाः शालिमुद्गयवेक्षवः शर्कराचपुनस्तस्मादिक्षुसारामृतोपमाइष्टारवेस्ततः पुण्याशर्कराहव्यकव्ययोः शर्करासप्तमीचैषावाजिमेधफलप्रदासर्वदुःखोपशमनीपुत्रसंततिवर्द्धिनी अस्यांतुशर्करादानंशर्कराभोजनंतथा कर्त्तव्यंहिप्रयत्नेनव्रतमेतद्रविप्रियं यःकुर्यात्परयाभक्त्यासवैसद्गतिमाप्नुयात् कल्पमेकंवसेत्स्वर्गेततोराजाभवेत्परम् इदमपिचशृणोतियःस्मरेद्वापठतिसयातिसुरेश्वरस्यलोकं मतिमपिचददातियोजनानांममरवधूजनकिन्नरैःससेव्यः इतिपद्मपुराणेनारदीयेचशर्करासप्तमीव्रतम्

वैशाखशुक्लाष्टमीकृत्यम् नारदीये वैशाखस्यसिताष्टम्यांसमुपोष्यचवारिभिः स्नात्वापराजितांदेवीं मांसीबालकचंदनैः स्नापयित्वार्चयेद्गंधाद्यैर्नैवेद्यंशर्करामयं कुमारीभोजयेच्चापिनवम्यांपारणाग्रतः ज्योतिर्मयविमानेनभ्राजमानोयथारविः लोकेषुविचरेद्विप्रदेव्याश्चैवप्रसादतः देवीपुराणेतु सहकारफलैःस्नाने वैशाख

स्याष्टमीदिने आत्मानंदेवतांस्नाप्यमांसीबालुकवारिभिः लेपनंफलकर्पूरंधूपंपंचसुगंधिकं फलंजातिफलं पंचसुगंधिकं कंकोलपूगकर्पूरजातीफललवंगकैः सुगंधपंचकंप्रोक्तमायुर्वेदप्रकाशकैः दे०याःपूजांचकुर्वीतकेतक्याःपंचकेनच शर्कराक्षीरनैवेद्यंकन्याविप्रेषुभोजने आत्मनः पारणंपश्चाद्दक्षिणाशक्तितोददेत् सर्वतीर्थाभिषेकंवातेनप्राप्नोतिभार्गवेतिवैशाखेशुक्लाकृष्णानवमीद्वयकृत्यम् नारदीये राधेनवम्यांदलयोश्चंडिकांयस्तुपूजयेत् विधिन, सविमानेतुदेवतैः सहमोदते तथाच निर्णयामृते भविष्योत्तरे वैशाखेमासिराजेंद्रनवम्यांपक्षयोर्द्वयोः उपवासपरोभक्त्यापूजयानस्तुचंडिकांहंसकुंदेंदुसंकाशस्तेजसाध्रुवसान्निभः विमानवरमारूढोदेवलोकेमहीयतइतिवैशाखशुक्लदशम्यांकृत्यमुक्तं नारदीये दशम्यांमाधवेविप्रधर्मराजस्वरूपिणं प्रपूज्यशुक्लैर्गंधाद्यैर्विष्णुमभ्यर्च्यमानवःगंधाद्यैरुपचारैस्तुश्वेतपुष्पैःसुगंधिभिः शतंप्रदक्षिणाः कृत्वाविप्रान्संभोज्यभक्तितः लभतेवैष्णवंलोकंनात्रकार्याविचारणा वैशाखशुक्लैकादशीमोहिनीतदुक्तंनारदीयेवैशाखशुक्लैकादश्यांसमुपोष्यचमोहिनीम् स्नात्वापरेन्हिसंपूज्यगंधाद्यैः पुरुषोत्तमंसंभोज्यविप्रान्मुच्येतपातकेभ्योनसंशयः अस्यांकथाः कौर्म्येपाद्मे युधिष्ठिरउवाच वैशाखस्यसितपक्षेकावाह्येकादशीभवेत् किंफलंकोविधिस्तस्याः कथयस्वजनार्दन श्रीकृष्णउवाच कथयामिकथामेतांशृणुष्वधर्मनंदन वसिष्ठेयामकथयत्पुरारामायपृच्छते श्रीरामउवाच कथयस्वप्रसादेनवसिष्ठमुनिसत्तम मयाकृतानिपापानिसीताहरणकालतः केनव्रतप्रभावेनतानियास्यंतिसंक्षये तद्व्रतंमुनिशार्दूलत्वमाख्यातुंममार्हसि श्रीवसिष्ठउवाचसाधुसाधुमहाराजत्वत्समोनास्तिमानवः त्वन्नामोच्चारणादेवपूतोभवतिनारकी सभवान्पृच्छतिव्रतं पापघ्नंसर्वकामदं मनुष्यतांत्वमापन्नः परमात्मासिमांततः तद्व्रतंराजराजेंद्रकथयिष्यामिविस्तरात् येनपापानिनश्यंतिब्रह्महत्यादिकानिच वैशाखस्यसितपक्षेराघवैकादशीस्मृता मोहिनीनामनाम्नावैसर्वपा

पहरापरा अस्याव्रतप्रभावेनभस्मसात्पातकंभवेत् शृणुष्वराजशार्दूलकथांपापहरांपरां यस्याःश्रवणमात्रेणपापानांनिःकृतिर्भवेत् सरस्वत्यास्तटेराजन्पुरीभद्रावतीपुरा द्युतिमान्नामराजावैतस्यांराज्यंचकारह सोमवंशसमुद्भूतोराजापरमधार्मिकः धनपालेतिनाम्नावैतस्याभूत्पुष्कलंधनं सकृष्णप्रीतयेत्यर्थमकरोद्धर्मसंचयं पुण्यान्यायतनान्येवविविधानिचकारसः पंचैवपुत्रास्तस्यासन्सुरूपाश्चित्रसन्निभाः सुमनाद्युतिमांश्चैवमेधावीमतिरेवच पंचमोधृष्टबुद्धिश्चमहापापरताःसदा वारस्त्रीषुचमध्येषुमांसेषुविविधंधनं पितुस्तेनक्षयंनीतमन्यायात्पितृसंचितंमहापापरतोदुष्टःसोभूद्ब्राह्मणनिंदकः अभक्ष्यभक्षकोनित्यंपापासक्तमनाः सदा वैश्यास्कंधेक्षिप्यबाहुंवैश्यास्यंपरिचुंबति जनेदृष्टिपथंप्राप्तेनलज्जामकरोत्खलः भ्रातृभिःसतदात्यक्तः स्वजनैर्जनकेनच गणिकाभिश्चसंत्यक्तोधनहीनोगतादरः सर्वैर्यदापरित्यक्तस्तदाचिंतापरोभवत् किंकरोमिक्वगच्छामिकेनोपायेनसंप्रति जीवाम्यहंद्रव्यहीनोभाग्यहीनोलघुस्ततः स्तेयकर्मकरिष्यामिस्वपितुर्नगरेधुना इतिसंचिंत्यतेनेत्थंमुषितंनगरंपितुः ज्ञातश्चारैर्गृहीतोपिमुक्तोराज्ञस्तुगौरवात् एकदासनृपस्याग्रेनीतोनगररक्षकैः संप्रेष्यराज्ञाकथितंक्रियतांनगराद्बहिः राजाज्ञयातदैवाशुप्रापितोनगराद्बहिः पुरपालैस्ततोरण्यंगहनंप्रविवेशह क्षुधितस्तृषितश्चैवबभ्रामसइतस्ततः मृगयाकर्तुमारेभेमांसजीवीबभूवसः शरांस्तीक्ष्णान्करेन्यस्यतूणीरंपृष्ठभागतः निर्दयत्वात्पापकर्मासबाणैरहनन्मृगान् तत्रैवमुनिवर्योभूत्कौंडिन्योप्यचरत्तपः प्रत्यहंजाह्नवीतीरेस्नानार्थंसमुपाययौ वैशाखेमासिसस्नानंदानंचविधिनाकरोत् कृत्वास्नानंजगामाशुमार्गेणस्वाश्रमंप्रति मार्गमध्येधृष्टबुद्धिंदुःखितंसंददर्शसः कौंडिन्यःकृपयासद्यः स्पृष्टवान्गांगवारिणाततस्त्वयंयदास्पृष्टोमुनिनागांगवारिणा तदैवपुण्यवान्जातो धृष्टबुद्धिःप्रहर्षितः कौंडिन्यंमुनिशार्दूलंविनयावनतोब्रवीत् व्रतंकथयमेस्वामिन्विनावित्तेनयद्भवेत् कौंडिन्यउवाच व्रतंतेकथयिष्यामिये

नपापक्षयोभवेत् वैशाखस्यसितेपक्षेमोहिनीनामनामतः एकादशीमहापुण्यानराणांपापनाशिनी मेरुतुल्यानिपापानिक्षयंनश्यातितत्क्षणात् पातकानिक्षयंयांतिपंचाशल्लक्षजन्मनां तमांस्यर्कोदयेनैवमोहिन्यैकादशीव्रतात् इतिश्रुत्वामुनेर्वाक्यंविधिदृष्टंयथाविधिः भक्त्याकरोद्दृष्टबुद्धिर्मोहिन्यैकादशीव्रतं सर्वपापक्षयंनीतंव्रतेनानेनतेनवैजन्मांतेमोक्षमापन्नोबभूवगरुडासनः ईदृशंकथितंराममोहिन्यैकादशीव्रतं माहात्म्यश्रवणादस्यागोसहस्रफलंलभेत् इति कूर्मपुराणेपाद्मेचवैशाखशुक्लमोहिन्यैकादशीव्रतकथा वैशाखशुक्लद्वादश्यांधरणीव्रतेषुजामदग्न्यद्वादशीव्रतं दुर्वासाउवाच वैशाखेप्येवमेवंतुसंकल्प्यविधिनानरः तद्वत्स्नानंमृदाकृत्वाततोदेवालयंव्रजेत् तत्र राध्यहरिंभक्त्या मंत्रैरेभिर्विचक्षणः जामदग्न्यायपादौतुउदरंसर्वधारिणे मधुसूदनायेति कटिं मुरः श्रीवत्सधारिणे क्षत्रांतकायबाहूचमणिकंठायकंठकं स्वनाम्नाशंखचक्रेतिशिरोब्रह्मांडधारिणे एवमभ्यर्च्यमेधावी प्राग्वैतस्याग्रतोघटं विन्यसेद्वेष्टितंतत्रयुग्मेतत्रविशेषतः वैणवेनचपात्रेणतस्मिन्संस्थापयेद्धरिं जामदग्न्येनरूपेणकृत्वासौवर्णमग्रतः दक्षिणेपरशुंचैवहस्तेतस्यचकारयेत् सर्वगंधैश्चसंपूज्यपुष्पैर्नानाविधैस्तथा ततस्तस्याग्रतःकुर्याज्जागरंभक्तिमान्नरः प्रभातेविमलेसूर्येब्राह्मणायनिवेदयेत् एवंनियमयुक्तस्ययत्फलंतन्निबोधमे आसीद्राजामहाभागोवीरसेनोमहाबलः अपुत्रःसपुनस्तीव्रंतपस्तेपेमहाबलः चरतस्तुतपोघोरंयाज्ञवल्क्योमहामुनिः आजगाममहायोगी तंद्रष्टुंचाभियोगतः राजोवाच कथंमेभवितापुत्रः स्वल्पायासेनवैद्विज एतन्मेकथयप्रीत्याभगवन्प्रणतस्यवै एवमुक्तोमुनिस्तेनपार्थिवेनयशस्विना आचख्यौद्वादशींचेमांवैशाखेसितपक्षजां सहिराजाविधानेनपुत्रकामोविशेषतः उपोष्यलब्धवान्पुत्रंतेनपरमधार्मिकं योद्यापिकीर्त्यतेलोकेपुण्यश्लोकोनरोत्तमः प्रासंज्ञकफलंह्येतद्व्रतस्यास्यमहामुने यत्पुत्रोजायतेनेनविद्यावान्कीर्त्तिरुत्तमा इहजन्मनिकिंचित्रंपरलोकेशृणुष्वमे कल्पमेकंब्रह्मलोकेउषित्वाप्सरसांगणैः

क्रीडित्वातेपुनःसृष्टौजायंतेचक्रवर्त्तिनः त्रिंशत्कल्पसहस्राणिजायंतेनात्रसंशयः इतिवाराहपुराणेधरणीव्रतेषुवैशाखशुक्लाजामदग्न्यद्वादशीव्रतकथा अस्यामेवद्वादश्यांयोगविशेषोहेमाद्रौपंचाननस्थौगुरुभूमिपुत्रौमेषेरविः स्यादिहशुक्लपक्षे मासाभिधानाकरभेणयुक्तातिथिर्व्यतीपातइतीहयोगः अस्मिंस्तुगोभूमिहिरण्यवस्त्रदानेनपापं परिहायसर्वं सुरत्वमिंद्रत्वमनामयत्वंमर्त्याधिपत्वंलभेतमनुष्यइति पंचाननः सिंहमासाभिधानामास संख्याभिधानातिथिर्द्वादशी करभेणहस्तऋक्षेणयुक्ता अस्यामेवमाधवपूजनमुक्तं नारदीयेवैशाखशुक्लद्वादश्यांसोपवासोजितेंद्रियः संपूज्यमाधवंभक्त्यागंधाद्यैरुपचारकैः पक्वान्नतृप्तिजनकं मधुरंसोदकुंभकं विधायदद्याद्विधिवत्माधवः प्रीयतामिति वैशाखशुक्लत्रयोदश्यांकामदेवपूजाव्रतम् नारदीये राधाशुक्लत्रयोदश्यांकामदेवव्रतंस्मृतं तत्रगंधादिभिःकामंपूजयेदुपवासवान् प्रतिमासंततः पश्चा त्रयोदश्यांसितेदले एवमेवव्रतंकार्यंवर्षांतेगामलंकृतां दद्याद्विप्रायसत्कृत्यव्रतसांगत्वसिद्धये वैशाखशुक्लचतुर्दश्यांनृसिंहजयंतीव्रतं तदुक्तंवाराहपुराणे वैशाखस्यशुक्लपक्षेचतुर्दश्यांमहातिथौ जयंतीतत्रकर्त्तव्यानृसिंहस्यद्विजोत्तमैरिति गोविंदार्णवे व्राह्मे चतुर्दश्यांशुक्लपक्षेमासिमाधवसंज्ञके प्रादुर्भूतोनृपंचास्यस्तस्मात्तांसमुपोषयेदिति इयंप्रदोषव्यापिनीग्राह्या तदुक्तंमदनरत्ने हेमाद्रौ नृसिंहपुराणे वैशाखशुक्लपक्षेतुचतुर्दश्यांनिशामुखे मज्जन्मसंभवंपुण्यंव्रतंपापप्रणाशनं वर्षेवर्षेतुकर्त्तव्यंममसंतुष्टिकारकमिति टोडरानंदेस्कांदे वैशाखस्यचतुर्दश्यांसोमवारेनिलर्क्षके अवतारोनृसिंहस्य प्रदोषसमयेद्विज तथाच नृसिंहप्रसादोदाहृतं नृसिंहपुराणे वैशाखशुक्लपक्षस्यचतुर्दश्यांविवस्वति अस्तंगामिनिसर्वेषांपुरतस्तंभमध्यतः प्रबभूवमहाविष्णुर्नरसिंहाकृतिर्नृप तस्यांव्रतंनरैःकार्यंमहाविष्णोरतिप्रियमिति कूर्मसिंहौवौद्धकल्कीचसायामितिपुराणसमुच्चयाच्च दिनद्वयेप्रदोषव्याप्तावव्याप्तावेकदेश संकल्परूपव्रतोपक्रमकाल

सत्त्वात् शुक्लपक्षगतत्वाच्चवैषम्यनैकदेशयोगेअधिकव्याप्तिमतीग्राह्याकृत्यरत्नावल्यामप्येवं दीक्षितोयत्तुदिनद्वये व्याप्तावव्याप्तौवापूर्वापूर्वदिनेगौणकालव्याप्तेःसत्त्वात् परदिनेचतदभावादित्युक्तं यत्तुकैश्चिदुक्तंपूर्वदिने प्रदोषकालव्यापिनीचतुर्दशीसद्भावे उत्तरदिने प्रदोषकालास्पर्शेपिउत्तरविद्धाग्राह्या अनंगेनसमायुक्तानैवोपोष्याचतुर्दशी धनापत्यैर्वियुज्येततस्मात्तांपरिवर्जयेदितिवचनेन पूर्वविद्धानिषेधादिति तन्न एतद्वचनस्यहेमाद्रिमदनरत्नादिसकलमहानिबंधेष्वलिखितत्वेनानादृतत्वात् अस्याएवंयोगविशेषेणप्राशस्त्यमुक्तं नृसिंहपुराणे स्वातीनक्षत्रयोगेचशनिवारेमहद्व्रतं सिद्धयोगस्यसंयोगेवणिजेकरणेतथा पुंसांसौभाग्ययोगेनलभ्यतेदैवयोगतःसर्वैरेतैस्तुसंयुक्तंहत्याकोटिविनाशनं एतैर्योगैर्विनापिस्यान्मद्दिनंपापनाशनमिति अस्मिन्व्रतेसर्वेषामधिकारः सर्वेषामपिवर्णानामधिकारोस्तिमद्व्रते मद्भक्तैस्तुविशेषेणकर्त्तव्यंमत्परायणैरितितत्रैवोक्तेः इदंचसंयोगपृथक्त्वन्यायेन सलत्वेपिदिनद्वये प्रदोषकालेसमव्याप्तिसत्त्वेपूर्वविद्धायानिषेधकत्वाच्च वैष्णवानांतुस्मरविद्धायानिषेधात्सर्वथाशुद्धैवोपोष्या तथाच हरिभक्तिविलासे बृहन्नारसिंहे वैशाखशुक्लपक्षस्यचतुर्दश्यांसमाचतेत् मज्जन्मसंभवंपुण्यंव्रतंपापप्रणाशनं स्वातिनक्षत्रयोगेनलभ्यतेदैवयोगतः सर्वैरेतैस्तुसंयुक्तंहत्याकोटिविनाशनं केवलंचप्रकर्त्तव्यंमद्दिनंफलकांक्षिभिः वैष्णवैस्तुनकर्त्तव्यास्मरविद्धाचतुर्दशीति आगमेपि प्रियेचतुर्दशीभौमेकर्त्तव्याकिल्विषापहाकामविद्धानकर्त्तव्यास्वातीभौमयुतायदीति इदंव्रतंनित्यंकाम्यंच वर्षेवर्षेतुकर्त्तव्यमितिवीप्साश्रवणात् तथाच विज्ञायमद्दिनंयस्तुलंघयेत्सपापकृन्नरः सयातिनरकंघोरंयावच्चंद्रदिवाकरावित्यकरणेदोषश्रवणाच्च अपुत्रोलभतेपुत्रानित्यादिफलश्रवणाच्च इतिनृसिंहजयंत्याग्राह्यातिथिनिर्णयः अथात्रकृत्यमुच्यते कृत्यरत्नावल्यां अथास्याःसोद्यापनोव्रतविधिः अस्यांप्रातःकृत्यंविधायसूर्यादिदेवताभ्योव्रतंनिवेद्याचम्य प्राणानायम्योदङ्मुखोवारि

पूर्णंताम्रपात्रंगृहीत्वासंकल्पंकुर्यात् तदुक्तंहेमाद्रौ नृसिंहपुराणे नियमंचप्रकुर्वीतदंतधावनपूर्वकमिति दंतधावनग्रहणंप्रातःकृत्योपलक्षणं दंतधावनंचतृणपर्णादिनाद्वादशगंडूषैर्वाकार्यं उपवासदिनेदंतकाष्ठनिषेधात् निर्णयसिंधौ दीक्षितएव संकल्परूपव्रतकर्मसमारभेदिति नृसिंहपुराणोक्तेरिति मदनरत्नेप्येवमेव वस्तुतस्तुसंकल्पःप्रातरेवकर्त्तुमुचितःप्रातः संकल्पयेद्विद्वानुपवासव्रतादिकमित्यादिवचनात् व्रतकर्मसमारभेदिति नृसिंहपुराणोक्तेस्तु व्रतस्यपूजादिरूपस्योपयोगियन्मंडपादिसामग्रीसंपादनंतत्परत्वात् तित्यकर्मसमारभेदितिपाठस्यैवबहुशोदृष्टत्वेनतत्रव्रतप्रारंभानुक्तेश्च संकल्पमंत्रस्तत्रैव श्रीनृसिंहोग्रदंष्ट्रस्त्वंदयांकुरुममोपरि अथाहंचविधास्यामिव्रतंनिर्विघ्नतांनयेतिनिर्णयसिंधौतु नृसिंहदेवदेवेशतवजन्मदिनेशुभे उपवासंकरिष्यामिसर्वभोगविवर्जितइतिसंकल्पमंत्रउक्तः ततोव्रतस्थेनमिथ्यालापपाखंड्यादिसंभाषणवर्जनंकार्य्यं ततोमध्याह्नेनद्यादौ मृद्गोमयतिलोदकैः स्नात्वानित्यकर्मनिर्वर्त्यगृहंगच्छेत् ततःसायंकालेगोमयोपलिप्तेभूपृष्ठदेशेऽष्टदलंकृत्वा तत्रकलशंसंस्थाप्यसर्वतोभद्रंवाविरचय्य आचार्यादिवरणंचविधाय कलशोपरि हैमींसुवर्णनृसिंहप्रतिमांपलपलार्धार्धादिमितां लक्ष्मीप्रतिमांच संस्थाप्य अग्न्युत्तरपूर्वकंप्राणप्रतिष्ठांकृत्वा मूलमंत्रेणवैदिकेन वज्रनखायविद्महे तीक्ष्णदंष्ट्रायधीमहि तन्नोनारसिंहःप्रचोदयात् इतिगायत्र्यानाममंत्रेणचषोडशोपचारैःपूजयेत् तत्रादौपूजोपयोगित्वेननृसिंहमंत्रन्यासादिकमुच्यते ॐनमःउग्रंवीरंमहाविष्णुंज्वलंतंसर्वतोमुखं नृसिंहंभीषणंभद्रंमृत्युमृत्युंनमाम्यहं अस्यमंत्रस्यब्रह्माऋषिरनुष्टुप्छंदःश्रीलक्ष्मीनृसिंहदेवता हंबीजंईंशक्तिःन्यासेविनियोगः ब्रह्मणेऋषयेनमः शिरसि अनुष्टुप्छंदसेनमोमुखे श्रीनृसिंहदेवतायैनमोहृदये हंबीजायनमोगुह्ये ईंशक्तयेनमः पादयोः उग्रंवीरं अंगुष्ठाभ्यांनमः महाविष्णुंतर्जनीभ्यांस्वाहा ज्वलंतंसर्वतोमुखंमध्यमाभ्यांवषट् नृसिंहंभीषणंअनामिकाभ्यांहुं भद्रंमृत्युमृत्युंकनि

षिकाभ्यांवौषट् नमाम्यहंकरतलकरपृष्ठाभ्यांफट् एवमेवहृदयादिष्वंगन्यासंकुर्यात् ततोध्यानंकुर्यात् नृसिंहंभ
जेजानुविन्यस्तबाहुंत्रिनेत्रंभुजेप्रोल्लसच्छंखचक्रंकृशानूपमंज्योतिषादीप्तदैत्यांशिरःशोभिदंष्ट्रासुदीप्तोग्रजिह्वम् १
वामांकेनृहरेःपूज्यालक्ष्मीभूषणभूषिता वामेपद्मधरादक्षबाहुनानृहरिंविभुं २ आश्लिषंतींशांतिमूर्त्तिमतोंगानिप्र
कल्पयेत् ध्यानांतरंचागमे माणिक्याद्रिसमप्रभंनिजरुचासंत्रस्तरक्षोगणं जानुन्यस्तकरांबुजंत्रिनयनंरत्नो
ल्लसद्भूषणं बाहुभ्यांधृतशंखचक्रमनिशं दंष्ट्रोग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयंवंदेनृसिंहंविभुम् १
एवंध्यात्वामानसैरुपचारैःसंपूज्य शंखस्थापनं षट्कोणमंडले विधाय पूजांकुर्यात् आगच्छदेवदेवेशप्रह्ला
दवरदायक यावत्पूजांकरोम्यत्रतावत्त्वंसुस्थिरोभव सहस्रशीर्षेत्यावाहनं नानारत्नसमायुक्तंकार्त्तस्वरविभू
षितं नृसिंहदेवदेवेशस्वासनंपरिगृह्यतां पुरुषएवेदमित्यासनं २ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं तो
यमेतत्सुखस्पर्शंपाद्यार्थंपरिगृह्यताम् ३ नृसिंहाच्युतदेवेशलक्ष्मीकांतनमोस्तुते अर्घ्यंगृहाणदेवेशभक्तानांव
रदायक त्रिपादूर्ध्वेत्यर्घ्यम् ४ कर्पूरवासितंतोयंमंदाकिन्याःसमाहृतं आचम्यतांत्वयादेवमयादत्तंहिभक्तितः त
स्माद्विराडित्याचमनम् ५ पंचामृतेनस्नपनंकरिष्येसर्वसिद्धिदं पयोदधिघृतंगव्यंमाक्षिकंशर्करातथा पंचामृते
नस्नपनंगृहाणसुरसत्तम ६ आप्यायस्वेतिपयसा १ दधिक्राष्णेतिदध्ना २ घृतमितिघृतेन ३ मधुव्वातेतिमधु
ना ४ स्वादुःपवस्वेति शर्करया ५ एवंपंचामृतस्नानम् गंगाचयमुनाचैवनर्मदाचसरस्वती तापीपयोष्णीकृ
ष्णाचताभ्यःस्नानार्थमाहृतं तोयमेतत्सुखस्पर्शंस्नानार्थंप्रतिगृह्यतां यत्पुरुषंव्यदधुरितिस्नानम् ७ स्नानानं
तरमाचमनीयम् पीतांबरयुगंदेवसर्वकार्यार्थसिद्धये मयानिवेदितंभक्त्यानृसिंहवरदायक तंयज्ञमितिवस्त्रम् ८
लक्ष्मीकांतनमस्तेस्तुत्राहिमांभक्तवत्सल ब्रह्मसूत्रंसोत्तरीयंगृहाणासुरनाशक तस्मात्यज्ञात्संभूतमितियज्ञोपवी

तम् ९ शीतलंचंदनंदिव्यंचंद्रकुंकुममिश्रितं ददामितवतुष्ट्यर्थंनृसिंहपरमश्वरे तस्माद्यज्ञात्सर्वहुतइति गंधम् १० अक्षताश्चसुरश्रेष्ठकुंकुमाक्ताःसुशोभनाः नृसिंहदेवदेवेशप्रीत्यात्वंस्वीकुरुप्रभो इत्यक्षताः कालोद्भवानिपुष्पाणितुलस्यादीनिवैप्रभोपूजयामि नृसिंहंत्वां लक्ष्म्यासहनमोस्तुते तस्मादश्वा इतिपुष्पाणि ११ कालागुरुमयंदिव्यंसर्वदैवतवल्लभं धूपंगृहाणदेवेशसर्वकामसमृद्धये यत्पुरुषेणेतिधूपम् १२ दीपःपापहरःप्रोक्तस्तमोराशिविनाशनः दीपेनलभतेतेजस्तस्माद्दीपंददामिते ब्राह्मणस्येतिदीपम् १३ नैवेद्यंसुखदंचारुभक्ष्यभोज्यसमन्वितंददामितेरमाकांतसर्वपापक्षयंकुरु चंद्रमामनसइतिनैवेद्यम् १४ इदंफलंमयानीतमितिफलम् पूगीफलंमहादिव्यमितितांबूलं हिरण्यगर्भगर्भस्थमितिदक्षिणा पंचवर्त्तिसमायुक्तंसर्वमंगलदायकंनीराजनंनिरीक्षस्वरमाकांतनमोस्तुते इतिनीराजनं मालतीमल्लिकापुष्पैर्नागचंपकसंयुतैः पुष्पांजलिंगृहाणेमंपादांबुजयुगेर्पितं इतिपुष्पांजलिंसमर्पयेत्नृसिंहदेवदेवेशसर्वकामफलप्रद लक्ष्मीकांतनमस्तुभ्यंपुत्रपौत्राभिवृद्धये नमस्तेदेवदेवेशनमस्तेसुरनायक नमस्तेकमलाकांतनमस्तेभक्तवत्सल नमस्तेसर्वभूतेशवासुदेवनमोस्तुते नाभ्याआसीदिति प्रार्थनांनमस्कारंचकुर्यात् सप्तास्यासन्नितिप्रदक्षिणांचकृत्वा उत्तरार्घ्यंचदद्यात्तत्रमंत्रः नृसिंहाच्युतदेवेशलक्ष्मीकांतनमोस्तुते अनेनार्घ्यप्रदानेनसफलाःस्युर्मनोरथाः ततोयज्ञेनयज्ञमितिमंत्रेणपुष्पांजलिंदत्वा रात्रौगीतवाद्यपुराणश्रवणादिभिर्जागरणंकुर्यात् इतिव्रतविधानं उद्यापनेपिसर्वतोभद्रेसर्वमंडलदेवतापूजांते कलशोपरिनारसिंहमंत्रेणयथाविधिपूजनं पूर्वोक्तमंत्रैर्विधायप्रातःपुनरपिदेवतापूजांमंडलदेवतासहितांविधायकुंडेस्थंडिलेवाब्रह्मवरणंचाग्निसंस्थापनंविधायान्वाधानांतव्याहृतिभिर्हुत्वा नरसिंहगायत्र्यात्वाज्येनचरुणाहुत्वाब्रह्मादयोमंडलदेवताग्रहादियागदेवताश्चैकैकया

हुत्वाहुत्वा नृसिंहोद्देशेनचतुर्दशाधिकान् ब्राह्मणान् प्रतिमाकुंभवस्त्रपवित्रादिभिरभ्यर्च्य स्वर्णमयींसिंहसाहितां श्रीमन्नृसिंहप्रधानप्रतिमांगोभूहिरण्यतिलपात्रशय्यासहितामाचार्यायदत्त्वाप्रार्थयेत् मद्वंशेयेचराजानोजनिष्यंतिचयेपरे तान्समुद्धरदेवेशदुस्तराद्भवसागरात् पातकार्णवमग्नस्यव्याधिदुःखांबुवारिभिः जीवैस्तुपरिभूतस्यमहादुःखगतस्यमे करावलंबनंदेहि शेषशायिन्जगत्पते श्रीनृसिंहरमाकांतभक्तानांभवनाशन क्षीरांबुधिनिवासेशचक्रपाणेजनार्दन व्रतेनानेनदेवेशभुक्तिमुक्तिप्रदोभव एवंसंप्रार्थ्यप्रतिमांसोपस्करामाचार्यायदद्यात् तत्रमंत्रः पीतांबरमहाबाहोप्रल्हादभयनाशकृत् अनेनार्घ्यप्रदानेनयथोक्तफलदोभवेति ततःपूर्णाहुतिंविधाय दक्षिणादिभिर्ब्राह्मणान्संतोष्य मध्याह्नेबंधुभिः सहभुंजीतेति इतिनृसिंहचतुर्दश्याः सोद्यापनापूजा अथनृसिंहपरिचर्य्ययामस्याःकथा हेमाद्रौ नृसिंहपुराणे हिरण्यकशिपुंहत्वादेवदेवंजगद्गुरुं सुखासीनंतदुत्संगेशांतकोपंरमापतिं प्रल्हादोज्ञानिनांश्रेष्ठःपालयन्राज्यमुत्तमं एकाकीचतदुत्संगेप्रियंवचनमब्रवीत् प्रल्हादउवाच नमस्तेभगवन्विष्णोश्रीनृसिंहरमापते त्वद्भक्तोहंसुरेशैकंत्वांपृच्छामितुतत्त्वतःस्वामिन्त्वयिममाभिन्नाभक्तिर्जातात्वनेकधा कथंचतेप्रियोजातःकारणंवदमेप्रभो श्रीनृसिंहउवाच कथयामिमहाप्राज्ञशृणुष्वैकाग्रमानसः भक्तेर्यत्कारणंवत्सप्रियत्वस्यचकारणं पुराकालेह्यभूर्विप्रःकिंतुतंनाप्यधीतवान् नाम्नात्वंवासुदेवोहिवेश्यास्वासक्तमानसः तस्मिन्जन्मनिनैवत्वंचकारसुकृतंकियत् मुक्तातुमद्व्रतंचैकंवेश्यासंगतिलालसः मद्व्रतस्यप्रभावेनभक्तिर्जातातवानघ प्रल्हादउवाच श्रीनृसिंहोच्यतांतावत्कस्यपुत्रस्यकिंव्रतंवेश्यायांवर्तमानेनकथंतच्चकृतंमया येनतद्विष्णुमाहात्म्यंवक्तुमर्हसिसांप्रतं नृसिंहउवाच पुरावंतिपुरेह्यासीद्ब्राह्मणोवेदपारगः तस्यनामसुशर्मेतिबहुलोकेषुविश्रुतः ब्रह्माक्रियासुनियतंसर्वासुकिलतत्परः तत्परत्रासक्तः अग्निष्टोमादिभिर्यज्ञैरिष्टाःसर्वेसुरोत्तमाः तेनापिविद्यमानेनकृतंनो

दुष्कृतंकियत् तस्यभार्यासुशीलाचविख्याताभुवनत्रये पतिव्रतासदाचारापतिभक्तिपरायणा जज्ञिरेस्यांसुताः पंचतस्माद्द्विजवरात्तथा सदाचाराःसुविद्वांसःपितृभक्तिपरायणाः तेषांमध्येकनिष्ठस्त्वंवेश्यासंगतितत्परः तयानिषिध्यमानेनसुरापानंत्वयाकृतंसुवर्णंचाप्यपहृतंचौरैःसार्धंत्वयाबहु विलासिन्यागृहेनित्यंवसतोप्यविचारतः विलासिनीवेश्या एकदातद्गृहेह्यासीत्तयासहमहाकलिः ततःकलहभावेनभोजनंनत्वयाकृतं अज्ञानान्मद्व्रतंकृत्वाव्रतानामिदमुत्तमं त्वयाविरहयोगेनरात्रौजागरणंकृतं वेश्यायावल्लभंकिंचित्प्रज्ञातंनतयासह रात्रौजागरणेचीर्णेत्यक्ताभोगमनेकशः व्रतेनानेनचीर्णेनमोदंतेदिविदेवताः सृष्ट्यर्थंहिपुराब्रह्माचक्रेह्येतदनुत्तमं मद्व्रतस्यप्रभावेननिर्मितंसचराचरं ईश्वरेणपुराचीर्णंत्रिपुराणांवधार्थिना माहात्म्येनव्रतस्यास्यत्रिपुराविनिपातिताःअन्यैस्तुबहुभिर्देवैर्ऋषिभिश्चपुरानघ राजभिश्चमहाप्राज्ञविहितंव्रतमुत्तमं एतद्व्रतप्रभावेनसर्वैसिद्धिमुपागताः वेश्यापिमत्प्रियाजाता त्रैलोक्येसुखचारिणी ईदृशंमद्व्रतंवत्सत्रैलोक्येचातिविश्रुतं कलहेनविलासिन्याव्रतमेतदुपस्थितं प्रल्हादतेनतेभक्तिर्मयिजाताह्यनुत्तमा धूर्तयाचविलासिन्याज्ञात्वाव्रतमिदंमहत् कलहश्चकृतोयेनमद्व्रतंचकृतंभवेत् सावेश्यात्वप्सराजाताभुक्त्वाभोगाननेकशः भुक्त्वाकर्मविहीनस्त्वंप्रल्हादविशसेमयि कार्य्यार्थंचभवानास्तेमच्छरीरपृथक्तया विधायसर्वकार्याणिशीघ्रंचैवागामिष्यसि यइदंव्रतमावश्यंप्रचरिष्यंतिमानवाः नतेषांपुनरावृत्तिर्मत्तःकल्पशतैरपि अपुत्रोलभतेपुत्रान्मद्भक्तांश्चसुवर्चसः दरिद्रोलभतेलक्ष्मींधनदस्यचयादृशी तेजस्कामोलभेत्तेजोराज्यार्थीराज्यमुत्तमं आयुःकामोलभेदायुर्यादृशंतच्छिवस्यच स्त्रीणांव्रतमिदंसाधुपुत्रदंभाग्यदंतथा अवैधव्यकरंतासां पुत्रशोकविनाशनंधनधान्यकरंचैवज्ञातिश्रैष्ठ्यकरंशुभं स्त्रियोवापुरुषोवापिकुर्वंतिव्रतमुत्तमं तेभ्योददाम्यहंसौख्यं भुक्तिमुक्तिसमन्वितं बहुनोक्तेनकिंवत्सव्रतस्यास्यफलंमहत् मद्व्रतस्यफलंवक्तुंनाहंशक्तोनशंकरः ब्रह्माचतुर्भिर्व

कैश्चनलभेन्महिमावाधिं प्रल्हादउवाच भगवंस्त्वत्प्रसादेनश्रुतंव्रतमनुत्तमं व्रतस्यास्यफलंसाधुत्वयिमेभक्तिकारणं स्वामिन्जातिविशेषेणत्वत्तःपापनिकृंतनं अधुनाश्रोतुमिच्छामिव्रतस्यास्यविधिंपरं कस्मिन्मासेभवेदेतत्कस्मिन्वावासरेप्रभो एतद्विस्तरतोदेववक्तुमर्हसिसांप्रतं विधिनायेनवैस्वामिन्समग्रफलभाग्भवेत् ममोपरिकृपां कृत्वाब्रूहित्वंसकलंप्रभो श्रीनृसिंहउवाच साधुसाधुमहाभागव्रतस्यास्यविधिंपरं सर्वंकथयतोमेद्यत्वमेकाग्रमतिः शृणु वैशाखेशुक्लपक्षेतुचतुर्दश्यांसमाचरेत् मज्जन्मसंभवंपुण्यंव्रतंपापप्रणाशनं वर्षेवर्षेप्रकर्त्तव्यंममसंतुष्टिकारणं महागुह्यमिदंश्रेष्ठमानुषैर्भवभीरुभिः कर्त्तव्यमितिशेषःतेनवैक्रियमाणेनसहस्रद्वादशीफलं जायतेमत्सखाएवमानुषाणांमहात्मनां मानुषाणांमध्येजायतइत्यन्वयःमत्सखाअतइतिशेषः स्वातिनक्षत्रयोगेचशनिवारेमहद्व्रतं सिद्धियोगस्यसंयोगेवणिजेकरणेतथा पुंसांसौभाग्ययोगेनलभ्यतेदैवयोगतः सर्वैरेतैस्तुसंयुक्तंहत्याकोटिविनाशनं एतदन्यतरेयोगेतद्दिनंपापनाशनं केवलेपिप्रकर्त्तव्यंमद्दिनेव्रतमुत्तमं अन्यथानरकंयातियावच्चंद्रादिवाकरौ यथायथाप्रवृत्तिःस्यात्पातकस्यकलौयुगे तथातथाप्रणश्यंतिसर्वेधर्मानसंशयः मद्व्रतस्यप्रभावेनमतिर्नस्याद्दुरात्मतः विचार्येत्थंप्रकर्त्तव्यंमाधवेमासिमद्व्रतं नियमश्चप्रकर्त्तव्योदंतधावनपूर्वकं श्रीनृसिंहमहोग्रस्त्वंकृपांकुरुममोपरि अद्याहंचविधास्यामिव्रतंनिर्विघ्नतांनय इतिव्रतग्रहणमंत्रःव्रतस्थेननकर्त्तव्यासंगतिःपापिभिःसह मिथ्यालापोनकर्त्तव्यःसमग्रफलकांक्षिभिःस्त्रीभिर्दुष्टैश्चआलापान्व्रतस्थोनैवकारयेत् स्मर्त्तव्यंमेमहारूपंमद्दिनेसकलेप्सुभिःततो मध्याह्नवेलायांनद्यादौविमलेजले गृहेवादेवखातेवातडागेविमलोदके वैदिकेनैवमंत्रेणस्नानंकृत्वाविचक्षणः मृत्तिकागोमयेनैवतथाधात्रीफलेनच तिलैश्चसर्वपापघ्नैःस्नानंकृत्वामहामतिः परिधायशुचिवासोनित्यकर्मसमारभेत् ततोगृहंसमागत्यस्मरन्मांभक्तियोगतः गोमयेनप्रलिप्याथकुर्य्यादष्टदलंशुभम् कलशंस्थापयेत्तत्ररत्नपल्लवग

भितम् तस्योपरिन्यसेत्पात्रंतंडुलैःपरिपूरितम् हैमींतत्रचमन्मूर्त्तिंस्थाप्याभ्यर्च्चयेत्तथैवच पलेनचतदर्द्धेनतदर्धार्द्धेनवापुनः यथाशक्तिस्तथाकार्यावित्तशाठ्यविवर्जिता पंचामृतेनसंस्नाप्यपूजनंचसमाचरेत् ततोब्राह्मणमाहूयतमाचार्य्यमलोलुपं सदाचारसमायुक्तंशांतदांतंजितेंद्रियम् तेनैवकारयेत्पूजांइच्छाशास्त्रानुसारतः आचार्य्यपठनाद्धीमान्पूजांकुर्य्याद्यथाविधिः मंडपंकारयेत्तत्रपुष्पस्तवकशोभितम् ऋतुकालोद्भवैःपुष्पैःपूजयेद्यतमानसः उपचारैःषोडशभिर्मंत्रैर्नामभिरंकितैः ततःपौराणिकैर्मंत्रैःपूजनीयोयथाविधिः चंदनंशीतलंदिव्यंचंद्रकुंकुममिश्रितं ददामितवतुष्ट्यर्थंनृसिंहपरमेश्वरइतिचंदनमंत्रः कालोद्भवानिपुष्पाणितुलस्यादीनिवैप्रभो पूजयामिनृसिंहत्वांलक्ष्मासहनमोस्तुते कालागुरुमयंधूपंसर्वदेवसुवल्लभम् करोमितेमहाविष्णोसर्वकामसमृद्धये दीपःपापहरःप्रोक्तस्तमोराशिविनाशनः दीपेनलभ्यतेतेजस्तस्माद्दीपंददाम्यहम् नैवेद्यंसौख्यदंदेवभक्ष्यभोज्यसमन्वितम् ददामितेरमाकांतसर्वपापक्षयंकुरु नृसिंहाच्युतदेवेशलक्ष्मीकांतजगत्पते अनेनार्घ्यप्रदानेनसफलाःस्युर्मनोरथाः पीतांबरमहाबाहोप्रल्हादाभयदायक यथाभूतार्चनेनाद्ययथोक्तफलदोभव रात्रौजागरणंकार्य्यंगीतवादित्रनिःस्वनैः पुराणपठनैर्नृत्यैःश्रोतव्याचकथाशुभा ततःप्रभातसमयेस्नानंकृत्वाह्यतंद्रितः पूर्वोक्तेनविधानेनपूजयेन्मांप्रयत्नतः वैष्णवंतुचरेच्छ्राद्धंमदग्रेस्वस्थमानसः ततोदानानिदेयानिवक्ष्यमाणानिचानघ पात्रेभ्यस्तुद्विजेभ्यश्चलोकद्वयजिगीषया सिंहःस्वर्णमयोदेयोममसंतोषकारकः गोभूतिलहिरण्यानिदेयानिचफलेप्सुभिः शय्यासतूलिकादेयासप्तधान्यसमन्विता अन्यानिचयथाशक्त्यादेयानिममतुष्टये वित्तशाठ्यंनकर्त्तव्यंयथोक्तफलमिच्छता ब्राह्मणान्भोजयेद्भक्त्यातेभ्योदेयाचदक्षिणा निर्द्धनैरपिकर्त्तव्यंदेयंशक्त्यनुसारतः सर्वेषामेववर्णानामधिकारोस्तिमद्व्रते मद्भक्तैस्तुविशेषेणकर्त्तव्यंमत्परायणैः मद्देशेयेचराजानोजननिष्यंतिचमत्पराः

गुरुकुल कांगड़ी
पुस्तकालय

तान्समुद्धरदेवेशदुस्तराद्भवसागरात् पातकार्णवमग्नस्यव्याधिदुःखांबुराशिभिः जीवैस्तुपरिभूतस्यमहादुःखगतस्यच करावलंबनंदेहिशेषशायिन्जगत्पते श्रीनृसिंहरमाकांतभक्तानांभवनाशन क्षीरांबुधिनिवासस्त्वंचक्रपाणेजनार्दन व्रतेनानेनदेवेशभुक्तिमुक्तिप्रदोभव एवंप्रार्थ्यततोदेवंविसृज्यचयथाविधिः उपहारादिकंसर्वमाचार्य्यायनिवेदयेत् मध्यान्हेतुसमायुक्तोभुंजीतबंधुभिःसह यइदंशृणुयाद्भक्त्याव्रतंपापप्रणाशनं तस्यश्रवणमात्रेणब्रह्महत्यांव्यपोहति व्रतंनामव्रताख्यानमित्यर्थः पवित्रंपरमंगुह्यंकीर्त्तयेद्यस्तुमानवः सर्वान्कामानवाप्नोतिव्रतस्यास्यफलंलभेत् इतिनृसिंहचतुर्दशीव्रतकथा अस्यामेवचतुर्दश्यां ओंकारेश्वरयात्राप्युक्ता काशीखंडे राधशुक्लचतुर्दश्यांममापिक्षेत्रवासिनः तत्रयात्रांकरिष्यंतिमहोत्सवपुरःसरां तत्रजागरणंकृत्वाचतुर्दश्यामुपोषिताः प्राप्नुवंतिपरंज्ञानंयत्रकुत्रापियेमृताः ब्रह्मांडोदरमध्येतुयानितीर्थानिसर्वतःतानिवैममभूयासुरागत्याकृतिदर्शनाइति अस्यामेवकालांतरोक्तंलिंगव्रतम् तदुक्तंहेमाद्रौ चतुर्दश्यांशुक्लपक्षेवैशाखस्यप्रयत्नतः शिवंपूज्यविधानेनमहास्नपनपूर्वकम् विलिप्यकुंकुमेनैवचंदनैश्चार्चयेच्छिवम् लिंगंपिष्टमयंकृत्वाहेमपुष्पाविलेपनं तिलप्रस्थंस्वर्णयुतंगुग्गुल्वगुरुसिल्हकंधूपंदत्वा दमनपुष्पैः संपूज्यभवायरुद्रायेतिनाम्नादद्याद्व्रतकर्त्तुस्तत्पितृणांचशिवलोकप्राप्तिर्भवतीति अस्याःसर्वमेवकृत्यंनारदीयेप्युक्तम् वैशाखस्यचतुर्दश्यांश्रीनृसिंहव्रतंचरेत् उपवासविधानेनशक्तोशक्तस्तथैकभुक्निशागमेतुसंपूज्यनृसिंहंदैत्यसूदनंउपचारैःषोडशभिःस्नानैःपंचामृतादिभिःततःक्षमापयेद्देवंमंत्रेणानेननारद तप्तहाटककेशांतज्वलत्पावकलोचनवज्राधिकनखस्पर्शदिव्यसिंहनमोस्तुते इतिसंप्रार्थ्यदेवेशंव्रतीस्यात्स्थंडिलेशयः जितेंद्रियोजितक्रोधःसर्वभोगविवर्जितःएवंयःकुरुतेविद्वान्विधिवद्व्रतमुत्तमं वर्षेवर्षेसलभतेभुक्तभोगोहरेःपदंओंकारेश्वरयात्राचकार्य्यात्रैवमुनीश्वर दुर्लभंचागमंचात्रदर्शनंपापनाशनं किमत्रबहुनोक्तेनपूजाध्यानजपेक्षणात् य

द्भवे तत्समुद्दिष्टंज्ञानंमोक्षप्रदंनृणाम् अत्रालिंगव्रतंचापिकर्त्तव्यंपापनाशनं पंचामृतेनसंस्नाप्यालिंगमालिप्यकुंकुमै नैवेद्यैस्सफलैर्हृद्यैःदीपावलिविभूषणैः एवंयःकुरुतेपैष्टंलिंगंसर्वार्थासिद्धिदं भुक्तिमुक्तींसलभतेमहादेवप्रसादतः इयं चगारुडकल्पादिःतत्रकल्पादिविधानोक्तं श्राद्धदानादिसर्वमेवाक्षयफलदमुक्तंभवति इतिवैशाखशुक्लचतुर्दशीकृत्यानि अथवैशाखपौर्णिमायां वैशाखस्नानं प्रातरवश्यमेवकार्यं तथाचभविष्ये वैशाखीकार्त्तिकीमाघीतिथयोतीवपूजिताः स्नानदानविहीनासानकार्यापांडुनंदन अस्यांदानप्रकारोनारदीये वैशाख्यामपिपूर्णायांदानंसर्वःस्यसर्वदम् यद्यद्द्रव्यंदददिप्रेतत्तदाप्नोतिनिश्चितं धर्मराजव्रतंचात्रकथितंतन्निशामय घृतान्नमुदकुंभंचवैशाख्यांवैद्विजातये यस्तुकृष्णाजिनंदद्यात्सत्कृत्यविधिपूर्वकं सर्वशास्त्रविदेसप्तद्वीपभूमिप्रदःसवै मोदतेविष्णुलोकेहियावच्चंद्रार्कतारकं कुंभान्स्वच्छतिलैःपूर्णान्हिरण्येनसमन्वितान् यःप्रदद्याद्द्विजाग्र्येभ्यः सनशोचतिकर्हिचिदिति पाद्मे वैशाख्यांविधिवत्स्नात्वाभोजयेद्ब्राह्मणान्दश कृशरंसर्वपापेभ्योमुच्यतेनात्रसंशयइति विष्णुधर्मोत्तरे वैशाख्यांपौर्णमास्यांतुब्राह्मणान्सप्तपंचवा क्षौद्रयुक्तैस्तिलैःकृष्णैर्वाचयेद्यदिचेन्नरः प्रीयतांधर्मराजेतियद्वामनसिवर्त्तते तिलैर्दत्तैरितिशेषः वाचयेत्स्वस्तिवाचयेदित्यर्थः यावज्जीवकृतात्पापात्तत्क्षणादेवमुच्यतइति यत्कालःस्यादित्यर्थः धर्मराजः प्रीयतां विष्णुः प्रीयतामितिवा तथा प्रपाकार्याप्रयत्नेनगोद्विजार्थंप्रयत्नतइति ब्रह्मपुराणे वैशाख्यांपौर्णमास्यांतुसृष्टाःकमलयोनिना तिलाःकृष्णाश्चगौराश्चतुष्ट्येसर्वदेहिनां तस्मात्कार्यैतिलैः स्नानंतत्राग्नौजुहुयात्तिलान् निवेदयेच्चविधिवत्तिलपात्रंचविष्णवे तिलतैलेनदीपाश्चदेयादेवेभ्यएवच मोदकाश्च तिलैःस्नानंकर्त्तव्यंपितृतर्पणम् तिलैःसमधुभिर्युक्तंब्राह्मणेभ्यश्चभोजनं दातव्यादक्षिणाचापितिलैर्मधुयुतैः सहमंत्रंजयेच्चपौराणंपारंपर्यक्रमागतं तिलास्तुसोमदैवत्याःसुरैःसृष्टास्तुगोसवे स्वर्गप्रदाःस्वतंत्राश्चतेमांरक्षंतु

नित्यशः दद्यादनेनमंत्रेणतिलपात्राणितत्रच एवंकृतेसमुक्तःस्यात्पापैर्जन्मशतार्जितैः महाभारतेपि वैशाख्यां पौर्णमास्यांतुतिलान्दद्याद्द्विजातिषु तिलाभक्षयितव्यास्तुतथैवालंभनंतिलैः कार्यंसततमिच्छद्भिः श्रेयःसर्वात्मना। गृहे आलंभनमुद्वर्तनं जाबालिः सुवर्णतिलसंयुक्तैःब्राह्मणात्पंचसप्तवा तर्पयेदुदपात्रैश्चब्रह्महत्यांव्यपोहति तर्पणमत्रतिलानांदानमुक्तं वैशाखमधिकृत्यदेवीपुराणे इंद्राग्निदैवतेऋक्षेपौर्णमास्यांतथैवच पूजांकृत्वाभवेद्ब्रह्मन्विगताघोनसंशयः इंद्राग्निदैवतंविशाखा पूजादुर्गायाः देवीपुराणोपक्रमात् तेनविशाखायुक्तायांवैशाखपौर्णिमायांदुर्गायाःपूजांकृत्वा ससुवर्णतिलदानेनसकलाघनाशःफलं सुवर्णनभिंकृत्वातुसखुरंमृगमार्गकंतिलैः प्रच्छाद्ययोदद्यात्तस्यपुण्यफलंशृणु ससमुद्रगुहातेनसशैलवनकानना चतुरंताभवेद्दत्तापृथिवीनात्रसंशयःकृष्णमार्गंकृष्णमृगचर्म एवमेवनिर्णयामृते पुराणसमुच्चये वैशाख्यांपौर्णमास्यांतुविशाखासुविशेषतः यस्तुकृष्णाजिनंदद्यात्सखुरंशृंगसंयुतमित्यादिना अथास्यांसोमव्रतं सुमंतुरुवाच सोमव्रतंतथाचात्रशंकरप्रीतयेशृणु ताम्रपात्रंपयःपूर्णंकृत्वातत्रचशंकरं प्रच्छाद्योपरिवस्त्रेणगंधपुष्पाक्षतंमहत् महत्ताम्रपात्रमित्यन्वयः षट्त्रिंशदंगुलंपात्रमुत्तमंपरिकीर्तितमितिप्रतिपादितं शिवभक्तेद्विजेदद्याद्भोजयित्वाविधानतः प्राच्यांसमुद्गतेसोमेप्रतीच्यांचगतेरवौ पौर्णमास्यांतुवैशाख्यांगृहपात्रंशिवाग्रतः प्रीयतांतिमहादेवः सोममूर्तिर्जगत्पतिः तस्मैविप्रायतत्पात्रमर्पयेद्भक्तितःशनैः एतत्सोमव्रतंनामकृत्वासोमांतिकंव्रजेत् रुद्रलोकादिहायातोभवेज्जातिस्मरोनरः पूर्वाभ्यासेनतेनैवपुनःशिवपुरंव्रजेत् इतिवैशाख्यांसोमव्रतम् वैशाखीकार्तिकीमाघीतिथित्रयमधिकृत्य वैशाखीपौर्णिमाविधानम् भविष्योत्तरे युधिष्ठिरउवाच संवत्सरेपियाः काश्चित्तिथयःपुण्यलक्षणाः तामेवदयदुश्रेष्ठस्नानेदानेमहाफलाः श्रीकृष्णउवाच वैशाखीकार्तिकीमाघीतिथयोतीवपूजिताः स्नानदानविहीनास्तान

नेयाःपांडुनंदनतीर्थस्नानंतथाशस्तंदानंवित्तानुसारतः वैशाख्यांपांडवश्रेष्ठपुण्याचोज्जयिनीमता कार्तिक्यांपुष्करंश्रेष्ठंमाघेवाराणसीमता स्नानेनोदकदानेनतारयंत्यखिलान्पितॄन् कुंभांच्छुद्धजलैःपूर्णान्हिरण्यान्नसमन्वितान् वैशाख्यांब्राह्मणेदत्वानशोचतिकृताकृतौ मधुरान्नरसैःपूर्णंभाजनेकनकोज्ज्वलेबहूनिधनधान्यानिभक्त्यापरमयायुतः गोभूहिरण्यवासांसिविप्रायाविधिनार्पय माघ्यांस्नात्वातथासम्यक्संतर्प्यपितृदेवताः तिलपात्राणिदेयानितथासफलमोदनं कार्पासदानमत्रैवधेनुदानंप्रशस्यते कंबलाजिनरत्नानिमोचकौपापमोचकौ उपानद्दानमत्रैवतुल्यमश्वरथेनतु प्रत्यूषेतत्रवास्नानंदानंवित्तानुसारतः कालेकालोद्भवंसर्वंशस्यतेपांडुनंदन कार्तिक्यांतुवृषोत्सर्गंविवाहंपुण्यलक्षणम् कुर्य्यात्कुरुकुलश्रेष्ठहरेर्नीराजनंतथा गजाश्वरथदानानिघृतधेन्वादिकानिच प्रदेयानिद्विजातिभ्यस्तास्ताःसंस्मृत्यदेवताः फलानियानिविद्यंतेसुगंधीन्यगदानिच अगदान्यौषधानिएलालवंगादीनि तानिच कंकोलकंफलंजातीलवंगोलवलीफलं खर्जूरंनारिकेलंचकदलीफलमेवच दाडिमंमातुलिंगंचकर्कोटंत्रपुसंतथा वृंताकंकारवेल्लंचचिंचाकूष्मांडमेवच फलानामप्रदानेनयेषांतुतिथयोगताः व्याधिताश्चदरिद्राश्चजायंतेभुविमानवाः नकेवलंब्राह्मणानांदानमत्रप्रशस्यते भागिनीभागिनेयानांमातुलानांपितृष्वसुः दरिद्राणांचबंधूनांदानंकोटिगुणोत्तरं मित्रंकुलीनश्चापन्नोबंधुर्दारिद्र्यपीडितः अभ्यागतोहिदूराद्यः सोतिथिःस्वर्गसंक्रमः वनंप्रस्थापितेरामेससीतेसहलक्ष्मणेमातामहकुलादेत्यविशुद्धेनांतरात्मना शपथैःश्राविताऽनेकैः कौशल्याभरतेनवै यदानप्रत्ययंयाताकदाचित्कौशलात्मजा तदासाशुचिभावेनतिथयः श्राविताःपुनः वैशाखीकार्तिकीमाघीतिथयोमरपूजिताः अप्रदानवतोयांतुयस्यार्योनुमतेगतः अंकमानीयभरतंसांत्वयामासदुःखितं एतत्तिथीनांमाहात्म्यंकथितंबहुविस्तरंभूयस्तुसंप्रवक्ष्यामितवभारतसत्तम वैशाखकार्तिकमघासहितानरेंद्रयापूर्णिमाभवतिपूर्णशशांकचिह्ना

तस्यांजलान्नकरकान्वरमाम्रपत्रैर्दत्त्वाप्रयातिपुरुषः पुरुहूतलोकं इतिभविष्योत्तरे वैशाखीकार्तिकीमाघीविधिः अथवैशाखकृत्योद्यापनं अपरार्केवामनपुराणे मासमेवंबहिः स्नात्वानद्यादौविमलेजले एकादश्यांचद्वादश्यांपौर्णिमायामथापिवा उपोष्यनियतोभूत्वाकुर्यादुद्यापनंबुधः मंडपंकारयेदादौकलशंतत्रविन्यसेत् निष्केणवातदर्धेनतदर्धार्धेनवापुनः शक्त्यातुकारयेद्देवंसौवर्णंलक्षणान्वितं लक्ष्मीयुतंजगन्नाथंपूजयेदासनेबुधः भूषणैश्चंदनैःपुष्पैर्दीपैर्नैवेद्यसंचयैः एवंसंपूज्यविधिवद्रात्रौजागरणंचरेत् श्वोभूतेकृतमैत्रोथग्रहवेद्यांग्रहान्यजेत् होमंकुर्यात्प्रयत्नेनपायसेनविचक्षणः तिलाज्येनयवैर्वापितिलैर्वापिस्वशक्तितः अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा प्रतविष्णुतरेणैवइदंविष्णुरनेनवा व्रतसंपूर्तिसिद्ध्यर्थंधेनुमेकांपयस्विनीं पादुकोपानहौछत्रंगुरवेव्यजनंतथा शय्यांसोपस्करांदद्याद्दीपिकांदर्पणंतथा ब्राह्मणान्भोजयेत्त्रिंशत्तेभ्योदद्याच्चदक्षिणां कलशांस्तोयसंपूर्णांस्तेभ्योदद्याद्यवांस्तथा एवंकृतेमाधवस्यउद्यापनविधौशुभं फलमाप्नोतिसकलंविष्णुसायुज्यमाप्नुयात् एतावत्यशक्तौ तत्रैवोक्तं वैशाख्यांविधिवत्स्नात्वाभोजयेद्ब्राह्मणान्दश कृशरंसर्वपापेभ्योमुच्यतेनात्रसंशयः इतिवैशाखोद्यापनम् अथ होममंत्रौ प्रतविष्णुस्तुवंतेवीर्येणमृगोनभीमःकुचरोगिरिष्ठः यस्योरुषुविक्रमणेष्वधियंतिभुवनानिविश्वा १ इदं विष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपांसुरे २ अथगोदानस्यविधिः तत्रादौदेशकालौ संकीर्त्यआत्मना सह एकविंशतिपुरुषतारणार्थंसर्वपृथिवीदानफलप्राप्त्यर्थंच वैशाखमासस्यस्नानदानजपहोमब्राह्मणपूजनदक्षिणान्नदानादिसमस्तफलप्राप्तिभूतगोदानमहंकरिष्ये ततोगणपतिपूजनपूर्वकगोदानप्रतिग्रहीतारं ब्राह्मणंवृणुयात् आत्मनोगोत्रप्रवरनामादिकमुच्चार्यब्राह्मणस्यगोत्रप्रवरनामादिकंद्वितीयांतमुच्चार्य्य अस्मिन्गोदानप्रतिग्रहकर्मणित्वामहंवृणे एवंकृत्वायथामिलितोपचारैर्विप्रंसंपूज्य गवेनमइतिसवत्सांगांसंपूज्य तद्देहेदेवानावाहयेत्

शृंगमूलयोर्ब्रह्मविष्णू आवाहयामि१ शिरोमध्येमहादेवंआवाहयामिललाटाग्रेगौरींमा०नासावंशेषण्मुखमा०४नासापुटयोःकंबलाश्वतरौनागावा- ५ कर्णयोरश्विनावा ६ नेत्रयोः शशिभास्करावा- ७ दंतेषुवायुमा. ८ जिह्वायांवरुणमा ९ हुंकारेसरस्वतीमा १० गंडयोर्यक्षानावा- ११ ओष्ठयोःसंध्याद्वयमा. १२ ग्रीवायामिंद्रमा, १३ कुक्षौरक्षांस्या. १४ उरसिसाध्याना- १५ खुराग्रेषुअप्सरोगणाना १६ पृष्ठएकादशरुद्राना. १७ सर्वसंधिषुवसूना. १८ श्रोणीतटेपितृना. १९ लांगूलेसोममा. २० बालसमूहेआदित्यरश्मीन् २१ गोमूत्रेगंगामा. २२ गोमयेयमुनामा- २३ क्षीरेसरस्वतीमा. २४ दधिनिनर्मदामा. २५ सर्पिषिहुताशनमा- २६ रोमसंधिषुवसूना- २७ समस्तसंधिषुदेवकोटीरावाहयामि उदरेपृथिवीमा. स्तनेषुचतुरः सागरानावाहयामि इत्यावाह्य सर्वानेवमितिपंचोपचारैः संपूज्य आच्छादनंमयादत्तंशुद्धंदेविविनिर्मितं सुरभ्यैवस्त्रदानेनप्रीयतांपरमेश्वर इतिमंत्रेणवस्त्रंनिवेद्य स्वर्णशृंगरौप्यखुरताम्रपृष्ठमुक्तालांगूलानियथास्थानंनिवेश्यनैवेद्यंदत्त्वा कांस्यदोहनंनिधाय प्राङ्मुखोदातापुष्पांजलिंगृहीत्वा त्रिःप्रदक्षिणीकृत्य यालक्ष्मीःसर्वभूतानांयाचदेवेष्ववस्थिता धेनुरूपेणसादेवीममपापंव्यपोहतु १ देहस्थायाचरुद्राणांशंकरस्यसदाप्रिया धेनुरूपेणसादेवीममपापंव्यपोहतु २ विष्णोर्वक्षसियालक्ष्मीःस्वहायाचविभावसौ चंद्रार्कशक्रशक्तिर्याधेनुरूपास्तुसाश्रिये चतुर्मुखस्ययालक्ष्मीर्यालक्ष्मीर्धनदस्यच लक्ष्मीर्यालोकपालानांसाधेनुर्वरदास्तुमे स्वधायापितृमुख्याणांस्वाहायज्ञभुजांतथा सर्वपापहराधेनुस्तस्माच्छांतिंप्रयच्छमे इतिपुष्पांजलिंदत्त्वागोपुच्छोदकेनदेवर्षिपितृतर्पणंकुर्यादितिकेचित् तत्रमूलंचिंत्यं ततस्ताम्रपात्रेकांस्यपात्रेवाघृतदधितिलकुशोदकसुवर्णादिदक्षिणान्वितं गोपुच्छंकृत्वाओमद्येत्यादिदेशकालौसंकीर्त्यात्मनश्चगोत्रप्रवरनामादिकमुच्चार्य पूर्वोक्तफलंविचिंत्य भुक्तिमुक्तिप्रदसर्वयज्ञजन्यफलप्राप्तिसर्वपापक्षयकामो

वैशाखमासस्नानदानादियथोक्तफलावाप्तये इमांगांरुद्रदैवत्यांसुवर्णशृंगरौप्यखुरताम्रपृष्ठादिसर्वोपस्करसंयुतांअमुकवेदांतर्गताममुकशाखिनेयथानामगोत्रप्रवरायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददेनममइतिगोपुच्छं विप्रकरेदत्वा यज्ञसाधनभूतायाविश्वस्याघविनाशिनी विश्वरूपधरोदेवः प्रीयतामनयागवेतिपठित्वा घृतक्षीरप्रदागावोघृतयोन्योमृतोद्भवाः घृतनद्योघृतावर्त्तास्तामेसंतुगृहेसदा गावोममाग्रतः संतुगावोमेसंतुपृष्ठतः सव्यदक्षिणयोर्गावोगवांमध्येवसाम्यहं कइदंकोदात् इतिपठित्वा स्वस्तीतिवदेत् ततोगोप्रतिष्ठार्थमिदंहिरण्यंदशमाषमितं तुभ्यमहंसंप्रददेइत्युक्त्वादद्यात् विप्रोगांप्रतिगृह्यगोमतींविद्यांपठेत् गावोमामुपतिष्ठंतुहेमशृंग्यः पयोमुचः सुरभ्यः सौरभेय्यश्चसरितः सागरास्तथा गावः पश्याम्यहंनित्यंगावः पश्यंतुमांसदा गावोस्माकंवयंतासांयतोगावस्ततोवयं गावः सुरभयोनित्यंगावोगुग्गुलुसन्निभाः गाव; प्रतिष्ठाभूतानांगावः स्वस्त्ययनंमहत् अन्नमेवपरंगावोदेवानांहविरुत्तमं पावनंसर्वभूतानांरक्षंतिचवहंतिच सर्वैषामेवभूतानांगावः शरणमुत्तमं गावः सर्वस्यलोकस्यगावोधन्याः शुभावहाः नमोगोभ्यः श्रीमतीभ्यः सौरभेयीभ्यएवच नमोब्रह्मसुताभ्यश्च पवित्राभ्योनमोनमः ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतम् एकत्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठति ततोब्राह्मणेभ्योभोजनं भूयसीं दक्षिणांच संकल्पयेत् इतिगोदानाविधिः अथकृष्णाजिनदानप्रयोगः तत्रादौदेशकालौसंकीर्त्य ममपुत्रभार्य्याद्यवियोगबहुधनत्वस्वदेशापरित्यागसमग्रभूमिदानफलसर्वलोकजयकामचारित्वाभूतसंप्लवस्वर्गवासादिसकलाभीष्टप्राप्तिकामः कृष्णाजिनदानमहंकरिष्ये इतिसंकल्प्य गोमयोपलिप्तभूमौ कुशोपरिकंबलमास्तीर्य्य तत्रसखुरं सशृंगं कृष्णाजिनमास्तीर्य्य तत्रशृंगयोः सुवर्णंदंतेषुरौप्यं लांगूलेमुक्ताः संनिवेश्यात्मसमतिलैरापूर्य्य वासोयुगलेनाच्छाद्य सुवर्णनाभौ निवेश्ययथाशक्तिरत्नैर्गंधैश्चालंकृत्य चतु

दिक्षुपूर्वादिक्रमेणरत्नपूर्णानिचत्वारिकांस्यपात्राणि घृतक्षीरदधिमधुपूर्णानि चत्वारिमृत्पात्राणिचसंस्थापयेत् दानप्रदेशाद्वहिर्गोमयाविरचितमंडले चंपकशाखायुक्तमजीर्णपीतवस्त्रसहितं जलपूर्णकुंभंस्थापयेत् ततास्तिलपूर्णं लोहपात्रंपश्चिमपादेमधुपूर्णं कांस्यपात्रंदक्षिणपादे १ मधुपूर्णंताम्रपात्रं अग्रिमदक्षिणपादे तिलपूर्णंरजतपात्र अग्रिमवामपादे अक्षतपूर्णंसुवर्णपात्रंनाभिदेशे ५ वक्ष्यमाणपंचमंत्रैःप्रत्येकंन्यसेत् तेचमंत्राः यानिकान्यपि पापानिमयालोभात्कृतानिवै लोहपात्रप्रदानेनप्रणश्यंतुममाघवै यानिपापान्यकामानिकामोत्थानिकृतानिच कांस्यपात्रप्रदानेनतानिनश्यंतुमेसदा २ परापवादपैशुन्यादुष्टमांसस्यभक्षणात् तत्रोत्थितंचमेपापंताम्रपात्रात्प्रणश्यतु कन्यानृतंगवांचैवपरदारप्रधर्षणम् रौप्यपात्रप्रदानेनक्षिप्रंनाशंप्रयातुमे जन्मजन्मसहस्रेषुकृतंपापंकुबुद्धिना सुवर्णपात्रदानात्तन्नाशयाशुजनार्दन ५ एवंपंचपात्राणांपंचमंत्राण्युक्त्वा ततोहेममुक्ताविद्रुमदाडिमबीजपूरसर्वशाकसर्वफलानिनिकटेसंस्थाप्य श्रवणयोःप्रशस्तपत्रेखुरेषुशृंगाटकानिसंस्थाप्य समस्तगुणोपेतंस्नातमाहिताग्निपात्रं वस्त्रयुग्मेनवृत्वायथाशक्त्यालंकारैश्चसंपूज्य ॐतत्सत् पूर्वोक्तफलकीर्तनांते इदंकृष्णाजिनंगोमयोपलिप्तास्तृतकुशोपरिकंबलवस्त्रोपरिस्थितं सुवर्णशृंगंरौप्यदंतंमुक्तालांगूलंवस्त्रयुगाच्छन्नं चतुर्दिक्षुरत्नपूरितकांस्यपात्रचतुष्टयं घृतदधिक्षीरमधुपूर्णमृत्पात्रयुतं चतुर्षुपादेषु तिलमधुघृतशर्करापूर्णलोहकांस्यताम्ररजतपात्रयुतं नाभिदेशेऽक्षतपूर्णं सुवर्णपात्रयुतं हेममुक्ताविद्रुमदाडिमबीजपूरसर्वशाकसर्वफलयुतं कर्णयोः प्रशस्तपत्रयुतंखुरेषु शृंगाटकयुतंसुवर्णनाभिं यथाशक्तिरत्नगंधादिभूषितममुकगोत्रायामुकशर्मणे अमुकगोत्रोमुकनामशर्मातुभ्यमहंसंप्रददेनममेत्युक्त्वासजलंपुच्छंविप्रहस्तेक्षिपेत् तत्रमंत्राःकर्ताकृष्णोविभुर्देवःकृष्णाजिनधरस्तथा त्वद्दानहतपापस्यप्रीयतांमेनमोनमः त्रयस्त्रिंशत्सुराणांत्वमाधारस्त्वेव्यवस्थितः कृष्णोसिमूर्तिमान्साक्षात्कृष्णाजिननमोस्तुते

वृषध्वजःप्रीयतामित्युक्त्वादानसद्गुणार्थं शतनिष्कादिदक्षिणांयथाशक्तिदद्यात् विप्रोयथाशाखंकामस्तुतिंपठित्वा देवस्येतियजुषागृह्णीयात् ततोविप्रंस्वगृहात् विसृज्य गोमयादिरचितेमंडलेयजमानः पूर्वस्थापितचंपकशाखायुतकुंभस्थाद्भिराप्यायस्वेत्यष्टभिर्ऋग्भिः समुद्रज्येष्ठेत्यादिभिरष्टभिर्ऋग्भिरभिमंत्र्यताभिरद्भिश्चंपकशाखायुक्तकुंभस्थाद्भिरभिषक्तःस्नायात् ततःपूर्वस्थापिताजीर्णपीतवस्त्रेणअगप्रोक्षणंकृत्वा अहतेवाससीपरिधाय आचांतश्चंदनादिना अलंकृतःशुद्धोहमितिभावयेत् अंगप्रोक्षणवस्त्रंकुंभसहितंचतुष्पथेप्रक्षिपेत् ततअन्येभ्योब्रह्मणेभ्योयथाशक्तिदक्षिणांदत्त्वा अच्छिद्रमस्त्वितिवाचयेत् ततोब्राह्मणेभ्योभोजनंसंकल्पयित्वा कृतस्यकर्मणईश्वरार्पणंकुर्य्यात् इतिवैशाख्यांकृष्णाजिनदानविधिः॥ अस्यांब्रह्मपुराणदानमुक्तं नारदीये एतद्ब्रह्मपुराणंतुभागद्वयसमन्वितंवर्णितं सर्वपापघ्नंसर्वसौख्यप्रदायकम् सूतशौनकसंवादंभुक्तिमुक्तिप्रदायकम् लिखित्वैतत्पुराणंयोवैशाख्यांहेमसंयुतंजलधेनुयुतंवापिभक्त्यादद्याद्द्विजातये पौराणिकायसंपूज्यवस्त्रभोज्यविभूषणैःसवसेद्ब्रह्मणोलोकेयावच्चंद्रार्कतारकमिति मेषसंक्रांतौ गरुडपुराणदानमपितत्रैव इत्येतद्गारुडंनामपुराणंभुक्तिमुक्तिदम् कीर्त्तितंपापशमनंपठतांशृण्वतांनृणाम् लिखित्वैतत्पुराणंतुविषुवेयःप्रयच्छति सौवर्णहंसयुग्माढ्यंविप्रायसदिवंव्रजेत् इतिगरुडपुराणदानं अत्रैवमत्स्यपुराणदानमपि नारदीये लिखित्वैतत्पुराणंतुहैममत्स्यसमन्वितम् विप्रायाभ्यर्च्चयोदद्यात्सयातिपरमं पदम् मत्स्यपुराणेपि विषुवद्धैममत्स्येनधेन्वाचैवसमन्वितम् योदद्यात्पृथिवीतेनदत्ताभवतिचाखिला इतिमत्स्यपुराणदानम् ॥ स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसावित्सद्वृंदसंरक्षकः धर्मा

धर्मविभागकृद्रघुपतेः पादांबुजार्चारतोजीयात्पुत्रकलत्रमित्रसहितःसंपालयन्क्ष्मांचिरम् १ रणवीरसिंहभूपेनकारितकृत्यसागरे अभूद्वैशाखकृत्यानांरम्योरत्नसमुच्चयः २ इतिश्रीसूर्यवंशावतंसरघुकुलतिलकश्रीरणवीरसिंहमहाराजकारितकृत्यरत्नाकरेवैशाखमासकृत्यरत्नसमुच्चयस्समाप्तः ॥ समाप्तोयंवैशाखमसः ॥ । * * * * ॥

॥ तत्सद्ब्रह्म ॥

172

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिब्बामल्लाधिकारेवैशाखमासोमुद्रितस्समाप्तिमगमत्
संवत् १९४१ आपाढ प्र. २१

ज्यैष्ठमासप्रारम्भः

॥ ॥ श्रीगणेशायनमः अथज्यैष्ठमासकृत्यनिर्णयः तत्रादौ वृषसंक्रांतौ ॥ पूर्वाःषोडशघटिकाःपुण्यकालः रात्रौसंक्रमणेसति प्रागुक्तोनिर्णयः अथमासकृत्यं महाभारते ज्येष्ठामूलंचयोमासमेकभक्तेनसंक्षिपेत् ऐश्वर्यमतुलंश्रेष्ठंपुमान्स्त्रीचाधितिष्ठति संक्षिपेदाधिवाहयेत् तथाच निदाघकालेपानीयंयस्यतिष्ठत्यवारितं संसर्गविषमंकृच्छ्रंनकदाचिदवाप्नुयात् छत्रदानात्तथाज्यैष्ठेसर्वान्कामानवाप्नुयात् छत्रोपानहयोर्दानंतस्मात्श्रेष्ठंद्विजोत्तमाः अक्षयंफलमाप्नोतिनाकलोकंसगच्छति अक्षयफलंछत्रादिदानेनभवेदित्यर्थःवामनपुराणे तस्माज्ज्यैष्ठेसदाभूपतोयस्थंयोर्चयेद्धरिं वीततापोनरस्तिष्ठेद्यावदाभूतसंप्लवं विष्णुधर्मोत्तरे अखिलज्यैष्ठमासव्यापिश्रीप्राप्तिव्रतमुक्तं वैशाख्यांसमतीतायां प्रतिपत्प्रभृतिक्रमात् पूर्ववत्पूजयेद्देवंश्रीसहायंदिनेदिने पुष्पैर्मूलैःफलैश्चैवजुहुयादक्षतांस्तथा विल्वांश्चवह्नौसततंगोरसैर्भोजयेद्द्विजान् त्रिरात्रोपोषितोज्यैष्ठ्यांकनकंप्रतिपादयेत् वस्त्रयुग्मंचराजेंद्रतेन साफल्यमाप्नुयात् इतिश्रीप्राप्तिव्रतं भविष्योत्तरे पिष्टेनकजजंकृत्वाज्यैष्ठेमासिसवेदकं पुष्पैःसंपूज्यगंधाद्यैर्नानावस्त्रविभूषणैः वर्षकोटियुगंसाग्रंसूर्यलोकेमहीयते कजजोब्रह्मा वामनपुराणे उदकुंभांबुधेनूश्चतालवृंतंसचंदनं त्रिविक्रमस्यप्रीत्यर्थंदातव्यंज्यैष्ठमासिच ज्यैष्ठकृष्णप्रतिपदमारभ्यश्रीप्राप्तिव्रतारंभोत्रैवोक्तः ज्यैष्ठकृष्णद्वितीयासमानकल्पादिः तत्रश्राद्धादिकल्पादिकृत्योक्तं ज्यैष्ठकृष्णतृतीयायांगौरीव्रतांगत्वेनधृतिगौर्य्योः पूजनं शतावरीपूजनं ज्यैष्ठकृष्णचतुर्थीव्रतांगत्वेन गणपतिपूजनं चंद्रोदये अर्घ्यदानं नूतप्राशनंचकार्य्यं ज्यैष्ठकृष्णपंचम्यां शंखपालनागपूजनं ज्यैष्ठकृष्णषष्ठ्यां स्कंदकुमारपूजाव्रतं ज्यैष्ठकृष्णसप्तम्यां उभयसप्तमीव्रतांगत्वेन मित्राख्यसूर्यपूजाव्रतं ज्यैष्ठकृष्णाष्टम्यां त्रिलोचनाख्याशिवपूजारंभोनारदीये ज्यैष्ठेमासिद्विजश्रेष्ठकृष्णाष्टम्यांत्रिलोचनं यःपूजयतिलोकेशंनाकलोकंव्रजेन्नरः भविष्योत्तरेपि ज्यैष्ठेमासितथाषाढेश्रावणेचतथापरे अपरे भाद्रपदेमासि

पूजयेच्चतुरोमासान्नीलोत्पलकदंबकैःत्रिपुरांतकरंशंभुंशिवलोकेवसेन्नरःज्यैष्ठकृष्णनवम्यांदुर्गासरस्वतीपूजा ज्यैष्ठकृष्णदशम्यांतिथिपत्वेनधर्मपूजेत्युभयदशमीव्रतं ज्यैष्ठकृष्णैकादशीअपरा युधिष्ठिरउवाचज्यैष्ठस्यकृष्णपक्षेचकावा ह्येकादशीभवेत् एतदाचक्ष्वमेकृष्णयावैपापस्यमोचनी श्रीकृष्णउवाचसाधुपृष्टंत्वयाराजन्लोकानांहितकाम्यया ज्यैष्ठस्यकृष्णपक्षेतुह्यपरानामनामतः एकादशीमहाराजमहापातकनाशिनी ब्रह्महामद्यपःस्तेयीगोत्रहाभ्रूणहा तथा अपरासेवनाद्राजन्पूतोभवतिमानवः कूटमानीकूटसेवीकूटसाक्ष्यंवदेन्नरः तुलाकूटकरःपापीकूटभाषारतश्च यः ज्योतिषांकूटगणकःकूटायुर्वैदिकोभिषक् कूटशास्त्रप्रवक्ताचविज्ञेयानरकौकसः अपरासैवनादेषांपापंनश्यतिनान्यथा क्षत्रियोयःक्षात्रधर्मंत्यक्त्वायुद्धात्पलायते सगच्छेन्नरकंघोरंयावदिंद्राश्चतुर्दशाशिष्यःशास्त्रंपठित्वायो गुरुंनिंदतिनित्यशः चतुराशीतिकल्पांतंरौरवेनरकेवसेत् स्वभर्तारंपरित्यज्ययासेवेत्परपूरुषं सानारीनरकं गच्छेद्यावदाभूतसंप्लवं अपरासेवनादेषांपापंनश्यतिनान्यथा कथयिष्यामिमाहात्म्यमपरायानृपोत्तम शृणुष्व परयाभक्त्यासर्वपापप्रणाशनं पुष्करेचप्रयागेचकाश्यांचनृपसत्तम त्रिष्वरण्येषुराजेंद्रनदीनांसंगमेषुच केदारे चविशालायां जंबूमार्गेतथैवच हरिद्वारेकनखलेकुशावर्त्तेतथैवच ॥ कोटितीर्थेप्रभासेचकुरुक्षेत्रेचपांडव द्वारिकायांचगोमत्यांगंगासागरसंगमे तीर्थेष्वेतेषुराजेंद्रसेव्यमानेषुयत्फलं तत्फलंसमवाप्नोतिह्यपरैकादशीव्रतात् रविग्रहेकुरुक्षेत्रेदानहोमनिषेवणात् गयायांपिंडदानेनप्रयागेस्नानमात्रतः यत्फलंमुनिभिःप्रोक्तमपरासेवनात्तुतत् नातःपरतराकाचित्पुण्याशुभफलप्रदा अर्धप्रसूतांगांराजन्योददातिद्विजन्मने तेनैवपृथिवीदत्तासप्तद्वीपसागरा तस्माच्छतगुणंपुण्यमपराव्रतसेवनात् लोकानांचैवसर्वेषांहितायकथितातव माहात्म्यश्रवणादस्यादशगोदानजं फलं स्त्रीपुमान्समवाप्नोतिनात्रकार्य्याविचारणा इतिब्रह्मांडपुराणे पद्मपुराणेच ज्यैष्ठकृष्णापरैकादशीव्रतकथा

ज्यैष्ठकृष्णद्वादश्यांतिथिपत्वेनहरिपूजाकार्य्या ज्यैष्ठकृष्णत्रयोदश्यांवटसावित्रीव्रतारंभःकार्य्यः पक्षप्रदोषव्रतमपिकार्य्यम् अत्रसावित्रीव्रतारंभे अमावास्यांपूर्णिमानुरोधेनयथात्रिरात्रसंपत्तिस्तथात्रयोदशीकार्य्येतिकथायामुक्तं कृत्यरत्नावल्याममापूर्णिमयोः प्राधान्याभिधानात् ज्यैष्ठकृष्णचतुर्दशीमाहेश्वरकल्पादि तत्रश्राद्धकल्पादिकृत्योक्तंकार्य्यम् अस्यामिवोमासतीजन्मदिनव्रतंस्त्रीभिः सौभग्याप्तयेकार्यम् तथोक्तंनारदीये ज्यैष्ठकृष्णचतुर्दश्यांजातापूर्वमुमासती तस्मात्सातत्रसंपूज्यास्त्रीभिःसौभाग्यवृद्धये उपहारैश्चविविधैर्गीतनृत्योत्सवादिभिः होमैःपयोभिर्वस्त्रैश्चपत्रपुष्पैःसुगंधिभिरिति अथज्यैष्ठस्यामावास्यायांसावित्रीव्रतम् ज्यैष्ठमास्यमावास्याया। सावित्रीव्रतमुत्तमं अवैधव्यायकुर्वंतिस्त्रियःसर्वाः समन्विताइतिराजमार्त्तंडे उक्तंचनिर्णयामृतेभविष्ये ज्यैष्ठमायां तथाज्यैष्ठेवटमूलेमहामतिः त्रिरात्रोपोषितानारीविधिनानेनपूजयेत् अशक्तौतुत्रयोदश्यांनक्तंकुर्य्याज्जितेंद्रिया अयाचितंचतुर्दश्याममायांसमुपोषणम् अथव्रतविधिः उद्यापनंच नद्यादौ तिलामलकरजनीविलेपनपूर्वकंस्नात्वावार्षिकत्वात् पूजादिकंनिर्वर्त्य उद्यापनपूजादिसंकल्पंकुर्यात् तद्यथा तिथ्यादिकमादावुच्चार्य्यममभर्तुःपुत्रादीनांचायुरारोग्यैश्वर्य्यादिप्राप्तिपूर्वकमिहजन्मनि जन्मांतरेच आत्मनश्चावैधव्यप्राप्तये आचरितवटसावित्रीव्रतोद्यापनपूजादिकमहंकरिष्ये इतिसंकल्प्य वृताचार्योवटमूलेगृहेवा वेदिकांविधाय तत्रसर्वतोभद्रंविरच्यतत्र ब्रह्मादिदेवताःसंपूज्य तत्रकलशद्वयंप्रतिष्ठाप्य एकस्मिन्कलशेहैमं ब्रह्माणं ब्रह्मयज्ञानमितिमंत्रेण गायत्रीमंत्रेणसावित्रींहैमींप्रतिष्ठाप्य तदुत्तरद्वितीयकुंभे पलादधिकराजतपर्य्यंके हैमीसत्यवत्सावित्रींयमनारदप्रतिमाः संस्थाप्यनाममंत्रैरावाह्य पुरतः काष्ठभारंकुठारंचहैमंराजतंचनिधायपूजयेत् अत्राशक्तौएकस्मिन्कलशेएकस्या

मेवमूर्त्तौसर्वेषांपूजनं पुष्पपूजोत्तरंनाममंत्रैरंगपूजा सावित्र्यैपादौपू- सावित्र्यै जानुनीकमलपत्राक्ष्यै कटिंभूतधारिण्यैउदरंपू- गायत्र्यैकटिंपू- ब्रह्मप्रियायैशिरःपू-पत्रपुष्पपूजानंतरं अर्घ्यंदद्यात् रजतादिपात्रेणद्वयोरपिउँकारपूर्वकंदेविवीणापुस्तकधारिणि वेदमातर्नमस्तेस्तुअवैधव्यंप्रयच्छमे पतिव्रतेमहाभागेभर्त्तुश्चप्रियवादिनि अवैधव्यंचसौभाग्यंदेहित्वंममसुव्रते पुत्रान्पौत्रांश्चसौभाग्यंगृहाणार्घ्यंनमोस्तुते अथब्रह्मसत्यवतोरर्घ्यदानं त्वयासृष्टंजगत्सर्वंसदेवासुरमानुषं सत्यव्रतधरादेवब्रह्मरूपनमोस्तुते अथयमायअर्घ्यदानं त्वंधर्मसाक्षीलोकानांशुभाशुभविवेककृत् वैवस्वतगृहाणार्घ्यंधर्मराजनमोस्तुते ततोनारदीयार्घ्यदानं नारदायनमस्तुभ्यंसुरेशादिभिरर्चित गृहाणार्घ्यंमयादत्तमवैधव्यंप्रयच्छमे अथसर्वेषांप्रार्थना सावित्रीब्रह्मगायत्रीसर्वदाप्रियभाषिणी तेनसत्येनमांपाहिदुःखसंसारसागरात् मयाकृतंमहाघोरंजन्मांतरशतैरघं भस्मीभवतुतत्सर्वमवैधव्यंप्रयच्छमेब्रह्मसत्यवतोः प्रार्थना अवियोगोयथादेवसावित्र्यासहतेविभो अवियोगस्तथास्माकंभूयाज्जन्मनिजन्मनि सावित्र्याः प्रार्थना सावित्रीत्वंयथादेविचतुर्वर्षशतायुषं पतिंप्राप्तासिगुणिनंममदेवितथाकुरु यमप्रार्थना कर्मसाक्षिन्जगत्पूज्यसर्ववंद्यप्रसीदमे संवत्सरव्रतंसर्वंपरिपूर्णंतदस्तुमे ततःसुवासिनीःसंपूज्य वायनानिदद्यात् कथाश्रवणादिना रात्रिंनयेत् प्रातःअग्निंप्रतिष्ठाप्यअन्वादध्यात् सावित्रींगायत्रीमंत्रेणपायसघृतदूर्वातिलव्रीहियवद्रव्यैःप्रत्येकमष्टोत्तरशतसंख्याकाहुतिभिर्ब्रह्माणंधर्मराजंनारदंचव्याहृतिमंत्रेण तिलव्रीहियवद्रव्यैः प्रत्येकमष्टोत्तरशतसंख्याहुतिभिर्ब्रह्मादिदेवताश्चैके कयाज्याहुत्यैपक्षे सत्यव्रतसावित्र्योर्ब्रह्मसावित्र्योश्च यवाहुत्याहुत्वा पृथक् होमादिकंनास्तीति पूजादौ तन्नाममंत्राभ्यामेव तयोः पूजाइत्युक्तत्वात् एवंहोमंसंपाद्य ततश्चतुर्विंशति द्वादशअष्टौवाचत्वारि मिथुनानि वस्त्रादिनासंपूज्य पूरिकामोदकमंडकादिकूष्मांडनारिकेल

मातुलुंगदाडिमबीजपूरादिफलहरिद्राकुंकुमकेसरविचूर्णकज्जलकंठसूत्रकंकणमौक्तिकपादभूषणंवस्त्रकंचुकीआदर्शपात्रादिदक्षिणातांबूलादियुतं सूर्पस्थंनवंसूर्पसहितंवायनंदद्यात् तत्रमंत्रःसोपस्करंद्विजश्रेष्ठव्रतसंपूर्तिकारकं वायनंतेप्रयच्छामिसावित्रीप्रीयतामिति ततःपीठंव्रतपूर्त्तयेगांचदत्त्वा सदन्नेनब्राह्मणान्संतर्प्य आशिषोगृहीत्वा इष्टजनैः सहभुंजीत इयानत्रविशेषः रात्रौअरुंधतीं दृष्ट्वा संपूज्य अर्घ्यंदद्यात् अरुंधतिनमस्तुभ्यंवसिष्ठस्यप्रियेशुभपुत्रान्देहिसुखंदेहिगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यंदत्त्वाभुंजीत अथात्रपंचतपोव्रतं मात्स्ये ज्यैष्ठेपंचतपाःसायंहेमधेनुप्रदोभवेत् यात्यष्टमीचतुर्दश्योरुद्रव्रतमिदंस्मृतं ज्यैष्ठेअष्टम्यांचतुर्दश्यांच शुक्लायांपंचतपाःपंचाग्निव्रतधृक्चतुर्दश्यांसायंकालेव्रतांतेहेम्नोधेन्वाश्चदानाद्दिवंयातीत्यर्थः हेमधेन्वोरितिषष्ठीसमासः षष्ठ्यर्थेलक्षणायते तथाचाग्नेये ज्यैष्ठेपंचतपाःसायंचतुर्दश्यष्टमीषुच यःकरोतिसुवर्णस्यधेनुदानंद्विजातये सयातिशांकरंलोकंरुद्रव्रतमिदं स्मृतम् धेनुंसौवर्णींशेषंपूर्ववत्इति इंद्रव्रतं ज्यैष्ठशुक्लपक्षेकर्त्तव्यंसप्ताहमात्रसाध्यं अत्राशक्तौशुक्लपक्षे अष्टमी चतुर्दशीमात्रेपिवाकार्यम् तत्रैवास्यसमाप्तिदर्शनात् अष्टमीचतुर्दश्योःप्रत्येकदिनसाध्यंवा अस्य समाप्तिश्चतुर्दश्यामेवोक्तासायंकालएवेत्युक्तत्वात् वामनपुराणे शुक्लपक्षेदानमुक्तम् उदकुंभांबुधेनुंचतालवृत्तंसचंदनं त्रिविक्रमस्यप्रीत्यर्थंदातव्यंसाधुभिःसदेति ज्यैष्ठप्रकरणात् सदाज्यैष्ठशुक्लपक्षएवेदंदानं प्रतिवर्षंप्रदेयामितिसदापदद्योतनाभिप्रायः शिष्टाश्चाप्युदाहरंति योवृषवार्तिनिसवितरिशिरीषवरबीजमश्नाति सनरःखगपतिसदृशोनागकुलंदृश्यतेसततम्बीजवरेण कीटाद्याविद्वता ज्यैष्ठशुक्लप्रतिपदायामारोग्यप्रतिपद्व्रतांगत्वेन वरुणाख्यसूर्यपूजाव्रतंकार्यं नारदीये अत्रकरवीरव्रतमुक्तं अथज्यैष्ठेशुक्लपक्षेपक्षत्यांदिवसोदये देवोद्यानभवंहृद्यंकरवीरंसमर्चयेत् रक्ततंतुपरीधानंगंधधूपविलेपनैः प्रभूतसप्तधान्यैश्चनारंगैर्बीजपूरकैः अभ्युक्ष्याभ्युक्ष्यतोयेनमंत्रेणात्थक्षमापयेत्

ग्राह्या वृहत्तयातथारंभासावित्रीवटपैतृकी कृष्णाष्टमीचभूताचकर्त्तव्यासंमुखीतिथिरितिस्कांदोक्तेः अस्याःकथाविधानंच भविष्ये युधिष्ठिरउवाच स्त्रीणांसंपद्यतेयेनमर्त्यलोकेगृहेशुभं पतिप्रेमतथात्यंतंतन्मेब्रूहिव्रतंशुभ श्रीकृष्णउवाच एकदापार्वतीशंभूस्थितौमुनिसुरावृतौ कैलासशिखरेरम्येनानाधातुविचित्रिते नानाद्रुमलताकीर्णेनानापुष्पोपशोभिते शंकरःपार्वतींप्राहकिंत्वयासद्व्रतंकृतं वामोरुयेनमेत्यंतंप्रियासिवरवर्णिनि आगच्छजानुदेशंमेसुप्रसन्नाननाप्रिये ब्रूहिचावितथंसर्वंत्वयापार्वतियत्कृतं इत्युक्ताप्रणताभूत्वागौरीप्राहशिवंशुभा तृतीयायांसमाचीर्णमयारंभाव्रतंशुभं तेनमेत्वंमनोहारिभर्त्ताभूतोसिशंकरईश्वरीचाप्यहंस्त्रीणांतवदेहार्धहारिणी ईश्वरउवाच कीदृशंतद्व्रतंभद्रेसर्वसौख्यप्रदायकं ब्रूहिपार्वतियत्तेनयच्चीर्णंपितुरंतिके गौर्य्युवाच पुराहंदेवतिष्ठामिकुमारीभवनेपितुःहिमवद्गह्वरेरम्येसखीगणसमावृता ततोहंमेनयाप्रोक्तास्वपित्राचाहिमाद्रिणा पुत्रिरंभाव्रतंचीर्णंचिरसौभाग्यवर्धनं येनप्रारब्धमात्रेणसर्वसंपत्स्यतेतव सौभाग्यंस्त्रीगणैश्वर्यंमहादेवीपदंततः एवंकरोमितेतातमयाचोक्तंवचःपितुः मनोभिलषितंकांतंयेनप्राप्नोमिशंकरं मेनोवाच अद्यशुक्लतृतीयायांस्नात्वानियमतत्परा कुरुपार्श्वेषुपंचाग्नीनुज्ज्वलमानान्हुताशनान् गार्हपत्यंदक्षिणाग्निमानायाहवनीयकं पंचमंभास्करंतेजइत्येतेपंचवह्नयः एतेषांमध्यमाभूत्वातिष्ठपूर्वमुखाचिरं सर्वाभरणसंयुक्तांदेवीमाभिमुखीकुरु महालक्ष्मींमहाकालींमहामायांमहामहीं चतुर्भुजांध्यानपरांपंकजोपरिसंस्थितां मृगाजिनच्छन्नकुचांजटावल्कलधारिणीं गंगाचयमुनासिंधुःशतद्रुर्नर्मदानदी सरस्वतीवैतरणीसैवप्रेक्तामहासती तस्याश्चप्रोक्षणपराभवतद्भावभाविता होमंकुर्युर्यतात्मानोब्रह्मणाःसर्वतोदिशं देव्याःपूजाप्रकर्त्तव्यापुष्पधूपादिनाततः वहुप्रकारैर्भक्ष्यैश्चनैवेद्यैर्घृतपाचितैः स्थापयेत्पुरतोदेव्याःपृथक्सौभाग्यमेवचजीरकंतृणराजश्चकुसुंभंकुंकुमंतथा निष्पावाःपावनतरालवणंशर्करागुडं पुष्पमंडपिकाकार्य्यागंधपुष्पाधिवासि

करवीरवृषावासनमस्तेभानुवल्लभ दंभोलिभृत्सदुर्गादिदेवानांसततंप्रिय आकृष्णेनेतिवेदोक्तमंत्रेणेत्थंक्षमापयेत् एवंभक्त्यासमभ्यर्च्यदत्वाविप्रायदक्षिणां प्रदक्षिणंततःकृत्वापश्चात्स्वभवनंव्रजेत् इदंकरवीरपूजाव्रतं भविष्योत्तरेपि एतद्व्रतंपुरापार्थसूर्याराधनकाम्यया अनुष्ठितंविक्षुभयासावित्र्या सत्यभामया दमयंत्यासरस्वत्यागायत्र्या गंगयातथा अन्याभिरपिनारीभिर्मर्त्यलोकेप्यनुष्ठितं करवीरव्रतंपार्थसर्वसौख्यफलप्रदं संपूज्यरक्तकुसुमार्चितसर्वशाखंनीलैर्दलैस्तततनुंकरवीरवृक्षं भुक्त्वामनोभिलषितान्भुविभव्यभोगांस्तेवैप्रयांतिभवनंभरताग्रभानोः अथास्याभेवज्यैष्ठशुक्लप्रतिपदि दशहराव्रतांगत्वेन गंगापूजास्तवादिप्रारंभः कार्य्यः तदुक्तंकाशीखंडे ज्यैष्ठेमासिसितेपक्षेप्राप्यप्रतिपदंतिथिं दशाश्वमेधिकेस्नात्वामुच्यतेसर्वपातकैः एवंसर्वासुतिथिषुक्रमस्नायीनरोत्तमः आशुक्लपक्षदशमीदशजन्माघमुत्सृजेदितिदशहरागंगास्तोत्रं दशहरादशमीविधाने वक्ष्यमाणं ज्ञेयम् ज्यैष्ठशुक्लद्वितीयायांचतुर्वक्त्ररूपभानुपूजा नारदीये ज्यैष्ठशुक्लद्वितीयायांभास्करंभुवनाधिपं चतुर्वक्त्रस्वरूपंचसमभ्यर्च्यविधानतः भोजयित्वाद्विजान्भक्त्याभास्करंलोकमाप्नुयात् इयंज्यैष्ठशुक्लद्वितीयाकालिंजनयंती तदुक्तंज्यैष्ठशुक्लद्वितीयायांबौद्धः कल्किर्भविष्यतीति नभस्येचद्वितीयायांबलभद्रोभवत्तदेत्यादि इयंद्वितीयासोपपदा इतिकालादर्शे सिताज्यैष्ठेद्वितीयाचआश्विनेदशमीसिता चतुर्थीद्वादशीमाघेएताःसोपपदाःस्मृताइति अत्रवेदाध्ययननिषेधो नारदीये युगादिषुचसर्वासुतथामन्वंतरादिषु अनध्यायंप्रकुर्वीततथासोपपदास्वपीति ज्यैष्ठशुक्लतृतीयायांरंभाव्रतमुक्तं नारदीये भविष्येच अथज्यैष्ठतृतीयातुशुक्लारंभेतिनामतः तस्यांसभार्य्यंविधिवत्पूजयेद्ब्राह्मणोत्तमम् गन्धपुष्पांशुकाद्यैस्तुनारीसौभाग्यकाम्यया रंभाव्रतमिदंविप्रविधिवत्समुपोषितं ददातिवित्तपुत्रांश्चमतिंधर्मेशुभावहां माधवीये भविष्येऽपि भद्रेकुरुष्वयत्नेनरंभाख्यंव्रतमुत्तमं ज्यैष्ठशुक्लतृतीयायांस्नातानियमतत्परेति साच विद्धा

ता पद्मासनेनसंतिष्ठेद्यावत्परिणतोरविः ततःप्रणम्यरुद्राणींमंत्रमेतदुदीरयेत् वेदेषुसर्वशास्त्रेषुदिविभूमौधरातले दृष्टःश्रुतश्चबहुशोनशक्त्यारहितःशिवः त्वंशक्तिस्त्वंस्वधास्वाहात्वंसावित्रीसरस्वती पतिंगृहेदेहिदेविवसुदेहिनमोस्तुते एवंक्षमापयेद्देवींप्रणिपत्यपुनःपुनः देहिभक्त्यागृहंरम्यंविचित्रंबहुभूमिकं छाद्यकाटारकेदारकपोतालिविभूषितं कुड्यस्तंभगवाक्षाढ्यंमाणिमंडिततोरणं पद्मरागमहानीलवज्रवैदूर्यभूषितं गृहदानविधानेनब्राह्मणायतपस्विने सपत्नीकायसंपूज्यसर्वोपस्करसंयुतं सुवासिनीभ्यस्तद्देयंनैवेद्यंसूर्पसंस्थितं निर्वर्त्यविधिनानेनततःपश्चात्क्षमापयेत् दांपत्यानिचपूज्यानिचतुर्थ्यांमधुरैरसैः इत्युक्तयामयाचीर्णंहररंभाव्रतंपरं व्रतांतेगस्त्यमुनयेदत्तंगृहवरंशुभं लोपामुद्राप्रियापत्नीतस्यवेश्मनिपूजिता तेनधर्मेणदेवेत्वंभर्तालब्धोसिशंकर अर्धकायेस्थितातेनस्त्रीणांज्येष्ठापिचेश्वरी अतएतद्व्रतंरम्यंयाश्चरिष्यंतियोषितः कौंतेयपुरुषोवापिस्यातंब्रह्मव्रतंभुवितासांपुत्रागृहंभोगाःकुलवृद्धिर्भविष्यति स्त्रीणांचातुलसौभाग्यंगार्हस्थ्यंसार्वकामिकं बालवृद्धस्थमध्यानांरूपलावण्यवृंहणं सपत्नीदर्पदलनंवशीकरणमुत्तमं अनेनव्रतधर्मेणपरलोकेयुधिष्ठिर चिंतितोवापिसंपूर्णः पिंडवंधःप्रजायते मर्त्यलोकेशुभेदेशेशुभेग्रामेशुभेपुरे हिमवद्विंध्ययोर्मध्येचार्यावर्त्तेमनोहरे उत्पद्यचशुभेवासेपूर्वोत्पन्न धनेकुले मृतःशक्रपुरंयातिततोविष्णुपुरंव्रजेत् ततःशिवपुरंयातिव्यासस्यवचनंयथा यद्रंभयामलभयाथहरेस्ततश्चगौर्या हिमाद्रिभवनस्थितायापिचीर्णं तस्याव्रतंभुविकरोतिरतास्वधर्मेब्रह्मेशकेशवपातिंसुखदंलभेत्सा इति भविष्योत्तरे पंचाग्निसाधनंरंभाव्रतं ज्यैष्ठशुक्लतृतीयायांकार्यंअस्योद्यापनं यथाशक्तिगृहदानसहितंकार्य्यं गृहदानं कूर्मपुराणे शक्तितःसर्वसंपूर्णंगृहंरम्यमथापिवा सदक्षिणंद्विजेदत्त्वाब्रह्मलोकंव्रजेन्नरः गारुडेच ऐष्टिकंदारवंवापिमृण्मयंवापिशक्तितः सर्वोपस्करणोपेतंददातिविपुलंगृहं

ब्राह्मणायदरिद्रायविदुषेचकुटुंबिने क्रीडित्वासुचिरंकालंमानुष्यंलोकमागतः भवत्यव्याहतैश्वर्यःसर्वकामसमन्वितः अथगृहदानप्रयोगः गृहमध्येदक्षिणभागेपंचवर्णरजोभिः पद्मं विलिख्य तदुपरिप्रस्थमात्रान्तिलान्तदुपरिशय्यां स्थापयित्वा शय्यापरिसौवर्णौलक्ष्मीनारायणौचसंपूज्य प्रतिग्रहीतारंसपत्नीकंप्रतिग्रहार्थंहूत्वातंचकरेगृहीत्वासमंत्रघोषंवक्ष्यमाणमंत्रैर्गृहंप्रवेशयेत् तेचमंत्राः एह्येहिनारायणदिव्यरूपसर्वामरैरर्चितपादपद्म शुभाशुभानंदशुचामधीशलक्ष्मीयुतस्त्वंचगृहंगृहाण नमःकौस्तुभनाथायहिरण्यकवचायच क्षीरोदार्णवसुप्तायजगद्धात्रेनमोनमः भूर्लोकप्रमुखालोकास्तवदेहेव्यवस्थिताः नंदंतियावत्कल्पांतंतथास्मिन्भवमेगृहे त्वत्प्रसादेनदेवेशपुत्रपौत्रैर्युतोगृहे पंचयज्ञक्रियायुक्तोवसेदाचंद्रतारकं ततस्तंपूर्वस्थापितशय्योपरिउदङ्मुखमुपवेश्यस्वयमासनेप्राङ्मुखउपविश्य ओमद्येत्यादिदेशकालकीर्त्तनानंतरममुकगोत्रायामुकशर्मणेब्राह्मणायेदंपक्वेष्टिकादिरचितंयथोपपत्तिसंपादितंकांस्यताम्रादिभाजनसर्वधान्यलवणगुडशर्करादिविविधरसोपेतं गोबलीवर्द्ददासीदासमंचतूलिकावितानादिसर्वोपकरणयुतंसदीपप्रभोज्यान्नंसर्वदैवतंगृहं सर्वपापक्षयपूर्वककल्पकोटिशतावधिब्रह्मलोकमहीपत्वादियथाभिलषितकामनयातुभ्यमहंसंप्रददे शिलाकाष्ठपक्वेष्टिकारचितगृहेतुकल्पकोटिशतावधिनारायणसमीपक्षीरार्णवनिवासकामइति मृण्मयगृहदानेपि एकैकमन्वंतरावच्छिन्नप्रतिलोकपालपुरनिवासकामइति इहतुमनोभिलषितमहेश्वरप्रतिमभर्त्तुरतिप्रेमान्वितस्थिरसौभाग्यप्राप्तयेरंभातृतीयाव्रतोद्यापनसांगतावाप्तयेइदंतुभ्यमहंसंप्रददे ततःप्रार्थना इदंगृहंगृहाणत्वंसर्वोपस्करसंयुतं तवविप्रप्रसादेनममास्त्वभिमतंफलं गृहंममविभूत्यर्थंगृहाणत्वंद्विजोत्तम प्रीयतांमेजगन्नाथोवास्तुरूपीजनार्दनः ततःप्रतिग्रहीतादेवस्यत्वेति यजुषाप्रतिगृह्णीयात् कामस्तुतिंचपठेत् ततःस्वर्णसहस्रमारभ्यैकसुवर्णपर्यंतंदानदक्षिणा यथाशक्तिप्रदेया पादुकोपानच्छत्रचामरादिकंदद्यात् संपन्नंवाप्यसंपन्नं

गृहोपस्करभूषणं सर्वसंपूर्णमेवास्तुत्वत्प्रसादाद्द्विजोत्तमेतिप्रार्थयेत् अस्यफलं मात्स्ये यएवंसर्वसंपन्नंपक्केष्टंविनिवेदयेत् कल्पकोटिशतंयावद्ब्रह्मलोकेमहीयते शैलजंदारुजंवापियोदद्याद्विधिपूर्वकं वसेत्क्षीरार्णवेरम्येनारायणसमीपतः मृण्मयंवापियोदद्याद्गृहंसुपस्करान्वितं पुरेतुलोकपालानांप्रतिमन्वंतरंवसेत् अत्रवास्तुपूजनमपिकार्यं मंडपवेदिपूजासर्वतोभद्रमंडलदेवतापूजाग्रहहोमादिकंचाचार्यानुमत्यायथाशक्तिकुर्यात् चतुर्दिक्षुचत्वारिकुंडानिविधायदक्षिणाग्निप्रमुखाग्निपूजाहोमादिकं ब्राह्मणैःकारयित्वा दक्षिणावस्त्रगोदानादिकंयथाशक्तिकुर्यात् इतिसोद्यापनंरंभातृतीयाव्रतम् अस्यांसौभाग्यशयनव्रतांगत्वेनललितादेवीपूजा घृतप्राशनंगौरीपूजाव्रतंमंदारपुष्पप्राशनंच इतिज्यैष्ठशुक्लतृतीयाव्रतानि ज्यैष्ठशुक्लचतुर्थ्यां सतीव्रतमुक्तं नारदीये ज्यैष्ठशुक्लचतुर्थ्यांतुसतीव्रतमनुत्तमं कृत्वागणपतेर्मातुर्लोकेमोदेतततत्समं निर्णयामृतेअस्यामुमाजन्मोक्तं ज्यैष्ठशुक्लचतुर्थ्यांतुजातापूर्वमुमासती तस्मात्सातत्रसंपूज्यास्त्रीभिःसौभाग्यवृद्धये उपचारैश्चावविधैर्गीतनृत्योत्सवादिभिः होमैःपयोभिर्वस्त्रैश्चपत्रपुष्पैःसुगंधिभिरिति ज्यैष्ठशुक्लपंचम्यांपितृपूजनं नारदीये तथाज्यैष्ठस्यपंचम्यांपितॄनभ्यर्चयेत्सुधीः सर्वकामफलावाप्त्यै वायनैर्विप्रभोजनैः ज्यैष्ठशुक्लषष्ठ्यांदिननाथपूजाव्रतम् ज्यैष्ठमासेशुक्लषष्ठ्यांविधिनेष्ट्वादिवाकरंलभतेवांछितान्कामांस्तसादान्नसंशयः ज्यैष्ठशुक्लषष्ठ्यामेवस्कंदपूजाव्रतमपिकार्यं ज्यैष्ठशुक्लसप्तम्यामिंद्ररविपूजाव्रतंनारदीये ज्यैष्ठेतुशुक्लसप्तम्यांजातइंद्रोरविःस्वयं तंसंपूज्यविधानेनसोपवासोजितेंद्रियःस्वर्गतिंलभतेविप्रदेवेंद्रस्यप्रसादतः ज्यैष्ठशुक्लाष्टम्यांदेवीपुराणोक्तंशुक्लादेवीपूजाव्रतं शुक्लाष्टम्यांपुरादेवीशुक्लादेवीमहाशनिं बधायदानवेंद्राणांशुक्लांशुक्लेप्रपूजयेत् अशनिजग्राहेतिशेषः नारदीयेप्येवं ज्यैष्ठशुक्लतथाष्टम्यांयोदेवींपूजयेन्नरःसविमानेनचरतिगंधर्वाप्सरसांगणैः ज्यैष्ठशुक्लनवम्यामुमाव्रतंनारदीये ज्यैष्ठशुक्लनवम्यांतुसोपवासोनरोत्तमःउमांसंपूज्यविधिवत्कुमारीर्भोजयेद्द्विजान्

प्र०र०
ज्यैष्ठ०
६

स्वशक्त्यादक्षिणांदत्त्वाशाल्यन्नंपयसाप्लुतं उमाव्रतमिदंविप्रयःकुर्य्याद्विधिवन्नरः सभुक्त्वेहवरान्भोगानंतेस्वर्गगतिंलभेत् अथैवंभविष्योत्तरेपि उपवासपरोभूत्वानवम्यांपूजयेदुमां ब्राह्मणीमितिवैनाम्नाश्वेतरूपेणरूपिणीं ज्यैष्ठमासिनृपश्रेष्ठकृत्वानक्तस्यवैविधिं शाल्यन्नंपयसोपेतंस्वयंभुंजीतवाग्यतः कुमारीर्भोजयेद्भक्त्यास्वशक्त्याब्राह्मणांस्तथेति ज्यैष्ठशुक्लदशमीदशहराख्या तदुक्तंनारदीये ज्यैष्ठशुक्लदशम्यांतुजाह्नवीसरितांवरा समायाताधरांस्वर्गात्तस्मात्सापुण्यदास्मृता अत्रदशयोगविशेषस्तत्रैव ज्यैष्ठःशुक्लदलंहस्तोबुधश्चदशमीतिथिः गरानंदव्यतीपाताःकन्येंदुर्वृषभास्करः दशयोगःसमाख्यातोमहापुण्यतमोमतः हरतेदशपापानितस्माद्दशहरास्मृता अस्यांयोजान्हवींप्राप्यस्नातिसंप्रीतमानसः विधिनाजान्हवीतोयेसयातिहरिमंदिरं हेमाद्रौभविष्ये अस्याःकेवलदशम्याएवहस्तमात्रयोगेदशहरात्वमुक्तम् ज्यैष्ठेमासिसितेपक्षेदशमीहस्तसंयुता हरतेदशपापानितस्माद्दशहरास्मृता॥ वारहेतु गंगायाएवदशहरेतिनामविशेषः दशम्यांशुक्लपक्षेतुज्यैष्ठेमासिकुजेहनि अवतीर्णायतःस्वर्गाद्धस्तर्क्षेचसरिद्वरा हरतेदशपापानितस्माद्दशहरास्मृता तस्यांस्नानंप्रकुर्वीतदानंचैवविशेषतइति स्कांदेपिदशयोगउक्तोयथा ज्यैष्ठेमासिसितेपक्षेदशम्यांबुधहस्तयोः गरानंदव्यतीपातेकन्याचंद्रेवृषेरवौ दशयोगेनरःस्नात्वासर्वपापैःप्रमुच्यते अत्रबुधभौमयोर्योगेकल्पभेदेनव्यवस्था इयंच यत्रयोगबाहुल्यंतत्रैवकार्य्या योगाधिक्यश्रवणात् ज्यैष्ठेमलमासेसतियोगविशेषेण तत्रैवकार्य्यानतुशुद्धे दशहरात्वोत्कर्षश्चचतुर्ष्वपियुगादिष्विवातिवदितिहेमाद्रौऋष्यशृंगोक्तेः तथाचब्रह्मपुराणेज्यैष्ठस्यशुक्लदशमीसंवत्सरमुखीस्मृता तस्यांस्नानंप्रकुर्वीतदानंचैवविशेषतइति इयंचयुगादिवत्स्वतंत्रैवयोगविशेषंविनापिदशपापहरेति तथाचस्कांदे यांकांचित्सरितंप्राप्यदद्याद्दर्भैस्तिलोदकं मुच्यतेदशभिःपापैर्महापातकसंभवैः एवंज्यैष्ठशुक्लदशम्यां नदीस्नानमात्रस्यदशविधपापनिवृत्तिःफलं एवंदानस्यापि तथाच ज्यैष्ठमासि

सितेपक्षेदशमीबुधसंयुता हरतेदशपापानितस्माद्दशहरास्मृता अत्रबुधयोगप्राधान्यं अत्रहस्तयोगोऽधिकः सर्वत्रतिलतर्पणेतिलयोगस्यतुल्यार्थत्वमपेक्षते नदीनात्रस्नानेदशविधपापनिवृत्तिरितिफलविशेषः तथाज्यैष्ठशुक्लदशम्यांतुभवेद्भौमदिनंयदि ज्ञेयाहस्तर्क्षसंयुक्तासर्वपापहरातिथिः तथाच गंगास्नानात्सिताज्यैष्ठेदशमीहस्तसंयुता हरतेदशपापानितस्माद्दशहरास्मृतेतिकृत्यमहार्णवेगांगेयाख्येयोगनिबंधेच ज्यैष्ठमासिक्षितिसुतदिनेशुक्लपक्षे दशम्यांहस्तेशैलान्निर्गमयदियंजान्हवीमर्त्यलोके पापंतस्यांहरतिहितिथौसादशेत्याहुरार्य्याःपुण्यंदद्यादपिदशगुणंवाजिमेधायुतस्य एवंचात्र हस्तभौमयुतायांज्यैष्ठशुक्लदशम्यां गंगास्नातस्यदशविधपापनाशवाजिमेधायुतशतगुणपुण्यप्राप्तिःफलं दशविधपापानितु परिभाषितानि भविष्यत्पुराणे स्कंदपुराणे काशीखंडेच परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनं वितथाभिनिवेशश्चमानसंत्रिविधंस्मृतम् १ पारुष्यमनृतंचापिपैशुन्यंचापिसर्वशः असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधम् २ अदत्तानामुपादानंहिंसाचैवाविधानतः परदारोपसेवाचकायिकंत्रिविधंस्मृतम् अभिध्यानं जिघृक्षा अत्रविशेषःकाशीखंडे ज्यैष्ठमासिसितेपक्षेप्राप्यप्रतिपदंतिथिं दशाश्वमेधिकेस्नात्वामुच्यतेसर्वपातकैः एवंसर्वासुतिथिषुक्रमस्नायीनरोत्तमः आषाढशुक्लनवमींप्रतिजन्मादिमुत्सृजेदिति ज्यैष्ठशुक्लप्रतिपदमारभ्याषाढशुक्लनवम्यंतं काश्यांदशाश्वमेधिकेस्नानं दशाश्वमेधेश्वरदर्शनं तथाच लिंगंदशाश्वमेधेशंदृष्ट्वादशहरातिथौ दशजन्मार्जितैःपापैस्त्यज्यतेनात्रसंशयः दशहरादशमीविधानं भविष्योत्तरकाशीखंडयोः निशायांजागरंकृत्वासमुपोष्यचभक्तितः पुष्पैर्गंधैश्चनैवेद्यैःफलैश्चदशसंख्यया तथादीपैश्चतांबूलैःपूजयेच्छ्रद्धयान्वितः स्नात्वाभक्त्यातुजाह्नव्यांदशकृत्वाविधानतः दशप्रसृतिभिश्चैवतिलान्सर्पिश्चवैजले सक्तुपिंडान्गुडपिंडान्दद्याच्चदशसंख्यया ततोगंगातटेरम्येहेम्नारौप्येणवातथा गंगायाःप्रतिमांकृत्वावक्ष्यमाणस्वरूपिणीं संस्था

प्यपूजयेद्देवींतदलाभेमृदापिच अथतत्राप्यशक्तश्चेल्लिखेत्पिष्टेनवाभुवि वक्ष्यमाणेनमंत्रेणकुर्य्यात्पूजांविशेषतः नारायणमहेशंचब्रह्माणंभास्करंतथा भगीरथचवारीशहिमवंतनगेश्वरं गंधपुष्पादिभिःसम्यग्यथाशक्तिप्रपूजयेत् दशप्रस्थतिलान्दद्याद्दशप्रस्थान्यवानपि प्रस्थःषोडशपलानि मुष्टिमात्रंपलंस्मृतमितिमहार्णवेभिधानात् मत्स्यकच्छपमंडूकमकरादिजलेचरान् कारयित्वायथाशक्तिस्वर्णेनरजतेनवा तदलाभेमृण्मयांश्चसंपूज्यकुसुमादिभिःगंगायांप्रक्षिपेदाज्यंदीपांश्चैवात्रदापयेत् पुष्पाद्यैःपूजयेद्गंगांमंत्रेणानेनभक्तितःगंगामंत्रश्च नमःशिवायैप्रथमंनारायण्यैपदंततः दशहरायैपदमितिगंगायैमंत्रएषवै स्वाहांतःप्रणवादिश्चभवेद्विंशाक्षरोमनुः ॐनमःशिवायैनारायण्यैदशहरायैगंगायैस्वाहा मुनिर्व्यासोस्यवैछंदःकृतिर्गंगास्यदेवता त्रिवेदवन्हिवाणाग्निनेत्रवर्णैःषडंगकं अस्यगंगामंत्रस्य वेदव्यासऋषिः कृतिःछंदो गंगादेवता गंगाप्रीत्यर्थेविनियोगः ऋष्यादीन् शिरसिमुखेहृदयेक्रमेणन्यसेत् विनियोगश्चसर्वांगेव्यापकत्वेनन्यस्तव्यः त्रिवन्हिवेदवाणाग्निनेत्रवर्णैःषडंगकंॐनमः १ शिवायै २ नारायण्यै ३ दशहरायै ४ गंगायै ५ स्वाहा ६ इतिषडंगन्यासः अथध्यानं उत्फुल्लामलपुंडरीकानिलया कृष्णेशविध्यात्मिका कुंभेष्टाभयतोयजानिदधतीश्वेतांवरालंकृता हृष्टास्याशशिशेखराखिलनदीशोणादिभिःसेविता ध्येयापापविनाशिनीमकरगाभागीरथीसाधकैः १ लक्षंजपेद्दशांशेनजुहुयात्सघृतैस्तिलैः जयादिशक्तिभिर्युक्तेपीठेभागीरथींयजेत् यजेच्चावसरेष्वंगदलेरुद्रंहरिंविधिं सूर्यंहिमाचलंमेनांभगीरथमपांपतिं दलाग्रतोमीनकूर्ममंडूकमकरानपि हंसकारंडवांश्चक्रवाकान्सारसकानपि चतुरस्त्रेशक्रमुख्यानायुधैःसंयुतान्यजेत् एवं संसाधितोमंत्रोभीष्टंयच्छतिमंत्रिणां ज्येष्ठशुक्लदशम्यांतविशेषेणभजेद्बुधः दद्याद्दशभ्योविप्रेभ्योदशप्रस्थमितांस्तिलान् प्रस्थःषोडशपलानिमुष्टिमात्रंपलंस्मृतमिति इतिमंत्रमहोदधौ अस्यागायत्रीच नमःशिवायविद्महे

नारायण्यैधीमहि तन्नोगंगाप्रचोदयात् अत्रगंगास्तोत्रमपिदशवारं पठेत् तदुक्तंभविष्ये तस्यांदशम्यामेतच्चस्तोत्रं गंगाजलेस्थितः यःपठेद्दशकृत्वस्तुदरिद्रोवापिचक्षमः सोपितत्फलमाप्नोतिगंगांसंपूज्यभक्तितः इदंस्तोत्रंचप्रतिपदादिदशमीपर्यंतंदिनवृद्धिसंख्ययापठनीयमितिशिष्टाः अथदशहरागंगास्तोत्रंकाशीखंडे नमःशिवायैगंगायैशिवदायैनमोनमः नमस्तेविष्णुरूपिण्यैब्रह्ममूर्त्त्यैनमोनमः नमस्तेरुद्ररूपिण्यैशांकर्य्यैतेनमोनमः सर्वदेवस्वरूपिण्यै नमोभेषजमूर्त्तये सर्वस्यसर्वव्याधीनांभिषक्श्रेष्ठ्यैनमोस्तुते स्थाणुजंगमसंभूतविषहंत्र्यैनमोस्तुते संसारविषनाशिन्यैजीवनायैनमोस्तुते तापत्रितयसंहर्त्र्यैप्राणेश्यैतेनमोनमः शांतिसंतानकारिण्यैनमस्तेशुद्धमूर्त्तये सर्वसंशुद्धिकारिण्यैनमःपापारिमूर्त्तये भुक्तिमुक्तिप्रदायिन्यैभद्रदायैनमोनमः भोगायैभोगदायिन्यैभोगवत्यैनमोस्तुते मंदाकिन्यैनमस्तेस्तुस्वर्गदायैनमोनमः नमस्त्रैलोक्यभूषायैत्रिपथायैनमोनमः नमस्त्रिशुक्लसंस्थायैक्षमावत्यैनमोनमः त्रिहुताशनसंस्थायैतेजोवत्यैनमोनमः नंदायैलिंगधारिण्यैसुधाधारात्मनेनमः नमस्तविश्वमुख्यायैरेवत्यैतेनमोनमः बृहत्यैतेनमस्तेस्तुलोकधात्र्यैनमोनमः नमस्तेविश्वमित्रायैनंदिन्यैतेनमोनमः परावरशताढ्यायैतारायैतेनमोनमः पृष्ण्यैशिवामृतायैचसुवृषायैनमोनमः पाशजालनिकृंतिन्यैअभिन्नायैनमोस्तुते शांतायैचवरिष्ठायैवरदायैनमोनमः उस्रायैसुखजग्ध्यैचसंजीविन्यैनमोस्तुते ब्रह्मिष्ठायैब्रह्मदायैदुरितायैनमोनमःप्रणतार्तिप्रभंजिन्यैजगन्मात्रेनमोस्तुते सर्वापत्प्रतिपक्षायैमंगलायैनमोनमः शरणागतदीनार्तपरित्राणपरायणे सर्वस्यार्तिहरेदेविनारायणिनमोस्तुते निर्लेपायैदुर्गहंत्र्यैदक्षायैतेनमोनमः परात्परपरायैवगंगेनिर्वाणदायिनि गंगेममाग्रतःपाहिगंगेमेदेविपृष्ठतः गंगेमेपार्श्वयोरेधिगंगेत्वय्यस्तुमेस्थितिः आदौत्वमंतमध्येचसर्वंत्वंगांगतेशिवे त्वमेवमूलप्रकृतिस्त्वंपुमान्परएवहि गंगेत्वंपरमात्माचशिवस्त्वंचनमःशिवे यइदंपठतिस्तोत्रंशृणुयाच्छ्रद्धयापि

यः दशधामुच्यतेपापैःकायवाचिकमानसैः रोगस्थोरोगतोमुच्येतविपद्यश्चविपद्गतः मुच्यतेबंधनाद्बद्धोभीतो
भीतेःप्रमुच्यते सर्वान्कामानवाप्नोतिप्रेत्यचात्रिदिवंव्रजेत् दिव्यंविमानमारुह्यदिव्यस्त्रीपरिवीजितः गृहेपिलिखितं
यस्यसदातिष्ठतिधारितम् नाग्निचौरभयंतस्यनसर्पादिभयंक्वचित् ज्यैष्ठमासिसितेपक्षेदशमीहस्तसंयुता साहरे
त्त्रिविधंपापंबुधवारेणसंयुता तस्यांदशम्यामेतच्चस्तोत्रंगंगाजलेस्थितः यःपठेद्दशकृत्वस्तुदरिद्रोवापिचक्षमः सो
पितत्फलमाप्नोतिगंगांसंपूज्यभक्तितः उपवासीवक्ष्यमाणैर्दशपापैःप्रमुच्यते सर्वान्कामानवाप्नोतिप्रेत्यब्रह्मणिली
यते इतिदशहरागंगास्तोत्रं अस्यांसेतुबंधरामेश्वरस्यप्रतिष्ठापितत्वात् तत्रविशेषेणपूजाकार्या तदुक्तं स्कांदेसे
तुमाहात्म्ये ज्यैष्ठेमासिसितेपक्षेदशम्यांबुधहस्तयोः गरानंदव्यतीपातेकन्याचंद्रवृषेरवौ दशयोगेसेतुबंधेलिं
गरूपधरंहरम् रामोवैस्थापयामासशिवलिंगमनुत्तमम् इतिज्यैष्ठशुक्लदशम्यांदशहराविधिः ज्यैष्ठशुक्लैकादशी
निर्जला तत्रनिर्जलमुपोष्यैवविप्रेभ्योजलकुंभान्दद्यादितिनिर्णयामृते उक्तं मदनरत्नेस्कांदेपि ज्यैष्ठेमासिनृपश्रे
ष्ठयाशुक्लैकादशीशुभा निर्जलंसमुपोष्यात्रजलकुंभान्सशर्करान् प्रदायविप्रमुख्येभ्योविष्णुलोकेसमोदते तथाच
नारदीये ज्यैष्ठशुक्लैकादशींचनिर्जलांसमुपोष्यतु उदयादुदयंयावद्भास्करस्यद्विजोत्तम प्रभातेकृतनित्यस्तुद्वा
दश्यामुपचारकैः हृषीकेशंसमभ्यर्च्यविप्रान्संभोज्यभक्तितः चतुर्विंशैकादशीनांफलंयत्तत्समाप्नुयात् अथास्याः
कथा भीमसेनउवाच भगवन्देवदेवेशवासुदेवजनार्दन एकादश्यांनभोक्तव्यमितिवेदविदोविदुः एकभक्तंनश
क्नोमिचोपवासस्तुदूरतः वृकनामातुयोवन्हिर्वर्त्ततेजठरेमम प्रतिक्षणंमुहूर्तेतुभोजनंक्रियतेमया उपवासेनशक्तो
मिकर्त्तुंदेवकिनंदन तदहंकिंकरोमीहजपहोमादिकंहरे एतद्ज्ञात्वाकृपांकृत्वाममाग्रेकथयप्रभो येनाखिलैकाद
शीनांव्रतेनफलमाप्नुयात् तद्व्रतंमेसमाचक्ष्वभक्तोस्मितवमाधव श्रीभगवानुवाच सत्यंसत्यंत्वयावीरममाग्रे

कथितंवचः तद्व्रतंवच्मितेयेनवत्सरकादश।फल ज्येष्ठमासेतुसंप्राप्तेवृषभस्थेदिवाकरे अथवामिथुनस्थकयाशुक्ले
कादशीभवेत् निर्जलानामसाप्रोक्तामहापातकनाशिनी उपवासंतुयस्तस्यांकरोतिजलवर्जितं तेनैवाप्नोतिसंव
रोवत्सरैकादशीफलं दशम्यांनियमःकार्योदंतधावनपूर्वकं एकादश्यांनिराहारोवर्जयिष्यामिवैजलं द्वादश्यांपा
रणंचैवकरिष्यामिजनार्दन व्रतेनानेनगोविंदशरणंमेभवाच्युत एकादश्यांनिराहारोरात्रौजागरतत्परः
द्वादश्यांपूजयेद्भक्त्यादेवंनारायणंहरिं गदाचदक्षिणेहस्तेखड्गश्चैवतुदक्षिणे शंखश्चवामहस्तेतुवामे
चक्रंतथोन्मुखं निर्जलायांहृषीकेशोभक्तिभावेनपूजितःइहलोकेशुभान्यंतेददातिपरमांगतिं जलंयोवर्जयेन्मर्त्योनि
र्जलैकादशीदिने फलंकोटिगुणंतस्यसुवर्णस्योपजायते यानारीकुरुतेभक्त्यानिर्जलैकादशीव्रतं वीरपुत्रप्रसूःसास्या
न्नूनंजन्मनिजन्मनि पूजयेत्परयाभक्त्यागंधपुष्पादिभिःसदादेवदेवंहृषीकेशंसंसारार्णवतारकं उदकुंभःप्रदातव्योब्रा
ह्मणायप्रयत्नतःनानावस्त्रान्नसंयुक्तःछत्रोपानहसंयुतः हेमरत्नैस्तथामुक्तामालयालंकृतोगले सितशर्करयायुक्तस्तत्रै
नंमंत्रमुच्चरेत् सितशर्करयायुक्तोहेमरत्नादिसंयुतःउदकुंभप्रदानेनप्रीयतांमेत्रिविक्रमःइमंमंत्रंसमुच्चार्यघटंदद्याद्द्वि
जन्मने धेनुदानंतथाकुर्याद्यथोक्तविधिनानरः योषिद्वाश्रद्धयाभीमयथेष्टफलमाप्नुयात् द्वादश्यांभोजयित्वातुविप्रा
न्दत्वाचदक्षिणांसकलैर्बांधवैःसार्धंपश्चाद्भुंजीतवैस्वयं यइदंकुरुतेभीमानिर्जलैकादशीव्रतं सप्राप्नोतिनरोलोकेसम
स्तैकादशीफलं माहात्म्यश्रवणादस्यागोसहस्रफलंलभेत् तस्मात्कुरुसदाभीमनिर्जलैकादशीव्रतं इतिपुराणसंग्र
होक्ता निर्जलैकादशीव्रतकथा ॥ ॐअथज्येष्ठशुक्लैकादशीव्रतकथा युधिष्ठिरउवाच श्रुतामेमानवाधर्मावासिष्ठा
श्चमयाश्रुताः द्वैपायनयथोद्दिष्टान्वैष्णवान्वक्तुमर्हसि १ व्यासउवाच श्रुतास्तेमानवाधर्मावैदिकाश्चश्रुताश्चते
कलौयुगेनशक्यंतेतेवैकर्त्तुंजनाधिप सुखोपायमल्पक्लेशधर्ममेकंमहाफलं ॥ पुराणानांचसर्वेषांसारभूतंवदामिते

एकादश्यांनभुंजीतपक्षयोरुभयोरपि एकादश्यांनभुंक्तेयोनयातिनरकंतुसः व्यासस्यवचनंश्रुत्वाकंपितोश्वत्थपत्र
वत् भीमसेनोमहावाहुर्भीतोवाक्यमभाषत भीमसेनउवाच पितामहनशक्तोहमुपवासंकरोमिकिं अतोवहुफलंब्रूहित्व
तमेकमपिप्रभो व्यासउवाच वृषस्थेमिथुनस्थेर्केशुक्लाह्येकादशीभवेत् ज्येष्ठमासिप्रयत्नेनसोपोष्याजलवर्जिता स्ना
नेवाचमनेचैववर्जयेन्नोदकंबुधः उपभुंजीतनैवान्यद्व्रतभंगोन्यथाभवेत् उदयादुदयंयावद्वर्जयित्वोदकंवुधः अप्रयत्ना
दवाप्नोतिद्वादशद्वादशीर्नरः ततःप्रभातेविमले द्वादश्यांस्नानमाचरेत् जलंसुवर्णंदत्वातुद्विजातिभ्योयथाविधि भुं
जीतकृतकृत्यस्तुब्राह्मणैःसहितोवशी एवंकृतेतुपुण्यंयद्भीमसेनशृणुष्वतत् संवत्सरस्यमध्येतुएकादश्योभवंतियाः
तासांफलमवाप्नोतिनास्तिमेचात्रसंशयः अस्यव्रतस्ययत्पुण्यंतन्मेप्राहजनार्दनः एकादश्यांसितेपक्षेज्येष्ठस्योद
कवर्जितं उपोष्यफलमाप्नोतितच्छृणुष्ववृकोदर सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं सर्वहोमेषुयत्पुण्यंतदस्याःसमु
पोषणात् उपोषितास्तुताःसर्वाएकादश्योनसंशयः धनधान्यवहाःपुण्याःपुत्रारोग्यप्रदास्तथा उपोषितानरव्याघ्र
इतिसत्यंवदामिते यमदूतामहाकाराः करालाः कृष्णपिंगलाः दंडपाशधरारौद्रामरणेदृष्टिगोचराः नप्रयांतिनरव्या
घ्रएकादश्यामुपोषणात् पीतांवरधराःसौम्याश्चक्रहस्तामनोजवाः अंतकालेनयंत्येनंवैष्णवावैष्णवींतनुं तस्मा
त्सर्वप्रयत्नेनउपोष्यजलवर्जितं जलधेनुंतथादत्त्वासर्वपापैःप्रमुच्यते इतिहेमाद्रौमहाभारतोक्तं निर्जलैकादशीमा
हात्म्यं अथब्रह्मवैवर्त्तपुराणेनिर्जलैकादशीमाहात्म्यं भीमसेनउवाचपितामहमहावुद्धेशृणुमेपरमंवचः युधिष्ठिरश्च
कुंतीचतथाद्रुपदनंदिनी अर्जुनोनकुलश्चैवसहदेवस्तथैवच एकादश्यांनभोक्तव्यंकदाचिदपिसुव्रत तेमाब्रुवंतिनि
त्यंहिमाभुंक्ष्वत्वंवृकोदर अहंतानब्रुवंतातवुभुक्षादुःसहामम दानंदास्यामिविधिवत्पूजयिष्यामिकेशवं भीमसेन
वचः श्रुत्वाव्यासोवचनमब्रवीत् व्यासउवाच यदिस्वर्गोह्यभीष्टस्तेनरकस्त्याज्यएवच एकादश्यांनभोक्तव्य

पक्षयोरुभयोरपि भीमसेनउवाचपितामहमहाप्राज्ञकथयामितवाग्रतः एकभक्तंनशक्तोहमुपवासंकुतोमुनेयेनवैप्राप्यतेस्वर्गंतन्मेवदयथातथा वृकनामातुयोवन्हिस्सर्वदाजठरेमम अतीवान्नंयदाश्नामितदासमुपशाम्यतितदेकंवदानेश्चित्ययेनश्रेयोहमाप्नुयां व्यासउवाच वृषस्थेमिथुनस्थेवायदाचैकादशीभवेत्ज्यैष्ठेमासिप्रयत्नेनसोपोष्योदकवर्जितातत्रस्नानाचमनादन्यद्वर्जयित्वोदकंबुधः माषकस्यसुवर्णस्ययत्रमज्जतिवैमणिः एतदाचमनंप्रोक्तंपवित्रकायशोधनं उपयुंजीतनान्यत्तुव्रतभंगोन्यथाभवेत् उदयादुदयंयावद्वर्जयित्वोदकंततः अयत्नात्समवाप्नोतिद्वादशद्वादशीफलं प्रभातेविमलेजातेद्वादश्यांस्नानमाचरेत्ससुवर्णंजलंदत्त्वाद्विजातिभ्योयथाविधि भुंजीतकृतकृत्यस्तुब्राह्मणैःसहितोवशी एवंकृतेतुयत्पुण्यंभीमसेनशृणुष्वतत् संवत्सरेतुयावत्य एकादश्योभवंतिवै तासांफलमवाप्नोतितत्रमेनास्तिसंशयः इतिमांकेशवःप्राहशंखचक्रगदाधरः सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज एकादश्यांनिराहारःसर्वपापात्प्रमुच्यते द्रव्यशुद्धिःकलौनास्तिसंस्कारःस्मार्त्तएवच वैदिकश्चकुतश्चास्तिप्राप्तेदुष्टेकलौयुगे किंतुतेबहुनोक्तेनवायुपुत्रपुनःपुनः एकादश्यांनभुंजीतपक्षयोरुभयोरपि एकादश्यांसितेपक्षेज्यैष्ठेमास्युदकंविनापुण्यंफलंवाप्राप्नोतितच्छृणुष्ववृकोदर सर्वतीर्थेषुयत्पुण्यंसर्वदानेषुयत्फलं तत्फलंसमवाप्नोतिइमांकृत्वावृकोदर संवत्सरेपियाश्चस्युःशुक्लाःकृष्णावृकोदर उपोषितास्ताःसर्वाःस्युरेकादश्योनसंशयः धनधान्यवहाःपुण्याःपुत्रारोग्यफलप्रदाःयमदूतामहाकायाःकरालाःकृष्णपिंगलाः दंडपाशधरारौद्रानांतेपश्यंतितंनरं पीतांबरधराःसौम्याश्चक्रहस्तामनोजवाःअंतकालेनयंत्येनंमानवंवैष्णवींपुरींतस्मात्सर्वप्रयत्नेनसोपोष्योदकवर्जिताजलधेनुंतदादत्त्वासर्वपापैःप्रमुच्यते इतिश्रुत्वातदाचक्रुःपांडवाजनमेजय तथात्वमपिभूपालसोपवासोर्चनंहरेः कुरुसर्वप्रयत्नेनसर्वपापप्रशांतये स्वप्नेन्नदृश्यमानंयन्मदंतरगतंचयत् नतस्यममदोषोस्तुप्रार्थयेत्वामहंप्रभो भोक्ष्येपरेन्हिदेवेशनिर्विघ्नंकुरुमे

अ०र०
ज्यैष्ठ०
१०

च्युत इत्युच्चार्य्यततोमंत्रमुपवासपरोभवेत् सर्वपापविनाशायश्रद्धाभक्तिसमन्वितः मेरुमंदिरमात्रंतुस्त्रियोवापुरु
षस्यवा सर्वंतद्भस्मतांयातिएकादश्याःप्रभावतः नशक्नुवंतियेदातुंजलधेनुंनराधिप सकांचनःप्रदातव्योघटको
वस्त्रसंवृतः तोयस्यनियमंयोस्यांकुरुतेवैसपुण्यभाक् पलकोटिसुवर्णस्ययामेयामेश्नुतेफलं स्नानंदानंजपंहोमंयद
स्यांकुरुतेनरः तत्सर्वंचाक्षयंप्रोक्तमेतत्कृष्णेनभाषितं किंवापरेणधर्मेणनिर्जलैकादशींनृप उपोष्यसम्यग्विधिवद्वै
ष्णवंपदमाप्नुयात् सुवर्णमन्नंवासांसियदस्यांसंप्रदीयते तत्तस्यैवकुरुश्रेष्ठसर्वंचाप्यक्षयंभवेत् एकादशीदिनेचान्नं
भुंक्तेपापंसकेवलं इहलोकेसचंडालोमृतोदुर्गतिमाप्नुयात् येप्रदास्यंतिदानानिद्वादश्यांसमुपोष्यवै ज्यैष्ठेमासि
सितेपक्षेप्राप्स्यंतिपरमंपदं ब्रह्महामद्यपःस्तेयीगुरुद्वेष्टासदाव्रती मुच्यंतेपातकैःसर्वैर्द्वादशीयैरुपोषिता विशेषं
शृणुकौंतेयनिर्जलैकादशीदिने यःकर्त्तव्योनरैःस्त्रीभिःश्रद्धाभक्तिसमन्वितैः जलशायीतुसंपूज्योदेयाधेनुश्चतन्मयीप्र
त्यक्षावाकुरुश्रेष्ठघृतधेनुरथापिवा दक्षिणाभिश्चपुष्टाभिर्मिष्टान्नैश्चपृथग्विधैः तोषणीयाःप्रयत्नेनद्विजाधर्मभृतांवर तु
ष्टोभवतिवैक्षिप्रंतैस्तुष्टैर्मोक्षदोहरिः आत्मद्रोहःकृतस्तैस्तुयैरेषानह्युपोषिता पापात्मानोदुराचारादुष्टास्तेनात्रसं
शयः कुलानांशतकंचापिकुलातीतंतथाशतं आत्मनासाहितंनीतंवासुदेवस्यमंदिरं कुर्वद्भिर्जागरंरात्रौयैरेषासमु
पोषिता अन्नपानंतथागावोवस्त्रंशय्यासनंशुभं कमंडलुतथाक्षेत्रंदातव्यंनिर्जलादिने उपानहौयोददातिपात्रंभू
मिंद्विजोत्तमे ससौवर्णेनयानेनस्वर्गलोकेमहीयते यश्चेदंशृणुयाद्भक्त्यायश्चापिपरिकीर्त्तयेत् उभौतौस्वर्गगंतारा
नात्रकार्य्याविचारणा यत्फलंसन्निहत्यायांराहुग्रस्तेदिवाकरे कृत्वाश्राद्धंलभेन्मर्त्यस्तदस्याःश्रवणादपि नियमश्च
प्रकर्त्तव्योदंतधावनपूर्वकं एकादश्यांनिराहारोवर्जयिष्यामिवैजलं केशवप्रीणनार्थायअन्यत्राचमनादृते द्वादश्यांदेव
देवेशःपूजनीयस्त्रिविक्रमः गंधपुष्पैस्तथादीपैर्वारिभिःप्रियदर्शनैः पूजयित्वाविधानेनमंत्रमेतदुदीरयेत् देवदेवहृषी

केशसंसारार्णवतारक उदकुंभप्रदानेननयमापरमांगातिं ततःकुभाःप्रदातव्याब्राह्मणेभ्यःस्वशक्तितः सांभवस्त्रयुगाभीमच्छत्रोपानद्युगान्विताः दानानिचात्रदेयानिजलधेनुर्विशेषतः भोजयित्वाततोविप्रान्स्वयंभुंजीतवाग्यतः एवंयःकुरुतेभीमद्वादशींपापनाशिनीं सर्वपापविनिर्मुक्तोपदंगच्छत्यनामयं ततःप्रभृतिभीमेनकृताह्येकादशीशुभ पांडवद्वादशीह्येषालोकेस्ख्यातावभूवह इतिब्रह्मवैवर्त्तेज्यैष्ठशुक्लानिर्जलैकादशीमाहात्म्यम् अत्रनिर्जलमुपोष्यविप्रेभ्योजलकुंभान्दद्यादितिनिर्णयामृते उक्तंमदनरत्नेस्कांदेच ज्यैष्ठमासिनृपश्रेष्ठयाशुक्लैकादशी।शुभानिर्जलंसमुपोष्यात्रजलकुंभान्सशर्करान् प्रदायविप्रमुख्येभ्यस्तापत्रयविवर्जितः विष्णोर्लोकमवाप्येहमोदतेविष्णुसान्निधाविधि एवमेतस्यामेकादश्यांपुराणेषुजलधेनुदानंचोक्तं तत्प्रकारस्तूच्यतेहेमाद्रौ वसिष्ठउवाच जलधेनुंप्रवक्ष्यामिप्रोयतेदत्तयायया देवदेवोहृषीकेशःसर्वेशःसर्वभावनः जलकुंभंनरव्याघ्रसुवर्णरजतान्वितं रत्नगर्भमशेषैस्तुग्राम्यैर्धान्यैःसमन्वितं सितवस्त्रयुगाच्छन्नंदूर्वापल्लवशोभितं कुष्ठमांसीमुरोशीरवालकामलकैर्युतं प्रियंगुपत्रसहितंसितवस्त्रोपवीतिनं छत्रोपानत्समायुक्तंदर्भविष्टरसंस्थितं चतुर्भिःसंयुतंभूपतिलपात्रैश्चतुर्दिशं स्थापितंदधिपात्रेणघृतक्षौद्रयुतंमुखे उपोषितःसमभ्यर्च्यवासुदेवंजनेश्वर पुष्पधूपोपहारैश्चयथाविभवमादृतः संकल्प्यजलधेनुंचतंकुंभमभिपूज्यच पूजयेद्वत्सकंतद्वत्कृतंजलमयंबुधः एवंसंपूज्यगोविंदंजलधेनुंसवत्सकां सितवस्त्रधरःशांतोवीतरागोविमत्सरः दद्याद्विप्रायराजेंद्रप्रीतयेजलशायिनः जलशायीजगद्योनिः प्रीयतांममकेशवः इतिचोच्चार्य्यभूनाथविप्रायप्रतिपाद्यतां अपक्वान्नाशिनास्थेयमहोरात्रमतःपरं अत्रायंप्रकारः जलकुंभमित्यादिकुंभोत्रजलकलशः सुवर्णरजतयोःसुवर्णस्यशृंगाकृतित्वं रजतस्यचखुराकृतित्वंतिलपात्राणांताम्रमयत्वं दधिपात्रस्यकांस्यमयत्वं अनियतपरिमाणतयाशक्तिविधानं पंचरत्नानिधान्यानिचपरिभाषायामुक्तानिअत्रयद्यपिसामान्यतोपदेशःतथापित

त्सामान्यादितरेषुतथात्वमितिन्यायादितरधेनुवदविरुद्धधर्माद्यनुष्ठानंवेदितव्यं यथासुवर्णस्यशृंगाकृतित्वंरजतस्यखुराकृतित्वं तिलपात्राणांताम्रमयत्वंदधिपात्रस्यकांस्यमयत्वंचानुसंधेयं तथाधान्यानि पार्श्वद्वयेकुष्ठादीनिघ्राणदेशे प्रियंगुपात्रंश्रवणे यज्ञोपवीतंशिरःस्थानेस्थापयेत् वत्सोपिचतुर्थांशेनधेनुवत्कार्यः क्वचित् पूजयेद्वत्सकंतद्वत्कृतंघृतमयंबुध इतिपाठाद्जलघृतयोर्विकल्पोवगम्यते कृष्णाजिनंचतुर्हस्तंप्राग्ग्रीवंविन्यसेद्भुवि गोमयेनोपलिप्तायांदर्भानास्तीर्यसर्वतः लघ्वेणकाजिनंतद्वद्वत्सस्यपरिकल्पयेत् प्राङ्मुखींस्थापयेद्धेनुमुदक्पादांसवत्सकां एणकाजिनंकृष्णाजिनं प्राङ्मुखींप्राक्शिरसमित्यर्थः तदुत्तरेणवत्सोपितथैवपरिकल्पनीयइतिमत्स्यपुराणे प्राग्वद्गुडधेनुवदत्रद्रव्यपरिमाणंबोध्यं तच्चउत्तमागुडधेनुःस्यात्सदाभारचतुष्टयं वत्संभारेणकुर्वीतभाराभ्यांमध्यमास्मृता अर्धभारेणवत्संस्याद्गृहवित्तानुसारतः भारस्तु तुलास्त्रियांपलशतंभारःस्याद्विंशतिस्तुलाइतिवचनाद्विंशतितुलापरिमितगृहवित्तानुसारतइति अत्रोत्तममध्यमादिकल्पनानिजवित्तानुसारतः कर्त्तव्येत्यर्थः अथप्रयोगः कर्त्तादेशकालौसंकीर्त्यामुकधेनुदानमहंकरिष्ये इतिसंकल्प्य गणेशपूजनं पुण्याहवाचनमाचार्यवरणंब्रह्मवरणंचकृत्वाचार्यः स्वयंभूशुद्ध्यादिकुर्य्यात् तत्रक्रमः यदत्रसंस्थितं भूतमितिसितसर्षपान् विकीर्य्य शुचीवोहव्येतिभूमिंसंप्रोक्ष्य समेभूप्रदेशगोमयोपलिप्तायांभूमौदर्भानास्तीर्य्य तदुपरिव्रीहियवगोधूमकंगुसर्षपमाषमुद्गरूपाणिग्राम्यधान्यानि यथाप्रमाणंपार्श्वद्वयेनिधाय तत्रकुंभंसजलंदर्भविष्टरस्थितं सुवर्णरजतान्वितरत्नगर्भंदूर्वापल्लवशोभितंसितवस्त्रयुगच्छन्नं चतुर्दिक्षुतिलपात्रोपेतंसच्छत्रंसोपानत्कंसंस्थाप्यमुखप्रदेशे दधिघृतक्षौद्रसहितानित्रीणिपात्राणिविन्यस्य घ्राणदेशेकुष्ठमांसीमुरोशीरामलकादीनिन्यस्य प्रियंगुपात्राणिश्रवणयोर्विन्यस्य शिरसियज्ञोपवीतानिधायद्राक्षाफलेक्षणांसितकंवलगलकंबलांताम्रककुत्पृष्ठांसितचामररोमाणं विद्रुमभ्रूयुगोपेतां इंद्रनीलतारकां नव

नीतस्तनांकितांक्षौमपुच्छांकांस्यदोहां स्वर्णशृंगाभरणोपेतां राजतखुरां नानाफलरूपदंतयुक्तांगांसवत्सांसंपाद्य आगावोआसन्निति सूक्तपठनोत्तरं सवत्सायैगवेनम इत्यावाह्यप्राणप्रतिष्ठांकृत्वामनोज्यूतिरितिप्रतिष्ठापूर्वकंसंपूज्य पुष्पांजलिंगृहीत्वात्रिःप्रदक्षिणीकृत्यप्रार्थयेत् यालक्ष्मीःसर्वभूतानांयाचदेवेष्ववस्थिता धेनुरूपेणसादेवीममशांतिं प्रयच्छतु देहस्थायाचरुद्राणांशंकरस्यसदाप्रिया धेनुरूपेणसादेवीममपापंव्यपोहतु विष्णोर्वक्षसियालक्ष्मीः स्वाहायाचविभावसौ चंद्रार्कशक्रशक्तिर्याधेनुरूपास्तुसाश्रिये चतुर्मुखस्ययालक्ष्मीर्यालक्ष्मीर्धनदस्यच लक्ष्मीर्यालोकपालानांसाधेनुर्वरदास्तुमे स्वधात्वंपितृमुख्यानांस्वाहायज्ञभुजांतथा सर्वपापहराधेनुस्तस्माच्छांतिंप्रयच्छमे एवमामंत्र्यतांधेनुंब्राह्मणायनिवेदयेत् अत्रैपदानप्रयोगः अद्यअमुकस्मिन्काले अमुकगोत्रोहममुकशर्माऽमुककामः अमुकगोत्रायामुकशर्मणेब्राह्मणाय इमांजलधेनुं सर्वोपस्करणवतीं यथोक्तवत्ससहितांविष्णुदैवतां तुभ्यंसंप्रददेनमम देवस्यत्वारुद्रायगामित्यादिब्राह्मणस्तुपुच्छदेशगृहीत्वा स्वस्तिकुर्यात् कइदंकस्माअदात्कामःकामायादात्कामोदाताकामः प्रतिगृहीता कामःसमुद्रमाविशत्कामेनत्वांप्रतिगृह्णामि कामैतत्ते वृष्टिरसिद्यौस्त्वाददातुपृथिवीत्वाप्रतिगृह्णातु इतिकामस्तुतिंपठेत् ततोदक्षिणादानं ततोगोपुच्छेतर्पणंकृत्वा गोस्तवंकुर्यात् गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः गावःशिरसिमेनित्यंगवांमध्येवसाम्यहं पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ तासांमध्येचयानंदातस्यैदेव्यै नमोनमः कर्मपरमेश्वरार्पणंकृत्वा ब्राह्मणान्भोजयित्वास्वयंभोजनंकुर्यात् इतिजलधेनुदानविधिः अथघृतधेनुदानविधिः वसिष्ठउवाच तिलाभावेतथादद्यघृतधेनुप्रयत्नतः येनभूपविधानेनतदिहैकमनाःशृणु वासुदेवंजगन्नाथं घृतक्षीराभिषेचनैः संपूज्यपूर्ववत्पुष्पैर्गंधधूपादिभिर्नवैः अहोरात्रोषितोभूत्वाअभिष्टूयघृतार्चिषं घृतार्चिषजगन्नाथ

देवदेवनमोस्तुते इतिस्तुतिः गव्यस्यसार्पिषःकुंभंपुष्पमालाविभूषितं कांस्यपिधानसंयुक्तंसितवस्त्रयुगेनच हिरण्यगर्भसहितंमणिविद्रुममौक्तिकैः अत्र पलसहस्रपरिमाणः कुंभः द्वादशपलाधिकानि पंचशतपलानीतिकेचित् कांस्यपिधानसहितं कांस्यपात्रपिहितं मध्यवर्त्तिनाहिरण्येनसहितमित्यर्थः मणिविद्रुममौक्तिकैः सहितमितिशेषः इक्षुयष्टिमयान्पादान्खुरान्रौप्यमयांस्तथा सौवर्णेचाक्षिणीकुर्य्यात्शृंगेचागुरुकाष्ठके अत्र सुवर्णादेरनुदितसंख्यतयायथाशक्तिविधानं सप्तधान्यमयेपार्श्वेपत्रोर्णेनचकंबलं कुर्य्यात्तुरुष्ककर्पूरैर्घ्राणंफलमयांन्स्तनान् तद्वच्छर्करयाजिव्हांगुडक्षीरमयंमुखं पत्रोर्णंधौतकौशेयम् तुरुष्कःसिल्हकःसिलारसेतिप्रसिद्धःक्षौमसूत्रेणलांगूलंरोमाणिसितसर्षपैः ताम्रपात्रमयंपृष्ठंकुर्य्याच्छ्रद्धासमान्वितः ईदृक्स्वरूपांसंकल्प्यघृतधेनुंनराधिप तद्वत्कल्पनयाविद्वान्घृतवत्संप्रकल्पयेत् तद्धेनुवत्खुरशृंगादियुक्तमित्यर्थः सचधेनोश्चतुर्थभागेनकर्त्तव्यः तंचविप्रंमहाभागंमनसैवघृतार्चिषं कल्पयित्वाततस्तस्मैप्रयतः प्रतिपादयेत् एतांममोपकारायगृह्णीष्वद्विजसत्तम प्रीयतांममदेवेशोघृतार्चिःपुरुषोत्तमः इत्युदाहृत्यविप्रायदद्याद्धेनुंनराधिप स्कंदपुराणेत्वयंमंत्रः घृतंगावःप्रसूयंते धृतंभूमौप्रतिष्ठितं घृतमग्निश्चदेवाश्चघृतंमेसंप्रगृह्यतामिति विष्णुधर्मोत्तरेतु घृतमग्निर्घृतंसोमस्तन्मयाःसर्वदेवताः घृतधेनुप्रदानेनसर्वास्तुष्यंतुदेवताः घृतरत्नसुवर्णानां सम्यक्कल्पनयाकृतां दत्वैकरात्रंस्थित्वातुघृताहारोनराधिप मुच्यतेसर्वपापेभ्यस्तथादानफलंशृणु घृतक्षीरवहानद्योयत्रपायसकर्दमाः तेषुलोकेषुसर्वेषुसुपुण्येषूपजायते पितॄनूर्ध्वंनयेत्स्वर्गंपुरुषास्तस्ययेप्यधः तांस्तेषुनृपलोकेषुसंनेयद्ध्वस्तकल्मषः सकामानाभिधंव्युष्टिःकथितानृपसत्तम विष्णुलोकंनरायांतिनिष्कामाघृतधेनुदाः घृतमग्निर्घृतंसोमस्तन्मयाःसर्वदेवताः घृतंप्रयच्छतांतृप्ताभवंत्यखिलदेवताः सुवर्णमत्रदक्षिणा अनुक्तदक्षिणेषु तस्ययथाशक्ति_विहितत्वात् कृष्ण.

जिनादिसाधनकंतुजलधेनुवत्कार्यं गोस्तुतिःपूर्ववदेव अस्याःप्रयोगादिकंजलधेनुवत् इतिविष्णुधर्मोक्तोघृतधेनुविधिः अस्यामेवराघवद्वादशीव्रतं तत्र द्वादशीशब्देनएकादश्येवग्राह्या दुर्वासाउवाच ज्यैष्ठेमासेप्येवमेवसंकल्प्यविधिनानरः अर्चयेत्परमंदेवंपुष्पैर्नानाविधैःशुभैः ॐनमोराघवायेतिपादौपूर्वंप्रपूजयेत् त्रिविक्रमायेतिकटिं धृतविश्वायचोदरं उरःसंवत्सरायेतिकंठं संवर्त्तकायच सर्वास्त्रधारिणेवाहूमुखमब्जरथांगके सहस्रशिरसेभ्यर्च्य शिरस्तस्यमहात्मनः अब्जरथांगकेशंखचक्रे एवमभ्यर्च्यविधिवत्प्राग्वत्कुंभंप्रकल्पयेत् प्राग्वद्वस्त्रयुगाच्छन्नौसौवर्णौरामलक्ष्मणौ प्राग्वन्मत्स्यप्रतिमावत् अनयोःस्वरूपं तथाचविष्णुधर्मोत्तरे रामोदाशरथिर्मौलीराजलक्षणलक्षितः मौलीमुकुटवान् भरतोलक्ष्मणश्चैवशत्रुघ्नश्चधनुर्धरः तथैवनूनंकर्तव्याःकिंतुमौलिविवर्जिताइति अर्चयित्वा विधानेनप्रभातेब्राह्मणायतौ दातव्यौमनसाकामममीहतापुरुषेणतु प्रीयतांमेराघवोयंरामोलक्ष्मणसंयुतः अपुत्रणपुरापृष्टोराज्ञादशरथेनतु वसिष्ठःपुत्रकामायप्रोवाचपरमादृतः इदमेवविधानंतुकथयामासतंद्विजाः प्राग्रहस्यं विदित्वातुसराजाकृतवानिदं तस्यपुत्रःस्वयंजातोरामाख्योमधुसूदनः चतुरंशोप्यभूद्विष्णुःपरितोषान्महामुने एतदैहिकमाख्यातंपारत्रिकमतःशृणु दिव्यान्भोगान्भुंजतेस्वर्गसंस्थोयावच्चंद्राद्वादशचद्विद्विसंख्याः अतीत्यकालंपुनरेत्यमर्त्यैराजाराज्ञांजायतेयज्ञयाजी दशचद्विद्विसंख्याश्चतुर्दशेंद्राइत्यर्थः नश्यंतिपापानिचतस्यपुंसःकामानवाप्नोतियथासमीहान् निःकामएतद्व्रतमेवचीर्त्वाप्राप्नोतिनिर्वाणपदंस्थिरंतत् इतिवाराहपुराणेधरणीव्रतेषुज्यैष्ठशुक्लैकादश्यांराघवद्वादशीव्रतं इतिनिर्जलैकादशीविधिः समाप्तः ज्यैष्ठशुक्लद्वादश्यांयमुनास्नानं भविष्यपुराणे यमुनासलिलेस्नात्वापुरुषोमुनिसत्तम ज्यैष्ठेमास्यमलेपक्षेद्वादश्यामुपवासकृत् समभ्यर्च्याच्युतंसम्यक्मथुरायांसमाहितः अश्वमेधस्ययज्ञस्यप्राप्नोत्यविकलंफलं अत्रैकादश्यामुपवासोद्वादश्यामर्चनमिति नारदीये द्वादश्यांज्यैष्ठ

शुक्लायांपूजयित्वात्रिविक्रमं गंधाद्यैर्मधुरान्नाढ्यंकरकंविनिवेदयेत् दद्याद्द्विजायतत्पश्चादेकभक्तंसमाचरेत् व्रतेनानेनसंतुष्टोदेवदेवस्त्रिविक्रमः ददातिविपुलान्भोगांस्ततोमोक्षंचनारद ज्यैष्ठशुक्लत्रयोदश्यांदौर्भाग्यशमनंव्रतं नारदीये ज्यैष्ठशुक्लत्रयोदश्यांदौर्भाग्यशमनंव्रतं तत्रस्नात्वानदीतोयेपूजयेच्छुभदेशजं श्वेतमंदारमर्कंवाकरवीरंचरक्तकं निरीक्ष्यगगनेसूर्य्यंप्रार्थयेन्मंत्रतस्तथा मंदारकरवीरार्काभवंतोभास्करांशजाः पूजितामममदौर्भाग्यंनाशयंतुनमोस्तुवः इत्थंयोर्चयतेभक्त्यावर्षेवर्षेद्रुमत्रयं नश्यतितस्यदौर्भाग्यंनात्रकार्याविचारणा भविष्योत्तरेऽपीदंव्रतमुक्तंयुधिष्ठिरउवाच ब्रूहिमेयदुशार्दूलव्रतंगंधविनाशनं कृतंयद्धंतिरोगंचदौर्भाग्यशमनंतथा श्रीकृष्णउवाच इमंप्रश्नंपुरापार्थजातूकर्ण्योमहामुनिः पृष्टोराज्ञ्यामहामत्यासऋषिःकालमंदया कथयामाससप्रश्नमुपविष्टाशृणोतिसादेवीकृतांजलिपुटाजातूकर्ण्योवदद्व्रतं ज्यैष्ठमासिसितेपक्षेत्रयोदश्यांयुधिष्ठिर गत्वापुण्येनदीतोयेपूजयेच्छुभदेशजं श्वेतमंदारमर्कंचकरवीरंचरक्तकं निंबंचसूर्यदेवस्यवल्लभंदुर्लभंतथा दीपनैवेद्यपुष्पाद्यैर्मंत्रेणानेनपांडव निरीक्ष्यगगनेसूर्य्यंस्नात्वाहृदिसमुच्चरेत् सूर्यत्वंश्वेतमंदारश्वेतार्कार्कसमप्रभ करवीरनमस्तुभ्यंनिंबवृक्षनमोस्तुते इतियोभ्यर्चयेद्भक्त्यावर्षेवर्षेपृथङ्नरः वर्षत्रयंनृपश्रेष्ठनारीवाभर्तृसंयुता तस्याःशरीरेदौर्गन्ध्यंदौर्भाग्यंचनजायते नसापत्न्यंभवेल्लोकेनवंध्यात्वंध्रुवंलभेत् जायतेतीवसौभाग्यंमर्त्यस्त्रीदुर्लभंनृप कथितंयाश्चरिष्यंतिगंधदौर्भाग्यनाशनं सर्वपापविनिर्मुक्ताःसुखंवत्स्यंतिमातरः निंबःसितार्ककरवीरलताःसपुण्यायाःपूजयंतिकुसुमाक्षतदीपदानैः ताःसर्वकामसुखवृद्धिसमृद्धिभाजोदौर्भाग्यदोषरहिताःसुभगाभवंति अत्रवृक्षत्रयान्निंबवृक्षोधिकइति नारदीयाद्विशेषः ज्यैष्ठशुक्लचतुर्दश्यां पंचतपाख्यं रुद्रव्रतं नारदीये ज्यैष्ठशुक्लचतुर्दश्यांदिवापंचतपानिशा मुखेददेद्धेमधेनुंरुद्रव्रतमिदंस्मृतं ज्यैष्ठपौर्णमासीमन्वादिःसाचपौर्वाह्णिकीग्राह्येति मन्वादिनिर्णये आदित्यपुराणे ज्यैष्ठमासितिलान्

दद्यात्पौर्णमास्यांविशेषतः अश्वमेधस्ययत्पुण्यंतत्प्राप्नोतिनसंशयः विष्णुरपि ज्यैष्ठीज्येष्ठायुताचेत्स्याच्छत्रोपानहदानतः नरोनराधिपत्यमाप्नोतीतिहेमाद्रौ ज्योतिषे अत्रयोगविशेषः ऐंद्रेगुरुःशशीचैव प्राजापत्येरविस्तथा पूर्णिमाज्यैष्ठमासस्यमहाज्यैष्ठीप्रकीर्तिता अपरार्केवामनपुराणे ज्यैष्ठ्यांकुंभांबुदानंचतालवृंतंसचंदनं त्रिविक्रमस्य प्रीत्यर्थंदातव्यंज्यैष्ठमास्यपि अथास्यांपूर्णिमायांवटसावित्रीव्रतं इयंचपूर्वविद्धाकार्या पूर्वविद्धानकर्त्तव्याअमावस्याचपूर्णिमा वर्जयित्वामुनिश्रेष्ठसावित्रीव्रतमुत्तममितिब्रह्मवैवर्त्तेवर्जयित्वेतिपर्युदासादष्टादशनाडीवेधो वटसावित्रीव्रतातिरिक्तपरः इयंचत्रयोदशीमारभ्यपूर्णिमांतंयावत्त्रिरात्ररूपं तथाचस्कांदभविष्ययोः ज्यैष्ठेमासिसितेपक्षे द्वादश्यांरजनीमुखे व्रतंत्रिरात्रमुद्दिश्यत्वहोरात्रंस्थितोभवेत् इत्युपक्रम्यअंतेउपसंहृतं ज्यैष्ठेमासिसितपक्षेपूर्णिमायांतथाव्रतं चीर्णंपुरामहाभक्त्या कथितंतेमयानघेति धर्मउवाच नारीवाविधवावापिसपुत्रापुत्रवर्जिता सभर्तृकासपुत्रावाकुर्याद्व्रतमिदंशुभं ज्यैष्ठेमासितुसंप्राप्तेपौर्णमास्यांपतिव्रता स्नात्वाचैवशुचिर्भूत्वानियमंकारयेत्ततः निर्णयामृते भविष्येच अमायांचतथाज्यैष्ठेवटमूलेतथासती त्रिरात्रोपोषितातत्रव्रतेनानेनपूजयेत् इति अथव्रतविधिः आचम्यमासपक्षाद्युल्लिख्य ममभर्तुः पुत्राणांचायुरारोग्यप्राप्तयेजन्मजन्मन्यवैधव्यप्राप्त्यर्थंचसावित्रीव्रतमहंकरिष्ये इतिसंकल्प्य वटसेचनमंत्रः वटसिंचामितेमूलंसलिलैरमृतोपमैः सूत्रेणवेष्टयेद्भक्त्यागंधपुष्पाक्षतैर्यजेत् ओंनमोवैवटायेति भ्रामयंतीप्रदक्षिणं भक्त्यादत्तंधर्मराज सावित्रिप्रतिगृह्यतां पाद्यं भक्त्यामयाहृतंतोयंफलपुष्पसमन्वितं अर्घ्यंगृहाणसावित्रिममास्यव्रतसिद्धये अर्घ्यं सुगंधिसहकर्पूरंसुरभिस्वादुशीतलं स्वपत्यासहसावित्रिकुरुष्वाचमनीयकं अद्भिःपंचामृतैःस्नानंमयाभक्त्याप्रकल्पितं मंदाकिन्याःसमानीतमुदकंचसदाप्रियं सावित्र्यैनमःधर्मराजायचनमः इतिसर्वत्रपूजामंत्रः आचमनं सूक्ष्मतंतुमयंवस्त्रंकार्पासेनविनि

मितं सावित्रिसत्यवत्कांतेमयादत्तंप्रगृह्यतां इतिवस्त्रं सावित्रिसत्यवत्कांतेधर्मराजसुरेश्वर सावित्रिब्रह्मणासार्द्धमुपवीतंप्रगृह्यतां इत्युपवीतं कुंकुमागुरुकर्पूरकस्तूरीरोचनान्वितं चंदनंतेमयादत्तंसावित्रिप्रतिगृह्यतां चंदनं अक्षताश्चसुरश्रेष्ठेकुंकुमाक्ताःसुशोभनाः मयानिवेदिताभक्त्यागृहाणपरमेश्वरि इत्यक्षताः माल्यादीनिसुगंधीनिमाल्यादीनिवैप्रभो मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यतां पुष्पाणि अथांगपूजा सावित्र्यैपादौपूजयामि प्रसावित्र्यैजंघे. कमलायताक्ष्यैकटिं.भूतधात्र्यैउदरंपू- ब्रह्मप्रियायैशिरः .अथब्रह्मसत्यवतोरंगपूजा धात्रेनमःपादौ ज्येष्ठायउदरं- परमेष्ठिनेगुह्यं.अग्निरूपायकटिंपू. वेधसेऊरू. पद्मनाभायहृदयं. सुमेधसेकंठं. हिरण्यगर्भायमुखं. ब्रह्मणेशिरः विष्णवेसर्वांगंपूजयामि देवद्रुमसमुद्भूतः कालागुरुसमन्वितः आग्नेयोयंमहाधूपःसावित्रि प्रतिगृह्यतां धूपं चक्षुर्दंसर्वलोकानांतिमिरस्यनिवारणं आर्त्तिक्यंकलितंभक्त्यागृहाणपरमेश्वरि दीपं अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां नैवेद्यं पूगीफलंमहादिव्यंनागवल्लीदलैर्युतं खदिराचूर्णसहितंतांबूलंप्रतिगृह्यतां तांबूलं हिरण्यगर्भगर्भस्थंहेमवीजंविभावसोः अनंतपुण्यफलदमतः शांतिंप्रयच्छमे इतिदक्षिणा सावित्रीचप्रसावित्रीसततंब्रह्मणःप्रिये जगत्पूज्येजगन्मातर्विधात्रिवरदेनमः सावित्रित्वंयथादेविचतुर्वर्षशतायुषं पतिंप्राप्तासिगुणिनंममदेवितथाकुरु सावित्रीचप्रसावित्रीसततंब्रह्मणःप्रिये पूजितासिद्विजैःसर्वैःस्त्रीभिर्मुनिगणैस्तथा त्रिसंध्यंदेविभूतानांवंदनीयासिसुव्रते मयादत्ताचपूजेयंत्वंगृहाणनमोस्तुते इतिपुष्पांजलिंदत्त्वा ततोर्घ्यंदद्यात् ओंकारपूर्वकेदेविसर्वदुःखनिवारिणि देविमातर्नमस्तुभ्यमवैधव्यंप्रयच्छमे पतिव्रतेमहाभागेचाद्रिजातेशुचिस्मिते दृढव्रतेदृढभवेसर्वदाप्रियवादिनि अवैधव्यंचसौभाग्यंदेहित्वंममसुव्रते पुत्रान्पौत्रांश्चसौख्यंचगृहाणार्घ्यंनमोनमः इत्यर्घ्यंदत्त्वा प्रार्थयेत् सावित्रीब्रह्मगायत्रीसर्वदाप्रियभाषिणी तेन

सत्येनमांपाहिदुःखसंसारसागरात् त्वंगौरीत्वंशुचिर्गौरीत्वंप्रभाचंद्रमंडले त्वमेवचजगन्मातामामुद्धरवरानने यन्मयादुःकृतंपूर्वंकृतंजन्मशतैरपि भस्मीभवतुतत्सर्वमवैधव्यंचदेहिमे अवियोगोयथादेवसावित्र्यासहितस्तव अवियोगस्तथास्माकंभूयाज्जन्मनिजन्मनि इतिप्रार्थना इतिपूजाविधिः अथकथास्कांदे सनत्कुमारउवाच कुलस्त्रीणांव्रतंदेवमाहात्म्यंचतथैवहि अवैधव्यकरंस्त्रीणांपुत्रपौत्रप्रदंवद ईश्वरउवाच आसीन्महेषुधर्मात्माज्ञानिपरमधार्मिकः नाम्नाचाश्वपतिर्वीरोवेदवेदांगपारगः अनपत्योमहावाहुःसर्वैश्वर्यसमन्वितःसपत्नीकस्तपस्तेपेससमाराधतेनृपः सावित्रींचप्रसावित्रींजपन्नास्तेमहामनाः जुहोतिचैवसावित्रींभक्त्यापरमयायुतः ततस्तुष्टातुसावित्रीसादेवीद्विजसत्तम सावित्र्यहवतीदेवीतस्यादर्शनमागता तांतुदृष्ट्वाजगद्वंद्यांसावित्रींचनृपोत्तमः प्रणिपत्यनृपोभक्त्याप्रहृष्टेनांतरात्मना तंदृष्ट्वापतितंभूमौतुष्टादेवीजगादह तुष्टाहंतवराजेंद्रवरंवरयसुव्रत एवमुक्तस्तया राजाप्रसन्नांतामुवाचह अनपत्योह्यहंदेविपुत्रमिच्छामिशोभनं नान्यंवृणोमिसावित्रिपुत्रमेवजगन्मये अन्यदस्तिसमग्रंमेक्षितौयच्चापिदुर्लभं प्रसादात्तवदेवेशितत्सर्वंविद्यतेगृहे एवमुक्तातुसादेवीप्रत्युवाचनराधिपं पुत्रस्तेनास्तिराजेंद्रकन्यैकातेभविष्यति कुलद्वयंतुसाराजन्नुद्धरिष्यतिभामिनी मन्नाम्नाराजशार्दूलतस्यानामभविष्यति इत्युक्त्वातंमुनिश्रेष्ठराजानंब्रह्मणःप्रिया अंतर्धानंगतादेवीससंतुष्टोमहीपतिः ततःकतिपयाहस्सुतस्यराज्ञीमहीभुजः ससत्वासुषुवेकन्यांपूर्णेकालेसुखायच सावित्र्यातुष्टयादत्तासावित्र्याजप्तयातथा सावित्रीतेनवरदातस्यानामवभूवह राजतेदेवगर्भाभाकन्याकमललोचना वर्द्धतेचमुनिश्रेष्ठचंद्रलेखेवचांबरे सावित्रीब्रह्मणोवैसाश्रीरिवायतलोचना तांदृष्ट्वाहेमगर्भाभांराजाचिंतामुपेयिवान् अयाच्यमानाचवरैरूपेणाप्रतिमाभुवि तस्यारुपेणतेसर्वेसन्निरुद्धामहीभुजः ततःसराजासंचिंत्यउवाचकमलेक्षणां पुत्रिप्रदानकालस्तेयाचंतेनैवकेचन स्वयंवर

यहृद्यंत्वंपातिंगुणसमान्वितं मनःप्रल्हादनकरंकुलेनाभिगुणेनच इत्युक्तातांसराजेंद्रोवृद्धामात्यैःसहैवतां वस्त्रालंकारसहितांधनरत्नैःसमन्वितां विसृज्यचक्षणंतत्रयावत्तिष्ठतिभूमिपः तावत्तत्रसमागच्छन्नारदोभगवानृषिःसंपूज्यचततोराजाअर्घ्यपाद्येनतंमुनिं आसनेसुखमासीनं प्रोवाचेदंद्विजोत्तम पावितोहंत्वयाविप्रदर्शनेनाद्यनारद यावदेवंवदन्राजातावत्साकमलेक्षणा आश्रमादागतादेवीवृद्धामात्यैःसमन्विता अभिवाद्यपितुःपादौववंदे सामुनिंततः नारदेनतुपृष्टासादृष्ट्वाप्रोवाचभूमिपम् कन्येयंदेवगर्भाभाकिमर्थंनप्रयच्छसि वरायत्वंमहावाहोवरयोग्यापिसुंदरी एवमुक्तस्तदातेनमुनिनाराजसत्तमः उवाचतांमुनिंवाक्यंमुनिनार्थेनप्रेषिता आगतेयंविशालाक्षीमयासंप्रेषितासती अनयाचवृतोभर्तापृच्छत्वंमुनिसत्तम सापृष्टातेनमुनिनातस्मैव्याचष्टभामिनी आश्रमेसत्यवान्नामद्युमत्सेनसुतोमुने भर्तृत्वेनमयाविप्रवृतोसौराजनंदनः नारदउवाच कष्टंकृतंमहाराजदुहित्रातव सुव्रत अजानंत्यावृतोभर्त्तासत्यवानितिविश्रुतः सत्यंवदत्यस्यपितासत्यंमाताप्रभाषते स्वयंसत्यंप्रभाषेतसत्यवानितितेनसः तथाचाश्वाःप्रियास्तस्यअश्वैःक्रीडतिमृन्मयैः चित्रेपिचलिखत्यश्वांश्चित्राश्वइतिचोच्यते रूपवान्गुणवांश्चैवसर्वशास्त्रविशारदः नतेनसदृशोलोकेविद्यतेचेहमानवः सर्वैर्गुणैःससंपूर्णोरत्नैरिवमहार्णवः एकोदोषोमहानस्यगुणानावृत्यतिष्ठति संवत्सरेणक्षीणायुर्देहत्यागंकरिष्यति अश्वपतिरुवाच अन्यंवरयभद्रंते वरंसावित्रिगम्यतांविवाहस्यतुकालोयंवर्त्ततेशुभलोचने सावित्र्यउवाच नान्यमिच्छाम्यहंतातमनसापिवरंविभो योमयाद्यवृतोभर्तासमेनान्योभविष्यति विचिंत्यमनसापूर्वंपश्चाद्वाचंसमुच्चरेत्क्रियतेचततःपश्चात्शुभंवायदिवाशुभं वृत्तमन्यंपुमांसंचकथंचान्यंवृणोम्यहं सकृज्जल्पंतिराजानः सकृज्जल्पंतिपंडिताः सकृत्कन्याःप्रदीयंतेत्रीण्येतानिसकृत्सकृत् पतिंमत्वानमेबुद्धिर्विचलंतीकथंचन सगुणोनिर्गुणोवापिमूर्खःपंडितएवच दीर्घायु

रथवानायुःसचभर्ताममप्रभो नान्यंवृणोमिभर्तारंयदिवास्याच्छचीपतिः इतिमत्वामयातातयत्कर्तव्यंसुखेनचनारद
उवाच स्थिरावुद्धिश्चराजेंद्रसावित्र्याःसत्यवान्पतिःवरयस्वविवाहायभर्त्रासहकुरुस्थितिं ईश्वरउवाच निश्चितांतुम
तिंज्ञात्वास्थिरवुद्धिश्चनिश्चयात् स्वल्पानुगोमहाराजःप्रतस्थेसोवनंप्रति गृहीत्वातुसुतांराजाद्युमत्सेनस्यस
न्निधौ नारदस्तुततःखेवैतत्रैवांतरधीयत सगत्वाराजशार्दूलोद्युमत्सेनवनंगतः वृद्धश्चांधश्चराजाचवृक्षमूलमुपा
श्रितःतथाश्वपतिराजासौपादौजग्राहवीर्यवान् स्वनामचसमुच्चार्यतस्थौतस्यसमीपतः उवाचराजातंभूपंकिमाग
मनकारणं पूजयित्वार्घ्यदानेनवन्यमूलफलैश्चसः ततःपप्रच्छकुशलंसराजामुनिसत्तम अश्वपतिरुवाच कुशलं
दर्शनेनाद्यतवराजन्ममाद्यवै दुहितानामसावित्रीतवपुत्रमभीप्सती भर्तारंराजशार्दूलप्राप्नोत्वियमनिंदिता ममे
दंकांक्षितंपूर्वंभर्तारमनयाविभो आवयोश्चैवसंवंधोभवत्वद्यममेप्सितः द्युमत्सेनउवाच वृद्धश्चांधश्चराजेंद्रफल
मूलाशनोनृप राज्याच्च्युतश्चमेपुत्रोवन्येनाद्यचजीवति साकथंसहतेदुःखंदुहितातवकानने अनभिज्ञाचदुःखा
नांप्रत्यहंसाभिकांक्षते अश्वपतिरुवाच अनयाचवृतोभर्ताजानंत्याराजसत्तम अनेनसहवासस्तुतवपुत्रेणमानद
स्वर्गतुल्योमहाराजभविष्यतिनसंशयः एवमुक्तस्तदातेनराज्ञाराजर्षिसत्तमः तथेतिसप्रतिज्ञायचकारोद्वाहमुत्तमं
कृत्वाविवाहंराजेंद्रः संपूज्यविविधैर्धनैः अभिवाद्यद्युमत्सेनंजगामनगरंप्रति सावित्रीतुपतिंलब्ध्वाइंद्रंप्राप्यश
चीयथा सत्यवानपिब्रह्मर्षेतयापत्न्याभिनंदितः क्रीडतेनगृहोद्देशेपौलोम्यामघवानिव नारदस्यचतद्वाक्यंहृद
येनमनास्विनी वहंतीनियमंचक्रेव्रतस्यास्यचभामिनी गणयंतीदिनान्येवनलेभेतोषमुत्तमं ज्ञात्वाचादिवसंविप्र
भर्तुर्मरणकारणं अत्रांतरेचनियमंत्रिदिनस्यमनस्विनी तस्मिन्दिनेजिगमिषावनेसत्यवतोभवत् कुठारंसपरिगृ
ह्यरीठकंवेत्रमुत्तमं प्रस्थितश्चवनायैवसावित्रीवाक्यमब्रवीत् नगंतव्यंवनेत्वद्यममवाक्येनमानद अथवागम्यते

साधोमयासहवनंव्रज संवत्सरश्चसंपूर्णोह्याश्रमेऽस्मिन्ममप्रभो तद्वनंद्रष्टुमिच्छामिप्रसादंकुरुमेप्रभो सत्यवानुवाच नाहंस्वतंत्रः सुश्रोणिपृच्छस्वपितरौमम ताभ्यांप्रस्थापितागच्छमयासहविनिश्चिता एवमुक्तातदातेनभर्त्रासा कमलेक्षणा श्वश्रूश्वशुरयोःपादावभिवाद्येदमब्रवीत् वनंद्रष्टुंममेच्छेयमाज्ञामह्यंप्रदीयतां उवाचवचनंसाध्वीवरमेकंप्रयच्छत भर्त्रासहवनंगंतुमेतद्वरयतेमनः तस्यास्तद्वचनंश्रुत्वाद्युमत्सेनोब्रवीदिदं व्रतंकृतंत्वयाभद्रेपारणंकुरुसुव्रते पारणांतेभीरुततोगंतुंतावत्त्वमर्हसि सावित्र्युवाच नियमश्चकृतोस्माकंरात्रौचंद्रोदयेसति जातेमयाद्यकर्तव्यं पारणंतातमेशृणु वनदर्शनकामोऽस्तिभर्त्रासहममाद्यवै नमेतत्रभवेद्ग्लानिर्भर्त्रासहनराधिप इत्युक्तस्तुतदाराजाद्युमत्सेनोमहीपतिः यत्तेभिलषितंतन्वितत्कुरुष्वसुमध्यमे नमस्कृत्वाथसावित्रीश्वश्रूश्वशुरयोरथ सहितातेनसा साध्वीवनंसत्यवताययौ अवलोकयंतीभर्तारंतंचकालंमनस्विनी वनंचफलितंदृष्ट्वापुष्पितद्रुमसंकुलं द्रुमाणांचैवनामानिमृगाणांचैवभामिनी पश्यंतीमृगयूथानिहृदयेनप्रवेपती तत्रगत्वासत्यवान्वैफलान्यादायसत्वरः काष्ठानिचसमादायबबंधभारकंतदा कठिनंपूरयामासकृत्वावृक्षावलोकनं वटवृक्षस्यसासाध्वीउपविष्टामहासती काष्ठान्याददतस्तस्यजाताशिरसिवेदना ग्लानिश्चमहतीजातागात्राणांवेपथुस्तदा आगत्यवृक्षसामीप्यंसावित्रीमिदमब्रवीत् ग्लानिश्चमहतीजाताशिरसश्चापिवेदना कंटकैर्भिद्यतेभद्रेशिरोमेशूलसम्मितैः उत्संगेतवसुश्रोणिस्वप्तुमिच्छामिसुव्रते अभिज्ञानाद्विशालाक्षीतस्यमृत्योर्मनस्विनी प्राप्तकालंमन्यमानातस्थौतत्रैवभामिनी सत्यवानपिसुप्तस्तुकृत्वोत्संगेशिरस्तदा तावत्तत्रसमागच्छत्पुरुषः कृष्णपिंगलः जाज्वल्यमानोवपुषातंददर्शाथभामिनी उवाचवाक्यंवाक्यज्ञाकस्त्वंलोकभयंकरः यमउवाच ॥ क्षीणायुस्तुवरारोहेभर्त्तातवमनस्विनि विनाकेनापिमांनेतुंनशक्यस्तुत्वदंतिके देविदुर्विषहंतेजः सोढुंशक्यंनते

शुभे इतिज्ञात्वामहाभागेस्वयमागमनंमम इत्युक्तातांवरारोहांतस्यदेहान्महात्मनः अंगुष्ठमात्रंपुरुषंबद्ध्वायासेन सत्वरं विचकर्षततोवेगाद्गृहीत्वाप्रास्थितःपुरीं सावित्रीचततःपश्चादनुयातिस्मतंपतिं यमउवाच निवर्त्तस्वमहाभागेत्वंदूरंसमुपागता गत्वास्वभवनंशीघ्रंकुरुचैवोर्ध्वदैहिकं एवमुक्तातुसातेनप्रत्युवाचयमंतदा नश्रमोनैवचग्लानिः सकाशेतवमानद विशेषतश्चभर्त्तुर्मेकुतोग्लानिःसुरेश्वर धर्म्मेणत्वंपालयसेधर्मेणत्वंविवर्द्धसे नाफलंदर्शनंदेवसतामुक्तंकदाचन आहुःसप्तपदींमैत्रीमितिवेदाविदोविदुः ईश्वरउवाच संतुष्टस्तववाक्येनधर्मराजोयमस्तदा वराणामीश्वरोदातावरंतस्यैदिदेशह सापश्चादात्मनःपुत्रान्पितुःपुत्रान्शतंतथा चक्षुःप्राप्तिंचसावव्रेश्वश्रूश्वशुरयोरपि राज्यप्राप्तिंतथाब्रह्मज्जीवितंचतथाविभोःभर्त्तुःकमलपत्राक्षीनिवृत्तासासुमध्यमा प्रदक्षिणंततःकृत्वाधर्मराजस्यसुव्रता तथेत्युक्ताधर्मराजोजगामचस्वमालयं सागत्वावटसामीप्यंकृत्वोत्संगेशिरस्तथा प्रबुद्धस्तुततोब्रह्मन्सत्यवानिदमब्रवीत् मयासुप्तंवरारोहेदृष्टमद्यैवभामिनि तत्सर्वंकथितंतस्यायद्वृत्तंसर्वमेवत तयाचकथितंसर्वंसंवादश्चयमेनहि अस्तंगतेततःसूर्येद्युमत्सेनोमहीपतिः पुत्रस्यागमनाकांक्षीइतश्चेतश्चधावति आश्रमादाश्रमंगच्छन्पुत्रदर्शनकांक्षया आवयोरंधयोर्यष्टिःक्वगतोसिविनावयोः एवंसविविधंक्रोशन्सपत्नीकोमहीपतिः चकारदुःखमत्युग्रंपुत्रपुत्रेतिचासकृत् अकस्मादेवराजेंद्रोलब्धचक्षुर्महीश्वरः तंदृष्ट्वामहदाश्चर्यंचक्षुःप्राप्तिंद्विजोत्तम तत्रपूर्वंतदावाक्यमूचुस्तेतापसाभृशंचक्षुःप्राप्तिश्चतेराजन्सूच्यतेतुमहामते पुत्रेणचसुसंयोगंप्राप्स्यसेनृपसत्तम ईश्वरउवाचयावदेवंवदंत्येनंतापसाद्विजसत्तमाः सावित्र्यासहितःप्राप्तःसत्यवान्द्विजसत्तम नमस्कृत्यद्विजान्सर्वान्पितरंमातरंतथा सावित्रीचततोब्रह्मन्ववंदेचरणाविति श्वश्रूश्वशुरयोर्ब्रह्मन्सावित्रीकमलेक्षणा मुनयऊचुः किंतुसावित्रिजानासिकारणंवरवर्णिनि वृद्धयोश्चक्षुषोःप्राप्तिःश्वश्रूश्वशुरयोस्तव सावित्र्युवाच नजानामिद्विजश्रेष्ठाश्चक्षुषोःप्राप्तिकारणं चिरंसुप्त

स्तुमेभर्त्तातेनकालव्यतिक्रमः सत्यवानुवाच अस्याःप्रभावात्संजातंनदृष्टंकारणंपरं तत्सर्वंविद्यतेविप्राःसावित्र्यास्तपसःफलं व्रतस्यैवतुमाहात्म्यंदृष्टमेतन्मयाधुना ईश्वरउवाच एवंतुवदतस्तस्यतदासत्यवतोविभोः पौरास्समागतास्तत्रअचक्षुर्नृपतिर्यतः येनराज्यंवलाद्राजन्हृतंक्रूरेणमंत्रिणाअमात्येनहतःसोपिइतिपौराःसमागताःपौराऊचुः उत्तिष्ठराजशार्दूलस्वराज्यंपालयप्रभो अभिषिंचस्वराजेंद्रपौरैर्मंत्रिपुरोहितैः ईश्वरउवाच सगत्वाराजशार्दूलः स्वपुत्रजनसंवृतः पितृपैतामहंराज्यंसंप्राप्तश्चमहामनाः सावित्रीसत्यवांश्चैवपरांमुदमवापतुः जनयामासपुत्राणांशतंवैवाहुशालिनी व्रतस्यैवतुमाहात्म्यात्तस्याःपितुरजायत पुत्राणांचशतंब्रह्मन्प्रसन्नाद्यमराजतः एतत्तेकथितंसर्वंव्रतमाहात्म्यमुत्तमं क्षीणायुर्जीवितोभर्ताव्रतस्यास्यप्रभावतःकर्त्तव्यंसर्वनारीणामवैधव्यफलप्रदं सनत्कुमारउवाच विधानंब्रूहिदेवेशव्रतस्यास्यचत्र्यंवक क्रियतेविधिनायेनस्त्रीभिः पुरनिषूदन ईश्वरउवाच वर्षैकनियमंकृत्वाएकभक्तेनमानद नक्ताहारेणवाविप्रभुक्तंप्राप्य द्विजर्षभ त्रिदिनंलंघयित्वातुचतुर्थेदिवसेशुभे चंद्रायार्घ्यंप्रदद्याच्चपूजयित्वासुवासिनीः सावित्रींचप्रसावित्रींगंधधूपनिवेदनैः मिथुनानियथाशक्त्याभोजयित्वायथासुखं भोजयेहंजगद्धात्रिनिर्विघ्नंकुरुमेशुभे दिनंप्रतिदिनंअर्घंकुर्यान्न्यग्रोधसेवनं कृत्वावंशमयेपात्रेचाक्षतप्रस्थमेवच सप्तधान्यःवृतंपात्रंप्रस्थैकेनद्विजोत्तम कारयेन्मुनिशार्दूलवस्त्रयुग्मेनवेष्टयेत् तस्योपरिन्यसेद्देवींसावित्रींब्रह्मणासह सावित्रीसत्यवांश्चैवकार्यौरौप्यमयाविभो पीठकश्चकुठारश्चकृत्वारौप्यमयौद्विज फलैःकालोद्भवैर्देवींपूजयेद्ब्रह्मणःप्रियां हरिद्रारंजितैश्चैवकंठसूत्रैःसमर्चयेत् सखीनांकंठसूत्राणित्रिदिनंप्रतिपादयेत् पक्वान्नानिचदेयानिनित्यमेवद्विजोत्तम माहात्म्यंचैवसावित्र्याः श्रोतव्यंमुनिसत्तम पुराणश्रवणंकार्यंसतीनांचरितंविभो पूजयेन्नित्यमेवेहमंत्रेणानेनसुव्रत सावित्रीचप्रसावित्रीसततंब्रह्मणःप्रिया पूज्यसेहूयसेदेविद्विजैर्मुनिगणैःसदा त्रिसंध्यंदेवि

भूतानांवंदितात्वंजगन्मये मयादत्ताचपूजेयंत्वंगृहाणनमोस्तुते नमःसावित्र्यैपादौपूजयामीत्यादिपूजनं सावित्रीचप्रसावित्रीद्विधाभूतासिशोभने जगत्त्रयेस्थितादेवित्रिसंध्येत्वंतथानघे त्रित्वेदेवित्रिलोकेत्वंत्रेधागौस्त्वंमहेश्वरि पुत्रान्देहिधनंदेहिसर्वंजन्मसुसर्वदा रूपंदेहियशोदेहिसौभाग्यंदेहिमेशुभे व्यापितंसकलंलोकमतोमांपाहिसर्वदा यथातेनवियोगस्तुभर्त्रासहसुरेश्वरि तथामेसुमहाभागेकुरुत्वंजन्मजन्मनि एवंसंपूजयेद्देवीं कमलासन संस्थितां एवंदिनत्रयंनीत्वाचतुर्थेहनिसत्तम मिथुनानिचसंपूज्यषोडशैवाद्विजोत्तम पूजयेद्वसुदानैश्चभूषणैश्चद्विजोत्तमान् अर्चयित्वातथाचार्यंसपत्नीकंसुसम्मतं तस्मैसंकल्पितंसर्वंहेमसावित्रिसंयुतं मंत्रेणानेनदातव्यंद्विजमुख्यायसत्तम सावित्रीकल्पविदुषेप्रणिपत्यतथामुने सावित्रीजगतांमातासावित्रीजगतांपिता मयादत्ताचसावित्रीब्राह्मणप्रतिगृह्यतां अवैधव्यंचमेनित्यंयावज्जन्मनिजन्मनि मृत्वाचवसतेलोकेब्रह्मणःपतिनासह तत्रैववर्षाचिरंकालंभुंक्तेभोगाननुत्तमान् अनेनैवविधानेनकर्तव्यंव्रतमुत्तमं सर्वान्मनोरथान्प्राप्यअंतेरुद्रोथजायते इतिस्कांदेसावित्रीव्रते अथाब्दसाध्यंहेमाद्रौस्कांदेच धर्मराजवरदानानंतरं सावित्र्युवाच यामदीयंव्रतंदेवभक्त्यानारीकरिष्यति भर्त्रासासहितासाध्वीसदास्यात्सुखभाजना धर्मराजउवाच नारीवाविधवावापिअपुत्रापुत्रवर्जिता सभर्तृकासपुत्रावाकुर्याद्व्रतमिदंशुभं ज्यैष्ठेमासितुसंप्राप्तेपौर्णमास्यांपतिव्रता स्नात्वाचैवशुचिर्भूत्वावटंसिंचेद्बहूदकैः सूत्रेणवेष्टयेद्भक्त्यागंधपुष्पाक्षतैःशुभैःनमोवैवस्वतायेतिभ्रमयंतीप्रदक्षिणं रात्रौकुर्वीतनक्तंचअभुक्तंचसमाहिता तथैववटवृक्षं चपक्षेपक्षेप्रपूजयेत् संप्राप्तेचपुनर्ज्यैष्ठेलघुभुक्द्वादशींनयेत् दंतानांधावनंकृत्वानियमंकारयेत्ततः त्रिरात्रंलंघयित्वातुचतुर्थेदिवसेगृहं चंद्रायार्घ्यंप्रदास्यामिपूजयित्वाशुभाःसती मिष्टान्नासियथाशक्त्याभोजयित्वाद्विजोत्तमान् भोक्ष्येदंतुजगद्धात्रिनिर्विघ्नंकुरुमेशुभे इतिनियममंत्रः कृत्वावंशमयेपात्रेवालुकाप्रस्थमेवचसप्तधान्ययुतंपात्रप्रस्थै

केनद्विजोत्तम वसुधोपरिसंस्थाप्यसावित्रींब्रह्मणासह हैमींततस्तयोःप्रीत्यै त्रिरात्रमुपवासतः न्यग्रोधस्यतले तिष्ठेत्यावच्चैवदिनत्रयं सौवर्णांचैवसावित्रींसत्येनसहकारयेत् रौप्यपर्यंकमारोप्यरथोपरिनिवेशयेत् पलादूर्द्ध्वं यथाशक्त्याधारथंरौप्यमयंशुभं काष्टभारंकुठारंचवटंचैवसुविस्तृतं एवंचमिथुनंकृत्वापूजयेद्गतमत्सरः वर्तुलंमंडलंकार्य्यंगोमयेनतपोधन पंचामृतेनस्नपनंगंधपुष्पोदकेनच चंदनागुरुकर्पूरैर्माल्यवस्त्रविभूषणैः नमःसावित्र्यैपादौतुप्रसावित्र्यैतुजानुनो कटिंकमलपत्राक्ष्यैउदरंभूतधारिण्यै ॐनमोगायत्र्यैकंठाशिरासिब्रह्मणःप्रिये अथ ब्रह्मसत्यवत्योः पादौपूजयेत्प्रयतस्तदा धात्रेनमइतिपूज्यावूरूज्येष्ठायवैनमःपरमेष्ठिनेतथामेरुंअग्निरूपायवैकटिं वेधसेचोदरंपूज्यं पद्मनाभायवैहृदिकंठंसुमेधसेपूज्यंमुखंहिरण्यगर्भजेब्रह्मणेवैशिरःपूज्यंसर्वांगंविष्णवेनमःअभ्यर्च्यैवंक्रमेणैवशास्त्रोक्तविधिनाशुभं ततोरजतपात्रेणअर्घ्यंदद्याद्द्वयोरपि अथार्घ्यमंत्रःॐकारपूर्विकाचैववीणापुस्तकधारिणिवेदमातर्नमस्तेस्तुअवैधव्यंप्रयच्छमे पतिव्रतेमहाभागेवन्हिजातेशुचिस्मिते दृढव्रतेदृढमतेभर्त्तुश्चप्रियवादिनि अवैधव्यंचमेदेहिदेवित्वंममसुव्रते पुत्रान्पौत्रांश्चसौख्यंचगृहाणार्घ्यंनमोनमः अथब्रह्मसत्यवत्योरर्घ्यमंत्रःत्वयासृष्टंजगत्सर्वंसदेवासुरमानुषंसत्यव्रतधरादेवेब्रह्मरूपनमोस्तुतेयमार्घ्यदानंत्वंकर्मसाक्षीलोकानांशुभाशुभविवेककृत् वैवस्वतगृहाणार्घ्यंधर्मराजनमोस्तुते धर्मराजःपितृपतिःसाक्षिभूतश्चजंतुषु कालरूपगृहाणार्घ्यमवैधव्यंप्रच्छमे गंधपुष्पैश्च नैवेद्यैःफलैःकुसुमदीपकैःरक्तवस्त्रैरलंकारैःपूजयेद्गतमत्सरः अथसावित्रीप्रार्थना सावित्रीब्रह्मगायत्रीसर्वदाप्रियभाषिणीतेनसत्येनमांपाहिदुःखसंसारसागरात् त्वंगौरीत्वंशचीलक्ष्मीस्त्वंप्रभाचंद्रमंडले त्वमेवजगतांमातामामुद्धरभवार्णवात् सौभाग्यंकुलवृद्धिंचदेहित्वंममसुव्रते यन्मयादुष्कृतंसर्वंकृतंजन्मशतैरपि भस्मीभवतुतत्सर्वमवैधव्यंचदेहिमे अथब्रह्मसत्यवत्योःप्रार्थना अवियोगोयथादेवसावित्र्यासहितस्यते अवियोगस्तथास्माकंभूयाज्ज

न्मनि जन्मनि यमप्रार्थना कर्मसाक्षिजगत्पूज्यसर्ववंद्यप्रसीदमे अथसावित्र्याः सावित्रि त्वंयथादेविचतुर्वर्षशतायुषंपतिंप्राप्तासिगुणितंममदेवितथाकुरु सावित्रीचप्रसावित्रीसततंब्रह्मणःप्रिया पूजितासिद्विजैःसर्वैःस्त्रीभिर्मुनिगणैस्तथा त्रिसंध्यंदेविभूतानांवंदनीयासिसुव्रते मयादत्ताचपूजेयंतांगृहाणनमोस्तुते जागरंतत्रकुर्वीतगीतनृत्यादिमंगलैःसुवासिन्यस्तथापूज्यादिवसेदिवसेगते सिंदूरंकुंकुमंचैवतांबूलंचसपूगकं तथादद्याच्चपूपाणिभक्ष्यंसौभाग्यमष्टकंसौभाग्यमष्टकंपरिभाषोक्तं यातिष्ठेच्चदिवारात्रौकामक्रोधविवर्जिता दिनत्रयेपिकर्तव्यमेवमर्घ्यादिपूजनं ततश्चतुर्थेदिवसेकर्तव्यंतच्छृणुष्वमे मिथुनानिचतुर्विंशत्षोडशद्वादशाष्टवा पूजयेद्वसुगोदानैर्भूषणाच्छादनासनैः आचार्यंचततःपश्चाद्व्रतस्यविधिकारकं सर्वलक्षणसंयुक्तंसर्वशास्त्रार्थपारगंवेदविद्याव्रतस्नातंशांतदांतंजितेंद्रियंसपत्नीकंसमभ्यर्च्यवस्त्रालंकारकुंडलैः शय्यांसोपस्करांदद्याद्गृहंचैवातिशोभनं अशक्तस्तुयथाशक्त्यास्तोकंस्तोकंप्रकल्पयेत् सौवर्णींप्रतिमांपुत्रपतिनासहदापयेत् दानमंत्रःसावित्रित्वंयथादेविचतुर्वर्षशतायुषंसत्यवंतपतिंलब्धामयादत्तातथाकुरु सावित्रीजगतांमातासावित्रीजगतांपिता मयादत्ताचसावित्रीब्राह्मणप्रतिगृह्यतां प्रतिग्रहमंत्रः मयागृहीतासावित्रीत्वयादत्तासुशोभने यावच्चंद्रश्चसूर्यश्चसहभर्त्रासुखीभव गुरुंचगुरुपत्नींचततोभक्त्याक्षमापयेत् यन्मयाकृतवैकल्पंव्रतेस्मिन्दुरधिष्ठितं सर्वंसंपूर्णतांयातुयुवयोरर्चनेकृते अथवटसेचनमंत्रः धर्मराजोयमोधातानिलःकालोंतकोव्ययः वैवस्वतश्चित्रगुप्तोदत्तोमृत्युःक्षयोवटः मासिमासितथातैस्तैर्नामभिःसिंचयेद्वटं इति द्वादशनामभिर्द्वादशमासेषुवटसेचने द्वादशमंत्रा ज्येष्ठादितोज्ञेयाः ॥ १२ ॥ न्यग्रोधेहंवसेनित्यंतस्माद्यत्नेनसेचयेत् इतिसावित्रींप्रतिधर्मराजवचनं ततोगुरुंसपत्नीकंपूजयेद्गतविस्मया भूषणैश्चसुवस्त्रैश्चकुंकुमैश्चमनोहरैः न्यग्रोधस्यसमीपेतुगृहेवास्थंडिलेशुभे सावित्र्याश्चैवमंत्रेणघृतहोमंतुकारयेत् पायसंजुहुयाद्भक्त्याघृतेनस

ह्भामिनि व्याहृत्याचैवमंत्रेणतिलव्रीहियवांस्तथा होमांतेदक्षिणांदद्यात्वित्तशाठ्यविवर्जितां क्षमापयेत्ततो विप्रंवद्यपादौप्रयत्नतः भुंजीतवासरांतेतुनक्तेशांतायशांस्वनी अर्घ्यंदद्यादरुंधत्यै दृष्ट्वाचैवप्रणम्यच अरुंधतिनमस्तेस्तुवसिष्ठस्यप्रियेशुभे सर्वदेवनमस्कार्य्येपतिव्रतेनमोस्तुते अर्घ्यमेतन्मयादत्तंफलपुष्पसमन्वितं पुत्रान्देहिधनंदेहिगृहाणत्वंशुभेमम सखीभिर्ब्राह्मणैःसार्द्धंभुंजीतविजितेंद्रिया एवंकरोतियानारीव्रतमेतदनुत्तमं भ्रातरः पितरौपुत्राःश्वशुरौस्वजनस्तथा चिरायुषस्तथारोग्याःस्युश्चजन्मशतत्रयं भर्त्राचसहितासाध्वीब्रह्मलोकेमहीयते इतिस्कंदपुराणेसोद्यापनंवटसावित्रीव्रतं अथास्यप्रयोगः संक्षिप्तप्रकारेणइदंव्रतंत्रयोदशीमारभ्यपंचदश्यांकार्यं कृष्णपक्षेअमांतंशुक्लपक्षेपौर्णिमास्यंतंकार्य्यं तत्रविधिः नद्यादौ तिलामलकरजनीविलेपपूर्वकंस्नात्वा व्रतस्यवार्षिकत्वात् पूजादिकंनिवर्त्योद्यापनंसंकल्पंकुर्यात् तद्यथा तिथ्यादिसंकीर्त्य ममभर्तुःपुत्रादीनांचपुरारोग्यैश्वर्य्यादिप्राप्तिपूर्वकंइहजन्मनिजन्मांतरेवात्मनोः वैधव्यफलप्राप्तये आचरितवटसावित्रीव्रतोद्यापनंकरिष्य इतिसंकल्प्यआचार्यवरणंविधायवटमूलेगृहेवा वेदींविधाय तत्र सर्वतोभद्रंविरच्य ब्रह्मादिदेवतासग्रहादिकाः संपूज्यतत्रकलशद्वयंप्रतिपाद्य तत्रैकस्मिन् कलशेब्रह्मयज्ञानामितिमंत्रेणहैमंब्रह्माणगायत्रीमंत्रेणहैमासावित्रींचप्रतिष्ठाप्य तदुत्तरेद्वितीयकलशेपलादधिकराजतपर्यंकेहैमीःप्रतिमाः सत्यवत्सावित्रीयमनारदानांनाममंत्रैरावाह्य पुरतःकाष्ठभारंकुठारंचहैमंराजतंचनिधायपूजयेत् अत्राशक्तौ एकस्मिन्कलशे सर्वेषांपूजा पुष्पपूजांते सावित्र्यैपादौपूजयामि प्रसावित्र्यैजानुनी कमलपत्राक्ष्यैकटिं. भूतधारिण्यैउदरंगायत्र्यैकंठंब्रह्मप्रियायैशिरःपू॰ मंत्रपुष्पार्चनानंतरं अर्घ्यंदद्यात् राजतादिपात्रेण द्वयोःकलशयोरुपरि ओंकारपूर्विकेदेविवीणापुस्तकधारिणि वैधात्र्यैनमस्तेस्तुअवैधव्यंप्रयच्छमे पतिव्रतेमहाभागेभर्तुश्चप्रियवादिनि अवैधव्यं

चसौभाग्यंदेहित्वंममसुव्रते पुत्रान्पौत्रांश्चसौभाग्यंगृहाणार्घ्यंनमोस्तुते अथब्रह्मसत्यवतोः त्वयासृष्टंजगत्सर्वंसदेवासुरमानुषं सत्यव्रतधरोदेवब्रह्मरूपनमोस्तुते यमस्य त्वंकर्मसाक्षीलोकानांशुभाशुभविवेककृत् वैवस्वतगृहाणार्घ्यंधर्मराजनमोस्तुते नारदायनमस्तुभ्यंसुरेशाद्यभिवंदित गृहाणार्घ्यंमयादत्तमवैधव्यंप्रयच्छमे ततःसावित्रींप्रार्थयेत् सावित्रीब्रह्मगायत्रीसर्वदाप्रियभाषिणी तेनसत्येनमांपाहिदुःखसंसारसागरात् मयाकृतंमहाघोरंजन्मांतरशतैरघं भस्मीभवतुतत्सर्वमवैधव्यंप्रदेहिमे ब्रह्मसत्यवतोः अवियोगोयथादेवसावित्र्यासहितस्तव अवियोगस्तथास्माकंभूयाज्जन्मनिजन्मनि सावित्र्याःसावित्रित्वंयथादेवीचतुर्वर्षशतायुषं पतिंप्राप्तासिगुणिनंममदेवितथाकुरु यमस्य कर्मसाक्षीजगत्पूज्यसर्ववंद्यप्रसीदमे संवत्सरव्रतंसर्वंपरिपूर्णंतदस्तुमे ततः सुवासिनीः संपूज्यवायनानिदद्यात् कथाश्रवणादिनारात्रिंनयेत् प्रातरग्निंप्रतिष्ठाप्य अन्वादध्यात् सावित्रींगायत्रीमंत्रेण पायसंघृतदूर्वातिलव्रीहियवैःप्रत्येकं अष्टोत्तरशतसंख्य.काहुतिभिः ब्रह्माणंधर्मराजानंनारदं च व्याहृतिपूर्वकनाममंत्रेण प्रत्येकमष्टोत्तर १०८ शतसंख्याकाहुतिभिर्हुत्वा ब्रह्मादिदेवताश्चैकैकयाहुत्याहुत्वा पक्षे सत्यवत्सावित्र्योःब्रह्मसत्यवतो र्ब्रह्मसावित्र्योश्च पृथक्पृथक्होमोनास्ति तत्तन्मंत्रैस्तयोःपूजाप्रार्थनैवेत्युक्तत्वात् ततश्चतुर्विंशतिद्वादशाष्टौचत्वारिवामिथुनानिवस्त्रादिनासंपूज्य पूरिकामोदकमंडकादिकूष्मांडनारिकेलमातुलिंगदाडिमवीजपूरादिकहरिद्रा कुंकुमकेसरकस्तूरीविचूर्णितकज्जलकंठसूत्रकंकणमौक्तिकपादभूषणवस्त्रकंचुकीआदर्शपत्रादिदक्षिणातांवूलादियुतनवसूर्पाविहितंवायनंदद्यात् तत्रमंत्रः सोपस्करंद्विजश्रेष्ठव्रत संपूर्त्तिकारकं वायनंतेप्रयच्छामिसावित्रीप्रीयतांमम ततःपीठंव्रतपूर्त्तयेगांचदत्त्वा ब्राह्मणान्संतर्प्य आशिषोगृहीत्वाइष्टजनैःसहभुंजीत इयान्तत्रविशेषः रात्रौअरुंधतींदृष्ट्वा संपूज्यअर्घ्यंदद्यात् अरुंधतिनमस्तेस्तुवशिष्ठस्यप्रिये

शुभे पुत्रान्देहिसुखंदेहिगृहाणार्घ्यंनमोस्तुतेइतिवटसावित्रीव्रतोद्यापनं अस्यामेवज्यैष्ठपौर्णमास्यांपुत्रकामव्रतं
पद्मपुराणेसृष्टिखंडे भीष्मउवाच श्रोतुमिच्छाम्यहंब्रह्मन्ज्यैष्ठस्यपूर्णिमाव्रतं सुतानेकोनपंचाशद्येनलेभेपुनर्दितिः
पुलस्त्यउवाच यद्वसिष्ठादिभिःपूर्वंदित्यैकथितपूर्वकं विस्तरेणतदेवेदंमत्सकाशान्निशामय ज्यैष्ठमासिसितेपक्षे
पौर्णमास्यांयतव्रता स्थापेदव्रणंकुम्भंसिततंडुलपूरितं नानाफलयुतंतद्वदिक्षुदंडसमन्वितं सितवस्त्रयुगच्छन्नंसित
चंदनचर्चितं नानाभक्ष्यसमोपेतंसहिरण्यंतुशक्तितः ताम्रपात्रंगुडोपेतंतस्योपरिनिवेशयेत् तस्मादुपरिब्रह्माणंसौ
वर्णंकलशोपरि कुर्य्यात्तुशर्करयोपेतांसावित्रींतस्यवामतः गंधधूपंतयोर्दद्याद्गीतंवाद्यंचकारयेत् तदभावेकथांकु
र्य्याद्यथातुष्येत्पितामहः ब्रह्मणःस्थाप्यप्रतिमांकृत्वागुडमयींशुभां शुक्लपुष्पाक्षततिलैरर्चयेत्पद्मसंभवंब्रह्मणेपादौ
संपूज्यजंघेसौभाग्यदायच विश्वायचोरुयुग्मंचमन्मथायेतिवैकटिं स्वच्छोदरायेत्युदरमतंद्रायेत्युरोदितं मुखंपद्म
मुखायेतिवाहूवैवेदपाणये नमःसर्वात्मनेमौलिमर्चयेच्चापिपद्मजं ततःप्रभातेतत्कुंभंब्राह्मणायनिवेदयेत् ब्राह्मणा
न्भोजयेद्भक्त्यास्वयंतुलवणंविना भक्त्यातुदक्षिणांदद्यादिमंमंत्रमुदीरयेत् प्रीयतामत्रभगवान्सर्वलोकपितामहः
हृदयेयंसमालोक्यतच्चानंदोभिधीयते अनेनविधिनासर्वंमासिमासिसमाचरेत् उपवासीपौर्णमास्यामर्चयेद्ब्राह्मण
त्रयं फलमेकंचसंप्राश्यशर्वर्य्यांभूतलेस्वपेत् ततस्त्रयोदशेमासिघृतधेनुसमन्वितां शय्यांदद्याद्विरिंच्यायसर्वोपस्क
रसंयुतां ब्रह्माणंकांचनंकृत्वासावित्रींरजतैस्तथा पद्मात्मकःसृष्टिकर्त्तासावित्रीमुपलभ्यतु वस्त्रैर्द्विजंसपत्नीकंपू
ज्यभक्त्याविभूषणैः शय्यासनादिकंदद्यात्प्रीयतामित्युदीरयेत् होमंशक्त्यातिलैःकुर्य्याद्ब्रह्मनामादिकीर्त्तयन् ग
व्येनसर्पिषातद्वत्पायसेनचधर्मवित् विप्रेभ्योवायनंदद्यात्पुष्पमालांचशक्तितः यःकुर्य्याद्विधिनानेनपौर्णमास्यां
स्त्रियोपिवा सर्वपापविनिर्मुक्तःप्राप्नोतिब्रह्मसाम्यतां इहलोकेधनंपुत्रान्सौभाग्यंध्रुवमत्रतु योब्रह्मासरस्मृतोवि

ष्णुरानंदात्मामहेश्वरः एकार्थत्वस्वरूपेणस्मरेद्देवंपितामहं एवंश्रुत्वाचकारासौदितिःसर्वमशेषतः कश्यपोव्रतमाहात्म्यादागत्यपरयामुदा चकारकर्कशांभूयोरूपलावण्यसंयुतां वरैस्तांछंदयामाससात्रवव्रेवरंवरं पुत्रंशक्रवधार्थायसमर्थंचमहौजसं वरयामिमहात्मानंसर्वामरनिषूदनं उवाचकश्यपोवाक्यमिंद्रहंतारमूर्जितं प्रदास्याम्यहमेतेनकिंतच्चक्रियतांश्रुतं आपस्तंभांकुरुत्विष्टिंपुत्रीयांमेयशस्विनि विधास्यामिततोगर्भंगर्भस्येष्टस्तनौशुभे ॥ भविष्यतिशुभोगर्भेदिविशक्रनिषूदनः आपस्तंभाततश्चक्रेपुत्रेष्टिंद्रविणाधिकां इंद्रशत्रोभवस्वेतिजुहाववहुविस्तरं देवाश्चमुदुर्दैत्यादानवामुमुदुस्तदा दित्यांगर्भमथाधत्तकश्यपःप्राहतांपुनः मुखंतेचंद्रप्रतिमंस्तनौविल्वफलोपमौ अधरौविद्रुमाकारौवर्णश्चातीवशोभनः त्वांदृष्ट्वाहंविशालाक्षिविस्मरामिस्वकांतनुं तथैवगर्भःसुश्रोणिहस्तेस्पृष्टौस्तनौतव त्वयायत्नोविधातव्योह्यस्मिन्गर्भेवरानने एवंसंवत्सरशतमस्मिन्नेवतपोवने संध्यायांनैवभोक्तव्यं गर्भिण्यावरवर्णिनि नस्थातव्यंनगंतव्यंवृक्षमूलेषुसर्वदा नोपस्करेषुनिविशेन्मुशलोलूखलादिषु जलंनैवावगाहेथाः शून्यागारंचवर्जयेः नशयानासदातिष्ठेर्व्यायामंचाविवर्जयेः ननुषांगारभस्मास्थिकपालेषुसमाविशेत् वर्जयेत्कलहंस्तोकंगात्राभ्यंगंतथैवच नमुक्तकेशातिष्ठेतनाशुचिःस्यात्कथंचन नशयीतोत्तरशिरानचैवाधःशिराःक्वचित् नवस्त्रहीनानोद्विग्नानचार्द्रचरणासती नामंगल्यांवदेद्वाचंनवकस्याधिकाभवेत् कुर्य्याच्चगुरुभिर्नित्यंपूजांमंगलतत्परा सर्वौषधीभिःसृष्ठेनवारिणास्नानमाचरेत् कृतरक्षासुशुश्रूषावाचापूजनतत्परा तिष्ठेत्प्रसन्नवदनाभर्त्तुःप्रियहितेरता नतर्जयेच्चभर्त्तारंसर्वावस्थमपिक्वचित् कृशाशादुर्बलाचैववार्द्धिक्यममचागतं स्तनौमेचलितौस्थानान्मुखंचवलिभिर्युतं एवंविधात्वयाचाहंकृताहिनवदेत्क्वचित् स्वस्त्यस्तुतेगमिष्यामितथेत्युक्तस्तयापुनः पश्यतांसर्वभूतानां तत्रैवांतरधीयत ततःस्वभर्तृवाचोक्तविधिनासमतिष्ठत अथज्ञात्वातथेंद्रोपिदितेःपार्श्वमुपागतः विहायदेवसदनंतां

व्र०र०
ज्यैष्ठ०
२१

शुश्रूषुरवस्थितःदितेःछिद्रांतरप्रेप्सुरभवत्पाकशासनः विपरीतोदरव्यग्रःप्रसन्नवदनोवहिः अजानन्किंचतत्कार्य्यमात्मनःशुभमाचरत् ततोवर्षशतांतेसान्यूनेतुदिवसैस्त्रिभिः मेनेकृतार्थमात्मानंप्रीत्यावस्थितमानसा अकृत्वापादयोःशौचंशयानामुक्तमूर्धजा निद्राभारसमाक्रांतादिवापरशिराःक्वचित् ततस्तस्यांतरंलब्ध्वाप्रविश्यांतःशचीपतिं वज्रेणसप्तधाचक्रेतद्गर्भंत्रिदशाधिपः ततःसप्तचतेजाताःकुमाराःसूर्यवर्चसः रुदंतःसप्ततेबालानिषिद्धाजंभभेदिना भूयोपिरुदमानांस्तानेकैकंसप्तधाच्छिनत् एवमेकोनपंचाशद्भूतास्तेरुरुदुर्भृशं इंद्रोनिवारयामासमारुदध्वंपुनःपुनः ततःसचिंतयामासवितर्कमतिवृत्रहा कर्मणःकस्यमाहात्म्यात्पुनः संजीवितास्त्वमी विदित्वापुण्ययोगेन पौर्णमासीफलंत्विदं नूनमेतत्परिणतमथवाब्रह्मपूजनात् वज्रेणाभिहताःसंतोनविनाशमवाप्नुयुः एकोऽप्यनेकतामापयस्मादुदरगोप्ययं अवध्यानूनमेवैतेतस्माद्देवाभवंत्विति यस्मान्मारुदइत्युक्तारुदंतोगर्भसंस्थिताः मरुतोनामतेनाम्नाभवंतुसुखभागिनः ततःप्रसाद्यदेवेशःक्षमस्वेतिदितिंपुनः अर्थशास्त्रंसमास्थायमयैतद्दुःकृतंकृतं कृत्वामरुद्गणैर्देवःसमेतोह्यमराधिपः दितिंविमानमारोप्यसंयुक्तामगमद्दिवं यज्ञभागभुजोजातामरुतस्तेततोभवन् नजग्मुरैक्यमसुरैस्ततस्तेसुरवल्लभाः इतिपाद्मसृष्टिखंडज्येष्ठपूर्णिमायां पुत्रकामव्रतं अथास्यामेवज्यैष्ठ्यां विल्वत्रिरात्रव्रतं ब्रह्मोवाच ज्यैष्ठेमासितुसंप्राप्तपौर्णमास्यांद्विजोत्तम ज्यैष्ठ्यांकुजदिनेकुर्यात्सिद्धार्थैःस्नानमुत्तमं श्रीवृक्षसिंतयेद्भक्त्यागंधपुष्पैश्चपूजयेत् वत्सरंत्वेकभक्तंतुहविष्यान्नेनकारयेत् श्वशूकरखरादीनांदर्शनेभोजनंत्यजेत् अनेनविधिनासम्यक्मासिमासिसमाचरेत् ततःसंवत्सरेपूर्णेगत्वाविल्वसमीपतःगृहीत्वावालुकांपात्रेप्रस्थमात्रांमहामुने अथवाधान्यमादाययवशालितिलादिकं ततोवंशमयेपात्रेवस्त्रयुग्मेनवेष्टयेत् उमामहेश्वरंहैमंशक्त्याकुर्याद्विभूषितं रक्तवस्त्रयुगंदद्यान्नैवेद्यंफलसंयुतं पुष्पैर्बहुविधैश्चापिफलैर्नानाविधैस्तथा गुडेक्षुजीरकैस्तत्रलव

णेनविरूढकैः सप्तधान्यैस्तथादीपैर्वंशपात्रप्रकल्पितैः रजनीकंठमूत्रैश्चशुभ्रैःकुंकुमकेसरैः अवतारंकरोत्येषाउमादेवीहरप्रिया श्रीनिकेतनमस्तुभ्यंशिवप्रियनमोस्तुते अवैधव्यंचमेदेहिश्रियंजन्मनिजन्मनि श्रियंधनपतिंपुत्रानारोग्यंकुलसंततिं सौभाग्यंरूपसंपत्तिपूजितस्त्वंप्रयच्छमे सहस्रंविल्वपत्राणांहोमयेत्तुयथाविधि पयसंतत्रजुहुयाद्विप्रःशांतोथमंत्रवित् राजतंश्रीतरुंकृत्वासुवर्णफलशोभितं अष्टोत्तरशतंयावत्पीतवस्त्रेणवेष्टयेत् त्रयोदश्यांसमारभ्ययावत्पूर्णाभवेत्तिथिः त्रिरात्रंजागरंकृत्वापीठवासीजितेंद्रियः उमापतेपशुपतेत्रैलोक्याधिपते प्रभो गृहाणार्घ्यंमहादेवगौर्य्यासहमहेश्वर ततःप्रभातेसंप्राप्तेस्नात्वाचतिलसर्षपैः वस्त्रालंकारयुग्मैश्चगुरुदांपत्यमर्चयेत् पादुकोपानहच्छत्रशय्यांगांचसुभूषितां गुरुंसंपूज्यभक्त्यातुदद्यादेतत्प्रयत्नतः षोडशाष्टौतुचतुरो द्विजान्दांपत्यभूषितान् वस्त्रालंकारगोदानैस्तस्मिन्नहनिपूजयेत् मिष्टान्नंभोजनंदेयमात्मनःश्रेयइच्छता यानारीकुरुतेचैतद्व्रतंपापप्रणाशनं सर्वसिद्धिकरंपुण्यंशिवलोकेमहीयते कल्पकोटिशतंयावदास्थायाशिवसान्निधौ ततो राज्ञीभवेन्मर्त्येपुत्रपौत्रसमन्विता इतिस्कंदपुराणोक्तंसोद्यापनंविल्वत्रिरात्रव्रतं अस्यामेवपौर्णमास्यांतिलदानंछत्रोपानहादिदानंचकुर्यात् तदुक्तंनिर्णयामृते ज्यैष्ठेमासितिलान्दद्यात्पौर्णमास्यांविशेषतः अश्वमेधस्ययत्पुण्यंतत्प्राप्नोतिनसंशयः विष्णुधर्मोत्तरे सोपवासस्तथाज्यैष्ठपूर्णेतुझशलक्षणे उपानहौतथाछत्रंदत्त्वात्यंतसुखीभवेत् तत्रमंत्रः उपानहौप्रदास्यामिकंटकादिनिवारणे सर्वस्थानेषुसुखदेअतःशांतिंप्रयच्छमे छत्रदानमंत्रःइहामुत्रातपत्राणंकुरुमेकेशवप्रभोछत्रंत्वत्प्रीतयेदत्तंब्राह्मणायमयासह मयालक्ष्म्यासह विष्णुस्मृतौ ज्यैष्ठीज्येष्ठायुताचेत्स्यात्तत्रछत्रोपानहप्रदानेननरोनराधिपत्यमाप्नोतीति तथावामनपुणे उदकुंभांवुदानंत्रिविक्रमस्यप्रीत्यर्थंदातव्यं ज्यैष्ठमासित्विति इयंचरौच्यमन्वादिः तत्रमन्वादिकार्यत्वेनश्राद्धदानादिविधेयं तथाचकौर्म्मकल्पादिरपिकल्पादिकार्यं

मपिकार्घ्यं अत्रपद्मपुराणदानमुक्तंमत्स्यपुराणे एतदेवयदापद्ममभूद्धैरणमयंजगत् तत्कथांताश्रयंतद्धत्पाद्ममित्युच्यतेवुधैः पाद्मंतत्पंचपंचाशत्सहस्राणितुपठ्यते ज्यैष्ठेमासितिलैर्युक्तंसोश्वमेधफलंलभेत् नारदीयेच एतद्वै पंचपंचाशत्सहस्रंपद्मसंज्ञितं पुराणंलेखयित्वावैज्यैष्ठ्यांस्वर्णाबज्संयुतं यःप्रदद्यात्सुसंस्कृत्यपुराणज्ञायमानवः संयातिवैष्णवंधामसर्वदेवनमस्कृतः इतिपद्मपुराणदानं ॥ स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेःपादांवुजार्चारतो जीयात्पुत्रकलत्रमित्रसहितःसंपालयन्क्ष्मांचिरम् १ रणवीरसिंहभूपेनकारितेकृत्यसागरे अभवज्ज्यैष्ठकृत्यानांरम्योरत्नसमुच्चयः २ इति श्रीमत्सूर्यवंशावतंसरघुकुलतिलकश्रीरणवीरसिंहमहाराजकारिते कृत्यरत्नाकरेज्यैष्ठमासकृत्यरत्नसमुच्चयः ॥

210

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिब्बामल्लाधिकारेज्यैष्ठमासोमुद्रितस्समाप्तिमगमत्
संवत् १९४१ श्रावण प्र. २४

आषाढमासप्रारम्भः

222

पुस्तकालय
गुरुकुल कांगड़ी

॥ ओंश्रीगणेशायनमः ॥ अथाषाढमासकृत्यनिर्णयः ॥

तत्रमिथुनसंक्रांतौपराः षोडशघटिकाःपुण्यकालउक्तः रात्रौतुपूर्वोक्तव्यवस्थाज्ञेया अयकृत्यंस्कंदपुराणे आषाढंचापियोमासमेकभक्तंसमाचरेत् राज्ञोसौमान्यतांप्राप्यकामानाप्नोतिपुष्कलान् महाभारते आषाढमेकभक्तेनस्थित्वामासमतंद्रितःबहुधान्योबहुधनोबहुमान्यश्चजायते आषाढकृष्णप्रतिपदामारभ्य बहुभोगबहुधान्यप्राप्तिव्रतारंभःकार्यः तदुक्तंविष्णुधर्मोत्तरे ज्यैष्ठ्यांतुसमतीतायांप्रतिपत्प्रभृतिक्रमात् पूर्ववत्पूजयेद्देवंविश्वरूपधरं हरिं पूर्ववत्रूपावाप्तिव्रतवत् कृत्वाव्रतांतेचतथात्रिरात्रंदत्त्वाश्वयुक्तंशयनंद्विजाय लब्ध्वाधनंधान्यममुत्रभूमौ स्वर्लोकमासाद्यचभोगवान्स्यात् इदमेवभोगावाप्तिव्रतं अत्रारोग्यप्रतिपद्व्रतांगत्वेन माधवनामधेयसूर्यपूजाव्रतं आषाढकृष्णद्वितीयायांतिथिपत्वेनब्रह्मणःपूजाव्रतंकार्य्यं आषाढकृष्णतृतीयायां गौरीव्रतांगत्वेनसुभगगौरीपूजाव्रतं इयंचाग्नेयकल्पादि तत्रापिकल्पादिश्राद्धदानादिकृत्यं कल्पांतस्थायिफलकमुक्तं आषाढकृष्णचतुर्थ्यां संकटचतुर्थीव्रतांगत्वेन हरनंदनगणपतिपूजादिकमुपवासव्रतं कार्य्यं पंचम्यांनागपूजा आषाढकृष्णषष्ठ्यां गुहनामधेयस्कंदपूजाव्रतं आषाढकृष्णसप्तम्यां निक्षुभार्कपूजा माघकृष्णादित्वेन भविष्यपुराणे यानार्य्युपवसेदेवंकृष्णामेकांतुसप्तमीं सागच्छेत्परमंस्थानंनिक्षुभार्कंप्रपूजयेत् एकांतिथिवर्गेमुख्यां कृष्णसप्तमींनिक्षुभार्कसप्तमीव्रतं तत्रादित्यस्यभगवतः पूजोपवासव्रतं स्त्रीभिरनुष्ठेयं आषाढकृष्णाष्टम्यांकृष्णाष्टमीव्रतं तदुक्तं वह्निपुराणे प्रतिमासंचतेपूजामष्टम्यांयःकरिष्यति ममचैवाखिलान्कामान्ससंप्राप्नोत्यसंशयमिति आषाढकृष्णनवम्यामैंद्रीदेवीपूजाव्रतं तदुक्तंमदनरत्ने उपवासपरोभक्त्यानवम्यांपक्षयोर्द्वयोः आषाढेमासिराजेंद्रयःकुर्य्यान्नक्तभोजनं पूजयेच्छ्रद्धयादुर्गामैंद्रींनाम्नींतुनामतः ऐरावणगतांशुभ्रांश्वेतवस्त्रस्वरूपिणीं ऐरावणसमारू

ढ इंद्रस्यानुचरोभवेत् आषाढकृष्णदशम्यांधर्मराजस्यपूजनं भविष्यपुराणोक्तंयमव्रतं दशम्यांयमउद्दिष्टः सर्वव्याधिहरोध्रुवं मूलमंत्राःस्वसंज्ञाभिरंगमंत्राश्चकीर्तिताः मूलमंत्राःप्रधानमंत्राः अंगमंत्राः परिवारमंत्राःपद्मपत्रेषु परिवारदेवतासहितंकार्णिकस्थंतिथीशंगंधादिभिःपूजयेत् सतिलक्षीरान्नमाक्षिकैर्होमंकुर्यात् तत्रादौ यमायधर्मराजायेत्यादिपरिवारदेवतापूजा ततोघृताक्तधानाहोमस्ततआज्यधारादिहोमः ॥ इतिभविष्यत्पुराणोक्तंयमदशमीव्रतं इदंदशमीमात्रेसर्वमासेष्वनुष्ठेयं आरोग्यव्रतमपिदशमीमात्रेसर्वदानुष्ठेयं आषाढकृष्णैकादशीयोगिनीतदुक्तंनारदीये आषाढकृष्णैकादशींयोगिनींसमुपोष्यतां सर्वदानफलंप्राप्य मोदतेविष्णुमंदिरे अस्याःकथा युधिष्ठिरउवाच आषाढकृष्णपक्षेतुकावाह्येकादशीभवेत् किंनामकोविधिस्तस्याएतद्विस्तरतोवद श्रीकृष्णउवाच व्रतानामुत्तममिदंलोकानांचहितायच कथयिष्यामिराजेंद्रभुक्तिमुक्तिफलप्रदं आषाढस्यकृष्णपक्षेयोगिनीनामनामतः तस्याव्रतप्रभावेनपूतोभवतिमानवः तस्मात्सर्वप्रयत्नेनकर्तव्यैकादशीतिथिः कामप्रदेहलोकेच परलोकेचमोक्षदा महापातकहंत्रीचमहापुण्यफलप्रदा योगिनीनामयस्मात्तुतस्मात्सर्वोत्तमास्मृता संसारेदुस्तरे राजन्संचरैकादशीव्रतं जगत्त्रयमसारंवैसारंवैयोगिनीव्रतं कथयामितवाग्रेहंकथांपौराणिकींशुभां अलकायां राजराजः शिवभक्तिपरायणः तस्यासीत्पुष्पवटुकोहेममालीतिनामतः तस्यपत्नीसुरूपाचविशालाक्षीतिनामतः सतस्यांस्नेहसंयुक्तः कामपाशवशंगतः मानसात्पुष्पानिचयमानीयस्वगृहेस्थितः पत्नीप्रेमसमायुक्तोनकुवेरालयंगतः कुवेरोदेवसदनेकरोतिशिवपूजनं मध्यान्हसमयेराजन्पुष्पागमसमीक्षकः हेममालीस्वभवनेरमतेकांतयासह यक्षराट्प्रत्युवाचाथकालातिक्रमकोपितः कस्मान्नायातिभोयक्षाहेममालीदुरात्मवान् निश्चयःक्रियतांमस्यइत्युवाचपुनःपुनः यक्षाऊचुःवनिताकामुकोगेहेरमतेस्वेच्छयानृप तेषांवाक्यंसमाकर्ण्यकुवेरःकोपपूरितः

आनयामासतंतूर्णंवटुकंहेममालिनं ज्ञात्वाकालात्ययंसोपिभयव्याकुललोचनः अस्नातएवचागत्यकुवेरस्याग्रतःस्थितः तंदृष्ट्वाधनदःक्रुद्धःकोपसंरक्तलोचनः प्रत्युवाचरुषाविष्टः स्फुरदोष्ठपुटद्वयः धनदउवाच आःपापदुष्टदुर्वृत्तकृतंमेदेवहेलनं अष्टादशश्वित्रकुष्ठीवियुक्तःकांतयातया अस्मात्स्थानादपध्वस्तोगच्छस्थानमथाधमं इत्युक्तोधनदेशेनतस्मात्स्थानात्पपातसः महादुःखाभिभूतश्चकुष्ठैःपीडितविग्रहः नैवतोयंनभक्ष्यंचवनेरौद्रालभददसौनसुखंदिवसेतस्यननिद्रांलभतेनिशि पातकेनाभिभूतोपिपूर्वकर्मस्मरत्यसौ छायायांपिडिततनुर्निदाघेनपपीडितः शिवपूजाप्रभावेनस्मृतिस्तस्यनलुप्यते भ्रममाणस्ततोगच्छद्धिमाद्रिंपर्वतोत्तमं तत्रापश्यन्मुनिवरंमार्कंडेयं तपोनिधिं यस्यायुर्विद्यतेसप्तब्रह्मणोदिवसान्यथ आश्रमंतुगतस्तस्यऋषेर्ब्रह्मसदःसमं ववंदेचरणौतस्यदूरतः पापकर्मकृत् मार्कंडेयोमुनिवरोदृष्ट्वातंकुष्ठिनंतदा परोपकरणार्थायसमाहूयेदमब्रवीत् कस्मात्कुष्ठाभिभूतस्त्वंकुतोनिंद्यतरोह्यसि इत्युक्तःसप्रत्युवाचमार्कंडेयंमहामुनिं हेममाल्युवाच राजराजस्यानुचरोहेममालीतिनामतः मानसात्पुष्पनिचयमानीयप्रत्यहंमुने शिवपूजनवेलायांकुवेरायसमर्पये एकस्मिन्दिवसेकाललोपश्चविहितोमया पत्नीसौख्यप्रसक्तेनकामव्याकुलचेतसा ततःक्रुद्धेनशप्तोहंराजराजेनवैमुने कुष्ठाभिभूतःसंजातोवियुक्तःकांतयातथा अधुनातवसान्निध्यंप्राप्तोस्मिशुभकर्मणा सतांस्वभावतश्चित्तंपरोपकरणक्षमं इतिज्ञात्वामुनिश्रेष्ठमांप्रशाधिकृतागसं मार्कंडेयउवाच त्वयासत्यमिदंप्रोक्तंनासत्यंभाषितंयतः अतोव्रतोपदेशंतेकथयामिशुभप्रदं आषाढेकृष्णपक्षेतुयोगिनीव्रतमाचर अस्याव्रतप्रभावेन कुष्ठंनश्यंतितेनघ इतिवाक्यंमुनेःश्रुत्वादंडवत्पतितः क्षितौ उत्थायदिष्टोमुनिनाबभूवातीवहर्षितः मार्कंडेयोपदेशेनकृतंतेनव्रतोत्तमं तद्व्रतस्यप्रभावेनदेवरूपोबभूवसः संयोगंकांतयालेभेबुभुजेसौख्यमुत्तमं ईदृग्विधंनृपश्रेष्ठकथितंयोगिनीव्रतं अष्टादशसहस्राणिद्विजान्भोजयेतं

तुष्टःतत्फलंसमवाप्नोतियोगिनीव्रतकृन्नरः महापापप्रशमनीमहात्पुण्यफलप्रदा शुचौकृष्णैकादशीतिकथितायोगिनीनृप पठनाच्छ्रवणान्मर्त्यःसर्वपापैःप्रमुच्यते इतिब्रह्मवैवर्त्तपुराणे ॥

पद्मपुराणेच आषाढकृष्णयोगिन्येकादशीमाहात्म्यं

अस्यांपुंडरीकाक्षनामविष्णुपूजनं आषाढकृष्णद्वादश्यांतिथीशत्वेनहरेःपूजनंकार्य्यं आषाढकृष्णत्रयोदश्यां त्रयोदशीमात्रव्रतत्वेनकामत्रयोदशीव्रतं हेमाद्रौ भविष्योत्तरे कामंपूज्यत्रयोदश्यांसुरूपोजायतेध्रुवं इष्टांरूपवतींभार्य्यांलभेत्कामांश्चपुष्कलान् मूलमंत्रांगसंज्ञाभिरंगमंत्राःप्रकीर्त्तितः पूर्ववत्पद्मपत्रस्थःकर्त्तव्यश्चातिथीश्वरःगंधपुष्पोपहारैश्चयथाशक्तिविधीयते पूजात्रावित्तशाठ्येनकृतापिनफलप्रदा आज्यधारासमिद्भिश्चदधिक्षीरान्नमाक्षिकैः पूर्वोक्तफलकोहोमःकृतःशांतेनचेतसा अत्रमूलमंत्रःकामगायत्रीसाचैत्रशुक्लत्रयोदश्यांअनंगत्रयोदश्यां अनंगमंत्राअपि तत्रैव ज्ञेयाःआषाढकृष्णचतुर्दश्यां मासशिवरात्रिव्रतांगत्वेनशिवचतुर्दशीव्रतं तदुक्तंमदनरत्ने स्कंदपुराणेयतःकृष्णचतुर्दश्यांपूजायत्नेनमेकृता तथाजागरणंरात्रौसन्निधौमेकृतंतथेति आषाढामावास्यापितृकल्पादिःकल्पादिकृत्यमधिकृत्यात्रश्राद्धादिविधेयं अमावास्यायांसकलामावास्यासाधारणं शूलव्रतं हेमाद्रौशिवधर्मेषु अमायांतुनिराहारोयोब्दमेकंसुयंत्रितःशूलंपिष्टमयंकृत्वावर्षांतेविनिवेदयेत् अनेनभ्रूणहत्यादिपापानिसकलान्यपि नश्यंत्यरिविनाशश्चशिवलोकेगतिर्भवेत् अथाषाढशुक्लप्रतिपदायामारोग्यप्रतिपद्व्रतं विद्याप्राप्तिव्रतांगत्वेन सूर्यपूजनं ब्रह्मणःपूजनंच संवत्सरमिदंकृत्वाततःसाक्षात्त्रयोदशं पूजनंदेवदेवस्यतस्मिन्नहनिभार्गवेतिविष्णुधर्मोत्तरोक्तमारोग्यव्रतं सदाप्रतिपदंप्राप्यशुक्लपक्षस्ययादव संवत्सरंमहाभागशुक्लगंधानुलेपनैरित्यादिशुक्लप्रतिपदिसविस्तरंज्ञेयं आषाढशुक्लद्वितीयायांरथयात्रोत्सवः तदुक्तंतिथितत्त्वेस्कांदे आषाढस्यसितपक्षेद्वितीया

युष्यसंयुता तस्यांरथेसमारोप्यरामंमांभद्रयासह नारदीयेपिआषाढस्यसितेपक्षेद्वितीयायुष्यसंयुतेत्यादि द्विजातिभिर्व्रतस्यार्थंपरिक्रम्यपुरोदितं जलाशयांतिकंगत्वाकारयेच्चमहोत्सवं तदंतेदेवभुवनंप्रवेश्यचयथाविधि ब्राह्मणान्भोजयेच्चैवव्रतस्यास्यप्रपूर्त्तयेइति आषाढशुक्लतृतीयायां सलक्ष्मीककेशवपूजा नारदीये आषाढस्यतृतीयायां शुक्लपक्षेचवाससा केशवंतुसलक्ष्मीकंसस्त्रीकंतुद्विजोर्चयेत् भोजनैःसुरभीदानैर्वस्त्रैश्चैवविभूषणैः प्रियैर्वाक्यैर्भृशं प्रीत्यानारीसौभाग्यवांछया समुपास्यव्रतंचैतद्धनधान्यसमन्विता देवदेवप्रसादेनविष्णुलोकमवाप्नुयात् आषाढशुक्लचतुर्थी रथंतरकल्पादिः तस्यांकल्पादिश्राद्धदानादिकमनंतफलदमितिवाक्यप्रपंचितम् आषाढशुक्लपंचम्यां पंचवर्णध्वजग्रामाद्बहिर्धरोपांतेनिधायवायुपूजासर्वलोकपालपूजा तदुक्तंनारदीये आषाढशुक्लपंचम्यांवायुंसर्वगतंमुनेग्रामाद्बहिर्विनिर्गत्यधरोपांतेसमास्थितः ध्वजंचपंचवर्णंतुवंशदंडाग्रसंस्थितं संमूर्छितंनिदध्यात्तुकल्पितासनमध्यतः ततस्तन्मूलदेशेतुदिक्षुसर्वासुनारद लोकपालान्समभ्यर्च्यकुर्य्याद्वायुपरीक्षणं तस्मैतस्मैदिगीशायपूजांसम्यक्प्रकल्पयेत् एवंस्थित्वानिराहारस्तत्रयामचतुष्टयं सायमागत्यगेहंस्वंभुक्त्वास्वयमवस्थितः लोकपालान्नमस्कृत्य सुप्याद्भूमितलेस्थितः यःस्वप्नोजायतेतस्यरात्रौयामेचतुर्थके सएवभवितानूनंसत्यमित्याहवैशिवः अशुभेतुसमुत्पन्नेःशिवपूजापरायणः सोपवासोयजेद्देवंयामंतद्दिनमेववा भोजयित्वाद्विजानष्टौततःशुभफलंलभेत् एतमेतत्समुद्दिष्टंशुभाशुभनिदर्शनं नृणांसौभाग्यजनकमिहलोकेपरत्रच इतिसौभग्यजनकपंचमीव्रतं आषाढशुक्लषष्ठ्यांस्कंदव्रतं नारदीये आषाढशुक्लषष्ठ्यांतुस्कंदव्रतमनुत्तमं उपोष्यपूजयित्वैवशिवोमाप्रियमात्मजं लभतेवांछितान्कामान्पुत्रपौत्रादिसंततिं आषाढशुक्लसप्तम्यां सूर्यपूजाव्रतं नारदीये आषाढशुक्लसप्तम्यांजातइंद्रोरविःस्वयं संपूज्यविविधान्नेनसोपवासोजितेंद्रियः स्वर्गंतिभलतेविप्रदेवेंद्रस्यप्रसादतः निर्णयामृतेऽपि आषाढशुक्लसप्तम्यां

कश्यपाद्विवस्वान्नामसूर्योजातः तत्रवर्तुलमंडलस्थितंसूर्यंधूपदीपानुलेपनादिभिः संपूज्यनैवेद्यंदद्यात् तदुक्तंब्रह्मपुराणे आषाढशुक्लसप्तम्यांविवस्वान्नामभास्करः जातःपूर्वंतुतस्मात्तंतत्रोपोष्ययजेत्सदा रथचक्राकृतौरम्येमंडले सर्वकामदं भक्ष्यैर्भोज्यैस्तथापेयैःपुष्पैर्धूपैर्विलेपनैरिति आषाढशुक्लाष्टम्यांमहिषघ्नदेवीव्रतं नारदीये शुक्लाष्टम्यां तथाषाढेस्नात्वाचैवनिशांबुना तेनैवस्नापयेद्देवींपूजयेच्चविधानतः ततःशुद्धजलैःस्नाप्यविलिंपेत्सेंदुचंदनैः नैवेद्यंशर्करोपेतंदत्त्वाचमनमर्पयेत् भोजयित्वाततोविप्रान्दत्त्वास्वर्णंचदक्षिणां विसृज्यचततःपश्चात्स्वयंभुंजीतवाग्यतः एतद्व्रतंनरःकृत्वादेवीलोकमवाप्नुयात् तथाचदेवीपुराणे अष्टम्यांचतथाषाढेनिशातोयेनस्नापयेत् ततोदेवींजलैःकुष्ठैर्वरदामुदकेनच स्नात्वाविलिप्यकर्पूरंचंदनंरोचनांबुभिरितिपाठांतरं धूपचंदनकर्पूरवालकैःसितासिल्हकैः भक्ष्यान्शर्करयापूर्णान्पानिकानिशुभानिच दापयेत्कन्यकाविप्रान्भोजनंचात्मनस्तदा शक्तितोदक्षिणांदद्यान्महिषघ्नींचकीर्तयेत् दीपमालांघृतेनैवसर्वान्कामान्प्रयच्छति सर्वयज्ञमहादानसर्वतीर्थफलंलभेत् एतद्व्रतवरंशुक्रमयारुद्रेणविष्णुना जगतोहितमिच्छद्भिश्चीर्णंदुर्गाव्रतंमहत् भानुनाग्रहविध्वंससमरेचकृतंपुरा देवासुरैर्यक्षनागकिन्नरैर्मानवैस्तथा अप्सरोभिस्तथास्त्रीभिःसौभाग्यस्यविवृद्धये कृतंवैग्रहशार्दूलयश्चकुर्याद्यथाविधि श्रवणादस्यचाप्नोतिसर्वकामसुखानिच इष्टानिलभतेमर्त्योवंध्यापुत्रंप्रसूयते इतिमहिषघ्नदेवीव्रतं आषाढशुक्लनवम्यामैंद्रीदेवीपूजाव्रतं नारदीये आषाढस्यनवम्यांचयःकुर्यात्पक्षयोर्द्विज नक्तंचैंद्रींसमभ्यर्च्यसितामैरावणस्थितां सभवेद्देवलोकेतुभोगभाग्देवयानगः आषाढशुक्लदशमीमन्वादिका नारदीये आषाढशुक्लदशमीपुण्यामन्वादिकामता तस्यांस्नानंदानजपोहोमोवास्वर्गतिप्रदः अथातआषाढशुक्लैकादशीदेवशयनीकृत्यं नारदीये आषाढशूक्लैकादश्यांयाद्विधानंतुतच्छृणु उपोष्यतस्मिन्दिवसेविधिवन्मंडपेशुभे स्थापयेत्प्रतिमांविष्णोःशंखचक्रगदांबुजैः लसच्चतुर्भुजांसौम्यां

कांचनींवापिराजतीं पीतांबरधरांशुभ्रेपर्यंकेस्वास्तृतेद्विज ततःपंचामृतस्नानंमंत्रैःशुद्धजलेनच पौरुषेणचसूक्तेन उपचारान्प्रकल्पयेत् नीराजनांतान्पाद्यादींस्ततःसंप्रार्थयेद्धरिं सुप्तेत्वयिजगन्नाथजगत्सर्वंचराचरं इतिसंप्रार्थ्य देवाग्रेचातुर्मास्यव्रतोदितान् नियमांस्तुयथाशक्तिगृह्णीयाद्भक्तिमान्नरः ततःप्रभातेद्वादश्यांसमर्चेच्छेषशायिनं उपचारैःषोडशभिस्ततःसंभोज्यवाडवान् प्रतोष्यदक्षिणाभिस्तुस्वयंभुंजीतवाग्यतः ततःप्रभृतिविप्रेंद्रगंधाद्यैःप्रत्यहंयजेत् कृत्वैवंविधिनाविप्रदेवस्यशयनव्रतं मुक्तिमेतियतोमर्त्योभवाद्विष्णुप्रसादतः अत्रैवदेवशयनोत्थापनव्रतमुक्तं भविष्योत्तरे मिथुनस्थेसहस्रांशौस्वापयेन्मधुसूदनं तुलराशिगतेतस्मिन्पुनरुत्थापयेद्धरिं आषाढस्यासिते पक्षेएकादश्यामुपोषितः इत्यादिकृत्यकलापोऽग्रेवक्ष्यते अथदेवशयन्येकादशीकथा भविष्योत्तरे पद्मपुराणेच युधिष्ठिरउवाच आषाढस्यसितेपक्षेकावाह्येकादशीभवेत् किंनामकोविधिस्तस्याःकिंपुण्यंचवदस्वमे श्रीकृष्णउवाच शृणुपार्थप्रवक्ष्यामिगोविंदशयनव्रतं कटिदानंसमुत्थानंचातुर्मास्यव्रतक्रमं युधिष्ठिरउवाच किंदेवशयनंनामकिंवैदेवःस्वपित्यहो देवःकिमर्थंस्वपितिकिंविधानंचतद्वद केमंत्राःकेचनियमाव्रतान्यत्रकृतिश्चका किंग्राह्यंकिंचभोक्तव्यंसुप्तेदेवेजनार्दने श्रीकृष्णउवाच मिथुनस्थेसहस्रांशौस्वापयेन्मधुसूदनं तुलराशिगतेतस्मिन्पुनरुत्थापयेद्द्रुतं अधिकेमासिपतितएषएवविधिक्रमः नान्यथास्वापयेद्देवंतथैवोत्थापयेद्धरिं आषाढस्यसितेपक्षेएकादश्यामुपोषितः स्थापयेत्प्रतिमांविष्णोःशंखचक्रगदाधरां कांचनींराजतींताम्रमयींपैत्तलिकींतथा पीतांबरधरांसौम्यांपर्यंकेस्वास्तृतेशुभे सितवस्त्रयुगाच्छन्नेसोपधानेयुधिष्ठिर इतिहासपुराणज्ञोब्राह्मणोवेदपारगः स्नापयित्वादधिक्षीरघृतक्षौद्रैर्जलेनवा समालभ्यचशुभैर्गंधैःपुष्पैर्धूपैःसुधूपितां पूजितांकुसुमैः शुभ्रैर्मंत्रेणानेनपांडव सुप्तेत्वयिजगन्नाथजगत्सुप्तंभवेदिदं विबुद्धेत्वयिबुध्येतजगत्सर्वंचराचरं एवंतांप्रतिमांविष्णोःस्थापयित्वायुधिष्ठिर

तस्यैवाग्रेस्वयंस्थित्वागृह्णीयान्नियमान्नरःचतुरोवार्षिकान्मासान्देवस्योत्थापनावधि गृहीतोनियमःशुद्धोनिर्विघ्नं सचयातुमे स्त्रीवानरोवामद्भक्तोधर्मभङ्गोथदृढव्रतः गृह्णीयान्नियमानेतान्दंतधावनपूर्वकं तेषांफलानिवक्ष्यामिकर्द्दणांतेपृथक्पृथक् मधुरस्वरोभवेद्राजन्पुरुषोगुडवर्जनात् लभेच्चसंततिंदीर्घांपुत्रपौत्रादिवर्द्धिनीं तैलस्यवर्जनात्पार्थसुंदरांगःप्रजायते कटुतैलपरित्यागाद्रिपुनाशमवाप्नुयात् मधुतैलपरित्यागात्सौभाग्यमतुलंभवेत् पुष्पादिभोगनियमात्स्वर्गेविद्याधरोभवेत् योगाभ्यासीभवेद्यस्तुसब्रह्मपदमाप्नुयात् कटुकतिक्तमधुरकषायक्षारजान्रसान् वर्जयेत्सवैरूप्यंदौर्गंध्यंनाप्नुयात्सदातांबूलवर्जनाद्भोगीरक्तकंठश्चजायते शाकपत्राशनाद्भोगीचापाकृतमलोभवेत् पदाभ्यंगपरित्यागाच्छिरोभ्यंगविवर्जनात् दीप्तिमान्दीप्तकरणोयक्षोद्रव्यपतिर्भवेत् लभेतसंततिंदीर्घांतैलपक्वविवर्जनात् भूमौसंस्तरशायीचहरेरनुचरोभवेत् सदामुनिः सदायोगीएकसस्यस्यभोजनात् निर्व्याधिर्नीरुजोजस्त्रमद्यमांसविवर्जनात् एवमादिपरित्यागाद्धर्म्यःस्याद्धर्मनंदन एकांतरोपवासेनब्रह्मलोकेमहीयते धारणान्नखलोमानांगंगास्नानंदिनेदिने मौनव्रतीभवेद्यस्तुतस्याज्ञास्खलिताभवेत् भूमौभुक्तेनरोयस्तुपृथिव्यधिपतिर्भवेत् ॐनमोनारायणायेतिजपित्वानंतकंफलं पादाभिवंदनाद्विष्णोर्लभेद्गोदानजंफलं कल्पस्थायीभवेद्राजन्सनरोनात्रसंशयः विष्णुपादांबुजस्पर्शात्कृतकृत्योभवेन्नरः विष्णोर्देवालयेकुर्यादुपलेपनमार्जनं कल्पस्थायीभवेद्राजन्सनारोनात्रसंशयाः प्रदक्षिणशतंयस्तुकरोतिस्तुतिपाठकः हंसयुक्तविमानेनसतुविष्णुपुरंव्रजेत् त्रिरात्रभोजनाच्चैवमोदतेदिविदेववत् षडहर्भोजनाद्राजन्देवोवैमानुषोभवेत् प्राजापत्यंचरंश्चैवचातुर्मास्यव्रतंनरः मुच्यतेपातकैःसर्वैस्त्रिविधैर्नात्रसंशयः तप्तकृच्छ्रातिकृच्छ्राभ्यांयःक्षिपेत्शयनंहरेः सयातिपरमंस्थानंपुनरावृत्तिवर्जितं चांद्रायणैर्नरोराजन्क्षिपेन्मासचतुष्टयं दिव्यदेहोभवेत्सोथसोमलोकं

चगच्छति शुक्लपक्षेनरोयोवैत्यजेदन्नादिभक्षणं तेनपक्षोपवासेनप्रतिपक्षंहरिप्रियः सगच्छेद्धरिसायुज्यं नभूयस्तुप्रजायते भिक्षाभोजीनरोयोहिसभवेद्वेदपारगः नलिप्यतेसपापैस्तुपद्मपत्रमिवांभसा कृष्णेविष्णौहृषीकेशेप्रसुप्तेमधुसूदने परान्नंवर्जयेद्यस्तुकृतकृत्योभवेद्द्विजः परान्नवर्जनात्पार्थचांद्रायणफलंलभेत् सर्वपापविनिर्मुक्तः सोमलोकमहीयते शाकाहारंतुयःकुर्याद्राजन्मासचतुष्टयं तस्यवंशसमुच्छेदःकदाचिन्नोपजायते लवणंवर्जयेद्यस्तुभूपमासचतुष्टयं त्रिजन्मोपार्जितंपापंसर्वंनाशमवाप्नुयात् शक्त्यादानंतुयःकुर्याद्यावन्मासचतुष्टयं विष्णुमुद्दिश्यराजेंद्रसदेवत्वमवाप्नुयात् पंचगव्याशनःपार्थचांद्रायणफलंलभेत् निर्मलंदेहमाप्नोतिगंगास्नानंदिनेदिने कांस्यमांसेन्नतंद्यूतंव्यायामंक्रोधमैथुने हिंसांतैलंविवादंचनिद्रांनैर्माल्यलंघनं द्वादश्यांद्वादशैतानिविष्णुभक्तोविवर्जयेत् उपवासंतथानक्तमेकभक्तमयाचितं अशक्तस्तुपुमान्कुर्यात्सायंप्रातरखंडितः स्नानंपूजादिसंयुक्तंसनरोहरिलोकभाक् गीतवाद्यकरोविष्णोर्गांधर्वंलोकमाप्नुयात् लोकान्प्रबोधयेद्यस्तुसोंतेविष्णुपुरंव्रजेत् कृत्वाप्रेक्षणकंदिव्यंलोकमप्सरसांव्रजेत् कृत्वाप्रेक्षणकंविष्णोर्निर्मलंदेहमाप्नुयात् नित्यस्नायीनरोराजन्नरकंनैवपश्यति भोजनंवर्जयेद्यस्तुसस्नानंपौष्करंलभेत् तीर्थजांबुहरिस्नानान्निर्मलंदेहमाप्नुयात् एकभक्ताशनान्नित्यमग्निहोत्रफलंलभेत् अयाचितेनचाप्नोतिवापीकूपप्रपाफलं षष्टाहःकालभोगेनस्थायीस्वर्गेनरोभवेत् भोगेनभोजनेनेत्यर्थः पत्रेषुयोनरोभुंक्तेकुरुक्षेत्रफलंलभेत् शिलायांभोजनेनित्यंप्रयागस्नानजंफलं सुप्तेनाथेजगन्नाथेकेशवेगरुडध्वजे निवर्तंतेक्रियाःसर्वाश्चातुर्मास्येचभारत यामद्वयंजागरणान्नरोगैरभिभूयते क्षणंतुयज्ञफलदंघटिकातुचतुर्गुणा प्रहरःकोटिगुणितस्ततःसंख्यानविद्यते ॥ इतिपद्मपुराणेजागरणफलमुक्तम् ॥ एवमादिव्रतैःपार्थतुष्टिमायातिकेशवः विवाहव्रतबंधादिक्रियाःसंस्कारलक्षणाः क्षौरग्रामप्रवेशादिगोदानादिप्रतिष्ठितं पुण्यानियानिकर्माणिवर्जयेद्दक्षिणायने अ

संक्रांततथामासंदैवेपित्र्येविवर्जयेत् मलिम्लुचमशौचंचरविसंक्रांतिवर्जिते प्राप्तेभाद्रपदेमासेएकादश्यासितेहानिक
टिदानंभवेद्विष्णोर्महापूजाप्रवर्तने कृष्णकृष्णजगन्नाथयोगिगम्यनिरंजन कटिदानंकुरुष्वाद्यप्राप्तेभाद्रपदेशुभे क
टिदानंपार्श्वपरिवर्त्तनम् यदेतद्देवशयनंतत्रमेकारणंशृणु पुरातपःप्रभावेणतोषयित्वाहरिंप्रभु याचितंमुखसंवास
संस्थानंयोगनिद्रया निरीक्ष्यचात्मनोदेहंरुद्धंलक्ष्म्याउरःस्थलं शंखचक्रासिशार्ङ्गैश्चवाहवोप्यथपश्यमे नाभे
रधोनिरुद्धमेवैनतेयेनपक्षिणामुकुटेनाशिरोरुद्धंकुंडलैःश्रवणेतथा ददाम्यहंततस्तुष्टोनेत्रयोःस्थानमादरात् चतुरोवा
र्षिकान्मासान्वसप्रीताभविष्यसि योगनिद्रापितद्वाक्यंश्रुत्वापौराणिकंशुभं चकारलोचनावासमतोर्थेनेयुधिष्ठिर
अहंतुतावद्रक्ष्यामिमानयामिमनस्विनीं योगनिद्रांमहानिद्रांशेषाहिशयनेस्वयं क्षीरोदतोयवीच्यग्रैर्धौतपादंसमा
हितं लक्ष्मीकरांबुजैःश्लिष्टैर्मृद्यमानपदद्वयं तत्रकालेतुयोमासान्मद्भक्तश्चतुरःक्षिपेत् व्रतैरनेकैर्नियमैःपाडवश्रेष्ठमा
नवः कल्पस्थायीविष्णुलोकेवसतेनात्रसंशयः ततोविवोधयेद्देवंशंखचक्रगदाधरं कार्त्तिकेशुक्लपक्षस्यएकादश्यां
पृथसुत मंत्रेणानेनराजेंद्रदेवमुत्थापयेत्ततः उत्तिष्ठोत्तिष्ठगोविंदयोगनिद्रांविहायच लक्ष्मींविसृज्यलोकस्वमल
क्ष्मींनुदकेशव समुत्थितेतदाविष्णौक्रिया सर्वाप्रवर्तते तत्रैवदेवदेवस्यतत्पूर्ववत्स्नानमाचरेत् महातूर्यरवैरात्रौ
भ्रामयेत्स्यंदनेस्थितं दर्शयेत्सर्वलोकांश्चउत्थितंधरणीधरं ससदेशोपिराजेंद्रसर्वःस्वर्गायकल्पते रात्रौजागरणं
कार्य्यमेकादश्यांसुरालये प्रभातेविमलेस्नात्वाद्वादश्यांविष्णुमर्चयेत् जुहुयाद्धव्यवाहंचहविर्द्रव्यैर्घृतादिभिः ततो
विप्रान्शुभाचारान्भोजयेदन्नविस्तरैःघृतक्षीरदधिक्षौद्रकषायगुडमोदकैःयजमानोग्रतःस्थित्वावादहास्यविवर्जिताः
एकादशदशाष्टौवाभोजयेत्कुरुसत्तम अर्चयेच्चंदनैश्चूर्णैःपुष्पैर्गंधैर्द्विजोत्तमान् शास्त्रोक्तविधिनापार्थभोजयेद्भगवद्भ
तान् आश्वात्येभ्यस्ततोदद्यात्पंक्तयकिंचिदेवच स्वभावाद्यदभीष्टंवैदत्तंपुष्पफलादिकं चतुरोवार्षिकान्मासांन्नियमो

यस्ययःकृतः कथयित्वाद्विजेभ्यस्तद्दद्याद्भक्त्याचदक्षिणां दत्त्वाविसर्जयेद्विप्रांस्ततोभुंजीतचस्वयं यस्यकंचतुरोमासान्प्रार्थितस्यसमुद्धरेत् एवंयश्चाचरेत्पार्थसोनंतफलमाप्नुयात् अवसानेतुराजेंद्रवासुदेवपुरंव्रजेत् यस्याविघ्नंसमाप्येतचतुर्मास्यव्रतंनृप सभवेत्कृतकृत्यस्तुनपुनर्मानुषोभवेत् योदेवशयनंचापिकटिदानंसमाचरेत् उत्थानंचापिकृष्णस्यसहरेर्लोकमाप्नुयात् शृणोतिध्यायतिस्तौतिजुहोत्याख्यातियोनरः हरिभक्तिकरःपार्थसगच्छेद्वैष्णवंपदम् दुग्धाब्धिभोगिशयनेभगवाननंतोयोस्मिन्दिनेस्वपितिचापिविबुध्यतेवा तस्मिन्ननन्यमनसामुपवासभाजांपुंसांददातिसुगतिंगरुडाग्रगामी ॥ इतिश्रीभविष्योत्तरपद्मपुराणयोर्विष्णोःशयनकटिदानोत्थापनैकादशीमाहात्म्यम्

अस्यामेवैकादश्यांवसुदेवद्वादशीव्रतंवराहपुराणे दुर्वासाउवाच आषाढेप्येवमेवंतुसंकल्प्यविधिनानरः अर्चयेत्परमंदेवंगंधपुष्पैर्विधानतः वासुदेवायपादौतुकटिंसंकर्षणायच प्रद्युम्नायेतिजठरमनिरुद्धायचेत्युरः चक्रपाणयेतुभुजौकंठंभूपतयेतथा स्वनाम्नाशंखचक्रेतुपुरुषायेतिवैशिरः एवमभ्यर्च्यमेधावीप्राग्वत्तस्याग्रतोघट विन्यसेद्वस्त्रयुग्मंतुतस्योपरिततोन्यसेत् कांचनंवासुदेवंचचतुर्बाहुसनातनं तमभ्यर्च्यविधानेनगंधपुष्पादिभिःक्रमात् प्राग्वत्तद्ब्राह्मणेदद्याद्देवादिनिसुव्रते एवंनियमयुक्तस्यपुण्यंतस्यफलंशृणु वसुदेवोभवद्राजायदुवंशविवर्द्धनः देवकीतस्यभार्यासीत्समानव्रतचारिणी सात्वपुत्राभवत्साध्वीपतिधर्मपरायणा तस्याःकालेनमहतानारदोभ्यागमद्गृहं वसुदेवेनभक्त्यासौपूजितोवाक्यमब्रवीत् कथयामासधर्मज्ञोदेवकीवसुदेवयोः तावप्येवंविधंभक्त्याचक्रतुःश्रद्धयान्वितौ तयोस्तुष्टःस्वयंविष्णुःपुत्रत्वंसंजगामह एवमेषापापहराद्वादशीपुत्रदास्मृता इमामुपोष्यचसुतान्विद्यांवित्तंलभंतिच राज्यंचभ्रष्टराज्यास्तुपापिनःपापसंक्षयं यथाभारोपनीतस्तुधरण्याःकेशवेनवै मृतोविष्णुपुरेरम्येमोदतेकालसंक्षये मन्वंतराणिषट्त्रिंशत्ततःकालात्ययेपुनः इहलोकेभवेद्राजाशतवर्षाणितानितु दातायज्वाक्षमायुक्त

स्ततोनिर्वाणमाप्नुयात् ॥ इतिवाराहपुराणेधरणीव्रतेषु आषाढशुक्लैकादश्यांवसुदेवद्वादशीव्रतमाहात्म्यं पद्मपुराणे श्रीमहादेवउवाच अश्वमेधसहस्राणिवाजपेयशतानिच एकादश्युपवासस्यकलांनार्हंतिषोडशीं स्नानंदानंजपोहोमःस्वाध्यायंदेवतार्चनं चातुर्मास्येकृतंयच्चसर्वंहिचाक्षयंस्मृतम् एककालंद्विकालंवापुराणंशृणुतेनरः सर्वपापविनिर्मुक्तोविष्णुलोकंसगच्छति हरौसुप्तेविशेषेणहरेर्नामपठन्जपन् तत्फलंकोटिगुणितंलभतद्विजसत्तम वैष्णवोब्राह्मणोयस्तुपूजनंप्रकरोतिहि सएवसर्वधर्मात्मापूज्यएवनसंशयः चातुर्मास्यमिदंपुण्यंपवित्रंपापनाशनं श्रुत्वातुलभतेपुण्यंगंगास्नानसमुद्भवं व्रतंकृत्वामहाभागयादिनोद्यापनंचरेत् सकर्ताकर्मणांतातनसम्यक्फलभाग्भवेत् व्रतवैकल्यमासाद्यकुष्ठीनामप्रजायते एतस्मात्कारणाच्चैवकुर्य्यादुद्यापनंद्विज गृहीत्वानियमानेतान्पालयित्वायथाविधि सुप्तोत्थितेजगन्नाथेगत्वाब्राह्मणसन्निधौ क्षमापयेद्देवदेवंयथाविधिसविस्तरम् यत्त्यक्तंनियमेनात्रतत्तद्दद्यात्सदक्षिणं शय्यांसोपस्करांदद्याद्वासोदद्याद्द्विजातये गोभूहिरण्यवासांसिगृहोपकरणानिच अशक्तौतुयथाशक्तिब्राह्मणानेवभोजयेत् यथाशक्तिप्रपूज्याथसर्वंसंपूर्णतामियात् इत्युत्तरखंडे आषाढशुक्लैकादश्यांस्वापमहोत्सवउक्तोमदनरत्ने ब्रह्मपुराणेपि एकादश्यांतुशुक्लायामाषाढेभगवान्हरिः भुजंगशायनेशेतेक्षीरार्णवजलेसदा ततस्तत्प्रतिमाकार्यासर्वलक्षणसंयुता सुप्तातुशेषपर्यंकेशैलमृद्भिस्तुवारिभिः ताम्रारकूटरजतैस्तथाचित्रपटेथवा लक्ष्म्याउत्संगहस्तेचविन्यस्तचरणांबुजा उत्संगहस्तेउत्संगस्थितहस्ते नानाविधोपकरणैः पूजाचविधिपूर्वकं उपवासश्चकर्त्तव्योरात्रौजागरणंतथा तस्यांरात्र्यांव्यतीतायांद्वादश्यांपूजयेत्तथा त्रयोदश्यांतथागीतंनृत्यंवाद्यंनिवेदयेदिति टोडरानंदेऽपि आषाढशुक्लैकादश्यांकुर्यात्स्वापमहोत्सवमिति अयंचद्वादश्यामपिकार्यः आभाकाद्येषुमासेषुमिथुनेमाधवस्यच द्वादश्यांशुक्लपंचम्यांप्रस्वापावर्तनोत्सवः ॥

इतिनिर्णयसिंधौभविष्योक्तेः आषाढशुक्लद्वादश्यांक्षीराब्धिशयनोत्सवः कार्योन्यथात्वनादृष्टिर्भवेत्पौराणिक व्रते इतिरामार्चनचंद्रिकोक्तेश्च द्वादश्यामित्यत्रपारणाहमात्रंविवक्षितं पारणाहेपूर्वरात्रेघंटादीन्वादयेन्मुहुरितितत्रैवोक्तेः नृसिंहपरिचर्यायामपियद्यपि आषाढस्यसितपक्षेएकादश्यामुपोषितः नक्तंद्विजवरश्रेष्ठगृह्णीयान्नियमंव्रती कार्त्तिकेशुक्लपक्षस्यएकादश्यांसमाहित इत्यादिवचनैरेकादश्यामेवानुष्ठेयतागम्यते तथापीयंच द्वादशीदेवप्रबोधार्थंविनिर्मितातिमंत्रलिंगानुगृहीताशिष्टाचाराद्द्वादश्यामप्यनुष्ठेयतानिर्धार्यतइत्युक्तं यत्द्वादश्याशयनादिकमुक्तंनमिथुनार्कएव आभाकाद्येषुमासेष्वितिभविष्योक्तेः स्वापकालविशेषस्तुनिशिस्वापोदिवोत्थानं संध्यायांपरिवर्त्तनमिति ब्रह्मपुराणवचनेनविशिष्योक्तेः एताश्चद्वादश्योरात्रिसंध्यादिनेष्वनुराधाश्रवणरेवतीनामादिमध्यांतभागउक्ताः क्रमेणप्रस्वापादिषुप्रशस्ताः तथाचनारदीये मैत्राद्यपादेस्वपितीहविष्णुः श्रुतेश्चमध्ये परिवर्त्तनेति पौष्णावसानेनसुरारिहंताप्रबुध्यतेमासचतुष्टयेनेतिभविष्येपि आभाकासितपक्षेषुमैत्रश्रवणरेवती रेवतीत्यत्रसप्तमीलोपः आदिमध्यावसानेषुप्रस्वापावर्तनोत्सवः यदातुद्वादशीषुरात्र्यादिभागेषु तन्नक्षत्रभागो नास्तितदा द्वादश्यानक्षत्रमात्रयोगोपिरात्र्यादिगतोग्राह्यः पादयोगोयदातत्स्यादृक्षेणापितदाभवेदितिवाराहपुराणात् विष्णुर्दिवानस्वपितिनचरात्रौप्रबुध्यते द्वादश्यामुख्यसंयोगेपादयोगेनकारणमितिविष्णुधर्मोत्तराच्च यदातुद्वादशीषुतानिनक्षत्राणिनसंत्येव किंत्वेकादशीषुत्रयोदशीषुवा तदातत्रापि तत्तदृक्षभागएवनिशादिवेलानादरेणप्रस्वापादिकार्यं अप्राप्तेद्वादशीमृक्षेउत्थानशयनेहरेः पादयोगेनकर्त्तव्येनाहोरात्रंविचिंतयेदिति जीमूतवाहनधृतवचनात् पादयोगादन्यतिथौद्वादश्यामृक्षसंगमादितिवचनाच्च कौस्तुभेतु अप्राप्तइत्यादिवचनंमुख्यकालेकेनापिनिमित्तेनाकृतोत्सवेनपुंसित्रयोदश्यादिगौणकालेकर्त्तव्यउत्सवः पादयोगवशेनदिवैववाकार्योरा

व्र०२०
आषाढ
७

थौवेतिसंदेहेनियमार्थंनतु नक्षत्ररहितद्वादशीबाधेन त्रयोदश्यादौपादयोगोऽ प्राप्तकर्त्तव्यतायाः प्रापणपूर्वंरात्र्यादिनिषेधार्थं अपूर्वविधौगौरवादितिव्याख्यातम् एवंचद्वादश्यांनिशाद्यादेरऽन्यतिथौच नक्षत्रपादयोगादेवनियतेसतियदाद्वादशीषुनिशादेरन्यत्रतद्दक्षभागेयो ऽन्यतिथौचतदितरनक्षत्रस्यैवयोगः तदाद्वादशीषुसंध्यायांप्रस्वापादि द्वादश्यांसंधिसमयेनक्षत्राणामसंभवे आभाकासितपक्षेषुशयनावर्त्तनादिकमितिवाराहवचनात् संधिसमयइतिशयनादावन्वेति संधिसमयश्चसायंसंध्यैवरेवत्यादेरलाभेवाद्वादश्यांचविभाभवेत् उभयोरप्यभावेतुसंध्यायांचमहोत्सवः ॥ इतिहरिभक्तिविलासे रेवत्यांतोयदारात्रौद्वादश्यांचसमागतः तदाप्रबुध्यतेविष्णुर्दिनातेप्राप्यरेवतीमिति जीमूतवाहनवचनात् अत्रबहुवचनेषुचतुर्थभागवाचिपादग्रहणाच्चतुर्धाविभक्तानुराधारेवत्योराद्यांत्यपादयोरेवस्वापबोधोत्सवौकार्यौनचादिमध्यावसानपूर्वितिवाक्येसमंस्यादश्रुतत्वादिति त्रेधाविभागएवअतएवमध्यग्रहणमप्युपपद्यतइतिवाच्यं वचनांतरेषुपादग्रहणेनविशेषश्रवणादश्रुतत्वादितिहेतोरसिद्धेः श्रवणस्यतुत्रेधाविभक्तमध्यभागएवग्राह्यः ॥ आषाढकार्त्तिकपौर्णमास्योरपि स्वापप्रबोधावाहयमः क्षीराब्धौशेषपर्यंकआषाढ्यांसंविशेद्धरिःनिद्रांत्यजतिकार्त्तिक्यांतयोस्तंपूजयेत्सदेति अत्रचाषाढीकार्त्तिकीद्वेआषाढस्येयंकार्त्तिकस्येयमितिव्युत्पत्त्यैकादशीपरे नचवृद्धिर्यस्याचामादेरितिवृद्धसंज्ञायांछआषाढीयमितिस्यादितिवाच्यं क्वचिदपवादविषयेप्यौत्सर्गिकप्रवृत्तिरितिन्यायेनाणप्रत्ययेनेष्टसिद्धेरितिलक्ष्मीधरभट्टाः यत्तु आषाढशुक्लपक्षांतेभगवान्मधुसूदनः भोगिभोगेनिजांमायांयोगनिद्रांसमाश्रुयात् शेतेसौचतुरोमासान्यावद्भवतिकार्त्तिकीतिवचनं तदपिपौर्णमास्यांशयनप्रबोधस्वीकारोचित्येनतद्विषयंबोध्य श्रीदत्तादयस्तु आषाढशुक्लैकादशीमारभ्यपौर्णमासीपर्यंतंविष्णोर्निद्राग्रहणरूपशयनसमयः अतएवएकादश्यांशयनमभिधायतदादिदिनपंचकेकर्मकथनंब्रह्मपुराणेवाराह

पुराणेच निद्राग्रहणमत्रानंतरमाषाढमासे द्वादश्यामित्यभिधानं वामनपुराणेवा अनुज्ञांब्राह्मणेभ्यश्चद्वादश्यांप्रयतःशुचिः लब्ध्वापीतांबरधरःस्वस्तिनिद्रांसमानयेदित्यभिधानंच यमस्मृतौ त्वापाढीपदस्योपाधेस्तत्रैवप्रवृत्तेः पूर्णिमायांशयनाभिधानंचसंगच्छते विष्णुधर्मोत्तरेप्येवम् केचित्तुभगवतःशयनकालेविकल्पएव कथमन्यथा आवैशाखाद्भुजगवनिताचुंबनायासखिन्नो देवोदैत्यप्रवरपरशुर्यावदेकांतसुप्तः अतःशय्यापरिणततनुर्योगनिद्रामुपैति तावद्हृष्टैःसमयउदितोब्रह्मणोभाषितेनेतिगणकशास्त्राद्वैशाखादिमासेहरिशयनमित्याहुः एते पांचपक्षाणांयथासंप्रदायंव्यवस्था श्रीरामस्यतुपारणोत्तरंद्वादशीमध्येत्रयोदशीमध्येवापूर्वरात्रेस्वापोत्सवः पारणाहेपूर्वरात्रइतिरामार्चनचंद्रिकोक्तेः शिष्टास्तुसर्वदेवानामपिपारणोत्तरमेवरात्रौकुर्वंतीतिकेचित् यत्तुमोहचूडोत्तरे मिथुनस्थोयदाभानुरमावास्याद्वयंस्पृशेत् द्विराषाढःसविज्ञेयोविष्णुःस्वपितिकर्कटइति तदुत्तरवर्षगतकर्कार्के स्वापपरमितिमाधवः मेषादिमिथुनांतेषुयदादर्शद्वयंभवेत् अत्रांतरेतदावश्यंमिथुनार्केहरिःस्वपेदितिवराहमिहिरोक्तेः एतस्यचावश्याऽनुष्ठेयतोक्ता रामार्चनचंद्रिकायां गारुडे मिथुनस्थेसहस्रांशौनस्वापयतियोहरिं वैष्णवैःसहसंभूयस्नानादृष्टिस्तदाभवेदिति अथरामार्चनचंद्रिकोक्तः स्वापमहोत्सवविधिः पारणाहेपूर्वरात्रेघंटादीन्वादयेन्मुहुः विधायमहतींपूजांविष्णुमभ्यर्च्यवैष्णवान् नीराज्यनरयानेचराममारोप्यवैष्णवैः गीतवादित्रघोषेणदेवंनीत्वाजलाशये पुष्पांजलिंप्रदायाथयानादुत्तारयेत्प्रभुं तीरेपिन्यासमाशास्यहस्तंदत्त्वोपवेशयेत् धौतांघ्रिपाणिराचांतः कुर्यात्संकल्पमादृतः न्यासंकृत्वाचदेवेचस्वर्णघर्मानुवाकतः तथापुरुषसूक्तेनोत्तरनारायणेनच पंचामृतेनसंस्नाप्यसंपूज्यायरघूत्तमं अतोदेवेतिमंत्रेणजलेप्रस्वापयेत्प्रभुं शेषपर्यंकवर्य्येस्मिन्फणामणिगणामले श्वेतद्वीपांतरेदेवकुरुनिद्रांनमोस्तुते अथकृत्वामहापूजांगंधस्रग्धूपदीपकैः अन्नतांबूलनृत्याद्यैराशास्यानुग्रहंहरेः

अ०२०
आषाढ
८

सुप्तेत्वयिजगन्नाथेजगत्सुप्तंभवेदिदं विबुद्धेचविबुद्ध्येतप्रसन्नोमेभवाव्यय इतिसंप्रार्थ्यतस्याग्रेगृह्णीयान्नियमानि
मान् श्वेतद्वीपेभोगिनाथेयोगनिद्रास्थितेत्वयि चातुर्मास्यव्रतेऽनुज्ञांदेहिलक्ष्मीपतेमम लब्ध्वानुज्ञांशंखहस्तोय
थाप्रोषितभर्तृका चतुरोवार्षिकान्मासान्राघवोत्थापनावधि इमंकरिष्येयनियमंनिर्विघ्नंकुरुमेच्युत इदंव्रतंमयादेव
गृहीतंपुरतस्तव निर्विघ्नंसिद्धिमायातुप्रसादात्तेरमापते गृहीतेस्मिन्व्रतेदेवपंचत्वंयदिमेभवेत् तदाभवतुसंपूर्णं
प्रसादात्तेरघूत्तम इत्यभ्यर्थ्याथदेवायशंखेनार्घ्यंनिवेदयेदिति अथप्रयोगः एकादश्यां नित्यंनै
मित्तिकंपूजनंचकृत्वा नरयानेनरथेन वा गीतवादित्रघोषेण देवंजलाशयेनीत्वा पुष्पांजलिंप्रदाययानादुत्तार्यस्व
हस्तेहस्तंदत्त्वातीरउपवेशयेत् ततःस्वयंधौतांघ्रिपाणिराचांतःसंकल्पंकुर्यात् ततोविष्णुमंत्रस्यछंदऋषिन्यास
पूर्वकं ध्यानंकृत्वाकेशवादिमातृकांस्वदेहेदेवेचन्यसेत् ततःसुवर्णघर्मानुवाकपुरुषसूक्तोत्तरनारायणानुवाकान्न्यसेत्
तेतुयथा सुवर्णघर्मंपरिवेदवेनं इंद्रस्यात्मानंदशधाचरंतं अंतःसमुद्रेमनसाचरन्तम् ब्रह्मान्वविंददशहोतारमर्णे
अंतःप्रविष्टःशास्ताजनानामेकःसन्बहुधाविचारःशतशुक्राणियत्रैकंभवंति सर्वेदेवायत्रैकंभवंति सर्वेहोतारोयत्रैकंभ
वंति समानसानआत्माजनानां अंतःप्रविष्टःशास्ताजनानाꣳसर्वाश्चप्रजायत्रैकंभवंति चतुर्होतारोयत्रसंपदंग
च्छंतिदेवैःसमानसीआत्माजनानां ब्रह्मेंद्रमग्निंजगतःप्रविष्टांदिवआत्मानꣳसवितारंबृहस्पतिं चतुर्होतारंप्रविशो
तेनुक्लृप्तं वाचोवीर्यंतपसान्वविंदत्अंतःप्रविष्टकर्तारमेतं त्वष्टारꣳरूपाणिविकुर्वंतंविपश्चिं अमृतस्यप्राणं यज्ञमेतं
चतुर्होतृणामात्मानंकवयोनिचिक्युः अंतःप्रविष्टंकर्तारमेतंदेवानांबंधुनिहितंगुहासु अमृतेनक्लृप्तंयज्ञमेतं चतुर्हो
तृणामात्मानंकवयोनिचिक्युः शतंनिपुनःपरिवेदविश्ववारःविश्वमिदंवृणाति इंद्रस्यात्मानिहितःपंचहोता अमृ
तंदेवानमायुःप्रजानां इंद्राꣳराजानꣳसवितारमेतं वायोरात्मानंकवयोनिचिक्युःरश्मिꣳरश्मीनांमध्येतपंतं ऋतस्य

पदेकवयोनियंति यआंडकोशंभुवनंविभर्ति अनिर्विण्णःसन्नथलोकान्विचष्टे यस्यांडकोशꣳशूष्ममाहुः प्राणमुल्वं तेनक्लृप्तोमृतेनाहमस्मि सुवर्णकोशꣳरजसापरिवृतं देवानांवसुधानींविराजं ४ अमृतस्यपूर्णांतामुकलांविचक्षते पादꣳषष्ठीतुर्नकिलाविवित्से येनतेवः पंचधोतक्लृप्ताःउतवाषड्धामनसोतक्लृप्ताः तꣳषड्ढोतारमृतुभिःकल्पमानंऋतस्यपदेकवयोनियंति अंतःप्रविष्टकर्तारमेतंअंतश्चंद्रमसिमनसाचरंतं सहैवसंतंनविजानंतिदेवा इंद्रस्यात्मानꣳशतधाचरंतं ॥ ५ ॥ इंद्रोराजाजगतोयईशे सप्तहोतासप्तधाविक्लृप्तःपरेणतंतुपरिविच्यमानःअंतरादित्येमनसाचरंतं देवानाꣳहृदयंब्रह्मान्वविंदत् ब्रह्मैतद्ब्रह्मणउज्जभार अर्कंश्चोततꣳसरिरस्यमध्ये अयस्मिन्त्सप्तपेरवःमेहंवहुलाꣳश्रियंवव्हश्वामिंद्रगोमतीं ॥ ६ अच्युतांवहुलाꣳश्रियं सहरिर्वसुवित्तमः पेरुरिंद्रायपिन्वते वव्हश्वामिंद्रगोमतीं अच्युतां वहुलाꣳश्रियम् मह्यमिंद्रोनियच्छतु शतꣳशताअस्ययुक्ताहरीणां अर्वाडातुवसुभीरश्मिरिंद्रःप्रमꣳहमाणोवहुलाꣳश्रियं रश्मिरिंद्रःसवितामेनियच्छतु ॥ ७ ॥ घृतंतेजोमधुमदिंद्रिय मध्ययमग्निर्दधातुहरिपतंगः पठरोसुपर्णोविचक्षयोनभसायएति सनइंद्रःकामवरंददातु पंचारंचक्रंपरिवर्ततेपृथु हिरण्यज्योतिःसरिरस्यमध्ये अजस्रंज्योतिर्नभसासर्पदेति सनइंद्रःकामवरंददातु सप्तयुंजंतिरथमेकचक्रं ८ एकोअश्वोवहातिसप्तनामा त्रिनाभिचक्रमजरमनर्वं येनेमाविश्वाभुवनानितस्थुः भद्रंपश्यंतउपसेदुरग्रेतपोदीक्षामृषयः सुवर्विदःततःक्षत्रंवलमोजश्चजातं तदस्मैदेवाअभिसन्नमंतु श्वेतꣳरश्मिन्भुज्यमानं अपांनेतारंभुमागलाएकरूपाःशतꣳसहस्राण्यप्रयुतानि नाव्यानांअपांयःश्वेतोरश्मिःपरिसर्वमिदंजगत् प्रजांपशून्धनानिअस्माकंददातुश्वेतोरश्मिःपरिसर्वंबभूव सुवन्मह्यंपशून्विश्वरूपान् पतंगमक्तमसुरस्यमायया १९ हृदापश्यंतिमनसामनीषिणःसमुद्रेअंतः कवयोविचक्षते मरीचीनांपदमिच्छंतिवेधसः पतंगोवाचंमनसाविभर्ति तासांधुर्वोवदद्गर्भेअंतःताद्योतमानꣳस्वर्यं

व्र०र०
आषाढ
९

मनीषां अंतरुयपदेकवयोनियंति येग्राम्याःपशवोविश्वरूपाः विरूपासंतोवहुधैकरूपाःअग्निस्ताँ्अग्रेममुक्तो
क्तुदेवःप्रजापतिःप्रजयासंविदानःवीतँ्तुकेस्तुके युवमस्मासुनियच्छतं प्रप्रयज्ञपतिंतिरयेग्राम्या पशवोवि
श्वरूपाःविरूपासंतोवहुधैकरूपाः तेषँ्सप्तानामिहरंतिरस्तु रायस्पोषायसुवीर्याय यआरण्याःपशवोविश्वरूपा
वपुस्ताँ्अग्नेप्रयुक्तादेवःप्रजयासंविदानःइडायैसप्तघृतवच्चराचरं देवाअन्वविदन् गुहाहितंयज्ञ रण्यःपशवोवि
श्वरूपाःविरूपासंतोवहुधैकरूपाःतेषाँ्सप्तानामिहरंतिरस्तु रायस्पोषायसुप्रजास्त्वायनवीर्याय ॥ १३ ॥ सह
स्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् सभूमिँ्सर्वतःस्पृत्वात्यतिष्ठद्दशांगुलम् १ पुरुषएवेदँ्सर्वंयद्भूतंयच्चभाव्यं
उतामृतत्वस्येशानो यदन्नेनातिरोहति २ एतावानस्यमहिमातोज्यायांश्चपूरुषःपादोस्यविश्वाभूतानित्रिपादस्या
मृतंदिवि ३ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनःततोविश्वङ्व्यक्रामत्साशनानशनेअभि ४ ततोवि
राड्जायतविराजोअधिपूरुषःसजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ५ यत्पुरुषेणहविषादेवायज्ञमतन्वत वसंतो
स्यासीदाज्यंग्रीष्मइध्मःशरद्धविः ६ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः देवायद्यज्ञंतन्वानाः अवध्नन्पुरुषं
पशुंतंयज्ञंवर्हिषिप्रौक्षन्पुरुषंजातमग्रतः तेनदेवाअयजंतसाध्याऋषयश्चये ८ तस्माद्यज्ञात्सर्वहुतः सम्भृतं
पृषदाज्यंपशूँस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये ९ तस्माद्यज्ञात्सर्वहुतऋचः सामानिजज्ञिरे छंदाँ्सिजज्ञिरे
तस्मात् यजुस्तस्मादजायत १० तस्मादश्वाअजायंतयेकेचोभयादतःगावोहजज्ञिरेतस्मात्तस्माज्जाताअजावय
११ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् मुखंकिमस्यकिंवाहूकिमूरूपादाउच्येते १२ व्राह्मणोस्यमुखमासीत्
वाहूराजन्यःकृतःऊरूतदस्ययद्वैश्यःपद्भ्याँ्शूद्रोअजायत १३ चंद्रमामनसोजातश्चक्षोःसूर्योअजायत ॥ मुखादिंद्र
श्चाग्निश्चप्राणाद्वायुरजायत १४ नाभ्याआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँअकः

ल्पयन् १५ वेदाहमेतंपुरुषंमहांतं आदित्यवर्णंतमसस्तुपारे सर्वाणिरूपाणिविचिंत्यधीरःनामानिकृत्वाभिद यदा
स्ते धातापुरस्ताथमुदाजहार शक्रःप्रविद्वान्प्रदिशश्चतस्रः तमेवंविद्वानमृतइहभवति नान्यःपंथाअयनायविद्यते
यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः १७ अद्भ्य
संभृतःपृथिव्यैरसाच्चविश्वकर्मणः समवर्तताग्रेतस्यत्वष्टाविदधद्रूपमेतितत्पुरुषस्याविश्वमाजानमग्रे वेदाहमे
तंपुरुषंमहांतं आदित्यवर्णंतमसःपुरस्तात् तमेवविद्वानमृतइहभवति नान्यःपंथाविद्यतेयनाय प्रजापति
श्चरतिगर्भे अतःप्रजायमानोबहुधाविजायते तस्यधीराःपरिजानंतियोनिंतंमरीचीनांपदमिच्छंतिवेधसः योदे
वेभ्यआतपतियोदेवानांपुरोहितः पूर्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये रुचंब्राह्मंजनयंतदेवाअग्रेतदब्रुवन् ॥
यस्त्वैवंब्राह्मणोविद्यात् तस्यदेवाअसन्वशे श्रीश्चतेलक्ष्मीश्चतेपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपंअश्विनौव्यात्तं
इन्निषाणमुंमइषाणसर्वलोकंमइषाण ॥ २१ ॥ पुरुषसूक्तेनसंपूज्यअतोदेवेतिमंत्रेणजलेशयनंकुर्यात् शेषपर्यं
कवर्येस्मिन्फणामाणिगणामले श्वेतद्वीपांतरेदेवकुरुनिद्रांनमोस्तुते इतिमंत्रेण तत्रापिमहापूजांकृत्वा अस्मिन्
हरेरनुग्रहमाशास्य सुप्तेत्वयिजगन्नाथेजगत्सुप्तंभवेदिदं विबुद्धेचविबुध्येतप्रसन्नोमेभवाव्ययेतिसंप्रार्थ्य श्वेतद्वीपेभो
गिनाथेयोगिनाथोस्थितेत्वयि चातुर्मास्यव्रतानुज्ञांदेहिलक्ष्मीपतेममेतिभगवत्कृपाकटाक्षदत्तांमाज्ञांलब्ध्वाशंख
हस्तोदेवस्याग्रेनियमस्वीकारंकुर्यात् तत्प्रकारस्तुहेमाद्रौभविष्ये एवंतांप्रतिमाविष्णोःपूजयित्वास्वयंनरः प्रभाषे
ताग्रतोविष्णोः कृतांजलिपुटस्तथा तत्रमंत्रः चतुरोवार्षिकान्मासान् राघवोत्थापनावधि इमंकरिष्येनियमंनि
र्विघ्नंकुरुमेच्युत इदंव्रतंमयादेवगृहीतंपुरतस्तव निर्विघ्नंसिद्धिमायातुप्रसादात्तेरमापते गृहीतेचव्रतेदेवपंचत्वंय
दिमेभवेत् तदाभवतुमेपूर्णंप्रसादात्तेरवृत्तमेति ततोदेवालयेदेवशंखेनार्घ्यंनिवेदयेत् तत्रमंत्रः शंखपात्रगतं

तोयंफलपुष्पसमान्वितं अर्घ्यंगृहाणदेवेशरमाकांतवरप्रदेति अर्घ्यदानोत्तरं भगवतःस्तुतिं कुर्यात्साचयथा यः
पृथ्वीभरवारणायदिविजैःसंप्रार्थितश्चिन्मयः संजातःपृथिवीतलेरविकुलेमायामनुष्योऽव्ययःनिश्चक्रंहतराक्षसः
पुनरगाद्ब्रह्मत्वमाद्यंस्थिरांकीर्त्तिंपापाहरांविधायजगतस्तंजानकीशंभजे १ विश्वोद्भवस्थितिलयादिषुहेतुमेकंमा
याश्रयंविगतमायमचिंत्यमूर्त्तिं आनंदसांद्रममलंनिजबोधरूपंसीतापतिंविदिततत्त्वमहंनमामि २ भजेहंसदाराम
मिंदीवराभंभवारण्यदावानलाभाभिधानं भवानीहृदाभावितानंदरूपंभवाभावहेतुंभवादिंप्रसन्नं ३ सुरानेकदुः
खौघनाशैकहेतुंनराकारदेहंनिराकारमीड्यं परेशंपरानदरूपंवरेण्यंहरिंराममीशंभजेभारतीशम् ४ प्रपन्नाश्रिता
नंददेहंप्रसन्नंप्रपन्नार्तिनाशेहुताशाभिधेयं तपोयोगयोगीशभावाभिभाव्यंकपीशादिमित्रंनजेराममित्रम् ५ सदा
भोगभाजांसुदूरेथभांतंसदायोगभाजामदूरेविभांतं चिदानंदकंदंसदाराघवेशंविदेहात्मजानंदरूपंप्रपद्ये ६ म
हायोगमायाविशेषानुयुक्तोविभासीशलीलानराकारवृत्तिः चिदानंदलीलाकथापूर्णकर्णाःसदानंदरूपाभवंतीहलोके
७ अहंमानपानाभिमत्तःप्रमत्तोनवेदाखिलेशाभिमानाभिमानः इदानींभवत्पादपद्मप्रसादात्रिलोकाधिपत्याभिमा
नोविनष्टः ८ स्फुरद्रत्नकेयूरहाराभिरामंधराभारभूतासुरानीकदावं शरच्चंद्रवक्त्रंलसत्पद्मनेत्रंदुराचारपारंभजे
राघवेशम् ९ सुराधीशनीलाश्मनीलांगकांतिंविराधादिरक्षोगणालोकशांति किरीटादिशोभंपुरारातिलाभंभजे
रामचंद्ररघूणामधीशम्१० लसच्चंद्रकोटिप्रकाशादिपीठेसमासीनमंकेसमाधायसीतां स्फुरद्धेमवर्णंतडित्पुंजभासं
भजेरामचंद्रंनिवृत्तार्तितंद्रम् ॥ ११ ॥ इत्यध्यात्मरामायणोक्तंरामचंद्रस्तोत्रम् ॥

इतिस्तुत्वाप्रजापालंराजन्नाशाम्यमंगलं शंखतीर्थंचसंप्रोक्ष्यगीतनृत्यादिनाहरिं परितोष्याथसंपूज्यवैष्णवान्ब्र
रथात्मके भगवंतंसमारोप्यगीतवादित्रघोषकैः आगत्यमंदिरेकृत्वामहानीराजनंप्रभोः विसृज्यवैष्णवान्देवमुप

वैश[illegible]त् इतिशयनोत्सवः मदनरत्नमहाभारते आषाढेचासितेपक्षेएकादश्यामुपोषितः चातुर्मास्यव्रतं कुर्याद्यात्किंचिन्नियतोनरः सनत्कुमारस्तु चातुर्मास्यव्रतारंभस्यकालांतरमप्याह एकादश्यांतुगृह्णीयादशक्तौ कर्कटस्यवा आषाढ्यांवानरोभक्त्याचातुर्मास्योदितंव्रतामिति अस्यचप्रारंभोगुर्वस्तादावपिकार्यः तथाचवृद्धगार्ग्यः नशैशवंनमौढ्यंचशुक्रगुर्वोर्नवातिथेः खंडत्वंचिंतयेद्वादौचातुर्मास्यविधौनरः तद्वाविशेषान्नियमव्रतानांप्रथमारंभविषयमपि यदपिहेमाद्रौव्रतप्रकरणे भविष्ये असंक्रांतेतथामासेदैवेपित्र्येचकर्मणि मलमासमशौचंचवर्जयेन्मतिमान्नरइति तच्छ्रावणेवर्जयेच्छाकमित्यादिनाश्रावणादिमासविशेषविहितव्रतानुवृत्त्यर्थं स्पष्टमासविशेषाख्याविहितंवर्जयेन्मलइतिवचनात् चातुर्मास्यव्रतानित्वंतरामलमासेप्यनुवर्त्ततएवेत्यपर इतिमयूखे एतद्वचनंचातुर्मास्यप्रकरणेपठितमपिअसंबद्धार्थत्वात्पूषानुमंत्रणन्यायेनात्रोत्कृष्टव्यमितिज्ञेयं प्रकरणनिवेशेपिवाप्रथमारंभविषयंज्ञेयमितिनिर्णयसिंधौ वस्तुतस्तुअधिमासनिपातेऽपिह्येषएवविधिक्रमइतिवचनेन चातुर्मास्यव्रतारंभानंतरंसमाप्तेः प्रागंतरामलमासपातेऽनुवृत्तिं विधाय तेनैतद्वचनंतत्प्रकरणेपाठितमपितद्भिन्नविषयं एकादश्यामशौचेपूर्णिमायांकर्कसंक्रांतौवारभेत् त्रितयेप्यशौचेप्रथममतोनारंभएव आरब्धेसूतकंनस्यादनारब्धेतुसूतकमितिविष्णूक्तेः द्वितीयारंभस्तुभवत्येव प्रतिवर्षंचयः कुर्यात्देवंवैसंस्मरन्हरिं देहांतेतिप्रदीप्तेनविमानेनार्कवर्चसा मोदतेविष्णुलोकेसौयावदाभूतसंप्लवमितिहेमाद्रौ भविष्यवचने नप्रतिवर्षंक्रियमाणस्यैकफलसंबंधेनैकव्रतत्वेनप्रथमारंभस्यवृत्तत्वादिति यत्त्वचनदीपिकायांस्कांदे अशुचिर्वाशुचिर्वापियदिस्त्रीयदिवापुमान् व्रतमेतन्नरःकुर्यान्मुच्यतेसर्वपातकैरिति तदारंभोत्तरंबोध्यम् ॥ चातुर्मास्यव्रतानिभविष्योत्तरीयेतिहासप्रसंगेनपर्वमेवोक्तानि अथचातुर्मास्यवर्ज्यानिभविष्ये श्रावणेवर्जयेच्छाकंदधिभाद्रपदेतथा दुग्धमाश्वयुजेमासिकार्त्तिकेचामि

व्र०र०
आषाढ
११

पंत्यजेत् द्विदलंत्यजेत्यपिपाठः प्राण्यंगचूर्णंचर्मांबुजंवीरंवीजपूरकं अयज्ञाशिष्टमन्नाद्यंयद्विष्णोरनिवेदितं दुग्धमन्नंमसूरंचमांसमष्टविधमतं रुद्ध्यंतत्तद्देशलभ्यंफलमूलादिवर्जयेत् ॥ पाद्मेकार्तिकमाहात्म्ये द्विजक्रीतारसाः सर्वेलवणंभूमिजंतथा ताम्रपात्रस्थितंगव्यंजलंपल्वलसंस्थितं आत्मार्थंपाचितंचान्नमशितंतत्स्मृतंबुधैः जंवीरंराजमाषांश्चमूलकंगृंजनंतथा कूष्मांडंचेक्षुदंडंचचातुर्मास्येत्यजेद्बुधः तथा विशेषाद्बदरींधात्रींकूष्मांडंतिंतिणींत्यजेत् जीर्णधात्रीफलंग्राह्यंकथंचित्कायशोधनमिति तथा निष्पावान्राजमाषांश्चमसूरान्संचितानिच वृंताकंचकलिंगंचसुप्तेदेवेनभक्षयेत् स्कांदे चत्वार्येतानिनित्यानिचतुराश्रमवर्त्तिनां प्रथमेमासिकर्तव्यं नित्यंशाकव्रतंनरैः द्वितीयेमासिकर्तव्यंदधिव्रतमनुत्तमं पयोव्रतंतृतीयेतुचतुर्थेपिनिशामय द्विदलंबहुवीजंच वृंताकंचैववर्जयेत् नित्यान्येतानिविप्रेंद्रव्रतान्याहुर्मनीषिणः स्कांदे वार्षिकांश्चतुरोमासान्प्रसुप्तेवैजनार्दने मंचखट्वादिशयनंवर्जयेद्भक्तिमान्नरः अनृतौवर्जयेद्भार्यांमांसंमधुपरौदनं पटोलंमूलकंचैववृंताकंचनभक्षयेत् शाकशब्दश्चदशधारूढः मूलपत्रकरीराग्रफलकांडाधिरूढकाः त्वक्पुष्पकवकंचैवशाकंदशविधंस्मृतमित्युक्तेः अधिरूढंअंकुरः स्मृतिकौस्तुभे मूलपत्रेत्यभियुक्तोक्तेःशाकशब्दस्यव्यंजनतयाप्रसिद्धेष्वेव फलमूलादिषूपसंहारः लोकव्यवहारादितियत्तुतत्तत्कालोद्भवाःशाकावर्जनीयाःप्रयत्नतः बहुवीजमवीजंचविकारिंचविवर्जयेदितिभविष्यवचनंतत्प्रयत्नात् इतिविशेषग्रहणात् एतेषांशाकानांदोषाधिक्यज्ञापनार्थं बहुवीजमितिचद्व्याधिकवीजवत्फलमित्यर्थः अवीजंविकारीतिपदद्वयेनकालादिविकृतंविकारवशेनविनष्टजंफलमुच्यते चकारद्वयमेकस्मिन्धर्म्मिणिविशेषद्वयसूचनार्थं आचारप्रदीपे वृंताकंचकलिंगंचबिल्वोदुंबरभिस्सटाः उदरेयस्यजीर्यंतितस्यदूरतरोहरिः भिस्सटादग्धान्नं भीस्सटेदीर्घपाठतर्भाःसदाश्लेष्मांतकमितिधन्वंतरिनिघंटुः यत्तुनृसिंहपरिचर्यायांवृंताकंसदावैष्णवैर्वर्ज्यं येभक्षयंतिवं

ताकंतेपांडूरतरोहारिरित्यादिनिंदाश्रवणादिति   तत्श्वेतवृंताकपरंतथाचपराशरःपलांडुश्वेतवृंताकंकुसुंभंवनकंटकंनालिकाचालपुष्पचभुक्तादिनमभोजनं   अत्रापिपलांडुमितिश्वेतपलांडावेवोपसंह्रियतइतिमाधवः   देहलीदीपकन्यायेनतत्रैवयुक्तमितितदाशयः   एतान्यातुरस्यभिषक्क्रियायामप्रतिषिद्धानीतिसुमंतुः तथाचतुर्ष्वपिहिमासेषुहविष्याशीनपापभागिति   हविष्याणिचपरिभाषायांद्रष्टव्यानि महाभारतेदानधर्मेषु कंचिद्धर्मंप्रवक्ष्यामिमानुषाणांसुखावहमिति   प्रकृत्य   चतुरोवार्षिकान्मासान्योददातितिलोदकं भोजनंचयथाशक्तिब्राह्मणेवेदपारगे अग्निकार्यंचकर्त्तव्यंपरमान्नेनभोजनं   दीपकश्चापिकर्त्तव्यःपितृणांसतिलोदकः   एतेनविधिनामर्त्यः   श्रद्दधानःसमाहितः   पशुबंधशतस्येहफलंप्राप्नोतिपुष्कलमिति   अत्र   क्रमेण   पैतृकाण्येव   तर्पणश्राद्धदीपदानानिविधीयंते   अग्निकार्यमग्नौकरणं   परमान्नेनेत्यस्यमध्यमणिन्यायेनान्वयः   अन्येचचातुर्मास्यनियमाभविष्योत्तरोक्तेतिहासेद्रष्टव्याः ॥   * अथचातुर्मास्यव्रतसमाप्तौविशेषउच्यते चातुर्मास्येतुयत्त्यक्तंभक्ष्यभोज्यादिकंचयत्   चतुरोवार्षिकान्मासान्नियमोयस्ययःकृतः   कथयित्वाद्विजेभ्यस्तद्दद्याद्भक्त्यासदक्षिणम्   दत्त्वाविसर्जयेद्विप्रान्ततोभुंजीतचस्वयमिति   अथतत्तद्वस्तुत्यागव्रतसमाप्तौदेयद्रव्याणि   काशीखंडे   पत्रभोजीभवेदूर्जेकांस्यंत्याज्यंप्रयत्नतः   कांस्यस्यनियमेदद्यात्कांस्यंसर्पिःप्रपूरितं   ऊर्ज्जेनभक्षयेत्क्षौद्रमतिक्षुद्रगतिप्रदम्   मधुत्यागेघृतंदद्यात्पायसंचसशर्करं   अभ्यंगेभ्यवहारेचतैलमूर्जेविवर्जयेत्   तैलत्यागेतिलान्दद्यात्   द्रोणमात्रान्सकांचनान्वाहुलेकांस्यभोजीयः   सक्तुभिःपूयशोणिते   मांसाशिनोपियेभूनास्त्यजेयुस्तेपिकार्त्तिके   नियमेमत्स्यमांसानांदद्याद्वैकार्त्तिकेव्रतीकूष्मांडानिसमाषानिविंशस्वर्णयुतान्यपि   विंशदितिकूष्मांडविशेषणं   कार्तिकेमौनभोजीयःसोश्नात्यमृतमेवहि   संघटांसवलांमौनी   सहिरण्यांप्रदापयेत्   कार्तिकेलवणंत्यक्तंयेनव्रतभृता

सदा त्यक्ताःसर्वैरसास्तेनतत्त्यागेगाँप्रदापयेत् भूशय्यांकार्तिकेकुर्वन्नमंचंसंस्पृशेद्व्रती पर्य्यंकंभूशयोदद्यात्सतूलंसोपधानकम् फलत्यागेफलंदेयंरसत्यागेचतद्रसम् धान्यत्यागेचतद्धान्यमथवाशालयःस्मृताःधेनूर्दद्यात्प्रयत्नेननसालङ्काराःसकाञ्चनीःएकतः सर्वदानानिदीपदानंतथैकतः कार्तिकेदीपदानस्यकलांनार्हंतिषोडशीं तथा दीपंयःकार्तिकेदद्यादखंडंघृतवर्तिकं मोहांधतमसंप्राप्यनसगच्छतिदुर्गतिमिति ॥ चातुर्मास्यव्रतासंभवेकिंचिद्व्रतमवश्यंकार्य्यं चतुर्ष्वपिचमासेषुनसामर्थ्यंव्रतेयदि तदोर्ज्जव्रतिनाभाव्यमप्यर्धफलमिच्छता अव्रतःकार्तिकोयेषांगतोमूढधियामिह तेषांपुण्यस्यलेशोपिनभवेत्सूकरात्मनामितिकाशीखंडात् अत्रैवदेवाग्रेस्वस्तिकादिकमपिकर्त्तव्यमितिपाद्मे इदंचकार्तिकशुक्लद्वादश्यांवक्तव्यमपिप्रसंगादत्रलिखितं तथा भार्गवार्चनदीपिकायांपाद्मे शयनीबोधिनीमध्येशमीदूर्वापमार्गकैः भृंगराजेनदेवांस्तुनार्चयेतिकदाचनेतिहेमाद्रौपाद्मे आषाढादिचतुर्मासानभ्यंगंवर्जयेन्नरः समाप्तौचपुनर्दद्यात्तिलतैलघृतंघटम् आषाढादिचतुर्मासंवर्जयेन्नखकृंतनं वृंताकंगृंजनंचैवमधुसर्पिर्घटान्वितं कार्तिक्यांतुपुनर्हेमब्राह्मणायनिवेदयेत् अन्यान्यपिवर्जनसंकल्परूपाणिअन्येभ्योग्रंथेभ्योज्ञेयानि ।॥ •

आषाढशुक्लद्वादश्यांतप्तमुद्राधारणमुक्तंरामार्चनचंद्रिकायां।शौनकेन तप्तमुद्रांकधारणंकर्तव्यंवैष्णवैरेतत्संप्रदायानुरोधतः शयन्यांचैवबोधिन्यांचक्रतीर्थेतथैवच शंखचक्रविधानेनवह्निपूतोभवेन्नरइति तथा पवित्रंतेविततंब्रह्मणस्पतेप्रभुगात्राणिपर्येषिविश्वतः अतप्ततनुर्नतदोमोअश्नुतेशृतासइद्वहंतस्तत्समासत ॥ तपोष्पवित्रंविततंदिवस्पदेशोचंतोअस्यतंतवाव्यवास्थिरन् इतिऋग्वेदे सहोवाचयाज्ञवल्क्यस्तत्पुमानात्महितायप्रेम्णाहरिंभजेत् सुश्लोकमौलेर्वर्माण्याग्निनासंध्वनइतिशातपथिकश्रुतौ एतेद्विष्णोअब्जचक्रेसुतप्तेजन्मांभोधिंतर्त्तवेचर्षणींद्राः मूलेबाह्वोर्दधतेन्येपुराणालिंगान्यंगेतावकान्यर्पयंति इतिसामवेदे उरुक्रमस्यचिन्हैरंकितालोकेसुभगाभवामइत्यथर्ववेदे

अग्निहोत्रंयथानित्यंवेदस्याध्ययनंयथा ब्राह्मणस्यतथानित्यंतप्तचक्रांकधारणम् इतिपाद्मे एतत्प्रकारस्तुरामर्चनचंद्रिकातोज्ञेयः पृथ्वीचंद्रोदयादिग्रंथेषुतु यस्तुसंतप्तशंखादिलिंगाचिह्नतनुर्नरःससर्वयातनाभोगीचंडालोजन्मकोटिषु द्विजंतुतप्तशंखादिलिंगांकिततनुंनराः संभाष्यरौरवंयांतियावदिंद्राश्चतुर्दशेतिबृहन्नारदीयोक्तेः शंखचक्राद्यंकनंचगीतनृत्यादिकंतथा एकजातेरयंधर्मोनजातुस्याद्द्विजन्मनः शंखचक्रेमृदायस्तुकुर्य्यात्तप्तायसेनवा सशूद्रवद्बहिःकार्य्यःसर्वस्माद्द्विजकर्मणः यथाश्मशानजंकाष्ठमनर्हंसर्वकर्मसु तथाचक्रांकितोविप्रःसर्वकर्म्मसुगर्हितःतथा शिवकेशवयोरंकाञ्छूलचक्रादिकान्द्विजः नधारयेतमतिमान्वैदिकेवर्त्मनिस्थितइति विश्वाश्वलायनादिवचनात् ऋग्वेदादिश्रुतीनांतुधर्म्मादिस्तुतिपरत्वात् अन्यश्रुतीनांच तथाविधानामनुपलंभादुदाहृतपाद्मवचनस्यचाकरग्रंथेष्वनुपलंभाच्चक्रादिधारणं शूद्रविषयमेवेत्युक्तं यद्यपिनिषेधस्य प्रतिसापेक्षत्वा द्विधिंविनाचतदयोगादुपजीव्यविरोधेनएकजातेरयंधर्मइत्यनेनसामान्यवाक्यानामुपसंहाराद्द्विजातिनिषेधोनित्यानुवादइति तदाशयइतिनिर्णयसिंधौ यद्यपिविश्वाश्वलायनादिवचनेषुमृदापिशंखचक्रादिधारणनिषेधःप्रतीयते तथापि शंखचक्रांकितोविप्रःश्मशानेम्रियतेपिचेत् प्रयागेयागतिःप्रोक्तासागतिस्तस्यनारदेति विष्णवायुधांकितंचिन्हंगोपीचंदनमृत्स्नया प्रयागादिषुतीर्थेषुसगत्वाकिंकरिष्यतीत्यादिवाराहपुराणवचनैर्मृदाकर्तव्यतावगमेनविहितप्रतिषिद्धत्वाद्विकल्पोऽवसीयतइत्यलमनयाप्रसक्ताचिंतया यतःपंचरात्रागमेमुद्राधारणस्याधिकारिविशेषमपुरस्कृत्यविहितत्वान्मुद्राधारणंसर्वपुरुषधर्म्मइतिकेचिदाहुः ॥ तथाहिपंचरात्रागमे तद्धारणविधिंवक्ष्येमहापातकनाशनं शंखचक्रंसमाराध्यगंधपुष्पादिभिःशुभैः इत्युपक्रम्याग्निनैवसुसंयुक्तंचक्रमादायमामकं दक्षिणंबाहुमूलंस्वंदहेद्विनतसाधकः उच्चारयन्निमंमंत्रंभूदेशेमांविचिंतयन् सुदर्शनमहाज्वालकोटिसूर्य्यसमप्रभ अज्ञानांधस्यमेनित्यंविष्णोर्मार्गंप्रदर्शय इमंमंत्रं

अ०१०
आषाढ
१३

समुच्चार्य्यदक्षिणंवाहुमंकयेत् पांचजन्यनिजध्यानध्वस्तपातकसंचय पाहिमांपापिनंघोरंसंसारार्णवतारण इति मंत्रंसमुच्चार्यदहेत्सव्यभुजंतथेति उक्तएवसनत्कुमारसंहितादिष्वपिसाधारण्येनचक्रादिधारणविधायकानिवचनानि निद्रष्टव्यानि एवंस्मृतिपुराणादिवचनान्यपिचक्रादिधारणविधायकान्युपलभ्यंते वामनपुराणे लीलयापिलिखेद्यस्तुवाहुमूलेसुदर्शनम् कुलकोटिंसमुद्धृत्यसगच्छेद्वैष्णवंपदमितिकूर्मपुराणे चक्रांकितधराःकेचित्कुलेविष्णुपरिग्रहाइति महाभारतेभीष्मपर्वणि ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चकृतलक्षणैः अर्चनीयश्चसेव्यश्चनित्ययुक्तैःस्वकर्मस्विति चिह्नंलक्ष्मचलक्षणमित्यभिधानकोशादत्रलक्षणशब्देनतत्तच्चक्रादिचिह्नमेवविवक्षितं यज्ञोपवीतादीनांसर्वसाधारणत्वाभावात् विष्णुधर्मेयमकिंकरसंवादे भवतांभ्रमतामत्रविष्णुसंश्रयमुद्रया आक्रांतोगोचरोनैवभविष्यति नरःक्वचित् इतिहाससमुच्चये पुंडरीकाख्यानेकेचिच्चक्रांकितास्तत्रप्राणिनोविचरंतिहि विचरंतियथायोगंपुण्यतीर्थेप्रशंसिनइति तप्तसिद्धंचक्रादिधारणंसर्वपुरुषधर्मइति अन्येतुपंचरात्रागमविहितंसुदर्शनादिधारणंशूद्रादीनांत्रैवर्णिकानांचधर्मः तंत्रमार्गश्चवैदिकमार्गान्मार्गांतरएव वैदिकंतुपुरस्कृत्वायश्चतंत्रंसमाचरेदितिवचनेनवैदिकतांत्रिककर्मणांक्रमविधायकेनवैदिककर्मानुष्ठानानंतरंतांत्रिकसीमंतोन्नयनादिषोडशकर्मणांविलक्षणरीत्याविहितत्वात् एवंचतांत्रिकोपनयनादिसंस्कृतस्यैवगुरुलघुकल्पाश्रयणेनतांत्रिकपूजनमुच्चावचफलार्थतयाविधीयतेसंस्कारैर्वैष्णवैःशुद्धः पूजार्होभवतिध्रुवमितिपांचरात्रवचनेनतांत्रिकपूजाधिकारिसंस्कारकत्वेनतेषांविधानात् अत्रच प्रकरणबलात् पूजाशब्देनतांत्रिकपूजैवगृह्यते तांत्रिकमार्गस्यचवैदिककर्म्मानुष्ठानेनसहननित्यवदनुष्ठानानियमः वैदिकानांतांत्रिककर्म्माननुष्ठानेप्रत्यवायेशोधकवचनाभावात् किंतुतंत्रमार्गेणश्रेयःप्राप्तुमिच्छतःस्वेच्छयातंत्रमार्गप्रवेशः एवंचैतादृशतंत्रमार्गप्रविष्टानां प्रत्येकशंखचक्राद्यंकनंशिखायज्ञोपवीतादिधारणवत्तांत्रिककर्म्मकर्तृसंस्काररूपतयाविधीयते ननु

स्वतंत्रफलसाधनपापफलवत्तांत्रिकपूजाविधिसान्निधिपठितस्यप्रधानकर्म्मत्वायोगेनांगत्वस्यैवौचित्यात्   फलवत्सन्निधावफलंतदंगमितिन्यायात् अतएवपांचरात्रोदिव्यासिद्धांतप्रतिपादितं तत्तत्तंत्रप्रवेशाद्यंतत्तत्तंत्रोक्तवर्त्मना दीक्षाचिह्नादिकंकार्य्यंवैष्णवानांयथाविधिः   यथाकृष्यादिसंस्कारात्क्षेत्रेसस्यफलोदयः   तथातापादिसंस्कारात्पुरुषस्यफलोदयः   भगवच्चिन्हसंतप्तोभगवच्छास्त्रचोदिते   धर्म्मेयदिनवर्त्तेतघातयेत्तंमहीपतिरिति   सनत्कुमारसंहितायामपि तंत्रसंस्कारयुक्तस्तुतंत्रमार्गमनाश्रयन् केवलंवैदिकंमार्गंसेव्यमानःपतत्यधःउपवीतादिवद्धार्याः शंखचक्रगदाध्वजाःतंत्रमार्गप्रवृत्तस्यवैष्णवस्ययथाविधि   अप्रसन्नप्रवृत्तानांचिन्हमत्रध्वजोयथा   तंत्रमार्गप्रवृत्तानांतथाचक्रादिधारणंचक्रादिधारणंपुंसांहरिसंवंधवेदनं यातिब्रह्मनिमित्तंहिकलयाहिविभूषणमिति एवंच सुदर्शनंधारयित्वावन्हितप्तंद्विजोत्तमःउपनीयविधानेनपश्चात्कर्म्मसुयोजयेदितिवचनेनसुदर्शनादिधारणस्यतांत्रिकोपनयनांगत्वेनप्रदीयते   उपवीतादिवद्धार्य्या   इतिसनत्कुमारवचनेनैवकुर्य्यात्   उपवीतीशिखीविप्रश्चक्रलांछनसंयुतः चक्रलांछनहीनस्यविप्रस्यविफलाक्रियेति   यमवचनेनापि   लांछनहीनस्य   तांत्रिकक्रियावैकल्यमेवप्रतिपाद्यते पूर्वोक्तप्रमाणैश्चक्रादिलांछनस्यतांत्रिकक्रियायामेवांगत्वावगमात्   चक्रांकितायदत्तानिहव्यकव्यानियानिवै   रक्षांसितानिगच्छंतिनपितॄन्नचदेवताइत्यादिवचनैःकेवलवैदिकानामुक्ताचारस्यनिषेधाच्च   अथपूर्वोक्तरीत्यातप्तमुद्राधारणस्यतांत्रिकविषयत्वमस्तुगोपीचंदनादिकृतसुदर्शनस्यसर्वस्वरूपसाधारणंस्यात्   गोपीचंदनतोनित्यंलांछितंयस्यविग्रहम्   शंखचक्रगदापद्मैर्देहेतस्यसदाहरिः   कृष्णायुधांकनंपुण्यंगोपीचंदनमृत्स्नया   प्रयागादिषुतीर्थेषुसगत्वाकिंकरिष्यति   ललाटेतुगदाधार्य्यामूर्ध्निपाशदरौतथा   भ्रूमध्येनंदकंचैवशंखचक्रौभुजद्वये   इत्यादिपद्मपुराणवचनेषुपुरुषविशेषाश्रवणादितिचेन्न   अनारभ्याधीतस्याग्निष्टोमेप्रवृणक्तीत्यादिवाक्यादग्निष्टोमार्थत्ववदुत्पत्तिवा

व्र० र०
अषाढ०
१४

क्यसंनिधावश्रूयमाणयजमानसंवंधस्यापि गोपीचंदनादिकृतचक्रादिधारणस्य गोपीचंदनमृत्तोयैः शंखचक्रादिलांछितःस्वगृहेपूजयेद्देवंपांचरात्रविधानतइतिवाक्यात्तांत्रिकपूजांगत्वावगमादित्याहुः परेतु वैष्णवसंस्काराः सर्वेपिविष्णवालयपूजार्थाएव ननुगृहेविष्ण्वाराधनार्थाः श्रीशास्त्रेसंकर्षणाद्युत्सवांतानामालयपूजाप्रकाराणामेववहुशः प्रपंचमानतयाआलयपूजायाएवप्रकरणत्वौचित्यात् गृहाराधनस्यक्वाचित्कविधानप्रकरणीयत्वायोगात् तथाचसुदर्शनधारणमालयपूजकदेवलकादिविषयमेवेत्याहुः वस्तुतस्तु पांचरात्राद्यागमांतर्गतानांद्विजात्यादिपदघटितवचनानांपांचरात्राद्यागमोक्तदीक्षासंस्कृतद्विजातिविषयत्वेन प्रामाण्यंव्यवस्थापितं द्विजात्यादिपदघटितस्यनिषेधशास्त्रस्यापितद्विषयत्वमेवयुक्तं तथाचाविहितप्रतिषिद्धत्वाद्ग्रहणं ग्रहणत्यागावाज्यभागवद्विकल्पोमुद्राधारणस्यवैदिकतांत्रिकदीक्षासंस्कृतानां नचशुद्धवैदिकानामेवभ्रांत्यादिप्रसक्तचक्रादिधारणंनिषिध्यत इतिवाच्यं वहूनांनिषेधवाक्यानांविधायकत्वेसंभवति नांतरिक्षेनादिवेत्यादिवदनुवादकत्वानौचित्यात् नचाष्टदोषदुष्टविकल्पापत्तिःअप्रामाण्यायपर्यायानुवादकत्वापेक्षयाफलमुखत्वेनविकल्पस्यस्वीकर्तुमुचितत्वात् निषेधवाक्यानिवहूनिपुराणादिषूपलभ्यंते स्वशरीरेऽन्यदेहेवाअंककरणाद्द्विजइति इदंहिमनुवचनंनब्रह्मविष्णुरुद्राणांचिन्हमेकस्यधारयेदितिवचनानुरोधेनद्विजशब्दप्रतिपाद्यानांब्राह्मणक्षत्रियवैश्यानां ब्रह्मविष्णुरुद्रचिन्हांकनरूपनिषेधपरंशातातपस्मृतौनांकयेन्नदेहेद्वात्रंदेवतायुधलांछनैःअंकयेद्यदिवामोहात्पतत्येवनसंशयइतियमस्मृतौनांकयेन्नदहेद्वात्रंदेवतायुधलांछनैःदहनाल्लेखनाद्विप्रःपातित्यंयातितत्क्षणात् इतिवौधायनस्मृतौनांकनायदहेदेहंदहेच्चेत्कामकारतःनाधिकुर्वंतिदग्धांगान्श्रौतस्मार्तेषुकर्मस्विति अन्यत्रापि ततश्चक्रधराश्चैवपंचायुधधराअपि पाखंडाःसर्वएवैते सर्वकर्मवहिष्कृताइतिस्मृतिसारसंग्रहे चैडालंपतितंव्यंगंतप्तचक्रधरंद्विजं सूतिकामग्निदंदृष्ट्वासवासाजलमाविशेदि

तिर्यग्यांतरे कुक्कुटश्चवराहश्चतत्रचक्रधरस्तथा। रजस्वलाचषंडश्चपंचैतेश्राद्धदूषकाः चक्रांकितायदत्तानिहव्यक
व्यानियानिवै रक्षांसितानिगच्छंतिनपितृन्नचदेवताः पाखंडिनश्चपतितायेचचक्रांकिताद्विजाः पुण्यकर्म्मणितेषां
वैसन्निधिर्नेष्यतेक्वचित् तप्तचक्रांकितंविप्रंनपश्येत्पुण्यकर्म्मणि तद्दृष्ट्वाचद्विजोभूमावशुद्धिंसहसाप्नुयात् अज्ञाना
दथवालोभादंकितोवासुदर्शनम् धत्तेकुलघ्नंतंदृष्ट्वासवासाजलमाविशेत् भुजाग्रेसलिलेनैवविलिखेद्यःसुदर्श
नम् वेदशास्त्रविनीतोपिदहत्यासप्तमंकुलमिति चक्रांकिततनुर्वापिराजन्लिंगांकितोपिवा। नाधिकारीसविज्ञेयःश्रौ
तस्मार्त्तेषुकर्म्मसु शंखचक्रंचलिंगंचयोमूढोधारयत्यसौ पाखंडःसहिविज्ञेयः सर्वकर्म्मवहिष्कृतः पाखंडिनंपा
शुपतंविकर्म्मस्थंनिरीश्वरम् विवासयेत्स्वराष्ट्रात्तुसर्वानेतानवैदिकानिति ताम्ररौप्यसुवर्णादिकृतचक्रादिलांछनम्
विधीयतेहिशूद्राणांनद्विजानांकथंचनेति नारदवचनं आदित्यपुराणे वेदेषुयज्ञभागेषुयस्यनास्त्यधिकारिता स
तापयित्वाचक्रादिधारयेत्स्वभुजद्वयमिति शंखचक्राद्यंकनंचनृत्यगीतादिकंतथा एकजातेरयंधर्म्मोनजातुस्याद्
द्विजन्मनः यथाश्मशानजंकाष्ठमनर्हंसर्वकर्म्मसु तथाचक्रांकितोविप्रः सर्वकर्म्मसुगर्हितः शंखचक्रंमृदाय
स्तुकुर्य्यात्तप्तायसेनवा सशूद्रवद्बहिःकार्य्यःसर्वस्माद्द्विजकर्म्मणइति किंच लीलयापिलिखेद्यस्तुबाहुमूलेसु
दर्शनम् कुलकोटिंसमुद्धृत्यसगच्छेद्वैष्णवंपदमित्यादिमानवादिवचनैः स्वतंत्रफलार्थत्वविहितस्य सुदर्शनधारण
स्यपांचरात्राद्यागमविहितदीक्षाकर्त्तृसंस्कारकत्वेप्रमाणाभावः नचप्रकरणात्तदवगमः प्रकरणापेक्षयावलीयसा
वान्येनफलार्थतयाविनियुक्तस्यदुर्बलेनप्रकरणेनविनियोगासंभवात् किंचात्रप्रकरणमेवनसंभवति परस्पराकां
क्षालक्षणंहिप्रकरणं नचफलार्थत्वेनाविनियुक्तस्यमुशलधारणस्यस्वोपकार्याकांक्षास्ति नचचक्रलांछनस्यविफली
क्रियते पूर्वोक्तवचनेनतांत्रिकजांगत्वेप्यस्त्वितिवाच्यं अतःक्रियाशब्देनफलसाधनपंचरात्राद्यागमविहितहोम दि

क्रियाया अभिधानेन पूजादेः क्रियाशब्देनाभिधेयत्वेनतदंगत्वेप्रमाणाभावात् नचवैष्णवत्वस्यासिद्ध्यर्थमित्यादिवचनैर्दीक्षांगत्वावगमः तत्रवैष्णवत्वस्यासिद्ध्यर्थसंभवेनवैष्णवत्वस्यविष्णुभक्तेर्व्यंजकत्वस्यैवप्रतीतेः नचोपनीतादिवद्धार्याः शंखचक्रगदादयः तंत्रमार्गप्रवृत्तस्यवैष्णवस्ययथाविधीतिवचनेन तांत्रिककर्मांगत्वावगमः तद्वचनस्य शंखचक्रादिधारणे तंत्रमार्गप्रवृत्तवैष्णवरूपकर्तृविधायकत्वात् शुद्धतांत्रिकविषयत्वेन मिश्रमार्गप्रवृत्तवैष्णवविषयत्वाभावाच्च एवंचसुदर्शनंधारयित्वावन्हितप्तंद्विजोत्तमः उपनीयविधानेनपश्चात्कर्मसुयोजयेदितिवचने त्वाप्रत्ययः कालमात्रविधायकः नत्वंगत्वबोधकोपिदर्शपौर्णमासाभ्यामिष्ट्वासोमेनयजेतेतिवत् वस्तुतस्तुचक्रांकिततनुर्वापिराजन्लिंगांकितोपिवा नाधिकारीपरिज्ञेयः श्रौतस्मार्त्तेषुकर्मस्विति वृद्धाह्निकवचने चक्रांकिततनोः श्रौतस्मार्त्तकर्मस्वधिकारनिषेधःप्रतीयते चक्रांकिततनुश्चतंत्रदीक्षासंस्कृतएव तस्यच वैदिकंतुपुरस्कृत्वापश्चात्तंत्रंसमाचरेदितिवचनेनवैदिकधर्माधिकारप्रतीतेर्मिश्रमार्गप्रवृत्तानांस्फुटंविकल्पसिद्धानिनचकेवलतंत्रमार्गप्रवृत्तानामपिविकल्पःस्यादितिवाच्यं वैदिकाधिकारिणामेवनिषेधविधिविषयत्वेन तत्रैवविकल्पौचित्यात् वैदिककर्माधिकारशून्यानामेवकेवलंतंत्रमार्गाधिकारात् एवंताम्ररौप्यसुवर्णादिकृतंचक्रादिलांछनं विधीयतेहिशूद्राणांनद्विजानांकथंचनेत्यादित्यपुराणवचने कथमपीति कथंचनेतिपदेनघटितेतांत्रिकदीक्षासंस्कृतत्वेपिचक्रादिधारणनिषेधापत्तेः तस्मात्केवलवैदिकैःशंखचक्रादिधारणंनकार्यं प्रापकप्रमाणाभावात् मिश्रमार्गप्रवृत्तैः पूर्वोक्तदिशादिविकल्पेनानुष्ठेयं केवलतंत्रमार्गप्रवृत्तस्तुनियमेनानुष्ठेयमितिसमाप्ताप्रकृतानुकृतिपरंपरयेत्यलंव्यवस्था अथमत्स्यपुराणोक्तंविभूतिद्वादशीव्रतं नंदिकेश्वरउवाच शृणुनारदवक्ष्यामिविष्णोर्व्रतमनुत्तमं विभूतिद्वादशीनामसर्वामरविभूषिता कार्तिकेत्वथवैशाखेमार्गशीर्षेतुफाल्गुणे आषाढेवैदशम्यां

तुशुक्लायांलघुभुङ्नरः कृत्वासायंतनींसंध्यांगृण्हीयान्नियमंबुधः एकादश्यांनिराहारःसमभ्यर्च्यजनार्दनं द्वादश्यांद्विजसंयुक्तःकरिष्येभोजनंततः तदविघ्नेनमेयातुसाफल्यंमधुसूदन ततःप्रभातेवोत्थायकृतस्नानजपःशुचिपूजयेत्पुंडरीकाक्षंशुभमाल्यानुलेपनैः विभूतिदेनमःपादौविशोकायेतिजानुनी नमःशिवायेत्यूरूचकटिवैविश्वरूपिणे कंदर्पायनमोमेढ्रमादित्यायनमःकरौ दामोदरायेत्युदरंवासुदेवायचस्तनौमाधवायेत्युरोविष्णोःकंठमुत्कंठिनेनमः श्रीधरायमुखंकेशान्केशवायेतिनारद पृष्ठंशार्ङ्गधरायेतिश्रवणौवरदपाणये शिरःसर्वात्मनेब्रह्मन्नमइत्यभिपूजयेत् मत्स्यमुत्पलसंयुक्तंहैमंकृत्वातुशक्तितः उदकुंभसमायुक्तंह्यग्रतःस्थापयेद्विभोः गुडपात्रंतिलैर्युक्तंसितवस्त्राभिवेष्टितं रात्रौजागरणंकुर्यादितिहासकथादिकं प्रभातायांतुशर्वर्य्यांब्राह्मणायकुटुंबिने सकांचनोत्पलंदेवंसोदकुंभंनिवेदयेत् यथानमुच्यतेविष्णुःसदासर्वविभूतिभिः तथामामुद्धराशेषदुःखसंसारकर्दमात् दशावताररूपाणिप्रतिमासंक्रमान्मुने दत्तात्रेयंतथाव्यासंमुन्यन्नेनसमन्वितं प्रतिमासंतुकर्त्तव्यामूर्तयःकांचनेनवै कांचनस्यैवपद्मस्यसंस्थाप्योपरिपूजयेत् पुष्पधूपादिनैवेद्यैर्भक्ष्यभोज्यैःसदीपकैः वस्त्रैराभरणैश्चैवयथाविभवसारतः रात्रौजागरणंकुर्याद्गीतनृत्यादिभिर्नरः ततःप्रभातेविमलेकृतस्नानादिकाक्रियः उपदेष्टेतुदातव्यंसर्वमेतत्समाहृतंप्रतिमासंपुराणज्ञेवेदवेदांगपारगे ततःसंवत्सरांतेचविश्वेशंशक्तिपूर्वकं शक्तिपूर्वकमिति सविभूतिपुरःसरंकृत्वासंपूज्यलवणपर्वतेनसमान्वितं लवणपर्वतदानविधिस्तुदानखंडेऽचेषणीयः शय्यांसोपस्करांश्रेष्ठांगांचैवोपस्करान्वितां ग्रामंदेशपतिर्दद्यात् क्षेत्रंग्रामपतिस्तथा निवर्तनंक्षेत्रपतिर्भवनंत्वसमृद्धिमत् एवंविभवसारेणपूजयित्वेदृशंगुरुं अन्यानपियथाशक्त्या तर्पयित्वाद्विजोत्तमान् वस्त्रान्नगोहिरण्यादिसत्वमास्थायचोत्तमं यत्रसत्वंतत्रहरिस्तोषमाप्नोत्यसंशयं यश्चातिनिःस्वःपुरुषोभक्तिमान्माधवंप्रति पुष्पार्चनविधानेनसत्कुर्य्याद्वत्सरत्रयं अनेनविधिनायस्तुविभूतिद्वादशीव्रतंकुर्यात्स

पापनिर्मुक्तःपितॄणांतारयेच्छतं सप्तजन्मन्यसौमर्त्योविभूतिंप्राप्नुयात्परां रोगदौर्गत्यपापानांभाजनंनोपजायते भक्तिश्चयज्ञपुरुषेतस्यजन्मनिजन्मनि प्राप्नुयादच्युतंस्थानमच्युतस्यप्रसादतः इयंचाखंडितंकार्याविभूतिद्वादशीनरैःसर्वपापप्रशमनीसर्वफलप्रदायिनी इतिकलुषविदारणंजनानांपठतिसदाथशृणोतिवात्तिभक्त्यामातिमपिचददाति देवलोकेवसतिचिरंचसपूज्यतेऽमरौघैः इतिमत्स्यपुराणोक्तंविभूतिद्वादशीव्रतं ॥ ❋ अथस्कंदपुराणोक्तंदेवशयन्येकादशीव्रतं तथाचपद्मपुराणे युधिष्ठिरउवाचआषाढस्यसितेपक्षेकिंनामैकादशीभवेत् कोविधिःकेनवाचीर्णा किंपुण्यंचवदस्वमे श्रीकृष्णउवाच कथयामिकथांपुण्यांस्वर्गमोक्षप्रदायिनीं कामिकानामनाम्नेतिसर्वपापहरापरा यस्याःश्रवणमात्रेणवाजपेयफलंभवेत् सत्यंसत्यंमयाप्रोक्तंनातःपरतरंनृणां पापिनांपापनाशायतृणदावानलोपमा अतःपरंनरश्रेष्ठनैवमोक्षप्रदायिनी यस्मात्तत्कारणाद्राजन्श्रूयतांगतिरुत्तमा वैष्णवैर्ममभक्तैश्चसततंश्रुतिपोषकैः आषाढेवामनोयैस्तुपूजितस्तैर्जगत्त्रयं वामनःपूजितोयेनकमलैःकमलेक्षणः तेनार्चितंजगत्सर्वंत्रयोदेवाःसनातनाः एतस्मात्कारणाद्राजन्कर्तव्यंहरिवासरं युधिष्ठिरउवाच संशयोस्तिमहाभागश्रूयतांमेजनार्दन कथंसुप्तोसिदेवेशकथंत्वंवलिमानदःसंतुष्टःपृथिवीदेवाकिंकुर्वंतिजनास्तदा किंव्रतंकोविधिश्चैवचातुर्मास्येसमागते एतद्विस्तरतोदेवसंशयंछिंधिमेप्रभो श्रीकृष्णउवाच श्रूयतांराजशार्दूलकथांपापहरांपरां वलिर्वैदानवःपूर्वमासीत्त्रेतायुगेतथा पूजयंश्चैवमांनित्यंमद्भक्तोमत्परायणः यज्ञैस्तुविविधैःसूक्तैर्जपन्नास्तेसनित्यशः द्विजानांपूजकोनित्यंयज्ञकृद्धर्मकृत्ततःपरंसात्विंद्रविद्वेषादिंद्रलोकमजीजयत् मदत्तमिंद्रलोकंतज्जितंतेनदुरात्मना एवंविधोवहुधास्तुतंइंद्रेणसूक्तिभिः गुरुणादैवतैःसार्धंवहुधापूजितोह्यहं ततोवामनरूपेणअवतारेतुपंचमे अत्युग्ररूपेणतदासर्वब्रह्मांडरूपिणा वालकेनजितःसोपिसत्यमालंव्यतास्थितवान् मयाव्याप्तंचतत्सर्वंत्रैलोक्यंसप्तसागरं एवंरूपंतदाकृत्वा

श्रूयतांराजसत्तम संकल्पमात्रेणकृतंपदत्रयमिदंक्रमात् प्रार्थ्यमानेमयितदासंकल्पःपतितःकरात् भूर्लोकेतुपदंन्यस्यभुवर्लोकेतुजानुनी स्वर्लोकेतुकटिंन्यस्यमहर्लोकेतथोदरं जनलोकेचहृदयंतपोलोकेचकंठकम् सत्यलोकेमुखंस्थाप्यउत्तमांगंतदूर्ध्वके सूर्यचंद्रग्रहाःसर्वेनक्षत्रायोगसंयुताः देवाःसेंद्राश्चनागाश्चममतस्थुस्तथोदरे स्तुवंतोवेदसंभूतैःसूक्तैश्चविविधैस्तदा करेगृहीत्वातुबालिंत्रिपादैःपूरितामही अर्धंतुतस्यपृष्ठेवैतदान्यस्यपदंत्वहं क्षिप्तोरसातलेराजन्दानवोममपूजकः क्षिप्तेतुदानवेचैवकिमकुर्वंततःपरं विनयावनतोसातुप्रसन्नोहंजनार्दनः आषाढशुक्लपक्षेवैकामिकाहरिवासरः तस्यामेकाचमेमूर्तिर्बलिमाश्रित्यतिष्ठति द्वितीयाशेषपर्यंकेक्षीराब्धौसागरोत्तमे सुप्तेमयिहृषीकेशेयावच्चायातिकार्तिकी तावदेतद्भवेत्पुण्यंसर्वपुण्येत्तमोत्तमं एतस्मात्कारणाद्राजन्कर्तव्यासाप्रयत्नतः नातःपरतराकाचित्पवित्रापापनाशिनी यस्यांप्रसुप्यतेदेवःशंखचक्रगदाधरः श्रीयुक्तंपूजयेद्देवंत्रैलोक्यस्यपितामहं रात्रौजागरणंकृत्वाभक्त्यायुक्तोविशेषतः एवंयःकुरुतेराजन्नेकादश्याविधानकं सर्वपापहरंचैवभुक्तिमुक्तिप्रदायकं शृणुयाच्चैवयोमर्त्यःकथांपापहरांपरां अश्वमेधस्ययज्ञस्यफलंप्राप्नोतिमानवः ॥ ॥

॥ इतिश्रीस्कंदपुराणेदेवशयनीकामदैकादशीव्रतकथा ॥

अस्यामेवाषाढशुक्लैकादश्यांमन्वादितिथिस्तत्रः श्राद्धंकर्तव्यं तत्रैकादशीमध्याह्नव्यापिनीग्राह्येति ॥ *

प्राक्मन्वादिकृत्येभिधानात् आषाढशुक्लैकादशीकृत्यनिर्णयः अत्राषाढशुक्लद्वादश्यामनुराधायोगरहितायांपारणंकुर्य्यात् तदुक्तंहेमाद्रिभविष्ये आभाकासितपक्षेषुमैत्रश्रवणरेवती संगमेनहिभोक्तव्यंद्वादशीव्रतमाचरेत्॥अस्यार्थः आषाढभाद्रपदकार्तिकशुक्लद्वादशीष्वनुराधाश्रवणरेवतियोगे एकादशीव्रतस्यपारणंनकुर्य्यात् आसुत्रिसूत्वप्येकादशीषूपवासव्रतकर्त्तव्यतोक्ता तथाचभगवद्वचनं मच्छयनेतुमदुत्थानेमत्पार्श्वपरिवर्तने नरोमूलफलाहा

रोहादिशल्यंममार्पेति यदाषाढद्वादश्यांमैत्रेणाष्टयामात्मकोयोगस्तदोपवासद्वयप्रसंगादशक्तादिभिर्मैत्राद्यपादयोगएवपारणेवर्ज्यः तदुक्तंविष्णुधर्मोत्तरे मैत्राद्यपादेस्वपितीहाविष्णुः पौष्णांत्यपादेप्रतिबोधमेति श्रुतेश्चमध्येपरिवर्तमेतिसुप्तिप्रबोधपरिवर्तनमेववर्ज्यमिति इदंत्वनुराधायोगेपारणवर्जनंकृतादियुगांतरविषयं तथाचज्योतिर्निबंधमहाभारते आभाकानांसितपक्षेमैत्रांत्यश्रुतिरोहिणी संगमेनैवभोक्तव्यंद्वादशद्वादशीर्हरेत् मैत्रर्क्षंतुकृतेत्याज्यं त्रेतायांरेवतींत्यजेत् अथपुनरपिदेवशयनमुपक्रम्य सर्वेषांदैवतानांशयनकालःप्रदर्श्यते वामनपुराणे एकादश्यां जगत्स्वामीशयनेपरिकल्पयेत् शेषाहिभोगपर्यंकेकृत्वासंपूज्यकेशवं कृत्वापवित्रकंचैवसम्यक्संपूज्यचाद्विजान् ॥ अनुज्ञांब्राह्मणेभ्यश्चद्वादश्यांप्रयतःशुचिः लब्ध्वापीतांबरधरःस्वस्तिनिद्रांसमापयेत् त्रयोदश्यांततःकामःस्वपितेशयनेशुभे कदंबानांसुगंधानांकुसुमैःपरिकल्पिते चतुर्दश्यांतथायक्षाःस्वपंतिसुखशीतले सौवर्णपंकजकृतेसुखास्तीर्णोपधानके पौर्णमास्यामुमानाथःस्वपितेचर्मसंभवे वैयाघ्रेसजटाभारंसमुद्ग्रंथ्याथचर्मणा यदादिवाकरोराशिंसमायातिचकर्कटं ततोमराणांरजनीभवतिदक्षिणायनं नीलोत्पलमयेशुभ्रेब्रह्माप्रतिपदितथा तल्पेस्वपितिलोकानांदर्शयन्मार्गमुत्तमं विश्वकर्माद्वितीयायांतृतीयायांगिरेःसुता विनायकश्चतुर्थ्यांतुपंचम्यामपिधर्मराट् षष्ठ्यांस्कंदःस्वपितिहिसप्तम्यांभगवान्रविः कात्यायनीतथाष्टम्यांनवम्यांकमलालया दशम्यांभुजगेशश्चस्वपंतेवायुभोजनाः एकादश्यांतुकृष्णायांसाध्याब्रह्मन्स्वपंतिच ॥ एवमेकादश्यांशयनपरिकल्पनं द्वादश्यांनिद्रोदयः इतिवामनपुराणात् अत्रविभुद्वादश्यांलवणपर्वतदानमुक्तंपाद्मे उत्तमःषोडशद्रोणैःकर्तव्योलवणाचलः मध्यमःस्यात्तदर्द्धेनचतुर्भिरधमःस्मृतः वित्तहीनोयथाशक्त्याद्रोणादर्ध्वंतुकारयेत् चतुर्थांशेनविष्कुंभपर्वतान्कारयेत्पृथक् अत्रपृथगित्युक्तेःप्रत्येकमेरुद्वयचतुर्थांशपरिमितेनलवणेन विष्कंभपर्वतचतुष्कमयंधान्यपर्वतवत्

विष्कुंभवत्तेषुज्ञेयमितिमदनः अत्रविधानंधान्यपर्वतवत्ज्ञेयं मंत्राश्च सौभाग्यरससंभूतोयतोयंलवणोरसः तदा
त्मकत्वान्मांपाहिपापात्तस्मान्नमोनमः यस्मादन्नरसाःसर्वे नोत्कृष्टालवणंविना प्रियंचशिवयोर्नित्यंतस्माच्छां
तिंप्रयच्छमे विष्णुदेहसमुद्भूतंयस्मादारोग्यवर्द्धनं तस्मात्पर्वतरूपेणपाहिसंसारसागरात् अनेनविधिनाय
स्तुदद्याल्लवणपर्वतं उमालोकेवसेत्कल्पंततोयातिपरांगतिं संकल्पश्च कल्पपर्यंतमुमालोकप्राप्तिसमनंतरपरम
गतित्वकामईश्वरप्राप्तिकामोवालवणाचलदानमहंकरिष्ये एवमेवदानविधानंइतिलवणाचलदानम् ॥ अथचातुर्मा
स्येधारणापारणाव्रतविधानं भविष्योत्तरे श्रीकृष्णउवाच शृणुकौंतेयवक्ष्यामिधारणापारणाव्रतं बांधवादिवध
दोषसर्वोपद्रवनाशकम् चातुर्मास्येतिथावादौमासिकौंतेयसुव्रत पुण्याहंकारयेत्पूर्वमेकादश्यांशुभेदिने पश्चात्स
कल्प्यनियमंतदारभ्यव्रतंचरेत् आदौमासितथाचांतचातुर्मास्यमथापिवा एकस्मिन्धारणंकार्यंपारणंचतथा
परं उपवासोधारणंस्यात्पारणंभोजनंभवेत् धारणाद्यदिनेप्राप्तेअर्घ्यंपूर्वंनिवेदयेत् पारणंतुततःकार्यंमंत्रमष्टाक्ष
रंजपेत् अष्टोत्तरशतंदद्यादर्घ्यंदेवायतन्मनाः समाप्तेमासिराजेंद्रकुर्यादुद्यापनबुधः चातुर्मास्यव्रतंचाथमा
सेमासेतुकारयेत् उपवासदिनेप्राप्तेपुण्याहंकारयेत्पुरा आचार्यंवरयेत्पश्चाद्ब्राह्मणांतुततःपरं कुर्यात्तुप्रतिमांत
त्रलक्ष्मीनारायणस्यच पूर्णकुंभेतुतांस्थाप्यपूजयेन्निशिभूमिप पंचामृतैस्तथापुष्पैस्तुलसीदलसंयुतैः माल
तीकेतकीभिश्चमल्लिकाकुसुमैस्तथा रात्रौजागरणंकुर्यात्पुराणपठनादिभिःप्रातःकालेतुसंप्राप्तेब्राह्मणांस्तुनिमंत्रयेत्
मासेविप्राःपंचदशद्विमासेद्विगुणान्नृप चातुर्मास्येतथाराजन् तथात्रिंशत्भूसुरान् आनीयसंख्ययाराजन्ब्राह्म
णांस्तान्निमंत्रयेत् पश्चात्पूजादिकंकृत्वादेवपूजांसमाचरेत् पश्चादग्निंसमाधायहोमंकुर्याद्यथाविधि निषसीदेति
मंत्रेणजुहुयाच्चतिलोदकं अराजिकेशामंत्रेणजुहुयाच्चतिलोदकं अष्टाक्षरेणमंत्रेणपायसंजुहुयात्ततः लक्ष्मीनारा

यणोद्देवः स्थानत्रयेपिदेवता पूर्णाहुतिंततोहुत्वाहोमशेषंसमापयेत् ब्राह्मणान्भोजयेत्पश्चादाचार्यंपूजयेत्ततः एवं कृत्वामहाभागब्रह्महत्यादिपातकैः मुच्यतेनात्रसंदेहस्तस्मात्कुरुमहाव्रतं सुग्रीवस्तुपुराराजन्कृत्वावालिनमाहवे नारदोपिपुराराजन्पूर्वजन्मनिशूद्रजः द्विजेभ्यउपदेशात्तुसकृद्धारणपारणं होमादिकंविनाचापिव्रतस्यास्य प्रभावतः जितेंद्रियस्ततोभूत्वाब्रह्माभूद्वाशिनांवरः तस्मात्सर्वप्रयत्नेनधारणंपारणंकुरु इंद्रियाणांवशार्थायसर्वपापापनुत्तये तस्मात्त्वमपिराजेंद्रकुरुष्वेदंव्रतोत्तमं किंदानैस्तपसासाध्यैःकिमन्यैश्चव्रतैर्यमैः धारणंपारणंकुर्याद्व्रतानामुत्तमंव्रतं सर्वयज्ञेषुतीर्थेषुसर्वदानेषुयत्फलं तत्फलंसमवाप्नोतिकृत्वाधारणपारणं इदंव्रतंमहापुण्यंतपसामुत्तमंतपः यज्ञानामुत्तमोयज्ञोव्रतानामुत्तमंव्रतं तस्मात्त्वमपिराजेंद्रकुरुष्वविधिपूर्वकं बांधवादिवधैर्दोषैर्मुच्यसेनात्रसंशयः इतितंसंप्रभाष्याथकृष्णःस्वांचपुरींययौ दृश्यमानःपौरजनैःसमस्तैःपांडुपुत्रकैः युधिष्ठिरोपिराजर्षिश्चकारेदंमहाव्रतं विमुक्तःसर्वपापेभ्योवंशपश्चतथाभवत् इतिभविष्योत्तरेधारणपारणव्रतम् अस्यामेवद्वादश्यांकृत्यांतरं नारदीये आषाढशुक्लद्वादश्यांविप्रान्द्वादशभोजयेत् मधुरान्नेनरं पूज्यपृथग्गंधादिभिःक्रमात् तेभ्योवासांसिदंडांश्चब्रह्मसूत्राणिमुद्रिकाः पात्राणिवददेद्भक्त्याविष्णुर्मेप्रीयतामिति महाभारते दानधर्मेषु आषाढमासिद्वादश्यांवामनेतिचपूजयेत् नरमेधमवाप्नोतिपुण्यंचलभतेमहदिति आषाढशुक्लत्रयोदशीमारभ्यपंचदिनात्मकमुमामहेश्वरमूर्तिपूजाव्रतं नारदीये शुचिशुक्लत्रयोदश्यामेकभक्तंसमाचरेत् पूजयित्वाजगन्नाथाउमामाहेश्वरीतनू हेमरौप्यमृण्मयौवायथाशक्तिविधायच सिंहोक्षस्थौदेवगृहेगोद्वेब्राह्मणवेश्मनि स्थापयित्वाप्रतिष्ठाप्यदेवमंत्रेणनारद ततःपंचदिनंपूजांचैकभक्तव्रतंतथा स्त्रीवापिदिवसेप्रातःस्नात्वासंपूज्यतौपुनः समर्पणीयौविप्रायवेदवेदांगशालिने वर्षेवर्षेततःपश्चाद्विधेयंपंचवर्षकं तदंतेधेनुयुग्मेनसहितौतौप्रदापयेत् इत्थंनरो

वानारीवाकृत्वाव्रतमिदंशुभं नैवदांपत्यविच्छेदंलभतेसप्तजन्मसु ॥ इतिसोद्यापनमुमामाहेश्वरव्रतं आषाढत्रयोदश्यांजयापार्वतीव्रतं भविष्योत्तरे श्रीलक्ष्मीरुवाच देवदेवजगन्नाथभुक्तिमुक्तिप्रदायक कथयस्वप्रसादेनलोकानुग्रहकाम्यया नारीणांयद्व्रतंचैवअवैधव्यकरंशुभं येनचीर्णेननारीणामखंडफलदंभवेत् श्रीभगवानुवाच सत्यमुक्तंत्वयादेविनचमिथ्यात्वयोदितं तद्व्रतंकथयिष्यामिनाख्यातंकस्यचित्पुरा येनचीर्णेननारीणामवैधव्यंप्रजायतेअकथ्यंपरमंगुह्यंपवित्रंपापनाशनं आषाढेचैवकर्तव्यंशुक्लपक्षेत्रयोदशी गृह्णीयान्नियमंतत्रदंतधावनपूर्वकं तत्रदंतधावनमंत्रः आयुर्बलंयशोवर्चःप्रजापशुवसूनिच ब्रह्मप्रज्ञांचमेधांचतन्नोदेहिवनस्पते नियमात्फलमाप्नोतिनिष्फलंनियमंविना तस्मात्सर्वप्रयत्नेनव्रतंनियमपूर्वकं एवंभक्तव्रतंचैवकरिष्येविधिनाधुना स्वादुरहितधान्येनतेनपापंव्यपोहतु उमामहेश्वरौकार्यौसुवर्णरजतादिभिः अथवामृण्मयौसिंहवृषदेहोपरिस्थितौ गेहेदेवालयेवापितथाब्राह्मणवेश्मनि स्थापयेद्वेदमंत्रेणप्रतिष्ठांतत्रकारयेत् तद्दिनेदंतकाष्ठंचयूथिकायावरानने कुंकुमागुरुकस्तूरीसिंदूरैरष्टगंधकैः चंपकैःसप्तपत्रैश्चयूथिकायाम्रतोद्भवैः ग्रीवासूत्रेणदूर्वायाःपूजयित्वाविधानतः अर्घ्येणचातिशुभ्रेणचोत्तरीययुगेनवै श्रीवृक्षद्राक्षादाडिमैस्तथाजातीफलेनच आद्यादेवीचशर्वाणीशंकरस्यसदाप्रिये अर्घ्यंगृहाणदेवेशिमनोपरिकृपांकुरु इतिपूजाप्रकर्तव्याकथांशृणुद्विजोत्तमात् श्रीलक्ष्मीरुवाच अच्युतायनमस्तुभ्यंपुरुषादिस्वरूपिणे व्रताध्यक्षमहाप्राज्ञत्वंवृद्धिक्षयकारक कथयस्वप्रसादेनव्रतानांव्रतमुत्तमं केनचादौपुराचीर्णमर्त्यलोकेप्रकाशितं एतत्सर्वप्रसादेनब्रूहिमेजगदीश्वर श्रीभगवानुवाच अथातःसंप्रवक्ष्यामिपार्वत्यास्तेकथामिमां यांश्रुत्वासर्वपापभ्योमुच्यतेनात्रसंशयः आसीत्पुराकृतयुगेकौंडिन्यनगरे वरेब्राह्मणोवसतेतत्रसत्यशौचपरायणः गुणवाञ्छीलसंतोषीवामनोनामनामतः तस्यभार्याप्रियासत्या रूपलक्षणसंयुता धनाढ्यावेदवि

अ०१०
आषाढ
१९

दुर्योगृहेवैसर्वसंपदः केनकर्मविपाकेनसंतानरहितोभवत् अपुत्रस्यगृहंशून्यंश्मशानसदृशंभवेत् दंपतीतेनदुः
खनक्षामौजातौशरीरतः एकदाकालयोगेननारदोगृहमागतः अर्घ्यंपाद्यंकृतंतेनकथांचक्रेमुनासह वामनउवाच
नारदत्वंमुनिश्रेष्ठसर्वज्ञानपरायण कथयस्वप्रसादेनकथंदुःखंप्रशाम्यति दानेनकेनदेवर्षेव्रतेननियमेनच तीर्थे
नकेनदेवर्षेसंतानंमेभविष्यति नारदउवाच शृणुविप्रप्रवक्ष्यामिसंतानंतुभविष्यति वनस्यदक्षिणेपार्श्वेविल्ववृ
क्षस्यमध्यतः विधुलिंगंचविरूढातंभवानीसहितंपरं सपर्य्याकुरुयत्नेनतुष्टोदास्यतिसंततिं अपूज्यंलिंगमभ्य
र्च्यपूज्यस्यचप्रदीयते अनाथप्रेतसंस्कारंकोटियज्ञफलंलभेत् इत्युक्त्वानारदःस्वर्गंगतोवैमुनिपुंगवः वनमध्यग
तौद्वौतौदंपतीपुत्रकांक्षिणौ विल्वमध्यगतंदृष्ट्वाशिवलिंगंपुरातनं विल्वपत्रेणजीर्णेनलिंगंतत्रैवछादितं विहायवि
ल्वपत्राणितदादायविलेपनं पंचामृतेनप्रक्षाल्यपूजांकृत्वामनोरमां नित्यंनियमसंयुक्तंपूजयन्परमेश्वरं पंचा
ब्दंपूजितस्तेनपार्वतीसहितोहरः एकदातुगतोसौहिपुष्पार्थेब्राह्मणोत्तमः कुसुमंगृह्यतेयावत्तावद्दष्टस्तुपन्नगैः
पतितस्तद्वनेघोरेसिंहव्याघ्रसमाकुले तृतीयेनमुहूर्तेननतद्भार्याचिंतयत्तदा केनापिकारणेनाद्यकथंनायातिमेप
तिः पार्वतीतुसमायातायत्रतिष्ठतिब्राह्मणी क्रंदमानांचतांदृष्ट्वापार्वतीवरदाभवत् सुधाशीकरहस्तेनविप्रवक्त्रं
प्रासिंचती उत्थितोब्राह्मणस्तत्रनिशीथेनिद्रयायथा तावेत्यचरणौदेव्यागृहीत्वाविनयान्वितौ पार्वत्योक्तमिदंवाक्यं
वरंवरयसुव्रते ब्राह्मण्युवाच त्वत्प्रसादेनरुद्राणिलब्धंतुवांछितंमया संतानंचैवमेनास्तिएतद्दुःखंचमेनुद पार्व
त्युवाच व्रतंकुरुविधानेनममनाम्नाचविश्रुतं जयाममव्रतंनामत्रैलोक्येपावनंपरं जयापार्वतीव्रतंचैतदाषाढेचारु
लोचने स्वादुरहितधान्येनलवणरहितेनचभोक्तव्यंपंचकदिनंकर्तव्यंतुदृढव्रतं त्रयोदश्यांसमारभ्यंतृतीयायांसमा
पनं शुक्लपक्षेसमारभ्यकृष्णपक्षेसमापनं पंचाब्दंपावनान्नैस्तुव्रतंकार्यंप्रयत्नतः पंचाब्दंतुयवैश्चैवव्रतं

तुलवर्णविना। पंचाब्दंतंडुलैःकार्य्यंनिक्षुरसविवर्जितं पंचाब्दंचैवमुद्गैस्तुएवंहायनविंशतिः विंशत्तमेतनोऽब्देतुस
तोद्यारंसमाचरेत् दंपत्योःपरिधानेहिप्रदद्यात्तुष्टप्रीतये भोज्यंसुवासिनीनांचतृतीयायायथोचितं विंशतिःप्रथमे
पक्षेवित्तशाठ्यमतःपरं वधकंपंचकेकार्य्यंपरिधानंसभोजनं नानारसैःसमायुक्तंघृतखंडसमन्वितं सभर्तृकायेदा
तव्यंभोज्यंसौभाग्यहेतवे कुंकुमंचजलंदेयमब्देऽब्देयथाशक्तितः रात्रौजागरणंकुर्य्यादखंडफलंभवेत् अनेनविधि
नायस्तुकुरुतेव्रतमुत्तमं जागरणेकृतेयातिव्रतं संपूर्णतांसदा व्रतेनरहितानारीविधवाजन्मजन्मनि शोचेतदुःखसंयु
क्तानचसौभाग्यभाग्भवेत् नारीणांचव्रतैर्दानैःपरिभक्त्यातततःपरं सौभाग्यमतुलंयातिपतिसंतोषदानतः एवमुक्त्वा
व्रतवरंतत्रैवांतरधीयत पश्चाद्गृहंसमागत्यसापत्याचसमन्विता पूर्वोक्तेनव्रतंकृत्वाप्राप्तपुत्रसुखंतयोःभर्तारंचविशे
षेणअवैधव्यंपरंसुखं भुक्त्वाचविविधान्भोगानंतेप्राप्तौशिवालयं श्रीभगवानुवाच एवंयाकुरुतेनारीनचभर्त्रावियु
ज्यते कुलत्रयंसमुद्धृत्यनयतेशिवमंदिरं सान्निध्यसुखमाप्नोतिशिवलोकेमहीयते कथांश्रुत्वाविधानेनसर्वपापैःप्र
मुच्यते ॥ इतिभविष्योत्तरेगुर्जराचारप्राप्तं जयापार्वतीव्रतं आषाढशुक्लचतुर्दश्यामपि शिवपूजाव्रतंनारदीये
शुचिशुक्लचतुर्दश्यांशिवंसंपूज्यमानवः देशकालोद्भवैःपुष्पैःसर्वांसंपदमाप्नुयात् आषाढपौर्णिमायांगोपद्मव्रतं को
किलागौरीव्रतं नारदीये चतुर्भुजंमहाकायंजांबूनदसमप्रभं शंखचक्रगदापद्मरमागरुडशोभितं सेवितंमुनिभिर्दे
वैर्यक्षगंधर्वकिन्नरैः एवंविधंहरिंध्यात्वातत्रपूजांसमाचरेत् पौरुषेणवसूक्तेनगंधाद्यैरुपचारकैः आचार्य्यंवस्त्रभूषाद्यै
स्तोषयेत्स्निग्धमानसः भोजयेन्मिष्टपक्वान्नैर्द्विजानन्यांश्चशक्तितः एवंकृत्वाव्रतंविप्रप्रसादात्कमलापतेः ऐहिकामु
ष्मिकान्कामान्लभतेनात्रसंशयः कोकिलाव्रतमप्यत्रप्रोक्तंतद्विधिरुच्यते पूर्णिमायांसमारभ्यव्रतंस्नायाद्बहिर्जले
पूर्णांतश्रावणेमासिगौरीमभ्यर्च्यकोकिलां स्वर्णपक्षांरत्ननेत्रांप्रवालमुखपंकजां कस्तूरीवर्णसंयुक्तामुत्पन्नांनंदनेवने

चूतचंपकवृक्षस्थांकलगंभीरनादिनीं चिंतयेत्पार्वतींदेवींकोकिलारूपधारिणीं गंधाद्यैःसत्यहंम्र.चैल्लिखितांवर्णकैः पटे ततोव्रतांतेहैमींवातिलपिष्टमयींद्विज आद्यादिप्रायमंत्रेणभक्त्यासस्वर्णदक्षिणां दविचैत्ररथोत्पन्नकोकिलेहर वल्लभे संपूज्यदत्ताविप्रायसर्वसौख्यकरीभव द्विजंसुवासिनीस्त्रिंशदेकांवाभोजयेत्ततः वस्त्रादिदक्षिणांशक्त्यादत्त्वा नत्वाविसर्जयेत् एवंयाकुरुतेनारीकोकिलाव्रतमुत्तमं सालभेत्सुखसौभाग्यंसप्तजन्मसुनारद ॥ अथगोपद्मव्रत पूजाक्रमः तत्रादौतिथ्यादिसंकीर्त्यात्मनऐहिकामुष्मिकसर्वकामावाप्तिकामो विष्णुप्रीत्यर्थंगोपद्मव्रतंकरिष्ये ध्यानं चतुर्भुजंमहाकायंजांबूनदसमप्रभं शंखचक्रगदापद्मरमागरुडशोभितं सेवितंमुनिभिर्देवैर्यक्षगंधर्वकिन्नरैः एवं विधंहरिंध्यात्वाततोयजनमारभेत् आवाहयामिदेवेशंभक्तानामभयप्रदं स्निग्धकोमलकेशंचमनसावाहयेद्ध्रुवं सहस्रशीर्षेत्यावाहनं १ सुवर्णमणिभिर्दिव्यैरचितंदेवनिर्मितं दिव्यसिंहासनंविष्णोउपविश्यप्रसीदमे पुरुषएवेत्यासनं २ पादोदकंसुरश्रेष्ठसुवर्णकलशोर्पितं गंधपुष्पाक्षतैर्युक्तंपाद्यंमेप्रतिगृह्यतां एतावानस्येतिपाद्यम् ३ अष्टद्रव्यसमायुक्तंस्वर्णपात्रोदकंशुभं अभयंकरभक्तानांगृहाणाचमनीयकं तस्माद्विराडित्याचमनम् ४ गंगागोदावरीपुण्यायमुनाचसरस्वती नर्मदासिंधुकावेरीतभ्यःस्नानार्थमाहृतं यत्पुरुषेणेति पंचामृतादिस्नानम् ५ वस्त्रयुग्मंसमानीतंपट्टसूत्रेणनिर्मितं सुवर्णराचितंदिव्यंगृहाणत्वंसुरेश्वर तंयज्ञमितिवस्त्रम् ६ कार्पासतंतुभिर्युक्तंब्रह्मणानिर्मितंपुरा अनेकरत्नखचितमुपवीतंगृहाणमे तस्मादितियज्ञोपवीतम् ७ चंदनंमलयोद्भूतंकस्तूर्यागुरुसंयुतं कर्पूरेणचसंयुक्तंस्वीकुरुष्वानुलेपनं तस्मादितिगंधम् ८ शतपत्रैःकर्णिकारैश्चपंचकैर्मल्लिकादिभिः तुलसी-युक्तपुष्पाणिगृहाणपुरुषोत्तम तस्मादश्वाइतिपुष्पम् ९ दशांगगुग्गुलंधूपंसुगंधंचमनोहरं कृष्णागुरुसमायुक्त धूपंदेवगृहाणमे यत्पुरुषमितिधूपम् १० आज्यसुवर्तिसंयुक्तंवह्निनायोजितंचयत् दीपंगृहाणदेवेशत्रैलोक्य

तिनिरापहं ब्राह्मणोस्येतिधूपं ११ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमान्वितं भक्ष्यभोज्यसमायुक्तं नैवेद्यंप्रति
गृह्यतां चंद्रमाइतिनैवेद्यं १२ इदंफलमितिफलं नाभ्याआसीदिति तांबूलं १३ हिरण्यगर्भमितिः सतास्या
सान्निति दाक्षिणा १४ यज्ञेनयज्ञमिति मंत्रपुष्पांजलिः १५ अथतत्तद्वर्षोक्तंवायणं सपक्वान्नमिदंविप्रवायणं
परिगृह्यतां त्वत्प्रसादाद्गृहेसर्वंव्रतस्यफलमाप्नुयां यानिकानीतिप्रदक्षिणा मंत्रहीनमितिप्रार्थनाइतिपूजा अथ
कथा सनत्कुमारउवाच नाथैकंपरिपृच्छामिचतुर्वर्गफलप्रदं नारीणामथवापुंसांभुक्तिमुक्तिफलप्रदं ब्रूहिचेदस्तिदे
वर्षेकृपांकृत्वाममोपरि नारदउवाच भगवन्सर्वमाख्यानियत्पृष्टंविदुषात्वया गोपद्मकव्रतंनामव्रतानामिदमुत्तमं
कार्यसिद्धिकरंलोकेविख्यातंभुवनत्रये सनत्कुमारउवाच भगवन्भूतभव्येशसर्वशास्त्रविशारद तद्व्रतंब्रूहिमेसर्वंक
थमुद्यापनंभवेत् पुरादंकेनचाचीर्णंदेवर्षेकथयस्वमे नारदउवाच आषाढकार्तिकौमासौ व्रतग्रहणसिद्धिदौ आषाढ
पौर्णमास्यांतुतथाष्टम्यांहरेर्दिने प्रारभेद्व्रतमेतत्तुकार्तिकावधितत्तिथौ तिलामलककल्केनस्नानंनित्यंविधायच
नदीतीरेतथागोष्ठेशिवागारेहरेर्गृहे शुभेवृंदावनेचापिलिखेद्वैपद्मरूपदे त्रयस्त्रिंशत्तुपद्मानिकुर्याद्भक्त्यादिनेदि
ने तत्संख्ययाप्रकर्तव्याअर्घ्यप्रदक्षिणानतीः बालकृष्णंसमुद्दिश्यलक्ष्म्यासहजगद्गुरुं गंधाद्यैरुपचारैस्तुयथाश
क्त्याप्रपूजयेत् ब्राह्मणंचततःपूज्यपद्मसंख्यंप्रपूजयेत् प्रथमेब्देचवटकैर्द्वितीयेपूपकैर्व्रती तृतीयेशाकनिष्टान्नै
श्चतुर्थेपूरिकादिभिः पंचमेपरमान्नैस्तुसद्मगंपूजयेद्व्रती अत्रैवोदाहरंतीममितिहासंपुरातनं ऋषीणांपृच्छमाना
नांसूतेनोक्तंमयाश्रुतं ऋषयऊचुः केनचादौपुराचीर्णंमर्त्येकेनप्रकाशितं कथमुद्यापनंतस्यकिंफलंसूतकथ्यतां सूत
उवाच पुराशक्रोमरावत्यांदेवदानवकिन्नरैः रुद्रैरादित्ययक्षाद्यैर्गंधर्वैःस्वर्गिभिःसह रंभानृत्यसमारंभेक्रीडालोभे
नविह्वला एवंनृत्येसमारब्धेत्रुटितंचर्ममंडलं क्षणमात्रंविचार्याथधर्मराजस्तमुक्तवान् यमउवाच जन्ममध्येत्र

तंयैश्चनकृतंप्राणिभिः कचित् तच्चर्मस्नायुभिःशक्रकर्त्तव्यंछादनंतयोः नारदेनश्रुतंतत्रजगामयदुनंदनं अर्चयित्वाथतंकृष्णोवचनंचेदमब्रवीत् श्रीकृष्णउवाच सर्वलोकेषुदेवर्षेभुवनेषुचरतासदा किमाश्चर्यंयत्त्वयादृष्टंसत्यंमेब्रूहि नारद नारदउवाच शक्रस्यभवनेदृष्टमाश्चर्यंदेवसंसदि तत्रसर्वेसमायाताः सुराश्चेन्द्राश्चतुर्दश रुद्राएकादशविधाश्चादित्याद्वादशापिच वसवोष्टौतथानागायक्षराक्षसपन्नगाः रंभयाचसमारब्धंनृत्यंशक्रस्यपश्यतः त्रुटितंचर्मवाद्यानामब्रुवंस्तस्यसाधने यमःप्राहतदादूतान्सुभद्राह्यव्रतास्तिभोः तामानयध्वंतच्चर्मवाद्ययोग्यंसदास्त्विति तच्छ्रुत्वात्वरयाभद्रभीत्यासर्वंनिवेदितं सूतउवाच इतिनारदवाक्यंतुश्रुत्वाकृष्णस्त्वरान्वितः सुभद्रायागृहंगत्वपूजितस्तामुवाचह किंचिद्व्रतंत्वयाभद्रेकर्तव्यंनेतिशंसमे सुभद्रोवाच सर्वव्रतानिमेकृष्णकृतान्येवनसंशयः नोचेत्तवसहोदर्यांतस्यामर्जुनवल्लभः पुत्रोभिमन्युश्चकथंकथयस्वजगत्पते श्रीकृष्णउवाच तथापित्वंमहाभागेव्रतमेकंसमाचर गोपद्मेतिचविख्यातंत्रिषुलोकेषुविश्रुतं इतिकृष्णवचःश्रुत्वासुभद्रातत्तदाकरोत् कृष्णोपदिष्टविधिनासत्वरंतत्समापितं सोद्यापनंव्रतंपूर्णेकालेयमभटाययुः दूताऊचुः सुभद्रेतवदेहस्यचर्मार्थेत्वागतावयं तच्चर्मदेववाद्यार्थंयमेनपरिकल्पितं इतिदूतवचःश्रुत्वासव्रतास्मीतिसाब्रवीत् ततोयमभटाःसर्वेददृशुःसादरास्तदा पद्मानांनिचयंतस्याःगृहेगांचसवत्सकां स्थंडिलेहस्तमात्रेतुसुसमिद्धंहुताशनं कृष्णोपदिष्टंवीक्ष्यैवभटाजग्मुर्यमांतिकं प्राप्तव्रतप्रभावेनसुभद्रापदमच्युतं इतिसूतवचःश्रुत्वामुनयश्चक्रिरेव्रतं सनत्कुमारउवाच भोभोनारददेवर्षेसर्वज्ञानसुधानिधे शीघ्रंब्रूहिसखेमह्यंव्रतस्योद्यापनेविधिं नारदउवाच पूर्णेतुपंचमेवर्षेव्रतस्योद्यापनंचरेत् श्रीविष्णोःप्रतिमाकार्यासुवर्णस्यपलेनवै पुष्पमंडपिकाकार्याचतुर्द्वारेसुशोभना तन्मध्येपूजयेद्भक्त्यारमयासहितंहरिं त्रयस्त्रिंशत्ततोविप्रान्व्रतहोमंसमारभेत् अतोदेवेतिमंत्रेणजुहुयात्तिलपायसं रक्तवस्त्रयुतांधेनुमाचार्यायप्रदापयेत्

ब्राह्मणांश्चसपत्नीकान्भोजयेच्चयथाक्रमं एवंयाकुरुतेविप्रतस्याःश्रीरचलाभवेत् यंयंचिंतयतेकामंतंतंप्राप्नोत्यसंशयं अंतेविष्णुपदंगच्छेत्सर्वपापविवर्जितः इतिनारदोक्तसोद्यापनगोपद्मव्रतं अत्रमूलंशिष्टाचारएव अस्य। मेवाषाढपूर्णिमायांकोकिलाव्रतं तस्यविधानं स्नात्वा आचम्यप्राणानायम्यमासपक्षाद्युल्लिख्यममेहजन्मनिसर्वपापक्षयपूर्वकपुत्रपौत्रस्थिरलक्ष्मीत्वावैधव्यसपत्नीनाशसौभाग्यसिद्धिद्वाराकोकिलारूपगौरीप्रीत्यर्थंकोकिलाव्रतंकरिष्ये इतिसंकल्प्य आषाढपौर्णमास्यांतुसंध्याकालेह्युपस्थिते संकल्पयेन्मासमेकंश्रावणेप्रत्यहंह्यहं. स्नानंकरिष्येदेवेशिकोकिलप्रतिमेतव जलेस्मिन्पावनेपुण्येसर्वदेवजलाशये इतिमंत्रेण तिलामलफलैः सर्वौषधिजलेनच पिष्टेन चाष्टौ दिनानि प्रत्येकंतिलामलकपिष्टेनचौषधियुतेनच षड्दिनान्येवंमासावधिस्नानेक्रमः एवं स्नात्वारविंध्यात्वातस्मैअर्घ्यंदद्यात् ततः आदित्यभास्कररवेअर्कसूर्यदिवाकर प्रभाकरनमस्तुभ्यंगृहाणार्घ्यंनमोस्तुते इतिसूर्य्यायअर्घ्यंदद्यात् ततःस्वर्णपक्षांरौप्यपादांमौक्तिकनेत्रांप्रवालमुखांरत्नपृष्ठांचूतचंपकवृक्षस्थां गौरीरूपिणींकोकिलांलिखित्वापूजयेदित्युक्तेः ध्यानंकुर्यात् स्वर्णपक्षांरक्तनेत्रांप्रवालमुखपंकजां कस्तूरीवर्णसंयुक्तामुत्पन्नांनंदनेवने चूतचंपकवृक्षस्थांपुष्टस्वरसमन्वितां चिंतयेत्पार्वतींदेविकोकिलारूपधारिणीं श्रीसूक्तेन गौरीमिमायेतिमंत्रेणपूजा आगच्छकोकिलेदेविदेहिमेवांछितफलं चंपकद्रुममारूढाक्रीडसेनंदनेवने इत्यावाहनं आसनंक्षौमवस्त्रेणनिर्मितंचानयेतव गृहाणेदंमयादत्तंकोकिलेप्रीतिवर्द्धिनि सौभाग्यंधनपुत्रांश्चदेहिमेकोकिलेनमः तिलपुष्पफलैर्युक्तंपाद्यंमेप्रतिगृह्यतां इतिपाद्यं रत्नचंपकपुष्पैश्चपीतचंदनसंयुतं हेमपात्रस्थितंतोयंगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यं निर्मलंसलिलंगांगंकोकिलेपक्षिरूपिणि वासितंचसुगंधेनगृहाणाचमनीयकं इत्याचमनं पंचामृतेनस्नपनंकोकिलेकलकंठके मयादत्तेनसुप्रीताभवत्वंपरमेश्वरि इतिपंचामृतं मंदाकिनीजलंपुण्यंसर्व

तीर्थसमन्वितं स्नानार्थंतेमयादत्तंकोकिलेगृह्यतांनम इतिस्नानं यस्मात्कर्पाससूत्रेणवासांसिविविधानिच पीतवस्त्रप्रदानेनप्रीताभवममांबिके इतिवस्त्रं कंचुकंचमयादत्तंनानावर्णैर्विनिर्मितं कोकिलेगृह्यतांदेविप्रसीदपरमेश्वरि कंचुकं हरिद्रारंजितंदेविकंठसूत्रंमयार्पितं कोकिलेसुभगेदेविवरदाभवमेंबिके कंठसूत्रं यानिरत्नानिसर्वाणिगंधर्वेषूरगेषुच तैर्युक्तंभूषणंहैमंकोकिलेप्रतिगृह्यतां इत्याभरणं श्रीखंडंचंदनंदिव्यंमलयाद्रिसमुद्भवं विलेपनंसुरश्रेष्ठगृह्यतांपरमेश्वरि इतिगंधं अक्षताःकुंकुमाक्ताश्चकामिनीभूषणास्पदं सौभाग्यदेगृहाणेहनमस्तेहरवल्लभे इत्यक्षताःशतपत्रैर्जातिपुष्पैश्चंपकैर्मरुपत्रकैःपाटलैश्चैवदूर्वाभिर्युतंपुष्पंगृहाणमे इतिपुष्पाणि तिलस्नेहेतिलमुखेतिलसौख्येतिलप्रिये सौभाग्यंधनपुत्रांश्चदेहिमेकोकिलेनमः पुष्पोत्तरमंगलपूजा शिवायैशिरः पूजयामि वनवासिन्यै.ललाटंपूजयामि २ सुरूपायैभ्रूमध्यंपू. पार्वत्यैचिबु-पू.तिर्यक्रूपिण्यैकंठंपू.कोकिलायै.हृदयंपू. पक्षिरूपिण्यैगुह्यंपू.पद्मावत्यै-पादौपूजयामि कृष्णवर्णायैसर्वांगंपू.वनस्पतिरसोधूपोतिधूपं आज्यसद्वर्तिसंयुक्तमितिदीपं शर्कराखंडखाद्यानिदधिक्षीरघृतानिच आहारार्थंमयादत्तंनैवेद्यंप्रतिगृह्यतामितिनैवेद्यं पाटलोशीरकर्पूरयुतंस्वादुसुशीतलं पानीयंतेमयादत्तंकोकिलेप्रतिगृह्यतामितिजलं चंदनागुरुकर्पूरकस्तूरीकुंकुमान्वितं करोद्वर्तनकंदेविकोकिलेप्रतिगृह्यतां इतिकरोद्वर्तनं कूष्मांडंनारिकेलंचपनसंकदलीदलं जंबूचमातुलुंगंचफलंगृह्णनमोस्तुते इतिफलं पूगीफलंमहादिव्यमितितांबूलं हिरण्यगर्भेतिदक्षिणा कोकिलेकृष्णवर्णेचसदावससिकानने भवान्यैहरकांतायैकोकिलायैनमोनम इतिनीराजनं पूजितापरयाभक्त्याकोकिलाहरवल्लभा पुष्पैर्नानाविधैस्तुष्टावरदास्तुसदामम इतिपुष्पांजलिःकोकिलारूपधारिण्यैजगन्मात्रेनमोस्तुतेशरणागतदीनार्तंत्राहिदेविसदांबिके इतिनमस्कारःगंधपुष्पफलैर्युक्तंतोयंहेमफलान्वितं कोकिलेत्वंगृहाणार्घ्यंवांछितार्थंप्रयच्छमे आषाढस्यासितपक्षेमधु

वर्णेहरप्रिये कोकिलेत्वंजगन्मातर्गृहाणार्घ्यंनमोस्तुते इतिपुनरर्घ्यं ततःप्रार्थना रूपंदेहिजयंदेहिसौभाग्यंदेहि मेसदा पुत्रान्देहिधनंदेहिसर्वान्कामान्प्रयच्छमे काकवंध्याविवत्साचमृतवत्सातिदुःखिता ताःसर्वाःफलिताः संतुकोकिलेत्वत्प्रसादतः त्वयालब्धःपतिर्देवःशंकरोलोकशंकरः अतोहंत्वत्प्रसादेनलभेयंपतिमुत्तमामितिप्रार्थना अतेहैमींतिलपिष्टजांवाकोकिलांकृत्वाविप्रायदद्यात् देविचैत्ररथोत्पन्नेविंध्यपर्वतवासिनि अर्चितापूजितासित्वंकोकिलेहरवल्लभे कोकिलेकलकंठासिमाधवेमधुरस्वरे वसंतेवससेदेविगच्छत्वंनंदनेवनेइतिविसर्जनं इतिकोकिलाव्रतपूजा अथकथा युधिष्ठिरउवाच स्वभर्तृरतिसंबंधेमहास्नेहोयथाभवेत् कुलस्त्रीणांतथाचक्ष्व व्रतंममजगद्गुरो श्रीष्णउवाच यमुनायास्तटेपूर्वंमथुरास्तिमहापुरी तस्यांशत्रुघ्ननामाभूद्राजाराघववंशजः तस्यभार्याकीर्तिमालानाम्नासीत्प्रथिताभुवि तयाप्रणम्यभगवान्वशिष्ठोमुनिसत्तमः पृष्टःकथंमुनिश्रेष्ठसौभाग्यमतुलंभवेत् एवमुक्तस्तयाज्ञानीवसिष्ठःकीर्तिमालया ध्यात्वामुहूर्तमाचख्यौकोकिलाव्रतमुत्तमं वसिष्ठउवाच आषाढपूर्णमास्यांतुसंध्याकालेह्युपस्थिते संकल्पयेन्मासमेकंश्रावणंप्रतिगृह्यतु स्नानं करिष्येनियताब्रह्मचर्यस्थितासती भोक्ष्यामिनक्तंभूशय्यांकरिष्येप्राणिनांदयां इतिसंकल्प्यपुरुषोनारीवाब्राह्मणांतिके प्राप्यानुज्ञांततःप्रातःसर्वसामग्रिसंयुतःपुरुषःप्रत्युषःकालेदंतधावनपूर्वकंस्नानंकुर्य्याद्व्रतीपार्थसुगंधामलकैस्तिलैःपिष्टाष्टकंततःपश्चात्सर्वौषध्याःपुनःपुनःस्नात्वाध्यात्वारविंसंध्यांतर्पयित्वापितृंस्तथा पूजयित्वालिखेत्पिष्टैःकोकिलांपक्षिरूपिणीं कलकंठां शुभैःपुष्पैःपूजयेच्चंपकोद्भवैः पत्रैर्वाधूपनैवेद्यैर्दीपालक्तकचंदनैः तिलतंडुलदूर्वाद्यैःपूजयेत्तांक्षमापयेत् नित्यंतिलव्रती भक्त्यामंत्रेणानेनपांडव तिलस्नेहेतिलमुखेतिलसौख्येतिलप्रिये सौभाग्यंधनपुत्रांश्चदेहिमेकोकिलेनमः इत्युच्चार्यततःपश्चाद्गृहमागत्यसंयतःकृताहारःस्वपेत्पार्थयावन्मासःसमाप्यते मासांतेताम्रपात्रं तुकोकिलांतिलपिष्ट

कौ०व्र०
श्रावण
२३

णीं रक्तनेत्रांस्वर्णपक्षांब्राह्मणायनिवेदयेत् वस्त्रैर्गुडैःसमायुक्तांश्रावण्यांकुलजातिका श्वश्रूश्वशुरवर्णेवादैवज्ञेवा पुरोहिते व्यासेवसंप्रदातव्याव्रतिभिःशुभकांक्षया तिलस्नेहइत्यादितिलदानमंत्रः एवंयःकुरुतेनारीकोकिलाव्रतमादरात्सप्तजन्मानिसौभाग्यंसाप्राप्नोतीतिनिश्चितंनिःसापत्नंपतिंभव्यंसस्नेहंप्राप्यभूतलेमृतागौरीपुरंयातिविमानेनार्कवर्चसा तयाचानुष्ठितंपार्थसमग्रंकीर्तिमालया तस्याश्चसर्वंसंपन्नंवसिष्ठवचनादिह पुत्रसौभाग्यसत्कारंशत्रुमृत्युप्रसादजं एवमन्यापिकौंतेयकोकिलाव्रतमादरात् चरिष्यतिव्रतंतस्याःसौभाग्यंचभविष्यति येकोकिलांकलरवांकलकंठपीठांयच्छंतिसाज्यतिलपिष्टमयींद्विजेभ्यः तेनंदनादिपुवनेषुविहृत्यकामंमर्त्यैःसमेत्यमधुरध्वनयोभवंति ॥ इतिहेमाद्रौभविष्योत्तरेकोकिलाव्रतकथा ॥ अथवाराहेकोकिलाव्रतं कीर्तिमालोवाच वदमेत्वंमुनिश्रेष्ठसौभाग्यप्राप्तिदंव्रतं पूज्यःकथंचभगवान्शिवःकेनव्रतेनवै वसिष्ठउवाच यदिपृच्छसिसत्यंहिव्रतानामुत्तमंव्रतंतारणंसर्वपापानांकथयामिनिबोधतत् दक्षप्रजापतेर्यज्ञेपुरादेवाःसमागताः ऋषयश्चतथासर्वेविद्याधरगणास्तथा ब्रह्माविष्णुश्चवायुश्चदेवराजस्तथैवचवरुणोग्निर्ग्रहाःसर्वेयेचान्येचदिवौकसः वसिष्ठोवाल्हिकोगार्ग्योविश्वामित्रोमहामुनिः एतेचान्येचबहवःसर्वेयज्ञार्थमागताःअपश्यन्नारदस्तत्रसंतिकेआगताइति ईश्वरेणविनासम्यग्दृष्ट्वासर्वान्समागतान् शिखांसंस्पृश्यपाणिभ्यांननर्तकलहप्रियः ज्ञात्वाकलहमूलंचततःकैलासमाययौसर्वाघनाशनंस्थानंकैलासशिखरंशुभं तत्रदृष्ट्वासमासीनंगौरीसहितमीश्वरं कृतांजलिपुटोभूत्वाप्रणिपत्यमुनिःस्थितःईश्वरस्तमुवाचायनिःश्वसंतमनंकधा किमागमनकृत्यंतेमदीयसदनंप्रति निश्वासोच्छ्वाससंयुक्तस्तन्मेब्रूहितपोधन ईश्वरस्यवचःश्रुत्वाशिखांसंस्पृश्यपाणिना दुःखयुक्तइवोवाचनारदःकलहप्रियःनारदउवाच यस्मिन्निमित्तमहंदेवमर्त्यलोकात्समागतःत्वदंतिकंदुःखयुक्तस्तच्छृणुष्वजगत्पते दक्षयज्ञमहंद्रष्टुमथदेवाःसमागताःतत्रयज्ञेस्थिताः सर्वेदक्षजामातरःप्रजाः

दृष्टास्तेनचतन्मध्येनदृष्टस्त्वंत्रिलोचनतवावज्ञाकृतातेनदक्षेणापुण्यकर्मणा तेननिश्वाससंयुक्तआगतोस्मित्वदंतिकं
ईश्वरेणविनाकिंचिद्धर्मकार्य्यंनसिध्यति अतोस्यविफलःसर्वःप्रयासःस्वमखंप्रति तस्यतद्भाषितंश्रुत्वानतन्मिथ्येति
चिंतयन् सक्रोधस्तुततोजातईश्वरोजगदीश्वरः गौर्य्यासंप्रार्थितोदेवःश्रुत्वातन्नारदेरितं तस्ययज्ञस्यघातार्थंदेव
देवव्रजाम्यहं इत्युक्तात्वरिताकोपादीश्वरेणनिवारिता जगदीशनमस्तुभ्यंव्रजामिपितृवेश्मनि नारदेनाथसाहि
तागणनाथेनसंयुता यज्ञार्थमागताचैवदक्षद्वारेशिवप्रिया वह्नौदृष्ट्वावसोर्द्धारांलज्जिताचशिवप्रिया तिष्ठतींद्वारितां
दक्षोनददर्शमहासतीं क्षणमेकंचसातिष्ठद्यदादक्षोनपश्यति तदैवंचिंतितंदेव्याजीवितव्यंमयाकथं धाविताकुंड
निकटेहाहाकृत्वाचसाततःवन्हौक्षिप्तंतदागौर्य्याशापंदत्त्वासुदारुणं दृष्ट्वातच्चगणेशेनपाशःपरशुरुद्यतःक्षुब्धोह्य
सौतदात्यर्थंगौर्य्याअर्थेगणाधिपः पाशेनवद्ध्वाकतिचित्कोपान्निहतवान्सुरान् दक्षेणनोदितादेवाःसर्वेयुद्धायनिर्य
युः महद्युद्धमभूत्तत्रसहदेवैर्गणेशितुः तद्दृष्ट्वानारदःशीघ्रंपुनःकैलासमाययौ निवेदयामासचतमुदंतंसर्वमी
श्वरे तच्छ्रुत्वास्फालयामासजटांकोपादुमापतिः ततोजातोतिविकटःपुरुषोरक्तलोचनः सवभाषेमहादेवंस्वा
मिन्नाज्ञांप्रदेहिमे वीरभद्रेतिनामास्यकृत्वाचाज्ञांतमादिशत् दक्षयज्ञविनाशायगच्छवीरेतिसत्वरम् श्रुत्वातदी
श्वरवचः सर्वप्रमथसंवृतः आययौयज्ञसदनमसृग्वह्निषुनिक्षिपन् ततइंद्रादयोदेवास्तद्वधायविनिर्ययुः
क्षणात्पराजितास्तेनविद्रुतास्तेदिशोदश अनुद्रुतांश्चतान्सोपिपूष्णोदंतानपातयत् भगस्यनेत्रेनासांचसहसा
विन्यकृंतत एवंविद्रावितान्सर्वाञ्छिरोयक्षस्यचिच्छिदे कृत्वैवंयज्ञघातंसआजगामाशिवांतिकं नमस्कृत्य
पुरस्तस्थौकृतंकार्यमितिब्रुवन् तथाप्रशांतःकोपोस्ययज्ञात्वैवंज्ञानचक्षुषा प्रसादयितुमीशानंब्रह्मविष्णूसमीयतुः
नमस्कृत्यस्तुतस्ताभ्यांप्रसन्नोभूत्सदाशिवः नारदस्तुंबरुश्चैवगीतैःशिवमतोषयन् प्रसन्नंवीक्ष्यतंविप्रःशिखांसं

स्पृश्यपाणिना ननर्तनारदस्तत्रतोषयन्नाधिकांशिवं एतस्मिन्नंतरेब्रह्माविष्णुश्चप्रमथाधिपं व्यजिज्ञपस्त्वंदक्षादीन्कृपादृष्ट्यावलोकय कृत्तांगान्कुरुपूर्णांगान्मृतान्संजीवयप्रभो विलोकितास्तेदेवेनकृपादृष्ट्याविलोकिताः यथापूर्वं सुराःसर्वैअभूवंस्तत्प्रसादतः उत्थायपादमूलंययौदक्षःपिनाकिनः अपराधंक्षमस्वेतिपुनःपुनरुवाचह उत्थापितः करेणासौततोदक्षःपिनाकिना उक्तश्चमापुनःकार्षीरेवमीशावमाननं विचरस्वसुखेनेतिभूयस्तंकोपआविशत् शशाप चतदागौरींयज्ञविघ्नकरींशिवःयज्ञेविघ्नंकृतवतीदक्षस्यैषाततश्चिरात् तिर्यग्योनिंसमापन्नाविचरिष्यतिभूतले ततो गौरीवभाषेतंप्रणिपत्यसदाशिवं कथंयास्यामितिर्यक्कंभूतलेवास्थितिःकथं अन्यथानैवभविताशापएषत्वयोदितःकोकिलानांस्वरंरूपंनारीरूपंपतिव्रता विद्यारूपंकुरूपाणांक्षमारूपंतपस्विनां अचिरादेवचपुनःकुलेमहतिजन्मनि भूयास्त्वमेवभर्ताचनवियोगश्चनौयतः वरयेत्कुलजांप्राज्ञःकुरूपामपिकन्यकां दुःकुलेयासमुत्पन्नाभर्तुःपातयतेकुलं नदीपातयतेकूलंनारीपातयतेकुलं नारीणांचनदीनांचस्वच्छंदललितागतिःततस्तुष्टोमहादेवश्चक्रेशापविमोचनं दशवर्षसहस्राणिकोकिलारूपधारणी नंदनेदेवविपिनेचरिष्यासि ततःपरं हिमालयसुताभूत्वामत्प्रियात्वमुपैष्यसि देवानांचयथाविष्णुःसहकारोमहीरुहां गंगाचसर्वतीर्थानांभव्यातिर्यक्षुकोकिला आषाढौद्यौयदास्यातांकोकिलायास्तदार्चनं सदायाकुरुतेनारीनसावैधव्यमाप्नुयात् वशिष्ठउवाच एतद्वाक्यावसानेतुगौरीसाकोकिलाभवत् तदाआदिशुचेर्हित्वेकोकिलायाव्रतंशुभं यानारीनैवकुरुतेमोहात्साविधवाभवेत् कुरुत्वमेतत्कल्याणिकीर्तिमालेव्रतंशुभं कीर्तिमालोवाच कथमाराध्यतेगौरीकोकिलारूपधारिणी विधानंब्रूहिमेब्रह्मन्त्वत्प्रसादात्करोम्यहं वसिष्ठउवाच कोकिलाव्रतमाहात्म्यंविधानंचवदाम्यहं शृणुदेविप्रवक्ष्यामिमंत्रैःपौराणिकैर्युतं मलमासेत्वतिक्रांतेशुद्धाषाढेसमागते आषाढ्यांपौर्णमास्यांतुसंध्याकालेह्युपस्थिते संकल्पयेन्मासमेकंश्रावणेप्रतिगृह्यच स्नानंसमाचरे

न्नित्यंब्रह्मचर्यस्थितासती भैक्ष्येनक्तंचभूशय्यांकरिष्येप्राणिनांदयां सौभाग्यधनधान्यादिप्राप्तयेशिवतुष्टये इति सानतवायासंकल्प्यविप्राग्रेनारीविप्रेभ्यएवच प्राप्यानुज्ञांतुसंपाद्यसामग्रींसकलामपि प्रत्यूषेचप्रतिदिनंदंतधावनपूर्वकं नद्यांगत्वाथवाप्यांवातडागेगिरिनिर्झरे स्नानंकरोमिदेवेशिकोकिलेप्रीतयेतव जलेस्मिन्पावनेपुण्येसर्वदेवजलाश्रयेस्नानंकुर्याद्व्रतीदेविसुगंधामलकैस्तिलैः दिनाष्टकंततःपश्चात्सर्वौषध्यापुनःपृथक् ततःपिष्टेनचस्नानंदिनान्यष्टौसमाचरेत् तिलामलकपिष्टेनसर्वौषधियुतेनच षट्दिनानिततःस्नानंसंपूर्णफललिप्सया स्नात्वाध्यात्वारविंतस्मैदद्यादर्घ्यंप्रयत्नतः आदित्यभास्कररवेह्यर्कसूर्यदिवाकर प्रभाकरनमस्तुभ्यंगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यमंत्रः कारयेत्कोकिलांदेवींसौवर्णींसर्वकामदां रौप्यंचरणयोश्चैवनेत्रयोश्चापिमौक्तिकं रत्नानिपंचपृष्ठेतुचूतवृक्षसमाश्रितां अथवातिलपिष्टेनकोकिलांपक्षिरूपिणीं निधायताम्रपात्रेतांपूजयेत्सुसमाहिता उपचारैःषोडशभिर्यथावत्तन्निबोधय आवाहयामित्वांदेवींकोकिलारूपधारिणीं अवतारंकुरुष्वात्रप्रसादंकुरुसुव्रते आवाहनं आगच्छकोकिलेदेविदेहिमेखिलवांछितं चूतवृक्षंसमारुह्यरमसेनंदनेवने आसनं तिर्यग्योनिसमुद्भूतेकोकिलेकलकंठके तिलपुष्पाक्षतैरर्घ्यंगृहाणत्वंनमोस्तुते अर्घ्यं आषाढस्यसितेपक्षेमेघवर्णस्वरूपिणि कोकिलेनामत्वंदेविस्नानीयंप्रतिगृह्यतां स्नानं कोकिलेकलकंठेचमाधवेमधुरस्वरे वसंतवससेदेविवस्त्रंचप्रतिगृह्यतां वस्त्रं श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरं विलेपनंमयादत्तंप्रीत्यर्थंप्रतिगृह्यतां गंधं हरिद्राकुंकुमद्रव्यैःकोकिलेकामसंभवे कुंकुमेनार्चितासित्वमतःशांतिंप्रयच्छमे हरिद्रा कृष्णशुक्लंचरक्तंवावासांसिविविधानिच पीतवस्त्रप्रदानेनप्रीताःस्युःसर्वदेवताः वस्त्रयुग्मं शतपत्रैर्जातिपुष्पैश्चंपकैर्मरुपत्रकैः पाटलैश्चैवदूर्वाभिर्युतंपुष्पंगृहाणमे इतिपुष्पं वनस्पत्युद्भवइतिधूपं आज्यंसहार्तिसंयुक्तमितिदीपं सर्वभक्ष्यसमायुक्तंरसैःसर्वैःसमन्वितं सर्वदेवसमाहारं नैवेद्यं प्रतिगृ

ह्यतामितिनैवेद्यं कूष्मांडैर्नारिकेलैश्चखर्जूरैर्दाडिमीफलैः चूतजंबीरजंबूभिःश्रीफलामलकैस्तथा द्राक्षाबादामबदरैर्मातुलुंगैः सशर्करैः फलानि नागवल्लीदलंशुद्धंकर्पूरैलासमन्वितं पूगीफलंसखदिरंतांबूलंप्रतिगृह्यतां तांबूलं हिरण्यगर्भमितिदक्षिणा भिन्नानिकंठसूत्राणिदद्यादपिदिनेदिने कुंकुमंपुष्पतांबूलमक्षतांश्चादिनेदिने कुर्यादेवंविधां त्रपूजांश्रावण्यांतच्च सुव्रती विसर्जयेत्तुपश्चात्तांसौवर्णींकोकिलांयदि यदातुतिलपिष्टस्याक्रियतेकोकिलायदि कुर्यात्तुप्रत्यहंपूजांभिन्नायास्तुविसर्जनं रम्यंवनंसमागत्यश्रुत्वाकोकिलकूजितं यदानश्रूयतेशब्दउपवासस्तुतद्दिने कोकिलेकृष्णवर्णेचसदावासोवनेषुते सौभाग्यमतुलंदेहिगृहाणार्घ्यंनमोस्तुते इत्यर्घंदत्वाविसर्जनं तत्रमंत्रः देवि चैत्ररथोत्पन्नेविंध्यपर्वतवासिनि गच्छगच्छमहादुर्गेस्वस्थानेनंदनेवने प्रार्थना नमस्कारमंत्रः रूपंदेहिधनं देहिसर्वसौख्यंचदेहिमे पुत्रान्देहियशोदेहिसौभाग्यंदेहिसंपदः इत्युक्त्वाततःपश्चाद्धविष्यान्नेनसुव्रती नक्तभोजीभवेत्तावद्यावन्मासःसमाप्यते मासांतेताम्रपात्रेतुकोकिलांस्वर्णनिर्मितां वस्त्रधान्यगुडैर्युक्तांश्रावण्यांकुंडलं तथा दद्यात्सदक्षिणांचापिदैवज्ञेवापुरोहिते एवमाषाढमासस्यद्वैविध्येसमुपस्थिते सधवाविधवावापियानारी कोकिलाव्रतं करोतिसप्तजन्मानिसौभाग्यंलभतेतुसा मृतागौरीपुरंयातिविमानेनार्कतेजसा भविष्योत्तरे श्री कृष्णउवाच एतद्व्रतंवसिष्ठेनमुनिनाकथितंपुरा तयाकृतंसुतत्सर्वंविधिनाकीर्तिमालया तस्याःसर्वंचनिष्पन्नं वसिष्ठवचनंयथा एवमन्यापिकौंतेयकोकिलाव्रतमुत्तमम् करिष्यतिततस्तस्याःसौभाग्यंचभविष्यति आषाढौद्वौ यदास्यातांकोकिलाव्रतमाचरेत् नकरोतियदानारीव्यालीभवतिकानने एकतःसर्वदानानिकोकिलाव्रतमेकतः कृतंपुराप्सरोभिश्चऋषिपत्नीभिरादरात् अहल्ययाचसंस्नात्वाकृत्वाशापविमुक्तये अरुंधत्यासदास्नात्वापूजिता कोकिलानृप सीतयापूजितासापिसर्वकामार्थासिद्धये गौतम्यांदंडकारण्येस्नानंकृत्वायथाविधि नलान्वेषणकामाय

दमयंत्याचपूजिता रुक्मिण्याचततःस्नात्वापूजिताकोकिलाशिवा विष्णोःपत्युरवाप्त्यर्थं तच्चजातंनसंशयः कुचैलामलिनादीनापरकर्मरतातथा एवंवंध्याकाकवंध्याकन्यावत्साविवत्सकाः सर्वास्ताःफलभाजः स्युरत्र तस्यास्यप्रभावतः आयुरारोग्यमैश्वर्य्यंसुखवृद्धिंयशःसुतान् सौभाग्यंसुंदरंरूपंनारीप्राप्नोतिनान्यथा एवं व्रतंमयाख्यातंकार्य्यंवारत्रयंनृप तृतीयांतेचविधिवत्कार्य्यमुद्यापनंशुभं एकस्माज्जायतेद्रव्यंद्वितीयाल्लभतेसुतान् तृतीयाच्चापिसौभाग्यंप्राप्नुयान्नात्रसंशयः ॥ इतिवाराह कोकिलाव्रतम् ॥ अथोद्यापनं भविष्योत्तरे युधिष्ठिरउवाच उद्यापनविधिंब्रूहिव्रतस्यास्यममप्रभो येनविज्ञातमात्रेणसौभाग्यंचभविष्यति ॥ श्रीकृष्णउवाच ॥ श्रावण्यांपौर्णमास्यांतुशुक्लपक्षेविशेषतः द्वितीयायामेकभक्तंदंतधावनपूर्वकम् उपवासस्यनियमं कर्तुंव्रतपरायणं तृतीयापुण्यफलदामध्याह्नेसमुपोषिता उपलिप्यशुचौदेशेमंडलंतत्रकारयेत् लिखेदष्टदलंपद्मंचतुष्कोणोपशोभितम् सप्तधान्यभृतंपात्रंप्रस्थेनैकेनपूरितं तदभावेतदर्द्धंवाकुडवेनाथपाण्डव ऊर्णपट्टंकृष्णवर्णंयुग्मंदद्यात्स्वशक्तितः तस्योपरिन्यसेद्देवींकोकिलांपूजयेत्ततः अन्नगंधप्रदानेनधूपदीपप्रदानकं नैवेद्यंमोदकाद्यंचपक्वान्नंसघृतंवहु अर्घ्यंचैवप्रदातव्यंतांबूलंफलमुत्तमं रात्रौजागरणंकार्यंवाद्यनृत्यसमन्वितं पूजयित्वैकचित्तेनफलंप्राप्नोतिचाक्षयं प्रभातेविमलेजातेस्नानंकृत्वाविधानतः नित्यंनिर्वर्त्यविधिवद्धोमंचविधिनाद्विजः तिलपंचकपुष्पैश्चतंडुलैर्घृतपायसैः अष्टोत्तरशतंहुत्वादुर्गामंत्रैश्चवैदिकैः कोकिलाप्रीतयेतद्वद्व्याहुतीनांशतत्रयं ब्राह्मणान्भोजयेत्पश्चात्सपत्नीकांश्चपंचच अशक्तोह्येकयुग्मंचभोजयेच्चतथागुरुं स्त्रीभ्यश्चैवप्रदातव्याःकरकाःपंचचैवतु मोदकाश्चससूत्राश्चवंशपात्रसमन्विताः कृष्णवर्णसमायुक्ताःपक्वान्नेनैवपूरयेत् सर्वोपस्करसंयुक्तंत्रिस्त्रीभ्यश्चप्रदापयेत् आचार्य्यंपूजयेद्भक्त्यागांकृष्णांचसवत्सकां उपानहौतथाशय्यांचामरंछत्रमेवच

मुद्रिकाकर्णवेष्टौचचंदनंकुसुमान्वितं सर्वंदद्याद्द्विजेंद्रायसपत्नीकायवैद्विजः दापयेद्विधिवत्सर्वंब्राह्मणायकुटुंविने व्रतोपदेष्ट्रेदानंचभोजनंचसदक्षिणं एवंयाकुरुतेराजन्कोकिलाव्रतमुत्तमं सर्वंप्राप्नोतिसौभाग्यंपुत्रधान्यधनानिच ततोभुंजीतनैवेद्यंपुत्रपौत्रसमन्वितः कोकिलेपूजितागच्छविधिवत्सर्वकामदे कारयेत्कोकिलांदेवींसौवर्णींसर्वकामदां रौप्यंचरणयोश्चैवनेत्रयोश्चापिमौक्तिकं पंचरत्नानिपृष्ठेचचूतवृक्षसमाश्रितां एवंचैवयथापूज्ययथोक्तविधिनाशनैः विप्रहस्तेर्पितालक्ष्मीःस्वंस्वभावमिदंशृणु महाक्रममवाप्नोतिमहामायाप्रसादतः ॥

इतिश्रीनारदीयेकोकिलाव्रतोद्यापनम् ॥

अस्याअकरणेप्रत्यवायोऽयोध्याकांडेभरतेनोक्तः आषाढीकार्त्तिकीमाघीतिथयोतीवपुण्यदाः अप्रदानवतोयांतुयस्यार्योनुमतेगतः अथास्योद्यापनेसंक्षिप्तप्रयोगः कौमुद्यां पूर्वोक्तसंकल्पांतेयथोक्तफलप्राप्त्यर्थमाचरितकोकिलाव्रतोद्यापनंकरिष्ये तत्रादावाचार्यवरणंविधाय एकलिंगतोभद्रेब्रह्मादिदेवताःसंस्थाप्य तदुपरिप्रस्थपरिमितसप्तधान्यपुंजोपरि ताम्रपात्रे कृष्णोर्णवस्त्रयुग्मवेष्टितं कलशंप्रतिष्ठाप्य तदुपरि एकविंशतिवंधात्मकं तिलपूर्णंवंशपात्रंनिधाय तत्रपूर्वोक्तलक्षणांहैमींकोकिलांगौरीमिमायमंत्रेणप्रतिष्ठाप्यपूर्वोक्तप्रकारेणपूजयेत् रात्रौजागरणं कृत्वा प्रातः अग्निं प्रतिष्ठाप्य अन्वादध्यात् कोकिलारूपिणींगौरीं गौरीमिमायेतिमंत्रेण तिलपंचकपुष्पतंडुलपायसाज्यद्रव्यैः प्रत्येकमष्टोत्तरशतसंख्याकाहुतिभिस्तथाव्याहृतिमंत्रेण विल्वपत्रैः शतत्रयपरिमिताहुतिभिर्ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये एवंहोमंसंपाद्यपंचमिथुनानिसंपूज्य अशक्तौद्वयं तेभ्योगुडतैलमिश्रितपक्वान्नपूरितकरकयुतं सौभाग्यद्रव्यदक्षिणान्वितं वंशपात्रस्थकृष्णोर्णवस्त्रेणवेष्टितं वायनंदद्यात् तत्रमंत्रः देविचैत्ररथोत्पन्नेविंध्यपर्वतवासिनि अर्चितापूजितासित्वंकोकिलेहरवल्लभे कोकिलेकलकंठासिमाधवे

275

मधुरस्वरे वसंतेवससेदेवि गच्छत्वंनंदनंवनंइतिमंत्रेणविसर्जयेत् ततःसदन्नेनब्राह्मणान्संतोष्य आचार्याय कोकिलाप्रतिमांसोपस्करांशय्यांगांचदत्त्वा भूरिदानेनान्यानपि संतोष्याशिषोगृह्णीयादिति कोकिलाव्रतोद्यापनं अस्यामेवांविकाव्रतं ब्रह्मपुराणे आषाढस्यपौर्णमास्यांयोर्चयेदंविकांनरः सोपवासोमहाभागसयातिपरमांगतिं सोपवासःकृतोपवासःपरमगतिर्मोक्षः अत्राशिवपूजोक्ताभविष्यपुराणे आषाढस्यपौर्णमास्यांविधिवत्पूजयेच्छिवं सोश्वमेधमवाप्नोतिविष्णुलोकेमहीयते अत्राभियुक्ताः पठंति शुचिसितदिनकरवारेकरमूलेवद्धमूलस्य नागारेरिवनागाः प्रयांतिकिलदूरतस्तस्य तथा आर्द्रायाःप्रथमेपादेक्षीरमश्नातियोनरः अपिरोषान्वितस्तस्यतक्षकःकिंकरिष्यति क्षीरंपरमान्नमश्नात्ययंवेलादितिव्रतिहस्तकाः तथा मूलंतंडुलवारिणापिवतियः प्रत्यंगिरासंभवं निष्पिष्टंशुचिभद्रयोगदिवसेतस्याहिभीतिःकुतः कुर्य्याद्देवयदाफणीदशतितंमोहान्वितोभूलयं स्थानंतेनसएवयातिनियतंचक्रंयमस्याचिरात् शुचिराषाढःप्रत्यंगिराशिरीषः अत्रविश्वेदेवपूजोक्ताब्रह्मपुराणे आषाढंयतेवैश्वदेवेनक्षत्रेसतिशोभने दशतान्पूजयेत्तत्र विश्वेदेवान्महावलान् वैश्वदेवंउत्तराषाढानक्षत्रंतेचदश क्रतुर्दक्षोवसुः सत्यःकालःकामस्तथैवच धुरिश्चलोचनश्चैवतथाचैवपुरूरवाः आश्रवश्चदशैतेतु विश्वेदेवाःप्रकीर्तिताः इतिवृहस्पत्युक्तेः भविष्यराणे आषाढ्यांस्नानपूजेच श्रावण्यांसततंनरः आषढ्यामथकार्तिक्यांमाघ्यांप्राश्यचपादपान्पजयेत्पितृपूर्वंतुदत्तमक्षयमुच्यतेइति अत्रविष्णुपुराणदानमुक्तं नारदीये एतद्विष्णुपुराणंतुसर्वशास्त्रार्थसंग्रहः वाराहकल्पवृत्तांतंव्यासेनकथितंत्विह योनरःपठतेभक्त्यायःशृणोतिचसादरं तावुभौविष्णुलोकंतुव्रजेतांभुक्तभौमकौ तल्लिखित्वाचयोदद्यादाषाढ्यांघृतधेनुना सततंविष्णुभक्तायपुराणार्थविदेद्विज सयातिवैष्णवंधामविमानेनार्कवर्चसाइति घृतधेनुदानंविष्णुधर्मोत्तरेज्ञेयम् अस्यांशिवशयनमुक्तं हेमाद्रौवामनपुराणे पौर्णमास्यामुमा

नाथः स्वपतेचर्मसंस्तरे वैयाघ्रेचजटाभारंसमुद्रूथ्याहिवर्षमणेति इयंरुद्रव्रतत्वात्पूर्वविद्धाग्राह्या अत्र विष्णुशयनमप्युक्तं प्रागेकादशीप्रकरणे अत्रैव आषाढीशयात्रापूजाचोक्ताकाशीखंडे उदीच्यांभारभूतेशमाढीशंसमर्चयेत् आषाढ्यांपंचदश्यांवैनपापैःपरितप्यते कृत्वासांवत्सरींयात्रामनेनाजायतेनरइति अस्यांकिंचिद्दानंकार्यमाषाढी कार्तिकीत्यादिनावैशाखीप्रकरणेद्रष्टव्यम् अस्यामेवशिवपवित्रारोपणमुक्तं हेमाद्रौ शिवधर्मपुराणभविष्ययोः पौर्णमास्यांतथाषाढ्यांशिवंसंपूज्ययत्नतः उपवीतंशिवेदद्याच्छिवभक्तांश्चपूजयेत् पुनरेवचकार्तिक्यांपूज्यशंभुं क्षमापयेत् यतिभ्योदक्षिणांदद्यात्सूत्रवस्त्रादिपूर्वकं यः कुर्यात्सकृदप्येवंचातुर्मास्येपवित्रकं कल्पकोटिशतं दिव्यंरुद्रलोकेमहीयतइति अत्रैवकालांतरविधिपूर्वकनित्यत्वमुक्तंकालांतरे आषाढ्यंतेचतुर्दश्यांनभस्यनभसोस्तथा अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोःसमं पवित्रारोपणंकार्यंसप्तम्यांचाधिवासनपूर्वकं गंधपवित्रारोपणं शिवेकार्यं पौर्णमास्यामनुष्ठानपक्षेचतुर्दश्यामष्टम्यांवाचाधिवासनंकार्यं सप्तम्यांवात्रयोदश्यांतत्रगंधपवित्रकमितिहेमाद्रिवचनात् पवित्रारोपणंशंभोःकुर्यान्नभसिवाशुचौ चतुर्दश्यामथाष्टम्यामधिवास्यविधानतः श्रावणेप्रौष्ठपद्यांचपवित्रारोपणंतुयः कुरुतेनापवित्रः स्यात्सतुसंवत्सरंनरइति शिवरहस्यवचनाच्च पवित्रारोपणंशुचौ आषाढ्यामधिमासत्वेतत्रनेदंकार्यं आषाढेतुनकर्तव्यंसुप्तेदेवेजनार्दन इतिवचसातदभिप्रायेणनिबंधकृद्भिः प्रत्याख्यानात् उक्तमासत्रयं तदकरणे कन्यागतेऽपि सूर्ये तत्कार्यं उक्तमासत्रये यस्तुनकुर्यात्सूत्ररोहणं असौकन्यागतेभानौ यथादक्षाणुनाकृतं कुर्यात्पवित्रंशंभोस्तु तुलायांनकथंचनेतिवचनाद्दक्षाणुना अघोरमंत्रेणेति व्याख्यातं हेमाद्रिणा सहकालासंभवेसद्योपितत्कर्तव्यं यद्वातदैवकर्तव्यं यदिप्रत्यग्रतयातदागोदोहांतरितंकृत्वासाधिवासिकंपवित्रकमितिवचनांतरात् मंत्रातिरिक्तविधिस्तु

विष्णुपवित्रारोपणवद्बोध्यः अस्यामेवपौर्णमास्यांसंन्यासिनामौत्सर्गिकसंचरणेचातुर्मास्यगतापवादस्य परिपालन संकल्पांगत्वेनक्षौरंव्यासपूजादिकंविहितं उत्सर्गशास्त्रंचाह श्वेताश्वतरीये एकरात्रंवसेद्ग्रामे पत्तनेतुदिनत्रयं पुरेदिनद्वयंभिक्षुर्नगरेपंचरात्रकम् वर्षास्वेकत्र तिष्ठेतस्थानेपुण्यजनाश्रिते आत्मवत्सर्वभूतानिपश्यन्भिक्षुश्चरेन्महीमिति अरुणस्मृतौ वर्षासुध्रुवशीलस्तुमाःस्वेकाकीयतिश्चरेत् द्वावेवाचरेदिति अत्रवर्षासुमाःस्विति कार्त्तिकांताश्चत्वारो मासाउच्यंते द्वाविति द्वयोर्वाश्रावणभाद्रपदयोरित्यर्थः ध्रुवशीलः एकस्थिरः चरेदिति भिक्षाटनाद्यनुवादः मेधातिथिः आषाढ्यांपौर्णमास्यांचकारयेद्वपनंयतिः चातुर्मासस्यमध्येतुवर्जयेद्वपनंयतिरिति तथाच वपनांतेतुपुनःस्नानमद्भिर्द्वादशभिर्यतिरिति द्वादश्यांचप्रकुर्वीतक्षौरांतेप्राणसंयमानिति अत्रिः वपनानंतरंस्नात्वापूजयेत्पुरुषोत्तममिति यतिधर्मसमुच्चये देवंकृष्णंमुनिंव्यासंभाष्यकारंगुरोर्गृहं गुरुदेवगणाध्यक्षंदुर्गांदेवींसरस्वतीं गणंगणेशंअध्यक्षंक्षेत्रपालं अत्रक्षौरादिसंकल्पकर्मणि औदायिकीत्रिमुहूर्तापूर्णिमाग्राह्या त्रिमुहूर्ताधिकंग्राह्यंपर्वक्षौरप्रणामयोरित्यभियुक्तोक्तेः कृत्यरत्नावल्यादौतु मध्याह्नव्यापिनीग्राह्यादिनद्वयेतादृशीचेत्परैवेत्युक्तं केनापिप्रणिधानेन पौर्णमास्या अस्यसंकल्पविधेरसंभवेद्वादश्यामेवानुष्ठेयं द्वादश्यांपौर्णमास्यांवाकुर्यात्संकल्पमात्मविदित्यादिवचनादिति अथव्यासपूजाविधिरुच्यते आषाढपौर्णमास्यांयतिः प्रातरुत्थायमृच्छौचादिकृत्वा अष्टोत्तरशतस्नानपूर्वकक्षौरस्नानसंध्यादिपर्वतर्पणांतंकार्यं ततोव्यासपूजास्थापनांगत्वेन हस्तौपादौप्रक्षाल्यप्राणायामंच कृत्वा ब्राह्मणैःसहतिथ्यादिसंकीर्त्यव्यासपूजांकरिष्येइतिसंकल्प्य श्रीपर्णीवृक्षपीठंनिधाय तदुपरि सदशं धौतवस्त्रंनिस्सार्य्य तत्रसंन्यासपीठंगंधादिनालिखेत् तत्रायंक्रमः प्रागायताद्वादशरेखा उदगायताउदक्संस्थाद्वादशरेखालिखेत्ततःपृथिव्यामेरुपृष्ठऋषिःसुतलंछंदः कूर्मोदेवता आसनोपवेशनेविनियोगःपृथ्वित्वेतिपठित्वाआधारश

व्र०१० आषाढ २८

क्त्येनमः वेदव्यासायनमः अनंतायनमः इत्यासनमावाह्य पूर्वेरक्षतुगोविंदोह्याग्नेय्यांगरुडध्वजः याम्यांरक्षतुवाराहोनारासिंहस्तुनैर्ऋते केशवोवारुणींरक्षेद्वायव्यांमधुसूदनः उत्तरेश्रीधरोरक्षेदैशान्यांतुगदाधरः ऊर्ध्वगोवर्द्धनधरोह्यधस्तात्तुमहीधरः इतिदिग्वंधः प्राणायामत्रयंकृत्वांगकरन्यासौकृत्वा प्रणवस्यऋष्यादिस्मृत्वा पादादिन्यासध्यानंकृत्वा सलिलंस्पृशेत् आधारशक्तिमारभ्य साक्षतपुष्पैः पीठदेवताआवाहयेत् आधारशक्त्येनमः वैराग्यायनमःऐश्वर्य्यायनमःवेदव्यासायनमः अनंतायनमः वराहायनमः पृथिव्यैनमः रत्नदीपायनमः रत्नप्रासादायनमः दिव्यसिंहासनायनमः धर्मायनमः ज्ञानायनमः वैराग्यायनमः ऐश्वर्य्यायनमः अधर्मायनमः अज्ञानायनमः अवैराग्यायनमः अनैश्वर्य्यायनमः संसत्त्ववोधात्मनेनमः रंरजसेप्रकृत्यात्मनेनमः तंतमसेसोमात्मनेनमः ऊंमूलायनमः कंदायनमः ऊंनालायनमः पद्माय. पत्रेभ्यो- केसरेभ्यो. कर्णिकायै. द्वादशकलात्मनेसूर्य्याय. षोडशकलात्मनेसोमाय. दशकलात्मनेअग्निमंडलाय.आत्मने. अंतरात्मनेनम इतिपीठदेवताआवाह्य ततोमुख्यदेवताऽऽवाहनं तत्रक्रमः गंगणपतये दुंदुर्गायै क्षंक्षेत्रपालाय इंइंद्राय संसरस्वत्यै. निंनिर्ऋतये- इत्याग्नेयवायव्यैशाननैर्ऋत्यकोणेषुस्थापयेत् मध्येश्रीकृष्णायंकृष्णपूर्वे वासुदेवाय- दक्षिणेसंकर्षणायनमः पश्चिमेप्रद्युम्नाय- उत्तरेअनिरुद्धाय- इतिकृष्णपंचकम् कृष्णदक्षिणभागेव्यासपंचकंसंस्थाप्य मध्येवेदव्यासाय. व्यासपूर्वेसुमंतवे व्यासदक्षिणेजैमिनये व्यासपश्चिमेवैशंपायनायनमः व्यासोत्तरेपैलाय- इतिव्यासपंचकन्या- कृष्णवामभागेशंकराचार्यपंचकम्. मध्येशंकराचार्य्येभ्योनमः पूर्वेविश्वरूपाचार्येभ्यो-दक्षिणपद्मपादाचार्येभ्यो- पश्चिमेहस्तामलकाचार्येभ्यो. उत्तरेत्रोटकाचार्येभ्योनमः इतिशंकराचार्यपंचकमावाह्य कृष्णपार्श्वयोर्ब्रह्मरुद्रौ पश्चिमादौ सनकादीन्स्थाप्य सनकायनमः सनंदनायनमः सनातनायनमः

सनत्कुमारायनमः सनत्सुजातायनमः पंपरमगुरुभ्योनमः पंपरमेष्ठिगुरुभ्योनमः अन्यांश्च ब्रह्मविद्याचार्य्यान्पूजयेत् तेच ब्रह्मब्रह्मावसिष्ठश्चशक्तिश्चैवपराशरः व्यासःशुकोगौडपादोगोविन्दस्वामिशंकरः इडविडाचार्य्येभ्योनमः समस्तब्रह्मविद्यासंप्रदायप्रवर्तकाचार्य्येभ्योनमः तत इंद्रादिदिक्पालान् स्वस्वस्थाने स्थापयेत् तत्रायंक्रमः पूर्वे इंद्रायनमः अग्नये नमः यमायनमः निर्ऋतयेनमः वरुणायनमः वायवेनमः सोमायनमः ईशानायनमः ब्रह्मणेनमः अनंतायनमः आत्मनेनमः अंतरात्मनेनमः परमात्मनेनम इतिदिक्पालानावाह्य ग्रहान्वैप्रतिष्ठाप्य ततस्तुमित्रावरुणौ ततःषोडशोपचारैर्वेदमंत्रैःपूजयेत् सहस्रशीर्षेतिषोडशर्चस्य नारायणऋषिः पुरुषोदेवता अनुष्टुप्छंदः अंत्यात्रिष्टुप्षोडशोपचारपूजायांविनियोगः सहस्रशीर्षेत्यावाहनं पुरुषएवेत्यासनं एतावानस्येतिपाद्यं. त्रिपादूर्ध्वमित्यर्घ्य- तस्माद्विराडित्याचमनं आप्यायस्वेतिमंत्रैःपंचामृतं यत्पुरुषेणेतिस्नानं तंयज्ञमितिवस्त्र. तस्माद्यज्ञात्सर्वहुतःसंभृतमितियज्ञोपवीतं. हिरण्यरूपइत्यलंकारान् तस्माद्यज्ञात्सर्वहुत ऋचःसामानीतिअक्षताः तस्मादश्वेतिपुष्पाणि. परिमलद्रव्यम् यत्पुरुषंव्यदधुरितिधूपं ब्राह्मणोस्येतिदीपं चंद्रमामनसइतिनैवेद्यम् मध्येपानीयं उत्तरापोशानंकरोमीत्युद्वर्तनम् नाभ्याआसीदितिफलम् तांबूलंच सप्तास्यासन्नितिदक्षिणा नीराजनंच यज्ञेनयज्ञमितिमंत्रपुष्पं अथवा सर्वानेव तत्तन्नाम्नायतिःपूजयेत् पश्चाद्दंतकाष्ठवस्त्रचंदनोदकचदद्यात् व्यासयुक्तानिमान्सर्वान्पूजयेच्चयथाक्रमं॥

अथपुष्पांजलिः लक्ष्मीकलत्रंललिताब्जनेत्रंपूर्णेंदुवक्त्रंपुरुहूतमित्रं कारुण्यपात्रंकमनीयगात्रंवंदेपवित्रंवसुदेवपुत्रम् १ ॐनमोभगवतेवासुदेवाय शुद्धबुद्धस्वरूपिणे हिरण्यरेतसेतुभ्यंप्राधान्यबलरूपिणे २ नमोस्त्वनंताय नीलोत्पलदलश्यामंपीतांबरधरंहरिम् शंखचक्रगदापद्मधारिणंप्रणमाम्यहम् १ इतिवैशंपायनपुष्पांजलि.

सर्वशास्त्रार्थतत्त्वज्ञंपरमानंदरूपिणम् ब्रह्माणंशंकराचार्य्यंप्रणमामिविवेकिनम् २ परात्परतरंशांतंयोगींद्रंयोगिसेवितं शांतेंद्रियंजितक्रोधसाशिष्यंप्रणमाम्यहं इतिशंकराचार्य्यपुष्पांजलिः पदेपदेमहापापसंघान्हंत्यसकृत्कृतान् प्रदक्षिणांतांमद्भक्त्यागृहाणजगदीश्वर इतिप्रदक्षिणा ततःपूर्वासनोपरिस्थित्वानमस्कारंकुर्य्यात् व्यक्ताव्यक्तंस्थूलसूक्ष्मंनिर्गुणंसगुणंशुभम् विश्वव्यापिनमीशानंवंदेदेवंरमापतिम् १ इतिनमस्कारः उद्भिज्जैरंडजैर्वापिप्राणिभिर्व्याप्यतेमही सूक्ष्मासूक्ष्मैर्व्यक्तियुक्तैर्नानारूपैःसमंततः एतेषांरक्षणायाहमापाद्यादिवसान्यतः असतिप्रतिबंधेतुमासान्वैवार्षिकानिह निवसामीतिसंकल्प्यमनसाविधिपूर्वकं वाचिकसंकल्पेसंन्यासिवक्तव्यान्मंत्रानाहात्रिः माधवश्चतुरोमासान्सर्वभूतहितायवै निद्रांयास्यतिशेषांकेलक्ष्म्यासहजगत्पतिः सुप्तश्चैवोस्थितोयावन्नभवेत्ससनातन. अहंतावन्निवत्स्यामिसर्वभूतहितायवै १ इदंव्रतंमयादेवगृहीतंपुरतस्तव निर्विघ्नासिद्धिमायातुप्रसादात्तेरमापते २ प्रावृट्कालेतुप्रायेणप्राणिभिर्व्याप्यतेमही स्थास्यामिचतुरोमासानतस्तेषांहितायवै ३ स्थापयिष्यामिशेषांकेलक्ष्म्यासहजगत्पतिं शेषपर्यंकवर्येस्मिन्फणामणिगणान्विते श्वेतद्वीपतटेचैवकुरुनिद्रांजगत्पते ४ सुप्तेत्वयिजगन्नाथेजगत्सुप्तंभवेद्भुवि विबुद्धेचविबुद्ध्येतप्रसन्नोमेभवाव्यय श्वेतद्वीपेयोगिनाथभोगिनाथेस्थितेत्वयि चातुर्मास्यव्रतानुज्ञांदेहिलक्ष्मीपतेनमः चतुरोवार्षिकान्मासान्देवस्योत्थापनावधि इतिचातुर्मास्यसंकल्पः ततउक्तवंतंयतिंब्रूयुः पार्श्वस्थायेद्विजातयः निवसंतुसुखेनात्रगमिष्यामःकृतार्थतां दर्शनात्सहवासाच्चभाषणादभिवंदनात् भिक्षादानाद्वस्त्रदानाद्गमिष्यामःकृतार्थतां त्वयिभुक्तेजगन्नाथे भुक्तोभवतिसर्वदा त्वयिसुप्तेदेवगणाःसंतोषंयांतिसर्वदा अतोभवद्भिःस्थातव्यंचातुर्मास्यव्रतावधि शुश्रूषांवःयथाशक्तिकरिष्यामोह्यहर्निशं गृहस्थैःप्रार्थितोभिक्षुरेवंस्थास्यामीतिप्रतिवदेत् ततोयतिःयस्यस्मृत्येतिपठित्वा अनेनपरमेश्वरः प्रीयतामितिवदेत् ततोगृहस्थैरासन.

कौपीनांतर्वासोवहिर्वासः प्रावरणीयवस्त्रैर्गंधाक्षतपुष्पधूपदीपखाद्यनैवेद्य फलनीराजनमंत्रपुष्पप्रदक्षिणा नम
स्कारैर्यतिस्तोषणीयः पूजानिवेदनंकृत्वाब्राह्मणान्संपूज्ययथाशक्तिदक्षिणांदत्त्वा श्रीपरमेश्वरःप्रीयतामितियथाश
क्तिब्राह्मणान्भोजयेत् इतिगृहस्थधर्माःप्राग्वृष्टेर्मृदमादायशुद्धांकंचिदपीडयन् प्राग्वृष्टेर्ज्यैष्ठाषाढमासयोः एवंमृ
त्तिकासंग्रहोदंतकाष्ठदंडोदकपात्रादिकसंग्रहप्रदर्शनार्थः तस्यसर्वस्यसमानत्वात् स्मरन्यज्ञेश्वरंविष्णुंवामनंक्रोड
रूपिणं येनोद्धृतासिदेवित्वंक्रोडरूपेणदंष्ट्रया त्वयासहसमायातुकेशवोधरणीधरः इतिमृत्संग्रहः इतिशंकराचा
र्यकृताव्यासपूजासमाप्ता॥ ॥ * अस्यामेवगजपूजोक्ताव्रतहेमाद्रौ एवमस्त्वितिदेवेशस्तमुवाचमतंगजं आ
षाढ्यांचतथाभाद्र्यांसमभ्यर्च्यगजाधिपं तवपूजांकरिष्यंतिदत्ताह्येषोवरस्तवेति तद्विधिस्तु तत्रैवद्रष्टव्यः विस्तरभ
यान्नेहप्रतन्यते इयंमन्वादिः अस्यामेवदिग्विशेषेवायुसंचारेफलविशेषउक्तोज्योतिःशास्त्रे आषाढ्यांभास्करास्ते
सुरपातिनिलयेवातिवातेसुवृष्टिः सस्यार्द्धंसंप्रकुर्य्याद्यदिदहनदिशिमंदवृष्टिर्यमेन नैर्ऋत्येसस्यनाशोवरुणादिशि
जलंवायुकोणेप्रवायुः कौबेर्य्यांसस्यपूर्णासकलवसुमतीतद्वदीशानवायौ १ अत्रनक्षत्रयोगवशादपिफलविशेष
उक्तःसंहितायां आषाढपूर्णिमायांतुयन्नक्षत्रंविचारयेत् पूर्वाषाढेसुभिक्षंस्यान्मूलेदुर्भिक्षमुच्चकैः उत्तराषाढकेश्वा
नांपीडाकटकसंहतिरिति अस्यांविष्णुपुराणदानं तल्लिखित्वाचयोदद्यादाषाढ्यांघृतधेनुनेत्युक्तम् घृतधेनुदानंवि
ष्णुधर्मोत्तरे तिलाभावेतथादद्याद्घृतधेनुंप्रयत्नतः वासुदेवंजगन्नाथंघृतक्षीराभिषेचनैः संपूज्यपूर्ववत्पुष्पैर्गंधधू
पादिभिर्नरः अहोरात्रोषितोनाम्नाअभिपूज्यघृतार्चिषं गव्यसर्पिषःकुंभंपुष्पमालाविभूषितं कांस्योपधानसं
युक्तंसितवस्त्रयुगेनच हिरण्यगर्भसहितंमणिविद्रुममौक्तिकैः कु [illegible]लसहस्रपरिमाणोवादशपलादिकानिपंचश
तपलानिवाकुंभः इक्षुयष्टिमयान्पादान्खुरान्रौप्यमयांस्तथा सौवर्णेचाक्षिणीकुर्य्यात् शृंगेचागुरुकाष्ठजे स

सधान्यमयेपार्श्वेपञ्चोर्णैनचकंवलम् पत्रोर्णधौतकौशेयं कुर्यात्तुरुष्ककर्पूरैर्घ्राणंफलमयान्स्तनान् तुरष्कःसिल्हकंशिलारसइतियावत् पुच्छंक्षौममयंकार्यैरोमाणिसितसर्षपैः ताम्रपृष्ठंविचित्रंतुईदृक्रूपांमनोहरां विधिनाकृतवत्सांचकुर्याल्लक्षणलक्षितां एवंकृत्वातथानत्वापूजयित्वाविधानतः तद्भक्तायप्रदातव्यामंगलाशास्त्रपारगे एतांमयोपकारायगृहाणत्वंद्विजोत्तम प्रीयतांममदेवेशोघृतार्चिःपुरुषोत्तमः इत्युदाहृत्यविप्रायदद्याद्धेनुंनराधिप स्कांदेत्वयंमंत्रः घृतमग्निश्चदेवाश्चघृतंमेदीयतामितिफलं घृतक्षीरवहानद्योयत्रपायसकर्दमाः त्रिषुलोकेषुसर्वेषुसुखभागीभवेन्नरः सकामानांत्वियंव्युष्टिः कथितानृपसत्तम व्युष्टिःफलं विष्णुलोकंनरोयातिनिष्कामायदिदीयते इत्यादि दक्षिणात्वेकसुवर्णप्रभृतियथाशक्तीतिहिरण्यांमेतिघृतधेनुदानविधिः ॥ स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसारसवित्सहृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेःपादांवुजार्चारतो जीयात्पुत्रकलत्रमित्रसहितस्संसपालयन्क्ष्मांचिरम् ८ रणवीरसिंहभूपेशकारितेकृत्यसागरे अभूदाषाढकृत्यानांरम्योइरत्नसमुच्चयः॥ ३ ॥ इतिश्रीमत्सूर्यवंशावतंसरघुकुलतिलकश्रीरणवीरसिंहमहाराजकारितेकृत्यरत्नाकरे आषाढमासकृत्यरत्नसमुच्चयः समाप्तोऽयमाषाढमासः ॥ ※ ॥

284

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिब्बामल्लाधिकारेआषाढमासोमुद्रितस्समाप्तिमगमत्
संवत् १९४१ भाद्रपद प्र. २८

श्रीगणेशायनमः श्रीरघुनाथोजयति

अथश्रावणमासकृत्यनिर्णयः तत्र कर्कटसंक्रांतौ पूर्वास्त्रिंशद्घटिकाःपुण्यकालः सूर्योदयोत्तरंसंक्रमेतुपरदिन एवपुण्यकालः रात्रौतुनिशीथात्प्राक् परतश्चसंक्रमे अपरार्के हेमाद्यनंतभट्टादिमतेपूर्वोत्तरयोर्दिनयोः पंचपंचनाड्यःपुण्यकालः धनुर्मीनावतिक्रम्यकन्यांचमिथुनंतथा पूर्वापरविभागेनरात्रौसंचरतेरविः दिनांतेपंचनाड्यस्तुतदापुण्यतमामताः उदयेपितथापंचदैवेपित्र्येचकर्माणि इतिस्कांदोक्तेः पूर्वापरविभागेनेति मकरकर्कटभिन्नसंक्रांतिपरं वक्ष्यमाणवचोविरोधात् इत्युक्तंमदनरत्ने तेनायमर्थः रात्रौपूर्वविभागेमकरेपंचनाड्यः पुण्यकालः रात्रार्धपरविभागेकर्कटसंक्रमेपूर्वदिनांतेपंचनाड्यः विषुवतोःपूर्वदिनेपंच परदिनेतिवाक्यांतरानुरोधात् ते नहेमाद्रिमाधवयोःसर्ववचनानांचाविरोधः माधवमतेतु अर्धरात्रेतदूर्ध्वंतुसंक्रांतौदक्षिणायने पूर्वमेवदिनंग्राह्यंयावन्नोदयतेरवेरितिवृद्धगर्गोक्तेः मिथुनात्कर्कसंक्रांतिर्यदास्यादंशुमालिनः प्रभातेवानिशीथेवातदापुण्यंतुपूर्ववत् इतिभविष्योक्तेश्चपूर्वदिनएवपुण्यं दाक्षिणात्यास्त्वेतदेवाद्रियंते अर्धरात्रावपिस्नानदानादिभवतीत्युक्तं प्राक्अत्रदानोपवासाद्यप्युक्तं तथात्र केशादिविकर्त्तनंनिषिद्धं कुंभेचकर्कटेवापितथैवकार्मुकेपिवा रोमखंडंगृहस्थस्यपितृहन्पातयतेह्यधः इतिसुमंतुवचनादिति विशेषस्तुजीवत्पितृविषये अत्रनदीनांरजोदोषः हेमाद्रावत्रिः सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः तासुस्नानंनकुर्वीतवर्जयित्वासमुद्रगामिति व्याघ्रोक्तेश्च इदंक्षुद्रनदीवियमाहात्म्ये त्वगस्त्योदयावधित्वमुक्तं यावन्नोदेतिभगवान्दक्षिणाशाविभूषणः तावद्रजोवहानद्यःकरतोयाःप्रकीर्त्तिताः करतोयाःस्वल्पोदकाः तथाचकात्यायनः याःशोषमुपगच्छंति ग्रीष्मेकुसरितोभुवि तासुप्रावृषिनस्नायाद

पुण्येदशवासरे स्मृतिसंग्रहे धनुःसहस्राण्यष्टौचगतिर्यासांनविद्यते नतानदीशब्दवहागर्त्तास्तेकथिताभुवि महानदीषुभविष्योक्तं आदौकर्कटकेदेविमहानद्योरजस्वलाः त्रिदिनंतुचतुर्थेह्निशुद्धाःस्युर्जाह्नवीयथा महानद्यश्चब्राह्मी गोदावरीभीमरथीतुंगभद्राचवेणिका तापीपयोष्णीविंध्याचदक्षिणेपरिकीर्त्तिताः वेणिकाकृष्णवेणा भागीरथीनर्मदाचयमुनाचसरस्वतीविशोकाचवितस्ताचविंध्यस्योत्तरतःस्थिताः द्वादशैतामहानद्योदेवश्रीक्षेत्रसंभवाः मदनरत्नेपुराणांतरे महानद्योदेविकाचकावेरीवंजरातथा रजसातुप्रदुष्टास्तुकर्कटादौत्र्यहंनृप कात्यायनः कर्कटादौरजोदुष्टागोमतीवासरत्रयं चंद्रभागासतीसिंधुसरयूर्नर्मदातथा इदंगंगाद्यतिरिक्तविषयं गंगाचयमुनाचैवप्लक्षताचसरस्वती रजसानाभिभूयंतेयेचान्येनदसंज्ञकाः शोणः सिंधुर्हिरण्याख्यःकोकिलोहितवर्बराः शतद्रूश्चतथासप्तपावनाःपरिकीर्त्तिता इतिदेवलोक्तेः यत्तु प्रथमंकर्कटेदेवित्र्यहंगंगारजस्वलेतिजान्हवीभिन्नागोदावर्य्यादिगंगांतरपरमितिमदनरत्ने अन्येतु नतुतीरनिवासिनामितिनिगमोक्तेः नूतनकूपादौयोगियाज्ञवल्क्यः अजागावोमहिष्यश्चब्राह्मणीचप्रसूतिका दशरात्रेणशुध्यंतिभूमिस्थंचनवोदकमिति क्वचित्तुदोषाभावमाह व्याघ्रपादः अभावेकूपवापीनामन्येनापिपयोभृतं रजोदुष्टेपिपयासिग्रामभोगोनदुष्यति तेनोद्धृतेनदोषः तथा तासुस्नानंनकुर्वीतइत्याहुः वसिष्ठोपि इज्याकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच सूर्यचंद्रग्रहेचैवरजोदोषोनविद्यते इत्यलंविस्तरेण अथश्रावणेकृत्यविशेषाआग्नेयपुराणे यश्चेंधनंददेद्देविवर्षादिचतुरोऋतून् घृतधेनुप्रदोतेचपरंब्रह्मादिगच्छति शातातपअयनादिदानमाह अयनादौसदादेयंद्रव्यमिष्टंगृहेषुयत् यदातुकर्कटंयातिभगवांश्चंडदीधितिः ततःप्रभृतिकालःस्याद्दक्षिणायनसंज्ञकः तत्रप्रावृट्सुसंपूज्यफलपुष्पांबुभिस्तथा गोरसाक्तांस्तथासक्तून्ब्राह्मणेभ्योनिवेदयेत् हिमंचशर्करांचैवशाकमूलफलानिच उपानच्छत्रमाल्यानितिलधेनुंचशास्त्रवत् तत्रकर्कटसंक्रांति

दिनेहिमंकर्पूरं अत्रस्वर्गीयफलंविश्वजिन्न्यायात् भविष्ये नैरंतर्य्येणयोमासंविधिनाचयजेद्रविं पुण्यंतदेवसकलं
भवेद्विषुवदर्चनात् एवमेवचविज्ञेयंग्रहणेचोत्तरायणे संक्रांतिदिवसेष्वेवंषडशीतिमुखेषुच तत्कार्त्तिक्यांभवेत्पुण्यं
समाराध्यदिवाकरं पुण्यमेवंचफाल्गुण्यामाषाढ्यामेवमेवच मत्स्यपुराणाग्निपुराणयोः आषाढ्यादिचतुर्मासा
न्प्रातः स्नायीभवेन्नरः विप्रेषुभोजनंदद्यात्कार्त्तिक्यांगोप्रदोभवेत् सवैष्णवपदंयातिविष्णुव्रतमिदंस्मृतं आषा
ढीतिबहुव्रीहिस्तद्गुणसंविज्ञाना आरभ्यचतुरोमान्कार्तिक्यांगोप्रदोभवेदितिश्रवणात् आग्नेयपुराणे अयनादयनं
यावद्वर्जयेत्पुष्पसर्पिषी तदंतेपुष्पदानानिघृतधेन्वासहैवतु दद्याच्छिवपुरंयातिविप्रायघृतपायसं एतच्छीलव्रतं
नामशीलारोग्यप्रदायकं महाभारते श्रावणंनियतोमासमेकभक्तेनयःक्षिपेत् यत्रतत्राभिषेकेनयुज्यतेज्ञातिभि
र्धनैः यत्रतत्रेति कृत्रिमेजलाशयेऽपीति श्रावणकृष्णप्रतिपदायां श्रावणमासनियमानांप्रारंभः आषाढ्यामुपो
षणंसंकल्पश्चविधेयः अत्रातिथिपत्वेनवह्निपूजाऽपिकार्या श्रावणकृष्णद्वितीयायामशून्यशयनव्रतं मत्स्पपुराणे
श्रीभगवानुवाच श्रावणस्यद्वितीयायांकृष्णायांमधुसूदनः क्षीरार्णवेसलक्ष्मीकःसदास्वपितिकेशवः तस्यांसंपू
ज्यगोविंदंसर्वान्कामानवाप्नुयात् गोभूहिरण्यदानानिशतकल्पशतायुषं अशून्यशयनीनामद्वितीयासंप्रकीर्तिता
तस्यांसंपूज्यगोविंदंमंत्रैरेभिर्विचक्षणः श्रीवत्सधारिन्श्रीकांतश्रीवासश्रीनिकेतन गार्हस्थंमाप्रणाशंमेयातुधर्मार्थ
कामद अग्नयोमाप्रणश्यंतुदेवताःपुरुषोत्तम पितरोमाप्रणश्यंतुतन्नोदांपत्यभेदतः लक्ष्म्यावियुज्यतेदेवोनकदाचि
द्यथादिवि तथाकलत्रसंबंधोदेवमामेवियुज्यतां लक्ष्म्यानशून्यंवरदयथातेशयनंसदा शय्याममाप्यशून्यास्तुत
थामिमधुसूदन गीतवादित्रनिर्घोषंदेवदेवस्यकारयेत् घंटाभवेदशक्तस्यसर्ववाद्यमयीयतः एवंसंपूज्यगोविंदंभोज
नंतैलवर्जितं सशक्तुक्षारलवणंयावन्मासचतुष्टयं ततःप्रभातेसंजातेलक्ष्मीपतिसमन्वितां दीपान्नभोजनैर्युक्तांश

व्र ०१०
श्रावण
२

ष्यांदद्याद्विचक्षणः पादुकोपानहच्छत्रचामरासनसंयुतां अभीष्टोपस्करैर्युक्तां शुक्लपुष्पांबरावृतां सोपधानकविश्रामांफलैर्नानाविधैर्युतां तथाभरणधान्यैश्चयथाशक्तयासमन्वि[illegible] अभ्यंगायचविप्रा[illegible]वैष्णवायकुटुंबिने दातव्यावेदविदुषेनचकुष्ठितकस्यचित् तत्रोपवेश्य[illegible]पत्यमलंकृत्यविधानतः पत्न्यास्तुभाजनंदद्याद्भक्ष्य[illegible]भोज्यसमन्वितं ब्राह्मणस्यापिसौवर्णी[illegible]मुपस्करसमन्वितां प्रतिमांदेवदेवस्यसोदकांविनिवेदयेत् एवंयस्तुपुमान्कुर्यादशून्यशयनंहरेः वित्तशाठ्येनरहितोनारायणपरायणः नतस्यपत्न्याविरहःकदाचिदपिजायते नारीवाविधिवद्ब्रह्मन्यावच्चंद्रार्कतारकंनविरूप्यंविशोकंचदांपत्यमभिजायते नपुत्रधनरत्नानिक्षयंयांतिपितामह सप्तकल्पसहस्राणिसप्तकल्पशतानिच कुर्वन्नशून्यशयनंविष्णुलोकेमहीयते विष्णुंपूजयेदित्यर्थः उपक्रमेतथाकीर्त्तनात् स्त्रियाअपिएतद्व्रतेक्रियमाणेकलत्रपदेपतिपदोहःपुरुषस्यास्त्रियश्चेतिप्रक्रमात् यावन्नस्याच्चतुष्टयंस्यादित्यर्थः एवंसंपूज्यगोविंदमश्नीयात्तैलवर्जितमितिपूजानंतरमत्रातैलाशनप्रतिपादनात् यत्रैवदिनेपूजातत्रैवदिनेऽतैलाशनं पूजनंच कृष्णाद्वितीयायामेव तस्यांसंपूजयेद्विष्णुमितिकीर्तनात् अतोयावत्तृतीयाभवतितावत्कृष्णद्वितीयातिथिगोविंदपूजनं नक्तमक्षारतैललवणभोजनमित्यर्थः ततःप्रभातइति चतुर्थकृष्णद्वितीयानंतरंप्रभातेशय्यादिदानमित्यर्थः लक्ष्मीपतिसमन्वितामिति लक्ष्मीपतिनाधिवासितांशय्यांदद्यादित्यर्थः नतुतत्प्रतिमान्वितां प्रतिमायाश्चाग्रेदानकथनात् इतिमत्स्यपुराणे अशून्यशयनद्वितीयाव्रतम् भविष्यपुराणे श्रीभगवानुवाच अशून्यशयनांनामद्वितीयांशृणुभारत शेतेजगत्पतिःकृष्णःश्रियासार्द्धंमहीपते अशून्यशयनीनामसदाकार्याहिसातिथिः कृष्णपक्षेद्वितीयायांश्रावणेमासिभूपते इदमुच्चारयेत्प्रातःप्रणम्यजगतःपतिं श्रीवत्सधारिन्श्रीकांतश्रीवासश्रीपतेऽव्यय गार्हस्थ्यंमाप्रणाशंमेयातुधर्मार्थकामद शुचयेमाप्रणश्यंतुमाप्रणश्यंतुनिर्जराः जामयोमाप्रणश्यंतुयतोदांपत्यमेवच लक्ष्म्यावियुज्यतेदेव

नकदाचिद्यथाभवान् तथाकलत्रसंबंधोदेवमामेवियुज्यतांलक्ष्म्यानशून्यंवरदयथातेशयनंसदा शय्याममाप्यशून्यास्तुतथैवमधुसूदन एवंप्रसाद्यपूजांचकृत्वालक्ष्म्यास्तथाहरेःफलानिदद्याच्छय्यायामभीष्टानिजगत्पतेःनक्तंप्रणम्यायतनेहरिंभुंजीतवाग्यतः ब्राह्मणायद्वितीयेन्हिशय्यांदद्यात्सदक्षिणां शतानीकउवाच कानिकानित्वभीष्टानिफलानिकेशवस्यतु योज्यानिशयनेविप्रदेवदेवस्यकथ्यतां किंचिद्दानंद्वितीयेन्हिदातव्यंब्राह्मणस्यच भक्तैर्नरैर्द्विजश्रेष्ठदेवदेवस्यशक्तितः सुमंतुरुवाच यानितत्रमहाबाहोकालेसंतिफलानिच मधुराण्यतितीव्रानिनचातिकटुकानिच दातव्यानिनृपश्रेष्ठस्वशक्त्याशयनेतदा मधुराणिचदत्त्वातुमनोवल्लभतामियात् तस्मात्कटुकतीव्राणिस्त्रीलिंगानिचवर्जयेत् खर्जूरमातुलुंगानिस्थितानिशिरसासह द्वितीयेह्निप्रदेयानिभक्त्याशक्त्याचभारत वासोदानंतथाधान्यदानंचान्नस्यशस्यते एवंकरोतियःसम्यङ्नरोमासचतुष्टयं तस्यजन्मत्रयंवीरगृहभंगोनजायते अशून्यशयनश्चस्याद्धर्मकामार्थसाधकः भवत्यव्याहतैश्वर्य्यःपुरुषोनात्रसंशयः नारीवाराजधर्मज्ञव्रतमेतद्यथाविधिः याकरोतिनशोच्यासौबंधुवर्गस्यजायते वैधव्यंदुर्भगत्वंचभर्तृत्यागंचसत्तम नाप्नोतिजन्मत्रितयेकृत्वैतद्व्रतमुत्तमं इत्येषाकथिताराजन्द्वितीयातिथिरुत्तमा यामुपोष्यनरोराजन्वृद्धिमृद्धिंश्रियंलभेत् भागधेयंश्रियासहप्रणम्येत्यर्थः उपोष्येत्यत्रउपवसनमुपासनं अग्रेनक्तंभुंजीतेत्यभिधानात् शुचयोऽग्नयःशिरसाविद्यमानव्रतेनेत्यर्थःनालिकेरेणेत्यनेन यज्ञभागहरोविष्णुःगांगेयमत्रसुवर्णं मासचतुष्टयं तत्तन्मासकृष्णचतुर्थीचतुष्टयमित्यर्थः स्त्रीकर्तृकपक्षेकलत्रसंबंधोमामेवियुज्यतामित्यत्रपदस्थनेपातिपदोहःपूर्ववदेवफलानिदद्याच्छय्यायामितिधारणमात्रं अग्रेदानाभिधानात् नक्तंप्रणम्येयम्येदौ नक्तंप्रणम्यभुंजीतेत्यन्वयःइत्येषाकथितेत्यादिना कर्मारंभफलांतरार्थं आषाढ्यनंतरंचसमाचारात् इत्यशून्यशयनद्वितीयाव्रतम् इदंश्रावणादिमासचतुष्टयं कृष्णपक्षद्वितीयासुकार्य्यंद्वितीयात्रचंद्रोदय

व्यापिनीग्राह्या एकभक्तेदिवानक्तेनिशिचंद्रोदयेव्रते तिथिस्तात्कालिकीग्राह्येतिमदनरत्नस्मृतिसंग्रहवचनात्
चंद्रोदयव्रतत्वंचास्य चंद्रोदयेऽर्घ्योदातव्योदध्यक्षतविभूषित इतिचंद्रोदयेऽर्घ्यविधानात् दिनद्वयेतत्सत्त्वेऽसत्त्वे
वापूर्वाचतुर्ष्वसितपक्षेषुमासेषुश्रावणादिषु अशून्याख्यव्रतंकुर्य्याज्जाययातुफलाधिकमितिमदनरत्नोदाहृतवचना
त् अत्रपूर्णिमांतोमासोग्राह्यः दिनद्वयेतथात्वेपूर्वाअत्रगोपूजायवानांप्राशनमितिविशेषोदिवोदासीये श्रावणकृ
ष्णतृतीयाकज्जलीसंज्ञेतिदिवोदासीये कृत्यरत्नावल्यां तत्रश्यामवर्णपुष्पादिभिः सांजनाक्षतैश्चदेवीपूजा कज्ज
लादिसौभाग्यद्रव्यंसुवासिनीभ्योदेयमितिशिष्टाचारात् अस्यामेवश्रवणयुक्तायांविष्णुपूजा तदुक्तंहेमाद्रौ विष्णु
धर्मोत्तरे तृतीयाश्रावणेकृष्णायासाश्रवणसंयुता तस्यांसंपूज्यगोविंदंतुष्टिमग्र्यामवाप्नुयादिति श्रावणकृष्णचतुर्थी
सोमकल्पादि तत्रश्राद्धादिकल्पांतस्थायिफलप्रदमुक्तंकल्पादिप्रबंधेश्रावणकृष्णचतुर्थ्यांसंकष्टचतुर्थीव्रतम् तच्चंद्रो
दयव्यापिन्यांकार्य्यं श्रावणेबहुलेपक्षेचतुर्थ्यांतुविधूदये गणेशंपूजयित्वाचचंद्रायार्घ्यंप्रदीयते इतिकथायां तत्रच
पूजाविधानात् दिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वा मातृविद्धागणेश्वरइतिवचनात् गणेशगौरीबहुलाप्यतिरिक्ताःप्रकी
र्त्तिताःचतुर्थ्यःपंचमीविद्धादेवतांतरयोगत इतिमदनरत्ने ब्रह्मवैवर्त्तवचनाच्च नचतृतीयाविद्धाविधायकवचनात् दिवा
त्रिमुहूर्त्तेवेधेसत्येवप्रवृत्तिर्नरात्राविति भ्रमितव्यं अहःसुतिथयःपुण्याःकर्मानुष्ठानतोदिवा नक्तादिव्रतयोगेषुरा
त्रियोगोविशिष्यतइति नरात्रिवेधस्यापिरात्रिसाध्यकर्मसुहेमाद्रिमाधवादिभिरुक्तत्वात् अथव्रतविधिः मासप
क्षाद्युल्लिख्य विद्याधनपुत्ररोगमुक्तिसंकटनाशकामःस्त्रीतुभर्त्रादिविरहसंकटविमुक्तिकामासंकटचतुर्थीव्रतपूजादिकं
करिष्य इतिसंकल्पःसौवर्णरौप्यताम्रमृण्मयाद्यन्यतमां गणेशमूर्त्तिंकृत्वा जलपूर्णंवस्त्रयुतंकुंभंतस्याग्रेस्थापयि
त्वाषोडशोपचारैःपूजयेत् तत्रादौध्यानं लंबोदरंचतुर्बाहुंत्रिनेत्रंरक्तवर्णकं नानारत्नैः सुवेषाढ्यंप्रसन्नास्यंविचिंतयेत्

पुस्तकालय
गुरुकुल कांगड़ी

ध्यायेद्गजाननंदेवंतप्तकांचनसान्निभं चतुर्भुजंमहाकायंसूर्यकोटिसमप्रभं आवाहनं आगच्छस्वजगन्नाथसुरासुर
नमस्कृत अनाथनाथसर्वज्ञविघ्नराजनमोस्तुते गजास्यायनमः१ आसनं गोतात्वंसर्वलोकानामिंद्रादीनांविशपतः
भक्तदारिद्र्यविच्छेदिन्नेकदंतनमोस्तुते विघ्नराजायनमः२ पाद्यम् मोदकानामर्पणेनभक्तानांवरदायक देवदेवनमस्ते
स्तुभक्तानांवरदोभव लंबोदरायनमः३ अर्घ्यम् महाकायमहारूपअनंतफलदायकदेवदेवनमस्तुभ्यंसर्वेषांपापनाश
न शंकरसूनवेनमः ४ आचमनं स्नानंपंचामृतेनैवगृहाणगणनायक अनाथनाथसर्वज्ञनमोमूषकवाहन उमासुता
यनमःस्नानं कुरुष्वाचमनंदेवसुरवंद्याखुवाहन सर्वाघदलनस्वामिन्नीलकंठनमोस्तुते वक्रतुंडायनमः६ वस्त्रं रक्तव
स्त्रकयुग्मंचदेवानामपिदुर्लभं गृहाणमंगलंदेवलंबोदरनमोस्तुते शूर्पकर्णायनमः७ यज्ञोपवीतम् ब्रह्मसूत्रंसोत्तरीयं
गृहाणगणनायक आरक्तंब्रह्मसूत्रंचकनकस्योत्तरीयकं कुवजायनमः ८ चंदनम् गृहाणेश्वरसर्वज्ञदिव्यंचंदनमु
त्तमम् विनायकनमस्तुभ्यंशिवसूनोनमोस्तुते विघ्ननाशनायनमः ९ अक्षताः शालितंडुलसंभूतानूकुंकुमाक्तां
स्त्वखंडितान् अक्षतान्गणनाथत्वंगृहाणवरदोभव पुनर्विघ्ननाशनायनमः १० पुष्पं सुगंधिद्रव्यमाल्यंचगृहा
णत्वमिभानन विनायकनमस्तुभ्यंशिवसूनोनमोस्तुते विकटायनमः ११ धूपं दशांगगुग्गुलंधूपमुत्तमंगणना
यक गृहाणदेवदेवेशउमासुतनमोस्तुते विकटाक्षायनमः १२ दीपं सर्वज्ञसर्वरत्नानांसर्वेशाविवुधप्रिय गृहा
णमंगलंदीपंघृतकर्पूरसंयुतं वामनायनमः १३ नैवेद्यम् नैवेद्यंगृह्यतांदेवनानामोदकसंयुतं सर्वान्नफलसंयुक्तं
सर्वभक्तिसमन्वितं सर्वदेवायनमः १४ फलं फलान्यमृततुल्यानिसुगंधीन्यघनाशन आनीतानियथाशक्त्यागृ
हाणमानिमानद सर्वार्तिनाशिनेनमः१५ तांबूलं तांबूलंगृह्यतांदेवनागवल्लीदलैर्युतम् कर्पूरगंधसंयुक्तंसुगंधिमुखभू
षणं विघ्नहर्त्रेनमः १६ समस्तपूजार्पणम् सर्वदेवादिदेवायसर्वसिद्धिप्रदायक भक्त्याकृतामिमांपूजांगृहाणेमांमुर

प्रभो सर्वदेवायनमः १७ एवंपूजाप्रकर्तव्याषोडशैरुपचारकैः मोदकान्कारयेत्प्रातस्तिलजान्दशपार्वति देवाग्रेस्थापयेत्पंचपंचविप्रायकल्पयेत् पूजयित्वातुतंविप्रंभक्तिभावेनदेववत् दक्षिणांचयथादत्त्वाशक्त्यापंचैवमोदकान् भक्षयेन्निशिचंद्रस्यअर्घ्यंदद्याद्यथाविधि चंद्रार्घमंत्रः क्षीरसागरसंभूतसुधारूपनिशाकर गृहाणार्घ्यंमयादत्तंगणेशप्रीतिवर्धनं मोदकदानमंत्रः विप्रवर्य्यनमस्तुभ्यंमोदकान्वैददाम्यहं मोदकान्सकलान्देवदेवदक्षिणयान्वितान् आपदुद्धारणार्थायगृहाणद्विजसत्तम प्रार्थना अवुद्धमतिरिक्तंवाद्रव्यहीनंमयाकृतं तत्सर्वंपूर्णतांयातुविप्ररूपगणेश्वर ब्राह्मणान्भोजयेद्देविपायसेनयथासुखं स्वयंभुंजीतपंचैवमोदकान्फलसंयुतान् अशक्तश्चैकमन्नंवाभुंजीतदधिसंयुतं अथवाभोजनंकार्यमेकवारंहिमाद्रिजे प्रतिमांगुरवेदद्यादाचार्यायसदक्षिणांवस्त्रकुंभसमायुक्तांतत्रमंत्रमिमंजपेत् यमामनंतिविश्वेशंविश्वनाथमुमासुतं विघ्नेश्वरंक्षिप्रवरंतुभ्यंदास्याम्यभीष्टदं विसर्जनमंत्रःगच्छगच्छसुरश्रेष्ठस्वस्थानेत्वंगणेश्वर व्रतेनानेनमेनित्यंयथोक्तफलदोभव इतिश्रावणकृष्णचतुर्थ्यांसंकष्टचतुर्थीव्रतम् प्रसंगादत्रपार्थिवगणेशपूजोच्यते अथपार्थिवगणेशव्रतविधिः शमीगर्भाच्चवल्मीकान्मूलादश्वत्थतोपिवा कुलालचक्रयंत्रोत्थांनदीकूलगतांमृदं आनीयेतिशेषः तीर्थेदेवकुलेचापिगृहेवापिसमाचरेत् प्रतिमामितिशेषः गणेशायनमः मृदाहरणं गणपतयेनमः सेचनं हेरंबायनमः संघटनम् धरणीधरायनमःप्रतिष्ठापनं महागणपतयेनमः आवाहनं लक्षलाभकर्त्रेनमः स्नानं शिवाप्रियायनमः पूजनं क्षिप्रायनमःक्षमापनं अमोघसिद्धयेनमः विसर्जनं अनेनैवविधानेनमौनेनप्रतिमांयजेत् वामहस्तेतुस्थितांदिव्यांसंपूज्याथविसर्जयेत् प्रथमादिविभेदेनविशेषाःस्युरिमेस्मृताः रक्तचंदनगंधोवैकरवीरंचपुष्पकं दशांगोगुग्गुलोधूपोनैवेद्यंतुगुडोदनं जातीपुष्पंद्वितीयेतुनैवेद्यंशर्करातथा तृतीयेपंचकंपुष्पनैवेद्यंलड्डुकंतथा चतुर्थेबकुलंपुष्पंनैवेद्यंतुह्यपूपकं पंचमेशतपत्रंतुनैवेद्यंवटकंतथा

षष्ठेकल्हारकंपुष्पंनैवेद्यंपूरिकामता सप्तमेचैवमंदारंनैवेद्यंघारिकास्मृता अष्टमेह्यर्कपुष्पंचभक्तंनैवेद्यमुच्यते नवगस्तिपुष्पंचैनवेद्यंपायसंस्मृतं दशेनारिंगणीपुष्पंदुग्धंनैवेद्यमुच्यते एकादशेकदंबचनैवेद्यंपंचखाद्यकं द्वादशेकुंदपुष्पंचनैवेद्यंकदलीफलम् त्रयोदशेमालतीपुष्पंनैवेद्यंदाडिमीफलं चतुर्दशेश्वेतपुष्पंनैवेद्यंजामनंफलं षोडशेविल्वपत्रंचद्राक्षानैवेद्यमुच्यते विष्णुक्रांतांसप्तदशेकालिंगंचनिवेदयेत् शतावर्य्यंष्टादशकेमधूकंफलयेवच एकोनाविंशेचतथाभृंगराजंचक्षीरिका विंशकेचशमीपत्रंप्रियालंचनिवेदयेत् एकाविंशेचदूर्वांचनैवेद्यंचघृतोदनं दिनेदिनेतथादूर्वावृद्धिःकार्याप्रयत्नतः एकाविंशतिमूर्त्तीर्वाप्रत्यहंपूजये रः त्रिसप्तदिनपर्यंतंक्षिप्रंसिद्धिः प्रजायते रक्तचंदनगंधोवा सर्वेभावेतथाक्षताः पुष्पार्थेचतथादूर्वानैवेद्यंपंचखाद्यकं एकान्नाहारशीलःस्याद्भूमिशायीजितेंद्रिय भाद्रेमासि चतुर्थ्यांतु उद्यापनविधिंचरेत् चतुर्थ्यांवारणंहैमंपलेनापितदर्धकं सौवर्णंगणपंचापिविधिनापूजयेन्नरः तद्वत्समाहरेत्सम्यगेकविंशतिपुत्रिकाः रात्रौजागरणंकुर्य्याद्गीतवाद्यादिमंगलैः सहस्त्रनामस्तोत्रंचप्रभातेह्यरुणोदये कृत्वानित्याविधिंसर्वमागमोक्तविधानतः अष्टद्रव्यैर्गणेशस्यमोदकैःपायसेनवा रंभाफलैःसलाजैश्चअष्टोत्तरसहस्त्रकं अष्टोत्तरशतंवापिततःपूर्णाहुतिंहुनेत् आगमोक्तविधानेनवैदिकेनाथवायजेत् दिक्पालेभ्योबलिंदद्यादभिषेकंसमाचरेत् आचार्य्यंपूजयेत्पश्चाद्वस्त्रालंकारभूषणैः तस्मैतांप्रतिमांदद्यात्संपूज्यविधिवन्नरः दानमंत्रः यमामनंतिविश्वेशंविश्वनाथमुमासुतं विश्वेश्वरंक्षिप्रवरंतुभ्यंदास्याम्यभीष्टदं विघ्नेश्वरःप्रीयतांमेक्षिप्रकारीशिवप्रदः हैमवारणदानेनसर्वविघ्नंविनश्यतु ततोगांदक्षिणांदद्यादेकवर्णांपयस्विनीं सहस्त्रंवाशतंवापिएकविंशतिमेवच ब्राह्मणान्भोजयेत्पश्चात्पायसैःसाज्यशर्करैः एवंकृतेतुदेवर्षेसर्वसिद्धिःप्रजायते इतिचिंतामणिकल्पेपार्थिवगणपतिपूजाविधिः समाप्तः उक्तंचहेमाद्रौ विष्णुपुराणे चतुर्थ्यांवारणंहैमंपलादूर्ध्वंतुशोभनं कारयित्वाकुशयुतंतिलद्रोणोपरिन्यसेत्

वस्त्रपुष्पैःपूजयित्वानैवेद्यंविनिवेदयेत् ततस्तुब्राह्मणेदद्याद्गणेशःप्रीयतामिति कार्य्यारंभेषुसर्वेषुतस्यविघ्नंनजायते राज्यकामस्तथाराज्यंश्रीकामःश्रियमाप्नुयात् वारणाःसप्तजन्मानिभवंतिमदविह्वलाः इदंचैत्रेश्रावणेकार्त्तिकेकार्यमितिहेमाद्रिः अथदूर्वागणपतिव्रतकथा सौरपुराणे ईश्वरउवाच शृणुवत्सप्रवक्ष्यामिव्रतानामुत्तमंव्रतम् अस्तिदूर्वागणपतेर्व्रतंत्रैलोक्यविश्रुतं भगवत्यापुराचीर्णंपार्वत्याचमयासह सरस्वत्यामहेंद्रेणविष्णुनाधनदेन। अन्यैश्चदेवगंधर्वैर्मुनिभिः किन्नरैर्नरैः चीर्णमेतद्व्रतंसर्वैःपुराकल्पेषडानन चतुर्थ्यामभवच्छुक्लानभोमासस्यपुष्पदा तस्यांव्रतमिदंकुर्य्यात्कार्त्तिक्यांवाषडानन गजाननंचतुर्बाहुमेकदंतंद्विपाननं विधायहेम्नाविघ्नेशंहेमपीठासनस्थितं तथाहेममयींदूर्वांतदाधारेव्यवस्थितं संस्थाप्यविघ्नहर्त्तारंकलशेताम्रभाजने वेष्टितंरक्तवस्त्रेण सर्वतोभद्रमंडले पूजयेद्रक्तकुसुमैःपत्रिकाभिश्चपंचभिः बिल्वपत्रमपामार्गशमींदूर्वांहरिप्रियां तुलसीमित्यर्थः अन्यैः सुगंधिकुसुमैःपत्रिकाभिर्विशेषतः फलैश्चमोदकैःपश्चादुपहारंप्रकल्पयेत् यथावदुपचारैश्चपूजयेद्गिरिजासुतं उमासुतनमस्तुभ्यंविश्वव्यापिन्सनातन विघ्नौघंछिंधिसकलमर्घ्यंपाद्यंददामिते अर्घ्यपाद्यमंत्रौ गणेश्वरायदेवायकुमारगुरवेनमः लंबोदरायदेवायसर्वविघ्नापहारिणे पूजामंत्रः उमांगमलसंभूतोदानवानांवधायवै अनुग्रहायदेवानांसदेवःपातुविश्वधृक् धूपमंत्रः परंज्योतिःप्रकाशायसर्वसिद्धिप्रदायच दीपंतुभ्यंप्रदास्यामिमहादेवात्मनेनमः दीपमंत्रः गणानांत्वागणपतिंहूहवे इत्युपहारमंत्रः गणेश्वरगणाध्यक्षगौरीपुत्रगजानन व्रतंसंपूर्णतांयातुत्वत्प्रसादादिभानन प्रार्थनामंत्रः एवंसंपूज्यविघ्नेशंयथाविभवविस्तरैः सोपस्करंगणाध्यक्षमाचार्य्यायनिवेदयेत् गृहाणभगवन्ब्रह्मन्गणराजंसदक्षिणं व्रतंत्वद्वचनाद्यसंपूर्णंयातुसुव्रत दानमंत्रः एवंयःपंचवर्षाणिकृत्वोद्यापनमारभेत् ईप्सितान्लभतेकामान्देहांतेशांकरंपदं अथवाशुक्लपक्षस्यचतुर्थ्यांसंयतेंद्रियः कुर्य्याद्वर्षंनयत्येवं

11

सर्वसिद्धिमवाप्नुयात् उद्यापनंविनायस्तुकरोतिव्रतमुत्तमं तेनशुक्लतिलैःकार्य्यंप्रातः स्नानंषडानन हेम्नावारजतेनापिकृत्वागणपतिंबुधः पंचगव्यैस्तुसंस्नाप्यदूर्वाभिःसंप्रपूजयेत् मंत्रैस्तुदशभिर्भक्त्यादूर्वायुक्तैःशिखिध्वज दूर्वांकुरैरित्यनेनप्रतिमंत्रदूर्वानुवृत्तिरनुज्ञायते मंत्राश्चनामात्मकाः स्कंदपुराणे गणाधिपनमस्तेस्तुउमापुत्राघनाशन विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक एकदंतेभवक्त्रेतितथामूषकवाहन कुमारगुरवेतुभ्यमेभिर्नामपदैःपृथगिति इत्येवंकथितंवत्ससर्वसिद्धिप्रदंशुभं व्रतंदूर्वागणपतेःकिमन्यच्छ्रोतुमिच्छसि इदंव्रतंश्रावणेकार्त्तिकेवारंभणीयं चतुर्थ्यांयाभवेच्छुक्लानभोमासस्यपुण्यदा तस्यांव्रतमिदंकुर्य्यात्कार्तिक्यांवाषडानन कार्त्तिकशुक्लचतुर्थ्यामारंभणीयं कार्त्तिकशुक्लचतुर्थ्यांवाव्रतंकुर्य्यादितिशुक्लचतुर्थीसमभिव्याहाराच्च अत्रदूर्वालक्षणं सप्तपत्रास्तुहरितादूर्वाःप्रादेशसंमिताः यद्वापंचशाखाःस्युर्विस्तृताःषडभिरंगुलैःप्रत्येकंमूलमंत्रेणलक्षपूजांसमाचरेत् समाप्तौतुमहापूजाहैमींदूर्वांसमर्पयेत् प्रथमदिनानुसारेणक्रमेणपुष्पनिवेदनक्रमउच्यते करवीरपुष्पादिविष्णुक्रांतांतंपुष्पाणिपत्राणिचेति अथश्रावणकृष्णचतुर्थ्यांसंकष्टचतुर्थीव्रतकथा हेमाद्रौस्कांदे ऋषयऊचुः दारिद्र्यशोककष्टाद्यैः पीडितानांचवैरिभिः राज्यभ्रष्टैर्नृपैःसर्वैःक्रियतेकिंसुखार्थिभिः धनहीनैर्जनैःस्कंदसर्वोपद्रवपीडितैः विद्यापुत्रगृहभ्रष्टैरोगयुक्तैःशिवार्थिभिः कर्त्तव्यंकिंवदोपायंपुनःक्षेमार्थसिद्धये स्कंदउवाच शृणुध्वंमुनयःसर्वेव्रतानांव्रतमुत्तमं संकष्टतरणंनामपुत्रादिसुखदायकं येनोपायेनसंकष्टंतरंतिभुविदेहिनः यद्व्रतंदेवकीपुत्रःकृष्णःपुत्रायदत्तवान् अरण्येक्लिश्यमानायपुनःक्षेमार्थसिद्धये यथाकथितवान्पूर्वंगणेशोमातरंप्रति तथाकथितवान्श्रीशोद्वापरेपांडवान्प्रति ऋषयऊचुःकथंकथितवानेवंपार्वतींश्रीगणेश्वरः तथापृच्छंतिमुनयोलोकानुग्रहकांक्षिणः स्कंदउवाच पुराकृतयुगेपुण्येहिमाचलसुतासती तपस्तप्तवतीभूरिनदृष्टःशंकरःपतिः तदासस्मारहेरंबंगणेशंपूर्वजंसुतं

तत्क्षणादागतंदृष्ट्वागणेशंपरिपृच्छति पार्वत्युवाच तपस्तप्तंमयाघोरंदुस्तरंलोमहर्षणं नप्राप्तःपार्वतीकांतो।गिरीशोममवल्लभः संकष्टतरणंनामव्रतंनारदउक्तवान् त्वदीयंयद्व्रतंनामकथयस्वपुरातनं तच्छ्रुत्वापार्वतीवाक्यंसंकष्टतरणंव्रतं प्रीत्याकथितवान्देवोगणेशोज्ञानसिद्धिदः श्रीगणेशउवाच श्रावणेकृष्णपक्षतुचतुर्थ्यांतुविधूदये गणेशंपूजयित्वाचचंद्रायार्घ्यंप्रदीयते पार्वत्युवाच क्रियतेकेनविधिना।किंकार्य्यं।किंचपूजनं उद्यापनंकदाकार्यमंत्राःकेस्युस्तुपूजने किंध्यानंश्रीगणेशस्यगणेशवदविस्तरात् गणेशउवाच चतुर्थ्यांप्रातरुत्थायदंतधावनपूर्वकं ग्राह्यंव्रतमिदंपुण्यंसंकष्टतरणंशुभं कर्तव्यमितिसंकल्प्यव्रतेस्मिन्गणपंस्मरेत् तत्रमंत्रः निराहारोस्मिद्देवेशयावच्चंद्रोदयोभवेत् भोक्ष्यामिपूजयित्वाहंसंकष्टात्तारयस्वमां एवंसंकल्प्यराजेंद्रस्नात्वाकृत्वातिलैःशुभैःआह्निकंतुविधायैवपश्चात्पूज्योगणाधिपः त्रिभिर्माषैस्तदर्धेनतृतीयांशेनवापुनः यथाशक्त्यातुवाहैमीक्रियतेप्रतिमातथा वित्तशाठ्यंनकर्त्तव्यंकृतेकार्य्यंविनश्यति जलपूर्णंवस्त्रयुतंकुंभंतस्याग्रतोन्यसेत् पद्ममष्टदलंपुण्यंगंधपुष्पैःप्रपूजयेत् एवंव्रतंतुकर्त्तव्यंप्रतिमासंत्वयाद्विजे यावज्जीवंतुवावर्षाण्येकविंशतिवातथा अशक्त्यात्वेकवर्षंवाप्रतिवर्षमथापिवा उद्यापनंतुकर्त्तव्यंचतुर्थ्यांश्रावणेऽसिते स्वीकारश्चतथाकार्य्यःसंकष्टहरणेतिथौ गणेशंचतथाचार्य्यंसर्वशास्त्रविशारदं श्रद्धयाप्रार्थयेदादौतेनोक्तंव्रतमाचरेत् एकविंशतिविप्रांश्चवस्त्रालंकारभूषणैः पूजयेद्गोहिरण्याद्यैर्हुत्वादौविधिनानलं होमयेन्मोदकान्पश्चात्तिलाक्तान्घृतसंयुतान् अष्टोत्तरसहस्रंवानोचेदष्टोत्तरंशतं अष्टाविंशतिसंख्यैर्वामोदकैर्वासशर्करैः आज्याक्ताष्टौशुभान्शूलान्जुहुयाज्जातवेदसि गीतैर्वादित्रनिनदैर्भक्तिभावपुरस्कृतैः पुराणवेदाध्ययनैःपूजयेत्श्रीगणेश्वरं एवंजागरणंकार्य्यंदत्वादानादिकंतथा सपत्नीकमथाचार्य्यंभूषयेद्वस्त्रभूषणैः उपानच्छत्रगोदानकमंडलुफलादिभिः शय्यावाहनभूदानधनधान्यगृहादिभिः

यथाशक्त्यात्रकर्त्तव्यंदारिद्र्याभावमिच्छता एकविंशतिविप्रांश्चभोजयेन्नामभिर्मम गजास्योविघ्नराजश्चलंबोदरशिवात्मजौ वक्रतुंडःशूर्पकर्णःकुब्जश्चैवगणेश्वरः विघ्ननाशोहिविकटोवामनःसर्वदैवतः सर्वार्त्तिनाशोभगवान्विघ्नहर्त्ताचधूम्रकः सर्वदेवाधिदेवश्चसर्वेषोडशवैस्मृताः एकदंतःकृष्णरूपोभालचंद्रोगणेश्वरः गणपश्चैकविंशश्चसर्वएतेगणेश्वराः एवंकृतविधानेनप्रसन्नोहंनसंशयः ददामिवांछितान्कामान्मद्व्रतंमत्प्रियंकुरु श्रीभगवानुवाच एवंतुकथितंपूर्वंगणेशेनस्वयंनृप पार्वत्यातत्कृतंराजन्व्रतंसंकष्टनाशनं व्रतेनानेनसालेभेमहादेवपतिंस्वकं त्वंकुरुष्वमहाराजव्रतंसंकष्टनाशनं चतुर्थीसंकटानामस्कंदेनकथितामुनीन् ऋषिभिर्लोकपालैश्चलोकेकृतमिदंव्रतं सूतउवाच एवंयुधिष्ठिरोराजाराज्यकामनयाद्विज व्रतंशत्रून्निहत्याजौस्वराज्यंप्राप्तवान्स्वयं तस्मात्सर्वप्रयत्नेनव्रतंकार्य्यंविचक्षणैः व्रतंकुर्व्वंतिशेषःयेनधर्मार्थकामाश्चमोक्षश्चापिभवेत्किल करोतियोव्रतंविप्रसर्वकामार्थसिद्धिदं सवांछितंफलंयातिपश्चाद्गणपतांव्रजेत् यदायदापदंविघ्नान्नरः प्राप्नोतिसंकटं तदातदाप्रकर्त्तव्यंव्रतंसंकष्टनाशनं त्रिपुरंहंतुकामेनकृतंदेवेनशूलिना त्रैलोक्यभूतिकामेनमहेंद्रेणचतत्कृतं रावणेनकृतंपूर्वंबालिबंधनसंकटे स्वकार्यंप्राप्तवान्राज्यंगणेशस्यप्रसादतः सीतान्वेषणकामेनकृतंवायुसुतेनच संकल्पंदृष्टवान्सोयं सीतांरामप्रियांपुरा दमयंत्याकृतंपूर्वंनलान्वेषणकारणात् सापतिंनैषधंलेभेपुण्यश्लोकंद्विजोत्तमाः अहल्यापिपतिंलेभेगौतमंप्राणवल्लभं विद्यार्थीलभतेविद्यांधनार्थीधनमाप्नुयात् पुत्रार्थीपुत्रमाप्नोतिरोगीरोगात्प्रमुच्यते व्रतमेतद्गणेशस्यसर्वकामफलप्रदं येनचीर्णेनदेवेशनरोराज्यंचविंदति राज्ञीचजायतेनारीअपिदासकुलोद्भवा राजपुत्रोजयेच्छत्रून्गरुडःपन्नगानिव ब्राह्मणोब्रह्मवर्चस्यंप्राप्यसर्वाधिपोभवेत् वर्णाश्रमविहीनोपिसोपिसिद्धिंचविंदति इतिसंकष्टचतुर्थीव्रतकथा तथैव नारदीये श्रावणस्यचतुर्थ्यांतुजातेचंद्रोदयेमुने गणेशायप्रदद्याच्चह्यर्घ्यंविधिविदांवर चंद्रोदयेअर्घ्यदानाभिधानात्

कृष्णपक्षचतुर्थ्यामिधानं तत्रध्यानं लंबोदरंचतुर्बाहुंत्रिनेत्रंरक्तवर्णकं नानारत्नविभूषाढ्यंप्रसन्नास्यंविचिंतयेत् आ
वाहनादिभिःसर्वैरुपचारैःसमर्चयेत् नैवेद्यंमोदकान्दद्याद्गाणेशपदमाप्नुयात् नानेनसदृशंचान्यद्व्रतमस्तिजगत्त्रये
तस्मात्कार्य्यंप्रयत्नेनसर्वान्कामानभीप्सता श्रावणकृष्णपंचम्यामन्नव्रतम् नारदीये श्रावणेकृष्णपंचम्यांव्रत
मेतत्समृद्धिदं चतुर्थ्यांदिनशेषेतुसर्वाण्यन्नानिनारद पृथक्पात्रेषुसंस्थाप्यजलेनाप्लावयेत्सुधीः ततोयामांतरे
तत्तन्निष्कास्यांबुनिधापयेत् प्रातर्भानौसमुदितेपितॄंश्चैवतथाऋषीन् देवांश्चाभ्यर्च्यसुस्नातःकृत्वानैवेद्यमग्रतः तद
न्नंयाचकेभ्यश्चप्रयच्छेत्प्रीतमानसः सर्वंदिनंक्षिपेदेवंप्रदोषेतुशिवालये गत्वासंपूज्यदेवेशंलिंगरूपिणमीश्वरं गंध
पुष्पादिभिःसम्यक्पूजयित्वामहेश्वरं यजेत्पंचाक्षरींविद्यांशतंचापिसहस्रकं जपंनिवेद्यदेवायभवायभवरूपिणे
स्नात्वामंत्रैर्वैदिकैश्चपौराणैश्चापिनाकुलः प्रार्थयेद्देवमीशानंशश्वत्सर्वार्थसिद्धये शारदीयानिचान्नानितथावा
संतिकान्यपि यानिस्युस्तैःसमृद्धोहंभूयांजन्मनिजन्मनि दत्त्वान्नंब्राह्मणादिभ्यःस्वयंभुंजीतवाग्यतः एतदन्नव्र
तनामविधिनाचरितंनृभिः सर्वान्नसंपज्जनकंपरलोकेगतिप्रदं अत्रैवश्रावणकृष्णपंचम्यांस्नुहीविटपदेवीपूजा
तत्रशिष्टाः सुप्तेजनार्दनेदेवेपंचम्यांभवनांगणे पूजयेन्मनसादेवींस्नुहीविटपसंस्थितां करवीरैर्जातिपुष्पैःशतपत्रै
सचंदनैः स्नापयेद्गव्यपयसातथाशीतोदकेनच सघृतंपयसापूपंदीपंदद्यात्सगुग्गुलं मनसादेवीविषहरा इति
मंत्रेणमौनव्रतेनास्याःपूजाकार्य्या सर्पवृश्चिकादिविषशांतिर्भवतीति अत्रश्रावणकृष्णषष्ठ्यांस्कंदपूजागुहस्यच
तिस्मरणात् अथसर्वमाससप्तमीषुतिथिपत्वेनादित्यःपूज्यः उक्तंच सप्तम्यांभास्करस्यचेति अथात्राष्टम्यांसुगति
प्रदव्रतांगत्वेन नक्ताशीत्वष्टमीषुस्याद्वत्सरांतेचगोप्रदः पौरंदरंपुरंयातिसुगतिव्रतमुत्तममितिपद्मपुराणवचनात्
अत्रश्रावणमासिकृष्णशुक्लनवम्योःकौमारीपूजातदुक्तंनिर्णयामृतेभविष्योत्तरे श्रावणेमासिराजेंद्रयःकुर्यान्नक्तभो

जनं क्षीरषष्टिकभक्तेनसर्वभूतहितेरतः उपवासपरोवापिनवम्यांपक्षयोर्द्वयोः कौमारीमितिवैनाम्नाचं
डिकांपूजयेत्सदा कृत्वारौप्यमयींशक्त्यादुर्गांवैपापनाशिनीं करवीरस्यपुष्पैश्चगंधैश्चागुरुचंदनैः धूपेनचदशां
गेनमोदकैश्चापिपूजयेत्कुमारीभोजयेत्पश्चात्स्त्रियोविप्रांश्चशक्तितः भुंजीतवाग्यतःपश्चाद्बिल्वपत्रकृताशनः
एवंयःपूजयेदार्य्यांश्रद्धाभक्तिसमन्वितः सयातिपरमंस्थानंयत्रदेवोगुहःस्थित इति अथ श्रावणकृष्णदशम्यां
तिथिपल्वनांतकपूजाव्रतं तदुक्तं दशम्यामंतकस्येति अंतकोयमः तस्य पूजा कार्य्या श्राव
णकृष्णैकादश्यांरोहिणीयोगान्वितायांरोहिणीचंद्रव्रतंभविष्योत्तरे युधिष्ठिरउवाच घनावृतेंवरेदेववर्षाकाल
उपस्थिते मयूरकेकाकुलितेदर्दुरारावपूरिते कुलस्त्रियःप्रयच्छंतिकस्यार्घ्यंकात्रदेवता किंव्रतंकस्यविख्यातमिदंक
स्यांतिथौभवेत् श्रीकृष्णउवाच प्रवृत्तेश्रावणेमासिकृष्णपक्षेह्युपस्थिते एकादश्यांशुचिर्भूत्वास्नात्वासर्वौषधीजलैः
माषचूर्णेनराजेंद्रकुर्य्यादिंदुरिकाशतं मोदकांश्चतथापंचघृतप्रस्थंसुनिर्मलं नरानेकैकमुद्दिश्यततोगत्वाजलाशये
दुष्टपानीयरहितेनवमेघजलैर्भृते तस्यैवपुलिनेरम्येजलांतेगोमयादिना कृत्वामराडिकंवृत्तंपिष्टकादिभिरावृतं चर्चि
तंगंधकुसुमैर्धूपदीपाक्षतैर्जलैः तत्रचंद्रंलिखेद्देवंरोहिण्यासहितंविभुं अर्चयेत्तंसभार्य्यंहिमंत्रेणानेनभावितः
सोमराजनमस्तेस्तुरोहिण्यैतेनमोनमः महासतिमहादेविसंपादयममेप्सितं इत्थंसंपूज्यतस्याग्रेनैवेद्यंदेयमार्चि
तं तच्चैवब्राह्मणेदद्यात्सोमोमेप्रीयतामिति प्रीयतामितिनदेवीरोहिणीशशिनःप्रियेति एवमुच्चार्य्यदत्वाचततोंत
र्जलमाविशेत् कंठांतंकटिमात्रंवागुल्फांतंवाजलाशये ध्यायेतमनसाचंद्ररोहिणीसहितंतदायावत्समस्तंयद्भुक्तंभूत्वा
दांतस्तटेस्थितः निविश्यवसनंप्राप्यततोविप्रायभोजनं दक्षिणासहितंदेयंनिष्पावंवापिकल्पयेत्भक्त्याशक्त्यायथा
वित्तंयथाचित्तंतथातथा यः करोतिनरोराजन्नारीवाचकुमारिका वर्षेवर्षेविधानेनयथेदंरोहिणीव्रतंइहलोकेचिरं

स्थित्वाधनधान्यसमाकुले गृहाश्रमेशुभांलक्ष्मींपुत्रपौत्रादिसंततिं ततस्तुतीर्थमरणंततोब्रह्मपुरंव्रजेत्तस्माद्विष्णुपुरंपार्थततोरुद्रपुरंशुभं हेरोहिणीशशधराभिमताहिताचकिंकारणंशृणुनरेंद्रानिवेदयामि संमृष्टमाषवरबिंदुविकासितंयद्रुकंजलेगुडघृतेनफलंतदेव इतिभविष्योत्तरेरोहिणीचंद्रव्रतं इयंश्रावणकृष्णैकादशीकामिका अस्याःकथाब्रह्मवैवर्त्ते पद्मपुराणेच युधिष्ठिरउवाच श्रावणस्यासितेपक्षेकिंनामैकादशीभवेत् तन्मेकथयगोविंदवासुदेवनमोस्तुते श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिकथांपापप्रणाशिनीं याप्रोक्ताब्रह्मणापूर्वंपृच्छतेनारदायच नारदउवाच भगवन्श्रोतुमिच्छामित्वत्तोहंकमलासन श्रावणस्यासितेपक्षेकिंनामैकादशीमता कोदेवःकोविधिस्तस्याः किंपुण्यंकथयप्रभो ब्रह्मोवाच शृणुनारदतेवच्मिलोकानांहितकाम्यया श्रावणैकादशीकृष्णाकामिकानामनामतः यस्याःश्रवणमात्रेणवाजिपेयफलंलभेत् अस्यांयःपूजयेद्देवंशंखचक्रगदाधरं श्रीधराख्यंमहाविष्णुंमाधवंमधुसूदनं पूजतेध्यायतेयोवैतस्यपुण्यफलंशृणु नगयायांनकाश्यांचनैमिषेनचपुष्करे तत्फलंसमवाप्नोतियत्फलंकृष्णपूजनात् गोदावर्यांगुरौसिंहेव्यतीपातेचदंडके नतत्फलमवाप्नोतियत्फलंकृष्णपूजनात् ससागरवनोपेतांयोददातिवसुंधरां कामिकाव्रतधारीयउभौसमफलौस्मृतौ प्रसूयमानांयोधेनुंदत्वासोपस्करांनृप तत्फलंसमवाप्नोतिकामिकाव्रतकृन्नरः श्रावणेश्रीधरंदेवंपूजयेद्योनरोत्तमः तेनैवपूजितादेवागंधर्वोरगकिन्नराः तस्मात्सर्वप्रयत्नेनकामिकादिवसेहरिः पूजनीयोयथाशक्तिमानुषैःपापभीरुभिः संसारार्णवमग्नायेपापपंकेसमाकुलाः तेषामुद्धरणार्थायकामिकाव्रतमुत्तमं एवंनारदजानीहिपुराप्राहहरिःस्वयं ॥ अध्यात्मविद्यानिरतैर्यत्फलंप्राप्यतेनरैः ततोबहुतरंविद्धिकामिकाव्रतसेवनात् रात्रौजागरणंकृत्वाकामिकाव्रतकृन्नरः नपश्यतियमंरौद्रंनैवपश्यतिदुर्गतिं नपश्यतिकुयोनिंचकामिकाव्रतसेवनात् कामिकायाव्रतंकृत्वाकैवल्यंयोगिनोगताः तस्मात्सर्वप्रयत्नेनकर्तव्यंनिय

तात्मभिः तुलसीप्रसवैःपत्रैर्योनरःपूजयेद्धरिं नसालिप्यतिपापेनपद्मपत्रमिवांभसा स्वर्णभारसहस्रंतुरजतंचचतुर्गुणं तत्फलंसमवाप्नोतितुलसीदलपूजनात् रक्तमौक्तिकवैदूर्य्यप्रवालादिभिरर्चितः नतुष्यतितथाविष्णुस्तुलसीपूजनाद्यथा तुलस्यामंजरीभिस्तुपूजितोयेनकेशवः आजन्मकृतपापस्यतेनसंमार्जितालिपिःयादृष्टानिखिलाघसंघशमनीस्पृष्टावपुःपावनीरोगानामभिवंदितानिरसनीसिक्तांतकत्रासिनी प्रत्यासत्तिविधायिनीभगवतःकृष्णस्यसंरोपितान्यस्तातच्चरणेविमुक्तिफलदातस्यैतुलस्यैनमःदीपंददातियोमर्त्योदिवारात्रौहरेर्दिने तस्यपुण्यस्यसंख्यानंचित्रगुप्तोनवेत्यलं कृष्णाग्रेदीपकोयस्यज्वलत्येकादशीदिने पितरस्तस्यतृप्यंतिह्यमृतेनदिविस्थिताःघृतेनदीपंप्रज्वाल्यतिलतैलेनवापुनः प्रयातिसूर्यलोकेसदीपकोटिशतैर्वृतः इयंतवाग्रेकथिताकामिकामहिमामया अतोनरैश्चकर्त्तव्यासर्वपातकनाशिनी ब्रह्महत्याप्रशमनीभ्रूणहत्याविनाशिनी त्रिदिवस्थानदात्रीच महापुण्यफलप्रदा श्रुत्वा माहात्म्यमेतस्यानरःश्रद्धासमन्वितः विष्णुलोकमवाप्नोतिसर्वपापैःप्रमुच्यते इतिब्रह्मवैवर्त्तेपद्मपुराणेच श्रावणकृष्णैकादशीकामिकाव्रतम् अथश्रीधरनाम्नोविष्णोःपूजनंनारदीयेपि श्रावणेकृष्णपक्षेतुएकादश्यांनरोत्तमःकामिकांसमुपोष्यैवनियमेनद्विजोत्तमः दत्वाचदक्षिणांतेभ्योविसृज्याश्रितबांधवैः एवंयःकुरुतेविप्रकामिकाव्रतमुत्तमं सर्वकामान्लभतेयातिविष्णोःपरंपदमिति अत्रद्वादश्यांश्रीधरपूजादिकंविधेयम् तदुक्तंमहाभारतेदानधर्मे अहोरात्रेणद्वादश्यांश्रावणेमासिश्रीधरं पंचयज्ञमवाप्नोतिविमानस्थःसमोदतेइति अत्रत्रयोदश्यांकामत्रयोदशीव्रतं हेमाद्रौ ब्रह्मोवाच कामंपूज्यत्रयोदश्यांसुरूपोजायतेनरः इष्टांरूपवतींभार्य्यांकामांश्चलभतेऽधिकान् पक्षत्रयोदशीव्रतमपिकार्य्यं श्रावणकृष्णचतुर्दश्यांपक्षचतुर्दशीव्रतं शिवरात्रिव्रतेवक्ष्यते श्रावणामावास्यायांश्राद्धादिकृत्यमुक्तं नारदीये ॥ शुचौनभसिभाद्रेचमासेपूर्णासितेतिथौ पितृश्राद्धदानहोमसुरार्च्यानंत्यमश्नुत इति * ॥

अत्रैवअमावास्यांपिठोराव्रतं मध्यदेशेतुपोलाइतिप्रसिद्धं साप्रदोषव्यापिनीग्राह्या यदापूर्वरात्रौप्रदोषव्याप्त्यभावस्तदापराकार्या अथव्रतविधिः मासपक्षाद्युल्लिख्यममइहजन्मनिजन्मांतरेवा पुत्रपौत्रफलावाप्त्यर्थंपिठोराव्रतंकरिष्य इतिसंकल्प्य देवीपूजांकृत्वा संध्याकालेस्नात्वाप्रदोषसमयेदेवींसंपूज्यषोडशोपचारैःब्राह्मणंसुवासिनींसंभोज्य पश्चात्स्वयंभुंजीत इतिविधिः नमोदेव्यैइतिमंत्रेणषोडशोपचारैःपूजनंकुर्य्यात् अथकथा इंद्राण्युवाच अपुत्रालभतेकामंपरत्रचमहत्फलं व्रतानांपरमंश्रेष्ठंकथयत्वंहिपार्वति पार्वत्युवाच प्राचीनःश्रीधरोविप्रअत्रिगोत्रोधनेश्वरः तस्यभार्यासुमित्राचगृहधर्मेणवर्त्तते श्रीधरस्यसुतोज्येष्ठःशंकरोनामनामतः तस्यभार्याविदेहाचमृतापत्याभवत्तदा श्रीधरस्यपितुःश्राद्धेविदेहाचप्रसूयते दुःखयुक्तासुमित्राचविदेहांपरिवर्जयत् दुःखयुक्तावनंप्राप्तामठमेकंददर्शसा सरिच्चप्रचलायत्रविदेहातत्रसागता मठमध्येस्थितानारीपश्यंतीचपुनःपुनः कुत्रेयमधुनाप्राप्तालक्षणान्वितसुंदरी मठाधिपाविचार्यैवंविदेहामाहसत्वरं डाकिनीयक्षवेतालैरनेकैःस्थीयतेशुभे त्वांग्रसिष्यंतिसकलागच्छशीघ्रंयथागतं विदेहोवाच दुःखयुक्तांचमांचात्रक्रामंतीचवनांतरं माग्रसयुश्चपिंगाक्षिक्षेमंममभवेत्कथं मठनार्युवाच अत्रागत्यचतुःषष्टिदिव्ययोग्यादयस्त्विमाः पूजनार्थंसमायातानिशामध्येशुभाःस्थिताः तवकामंप्रकुर्वंतिजीविष्यंतिचबालकान् विल्वपत्रेषुगुप्तात्वमधुनाभवभामिनी लुप्तातत्रविदेहाचविल्वपत्रेषुसंस्थिता क्षणेनैकेनक्षेटिंगाम्मठमध्येसमागताः ज्ञात्वामनुष्यगंधंचमठनारीमपृच्छत कुतोमनुष्यगंधश्चमठगेहंसमाश्रितः निशामध्येचतुःषष्टि दैव्यस्तत्रसमागताः अनेकैश्चमहारत्नैः फलैर्नानाविधैरपि निविष्टांमठदेवींतामाह्वानंकुर्वंतेस्माहि श्रावणस्यतुमासस्यकृष्णपक्षेकुहूतिथौ पूजांकृत्वाचतुः षष्टिरतिथीन्ब्रुवतेस्माहि वदतेस्ममनुष्यास लुप्ताथप्रकटाभवत् ममाशुचित्वमापन्नंमातर्मेबालकंमृतं तवाग्रेमृतमादायास्थितास्मीतिचबालकं ममगर्भा

श्चतुःषष्ठ्यःसजीवाश्चभवंत्वितःतत्रस्थितंचनैवेद्यंनारिकेप्रतिगृह्यतां चतुःषष्टिस्ततस्तुष्टाददौतस्यैशुभंवरं श्रीधरस्यस्नुषाहित्वंशंकरस्यचवल्लभा पुत्रपौत्रयुताराज्यंभुक्त्वापूज्यासुरालये अष्टपुत्राभवत्वाशुविदेहेगम्यतांपुरं आगतायेनमार्गेणतेनैवपुनरेव हि पुरांतरंस्थित।गत्वाप्रविवेशस्वमंदिरं श्रीधरश्चसुमित्राचशंकरोबांधवैःसह विदेहाचाष्टपुत्रैश्चयुक्तासामंगलोत्सवैः प्रापुर्मुदं महाभागादेवीनांचप्रसादतः द्विजमंत्रादिनिर्घोषैर्दुंदुभीःपटहध्वनैः मृगाक्षिमंगलारावैर्मृदंगैर्नृत्यघोषकैः तयासंपूजितादेव्यश्चतुःषष्टिःप्रकीर्तिताः तद्व्रतंशृणुचेंद्राणिपिठोराख्यंकुहूतिथौ। तासांस्मरणमात्रेणपुत्रपौत्रधनान्विता नारीभवतिचेंद्राणिशृणुत्वंनामपूजनं दिव्ययोगीमहायोगी।सिद्धयोगीगणेश्वरी प्रेताक्षीडाकिनीकालीकालरात्रिर्निशाचरी ह्रींकारीरौद्रवेतालीहुंकारीभूतडामरी। ऊर्ध्वकेशीविरूपाक्षी।शुष्कांगीनरभोजना भराडीवीरभद्राचधूम्राक्षीकलहप्रिया राक्षसीघोररक्ताक्षीविश्वरूपाभयंकरी चंडिकावीरकौमारीवाराहीमुंडधारिणी भास्वरीरौद्रवेतालीश्रीपर्णीत्रिपुरांतका भैरवीध्वंसिनीक्रोधीदुर्मुखीप्रेतवाहिनी खट्गांगीदीर्घलंबोष्ठीमालिनीमंत्रयोगिनी कालाग्निग्रहणीचक्रीकंकालीभुवनेश्वरी। कंटकीकोटिनीरौद्रीयमदूतीकरालिनी घोराक्षीकार्मुकीलौकीकाकदृष्टिरधोमुखी मुंडाग्रधारिणीव्याघ्रीकिंकिणीप्रेतभक्षिणी कालरूपाचकामाख्याउष्ट्राणीयोगिपीठिका महालक्ष्मीरेकवीराकालरात्रीचपीठिका नमोस्तुवश्चतुषष्टिदेवीभ्यःशरणंव्रजे पुत्रषष्ठिश्रीवृद्धिकामोहंभक्त्यासंपूजिताःशुभाःएवमिंद्राणिकथितंपिठोराख्यंमहाव्रतं भक्त्याकुर्वंतियानार्यःकृतकृत्याभवंतिताःसुखसौभाग्यसंयुक्ताश्चतुःषष्ठ्याःप्रसादतः इतिभविष्योत्तरपुराणेपिठोराव्रतंसंपूर्णम् ⁂ व्रतविधिःस्कांदे प्रातःस्नानादिनिर्वर्त्यवार्षिकवत्पूजामुद्यापनसंकल्पंचकुर्य्यात् तिथ्यादिसंकीर्त्यआत्मनःस्वकुलस्यचसंततिविच्छेदाभावपूर्वकपुत्रपौत्रलक्ष्मीसुखाद्यभिवृद्धयेसप्तवर्षावध्याचरितापिठोराव्रतसंपूर्णतासिद्ध्यर्थं चतुःषष्टियोगिनीस्वरूपसप्तमा

व्र०र०
श्रावण
१०

तृकाप्रीत्यर्थंतदुद्यापनाख्यंकर्मकरिष्ये वृताचार्य्यउक्तप्रकारेणसर्वतोभद्रेअष्टौकलशान्प्रतिष्ठाप्य सप्तकलशेषु क्रमेण हैमीःसप्तप्रतिमानाममंत्रेण ब्राह्मीं महेश्वरीं -कौमारीं. वैष्णवीं- वाराहीं. इंद्राणीं- चामुंडां. आवाह्य य ज्ञानांसप्तमातरोइत्यनेनपूजयेत् तदुत्तरे सुवर्णादिपूर्णपात्रयुते कलशे चतुःषष्टियोगिनीः हैमप्रतिमासुअक्षतपुंजेषुआवाहयेत् दिव्ययोगिनीं १ महायोगिनीं २ सिद्धयोगिनीं ३ गणेश्वरीं ४ प्रेताक्षीं- ५ डाकिनीं ६ कालीं ७ कालरात्रीं ८ निशाचरीं ९ हूंकारीं १० रुद्रवेतालीं ११ क्षींकारीं- १२ भूतडामरीं १३ ऊर्ध्वकेशीं १४ विरूपाक्षीं १५शुष्कांगीं . १६नरभोजनां १७ भराडीं १८ वीरभद्रीं. १९ धूम्राक्षीं. २० कलहप्रियां- २१राक्षसीं. २२ घोररक्ताक्षीं २३ विश्वरूपां. २४ भयंकरीं २५ भास्वरीं २६ रौद्रवेतालीं २७ श्रीपर्णीं २८ त्रिपुरांतकां २९ भैरवीं ३० ध्वंसिनीं३१क्रोधिनीं ३२ दुर्मुखीं ३३ प्रेतवाहिनीं ३४ कंटकीं ३५ कोटिनीं-३६ यमदूतीं ३७ करालीं ३८ खट्वांगीं ३९ दीर्घलंबोष्ठीं.४०मालिनीं.४१ मंत्रयोगिनीं.४२कालाग्निगृहिणीं-४३ चक्रीं.४४ कंकालीं.४५ भुवनेश्वरीं-४६स्फाराक्षीं-४७ कार्मुकीं.४८लौकिकीं४९काकदाष्टिं.५०अधोमुखीं-५१ भक्षणीं.प्रेरणीं.५२ व्याघ्रीं.५३कंकणीं.५४प्रेतभक्षणी-५५ कालरूपां५६ वीरकौमारिकां५७ चंडां.५८ वाराहीं.५९ मुंडधारिणीं६०कामाक्षीं ६१उष्ट्राणीं ६२ जालंधरीं ६३ महालक्ष्मीं६४ततःसुवर्णपात्रेणफलपुष्पयुतमर्घ्यंनाममंत्रेणप्रत्येकंदद्यात् रात्रिंनिनयेत् प्रातःपीठदेवताःसंपूज्य अग्निंप्रतिष्ठाप्यअन्वादध्यात् सप्तमातृः अष्टोत्तरशतमाज्याहुत्यायोगिनीश्चैकैकयाज्याहुत्याब्रह्मादिदेवताश्चैकैकयाज्यहुत्यायक्ष्ये पूजामंत्रेणहोमः होमस्तु कृताकृतः ततःसप्तमिथुनानिवस्त्रादिनासंपूज्य वस्त्रदक्षिणाप्रतिमायुतान्सप्तकलशांस्तेभ्योदद्यात् तत्रमंत्रः सोपस्करंचकलशंगृहाणद्विजसत्तम प्रीयंतांमातरोमह्यंलोकानांस्थितिहेतवे ततोयोगिनीपीठमाचार्यायदत्त्वाव्रतपूर्त्त

ये अष्टौगास्तेभ्योदत्त्वासदन्नेनसंतर्प्य आशिषोगृहीत्वास्वयंभुंजीतइतिपिठोराव्रतम् श्रावणशुक्लप्रतिपदमारभ्याचारप्राप्तंविल्वरोटकव्रतम् युधिष्ठिरउवाच हृषीकेशमयाकारिव्रतदानाद्यनेकधा श्रोतुमिच्छामिदेवेशव्रतंसंपत्तिकारकं येनव्रतेनदेवेशपुनाराज्यंलभामहे तथाव्रतंतुमेदेहिपांडवानांकृपाकर श्रीभगवानुवाच वक्ष्यामिशुभदंपार्थ लक्ष्मीवृद्धिप्रदायकं धर्मार्थकाममोक्षाणांनिदानंपरमंव्रतं राजोवाच केनचादौपुराचीर्णंमर्त्यैकेनप्रकाशितंविधिनाकेनकर्त्तव्यंतत्सर्वंवदकेशव श्रीभगवानुवाच आसीत्सौम्यपुरेराजासोमोनामेतिविश्रुतः क्षात्रधर्मेतिकुशलःप्रजापालनतत्परः तस्यराज्येप्रजाःसर्वाःसौम्याधर्मपरायणाः तस्यराज्ञस्तुचामात्यःसोपिसौम्यःशुभावहः तस्मिन्सरस्तुसौम्यंचसदासौम्यांबुनाप्लुतं अभूत्सोमेश्वरोदेवोलोकानांपालनायच तत्राभवत्सोमशर्माब्राह्मणोवेदपारगः वेदार्थविच्छास्त्रविच्छुद्धाचारोतिदुर्लभः तस्यभार्याशुभाचारापुरंध्रीचारुभाषिणी भर्तृशुश्रूषणरताकल्याणाप्रियवादिनी सोकरोच्चकुटुंबार्थंकणयज्ञंदिनेदिने नलभ्यतेधिकंतेनधनंधान्यंतथैवच अतीवखेदखिन्नस्तुविचार्यचपुनःपुनः किंकरोमिक्वगच्छामिसंभाव्योहंमहीतले केनकर्मविपाकेनलभतेचेदृशंफलं अथवार्थकरंधर्म्यंदेवपूजादिकंतथा ससोमेशकरोद्भक्तिंदैन्यनाशायपार्थिव कदाचित्खेदखिन्नोसावाजगामसरोवरं अभूत्सोमेश्वरःसाक्षात्तस्मिन्दृष्टः सरोवरे वृद्धब्राह्मणरूपेणकृपयापरयायुतः तेनसंदुःखितोदृष्टःसोमशर्माद्विजोत्तमः दुखंकिमर्थंसजातंत्वन्यथाचरणेन च किंचिद्दत्तंनास्तिपूर्वंतदर्थमीदृशंफलं तस्यतद्वचनंश्रुत्वाब्राह्मणस्त्विदमब्रवीत् भोभोविप्रवरश्रेष्ठव्रतमेकंवदामिते तेनादिष्टंव्रतंचेदंपूर्णंसंपत्तिकारकं सोमशर्मोवाच भोभोब्राह्मणशार्दूलव्रतंतद्वदमेप्रभो यस्यानुष्ठानमात्रेणलक्ष्मीवृद्धिःप्रजायते कस्मिन्मासेचकर्त्तव्यंकिंदानंकिंचभोजनं धनलाभायकर्तव्यंकस्यदेवस्यपूजनं कैस्तुपुष्पैःप्रकर्त्तव्यापूजाचारुतराशुभा नैवेद्यंकीदृशंदेयमर्घ्यंकैस्तुफलैर्भवेत् यदितुष्टोसिविप्रेंद्रतत्सर्वंब्रूहिमेप्रभो ब्राह्म

णउवाच साधुविप्रत्वयापृष्टंव्रतंवृद्धिप्रदायकं विधानंतस्यवक्ष्यामिसर्वसिद्धिप्रदायकं श्रावणस्यसितेपक्षेप्रथ
मेसोमवासरे प्रकर्त्तव्यंव्रतंविप्रशुभंनियमपूर्वकं सार्धमासत्रयंविप्रकर्तव्यंविधिपूर्वकं विल्वदलैस्तुकर्त्तव्यंचतु
र्दश्यांतुकार्त्तिके व्रतारंभस्तुकर्त्तव्योनियमश्चविचक्षणैः अद्यारभ्यव्रतंदेवरोटकाख्यंमनोहरं करोमिपरयाभक्त्या
पाहिमांजगतांगुरो दिनेदिनेप्रकर्त्तव्यापूजादेवस्यशूलिनः कथांविनानभोक्तव्यंप्रत्यहंचपुनःपुनः उपोषणंचतुर्द
श्यांकर्त्तव्यंविधिपूर्वकं शुचिर्भूत्वादिनेतस्मिन्कर्तव्यंरोटकव्रतं चतुर्दश्यांनिराहारःस्थित्वाचैवपरेहनि भोक्ष्यामि
पार्वतीनाथसर्वसिद्धिप्रदायक इत्युपोषणमंत्रः कृत्वामाध्यान्हिकंकर्मनित्यपूजादिकंतथातस्यांरात्रौतुकर्तव्यापूजा
देवस्यशूलिनः शुभेचैतत्प्रदेशेतुकर्त्तव्यंपुष्पमंडपं पूज्यस्तत्रशिवोदेवोधर्मकामार्थसिद्धये क्षीरादिस्नपनंकुर्य्या
च्चंदनादिविलेपनं कृष्णागुरुसकर्पूरंमृगनाभिविमिश्रितं पुष्पैर्नानाविधैरम्यैःपूज्योदेवोमहेश्वरः धनकामेनकर्तव्या
पूजादेवस्यशूलिनः विल्वपत्रैरखंडैश्चतुलसीपत्रकैस्तथा नीलोत्पलैश्चारुतरैःकर्त्तव्यापुण्यवर्द्धिनी कल्हारकम
लैश्चैवकुमुदैश्चातिशोभनैः चंपकैर्मालतीपुष्पैरकुरविंदैःशुभावहैः मंदारैरर्कपुष्पैश्चपूजाचान्यैःशिवप्रियैः अन्यैर्ना
नाविधैःपुष्पैर्ऋतुकालोद्भवैःशुभैः धूपैर्नानाविधैःपार्थपुण्यवर्धनसाधकैः दीपास्तत्रप्रदातव्याघृतपूर्णामनोरमाः
लेह्यैःपेयैस्तथाभोज्यैःस्वादुभिश्चशिवप्रियैः अन्यैर्नानाविधैरस्यैस्तथाविप्रवरैस्तुतं नैवेद्यंतुप्रकर्त्तव्यंरोटकानां
विशेषतः कर्त्तव्यारोटकाःपंचपुरुषाहारमानतः द्वौतुविप्रायदातव्यौद्वाभ्यांचभोजनंशुभं एकोदेवायदातव्योनैवे
द्यार्थंसदाबुधैः महेशायप्रदातव्यंतांबूलंसुमनोहरं अर्घ्यदानंप्रदातव्यंधनसंपत्तिकारकं गुर्जरीचशुभाद्राक्षामातु
लिंगंमनोरमं आक्षोटानिदाडिमंचनारंगानिशुभानिच कर्कटीचशुभाप्रोक्ताअर्घ्यदानेमनोहरा अन्यैर्नानाविधैः
पार्थऋतुकालोद्भवैःशुभैः यःकरोत्यर्घदानंचतस्यपुण्यंवदाम्यहं इलांयःसागरैर्युक्तांरत्नैश्चान्यैर्मनोरमैः दत्वा

यत्फलमाप्नोतितेनतत्फलमाप्नुयात् अनेनविधिनातेनतत्कार्य्यंव्रतसिद्धये पंचवर्षंप्रकर्त्तव्यमतुलंधनलिप्सुभिः पश्चादुद्यापनंकुर्य्याद्रोटकस्यव्रतस्यच उद्यापनेतुकर्त्तव्यौहैमरौप्यौतुरोटकौ इतिशिवपुराणेविल्वरोटकव्रतम् नारदीयेऽप्येवं नभःशुक्लप्रतिपदिलक्ष्मीवृद्धिप्रदायकं धर्माद्यकाममोक्षाणांनिदानंपरमंव्रतं सोमवारंसमारभ्य यावन्मासत्रयंद्विज कार्त्तिकेसितभूतायामुपोष्यव्रतकृन्नरः पूर्णायांशिवमभ्यर्च्यसौवर्णंवस्त्रसंयुतं दद्याद्विप्रायसंकल्प्यधनवृद्ध्यैमुनीश्वर श्रावणशुक्लद्वितीयायांविश्वकर्मशयनम् तत्रचंद्रायार्घ्यदानं नारदीये नभःशुक्लद्वितीयायांविश्वकर्माप्रजापतिः स्वपतेसातिथिःपुण्याह्यशोकशयनाह्वया सशक्तिकंतुशय्यायांपूजयित्वाचतुर्मुखं इममुच्चारयेन्मंत्रंप्रणम्यजगतांपतिं चंद्रार्घ्यदानमंत्रोक्तंसर्वसिद्धिप्रदायकं श्रीवत्सधारिन्श्रीकांतश्रीवासश्रीपतेव्यय गार्हस्थंमाप्रणाशंमेयातुधर्मार्थकामदइति श्रावणशुक्लतृतीयायांस्वर्णगौरीव्रतंनारदीये नभःशुक्लतृतीयायांस्वर्णगौरीव्रतंचरेत् उपचारैःषोडशभिर्भवानींनामभिर्यजेत् पुत्रान्देहिधनंदेहिसौभाग्यंदेहिसुव्रते अन्यांश्च सर्वकामान्मेदेहिदेविनमोस्तुते एवंसंप्रार्थ्यदेवेशींभवानींभवसंयुतां व्रतसंपूर्त्तिकामातुवायनंदापयेत्तथा एवं षोडशवर्षाणिकृत्वानारीशुभंव्रतं उद्यापनंचरेद्भक्त्यावित्तशाठ्यविवर्जिता मंडपेमंडलेशुद्धेगणेशादिसुरार्चनं कृत्वाताम्रमयंपात्रंकलशोपरिविन्यसेत् सौवर्णींप्रतिमांतत्रभवान्याःपरिपूजयेत् गंधपुष्पादिभिःसम्यक्ततोहोमंसमाचरेत् वेणुपात्रैःषोडशभिःपक्वान्नपरिपूरितैः समर्प्यदेव्यैनैवेद्यंद्विजेशंतान्निवेदयेत् वायनंचततःपश्चाद्दद्यात्संबंधिबंधुषु प्रतिमांगुरवेदत्त्वाद्विजेभ्योदक्षिणांतथा पूर्णंलभेत्फलंनारीव्रताचरणतत्परा अथास्यांश्रावणशुक्लतृतीयायांस्वर्णगौरीव्रतेपूजा देविदेविसमागच्छप्रार्थयेहंजगन्मये इमांमयाकृतांपूजांगृहाणसुरसत्तमे आवाहनम् १ भवानित्वंमहादेविसर्वसौभाग्यदायके अनेकरत्नसंयुक्तमासनंप्रतिगृह्यतां आसनम् २ सुचारुशी

तलंदिव्यंनानागंधसुवासितं पाद्यंगृहाणदेवेशिशिवेनसहितेशिवे पाद्यं २ अर्घ्यंगृहाणदेवेशिफलरत्नसमान्वितं अष्टांगकल्पितंभक्त्याशिवेनसहसुव्रते अर्घ्यम् ३ गंगातोयंसमानीतंसुवर्णकलशेस्थितं आचम्यतांमहादेविशंकरप्रियवादिनि आचमनं ४ गंगासरस्वतीरेवापयोष्णीयमुनाजलैः स्नापितासिमयादेविसदाशांतिंप्रयच्छमे स्नानं ५ सर्वभूषाधिकेसौम्येलोकलज्जानिवारणे मयोपपादितेदेविवाससीप्रतिगृह्यतां वस्त्रं ६ कर्पूरकुंकुमैर्युक्तं हरिद्रादिसमान्वितं कस्तूरिकासमायुक्तंचंदनंप्रतिगृह्यतां चंदनं ७ अक्षतान्धवलान्देविकुंकुमाक्तान्सुशोभनान् भालालंकारसिद्ध्यर्थंगिरिजेप्रतिगृह्यतां अक्षताः ८ माल्यानिचसुगंधीनिमालत्यादीनियानिच मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यतां पुष्पाणि ९ देवद्रुमरसोद्भूतःकालागुरुसमन्वितः आदीयतेमयाधूपोभवानिघ्राणतर्पणः १० आज्यंचवर्त्तिसंयुक्तंवह्निनायोजितंमया दीपंगृहाणदेवेशि त्रैलोक्यतिमिरापहं दीपं ११ अन्नंचतुर्विधं स्वादुरसैःषड्भिःसमन्वितम् नैवेद्यंगृह्यतांदेविप्रसादंकुरुसर्वदा नैवेद्यम् १२ कर्पूरैलालवंगादितांबूलदलसंयुतं क्रमुकस्यफलंदेवितांबूलंप्रतिगृह्यताम् तांबूलं १३ इदंफलंमयादेविस्थापितंपुरतस्तव तेनमेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि फलं १४ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे दक्षिणा १५ पुत्रान्देहिधनंदेहिसौभाग्यंदेहिसुव्रते अन्यांश्चसर्वकामांश्चदेहिदेविनमोस्तुते प्रार्थना भवान्याश्चमहादेव्याव्रतसंपूर्तिहेतवे वायनंद्विजवर्यायप्रीतयेहंददामिते १७ वायनदानमंत्रः १८ नानाषोडशपक्वान्नैर्वेणुपात्राणिषोडश कुर्य्याद्वस्त्रादिभिर्युक्तान्याहूयद्विजदंपतीः व्रतोद्यापनपूर्त्यर्थंब्राह्मणेभ्योददाम्यहं स्वलंकृताःसुवासिन्यःपातिव्रत्येनभूषिताः ममकामसमृद्ध्यर्थंप्रतिगृह्णंतुमोदिता इतिस्वर्णगौरीव्रतपूजा अथोद्यापनं युधिष्ठिरउवाच उद्यापनविधिंब्रूहितृतीयायाःसुरेश्वर भक्तितःश्रोतुमिच्छामिव्रतसंपूर्त्तिहेतवे श्रीकृष्णउवाच उद्यापन

विधिंवक्ष्येसावधानेनवैशृणु त्रिंशद्दंडप्रमाणेनविस्तीर्णंदक्षिणोत्तरं प्रत्यक्प्राग्वैतुराजेंद्रतच्चगोचर्ममुच्यते गोचर्ममात्रंसंलिप्यगोमयेनविचक्षणः मंडलंकारयेत्तत्रनानावर्णैःसुशोभनं ग्रहमंडलपार्श्वेतुपद्ममष्टदलंलिखेत् तन्मध्येस्थापयेत्कुंभमव्रणंमृण्मयंशुभं ताम्रपात्रंप्रकुर्वीतपलैःषोडशभिस्ततः तदर्धार्धेनवाकुर्य्याद्वित्तशाठ्यंविवर्जयेत् कर्षमात्रसुवर्णेनप्रतिमांकारयेद्बुधः तदर्धंमध्यमंप्रोक्तंतदर्धंतुकनिष्ठिकं कृत्वारूपंप्रयत्नेनपार्वत्याचहरस्यच अथताम्रमयेपात्रेप्रतिमांतत्रविन्यसेत् श्वेतवस्त्रयुगच्छन्नंश्वेतयज्ञोपवीतकं भाजनंचतिलैःपूर्णंकलशोपरिविन्यसेत् पार्वत्यासंयुतंकृत्वास्थापयित्वाविधानतः वेदोक्तेनप्रतिष्ठाचकर्त्तव्याचयथाविधि पंचामृतेनस्नपनंकृत्वादेवस्यचोत्तमं स्नानंचकारयेत्पश्चात्ततःपूजांसमाचरेत् चंदनेनसुगंधेनसुपुष्पैश्चप्रपूजयेत् धूपंचकल्पयेद्गंधंचंदनागुरुसंयुतं नानाप्रकारनैवेद्यंतथादीपंचकारयेत् अर्चयेत्पूजयेद्भक्त्यागंधपुष्पैःफलाक्षतैः आवाहनादिकर्त्तव्यंपुराणागमसंभवैः कार्य्याविधानतःपूजाभक्तिश्रद्धासमान्वितैः देवदेवसमागच्छप्रार्थयेहंजगत्पते इमांमयाकृतांपूजांगृहाणसुरसत्तम एवंपूजाप्रकर्त्तव्यारात्रौजागरणंततः गीतनृत्यादिसंयुक्तंकथापुस्तकवाचनं अर्चयेत्पूर्ववद्देवंपश्चाद्धोमंसमाचरेत् स्वगृह्योक्तविधानेनकृत्वाग्निस्थापनंततः प्रारभेत्तुततोहोमंनवग्रहपुरःसरं तिलाश्चयवसंमिश्रानाज्येनचपरिप्लुतान् स्विष्टकृद्धोमपर्य्यंतंकृत्वाविधिवदाचरेत् एवंसमाप्यहोमंतुतत्राचार्य्यंप्रपूजयेत् अर्घ्यपुष्पप्रदानेनवस्त्रालंकारभूषणैः शक्त्यातुदक्षिणांदद्यादोंकारेणसमन्वितां धेनुंसदक्षिणांदद्यात्सुशीलांचपयस्विनीं स्वर्णशृंगींरौप्यखुरांकांस्यदोहनसंयुतां रत्नपुच्छांवस्त्रयुतांताम्रपृष्ठीमलंकृतां सवत्सामव्रणांभद्रांधेनुंदद्यात्प्रयत्नतः सुवर्णेनसमोपेतामाचार्यायचसाधवे षोडशभिःप्रकारैश्चपक्वान्नैःप्रीणयेत्सदा षोडशप्रतिमांदद्याद्ब्राह्मणेभ्यःप्रयत्नतः वंशपात्रस्थितैःपश्चाद्दद्याद्वित्तानुसारतः वंधुभिःसहभुंजीतनियतश्चपरेहनि एवंकृ

26

स्वाभवेत्पार्थपरिपूर्णंव्रतोत्तमम् इतिभविष्योत्तरे स्वर्णगौरीव्रतोद्यापनं अथकथासूतउवाच कैलासशिखरे रम्येसिद्धगंधर्वसेविते उमयासहितःस्कंदःपप्रच्छशिवमव्ययम् स्कंदउवाच करुणासागरेशानलोकानांहितकाम्यया व्रतंकथयदेवेशपुत्रपौत्रप्रवर्धनं शंकरउवाच साधुपृष्टंमहाभागकथयामिषडानन स्वर्णगौरीव्रतंनामसर्वसंपत्करंनृणां पुरासरस्वतीतीरेविमलाख्यामहापुरी तत्रचंद्रप्रभोनामराजाभूद्धनदोपमः तस्यश्रीरूपलावण्यसौंदर्यस्मरविभ्रमे महादेवीविशालाख्येद्वेभार्येचमृगेक्षणे तयोःप्रियतराज्येष्ठातस्यासीन्नृपतेर्नता सकदाचिद्वनं भेजेमृगयासक्तमानसः तत्रशार्दूलवाराहवनमाहिषकुंजरान् हत्वावभ्रामतृष्णार्त्तः सरसीविपनेमहत् चकोरचक्रवाकाह्वपुंडरीकशताकुलं उत्फुल्लमल्लिकोद्दामकुमुदोत्पलमंडितं समासाद्यसरस्तीरेपीत्वाजलमनुत्तमं भक्त्यागौरीमर्चयंतंददर्शाप्सरसांगणं किमेतदितिपप्रच्छराजाराजीवलोचनः स्वर्णगौरीव्रतमिदंक्रियतेस्माभिरुत्तमं सर्वसंपत्करंनृणांतत्कुरुष्वनृपोत्तम राजोवाच विधानंकीदृशंव्रूतकिंफलंविस्तरान्ममताऊचुर्योषितःसर्वानभोमासितृतीयके प्रारब्धव्यंव्रतमिदंगौर्य्याःषोडशवत्सरान् तच्छ्रुत्वासोपिजग्राहव्रतंनियतमानसः गुणैःषोडशभिर्युक्तंडोरकंदक्षिणेकरे बध्नाम्यनेनमंत्रेणकरिष्येहंव्रतंतव ततःकृत्वाव्रतंदेव्यामंदिरामदमत्तयाप्रधृतंडोरकंहस्तेतदृष्ट्वापत्न्यतिकोपिता त्रोटित्वासाचचिक्षेपवाह्यशुष्कतरूपरि नकर्त्तव्यंनकर्त्तव्यमितिराज्ञिवदत्यपि तेनसंस्पृष्टमात्रेणततःपल्लवितांगकः तंद्वितीयाततोदृष्ट्वाभक्तिव्याकुलिताभवत् तन्मूलेडोरकंछिन्नंगृहीत्वासाबबंधह ततस्तद्व्रतमाहात्म्यात्पत्युःप्रियतराभवत् देवीकृतापचारेणसात्यक्तादुःखितावने प्रययौसातुमहिषीध्यायंतीविस्मयाकुला मुनीनामाश्रमेपुण्येनिवसंतसितिक्वचित् निवारितामुनिवरैर्गच्छपापैर्यथासुखं धावंतीविपिनेघोरेशणाध्यक्षंददर्शह तेनदृष्टापिसागौरीत्याज्येयमनपोषिता ततोददर्शाग्रगतांगच्छंतीतुसरःश्रियं ततो

वनश्रियंचाग्रेसर्वाभरणभूषितां पश्यंतीशकुनैस्तत्तद्व्रजंतीष्विवमानुषी तैस्तैर्निराकृतादृष्टानिर्विण्णानिष्पपातह ततस्तत्कृपयागौरीप्रादुरासीन्महासती तांदृष्ट्वादंडवद्भूमौनत्वास्तुत्वानृपांगना जयदेविनमस्तुभ्यंजयभक्तवरप्रदे जयशंकरवामांगेमंगलेसर्वमंगले ततोलब्ध्वावरंभक्त्यागौरीमभ्यर्च्यतद्व्रतं चक्रेदेवीपदंतस्यैददौसौभाग्यसंपदः इतिगौर्य्याःप्रसादेनसर्वान्कामानवाप्यच अंतेशिवपुरंप्राप्तःकांताभिःसहितोनृपः यःशोभनंव्रतमिदंकथितंशिवायाः कुर्य्यात्सचप्रियतरोभविताचगौर्य्याः प्राप्यश्रियंसमधिकंभुविशत्रुसंघंनिर्जित्यनिर्मलपदंसहसाप्रयाति इतिस्कंदपुराणेस्वर्णगौरीव्रतकथा इयमेवतृतीया मधुस्रवेतिनाम्ना गुर्जरदेशेषुप्रसिद्धा परयुताग्राह्येतिदिवोदासः एतस्याचारविधिरपि तत्रैव अस्यामेवाऽनंततृतीयाव्रतंभविष्योत्तरे युधिष्ठिरउवाच सौभाग्यारोग्यफलदंविघ्नाधिक्षयकारकं भुक्तिमुक्तिप्रदंकिंचिद्व्रतंब्रूहिजनार्दन श्रीकृष्णउवाच यदुमायाःपुरादेवउवाचासुरसूदनःकथासुसंप्रवृत्तासुललिताराधनंप्रति तदिदानींप्रवक्ष्यामि भुक्तिमुक्तिफलप्रदं नराणामथनारीणामाराधनमनुत्तमं शृणुष्वावहितोभूत्वासर्वपापप्रणाशनं नभस्येत्वथवैशाखेपुनर्मार्गशिरेतथा शुक्लपक्षेतृतीयायांस्नात्वासद्गौरसर्षपैः गोरोचनंचगोमूत्रंमुस्ताचगोशकृत्तथा दधिचंदनसंमिश्रंललाटेतिलकंन्यसेत् सौभाग्यारोग्यकृद्यस्मात्सदाचललिताप्रिया प्रतिपक्षंतृतीयासुबद्ध्वावापीतवाससी धारयेदथवारक्तेसितानिकुसुमानिच विधवापांडुरक्तानिकुमारीशुक्लवाससी दध्यर्घ्यंपंचगव्येनततःक्षीरेणकेवलं तर्पयेन्मधुनातद्वत्पुष्पगंधोदकेनच पूजयेत्शुक्लपुष्पैश्चफलैर्नानाविधैरपि धान्यकाजाजिलवणगुडक्षीरघृतादिषु शुक्लाक्षतैस्तिलैरर्घ्यैर्ललितायाःसदार्चयेत् आपादादर्चनंकुर्य्याद्गौर्य्याःसम्यक्समासतः वरदायैनमःपादौतथागुल्फौश्रियेनमः अशोकायैनमोजंघेभवान्यैजानुनीतथा ऊरूमंगलकारिण्यैवाग्देव्यैचतथाकटिं पद्मोद्भवायैजठरमुरःकामश्रियेनमः करेसौभाग्यवासिन्यैबाहूशशिमुखश्रि

यै मुखंदर्पणवासिन्यैस्मितंगौर्य्यैनमस्तथा तथानासांसुनेत्रायैत्रिनेत्रायैविलोचने तुष्ट्यैललाटफलकंकात्यायन्यैशिरस्तथा नमोगौर्य्यैनमःसृष्ट्यैनमःकांत्यैनमःश्रिये रंभायैललितायैचवासुदेव्यैनमोनमः एवंसंपूज्यविधिवदग्रतःपद्ममालिखेत् पत्रैर्द्वादशभिर्युक्तंकुंकुमेनसकार्णिकं पूर्वेणविन्यसेद्गौरीमपर्णांचततःपरं भवानींदक्षिणेतद्वद्रुद्राणींतुततःपरं विन्यसेत्पश्चिमेसौम्यांततोमदनवासिनीं वायव्यांपाटलामुग्रामुत्तरेणततोह्युमां लक्ष्मीस्वाहास्वधातुष्टिर्मगलाकुमुदासती रुद्राणीमध्यतःस्थाप्याललिताकर्णिकोपरि कुसुमैरक्षतैःशुभ्रैर्नमस्कारेणविन्यसेत् गीतंमगलघोषैश्चकारयित्वासुवासिनीं पूजयेद्रक्तवासोभीरक्तमाल्यानुलेपनैः सिंदूरकुंकुमस्नानमिष्टाशिरसिपातयेत् नभस्येपूजयेद्गौरीमुत्पलैरसितैस्तथा बंधुजीवैराश्वयुजेकार्त्तिकेशतपत्रकैः कुंदपुष्पैर्मार्गशिरेपौषेवैकुंकुमेनच माघेतुपूजयेद्देवींसिंधुवारेणभक्तितः जात्यातुफाल्गुणेपूज्यापार्वतीपांडुनंदन चैत्रेतुमल्लिकाशोकैर्वैशाखेगंधपाटलैःज्येष्ठेकमलमंदारैराषाढेचजपांबुजैः कदंबैरथमालत्याश्रावणेपूजयेदुमां गोमूत्रगोमयंक्षीरंदधिसर्पिःकुशोदकं बिल्वपत्रार्कपुष्पंचगवांशृंगोदकंतथा पंचगव्यंतथाबिल्वंप्राशयेत्तंडुलोदकं एतद्भाद्रपदाद्यंतुप्राशनंसमुदाहृतं प्रतिपक्षंतृतीयायांमयाप्रोक्तंवरानने ब्राह्मणंब्राह्मणींचैवशिवंगौरींप्रकल्प्यच भोजयित्वार्चयेद्भक्त्यावस्त्रमाल्यानुलेपनैः पुंसःपीतांबरंदद्यात् स्त्रियःकौसुंभवाससी निष्पावाजाजिलवणमिक्षुदंडसमन्वितं स्त्रियैदद्यात्फलंपुंसःसुवर्णोत्पलसंयुतं यथानदेवदेवेशस्त्वांपरित्यज्यगच्छति तथामांसपरित्यज्यपतिर्नान्यत्रगच्छतु कुमुदाविमलानंताभवानीवसुधाशिवा ललितासुकलागौरीसतीरंभाचपार्वती नभस्यादिषुमासेषुप्रीयतामित्युदीरयेत् व्रतांतेवायनंदद्यात्सुवर्णकमलान्वितं मिथुनानिचतुर्विंशत्तदर्धंसकृदर्चयेत् अष्टावष्टावथपुनश्चातुर्मास्येसमर्चयेत् तथोपदेष्टारमपिपूजयेच्चतथागुरुं नपूज्यतेगुरुर्यत्रसर्वास्तत्राफलाःक्रियाः उक्तानंततृतीयैषासदानंतफलप्रदा सर्वपापहरा

स्नानंपंचामृतंदिव्यंपयोदधिघृतंमधु सितयाचसमायुक्तंपूजार्थंप्रतिगृह्यतां इति पंचामृतस्नानं गंगादिसर्व
तीर्थेभ्योमयाप्रार्थनयाहृतं गृहाणविघ्नराजेंद्रमयादत्तंसुभक्तित इति शुद्धोदकस्नानं विनायकायशूरायवरदा
यगजानन उमासुतायदेवायकुमारगुरवेनम इतिगंधं लंबोदरायदेवायसर्वविघ्नापहारिणे उमांगमलजाता
यदानवानांवधायवै इतिपुष्पाणि दशांगंगुग्गुलंधूपंसुगंधंसुमनोहरं उमासुतनमस्तुभ्यंगृहाणवरदायक इति
धूपं परंज्योतिःप्रकाशायसर्वसिद्धिप्रदायच दीपंतुभ्यंप्रदास्यामिमहादेवात्मनेनम इतिदीपं गणानांत्वागणपति
हवामहे इतिदीपं लड्डुकापूपपक्वान्नंफलैर्नानाविधैर्युतं नानाभक्ष्यंपायसंचनैवेद्यंप्रतिगृह्यतां इतिनैवेद्यं
पूगीफलंमहादिव्यमितितांबूलं हिरण्यगर्भगर्भस्थमितिदक्षिणा गणेश्वरगणाध्यक्षगौरीपुत्रगजानन व्रतंसंपूर्णं
तांयातुत्वत्प्रसादादिभानन इतिप्रार्थना एवंसंपूज्यविघ्नेशंयथाविभवविस्तरैः सोपस्करंगणाध्यक्षमाचार्या
यनिवेदयेत् गृहाणभगवन्ब्रह्मन्गणराजंसदक्षिणं व्रतंत्वदर्चनादद्यपूर्णतांयातुसुव्रत इतिमूर्त्तिदानमंत्रः एवं
यःपंचवर्षाणिकृत्वोद्यापनमाचरेत् लभतेसर्वकामानांदेहांतेशांकरंपदं अथवाशुक्लपक्षस्यचतुर्थ्यांसंयतेंद्रियः कुर्या
द्वर्षत्रयंत्वेवंसर्वसिद्धिमवाप्नुयात् उद्यापनंविनायस्तुकरोतिव्रतमुत्तमं तेनशुक्लतिलैःकार्यंप्रातःस्नानंषडानन हे
म्नावारजतेनापिकृत्वागणपतिंबुधः पंचगव्यैस्तुसंस्नाप्यदूर्वाभिःसंप्रपूजयेत् अथदूर्वालक्षणं सप्तपत्रास्तुहरिता
दूर्वाःप्रादेशसंमिताः यदिवापंचपत्रास्तुविस्तृताःषड्भिरंगुलैः प्रत्येकंमूलमंत्रेणलक्षपूजांसमाचरेत् समाप्तौतुमहा
पूजांहैमींदूर्वांसमर्पयेत् इतिदूर्वाप्रकारः इदंदूर्वापूजनंपार्थिवगणपतिपूजायामपिकार्यं तथाचैकविंशतिपत्रिका
पूजापिकार्या पुष्पपूजापि करवीरपुष्पं १ कल्हारपुष्पं २ कदंबपुष्पं ३ शतावरीपुष्पं ४ जाती. ५ मं
दार- ६ कुंदपु. ७ भृंगराज. ८ चंपकपु- ९ कर्कटपु. १० मालतीपु. ११ शमीपु. १२ वकुलपु. १३

देवीसौभाग्यवरवर्धिनी नचैनांवित्तशाठ्येनकदाचिदपिलंघयेत् नरोवायदिवानारीवित्तशाठ्यात्पतत्यधः गर्भिणीसूतिकानक्तंकुमारीवाथरोगयुक् यदाकदाचिदन्येनक्रियमाणांतुकारयेत् इमामनंतफलदांतृतीयांयःसमाचरेत् कल्पकोटिशतंसाग्रंशिवलोकेसपूज्यते वित्तहीनोपियःकुर्याद्वर्षत्रयमुपोषणैः युक्तमंत्रविधानेनसोपितत्फलमाप्नुयात् नारीवाकुरुतेयातुकुमारीविधवातथा सापितत्फलमाप्नोतिगौर्य्यनुग्रहभाविता इतिपठतिशृणोत्यपापमिच्छन्गिरितनयाव्रतमिंद्रलोकसंस्थःमतिमपिचददातिसोपिदेवैरमरवधूजनकिन्नरैश्चपूज्यइतिभविष्योत्तरेभाद्रशुक्लानंततृतीयाव्रतं अथश्रावणेकार्त्तिकेशुक्लचतुर्थ्यांदूर्वागणपतिव्रतं मदनरत्ने सौरपुराणे स्कंदउवाच केनव्रतेनभगवन्सौभाग्यमतुलंभवेत् पुत्रपौत्रधनैश्वर्य्यैर्मनुजःसुखमश्नुते तन्मेवदमहादेवव्रतानामुत्तमंव्रतं श्रीमहादेवउवाच अस्तिदूर्वागणपतेर्व्रतंत्रैलोक्यविश्रुतं भगवत्यापुराचीर्णंपार्वत्याश्रद्धयासह सरस्वत्यामहेंद्रेणविष्णुनाधनदेनच अन्यैश्चदेवैर्मनुजैर्गंधर्वैःकिन्नरैस्तथा चीर्णमेतद्व्रतंसर्वैःपुराकल्पेषडानन चतुर्थीयाभवेच्छुक्लानभोमासस्य पुण्यदा तस्यांव्रतमिदंकार्य्यंकार्त्तिक्यांवाषडाननन कार्त्तिकशुक्लचतुर्थ्यामित्यर्थः चतुर्थ्यांविघ्नहर्त्तारंकलशेताम्रभाजनेवेष्टितंरक्तवस्त्रेणसर्वतोभद्रमंडले पूजयेद्रक्तकुसुमैःपत्रिकाभिश्चपंचभिः बिल्वपत्रमपामार्गंशमीदूर्वाहरिप्रिया हरिप्रियातुलसी अन्यैःसुगंधकुसुमैर्यथालब्धैःसुगंधिभिः फलैश्चमोदकैःपश्चादुपहारंप्रकल्पयेत् यथावदुपचारैश्चपूजयेद्गिरिजासुतं गजाननंचतुर्बाहुमेकदंतंरविप्रभं विधायहेम्नाविघ्नेशंहेमपीठासनस्थितं आगच्छदेवदेवेशगणनाथजगत्पते विनायकनमस्तुभ्यंगौरीमलसमुद्भव आवाहनं अनेकरत्नखचितंमुक्ताफलविभूषितं स्वर्णसिंहासनंचारुप्रीत्यर्थंप्रतिगृह्यतां आसनं उमासुतनमस्तुभ्यंविश्वव्यापिन्सनातन विघ्नौघंछिंधिसकलंतुभ्यंपाद्यंसमर्पितं पाद्यं गणेश्वरायदेवायउमापुत्रायवेधसे पूजामद्यप्रयच्छामिगृहाणभगवन्मम इत्यर्घ्यं

अगस्तिपु॰ १४ दाडिमपु॰ १५ दूर्वापुष्पं १६ कर्कटपु॰ १७ रिंगिणीपु॰ १८ अपामार्गपु॰ १९ विल्वपुष्पं २० विष्णुक्रांतपु॰ २१ अत्रदूर्वागणपतिपूजायांतुदूर्वायुक्तैःपंचगव्यैर्दशभिर्नाममंत्रैःपूजाकार्या तत्रप्रयानं स्नानमात्रमेव दशनाममंत्राःस्कंदपुराणेउक्ताः गणाधिपनमस्तेस्तुउमापुत्राघनाशन विनायकेश पुत्रेतिसर्वसिद्धिप्रदायक एकदंतेभवक्त्रेतितथामूषकवाहन कुमारगुरवेतुभ्यमेभिर्नामपदैःक्रमात्इत्येवंकथितंवत्स सर्वसिद्धिप्रदंशुभं व्रतंदूर्वागणपतेः किमन्यच्छ्रोतुमिच्छसि इतिसौरपुराणोक्तंदूर्वागणपतिव्रतं नारदीयेच॥ अथास्मिन्नेवादिवसेदूर्वागणपतिव्रतं केचिदिच्छंतिदेवर्षेतद्विधानमिदंशृणु हैमंनिर्मायगणपंताम्रपात्रोपरिस्थितं वेष्टितंरक्तवस्त्रेणसर्वतोभद्रमंडले पूजयेद्रक्तपुष्पैश्चपत्रिकाभिश्चपंचभिः विल्वपत्रमपामार्गशमीदूर्वाहरिप्रिया एभिरन्यैश्चकुसुमैरभ्यर्च्यफलमोदकैः उपहारंप्रकल्प्याथदद्यादर्घ्यसमुत्थितः ततःसंप्रार्थ्यविघ्नेशंमूर्त्तिंसोपस्करां मुने आचार्यायविधिज्ञायनमस्कृत्यनिवेदयेत् कृत्वैवंपंचवर्षाणिसमुद्याप्ययथाविधिभुक्त्वेहभोगानखिलाल्लोकं गणपतेर्व्रजेदितिदूर्वागणपतिव्रतं श्रावणशुक्लपंचमीनागपंचमी सानागपूजादौ परैवेतितिथिसामान्यनिर्णये प्रागुक्तं चमत्कारचिंतामणावप्येवं पंचमीनागपूजायांकार्याषष्ठीसमन्विता तस्यांतुतुषितानागाइतरासुचतुर्थिकाइतराःपंचम्यः श्रावणेपंचमीशुक्लासाप्रोक्तानागपंचमीतांपरित्यज्यशेषास्तुचतुर्थीसहिताहिता इतिमदनरत्नविधानाच्च तेनैषांपरैव अत्रविशेषोहेमाद्रौ भविष्येश्रावणेमासिपंचम्यांशुक्लपक्षेनराधिप द्वारस्योभयतोलेख्यागोमयेनविषोल्वणाः पूजयेद्विधिवद्वीरदधिदूर्वांकुरैःकुशैः गंधपुष्पोपहारैश्चब्राह्मणानांचतर्पणैः एतस्यां पूजयिष्यंतिनागान्भक्तिपुरस्सराः नतेषांसर्पतोवीरभयंभवतिकुत्रचिदिति नागाश्च वासुकितक्षककालियमणिभद्रऐरावतकर्कोटकधृतराष्ट्रधनंजयाः नारदीयेऽपि श्रावणेशुक्लपंचम्यांनृभिरास्तिक्यतत्परैः द्वारस्योभयतोलेख्या

गोमयेनविषोल्बणाः गंधाद्यैःपूजनंतेषांतथेंद्राणीमनंतरं संपूज्यस्वर्णरूप्यादिदध्यक्षतकुशांबुभिः गंधैःपुष्पैस्तथाधूपैर्दीपैर्नैवेद्यसंयुतैः ततःप्रदक्षिणीकृत्यतद्द्रव्यंसंप्रणम्यच संप्रार्थ्यभक्तिभावेनविप्राग्रेषुसमर्पयेत् यदिदंस्वर्णरौप्यादिद्रव्यंवैविप्रसात्कृतं तदनंतफलंभूयान्ममजन्मनिजन्मनि इत्येवंददतोद्रव्यंभक्तिभावेननारद प्रसन्नःस्याद्धनाध्यक्षःस्वर्णादिकफलप्रदः एतद्व्रतंनरःकृत्वाविप्रान्संपूज्यभक्तितः पश्चात्स्वयंचभुंजीतदारापत्यसुहृद्वृतः अस्यामेवपंचम्यांवासुकिकुंडस्नानं यःस्नातोनागपंचम्यांकुंडेवासुकिसंज्ञके नतस्यविषसंसर्गोभवेत्सर्पसमुद्भवः नागाःप्रसन्नाजायंतेकुलेतस्यापिसर्वदेति अत्रैवविषापहपंचमीव्रतं मात्स्ये नागाश्चैवतुकर्त्तव्याःखड्गखेटकपाणयःअधःसर्पाकृतिस्तेषांनाभेरूर्ध्वंतुमानुषी फणाश्चमुर्द्ध्निकर्त्तव्याद्विजिह्वावाहिनीसमाःअसमाःविषमसंख्या तथैवस्कंदपुराणेपि श्रावणेमासिपंचम्यांशुक्लपक्षेवरानने द्वारस्योभयतोलिख्या गोमयेनविषोल्बणाः कृत्वाकौसुंभिकान्नागानिंद्राणींचप्रपूजयेत् घृतोदकाभ्यांपयसास्नापयित्वावरानने गोधूमैःपयसापूपैर्लाजैश्चाविविधैरपि पूजयेद्दधिवद्देविदधिदूर्वांकुरैःक्रमात् गंधपुष्पोपहारैश्चब्राह्मणानांचतर्पणैः येतस्यांपूजयंतीहनागान्भक्तिपुरस्सरं नतेषांसर्पतोदेविभयंभवतिकुत्रचिदितिसर्पाभयपंचमीव्रतम् ॥ श्रावणशुक्लषष्ठ्यांस्कंदपूजनं नारदीये श्रावणशुक्लषष्ठ्यांतुशरजन्मानमर्चयेत् उपचारैःषोडशभिर्भक्त्याचपरयान्वितः लभतेभीप्सितानर्थान्षण्मुखस्यप्रसादतइति श्रावणशुक्लसप्तमी अव्यंगसप्तमीनारदीये श्रावणेशुक्लसप्तम्यामव्यंगसप्तमीव्रतं कार्पासंतुचतुर्हस्तंसाग्रंवस्त्रंहिगोपतेः पूजांतेप्रीतयेदेयंव्रतमेतच्छुभावहं अस्यामेवसप्तम्यांविशेषोभविष्योत्तरे श्रावणेमासिसप्तम्यांदेवाग्र्यंसप्तवाहनं शुक्लपक्षेसमभ्यर्च्यपुष्पगंधादिभिःशुचिः प्राप्येहविपुलंभोगंधर्मानंतरमक्षयं अमुत्रलोकमायातिदिव्यंदिनपतेःपुरं समर्प्याव्यंगमप्यत्रकार्य्यंवैनक्तभोजनं अव्यंगशब्देनकार्पाससूत्रनिर्मितः सर्पनिर्मोकाकृतिरंतःसुचि

रोवस्त्रविशेषः सच द्वाविंशत्यधिकशतांगुलपरिमितउत्तमः विंशत्याधिकशतांगुलैर्मध्यमः अष्टोत्तरशतांगुलस्त्वधमः इतिबोध्यः ॥ अस्यामेवपापनाशनीसप्तमीव्रतं हेमाद्रौ शुक्लपक्षस्यसप्तम्यांयदर्क्षंतुकरोभवेत् तदा स्यात्सुमहापुण्यासप्तमीपापनाशनी तस्यांसंपूज्यदेवेशंचित्रभानुंदिवाकरं सप्तजन्मकृतंपापंव्रतेनानेननश्यति नारदीयेप्येवमुक्तं यदिचेद्धस्तयुक्तेयंतदास्यात्पापनाशनी अस्यांदानंजपोहोमस्सर्वमक्षयतांव्रजेदिति ॥ श्रावणशुक्लाष्टम्यांदेवीपूजा नारदीये नभःशुक्लेतथाष्टम्यांदेवींचैवविधानतः क्षीरेणस्नापयित्वाथमिष्टान्नंविनिवेदयेत् ततोद्विजान्भोजयित्वापरेह्निस्स्वयमप्युत भुक्त्वासमापयेदेतद्व्रतंसंतातिवर्धनं अत्रैवदेवीपुराणोक्तं दुर्गाव्रतं देवीव्रतंप्रवक्ष्यामिसर्वकामप्रसाधनं श्रावणेशुक्लपक्षेतुअष्टम्यांवायुभोजनः स्नात्वासार्द्रपटोभूत्वादेवींक्षीरेणस्नापयेत् दत्त्वापायसनैवेद्यंस्वयंभुंजीततद्व्रतीति ॥ श्रावणशुक्लनवम्यांकौमारीव्रतं नारदीये श्रावणेमासिविप्रेंद्रनवम्यांनक्तभुक्नरः पक्षयोरुपवासंवाकौमारींचंडिकांयजेत् रौप्यांपापहरांगंधैःपुष्पैर्धूपैश्चदीपकैः नैवेद्यैर्विविधैश्चैवकुमारीभोजनैस्तथा एवंयःकुरुतेभक्त्याकौमारीव्रतमुत्तमं सविमानेनगच्छेद्वैदेवीलोकंसनातनं ॥ श्रावणशुक्लदशम्यांशिवार्चनव्रतं नारदीये श्रावणीशुक्लदशमीसर्वाशापरिपूर्त्तिदा अस्यांशिवार्चनंशस्तंगंधाद्यैरुपचारकैः तत्रोपवासंनक्तंवाद्विजानांभोजनंजपः होमोदानंचधेन्वादेःसर्वपापप्रणाशनं ॥ श्रावणशुक्लैकादशी। पुत्रदा तदुक्तं नारदीये एकादशींनभःशुक्लेपुत्रदांसमुपोष्यवै द्वादश्यांनियतोभूत्वा पूजयेच्चजनार्दनं उपचारैःषोडशभिस्ततःसंभोज्यवाडवान् दद्याच्चदक्षिणांतेभ्यःपुत्रंप्राप्येहसद्गुणं यातिविष्णोःपदंसाक्षात्सर्वदेवनमस्कृतः अस्याःकथाभविष्योत्तरेपाद्मेच युधिष्ठिरउवाच श्रावणस्यसितपक्षेकिंनामैकादशीभवेत् कथयस्व प्रसादेनममाद्यमधुसूदन श्रीकृष्णउवाच शृणुष्वावहितोराजन्कथांपौराणिकींशुभां यस्याःश्रवणमात्रेणवा

जिपेयफलंलभेत् द्वापरस्ययुगस्यादौपुरीमाहिष्मतीशुभा तस्यांमहीजिदाख्यातोराज्यंपालयतिस्वकं पुत्रहीनस्यतस्यैवनतद्राज्यंसुखावहं अपुत्रस्यसुखंनास्तिइहलोकेपरत्रच ततोस्यपुत्रहीनस्यकालोवहुतरोगतः नप्राप्तश्चसुतोराज्ञः सर्वसौख्यप्रदोनृणां दृष्ट्वात्मानंप्रवयसंराजाचिंतापरोभवत् सदोगतःसभामध्येइदंवचनमब्रवीत् इहजन्मानिहेलोकानमयापातकंकृतं अन्यायोपार्जितंवित्तंक्षिप्तंकोशेमयानहि ब्रह्मस्वंदेवद्रविणंनमयापहृतंक्वचित् न्यासापहारोनकृतःपरस्यवहुपापदः सुतवत्पालितालोकाधर्मेणैवजितामही दुष्टेषुपातितोदंडोवंधुमित्रप्रियेष्वपि शिष्टास्तुपूजितानित्यंद्वेष्याअपिमयाजनाः इत्येवंव्रजतोमार्गेधर्मयुक्तेद्विजोत्तमाः कस्मान्ममगृहेपुत्रोनजातस्तद्विमृश्यतां इतिवाक्यंद्विजाःश्रुत्वासप्रजाःसपुरोहिताः मंत्रयित्वाहितंतेवजग्मुस्तेगहनंवनं इतश्चेतश्चपश्यंतआश्रमान्मुनिसेवितान् नृपतेर्हितमिच्छंतोददृशुर्मुनिसत्तमं तप्यमानंतपोघोरंनिरानंदंनिरामयं निराहारंजितात्मानंजितक्रोधंसनातनं लोमशंधर्मतत्त्वज्ञंसर्वशास्त्रविशारदं दीर्घायुषंमहात्मानमनेकब्रह्मसंमितं कल्पेकल्पेगतेयस्यह्येकंलोमा यशीर्यते अतोलोमशनामास्यत्रिकालज्ञंमहामुनिं तंदृष्ट्वाहर्षिताःसर्वेआजग्मुस्तस्यसन्निधिं यथान्यायंयथार्हंतनमश्चक्रुर्यथोचितं विनयावनताःसर्वेऊचुश्चैवपरस्परं अस्मद्भाग्यवशादेवप्राप्तोयंमुनिसत्तमः लोमशउवाच किमर्थमिहसंप्राप्ताःकथयध्वंस्वकारणं मद्दर्शन ल्हादेननस्तुवंतइवमांकिमु जनाऊचुः संशयच्छेदनार्थायआगतास्तवसन्निधिं पद्मयोनेःपरतरस्त्वत्तःश्रेष्ठोनविद्यते अतःकार्य्यवशात्प्राप्ताःसमीपंभवतोवयं महीजिन्नामराजानःपुत्रहीनोस्तिसांप्रतं वयंतस्यप्रजाब्रह्मन्पुत्रवत्तेनपालिताः तंपुत्ररहितंदृष्ट्वातस्यदुःखेनदुःखिताः तपःकर्त्तुमिहायातामूर्त्तिंकृत्वातुनैष्ठिकीं तस्यभाग्यवशाद्दृष्टोह्यस्माभिस्त्वंतपोधन महतांदर्शनंनैवकार्यसिद्धिर्भवेन्नृणां उपदेशंवदमुनेःराज्ञःपुत्रोयथाभवेत् इतितेषांवचःश्रुत्वा

मुहूर्त्तंध्यानमास्थितः प्रत्युवाचमुनिर्ज्ञात्वा तस्यजन्मपुरातनं लोमशउवाच पूर्वजन्मनिवैश्योसौधनहीनोनृशंसकृत् ज्यैष्ठेमासिसितेपक्षेदशमीदिवसेतथा मध्यंगेद्युमणौप्राप्तेग्रामसीम्निजलाशये वापिकांसजलांदृष्ट्वाजलपानेमनोदधौ सद्यःसूतासवत्साचधेनुस्तत्रसमागता तृषिताचनिदाघार्त्तातस्यामापःपपौतुसा पिबंतींवारयित्वातामसौतोयंस्वयंपपौ कर्मणस्तस्यपाकेनपुत्रहीनोनृपोभवत् कस्यापिजन्मनःपुण्यात्प्राप्तंराज्यमकंटकं प्रजाऊचुः पुण्यात्पापंक्षयंयातिपुराणेश्रूयतेमुने पुण्योपदेशंकथययेनपापक्षयोभवेत् यथाभवत्प्रसादेनपुत्रोभवतिभूपतेः लोमशउवाच श्रावणेशुक्लपक्षेतुपुत्रदानामविश्रुता एकादशीवांछितदाकुरुध्वंतद्व्रतंजनाः यथाविधियथान्यायंयथोक्तंजागरान्वितं तस्यपुण्यंसविपुलंददध्वंनृपतेर्जनाः एवंकृतेसुनियतंराज्ञःपुत्रोभविष्यति श्रुत्वातेलोमशवचस्तंप्रणम्यद्विजोत्तमम् प्रत्यङ्मुखागृहान्जग्मुर्हर्षोत्फुल्लविलोचनाः श्रावणंतुसमासाद्यस्मृत्वालोमशभाषितम् राज्ञासहव्रतंचक्रुःसर्वेश्रद्धासमन्विताः द्वादशीदिवसेपुण्यंतेददुर्नृपतेर्जनाः एवमेषानृपश्रेष्ठपुत्रदानामविश्रुता कर्त्तव्यापुत्रमिच्छद्भिरिहलोकेपरत्रच श्रुत्वामाहात्म्यमेतस्यानरःपापैः प्रमुच्यते इहपुत्रसुखंप्राप्यपरत्रस्वर्गतिंलभेत् इतिभविष्योत्तरपद्मपुराणयोः श्रावणशुक्लापुत्रदानामैकादशीव्रतकथा ॥ अस्यामेव बुद्धद्वादशीव्रतं धरणीव्रतेषु वाराहे ॥ दुर्वासाउवाच ॥ एवमेवश्रावणेतुमासिसंकल्प्यद्वादशीं अर्चयेत्परमंदेवंगंधपुष्पानुलेपनैः बुद्धायपादौसंपूज्यश्रीधरायेतिवैकटिं पद्मोद्भवायजठरमुरःसंवत्सरायच सुग्रीवायेतिवैकुंठंभुजौद्वौविश्वबाहवे प्राग्वच्छस्त्राणिसंपूज्याशिरोवैपरमात्मने एवमभ्यर्च्यमेधावीतस्याग्रेपूर्ववत्घटं स्थापयेत्तत्रसौवर्णंबुद्धंकृत्वाविचक्षणः बुद्धस्तुद्विभुजःकार्योध्यानस्तिमितलोचनः एवंतमेवसंपूज्यब्राह्मणायनिवेदयेत् प्रीयतांश्रीधरोबुद्धरूपीविष्णुःसदामम अनेनविधिनापूर्वंद्वादशीसमु

पोषिता शुद्धोदनस्यवुद्धोभूत्स्वयंपुत्रोजनार्दनः महतींचश्रियंप्राप्तःपुत्रपौत्रसमन्वितः भुक्काराज्याश्रियंसोथग
तिंपरमिकांगतः इतिवाराहेधरणीव्रतेषुश्रावणशुक्कबुद्धद्वादशीव्रतं नारदीयेतु द्वादश्यांतुनभःशुक्केश्रीधरंपूजये
द्व्रती गंधाद्यैस्तत्परोभूत्वादधिभक्तैर्द्विजोत्तमान् संभोज्यदक्षिणांरौप्यंदत्वानत्वाविसर्जयेत् व्रतेनानेनदेवेशः
श्रीधरःप्रीयतामिति ॥ अथश्रावणशुक्कद्वादश्यांपवित्रारोपणमुक्तं विष्णुरहस्ये श्रावणस्यसितेपक्षेकर्कटस्थेदि
वाकरे द्वादश्यांवासुदेवस्यपवित्रारोपणंस्मृतं द्वादश्यांश्रावणेवापिपंचदश्यामथापिवा अनुकूलेषुकर्त्तव्यंपंच
म्यामथवापिवेति नारदउवाच श्रुतामयाविधानोक्ताविष्णोराराधनक्रिया त्वत्प्रसादात्सुरश्रेष्ठजन्मदुःखक्षयप्र
दा भूयोपिश्रोतुमिच्छामिसम्यक्पूजांफलप्रदां अल्पग्रंथेनदेवेशमहापुण्यफलप्रदां पवित्रारोपणंकृत्वाविष्णो
र्भक्तिसमन्वितैःकिंफलंप्राप्यतेदेवनरैस्तद्गतमानसैः यस्मिन्कालेचकर्त्तव्यंविधानंचतथाभवेत् तिथौकस्यांयथा
सूत्रप्रमाणंचयथाविधि यावंतस्तंतवस्तास्मिंस्तत्रतत्रानुमंत्रणं तत्वन्यासविधानंतुतथाचैवाधिवासनं आरोपणवि
धानंचउपवीतस्यचक्रिणःविसर्जनंचदेवस्यपवित्रारोपणादिकं किंकृत्वाफलमाप्नोतिहीयतेकिंनकुर्वतःएतत्सर्वंसमा
चक्ष्वविधानंत्रिदशेश्वर ब्रह्मोवाच शृणुवत्सपरंगुह्यंविधानंदेवनिर्मितंमयाश्रुतंपुरासम्यक्सकाशाच्चक्रपाणिनःपवि
त्रारोपणंविष्णोर्भुक्तिमुक्तिप्रदायकं आयुःकीर्तियशःपुण्यसंपत्भोगधनावहं पुण्यानांतुयथापुण्यंसर्वपापहरंशुभं प
वित्रारोपणंतस्यात्पवित्रंपरमंस्मृतं संवत्सरंनरोभक्त्यासमभ्यर्च्यजनार्द्दनं यत्फलंसमवाप्नोतिपावित्रारोपणेनतत्
नकरोतिविधानेनपवित्रारोपणंतुयः तस्यसांवत्सरीपूजानिष्फलामुनिसत्तम तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरा
यणैः वर्षेवर्षेप्रकर्त्तव्यंपवित्रारोपणंहरेः श्रावणस्यसितेपक्षेकर्कटस्थेदिवाकरे द्वादश्यांवासुदेवस्यपवित्रारो
पणंस्मृतं सिंहस्थेवारवौकार्यंकन्यायांतुगतेथवा तस्यामेवतिथौसम्यक्तुलास्थेनकथंचन विष्णोरुद्रस्य

सूर्यस्यविरिंचेः षण्मुखस्यच देव्यागणाधिनाथस्यमातॄणांधनदस्यच पवित्रारोपणंकार्य्यमन्येषांचयथाविधि अकृत्वाफलहानिःस्यात्संवत्सरकृतार्चनात् सर्वेषांतुमहापुण्यंपवित्रारोपणेकृते तिथयस्तन्तुविन्यासाःपृथगुक्तास्तपोधनाः प्रतिपद्धनदस्योक्ता पवित्रारोपणेतिथिः श्रियोदेव्याद्वितीयातुतिथीनामुत्तमातिथिः तृतीयातुभवान्यास्तुचतुर्थीतत्सुतस्यच पंचमीशेषराजस्य षष्ठीप्रोक्तागुहस्यच सप्तमीभास्करस्योक्ता दुर्गायाश्चाष्टमीस्मृता मातृणांनवमीप्रोक्ता दशमीवासुकेःस्मृता एकादशीऋषीणांतु द्वादशीचक्रपाणिनः त्रयोदशीह्यनंगस्य शिवस्योक्ताचतुर्दशी ममदेवमुनिश्रेष्ठ पौर्णमासीतिथिः स्मृता यथोक्तशुक्लपक्षेतुतिथयः श्रावणस्यच सर्वेषामेवदेवानांकार्यंतासुयथाविधि नारदउवाच यस्मिन्सूत्रंतुकर्तव्यं पवित्रंचक्रपाणिनः प्रमाणंचैवतंतूनांपुण्यंचैवेहकीदृशं कनिष्ठमध्यमेचैवउत्तमेचपवित्रके यथाकृतेफलंकर्त्तुस्तद्वदस्वपितामह ब्रह्मोवाच शृणुवत्सयथाकार्यंयत्सूत्रंयत्प्रमाणकं विधानंचयथातस्यफलंतस्ययथाभवेत् प्रथमंदर्भसूत्रंचपट्टसूत्रंततः परं शुचिकार्पाससूत्रेणनिर्मितंवाशुभावहं शुचिर्भूत्वाशुचौदेशेकारयेतप्रयत्नतः तद्विधानोपयुक्तंतुयथोक्तफलदायकं कन्यातुकर्तयेत्सूत्रंनारीवाथपतिव्रता विधवासाधुशीलावासूत्रमेतत्तुकर्त्तयेत् केशयुक्तंक्षतंदग्धामद्यरक्तादिदूषितं मलिनंनीलरक्तंवाप्रयत्नेनविवर्जयेत् यथोक्तंसूत्रमादाय त्रिगुणंत्रिः प्रयोजयेत् पवित्रंतेनकुर्वीतकनिष्ठोत्तममध्यमं कनिष्ठंतत्तुविज्ञेयंसप्तविंशतिभिःशुभं मर्त्यलोकेतुतत्कीर्त्ति सुखायुर्धनपुत्रदं चतुःपंचाशताज्ञेयंतंतूनांमध्यमंपरं अष्टोत्तरसहस्रंतुतंतूनांपारिसख्यया वनमालास्मृताविष्णोर्दत्तामुक्तिप्रदाहिसा कनिष्ठंनाभिमात्रंस्यादूरुमात्रंतुमध्यमं पवित्रंचोत्तमंप्रोक्तंजानुमात्रप्रमाणतः वनमालाप्रमाणेन प्रतिमायाः प्रणीयते नराणांजन्मसंसंसारमृत्युदुःखप्रणाशिनी कनिष्ठद्वादशैवोक्तामध्यमेद्विगुणाः स्मृताः त्रिगुणास्तु

तमेत्रोक्ताग्रंथयस्तुपवित्रके शतमष्टोत्तरंकार्य्यंग्रंथीनांतुविधानतः मुनींद्रवनमालायांविष्णुपूजनतत्परैः अधिवासनसूत्रेतुग्रंथयोद्वादशस्मृताः तन्तुन्यासविधानंतुश्रूयतांगुह्यमुत्तमं इदंविष्णुरितिख्यातोमंत्रराशिर्द्विजन्मनां शूद्राणांतन्तुविन्यासेमंत्रोवैद्वादशाक्षरः तावदावर्त्तयेन्मंत्रं यावंतोग्रंथयः स्मृताः एकधाचद्विधाचैवत्रिधाचैव पवित्रके ह्रस्वेप्रतिग्रंथिसकृन्मंत्रजपः मध्यमोत्तमयोर्द्विस्त्रिः कुंकुमोशीरकर्पूरचंदनादिविलेपनैः पवित्राणि विलिप्याथ तन्तुन्यासपुरःसरं मूलमंत्रेणवैकार्य्यं पवित्रारोपणंहरेः एकादश्यांचतद्रात्रौमूलमंत्रेणभक्तिमान् एकादश्यांशुभैर्गंधैःपुष्पधूपविलेपनैः नैवेद्यदीपवस्त्राद्यैः पूजयेद्गरुडध्वजं नृत्यगीतशुभाख्यातैर्मल्लयुद्धैःसुवल्गितैः वाद्यैर्मुरजशंखाद्यैर्जागरंकारयेन्निशि क्षीरंकृशरसंयाववटुकापूपमोदकैः फलैःसुगंधैर्मधुरैर्नैवेद्यंकारयेद्धरेः एकादश्यांनरोभक्त्यासंपूज्यमधुसुदनं पवित्रारोपणंकुर्य्याद्देवदेवस्यचक्रिणः सोपवासःशुचिःस्नातःकृतजप्योजितेंद्रियः दत्त्वादानंद्विजाग्रेभ्यःपूजयित्वाजनार्दनं पूर्वाधिवासितंसम्यक्समादायपवित्रकं अतोदेवेतिमंत्रेणविष्णोर्मूर्ध्निनिवेशयेत् अयंमंत्रोद्विजातीनांपवित्रारोपणेस्मृतः शूद्रस्यमूलमंत्रोवायेनैवपूजयेद्धरिं वाशब्दाद्द्वादशाक्षरोवा स्तुतिमंगलनिर्घोषैर्गीतवादित्रनिःस्वनैः पवित्रारोपणंकृत्वादेवोयाच्यस्त्विमंवरं मणिविद्रुममालाभिर्मंदारकुसुमादिभिः एषासांवत्सरीपूजातवास्तुगरुडध्वज मंत्रहीनंक्रियाहीनंभक्तिहीनंजनार्दन यत्पूजितं मयादेवपरिपूर्णंतदस्तुमे वनमालायथादेव कौस्तुभः सततंहरेः पवित्रमस्तुतेतद्वत्पूजांचहृदयेवह कृत्वापवित्रकंविष्णोर्वत्सद्वादशवार्षिकं फलंप्राप्नोत्यकृत्वातुपूजाहानिमथाप्नुयात् एवंसंप्रार्थ्यदेवेशंप्रणिपत्यपुनःपुनः भूयोपिदद्याद्विप्रेभ्योहरिमुद्दिश्यदक्षिणां ततोनुभोजयेद्भक्त्यागुरुंज्ञानप्रदायिनं वस्त्रगंधानुलेपाद्यैः पुष्पैस्तुवरभूषणैः प्राप्यमंत्रंगुरोः शिष्योभक्त्यानार्चयतेगुरुं सगच्छतिविमूढात्मानरकंहिनराधमः तस्मात्सर्वप्रयत्नेन

यथाविष्णुंतथागुरुं अानंदेनार्चयेद्यस्तुसमुक्तिफलमाप्नुयात् यथाविष्णुस्तथाविप्रायथाविप्रास्तथागुरुः त्रिसध्यंपूजयेद्यस्तुसमुक्तिफलमर्हति निः क्रम्यदेवतागारात्संपूज्यपितृदेवताः मूलमंत्रेणजुहुयाद्वह्नौसघृतपायसं ततोनुपूजयेद्विप्रान्दद्याच्छक्त्याचदक्षिणां तांबूलपुष्पगंधाद्यैः पूजयित्वाविसर्जयेत् ततोबंधून्विशिष्टांश्चज्ञातिमित्रसमाश्रितान् भोजयेदागतांश्चान्यान्भिक्षुकांश्चस्वशक्तितः एवंविधिंविनिर्वर्त्यपवित्रारोपणेहरेः विष्णोःसायुज्यमाप्नोतिपुनरावृत्तिवर्जितं स्थंडिलेदेवदेवस्यएषएवविधिः स्मृतः पवित्रारोपणेविष्णो र्विशेषःश्रूयतामिह यावन्मानसमायुक्तंभावयेतजनार्दनं तावदंगुलकंतस्यपवित्रंमानवंस्मृतं यावंतोग्रंथयः प्रोक्ताः स्वतस्तैश्चानुमंत्रणं तत्रैवमूलमंत्रेणदद्याद्विष्णोः पवित्रकं प्रतिमायांस्थंडिलेवाकृत्वाविष्णोः पवित्रकं कुलानांशतमुद्धृत्यविष्णुलोकंव्रजेन्नरः एवंसंपाद्याविधिनापवित्रारोपणंहरेः अर्चयित्वाविधानेनहरिंचसपवित्रकं विसर्जनस्यमंत्रेणअनेनैवपवित्रकं सांवत्सरींशुभांपूजांसंपाद्यविधिवन्ममव्रजेदानीं पवित्रस्त्वंविष्णुलोकंविसर्जितः मंत्रेणानेनतत्सूत्रपवनार्थंयथाविधि उत्तार्यब्राह्मणेदद्यात्तोयेचाथविसर्जयेत् यावत्पुण्यंस्मृतंसम्यक्पवित्रारोपणेकृते उपवीतेकृतेभक्त्यातत्फलंचाप्नुयान्नरः अनेनैवानिधानेनतस्यपूजाविसर्जनं प्रार्थनावाहनंदानंसमस्तंविधिनाचरेत् नत्वमंत्रैः समावेश विसर्जनविधिक्रियाः अर्चनेचसुरेंद्राणांसर्वकामानवाप्नुयात् आयुर्बलंधनंविद्यामारोग्यंकीर्त्तिमव्ययां प्रयच्छतियथाशक्त्याप्रसन्नास्तुदिवौकसः अर्चितेदेवदेवेशे शंखचक्रगदाधरे अर्चिताःसर्वदेवाः स्युर्यतः सर्वगतोहरिः अर्चनेसर्वलोकेशे सुरासुरनमस्कृते केशवेकंसकेशिघ्नेनयातिनरकंनरः प्रातर्मध्येपराह्णेचसुरासुरगुरुंहरिं येनमंतिनरानित्यंनतेनरकगामिनः तपस्तप्त्वानरोघोरमरण्येविजितेंद्रियः यत्फलंसमवाप्नोतिस्मृत्वातद्गरुडध्वजं इतिगुह्यतमंविष्णोः पूजाः कल्पंमयोदितं समाचरतियोमर्त्यः सयातिपरमांगतिं इ

40

व्र०र०
श्रावण
३०

तिब्रह्मपुराणोक्तः पवित्रारोपणविधिः शिवागमेशिवपवित्रलक्षणं एकाशीत्यथवासूत्रैत्रिंशताचाष्टयुक्तया पंचाशतावाकर्त्तव्यंतुल्यग्रंथ्यंतरालकं द्वादशांगुलमानानिव्यासादष्टांगुलानिवा लिंगविस्तरमानानिचतुरंगुलिकानिवा तथैवपिंडिकास्पर्शंचतुर्थंसार्वदैवतं गोगावतारकंकार्यंपवित्रमतिसुंदरं गोगः शिवः अथविष्णुरहस्योक्तः पवित्रारोपणविधिः नारदउवाच भगवन्देवदेवेशपरंकौतुहलंहिमे पवित्रारोपणंपुण्यंप्रसादाद्वक्तुमर्हसि पवित्रेतिकथंसंज्ञाकुतोत्पन्नंकिमुच्यते कृतेचाकिंफलंप्रोक्तं विधानंतस्यकीदृशं द्रव्येनकेनवाकुर्य्यात्किंप्रमाणंहितत्स्मृतं किंदैवतंचकिंछंदः कोवातस्यऋषिःस्मृतः अध्यात्मंचाधिभूतंचअधिदैवंकथंभवेत् केनमंत्रेणतत्कुर्याद्विधानंतस्यकीदृशं कस्मिन्कालेतुकर्त्तव्यं नक्षत्रेचतिथौकथं कियंतंध्रियतेकालमेतद्ब्रूहिसुरेश्वर श्रीभगवानुवाच साधुनारदधर्मज्ञतोषिहंत्वयानघ शृणुष्वतववक्ष्यामिपवित्रारोपणंक्रमात् पावयत्येवयन्नित्यंत्रायतेभवबंधनात् पवित्रंतेनविख्यातंब्राह्मंतेजोहिगीयते विष्णवाख्ययत्तुविख्यातंतदालोकेनिगद्यते तदेवसूत्ररूपेणयज्ञेशः कर्मणः प्रभुः तदेवत्रिगुणीभूतेमतंनाराणाख्यया त्रिदेवात्मात्रिवेदात्मा त्र्यक्षरः पणवः स्मृतः तेतंतवः समुद्भूतावराहाद्यंगमिश्रिताः कुतउत्पन्नमितियत्प्रश्नस्यैवेदमुत्तरं संपातेनचसंभूतातत्रात्मापरिकीर्त्तितः तंतूनांप्रथमोदेवोवासुदेवोजगद्गुरुः हस्तायुधोद्वितीयश्चप्रद्युम्नश्चतृतीयकः अपरस्त्वनिरुद्धस्तु ततोनारायणः प्रभु ब्रह्माविष्णुस्तथैवाग्निर्वराहेणसमाश्रिताः अधिदेवेनरूपेणअध्यात्मंचनिबोधमे मनोबुद्धिरहंकारस्तन्मात्राणितथैवच जीवश्चेतिनवैवात्रअध्यात्मेसंव्यवस्थिताः द्यौरंतरिक्षंपृथिवीभूर्भुवस्स्वस्तथैवच अकारश्चउकारश्चमकारश्चाधिभूतके अग्नित्रयंतथाकर्मत्रयंचसदनत्रयं ज्ञेयंपवित्रंतद्विद्वानाधिदेवमुदाहरेत् छंदश्चैवात्रगायत्रीप्रद्युम्नऋषिउच्यते वासुदेवः परस्तस्य देवतापरिकीर्त्तिता योगोस्यसर्ववेदानां ब्राह्मणानांविशेषतः अलं

कारंद्विजातीनांकर्त्तव्यंप्रतिवत्सरं शरद्वर्षासुकुर्वीतपवित्रारोपणंशुभं यावद्धधारयेत्तंतूंस्तावत्कुर्वीतवैव्रतं तथाप
वित्रकंकृत्वात्रीन्मासान्मासमेववा पक्षंद्विमासमर्द्धंवात्रिरात्रंपंचएववा अवधिंचकार्त्तिकंकृत्वासितपक्षाद्यनुक्रमा
त् यथाशक्त्यायजेद्देवंकालसंकल्पनात्तथा पवित्रैर्ध्रियमाणैर्वैनत्याज्यंदेवतांतिकं अपवित्रेकृतेपश्चाद्यथेष्टंविच
रेद्बुधः मंगलंशोभनंरुद्रंविजयंचचतुर्थकं आषाढस्यक्रमेणैवदैवनामानिधारयन् द्वादश्यांश्रवणेवाथचाष्टम्या
मथवाद्विज अनुकल्पेतुकर्तव्यंपंचदश्यामथापिवा सूत्रंतुसात्विकंकृत्वातृणवल्कलसंभवं कार्पासिकतथाकार्यं
दार्भिकंवापिकारयेत् ब्राह्मणीकर्त्तितंसूत्रमन्यद्वातुयथारुचि त्रिगुणंत्रिगुणीकृत्यक्षालयेन्निर्मलांभसा यत्नेनशोध
येद्दोषान्केशाद्यांश्चस्वयंबुधः अष्टोत्तरशतंकुर्य्याच्चतुःपंचाशदेवताः सप्तविंशतिरेवाथज्येष्ठमध्यकनीयसां अंगुष्ठ
पर्वमात्रास्तुग्रंथयश्चोत्तमाःस्मृताः तदर्धंमध्यमाश्चैवतदर्धमधमाःस्मृताः अधमंनाभिमात्रंस्यादूरूमात्रंद्वितीयकं
उत्तमंजानुमात्रंचप्रतिमायानिगद्यते एवंहिरूपतःकुर्य्यादधमोत्तममध्यमे यथाशोभंप्रकुर्वीतग्रंथयोविषमाःस्मृताः
सैवप्रोक्ताभवेद्देवग्रंथिर्दैवतविग्रहा आरोग्यदंद्विजश्रेष्ठएवंविद्याद्विचक्षणः स्थंडिलेवाथवक्ष्यामिप्रथमकर्णिकांतरे
दलाग्रगेद्वितीयंचादिशापालांतगंपरंयथाशक्त्यातुकर्त्तव्यंप्रत्यवायोह्यतिक्रमात् पितृतोमातृतःशुद्धआत्मशुद्धस्तथै
वचसदाचारस्थितोमंत्रीवेदवेदांगपारगः अलुब्धोपिशुनःसौम्यःसर्वभूतहितेरतः आचार्यःसतुविज्ञेयःसर्वकर्मरतो
हिसः ब्राह्मणःक्षत्रियोवैश्यस्तथास्त्रीशूद्रएवच स्वधर्मावस्थिताःसर्वेभक्ताश्चमधुसूदने पूर्वोक्तगुरुमासाद्यभक्त्या
संतोषयेद्व्रतं यज्ञार्थंप्रार्थयेत्पश्चादुद्धारंकुरुमेप्रभो पवित्रेणैवयज्ञेनयजेयंमधुसूदनं करिष्याम्येवमित्युक्तेसंभारांश्च
समाचरेत् हरेःसूत्रादियत्सर्वंगुरवेतन्निवेदयेत् यथाशक्त्यापवित्रंचशुचिःकुर्य्यादतंद्रित अष्टाक्षरेणमंत्रेणग्रंथयंतेग्रं
थयस्तथा कुंकुमंरोचनाचैवकर्पूरेणसमन्वितं आदावुक्तेनमंत्रेणव्यस्तेनार्घ्यंविनिःक्षिपेत् समस्तेनततोमंत्रीमंत्रयेत

विचक्षणः उक्तेनैवतुमंत्रेणचार्चयेतपावित्रकं इतिकुंकुमंनिःक्षिप्यनमइतितदुपरिकर्पूरमिति व्यस्तेनमेलयित्वा ॐ नमोनारायणायेतिसमस्तेनमंत्रेणाभिमंत्र्य समस्तेनैवपावित्रमलंकुर्य्यात् इतिविष्णुरहस्योक्तपवित्रारोपणविधिः स्मृतिकौस्तुभेहेमाद्रौ कालोत्तरेपवित्रारोपणप्रकरणे कृतेमणिमयंकार्यंत्रेतायांहेमसंभवं पट्टजंद्वापरेसूत्रंकार्पासंतुकलौस्मृतं यतेर्मानसंकार्यमिति अथनृसिंहपरिचर्या रामार्चनचंद्रिकोक्त पवित्रारोपणविधिः श्रावणस्यसितेपक्षेद्वादश्यांशौनकादिभिः उक्तस्तदाप्रकर्तव्यःपवित्रारोपणोत्सवः तथाचबह्वृचपरिशिष्टे सस्नातःसर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः हरेश्चप्रीतिमाप्नोति यः पवित्रंसमाचरेत् विधिनाशास्त्रदृष्टेनयोनकुर्यात्पवित्रकं हरंतिराक्षसास्तस्यवर्षपूजादिजंफलम् पाद्मेतु ऊर्जेव्रतंमधौदोलांश्रावणांतेतुपूजनं चैत्रेदमनकारोपमकुर्वाणोव्रजत्यधः पवित्रारोपणंविघ्नात्श्रावणेनभवेद्यदि कार्त्तिकावाधेसिंहार्केकर्तव्यमितिनारद इतिपवित्रनित्यता प्रयोगसारादुत्पत्तिपवित्रस्यप्रतन्यते कनीयान्वासुकेर्भ्रातापवित्रोनामनागराट् निराहारव्रतोभूत्वादैविकंशरदांशतं तपस्तेपेसमाश्रित्य देवदेवंमहेश्वरं प्रसन्नस्तपसातस्यपुरतःपुरुषोत्तमः प्रणतार्तिहरःशंभुराविरासीदुमाधवः प्रसादाभिमुखंदृष्ट्वादेवेशंभुजगेश्वरः कंठाभरणतांप्राप्तंवव्रेवरमनुत्तमं तथेत्याभाष्यतंकंठेदधारत्रिपुरांतकः प्रादात्तस्मैवरंचान्यंपवित्रायात्मयोगिने येत्वांनबहुमन्यंतेयथासंभावितोमया जपहोमादिजंतेषांफलंत्वामेतुनिश्चयात् अत्रैव श्रावणेमासिनक्षत्रेवापिवैष्णवे तस्मादाराधयंतुत्वांनित्यनैमित्तिकोद्यताः वैदिकाःसक्तुहोमेनपूजांकुर्वंतुतेनह त्वत्सादृश्यानुकारेणनिर्वर्तितेनैवतांत्रिकाः आराध्यारोप्यपूज्यार्थंदेवतायैपवित्रकम् नानागमोक्तमार्गेणतस्यकर्त्तव्यतोच्यते हेमरौप्यताम्रक्षौमैःसूत्रैःकौशेयजैःशुभैः काशैस्तथाचकार्पासैर्ब्राह्मण्याकर्तितैःशुभैः कन्ययावापवित्रस्यान्नपुंश्चल्यादिभिःकृतैः स्नात्वात्रिगुणितंसूत्रं त्रिगुणीकृत्यशोधयेत् अभिषिंचेत्पंचगव्यैरद्भिःप्रक्षालयेत्ततः

मूलेनाष्टोत्तरशतंगायत्र्यारामसंज्ञया अभिमंत्रयेदितिशेषः शंखोदकेनाभिषिच्यपवित्राणिविनिर्मथेत् दुग्धद्र
व्याज्यविण्मूत्रैःपंचगव्यक्रमंविदुः आप्यायस्वदधिक्राव्णस्तेजोसिपंचगव्यके गंधद्वारांचगायत्रींक्रमाद्ज्ञेयंवि
चक्षणैः इतिसूत्रशुद्धिः तत्रोत्तमंपवित्रंतुषष्ट्यासहशतैस्त्रिभिः सप्तत्यासहितंद्वाभ्यांपवित्रंमध्यमंस्मृतं साशीति
नाशतेनैवकनिष्ठंतत्समाचरेत् अष्टोत्तरतदर्द्धार्द्धनवसूत्रक्रमेणवा जानूरूनाभिपर्यंतमुत्तमादित्रयंभवेत् अष्टोत्त
रसहस्रेणवनमालांप्रकल्पयेत् उत्तमस्यपवित्रस्यद्वैगुण्येनापिभावयेत् आरभ्यमुकुटंप्राप्तसूत्रेणरचिताशुभा
आपादलंबिनीमालावनमालाप्रकीर्तिता यजमानपवित्रंचाधिवासनपवित्रकं कनिष्ठेनसमंकार्यंमध्यमेनसमंगुरोःकु
र्वीताग्रेपवित्रंचमध्यमेनसमंशुभं साधारणपवित्राणित्रिभिःसूत्रैःसमाचरेत् उत्तमंतुशतग्रंथिपंचाशद्ग्रंथिमध्यमं
कनिष्ठंतुपवित्रंस्यात्षट्त्रिंशद्ग्रंथिशोभितं षट्त्रिंशच्चचतुर्विंशत्द्वादशेतिचकेचन चतुर्विंशत्द्वादशाष्टावित्येकेमुन
योविदुः अंगुष्ठपर्वमात्रंतुकुर्य्याद्ग्रंथिमथोत्तमे तदर्धेनतदर्धेनमध्यमेचकनिष्ठके ग्रंथीन्कुर्वीतसर्वत्रसुवृत्तान्सुमनोह
रान् नवैविषमसंख्याकान्ग्रंथीन्कुर्वीतकर्हिचित् विशोभेनप्रदानेनकर्तुः स्यादशुभंफलम् पवित्रंपरयाभक्त्यात
स्मात्कुर्वीतशोभनं कुंकुमंरोचनांचैवकर्पूरेणचमिश्रितं तेनसंपूजयेत्सूत्रमष्टाक्षरविमंत्रितं त भिमंत्रणंकुर्यात्इदं
विष्णुश्चमंत्रतः द्वादशाक्षरमंत्रोवासर्वसाधारणास्मृतइतिपवित्रलक्षणं ततस्तानिपवित्रा णवेपटलेशुभेसं
स्थाप्यशुचिवस्त्रेणविधायपुरतोन्यसेत् अरत्निसंमितांवेणींकुर्यात्षट्त्रिंशताकुशैःमंत्रयेन्मूलमंत्रेणपंचगव्येनशो
धयेत् तांतुकक्षांतरेकृत्वामानसंस्नानमाचरेत् ततस्तुसर्वतोरक्षांकृत्वासौहोममाचरेत् महास्नानंप्रकुर्वीतउपचारां
स्तथैवच देवस्यसर्वतःस्थाप्यादंतकाष्ठजलंकुशाः मृत्तिकांचहरिद्रांचकुष्ठंगोरोचनानिच पादुकोपानहच्छत्रंचा
मरंव्यजनंतथा ब्रीह्यादीनिचधान्यानिपुरतःस्थापयेत्तथा दंडवत्प्रणिपातैश्चस्तोत्रैर्नानाविधैरपि वैदिकैश्चज

पेदेवंयथावत्प्रतिबोधयेत् क्रियालोपविघातार्थंयस्त्वयाविहितंप्रभो मयैतत्क्रियतेदेवत्वत्तुष्ट्यैचपावित्रकं नहि
विघ्नोभवेदत्रकुरुतात्त्वंदयांमयि सर्वथासर्वदाविष्णोममत्वंपरमागतिः उपवासेनत्वांदेवतोषयामिजगत्पते काम
क्रोधादयोप्येतेनमेस्युर्व्रतघातकाः अद्यप्रभृतिदेवेशयावद्वैशेषिकंदिनं तावद्रक्षात्वयाकार्य्यासर्वस्यास्यनमोस्तुते
एवंविज्ञाप्यदेवेशंगुरुपादौप्रणम्यच कुर्य्यात्तुवैष्णवैःसार्धंपवित्रारोपणंहरेः कुंभपुण्यांबुनापूर्णंसर्वतोभद्रकेशुभे
स्थापयेत्पुरतोविष्णोरतत्रसूत्राणिपूजयेत् संवत्सरस्ययागस्यपवित्रीकरणायभोः विष्णुलोकात्पवित्रत्वमागच्छेह
नमोस्तुते अनेनावाहयेत्सूत्रंमूलमंत्रयुतेनच उत्तमादित्रयेविद्वान्स्मरेद्देवत्रयंतथा गुणान्वेदत्रयंचैवध्यायेल्लोकत्रयं
तथा प्रकृतिंवनपूर्वायांमालायांनिखिलात्मिकां द्युलोकंमुकुटेसूत्रेध्यायेत्तद्गात्रशालिनि सर्वाभरणचित्रांगसर्वदेवनम
स्कृत लावण्यरूपविश्वात्मन्ज्येष्ठसूत्रंसमाश्रय सर्वलक्ष्मीकरश्रीशसर्वज्ञानमयात्मक निवृत्तरूपविश्वात्मन्मध्यसू
त्रंसमाश्रयं अतिवेगजगद्योनिपुरुषात्मनादिवस्पते कनीयोमेप्रभोदेवतेजसासूत्रमाश्रय सर्वाधारधरारूपसर्वकर्त्तः
प्रजापते सर्वथात्मेशसूत्रेस्मिन्सान्निध्यंकुरुतेनमः सर्वरत्नोज्ज्वलाकारब्रह्मांडेब्रह्मरोचिष मुकुटोत्तमसर्वांगशिरः
सूत्रइहैहिभोःप्रकृतिर्जगतःकर्त्रीसर्वलावण्यपदायिनी श्रीसूत्रेनित्यकल्याणिसान्निध्यंकुरुतेनमः उत्तमादीनिसूत्राणि
क्रमादालभ्यापाणिना मनुभिर्मंत्रयेदेभिःपूजयेन्मूलमंत्रतःब्रह्मविष्णुमहादेवाःश्रीसूत्रिदेवताः स्मृताःॐकारसोमव
ह्नीचब्रह्मानागः शशीरविः शिवश्चविश्वेदेवाश्चनवसूत्राधिदेवताःक्रियाचपौरुषीवीराविजयेशापराजिता मनोन्म
नीजयाभद्रामुक्तिश्चग्रंथिदेवताः ध्यात्वावाह्यमृतीकृत्यगंधपुष्पाक्षतांकुरैः धूपदीपांततांबूलैःपवित्राणिवुधोर्चयेत्
अथदेवकरेविद्वान्पट्टसूत्रसमुद्भवं वितास्तिमानकंडोरंवध्नीयान्मंगलात्मकः संवत्सरकृतार्चायाः संपूर्णफलदोसि
यत् पवित्रारोपणोयंतत्कुरुकंधरकेनमः तेइत्यपिपाठः ॐविष्णुतेजोद्भवंरम्यंसर्वपातकनाशनं सर्वकामप्रदंदेव

तवांगेधारयाम्यहं मूलसंपुटितादस्माद्दद्याद्गंधपवित्रकं नीराजयेत्ततोदेवंमंगलाघोषपूर्वकं नैवेद्यंविविधंदद्यात्तां
बूलमनुलेपनं उपतिष्ठेत्ततोदेवंजितमित्यादिभिःस्तवैः मंत्रेणाथसुरेशानंदेवदेवंनिमंत्रयेत् आमंत्रितोसिदेवेश
पुराणपुरुषोत्तम प्रातस्त्वांपूजयिष्यामिसान्निध्यंकुरुकेशव क्षीरोदधिमहाभागशय्यावस्थितविग्रह प्रातस्त्वांपूज
यिष्यामिसन्निधौभवतेनमः निवेदयाम्यहंतुभ्यंप्रातरेतत्पवित्रकं सर्वथासर्वदाविष्णोनमस्तेस्तुप्रसीदमे निपते
द्दंडवद्भूमौक्षिपेत्पुष्पांजलिंपुनः पूजितान्यत्रसूत्राणिकुंभंचपुरतःस्थितं अस्त्रेणसर्वतोरक्षेत्कवचेनावगुंठयेत्
रक्षेद्वाचक्रमंत्रेणनृहरेर्मनुनाथवा ब्राह्मणांस्तुनमस्कृत्यगुरुपादौप्रणम्यच गीतमंगलनिर्घोषैः कुर्य्याज्जागर
णंततःअधिवासेविधिःप्रोक्तः कपिलैर्नारदादिभिः अधिवासनकालश्च दीपिकायामुक्तः गोदोहांतरिते
कालेपूर्वेद्युर्वाधिवासनमिति इतिपवित्राधिवासनं ततःप्रातःसमुत्थायध्यात्वादेवंयथोदितं नित्यपूजां
ततः कृत्वापवित्राणांतथैवच नीराजयेच्छनैर्दीपैर्मंगलाघोषपूर्वकं स्तुत्वाचविविधैःस्तोत्रैर्महादेवंसुरा
र्चितं ततोमंगलनिर्घोषैःशंखतूर्यादिनिःस्वनैः गंधदूर्वाक्षतैर्युक्तंदद्याद्देवायसूत्रकं ओंरामरामनमस्तुभ्यंगृ
हाणेदंपवित्रकं पवित्रीकरणार्थायवर्षपूजाफलप्रदं पवित्रंतत्कुरुष्वाद्ययन्मयादुष्कृतंकृतं शुद्धोभवाम्यहंदेव
त्वत्प्रसादात्सुरेश्वर मूलसंपुटितोह्येषपवित्रारोपणेविभुः अंगाद्यावृत्तिदेवेभ्यस्ततोदद्यात्स्वनामभिः नैवेद्यंतु
महापूर्वंततोदद्याच्चभक्तितः नीराजयेत्ततोदेवंरमाकांतंसुमंगलं संवीज्यचामरैः पुण्यैर्दर्पणंदर्शयेत्ततः विविधानि
चपुष्पाणिदद्यात्पुष्पांजलिंततः प्रार्थयेद्देवदेवेशंमंत्रैरेभिर्यथाविधि मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इ
यंसांवत्सरीपूजातवास्तुगरुडध्वज वनमालायथादेव कौस्तुभः सततंहृदि पवित्रमस्तुतेतद्वत्पूजांचहृदयेवह
जानताऽजानतावापिनकृतंयत्तवार्चनं केनचिद्विघ्नदोषेणपरिपूर्णंतदस्तुमे अपराधसहस्राणिक्रियंतेहर्निशंमया

दासोयमितिमांमत्वाक्षमस्वमधुसूदन निपत्यदंडवत्भूमौभक्तियुक्तेनचेतसा प्रणमेद्देवदेवेशंरामामिष्टार्थदंबुधः ततःपवित्रंगुरवे दद्याद्गंधादिपूर्वकं अथैनंपूजयेद्भक्त्यास्वर्णवस्त्रानुलेपनैः ब्राह्मणान्विष्णुभक्तान्वैगंधपुष्पादिनार्चयेत् भक्त्याप्रतोषयेत्तांस्तुवस्त्रभोजनकांचनैः मासंपक्षमहोरात्रंत्रिरात्रंधारयेत्तथा देवेनसूत्रसंभेदेदेशकालविवक्षया प्रत्यहंस्नानकार्य्यादिसूत्राण्युत्तार्यकारयेत् अभिषिच्यार्घतोयेनपुनर्देवेनिवेदयेत् अथांतेदेवमभ्यर्च्यविशेषात्पुष्पचंदनैः नैवेद्यंविधिवद्दत्वाततःसूत्रंविसर्जयेत् सांवत्सरींशुभांपूजांसंपाद्यविधिवन्मम व्रजेदानींपवित्रत्वंविष्णुलोकंविसर्जितः यावदेवपवित्राणितावत्तिष्ठेत्समाहितः ब्रह्मचारीहविष्याशीदेवपूजापरायणः पवित्रारोपणंकालेनकरोतिकथंचन तदायुतंजपेन्मंत्रंस्तोत्रंवापिसमाचरेत् इतिपवित्रारोपणम् अथसर्वसाधारणप्रयोगः पवित्राणितु स्वर्णरजतताम्रपट्टसूत्रपद्मसूत्रकुशकाशमुंजशणवल्कलकार्पाससूत्रेष्वन्यतमसूत्रैःकुर्यात्तत्रनिषिद्धसूत्राणि केशयुक्तंक्षतंदग्धं मद्यरक्तादिदूषितं मलिनंनीलरक्तंवाप्रयत्नेनविवर्जयेदिति कर्पाससूत्रं चेत्सुवासिनीभिः कर्त्तितंतथा लब्धंवागृहीत्वा त्रिगुणीकृत्य नवसूत्रस्यैकरसत्वेनकल्पितैः सूत्रैः पवित्राणिकुर्यात् स्वर्णादिसूत्रकृतपवित्रेषुयथाकृततंतुमादायवक्ष्यमाणसंख्यासंमाननीयेति शिवार्चनचंद्रिकारत्नमालाकारयोराशयः तत्रादौसूत्रशुद्धिक्रमः तत्सूत्रंपंचगव्येनाभिषिच्याद्भिः प्रक्षाल्य मूलेन रामगायत्र्यावाष्टोत्तरशतवारमष्टवारंवा शंखोदकेनाभिमंत्र्य शुचौदेशे निधाय पवित्राणिकुर्य्यादितिसूत्रशुद्धिः तत्रउत्तमपवित्रंषष्ट्यधिकात्रिशतसूत्रैर्मध्यमं साशीतिशतसूत्रैः कनिष्ठं अथवाष्टोत्तरशतेनोत्तमं मध्यमंतदर्धं सप्तविंशत्याकनिष्ठं तच्चदेवस्यजानुपर्यंतमुत्तमं ऊरूपर्यंतमध्यमंनाभिपर्यंतंकनिष्ठं वनमालात्वष्टोत्तरसहस्रसूत्रैः कार्या उत्तमपवित्रसूत्रप्रमाणार्धगुणेनवाकार्य्या मुकुटमारभ्यपादपर्यंतामालावनमाला यजमानपवित्रमाधिवासनपवित्रंचाशीत्यधिकशतसूत्रैः सप्तविंशतिसूत्रैर्वा कार्य्यं गुरुपवित्रंतु द्विसप्तत्याधिकशतद्वयसूत्रैः चतुः पंचाशता

सूत्रैर्वाकर्त्तव्यं नृसिंहपरिचर्यायांतु गुरुपवित्रंसप्तविंशतिभिःषड्विंशत्यावानवसूत्र्यावाकर्त्तव्यमित्युक्तं अग्निपवित्रंतुगुरुपवित्रेणसमंसप्तविंशत्यासूत्रैर्वाकर्त्तव्यं शिवपवित्रंतूत्तममेकाशीत्यासूत्रैः कार्य्यं पंचाशतासूत्रैर्मध्यमं अष्टत्रिंशत्सूत्रैः कनिष्ठं तत्पवित्रप्रमाणंच द्वादशांगुलमानानि व्यासादष्टांगुलानिवा लिंगविस्तारमानानिचतुरंगुलकानिचेति अन्यानि साधारणपवित्राणि त्रिभिः सूत्रैः कर्त्तव्यानि क्रमज्ञानांशिष्याणांचस्कंधादिनाभिपर्यंतंदैर्घ्यमुक्तं नृसिंहपरिचर्यायांतु परिवारदेवतानांपवित्राणिसप्तविंशतिषोडश द्वादशनवत्रिसूत्रीभिः कर्त्तव्यानीत्युक्तं उत्तममध्यमकनिष्ठपक्षत्रयानुसारेण पवित्राणि कुर्य्यादितिशिवार्चनचंद्रिकाकारः अथपवित्रेषु ग्रंथयः अष्टाक्षराभिमंत्रितैः कुंकुमगोरोचनैः कर्पूरैस्तत्सूत्रंरंजयित्वेदं विष्णुरितिमंत्रेण द्वादशाक्षरमंत्रेणवाभिमंत्र्य ग्रंथीन्कुर्यात् तत्रोत्तमपवित्रेशतग्रंथयः षट्त्रिंशद्वाचतुर्विंशतिर्वाकर्त्तव्याः मध्यमपवित्रेतुपंचाशत्चतुर्विंशतिर्द्वादशवाग्रंथयः कार्याः कनिष्ठपवित्रे षट्विंशतिरष्टादशाष्टौवाग्रंथयः कार्याः शिवार्चनचंद्रिकायांत्वेतानिसर्वाणिदशदशग्रंथियुक्तानिकर्त्तव्यानीत्युक्तं वनमालायामष्टोत्तरशतंग्रंथयः कार्याः गंधपवित्रंतुद्वादशनवसूत्रीभिर्द्वादशग्रंथियुक्तमरत्निमात्रं ग्रंथिरहितंवितस्तिमात्रंवाकार्य्यं अथग्रंथिरचनाप्रकारमाह अंगुष्ठपर्वमात्रग्रंथिरुत्तमे तदर्धेनमध्यमे तदर्धेनकनिष्ठे एवंह्युन्नतान्शोभनान्समान्ग्रंथीन् नारायणाष्टाक्षरकवचमंत्रंवाजपन्कुर्वीत शिवार्चनचंद्रिकायांतुग्रंथिषुसूत्रवेष्टनसंख्याउक्ता उत्तमपवित्रेषट्त्रिंशत् मध्यमेषुचतुर्विंशतिःकनिष्ठेषु द्वादशइति ततोऽरत्निसंमितांषट्त्रिंशताकुशैर्वेणींकृत्वा तांवेणींमूलमंत्रेणाभिमंत्र्य पंचगव्येनसंशोध्य कक्षांतरे कृत्वा मानसंस्नानंकुर्य्यात् तद्यथा सुस्थितंपुंडरीकाक्षंमंत्रमूर्त्तिंप्रभुंस्मरन् अनंतादित्यसंकाशंवासुदेवंचतुर्भुजं शंखचक्रगदापद्ममुकुटंवनमालिनं दिव्यचंदनलिप्तांगंचारुहासंशुभेक्षणं नारदाद्यैः सेव्यमानंभास्वद्विपुलकंकणं

सकिंकणीककेयूरहारिणंमणिनूपुरं ध्वजच्छत्रांकुशाब्जलक्ष्यपादपंकेरुहद्वयं तत्पादोदकजांधारांनिपतंतींस्वमूर्धानि चिंतयेद्ब्रह्मरंध्रेणप्रविशंतींस्वकांतनुं तयासंक्षालयेत्सर्वमंतर्देहगतंमलं तत्क्षणाद्विरजामंत्रीजायतेस्फटिकोपमः इदमांतरकंस्नानंसहस्रादधिकंस्मृतम् ततः सर्वतोरक्षणं कुर्यात् तद्यथा जलपुष्पाक्षतान्हस्ते गृहीत्वा ओंहूः अस्त्रायफट्इति उच्चार्यात्मनः परितः प्रक्षिप्य अस्त्रायफट् इतिछोटिकाभिः सर्वदिग्बंधनंकृत्वा अग्निप्रकारमुद्रां स्वमूर्धानं परितः प्रादक्षिण्येन त्रिर्भ्रामयेत् तन्मध्यगतमात्मानंसंचिंत्य संक्षेपेणभगवत्पूजांकृत्वा मूलमंत्रेणवैदिकेनवाहोमंविधाय महापूजांकुर्यात् तत्रनित्यपूजनात्पंचामृतदिद्रव्यंत्रिगुणितंग्राह्यं ततोगंधतैलदानानंतरमुद्वर्तनंकुर्यात् तत्प्रकारोमहाकापिलपांचरात्रे रजनीसहदेवीच शिरीषंलक्ष्मणापिच सहाभद्राकुशाग्राणिउद्वर्तनमिहोच्यतइति एतदनंतरं शंखजलेन देवायाभिषेकं कुर्यात् तदाहुः शतंसहस्रमयुतंशक्त्यावाप्यभिषेचयेत् शंखसंपूर्यतेनैवसपुष्पेणचदेवतामिति अन्यत्रापि स्वशक्त्या गंधितोयेनसंस्नाप्यजगदीश्वरं महाभिषेकंसर्वत्रशंखेनैवप्रकल्पयेदिति ततोदेवंसर्वोपचारैःसंपूज्य देवस्यपुरतो दंतकाष्ठंजलंकुशान्मृत्तिकांहरिद्रांकुष्ठंगोरोचनंपादुके उपानहौ छत्रं चामरंव्यजनं व्रीह्यादिधान्यानिचस्थापयेत् तानि चोक्तानि विष्णुपुराणे व्रीहयःसयवामाषागोधूमाअणवस्तिलाः प्रियंगुसप्तमाह्येतेअष्टमाश्चकुलत्थकाः श्यामाकास्त्वथनीवाराजर्तिलाःसगवेधुकाः तथावेणुयवाःप्रोक्तास्तथामर्कटकामुने ग्राम्यारण्याःस्मृताह्येताओषध्यश्चचतुर्दशेति ततः साष्टांगंप्रणिपत्य नानाविधैःस्तोत्रैर्वैदिकैश्चदेवंस्तुत्वाविज्ञापयेत् क्रियालोपविधातार्थंयत्त्वयाविहितंप्रभो मयैतत्क्रियतेदेवत्वत्तुष्ट्यैचपवित्रकं नहिविघ्नोभवेदत्रकुरुतात्त्वंदयांमयि सर्वथासर्वदाविष्णोममत्वंपरमागतिः उपवासेनत्वांदेवतोषयामिजगत्पते कामक्रोधादयोप्येतेनमेस्युर्व्रतघातकाः

अद्यप्रभृतिदेवेशयावद्वैशेषिकंदिनं तावद्रक्षात्वयाकार्यासर्वस्यास्यनमोस्तुते तवयागंकरिष्येहंपवित्रमयमच्युत आमंत्रितोसिसपरीवारःश्रीरामभोमया रामराममहारामरक्षमांशरणागतं त्वद्भक्तितुष्टिसंपूर्णंतवतोषकरं परं इतिनिजाराधनायदेवंविज्ञाप्यस्वगुरुपादौप्रणम्य देवाग्रेसर्वतोभद्रमंडलं पंद्मवा विरच्य तत्र फलपुष्पमालालंकृतंवितानमावध्य मंडलोपरि जलपूर्णकुंभं महीद्यौरित्यादिविधिना संस्थाप्य तदुपरिससूत्रंवैणवं पात्रंचसंस्थाप्य पवित्रपूजनंच कुर्यात् सांवत्सरस्ययागस्यपवित्रीकरणायभोः विष्णुलोकात्पवित्राद्यआगच्छेहनमोस्तुते इत्यनेनमूलमंत्रयुतेनावाहयेत् उत्तममध्यकनिष्ठेषु ब्रह्मविष्णुरुद्रान्सत्त्वरजस्तमांसि वेदत्रयंच ध्यात्वा वनमालायांप्रकृतिंमुकुटसूत्रेद्युलोकंध्यात्वा ॐसर्वाभरणाचित्रांगसर्वदेवनमस्कृत लावण्यरूपविश्वात्मन्ज्येष्ठसूत्रंसमाश्रय सर्वलक्ष्मीकरश्रीशसर्वज्ञानमयात्मक निवृत्तिरूपविश्वात्मन्मध्यरूपंसमाश्रय २ अतिवेगजगद्योनेपुरुषात्मन्नादिवस्पते कनीयोमेप्रभोदेवतेजसासूत्रमाश्रय ३ सर्वाधारधरारूपसर्वकर्त्तःप्रजापते सर्वथात्मेशसूत्रेस्मिन्सान्निध्यंकुरुतेनमः ४ सर्वरत्नोज्वलाकारसमस्तब्रह्मरोचिष मुकुटोत्तमसर्वांगशिरस्सूत्रइहैहिभोः ५ प्रकृतिर्जगतः कर्त्रीसर्वलक्षणदायिनी श्रीसूत्रेसर्वकल्याणिसान्निध्यंकुरुतेनमः ६ उत्तमादीनिसूत्राणिक्रमात्पाणिनाएभिर्मंत्रैरालभ्यत्रिसूत्र्यांब्रह्मविष्णुरुद्रान् ॐकारंसोमंवह्निंनागान्शशिनं रविंशिवंविश्वान्देवान्नवसूत्र्यांक्रियांपौरुषींवीरांविजयांशांतिंअपराजितां मनोन्मनींजयांभद्रांमुक्तिंग्रंथिषुध्यात्वा यावद्ग्रंथिसंख्यामावर्त्यमानैरेवनामभिरावाह्यपूजयेत् ततआवाहनादिमुद्राःप्रदर्श्य चक्रमुद्रयासंरक्ष्यधेनुमुद्रयाअमृतीकृत्य गंधाक्षतपुष्पधूपदीपनैवेद्यफलतांबूलादिभिः पवित्रदेवता अभ्यर्च्य गंधपवित्रंवितस्तिडोरकात्मकंगृहीत्वा हृदयमंत्रेणप्रणवेनचाभिमंत्र्यदेवंनमस्कृत्य संवत्सरकृतार्चायाःसंपूर्णफलदोसियत् पवित्रारो

पणायैतत्कुरुकंधरकेनमः विष्णुतेजोद्भवंरम्यंसर्वपातकनाशनं सर्वकामप्रदंदेवतवांगेधारयाम्यहमिति मूलसंपुटितंश्लोकद्वयंपठित्वादेवकरेबध्नीयात् ततोमंगलारात्रिकेनदेवंनीराज्यपुनर्नैवेद्यतांबूलादिभिःसंपूज्य ध्येयंसदापरिभवघ्नमभीष्टदोहं तीर्थास्पदंशिवविरिंचिनुतंशरण्यं भृत्यार्त्तिहंप्रणतपालभवाब्धिपोतं वंदेमहापुरुषतेचरणारविंदम् १ त्यक्त्वासुदुस्त्यजसुरेप्सितराज्यलक्ष्मींधर्मिष्ठआर्यवचसायदगादरण्यं मायामृगंदयितयेप्सितमन्वधावद्वंदेमहापुरुषतेचरणारविंदम् २ श्रीमत्सरोरुहयवांकुशचक्रचापमत्स्यांकितंनवविलोहितपल्लवाभंलक्ष्म्यालयंपरममंगलमात्मध्येयंवंदेमहापुरुषतेचरणारविंदम् ३ वृंदावनांतरमगादनुगोकुलानांसंचारिसर्वपशुभिःसुविवृद्धिकामि संचिंतयद्व्रजगिरोमृगपक्षिणांयद्वंदेमहापुरुषतेचरणारविंदम् ४ यद्गोपिकाविरहजाग्निपरीतदेहास्तत्तस्तनेषुविजहुःपरिरभ्यतापं रासेतदीयकुचकुंकुमपंकलिप्तंवंदेमहापुरुषतेचरणारविंदम् ५ ज्ञानालयंश्रुतिविमृग्यमनादिमर्च्यंब्रह्मादिभिर्हृदिविचिंत्यमगाधबोधैः संसारकूपपतितोत्तरणावलंबंवंदेमहापुरुषतेचरणारविंदम् ६ येनांगचालनवशात् स्तनपानबुद्ध्याक्षिप्तांघ्रिणाहतमनोविपरीतचक्रं विध्वस्तभांडमपतद्भुविगोपमूर्त्ते वंदेमहापुरुषतेचरणारविंदम् ८ इत्यष्टकंपठतियः परमस्यपुंसोनारायणस्यनरकार्णवतारणस्य सर्वांतिमाशुहृदियः कुरुतेमनुष्यःसंप्राप्यदेहविलयंलभतेचमोक्षम् ९ योंतःप्रविश्यममवाचमिमांप्रसुप्तांसंजीवयत्यखिलशक्तिधरःस्वधाम्ना अन्यांश्चहस्तचरणश्रवणत्वगादीन्प्राणान्नमोभगवतेपुरुषायतुभ्यम् १० इत्यादिभिःस्तुत्वादेवंनिमंत्रयेत् आमंत्रितोसिदेवेशपुराणपुरुषोत्तम प्रातस्त्वांपूजयिष्यामिसन्निधौभवतेनमः निवेदयाम्यहंतुभ्यंप्रातरेतत्पवित्रकं सर्वथासर्वदाविष्णोनमस्तेस्तुप्रसीदमे इतिसंप्रार्थ्यसाष्टांगंप्रणिपत्य पुष्पांजलिं दत्त्वा सूत्राण्यस्त्रेणसंरक्ष्य कवचेनावगुंठ्य नृसिंहमंत्रेणरक्षणंकुर्यात् नृसिंहमंत्रस्तु उग्रंवीरंमहाविष्णुं

ज्वलंतंसर्वतोमुखं नृसिंहंभीषणंभद्रंमृत्युमृत्युंनमाम्यहं ततोब्राह्मणवंदनं गुरुवंदनंच कृत्वा रात्रौजागरणंकुर्यात् सद्योधिवासनेतु जागरणंनास्ति ततोजागरणंकुर्यात्सद्योजागरणंनहीति दक्षिणामूर्त्तिसंहितावचनात् इत्येकादश्यांपवित्राधिवासनं ततोद्वादश्यांनित्यंनैमित्तिकंचदेवपूजनंकृत्वा पवित्राणिचकृत्वासंपूज्यदेवंनीराज्यस्तोत्रैःस्तुत्वा गंधदूर्वाक्षतैर्युक्तंपवित्रंहस्तेगृहीत्वा मूलमंत्रेण ष्टवारमभिमंत्र्य मूलसंपुटितेनश्लोकद्वयेनपवित्रमर्पयेत् ॐरामरामनमस्तुभ्यंगृहाणेदंपवित्रकं पवित्रीकरणार्थायवर्षपूजाफलप्रदं पवित्रंतत्कुरुष्वाद्ययन्मयादुष्कृतंकृतं शुद्धोभवाम्यहंदेबत्वत्प्रसदात्सुरेश्वरेति ततोंगावृत्तिदेवतास्तत्तन्नामभिर्दद्यात् ततोमहानैवेद्यंसमर्प्यनीराजनंकृत्वाचामरैःसंवीज्यादर्शंदर्शयित्वापुष्पांजलिंसमर्प्य मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयंसांवत्सरीपूजातवास्तुगरुडध्वज वनमालायथादेवकौस्तुभंसततंहृदि पवित्रमस्तुतेतद्वत्पूजांचहृदयेवह जानताऽजानतावापिनकृतंयत्तवार्चनं केनचिद्विघ्नदोषेणपरिपूर्णंतदस्तुमे अपराधसहस्राणिक्रियंतेहर्निशंमया दासोयमितिमांमत्वाक्षमस्वमधुसूदन इतिसंप्रार्थ्यसाष्टांगंप्रणम्यदेवंप्रसादाभिमुखंविचिंत्य मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर पूजनंपूर्णतामेतुपवित्रेणार्पितेनतइतिपठित्वा गुरवेगंधादिपूर्वकंपवित्रंदत्त्वा सुवर्णवस्त्रादिभिः पूजयेत् ततोब्राह्मणान्संभोज्य स्वयंभुंजीत पवित्रधारणंतु देवेस्वदेहेच मासपक्षादियथासंभवकार्यं स्नानादिकालेतुतदुत्तार्यदेवंस्नापयेत् तथैव स्वयं स्नायात् अर्घ्यतोयेनाभिषिच्य देवांगे स्वांगेच तद्धारयेत् विसर्जनसमयेदेवंसूर्यंचविशेषेण गंधादिभिः संपूज्य विसर्जयेत् विसर्जनमंत्रस्तु ॐसांवत्सरींशुभां पूजांसंपाद्यविधिवन्मम व्रजेदानींपवित्रत्वंविष्णुलोकंविसर्जितः यावद्देवेपवित्राणितावद्ब्रह्मचर्यादिनियमेन स्थेयं एवंयः कुरुतेविद्वान् वर्षेवर्षेनसंशयः सयातिपरमंस्थानं यत्ररामः सनातनः यावत्तंतुपवित्रंतुतावत्स्वर्गेम

हीयते आयुरारोग्यमैश्वर्यंविपुलंतस्यवर्धते अथसंक्षेपेणपवित्रारोपणाविधिः दशम्यांहेमरौप्यादिसूत्रपवित्राणि कुर्यात् कार्पाससूत्रंचेत्तस्यनवसूत्रींविधायपंचगव्येनप्रोक्ष्य प्रणवेनप्रक्षाल्यमूलेनाष्टोत्तरशतमभिमंत्र्यशुचिदेशे अष्टोत्तरशततदर्धगुणितनवसूत्र्या देवस्यजानूनाभिपर्यंतानि षट्त्रिंशच्चतुर्विंशतिद्वादशग्रंथिकान्युत्तममध्यमकनिष्ठनि पवित्राणिविधायाष्टोत्तरसहस्रनवसूत्र्या अष्टोत्तरशतग्रंथिकवनमालांविधाय द्वादशनवसूत्रीभिः तावद्ग्रंथिकंगंधपवित्रंसप्तविंशतिनवसूत्र्यागुरुपवित्रंचकृत्वाग्रंथीन्कुंकुमेनरंजयित्वापामार्गबिल्वान्यतरकाष्ठेनदंतान्संशोध्य क्रियालोपविघातार्थंयत्त्वया।विहितंप्रभो मयैतत्क्रियतेदेवतवतुष्ट्यैपवित्रकं नमेविघ्नोभवेदत्रकुरुनाथदयां मयि सर्वथासर्वदाविष्णोममत्वंपरमागतिरिति प्रार्थ्यैकभक्तेनतद्दिनमतिवाह्यैकादश्यांकृतानित्याक्रियः श्रीराममहामंडपेराजोपचारैः संपूज्य हरेः पुरतः सर्वतोभद्रस्थोदकुंभेवैणवंपटलंनिधाय तत्रपूर्वनिर्मितसकलसूत्राणिनिधाय त्रिसूत्र्यांब्रह्मविष्णुशिवान् नवसूत्र्यां ओंकारसोमवह्निब्रह्मनागशशिसूर्यसदाशिवविश्वेदेवान्ग्रंथिषुक्रियापौरुषीवीराजयापराजिताविजयामुक्तिदासदाशिवामनोन्मनीसर्वतोमुखी प्रणवादिनमोंतैरेतैरेव यावद्ग्रंथिसंख्यमावर्त्यमाननामभिरावाह्य गंधादिभिरभ्यर्च्य गंधपवित्रंधूपितमादाय प्रणवेनाभिमंत्र्य विष्णुतेजोद्भवंरम्यंसर्वपातकनाशनं सर्वकामप्रदंदेवतवांगेधारयाम्यहमितिमंत्रेण मूलसंपुटितेन भगवत्पादयोःसमर्प्यप्रार्थयेत् आमंत्रितोसिदेवेशपुराणपुरुषोत्तम प्रातस्त्वांपूजयिष्यामिसन्निधौभवतेनमइति तत्कथाजागरेण तांरात्रिमतिवाह्य द्वादश्यां कृतनित्यक्रियश्चरामं पवित्राणिच संपूज्य गंधदूर्वाक्षतयुक्तंकनिष्ठपवित्रमादायदद्यात् मंत्रः देवदेवनमस्तुभ्यंगृहाणेदंपवित्रकं पवित्रीकरणार्थायवर्षपूजाफलप्रदं पवित्रकंकुरुष्वाद्ययन्मयादुष्कृतंकृ

तं शुद्धोभवाम्यहं देवत्वत्प्रसादात्सुरेश्वरेति एवं मध्यमोत्तमवनमालाः एतन्मंत्रावृत्त्या समर्प्याः अंगदेवताभ्योपियथासंभवंसमर्प्यनीराज्यप्रार्थयेत् ॐमणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयंसांवत्सरीपूजातवास्तुगरुडध्वज वनमालायथादेवकौस्तुभंसततंहृदि तद्वत्पवित्रतंतूस्त्वंपूजांचहृदयेवह जानताऽजानतावापियत्कृतंनतवार्चनं केनचिद्विघ्नदोषेणपरिपूर्णंतदस्तुमे अपराधसहस्राणिक्रियंतेहर्निशंमया दासोयमितिमांमत्वा क्षम्यतांपरमेश्वर ततोगुरुंचसंपूज्यसमर्प्यब्राह्मणैःसह पारणांविधायात्रिरात्रंब्रह्मचर्यादिनिपमवान् देवेपवित्रसंदर्भमाभिषेकान्यकालेसंस्थाप्य त्रिरात्रांतेदेवंसंपूज्य पवित्राणिविसर्जयेदिति इतिसंक्षिप्तपवित्रारोपणविधिः अत्राप्यसमर्थश्चेत् नित्यपूजांतेपवित्रपूजनंकृत्वामूलेनदेवायपवित्रंसमर्प्या ऽऽवरणदेवताभ्यएकैकंसमर्प्यगुरुसंपूज्य पवित्रं समर्प्य स्वयंपवित्रं धृत्वा ब्राह्मणान्भोजयेदिति इतिसंक्षिप्तपवित्रारोपणविधिः पद्मपुराणे महादेवउवाच श्रावणेमासिसंप्राप्तेपवित्रारोपणेविधिः यत्कृतेसातिदेवेशिदिव्यभक्तिः प्रजायते पवित्रारोपणंविष्णोः कर्त्तव्यंश्रद्धयाबुधैः संपूर्णंजायतेतस्यपूजाभवतिवार्षिकी पवित्रारोपणेविष्णोर्जायतेसुखमात्मनः संपूजितेसदाविष्णौनानासुखमवाप्नुयात् सूत्रंचाथसमानीयब्राह्मण्याकर्तितंशुभं स्वेनैवकर्त्तितंसूत्रंतेनैवचप्रकारयेत् नशूद्राकर्त्तितंसूत्रंतद्ग्राह्यंवातथैवच अन्यथाविक्रयेणापिग्राह्यंवाचायथातथा क्षौमेनैवप्रकर्त्तव्यःपवित्रारोपणेविधिः रूप्येणैवतथाकार्य्यंपवित्रंविष्णुदैवतं सौवर्णेनापिदेवेशिकर्त्तव्यंविधिपूर्वकं अभावे सर्वधातूनांग्राह्यंसूत्रंतथाबुधैः कृत्वातुत्रिवृतंसूत्रंप्रक्षाल्यमुदकेनच लिंगेलिंगप्रमाणंतुप्रतिमायांयथामितं पादांतंजानुपर्यंतंतथानाभिसमंस्मृतं ज्येष्ठमध्यंकनिष्ठंचपवित्रंकारयेद्बुधः संवत्सरदिनंयद्वत्तदर्धार्धेनसंख्यया सत्रेणैवप्रकर्त्तव्यंग्रंथिमष्टोत्तरेणतु तदर्धसंख्यकेनापियुक्त्यावातत्रपार्वति लिंगेवैलिंगसंज्ञंतुगंगानामभिरन्वितं

प्रतिमायांतथादेविपवित्रंवनमालिकं यथाशोभंतथाकार्यंयेनविष्णुःप्रसीदति एकंवैसुपवित्रंतुगंगाख्यंकारये
त्सदा तंतूनामेवसंयुक्तंकर्त्तव्यंवैष्णवैर्नरैः देवानांचतथैवोक्तंपवित्रंविष्णुदैवतं अंबरीषायभक्तायअन्येयेचध्रुव'
दयः पवित्राणिततःपश्चाद्दातव्यानीहपार्वति प्रतिपद्धनदस्योक्तापवित्रारोपणेतिथिः लक्ष्म्यादेव्याद्वितीया
तुतिथीनामुत्तमातिथिः तृतीयातुतवप्रोक्ताचतुर्थीगणपस्यतु पंचमीस्याच्चंद्रमसः षष्ठीवैकार्त्तिकस्यतु सत
मीचरवेः प्रोक्तादुर्गायाश्चाष्टमीमता नवमीचैवमातृणांयमस्यदशमीतथा एकादशीतुरुद्राणांद्वादशीमाधव
स्यतु त्रयोदशीतुकामस्याशिवस्योक्ताचतुर्दशी तद्वत्पंचदशीस्याताधातुर्वैपूजनेपुनः एतावैतिथयः प्रोक्ताः
पवित्रारोपणेक्रमात् कनिष्ठंद्वादशप्रोक्तामध्यमेद्विगुणामताः त्रिगुणाश्चोत्तमेचैवग्रंथयश्चपवित्रके कर्पूरकेस
राभ्यांचचंदनेनहरिद्रया रंजयित्वातुतत्सर्वंस्थाप्यंनवकरंडके देवस्यायतनंयत्रस्थाप्यंतत्रचदेववत् आदौदे
वार्चनंकृत्वाधिवास्यंचपवित्रकं अधिवासितेपवित्रेतु ततोवैपूजनंस्मृतं पवित्रेषुचयेदेवास्तेषांनिकटमाचरेत्
ब्रह्माविष्णुश्चरुद्रश्चत्रयोवैसूत्रदेवताः क्रियाचपौरुषीवीराचतुर्थीचापराजिता जयाचविजयाचैवमुक्तिदाचस
दाशिवा मनोन्मनीतुनवमीदशमीसर्वतोमुखी ग्रंथीनांदेवताश्चैवसूत्रेषुविनिवेशयेत् आवाहनंमुद्रयावैशा
स्त्रोक्तविधिनाततः आवाह्यतत्रताः सर्वाः सन्निधीकरणंततः संरक्षेद्रक्षमुद्राभिर्धेनुमुद्रामृतीक्रिया प्रागे
वदेवताग्रेतुगृहीत्वाकलशोदकं आगमोक्तेनमंत्रेणप्रोक्ष्यक्लींकृष्णमंत्रतः क्लींकृष्णायनमइतिप्रोक्षणमंत्रः गंधपुष्पै
र्धपदीपैर्नैवेद्यैःफलसंयुतैः तांबूलदक्षिणादानैस्ततोदेवाग्रतःपुनः धूपयित्वापवित्रंतुनतिमुद्रांसमाचरेत् एवमभ्य
र्च्यमंत्रेणामंत्रयेतपवित्रकं आमंत्रितोसिदेवेशसार्धंदेव्यागणादिभिः मंत्रैर्वालोकपालैश्चसहितः परिचारकैः

आगच्छभगवन्विष्णोविधिसंपूर्णहेतवे प्रातस्त्वांपूजयिष्यामिसान्निध्यंनियतंकुरु ततोगंधपवित्रंदेवस्यचराचरगुरोः श्रीविष्णोश्चरणयोर्निक्षिप्य प्रातर्नित्यक्रियांविधाय पुण्याहंस्वस्तिवाचनं विधाय जयशब्दैर्घंटावादित्रघोषैः पवित्रंसमर्प्यपूजांकुर्यात् प्रथमंज्येष्ठंततोमध्यमंपश्चात्कनिष्ठंतेभिर्मंत्रैः सर्वैर्यथाक्रमेण पूजांकुर्यात् ॐ वासुदेवायविद्महेश्रीविष्णुंचधीमहि तन्नोदेवः प्रचोदयात् इतिपवित्रदानम् अथवास्वमंत्रैः ततोत्रमहतींपूजां विष्णोश्चैवप्रसाधिनीं यथाचैवार्चितोदेवोविष्णुरात्माप्रसीदति समंताद्दीपमालाचकर्तव्याविधिनाततः चतुर्विधंतथान्नंचनैवेद्यंकारयेद्बुधः पवित्राणिततोदद्यात्स्राक्सुजातेसुशोभनं भक्त्याचैवविशेषेण श्रीधरंपूजयेत्ततः वस्त्रालंकारविधिनापूजनीयोगुरुर्महान् पूजयित्वागुरुंतत्रपवित्रंधारयेत्ततः अथवा वैष्णवाःसंति तेभ्यस्तांबूलादिकंदत्वा पूर्णाहुतिमग्नयेपश्चाद्दत्वा श्रीनिवासाय श्रीकृष्णाय कर्म निवेदयेत् मंत्रहीनंक्रियाहीनंभक्तिहीनंतु केशव यत्पूजितोमयासम्यक् संपूर्णयातुमेध्रुवम् तत उद्वास्य इष्टबंधुभिस्तथाविप्रैर्वा साहतः सनुमिष्टमन्नंस्वयंभुंजीत एतत्पूजनकंदिव्यंयेशृण्वंतिद्विजोत्तमाः सर्वपापानिविमुक्तायांतिविष्णोःपरंपदम् यावचंद्रोजगत्यस्मिन्यावत्तपतिवैरविः पवित्रारोपकस्तावन्मोदतेनात्रसंशयः पृथिव्यांयानिदानानिनियमाश्चतथापुनः सर्वेसंपूर्णतांयांतिपवित्रारोपणेकृते अयमुत्सवराजोवैपवित्रारोपकोविधिः ब्रह्महाशुध्यतेतत्रनात्रकार्याविचारणा सत्यंसत्यंपुनःसत्यंयदुक्तंनगनांदिनि पवित्रारोपणेपुण्यंदर्शनेनतथास्मृतं श्रद्धयाथमहाभागेपवित्रारोपकोविधिः कृतोवैभक्तिभावेनसवैधन्यतमःस्मृत धन्योहंकृतकृत्योहंसुभाग्योधरणीतले मयायातुकृताभक्तिर्वैष्णवीमुक्तिदायिका इतिपद्मपुराणे उत्तरखंडेपवित्रारोपणं। श्रावणशुक्लत्रयोदश्यांरतिकामव्रतंशुभं वैधव्यवारणंस्त्रीणांतथासंताननवर्धनं कृतोपवासःपुरुषोनारीवाद्विजसत्तम ताम्रेवामृण्मयेवापिसौवर्णेराजते

56

तथा रतिकामौप्रविंन्यस्यगंधाद्यैःसम्यगर्चयेत् सत्कृत्यभोज्यप्रतिमेदद्यात्ताभ्यांसदक्षिणे एवंचतुर्दशाब्दंतु कृत्वाव्रतमनुत्तमं धेनुयुग्मान्वितेदेयेव्रतसंपूर्तिहेतवे श्रावणशुक्लचतुर्दश्यां देवीपवित्रारोपणं नारदीये नभःशुक्लचतुर्दश्यांपवित्रारोपणंमतं तत्स्वशाखोक्तविधिनाकर्त्तव्यंद्विजसत्तम शताभिमंत्रितंकृत्वाततोदेव्यैसमर्पयेत् पवित्रारोपणंकृत्वानरोनार्य्यथवादरात् महादेव्याःप्रसादेनभुक्तिमुक्तिमवाप्नुयात् शिवपवित्रमपि तत्रैव कालांतरे आषाढेतुचतुर्दश्यांनभस्यनभसोस्तथा अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोरपि अधिवासनंतुदीपिकायां गोदोहांतरितेकालेपूर्वेद्युर्वाधिवासनमिति अथश्रावण्यांपूर्णिमायां रक्षांवधनमुपाकर्मच नारदीये अथश्रावणपूर्णायांवेदोपाकरणंस्मृतं याजुषैस्तत्रकर्त्तव्यंदेवर्षिपितृतर्पणं ऋषीणांपूजनंचापिस्वशाखोक्तविधानतः वह्वृचैस्तुचतुर्दश्यांसामगैर्भाद्रकेकरे रक्षाविधानेनतथाकर्त्तव्यंविधिपूर्वकं सिद्धार्थाक्षतराजिकाश्चविधृतारक्तांशुकारोपिता कौसुंभेनचतंतुनाथसलिलैःप्रक्षाल्यकांस्येधृता गंधाद्यैरभिपूज्यदेवनिकरान्संप्रार्थ्यविष्णवादिकान् वध्नीयाद्द्विजहस्ततःप्रमुदितोनत्वाप्रकोष्ठेस्वके ततस्तुदक्षिणांदत्त्वाद्विजेभ्योध्यायमाचरेत् विसृज्यचऋषीन्सप्तधारयेद्ब्रह्मसूत्रकं रंजितंकुंकुमाद्यैस्तुनवीनंनिर्मितंस्वयं शक्त्यासंभोज्यविप्राग्र्यानेकभक्तंसमाचरेत् कृतेह्यस्मिन्व्रतेविप्रवार्षिकंकर्मवैदिकं विस्मृतंविधिहीनंचनकृतंतुकृतंभवेत् इत्यभिधानादत उपाकर्मणिरक्षावंधादिकर्मयथाविधानमाचरंतिशिष्टाः अथश्रावणीकृत्यं तत्ररक्षावंधनंकार्यं तदुक्तंमदनरत्नेभविष्योत्तरे युधिष्ठिर उवाच सर्वरोगोपशमनंसर्वाशुभविनाशनं सकृत्कृतेनाब्दमेकंयेनरक्षान्वितोभवेत् श्रीकृष्णउवाच शृणुपांडवशार्दूलइतिहासंपुरातनं इंद्राण्यायत्कृतंपूर्वंशक्रस्यजयवृद्धये देवासुरमभूद्युद्धंपुराद्वादशवार्षिकं तत्रासुरैर्जितःशक्रःसहसर्वैःसुरोत्तमः वृहस्पतिंसमामंत्र्यइदंवचनमब्रवीत् नस्थातुंचैवशक्तोस्मिनगंतुंतैरभिद्रुतः सर्वथा

व्र०र०
श्रावण
२१

व्यापिनीग्राह्या ततोपराह्णसमयेरक्षापोटलिकांशुभामित्युक्तेः दिनद्वयेतद्व्याप्तौअव्याप्तौचपूर्वाग्राह्या श्रावणी
दौर्गीनवमीतिवृद्धयमवचनात् स्मृतिकौस्तुभेतु अस्मिन्कर्मण्यौदयिकीतिथिर्ग्राह्या पौर्णमास्यांदिनोदयइत्यु
पक्रमात् उपाकर्मोपलक्षितोत्तरकालताप्रतीतेश्चेतिपूर्वस्यांभद्रासत्वेतूत्तराग्राह्या भद्रायांद्वेनकर्त्तव्येश्रावणीफा
ल्गुणीतथा श्रावणीनृपतिंहंतिपुण्यंदहतिफाल्गुनीतिवचनाच्च अत्रसर्वेषामप्यधिकारः ब्राह्मणैःक्षत्रियैर्वैश्यै
रितिभविष्यवचनात् इतिरक्षाबंधनविधिः ॥ अथोपकर्मकालनिर्णयः तत्रबह्वृचानामुपाकर्मकालमाहाश्वलाय
नः अथातोध्यायोपाकरणमोषधीनांप्रादुर्भावे श्रवणेनश्रावणस्यपंचम्यांहस्तेनवेति ओषधीनांप्रादुर्भावे अंकु
रोदयइतियावत् श्रवणसंबंधिन्यांहस्तयुक्तपंचम्यांकेवलपंचम्यांहस्तेवाकर्त्तव्यमितिव्याख्यातारः यजुर्वेदिवि
षयेपारस्करः अथातोध्यायोपाकर्मश्रवणेनश्रावण्यांपौर्णमास्यांपंचम्यांहस्तेनवेतिबौधायनः श्रावण्यांपौर्णमा
स्यांवोपाकृत्यछंदांस्यधीयीतेति एवमन्यान्यपियजुर्वेदिकानांगृह्यसूत्राण्युदाहार्याणि छंदोगविषयेगार्ग्यः सिंहे
रवौतुपुष्यर्क्षेपूर्वाह्णेविचरेद्बहिः छंदोगामिलिताःकुर्युरुत्सर्गंसर्वछंदसां शुक्लपक्षेतुहस्तेनउपाकर्मापराह्णिक
मिति अथर्ववेदिनांतूपाकर्मकालउक्तः कौशिकगृह्ये अथर्ववेदस्याध्ययनविधिंवक्ष्यामः श्रावण्यांप्रौष्ठपद्यांवोपाकृ
त्यार्द्धपंचमासानधीयीरन् अर्धमासंवोपाकृत्यक्षपेरन् अहमुत्सृज्यआरंभःश्रावण्यामुकपौष्यामुत्सर्गइतिगोभिलः
पर्वण्यौदयिकेकुर्युःश्रावणंतैत्तिरीयकाःबह्वृचाःश्रवणर्क्षेतुहस्तर्क्षेसामवेदिन इति मनुः श्रावण्यांप्रौष्ठपद्यांवाउपाकृ
त्ययथाविधि युक्तःछंदास्यधीयीतमासान्विप्रोर्द्धपंचमानिति अर्धेनयुतःपंचमोयेषांतेऽर्धपंचमाः शाकपार्थिवादि
त्वादुत्तरपदलोपिसमासः सार्धांश्चतुरोमासानित्यर्थः बृहत्प्रचेताः भवेदुपाकृतिः पौर्णमास्यांपूर्वाह्णएवतु ब्राह्म
णान्भोजयेत्तत्रपितॄनुद्दिश्यदेवता इति याज्ञवल्क्यः अध्यायानामुपाकर्मश्रावण्यांश्रवणेनवा हस्तेनौषधिभावेवा।

योद्धुमिच्छामिगुरुस्त्वंचन्यवारयत् तयोःसंवदतोरेवंशचीप्राहसुरेश्वरं अद्यभूतमिदंदेवप्रातःसर्वंभविष्यति अहंरक्षांविधास्यामियेनतेजोभविष्यति इत्युक्त्वापौर्णमास्यांसापौलोमीकृतमंगला बबंधदक्षिणेपाणौरक्षापोटलिकांततः बद्धरक्षस्ततः शक्रः कृतस्वस्त्ययनोद्विजैः जघानदानवानीकंक्षणात्कालइवप्रजाःशक्रश्चविजयीभूत्वापुनरेवजगत्त्रयं प्राप्येतिशेषः एषप्रभावोरक्षायाः कथितस्तेयुधिष्ठिर जयदः सुखदश्चैव पुत्रारो ग्यधनप्रदः युधिष्ठिरउवाच क्रियतेकेनविधिना रक्षाबंधः सुरोत्तम कस्मिंमास्तिथौकदादेव एतन्मेवक्तुमर्हसि यथायथाहिभगवन् विचित्राणिप्रभाषसे तथातथानमेतृप्तिर्बहूवर्थाःशृण्वतः कथाः कृष्णउवाच संप्राप्तेश्रावणस्यांते पौर्णमास्यांदिनोदये स्नानंकुर्वीतमतिमान्श्रुतिस्मृतिविधानतः ततोदेवान्पितॄंश्चैव तर्पयेत्परमांभसा उपाकर्मदिने प्रोक्तंऋषीणांचैवतर्पणं कुर्वीतब्राह्मणैःसार्धंवेदानुद्दिश्यशक्तितः शूद्राणांमंत्ररहितंस्नानंदानंचशस्यते ततोपराह्णसमयेकुर्यात्पोटलिकांशुभां कारयेद्दाक्षतैस्तद्वत् सिद्धार्थैर्हेमचार्चितां वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्वामलवर्जितैः विचित्रतंतुग्रथितांस्थापयेद्भाजनोपरि कार्यागृहस्यरक्षा गोमयश्चितैःसुवृत्तैस्तु दूर्वावर्णकसहितैर्भित्तौदुरितोयशमानाय उपलिप्तेगृहमध्येवृत्तचतुष्कन्यसेत्कुंभं पीठं दत्त्वोपाविशेद्राजामात्यैर्युतश्चसुमुहूर्त्तेवेश्याजनेनसहितो मंगलसहितैः समुत्थितैश्चिह्नैः रक्षाबंधः कार्यः प्रशांतिदः सर्वविघ्नानां देवद्विजातिशस्त्रान्वस्त्रैरक्षाभिरर्चयेत्प्रथमं तदनुपुरोधानृपते रक्षांबध्नीतमंत्रेण येनबद्धोबलीराजादानवेंद्रोमहाबलः तेनत्वामपिबध्नामिरक्षेमाचलमाचल ब्राह्मणैःक्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्चमानवैः कर्त्तव्योरक्षिकाबंधोद्विजान्संपूज्यभक्तितः अनेनविधिना यस्तुरक्षाबंधनमाचरेत् ससर्वदोषरहितः सुखीसंवत्सरंभवेत् यःश्रावणेविमलमासिविधानदक्षोरक्षाविधानमिदमाचरतेमनुष्यः आस्तेसुखेनपरमेणसवर्षमेकं पुत्रप्रपौत्रसहितःससुहृज्जनःस्यादिति अत्रपूर्णिमाअपराह्ण

पंचम्यांश्रावणस्यत्विति औषधीनांप्रादुर्भावेश्रावणस्येतिचसर्वत्रसंबध्यतेहस्तेनयुक्तायांपंचम्यामिति स्मृतिचंद्रिकायां दिनांतरेपिहस्तेनयुक्तइतिहेमाद्रिः एवमेवस्मृत्यर्थसारेपि अत्रेयंव्यवस्थाबव्हृचैरौषधीप्रादुर्भावेसति शुक्लप्रतिपदादिश्रावणमासस्य श्रवणनक्षत्रेवैदिककर्मत्वात् पूर्वाह्णेउपाकर्मकर्त्तव्यं यजुर्वेदिभिस्तुश्रावण्यां पूर्वाह्णेकर्त्तव्यं छंदोगैस्तुसिंहस्थेसूर्येहस्तनक्षत्रे अपराह्णेकर्त्तव्यम् एषांग्रहसंक्रांतिदुष्टत्वेबव्हृचैःहस्तयुक्तायाश्रावणशुक्लपंचम्यांकेवलपंचम्यांवाहस्तयुक्तेश्रावणशुक्लतिथ्यंतरेवाकार्य्यं यजुर्वेदिभिर्भाद्रपद्ये षांगृह्येआषाढ्युक्तातैराषाढ्यांकार्य्यं वाजसनेयिभिस्तुपंचम्यां तदुक्तंस्मृत्यंतरे उपाकर्मप्रकुर्वीतक्रमात्सामर्ग्यजुर्विदः ग्रहसंक्रांत्यदुष्टेषुहस्तश्रवणपर्वसु तथा संक्रांतौग्रहणेचैवसूतकेमृतकेतथा गणस्नानंनकुर्वीतनारदस्यवचोयथा अथचेद्दोषसंयुक्तेपर्वणिस्यादुपक्रमः दुःखशोकामयग्रस्ताराष्ट्रेतास्मिन्न्द्विजातयः तथा यदिस्याच्छ्रवणं पर्व ग्रहसंक्रांतिदूषितं स्यादुपाकरणंशुक्लपंचम्यांश्रवणस्यतु स्मृतिमहार्णवे संक्रांतिर्ग्रहणंवापियदिपर्वणिजायते तन्मासेहस्तपंचम्यांकार्यंवाजसनेयिभिरिति अत्रपंचमीतन्मासगतैवगृह्यते नान्यमासगता अप्रकृतत्वात् वाजसनेयिग्रहणं तेषांगृह्येपंचम्युक्तास्तेषामुपलक्षणं येषांगृह्यसूत्रेपंचमीनोक्ता तेषामोषधिप्रादुर्भावइवश्रवणगतकालस्यग्रहादिदुष्टत्वेपिभाद्रपदएवोदितश्रवणादिकालेषूपाकर्मौचितं एतद्वार्षिकमित्याचक्षतइत्यादिवाक्यानामौषध्यप्रादुर्भावपर्वसंक्रांतिदोषोपिभाद्रपदप्रापकतायास्तुल्यत्वात् बौधायनीयानांतुश्रावण्याःपौर्णमास्याग्रहादिदुष्टत्वेआषाढ्यां तदनुष्ठानमुचितं श्रावण्यांपौर्णमास्यामाषाढ्यांवोपाकृत्यछंदांस्यधीयेतेतिबौधायनवचनात् ग्रहसंक्रांतिदोषश्चउपाकर्मसंबंधिन्यहोरात्रेभाव्यार्धरात्रात्पूर्वंनक्षत्रपर्वणोर्विद्यमानएवदूषकोनान्यथा तथातीतादर्धरात्रात्परतोविद्यमानोदूषकोनतत्पूर्वः नाप्युपाकर्मांगभूततिथिनक्षत्रयोः पूर्वोत्तरकालीनेति तिथ्यंतरेनक्षत्रांतरेवा

विद्यमानः अर्धरात्रादधस्ताच्चेत्संक्रांतिर्ग्रहणंतथा उपाकर्मनकुर्वीतपरतश्चेन्नदोषकृत् इतिमदनरत्नधृतगार्ग्यवचनात् यद्यर्धरात्रादर्वाक्स्याद्ग्रहःसंक्रांतिरेवतु नोपाकर्मतदाकुर्याच्छ्रावण्यांश्रवणेपिचेतिशास्त्रांतराच्च बह्वृचःश्रवणेकुर्युर्ग्रहसंक्रांतिवर्जिते इत्यादौश्रवणादिसामानाधिकरण्येनग्रहणादिपर्युदासश्रवणाच्चयानितुत्रयोदश्यादितोवर्ज्यंदिनानानवकंध्रुवं मांगल्येषुसमस्तेषुग्रहणेचंद्रसूर्ययोः तथाद्वादश्यादितृतीयांतोवेधइंदुग्रहे स्मृतः एकादश्यादिकःसौर श्चतुर्थ्यंतःप्रकीर्तितः खंडग्रहेतयोःप्रोक्त उभयत्रदिनत्रयमित्यादीनितुपौर्णमासीव्यतिरिक्तदिनानामपिदोषत्वप्रतिपादकानिवचनानि तान्युपाकर्मादिव्यतिरिक्तकर्मविषयाणि नित्यनैमित्तिकेजप्येहोमयज्ञक्रियासुच उपाकर्मणिचोत्सर्गेग्रहवेधोनविद्यत इतिवाक्येन उपाकर्मणिवेधदोषाभावस्योक्तत्वात् पर्वणिग्रहणेसतिपूर्वत्रिरात्रादिवेधाभाववक्तुमिदं तेनपर्वणिग्रहणेपि चतुर्दश्यांश्रवणेकार्यमितिहेमाद्रिःयदापिगौणकालेपिऔषधिप्रादुर्भावाभावः ग्रहसंक्रांतियोगोवानिमित्तांतरेणकेनचिदनयातिर्वाभवतितदावर्षर्तुमध्ये यदाकदाचित्कार्यंनतुश्रावणसंबंधनियमः तदुक्तंशौनकेन तद्वार्षिकमित्याचक्ष्यतइति वर्षासुभवंवार्षिकमित्यर्थः अतएवबह्वृचकायाम् आवृष्ट्यौषधयस्तस्मिन्मासेतुनभवंतिचेत् तदाभाद्रपदेमासिश्रवणेनतदिष्यतइति गोभिलः प्रौष्ठपदींहस्तेनोपाकरणमिति प्रौष्ठपदींप्राप्येतिशेषः वसिष्ठोपि स्थितेरवावुपाकर्मकर्त्तव्यंसिंहयुक्तके इतिवचनंतुनर्मदोत्तरभागविषयं नर्मदोत्तरभागेतुकर्त्तव्यंसिंहपुराणोक्तकं कर्कटेसंस्थितेभानावुपाकुर्य्यात्तुदक्षिणइतिवचनात् कथंतर्हिनर्मदोत्तरभागगतानांशिष्टानांकर्कटस्थेरवावुपाकर्मानुष्ठानं अत्रकेचित् अस्यवचनस्यसामगविषयत्वात्तद्व्यतिरिक्तानांकर्कस्थेपिसूर्येनदोषइत्याहुः अन्येतुसामगविषयत्वस्यायुक्तत्वादेतस्यवचनस्यप्राच्यग्रंथेषुदाक्षिणात्यप्राचीननिबंधेषुचादृष्टत्वादनाकरत्वमाहुः एतच्चशुक्रास्ता

दावपिकार्य्यं उपाकर्मोत्सर्जनंचपवित्रदमनार्पणामिति दमनारोपेलिखितवचनात् यज्ञोपवीतंकर्त्तव्यंश्रावणे
गुरुशुक्रयोः मौढ्येपिवार्धकेवाल्येनित्यवत्कर्मनोदित मितिस्मृतिसारसमुच्चयाच्च प्रथमारंभस्तुनभवति गुरु
भार्गवयोर्मौढ्येबाल्येवावार्धकेपिवा तथाधिमाससंसर्पमलमासादिषुद्विजाः प्रथमोपाकृतिर्नस्यात्कृतंकर्म्मवि
नाशकृदितिसंग्रहवचनात् अत्रआदिशब्देनसिंहस्थगुर्वाणिँदिग्रहणं द्वितीयादिप्रयोगोपिअधिमासे उत्कर्ष
बालवृद्धौस्यातुपाकर्मादिकर्माणि अभिषेकादिवृद्धीनांनतुकर्षोयुगादिष्विति कात्यायनेनोक्तेश्च यतु दृशह
रासुनोत्कर्षश्चतुर्ष्वपियुगादिषु उपाकर्मणिचोत्सर्गेह्येतद्दिनचतुष्टय इतिऋष्यशृंगवचनं तत्सामगविषयं
तेषांसिंहार्कोपजीवनेनविहितस्योपाकर्मणोऽग्रिममासेसंभवात् एतानिहस्तश्रवणपर्वादिनद्वयेऽपिकर्मकालप्राप्ता
वौदयिकानिग्राह्याणि उक्तंगृह्यपरिशिष्टे धनिष्ठाप्रतिपद्युक्तंत्वाष्ट्रमृक्षसमन्वितं श्रावणंकर्मकुर्वीरन्ऋग्यजुः
सामपाठका इतिव्यासः श्रवणेनतुयत्कर्मउत्तराषाढसंगतं संवत्सरकृतोध्यायस्तत्क्षणादेवनश्यति धनिष्ठा
संयुतंकुर्यात्श्रावणंकर्मयद्भवेत् तत्कर्मसफलंविंद्यादुपाकरणसंज्ञितं निगमे ग्रहयोगोगुरुंहंतिसंक्रांतिःशिष्य
घातिनी तपोहंत्युत्तराषाढाउपाकर्मणिवैष्णवे धनिष्ठामिश्रितेकार्यमुपाकरणसंज्ञितं कालिकापुराणे चतुर्द
श्यांसमुत्पन्नावसुरौमधुकैटभौ वेदान्स्वीकुर्वतःपद्मयोनेस्तौजह्रतुःश्रुतीः हत्वातावसुरौदेवः पातालतलवासिनौआ
हृत्यताःश्रुतीस्तस्मैददौलोकगुरुःस्वयं अभूक्कठधश्रुतिर्ब्रह्मापर्वण्यौदायिकेपुनः अतोभूतयुतेतस्मिन्नोपाकरणमि
ष्यते आसुरंवर्जयेत्कालंवेदाहरणशंकयेति औदायिकानिचपर्वादीनिप्रातःसांगवात्मकषण्मुहूर्तव्यापीनिग्रा
ह्याणि श्रावण्यांप्रौष्ठपद्यांवाप्रतिपत्षण्मुहूर्त्तकैः विद्धास्याच्छंदसातत्रोपाकर्मोत्सर्जनंभवेदितिनिगमवचनात्
पर्वग्रहणंहस्तश्रवणयोरप्युपलक्षणं अतएवपृथ्वीचंद्रोदये श्रावणीपौर्णमासीतुसंगवात्परतोयदितदैवोदयि

कीग्राह्यानान्यदौदयिकीभवेदितिगार्ग्यवचनंलिखित्वा उदयेसंगवस्पर्शेश्रुतौपर्वणिवार्कभे कुर्युर्नभस्युपाकर्म ऋग्यजुःसामगाःक्रमादितिवचनांतरमपिलिखितं स्मृतिकौस्तुभेतु पृथ्वीचंद्रोदयोदाहृतवचनेसंगवस्पर्शग्रहणात्संगवैकदेशव्याप्तिः प्रतीयते निगमवाक्येतुषण्मुहूर्त्तकइतिपूर्णभागद्वयव्याप्तिः तदधिकव्याप्तिरपि गार्ग्यवचनात्प्रतीयते एषांवचसांयथाश्रुतार्थ परत्वे संभवति नान्यतरस्यानुवादत्वंवक्तुमुचितं नापिविकल्प परत्वंतस्याष्टदोषदुष्टत्वात् अनेकश्रुतिकल्पनाप्रसंगाच्च किंतुयेषांशाखिनांषण्मुहूर्त्तसाध्यमेवोपाकर्मतान्प्रति षण्मुहूर्त्तव्याप्तिरेवाग्राह्यत्वनियामिकाएवमितरे अपिव्याप्तीतितच्छाखिनांप्रतिग्राह्यत्वनियामकेबोध्ये अतएव स्फुटस्मृत्यर्थसारोक्तिः तिथिखंडेसत्युदयव्यापिनीप्रयोगपर्याप्तितिथिरूपाकरणेग्राह्येति एवंचनोक्तवचनेषुक्वापि स्वार्थत्यागः नाप्यनेकश्रुतिकल्पनाप्रसक्तिः सर्वेषांकर्मकालव्यापिशास्त्रप्रपंचकरूपत्वादितिसिंहाभट्टीये श्रावणः श्रवणंपर्वसंगवस्पृग्यदाभवेत् तदेवौदयिकंकार्यंनान्यदौदयिकंभवेदिति निर्णयसिंधौतु उदयव्यापि नित्यैवविष्णवर्क्षेघटिकाद्वयं तत्कर्मसफलंज्ञेयं तस्यपुण्यत्वनंतकमितिगार्ग्यवचनविरोधा देतानिवचनानिप्राशस्त्यमात्रपराणीत्युक्तं परमार्थतस्तु बहूनांवचनानांप्राशस्त्यपरत्वस्यानुचितत्वादेकस्योदयव्यापिनीतिगार्ग्यवचनस्यैववैश्वानराधिकरणन्यायेन षण्मुहूर्त्तात्मककालावयवमुहूर्त्तात्मककालस्तुतिद्वाराःषण्मुहूर्त्तात्मकपूर्वोक्तकालस्तावकत्वंयुक्तमितिप्रतिभाति हेमाद्रिमदनपारिजातादयस्तु पर्वण्यौदयिकेकुर्य्युःश्रावणंतैत्तिरीयकाः बह्वृचाःश्रवणेकुर्य्युर्ग्रहसंक्रांतिवर्जितइतिवाक्ये तैत्तिरीयकग्रहणात्तैरेवौदयिकेकार्यं धनिष्ठाप्रतिपद्युक्तामितिगृह्यपरिशिष्टवाक्ये सामान्येन श्रुतोपियजुः शब्दएतद्वचनानुरोधेन तैत्तिरीयकपरःअतोवाजसनेयिभिः श्रावणीदुर्गानवमीतथादुर्गाष्टमीचया पूर्वविद्धातुकर्त्तव्याशिवरात्रिर्बलेर्दिनमितिवचनात्पूर्वविद्ध

पौर्णमास्यामिदंकार्यमित्याहुः मदनरत्नस्तु पर्वण्यौदयिकइतिवचनस्यबह्वृचपरिशिष्टीयत्वेनतान्प्रत्येवकर्मविधातुंप्रवृत्तत्वाद्बह्वृचाः श्रावणेकुर्य्युरित्यनेन बह्वृचकर्तृकउपाकर्मणिश्रवणान्वितकालेविहितेकालिकापुराणादौप्राशस्त्यपूर्वकंयजुर्वेदादिविशेषमनुपादायसामान्येनविहितं हितयदौदयिकं पर्वतद्बह्वृचैः कर्मानुष्ठानयोग्यौदयिकपर्वलाभेप्राशस्त्यबुद्ध्याश्रवणापरित्यागेन मायाहीत्येतदर्थं धनिष्ठांप्रतिपद्युक्तामित्यादिवाक्यप्राप्तौदयिकपर्वणो यजुर्वेदिसंबंधपर्वण्यौदयिकेकुर्य्युः श्रावणंतैत्तिरीयिका इतिवाक्यंप्रतिपादयतीत्येतदनुवादकं अनुवादस्यच प्राप्त्यधीनत्वादौदयिकपर्वप्राप्तेश्च यजुर्वेदिमात्रसाधारणत्वात्तदनुवादवाक्यगततैत्तरीयपदस्य यजुर्वेदिमात्रोपलक्षकत्वात् श्रावणीदुर्गनवमीतिवाक्यस्य पवित्रारोपणादौचरितार्थत्वाच्च सर्वैरपियजुर्वेदिभिरौदयिकेपर्वण्युपाकर्मकर्तव्यमित्याह स्मृतिकौस्तुभेतु तैत्तिरीयशब्दस्यप्रसिद्धार्थबाधप्रसंगात् गोभिलवाक्यस्य बह्वृचान्प्रतिश्रवणविधानमात्रपरत्वेन नेतुमशक्यत्वाच्च अथतदपिसामगानामितिस्तुतिमात्रविधिपरमितिचेत् नहोलाधिकरणेस्मृतीनांगृह्यग्रंथानांचाध्यापनव्यवस्थयाप्रामाण्यव्यवस्थानाप्राप्तांदूरीकृत्य सर्वान्प्रतिप्रामाण्यस्यस्थापितत्वेनतत्परिशिष्टेतत्तच्छाखीयपुरस्कारेणप्रवृत्तविधेर्विवक्षामंगीकृत्येतरशाखीयान्प्रति प्रतीयमानविध्यविवक्षांगीकारस्यनिर्हेतुकत्वादिति इदं ब्रह्मचारिगृहस्थवनस्थैस्त्रिभिरपि कार्यं अतएव नारायणवृत्तौ अथातोध्यायोपाकरणमितिसूत्रव्याख्यानेयस्माद्ब्रह्मव्रताध्ययनंनित्यंअतउपाकर्मावश्यकमित्यादिना ब्रह्मयज्ञांगनायुक्तां अतएवजीर्णप्रयोगरत्ने गोभिलः उपाकर्मोत्सर्जनंचवनस्थानामपीष्यते धारणाध्ययनांगत्वाद्गृहिणांब्रह्मचारिणामिति ननुगृहस्थस्यसमावर्तनोत्तरं ग्रहणाध्ययनांगतयावाएतस्यकर्मणो ऽनुष्ठान कथंयुक्तमितिचेत् उच्यते समावृत्तोब्रह्मचारिकल्पेनयथान्यायमितरेजायामपीत्येके इत्याश्वलायनसूत्रे व्याख्यातंह्येतदित्थंवृत्तिका

अ०२०
श्रावण
३२

रेण ब्रह्मचारिकल्पेनब्रह्मचारिधर्मैरित्यर्थः स्वाध्यायकाले विहितायेधर्माः मधुमांसस्त्रीगमनखट्वादिवाशयनादिवर्जनादयः तैर्युक्तोधीयीतसमावृत्तः मेखलादयस्तुनभवंति अस्वाध्यायधर्मत्वात् इतरेब्रह्मचारिणइत्यर्थः अत्राध्ययने ब्रह्मचारिणमपि प्रवृत्त्यर्थमिदं इतरथासमावृत्तानामेवेतिशंकास्यात्समावृत्तोजायां गच्छेदित्येकआहुः ऋतावेवगच्छेन्नाऋतावितिवेदव्रतानिवापारंनीत्वाह्युभयमेवचेत्यादिश्रुतिरपिवेदसमाप्त्यभावेपिसमावर्त्तनविधानेन गृहस्थानामपिवेदाध्ययनसूचनाच्च अत्रचसायुज्यकामयोराजपुरोहितयोः कुलाययज्ञइवाध्येष्यमाणोध्याप्यैरन्वारब्धइत्याश्वलायनसूत्राच्चतुरवतपंचावताख्यभिन्नकल्पनायामप्यधिकारः अत्रापि समानकल्पयोरेवाधिकारोस्त्वितिचेन्नएतदधिकरणस्यतुल्यकल्पादिकाराधिकरणापवादतयाभाष्यादौप्रतिपादितत्वात् स्मृतिकौस्तुभेतु प्रधानभूतोप्याचार्यैर्बहुभिरपिचतुरवतिभिः सहोपाकर्मकुर्वन् एकस्यापिजामदग्न्यस्यानुरोधेनपंचावतमेवकुर्यात् आग्रयणेजघन्येएवंद्यावापृथिव्यनुरोधेनमुख्यानेकेंद्राग्न्यादीनांप्रसूमपानियमसाधकतयाद्वादशाध्यायोक्तस्यकांस्यभोजिन्यायस्यप्रकृतेपितुल्यत्वात् उक्तंहि चतुरवतिनंप्रत्यपिपाक्षिकपंचावतानुष्ठानं कात्यायनेनतस्यद्विरवतित्रिर्जामदग्न्यानां सर्वेषांचोभयविरोधादितिव्याख्यातंचैतत् कर्काचार्येदेवयाज्ञिकैः स्वशाखांतरेपंचावतंजमदग्नीनामित्युक्तेस्तेषांपंचावतमेव अन्येषांचतुरवतंपंचावतंवेतिसत्यामप्यत्राव्यवस्थितविकल्पप्रसक्तौजामदग्न्यानुज्ञयैवाजामदग्न्यंशकांकुर्यात् अथजामदग्न्योमामंत्र्यमंचावतंकुर्वीतेत्यापस्तंबोक्तेः अतएवतनूनपान्नराशंसयोरिवचतुरवतपंचावतयोर्व्यवस्थाभावात् अजामदग्न्यानांजामदग्न्यैः सहानाधिकारशंकातेनराजपुरोहितौसायुज्यकामौयजेतामितिवचनात् कुलाययज्ञइवोपाकर्मणिचोत्सर्गइतिकार्ष्णाजिनिवचनादिहापि

सहाधिकार इति तदुभयमप्यभुक्तवांतिमेवत्युपेक्षणीयं नचकुलायदृष्टांतेनसमाधानमप्युचितम् वसिष्ठशौनकादिगोत्रोत्पन्नेनपुरोहितेनसहैवराज्ञोधिकारंप्रतिपादयतोवचनस्योपपत्तौ सत्रवत्कुलायेपिप्रपाजगोचरभिन्नकल्पार्हाणां सहाधिकारकल्पनानुपपत्तेः सोमचमसाकलचमसार्हत्वेनभिन्नकल्पयोर्विप्रक्षत्रिययोः सहाधिकारप्रतिपादकाज्ञयाचास्याधिकरणस्य तुल्यकल्पयाधिकाराधिकरणवशादलंसभवत्पाल्यालोकायितुमुचितंविद्वद्भिरिति अथात्रकर्त्तव्यमुच्यते कार्ष्णाजिनिः उपाकर्मणिचोत्सर्गेयथाकालंसमेत्यतु ऋषीन्दर्भमयान्कृत्वापूजयेत्तर्पयेत्ततइति व्यासः ऋषीणामर्चनंपूर्वंकर्त्तव्यंचानिवीतिनेति कार्ष्णाजिनिः वेदारंभणतःपूर्वंसक्तुप्राशनतः परं नवयज्ञोपवीतानिदध्याद्द्वैधारयेत्ततइति गालवः कृत्वायज्ञोपवीतानिनवानिवसुधाधिप हुत्वाग्नौगुरवेदत्त्वापितृभ्यो धारयेत्ततइति पितृभ्यइत्यत्रापिदत्त्वेत्यनुषज्यते वायवीये उपाकर्मणिविप्रेभ्योदद्याद्यज्ञोपवीतकं आयुष्मान् जायतेतेनकर्मणामानवोभुवि ब्रह्मचारिणोविशेषः कालादर्शे मौंजीयज्ञोपवीतंचनवंदंडंचधारयेत्] अजिनंकटिसूत्रंचनवंवस्त्रंतथैवच अत्रविशेषः कारिकायां पश्चादग्रेषुदर्भेषूप्रागग्रेषुपविश्यच आसिच्यापः शरावादौ दर्भास्तत्रनिधायच प्रागग्रदर्भगर्भास्तेकुर्युर्ब्रह्मांजलीस्तथा सव्याहृतिंजपंत्युच्चैः सावित्रींब्रह्मयज्ञवत् त्रिरभ्यसेत्पुरोंकारंव्याहृतीश्चात्रकर्मणीति गोभिलः उत्सर्जनंचवेदानामुपाकरणकर्मच अकृत्वावेदजप्येनफलंनाप्नोतिमानवःअतएवचोपाकर्मोत्सर्जनयोर्नित्यत्वमित्युपाकर्मकालनिर्णये अथोत्सर्जनप्रयोगःआचार्यआचम्यप्राणानायम्य देशकालौसंकीर्त्य अधीतानांछंदसामाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थंएभिर्ब्राह्मणैः सहअंतरितमुत्सर्जनाख्यंकर्मकरिष्ये तदंगंहोमंकर्तुंस्थंडिलादिकरिष्ये स्थंडिलमुपलिप्योल्लिख्याभ्युक्ष्य कलशमाग्नेय्यां निरस्यपाणिंप्रक्षाल्य एह्यग्नेराहुगणोगौतमोग्निस्त्रिष्टुप् जुष्टोदमूनाआत्रेयोवसुश्रुतोग्निस्त्रिष्टुप्अग्न्यावाहनेविनियोगः ओंएह्य

ब्र०र०
श्रावण
२३

मइहहोतानिषीदादब्धः सुपुरएताभवानः अवतांत्वारोदसीविश्वमिन्वेयजामहे सौमनसायदेवान् जुष्टोदमूनाअतिथिदुरोणइमन्नोयज्ञमुपयाहिविद्वान् विश्वाअग्नेअभियुजोविहत्याशत्रूयतामाभराभाजनानि इत्यक्षतैरावाह्य व्याहृतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृहती अग्निप्रतिष्ठापनेविनियोगः ओंभूर्भुवः स्वः अग्निंपावकनामानं प्रतिष्ठापयामीतिप्रतिष्ठाप्य प्रोक्षितेंधनानिनिक्षिप्य वेणुधमन्याप्रबोध्य ध्यायेद्देवं चत्वारिशृंगावामदेवोग्निस्त्रिष्टुप्अग्निमूर्तिध्यानेविनियोगः ओंचत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य त्रिधावद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेश सप्तहस्तश्चतुःशृंगः सप्तजिह्वोद्विशीर्षकः त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं तोमरंव्यजनंवामेघृतपात्रंचधारयन् आत्माभिमुखमासीनएवंरूपोहुताशनः एवंध्यात्वासमिद्द्वयमादाय अस्मिन्क्रियमाणोत्सर्जनहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये अस्मिन्नन्वाहितेऽग्नौ जातवेदसमग्निमिध्मेन प्रजापतिंचाघारदेवते आज्येनाग्निषोमौचक्षुषीआज्येनात्रप्रधानं सावित्रींब्रह्माणंश्रद्धांमेधांप्रज्ञांधारणांसदसस्पतिं अनुमतिंछंदांस्यृषीन् एताः प्रधानदेवता आज्यद्रव्येण पुनरत्रप्रधानं अग्निंअसृणसूर्य्यम् अग्निंशकुंतंअग्निंमित्रावरुणौअग्निंअपः अग्निंप्रजापतिं देवंब्रह्माणं अग्निंइंद्रासोमौ इंद्रंअग्निंमरुतः पवमानं सोमं अग्निंसंज्ञानं एताः प्रधानदेवतागृहसिद्धान्नद्रव्येण स्विष्टकृतमग्निमिध्मसन्नहनेन रुद्रमयासमग्निं देवान्विष्णुमग्निंवायुंसूर्यंप्रजापतिं चैताः प्रायश्चित्तदेवता आज्येन ज्ञाताज्ञातदोषनिवर्हणार्थं त्रिवारमग्निंमरुतश्चाज्येनसांगोपांगेनकर्मणासद्योयक्ष्ये व्याहृतीनांपरमेष्ठीप्रजापतिर्बृहती अग्न्याधानसमिद्धोमेविनियोगः

ॐभूर्भुवः स्वः स्वाहा प्रजापतयइदंनमम अग्निंपरिसमूह्य परिस्तृणीयात् अग्नेरष्टांगुलपरिमिते देशेऐशानींदिशमारभ्यदक्षिणांसमंतात्सोदकेनपाणिना त्रिः परिमृज्य दर्भैर्दशांगुलमितेदेशेप्राच्यादिषुपरिस्तृणीयात् तत्रप्राच्यांप्रतीच्यांचोदगग्रादर्भाअवाच्यामुदीच्यांचप्रागग्राः पूर्वपश्चात्परिस्तरणमूलयोरुपरिदक्षिणपरिस्तरणं उपरिपरिस्तरणंतु तदग्रयोरधस्तात् एकैकस्यांदिशिचत्वारएवषोडश उत्तरतः पात्रासादार्थं कांश्चित्प्रागग्रान्दर्भानास्तृणीयात् अग्नेरैशानीतस्त्रिरंभसापरिषिच्यदक्षिणसव्यपाणिभ्यांक्रमेणचरुस्थालीप्रोक्षण्यौदर्वींस्रुवौ प्रणीताज्यपात्रेइध्मावर्हिषी इतिद्वंद्वेप्रक्ष्याल्यासादयेत् ततःप्रोक्षणीपात्रमुत्तानीकृत्वा तत्रानंतर्गर्भितसाग्रसमस्थूलप्रादेशमात्रेकुशद्वयरूपेउत्तराग्रेपवित्रेनिधाय शुद्धाभिरद्भिस्तत्पात्रंपूरयित्वा गंधपुष्पादिक्षिप्त्वा अंगुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यांपाणिभ्यामुदगग्रेपृथक् पवित्रेधृत्वा अपस्त्रिरुत्पूयपात्राण्युत्तानानिकृत्वा इध्मग्रंथिंविस्रंस्य सर्वाणित्रिःप्रोक्षयेत् प्रणीतापात्रमग्नेःप्रत्यङ्निधाय तत्र पवित्रेनिधायोत्पूताभिरद्भिः पूरयित्वा गंधपुष्पादिनिःक्षिप्य पूर्णपात्रंपाणिभ्यामादायाग्नेः प्रादक्षिण्येनानामिकाग्रंनीत्वाग्नेरुत्तरतोदर्भेषुनिधायपवित्रेगृहीत्वान्यैर्दर्भैराच्छादयेत् गृहासिद्धान्यद्द्रव्यं चरुस्थाल्यामादाय तेपवित्रेआज्यपात्रेनिधाय तत्पवित्रपुरतःसंस्थाप्य तस्मिन्नाज्यमासिच्याग्नेरंतःस्थितांगारान्भस्मनासहाग्नेरुदकपरिस्तरणाद्बहिर्निरूह्य तेष्वाज्यपात्रमधिश्रित्य ज्वलतादर्भोल्मुकेन प्रज्वाल्यांगुष्ठपर्वमात्रं प्रक्षालितंदर्भाग्रद्वयमाज्येप्रक्षिप्य पुनर्ज्वलतातेनैवदर्भोल्मुकेन सिद्धान्नद्रव्येण सहाज्यं त्रिःपर्यग्निकृत्वा तदुल्मुकमपास्यापः स्पृष्ट्वाज्यपात्रंतुविकर्षन्नुदगुद्वास्यांगारानग्नौप्रत्यस्यापःस्पृष्ट्वा तत्रस्थमेवाज्यं सवितुष्ट्वाहिरण्यस्तूपः सवितापुरउष्णिक्आज्यस्योत्पवने विनियोगः सवितुष्ट्वाप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः इतिमंत्रेणैकश्रुत्योच्चारितेनैकंवारं

द्भिस्तूष्णींउत्पूतपवित्रे अद्भिः प्रोक्ष्याग्नौ प्रहरेत् अथाग्नेःपश्चात्परिस्तरणाद्वाहिर्भुवंप्रोक्ष्य तत्रवर्हिः सन्नहनीं रज्जुमदगग्रांप्रसार्य तदुपरिवर्हिःप्रागग्रमुदगपवर्गमविरलमास्तीर्य तस्मिन्नाज्यपात्रंनिधायदक्षिणकरेस्रुक्स्रुवौगृहीत्वा सव्येनकांश्चिद्दर्भानादायसहैवाग्नौप्रताप्यस्रुचंनिधाय दक्षिणहस्तेन स्रुचस्यविलमैग्रस्तुपृष्ठमभ्यात्ममग्रतः आरभ्यपृष्ठतोयावदुपरिष्टाद्विलंभवेत्कुशानां मूलतोदंडमेकैकंत्रिर्मृजे।तवैं प्रोक्ष्य प्रताप्य चासाद्यवर्हिष्युत्तरतोन्यसेत् एवमेवदर्वीमपिसंमृज्यतान्कुशान् कृतसमान् प्रोक्ष्याग्नौप्रहरेत् ततोगृहसिद्धान्नमग्न्याज्ययोर्मध्येननीत्वा आज्याद्दक्षिणतोवर्हिषिसांतरमासाद्याभिघार्याग्निंगंधादिभिरभ्यर्चयेत् विश्वानिनइतितिसृणमात्रेयोवसुश्रुतोग्निस्त्रिष्टुप्द्वाभ्यामर्चनेंत्योपस्थाने विनियोगः विश्वानिनोदुर्गहाजातवेदः सिंधुन्ननावादुरितानिपर्षिअग्नेअत्रिवत्नमसा गृणानोस्माकंबोध्यवितातनूनां यस्त्वाहृदाकीरिणामन्यमानोमर्त्यंमर्त्योजोहवीविजातवेदोयशो अस्मासुधेहिप्रजाभिरग्ने अमृतत्वमश्यां यस्मैत्वंसुकृतेजातवेद उलोकमग्नेकृणवस्योनंअश्विनंसुपुत्रिणवीरमंतंगोमंतंरयिन्नशतेस्वस्ति आद्यमंत्राभ्यामष्टसुदिक्ष्वर्चयेदष्टभिः पादैः अंत्योपस्थानं आत्मानंचालंकृत्यहस्तंप्रक्ष्याल्य इध्मवंधनरज्जुमिध्मस्थानेनिधाय पाणिनेध्ममादाय मूलमध्याग्रेषु स्रुवेणत्रिरभिघार्य अयंतेवामदेवोजातवेदाअग्निस्त्रिष्टुप् इध्महवनेविनियोगः अयंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्धस्वचेद्धर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधयस्वाहा जातवेदसेअग्नयइदंनमम ततः स्रुवेणाज्यंगृहीत्वा वायव्यदिशमारभ्याग्नेयींदिक्पर्यंतमाज्यधारामाहरेत् तथैवनैर्ऋतींदिशमारभ्यैशानीपर्यंतंजुहुयात् प्रजापतिंमनसाध्यायन्स्वाहेतिजुहुयात् उभयत्र प्रजापतयइदंनमम ततोग्नयेस्वाहा अग्नयइदंउत्तरतः सोमायस्वाहा सोमायेदंदक्षिणतः ततः सावित्र्यादिनवभ्यः सावित्र्यैस्वाहा सावित्र्याइदं ॐब्रह्मणेस्वाहा ब्रह्मणइदं ॐश्रद्धायैस्वाहा

श्रद्धायइदं ॐमेधायैस्वाहा मेधायइदं प्रज्ञायैस्वाहा प्रज्ञायइदं ॐधारणायैस्वाहा धारणायइदं ॐसदसस्पतयेस्वाहा सदस्पतयइदं ॐअनुमतयेस्वाहा अनुमतयेइदं ॐछंदोभ्यऋषिभ्यःस्वाहा छंदोभ्यऋषिषिभ्यइदं आज्याहुत्यंतेचतुरवत्यप्याचार्य्यः पंचावतिनंशिष्यमामंत्र्य विंशतिकृत्वः पंचावत्तंकुर्वीत शिष्टाचारश्चेत्थंपंचावतिनउत्थायाचार्य्यः स्वयंचप्रसूतइतिमंत्रेणनिवेदयंति प्रसूनोभक्षमकरंचरावपिस्तोमंप्रथमः सूरिरुन्मृजेसुतेसातेनपद्यागमंवांप्रतिविश्वामित्रजमदग्नीदमे ततः स्रुवेणस्रुच्याज्यमुपस्तीर्य गृहसिद्धान्नमध्यादंगुष्ठमध्यमानामिकाभिरुदगग्राभिर्नखसंस्पर्शनमकुर्वन्नववदायदर्व्यामर्प्य ततोन्नपूर्वार्धात् पार्श्वमार्धाभिस्तथैवावदायदर्व्याप्यपात्रस्थमन्नमभिघार्य दर्वीस्थमावर्त्तंचाभिघार्य अग्निमीलेविश्वामित्रोमधुछंदोऽग्निर्गायत्री उत्सर्जनप्रधानगृहसिद्धान्नहोमेविनियोगः ॐअग्निमीलेपुरोहितंयज्ञस्यदेवमृत्विजं होतारंरत्नधातमंस्वाहा अग्नयइदंनममेतिसर्वत्रत्यागमाचार्यएवकुर्य्यात् प्राक्संस्थान्युदक्संस्थानिचावदानानिजुहुयादितिजयंतः कुसुंभकोमैत्रावरुणिरगस्त्योप्तृणसूर्या अनुष्टुप् उत्सर्जनप्र; ॐकुसुंभकस्तदब्रवीद्गिरेः प्रवर्त्तमानकः वृश्चिकस्यारसंविषगरसंवृश्चिकतेविषंस्वाहा अप्तृणसूर्येभ्यइदं त्वमग्नेशौनकोगृत्समदोग्निर्जगती उत्सर्जन. ॐत्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिःस्वाहा अग्नयइदं ॐआवदञ्छौनकोगृत्समदः शकुंतोजगतीउत्सः आवदंस्त्वंशकुनेभद्रमावदत् त्वमासीनः सुमतिंचिकिद्धिनः यदुत्तमंवदासिकर्करिर्यथावृहद्वदेमविदथेसुवीराः स्वाहा शकुंतायेदं सोमस्यमागाथिनोविश्वामित्रोऽग्निस्त्रिष्टुप् उत्स. ॐसोमस्यमानवसवंक्ष्यग्नेवह्निंचकथं विदथेयजध्यैदेवांअच्छादीद्यद्युंजेअद्रिंशमायैअग्नेतवंजुषस्वाहा अग्नयइदं गृणानामाभार्गवोजमदग्निर्मित्राव

रुणौगायत्री उत्स· ॐगणानाजगदग्निनावृत्तस्यसीदतंपातंसोमम्तावृधांस्वाहा मित्रावरुणाभ्यामिदं त्वा
ह्यग्नेगौत्तमोवामदेवोग्निरष्टिः उत्स- त्वाह्यग्नेसदसित्समन्येतोदेवासोदेवमरतिन्येरिरइतिक्रत्वान्येरिन्ये अ
मर्त्यंयजतमर्त्येष्वादेवमादेवंजननंप्रचेतसंविश्वमादेवंजननप्रचेतसंस्वाहा अग्नयइदं धामंतेगौत्तमवामदेवअ
पोजगती उत्स. ॐधामंतेविश्वंभुवनमधिश्रितमंतः समुद्रेह्यद्यं १ तरापुषिअपामनीकेसमिथेपआभतस्तम
श्यामधुमंततऊर्म्मिस्वाहा अग्नयइदं प्रबोध्यात्रेयोवुधगविष्ठिएवाग्निस्त्रिष्टुप् उत्स. ॐप्रबोध्याअग्निंसमिधाज
नानांप्रतिधेनुमित्नापतीमुपासंयव्हाइवप्रवयामुज्जिहानांप्रभानवः सिस्तनेनाकमच्छस्वाहा अग्नयइदं गंतान
आत्रेयएत्नपामरुन्मरुतोऽतिजगती उत्स. ॐगंतानोपतंयतिपासुशामिश्रोताहवमरक्षेएवपामरुतज्येष्टासोन
पर्वतासोव्योमानिरूपंतस्यप्रचेतसः स्यातदुर्धर्त्तवोनिदः स्वाहा मरुद्भ्यइदं त्वंह्यग्नेवार्हस्पत्योभरद्वाजोग्निस्त्रिष्टप्
उत्स.ॐत्वंह्यग्नेप्रथमोतास्याधिपो अभावोदस्महोतातुंसीदषन्नकृणोर्दुष्टसहोविश्वस्मैसहध्यैस्वाहा अग्नयइदं
योनस्वोभरवातः पायुर्देवब्रह्मण्यनुष्टप् उत्स. योनस्वोअरण्येपश्चनिष्टोजिघादनिदेवास्तसर्वेधूर्वंतुब्रह्मवर्ममममांत
रंस्वाहा देवब्रह्मभ्यइदंअग्निनरोमैत्रावरुणिर्वसिष्टोग्निर्विराट् उत्स·अग्निंनरोदीधितिभिररण्योहस्तच्युतीजनयं
तप्रशस्तं दूरेदृशंगृहपातिमध्वर्युंस्वाहा अग्नयइदं प्रतिचक्ष्यमैत्रावरुणिर्वासिष्टइंद्रासोमावनुष्टुप्उत्स. ॐप्रतिचक्ष्व
विचक्षेंद्रश्चसोमजाग्रतं रक्षोभ्योवधमस्यतमशनिंपाजुमद्भ्यः स्वाहा इंद्रासोमाभ्यामिदंमाचित्काण्वः प्रगाथइंद्रोवृ
हती उत्स. ॐमाविदन्याद्दिश:सनसखायोमारिषण्यतइंद्रमित्स्तोमोवृषणंसचासुतेमुहुरुक्थाचशंसतस्वाहाइंद्रायेदं
अग्नेपाहिकाण्वःसौभरिरग्नामरुतोनुष्टप्उत्स. अग्नेपाहिमरुत्सखारुद्रेभिःसोमपीतयेसोभर्याउपसुष्टुतिमादाय

ग्रा

स्वर्णरेखास्वाहा अग्नामरुद्भ्यइदं स्वादिष्ठय।वैश्वामित्रोमधुच्छंदः पवमानः सोमोगायत्री उत्स. ओंस्वादिष्ट य
मदिष्ठयापवस्वसोमधारयाइंद्रायपातवेसुतः स्वाहा पवमानायसोमायेदं पतेराजन्मारीचः कश्यपः सोमपवमा
नः सोमः पंक्तिः उत्सर्ज- ओंपतेराजच्छतंहविस्तेनसोमाभिरक्षतः अरातीवामानस्तारन्मोचनः किंचिनामम
दिंद्रायेंद्रोपरिस्रवास्वाहा पवमानायसोमायेदं अग्नेबृहत्रास्यास्त्रितोग्निस्त्रिष्टुप् उत्स.ओंअग्नेबृहन्नुषसामूर्ध्वो।अस्था
त्रिर्जगन्वान्नमसोज्योतिषागात् अग्निर्भानुनारुषनास्वंगआजातोविश्वासद्मान्यप्राः स्वाहा अग्नयइदं समानी
वआंगिरसः संवननः संज्ञानमनुष्टुप् उत्स. ओंसमानीवआकूतिः समानाहृदयाविवः समानमस्तुवोमनोय
थावः सुसहासतिस्वाहा संज्ञानायेदं स्रुवेणाज्यंदर्व्यामुपस्तीर्य गृहसिद्धमुत्तरभागतोभूयोनूचानाभिरेवांगुली।
भिरवदायदर्व्यामपात्रस्थंहविरभिघार्य यदस्यकर्मणोहिरण्यगर्भोग्निरतिधृतिः स्विष्टकृद्धोमेविनियोगः ओंय
दस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं अग्निष्टस्त्विष्टकृद्विद्वान्सर्वंस्विष्टंसुहुतंकरोतुमे अग्नयेस्विष्टकृते सुहुतहु
तेसर्वप्रायश्चित्ताहुतीनांकामानांसमर्द्धयित्रेसर्वान्नः कामान्समर्धयस्वाहा अग्नयेस्विष्टकृतइदं रुद्रायपशुपतयेस्वा
हा पशुपतयेरुद्रायेदं ततः प्राणायामंकृत्वा पृथ्वीत्यस्यमंत्रस्यमेरुपृष्ठऋषिः कूर्मोदेवता सुतलंछंदः आसनेवि
नियोगः पृथ्वित्वयाधृतालोका देवित्वंविष्णुनाधृता त्वंचधारयमांदेविपवित्रंकुरुचासनं अपसर्पंतुवामदेवो
भतान्यनुष्टुप् भूतोत्सादनेविनियोगः अपसर्पंतुतेभूतायेभूताभुविसंस्थिताः येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञ
या अनेनभूतानुत्सार्य शरावेजलंकुशांश्चाधायाविद्युदासिविद्यमेपाप्मानमृतात्सत्यमुपैमि तज्जलमभिमृश्योप
स्थकृते दर्भगर्भब्रह्मांजलिंविधाय प्रणवादिस्वयमुच्चारयन्नन्यानप्येवमेवोपविष्टान्वाचयेत् प्रणवस्यपरब्रह्मऋषिः
परमात्मादेवता देवीगायत्रीछंदः व्याहृतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृहतीगायत्र्यागाधिनोविश्वामित्रः स

अ०र०
श्रावण
३६

वितागायत्री अग्निमीलइत्यादीनांछंदसांवैश्वामित्रमधुच्छंदादयऋषयः अग्न्यादयोदेवताः गायत्र्यादीनिछंदांसि
सर्वेषामुत्सर्जनेविनियोगः ॐभूर्भुवःस्वः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ॐभूर्भुवःस्व
तत्स०माहिधियो॰ यात् ॐभूःस्वः तत्स॰ हिधियो- प्रचोदयात् अग्निमीलेपुरोहितंयज्ञस्यदेवमृत्विजंहोतारंरत्न
धातमं अग्निः पूर्वेभिर्ऋषिभिरीड्योनूतनैरुतसदेवांएहवक्षतिअग्निनारयिमश्रवत्पोषमेवदिवेदिवे यशसंवीरवत्तमं
अग्नेयंयज्ञमध्वरंविश्वतः परिभूरसिसइद्देवेषुगच्छति अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः देवोदेवेभिराग
मत् यदंगदाशुषेत्वमग्नेभद्रंकरिष्यसितवेतत्सत्यमंगिरः उपत्वाग्नेदिवेदिवेदोषावस्तर्धियावयंनमोभरंतएमसि रा
जंतमध्वराणांगोपामृतस्यदीदिविंवर्धमानंस्वेदमेसनः पितेवसूनवेग्नेसूपाय नोभवसचस्वानः स्वस्तये अग्निर्वैदे
वानामवमोविष्णुः परमः अथमहाव्रतम् एषपंथाएतत्कर्म अथातः संहितायाउपनिषत् विदामघवन्विदाम
हाव्रतस्यपंचविंशतिंसामधेन्यः इषेत्वोर्जेत्वा अग्नआयाहिवीतये शन्नोदेवीरभिष्टये अथैतस्य समाम्नायस्यस
माम्नायः समाम्नातः मयरसतजभनलगसंमितं गौः ग्मा पंचसंवत्सरमयं अथशिक्षांप्रवक्ष्यामि वृद्धिरा
दैच् यदिंद्रादोदाशराज्ञेउदंजनाउपश्रुत योगीश्वरंयाज्ञवल्क्यंनारायणंनमस्कृत्य अथातोधर्मंव्याख्यास्यामः
अथातोधर्मजिज्ञासा अथातोब्रह्मजिज्ञासा तच्छंयोरावृणीमहे गातुंयज्ञाय गातुंयज्ञपतये दैवीस्वस्तिर
स्तुनः स्वस्तिर्मानुषेभ्यः ॐऊर्ध्वंजिगातुभेषजंशन्नोअस्तुद्विपदेशंचतुष्पदे ॐनमोब्रह्मणे नमोऽस्त्वग्नये नमः
पृथिव्यैनमओषधीभ्यः नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरोमि इमामृचंत्रिः पठेत् भद्रंनोअपिवा
तयमनः ॐशांतिः शांतिः शांतिःवृष्टिरसिवृश्चमेपाप्मानमृतात्सत्यमुपागांततःसर्वेउत्सृष्टावैवेदाइत्युक्तांजलिस्था
न्कुशानाचार्य्यायदद्युः आचार्य्यः स्रुवेणप्रायश्चित्ताव्याहुतीर्जुहुयात् तत्रमंत्रः अयाश्चविमदोपात्राग्निः पंक्तिः

प्रायश्चत्ताज्यहोमेविनियोगः ॐअयाश्चाग्नेस्यनभिशस्तियाश्चसत्वमित्थमयाअसि अयासावयसाकृतोयासहव्यमहिषेयातोधेहिभेषजंस्वाहा अयासेग्नयइदं अतोदेवाइतिद्वयोः काण्वोमेधातिथिऋषिः पूर्वोदैव्युत्तरावैष्णवीगायत्रीछंदः मापः क्षेष्टाइतिजपित्वा कुशाग्रैः प्राच्यादिपंचदिक्षु प्रादक्षिण्यक्रमेणोदकमुदुक्षेत् प्राच्यांदिशिदेवाऋत्विजोमार्जयंतां दक्षिणस्यांदिशिमासाः पितरोमार्जयंतांप्रतीच्यांदिशिग्रहाः पशवोमार्जयंतामुदीच्यांदिश्यापओषधयोवनस्पतयोमार्जयंता मूर्ध्वायांदिशियज्ञः संवत्सरः प्रजापति र्मार्जयतां मार्जयंतांमितिवा स्वाशिरसिकुशाग्रैरभिषिंचेदेतैर्मंत्रैः आपोअस्मादेवश्रवा आपस्त्रिष्टुप्मार्ज्जनेविनियोगः आपोअस्मान्मातरः शुंधयंतुघृतेननोघृतप्वः पुनंतुविश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यः शुचिरापूतएमि इदमापः सिंधुद्वीपआपोनुष्टुप्मार्ज्जनेविनियोगः इदमापः प्रवहतायत्किंचिद्दुरितंमयि यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं सुमित्र्यापओषधयः संतुदुर्मित्र्यास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मइति ततआचार्यः स्ववामकरेप्रणीतापात्रं माहंप्रजांपरासिचं पानः सयावरीस्थनसमुद्रेवोनिनयानिस्वंपाथोअपीथेत्येकश्रुत्या पठन्प्रत्यङ्मुखमवाङ्निनीयतज्जलेनाध्याप्यान्मार्जयेत् विश्वानिनइति ऋचेनाग्नेरुत्तरपूजनोपस्थानंकुर्य्यात् मानस्तोकआंगिरसः कुत्सोरुद्रोजगतीविभूतिग्रहणेविनियोगः ॐमानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः वीरान्मानोरुद्रभामिनोवधीर्हविष्मंतः सदामित्वाहवामहे इतिस्रुवबिल्वपृष्ठेनविभूतिंगृहीत्वा ॐत्र्यायुषंजमदग्नेरितिललाटे कश्यपस्यत्र्यायुषंकंठे अगस्त्यस्यत्र्यायुषंनाभौ यद्देवानांत्र्यायुषंदक्षिणांसे तन्मेअस्तुत्र्यायुषंवामांसे सर्वमस्तुशतायुषं शिरसिधारयेत् आचार्योग्नेर्वायत्प्रदेशोस्थितं ॐचमेस्वरश्चमेयज्ञोपवीतंचतेनमश्वयत्तन्यूनंतस्मैतउपपतेतिरिक्तं तस्मैतेनमः स्वस्तिश्रद्धांमेधांयशः प्रज्ञांविद्यांबुद्धिंश्रियंबलं आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहनइति

पूर्ववत्परिसमूह्यपर्युक्षेत् गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन इत्यग्निं विसृज्य यांतुदेवगणाःसर्वे पूजामादायपार्थिवीं इष्टकामप्रसिद्ध्यर्थंपुनरागमनायच ततउदकतीरंगत्वा शरीरशुद्ध्यर्थमुत्सर्जनांगत्वेन सर्वैःसहस्नानानिकुर्यात् तद्यथा प्राणानायम्य देशकालौस्मृत्वा उत्सर्जनांगत्वेनगणस्नानमहंकरिष्यइतिसंकल्प्य स्नात्वाचम्य उत्सर्जनांगत्वेनभस्मगोमयस्नानानिकरिष्ये भस्मादायईशानायनमइतिशिरसि तत्पुरुषायनमइतिमुखे अघोरायनमइतिहृदये वामदेवायनमइतिगुह्ये सद्योजातायनमइतिपादयोः प्रणवेनसर्वांगे यद्वा अग्निरितिभस्मजलमिति भस्मस्थलमिति भस्म व्योमेति भस्म सर्वंहवाइदंभस्म मानस्तोकइतिसर्वांगे विलिप्य स्नात्वाचम्य गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं अनेनगोमयमादाय अग्रमग्रंचरंतीनामोषधीनांवनेवने तासामृषभपत्नीनांपवित्रंकायशोधनं यन्मेरोगांश्चशोकांश्चपापांश्चनुदगोमय सर्वदेतिशिरःप्रभृत्यंगानिविलिप्य स्नात्वाचम्य बलित्थापर्वतानांछिद्रांविभर्षिपृथिवि प्रयाभूमिप्रवत्वनिमह्नाजनोषिमाहिनि इतिभूमिंप्रार्थ्य मावोरिषत्खनितायस्मैवाकंखनामिव द्विपदचतुष्पदस्माकंसर्वमस्त्वनातुरम् इतिखनित्वा स्योनापृथिविनोभवानृक्षरानिवेशनी यच्छानःशर्मसप्रथाःइतिमृदमादाय आपनेतिपरायणेदूर्वारोहंतुपुष्पिणीः ह्रदाश्चपुंडरीकाणिसमुद्रस्यावहाइमे इतिदूर्वामादायगायत्र्यासर्वांमृदमभ्युक्ष्यभूमौनिधाय त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रं ह्वयामिशक्रंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रः इतिपूर्वतः यमायमधुमत्तमंराज्ञेहव्यंजुहोतनइदंनमऋषिभ्यः पूर्वजेभ्यःपूर्वेभ्यःपथिकृद्भ्यः इतिदक्षिणतः तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः अहेडमानो वरुणेहवोध्युरुशंसमानआयुः प्रमोषीः इतिपश्चिमतः वयंसोमव्रतेतवमनस्तनूषुविभ्रतः प्रजावंतः सचेमहि

इत्युत्तरतः तत्सूर्यंरोदसीउभेदोषावस्तोरुपब्रुवे भोजेष्वस्मांअभ्युच्चरासदा इत्युपरिष्टात् अधः पश्यस्वसोमंतरांपादकौहरमातेकशप्लकौदृशन्स्त्रीहिब्रह्माबभूविथा इत्यधोमृदंक्षिप्त्वांगेषुमृदंलिंपेत् सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलम् इतिशिरसि अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांचिबुकादधि यक्ष्मंशीर्षण्यंमस्तिष्काज्जिह्वायाविवृहामिते इतिमुखे ग्रीवाभ्यस्तदुष्णिहाभ्योअनुक्यात् यक्ष्मंदोषण्यमंसाभ्यांबाहुभ्यांविवृहामिते इतिग्रीवायां आन्तरेभ्यस्तेगुदाभ्योवनिष्ठोर्हृदयादपियक्ष्मंमतस्नाभ्योविवृहामिते इतिहृदये नाभानाभिनआददेचक्षुश्चित्सूर्येसच कवेरपत्यद्दुहे इतिनाभौ त्वामिंद्रसजोषसमर्कंविभर्षिवाह्वोः वज्रंशिशानओजसा इतिवाह्वोः सोमानंस्वरणंकृणुहिब्रह्मणस्पतेकक्षीवंतऔशिजः इतिकक्षयोः यः कुक्षिः सोमपातमः समुद्रइवचिन्वते कुर्वीरापोनकाकुदः इतिकुक्षौ वह्नीनांपिताबहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य सेकाः पृतनाश्चसर्वा पृष्ठेतिनद्धोतपातिप्रसूनः ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदादाभ्यांयक्ष्मश्रोणीभ्यांभासदाद्भंससोविवृहामिते इत्यूर्वोः मेहनाद्वलंकरणाल्लोमभ्यस्तेनखेभ्यः यक्ष्मंसर्वस्मादात्मनस्तामिदंविवृहामिते इतिजान्वोः एतावानस्यमहिमातोज्यायांश्चपूरुषः पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि इतिपादयोः अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणियक्ष्मंसर्वस्मादात्मनस्तामिमंविवृहामिते इतिपुरुषसूक्तेनचसर्वांगे अश्वक्रांते रथक्रांतेविष्णुक्रांतेवसुंधरे शिरसाधारयिष्यामिरक्षस्वमांपदेपदे इतितिलदूर्वामृदंशिरसिनिधायमृत्तिकास्नानंप्रक्षाल्य हिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहियाचितः यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः यन्मेमनसावाचाकर्मणावादुष्कृतंकृतं तन्नइंद्रोवरुणोवृहस्पतिः सविताचपुनंतुपुनःपुनः इमंमेगंगेयमुनेसरस्वतिशतद्रुस्तोमंसचतापरुष्ण्या असित्क्यामरुद्वृधे वितस्तयार्जीकीयेशृणुह्याशिषोमया इदंतेन्याभिसमानमद्भिर्याउकाश्चसिंधुंप्रव

हंतिनद्यः सर्पोजीर्णांमिवत्वचं जहातिपापंसशिरस्कोभ्युपेत्य गंगागंगेतियोब्रूयाद्योजनानांशतैरपि मुच्यतेसर्व पापेभ्योविष्णुलोकंसगच्छति सुमित्र्यानआपओषधयः संतु दुर्मित्र्यास्तस्मैसंतुयोष्मान्द्वेष्टियंचवयंद्विष्मः स मुद्रज्येष्ठाः सलिलस्यमध्यात्पुनानायंत्यनिविषमानाः इंद्रोयावज्रीवृषभोरराद ताआपोदेवीरिहमामवंतु या आपोदिव्यउतवास्रवंतिखनित्रिमाउतवापाः स्वयंयाः समुद्रायाः शुचयः पावकास्ता आपोदेवीरिहमामवं तु यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानाम् मधुश्चुतः शुचयोया पावकास्ताआपो० यासुराजा वरुणोयासुसोमोविश्वेदेवायासुसूर्योंमदंतिवैश्वानरोयास्वग्निःप्रविष्ठवास्ताःएतोन्विंद्रंस्तवामशुद्धंशुद्धेनसाम्ना शुद्धै रुक्थैर्वावृद्धांसंशुद्धआशीर्वान्ममक्तु इंद्रः शुद्धोनआगहिशुद्धः शुद्धाभिरूतिभिः शुद्धोरयिंतिधारयशुद्धोममाद्धि सोम्यः इंद्रः शुद्धोहिनोरयिंशुद्धोरत्नानिदाशुषे शुद्धोवृत्राणिजिघ्नसेशुद्धोवाजंसिषासति तरत्समंदीधावति धारासुतस्यांधसः तरत्समंदीधावतिउस्रावेदवसुनांमर्त्यस्यदेव्यवसः तरत्० ध्वस्रयोः पूरुषंन्योरासहस्राणिद द्महे तरत्- आपयोस्त्रिशतंतनासहस्राणिचदद्महे तरत्· त्रिभिष्ट्वंदेवसवितर्वर्षिष्ठैःसोमधामाभिः अग्नेदक्षैः पुनीहि नःपुनंतुमादेवजनाः पुनंतुवसवोधियः विश्वेदेवाः पुनीतमाजातवेदः पुनीहिमा प्रप्यायस्वप्रस्थंवस्वसोमाविश्वेभि रंशुभिः देवेभ्यउत्तमंहविः उमप्रियंपानिप्रतंयुवावानभाहुतीवृधं अगन्मविभ्रतोनमः अलाप्यस्यपरशुनंमा यचस्वदेवसोमआखुंचिदेवसोमयः पावमानीरध्येत्यृषिभिः संतरसंसर्वंसर्वंसपूतमाश्नातिस्वदिनंमातरिश्वना प वमानीर्योअध्येतिऋषिभिः संभृतंसंतस्मैसरस्वतीउहेक्षीरंसर्पिर्मधूदकं पावमानीः स्वस्त्ययनीः सुदुघाहिघृ तश्चुतः ऋषिभिः संभृतोरसः ब्राह्मणेष्वमृतंहितंपावमानीर्दिशंतुनः इमंलोकमथोअमुंकामान्समर्धयंतुनः दे वीर्दैवैः समाहिता येनदेवाः पवित्रेणआत्मानंपुनतेसदा तेनसहस्रधारेणपावमान्यः पुनंतुमा प्राजाप

त्वंपवित्रंशताद्यामाहिरण्मयं तेनब्रह्मविदोवयंपूतंब्रह्मपुनीमहे इंद्रः सुनीतीसहमापुनातु सोमः स्वस्त्यावरुणः समचिया यमोराजाप्रमृणाभिः पुनातुमा जातवेदामांजयंत्यापुनातु आपोहिष्ठेतितिसृभिर्मार्जयित्वा इममेगंगेत्युदकमालोडयऋतंचेतीतितृचेनाघमर्षणंकृत्वा प्रवाहाभिमुख स्त्रीन्मार्जयित्वाचम्य स्नानांगतर्पणं कुर्यात् तद्यथा ब्रह्मादयोयेदेवास्तांदेवांस्तर्पयामि भूर्देवांस्त० स्वर्देवांस्त० कृष्णद्वैपायनादयोयेऋषयस्तानृषींस्त० भूऋषींस्त० भुवऋषींस्त० स्वऋषींस्त० सोम पितृमा यमांगिरस्वनाग्निकव्यवाहनादयोयेपितरस्तान्पितॄंस्त० भूः पितॄंस्त० भुवः पितॄंस्त० स्वः पितॄंस्त० भूर्भुवःस्वः पितॄंस्त० अग्निदग्धाश्चयेजीवायेप्यदग्धाकुलेमम भूमौदत्तेनतोयेनतृप्तायांतुपरांगतिमिति जलांजलिंतटेनिक्षिप्य यन्मयादूषितंतोयंशारीरमलसंभवात् तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहं यक्ष्मतर्पणंकृत्वा ऋषीन्पूजयेत् तच्चेत्थंआचम्य प्राणानायम्य देशकालौसंकीर्त्य ऋषीन्पूजयिष्यइतिसंकल्प्य कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः जमदग्निर्वसिष्ठश्चसप्तैतेऋषयंस्मृताः अरुंधतीसहितान्सप्तऋषीनावाहयामि तदस्तुमित्रावरुणागुहावैप्रतिष्ठा अरुंधतीसाहितेभ्यः सप्त ऋषीभ्यः सप्त ऋषिभ्योनमः आवाहनंस. आसनं पाद्यं अर्घ्यं आचमनीयं स्नानीयं पुनराचमनं- वस्त्रं. आचमनं यज्ञोपवीतं अथगंधः पुष्पाणिधूपं दीपं नैवेद्यं आचमनं फलं तांबूलं दक्षिणा अरुंधतीसहितेभ्यः सप्तऋषिभ्योनमः मंत्रपुष्पांजलिं समर्पयामि मंत्रहीनंक्रियाहीनं. आवाहनंनजानामीतिचक्षमाप्य ततः सावित्र्यादींस्तर्पयेत् सावित्रींतर्पयामि ब्रह्माणंत. श्रद्धांतर्प०मेधांत- प्रज्ञांत- धारणांत० सदसस्पतिंत० अनुमतिंत० छंदांस्यृषींस्त० अत्पूणसूर्यांस्त० आग्नेंत० शकुंतंत० आग्नेंत० मित्रावरुणौत० अश्विनौत० अपस्तर्पयामि आग्निमरुतस्त० आग्नेंतर्प० देवब्रह्म

एंत० अग्नितर्प० इंद्रासोमौत० इंद्रंतर्प० अग्नामरुतस्त० पवमानसोमंतर्प० अग्निंत० संज्ञानंतर्प० ब्रह्मयज्ञांगसंयुक्तंतर्पणंस्यादिहापितॄन् इतिकारिकोक्तेः प्रजापतिस्तृप्यतु ब्रह्मातृप्य० वेदास्तृप्यंतु देवास्तृप्यं ऋषयस्तृप्यंतु सर्वाणिछंदांसितृप्यंतु ओंकारस्तृप्यतु वषट्कारस्तृप्यतु व्याहृतयस्तृप्यंतु सावित्रीतृप्यतु यज्ञास्तृप्यंतु द्यावापृथिवीतृप्येतां अंतरिक्षंतृप्यतु अहोरात्राणितृप्यंतु सांख्यास्तृप्यंतु सिद्धास्तृप्यंतु समुद्रास्तृप्यंतु नद्यस्तृप्यंतु क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसस्तृप्यंतु नागास्तृप्यंतु वयांसितृप्यंतु गावस्तृप्यंतु साध्यास्तृप्यंतु विप्रास्तृप्यंतु यक्षास्तृप्यंतु रक्षांसितृप्यंतु भूतानितृप्यंतु एवमेतानितृप्यंतु अथऋषयः उपवीतीशतर्चिनस्तृप्यंतु मध्यमास्तृप्यंतु गृत्समदस्तृप्यतु विश्वामित्रस्तृप्यतु वामदेवस्तृप्यतु भरद्वाजस्तृप्यतु वसिष्ठस्तृप्यतु प्रगाथास्तृप्यंतु पावमान्यस्तृप्यंतु क्षुद्रसूक्तास्तृप्यंतु महासूक्तास्तृप्यंतु प्राचीनावीती अत्रजीवत्पितृकस्यापसव्येविशेषमाह अपसव्यंद्विजाग्र्याणां पित्र्येसर्वत्रकीर्त्तितं आप्रकोष्ठात्प्रकर्तव्यंमातापित्रोस्तुजीवतोरितिशिष्टाचारात् सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यास्तृप्यंतु जानंति वाहविगार्ग्यगौतमशाकल्यवाभ्रव्यमांडव्यमांडूकेयास्तृप्यंतु गार्गीवाचक्रवीतृप्यतु वडवाप्रातिथेयीतृ० सुलभामैत्रेयीतृ० कहोलंतर्पयामि कौषीतकंत० महाकौषीतकंतर्प० पैग्यंतर्पयामि महापैग्यंतर्पयामि सुयज्ञंतर्प० सांख्यायनंतर्पया० ऐतरेयंत० महैतरेयंतर्पयामि शाकलं तर्पया० वाष्कलं तर्पया० सुजातवक्रं तर्पयामि औदवाहिंतर्पयामि महौदवाहिंतर्पयामि सौजामिंत. शौनकंतर्पया- आश्वलायनंत- येचान्येत्राचार्यास्तेसर्वेतृप्यंत्विति अत्रकारिका त्रिशद्भिरेकेनैस्तुद्वादशैश्चतथाभवेत् त्रयोविंशतिवाक्यैस्तुदेवर्षींश्चपितॄन्

क्रमात् अस्मत्पितरममुकशर्माणममुकगोत्रंवसुरूपंस्वधानमस्तर्पयामिएवंपितामहंप्रपितामहं मात्रादीस्तिस्रः मातामहादीन्सपत्नीकान्पत्नींसुतादीन्पितृव्यंमातुलंभ्रातरंपितृस्वसारं मातृष्वसारमात्मस्वसारंयथायोग्यंसधवाः सतनयाः श्वशुरंगुरुंशिष्यानाप्तांश्चतर्पयेत् आब्रह्मस्तंबपर्यंतदेवर्षिपितृमानवाः तृप्यंतुपितरः सर्वेमातृमातामहादयः अतीतकुलकोटीनांसप्तद्वीपनिवासिनां आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं येके चास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः तेगृह्णंतुमयादत्तंवस्त्रनिष्पीडनोदकं इत्युत्तरीयंतटेनिष्पीड्यसव्येनवा यमादींस्तर्पयेत् यमंतर्पयामि धर्मराजंतर्पयामि अघ्नंतर्पयामि ततो यमोनिहंतापितृयर्मराजोवैवस्वतोदंडधरश्चकालः भूताधिपोदत्तकृतानुसारीकृतांतमेतंदशभिर्जपंतिइतिदशवारंजपेत् ततः शांत्यर्थं आनोभद्राः १० शन्नइंद्राग्नी १९ त्यमूषवा ३ महित्रीणांसुवृष्ट्यर्थंतिस्रोवाचः पर्जन्यायप्रः ३ अच्छावद१० बलित्थापर्वतानां ३ प्रदेवत्राब्रह्मणे १९ बृहस्पतेप्रतिमे १३ एतानिपर्जन्यस्तुतिसूक्तानि ऋषयोवैसरस्वत्यांसत्रमासतेतिब्राह्मणखंडद्वयंचवैदिकाः पठंति ततोवेदप्रीत्यर्थंब्राह्मणान्भोजयेत् विश्वेतातेसवनेषुप्रवाच्यायाचकथंमघवन्निंद्रसुन्वते परावंतमन्युंरुसंभतंवखपावृणोः शरभापशरवंधवे इत्यृषीन्जलेउद्वासयेत् इत्युत्सर्जनप्रयोगः अथोपाकर्मप्रयोगः सचोत्सर्जनवद्ज्ञेयः विशेषोलिख्यते नूतनब्रह्मचारिणांउपाकर्मार्थतया नूतनकटिसूत्राद्युपकल्पनं स्वस्तिपुण्याहवाचनं नांदीश्राद्धंचकार्यं तादृशब्रह्मचार्यभावेतूपकल्पनमात्रंकृत्वाचम्य प्राणानायम्य देशकालौसंकीर्त्य अधीतानामध्येष्यमाणानांछंदसांयंतयामतानिरासेनाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थंएभिर्ब्राह्मणैः सहोपाकर्मकरिष्ये अन्वाधानेक्रियमाणेउपाकर्महोमेदेवतापरिग्रहार्थंगृहसिद्धान्नस्थेनदधिसक्तुद्रव्येणशेषेणस्विष्टकृताग्निमिध्मसन्नहनेनरुद्रंयज्ञोपवीतेनपरमात्मानमयामः इध्मसन्नहनहोमानंतरं

दधिसक्तुप्राशनोपवीतहोमदानधारणानिच दधिक्राव्णोवामदेवोदाधिक्रावानुष्टुप् दधिसक्तुप्राशनेविनियोगः ओंदधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः सुरभिनोमुखाकरत्प्रणआयूंषितारिषत् इतिमंत्रेणप्राङ्मुखाः प्रत्येकंदधिसक्तून्प्राश्याचामेयुः अग्नेःपश्चादेकधारणया एकैकःप्राङ्मुख उपविश्य मार्जनंचकुर्यात् कृत्वायज्ञोपवीतानिनवानिवसुधाधिप हुत्वाग्नौगुरवेदत्त्वापितृभ्योधारयेत्ततइति गालववचनात् वेदारंभेऋष्यादिस्मरणां तेसर्वेषामुपाकरणेविनियोगः अतेउपाकृतावैवेदाइत्युक्त्वाअंजलिस्थान्कुशान्दक्षिणकटौनिवेश्यापउपस्पृशेयुः वेदारंभणतः पूर्वं सक्तुप्राशनतःपरं नवयज्ञोपवीतानिदद्याद्वैधारयेत्ततइति कार्ष्णाजिनिवचनात् पितृभ्यइत्यस्यापिदत्त्वेत्यनेनान्वयः होमेधारणेचयज्ञोपवीतमितिमंत्रस्यपरब्रह्मपरमात्मात्रिष्टुप्यज्ञोपवीतहोमेविनियोगः यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजःस्वाहा परमात्मनइदंब्रह्मचारीनूतनमेखलादिधारयेत् अजिनंकटिसूत्रंचनववस्त्रंतथैवचेति कालादर्शोदाहृतवचनात् एषांधारणेक्रमोमंत्रप्रकारश्चोपनयनवद्बोध्यः अन्यदुत्सर्जनेनसमानं इत्युपाकर्मप्रयोगः अथात्रकश्चनोपयुक्तशास्त्रार्थोलिख्यते वृत्तिकृन्मतेउत्सर्जनप्रकरणस्यदेवताग्रहणेनाग्न्यादीनांसावित्र्यादिभिःसहतेनोक्तत्वात् जयंतमतेसावित्र्यादीनांप्रधानदेवतांगत्वेननसंकल्पअन्नाज्यसेवास्विष्टकृतेनवेधाति सावित्र्यादीनामगत्वादितितदुक्तेः अत्रकारिकाः आज्यसंस्कारपर्यंतमुपलेपादिपूर्ववत् आज्येनदधिसक्तूनां त्रिःपर्यग्निकरणंभवेत् उन्पूतसातमाज्यंचेत्तेषांत्रिः प्रोक्षणंभवेत् इत्थमभिघारणांतंस्यादाज्यस्योद्वासनादिकं अन्वारंभोधुनाशिष्यैः स्वयमेवनसंतिचेत् प्रकुर्वीताज्यभागांतामिध्माधानादिपूर्ववत् इहाज्यभागौतत्रस्तस्तथैवोत्सर्जनेपितौ हुत्वाज्यंनवभिर्मंत्रैःसावित्र्याद्यैरतः परं हुत्वाचदानधर्मेणतान्सक्तून्दधिसंयुतान् हुत्वाग्नि

मीलइत्याद्यैर्मंत्रैर्दशतिभिः क्रमात् शाकलानांसमानीवइत्यृचांत्या उँतीभवेत् वाष्कलानांतुतच्छंयोरित्यृचांत्या उँतीभवेत् योनः स्वतिमंत्रेदेवब्रह्मतेदेवताइतिसप्तदापः देवानांब्रह्मणश्चदेवतात्वमितितुयुक्तं अस्या ऋचोदेवाब्रह्मचदेवेतिभाष्यकृताभिधानात् ब्रह्ममंत्रः समेश्चांतरंशराणांनिवारकंकर्मविद्यतइति व्याख्या नदशायामपिभाष्यकृतैववर्मणोब्रह्मतवगुणाभिधेयित्वेनस्वातंत्र्यानिराकरणाच्च एवंचऋष्यादिस्मरणकाले पिदेव ब्रह्मएयनुष्टुवित्येवपातितुमुचितं त्यागश्चदेवब्रह्मणइदमितिपंचावतिसर्वेवद्धिरवदाय तथैवदधिसक्तून् सकृद्द्विर्वा वदायाद्विरभिघारयेद्वृत्तिकृन्मते जयंतमतेतुनाज्यावदानं ततोस्यावशेषः कारिकायां अथस्विष्टकृतंहुत्वा दधिसक्तुभिरेवच दधिसक्तून्स्वयंशिष्यान्प्राश्याचम्यततःपरं परिस्तरणदर्भैस्तैरंतर्दधातिवांजलीन् अन्येनसेचयित्वापस्ताभिः कुर्वीतमार्जनमिति वेदारंभेकारिकाः पश्चादग्रेषुदर्भेषुप्रागग्रेषूपविश्यच आपिच्यापः शरावादौ दर्भांस्तत्रनिधायच प्रागग्रदर्भगर्भास्तेकुर्युर्ब्रह्मांजलीनथ सव्याहृतिंवदंत्युच्चैः सावित्रींब्रह्मयज्ञवत् त्रिरभ्यसेत्पुरोंकारंव्याहृतीश्चात्रकर्माणि अग्निमीलइदंसूक्तमनुवाकयंयथाविधिः प्रारभेरन्नृचंवापित्वध्याप्याद्वाचयेद्गुरुः प्रायश्चित्तादिसकलंहोमशेषंसमापयेदिति उत्सर्जनस्नाने याः कारिकाः अथतीरमयांगत्वांतिवगाह्य ततोजलं सावित्र्याद्यास्तथाग्न्याद्यादेवतास्तर्पयंतिच सावित्रींतर्पयाम्यग्नितर्पयामीतितर्पयेत् जपंस्तत्वग्निमीत्यादिमंत्रैस्तर्पणमब्रवीत् ब्रह्मयज्ञांगभुक्तंयत्तर्पणंस्यादिहापिचेति अवगाह्येत्यनेन भस्मगोमयमृत्स्नानानि शास्त्रांतरसिद्धानिविहितानीतिशिष्टव्यवहारः अतएवविवाहादूर्ध्वकालेप्रसिद्धस्यापिंडनंमृदास्नानंनकुर्यात् तिलतर्पणमित्यादीनिषेधस्यनात्रप्रवृत्तिः नचात्रनदीनांरजोदोषप्रसक्तिः उपाकर्मणिचोत्सर्गेरजोदोषोनविद्यतइतिगार्ग्यवचनात् वेदाःछंदांसिसर्वाणिब्रह्माद्याश्चदिवौकसः

जलार्थिनोथपितरोमरीच्याद्यामहर्षयः उपाकर्माणिचोत्सर्गेस्नानार्थंब्रह्मवादिनः पिपासवोनुगच्छंतिसंहृष्टाः
स्वशरीरिणः समागमस्तुयत्रैषांतत्रहत्यामलानिच नूनंसर्वक्षयंयांतिकिमुनैकंनदीरजः इतिछंदोगपरिशिष्टा
च्च उत्सर्गानंतरंऋषिपूजातर्पणेकार्ये उपाकर्माणिचोत्सर्गेयथाकालंसमेत्यच ऋषीन्दर्भमयान्कृत्वापूजयेत्तर्पये
त्तन इति स्मृतिचंद्रिकोदाहृतवचनात् तत्रान्यजलोपस्पर्शनपानाभ्यामाभ्युदयप्राप्तिः ऋषीणांसिच्यमाना
नामंतरालंसमाप्तितः संविवेद्यः शरीरेण स्पृशन्मुक्तजलच्छटः विद्यादीन्ब्राह्मणःकामान्वरादीन्कन्यकास्तथा
आमुष्मिकान्यपिसुखान्याप्नुयात्सनसंशयइति छंदोगपरिशिष्टात् ततः प्रकृतदेवतातर्पणं ब्रह्मयज्ञांगतर्पणंस्वपि
त्रादितर्पणंचकार्यं ततोयमतर्पणं कुर्यादितिशिष्टाः बाष्कलानांतुतच्छंयोशंयुर्विश्वेदेवाःशक्करीउऊतछंयोदेस्वाहा
विश्वेभ्योदेवेभ्यइदं इत्युपाकर्मोत्सर्जनप्रयोगः अत्रैवप्रसंगादुत्सर्जनकालोनिर्णीयते तत्रयाज्ञवल्क्यःपौषमासस्य
रोहिण्यामष्टकायामथापिवा जलांतेछंदसांकुर्यादुत्सर्गंविधिवद्बहिः पौषमासस्यरोहिण्यांकृष्णाष्टम्यांवाजलसंनि
धौ ग्रामाद्बहिर्वेदानामुत्सर्जनंकुर्यादित्यर्थः अनयोः पक्षयोः स्वस्वगृह्यानुसारेणव्यवस्था मनुः पुष्येतुछंदसांकु
र्याद्बहिरुत्सर्जनंद्विजः माघशुक्लस्यवाप्राप्तेपूर्वाह्णेप्रथमेहनि व्यवस्थितश्चायंविकल्पः श्रावण्यांप्रोष्ठपद्यांवा
प्युपाकृत्ययथाविधि युक्तश्छंदांस्यधीयीतमासान्विप्रोर्द्धपंचमानितितेनैवोक्तत्वात् तेनश्रावण्यांयदोपाकर्मतदापौ
षशुक्लप्रतिपादिउत्सर्जनंकार्यं यदाप्रौष्ठपद्यांतदामाघशुक्लप्रतिपदिकार्यमित्यर्थः यत्तुहारीतः अर्धपंचममा
सानधीत्योर्ध्वमुत्सृजेत् पंचार्द्धषष्ठान्वेतितदाषाढ्यामुपाकर्मविषयं यत्तुकात्यायनः उपाकृत्योदगयनेततो
धीयीतधर्मवत् उत्सर्गश्चैकएवैषांतेषांप्रौष्ठपदोपिवेति अत्रप्रौष्ठपदांसिंहोपलक्षकं सिंहेरवावितिगार्ग्यवचनात्
वौधायनस्तु पौष्यांमाघ्यांवाकुर्युः श्रावण्यांपौर्णमास्यामाषाढ्यांवोपाकृत्यपौष्यांमाघ्यां वोत्सृजेदिति

तत्सूत्रात् तैत्तिरीयास्तु तेषांकार्यपौष्यांपौर्णमास्यांरोहिण्यांवावेरमेदितितत्सूत्रात् बह्वृचैस्तु माघ्यांकार्य्यं अध्यायोत्सर्जनंचाध्यायपौर्णमास्यांविधीयतइति कारिकोक्तेः मध्यमाष्टकायामिताभ्योन्नेनहुत्वाभ्यर्चयंति एताएवदेवतास्तर्पयंति आचार्यान्ऋषीन् पितृंश्चैतदुत्सर्जनमित्याश्वलायनसूत्राच्च व्याख्यातंचैतद्वृत्तिकारेण मध्यमाष्टकाग्रहणंषण्मासांतलक्षणार्थंतेनतस्याःसमीपेमाघ्यांपौर्णमास्यामित्यर्थइति कातीयास्तुभाद्रपदेकुर्युः उत्सर्गंश्चेत्तदातिष्यातिथ्यंतेप्रौष्ठपदेवेतिकात्यायनोक्तेः अत्रकातीयसूत्रं अर्धषष्ठान्मासानधीत्योत्सृजेयुरर्धसप्तमान्वेति तथा पौषस्यरोहिण्यांमध्यमायांवाष्टकायांअध्यायानुत्सृजेयुरिति अत्रहरिहरः पौषेउत्सर्जनकर्तव्यतामाभिधायाह ततस्त्रिरात्रानंतरंशुक्लपक्षेषुछंदांस्यधीयीरन् कृष्णपक्षेष्वंगानि ततःपुनरर्द्धषष्ठानर्धसप्तमान्वाधीत्योर्ध्वमेवोत्सर्गंविधायत्रिरात्रमेकरात्रंव्यवस्थाययथेष्टंविप्रतिष्ठेरन् ततः पुनरुपाकृत्यअध्ययनं यावदुत्सर्गमिति अनेनोत्सर्गद्वयं कातीयानां कर्तव्यमितिप्रतीयते अपरेतु एकस्यैवोत्सर्गस्य कालचतुष्टयं मन्यंते तेनोत्सर्गद्वयमिति अत्राद्वितीयमतमेव सूत्रस्वरसानुसारीतिप्रतीयते सामगास्तु सिंहार्केपुष्येकुर्युः सिंहेरवौत्विति पूर्वोक्तगार्ग्यवचनात् सर्वैरुपाकर्मदिनेवाकार्यं पुष्येतदुत्सर्जनंकुर्यात् उपाकर्मदिनेथवेति हेमाद्रौ खादिरगृह्योक्तेः स्वाध्यायमधीतेष्टमितिश्रुतेश्च यत्तुतिथ्यर्के इदानींतनैराश्वलायनैरप्ययमेवोत्सर्जनकालआद्रियते तत्रमूलंनजानइत्युक्तं तद्भ्रांतिविजृंभितं पुष्येतदुत्सर्जनंकुर्यादुपाकर्मदिनेऽथवेति स्वयमेवखादिरगृह्यस्यमूलत्वेनोक्तत्वात् नचगृह्यसूत्राणां तत्तच्छाखीयात्मत्वेनव्यवस्थितप्रामाण्यकत्वमितिवाच्यं अविरोधिनांत्वेकत्वेनपरशाखीयस्यापिग्राह्यत्वात् यदासिंहस्थेसूर्येसतितन्मध्यस्थहस्तनक्षत्रात्प्राक्पुष्यः कर्कस्थोभवति तदा तस्मिन्पुष्ये उत्सर्गं कृत्वा तदुत्तरहस्तेउपाकर्मसामगाःकुर्युः मासिप्रौष्ठपदेहस्तात्पुष्यः

पूर्वोभवेद्यदा तदातुश्रवणेकुर्यादुत्सर्गंछंदसांद्विजइतितत्परिशिष्टोक्तेः अत्रप्रौष्ठपदश्रावणशब्दौमीनादिसौरमासाभिप्रायेणछंदोगानामुत्सर्जनोपाकर्मणोः सौरमासएवविधानात् एतच्चकर्मद्वयंप्रत्यब्दंकार्यंतदुक्तंहेमाद्रौ कात्यायनेन प्रत्यब्दंकरणंकर्मगोत्सर्गौविधिवद्द्विजैः क्रियतेछंदसांतेनपुनराप्यायनंभवेत् अयातयामैश्छंदोभिर्यत्कर्मक्रियतेद्विजैः क्रीडमानैरपिसदातत्तेषांसिद्धिकारकमिति अत्रद्विजैरितित्रयाणामाश्रमिणामवर्णानामधिकारसिद्धिः यत्तु मासान्विप्रोर्धपंचमानित्युदाहृतशास्त्रे विप्रग्रहणात् ब्राह्मणस्यैवसतोऽधिकारः क्षत्रियवैश्ययोस्तदन्वारंभमात्रमेवेतिज्ञापनार्थं अध्येष्यमाणोध्यायैरन्वारब्धइत्याश्वलायनसूत्रेअध्यापकपरेणाध्येष्यमाणपदेनअध्यापनाधिकृतब्राह्मणस्यैवस्वतंत्राधिकारप्रतीतिरिति उत्सर्जनोत्तरंकार्यं मनुराह अतऊर्ध्वंतुछंदांसि शुक्लेषुनियतः पठेत् कारिकायांतुविशेषः अतआरभ्यषण्मासान्षडंगानित्वधीयते शुक्लेवेदमधीयीतकृष्णेंगानीतिकेचनेति अत्रनदीनांदोषोनास्तीत्याह वसिष्ठः उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यतइति गार्ग्येपि उपाकर्मणिचोत्सर्गेरजोदोषोनविद्यत इति उपाकर्मोत्सर्गानंतरं त्रिरात्रंपक्षिणीमहोरात्रंवाअध्ययनंनकार्यं तदुक्तं निर्णयसिंधौ मिताक्षरायां उपाकर्मण्युत्सर्गेचत्रिरात्रंपक्षिणीमहोरात्रंवानध्यायइति एतच्चकर्मद्वयमध्येष्यमाणोध्यायैरन्वारब्धइतिसूत्रात्साशिष्यते तदधिकारिकस्यकर्मणआचार्याग्नौनान्यस्याग्नावन्योजुहुयादितिनिषेधात् कर्मद्वयमिदं केचिल्लौकिकाग्नौप्रकुर्वीत इतिकारिकोक्तेश्च लौकिकाग्नावेवकर्तव्यं तदभावेतु अध्यायोपाकृतिंकुर्यात्तन्नोपासनवह्निनेतिवचनात् स्मार्तइतिगर्गः इत्युत्सर्जनम् अस्यामेवआश्वलायनैःश्रवणाकर्मकार्यं श्रावण्यांपौर्णमास्यांश्रवणाकर्मेति सूत्रात् सामवेदिनामप्यत्रैव श्रवणाकर्मसर्पबलिश्च अथातः श्रवणाकर्मपौर्णमास्यामित्यादिना श्र

वणाकर्मविधायअहरहस्तूष्णींबलिंहरेत् सायंप्राग्घोमादाग्रहायण्याइतितदीयगृह्यसूत्रात् अत्रपौर्णमासीमामान्तोस्तावपिग्रंथांतरवशेनपूर्णमासीविशेषेतदुपसंहारसंभवः कातीयसूत्रेऽपि अथातः श्रवणाकर्मश्रावण्यांपौर्णमास्यांश्रवणकर्मोक्तातदंतेसर्पबलिरप्युक्तः अस्यामेवरात्रौतैत्तिरीयकैः स्थालीपाकः कार्यः श्रावण्यां पौर्णमास्यांस्थालीपाकइतिसूत्रात् अस्मिन्कर्मद्वये प्रदोषव्यापिनीपौर्णमासी ग्राह्या अस्तमितेस्थालीपाकंश्रपयित्वेति अस्तमयकालविधानात् कर्मणोयस्ययःकालइतिवचनात् पौर्णमासीशब्दस्य पर्वान्यक्षणवचनत्वात्पर्वसंधिदिवसे रात्रौ श्रवणाकर्मानुष्ठानं वदंति अस्यचश्रवणाकर्मणोमुख्यकालेदैवादकरणेलोपः मुख्यकालेऽपि सकृदेवकरणमितिकेचित् यथोक्तमेततुल्यन्यायाष्टकाप्रकरणेकर्केणसकृत्करणंचाभ्यासश्रवणादिति अन्येत्वीदृशपाकयज्ञानां प्रत्यब्दमावृत्तिंमन्यंते उक्तंहि रेणुकाकारिकायां अथातः श्रवणाकर्मशास्त्रदृष्टामयोच्यते श्रावण्यामेवतत्कार्यमभावाद्गौणकालतः वचनात्सूत्रकारस्यसकृदस्यक्रियाभवेत् एवमेवेतरेषांस्यादावृत्तिर्वास्मृतेर्बलात् सकृत्करणमिच्छंतिपाकयज्ञेचकेचन आवृत्तिंकेचिदिच्छंतितन्न। वृत्तिः सतांमतेति अस्यामेवहयग्रीवपूजोक्ताकल्पतरौ ब्राह्मे श्रावण्यांश्रवणेजातः पूर्वंहयशिराहरिः जगादसामवेदंतुसर्वकल्मषनाशनं सिंधुर्नदीवितस्तायांप्रविष्टातत्रचैवहि अतोत्रश्रवणेतत्रस्नानंसर्वार्थसिद्धिदं तत्रसंगमे कृत्वासंपूजयेद्विष्णुंशंखचक्रगदाधरं श्रोतव्यान्यथसामानिपूज्याविप्राश्चसर्वदा क्रीडितव्यंच भोक्तव्यंतत्रैवस्वजनैः सह जलक्रीडातुकर्त्तव्यानारीभिर्भर्तृलब्धयइति अत्रसर्वदेवानांपवित्रारोपणमुक्तं निर्णयामृते मत्स्यपुराणे आषाढ्यामथचाष्टम्यांचतुर्दश्यामुमापतिं पवित्रैरर्चयेद्ब्राह्म्यांश्रावण्यांचेतरान्सुरानिति अस्यामेवपौर्णमास्यांदेवीपुराणोक्तंजयाव्रतं हेमाद्रौ अगस्त्यउवाच ब्रह्मणायोविधिः शक्रेकथितोविज

यात्रहः जयेतिपूर्णिमातातश्रावणस्यशुभावहेत्यादि अत्रयवांकुरादियुक्तायां वेद्यां देवींसंस्थाप्यरोचनाचंदनगंधैरुपलिप्य पुष्पादिभिः संपूज्य यवगोधूममुद्गशालिषष्टिकाढकीतिलमाषादीन् विल्वादीनि फलानि चनिवेदयेत् इतिजयापूर्णिमाव्रतम् अत्रजलधेनुदानमुक्तम् विष्णुः श्रावण्यां श्रवणयुतायां जलधेनुं सालंकारांवस्त्रयुगाच्छादितांदत्त्वास्वर्गलोकमवाप्नोतीति विष्णुधर्मोत्तरे श्रावण्यांशुक्लपक्षेतुद्वादश्यांप्रीतयेनृप गोप्रदानेनदेवेशोयत्पूर्वंलिखितंतव कृतोपवासःसंप्राश्यपंचगव्यंनरेश्वर घृतक्षीराभिषेकंचकृत्वाविष्णोः समाहितः समभ्यर्च्यचगोविंदंपुष्पादिभिररिंदम उदङ्मुखींपूजयित्वातथागृष्टिंपयस्विनीं सपुत्रांवस्त्रसंवीतांसितयज्ञोपवीतिनीं स्वर्णशृंगींशुभाकारांहिरण्योपरिसंस्थितां हिरण्यंवाचयित्वाग्रेब्राह्मणायोपपादयेत् इमांत्वंप्रतिगृह्णीष्वगोविंदःप्रीयतामिति सम्यगुच्चार्यतंविप्रंगोविंदंनृपकल्पयेत् अनुव्रजेच्चगोविंदंपदान्यष्टौनराधिप अनेनविधिनाधेनुंविप्राययः प्रयच्छति गोविंदप्रीणनाद्राजन्विष्णुलोकंसगच्छति सप्तावरांस्तथापूर्वान्सप्तात्मानंचमानवः सप्तजन्मकृतात्पापान्मोचयेदवनीपते पदेपदेतुयज्ञस्यगोसवस्यतुमानवः फलंप्राप्नोतिराजेंद्र दक्षायैवंजगौहरिः सर्वकामफलासास्यात्सर्वकालेषुपार्थिव भवत्यघौघापहरायावदिंद्राश्चतुर्दश सर्वेषामपिपापानांकृतानामविजानता प्रायश्चित्तमिदंप्रोक्तमनुतापोपबृंहितं गृष्टिरेकवारप्रसूतागौः इमांत्वंप्रतिगृह्णीष्वेत्यस्यसमुच्चार्येत्यन्वयः तंविप्रंगोविंदंकल्पयेत् गोविंदरूपतयाचिंतयेत् दत्त्वाचगोविंदः प्रीयतमितिविप्रंवाचयित्वा तस्मैब्राह्मणायहिरण्यमुपपादयेत् दद्यादित्यर्थः पदेपदेइत्यादिनाअनुव्रजनफलोदनं हिरण्योपरिसंस्थितां हिरण्यार्पितखुरचतुष्टयामित्यर्थः जलधेनुदानेविशेषो विष्णुधर्मोत्तरे जलकुंभंनरव्याघ्र सुवर्णरजतान्वितं सुवर्णरजतशृंगखुरान्वितामितिसांप्रदायिकाः रत्नगर्भमशेषैस्तुग्राम्यैर्धान्यैःसमन्वितं सि

वस्त्रयुगच्छन्नंदूर्वापल्लवशोभितं कुष्ठमांसीमुरोशीरबालकामलकैर्युतं प्रियंगुपत्रसहितंसितवस्त्रोपवीतिनसच्छत्रंसदुपानत्कंदर्भविष्टरसंस्थितं चतुर्भिः संभृतंभूपतिलपात्रैश्चतुर्दिशं स्थगितंदधिपात्रेणघृतक्षौद्रवतामुखे तिलपात्राणितान्यस्य दधिपात्रं कांस्यस्येतिदानविवेके उपोषितःसमभ्यर्च्यवासुदेवंजलेशयं पुष्पधूपोपहारैस्तुयथाविभवमादृतः संकल्प्यजलधेनुंचकुंभंतमभिपूज्यच पूजयेद्वत्सकंतद्वत्कृतंजलमयंबुधः एवंसंपूज्यगोविंदंजलधेनुंसवत्सकां सितवस्त्रधरः शांतोवीतरागोविमत्सरः दद्याद्द्विजायराजेंद्रप्रीत्यर्थंजलशायिनः जलशायीजगद्योनिः प्रीयतांममकेशवः इतिचोच्चार्यभूनाथविप्रायप्रतिपाद्यतां अपक्वान्नाशिनास्थेयमहोरात्रमतः परं तथाधान्यानि पार्श्वद्वये कुष्ठादीनि घ्राणदेशे प्रियंगुपत्रंश्रवणे यज्ञोपवीतंमूर्ध्निअथार्पयेत्वत्सश्चतुर्थांशेनैव दक्षिणाःशक्तितः सुवर्णेन अनेनविधिनदत्त्वाजलधेनुंनराधिप सर्वान्कामानवाप्नोतिसर्वदाभक्तिमान्नरइति अथश्रावण्यांवायुपुराणदान् नारदीये संहितेयंमहापुण्याशंकरस्यमहात्मनः नर्मदाचरितंयत्रवायुनापरिकीर्त्तितं लिखित्वेदंपुराणंतुगुडधेनुसमन्वितं श्रावण्यांयोददेद्भक्त्याब्राह्मणायकुटुंबिने रुद्रलोकेवसेन्नित्यंयावदिंद्राश्चतुर्दशेति अथगुडधेनुः मात्स्ये उत्तमागुडधेनुः स्यात्सदाभारचतुष्टयं वत्संभारेणकुर्वीतभाराभ्यांमध्यमास्मृता अर्धभारेणवत्सः स्यात्कनिष्ठाभारकेणतु चतुर्थांशेनवत्सः स्याद्गृहवित्तानुसारतः भारः पलसहस्रमिति धेनुवत्सौघृतास्यौतुसितसूक्ष्मांबरावृतौ शुक्तिकर्णाविक्षुपादौशुक्तिमुक्ताफलेक्षणौसितसूत्रशिरालौतुसितकंबलकंबलौ ताम्रगंडकपृष्ठौतुसितचामररोमकौ गंडकः ककुत्प्रदेशः विद्रुमाक्षयुगोपेतौनवनीतस्तनान्वितौ क्षौमपुच्छौकांस्यदोहाविंद्रनीलकतारकौ सुवर्णशृंगाभरणौराजतैः खुरसंयुतौ नानाफलमयैर्दंतैर्घ्राणगंधकरंडकौ इत्येवंरचयित्वातांधूपदीपैरथार्चयेदिति इतिवायुपुराणसहितगुडधेनुदानविधि

अथमंगलागौरीव्रतोद्यापनपूजनविधिः युधिष्ठिरउवाच उद्यापनविधिंब्रूहिव्रतराजस्यकेशव यतोनिरुद्यापनकंव्रतंनिष्फलमुच्यते कृष्णउवाच वदामिव्रतराजस्यस्त्रीणांकर्त्तव्यमुत्तमम् श्रावणेमासिभौमेषुचतुर्षुव्रतमाचरेत् प्रातरुत्थायसुस्नातासंकल्प्यव्रतमुत्तमं दीपंमहांतंप्रज्वाल्यमंगलांपूजयेच्छुचिः अथपूजाविधिः अद्येत्यादिदेशकालौसंकीर्त्य ममपुत्रपौत्रादिवृद्धयेऽवैधव्यायुरादिसकलसिद्धिद्वारा श्रीशिवमंगलागौरीप्रीत्यर्थंपंचवर्षपर्यंतंश्रीमंगलागौरीव्रतमहंकरिष्ये प्रथमेवत्सरेमातुर्गेहेकर्त्तव्यमेवच ततोभर्तृगृहेकार्यमवश्यंस्त्रीभिरादरात् पंचमेवत्सरेप्राप्तेकुर्यादुद्यापनंशुभम् आचार्यंवरयेत्तत्रवेदवेदांगपारगं श्रावणेमासिभौमेषुह्युद्यापनविधिंचरेत् प्रातरुत्थायसुस्नातासंकल्प्यव्रतमुत्तमं चतुःस्तंभंचतुर्द्वारंकदलीस्तंभमंडितं घंटिकाचामरयुतंकमलैरुपशोभितं मध्येवितानंबध्नीयात्पंचवर्णैरलंकृतं तन्मध्येस्थापयेत्पीठंदृषदं उपलंतथा रौप्येणकारयेत्पीठंदृढः कांचननिर्मितः रौप्यहेम्नोरभावेतुपाषाणस्यविधीयते पीठोपरिन्यसेद्देवींततोग्रेदृषदंतथा तस्याग्रेलिंगतोभद्रंलिखेद्रंगैश्चपंचभिः हरिद्रापिष्टकंकृत्वातन्मध्येऽष्टदलंलिखेत् तस्योपरिन्यसेद्व्रीहीन्द्रोणेनपरिसंमितान् सौवर्णंराजतंताम्रंकलशंविन्यसेद्बुधः पंचरत्नानिनिक्षिप्यसर्वौषधिसमन्वितं तस्योपरिन्यसेत्पात्रंताम्रंवैणवसंभवं उमामहेश्वरींमूर्त्तिंकांचनेनचनिर्मितां तस्योपरिन्यसेद्राजन्पूजयेच्छिवमंगलां महावैइतिमंत्रेणइतिमूर्त्तिंपीठोपरिस्थापयेत् तदस्तुमित्रावरुणेत्यृचावाहनमाचरेत् गोधूमोद्भवपिष्टेनकारयेद्दीपमुत्तमं कृत्वा प्रज्वालितोदीपो घृतवर्त्तिसमन्वितःउपचारैः षोडशभिर्गंधपुष्पादिभिस्तथा पत्रैःपुष्पैः षोडशैश्चनानाजातिसमन्वितैः तंडुलैर्धान्यकैश्चैवस्वच्छैःषोडशसंज्ञकैः अपामार्गस्यपत्रैश्चदूर्वाधत्तूरसंज्ञकैः षोडशैर्दूर्वसंख्याकैर्विल्वपत्रैश्चपंचभिः नीराजनंततःकुर्याद्दीपैः षोडशसंख्यकैः अथपूजा कुंकुमागुरुलिप्तांगांसर्वाभरणभूषि

तां नीलकंठप्रियांगौरींवंदेहंमंगलाह्वयां ध्यानम् अत्रागच्छमहादेविसर्वलोकसुखप्रदे यावद्व्रतमहंकुर्वेपुत्रपौत्रादिवृद्धये आवाहनं रौप्येणचासनंदिव्यंरत्नमाणिक्यशोभितं मयानीतंगृहाणत्वंगौरिकामारिवल्लभे आसनम् गंधपुष्पाक्षतैर्युक्तंपाद्यंसंपादितंमया गृहाणमंगलेगौरिसर्वान्कामान्प्रपूरय पाद्यम् गंधपुष्पाक्षतैर्युक्तमर्घ्यंसंपादितंमया गृहाणपुत्रपौत्रादीन्प्रसन्नाभवसर्वदा अर्घ्यम् कामारिवल्लभेदेविकुर्वाचमनमंविके निरतरमहंवंदेचरणौतवपार्वति आचमनम् पयोदधिघृतंचैवमधुशर्करयासमं पंचामृतेनस्नपनात्प्रीयतांपरमेश्वरी पंचामृतस्नानम् जाह्नवीतोयमानीतंशुभंकर्पूरसंयुतं स्नपयामिसुरश्रेष्ठेत्वांपुत्रादिफलप्रद। स्नानम् आचमनम् वस्त्रंचसोमदैवत्यंलज्जायास्तुनिवारणं मयानिवेदितंभक्त्यागृहाणपरमेश्वरि वस्त्रम् कंचुकीमुपवस्त्रंचनानारत्नैः समन्वितं गृहाणत्वंमयादत्तंपार्वति।जगदीश्वरि कंचुकीवस्त्रम् कुंकुमागुरुकर्पूरंचंदनंकस्तुरींतथा विलेपनंमहादेविगंधंदास्यामिभक्तितः गंधम् रंजिताःकुंकुमौघेनअक्षताश्चातिशोभनाः ममैषांदेविदानेनप्रसन्नाभवपार्वति अक्षताः समर्पयामि हरिद्रांकुंकुमंचैवसिंदूरंकज्जलान्वितं सौभाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वरि सौभाग्यद्रव्याणिसमर्पयामि सेवंतिकावकुलचंपकपाटलाब्जपुन्नागजातिकरवीररसालपुष्पैः विल्वप्रवालतुलसीदलमालतीभिस्त्वांपूजयामिजगदीश्वरिमेप्रसीद पुष्पाणि अपामार्गस्यपत्रैश्चदूर्वाधत्तूरसंज्ञकैः षोडशैर्दूर्वसंख्याकैर्विल्वपत्रादिपंचभिः पत्रपूजा अथांगपूजा उमायैनमः पादौपूजयामि गौर्यैनमः जंघेपू० पार्वत्यैजानुनीपू० जगद्धात्र्यैऊरूपू० जगत्प्रतिष्ठायै कटिंपू० शांतिरूपिण्यै० नाभिंपू. देव्यैनमः उदरंपू- लोकवंद्यायै. स्तनौपू. काल्यैन- कंठंपू- शिवायैन. मुखंपू. भवान्यैनः नेत्रेपू. रुद्राण्यैकर्णौपू. महादेव्यै. ललाटं. मंगलदात्र्यै० शिरः

पू० पुत्रदायिन्यैनमः सर्वांगंपूजयामि देवद्रुमरसोद्भूतःकृष्णागुरुसमान्वितः आघ्रेयः सर्वदेवानांधूपोयं प्रतिगृह्यतां धूपं त्वंज्योतिः सर्वदेवानां तेजसांतेजउत्तमं आत्मज्योतिः परंधामदीपोयंप्रतिगृह्यतां दीपं०अन्नंचतुर्विधंस्वादुरसैः षड्भिः समन्वितं भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां नैवेद्यम् आचमनीयं०करोद्वर्तनं० फलं- तांबूलं. दक्षिणां. वज्रमाणिक्यवैदूर्यमुक्ताविद्रुममंडितं पुष्परागसमायुक्तंभूषणं प्रतिगृह्यतां भूषणानि- नीराजनम् नमोदेव्यैपुष्पांजलिं प्रदक्षिणा. नमस्कारः पुत्रान्देहिधनंदेहिसौभाग्यंदेहिमंगले अन्यांश्चसर्वकामांश्चदेहिदेविनमोस्तुते इतिप्रार्थना ततोवैणवपात्रेतुसौभाग्यद्रव्यमाक्षिपेत् अन्नंकंचुकिसंयुक्तंसवस्त्र फलदक्षिणं वायनंगौरिविप्रायददामिप्रीतयेतव सौभाग्यारोग्यकामानांसर्वसंपत्समृद्धये गौरीगिरीशतुष्ट्यर्थंवायनंतेददाम्यहं इतिमंत्राभ्यांवायनं ताद्दशेवावैणवेपात्रेसौभाग्यद्रव्यमाक्षिपेत् लड्डुकंचुकिसंयुक्तंसवस्त्रफलदक्षिणं मात्रेसुवासिनीभ्यश्चदेयंवायनमुत्तमं जननींमातृसंबंधिस्त्रियः षोडशभोजयेत् नीराजनंततः कुर्याद्दीपैः षोडशसंख्यकैः भोक्तव्याःपूपिकाश्चाथस्त्रीभिः सहस्वयंततः अन्नंलवणवर्जंतुमौनेनभोजयेत्स्वयं सुवासिनीश्चापितथावस्त्रालंकारभूषणैः पूजयेच्चततः पश्चात्कुर्याद्गौरीविसर्जनं विप्रायप्रतिमांदेयारत्नवस्त्रादिभूषिता एवंकृतेविधानेऽस्मिन्नार्यवैधव्यमाप्नुयात् इतिमंगलागौरीपूजोद्यापनविधिः अथकथा युधिष्ठिरउवाच नंदनंदनगोविंदशृण्वतोबहुलाः कथाः कथयोत्कृष्टपुत्रायुः करंममशुभंव्रतम् श्रीकृष्णउवाच अवैधव्यकरंवक्ष्येव्रतंचारिनिसूदन शृणुत्वंसावधानः सन्कथांवक्ष्येपुरातनीं कुंडिनंनामनगरंख्यातस्तत्रद्विजाप्रियः आसीद्वणिग्धर्मपालोनाम्नाबहुधनोपिसः सपत्नीकोह्यपुत्रोसौनास्तीतिव्याकुलोहृदि तस्यगेहेभस्मलिप्तोदेहेरुद्राक्षधारकः जटिलोभिक्षुकोनित्यमागच्छत्

प्रियदर्शनः नस्वीकुर्वंस्तदन्नंसइतिदृष्ट्वाऽबलाऽवदत् स्वामिन्नयंसदायातिभिक्षुकोजटिलोगृहे नस्वीकरोत्यस्मदन्नमितिदृष्ट्वाममाधिकं दुःखंप्रजायतेनित्यं श्रुत्वाभार्यावचोऽब्रवीत् धर्मपालउवाच प्रियेकदाचिद्गत्वा त्वंससुवर्णांगणेभव यदाभिक्षार्थमायातिभिक्षोर्वस्त्रांतरेत्वया बद्ध्वातस्यप्रदेयानिसुवर्णानिप्रियेनघे अनंतरं तस्यभार्याऽचीकरत्स्वामिनोदितम् जटिलेनतुसाशप्तापत्यंतेनभविष्यति श्रुत्वाभिक्षोरिदंवाक्यंदुःखितातमुवाचह स्वामिन्शप्तात्वयापापाच्छापादुद्धरसंप्रति इत्युक्त्वातस्यचरणौववंदेदीनभाषिणी जटिलउवाच भर्तुः समीपेवक्तव्यंत्वयापुत्रिममाज्ञया नीलवस्त्रःसमारुह्य नीलाश्वंगच्छकाननं खननंतत्रकर्त्तव्यं यत्राश्वस्तेस्खलिष्यति रम्यंपक्षिभिरायुक्तंमृगसंघद्रुमाकुलं सुवर्णरचितंरत्नमाणिक्यादिविभूषितं नानापुष्पैः समायुक्तंदृश्यंदेवालयंततः वर्त्ततेतत्रभवतीभवानीभक्तवत्सला आराधयत्वंमनसायथाविध्युद्धरिष्यति त्वांभवानीतिवचनंश्रुत्वाभिक्षोः सुखप्रदं ववंदेतस्यचरणौपुनः पुनरुवाचह तदैवकालेजटिलस्त्वंतर्भूतो बभूवसः साऽवदत्पतिमत्रैहिशृणुभिक्षूक्तमादरात् यथोक्तमवदद्वृत्तांतच्छ्रुत्वावाक्यमग्रहीत् नीलवस्त्रः समारुह्यनीलाश्वंप्रस्थितोवनं गच्छन्नानाविधान्वृक्षान्पार्थिपश्यन्भयाकुलः मृगान्सिंहान्दंदशूकान्तथान्य,नपिपक्षिणः ददर्शासौतडागंचबाहुल्येनाविराजितं रक्तनीलोत्पलैश्चक्रवाकद्वंद्वैश्चराजितं स्नानंचकारतत्रासौतर्पणाद्यापिभूरिशः पुनरश्वंसमारुह्यजगामगहनंवनं स्खलितंवाजिनंपश्यदश्वादुत्तीर्यएवच चखानपृथिवींतत्रयावद्देवालयंगतः ददर्शचमहास्थूलंदेवालयमसौततः रत्नैर्मुक्ताफलैश्चैवमाणिक्यैश्चापिसर्वतः पूजयामासजटिलवाक्यंस्मृत्वातिविस्मितः सुवर्णयुक्तवस्त्राणिचंदनान्यक्षतान्शुभान् चंपकादीनिपुष्पाणिधूपदीपंविशेषतः नानापक्वान्नसंयुक्तंरसैः षड्भिः समन्वितं नानाशाकैःसमाक्रांतं सदुग्धघृतशर्करं

नैवेद्यंकरशुद्ध्यर्थंचंदनंमलयाद्रिजं संपाद्यतुष्टहृदयः फलतांबूलदक्षिणाः जजापमंत्रान्गुप्तोसौसगुणध्यानपूर्वकं
देवीभक्तंगृहादैत्यलोभयामाससादरं प्रसन्नावददत्रेयंपूजासंपादिताकथं येनसंपादितातस्मैददामिवरमद्भुतम् इति
श्रुत्वाधर्मपालोदेव्यग्रेप्रांजलिःस्थितः भगवत्युवाच धर्मपालत्वयासम्यक् पूजासंपादितानघ वरंयाचयमद्भक्तददा
मिवहुलंधनं धर्मपालउवाचवहुलाधनसंपत्तिर्वर्ततेत्वत्प्रसादतः अपत्यंप्राप्तुमिच्छामिपितृणांतारकंशुभंआयातिभि
क्षुकोगेहेगृह्णातिनमदन्नकं तेनमेवहुलंदुःखंसभार्यस्योपजायते इतिदीनवचःश्रुत्वादेवीवचनमब्रवीत् देव्युवाच
धर्मपालकतेऽदृष्टेऽपत्यंनास्तिसुखप्रदं तथापिकिंयाचयसिकन्यांविगतभर्तृकाम् पुत्रमल्पायुषंवाथाप्यंधंदीर्घायुषं
सुतं धर्मपालउवाच पुत्रमल्पायुषंदेहितावताकृत्यकृत्यतां प्राप्नोमिचोद्धरिष्यामिपितरोममघोरगाः देव्युवाच
मत्पार्श्वेवर्त्तमानस्यनाभावारुह्यशुंडिनः तत्पार्श्ववर्त्तिचूतस्यगृहीत्वाफलमद्भुतं पत्न्यैदेयंततःपुत्रोभाविष्यतिन
संशयः इतिदेवीवचः श्रुत्वागत्वातत्पार्श्वएवच नाभिंगजमुखस्याथारुह्यजग्राहमोहतः फलान्युत्तार्यचततः फ
लमेकंददर्शसः एवंपुनः पुनः कुर्वन्फलमेकंददर्शसः क्षुब्धोगणपतिश्चाथधर्मपालायशप्तवान् षोडशेवत्सरे
प्राप्तेसर्पः पुत्रंदशिष्यति धर्मपालःफलंसम्यक् वस्त्रेवद्ध्वाऽगमद्गृहं फलंपत्न्यैददौसापिभक्षयित्वापतिव्र
ता गर्भंसाधारयामासपत्यासहसुसंगता संपूर्णेनवमेमासेप्रासूतसुतमुत्तमं जातकर्मचकारास्यपितासंतुष्ट
मानसः षष्ठीपूजांचकारास्यषष्ठेतुदिवसेततः द्वादशेऽहनिसंप्राप्तेशिवनाम्नाजुहावतं षष्ठेमासिचकारासावन्न
प्राशनमद्भुतं तृतीयेवत्सरेचूडामष्टमेऽब्देह्यनुत्तमं कृत्वोपनयनंपार्थविप्रोभूत्तुष्टमानसः दशमेवत्सरेप्राप्तेऽब्रवी
द्भार्यापतिव्रता भार्योवाच बालकस्यविवाहोऽपिकर्त्तव्यः सुमुहूर्त्तके धर्मपालउवाच मयासंकल्पितंकाश्यांग
मनंबालकस्यतत् कृत्वासमायातुततोविवाहोऽस्याभविष्यति पुत्रोसौप्रेषितस्तेनश्यालकेनसमान्वितः वार

एस्य प्रस्थितोसौगृहीत्वाबहुलंधनं कुर्वंतौपथिसद्धर्मंप्रतिष्ठापुरमापतुः क्रीडंत्यः कन्यकादृष्टास्तत्रदेशेमनोरमे तासांसमाजेगौरांगीसुशीलानामकन्यका तयासहसखीकाचिच्चकारकलहंभृशं गालनंचददौतस्यैरंडेऽभाग्येमुहुर्मुहुः सुशीलोवाच साखित्वयागालनंमेऽयर्थंदत्तंशुभानने जनन्यामेमानवत्याश्चास्तिगौरीव्रतंशुभं तस्यप्रसादात्सकलाः संबंधिन्योऽपियाःस्त्रियः आजन्माविधवाजाताः किंपुनः कन्यकाध्रुवं वक्ष्येतस्यप्रभावंकिंव्रतराजस्यभामिनि पूजनेधूपदीपोऽयंयत्रतत्रसुखंभवेत् इतिश्रुत्वाततोवाक्यंविस्मयोत्फुल्ललोचनः मातुलाश्चिंतयामासबालकस्याप्रियंततः शतंजीवीभवेदेषएतद्धस्ताक्षरायदि पतंत्यमुष्यशिरसि इतिभाव्यंपुनःपुनः सुशीलामेवपश्यन्सविस्मयोत्फुल्ललोचनः सुशीलाप्रास्थितागेहेतदनुप्रास्थितावुभौ स्वगृहंप्रापगौरांगीनिकटेतद्गृहस्यतौ तडागेरम्यदेशेचवासंचक्रतुरादरात् विवाहकालेसंप्राप्तेसुशीलाजनको हरिः विवाहोद्योगवान्जातोविचचारहरंवरं असमर्थंहरंदृष्ट्वातन्मातापितरावुभौ ययाचतुःशिवंबद्धांजलीविनययुक्तकौ वरपितरावूचतुः उपस्थितोविवाहोनौपुत्रस्यशुभयाहरेः सुशीलयाकन्ययायमसमर्थश्च दृश्यते अतोदेयःशिवः श्रीमान्लग्नकालेत्वयाविभो लग्नंभविष्यातिततोदेयोस्माभिःशिवस्तव मातुलउवाच अवश्यंलग्नकालेऽसौशिवोग्राह्यःप्रियंवदः ततोमुहूर्त्तेसंप्राप्तेविवाहमकरोच्छिवः तत्रैवशयनंचक्रेससुशीलः प्रियंवदः स्वप्नेसामंगलागौरीमातृरूपेणभास्वता सुशीलामवदत्साध्वीहितंवचनमेवच गौर्य्युवाच सुशीलेतव गौरांगिभर्त्तुर्दंशार्थमागतः महान्भुजंगउत्तिष्ठदुग्धंस्थापयतत्पुरः घटंचस्थापयाशुत्वंतन्मध्येसगमिष्यति स्ववस्त्रमंगान्निष्कास्यवर्धनीयस्त्वयाघटः प्रातरुत्थायदेहित्वमात्रेवायनकंशुभं इतिगौरीवचःश्रुत्वा सुशीलाक्षणमुत्थिता ददर्शाग्रेनिःश्वसंतंकृष्णसर्पंमहाभयं ततश्चकारगौर्युक्तंप्रवृत्तानिद्रितुततः उवाचवरआसन्नः

क्षुल्लग्नामहतीमम भक्षणायाशुदेहि त्वंलड्डुकादिकमुत्तमं श्रुत्वेतिवाक्यंपत्येसाददौलड्डुकमुत्तमं भक्षयित्वाशि
वहेमेतस्मिन्पात्रेंगुलीयकं दत्वातत्स्थापयामासस्थलेगुप्तेशुभानना सुखेनशयनंचक्रेष्टथिव्यांसर्वकोविदःततः
प्रभातसमयेशिवआगाद्गृहंस्वकं स्नानशुद्धासुशीलासामात्रेवायनकंददौ माताददर्शतन्मध्येमुक्ताहारमनुत्तमं
ददौप्रियायैकन्यायैसहसातुष्टमानसा क्रीडाकालेसुसंप्राप्तेहरआगात्तुमंडपे आदेशयत्सुशीलातांक्रीडार्थं
जननींततः सुशीलोवाच नायंवरोमेजननियेनपाणिग्रहः कृतः अनेनसहमनसाक्रीडनेच्छातथानमे इ
तिश्रुत्वासमाक्रांतौचिंतयापितरौततः अन्नदानमुपायंचाविचेरतुरितिद्रुतं तदारभ्यचक्रतुस्तौपुराणोक्तविधानत
सुशीलापादयोश्चक्रेक्षालनंमुद्रिकान्विता जलधारांददौमाताचंदनंपुत्रकोहरेः हारिर्ददौचतांबूलंबुभुजुस्तत्रमाः
नवाः इतिरीत्यान्नदानंतत्प्रवृत्तंभिक्षुसौख्यदं तावुभौप्रास्थितौकाश्यांप्राप्तौकाशींसुखप्रदां निर्मलांभासिगं
गायाः स्नानंचक्रतुरादरात् स्वर्गद्वारंप्रास्थितौतौकुर्वंतौधर्ममुत्तमम् पीतांबराणिददतुर्भिक्षूकाणांगृहेगृहेआशि
षश्चददुस्तस्मैचिरंजीवीभवेतिच विश्वेश्वरंसमायातौनत्वास्तुत्वापुनःपुनः स्वयंगृहंप्रस्थितौतौशिवोमार्गेद्रुतंवदन्
शिवउवाच कायेमेकिंचिदस्वास्थ्यंमातुलप्रतिभातिहिं ततः प्राणोत्क्रमेतस्ययमदूताउपस्थिताः मंगलागौरिकाचा
पितेषांयुद्धमभून्महत् जित्वातान्मंगलाप्राणान्ददौतस्मैशिवायच शिवोऽकस्मादुत्थितोसौमातुलंप्रत्युवाचह स्वप्ने
युद्धंमयादृष्टंमंगलायमभृत्ययोः जितास्तेमंगलागौर्याततोहंशयनच्युतः मातुलउवाच यज्जातंशिवतज्जातंनस्मर्त
व्यंत्वयापुनः गच्छावआवांनगरेपितरौद्रष्टुमुत्सुकौ प्रास्थितौतौततस्तस्मात्प्रतिष्ठापुरमापतुः रम्येतडागेतत्रैतौ
पाक रंभविचक्रतुःदृष्टौतौहरिदासीभिर्धैर्यौदार्यधरौशुभौ दास्यऊचुः अन्नदानंहरेर्गेहेप्रवृत्तंतत्रगम्यतां उभावूचतुः
भोदास्योयात्रिकावावांगच्छावोनक्वचिद्गृहे इतिश्रुत्वातयोर्वाक्यंदास्योजग्मुःस्वकंगृहम्

स्वस्वामिनिकटेवाक्यमवदन्सादरंतदा सचदासीवचः श्रुत्वातदर्थंप्रभुरादरात् प्रेषयामासहस्त्यादिरत्नवस्त्राणि भूरिश.तंदृष्ट्वाविस्मितौतावागच्छतश्चहरेर्गृहं हरिर्मातुलमभ्यर्च्यशिवंपूजितुमागतः क्षालयंतीचसाकन्याचरणौ तस्यसत्रपा अभूत्केयमितिचजननींप्रत्युवाचह हरिः पप्रच्छसाश्वश्र्वाशिवंमंगलदर्शनं हरिरुवाच ।किंचिच्चिह्नं तवास्त्यत्रब्रूहिमेवरदर्शन शिवउवाच ममेदंचिह्नमस्तीहइत्युक्त्वागृहमागतः ततआनीयतत्पात्रंदर्शयामाससादरं तत्पात्रंचहरिर्दृष्ट्वाकन्यादानंचकारसः ददौरत्नानिवस्त्राणिसुवर्णानिवहून्यपि तामादायप्रस्थितौतौददातेवहुलंधने श्रावणेमासिसंप्राप्तेव्रतंभौमेचकारसा भुक्त्वासर्वेप्रस्थितास्तेयोजनंजग्मुरुत्तमाः सुशीलोवाच गौरीविसर्जनं चापिदीयमानंकरिष्यते ततोगंतव्यमस्माभिःपितरौद्रष्टुमादरात् इत्युक्त्वाआगतास्तत्रगौर्याआवाहनंकृतं ददृशुस्तत्रसौवर्णदेवालयमनुत्तमं गौरीविसर्जनंदीयमानंसाचव्यचीकरत् ततःसर्वेप्रस्थितास्तेपितरौद्रष्टुमुत्सुकाः कुंडिनासन्नदेशेतान्दृष्ट्वाविस्मयिनोजनाः अब्रुवंस्तेधर्मपालंसोत्कंठंप्रियदर्शनाः जनाऊचुः धर्मपालाद्यतेपुत्रस्सभार्य श्यालकस्तथा समायातोवयंदृष्ट्वाअधुनैवसमागताः यावज्जनावदंस्तत्रतावत्सोपिसमागतः नमस्कारांश्चकारासौपितृभ्यांपितृवल्लभः मातुलोऽपिनातिंचक्रेभगिनीधर्मपालयोः सुशीलाश्वशुरायापिश्वश्रूंनत्वास्थितातदा श्वश्रूरुवाच सुशीलेतद्व्रतंब्रूहियद्व्रतस्यप्रभावतः आयुर्वृद्धिःशिशोर्मेऽपिजाताकमललोचने सुशीलोवाच नजानेहंव्रतंश्वश्रजानेमानवतीहरौ श्वशुरंधर्मपालंचश्वश्रूंचभवतींतथा मंगलांदेवतांजानेवरंतु युवयोः सुतं इत्युक्त्वाचसुशीलासाबुभुजेस्वांतहर्षिता कृष्णउवाच तस्माद्व्रतमिदंधर्मस्त्रीभिः कार्यंसदैवतु युधिष्ठिरउ- फलमस्यश्रुतंकृष्णविधानंब्रूहिकेशव कृष्णउवाच श्रावणेमासिभौमेषुचतुर्षुव्रतमाचरेत् प्रातरुत्थायसुस्नातासंकल्प्यव्रतमुत्तमं उपचारैः षोडशभिः पजयेन्मंगलांतथा नीराजनंततःकुर्याद्दीपैः षोड

शसंख्यया षात्रेसुवासिनीभ्यश्चदेयंवायनमुत्तमं भोक्तव्याःकन्यकाश्चापिअन्नंलवणवर्जितं विसर्जनंमंगलायादीयमानंततःक्रमात् पंचसंवत्सरेष्वेवंकर्त्तव्यंपतिमिच्छुभिः इतिश्रीभविष्योत्तरपुराणे मंगलागौरीव्रतोद्यापनंसंपूर्णम् स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीरित्यादि १ रणवीरसिंहभूपेशकारिते कृत्यसागरे अभूच्छ्रावणकृत्यानांरम्योरत्नसमुच्चयः २ इतिश्रीमत्सूर्यवंशावतंसरघुकुलतिलकश्रीरणवीरसिंहमहाराजकारितेकृत्यरत्नाकरेश्रावणमासकृत्यरत्नसमुच्चयः समाप्तः ॥

समाप्तोऽयं श्रावणमासः शुभमस्तुसर्वजगताम्

97

पुस्तकालय
गुरुकुल कांगड़ी

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिब्बामल्लाधिकारेश्रावणमासोमुद्रितस्समाप्तिमगमत
संवत् १९४१ आश्विन प्र. २५

1

भाद्रपदमासप्रारम्भः

श्रीगणेशायनमः

अथभाद्रपदमासकृत्यनिर्णयः॥ तत्रादौसिंहसंक्रमणे आद्याःषोडशनाड्यःपुण्यकालःनारदीये याम्यायनस्थिरेत्वाद्याःपराःसौम्येद्विमूर्तिभे मध्याविषुवतिप्रोक्ताःपुण्यनाड्यस्तुषोडशेति तथाचात्र ससुवर्णछत्रदानं हेमाद्रौदानखंडे विश्वामित्रःमेषसंक्रमणेभानोर्मेषदानंमहाफलमित्युपक्रम्य ससुवर्णछत्रदानंसिंहेपिविहितंतथा अत्रसिंहसंक्रांतौ कलियुगस्यांतःब्रह्मपुराणे सूर्यस्यसिंहसंक्रांत्यामंतःकलियुगस्यतु अत्रश्राद्धादिकमक्षयफलदमिति युगाद्येषुयुगांतेषुश्राद्धमक्षयमुच्यते तच्चपिंडादिकृत्येनिर्णीतं अथात्रसिंहसंक्रांतौ तुलसीव्रतं विंशतिदिनात्मकंप्रारभ्यं तथाचसिंहसंक्रांतिदिनमारभ्यदशादिनावधितुलसीमूले प्रत्यहंसूत्रप्रक्षेपः पुनर्दशमदिनेतदादायदशगुणंदशग्रंथियुतंचकृत्वा पुमान्दक्षिणेनारीवामभुजेधृत्वा तच्चदशदिनावधितुलसीमंत्रेणसंपूज्यएवंचांतेमोचयेत् कथायामुकुंदानविसर्जनादिकंकुर्य्यात् अत्रपूजामंत्रःतुलसिश्रीसखिशुभेपापहारिणिपुण्यदे नमस्तेनारदनुतेनारायणमनःप्रिये अथतुलसीकवचंस्कंदपुराणे तुलसीकवचस्यास्यऋषिर्विष्णुरुदीरितः छंदोनुष्टुप्समाख्यातंतुलसीदेवतेरिता धर्मार्थकाममोक्षार्थेविनियोगः तुलसीमेशिरःपातुमुखंचसुमुखीमम जिव्हांमेपातुसुमदाकंठंविद्यामयीममस्कंधौकल्हारिणीपातुभुजौमेपापहारिणी करौपद्मकरापातुहृदयंविष्णुवल्लभा पुण्यदामध्यमंपातुनाभिंसौभाग्यदायिनी कटिंकुंडलिनीपातुऊरूनारदपूजिता ज्वालिनीजानुनीपातुजंघे सकलवंदिता नारायणप्रियापादौसर्वांगंसर्वरक्षका संकटेविषमेदुर्गे भयेवादेमहाहवे निश्यन्हिसंध्ययोः पातुतुलसीसर्वतःसदा इतीदंपरमंगुह्यं तुलस्याः कवचामृतं तुलसीकाननेतिष्ठन्नासीनोवाजपेदिदं सर्वान्कामानवाप्नोतिविष्णुसायुज्यमाप्नुयात् इति स्कंदपुराणेतुलसीकवचं अथ तुलसीव्रतकथा भविष्योत्तरे श्रीकृष्णउवाच एकदादेवदेवेशोलक्ष्मींप्राण

समप्रियां संतुष्टःपरयाभक्त्यारहस्यंविष्णुरब्रवीत् श्रीविष्णुरुवाच लक्ष्मिलक्ष्मिप्रियेदेविवरंवरयसुव्रते
प्रसन्नस्त्वांददाम्यद्ययत्तेमनसिविद्यते लक्ष्मीरुवाच यदितुष्टोसिदेवेशयदितेवल्लभास्म्यहं ऐहिकामुष्मि
कंन्दणांसर्वसौख्यप्रदायकं तद्व्रतंब्रूहिनिश्चित्यव्रतानांचोत्तमोत्तमं केनचादौपुराचीर्णंवैकुंठब्रूहिविस्तरात् श्रीविष्णु
रुवाच शृणुलक्ष्मिमहाभागेकुरुत्वंतुलसीव्रतं येनव्रतप्रभावेणसर्वसिद्धिर्भवेन्नृन्दणां अत्रतेकथयिष्यामिकथांपाप
प्रणाशिनीं भुक्तिमुक्तिप्रदांपुण्यांसावधानावधारय पुराकृतयुगस्यादौदक्षिणस्यांमहापुरीमाहिष्मतीतिविख्यातासर्व
संपत्समन्विता तत्रासीद्भूभृतांश्रेष्ठोधर्मदत्ताभिधोवली सौंदर्य्येकामतुल्योसौवाण्यांदेवगुरोःसमः दानेबलि
समोलक्ष्मियुद्धेपांडुसुतोयथा निर्दंभोविष्णुभक्तश्चसर्वशास्त्रविशारदः तस्यपत्नीमदादेवीनाम्नाख्याताजगत्त्रये
गुणैर्भर्तृसमादेवीपतिभक्तिपरायणा धर्मदत्तस्यसाराज्ञीप्राणेभ्योपिगरीयसी कदाचित्सुषुवेकन्यांसर्वलक्षण
संयुतां विष्णुदासीतिविख्याताविष्णुपूजनतत्परा तत्रकश्चिन्महायोगीविष्णुभक्तिपरायणाः रागद्वेषविहीन
श्चधर्मात्मासंयतेंद्रियःसदातस्यगृहंयातिसेवार्थंनृपवल्लभा महादेवीप्रसंगेनविष्णुदास्यपिसाययौ कदाचिन्मृत्यु
संप्राप्ताराज्ञीमुक्तिमवापसा साकन्यापिशुभाचारातथैवार्चनतत्परा प्रत्यहंतद्गृहंगत्वासंमार्जनपरायणा द्वेषेण
चापराराज्ञ्यस्तस्यांदोषमरोपयन् एतत्प्रसिद्धंलोकेषुविमातानैवतुष्यति सपत्नीसंततिंदृष्ट्वाद्वेषयुक्ताहिनित्यशः
नृपाग्रेकथितंताभिःकन्यैषाव्यभिचारिणी प्रयातिप्रत्यहंप्रातः कुत्राचिन्नैवविद्महे अस्यास्त्यागःप्रकर्तव्योयतोना
यातितेगृहं इतितासांवचःश्रुत्वाराजाचिंतातुरोऽभवत् एकांतेचनिवासायकन्यायैप्रददौगृहं कन्याविप्रगृहंग
त्वाचख्यौवृत्तांतमादितः तुष्टेनतेनविप्रेणतुलस्याःकथितंव्रतं कन्योवाच यदितुष्टोसिविप्रेंद्रव्रतंवदसविस्तरं येन
व्रतप्रभावेणसुखिन्येकाकिनीसदा विप्रउवाच तुलसीव्रतविधानंहिशृणुष्वावहितासती यस्मिन्दिनेसमायाति

सिंहराशिंदिवामणिः तदादशादिनंयावत्तुलसीमूलकेक्षिपेत् सूत्रंकार्पासिकंशुद्धंगृह्णीयाद्दशमेदिने तत्सूत्रंदशधाकृत्वादशग्रंथिसमन्वितं पुंसातुदक्षिणेकार्यंनार्य्यावामेतथाभुजे यावद्दशाहंवध्नीयान्नतंवैपरिमोचयेत् तस्यार्चातु प्रकर्तव्यागंधपुष्पादिभिःशुभैः जलपूर्णंघटंदद्यात्सपक्वान्नंसदक्षिणं सवस्त्रकंतुविप्रायव्रतसंपूर्त्तिहेतवे तत्रमंत्रः तुलसिश्रीसखिशुभेपापहारिणिपुण्यदे नमस्तेनारदनुतेनारायणमनःप्रिये एवंत्वयाप्रकर्तव्यंव्रतंसंकष्टनाशनं सर्वसिद्धिप्रदंचैवसर्वसौख्यप्रदायकं भद्रंतेस्तुशुभाचारेगच्छशीघ्रंस्वकंगृहं ततोगृहेनिवासंचकुरुयत्तेपिताददौ आगंतव्यंनमेगेहंकिंचित्कालंप्रतीत्यचविप्रादिष्टासमागत्यप्रविष्टामंदिरंतदा सर्वसंपत्समायुक्तमसहायाहरिप्रिया तुलसींतत्रसारोप्यहरिपूजनतत्परा व्रतंचकारविधिवद्विप्रादिष्टंशुभार्थिनी तेनव्रतप्रभावेण वाचःसत्यमवाप्य सा एकदादुःखितासासीत्सूर्यंप्रोक्तवतीसती मदीयाज्ञांविनादेवनोदयंयाहिभास्कर तथास्त्वितिरविः प्राह ततोलोकोतिदुःखितः नित्यंनैमित्तिकंकर्मसर्वंनष्टंरविंविना ततोलोकःसमागत्यराज्ञःसन्निधिमब्रवीत् किमस्माभिःप्रकर्त्तव्यंसंकटेसमुपस्थिते इतितेषांवचःश्रुत्वाराजाचिंतातुरोऽभवत् सुमंत्रिणं समाहूयराजावचनमब्रवीत् सांप्रतंकिंप्रकर्त्तव्यंलोकोह्यत्यंतदुःखितः शृणुराजन्परंगुह्यंकन्यातेशुभलक्षणात्वयातस्याःकृतस्त्यागोनारीवचनकारणात् सायदातुष्टिमायातितदासूर्यउदेष्यति राजामंत्रिवचःश्रुत्वाकन्यायामंदिरंगतः ततःसंप्रार्थयामासकन्यकां शुभलक्षणां पुत्रिपुत्रिमहाभागेममोपरिकृपांकुरु क्षंतव्यश्चापराधोमेकुरुलोकंसुखान्वितं इतिसंप्रार्थितापित्रासूर्यस्यार्थेसुमानसा उदयंयाहिभोस्वामिन्येनलोकःसुखीभवेत् इतितस्यावचःश्रुत्वाश्रीसूर्यश्चोदयंगतः ततःकर्माणिसंचक्रेलोकःसूर्योदयेसति राज्ञापृष्टातदाकन्याशुभाचारासुसंयता राजोवाच पुत्रिपुत्रिमहाभागेत्वंजाताममवेश्मनि सात्वंब्रूहिमहाभागेव्रतंदानंतपश्चाकिं त्वयाकृतंमहाभागेतदेवाद्यकरोम्यहं सपत्नीकःसलोकश्चपिताहंते

सुपुत्रिके पुत्र्युवाच समाहितमनाभूपवचनंममचशृणु अत्रैवनगरेविप्रोविष्णुभाक्तिपरायणः महादेवीतिमातामितस्य सेवापरायणा अहंतस्यहिविप्रस्यसदाभक्तिपरायणा उपदिष्टंव्रतंतेनतुलस्यामुक्तिदायकंयथोपादिष्टंविप्रेणपित्रेउक्तंयथातथाप्रजाभ्यःकारयामासव्रतंचक्रेनृपःस्वयं ततःप्रभृतिलोकेस्मिन्व्रतंविख्यातिमागतं यथायोग्यंवरंलब्ध्वा राजाकन्यांशुभोदये कालेवैवाहिकेलक्ष्मिसुप्रसन्नोनरेश्वरः स्त्रीवापिपुरुषोवापिकरोतिव्रतमुत्तमं ऐहिकंसुखमाप्नोतितथैवामुष्मिकंफलंयःशृणोतिकथामेतांयतचित्तःसमाहितःसर्वपापविनिर्मुक्तोविष्णुलोकंसगच्छति विधिवत्कुरुते नारीतुलस्याव्रतमुत्तमं विष्णुदासीसमाज्ञेयासत्यंसत्यंवरानने इतिभविष्योत्तरेतुलसीव्रतकथा अथात्रसिंहार्केगोप्रसवशांतिःकार्य्या अद्भुतसागरे नारदः भानौसिंहगतेचैवयस्यगौः संप्रसूयते मरणंतस्यनिर्दिष्टंषड्भिर्मासैर्नसंशयः तत्रशांतिंप्रवक्ष्यामियेनसंपद्यतेसुखं प्रसूतांतत्क्षणादेवगांविप्रायप्रदापयेत् ततोहोमंप्रकुर्वीत घृताक्तै राजसर्षपैः आहुतीनांघृताक्तानामयुतंजुहुयात्ततः अयंहोमोव्याहृतिभिः कार्य्यः सोपवासः प्रयत्नेनदद्याद्विप्रायदक्षिणामिति अथर्ववेदिनां गृह्यपरिशिष्टे माघवुधेचमहिषी श्रावणेवडवादिवा सिंहे गावः प्रसूयंतेस्वामिनोमृत्युदायकाइति अत्र तंत्रोक्ता अमृता शांतिः कार्य्या भाद्रकृष्णप्रतिपदमारभ्य भाद्रमासोक्तदानव्रतनियमादीनामारंभः कार्य्यः मासिभाद्रपदेदद्यात्पायसंमधुसर्पिषी हृषीकेशप्रीणनार्थं लवणंसगुडोदनमिति अत्रफाणितदानमपि विष्णुधर्मोत्तरे प्रौष्ठपादेतथामासिप्रदाताफाणितस्यच फाणितंखंडमंडकीतिपायसाविशेषाख्यं महाभारतंप्रौष्ठपादंतुयोमासमेकभक्तेनसंक्षिपेत् गवाढ्यंस्फीतकमलमैश्वर्य्यंप्रतिपद्यते भाद्रकृष्णद्वितीयायामशून्यशयनंव्रतं तथाच चतुर्ष्वसितपक्षेषुमासेषुश्रावणादिषु अशून्याख्यंव्रतंकुर्य्याज्जययातुफलाधिकमिति अत्रजयया तृतीययाविद्धाद्वितीयाकार्येत्यर्थः भाद्रकृष्णतृतीयायां

विशालाक्षीयात्रोक्ताकाशीखंडे भाद्रकृष्णतृतीयायामुपवासपरैर्नरैः कृत्वाजागरणंरात्रौविशालाक्षीसमीपतइति अत्रतृतीयारात्रिव्यापिनीग्राह्यारात्रौजागरणविधानादिति भाद्रकृष्णचतुर्थ्यांसंकष्टचतुर्थीव्रतंस्कांदे श्रावणेवहुलेपक्षेचतुर्थ्यांतुविधूदये गणेशंपूजयित्वातुचंद्रायार्घ्यंप्रदीयते श्रावणोत्रामांतोग्राह्यःव्रतेशुक्लादिमेवचेतिवचनात् इयंचंद्रोदयव्यापिनीग्राह्येतिप्रागभिधानात् चंद्रोदयव्रतत्वाच्च चंद्रोदयव्रतेचैवतिथिस्तात्कालिकीस्मृतेतिदिनद्वयेचंद्रोदयव्यापित्वे पूर्वा चतुर्थीसतृतीयाचमहापुण्यफलप्रदा कर्तव्याव्रतिभिर्वत्सगणनाथसुतोषिणीतिब्रह्मवैवर्तवचनात् गणेशगौरीवहुलाअतिरिक्ताः प्रकीर्तिताः चतुर्थ्यःपंचमीविद्धादेवतांतरयोगतइतिवचनाच्चनचतृतीयाविद्धाविधायकानिवचनानिदिवात्रिमुहूर्तवेधसत्येवप्रवर्तंते तेनरात्रियोगमात्रतइतिवाच्यं रात्रिसाध्यकर्मसुरात्रावपिवेधस्य जन्माष्टमीप्रकरणे माधवादिभिः प्रदर्शितत्वात् अतएवमहालक्ष्मीव्रतसमापने दिनद्वयेअष्टम्याश्चंद्रोदयकालव्यापित्वे कृष्णपक्षेऽष्टमीचैत्रकृष्णपक्षेचतुर्दशी पूर्वविद्धैवकर्तव्यापरविद्धानकुत्रचित् इतिवचनात् पूर्वविद्धाग्राह्येत्युक्तं हेमाद्रौमदनरत्नेच यानि चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते मध्याह्नव्यापिनीग्राह्यापरतश्चपरेहनीत्यादिवचनानितु सिद्धिविनायकादिव्रतविषयाणि तेषुमध्याह्नस्यकर्मकालविषयत्वात् प्रातःशुक्लतिलैःस्नात्वामध्याह्नेपूजनंसदेतिवचनात् अतएवमाधवेन मध्याह्नस्यकर्मकालत्वमंगीकृतंच विनायकव्रतेमध्याह्नव्यापिनीग्राह्येत्युक्तं तस्मादुभयत्रचंद्रोदयकालेसर्वथापूर्वैवेतिन्याय्यः पंथाइत्यलंबहुना अथ व्रतविधिः ॐमद्येत्यादि विद्याधनपुत्रारोग्यादिकामः संकटचतुर्थीव्रतंकरिष्य इतिसंकल्पः स्त्रीतुभर्त्रादिप्रीतिद्वारासर्वकामावाप्त्यै संकष्टचतुर्थीव्रतंकरिष्ये सौवर्णरौप्यताम्रमृण्मयाद्यन्यतमांगणपतिमूर्तिंकृत्वा जलपूर्णंवस्त्रयुतंकुंभंतस्याग्रेस्थापयित्वाषोडशोपचारैःपूजयेत् ध्यानं लंबोदरंचतुर्बाहुंत्रिनेत्रंरक्तवर्णकं नानारत्नसुवेषाढ्यं

प्रसन्नास्यंविचिंतयेत् ध्यायेद्गजाननंदेवंतप्तकांचनसान्निभं चतुर्भुजंमहाकायंसूर्यकोटिसमप्रभं अथव्रतविधिःप्रातःकृत्यादिकृत्वासूर्यादिदेवताभ्योव्रतंनिवेद्याचम्योदङ्मुखोवारिपूर्णताम्रपात्रंगृहीत्वा मासाद्युल्लिख्य ममसर्वकर्मनिर्विघ्नसिद्धिपुत्रपौत्रसौभाग्यादिसिद्ध्यर्थंसंकष्टहरणगणपतिप्रीत्यर्थंसंकष्टहरणचतुर्थीव्रतमहंकरिष्ये इतिसंकल्प्यमौनेनदिनमतिवाह्यसंध्यासमयेतैलाभ्यंगपूर्वकंस्नानंकृत्वासायंसंध्यादिकृत्वा भूतशुद्धिप्राणप्रतिष्ठांकेवलमातृकान्यासंचकृत्वा सर्वसंकष्टतरणार्थं चतुर्थ्यां गणपतिपूजनमहंकरिष्ये इतिसंकल्प्यार्घ्यादिस्थापनं कृत्वापीठमंडूकादिपरतत्त्वांतंसंपूज्यतीव्रायैनमः ज्वालिन्यैनमः नंदायैनमः भोगदायैनमः कामरूपिण्यैनमः उग्रायैनमः तेजोवत्यैनमः सत्यायैनमः दिक्षुविदिक्षुच मध्येविघ्नविनाशिन्यैनमः सर्वशक्तिकमलासनायनमः इतिपूजयेत् ततःपीठमध्येमूर्तौफलकेवास्वेष्टदेवतागमोक्तप्रकारेणपूजयेत् अथध्यानं कोटिसूर्यप्रभंदेवंगजवक्त्रंचतुर्भुजं पाशांकुशधरंदेवंध्यायेत्सिद्धिविनायकं इतिध्यात्वा आत्मसंस्थमजंशुद्धंत्वामहंपरमेश्वरं अरण्यामिवहव्याशंमूर्तावावाहयाम्यहमितिपठित्वा सहशीर्षेत्यावाहनं आगच्छदेवदेवेशगणनाथनमोस्तुते विनायकनमस्तुभ्यंगौरीमलसमुद्भव ॥ आवाहनं १ अनेकरत्नसंयुक्तंमुक्ताफलविभूषितं स्वर्णसिंहासनंदेवप्रीत्यर्थंप्रतिगृह्यतां पुरुष एवेति विघ्नविनाशिनेनमः ॥ इत्यासनंसमर्पयामि २ तवेयंमहिमामूर्तिस्तस्यांत्वासर्वगंविभो भक्तिस्नेहसमाकृष्टंदीपवत्स्थापयाम्यहमिति १ अनन्यातवदेवेशमूर्तिःशक्तिर्महाप्रभो सान्निध्यंकुरुतस्यांत्वंभक्तानुग्रहतत्परेति सान्निधापनं २ आज्ञयातवदेवेशकृपांभोधेगुणांबुधे आत्मानंदैकतृप्तंत्वांनिरुणाध्मिसदागुणेतिसंनिरोधनं ३ अज्ञानाद्वैमनस्याद्वावैक्लव्यात्साधनस्यच यदपूर्णंभवेत्कृत्यंतथाप्यभिमुखोभवेति सम्मुखीकरणं ४ अभक्तवाङ्मनश्चक्षुःश्रोत्रदूरायतद्युते स्वतेजःपंजरेणाशुवेष्टितोभवसर्वत इत्यवगुंठनं ५ ततोमूलमंत्रेणसकली

करणं ६ अमृतीकरणं ७ परमीकरणं ८ ऐंवदवदवाग्वादिनिऐंक्लींक्लिन्नेक्लेदय २ महाक्षोभंकुरुक्लींसौंमहामोहं कुरुसोःह्रौः अंआंइत्यादिप्रोक्ष्य प्राणप्रतिष्ठांकुर्यात् ॐआंह्रींक्रौमित्युच्चार्य्य देवस्यजीवइहस्थितः ॐआंह्रींक्रौमित्युच्चार्य्यदेवस्यसर्वेंद्रियाणिइहतिष्ठतु ॐआंह्रींक्रौमित्युच्चार्य्यदेवस्यवाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखंचिरंतिष्ठतुस्वाहा इतिप्राणप्रतिष्ठा ततःपाद्यं गौरीपुत्रनमस्तेस्तुगणानामीश्वरप्रभो भक्त्यापाद्यंमयादत्तंसर्वसिद्धिंप्रयच्छमे एतावानस्येतिलंबोदरायनमः पाद्यंसमर्पयामिनमः व्रतमुद्दिश्यदेवेशगंधपुष्पाक्षतैर्युतं गृहाणार्घ्यंमयादत्तंभक्तिस्नेहेनपूजित त्रिपादूर्ध्वेत्यर्घ्यं चंद्रधारिणेनमः आचम्यतांगणाधीशसर्वसिद्धिप्रदायक अनाथनाथसर्वज्ञगीर्वाणवरपूजित तस्माद्विराडिति विश्वप्रियायनमः आचमनीयंस· गव्यंदधिसमानीतंमधुनाचसमन्वितं गृह्योक्तविधिनादत्तंमधुपर्कंगृहाणभोः गणपतयेनमः मधुपर्कंस- मधुपर्कानंतरंपुनराचमनीयंस· पंचामृतंमयानीतंपयोदधिघृतंमधु सितयाचसमायुक्तंस्नानार्थंप्रतिगृह्यतां पंचामृतस्नानंस- गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं गृहाणविघ्नराजेंद्रमयादत्तंहिभक्तितः यत्पुरुषेणेति सर्वास्त्रधारिणेनमः शुद्धोदकस्नानंसहाचमनं रक्तवस्त्रंमहादिव्यंदिव्यगंधाधिवासितं भक्त्यादलंगृहाणेशलंबोदरहरात्मज तंयज्ञमिति कुमारगुरवेनमः आच्छादनंस-राजतंब्रह्मसूत्रंचकांचनंचोत्तरीयकं गृहाणेश्वरसर्वज्ञभक्तानांवरदायक तस्माद्यज्ञात्सर्वहुतः संभृतमिति शिवात्मजायनम इत्युपवीतंस- गंधंगृहाणदेवेशदिव्यचंदनमुत्तमं कर्पूरागुरुसंयुक्तंगणाध्यक्षसुरार्चित तस्माद्यज्ञात्सर्वहुतः ऋचस्सा- रुद्रप्रियायनमः गंधंस. अक्षताश्चसुरश्रेष्ठकुंकुमाक्ताःसुशोभनाः गृहाणविघ्नराजेंद्रदयांकृत्वाममोपरि विघ्नहर्त्रेनमः अक्षताः स - सिंदूरंगृह्यतांदेवबालार्कसदृशद्युते सर्वसंकष्टनाशार्थंदत्तंपरशुधारिणे परशुधारिणेनमः सिंदूरंस-विनायकनमस्तुभ्यंसुरासुरसुपूजितसुगंधीनिचपुष्पाणिगृहाणपरमेश्वर तस्मा

दत्त्वाक्षतिं गुणशालिनेपुष्पाणिस- दशांगंगुग्गुलुंधूपंसुगंधंसुमनोहरं उमासुतनमस्तुभ्यंगृहाणवरदोभव यत्पुरुपमिति भवानीप्रीतिकर्त्रेनम इतिधूपंस. गृहाणमंगलंदीपंघृतवर्त्तिसमन्वितं भासनंसर्ववस्तूनांतेजोराशेजगत्पते ब्राह्मणोस्येति गजकर्णायनमः दीपंस. लड्डुकानिचपक्कान्नंनानाभक्ष्यंचपायसं गृहाणविघ्नराजेंद्रफलैर्नानाविधैर्युतंचंद्रमामनसइतिनैवेद्यंस- अघनाशिनेनमः पंचप्राणाहुतीर्मुख्या; कारयेत् नमस्तेदेवदेवेशसर्वतृप्तिकरंपरं अन्नंनिवेदितंभक्त्याप्रकृतिस्थंसुशीतलं परमानंदसंपूर्णंगृहाणजलमुत्तमं मध्येपानीयं उत्तरापोशानं दत्त्वा करोद्वर्त्तनीयादिचदत्त्वा तांबूलं दद्यात् पूगकर्पूरसंयुक्तंनागवल्लीदलैर्युतं तांबूलंगृह्यतांदेव सर्वमंगलदायक सिद्धिदायनमः तांबूलंसम- नारिकेलंसनारंगंकदलीमातुलुंगकं इक्षुदंडंगृहाणेशसर्वप्रियनमोस्तुते संकष्टनाशिनेनमः सफलमिक्षुदंडंस. हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतः शांतिं प्रयच्छमे सर्वभोगदायिने दक्षिणां . ततः पुष्पांजलिदानायैकविंशतिदूर्वांकुरानादाय वक्ष्यमाणनामभिः पूजां कुर्यात् गणाधिपायनमः उमापुत्राय. अघनाशनाय. एकदंताय- इभवक्त्राय. मूषकवाहनाय. विनायकाय- ईशपुत्राय. सर्वसिद्धिप्रदायकाय. कुमारगुरवेनमः एकांदूर्वांगृहीत्वा गणाधिपनमस्तेस्तुउमापुत्राघनाशन एकदंतेभवक्त्रेतिनमोमूषकवाहन विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक कुमारगुरवेतुभ्यंपूजयामिप्रयत्नतः एभिर्नामभिः संपूज्य प्रत्येकनामभिर्दूर्वायुग्मद्विरावृत्त्यासमर्पयेत् ततः पुष्पांजलिंदत्त्वानीराजनंकुर्यात् कर्पूरवर्त्तिकायुक्तः सर्ववस्तुप्रकाशकः नीराजनार्थमानीतोदीपोयंप्रतिगृह्यतां सर्वविघ्नविनाशिनेनमः नीराजनंसमर्पयामि पुनः पुष्पांजलिंदत्त्वासंकष्टहरणंकृत्वाहृत्स्थान्कामान्प्रपूरय विघ्नान्नाशयमेसर्वान्नाशायोपस्थितान्प्रभो . त्वत्प्रसादेनकार्य्याणिसर्वाणीहकरोम्यहं इतिविज्ञाप्यदेवेशंप्रणिपत्यपुनःपुनः नमस्कारंकरोमीशसर्वकामार्थसिद्धये प्रीत्यानु

गृह्यदेवेश प्रसादसुमुखोभव नाभ्याआसीदितिनमस्कारः ततः प्रदक्षिणां करोमीशसर्वकामार्थसिद्धये सर्वकामप्रदस्त्वंहिसर्वविघ्नहरोभव सप्तास्यासन्निति उमासुताय नमः प्रदक्षिणा पुनर्नत्वाप्रार्थयेत् संसारपीडाव्यथितंहि मांसदासंकष्टभीतंसुमुखप्रसीदत्वंत्राहिमांमोचयकष्टसंघान्नमोनमोविघ्नविनाशनाय त्वामुद्दिश्यकृतंमेद्ययथाशक्त्यातुपूजनं तत्सर्वंपूर्णतामेतुत्वत्प्रसादाद्गजानन अथवायनदानं श्रीविप्रायनमस्तुभ्यंसाक्षाद्देवस्वरूपिणे गणेशप्रीतयेतुभ्यंमोदकान्वैददाम्यहं मोदकान्सफलान्मौद्गान्दाक्षिणाभिःसमन्वितान् आवयोस्तारणार्थायगृहाणेमान्नमोनमः आवयोर्दंपत्योर्वादात्प्रतिग्रहीत्रोरित्यर्थः एवंवायनंदद्यात् ॥ ततश्चंद्रपूजनंकृत्वाचंद्रायार्घ्यंदद्यात् शंखे दुग्धदूर्वाक्षतफलानिदत्त्वा ज्योत्स्नापतेनमस्तुभ्यंनमस्तेज्योतिषांपते नमस्तेरोहिणीकांतगृहाणार्घ्यंनमोस्तुते सौम्यायदेवदेवायग्रहराजायशालिने अर्घ्यंगृहाणदेवेशद्विजराजनमोस्तुते क्षीरोदार्णवसंभूतअत्रिनेत्रसमुद्भव गृहाणार्घ्यंमयादत्तं रोहिणिसहितप्रभो गंगतार्णवमाणिक्यक्षीराब्धिमथनोद्भव जानासित्वंमदीयांतः सोमराजायते नमः क्षीरोदार्णवसंभूतलक्ष्मीबंधोनिशाकर गृहाणार्घ्यंमयादत्तंगणेशप्रीतिवर्द्धन समस्ततारकाधीशजगदाल्हादकारक गृहाणार्घ्यंमयादत्तंबालचंद्रनमोस्तुते इत्यनेनार्घ्यंदत्त्वा नमस्कारंकुर्य्यात् शंकरस्यललाटस्थंतिलकंतुमनोहरं अत्रिनेत्रसमुद्भूतंनमामिशशिनंसदा नमोमंडलदीपायशिरोरत्नायधूर्जटेः कलाभिर्वर्द्धमानायनमश्चंद्रायचारवे इतिचंद्रप्रार्थनांकुर्यात् ततोगणेशायार्घ्यं गणेशशेषविघ्नेशसर्वसिद्धिप्रदायक संकष्टहरमेदेवगृहाणार्घ्यंनमोस्तुते गौरीसुतनमस्तेस्तुसततंमोदकप्रिय संकष्टनाशनार्थायगृहाणार्घ्यंनमोस्तुते कृष्णपक्षेचतुर्थ्यांतुपूजितोसिशुभाप्तये गृहाणार्घ्यंमयादत्तंममकामान्प्रपूरय इत्यर्घ्यंदत्त्वातिथ्यर्घ्यंदद्यात् तिथीनामुत्तमेदेविगणेशस्यचवल्लभे गृहाणार्घ्यंमयादत्तंसर्वसिद्धिप्रदायिके इतिचतुर्थ्याअर्घ्यंदत्त्वा गणेशंप्रार्थयेत् यद्दत्तंभक्तिमात्रेणपुष्पंपत्रंफलं

जलं निवेदितंचनैवेद्यंतद्गृहाणानुकंपया आवाहनंनजानामिनजानामिविसर्जनं पूजांचैवनजानामित्वंगतिः परमेश्वर कर्मणामनसावाचात्वत्तोनान्यास्तिमेगतिः अंतश्चरसिभूतानांद्रष्टात्वंपरमेश्वर देवयोनिसहस्रेषुयेषुयेषुव्रजाम्यहं तेषुतेष्वचलाभक्तिरच्युतास्तुसदात्वयि देवोदाताचभोक्ताचदेवः सर्वमिदंजगत् देवोजयतिसर्वत्रसदेवःसर्वमेवतत् ततोर्घपात्रमुद्धृत्य साधुवाकर्मदुष्टंवायद्यदाचरितंमया तत्सर्वंभगवन्देवगृहाणाराधनंपरं इतः पूर्वंप्राणबुद्धिदेहधर्माधिकारजाग्रत्स्वप्नसुषुप्त्यवस्थासुमनसावाचाकर्मणाहस्ताभ्यांपद्भ्यामुदरेणशिश्नायत्कृतंयदर्चितंतत्सर्वंश्रीगणाधिपरूपपरब्रह्मार्पणमस्तु श्रीगुरुदेवतासमर्पणमस्तु रश्मिरूपागणेशस्यपूजितायाश्चदेवताः गणेशांगेविलीनास्ताः संतुसर्वाःसुखावहा इतिपुष्पांजलिंदत्वा ततोदंतपाशांकुशविघ्नपरशुलटुकवीजपूराख्याः सप्तमुद्राः प्रदर्श्य व्रतसमर्पणंकृत्वा ब्राह्मणेभ्यः प्रदेयभोजनसंकल्पंकुर्यात् सुवर्णमूर्तिश्चेत्तद्दानंकृत्वोद्वासयेत् फलकादावाहनंचेत्तदा विसर्जनमात्रं दानमंत्रस्तु सुवर्णनिर्मितंदेवंरक्तवस्त्रेणवेष्टितं ददाम्यहंद्विजेंद्रायप्रीयतांगणनायकः ततोविसर्जनं आयातस्त्वमुमापुत्रममानुग्रहकाम्यया पूजितोसिमयाभक्त्यागच्छस्थानस्वकंप्रभो उत्तिष्ठब्रह्मणस्पतइतिविसर्जनंकृत्वाब्राह्मणान्भोजयित्वास्वयमपिवाग्यतोभुंजीत इतिसंकष्टचतुर्थीव्रतपूजाविधिः ॥

अथकथा सूतउवाच अरण्येवर्त्तमानंतुपांडुपुत्रंयुधिष्ठिरं सभ्रातरंसुखासीनमाययौव्यासआदरात् तंदृष्ट्वा मुनिशार्दूलंव्यासंप्रत्याययौनृपः मधुपर्कंतथार्घ्यंचकृत्वातस्मैह्यवोचत युधिष्ठिरउवाच अद्यमेसफलंजन्मभवदागमनंयतः संकष्टेयेतुमेजातावनेचवनवासिनः तेसर्वेविलयंयाताभवतांदर्शनेनहि आत्मानंसाधुमन्येहंराज्यतृष्णापराङ्मुखं दुःखितंमां कथंस्वामिन्राज्यतृष्णाविचेतसं इमेभीमादयः सर्वेबांधवाव्यथयंतिमां दुराधर्षासवीर्याहिमच्छासनविधौहताइयंतुद्रौपदीसाध्वीराजपुत्रीपतिव्रता राज्यभोगोपयोग्याहिसापिदुःखोपभोगिनी मयाद्यकिंकर्तव्यंव्यासपूर्वकर्मानु

वर्त्तिना दायादैर्वंचितंराज्यंद्यूतच्छद्मरतैस्तथा पराजितावयंब्रह्मन्सुहृद्भिर्बंधुभिःसह वनंप्रस्थापितादुष्टैरित्यामुक्तंचकौरवै इत्थंनिराकृताःसर्वेतदातुवनमागताः अहंतदाप्रभृत्यात्रान्तद्रक्ष्यामिभवादृशान् यद्यस्तिव्रतमेकंहिसर्वसंकटनाशनं राज्यदंराज्यसक्तानांदुःखितानांसुखप्रदं पुराकृतंकेनभूमौफलदंदुःखनाशनं तत्सर्वंकथयब्रह्मन्नुग्राह्योस्मितेमुने इत्युक्तवंतंराजानंदुःखसंकष्टभाजनं उवाचकृपयाव्यासोधर्मपुत्रंधरापतिम् व्यासउवाच नास्तिभूमंडलेराजात्वत्समोधर्मतत्परः कथयामिव्रतंतुभ्यंशुभदंफलदंभुवि यत्कृत्वासर्वकार्य्याणांनिष्पत्तिर्जायतेभुवि यस्तुकुर्य्याद्व्रतवरंसप्राप्नोतिफलंपुमान् विद्यार्थीलभतेविद्यांधनार्थीलभतेधनं योषिद्वापिपुमान्वापिकरोतिव्रतमुत्तमं ईप्सितंफलमाप्नोतिपतिनासहमोदते संकष्टेषुसदाक्षिप्तोमानवोग्रहपीडितः सदाकुर्याद्व्रतमिदंसर्वसंकटनाशनं यत्कृत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः आसीत्पुराकृतयुगेचंद्रसेनोमहीपतिः साम्राज्यदीक्षितोनित्यंमंत्रिभिः परिवारितः सुहृद्भिर्बंधुभिश्चैवतथापुत्रैश्चसंयुतः तस्यापिहितकर्त्रीचपत्नीगुणवतीप्रिया नाम्नारत्नावतीचासीत्पातिव्रत्यपरायणा तयोःपरस्परंप्रीतिरभवच्चगुणाधिका कदाचिद्दैवयोगेनहृतंराज्यंचवैरिभिःकोशोबलंचापहृतंविध्वस्तोबंधुभिःसच रत्नावत्यातयासार्द्धंनिर्गतोभूमिवल्लभः वनंक्षुधातपक्लांतोह्येकवासास्तृषार्दितः इतश्चेतश्चविचरन्नातपक्लमितेक्षणः एकाकीवनमासाद्यतयासार्द्धंमहीपतिः तदासूर्यास्तसमयेरण्येशिवानिनादिते व्याघ्राश्चचुक्रुशुस्तत्रपर्जन्योवैववर्षह एतस्मिन्नंतरेराज्ञींकृच्छ्रेणात्यंतदुःखितां तांविलोकयनृपश्रेष्ठोदुःखेनात्यंतपीडितः ततःप्रभातसमयेमार्कंडेयंमहामुनिं ददर्शराजातत्रैवविस्मयाकृष्टमानसः उपगम्यशनैस्तत्रदंडवत्पतितोभुवि उवाचपश्चाद्भूपोसौ मार्कंडेयंमहामुनिं राजोवाच किंकृतंहिमयाब्रह्मन्दुःकृतंकथयस्वमे केनकर्मविपाकेन राज्यलक्ष्मीःपराङ्मुखी॥ मार्कंडेयउवाच शृणुराजन्प्रवक्ष्यामियत्त्वयापूर्वजन्मनि कृतंहिलुब्धक

आसीन्निर्गतस्त्वंमहावनंमृगशार्दूलशशकानद्दन्स्त्वंवनेतदा तस्यांरात्रौभ्रमन्राजाचतुर्थ्यांश्रावणस्यहि दृष्टशुभंचकृष्णायांतडागपृथुनिर्मितं तत्तीरेनागकन्यानांसमूहंरक्तवाससां गणेशंपूजयंतीनांदृष्ट्वातान्नियमशुभं उपगम्यशनैस्तत्रपृष्टवानसिपार्थिव आर्याः किमेतत्सर्वंहिकथयध्वंममाग्रतः नागकन्याउवाचपूजयामोगणेशंहिसर्वसिद्धिप्रदायकं शांतिदंपुष्टिदंनित्यंसर्वसंकटनाशनं पुनःपृष्टास्त्वयास्तास्तु किंदानंकोत्रपूज्यते कन्याउवाच यदाचोत्पद्यतेभक्तिस्तदापूज्योगणाधिपः कृष्णायांवाचतुर्थ्यांवैरक्तपुष्पैःप्रपूजयेत् गंधैःपुष्पैस्तथाधूपैर्नैवेद्यैर्भक्तिभावतः विविधान्मोदकान्कृत्वापूरिकान्घृतपाचितान् निवेदयेद्गणेशायह्येवंकुर्यात्तद्व्रतंत्विदंततोगृहीत्वाराजेंद्र व्रतंसंकष्टनाशनं निर्गतस्त्वंवनात्तस्माद्ध्यायन्देवंगणेश्वरं तत्प्रभावेणराजेंद्रगृहंलक्ष्म्यायुतंवभौ जातंहिधनधान्यादिपुत्रपौत्रैःसमाकुलं नानाविधैः रत्नगणैर्गोधनैश्चसमन्वितं कस्मिंश्चित्समयेराजन्धनलोभेनमोहितः विस्मृतोव्रतराजोहित्वयामत्तेनभूतिदः ततःप्राप्तंहिपंचत्वंत्वयाप्राणविनाशनंतत्प्रभावाद्राजकुलेजातस्त्वंविमलेनृप त्वयाजन्मप्रभृतितोराज्यंप्राप्तमिहप्रभो सुहन्मित्रश्रियायुक्तंप्राप्तंहिविपुलंवपुः कृत्वादज्ञाव्रतस्यांतेतत्प्राप्तंफलमीदृशं ॥ राजोवाच प्रभुनातत्करिष्येहव्रतंकथयसुव्रत यत्कृत्वासकलंराज्यंव्रह्मन्प्राप्स्यामिवैपुनः ॥ मार्कंडेयउवाच॥ व्रतंसंकल्पपूर्वंत्वंकुरुराजर्षिसत्तम प्राप्स्यसित्वंनिजराज्यंसंदेहंमाकुरुष्वाहि ॥ व्यासउवाच ॥ ऋषेस्तद्वचनंश्रुत्वातदाहृष्टोमहीपतिः अकरोत्तद्व्रतंभक्त्यामुनिश्चांतर्दधेनृप आयातास्तत्क्षणात्सर्वेमंत्रिणस्सहसैनिकाः वभूवतैःपरिवृतःसाक्षादाखंडलोयथा लब्धंराज्यंस्वकंयंवैगणेशस्यप्रसादतः बुभुजेमेदिनींसर्वांपुत्रपौत्रसमन्वितः तस्मात्त्वमपिराजेंद्र कुरुसंकष्टनाशनंव्रतंसिद्धिप्रदंनृणांस्त्रीणांचापिफलप्रदं यत्कृत्वासकलान्भोगाननायासेनविंदति विद्यार्थीलभतेविद्यांधनार्थीलभतेधनं योषिद्वावैपतिव्रताकरोतिव्रतमुत्तमं ईप्सितंफलमाप्नोतिपत्यासहविलासिनी कुमारी

व्रतसामर्थ्याल्लभतेपतिमुत्तमं विधवायदिवाकुर्य्याद्वैधव्यंनपुनर्लभेत् पुत्रार्थीलभतेपुत्रान्व्रतस्यास्यप्रभावतः युधिष्ठिरउवाच सविस्तरंव्रतंब्रूहिकृपयाकष्टनाशनं दानंविधिंचविधिवत्सर्वंब्रूहितपोधन॥ व्यासउवाच॥ यदासंक्लेशितोमर्त्यौनानादुःखैश्चदारुणैः तदाकृष्णचतुर्थ्यांवैपूजनीयोगणाधिपः तैलाभ्यंगंनकुर्वीतरात्रौपूजांसमाचरेत् रक्तपुष्पैश्चधूपैश्चएभिर्नामपदैःपृथक् आवाहनंगणेशायआसनंविघ्ननाशिने पाद्यंलंबोदरायेतिअर्घ्यंचंद्रार्द्धधारिणे विश्वप्रियायाचमनंस्नानंवैब्रह्मचारिणे भवानीप्रीतिकर्त्रेवधूपंदद्याद्यथाविधि गजकर्णायवैदीपंनैवेद्यमघनाशिने तांबूलंसिद्धिदायेतिफलंसंकष्टनाशिने ततोदूर्वांकुरैःपूज्यएकविंशतिसंख्यया दशभिर्नामभिर्द्वौद्वावेकंतंसर्वनामभिः गणाधिपनमस्तेस्तुउमापुत्राघनाशन एकदंतैकवक्त्रेतितथामूषकवाहन विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक कुमारगुरवेतुभ्यंपूजयामिप्रयत्नतः एवंपूजाप्रकर्तव्याप्रार्थयेद्गणनायकं संसारपीडाचकितंहिमांसदासंकष्टभीतंसुमुखप्रसीद त्वंपाहिमांमोचयकष्टसंघान्नमोनमोविघ्नविनाशनाय ततस्तुब्राग्यतोदद्यान्मोदकन्घृतपाचितान् विप्रायदशसंख्याकान्दशचात्मनियोजयेत् ततस्तुमंडलेचंद्रंसंपूज्यविधिवद्व्रती मंडलेराजतेतंडुलपिष्टेनवाराचेते चंदनालिखितेवाकांस्यपात्रेअर्घ्यंदद्यात् चंद्रात्पूर्वंगणेशायदुग्धेनार्घ्यंनिवेदयेत् पूजांजपंतथाहोमंकुर्य्यान्मूलेनमंत्रवित् श्रावणेसिद्धलड्डुकान्नभक्ष्येदधिभोजनं आश्विनेचोपवासंचकार्त्तिकेदधिभक्षकं मार्गमासेनिराहारंपौषेगोमूत्रभक्षणं तिलांश्चभक्षयेन्माघेफाल्गुणेघृतशर्करां चैत्रमासेपंचगव्यंमाधवेशतपत्रिकां घृतस्यभोजनंज्येष्ठेआषाढेमधुभक्षणं इतिमासव्रतंकृत्वानरोमुच्येतसंकटात् भुंजीयाद्वास्वयंविप्रैःसहस्वस्थस्तुसुव्रत पूर्वोक्तेनविधानेनपूजयेद्भक्तिमान्नरः चंदनेनसुगंधेनपुष्पैर्नानाविधैःशुभैः ज्योत्स्नापतेनमस्तेस्तुनमस्तेज्योतिषांपते गृहाणार्घ्यंमयादत्तंरोहिण्यासहितःशशिन् इत्यादिसप्तमंत्रैरेकेन वा चंद्रायार्घ्यंसप्तवारंदेयं नमोमंगलदीपायशिरोरत्नायधूर्जटेः कलाभिर्वर्द्धमानाय

नमश्चंद्रायचारवे इतिप्रणामःगजानननमस्तुभ्यंसर्वसिद्धिप्रदायक गृहाणार्घ्यंमयादत्तंसंकष्टंनाशयाशुमे कृष्णपक्षे चतुर्थ्यांवैपूजितोसिशुभोदये गृहाणार्घ्यंमयादत्तंममकामान्प्रपूरय ॥ अथचतुर्थ्याअर्घ्यम् ॥ तिथीनामुत्तमेदेवि गणेशस्यातिवल्लभे सर्वसंपत्प्रदेदेविगृहाणार्घ्यंनमोस्तुते एवंपूजाप्रकर्तव्याभक्त्या विप्रांश्चभोजयेत् स्वयमेवतुभुंजीतवाग्यतोबंधुभिस्सह रात्रौजागरणंकुर्य्याद्यथाशक्त्या जितेंद्रियः भूमिशायीजितक्रोधोलोभदंभविवर्जितः ॥ प्रतिमासंतुयःकुर्यात्पंचाब्दंत्र्यब्दमेववा अथवाजन्मतःकुर्य्यान्नदुःखंजायतेध्रुवं दारिद्र्यं नभवेत्तस्यसंकष्टात्सप्रमुच्यते शृण्वंतियेव्रतमिदंस्वयमीदृशंहितेवैसुखंभुविमनोरथपूर्णचित्ताः नित्यंभवंतिललनाःपुरुषैःसुखिन्यः पुत्रप्रपौत्रधनधन्ययुताःपृथिव्याम् ॥ सूतउवाच एवमुक्त्वाततोव्यासस्तत्रैवांतरधीयत युधिष्ठिरस्तुतत्सर्वमकरोद्व्रतमुत्तमं मेनेव्रतप्रभावेणधर्मोराज्यमवाप्यह हत्वारणेरिपून्सर्वान्सुहृद्बंधुजनैःसह यज्ञान्नानाविधान्कृत्वाततःसुखमवाप्तवान् प्रद्युम्नेनकृतंपश्चाद्बाणनाथस्यतोषणं कृत्वाबाणासुरंयुद्धेजयंप्राप्तोह्यधोक्षजः आसीनेह्युषयासार्द्धमनिरुद्धेमहीपते अन्यैर्देवासुरनरैःकृतंविघ्नेशतुष्टये ऋषिभिर्दानवैश्चान्यैर्यक्षगंधर्वकिन्नरैः इति भविष्योत्तरपुराणे व्यासयुधिष्ठिरसंवादे संकष्टचतुर्थीव्रतकथा॥ एवमेवप्रतिमासंसंकष्टहरणचतुर्थीव्रतं भाद्रकृष्णपक्षेबहुलाचतुर्थीव्रतं इदंचमध्यदेशेप्रसिद्धंतत्रचतुर्थीसायंकालव्यापिनीग्राह्या दिनद्वयेचंद्रोदयसत्त्वेऽसत्त्वेवपूर्वैवेति उक्तंच गौर्य्याश्चतुर्थीसितधेनुपूज्यादुर्गार्चनंदुर्भरहोलिकाच वत्सस्यपूजाशिवरात्रिरेताः परान्विताघ्नंतिनृपंसराष्ट्रमिति अत्रधेनुपूजामात्रमेवव्रतविधानं बहुलेतिश्वेतागौरेवपूज्यानान्यत्पूजादिविधानं तथाचनारदीये अथभाद्रेकृष्णपक्षेचतुर्थीबहुलाव्रतं धेनुः संपूजनीयात्रवस्त्रगंधयवादिभिः ततःप्रदक्षिणीकृत्यशक्तश्चद्दानमाचरेत् अशक्तःपुनरेनांतुनमस्कृत्याविसर्जयेत् पंचाब्दंवादशाब्दंवाषोडशाब्दमथापिवा व्रतंकृत्वासमुद्याप्यधेनुंदद्यात्

17

पयस्विनीं प्रभावेणव्रतस्यास्यभुक्त्वाभोगान्मनोरमान् सत्कृतोदेवतावृंदैर्गौलोकंसमवाप्नुयात् भाद्रकृष्णपंचम्यांमानवकल्पादि अत्रयुगांतवत्पूजाश्राद्धादिविधेयं अत्रनागानांपूजोक्तानारदीये भाद्रेतुकृष्णपंचम्यांनागान्क्षीरेणतर्पयेत् यस्तस्यांपूजयेन्नागान्कुलेतस्यास्तानिर्भरे निर्भरंनामानवच्छिन्नं भाद्रकृष्णषष्ठ्यांकुलपलाशव्रतंतत्रषष्ठीमध्याह्नव्यापिनीग्राह्या पूजाव्रतेषुसर्वेषुमध्याह्नव्यापिनीतिथिरितिस्मरणात् सखिभिःसहमध्याह्नेगत्वाचसलिलांतिकामित्यादिनाकथायांकर्मकालव्यापित्वोक्तेः दिनद्वये सत्वे ऽसत्वेवापराकुशपलाशव्रतस्यैववहुलाषष्ठीतिसंज्ञोक्ता ॥ तत्र स्कंदपूजामुपक्रम्यवहुलासितवर्णागौरेवपूज्येति अस्यामेवचंद्रषष्ठीव्रतं सायं चंद्रोदयव्यापिनी ग्राह्या उभयत्र तथात्वेपूर्वातदुक्तंभविष्ये तद्वद्भाद्रपदेमासिषष्ठ्यांपक्षेसितेतरे चंद्रषष्ठीव्रतं कुर्यात्पूर्ववेधःप्रशस्यते चंद्रोदयेयदाषष्ठीपूर्वेह्निवापरेहानि सप्तम्यामुदितेचंद्रेनार्घ्यंदद्यात्कदाचन कदाचिद्याददेन्नारी सानारीनरकंव्रजेदितिकथायामप्युक्तेरियं सर्वथापूर्वैवकार्य्या चंद्रषष्ठ्यासितेपक्षेसवोपोष्याप्रयत्नतइति अस्याः कथा भविष्योत्तरे ॥ अंवरीषउवाच ॥ देवराजकथंस्त्रीणांपातकंयातिदूरतः भुक्तिमुक्तिप्रदंब्रूहिव्रतंधर्मकरंपरम् ॥ इंद्रउवाच ॥ पुराकृतयुगस्यादौदेवर्षिर्नारदोऽभवत् तेनपृष्टोमहीपालब्रह्माब्रह्मविदांवरः ॥ नारदउवाच ॥ रौरवेणांधतमसात्रैलोक्यंपरिवेष्टितं तपोदानंचहोमंचव्रतं किंचित्प्रकाशय येनासौमुच्यतेजंतुर्नरकात्पापसंभवात् नरोवायादिवानारीतद्व्रतंकथयस्वमे ॥ ब्रह्मोवाच ॥ शृणुवत्सपरंगुह्यंव्रतानामुत्तमंव्रतं निश्चितंसर्वधर्मेषुमहापापप्रणाशनं विदेहनगरेरम्येचतुर्वर्णसमाकुले गृहप्राकारशोभाढ्येवेदिचत्वरमंडिते गृहधर्मेणसंयुक्तायत्रनार्योनरैःसह भृगुवंशेसमुत्पन्नोब्राह्मणोवेदपारगः ऋषिस्तत्रैवनगरेह्यवसद्धर्मवित्तमः एकदातस्यचपितुः क्षयाहःसमुपागतः प्रातःपाकःप्रकर्तव्यस्त्वयापूतांतरात्मना

व्यंजनादीनियत्किंचित्कर्तव्यंघृतसादितं एतदुक्तंस्वाप्रियापैतथेत्यंगीकृतंतया संध्याकालेचतेनैवाद्विजाश्चामंत्रितास्तथा रात्रौदैववशात्साथसंबभूवरजस्वला आत्मानंरजसाक्रांतंनाज्ञासीत्साद्विजांगना रजसाक्रांतयासर्वंकृतंतद्व्यंजनादिकं तेनकर्मप्रचारेणदेवताःपितरस्तथा निः श्वासमुष्णमुन्मुच्य निराशानिर्गतास्तथा अथकालेनसंप्राप्ताकेनचिन्मृत्युगोचरं तेनदोषेणसानारी चंडालीयोनिमागता मृतभार्य्यस्त्वसौविप्रोनिजकर्मरतः सदा सुताःपंचगृहेतस्यगृहकर्मरताः सदा श्वपचस्यगृहेजाताब्राह्मणीपापसंयुता जातिस्मराभवत्सातु पातिव्रतप्रभावतः जाताचंडालभवनेवर्द्धतेस्मादिनेदिने अष्टवर्षायदाजातागतासापतिमंदरं देवार्चनविदेरंतेगृहद्वारेह्युपस्थिता त्रियामादिनशेषेतुवैश्वदेवंप्रकुर्वता बलिंचददतासम्यग्वायसेभ्योद्विजन्मना तस्मिन्कालेतुसंप्राप्तातस्यास्तुमुखदर्शनात् हाहाकारःकृतस्तेनसूर्यस्यचनिरीक्षणं स्मरणंवासुदेवस्यभोजनंचविवर्जितं पुनःस्नानंकृतंतेनदानंदत्तंचशक्तितः त्रिरात्रोपोषणंकृत्वाचतुर्थेऽहनिपारणं चतुर्थेऽह्निपुनःप्राप्तामातंगस्यचकन्यका मातंगस्यगृहेगत्वाब्राह्मणस्यसुतस्तदा तमब्रवीत्समातंगंकुपितोवीक्ष्यसंगमात् किमर्थमागतापुत्रीतवास्माकंचवेश्मनि अवदत्तत्रमातंगःसंगृह्णामीहपुत्रिकां तूर्णंगृहंव्रजस्वामिन्प्रसादंकुरुमेप्रभो द्वितीयेदिवसेतत्रमातंगीपुनरागता कुपिताब्राह्मणाः सर्वेमातंगस्यचकन्यकां तत्पित्रेकथयामासुर्मातंगः पुनराहतान् त्रायध्वंमांद्विजाः सर्वेकिंकरोमिसुतांप्रति इत्युक्त्वागृहमागत्यकोपेनाविष्टचेतनः रज्जुभिः सादृढंबद्धाताडितालगुडेनह मुक्तासादिवसस्यांते मातंगेनदुरात्मना रात्रौस्वप्नेगतापुत्रंकिंसुप्तोसिभवान्सुत आगताहंतुजननीमहत्कष्टंसमाश्रिता ॥ पुत्रउवाच ॥ वदमातः कथंकष्टंसांप्रतंतववर्त्तते केनकर्मविपाकेनमातंगीयोनिमागता ॥ मातोवाच ॥ तवद्वारेस्थितातत्र मातंगस्यचकन्यका तांमांविद्धिस्वकर्मार्तांविषमांगतिमास्थितां सहितापितृवंशेनगताचंडालतामहं स्त्रीधर्म

मविजानंत्याकृतंकर्ममयागृहे तेनकर्मविपाकेननरकेपतितास्म्यहं तथाकार्यंत्वयापुत्रयथाहंमोक्षमाप्नुयां इति तस्यावचःश्रुत्वातत्सुतःशोककर्षितः शास्त्रंविलोक्यतेनैवगौरीसंवादमीक्षितं व्रतंचंदनषष्ठ्याख्यंशोकमोहप्रणाशनं मातुर्विमोचनायैवचकारविधिपूर्वकं नभस्यस्यासितपक्षेयदाषष्ठीचलभ्यते तस्यामुपोषणंकार्य्यंचंद्रमालोक्य भोजनं रक्तचंदनलेपेन लिखेत्सूर्य्यससोमकं गंधैःपुष्पैस्तथाधूपैर्दीपनैवेद्यसंयुतैः मनोरमैश्चविविधैः पूजयेत्सुसमाहितः कथानकंचश्रोतव्यंब्राह्मणान्परिभोजयेत् चंद्रोदयेसदादद्यादर्घ्यंचैवफलैःशुभैः सप्तम्यामुदितेचंद्रे नार्घ्यंदद्यात्कदाचन कदाचिद्याददेन्नारीसाध्रुवंनरकंव्रजेत् चंद्रायार्घ्यदानमंत्रः ॥ क्षीरोदसागराज्जातह्यात्रिनेत्रसमुद्भव गृहाणार्घ्यमिमंदेवनमोस्तुरजनीपते अनेनविधिनातेनविप्रेणैतद्व्रतंकृतं तेनपुण्यप्रभावेणगतोसौमोक्षमव्ययंएतच्चंदनषष्ठ्याख्यंव्रतंस्वर्गप्रदंनृणां गोशतस्यप्रदानेनयत्फलंप्राप्नुयान्नरः तत्फलंसमवाप्नोतिव्रतमेतत्करोतियःसंवत्सरकृतंपापंस्त्रीणांनश्यतितत्क्षणात्शुद्धदेहाभवेन्नारीव्रतमेतत्समाचरेत् चंद्रलोकेवसेन्नित्यंयावच्चंद्रदिवाकरविति भविष्योत्तरे ब्रह्मोक्तंचंद्रषष्ठीव्रतकथानकम् ॥ अथव्रतविधिः॥ पूर्वदिनेनिरामिषमेकवारंहविष्यभोजनंकुर्य्यात् व्रतदिनेप्रातःसंकल्पंकुर्यात् ॐमद्यात्मनोज्ञातरजोभावकृतपाकादिसंपर्कजपापक्षयपूर्वकचंद्रलोकप्राप्तिरूपमोक्षकामनयाचंद्रषष्ठीव्रतंकरिष्येततोनद्यादौगत्वापंचगव्यसहितेनजलेनस्नानं तत्रमंत्रः आपस्त्वमपिदेवेशज्योतिषां पतिरेवच पापंनाशयदेवेशिमनोवाक्कायकर्मजं इतिसूर्यायनमस्कारः ॥ पंचपल्लवैर्मार्जनंकृत्वा ततोमृत्तिकयास्नानं मृत्तिकेब्रह्मपूतासिकश्यपेनाभिमंत्रिता पवित्रीकुरुमांनित्यंसर्वपापात्समुद्धर ततोवरुणंप्रार्थयेत् पाशग्रहस्त्वं वरुणनदीनामीश्वरप्रभो अद्याहंप्रार्थयामित्वांपूतंकुरुमहेश्वर इत्येवंस्नात्वा ॥ तिलकंविधाय सूर्यायरक्तचंदनाक्षतपुष्पैरर्घ्यंदद्यात् नमोविवस्वतेब्रह्मन्भास्वतोविष्णुरूपिणे जगत्पवित्रेशुचयेसवित्रेकर्मसाक्षिणे इत्यर्घ्यंदत्त्वा।

व्र०र०
भाद्रप०
९

सदालापपूजाकीर्त्तनादिभिर्दिनंसमाप्यरात्रौचंद्रोदयेचंद्रायार्घ्यंदद्यात् श्वेतचंदनपुष्पफलाक्षतयुतमर्घ्यंपात्रमादाय क्षीरोदसागरोद्भूतह्यात्रिनेत्रसमुद्भव गृहाणार्घ्यमिमंदेवनमस्तेरजनीपतेइत्यर्घ्यंदत्त्वा निरामिषमक्षारलवणं भोजनं कुर्यादितिव्रताविधिः ॥अथोद्यापनं ॥यथोक्तलक्षणमंडपंवेदिकांवाविधाय तत्रोद्यापनसंभृतिमादाय संकल्पंकुर्य्यात् ॐअद्याहमात्मनोज्ञाताज्ञातरजोभावकृतपाकादिपंचकजनितपापक्षयपूर्वकचंद्रलोकप्राप्तिरूपमोक्षकामनयायथाकालसमाचरितचंद्रषष्ठीव्रतोद्यापनंकरिष्ये ततआचार्यवरणादिग्रहमंडलसर्वतोभद्रमंडलपूजासामान्यपद्धतिक्रमंविधाय सर्वतोभद्रस्थकलशेव्रताधिष्ठातृदेवताप्रतिमांसंस्थाप्यपूजामारभेत् द्विभुजंपंकजारूढंसदाप्रहसिताननं निष्पादितंशिल्पिनाचतस्मिन्नेवदिनेपुनः ॥ अथध्यानम् ॥ ध्येयःसदासवितृमंडलमध्यवर्ती नारायणःसरसिजासनसन्निविष्टः केयूरवान्कनककुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः ॥ १ आगच्छदेवदेवेशतेजोराशेजगत्पते गृहाणार्घ्यंमयादत्तंकृपयापरमेश्वर ॥ इत्यावाहनं नानारत्नसमायुक्तंकांतस्वरविभूषितं आसनंदेवदेवेशप्रीत्यर्थंप्रतिगृह्यतामित्यासनं ॥ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां इतिपाद्यम् ॥ नमस्तेदेवदेवेशनमस्तेधरणीधर नमस्तेकमलाकांतअर्घ्यंनःप्रतिगृह्यतामित्यर्घ्यं कर्पूरवासितंतोयंमंदाकिन्यास्समाहृतं आचम्यतांजगन्नाथमयादत्तंसुभक्तितइत्याचमनं पंचामृतंसमानीतंपयोदधिघृतंमधु शर्करारससंयुक्तंस्नानार्थंप्रतिगृह्यतामितिपंचामृतस्नानं गंगाचयमुनाचैवनर्मदाचसरस्वती तापीपयोष्णीरेवाचताभ्यःस्नानार्थमाहृतं तोयमेतत्सुखस्पर्शंस्नानार्थंप्रतिगृह्यतां ॥ इतिशुद्धस्नानं ॥ सर्वभूषाधिकेदेवलोकलज्जानिवारणे मयोपपादितेदेववाससीप्रतिगृह्यतां ॥ इतिवासोयुगं ॥ देवदेवनमस्तेस्तुत्राहिमांभवसागरात् ब्रह्मसूत्रंसोत्तरीयंगृहाणसुरसत्तम ॥ इतियज्ञोपवीतं ॥ श्रीखंडचंदनंदिव्यंगंधाढ्यंसुमनोहरं विलेपनंसुरश्रेष्ठ

प्रीत्यर्थंप्रतिगृह्यता ॥ मितिगंधं ॥ अक्षताधवलाः श्रेष्ठाः कुंकुमाक्ताः सुशोभनाः भक्त्यामयार्पिता देवपूजार्थं प्रतिगृह्यतां इत्यक्षताः मल्लिका मालती जाती केतकी चंपकानिच मयाहृतानिदेवेशपूजार्थंप्रतिगृह्यतां इतिपुष्पाणि वनस्पतिरसोदिव्योगंधाढ्यःसुमनोहरः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां इतिधूपः आज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहं इतिदीपम् इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि इतिफलं पूगीफलंमहादिव्यंनागवल्लीदलैर्युतं खदिरासारसहितंप्रीत्यर्थंप्रतिगृह्यतां इतितांबूलं हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोःअनंतपुण्यफलदमतःशांतिंप्रयच्छमे इतिदक्षिणा चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच सर्वेषांज्योतिषांज्योतिर्दीपोयंप्रतिगृह्यतां इतिनीराजनं नमस्तेपुंडरीकाक्षनमस्तेस्तुरमाप्रिय नमस्तेकमलाकांतवासुदेवनमोस्तुते इतिपुष्पांजलिःयानिकानिचपापानिजन्मांतरकृतानिच तानिसर्वाणिनश्यंतिप्रदक्षिणापदेपदे इतिप्रदक्षिणं अर्घ्योयंगृह्यतां देवभक्तिंमेह्यचलांकुरु व्रतंमेपूर्णतांयातुसकलाःस्युर्मनोरथाः इतिपुष्पफलाक्षतमर्घ्यप्रदानं कुर्यात् नमः सर्वहितार्थायजगदाधारहेतवे साष्टांगोयंप्रणामस्तेप्रयत्नेनमयाकृतः इतिसाष्टांगप्रणामः आवाहंनैवजानामिनैवजानामिपूजनं विसर्जनंनजानामित्वंगतिःपरमेश्वरइतिप्रार्थना ततः कलशेषुमासदेवतानांपूजनं ताश्चभाद्रपदमारभ्यात्रपूजनीयाः ओंभगवतेयोगीश्वरायप्राकम्यासहितायनमः इतिगंधादिभिः संपूज्य प्रार्थनांकुर्यात् मासिभाद्रपदेपापमज्ञानाद्ज्ञानतःकृतं प्राकाम्यासहितस्तस्मात्पातुयोगेश्वरःप्रभुः १ ओंभगवतेपुंडरीकाक्षायलघिमासहितायनमः आश्विनेमासियत्पापमज्ञानाद्ज्ञानतःकृतं तस्मान्मांपुंडरीकाक्षोलघिमासहितोवतु २ ओंभगवतेकृष्णायरुक्मिणीसहितायनमः कार्तिकेमासियत्पापमज्ञानाद्ज्ञानतःकृतं तस्मात्त्वंभगवन्कृष्णरुक्मिण्यासहपा

22

व्र०१०
भाद्रप०
१०

हिमां३ ओंभगवतेमोहिनीसहितायअनंतायनमः मार्गशीर्षेकृतंपापंज्ञानादज्ञानतोयतः मोहिनीसहितोनंतभगवन्पाहिमांसदा ४ ओंभगवतेअच्युतायप्रीतिसहितायनमः पौषेमासिकृतंपापमज्ञानाद्ज्ञानतोपिवा प्रीत्यासहाच्युतोदेवस्तस्मान्म पातुसर्वदा ५ ओंभगवतेचक्रिणेशांक्तेसहितायनमः माघेमासिमयापापमज्ञानाद्ज्ञानतोपिवा कृतंतस्मान्मांपुनातुचक्रीशक्त्यासमन्वितः ६ ओंभगवतेगोविंदायक्रियासहितायनमः फाल्गुनेमासियत्पापमज्ञानाद्ज्ञानतोपिवा तस्मात्क्रियायुतोदेवोगोविंदोमांसदावतात् ७ ओंभगवतेजनार्दनायश्रीसहितायनमः चैत्रेमासिमयापापमज्ञानाद्ज्ञानतोपिवा कृतंजनार्दनस्तस्माच्छ्रीसमेतोवतात्सदा ओंभगवतेउपेंद्रायमहिमासहितायनमः वैशाखेमासियत्पापमज्ञानाद्ज्ञानतः कृतं तस्मान्मांमहिमायुक्तउपेंद्रोवतुसर्वदा ९ ओंभगवतेयज्ञपूरुषायलक्ष्मीसहितायनमः ज्यैष्ठेमासिमयापापमज्ञानाद्ज्ञानतःकृतं तस्माल्लक्ष्मीसमेतोऽव्यात्सर्वदायज्ञपूरुषः १० ओंभगवतेवासुदेवायकांतिसहितायनमः आषाढेमासियत्पापमज्ञानाद्ज्ञानतःकृतं तस्मात्कांतिसमायुक्तोवासुदेवःपुनातुमं। ११ ओंभगवतेप्राप्तिसहितायहरयेनमःश्रावणेमासियत्पापमज्ञानाद्ज्ञानतोपिवातस्मात्प्राप्तिसमायुक्तोहरिर्मांसर्वदावतु १२ ओंभगवतेकेशवायह्रीसमेतायनमः मलमासेपियत्पापमज्ञानाद्ज्ञानतःकृतं तस्मान्मांकेशवोदेवोह्रीसमेतोवतात्सदा १३ ॥ इतिव्रताधिष्ठातृयज्ञपुरुषपूजा ॥ अथतत्रैव ॥ ताम्रपात्रेघटेवा द्वादशारं पद्मंविधाय तत्रसौवर्णंसूर्यबिंबंपूजयेत् पूर्वादिदलमारभ्य ओंभगवतेआदित्याय प्रभासहितायनमः इतिमार्गशीर्षमारभ्यान्यव्रतेपूजा ॥ ॥ अथभाद्रपदमारभ्यैवपूजाकार्या ओंभगवतेयमायसंयमनीसहितायनमःमासिभाद्रपदेपापंदिवायच्चरितंमया तस्मात्संयमनीयुक्तोयमोमांपारिरक्षतु १ ओंभगवतेत्वष्ट्रेपद्मगर्भासहितायनमः आश्विनेयद्दिवापापमज्ञानाद्ज्ञानतःकृतं पद्मगर्भासमेतोमांत्वष्टातस्मात्सदावतु २ ओंनमोभगवतेस्वर्पतयेस्वर्ग

तिसहितायनमः कार्तिकेमासियत्पापमज्ञानाद्ज्ञानतःकृतं तस्मान्मांस्वर्पतिर्देवःस्वर्गत्यासहितोवतु २ ॐभगवतेआदित्यायप्रभासहितायनमः मार्गशीर्षेदिवापापमज्ञानाद्ज्ञानतःकृतं तस्माच्चप्रभयासाकमादित्योहिपुनातुमां ३ ॐभगवतेदीप्तिसहितायरवयेनमःपौषेमासिदिवापापमज्ञानाद्ज्ञानतःकृतं तस्मान्मांदीप्तिसहितःपुनातुभगवान्रविः ४ ॐभगवतेगभस्तयेप्रकाशासहितायनमः माघेमासिदिवापापमज्ञानाद्ज्ञानतोपिवा तस्मात्प्रकाशयासार्द्धंगभस्तेत्वंपुनीहिमां ५ ॐभगवतेभानवेमरीच्यासहितायनमः फाल्गुनेयद्दिवापापमज्ञानाद्ज्ञानतः कृतं तस्मान्मरीच्यासहितोभानुर्मांसर्वदावतु ६ ॐभगवते प्रभाकराय तपत्यासहितायनमः चैत्रेपियद्दिवापापमज्ञानाद्ज्ञानतोपिवा तस्मात्प्रभाकरोदेवस्तपत्यासहितोवतु ७ ॐभगवतेदिवाकरायपद्मिनीसहितायनमः वैशाखेमासियःपापमज्ञानाद्ज्ञानतःकृतं तस्माद्दिवाकरोदेवःपद्मिन्यासहितोवतात् ८ ॐभगवतेधर्मायहव्यवाहासमेतायनमः ज्यैष्ठेमासिदिवापापमज्ञानाद्ज्ञानतोपिवा हव्यवाहासमेतोमांतस्माद्धर्मः सदावतु ९ ॐभगवतेतपनायतेजोवतीसहितायनमः आषाढेमासियत्पापमज्ञानाद्ज्ञानतःकृतं तेजोवत्यासमेतोवैतस्मान्मांतपनोवतु ११ ॐभगवतेवरुणायसत्यभामासहितायनमः श्रावणेमासियत्पापमज्ञानाद्ज्ञानतःकृतं तस्मात्पुनातुमांवरुणस्संयुतस्सत्यभामया १२ ततः श्वेतचंदनेन कांस्यपात्रे द्वादशपत्रं पद्मंनिर्मायतत्रराजतंचंद्रबिंबंनिधायपूजांकुर्यात् ॐभगवतेद्विजराजायपूर्वाभाद्रपदासहितायनमः मासिभाद्रपदेपापमज्ञानाद्ज्ञानतः कृतं पूर्वाभाद्रपदायुक्तोद्विजराजोवतात्ततः १ ॐभगवतेविधवेआश्विनीसहितायनमः मासिचाश्वयुजेपापमज्ञानाद्ज्ञानतःकृतं विधुर्मांभगवांस्तस्मादाश्विन्यासहितोवतु २ ॐभगवतेकुंजराधरायकृतिकासहितायनमः कार्तिकेमासियत्पापमज्ञानाद्ज्ञानतः कृतं तस्मान्मांकृत्तिकायुक्तः पुनातुकुंजराधरः ३ ॐभगवतेमृगांकाय मृगशी

र्षान्वितायनमः मार्गशीर्षेमयापापमज्ञानाद्ज्ञानतः कृतं तस्मान्मृगशिरोयुक्तमृगांकत्वंपुनीहिमां ४ ॐभगवतेसुधांशवेपुष्यसहितायनमः पौषेमासिचयत्पापमज्ञानाद्ज्ञानतःकृतं तस्मात्सुधांशुर्भगवान्पुष्ययुक्तःपुनातुमां ५ ॐभगवतेइंदवेमघासहितायनमः माघेमासिचयत्पापमज्ञानाद्ज्ञानतःकृतं तस्मान्मघासमायुक्तइंदुर्मामवतात्सदा ६ ॐभगवतेकुमुदबांधवायपूर्वाफाल्गुणीसहितायनमः फाल्गुणेमासियत्पापमज्ञानाद्ज्ञानतःकृतं तस्मात्पूर्वाफाल्गुणीतःपायात्कुमुदबांधवः ७ ॐभगवतेचंद्रायचित्रासहितानमः चैत्रेमासिचयत्पापमज्ञानाद्ज्ञानतःकृतं चित्रयासंयुतस्तस्मान्मांचंद्रःसर्वदावतु ८ ॐभगवतेऔषधीशायविशाखासहितायनमः वैशाखेमासियत्पापमज्ञानाद्ज्ञानतःकृतं तस्माद्विशाखासहित ओषधीशःपुनातुमां ९ ॐभगवतेनिशाकरायज्येष्ठासहितायनमः ज्येष्ठमासिमयापापमज्ञानाद्ज्ञानतःकृतं तस्मान्निशाकरोदेवोज्येष्ठयासहितोवतु १०. ॐभगवतेसुमनसेपूर्वाषाढासहितायनमः आषाढेमासियत्पापमज्ञानाद्ज्ञानतःकृतं तस्मान्मांसुमनादेवः पूर्वाषाढायुतोवतु११ ॐभगवतेहिमांशवेश्रवणसहितायनमः श्रावणेमासियत्पापमज्ञानाद्ज्ञानतोपिवा हिमांशुर्भगवांस्तस्मात् श्रवणेनयुतोवतात् १२ ॐभगवतेपुरुषोत्तमायशांतिसहितायनमः मलिम्लुचेचयत्पापमज्ञानाद्ज्ञानतःकृतं यःस्यात्शांतिसमायुक्तःपातुमांपुरुषोत्तमः १३ ततःषष्ठीतिथिःपूज्या इत्येवंपूजांविधाय स्तोत्रपाठादिनाहःशेषंनीत्वारात्रौजागरणंकथाश्रवणादिकंचविधाय प्रातःस्नात्वा मंडलदेवतापूजां विधाय गृह्योक्तविधिना ग्निस्थापनं विधाय ब्रह्मणोवरणंचकृत्वा अन्वाधानांतमग्निकार्यं यथाविधि कुर्यात् ततोमंडलदेवतामंत्रैर्ग्रहमंत्रैश्चहोमंसंपाद्य इदं विष्णुरितिमंत्रेणाष्टोत्तरशतमाहुतीः पायसाज्यद्रव्येण तैलाज्यद्रव्येण आकृष्णेनेतिमंत्रेणाष्टोत्तरशताहुतीर्हुत्वा पुनःपायसाज्यद्रव्येणाप्यायस्वेतिचंद्रमंत्रेण हुत्वा ततः सकलहोमशेषं समाप्य स्विष्टकृद्धोमांते अभिषेकं

पूर्णाहुतिंचकृत्वा आचार्यंसंपूज्य सर्वतोभद्रस्थकलशप्रतिमादिकंपीठंचाचार्यायदत्वा व्रतपूर्त्तये शय्यादानं गोदानंच विधाय यथाशक्तिब्राह्मणान्सदन्नदक्षिणादिभिःसंतोष्याशिषोगृहीत्वा भूयसींदक्षिणां दत्वेष्टजनैःसहभुंजीतइतिसोद्यापनंचंद्रषष्ठीव्रतम् अथशुक्लादि-श्रावणमासिकृष्णसप्तम्यांशीतलाव्रतं तच्च मध्याह्नव्यापिन्यां कार्य्यम् तथाच माधवीये हारीतः पूजाव्रतेषुसर्वेषुमध्यान्हव्यापिनीतिथिरिति अथव्रतविधिः मासपक्षाद्युल्लिख्य ममावैधव्यदारिद्र्याभावभर्तृवियोगनिरसनपूर्वकबाधानिवृत्त्यर्थं शीतलाव्रतंकरिष्ये तथाच मिलितोपचारैः शीतलांपूजयिष्ये इतिसंकल्पं विधाय कलशं संस्थाप्य तदुपरिशीतलां पूजयेत् ॥ तत्रध्यानं ॥ वंदेहं शीतलांदेवींरासभस्थांदिगंबरां मार्जनीकलशोपेतांसूर्पालंकृतमस्तकां कुंभसंस्थःपयेद्देवींपूजयेन्नाममंत्रतः शीतलेदहमेपापंपुत्रसौख्यफलप्रदे धनधान्यप्रदेदेविपूजांगृह्णनमोस्तुते इतिसंप्रार्थ्य शीतलेशीतलाकारेअवैधव्यसुतप्रदं श्रावणस्यासितपक्षेअर्घ्यंगृह्णनमोस्तुते इत्यर्घ्यंदद्यात् शीतलेत्राग्निपक्वानिदध्नाचैवान्वितानिच नैवेद्यंसर्वाप्रकुर्वीतघृतमिश्रंचसुंदरि कुमारीःसुभगाःसप्तपूजनीयाःप्रयत्नतः इतिपूजाविधिः ॥ अथ कथा हेमाद्रौभविष्यत्पुराणे श्रीकृष्णउवाच प्रसिद्धंश्रूयतांरम्यंनगरंहस्तिनापुरं इंद्रद्युम्नश्चराजाभून्नृपतिलोकपालकः धर्मकर्मविधानायतस्यभार्यायशस्विनी क्रियानाम्नीचसासाध्वीदानशीलाप्रियंवदा बभूवप्रथमःपुत्रोमहाधर्मेतिनामतः वर्द्धतेपितृवात्सल्यात्कालेकन्यामजीजनत् द्वितीयाचतथापुत्रीतस्याजातागुणोत्तमा पुत्रीलक्षणसंपन्नाशुभकारीतिनामतः वर्द्धतेसापितुर्गेहेसर्वांगगुणसुंदरी नाम्नारूपेणसाबालासर्वोत्तमगुणाधिका सामुद्रिकगुणोपेतापद्महस्ताप्रियंवदा वरांहिदेहमानेनलक्ष्मीवान्रूपवान्गुणैः समाययौचजग्राहपाणिग्रहणपूर्वकं कदाचित्सापितुर्गेहेजामात्रानयनायच आजगामपरिजनैःस्वपुत्र्यानयनोत्सुका प्रणम्यचापितुःपादौत्व

ब्र०१०
भाद्रप०
१२

रितंचारुहासिनी तत्पुत्रीनयनायापिजामाताकृतविग्रहः ततःसाकन्यकाप्रीतापितरंवाक्यमब्रवीत् रथमारुह्यहेतातयास्यामिस्वपुरेगृहं तस्याःपितेत्युवाचेदंदंपत्योःशुभहेतवे पुत्रित्वंसुस्थिराभूत्वादिनमेकंवदस्वमे कन्योवाच ताततन्नपरिज्ञातंयदुक्तंपद्मयोनिना पातिव्रत्यसमोधर्मोनास्तीहभुवनत्रये करिष्यामिव्रतंयच्चत्वयोक्तमतिशोभनं ततस्तांकारयामासशीतलाव्रतमुत्तमं पुत्रींचप्रेषयामासब्राह्मणोवेदपारगः व्रतोपकरणेपुत्रीमार्गेप्राप्तासरोवरं शीतलापूजनाद्धेतोर्गतासाध्वीसरोवरं तत्रदृष्ट्वातदामोहात्तडागंविधिसाधनंवभ्रामसावनेशून्येस्मरंती शीतलाव्रतं अतिश्रांताययौमोहाद्भयेनविपिनंमहत् स्मरंतीशीतलांवृद्धांनारीरूपांददर्शसा सुवासिनिविजानीहिसाध्वींमांवरवर्णिनि भविष्यतिचिरंजीवीभर्त्तातेभर्तृवत्सले आगच्छपूजनार्थायदर्शयामिसरोवरं तयासहगतासाध्वीतडागंविधिपूर्वकं पूजयामासशर्वाणींतोषयामासशीतलां पूजयित्वाचतांदेवींसुपथंगंतुमुद्यता शीतलायावरंगृह्यसहसख्याचप्रस्थिता ययौसाददृशेरण्येस्वभर्त्ताकिंनुवक्ष्यति सरोवरंसमायातोन्वेषयन्शीतविग्रहः ब्राह्मणोनिद्रयासुप्तःपूर्वकर्मस्वभावतः दष्टोभुजगरूपेणसंयुक्तःपूर्वकर्मणा दृष्ट्वापतिंविषहतंशीतलायाःपतिव्रता वरंसंगृह्यशालायांरुरोदकरुणंबहु तयोस्तरुणदंपत्योर्भाग्यसौभाग्यदर्शनात् रुदंतीकरुणंवालायाचयामासतद्व्रतं यावत्तुपरलोकायजनसंघैःसुसंस्कृते कृशाणौतुसहैवात्रगंतुमिच्छामिवाह्निना तस्मात्साहंप्रवेक्ष्यामिपावकंपतिनासह अर्जयिष्येसुखंदिव्यमक्षयंयद्भवांतरे तावद्ददर्शतांदेवींशीतलांवरदांशुभां शीतलोवाच ॥ वत्सेकिमिदमित्युक्तंनश्रुतं वरवर्णिनि शीतलाव्रतकारिण्यावैधव्यंनैवजायते स्वयमुत्थाप्यकल्याणिपतिसुप्तंगृहंनय बोधयाशुत्वयाचीर्णं व्रतंवैधव्यनाशनं इत्युक्ताबोधयामासभर्त्तारंसापतिव्रता तथेत्युत्थायतद्भर्त्तामृतोजीवमवाप्यच भर्त्तापिमुदितांदृष्ट्वातांप्रियांप्रीतकर्मणा दृष्ट्वातुमहदाश्चर्यंतद्ग्रामस्थायिनोजनाः सर्वेतेविस्मयंजग्मुर्ब्राह्मणैःपरिवारिताः ब्राह्मणी

हार्षितांदृष्ट्वाप्रणिपत्यपतिव्रता याचयामाससमाभूयोवैधव्यंचावियोगिता अन्यापिशीतलायास्तुनव्रंनारीकरिष्यति अवैधव्यमदारिद्र्यमवियोगंस्वभर्तृतः इत्युक्त्वांतर्दधेदेवीशीतलाकामरूपिणी शीतलायावरंलब्ध्वाजगामाथस्ववेश्मनि पद्मानिवासप्रभविष्णुवंद्या समर्हणासाधितसर्वमंगला प्रसादमासाद्यचशीतलयानित्योत्सवापार्वतिवद्बभूव इतिभविष्योत्तरेशीतलासप्तमीव्रतं अथशीतलामंत्रजपविधिर्भैरवतंत्रे अस्यश्रीशीतलादेवीमंत्रस्यउपमन्युऋषिः बृहतीछंदः श्रीशीतलादेवता ओंबीजं ह्रींशक्तिः श्रींकीलकंश्रीशीतलादेवीप्रीत्यर्थेजपेविनियोगः अथन्यासः ऋषिः शिरसि छंदोमुखे देवताहृदि बीजंगुह्ये शक्तिः पादयोः कीलकंनाभौ विनियोगः सर्वांगे व्यापकत्वेनन्यस्तव्यः अथकरषडंगन्यासः ह्रांश्रां १ ह्रींश्रीं २ ह्रूंश्रूं ३ ह्रैंश्रैं ४ ह्रौंश्रौं ५ ह्रःश्रः ६ ॥ ध्यानम् ॥ दिग्वाससंमार्जनिकांचसूर्पंकरद्वयेसंदधतींत्रिनेत्रां श्रीशीतलांसर्वरुजांप्रशांत्यैरक्तांगरागस्रजमर्चयामि १ ओंह्रींश्रींशीतलायैनमः इतिदशलक्षंजपेत् पायसेनदशांशहोमः तद्दशांशेनतर्पणं तद्दशांशेनमार्जनं कुमारीविप्रभोजनंचकार्यं विस्फोटकशांतिर्भवति अस्याःपूजायंत्रं अष्टदलं पद्मं चतुर्द्वारोपेतंविरचय्य कर्णिकायाषडंगानिसंपूज्य मध्येमूलेनशीतलांदेवींसंपूज्य पत्रेष्वेतादेवताःपूजयेद्यथा ओंह्रींश्रींसुनंदायाः श्रीपादुकांपूजयामिनमः १ ओंह्रींश्रींचंडिकायाःश्रीपा. २ ओंह्रींश्रींसुमालायाःश्रीपा. ३ ओंह्रींश्रींसुधालायाः श्रीपा. ४ ओंह्रींश्रींमदविह्वलायाःश्रीपा- ५ ओंह्रींश्रींआमोदायाःश्रीपा. ६ ओंह्रींश्रींप्रमोदायाःश्रीपादु- ७ ओंह्रींश्रींसुखदायाःश्रीपा. ८ चतुरस्रेषुद्वारेषुच इंद्रादीन् ८ पूजयेत् तद्बाह्ये वज्रादीनिआयुधानि ८ पूजयेत् अथमंत्रांतरमुच्यते ओंह्रींतंनमःशीतलायैविस्फोटकान्विनाशय- २ वातंछेदय. २ दाहंस्तंभय २ ओंह्रींतंनमः शीतलायैस्वाहा ४८ इत्यनेनमंत्रेणापिजपोयथाशक्तिकार्यःअथशीतलावाहनस्यनामानि रासभोगर्दभश्चैवखरो

वैशाखवाहनः शीतलावाहनंचैवदूर्वाक्रंदननंदनः एतानिखरनामानिशीतलाग्रेतुयःपठेत् तस्यदेहचगेहेचशीतलारु
क्नजायते अथशीतलाकवचंभैरवतंत्रे देव्युवाच भगवन्सर्ववेत्तात्वंलोकानांहितकारकाः देवादिदेवदेवेशस
र्वलोकनमस्कृतः श्रीमान्सर्वकलाभिज्ञः सर्वतंत्रविचक्षणः देव्याःश्रीशीतलायाश्च कवचंब्रूहिभैरव ईश्वरउ
वाचशृणुदेविप्रवक्ष्यामिरहस्यंसुरदुर्लभं कवचंशीतलादेव्याजगन्मंगलकाभिधम् पठनाद्धारणाद्यस्यशुभंभवतिस
र्वतः श्रीजगन्मंगलस्यास्यकवचस्यऋषिः शिवः छंदोनुष्टुप्समाख्यातंदेवताशीतलेरिता लक्ष्मीर्बीजंपराश
क्तिःकामराजस्तुकीलकं बालानांदेविरक्षार्थं विनियोगःप्रकीर्तितः ॐअस्यश्रीशीतलादेवीकवचराजस्यसदा
शिवऋषिरनुष्टुप्छंदः श्रीशीतलादेवीदेवता श्रींबीजं ह्रींशक्तिः क्लींकीलकं बालानांविस्फोटकरोगशांतये
पाठेविनियोगः ॥ ध्यानं ॥ उद्यदिंदुवदनांचतुर्भुजांशक्तिपाशपरिघांकुशायुधां हारिणींशवगतांसितांवरांशी
तलांभगवतींहृदिस्मरेत् एवंध्यात्वाकवचंपठेत् ॐह्रींश्रींशुभंकरीपातुमस्तकंचंद्रशीतला ललाटंसुकुमारां
गीभ्रुवौब्रह्मांडचारिणी नेत्रेमेपातुमातंगीश्रुतीमेछिन्नमस्तका नासांमेपातुचामुंडा पायादोष्ठौसुरेश्व
री मुखंमेपातुसुमुखीदंतान्मेरक्तदंतिका जिह्वांज्वालामुखीपातुकंठंकालीममावतु स्कंदमाताचमेस्कं
धौबाहूमेबगलामुखी हस्तौकमलहस्ताव्यान्नखान्मेभैरवेश्वरी वक्षोमेपातुवाराही स्तनौपातुमनोन्मना
पार्ष्णीपीतांबरीपातुपृष्ठंनीलसरस्वती शिश्नंमेभगमालाव्यान्मेढ्रंमहिषघातिनी गुह्यंमेगुह्यकेशानीऊरूमेभुव
नेश्वरी जानूमेविजयापातुजंघेमेपातुभैरवी गुल्फौमेपातुवीरेशीपादौत्रिपुरसुंदरी विस्मारितंचयत्स्थानंय
त्स्थानंनामवर्जितं तत्सर्वंपातुमेनित्यंविद्येयंश्रीदशाक्षरी पादादिमूर्धपर्यंतंसर्वांगंसंधिसंयुतं शिरसःपादप
र्यंतंशीतलापातुमेवपुः रणेराजकुलेद्यूतेविवादेशत्रुविग्रहे मारीभयेचदुर्भिक्षेश्रींह्रींक्लींशीतलावतु पूर्वेमांपातुब्रौं

ब्राह्मीवह्नौह्रींवैष्णवीतथा दक्षिणेउंमहेशानीऐंऐंहूंनैर्ऋतवेक्रंतु पश्चिमेक्लींचकौमारी वायव्येह्रींनृसिंहिका। उत्तरेषोडशीपायादैशानेश्रीं।शिवावतुऊर्ध्वेउंक्लींउग्रतारापात्वधोमेपराजिता प्रभातेपातुमांबालामध्याह्नेत्रिपुरावतु सायंसरस्वतीपातुनिशीथेभद्रकालिका सर्वत्रशुभदापातुउंह्रींश्रींक्लींदशाक्षरी इतीदंकवचंगुह्यंजगन्मंगलकाभिधं शीतलायाश्चसर्वस्वंरहस्यंममपार्वति सर्वमंत्रमयंदिव्यंसर्वसिद्धिप्रदायकं पठेद्वापाठयेद्वापिकवचंदेवदुर्लभं रोगीचमुच्यतेरोगाद्बद्धोमुच्येतबंधनात् नाग्निभीर्ज्वरपीडाचजायतेपरमेश्वरि बालानांपीडितानांचपठेद्वापाठयेद्यदि ससद्योरोगमुक्तस्तुजायतेसुभगःशिवे कुंकुमालक्तकस्तूरीरसैर्देविरवेर्दिने विलिख्यकवचंदिव्यंपूजयित्वाचशीतलां श्वेतचंदनपुष्पैश्चसितवस्त्रेणपार्वति धूपदीपादिनैवेद्यैः क्षीरेणतर्पयेत्ततः धारयेद्योपिकवचंमृत्युंप्राप्तोपिजीवति शतावर्त्तंपठेद्यस्तुदशावर्तंव्रतीशुचिः तस्यदेवीस्वयंदेवमातेवहितकारिणी इतीदंकवचंपुण्यंशीतलायारहस्यकं गोपनीयंगुह्यतममदेयंयस्यकस्यचित् ॥ ❀ ॥ इतिश्रीभैरवीतंत्रेशीतलाकवचम् ॥ इतिभाद्रकृष्णसप्तम्यांशीतलासप्तमीव्रतम् ॥

अस्यामेववाराहपुराणोक्तंपुत्रप्राप्तिव्रतं तत्रविष्णुंसंपूज्य गोपालमंत्रेणसघृतैःकृष्णतिलैरष्टम्यांहोमंकृत्वा ब्राह्मणान्संभोज्यविल्वपत्रप्राशनपूर्वकंस्वयमपिषड्रसंभुजीत एवंसर्वासुकृष्णपक्षसप्तमीषुव्रतंकुर्वीत वत्सरांतेगोयुग्मंदद्यात्पुत्रप्राप्तिर्भवतीति पुत्रसप्तमीव्रतम् ॥ अथभाद्रकृष्णाष्टम्यांदशाफलव्रतं नारदीये नभस्यस्याऽसिताष्टम्यांदशाफलमितिव्रतं उपवासंचसंकल्प्यस्नात्वाकृत्वाचनित्यकं तुलस्याःकृष्णवर्णायादलैर्दशभिरर्चयेत् कृष्णंविष्णुंतथानंतंगोविंदंगरुडध्वजं दामोदरंहृषीकेशंपद्मनाभंहरिंप्रभुं एतैश्चनामभिर्नित्यंकृष्णदेवंसमर्चयेत् नमस्कारंततःकुर्याद्व्रतानांव्रतमुत्तमं आदौमध्येतथाचांतेहोमंकुर्याद्विधानतः कृष्णमंत्रेणजुहुयाच्चरुणाष्टोत्तरंशतं

ह्रीमंतेविधिनासम्यगाचार्यंपूजयेत्सुधीः सौवर्णंताम्रपात्रंवामृण्मयंवेणुपात्रके तुलसीदलंसुवर्णेनकारयित्वासुलक्ष
णं हैम्नावाप्रतिमांकृत्वापूजयित्वाविधानतः विधायप्रतिमांतत्रह्याचार्यायनिवेदयेत् दातव्यागौःसवत्साचवस्त्रा
लंकारभूषिता दशार्द्धंकृष्णदेवायपूरिकादशचार्पयेत् तत्रदद्याद्विधिज्ञायस्वयंवाभक्षयेद्व्रती वायनंचप्रदातव्यंय
थाशक्तिद्विजोत्तम दशमेन्हिततोमूर्तिंसद्रव्यंगुरवेर्पयेत् व्रतांतेदशविप्रेभ्यःप्रत्येकंदशपूरिकाः दद्यादेवंदशाब्दंतुकृ
त्वाव्रतमनुत्तमं उद्याप्यविधिनाभूयात्सर्वकामसमन्वितः अंतेकृष्णस्यसायुज्यंलभतेनात्रसंशयः इदंशुक्लादिश्रव
णकृष्णाष्टम्यांदशाफलव्रतं तत्रास्यविधिः ॥ ध्यानम् ॥ तमद्भुतंबालकमंबुजेक्षणंचतुर्भुजंशंखगदाद्युदायुधं
श्रीवत्सलक्ष्मंगलशोभिकौस्तुभंपीतांबरंसांद्रपयोदसौभगं महार्हवैदूर्यकिरीटकुंडलत्विषापरिष्वक्तसहस्रकुंतलं
उद्दामकांच्यंगदभूषणादिभिर्विरोचमानंवसुदेवऐक्षत ॥ १ ॥ श्रीगोपालकृष्णायनमःध्यायामि चारुदेवायआव
हयामि शेषशायिने आसनं तीर्थपादाय पाद्यं गंगाजनकायअर्घ्यं यमुनावेगसंहारिणे आचमनं नित्यमुक्तायपं
चामृतस्नानं कृष्णायशुद्धोदकस्नानं पीतवासिनेवस्त्रं यज्ञप्रियाययज्ञोपवीतं सर्वेश्वरायगंधं अधोक्षजायाक्षताःक
लाप्रियाय पुष्पाणि तुलसीदलानिच ततोंगपूजां कुर्यात् कृष्णायनमः शिरःपूजयामि विष्णवेनमः
मुखंपूज.हरयेनमः कंठंपूज- शेषशायिनेनमोबाहूपू० गोविंदायनमोहृदयंपू. गरुडध्वजायनमः नाभिंपू.
दामोदरायनमः गुह्यंपू. हृषीकेशायनमः ऊरूपू. पद्मनाभायनमः पादौपू. उपेंद्रायनमः सर्वांगंपूजः
पारिजातापहारकाय धूपं ज्ञानप्रदायदीपं चक्रिणे नैवेद्यं पद्मनाभाय नीराजनं पूगीफलं तांबूलं
इदंफलमितिफलं हिरण्यगर्भगर्भस्थमिति दक्षिणा देवदेवनमस्तेस्तुभक्तप्रियकृपानिधे गृहाणार्घ्यंमयाद
त्तंदेवक्यासहितप्रभो इत्यर्घ्यं त्रिलोकनाथोदेवेशस्सर्वभूतदयानिधिः दानेनानेनसुप्रीतोभवत्विहसदामम

वायनं श्रीकृष्णःप्रतिगृह्णातिश्रीकृष्णोवैददातिच श्रीकृष्णस्तारकोभूम्यां श्रीकृष्णायनमोनमः संसारार्णवमग्नानांनराणांपापकर्मणां इहमोक्षफलावाप्तिंकुरुष्वपुरुषोत्तम इति ॥ अथकथा सूतउवाच ॥ शृणुध्वमृषयः सर्वेनैमिषारण्यवासिनः पुराकृतयुगस्यादौकृष्णदेवेनभाषितं तद्व्रतंवःप्रवक्ष्यामिसांगोपांगमुनीश्वराः पुरावैद्वापरस्यांतेपांडवाःकौरवास्तथा द्यूतंप्रचक्रिरेसर्वेधनमानेनमोहिताः निर्जिताःपांडवादुःखाद्वनंप्रापुर्महीश्वराः कुंतीविदुरगेहेतुसंस्थितासुमहायशाः तच्छ्रुत्वाकृष्णदेवोपिकृपयापरयायुतः आययौगरुडारूढोविदुरस्य गृहंप्रति तत्रापश्यन्महातेजाःकुंतींपरमदुःखितां विदुरेणार्चितःकृष्णःकुंतींचैवाहभक्तितः नत्वाहकुंतींत्वादेवींपश्याम्यद्यविडंबयन् त्वत्पुत्रास्तुमहादुःखं प्रापुस्तेगहनेवने तवापिसुमहद्दुःखंसर्वदातन्ममाप्रियं कुंत्युवाच हृषीकेशमहाबाहोमहादुःखेनकर्षिताः कृपयापरयादेवरक्षितावयमीदृशाः ममचैवमहादुःखंत्वयिभ्रात्रजसंस्थिते मत्पुत्रास्तेमहादुःखात्प्रविष्टागहनंवनं कृपयाविदुरोमह्यंभोजनंप्रस्थसंमितं ददातिप्रत्यहंकृष्णजीवनंममदुःखदं गृहस्यपश्चिमेभागेवसाम्येवंजनार्दन दर्शिताकौरवाणांहिसर्वेषांकुमतिस्तथा इतितस्यावचः श्रुत्वाकृष्णःपरमधर्मवित् दशाफलमितिख्यातंतद्व्रतंकुरुसुव्रते कुंत्युवाच कस्मिन्कालेप्रकर्तव्यंतद्व्रतंकेशवप्रभो वदमांप्रातिचेत्युक्तोजगादसात्वतेश्वरः कृष्णउवाच श्रावणस्यासितपक्षेकृष्णाष्टम्यांनिशीथके देवक्यांवसुदेवाच्चप्रादुर्भवतिकेशवः तदग्रेदशगुणितंसूत्रंस्थाप्यप्रपूजयेत् हस्तेबद्ध्वातुतत् सूत्रं दशाहंव्रतमाचरेत् संसारार्णवमग्नानांनराणांपापकर्मणां इहामुत्रफलावाप्तिंकुरुष्वपुरुषोत्तम अनेनडोरकंबद्ध्वादशवर्षंव्रतंचरेत् देवस्यपुरतोनित्यंदशपद्मानिकारयेत् ततश्चशृणुयात्पुण्यांकथामेतांशुभावहां तुलस्याःकृष्णवर्णायादलैर्दशभिरर्चयेत् कृष्णंविष्णुंतथानंतंगोविंदंगरुडध्वजं दामोदरंहृषीकेशंपद्मनाभंहरिंप्रभुं एतैश्चनामभिर्नित्यंकृष्णदेवंसम

चंयेत् नमस्कारंप्रकुर्वीतप्रदक्षिणसमन्वितं एवंदशादिनंकृत्वाव्रतानामुत्तमंव्रतं आदौमध्येतथाचांतेहोमंकुर्य्याद्विधानतः कृष्णमंत्रेणजुहुयाच्चरुणाष्टोत्तरंशतं ततोहोमांतविधिनाआचार्य्यंपूजयेत्सुधीः सुवर्णताम्रपात्रेवामृण्मयेवेणुपात्रके तुलसीदलंसुवर्णेनकारयित्वासुलक्षणं प्रतिमांचततःकृत्वापूजयित्वाविधानतः विधायप्रतिमांतत्रआचार्य्यायनिवेदयेत् दातव्यागौःसवत्साच वस्त्रालंकारभूषिताः दशाहोमेतुकृष्णायपूरिकादशचार्पयेत् दापयेत्तुब्राह्मणायस्वयंभुक्त्वातथैवच वायनंतुगृह्णीष्वसर्वोपस्करसंयुतं संसारार्णवमग्नानांपाहिदेवकिनंदन अनेनोद्यापनंकृत्वानमस्कृत्यक्षमापयेत् दक्षिणाभिर्युतादेविदातव्याकृष्णसन्निधौ दशांतेदशविप्रेभ्यःप्रत्येकंदशपूरिकाः एवंदशसुवर्षेषुव्रतंकुर्य्यान्नरोत्तम एवंव्रतंत्वयादेविकर्तव्यंकृष्णसन्निधौ एवमुक्तातुकृष्णेनकुंतीश्रुत्वामुदान्विता उवाचकृष्णदेवंतंममवित्तंनविद्यते प्रत्युवाचहृषीकेशस्तववित्तंभविष्यति एवमुक्त्वाययौकृष्णःकर्णंद्रष्टुंमुदान्वितःकर्णोपिसुमहात्मानंकृष्णंदृष्ट्वाप्रहर्षितः सिंहासनंददौतस्मैपाद्यमर्घ्यंतथैवच कर्णोप्युवाचदेवेशकिमर्थंतवचागमः उवाचकृष्णदेवोथतवमातातिदुःखिता कर्णउवाच दुर्योधनभयात्कृष्णमातरंयाम्यहंकथं कथंवादुःखितामाताप्रमुच्येतवदस्वमे श्रीकृष्णउवाच सुवर्णपात्रंसपूर्य्यपायसक्षीरसंयुतं प्रत्यहंतत्रदातव्यंविप्रेवाचार्यपुत्रके तवमातातथाप्रीताभविष्यतिनसंशयः एवमुक्त्वातदाकृष्णोजगामद्वारिकांमुदा सकृष्णभाषितंश्रुत्वाशतनिष्कंतुवाग्यतः ततःश्रुत्वाकथांकर्णश्चक्रेसर्वंमहाशयः पंचभक्ष्यसमायुक्तंपात्रंस्वर्णेनकारितं शतनिष्कसमायुक्तंविप्रहस्तेप्रदायसः प्रत्यहंवैतथाकुंतीपुत्रंदृष्ट्वातुहर्षिता देवस्यसन्निधौकुंतीव्रतंचक्रेतुभक्तितः कृष्णेनकारितंसर्वंममभाग्यायवैध्रुवं कृष्णपूजांततःकृत्वाकथांश्रुत्वाचपूर्ववत् उद्यापनेददावन्नंब्राह्मणेभ्योयथाक्रमं तुलसीदलंसुवर्णेनकारयित्वासुलक्षणं प्रतिमांविष्णुभक्तायस्वर्णपात्रेनिधायच गोदानेनसमायुक्तामाचार्य्यायमहा

सती कुंतीददौतदातत्रविष्णुर्नःप्रीयतामिति व्रतंदशसुवर्षेषुचकारोद्यापनंततः तद्व्रतस्यप्रभावेणतनूजाःसमुपागताः हत्वाशत्रून्मृधेसर्वान्कृष्णस्यचप्रसादतः युधिष्ठिरःसधर्मात्मास्वंराज्यंप्राप्तवान्सुधीः प्रोवाचेदंव्रतंकुंतीद्रौपदींचपतिव्रतां दशाफलमितिख्यातंकृष्णदेवेनभाषितं एवंसर्वैमहादुःखान्निस्तीर्य्यस्वपुरींगताः व्रतस्यास्यप्रभावेण कृष्णस्यचप्रसादतः सापिचक्रेमहाभागाद्रौपदीव्रतमुत्तमं तस्मात्सर्वप्रयत्नेनकर्तव्यंतुव्रतंजनैः याभक्त्याकुरुतेनारीव्रतानामुत्तमंव्रतं सर्वान्कामानवाप्नोतिविष्णुलोकेमहीयते इदंव्रतंमहापुण्यंव्रतानामुत्तमंस्मृतं वदतांशृण्वतांचैवविष्णुलोकप्रदंध्रुवम् ॥ ❀ इतिभविष्योत्तरेदशाफलव्रतम् ॥ अथास्यामेवभाद्रकृष्णजन्माष्टम्यां श्रीकृष्णजन्माष्टमीव्रतं ॥ तदुक्तंनारदीये ॥ कृष्णजन्माष्टमीचैषास्मृतापापहरानृणां केवलेनोपवासेनतस्मिन्जन्मदिनेहरेः सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः उपवासीतिलैःस्नातोनद्यादौविमलेजले सुदेशेमडपेकॢप्तेमंडलंलेखयेत्सुधीः तन्मध्येकलशंस्थाप्यताम्रजंवापिमृण्मयं तस्योपरिन्यसेत्पात्रंताम्रंतस्योपरिस्थितं हैमींवस्त्रयुगाच्छन्नांकृष्णस्यप्रतिमांशुभां पाद्याद्यैरुपचारैस्तुपूजयेत्स्निग्धमानसः देवकींवसुदेवंचयशोदांनंदमेवच बलंगोपांस्तथागोपीर्गाश्चदिक्षुसमर्चयेत् ततश्चारात्रिंकंकृत्वाक्षमाप्यानन्यभक्तितः तिष्ठेत्तथैवार्द्धरात्रेपुनःसंस्नापयेद्धरिं पंचामृतैःशुद्धजलैर्गंधाद्यैःपूजयेत्पुनः धान्याकंचयवानींचनागरंशर्करांतथा सजीरकंघृतंपात्रेनैवेद्यंविनिवेदयेत् पुनश्चारात्रिकंकृत्वादशधारूपधारिणं विचिंतयन्शशांकायदद्यादर्घ्यंसमुद्यते क्षीरोदसागरोत्पन्नह्यत्रिनेत्रसमुद्भव गृहाणार्घ्यंमयादत्तंरोहिण्यासहितःशशिन् ततःक्षमाप्यदेवेशंरात्रिशेषंनयेद्व्रती पौराणिकैःस्तोत्रपाठैर्गीतवाद्यैरनेकधा ततःप्रभातेविप्राग्र्यान्भोजयेन्मधुरान्नकैः दत्त्वाचदक्षिणांतेभ्योविसृजेत्तुष्टमानसः ततस्तांप्रतिमांविष्णोःस्वर्णंधेनुसमन्वितां गुरवेदक्षिणांदद्याद्विसृज्याश्नीतचस्वयम् दारापत्यसुहृद्भृत्यैरेवंकृत्वाविधानतः साक्षाद्गोलोकमा

34

व्र०र०
भाद्रप०
१६

भोतिविमानवरमास्थितः नैतेनसदृशंचान्यद्व्रतमस्तिजगत्रयेकृतेनयेनलभ्येतकोटिरेकादशीफलम् अत्रप्रतिमादानेस्वर्णधेनुसमन्वितंगोदानमुक्तं सुवर्णधेनुतिलधेन्वादिदानप्रकरणोक्तं अथवासुवर्णदक्षिणान्वितधेनुयुताप्रतिमादेयाइति अथजन्माष्टमीनिर्णीयतेसाचामांतमासपक्षेश्रावणकृष्णाष्टमी पूर्णिमांतमासपक्षेभाद्रकृष्णाष्टमी उभयथाप्येकैव उभयविधोपिस्मार्तव्यवहारोदर्शयिष्यते साचद्विविधाशुद्धाविद्धाच तत्रशुद्धायामष्टौतत्रसप्तमीयोगरहिताशुद्धा सप्तमीयुक्ताविद्धा शुद्धाच त्रिविधासमान्यूनाअधिकाचेति तत्रसूर्योदयादुदयपर्यंतस्थितासमाततोर्वाङ्निवृत्ता न्यूना तमतिक्रम्यप्रवृत्ताअधिका विद्धापिसमन्यूनाधिकभेदेन त्रिधा तत्र शुद्धसमारोहिणीसहितातद्रहिताचेतिद्विविधा शुद्धाधिकातुपूर्वदिनएवरोहिणीसहिता उभयत्ररोहिणीसहिता उभयत्ररोहिणीरहिताचेतिचतुर्विधा एवंशुद्धाप्यष्टविधा एवंविद्धसमापि रोहिणीसहितातद्रहिता विद्धन्यूनापिरोहिणीसहिता उभयत्ररोहिणीरहिताचेतिचतुर्विधा एवंविधाप्यष्टविधा उभयेषांशुद्धविद्धभेदानां मेलनेषोडशप्रकाराभवंति द्वावन्यावांतरभेदौयथा अर्धरात्रेरोहिणीयुक्ताष्टमीजयंतीत्येके द्वितीयानवमीयुक्ताष्टम्यांवुधवारसोमवारयोरन्यतरेणयोगे एवमष्टादशप्रकाराजन्माष्टमीतत्रसकामैर्निःकामैश्चसर्वथोपवासःकर्त्तव्यः गृध्रमांसंखरंकाकंश्येनंचमुनिसत्तम त्रैलोक्यजनितंपापंभुक्तेतेननसंशयः येनकुर्वंतिजानंतःकृष्णजन्माष्टमीव्रतं तेभवंतिमहाप्राज्ञव्यालामहतिकानने श्रावणेवहुलेपक्षेकृष्णजन्माष्टमीव्रतं नकरोतिनरोयस्तुभवतिब्रह्मराक्षसः अकुर्वन्नरकंयातियावदिंद्राश्चतुर्दश अतीतानागतंतेनकुलमेकोत्तरंशतं पातितंनरकेघोरेयोभुंक्तेकृष्णवासरे रटंतीहपुराणानिभूयोभूयोमहामुने तथा कृष्णजन्माष्टमींत्यक्त्वायेन्यद्व्रतमुपासते नाप्नुवंतिशुभंकिंचिदिष्टापूर्त्तमथापिवा श्रावणेवहुलेपक्षेनकरोतियदाष्टमीं क्रूरायुधाःक्रूरमुखाहिंसंतियमकिंकराः इत्यादिवाक्यैरकरणेप्रत्यवायश्रवणात् वर्षेवर्षेतुयानारीकृष्णजन्माष्टमीव्रतं

नकरोतिमहाप्राज्ञऽथालीभवतिकानने वर्षेवर्षेतुकृतंव्यंतुष्ट्यर्थंचक्रपाणिन इत्यादिस्कंदादिवाक्येषु वीप्साश्रुतेश्चव
क्ष्यमाणजयंतीव्रतमपिनित्यं यद्बाल्येयच्चकौमारेयौवनेवार्द्धकेतथा बहुजन्मकृतंपापंहंतिसोपोषितातिथिःसप्तजन्म
कृतंपापंराजन्यत्रिविधंनृणांनक्षालयतिगोविंदस्तिथौतस्यांसमार्चितःउपवासश्चतत्रोक्तोमहापातकनाशनःजयंत्यां
जगतीपालविधिनानात्रसंशयइतिवन्हिपुराणवचनेतथा शूद्रान्नेनतुयत्पापंशवहस्तस्यभोजने तत्पापंलभ्यतेमर्त्यै
र्जयंत्याभोजनेकृतइति स्कंदपुराणवचनेन तथाब्रह्मघ्नश्चसुरापश्चगोवधेस्त्रीवधेपिवा नलोकोमुनिशार्दूलजयंती
विमुखस्यच नकरोतियदाविष्णोर्जयंतीसम्भवंव्रतं यमस्यवशमापन्नःसहतेनारकींव्यथां जयंतीवासरेप्राप्तेकरो
त्युदरपूरणं खाद्यतेतिलमात्रंतुयमदूतैःकलेवरम् जोभुंजीतविमूढात्माजयंतीवासरेन्नृप नरकोत्तरणंनास्तिद्वादशी
मपिकुर्वत इत्यादिवचनैश्च तदकरणेदोषश्रवणात् शवहस्तस्यभोजनेशावहस्तस्थभोजनइत्यर्थः जन्माष्टमीव्रतं
काम्यमपिफलश्रवणात् तथाचस्कान्दे व्रतेनाराध्यदेवेशंदेवकीसहितंहरिं त्यक्त्वायमपथंघोरंयातिविष्णोःपरंपदं
जन्माष्टमीव्रतंयेवैप्रकुर्वंतिनरोत्तमाः कारयंत्यथवालोकाल्लक्ष्मीस्तेषांसदास्थिता स्मरणंवासुदेवस्यमृत्युकालेभ
वेन्मुने सिध्यंतिसर्वकाम्यानिकृतेजन्माष्टमीव्रते इत्यादि तथाजयंतीव्रतमपिकाम्यं महाजयार्थंकुरुतांजयंतीं
मुक्तयेऽनघ धर्ममर्थंचकामंचमोक्षंचमुनिपुंगव ददातिवांछितानर्थान्येचान्येप्यतिदुर्लभा इतिस्कंदादौ फलश्रुतेः
तथाभविष्योत्तरे जयंतीकल्पेपि प्रतिवर्षंविधानेनमद्भक्तोधर्मनंदन नरोवायदिवानारीयथोक्तंफलमाप्नुयात् पुत्रसं
तानमारोग्यंसौभाग्यमतुलंलभेत्इहधर्मरतिर्भूत्वामृतोवैकुंठमाप्नुयादित्यादि तत्रादौजयन्तीस्वरूपंतावन्निरूप्यते
माधवीयेविष्णुधर्मोत्तरे रोहिणीचयदाकृष्णपक्षेष्टम्यांद्विजोत्तम जयन्तीनामसाप्रोक्तासर्वपापहरातिथिरिति सन
त्कुमारसंहितायां शृणुष्वावहितोराजन्कथ्यमानंमयानघ श्रावणस्यचमासस्यकृष्णाष्टम्यांनराधिप रोहिणीयदि

लभ्यैतजयंतीनामसातिथिःस्कांदे प्राजापत्येनसंयुक्ताअष्टमीतुयदाभवेत् श्रावणेबहुलेसातुसर्वपापप्रणाशिनी जयं
पुण्यंचकुरुतेजयांपुण्यांचतांविदुरिति शिवपुराणेपिशिववाक्यं शृणुवत्सप्रवक्ष्यामिअष्टमीभेदनिर्णयं श्रावणेकृष्ण
पक्षस्यघटीह्यष्टिर्यदाभवेत् तदाजन्माष्टमीस्यातासम्पूर्णासाप्रकीर्त्तिता रोहिणीऋक्षसंयुक्ताजयंतीसातुकथ्यते
वसिष्ठउवाच श्रावणेवानभस्यैवारोहिणीसहिताष्टमी यदाकृष्णानरैर्लब्धासाजयंतीतिकीर्त्तिता श्रावणेनभवेद्योगो
नभस्येतुभवेद्ध्रुवं तयोरभावेयोगस्यतस्मिन्वर्षेनसम्भवइति अत्रश्रावणइतिमुख्यः कल्पः नभस्योऽनुकल्पः
यदिवाश्रावणेयदिवानभस्यैसर्वथापिरोहिणी कृष्णजन्माष्टमीयोगेजयंतीत्यितदविवादं पुराणांतरेपि रोहिणीचय
दाकृष्णपक्षेष्टम्यांद्विजोत्तम जयंतीनामसाप्रोक्तासर्वपापहरातिथिः अत्र चयद्यपिसामान्यतः कृष्णाष्टमीरोहि
णीयोगोजयंतीत्युक्तमिति तथापि पूर्वोक्तवचननिचयपर्यालोचनयात्रत्वष्टमीपदस्यजन्माष्टमीपरतयानेनापिवच
नेन जन्माष्टमीरोहिणीयोगस्यैव जयंतीत्वमुक्तं अत्रकेवलेनोपवासेनेतिवाक्ये केवलोपवासस्यफलसंबंधप्र
तीतेरुपवास एव प्रधानं पूजादेःस्पष्टफलसंबंधानवगमात्तदंगत्वं तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजामि
त्यादिस्तुतिमात्रमितिप्राञ्चः उपवासः पूजाचेत्युभयंप्रधानं जन्माष्टमीदिनेप्राप्तइतिस्कांदात् अर्द्धरात्रेतुरो
हिण्यांयदाकृष्णाष्टमीभवेत् तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजं सोपवासोहरेः पूजांकृत्वातत्रनसीदती
ति भविष्यत्पुराणाच्च तयोरिवफलसंबंधावगमादितिकालतत्त्वविवेचने अत्रकेचित् यत्तुमयूखे सोपवासोहरेःपूजा
मित्यत्र मासिभाद्रपदेऽष्टम्यांकृष्णपक्षेऽर्धरात्रके शशांकेवृषराशिस्थेऋक्षेरोहिणिसंज्ञके योगेस्मिन्वसुदेवाद्धिदे
वकीमामजीजनत् तस्मान्मांपूजयेत्तत्रशुचिः सम्यगुपोषितः इत्यादावुपवासस्य गुणत्वप्रतीतेः सदंतोधाव
तीत्यादिवत्फलसंस्कारः पूजैवप्रधानमिति तदापाततः केवलेनोपवासेनतस्मिन्जन्मदिनेशुभे सप्तजन्म

कृतात्पापान्मुच्यतेनात्रसंशयइतिवचनेन केवलोपवासस्यफलसंवंधश्रवणात् अर्द्धरात्रेतुरोहिण्यांयदाकृष्णाष्टमा
भवेत् तस्यामभ्यर्चनंशौरेर्हंतियापंत्रिजन्मजमित्यत्रपूजायाः केवलायाएव जपंत्यामुपवासश्चमहापातकना
शनः सर्वैःकार्योमहाभागपूजनीयश्चकेशवइतिभविष्यद्विष्णुधर्मयोरप्येकवाक्ये फलसंवंधश्रवणाच्च अतएव
प्रयोगभेदकल्पनापत्तिरपिपरास्ता यत्राप्येकैकस्यश्रवणं तत्राप्यपरस्योपलक्षणीयत्वाच्च सोपवासोहरेः पू
जामित्यत्रशुचिः सम्यगुपोषितइत्यत्रचोपवासस्यविशेषणत्वेनोपादानेऽपि प्राधान्यंनविहन्यते यजतावद्देशवत्
एवंचसति वासुदेवंसमुद्दिश्यसर्वपापप्रशांतये उपवासंकरिष्यामिकृष्णाष्टम्यांनभस्यके इतिभविष्योक्तसंक
ल्पवाक्ये यदुपवासमात्रग्रहणं तत्पूजाया अप्युपलक्षणं विध्यनुसारित्वात्संकल्पः एवंसतिवासुदेवंसमुद्दिश्येत्य
प्यांजस्येनोक्तामिति पूजायांतस्योद्देशत्वादुपवास उद्देश्यानपेक्षणात् वासुदेवशब्देन तत्प्रीतिलक्षणयाचतदेपक्ष
याजघन्यउपवासपदएव यथाश्रुततदन्वयार्थं पूजालक्षणायामुक्तत्वात् उपवासोपसर्जनकपूजालक्षणायांच व
सुदेवंसमुद्दिश्येत्यस्याविशेष्यपूजान्वयोपपत्तेः अतएवद्वितीयसंकल्पवाक्ये अर्चयित्वोपवासेनभोक्ष्येहमपरेहनि
इतिपूजायाअप्युल्लेखः तस्मादुभयमपिप्रधानं स्मृतिकौस्तुभेतु मदनरत्नाद्युदाहृतभविष्योत्तरस्य जन्माष्टमीशा
स्त्रे तावदालोच्यमाने कीदृशंतद्व्रतंदेवसर्वदेवैरनुष्ठितमित्युपक्रम्य प्रसंगेनापियोभक्त्याव्रतंपश्येज्जनाकुलमित्यु
पसंहारात् जन्माष्टमीसंज्ञकव्रतस्यैव प्राधान्यमितिप्रतीयते व्रतशब्दश्च मानससंकल्पवाचित्वेन स्नातकव्रत
प्रकरणेभियुक्तैर्व्याख्यातः किंविषयकः ससंकल्पइत्याकांक्षायां यावत्योतरालउपवासपूजादयः फलसंबंधित
यानिर्दिष्टाः क्रियास्तावत्योविषयत्वेनसंवध्यंते तावद्विषयकसंकल्पस्य फलसंबंधो ज्ञायत एव सकलश्रुतीन
जातेष्टिफलश्रुतीनामिवतात्पर्यावगमात् संभवंति चैवंसतिसंकल्पांगमंत्रउपवासशब्देनप्रधानक्रियाप्रकाशना उ

38

पवासोनामसेतिकर्त्तव्यताकोभोजनसंकल्पइतिहेमाद्र्यादिभिरुक्तत्वात् तस्मात्संकल्पस्यैवप्राधान्यमिति ए
तेनजयंतीव्रतमपिव्याख्यातं तत्रापिव्रतशब्देनैवोपक्रमोपसंहारादिति नचैवमष्टमीरोहिणीतिवसिष्ठवचनेर्द्धरा-
त्रस्यमुख्यकालत्वाभिधानमनुपपन्नमितिवाच्यं मुख्यस्यकालइतितत्पुरुषापेक्षया मुख्यः कालः इतिकर्मधार
यस्यस्थपत्याधिकरणन्यायेनौचित्यात् कालस्यमुख्यत्वंच स्वव्याप्त्याअसाधारण्येननिर्णायकत्वमतोनानुपपत्ति
रित्युक्तं अस्याश्च पूजायाः कालउक्तोविष्णुधर्मोत्तरे रोहिणीसहिताकृष्णामासिभाद्रपदेष्टमी सप्तम्यामर्द्ध
रात्राधः कलयापियदाभवेत् तत्रजातोजगन्नाथः कौस्तुभीहरिरीश्वरः तमेवोपवसेत्कालंतत्रकुर्याच्चजागरं
अर्द्धरात्रेतुयोगोयंतारापत्युदयेतथा नियतात्माशुचिः स्नातः पूजांतत्रप्रवर्तयेदिति वसिष्ठस्तु स्पष्टमर्द्ध
रात्रस्य मुख्यकालत्वमाह अष्टमीरोहिणीयुक्तानिश्यर्द्धेदृश्यतेयदि मुख्यकालःसविज्ञेयस्तत्रजातोहरिः
स्वयमिति मुख्यस्य प्रधानस्य कालोमुख्यकालः श्रीभागवते दशमस्कंधे तृतीयाध्यायेऽपि ॥
अथसर्वगुणोपेतःकालः परमशोभनः यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकमित्युपक्रम्यनिशीथेतमउद्भूतेजायमाने
जनार्दने देवक्यांदेवरूपिण्यांविष्णुस्सर्वगुहाशयःआविरासीदित्यादिअजनजन्मर्क्षंरोहिणी यद्यपि त्रिकालंपूजये
द्देवंदिवारात्रौविशेषतःअर्द्धरात्रेपिचतथाप्यर्द्धरात्रकालावच्छिन्नैव पूजा प्रधानं तथाचभविष्योत्तरे मासिभाद्रपदेऽ
ष्टम्यांनिशीथेकृष्णपक्षगे शशांकेवृषराशिस्थेऋक्षेरोहिणिसंज्ञके योगेस्मिन्वसुदेवाद्धिदेवकीमामजीजनत् तस्मा
न्मांपूजयेत्तत्रशुचिः सम्यगुपोषितः ब्राह्मणान्भोजयेद्भक्त्याततोदद्याच्चदक्षिणां हिरण्यंमेदिनींगावोवासांसि
कुसुमानिच यद्यदिष्टतमंतत्तत्कृष्णोमेप्रीयतामिति नारदीयसंहितायामपि उपोष्यजन्मचिह्नानिकुर्याज्जागरणं
तुयः अर्द्धरात्रयुताष्टम्यांसोऽश्वमेधफलंलभेदिति एवंसत्यर्द्धरात्रेऽष्टमीसद्भाव एवात्रकार्यकालव्याप्तिरित्यभिधीयते

यत्तदेवाभिप्रेत्य विष्णुरहस्ये पठ्यते अर्द्धरात्रेतुरोहिण्यामित्यादितस्मिन्नर्द्धरात्रे पूर्वापरयामयोः कियत्परिमाणमपेक्षितमित्यपेक्षायामादित्यपुराणेदर्शितं अर्द्धरात्रादधश्चोर्द्ध्वंकलयापियदाभवेत् जयतीनामसाप्रोक्ता सर्वपापप्रणाशिनीति वराहसंहितायामपि सिंहेर्केरोहिणीयुक्तानभः कृष्णाष्टमीयदि रात्र्यर्द्धपूर्वापरगा जयंतीकलयापिचेतिरात्रेरर्द्धं रात्र्यर्द्धंपूर्वंचअपरंचपूर्वापरे रात्र्यर्द्धंचतेपूर्वापरेचतयोर्गच्छतिवर्तत इतिरात्र्यर्द्धपूर्वापरगा योगीश्वरोपि रोहिणीसहिताकृष्णामासेचश्रावणेऽष्टमी अर्द्धरात्रादधश्चोर्ध्वमित्यादिकलायाअतिसूक्ष्मत्वेनदुर्लक्षणत्वात्सएवपक्षांतरमाह अर्द्धरात्रादधश्चोर्ध्वमेकार्द्धघटिकान्विता रोहिणीचाष्टमीग्राह्याउपवासव्रतादिष्विति एकाचार्द्धघटिकाताभ्यामन्विता कलाद्यपेक्ष्यार्द्धघटिकास्थूला तामपेक्ष्यघटिकास्थूलातत्रायमर्थः पूर्वभागावसानएकाघटिका उत्तरभागादौचैकेतिमिलित्वातान्निशीथशब्दवाच्यंतावत्परिमाणंसर्वैरपिसुलक्ष्यत्वान्मुख्यः कल्पः तदसम्भवेघटिकार्द्धघटिकाऽन्वेष्टव्या तस्याअप्यसंभवे कलेति तत्रमुख्यंपक्षमभिप्रेत्यभविष्योत्तरेनिशीथेकृष्णपक्षगइत्युक्तं तच्च वचनं साकल्येनपूर्वमेवोदाहृतं अत्रजयंत्यांचंद्रार्घस्यावश्यकर्त्तव्यत्वात्तस्यचचंद्रोदयकालीनत्वान्निशीथेयोगः प्रशस्तः एतदेवमाधवीयेविष्णुधर्मोत्तरेऽभिहितं अर्द्धरात्रेतुयोगोयमित्यादिसोयमर्द्धरात्रेयोगोमुख्यः कल्पः यस्तुकृत्स्नाहोरात्रयोगः सोयंमुख्यतरः यश्च यदाकदाचिदीषद्योगः सोऽनुकल्पः सच वसिष्ठसंहितायांदर्शितः अहोरात्रेतयोर्योगोह्यसंपूर्णोभवेद्यदि मुहूर्त्तमप्यहोरात्रेयोगश्चेत्तामुपोषयेदिति वासरेवानिशायांवायत्रस्वल्पापिरोहिणी विशेषेणनभोमासेसैवोपोष्यामनीषिभिरिति योयंजयंतीव्रतेयोगनिर्णयः सएवजन्माष्टमीव्रतेऽपिद्रष्टव्यः यस्मिन्वत्सरेयोगोनास्तितस्मिन्वत्सरे जन्माष्टमीव्रतमेकमेवप्रवर्त्तते यदाचपूर्वेद्युः परेद्युर्वारोहिणीयोगस्तदाजन्माष्टमीजयंत्यामंतर्भूताज्ञेया नतुज

न्माष्टमीव्रतंपृथक्कार्यं तदुक्तंमाधवेनैव यस्मिन्वर्षेजयंत्याख्योयोगोजन्माष्टमीतदा अंतर्भूताजयंत्यांस्यादृक्षयोगःप्रशस्तता इतिमदनरत्ननिर्णयामृते गौडमैथिल्यमतेप्येवंनिर्णयसिंधौ हेमाद्रिस्तु रोहिणीसंयुतोपोष्यासर्वाघौघविनाशिनी अर्द्धरात्रादधश्चोर्ध्वमित्यग्निपुराणादर्धरात्र एव रोहिणीयोगस्य प्राशस्त्यान्मुहूर्तमपि लभ्यतेत्यादिनाचार्द्धरात्रयोगेप्युपपत्तेर्नजयंतीव्रतांभिन्नं किंच रोहिण्यामर्द्धरात्रेचेति विष्णुधर्मोक्तेः समायोगेतु रोहिण्यांनिशीथेराजसत्तम समजायतगोविंदोवासरूपीचतुर्भुजः तस्मात्तंपूजयेत्तत्रयथावित्तानुरूपत इति वह्निपुराणाच्चार्द्धरात्रस्य कर्मकालत्वमवसीयते अतः कर्मणोयस्ययः कालइत्यादिवचनात्पूर्वत्रैव प्राप्तेःपरदिनेसमेपिरोहिणीयोगस्यनप्रयोजकताअन्यथाबुधवारादेरपितत्त्वापत्तेः किंचजयंतीशब्दोरात्रिविशेषवचनः अभिजिन्नामनक्षत्रंजयंतीनामशर्वरी मुहूर्तोविजयोनामयत्रजातोजनार्द्दन इतिब्रह्मांडपुराणात् तेन तद्योगिरोहिण्यागौणत्वान्नव्रतभेदइत्यूचिवानितिस्थितं यत्तु निर्णयसिंधौ रोहिणीयोगश्चाहोरात्रेचेत्तामुपोषयेदिति वसिष्ठसंहितोक्तेरित्याद्युक्तं तत्तुच्छंमाधवाचार्यधृतवसिष्ठसंहितोक्ताष्टमीरोहिणीयुक्तेऽतिमुख्यत्वबोधकवचनाविरोधात् पूर्वोक्तमाधवग्रंथविरोधाच्चेत्यलं तदेवंकर्मकालेनिरूपितेवक्ष्यमाणव्यवस्थोपयोगित्वेनैव बोधोनिरूप्यते सचात्रतिथ्यंतरवदष्टम्यादिवाप्रवेशसत्येव न किंतुरात्रिमात्रसत्वेपिभवत्येव पूजारूपस्यप्रधानस्यार्द्धरात्रसाध्यत्वात् अहःसुतिथयःपुण्याइतिवचनाच्च अन्यत्रापिअष्टमीशिवरात्रिश्चह्यर्धरात्रादधोयदि दृश्यतेघटिकायास्तुसर्वविद्धाप्रकीर्तितेति इदमर्द्धरात्रात्पूर्वंघटिकासद्भाववचनंसर्वकृष्णाष्टमीसाधारणं जन्माष्टम्यांतुकलासद्भावोपिपूर्वोक्तविष्णुधर्मोत्तरादिवचनेष्वभिहितः तदेववेधनिर्णीतेसंप्रतिपूर्वोक्तभेदेषुव्यवस्थोच्यते तत्रशुद्धयोः समन्यूनयोरोहिणीसहितयोस्तद्रहितयोर्वानविवादःउत्तरदिनेऽष्टम्यभावात्एवंविद्धयोरपिसमन्यूनयोर्नविवादः शुद्धाधिक।

विद्धाधिकावायदान्यतरास्मिन्नेवदिने रोहिणीसहिता तदा सैव ग्राह्या जन्माष्टम्यांभवेद्यत्रकलैकारोहिणीनृप जयंतीनामसाज्ञेयाउपोष्यासाप्रयत्नतः सप्तजन्मकृतं पापंराजन्यत्रिविधंनृणां तत्क्षालयतिगोविंदस्तिथौतस्यांसुभाषित इतिवन्हिपुराणवचनात् कृष्णाष्टम्यां कृष्णजन्माष्टम्यां कालतत्त्वविवेचने उत्तरदिनएव रोहिणीयोगे निशीथव्यापिनीमपिकिंवहुनाशुद्धामपिपूर्वांपरित्यज्योत्तरैव जन्मष्टमी व्रते ग्राह्या ननु चार्द्धरात्रस्यकर्मकालत्वंतावास्थितं कर्मकालव्याप्तिशास्त्रस्यचसर्वापेक्षयाबलवत्त्वमुपपादितमेव रोहिणीयोगेतु प्राशस्त्यात्फलातिशयमात्रं नतु तस्यनिर्णयोपयोगिता नवमीबुधवारादियोगवत् अन्यथाप्रेतयोनिगतानांतुप्रेतत्वंनाशितंनरैः यैःकृताश्रावणेमासिअष्टमीरोहिणीयुता किंपुनर्बुधवारेणसोमेनापिविशेषतः किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदेति पद्मपुराणवचनात्पूर्वेद्युरर्धरात्रे रोहिणीयुक्तामप्यष्टमीं विहाय बुधवारादियुक्तापराकर्त्तव्यास्यादिति अत्रोच्यते कर्मकालव्याप्तिशास्त्रादेवप्रधानभूतायाअर्द्धरात्रसत्वेनप्राप्तग्राह्यं दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुतामितिवचनेन रोहिणीयोगाभावविषयंक्रियते एवंहितस्यार्थः दिवावच्छेदेनरात्र्यवच्छेदेनवाकलामात्रापिचेद्रोहिण्यष्टम्यांनास्तितदैवचंद्रोदयसंयुता मर्द्धरात्रव्यापिनीमितियावत् प्रकुर्वीत दिनद्वयेपितादृश्याअभावेबहुरात्रिसंयुतामुत्तरांप्रकुर्वीतेति विष्णुरहस्यादिपदमर्द्धरात्रगततत्परमितित्वव्यंताशुद्धं तथात्वेवाक्यस्यैवानर्थक्यप्रसंगात् यदाहिशुक्लाप्यष्टम्यर्द्धरात्रवर्त्तमानाग्राह्यातदारोहिणीसहितामुत्तरामितिकिंवचनेन मुहूर्तमप्यहोरात्रइति वचनेतु स्पष्टैवाहोरात्रसंबंधियत्किंचित्मुहूर्तप्रतीतिः उदये चाष्टमीकिंचिन्नवमीसकलादीत्यत्रच सूर्योदयप्रतीतिः तेनरोहिणीरहितायानिशीथव्यापिन्याअपवादेनानिर्णायकएवरोहिणीयोगोनतुबुधवारादिवत्प्राशस्त्यमात्रहेतुप्रतीतिरित्यपियुक्तं रात्रियुक्तांप्रकुर्वीततामुपावसेदुपोष्यासा

ग्र०र०
भाद्रप०
२०

प्रयत्नइत्यादिपुनिर्णायकत्वस्यैवप्रतीतेः बुधवारादियोगवाक्येषुतुप्राशस्त्यमात्रप्रतीतेरिति मयूखेतुयदापूर्वेद्युरोहिणीरहितानिशीथगाचतिथिः परेद्युरोहिणीसहितानिशीथास्पृक्चतदापूर्वैवग्राह्या कर्मकालशास्त्रस्यसर्वापेक्षया प्राबल्यस्यसर्वग्रंथसिद्धत्वात् रोहिणीयोगेतुप्राशस्त्यात्फलातिशयमात्रंतुतस्यनिर्णयोपयोगिता नवमीबुधवारवत् अन्यथाव्रतयोनिगतानामितिपाद्मवचसापूर्वेद्युरर्द्धरात्रेवर्त्तमानां सरोहिणीमप्यष्टमीं त्यक्त्वा बुधनवमीयुतापरैवकार्येत्यापद्येतेति निर्णयसिंधावपि यदापूर्वेद्युर्निशीथेष्टमीपरेह्निरोहिणीतदापरेद्युर्जयंतीयोगस्यप्रशस्त्यात्परैवेतिमाधवः तदुक्तंतेनैव यस्मिन्वर्षेजयंत्याख्येति पूर्वविद्धाष्टमीयातुहूयुदयेनवमीदिने मुहूर्तमपि संयुक्तासंपूर्णासाष्टमीभवेत् कलाकाष्ठामुहूर्तापियदाकृष्णाष्टमीतिथिः नवमीसैवग्राह्यास्यात्सप्तमीसंयुतानहीतिपाद्मोक्तेश्च केचित्तु हेमाद्रौ अष्टम्याःप्राधान्यात्तस्याश्चपूर्वेद्युकर्मकालव्यापित्वात्पूर्वैव पाद्मेतु पूर्वाह्निनिशीथेप्यष्टम्यभावस्तत्रव्रतंज्ञेयं अंतर्भावोक्तिस्तुमूर्खप्रतिदर्शनमात्रमित्याहुःनत्वष्टम्याःकर्मकालव्याप्तौदिवावायदेवेति वाक्येरोहिणीयुतायाग्राह्यत्वोक्तेर्वचनात्कर्मकालव्यापिनींत्यक्त्वापूर्वापरावाल्पापिरोहिणीयुताग्राह्येति वस्तुतस्तुउपवासद्वयंकार्यंद्वयोर्नित्यत्वादितिस्थितं शुद्धाधिकायदापूर्वस्मिन्दिनेनिशीथेरोहिणीयुक्ता उत्तरदिनेपितद्युक्तातदापूर्वैवग्राह्या रोहिण्यामर्द्धरात्रेचयदाकृष्णाष्टमीभवेत् सोपवासोहरेःपूजांकृत्वातत्रनसीदति विष्णुधर्मोत्तरवचनात् यदातुशुद्धाधिकाकार्यादिनद्वयस्यार्द्धरात्रंविहायरोहिणीयोगस्तदापिपूर्वैवग्राह्या तस्याः सर्वाहोरात्रव्यापिवत्प्रथमातिक्रमेकारणाभावाच्चयदातुशुद्धाधिकादिनद्वयेपिरोहिणीरहितातदाप्यहोरात्रव्यापित्वात्पूर्वैवग्राह्यादिवावेतिवचनाच्च विद्धाधिकातुयदापूर्वस्मिन्नेवदिनेनिशीथेरोहिणीयुक्ता दिनांतरेतुनिशीथंविहाय रोहिणीयुक्तातदापूर्वैवग्राह्या सप्तमीसंयुताष्टम्यांनिशीथेरोहिणीयदि भवितासाष्टमीपुण्यायावच्चंद्रदिवाकराविति वह्निपुराणवचनात्

43

पद्मपुराणेपि कार्याविद्धापिसप्तम्यारोहिणीसहिताष्टमीतत्रोपवासंकुर्वीतातिथिभांतेचपारणमिति आदित्यपुराणे विनाऋक्षेंनकर्तव्यानवमीसंयुताष्टमी कार्याविद्धापिसप्तम्यारोहिणीसहिताष्टमी तत्रोपवासंकुर्वीततिथिभांतेचपारणमिति विष्णुधर्मोत्तरे जयंतीशिवरात्रिश्चकार्येभद्राजयान्विते कृत्वोपवासंतिथ्यंतेतथाकुर्यात्तुपारणमिति जन्माष्टमीजयंतीचशिवरात्रिस्तथैवच पूर्वविद्धैवकर्तव्यातिथिभांतेचपारणमिति जयंत्यापूर्वविद्धायामुपवासंसमाचरेदिति गारुडाच्च . यदातुविद्धाधिकोत्तरस्मिन्नेवदिनेनिशीथेरोहिणीसहितापूर्वदिनेतुनिशीथंविहायरोहिणीतदोत्तरैवग्राह्या मासिभाद्रपदेष्टम्यांकृष्णपक्षेर्द्धरात्रके शशांकेवृषराशिस्थेप्राजापत्यर्क्षसंयुते उपोषितोर्चयेद्विष्णुंयशोदांदेवकीतथेतिभविष्योत्तरवचनात् यदानविद्धाधिकादिनद्वयेप्यर्द्धरात्रेरोहिणीयुक्तादिनद्वयेप्यर्द्धरात्रंविहायरोहिणीसहितावातदोत्तरैवग्राह्या अविद्धायांतुसंज्ञायांजातोदेवकिनंदनइतिवचनात् वर्ज्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमीसऋक्षापिनकर्तव्यासप्तमीसंयुताष्टमी ब्रह्मवैवर्त्तवचनात्हेमाद्रौयदार्द्धरात्रादूर्ध्वंकलामात्रमप्यतिक्रम्याष्टमीप्रवृत्तारोहिणीच द्वितीयेन्हिमुहूर्त्तंद्वेमुहूर्त्तेवातदाद्वितीयैवग्राह्या तथाचस्कंदपुराणे सप्तमीसंयुताष्टम्यांभूत्वाऋक्षंद्विजोत्तम प्राजापत्यंद्वितीयेह्निमुहूर्तार्धंभवेद्यदि तदाष्टयामिकंज्ञेयंप्रोक्तंव्यासादिभिःपुरेति पाद्मेपि मुहूर्तेनापिसंयुक्तासम्पूर्णासाष्टमीभवेत् किंपुनर्नवमीयुक्ताकुलकोटयस्तुमुक्तिदेति तत्रैव पूर्वविद्धाष्टमीयातुउदयेनवमीदिनेमुहूर्त्तमपिसंयुक्तासंपूर्णासाष्टमीभवेत् कलाकाष्टमुहूर्तापियदाकृष्णाष्टमीतिथिः नवम्यांसैवग्राह्यास्यात्सप्तमीसंयुतानहीति यदाशुद्धाधिकायांविद्धाधिकायांवाद्वितीयदिनएवरोहिणीयोगः तदाप्राजापत्यर्क्षसंयुक्तेतिविष्णुरहस्यवचनादुत्तरस्याग्राह्यत्वंप्रागुक्तं तस्याएवबुधवारादियोगेनप्राशस्त्यातिशयोपि पूर्वोक्तः प्रेतयोनिगतानामितिपद्मपुराणेप्रदर्शितः निर्णयामृतेपि यदास्वल्पापिसूर्योदयेष्टमीसाचरोहिणीयुक्ता उपरिसकलानवमीबुधवारेणवायुताभवति तदासं

पूर्णामप्यष्टमींपरित्यज्यसैवस्वल्पाप्युपोष्या तदुक्तंब्रह्मपुराणे उदयेचाष्टमीकिंचित्सकलानवमीयदि भवेद्बुधे
नसंयुक्ताप्राजापत्यर्क्षसंयुता अपिवर्षशतेनापिलभ्यतेवानवाविभोइति केचित्तुयत्तुमयूखे सोमेनेत्यत्रयुक्तं
तुचंद्रोदययुतेत्युक्तं तन्मंदं बुधवारसांनिध्यात्सोमवारग्रहणौचित्यान्माधवमदनरत्नानिर्णयामृतादिषुसोमपदेन
सोमवारग्रहणाच्च नृसिंहपरिचर्यायामपि सोमपदस्यसोमवारत्वमुक्तं निर्णयसिंधौतु उदयेत्यादिवचनं दाना
दिविषयंउपवासाश्रवणादित्यनंतभट्टः उदयेचन्द्रोदये इतिदीक्षिताःअप्येवंगौडास्तु नवमीक्षयपरमिदंवचनं नव
मीसकलायदीतिभविष्योक्तेः एवंतत्पूर्वदिनेजयंत्यभावपरमित्याहुः जयंत्यादिसर्वापवादोयमित्याचार्यचूडाम
ण्यादयः वयंतु सत्यंव्रतभेदः जन्माष्टम्युपवासःपूर्वेद्युरेवपरेद्युर्जयंतीव्रतत्वादुपवासद्वयंकार्यमित्यपिस्थितं यातु
विद्धाधिका दिनद्वयेऽपि रोहिणीयोगरहितासाचतुर्विधा पूर्वस्मिन्नेवदिनेनिशीथेवर्तमानोत्तरस्मिन्नेवदिनेनिशीथेव
र्तमाना दिनद्वयेऽनिशीथेवर्त्तमानादिनद्वयेपितत्रावर्तमानाचेति तत्राद्ययोः पक्षयोर्यानिशीथव्यापिनीसैवग्राह्या
दिवावायदिवारात्राविति वचनात् तृतीयचतुर्थयोस्तूत्तरैवग्राह्या बहुतरसंकल्पादिकर्मकालव्यापित्वात् वर्जनी
याप्रयत्नेनसप्तमीसंयुताष्टमीत्यादिवचनैः सप्तमीसहितायाअष्टमीनिषेधाच्चेतिकृतमलंविस्तरेण यद्यप्यत्रद्वि
तीयचतुर्थभेदौमाधवाद्युदाहृताष्टमीशिवरात्रिश्चेतिवचनप्रतिपादितार्द्धरात्रात्पूर्वसप्तमीसद्भावरूपवेधग्रहणेऽनुप
पन्नौतथापिविद्धापदेनप्रकृते सप्तमीमिश्रामात्रोपदानेनानुपपन्नौ अथनृसिंहपरिचर्यामतंलिख्यते सूर्योदयादुपरि
पलमाणाष्टमीनिर्णये सत्यामसत्यांवारोहिण्यांद्वितीयदिनएवजन्माष्टमीव्रतंकर्त्तव्यं उदयेचाष्टमीतिस्कांदवचनात्
प्रेतयोनिगतानांतिलिपाद्यवचनाच्चसप्तमीविद्धातुसर्वथात्याज्यैवजन्माष्टमींपूर्वविद्धांसऋक्षांसकलामपि विहायनव
मीशुद्धामुपोष्यव्रतमाचरेत् शुद्धांऋक्षहीनां पलवेधेतुविप्रेंद्रसप्तम्याअष्टमींत्यजेत् सुरायाबिंदुनास्पृष्टंगंगाम्भः

कलशंयथेति वर्जनीयाप्रयत्नेनेत्यादिपूर्वोक्तस्कांदवचनाच्च अष्टम्यनिर्गमेतुसप्तमीविद्धाप्युपोष्या एकादश्यात्रानिर्गमेपिदशमीविद्धापरित्यागेनशुद्धद्वादश्युपवासविधानवच्छुद्धनवम्युपवासविधानाभावात् रोहिणीयोगस्तुबुधसोमवारादियोगवत्प्राशस्त्यातिरेकपरोनोपवासप्रयोजकः तथात्वेतदभावेव्रतलोपप्रसंगात् कालनिर्णयकारास्तूभयार्द्धरात्रेरोहिण्यष्टमीयोगउभयार्द्धरात्रे रोहिण्यष्टमीयोगाभाव उत्तरार्द्धरात्रएवरोहिण्यष्टमीयोगेपूर्वार्द्धरात्रेरोहिणीमात्रयोगेचोत्तरैवोपोष्यान्यदापूर्वा दिनद्वयेऋक्षाभावेपिव्यवस्थापर्यायेपवउदयेचेत्यस्यदिनद्वयेप्यर्द्धरात्ररोहिण्यष्टमीयोगपरत्वंवर्णयांबभूवुः तत्राष्टमीयोगातिरिक्तस्यऋक्षादियोगस्योपवासविधानायोद्देश्यविशेषणतयाविवक्षितत्वेहविरुभयत्ववदापाततोवाक्यभेदस्यपरिहारोदिव्यदृष्ट्याशिष्टैरन्वेष्टव्यः हरिभक्तिविलासमते श्रीजन्माष्टमीव्रतदिननिर्णयः ॥ तथाचकारिका कृष्णोपोष्याष्टमीभाद्रेरोहिण्याढ्यामहाफला निशीथेत्रापिकिंचेन्दौज्ञेवापिनवमीयुता अत्रयोगबाहुल्यंयोगप्राशस्त्यंचोपवासानियामकं तथैवहनें दुःपूर्वेहनिज्ञोवापरेचेद्रोहिणीयुता केवलावाष्टमीवृद्धासोपोष्यानवमीयुता वृद्धावृद्धिगामिनीसतीस्वल्पापीत्यर्थः तथोक्तं उदयेचाष्टमीकिंचिदित्यादि मुहूर्तेनापिसंयुक्तासासम्पूर्णाष्टमीभवेदितिच ननुपरेचेद्रोहिणीयुतेत्यनेनपूर्वेहनिरोहिणीयुतत्वंनास्तीतिज्ञापनात् परेह्निरोहिणीनवमीयुतेतिहेतुगर्भविशेषणं युतानवमीयुताततः सैवोपोष्येत्यर्थः नवमीयोगस्यप्राशस्त्यात् तच्चकिंपुनर्नवमीयुक्तेत्यादौकैमुतिकन्यायात् मासिभाद्रपदेकृष्णाअष्टमीनवमीभवेत् पूज्याष्टमीततःपुंभिःस्त्रीभिश्चापिविशेषतइतिसूत्रोक्तेश्चगौतमीतंत्रेच अष्टमीनवमीविद्धाउमामाहेश्वरीतिथिः सैवोपोष्यासदापुण्यकांक्षिभीरोहिणींविना अत्रकारिका अत्रकेवलमित्यादाउमामाहेश्वरीतिथिः प्रोक्तासैवयस्मादुपोष्यत्वेनानिश्चितेति तत्तद्योगाभावेतुकेवलाष्टम्युपोष्या तथाचकारिका रोहिण्यादिवियु

क्तापिसोपोष्याकेवलाष्टमी तत्तद्योगस्तुवैशिष्टोव्रतलोपेन्यथाभवेत् इत्थंशुद्धेवलिखितायोगाद्बहुविधाष्टमीत्याज्याविद्धाचसप्तम्यासा विद्धैकादशीयथा ननुभवत्वष्टमीनिर्गमेपरदिनोपवासः अष्टमीक्षयेतदनिर्गमेकाव्यवस्थेत्याशंक्याह तदेवमष्टमीहानौव्रतलोपःप्रसज्यते तन्निरस्तं पूर्वमेवस्कांदवाक्यानुसारतः जन्माष्टमींपूर्वविद्धामित्याद्यंयदुदीरितमितिस्कांदीयवचनद्वयपूर्वं लिखितं यथाजन्माष्टमींपूर्वविद्धामित्यादिसकलापिसऋक्षापिनवमीसंयुतापिच जन्माष्टमीपूर्वविद्धानकर्तव्याकदाचनेति नवमीसंयुतापीत्यष्टमी क्षयाभिप्रायेण तदेवमेकादश्यानिर्गमेशुद्धद्वादश्युपवासवदत्रापिनवमींशुद्धामुपोष्यव्रतमाचरेदितिवचनवलात्तादृशस्थले शुद्धनवमीव्रतमेवविधेयं विद्धाव्रतंतुसर्वथैवत्याज्यंमोक्षकांक्षिभिर्यतिविधवाभिश्चसकामैस्तुपूर्वविद्धावाशुद्धाष्टम्यांनिशीथव्यापिन्यामेवकार्यमितिदिक् स्मृतिकौस्तुभेपि पूर्वदिनेसप्तमीवेधेन निशीथव्यापिन्याअपिग्राह्यत्वापवादोवैष्णवीयः यथोक्तंज्योतिर्निबंधे सर्वथासप्तमीयुक्तासंत्याज्यासर्ववैष्णवैः उपोष्यानवमीयुक्तातदुक्तंपुष्करे स्फुटं वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमी सऋक्षापिनकर्तव्यासशल्यासाप्रकीर्तितेत्यादि तदलमतिप्रसंगेन इतिजन्माष्टमीजयंतीनिर्णयः ॥ अत्रकृत्यविशेषः ततोष्टम्यांतिलैःस्नातोनद्यादौविमलेजलइत्यादिवक्ष्यमाणभविष्योक्तेतिहासेद्रष्टव्यः अथप्रयोगः तत्रकर्तोक्तवज्जन्माष्टम्युपवासपूर्वदिनेलघुभुक्रात्रौजितेंद्रियः सुखोपवासदिने प्रातः स्नानादिनित्यकृत्यंविधाय सूर्यःसोमोयमः कालःसंध्येभूतान्यहः क्षपा पवनोदिक्पतिर्भूमिराकाशंखेचरामम व्रह्मशासनमास्थायकल्पध्वमिहसंनिधिमित्युक्त्वा सूर्यादिदेवताभ्योनमस्कृत्वाचम्य प्राणानायम्यप्राङ्मुखउदङ्मुखोवादर्भहस्तः फलपुष्पाक्षतैर्वापूर्णताम्रादिपात्रंदक्षिणहस्तेनादाययमासपक्षवारनक्षत्रमुल्लिख्यामुकफलकामःपापक्षयकामोवा श्रीकृष्णप्रीतयेजन्माष्टमीव्रतमहंकरिष्ये तथा वसुदेवंसमुद्दिश्यसर्वपाप

प्रशान्तयें उपवासंकरिष्यामिकृष्णाष्टम्यांनभस्यहं अद्यकृष्णाष्टमींदेवींनभश्चंद्रंसरोहिणीं अर्चयित्वोपवासेनभोक्ष्येहमपरेहनि एनसोमोक्षकामोऽस्मियद्गोविंदत्रियोनिजं ॥ तन्मेमुंचतुमांत्राहिपतितंशोकसागरे आजन्ममरणंयावद्यन्मयादुष्कृतंकृतं तत्प्रणाशयगोविंद प्रसीदपरमेश्वर इतिपठित्वाजलमुत्सृजेत् नृसिंहपरिचर्यायांतु अद्यस्थित्वानिराहारः श्वोभूतेपरमेश्वर भोक्ष्यामिपुंडरीकाक्षआस्मिन्जन्माष्टमीव्रते ॥ इतिसंकल्पवाक्यंपठितं ॥ सप्तम्यांचैकभक्तानंतरेसंकल्पंकुर्यादितिचोक्तं ततोमध्यान्हेकृष्णतिलैः स्नात्वा देवक्याः सूतिकागृहादिकुर्यात् ॥ तद्यथा ॥ सूपलिप्तसुदेशेकदलीस्तंभनानावर्णवासः शोभितं समंतात्स्थापितैराम्रपल्लवादियुतैर्जलपूर्णनवकलशैर्दीपावलीभिः पुष्पमालाभिर्युतंचंदनागुरुधूपितं अग्निखड्गकृष्णछागरक्षामणिद्वारन्यस्तमुशलादियुतं गीतवादित्रनृत्यादिमंगलोपेतंषष्ठ्यादेव्याधिष्ठितंदेवक्याः सूतिकागृहंविधायतस्यसमंताद्भित्तिषु सकुसुमाञ्जलीन्देवगंधर्वादीन्खड्गचर्मधरंवसुदेवदेवकीगर्भगोपीगोपान्कंसनियुक्तान्गोधेनुकुंजरान्यमुनांतर्जलस्थंकालियंअन्यच्चसकलंतत्कालीनं गोकुलचरितंयथासम्भवंलिखित्वासूतिकागृहमध्ये मंचकंस्थापयित्वा तदुपरिसर्वतोभद्रमंडलोपरिकलशेसिंहासनेवाहेमींराजतींताम्रींपैत्तलींमणिमयींवार्क्षीं मृन्मयींलेख्यरूपांवायथासंभवं तांश्रीकृष्णप्रतिमांदेवकीस्तनंधयींप्रसूतांदेवक्याश्चरणौसंवाहयंतींलक्ष्मीप्रतिमांच प्रसूतांदेवकीप्रतिमांचसंस्थापयेत् तथैवक्कचित्प्रदेशेसकन्यकांयशोदांरोहिणींवसुदेवंनंदंबलभद्रंगोपीर्गोपांश्चोपकल्प्यदेवकीसमीपेखड्गहस्तंकंसंपूतनाराक्षसादींश्चावस्थापयेत् तत्रप्रतिमायाअग्न्युत्तारणंकृत्वादेशकालाद्यनुस्मृत्यसपरिवारश्रीकृष्णपूजांकरिष्य इतिसंकल्प्य ॥ हस्तेपुष्पांजलिंगृहीत्वागायद्भिरितिमंत्रपुरःसरंदेवक्यांक्षिपेत् साच गायद्भिःकिन्नराद्यैःसततपरिवृतावेणुवीणानिनादैः भृंगारादर्शकुंभप्रवरकृतकरैःकिन्नरैःसेव्यमाना

पर्यंकेस्वांस्ततेयामुदिततरमुखीपुत्रिणीसम्यगास्ते सादेवीदेवमाताजयतिसुवदनादेवकीदिव्यरूपेति विश्वेश्वरायदेवायतथाविश्वंभरायच विश्वस्यपतयेतुभ्यंगोविंदायनमोनमइति श्रीकृष्णायपुष्पांजलिंदद्यात् श्रीकृष्णाविर्भावंपरिभाव्य तमद्भुतंबालकमंबुजेक्षणंचतुर्भुजंशंखगदाद्युदायुधं श्रीवत्सलक्ष्मंगलशोभिकौस्तुभंपीताम्बरंसान्द्रपयोदसौभगं महार्हवैडूर्यकिरीटकुण्डलत्विषापरिष्वक्तसहस्रकुंतलं उद्दामकांच्यंगदकंकणादिभिर्विरोचमानंवसुदेवऐक्षत सविस्मयोत्फुल्लविलोचनोहरिंसुतंविलोक्यानकदुंदुभिस्तदा कृष्णावतारोत्सवसंभ्रमोस्पृशन्मुदाद्विजेभ्योयुतमाप्लुतोगवां अथैनमस्तौदवधार्यपूरुषंपरंनतांगःकृतधीःकृताजलिरिति ॥ जन्मश्लोकान्पठेत्ततःश्रीकृष्णमंत्रन्यासान्विदध्यात् तेचयथा शिरसिनारदऋषयेनमः मुखेगायत्रीछंदसेनमः हृदिश्रीकृष्णपरमात्मादेवतायैनमः क्लींबीजायनमः गुह्ये श्रींशक्तयेनमःपादयोः ततःषडंगन्यासः क्लांअंगुष्ठाभ्यांनमः क्लींतर्जनीभ्यांस्वाहा क्लूंमध्यमाभ्यांवषट् क्लैंअनामिकाभ्यांहुं क्लौंकनिष्ठिकाभ्यांवौषट् क्लःकरतलकरपृष्ठाभ्यांफट् एवंक्लांहृदयायनमइत्यादिततोमुद्रादिकंप्रदर्श्य अव्याद्व्याकोशनीलांबुजरुचिररुणांभोजनेत्रोंबुजस्थोबालोजंघाकटीरस्थलकलितरणत्किंकिणीकोमुकुंदः दोर्भ्यांहैयंगवीनंदधदतिविमलंपायसंविश्ववंद्यो गोपीगोपालवीतोरुणनखविलसत्कंठभूषश्चिरंव इतिहृदिध्यात्वापूजनंकुर्यात् प्रतिमापूजनंचसर्वत्रप्राणप्रतिष्ठापुरःसरंकर्त्तव्यं प्रतिमायाःकपोलौद्वौस्पृष्ट्वादक्षिणपाणिना प्राणप्रतिष्ठांकुर्वीततस्यांदेवस्यवाहरेः अकृतायांप्रतिष्ठायांप्राणानांप्रतिमासुच यथापूर्वंतथाभावःस्वर्णादीनांनदेवता अन्येषामपिदेवानांप्रतिमास्वपिपार्थिव प्राणप्रतिष्ठाकर्तव्यातस्यांदेवत्वसिद्धये वासुदेवस्यबीजेनतद्विष्णोरित्यनेनच तथैवहृदयेंगुष्ठंदत्वाशश्वच्चमंत्रवित् एभिर्मंत्रैःप्रतिष्ठांतुहृदयेपिसमाचरेत् अस्मैप्राणाःप्रतिष्ठंतुअस्मैप्राणाःक्षरंतुच अस्मैदेवत्वसंख्यायैस्वाहेतियजुरीरयन्

अगमंत्रैरागिमंत्रैर्वैदिकैरित्यनेनच प्राणप्रतिष्ठांसर्वत्रप्रतिमासुसमाचरेदितिकालिकापुराणात् बीजेनमूलमंत्रेणचैदंकर्मसमाचरेत् हृद्गतंकृष्णमाध्यायपूजनंवेदधेन्नरइत्यभिप्रायेण यदास्वहृदयेपूजाक्रियते तदाहृदयेंगुष्ठंदत्वा मंत्राःपठनीयाः प्रतिमाया कपोलौहृदयंवास्पृष्ट्वेतिविशेषः वैदिकमूलमंत्राभावे प्रणवादिचतुर्थ्यंतनमोंतनामभिरित्यनेनसंगृहीतानि अस्मैइत्यस्यस्थानेतत्तद्देवतानामयुक्तामस्माइत्यादिस्वाहांतंमंत्रंपठन् प्राणप्रतिष्ठांकुर्यात् ततोगायद्भिरित्यनेनदेवकींमांचापिबालकंसुप्तंपर्यंकेस्तनपायिनं श्रीवत्सवक्षसंशांतंनीलोत्पलदलच्छविमिति ॐनमोदेव्यैश्रियैइतिश्रियंचसम्पूजयेत् प्रणवादिनमोंतंचपृथक्नामानुकीर्त्तयन् कुर्यात्पूजांविधिज्ञश्चसर्वपापापनुत्तये देवक्यैवसुदेवायवासुदेवायचैवहि बलदेवायनंदाययशोदायैपृथक्पृथक्इति नमोदेव्यैश्रियैइतीतिचभविष्योत्तरवचनात् एवंनंदयशोदाबलभद्रचंडिकादीन् षोडशोपचारैः प्रत्येकंमंत्रेणपूजयेत् भविष्योत्तरेतु केषुचिदुपचारेषु विशेषमंत्राअप्युक्ताः तत्रस्नानमंत्रः योगेश्वरायदेवाययोगानांपतयेविभो योगोद्भवायानित्यायगोविंदायनमोनमइति नृसिंहपरिचर्यायांतु योगेश्वरायदेवायदेवकीसहितायच योगोद्भवायेतिपूर्ववत्क्षीरेणस्नपयेत् गारुडेतु योगेश्वराययोगाययोगिनांपतयेनमः योगगम्याययोगींद्रैर्गोविंदायनमोनमः इतिशुद्धोदकस्नपनं यज्ञेश्वरायदेवायतथायज्ञोद्भवायच यज्ञानांपतयेनाथगोविंदायनमोनमः अघ्यनैवेद्यमंत्रः विश्वेश्वरायविश्वायतथाविश्वोद्भवायच विश्वस्यपतयेतुभ्यंगोविंदायनमोनमः इतिफलदक्षिणादिसर्वंदत्वा देवक्यैअर्घ्यंदद्यात् प्रणमेदेवजननींत्वत्तोजातस्तुवामनः वसुदेवात्तथाकृष्णोनमस्तुभ्यंनमोनमः सपुत्रार्घ्यंप्रदत्तंमेगृहाणेमंनमोस्तुतइति ततःश्रीकृष्णायार्घ्यंदद्यात् तत्रमंत्रोगारुडे यज्ञाययज्ञेश्वराययज्ञपतयेयज्ञसंभवायगोविंदायनमोनमइति नृसिंहपरिचर्यायांतु जातःकंसवधार्थायभूभारोत्तारणायच देवतानां

हितार्थायधर्मसंस्थापनायच गृहाणार्घ्यंमयादत्तंदेवक्यासहितोनघेति ततोदेवकीप्रार्थना देवक्यैतुनमस्तुभ्यंकृष्णोत्पादनतत्परे पापक्षयकरीदेवीतुष्टिंयातुमयार्चिता अदितेदेवमातस्त्वंसर्वपापप्रणाशिनि अतस्त्वंपूजिता देवीभीतोहंभवसागरात् पूजितासिचयद्देवैःप्रसन्नात्वंवरानने पूजितातुमयाभक्त्याप्रसादंकुरुसुव्रते यथापुत्रं हरिंलब्ध्वाजातासित्वंचनिर्वृता परीतादेविनिर्वृतस्वपुत्रान्दर्शयस्वमइति ॥

अथश्रीकृष्णप्रार्थना अवतारसहस्राणिकरोषिमधुसूदन नसंख्यामवताराणांकश्चिज्जानातिवैभुवि देवाब्रह्मादयोवापिस्वरूपंनविदुस्तव अतस्त्वांपूजयिष्यामिमातुरुत्संगसंस्थितं वांछितंकुरुमेदेवदुःकृतंचैवनाशय कुरुष्वमेदयांदेवसंसारार्त्तिभयापहेति ततः श्रीकृष्णायपुष्पांजलिंदद्यात् ॥ गारुडं ॥ ध [illegible]यधर्मेश्वरायधर्मपतयेधर्मसंभवाय गोविंदायनमोनमः इतिस्वाहांतोघृताक्ततिलहोमेमंत्रउपात्तः ततोगव्यघृतेनवसोर्धाराकार्या क्वचिद्गुडघृतेनेत्युक्तंततोजातकर्मनालच्छेदनंषष्ठीपूजनंनामकर्मचसंक्षेपेणकार्यं तत्रादौजातकर्मप्रयोगः मासपक्षाद्युल्लिख्यास्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हणद्वारागर्भांबुजनितदोषपरिहारार्थंमेधायुर्वृद्ध्यर्थंजातकर्माहंकरिष्ये तत्रनिर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्धारानांदीश्राद्धंचकरिष्ये इतिसंकल्प्य ॥ गणानांत्वेतिपंचोपचारैर्गणेशंपूजयेत् ततः पुण्याहं कल्याणं ऋद्धिः स्वस्तिश्रीः पुनंतुमां यथेमां सत्र्यऋद्धिः स्वस्तिनः श्रीश्चते इतिपुण्याहवाचनं ॥ अथमातृकापूजनं ॥ गौरीपद्माशचीमेधा सावित्रीविजयाजया देवसेनास्वधास्वाहामातरोलोकमातरः हृष्टिः पुष्टिस्तथातुष्टिरात्मनः कुलदेवता ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा वाराहीचतथैंद्राणीचामुंडासप्तमातरइति वसोपवित्रमसि ॥ इतिघृतधाराः ॥ पंचसप्तवाकुडयेकृत्वासंपूजयेत् ततआयुष्यसूक्तजपः आयुष्यंवर्चस्यंरायस्पोषमौद्भिदं इदंहिरण्यंवर्चस्य

जैत्रायाविशतादिमां ननतद्रक्षांसिनपिशाचाश्चरंतिदेवानामोजः प्रथमंह्येᳫंह्येतत् योविभर्त्तिदाक्षायणᳫं हिरण्यᳫंसदेवेषुकृणुतेदीर्घमायुः समनुष्येषुकृणुतेदीर्घमायुः ॥

॥ इतिमातृकापूजनम् ॥

अथानांदीश्राद्धं सत्यवसुसंज्ञकाविश्वेदेवानांदीमुखा भूर्भुवःस्वःइदंवःपाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिगोत्रानांदीमुख्योमातृपितामहीप्रपितामह्यः इदंवः पाद्यं पादा० पितृपितामहप्रपितामहाः नांदीमुखाः भूर्भुवः स्वः इदंपाद्यं पादा० द्वितीयगोत्रा मातामहप्रमातामहवृद्धप्रमातामहा भू. इदं पादा० नेत्रस्पर्शः मासपक्षाद्युल्लिख्यअस्मिन्कर्मणीसाकल्येनविधिनानांदीश्राद्धमहंकरिष्ये सत्यवसुसंज्ञकाः विश्वेषांदेवानांभूर्भुवःस्वः इमे आसनेवोनमोनमः नांदीश्राद्धेक्षणौक्रियेतांतथाप्राप्नुतौ भवंतौआप्नुतांगोत्राणांमातृपितामहीप्रपितामहीनां इमे नांदीश्राद्धेगोत्राणांपितृपितामहप्रपितामहानांनांदी. इमे० नांदीद्याअक्षताःपांतुपुष्पाणिपांतु सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्योवः गंधार्चनंस्वाहा संपद्यतावृद्धिगोत्राभ्योः मातृपितामहीप्रपितामहीभ्योनांदीमुखीभ्योवः द्रव्याणिपुनर्गंधादिदत्वा गोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः नांदीमुखेभ्यःवःगं० द्वितीयगोत्रेभ्यो मातामहप्रमातामहवृद्धप्रमातामहेभ्यःवःस्वधानमः सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्यो दास्यमानब्राह्मणयुग्मभोजनायपायसाद्यंअन्नंअमृतरूपेणस्वाहासंपद्यतां वृद्धिगोत्राभ्योमातृपितामहीप्रपितामहीभ्योनांदीमुखेभ्यः दास्यमानब्राह्मणभोजनायादीत्युक्त्वावृद्धिद्वितीयगोत्रेभ्यो मातामहप्रमातामहवृद्धप्रमातामहेभ्यो वृद्धौसत्यवसुसंज्ञकाविश्वेदेवाः प्रीयंतां वृद्धिगोत्रानांदीमुख्योमातृपितामहीप्रपितामह्यःप्रीयंतांवृद्धिगोत्रानांदीमुखाःपितरःप्रीयंतां द्वितीयगोत्राः नांदीमुखाः मातामहाः प्रीयंतां सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्योनांदीमुखेभ्यः कृते

तन्नांदीश्राद्धस्यफलप्रतिष्ठासिध्यर्थंद्राक्षामलकयवमूलनिष्क्रयणीं दक्षिणांदातुमहमुत्सृजे वृद्धिगोत्राभ्योमातृ
अ०र० पितामहीप्रपितामहीभ्योनांदीश्राद्धस्यदक्षिणांदातुमहमुत्सृजे वृद्धिगोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः कृ
भाद्रप० तैतन्नांदीश्राद्धदक्षिणांदातुमहमुत्सृजे द्वितीयगोत्रेभ्योमातामहप्रमातामहवृद्धप्रमातामहेभ्यः कृतैतन्नांदीश्रा
२५ द्धदक्षिणांदातुमहमुत्सृजे उपास्मैगायतानरः पवमानायेंदवेअभिदेवांयईक्षते नांदीश्राद्धंसंपन्नसुसंपन्नंअनेन
नांदीश्राद्धेनकर्मदेवताः प्रीयंतां वृद्धिः अनामिकयासुवर्णांतर्हितयामधुघृतेप्राशयेत् भूः त्वयिदधामि
भुवस्त्वयिदधामि स्वस्त्वयिदधामि भूर्भुवः स्वः सर्वंत्वयिदधामि अथास्याः पुष्पंकरोति ताभ्यां
दक्षिणेवामेवाकर्णेजपति अग्निरायुष्मान्सवनस्पतिभिरायुष्मान् तेनत्वा युषायुष्मंतंकरोमि सोमआयुष्मा
न् सओषधीभिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि ब्रह्मायुष्मान्तद्ब्राह्मणैरायुष्मान्तेनत्वा ऋषयआयुष्मंतस्तेव्र
तैरायुष्मंतस्तेनत्वा देवाआयुष्मंतस्तेमृतेनायुष्मंतः तेनत्वा यज्ञआयुष्मान्सवनस्पतीभिरायुष्मान्तेन इति
त्रिः त्र्यायुषंजमदग्नेः कश्यपस्यत्र्यायुषंयद्देवानांत्र्यायुषंतन्मेअस्तुत्र्यायुषं इति त्रिः सयास्मिन्देशेजातोभव
तितमभिमंत्रयेत् वेदतेभूमिहृदंयद्रमासिश्रीः तंवेदाहंतन्मांतत्विद्यात् पश्येमशरदःशतंजीवेमशरदःशतंशृणुया
मशरदःशतमिति अथैनमभिमृशति अश्माभवपरशुर्भवहिरण्यमस्तुते आत्मावैपुत्रनामासिजीवत्वंशरदःशतमि
तिततोनालछेदनंषष्ठीपूजनंचकुर्यात् ॥ ॥ तत्रषष्ठीपूजनविधिः पंचम्यांषष्ठ्यांचरात्रौ।पितादेशकालौस्मृत्वास्यशिशो
सूतिकायाश्चसर्वारिष्टशांत्यर्थमायुरारोग्यासिद्ध्यर्थंविघ्नेशस्यजन्मदानां.षष्ठीदेव्याः जीवंतिकायाः स्कंदस्यराक।
दीनांचपूजांकरिष्ये इतिसंकल्प्यगणेशंसम्पूज्यकलशंसंस्थाप्य तत्रप्रतिमास्वक्षतपुंजेषुवागणेशजन्मदाः जीवं
तिकास्कंदंराकामनुमतिंसिनीवालीं।कुहूकुड्येलिखितां।षष्ठींभगवतींच आवाह्यततस्तुग्रहान्नवप्रतिष्ठाप्यषोडशोपचा

रैः सम्पूज्यदधिभक्तंनिवेद्यदीपान्माषभक्तवलीन्दत्त्वाप्रार्थयेत् गौरीपुत्रोयथास्कंदः शिशुत्वेरक्षितः पुरा तथा ममाप्ययंबालःषष्ठिकेरक्ष्यतांनमः ॥ ः ः ॥ अथनामकरणं तच्च दशरात्रेव्युष्टेनामकरणमितिगोभिलसूत्रात् अहन्येकादशेनामेतियाज्ञवल्क्यस्मृतेः ॥ दशम्यामुत्थाप्यब्राह्मणान्भोजयित्वा पितानामकारीतिगृह्यसूत्रात् एकादशेन्हिब्राह्मणेनकर्त्तव्यं तत्रभद्रावैधृत्यमावास्यादिकालाशुद्धौद्वादशेपूर्णमासे दशरात्रेवर्षेकार्यं क्षत्रादिस्तु स्वस्वाशौचांतेकुर्यात् तत्रनियतकालेगुरुभार्गवयोरस्ताद्याधिमासादिदोषोनास्ति अतीतकालेतुसोऽस्त्येव अतीतकालश्चेत् अश्विनीरोहिणीमृगपुनर्वसुउत्तरात्रय हस्तत्रयानुराधाश्रवणत्रयरेवतीषु शुभवारेरिक्ताष्टमीवर्जिततिथौकार्यं तत्रपूर्वाह्णेपित्रादिःकृतान्हिकः प्राणानायम्यदेशकालौकीर्त्तनांतेअस्यकुमारस्यवैजिकगार्भिकैनोनिवर्हणायुरभिवृद्धिव्यवहारसिद्धिद्वारापरमेश्वरप्रीतये नामकरणमहंकरिष्ये इतिसंकल्प्यतानिकृत्वा ॥ नामकरणपूर्वांगत्वेनविहितंब्राह्मणत्रयायभोजनं संप्रदास्यइतिचसंकल्प्यानुच्छिष्टपाकेनत्रीनधिकान्वाब्राह्मणान्भोजयित्वा प्रशस्तपात्रेतंडुलोपरिआदौलक्ष्मीनृसिंहभक्तइत्यादि स्वकुलदेवतानामलेख्यम् ॥ ततोमार्गशीर्षादेः ॥ कृष्णोऽनंतोच्युतश्चक्रीवैकुंठोथजनार्दनः उपेंद्रोयज्ञपुरुषोवासुदेवस्तथाहरिः योगेशः पुंडरीकाक्षो मासनामान्यनुक्रमात् ॥ इतिक्रमादागतंमासनामकृष्णइत्यादिलेख्यम् ॥ ततोवकहडचक्रानुसारेणजन्मनक्षत्राश्विन्यादिप्रथमद्वितीयतृतीयचतुर्थपादप्रयुक्ताद्यक्षराणि जन्मनामानिलेख्यानि ॥ तथा ॥ तत्राश्विनीनक्षत्रस्य चूचेचोलाअश्विनी चूडामणिः चेलयतिः चूलभद्रः लाडिकाइति भरणीनक्षत्रस्य लिलूलेलोभरणी लीलाधरः लूतारिः लोकप्रियः लोकनाथः कृत्तिकानक्षत्रस्य आईऊएकृत्तिका आत्मारामः ईश्वरभट्टः ऊघोरभट्टः एकनाथः रोहिणीनक्षत्रस्य ओवाविवूरोहिणी ओंकारेश्वरः वाचस्पति

१०ब्र०
भाद्रप०
२६

वीरेश्वरः वूलारामः मृगशिरनक्षत्रस्य वेवोकाकीमृगशिरः वेशिभट्टः वासनापतिः कालभट्टः कौत्युंज्वलइत्यादीनिबोध्यानि ततः काचवर्गाणांघोषसंज्ञकं तृतीयचतुर्थपंचमाक्षरंहकाराद्यंअंतस्थसंज्ञकंयरलवाद्यन्यतममध्यमाक्षरंदीर्घांताक्षरंपितामहादिनामकृत्प्रत्ययांतंतद्धितांतवर्ज्यंद्व्यक्षरंवाशर्मब्राह्मणस्य सुखवाचकशब्दांतंब्राह्मणस्ययथा हरदत्तशर्माहरिशर्माइत्यादिक्षत्रियस्यतुवर्मा यथाहरदत्तवर्मा हरवर्माहरदत्तसिंहहरसिंहइत्यादि वैश्यस्यतुहरिगुप्तइत्यादि शूद्रस्यतु हरिदासइत्यादिलेख्यं नामदेवताभिरितिसम्पूज्य मातुरुत्संगस्थशिशोर्दक्षिणकर्णे कुलदेवता लक्ष्मीनृसिंहभक्तोसीत्यादिकथनीयं मासनाम्नाकृष्णइत्यादि नक्षत्रनाम्नाचूडामणिरसीत्यादि व्यावहारिकनाम्नाहरदत्तशर्मासीत्यादिनामचतुष्टयंकथनीयं विप्रैर्मनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञंसमिमंदधातु विश्वेदेवासइहमादयंतामोंप्रतिष्ठ इतिमंत्रांते नामसुप्रतिष्ठितमस्तुइतिवक्तव्यं उत्थितोबद्धांजलिः कर्ता कुलदेवतानाम्ना लक्ष्मीनृसिंहभक्तनामायंभवतोभिवादयते इतिवदेत् तेचआयुष्मान्भवतुलक्ष्मीनृसिंहभक्तइतिवदेयुः एवमेवकर्त्तामासनाम्नाकृष्णनामायंभवतोभिवादयते इतिवदेत् तेचआयुष्मान्भवतुकृष्णशर्माइतिवदेयुः पुनः कर्तानक्षत्रनाम्नाचूडामणिशर्मायंभवतोभिवादयते इतिवदेत् तेचआयुष्मान् भवतु चूडामणिशर्मा इतिवदेयुः पुनः कर्त्ताव्यावहारिकनाम्ना हरदत्तशर्मायं भवतोभिवादयते इतिवदेत् तेचआयुष्मान्भवतुहरदत्त शर्मा इतिवदेयुः ॥ ॥

इतियस्ययथागतंनामचतुष्टयं अभिवादनप्रत्यभिवादेनपूह्यं ततः कर्त्ताविप्रान्नत्वा कृतैतन्नामकारणांगतया विहितंदशसंख्याकब्राह्मणेभ्योभोजनंसंप्रदास्ये ॥ इतिसंकल्प्यब्राह्मणान्दशभोजयेत् ॥

विप्रान्संपूज्यतांबूलदक्षिणाभिस्तेभ्यआशिषोगृह्णीयात् कन्यायास्तु अयुताक्षरमकारांततद्धितप्रत्ययांतं कार्यं

मासनामस्वपि कृष्णानंताच्युताचक्रिणोवैकुंठाजनार्दना उपेंद्रोयज्ञपुरुषोवासुदेवोहरियोगेशो पुंडरीकाक्षा इति नामकरणप्रयोगः ॥ ॥ इतिकार्त्तिकीनां जातकर्म नामकर्मच ॥

ततःप्रतिमादौमंडलेवासोमायसोमेश्वरायपतये सोमसम्भवाय सोमायनमोनम इतिगारुडोक्तमंत्रेण चंद्रं संपूज्य ॥ शंखेतोयंसमादायसपुष्पकुशचंदनं जानुभ्यांधरणींगत्वाचंद्रायार्घ्यंनिवेदयेत् क्षीरोदार्णवसंभूतअत्रिनेत्रसमुद्भव गृहाणार्घ्यंशशांकेमंरोहिण्यासहितोमम ज्योत्स्नापतेनमस्तुभ्यंनमस्तेज्योतिषांपते नमस्तेरोहिणीकांतअर्घ्यंमेप्रतिगृह्यतामितिमंत्राभ्यां ततोज्योत्स्नायाः पतयेतुभ्यंज्योतिषांपतयेनमः नमस्तेरोहिणीकांतसुधावासनमोस्तुते नमोमंडलदीपायशिरोरत्नायधूर्जटेः कलाभिर्वर्द्धमानायनमश्चंद्रायचारवे इतिमंत्राभ्यांप्रणमेत् ॥ ततो भगवत्स्तुतिं कुर्यात् अनघंवामनंशौरिंवैकुंठंपुरुषोत्तमं वासुदेवंहृषीकेशंमाधवंमधुसूदनं वाराहंपुंडरीकाक्षंनृसिंहंदैत्यसूदनं दामोदरंपद्मनाभंकेशवंगरुडध्वजं गोविंदमच्युतंकृष्णमनंतमपराजितं अधोक्षजंजगद्बीजंसर्गस्थित्यंतकारिणं अनादिनिधनंविष्णुंत्रिलोकेशंत्रिविक्रमं नारायणंचतुर्बाहुंशंखचक्रगदाधरं पीतांबरधरंनित्यंवनमालाविभूषितं श्रीवत्सांकंजगत्सेतुंकृष्णंचक्रधरंहरिं प्रपद्येऽहंसदादेवंसर्वकामप्रसिद्धये प्रणमामिसदादेवं वासुदेवं जगत्पति मिति त्राहिमांसर्वलोकेशहरेसंसारसागरात् त्राहिमांसर्वपापघ्न दुःखशोकार्णवात्प्रभो सर्वलोकेश्वरत्राहिपतितंमांभवार्णवे ॥ देवकीनंदनः श्रीमान् हरेसंसारसागरात् त्राहिमांसर्वदुःखघ्न रोगशोकार्णवाद्धरे दुर्गतांस्त्रायसेविष्णोयेस्मरंतिसकृत्सकृत् सोहंदेवेनदुर्वृत्तस्त्राहिमांशोकसागरात् पुष्कराक्षनिमग्नोहंमायाविज्ञानसागरेत्राहिमांदेवदेवेशत्वत्तोनान्योस्तिरक्षिता यद्बाल्येयच्चकौमारेयौवनेयच्चवार्द्धके तत्पुण्यंवृद्धिमाप्नोतुपापंहरहल।

युधेतिमंत्रैःप्रार्थयेत् ततःस्तोत्रपुराणपठनादिभी रात्रिशेषमतिवाह्य परदिनेप्रातःस्नानादिनित्यकृत्यं विधाय पुनः सपरिवारं श्रीकृष्णंयथासंभवं संपूज्य चंडिकायाश्च यथाविभवं महोत्सवं कृत्वा यथाशक्ति ब्राह्मणान्भोजयित्वा तेभ्यः सुवर्णमेदिनीधेनुवस्त्रादियद्यदिष्टं ततःकृष्णोमेप्रीयतामिति दत्त्वा यंदेवंदेवकीदेवीवसुदेवादजीजनत् भौमस्यब्रह्मणोगुप्त्यैतस्मैब्रह्मात्मनेनमः सुजन्मनेसुदेवायगोब्राह्मणहितायच शांतिरस्तुशिवं चास्त्वित्युक्त्वाप्रतिमामुद्वास्यतांब्राह्मणायदत्त्वाब्राह्मणान्विसृज्य इष्टैःसह स्वयंपारणंकुर्यादिति गारुडेपु सर्वायसर्वेश्वरायसर्वपतयेसर्वभवायगोविंदायनमइतिपारणारंभे भूताय भूतपतये भूतेश्वराय भूतसंभवाय गोविंदायनमः इतिसमापनेमंत्रउक्तः इदंचप्रतिमासं कृष्णाष्टम्यामप्युक्तं मदनरत्ने वह्निपुराणे प्रतिमासंचतेपूजामष्टम्यांयःकरिष्यति ममचैवाखिलान्कामान्संप्राप्स्यतिनसंशयइति अथपारणनिर्णयः पारणमुपवासपरदिनेपूर्वाह्णेकर्त्तव्यं उपवासेषुसर्वेषुपूर्वाह्णेपारणंभवेदिति देवलस्मरणात् एवंसामान्यतः पूर्वाह्णे पारणप्राप्तौ पारणादिनेकेवलाष्टमीसद्भावेतदंतेकर्त्तव्यं तदाहभृगुः जन्माष्टमीरोहिणीचशिवरात्रिस्तथैवच पूर्वविद्धैवकर्त्तव्यातिथिभांतेचपारणमिति अत्ररोहिणीव्रतोपवासेभांते कर्त्तव्ये इतरोपवासे तिथ्यंते पारणमितिविवेकः ॥ विष्णुरहस्ये ॥ कृष्णाष्टमीस्कंदषष्ठीशिवरात्रिश्चतुर्दशी एताः पूर्वयुताः कार्यास्तिथ्यंतेपारणंभवेदिति ॥ निगमेऽपि ॥ पूर्वविद्धासुतिथिषुभेषुचश्रवणंविना उपोष्यविधिवत्कुर्यात्तत्तदंतेचपारणमिति ॥ विष्णुधर्मेऽपि ॥ जयंतीशिवरात्रिश्चकार्येभद्राजयान्विते कृतोपवासस्तिथ्यंतेतथाकुर्याच्चपारणमिति ॥ यदातुपारणदिनेऽष्टमीरोहिण्योः संभवस्तदोभयांते पारणंकर्तव्यं तदुक्तंपद्मपुराणे कार्याविद्धातुसप्तम्यारोहिणीसहिताष्टमी तत्रोपवासंकुर्यात्तुतिथिभांतेचपारणमिति ब्रह्मवैवर्तेपि अष्टम्यामथरोहिण्यांनकुर्यात्पारणंक्वचित् हन्यात्

पुराकृतंकर्मउपवासार्जितंफलं तिथिरष्टगुणंहंतिनक्षत्रंचचतुर्गुणं तस्मात्प्रयत्नतः कुर्यात्तिथिभांतेचपारणमिति स्कंदपुराणे तिथिनक्षत्रनियमेतिथिभांतेचपारणं अतोन्यथापारणेतुव्रतभंगमवाप्नुयादितिनिर्णयामृते अत्राष्टम्यंतेपारणंकार्यंरोहिण्यंतोनापेक्षितः भांतेपारणविधानस्य रोहिणीश्रवणातिरिक्तनक्षत्रविषयत्वात् याकाश्चितिथयःप्रोक्ताःपुण्यानक्षत्रसंयुताः ऋक्षांतेपारणंकुर्याद्विनाश्रवणरोहिणीमितिस्मरणात् माधवीयेतु नक्षत्रं चतुर्गुणमितिप्रत्यवायस्योदाहृतत्वात् नैवंयुक्तं विनाश्रवणरोहिणीमिति वचनंतु केवलनक्षत्रोपवासविषयमनुकल्पविषयंचेत्यवगंतव्यमित्युक्तं ननु यदा पूर्वविद्धोपवासिपरदिनेर्द्धरात्रेतदूर्ध्वंवातिथ्यंतोभवति तदा महानिशायां भोजननिषेधात् द्वितीयदिनउपवासः प्रसज्येत सच नयुक्तः पारणस्यावश्यकांगत्वात् यदिपारणभंगोनस्यात्तदाप्रतिनिधिविधानं नोपपद्येत तद्विधानंच द्वादशीप्रस्तावे देवलेनदर्शितं संकटेसमनुप्राप्तेद्वादश्यांपारयेत्कथं अद्भिस्तुपारणंकुर्यात्पुनर्भुक्तंनदोषकृदिति अतः पारणशब्दबलात्प्रतिनिधिबलाच्च पारणस्यांगत्वंद्रष्टव्यं अतएवादित्यपुराणे पारणांतंव्रतंज्ञेयंव्रतांतेतद्विभोजनं असमाप्तेव्रतेपूर्वंनैवकुर्याद्व्रतांतरमितिपारणशब्दस्य पारकर्मसमाप्तावितिधातोर्निष्पन्नत्वेनव्रतसमाप्त्यर्थत्वात्तदभावेव्रतस्यासमाप्तिः स्यादितिचेत् सत्यं तिथिभांतकालः पारणस्यांगं पारणंचांगि नह्यंगभावेंगिन एवलोपइतिप्रसिद्धिरस्ति अतश्चतिथ्यंताभावेपि दिवैवपारणं कर्त्तव्यं तदुक्तं तिथ्यृक्षयोर्यदाछेदोनक्षत्रांतमवाप्यवा अर्द्धरात्रेऽपिवाकुर्यात्पारणंह्यपरेऽहनीति अस्यायमर्थः तिथ्यृक्षयोः छेदद्वयोः परिसमाप्तौ दिवैव पारणं कर्त्तव्यं अयंमुख्याः नक्षत्रांतइत्यनुकल्पः नक्षत्रपदंतिथेरप्युपलक्षणं अन्यतरांतेवापारणंकुर्यादित्यर्थः अर्धेचार्धरात्रेयद्युभयांतस्तदादिवसे मुख्यानुकल्पयोरुभयोरप्यसंभवाद्रात्रौच पारणस्यनिषिद्धत्वाच्चार्थात्तत्राप्युपवासप्राप्तौ पारणप्रतिप्रसवः क्रियते अर्द्धरात्रेऽपिवा कुर्यादिति

१०व्र०
भाद्रप०
५८

निर्णयामृतेतु अर्द्धरात्रेतिथिभांतः स्यात्तदाऽपरेहनि परदिनेपारणंकुर्यात् दिवसपारणंच सर्वोपवाससाधारणं तदुक्तंब्रह्मवैवर्ते सर्वेष्वेवोपवासेषुदिवापारणमिष्यते अन्यथापुण्यहानिःस्यादृतेधारणपारणामिति गरुडपुराणेऽपि अन्यतिथ्यागमेरात्रौतामसस्तैजसोदिवा तामसेपारणंकुर्वंस्तामसींगतिमश्नुतइति अन्यत्तदसदिति स्मृतिकौस्तुभे शास्त्रांतरादेवास्यार्थस्यासिद्धत्वेन वाक्यद्वयवैयर्थ्यापत्तेः अपिशब्देन प्रतिप्रसवतात्पर्यद्योतनाच्च अन्यतरांतेपारणाभ्यनुज्ञानं नारदीयेऽपि तिथिनक्षत्रसंयोगेउपवासोयदाभवेत् पारणंतुनकर्तव्यंयावन्नैकस्यसंक्षयइति वह्निपुराणे जयंतीमुपक्रम्य भांतेकुर्यात्तिथेर्वापिशस्तंभारतपारणमिति तथा रोहिणीसहितावेयंविद्वद्भिःसमुपोषिता वियोगेपारणंकुर्युरार्याब्रह्मप्रवादिनः सांयोगिकव्रतेप्राप्तेयद्येकोपिवियुज्यते तत्रैवपारणंकुर्यादेवंवेदविदोविदुरिति मदनरत्नेपि यदादिने नैकतरस्यान्तः किंतुरात्रावेव निशीथादर्वागुभयांतोन्यतरांतोवातदारात्रावप्युभयांतेऽन्यतरांतेवाकर्तव्यं यदातुनिशीथव्यवहितपूर्वक्षणएवोभयांतएकतरांतोवा तदा निशीथे पारणं कर्तव्यं तिथ्यृक्षयोरितिवचनादिति निशीथोरात्रेरष्टमोमुहूर्त्तो यत्तु नरात्रौपारणंकुर्यादृतेवैरोहिणीव्रतात् तत्रनिश्यपितत्कुर्याद्वर्जयित्वामहानिशामिति गौडोदाहृतभविष्योत्तरवचनेन महानिशायां पारणनिषेधः समहानिशातोऽर्वाक् पारणकाललाभेऽवगंतव्यः निर्णयसिंधावपि महानिशातोर्वागन्यतरांतलाभेमहानिशानिषेधः महानिशायामेवान्यतरांतलाभे तत्रैवपारणमिति अत्रकेचित् यत्तु मयूखउक्तं पारणंरात्रौनकुर्यात् किंतुदिवैवेति तत्रौढिवादमात्रं अर्द्धरात्रेपिवाकुर्यादित्याद्यनेकवचनानर्थक्यप्रसंगात् प्राचीनहेमाद्र्यादिसर्वग्रंथविरोधाच्च यदप्युक्तंमाधवेन अर्द्धरात्रशब्देन रात्रिमात्रंगृह्यत इति तदपिमाधवग्रंथे तादृशार्थानुपलंभान्मृग्यं महानिशासार्द्धयामादुपरितोयामः तदुक्तं महानिशातुविज्ञेयामध्यमंमध्ययामयोः तथा मध्यमः

प्रहरोरात्रेर्विज्ञेयातुमहानिशेतिस्मृत्यंतरमिति इदमेवहेमाद्रिमदनरत्नमाधवादीनांमतं कामधेनौ गर्गस्तु महानिशातुविज्ञेयामध्यमंप्रहरद्वयमित्यादि वृद्धशातातपस्तु महानिशाद्वेघटिकेरात्रौमध्यमयामयोरित्याह वेदपाठपरंतदित्यन्ये अशक्तस्तु गौणमुख्यकालालाभेपिदिवैवपारणंकुर्यात् जयंत्यांपूर्वविद्धायामुपवासंसमाचरेत् तिथ्यंतेचोत्सवांतेवाव्रतेकुर्वीतपारणमिति कालादर्शादिनिबंधवचनात् उत्सवांते जागराद्युत्सवांते द्वितीयदिवसेप्रातरित्यर्थः अत्रकेचित् यत्तूकंमयूखे उद्यापनंत्वनुक्तत्वान्नास्तीतितदप्यपेशलं उद्यापनंविनायत्तुतद्व्रतं निष्फलंभवेत् यदिचोद्यापनंनोक्तंव्रतानुगुणतश्चरेत् वित्तानुसारतोदद्यादनुक्तोद्यापनेव्रते गांचैवकांचनंदद्याद्व्रतस्यपरिपूर्त्तये ॥

॥ इतिपृथ्वीचंद्रोदयेनंदिपुराणोक्तेस्तस्मात्सर्वथाउद्यापनंकर्त्तव्यम् ॥

॥ तत्प्रकारश्चभविष्योत्तरोक्तेजन्माष्टमीव्रतकथाच ॥

॥ युधिष्ठिरउवाच ॥ कीदृशंतद्व्रतंदेवदेवैः सर्वैरनुष्ठितं जन्माष्टमीतिसंज्ञंचपवित्रंपापनाशनं येनत्वंतुष्टिमायासिचीर्णेनप्रभवायचएतन्मेतत्वतोब्रूहिसविधानंसविस्तरं ॥ श्रीकृष्णउवाच ॥ मासिभाद्रपदेष्टम्यांनिशीथेकृष्णपक्षगे शशांकेवृषराशिस्थे ऋक्षेरोहिणीसंज्ञके योगेस्मिन्वसुदेवाद्धिदेवकीमामजीजनत् भगवत्याश्चतत्रैवक्रियतेस्ममहोत्सवः योगेस्मिन्कस्यअष्टम्यांसिंहराशिगतेरवौ सप्तम्यांलघुभुक्कुर्याद्दंतधावनपूर्वकं उपवासस्यनियमंरात्रौस्वप्याज्जितेंद्रियः केवलेनोपवासेनतस्मिञ्जन्मदिनेमम सप्तजन्मकृताःपापान्मुच्यतेनात्रसंशयः उपावृत्तस्यपापेभ्योयस्तुवासोगुणैःसह उपवासःसविज्ञेयः सर्वभोगविवर्जितः ततोष्टम्यांतिलैःस्नातोनद्यादौविमलेजले सुदेशेशोभनंकुर्याद्देवक्याःसूतिकागृहं सितपीतैस्तथारक्तैः

कर्वुरैर्हरितैःपृथक् वासोभिः शोभितंकृत्वा समंतात्कलशैर्नवैः भक्ष्यैःफलैरनेकैश्चदीपालिभिरितस्ततः पुष्पमालाविराचितंचंदनागुरुधूपितं अतिरम्यमनौपम्यंरत्नजालादिभूषितं हरिवंशस्यचरितंगोकुलंचविलेखयेत्ततो। वादित्रनिनदैर्वीणावेणुरवाकुलंनृत्यगीतक्रमोपेतंमंगलैश्चसमंततः वन्हिवारिलोहखड्गैःकृष्णच्छायाम्वरादिभिः द्वारिविन्यस्तमुसलंरक्षितंरक्षपालकैः षष्ठ्यादेव्याधिष्ठितंचस्त्रीभिश्चस्वजनैस्तथा एवंविभवसारेणकृत्वातत्सूतिकागृहंतन्मध्येप्रतिमास्थाप्यासाचाप्यष्टविधास्मृता कांचनीराजतीताम्रीपैत्तलीमृन्मयीतथा वार्क्षीमणिमयीचैववर्णकैर्लिखितातथा सर्वलक्षणसंपूर्णाःपर्यंकेचावृतास्तृते संतप्तकांचनाभासांमयासहतपस्विनीं प्रसुप्तांचप्रसूतांचस्थापयेन्मंचकोपरि मांतत्रवालकंगुह्यंपर्यंकेस्तनपायिनं श्रीवत्सवक्षसंशांतंनीलोत्पलदलच्छविं यशोदांतत्रचैकस्मिन्प्रदेशेसूतिकागृहे तद्वच्चकल्पयेत्पार्थप्रसूतवरकन्यकां तथैवममपार्श्वस्थाःकृतांजलिपुटान्नृप देवाग्रहास्तथानागायक्षाविद्याधरानटाः प्रणताःपुष्पमालाग्रचारुहस्ताःसुरासुराः संचरंतइवाकाशेप्रहारैरुदितोदितैः वसुदेवोपितत्रैवखड्गचर्मधरः स्थितः कश्यपोवसुदेवश्चअदितिश्चैवदेवकी शेषोपिवलभद्रोयंयशोदादितिरन्वभूत् नंदःप्रजापतिर्दक्षोगर्गश्चापिचतुर्मुखः गोप्यश्चाप्सरसःसर्वे गोपाःसर्वेदिवौकसः एषोवतारोराजेंद्रकंसोयंकालनेमिजः तत्रकंसानियुक्ताश्चमोहितायोगनिद्रया गोधेनुकुजराश्चैवदानवाःशस्त्रपाणयः नृत्यंतश्चाप्सरोभिश्चगंधर्वागीततत्पराः रम्यामेवंविधांकृत्वादेवकींनवसूतिकां लेखनीयश्चतत्रैवकालियोयमुनाहूदेइत्येवमादियत्किंचिच्छक्यतेचरितंमम लेखयित्वाप्रयत्नेनपूजयेद्भक्तितत्परः ततस्तान्पूजयेद्भक्त्यागंधपुष्पाक्षतैःफलैःकूष्मांडैर्नारिकेलैश्चखर्जूरैर्दाडिमीफलैः वीजपूरैःपूगफलैर्लकुचैस्त्रपुसैस्तथा कालदेशोद्भवैःपुष्टैःपुष्पैश्चापियुधिष्ठिर पाद्यार्घैःपूजयेद्भक्त्यागंधपुष्पाक्षतैः फलैः मंत्रेणानेनकौंतेयदेवकींपूजयेन्नरः गायद्भिःकिन्नराद्यैःसतत

परिस्तृतावेणुवीणा।निनादै भृंगारादर्शकुंभप्रवरकृतकरैः किन्नरैः सेव्यमाना पर्यंकेस्वास्तृतेयामुदिततरमुखीपुत्रिणीसम्यगास्ते सादेवीदेवमाताजयतिसुवदनादेवकीकांतरूपा पादौसंवाहयंतीश्रीर्देवक्याश्चरणांतिके निषण्णापंकजेपूज्यानमोदेव्यैश्रियैइति अणवादिनमोंतंचपृथक्नामानुकीर्त्तयेत् कृत्वापूजांविधिज्ञश्चसर्वपापापनुत्तये देवक्यैवसुदेवायवासुदेवायचैवहि वलदेवायनंदाययशोदायैपृथक् पृथक् क्षीराद्यैःस्नपनंकृत्वाचंदनेनानुलेपयेत् पूजांतरमपीच्छंतिकेचिदत्रैवसूरयः चंद्रोदयेशशांकायअर्घ्यंदद्याद्धरिंस्मरेत् अनघंवामनंशौरिंवैकुंठपुरुषोत्तमम् वासुदेवंहृषीकेशंमाधवंमधुसूदनं वाराहंपुंडरीकाक्षंनृसिंहंदैत्यसूदनं दामोदरंपद्मनाभंकेशवंगरुडध्वजं गोविंदमच्युतंकृष्णमनंतमपराजितं अधोक्षजंजगद्बीजंसर्गस्थित्यंतकारकं अनादिनिधनंविष्णुंत्रिलोकेशंत्रिविक्रमं नारायणंचतुर्वाहुंशंखचक्रगदाधरं पीताम्वरधरंनित्यंवनमालाविभूषितं श्रीवत्सांकंजगत्सेतुंश्रीधरं श्रीपतिंहरिं योगीश्वरायदेवाययोगिनांपतयेनमः योगोद्भवायनित्याययगोविंदायनमोनमः स्नानमंत्रः यज्ञेश्वरायदेवायतथायज्ञोद्भवायच यज्ञानांपतयेचाथगोविंदायनमोनमः धूपादिमंत्रः विश्वेश्वरायविश्वायतथाविश्वोद्भवायच विश्वस्यपतयेतुभ्यंगोविंदायनमोनमः पूजामंत्रः मंत्रेणानेनवैदेयंदद्याच्चंद्रमसेनरः तथैवार्घ्यंचमंत्रेणअनेनैवतुदापयेत् क्षीरोदार्णवसंभूतअत्रिनेत्रसमुद्भव गृहाणार्घ्यंशशांकेमंरोहिण्यासहितोमम ज्योत्स्नापतेनमस्तुभ्यंनमस्तेज्योतिषांपते नमस्तेरोहिणीकांत अर्घ्यंनः प्रतिगृह्यतां स्थंडिलेस्थापयेद्देवंशशांकंरोहिणीयुतं देवक्यावसुदेवंचनंदंचैवयशोदया वलदेवंमयासार्द्धंभक्त्यापरमयानृप संपूज्यविधिवद्देवीं किंनाप्नोतिचदुर्लभं अर्द्धरात्रेवसोर्धारांपातयेद्गव्यसर्पिषा ततोवार्द्धापयेन्नालंषष्ठीनामादिकंनम कर्त्तव्यंतत्क्षणाद्रात्रौप्रभातेनवमीदिने यथामयितथाकार्यो भगवत्यामहोत्सवः व्राह्मणान्भोजयेद्भक्त्यातेभ्योदद्याच्चदक्षिणां

हिरण्यंमेदिर्नांगावोवासांसिकुसुमानिचयद्यदिष्टतमंतत्तत्कृष्णोमेप्रीयतामिति यंदेवंदेवकीदेवीवसुदेवादजीजनत् भौमस्यब्रह्मणोगुप्त्यै तस्मैब्रह्मात्मनेनमः सुजन्मनेसुदेवायगोब्राह्मणहितायच शांतिरस्तुशिवंचास्तुइत्युक्त्वामांविसर्जयेत् ततोबंधुजनौघंचदीनानाथजनंतथा भोजयित्वासुशांतात्मास्वयंभुंजीतवाग्यतः एवंयकुरुतेदेव्यादेवक्याससमहोत्सवं प्रतिवर्षंविधानेनमद्भक्तोधर्मनंदन नरोवायदिवानारीयथोक्तफलमाप्नुयात् पुत्रसंतानमनघंसौभाग्यमतुलंलभेत् इहधर्मरतिर्भूत्वामृतोवैकुंठमाप्नुयात् तत्रदिव्येनमानेनवर्षलक्षंयुधिष्ठिरे भोगान्नानाविधान्भुंक्त्वापुण्यशेषादिहागतः सर्वकामसमृद्धेतुसर्वासुखविराजिते सर्वरत्नयुतेपार्थसर्वगोकुलमंडले महान्नृपवरिष्ठानांजायतेहृदयोमम यस्मिन्सदैवदेशेतुलिखितंवापटार्पितं ममजन्मदिनंपुण्यंसर्वालंकारभूषितैः पूज्यतेपाण्डवश्रेष्ठजनैरुत्सवसंयुतैः परचक्रभयंतत्रनकदाचित्भवेत्पुनः पर्जन्यःकामवर्षीस्यादीतिभ्योनभयंभवेत् गृहेवापूज्यतेयास्मिन्देवक्याश्चरितंमम तत्रसर्वसमृद्धिः स्या न्नोपसर्गादिजंभयं पशुतोनकुलाद्वालात्पापरोगाच्चपातकात्राजतश्चौरतश्चापिनकदाचिद्भयंभवेत् प्रसंगेनापियोभक्त्याव्रतंपश्येजनाकुलं सोपिपापविनिर्मुक्तः प्रयातिहरिमंदिरं जन्माष्टमीजनमनोनयनाभिरामा पापापहासदितिनंदित नंदगोपा योदेवकींसुतयुतांयजतीहतस्यां पुत्रानवाथसमुपैतिपदंसविष्णोः ॥

॥ इतिश्रीजन्माष्टमीव्रतकथासमाप्ता ॥

अन्याकथापद्मपुराणे ॥ ॥ शौनकउवाच ॥ कृष्णजन्माष्टमींसूततस्यामाहात्म्यमुत्तमं कथयस्वमहाप्राज्ञचोद्धरस्वभवार्णवात् सूतउवाच कृष्णजन्माष्टमींब्रह्मन्भक्त्याकरोतियोनरः अंतेविष्णुपुरंयातिकुलकोटियुतोद्विज अष्टमीबुधवारेचसोमेचैवद्विजोत्तम रोहिणीऋक्षसंयुक्ताकुलकोट्याश्चमुक्तिदा ३ महापातकसंयुक्तः करोति

व्रतमुत्तमं सर्वपापाविनिर्मुक्तश्चांतेयातिहरेर्गृहं कृष्णजन्माष्टमींब्रह्मन्नकरोतिनराधमः इहदुःखमवाप्नोतिस
प्रेत्यनरकंव्रजेत् ५ नकरोतिचयानारीकृष्णजन्माष्टमीव्रतं वर्षेवर्षेतुसामूढानरकंयातिदारुणम् ६ जन्माष्टमीदि
नेयोवैनरोऽश्नातिविमूढधीः महानरकमश्नातिसत्यंसत्यंवदाम्यहं ७ दिलीपेनपुरापृष्टोवसिष्ठोमुनिसत्तमः त
च्छृणुष्वमहाप्राज्ञसर्वपातकनाशनम् ८ दिलीपउवाच भाद्रेमास्यसिताष्टम्यांयस्यांजातोजनार्दनः तदहंश्रो
तुमिच्छामिकथयस्वमहामुने ९ कथंवाभगवाञ्जातःशंखचक्रगदाधरः देवकीजठरेविष्णुःकिंकर्तुंकेनहेतुना
१० वसिष्ठउवाच शृणुराजन्प्रवक्ष्यामिकस्माज्जातोजनार्दनः पृथिव्यांत्रिदिवंत्यक्त्वाभवनंकथयाम्यहम् ११ पु
रावसुधराह्यासीत्कंसादिनृपपीडिता स्वाधिकारप्रमत्तेनकंसदूतेनताडिता क्रंदंतीरुदतीक्ष्मातुययौघूर्णितलोच
ना यत्रतिष्ठतिदेवेशउमाकांतोवृषध्वजः कंसेनताडितानाथइतितस्मैनिवेदितम् १४ क्रंदंतींतांसमालोक्यकोपेन
स्फुरिताधरः उमयासहितः सर्वैर्देववृंदैरनुद्रुतः आजगाममहादेवोविधातृभवनंरुषा गत्वाचोवाचब्रह्माणं
कंसध्वंसनिमित्तये १६ उपायः सृज्यतांब्रह्मन्भवताविष्णुनासह ऐश्वरंतद्वचःश्रुत्वागंतुंचप्रोद्यतोविभुः
क्षीरोदंयत्रवैकुंठःसुप्तोऽस्तिभुजगोपरि हंसपृष्ठंसमारुह्यहरेरंतिकमाययौ तत्रगत्वासमंधात्रादेववृंदैर्हरा
दिभिः संयुक्तैःस्तूयतेवाग्भिः कोमलैर्वाग्विदांवरैः १९ नमः कमलनेत्रायहरयेपरमात्मने जगतःपालयित्रे
चलक्ष्मीकांतनमोस्तुते २० इतितेभ्यःस्तुतिंश्रुत्वाप्रत्युवाचजनार्दनः देवान्ब्रह्ममुखान्सर्वान्भवाद्भिरागतंकथम् २१
ब्रह्मोवाच शृणुदेवजगन्नाथयस्मादस्माकमागतं कथयामिसुरश्रेष्ठतदहंलोकभावन २२ शूलिदत्तवरोन्मत्तः कं
सराजोदुरासदः वसुधाताडितातेनकरादानेनपीडिता २३ पूर्वंतपःकृतंतेनदुष्करंभुविमानवैः तस्माच्चकम्पिरे
देवाः शूलिनः शरणंययुः ततःशूलीतत्समीपंगत्वावाक्यमुवाचह वरंवरयभद्रंतेदास्यामिसुरदुर्लभम् त

तोवत्रैवरंकंसोमाययातुप्रवंचितः भगिनेयंविनाशंभोमरणंभवितानवै २४ तस्माद्गच्छस्वयंदेवकंसंहंतुंदुरासदं
देवकीजठरेजन्मलब्ध्वागत्वाचगोकुलम् २५ ब्रह्मणाप्रेषितोदेवः प्रत्युवाचचशूलिनं पार्वतींदेहिवेशभोअब्दंस्थि
त्वागमिष्यति २६ उमयारमयासार्द्धंशंखचक्रगदाधरः उद्दिश्यमथुरांचक्रे प्रयाणंकमलासन २७ देव
कीजठरेजन्मलेभेतत्रगदाधरः यशोदाकुक्षिमध्यास्तेशर्वाणीमृगलोचना नवमासांश्चविश्रम्यकुक्षौनवदिनाधि
कान् भाद्रमास्यासितेपक्षेचाष्टमीसंज्ञिकेतिथौ रोहिणीतारकायुक्तारजनीघनघोरिता तस्यांजातोजगन्नाथः
कंसारिर्वसुदेवजः ३० वैराटीनंदपत्नीचयशोदाऽजीजनत्सुतां पुत्रंपद्मकरंपद्मनाभिंपद्मदलेक्षणं ३१ तदाह
र्षितुमारेभेदृष्ट्वाचानकदुंदुभिः कंसासुरभयत्रस्ताप्रोवाचदेवकीतदा ३२ विराटंगच्छभोनाथसुतंप्रत्यर्पितुंकिल
पुत्रंदत्त्वायशोदायैसुतांतस्याःसमानय तस्यावचःसमाकर्ण्यवसुदेवोपिदुःखितः अंकेकुमारमादायविरा
टाभिमुखोययौ ३४ यमुनाजलसंपूर्णातत्पथोमध्यवर्त्तिनी आसीत्प्रांतेमहादीर्घागंभीरोदकपूरभाक् ३५
एवंदृष्ट्वातटेस्थित्वायमुनामवलोक्यच वसुदेवोऽपिदुःखार्त्तोविललापातिचिंतया ३६ किंकरोमिक्वगच्छामिवि
धिनाऽपिहिवंचितः कथमद्यगमिष्यामिविराटंनंदमंदिरम् ३७ हरिणातत्रसानंदंमाययावंचितः पिता क्षण
मात्रंतटेस्थित्वायमुनामवलोकयत् ३८ तेनदृष्ट्वापुनः सापिक्षणाज्जानुवहाऽभवत् तांदृष्ट्वाहृष्टचित्तः सप्र
स्थानमकरोत्तदा ३९ मायांकृत्वाजगन्नाथःपितुरंकाज्जलेऽपतत् तंपुत्रंपतितंदृष्ट्वाहाहाकृत्वासुदुःखितः म
हापापंपुनः कर्त्तुंविधिनातेनवंचितः त्राहिमांजगतांनाथसुतंरक्षसुरोत्तम ४१ जनकक्रंदितंदृष्ट्वाकंसारिः कृप
यामुहुः जलक्रीडांसमाचीर्यपितुः क्रोडमगात्पुनः पथातेनद्विजश्रेष्ठजगामनंदमंदिरं सुतंदत्त्वायशोदायैसु
तांतस्याः समानयत् निजागारंततःप्राप्यपत्न्यैप्रत्यर्पितासुता ॥ देवकीचप्रसूतेतिवार्त्ताप्राप्तासुरारिणा

अानेतुंप्रेषितादूताः सुतांदुहितरंतदा आगत्यकंसदूतास्तेसुतांनेतुंप्रचक्रमुः ४५ वलाद्धस्तात्समाकृष्यदेवकीवसुदे
वयोः कंसदूतागृहीत्वातामर्पित्वातुसुरारये ४६ सधृत्वातांमहाराजसभयोभूद्दुरासदः शुद्धकांचनवर्णाभांपूर्णें
दुवदनांहसन् दृष्ट्वाकंसोहसंतींतांविद्युत्स्फुरितलोचनां आदिदेशासुरश्रेष्ठोजहिनीत्वाशिलोपरि आज्ञांलब्ध्वाऽ
सुरास्तेवैनिष्पेष्टुंतांप्रवर्तिताः विद्युच्छीघ्रतरागौरीजगामस्वंकरांतिकात् गौर्य्युवाच शृणुराजन्प्रवक्ष्यामिय
त्रास्तेशत्रुरुत्तमः नंदस्यनिलयेगुप्तस्तवहंतासुरोत्तमः वसिष्ठउवाच एवमुक्त्वातुसादेवीजगामानिजमंदिरं
श्रुत्वावाक्यंततोदेव्याःकंसोराजासुदुःखितः भगिनींपूतनामाहगच्छत्वंनंदमंदिरं छद्मनातत्सुतंहत्वागच्छत्वं
वांछितंबहु दास्यामिशासनंतेवैव्रजशीघ्रंशुभंकुरु आज्ञांप्राप्यराक्षसीसागोकुलाभिमुखंगता माययांतगृह
द्वारंप्रविष्टासुरमर्दनं स्तनपानेनतत्प्राणानाकृष्यनंदगोकुले केशिनंचवकंदैत्यंधेनुकंरासभंपुनः जृंभणंचाग्नि
व्हंचहत्वागोवर्धनंदधत् कालीयमर्दनंकृत्वागतोमधुपुरींततः दृष्ट्वाकंसोहतः क्रूरः कंसमल्लानजीजयत् पित
रौतोषयामाससुप्रसन्नैस्सुसंस्कृतः एतत्तेकथितंराजन्विष्णोर्जन्मदिनव्रतं श्रुत्वापापानिनश्यंतिकृत्वाकिंनभ
विष्यति यइदंकुरुतेमर्त्योयाचनारीहरेर्व्रतं ६१ ऐश्वर्यमतुलंप्राप्यजन्मन्यत्रयथेप्सितं पूर्वविद्धानकर्त्त
व्यातृतीयाषष्ठिरेवच अष्टम्येकादशीभूताधर्मकामार्थवांछिभिः वर्जयित्वाप्रयत्नेनसप्तमीसंयुताष्टमीं विनाऋक्षे
णकर्त्तव्यानवमीसंयुताष्टमी उदयेचाष्टमीकिंचित्सकलानवमीयदि मुहूर्तरोहिणीयुक्तासंपूर्णासाष्टमीभवेत् अ
ष्टमीवुधवारेणरोहिणीसहितायदि सोमेनवाभवेद्राजन्किंकृतैर्व्रतकोटिभिः नवम्यामुदयात्किंचित्सोमेवापिवुधे
पिच अपिवर्षशतेनापिलब्धात्रापिनलभ्यते विनाऋक्षंतुकर्त्तव्यानवमीसंयुताष्टमी कार्याविद्धापिसप्तम्यारो

हिणीसंयुताष्टमी कलाकाष्ठामुहूर्तापियदाकृष्णाष्टमीतिथिः नवम्यासहिताग्राह्यासप्तमीसंयुतानहि किंपुनर्बुधवारेणसोमेनापिविशेषतः किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदा पलवेधेनराजेंद्रसप्तम्याअष्टमींत्यजेत् सुरायाबिंदुनास्पृष्टोगंगाभःकलशोयथा दिलीपउवाच केनचादौकृतंचेद्वाकेनवातत्प्रकाशितं किंपुण्यंकिंफलंदेवः कथयस्वमहामुने वसिष्ठउवाच चित्रसेनोमहाराजामहापापपरोमहान् अगम्यागमनंकृत्वास्वर्णस्तेयंद्विजस्यच सुरयाचसदातृप्तोह्यथामांसेसदारतः एवंपापसमायुक्तोनित्यंप्राणिवधेरतः चांडालैःपतितैःसार्द्धमालापंसर्वदाकरोत् एकदैवविधोराजामृगयायांमनोदधे अरण्येद्वीपिनंज्ञात्वावेष्टयित्वाचसर्वतः सावधानंभटान्सर्वान्वाक्यमेतदुवाचह सचवध्यः पुरोयस्यगच्छेद्राज्ञोजगामह सलब्धोपिततोराजाव्याघ्रंपश्चाज्जगामह अनेकक्लेशदुःखेन व्याघ्रंहंतुंसमाहितः क्षुत्पिपासाकुलः प्राप संध्यायांयमुनातटम् अष्टमीरोहिणीयुक्तातद्दिनंजन्मवासरं स्वःकन्यायमुनायांवैव्रतंचक्रुर्नराधिप नानोपहारैर्द्रव्यैश्चधूपदीपैःसुशोभनैः गंधपुष्पंतथाद्रव्यं कुंकुमादिमनोहरम् ॥ अन्नंबहुगुणंदृष्ट्वाभोजनेमानसंकृतम् श्रीराजोवाच अन्नाभावान्ममाद्याशुप्राणायास्यंति निश्चितं स्त्रियऊचुः जन्माष्टम्यांहरेरद्यनभोक्तव्यंत्वयानघ गृध्रमांसंखरंकाकंगोमांसमन्नमेवच भुक्तवान्नत्रसंदेहोयोभुंक्तेकृष्णजन्मनि किंकिंछिद्रंनसंजातंसंसारेवसतांनृणां यैर्नदेहेस्थितप्राणेजयंतीनकृतानृप तत्राकृतोपवासस्याकठिनंयममंदिरं यद्दत्तंपितरोनित्यंनगृह्णंतियथाविधि पितरःपातिताःसर्वेजयंत्यांभोजनेकृते इतिश्रुत्वाततोराजन्व्रतंचक्रेनराधिपः किंचित्पुष्पंकियद्गंधंवस्त्रंचानीयहर्षितः एतद्व्रतेसमायुक्तस्तिथिभांतेचपारणं ॥ सूतउवाच ॥ यत्फलंमथुरांगत्वादृष्ट्वाकृष्णमुखांबुज तत्फलंप्राप्यतेपुंसांकृष्णजन्माष्टमीव्रतात् यत्फलंद्वारिकांगत्वादृष्टेविश्वेश्वरेहरौ तत्फलंप्राप्यतेदीनैस्तस्यजन्माष्टमीव्रतात् ॥ इतिश्रीपद्मपुराणेहरिजन्माष्टमीव्रतकथनम्

॥ अथभविष्यत्पुराणोक्तंजन्माष्टमीव्रतोद्यापनम् ॥

युधिष्ठिरउवाच उद्यापनविधितत्रब्रूहिदेवदयानिधे येनसंपूर्णतांयातिव्रतमेतदनुत्तमम् श्रीकृष्णउवाच पूर्णांतिथिमनुप्राप्यश्रद्धाचित्तादिसंयुतः पूर्वेद्युरेकभक्ताशीस्वपेन्मांस्वहृदिस्मरन् प्रातरुत्थायसंस्मृत्यपुण्यश्लोकान्समाहितः निर्वर्त्यावश्यकं कर्मब्राह्मणान्स्वस्तिवाचयेत् गुरुमानीयधर्मज्ञंवेदवेदांगपारगम् वृणुयादृत्विजश्चैववस्त्रालंकरणादिभिः पलेनवातदर्द्धेनतदर्द्धार्द्धेनवापुनः शक्त्यावाकारयेत्तत्रवित्तशाठ्यविवर्जितः सौवर्णींप्रतिमाकार्यापाद्यार्घ्याचमनादिकं एतत्संपाद्यविधिवत्पूजोपकरणादिकं गोचर्ममात्रंसंलिप्यमध्येमंडपमाचरेत् ब्रह्माद्यादेवतास्तत्रस्थापयित्वाप्रपूजयेत् मंडपंरचयेत्तत्रकदलीस्तंभमंडितं चतुर्द्वारसमोपेतंफलपुष्पादिसंयुतं वितानंतत्रबध्नीयाद्विचित्रंचैवशोभितं मंडपेस्थापयेत्कुंभंताम्रंवामृण्मयंशुचिः तस्योपरिन्यसेत्पात्रंराजतंवैणवंतुवा वाससाच्छाद्यकौंतेयपूजयेत्तत्रमांबुधः उपचारैः षोडशभिर्मंत्रैरपिसमाहितः ध्यात्वावाह्यामूर्तींकृत्यस्वागतादिभिरादरात् ध्यात्वाचतुर्भुजंदेवंशंखचक्रगदाधरं शुद्धेह्यस्मिन्नधिष्ठानेसन्निधेहिकृपांकुरु आवाहनं देवदेवजगन्नाथगरुडासनसंस्थित- गृहाणासनकंदिव्यंजगद्धातर्नमोस्तुते ॥ आसनं नानातीर्थाहृतंशुद्धंनिर्मलंपुष्पमिश्रितं पाद्यंगृहाणदैत्यारेविश्वरूपनमोस्तुते पाद्यं गंगादिसर्वतीर्थेभ्योमयानीतंसुशीतलं गृहाणाचमनंकृष्णविश्वकायनमोस्तुते आचमनीयं गंधपुष्पाक्षतैश्चैवफलेनचसमन्वितं अर्घ्यंगृहाणदेवेशमयादत्तंहिभक्तितः अर्घ्यं दधिक्षौद्रघृतंशुद्धंकपिलायाःसुगंधियत् सुस्वादुमधुरंशौरेमधुपर्कंगृहाणमे मधुपर्कंआचमनं पंचामृतैस्तुस्नपनंकरिष्यामिसुरोत्तम क्षीरोदधिनिवासायलक्ष्मीकांतायतेनमः मंदाकिनीगौतमीचयमुनाचसरस्वती ताभ्यः स्नानार्थमानीतंगृहाणशिशिरंजलं स्नानं पुनराचमनं शु

द्धजांबूनदप्रख्येतडिद्भास्वररोचिषी मयोपपादितेतुभ्यंवाससीप्रतिगृह्यतांवस्त्रं पुनराचमनीयं यज्ञोपवीतंपरममितियज्ञोपवीतं किरीटकुंडलादीनिकांचीवलययुग्मकं कौस्तुभंवनमालांचभूषणानिभजस्वमे भूषणानि मलयाचलसंभूतंगंधसारमनोहरं हृदयानंदनंचारुचंदनंप्रतिगृह्यतां चंदनं मालतीचंपकादीनियूथिकाबहुलानिच तुलसीपत्रमिश्राणिगृहाणसुरसत्तम पुष्पाणि देवकींवसुदेवंचरोहिणींसबलांतथा सात्यकिंचोद्धवाक्रूरावुग्रसेनादियादवान् नंदंयशोदांतत्कालप्रसूतांगोपिकास्तथा कालिंदींकालियंचैवपूजयेन्नाममंत्रतः वनस्पतिरसोद्भूतंकालागुरुसमन्वितं धूपंगृहाणगोविंदगुणसागरगोपते धूपं आज्यंचवर्त्तिसंयुक्तमितिदीपं नैवेद्यंगृह्यतांदेवेतिनैवेद्यं शाल्योदनंपायसंचसिताघृतविमिश्रितं नानापक्वान्नसंयुक्तंनैवेद्यं प्रतिगृह्यतां नैवेद्यं तदंतेपुनराचमनीयं पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतं कर्पूरादिसमायुक्तंतांबूलंप्रतिगृह्यतां तांबूलं इदंफलमितिफलं हिरण्यगर्भगर्भस्थमितिदक्षिणा नीराजयेत्ततोभक्त्यामंगलंसमुदीरयन् जयमंगलाघोषैर्देवदेवंसमर्चयेत् दत्त्वापुष्पांजलिंचाघ्यदक्षिणादिपुरःसरं प्रणमेद्दंडवद्भूमौप्राक्तिप्रव्हःपुनःपुनः स्तुत्वानानाविधैःस्तोत्रैः प्रार्थयेत्तंजगत्पतिं नमस्तुभ्यंजगन्नाथदेवकीनंदनप्रभो वसुदेवात्मजानंतयशोदानंदवर्द्धन गोविंदगोकुलाधारगोपिकांतनमोस्तुते ततस्तुदापयेदर्घ्यमिंदोरुदयतः शुचिः कृष्णायप्रथमंदद्यादेवकीसहितायच नारिकेलेनशुद्धेनदद्यादर्घ्यंविचक्षणः कृष्णायपरयाभक्त्याशंखकृत्वाविधानतः जातः कंसवधार्थायभूभारोत्तारणायच कौरवाणांविनाशायदैत्यानांनिधनायच गृहाणार्घ्यंमयादत्तंदेवकीसहितोहरे कृष्णार्घ्यमंत्रः शंखंकृत्वाततस्तोयंसपुष्पफलचंदनं जानुभ्यामवनींगत्वाचंद्रायार्घ्यंनिवेदयेत् क्षीरोदार्णवसंभूतअत्रिनेत्रसमुद्भव गृहाणार्घ्यंमयादत्तंरोहिणीसहितोविधो ज्योत्स्नापतेनमस्तुभ्यंनमस्तेज्योतिषांपते

नमस्तेरोहिणीकांतगृहाणार्ध्यनमोस्तुते चंद्रार्ध्यमंत्रः इत्थंसंप्रार्थ्यदेवेशंरात्रौजागरणंचरेत् गीतनृत्यादिनाचै
वपुराणश्रवणादिभिः प्रत्यूषेविमलेस्नात्वापूजयित्वाजगद्गुरुं पायसेनतिलाज्यैश्चमूलमंत्रेणभक्तितः अष्टोत्तर
शतंहुत्वाततः पुरुषसूक्ततः इदंविष्णुरितिप्रोक्त्वाजुहुयाद्घृताहुतीः होमशेषंसमाप्याथपूर्णाहुतिपुरस्सरं आ
चार्य्यंपूजयेद्भक्त्याभूषणाच्छादनादिभिः गामेकांकपिलांदद्याद्व्रतसंपूर्त्तिहेतवे पयस्विनींसुशीलांचसवत्सांसगु
णांतथा स्वर्णशृंगींरौप्यखुरांकांस्यदोहनिकायुतां रत्नपुच्छांताम्रपृष्ठींस्वर्णघंटासमन्वितां अव्यगांवस्त्रसंछन्ना
मेवंसंपूर्णतांव्रजेत् कपिलायाअभावेतुगौरन्यापिप्रदीयते ततोदद्याच्चऋत्विग्भ्योऽन्येभ्यश्चैवयथार्हतः ब्राह्म
णान्भोजयेत्पश्चाद्दद्यात्तेभ्यश्चदक्षिणां कलशानन्नसंपूर्णान्दद्याच्चैवसमाहितः प्राप्यानुज्ञांतथातेभ्योभुजी
तसहवंधुभिः एवंकृतेमहाराजव्रतोद्यापनकर्मणि निःपापस्तत्क्षणादेवजायतेविवुधोत्तमः पुत्रपौत्रसमा
युक्तोधनधान्यसमन्वितः भुक्त्वाभोगान्चिरंकालमंतेममपुरंव्रजेत् इतिभविष्योतरोक्तं जन्माष्टमीव्रतोद्यापनं
अथस्मृतिकौस्तुभोक्तंजन्माष्टमीव्रतोद्यापनं ॥ युधिष्ठिरउवाच ॥ त्वत्प्रसादाद्धृषीकेशश्रुतंमेव्रतमुत्तमं इदा
नींकृपयाब्रूहिव्रतोद्यापनकर्मच १ उद्यापनंविनानैवव्रतस्यफलमश्नुते कर्त्तव्यंतुकथंभक्तैरखंडफलभोक्तृभिः २
श्रीकृष्णउवाच शृणुपांडववक्ष्यामिव्रतोद्यापनमुत्तमं व्रतंकृतेनराजेंद्रसफलंविपुलंभवेत् ३ यथातथाचत
त्कुर्याद्वित्तशाठ्यंनकारयेत् वर्षेवर्षेतथाऽष्टम्यांकुर्याद्व्रतमनुत्तमम् ४ सप्तम्यांपंचगव्येनविधिवत्कायशोधनं
कुर्याद्व्रतेतथाऽष्टम्यांमध्यान्हेचेष्टवंधुभिः ५ इष्टवंधवोऽपितत्रसहायाभवेयुरित्यर्थः सर्वौषधैःसर्वगंधैः स्नानंशु
क्लतिलामलैः वेदोक्तविधिनास्नात्वातर्पयेत्पितृदेवताः ६ ततोयथोक्तविधिनाकुर्यादाराधनंहरेः एह्येहि
कृपयाकृष्णक्षीरोदार्णवसंस्थित ७ पद्मचक्रमहाशंखलक्ष्मीगरुडशोभित श्रीवत्सकौस्तुभोरस्कफणासुप्ता

न्वितप्रभो ८ व्रतस्योद्यापनेनत्वंसर्वकामप्रदोभव इत्यावाहनमंत्रः इतिप्रार्थ्यततोदेवमार्चितंसनकादिभिः
९ आगतानर्चयेत्सर्वान्गंधपुष्पादिभिःक्रमात् पुण्याहवाचनंकुर्यात्संकल्पंचयथाविधि १० आचार्यमर्चयेद्वि
द्वान्श्रोत्रियंचकुटुंबिनं श्रुतिस्मृतिसमायुक्तंब्रह्माणंवरयेत्ततः ११ धर्मश.स्त्रार्थतत्त्वज्ञानन्यांश्चवेदपारगान् वरये
द्यजनार्थंहिब्राह्मणानांचसप्तकं १२आशीर्वादंगृहीत्वाथसर्वैर्द्विजवरोत्तमैः शुचौदेशेतुसंलिप्तेगोमयेनविचक्षणः १३मं
डलंकारयेत्तत्रपंचवर्णैसुशोभनं नवनाभंसारविंदंसर्वतोभद्रसंज्ञकं १४मंडलंकारयेन्मध्येमनसोल्हादकंपरं मंडपं
कारयेत्तत्रसुतोरणसमन्वितं १५ चतुर्द्वारान्वितंह्येतत्स्थापयेदिष्टदेवताः प्रथमेद्वारमार्गेतुवरुणंस्थापयेद्बुधः १६अव
तेहेलमंत्रेणनैवेद्यांतंप्रकल्पयेत् द्वितीयद्वारदेशेतुकुवेरंस्थापयेत्ततः १७ गणानांत्वेतिमंत्रेणचतुर्थेगणनायकं एवं
सुपूजितेतत्रमंडलेपंकजादिभिः १८ मध्येऽवस्थापयेत्कुंभंसौवर्णंराजतंतथा अभावेताम्रजंवापिमृण्मयंवापिकारये
त् १९ सुधाधवलितंकृत्वाचंद्रसूर्यनिभंशुभं नामांकितंतुतत्कृत्वाजलपूर्णंसरत्नकं गंधपुष्पादिसंयुक्तंसपल्लव
फलंतथा २० पात्रंचकारयेत्पश्चाद्धेम्नावारजतेनवा अभावेताम्रपात्रंतुकुंभस्योपरिविन्यसेत् २१ सर्वेसमुद्रास्स
रितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः २२ इतिजलावाहनं स्थितंत्वयिजग
त्सर्वंसदेवासुरमानुषंआत्मनःकार्यसिध्यर्थंस्थापयित्वाघटोपरि मूर्त्तिचकारयेत्तत्रकृष्णस्यैवविचक्षणः २३
अष्टमापप्रमाणांतुवित्तशाठ्यंनकारयेत् तदर्द्धेनाथवार्द्धेनशक्त्यावाकारयेद्बुधः २४आवाहयेत्प्रयत्नेनमूर्तिंकलशसं
स्थितां चामरंछत्रशय्यांचपीठिकांचाथपात्रकम् २५ सूपस्करसमायुक्तंदेवस्याग्रेनिवेदयेत् २६ देवस
मीपेस्थापयेत् एवंपंचामृताद्युपकल्पनविधानम् पंचामृतेनततस्नानंकुर्याद्देवस्यमंत्रतः स्नानंचकारयेत्पार्थपश्चा
त्पूजांसमाचरेत् ततस्तुपूजयेद्देवंविष्णुंतंविश्वरूपिणम् २७ वस्त्रयुग्मेनसंवीतंपीतयज्ञोपवीतिनं चंदनेनसुगंधेन

कर्पूरागुरुगंधिना विलेपनेनभोगायप्रीयतांमधुसूदनः २८ उक्तविलेपनेनसहभोगाययदपेक्षितंनैवेद्यतांबूलादि तस्याशुप्रकल्पनंकार्यमित्याशयः अथपूजाप्रकर्तव्यामंत्रैर्वेदपुराणिकैः ३० आगच्छदेवदेवेशतेजोराशे जगत्पते पूजयिष्याम्यहंदेवप्रसादसुमुखोभव सहस्रशीर्षेत्यावाहनं देवाब्रह्मादयोयेचस्वरूपंनविदुस्तव अतस्त्वांपूजयिष्यामिमातुरुत्संगवासिनं यस्यावताररूपाणिसमर्चंतिदिवौकसः अपश्यंतःस्वयंरूपंतस्मै श्रीब्रह्मणेनमः पुरुषएवेदंआसनं अवतारसहस्राणिकरोषिमधुसूदन नतेसंख्यावताराणांकाश्चिज्जानाति तत्त्वतः एतावानस्येतिपाद्यं जातः कंसवधार्थायभूभारोत्तारणायच देवानांचहितार्थायधर्मसंस्थापनायच कौरवाणांविनाशायपांडवानांहितायच गृहाणार्घ्यंमयादत्तंदेवक्यासहितोहरे त्रिपादूर्ध्वइत्यर्घ्यं सुरासुरनरेशायक्षीराब्धिशयनायच योगेश्वरायदेवाययोगिनांपतयेनमः योगोद्भवायनित्यायगोविंदायनमोनमः कृष्णायवासुदेवायदद्यादाचमनंशुभं तस्माद्विराजाचमनीयं नारायणनमस्तेऽस्तुनरकार्णवतारक गंगोदकंसमानीतं स्नानार्थंप्रतिगृह्यतां तस्माद्यज्ञात्इतिस्नानं पयोदधिघृतंक्षौद्रंशर्करास्नानमुत्तमं तृप्त्यर्थंदेवदेवेशगृह्यतां देवकीसुत पंचामृतस्नानं शुद्धोदकस्नानं आचमनं क्षौमंचपट्टसूत्राढ्यंमयानीतांशुकंशुभं गृह्यतां देवदेवेशमयादत्तंसुरोत्तम तस्माद्यज्ञाद् द्वितीयवस्त्रंच नमः कृष्णायदेवायशंखचक्रधरायच ब्रह्मसूत्रं जगन्नाथगृहाणपरमेश्वर तस्मादश्वेत्युपवीतं नानागंधसमायुक्तंचंदनंचारुचार्चितं कुंकुमाक्ताक्षतैर्युक्तंगृह्यतांपरमेश्वर तंयज्ञमितिगंधं पुष्पाण्येतानिदिव्यानिपारिजातोद्भवानिच मालतीकेसरादीनिपूजार्थंप्रतिगृह्यतां यत्पुरुषमितिपुष्पं अष्टांगपूजा श्रीकृष्णायनमः पादौ पूजयामि संकर्षणायनमः स्फिजौपू. कालात्मने नमोजानुनी पू. विश्वकर्मणे. जघनंपू- विश्वनेत्राय- कटिंपूजयामि विश्वकर्मणे मेढ्रंपू. वाचस्पते

अ०र०
भाद्रप०
३५

नमस्तुभ्यमितिसंपूजयेन्मुखं ललाटेकेशवायैवललाटंपू. सर्वात्मने. शिरःपूः कालात्मन्विश्वरूपात्मन् नारायणनमोनमः इतिसर्वांगपूजा वनस्पतिरसोदिव्योगंधाढ्यः सुमनोहरः आघ्रेयः सर्वदेवानांधूपोयंप्रतिगृह्यतां ब्राह्मणोस्येतिधूपं त्वंज्योतिः सर्वदेवानांतेजस्त्वंतेजसांपरं आत्मज्योतिर्नमस्तुभ्यंदीपोयंप्रतिगृह्यतां चंद्रमामनसइतिदीपं नानागंधसमायुक्तंभक्ष्यंभोज्यंचतुर्विधं नैवेद्यार्थंमयादत्तंगृहाणपरमेश्वर नाभ्याआसीदितिनैवेद्यं तांबूलंचसकर्पूरंपूगीफलसमन्वितं मुखवाकरंरम्यंप्रीतिदंप्रतिगृह्यतां यत्पुरुषेणेति तांबूलम् सुवर्णरजतंताम्रंनानारत्नसमन्वितं कर्मसाद्गुण्यसिद्ध्यर्थंदक्षिणाप्रतिगृह्यतां सप्तास्यासान्निति दाक्षिणा इदंफलं यज्ञेनयज्ञमितिफलं १३ ततोवैदिकमंत्रैः पुष्पांजलिंदद्यात् इदंविष्णुरित्यादिभिः एवं पूजाप्रकर्त्तव्यारात्रौजागरणंतथा गीतवादित्रसंयुक्तपुराणश्रवणंतथा प्रतिमायांविधायैवंपूजांदेवस्यचक्रिणः ततःप्रभातसमयेस्नात्वशुचिजलाशये पूर्ववत्पूजयेद्देवंपश्चाद्धोमंसमाचरेत् स्वगृह्योक्तविधानेनप्रतिष्ठाप्यचरुंततः व्रीहियवतिलैश्चैवघृतेनचपरिप्लुतैः अतोदेवेतिमंत्रेणशतमष्टोत्तरंक्रमात् त्रुटयेस्वाहा कालात्मनेस्वाहा अहोरात्रायस्वाहा अर्द्धमासायस्वाहा मासायस्वाहा संवत्सरायस्वाहा सर्वात्मनेस्वाहा ततइदंविष्णुरितिमंत्रेणपंचखाद्यहुतंस्मृतं यथासंख्यंचकर्तव्यंहुतंसंपूर्णमेवच ततोमहाव्याहृतयोहोममंत्राः प्रकीर्त्तिताः जपेत्पुरुषसूक्तंतुस्मरेद्देवमनंतकं पूर्णाहुतिंततोहुत्वायवैर्व्रीहिघृतादिभिः आदित्यादीन्ग्रहान्सर्वान्शक्तौवाराधयेदिह नवैर्धौतैरतिश्वेतैर्वस्त्रैराभरणैःशुभैः कर्णांगुलीभूषणैश्चरौप्यंकृत्वापवित्रकं अर्घ्यपुष्पप्रदानेन आचार्यंतुप्रपूजयेत् आचार्यंपूजयित्वाचवस्त्रैर्नानाविधैःशुभैः वस्त्रंछत्रंचहेमंचरत्नादिभिरलंकृतं सकंकणंहारयुक्तंसपत्नीकायदाप्यच मुद्रिकाकर्णभूषैश्चतथावस्त्रैःप्रपूजयेत् दद्यात्सदक्षिणांधेनुंसवत्सांचपयस्विनीम

स्वर्णशृंगींरौप्यखुरांकांस्यदोहनसंयुतां ताम्रपृष्ठींस्वर्णघंटांनासिकामौक्तिकान्वितां रत्नपुच्छांवस्त्रयुतांनिष्कत्रयसमन्विता भक्त्यासमर्पयेत्सर्वंयथाविभवसारतः सुरभीवैष्णवीमातानित्यंविष्णुपदेस्थिता गोग्रासंतु मयादत्तंसुरभिप्रतिगृह्यतां गावोममाग्रतः संतुगावोमेसंतुपृष्ठतः गावोमेहृदयेसंतुगवांमध्येवसाम्यहं धेनुंस्पृष्ट्वानमस्कुर्यात्कुर्याच्चैवप्रदक्षिणां प्रदक्षिणीकृतातेनसप्तद्वीपावसुंधरा नमोगोभ्यः श्रीमतीभ्यः सौरभेयीभ्यएवच नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः नमस्कारः गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच गोप्रार्थना यस्मात्त्वंपृथिवीरूपाधेनुरूपेणसंस्थिता त्वदर्चनाद्धरिःप्रीतोममपापंव्यपोहतु मंत्रैरेभिस्तुसंपूज्यआचार्यायनिवेदयेत् पदंचैवप्रदातव्यंवस्त्राद्यष्टकसंयुतं पादुकोपानहच्छत्रमुद्रिकादिभिरंकितं नामांकंसजलंकुंभंतंडुलैःपूरितंतथा सोपस्करांचप्रतिमामाचार्यायनिवेदयेत् कृष्णायानंतरूपायदास्यामिप्रतिमामिमां द्रव्यविष्णुसमुद्भूतामतःशांतिंप्रयच्छमे प्रतिमामंत्रः मंडलंफलसंयुक्तंब्राह्मणायनिवेदयेत् अन्येभ्योब्राह्मणेभ्यश्चभक्त्यादद्याच्चदक्षिणां अभिषेकंततःकुर्याद्यजमानस्य मंत्रतः समुद्रेतिप्रतिमंत्रैः शर्करास्त्वितिमंत्रतः कोटितीर्थसमंपुण्यमाचार्यंतुक्षमापयेत् मंत्रहीनाक्रियाहीनंभक्तिहीनंजनार्दन संपूजितंमयादेवपरिपूर्णंतदस्तुमे क्षमापनमंत्रः इष्टमित्रादिसंयुक्तोगृहमागत्यसंयुतः ब्राह्मणान्भोजयेत्पश्चाद्यथाविभवविस्तरैः मिष्टान्नपायसैर्भोज्यैः पश्चाद्दद्याच्चदक्षिणां दीनानाथांश्चसंपूज्यब्राह्मणांश्चविशेषतः भुंजीतवाग्यतोभूत्वाचिंतयेत्तद्दिनेहरिं एवंकृतेधर्मराजकर्मणासौजनार्दनः सकृष्णरूपीभगवान्प्रियोभवतिसर्वदा सगरेणपुराचीर्णंराजभिर्जनकादिभिः मनुनाचदिलीपेनरघुणाभरतेनच नृपैरन्यैश्चचरितंराज्यंभुक्त्वादिवंगताः यः करोतिनृपश्रेष्ठव्रतस्योद्यापनंमुदा व्रतस्यफलमाप्नोतिविष्णुलोकेमही

यते ॥ इतिजन्माष्टम्युद्यापनविधिस्समाप्तः ॥ :: ॥ ⁂ ॥ अथास्यामेव रोहिणीयुक्तायामाग्निपुराणोक्तंजयंतीव्रतम् ॥ वसिष्ठउवाच कृष्णाष्टम्यांभवेद्यत्रकलैकारोहिणीनृप जयंतीनामसाज्ञेयाउपोष्याच प्रयत्नतः सप्तजन्मकृतंराजन्यत्पापंत्रिविधंनृणां तत्क्षालयतिगोविंदास्तिथौतस्यांसुभावितः उपवासश्चतत्रोक्तोमहापातकनाशनः जयंत्यांजगतीपालविधिनानात्रसंशयः त्रेतायांद्वापरेचैवराजन्कृतयुगेपुरा रोहिणीसहिताचेयंविद्वद्भिःसमुपोषिता वियोगेपारणंचक्रुर्मुनयोब्रह्मवादिनः सांयोगिकेव्रतेप्राप्तेयत्रकोपि वियुज्यते तत्रपारणकंकुर्यादेवंविधिविदोविदुः अतः परंमहीपालसंप्राप्तेतामसेकलौ जन्मनोवासुदेवस्यभविताव्रतमुत्तमं आराधितःसदेवक्याविष्णुःसर्वेश्वरःपुरा समयोगेतुरोहिण्यांनिशीथेराजसत्तम समजायतगोविंदोबालरूपीचतुर्भुजः तंदृष्ट्वाजगतांनाथंप्रणम्यगरुडध्वजं देवकीप्रांजलिर्भूत्वाइदंवचनमब्रवीत् देवक्युवाच नाहमेवंविधंवोढुंहार्देप्रस्तुतलोचन तवेदृक्रूपमालोकयशक्तोभिमधुसूदन वासुदेवउवाच त्वंमांद्रक्ष्यस्यसंदिग्धंदिनेस्मिन्नेवतामसे तवदर्शनमेष्यामिबालरूपेणदेवकि येत्वांपुष्पादिभिर्दैर्विपूजयिष्यंतिमानवाः दिनेऽस्मिन्मांमहाभागास्तवोत्संगेऽयवस्थितं दास्यंतियेनिशीथेऽर्घ्यंरोहिणीसहिते विधौ सुवर्णेनकृतेपात्रेराजतेवानरोत्तमाः सर्वान्कामानवाप्स्यंतिइहलोकेपरत्रच सप्तमीसंयुताष्टम्यांनिशीथेरोहिणीयदि भवितासाऽष्टमीपुण्यायावच्चंद्रादिवाकरौ प्रतिमासंचतेपूजामष्टम्यांयःकरिष्यति ममचैवाखिलान्कामान्सप्राप्स्यतिनसंशयः वशिष्ठउवाच अनेनविधिनायस्तुप्रतिमासंनरेश्वर करोतिवत्सरंपूर्णं यावदागमनंहरेः दद्याच्छय्यांसुसंपूर्णांभोगरत्नैरलंकृतां ब्राह्मणायनृपश्रेष्ठतस्यपुण्यफलंशृणु यत्पुण्यंसम्यगिष्टेनराजसूयेनपार्थिव तत्पुण्यंसफलंलब्ध्वाविष्णोःसालोक्यतांव्रजेत् नापुत्रोह्यथनोदुःखीनवियोगोकुरूपवान्

भवेन्नाकालतोमृत्युर्यावज्जन्मशतंनृप शंखेतोयंसमादायसपुष्पफलकांचनं जानुभ्यांचधरांगत्वाचंद्रायार्घ्यंनिवेदयेत् क्षीरोदार्णवसंभूतअत्रिनेत्रसमुद्भव अर्घ्यंगृहाणशशांकेमंरोहिण्यासहितोमम रोहिण्यासहितंचंद्रंकृत्वारौप्यमयंबुधः द्वादशांगुलविस्तारंतत्रार्घ्यंसंनिवेदयेत् ततोऽनुपूजयेत्तांतुसकृष्णांदेवकींनृप गंधपुष्पैःसनैवेद्यैर्वस्त्रालंकारभूषणैः प्रणम्यदेवजननींत्वत्तोजातस्तुवामनः वासुदेवस्तथाकृष्णोनमस्तुभ्यंनमोनमः सपुष्पार्घ्यंप्रदत्तंमेगृहाणेमंनमोस्तुते अदितिर्देवमातात्वंवसुदेवस्तुकश्यपः अजीजनस्त्वमीडेयहवासुदेवंसनातनं इत्येवंपूजयित्वातु पुनःसूक्तैः सुवैष्णवैः स्तुत्वावादित्रनिर्घोषै गीतवाद्यैःसुमंगलैः सुकथाभिर्विचित्राभिस्तथाप्रेक्षणकैरपि पूर्वेतिहासैःपौराणैः क्षपेत्तांशर्वरींनृप दद्यात्स्वशक्तितोराजन् प्रभातउदितेरवौ ब्राह्मणेभ्योयथाशक्त्याधेनुवस्त्रादिकांचनं दक्षिणांतुद्विजेभ्यस्तुसर्वंतच्चाक्षयंभवेत् भांतेकुर्यात्तिथेर्वापि शस्तंभारतपारणं कृतेनतेनपूतात्माराजसूयफलंलभेत् यःकुर्याद्व्रतमेतत्तु पुण्यवान्शक्तितःसदा इहामुत्रसुखीविद्वान्परात्परतरंव्रजेत् आदित्यपुराणे तमेतमेवविधिमाभिधायपूजाविशेष उक्तः गंधैर्माल्यैस्तथापेयैर्यवगोधूमसंभवैः सगोरसैर्भक्ष्यभोज्यैः फलैश्चविविधैरपि रात्रौप्रजागरः कार्योनृत्यगीतसमाकुलैः अरुणोदयवेलायां नवम्यांचततःस्त्रियः रक्तवस्त्रान्विताःसर्वाः पुष्पमाल्यैरलंकृताः नयंतिप्रतिमांह्येतांनानाविभवसंभवाः नदीतीरंशुभंरम्यंविविक्तंप्रतिवत्सरं तत्रस्नानंप्रकुर्वंतिस्नापयंतिचतास्ततः ततःप्रविश्यचगृहंपवित्रंभुंजतेचताः युक्तमिक्षुविकारैश्चमध्वाज्यमरिचैः सह इतिजयंतीव्रतम् अथव्रतोद्यापनकौमुद्युक्तंसंक्षेपेणजन्माष्टमीव्रतोद्यापनं ॥ ॥ प्रातर्दंतधावनपूर्वकंस्नात्वादेशकालौसंकीर्त्य ममाखिलपापक्षयपूर्वकधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्धिद्वारा अमुककामनयावाआचरितजन्माष्टमीव्रतोद्यापनंकरिष्ये तदंगं

पुण्याहवाचनादिकृत्वावृताचार्यः गोमयादिलिप्तशुद्धदेशेपंचवर्णपुष्पमालादिशोभितायांवेद्यांसर्वतोभद्रस्थतिलोपरिस्थकलशोपरिपूर्णपात्रेरौप्यपर्य्यंकेसौवर्णींदेवकीं तदुत्संगेवामस्तनपायिनंसौवर्णंश्रीकृष्णमिदंविष्णुरितिमंत्रेणविष्णोर्नुकमितिवापरितः वासुदेवं वलदेवंनंदंयशोदांसुभद्रांरोहिणींविधुमत्स्यादिदशरूपाणिआदित्यादिग्रहान्अश्विन्यादिसप्तविंशतिनक्षत्राणिदेवान् नागान्यक्षान्विद्याधरान् उरगान्यमुनांकालियंकंसंगां योगनिद्रां सात्यकिंउद्धवंअक्रूरंउग्रसेनादियादवान् शंखचक्रंगदांपद्मं त्रुटिंकालात्मानं अहोरात्रं मासं संवत्सरं सर्वात्मानं द्वारपालान् पुण्यशीलं जयंविजयं पुरतोगरुडं एवंनाममंत्रैरावाह्य पुरुषसूक्तेनपूजयेत् कृष्णंचतुर्भुजंदेवंशंखचक्रगदाधरं पीतांवरयुगोपेतंलक्ष्मीयुक्तंविभूषितं लसत्कौस्तुभशोभाढ्यंमेघश्यामंसुलोचनंध्यायामिपुंडरीकाक्षंजगदानंदकारकं अथांगपूजा कृष्णायनमःपादौपूजयामि संकर्षणाय. गुल्फौ कालात्मनेनमः जानुनी· विश्वकर्मणे जंघे- विश्वनेत्राय· कटिं पद्मनाभाय. नाभिं· परमात्मने-हृदयं. श्रीकराय- कंठं- सर्वास्त्रधारिणे. वाहुं. वाचस्पतये- मुखं. केशवाय·ललाटं·सर्वात्मने. शिरसि० पूजांसमाप्यस्तोत्रंपठेत् अनघंवामनंशौरिं श्रीकंठंपुरुषोत्तमम् वासुदेवंहृषीकेशंमाधवंमधुसूदनं वाराहंपुंडरीकाक्षंनृसिंहंदैत्यसूदनं दामोदरंपद्मनाभंकेशवंगरुडध्वजं गोविंदमच्युतंकृष्णमनंतमपराजितं अधोक्षजंजगद्बीजंसृष्टिस्थित्यंतकारकं अनादिनिधनं विष्णुंत्रैलोक्येशंजगद्गुरुं नारायणंचतुर्वाहुंशंखचक्रगदाधरं पीतांवरधरंनित्यंवनमालाविराजितं श्रीवत्सांकंजगद्धेतुंश्रीधरंश्रीपतिंहरिं एवंस्तुत्वादेवस्यजातकर्मनामकर्मषष्ठीपूजादिकृत्वा पुरतः अभयावचाकुष्ठंगुडूचींपिप्पलीशस्त्राणिनिक्षिप्यार्घ्यंदद्यात् चंद्रोदये जातः कंसवधार्थायधर्मसंस्थापनायच गृहाणार्घ्यंमयादत्तंदेवकीसहितोहरे ॥ इतिकृष्णार्घ्यं ॥ अंगनेभूमौराजतंचंद्रविंवंसंपूज्यअर्घ्यंजानुभ्यामवनींगत्वाद

द्यात् मंत्रः क्षीरोदार्णवसंभूतलक्ष्मीवंधोनिशाकर गृहाणार्घ्यंमयादत्तं रोहिण्यासहितः शशिन् ततः प्रार्थना त्राहिमांसर्वगश्रीशघोरसंसारसागरात् त्राहिमांसर्वपापघ्न दुःखशोकार्णवात्प्रभो यद्बाल्येयच्च कौमारेयौवनेयच्चवार्द्धके तत्पुण्यंवृद्धिमाप्नोतुपापंहरहलायुधेति रात्रौजागरणंकुर्यात् प्रातः स्नात्वासंपूज्याग्निंप्रतिष्ठाप्यान्वादध्यात् प्रधानंविष्णुं इदंविष्णुरितिमंत्रेणाज्यसतिलव्रीहियवद्रव्यैः प्रतिद्रव्यं अष्टोत्तरशतसंख्याकाहुतिभिः पुनः पंचखाद्येन विष्णोर्नुकमिति मंत्रेणाष्टोत्तरशतसंख्याकाः पुनः पुरुषसूक्तेनप्रत्यृचं एकैकयाज्याहुत्या महाव्याहृतिभिश्चाष्टाविंशतिसंख्याज्याहुतिभिः परिवारदेवताश्चैकैकाज्याहुत्या शेषेणस्विष्टकृतमित्यादिहोमशेषंसमाप्य तत आचार्य्यंसंपूज्य विभवेसति भूशय्यारौप्यवस्त्रकांचनासनं दत्त्वा पीठंदत्त्वा श्रीकृष्णः प्रतिगृह्णाति श्रीकृष्णोवैददातिच श्रीकृष्णस्तारकोभक्त्या श्रीकृष्णायनमोनमः श्रीकृष्णानंतरूपायदास्यामिप्रतिमामिमां द्रव्यंविष्णुसमुद्भूत मतःशांतिंप्रयच्छमे व्रतपूर्तयेगांचदद्यात् सुरास्त्वामित्यादिभिर्यजमानमभिषिंचेत् अग्निंविसृज्य भूयसींदक्षिणांदत्त्वा शतमर्द्धशतंविंशतिंदशवा ब्राह्मणान्संतर्प्य स्वयंभुंजीतेति जन्माष्टमीव्रतंभविष्योत्तरे ॥ ॥ ॥ ः ॥

अस्यामेवकृष्णाष्टम्यामुमामाहेश्वरंव्रतं हेमाद्रौ नभस्येमासिचाष्टम्यांयदार्द्राजायतेतदा व्रतमेतद्विधातव्यमुमामाहेश्वरंभुवित्यादि अस्यामेवमृगशिरोयुक्तायां कालाष्टमीव्रतम् हेमाद्रौवामनपुराणे नभस्येमासिच तथायास्यात्कृष्णाष्टमीशुभा युक्तास्यान्मृगशीर्षेणसातुकालाष्टमीमता तस्यामपिशिवपूजनंकार्य्यं इयंमन्वादिरपि भाद्रकृष्णनवमीगोगामिनवमीतिक्वचित्प्रसिद्धा गोगामीवृषभध्वजइतिनामानुसारेण कालाष्टमीव्रतंकुर्यात्तिथिरंतेचपारणम् शिवपूजैवात्रकार्य्यादशम्यामंतकस्यचेतिवाक्यात् ॥ दशम्यांधर्मराजव्रतम् ॥

भाद्रप०
व्र०र०
३८

भाद्रकृष्णैकादश्यजानामैकादशी ब्रह्मांडपुराणे ॥ युधिष्ठिरउवाच भाद्रस्यकृष्णपक्षेतुकिंनामैकादशी भवेत् एतदिच्छाम्यहंश्रोतुंकथयस्वजनार्दन श्रीकृष्णउवाच शृणुष्वैकमनाराजन्कथयिष्यामिविस्तरात् अजेतिनामविख्यातासर्वपापप्रणाशिनी पूजयित्वाहृषीकेशंव्रतमेतत्करोतियः पापानितस्यनश्यंतिमहापातकजान्यपि नातः परतराराजन्लोकद्वयाहितावहा सत्यमेतन्मयाप्रोक्तंनासत्यंममभाषितं हरिश्चंद्रइतिख्यातो बभूवनृपतिःपुरा चक्रवर्त्तीसत्यसंधः समस्तायाभुवःपतिः कस्यापिकर्मणोयोगाद्राज्यभ्रष्टोबभूवसः विक्रीतौवनितापुत्रौसचकारात्मविक्रयं पुक्कसस्यचसदासत्वंगतोराजासपुण्यकृत् सोऽभवन्नृपतिश्रेष्ठोनसत्याच्चलितस्तथा एवंभूतस्यनृपतेर्वहवोवत्सरागताः ततश्चिंतातुरोराजासबभूवातिदुःखितः किंकरोमिक्वगच्छामिनिष्कृतिर्मेकथंभवेत् इतिचिंतयतस्तस्यमग्नस्यवृजिनार्णवे आजगाममुनिःकश्चिद्दृष्ट्वाराजानमातुरं परोपकरणार्थायब्रह्मणानिर्मिताद्विजाः सतंदृष्ट्वाद्विजवरंननामनृपसत्तमः कृतांजलिपुटोभूत्वागौतमस्याग्रतः स्थितः कथयामासवृत्तांतमात्मनोदुःखसंयुतं श्रुत्वानृपतिवाक्यंतद्गौतमोविस्मयान्वितः उपदेशंनृपतयेव्रतस्यास्यददौमुनिः मासेभाद्रपदेराजन्कृष्णपक्षेऽतिशोभना एकादशीसमाख्यातासाऽजानाम्नातिपुण्यदा अस्याः कुरुव्रतंराजन्पापस्यांतोभविष्यति तवभाग्यवशादेषासप्तमेऽह्निसमागताऽउपवासपरोभूत्वारात्रौजागरणंकुरु एवमस्याव्रतेचीर्णेतवपापक्षयोध्रुवं तवपुण्यप्रभावेणआगतोहंनृपोत्तम इत्येवंकथयित्वातुमुनिरंतरधीयत मुनेर्वाक्यंनृपःश्रुत्वाचकारव्रतमुत्तमं कृतेतस्मिन्व्रतेराजन्पापस्यांतोभवत्क्षणात् श्रूयतांराजशार्दूलप्रभावोऽस्यव्रतस्यच निस्तीर्णदुःखोराजासीद्व्रतस्यास्यप्रभावतः पत्न्यासहसमायोगंपुत्रेणचसमागतः देवदुंदुभयोनेदुः पुष्पवर्षमभूद्दिवः एकादशीप्रभावेणप्राप्यराज्य

मर्कटकं स्वर्गंलेभेहरिश्चंद्रः सपुत्रः सपरिच्छदः ईदृग्विधंव्रतंराजन्येकुर्वंतिद्विजोत्तमाः सर्वपापविनिर्मुक्तास्त्रिदिवंयांतितेनृप पठनाच्छ्रवणाद्वापिअश्वमेधफलंलभेत् ॥ ॥

॥ इतिब्रह्मांडपुराणपद्मपुराणयोर्भाद्रकृष्णाजैकादशीव्रतकथा ॥ ॥

भाद्रपदमासकृष्णद्वादशीवत्सद्वादशी ॥ साचपांचनदादिदेशेप्रसिद्धा अस्यामूलंमृग्यं तत्रसवत्सयागोःपूजा पिष्टमयीं सवत्सां गां स्त्रियः पूजयंति तच्चोक्तं भविष्योत्तरे सवत्सांतुल्यवर्णांगांशीलिनींचपयस्विनीं चंदनादिभिरालिप्यपुष्पमालाभिरर्चयेत् सवत्सायै धेनवे नमः ॥ इतिसंपूज्य ॥ वस्त्रेणाच्छाद्याऽर्घ्यंदद्यात् क्षीरोदार्णवसंभूतेसुरासुरनमस्कृते सर्वदेवमयेमातर्ध्यंगृह्णनमोस्तुते ततः प्रत्यक्षंगांसंपूज्य तस्यैग्रासदानमंत्रः सुरभित्वंजगन्मातानित्यंविष्णुपदेस्थिता सर्वदेवमयीग्रासंमयादत्तमिमंग्रस ॥ ततःप्रार्थना सर्वदेवमयेदेविसर्बरत्नैरलंकृते मातर्ममाभिलषितंसफलंकुरुनंदिनि भाद्रकृष्णत्रयोदशीयुगादिः ॥ तदुक्तं भविष्योत्तरे कलिःकृष्णत्रयोदश्यांनभस्येमासिनिर्गतः अत्रकृत्यंयुगादीन्प्रक्रम्य ॥ पानीयमप्यत्रतिलैर्विमिश्रंदद्यात्पितृभ्यः प्रयतोमनुष्यः श्राद्धंकृतंतेनसमा सहस्रं रहस्यमेतत्पितरोवदंति ॥. विष्णुपुराणेपि ॥ युगादयः स्मृताह्येताः पितृणांतृप्तिहेतवे ॥ भारतेऽपि यामन्वाद्यायुगाद्याश्चतिथयस्तासुमानवः स्नात्वादत्वाचहुत्वाचजप्त्वानंतफलंलभेत् युगादिषुयुगांतेषुश्राद्धमक्षयमुच्यते इत्यत्रश्राद्धमप्युक्तं पानीयमित्यादिना भाद्रकृष्णचतुर्दश्यां शिवपूजाविधीयतइति चतुर्दश्यांशिवस्यचेतिवचनात् भाद्रामायांकुशाग्रहणं हेमाद्रौहारीतः मासेनभस्येमावास्यातस्यांदर्भोच्चयोमतः अयातयामास्तेदर्भाविनियोज्याःपुनःपुनः अत्रातिदेशमाह नभस्यैकादशीभूतदर्शाष्टम्यांसमुद्धृताः वर्षयी

पुस्तकालय गुरुकुल ... गड़ी

ग्याः कुशास्तास्त्वित्यादि नारदीये शुचौनभसिभाद्रेचमासेपूर्णातिकेद्विज पितृश्राद्धंदानहोमःसुरार्चानंत्यमश्नुते भाद्रदर्शेऽपराह्णेतुतिलक्षेत्रसमुद्भवान् विरिंचिमनुनामंत्र्यहुंफट्छिन्नान्कुशान्द्विजः सर्वदासर्वकार्येषुयोजयेदेकदापरान् मंत्रस्तु विरिंचिनासहोत्पन्नपरमेष्ठिनिसर्गज दहपापानिसर्वाणिदर्भस्वस्तिकरोभव भाद्रशुक्लप्रतिपदाकृत्यं नारदीये भाद्रशुक्लप्रतिपदिजपेन्नाम्नांसहस्रकं व्रतंमौनमयंकेचिदाहुरत्रशिवार्चनं नैवेद्यंतुपचेन्मौनीषोडशत्रिगुणानिच फलानिपिष्टपक्वानिदद्याद्विप्रायषोडश देवायषोडशान्यानिभुज्यंतेषोडशात्मना सौवर्णंशिवमभ्यर्च्यकुंभोपरिविधानवित् तत्सर्वंधेनुसहितमाचार्य्यायनिवेदयेत् इतिकृत्वाव्रतंविप्रदेवदेवस्यशूलिनः चतुर्दशाब्दंदेहांतेभुक्त्वाभोगान्शिवंव्रजेदिति अथभाद्रशुक्लप्रतिपदि स्कंदपुराणोक्तं महत्तमाख्यंशिवव्रतं तदेवमौनव्रतमित्युच्यते इदंव्रतंपूर्वविद्धायामेवकर्त्तव्यं तदुक्तंनिर्णयामृतेब्रह्मवैवर्तेच पूजाव्रतेषु सर्वेषुकर्त्तव्यासंमुखीतिथिरिति मदनरत्नेस्कांदे नंदिकेश्वरउवाच देवकेनविधानेनव्रतपुण्यंमहत्तमं कस्मिंस्तिथौतत्कर्तव्यंविधानंतद्वदस्वमे स्कंदउवाच मासेभाद्रपदेशुक्लेपक्षेचप्रतिपत्तिथौ नैवेद्यंतुपचेन्मौनीषोडशत्रिगुणानिच फलानिपिष्टपक्वानिदद्याद्विप्रायषोडश देवायषोडशैतानिदातव्यानिप्रयत्नतः भुज्यंतेषोडशतथा व्रतस्यनियमाश्रयात् सौवर्णंकारयेद्देवंयथाशक्त्याहिरण्मयं सौवर्णंकर्षपरिमितसौवर्णघटितं यथाशक्तिवा नेत्रत्रयसमायुक्तंजटामंडलमंडितं पंचवक्त्रंचतुर्बाहुंषडस्यूब्जस्यमध्यगं त्रिशूलंयज्ञसूत्रंचवहंतंदक्षिणेकरे कपालंकुंडिकांवामेशिखायांचंद्रधारिणं पंचामृतेनस्नपनंकृत्वासंस्थापयेत्ततः कुंभस्योपरिदेवेशंशुक्लवस्त्रयुगान्वितं गंधपुष्पैः समभ्यर्च्यफलैर्नानाविधैस्तथा प्रसीददेवदेवेशचराचरजगद्गुरो वृषध्वजमहादेवत्रिनेत्रायनमोनमः पूजामंत्रः देवस्यचपरीधानंदद्याद्धेनुंपयस्विनीं अनेनतुविधानेनयः कुर्याद्व्रतमुत्तमं सरा

ज्यंलभतेदेवदीर्घमायुस्तथैवच सर्वपापविनिर्मुक्तः शिवलोकेमहीयते भुक्त्वातुविविधान्भोगांस्ततः शिवपुरंव्रजेत् इतिमहत्तमव्रतं अथास्यामेवस्कंदपुराणोक्तं मौनव्रतम् पार्वतीप्रश्नानंतरं ईश्वरउवाच शृणु देविप्रवक्ष्यामियत्पृष्टोऽहंत्वयाधुना व्रतमेतत्पुराचीर्णंसीतयाराघवेणच अन्यैरपिजनैः सर्वैराचीर्णंव्रतमुत्तमं नभोमासेव्यतिक्रांतेनभस्येचप्रवर्त्तिते नभाः श्रावणः. नभस्योभाद्रपदः तौचात्रपूर्णिमांतौ ग्राह्यौ एवंकालक्रमेणैवश्रावणीपूर्णिमागता तद्दिनंप्राप्यविप्रेणऽग्रेतत्रैवाभिधानात् व्रतमेतत्तुकर्त्तव्यंषोडशैवदिनानितु एतच्छ्रुत्वाततोदेवीप्रहृष्टावाक्यमब्रवीत् पार्वत्युवाच विधानंचपुराप्रोक्तंव्रतंमौनव्रतात्मकं तत्समस्तंसमाचक्ष्वप्रसादंकुरुमेप्रभो ईश्वरवाच तद्दिनेचैवसंप्राप्यसभार्यः सहवांधवः गत्वाप्रभातसमयेस्नानार्थं जलसन्निधौ तडागेवानदीतीरेगत्वाप्रस्रवणेऽथवा स्नानंकार्य्यंतदासर्वैः शिवध्यानपरायणैः दूर्वाः षोडशसंगृह्यषोडशग्रंथिसंयुताः तत्सूत्रंचकरेन्यस्यस्त्रियावामेनदक्षिणे एवंविधानंकर्त्तव्यंयावत्स्यात्प्रतिपद्दिनं तद्दिनेचैवसंप्राप्तेसमाप्त्यर्थंव्रतस्यतु मौनेनैवानयेत्तोयंमौनाद्गोधूमपेषणं मौनेनैवचकर्त्तव्यंनैवेद्यंभोजनादिकं सर्वोपस्करमादायगत्वाचजलसन्निधौ स्नानंकार्यंतदातत्रनित्यकर्मततः परं देवर्षिमनुजानांच पितृणांचैवतर्पणं पश्चाद्देवायदेवेशिमंत्रैःसंपूजयेत्ततः शूलपाणेवृषारूढअर्द्धचंद्रविभूषण तोयेनस्नापितोदेवपवित्रंकुरुमांसदा देवैस्तुवंदिताधेनुः सर्वपापप्रणाशिनी तत्क्षीरस्नापितोदेवनित्यंशोकहरोभव कामतोऽकामतोवापियन्मयादुःकृतंकृतं तत्सर्वंविलयंयातुदध्नःस्नानेनमेशिव रसानामुत्तमंत्वाज्यंदेवानांचसदाप्रियं तेनत्वंस्नपितोदेवनिधिकांतिप्रदोभव यस्योच्चारणमात्रेणतृप्तिंयांतिपितामहाः मधुनास्नापितोदेवनित्यंशोकहरोभव यमलोकभयत्रस्तः शरणंत्वागतःशिव खंडस्नानेनदेवेशमांकुरुष्वस्वमानुषं यस्यदर्शनमात्रेणशुद्धिमायाति

जीवितं तेनैवोत्तमतोयेनस्नातोदेहिप्रियंध्रुवम् सुगंधिचंदनैर्देवकुंकुमेनसमन्वितैः अर्चितोसिमयाभक्त्याशिवलोकप्रदोभव अक्षयान्बंधुपुत्रादीन्ज्ञानंचैवातिवाङ्मनः अतेचैवाक्षयंलोकमक्षतैरर्चितः कुरु संतानःपारिजातश्चयेचान्येसुरपादपाः तेषांपुष्पैर्मयादेवःसुंदरोगंधवान्शुचिः ईप्सितंमेवरंदेहिपरत्रचशुभांगतिं शुद्धाशुक्लावरावर्तिराज्येनचसमन्विता दीपवर्तिप्रदानेनप्रीतःस्यादीश्वरोमम सर्वमन्नंमयादत्तंदेवानांवसदाप्रियं तेनैवान्नप्रदानेनसुप्रीतोवरदोभव शाखाप्रशाखाचसिताचदूर्वाविस्तारभूताधरणीतलेयथा ममापिसंतानवरंतथाक्षयंकुरुष्वदूर्वेशिवपूजनेन नानाविधंफलंमुख्यंसपुष्पाक्षतचंदनं भक्त्यापरमयादत्तंगृहाणत्वंसुरेश्वर जन्मजन्मांतरेष्वेवभावाभावेनयत्कृतं क्षंतव्यंदेवतत्सर्वंशंभोत्वांशरणंगतः एतत्सर्वंतुमौनेनशुद्धोभूत्वासमाहितःशिवपूजांप्रकुर्वाणःकृतकृत्योभवेन्नरः एवंसंपूज्यविधिनासंकल्पः क्रियतेततः ।सदासंपन्नपूजायांप्रीयतांममशंकरःसंप्रीतोभवदेवेशभक्त्याह्यसदार्चितः एवंपंचामृतस्नानंयःकारयतिमानवः आजन्मोपार्जितात्पापान्मुच्यतेनात्रसंशयः विभागेनप्रदातव्यंब्राह्मणायशिवायच आत्मनाचैवभोक्तव्यंपक्वान्नंविधिवच्छुभं एवंक्रमेणकर्तव्यंसहष्टजनबांधवैः व्रतिनाहितकामार्थंद्विजाभोज्याःसदक्षिणाःदातव्यंप्रीतिपूर्वेणयाचेताछिद्रकंद्विजं ततश्चशिवपूजादिभावाभावेनयत्कृतं तत्सर्वंममपूर्णंस्याद्धर्मकामार्थसाधनं पुत्रपौत्रप्रदंह्येतत्सर्वकामप्रदंव्रतं एतत्सर्वंमयाख्यातंत्वदग्रेप्रीतिपूर्वकं श्रुतमात्रेणदेवेशिसर्वपापैः प्रमुच्यते इतिमौनव्रतम् ॥ ॥ ॥

भाद्रशुक्लद्वितीयायां शक्ररूपविधातृपूजा नारदीये भाद्रशुक्लद्वितीयायांशक्ररूपजगद्विधिं पूजयित्वाविधानेनसर्वक्रतुफलंलभेत् भविष्यपुराणे भाद्रशुक्लतृतीयामधिकृत्योक्तं माघेभाद्रपदेवापिस्त्रीणांधन्याःप्रचक्षते गुडापूयास्तुदातव्यामासिभाद्रपदेतथा तृतीयायांपायसंवावासुदेवस्यतुष्टये इयंमन्वंतरादिः भारते यामन्वाद्य

युगाद्याश्वतिथयस्तासुमानवः स्नात्वादत्त्वाचहुत्वाचजप्त्वाचानंत्यमश्नुते॥ अथास्यांहरितालव्रतं नारदी
ये भाद्रशुक्लतृतीयायांव्रतंवैहारितालिकं कुर्याद्भक्त्याविधानेनपाद्यार्घ्याचमपूर्वकम् ततस्तुकांचनेपात्रे
राजतेचापिताम्रके वैणवेमृण्मयेवापिविन्यस्यान्नंसदक्षिणं सफलंचसवस्त्रंचद्विजायप्रतिपादयेत् तदंतेपार
णंकुर्यादिष्टबंधुजनैः सह एवंकृतव्रतानारीभुक्त्वाभोगान्मनोरमान् व्रतस्यास्यप्रभावेणगौर्य्याः सहचरी
भवेत् सौभाग्यद्रव्यवस्त्राणिवंशपात्राणिषोडश दातव्यानिप्रयत्नेनब्राह्मणेभ्योयथाविधि अन्येभ्योविप्रव
र्य्येभ्योदक्षिणांचप्रयत्नतः भूयसींचततोदद्याद्विप्रेभ्यदेवितुष्टये एवंयाकुरुतेनारीव्रतंसौभाग्यवर्द्धनं सातुदे
वीप्रसादेनसौभाग्यंलभतेध्रुवं यदातृतीयाभाद्रेतुहस्तर्क्षसहिताभवेत् व्रह्मगौरीव्रतंनामसमुद्दिष्टंतुशौरिणा धर्म
णहारिणावितिवोध्यं तथाकोटीश्वरंनामव्रतंप्रोक्तंपिनाकिना लक्षेश्वरीतिचतथातद्विधानमथोच्यते अस्या
व्रतंतुसंग्राह्यंयावद्वर्षचतुष्टयं उपवासेनकर्त्तव्यंवर्षेवर्षेतुनारद अखंडानांतिलानांतुतंडुलानांचनारद ल
क्षमेकंविशोध्याथक्षिपेत्पयसिसंशृते तत्पक्केनविनिर्मायदेवीमूर्त्तिसुशोभनां प्रकारैर्गंधपुष्पाणांपुष्पमालाविभू
षितां संस्थाप्यपार्वतींतत्रपूजयेद्भक्तिभावतः गंधैः पुष्पैस्तथाधूपैस्तथानैवेद्यविस्तरैः विविधैश्चफलैर्विप्रनमस्कृ
त्यक्षमापयेत् ततोविसर्जयेद्देवींजलमध्येचदक्षिणां दद्याद्विधिज्ञविप्रेभ्योभुंजीयाच्चपरेऽहनि इतितेकथितं
विप्रलक्षकोटीश्वरीव्रतं गौरीलोकंप्रयात्यंतेव्रतस्यास्यप्रभावतः अतोऽस्यां तृतीयायां गौरीदैवत्यं व्रतच
तुष्टयमुक्तं ॥ हरितालिकाव्रतं ॥ हस्तगौरीव्रतम् ॥ कोटीश्वरीव्रतम् लक्षेश्वरीव्रतंच ॥ तत्र
शिष्टपरिगृहीतं हरितालिकाव्रतं तच्च परविद्धायां कार्यं मुहूर्तमात्रसत्त्वेऽपि दिनेगौरीव्रतंपरेइतिमाधवोक्तेः

आद्यामधुश्रावणिकाकज्जलीहरितालिका चतुर्थीमिश्रितास्त्रीभि र्दिवानक्तेविधीयते तृतीयानभसः शु
क्लामधुश्रावणिकास्मृता रंभाख्यांवर्जयित्वातुतृतीयांद्विजसत्तम अन्येषुसर्वकार्य्येषुगणयुक्ताप्रशस्यत इति
ब्रह्मवैवर्त्तात् द्वितीययातुयाविद्धातृतीयानकदाचन कर्त्तव्यासूरिभिस्तातधर्मकामार्थतत्परैः विहायैकातु
रंभाख्यांतृतीयांपुण्यवर्द्धिनीमितिस्कांदोक्तेर्द्वितीयाविद्धानिषेधप्रयोजकश्चात्र द्वितीयोनात्रिमुहूर्तकः किंतुकला
काष्ठात्मकोपि तदुक्तं स्कांदे कलाकाष्ठादिमात्रादिद्वितीयासंप्रदृश्यते सातृतीयानकर्तव्याकर्तव्यागणसंयुते
ति अतएव स्वल्पापि तृतीयाचतुर्थ्याअयंचाल्पवेधप्रयुक्तोनिषेधोगौरीव्रतविषयः विहायैकांतुरम्भाख्यांमितिपर्य्यु
दासेनत्वेतत्सदृशानामेवव्रतांतराणांप्रतीतेः इयंमन्वादिः भाद्रस्यकज्जलीकृष्णाशुक्लाचहरितालिकेतिदिवो
दासोदाहृतवचनात् अथहरितालिकाव्रतविधिः मासपक्षाद्युल्लिख्यममसमस्तपापक्षयार्थंसप्तजन्मारोग्यसौ
भाग्यादिवृद्धयेउमामहेश्वरसायुज्यतासिद्ध्यर्थंहरितालिकाव्रतमहंकरिष्ये तत्रादौ गौरीयुक्तंमहेश्वरंसंपूजयिष्ये॥
अथध्यानं पीतकौशेयवसनांहेमाभांकमलासनां भक्तानांवरदांगौरींसशिवांचिंतयाम्यहम् १ मंदारमाला
कुलितालकायैकपालमालांकितशेखराय दिव्यांवरायैचदिगंवरायनमः शिवायैचनमः शिवाय २ इ
तिध्यात्वा ॥ देवदेविसमागच्छप्रार्थयेहंजगन्मये इमांमयाकृतांपूजां गृहाणसुरसत्तमे शिवगौरीभ्यांनम
इत्यावाहनं ॥ भवानित्वंमहादेवि सर्वसौभाग्यदायिके अनेकरत्नसंयुक्तमासनंपरिगृह्यतां इत्यासनम् ॥
सुचारुशीतलंदिव्यंनानागंधाधिवासितं पाद्यंगृहाणदेवेशिमहादेविनमोस्तुते पाद्यम् ॥ श्रीपार्वतिमहाभागे
शंकरप्रियवादिनि अर्घ्यंगृहाणकल्याणिभर्त्रासहपतिव्रते इत्यर्घ्यम् ॥ गंगाजलंसमानीतंसुवर्णकलशेस्थितं
आचम्यतांमहाभागेरुद्रेणसहितेऽनघे इत्याचमनम् ॥ गंगासरस्वतीरेवाकावेरीनर्मदाजलैः स्नापितासिमया

देविसदाशांतिंप्रयच्छमे स्नानम् ॥ आप्यायस्वेतिपयः दधिक्राव्णेतिदधि घृतमितिघृतं मधुवातेतिमधु स्वादुपवेतिशर्करा पंचामृतसमानीतंपयोदाधिघृतंमधु शर्करांजलसंयुक्तांस्नानार्थप्रतिगृह्यतां पचामृतस्नानं वरुणस्येतिशुद्धस्नानं हरिद्रासर्षपद्रव्यैरुद्वर्तनं पुनराचमनं शिवगौरीभ्यांनमः सर्वसत्वाधिकेरम्येलोकलज्जानिवारणे मयोपपादितेदेविवाससीपरिगृह्यतां वस्त्रम् कर्पूरागुरुसंघृष्टंकुंकुमादिसमान्वितं कस्तूरिकासमायुक्तचंदनंप्रतिगृह्यतां गंधम् रंजिताः कुंकुमाद्येन अक्षताश्चातिशोभनाः ममैषां देविदानेनप्रसन्नाभवसर्वदा। अक्षताः मल्लिकावकुलचंपकपाटलापुन्नागजातिकरवीररसालपुष्पैः विल्वप्रवालतुलसीदलमालिकाभिस्त्वांपूजयामिजगदीश्वरिमेप्रसीद पुष्पाणि देवद्रुमरसोद्भूतः कृष्णागुरुसमन्वितः आनीतोयंमयाधूपोभवानिप्रतिगृह्यतां धूपः त्वंज्योतिःसर्वदेवानां तेजसांतेजउत्तमं आत्मज्योतिः परं धामदीपोयंप्रतिगृह्यतां नैवेद्यम् पुनराचमनं श्रीशिवाभ्यांनमः मलयाचलसंभूतंकर्पूरेणसमन्वितं करोद्वर्तनकंचारुगृह्यतांजगदीश्वरि करोद्वर्तनं इदंफलमितिफलं कर्पूरैलालवंगादितांबूलदलसंयुतं क्रमुकस्यफलंदेवितांबूलंप्रतिगृह्यतां तांबूलं हिरण्यगर्भेतिदक्षिणाद्रव्यं वज्रमाणिक्यवैदूर्यमुद्राविद्रुममंडितं पुष्परागसमायुक्तंकांचनंप्रतिगृह्यतां सुवर्णमंत्रपुष्पं चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच त्वमेवसर्वतेजांसि आर्तिक्यंप्रतिगृह्यतां नीराजनं अथनामपूजा उमायैनमः गौर्यैनमः जगद्धात्र्यैनमः जगत्प्रतिष्ठायैनमः शांतिरूपिण्यैनमः हरायनमः महेश्वरायनमः शंभवेनमः शूलपाणयेनमः पिनाकधृतेनमः शिवायनमः पशुपतयेनमः महादेवायनमः इतिपुष्पांजलयः यानिकानिचपापानि जन्मांतरकृतानिच तानिसर्वाणिनश्यंतिप्रदक्षिणपदेपदे इतिप्रदक्षिणा ॥ अन्यथाशरणंनास्तित्वमेवशरणं

मम तस्माच्छरण्यभावेनरक्षमांपरमेश्वरि इतिनमस्कारः ततोवैणवपात्रस्थंवायनंदद्यात् अन्नंसौवर्णपात्रस्थंफलवस्त्रसदक्षिणं वायनंगौरिविप्रायददामिप्रीतयेतव सौभाग्यारोग्यकामानां सर्वसंपत्समृद्धये गौरी।गिरीशतुष्ट्यर्थंवायनंतेददाम्यहं प्रतिगृह्णाद्विजश्रेष्ठसंपूर्णफलदायक त्वत्प्रसादात्सुरश्रेष्ठमुच्येहंसर्वपातकात् इतिवायनदानं आचार्यायचगांदद्यात्सवत्सांचपयस्विनीं शक्त्याचदक्षिणांदद्याद्व्रतसंपूर्त्तिहेतवे अथोपवासनिवेदनं निराहारोद्यदेवेशउमाकांतजगद्गुरो भोक्ष्यामिश्वोजगन्नाथास्मिन्हरितालिकाव्रते कथांश्रुत्वातदनंतरंप्रतिमादानं अथकथा नारायणंनमस्कृत्य. सूतउवाच मंदारमालाकुलितालकायैकपालमालांकितशेखराय दिव्यांबरायैचदिगंबरायनमःशिवायैचनमःशिवाय कैलासशिखरासीनंगौरीपप्रच्छशंकरं प्रपन्नास्मिजगन्नाथतथ्यंब्रूहिममप्रभो केनव्रतप्रभावेणतपोदानेनशंकर अनादिमध्यनिधनोभर्त्तात्वंजगतःप्रभुः मयाप्राप्तोसिदेवेशनजानेतत्सदाशिव कथयस्वप्रसादेनयद्यहंतववल्लभा ईश्वर- शृणुदेविप्रवक्ष्यामितवाग्रेव्रतमुत्तमं येनव्रतप्रभावेणप्राप्तमर्द्धासनंप्रिये यद्गुह्यंममसर्वस्वंकथयामितवप्रिये यथाचोडुगणेचंद्रोग्रहाणांभानुरेवच वर्णानांतुयथाविप्रोदेवानांविष्णुरुत्तमः नदीनांतुयथागंगापुराणानांतुभारतं वेदानांतुयथासामइंद्रियाणांमनोयथा पुराणवेदसर्वस्वमागमेषुयथोदितं तदेकाग्रेणमनसाशृणुष्वेदंसनातनं येनपुण्यप्रभावेणप्राप्तमर्द्धासनंमम तत्सर्वंकथयिष्यामित्वंममप्रेयसीयतः भाद्रेमासिसितेपक्षेतृतीयाहस्तसोमयुक् तदनुष्ठानमात्रेण सर्वान्कामानवाप्नुयात् शृणुपूर्वंयथादेवित्वयातस्यामनुष्ठितम् तत्सर्वंकथयिष्यामि यथावृत्तंहिमाचले ॥ पार्वत्युवाच ॥ कथंपूर्वंमयाचीर्णंव्रतानामुत्तमंव्रतं तत्सर्वंश्रोतुमिच्छामित्वत्सकाशाद्वृषध्वज ईश्वरउवाच नानापक्षिगणैर्युक्तोनानामृगनिषेवितः यत्रदेवाःसगंधर्वाः सिद्धचारणगुह्यकाः

विहरंतियथासौख्यंगंधर्वागीततत्पराः स्फाटिकैः कांचनैःशृंगै र्मणिवैडूर्यभूषितैः भुजैर्लिखन्निवाकाशंसुदृढोमंदरोयथा हिमेनापूरितःसर्वो गंगाध्वनिविराजितः नृत्यंत्यप्सरसोयत्रशोभमानोनगेश्वरः तत्रत्वंपार्वती बाल्ये आचरंतीमहत्तपः द्वादशाब्दानिदेवेशिधूमपानमधोमुखी भूत्वात्वंपतिरित्येवंमदाराधनतत्परासंवत्सरचतुःषष्टिपक्षं पर्णाशनंत्वया दृष्ट्वातातस्तुतेकष्टं :दुखितश्चिंतितोभृशं कस्मैदेयामयाकन्याएवंचिंतातुरोऽभवत् इत्येवं चिंतयाविष्टेदेवार्षिर्नारदोऽभ्यगात् पाद्यार्घ्याचमनादीनिनारदायददौगिरिः सुखासनगतंतंतुहिमवानिदमब्रवीत हिमवानुवाच किमर्थमागतः स्वामिन्वदस्वमुनिसत्तम महाभाग्येनसंप्राप्तंत्वदीयागमनंप्रभो अद्यमेसफलंजन्म अद्यमेसफलाः क्रियाः गतंचाद्यजडत्वंमे यज्ज्ञातंतवदर्शनं गताद्यमानसीचिंता यथाहंदुःखिता भृशं कन्यारत्नमिदंकस्मैदेयंत हिमेमुने नारदउवाच शृणुशैलेंद्रमद्वाक्यं विष्णुनाप्रेषितोह्यहं योग्यंयोग्यायदातव्यंकन्यारत्नमिदंत्वया वासुदेवसमोनास्तिब्रह्मसूर्यशिवादिषु चतुर्वर्गप्रदश्चैवदीयतांमम संमतं हिमवानुवाच वासुदेवसमोदेवः कन्यांप्रार्थयतेयदि तस्मैदेयामयाकन्यात्वदागमनगौरवात् इत्येवंगदितंश्रुत्वावैकुंठंनारदोययौ प्रीतः प्रीतांबरधरंशंखचक्रगदाधरं चतुर्भुजंवासुदेवंनमस्कृत्याभ्यभाषत नारदउवाच शृणुदेवविवाहार्थं गतोऽहंशैलजांप्रति तेनदत्तंप्रतिग्राह्यंकन्यारत्नंसुशोभनं हिमवांस्तुतदागौरीमुवाचातीवहर्षितः दत्तासित्वंमयादेविदेवायगरुडध्वजे श्रुत्वावाक्यंपितुर्देवीसख्यासार्द्धंवनांतरं गता ह्यनशनंकृत्वातपस्तप्तुंसुदुःखिता सख्युवाच किमर्थंनगपुत्रित्वंदुःखि तातप्यसेपुनः कोवाकामोभिलषितः सखिजानेनवैशुभे पार्वत्युवाच सखिशृणुमहान्कामोमनसाचिंतितोमया अल्पेनतपसाकिंसंप्राप्यतेमादृशैः खलु अतोमयासहपुन अलत्वप्तुंवनांतरे सख्युवाच कोवाकामोभिलषितोयोल्पेन

ब्र॰ र॰
भाद्रप॰
४३

तपसानरैः नप्राप्यतेतंमेब्रूहि उपायंचिंतयामिवै ॥ पार्वत्युवाच ॥ कैलासाशिखरासीनंदेवदेवंवृषध्वजम् भर्तृत्वेनैवमनसाकामयेहंनसंशयः सोयंकामोमहानद्यमेतातेनकृतोऽन्यथा तस्मादेहपरित्यागंकरिष्येहंनसंशयः पार्वत्यावचनंश्रुत्वासखीवचनमब्रवीत् नगपुत्रिमहद्भाग्यंप्रार्थिताविष्णुनायतः संसेव्योदेवतैः सर्वै र्महेंद्रादिपुरोगमैः यस्यैकगुणलेशेनगुणवंतोभवंतिहि सगुणानामनंतत्वादनंतइतिविश्रुतः देवानांकन्यकाभद्रेस्वकार्यांचेष्टदेवतां संपूजयितुमिच्छतिप्रार्थयंतिदिवानिशंअतिभाग्यवशाद्देविमाहिष्यंप्राप्यतेयथा किंत्वयापायसंत्यक्त्वाभिक्षार्थंगम्यतेन्यतः प्राप्यापिकामदंदेवंप्रार्थ्यतेकामदाहकः अस्तिकाचित्क्वचिद्रम्या त्रिलोक्यांत्वाद्दिनाप्रिये नरोत्तमायदत्तासितवपित्राशुभंकृतं माशोचस्वनिवर्त्तस्वजानासित्वंगुणांस्तयोः भ्रामितास्यथकेनत्वंशृणुष्वैकमनानघे किरीटीकेशवोनित्यंजटीमृत्युंजयोऽनघे केशवः सुमुखोभद्रे सचभीममुखः सदा सुपंक्तिरत्नदंतश्चाविपांक्तिर्दीर्घदंष्ट्रकः रत्नकुंडलवान्विष्णुर्नागकुंडलवान्शिवः विष्णुः कमलनेत्रश्च ज्वलन्नेत्रः सदाशिवः चतुर्भुजधरोविष्णुः सवैदशभुजोमहान् श्रीवत्सलांछनोविष्णुः शिवस्यब्रह्मणःशिरः पीतांवरधरोविष्णुः सचचर्मांवरः सदा पद्मपाणिर्युवाविष्णुः सवृद्धः शूलपाणिधृक् अम्लानपद्ममालःस मुंडमालाप्रियः सच कंठेऽस्यकौस्तुभंरत्नं तस्यकंठेविषंसदा वाहनंगरुडोयस्य जरठोक्षाशिवस्यच शेषपर्यंकाशायीस चिताभस्मशयः सच गंधर्वध्वनिनाहृष्टो भूतानांरोदनेनसः विष्णुर्भोगीचयोगीच कथंकामयसेशिवं पार्वत्युवाच नजानासिविमूढात्वंयोगिनंशूलपाणिनं यस्याज्ञासाधको विष्णुस्त्रिलोकींपातिनान्यथा राजसेनस्वरूपेणब्रह्मासृष्टिंविधातिच तामसेनस्वरूपेणरुद्रोत्तिसकलंरुषा गुणानांतस्यवैशिष्ट्यं महत्त्वंवेत्तिकः शुभं यस्याज्ञावशगोभूत्वा विष्णुः पृथ्वींदधारवै पुनः ससूकरो

भूत्वातांचदंतेदधारवै यद्दत्तान्भुंजतेभोगान्विष्णुर्भोगीतिकथ्यते सहस्रकमलैःपूर्वं विष्णुनाराधितः शिवः वैकुंठसंश्रयंतेज स्तेनदत्तंनिजंक्षणात् इंद्रादीनांतुयोदातासदेवोनश्रुतस्त्वया यद्दत्ततत्रराज्यंतुइंद्राद्याभुंजतेसुखं कुवेरेणापिमहती श्रीरवाप्तावरानने वरुणेनजलेशत्वं शेषः पातालसंस्थितः सूर्यस्तपतिभीत्यावैवायुर्वातिदिवानिशं यमः संयमनीशत्वं तंदेवंकिंनवेत्स्यासि यस्यांज्ञयास्वकालेनमेघावर्षंतिसर्वतः पावकः सर्वदेवानांवदनंवर्त्ततेनघे पितरः पितृलोकत्वं मत्पितापर्वतेश्वरः चंद्रोह्युडुगणेशत्वंसमुद्रोवैगभीरतां सोमः प्रायोषधीशत्वंचंदनश्चसुगंधितां यस्याज्ञयास्वकालेपिभवंत्यादेशवार्तिनः वृष्टिःशीतंचघर्मश्च स्वकालेचगमागमं शक्राद्याअपिदिक्पालाः स्वांदिशंपालयंतिते येषुकृत्येषुयेदेवायोजितास्तेतुतत्पराः अन्यथाकरणेतेषांसचदंडंविधास्यति परात्परः सर्वदेवो निर्गुणः सगुणोपिवा निराकारश्चसाकारोयोगीभोगीसएवच केवलोनिर्गुणः साक्षी क्षरश्चाक्षरएवच कोवेदतस्यतद्रूपंयद्ब्रह्मेतिप्रचक्षते ब्रह्माद्यादेवताः सर्वाऋषयश्चतपोधनाः योगिनोज्ञाननिष्ठायेयदर्थेत्यक्तवंधनाः तेपितस्यनजानंतिस्वरूपंसखिशूलिनः अतस्तंकामयेहंवैविपत्तिंपतिताशुभे ॥ सख्युवाच ॥ सम्यक्कामोभिलषितस्तदर्थेत्यक्तजीविता यत्रवैनिश्चितावुद्धिः सकामोभवतिध्रुवं ममापिचमहद्भाग्यंयतस्त्वत्कर्मकारिका किंचिद्विज्ञप्तुमिच्छामित्वयाचेच्छ्रू यतेवचः अंविकापूजनंकार्यंतन्मयाकामदंश्रुतं तवेष्टदात्रीयादेवीसापिपूज्याप्रयत्नतः तत्पित्रनुग्रहंदाविमायिप्रीतिरनुत्तमा अनुज्ञादानमात्रेणनित्यंसफलतांनय करिष्याम्यहमप्येतद्गौर्य्याः पूजनमुत्तमं तथेतिसंमतंकृत्वागातायत्रमहावनं पितानिरीक्षयामासहिमवांस्तांगृहेगृहे केननीतानुसापुत्रीदेवदानवकिन्नरैः सत्यंकृतंचऋषयेकिंदास्येगरुडध्वजे इत्येवंचिंतयाविष्टोमूर्छितोनिपपातह हाहाकृत्वाततोलोका प्रधावंतिगि

रिंप्रति आगत्यमुनयः सर्वे पप्रच्छुस्तंहिमालयं किमर्थंमूर्छतांप्राप्तः कथयस्वहृदिस्थितम् ॥ हिमवानुवाच यदर्थंदुः खसंभ्रांतः कन्यारत्नंहृतंमम दष्टावाकालसर्पेणसिंहव्याघ्रेणवाहता पतितः शोकसंतप्तोवातेनैवयथातरुः निर्गतोगिरिराजस्तुदुहितुश्चगवेषणे गत्वाथविपिनंघोरंसिंहशार्दूलसंकुलं व्याघ्रैःसिंहैश्चभल्लूकैर्युध्यमानैर्महागजैः तस्मिन्वनेमहाघोरेगत्वातांसखिभिर्युतां दृष्ट्वांतत्रनदींरम्यांवनमध्येगुहांतरे उपविष्टालिभिः सार्द्धमन्नाहारविवर्जिता संस्थाप्यवालुकापिंडपार्वत्यासहितंमम हस्तनक्षत्रसंयुक्तामासिभद्रेसिताजया तत्रवाद्येनगीतेनरात्रौजागरणंकृतं तेनव्रतप्रभावेणआसनंचलितंमम प्राप्तोहंदेवितत्रैवयत्रत्वंसखिभिः सह करोषिममप्रीत्यर्थंमद्गंधादिलेपनं गुरूपदिष्टमार्गेणतेनतुष्टोभृशंमुदा प्रसन्नोस्मिवरंब्रूहिमयाप्रोक्तंवरानने ॥ पार्वत्युवाच ॥ प्रसन्नोसियदादेवददस्वमनसेप्सितं सर्वज्ञस्यनचाज्ञातंकिंचिदस्तिमहीतले ॥ महादेवउवाच ॥ अहंभर्त्ताभवेयंवैइतिहेतोः कृतंव्रतं तत्प्राप्स्यसित्वंसुभगेनवृथाममदर्शनं व्रतमेतत्करिष्यंतियानार्योदृढमानसाः प्राप्यापिसकलान्कामान्युज्यंतेब्रह्मणासह इत्युक्काचततोदेविकैलासमहमागतः ततः प्रभातसमये नद्यामेवविसृज्यतां पारणंतुततः कृत्वायत्प्राप्तंवनमध्यगं पुनस्तत्रैवसुप्तासिसख्यासार्द्धंसरित्तटे हिमवानपितत्रैवसंप्राप्तस्त्वद्गवेषणात् पश्यन्ययौचतुर्दिक्षुअन्नपानविवर्जितः सुप्तांदृष्ट्वानदीतीरेदूरतः कन्यकाद्वयं उत्थाप्योत्संगमानीयरुदंतींत्वामुवाचह सिंहव्याघ्रादिभिर्जुष्टंसेवितंहिमहावनं पुत्रिप्राप्ताकिमर्थंत्वंप्रियंकिंकरवाणिते श्रीपार्वत्युवाच शृणुतातमयाज्ञातंत्वंमादास्यसिशूलिने तदन्यथाकृतंताततेनाहंवनमागता तथेत्युक्तंहिमवतात्वमानीतागृहंप्रति तेनाप्युक्तस्त्वहंदिविविवाहार्थंत्वयासह ॥ श्रीपार्वत्युवाच ॥ किंकृतंगिरिणातत्रविवाहोभूत्कथंमम त्वयात्रकिंकृतंनाथश्रोतुमिच्छामिविस्तरात् ॥ श्रीमहादेवउवाच ॥

ऋषयः सप्तभोदेवि वदर्थेप्रेषितामया दृष्टास्तेनगराजेनप्रपच्छमुदितानननान् कुतआगमनंजातंभवतांज्ञानचक्षुषां अन्यथामहतांप्राप्तिर्जडानांवैकथंभवेत्. ऋषयऊचुः नगराजवर्यंतावच्छंकराज्ञाविधायिनः त्वत्समीपेतुकन्यार्थंदीयतांयदिरोचते ॥ गिरिरुवाच ॥ महादेवोयदामत्तः कन्यांप्रार्थयतेतदा कन्ययाचकृतंसम्यक्यदर्थेदुश्चरंतपः अतस्तेनप्रसादोऽस्याः कर्तव्यः शूलपाणिना ऋषिभिर्गीयतेनित्यंसदेवोभक्तवत्सलः इतिश्रुत्वागताविप्रामहादेवस्यसन्निधौ तद्वृत्तांतंसमाकर्ण्यत्र.जगाममहेश्वरः आजग्मुस्तत्रवै सर्वेदेवाइंद्रपुरोगमाः पातालादागतः शेषः क्षीराब्धिशयनाद्विभुः यत्रतत्रस्थितादेवा गंधर्वाः सिद्धचारणाः तेतत्स्थानात्समाजग्मुस्तन्महोत्सवसंभ्रमाः विष्णुनाचधृतंछत्रंश्वेतंशतशलाकजं इंद्रोवैचामरेदिव्येकुवेरः कोशधारकः स्वफणामणिभिः शेषोदीपमालांविभर्तिसः सहस्रयोजनायामंतेनाकरिसुमंडपं एकस्तंभमयंप्रोक्तंयोजनानांशताधिकं ब्रह्माद्यादैवताःसर्वेमंत्राशिषमचीकरन् जयशब्दकृतोदेवाऋषयश्चतपोधनाः नृत्यंत्यप्सरसस्तत्रगंधर्वाललितंजगुः वाद्यानांस्वनितंमेघोमंदंमंदंचगर्जति ।विकिरंश्चचतुर्दिक्षुतुषारकुसुमानिसः देवकन्यानागकन्यालाजैस्तुकृतमंगलाः सरस्वतीरमादेवीशच्याद्यादेवतास्त्रियः स्वर्णपात्रेनिधायाशुपुष्पचंदनमक्षतान् दधिदूर्वाचसिद्धार्थाहारिद्रारत्नदीपिकां नीराजनंप्रकुर्वंतिगिरिजायाः शिवस्यच पुष्पवृष्टिंप्रकुर्वंतिदेवाःसव्यापसव्यतः महोत्सवः प्रवृत्तोभूद्धिमालयगिरौतथा गिरिणाचतदातस्मैदत्तंजामातृतोषकंगजानांदशसाहस्रमश्वानांनियुतंतथा अनर्घ्यान्यपिरत्नानिददौतस्मैगिरीश्वरः मुक्तानांदशकोटयश्चदशकोटयश्चविद्रुमाःहीरकंदशकोटयस्तुपारिवर्हंददौगिरिः असंख्याताश्चवैदास्योमनःसंतुष्टिकारिकाः मैनाकस्तत्प्रियार्थंवैगिरिणाप्रेषितःस्वयं एवंगिरिजयासार्द्धंकैलासमहमागतः आगत्यदैवतान्सर्वान्स्वेस्वेस्थ.नेसमादिशम्

92

शिवउवाच ॥ तेनव्रतप्रभावेणसौभाग्यमतुलंत्वया प्राप्तमर्द्धासनंदेविसाधितंसुमहत्तरं अद्यारभ्यव्रतंदेविनक
ब्र०र० स्यापिनिवेदितं यद्गोप्यंपरमंदेवियन्नोक्तंकस्यचिन्मया तदुक्तंत्वत्समीपंतुत्वत्सौभाग्यविमोहनात् व्रतराज
भाद्रप० स्यनामापिशृणुदेवियथाऽभवत् आलिभिर्हरितायस्मात्तस्मात्साहरितालिका पार्वत्युवाच केनपूर्वंकृतंनाथ
४५ विधिंचास्यवदप्रभो किंपुण्यंकिंफलंचास्यकैश्चवाक्रियतेनरैः ॥ महादेवउवाच ॥ शृणुदेविविधिं
वक्ष्येनारीणांव्रतमुत्तमं कर्त्तव्यंतुप्रयत्नेनयदिसौभाग्यमिच्छति तोरणादिचकर्तव्यंकदलीस्तंभमंडितं
आच्छाद्यपट्टवस्त्रैर्वानानावर्णविचित्रकैः चंदनानिसुगंधीनिलेपयेद्गृहमंडपे शंखभेरीमृदंगैश्चवादित्रैर्वहुनिः
स्वनैः नानामंगलचारस्तुकर्त्तव्योममसद्मनि स्थापयेत्प्रतिमांतत्रपार्वत्यासहितांमम पूजयेद्बहुभिः पुष्पैर्गं
धधूपैर्मनोहरैः नानाकारैश्चनैवेद्यैर्नानाभक्ष्योपचारकैः नानोपहारतांवूलैरुपवासप्रजागरैः नारिकेलैः पू
गफलैर्दाडिमैः कनकादिभिः वीजपूरैः सनारंगैरन्यैर्ऋतुभवैस्तथा कालदेशोद्भवैः सर्वैः फलैश्चविविधैः
शुभैः गंधपुष्पैस्तथादीपैर्मंत्रेणानेनपूजयेत् नमः शिवायशांतायपंचवक्त्रायशूलिने नंदिभृंगिमहाकाल
गणयुक्तायशंभवे शिवायैहरकांतायैप्रकृत्यैसृष्टिहेतवै शिवायैसर्वमंगल्येशिवरूपेजगन्मये शिवकल्याण
देनित्यंशिवरूपेनमोनमः शिवरूपेनमस्तुभ्यंशिवायैसततंनमः नमस्तेब्रह्मरूपिण्यैजगद्धात्र्यैनमोनमः संसारभ
यसंतापात्त्राहिमांसिंहवाहिनि येनकामेनदेवित्वंपूजितासिमयेश्वरि राज्यंसौभाग्यसंपत्तिंदेहिमामंवपार्वति पूर्वो
क्तेनविधानेनपूजयेदुमयासह कथांश्रुत्वैकचित्तेनदद्यादन्नानिभूरिशः आचार्यायप्रदातव्यंवस्त्रधेनुहिरण्यकं अ
न्येषांदीयतेदानंस्त्रीणांवाभूषणादिकं ततोवाद्येनगीतेनतांनिशांकौतुकादिना नयेदतंद्रितादेवियादिसौभाग्यमिच्छ
ति तस्मिन्नहनियानारीभोजनंकुरुतेयदि सप्तजन्मभवेद्वंध्यावैधव्यंचपुनः पुनः दारिद्र्यंपुत्रशोकंचकर्कशा-

दुःखभोगिनी पतेत्सानरकेघोनोपवासंकरोतिंया कांचनंराजतंताम्रंवेणुजंवापिमृन्मयं संपुटीकृत्यतन्मध्येफलानिविविधानिच हरिद्राकुंकुमंचैवअंजनादिप्रकल्पयेत् वस्त्राण्याभरणादीनितांबूलंसहिरण्यकं कृत्वासंछाद्यवस्त्रेणप्रदद्याद्ब्राह्मणस्त्रियै प्रीत्यर्थंतवदेवेशिदानंदेयंस्वशक्तितः दत्त्वानेनविधानेनपारणंतदनंतरं एवं विधियाकुरुतेचनारीभर्त्रासमंसारमतेसुखेन विनाशकालेममतुल्यरूपंसायुज्यमुक्तिंलभतेसुखेन अश्वमेधसहस्त्राणिवाजपेयशतानिच कथाश्रवणमात्रेणतत्पुण्यंलभतेनरः एतत्तेकथितंदेविविधानंसरहस्यकं कोटियज्ञकृतंपुण्यमस्यानुष्ठानमात्रतः इतिभविष्योत्तरपुराणेहरितालिकाव्रतं अथोद्यापनं ॥ पार्वत्युवाच उद्यापनविधिंब्रूहितृतीयायाःसुरेश्वर भक्तितः श्रोतुमिच्छामिव्रतसंपूर्तिहेतवे ॥ महादेवउवाच ॥ उद्यापनविधिंवक्ष्येयेनसांगंफलंलभेत् प्राप्तेभाद्रपदेमासितृतीयाहस्तसोमयुक् तस्यांरात्रौप्रयत्नेनयथोक्तंसर्वमाचरेत् सर्वतोभद्रसंज्ञंवालिंगतोभद्रमेवच कारयेद्विधिवद्देविमंडलस्यप्रपूजनं तस्याग्रेस्थापयेत्कुंभंव्रणच्छिद्रविवर्जितं तस्योपरिन्यसेद्धैमंपार्वत्यासहितंशिवं वस्त्रयुग्मेनसंवेष्ट्यपूर्ववत्पूजनंचरेत् ततः प्रभातसमये युग्मान्यष्टौनिमंत्रयेत् क्वचित्तु षोडशद्विजयुग्मांश्चपक्वान्नाद्यैश्चपूजयेत् सौभाग्यद्रव्यवस्त्राणिवंशपात्राणि षोडशेत्युक्तं तच्छक्तपरतयाज्ञेयं आचार्यंवरयेत्तत्रचतुर्भिर्ब्राह्मणैः सह स्थंडिलंतुप्रकर्त्तव्यंहस्तमात्रंसुशोभन ततोहोमंप्रकुर्वीतघृतदूर्वासमित्तिलैः पृथक्पृथक्शतंकृत्वामंत्रेणजातवेदसे पातयित्वावसोर्धारांपुनःपूजनमाचरेत् नमः प्रणतपालायनमः कैलासवासिने नमोवेदांतवेद्यायउमादेहार्द्धधारिणे उत्पत्तिस्थितिसंहारकर्त्रेत्रिनेत्रेनमोऽस्तुते येनकामेनमेदेवपूजितश्चोमयासह व्रतंसंपूर्णतांयातुत्वत्प्रसादाज्जगद्गुरो इतिस्तुत्वामहादेवंप्रणिपत्यपुनः पुनः गोभूहिरण्यदानानिवस्त्रदानान्यनेकशः सहिरण्यंसवस्त्रंचतेभ्योदद्याच्चभ

क्तितः उमामहेश्वरोदेवः प्रीयतांमेनमोनमः ततः कुर्यात्स्वयंदेविबंधुभिः सहभोजनं सर्वान्कामानवाप्नोतिसौभाग्यंलभतेध्रुवं मृतवत्सातुयानारीपुत्रंप्राप्यचिरायुषं नपुनर्गर्भमायातिसागौर्यासहलीयते॥ इति स्कंदपुराणेउमामहेश्वरसंवादेसोद्यापनहरितालिकाव्रतकथासंपूर्णा॥ अथोद्यापनं पार्वत्युवाच उद्यापनविधिं ब्रूहित्तृतीयायाः सुरेश्वर भक्तितःश्रोतुमिच्छामिव्रतसंपूर्तिहेतवे ईश्वरउवाच ॥ उद्यापनविधिंवक्ष्येव्रतराजस्यशोभनं यस्यानुष्ठानमात्रेणसंपूर्णंहिव्रतंभवेत् चतुःस्तंभंचतुर्द्वारंकदलीस्तंभमंडितं घंटिकाचामरयुतंकमलैरुपशोभितं चंदनागुरुकर्पूरैर्लेपितंधूपितंशुभं मध्येवितानंवध्नीयात्पंचवर्णैरलंकृतं तन्मध्येकारयेत्पद्मंपंचवर्णैः सुशोभनैः तस्योपरिन्यसेद्व्रीहीन्द्रोणेनपरिसंमितान् सौवर्णंराजतंताम्रंकलशंविन्यसेद्बुधः पंचरत्नानिनिक्षिप्यसर्वौषधिसमन्वितं तस्योपरिन्यसेत्पात्रंसौवर्णंराजतंहिवा वृषारूढंमहादेवंरजतेनविनिर्मितं सर्वावयवसंयुक्तांगौरींहेम्नाविनिर्मितां पूजयेत्तत्रगंधाद्यैः पुष्पैर्नानाविधैः शुभैः रात्रौजागरणंकुर्यात्कथावाचनपूर्वकं ततः प्रभातेविमलेकृत्वास्नानादिकर्मच पूर्ववच्चार्चयेद्देवंपश्चाद्धोमंसमाचरेत् स्वगृह्योक्तविधानेनकृत्वाग्निंस्थापयेत्ततः प्रारभेच्चततोहोमंनवग्रहपुरःसरं तिलांश्चयवसंमिश्रानाज्येनचपरिप्लुतान् जुहुयादघोरमंत्रेणगौरीमंत्रेणमंत्रवित् अष्टोरशतंवापिअष्टाविंशतिरेववा एवंसमाप्यहोमंतुतत्राचार्य्यंप्रपूजयेत् सुवर्णरत्नवासोभिर्गांचदद्याद्यथाविधि शय्यांसोपस्करांदद्यादाचार्य्यायप्रयत्नतः षोडशद्विजयुग्मांश्चपक्वान्नाद्यैश्चभोजयेत् सौभाग्यद्रव्यवस्त्राणिवंशपात्राणिषोडश दातव्यानिप्रयत्नेनब्राह्मणेभ्योयथाविधि अन्येभ्योविप्रवर्येभ्योदक्षिणांचप्रयत्नतः भूयसींपरयाभक्त्याप्रदद्याच्छिवतुष्टये उद्दिश्यपार्वतीशंचसर्वंकुर्यादतंद्रितः बंधुभिः सहभुंजीतनियतश्चपरेऽहनि एवंयाकुरुतेनारीव्रतराजंसुमध्यमे साभाग्यमतुलंतस्याः सप्तजन्मनसंशयः

इतिश्रीभविष्योत्तरेहरितालिकाव्रतोद्यापनम् ॥ अस्यामेवतृतीयायांकोटीश्वरीव्रतं ॥ मदनरत्ने रंभोवाच देवलोकेमहादेविगणिकाःसौख्यसंयुताः मर्त्यलोकेतथासर्वाःस्त्रियः सौभाग्यगर्विताः कथंभाग्यंचभोगांश्चलभंतेपरमेश्वरि ॥ पार्वत्युवाच ॥ शृणुभद्रेपरंगुह्यंसर्वकामफलप्रदं दुर्भगाणांचनारीणांसौभाग्यकरणंपरं लक्षेश्वरीतिविख्यातंततः कोटीश्वरीव्रतं तृतीयाशुक्लपक्षेतुमासिभाद्रपदेभवेत् तस्याव्रतंतुसंग्राह्यंयावद्वर्षचतुष्टयं उपवासेनकर्तव्यंवर्षेवर्षेतुसुंदरं अखंडानांतंडुलानांवातिलानांसुलोचने लक्षमेकंविविचयाथाक्षिपेत्पयसिशोभने क्षीरसंमिश्रितैः कार्य्यादेव्यामूर्त्तिः सुलोचना । कृत्वातुपुष्पप्राकारंफलपुष्पसुमंडितं संस्थाप्यपार्वतींदेवींपूजयेद्भक्तिसंयुतः पूजयेद्विविधैः पुष्पैः कुंकुमागुरुचंदनैः गंधैः पुष्पैश्चधूपैश्चनैवेद्यैर्विविधैस्तथा वस्त्रेणचैवरक्तेनपूजयेत्परमेश्वरीं उमादेविनमस्तुभ्यंकात्यायनिनमोस्तुते नमः शर्वाणिरुद्राणिअपर्णेशंकरप्रिये सर्वभूतहितेदेवित्राहिसंसारसागरात् ॥ अत्रपूजामंत्रः ॥ नमोलक्षेश्वरीदेविकोटीश्वरिनमोस्तुते गृहाणार्घ्यंमयादत्तंशंकरेणसमंमम इत्यर्घ्यमंत्रः ॥ पुराव्रतमिदंभद्रेइंद्राण्याद्यकृतंशुभम् विंध्यावल्याचसावित्र्याअरुंधत्याकृतंपुरा दमयंत्याचरोहिण्याकृतंव्रतवरंशुभं गौरिणीर्भोजयेच्छक्त्याइंद्राण्येवंसुदीक्षिता गौरिणीसुवासिनीः एवंविधिविधानेनकरोतिनियतंव्रतं नतस्याःस्याच्चदारिद्र्यंनचैवेष्टवियोजनं अष्टपुत्राभवेन्नारीभर्तारंचगुणाधिकं सुरूपंगुणिनंकांतंपंडितंप्रियदर्शनं ईश्वरंचैवराजानंलभेद्दीर्घायुषंप्रियं दातारंचैवभोक्तारंसमस्तजनवल्लभं सुशीलंधार्मिकंशूरंचंद्रवत्प्रियदर्शनं सुरूपासुभगाचैवसदापत्युः प्रियाभवेत् सदपत्यावरारोहाकुरुतेराज्यमुत्तमं अंतकालेसमंतेनरमतेत्रिदिवेतथा षष्टिवर्षसहस्राणिषष्टिवर्षशतानिवा इदंकृत्वापुरेंद्राणीइंद्रंलेभेपतिंप्रियं रोहिणीपतिमालेभेचंद्रंव्रत

निषेवणात् संज्ञादेवीस्वभर्त्तारमादित्यंप्राप्यसत्पतिं इदंतेकथितंभद्रे व्रतंकोटीश्वरीभवं लक्षेश्वरीतिविख्यातंकुरुरंभेयथोदितं ॥ इतिकोटीश्वरीलक्षेश्वरीव्रतम् ॥ ॥ ॥ अथास्यास्तृतीयायाः संक्षिप्तमुद्यापनमुच्यते तिथ्याद्युल्लिख्यममसकलपापक्षयपूर्वकसप्तजन्मसौभाग्यवृद्धिभर्तृवियोगराहित्यादिभोगप्राप्तिद्वाराउमामहेश्वरप्रीत्यर्थंयथाकालाचरितहरितालिकाव्रतोद्यापनंकरिष्ये आचार्यंवृत्वा उक्तविधिनालिंगतोभद्रेद्रोणपरिमितव्रीहिस्थकलशेराजतंशिवंहैमींगौरींपुरतोराजतंवृषभमुक्तमंत्रैः प्रतिष्ठाप्य संपूजयेत् तत्र मंत्रः मंदारमालाकुलितालकायैकपालमालांकितशेखराय दिव्यांबरायैचदिगंबरायनमः शिवायैचनमः शिवाय इत्यावाहनादिषोडशोपचारैः पूर्ववत्संपूज्य प्रार्थयेत् नमः शिवायसोमायपंचवक्त्रायशूलिने नंदिभृंगीमहाकालगणयुक्तायशंभवे शिवायैहरकांतायैप्रकृत्यैसृष्टिहेतवे नमस्तेरुद्ररूपिण्यैजगद्धात्र्यैनमोनमः येनकामेनदेवित्वंपूजितासिहरप्रिये संपूर्णंकुरुमेकामंसौभाग्यंचप्रयच्छमे ततः सुवासिनीः पूज्यरात्रौतानियतानयेत् प्रातः अग्निंप्रतिष्ठाप्य अन्वादध्यात् अधानं उमामहेश्वरंचगौरीमिमायेतिमंत्रः गौरीमिमायसलिलानित्यैकपदी द्विपदीसाचतुष्पदी अष्टापदीनवपदीबभूवासहस्राक्षरायद्मेव्योमन् त्र्यंबकंयजामहइतिमंत्रः त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनं ऊर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् मंत्राभ्यांप्रतिमांच प्रतिद्रव्यंअष्टोत्तरशतसंख्याकाभिस्तिलयवसाज्याहुतिभिर्यक्ष्ये ब्रह्मादिदेवताः परिवारदेवताश्च एकैकयाज्याहुत्यायक्ष्येएवंहोमंसमाप्य ततः संपूजितायाचार्यायगांदत्त्वा षोडशाष्टौवायुग्मानिसंपूज्य सौभाग्यद्रव्यवस्त्रदक्षिणायुतानिसशूर्पाणिवायनानिदद्यात् तत्रमंत्रः सौभाग्यारोग्यकामानांसर्वसंपत्समृद्धये गौरीगौरीशतुष्ट्यर्थंवायनंतुददाम्यहं इतिसंक्षिप्तहरितालिकाव्रतोद्यापनम् ॥ अथात्रैवहस्तगौरीव्रतं ॥ सूतउवाच

कुंत्यांसुखोपविष्टायांहास्तिनापुरमुत्तमं मानितायांनरेंद्रैश्चतनयैः पंचभिः सह तस्याःकुशलमन्विच्छन्नाजगामाथमाधवः अभिनंद्यसुखासीनंदेवदेवंजनार्दनं उवाचकुंतीसानंदाह्यप्रगल्भमिदंवचः ॥ कुंत्युवाच धन्यास्मिकृतकृत्यास्मिसनाथास्मिपरंतप साहंसंभावितायास्मित्वयासर्वजगद्गुरो यदिमेसुप्रसन्नोऽसितदाचक्ष्वव्रतंविभो यद्विधायसुखंराज्यंप्राप्नुयांतनयैःसह कृष्णउवाच कुंतितेकथयिष्यामिव्रतानामुत्तमंव्रतं यत्कृत्वासुखसंतानंधनधान्यसमान्वितं विधूतदुष्कृतापुण्यासपुत्राराज्यमाप्स्यासि हस्तगौरीव्रतंभद्रेकुरुष्वशुचिमानसा कुंत्युवाच यच्चोक्तंतुव्रतंनाथविधानंतस्यकीदृशं केनपूर्वंकृतंदेवतन्मेब्रूहिजनार्दन ॥ कृष्णउवाच कैलासशिखरेदेवीहस्तस्थेचदिवाकरे दिवाप्रसुप्तासागौरीहरसान्निधिमानसा सासुप्तादेवदेवेशंस्वप्नेशंभुंददर्शह अर्द्धदेहंवृषार्द्धस्थमर्धचंद्रकलाधरं उत्थायसहसागौरीप्रोवाचशंकरंप्रति किमिदंतन्ममाचक्ष्वतप्यतेमानसंमम ॥ ईश्वरउवाच देविपूर्वंनिषिद्धासिहस्तऋक्षगतेरवौ नस्वप्तव्यंदिवातत्रतस्येदंविहितंफलं शृणुदेवित्वयायेनखंडितोहंविलोकितः त्वयारब्धंव्रतंदेविमदाराधनकाम्यया अपूर्णोऽस्मिन्प्रसन्नोऽस्मिनत्वयाचसमुज्झितं अपूर्णव्रतचारेणदृष्टोऽहंतादृशस्त्वया तत्कुरुष्वाधुनादेविहस्तगौरीव्रतंशुभम् पार्वत्युवाच ॥ आदिश्यतांव्रतंनाथविधानेनमहेश्वर आरंभोस्यकदाकार्यः कोविधिः कस्यपूजनम् ॥ ईश्वरउवाच मंडपेस्थापनंकुर्यात्सर्वालंकारभूषिते अन्वहंकांचनैः पुष्पैः फलमुक्तान्वितैः शुभैः नैवेद्यैः पंचखाद्यैश्चशृणुयात्प्रत्यहंकथां दिनेचतुर्दशेप्राप्तेस्थापयेत्प्रतिमांशुभां पूजयेच्चसुवर्णस्यपुष्पैश्चान्यैः सुगंधिभिः चंदनैर्धूपदीपैश्चतांबूलैश्चफलादिभिः ध्यायेच्चहृदयेगौरींहरहेरंबसंयुतां दक्षिणांचततोदत्त्वानत्वादेवींविसर्जयेत् व्रतंसमाचरेद्देवियावद्वर्षंत्रयोदशं स्वर्णभाजनगौर्यादिप्रतिवर्षंविसर्जयेत् ततश्चतुर्दशेवर्षेतदुद्यापनमाचरेत् सं

स्थाप्यगणपंगौरींकांचनींकांचनेगजे पूर्वोक्तविधिना पूज्यवासराणित्रयोदश चतुर्दशेथदिवसेसंजातेप्रातरुत्थिता कृतोपवासनियमागजंगौरींप्रपूजयेत् पक्वान्नंस्वर्णपात्रेषुत्रयोदशसुनिक्षिपेत् स्त्रीभ्यश्चकंचुकींदत्वाभोजयित्वाविसर्जयेत् एवंदेविव्रतंकृत्वासर्वान्कामानवाप्नुयात् अशक्तौतुसदाकार्याप्रतिमामृत्तिकामयी पात्राणिवैणवान्येवपीतपुष्पाणिचैवहि ॥ श्रीकृष्णउवाच ॥ ततश्चक्रेव्रतंगौरीप्राप्तासावांछितंफलं त्वमप्येतद्व्रतंकुंतिकुरुश्रद्धासमन्विता अथभक्त्याव्रतंकुंतीसाविधानंतदाऽकरोत् गौरीचापितच्छ्रुत्वाव्रतंचक्रेयथाविधि तुष्टाचभक्तिभावेनपुष्टागौरीततोऽब्रवीत् ॥ पार्वत्युवाच ॥ कुंतितेपरितुष्टास्मिवरंवरयसुव्रते ॥ कुंत्युवाच देहिमेसर्वसंपत्तिंसर्वसौख्यंसदोदयं प्रयच्छममपुत्राणांमहद्राज्यमनामयम् व्रतमेतत्तुयःकुर्यात्तवलोकमवाप्स्यति नदारिद्र्यंनवैधव्यंनशोकोनापिदुष्कृतं कृच्छ्रनोपहतंदेविकदाचित्संभवेदिह तथेत्युक्त्वाततोदेवीतत्रैवांतरधीयत एतद्व्रतंसकलदुःखविनाशहेतुः सौभाग्यराज्यफलभावनयाचरंति यायोषितः सुखमनंतमिहापिपूज्यागौरीपतिंपतिरतास्तुततंलभंते ॥ इतिभविष्योत्तरोक्तभाद्रपदशुक्लतृतीयायांहस्तगौरीव्रतंसमाप्तम्

अस्योद्यापनंहरितालिकाव्रतोद्यापनवद्ज्ञेयं विशेषश्चात्र गौरीहरगणेशपूजा त्रयोदशविधवायनदानम् ॥ तिथ्यादिसंकीर्त्य सकलदुःखदुःस्वप्ननाशसौभाग्यसुखावाप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थंत्रयोदशवर्षाचरित्तहस्तगौरीव्रतपूर्णतासिद्ध्येतदुद्यापनंकरिष्यइति तत्राचार्यंवृत्वा लिंगतोभद्रेउक्तप्रकारेणकलशेकांचनगजेगौरींहरंगणेशंच सुवर्णपुष्पादिनातत्तन्मंत्रैः संपूज्य सुवासिनीः पूज्यरात्रिंनिनयेत् प्रातराचार्यअग्निंप्रतिष्ठाप्य अन्वादध्यात् गौरींहरंगणेशंचगौरीमिमायेतिगौरीं तत्पुरुषायविद्महेइतिहरं गणानांत्वेतिगणपतिं प्रत्येकमष्टोत्तरशततिलाज्याहुतिभिर्ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये शेषेणस्विष्टकृतमित्यादिहोमंसमाप्य वायनं

त्रयोदशविधत्रयोदशसंख्याकपक्कान्नपूरितं सौवर्णेवैणवे वा पात्रेकृत्वा त्रयोदश दंपतीः सुवासिनीर्वा संपूज्यदद्यात् तत्रमंत्रः पक्कान्नपूरितंविप्रव्रतसंपूर्त्तिहेतवे वायनंतेप्रयच्छामिगौरीगौरीशतुष्टये तत्रआचार्यायगांशय्यादिकंचदद्यादितिहस्तगौरीव्रतोद्यापनम् ॥ ॥ ॥

अस्यामेवभाद्रशुक्लतृतीयायांभविष्योत्तरोक्तंहरिकालीव्रतम् ॥ ॥ युधिष्ठिरउवाच भगवन्हरिकालीतिकादेवीप्रोच्यतेभुवि आर्द्रधान्येस्थिताकस्मात्पूज्यतेस्त्रीजनेनसा पूजिताकिंददातीहसर्वंमेब्रूहिकेशव ॥ श्रीकृष्णउवाच पार्थपौराणिकींदिव्यांमत्तः शृणुकथामिमां आसीद्दक्षस्यदुहिताकालीनाम्नीतुकन्यका वर्णेनापिचसाकृष्णानवनीलोत्पलप्रभा त्र्यंबकायचसादत्तामहादेवायशूलिने विवाहिताविधानेनशंखतूर्यनिनादिना यज्ञयात्रागतैर्देवैर्ब्राह्मणानांचनिः स्वनैः निर्वर्तितेविवाहेतुकाल्यासार्धंत्रिलोचनः क्रीडतेविविधैःकामैर्मनसः प्रीतिवर्धनैः अथदेवसमाजेतुकदाचिद्वृषभध्वजः आस्थानमंडपेरम्येआस्तेविष्णुसहायवान् तत्रस्थश्चाह्वयामासनर्मणात्रिपुरांतकः कालींनीलोत्पलश्यामांगणमातृगणान्वितां एह्येहित्वमितःकालिभिन्नकृष्णांजनप्रभे कालमप्यतिसौन्दर्यात्तवरूपंममाप्रियं इत्येवमुक्तासदेवीव्रीडिताक्रद्वनानसा निः श्वासोच्छासताघ्रक्षीवाष्पगद्गदयागिरा रुरोदसस्वरंबालाप्रोवाचस्फुरिताधरा किंदेवनाम्नायागौरीसागौरीत्यभिधीयते यस्मान्ममोपमादत्ताभिन्नकृष्णांजनप्रभो समाजेदेवसंघानांवासुदेवस्यसन्निधौ तस्माद्देहमिमंकृष्णंजुहोमिज्वालितेऽनले इत्युक्तावार्यमाणापिहरिकालीरुषान्विता मुमोचहरितांछायाकांतिंहरितशाद्वले चिक्षेपदेहंरोषेणज्वालितेहव्यवाहने पुनः पर्वतराजस्यगृहेगौरीबभूवसा महादेवस्यदेहार्धेस्थितासंपूज्यतेसुरैः यामुक्ताशाद्वलेदेव्याकालकांतिः स्वदेहजा साबभूवमहावीर्यादेवीकात्यायनीपुनः तयाकृतानि

भूरीणिदेवकार्याणिपांडव तुष्टैर्देवगणैर्दत्तोवरस्तस्यैशृणुष्वमे येत्वांशाद्वलसंस्थांवैकालीतिवरदायिनीं पूजयिष्यंतिपुरुषानार्योवापिविशेषतः सर्वपापविनिर्मुक्ताः सुखसौभाग्यगर्विताः चिरायुषोभविष्यंतिभर्तृपुत्रसमन्विताः एवंसाहरिकालीतिगौरीसाम्येव्यवस्थिता ॥ श्रीकृष्णउवाच शुक्लभाद्रपदस्यैवंतृतीयायां समाचरेत् सप्तधान्यैस्तुवैरूढैः कृत्वाहरितशाद्वलीं खर्जूरैर्नारिकेलैश्चफलैश्चमधुरैस्तथा मातुलुंगकुसुंभैश्चधान्यकैर्जीरकैस्तथा गंधैः पुष्पैः फलैर्धूपैर्नैवेद्यैर्मोदकादिभिः प्रीणयित्वासमाच्छाद्यपद्मरागेणभास्वता घंटावाद्यादिभिर्गीतैः शुभैर्दिव्यकथानकैः पूजनीयामहाराजमंत्रेणानेनभक्तितः हरिनाम्निसमुत्पन्नेहरिकालिहरिप्रिये सर्वदाशस्यमूर्तिस्थेप्रणतार्त्तिहरेनमः इत्थंसंपूज्यतांदेवींदद्याद्विप्रायदक्षिणां कृत्वाजागरणंरात्रौप्रभातेकिंचिदुद्गते रवौसुवासिनीभिश्चसानेयातुजलाशये ततोजलाशयेरम्येमंत्रेणैवविसर्जयेत् अर्चितासिमयाभक्त्यागच्छदेविसुरालयं ममदौर्भाग्यनाशायपुनरागमनायच एवंयः पांडवश्रेष्ठहरिकालीव्रतंचरेत् प्रतिवर्षंविधानेननारीवाभक्तितत्परा चीर्त्वायत्फलमाप्नोतितदन्येननचाप्यते मर्त्यलोकेचिरंजीवेत्सर्वकामैः सुपूजिता पुत्रपौत्रसुहृन्मित्रनप्तृदौहित्रसंकुले साग्रंवर्षशतंजीवेद्भोगान्भुक्त्वा महीतले ततोऽवसानेदेहस्यशिवलोकेमहीयते वीरभद्रमहाकालनंदीश्वरविनायकाः सर्वेप्रसादसुमुखाभवंतिव्रतयोगतः संपूज्यसूर्पगतसुप्तविरूढसस्यांदेवींहिमाद्रितनयांहरिकालिकाख्यां नैवेद्यजागरसमुद्धतगीतवाद्यैः संप्राप्नुवंतिमनुजाः सुचिरंसुखानि ॥ इतिभविष्योत्तरोक्तंहरिकालीव्रतम् ॥ ॥ अथ भाद्रशुक्लचतुर्थ्यांसिद्धिविनायकव्रतम् ॥ हेमाद्रौस्कांदे तच्च मध्याह्नव्यापिन्यांकार्यं प्रातः शुक्लतिलैः स्नातोमध्याह्नेपूजयेन्नृपेतिगणपतिकल्पे तत्रैव पूजाविधानात् दिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वा अन्यथापरा चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते मध्याह्नव्यापिनीसाचपरतश्चेत्परेऽहनीतिबृहस्पत्युक्तेः इयंच

रविभौमयोरतिप्रशस्ता भाद्रशुक्लचतुर्थीयाभौमेनार्केणवायुता महतीत्यत्रविघ्नेशमर्चयित्वेष्टमाप्नुयादितिवाराहोक्तेः अथव्रतविधिः मासपक्षाद्युल्लिख्यजयपुत्रादिकामः स्त्रीसुतसौभाग्यादिकामःसिद्धिविनायकव्रतंतत्पूजनमहंकरिष्ये इतिसंकल्पः ॥ षोडशोपचारैः पूजांकुर्यात् ॥ तत्रध्यानं ॥ एकदंतंशूर्पकर्णंगजवक्त्रंचतुर्भुजं पाशांकुशधरदेवंध्यायेत्सिद्धिविनायकंध्यायेद्गजाननंदेवंतप्तकांचनसन्निभं चतुर्भुजंमहाकायंसर्वाभरणभूषितंदंताक्षमालापरशुपूर्णमोदकधारिणं मोदकासक्तशुंडाग्रमेकदंतंविनायकम् इतिध्यानं आवाहयामिविघ्नेशसुरराजार्चितेश्वर अनाथनाथसर्वज्ञपूजार्थंगणनायक सहस्रशीर्षेत्यादिपुरुषसूक्तमंत्रैः सर्वोपचारपूजा सहस्रशीर्षेत्यावाहनं विचित्ररत्नखचितंदिव्यास्तरणसंयुतं स्वर्णसिंहासनंचारुगृह्णीष्वसुरपूजितइत्यासनं ॥ गणाध्यक्षनमस्तेऽस्तुगृहाणकरुणाकर अर्घ्यंचफलसंयुक्तंगंधमाल्याक्षतैर्युतं इत्यर्घ्यं सर्वतीर्थसमुद्भूतंपाद्यंगंधादिभिर्युतं विघ्नराजगृहाणेदंभगवन्भक्तवत्सल इतिपाद्यं दध्याज्यमधुसंयुक्तंमधुपर्कंमयाहृतं गृहाणसर्वलोकेशगणनाथनमोऽस्तुते मधुपर्कं विनायकनमस्तुभ्यंत्रिदशैरभिवंदित गंगोदकेनदेवेशकुरुष्वाचमनंप्रभो इत्याचमनं ॥ स्नानंपंचामृतंदिव्यंसर्वतीर्थाहृतंमया गंधतोयैरुमापुत्रगृह्णीष्वाभिष्टदायक स्नानं रक्तवस्त्रद्वयंदेवदेवांगसदृशंप्रभो सर्वप्रदंगृहाणेदंलंबोदरहरात्मज वस्त्रं राजतंब्रह्मसूत्रंचकांचनंचोत्तरीयकं गृहाणचारुसर्वज्ञभक्तानाभक्तवत्सल यज्ञोपवीतम् नानाविधानिदिव्यानिनानारत्नोज्वलानिच भूषणानिगृहाणेशपार्वतीप्रियनंदन आभरणं गंधगृहाणभगवन्सर्वगंधसमन्वितं गणाध्यक्षनमस्तेऽस्तुभक्ताभीष्टफलप्रद गंधं अक्षतान्धवलान्देवगृहाणद्विरदानन अनाथनाथसर्वज्ञगीर्वाणसुरपूजित अक्षताः सुगंधीनिचपुष्पाणिजातीकुंदमुखान्यपि विविधानिचपत्राणिगृहाणगणनायक पुष्पाणि अथांगपूजा गणेशायनमः पादौपूजयामि १ विघ्नराजाय

नमः जानुनीपू- २ आखुवाहनायनमः ऊरूपू. ३ हेरंबाय- कटिंपू- ४ कामारिसूनवे- नाभिं- पू- ५ लंबोदराय- उदरंपू. ६ गौरीसुताय- स्तनौपू ७ गणनायकाय- हृदयंपू- ८ स्थूलकंठाय- कंठंपू- ९ स्कंदाग्रजाय- स्कंधौपू- १० पाशहस्ताय· हस्तौपू· ११ गजवक्त्राय· मुखंपू' १२ विघ्नहर्त्रेन· ललाटं-पू- १३ सर्वेश्वराय· शिरः.पू, १४ गणाधिपायनमः सर्वांगंपूजयामि १५ अथपत्रिकापूजा सुमुखायकाकमाचीपत्रंसमर्पयामि- १ गणाधिपायभृंगराजंस. २ उमापुत्रायविल्वपत्रंस. ३ गजाननायदूर्वापत्रंस. ४ लंबोदरायवदरीपत्रंस- ५ हरसूनवेधत्तूरपत्रंस ६ गजकर्णायतुलसीदलंस- ७ वक्रतुंडायशमीपत्रंस. ८ गुहाग्रजायअपामार्गपत्रंस. ९ एकदंतायवृहतीपत्रंस. १० विकटायमधुपत्रंस. ११ विनायकायअश्मंतपत्रंस· १२ कपिलाय. अर्कपत्रंस- १३ गजदंतायअर्जुनपत्रंस- १४ विघ्नराजायविष्णुक्रांतपत्रंस- १५ वटवेदाडिमीपत्रंस- १६ सुराग्रगण्यायदेवदारुपत्रंस- १७ भालचंद्रायमरुपत्रंस १८ हेरंबायसिंदूरपत्रंस. १९ चतुर्भुजायजातीपत्रंस. २० सर्वेश्वरायअगस्तिपत्रंस- २१ इत्येकविंशतिनामभिरेकविंशतिपत्रिकापूजा ॥ ॥ कुमारगुरवेतुभ्यंपूजयामिप्रयत्नतः दूर्वायुग्मंगृहीत्वातुगंधपुष्पाक्षतैर्युतं एकैकेनतुनाम्नातुदत्त्वैकंसर्वनामभिः अथैकविंशतिंगृह्यमोदकान्घृतपाचितान् स्थापयित्वागणाध्यक्षसमीपेकुरुनंदन दशविप्रायदातव्याः स्वयंचाद्यात्तथादश एकंगणाधिपेदद्यात्सनैवेद्यं नृपोत्तम जातरूपमयंदेवंब्राह्मणायनिवेदयेत कृत्वानैमित्तिकंकर्मपूजयेदिष्टदेवतां ब्राह्मणान्भोजयेत्पश्चात्भुंजीयात्तैलवर्जितं विनायकस्यप्रतिमांवस्त्रयुग्मसमन्वितां दद्याद्विप्रायविदुषेसर्वविघ्नोपशांतये एवंकृतेधर्मराजविघ्ननाथस्यपूजने विजयस्तेभवेन्नूनंसत्यंसत्यंमयोदितं वैष्णवाद्यासुदीक्षासुआदौपूज्योगणाधिपः

तस्मिन्संपूजितेविष्णुरीशोमाचतथारमा हव्यवाहमुखादेवाः पूजिताःस्युर्नसंशयः चंडिकाद्यामातृगणाः परितुष्टाभवंतिच तस्मिन्संपूजितेविप्रभक्त्यासिद्धिविनायके यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः सिध्यंतिसर्वकार्याणिसिद्धिदस्यप्रसादतः ॥ इतिसिद्धिविनायकव्रतपूजा ॥ ॥ एवमेवोक्तंनारदीयेऽपि ॥ ॥ अथशुक्लचतुर्थ्यांतुसिद्धिवैनायकंव्रतं आवाहनादिभिःसर्वैरुपचारैःसमर्चयेत् एकाग्रमनसोभूत्वा ध्यायेत्सिद्धिविनायकं पाशांकुशधरंदेवंतप्तकांचनसन्निभं एकविंशतिपत्राणिचैकविंशतिनामभिः समर्पयेद्भक्तियुतस्तानिनामानिमेशृणु सुमुखायकाकमाचीं गणाधीशायभृंगजं उमापुत्रायबिल्वस्यदूर्वांगजमुखायतु लंबोदरायबदरींधत्तूरंहरसूनवे शूर्पकर्णायतुलसींवक्रतुंडायवैशमीं गुहाग्रजायापामार्गमेकदंतायवार्हतं विकटायाश्मंतपत्रंकपिलायार्कपत्रकं गजदंतायार्जुनंचविष्णुक्रांताविघ्नराजके वटवेदाडिमीपत्रंसुराग्रण्येसुरद्रुजं मरुपत्रंभालचंद्रेप्रदद्याद्भक्तिभावतः हेरंबायचसिंदूरंजातीपत्रंचतुर्भुजे सर्वेश्वरेऽगस्तिपत्रंदद्यात्प्रीतिविवर्धनं विंशतिरेवभवंतिनामानि विनायकेतिनामपूर्वोक्तंज्ञेयं दूर्वायुग्मंततोगृह्यगंधपुष्पाक्षतैर्युतं पूजांनिवेदयेद्भक्तियुतोमोदकपंचकं आचमय्यनमस्कृत्यसंप्रार्थ्यचाविसर्जयेत् विनायकस्यप्रतिमांहैमींसोपस्करांमुने निवेदयेच्चगुरवेद्विजेभ्योदक्षिणांददेत् एवंकृत्वाऽर्चनंभक्त्यापंचवर्षाणिनारद उद्याप्यलभतेकामानैहिकामुष्मिकान्शुभान् इतिहेमाद्रौ ॥ भविष्योत्तरेच मासिभाद्रपदेयान्याशिवलोकेप्रपूजिता तस्यांस्नानंतथादानमुपवासोर्चनंतथा क्रियमाणंशतगुणंप्रसादाद्दंतिनोनृप चतुर्थीत्यनुषंगः ॥ अत्रैवरात्रौचंद्रंनपश्येत् तस्यदर्शनेनमिथ्याभिशापप्राप्तिर्भवति तदाहापरार्के मार्कंडेयः भाद्रेमासिसितेपक्षेचतुर्थींस्वातियोगिनी मिथ्याभिशापंकुरुतेदृष्टचंद्रान्नसंशयः पराशरोऽपि कन्यादित्येचतुर्थ्यांतुशुक्लेचंद्रस्यदर्शनं मिथ्याभिदूषणंकुर्याद्रात्रौपश्येन्नतंसदा

पंचाननगतेभानौपक्षयोरुभयोरपि चतुर्थ्यामुदितःसोमोनेक्षितव्यःकदाचनेति तेनचतुर्थ्यांनपश्येदित्यर्थः प्रधानक्रियान्वयलाभात् तेनचतुर्थ्यामुदितस्यपंचम्यांननिषेधः अत्ररात्रिशब्दग्रहणाद्दिवाचंद्रदर्शनेननिषेधइति यत्तुकेनचिदुक्तंरात्रिशब्दोऽहोरात्रपरइतितन्मृग्यंएतादृशार्थप्रतिपादकवचनस्यमहानिबंधेष्वदृष्टत्वात् कदाचित्प्रमादाद्दृष्ट्वाविष्णुपुराणोक्तंश्लोकंपठेत् तथाचपुराणांतरेततश्चतुर्थ्यांरात्र्यांयःप्रमादाद्वीक्ष्यमानवःपठेत्पौराणिकंवाक्यंप्राङ्मुखोवाप्युदङ्मुख इतिनिर्णयामृते ब्रह्मपुराणेतु चंद्रदर्शनेविशेषउक्तः वासुदेवोभिशस्तस्तुनिशाकरमरीचिषु स्थितश्चतुर्थ्यामाद्यायांमनुष्याणांपतिश्वसः ततश्चतुर्थ्यांचंद्रंतुप्रयत्नाद्वीक्ष्यमानवः पठेत्पौराणिकंवाक्यंप्राङ्मुखोवाप्युदङ्मुखः तद्दोषशांतयेसिंहः प्रसेनइतिवैपठेत् सिंहः प्रसेनमवधीत्सिंहोजांबवताहतः सुकुमारकमारोदीस्तवह्येषस्यमंतकइति सिंहः प्रसेनमितिमंत्रेणाभिमंत्रितं जलंपेयं स्यमंतकोपाख्यानंचश्रोतव्यमाचारादितिस्मार्त्ता इतिकृत्यरत्नावल्यां ॥ ॥ अथस्यमंतकोपाख्यानम् ॥ नंदिकेश्वरउवाच ॥ शृणुष्वैकाग्रचित्तः सन्व्रतंगाणेश्वरंशुभं चतुर्थ्यांशुक्लपक्षस्यसदाकार्यंप्रयत्नतः सनत्कुमारयोगींद्रयदीच्छेच्छुभमात्मनः नारीवापुरुषोवापियः कुर्याद्व्रतमुत्तमं मोचयित्वाशुसंकष्टाद्विंभद्रव्रतिनंनरं अपवादहरंचैवसर्वविघ्ननिवारणं कांतारेविषमेचैवत्रिषुलोकेषुविश्रुतं अतोनविद्यतेचान्यत्सर्वसंकष्टनाशनम् ॥ सनत्कुमारउवाच ॥ केनचादौपुराचीर्णंमर्त्यलोकेकथंगतं एतत्समस्तंविस्तार्द्यब्रूहिगाणेश्वरंव्रतं ॥ नंदिकेश्वरउवाच ॥ चक्रेव्रतंजगन्नाथोवासुदेवः प्रतापवान् आदिष्टंनारदेनैववृथालांछनशांतये ॥ सनत्कुमारउवाच ॥ षड्गुणैश्वर्यसंपन्नः सृष्टिसंहारकारकः वासुदेवोजगद्व्यापीप्राप्तवान्लांछनंकथं एतदाश्चर्यमाख्यानंब्रूहित्वंनंदिकेश्वर नंदिकेश्वरउवाच ॥ भुवोभारावतारार्थंवसुदेवसुतावुभौ रामकृष्णौसमुत्ती

णौपद्मनाभहलायुधौ जरासंधभयात्कृष्णोद्वारिकांसमकल्पयत् विश्वकर्माणमाहूयपुरींहाटकनिर्मितां तत्रषोडशसाहस्रंस्त्रीणांचैवशताधिकं भुवनानिमनोज्ञानितेषांमध्येप्यकल्पयत् यादवानांगृहास्तत्रषट्पंचाशच्चकोटयः अन्येचवहवोलोकावसंतिविगतज्वराः यत्किंचित्त्रिषुलोकेषुसौंदर्यंतत्रदृश्यते सत्राजितप्रसेनाख्यौपुत्राउग्रस्यविश्रुतौ अंभोधेस्तीरमासाद्यतन्मनस्कतयाचसः सत्राजितस्तपस्तेपेसूर्यमुद्दिश्यवुद्धिमान् व्रतंनिरशनंगृह्यसूर्यसंवद्धलोचनः ततः प्रसन्नोभगवान्सत्राजितपुरःस्थितः सत्राजितोपितुष्टावदृष्ट्वादेवंदिवाकरम् तेजोराशेनमस्तुभ्यंनमस्तेसर्वतोमुख विश्वव्यापिन्नमस्तेऽस्तुनमस्तेविश्वरूपिणे काश्यपेयनमस्तेस्तुहरिदश्वनमोस्तुते ग्रहराजनमस्तेऽस्तुनमस्तेचंडरोचिषे वेदत्रयनमस्तेऽस्तुसर्वदेवनमोनमः प्रसीदपाहिदेवेशसंतुष्ट्यामांदिवाकर इत्थंसंस्तूयमानोऽसौदेवदेवोदिवाकरः स्निग्धगंभीरमधुरंसत्राजितमुवाचह ॥ सूर्यउवाच वरंब्रूहिप्रसन्नोस्मियत्तेमनसिवर्तते सत्राजितमहाभागतुष्टोहंतवानिश्चयात् ॥ सत्राजितउवाच ॥ स्यमंतकमणिंदेहियदितुष्टोसिभास्कर ददौतस्यचतद्रत्नंस्वकंठादवतार्यसः ॥ सूर्यउवाच ॥ भाराष्टकंशातकुंभंस्रवतेसौमहामणिः शुचिष्मतासदाधार्यंरत्नमेतन्महोत्तमं सत्राजितक्षणेनैतदशुचिंहंतिमानवं इत्युक्त्वांतर्दधेदेवस्तेजोराशिर्दिवाकरः तत्कंठरत्नज्वलमानरूपः पुरींसकृष्णस्यविवेशसत्वरं दृष्ट्वातुलोकामनसादिवाकरंसंचिंतयंतस्तिमिरास्तदृष्टयः समागतोयंहरिदश्वदीधितिर्जनार्दनंद्रष्टुमसंशयेन नायंसहस्रांशुरितीहलोकाः सत्राजितोयंमणिकंठभास्वान् ॥ स्यमंतकंमहारत्नंदृष्ट्वातत्कंठमंडले स्पृहांचक्रेजगन्नाथोनजहारमणिंतदा सत्राजितोजातभयोयाचयिष्यतिमांहरिः प्रसेनायददौभ्रात्रेधार्योयंशुचिनात्वया एकदाकंठदेशेसौक्षिप्त्वातंमणिमुत्तमं मृगयाक्रीडनार्थायगतः कृष्णेनसंयुतः अश्वारूढोऽशुचिश्चासौहतः सिंहेनतत्क्षणात् रत्नमादा

ब्र०१० यासिंहोपिगच्छन्जांबवताहतः नीत्वास्वविवरेरत्नंददौपुत्रायजांबवान् पुरींविवेशकृष्णोपिस्वकैः सर्वैः समावृतः
अ०५० प्रसेनोद्यापिनायातिहतः कृष्णेनानिश्चितं मणिलोभेनहाकष्टंबांधवः पापिनाहतः द्वारिकावासिनः सर्वे
५२ जनाऊचुः परस्परं वृथापवादसंतप्तः कृष्णोपिनगराच्छनैः सहैवतैर्गतोरण्यंदृष्ट्वासिंहनिपातितं प्रसेनंवाहनयु
तंतत्पदानुसरन्गतः ऋक्षेणनिहतंसिंहंदृष्ट्वाकृष्णश्चताद्बिलं विवेशयोजनशतमंधकारंस्वतेजसा निवारयन्ददर्शा
ग्रेप्रासादंवद्धभूमिकं कुमारंजांबवंतस्यदोलायाममितद्युतिं मणिमालंबमानंचददर्शभगवान्हरिः रूपयौव
नसंपन्नांकन्यांजांबवतींपुनः दोलांदोलायमानांचददर्शकमलेक्षणः समहाविस्मयंचक्रेदृष्ट्वातांचारुहासिनीं सिंहः
प्रसेनमवधीत्सिंहोजांबवताहतः सुकुमारकमारोदीस्तवह्येषस्यमंतकः मदनज्वरदाहर्तादृष्ट्वातंकमलेक्षणं उ
वाचललितंवाक्यंगम्यतांगम्यतामिति रत्नंगृहीत्वावेगेनयावच्छेतेतुजांबवान् इत्याकर्ण्यहसन्शौरिःशंखंदध्मौ
प्रतापवान् आकर्ण्यसहसोत्थायऋक्षः संयुयुधेततः तयोर्युद्धमभूद्घोरंहरिजांबवतोस्तदा द्वारिकावासिनः सर्वे
गतास्तेसप्तमेदिने मृतः कृष्णोभक्षितोवानिःसादिग्धाविचार्यच परलोकक्रियांचक्रुः परेतस्यचतेतदा ऊनविं
शदिनंयावद्बाहुप्रहरणोविभुः युयुधेतेनऋक्षेणयुद्धकर्मणितोषितः जांबवान्प्राक्तनंस्मृत्वादृष्ट्वादेवबलंमहत् जां
बवानुवाच अजेयोऽहंसुरैः सर्वैर्यक्षराक्षसदानवैः त्वयाजितोऽहंदेवेशदेवस्त्वमसिनिश्चितं जानेत्वांवैष्णवंतेजो
नान्यथाबलमीदृशं इतिप्रसाद्यदेवेशंददौमाणिक्यमुत्तमं सुतांजांबवतींचाथभार्यार्थेवरवर्णिनीं पाणिंचग्राहया
मासवासुदेवंचजांबवान् मणिमादायदेवोऽपिजांबवत्याचसंयुतः तद्वृत्तांतंसमाचष्टेद्वारिकावासिनांततःसत्राजितस्य
माणिक्यंदत्तवान्सदसिस्थितः मिथ्याभिशापसंशुद्धिंप्राप्तवान्मधुसूदनः सत्राजितोऽपिसंत्रस्तःकृष्णायप्रददौ
सुतां सत्यभामांमहाबुद्धिर्ददौसर्वगुणान्वितां शतधन्वाक्रूरमुख्यायादवादुष्टमानसाः सत्राजितेनतेवैरंचक्रु

रत्नाभिलाषिणः दुरात्माशतधन्वापिगतेकृष्णेऽपिकुत्रचित् सत्राजितंनिहत्याशुमणिंजग्राहपापधीः कृष्णस्यपुरतःसत्यासमाचष्टविचेष्टितं अतर्हष्टोवहिः कोपीकृष्णः कपटनायकः वलदेवंपुरोवाक्यमुवाचधरणीधरः हत्वासत्राजितंहत्वामणिमादायगच्छति निहत्यशतधन्वानंगृहीत्वारत्नमावयोः मनयोर्प्यंचतद्रत्नंभविष्यतिनसंशयः एतच्छ्रुत्वाभयत्रस्तः शतधन्वापियादवः आहूयाक्रूरनामानंमणिकंयप्रददौचसः आरुह्यवडवांवेगान्निर्गतः दक्षिणांदिशं रथस्थावनुगच्छेतांतदारामजनार्दनौ शतयोजनमात्रेणममारवडवातदा पलायनानेनिहतः पदातिस्तुपदातिना अदृष्ट्वातत्रतद्रत्नंवलदेवंपुरोवदत् तदाकर्ण्यमहारुष्टउवाचवचनंवलः कपटीत्वंसदाकृष्णपापीलोभीसुनिश्चितं अथाद्यस्वजनंहंसिकस्त्वांवंधुःसमाश्रयेत् अनेकशपथैः कृष्णोवलदेवंप्रसादयन् सोपिधिक्कृष्णमित्युक्त्वाययौवैदर्भमंडलं कृष्णोपिरथमारुह्यद्वारिकांप्रययौपुनः तथैवोचुर्जनाःसर्वेनसाधीयानयंहरिःनिष्कासितोरत्नलोभाज्ज्येष्ठोभ्राताबलोबली तच्छ्रुत्वादीनवदनःसंतप्तोनैवभातिच वृथाभिशापसंतप्तोबभूवसजगत्पतिः अक्रूरोपिविनिर्गम्यतीर्थयात्रामिषात्ततः काशींगत्वासुखेनासाववसत्प्रभुमीश्वरं तोषमुत्पादयंतेनद्रव्येणासौचवुद्धिमान् सुरालयगृहैःशिवत्रैर्नगरंसमकल्पयत् नदुर्भिक्षंनवैरोगाईतयोनचवंधनं शुचिनाधार्यतेतत्रमणिःसूर्यस्यानिश्चितं जानन्नपिससर्वज्ञोमानुषंभावमाश्रितः लोकाचारंतथामायामज्ञानंचसमाश्रितः वंधुवैरंसमुत्पन्नंसांछनंसमुपस्थितं वृथापवादबहुलंजायमानंकथंसहे इतिचिंतातुरंकृष्णंनारदः समुपस्थितः गृहीत्वातत्कृतांपूजांसुखासीनस्ततोऽब्रवीत् नारदउवाच किमर्थंखिद्यसेदेवकिंवातेशोककारणं यथावृत्तंसमाचष्टनारदायतुकेशवः जानामिकारणंदेवयदर्थंलांछनंतव त्वयाभाद्रपदेशुक्लेचतुर्थ्यांचंद्रदर्शनं कृतंतेनसमुत्पन्नंलांछनंतुदृष्टैवहि श्रीकृष्णउवाच वदनारदमेश्रीघ्रंकोदोषश्चंद्रदर्शने किमर्थंतुद्वितीयायांकुर्वंतितस्यदर्शनं नारद

उवाच गणनाथेनशप्तस्त्वंचंद्रमारूपदर्पितः त्वद्दर्शनेनराणांहितथानिंदाभविष्यति श्रीकृष्णउवाच किमर्थं गणनाथेनशप्तश्चंद्रः सुधामयः इदमाख्यानकंश्रेष्ठंयथावद्वक्तुमर्हसि नारदउवाच गणानामाधिपत्येनरुद्रेणब्रह्मणापुरा अणिमामहिमाचैवगरिमालघिमातथा प्राकाम्येशित्वमित्येवअर्थकामावसापिताभार्य्यार्थंप्रददौदेवो गणेशस्यप्रजापतिः पूजयित्वागणाध्यक्षंस्तुतिंकर्तुंप्रचक्रमे ब्रह्मोवाच गजवक्त्रगणाध्यक्षलंबोदरवरप्रद विद्याधीश्वरदेवेशसृष्टिसंहारकारक पूजयेयुर्गणाध्यक्षंमोदकाद्यैःप्रयत्नतः तेषांवैजायतेसिद्धिर्निर्विघ्ननसंशयः अपूज्यगणाध्यक्षंयेवांछंतिनराःसुखं नतेषांजायतेसिद्धिःकल्पकोटिशतैरपि त्वद्भक्त्यातुगणाध्यक्षविष्णुःपालयतेसदा रुद्रोपिसंहरत्याशुत्वच्छक्त्यैवसृजाम्यहं इत्थंसंस्तूयमानोसौदेवदेवोगजाननः उवाचपरमप्रीतोब्रह्माणंजगतांपतिम् गणेशउवाच वरंब्रूहिप्रदास्यामियत्तेमनसिवर्त्तते ब्रह्मोवाच क्रियमाणातुमेसृष्टिर्निर्विघ्नंजायतांप्रभो एवमस्त्वितिदेवेशोगृहीत्वामोदकान्करे सत्यलोकात्समागच्छन्स्वेच्छयागगनेशनैः चंद्रलोकंसमासाद्यस्खलितोगणनायकः अथहास्यंमहच्चक्रेसोमोरूपमदान्वितः तंदृष्ट्वाकोपताम्राक्षोगणनाथःशशापह दर्शनीयःसुरूपोहंसुंदरश्चाहमित्यथ गर्वितोसिशशांकत्वंफलंप्राप्स्यसिसत्वरं अद्यप्रभृतिलोकास्त्वांनहिपश्यंतिपापिनं येपश्यंतिप्रमादेनत्वांनरामृगलांछनं मिथ्याभिशापसंयुक्ताभविष्यंतिहितेध्रुवं हाहाकारोमहान्जातःश्रुत्वाशापंसुदारुणं अत्यंतम्लानवदनोजलेचंद्रःसमाविशत् कुमुदेकौमुदीनाथःस्थितस्तत्रकृतालयः तत्रदेवर्षिगंधर्वानिराशादीनमानसाः तुरासाहंपुरोधायजग्मुस्तेप्रपितामहं दृष्ट्वापितामहंदेवंशशंसुश्चंद्रचेष्टितं दत्तशापोगणेशेनकथयामासुरादरात् विचार्यभगवान्ब्रह्मातान्सुरानिदमब्रवीत् गणेशशापोदेवेंद्राःशक्यतेकेनचान्यथा कर्तुमिंद्रेणनमयाविष्णुनापिविनिश्चितं तमेवदेवदेवेशंव्रजध्वंशरणंसुराः सएवशाप

मोक्षंचकरिष्यतिनसंशयः देवाऊचुः केनोपायेनवरदोगजवक्रोगणेश्वरः पितामहमहाप्राज्ञतदस्माकंवदप्रभो।
पितामहउवाच चतुर्थ्यांदेवदेवोऽसौपूजनीयःप्रयत्नतः कृष्णपक्षेविशेषेणनक्तंकुर्याद्व्रतत्प्रियं अपूपैर्घृतसंयुक्तै
मोंदकैःपरितोषयेत् मधुरान्नंहविष्यंचस्वयंभुंजीतवाग्यतः स्वर्णरूपंगणेशस्यदातव्यंद्विजसत्तमे शक्त्याचदक्षिणा
दत्त्वावित्तशाठ्यंनकारयेत् गीष्पतिंप्रेषयामासुःसमेत्यत्रिदशेश्वराः सगत्वाकथयामासवचोब्रह्मोदितंतुतत् व्रतं
चक्रेततश्चंद्रोयथोक्तंब्रह्मणापुरा आविर्बभूवभगवान्गणेशोव्रततोषितः संक्रीडमानंगणनायकंचतुष्टावदृष्ट्वातु
कलानिधानः चंद्रउवाच त्वंकारणंकारणकारणानांवेत्तासिवेद्यंचविभोप्रसीद प्रसीददेवेशजगन्निवासगणे
शलंबोदरवक्रतुंड ॥ १ ॥ विरिंचिनारायणपूज्यमानक्षमस्वमेगर्वकृतंचहास्यं येत्वामसंपूज्यगणेशनूनंवा
छंतिमूढाविहितार्थसिद्धिम् ॥ २ ॥ तेदैवनष्टानिभृतंचलोकेज्ञातोमयातेसकलःप्रभावः येचाप्युदासिनतरास्तु
पापास्तेयांतिपापंनरकंसदैव ३ एवंसंस्तूयमानोसौचंद्रेणाथगजाननः उवाचप्रहसन्वाक्यंमेघगंभीरया
गिरा तुष्टोहंतवदास्यामिवरंब्रूहिनिशाकर ४ चंद्रउवाच लोकानांदर्शनीयोऽहंभवामिपुनरेवहि विपापोऽहंवि
शापोहंत्वत्प्रसादाद्गणेश्वर गणेशउवाच वरमन्यंप्रदास्यामिनैतद्देयंमयातव विघ्नेशवचनंश्रुत्वाब्रह्माद्यास्तुभया
कुलाः देवंविज्ञापयांचक्रुर्गणेशंभक्तवत्सलं देवाऊचुः विशापंकुरुदेवेशप्रार्थयामोवयंतव ततोनुनीतोब्र
ह्माद्यैःप्रसन्नोभूद्गजाननः विशापमकरोच्चंद्रंकमलासनगौरवात् शुक्लपक्षेचतुर्थ्यांतुयेपश्यंतिसदैवहि मिथ्याभि
वादमायासंतेप्राप्स्यंतिनसंशयः मासादौपूर्वमेवत्वांयेपश्यंतिसदाजनाः भद्रायांशुक्लपक्षस्यतेषांदोषोनजायते
तदाप्रभृतिलोकोयंद्वितीयायांकृतादरः चंद्रस्यदर्शनार्थायगणनाथस्यभारत भाद्रशुक्लचतुर्थ्यांतुयस्त्वांपश्यति
पापधीःमिथ्याभिशापमालिन्यमावर्षंतस्यजायते पुनरेवतुपप्रच्छकलावान्गणनायकं केनोपायेनदेवेशतुष्टोभ

॥१०

व्र०र० वसितद्वद गणेशउवाच सदाकृष्णचतुर्थ्यांतुमोदकाद्यैःप्रपूजयेत् रोहिणीसहितंत्वांचसमभ्यर्च्यविधानतः य
भद्रप० थाशक्त्यातुमद्रूपंस्वर्णेनपरिकल्पितं दत्वाद्विजायभक्तायकथांश्रुत्वाविधानतः सदातस्यकरिष्यामिसंकष्ट
५४ स्यविनाशनं भाद्रशुक्लचतुर्थ्यांतुमृण्मयीप्रतिमाशुभा हेमाभावेतुकर्तव्यानानापुष्पैःप्रपूजिता ब्राह्मणान्भोजये
त्पश्चाज्जागर्याच्चविशेषतः स्थापयेदव्रणंकुंभंधान्यस्योपरिशोभितं यथाशक्त्यातुमद्रूपंशातकुंभेननिर्मितं वस्त्र
द्वयसमाच्छन्नंमोदकाद्यैःप्रपूज्यमां रक्तांबरधरोमर्त्योब्रह्मचर्यरतःसुधीः रोहिणीसहितंत्वांचपूजांप्राप्यचतत्पर
रजतस्यतुलेरूपंयथाशक्त्याविनिर्मितं वस्त्रंशिवप्रियायेतिगणाधिपनमोऽस्तुते गंधंलंबोदरायेतिपुष्पंसिद्धिप्रदा
यच धूपंगजमुखायेतिदीपंमूषकवाहिने विघ्ननाथायनैवेद्यंफलंसर्वार्थसिद्धिदे तांबूलंकामरूपायदक्षिणांधन
दायच इक्षुदंडैस्सदापूज्यंनाम्नाशोभाकरंशुभं विसर्जनसमारंभैःसर्वसिद्धिप्रदायकं एवंसंपूज्यविघ्नेशंकथां
श्रुत्वाविधानतः मंत्रेणानेनतत्सर्वंब्राह्मणायनिवेदयेत् दानेनानेनदेवेशप्रीतोभवगणेश्वर सर्वत्रसर्वदादेवनि
र्विघ्नंकुरुसर्वदा मानोन्नतिंचराज्यंचपुत्रान्पौत्रान्प्रदेहिमे गावश्चधान्यंचवासांसिदद्यात्सर्वस्वशक्तितः दत्वातु
ब्राह्मणेसर्वंस्वयंभुंजीतकामतः मोदकापूपमधुरंलवणक्षारवर्जितं एवंकरोतियश्चंद्रतस्याहंसर्वदाजयं सिद्धिंच
धनधान्यंचददामिविपुलांप्रजां इत्युक्त्वांतर्दधेदेवोगणनाथोविनायकः तद्व्रतंकुरुकृष्णत्वंततःशुद्धिमवाप्स्यसि नं
दिकेश्वरउवाच नारदेनैवमुक्तश्चव्रतंचक्रेहरिःस्वयं मिथ्यापवात्पंशुद्धिंप्रापदेवोजनार्दनः येशृण्वंतितवा
ख्यानंस्यमंतकमणीयकं चंद्रस्यचरितंसर्वंतेषांदोषोनजायते भाद्रेशुक्लेचतुर्थ्यांतुचंद्रस्यदर्शनंक्वचित् जातं
तत्परिहारार्थंश्रोतव्यंसर्वमेवतु यदायदामनःकष्टसंदेहमुपजायते तदातदेदंश्रोतव्यमाख्यानंकष्टनाशनं ए
वमुक्त्वाततोदेवोगणेशःकृष्णतोषितः यदायदाप्रयातिकार्यमुद्यतंनारीनरश्चापिकरोतिसद्व्रतं सिध्यंतिकार्याणि

समीप्सितानिकिंदुर्लभंविघ्नहरेप्रसन्ने श्रावणस्यासितपक्षेचतुर्थ्यामेकभुग्व्रती व्रतंकुर्य्याद्गणेशस्ययावन्मासचतुष्टयम् इतिस्कंदपुराणेस्यमंतकोपाख्यानम् ॥ ॥ ॥ अथान्यप्रकारोक्तसिद्धिविनायकव्रतम् ॥ तत्रप्रातःकृत्यादिकृत्वा ॥ सूर्य्यादिदेवताभ्योव्रतंनिवेद्य आचम्योदङ्मुखोवारिपूर्णताम्रपात्रंगृहीत्वा मासपक्षाद्युल्लिख्यममसर्वकर्मनिर्विघ्नसिद्धिपुत्रपौत्रसौभाग्यादिसुखसिद्ध्यर्थंसिद्धिविनायकगणपतिप्रीत्यर्थंचसिद्धिविनायकपूजामहंकरिष्ये इतिसंकल्प्य ध्यानम् एकदंतंशूर्पकर्णमिति आगच्छजगदाधारसुर सुरवरार्चित अनाथनाथ सर्वज्ञगीर्वाणपरिपूजित ॥ आवाहनम् १ स्वर्णसिंहासनंदिव्यंसर्वमंगलसंयुतं त्वामहंस्थापयिष्यामिगणाध्यक्षनमोऽस्तुते आसनम् २ गौरीसुतनमस्तेस्तुशंकरप्रियसूनवे पाद्यंगृहाणदेवेशगंधपुष्पाक्षतैःसह पाद्यम् ३ अर्घ्यंगंधोदकंदिव्यंसर्वमंगलसंयुतं गृहाणदेवदेवेशभक्तानांवरदायक इत्यर्घ्यम् ४ गंगाजलंसमानीतंसुवर्णकलशेस्थितं आचम्यतांगणाध्यक्षसर्वविघ्नहरोभव आचमनम् ५ दधिक्षीरंघृतंचैवमधुखंडविमिश्रितं तृप्त्यर्थंदेवदेवेशमधुपर्कंददामिते मधुपर्कं ६ स्नानंपंचामृतंदेवगृहाणवरदायक अनाथनाथसर्वज्ञसर्वसिद्धिप्रदोभव पंचामृतस्नानं ७ सर्वतीर्थात्समुद्धृत्यगंधतोयैःकुशोदकैः फलतोयैर्जलैर्गांगैःस्नपयामिगणेश्वर शुद्धस्नानं ८ रक्तवस्त्रद्वयंदेवदेवांगसदृशंप्रभो गणेश्वरगृहाणत्वंभक्तानांवरदायक वस्त्रं ९ राजतंब्रह्मसूत्रंचकांचनंचोत्तरीयकं गृहाणदेवदेवेशगणाध्यक्षनमोऽस्तुते यज्ञोपवीतं १० श्रीखंडचंदनंदिव्यंकर्पूरेणचसंयुतं गंधंदास्यामिदेवेशगणाध्यक्षनमोनमः गंधं ११ अक्षतान्धवलान्देवगृहाणद्विरदानन सर्वदेवोत्तमस्त्वंहिचाक्षयंकुरुमेफलम् अक्षताः १२ सुगंधीनिचपुष्पाणिगृहाणद्विरदानन विनायकनमस्तेऽस्तुसुरासुरसुपूजित पुष्पं १३ अथांगपूजा गणेशायनमः पादौपूजयामि १ विघ्नराजाय जानुनी २ आखुवाहनाय ऊरू ॥ ३ ॥ हेरंबाय कटिंपू ॥ ४ ॥ गणाधिपाय नाभिं ५ लंबोदराय उदरं ॥ ६ ॥ गणनाथायहृदयं ॥ ७ ॥ गुहाग्रजाय

स्कंधौपू॰ ८ स्थूलकंठायकंठंपू- ९ परशुहस्तायहस्तान् १० गजवक्रायवक्रं. ११ विघ्नराजाय नेत्राणि.१२ स
र्वेश्वरायशिरः पूजयामि १३ अथपत्रिकापूजा सुमुखायनमः साचीपत्रंसमर्पयामि १ गणाधिपायभृंगराज
पत्रं-२उमापुत्राय. विल्वपत्रं. ३ गजाननाय.दूर्वापत्रं. ४ लंबोदराय वदरीपत्रं॰ ५ हरसूनवे धत्तूरपत्रं॰ ६ गज
कर्णाय तुलसीपत्रं॰ ७ गुहाग्रजाय अपामार्गपत्रं- ८ एकदंताय कंटकारिपत्रं- ९ वक्रतुंडाय शमीपत्रं-१०
विकटाय करवीरपत्रं-११ इभतुंडाय अश्मंतकपत्रं- ॥ १२ ॥ कपिलाय अर्जुनपत्रं-॥१३॥ भिन्नदंताय- विष्णु
क्रांताय॰ ॥१४ पत्नीहीनाय दाडिमीपत्रं- १५ वटवेदेवदारुपत्रं॰ ॥ १६॥ भालचंद्राय मरुवकपत्रं॰ ॥ १७॥सूर्प
कर्णाय जातीपत्रं॰ ॥ १८ ॥सुराग्रजाय गांधारीपत्रंस॰ ॥ १९ ॥ सिद्धिविनाय काय केतकीपत्रंसम
र्पयामिनमः ॥ २० ॥ इत्येकविंशतिपत्राणिसमर्पयामि ॥ २१ ॥ अथदूर्वापूजा दूर्वायुग्मंगृही
त्वातुगंधपुष्पाक्षतैर्युतं पूजयेत्सिद्धिविघ्नेशं प्रत्येकंसर्वनामभिः एकंसमर्पयामीतिशेषः गणाधि
पायनमः दूर्वायुग्मं ॥ १ ॥ उमापुत्रायनमः २ अघनाशिनेनमः३ विनायकायनमः ४ ईशपुत्रा
यनमः ५ सर्वसिद्धिप्रदायकायनमः ६ एकदंतायनमः ॥ ७ ॥ इभवक्रायनमः ॥ ८ ॥ मूषकवाहना
यनमः ॥ ९ ॥ कुमारगुरवेनमः १० सर्वनामभिरेकंदूर्वादलंसमर्पयामिनमः २१ दशांगगुग्गुलो
धूपंसुगंधिचमनोहरं गृहाणेश्वरसर्वज्ञउमापुत्रनमोऽस्तुते धूपं सर्वज्ञसर्वलोकेशसर्वेषांतिमिरापहं गृहाणमंगलं
दीपंरुद्रप्रियनमोस्तुते दीपं नैवेद्यंगृह्यतांदेवभक्तिंमेह्यचलांकुरु ईप्सितंमेवरंदेहिपरत्रचपरांगतिं नै
वेद्यं १६ तांबूलंगृह्यतांदेवनागवल्लीदलैर्युतं कर्पूरेणचसंयुक्तंदेवतानांपरंप्रियम् तांबूलं १७इदंफलमिति १८
हिरण्यगर्भस्थमितिदक्षिणा ॥ १९ ॥ विघ्नेश्वरविशालाक्षसर्वाभीष्टफलप्रद प्रदक्षिणंकरोमित्वांसर्वान्का

मान्प्रयच्छमे प्रदक्षिणा २० नमस्कृतोऽसिदेवेशसर्वविघ्नहरोभव ईप्सितंमेवरंदेहिनमस्तेभक्तवत्सल देवदेवजगन्नाथभक्तानांवरदायक अविघ्नंकुरुमेदेवसर्वकार्य्येषुसर्वदा नमस्कारः विनायकनमस्तेस्तुविघ्नेशसुरपूजित इप्सितंमेवरंदेहिनमस्तेकरुणाकर प्रार्थनामंत्रः मल्लिकामालतीपुष्पनानाचंपकसंयुतं पुष्पांजलिंगृहाणेमंपादांबुजयुगार्पितम्॥ गणानांत्वेतिमंत्रेणवा॥गणाधिपनमस्तेस्तुसततंमोदकप्रिय अविघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा दाताविघ्नेश्वरोदेवोग्रहीताचसविघ्नराट् तस्मादिदंमयादत्तंसंपूर्णंव्रतमस्तुमे गणेशःप्रतिगृह्णाति गणेशोवैददातिच दीयतेगणनाथायप्रीयतांमेगणाधिपः सौख्यंसौमनसंनित्यंकरोतुगणनायकः इतिमंत्रंसमुच्चार्य्यंदशदद्याद्द्विजातये इतिनैवेद्यदानम् ॥ विनायकस्यप्रतिमावस्त्रयुग्मसमन्विता ब्राह्मणायप्रदास्यामि सर्वविघ्नोपशांतये इतिप्रतिमादानम् ॥ प्रार्थना विघ्नानिनाशमायांतुसर्वाणिसुरनायक कार्याणिसिद्धिमायांतुपूजितेत्वयिधातरि न्यूनातिरिक्तानिपरिस्फुटानियानीहकर्माणिमयाकृतानि क्षम्यानिसर्वाणिशुभप्रदायप्रयाहितुष्टिंपुनरागमाय अथसंकष्टहरणचतुर्थ्युक्तप्रकारेणरोहिणीसहितचंद्रपूजांकुर्य्यात् अथकथा ऋषय ऊचुः ॥ निर्विघ्नेनतुकार्य्याणिकथंसिद्ध्यंतिसूतज अर्थसिद्धिकरंनृणांपुत्रसौभाग्यसंपदं दंपत्योःकलहेचैक्यं वंधुभेदेतथानृणां उदासीनेषुलोकेषुकथंसंमुखताभवेत् विद्यारंभेतथानृणांवाणिज्यार्थेकृषौतथा नृपतेःपरचक्रस्यजयसिद्धिकरीनृणां सूतउवाच सन्नद्धयोःपुराविप्राः कुरुपांडवसेनयोः पृष्टवान्देवकीपुत्रंधर्मपुत्रोयुधिष्ठिरः ॥ ॥ युधिष्ठिरउवाच निर्विघ्नेनजयोह्येषांवददेवकथंभवेत् कांदेवतांनमस्कृत्यसम्यक्राज्यंलभेमहि श्रीकृष्णउवाच पूजयस्वगणाध्यक्षंविघ्नेशंसिद्धिदायकं तस्मिन्संपूजितेराजन्सर्वान्कामानवाप्स्यसि युधिष्ठिरउवाच देवकेनविधानेनपूजनीयोगणाधिपः पूजितस्तुतिथौकस्यांसिद्धिदोगणपोभवेत् श्रीकृष्णउवाच

व्र०र०
भाद्रप०
५६.

गजवक्त्रश्चतुर्थ्यांतुसदापूज्योनराधिप   यदाचोत्पद्यतेभक्तिस्तदापूज्योगणेश्वरः   शुक्लपक्षेचतुर्थ्यांतुमासि भाद्रपदेतथा   प्रातःशुक्लतिलैःस्नात्वामध्याह्नेपूजयेन्नृप   निष्कमात्रसुवर्णेन तदर्द्धार्द्धेनवापुनः   स्वशक्त्या गणनाथस्यस्वर्णरौप्यमयाकृतिं   अथव मृण्मयींकुर्य्याद्वित्तशाठ्यविवर्जितः कृत्वापूजांप्रयत्नेनस्नाप्यपंचामृतैःशुभैः   वस्त्रंसर्वप्रदंरक्तंयुग्मंदद्यात्सुभावितं   गणाध्यक्षेतिनाम्नावैगंधंदद्याच्चभक्तितः विनायकेतिपुष्पाणिधूपंचोमासुतेतिच   दीपंरुद्रप्रियायेतिनैवेद्यंविघ्ननाशिने   ततोदूर्वांकुरान्गृह्य विंशतिंचैकमेवहि पूजयेत्तुप्रयत्नेन   एभिर्नामपदैः   पृथक्   गणाधिपनमस्तेस्तु उमापुत्राघनाशन   विनायकहरपुत्रेति सर्वसिद्धिप्रदायक   एकदंतेभवक्त्रेतितथामूषकवाहन   कुमारगुरवेतुभ्यं पूजनीयः   प्रयत्नतः   दूर्वायुग्मंगृहीत्वातु गंधयुक्तंप्रपूजयेत् एकैकेनतु नाम्नावैपूजाचैकेनसर्वतः   एकेनदूर्वांकुरेणसर्वनामभिःपूजाकार्या   दत्वैकंसर्वनामभिरितिवीरमित्रोदये   तथैकविंशतिंगृह्यमोदकान्घृतपाचितान्   स्थापयित्वागणाध्यक्षसमीपेकुरुनंदन   दशविप्रायदातव्याः   स्वयंचाद्यात्तथा दशएकंगणाधिपेदत्वानैवेद्यंचनृपोत्तम   गणेशःप्रतिगृह्णातिगणेशोवैददातिच   दीयतेगणनाथायप्रीयतांमेगणाधिपः   सौख्यंसौमनसंनित्यंकरोतुगणनायक इतिमंत्रसमुच्चार्य्यदशदद्याद्द्विजालये   गुरुंव्रतोपदेष्टारमलंकृत्यप्रयत्नतः   दद्याच्चदक्षिणांसम्यक्यथाविभवविस्तरं   जातरूपमयंदेवंब्राह्मणायानिवेदयेत्   कृत्वानैमित्तिकंकर्मपूजयेदिष्टदेवतां   ततःप्रार्थना   विघ्नानिनाशमयांतुसर्वाणिसुरनायक   कार्य्यंमेसिद्धिमायातुपूजितेत्वयिधातरि विप्रायभोजनंदद्याद्भुंजीयात्तैलवर्जितं   एवंकृतेधर्मराजगणनाथस्यपूजने   विजयस्तेभवेन्नित्यंसत्यंसत्यंमयोदितं   त्रिपुरंदग्धुकामेनपूजितःशूलपाणिना   शक्रेणपूजितःपूर्वंतथावृत्रवधेनृप   रामेणाराधितःपूर्वंसीतामन्वेषतापुरा दृष्टा सीतामहाभागवानरेणहनूमता   भगीरथेनतद्वच्चगंगामानायतापुनअमृतोत्पादनार्थायतथादेवासुरैरपि   अमृता

हरणात्पूर्ववैनतेयेनपत्रिणा आराधितोगणाध्यक्षोह्यमृतंतुहृतंबलात्यदापूर्वंतुदैत्येनहृतोरुक्मिणिनंदनः आराधितोमयातद्वत्रुक्मिण्यासहितेन चकुष्ठव्याधियुतेनाथसांबेनाराधितःपुरा जयकामस्तथात्वंहितमाराधयशांकरिं प्राप्स्यसित्वंनिजंराज्यंजित्वाशत्रुगणान्रणे सिध्यंतिसर्वकार्याणिनात्रकार्य्याविचारणा सूतउवाच एवमुक्तस्तुकृष्णेनसानुजःपांडुनंदनः पूजयामासदेवेशपुत्रंत्रिपुरघातिनः शत्रुसंघान्निहत्याशुप्राप्तवान्राज्यमोजसा सिद्ध्यंतिसर्वकार्य्याणिमनसाचिंतितान्यपि विद्यारंभपूजनीयोविद्यालाभोभवेन्नृणां विवाहेक्रियमाणेतुपूज्यश्चासौविनायकः सिद्ध्यंतिसर्वकर्माणिअर्थसिद्धिर्भवेन्नृणां कृषिप्रारंभसमयेकार्षिकेणविनायकः पूजनीयःप्रयत्नेनधान्यंतस्याक्षयंभवेत् व्युष्टिकामैस्तथाशूद्रैःपूजनीयोगणाधिपः विद्याकामोलभेद्विद्यांधनकामोलभेद्धनं जयंचजयकामश्चपुत्रार्थीलभतेसुतं पतिकामाचभर्त्तारंसौभाग्यंतुसुवासिनी विधवापूजयित्वातुवैधव्यंनाप्नुयात्पुनः यंयंचिंतयतेकामंतंतंप्राप्नोतिलीलया वैष्णवादिषुदीक्षासुआदौपूज्योगणाधिपः यस्मिन्संपूजितेविष्णुरीशोभानुस्तथाह्युमा हव्यवाहमुखादेवाःपूजितास्युर्नसंशयः चंडिकाद्यामातृगणाःपरितुष्टाभवंतिच यस्मिन्संपूजितेभक्त्याविप्राःसिद्धिविनायके यइदंशृणुयान्नित्यंश्रावयेद्वापिभक्तितः सिद्ध्यंतिसर्वकार्याणिसिद्धिदस्यप्रसादतः ॥ ॥ इतिस्कंदपुराणेसिद्धिविनायकव्रतम् ॥ इयमेवचतुर्थीशिवानाम्नी ॥ ॥ सुमंतुरुवाच ॥ शिवाशांतासुखाराजन्चतुर्थीत्रिविधामता मासिभाद्रपदेशुक्लाशिवालोकेषुपूजिता माघशुक्लास्मृताशांताभौमवारेसुखास्मृता तस्यांस्नानंतथादानमुपवासोजपस्तथा क्रियमाणंशतगुणंप्रसादाद्दंतिनोनृप दंतिनोविनायकस्येत्यर्थः गुडलवणघृतानांदानंशुभकरंस्मृतं गुडापूपैस्तथावीरपुण्यंब्राह्मणभोजनं चतुर्थ्यांनरशार्दूलपूजनीयाःसदास्त्रियः गुडैर्लवणपूजाभिः स्वस्रःश्वश्रूश्चमातरः ताःसर्वाःसुभगाःसर्वैर्विघ्नेशस्यानु

मोदनात्कन्यकातुविशेषेणविधिनानेनपूजयेत् ॥ इतिभविष्योत्तरोक्ताशिवाचतुर्थीव्रतम् ॥ ॥ अस्यामेवहर्षणीनाम्नीपार्वतीपूज्या तत्रस्मृतिः ॥ भाद्रशुक्लचतुर्थ्यांतुहर्षणीनामयामता पूजयेत्पार्वतींतस्यासौभाग्यंनविहन्यते ॥ अथभाद्रशुक्लपंचम्यांनागपूजा ॥ अत्रपंचमीपरयुताग्राह्या तदुक्तंचमत्कारचिंतामणौ पंचमीनागपूजायांग्राह्याषष्ठीसमन्विता तस्यांतुतुषितानागाइतरायचतुर्थिकेतिवचनात्सूर्योदययुतांग्राह्येत्यर्थः प्रभातखंडे ॥ शिवउवाच ॥ तथाभाद्रपदेमासिपंचम्यांश्रद्धयान्वितः यस्त्वालेख्यनरोनागान्नीलपीतादिवर्णकैः कुरुकुल्यातथावीथ्यांस्वगृहेविलिखेद्बुधः कुरुकुल्यामंत्रेण ॥ ॐकुरुकुल्येहुंफट्स्वाहा पूजयेद्गंधपुष्पैश्चपयसापायसेनच तस्यसंतुष्टिमायांतिपन्नगास्तक्षकादयः आसप्तमात्कुलात्तस्यनभयंनागतोभवेत् अत्रायंप्रोच्यतेमंत्रः सर्वासुखनिषेधकः तस्मिन्प्रजप्तमात्रेतुनविषंक्रमतेतदा इत्येवंकथितंदेविनागव्रतमनुत्तमं यच्छ्रुत्वाचपठित्वाचमुक्तःस्यात्सर्वपातकैः नागाश्चात्र वासुकि तक्षक कालिय मणिभद्र ऐरावत कर्कोटक धनंजय धृतराष्ट्रसंज्ञाः इत्यालेख्यापंचमी अत्रैवनागदष्टव्रतमुक्तं सुमंतुरुवाच ॥ नागदष्टोनरोराजन्प्राप्यमृत्युंव्रजत्यधः अधोगत्वाभवेत्सर्पोनिर्विषोनात्रसंशयः ॥ शतानीकउवाच ॥ नागदष्टःपितायस्यभ्रातावादुहिताथवा मातापुत्रोथवाभार्य्याकर्तव्यंतदवदस्वमे मोक्षायतस्यविप्रेंद्रदानंव्रतमुपोषणं ब्रूहिमेद्विजशार्दूलयेनतद्वैकरोम्यहं सुमंतुरुवाच उपोष्यपंचमीसम्यक्नागानांबलवर्द्धिनी त्वमेकमेवतावच्च विधानंशृणुभारत उपोष्येतिदिवसेभोजनाभावस्यांतेनक्तव्रतामित्यग्रेतथोक्तेः मासिभाद्रपदेचैवशुक्लपक्षेतुपंचमी सर्वपुण्यतमाप्रोक्ताग्राह्यासौगत्यकाम्यया चतुर्थ्यामेकभक्तंचतस्यांनक्तंप्रकीर्तितं तस्यांपंचम्यामित्यर्थः कृत्वारोप्यमयंनागमथवाकलधौतजं अथदारुमयंभव्यं मृण्मयंवाथभक्तितः पंचम्यामर्चयेद्भक्त्यानागंपंचफणंतथा

करवीरैस्तथापद्मैर्जातिपुष्पैःसुगंधिभिः गंधपुष्पैः सुनैवेद्यैः स्नापयेत्क्षीरादिभिर्नृप ब्राह्मणान्भोजयेत्पश्चाद्घृतपायसमोदकैः अनंतंवासुकिंशंखंपद्मंकंबलमेवच धृतराष्ट्रंशंखपालंकालियंतक्षकंतथा पिंगलंचतथानागं मासिमासिप्रपूजयेत् पूजयित्वाप्रयत्नेनपंचम्यांनक्तभुग्भवेत् एवंद्वादशकृत्वावैमासिभाद्रपदेनृप वत्सरांतेयथाशक्त्यामहाभोज्यंतुकारयेत् ब्राह्मणान्यतीनांचनागानुद्दिश्यभक्तितः इतिहासविदंनागं कांचनंरत्नाचित्रितं गांचदद्यात्सवत्सांवैसर्वोपस्करसंयुतां दानकालेपठेदेतत्स्मरन्नारायणंविभुं सर्वगंसर्वधातारमनंतमपराजितं येकेचिन्मत्कुलेसर्पैर्दष्टाःप्राप्ताअधोगतिं व्रतेनानेनगोविंदमुक्तिभाजोभवंतुते इत्युच्चार्याक्षतैर्युक्तांसितचंदनमिश्रितं वासुदेवाग्रतोभूप तोयंतोयेथनिक्षिपेत् अननेविधिनासर्वेयेमरिष्यंतियेमृताः सर्पतस्तेभियास्यंतिस्वर्गतिंनृपसत्तम कृत्वासर्वान्समुद्धृत्यकुलजान्कुलनंदन प्रयातिविष्णुसान्निध्यंसेव्यमानोप्सरोगणैः वित्तशाठ्यविहीनोयःसर्वमेतत्फलंलभेत् नक्तेनभुक्तिसहिताःकिलपंचमीषु येपूजयंतिसुभगाः कुसुमोपहारैः तेषांगृहेत्वभयदाहिभवंतिसर्पादर्पान्वितामणिमयूखविभासितांगाः इतिदष्टपंचमीव्रतं अस्यामेवभाद्रशुक्लपंचम्यां ऋषिपंचमीव्रतं तत्रमध्यान्हव्यापिनीपंचमीग्राह्या पूजाव्रतेषुसर्वेषुमध्यान्हव्यापिनीतिथिरितिहारीतोक्तेः दिनद्वयेतथात्वेहेमाद्रिमतेपरा पंचमीतुप्रकर्तव्याषष्टीयुक्तातुनारदेतिवाक्यात् सितापरयुतास्तस्यादसितापूर्वसंयुतेतिदीपिकोक्तेश्चशुक्लपक्षेतिथिग्राह्यायस्यामभ्युदितोरविरितिवचनाच्चऋषिपंचमीषष्टीयुतेतिदिवोदासीयेपि माधवमदनरत्नादिमतेतुपूर्वासर्वत्रपंचमीपूर्वेत्युक्तेः निर्णयसिंधौकल्परत्नावल्यामप्येवं अत्रऋषिपूजनमुक्तंनारदीये भाद्रस्यशुक्लपंचम्यांवेदिकाकारयेन्मुदा गोमयेनोपलिप्याथकृत्वापुष्पोपशोभितां तत्रास्तीर्यकुशान्विप्रऋषीन्सप्तसमर्चयेत् गंधैश्चविविधैः पुष्पैर्धूपैर्दीपैः सुशोभनैः कश्यपोत्रिर्भरद्वाजोविश्वा

मित्रोथगौतमः जमदग्निर्वसिष्ठश्चसप्तैतेऋषयः स्मृताः एतेभ्यो।चैवविधिवत्कल्पयित्वाविधानतः नैवेद्यंकलये द्विद्वान्श्यामाकाद्यैरकृष्टजैः तन्निवेद्यविसृज्यैतान्स्वयंचाद्यात्तदेवहि अनेनविधिनासप्तवर्षाणिप्रतिवत्सरं कृत्वातानिववरयेदाचार्य्यान्सप्तवैदिकान् प्रतिमासप्तकुर्वीतसुवर्णेनस्वशक्तितः जटिलाःसाक्षसूत्राश्चकमंडलुसमन्विताः संस्थाप्यकलशेष्वेतान्ताम्रेषुमृण्मयेषुवा स्नापयेद्विधिवद्भक्त्यापृथक्पंचामृतैरपि उपचारैःषोडशभिस्ततःसंपूज्यभक्तितः अर्घ्यंदत्वाततोह्यतांस्तिलव्रीहियवादिभिः सहस्तोमाइतिऋचानाममंत्रैस्तुवापृथक् पुण्यैर्मंत्रैस्तथैवान्यैर्हुत्वापूर्णाहुतिंचरेत् ततस्तुसप्तगादद्याद्वस्त्रालंकारसंयुताआचार्यंपूजयेच्चैववस्त्रालंकारभूषणैः अनुज्ञयागुरोः पश्चान्मूर्तीर्विप्रेषुचार्पयेत् भोजयित्वाचतान्भक्त्याप्रणिपत्याविसर्जयेत् ततःशिष्टैःसहस्नातःस्वयंब्राह्मणशेषतः एवंकृत्वाव्रतंसांगंभोगान्भुक्त्वात्रवांछितान् सप्तर्षीणांप्रसादेनाविमानवरगोभवेत् ब्रह्मपुराणेपि नभस्यशुक्लपक्षेतुयावैभवतिपंचमी नद्यादिकेतदास्नात्वाकृत्वानियममेवच ब्राह्मणीक्षत्रियावैश्याशूद्राचापिवरानने कृत्वानैमित्तिकंकर्मगत्वानिजगृहंपुनः वेदींसम्यक्प्रकुर्वीतगोमयेनोपलेपितां रंगवल्लीसमायुक्तांश्वेतपुष्पोपशोभितां तत्रसप्तऋषीन्दिव्यान्भक्तियुक्तःप्रपूजयेत् गंधैश्चविविधैःपुष्पैर्धूपदीपैः सुशोभनैः ततोनैवेद्यसंपन्नमर्घ्यंदद्याच्छुभैःफलैः तत्रार्घ्यमंत्राः कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः जमदग्निर्वसिष्ठश्चअरुंधत्यासमन्विताः गृहाणार्घ्यंमयादत्तंतुष्टाभवंतुमेसदेति एवंपूजांविनिर्वर्त्यऋषीन्ध्यात्वासमाहितः अकृष्टपृथ्वीसंजातंशाकाहारंप्रकल्पयेत शयीतब्रह्मचर्य्येणाऋषीन्ध्यात्वासमाहितः अनेनविधिनासप्तवेदवेदांगपारगा।नित्यादिसर्वत्रपाठः अनुज्ञयागुरोः पश्चाद्ब्राह्मणेभ्योनिवेदयेत् प्रीतिभावसमायुक्तोभोजयित्वायथाविधि अनेनविधिनासम्यग्व्रतमेतत्समाचरेत् सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषु

यत्फलं सर्वदानेषुदत्तेषुतदेतत्फलमाप्नुयात् ॥ ॥ इतिनारदीयेब्रह्मपुराणेचऋषिपंचमीव्रतविधानम्

अथकथा हेमाद्रौ ब्रह्मांडपुराणे सिताश्वउवाच ॥ श्रुतानिदेवदेवेशव्रतानिसुवहूनिच ॥ सांप्रतंमेसमाचक्ष्वव्रतंपापप्रणाशनम् ॥ ब्रह्मोवाच ॥ शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतं ऋषिपंचमीतिविख्यातंसर्वपापहरंपरं येनचीर्णेननराजेंद्रनरकंनैवपश्यति अत्रैवोदाहरंतीममितिहासंपुरातनं वैदिशेभूद्द्विजवरउत्तंगोनामनामतः तस्यभार्य्यासुशीलेतिपातिव्रतपरायणा अस्य।अपत्ययुगलंपुत्रोहिसुविभीषणः अधीतवान्सुतस्तस्यवेदान्सांगपदक्रमान् समानेनकुलीनेनसुताचापिविवाहिता विवाहितैवसादैवाद्वैधव्यंप्रापसत्तमासशीलंपालयंतीसाआस्तेनिजापितुर्गृहे तस्यादुःखेनसंतप्तः सुतंसंस्थाप्यवेश्मनि गंगातीरेवनंप्राप्तः सकलत्रस्तयासह सतत्र।ध्यापयामासशिष्यान्वेदंद्विजोत्तमः सुताचकुरुतेतत्रपितुःशुश्रूषणंपरं पितुःशुश्रूषणंकृत्वापरिश्रांताकदाचन निशीथेकिलसंसुप्ताकृमिरा।शिरजायत तांतेतथाविधांदृष्ट्वाविवस्त्रांप्रस्तरस्थितां शिष्यानिवेदयामासुस्तन्मातुःकरुणंस्थिताः नजानीमोवयंकिंचिद्देवीसाध्वीतथाविधा कृमिराशिमयी।जातामातः सपदिदृश्यते वज्रपातसदृक्षंतत्श्रुत्वाशिष्यैरुदीरितं संभ्रांतमानसाशीघ्रंतत्समीपमुपागता सुतांतथाविधांदृष्ट्वाविललापसुदुःखिता उरश्चताडयामाससुतरांमोहमापच क्षणेनप्राप्यचैतन्यमुत्थाप्यपरिमृज्यच समालभ्यचवाहुभ्यांनीत्वातात्पितुरंतिकं स्वामिन्कथयमेसाध्वीकेनदुष्कृतकर्मणा निशीथेसंप्रसुप्तेयंजायतेकृमिसंकुला एतच्छ्रुत्वाततोवाक्यंमुनिर्ध्यानपरायणः ज्ञात्वानिवेदयामासतस्याःप्राग्जन्मचेष्टितं ॥ ऋषिरुवाच प्रागियंसप्तमेतीतेजन्मनिब्राह्मणीह्यभूत् नोत्ससारस्वभांडेभ्यः संजाताचरजस्वला अस्याःकृतेनपापेनजा

यतेक्रमिवद्वपुः रजस्वलायाःपापेन युक्ताभवतिसानघे प्रथमेहनिचंडालीद्वितीयेब्रह्मघातिनी तृतीयेरजकी प्रोक्ताचतुर्थेह्निशुध्यति तयैतयासखीसंगाद्व्रतंदृष्ट्वावमानितं दृढव्रतप्रभावेणजाताद्विजकुलेमले अवमानाद्व्रतस्यास्यक्रमिराशिमयीतुसा एतत्तेकथितंसर्वंकारणंदुष्कृतस्यच सुशीलोवाच ॥ दर्शनादपियस्तस्याविप्राणांनिर्मलेकुले जन्मयुष्मद्विधानांहि जायतेब्रह्मतेजसा अवमानात्प्रजायंतेविग्रहेक्रमिराशयः महाश्चर्यकरंनाथतद्व्रतंकथयस्वमे ॥ ऋषिरुवाच ॥ सुशीलेशृणुतत्सम्यग्व्रतानामुत्तमंव्रतं येनचीर्णेनसहसापापादस्मात्प्रमुच्यते दुःखत्रयाभिघातश्च जायतेनात्रसंशयः कल्याणानिप्रवर्द्धंतेसंपदश्चनिरापदः नभस्येशुक्लपक्षेतुयदाभवतिपंचमी नद्यादिषुतदास्नानंकृत्वानियममेवच विधायनित्यकर्माणिगत्वाद्वारवतीमृषीन् द्वारवतींअग्निहोत्रशालां स्नापयेद्विधिवद्व्रतयापंचामृतरसैः शुभैः चंदनागुरुकर्पूरैर्विलिप्यचसुगंधिभिः पूजयेद्विविधैः पुष्पैर्गंधधूपादिदीपकैः समाच्छाद्यशुभैर्वस्त्रैः सोपवीतैर्यथाविधिः ततोनैवेद्यसंपन्नमर्घ्यंदद्याच्छुभैः फलैः अर्घ्यमंत्रः जमदग्निभरद्वाजइतिश्रोतव्यमिदमाख्यानं शाकाहारंप्रकल्पयेत् स्थातव्यंब्रह्मचर्येणऋषिध्यानपरायणैः अनेनविधिनासम्यग्व्रतमेतत्समाचरेत् तस्यापिजायतेपुण्यंतच्छृणुष्वसमाहिता सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं सर्वदानेषुदत्तेषुतदस्यव्रतमात्रतः कुरुतेयाव्रतंचैतत्सानारीसुखभागिनी रूपलावण्यसंयुक्तापुत्रपौत्रादिसंयुता इहलोकेसदैवस्यात्परत्राप्यक्षयागतिः व्रतस्यास्यप्रभावेणजातिंस्मरतिपौर्विकीं ॥ इतिहेमाद्रौब्रह्मांडपुराणेऋषिपंचमीव्रतकथा ॥ ॥

अथपूजाविधिः ॥ ॐमासपक्षाद्युल्लिख्यमयाज्ञानतोऽज्ञानतोवारजस्वलावस्थायांभांडादिसंपर्कजनितदोषपरिहारार्थंशास्त्रोक्तसमस्तफलप्राप्त्यर्थंऋषिपंचमीव्रतपूजनमहंकरिष्ये इतिसंकल्प्य पीठेकलशेवादर्भमयानरुंधती

सहितान्सप्तऋषीनूपूजयेत् तत्रमंत्रः मूर्तंब्रह्मएयदेवस्यब्राह्मणोनिजमुत्तमं सूर्यकोटिप्रतीकाशंऋषिवृंदं विचिंतयेत् इतिध्यानं आगच्छंतुमहाभागाश्चतुर्वेदस्वरूपिणः यावद्व्रतमहंकुर्वेकृपयाभवतांप्रभो आवाहनम् ऋग्यजुः सामवेदानांस्वरूपेभ्योनमोनमः पुराणपुरुषेभ्योहिदेवर्षिभ्योनमोनमः आसनं गंधपुष्पाक्षतैर्युक्तं पाद्यंगृह्णंतुभोद्विजाः प्रसादंकुरुतप्रीत्या तुष्टाःसंतुसदामम पाद्यम् नभस्येशुक्लपंचम्यामर्चिता ऋषिसत्तमाः दहंतुपापंमेसर्वमर्घ्यंगृह्णंतुवोनमः अर्घ्यं लोकानांसृष्टिकर्तारोयूयंसर्वेतपोधनाः नमोवोधर्मविज्ञेभ्योमहर्षिभ्योनमोनमः आचमनं मंदाकिनीगौतमीचयमुनाचसरस्वाती गोमतीनर्मदातापी ताभ्यः स्नानीयमाहृतं स्नानं सर्वेनित्यंतपोनिष्ठाब्रह्मज्ञाः सत्यवादिनः वस्त्राणिप्रतिगृह्णंतुमुक्तिंयच्छंतुसर्वदा वस्त्रं यज्ञोपवीतंपरमंपवित्रमितियज्ञोपवीतं कुंकुमागुरुकर्पूरसुगंधैर्मिश्रितंशुभं गंधाढ्यंचंदनंदिव्यंगृह्णंतुऋषिसत्तमाः चंदनं रंजिताःकुंकुमाद्येनअक्षताश्चसुशोभनाः गृह्णंतुममसंतुष्टाःप्रसन्नाऋषिसत्तमाः अक्षताः माल्यानिवकुलादीनिमालत्यादीनिवैद्विजाःमयाहृतानि पुष्पाणिपूजार्थंप्रतिगृह्यतां पुष्पाणि वनस्पतिरसोधूपोगंधाढ्यःसुमनोहरः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां धूपः आज्यंचवर्तिसंयुक्तंवान्हिनायोजितंमया दीपंगृह्णंतुमुनयस्त्रैलोक्यतिमिरापहं दीपं नानापक्वान्नसंयुक्तंरसैःषड्भिःसमन्वितं नैवेद्यमृषयःसर्वेगृह्णंतुवसुदायकाः नैवेद्यं लोकानांसृष्टिकर्तारोयूयंसर्वेतपोधनाः नमोवोधर्मविज्ञेभ्योमहर्षिभ्योनमोःनम आचमनं पूगीफलंमहादिव्यंनागवल्लीदलैर्युतं कर्पूरादिसमायुक्तंतांबूलंप्रतिगृह्यतां तांबूलं इदंफलमितिफलं हिरण्यगर्भस्थमितिदक्षिणा यानिकानिचपापानीतिप्रदक्षिणा वायनंफलसंयुक्तंव्रतसंपूर्तिहेतवे भवंतःप्रतिगृह्णंतुज्योतीरूपास्तपोधनाः वायनं न्यूनातिरिक्तकर्माणिमयायानिकृतानिच क्षमध्वंतानिसर्वाणियूयंसर्वेतपोधना इतिप्रार्थना इतिपूजा ॥ ॥

अथकथा युधिष्ठिरउवाच श्रुतानिदेवदेवेशव्रतानिसुवहूनिच सांप्रतंमेसमाचक्ष्व व्रतंपापप्रणाशनं श्रीकृष्णउवाच अथान्यच्चापिराजेंद्रऋषिपंचमिसंज्ञिता कथयिष्यामियांकृत्वानारीपापात्प्रमुच्यते युधिष्ठिरउवाच कीदृशीपंचमीकृष्णकथंचऋषिसंज्ञिता पातकान्मुच्यतेकस्मान्नारीयदुकुलोद्भव श्रीकृष्णउवाच अज्ञानाज्ज्ञानतो वापियास्त्रीजातारजस्वला दुष्टास्पृशतिभांडानिगृहकर्माणिसंस्थिताप्राप्नोतिसमहापापंसर्ववर्णसमुद्भवा शृणुष्व कारणंयस्माद्वर्जनीयारजस्वला प्रोत्सार्य्यागृहतश्चापिचातुर्वर्ण्येनभारत ब्रह्महत्यांपुराशक्रोवृत्रंहत्वाह्यवाप्तवान् तयावैव्रीडितोराजन् पीडितोवृत्रहापुनः ब्रह्माणंसमुपागच्छदात्मनःशुद्धिकारणात शुद्धिंशक्रस्य राजेंद्रप्रहृष्टेनांतरात्मना विभज्यब्रह्महत्यांतुचतुर्द्धाचचतुर्मुखः प्राक्षिपत्राजशार्दूलचतुःस्थानेषुवैतदा वह्नौप्रथमजातासुज्वालासुचनदीषुच पर्वतेषुचराजेंद्रनारीरजसिचैवहि अतोरजस्वलानारीप्रोत्सार्य्याचप्रयत्नतः ब्रह्मणःशासनात्पार्थचातुर्वर्ण्येनसर्वदा प्रथमेहनिचंडालीद्वितीयेब्रह्मघातिनी तृतीयेरजकीप्रोक्ताचतुर्थेहनिशुद्ध्यति अज्ञानाद्ज्ञानतोवापिजातसंपर्कपातकं तत्पापसंक्षयार्थंहिकार्य्येयमृषिपंचमी सर्वपापप्रशमनीसर्वोपद्रवनाशिनी ब्रह्मक्षत्रियविट्शूद्रैःस्त्रीभिःकार्य्याविशेषतः ॥ श्रीकृष्णउवाच॥ अथान्यदपिवक्ष्यामितवराजन्कथानकं पुराकृतयुगेराजन्विदर्भायांबभूवह श्येनजिन्नामराजेंद्रश्चतुर्वर्णानुपालकः तस्यदेशे चसद्विप्रोवेदवेदांगपारगः सुमित्रोनामराजेंद्रसर्वभूतहितेरतः कृषिवृत्त्यासमासीनःकुटुंबपरिपालकः तस्यभार्यासुसाध्वीचपतिशुश्रूषणेरता जयश्रीर्नामविख्यातावहुभृत्यसुहृज्जना क्षेत्रादिषुरतासाध्वीव्याकुलीकृतमानसा एकदास्वात्मनिप्राप्तमृतुकालंव्यलोकयत् रजस्वलापिसानारीगृहकर्मचकारह भांडानिसास्पृशद्राजन्नृतौप्राप्तेपिभामिनी कालेनवहुनासाध्वीपंचत्वमगमत्तदा भार्यातस्यजयश्रीःसाऋतुसंपर्कदोषतः शुनीयोनि

मनुप्राप्तासुमित्रोपिनरेश्वर तस्याःसंपर्कदोषेणवलीवर्दोवभूवह तद्दोषेणमहाराजदुर्गतिंतौगतौतदा सुमित्रस्य चपुत्रोभूत्पितृशुश्रूषणेरतः सुमतिर्नामधर्मज्ञोदेवतातिथिपूजकः तस्यतौपितरौपार्थऋतुसंपर्कदोषतः तिर्यग्योनिमनुप्राप्तावुभौजातिस्मरौनृप उच्छिष्टभोजिनासाभूत्स्मरंतीपूर्वपातकं सुमित्रोपिपितातस्यवलीवर्दोवभूवह अथक्षयाहेसंप्राप्तेपितृशुश्रूषणेरतः भार्यांचंद्रवतींप्राहसुमतिःश्रद्धयान्वितां तयाकृतापाकशुद्धिःसुमतेर्भर्तुराज्ञया मुक्तंपायसभांडेस्याःसर्पेणगरलंततः दृष्ट्वाब्रह्मवधाद्भीताशुनीभांडान्स्पृशन्मुहुः द्विजभार्याचतांदृष्ट्वाउल्मुकेनजघानतां भोजिताब्राह्मणास्तत्रश्राद्धंकृत्वाप्रयत्नतः ततोभुक्तेषुविष्टेषुनोच्छिष्टंप्रददौवहिः द्वारस्थायास्तदाशुन्याउपवासस्तथाभवत् ततोरात्र्यांप्रवृत्तायांसाशुनीक्षुधितानृप वलीवर्दमुपागत्यभर्त्तारमिदमब्रवीत् वुभुक्षिताद्यनाथाहंनदत्तंभोजनंतुमे ग्रासादिकंवानलभेक्षुधामांवाधतेवलात् अन्यस्मिन्दिवसेपुत्रोममलेह्यंददत्यसौ अद्यमह्यंकिमप्येवउच्छिष्टमपिनोददौ पायसान्नेपपाताथगरलंसर्पसंभवं मयाविचिंत्यमनसामरिष्यंति द्विजोत्तमाः संस्पृष्टंपायसंरोषाद्बध्वाहंताडिताभृशं दुःखितंतेनगात्रंमेकटिर्भग्नाकरोमिकिं ततःप्रहस्यवैभर्त्ता भद्रेतेपायसंग्रहात् कथंहराम्यशक्तश्चभारवाहत्वमागतः अद्याहमात्मजैः क्षेत्रेवाहितःसकलंदिनं मारितश्चात्मजेनाहंमुखंवद्ध्वावुभुक्षितः वृथाश्राद्धकृतंतेनजाताद्यममकष्टता श्रीकृष्णउवाच॥ तयोःसंवदतोरेवंमातापित्रोश्चभारत श्रुत्वावाक्यंतदापुत्रोयदुक्तंचतदोभयोः ततोरजन्यांतत्कालंददौतस्यैसुभोजनं पितरौतौविदित्वातुदत्तवान्सुमतिस्तदा तदासौदुखितःपुत्रःश्रुत्वावस्थांतदातयोः मातापित्रोश्चराजेंद्रतदासौप्रस्थितोवनं ज्ञातुमिच्छामिकष्टंवैमातापित्रोश्चभारत तत्रगत्वाज्ञानवृद्धान्ऋषीन्सप्तवनाश्रितान् प्रणिपत्याब्रवीद्वाक्यंहितंचैवतदातयोः सुमतिरुवाच कथयध्वंब्रह्मर्षयःप्रश्नमेतत्समाहिताः केनकर्मविपाकेनपितरौमेतपोधनाः

इमामवस्थांसंप्राप्तौमोक्ष्यंतेपातकात्कथं ऋषयऊचुः तवमातापुराविप्रस्वगृहेबालभावतः ऋतुंप्राप्तांविदित्वातुसंपर्कमकरोद्द्विज तेनकर्मविपाकेनशुनीयोनिमुपागता पिताचस्पर्शदोषेणवलीवर्दोबभूवह एतयोर्मुक्तिकामार्थं कुरुत्वमृषिपंचमीं भार्ययासहविप्रेंद्रऋषीन्संपूज्ययत्नतः आचरस्वव्रतंतत्रसप्तवर्षंद्विजोत्तम अंतेचोद्यापनंकुर्य्याद्वित्तशाठ्यविवर्जितः शाकाहारस्तुकर्तव्यः श्यामाकाहारएवच नीवारैर्वापिकर्तव्यः कृष्टपच्यंनभक्षयेत् प्राप्यभाद्रपदेमासिशुक्लपक्षस्यपंचमीं तस्यांमध्यान्हसमयेनद्यादौविमलेजलेकृत्वापामार्गकाष्ठेनदंतधावनमादितः आयुर्वलंयशोवर्चः प्रजाःपशुवसूनिच ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते संप्रार्थ्यानेनमंत्रेणकुर्य्याद्वैदंतधावनं मुखदौर्गंध्यनाशायदंतानांचविशुद्धयेष्ठीवनायमलानांचकुर्वेहंदंतधावनं अनेनदंतान्संशोध्यस्नायात्मृत्स्नानुपूर्वकं तिलामलककल्केनकेशान्संशोध्ययत्नतः परिधायनवेशुद्धेवाससीसुसमाहितः पूजयस्वऋषीन्दिव्यानरुंधत्यासमन्वितान् कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः जमदग्निर्वसिष्ठश्चसाध्वीचैवाप्यरुंधती मंत्रेणानेनसप्तर्षीन्पूजयेत्सुसमाहितः व्रतेनऋषिपंचम्यांकृतेनैवंद्विजोत्तम ऋतुसंपर्कजोदोषः क्षयंयातिनसंशयः

श्रीकृष्णउवाच श्रुत्वातत्सुमतिर्वाक्यंपरमंऋषिभाषितं गृहमेत्यव्रतंचक्रेसभार्य्यःश्रद्धयान्वितः व्रतंतुऋषिपंचम्याः सर्वपापविनाशनं कृत्वासर्वंयथोक्तंचमातापित्रोः फलंददौ व्रतपुण्यप्रभावेणमातातस्यश्वयोनितःमुक्तातुनृपशार्दूलविमानवरमास्थिता दिव्यांवरधराभूत्वागतास्वर्गेचभारत पितापिसोमृतोगच्छत्सुमतेःपशुयोनितःस्वर्गंप्राप्तोमहाराजव्रतस्यास्यप्रभावतः कायिकंवाचिकंवापिमानसंयच्च दुष्कृतं तत्सर्वंविलयंयातिव्रतस्यास्यप्रभावतः अस्ययज्जायतेपुण्यंतच्छृणुष्वनृपोत्तम सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं सर्वदानेषुदत्तेषुतदेतद्व्रतधारणात् कुरुतेयाव्रतंनारीसाभवेत्सुखभागिनी रूपलावण्ययुक्ताचपुत्रपौत्रादिसंयुता इहलोकेसदैवस्यात्परत्रचपरांगतिं

एतत्तेकथितंराजन् व्रतानामुत्तमंव्रतं सर्वसंपत्प्रदंचैवनारीणांपापनाशनं धनंयशश्चस्वर्गश्चपुत्रानपिचभारत पठतांशृण्वतांवापिनारीणांपापनाशनम् ॥ ॥ इतिभविष्योत्तरेऋषिपंचमीव्रतकथा ॥ ॥

अथोद्यापनं युधिष्ठिरउवाच किमस्योद्यापनंप्रोक्तंव्रतपूर्णफलप्रदं सुमतिःकेनविधिनाचकारवदतत्त्वतः श्रीकृष्णउवाच पूर्वस्मिन्दिवसेकुर्य्यादेकभक्तंसमाहितः शुचौदेशेसमालिख्यसर्वतोभद्रमंडलं अव्रणंसजलंकुंभंताम्रंमृण्मयमेववा संस्थाप्यवस्त्रसंवीतंकंठदेशेसुशोभने पंचरत्नसमायुक्तंफलगंधाक्षतैर्युतं सहिरण्यंसमाछाद्यताम्रेणपत्रजेनवा वंशमृण्मयपात्रेणयवपूर्णेनचैवहि आछादयेच्चचैलेनलिखेदष्टदलंततः सौबर्णीःप्रतिमाःकार्य्याःऋषीणां भावितात्मनां पलेनवातदर्धेनतदर्धार्धेनवापुनः शक्त्यावाकारयेत्तत्रवित्तशाठ्यविवर्जितः वितानंपंचवर्णंचफलपुष्पसमन्वितं वध्नीयादुपरिश्रीमान्संविधायात्रवेदिकां मध्यान्हेपूजयेद्भक्त्याऋषीन्श्रद्धासमन्वितः कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः जमदग्निर्वसिष्ठश्चसाध्वीचैवाप्यरुंधती मंत्रस्नानेनराजेंद्रकृत्वापूजांसमाहितःरात्रौ जागरणंकुर्य्यात्पुराणश्रवणादिभिः कृतनित्यक्रियःप्रातर्जुहुयात्तिलसर्पिषा वैदिकोवापिपौराणोत्राधिकारान्मनुस्मृतात् अत्रवैदिकोमंत्रः सहस्तोमाःसहछंदसइति ॥ सप्तऋषयइतिवा अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतु वा पुनःपूजांततःकृत्वागुरुंसंपूजयेद्व्रती स्वर्णांगुलीयवासोभिः कुंडलामृतभोजनैः दद्यादेकांसवत्सांतुगुरवे गांपयस्विनीं पूजयेदृत्विजःसप्तवासोभिर्दक्षिणादिभिः कलशांश्चपवित्रांश्चदद्यात्तेभ्यःसुभक्तितः आचार्य्यंच सपत्नीकंप्रणिपत्यक्षमापयेत् लब्धानुज्ञोनुभुंजीतहृष्टैर्बंधुजनैर्वृतः उद्यापनविधिःप्रोक्तसर्वत्रायंफलार्थिनां एवंयः कुरुतेभूपउद्यापनविधिंपरं सर्वपापविनिर्मुक्तःस्वर्गलोकेमहीयते इहलोकेचिरंकालंभर्त्रासहशुचिस्मितापुत्रपौत्रैःपरिवृताभुक्त्वाभोगान्मनोरमान् निष्पापासुभगानित्यंलभतेचाक्षयांगतिम् ॥ इतिभविष्योत्तरेसोद्यापनऋ

षिपंचमीव्रतम् ॥ ॥ ॥ अथप्रयोगाः नद्यादौसमंत्रकंदंतधावनपूर्वकंस्नात्वा नित्यपूजांकृत्वा ॐमद्यम
मज्ञानतोऽ ज्ञानतोवारजस्वलावस्थायांकृतसंपर्कजातदुर्योनित्वदोषपरिहारार्थंशुभप्राप्त्यर्थंयथाशक्त्याचरितऋ
षिपंचमीव्रतपूजोद्यापनंकरिष्ये आचार्यवरणंविधाय सर्वतोभद्रेसप्तकलशेषुएकस्मिन्वा अरुंधतीसहि
ताःसप्तर्षिप्रतिमाःसंपूजयेत् सग्रहाःसर्वतोभद्रादिमंडलदेवताश्चग्रहयज्ञविधिना संपूज्य कश्यपोत्रिर्भर
द्वाजइतिमंत्रेणवैदिकमंत्रैर्वाऋषिपूजनंकार्य्यं पूजांते वायनंदद्यात् न्यूनातिरिक्तकर्माणिमयायानिकृतानिच
क्षमध्वंतानिसर्वाणियूयंसर्वेतपोधनाः ततःकथाश्रवणादिनारात्रिंनयेत् प्रातरग्निंप्रतिष्ठाप्यान्वादध्यात् अत्र
प्रधानं अरुंधतीसहितकश्यपादिऋषीन्पूजामंत्रेण तिलव्रीहियवसर्पिर्द्रव्यैःप्रतिद्रव्यमष्टोत्तरशतमष्टाविंशति
संख्याहुतिभिर्ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये शेषेणस्विष्टकृतमितिहोमंसमाप्यपुनःपूजांकृत्वा सपत्नीका
न्सप्तब्राह्मणान्संपूज्यतेभ्यः क्रमेणदक्षिणाप्रतिमायुतान् कलशान्दद्यात् तत्रमंत्रः प्रतिगृह्या द्विजश्रेष्ठाःप्रतिमादिस
मन्वितान् कलशान्ऋषिसंप्रीत्यैव्रतसंपूर्तिहेतवे यदेककुंभेप्रतिमापूजनतदासर्वप्रतिमायुतकलशमाचार्य्याय अ
न्येभ्यःपक्वान्नवस्त्रदक्षिणायुतान् दद्यात् ततःसप्तभ्यःसप्तगाः आचार्य्यायएकांगांदत्त्वाप्रार्थयेत् सप्तर्षिभ्यःशु
भाःश्रेष्ठाःसर्वेषांचफलप्रदाः सर्वपापंचमेघ्नंतुज्ञानतोऽज्ञानतः कृतं एतेसप्तर्षयः सर्वेभक्त्यासंपूजितामय। यथोक्तफल
दासंतुव्रतस्यफलदायकाइति ततआशिषोगृहीत्वा ब्राह्मणान्संतर्प्यस्वयंभुंजीत ॥ ॥ इतिऋषिपंचमीव्रतोद्या
पनम् ॥ ॥ ॥ ॥ भाद्रशुक्लषष्ठीसूर्य्यषष्ठी ॥ सासप्तमीयुतेतिदिवोदासः शुक्लेभाद्रपदेषष्ठ्यांस्नानंभास्कर
पूजनं प्राशनंपंचगव्यस्यचाश्वमेधकजंफलमितिवचनात् अत्रस्नानादिकृतमक्षय्यंभवति तदुक्तंभविष्योत्तरे येयंभाद्र
पदेमासिषष्ठीस्याद्भरतर्षभ इयंपापहरापुण्याशिवाशांताशुभानृप स्नानदानादिकंसर्वमस्या मक्षयमुच्यते योस्यां

पश्यतिगांगेयंदक्षिणापथवासिनं ब्रह्महत्यादिपापैस्तुमुच्यतेनात्रसंशयः ॥ इयमेवललिताषष्ठी ॥ तथाचोक्तं नारदीये ॥ भाद्रेमासिशुक्लषष्ठ्यांललिताव्रतमुच्यते प्रातः स्नात्वाविधानेननारीशुक्लांबरावृता शुक्लमाल्यधराचापिनद्योः संगमवालुकां गृहीत्वावंशपात्रेतुकृत्वापिंडाकृतिंचतां पंचधाललितांतत्रध्यायेद्वनविलासिनीं पंकजंकरवीरंचनैपालींमालिनींतथा नीलोत्पलंकेतकींचसंगृह्यतगरंतथा एकैकाष्टशतंग्राह्यंताभ्योदेवींप्रपूज्यच प्रार्थयेदग्रतःस्थित्वादेवींतांगिरिशप्रियां गंगाद्वारेकुशावर्तेविल्वकेनीलपर्वते स्नात्वाकनखलेतीर्थेहरंलब्धवतीपतिं ललितेसुभगेदेविसुखसौभाग्यदायिनी अनंतंदेहिसौभाग्यंमह्यंतुभ्यंनमोनमः मंत्रेणानेनकुसुमैश्चंपकस्यसुशोभनैः अभ्यर्च्यविधिवत्तस्यानैवेद्यंपुरतोन्यसेत् क्रमुकैरपिकूष्मांडैर्नारिकेलैश्चदाडिमैः वीजपूरैस्तुजंवीरैःकारवेल्लैःसुनिर्भरैः फलैस्तत्कालसंभूतैःकृत्वाशोभांतदग्रतः विरूढधान्यांकुरकैः सदीपावलिभिस्तथा सार्धसुगुणकैर्धूपैःसोहालिककरंजकैः गुडपुष्पैः कर्णवेष्टैः मोदकैरुपमोदकैः वहुप्रकारैर्नैवेद्यैर्यथाविभवमानता एवमभ्यर्च्यविधिवद्रात्रौजागरणोत्सवं गीतवाद्ययुतंनृत्यैः प्रेक्षणीयैरनेकशः सखीभिःसहितासाध्वीतांरात्रिंप्रयतानयेत् एवंजागरणंकृत्वासप्तम्यांसरितंनयेत् गंधपुष्पैरथाभ्यर्च्यगीतवाद्यपुरःसरं तच्चदद्याद्द्विजेंद्रायनैवेद्यादिद्विजोत्तम स्नात्वागृहसमागत्यहुत्वावैश्वानरंततःदेवान्पितॄंश्चसंतर्प्यपूजयित्वासुवासिनीः कन्यकाश्चैवसंभोज्याब्राह्मणादशपंचचभक्ष्यैर्भोज्यैर्वहुविधैर्दत्वादानान्यनेकशःललितामस्तुसुप्रीताइत्युक्त्वातांविसर्जयेत् यःकश्चिदाचरेदेतद्व्रतंसौभाग्यदंपरंनरोवायदिवानारीतस्यपुण्यफलंशृणु यद्व्रतैश्चतपोभिश्चदानैर्वानियमैरपि व्रतेनानेनलभ्येतकिंवहूक्तेननारद मृतेरनंतरंप्राप्यशिवलोकंसनातनं मोदतेललितादेव्यासहैवसाखिवाच्चिरम् ॥ इतिनारदीयेललिताषष्ठीव्रतम् ॥ अस्यामेवचंपाषष्ठीव्रतमुक्तंस्कांदे ॥ षष्ठीभाद्रपदेशुक्लावैधृतेनसमान्विता विशाखाभौमयोगेनचंपाषष्ठीतिवि

श्रुता रविवारेणाप्युक्ता रविवारेणसंयुक्तासाचंपेतीहकीर्तितातिमदनरत्ने देवासुरमनुष्याणादुर्लभापष्टिहायनी कृतेत्रेतायांपंच।शद्वायनीद्वापरेपुनः चत्वारिंशत्कलौत्रिंशद्वायनीसफलामता अत्ररम्येसूर्य्यपूजा ॥ द्वादशदलेनाममंत्रैः षष्ठ्यांकार्य्या अत्रनाममंत्राः आदित्यस्तपनः पूषाभानुमान्भानुरर्यमा विष्णुःशक्रोंशमान्देवःसहस्रांशुर्विनायकः सूरः सूर्य्यःखगइति पूजनीयः प्रयत्नतः अत्रादित्यः कर्णिकायांदलेषुशेषनामभिः पूजाकार्या ॥ स्कंदउवाच प्राप्तराज्यंचराजानंधर्मपुत्रंयुधिष्ठिरं कदाचिदागतोद्रष्टुंदुर्वासामुनिसत्तमः ततोराजातमभ्यर्च्यपाद्याद्यैरिदमब्रवीत् तद्व्रतंश्रोतुमिच्छामिकर्त्तुंचमुनिसत्तम दुर्वासाउवाच श्रृणुराजन्महाभागव्रतानामुत्तमंव्रतं अस्तीहयच्चीर्णमात्रंसर्वकामांस्तुपूरयेत् यदिलभ्येतजीवाद्विदैवेननृपसत्तम षष्ठी भाद्रपदेशुक्लावैधृतेनसमन्विता विशाखाभौमयोगेनसाचंपेतीहविश्रुता तस्मादियंचंपाषष्ठीद्विधाज्ञेयाएकावैधृतियोगवती भाद्रशुक्ला अपराविशाखाभौमयोगवत्येवषष्ठीचेति देवासुरमनुष्याणांदुर्लभाषष्टिहायिनी कृतेत्रेतायांपंचाशद्वायनीद्वापरेपुनः चत्वारिंशत्कलौत्रिंशद्वायनीदुर्लभाततः आदौकृतयुगेपूर्वंयाचीर्णाविश्वकर्मणा तत्फलाद्विश्वकर्तृत्वंप्राजापत्यमवाप्तवान् पृथुनाकार्त्तवीर्येणभुविनारायणेनच ईश्वरेणोमयासार्द्धमितरेतरलिप्सया यश्चैनांविधिवत्कुर्य्यात्सोनंतफलमश्नुते युधिष्ठिरउवाच तद्विधिंश्रोतुमिच्छामिविस्तराद्वदतोमुने केमंत्राः केचनियमाः साचकिंलक्षणाभवेत् दुर्वासाउवाच द्विदैवत्यर्क्षभौमेनवैधृतेनसमन्विता नभस्ययासिताषष्ठीसाचंपेतिनिगद्यते द्विदैवतर्क्षंविशाखा पंचम्यानियमंकुर्य्यादुपवासस्यचव्रती उपवासस्यांगभूतं नियममेकभक्तंकुर्य्यादित्यर्थः चंपाषष्ठीव्रतंकुर्य्यादित्यर्थः चंपाषष्ठीव्रतंकुर्य्याद्यथोक्तवचनाद्गुरोः ततःप्रभातेविमलेदंतधावनपूर्वकं कृत्वासम्यक्व्रतंतस्यसंकल्पंकुरुतेनरः कृत्वेतिसकलांगोपेतंव्रतं स्वसाध्य

त्वेनमनसिनिधायेत्यर्थः निराहारोद्यदेवेशत्वद्भक्तस्त्वत्परायणः पूजयिष्याम्यहंभक्त्याशरणंभवभास्कर संक
ल्पमंत्राः ततःस्नानंप्रकुर्वीतनद्यादौविमलेजले मृदमालभ्यमंत्रैश्चतिलैःशुक्लैश्चमंत्रवित् सावित्रःपरमस्त्वं
हिपरंधामजलेमम त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधा प्रार्थनामंत्रः आपस्त्वमसिदेवेशज्योतिषांपतिरेवच ॥
पापंनाशयमेदेववाङ्मनःकर्मभिःकृतं स्नानमंत्रः ततःसंतर्पयेद्देवानृषीन्पितृगणानपि ततश्चैत्यगृहंमौ
नीपाखंडालापवर्जितः स्थंडलंकारयेच्छुभ्रंचतुरस्रंसुशोभनं स्थापयेदव्रणंकुंभंपंचरत्नसमन्वितं रक्तवस्त्र
युगच्छन्नंरक्तचंदनचर्चितं तस्योपरिन्यसेत्पात्रंसौवर्णंताम्रमेवच कुंकुमेनलिखेत्पद्मंद्वादशारंसकर्णिकं तस्यो
परिन्यसेत्सूर्यंसौवर्णंसरथारुणं शक्त्यावावित्तसारेणवित्तशाठ्यविवर्जितः तमर्चयेद्गंधपुष्पैर्विधिमंत्रपुरःसरं
पंचामृतेनस्नपनंकुर्य्याद्देवस्यसंयुतः ततस्तुगंधतोयेनपरांपूजांसमाचरेत् गंधैर्नानाविधैर्दिव्यैः कर्पूरागुरु
कुंकुमैः फलैस्तदृतुसंभूतैः रनेकैश्चसुगंधिभिः मंडपंकारयेत्तत्रपुष्पमालाविभूषितं यथाशोभंप्रकुर्वीतअध
श्चोपरिसर्वतः ततस्तुपूजयेद्देवंभास्करंकमलोपरि आदित्यायनमः तपनायनमः पूष्णेनमः भानुमतेनमः
भानवेनमः अर्यष्णेनमः विश्वचक्रायनमः अंशुमतेनमः खनायकायनमः सुरायनमः सूर्य्यायनमः
खगायनमः एषुत्रयोदशसुनामसु आदित्यायनमइत्यनेनमध्येपूजनं इतरैर्द्वादशभिः पूर्वादिदलक्रमेण पू
जनं जन्मांतरसहस्रेणदुष्कृतंयन्मयाकृतं तत्सर्वंनाशमायातुदिवाकरतवार्चनात् प्रार्थनामंत्रः विनतातन
योदेवः कर्मसाक्षीतमोनुदः सप्ताश्वः सप्तरज्जुश्चअरुणोमे प्रसीदतु ॥ अरुणपूजामंत्रः ततःसंपूजयेद्देवम
च्युतंतुरथेस्थितं अष्टाक्षरेणमंत्रेणगंधपुष्पादिभिःक्रमात् अष्टाक्षरोघृणिरितिमंत्रः घृणिआदित्यायनमःकाला
त्मासर्वभूतात्मावेदात्मासर्वतोमुखः जन्ममृत्युजरारोगसंसारभयनाशन इत्यर्घ्यमंत्रः ॥ सूर्योदयेपठनीयः

ततः संपूजयेच्छुक्लांसवत्सांगांपयस्विनींसवस्त्रकंठाभरणांसुघंटाभिरलंकृतां ब्रह्मणोत्पादितादेविसर्वपापविनाशनिसंसारार्णवमग्नंमांगोमातस्त्रातुमर्हसि स्वरूपावहूरूपाश्चमातरोलोकमातरः गावोमामुपसर्पंतुसरितः सागरंयथा यालक्ष्मीः सर्वदेवानांयाचदेवीव्यवस्थिता धेनुरूपेणसादेवीममपापंव्यपोहतु यालक्ष्मीलोकपालानांयालक्ष्मीर्धनदस्यच चंद्रार्कशक्रशक्तिर्यासाधेनुर्वरदास्तुमे ॥ धेनुपूजामंत्रः ॥ तिलहोमंततःकुर्य्यात्सावित्र्याष्टोत्तरंशतं ततस्तांकल्पयेद्धेनुमर्कोमेप्रीयतामिति आचार्यायततोदद्यादादित्यंसरथारुणं सकुंभरत्नैर्वस्त्रैश्चसर्वोपकरणैः सह ददामिभानुंभवतांसर्वोपस्करसंयुतं मनोभिलषितावाप्तिंकरोतुममभास्करः दानमंत्रः गृह्णामिभास्कररवेभवंतंविश्वतोमुखं मनोभिलाषितावाप्तिमुभयोःकर्तुमर्हसि प्रतिग्रहमंत्रः सर्वतीर्थमयींधेनुंसर्वयज्ञमयींशुभां सर्वदानमयींदेवींब्राह्मणायददाम्यहं गोदानमंत्रः गृह्णामिसुरभिंदेवींसर्वयज्ञमयींशुभां उभौपुनीहिवरदेउभयोस्तारकाभव धेनुप्रतिग्रहमंत्रः ॥ ततस्तुभोजयेद्विप्रान्द्वादशैवस्वशक्तितः दद्याच्चदक्षिणांतेभ्यः प्रणिपत्यविसर्जयेत् आवैकल्यंव्रतेतस्यशंसेयुस्तेद्विजोत्तमाः अभिनंद्यतमाशीर्भिः परिरेभुरनिंदिताः ततस्तुस्वयमश्नीयाद्द्विजानांशेषमिष्टकं सहपुत्रैः कलत्रैश्चअन्यैर्बहुजनैर्वृतः एवंयःकुरुतेचंपा सोत्यंतफलमश्नुते प्रभूणांचप्रभुःप्रोक्त स्त्वंप्रभूणांचगोचरः सर्वैश्चैतद्व्रतकार्य्यंस्वशक्त्यादुःखभीरुभिः प्रभुःप्रथमकल्पस्ययानुकल्पेनवर्त्तते विफलंतस्यतत्स्यादनीशस्त्वनुकल्पकः पंचम्यांनियमंकुर्य्यादाचार्य्यवचनाद्व्रती षष्ठ्यांस्नानंप्रकुर्वीतसंतर्प्यपितृदेवताः अभ्येत्यस्वगृहंमौनी सूर्य्यंमनसिचिंतयेत् स्थापयेदव्रणंकुंभंमृत्पात्रंचतथोपरि तस्योपरिन्यसेत्सूर्य्यंपलेनैकेननिर्मितं सौवर्णंभक्तिसंयुक्तोवित्तसारंतथारुणं तमर्चयेज्जगन्नाथंगृहीत्वाज्ञांगुरोस्स्वयं षडक्षरेणमंत्रेणगंधपुष्पानुसंभवं ओंनमःसूर्य्यायेतिषडक्षर

मंत्रः संपूज्यविधिवद्देवंफलपुष्पादिकंचयत् सूर्यायवेदयेत्सर्वं सूर्योमेप्रीयतामिति ततः प्रभातेविमलेगत्वा गुरुगृहंव्रती सर्वोपकरणैःसूर्य माचार्यायनिवेदयेत् धान्यंपुष्पफलंवस्त्रंरत्नंधन्वादिकंचयत् गवांकोटिसहस्रेणकुरुक्षेत्रेर्कपर्वणि चंपादानस्यराजेंद्रकलांनार्हंतिषोडशीं सर्वतीर्थप्रदानानितथान्यान्यपिषोडश चंपयातुलितान्नाद्याश्चंपैकाव्यतिरिच्यते आदित्यस्तपनःपूषाभानुमान्भानुरर्यमा विश्वचक्रोंशुमान्देवः सहस्रांशुःखनायकः सूरः सूर्यः खगः पूज्यः पूर्वपत्रादेवइत्यंशुमतोविशेषणं ॥ पंचम्यामित्यादिनापुनर्व्रतविधिर्धनहीनविषयः इतिस्कंदपुराणोक्तंचंपाषष्ठीव्रतम् ॥

ब्रह्मांडपुराणे मल्लारिमाहात्म्ये मार्गेपीयंचंपाषष्ठ्युक्ता मार्गेभाद्रपदेशुक्लाषष्ठीवैधृतिसंयुता रविवारेणसंयुक्तासाचंपेतीहविश्रुता ॥ अथभाद्रशुक्लसप्तम्यामनंतसप्तमीव्रतं हेमाद्रौ विष्णुधर्मोत्तरे शुक्लपक्षेतुसप्तम्यांमासिभाद्रपदेनृप तत्रसूर्यंदिवापूज्यनक्तंभुंजीतवत्सरं मत्स्यपुराणेपि शुक्लपक्षेतुसप्तम्यांमासिभाद्रपदेच्युतं प्रणम्याशिरसानित्यंपूजयेत्सप्तवासरान् पुष्पधूपादिभिर्वीरकुतुपानांचतर्पणैः पाखंडादिभिरालापंवर्जयेत्प्रयतात्मना अत्रकुतपाब्राह्मणाउक्ताः विधायदक्षिणादत्वानक्तंभुंजीतवाग्यतः तिष्ठन्व्रजन्प्रस्थितश्चचक्षुःप्रस्खलनादिषु आदित्यनामस्मरणंकुर्वन्नुच्चारणंतथा अनेनैवविधानेनमासान्द्वादशवैक्रमात् उपोष्यपारणेपूर्णेसमभ्यर्च्यजगद्गुरुं पुण्येनश्रवणेनेहप्रीणयन्पुष्टिमच्युतां एवंयःपुरुषःकुर्यादादित्याराधनंशुचिः नारीवास्वयमभ्येत्यआनंत्यफलमश्नुते ॥ अस्यामेवभाद्रशुक्लसप्तम्याममुक्ताभरणसप्तमीव्रतम् ॥ ॥ ॥ तत्रपूजायांसप्तमीपूर्वविद्धाग्राह्याषण्मुन्योरितियुग्मवाक्यात् नारदीये ॥ भाद्रस्यशुक्लसप्तम्याममुक्ताभरणव्रतं सोमस्यतुमहेशस्यपूजनंचात्रकीर्त्तितं गंधादिभिःषोडशभिरुपचारैःस

मर्चयेत् ॥ प्रार्थ्यप्रणम्यविसृजेत् सर्वकामसमृद्धये ॥ अत्रकृत्यंभविष्योत्तरे ॥ भूमौलिखितोमासहिताशिवप्रतिमायामावाहनं एह्येहिभगवन्देवसर्वपापप्रणाशन तवपूजांकरिष्यामिसन्निधौभवशंकरेति भवानीशंकरावावाह्यषोडशोपचारैःसंपूज्य नमस्तेभूतनाथायनमस्तेशशिशेखर नमस्तेदक्षयज्ञघ्ननमस्तेकामनाशन नमस्तेपार्वतीदेव्यैचंडिकायैनमोनमःवरदायैनमस्तेस्तुभद्रकाल्यैनमोनमः इतिसंप्रार्थ्य ॥ शर्कराघृतमिश्रंतडुलपिष्टमुपहारंनिवेद्य एकादशतंतुयुतसूत्रमेकादशग्रंथिविशिष्टंवामहस्तेवध्वापूजांतेकथांशृणुयात् ॥ अथपूजाविधिः मासपक्षाद्युल्लिख्यसर्वपापक्षयपूर्वकंसर्वकामसमृद्ध्यर्थंउमासहितसोमशंकरपूजनव्रतमहंकरिष्ये ॥ भूमौलिखितभवानीशंकरप्रतिमायामावाहनादिसर्वोपचारपूजांकुर्यात् देवदेवमहेशानपरमात्मन्जगद्गुरो प्रतिपादितयासोमपूजयापूजयाम्यहं ॥ इत्यावाहनम् ॥ अनेकरत्नखचितंसौवर्णंमणिसंयुतं मुक्तान्वितंमहादेव गृहाणासनमुत्तमम् ॥ इत्यासनम् ॥ पाद्यंगृहाणदेवेशसर्वविद्यापरायण ध्यानगम्यसदाशंभोसर्वेश्वरनमोस्तुते ॥ इतिपाद्यम् ॥ इदमर्घ्यमनर्घ्यंत्वममराधीशशंकर किंकरीभूतसर्वेशमयादत्तंगृहाणवै इत्यर्घ्यं ॥ गंगादिसर्वतीर्थेभ्यःसमानीतंसुशीतलं जलमाचमनीयार्थंगृहाणसोमयासह ॥ इत्याचमनम् ॥ मध्वाज्यशर्कराभ्यश्चसुधयापरिकल्पितं शंकरप्रीतयेतोहंमधुपर्कंनिवेदये ॥ इतिमधुपर्कः ॥ आदौपंचामृतैःस्नानंपश्चाच्छुद्धेनवारिणा स्नानंकुरुमहादेवनिजयाकांतयासह ॥ इतिस्नानम् ॥ स्नानादूर्ध्वंमहादेवप्रीत्यापापप्रणाशन वस्त्रयुग्मंसमानीतंमद्दत्तंप्रतिगृह्यताम् ॥ इतिवस्त्रम् ॥ उपवीतंसोत्तरीयंनानाभरणभूषितं गृहाणसोमविमलमथाहृतमिदंशुभम् ॥ इतियज्ञोपवीतम् ॥ मलयाचलसंभूतंसुगंधिघनसारयुक् चंदनंपंचवदनगृहाणदयितायुत ॥ इतिगंधम् ॥ जातीचंपकपुन्नागबकुलैःपारिजातकैः शतपत्रैश्चकल्हारैरर्चयेहमुमा

पतिम् ॥ इतिपुष्पाणि ॥ त्रैलोक्यपावनानंतपरमात्मन्जगद्गुरो चंदनागुरुकर्पूरैर्धूपंदास्यामिशंकर ॥ इति धूपम् ॥ शुभवर्त्तियुतंसर्पिर्लोडितंवन्हिनायुतं दीपमेकमनेकार्कप्रतिमंकल्पयेत्विमम् इतिदीपम् पायसापूपकृशरंदुग्धान्नंसगुडोदनं दिव्यान्नंषड्रसोपेतं सुधारससमन्वितं समर्प्पयामिदेवेशकिंकरःशंकरायते नैवेद्यं पुनराचमनंशुद्धंकुरुसोमांबुनामुना मुखशुद्धिकरंपूर्णंकृपयात्वंगृहाणवै ॥ पुनराचमनम् ॥ कस्तूरिकासमायुक्तंमलयाचलसंभवं गृहाणचंदनंसोम करोद्वर्तनहेतवे ॥ इतिकरोद्वर्त्तनम् ॥ नारिकेलफलंजंबूफलंनारंगमुत्तमं कूष्मांडंपुरतोभक्त्याकल्पितंपरिगृह्यतामितिफलम् ॥ पूगीफलंमहादिव्यं० ॥ इतितांबूलम् ॥ हिरण्यगर्भगर्भस्थमितिदक्षिणा ॥ भक्त्यादीपावलिंदेव ॥ इतिनीराजनं ॥ अथपुष्पांजलिः ॥ यानिकानिचपापानि. ॥ इति प्रदक्षिणा महादेवमहाराजभक्तानांपापनाशन अस्माकंकुर्वतांपूजांसाधुवासाधुयोजितां ज्ञानतोज्ञानतो वापिभवतोविहितांचयां संपूर्णयत्तुविश्वेशोविमलांकोमलस्तुतिं पापोहंपापकर्माहमितिप्रार्थना देवदेवजगन्नाथसर्वसौभाग्यदायक गृहणीयंडोररूपंत्वांपुत्रपौत्रप्रवर्द्धनं ॥ इतिडोरकग्रहणम् ॥ सप्तसामोपगीतंत्वांधारयामिजगद्गुरो सूत्रग्रंथिस्थितंनित्यंधारयामिस्थिरोभव ॥ इतिडोरकोत्तारणम् ॥ ॥ ॥ अथयपनम् ॥ मंडकान्विष्टकान्वाथसघृतान्दक्षिणायुतान् एकादशमितान्सान्नान्ब्राह्मणायकुटुंबिने ॥ वेदशास्त्रप्रवीणायदद्यात्सोमस्यतुष्टये शंकरःप्रतिगृह्णातिशंकरोवैददातिच शंकरस्तारकोस्माकंशंकरायनमोनमः इतिवायनदानम् एवंतुपूजनंकुर्य्यात्सोमस्यसुखदस्यच सर्वान्कामानवाप्नोति पुत्रपौत्रैश्चमोदते ॥ इत्यमुक्ताभरणसप्तमीव्रतेसोमशिवपूजा ॥

अथकथा हेमाद्रौ भविष्योत्तरे श्रीकृष्णउवाच मुनींद्रोलोमशोनाममथुरायांगतःपुराअर्चितोवसुदेवेनदेवक्याचयुधिष्ठिर उपविष्टःकथाःपुण्याः कथयित्वामनोरमाः ततःकथयितुंभूयःकथामेतांप्रचक्रमे कंसेनतेहताःपुत्राजाताजाताः

पुनः पुनः मृतवत्सादेवकित्वंपुत्रदुःखेनदुःखिता यथाचंद्रमुखी।दीनाबभूवनहुषप्रिया पश्चाच्चीर्णव्रताचैवबभूवाक्ष
तवालका त्वमपिदेवकितथाभविष्यसिनसंशयः देवक्युवाच कासौचंद्रमुखीब्रह्मन्बभूवनहुषप्रिया। किंचीर्णंहि
व्रतंदिव्यंतयासंततिवर्द्धनं सपत्न्यादर्पशमनंसौभाग्यारोग्यवर्द्धनं लोमश उवाच अयोध्यायां।पुराराजानहुषो
नामविश्रुतः तस्यासीद्रूपसंपन्नादेवीचंद्रमुखीप्रिया तथातत्रैवनगरेविष्णुगुप्तोभवद्द्विजः आसीद्गुणवतीतस्यपत्नी
भद्रमुखीतथा तयोरासीदतिप्रीतिः स्पृहणीयापरस्परं अथतेदयितेसख्यौस्नानार्थंसरयूजले प्राप्तेप्राप्ताश्च त
त्रैवबाह्यावैनागरांगनाः ताःस्नात्वामंडलंचक्रुस्तन्मध्येऽव्यक्तरूपिणं लेखयित्वाशिवंसोममुमयासहशंकरं गंधपु
ष्पाक्षतैर्भक्त्यापूजयित्वायथाविधि प्रणम्यगंतुकामास्ताःपप्रच्छतुर्वरस्त्रियः ताऊचुःशंकरोस्माभिःपार्वत्यासहपूजि
तःबद्ध्वासूत्रमयंतंतुशिवस्यात्मानिवेदितः धारणीयमिदंतावद्यावत्प्राणविधारणं तासांतद्वचनंश्रुत्वासख्यौचमो
तदेवहि कृत्वातुसमयंतत्रबद्ध्वादोर्भ्यांतुडोरकं ततस्ताश्चगृहंजग्मुःस्वसखीभिःसमावृताः कालेनमहतातस्यास्त
द्व्रतंविस्मृतंशुभं।चंद्रमुख्याःप्रमत्तायाविस्मृतःसतुडोरकः भद्रमुख्यास्तथाभद्रेविस्मृतंसर्वमेवतत् मृताकैश्चिदहोरा
त्रैः साबभूवविहंगमी भद्राख्याकुक्कुटीजाताव्रतभंगाच्छुभानने संभूयभूयः समयंप्राग्व्रतंचक्रतुः सदा कालेनपंच
तांप्राप्तेसखीभावात्सहैवते अदैवमातृकेदेवजातिपिकुलसंयुते ब्राह्मणीब्राह्मणेजाताराज्ञीचंद्रमुखीपुरा नाम्नाभद्रमु
खीजाताभूषणानामसामता अग्निमीलस्यसादत्तापित्रातस्यपुरोधसा अतीववल्लभाचासीद्भूषणाभूषणप्रिया भू
षिताभूषणवरैरूपेणालंकृतास्वयं तस्यावभूवुरष्टौचपुत्राःसर्वगुणान्विताः मातृवद्रूपसंपन्नाःपितृवद्धर्मशीलि
नः सख्यौतेतेनतद्वच्च जातिजातिस्मरेकिल पुनर्निरंतराप्रीतिस्तयोरासीद्यथापुरा कालेवहुतिथेजाते
त्यक्तासात्यक्तयौवना मध्येवयसिराज्ञीचपुत्रमेकमजीजनत् ईश्वरीरोगिणंमूकंप्रज्ञाहीनंचविस्वरं तादृशो

पिमहाभागमृतोसौनववार्षिकः ततस्तांभूषणांद्रष्टुमीश्वरीपुत्रदुःखिनीं सखीभावादतिस्नेहात्पुत्रैःस्वैःपरिवारिता
॥ अमुक्ताभरणाभद्रास्वरूपेणैवभूषिता ॥ साहभद्राद्विजस्याभूद्भार्याभूषणनामिका पुरोहितस्यका
लेन कुक्कुटीवहुपुत्रिणी तांदृष्ट्वातदृशींभद्राप्रजज्वालेश्वरीरुषा ततोगृहंप्रेषयित्वाब्राह्मणींतीव्रमत्सरां चिं
तयामाससाशीघ्रंतस्याःपुत्रवधंप्रति निश्चित्यचेतसाक्रूराघातयामासतान्सुतान् हताहताश्चतेपुत्राःपुनर्जीवं
त्यनामयाः तदद्भुततरंदृष्ट्वासखीमाहूयभूषणां उपविश्यासनेश्रेष्ठेवहुमानपुरःसरं अपृच्छद्विस्मयाविष्टाराज्ञीसा
नृपवल्लभा ब्रूहितथ्यंमहाभागेकिंत्वयासुकृतंकृतं दानंव्रतंतपोवापिशुश्रूषण
मुपोषणं येनतेनिहताःपुत्राः ॥ पुनर्जीवंत्यनामयाः तथाहिवहुपुत्राचजीववत्साशुभानना अमु
क्ताभरणानित्यंभर्तुश्चेतसिवास्थिता अतीवशोभसेभद्रेविधुर्घर्मात्ययेयथा ॥ भूषणोवाच ॥ शृणुदेविप्रव
क्ष्यामिजन्मांतरविचेष्टितं किंततद्विस्मृतंसर्वंत्वयाध्यायांकृतंहियत् आवाभ्यांव्रतवैकल्पंप्रमत्ताभ्यांवगनने ये
नत्वंप्लवगीजाताजाताहंकुक्कुटीतथा तत्रापिव्रतवैकल्यंत्वयाचापल्यतःकृतं मयातुसर्वभावेनचेतस्याध्यायशंकरं
तिर्यग्योन्यनुसारेणमनोवृत्त्याहिनुष्ठितं एतद्विकारणंभद्रेनान्यत्किंचित्करोम्यहं ॥ लोमशउवाच ॥ इत्याक
र्ण्यचसंस्मृत्यपूर्वजन्मविचेष्टितं ईश्वरीचतयासार्द्धं पुनःसम्यक्चकारह व्रतस्यास्यप्रभावेणपुत्रपौत्रादिसंभवं
भुक्त्वाचसौख्यमतुलंभृताशिवपुरंगता तस्मात्त्वमपिकल्याणिव्रतमेतत्समाचर आरब्धेस्मिन्व्रतेदव्येजीव
पुत्राभविष्यसि ॥ देवक्युवाच ब्रह्मन्नाख्याहिमेसम्यग्व्रतमेतत्सुखप्रदं संतानवृद्धिकरणंशिवलोकस्थिति
प्रदं भद्रेभाद्रपदेमासिसप्तम्यांसलिलाशये स्नात्वाशिवंमंडलकेलेखयित्वासहांबिकं तत्रसंपूज्यसमयंकु
र्याद्ध्वाकरेगुणं यावज्जीवंमयात्वातुशिवस्यविनिवेदितः इत्येवंसमयंकृत्वाततः अष्टतेडोरकं सौवर्णंरा

जतंवापिसौत्रंवाधारयेत्करे मांडकान्वाष्टकोन्दद्यान्मासपेक्षथवाद्विज स्वयंताश्चैवभोक्तव्याव्रतभंगमयाच्छुभे प्रतिमासंतुसप्तम्यांशुक्लपक्षेविशेषतः कुर्य्यादेवंव्रतभद्रे वर्षांते पिचदेवकि कारितामुद्रिताव्रीह्यैहैंमीरूप्या स्वशक्तितः ताम्रपात्रेपरिस्थाप्यब्राह्मणेभ्योनिवेदयेत् आचार्यायविशेषेणसौवर्णंह्यंगुलीयकं पुष्पकुंकुमसंयुक्तंताबूलांजनसूत्रकैः एवंतत्पारयित्वातुव्रतंसंतातिवर्द्धनं सर्वपापविनिर्मुक्ताभुक्त्वासौख्यमनामयं संतानंवर्द्धयित्वाचशिवलोकेमहीयते एतत्तेसर्वमाख्यानमाख्यातंव्रतमुत्तमं कुरुदेवकियत्नेनजीवपुत्राभविष्यति श्रीकृष्णउवाच ॥ इत्युक्त्वातुमुनिश्रेष्टस्तत्रैवांतरधीयत चकारसर्वंयत्नेनयदुक्तंतेनधीमता व्रतस्यास्यप्रभावेणदेवकीमामजीजनत् तस्मात्पार्थनरैःकार्य्यं स्त्रीभिःकार्य्यंविशेषतः व्रतंपापप्रशमनंसुखसंतातिवर्द्धनं एवंयः शृणुयाद्भक्त्यायश्चैतत्प्रतिपादयेत् व्रतमाख्यानसहितंनहिपापैःप्रमुच्यते साख्यानकंव्रतमिदंसुतसौख्यकामायास्त्रीकरिष्यातिशिवंहृदयेनिधाय दुःखंविहायवहुशः कृतकल्मषौघान्सास्त्रीव्रताद्भवतिशोभनजीववत्सा इतिहेमाद्रौभविष्योत्तरे ॥ अमुक्ताभरणसप्तमीव्रतं अस्यविधिः हेमाद्रौ नद्यादौजलाशयेस्नात्वा गृहमागत्यगोमयादिलिप्तशुद्धदेशेमंडलंविधाय तदुपरिचंदनादिनाउमयासहितं शिवंलिखित्वोक्तविधिनापूजयेत् देशकालौसंकीर्त्त्यममाखिलपापक्षयपूर्वकपुत्रपौत्रधनधान्यसौख्यातिशयद्वाराश्रीसांबसदाशिवप्रीत्यर्थममुक्ताभरणसप्तमीव्रतंकरिष्य इतिसंकल्प्यपूर्वोक्तप्रकारेणपूजांसमाप्यप्रार्थयेत् महादेवमहाराजप्रीत्यापापप्रणाशन अस्माकंकुर्वतांपूजांसाधुबाऽसाधुयोजितां ज्ञानतोज्ञानतोवापिभावतोविहितांचयां संपूर्णयतुविश्वेशोविमलांकोमलस्तुतिं ततोदेवस्यपुरतः यावज्जीवंमयात्मातुशिवस्यविनिवेदितः इत्येवंसंकल्पंकुर्यात् सौवर्णंराजतंसौत्रंवाडोरकंदेवाग्रेतत्संपूज्यानेनमंत्रेणगृह्णीयात् देवदेवजगन्नाथसर्वसौभाग्यदायक गृह्णीयां

डोररूपंत्वांपुत्रपौत्रविवर्द्धनं ततोहस्तेवंधनमंत्रः सप्तसामोपगीतंत्वांधारयामिजगत्पते सूत्रग्रंथिस्थितं नित्यंधारयामिस्थिरोभवेतिमंत्रेणहस्तेवध्वा ततः दहसर्वाणिपापानिकृपांकुरुदयानिधे प्रसन्नः सन्नुमाकान्ते दीर्घायुःपुत्रदोभवेतिजीर्णडोरकोत्तारणंकृत्वा सौवर्णंराजतंपुत्रायशिष्यायब्राह्मणन्वादद्यात् स्त्रियाचदुहितृस्नुषादिभ्योरयंसौत्रस्यवेलविसर्जनीय मितिसदाचारः ततोब्राह्मणेभ्यएकादशशतसंख्याकान्मोदकान्वेष्टकान्वाघृतदक्षिणायुतान् वायनंदद्यात् स्वयंबंधुभिः सहभुंजीत प्रतिमासंशुक्लसप्तम्यामेवं तद्व्रतंकार्यं वर्षांतेहैमींराजतींवामुद्रिकांताम्रपात्रोपरिस्थाप्यब्राह्मणेभ्योयथाशक्तिदद्यात् आचार्यायविशेषेणसौवर्णमंगुलीयकं पुष्पकुंकुमतांबूलांजनसूत्रयुतंसदक्षिणंचदद्यात् ब्राह्मणान्भोजयित्वास्वयंभुंजीत संतानवृद्धिंलब्ध्वाशिवलोकेमहीयते इत्यमुक्ताभरणसप्तमीव्रतं नारदीये शुक्लाष्टम्यांनभस्यस्यकुर्याद्राधाव्रतंनरः पूर्ववद्राधिकांदेवींकलशस्थांप्रपूजयेत् मध्याह्नेपूजयित्वैनामेकभक्तंसमाचरेत् शक्तोभक्तश्चोपवासंपरेह्निविधिनाततः सुवासिनीर्भोजयित्वागुरवेप्रतिमार्पणं कृत्वास्वयंचभुंजीतव्रतमेतत्समापयेत् व्रतेनानेनदेवर्षेकृतेनविधिनाव्रती रहस्यंगोष्ठजंलब्ध्वाराधापरिकरेवसेत्

अथकथाप्रारंभः ॥ शौनकउवाच कथयस्वमहाप्राज्ञ गोलोकंयातिकर्म्मणा सुमतेदुस्तरात्केनजनःसंसारसागरात् राधायायाष्टमीसूततस्यमाहात्म्यमुत्तमं सूतउवाच ब्रह्माणंनारदःपृष्टः पुराचैतन्महामुनेतच्छृणुष्वसमासेनऊचिवांस्तत्प्रतिद्विज नारदउवाच पितामहमहाप्राज्ञसर्वशास्त्रविदांवर राधाजन्माष्टमीतातकथयस्वममाग्रतः तस्याःपुण्यंफलंकिंवा कृतंकेनपुराविभो अकुर्वतांजनानांहिकिल्विषंकिंभवेद्द्विजकेनवैतुविधानेनकर्तव्यंतद्व्रतंकदा। कस्माज्जाताचसाराधातन्मेकथयमूलतः ब्रह्मोवाच राधाजन्माष्टमींवत्सशृणुष्वसुसमाहितः कथयामिसमासेनसम

यद्धरिणोदितंकन्यादानसहस्रेणयत्पुण्यंप्राप्यतेजनैः गंगादिषुचतीर्थेषुस्नात्वायत्फलमाप्यतेसकृद्राधाष्टमींकृत्वा
तस्माच्छतगुणंलभेत् कृष्णप्राणप्रियाष्टम्याःफलंप्राप्नोतिमानवः एतद्व्रतंतुयःपार्थःश्रद्धयाऽश्रद्धयापिवा क
रोतिविष्णुसदनंगच्छेत्कोटिकुलैर्द्विजःपुराकृतयुगेवत्सवरनारीसुशोभना सुमध्याहरिणीनेत्राशुभांगाचारुहासिनी
सुकेशीचारुकेशीचनाम्नालीलावतीस्मृता तयाबहूनिपापानिकृतानिसुदृढानिचसैकदासाधनाकांक्षीनिसृत्यपुरतः
स्वतःगतान्यनगरंतत्रदृष्ट्वाचैवजनान्बहून् राधाष्टमीव्रतपरान् सुंदरेदेवतालये गंधपुष्पैर्धूपदीपैर्वस्त्रैर्नानाविधैःफ
लैःभक्तिभावैःपूजयंतोराधायामूर्त्तिमुत्तमाम् केचिद्गायंतिनृत्यंतिपठंतिस्तवमुत्तमं तालवेणुमृदंगांश्चवादयंतिचकेमु
दा जनांस्तथाविधान्दृष्ट्वाकौतूहलसमन्विता स्तस्यास्तुवचनंश्रुत्वापरकार्य्यहितेरताःआरेभिरेतदावक्तुंवैष्णवाव्र
ततत्पराःराधाव्रतिनऊचुःभाद्रेमासिसिताष्टम्यांजाताश्रीराधिकायतः अष्टमासाद्यसंप्राप्तांतांकुर्वामप्रयत्नतःगोदा
नजनितंपापंस्तेयजंब्रह्मघातकं परस्त्रीहरणंचैवतथाचगुरुतल्पगं विश्वासघातजंचैवस्त्रीहत्याजनितंतथाएतानिना
शयत्याशुकृताराधाष्टमीनृणां तेषांतुवचनंश्रुत्वासर्वपातकनाशनं करिष्याम्यहमित्येवपरामृश्यपुनःपुनः तत्रैवव्र
तिभिः सार्द्धंकृत्वासाव्रतमुत्तमं दैवात्सापंचतांयातासर्पघातेननिर्मलाः ततोयमाज्ञयादूताः पाशमुद्गरपाणयःआग
तास्तांसमानेतुंववंधूरज्जुभिस्तदा यदानेतुंमनश्चक्रुर्यमस्यसदनंप्रतितदागताविष्णुदूताशंखचक्रगदाधराः हिरण्
मयंविमानंचराजहंसयुतंशुभं पाशस्यछेदनंकृत्वाचक्रेणातित्वरान्विताःरथेचारोपयामासुस्तांनारींगतकिल्बिषां
न्युर्विष्णुपुंतेचगोलोकाख्यंमनोहरं कृष्णेनराधयास्तत्रस्थिताव्रतप्रसादतः राधाष्टमीव्रतंतातयोनकुर्याच्चमूढ
धीः नरकान्निष्कृतिर्नास्तिकोटिकल्पशतैरपि स्त्रियश्चयानकुर्वीतव्रतमेतच्छुभप्रदं राधाविष्णोःप्रीतिकरंस
र्वपापप्रणाशनं अंतेयमपुरींगत्वापतंतिनरकेचिरं ॥ कदाचिज्जन्मचासाद्यपृथिव्यांविधवाध्रुवं एकदापृथिवी

वत्सदुष्टसंघैश्चताडिताः गौर्भूत्वाचभृशंदीनाचाययौसाममांतिकं निवेदित।नेनोदुःखंरुदतीचपुनः पुनः तद्वाक्यंचसमाकर्ण्यगतोहंविष्णुसंनिधिं कृष्णेनिवेदितेचाशुपृथिव्यादुःखसंचयं तेनोक्तंगच्छभो।ब्रह्मन्देवैःसार्द्धंचभूतले अहंतत्रापिगच्छामिपश्चान्ममगणैः सह तच्छ्रुत्वाहसितोहंवैआगतःपृथिवीतलं ततः कृष्णंसमाहूयराधाप्राणगरीयसी उवाचवचनंदेवी गच्छेहंपृथिवीतले पृथिवीभारनाशायगच्छामिमर्त्यमंडलं। इतिश्रुत्वापिसाराधाप्यागतापृथिवींततः भाद्रमासिसितपक्षेअष्टमीसंज्ञिकेतिथौ वृषभानोर्यज्ञभूमेर्जातासाराधिकादिवायज्ञार्थंगोपनार्थंश्चचक्रुस्तांदिव्यरूपिणीं राजानंदमनाभूत्वातांप्राप्यानिजमंदिरं दत्तवान्महिर्षीनि।त्वासाचतांपरिपालयन् इतितेकथितंवत्सत्वयापृष्टंचयद्वचः गोपनीयंगोपनीयंगोपनीयंप्रयत्नतः सूतउवाच यइदंशृणुयाद्भक्तयाचतुर्वर्गफलप्रदं सर्वपापविनिर्मुक्तोप्यंतेयातिहरेर्गृहम् इतिश्रीपाद्मेब्रह्मखंडेव्रतकथाइयमेवज्येष्ठानक्षत्रयोगेज्येष्ठाष्टमीतथाच नारदीये यदाज्येष्ठार्क्षसंयुक्ताभवेज्येष्ठाष्टमीद्विज ज्येष्ठानाम्नीतिसाज्ञेया।पूजितापापनाशिनी अथैतांतुसमारभ्यव्रतंषोडशवासरं महालक्ष्म्याः समुद्दिष्टंसर्वसंपद्विवर्धनं करिष्येहंमहालक्ष्मिव्रतंतेत्वत्परायणः तदविघ्नेनमेयायात्समाप्तिंत्वत्प्रसादतः तदविघ्नेनमेयायात्डोरकंदक्षिणेकरे षोडशग्रंथिसहितंगुणैः षोडशभिर्युतं ततोन्वहंमहालक्ष्मींगंधाद्यैरर्चयेद्व्रती यावत्कृष्णाष्टमींतत्तुचरेदुद्यापनंबुधः अथज्येष्ठापूजा लिंगपुराणे कन्यास्थार्काष्टमीयातुज्येष्ठर्क्षेमहतीस्मृता अलक्ष्मीपरिहारायज्येष्ठांतत्रप्रपूजयेत् अत्रकन्यास्थार्कयोगेनप्राशस्त्यमात्रं मासस्तुभाद्रपदश्चांद्रएव कालादर्शेपि भाद्रशुक्लाष्टमीज्येष्ठानक्षत्रेणसमन्विता महतीकीर्तितातस्यांज्येष्ठांदेवींप्रपूजयेत् यत्तुज्येष्ठानक्षत्रापेक्षंव्रतं तत्तिथिव्रताद्भिन्नं तच्चस्यांतिथौज्येष्ठानक्षत्रेतस्यांति

थौकार्य्यं तदुक्तंमाधवीयेस्कांदे मासिभाद्रपदेशुक्लेपक्षेज्येष्ठर्क्षसंयुतं यस्मिन्कस्मिन्दिनेकुर्य्याज्ज्येष्ठायाः परिपूजनमिति अष्टम्यांखंडत्वेज्येष्ठायोगवशेनपूर्वापरावाग्राह्या दिनद्वयेयोगेतदभावेवापरा पूर्वेह्निसन्नियोगे पूर्वैव नवम्यासहिताकार्य्यासाष्टमीनात्रसंशयः मासिभाद्रपदेशुक्लेपक्षेज्येष्ठर्क्षसंयुते रात्रिर्यस्मिन्दिनेतत्र ज्येष्ठायाःपरिपूजनमिति तत्रैवोक्तेः अस्यापवादः यस्मिन्दिनेभवेज्ज्येष्ठामध्यान्हादूर्ध्वमप्यणु तस्मिन्नन्हिचपूजाचन्यूनाचेत्पूर्ववासरइतिज्येष्ठानक्षत्रेतस्यखंडत्वेऽ ष्टमीभानुवारयुगन्यतरयुग्वाज्येष्ठानक्षत्रंग्राह्यं तत्राष्टम्यांभानुवारोयदाज्येष्ठर्क्षेभबवा लोलज्येष्ठेतिसाप्रोक्तादुर्लभाबहुकालिकेतिस्कंदात् अन्यतरयोगस्याप्यभावेमध्यान्हादूर्ध्वमनुवर्तमानंग्राह्यं पूर्वोक्तस्कांदात् तथा मैत्रेणावाहयेद्देवींज्येष्ठायांतुप्रपूजयेत् मूलेविसर्ज्जयेद्देवींत्रिदिनंव्रतमुत्तममितिविशाखायोगेसतिज्येष्ठानुमंत्रणमनुराधायां तद्योगरहितायांकार्य्यं असंभवेपादमात्रंहित्वास्थापयेदितिनिर्णयोद्धारेउक्तं अत्रभद्रादिवर्ज्जयित्वाज्येष्ठांनिमंत्रयेत् अपरिहारयोगेतुभद्रामुखमात्रंत्यजेत् संपूर्णावैधृतिश्चेत्तदाघटिकाः षोडशद्वादशवात्यक्त्वामंत्रयेत् इदंव्रतंमहाराष्ट्रेषुप्रसिद्धं निर्णयसिंधौ इदंव्रतंकेवलतिथौकेवलनक्षत्रेचोक्तं मात्स्ये प्रत्याब्दिकतिथावुक्तंयज्ज्येष्ठादैवतंव्रतं प्रतिज्येष्ठाव्रतंयच्चविहितंकेवलोडुनि तिथावेवाचेरदाद्यद्वितीयंकेवलोडुनि दाक्षिणात्यास्तुऋक्षएवकुर्वंति अतएवमदनरत्नेभविष्येउक्तं मासिभाद्रपदेशुक्लेपक्षेज्येष्ठायदाभवेत् रात्रौजागरणंकुर्य्यादेभिर्मंत्रैश्चपूजयेत् पूजामंत्रोभविष्ये पुत्रदारसमृद्ध्यर्थंलक्ष्म्याश्चैवविवृद्धये अलक्ष्म्याश्चविनाशायज्येष्ठेत्वांपूजयाम्यहमितिमंत्रेणषोडशोपचारैः पूजयेत् ततोनमस्कारमंत्रः ज्येष्ठायैतेनमस्तुभ्यंश्रेष्ठायैतेनमोनमः शर्वाण्यैतेनमस्तुभ्यंशांकर्यैतेनमोनमः अथकथारूपेपूजाविधानं भविष्योत्तरे युधिष्ठिरउवाच ऋतुवंध्यातुयानारीकाकवंध्यातथापरा मृतप्रजातृतीयाचयोनिदोषैश्चदूषिता निर्धना

श्चजनायेचदारिद्र्येमहतिस्थिताः कर्मणाकेनमुच्यंतेतन्मेब्रूहिजनार्दन कृष्णउवाच मासिभाद्रपदेशुक्ले पक्षेज्येष्ठायदाभवेत् रात्रौजागरणंकुर्य्याद्गीतवादित्रनिःस्वनैः एवंविधिविधानेनएभिर्मंत्रैश्चपूजयेत् एह्येहित्वंमहाभागेसुरासुरनमस्कृते ज्येष्ठेत्वंसर्वदेवानांमत्समीपगताभव ॥ आवाहनं ॥ श्वेतसिंहासनस्थात्वंश्वेतवस्त्रैरलंकृता वरदंपुस्तकंपाशंविभ्रत्यैतेनमोनमः आसनम् ॥ ज्येष्ठश्रेष्ठेतपोनिष्ठेब्राह्मिष्ठेब्रह्मवादिनि क्षीराब्धौतुसमुद्भूतेअर्घ्यंज्येष्ठनमोस्तुते ॥ अर्घ्यम् शार्ङ्गंवाणाश्चखड्गंचप्रासतोमरदर्पणौः अन्यैरप्यायुधैर्युक्तांज्येष्ठेत्वामर्चयाम्यहं सुरसुरनरैर्विद्यायक्षकिन्नरपूजिता पूजितासिमयादेविज्येष्ठेत्वामर्चयाम्यहं विप्रप्रियेमहाभागेसुरासुरसुपूजिते स्थूलसूक्ष्ममयेदेविज्येष्ठेत्वामर्चयाम्यहं एभिर्मंत्रैः सर्वोपचारपूजा त्वंलक्ष्मीस्त्वमुमादेवीत्वंज्येष्ठेसर्वदामरैःपूजितासिमयादेविवरदाभवमेसदा इतिप्रार्थनामंत्रः पुत्रदारविवृद्ध्यर्थंलक्ष्म्याश्चैवद्विजोत्तमं गुरुंसंपूजयेद्भक्त्यावस्त्रैराभरणादिभिः द्वादशैवतुवर्षाणिपूजनीयाप्रयत्नतः यावज्जन्मतथापूज्याविधिनानेनमानवैः ददातिवित्तपुत्रांश्चपूजनीयासदास्त्रियः अनेनविधिनायुक्तोयोहिपूजयतेनरः नारीवापूजयत्येनांतस्यलक्ष्मीर्विवर्धते वंध्यातुलभतेपुत्रान्दुर्भगासुभगाभवेत् मृतवत्साजीवपुत्राकाकवंध्याप्रजावती दुःखितोहिनरःकश्चित्सर्वदाससुखीभवेत् एवंविधविधानेनज्येष्ठांयस्त्वर्चयेत्सदा विघ्नास्तस्यप्रणश्यंतियथाप्सुलवणंतथा यथाप्राप्यंकुरुश्रेष्ठज्येष्ठायाःशोभनंव्रतं निराजनीकृतेपश्चाद्दीपोग्राह्यःसुभक्तितः नैवेद्यसहितप्राणाहुतिंत्वग्रेयुधिष्ठिर गुरुहस्तात्सदाग्राह्योदीपःप्रज्वलितोमहान् व्रतस्थोभक्तियुक्तस्तुशुचिःप्रयतमानसः अनेनविधिनाचैवव्रतंग्राह्यंयुधिष्ठिर ज्येष्ठानामपरादेवीभुक्तिमुक्तिफलप्रदा यस्तुपूजयतेराजन्तस्मैस्वर्गंप्रयच्छति तत्रैवस्कांदे मासिभाद्रपदेपक्षेशुक्लेज्येष्ठर्क्षसंयुते यस्मिन्कस्मिन्दिने कुर्य्याज्येष्ठायाःपरिपूजनं तत्राष्टम्यांयदावारोभानोर्ज्येष्ठर्क्षमेवच नीलज्येष्ठेतिसाप्रोक्तादुर्लभाबहुकालिकी कृतःस्नानो

नरःकुर्य्यात्तस्यामन्यत्रवादिने भक्तियुक्तःशुचिःकुर्य्यांज्येष्ठादेव्यास्तुपूजनं नद्याःपूर्वंसुराहृत्यसिकताःशुद्धदेशजाःदेवीरूपंतुतत्रैवकृत्वातुब्राह्मणैःसह मंडलेतांतुसंस्थाप्यदेवींहेममयींततः स्थापयेद्राजतींताम्रींलिख्यांवापटकुडययोः आवाहयेत्ततोदेवीमथवापुस्तकेपिवा त्रिलोचनांशुक्लदंतींराजजींविभ्रतींतनुं त्रिवस्त्रांरक्तनयनांज्येष्ठामावाहयाम्यहं मितिमंत्रेणतांदेवीमावाह्यसुकृतव्रती स्नानंदद्यात्तथापाद्यंपादयोर्द्विजपुंगवः श्रीखंडकर्पूरयुतंदद्यादर्घ्यंतथार्चनं भक्त्यामयाप्रयत्नेनयदन्नंदीयतेतवतद्गृहाणसुरेशानिज्येष्ठेश्रेष्ठेनमोनमः इत्युच्चार्घ्यंसुवर्णादिपात्रेणांजलिनापिवा अर्घ्यंदत्वास्मरेद्देवींगंधपुष्पैस्तथार्चयेत् गोधूमयवशाल्यादितद्द्रव्यैस्तुपारयेत् ततःप्रसृतमात्रैस्तुपूरिकादीनिसर्पिषानिवेदयेच्चतैरेवदद्याद्देव्यैप्रयत्नतः ततस्तुत्वामहादेवींसर्वकामफलप्रदां ज्येष्ठायैतेनमस्तुभ्यंश्रेष्ठायैतेनमोनमःज्येष्ठेश्रेष्ठतपोनिष्ठेब्रह्मिष्ठेसत्यवादिनि गृह्याहित्वंमहामायेअर्घ्यंगृह्णनमोस्तुते अर्घ्यंस्तुत्योक्त्यास्तोत्रसंपत्यागीतानिपुरतस्ततःसौवीरैश्चैवसंयुक्तोदद्याच्छास्त्रेभ्यएवच सुवासिनीभ्यःशक्त्यातुदद्याद्वस्त्रंकृतव्रती तत्रदेवीमनुज्ञाप्यततोभुंजीतवाग्यतः भक्षयित्वातदाचम्यदेवींनत्वापुनःपुनः शयीतब्रह्मचर्य्येणकुर्य्यात्प्रातर्विसर्जनं एवमेवप्रकुर्य्याद्दैव्रतंतुप्रतिवत्सरं विसर्जनांतेतुतज्ज्ञःसिकतावारिणिक्षिपेत् अपूपवटकान्दद्याद्ब्राह्मणेभ्यस्ततोद्विजः कुर्य्यादेवंप्रयत्नेनसायंप्रातर्विसर्जयेत् विद्यार्थीप्राप्नुयाद्विद्यांस्त्रीकामःस्त्रियमाप्नुयात् शिवस्मरणकारीतुदेव्यैदद्यादसौ।श्रियै सौवर्णराजतंताम्रंकृतकृत्योभवेत्तदा व्रतंस्यचकृतयाकृतार्हणः देव्यामहत्वंकथितंतदेवंविधिश्चयत्रार्चनसंयुतस्तथामंत्रोपिसायुज्यकरोव्रतस्यतस्मान्मयातेकथितंसदैवं ॐअथोद्यापनं ओमद्यममालक्ष्मीपरिहारपूर्वकधनधान्यपुत्रसौभाग्यादिवृद्धयेज्येष्ठाव्रतोद्यापनंकरिष्ये सौवर्णींज्येष्ठाप्रतिमांसर्वतोभद्रस्थकलशोपरिसंस्थाप्यमंडलदेवतासहितांतस्याःपूजांकृत्वात्रिलोचनांशुक्लदंतामितिध्यात्वा त्रिवस्त्रांरक्तनयनामित्यावाह्य ज्येष्ठेश्रेष्ठतपोनिष्ठेत्यर्घ्यं

दत्त्वातामग्निवर्णां आपोहिष्ठेतितिसृभिः हिरण्यवर्णामित्यादिभिःसंपूज्य यस्याःसिंहोरथेयुक्तोव्याघ्रश्चापिमहाबलः ज्येष्ठामहामिमांदेवींप्रपद्येशरणंविभुं ततःप्रार्थना ज्येष्ठांतर्पयामि श्रेष्ठांतर्पयामि विद्यांतर्पयामि वैनायिकींतर्पयामितापिनींतर्पयामि श्रीकृष्णांतर्पयामिनमः ततःअष्टवटुकानांवायनंदद्यात् रात्रौजागरणंकुर्य्यात् प्रातःपुनःसंपूज्याग्निंप्रतिष्ठाप्य अन्वादध्यात् ततोहोमंकुर्य्यात् तत्रप्रधानं गौरींतामाग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलैर्जुष्टां दुर्गांदेवींशरणमहंप्रपद्ये इतिमंत्रेण ॥ दधिमधुक्षीरघृतैःप्रत्येकमष्टोत्तरशतसंख्याहुतिभिः मंडलदेवताश्चैकैकयाआज्याहुत्यायवादिचरुहोमेनयक्षे एवंहोमसंपाद्य आर्यायपीठंप्रतिमावस्त्रगोदानादिदत्त्वा सुवासिनीर्ब्राह्मणाश्चसंपूज्याःसिकतादिकं नद्यांत्यजेत् एवंद्वादशपर्यंतंआजन्मपर्यंतंवाज्येष्ठाव्रतं अत्रपूजा स्नानमाचमनंचैवमधुपर्कोपवीतकं गंधपुष्पंतथाधूपंदीपंनैवेद्यमेवच पुनराचमनंचैवकारयित्वा विसर्जयेत् ॐज्येष्ठायैनमः ॐसत्यायैनमः ॐकलियायैनमः ॐविद्यायैनमः ॐविनायकायैनमः ॐताप्यैनमः ॐश्रियैनमः ॐश्रीकृष्णायैनमः एभिरष्टभिर्नामभिस्तर्पणंहोमंचकुर्य्यात् हविष्यंस्वयमश्नीयाद्ब्राह्मणांस्तेनभोजयेत्अनेनविधिनायस्तुब्राह्मणानांचतुष्टयं व्रतांतेप्रतिमांकुर्य्यात्सौवर्णींफलसंमितां कृष्णवस्त्रेणसंयुक्तामाचार्य्यायनिवेदयेत् वस्त्राभरणमाल्यादिलेपनैःपूजितंद्विजं प्रणिपत्यततःपश्चात्तस्मैसर्वंनिवेदयेत् ब्राह्मणानुक्तवंतस्तेप्रकुर्य्याःस्वस्तिवाचनं एवंकृतेव्रतैःसम्यक्सर्वशांतिःप्रजायते धनधान्यसमृद्ध्यर्थंआरोग्यंचप्रजायते इतिज्येष्ठाव्रतम् ॥ ॥ ॥ अत्रैवदूर्वाष्टमीव्रतम् ॥ नारदीये ॥ दूर्वाष्टमीव्रतंचात्रकथितंतत्रमेशृणु शुचौदेशेप्रजातायांदूर्वायांद्विजसत्तम स्थाप्यलिंगंततोगंधैःपुष्पैर्धूपैश्चदीपकैः नैवेद्यैरर्चयेद्भक्त्यादध्यक्षतफलादिभिः अर्घ्यंप्रदद्यात्पूजातेमंत्राभ्यांसुसमाहितइति इदंचपूर्वविद्धायामष्टम्यांकार्य्यंश्राव

णीदुर्गानवमीदूर्वाचैवहुताशनी पूर्वविद्धातुकर्तव्याःशिवरात्रिर्बलेर्दिनमितिवृहद्यमवचनात् शुद्धाष्टमीतिथिर्यातुमासिभाद्रपदेभवेत् दूर्वाष्टमीतुसाज्ञेयानोत्तरासाविधीयते इतिहेमाद्रौमदनरत्नधृतपुराणसमुच्चयवचनाच्च मुहूर्त्तैरौहिणेष्टम्यांपूर्वावायदिवापरा दूर्वाष्टमीतुसाकार्य्याज्येष्ठांमूलंचवर्जयेदितिपरेत्युक्तं तत्पूर्वज्येष्ठामूलयोगेकर्मकालव्याप्त्यभावेचद्रष्टव्यं दूर्वाष्टमीसदात्याज्याज्येष्ठामूलर्क्षसंयुता तथाभाद्रपदेमासिशुक्लाष्टम्यांचभारत दूर्वामभ्यर्चयेद्भक्त्याज्येष्ठामूलेविवर्जयेत् ऐंद्रर्क्षपूजितादूर्वाहंत्यपत्यानिनान्यथा भर्त्तुरायुहरामूलेतस्मात्तांपरिवर्जयेदिति मदनरत्नेस्कांदेशुक्लभाद्रपदेमासिदूर्वासंज्ञाचयाष्टमी सिंहार्कएवकर्तव्यानकन्यार्केकदाचन सिंहस्थेतूत्तमासूर्येनुदितेमुनिसत्तम तत्रैव अगस्त्यउदितेतातपूजयेदमृतोद्भवां वैधव्यंपुत्रशोकंचदशजन्मानिपंचच यदातुभाद्रशुक्लाष्टम्यामगस्त्योदयस्तदातत्पूर्वकृष्णाष्टम्यांकार्य्यंशुक्लपक्षालाभेपूर्णिमांतमासेनभाद्रपदलाभात् यदातुभाद्रपदोधिकस्तदासिंहार्कएवेतिउदाहृतवचनात् अधिमासेतुसंप्राप्तेअगस्त्यउदितेमुने अर्वाक्चेदंव्रतंकार्य्यंपरतोनतुकुत्रचिदितिनिर्णयदीपेस्कांदाच्चाधिकएवकर्त्तव्यं इदंचस्त्रीणांनित्यं यानपूजयतेनारीमोहाद्देहयथाविधि स्त्रीणिजन्मानिवैधव्यंलभतेनात्रसंशयः तस्मात्संपूजनीयासाप्रतिवर्षंवधूजनैरितिपुराणसमुच्चयात् यदातुज्येष्ठादिकंविनासर्वथाष्टमीनलभ्येततदाकर्त्तव्याचैकभक्तेनज्येष्ठामूलंयदाभवेत् दूर्वामभ्यर्चयेद्भक्त्यानवंध्यंदिवसंनयेदितिभविष्योत्तरादनुकल्पेनानुष्ठानंनतुसर्वथाव्रतलोपः ॥ अथव्रतम् हेमाद्रौभविष्येब्रह्मन्भाद्रपदेमासिशुक्लाष्टम्यामुपोषितः पूजयेच्छंकरंभक्त्यायोनरःश्रद्धयान्वितः सयातिपरमंस्थानंयत्रदेवस्त्रिलोचनः गणेशंपूजयेद्यस्तुदूर्वयासहितंमुने अत्रगणेशः शिवः ॥ फलाद्यैःसकलैर्दिव्यैर्गंधपुष्पैर्विलेपनैः दूर्वांपूज्यतथेशानंमुच्यतेसर्वपातकैः शुचौदेशेप्रजातायांदूर्वायांब्राह्मणोत्तमस्थाप्यलिंगंप्रतिष्ठाप्यपुष्पैर्धूपैः समर्चयेत् खर्जूरै

नारिकेलैश्चमातुलिंगैः फलैस्तथा पूजयेच्छंकरंभक्त्यादूर्वायांविधिवद्द्विज दध्यक्षतैर्द्विजश्रेष्ठअर्घ्यंदद्यात्रिलोचने दूर्वाशमिभ्यांसंपूज्यमानवःश्रद्धयान्वितःसवैसुकृतजन्मास्यात्सर्वदेवैर्नमस्कृतः विद्यांप्राप्नोतिविद्यार्थीपुत्रार्थीपुत्रमायात् धर्मार्थीधर्ममाप्नोतिकन्यार्थीलभतेचतां मनसायद्यदिच्छेत्तत्तदाप्नोतिमानवः यएवंपूजयेद्दूर्वांभूतेशंमानवःफलैः सःसप्तजन्मपापौघैर्मुच्यतेनात्रसंशयः कृतोपवासःसप्तम्यामष्टम्यांशिवमर्चयेत् दूर्वासमेतंविप्रेंद्रदध्यक्षतफलैःशुभैः ॥

अथदूर्वापूजामंत्रः त्वंदूर्वेमृतजन्मासिवंदितासिसुरासुरैः सौभाग्यंसंततिंदेहिसर्वकार्यकरीभव यथाशाखाप्रशाखाभिर्विस्तृतासिमहीतले तथाविस्तृतसंतानंदेहित्वमजरामरं ताल्लिंगमंत्रैरीशानमर्चयेत्प्रयतः शुचिः ततः संपूजयेद्विप्रान्फलैर्नानाविधैर्द्विज अनाग्निपक्वमश्नीयादन्नंदधिफलं तथा अक्षारलवणंव्रह्मन्नश्नीयान्मधुनान्वितं दद्यात्फलानिविप्रेभ्यः फलाहारः स्वयंभवेत् प्रणम्यशिरसादूर्वांशिवंशिवमुपाश्नुते यएवंकुरुतेभक्त्यामहादेवस्यपूजनं गणत्वंयात्यसौव्रह्मन्मुच्यतेव्रह्महत्यया एवंपुण्यापापहरा अष्टमीदूर्वसंज्ञिता चतुर्णामपिवर्णानांस्त्रीजनानांविशेषतः आदित्यपुराणे अत्रश्रीपूजनमप्युक्तं शुक्लाष्टम्यांतुसंप्राप्तेमासिभाद्रपदेतथा दूर्वाप्रतानंसुश्वेतमुत्तराशाभिगामिनं पूजयेद्गृहमानीयगंधमाल्यानुलेपनैः फलपुष्पैस्तथाचैवदीपैर्धूपैर्विसर्जयेत् अग्निपक्वंतथासर्वंनानिवेद्यंकथंचन भोक्तव्यंचतथाव्रह्मन्नाग्निपक्वविवर्जितं दूर्वांकुरस्थांसंपूज्यविधिनायौवनेश्रियं यौवनंस्थिरमाप्नोतियत्रयत्राभिजायते भविष्योत्तरे विशेषः अष्टम्यांफलपुष्पैश्चखर्जूरैर्नारिकेलकैः द्राक्षामोदकपिष्टैश्चवदरैर्लकुचैस्तथा नारंगैर्जंवुकैराम्रैर्वीजपूरैश्चदाडिमैः दध्यक्षतैःस्रजोभिश्च धूपैर्नैवेद्यदीपकैः मंत्रेणानेनराजेंद्रशृणुष्वावहितोमम त्वंदूर्वेमृतजन्मासित्यादिपूर्वोक्तएवमंत्रः दत्त्वापिंडानिविप्रेभ्यः फलैश्चविविधैःप्रभो तिलपिष्टकगोधूमधान्यपिंडानिप।

ढव भोजयित्वासुहृन्मित्रसंबंधिसुजनांस्तथा ततोभुंजीततच्छेषंस्वयंश्रद्धासमन्वितः कर्तव्यंचैकभक्तेनज्येष्ठामूलंयदाभवेत् दूर्वामभ्यर्चयेद्भक्त्यानावंध्यादिवसंनयेत् पक्षेभाद्रपदस्यैवंशुक्लाष्टम्यांयुधिष्ठिर दूर्वाष्टमीव्रतंपुण्यंयः करोतीहमानवःनतस्यक्षयमाप्नोतिसंतानंसप्तपौरुषंनंदतेवर्धतेनित्यंयथादूर्वातथाकुलं इतिभविष्येदूर्वाष्टमीव्रतम्

भाद्रशुक्लनवम्यांश्रीवृक्षनवमीव्रतम् भविष्योत्तरे श्रीकृष्णउवाच समुद्यतेषुदेवेषुक्षीरोदमथनेपुरादैत्यानांमोहनार्थाययोषिद्भूतेजनार्दने विल्ववृक्षेक्षणंश्रांताकमलाकमलालया ममेयमितिचान्योन्यंयुयुधुर्देवदानवाः जितासर्वेपुरापार्थयुधिकृष्णेनचक्रिणा पातालंगमितादैत्याः साश्रीशमाययौतदा श्रीसमावासितायस्मात्श्रीवृक्षस्तेनसंस्मृतः तस्माद्भाद्रपदस्यैवशुक्लपक्षेकुरूत्तम नवम्यामर्चयेद्भक्त्याईषत्सूर्योदयेव्रतं श्रीवृक्षंविविधैः पुष्पैः रनाग्निपाचितैः फलैः तिलमिष्टान्नगोधूमैर्धूपगंधस्त्रगंवरैः ईषद्भानुकराताम्रताम्रेकृतनभस्तले मंत्रेणानेनराजेंद्रआंकाकोलुकदर्शने श्रीनिवाशनमस्तेस्तुश्रीवृक्षशंकरप्रिय ममाभिलषितंकृत्वा सर्वविघ्नहरोभव संपूज्यमांततोभ्यर्च्यश्रीवृक्षंप्रणिपत्यच मंत्रेणानेनराजेंद्रदत्त्वाब्राह्मणभोजनैः ततोभुंजीतनक्तंवैतिलक्षारविवर्जितं अनग्निपक्वसूपान्नंदधिपुष्पफलंशुभं एवंयः कुरुतेपार्थश्रीवृक्षाभ्यर्चनंनरः नारीवादुःखशोकाभ्यांमुच्यतेनात्रसंशयः सप्तजन्मांतरंयावत्सुखसौभाग्यमान्यथा श्रीमतीफलिनीधन्यामर्त्यलोकेमहीयते श्रीवृक्षमक्षतफलंसततंनवम्यांनैवेद्यपुष्पफलवस्त्रविरूढधान्यैः पूज्याप्रभातसमयेपुरुषोत्तमेष्टांसंप्राप्नुवंतिपुरुषाः श्रियमुत्तमांच ॥

इतिश्रीभविष्योत्तरेश्रीवृक्षनवमीव्रतम्

अत्रैवनंदानवमी अत्रदुर्गापूजोक्ता नारदीये भाद्रेतुशुक्लानवमीनंदाख्यापरिकीर्तिता तस्यांयः पूजयेद्

दुर्गांविधिवच्चोपचारकैः सोऽश्वमेधफलंप्राप्यविष्णुलोकेमहीयते मदनरत्नेभाविष्योत्तरेपिसुमंतुरुवाच मासि भाद्रपदेयातुनवमीवहुलेतरा वहुलः कृष्णपक्षस्तदितराशुक्लानवमी तस्यांयःपूजयेद्दुर्गां विधिवत्कुरुनंदन सोऽश्वमेधफलंविद्याविष्णुलोकंचगच्छति एकभक्तंतुसप्तम्यामष्टम्यांसमुपोषितःदूर्वोपरिस्थितादेवीमित्यादिखर्जूरनारिकेलादिभिः पूजयित्वा रात्रौजागरणंकृत्वा नंदामंत्रंजपेत् ओंनंदायैस्वाहा हुंस्वरिति ततः प्रभाते नवम्यांचंडिकांप्रीणयित्वा गुरुशक्त्याकुमारीपूजयेत्ततः एवंचाश्वयुजेमासिकार्त्तिकेकार्त्तिकोत्तरे पूजयेच्चतुरोमासान्नंदाभगवतींविभो स्नानंकुशोदकंप्रोक्तंप्राशनेचनराधिपेत्यादि इतिनंदानवमीव्रतम् ॥ ॥

भाद्रशुक्लदशम्यांदशावतारव्रतं नारदीये अथनभस्यशुक्लायांदशम्यांद्विजसत्तम व्रतंदशावताराख्यंस्नानंतत्रजलाशये कृतसंध्यादिनियमोदेवर्षिपितृतर्पणं ततोदशावताराणिसमभ्यर्चेत्समाहितः मत्स्यंकूर्मंवराहंचनरसिंहंत्रिविक्रमं रामंरामंचकृष्णंचवौद्धंकल्किनमेवच दशमूर्त्तीस्तुसौवर्णीः पूजयित्वाविधानतः दद्याद्दशभ्योविप्रेभ्यः पूजयित्वातुनारदउपवासंचैकभक्तंकृत्वासंभोज्यवाडवान् विसृज्यपश्चाद्भुंजीतस्वयंस्वीयैः समाहितः भक्त्याकृत्वाव्रतंह्येतद्भुक्त्वाभोगानिहोत्तमान् विमानेनव्रजेदंतेविष्णुलोकेसनातनमिति दशावतारमूर्त्तयः पंचरात्रे वामेशंखंगदांदक्षेद्विभुजोमत्स्यरूपधृक् नरांघ्रिर्मत्स्यरूपोवामत्स्वरूपीजनार्दनः अधोंघ्रिर्मत्स्यरूपोवायुक्तायुधकरचरणादिमान्मत्स्यरूपइतिविकल्पः कूर्मस्तुकमठाकारोमत्स्यरूपोक्तरूपवान् २ ॥ नरांगंसूकरास्यंचमनाक्श्यीनंसुभीषणं श्रीर्वामकूर्परस्थातुधरानंतौपदानुगौ एतद्रूपधरंदेवंवाराहंभुक्तिमुक्तिदं कूर्परंदंष्ट्राग्रमिति ॥ ३ ॥ ज्वलदग्निसमाकारंसिंहवक्त्रंनरांगकं दंष्ट्राकरालवदनंललज्जिह्वंसुभीषणं वृत्तास्यंकुटिलंक्रुद्धमानद्धंपीनवक्षसं अभेद्यतीक्ष्णनखरमात्मसंहतदानवंतद्वक्षोदारयंतंचकराभ्यांन

खरैर्भृशं गदाचक्रधरंदोर्भ्यांनरसिंहंचतुर्भुजम् ॥ ४ ॥ कुंडीछत्रधरोद्विदोर्वामनः परिकीर्त्तितः द्विदोर्द्विभुजाः ॥ ५ ॥ क्षत्रांतकरणंघोरमुद्वहन्परशुंकरे जामदग्यश्चकर्त्तव्योभृशंरोषारुणेक्षणः ॥ ६ ॥ युवाप्रसन्नवदनःसिंहस्कंधोमहावलः आजानुवाहुःकर्तव्यो रामोवाणधनुर्धरः मद्यपात्रंचसीरंचवामदक्षिणयोः क्रमात गदा मुशलवज्रंचहलीरामः प्रकीर्त्तितः शंखचक्रंगदांपद्मंदधानोनीलमेघभः कृष्णः कमलपत्राक्षः कर्तव्यश्चचतुर्भुजः द्विभुजोवापिकर्त्तव्यः पीतांवरविभूषितः शंखचक्रधरः श्यामोद्विभुजः कृष्णसंज्ञकः ॥ ८ ॥ कषायवस्त्रसंवीतः स्कंधसंसक्तचीवरः पद्मासनस्थोद्विभुजो ध्यायीबुधः प्रकीर्त्तितः खड्गोद्यतकरःक्रुद्धो हयारूढोमहावलः म्लेच्छछेदकरः कल्की द्विभुजः परिकीर्तितइति ॥ १० ॥ अस्याविधानंभविष्योत्तरे ॥ युधिष्ठिरउवाच दशम्यांशुक्लपक्षस्ययासौप्रौष्टपदेशुचिः स्नात्वाजलाशयेस्वच्छेपितृदेवादितर्पणं कृत्वाकुरुकुलश्रेष्ठगृहमागत्यमानवः गृहीत्वाधान्यचूर्णस्यस्वहस्तेप्रसृतित्रयं क्रमेणपाचयेत्ततुपायसंघृतसंयुतं प्रथमे पूपकान्वर्षे द्वितीयेघृतपूपकान् तृतीयेपूपकसरांश्चतुर्थेमोदकान्शुभान् सोहालकान्पंचमेचषष्ठेवैखंडवेष्टकान् सप्तमेद्वकोकरसामर्कपुष्पांस्तथाष्टमे नवमेकर्णवेष्टांश्चदशमेमंडकान्शुभान् दद्यात्स्वयंदशहरेर्दशविप्रायदापयेत् क्रमेणभक्षयेद्दत्त्वायथोक्तविधिनानृप अर्धार्द्धंविष्णवेदेव मर्धार्धं चद्विजातये ततोपरार्धमश्नीयाद्दत्वारम्येजलाशये मंत्रेणानेनमेधावीहरिमभ्युक्षवारिणा मत्स्यंकूर्मंवराहंचनरसिंहंत्रिविक्रमं रामंरामंचकृष्णं चबौद्धंचैवसकल्किकं गतोस्मिशरणंदेवंहरिनारायणं विभुं प्रणतोस्मिजगन्नाथंसमेविष्णुप्रसीदतु छिनत्तु वैष्णवीमायांभक्त्याप्रीतोजनार्दनः श्वेतद्वीपंनयेत्तस्मात्मयात्मासन्निवेदितः अत्रहैमीर्मत्स्यादिप्रतिमाः कृत्वा पूज्याः एवंयः कुरुतेभक्त्याविधिनानेनसुव्रतः दशावारनामाद्यंतस्यपुण्यफलंश्रृणु श्रूयंतेयास्त्विमालोके

मनुष्याणांदशदशाः ताञ्छिनत्तिनसंदेहश्चक्रप्रहरणोविभुः संसारसागराद्घोरात्समुद्धृत्यजगत्पतिः श्वेतद्वीपं नयत्याशुव्रतेनानेनतोषितः किंतस्यनभवेल्लोकेयस्यतुष्टोजनार्दनः यद्दुर्लभंयदप्राप्यंमनसोयन्नगोचरं तदप्यप्रार्थितंध्यातोददातिमधुसूदनः सोहंजनार्दनः प्राज्ञःकालरूपधरोच्युतः मर्त्यलोकेस्वयंपार्थभूभारोत्तारकारणात् या स्त्रीव्रतमिदंपार्थचरिष्यतिमयोदितं सालक्ष्म्याचलयुक्तास्यात्पुत्रभर्तृसमन्विता मर्त्यलोकेचिरंस्थित्वाविष्णुलोके महीयते विष्णुलोकाद्रुद्रलोकंततोयातिपरांगतिंयेपूजयतिपुरुषाःपुरुषोत्तमस्यमत्स्यादिकास्तुदशमीषुदशावतारान् मन्येदशस्वपिदशासुसुखंविहृत्यतेयांतियानमधिरुह्यसुरारिलोकम् इतिभविष्येदशावतारदशमीव्रतम् भाद्रशुक्लैकादशीपद्मा तदुक्तं नारदीये नभस्यैकादशीशुक्लापद्माख्यांसमुपोष्यवै कृत्वानित्यार्चनंतत्रकटिदानमथाचरेत् पूर्ववत्स्नापितायास्तुप्रतिमायाद्विजोत्तम समुत्सवविधानेननीत्वातांसलिलाशये कृत्वांबुस्पर्शनात्तस्य संपूज्यविधिनाततः आनीयमंडपेतस्मिन्पार्श्वेनचस्वापयेत् ततःप्रभातेद्वादश्यांगंधाद्यैरर्च्यवामनं संभोज्यवाडवान्दत्वादक्षिणांचाविसर्जयेत् एवंयःकुरुतेविप्रपद्माव्रतमनुत्तमं भुक्तिमत्रामुत्रमुक्तिंलभेत्तेनात्रसंशयः कटिदानंभगवतः पार्श्वपरिवर्तनेशय्यादानमित्यर्थः अथकथाभविष्योत्तरे युधिष्ठिरउवाच नभस्यस्यासितपक्षेकिंनामैकादशी भवेत् कथयस्वप्रसादेनकोवात्रविधिरुत्तमः कृष्णउवाच कथयामिमहीपालकथामाश्चर्यकारिणीं कथयामासयांब्रह्मानारदायमहात्मने नारदउवाच कथयस्वप्रसादेनचतुर्मुखनमोस्तुते नभस्यशुक्लपक्षेतुकिंनामैकादशीभवेत् एतदिच्छाम्यहंश्रोतुंविष्णोराराधनायवै ब्रह्मोवाच वैष्णवोसिमुनिश्रेष्ठसाधुपृष्टंकविप्रिय नातःपरतरंलोकेपवित्रंहरिकीर्तितं पद्मानामेतिविख्यातानभस्यैकादशीसिता हृषीकेशःप्रीतयेस्याःकर्त्तव्यंव्रतमुत्तमं कथयामितवाग्रेहंकथांपौराणिकींशुभां यस्याःश्रवणमात्रेणमहापापंविनश्यति मांधातानामराजर्षिर्विवस्व

ब्र०र०
भाद्रप०
७४

द्वंशसंभवः वभूवचक्रवर्त्तीसनृपःसत्यप्रतापवान् धर्मतःपालयामासप्रजाःपुत्रानिवौरसान्तस्यदेशेनदुर्भिक्षंनाध
योव्याधयस्तथा निरातंकाःप्रजास्तस्यधनधान्यसमेधिताः नान्यायोपार्जितंवित्तकोशेतस्यमहीपतेः स्वस्व
मार्गेप्रवर्त्ततप्रजाधर्मपरायणाः कामधेनुसमाभूमिस्तस्यराज्ञोमहीपते तस्यैवकुर्वतोराज्यंवहुवर्षगणागताः अ
थकदाचित्संजातेविपाकेकिलकर्मणः वर्षत्रयंतुतद्विषयेनववर्षवलाहकः तेनोद्विग्नाःप्रजास्तस्यवभूवुःक्षुधयार्दिताः
अथप्रजाःसमागम्यराजानमिदमब्रुवन् श्रोतव्यंनृपशार्दूलप्रजानांवचनंत्वया आपोनाराइतिप्रोक्ताःपुराणेषुम
हर्षिभिः अयनंभगवांस्तस्मान्नारायणइतिस्मृतः पर्जन्यरूपीभगवान्विद्वन्सर्वगतःस्थितः सएवकुरुतेवृष्टिम
न्नंचैवततःप्रजाःतदभावेननृपतिक्षयंगच्छंतिताःप्रजाःतथाकुरुनृपश्रेष्टयोगक्षेमंयथाभवेत् राजोवाच सत्यमुक्तंभ
वद्भिस्तुनमिथ्याभिहितंवचः अन्नंब्रह्मेतियत्प्रोक्तंसर्वमन्नेप्रतिष्ठितं इत्येवंश्रूयतेलोकेपुराणेवहुविस्तरे नृपा
णामपचारेणप्रजानांपीडनंभवेत् नाहंपश्याम्यपकृत्यंदोषंपश्चाद्विचारयन् तथापिसाधयिष्यामिप्रजानांहितका
म्यया इतिकृत्वामतिंराजापरिमेयपरिच्छदः नमस्कृत्यविधातारंजगामगहनंवनं चचारमुनिमुख्यानामाश्र
मांस्तपसाश्रितान् ददर्शाथतपस्तप्तमृषिमांगिरसंनृपःतेजसाद्योतितदिशंद्वितीयमिवभास्करं तंदृष्ट्वाहर्षितो
राजाऽवतीर्य्यस्ववाहनात् नमश्चक्रेन्वपावृत्यराजांजालिपुटोभवत् मुनिस्तमभिनंद्याथस्वस्तिवाचनपूर्वकंपप्र
च्छकुशलंराज्येसप्तस्वंगेषुभूपतेः निवेदयित्वाकुशलंपप्रच्छानामयंनृपः दत्तासनोगृहीतार्घ्य मुपाविष्टंस्वसान्निधौ
प्रत्युवाचमुनिंराजापृष्टोह्यागमकारणं राजोवाच भगवन्धर्मविधिनाममपालयतोमहीं अनावृष्टिःप्रवृत्तावै
नाहंवेदात्रकारणं संशयच्छेदनार्थायह्यागतोहंतवांतिकं योगक्षेमविधानेनप्रजानांकुरुनिर्वृतिं अंगिराउवाच
यत्तुकृतयुगंराजन्युगानामुत्तमंस्मृतं अत्रधर्मपरालोकाधर्मःस्याच्चचतुष्पदः अस्मिन्युगेतपोयुक्ताब्राह्मणानेतरेजनाः

विषयेतवराजेंद्रवृषलोहितपस्यतिविकर्मकरणात्तस्यनवर्षतिवलाहकः कुरुतस्याविधेयत्नंयेनदोषःप्रशाम्यति ॥ राजोवाच नाहमेनंवधिष्यामितपस्यंतमनागसं धर्मोपदेशंकथयह्युपसर्गविनाशनम् ॥ ऋषिरुवाच ॥ ततःशृणुनृपश्रेष्ठकुरुष्वेकादशीव्रतं नभस्यस्यासितेपक्षेपद्मानामेतिविश्रुता यस्याव्रतंकुरुनृपसप्रजःसपरिच्छदः इतिवाक्यमृषेःश्रुत्वाराजास्वगृहमागतः तस्याव्रतप्रभावेणसुवृष्टिरभवत्तदा सर्वसिद्धिकरीह्येषासर्वोपद्रवनाशिनी प्राप्तेभाद्रपदेमासिपद्माव्रतमथाकरोत् प्रजाभिश्चाथसर्वाभिश्चातुर्वर्ण्यसमन्वितः एवंव्रतेकृतेराजन् प्रववर्षवलाहकः जलेनप्रावृताभूमिरवसत्सस्यशालिनी हृषीकेशप्रसादेनलोकाःसौख्यंप्रपेदिरे एतस्मात्कारणादेवकर्तव्यंव्रतमुत्तमं भुक्तिमुक्तिप्रदंचैवलोकानांसुखदायकं पठनाच्छ्रवणाद्राजन्सर्वपापैःप्रमुच्यते इतिब्रह्मांडपुराणेभाद्रशुक्लापद्मैकादशीव्रतमाहात्म्यकथा अस्यामेवैकादशीश्रवणनक्षत्रसंयुतायांविजयैकादशीव्रतं तदुक्तंमदनरत्नेहेमाद्रौचभविष्योत्तरे ॥ श्रीकृष्णउवाच द्वादश्यास्तेविधिःप्रोक्तःश्रवणेनयुधिष्ठिरसर्वपापप्रशमनःसौख्यमोक्षप्रदायकः एकादशीयदाशुक्लाश्रवणेनसमन्विता विजयासातिथिःप्रोक्ताभक्तानां विजयप्रदाअभीष्टासर्वदेवस्यसर्वदाविजयातिथिः एषवैफाल्गुणेमासिपुष्येणसहितानृप विजयाप्रोच्यतेसद्भिःकोटिकोटिगुणोत्तरा एषैवशुक्लपक्षैकादशीपरामृशते एकादश्यांसोपवासोरात्रौसंपूजयेद्धरिं सौवर्णे रौप्यपात्रेवादारुवंश्यमयीपिवा सौवर्णंवामनंकुर्यात्स्वचित्तस्यानुसारतःशुभाननंधारयंतमक्षसूत्रंतथैवच शिखीकमंडलुधरच्छत्रीयज्ञोपवीतवान् एवंलक्षणसंपन्नंवामनंपूजयेद्धरिं आछाद्यपात्रंवासोभिरक्षतैःफलसंयुतं मार्गेणचर्मणावापिभक्त्यावाशक्त्यपेक्षया तिलोदकेनसंपूर्णंप्रस्थेनकुडवेनवा अलाभेयवगोधूमैःफलंमुख्यंतिलैर्भवेत् पुष्पैर्गंधैःफलैर्धूपैःकालोत्थैरर्चयेद्धरिं नानाविधैश्चनैवेद्यैर्भक्ष्यैर्भोज्यैगुडोदनैः मंत्रवत्तच्छत

152

व्र०र० भद्रप० ७५

गुणंभक्त्याकोटिगुणोत्तरं पूजामंत्रान्प्रवक्ष्यामितान्शृणुष्वयुधिष्ठिर पादौमत्स्यायचनमोनमःकूर्मायजानुनी
वाराहायनमोगुह्यंनृसिंहायेतिनाभितः उरस्तुवामनायेतिभुजौरामायवैनमः मुखंरामायचनमःकृष्णायचनमः
शिर :मत्स्यःकूर्मोवराहश्चनरसिंहोथवामनः रामोरामश्चकृष्णश्चअर्चयामिनमोनम इत्यर्चनमंत्रः गंधपुष्प
फलैर्वन्यैर्नैवेद्यैर्विधिनार्चयेत् एवमभ्यर्च्यविधिवदेकादश्यांसमंत्रकं जागरंतत्रकुर्वीतगीतवादित्रनिस्वनैः एवं
सनियमंस्थित्वाप्रभातेविमलेसति पूर्वोक्तविधिनातद्वदर्चयेद्वामनंहरिं प्रदद्याद्वेदविदुषेब्रह्मणेमंत्रतोनृप वा
मनोबुद्धिदोदाताद्रव्यस्थोवामनःस्वयं वामनोस्यप्रतिग्राहीवामनोवैनमस्कृतःब्राह्मणोग्निरितिमंत्रेणप्रतिगृह्णी
तमंत्रवित् वामनःप्रतिगृह्णातिवामनोवैददातिच वामनस्तारकोभूम्यांवामनायनमोनमइतिप्रतिग्रहमंत्रः ए
वंदत्त्वाततःप्रातर्भोजनंपृषदाज्यकं पूर्वंदत्त्वावामनेभ्यःपश्चाद्भुंजीतचस्वयं भूयोयथेच्छयाराजन्सर्वत्रैवविधिः
स्मृतः एवंकृतव्रतेब्रह्मन्यत्पुण्यंतन्निबोधमे यावत्कल्पशतंपूर्णमेकसप्ततिसंख्यया प्राप्यविष्णुपुरंराजन्क्रीड
तेकालमक्षयं इहागत्यभवेद्राजाप्रतिपक्षक्षयंकरः हस्त्यश्वरथदानानांदाताभोक्ताविमत्सरी रूपसौभाग्यसं
पन्नोदीर्घायुर्नीतिजोभवेत् पुत्रपौत्रैपरिवृतोजीवेच्चशरदांशतं एषाव्युष्टिःसमाख्याताएकादश्यामयंतव व्यु
ष्टिःफलं पृथगेवसमाख्याताद्वादशीश्रवणान्विता उपोष्यैकादशींपश्चाद्द्वादशीमप्युपोषयेत् नचात्रविधिलो
पःस्यादुभयोर्दैवतंहरिरिति इदंश्रवणद्वादशीव्रतमुत्तरदिने विजयैकादशीव्रतंचैकादश्यामेवश्रवणयुक्तायां
कार्यंश्रवणयुक्तैकादश्याउत्तरदिनेऽलाभेदशमीविद्धायामपिश्रवणयुक्तैकादश्यामेवकार्यं दशम्येकादशीयत्रेत्येत
द्व्रतप्रकरणस्थवह्निपुराणवचनात् विशेषस्तुद्वादशीनिर्णयेज्ञेयःएतत्पारणंतुपरेन्हिश्रवणापेक्षयाकर्त्तव्यंश्रवण
स्याधिक्येपारणनिषेधेसतिश्रवणमतिवाह्यत्रयोदश्यामेवकर्तव्यं तिथिवृद्धौतुद्वादश्याउडुसंख्ययात् वृद्धौकुर्या

त्रयोदश्यांतत्रदोषोनविद्यते इत्येतत्प्रकरणपठितवन्हिपुराणवचनात् ॥ ॥ इतिविजयैकादशीव्रतनिर्णयः ॥ अस्यांश्रवणैकादश्यांमध्यान्हेवामनावतारइतिनिर्णयामृतेनिर्णयसिंधौचभविष्योत्तरश्रीभागवतऽष्टमस्कंधऽष्टादशाध्यायेतुवामनोत्पत्तिरुक्तासायथा श्रावणेश्रवणद्वादश्यांमुहूर्त्तेभिजितिप्रभुः सर्वनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणम् १ द्वादश्यांसवितातिष्ठन्मध्यंदिनगतोनृप विजयानामसाप्रोक्तायस्यांजन्मविदुर्हरेः २ अस्यार्थः श्रवणस्थेचंद्रेतत्रापिश्रवणांशेअभिजितिनक्षत्रंतच्चश्रुत्युपदर्शितं अभिजिन्नामनक्षत्रमुपरिष्टादुषानामधस्ताच्छ्रोणायाइतिएवंविशिष्टेमुहूर्त्तेप्रादुर्वभूवेत्यर्थः यस्यांद्वादश्यांहरेर्जन्मतत्तस्यामेवविदुः तदाचमध्यंदिनगतः सवितातिष्ठत्साचद्वादशीविजयानामेतिप्रोक्तेत्यन्वयइतिश्रीधरस्वामिनः अत्रकल्पभेदाद्व्यवस्थेतिकेनच वस्तुतस्तुद्वादशीशब्देनैकादश्याएवाभिधानात् भविष्योत्तरभागवतयोर्नैवार्थस्यसंगतिः संप्रवृत्तेपिरजसिनत्याज्यंद्वादशीव्रतमित्यादिषुद्वादशीशब्देनैकादश्याएवगृहीतत्वात् अथात्रभविष्योत्तरोवामनपूजाप्रयोगः तत्रप्रातः स्नानादिनिवर्त्यमध्याह्नेकलशस्थापनंकृत्वा तदुपरिआढकादिपरिमिततिलयवादिपूर्णेस्वर्णादिपात्रेसौवर्णंवामनंनिधाय शुभाननंधारयंतामित्यादिप्रकारेणध्यात्वा वामनायनमइत्यनेनपौरुषसूक्तेनचावाहनादिपुष्पांजलिपर्यंतंपूजयित्वामत्स्यादिनामभिः पादादिपूजांविधायगंधादिनातमभ्यर्च्यदध्यक्षतफलयुक्तमर्घ्यंगृहीत्वा नमस्तेपद्मनाभायनमस्तेजलशायिने तुभ्यमर्घ्यंप्रयच्छामिबालवामनरूपिणइत्यर्घ्यंसमर्प्य नमःकमलकिंजल्कपीतनिर्मलवाससेमहाहवरिपुस्कंधघृष्टचक्रायचक्रिणे इतिस्तुत्वापुष्पांजलिंदत्वा रात्रौजागरणंविधाय प्रभातेपुनःसंपूज्यवामनोबुद्धिदातेत्यादिमंत्रेणमूर्त्तिंदद्यादितिपूजाविधिः अथाग्निपुराणोक्तंविजयद्वादशीव्रतं मैत्रेयउवाच विधानं

शृणुराजेंद्रयथादृष्टंमनीषिभिः यथोक्तंनियमंकुर्य्यादेकादश्यामुपोषितः दंतकाष्ठंविगृह्यादौवाग्यतोविजितेंद्रियः श्रवणद्वादशीमद्यसमुपोष्यजनार्दनं अर्चयित्वाविधानेनअहंभोक्ष्येपरेहानि नदीनांसंगमेस्नात्वाह्यर्चयेत्तत्रवामनं सौवर्णरत्नसंयुक्तंद्वादशांगुलमुच्छ्रितं पीतवस्त्रैःशुभैर्वेष्ट्यंभृंगारेनिर्व्रणेनवे हिरण्मयेनपात्रेण अर्घ्यपात्रंप्रकल्पयेत् दध्यक्षतफलैश्चैवसहिरण्यंसदक्षिणं नमस्तेपद्मनाभायनमस्तेजलशायिने तुभ्यमर्घ्यंप्रयच्छामिबालवामनरूपिणे नमःकमलकिंजल्कपीतनिर्मलवाससे महाहवरिपुस्कंधघृष्टचक्रायचक्रिणे नमशार्ङ्गासिशंखवज्रपाणयेवामनायच यज्ञभुक्फलदात्रे चवामनायनमोनमः देवेश्वरायदेवायसर्वसंभूतिकारिणे मत्स्यकूर्मवराहायनरसिंहस्वरूपिणे रामरामात्रिरामायवामनायनमोनमः श्रीधरायनमस्तुभ्यंनमस्तेगरुडध्वज चतुर्बाहोनमस्तेस्तुनमस्तेधरणीधर संपूज्यैवंविधानेन नरः स्रक्चंदनादिभिः रात्रौजागरणंकुर्य्यात्पुरतोजलशायिनः धृत्वाजलमयंरूपंदेवदेवस्यचक्रिणः ब्रह्मांडमुदरेयस्यमहद्भूतैरधिष्ठितं मायावीवामनः श्रीमान्सोत्रायतुजगत्पतिः एवंसंपूज्यविधिनाद्वादश्यामुदयेरवेः भृंगारंदेवहितंपूर्ववत्संप्रपूजयेत् वामनःप्रतिगृह्णातुवामनोहंददामिते वामनः सर्वतोभद्रंद्विजायाथनिवेदयेत् जलधेनुंतथादद्याच्छत्रंचैवतुपादुकां सहिरण्यानिवस्त्राणिधेनुंसवत्सांतथा यत्किंचिद्दीयतेदानंतदानंत्यायकल्पते श्रवणद्वादशीयोगेसंपूज्यगरुडध्वजं दत्त्वादानंद्विजातिभ्योवियोगेपारणंयतः सिंहस्थितेतुमार्तंडेश्रवणस्थेनिशाचरे साधेनुद्वादशीज्ञेयानस्याद्भाद्रपदादृते दशम्येकादशीयत्रसानोपोष्याभवेत्तिथिः श्रवणेनतुसंयुक्तासशुभासर्वकामदा इत्येषाकथिताराजन्द्वादशीश्रवणेनच कर्त्तव्यासाप्रयत्नेनइहामुत्रफलप्रदा इयंसिंहस्थेचंद्रेचधेनुद्वादशीज्ञेयासाद्वादश्यामेव कार्य्या श्रवणयुक्तैकादशीविजयैकादशी श्रवणान्विताद्वादशीश्रवणद्वादशी इत्यग्निपुराणेविजयैकादशीव्रतम्

अथनृसिंहपरिचर्य्योक्तोविजयाव्रतानुष्ठानविधिः विजयाव्रतंसंगमेऽनुष्ठेयं नदीसंगमालाभे मार्कं
डेयोपदिष्टतीर्थसंगमेऽनुष्ठेयं तथाच शालग्रामशिलावारितुलसीजलमेवच संगमेचोद्धरेतत्रविजयाव्रतमाचरे
दित्युक्ते तत्रादौगुरुंप्रणम्यसंकल्पंकुर्य्यात् तत्रमंत्रः द्वादश्यांतुनिराहारः स्थित्वाहमपरेहनि भोक्ष्ये
त्रिविक्रमानंतशरणंमेभवाच्युतेति सशार्ङ्गशरायुधंसौवर्णंदेवंकृत्वा ताम्रकलशोपरिवैणवपात्रंपंचामृतस्नापि
तं सवस्त्रंदेवमुपवेश्य ।सितचंदनेनानुलिप्य सितवस्त्रछत्रोपानहंसमर्प्यावयवपूजांकुर्यात् शिरसिवासुदेवा
यनमः मुखे श्रीधरायनमः कंठे श्रीकृष्णायनमः वक्षासि श्रीपतयेनमः वाह्वोः सर्वास्त्रधारिणेनमः पादयोः
सर्वात्मनेनमः ततोविशेषार्घ्यंदद्यात् तत्रमंत्रः शंखचक्रगदापद्मसशार्ङ्गशरपूजित गृहाणार्घ्यंमयादत्तं
शार्ङ्गपाणेनमोऽस्तुते इतिधूपदीपौदत्त्वा घृतपक्वनैवेद्यंफलतांवूलादीनेचसमर्प्य जागरणं कृत्वा प्रभातेस्ना
त्वा देवं संपूज्य पुष्पांजलिंदद्यात् तत्रमंत्रः नमस्तेअस्तुगोविंदवुधश्रवणसंज्ञक अघौघस्यक्षयंकृत्वासर्व
सौख्यप्रदोभवेति ततः सर्वमाचार्यायदत्त्वा पारणंकुर्य्यादिति अस्यव्रतस्यवुधयोगेसति फलातिशयोऽवगंत
व्योवुधश्रवणसंज्ञकेतिमंत्रलिंगात् ॥ इतिनृसिंहपरिचर्य्याकाराः ॥ अत्रदध्योदनदानादिकंकार्य्यं तच्च द्वा
दश्यामनुष्ठेयम् ॥ इतिविजयैकादशीव्रतम् ॥ ॥ ॥ अत्रैवकल्किद्वादशीव्रतं वाराहे धरणीव्रतेषु-
दुर्वासाउवाच तावद्भाद्रपदेमासिशुक्लपक्षेतुद्वादशीं संकल्प्यविधिनादेवमर्चयेत्परमेश्वरं नमोऽस्तुकल्किने
पादौ हृषीकेशायवैकटिं म्लेच्छप्रध्वंसनायोरूजगन्मूर्तेतथोदरं श्रीकंठायेतिवैकंठंखड्गपाणीतिवैकटिं स्वना
म्नाशंखचक्रेविश्वमूर्त्तेतथाशिरः सितवस्त्रयुगच्छत्रंगंधपुष्पोपशोभितं कृत्वाप्रभातेविप्रायप्रदेयंशास्त्रवित्तमे प्री
यतांमेहृषीकेशकाल्किरूपेतिमंत्रतः पूर्वंराजाविशालोभूत्काशीपुर्य्यांमहाबलः द्वादशींकृतवान्सोपिचक्रवर्त्तीबभू

पुस्तकालय
गुरुकुल कांगड़ी

वह यज्ञैश्चाविविधैरिष्ट्वापरांनिर्वाणमाप्तवान् अथैतासांद्वादशीनांफलानांभेदउच्यते पूज्यतेमत्स्यरूपेणसर्वज्ञत्वमभीप्सुभिः स्ववंशोद्धरणार्थायकूर्मरूपीतिपूज्यते नरसिंहस्वरूपेणसर्वपापभयातुरैः वामनोमोहनाशायवित्तार्थेजमदग्निजः शूरशत्रुविनाशाययजेद्दाशरथिंबुधः वलकृष्णौयजेद्धीमान्पुत्रकामोनसंशयः रूपकामोयजेद्बुद्धंकल्किनंशत्रुघातनं इतिधरणीव्रतेषु कल्किद्वादशीव्रतम् ॥ अथात्रैवकटिपरिवर्त्तनोत्सवः तथाचभविष्योत्तरे प्राप्तेभाद्रपदेमासिएकादश्यांसितेऽहनि कटिदानंभवेद्विष्णोर्महापातकनाशनं कटिदानंपार्श्वपरिवर्त्तनं रामार्चनचंद्रिकायां शयनोत्सववच्चैवदेवंनीत्वाजलाशये कटिदानोत्सवंकुर्वेइतिसंकल्प्यपूजयेत् देवदेवजगन्नाथयोगगम्यानिरंजन कटिदानंकरोम्यद्यप्राप्तेभाद्रपदेशुभे अनेनकटिपरिवर्त्तिंदाक्षिणांप्रकल्पयेत् महापूजांततः कृत्वापूर्ववत्स्वगृहंव्रजेत् इतिनिर्णयसिंधौतुद्वादश्यांविष्णोःपरिवर्त्तनकृत्यमुक्तं तच्चसंध्यायांविष्णुंसंपूज्यप्रार्थयेत् मंत्रस्तुतिथितत्त्वे वासुदेवजगन्नाथप्राप्तेयंद्वादशीतव पार्श्वेनपरिवर्त्तस्यसुखंस्वापिहिकेशव इतिभाद्रपदशुक्लैकादशीकृत्यं ॥ ॥ अथभाद्रशुक्लद्वादशीकृत्यं तत्रपारणंश्रवणयोगरहितायांकुर्यात् आभाकासितपक्षेषुमैत्रश्रवणरेवती संगमेनैवभोक्तव्यंद्वादशद्वादशीर्हरेरितिदिवोदासोदाहृतवचनात् ज्योतिर्निवंधेतु आभाकापौसितेपक्षेमैत्रांत्यश्रुतिरोहिणीसंगमैनवभोक्तव्यंद्वादशद्वादशीर्हरेरितिवायुपुराणोक्तेः पौषशुक्लैकादश्याव्रतपारणेरोहिणीद्वादशीयोगेऽपिपारणनिषेधउक्तः तत्रैवकृतयुगादिवशाद्व्यवस्थाप्युक्ता महाभारते मैत्रर्क्षंतुकृतेत्याज्यंत्रेतायांरेवतींत्यजेत् द्वापरेरोहिणीत्याज्याकलौतुश्रवणंत्यजेत् अत्रश्रवणद्वादशीयोगे पारणप्रत्यवायापत्तिरुक्ता उपोष्यैकादशींमोहात्पारणंश्रवणेयदि करोतिहंतितत्पुण्यंद्वादशद्वादशीभवमिति स्कंदाच्च अस्यतत्रैवप्रतिप्रसवः मार्कंडेयः विशेषेणमहीपालश्रवणंवर्धतेयदि तिथिक्षयेनभोक्तव्यंद्वादशींलंघये

157

न्नर्हीति इहचयदाश्रवणद्वादशीयोगबाहुल्यंतदाश्रवणर्क्षंत्रेधाविभज्य मध्यमाविंशतिघटिकायोगंत्यक्त्वापारणंकार्यं
तदुक्तंविष्णुधर्मे श्रुतेश्चमध्येपरिवर्त्तमेतिसुप्तिप्रबोधिपरिवर्त्तनमेववर्ज्यमिति केचित्तु श्रवणर्क्षंत्रेधाविभज्यमध्यमपाद
द्वयं वर्ज्जयित्वापारणमाहुः अन्येत्वाभाका।वित्यतिमैत्रांत्यपादइत्यापिचनिर्मूलमित्याहुःअत्रैवशक्रध्वजोत्थापनमुक्त
मपरार्के गर्गेण द्वादश्यातुसितेपक्षेमासिभाद्रपदेतथा शक्रमुत्थापयेद्राजावैश्वश्रवणवाससे ब्रह्मपुराणेच
इंद्रोभाद्रपदेमासिपक्षेशुक्लेचविष्णुना नियुक्तःसर्वसस्यानिव्रीहींश्चैवफलानिच औषधीर्वज्रहस्तश्चजनय
न्पालयत्यपि तद्धयार्त्तानिसर्वाणिवर्धयत्यखिलंजगत् तस्मात्सतत्रसंपूज्यः सभार्यश्चदिनेदिने सग
णःसायुधश्चैवसानुपात्रःसवाहनःपटभित्तिकृतोदेवोराज्ञापूज्योविशेषतः भक्तैःफलैर्नवैर्मूलैर्वस्त्रैश्चैवविशेषतः त
मुद्दिश्यार्चयेद्विप्रांस्तथारंगोपजीविनः पटभित्तिकृतइति पटेभित्तौवालिखितइति दिनेदिनेइतिवचनात्
द्वादशीमारभ्ययावदवस्थानंप्रत्यहंपूज्यः ज्योतिःशास्त्रे द्वादशींतुपरित्यज्यतिथावन्यत्रशास्त्रतःशक्रउत्थापि
तोहंति राजानंराष्ट्रमेवचशक्रमुत्थापयेद्राजाउत्तरेणकदाचन श्रवणेवाधनिष्ठायांनतुऋक्षांतरेणतुविश्वमुत्थित
मश्विन्यांश्रवणेयमदैवते वासवेतुधनिष्ठायांनिशिशक्रंप्रवासयेदिति अत्रैवश्रीपतिसंहितावचनम् द्विराषाढे
तुकन्यायांशक्रमुत्थापयेद्यदि राज्ञोराज्यंविनश्येतप्रजाचैवानिपीडयते अथतत्पूजा तत्रावाहनमंत्रः एह्ये
हिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरामरेश समुत्थितस्त्वंश्रवणाद्यपादेगृहाणपूजांभगवन्नमस्ते इत्यावाहनम्
ऐरावतसमारूढोवज्रहस्तोमहाबलः शतयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमः वज्रहस्तसुरारिघ्नबहुनेत्रपुरंदर
रक्षार्थंसर्वभूतानांपूजेयंप्रतिगृह्यतां इत्येतैर्मंत्रैः संपूज्यप्रार्थयेत् नमस्तेदेवदेवेशसहस्राक्षनमोस्तुते आ
खंडलनमस्तेस्तुरूपंदेहिश्रियंस्थिरां इत्यष्टदिवसांतंप्रत्यहंसंपूज्यविसर्जयेत् अष्टमेदिनेभरण्यांविसर्जनं राज

मार्त्तंडे याम्येततोर्द्दैवपतेर्निशायांविसर्जनंशांतिकरंनृपाण। विसर्जनेतुव्यासोक्तोमंत्रःसार्द्धंसुरासुरगणैःपुरंदरशतक्रतो उपहारंगृहीत्वैनंमहेंद्रप्रतिगम्यतां अयमष्टमेहनिभरण्यामेव विसर्जनीयः तदुक्तंराजमार्त्तंडे अंतकस्यादिमध्यांतंयदिस्यादष्टमेहनि शक्रंविसर्जयेत्तत्रनोविधिश्चाष्टमोपरि पातयेदष्टमेचाह्निलोकपालंतदांतिके निशायांसर्वसत्वानांकरोतिकुशलंभुवि नवमेतुदिनेदृष्टोराज्ञांशक्रोभयप्रदः ततोनादृत्यमायांतं निशिसुप्तोनुपातयेत् नवमात्परतःशक्र मंतकस्यानुरोधतः येपश्यंतिवज्रपाणिंतेषांराष्ट्रंविनश्यति अंतकांतंयमदैवतस्यभरणीनक्षत्रस्यसुप्तनिशावसाने अत्राप्तावष्टमनिशावसानेभरण्युदयस्यतन्मध्यस्यतदंतस्यवालाभेशक्रविसर्जनं तदपितदलाभेतदेवाश्विन्यामपितद्विसर्जनं अत्रभौमशनिवारवर्ज्यंविसर्जनमुक्तं तथाच सौरभूमिजयोर्वारेसूतकेमृतकेपिवा भूमिपालादिकोत्पातेशक्रंनैवप्रवासयेत् इयमेवश्रवणद्वादशी नारदीये नभस्यशुक्लद्वादश्यांव्रतीसंपूज्यवामनं तदग्रेभोजयेद्विप्रान्पायसैर्द्वादशीतिथौ सौवर्णींदक्षिणांदत्वाविष्णुप्रीतिकरोभवेत् अत्रोपवासादिकं महाफलमित्युक्तं हेमाद्रौभाविष्योत्तरे मासिभाद्रपदेशुक्लाद्वादशीश्रवणान्विता सर्वपापहरापुण्याउपवासेमहाफलेति शुक्लद्वादश्यांश्रवणाभावे कृष्णद्वादश्यामाघादौसत्वेसर्वग्राह्या तदुक्तंमाधवीये शुक्लावायदिवाकृष्णाद्वादशीश्रवणान्विता तस्यामेवोपवासश्चत्रयोदश्यांतुपारणमिति एतच्चवचनंश्रवणयुक्तद्वादशीसामान्याभिप्रायं भाद्रपदशुक्लद्वादश्यांनियमेनश्रवणयोगस्यासंभवात् तत्रैकादश्यांद्वादशीश्रवणयोगेसैवोपोष्याएकादशीद्वादशीचवैष्णवमपितत्रचेत् तद्विष्णुशृंखलंनामविष्णुसायुज्यकृद्भवेदितिष्णुधर्मोक्तेः यदादिनद्वयेपिश्रवणद्वादश्योर्योगस्तदाप्येकादशीयोगस्यप्रशस्तत्वात्तद्युक्तायामेवोपवासादिकर्तव्यं तदुक्तंमदनरत्नेमात्स्ये द्वादशीश्रवणस्पृष्टाभवेदेकादशीयदि सएषवैष्णवोयोगो।

विष्णुशृंखलसंज्ञितः तस्मिन्नुपोष्यविधिवन्नरःसक्षीणकल्मषः प्राप्नोतित्युत्तमांसिद्धिंपुनरावृत्तिवर्जितामिति यदात्वेकस्मिन्नहोरात्रेश्रवणमेकादशींस्पृष्ट्वाद्वादशींस्पृशति तदाफलाधिक्यमुक्तंनारदीये संस्पृश्यैकादशींराजन्द्वादशींयदिसंस्पृशेत् श्रवणंज्योतिषांश्रेष्ठंब्रह्महत्यांव्यपोहति इति अस्मिंस्तुविष्णुशृंखलयोगेएकादश्युपवासश्चतंत्रेणैवानुष्ठेयःएकदैवत्यत्वाद्विरोधाभावाच्च अत्रचैकादश्याःश्रवणयोगाभावेपितद्दिनावच्छेदेनश्रवणद्वादशीयोगादेव विष्णुशृंखलमिति हेमाद्रिमतं निर्णयामृतेतुश्रवणस्यैकादशीद्वादशीभ्यांयोगे एवविष्णुशृंखलं नान्यथेति अत्रोदयादुदयपर्यंतोऽस्तमयपर्यंतोवामनक्षत्रयोगइतरद्वादशीवन्नापेक्षितः मासिभाद्रपदइतिभविष्योत्तरवाक्यात् तथाच मदनरत्नादिषुस्वल्पश्रवणयोगोपिसंपूर्णापुण्यतमाभवतीत्युक्तं द्वादशीश्रवणस्पृष्टाकृत्स्नापुण्यतमातिथिःनतुमानेनसंयुक्तातावत्येवप्रशस्यतइति मत्स्यपुराणात् निर्णयसिंधौ दीक्षितीयेच यदातिथ्यनंतरंसूर्योदयावधिद्विकलामात्रमपिश्रवणर्क्षंभवतितदापिपूर्वैवेत्युक्तंप्रक्रम्य तिथिनक्षत्रयोर्योगोयोगश्चैवनराधिप द्विकलोयदिलभ्येतसज्ञेयोह्यष्टयामिकइतिनारदीयवचनात् दिवोदासीयेतु रात्रेः प्रथमयामेश्रवणयोगेपूर्वाऽन्यथोत्तरा रात्रेःप्रथमपादेचेच्छ्रवणंहरिवासरे तदापूर्वामुपवसेत्प्रातर्भवतिपारणमित्युक्तेरितिइदंतुनिर्मूलत्वात्पूर्वविरोधादुपेक्ष्यमितिनिर्णयसिंधौ दीक्षितस्मृतिकौस्तुभयोर्मतेसमूलमेवमदनरत्नेनिर्णयसिंधौ प्रतापमार्तंडेच यत्तु यस्मिंदिनेउदयकालीनश्रवणद्वादशीयोगस्तस्मिन्दिनेश्रवणद्वादशीव्रतस्यविधायक मुदयव्यापिनीग्राह्या श्रवणद्वादशीव्रतइतिवृहन्नारदीयवचनं.यच्चस्मृत्यर्थसारेउदयव्यापिनीग्राह्येत्युक्तं तद्यदाशुद्धाधिकाद्वादशीपरदिनेपूर्वोदयकालिकश्रवणयोगवती पूर्वदिनउदयकालव्यतिरिक्तकालिकश्रवणयोगवती तदोत्तराग्राह्येत्येवंपरामित्युक्तं यदातूभयकालीनः श्रवणयोगस्तदा पूर्वाग्राह्या वहुतरकर्मकालव्यापित्वात् यदातुश्रवणनक्षत्रमेकादश्यामेवभवति नतुद्वादश्यां

व्र०र०
मद्रप०
७९

तदाश्रवणद्वादशीव्रतमेकादशीव्रतमेकादश्यामपिकर्त्तव्यं तदुक्तं यदानप्राप्यतेऋक्षंद्वादश्यांवैष्णवंक्वचित् एकादशीततोपोष्यापापघ्नीश्रवणान्विता उभयोर्दैवताविष्णुःपुराणपुरुषोत्तमःविभेदोनैवकर्त्तव्योविभेदात्पतितोनरइति विष्णुपुराणेपि याःकाश्चित्तिथयःप्रोक्ताःपुण्यनक्षत्रयोगतः तामेवतद्व्रतंकुर्याच्छ्रवणंद्वादशींविनेति श्रवणद्वादशीव्रतंश्रवणान्वितायामेकादश्यामपिकर्तव्यम् नतुश्रवणरहितायांद्वादश्यामेवेतिनियमइत्यर्थः श्रवणयुतशुद्धैकादश्याअलाभेतुदशमीविद्धापिश्रवणयुताग्राह्या तथाचवन्हिपुराणे दशम्येकादशीयत्रसानोपोष्याभवेत्तिथिःश्रवणे नतुसंयुक्तासोपोष्यासर्वकामदेति एतावांस्तुविशेषः श्रवणैकादश्यांवामनावतारः कृष्णपूजाच श्रवणद्वादश्यां जनार्दनपूजाविधिस्त्वेकएव हरिभक्तिविलासेऽयंविशेषः तथाचकारिका एकादश्यामुपवसेत् प्रादुर्भूतोहिभगवान्द्वादश्यामेववामनः तथाचमत्स्यपुराणे उपोष्यैकादशींपूर्वंद्वादश्यांपूजयेद्धरिमिति अतोनयादिलभ्येतमध्यान्हेद्वादशीतदा द्वादशीमध्य एवार्च्योवामनस्तर्हिसूरिभिःयदात्वेकादशी शुद्धाद्वादशीश्रवणान्विता तदातुसमर्थे नोपवासद्वयंविधायत्रयोदश्यांपारणंकर्त्तव्यंतदुक्तंभविष्योत्तरे एकादशीमप्युपोषयेत् नचात्रविधिलोपःस्यादुभयोर्दैवतंहरिरिति पारणमंतरेणैकादशीव्रतसमाप्तिरूपविधिलोपोनस्यादित्यर्थः यत्तुविष्णुधर्मे पारणांतंव्रतंज्ञेयंयत्रतांतेविप्रभोजनम् असमाप्तेव्रतेपूर्वंनैवकुर्य्याद्व्रतांतरमितितदेतदन्यव्रतविषयं नारदीयपुराणे द्वादश्यामुपवासोत्रत्रयोदश्यांतुपारणं निषिद्धमपिकर्तव्यमित्याज्ञापारमेश्वरीति मार्कंडेयोप्येवं निर्णयसिंधौ अत्रगौडाः शृणुराजन्परंकाम्यंश्रवणद्वादशीव्रतमितिस्थूलशीर्षवचनात् काम्यमेवेदम् तेनाशक्तस्यनित्यमेकादशीव्रतमेवेतिमन्यंते द्वादशीमुपवासेनशुद्धात्मानृपसर्वशः चक्रवर्त्तित्वमतुलंसंप्राप्नोत्युत्तमां श्रियमितिगौडनिबंधेमार्कंडेयोक्तेश्चेति कालतत्वविवेचने एताश्चाष्टौद्वादश्यः काम्याएवेतिनित्यत्वप्रमाणा

6 161

भावात् फलश्रवणाच्च यत्तु नकरिष्यंतियेलोकेद्वादश्योष्टैममाज्ञया तेषांयमपुरेवासोयावदाभूतसंप्लवमित्यादीनिपद्मपुराणस्थवचनानीतिकेनचिल्लिखितानि तान्यपिवैष्णवग्रंथेष्वप्यदर्शनादनादरणीयान्येव कौस्तुभेतु इदंचव्रतंनित्यंकाम्यं उपवासमकृत्वातु नरोनरकमृच्छतीति श्रवणद्वादशीप्रकरणे वामनपुराण वचनादिति तत्रमूलंमृग्यं कृत्यरत्नावल्यांतु अत्रव्रतंकाम्यंनित्यमितिकेचिदित्युक्तं यस्तूपवासद्वयासमर्थोयावज्जीवं स्वीकरोत्येकादशीव्रतंचसत्वेकादश्यामुपोष्य श्रवणद्वादश्यांविष्णुंसंपूज्यदध्योदनदानादिकंकृत्वापारणंकुर्यात् तदुक्तंमत्स्यपुराणे द्वादश्यांशुक्लपक्षेतुनक्षत्रंश्रवणंयदि उपोष्यैकादशींतत्रद्वादश्यांपूजयेद्धरिं अस्यार्थः कालतत्वविवेचने हरिपूजामेवकुर्य्यान्नतूपवासमित्यर्थः उपवासकरणेतदंगहरिपूजायाः प्राप्तत्वादेवतद्विधिवैयर्थ्यादिति उपवासद्वयासमर्थेनास्वीकृतैकादशीव्रतेनकाम्यंनित्यस्यवाधकमितिन्यायेनश्रवणद्वादश्यामेवोपवासः कर्तव्यः तदुक्तंनारदीयपुराणे उपोष्यद्वादशींपुण्यांवैष्णवर्क्षेणसंयुतां। एकादश्युद्भवंपुण्यंनरःप्राप्नोत्यसंशयम् वाजिपेयेयथायज्ञेकर्महीनोपिदीक्षितः सर्वंफलमवाप्नोतिह्यस्नातोप्यहुतोपिसन्निति एवमेकादशींभुक्त्वाद्वादशीसमुपोषणात् पूर्ववासरजंपुण्यंसर्वंप्राप्नोत्यसंशयमिति निर्णयसिंधावपिवामनपुराणे एकादश्यांनरोभुक्त्वाद्वादश्यांसमुपोषणात् व्रतद्वयकृतंपुण्यंसर्वंप्राप्नोत्यसंशयमिति दिवोदासीयेभाविष्यपुराणे उपवासद्वयंकर्तुंनशक्नोतिनरोयदि प्रथमेह्निफलाहारीनिराहारोपरेहनीति उभयदिनेश्रवणाभावेतुएकादश्यामुपोष्यद्वादश्यांवामनोत्सवंकुर्य्यात् श्रवणयोगाभावेकेवलद्वादश्याव्रतविधानाभावात् तथाहरिभक्तिविलासीकारिका दिनद्वयेपिश्रवणाभावेतद्योगहानितः एकादश्यामुपोष्यैवद्वादश्यांवामनंयजेत् पारणेतूभयांते मुख्यः तदुक्तंस्कंदपुराणे तिथिनक्षत्रनियमेतिथिभांतेचपारणं अतोन्यथापारणायांव्रतभंगमवाप्नुयात्

उभयांतालाभे एकतरांतेवापारणंकुर्यात् तदुक्तं हैमाद्रौमदनरत्ने नारदीयपुराणे तिथिनक्षत्रसंयोग
उपवासोयदाभवेत् पारणंतुनकर्तव्यंयावन्नैकस्यसंक्षयइति इयंबुधवारेतिप्रशस्ता श्रवणद्वादशीयोगेबुध
वारोयदाभवेत् अत्यंतमहतीनामद्वादशीसाप्रकीर्त्तितेतिविष्णुधर्मोत्तरीयवचनात् भाद्रपदेसात्यंतफलदा
तथाचस्कंदपुराणे मासिभाद्रपदेशुक्लाद्वादशीश्रवणान्विता महतीदशधाज्ञेयाउपवासेमहाफला बुधश्रवण
संयुक्तायाचैवद्वादशीभवेत् अत्यंतमहतीतस्यांदत्तंभवतिचाक्षयमिति अत्रकृत्यंकृत्यरत्नावल्यां ब्रह्मवैवर्त्त
पुराणे बुधश्रवणसंयुक्ताविजयासंगमंतदा वारिधानींप्रदायास्यांदध्योदनसमन्वितां प्रेतयोनौनजायेतपूज
यित्वात्रवामनं वंशःसमुद्धृतस्तेनमुक्तःपितृऋणादसौ अत्रतीर्थस्नानादिकमनंतफलंभवति तदुक्तंविष्णुध
र्मोत्तरे भाद्रस्यशुक्लपक्षेतुनक्षत्रंश्रवणंयदि तस्यांतीर्थेयत्स्नानंतदनंतफलंभवेत् देवतापूजनंविप्र भोजनंहव
नंतथा एकजप्यात्सहस्रस्यजपस्यफलमश्नुते दानंचमहदल्पंवासहस्रगुणितंभवेदिति अस्यांबुधयोगे
संगमस्नानमुक्तंलैंगे अतःपरंतुसंसेव्योगंगावरुणसंगमः श्रवणद्वादशीयोगेबुधवारोयदाभवेत् तदातस्मि
न्नरःस्नात्वागोसहस्राफलंलभेदिति श्राद्धंकरोतियस्तत्रतास्मिन्कालेयशस्विनि तारयेत्सपितॄन्सर्वान्विष्णु
लोकंसगच्छति अन्यत्रापि नदीनांसंगमेस्नानमुक्तंविष्णुधर्मोत्तरे श्रवणद्वादशीयोगंपूजयित्वाजनार्दनं दा
नंदत्वाचविप्रेभ्यःसोपवासोजितेंद्रियः पुण्येषुसततंराजन्नदीनांसंगमेषुच गंगासरय्वोर्गंगायाःशोणस्यचसमा
गमे इक्षुमत्याश्चगंगाया गंगायमुनयोस्तथा गोमत्याश्चसरय्वाश्चकौशिक्यांगंडकागमे विपाशयादेवहूदो
यत्रयोगंप्रपद्यते विपाशाचतथायोगंयत्रयातिशतद्रुहा इरावतीतथायोगंयत्रयातिचासिंधुना चंद्रभागातथायोगं
तौष्यांयत्रसमागता चंद्रभागायत्रयातिवितस्तायाःसमागमं महासिंधुश्चसंयोगं यत्रयातिवितस्तया विष्णु

लोकंप्रापयतियावदाभूतसंप्लवं राजसूयादिभिर्यज्ञैर्यत्फलंसमवाप्यते श्रवणद्वादशींप्राप्यतत्फलंलभतेनरइति ॥ अथविष्णुधर्मोत्तरेश्रवणद्वादशीविधानम् रामउवाच उपवासासमर्थानांकिंचिदेकमुपोषितं महाफलंमहादेवतन्ममाचक्ष्वपृच्छतः शंकरउवाच याराम श्रवणोपेताद्वादशीमहतीतुसा तस्यामुपोषितःस्नातःपूजयित्वाजनार्दनंप्राप्नोत्ययत्नद्धर्मज्ञो द्वादशद्वादशीफलं दध्योदनयुतंतस्यांजलपूर्णंघटंतथा वस्त्रेणवेष्टितंदत्त्वाछत्रोपानहमेवच नदुर्गतिमवाप्नोतिगतिमग्र्यांचविंदति अक्षयंस्थानमाप्नोतिनात्रकार्य्याविचारणा श्रवणद्वादशीयोगेवुधवारोभवेद्यदि अत्यंतमहतीनामद्वादशीसाप्रकीर्त्तिता स्नानंजप्यंतथादानंहोमंश्राद्धंसुरार्चनं सर्वमक्षयमाप्नोतितस्यांभृगुकुलोद्वहतस्मिन्दिनेतथास्नातोयत्रक्वचनसंगमे सगंगास्नानजंरामफलंप्राप्नोत्यसंशयं श्रवणेसंगमाःसर्वे परपुष्टिप्रदाःसदा विशेषाद्द्वादशीयुक्तेवुधयुक्तेविशेषतः तथैवद्वादशीप्रोक्तासर्वकामफलप्रदा ॥ इतिविष्णुधर्मोत्तरोक्तश्रवणद्वादशी ॥ ॥ अथभविष्योत्तरोक्ताश्रवणद्वादशीकथा ॥ युधिष्ठिरउवाच उपवासासमर्थानांसदैवपुरुषोत्तम एकायाद्वादशीपुण्यातांवदस्वममानघ श्रीकृष्णउवाच मासिभाद्रपदेशुक्लाद्वादशीश्रवणान्विता सर्वकामप्रदापुण्याउपवासेमहाफला संगमेसरितांस्नात्वाद्वादश्यांसमुपोषितः समग्रंफलमाप्नोतिद्वादशद्वादशीभवं वुधश्रवणसंयुक्तासैवचेद्द्वादशीभवेत् अतीवमहतीतस्यांसर्वंकृतमिहाक्षयं द्वादशीश्रवणोपेतायदाभवतिभारत संगमेसरितांस्नात्वागंगादिस्नानजंफलं सोपवासःसमाप्नोतिनात्रकार्य्याविचारणा जलपूर्णंतथाकुंभंस्थापयित्वाविचक्षणः पंचरत्नसमोपेतंसोपवीतंसुपूजितं तस्यस्कंधेसुघटितंस्थापयित्वाजनार्दनं स्वशक्त्यास्वर्णघटितंशंखशार्ङ्गविभूषितं स्नापयित्वाविधानेनासितचंदनचर्चितं सितवस्त्रयुगच्छत्रवस्त्रोपानद्युगान्वितं ओंनमोवासुदेवायशिरःसंपूजयेत्ततः श्रीधरायमुखंतद्वद्वैकुंठायदृशौ नमःनमःश्रीपतयेवक्षंभुजौसर्वास्त्रधारिणे व्यापकायन

मःकुक्षी केशवायोदरंनमः त्रैलोक्यजनकायेतिमेढ्रंसंपूजयेद्धरिःसर्वाधिपतयेजंघेपादौसर्वात्मनेनम अनेनविधिनाराजन्पुष्पैर्धूपैःसमर्चयेत्ततस्तस्याग्रतोदेयंनैवेद्यंघृतपाचितं मोदकांश्चनवान्कुंभान्दद्याच्छक्त्याविचक्षणः एवंसंपूज्यगोविंदंकुर्य्याज्जागरणनिशि प्रभातेविमलेस्नात्वासंपूज्यगरुडध्वजं पुष्पधूपादिनैवेद्यैःफलैर्वस्त्रैःसुशोभनैः पुष्पांजलिंततोदत्त्वामंत्रमेतमुदीरयेत् नमोनमस्तेगोविंदबुधश्रवणसंज्ञक अघौघसंक्षयंकृत्वासर्वसौख्यप्रदोभव अनंतरंब्राह्मणेतंवेदवेदांगपारगे पुराणज्ञेविशेषेणविधिवत्संप्रदापयेत् प्रीयतांदेवदेवेशोममसंकष्टनाशनः अनेनविधिनाराजन्नद्यास्तीरेनरोत्तमः सर्वंनिवर्तयेत्सम्यगेकभक्तरतोपिसन् अत्रार्घ्यदानंभक्तिचंद्रोदये शंखचक्रगदापद्मशरशाङ्र्गविभूषित गृहाणार्घ्यंमयादत्तंशाङ्र्गपाणेनमोस्तुते इतिभविष्योत्तरोक्तंश्रवणद्वादशीव्रतम् ॥ ॥ अथवामनपुराणोक्ताश्रवणद्वादशीकथा ॥ पुलस्त्यउवाच श्रूयतांकथयिष्यामिकथांपापप्रणाशिनीं पुरात्रेतायुगस्यादौयथावृत्तंतपोधन मद्रदेशइतिख्यातो देशोवैब्रह्मणः सुत शाकलंनगरंतत्रख्यातंस्थानीयमुत्तमं तत्रविपणिवृत्तिस्थः सुधर्माख्योभवद्वणिक् धनाढ्योगुणवान्भोगीनानाशास्त्रविशारदः सचैकदानिजाद्राष्ट्रात्स्वराष्ट्रंगंतुमुद्यतः सार्थेनमहतायुक्तोनानाविपणिपण्यवान् गच्छतः पथितस्याथ मरुभूमौकलिप्रिय अभवद्दस्युतोत्पन्नो ह्यवस्कंदोतिदुः सहः ततःसहृतसर्वस्वो वणिग्दुःखसमन्वितः असहायोमरौतस्मिंश्चचारोन्मत्तवद्वशी चरतातदरण्येवै दुःखाक्रांतेननारदआत्माइवशमीवृक्षो मरावासादितः शुभः तं मृगैः पक्षिभिश्चैवहीनंदृष्ट्वाशमीतरुं क्षांतः क्षुत्तृट्परितात्मातस्याधः समुपाविशत् सुप्तश्चापिसुविश्रांतो मध्याह्नेचसउत्थितः समपश्यत्तथायांतंप्रेतंप्रेतशतैर्वृतं उद्वाह्यंतमथान्येनप्रेतेनप्रेतनायकं पिंडाशिभिश्चपुरतोधावद्भिर्भीमविग्रहैः अथाजगामप्रेतोसौपर्यटित्वावनानिच उपगम्यशमीमूलेवणिक्पुत्रंददर्शह स्वागते

नाभिवाद्यैनंसमाभाष्यपरस्परं उपोपविष्टः छायायांपृष्ट्वाकुशलमात्मवान् ततः प्रेताधिपतिनापृष्टः सतुवभूवतुः कुतआगम्यतेब्रूहिकसाधोवागमिष्यति कथंचेदंमहारण्यंमृगपक्षिविवर्जितं समासन्नोसिभद्रंतेसर्वमाख्यातुमर्हसि सर्वमाख्यातवान्ब्रह्मन्स्वदेशधनविच्युतिं तंचश्रुत्वासवृत्तांतंतस्यदुःखे दुःखिता वणिक्पुत्रवचःप्राहप्रेतपालःसबंधुवत् प्रेतपालउवाच ॥ एवंगतोपिमाशोकंकर्त्तुमर्हसिसुव्रत भूयोप्यर्थाभविष्यंतियादिभाग्यफलंतव भाग्यक्षयेथक्षीयंतेभवंत्यभ्युदयेनते क्षीणस्यास्यशरीरस्यचिंतयानोभयंभवेत इत्युच्चार्य्यसमारुह्यस्वान्भृत्यान्वाक्यमब्रवीत् अद्यातिथिरयंपूज्यः सहदेशजनैर्मम अस्मिन्दृष्टेवणिक्पुत्रेयथास्वजनदर्शनं अस्मिन्समागतेप्रेताः प्रीतिर्जाताममातुला एवंहिवदतस्तस्यमृत्पात्रंसुदृढंनवं दध्योदनेनसंपूर्णमाजगामयथेप्सितं तथानवाचसुदृढासंपूर्णापरमांभसा वारिधानीचसंप्राप्ता प्रेतानामग्रतःस्थिता तदागतंचसलिलमन्नंविक्ष्यमहामतिः प्राहोत्तिष्ठवणिक्पुत्रत्वमान्हिकमुपाचर ततस्तौवारिवाहिन्याः सलिलेनविधानतः कृत्वान्हिकावुभौजातौवणिक्प्रेतपतिस्तथा ततोवणिक्सुतेआदौदध्योदनमथेच्छया दत्वातेभ्यश्चसर्वेभ्यः प्रेतेभ्योप्यददात्ततः भुक्तवत्सुचसर्वेषुकामतोंभसिसेविते अनंतरंचबुभुजेप्रेतपालोवराशनं प्रकामतृप्तेप्रेतेतुवारिधान्योदनस्ततः अंतर्धानमगाद्ब्रह्मन्वणिक्पुत्रस्यपश्यतः ततस्तदद्भुततमंदृष्ट्वासौमतिमान्वणिक् पप्रच्छतंप्रेतपालंकौतूहलमनावशी अरण्येनिर्जलेदेशेकुतोन्नस्यसमुद्भवः कुतस्तुवारिधानीयंसंपूर्णापरमांभसा तथावीतभयाभृत्यास्तेभ्यर्णोवर्णतःकृशाः भवानपिचतेजस्वीकिंचित्पुष्टवपुःशुभः शुक्लवस्त्रपरीधानोवहूनांपरिपालकः सर्वमेतन्ममाचक्ष्वभवान्कःकाशमीत्वियं इत्थंवणिक्सुतवचःश्रुत्वासौप्रेतनायकः शशंससर्वंतस्याथयथावृत्तंपुरातनं अहमासंपुराविप्रःशाकलेनगरोत्तमेसोमशर्मेतिविख्यातोवहुलागर्भसंभवः ममासीच्चवणि

कृश्रीमान्प्रातिवेश्योमहायशाःसोहंकदर्य्योमूढात्माधनेपिसतिदुर्मतिः नददामिद्विजातिभ्योनचाश्नाम्यन्नमुत्तमं प्रमादाद्यदिभुंजेयंदाधिक्षीरघृतान्वितं रात्रौततोनृभिर्घोरैस्ताडयतेममविग्रहः प्रातर्भवतिमेघोरामृत्युतुल्याविसूचिका नचकश्चिन्ममाभ्यासेतत्रतिष्ठतिबांधवःकथंकथमपिप्राणामयासंप्रतिधारिताः एवमेतादृशःपापोनिवसाम्यतिनिर्घृणःसौवीरतिलपिण्याकशक्तुशाकादिभोजनैः क्षपयामिकदन्नाद्यैरात्मनःकालयाततां एवंतत्रसखेमह्यमहान्कालोभ्यगाद्यंश्रवणद्वादशीनाममासिभाद्रपदेभवत् तत्रनागरिकोलोकोगतःस्नानंचसंगमेःइरावत्यानद्वलायाब्रह्मक्षत्रपुरःसरःप्रातिवेशप्रसंगेनतत्रस्नातुंगतोह्यहं कृतोपवासःशुचिनात्वेकादश्यांयतव्रतः ततःसंगमतोयेनवारिधानींनरांदृढां संपूर्णांवस्त्रसंवीतांछत्रोपानहसंयुतांमृत्पात्रमपिमृष्टस्यपूर्णंदध्योदनस्यहि प्रदत्तंब्राह्मणेंद्रायशुचयेस्नातधर्मिणे तदेकंजीवितादत्तंमयादानंवणिक्सुत वर्षाणांसप्ततीनांतुनान्यद्दत्तंहिकिंचन मृतःप्रेतत्वमापन्नोदत्वाप्येतान्एमेहिमे एतत्तेकारणंप्रोक्तंयद्दत्तंतुमयांभसा दत्तंतदिदमायातिमध्याह्नेपिदिनेदिने यावच्चान्नंनभुंजेहंनतावत्क्षयमेतिवै मयिभुक्तेचपीतेचसर्वमंतर्हितंभवेत् यच्चातपत्रमददंसौयंजातःशर्मातरु उपानयुगलेदत्तेप्रेतोमेवाहनोभवत् इदंतवोक्तंसर्वंहिमयाज्ञानवतात्मना श्रवणद्वादशीपुण्यातवोक्तापुण्यवर्धिनी इत्येवमुक्तोवचनेवणिक्पुत्रोद्ववोद्वचः यन्मयातवकर्त्तव्यंतदनुज्ञातुमर्हसि तत्तस्यवचनंश्रुत्वावणिक्पुत्रस्यनारदप्रेतपालोवचःप्राहस्वार्थसिद्धिकरंततः यत्त्वयातातकर्त्तव्यंमद्धितार्थंमहामते कथयिष्यामित्सम्यक्तवश्रेयस्करंमम गयायांतीर्थजुष्टायांस्नात्वाशौचसमन्वितः ममनामसमुद्दिश्यपिंडनिर्वापनंकुरु तत्रपिंडप्रदानेनप्रेतभावादहंसखेमुक्तःसर्वपितॄणांहियास्यामिसहलोकतांयाचेयं द्वादशीपुण्यामासिप्रोष्ठपदेसिता बुध श्रवणसं युक्तासातेश्रेयस्करीस्मृताइत्येवमुक्तातुवचःप्रेतराजोनुगैः सह स्वनामानियथान्यायंसम्यगाख्यातवान्शुचिः प्रेतस्कंधंसमारोप्य

याततोमरुधन्वकं रम्येचशूरसेनाख्येदेशप्राप्तःसवैवणिक् स्वकर्मधर्मयोगेन धनमुच्चावचंवहु उपार्जयित्वाप्रययौगयातीर्थमनुत्तमं पिंडनिर्वपणंचक्रेऽथान्येषांस्वगोत्रिणां एवंप्रदत्तेष्वथवैपिंडेषुप्रेतभावतः विमुक्तास्तेद्विजप्रेताब्रह्मलोकततोगताः सचापिहिवणिक्पुत्रोनिजमालयमाव्रजत् श्रवणद्वादशींकृत्वाकालधर्ममुपेयिवान् गंधर्वलोकेसुचिरंभोगान्भुक्त्वासुदुर्लभान् मानुषंजन्मचासाद्यसवभौशाकलेविराट् स्वकर्मधर्मवृत्तिस्थः श्रवणद्वादशीरतः कालधर्ममवाप्यासौगुह्यकावासमाप्तवान् तत्रोष्यसुचिरंकालंभोगान्भुक्त्वाथकामतः मर्त्यलोकमथप्राप्यराजन्यतनयोऽभवत् तत्रापिक्षत्रवृत्तिस्थोदानधर्मरतोवशी नोग्रहेरिगणान् जित्वाकालधर्ममुपेयिवान् शक्रलोकंचदुष्प्रापं देवैःसर्वैः सुपूजितं पुण्यक्षयादिहागत्यशाकलेचाभवद्द्विजः ततोविकटरूपोसौसर्वशास्त्रार्थपारगः व्यवाहयद्द्विजसुतांरूपेणानुपमांद्विजः सातुतंनिजभर्त्तारंसुशीलमपिभामिनी विरूपमितिमन्वानाततःसोभूत्सुदुःखितः ततोनिर्वेदसंयुक्तोगत्वाश्रमपदंमहत् इरावत्यास्तटेधीमान्चक्रधारिणमासदत् तमाराध्यजगन्नाथंनक्षत्रपुरुषेणहि नक्षत्रपुरुषव्रतेनेत्यर्थः ॥ सुरूपांतामवाप्याग्र्यामस्मिन्नेवचजन्मनि ततःप्रियोभूद्भार्याया भोगवानभवद्वशी श्रवणद्वादशीयुक्तःपूर्वाभ्यासादजायत एवंपुरासौद्विजपुंगवस्तुकुरूपरूपोभगवत्प्रसादात् अनंगरूपप्रतिमोवभूवमृश्वराजासपुरूरवाभाभवत् ॥ ॥ इतिश्रीवीरमित्रोदयेवामनपुराणोक्ताश्रवणद्वादशीकथा ॥

अथभविष्योत्तरोक्ताश्रवणद्वादशीकथा ॥ ॥ श्रीकृष्णउवाच अत्राप्युदाहरंतीममितिहासंपुरातनं महत्यरण्येयद्वृत्तंभूमिपालशृणुष्वतत् देशोदशार्णकोनामतस्यभागेतुपश्चिमे अतीवासीन्मरुद्देशः सर्वसत्वभयंकरः संतप्तसिकताभूमिर्यत्रकृष्णामहोरगाः अल्पच्छायाद्रुमाकीर्णामृतप्रा

णिसमाकुला शमीखदिरपालाशसकरीरैश्चपीलुकैः तत्रभीमद्रुमाः पार्थ कंटकैः संवृताद्दढाः दुष्टप्राणिगणाकीर्णातत्रभूर्दृश्यतेक्कचित् अग्न्यर्कतापविषमानिस्तृणापुरुषोज्वलाः ज्वलदग्निसमैचवयत्किंचित्तत्रदृश्यते तथापिजीवाजीवंतिसर्वेकर्मनिबंधनाः नोदकंमुदकाभाराराजंस्तत्रवलाहकाः कदाचिदापिदृश्यंतेप्लवमानाविहंगमाः येकांतारगतैः कैश्चिच्छिशुभिस्तृषितैः समं गच्छंतिजलपानायसंभ्रमात्सैकतेतटे सैकतेष्वेवनश्यंतिजलेसैकतसेतुवत् तस्मिंस्तथाविधेदेशेकैश्चिद्दैववशाद्वणिक् निजसार्थपरिभ्रष्टः प्रविष्टोमरुजांगले बभ्रामभ्रांतहृदयः क्षुत्तृष्णाश्रमपीडितः क्वग्रामः क्वजनः कार्थ्यंयास्यामिवहुधेरितः अथप्रेतान्ददर्शासौतृष्णाव्याकुलितेंद्रियः स्नायुवद्धास्थिचरणांधावमानानितस्ततः उत्कचान्मलिनान्रूक्षान्निर्मांसान्भीमदर्शनान् प्रेतस्कंधसमारूढमेकंविकृतदर्शनं ददर्शवहुभिः प्रेतैः समंतात्परिवारितं आगच्छन्शिवभर्त्तांस स्तुतिशब्दपुरःसरं प्रेतस्कंधान्महींगत्वातस्यांतिकमुपागमत् सोभिवाद्यवणिक्श्रेष्ठमिदंवचनमब्रवीत् अस्मिन्घोरतरेदेशेप्रवेशोभवतः कथं तमुवाचवणिक्श्रीमान्ससार्थभ्रष्टयोगतः प्रवेशोदैवयोगेनकष्टकर्मकृतेनतु तृष्णामेवाधतेत्यर्थंक्षुद्भ्रमोथभृशांतथा प्राणाः कंठमनुप्राप्ता वचनंनष्टयेवमे अत्रोपायंनपश्यामिजीवेयंयेनकेनचित् ॥ कृष्णउवाच ॥ इत्येवमुक्तः प्रेतस्तं वणिजंवाक्यमब्रवीत् एवमुक्तेतथाचक्रेसवणिक्तृष्णयार्दितः मध्यान्हसमये प्राप्तेततस्तंदेशमागताः पुन्नागवृक्षाच्छीतावारिधानीमनोरमा दध्योदनस्य भक्तेन वर्धमानेनसंयुता अवतीर्यततःसोग्र दधावतिथयेततः तेषामामंत्रणेनैव त्वरांतृप्तिमुपागतः वितृष्णोविज्वरश्चैवक्षणेनसमपद्यत ततश्च प्रेतसंघस्यतस्माद्भागात्क्रमाद्ददौ दध्योदनात्सपानीयात्प्रेतास्तृप्तिंपरांगताः अतिथिंतर्पयित्वातुप्रेतलोकंचसर्वशः ततः स्वयंचवुभुजे भुक्तशेषंयथासुखं तस्यभुक्तवतस्तत्रपानीयंचक्षयंययौ प्रेताधिपंततस्तुष्टोव

णिग्वचनमब्रवीत् आश्चर्यमेतत्परमंवनेऽस्मिन्प्रतिभातिमे अन्नपानस्यसंप्राप्तिः परमस्यकुतस्तव स्तोके नचतथान्नेनविभर्षिसुवहून्पृथक् तृप्तिंगताः कथंत्वेतिनिर्मांसाभिन्नकुक्षयः अपरंचकथंह्येतन्ममाश्चर्यकथं यतः कथमस्यामटव्यांत्वंघोरायांचकृतालयाः तदेतत्संशयंछिंधिवरंकौतूहलंमम एवमुक्तःसवाणियांप्रेतो वचनमब्रवीत् ॥ प्रेतउवाच ॥ शृणुभद्रप्रवक्ष्यामिदुःकृतंकर्मचात्मनः शाकलेनगरेरम्येअहमासंसुदुर्मतिः वणिगासंपुराकालेततोभद्रंममानघ शाकलेनगरेतस्मिन्नास्तिक्यस्यदुरात्मनः धनलोभात्तदातत्रकदाचित्क्रमदेरिता नदत्ताभिक्षवेभिक्षानतृष्णार्त्तजलंकदा प्रतिवेश्यस्तुतत्रासीद्ब्राह्मणोगुणवान्मम श्रवणद्वादशीयोगेमासिभाद्रपदेतथा सकदाचिन्मयासार्द्धंतौषींनामनदींययौ तस्यास्तुसंगमःपुण्योयत्रासीच्चंद्रभागया चंद्रभागासोमसुतातौषीचैवार्कनंदिनी तयोःशीतोष्णसलिलेसंगमंसुमनोहरं तत्तीर्थवरमासाद्यप्रातिवेश्यस्तुमे द्विजः श्रवणद्वादशीयोगेस्नातश्चैवउपोषितः चांद्रभागस्यतोयस्यवारिधान्योनवादृढा दध्योदनयुतैःसार्द्धंसंपूर्णैर्वर्द्धमानकैः छत्रोपानद्युगंवस्त्रंप्रतिमांविधिवद्वरैः प्रददौविप्रमुख्यायरहस्यज्ञोमहामतिः चित्तसंरक्षणार्थायतस्यापिचततोभयात् सोपवासेनदत्तावैवारिधानीतदामया चांद्रभागस्यतोयस्यदध्योदनयुतातदा एतत्कृत्वागृहंप्राप्तस्ततःकालेनकेनचित् पंचत्वमहमायातोनास्तिक्यात्प्रेततांगतः अस्यामटव्यांघोरायांयथादृष्टस्तयानघ ब्रह्मस्वहारिणस्त्वेतेपापाःप्रेतत्वमागताः परदाररताःकेचित्स्वामिद्रोहरताःपरे मित्रद्रोहरताः केचित्पापकर्मरताश्चये ममैतेभृत्यतांयाताअन्नपानकृतेनघ अक्षयोभगवान्विष्णुःपरमात्मासनातनः यद्दीयतेतमुद्दिश्यअक्षयंतत्प्रकीर्तितं मयाविहीनाःकिंत्वेतेवनेऽस्मिन्भृशदारुणे पीडामनुभविष्यंतिदारुणंकर्मयोनिजं एतेषांतुमहाभागममानुग्रहकाम्यया अनेकनामगोत्राणिगृह्णीयास्त्वचिरेणच गयाशीर्षंततोगत्वा

श्राद्धंकुरुमहामते एकमेकंसमुद्दिश्यप्रेतंप्रेतंयथाक्रमं अस्तिकक्षागताचैवतत्रसंपुटिकाशुभा हिमवंतमथासाद्यतत्रस्त्वंलप्स्यसेनिधिं इत्याज्ञाप्यसचप्रेतोवणिजंतंयथासुखं विसर्जयामासतदासवैप्रायात्स्वमालयं समासाद्यगृहंतत्रपश्चात्प्रायाद्धिमालयं तत्रोपदिष्टंविधिवन्निधिंप्राप्यसमागतः सयाष्टिंसंप्रतिष्ठाप्यगयाशीर्षंततोगतः धनभागः तथादायगयाशीर्षंततोघटं प्रेतानांक्रमशस्तत्रचक्रेश्राद्धंदिनेदिने ततःसप्रेतनाथोहितोतजांबूनदप्रभःसमारुह्यविमानेसौस्वर्गलोकमितोगतःस्वर्गतेप्रेतनाथे तु प्रभावात्सवणिक्ततः प्रेतानांक्रमशस्तत्रचक्रेश्राद्धानिसर्वतःयस्ययस्ययथाश्राद्धंकरोतिसदिनेवणिक् सःसस्तदातदास्वप्नेदर्शयत्यात्मनस्तनुंब्रवीतिचमहाभागप्रसादेनतवानघप्रेतभावमिमंत्यक्त्वाप्राप्तोस्मि परमांगतिं सकृत्वाधनलोभेनप्रेतानांसद्गतिंवणिक्जगामस्वगृहेतत्रमासिभद्रेयुधिष्ठिर चकारविधिद्दानंततोधिष्ठांतमागतः अवापपरमंस्थानंदुर्लभंसर्वमानुषैः यत्रकामफलावृक्षाःनद्यःपायसकर्द्दमाः शीतलामलपानीयाःपुष्करिण्योमनोरमाः तंदेशमासाद्यवणिकमहात्मासमृष्टजांबूनदभूषितांगः कल्पंसमग्रंसुरसुंदरीभिः स्वर्गेसरेमेमुदितःसदैव बुधश्रवणसंयुक्ताद्वादशीसर्वकामदा दानंदध्योदनंशस्तमुपवासपरोभव सगरेणककुत्स्थेनधुंधुमारेणगाधिना एतैश्चान्यैश्चराजेंद्रकामदाद्वादशीकृता याद्वादशीबुधयुताश्रवणेनसार्द्धंसावैजयंतिकथितामुनिभिर्नभस्ये तामादरेणसमुपोष्यनरोहिसम्यक्प्राप्नोतिसिद्धिमणिमादिगुणे पपन्नम्

इतिभविष्योत्तरोक्ताश्रवणद्वादशीव्रतकथा ॥॥

अथोद्यापनं उपोषितोनरोभक्त्यास्थापयेत्प्रतिमाग्रहः कृत्वासौवर्णिकंदेयंवामनंतंमथाव्ययंगंधैःपुष्पैस्तथाधूपैर्नैवेद्यैर्विविधैरपि ततस्तस्यासमीपेतुदधिभक्तघटंन्यसेत् करकःपुरतःस्थाप्योगंधोदकसमन्वितः छत्रंचसाक्षसूत्रंचसुयष्टिंकुंडिकांतथा न्यसेत्तस्यसमीपेतुशुचिःशुद्धेनचेतसा नैवेद्यैर्विविधैर्भक्ष्यैःसर्वतस्तंप्रपूजयेत्

खतूर्य्यरवैश्चैवब्रह्मघोषविमिश्रतैः एवंजागरणंकृत्वाप्रभातेविमलेजले स्नानादिकंविधायाथहोमंकुर्य्यात्तिलैः सहपूजांचपूर्ववत्कृत्वावामनस्यसमीपतः दद्यात्तद्विप्रवर्य्यायवामनंतिलमध्यगं वामनोवुद्धिधोदाताद्रव्यस्थो वामनःस्वयं वामनोस्यप्रतिग्राहीतेनवामनतेनमः वामनःप्रतिगृह्णातिवामनोवैददातिच वामनस्तारकोभाभ्यांतेनवामनतेनमः ॥ इतिदानप्रतिग्रहमंत्रोः ॥ ॥ अत्रप्रतिमाग्रतइतिउपवासदिनेश्रवणद्वादशीव्रतांगत्वेनयस्याःप्रतिमायाःपूजनंकृतं तदग्रेउपवासदिनेएवोद्यापनांगत्वेनप्रतिमांतरस्थापनंरात्रौपूजांतरविधानमुच्यते उपोषितइतिचाशक्तस्यापिदिवाहारवर्जनंरात्रिपूजात्वेनकथ्यतेद्रष्टव्यं एवंजागरणंकृत्वेतिश्लोकेपूर्वकृतस्नानादिभिन्नंवक्ष्यमाणहोमांगत्वेनस्नानवासःपरिधानादिविधीयते उद्यापनांगत्वेनजागरणतुल्यतांदर्शयितुं तदपवास्तिलैःसहेति पायसाक्षतानांचेतिशेषः पौरुषेणतुसूक्तेनपायसंहोमयेत्सुधीः पश्चात्तिलाक्षितांश्चैवपूर्णाहुत्यासमन्वितः दध्यातुद्विजवर्य्यायवामनंविमलंस्थितमितिशास्त्रांतरसंप्रधायात् ॥ ॥

अथप्रयोगः भाद्रशुक्लद्वादश्यांसंगमेस्नात्वा गृहमागत्यश्रवणद्वादशीप्रयुक्तांविष्णुपूजनंकृत्वा वृद्धश्रवणद्वादशीव्रतांत्वेनोद्यापनंकरिष्ये इतिसंकल्प्य तदंगत्वेनगणेशपूजनाद्याचार्य्यवरणांतंकुर्य्यात् यथाविभवंतस्यपूजनंच अथाचार्य्योहंस्यांवामनप्रतिमाया अग्न्युत्तारणंकुर्यात् यथाविभवंतत्पूजनंचसाय संध्योत्तरपूर्वपूजितप्रतिमाग्रेपुष्पमंडपिकायासर्वतोभद्रादिमंडलस्थकलशोपरिवामनप्रतिमायां ओंवामनायनमइतिमंत्रेणसहस्रशीर्षेत्यादिमंत्रसहितेनषोडशोपचारैः संपूजयेत् तत्रनैवेद्यंवहुविधंप्रदर्शयेत् पूजांतेदेवदेवस्यपुरतः दधिघटगंधोदकपूर्णकरकछत्रादिचसादयेत् ततोनानावाद्यघोषैर्ब्रह्मणवेदघोषैश्चजागरणंकुर्य्यात् सर्वेप्रहरेषुनानाविधभक्ष्यनैवेद्यसमर्पणंचकुर्य्यात् ततः प्रातर्नित्यंस्नानहोमौविधायपुनःस्नानधौतवासास्तिलकधा

[illegible]क्तोद्यापनांगहोमंकल्पयेत् आचार्य्योयदन्नसंस्थितामितिसर्षपविकरणप्रोक्षणादिदेशशुद्धिंविधायहोमांग
त्वेनस्थंडिलेऽग्निंप्रतिष्ठाप्यैशानदेशेकलशेवरुणपूजनांतंग्रहपूजनंचकृत्वाऽग्नेपश्चिमेदेशेउपविश्य ग्रहोद्देशे
ान्वाधानेऽर्कादिसमिच्चर्वाज्यातिसंकीर्तिं पुरुषनारायणंषोडशपायसाहुतिभिः षोडशतिलाक्षताहुतिभिः शे
षेणस्विष्टकृतमित्यादि अष्टपात्रासादनंप्रणीतानिधानांतेआज्यनिर्वापः ग्रहसमिद्वपायसेनसहतिलैर्यवतंडु
लैश्चआज्यपर्य्यग्निकरणं संमार्जनांते पायसमग्नावधिश्रित्याभिधार्योद्वास्याजंदाक्षिणे आसाद्याग्न्यर्चनादिआ
ज्यभागांतेयथान्वाधानं प्रायश्चित्तांतेवलिदानपूर्णाहुति ततः पूर्णपात्रानयनसंस्थाजयपरिस्तरणविसर्जना
र्चना ततोवरुणकलशोदकेनयजमानाभिषेकः आचार्य्यायधेनुदानं ततोवामनस्यग्रहाणांचोत्तरपूजांते ताःप्र
तिमाआचार्य्यहस्तेप्रतिपाद्यदशावतारब्राह्मणभोजनसंकल्पेश्वरार्पणंकुर्य्यादितिश्रवणद्वादशीव्रतं ॥

अथवामनजयंतीव्रतकथा ॥ भविष्योत्तरे ॥ श्रीकृष्णउवाच ॥ ॥ द्वादश्यास्तेविधिः प्रोक्तः
श्रवणेनयुधिष्ठिर सर्वपापप्रशमनः सर्वसौख्यप्रदायकः एकादशीयदासास्यात्श्रवणेनसमन्विता वि
जयासातिथिः प्रोक्ताव्रतिनामभयप्रदा पुरादेवगणैः सर्वैर्निजधामपरिच्युतैः प्रार्थितोभगवान् विष्णोरिंद्रा
ग्न्यनिलसंयुतैः वलवानतितोविष्णुर्वलिर्नाममहावलः तेनदेवगणाः सर्वेपातितानिजमंदिरात् त्वंगतिः
सर्वदेवानांशीघ्रंकष्टंत्वमुद्धर जहिदैत्यंमहावाहोवलिंवलवतांवर श्रुत्वाविष्णुस्तदावाक्यंदेवानां
करुणोदयं उवाचवाक्यंवाक्यज्ञोदेवानांहितकाम्यया जानेविरोचनसुतंवलिंत्रैलोक्यशंकितं तपसाभा
वितात्मानंशांतंदांतंजितेंद्रियं मद्भक्तंमद्गतप्राणंसत्यसंधंमहावलं सपूजयतिमांभक्त्याप्रजानांप्रियकारकः
नगुणास्तस्यशक्यंतेवक्तुंकेनापिभूतले अवश्यंतपसोपेतैर्भोक्तव्यंतपसःफलं तपसस्तस्यवहुनाकालेनांतोभवि

ष्यति यदाविजयिसंज्ञास्यात्कालेनकेनचित्कृत। समाहृत्यश्रियंतस्मातदादास्येदिवौकसां अदितिर्मैप्रयत्नाद्दैपुत्रार्थीपुत्रगृध्निनी तस्यामनीषितंदेवकार्य्यंविष्णुराचिंतयत् संचिंतयित्वासुचिरंदेव्यागर्भावधारणं अदितिवरयामासवांछितंतेभविष्यति अथकालेवहुगतेगार्विणीसाभवत्तदा सुषुवेनवमेमासिपुत्रंसावामनंहरिं ह्रस्वपादं ह्रस्वकायंमहाशिरसमन्वितं पाणिपादोदरकृशंह्रस्वजंघोरुकेसरं दृष्टातुवामनंजातमदितिर्मोददायकं भयंवभूव दैत्यानांदेवतास्तोषमागमन् जातकादीनशुभकरान्संस्कारान्स्वयमेवहि चकारकश्यपोधीमान्प्रजापतिसमन्वितः आवद्धमेखलोदंडीजटीयज्ञोपवीतवान् कुशचर्माजिनधरः कमंडलुविभूषितः वलेर्वलवतोयज्ञंजगामवह्वविस्तरं दृष्टादैत्यवलंसर्वंवामनोभेतत्क्षणं अर्थेनाहंयज्ञपतेर्दीयतांमममेदिनी पदत्रयप्रमाणेनयाचनार्थंस्थितोस्म्यहं दत्तादत्तातवत्तथावलिः प्राहद्विजोत्तमं ततोवर्द्धितुमारेभेवामनोनंतविक्रमः पादौभूमौ प्रतिष्ठाप्यशिरसावृत्यरोदसी तंदृष्ट्वामहदाश्चर्यंसिद्धादेवर्षयस्तथा साधुसाध्वितिदेवेशंप्रशशंसुर्मुदान्विताः ततोदैत्यगणान्सर्वान्जित्वात्रिभुवनंवशी वलिंप्राहचभोगच्छ पातालंसवलानुगः तत्रत्वमीप्सितान्भोगान्भुक्तामद्वाहुपालितः अस्येंद्रस्यावसानेतुत्वमेवेंद्रोभविष्यसि एवमुक्तोवलिःप्रायान्नमस्कृत्यनरोत्तमं विसृज्यचवलिंदेवोलोकपालानुवाचह स्वानिधिष्ण्यानिलोकेशागच्छध्वंविगतज्वराः देवेनोक्तागतादेवाः प्रहृष्टापूज्यवामनं देवःकृत्वाजगत्कार्य्यंतत्रैवांतरधीयत एतत्सर्वंसमभवदेकादश्यांनराधिप तेनेष्टादेवदेवस्यसर्वथाविजयातिथिः एवंचफाल्गुनेमासिपुष्पेणसाहितानृप विजयाप्रोच्यतेसद्भिःकोटिकोटिगुणस्तदा एकादश्यांसोपवासोरात्रौसंपूजयेद्धरिं रौप्येसौवर्णपात्रेवादारुवंशमयेपिवा सौवर्णवामनंकुर्य्यात्स्ववित्तस्यनुसारतः शिखीकमंडलुधरः छत्रीयज्ञोपवीतवान् एवंलक्षणसंपन्नंवामनंपूयेद्धरिं आछाद्यपात्रंवासोभिरहतैःफलसंयुतैः मार्गेणचर्मणानद्धैभक्त्यावाशक्त्यपेक्षया ति

लोदकेनसंपूर्णप्रस्थेनकुडवेनच अलाभेयवगोधूमैःफलैशुक्ल तिलैर्नवैः पुष्पैर्गंधैः फलैर्धूपैःकालोत्थैरर्चयेद्धरिं नानाविधैश्चनैवेद्यैर्भक्ष्यैर्भोज्यैर्गुडोदनै स्वस्यवित्तानुसारेणसहिरण्यंचकारयेत् एभिर्मंत्रपदैस्तत्रपूजयेद्गरुडध्वजं उपहारैर्नृपश्रेष्ठशुचिर्भूत्वासमाहितः ॥ ॥ अथाग्रेभविष्येत्तरोक्तोवामनजयंत्याःप्रयोगः ॥

तत्रादौभाद्रशुक्लद्वादश्यां नदीसंगमादितीर्थंगत्वा ॥ वरोवरेण्योवरदोवराहोधरणीधरः अपवित्रपवित्रमांकरोतुभगवान्हरिरितिमंत्रेणतिलकल्कादिविलेपनपूर्वकंस्नात्वा संध्यापूजादिनित्यविधिंसमाप्य संकल्पंकुर्यात् ॥ ॥ ओमद्येत्यादिदेशकालौसंकीर्त्यात्मनोखिलपापक्षयपूर्वकपैशाच्यादिदुर्गतिनिवारणद्वाराविष्णुप्रीत्यर्थं पुत्रपौत्रादिपरिवारसहितचिरंजीवत्वसुखसौभाग्यादिसदभीष्टसिद्ध्यर्थंवामनजयंतीव्रतोद्यापनांगभूतवाम नपूजाविधानंकरिष्ये आचार्यवरणादिपूजातंतंसमाप्य मंडपांतर्वेदिकायांपीठादौदेवताःपूजयेत् आधारशक्तयेनमः विमलायैनमः उत्कर्षिण्यैनमः इ[illegible]नमः क्रियायैनमः प्रह्वायैनमः सत्यायैनमः मेधायैनमः मध्येपरदेवतायैनमः परितोवाहे[illegible]इंद्रा[illegible]लोकपालेभ्यः सायुधेभ्यः सपरिवारेभ्योनमः पूर्वादिदिक्षु गणपतिंदुर्गांक्षेत्रपालं वास्तोष्पतिमभ्यर्च्यस[illegible]तोभद्रे ब्रह्म[illegible]तनुब्रह्मादिदेवताश्चावाह्यसंपूज्य तदुपरिकुशान्कृष्णाजिनंवाप्रसार्यततत्रद्रोणपरिमितंतिलपर्वतं अलाभेयव[illegible]ानूउपरितिलपूरितंपात्रंसकलशंसंस्थाप्यतत्रद्वादशारपद्मे हैमींवामनप्रतिमांस्थापयेत् तत्रमंत्रः त्रीणिपदानिविचक्रमेविष्णुर्गोपाअदाभ्यः अतोधर्माणिधारयन् इतिसंस्थाप्यपूजयेत् ॥ ॥ ॥ अथध्यानम् ध्यात्वाजलमयंदेहंदेवदेवस्यचक्रिणः ब्रह्मांडमुदरेयस्य महद्भूतैरधिष्ठितं मायावीवामनः श्रीमान्समांपायाजगत्पतिः शिखीकमंडलुधरःछत्रीयज्ञोपवीतवान् एवंलक्षणसंपन्नंवामनंपूजयेद्धरिं सहस्रशीर्षेतिआवाहनम् आगच्छदेवदेवेशतेजोराशीजगत्पते क्रियमाणां

मयापूजांगृहाणसुरसत्तम ॥ १ ॥ पुरुषएवेदमासनं नानारत्नसमाकीर्णंकार्तस्वरविभूषितं आसनंदेवदेवेशपूजार्थंप्रतिगृह्यतां ॥ २ ॥ एतावानस्यपाद्यं पाद्यंगृहाणदेवेशसर्वक्षेमकरप्रभो भक्तयासमर्पितंदेवलोकनाथनमोस्तुते ॥ ३ ॥ त्रिपादूर्द्धअर्घ्यं नमस्तेदेवदेवेशनमस्ते धरणीधर नमस्तेजगदाधारअर्घ्यंनःप्रतिगृह्यतां ॥ ४ ॥ ततोविराडित्याचमनं कर्पूरवासितंतोयंमंदाकिन्याःसमाहृतं आचम्यतांजगन्नाथमयादत्तंहिभक्तितः॥ ५ तस्माद्यज्ञात्सर्वहुतःसंभृतमितिस्नानं पंचामृतंमयानीतंस्नानार्थंपरमेश्वर शर्करारससंयुक्तंपयोदधिघृतंमधु अजनायमहेशायजलजास्यायशंखिनी न[illegible]केशवानंतवासुदेवनमोस्तुते ॥ ६ ॥तस्माद्यज्ञात्सर्वहुतऋचःसामानिवस्त्रं सर्वभूषाधिके सौम्ये लोकलज्जानिवा[illegible]दयोःपा[illegible]तुभ्यंवाससीप्रतिगृह्यतां ७ तस्मादश्वाति यज्ञोपवीतम् सर्वदेवनमस्तेतस्तुत्राहिमांभवसागरात् ब्रह्मसू[illegible]नरीयंगृहाणपरमेश्वर ८ तंयज्ञमितिगंधं मलयेषुसमुत्पन्नंगंधयुक्तंमनोहरं मयानिवेदितंगंधंगृहाणपुरुषोत्तम ९ यत्पुरुषामेतिपुष्पं माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां पुष्पपूजांतेअंगपूजांकुर्यात् पादादावेकमेकांगंपूजयेच्छीर्षंततः पादौमत्स्यायचनमःनमःकूर्मायजानुनी वराहायनमोगुह्यंनृसिंहायेतिनाभितः उरस्तुवामनायेतिभुजौरामायवैनमः मुखंश्रीरामचंद्रायकृष्णायचनमःशिरः मत्स्यंकूर्मंवराहंचनारसिंहंचवामनं रामंरामंरामकृष्णमर्चयामीहतेनमःततोधूपादिपूजा ब्राह्मणोस्येतिधूपः धूपोयंदेवदेवेशशंखचक्रगदाधर अच्युतानंतगोविंदवासुदेवनमोनमः चंद्रमामनसेतिदीपं त्वमेवपृथिवीज्योतिवायुराकाशमेवच त्वमेवज्योतिषांज्योतिर्दीपोयंप्रतिगृह्यतां १२ नाभ्याआसीतिनैवेद्यं अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं मयानिवेदितंदेवप्रसीदपरमेश्वर १३ यत्पुरुषेणहविषाइतितांबूलं पूगीफलंमहादिव्यंनागवल्लीदलैर्युतं कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्यतां १४ इदंफलंमयादेवइतिफलं सप्तास्यासन्नितिदक्षिणा हिरण्यगर्भग

र्भस्थमित्यादिपठेत् १५ चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच त्वमेवसर्वज्योतींषिआर्तिक्यंप्रतिगृह्यतां इतिनीराजनं यानिकानिचपापानीतिप्रदक्षिणायज्ञेनयज्ञमितिमंत्रपु.ष्पांजलि नमस्तेपुंडरीकाक्षनमस्तेस्त्वमरप्रिय नमस्तेजगदाधारदेवदेवनमोनमः इतिनमस्कारः१६ततःप्रार्थना अग्निर्यमोवैश्रवणःकेशवःसलिलंशिवःत्वष्टायमोथवरुणः पापंमेहंतुसर्वदा जगत्पूज्योजगद्वंद्यअनादिर्जगदंतकृत् जलाशयोजगद्योनिःप्रीयतांमेजनार्जनः अनेककर्मनिर्वंधध्वंसनंजलशायिनं नतोस्मिमथुरावासंमाधवंमधुसूदनं नमोवामनरूपायनमस्तेस्तुत्रिविक्रम नमस्तेवलिवंधायवामनायनमोनमः नमोनमस्तेगोविंदवामनेशत्रिविक्रम पापस्यसंक्षयंकृत्वासर्वकामप्रदोभव सर्वगःसर्वदेवेशः श्रीधरःश्रीनिकेतनः विश्वेश्वरायविष्णवेश्रीशायच नमोनमः एवंसंपूजयेद्रात्रौएकादश्यांनरोत्तमः जागरंतत्रकुर्वीतगीतवादित्रमंगलैः प्रातः पूर्वोक्तविधिनापूजयेद्वामनंहरिं स्त्रियोवापुरुषावापिवामनंमंत्रवद्ददेत वामनः प्रतिगृह्णातिवामनोवैददातिच वामनस्तारकोभाभ्यांवामनायनमोनमः इतिपूजा अथोद्यापनांगभूतोहोमः तत्रस्वगृह्योक्तविधिनाअग्निंप्रतिष्ठाप्य अनाध्वानातमग्निकार्यं समाप्य वामनंपायसघृतसंमिश्रिततिलैःप्रतिद्रव्यमष्टोत्तरशतसंख्याकाहुतिभिः पीठदेवताब्रह्मादिदेवताश्चैकैकयाहुत्यापक्षे इत्यभिलप्य इरावतीतिमंत्रेण पायसंघृतंचजुहुयात् इरावतीधेनुमतीहिभूतꣳसूय.वसनीमनवेदशस्या।व्यस्कभ्णारोदसीविष्णवेतेदाधर्मर्थपृथिवीमभितोपपूषैः स्वाहा १०८ इदंविष्णुरितिपालाशसमिद्भिः इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं समूढमस्यपाꣳसुरेस्वाहा १०८ त्रीणित्याज्यहोमः त्रीणिपदानिविचक्रमेविष्णुर्गोपअदाभ्यः अतोधारयन्स्वाहाः १०८ विष्णोकर्माणित्याज्यहोमः विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशेइंद्रस्ययुजःसखास्वाहा १०८ ततोहोमशेषंसमाप्य द्वादशविप्रान् वस्त्रादिनासंपूज्य दध्यन्नमुपवीतगोपीचंदनपूगीफलदक्षिणायुतान्करकान्तेभ्यो

दद्यात् तत्रमंत्रः वामनःप्रतिगृह्णातीतिमंत्रपाठः ततः एकंसुगंधिजलपूर्णंदधिभक्तयुतंद्विज करकंतेप्रयछामिवाम नःप्रीयतामिति वामनःप्रतिगृन्हातीतिपठित्वा आचार्य्यायदद्यात् सोपस्करं शय्यांगांचव्रतपूर्तयेआचार्य्या यदत्वा पूर्णाहुतिंविधाय ईशानकलशोदकेनाभिषेकंविधाय अन्यानपिभूरिदक्षिणादिभिःपरितोष्यआशिषांगृह्णी यात् श्रीकृष्णउवाच एवंदत्वाततःप्रातर्भोजनंपृथदाज्यकं पूर्वंदद्याद्ब्राह्मणेभ्यः पश्चाद्भुंजीतवाग्यतः भूयोयथेच्छया राजन् सर्वत्रैषाविधिःस्मृतः एवंकृतेव्रतेराजन्यत्पुण्यंतच्छृणुष्वमे यावत्कल्पशतंपूर्णंतावद्वर्षाणिसंख्यया प्राप्य विष्णुपुरेभोगान्भुक्त्वांतेकल्पसंक्षये इहागत्यभवेद्राजाराजभिश्चापिसेवितः हस्त्यश्वरथपादानीदाताभोक्ताविम त्सरा रूपसौभाग्यसंपन्नोदीर्घायुर्नीतिसंयुतः पुत्रपौत्रैः परिवृतोजीवेत्सशरदांशतं एषाव्युष्टिर्मयाख्याताद्वादश्या स्तेयुधिष्ठिर एवमेवसमाख्याताद्वादशीश्रवणान्विता उपोष्यैकादशीपश्चाद्द्वादशीमप्युपोषयेत् नचात्रविधिलोपः स्यादुभयोर्देवताहरि वुधश्रवणसंयुक्ताद्वादशीसंगमोदकं दानंदध्योदनंसम्यगुपवासोर्चनंहरेः सगरेणककुत्स्थे नधुंधुमारेणगाधिना एतैश्चान्यैश्चराजेंद्रकृतोयंद्वादशीविधिः इतिभविष्योत्तरेपुराणेसोद्यापनंवामनजयंतीव्रतम्

अथास्यामेवभाद्रशुक्लद्वादश्यामवियोगद्वादशीव्रतंभविष्योत्तरे युधिष्ठिरउवाच ॥ अवियोगव्रतंब्रूहिमह्यंदे वकिनंदन विधानंकीदृशंचास्याकिंपुण्यंकात्रदेवता श्रीकृष्णउवाच शृणुपांडवयत्नेनकथ्यमानंमयाखिलं अवियोगवतंनामव्रतानामुत्तमोत्तमं प्रौष्ठपादेशुक्लपक्षेद्वादश्यांप्रातरुत्थितः सशुचिः शुक्लाभरणः स्नात्वापूर्वं जलाशये हृद्येरम्येविलिप्तेचाविलिखन्मंडलेहरिं गोधूमचूर्णपिष्टैर्लक्ष्मीमनुपार्श्ववर्तिनीं तत्रैवहरंगौरीसहितं सावित्रींब्रह्मणासहितांरंज्ञीसाहितंचरविंत्रैलोक्यद्योतकर्तारं गंधैः पुष्पैर्धूपैर्नैवेद्यैरर्चयेद्यथाशक्त्या अवियोगव्र तचारीमंत्रेणानेनराजेंद्रनारीवापुरुषोवा अवियोगव्रतंदृढंकृत्वा भक्त्याध्यानीमौनीभूत्वापूजयेद्देवान सहस्रमूर्द्धा

पुरुषः पद्मनाभोजनार्दना व्यासर्षिकपिलाचार्यौभगवान्पुरुषोत्तमः नारायणोमधुलिहाविष्णुर्दामोदरोहरिः महावराहोगोविंदः केशवोगरुडध्वजः श्रीवत्सः पुंडरीकाक्षोविश्वरूपस्त्रिविक्रमः उपेंद्रोवामनोरामोवैकुंठोमाधवोविभुः वासुदेवोहृषीकेशाः कृष्णः संकर्षणोच्युत- अनिरुद्धोमहायोगीप्रद्युम्नोनंतएवच नित्यंममास्तुसुप्रीतः ससुतः केशिसूदनः उमापतिर्नीलकंठःस्थाणुसंभुर्भगाक्षिहा ईशोस्तुसहपार्वत्याशंकरः शंकरेश्वरः ब्रह्माशंभु· प्रभुस्त्रष्टापुष्कराक्षः पितामहः हिरण्यगर्भोवेदज्ञः परमेष्टिप्रजापतिः वेधाचतुर्मुखःकर्ता स्वयंभुः कमलासनः विरंचिपद्मयोनिश्चममास्तुवरदःसदा आदित्योभास्करोभानुःसूर्य्योर्कः सवितारिकः मार्तंडोमंडलीज्योतिरशिमरग्निर्महेश्वरः प्रभाकरःसुसंप्टशिमस्तरणिःसरणिःखगः दिवाकरोदिनकरः सहस्रांशुर्मरीचिवान् पद्मप्रबोधनः पूषाकिरणमिरुभूषणः दिक्षुभावल्लभोदेवः सप्रीतोस्तुसदामम लक्ष्मीः श्रीपद्महस्ताचचंचला कमलालया सदाभवतुसुप्रीताममसाहरिवल्लभा। उमागौरीमृडानीचगिरिजामेनकात्मजा सदाभवतुमे प्रीतापार्वतीहरवल्लभा सावित्रीभारतीवाणीवीणापुस्तकसंयुता सासदामेप्रसन्नास्यात् विधियुक्तासरस्वती प्रभाकरयुतानित्यंछायाभाद्योतकारिणी प्रीताभवतुमेसंज्ञादिक्षुभाभास्करप्रिया इति पद्मनाभशंकरपितामहार्कान्प्रिया सहितान् एवंपूजांकृत्वादत्वादानंव्रजेद्देशमयश्चरतिनरः कश्चिद्व्रतमेतद्भक्तिभावितोलोके भवतियशोधनभागीसंततिमान् विगतसंतापः हरिहरहिरण्यगर्भप्रभाकराणां क्रमेणलोकेषु भुक्त्वाभोगान्विपुलानथयोगीनिर्वृतो.भवति स्त्रीपुंसोर्यदियुग्मंपुरुषोवायदिसमाचरतिकश्चित् नारीवाव्रतमेतत्कृत्वायात्यालयंविष्णोः इतिभविष्योत्तरेहरिहरहिरण्यगर्भप्रभाकराणामवियोगव्रताध्यायः ॥ ॥

अस्यामेवभाद्रशुक्लद्वादश्यांदुग्धत्यागव्रतारंभः कार्य्यः तदुक्तं दुग्धमाश्वयुजेमासीतिदुग्धव्रतंपायसादिवर्ज्यं दधि

घृतादयस्तुग्राह्याएव नन्वेवंसंधिन्यानिर्देशावत्सागोःपयःपरिवर्जयेदिति संधिन्यादिक्षीरनिषेधेपिदध्यादिग्राह्यंस्यादितिकेचित् तत्रचवाचिकनिषेधसत्त्वात्तदाह अपरार्के शंखः क्षीराणियान्यभक्ष्याणितद्विकाराशनेबुधः सप्तरात्रंव्रतंकुर्य्यात्प्रयत्नेनसमाहितइति व्रतंचात्रगोमूत्रयावकमितिनिर्णयासिंधौदीक्षितीयेच ॥ इतिभाद्रशुक्लद्वादशीकृत्यानि ॥ ॥ अथभाद्रशुक्लत्रयोदश्यांगोत्रिरात्रव्रतं नारदीये भाद्रशुक्लत्रयोदश्यांगोत्रिरात्रव्रतंस्मृतं लक्ष्मीनारायणंकृत्वासौवर्णंवापिराजतं पंचामृतेनसंस्नाप्य मंडलेऽष्टदलेशुभे घटेविन्यस्यवस्त्राढ्यंगंधाद्यैः परिपूजयेत् आरात्रिकंततःकृत्वादद्यात्सान्नोदकंघटं एवंदिनत्रयंकृत्वाव्रतांतेगांसमर्च्यच सम्यगर्घ्यंचसंपाद्यदद्यान्मंत्रेणनारद पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ तासांमध्येचयानंदातस्यैधेन्वैनमोनमः प्रदक्षिणीकृत्यततोदद्याद्गांविप्रायमंत्रतः गावोममाग्रतःसंतु गावोमेसंतुपृष्ठतः गावोमेपार्श्वतःसंतुगवांमध्येवसाम्यहं ततश्चद्विजदांपत्यंसम्यगभ्यर्च्यभोजयेत् लक्ष्मीनारायणंतस्मैनमस्कृत्यप्रदापयेत् अश्वमेधसहस्राणिराजसूयशतानिच कृत्वायत्फलमाप्नोतिगोत्रिरात्रव्रताच्चतत् अथहेमाद्रौ भविष्योत्तरोक्तं गोत्रिरात्रव्रतं ॥ ॥ युधिष्ठिरउवाच भगवंस्त्वत्प्रसादेनवहूनिसुकृतानिमे श्रुतानिवहुपुण्यानिकृतानिमधुसूदन सर्वपापहराणिस्युःसर्वकामप्रदानिच तंव्रतंश्रोतुनिच्छामिव्रतानांव्रतमुत्तमं किंचिद्योगव्रतंब्रूहियदितुष्टोसिमाधव यत्कृत्वासर्वपापेभ्योनरोनारीविमुच्यते श्रीकृष्णउवाच कथयामिनृपश्रेष्ठव्रतानामुत्तमंव्रतं महाफलप्रदंचैवतच्छृणुष्वनृपोत्तम यान्यांन्कामांश्चवांछतिलभंतेतांस्तथैवच तत्क्षणादेवमुच्यंतेनराःपापैश्चसर्वशः विष्णोभगवतोराजन्कामधेनोःप्रसादतः सौभाग्यंसंततिंलक्ष्मींप्राप्नोतिमनुजोत्तमः युधिष्ठिरउवाच यदितुष्टोसिभगवन्व्रतस्यास्यविधिंशुभं ब्रूहिमेयदुशार्दूलकरोमित्वत्प्रसादतः केमंत्राःकेनमस्कारादेवताःर्थेचकीर्तिताः किंदानमर्चनंतत्रकथयस्वसुरो

त्तम कृष्णउवाच नारदेनपुराराजन्यदुक्तंसगरादिषु स्मारितंतत्त्वयाराजंस्तच्छृणुष्वव्रतोत्तमं मासिभद्रापदेशुक्लेत्रयोदश्यांसमारभेत् त्रयोदश्यांप्रभातेतुसमुत्थायशुचिर्भवेत् गृह्णीयान्नियमंपूर्वंदंतधावनपूर्वकं आचम्योदकमादायइमंमंत्रमुदीरयेत् गोत्रिरात्रव्रतस्यास्योपवासकरणेमम शरणंभवमेनित्यंनमस्तेधेनुरूपिणी प्रसीदतुमहादेवोलक्ष्मीनारायणःप्रभुः लक्ष्मीनारायणंदेवंसौवर्णंवास्वशक्तितः पंचामृतेनगव्येनस्नापयेत्कमलापतिं स्थापयेत्सर्वतोभद्रेमंडलेष्टदलेपिवा गधपुष्पैश्चनैवेद्यैःस्तुतिगीतादिनर्तनैः नारिकेलार्घ्यदानेनप्रीणयेद्वाहारितथा लक्ष्मीकांतजगन्नाथगोत्रिरात्रव्रतंमम परिपूर्णंकुरुष्वमंगृहाणार्घ्यंनमोस्तुते आरात्रिकंततःकुर्याद्भक्त्याकृष्णस्यतुष्टिदं नवकुंभजलभृतंहविष्यान्नेनपूरितं कृत्वादिनत्रयंपार्थप्रीतयेविनिवेदयेत् पंचपूजांतःकृत्वाजलधारांप्रदक्षिणां पुरादत्त्वातुमुकुटंकुंडलेकुंकुमंतथा अन्नगोदानगंधादिदिव्यपुष्पैःसुदीपकैः अहोरात्रभवंकिंचिद्घृतदीपंदिनत्रयं अर्घ्यंदानंततः कुर्यान्नारिकेलादिभिः फलैः मंत्रोयथा पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ तासांमध्येतुयानंदातस्यैधेन्वैनमोनमः प्रदक्षिणीकृतायेनधेनुवर्य्यातुपांडव प्रदक्षिणीकृतातेनसप्तद्वीपावसुंधरा गावोममाग्रतः संतुगावोमेसंतुपृष्ठतः गावोमेपार्श्वतःसंतु गवांमध्येवसाम्यहं आरात्रिकंसनैवेद्यंगीतवाद्यंमहोत्सवः कुंकुमंकलशंसूत्रंधेन्वैदद्याद्विचक्षणः एवंसंपूज्यतांधेनुंसम्यग्भक्त्यादिनत्रयं यवांश्चयवसंचैवचारयेत्प्रापयेदधः गोमयादागतैर्धौतैः कुर्य्यात्तैरेवपारणं धेन्वैप्रजागरं कुर्य्यात्सर्वपापप्रणाशनं त्रिविधान्मुच्यतेपापात्प्रहरार्द्धेनपांडव तस्योत्तरकृतापापात्प्रहरेणविमुच्यते चत्वारिवेणुपात्राणिकारयित्वाप्रपूजयेत् नारिकेलाम्रकदलीद्राक्षाखर्जूरदाडिमैः शुभैर्विरूढैः सिंदूरैर्वस्त्रैः कुंकुमकज्जलैः प्रथमेवीजपूरार्घ्यंद्वितीयेदाडिमंशुभं तृतीयेनारिकेलेनदद्यादर्घ्यंदिनत्रयं करकास्तुत्रयःकार्य्या हविष्यान्नेनपू

रिताः लक्ष्मीनारायणंदेवंब्राह्मणंभार्ययासह पूजयेत्कुसुमैर्वस्त्रैर्हेमसूत्रैर्युधिष्ठिर दंपत्योर्भोजनंदेयंधेनुभक्त्यादिनत्रयं पारणेपौरिणोविप्रानिष्टान्वधूंश्चभोजयेत् गुरुरूपायताधेनुंद्विजायप्रतिपादयेत् सकुंकुमांसवस्त्रांचघंटामुकुटभूषितां गीतवादित्रनृत्यादिस्तुतिपाठपुरस्सरं यायाद्विप्रगृहंयावत्प्रापयेत्ततएवच एवंयःकुरुतेनारीत्रिरात्रव्रतमुत्तमं भवांतरकृतात्पापात्त्रिविधान्मुच्यतेनरः पापाकाचिन्नपश्येतभर्तृदुःखंनराधिप पुत्रपौत्रसुखंतस्याभविष्यतिनसंशयः जन्मांतरेप्यसौनारीवैधव्यंनैवपश्यति वैधव्यंतुमहद्दुखंनभवेत्तुभवांतरं अपुत्रोलभतेपुत्रान्धनहीनोधनंलभेत् कायेनमनसाचैवकर्मणायदुपार्जितं तत्सर्वंपातकंयातिगोत्रिरात्रव्रतेकृते इहभोगान्सविपुलान्भुक्त्वायुः पूर्णामेवच व्रतस्यास्यप्रभावेणस्वर्गलोकेमहीयते कीर्तिदंधनदंचैवसौभाग्यकरणंनृप आयुरारोग्यकरणंसर्वपापप्रणाशन एतस्मात्कारणाद्राजन्सभार्यस्त्वंकुरुव्रतं यदिराज्यपरांकीर्तिंनिर्विघ्नंप्राप्तुमिच्छसि ॥ अथगुर्जराचारप्राप्तंगोत्रिरात्रव्रतं युधिष्ठिरउवाच येनापिसकलालक्ष्मीर्नराणांभवनेभवेत् संततिर्वर्द्धतेस्त्रीणांतद्व्रतंवदमे प्रभो कृष्णउवाच शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतं येनैवक्रियमाणेनसर्वपापक्षयोभवेत् गोत्रिरात्रमितिख्यातंनृस्त्रीणांफलदायकं वांछितंजायतेतेषांयेषांचेतसिवर्तते युधिष्ठिरउवाच कीदृशंतद्व्रतंदेवविधानंतत्रकीदृशं कथमेवसमुत्पन्नंकस्मिन्कालेतुकेशव ॥ कृष्णउवाच पुराकृतयुगेपार्थमनुर्नामवभूवह वैवस्वतकुलेजातोबभूवपृथ्वीपतिः द्वितीयइतिविख्यातःसाक्षान्मनुरिवापरः नृपाःसर्वेवशंयाताबभूवु र्वरदायकाः नित्यंधर्मपरोराजापूजनीयोमनीषिणां नजायतेतुसंतानंतस्यैवंवर्ततःसतः वांछतासंततिंतेनदत्तामंत्रिषुकोशल। सपुत्रार्थंसपत्नीकोवसिष्ठस्याश्रमंययौ वांछद्भिःपथिकल्याणंसारसैस्तोरणीकृतं विविधानिचवृक्षाणिमार्गेषुफलितानिच सराजामहिषीसार्द्धंरथारूढःसुवाहनः संध्यायांयोगिनस्तस्यमहर्षेःप्रापआश्रमं सारथिंचसमादिश्यवाजीन् विश्रामये

त्यथ रथादुत्तीर्यदांपत्यमाश्रमंतुगतंमुनेः एवंकर्माणिसंध्यायांदिलीपोददृशेगुरुं अरुंधत्यासमासीनंसावित्र्येवपि
अ०१० तामहं तौप्रणम्यगुरुंतत्रमुनिपत्नींविशेषतः स्थितौतस्यसमीपेतुप्रीत्यानंदिनतौतयोः दिलीपंचतदर्थस्यधर्मज्ञलो
भाद्रप० कपालकं पप्रच्छकुशलंराज्येवसुधायांशुभंमुनिः दिलीपउवाच कुशलंनःसदादेवस्थितेत्वयिगुरौसति सुराणांचम
१० नुष्याणांविपद्भ्योरक्षिताभवान् विषयेममकांतायामपत्यंकिंनजायते नतुकार्य्यंधरित्र्यामेनिराशाःपितरोमम तथाकु
रुमुनिश्रेष्ठपुत्रोभवतिमेयथा राज्ञांविपत्तिसंप्राप्तौत्वदायत्तंसुखंमुने वेदेतिकथितेराज्ञामुनयेवैयुधिष्ठिर तथामुनिः
क्षणंतस्थौध्यानस्तिमितलोचनः कारणंसंततेराज्ञोमुनिर्दृष्ट्वासमाधिना पश्चान्निवेदितंतस्मैदिलीपायप्रयत्नतः व
सिष्ठउवाच पुरावृत्रारिमाराध्यवसुधांगच्छतस्तव अभूत्कल्पद्रुमस्याधः कामधेनुर्नवंदिता जातस्तस्यास्तदाको
पोदत्तस्तेशापईदृशः नवंदिताहंभवतासांप्रतंयदिभूपते भविष्यतिनतेपुत्रस्तच्छापोनश्रुतस्त्वया नपूजयेच्च
यःपूज्यान्योवंद्यान्नैववंदते नजायतेतुकल्याणंपातकैरनुलिप्यते दिलीपउवाच कृतोमयापराधोयंकिंकरोमि
महामुने संततिर्जायतेयेनतद्व्रतंवदमेप्रभो वसिष्ठउवाच अन्यैर्नानाविधैःपुण्यैस्तपोभिर्नृपदुःसहैः नजाय
तेतुसंतानंगोत्रिरात्रव्रतंविना सपत्नीकःसवत्सांमेधेनुंराजन्फलप्रदां आराधयैकाग्रमनागोत्रिरात्रव्रतंकुरु या
वदित्थंदिलीपस्यमुनिनाकथितंव्रतं तावच्चनंदिनीधेनुर्वनादावृत्तेशुभा कुंडोध्नीतिलकंसितंसुकापिलादुग्धंशुचि
बिभ्रती देवानांवरदाशुभोदधिभवाकामप्रदापाटला गीर्वाणाःसकलाःश्रुतौवपुषिवैतिष्ठंतियस्याश्चते
संपूर्णांशशिनःकलांचदधतीश्रेयस्करीपूर्णिमा भाद्रेमासिसमायातंशुक्लपक्षेतुपार्थिव प्रातःस्नात्वात्रयो
दश्यांनियमंतुसमाचरेत् समुपोष्यगोत्रिरात्रभक्तिंकृत्वाततस्तव भोक्ष्यहानिचतुर्थेहंसौभाग्यंदेहिगौमम इति
यममंत्रः ततोगाश्चासमभ्यर्च्यमंडलेगंधदीपकैः नगरैशतपत्रैश्चचंपकाद्यैशुभाननांगावोममाग्रतःसंतुगावो

मेसंतुपृष्ठतः गावोमेपार्श्वयोःसंतुगवांमध्येवसाम्यहं पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ तासांमध्येतु
यानंदातस्यैधेन्वैनमोनमः इतिपूजामंत्रः फलैर्नानाविधैः पुष्पैर्गंधैरपिस्वशक्तितः पूजनीयाप्रयत्नेनदद्याद
र्घ्यविधानतः नालिकेरंचकूष्मांडंमातुलिंगंचदाडिमं समिष्टान्नंचनैवेद्यंकारयेद्यवसंयुतं गोत्रिरात्रव्रतार्थायफल
मद्यकरेधृतं सर्वकामप्रदंदेविगृहणार्घ्यंनमोस्तुते इत्यर्घ्यमंत्रः वस्त्रयुग्मंविधानेनदद्याद्वासांसिदक्षिणां सप
त्नीकायगुरवेस्वशक्त्याचव्रतीनरः दिनानिव्रतिभिस्त्रीणिश्रोतव्याचकथाशुभा जितक्रोधैस्ततःसर्वैःस्त्रीभिर्वापुरु
षैरपि एवंसंपूज्यविधिवल्लक्ष्मीयुक्तंतुकेशवं चतुर्थेदिवसेप्राप्तेततोधेनुंविसर्जयेत् अथधेनुंसवत्सांचमंत्रेणाने
नपार्थिव दद्याद्विप्रायविदुषेधर्मज्ञेशास्त्रपारगे परिपूर्णंव्रतंकृत्वादत्वाकामानभीप्सितान् विप्रायत्वंमयादत्तामा
तर्गच्छयथासुखं इतिदानमंत्रः ॥ सर्वदानानिदेयानिस्वशक्त्याव्रतिभिर्नरैः विविधेभ्योद्विजेभ्यश्चदक्षिणांचस्व
शक्तितः वित्तशाठ्यंनकुर्वीतदापयेच्चततोनरः गृहंयावत्व्रजेत्तिष्ठद्गीतवाद्यपुरस्सरं गोपालानांचपाथेयंपूजा
पूर्त्तिकरंपरं यवायेचारितानित्यंफलैर्नानाविधैःसह भुक्तायेकामधेन्वाचसंयुक्तागोमयेनच पारणंतैःप्रकर्तव्यं
सर्वैरिष्टजनैःसह सपत्नीकायगुरवेदत्वाचान्नंसदक्षिणं कृष्णउवाच एवमाराध्यतांधेनुंराजावैभक्तितत्पर
ततःप्रजानामधिपः प्रभातेसुरभिंमुनेः भाद्रेमासिसितेपक्षेत्रयोदश्यांयुधिष्ठिर पूजांकृत्वाविधानेनमुमोच
त्वरितंशुचिः संध्यायप्रभृतिस्थित्वाआययौपुनराश्रमं अर्चांसुदक्षिणाकर्तुंनत्वाचाविधिवद्वलिं ययौधेनोःस
मीपेतुवलिंदत्वादिनत्रयं अनुयातस्ततोधेनोस्तृतीयेदिवसेपुनः जगतींगोरूपधरामिवोदधिपयोधरां लताभिः
श्चततोराजापुष्पैर्वर्धयितस्तदा जयशब्दंचभाषंतेपक्षिणःसुंदरस्वनाः गीतेचवनदेवीभिर्गायमानंयशःस्वकं शुश्रा
वचततोराजाभृशंमनसिहर्षितः तद्दिनेवैमुनेर्धेनूराज्ञोभावंपरीक्षितुं विवेशगह्वरंतत्रपार्वत्याश्चपितुर्गृहं कृत्रिम

श्चततःसिंहोमुनेर्धेन्वाभयंकरः सिंहश्चददृशेराज्ञाधेनुंकर्षन्वलेनवै दृष्टाराज्ञातदाधेनुःक्रंदमानास्वरोल्वणैः ततो
धनुर्धरःसोपितांमोक्तुमुपचक्रमे तूण्याःसिंहवधार्थायराजावाणंसमाददे उत्पाः स्तुतदारोधःकोपयुक्तोबभूव
सः धनुष्यारोपयन्वाणंचित्रन्यस्तइवस्थितः हस्तस्यनिश्चलत्वेनक्रोधस्तस्यव्यवर्धत विस्मयंप्रापयान्सि
होराजानंवैयुधिष्ठिर मानवस्यगिराप्राहदुष्टत्वेनगाविस्थितः सिंहउवाच वाणःप्रयुक्तोभवतावृथामयिभ
विष्यति ततःकष्टेनमहताश्रमंमाकुरुसर्वथा नमारुतस्यवेगोहिपर्वतोन्मूलनेक्षमः जायेतेनमहाराज
स्यात्केवलमनोःकुले महेश्वरस्यमांराजन्नाम्नाकुंभोदरंतुवै सेवकानांचसर्वैषांमुख्यंजानीहिभूमिप विलोक
येमंपुरतोदेवदारुंमहाद्रुमं सिक्तःस्नेहेनभूपालशिवयायंसुतःकृतः कदाचिदागतोहस्तीभग्नस्तेनमहाद्रुमः
तस्यसंरक्षणार्थायनियुक्तोयंशिवेनतु कृत्वाशिवेनसिंहत्वंयुक्तोहंजीवभोजनः तर्हीयंखलुगौराजन्भक्ष्यार्थंसमु
पागता त्यक्त्वालज्जांनिवर्त्तस्वसुभक्तोस्तिगुरोर्भवान् आपत्कालइदंवृत्तंनस्याच्छस्त्रभृतोयदि दोषोनजायतते
तस्ययशोराजन्नगच्छति श्रुत्वागिरंतुसिंहस्यराजाचैनमुवाचह ईश्वरेणसमोनान्यांवेत्सिसिंहभवानपि समीक्ष्या
च्चकथंयातिममधेनुरियंगुरोः प्रसिद्धदेहंगृह्णीष्वमुंचधेनुंसवत्सकां भविष्यतिजनन्याश्चवत्सोमार्गंविलोकयन्
सिंहेनतुदिलीपायकथितंवैतदावचः देहांतरेचदृष्टानिभयकारीणिकुर्वता लोकेनहेतुनापार्थकांतंछत्रंचमत्कृतं स
र्वस्यजगतोराज्यंवपुरेतन्नवंवयः त्यक्तुमिच्छसिभोराजन्मूर्खत्वंकथमीदृशं ददासिचकथंप्राणान्प्रजापालनतत्परः
जीवन्नेवमहाराजमुनेःकोपश्चशाम्यति ततोरक्षस्वकंदेहं राज्यंचकुरुभूमिप यावच्चोवाचासिंहोसौनगेनानुगता
गिरः दिलीपोपितदापार्थवाणीमेतामुवाचह गवानिरीक्षितश्चैवभूमिपोदीननेत्रया किंमेराज्येनभोःसिंह
विष्टपेजीवनेनमे यशोगतंचमेसर्वंगुरोर्धेनुंग्रहीष्यसि यदिसिंहततश्चाग्रेसिंहस्यपातितस्तदा यावदित्थंच

पतितोमांसस्यापिंडवन्नृप तावत्सिंहोरवंकृत्वाधावितश्चभयंकरः दृष्ट्वासिंहंनिपतितंचंचलोनबभूवह तावत्तस्योपरिष्टाच्चपुष्पवृष्टिःपपातवै उत्तिष्ठवत्सभूपालवाचमित्थंनिशम्यसः उत्थितश्चपुनश्चाग्रेगांददर्शनवैहरिं सेवयाचगुरोःपार्थभक्त्याचैवविशेषतः प्रीताकामदुघाहंचवरंयाचयतद्भवान् योजयित्वाकरौराजाययाचेतनयंततः वंशकर्तामहाप्राज्ञःशिवभक्तोनिरंतरं ॥ धेनुरुवाच ॥ गोत्रिरात्रव्रतंराजन्मद्भक्त्याभवताकृतं ततोयंस्याच्चतेदक्षःपुत्रःपौरुषविग्रहः येचान्येपिकरिष्यंतिगोत्रिरात्रव्रतंमम तेषांकामंप्रदास्यामिमनसीष्टंनसंशयः इत्युक्त्वाचलिताधेनुर्वसिष्ठस्याश्रमंप्रति गामागतांबलिंनीत्वाआययौतुसुदक्षिणा पूजांकृत्वाविधानेनराजपत्नीविशेषतः प्रदक्षिणक्रियांकृत्वाचालितावैयुधिष्ठिर आश्रमेचततोगत्वादिलीपोसौततःपुनः गुरोरग्रेचतत्सर्वंवृत्तांतमवदीत्पुनः नंदितौचतदापार्थदंपतीतौसुकोमलौ पारणंचततःकृत्वाप्रस्थितौनगरंप्रति हुताशंचनमस्कृत्यहोतारंगांतथैवच आगतश्चततोराजाउत्पताकंपुरंप्रति राज्ञातेनकृष्णांगेनराज्यमारोपितंभजे दिनैःकतिपयैरेवगोत्रिरात्रप्रभावतःराज्यंचकुर्वतस्तस्यसुतस्तस्यमहाबली प्रभातेसुमुहूर्तेचउत्पन्नोरघुसंज्ञया रम्यंजातंतदासर्वंसंजातानिर्मलादिशः आददेचहुतंवह्निर्वायवःशीतलाववुः मृदंगानांस्वनैरम्यैः पूर्णंखंससमभूत्तदा प्रजाःसर्वास्तदापार्थंवदंतिचपुनःपुनः गोत्रिरात्रप्रभावेणराज्ञःपुत्रोबभूवह पुरंदरस्यजेताचमहाधर्मपरायणः दिग्विजयस्ययज्ञस्यकर्तासोपियुधिष्ठिर यज्ञंदिग्विजयंकृत्वाविप्रेभ्यश्चददौवसु ईदृशश्चाप्ययंसूनुर्गोत्रिरात्रप्रभावतःतदाप्रभृतिवैलोकालोकेस्मिन्कुर्वतेव्रतं देवैःसर्वैःकृतंतत्रसर्वकामार्थसिद्धये सर्वाभिर्देवपत्नीभिःकृतंचव्रतमुत्तमं गोत्रिरात्रव्रतंपुण्यंविधानेनफलप्रदं कुरुष्वत्वंमहाराजकुरुराजयुधिष्ठिर साक्षादनंतरंमातुः कृतामनसिपार्थिव भाद्रपदेसवत्सांत्वंभक्त्यात्वाराधयस्वगां एवंयःकुरुतेपार्थगोत्रिरात्रव्रतंपुनः सिद्ध्यंतिसर्वकार्याणिसुखंचैवप्रवर्द्धते नजायतेयदा

त्ययस्याः पार्थभुवस्तले भक्त्येदंयदिकुर्वीततस्याःस्याद्यनसंशयः तपोभिर्दुष्करैःकिंचिद्यज्ञैस्तर्थिव्रतादिभिः मुक्तोखिलेभ्यःपापेभ्योव्रतमेतद्विधायतु कुर्वंतियेव्रतमिदंजगतिप्रसिद्धंपापापहंसकलचिंतितकामदंच ॥ आरुह्यतेवरविमानमनुत्तमंचस्वर्गंप्रयांतियमभृत्यभयंविहाय ॥ इतिभविष्योत्तरेगोत्रिरात्रव्रतं ॥

अथोद्यापनम ॥ युधिष्ठिरउवाच कथयस्वमहापुण्यंगोत्रिरात्रव्रतस्यवै उद्यापनविधिंकृष्णयेनचीर्णेन तत्फलम् ॥ श्रीकृष्णउवाच वर्षेचतुर्थेसंप्राप्तेगोत्रिरात्रव्रतस्यवै उद्यापनविधिंवक्ष्येसर्वेषांव्रतसिद्धये तृतीयेदिवसेस्नायान्मध्याह्नेविधिपूर्वकं देवान्पितॄन्समभ्यर्च्यशुद्धेचसुगृहेव्रती रात्रौचसर्वतोभद्रंगौरीतिलकमुत्तमं पूरयेत्पंचभिर्वर्णैः शोभनंचयथोदितं ताम्रस्यकलशंकुर्य्यात्ताम्रपात्रसमन्वितं मासैनैकेनराजेंद्रलक्ष्मीनारायणं विभुं नवेसूक्ष्मेधृतेवस्त्रेदेवार्थंपरिकल्पयेत् वंशपात्राणिकुर्वीतसौभाग्यगुणचिह्नकैः विरूढवस्त्रपक्वान्नैर्नारिकेलादिभिः फलैः विलेपनैश्चपुष्पैश्चधूपैर्दीपैस्तथोत्तमैः पंचामृतैश्चनैवेद्यैः पूजयेद्विधिपूर्वकं लक्ष्मीनारायणंदेवंगांसवत्सांविशेषतः रात्रौजागरणंकृत्वागीतवादित्रकौतुकै ततःप्रभातसमयेहोमंकृत्वाचवैष्णवं आचार्य्यंवरयेत्तत्रवेदवेदांगपारगं तदाज्ञयाचकर्तव्यंसाधुकर्मप्रयत्नतः गोत्रयंचप्रदातव्यमेकामपिसवत्सकां वहुदुग्धांसुशीलांचतारुण्याभरणान्वितां दंपतीपरिधानंचवस्त्रैराभरणैः शुभैः शय्यांसोपस्करांदद्यात्पानपात्रं कमंडलुं चामरंघृतपात्रंचतिलपात्रंसदक्षिणं पात्राणिचसुवर्णंचभोज्यागव्येनवैद्विजाः एवंधेनूंचविप्रायप्रदत्वा चपृष्ठतोव्रजेत् पदेपदेऽश्वमेधस्यफलंप्राप्नोत्यसंशयः अवारितान्निदानानिदत्त्वातंचविसर्जयेत् भूयसींदक्षिणां दद्याद्व्रतसंपूर्तिहेतवे गोपालेभ्योपिदद्याच्चशष्कुल्यादिसकंवलं सर्वंक्षमापयित्वातुपारणंचततश्चरेत् अनाथैर्व्याधिमुक्तैश्चसीदद्भिश्चकुटुंबकैः गवांभक्षितमन्नंयद्दुग्धेनपरिपाचितं तेनान्नेनप्रकर्तव्यादेहस्यशुद्धिमिच्छता

एवमुद्यापनंकार्य्यंव्रतस्यफलमिच्छता शक्त्यभावेद्विजानुज्ञांगृह्णीयुर्व्रतिनः सदा तयातत्पूर्णतामेतिनान्यथापिकदाचन नारीवापुरुषोवापिपुत्रवान्जायतेध्रुवं इहलोकेसुखंभुक्त्वाअंतेगोलोकमाप्नुयात् श्रीकृष्णउवाच एतत्तेकथितंराजन्व्रतस्योद्यापनंशुभम् श्रोष्यंतिवापठिष्यंतितेषांसर्वेमनोरथाः येकरिष्यंत्यसंदेहंतेषांलोकाश्चशाश्वताः

इतिभविष्योत्तरेसोद्यापनंगोत्रिरात्रव्रतम्

अथात्रैवप्रसंगादशोकत्रिरात्रव्रतंभविष्योत्तरे ॥ ॥ श्रीकृष्णउवाच ॥ शृणुराजन्पुरावृत्तमयोध्यायांव्रतं शुभं वसिष्ठेनमुनींद्रेणसीतायैयन्निवेदितं विधायरावणवधंयदारामोपुरेभ्यगात् तदासीताप्रणम्याथवासिष्ठंवाक्यमब्रवीत् सीतोवाच भगवन्दंडकारण्याद्रावणेनहृतापुरा नपश्यामितदाकिंचिदात्मीयंविकलेंद्रिया मासान्दशोषितातत्रराक्षसेनहृतासती अशोकवृक्षप्रणताजाताचिंतापरायणा उक्तंत्रिजटयातत्रवाक्यंहेत्वर्थसंयुतं अशोकंप्रणमसीतेविशोकात्वंभविष्यसि तथेत्युक्तंमयाब्रह्मन्यथोक्तंत्रिजटावचः ततः प्रभृत्यहंशाश्वदशोकव्रतमारभे तेनव्रतप्रभावेणहनुमान्पवनात्मजः शतयोजनविस्तीर्णंतीर्त्वासागरमव्यय मयादृष्टो द्विजश्रेष्ठसाभिज्ञानोमहाबलः पुनश्चकुशलीजातोदग्ध्वालंकांमहाबलः ततोमेप्रत्ययोजातोव्रतस्यास्यमहातरोःअस्यचव्रतराजस्यप्रभावेणात्मजोहरिःततः कैश्चदहोरात्रैर्भर्त्तामेराघवोबली निहत्यरावणंसंख्येमांविशुद्धांगृहीतवान् तदहंभगवन्विप्रपृच्छामित्वांदृढव्रतं अशोकस्यप्रभावंमेवक्तुमर्हस्यशेषतःव्रतस्यतस्यपुण्यंतुपुराणोक्तंमहीतले अथवासुरलोकेषुसुरनारीनिषेवितं वसिष्ठउवाच॥ एवमेतज्जनकजेयथावक्ष्यसिसुव्रते अशोकस्यप्रभावेणतद्वाक्यमयाधुनाशृणुचात्रमयाख्यातंनंदनोदिव्यकानने वृहस्पतिमुखाच्छ्रुत्वायज्ज्ञातंपरमाद्भुतंवृत्राभिभूतेनेंद्रेणहतोदैवात्महासुरःविश्रंसत्वाद्बुद्धिहानिस्तस्यधर्मेथजायत ब्रह्महत्यामवाप्याथदेवेंद्रोनष्टचेतनःत्रैलोक्यराज्यंत्यक्त्वाशु

समुरारिर्भयार्दितः एतस्मिन्नंतरेदेविनहुषोनृपसत्तमः त्रैलोक्यराज्यंसकलंजहारवलदर्पितः ततःशचीप्रव्यथिताहतराज्यमवेक्ष्यसा नंदनांतरमासाद्यतपस्तेपेसुदुष्करंतांश्रुत्वाधर्मनिरतांवृहस्पतिरुदारधीःआगत्य नंदनेदेवींवाक्यमाहमहातपः ॥वृहस्पतिरुवाच किमर्थंतप्यतेदेवि तपः परमदुष्करं त्वया॥किंप्रार्थ्यतेतेन तपसाब्रूहिकारणम् ॥ शच्युवाच ॥ हत्याभिभूतंदेवेंद्रंहतराज्यंहतत्विषं क्वापिप्रनष्टंतंविप्रनजानेहंप्रियंपतिं एतस्मात्कारणाद्ब्रह्मनूतपउग्रंसमाश्रिता यथापुनर्निजंराज्यंदेवेंद्रः प्राप्नुयादिति क्वतिष्ठतिमुनेब्रूहिसुरराट्शत्रुतापनः प्रसादंकुरुमेदेवसंयोगंतेनचाप्नुयां ॥ वाक्पतिरुवाच ॥ शृणुपौलोमिदेवेंद्रोयथानष्टोभयातुरः मानसोंभसिसंभूतपंकजांतरमाश्रितः ब्रह्महत्याप्रभावेणउद्वेगंगुरुमाश्रितः अभिभूतामिहापश्यत्ततोप्सुविलयंगतः कामंततःप्रसंगेन सर्वंप्राप्स्यसिसुव्रते वहुकालेप्सितंयस्मात्तपसालभ्यतेफलं स्त्रीणांपुष्टिप्रदंह्येकंव्रतंप्रोक्तंस्वयंभुवा सावित्र्याःपृच्छमानायास्तत्त्वंकर्त्तुमिहार्हसि अशोकव्रतमित्येवनाम्नाख्यातंत्रिविष्टपे येनचीर्णेनपौलोमिनारीदुःखंनविंदति हरः स्वयंभवत्येषवृक्षराजेषुनंदने अस्मिंस्तुष्टेहरस्तुष्टइतिविज्ञायानिश्चितं ॥ शच्युवाच पुन्नागनागवकुलंचंपकाद्यान्महीरुहान् परित्यज्यकथंचान्यान्हरोस्मिकृतसन्निधिः वाक्पतिरुवाच हरेणानिर्मितःपूर्वंअशोकोयंकृपालुना लोकोपकारकरणेततोयंशिववल्लभः वसिष्टउवाच निर्मायवृक्षप्रवरंप्रणम्यभक्त्यार्चयित्वाविधिवच्चधर्मंपप्रच्छदेवीपुनराहनाम्नादेविशृणुत्वंविधिमस्यसर्वं ॥ वृहस्पतिरुवाच आरभ्यतद्व्रतंकार्य्यंत्रिरात्रंसमुपोषणं त्रिरात्रंदेविविख्यातमशोकतरुमूलके कार्य्यंनारीभिरमलंमनोवाक्कायकर्मभिःततःप्रदक्षिणादेयाअष्टोत्तरशतंफलैः नारिकेलैश्चखर्जूरैर्गोस्तनीभिर्दिनेदिने मंत्रेणानेनमनसापूजयंतिसदाशिवं अशोकशोकापनुदसर्वकामफलप्रदव्रतेनानेनपूर्णेनयथोक्तफलदोभव इतिप्रदक्षिणामंत्रः ततस्तृतीयेदिवसेसमभ्यर्च्यविधानतः महादेवंवृष

युतंवंशपात्राणिकारयेत् अनेनैवविधानेनयःकुर्य्याद्व्रतमुत्तमं वैधव्यनाप्नुयान्नारीपुत्रसौख्ययुताभवेत् वसिष्ठउवाच ॥ बृहस्पतिमुखाच्छ्रुत्वाशचीचक्रेव्रतोत्तमं शास्त्रोक्तविधिनासीते भक्त्यादेवःसमागतः ब्रह्महत्याविनिर्मुक्तोयथाभवतिवाससः तथात्वमपिवांछार्थंव्रतमेतत्समाचर यथासाध्वीषुसुभ्रुश्रीप्राधान्यंजायतेक्षितौ व्रतमेतत्कृतं लोकेख्यातादेवीभविष्यति व्रतमेतदशोकस्यसर्वकामफलप्रदम् कृष्णउवाच वसिष्ठस्यवचःश्रुत्वा सीताचक्रेव्रतोत्तमं रामाज्ञांसमनुप्राप्यअयोध्यायांचकारसा सीताव्रतेकृतेतस्मिन्दुःखहीनासदाभवेत् युधिष्ठिरउवाच ॥ अशोकव्रतराजस्यपूजांदेवविधानतः कादेवतातत्रपूज्यानारीभिर्वदकेशव श्रीकृष्णउवाच ॥ अशोकवृक्षेतिष्ठंति सर्वेदेवायुधिष्ठिर पल्लवेषुचशाखासुशिवाद्याःसर्वदैवहि अशोकसन्निधौरामः पूजनीयःसलक्ष्मणः सीतयासहितोराजन्विष्णुरंशोयतोमतः पृथङ्मंत्रैःपृथग्वस्त्रैरशोकाख्यायथाक्रमं पूज्याश्चभरतश्रेष्ठपुराणोक्तविधानतः अशोकवृक्षाविहिताः शिवाद्यायेसुरोत्तमाः अशोकपूजनेनाशु तैःसंतुष्टाभवंत्विह गौर्य्यालक्ष्म्यातथेंद्राण्यादमयंत्याचसीतया त्वंसमाराधितःपूर्व मशोकफलदोभव इतिपूजामंत्रः ॥ अशोकवनिकामध्येसीतयात्वंप्रसाधितः अशोकसंफन्नफलोगृहाणार्घ्यंकृतंमया इत्यशोकार्घ्यमंत्रः । रावणस्यवधार्थायउत्पन्नस्त्वंमहीतले विष्णोरंशोसिदेवेशगृहाणार्घ्यंनमोस्तुते तातभक्त्युन्मुखंरामंवंदेहंलोकसुंदरं इतिरामार्घ्यमंत्रः । रामभक्तियुतंभातंसुमित्रानंदवर्धनं तंलक्ष्मीवर्द्धनंगौरंलक्ष्मणंपूजयाम्यहं इतिलक्ष्मणपूजा ॥ अवनीतलसंभूतेसीतेसर्वांगसुंदरि गृहाणार्घ्यंमयादत्तंपूजांजनकनंदिनि इतिसीतापूजा लक्ष्मीस्त्वंसर्वदेवस्यविष्णोरंशामहीतले अवतीर्णामयादत्तंगृहाणार्घ्यंनमोस्तुते इतिसीतायाअर्घ्यमंत्रः एवंसंपूज्यविधिवत्सर्वशोकविनाशनं सर्वपापप्रशमनंसर्वकीर्त्तिविवर्द्धनं अपुत्रयापुरापार्थपार्वत्यामंदिराचले

अशोकःशोकशमनःपुत्रत्वेपरिकल्पितः दकचास्यितत्र शोकस्यमहातरोः कारितंविधिवत्तत्रतेनाशोकोनगोत्तमः याव्रतंकुरुतेनारीपुराणोक्तविधानतः अशोकस्यप्रभावेणसर्वान्कामानवाप्नुयात् अवैधव्ययुतासातुलक्ष्मीसान्निध्यमाप्नुयात् सर्वोपहारंराजेन्द्रब्राह्मणायनिवेदयेत् कथामपिसमाकर्ण्ययःकुर्याद्द्विजपूजनं व्रतस्यफलमाप्नोति सव्रतोहिनसंशयः युधिष्ठिरउवाच विशेषंब्रूहिमेदेवअशोकतरुपूजने येनार्चितेतरौ सर्वंप्राप्यतेसकलंफलं श्रीकृष्णउवाच कथयामितरोराजन्याभिर्व्रतमिदंकृतं मनुष्यदेवगंधर्वनारीभिःपुत्रवृद्धये अनसूययात्रिपत्न्याअरुंधत्यातथैवच देवक्यासीतयाचैंद्र्याद्रौपद्यासत्यभामया दमयंत्याचसावित्र्यातद्व्रतंकृतमुत्तमं अशोकःपूजितःपूर्वं यथावच्छृणुपार्थिव अशोकोराजतश्चैवसौवर्णश्चतथाशिवः तथैवकारयेत्सीतांसौवर्णौरामलक्ष्मणौ पूजयेद्विधिवन्मंत्रैः पूर्वोक्तैर्नृपसत्तम अशोकंपूजयेद्वृक्षंप्ररूढंशुभपल्लवैः विरूढैःसप्तधान्यैश्चगुणकमोदकैःशुभैः कालोद्भवैः शुभैर्दिव्यैर्नारिकेलःसदाडिमैः पुष्पादिभिस्तस्यधूपैः पूजयेत्तरुमुत्तमं अशोकःपांडवश्रेष्टशोकंनाशयतिस्मृतः पितृमातृपतीनांचश्वशुराणांतथैवच अशोकस्त्वंशोकहरोभवसर्वत्रनःकुले इतिश्रीभविष्योत्तरेअशोकत्रिरात्रव्रतम्

अथभाद्रशुक्लचतुर्दशीकृत्यानिनारदीये ॥ भाद्रशुक्लचतुर्दश्यामनंतव्रतमुत्तमं कर्तव्यमेकभक्तंहिगोधूमप्रस्थपिष्टकं विपाच्यशर्कराज्याक्तमनंतायनिवेदयेत् गंधाद्यैःप्राकसमभ्यर्च्यकार्पासंपटजंतुवा चतुर्दशग्रंथियुतंसूत्रंकृत्वासुशोभनं ततःपुराणमुत्तार्यसूत्रंक्षिप्त्वाजलाशये निबध्नीयान्नवंनारीवामेदक्षेभुजेपुमान् विप्रायमिष्टपक्वान्नंप्रदद्याद्दक्षिणान्वितं स्वयंचतन्मितंचाद्यादेवंकुर्याद्व्रतोत्तमं मंडलंसर्वतोभद्रंधान्यवर्णैः प्रकल्प्यच सुशोभनंन्यसेत्तत्रकलशंताम्रजंमुने तस्योपरिन्यसेद्धैमीमनंतप्रतिमांशुभां पीतपट्टांशुकाछन्नांतत्रतंविधिनायजेत् गणेशमातृकाःखेटान्

लोकपालान्यजेत्पृथक् ततोहोमंहविष्येणकृत्वापूर्णाहुतिंचरेत् शय्यांसोपस्करांधेनुंप्रतिमांचद्विजोत्तम प्रदद्याद्गुर
वेभक्त्याद्विजानन्यांश्चतुर्दश संभोज्यमिष्टपक्वानिदक्षिणाभिः प्रतोषयेत् एवंयः कुरुतेऽनंतव्रतंप्रत्यब्दमादरात्
सत्वनंतप्रसादेनजायतेभुक्तिमुक्तिभाक् अथात्रैवकदलीव्रतं कदलीव्रतमप्यत्रतद्विधानमिदंशृणु नरोवायदि
वानारीरंभावनमुपस्थितंस्नात्वासंपूजयेद्गंधपुष्पधान्यांकुरादिभिः दधिदूर्वाक्षतैर्दीपैर्वस्त्रैःपक्वान्नसंचयैः एवंसं
पूज्यमंत्रेणततःसंप्रार्थयेच्चतां अप्सरोमरकन्याभिर्नागकन्याभिरर्चिते शरीरारोग्यलावण्यंदेहिदेविनमोऽस्तु
ते इतिसंप्रार्थ्यकन्यास्तुचतस्रोवासुवासिनीः संभोज्यांशुकसिंदूरकज्जलालक्तकार्चिताः नमस्कृत्यनिजंगेहंसम
ध्यैनंव्रतंव्रजेत् एवंकृतेव्रतेविप्रलब्ध्वासौभाग्यमुत्तमं इहलोकेविमानेनस्वर्गलोकेव्रजेत्परामिति ॥
अथभविष्योक्तंभाद्रपदशुक्लचतुर्दश्यामनंतचतुर्दशीव्रतं तत्र चतुर्दश्यौदयिकीग्राह्या उदयेत्रिमुहूर्तापिग्राह्यानंत
व्रतेतिथिरित्युक्तेः दैवकर्मत्वाच्च चतुर्दश्याचपूर्णिमेतियुग्मवचनात् तथाभाद्रपदस्यांतेचतुर्दश्यांसितेद्विज पौ
र्णमास्याःसमायोगेव्रतंचानंतकंचरेदितिभविष्योक्तेः मुहूर्तमपिचेद्भाद्रेपूर्णिमायांचतुर्दशी संपूर्णांतुविदुस्तस्यां
पूजयेद्विष्णुमव्ययमिति स्कांदाच्च दिनद्वये-यौदयिकत्वेसंपूर्णत्वात्पूर्वैव कालतत्त्वविवेचनकृत्यरत्नावलीनिर्णय
सिंधुमयूखादिष्वप्येवं माधवीयेउदयव्यापिन्यांतिथ्यंतरवत्त्रिमुहूर्तेतिमुख्यः कल्पः द्विमुहूर्तेत्यनुकल्पइत्युक्तं
निर्णयामृतेतुस्वल्पायामप्युदयकालव्यापिन्यांचतुर्दश्यामुपक्रम्यपूर्णिमाभावेपिपूजादिकंकार्यं उदयकालव्या
पिन्यास्तिथेर्दैवकृत्यसंपूर्णत्वविधानात् तदुक्तं उपवासव्रतादीनांघटिकैकापियाभवेत् उदयेसातिथिर्ज्ञेयावि
परीतातुपैतृकइत्यादि वस्तुतस्तुमुहूर्तमपिचेद्भाद्रेइति स्कांदवाक्येनसंपूर्णत्वाभिधानान्मध्याह्नेभोज्यवेलायामिति
तथावाक्याच्चपूजनंमध्याह्नएवकर्तव्यंमहाष्टम्यादिवत्दिवोदासप्रतापमार्तंडयोस्तुमध्याह्नेभोज्यवेलायामितिकथा

श्रवणान्मध्याह्नव्यापिनीग्राह्येत्युक्तं अथानंतपूजनविधिः तत्रमासपक्षाद्युल्लिख्याखिलपापनिर्मुक्तिपूर्वकोत्तमासिद्धि पुत्रपौत्रधनधान्यसंपत्त्यारोग्यामुष्मिकपरमगतिप्राप्तये चतुर्दशवर्षादियथाविध्यनंतव्रतंकरिष्ये इतिसंकल्पंकृत्वा मंडलंसर्वतोभद्रंकृत्वाकुंभंतुविन्यसेत् तत्राष्टदलपद्मंतुपूजयेद्विष्णुमव्ययं कुंभोपरिपात्रंविन्यस्य तदुपर्य्यष्टदलं कृत्वा तत्रपूजयेदित्यर्थः कृत्वादर्भमयंदेवंफणासप्तकमंडितं तस्याग्रतोदृढंसूत्रं कुंकुमाक्तंसुशोभनं चतुर्दशग्रंथियुतमुपस्थाप्यप्रपूजयेत् ततस्तुमूलमंत्रेणनमस्कृत्यचतुर्भुजं नवाम्रपल्लवाभासंपिंगलश्मश्रुलोचनं पीतांबरधरंदेवंशंखचक्रगदाधरं प्रसन्नवदनंविष्णुंविश्वरूपंविचिंतयेदितिध्यानम् । अथग्रंथिदेवताः विष्णुरग्निस्तथादित्यःसहस्राक्षःपितामहः इंद्रःपिनाकीविघ्नेशः स्कंदः सोमस्तथैवच वरुणः पवनःपृथ्वीवसवोग्रंथिदेवता इतितत्रावाह्यपूजयेत् आगच्छानंतदेवेशतेजोराशेजगत्पते क्रियमाणांमयापूजांगृहाणसुरसत्तमसहस्रशीर्षेत्यावाहनम् १ नानारत्नसमायुक्तंकार्तस्वरविभूषितं स्वासनंदेवदेवेशगृहाणपुरुषोत्तम पुरुषएवेत्यासनं २ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां एतावानस्येतिपाद्यं ३ अनंतानंतदेवेशअनंतगुणसागर अनंतानंतरूपोसिगृहाणार्घ्यंनमोस्तुते त्रिपादूर्ध्वेत्यर्घ्यं ४ कर्पूरवासितंतोयंमंदाकिन्याः समाहृतं आचम्यतांहृषीकेशत्रैलोक्यव्याधिनाशन ततोविराडित्याचमनं ५ वांछितंकुरुमेदेवदुष्कृतंमाविचारय मधुपर्कंगृहाणेदंत्रैलोक्यार्तिभयापह इतिमधुपर्कम् ६ ततः पुनराचमनंपूर्वोक्तमंत्रेण शर्करामधुसंमिश्रंपयोदधिघृतंतथा पंचामृतेनस्नपनंगृहाणजगतांपते आप्यायस्वइतिदुग्धंदधिक्राव्णइतिदधि घृतंमिमिक्षेतिघृतं मधुवातेतिमधु स्वादुपवस्यशर्करा इतिपंचामृतं गंगाचगोमतीरेवायमुनाचसरस्वती नदीनदसहस्राणांतोयमेतत्समाहृतं अनंतगुणरत्नायविश्वरूपधरायच नमोमाहात्म्यदेवायअनन्तायनमोनमः यत्पुरुषेतिस्नानं

पीतांबरयुगंदेवसर्वकामार्थसिद्धये मयानिवेदितंभक्त्या गृहाणसुरसत्तम तंयज्ञमितिवस्त्रं दामोदरनमऽस्तुत्राहि मांभवसागरात् ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्तम तस्माद्यज्ञात्सर्वहुतःसंभृतमित्युपवीतं कस्तूरीकुंकुमोपेतंकर्पूरेणचसंयुतं गंधंदास्यामिदेवेशअनंतायनमोनमः श्रीखंडचंदनंदिव्यंगंधाढ्यंसुमनोहरं विलेपनंसुरश्रेष्ठप्रीत्यर्थं तवगृह्यतां तस्माद्यज्ञात् ऋचःसामानीतिगंधं नमःसर्वहितार्थायजगदाधारहेतवे सर्वसंस्थितरूपायअनंतायनमोनमः मुक्तारत्नाक्षताःश्रेष्ठाःकुंकुमाक्ताक्षताःशुभाः वासुदेवजगन्नाथप्रीत्यामेस्वीकुरुप्रभो इत्यक्षताःमाल्यादीनिसुगंधीनिमालात्यादीनिवैप्रभो मयाहृतानिपुष्पाणि पूजार्थंप्रतिगृह्यतां तस्मादश्वाइति पुष्पाणि अथांगपूजा अनंतायनमः पादौ पूजयामि संकर्षणाय गुल्फौपू. कालात्मने जानुनीपू- विश्वरूपाय· जंघेपू- विश्वरूपाय, कटिंपू, विश्वसाक्षिणे- मेढ्रंपू. पद्मनाभाय. कटिंपू, पद्मनाभाय‘ नाभिपू’ परमात्मने- हृदयंपू- श्रीकंठाय कंठंपू. सर्वास्त्रधारिणे. वाहून्पू- वाचस्पतये- मुखंपू, दामोदराय, दंतान्पू· केशवाय ललाटंपूज- कमलासनाय· शिरःपू. सर्वात्मनेनमः सर्वांगंपूजयामिनमः वनस्पतिरसोदिव्योगंधाढ्यः सुमनोहरः आघ्रेयःसर्वदेवेशधूपोयंप्रतिगृह्यतां यत्पुरुषंव्यदधुरितिधूपं घृतवर्तिसमायुक्तंवह्निनायोजितंमया दीपंगृहाणदेवेशत्रैलोक्यमितिरापहं ब्राह्मणोस्येतिदीपं अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं नैवेद्यंगृह्यतांदेवभक्तिंमेह्यचलांकुरु चंद्रमामनसइतिनैवेद्यं कर्पूरवासितंतोयंमंदाकिन्याःसुशीतलं आचम्यतांजगन्नाथमयादत्तंहिभक्तितः आचमनं गंधकर्पूरकस्तूरीसमायुक्तंमनोहरं करोद्वर्तनकंदेवगृहाणपरमेश्वर इतिकरोद्वर्तनं इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि नाभ्याआसीदितिफलं पूगीफलसमायुक्तंस र्पूरंमेनाहरं भक्त्यादत्तमयादेवतांबूलंप्रतिगृह्यतां इतितांबूलं हिरण्यगर्भगर्भस्थंहेमबीजं

विभावसोः अनंतपुण्यफलदमतः शांतिंप्रयच्छमे इतिदक्षिणाद्रव्यम् ॥ ततःपुष्पांजलिंदद्यात् मल्लिकामालतीपुष्पैर्नागचंपकसंयुतैः पुष्पांजलिंगृहाणेमंपादांबुजयुगार्पितं चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच त्वमेकः सर्वज्योतींषित्र्आर्तिक्यंप्रतिगृह्यतां इतिनीराजनं ॥ अथचतुर्दशग्रंथीनांसशक्तिकपूजा॥ ओंमोहिन्यैनमः ओंअनंतायनमः ओंश्रियैनमः ओंअनर्घायनमः ओंपद्मिन्यैनमः ओंरुक्मिणीकांतायनमः ओंमहाबलायैनमः ओंगरुडध्वजायनमः ओंअजन्यैनमःओंवृषकूर्मायनमः ओंमंगलायैनमः ओंपृथ्वीधरायनमः ओंवरदायैनम ओंनृसिंहायनमः ओंशुभायैनमः ओंउपेन्द्रायनमः ओंशिवदूत्यैनमः ओंजामदग्न्यायनमः ओंदुर्गायैनमः ओंरघुनंदनायनमः ओंब्रह्माण्यैनमः ओंकृष्णायनमः ओंचित्रमंडलायैनमः ओंबुद्धरूपायनमः ओंहरिसिद्धायैनमः ओंमधुसूदनायनमः ओंवामनायनमः ओंभूत्यैनमः १४ ओंविराजायनमः ओंब्रह्मणेनमः ओंशभवेनमः ओंकुमारायनमः ओंनारदायनमः ओंमनवेनमः ओंआत्रेयायनमः ओंकपिलायनमः ओंव्यासायनमः ओंयज्ञायनमः ओंधन्वंतरयेनमः ओंपृथिव्यैनमः ओंनारायणायनमः ओंवृषस्कंधायनमः ओंविष्णवेनमः ओंअग्नयेनमः ओंसूर्यायनमः ओंसहस्राक्षायनमः ओंपितामहायनमः ओंइन्द्रायनमः ओंपिनाकिनेनमः ओंविघ्नेशायनमः ओंस्कंदायनमः ओंसोमायनमः ओंवरुणायनमः ओंपवनायनमः ओंपृथिव्यैनमः ओंवसुभ्योनमः इतिगंधाक्षतपुष्पदूर्वादिभिः पूजयेत् १४ पुनःपुष्पांजलिंदत्त्वा साष्टांगोयंप्रणामस्ते प्रयत्नेनमयाकृतः दासोयमितिमांमत्वाप्रसीदपुरुषोत्तम नाभ्याआसीदितिनमस्कारः अनंतकामान्मेदेहि सर्वकामफलप्रद अनंतायनमस्तुभ्यंपुत्रपौत्रप्रवर्द्धन नमस्तेदेवदेवेशनमस्तेगरुडध्वज नमस्तेपुण्डरीकाक्ष नमस्तेह्यमराप्रिय नमस्तेकमलाकांत-वासुदेवनमोस्तुते द्वौहस्तौमुकुलीकृत्यजानूपरिनिधायचेति सप्तास्यासन्नितिनमस्कारःयानिकानिचेति प्रदक्षिणा

मल्लिकामालतीचैत्यादि यज्ञेनयज्ञमितिमंत्रपुष्पांजलिः नमःसर्वहितार्थायजगदाधारवक्षसे सर्गास्थित्यंतरूपायगृहाणार्घ्यंनमोस्तुते इतिपुनरर्घ्यंदत्त्वा प्रार्थना अनंतकामान्मेदेहिपुत्रपौत्रविवर्द्धन अनंतः सर्वकामानामधिपः सर्वकामदः व्रतेनानेनसुप्रीतोभवत्विहसदामम अनंतायनमस्तुभ्यंसहस्रशिरसेनमः नमोस्तुपद्मनाभायनागाधिपतयेनमः अनंतसंसारमहासमुद्रेमग्नंहिमामुद्धरवासुदेव अनंतरूपेविनियोजयस्वअनंतसूत्रायनमोनमस्ते इत्यनंतसूत्रनमस्कारः अनंतकामदंदेवंसर्वकामफलप्रदं अनंतडोररूपेणपुत्रपौत्रप्रवर्द्धन नमस्तेदेवदेवेशनमस्तेधरणीधर सूत्रग्रंथिषुसंस्थायअनंतायनमोनमः अथसूत्रग्रहणं संसारगह्वरगुहासुसुखंविहर्तुंवांछतियेकुरुकुलोद्भवशुद्धसत्त्वाः संपूज्यचत्रिभुवनेशमनंतरूपंबध्नंतिदक्षिणकरेवरडोरकंते इतिनूतनानंतसूत्रधारणं अथजीर्णानंतसूत्रविसर्जनम् संवत्सरकृतांपूजांसंपाद्यविधिवन्मम व्रजेदानींसुरश्रेष्ठत्वमनंतफलप्रद तस्यापिषोडशोपचारपूजार्घ्यः पूर्वोक्तेनविधानेनपूजयेद्विष्णुरूपिणं पूजयित्वाहरिंदेवमाचार्यंपूजयेत्ततः परिधायसपत्नीकंवस्त्रालंकारभूषणैः मंत्रैःसंपूज्यविधिवद्धेनुंदद्यात्प्रयत्नतः सुरभीवैष्णवीमातानित्यंविष्णुपदेस्थिता ग्रासंगृह्णमयादत्तंगोमातस्त्रातुमर्हसि गावोममाग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृदयेसंतुगवांमध्येवसाम्यहं मंत्रेणानेनसंपूज्यआचार्यायनिवेदयेत् गोदानस्यप्रतिष्ठार्थं स्वर्णंदद्याद्यथाविधि ततश्चामंत्रितान्विप्रान्पूर्वेद्युश्चचतुर्दश वस्त्रोपवीतैसंपूज्यभोजयेदन्नविस्तरैः ततस्तुदक्षिणांतेभ्योवित्तशाठ्यविवर्जितः स्वशक्त्यादक्षिणांदद्यादाचार्यंचक्षमापयेत् क्रियाहीनंभक्तिहीनंद्रव्यहीनंतथैवच मंत्रहीनंपठेत्पश्चात्व्रतसंपूर्तिहेतवे अनंतसंसारमहासमुद्रे अनंतरूपायनमोनमस्ते इत्यनंतंविसृज्याथब्राह्मणांश्चतथैवच दीनांधकृपणेभ्यश्चदद्यादन्नादिकंधनं यथोपपन्नंभोक्तव्यंकृत्वामानसमव्ययं आच

स्यचशुचिर्भूत्वाध्ययेद्विष्णुंचतद्दिने एवंकृतेनृपश्रेष्ठकर्मणाचजनार्दनः अनंतरूपीभगवान्तुष्टोभवतिसर्वदा
व्रतस्यफलमाप्नोतिविष्णुलोकंव्रजेन्नरः ३ इतिसोद्यापनं प्रतिवर्षमनंतपूजनम् ॥ अथकथा ॥ भविष्योत्तरे
युधिष्ठिरउवाच अहंदुःखीहसंजातोभ्रातृभिःसहकेशव कथंमुक्तिर्वदास्माकमनंताद्दुःखसागरात् कंदेवंपूजयि
त्वावैप्राप्स्यामोराज्यमुत्तमं अथवाकिंव्रतंकृत्वात्वत्प्रसादाद्भवीहिनः श्रीकृष्णउवाच अनंतव्रतमस्त्यन्यत्ति
थावस्यांयुधिष्ठिर सर्वपापहरंनृणांस्त्रीणांचैवयुधिष्ठिर शुक्लपक्षेचतुर्दश्यांमासिभाद्रपदेभवेत् तस्यानुष्ठानमा
त्रेणसर्वपापंव्यपोहति युधिष्ठिरउवाच कृष्णकोयमनंतेतिप्रोच्यतेयस्त्वयाविभो किंशेषनागआहोस्विदनं
तस्तक्षकःस्मृतः परमात्माथवानंतउताहोब्रह्मगीयते कएषोनंतसंज्ञोवैतथ्यंमेब्रूहिकेशव श्रीकृष्णउवाच
अनंतइत्यहंपार्थममरूपंनिबोधतत् आदित्यादिग्रहात्मायोयःकालउपपद्यते लवकाष्ठामुहूर्तादिदिनरात्रिस्वरूप
वान् पक्षमासर्तुवर्षाणियुगकालव्यवस्थया योयंकालोमयाख्यातःसोनंतइतिकीर्त्यते सोहंकालोवतीर्णो
त्रभूभारोत्तारणायच दानवानांवधार्थायसाधूनांपालनायच अनादिमध्यपर्यंतं कृष्णविष्णुहरिंशिवं वै
कुंठभास्करंसोमंसर्वव्यापिनमीश्वरं विश्वरूपंमहाकालंसृष्टिसंहारकारकं प्रत्ययार्थंमयारूपंफाल्गुणायप्रदर्शि
तं पूर्वमेवमहाबाहो योगिध्येयमनुत्तमं विश्वरूपमनंतंचयस्मिन्निंद्राश्चतुर्दश वसवोष्टौतथादित्या रुद्रा
एकादशस्मृताः सप्तर्षयःसमुद्राश्चपर्वताःसरितोद्रुमाः नक्षत्राणिदिशोभूमिः पातालंभूर्भुवादिकं माकुरुष्व
त्रसंदेहंसोहंपार्थनसंशयः युधिष्ठिरउवाच अनंतव्रतमाहात्म्यंविधिंवदविदांवर किंपुण्यंकिंफलंचास्यअनुष्ठा
नवतांनृणां केनचादौपुराचीर्णंमर्त्येकेनप्रकाशितं एवंसविस्तरंकृत्वाब्रूह्यनंतव्रतंमम कृष्णउवाच आसी
त्पुराकृतयुगे सुमंतुर्नामवैद्विजः वसिष्ठगोत्रेचोत्पन्नःसुरूपांचभृगोःसुतां शीलानाम्नींचोपयेमेवेदोक्तविनिव

नृप तस्याः कालेनसंजातादुहितानंतलक्षणा शीलानाम्नीसुशीलासावर्धती।पितृवेश्मनि माताचतस्याःका
लेनज्वरदाहेनपीडिता। विननाशनदीतीरेययौस्वर्गपतिव्रता। सुमंतुस्तुततोन्यांवैधर्मपुंसःसुतांपुनः उपयेमेवि
धानेनदुःशीलांनामनामतः दुःशीलाकर्कशाचंडीनित्यंकलहकारिणी सापिशीलापितुर्गेहेगृहार्चनपराबभौ
कुड्यस्तंभगृहद्वारिदेहलीतोरणादिकं वर्णकैश्चित्रमकरोन्नीलपीतासितासितैः स्वस्तिकैःपद्मकैश्चैवअर्चयंतीपुनः
पुनः ततःकालेबहुगतेकौमारवशवर्तिनी। पित्रादृष्टातदातेनस्त्रीचिह्नायौवनेस्थिता। कस्मैदेयामयाशीला।विचार्य्यै
तिसदुःखितः एतस्मिन्नेवकालेतुमुनिर्वेदविदांवरः कन्यार्थीचागतः श्रीमान्कौडिन्योनामनामतः उवाचरूप
संपन्नांत्वदीयांतनयांवृणे पिताददौद्विजेंद्रायकौडिन्यायशुभेदिने स्वगृह्योक्तविधानेनविवाहमकरोत्तदा। निव
र्त्यौद्वाहिकंसर्वंकर्कशांप्रोक्तवांस्तदा। किंचिदाद्यादिकंदेयंजामातुःपरितोषिकं तच्छ्रुत्वाकर्कशाक्रुद्धाप्रोत्सार्य्यगृह
मंडलं पेटायांप्रस्थरंवद्ध्वास्वगृहंगम्यतामिति भोज्यावसिष्टचूर्णेनपाथेयंचचकारसा कौडिन्योपिविवाह्यैनांप
थिगच्छन्शनैःशनैःशीलांसुमंतुरादायनवोढांगोरथेनवै मध्याह्नेभोजवेलायांसमुत्तीर्य्यसरित्तटे ददर्शशीलास्त्रीणां
तुसमूहंरक्तवाससां चतुर्दश्यांतदापार्थस्वर्चयंतंजनार्दनं उपगम्यशनैःशीलापप्रच्छस्त्रीकदंबकं आर्य्याःकिमेत
न्मेब्रूतंकिंनामव्रतमीदृशं ताऊचुर्योषितस्तांवैशीलांशीलविभूषणां अनंतव्रतमेतद्धिव्रतेनंतःप्रपूज्यते साब्रवीदह
मप्येतत्करिष्येव्रतमुत्तमं विधानंकीदृशंतत्रकिंदानंकोत्रपूज्यते स्त्रियऊचुः शीलेसदन्नप्रस्थस्यपुंनाम्नःसंस्कृत
स्यच अर्धंविप्रायदातव्यमर्द्धमात्मनिभोजनं शक्त्याचदक्षिणांदद्याद्वित्तशाठ्यविवर्जितः कर्तव्यंसत्सरित्तीरेवि
धिनानेनभामिनि स्नात्वानंतंसमभ्यर्च्यमंडलेधूपदीपकैः पुष्पैर्गंधैश्चनैवेद्यैःपीतरक्तैश्चतुःसमैः॥ चतुःसमैःपरिभा
षोक्तगंधद्रव्यैः॥तस्याग्रतोदृढंसूत्रंकुंकुमाक्तंसडोरकं चतुर्दशग्रंथियुतंवामेकरतलेन्यसेत् अनंतसंसारमहासमुद्रे

मग्नंहिमामुद्धरवासुदेव अनंतरूपेविनियोजयस्वअनंतसूत्रायनमोनमस्ते अनेनडोरकंवद्ध्वाभोक्तव्यंस्वस्थमा
नसैःध्यात्वानारायणंदेवमनंतंविश्वरूपिणं भुक्त्वाचांतेव्रजेद्वेश्मभद्रेप्रोक्तमिदंव्रतम् कृष्णउवाच एवमाकर्ण्यराजें
न्द्रप्रहृष्टेनांतरात्मना सापिचक्रेव्रतंशीलाकरेवद्ध्वासुडोरकं पाथेयमर्धंविप्रायदत्त्वाभुक्त्वास्वयंततः पुनर्जगामसं
हृष्टागोरथेनस्वकंगृहं भर्त्रासहैवशनकैःप्रत्ययस्तत्क्षणादभूत् तेनानंतव्रतेनास्याबभौगोधनसंकुलं गृहाश्रमंश्रि
याजुष्टंधनधान्यसमाकुलं आकुलंव्याकुलंरम्यंसर्वत्रातिथिभोजनैः सापिमाणिक्यकांचीभिर्मुक्ताहारविभूषिता
देवांगवस्त्रसंछन्नासावित्रीप्रतिमाभवत् कदाचिदुपविष्टायादृष्टोवद्धस्तुडोरकः शीलायाहस्तमूलेनुतेनोक्तंकिमिदं
त्वया धृतस्तुडोरकत्वेनाकिमर्थंब्रूहितत्त्वतः यस्यप्रसादात्सकलाधनधान्यादिसंपदः लभ्यंतेमानुषैश्चापिसोनं
तोयंमयाधृतः शीलायास्तद्वचःश्रुत्वाभर्त्रातेनद्विजन्मना श्रीमदांधेनकौरव्यसापैक्षस्त्रोटितोरुषा कोनंतइतिमू
ढेनजल्पतापापकारिणा क्षिप्तोज्वालाकुलेवह्नौहाहाकृत्वाप्रधावती शीलागृहीत्वातत्सूत्रंक्षीरमध्येसमाक्षिपत् तेन
कर्मविपाकेनसाश्रीस्तस्यक्षयंगता गोधनंतस्करैर्नीतंगृहंदग्धंधनंगतं यद्यथैवागतंगेहेतत्तथैवपुनर्गतं स्वज
नैः कलहोनित्यंवंधुभिस्तर्जनंतथा अनंताक्षेपदोषेणदारिद्र्यपतितंगृहं नकश्चिद्वदतेलोकेतेनसार्द्धंयुधिष्ठिर श
रीरेणातिसंतप्तोमनसाप्यतिदुःखितः विर्वेदंपरमंप्राप्तःकौडिन्यःप्राहतांप्रियां शीलेममेदमुत्पन्नंसहसाशोकका
रकं येनातिदुःखितोस्माकंजातंसर्वधनक्षयं स्वजनैःकलहोगेहेनकश्चिन्मांप्रपद्यते शरीरेनित्यसंतापः खेद
श्चेतसिदारुणः जानासिदुर्नयःकोत्रकिंकृतेसुकृतंभवेत् प्रत्युवाचाथतंशीलासुशीलाशीलमंडिता प्रायोनंतकृता
क्षेपपापसंभवजंफलं भविष्यतिमहाभागतदर्थंयत्नमाचर एवमुक्तःसविप्रर्षिर्जगाममनसाहरिं निर्वेदान्निर्ज
गामाथकौडिन्यःप्रययौवनं तपसेकृतसंकल्पोवायुभक्ष्योद्विजोत्तमः मनसाध्यायचानंतंकद्रक्ष्यामिचतंविभुं

यस्यप्रसादात्संजातमाक्षेपान्निधनंगतं धनादिकंममातीवसुखदुःखप्रदायकं एवंसंचिंतयन्सोथबभ्रामविज
नेवने तत्रापश्यन्महाचूतंपुष्पितंफलिततंथा वर्जितंपाक्षिसंघातैःकीटकोटिवृतंतथा तमपृच्छत्त्वयानिं
तःकच्चिद्दृष्टोमहातरो ब्रूहिसौम्यममातीवदुःखंचेतसिविद्यते सोब्रवीद्द्रुनानंतंकच्चिज्जानामिवाद्विज एवंनि
राकृतस्तेनसजगामाथदुःखितः क्वद्रक्ष्यामीतिपश्यन्सगामपश्यत्सवत्सकां तृणमध्येप्रधावंतीमितश्चेत
श्चपांडव अब्रवीद्धेनुकेब्रूहियद्यनंतस्त्वयेक्षितः साचोवाचाथकौडिन्यंनानंतंवेद्यहंद्विज ततोव्रजन्ददर्शाग्रेगो
वृषंशाद्वलेस्थितं दृष्ट्वापप्रच्छगोस्वामिन्नानंतोवीक्षितस्त्वया गोवृषस्तमुवाचेदंनानंतोवीक्षितोमया ततोव्रजन्दद
र्शाग्रेरम्यंपुष्करिणीद्वयं अन्योन्यजलकल्लोलैर्वीचीपर्यंतसंगमं छत्रकिंजल्ककल्हारकमलोत्फलमंडितं सेवितं
भ्रमरैर्हंसैश्चक्रैःकारंडवैर्वकैः तेचापृच्छद्द्विजोनंतोभवद्भ्यांनोपलक्षितःऊचतुस्तेद्विजश्रेष्ठनानंतोवीक्षितोद्विज ददा
र्शाथवनेतस्मिन्गर्दभंकुंजरंतथा तावप्युक्तौद्विजेनेत्थंनोतिताभ्यांनिवेदितं एवंसंपृछ्यनष्टाशस्तत्रैवनिषसादह
कौडिन्योविह्वलीभूतोनिराशोजीवितेनृप दीर्घमुष्णंचनिःश्वस्यपपातभुविभारत प्राप्यसंज्ञामनंतेतिजल्पन्नुत्थ
यसद्विजः नूनंत्यक्ष्याम्यहंप्राणानितिसंकल्प्यचेतसि उत्थायोद्बध्यवृक्षेस्मिंस्तावद्भारतसत्तम कृपयानंतदेवोपि
प्रत्यक्षंसमजायत वृद्धब्राह्मणरूपेणइत एहीत्युवाचतं प्रगृह्यदक्षिणेपाणौगुहायांचप्रवेश्यतं स्वांपुरींदर्शया
मासदिव्यनारीनरैर्वृतां तस्यांनिविष्टमात्मानंदिव्यसिंहासनेशुभे पार्श्वस्थशंखचक्राब्जगदागरुडशोभितं
दर्शयामासविप्रायस्वीयंरूपमनंतकः विभूतिभेदैश्चानंतैरनंतममितौजसं तंदृष्ट्वातादृशंरूपमनंतमपराजितं
नोद्यमनोजगादोच्चैर्जयशब्दपुरःसरं पापोहंपापकर्माहंपापात्मापापसंभवः त्राहिमांपुडरीकाक्षसर्वपापहरोभव
तच्छ्रुत्वादेवदेवेशःप्राहसुस्निग्धयागिरा माभैस्त्वंब्रूहिविप्रेंद्रयत्तेमनसिवर्त्तते कौडिन्यउवाच मयाभूत्याव

लिप्तन त्रोटितोनंतडोरकः तेनपापविपाकेनभूतिर्मेप्रलयंगता स्वजनैःकलहोगेहेनकश्चिन्मांप्रभाषते निर्वेदाद्भ्रमतोरण्येतवदर्शनकांक्षया कृपयादेवदेवेशत्वयात्मासंप्रदर्शितः तस्यपापस्यमेशांतिंकारुण्याद्वक्तुमर्हसि **कृष्णउवाच** ॥ तच्छ्रुत्वानंतदेवेशस्तमुवाचद्विजोत्तम भक्त्यासंतोषितोदेवःकिंचिद्दयासमन्वितः **अनंतउवाच** स्वगृहंगच्छकौंडिन्यमाविलंबंसमाचर चरानंतव्रतंभक्त्यानववर्षाणिपंचच सर्वपापविशुद्धात्माप्राप्स्यसेसिद्धिमुत्तमां पुत्रपौत्रान्समासाद्यभुक्त्वाभोगान्यथेप्सितान् अंतेचस्मरणंप्राप्यमामुपैष्यस्यसंशयं अन्यच्चतेवरंदद्मिसर्वलोकोपकारकं इदमाख्यानकवरंशीलानंतव्रतादिकं शृणोतिचनरोयस्तुकुर्वन्व्रतमिदंशुभं सोचिरात्पापनिर्मुक्तःप्राप्नोतिपरमांगतिं गच्छविप्रगृहंशीघ्रंयथायेनागतोह्यसि **कौंडिन्यउवाच** स्वामिन्पृच्छामिमेब्रूहि किंचित्कौतूहलंमया अरण्येभ्रमताद्दृष्टंतन्नवेद्मिजगद्गुरो सचूतवृक्षःकस्तत्रकागौःकोवृषभस्तथा कमलोत्पलकल्हारैःशोभितंसुमनोहरं मयादृष्टंमहारण्येकिंतत्पुष्करिणीद्वयं कःखरःकुंजरःकोत्रकोसौवृद्धोद्विजोत्तमः **अनंतउवाच** सचूतवृक्षोविप्रोसौवेदविद्याविशारदः सोर्थितोपिनचप्रादाच्छिष्येभ्यस्तरुतांगतः सागौर्वसुंधराद्दृष्टा सफलायात्वयाद्विज वृषोधर्मस्त्वयादृष्टःशाद्वलंसत्यमास्थितः ब्राह्मण्यौकेचिद्प्पास्तां भगिन्यौतेपरस्परं अन्नदानादियत्किंचित्तन्निवेदयतोमिथःविप्रायनक्वचिद्दत्तंमतिथौनिर्बलेतथा भिक्षादत्तानचार्थिभ्यस्तेनपापेनकर्मणा विचिकल्लोलमालाभिर्गच्छतस्तेपरस्परं खरःक्रोधस्त्वयादृष्टः कुंजरोमदउच्यते ब्राह्मणोसावनंतोहं गुहासंसारगह्वरं इत्युक्त्वादेवदेवेशस्तत्रैवांतरधीयत स्वप्नप्रायंतुतद्दृष्ट्वाततः स्वगृहमागतः कृत्वानंतव्रतंसम्यग्वर्षाणिनवपंचच भुक्त्वासर्वमनंतेनयथोक्तंकुरुनंदन अंतेचस्मरणंप्राप्यततोनंतपुरंगतः तथात्वमपिराजर्षेकथांशृणुव्रतंकुरु प्राप्स्यसेचिंतितंसर्वमनंतस्यवचोयथा यद्यच्चतुर्दशेवर्षे

फलंप्राप्तंद्विजन्मना वर्षैकेनतदाप्नोतिकृत्वोपाख्यानकंव्रतं एतत्तेकथितंभूपव्रतानामुत्तमंव्रतं यत्कृत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः येऽपिशृण्वंतिसततंपठ्यमानंपठंतिये तेपिपापाविनिर्मुक्तायास्यंतिचहरेःपदम् संसारगह्वरगुहासुसुखंविहर्तुंवांछंतियेकुरुकुलोद्वहशुद्धसत्वाः संपूज्यचत्रिभुवनेशमनंतदेवंबध्नंति दक्षिणकरेवरडोरकंते इतिश्रीभविष्योत्तरे अनंतव्रतकथा ॥

अथोद्यापनं ॥ युधिष्ठिरउवाच ॥ देवदेवसमासेनव्रतस्यास्यफलंश्रुतं उद्यापनाविधिंहित्वानव्रतस्यफलंलभेत् कृष्णउवाच मासिभाद्रपदेप्राप्तेपरिपूर्णेव्रतेततः शुक्लायांतुचतुर्दश्यांब्रह्मचारीभवेत्ततः एकभक्तेननियमंकृत्वाभक्तिसमन्वितः स्नात्वानद्याह्रदस्थानेतीर्थेप्रस्रवणेतथा सर्वौषधैःसर्वगंधैस्तिलकल्कैरथाम्लकै वेदोक्तविधिनासम्यक्तर्पयेत्पितृदेवताः नवनाभंसुसंपूर्णंसर्वतोभद्रमेववा तस्योपरिन्यसेत्कुंभमव्रणंसुदृढंनवं ताम्रपात्रसमायुक्तंपंचरत्नसमन्वितं सुवर्णडोरकंकृत्वा चतुर्दशग्रंथियुतं सूत्रमयानंतरूपंचमाषकेणसुवर्णस्यदरिद्रेणापिपार्थिव शय्यांसोपस्करांकृत्वातत्रानंतंन्यसेद्व्रती लक्ष्म्यायुतंवासुदेवंमुसलेनहलेनच कुंभस्थताम्रपात्रोपरिस्वर्णनिर्मितमनंतं शय्योपरित्वर्थात्सूत्रमयमनंतंपूजयेदितिकेचित् तत्रलक्ष्म्यायुतमित्यादेरसंगतेः आचार्यंपूजयित्वाचवस्त्रैराभरणैस्तथा कर्णांगुलीपवित्रैश्चभक्त्यातत्रसमाहितः ततस्तुपूजयेद्देवमनंतंविश्वरूपिणं वस्त्रयुग्मंशुचिर्यस्माद्वासुदेवस्यवल्लभं अनंतःप्रीयतातेनपीतवस्त्रेणमेसदा वस्त्रयुग्मसमाच्छन्नंपीतयज्ञोपवीतकं चंदनेनसुगंधेनकर्पूरागुरुमिश्रिणा लेपयेऽहंतवांगानिप्रीयतांमधुसूदनः गंधः पुनःपुष्पाणिसंगृह्यपूजयेन्नामभिःपृथक् अनंतायनमःपादौगुल्फौसंकर्षणायच नमःकालात्मनेजानूजघनंविश्वरूपिणे कटिंवैविश्वरूपायमेढ्रंवैविश्वतेजसे नाभ्यांतुपद्मनाभायहृदयेपरमात्मने कंठंश्रीकंठनाथायबाहूसर्वास्त्रधारि

ऐ वाचस्पतेनमस्तुभ्यंमुखंसंपूजयेद्धरेः ललाटेकेशवायेतिशिरःसर्वात्मनेनमः लोकात्मासर्वभूतात्मानिमे
त्रुटिसंभवः जन्ममृत्युजराव्याधिसंसारभयनाशनः वनस्पतिरसोदिव्योगंधाढ्यःसुमनोहरः आघ्रेयःसर्व
देवानांधूपोयंप्रतिगृह्यतां आज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहं अन्नं
चतुर्विधंस्वादुरसैःषड्भिःसमन्वितं नैवेद्यंतेमयादेवदत्तंतत्प्रतिगृह्यतां पूगीफलंसपत्रंचसकर्पूरंमनोहरं पवित्रीकृत
मत्यंतंतांबूलंप्रतिगृह्यतां एवंपूजांततःकृत्वागच्छेत्कुंडसमीपतः स्वगृह्योक्तविधानेनकृत्वाग्निस्थापनंबुधः आरभ
त्ततोहोममश्वत्थसमिधैस्तिलैः व्रीहिभिर्मिश्रितैश्चापिघृतेनतुविधानतः ततःपुरुषसूक्तेनआतोदेवेतिवापुनः
इदंविष्णुर्विचक्रमेशतमष्टोत्तरंहुनेत् चरुहोमंततःकुर्यान्मंत्रैरेतैर्विचक्षणः अनंतायचकालायअहोरात्रायवैनमः
अर्द्धमासायमासायऋतुभ्यश्चतथापुनः मदनरत्नेजुहुयाद्गुरुरित्यस्याग्रे सर्वंहुत्वाविधानेन मंत्रैरेतैर्विचक्षणः एतै
र्वक्ष्यमाणैश्चमंत्रैर्जुहुयादितिसंबंधः मंत्राश्चैते अनंतायस्वाहा कालायस्वाहा अहोरात्रायस्वाहा अर्ध
मासायस्वाहा मासायस्वाहा ऋतुभ्यःस्वाहा संवत्सरायस्वाहा ततोव्याहृतिहोमः सर्वं प्रायश्चित्तं
चदक्षिणा आज्यतिलैःस्विष्टकृतं प्रजापतिभ्योजुहुयात् ततोवैलोकपालांश्चग्रहान्पूज्ययथाक्रमं गीत
वादित्रनिनदैर्हुत्वापूर्णाहुतिंव्रती पुराणश्रवणैस्तद्वद्रात्रिशेषंनयेद्व्रतीतिरात्रौहोमोनभवति पूजांते पूर्वेदि
नेएवकार्य्यः अथवा जागरणांते प्रातर्होमःकार्य्यइतिसंप्रदायानुसारतः पूर्वोक्तेनविधानेनपूजयेद्विश्वरूपि
णं पूजयित्वाहरिंदेवमाचार्य्यंपूजयेत्ततः परिधाप्यसपत्नीकंवस्त्रालंकारभूषणैः मंत्रैःसंपूज्यविधिवद्धेनुंदत्वा
विधानतः सुरभीवैष्णवीमातानित्यंविष्णुपदेस्थिता ग्रासंगृह्णमयादत्तंगोमातस्त्रातुमर्हसि गावोम
माग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृदयेसंतुगवांमध्येवसाम्यहं मंत्रेणानेनसंपूज्यआचार्य्यायनिवेदयेत्

गोदानस्यविधानार्थायदद्यात्स्वर्णंयथाविधि अनंतंसपरीवारमाचार्य्यायनिवेदयेत् ततआमंत्रितान्विप्रान्पूर्वेद्युश्चचतुर्दश वस्त्रोपवीतैःसंपूज्यभोजयेदत्रविस्तरैः ततस्तुदक्षिणांतेभ्योवित्तशाठ्यविवर्जितः स्वशक्त्यादक्षिणांदद्यादाचार्य्यायक्षमापयेत् क्रियाहीनंभक्तिहीनंद्रव्यहीनंतथैवच मंत्रहीनंपठेत्पश्चाद्व्रतसंपूर्तिहेतवे दीनांधकृपणेभ्यश्चदद्याच्चैवतथाधनं ततोहृष्टैःसमस्तैश्चपुत्रसंबन्धिबांधवैःयथोपपन्नंभोक्तव्यंकृत्वामानसमव्ययं-आचम्यचशुचिर्भूत्वाचिंत्योविष्णुश्चतद्दिने एवंकृतेनृपश्रेष्ठकर्मण्याशुजनार्दनः अनंतरूपीभगवान्तुष्टोभवतिसर्वदा व्रतस्यफलमाप्नोतिविष्णुलोकेमहीयते इतिश्रीहेमाद्रौभविष्येसोद्यापनमनंतव्रतं

अथहेमाद्रिमदनरत्नोलिखितभविष्यपुराणानुयायी अनंतव्रतोद्यापनप्रयोगः तत्रग्रहणदिनादिकचतुर्दशवर्षासमाप्तिदिनेत्रयोदश्यांकृतैकभुक्तस्तदुत्तरशुक्लचतुर्दश्यांब्रह्मचर्य्याद्युपवास नियमवतोयथासंभवंपुण्यतीर्थादौसर्वौषधितिलकल्कामलैः स्नात्वास्नानांगतर्पणांतंनित्यकर्मनिर्वर्त्य गृहमागत्यमृदावेदिंकृत्वा तत्रनवनागंसर्वतोभद्रंवावालिख्यपंचवर्णैर्यथासंभवंसप्तधान्यादिभिःसंपूर्य्य सपवित्रपाणिराचम्यमासपक्षाद्युलिख्यचरितानंत व्रतपरिपूर्णतायै उत्तरांगमुद्यापनमहंकरिष्ये इतिसंकल्प्य तत्रादौनिर्विघ्नतासिद्धयेगणपतिंपूजयेत् ततआर्यमासनवस्त्रदक्षिणाकुंडलादिभिर्वृत्वापूजयेत् ततआचार्यो यदत्रसंस्थितंभूतंस्थानमाहृत्यसर्वदा स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु अपवित्रःपवित्रोवेतिपंचगव्येनप्रोक्ष्यसर्वतोभद्रकरणपक्षे तत्रसर्वतोभद्रेदेवताआवाह्यपूजयेत् सर्वतोभद्रनिर्माणप्रकारोदेवतापूजादिप्रकारश्चपरिभाषायामुक्तः सोत्रापियथासंभवमनुष्ठेयः ततोमंडलमध्येमहीयौरित्यादिकलशस्थापनमुक्तप्रकारेणकार्य्यं तत्रताम्रपूर्णपात्रयुतंकलशंस्थापयेत् तस्मिन्माषमात्रादिस्वर्णनिर्मितंचतुर्दशग्रंथियुतानंतंस्थापयेत् तदुत्तरतःसुविस्मृतांशय्यामासाद्यंतत्रापिस्वर्णडोरकप्रतिमायांश्री

मदनंतापनइतिमंत्रेणावाहनादिपंचामृत्तस्नपनानंतरंवार्षिकपूजावत्कुर्य्यात् ततोवस्त्रयुग्मंशुचिर्यस्माद्वासुदेवांगवल्लभं अनंतःप्रीयतांतेनवस्त्रयुग्मेनसर्वदा इतिमंत्रेणवस्त्रयुग्मंयज्ञोपवीतंचसमंत्रकंसमर्प्य चंदनेनसुगंधेनकर्पूरागुरुगंधिना लेपयेहंतवांगानिप्रीयतांमधुसूदन इतिचंदनसमर्प्य माल्यादीनीतिपुष्पाणिसमर्प्य पुष्पाणिगृहीत्वांगपूजांकुर्य्यात् अनंतायनमःपादौपू०संकर्षणायनमःगुल्फौ कालात्मने- जानुनीपू० विश्वरूपायकटिं विश्वरूपिणेजघनं विश्वसाक्षिणेमेढ्रंपू०पद्मनाभाय- नाभिंपूजयामि.परमात्मनेहृदयंपू०श्रीकंठाय. कंठं-सर्वास्त्रधारिणेबाहू.वाचस्पतयेमु.केशवाय-ललाटंपू.सर्वात्मने. शिरःपूजयामिततःकालात्मासर्वभूतात्मानिमेषत्रुटिसंभव जन्ममृत्युजराव्याधिसंसारभयनाशन इतिमंत्रेणपुष्पाणिसमर्प्यधूपदीपादिदत्वा पूजासाद्गुण्यार्थंदक्षिणां. चदत्वानीराजनंकूर्य्यात् ततःकुंभात्पश्चिमभागेकुंडंस्थंडिलंवानिर्माय तत्रउद्यापनांगभूतंहोमंकरिष्ये इति संकल्प्य स्थंडिलोपलेपनादिअग्निप्रतिष्ठापनांकृत्वा अन्वादध्यात् तच्चेत्थंओमद्यास्मिन्नाहितेग्नोजातवेद समिद्धेनप्रजापतिंचाचारदेवतेआज्येन अग्निषोमौचक्षुषीआज्येनप्रदांदेवतामनंतमश्वत्थसमित्तिलव्रीहियवघृत द्रव्यैःप्रत्येवमष्टोत्तरशत्ताविंशत्पष्ठान्पतमसंख्ययापुनरनंतकालसंवत्सरर्तुमासार्धमाससंवत्सरं अग्निवायुसूर्य्यं प्रजापतिंचवरुणाएकैकयाआज्याहुत्याग्रहान्समिदाज्येनचरुद्रवेणप्रत्येक मष्टोत्तरशताष्टायातमसंख्ययावासर्वतोभद्रपीठदेवता आज्येनैकैकयाहुत्यास्विष्टकृतं प्रजापतिंचाज्यक्षुतिलैःदध्यन्तहवनेनरुद्रमित्यादिसर्वमाज्याभागांतंहुत्वोक्तद्रव्येणपुरुषसूक्तेन अतोदेवा उत्पन्नेनइयंविष्णुरित्येननचान्वाधानक्रमेणजुहुयात् ततः प्रायश्चित्तहोमंसमाप्यलोकपलान्ग्रहांश्चपंचोपचारैः संपूज्यबलिदानंचकृत्वागीतवादित्रान्निनदैः पूर्णाहुतिंजुहुयात् पुराणश्रवणजागरणादिभिर्निशामतिवाह्याऽपरेन्हिकृत्वान्हिकोयमानः पूर्वदिनस्थापितमनंतंसपरिवा

रमंडलांतंपूर्ववत्पूजयित्वाआचार्य्यंप्रपूजयेत् ततोगावोममाग्रतः संतुइत्यनेनधेनुंपूज्य सुरभीवैष्णवीमाताइतिमंत्रेणतस्यैवग्रासंदत्वा आचार्य्छायतांधेनुंदद्यात् ततःप्रतिमांशय्याकलशादियुक्तामध्याचार्यायनिवेदयेत् अतःपूर्वेद्युर्निमंत्रितान्चतुर्दशब्राह्मणान् वस्त्रयज्ञोपवीतादिभिःसंपूज्य नानाविधेनान्नेनाचार्यसहितान्भोजयित्वातेभ्योवस्त्रकलशप्रतिमादिसहितां अनंतव्रतोद्यापनसामग्रींदत्वादक्षिणांचदत्वाआशिषोगृहीत्वा विसर्जयेत् ततआचार्य्यायदक्षिणांदत्वाक्षमापयेत् तत्रमंत्रः क्रियाहीनंद्रव्यहीनंभक्तिहीनंतथैवच मंत्रहीनंकृतंयच्चपरिपूर्णंतदस्तुमे इतिएवंक्षमाप्यस्वयंभुंजीत इत्यनंतव्रतोद्यापनप्रयोगः ॥

अथनष्टडोरकप्रायश्चित्तं युधिष्ठिरउवाच ॥ अनंतव्रतमाहात्म्यंकृत्स्नंकृष्णत्वयोदितं भगवन्डोररूपेण भाग्यदोसिमहात्मनां डोरःप्रमादत्तोनष्टोयदिस्याद्विदितंजनैः तदाकिंकरणीयंस्याद्व्रतंत्रैलोक्यपावनं कृष्णउवाच ॥ साधुपृष्टंत्वयाराजन्वक्ष्यामिव्रतनिष्कृतिं फलंलोकस्यसर्वस्यरक्षार्थंशृणुतत्क्रमात् डोरनष्टेमहान्दोषः प्रभवेद्व्रतिनामिहतस्मात्तद्दोषशांत्यर्थं प्रायश्चित्तंविधीयते गुरुंप्रदक्षिणीकृत्यनमस्कृत्यसमाहितः विज्ञाप्यडोरशंचकृत्वाडोरंव्रतीततः हव्यवाहंप्रतिष्ठाप्यतस्मिन्ध्यात्वाहरिंपरं आज्यमग्नावधिश्रित्यदद्याद्धिप्रायवाससं अष्टोत्तरशतंहुत्वामूलमंत्रेणवैष्णवः नाममंत्रेणजुहुयाद्द्वादशार्णयुतेनवा केशवादिसकृद्धुत्वाप्रायश्चित्तंतुशक्तितः केशवादिचतुर्विंशतिनामभिर्होमंकृत्वापूर्णाहुतिंततोहुत्वाहोमशेषंसमापयेत् व्रतेच्छिद्रंतपच्छिद्रंयज्ञच्छिद्रंयज्ञकर्मणिवचनाद्भूमिदेवानांसर्वंसंपूर्णतांव्रजेत् मंत्रहीनं क्रियाहीनं भक्तिहीनंजनार्दनयत्पूजितंमयादेवपरिपूर्णंतदस्तुमे आचार्य्यपूजनंकार्य्यंदक्षिणाद्यैर्नृपोत्तम एवंशांतिविधिंकृत्वापूर्ववहुतमादिशेत् प्रायश्चित्तमकृत्वातुपुण्यंनस्याद्व्रतेक्वचित् व्याधिनाग्रसितोदेहःश्रियासंत्यज्यतेगृहं डोरस्यातिक्रमेचैवचरेत्सर्वमिदंबुधः यइदंकुरुतेपार्थतस्यायुःपुत्रसंपदःभवंतीतिशेषः इत्यनंतडोरप्रायश्चित्तं

अथापरमनंतव्रतोद्यापनं त्वत्प्रसादाच्छ्रुतंकृष्णमयानंतव्रतंसुभं इदानींब्रूहिमेनंतव्रतोद्यापनमुत्तमं श्रीकृष्ण उवाच यदाचित्तस्यचित्तस्यसंपत्तिर्जायतेशुभा तदाचोद्यापनंकुर्य्याछुभलग्नेशुभेदिने संकल्पयेदुपावासंदेशकालावनुस्मरन् ततोनदीतडागंवागत्वासर्वौषधैस्तथा तिलकल्केमासलकैःस्नायान्मज्जनपूर्वकं तीरेमंडपिकांकृत्वा गृहेवापिसुशोभितां तन्मध्येउपविश्याथदेशकालौस्मरेत्ततः गणेशंपूजयित्वाथपुण्याहंवाचयेद्द्विजैः आचार्य्यं वृणुयाद्भार्य्यायुतंवेदांगपारगं ब्राह्मणानृत्विजश्चापिचतुर्दशफलादिना सर्वान्वस्त्रालंकारैर्जलपात्रादिनार्चयेत् सौवर्णंराजतंवापिताम्रजंवापिमृण्मयंकुंभंन्यसेत्तदुपरिसुधाचंदनचर्चितं तस्मिन्जलेगंधपुष्पफलपल्लवमृत्तिकाः क्षिप्तारत्नहिरण्यादिवाससावेष्टयत्ततः सौवर्णंराजतंताम्रजातंवंशजमेवच पात्रंतदुपरिन्यस्यपट्टकूलादिकंशुभंप्रसार्य्यतदुपर्य्यत्राष्टदलंचंदनादिना पद्मंविरच्यतन्मध्येनंतमूर्त्तिंनिधायच पलेनचतदर्द्धेनतदर्द्धेनापिवाकृतां सौवर्णमयाऽऽयुक्तांशंखचक्रगधाब्जकां आवाहनाद्युपचारैःपूजयेत्सुसमाहितः पंचामृतेनस्नपयेत्ततश्चवसंनद्वयं पट्टकूलादिकंपीतमर्पयित्वार्चयेद्व्रती गंधपुष्पादिभिर्नानामक्ष्यैर्नानाफलैस्तथा एवंसंपूज्य विधिवद्विधिनावार्षिकेणतु पुष्पैःसंपूजयेदंगान्यनंतस्यचनामाभिः अनंतायनमः पादौगुल्फौसंकर्षणायच कालात्मनेजानुनीचजघनंविश्वरूपिणे विश्वनाथायवैगुह्यंकटिंवैविश्वरूपिणे नाभिचपद्मनाभायहृदयंपरमात्मने कंठंश्रीकंठनाथायबाहून्सर्वास्त्रधारिणे मुखंचवाचस्पत्तयेचक्षुषीकपिलायच ललाटेकेशवायेतिशिरःसर्वत्मनेनमः नमःपादौजयागत्यैवमादिप्रपूजयेत् एवंपूजांयदायैवंरात्रौजागरणंचरेत् गीतवादित्रनृत्यादिपुराणश्रवणान्वितं प्रतिमायांप्रकुर्वीतपूजांगंधादिनाहरेः नानाफलानिभक्ष्याणिचोपवासीनिवेदयेत् ततः प्रभातसमयेस्नात्वाचार्य्यादिभिःसह अनंतपूजयेत्प्राग्वंजुहुयात्यश्चिमेततः कुंडेवास्थंडिलेकुर्य्यादग्निस्थाप

नपूर्वकं आज्यभागांतमाचार्य्यः स्वगृह्योक्तविधानतः ततोश्वत्थसमिद्भिश्चतदलाभेन्यथापिवा दधिमध्वाज्यस्निग्धाभिस्तिलैर्वापायसेनच आज्येनचप्रतिद्रव्यमष्टोत्तरसहस्रकं अष्टोत्तरशतंचाष्टाविंशतिजुहुयात्क्रमात् अतोदेवेतिमंत्रेणर्त्रीणांवैनाममंत्रतः प्रणवाद्यंचतुर्थ्यंतंनमोंतानंतनामतःनाममंत्रैश्चजुहुयाच्चतुर्दशभिरादरात् ओंअनंतायस्वाहा १ कपिलायस्वाहा २ शेषायस्वाहा ३ कालात्मनेस्वाहा ४ अहोरात्रायस्वाहा ५ अर्धमासायस्वाह ६ षट्ऋतुभ्यःस्वाहा ७ संवत्सरायस्वाहा ८ परिवत्सरायस्वाहा ९ उपसेस्वाहा १० कलायैस्वाहा ११ काष्ठायैस्वाहा १२ मुहूर्तायस्वाहा १३ समिधादिभिरेवंचप्रत्येकंजुहुयात्क्रमात् ततःस्विष्टकृदारभ्यपूर्णपात्रांतमाचरेत् जप्तापुरुषसूक्तंतुस्मृत्वानंतंसुरोत्तमं पूर्णाहुतिंचजुहुयाद्धोमांतेविश्वामित्यृचा होमशेषसमाप्याथकृत्वात्र्यायुषमप्यथ पूजयित्वाहरिंदेवमाचार्यंपूजयेत्ततः वस्त्रालंकारभूषाद्यैस्ततोधेनुंसमर्पयेत् पयस्विनींसुशीलांचवस्त्रालंकारभूषितां स्वर्णशृंगींरौप्यखुरींताम्रपृष्ठींसुवाससं कांस्यदोहांरत्नपुच्छांनिष्ककंठींसवत्सकां गांवामंत्रेणसंपूज्याचार्य्यायचसमर्पयेत् मंत्रास्तुगवामंगेष्वितिगावोममाग्रतः संतुगावोमेसंतुपृष्ठतःगावोमेहृदयेसंतुगवांमध्येवसाम्यहं मंत्रमेतत्समुच्चार्य्य वस्त्रालंकारभूषणैःतत्पत्नींपूजयित्वाथब्राह्मणांस्तोषयेत्ततःऋत्विजःपूजयित्वाथतेभ्योदत्त्वाचदक्षिणां चतुर्दशचकुंभांश्चपक्वान्नपरिपूरितान् वस्त्रोपवीतंदद्याच्चाप्यनंतःप्रीयतामिति आचार्य्यादीन्भोजयित्वापूर्णतांवाचयेत्ततः अथानंतंविसृज्यापिगृह्णीयादाशिषस्ततः भक्तियुक्तोनमस्कृत्यब्राह्मणांस्तान्विसर्जयेत् ततोहृष्टोबंधुयुतोभुंजीतसुसमाहितः एवंकृतेनंतफलदातानंतोनसंशयः इतिभविष्योत्तरेअनंतव्रतोद्यापनविधिः

अथसंक्षिप्तप्रकारेणानंतव्रतोद्यापनम् व्रतोद्यापनकौमुद्यां तत्रादौतिथ्यादिसंकीर्त्यात्मनोनिखिलपापक्षयपूर्वोत्त

मसिद्धिपुत्रपौत्रपूरितविविधभोगधनधान्यपरमगतिप्राप्तिकामनया चतुर्दशवर्षाचरितानंत व्रतोद्यापनं करिष्येइतिसंकल्प्य नित्यविधिनास्वयंदेवंसंपूज्य ततोव्रताचार्य्यःसर्वतोभद्रे ब्रह्मादिदेवताआवाह्यतदुपरिकलशंविधिना प्रतिष्ठाप्य तत्र यमुनामावाह्यश्रीसूक्तेन नाममंत्रेणवासंपूज्य तदुपरिअक्षतपरिपूर्णपात्रंनिधायतत्राष्टदलं विलिख्यतत्र स्वर्णनिर्मितांचतुर्दशग्रंथियुतामनंतप्रतिमां सहस्रशीर्षेतिपुरुषसूक्तेन स्थापयेत् तदुत्तरतःसप्तधान्योपरिविस्तृतरौप्यशय्यायांनिर्मितलक्ष्मीसहितंहैमं हलमुसलोपेतमनंतंदेवं अतोदेवेतिमंत्रेणइदं विष्णुरितिमंत्रेणवास्थापयेत् स्वर्णडोरकप्रतिमायोःपुरुषसूक्तेनश्रीमदनंतायनमः इतिनाममंत्रेणवा पूजावार्षिकवत्कार्य्या अथ ग्रंथिदेवताः विष्णुः १ अग्निः २ आदित्यः ३ सहस्राक्षः ४ पितामहः ५ इंद्रः ६ पिनाकी ७ विघ्नेशः ८ स्कंदः ९ सोमः १० वरुणः ११ पवनः १२ पृथ्वी १३ वसवः १४ ततःशय्यायांप्रतिमायाः शंखचक्रंगदांपद्मंनाममंत्रेण तद्बहिर्नाममंत्रेण अनंतंकपिलंदक्षंमनुंप्रजापतिं संकर्षणं बालं वनमालिनं त्रिविक्रमं अहोरात्रं अर्धमासं मासं ऋतुं अयने संवत्सरं परिवत्सरं इडावत्सरं अनुवत्सरं संवत्सरं प्रजाध्यक्षं अजितं सर्वभूतं प्रद्युम्नं अनिरुद्धं श्रीधरं पुरुषोत्तमं पद्मनाभं विश्वरूपं त्रिविक्रमं कृष्णं अच्युतं तद्बहिरिंद्रादीन् तद्बहिरष्टवसून् तद्बहिरेकादशरुद्रान् तद्बहिरश्विन्यादिसप्तविंशतिनक्षत्राणि तद्बहिर्ब्राह्म्यादि सप्तमातृः तद्बहिश्चैत्रादिद्वादशमासान् तद्बहिर्दीप्तादिशक्तीःदीप्तासूक्ष्माप्रभाप्रज्ञाविभूतिर्विश्वतोमुखी अमोघा विद्युतातद्बहिर्विष्कुंभादियोगानावाह्य नाममंत्रैरेवपूजाकार्य्या पीठस्यपरितः पक्वान्नसहितान् चतुर्दशकुंभान्संस्थाप्यचतुर्दशनामभिःपूजयेत् नाममंत्राः अनंतायनमः १ संकर्षणायनमः २ कालायनमः ३ शेषायनमः ४ वासुदेवायनमः ५ विश्वनाथायनमः ६ विश्वरूपायकटिंपू० ७ पद्मनाभायनमः ८ दामोदरायनमः ९

जगन्नाथायनमः १० चतुर्भुजायनमः ११ श्रीकंठायनमः १२ केशवायनमः १३ सर्वात्मनेनमः १४ इतिसर्वेषांपूजा ततोंगपूजा अनंतायपादौपूजयामि १ संकर्षणायगुल्फौपू २ कालायजंघेपू ३ शेषायजानुनीपू ४ वासुदेवायऊरूपू ५ विश्वनाथायगुह्यंपू ६ विश्वरूपायकटिंपू ७ पद्मनाभायनमः नाभिंपू० ८ दामोदरायउदरंपू १० जगन्नाथायहस्तौपू चतुर्भुजायबाहुद्वयंपू ११ श्रीकंठायनमःकंठंपू १२ केशवायललाटंपू १३ सर्वात्मनेनमः शिरःपूजयामि अनंतायनमः सर्वांगंपूजयामि ततोधूपादिमंत्रपुष्पान्त सर्वोपचारैःसंपूज्य नमस्कुर्य्यात् नमस्तेदेवदेवेशनमस्तेधरणीधर नमस्तेसर्वनागेंद्रअनंतायनमोनमः इतिनमस्कारः ततःप्रार्थना अनंतकामान्मेदेहिसर्वकामफलप्रद अनंतायनमस्तुभ्यंपुत्रपौत्रविवर्द्धन व्रतेनानेनसुप्रीतोभवत्विहसदामम ततःपुराणपाठजागरणादिभिर्निशामतिवाह्य प्रातरग्निंप्रतिष्ठाप्यअन्वादध्यात् तत्रप्रधानंश्रीमदनंतं अश्वत्थसमित् तिलव्रीहियवघृत पापसद्रव्यैः प्रत्येकमष्टोत्तरशतसंख्याकाहुतिभिः पीठदेवताआवरणदेवताश्चैकैकयाआज्याहुत्याब्रह्मादिदेवताश्चैकैकया आज्यहुत्यायक्ष्येस्थपनोक्तनाममंत्रैः सकलोहोमःकार्य्यःकेचित्तु व्रतदिन एवसर्वंहोमनिच्छंति प्रातस्तुब्राह्मणभोजनमात्रं ततःपीठंसंपूज्यवस्त्रादिभिराचार्य्यंचसंपूज्यपीठंदद्यात् तत्रमंत्रः प्रतिगृह्णद्विजश्रेष्ठसमस्तफलदायक ब्रह्मसाक्षादहंविप्रविमुच्येभववंधनात् अनंतःप्रतिगृह्णातिअनंतोवैददातिच अनंतस्तारकोभाभ्यामनंतायनमोनमः ततःपूर्वेद्युर्निमंत्रितान् चतुर्दशब्राह्मणान् वस्त्रादिभिः संपूज्यस्थापितचतुर्दशकलशान्यक्वान्नादिसहितान् सदक्षिणान्तेभ्योदद्यात् प्रतिगृह्णद्विजश्रेष्ठेत्यादिमंत्रौपठेत्व्रतपूर्तयेगांदत्वासुवर्णदानप्रतिष्ठांदद्यात् ततआशिषोगृहीत्वाक्षमाप्यचविसर्जयेत् क्रियाहीनंभक्तिहीनंद्रव्यहीनंतथैवच मंत्रहीनंकृतंयज्ञपरिपूर्णंतदस्तुमे ततोब्राह्मणभोजनपुरःसरंस्वयंभुंजीत इतिव्रतोद्यापनकौमुद्यामनंतव्रतोद्यापनं

अथास्यामेवचतुर्दश्यांपालीव्रतम् हेमाद्रौ भविष्योत्तरे युधिष्ठिरउवाच अंबुपूर्णतडागेषुमहत्तोयाशयेषुच कस्यार्घ्यंसंप्रयच्छंतिकृष्णैताः कुलयोषितः श्रीकृष्णउवाच मासिभाद्रपदेप्राप्तेशुक्लभूततिथौनृप तडागपाल्यां दातव्योवरुणायार्घ्यउत्तमः ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैःस्त्रीभिर्विशेषतः तस्मिन्दिनेभक्तिनम्रैर्देयोर्घ्यः पांडुनन्दन फलैः पुष्पैस्तथावस्त्रैर्दीपालक्तकचंदनैः विरूढैः सप्तधान्यैश्चदधिमिष्टान्नचंदनैः अनग्निपक्कसिद्धान्नैस्तिलतंडुलमिश्रितैः खर्जूरैर्नारिकेलैश्चवीजपूरैः फलैस्तथा द्राक्षादाडिमपूगैश्चपुष्पैश्चापिप्रपूजयेत् आलिख्यमंडलेदेवंवरुणंवारुणीयुतं प्रभासतीर्थसहितंगयापुष्करसंयुतं मंत्रेणानेनराजेंद्र पूजयेद्भक्तिभावतः वरुणायनमस्तुभ्यंनमस्तेयादसांपते अपांपतेनमस्तुभ्यंरसानांपतयेनमः माक्लेदंमाचदौर्गन्ध्यंवैरस्यंमामुखेमम वरुणोवाहणीभर्तावरदोस्तुसदामम एवंयःपूजयेद्भक्त्यापुरुषोवरुणालयं मध्याह्नेसरसिस्नात्वानाग्निपक्कव्रतीनृप चातुर्वर्ण्याचयानारीव्रतेनानेनपांडव निवेद्यब्राह्मणेदद्यात्तन्नैवेद्यंप्रकल्पितं एवंयःकुरुतेपार्थपालीव्रतमनुत्तमंतत्क्षणात्सर्वपापेभ्योमुच्यतेनात्रसंशयः यथास्त्रयुद्धेगाभीर्यंजायतेनेहकुत्रचित् एवंहिव्रतिनांगेहेधर्मंज्ञातुंनशक्यते आयुषायशसाकीर्त्यासौभाग्येनयुतासदा भवंति व्रतमाहात्म्याज्जंतवोनात्रसंशयः संरुद्धशुद्धसलिलातिविलांविशालांपालीमुपेत्यबहुभिस्तरुभिः कृतालीं येपूजयंति वरुणीसाहितं समुद्रंतेषांगृहेभवतिभूतिरलंपुगाढ्या इतिभविष्योत्तरेपालीव्रतं ॥ अस्यामेवभाद्रपदशुक्लचतुर्दश्यांरंभाव्रतं भविष्योत्तरे श्रीकृष्णउवाच ॥ अस्मिन्नेवदिनेपार्थशृणुब्रह्मसभातलेदेवलेनपुरागीतादेवर्षिगणसन्निधौ अप्सरोगणगंधर्वैर्देवैःसर्वैःसमर्चितं संसारासरतांदृष्ट्वातत्रस्थाकदलींततः शुक्लपक्षेचतुर्दश्यांमासिभाद्रपदेनृप जातीफलैःपूगफलैर्लवंगैःकदलीफलैः सक्तुदलैयैतुरंभायेपूजाचात्रनिगद्यते तस्मिन्नहनिदातव्यस्त्रीभिरन्याभिरप्यलं मंत्रेणानेनवैपार्थसंशृणुष्वनरे।

तम यथात्वंकंदलदलैःकदल्येकामदायिनि शरीरारोग्यलावण्यंदेहिदेहिनमोस्तुते इत्थंयः पूजयेद्रंभांपुरुषोभक्तिमान्नृप नारीवानन्निपक्कान्नाचातुर्वर्ण्यायुधिष्ठिर तस्याःकुलेपिनभवेत्कापिनारीकुलाटनी दुर्गतादुर्भगावंध्यास्वैरिणीपापकारिणी विलासिनीवावृषलीपुनर्भूभूगुणेतरा गणिकास्थाविरास्यावामूलकर्मकराखला भर्तृव्रताच्चचलितानकदाचित्प्रजायते भवेत्सौभाग्यसौख्याढ्यापुत्रपौत्रश्रियावृता आयुष्मतीकीर्तिमतीरमेद्वर्षशतंभुवि एतद्रंभाव्रतंचीर्णंगायत्र्यास्वर्गसंस्थया तथागौर्य्याचकैलासेइंद्राण्यानंदनेवने श्वेतद्वीपेतथालक्ष्म्यारंभयारविमंडले भानुमत्यानागपुरेव्रतमेतदनुष्ठितं एतद्व्रतंपार्थिवेंद्रमासिभाद्रपदेसति याकरोतिनसादुःखैः कदाचिदपिपीड्यते उन्निद्रकंदलदलांकदलींमनोज्ञांयाःपूजयंतिकुसुमाक्षतधूपदीपैः तासांगृहेषुनभवंतिकदाचिदेवनार्य्यस्त्वनार्य्यचरिताविधवाविरूपाः इतिभविष्योत्तरोक्तं भाद्रपदशुक्लचतुर्दश्यांरंभाव्रतम्

अथाऽगस्त्यार्घ्यदानव्रतं पद्मपुराणेसृष्टिखंडे ॥ भीष्मउवाच भूर्लोकोथभुवर्लोकःस्वर्लोकोथमहर्जनः तपःसत्यश्चसप्तैते देवलोकाःप्रकीर्तिताः पर्य्यायेणतुसर्वेषामाधिपत्यंकथंभवेत् इहलोकेशुभंरूपमायुरारोग्यमेवच लक्ष्मीश्चविपुलाब्रह्मन्कथंस्यात्सुरपूजित ॥ पुलस्त्यउवाच वसिष्ठेसंभवत्यस्मिन्जलकुंभेचपूर्ववत् ततश्चैव बभूवाथसाक्षसूत्रकमंडलुः अगस्त्यइतिशांतात्माबभूवऋषिसत्तमः मलयस्यैकदेशेतुवैखानसविधानतः सभार्य्यःससुतोविप्रस्तपश्चक्रेसुदुष्करं ततःकालेनमहताह्युदकादिनिपीडितं जगद्वीक्ष्यसकोपेनपीतवान्वरुणालयं ततोस्यवरदाःसर्वेबभूवुःशंकरादयः ब्रह्माविष्णुश्चभगवान्वरदानायजग्मतुः वरंवृणीष्वभद्रंतेयश्चाभीष्टोव्रतेशुभ ॥ अगस्त्यउवाच यावद्ब्रह्मसहस्राणांपंचविंशतिकोटयः वैमानिकोभविष्यामिगगनांतरवर्त्मनि मद्विमानोदयेकुर्य्याद्यः कश्चित्पूजनंमम सर्वेपुण्यत्वमायातुवरएकोवृतोमया श्राद्धंयेवैकरिष्यंतिपिंडपूर्वंतुभक्तितः

तेषांपितृगणाः सर्वैर्मयासार्द्धंदिविस्थिताः सप्तकल्पंप्रतिष्ठंतुएषएववरोमम एवमस्त्वितितंचोक्त्वाययुर्देवा
यथागतं तस्मादर्घ्यःप्रदातव्योह्यगस्त्यस्यसदाबुधैः अथागस्त्यार्घ्यदानविधिः वीरमित्रोदयेमत्स्यपुराणे
कथमर्घ्यप्रदानादिकर्तव्यंतस्यवैप्रभो विधानंयदगस्त्यस्यपूजनेतद्वदस्वमे ईश्वरउवाच प्रत्यूषसमयेविद्वान्
कुर्य्यात्तस्योदयेनिशि स्नानंशुक्लतिलैस्तद्वच्छुक्लमाल्यांवरोगृही स्थापयेदव्रणंकुंभंमाल्यवस्त्रविभूषितं पंचर
त्नसमायुक्तंताम्रपात्रसमन्वितं अंगुष्ठमात्रंपुरुषंतथैवसौवर्णमत्यायतबाहुदंडं चतुर्भुजंकुंभमुखेनिधायधान्या
निसप्तांकुरसंयुतानि सकांस्यपात्राक्षतशुक्तियुक्तंमंत्रेणदद्याद्द्विजपुंगवाय उत्क्षिप्यलंबोदरदीर्घबाहुमनन्यचेता
यमदिङ्मुखस्थः उत्क्षिप्यकुंभमुखान्निःसार्यलंबोदरदीर्घबाहुंपुरुषंमंत्रेणदद्यादित्यर्थः लंबोदरमित्यादिपुनर्वि
शेषणंलंबोदरत्वविधानार्थं यमदिङ्मुखस्थइतिकुंभस्थापनादौसर्वत्रसंबध्यते प्रयोगांगकर्तृधर्मत्वात् श्वेतांच
दद्याद्यदिशक्तिरस्तिरौप्यैः खुरैर्हेममुखींसवत्सां धेनुंनरःक्षीरवतींप्रणम्यसवस्त्रघंटाभरणांद्विजाय हेममुखींसुव
र्णशृंगीं अन्यत्रतथादर्शनात् आसप्तरात्रादुदयेर्घ्यमस्यदातव्यमेतत्सकलंनरेण उदयाद्यमस्येतिपाठोहेमाद्रौ
यमोऽगस्त्यः यावत्समाःसप्तदशाथवास्युरथोर्ध्वमप्येववदंतिकेचित् ॥ ॥ ॥ अथार्घ्यदानमंत्रः
काशपुष्पप्रतीकाशवान्हिमारुतसंभव मित्रावरुणयोःपुत्रकुंभयोनेनमोस्तुते १ प्रत्यब्दंचफलत्यागमेवंकुर्वन्प्र
सीदति त्यजेदगस्त्यमुद्दिश्यधान्यमेकंफलंरसं होमंकृत्वाततः पश्चाद्भक्षयेन्मानवः फलं अनेनविधिना
यस्तुपुमानर्घ्यंनिवेदयेत् इंद्रलोकमवाप्नोतिरूपारोग्यसमन्वितः सप्तैवलोकानाप्नोतिसप्तार्घ्यान्यः प्रय
च्छति आसप्तरात्रादित्यादेरयमर्थः यस्मिन् अंशेअगस्त्योदयः तस्याद्यः प्राग्भूतोयोंशः ततः प्रागेक
स्मिन्दिने ऽर्घ्योदातव्यः॥ अगस्त्योदयकालश्चब्रह्मपुराणे ॥ अगस्त्योदक्षिणामाशामाश्रित्यनभसिस्थितः

वरुणस्यात्मजोयोगीविंध्यवृद्धिविमर्दनः कन्यांशेभ्यः पश्चिमेभ्यः षष्ठप्रारभ्यसंख्यया आशान्द्वाविंशतिर्यावद्भुंक्ते सूर्यस्तुराशिषु विंशतिमितिकल्पतरौपाठः उदेतितावद्भगवानगस्त्योऽयोऽम्नितोयभुगिति कन्यांशेभ्यइतिपूर्वदिक्शब्दस्याध्याहारेपंचमी पश्चिमेभ्यइतिव्यधिकरणेच तेनायमर्थः कन्यांशपूर्वेभ्यः सिंहांशकेष्वंतिमेभ्यः षड्भ्यः प्रारभ्य अगस्त्योदयइतिचोदयात्पूर्वस्याऽपिपाश्चिमत्वमित्येकएवार्थः अतएवागमः कन्यामनागतेसूर्येयत्रार्घ्योवैसप्तमादिति सिंहांतिमेष्वंशकेष्वर्घ्यंदर्शयति यत्तु आगमज्योतिषयोः अप्राप्तेभास्करेकन्यांत्रिभिर्भागैस्त्रिभिर्दिनैः अर्घ्यंदद्युरगस्त्यायये वसंतिमदालये इतिवचनंसप्तविंशांशादिषु अर्घ्यदानं तत्प्राशस्त्यपरं नतुपूर्वांशकनिषेधपरं धर्मशास्त्रविरोधेनैतद्वचनमनादेयमित्युक्त्वा ब्रह्मपुराणार्थपरत्वेनानेतव्यमितिलिखितवतो रत्नाकरस्याप्येतदभिप्रेतं समयप्रदीपेतु ज्योतिःशास्त्रात् सप्तविंशेसिंहांशके अगस्त्योदयस्तदनुसारिकन्यांशकेप्यर्घ्यदानंआसप्तरात्रादितिश्रवणात् आगमेतु कन्यायांसमनुप्राप्ते सूर्येऽर्घ्यः संप्रकीर्तित इतिकन्यांशकेष्वर्घ्योनिषिद्धइत्युक्तं अर्घ्यद्रव्याणितु रक्तविल्वाक्षतैः पुष्पैर्दधिदूर्वाक्षतैस्तिलैः सामान्यःसर्वदेवानामर्घ्योयंपरिकीर्तित इतिसामान्यविधिः रत्नाकरेतुपुंखेनासितपुष्पाक्षतैःजलैरर्घ्योदेयइतिनृसिंहपुराणे अगस्त्यार्घ्येतथादर्शनात् इतिदर्शनादित्युक्तं एतत्सकलमिति एभिरंगैः संपूर्णमित्यर्थः सकलमितिपाठेसकलमर्घ्यमित्यर्थःसमावर्षाणिवर्दत्स्येवेतिसंबंधः काशपुष्पप्रतीकाशेतिमंत्रः सौवर्णपुरुषदानेप्ययमेवार्घ्यमंत्रः मंत्रांतरानभिधानात् ब्राह्मणकर्तृके अर्घ्येतु अगस्त्यः खनमानः खनित्रैः प्रजामपत्यमिषमाणः उभौ वर्णावृरुद्रः पुपोषसत्यादेवेष्वाशिषोजगामेतिवैदिकमंत्रान्वयइतिविशेषोऽस्मिन्कल्पेनास्ति एतन्मंत्रस्यविशेषानभिधानेनचातुर्वर्ण्यगोचरत्वादिति ॥ वीरमित्रोदयेप्रत्यब्दमिति अत्रफलत्यागेविशेषः स्मृत्यंतरे वीज

पूरंनारिकेलंरंभाजातीफलंतथा खर्जूरचूतदाडिम्यः फलान्येतानिवर्जयेदिति होमश्च महाव्याहृतिभिराज्येनवैदिकमंत्रेणनाममंत्रेणच स्वयमाचार्यद्वारावा अत्रायमनुष्ठानक्रमः प्रथमं यथोक्तस्नानं ततोयथोक्तकुंभस्थापनं यथोक्तसौवर्णपुरुषस्थापनं ततोऽगस्त्यपूजा नवग्रहपूजायां मानाभ ः विधानंयदगस्त्यस्यपूजनेतद्ददस्वमे इत्युपक्रमे तथाकीर्तनात् अत्र शिष्टा यामचतुष्टये पूजां रात्रौजागरणं लोपामुद्रापूजनमाचरंति ततोऽर्घ्यदानं ततोहोमः ततः फलत्यागः सौवर्णपुरुषदानसंपत्तौ धेनुदानंच हेमाद्रौ तु सकाशपुष्पाक्षतशुक्तियुक्तमित्यादिपठित्वाव्याख्यातं सकाशपुष्पाक्षतयाशुक्त्यायुक्तमर्घ्यमुत्क्षिप्यदद्यादित्यन्वयः अत्यायतवाहुदंडमित्युत्क्षेपणक्रियाविशेषणं लंबोदरंदीर्घवाहुमिति प्रतिमाविशेषणंद्विजपुंगवोऽगस्त्य इति ॥ इत्यर्घ्यदानम् ॥

ब्रह्मपुराणे कृतोपवासःसंपश्येदगस्त्यमुदितंमुनिं सर्वकामप्रदंपुण्यंसर्वसौभाग्यवर्द्धनं अर्चितव्यश्चभगवान्श्रद्धाभक्तिसमन्वितैः पूर्णकुंभैःसकूष्मांडैर्यवैर्धान्यैर्घृतेनच जातीपद्मोत्पलैः शुभ्रैश्चंदनेनसितेनच गोभिः श्वेतैस्तथावस्त्रैरत्नैः सागरसंभवैः उपानच्छत्रदंडैश्चपादुकांजनवल्कलैः भूरिणापरमान्नेनफलैः पुष्पैः सुशोभनैः अन्नप्रकारैर्भक्ष्यैश्चहोमैर्ब्राह्मणतर्पणैः आशास्यचशुभंकाममुद्दिश्यचमनोगतं यद्यहंभगवन्कामंप्राप्नुयामनसेप्सितं त्वत्प्रसादादविघ्नेनभूयस्त्वांपूजयाम्यहं इत्युक्त्वापूजयेत्पश्चाद्देवज्ञांश्चतथागुरुं ब्राह्मणान्भोजयित्वातुततोभुंजीतवाग्यतः अत्रचसंपश्येदित्यभिधानात् मेघादिछन्नेनशास्त्रासिद्धिः मत्स्यपुराणीयकल्पेतुदर्शनस्यानंगत्वात् कालमात्रस्यमेघादिसत्त्वेऽसत्त्वेपि सत्त्वेविकल्पएवशास्त्रार्थः नत्वेकएवकल्पोद्वाभ्यांवोढव्यइतिवाच्यं फलभेदात्करणभेदाच्च मत्स्यपुराणीयकल्पे अर्घ्यदानमेवप्रधानं अनेनविधिनायस्तुपुमानर्घ्यंनिवेदयेत्

इत्यादिनातस्यैवफलसंबंधबोधनात् ब्राह्मेतुपूजैवप्रधानं तत्रैवमनोगतकामलाभरूपफलश्रवणात् अर्घ्यस्यवाकथनात् एवंचमत्स्यपुराणीयेकल्पे उपवासआचारबलादेव अथचमत्स्यपुराणीयेपुमानितिश्रवणात्पुंसामेवाधिकारः ब्राह्मेतुसर्वाधिकारोविशेषाश्रवणात् इत्यगस्त्यपूजाविधिः ॥

नृसिंहपुराणेतु यदागस्त्योदयप्राप्तिस्तदासर्वसुराधिप अगस्त्यायददात्यर्घ्यंमहापुण्यविवृद्धये शंखेतोयंविनिःक्षिप्यसितपुष्पाक्षतैर्युतं मंत्रेणानेनवैदद्यात्सितपुष्पसमन्वितं काशपुष्पप्रतीकाशवह्निमारुतसंभव मित्रावरुणयोःपुत्र कुंभयोनेनमोस्तुते वातापीभक्षितोयेनइल्वलश्चमहासुरः समुद्रः शोषितोयेन सनोगस्त्यः प्रसीदतु एवंतुयोददात्यर्घ्यमगस्त्यायमहात्मने सर्वपापविनिर्मुक्तः सर्वांतरतिदुर्गतिम् ॥ भविष्योत्तरे ॥

श्रीकृष्णउवाच कांचनंकारयित्वातुयथाशक्त्यासुशोभनं पुरुषाकृतिप्रशांतंचजटामंडलधारिणं कमंडलुकरंशिष्यैर्मृगैश्चपरिवारितं मृत्यूग्रविषहंतारंदर्भाक्षस्त्रग्धरंमुनि तस्मिन्कुंभेसमालभ्यचंदनेनततोन्यसेत् स्नापितंचानुलिप्तंचंदनेनसुगंधिना पूजितंजातिकुसुमैर्हृद्यैर्धूपैश्चधूपितं ततश्चार्घ्यः प्रदातव्यो यैर्द्रव्यैस्तच्छृणुष्वमे खर्जूरैर्नारिकेलैश्चकूष्मांडैस्त्रपुसैरपि कर्कोटैः कारवेल्लैश्चकमरैर्बीजपूरकैः वृंताकैर्दाडिमैश्चैव नारंगैः कदलीफलैः दूर्वांकुरैः कुशैः काशैः पद्मैर्नीलोत्पलैस्तथा नानाप्रकारैर्भक्ष्यैश्च गोभिर्यवैः शुभैरसैः विरूढैः सप्तधान्यैश्च वंशपात्रेनिधापितैः सौवर्णरूप्यपात्रेणताम्रवंशमयेनच मूर्ध्निस्थितेनमंत्रेणजानुभ्यामवनींगतः दक्षिणाभिमुखोभूत्वाध्यात्वागस्त्यंक्षणंनृप दद्यादर्घ्यंप्रयत्नेनपयसागुरुचंदनैः अर्घ्यपात्रंशुक्त्याकारमितिसंप्रदायात् सकाशपुष्पाक्षतशुक्तौतिहेमाद्रिः काशपुष्पप्रतीकाशवह्निमारुतसंभव मित्रावरुणयोः पुत्रकुंभयोनेनमोस्तुते वातापीभक्षितोयेनसमुद्रः शोषितः पुरा लोपामुद्रापतिः श्रीमान्योसौतस्मैनमोनमः यस्योदितेनपापानिविलयंयांति

व्याधयः तस्मैनमोऽस्त्वगस्त्यायसशिष्यायचपुत्रिणे ब्राह्मणोवेदमंत्रेणदद्यादर्घ्यंनृपोत्तम वेदमंत्रस्तु अगस्त्यःखनमानेत्यादिपूर्वमुक्तः दत्त्वैवमर्घ्यंकौंतेयप्रणिपत्यविसर्जयेत् अर्चितस्त्वंयथाशक्त्यानमोऽगस्त्यमहर्षये ऐहिकामुष्मिकांदत्त्वाकार्यसिद्धिंदत्स्वमे इति विसर्जयित्वागस्त्यंतंविप्रायप्रतिपादयेत् दैवज्ञन्यासरूपाय वेदवेदांगवेदिने दानमंत्रः अगस्त्योममनस्स्थोऽस्तुयोगस्त्योऽस्मिन्घटेस्थितः अगस्त्योद्विजरूपेणप्रतिगृह्णातुसत्कृतः अगस्त्यःसप्तजन्मोत्थंनाशयत्वावयोरघं अतुलंविमलंसौख्यंप्रयच्छतुमहामुने प्रतिग्रहमंत्रः एवंयः कुरुतेभक्त्यात्वगस्त्यव्रतमादरात् फलमेकंतथाधान्यंरसंचैकंपरित्यजेत् संपूर्णेचतथावर्षेपुनरन्यमुपक्रमेत् अन्यत्फलरसधान्यादित्यागंद्वितीयवर्षादावुपक्रमेदित्यर्थः दत्त्वार्घ्यंसप्तवर्षाणिक्रमेणानेनपाण्डवपुमान्फलमवाप्नोतितदेकाग्रमनाः शृणु ब्राह्मणःस्याच्चतुर्वेदः सर्वशास्त्रविशारदः क्षत्रियःपृथिवींसर्वां प्राप्नोत्यर्णवमेखलां वैश्यानांधान्यनिष्पत्तिर्गोधनंविपुलंभवेत् शूद्राणांधनमारोग्यंसन्मानंचाधिकंभवेत् स्त्रीणांपुत्राःप्रजायंतेसौभाग्यंगृहसमृद्धिमत् विधवानांमहत्पुण्यंभर्तृलोकगतिप्रदं कन्याभर्तारमाप्नोतिव्याधेर्मुच्येतदुःखिता येषुदेशेष्वगस्त्यार्घ्यपूजेयंक्रियतेजनैः तेषुदेशेषुपर्जन्यःकामवर्षीप्रजायते ईतयःप्रशमंयांतिनश्यंतिव्याधयस्तथा विष्णुरहस्ये काशपुष्पमयींरम्यांकृत्वामूर्त्तितुवारुणेः प्रदोषेविन्यसेत्तांतुपूर्णकुंभेस्वलंकृते जलपूर्णेकुंभे कुंभस्थंपूजयेत्तंतुपुष्पधूपविलेपनैः दध्यक्षतबलिंदद्याद्रात्रौकुर्यात्प्रजागरं प्रभातेतंसमादाययायात्पुण्यजलाशयं निशावसानेतांपश्यन्जलांतेप्रतिमांमुनेः पुष्पैर्मूलैःफलैर्गंधैर्धूपैरथसुगंधिभिः द्राक्षाखर्जूरकर्कंधुनारिकेलादिभिःशुभैः पंचरत्नसमायुक्तंहेमरूप्यसमन्वितं सप्तधान्यभृतंपात्रंचंदनेनसमायुतं तत्तुताम्रमयंकृत्वादद्यादर्घ्यंद्विजातये अगस्त्यः खनमानइतिपूर्वोक्तोमंत्रः॥ अगस्त्यःखनमानेतिपठन्मंत्रमिमं

मुने यथालाभकृतार्घ्येण सम्यगभ्यर्च्यभक्तितः अर्घ्यंदद्युरगस्त्याययशूद्रेमंत्रविधिस्त्वयं काशपुष्पप्रतीकाश वह्निमारुतसंभवमित्रावरुणयोः पुत्र कुंभयोनेनमोस्तुते ॥ अथविष्णुरहस्यानुसारेणागस्त्यार्घ्यदानपद्धतिः ॥ काशपुष्पमयीमगस्त्यप्रतिमांकृत्वा जलपूर्णपंचपल्लवालंकृतप्रतिष्ठापितकुंभेतन्मंत्रेणतांविन्यस्य ॥ पुरुषाकृतिंप्रशांतंचजटामंडलधारिणं कमंडलुकरंशिष्यैर्मृगैश्चपरिवारितं मृत्यूग्रविषहंतारंदर्भाक्षस्रग्धरंमुनिमितिध्यात्वा अगस्त्यः खनमानइतिमंत्रेणतांसंपूज्य पुष्पधूपदीपनैवेद्यादिभिरर्चयित्वा पुष्पमूलफलगंधसुगंधधूपद्राक्षाखर्जूरनारिकेलादिफलपंचरत्नहेमरूप्यादिभिः सप्तधान्यैश्चंदनेनचयुक्तंताम्रपात्रंशंखंवासजलंपाणिभ्यामादायागस्त्यायार्घ्यंदद्यात् ॥ तत्रमंत्रः विंध्यवृद्धिक्षयकरमेघतोयविषापह रत्नवल्लभदेवेश लंकावासनमोस्तुते वातापिर्भक्षितोयेनसमुद्रःशोषितःपुरा लोपामुद्रापतिःश्रीमान्योसौतस्मैनमोनमः येनोदितेनपापानिप्रलयंयांतिव्याधयः तस्मैनमोस्त्वगस्त्यायसशिष्यायचपुत्रिणे लंकावासनमस्तुभ्यंमृषीणां प्रवरोत्तम उदितोद्वारिलंकाया अर्घ्योमेप्रतिगृह्यतां शंखपुष्पफलंतोयंरत्नानिविविधानिच सुरासुरमुनिश्रेष्ठअर्घ्योमेप्रतिगृह्यताम् राजपुत्रिनमस्तुभ्यमृषिपत्निनमोस्तुते गृहाणार्घ्यंमयादत्तंलोपामुद्रेशुभानने ॥ इत्यगस्त्यार्घ्यदानविधिः ॥ अथभाद्रपदपौर्णमासीकृत्यानि नारदीये प्रौष्ठपद्यांपौर्णमास्यामुमामाहेश्वरंव्रतं एकभक्तःस्वयंस्नातःशिवंसंपूज्यभक्तितः कृतांजलिःप्रार्थयेतश्वःकरिष्येव्रतंप्रभो एवंविज्ञाप्यदेवेशंगृह्णीयाद्व्रतमुत्तमं रात्रौदेवांतिकेस्नात्वाव्युत्थायापररात्रके कृतमैत्रादिनियमोभस्मरुद्राक्षभृत्ततः पूजयेच्छंकरंसम्यगुपचारैः पृथग्विधैःविल्वपत्रैःसुगंधाढ्यैर्नैवेद्यैर्धूपदीपकैः ततश्चोपवसेद्विद्वानाप्रदोषंविधूदये पुनःसंपूज्यतत्रैवरात्रौजागरणंचरेत् एवंपंचदशाब्दंतुकृत्वाव्रतमतंद्रितः वर्षेवर्षेतदुत्सर्गंविदध्याद्विधिपूर्वकं उमयाश्चमहेशस्यसौवर्णंप्रतिमा

द्वयं हैमीरौप्यामृण्मयाश्चपदाःपंचदशोत्तमाः तत्रैकस्मिन्घटेस्थाप्यंसौवर्णप्रतिमाद्वयं पंचामृतेनसंस्नाप्य जलैः
शुद्धैस्ततोर्चयेत् उपचारैःषोडशभिस्ततःपंचदशद्विजान् भोजयेच्चैवमिष्टान्नैर्दद्यात्तेभ्यश्चदक्षिणां कुंभमेकैक
मीशस्यमूर्त्याढ्यंगुरवेऽर्पयेत् एवंकृत्वाव्रतंचैतदुमामाहेश्वराभिधं जायतेभुविविख्यातोनिधानंसर्वसंपदां अथा
स्मिन्नेवदिवसेशक्रव्रतमपिस्मृतं प्रातःस्नात्वाविधानेनपूजयेत्सुरनायकं गंधाद्यैरुपचारैस्तुनैवेद्यानांचराशिभिः
ततोनिमंत्रितान्विप्रान्संभोज्याविधिवत्ततः समागतांस्तथैवान्यान्दीनानाथांश्चभोजयेत् एतच्छक्रव्रतंब्रह्मन्कर्तव्यं
प्रतिवार्षिकं राज्ञावाधनिनान्येनधान्यमिष्यातिमिच्छता।

अथात्रउमामहेश्वरंव्रतं शिवरहस्ये राजोवाच भगवन्मुनिशार्दूलव्रतमेकंवदस्वमे सांगंयस्मिन्व्रतेचीर्णेसर्वा
न्कामानवाप्नुयात् गौत्तमउवाच ॥ उमामाहेश्वरंनामव्रतमास्तिव्रतोत्तमं सांगेतस्मिन्व्रतेचीर्णेसर्वान्कामानवा
प्नुयात् मासिभाद्रपदेशुक्ले पौर्णमास्यांप्रयत्नतः तद्व्रतंकार्यमनघैर्ब्राह्मणाद्यैर्विधानतः भाद्रशुक्लेचतु
र्दश्यांप्रातःस्नात्वाविधानतः शिवंध्यात्वाजगद्वंद्यंसोमंसोमार्द्धशेखरं कृतांजलिपुटोभूत्वामंत्रमेतंपठेन्नरः
श्वःकरिष्येव्रतंयत्नादुमामाहेश्वराभिधं आज्ञांदेहिमहादेवसोमसोमार्द्धशेखर इतिविज्ञाप्यवैदेवं पुनः संपूज्य
यत्नतः मध्याह्नेपिशिवंसायंपूजयेद्विधिपूर्वकं निद्राकार्यायथायोगंमहादेवस्यसन्निधौ उत्थायपश्चिमेयामेमहा
देवंततःस्मरेत् ततःशौचादिकंसर्वंनिर्वर्त्यप्रीतमानसः स्नानंकुर्याद्यथायोगंयथाशास्त्रंयथाक्रमं परिधायततोवस्त्रंक्षा
लितंशुष्कमक्षतं उद्धूलनंततःकार्यंत्रिपुंड्रंभस्मनाततः रुद्राक्षधारणंकार्यंसंध्याकार्यातथापुनः ततःशिवार्च
नंकार्यंविल्वपत्रादिभिर्नवैः ततोहोमोपिकर्तव्यःशिवप्रीत्यर्थमादरात् ततःपरंनियमनप्रणमेत्सोममव्ययं
ग्रंथिंकुशैःप्रयुंजीतततःकार्यासमादरात् भव्यंपंचदशग्रंथिंप्रयुंजीतशिवात्मकं संपादनीयंयत्नेनव्रतनिष्ठैरनाकुलैः

उमामाहेश्वरंचैवसौवर्णंप्रतिमाद्वयं संपादनीयंयत्नेनराजतंवामनोहरं पलादूर्द्ध्वंप्रकर्तव्यंप्रतिमाद्वयमुत्तमं अधिकंचेद्यथाशक्तिकर्तव्यमितियत्नतः सौवर्णंराजतंवापिताम्रंवाकलशोत्तमं संपाद्यतंप्रयत्नेनप्रयतोव्रततत्परः ततःसदर्भंयुंजीतवस्त्रयुग्मार्चितंशुभं पृथकपृथक्स्थापनीयंकलशेप्रतिमाद्वयं आपोहिष्ठादिभिर्मंत्रैस्तथा त्रैयंवकैरपि अभिषिच्यप्रयत्नेनपूजयेत्प्रतिमाद्वयं ततःप्रयत्नतोगच्छेदलंकृतशिवालयं शिवस्थानंततःकुर्यात्तोरणाद्यैरलंकृतं ततःषोडशपत्रेब्जेवहिरंतश्चतुर्गुणे अलंकृतैः स्वस्तिकाद्यैः स्थापयेत्कलशंनवं ध्यायेत्ततोमहादेवमुमादेहार्द्धधारिणं मुक्तामालाहारनागदुकूलपरिवेष्टितं पंचाननमुमाकांतमनलेंदुरवीक्षणं चंद्रार्द्धशेखरंत्र्यक्षंजटामुकुटमंडितं त्रिपुंड्रेखाविलसद्भालभागमनामयं भस्मोद्धूलितसर्वांगंरुद्राक्षाभरणान्वितं मंदस्मितमनाधारमाधारंजगतांप्रभुम् देवैरनंतैरनिशंस्तूयमानमनेकधा देवात्मकंदेववंद्यंविष्णुव्रह्मादिवंदितम् विष्णुनीराजितारक्तपादपंकजमुत्तमं अप्रतिद्वंद्वमद्वंद्वंसर्ववृंदारकार्चितं सर्वोत्तममनाद्यंतंसर्वदेवनिषेवितं ऋतंशुद्धंपरंव्रह्मपुरुषंकृष्णपिंगलं ऊर्द्ध्वकेशंविरूपाक्षंविश्वरूपंचिदात्मकं निष्कलंनिर्गुणंशांतंनिरवद्यंनिरंजनं अप्रमेयंजगन्मध्येसृष्टिसंहारकारकं विश्ववाहुंविश्वपादंविश्वाक्षंविश्वसंभवं विश्वंनारायणाख्यमक्षरंपरमंपदं विश्वतःपरमंनित्यंविश्वस्येशमनामयं एवंध्यात्वामहादेवंसर्वदेवोत्तमोत्तमं ध्यायेत्ततःपरंगौरीमाद्याविद्यामनामयां लक्ष्मीसेवितपादाब्जांशचीसेवितपादुकां सरस्वत्यादिभिर्नित्यंस्तूयमानपदांवुजां अधरोष्ठाधरीभूतपक्वविंवफलामुमां मुखकांतिकलोपेतपूर्णचंद्रामनामयां तिरस्कृतालिमालानामलकावलिभिःसदा पीनवक्षोजानिर्द्धूतचक्रवाकवरांगनां नित्यंतिरस्कृताभोज्यनयनाभ्यामानिंदितां सीतावार्घकृताशेषकामभल्लामहार्निशं भृकुटयूर्द्धीकृताशेषकामचापमनाकुलां वाहुनालकलोद्धूतहेमनालांविलासिनीं रोमावलीतिरोभूतभ्रमद्भ्रमरजामिकां ना

व्र०र०
भाद्र०
१०९

भिरंध्रतिरोद्भूतघनावत्ताभ्रवतुलां ऊरुयुग्मतिरोभूतरंभास्तंभांशुभावहां पादयुग्मतिरोद्भूतनिर्जितारुणपंक
जां अब्जेंद्रोपेंद्रजननीं महेशार्द्धांगभागिनीं महेशाश्लिष्टवामांगां वरदाभयदां सदां प्रसन्नवदनां शांतां स्मितपूर्वा
भिभाषिणीं पूर्णचंद्रदुकूलाढ्यां जनाभरणभूषितां स्तूयमानां सदा देवैर्यक्षैर्दानैश्च कोटिशः एवंध्यात्वा ततः सम्य
गुपचारान्प्रकल्पयेत् ततः पुष्पाणि संगृह्य शिवमावाहयेच्छिवां अथावाहनं महादेवदयासिंधो विष्णुब्रह्मादिवंदि
त आवाहयामि देवत्वां प्रसीद परमेश्वर लक्ष्म्यादिदेववनितापरिसेवितपादके आवाहयामि देवि त्वां प्रसीद परमे
श्वरि इत्यावाहनं १ गृहाण सोम विश्वात्मन्नासनं रत्ननिर्मितं अनंतासन विश्वेश करुणासागर प्रभो उमे सोमधरा
श्लिष्टे सोमार्द्धकृतशेखरे नानारत्नसमाकीर्णमासनं परिगृह्यतां। इत्यासनं २ पाद्यं गृहाण गौरीश हेमपात्रस्थितं शुचि
गृहाण देवि पाद्यं त्वं वेदवेदांतसंस्तुते इति पाद्यं ३ अर्घ्यं गृहाण देवेश सपुष्पगंधसंयुतं शिवानंतगुणग्राम सर्वाभीष्टफ
लप्रद गृहाणार्घ्यं शिवे नित्ये सर्वावयवशोभने शिवप्रिये शिवाकारे नित्यं भक्तवरप्रदे इत्यर्घ्यं ४ गृहाणाचमनं शंभो शु
चिभूतं शुचिप्रिय गृहाणाचमनं देवि शुचिभूते शुचिप्रिये इत्याचमनं ५ मधुपर्कं गृहाणेश सर्वदा मधुपर्कद मधुपर्कप्र
दानेन प्रीतो भव महेश्वर मधुपर्कमिदं देवि स्वीकुरु प्रियशंकरे मधुपर्कप्रदानेन सुप्रीता भव शोभने इति मधुपर्कं ६ शं
भो पंचामृतं स्नानं स्वीकुरुष्व कृपानिधे सर्वतीर्थमयं नित्यं स्नानं शासन पावन शिवं पंचामृतं स्नानं स्वीकुरुष्व शिवप्रिये
श्रेष्ठतीर्थोत्तमे शुद्धे तीर्थराजानिषेविते इति पंचामृतस्नानं ७ शंभो शुद्धोदकस्नानं स्वीकुरुष्व सुरोत्तम प्रसीद परयाभ
क्त्या पाहि मां करुणानिधे शिवे शुद्धोदकस्नानं स्वीकुरुष्व शिवप्रिये प्रसीद देवि दीनं त्वं पाहि मां शरणागतं इति शुद्धो
दकस्नानं ८ सोत्तरीयं गृहाणेदं दुकूलं शंकरप्रिये प्रसीद पाहि मां दीनमनन्यशरणां शिवे इति वस्त्रं ९ उपवीतं गृहाणेश
शंभो सर्वामरोत्तम उपवीतं गृहाणेशि शिवसंश्लिष्टविग्रहे इति यज्ञोपवीतं १० गृहाण चंदनं दिव्यं गंधाढ्येन विराजितं

प्रसीदपार्वतीनाथशरणागतवत्सल गृहाणचंदनंदेविवालचंद्रविराजितं विश्वंविश्वात्मिकेपाहिविश्वनाथप्रियेसदा इतिगंधं ११ गृहाणाभरणानीशनिराशानियमाश्रय विश्वाभरणविश्वेश रत्नाभरणभूषित गृहाणाभरणान्यंवेसर्वाभरणभूषिते सर्वप्रियेजगद्वंद्येजगदानंददेशिवेइत्याभरणं १२ गृहाणविल्वपत्राणिसपुष्पाणिमहेश्वर सुगंधीनिनवानीशशिवत्वंकुसुमप्रिय गृहाणविल्वपुष्पाणिसामोदानिशिवप्रिये सुगंधविल्वमंदारमालिकासमलंकृते इति पुष्पविल्वपत्राणि १३ दशांगंगुग्गुलंधूपंनानागंधमनोहरं गृहाणभक्तवरदेलक्ष्मीदेव्याधिवंदितेइतिधूपम् १४कार्पासवर्त्तिसंयुक्तंगोघृतेनप्रदीपितं गृहाणात्यंतसूर्याग्निचंद्रप्रभनमोस्तुते आज्यंत्रिवर्तिविस्फूर्त्तिदीपमीशानवल्लभे गृहाणचंद्रसूर्याग्निमंडलाधिकसुप्रभे इतिदीपम् १५ शंभोगोघृतसंयुक्तंपरमान्नंमनोहरंसशर्करंगृहाणांबेपरमानंददायिनि इतिनैवेद्यम् १६ शंभोगृहाणगंधाढ्यमिदमाचमनीयकं शुद्धेशुद्धिप्रदेदेविशिवभूषितविग्रहे इत्याचमनीयं १७ शंभोगृहाणतांबूलमेलाकर्पूरसंयुतं प्रसीदभगवन्शंभो सर्वज्ञामितविक्रम शिवेगृहाणतांबूलं क्रमुकादिफलान्वितं प्रसीदसुस्मितेदेविसोमलिंगार्द्धविग्रहे इतितांबूलं १८ गृहाणपरमेशानसरत्नेछत्रचामरे दर्पणंव्यजनंत्वीशसर्वदुः खविनाशन गृहाणेमेसुराराध्येसरत्नेछत्रचामरे दर्पणंव्यजनंचाद्येविद्याधारेनमोस्तुते इतिछत्रचामरादि १९ प्रदक्षिणनमस्कारान्गृहाणपरमेश्वर नर्तनंचमहादेविशिवमाद्यप्रियेशिवे इतिप्रदक्षिणनमस्काराः २० एवंप्रयत्नतःकार्यंशिवयोःपूजनंशिवं शिवानीचप्रयत्नेनपूर्वोक्तमपिपूजनं उक्तमंत्रंसमुच्चार्ययथापूर्वंयथाक्रमं शिवायनमःशिवंपूजयामि आवाहंतीतिमंत्रस्तुभवान्याःपरिकीर्त्तितः कपर्दिनेनमःकपर्दंपूजयामि भाललोचनायनमः भालंपूजयामि सोमसूर्य्याग्निलोचनायनमः नेत्राणिपूजयामि सुश्रोत्रायनमः श्रोत्राणिपूजयामि घ्राणगंधायनमः घ्राणानिपूजयामि स्मृतिदंतायनमः दंतान्पूजयामि श्रुतिजिव्हायनमः जिव्हापूजयामि कंठक

पोलायनमः कपोलानिपूजयामि ज्ञानोष्ठायनमःओष्ठान्पूजयामि नीलकंठायनमः कंठान्पूजयामि भूरिववक्षसेनमः वक्षांसिपूजयामि हिरण्यवाहवेनमः वाहून्पूजयामि विश्वोदरायनमः जठरंपूजयामि विश्वनखायनमः नखान्पूजयामि सर्वात्मकायनमः सर्वांगंपूजयामिनमः ॥ अथगौर्य्याः ॥ शिवायैनमः शिरःपूजयामि पृथुवेण्यैनमः वेणींपूजयामि सीमंतराजितायैनमः सीमंतंपूजयामि कुंकुमभालायैनमः भालंपूजयामि सोमसूर्याग्निलोचनायैनमः लोचनानिपूजयामि श्रुतिश्रोत्रायैनमः श्रोत्राणिपूजयामि गंधप्रियायैनमः घ्राणंपूजयामि सुभगकपोलायैनमः कपोलौपूजयामि कोमलदंतायैनमः दंतान्पूजयामि विद्याजिव्हायैनमः जिव्हांजयामि विंबोष्ठायैनमः ओष्ठौपूजयामि घृतकंठायैनमः कंठंपूजयामि पृथुलकुचायैनमः कुचौपूजयामि विश्वगर्भायैनमः उदरंपूजयामि शुभकट्यैनमः कटिंपूजयामि दिव्योरुदेशायैनमः ऊरूपूजयामि वृत्तजंघायैनमः जंघायुगंपूजयामि लक्ष्मीसेवितपादायैनमः पादौपूजयामि महेश्वरप्रियायैनमः नखान्पूजयामि शोभनविग्रहायैनमः सर्वांगंपूजयामि अंगपूजांसमाप्येवंडोरकंतुविसर्जयेत् प्रत्येकंग्रंथिषुस्वच्छैःस्वच्छैर्विल्वदलादिभिः प्रथमग्रंथिमारभ्य नमःसोमेतिमंत्रतः यथाक्रमेणसंपूज्यततोधार्य्यंतुडोरकं तत्रोपचाराः सर्वेपि तेनमंत्रेणसादरं व्रतिभिर्यत्नतःकार्य्यंकुंकुमाक्तंतुडोरकं ततःपंचदशप्रस्थगोधूमास्तंडुलाश्चवाउपायनार्थमानेयाः शुद्धाःकीटाद्यदूषिताः यद्वापंचदशाज्याक्तागोधूमाधूपमंडकाः ततःशिवैकशरणाःशैवाःशिवव्रतप्रियाःपूजनीयाः प्रयत्नेनगंधपुष्पादिभिः क्रमात् ततःसवस्त्रंकलशंशिवयोःप्रतिमाद्वयं शैवायदेयंयत्नेनसुवर्णपलसंयुतं आदावुपायनंदत्वादेवमेतदतःपरं उपायनस्यमंत्रोपिवक्ष्यतेत्रविशेषतः उमेशःप्रतिगृह्णातिउमेशोवैददातिच उमेशस्तारकोभाभ्यामुमेशायनमोनमः अमुंमंत्रंसमुच्चार्य्यदत्वोपायनमेवच तथाशैवाःप्रयत्नेन भोजनीया

विशेषतः सुवासिन्योपियत्नेनभोजनीयाःशिवप्रियाः शैवानेवंभोजयित्वास्वयंभुंजीतवाग्यतः अतिथीनपिसंतर्प्यद्वारदेशस्थितान्नृप एवंप्रयत्नतःकार्य्यंप्रतिवत्सरमादरात् नियमेनैवविधिवदुक्तरीत्यायथाक्रमं ब्राह्मणाद्यैरिदंकार्य्यंव्रतंसंयतमानसैः सर्वाभीष्टप्रदंपुण्यंव्रतमेतच्छिवात्मकं प्राप्तेतुषोडशेवर्षेकार्य्यमुद्यापनंनृप उद्यापनविधानंचवक्ष्येशृणुयथाक्रमं पौर्णमास्यांभाद्रपद्यांव्रतोद्यापनमादरात् कर्तव्यमितियत्नेनद्रव्यंसंपाद्यसादरं हैमीकार्य्यासार्द्धषष्टी प्रतिमाचपलोन्मिता तदर्धेनाथवाकार्य्यातदर्धार्धेनवान्नृप रजतेनाथवाकार्य्या यथोक्तपलमानतः संपादनीयाःकुंभाश्च हैमाः पंचदशोत्तमाः अथवाराजताःकार्य्या यद्वाताम्रमयान्नृप भाद्रशुक्लचतुर्दश्यांशैवाब्राह्मणपुंगवाः निमंत्रणीयायत्नेन प्रातःसप्तदशोत्तमाः ततोगृहंवितानाद्यैरलंकृत्यप्रयत्नतः स्वस्तिकाद्यैरलंकुर्य्यात्तुशिवस्थानमघापहं ततःसाहंप्रयत्नेनतस्मिन्शंकरमंदिरे पूजनीयाःप्रयत्नेनशिवयोः प्रतिमाःशुभाः पूर्वोक्तेनविधानेनमंत्रैस्तैरेवसाधनैः रात्रौजागरणंकार्य्यंसोपवासंप्रयत्नतः ऋत्विग्भिः सह सोत्साहंपयोमात्राशनेनवा रात्रौशिवकथाःश्राव्याःश्रोतव्यायत्नतोनृप कर्त्तव्यायत्नतोरात्रौपूजायामचतुष्टये ततःस्थेयंप्रयत्नेनस्नात्वाशंकरसन्निधौ पूजनीयाःप्रयत्नेनशिवोदेवःशिवापतिः चतुरस्रंततःकार्य्यंकुडमष्टदलान्वितं कंठदघ्नंप्रांतदेशेहस्तद्वयसमन्वितं तत्रवह्निंप्रतिष्ठाप्यविधिवद्गृह्यमार्गतः पंचविंशतिसाहस्रंहोमःसोमेतिमंत्रतः ततःप्रयत्नतोराजन्नूनमःपूर्वंसतारकं ततःपूर्णाहुतिंहुत्वाशैवान्संपूजयेत्ततः विल्वपत्रभस्मनाचपूजनीयायथाक्रमं एकैकस्मैप्रदातव्यंशिवयोःप्रतिमाद्वयं कलशोपिप्रदातव्यस्ततोवस्त्रद्वयान्वितः आचार्य्यायप्रदातव्यंसुवर्णशतमादरात् ततोयत्नेनशैवेंद्राभोजनीयाधृतव्रतैः सुवासिन्योपिशैवानांभोजनीयाःप्रयत्नतः ततोदेयास्वशक्त्याचभोजितेभ्यश्चदक्षिणा ततश्चस्वकृतंकर्मशिवायविनिवेदयेत् उद्या

पर्नंकृतंशंभोमयैतदधुनाप्रभो इदंसंपूर्णतामेतुत्वत्प्रसान्महेश्वर मंत्रहीनंभक्तिहीनंशक्तिहीनमुमापते विधिहीनंकृतंकर्मत्वत्प्रसादात्फलप्रद प्रायश्चित्तंवैदिकानांव्यंगानामपिकर्मणां शिवस्मरणमेवेतिश्रुतिरप्यस्तिशांकरी अतःकृतमिदंश्रौतंकर्मव्यंगमपिप्रभो सांगंभवतुविश्वेशतवैवस्मरणात्प्रभो इतिसंप्रार्थ्यदेवेशंसांबंसर्वसुरोत्तमं भुंजीयाद्बंधुभिःसार्द्धंसमौनंतिलवर्जितं एवंयःकुरुतेसम्यगुमामाहेश्वरंव्रतं ससर्वभोगान्भुक्त्वातेमोक्षंप्राप्नोति सर्वथा ॥ राजोवाच गौतमैतद्व्रतंचीर्णंपुराकेनवदस्वमेकस्यकाममभूत्सिद्धिर्व्रतस्यास्यप्रभावतः ॥ गौतमोवाच पुराशैववरोराजन्दुर्वासाख्योमुनीश्वरः कदाचित्संचरल्लोकान्ददर्शकमलापतिं ततःसमागतंदृष्ट्वादुर्वासामुनिरंजतः बिल्वमालांददौतस्मैशंकरेणसमर्पितां गृहीत्वाबिल्वमालांतांहरिर्गमनसंभ्रमात् शिरसापूजनीयांतांगरुडांशेविनिःक्षिपत् तदस्तांतादृशींवीक्ष्यदुर्वासाःक्रोधमूर्छितः हरिंशशापबहुधाधिग्धिग्जन्मेतिसंवदन् मयाशिवार्पितामालादत्तातुभ्यमघापहा साकथंगरुडस्कंधेविनिःक्षिप्तातुयाहरे गर्वस्यमूलभूतेयंतवलक्ष्मीर्विनश्यति लक्ष्मीःपततुदुग्धाब्धौगरुडोपिविनश्यतु वैकुंठस्याधिकारोपितवयातुमदाज्ञया निस्तेजस्कोवमेःपृष्ठेसंचरायावधिध्रुवं इत्युक्त्वासतुदुर्वासाययौलोकांतरंनृप ततःपपातदुग्धाब्धौलक्ष्मीर्विष्णोर्मनोहरा ततोतिदुःखितोविष्णुः प्रलपन्वनमास्थितः उवासविपिनेघोरेस्वकृतंकर्मसंस्मरन् ततःकदाचिद्भूपालमयातत्रगतंपुरा तदामामागतंदृष्ट्वापूजयामाससमांहरिः ततोश्रुपूर्णनयनःकृतांजलिपुटोहरिः जगादपूर्ववृत्तांतंस्वलक्ष्मीनाशकारणं ततोतिक्रांतचित्तायविष्णवेव्रतमुत्तमं तत्पृष्टेनमयाभूपकथितंसादरंमया ततोविलंबंविधिवच्चकारश्रद्धयान्वितं ततःप्रसन्नोभगवान्हरयेपार्वतीपतिः ददौलक्ष्मींसगरुडांकरुणानिधिरव्ययः इदमेवव्रतंचीर्णमिंद्रेणाप्यमितौजसा तेनप्राप्तस्ततःस्वर्गःस्वर्गभोगाश्चशाश्वताः ब्रह्मणापिव्रतंचीर्णमिदमेवपुरानृप

नष्टावागीश्वरीतेनसंप्राप्तादुर्ल्लभापिसा मुनिभिश्चपुराचीर्णंव्रतमेतन्मुमुक्षुभिः अस्यव्रतस्याचरणान्मुक्तिःप्राप्तामुनीश्वरैः इदंव्रतंप्रयत्नेनयःकरिष्यतिभक्तितः तस्यसौभाग्यसंपत्तिर्भविष्यत्येवसर्वथा यस्यास्त्यैश्वर्य्यभोगेच्छामोक्षेच्छाप्यत्रपार्थिनीयस्यसर्वाधिपत्येच्छातेनकार्य्यमिदंव्रतं वैधुतेनापिविप्रेणमोक्षार्थमतियत्नतः कृतमेतद्व्रतंपूर्वंसर्वाभीष्टप्रदायकं शारदोनामविप्रोभूद्वेदवेदांगपारगः मोक्षार्थमतियत्नेनतेनचीर्णमिदंव्रतं मुक्तिःप्राप्ताचतेनापिव्रतस्यास्यप्रभावतः यंयंकामंसमुद्दिश्यव्रतमेतदनुत्तमंयःकरिष्यतिसःकामंतंतमाप्नोतिनिश्चितं इदंव्रतंमहेशेनसमाख्यातमुमांप्रति कुमारायसमाख्यातमुमयैतद्व्रतंनृप नंदिकेशायकथितंकुमारेणव्रतंततः नंदिकेशेनकथितंदुर्वाससमुनये ततःदुर्वाससापिकथितमगस्त्यायव्रतोत्तमं व्रतंतत्सागरेमह्यमगस्त्येनमहात्मना मयातिखिन्नचित्तायविष्णवेकथितंपुरा तेनचीर्णंव्रतमिदंसर्वसौभाग्यदायकं ब्रह्मणेकथितंपूर्वमिदमेवव्रतंमया तेनचीर्णंव्रतंसांगवाणीप्राप्त्यर्थमादरात् सूर्य्यायेंद्रायचंद्रायमयैतत्कथितंव्रतं तैस्तुचीर्णंव्रतमिदंसर्वसौभाग्यदायकं कश्यपादिमुनिभ्यश्चकथितंव्रतमुत्तमं तैश्चचीर्णंव्रतंसम्यक्भुक्तिमुक्तिफलप्रदं भूपव्रतानिसंत्येववहूनिविविधानिच तथाप्येतद्व्रतसमंव्रतंनास्त्येवसर्वथा भवानपिकुरुप्रीत्याभूपालव्रतमुत्तमं इदंव्रतंशिवक्षेत्रेयःकरिष्यतिभक्तितः तस्यसर्वार्थसंसिद्धिर्भविष्यतिनसंशयः ॥ ईश्वरउवाच ॥ इत्येतद्वचनंश्रुत्वासराजाप्रीतमानसः सपुत्रःपूजयामासगौतमंशैवपुंगवं ततोधर्मव्रतंचेदमुपदिश्यसगौतमः पुनःसंपूजितोराज्ञास्वाश्रमंप्रतिसंययौ राजासपुत्रस्तद्वाक्यादिदंमाहेश्वराभिधं व्रतंचकारविधिनायथाक्रममतंद्रितः येमामनन्यहृदयाःसकलामरेशंसंपूजयंतिसततंधृतभस्मपूताःतेमामुपेत्यविगताखिलदुःखवंधामद्रूपमेत्यसुखिनोनिवसंतिनित्यम्

इतिशिवरहस्येशिवप्रोक्तभाद्रपदपौर्णमास्यामुमामाहेश्वरंव्रतंसोद्यापनम् ॥

अत्रैवलोकपालानांपूजाव्रतं तदुक्तं निर्णयामृतेब्रह्मपुराणे पूर्वाभाद्रपदायोगेपौर्णमास्यांपितामहः शक्रा
ग्नियमरक्षोंभोवायुवित्तेशशंकरान् लोकपालांस्तुरक्षार्थंत्रैलोकस्याभिषेचयत् पृथिव्याधारणार्थायतथानंतं
चभोगिनं तस्मात्तत्रलिखेत्पद्ममष्टपत्रंसकर्णिकं कर्णिकायांलिखेत्तत्रसानंतंकमलोद्भवं प्राच्यादिषुचपत्रेषु
वाह्येवाद्यांश्चसायुधान् ततःक्रमेणतेनैवसंस्थाप्यकलशान्शुभान् पश्चात्संपूजनीयाश्चभक्त्याब्रह्मादयःसु
राइति अथभाद्रशुक्लचतुर्दश्यां हेमाद्रौभविष्योक्तेकदलीव्रतं पुण्येमासिप्रकुर्वीतपूर्णिमायांशुभेदिने
इत्युक्तयापौर्णिमायाकार्य्यं उमामाहेश्वरपूजायाकथायामभिधानाच्च यत्प्रसिद्धंसमाख्यातंकदलीव्रतमुत्तमं त
त्तेहंसंप्रवक्ष्यामिलोकानुग्रहकारकं नाकपृष्ठैःपुरादेवैर्यक्षगंधर्वकिन्नरैः अप्सरामरकन्याभिर्नागकन्याभिरर्चिता
संसारासारतांज्ञात्वाकदलीनंदनस्थिता शुक्लपक्षेचतुर्दश्यांमासिभाद्रपदेनृप देयमर्घ्यंवरस्त्रीभिःफलैर्नानाविधै
स्तथा विरूढैःसप्तधान्यैश्चदीपालीरक्तचंदनैः दधिदूर्वाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः जातीफलैः पूगफलैः पूज
येद्गतमत्सरः तस्मिन्नहनिदातव्यंस्त्रीभिरन्याभिरेवच मंत्रेणानेनचैवार्घ्यंतंशृणुष्वनराधिप चिंतयेत्कदलींनि
त्यं कंदलैः कामदीपितैःशरीरारोग्यलावण्यंदेहिदेविनमोस्तुते एवंयः पूजयेद्रंभांपुरुषोभक्तिमान्नृप नारीवान
ग्निषक्काशीत्रीन्मासांश्चतुरोपिवातस्मिन्कालेनहिभवेत्काचिन्नारीकुलाटिनीदुर्गतादुर्भगाव्यंगास्वैरिणीपापचारि
णी भवेत्सौभाग्यसौख्याढ्यापुत्रपौत्रश्रियायुता आयुष्मतीजीववत्साजीवेद्वर्षशतंभुवि इतिहेमाद्रौभविष्येकद
लीव्रतम् ॥

अत्रगुर्जराचारप्राप्तं कार्तिक्यांमाघ्यांवैशाख्यांचकदली व्रतं तत्र कदली व्रते पूजनं आगच्छकदलीदे
विसौभाग्यफलदायनी रूपंदेहियशोदेहि जयंदेहिसुनिश्चितं आगच्छागच्छवरदे शंकरेणमहेश्वरि

करिष्यमाणांपूजांमेगृहाणानुग्रहंकुरु ॥ आवाहनम् १ कार्तस्वरमयंदिव्यंनानामणिगणान्वितं अधितिष्ठमहादे
विशिवेनसहपार्वति ॥ आसनम् ॥ २ ॥ दूर्वाक्षतादिभिर्युक्तंस्वर्णपात्रेस्थितंशुभं पाद्यार्थंकल्पितंभक्त्यागृहाणपर
मेश्वरि ॥ पाद्यम् ॥ ३ ॥ अर्घ्यपात्रस्थितंतोयंफलपुष्पसमन्वितं अर्घ्यंगृहाणदेवित्वंभक्त्यादत्तंशिवप्रिये ॥
अर्घ्यम् ॥४॥ कर्पूरोशीरसुरभिशीतलंविमलंजलं गंगायास्तुसमानीतंगृहाणाचमनीयकं ॥ आचमनम् ॥५॥गंगा
दिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतंस्नानार्थंतेमयातोयंगृहाणपरमेश्वरि॥स्नानम् ॥६॥यथारंभेविवृद्धिस्तेशाखादीनां
सदाभवेत् तथावर्द्धयमांदेविसेचनात्पार्वतिप्रिये ॥ इतिसेचनमंत्रः ॥ ७ ॥ वस्त्रंशुभ्रमिदंशुभ्रंकुंकुमारक्तशोभनं
गृहाणाच्छादनंदेवितथावर्द्धयमांसदा ॥ वस्त्रम् ॥ ८ ॥ आचमनीयं पूर्वोक्तमंत्रेण ॥ श्रीखंडंचंदनंदिव्यंघनसारंम
नोहरं विलेपनंगृहाणेदंरुद्राणिप्रियवल्लभे ॥ चंदनम् ॥९॥ मालतीचंपकादीनिशतपत्राधिकानिच सुगंधीनि
गृहाणत्वंपूजार्थंसुमनांसिनः॥पुष्पाणि ॥ १० ॥ अगुरुंगुग्गुलंधूपंदशांगंसुमनोहरं गृहाणदेविवरदेघ्राणतृप्ति
करंपरम् ॥ धूपम् ॥११॥ चक्षुदंसर्वलोकानांतिमिरस्यानिवारणं आर्तिक्यंकल्पितंभक्त्यागृहाणपरमेश्वरि दीपं ॥
१२ ॥ नानापक्वान्नसंयुक्तं रसैःषड्भिःसमन्वितं तेनैवेद्यंविधिभक्त्याकल्पितंत्वंगृहाणमे ॥ नैवेद्यम् ॥ १३ ॥ क
र्पूरैलालवंगादिनागवल्लीदलान्वितं पूगीफलसमायुक्तंतांबूलंप्रतिगृह्यताम् ॥ तांबूलम् १४ इदंफलंमयादेविस्था
पितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥फलम् ॥१ ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनं
तपुण्यफलदमतः शांतिंप्रयच्छमे ॥ हिरण्यम् ॥ १६ ॥ त्वमिंद्राणीप्रियानित्यंपार्वत्याश्चातिवल्लभा सतीनांका
मदापूज्याकामान्मेपरिपूरय ॥ नीराजनम् ॥ १७॥ आश्रयोदेवपत्नीनांपूजितात्वंश्रियास्वयं सौभाग्यारोग्यमा
युष्यंदेहिरंभेनमोस्तुते ॥ १८ ॥ प्रार्थना ॥ कदल्यैकमलायिन्यैमेधायैतेनमोनमः रंभायैभूतिसारायैसर्वसौख्य

व्र०र०
भाद्र०
११३

प्रदेनमः ॥ नमस्कारः ॥ १९ ॥ यथायथातेप्रसवोवर्द्धतेकदलेध्रुवंतथामनोरथानांमेप्रभावोवर्द्धतांस्वयम् ॥ इति कदलीदानमंत्रः ॥ २० ॥ ॥ अथकथा युधिष्ठिरउवाच कृष्णकृष्णमहावाहोसर्वविद्याविशारद अनाथनाथविश्वात्मन्दीनदैन्यनिकृंतन त्वमस्माकंपुरोवंधु स्त्वमस्माकंपरःसखा त्वयाभिरक्षितानित्यं विचरामोत्रनिर्भयाः किंचित्पृच्छामिदेवेशवदस्वकृपयाविभो यद्गुह्यंसर्वधर्मेषुकृतेयास्मिन्महत्फलं सौभाग्यारोग्यदंपुण्यंधनधान्यविवृद्धिदं अन्नाच्छादनपुत्रादिवर्द्धनंश्रीनिकेतनं तन्ममाचक्ष्वभगवन्लोकानामुपकारक ॥ श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतं यत्कृत्वासर्वदुःखेभ्योनारीमुच्येतसंकटात् वस्त्रान्नपानविच्छित्तिर्नभवेत्तुकदाचन पुरामामेत्यकौंतेयरुक्मिणीप्राणवल्लभा प्रणिपत्याभवेद्दीनासर्वकामाप्तयेशुभा सौभाग्यंमेकथंदेवभवेज्जन्मनिजन्मनि सपत्नीनांश्रियंवीक्ष्यस्पृहामेजायतेप्रभो इतिप्रियायावचनंश्रुत्वाहंतांसमब्रुवं रंभाव्रतंकुरुष्वाशुसौभाग्यप्राप्तयेशुभं कृतेयस्मिन्व्रतेदेविपरंसौभाग्यमाप्स्यसि इतिश्रुत्वावचोदेवीरुक्मिणीमामभाषत रंभाव्रतंभवेत्कीदृक् कोविधिःकिंचपूजनं केनचादौपुराचीर्णमर्त्येकेनप्रकाशितं रुक्मिणीभाषितं श्रुत्वापुनरेवाहमब्रुवं रंभाव्रतमिदंवक्ष्येशृणुदेवियथोदितं गोचर्ममात्रंसंलिप्यसर्वतोभद्रमंडलं लिखेत्तत्रतथावर्णैर्नीलपीतसितासितैः ब्रह्माद्यादेवतास्तत्रस्थापयित्वाप्रपूजयेत् अथवास्वास्तिकंकुर्य्यात्पद्ममष्टदलंतुवैततः साग्रांसपर्णांहिसस्मितांवसुशोभनां समूलांकदलींस्थाप्यपूजयेत्तांयथाविधिउत्तमांतांसमानीयसेचयेत्तांसमाहिता यथारंभेविवृद्धिस्तेशाखादीनांसदाभवेत्तथावर्द्धयमांदेविसेचनात्पार्वतीप्रियेयथायथातेप्रसवोवर्द्धतेकदलीनवःतथामनोरथानांमेप्रसवोभवतुस्वयं एवंसंपूज्यविधिवद्भक्तियुक्तेनचेतसारात्रौजागरणंकुर्य्याद्गीतवादित्रनिःस्वनैःएवंयाकुरुतेनारी व्रतानामुत्तमंव्रतं भुक्त्वातुविविधान्भोगान्सौभाग्यंविंदतेध्रुव एवमेतत्प्रकर्त्तव्यंकदलीव्रतमुत्तमं तस्मात्कुरु

विधानेनयथोक्तंफलमाप्स्यसि इतिश्रुत्वाविधानेनसाचकारव्रतोत्तमं अवापसकलंकामं मनसायदभीप्सितं अन्यच्चशृणुराजेंद्रयदाश्चर्यकरंनृणांद्यूतेपराजितायूयंकृष्णानीतासमाप्रति दुःशासनेनदुष्टेनद्रौपदीमुक्तमूर्द्धजा आकृष्यमाणेवस्त्रेतुचित्तेमाममस्मरत्तदा तूर्णंतत्रगतोराजन्द्रौपद्यास्त्राणनायवै अदृश्यमाणःकृष्णायैव्रतंसमुपातिष्ठवान् तदाकर्तुमशक्येतुव्रतेस्मिन्राजसत्तम रुक्मिण्याचरितंपूर्वंयदेतद्व्रतमुत्तमं तस्यपुण्यफलंदत्तंकृष्णायै राजसत्तम तत्कालमेववस्त्राणांसमृद्धिरभवत्पुरा दुःशासनेनदुष्टेनआक्षिप्तेष्वंशुकेषुच प्रादुर्भूतानिवस्त्राणि नानावर्णानिभारत खिन्नोदुःशासनःपापो विररामांशुकग्रहात् तावद्बभूवुर्वस्त्राणिकदलीगर्भवन्नृप इत्थंव्रतप्रभावोयंगुह्योपिकथितोमया कारयस्वविधानेनपूर्णकामोभविष्यसि ॥ अथोद्यापनम्

॥ युधिष्ठिरउवाच ॥ कस्मिन्मासेतिथौकस्मिन्नाचरेद्व्रतमुत्तमं कथंभावेनकिंकार्यंतन्ममाचक्ष्वकेशव

॥ श्रीकृष्णउवाच ॥ कार्तिकेमाघमासेवावैशाखेत्वितरेतुवा पुण्यमासिप्रकुर्वीतपौर्णमास्यांसमेदिने तिथिक्षयंवर्जयेतशुभायांसुसमाहितः यस्मिन्देशेनलभ्येतकदलीराजसत्तम सुवर्णेनशुभांतत्रकृत्वापूजांसमाचरेत् यदिलभ्येतुकदलीमारोप्यादौप्रपूजयेत् यावन्नस्यात्फलंतावत्सिंचेन्नीरेणभूपते फलोद्भूतक्रमेतस्याः पश्चाद्विप्रान्समाह्वयेत् प्रभातेविमलेस्नात्वानद्यादौविमलेजले अहतेवाससीगृह्यकृत्वासंध्यादिकर्मच अरत्निमात्रंकृत्वातुस्थंडिलंवाग्यतःशुचिः अग्निंसंस्थाप्यविधिवत्तत्रहोमंसमाचरेत् शतमष्टोत्तरंविद्वान्तिलाज्याहुतिभिस्तथा एकाग्रचित्तःसंहृष्टः कृतीऽव्याहृतीभिः पृथक् ब्रह्मादिभ्योदेवताभ्योनाममंत्रैःपृथक्पृथक् आचार्यंचसपत्नीकं वस्त्राद्यैःपूजयेत्ततः धेनुंपयस्विनींदद्यात्सवत्सांरत्नभूषितां स्वर्णशृंगींरौप्यखुरांकांस्यदोहनिकायुतां ताम्रपृष्ठींरत्नपुच्छांवस्त्रघंटाविभूषितां अभ्यर्च्यवेदविदुषेआचार्यायनिवेदयेत् पादुकोपानहौछत्रम

लंकाराननेकशः यथाशक्तिप्रदेयानि व्रतस्यपरिपूर्त्तये चतुर्विंशद्द्वाडवानांयुग्मान्याहूयसंयतः वस्त्रालंकारगंधाद्यैः पूजयित्वातुभोजयेत् वायनानितुदेयानिवंशपात्रैस्तुशक्तितः दद्याच्चदक्षिणांसम्यग्यथाविभवसारतः अन्येभ्योपियथाशक्तिदद्यादन्नसुसंस्कृतं क्षमापयित्वातान्देवीव्रतस्यपरिपूर्त्तये वाचयित्वायथान्यायमाच्छिद्रंच क्षमापयेत् दीनानाथान्प्रतर्प्याशुस्वयंभुंजीतवाग्यतः एवंयःकुरुतेदेविकदलीव्रतमुत्तमं भुक्त्वातुविविधान्भोगान्सौभाग्यंविंदतेपरं तस्मात्कुरुविधानेनयथोक्तंफलमाप्स्यसि एवंनारीनरोवापियःकुर्यात्कदलीव्रतं सर्वान्कामानवाप्नोतिस्वर्गलोकेमहीयते इतिभविष्योत्तरोक्तंकदलीव्रतं एतच्चपौर्णमास्यांविहितमपिहेमाद्रिमतेन चतुर्दश्यांकार्य्यम्

इतिभाद्रशुक्लचतुर्दश्यांकदलीव्रतंभविष्योत्तरोक्तमिदम्

अस्यांभाद्रपौर्णमास्यांसुवासिन्योनार्य्योभर्तुरायुरभिवृद्धयेसावित्रीव्रतंकुर्वंति वीरमित्रोदयेभविष्ये ॥ युधिष्ठिर उवाच स्मरामिचहृषीकेशयच्चोक्तंभवतामम तत्सावित्रीव्रतंब्रूहिप्रसादसुमुखोभव ॥ श्रीकृष्णउवाच कथयामि कुलस्त्रीणांमहिम्नोवर्द्धनंपरं यथाचीर्णंतुसावित्र्याव्रतंवैराजकन्यया आसीन्मद्रेषुधर्मात्मासर्वभूतहितेरतः पार्थिवोश्वपतिर्नामपौरजानपदप्रियः सर्वेश्वरोनपत्यश्चसत्यवाक्संयतेंद्रियः समभार्य्योव्रतमिदंचकारापत्यकाम्यया सावित्रीतिप्रसिद्धंयत्सर्वकामप्रदायकं तस्यतुष्टातुसादेवीसावित्रीब्रह्मणःप्रिया उवाचदुहिताह्येकातवराजन्भविष्यति तस्याःप्रसादातुष्टामितवसर्वंभविष्यति मन्नाम्नासाचकर्त्तव्यामहाकीर्तिमतीतुसा भविष्यतिमहाराजनशोकंकर्त्तुमर्हसि एवमुक्त्वातुसावित्रीजगामादर्शनंतदा कालेनगच्छताजातादुहितादेवरूपिणी सावित्र्याप्रीतयादत्तासावित्र्याजप्तयातथा आदिष्टाचैवसावित्र्यासावित्रीसदृशीयतः सावित्रीत्येवनामास्याश्चक्रुर्विप्रास्तथापिता साश्रीव

द्विग्रहवतीऽव्यवर्द्धतपितुर्गृहे कालेवहुतिथेजाते यौवनस्थावभूवसा तांसुमध्यांतुसुश्रोणींप्रतिमांकांचनीमिव प्राप्तेयंदेवकन्येतिदृष्ट्वातांमेनिरेजनाः सातुपद्मपलाशाक्षीप्रज्वलंतीवतेजसा चचारचापिसावित्रीव्रतंयद्भृगुणोदितं अथोपोष्यशिरः स्नात्वा सम्यकसंपूज्यदेवताः हुत्वाग्निंविधिवद्विप्रान्वाचयित्वेंदुपर्वाणि तेभ्यःसुमनसःसिद्धाः प्रतिगृह्यनृपात्मजा सखीपरिवृताभ्येत्य देवीश्रीरिवरूपिणी साभिवाद्यपितुः पादौविनीताचारुहासिनी कृतांजलिर्वरारोहा नृप[illegible]ः पार्श्वतः स्थिता तांदृष्ट्वायौवनप्राप्तांस्वांसुतांदेवरूपिणी उवाचराजापत्यर्थंसमन्त्र्यसहमंत्रिभिः पुत्रिप्रदानकालोयंनचकश्चिद्वृणोतिमां विचारयन्नपश्यामिवरंतुल्यमिहात्मनः तथापिदेयासिमयादोषः स्यादन्यथामम पठ्यमानंमयापुत्रिधर्मशास्त्रेषुसंश्रुतं पितुर्गेहेतुयाकन्या रजःपश्यत्यसंस्कृता ब्रह्महत्यापितुस्तस्यसाकन्यावृषलीस्मृता अतोर्थंप्रेषयामित्वांकुरुपुत्रिस्वयंवरं वृद्धैरमात्यैःसहिता शीघ्रंगच्छस्वमाचिरं वेदादीनांयथावाच्योनभवेयंतथाकुरु एवमस्त्वितिसावित्रीप्रोक्ताशीघ्रंविनिर्ययौ स्यंदनेनमहार्हेणमंत्रिभिः परिवारिता तपोवनानिरम्याणिराजर्षीणांजगामसा मान्यानांतत्रवृद्धानांकृत्वापादाभिवंदनं ततोवभ्रामतीर्थानिपर्वतानांवनानिच देशांश्चविविधान्रम्यानाश्रमान्सुमनोहरान् एकस्मिन्साश्रमपदेकृतकृत्यावभूवह वरयित्वावरंसातुआजगामस्वमालयं सावित्रीमंत्रिसहितापरितुष्टेनचेतसा तत्रापश्यतदेवर्षिंनारदंपितुरंतिके आसीनमासनेविप्रंप्रणम्यास्मितभाषिणी कथयामासतत्सर्वंप्रेम्णारण्यंगतासती ॥ सावित्र्युवाच आसीच्छालेषुधर्मात्मा क्षत्रियः पृथिवीपतिः द्युमत्सेनइतिख्यातोदैवादंधोवभूवसः तस्यचाप्यभवद्भार्यारुक्मिणीरूपशालिनी तस्यप्रतिहतंराज्यंवैरिभिर्दैवयोगतः सावालापत्ययासार्द्धंभार्ययाप्रास्थितोवनं सचास्यवनसंवृद्धः पुत्रःपरमधार्मिकः सत्यवान्नामरूपाढ्योभर्तेतिमनसाकृतः ॥ नारदउवाच अहोकष्टमहोकष्टंसावित्रिकिमिदंकृतं वृतस्तेवा

लभावाद्यतगुणवान्सत्यवान्नृपः सत्यंवदत्यसौराजा सत्यवाक्केनसः स्मृतः नित्यमश्वाः प्रियास्तस्य करोत्यश्वान्समृण्मयान् चित्रेपिचलिखत्यश्वान्चित्राश्वस्तेनसोच्यते किंवर्णयोरंतिदेवश्च शक्त्यादानगुणैःसमः ब्रह्मण्यःसत्यवाग्दक्षः शिविरौशीनरोयथा ययातिरिवचोदारः सोमवत्प्रियदर्शनः अश्विन्याविवरूपेणद्युमत्सेनसुतोवली एकोदोषोस्तिनान्योस्तिअद्यप्रभृतिसत्यवान् संवत्सरेणक्षीणायुर्देहत्यागंकरिष्यति ॥ श्रीकृष्णउवाच नारदादेतदाकर्ण्यदुहितामाहपार्थिवः पुत्रिसावित्रिगच्छान्यंवरंवरयसत्पतिं संवत्सरेणसोल्पायुर्देहत्यागंकरिष्यति ॥ सावित्र्युवाच सकृज्जल्पंतिराजानः सकृज्जल्पंतिपंडिताः सकृत्प्रदीयतेकन्यात्रीण्येतानिसकृत्सकृत् दीर्घायुर्वापिस्वल्पायुर्निर्गुणः सगुणोपिवा सकृद्वृतोमयाभर्त्तानद्वितीयंवृणोम्यहं मनसानिश्चयंकृत्वाततोवाचाभिधीयते क्रियतेकर्मणापश्चा देपधर्मःसनातनः ॥ नारदउवाच यद्येतदिष्टंदुहितुस्ततः शीघ्रंविधीयतां अविघ्नमस्तुसावित्रीदिष्टंभद्रंकरिष्यति ॥ श्रीकृष्णउवाच॥एवमुक्त्वासमुत्पत्यनारदस्त्रिदिवंययौ उत्पाद्यदुःखमतुलं तस्यराज्ञोयुधिष्ठिर राजापिदुःखसंविग्नश्चिरंध्यानपरोभवत् अहोतिदुःखमुत्पन्नमपारंमादृगात्मनां एतदुःखमह्योदृष्ट्वावरमेवानपत्यता सत्यमुक्तंपुराणज्ञैः कन्यादुःखैकभाजनं देव्यायदुक्तंतत्सर्वं व्यलीकंप्रतिभातिमे एवंसंशोच्यवहुधादधारात्मानमात्मना देवींसंस्मृत्यसावित्रीं मयादत्तोवरःपुरा राजास्वदुहितुःसर्वंवैवाहिकमथाकरोत् स्वयंगत्वातुसामीप्यवनंमुनिनिषेवितंशुभेमुहूर्तेपार्श्वस्थैर्ब्राह्मणैर्वेदपारगैः समर्पयित्वाकन्यांतांदत्त्वादायांश्चपुष्कलान् उवाचेदंमहाभागंसुप्रीतेनांतरात्मना द्युमत्सेनमहाभागशृणुमेपरमंवचः इदंमेदुहितातातवल्लभाजीवितादपि भर्त्तासमुचितोह्यस्याः सत्ववान्सत्यवल्लभः त्वमप्यस्यासमुचितः श्वशुरोधर्मवत्सलः अतोपराधाःक्षंतव्यावालेयंकार्यवालिशा यदभीष्टंचजामातुर्युवयोर्यदभीप्सितं तदाख्येय

मतोस्माकंस्वस्तिततस्तुव्रजाम्यहम् ॥ श्रीकृष्णउवाच इत्यभाष्यगतोराजानारदोक्तेर्व्यथान्वितः सावित्र्यपिचतं लब्ध्वापतिंसर्वगुणान्वितं मुमुदेतीवतन्वंगीदिवसान्यार्यपुण्यकृत् एवंतत्राश्रमेतेषांतदानिवसतांसतां कालस्तत्पश्यतांकश्चिदतिचक्रामभारत सावित्र्यास्तुशयानायाश्चितयंत्यादिवानिशं नारदेनयदुक्तंतत्कदाचिन्नापसर्पति ततःकालेवहुतिथेव्यतिक्रांतेकदाचन प्रातःकालेहिमर्तव्यंयत्रसत्यवतानघ प्रौष्टपादेसितेपक्षेद्वादश्यां रजनीमुखे गणयंत्याश्चसावित्र्यानारदोक्तंवचोहृदि चतुर्थेहनिमर्तव्यमितिसंचिंत्यभामिनी व्रतंत्रिरात्रमुद्दिश्यसावित्र्यास्वयंमहाफलं उपोष्यसंस्थितासाध्वीसावित्रीसापतिव्रता । ततस्त्रिरात्रंनिर्वर्त्यस्नात्वासंतर्प्यदेवताः श्वश्रूश्वशुरयोःपादौववंदेचारुहासिनी अथव्रतस्थेपरशुंगृहीत्वासत्यवान्स्वयं सावित्र्यपिचभर्त्तारंगच्छंतंपृष्ठतोन्वगात् वार्य्यमाणापिसाभर्त्रावृद्धाभ्यांचाभिभाषिता उवाचश्वश्रूर्माभद्रेगच्छकंटकिनंवनं सुकुमारासिकल्याणिवालेसाभूमिपात्मजे अपदार्हापदैर्यातुकथंशक्ष्यासितद्वनं उपवासास्त्रयस्तेद्यतस्माद्भुंक्ष्वसुमध्यमे सावित्र्युवाच नैषधर्मो वरस्त्रीणांयद्भर्तरिवुभुक्षिते स्वयमेवचभोक्तव्यमित्याहुर्धर्मदर्शिनः अपरंकौतुकंमेस्तिवनस्याद्यप्रदर्शने भर्त्रा सहाद्ययास्यामिमानिषेधंकरिष्यथ भर्त्रासहागमिष्यामिकिंविपादेनमाचिरं ततोज्ञात्वाथसावालाजगामाथपतिव्रता सावित्र्यनुपदंभर्तुर्वनेतस्मिन्मनोरमे गत्वासौदूरमध्वानंजग्राहाथफलादिकं समित्कुशंचकुसुमंभार्यया संवदन्प्रियं काष्टंकुठारेणतथापाटयामासलीलया अथपाटयतस्तस्यजाताशिरसिवेदना ततःसंवृत्यतत्सर्वंवटच्छायामुपाश्रितः सत्यवान्वेदनाक्रांतःकिंचिद्घूर्णितमानसः वटशाखामुपाश्रित्यसत्यवान्प्राहगद्गदं सावित्रिपश्यशिरसिवेदनामांप्रवाधते नचकिंचित्प्रपश्यामिभ्रमतीवाद्यमेमनः तवोत्संगेक्षणंतावत्स्वप्तुमिच्छामिसुंदरि सावित्र्युवाच विश्रमस्वमहावाहोसावित्रीप्राहदुःखिता पश्चादपिगमिष्यामोह्याश्रमंसुसुखोदयं ॥

234

ब्र०र०
भाद्र०
११६

श्रीकृष्णउवाच ॥ यावदुत्संगगंकृत्वाशिरश्चास्तेमहीतले तावत्करालवदनाःशतशोथसहस्रशः आजग्मुर्यमदूताश्चरौद्राश्चातिभयंकराः नशेकुर्दृष्टिपातात्तेसावित्र्याःस्थातुमंतिके गत्वाचचक्षुस्तत्सर्वंसावित्र्यास्तुयमंद्रुतं दृष्टिपातेननास्माभिःसाध्यतेसत्यवान्कचित् इत्याकर्ण्ययमःकोपादुत्थायचवरासनात् आरुह्यमहिषंरौद्रंरौद्रः प्राणहरोवली आजगामत्वरायुक्तोयत्रास्तेसापतिव्रता सावित्र्यपिचसंत्रस्तावीक्ष्यमाणाइतस्ततः सावधानाकुथंकोयंभर्त्तारंममनेष्यति तावद्ददर्शसावालापुरुषंकृष्णापिंगलं किरीटिनंपीतवस्त्रंसाक्षात्सूर्यमिवोदितं तमुवाचाथसावित्रीप्रणम्यमधुराक्षरं सावित्र्युवाच कस्त्वंदेवोथवादैत्योमांधर्षयितुमागतः नचाहंकेनचिच्छक्या स्वधर्माद्वरोपितुं द्रष्टुंवापुरुषश्रेष्ठदीप्तांवह्निशिखामिव यमउवाच यमःसंयमनश्चाहंसर्वभूतभयंकरः क्षीणायुरेषतेभर्त्तासन्निधौतेपतिव्रते नशक्यःकिंकरैर्नेतुंततोहंस्वयमागतः शरीरात्पाशसंयुक्तंपृथग्भूतंमहाद्युतिं अंगुष्ठमात्रंपुरुषंनिचकर्षयमोवलात् पुनःप्रयातुमारेभेपंथानंपितृसेवितं सावित्र्यपिवरारोहाकृत्वापादेनमंडलं रक्षार्थंभर्तृकायस्यययावनुपदंततः पतिव्रतातदाश्रांताध्यायमानानिजंपतिं तच्चित्तातद्गतंप्राणातामुवाचयमस्तदा यमउवाच निवर्त्यगच्छसावित्रिसुदूरंतुमिहागता एषमार्गोविशालाक्षिनकेनाप्यनुगम्यते सावित्र्युवाच नश्रमोनचमेग्लानिः कदाचिदपिजायते भर्त्तारमनुगच्छंत्यास्तवशिष्टस्यसन्निधौ सतांसंतोगतिर्नान्यास्त्रीणांभर्त्तासदागतिः वेदावर्णाश्रमाणांचशिष्याणांचगुरुर्गतिः सर्वेषामेवजंतूनांस्थानमस्तिमहीतले मुक्त्वाभर्त्तारमेकंतुस्त्रीणांनान्यःसमाश्रयः एभिरन्यैःसमुचितैर्वाक्यैर्धर्मार्थसंयुतैः तोषितोधर्मराजस्तुसावित्रीमिदमब्रवीत् यमउवाच तुष्टोस्मितवभद्रेत्वंवरंवरयसुव्रते साचवव्रेस्वराज्यंचविनयावनतासती चक्षुःप्राप्तिस्तथाराज्यंश्वशुरस्यमहात्मनः जीवितंचतथाभर्तुर्धर्मसिद्धिंचशाश्वतीं पितुःपुत्रशतंचैवतथाचशतमात्मनः धर्मराजोवरान्दत्वाप्रेषयामासतां

ततः आजगामाथसातन्वीन्यग्रोधविटपंतदा कृत्वोत्संगेशिरस्तस्यपूर्ववन्निषसादच गात्रसंवाहनंचक्रेभर्त्तुःश्रां
तस्यभारत उत्थिताश्चेतनांप्राप्यनीरुक्प्राहेदमादरात् कथंनबोधितोभद्रेकालोतीवगतोमम किंमांवक्ष्यति
मेतातःकिंवामाताचदुःखिता विरुद्धवाचंसंजातंकालोतीवगतोवने विहायमातापितरौकालेनकापिमेत्यगात् इति
मत्वाविरुद्धंतेकृतंनेहप्रबोधनं सावित्र्युवाच कथंत्वांबोधयेवीरपीडितंतुशिरोरुजा ममैवात्रविलंबोभूदकार्य्येस्य
तवानघ अपश्यंत्थायसावित्रीजग्राहशिरसेंधनं समित्कुशादिकंसोथजग्मतुस्तौस्वमाश्रमं ततःपित्रास्वनेत्रा
भ्यांदृष्टौतौपरयामुदा आलिंग्यमूर्ध्न्युपाघ्रायपुत्रमंकेनिवेश्यसः उवाचदिष्ट्यापश्यामिसभार्य्यंत्वांसमागतं वि
लंबकारणंपृष्टःसमाचष्टेयथातथं वेदितार्थोथसंहृष्टःपूजयामासतांसतीं अथवापूर्वजैर्भुक्तंराज्यंनिहतकंटकं द्यु
मत्सेनोमहाभागइयाजक्रतुभिस्तदा ततोश्वपतिरासाद्यपुत्रानात्मगुणाधिकान् सावित्र्याश्चेष्टितंज्ञात्वाजामा
तुर्जीवितंतथा राज्यप्राप्तिंचविपुलांपरांमुदमवापसः सावित्र्याख्यानकमिदंसर्वपापप्रणाशनं अवैधव्यप्रदं
स्त्रीणांस्वर्गमोक्षप्रदायकं सुखसौभाग्यदंचाथप्रातर्जप्यमिदंसदा भाद्रपदेपूर्णिमायामाशुचीर्णंव्रतंत्विदं माह
त्म्यमस्यनृपतेःकथितंसकलंमया ॥ युधिष्ठिरउवाच ॥ कीदृशंतद्व्रतंकृष्णसावित्र्यायदनुष्ठितं तस्मिन्भाद्रपदेमासि
विधानंतस्यशंसमे कादेवताव्रतेतस्मिन् कोमंत्रः किंफलंप्रभो एतदाख्याहिमेनाथ नाहितुष्यामिमाधव
॥ श्रीकृष्णउवाच ॥ श्रूयतांपांडवश्रेष्ठसावित्रीव्रतमादरात् कथयामिकथंचीर्णं तयासम्यग्युधिष्ठिर त्रयोदश्यां
भाद्रपदेदंतधावनपूर्वकं त्रिरात्रंनियमंकुर्य्यादुपवासस्यभक्तितः अशक्तश्चत्रयोदश्यांनक्तंकुर्य्याज्जितेंद्रियः अयाचितं
चतुर्दश्यांपौर्णमास्यामुपोषितःनित्यंस्नात्वामहानद्यांतडागेनिर्झरेपिवा विशेषतःपौर्णमास्यांस्नानंसर्षपमृज्जलैः ग
हीत्वावालुकांपात्रेप्रस्थमात्रांयुधिष्ठिर अथवाधान्यमादाययवशालितिलादिकं ततोवंशमयेपात्रेवस्त्रयुग्मेनवेष्टिते

सावित्रीप्रतिमांकृत्वाब्रह्मणश्चैवशोभनां सौवर्णींमृण्मयींवापिस्वशक्त्यारौप्यनिर्मितां ब्रह्मस्वरूपनिर्माणंविष्णु
धर्मोत्तरेहितं पद्मपत्रासनस्थश्चब्रह्माकार्यश्चतुर्मुखः पुस्तकंस्वस्तिकंतद्वदक्षमालांकमंडलुं सावित्रीतस्यकर्तव्या
वामोत्संगगतातथा आदित्यवर्णाधर्मज्ञासाक्षसूत्रकरातथेति रक्तवस्त्रयुगंदद्यात्सावित्र्याब्रह्मणः सितं सावि
त्रींब्रह्मणासार्द्धमेवंभक्त्याप्रपूजयेत् गंधैः पुष्पैश्चनैवेद्यै र्दीपकैर्मोदकैः शुभैः पूर्णकोशातकैः पक्कैः कूष्मांडैः क
र्कटीफलैः नारिकेलैः सखर्जूरैः शाखोटैःपनसैस्तथा धान्याकैर्जीरकैर्हृद्यैर्गुडेनलवणेनच विरूढैःसप्तधान्यैश्च
वंशपात्रप्रकल्पितैःहरिद्रयाकंठसूत्रैःशुभैःकुंकुमकेसरैःअवतारंकरोत्येवंसावित्रीब्रह्मणःप्रिया ॥अवतारमवस्थितां॥
तामर्चयेतमंत्रेणसावित्रींब्राह्मणीस्वयं इतरासांतथास्त्रीणांपुराणोक्तोविधिःस्मृतः ॐकारपूर्वकेदेविवीणापुस्तकधा
रिणी वेदमातर्नमस्तुभ्यमवैधव्यंप्रयच्छमे रूपंदेहियशोदेहिसौभाग्यंदेहिदेहिमे एवंसंपूज्यविधिवज्जागरंतत्र
कारयेत् गीतवाद्यत्रनिर्घोषैर्हृष्टनारीकदंबकैःपुण्याख्यानैश्चविविधैस्तांरात्रिमतिवाहयेत् उत्सवेननयेद्रात्रिंसा
वित्र्याश्चकथानकैः ततःप्रभातसमयेरवावभ्युदितेसति सावित्रींब्राह्मणश्रेष्ठसनैवेद्यानिवेदयेत् अथसावित्रि
कल्पज्ञेसावित्र्याख्यानवाचके वेदज्ञेतुस्ववृत्तिस्थेदरिद्रेवाकुटुंबिनि मंत्रेणानेनकौंतेयप्रणम्याविधिपूर्वकं दूर्वा
क्षततिलैर्मिश्रापूर्वाशाभिमुखास्थिता शुचिवस्त्रधरेविप्रेॐकारस्वस्तिपूर्वकं सावित्रीयंमयादत्तासहिरण्याहिर
ण्मयी ब्रह्मणःप्रीणनार्थायब्राह्मणप्रतिगृह्यतां एवंदत्त्वाद्विजेंद्रायसावित्रींतांयुधिष्ठिर नैवेद्यादिचतत्सर्वंब्राह्मण
स्यगृहंनयेत् स्वयंदशपदंगच्छेत्स्ववेश्मततआविशेत् गौरिण्योभोजयेद्भक्त्याहविष्यान्नेनशक्तितः पुष्पैः कुसुम
सिंदूरैस्तालकैः कंठसूत्रकैः वासोभिर्भूषणैर्भक्त्याविसशाठ्यविवर्जिता तथाभुक्त्वाहविष्यान्नंब्राह्मणैर्बहुभिः सह
विसर्जयेत्ततस्तांचसावित्रीप्रीयतामिति वक्तव्यंब्राह्मणैः सर्वैस्तुष्टैर्भुक्ततरैर्भृशं सावित्रीवरदातुभ्यंसदाभवत्

सुव्रते पुत्रीपुत्रस्तथाभर्त्तापरमायुरनामयः पुत्रपौत्रैश्चसंवर्द्धंवर्द्धतांतवसत्कुलं व्रतंचसुव्रतंतद्वद्विधिनानेनानिश्चितम्॥

॥ इतिश्रीभविष्योत्तरोक्तप्रौष्ठपद्यांसावित्रीव्रतम् ॥

अस्यामेववारुणव्रतारंभःकार्य्यः तदुक्तं हेमाद्रौविष्णुधर्मोत्तरे ॥ मार्कंडेयउवाच ॥ प्रौष्ठपद्यास्तथारभ्यसंपूर्णशशलक्षणं संपूज्यवरुणंदेवंगंधमाल्याः संपदा जलाशयजलेदेवंध्यात्वासंवत्सरावधौ दद्याद्व्रतावसानेतुजलधेनुंद्विजातये छत्रोपानद्युगयुतांवासोयुगविभूषितां प्राप्नोतिलोकंवरुणस्यराज्ञस्तत्रोष्यकालंसुचिरंमनुष्यः मानुष्यमासाद्यभवत्यरोगोरूपान्वितोवित्तयुतस्तथैव ॥ इतिभाद्रीकृत्यसमाप्तम् ॥

अथास्यांश्रीभागवतपुस्तकदानम् नारदीये प्रौष्ठपद्यांपौर्णमास्यांहेमसिंहासनस्थितां देयंभागवतायेदंद्विजायप्रीतिपूर्वकं मदनरत्नेमात्स्ये यत्राधिकृत्यगायत्रींवर्ण्यतेधर्मविस्तरः वृत्रासुरवधोपेतं तद्भागवतमुच्यते अष्टादशसहस्राणिपुराणंतत्प्रकीर्तितं लिखित्वातच्चयोदद्याद्धेमसिंहसमन्वितं पौर्णमास्यांप्रौष्ठपद्यांसयातिपरमंपदमिति ॥ अस्यामेवकन्यार्कयुक्तायामयुक्तायामपिप्रपितामहान्परान्त्रीनुद्दिश्यश्राद्धंकुर्य्यात् ॥

तदुक्तं हेमाद्रौ मार्कंडेयपुराणे नांदीमुखानांकर्तव्यंकन्याराशिगतेरवौ पौर्णमास्यांतुकर्तव्यंवराहवचनंयथेति नांदीमुखत्वंचोक्तंब्राह्मे पितापितामहश्चैवतथैवप्रपितामहः त्रयोह्यश्रुमुखाश्चैतेपितरःपरिकीर्तिताः तेभ्यःपूर्वंतरायेतेप्रजावंतःसुखैधिताः तेतुनांदीमुखानांदीसमृद्धिरभिधीयते एतच्चनित्यंप्रत्यब्दंकर्तव्यं प्रत्यब्दमित्युक्तत्वात् अत्रमातामहाअपिकार्य्याःपूज्यंतेपितरो यत्रतत्रमातामहाअपीतिवौधायनोक्तेः अत्रपितृशब्दस्यजनकपरत्वेनवहुवचनाविरोधनिष्ठायांमातुःश्राद्धेतदापत्तिः इष्टापत्तेः अत्रपिंडपातनिषेधापवादः पौर्णमासीषुसर्वासुवर्ज्जयेत्पिंडपातनं वर्ज्जयित्वाप्रौष्ठपदींयथादर्शस्तथैवसेति ॥ निर्णयदीपेगार्ग्योक्तेः अथात्रसपिंडकाभ्युदयिकश्राद्ध

ब्र०र०
भाद्र०
११८

प्रयोगः सचदेशाचारपरिगृहीतस्वगृह्योक्तविधिना कार्यः ॥ सपिंडकाभ्युदायिकश्राद्धम् ॥
अथप्रयोगः तत्रदक्षिणोत्तरक्रमेणद्वादशस्थानेषुप्रत्येकंआसादितद्रव्यंज्वालितप्रदीपदेशमागत्य आचम्य
प्राङ्मुखउदङ्मुखोवाउपविशेत् सव्येनसर्वंकर्तव्यंऋजवएवकुशाः तिलकार्येयवाःकर्तव्या ॐअपवित्रःपवि
त्रोवेत्यादिनापुंडरीकाक्षःपुनात्विति श्राद्धीयवस्तूनिसिंचेत् कुशोदकेन ततःकुशयवजलान्यादाय ॐअद्यामु
कगोत्राणांमातृपितामहीप्रपितामहीनांअमुकामुकदेवीनांनांदीमुखीनांतथामुकगोत्राणांपितृपितामहप्रपितामहा
नाममुकामुकशर्म्मणांनांदीमुखानांतथामुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्म्मणांनांदी
मुखानाममुकगोत्रस्यामुकस्यकर्तव्यामुककर्म्मनिमित्तकमाभ्युदयिकश्राद्धमहंकरिष्ये
इतिसंकल्पंकुर्यात् ॥ ततोगायत्रींदेवताभ्यइतित्रिर्जपेत् ॥
ॐअद्यामुकगोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनांदीमुखीनामाभ्युदयिकश्राद्धसंबंधिनोविश्वेदे
वाइदमासनंवोनमः ॥ इतिकुशत्रयरूपंपवित्रमासनं दक्षिणतः आरभ्यउत्सृजेत एवंयथोत्तरं ॐअद्यामुक
गोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्म्मणांनांदीमुखानामाभ्युदयिकश्राद्धसंबंधिनोविश्वेदेवाइदमासनं
वोनमः ॐअद्यामुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्म्मणांनांदीमुखानामाभ्युदयिक
श्राद्धसंबंधिनोविश्वेदेवाइदमासनंवोनमः ॐमद्यामुकगोत्रेमातरमुकदेविनांदीमुखिआभ्युदयिकश्राद्धइदमासनं
तेनमः एवंपितामहीप्रपितामहीभ्यामासनंदद्यात् ततः ॐअद्यामुकगोत्रपितरमुकशर्म्मन्नांदीमुखाभ्युदयिक
श्राद्धइदमासनंतेनमः एवंपितामहप्रपितामहयोरपि ॐमद्यामुकगोत्रमातामहामुकशर्मन्नांदीमुखाभ्युदयिश्रा
द्धइदमासनंतेनमः एवंप्रमातामहवृद्धप्रमातामहयोरपि ततः आवाहनं ॐविश्वान्देवानहमावाहयिष्यइत्युक्त्वा

ओंविश्वेदेवासआगतशृणुतामइमꣳहवं इदंवर्हिनिषीदत इत्यावाह्य ओंयवोसियवयास्मद्वेषोयवयारातीरितिदेवपात्रेषुयवान्विकीर्य्य ओंविश्वेदेवाः शृणुतेमꣳहवंमेयेअंतरिक्षयउपद्यविष्ठयेअग्निजिह्वाउतवायजत्राआसाद्यास्मिन्वर्हिषिमादयध्वं ओंआगच्छंतुमहाभागाविश्वेदेवामहावलाः येयत्रविहिताःश्राद्धे सावधानाभवंतुमे इतिपठित्वा ॥ ततः ओंपितॄनहमावाहयिष्ये इत्युक्ता ओंउशंतस्त्वानिधीमहिस मिताःसमिधीमहि ॥

इतिपितॄनावाह्य

ओंअपहताअसुरारक्षांसिवेदिषद इतिमात्रादिपात्रेषुयवान्विकीर्य्य ओंआयंतुनःपितर इतिपठित्वा ततोर्घ्यकरणं तत्रदेवपूर्वकंसर्वेषु ओंशन्नोदेवीतिमंत्रेणजलंक्षिपेत् ततोदेवार्घपात्रेषु ओंयवोसी तियवान्विकीर्य्य मात्रादिपात्रेषु ओंयवोसिसोमदेवत्योगोसवोदेवानिर्मितः प्रत्नमाद्भिःपृक्तःयुष्मान्नांदीमुखान्पितॄन्लोकान्प्रीणाहिनः स्वाहा इति मंत्रेणयवान्क्षिप्त्वा ततःप्रत्येकंगंधपुष्पाणिक्षिपेत् ॥ ततःप्रथमं देवार्घपात्रं वामहस्ते कृत्वा तत्रस्थपवित्रंभोजनपात्रेनिधाय तदुपरिकिंचिदुदकांतरंदत्त्वा ओंयादिव्याइतिपठित्वाकुशयवजलान्यादाय ओंमद्यामुकगोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनांदीमुखीनामाभ्युदयिक श्राद्धसंवंधिनोविश्वेदेवाएषवोहस्तार्घोंनमः एवंपित्रादिश्राद्धदेवेभ्योमातामहादिश्राद्धदेवेभ्योपिदद्यात् ततोमातुरर्घपात्रमादाय पूर्ववत् यादिव्याइतिपठित्वाकुशादीन्यादाय ओंमद्यामुकगोत्रेमातरमुकदेविनांदीमुखिआभ्युदयिकश्राद्धेएषतेहस्तार्घोंनमः एवंपितामहीप्रपितामह्योरपिदद्यात् ततःपित्रर्घपात्रमादायसव्यपूर्ववत्कृत्वाकुशादीन्यादाय ओंमद्यामुकगोत्रपितरमुकशर्मन् नांदीमुखाभ्युदयिकश्राद्धएषतेहस्तार्घोंनमः एवंपितामहादिपंचभ्योदद्यात् ततोवशिष्टजलपवित्रयुतंप्रथमंदेवार्घपात्रमादाय ओंविश्वेभ्योदेवेभ्यःस्थानमसीतिदेवासवदक्षिणपार्श्वेउत्तानंस्थापयेत् एव

मपरदेवार्घपात्रद्वयं तत्तदासनदक्षिणभागेप्रत्येकंस्थापयेत् ततःपितामहीप्रपितामहीअर्घपात्रद्वयस्थितं पवित्रं भोजनपात्रोपरिधृत्वादक्षिणकरेणादाय ओंमातृभ्यःस्थानमसीतिमात्रासनवामभागेन्युब्जीकुर्य्यात् एवमेवपित्रा र्घपात्राणांमिलनंकृत्वापित्राद्यासनवामभागे ओंपितृभ्यःस्थानमसीतिन्युव्जीकरणं ततोगंधादिदानं ओंमद्यामुक गोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनांदीमुखीनामाभ्युदायिकश्राद्धसंवंधिनोविश्वेदेवाएतानिगं धपुष्पधूपदीपतांवूलयज्ञोपवीतवासांसिवोनमः एवंपित्रादिदेवेभ्योमातामहादिदेवेभ्यश्चदद्यात् ततः ओंमद्या मुकगोत्रपितरमुकशर्म्मनूनांदीमुखाभ्युदयिकश्राद्धएतानिगंधपुष्पधूपदीपतांवूलयज्ञोपवीतवासांसितेनमः एवं पितामहादिपंचभ्योपिदद्यात् ततपात्रमर्घासनसहितंचतुष्कोणमंडलंकुर्यात् ततःसजलैपुटकादौहस्तेनैवस घृतमन्नमादाय ओंअग्नयेकव्यवाहनायस्वाहा इत्याहुतिद्वयंजुहुयात् सोमायपितृमतेस्वाहा इत्याहुतिद्वयं जुहुयात् ततोपसव्यंकृत्वा दक्षिणाभिमुखः पातितवामजानुः मोटकतिलजलान्यादाय ओंइदमन्नमेतद्भूस्वामि पितृभ्योनमः इतिभूस्वामिनेकिंचिदन्नंदद्यात् पिंडार्थंकिंचिदवशेषयेत् ततोन्यदन्नंयथासंभवंसर्वत्रपरिविष्यघृ तजलंचतत्रोपनीयपात्रमालभेत् तत्रक्रमः उत्तानपाणिभ्यांदेवपात्रंस्पृष्ट्वा ओंपृथिवीतेपात्रंद्यौरपिधानंब्राह्म णस्यमुखेअमृतेअमृतंजुहोमिस्वाहा इतिपठित्वा ॥

ओंइदमन्नंविचक्रमेत्रेधानिदधेपदंसमूढमस्यपाꣳसुरेकृष्णहव्यरक्षमदीयं इतिपठित्वा इदमन्नमित्यन्ने ओं इमाआपा इतिजले ओंइदमाज्यमितिघृते ओंइदंहविरितिपुनरन्नेदक्षिणांगुष्ठमारोप्य ओंयवोसियवयास्म द्द्वेषोयवयारातीरिति यवान्विकीर्य कुशादीन्यादाय ओमद्यामुकगोत्राणांमातृपितामहीप्रपितामहीनां अमुका मुकदेवीनांनांदीमुखीनामाभ्युदयिकश्राद्धसंवंधिनोविश्वेदेवाइदमन्नंसोपकरणंवोनमः यद्येकमेवपात्रंभवति तदा

वामेनपाणिनापात्रमत्यजन्नेव ओंइदंविष्णुरित्यादिपठित्वा यवक्षेपपर्यंतंकृत्वा कुशादीनादायपित्राद्युल्लेखेन पित्रादिदेवेभ्योपिजलमुत्सृजेत् एवमेवमातामहादिदेवेभ्यःभिन्नपात्रपक्षे पृथिवीतिपात्रमित्यादीनांसर्वेषामावृत्तिः ततोमातृपात्रमुत्तानाभ्यामेवपाणिभ्यांस्पृष्ट्वा ओंपृथिवीतेपात्रमित्यादि ओंइदंविष्णुरित्यादिपठित्वा ओंकृष्णकव्यमिदंरक्षमदीयं ओंइदमन्नमित्यन्नेदक्षिणांगुष्ठंनिवेश्य ओंअपहताअसुरारक्षांसिवेदिषद इत्यन्नोपरियवान्विकीर्य्य ओमद्यामुकगोत्रेमातरमुकदेविनांदीमुखिआभ्युदायिकश्राद्धइदमन्नंसोपकरणंतेनमः एवंपात्रालंभनादिकं प्रत्येकंपितामहीप्रपितामहीभ्यामपिदद्यात् एवंपितृपात्रमालभ्य ओंपृथिवीतेइत्यादिपठित्वा पूर्ववत्सर्वंकृत्वा ॥

ओमद्यामुकगोत्रपितरमुकशर्म्मन्नांदीमुखाभ्युदयिकश्राद्धइदमन्नंसोपरणंतेनमः इतिपित्रेन्नमुत्सृजेत् एवंप्रितामहादिपंचभ्योन्नमुत्सृजेत् ततःप्रांजलिः

ओंअन्नहीनमित्यादिजपेत् दर्भेषूपविश्यगायत्रींत्रिर्जपित्वा ॥ ओंमधुमधुमध्विति मधुवाताइत्यादिऋचंजपेत् पितृमंत्रान् ओंउदीरतामवरइत्यादीन् जपेत् अन्यानितुपुरुषसूक्तादीनिपवित्राणिजपेत् ततःप्रागग्रकुशत्रयं भूमावास्तीर्य्य जलेनप्रोक्ष्यजलप्रोक्षितं सयवघृतमन्नंकुशादिना अनग्निदग्धाश्चयेजीवायेप्रदग्धाःकुलेमम भूमौदत्तेनतृप्यंतुतृप्तायांतुपरांगति मितिमंत्रेणकुशोपरि अन्नंविकरेत् ॥

ततआचम्यहरिंस्मृत्वागायत्रींत्रिर्जपेत् चतुरस्रांपिंडयोग्यभूमिंपरिस्कृत्यउत्तरोत्तरक्रमेणस्थानत्रयेप्रादेशमात्रंपरिमायतत्रप्रागग्रांरेखांदर्भापिंजुलीमूलेन ओंअपहतेत्यादि जपित्वा कुर्य्यात् प्रत्येकंरेखात्रयोपरि ओंयेरूपाणीति अंगारान् भ्रामयेत् तदुपरिप्रत्येककुशत्रयमास्तीर्य्य प्रत्येकमवनेजनंदद्यात् ॥ तत्रक्रमः ॥ यवजलंगं

धपुष्पैर्नवपात्राणिपूरयित्वाएकंपात्रंवामहस्तेकुशादीन्यादाय ॥ ओमद्यामुकगोत्रेमातरमुकदोविनांदीमुखिअभ्युदायिकश्राद्धपिंडस्थानेअत्रावनेनिक्ष्वतेनमः ॥ इतिसर्वदक्षिणकुशत्रयमूलमात्रेऽवनेजनंदद्यात् एवमेवपात्रांतरमादाय तत्कुशत्रयमध्येपितामह्यै अवनेजनंदद्यात् तत्कुशत्रयाग्रेप्रपितामह्यै अवनेजनंदद्यात् ततश्चतुर्थमादाय ओमद्यामुकगोत्रपितरमुकशर्मन् नांदीमुखाभ्युदायिकश्राद्धपिंडस्थानेअत्रावनेनिक्ष्वतेनमः ॥ इतिसर्वदक्षिणकुशत्रयमूलपित्रेऽवनेजनंदद्यात् किंचिज्जलमवशेषयेत् एवंपितामहप्रपितामहयोःपिंडस्थानेऽवनेजनंदद्यात् एवमेवपात्रांतरमादाय ओमद्यामुकगोत्रमातामहामुकशर्मन्नांदीमुखाभ्युदयिकश्राद्धपिंडेअत्रावनेनिक्ष्वतेनमः इत्यपरकुशत्रयमूलेमातामहायावनेजनंदद्यात् एवंप्रमातामहवृद्धप्रमातामहयोर्दद्यात् ततोयवदधिवदरघृतमिश्रितान्नेनपिंडान्निर्माय एकपिंडंकुशादींश्चादायओमद्यामुकगोत्रेमातरमुकदेविनांदीमुखिअभ्युदयिकश्राद्धएषतेपिंडोनम इतितदवनेजनस्थानेपिंडंदद्यात् एवमेवपितामहीप्रपितामहीभ्यांस्वीयावनेजनस्थानेपिंडंदद्यात् ततश्चतुर्थपिंडमादाय ओमद्यामुकगोत्रपितरमुकशर्म्मन् नांदीमुखाभ्युदयिकश्राद्धएषतेपिडोनमः एवंपितामहप्रपितामहयोः ततःसप्तमंपिंडमादाय ओम्मद्यामुकगोत्रमातामहामुकशर्म्मन्नांदीमुखाभ्युदयिकश्राद्धएषतेपिंडोनमः ॥ इति तदवनेजनंदद्यात् एवंप्रमातामहवृद्धप्रमातामहयोर्दद्यात् ततोदर्भमूलेकरंप्रोंछ्यआचम्यहरिंस्मृत्वा अत्रमातरोमादयध्वंयथाभागमावृषायध्वंइतिपठित्वा उदङ्मुखीभूयश्वासंनियम्यतेनैवपथामुखंपरावर्तयन् ओंअमीमदंतमातरोयथाभागमावृषायिषतइतिजपेत् ॥ एवंअत्रपितरोमादयध्वंयथाभागमावृषायध्वमितिजपित्वा ॥

उदङ्मुखीभूयश्वासंनियम्य तेनैवपथामुखंपरावर्तयन् ओंअमीमदंतइत्यादिजपेत् ॥ ततोऽवनेजनावशिष्टजलेनप्रत्यवनेजनंदद्यात् ॥ तत्रक्रमः ओंअद्यामुकगोत्रेमातरमुकगोत्रेनांदीमुखाभ्युदायिकश्राद्धपिंडेप्रत्यवनेनिक्ष्व

जनंनिक्ष्वतेनमः इतितात्पिंडोपरिदद्यात् ॥ एवंपितामहीप्रपितामहीभ्यां तथा ओंअद्यामुकगोत्रपितरमुकशर्म्मन्नांदीमुखाभ्युदयिकश्राद्धेप्रत्यवनेनिक्ष्वतेनमःइत्युपरिदद्यात् एवमेवतत्तत्पिंडोपरिपितामहादिपंचभ्योदद्यात् ततोनीवींविस्रंस्याचम्यहारिंस्मृत्वासूत्राण्यादाय ओंनमोवोमातरोरसायनमोवोमातरो मन्यवेनमोवोमातरोनमोवोमातरोगृहान्नोमातरोदत्तसतोवोमातरोद्वेष्मः एतद्वासः ॥ इतिमात्रादिपिंडत्रयोपरिप्रत्येकंसूत्रंदद्यात् ततः नमोवः पितरइत्यनेनमंत्रेणपित्रादिपिंडषट्कोपरिप्रत्येकंसूत्रंदद्यात् ततःकुशजलान्यादाय ओंअद्यामुकगोत्रेमातरमुकदेविनांदीमुखाभ्युदयिकश्राद्धेपिंडेएतत्तेवासोनमः ॥ एवंपितामहीप्रपितामहीएवंपितामहादीनांपंचानांसूत्रमुत्सृजेत् ततोगंधपुष्पधूपदीपतांबूलानिप्रत्येकंपिंडमभ्यर्च्य ओंशिवाआपः संत्वितिजलं ओंसौमनस्यमस्त्वितिपुष्पाणि ओंअक्षतंचारिष्टमास्त्वितितंडुलान्प्रत्येकंपात्रेषुनिक्षिप्य कुशादीन्यादाय ओंअद्यामुकगोत्रायामातुरमुकदेव्यानांदीमुख्याभ्युदयिकश्राद्धदत्तैतदन्नपानादिभिःप्रीयतां इत्यक्षय्योदकंदद्यात् एवंपितामह्याः प्रपितामह्याश्चाक्षय्योदकं ओंअद्यामुकगोत्रस्यपितुरमुकशर्म्मणोनांदीमुखस्याभ्युदयिकश्राद्धदत्तैतदन्नपानादिभिः प्रीयतांइतीपित्रे एवंपितामहादिपंचभ्योक्षय्योदकंदद्यात् ॥ ततः ओंअघोरामातरःसंत्वितिमातृपिंडोपरिपूर्वाग्रां जलधारांदद्यात् एवंपितामहीप्रपितामह्योः ततओंअघोराः पितरः संत्वितिपित्रादिपिंडषट्कोपरिजलधारांदद्यात्-ततओंगोत्रंनोवर्द्धतांदातारोनोभिवर्द्धतांवेदाः संततिरेवच श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्त्विति अन्नंचनोवहुभवेदतिथींश्चलभेमहि याचितारश्चनःसंतुमाचयाचिष्मकंचन एताःसत्याशिषःसंतुइत्याशीःप्रार्थयन् सपवित्रकुशत्रयाणिप्रत्येकमात्रादिपिंडत्रयेमातामहादिपिंडत्रयंदत्त्वा ओंऊर्जंवहंतिरमृतंघृतंपयः कीलालंपरिश्रुतं स्वधास्थतर्पयतमेमातॄः इतिमात्रादिपिंडोपरिदक्षिणाग्रांजलधारांदद्यात् ततस्तथैव ऊर्जंवहंतिरमृतंघृतंपयःकीलालंप

पुस्तकालय
गुरुकुल [illegible] गड़ी

रिश्रुतं स्वधास्थतर्पयतमेपितृन् इतिपित्रादिपिंडषट्कोपरिदक्षिणाग्रांजलधारांदद्यात् ततः पिंडमाघ्रायोत्थाप्यपिंडाधारकुशानुल्मुकंचवन्हौक्षिपेत् अर्घपात्राण्युत्तानीकृत्यदक्षिणांदद्यात् दक्षिणाद्रव्यंचफलमूलेफलंमूलंवा प्रत्येकंतत्रक्रमः ओंमद्यामुकगोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनांदीमुखीनामाभ्युद यिकश्राद्धसंवधिनांविश्वेषांदेवानांकृतैतच्छ्राद्धप्रतिष्ठार्थमिमेफलमूलेवनस्पतिदैवतेयथानामगोत्रायब्राह्मणायदक्षिणांदातुमहमुत्सृजेत् एवंपित्रादिश्राद्धसंवंधिदेवताश्राद्धदक्षिणांमातामहादिश्राद्धसंवंधिविश्वेदेवश्राद्धदक्षिणांदद्यात् ॥ ओंमद्यामुकगोत्रायामातुरमुकदेव्यानांदीमुख्याः कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमेफलमूलेवनस्पतिदैवतेइत्यादि अद्यामुककगोत्रस्यपितुरमुकशर्म्मणोनांदीमुखस्यकृतैतदाभ्युदयिकश्राद्धदक्षिणांदद्यात् ओंवाजेवाजेइत्यादिनामात्रादिविसर्जनं विश्वेदेवाप्रीयंतामितिदेवाविसर्जनं ततः ओंदेवताभ्यइतित्रिर्जपेत् दीपनिर्वापणम् श्राद्धीयद्रव्यप्रतिपत्तिः ॥ इत्याभ्युदयिकश्राद्धविधिः

अथसंकल्पश्राद्धमपरशाखायाम् मध्यान्हस्नानंविधाय संध्यांकृत्वा तर्पणंविधाय ॥ श्राद्धस्थलेगत्वा दीपंप्रज्वाल्यआचम्य शुक्लांवरधरंविष्णुंमितिविष्णुंनमस्कृत्य यंब्रह्मवेदांतविदोवदंतिपरंप्रधानंपुरुषंतथान्ये विश्वोद्गतेः कारणमीश्वरंवा तस्मैनमोविघ्नविनाशनाय अभीप्सितार्थसिद्ध्यर्थंपूजितोयःसुरैरपि सर्वविघ्नछिदेतस्मै गणाधिपतयेनमः स्ववामभागेकर्मपात्रपूरणं भूमौशंखचक्रेलिखित्वा आसनं आसनेपात्रं पात्रे पवित्रं ओंपवित्रेस्थेवैष्णव्यौसवितुर्वः प्रसवउत्पुनाम्यछिद्रेणपवित्रेणसूर्यस्यरश्मिभिः शन्नोदेवीतिजलं ॥ ओंशन्नोदेवीरभिष्टयऽआपोभवंतुपीतयेशंयोरभिस्रवंतुनः ओंयवोसीतियवान् ॥ ओंयवोसियवयास्मद्द्वेषो यवयारातीदिवेत्वातरिक्षायत्वापृथिव्यैत्वाशुंधंताल्लोकाःपितृषदनाःपितृषदनमासीद ॥ तिलोसीतितिलान् ति

245

लोसिसोमदेवत्योगोसवोदेवनिर्मितः प्रत्नमद्भिःपृक्तः स्वधयापितॄंलोकान्प्रीणाहिनःस्वाहा गंधपत्रिकाक्षता
दितूष्णींनिक्षिप्य तेनजलेन आत्मानं प्रोक्ष्यंसंकल्पश्राद्धसामग्रीःसंप्रोक्ष्य प्राणानायम्य पुंडरीकाक्षस्मरण
विधाय अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा यः स्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरः शुचिः ओंपुंडरीका
क्षायनमः ओंदेवताभ्यः पितृभ्यश्चमहयोगिभ्यएवच नमः स्वाहायैस्वधायैनित्यमेवनमोनमः ३ सप्तव्याधा
दशार्णेषुमृगाः कालंजरेगिरौ चक्रवाकाःशरद्वीपे हंसाः सरसिमानसे तेपिजाताः कुरुक्षेत्रे ब्राह्मणावेद
पारगाः प्रस्थितादीर्घमध्वानंयूयंकिमवसीदथ श्राद्धकालेगयांध्यात्वाध्यात्वादेवंगदाधरं मनसाचपितॄन्ध्यात्वा
संकल्पश्राद्धमारभेत् अपसव्य ओंसोमस्यनीवीरसिविष्णोशर्मासिशर्वयजमानस्येंद्रस्ययोनिरसिसुसास्कृधिइ
तिवाकट्यांनीवींबंधनं अग्निष्वाताः पितृगणाः प्राचींरक्षंतुमेदिशं तथावर्हिषदःपांतु याम्यांयेपितरःस्थि
ताः प्रतीचीमाज्यपाःपांतु उदीचीमपिसोमपाः रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः सर्वतश्चाधिपस्ते
षांयमोरक्षांकरोतुमे तिलारक्षंतुदितिजान्दर्भारक्षंतुराक्षसान् पंक्तिंवैश्रोत्रियोरक्षेदतिथिः सर्वरक्षकः सव्यं
ओंयद्देवादेवहेडनंदेवासश्चकृमावयं अग्निर्मातस्मादेनसोविश्वान्मुंचत्वꣳहसः यदिदिवायदिनक्तमेनाꣳ सि
चकृमावयं वायुर्मातस्मादेनसोविश्वान्मुंचत्वꣳहसः २ यदिजाग्रद्यदिस्वप्नएनाꣳसिचकृमावयं सूर्योमा
तस्मादेनसोविश्वान्मुंचत्वꣳहसः गायत्र्याःशूद्रादिदृष्टिदोषनिपातात्पाकादीनांपवित्रतास्तु प्रतिज्ञा ओंविष्णु
३ इत्यादिदेशकालौसंकीर्त्य अपसव्यं अमुकनामसंवत्सरेअमुकायनेअमुकऋतौअमुकमासेअमुकपक्षेअमुक
तिथौअमुकगोत्राणांअस्मत्पितृपितामहानांअमुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणांतथाअमुक गोत्रा
णांअस्मत्मातामहप्रमातामहवृद्धप्रमातामहानांअमुकामुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणां अमुकस

अ०र०
भाद्र०
१२२

ज्ञकाविश्वेदेवपूर्वकंसंकल्पश्राद्धंकरिष्ये ॐकुरुष्व ॥ सव्यम् विश्वेदेवाआसनं यवजलकुशद्वयंगृहित्वा अद्येह- अमुकगोत्रपित्रादित्रयश्राद्धसंवंधिनांतथामुकगोत्रमातामहादित्रयश्राद्धसंवंधिनां पूरूरवोमाद्रवसंज्ञकानांविश्वेषांदेवानांइदमासनमस्तु ॐभूर्भुवःस्वः इदमासनमास्यतांआस्ये ॥ अपसव्यम् तिलमोटकजलं गृहीत्वा अद्येहामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकशर्मणांसपत्नीकानां वसुरुद्रादित्यस्वरूपाणांसंकल्पश्राद्धेइदमासनमस्तु ॐभूर्भुवःस्वः इदमासनमास्यतांआस्ये ॥ अद्येह अमुकगोत्राणामस्मत्मातामहप्रमातामहवृद्धप्रमातामहानाममुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणांइदमासनमस्तु ॐभूर्भुवःस्वः इदमासनमास्यतां आस्ये सव्यं विश्वेदेवार्चनविधौअत्र २ सुगंध नमोस्त्वनंतायेतिपूजनंधूपदीपौ ॥ यवकुशानादाय. अद्ये- अमुकगोत्रपित्रादित्रयः श्राद्धसंवंधिनः तथा अमुकगोत्रमातामहादित्रयश्राद्धसंवंधिनः विश्वेदेवार्चनविधौ इमानिगंधाक्षतपुष्पधूपदीपादीनिनिधायविभागंवोनमः स्वाहा विश्वेदेवार्चनविधेः सर्वंपरिपूर्णम् ॥

अपसव्यं अत्र २ सुगंध पितृभ्योपिपूजनं धूपदीपौतिलामोटकं अद्येह-अमुकगोत्रा अस्मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणः सपत्नीकावसुरुद्रादित्यस्वरूपाः तथा अमुकगोत्रा अस्मत्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः सपत्नीकावसुरुद्रादित्यस्वरूपाः अर्चनविधौ- इमानिगंधाक्षतपुष्पधूपदीपादियथाविभागशः स्वधा ॥ सव्यं अर्चनविधेः सर्वंपरिपूर्णमस्तु अस्तुपरिपूर्णं गंधादिदानाचमनेस्वयंवाचमेत् परिवेषणार्थंभस्मनारेखाकरणं यथाचक्रायुधोविष्णुस्त्रैलोक्यंपरिरक्षति एवंमांमंडभस्माकसर्वभूतानिरक्षतु पत्रावलिः संस्थाप्य ॥

ॐमधु ३ अधोमुखाभ्यांपाणिभ्यांपात्रमालभ्य जपति पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिविष्णोहव्यᳫं रक्ष यवान्विकीर्य्य अपहताअसुरारक्षाᳫंसिवेदिषद इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं समूढमस्यपाᳫं सुरे अंगुष्ठग्रहणंइदमन्नं इमाआपः इदमाज्यं इदंशाकादिकंसर्वंहविः ततः कुशयवजलान्यादाय. अद्येह. अमुकगोत्राअस्मत्पित्रादित्रयः श्राद्धसंबंधिभ्यः तथाअमुकगोत्राअस्मन्मातामहादित्रयःश्राद्धसंबंधिभ्यः पूरूरवोमाद्रवसंज्ञकेभ्योविश्वेभ्योदेवेभ्यः अस्मिन्श्राद्धेइदमन्नंसोदकंसोपस्करघृताद्युपस्करसहितंयत्परिविष्टंपरिवेष्यमाणंब्राह्मणस्यतृप्तिपर्य्याप्तं अमृतस्वरूपंनिषद्ध्यैब्राह्मणायदीयमानमन्नंचयथाविभागंवोनमः विश्वेभ्योदेवेभ्योनमःयथासुखेनभुंजध्वंभुंजयामि ॥ अपसव्यं ॐमधु ३ पात्रमालभ्य उत्तानाभ्यांपाणिभ्यांजपति पृथिवीतेपात्रंद्यौः विष्णोहव्यᳫंरक्ष तिलान्विकीर्य्य अपहता. इदंविष्णुर्वि. अंगुष्ठग्रहणं इदमन्नं पूर्ववत् ॥ सर्वंकव्यं अद्येह. अमुकगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यः अमुकशर्मभ्यः सपत्नीकेभ्योवसुरुद्रादित्यस्वरूपेभ्यः अस्मिन्श्राद्धेइदमन्नं- यथाविभागंवःस्वधा पित्रादिभ्योजपति पृथि- विष्णोःकव्यᳫंरक्ष तिलान्विकीर्य्य अपहता- इदंविष्णुर्वि. अंगुष्ठग्रहणंइदमन्नं सर्वंकव्यं- अद्येह- अमुकगोत्रेभ्यः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्यः अमुकामुकशर्मभ्यः सपत्नीकेभ्योवसुरुद्रादित्यस्वरूपेभ्यः अस्मिन्श्राद्धेइद० यथाविभागंवःस्वधा मातामहादिभ्योनमः यथासुखेनभुंजयामि सव्यं ॐयेचेहपितरोयेचनेहयांश्चविद्मयांचनप्रविद्मत्वंवेत्थयतितेजातवेदःस्वधाभिर्यज्ञᳫंसुकृतंजुषस्व इतिसर्वेभ्योजलदानं

अपसव्यं ॐमधुवाताऋतायतेमधुक्षरंतिसिंधवः माध्वीर्न्नः सन्त्वोषधी मधुनक्तमुतोषसोमधुमत्पार्थिवᳫंरजः मधुद्योरस्तुनःपिता मधुमान्नोवनस्पतिर्मधुमांअस्तुसूर्य्यः माध्वीर्गावोभवंतुनः ॐमधु ३ विकरदा

ब्र०र०
भाद्र०
१२३

नं सर्वान्पाकजातान् एकीकृत्यवारिणाप्लाव्य कुशोपरिविकिरेत् यथा असंस्कृतप्रमीतानांत्यागिनांकुलभा
गिनां उच्छिष्टभागधेयानांदर्भेषुविकिरासनं अनेनदक्षिणाग्रान्कुशान्निक्षिप्य पाकमादाय अग्निदग्धाश्च
येजीवायेप्यदग्धाकुलेमम भूमौदत्तेनतृप्यंतुतृप्तायांतुपरांगतिम् येषांनपचतेमातायेषांनपचतेपिता उच्छिष्टं
येचकांक्षंतितेभ्योन्नंदत्तमक्षयं उच्छिष्टभागधेयेभ्योनमः इतिसंपूज्य सव्यं हस्तौपादौप्रक्षाल्यआचम्य
श्राद्धस्थलेगत्वा विकिरेद्द्विराचमनं विश्वेदेवब्राह्मणाय सकृत्सकृत् मधुवाता इतिपठित्वा सव्यं
भोब्राह्मणाअस्मिन्पाकमध्येयत्किंचिद्रोचतेतत्प्रतिगृह्यतां तृप्तास्थ तृप्तास्मः शेषमन्नं इष्टैःसहभुज्यतां अ
पसव्येनअक्षय्योदकदानं अद्येह- अमुकगोत्रस्यअस्मत्पितुः अमुकशर्मणः सपत्नीकस्यवसुस्वरूपस्यअ
स्मिन्संकल्पश्राद्धइदमन्नोदकादियद्दत्तंतदक्षयमस्तु अस्तु अक्षय्यं तथाअमुकगोत्रस्यपितामहस्यअमुकशर्म
णः सपत्नीकस्यआदित्यस्वरूपस्यइदम० तथाअमुकगोत्रस्यअस्मन्मातामहस्यअमुकशर्मणः सपत्नीकस्य
वसुरूपस्यइदमन्नं- अद्येह. अमुकगोत्रस्यप्रमातामहस्यअमुकशर्मणः सपत्नीकस्यरुद्रस्वरूपस्यइदमन्नं- तथा
अद्येह. अमुकगोत्रस्यअस्मद्वृद्धप्रमातामहस्यअमुकशर्मणः सपत्नीकस्यआदित्यस्वरूपस्यइदमाचमनं ॥
सव्यं आशीर्ग्रहणं अघोराःपितरःसंतुगोत्रंनोवर्द्धतां- २ दातारोनोभिवर्द्धतां २ वेदावर्द्धतां १ संततिर्वर्द्धतु
श्रद्धाचनोमाव्यगमत् वहुदेयंचनोअस्तु अन्नंचनोवहुभवेत्भवतु अतिथींश्चलभेमहि लभध्वं याचितार
श्चनः संतुमाचयाचिष्मकंचनमायाचेथा एताएवआशिषः सत्याः संतुपितृणांप्रसादोस्तु दक्षिणा देशकालौसंकी
र्त्य अद्येह- अमुकगोत्राणांअस्मत्पितृपितामहप्रपितामहानांअमुकामुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरू-
पाणां तथा अमुकगोत्राणांअस्मन्मातामहप्रमातामहवृद्धप्रमातामहानांअमुकामुकशर्मणांसपत्नीकानांवसुरुद्रा-

दित्यस्वरूपाणांकृतैतत्संकल्पश्राद्धकर्मणःसांगतासिद्ध्यर्थंइमांरजतनिष्क्रयिणींदक्षिणांश्राद्धभोक्तृभ्यांब्राह्मणाभ्यां दास्ये ओंतत्सन्नमम कुशयवानादाय अद्येह-अमुकगोत्रपित्रादित्रयश्राद्धसंबंधिनांतथाअमुकगोत्रअस्मन्मातामहादित्रयाणां श्राद्धसंबंधिनांपुरूरवोमाद्रवसंज्ञकानांप्रीतयेकृतस्यास्यसंकल्पश्राद्धार्थंवैश्वदेवकर्मणः सांगतासिद्ध्यर्थं इमांसुवर्णनिष्क्रियिणींदक्षिणांश्राद्धभोक्त्रेब्राह्मणायदास्ये ओंपितृपूर्वं ओंस्वस्तिभवंतोब्रुवंतु तिलकं सत्यानुष्ठानसंपन्नाः सर्वदायज्ञवृद्धयः पितृमात्रपराश्चैवसंत्वस्मत्कुलजानराः ॥ देवताभ्यःपितृभ्यश्च महायोगिभ्यएवच नमःस्वहायैस्वधायैनित्यमेवनमोनमः ३ सप्तव्याधादशार्णेषुमृगाःकालंजरेगिरौ चक्रवाकाःशरद्वीपे हंसाःसरसिमानसे तेपिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः प्रस्थितादीर्घमध्वानंयूयंकिमवसीदथ श्राद्धकालेगयांध्यात्वाध्यात्वादेवंगदाधरं मनसाचपितृन्ध्यात्वासंकल्पश्राद्धंविसर्जयेत् इदंमयाकृतंसंकल्पश्राद्धंविधिहीनंयत्कृतंतत्सुकृतमस्तु यन्नकृतंतत्श्रीविष्णोः प्रसादाद्विश्वेषांदेवानांब्राह्मणवचनात्सर्वंपरिपूर्णमस्तु अस्तुपरिपूर्णम् ॥ अपसव्यं उतिष्ठतिपितृविप्रासनंउत्थाप्य सव्यं- विश्वेदेवात्रासनंच उत्थाय ओंउत्तिष्ठब्रह्मणस्पते देवयंतस्त्वेमहे उपप्रियंतुमरुतः स्वधानमः इंद्राप्राशुर्भवासचा अपसव्य आमावाजस्येतिप्रदक्षिणीकृत्य ओंआमावाजस्यप्रसवोजगम्यादामाद्यावापृथिवीविश्वरूपे आमागंतंपितरं मातरंचामासोमोअमृतत्वेनगम्यात् नीवींविस्रंस्य पाणिनादीपंनिर्वाप्य. सव्येन आचम्य यस्यस्मृत्येति. चतुर्भिश्च. कायेनवाचामनसेंद्रियैर्वाबुध्यात्मनावाप्रकृतिस्वभावात् करोमियद्यत्सकलंपरस्मैनारायणायेतिसमर्प्पयामि अनेनकर्मणा श्रीभगवान्यज्ञपुरुषः प्रीतोस्तु ॥ इतिसंकल्पश्राद्धम् ॥

अथातिकार्य्यासक्तस्यराजादेः संक्षेपतः संकल्पश्राद्धं तत्रादौपुंडरीकाक्षःपुनात्विति विष्णुंस्मृत्वा

श्राद्धकालेगयाध्यात्वेतिध्यानं ॥ गयागदाधराभ्यांनमः ओमद्येत्यादि अमुकगोत्रस्यअस्मत्पित्रादित्रयस्यामुकामुकसंज्ञस्यवसुरुद्रादित्यरूपिणोमातामहादित्रयस्यचसपत्नीकस्याविश्वेदेवपूर्वकपार्वणश्राद्धं अथवैकोद्दिष्टंवासंकल्पविधिनाहंकरिष्ये देवताभ्यःपितृभ्यश्चेतिजपित्वा ओमद्यामुकगोत्रस्यास्मत्पित्रादित्रयस्यामुकगोत्रस्यमातामहादित्रयस्यच मातादित्रयस्यमातामह्यादित्रयस्यचसंकल्पश्राद्धसंबंधिनांविश्वेषांदेवानांश्राद्धविधिसंपत्त्यर्थमिदंसदक्षिणमन्नंसोपकरणं यथानामगोत्राभ्यांब्राह्मणाभ्यांदातुमहमुत्सृजे विश्वेदेवाःप्रीताभवंतु इति सव्येन अपसव्यंकृत्वा ओमद्यामुकगोत्राणामस्मत्पितृपितामहानाममुकामुकशर्मणां तथाचमातृपितामहीप्रपितामहीनांतथाचामुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानांसपत्नीकानामक्षयतृप्तिहेतोःसांवत्सरिकमहालयपार्वणैकोद्दिष्टश्राद्धस्यसमग्रफलप्राप्त्यर्थंइदंसिद्धान्नंपक्वान्नमामान्नंवासदक्षिणं यथानामगोत्रेभ्योब्राह्मणेभ्यो दीयमानमक्षय्यमस्तु स्वधा पितृभ्यःस्वधायिभ्यः स्वधानम पितामहेभ्यःस्वधायिभ्यःस्वधानमः प्रमातामहेभ्यःस्वधायिभ्यः स्वधानमः अक्षन्नपितरोमीमदन्तपितरःशुंधध्वं श्रीगयागदाधरौप्रीयेतांगोत्रंनोवर्द्धतामित्याशीःप्रार्थनं ततःसव्यं कृत्वा ओमद्यास्मत्पित्रादेः कृतस्यास्यसंकल्पविधिश्राद्धस्यसाद्गुण्यार्थमिमं दक्षिणाद्रव्यंचंद्रसूर्याग्निदैवतं यथानामगोत्राय ब्राह्मणाय तुभ्यमहंसंप्रददे श्रीगयागदाधराभ्यांनमः ॥

इत्यतिसंक्षिप्तसंकल्पश्राद्धम्

अथनित्यश्राद्धप्रयोग आचम्य प्राङ्मुखउपविश्यवाउदङ्मुखउपविष्टः ओंअपवित्रःपवित्रोवासर्वावस्थांगतोपिवा यःस्मरेत्पुंडरीकाक्षंसवाह्याभ्यंतरःशुचिरितिपठित्वा ओंपुंडरीकाक्षःपुनात्वितिकुशत्रयजलेनश्राद्धीयद्रव्याणिसिंचेत् ततःकुशत्रयतिलजलान्यादाय ओंअद्यामुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणांनित्यश्राद्धमहंकरिष्ये इतिसंकल्पंकुर्यात् ततस्त्रिर्गायत्रींजपित्वा ओंदेवताभ्यइतित्रिर्जपेत् ततोपसव्यं

कृत्वा दक्षिणाभिमुखःपातितवामजानुर्मोटकतिलजलान्यादाय ओंअद्यामुकगोत्रपितरमुककर्शन्नित्यश्राद्धेइदमासनंतेस्वधेति तिलजलप्रोक्षितंमोटकरूपमासनंदक्षिणाग्रंपित्रेदद्यात् एवमेवपितामहादिभ्यः प्रत्येकमासनमुत्सृजेत् ओंअपहताअसुरारक्षाꣳसिवेदिषद इतिश्राद्धदेशेतिलान्विकीर्य्य ओंआयांतुनःपितर इतिजपेत् ततःओंमद्यामुकगोत्रपितरमुकशर्मन्नित्यश्राद्धेएतानिगंधपुष्पधूपदीपतांबूलानितेस्वधा इतियथासंभवंपित्रेगंधादिकमुत्सृजेत् एवमेवपितामहादिभ्योप्युत्सृजेत् ततोजलेनमंडलंचतुष्कोणमन्नपात्रस्यचतुर्दिशंकृत्वान्नपरिवेषणंकुर्यात् ततोमधुदत्त्वा ओंमधुवाताऋतायतेइति ओंमधुमधुमध्वितिमंत्रयेत् ततोन्नपात्रंव्यस्ताभ्यामधोमुखाभ्यांपाणिभ्यांस्पृशन् ओंपृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेऽमृतंजुहोमिस्वाहा ओंइदंविष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्ययाꣳसुरेइतिजपित्वावामहस्तेनान्नपात्रमत्यजन् ओंकृष्णकव्यमिदंरक्षमदीयमितिजपित्वा ओंइदमन्नं ओंइमाआपः ओंइदमाज्यं ओंइदंहविरितिअन्नघृतजलेषुपुनरन्नेपिदक्षिणांगुष्ठमारोप्य ओंअपहताअसुरारक्षाꣳसिवेदिषद इत्यन्नोपरितिलान्विकीर्य मोटकादीन्यादाय ओंमद्यामुकगोत्रापितरमुकशर्मन्नित्यश्राद्धमिदमन्नंसोपकरणंतेस्वधेतिपित्रेन्नमुत्सृजेत् एवंपितामहादिपंचभ्योप्युत्सृजेत् ततो दर्भेष्वासीनः गायत्रीमधुवाताइतिऋचंओंमधुमधुमध्वितिचजपेत्ततः कृणुष्वपाजइत्यादिऋचंपठेत्ततस्तिलान्भूमौक्षिप्त्वाओंउदीरतामवरेत्यादिपित्र्यमंत्रान् ओंसहस्रशीर्षेत्यादिपुरुषसूक्तं ओंआशुःशिशानेत्यादिकंप्रातिरथमन्यानिचपवित्राणियथाशक्तिजपेत् ओंनमस्तुभ्यंविरूपाक्षनमस्तेनेकचक्षुषे नमःपिनाकहस्तायवज्रहस्तायवैनमः इतिपठेत् ततःओंमद्यामुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणांकृतैतन्नित्यश्राद्धप्रतिष्ठार्थमेकाकिनीमूल्यरजतंचंद्रदैवतंयथानामगोत्रायब्राह्मणायदक्षिणांदातुमहमुत्सृजेत् इतिमोटकादिनादक्षिणांदद्यात् ततःस

ष्यंकृत्वा उँदेवताभ्यःपितृभ्यइत्यादित्रिःपठेत् ओंप्रमादात्कुर्वतांकर्मइतिपठित्वा विष्णुंस्मरेत् नित्यश्राद्धीयमन्नंब्राह्मणायप्रतिपादयेत् जलेवाक्षिपेत्

इतिनित्यश्राद्धविधिः ॥

स्वस्तिश्रीरणवीरसिंहधरणीपालोवदन्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंसेवकः धर्माधर्मविभागकृद्रघुपतेःपादांबुजार्चारतोजीयात्पुत्रकलत्रमित्रसहितःसंपालयन्क्ष्मांचिरम् १ रणवीरसिंहभूपेशकारितेकृत्यसागरे अभून्नभस्यकृत्यानांरम्योरत्नसमुच्चयः २ ॥

इति श्रीमत्सूर्यवंशावतंशरघुकुलतिलकश्रीरणवीरसिंहमहाराजकारितेकृत्यरत्नाकरेभाद्रपदमासकृत्यरत्नसमुच्चयःसमाप्तः शुभमस्तुसर्वजगताम् ॥

254

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिब्बामल्लाधिकारेभाद्रपदमासोमुद्रितस्समाप्तिमगमत्
संवत् १९४१ कार्त्तिक प्र. २९

(1)

आश्विनमासप्रारम्भः

2

॥ ॐश्रीगणेशायनमः अथाश्विनमासकृत्यनिर्णयः ॥

कन्यार्कसंक्रमणेपराः षोडशघटिकाःपुण्यकालःशेषंप्राग्वत् संक्रांतिनिर्णयेज्ञेयं अत्रकृत्यंविष्णुःआश्विनेसकलेमासेघृतंप्रदायाऽश्विनौपूजयित्वारूपवान्भवति वामनपुराणे तिलांस्तुरंगंवृषभंदधिताम्रारसादिकं प्रीत्यर्थं यज्ञनाभस्यदेयमाश्वयुजेनरैः आदिशब्देनाभीष्टद्रव्यपरिग्रहः भविष्यपुराणे कृत्वाचाश्वयुजेमासिविपुलं धान्यपर्वतं सुवर्णवस्त्रगंधाढ्यंसूर्यस्याग्रेनिवेदयेत् सविमानैःसमहायानै र्वरभोगसमन्वितैः वर्षकोटिसहस्राणिसूर्यलोकेमहीयते योवाप्यश्वयुजंमासमेकभक्तेनसंक्षिपेत् प्रजावान्वाहनाढ्यश्चबहुपुत्रश्चजायते स्कंदपुराणे योपिचाश्वयुजंमासमेकभक्तेनसंक्षिपेत् वाणिज्यंतुलभेत्तस्यकृषिःपशुगणस्तथा विष्णुधर्मोत्तरे आश्विनेघृतदानेनरूपवानभिजायते अत्रग्रहणमुपक्रम्यदेवीपुराणे आश्विनेसरयूःपुण्यास्नानदानादिकर्मसु नंदिपुराणे अथवाश्वयुजंमासंवर्जयेन्मांसभोजनं मासषट्ककृतंपुण्यंलभतेनात्रसंशयः मासषट्केमांसवर्जजन्यंपुण्यंलभतइत्यन्वयः अत्रसौरमासएवग्राह्यः कन्यास्थार्कस्यफलविशेषप्राधान्याच्च अथमहालयेनिर्णीयते सचाश्विनमासस्यकृष्णपक्षः कन्यास्थार्केमहापुण्यप्रदः सचश्राद्धकरणेनित्यः कन्यास्थार्कंविनापिनित्यएवमलमाससंभवेकन्यास्थार्कस्यविरहात् तत्रपृथ्वीचंद्रोदयेवृद्धमनुः आषाढीमवधिंकृत्वापंचमंपक्षमाश्रिताः वांछतिपितरःक्लिष्टाअत्रमप्यन्वहंजलं अथकन्यार्कयोगेपुण्यतमत्वमाह शाकटायनिः कन्यास्थार्कान्वितःपक्षसोत्यंतंपुण्यउच्यते अत्रविशेषमाह वृद्धमनुः मध्येवायदिवाप्यंतेयत्रकन्यांव्रजेद्रविः सपक्षःसकलःश्रेष्ठःश्राद्धषोडशकंप्रति मार्कंडेयब्रह्मांडपुराणयोः कन्यागतेसवितरियान्यहानितुषोडशक्रतुभिस्तानितुल्यानिदेवोनारायणोब्रवीत् अत्रहेमाद्रिः षोडशत्वंत्रेधाव्याचख्यौ तिथिवृद्ध्यापक्षस्यषोडशदिनत्वे श्राद्धवृद्ध्यर्थमित्येकः पक्षःभद्रा

पौर्णिमासहितइतिद्वितीयः पक्षः आश्विनशुक्लप्रतिपत्सहितस्तृतीयःपक्षइति अत्रकेचित्षोडशशक्ताशक्तविषयत्वेनषट्पक्षाइत्याहुः यथा कृष्णप्रतिपदादिशुक्लप्रतिपदांतएकःप्रतिपदादिदर्शांतोद्वितीयः पंचम्यादिदर्शांतस्तृतीयःअष्टम्यादिदर्शांतश्चतुर्थः दशम्यादिदर्शांतः पंचमः अतएवचतुर्दशीवर्जितादर्शांताः दशसप्तपंचतिथिपक्षाइतिकेचित् एकतिथिपक्षश्चेतिषट् तत्रप्रथममाह शाकटायनिः नभस्यस्यापरेपक्षेतिथिषोडशकश्चयःकन्यागतान्वितश्चेत्स्यात्सकलःश्राद्धकर्मणीति क्वचिदितिसंदिग्धेसंदेहवचनं नभस्यस्येत्यमांतमांसेन तिथिषोडशकश्चामावास्योत्तरांप्रतिपदमादाय देवलेनोक्तं अहःषोडशकंयत्तुप्रोक्तंप्रतिपदासह चंद्रक्षयाद्विशेषेणसार्धे दर्शात्मिकास्मृतेति पंचदशदशसप्तपंचतिथिपक्षविषयो ब्रह्मपुराणे अश्वयुक्कृष्णपक्षेतुश्राद्धंकुर्याद्दिनोदिने त्रिभागहीनंपक्षंवात्रिभागंत्वर्द्धमेवचेति त्रिभागहीनंपंचम्यादि पक्षंप्रतिपदादि त्रिभागंदशम्यादि अर्धंत्वष्टम्यादि अत्रतृतीयोभागःत्रिभागःपक्षस्य तद्धीनत्वाच्चाद्यानांचतसृणांचतुर्दश्याश्चवर्जनंएवमर्द्धत्रिभागयोरपिचतुर्दशीवर्जनं यत्र नभस्यस्यापरेपक्षे श्राद्धंकुर्याद्दिनेदिने नैवनंदादिवर्जस्या नैववर्ज्याचतुर्दशीति वचनेन प्रतिपदादिपक्षएवचतुर्दशीवर्जनानिषेधादितरपक्षेषुतद्वर्जनप्रतिपत्तेः नंदादिवर्जनंतुनभवति संख्याहानिप्रसंगात् अथापरपक्षःतत्रगौतमः श्राद्धंपितृभ्योदद्यात्पंचम्यादिदर्शंतमष्टम्यादिदशम्यादिसर्वास्मिंश्चेति एकदिनपक्षोनागरखंडे आषाढ्याःपंचपक्षेकन्यासंस्थेदिवाकरे योवैश्राद्धंनरःकुर्य्यादेकस्मिन्नपिवासरे तस्यसंवत्सरंयावत्तृप्ताःस्युः पितरोध्रुवमिति अस्मिन्पक्षेनंदादिवर्जनमपिभवति अत्रतदप्रवृत्त्यैकरणाभावात् नंदादिवर्जनमाह नारदः ननंदासुभृगोर्वारेरोहिण्यांचत्रिजन्मसु रेवत्यांचमघायांचकुर्यादापरपाक्षिकमिति नंदातिथयः प्रतिपत्षष्ठिएकादश्यः त्रिजन्मनक्षत्राणि श्राद्धकर्तुर्जन्मनक्षत्रदशमएकोनविंशतिनक्षत्राणि जन्मतारासंज्ञानि यत्तु कर्तु

श्चपुत्रदाराणांत्रिजन्मर्क्षाणिवर्जयेदिति क्वचिल्लिखितवचनं तद्यदिसांकरंतदैवव्याख्येयं कर्तुस्तत्पुत्रस्यतद्दाराणांचत्रिजन्मर्क्षाणि आद्यदशमैकोनविंशनक्षत्राणि यत्रदिनेभवंति तद्दिनेश्राद्धंवर्जयेदिति अन्यथा त्रिशब्दस्यबहुवचनस्यचवैयर्थ्यापत्तेः केचित्तुत्रिजन्मानीत्यत्र जन्मनक्षत्रतःपूर्वोत्तरतश्चनक्षत्रेण त्रिजन्मनक्षत्राणीतिव्याख्यानंतुपूर्वोत्तरनक्षत्रयोर्जन्मनक्षत्रवाच्यत्वाभावान्मूललेखनाभावाच्चोपेक्षितं अन्यत्रापि श्राद्धनिषेधविषयः नंदाश्वकाममह्यारभृग्वग्निपितृकालभे गंडेवैधृतिपातेचपिंडास्त्याज्याःसुतेप्सुभिरिति अश्वेतिसप्तमी कामेतित्रयोदशी आरोभौमः अग्निपितृकालभानि कृत्तिकामघाभरण्याख्यानिनक्षत्राणि अत्रपिंडदानग्रहणंश्राद्धोपलक्षणं एककल्पनालाघवात् अस्यापवादःप्रयोगपारिजातोदाहृतेसंग्रहवचने अमायांतेभरण्यांचद्वादश्यांपक्षमध्यके तिथिवारंचनक्षत्रंयोगंचनविचारयेदिति मासतिथिसमानजातीयामपिचतुर्दशीभिन्नायांतिथौनिषेधप्रयोजकयुक्तायामपियावत्संभवंशिष्टाः महालयश्राद्धमाचरंति आधुनिकेषुग्रंथेषुवचनान्यपिलिखितानि नागरखंडे आषाढ्याःपंचमेपक्षेकन्यासंस्थेदिवाकरे मृताहनिपितुर्योवैश्राद्धंदास्यतिमानवः तस्यसंवत्सरंयावत्संतुष्टाःपितरोध्रुवं कात्यायनः यातिथिर्यस्यतातस्यमृताहेतुप्रवर्तते सातिथिः पितृपक्षेतुपूजनीयाप्रयत्नतः तथा अशक्तः पक्षमध्येतुकरोत्येकदिनेयदा निषिद्धेपिदिनेकुर्य्यात्पिंडदानंयथाविधि इति एतानिवचनानिमहानिबंधेष्वदर्शनादनादरणीयानीति तथामार्कंडेयः कन्यागतेसवितरिदिनानिनवपंचच पार्वणेनविधानेनश्राद्धंतत्रविधीयते यस्तुवैवाहितोमासान्सत्यजेद्द्वादशैवहि सपिंडःपिंडनिर्माणंमौंजीबंधेषडेवहीति विवाहानंतरंपिंडदाननिषेधो ज्योतिः शास्त्रपराशरेणोक्तः तस्यापवादःस्मृतिसंग्रहे महालयेगयाश्राद्धेमात्रापित्रोर्मृतेहनि यस्यकस्यापिमर्त्यस्यसपिंडीकरणेतथा कृतोद्वाहोपिकुर्वीतपिंडनिर्वपणंसुतइति सन्यासिनांतुमहालयश्राद्धंद्वादश्यांकर्त्तव्यं यतीनांचवन

स्थानांवैष्णवानांतथैवच द्वादश्यांविहितंश्राद्धंकृष्णपक्षेविशेषतइति पृथ्वीचंद्रोदयोक्तेः वायुपुराणेपि संन्यासिनोप्यौरसादिपुत्रःकुर्य्याद्यथाविधि महालयेतुयच्छ्राद्धंद्वादश्यामेवतद्भवेदितिइदंतुतंत्रेणैवकर्तव्यं मृताहंचसपिंडंचगयाश्राद्धंमहालयं आपन्नोपिनकुर्वीतश्राद्धमासेनकार्हिचित् इतिस्मृतिदर्पणेगालवोक्तेः अथात्रदेवताः तत्रायं तावत्संग्रहश्लोकः तातांबात्रितयंसपत्नजननीमातामहादित्रयं सस्त्रीस्त्रीतनयादितातजननीस्वभ्रातरस्तास्त्रियः तातांबात्मभगिन्यपत्यधवयुग्जायापितासद्गुरुः शिष्याप्ताःपितरोमहालयविधौतीर्थेतथातर्पणे अत्रमहालयविधौ एतेसपिंडकश्राद्धदानार्हाः तथैतेषांपार्वणैकोद्दिष्टादिश्राद्धनिर्णयः पितरोयत्रपूज्यंतेतत्रमातामहाअपि तथाच अन्वष्टकासुवृद्धौचप्रतिसंवत्सरंतथा महालयेगयायांचसापिंडीकरणात्पुनः मातुःश्राद्धंपृथक्कुर्यादन्यत्रपतिनासह हेमाद्रौ महालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच नवदैवतमत्रेष्टंशेषंषाट्पौरुषंविदुरिति सपत्नमातुः सहैकतंत्रेणद्विपितृकश्राद्धवत् निगमे महालयेगयाश्राद्धेश्राद्धेचान्वष्टकासुच ज्ञेयंद्वादशदैवत्यंतीर्थेप्रौष्ठेगयासुच तथाच हेमाद्रौ उपाध्यायगुरुश्वश्रूपितृव्याचार्य्यमातुलाः श्वशुरभ्रातृतत्पुत्राऋत्विक्शिष्याद्युपोषकाः भगिनीस्वामिदुहितृजामातृभगिनीसुताः एकोद्दिष्टविधानेनपूजनीयाः प्रयत्नतइति अत्रसंबंधप्रत्यासत्त्याक्रमः तत्तुल्यत्वेभरणक्रमात्तेनार्थनिर्णयेपाठक्रमादितिबोध्यं अत्रप्रत्येकोद्दिष्टंब्राह्मणभेदइतिमुख्यःपक्षः अशक्तौतुचतुर्विंशतिमतेएकस्मिन्ब्राह्मणेसर्वानाचार्य्यादीन्प्रपूजयेत् दशद्वादशवापिंडान्दद्यादकरणंनतु पार्वणानुवृत्तौविप्रानाहयाज्ञवल्क्यः द्वौदैवेपितृकृत्येत्रीनैककमुभयत्रवा मातामहानामप्येवंतंत्रंवावैश्वदेविकं श्राद्धादेःसंपात्तेच दीपिकायांपराशरःसंपत्तावप्पपात्राणामेकैकस्यत्रयस्त्रयः पित्रादेर्ब्राह्मणाःप्रोक्ताश्चत्वारोवैश्वदैविके पात्रालाभेमनुः द्वौदैवेपितृकृत्येत्रीनेकैकमुभयत्रवा भोजयेदसमृद्धोपिनप्रसज्येतविस्तरे अत्यशक्तौ हेमाद्रौदेवलः एकेनापिहिविप्रेणषट्पिंडंश्राद्ध

माचरेत् षडर्घ्यान्दापयेत्तत्र षड्भ्योदद्यात्तथाहविः तत्रैववसिष्ठः यद्येकंभोजयेच्छ्राद्धंदैवंतत्रभवेत्कथं अन्नंपात्रेसमुद्धृत्यसर्वस्यप्रकृतस्यच देवतायतनेकृत्वाततःश्राद्धंसमाचरेत् प्रास्येदग्नौतदन्नंतुदद्याद्वाब्रह्मचारिणे अत्रदेवलः एकेनापिचविप्रेणषट्पिंडश्राद्धमाचरेत् षडर्घ्यान्दापयेत्तत्रषड्भ्योदद्यात्तदासनं पिताभुंक्तेविप्रकरेमुखेभुंक्तेपितामहः प्रपितामहस्तुताळुस्थः कंठेमातामहस्तथा प्रमातामहश्चहृदयेवृद्धोनाभौतुसंस्थितः एवमप्याचरेच्छ्राद्धंषड्दैवत्यंमहामुने विलुप्तिंकारयेद्यस्तुपितृहासप्रजायते हेमाद्रौसत्यव्रतः निधायदर्भनिचयमासनेषुसमाहितः प्रैष्यानुप्रैष्यसंयुक्तंसर्वंतत्रप्रकल्पयेत् मातृश्राद्धेतुविप्रालाभे सुवासिन्योऽपिभोजनीया इत्याहापरार्के वृद्धवसिष्ठः मातृश्राद्धेतुविप्राणामलाभेपूजयेदपि पतिपुत्रान्विताभव्यायोषितोऽष्टौकुलोद्भवाइति विधवायास्तुविशेषः स्मृतिसंग्रहे चत्वारिपार्वणानीहविधवायाःसदैवहि स्वभर्त्तुश्वसुरादीनांमातापित्रोस्तथैवच ततोमातामहानांचश्राद्धदानमुपक्रमेदिति तथा श्वश्रूणांचविशेषेणमातामह्यास्तथैवचेत्यपिपाठः तस्याःषड्दैवत्येविशेषःस्मृतिरत्नावल्यां स्वभर्तृप्रभृतित्रिभ्यःस्वपितृभ्यस्तथैवच विधवाकारयेच्छ्राद्धंयथाकालमतंद्रितेति विधवास्वयंसंकल्पंकृत्वा अन्यद्वाराकारयेदितिप्रयोगपारिजातः अत्रचैकपाकः वैश्वदेववदेकतंत्रं पृथग्वा एकोद्दिष्टं एकोद्दिष्टेअग्नौकरणंनकर्त्तव्यमितिगृह्यकाराः एकोद्दिष्टस्वरूपमाह याज्ञवल्क्यः एकोद्दिष्टंदैवहीनमेकार्घ्यैकपवित्रकं आवाहनाग्नौकरणरहितंत्वपसव्यवदिति अत्रपाणिहोमः पिंडश्चाद्विजातिकरइत्याह प्रयोगपारिजाते आचार्य्यः काम्यमभ्युदयोऽष्टम्यामेकोद्दिष्टमथाष्टकं चतुर्ष्वेषुकरेहोमःपिंडश्चात्रद्विजातकइति पार्वणैकोद्दिष्टयोः समानतंत्रत्वेतु अग्निसमीप एवहोमः अत्रधुरिलोचनौवैश्वदेवौ आपिकन्यागतेसूर्येकाम्येचधुरिलोचनाविति हेमाद्रावादित्यपुराणवचनं तत्काम्यवुद्ध्याक्रियमाणमहालयश्राद्धविषयमितिहेमाद्र्यादयःकेचित्तुनित्येम

8

व्र०र०
आश्वि०
॥३॥

हालयश्राद्धंतावदिच्छंति सतांत्वितन्नरोचते यतोनात्रमहालयपदंश्रूयते किंतुकन्यागतेसूर्येश्राद्धइत्येव तत्र
किंकन्यागतेसूर्येइत्यधिकरणसप्तमी उतनिमित्तसप्तमी आद्येकन्यागताधिकरणेतुवार्षिकादिष्वतिप्रसंगः महाल
यश्राद्धस्यतन्निमित्तकत्वाभावेतत्रधुरिलोचनौनस्यातांकिंतुपुरूरवोमाद्रवनामानौ आषाढीमवधिंकृत्वायःस्यात्पक्ष
स्तुपंचमः श्राद्धंतत्रप्रकुर्वीतकन्यांगच्छतुवानवा आगतेपिरवौकन्यां श्राद्धंकुर्वीतयत्नतः आषाढ्याः पंचमःपक्षःप्र
शस्तः पुण्यकर्मणीति जातूकर्णजाबालिवचनाभ्यां महालयश्राद्धस्य केवलाषाढ्याः पंचमपक्षप्रयुक्तत्वात् तत्रैव
शक्रध्वजनिपातांकोयःस्यात्पक्षस्तुपंचमः सविज्ञेयोऽपरःपक्षःश्राद्धंतत्रविधीयते पुत्रानायुर्धनंधान्यमारोग्यंभू
तिमेवच प्राप्नोतिपंचमेदत्त्वाश्राद्धंदातातथापरान् एतान्यपिहिहिंसंतिपंचयोवैव्यतिक्रमेत् तन्मात्रातिक्रमे
विद्वान्पंचमेपितृकंविधिमिति कन्यार्कयोगस्यप्राशस्त्यार्थः नतुतस्यनिमित्तत्वं तर्हि किंनिमित्तमेतद्वचनमितिचे
त् नांदीमुखानांप्रत्यब्दंकन्याराशिगतेरवौ पौर्णमास्यांतुकर्त्तव्यंश्राद्धंतत्रविजानता इतिविहितेश्राद्धे कन्या
र्कयुक्तपौर्णमास्यानिमित्तत्वेनतत्रकन्यार्कस्यापिनिमित्तत्वात् तत्रभवेतांधुरिलोचनौ यद्वा कन्यार्कसंक्रांतिश्राद्धेभ
वेतां नतुकदाचिन्महालयश्राद्धेइति अत्रैवंप्रतिदिनप्रयोगभेदाद्दक्षिणाभेदः यत्तु हेमाद्रिणाऽभ्यासपक्षे अंतेद
क्षिणादानमित्युक्तं तत्कौर्म्येऽपि प्रतिदिनंप्रयोगभेदाद्दक्षिणायाश्च प्रयोगांगत्वात्प्रत्युक्तं प्रयोगांगतायाअनंतत्व
सुक्तमित्यर्थः एतच्चगुर्विणीपतिनाजीवत्पितृकेणापिपिंडरहितंकार्य्यं तथाचदक्षः मुंडनंपिंडनंचैवप्रेतकर्मचसर्वशः
नजीवत्पितृकःकुर्याद्गुर्विणीपतिरेवचेति जीवत्पितृकस्यत्वष्टकावार्षिकादौवचनाद्भवति नान्यत्रेति एतच्चसंन्यस्त
पितृकादिनाजीवत्पितृकेणापिकार्य्यं वृद्धौतीर्थेचसंन्यस्तेतातेचपतितेसति येभ्यएवपितादद्यात्तेभ्योदद्यात्स्व
यंसुत इतिकात्यायनोक्तेः यत्तुकौंडिन्यः दर्शश्राद्धंगयाश्राद्धंश्राद्धंचापरपाक्षिकं नजीवत्पितृकःकुर्यान्नतत्संन्यस्त

पितृकस्तत् जीवत्पितृकातिरिक्तविषयं पिंडप्रतिषेधेतु छागलेयः पिंडोयत्रनिवर्तेतमघादिषुकथंचन संकल्पंतुतदाकार्य्यंनियमाद्ब्रह्मवादिभिरिति संकल्पश्राद्धं कर्तव्यं अशक्त्यापार्वणंश्राद्धंयथावत्कर्तुमक्षमः पिंडार्घ्यादिविहीनंतुसंकल्प्यश्राद्धमाचरेत् अत्रश्राद्धेतर्पणं पक्षश्राद्धप्रतिदिनं श्राद्धोत्तरंसकृन्महालयेतु परोक्तेकार्य्यं तदुक्तंनारदीये पक्षश्राद्धंयदाकुर्य्यात्तर्पणंतुदिनेदिने सकृन्महालयेचैवपरेऽहनितिलोदकंगर्तेपि पक्षश्राद्धेहिरण्येचअनुव्रज्यातिलोदकमिति प्रयोगपारिजातेऽपि गर्गः कृष्णभाद्रपदेमासिश्राद्धंप्रतिदिनंभवेत् पितृणांप्रत्यहंकार्य्यंनिषिद्धाहेऽपितर्पणं सकृन्महालयोयःस्यादष्टकास्वंतएवहीतिनिषिद्धदिनेऽपिकार्यंतीर्थेतीर्थविशेषेषुकार्य्यंप्रेतेचसर्वदेति स्मृत्यर्थसारोक्तेः तीर्थेतीर्थविशेषेचगयायांप्रेतपक्षके निषिद्धेऽपिदिनेकुर्यात्तर्पणंतिलमिश्रितमितिस्मृतिरत्नावल्यांवचनाच्च एतच्चमलमासेनकार्य्यं तदाहभृगुः वृद्धिश्राद्धंतथासोममग्न्याधानंमहालयं राजाभिषेकंकाम्यंचनकुर्य्याद्भानुलंघितइति हेमाद्रौ नागरखंडेऽपि नभोवाथनभस्योवामलमासोयदाभवेत् सप्तमःपितृपक्षःस्यादन्यत्रैवतुपंचमइति एतच्चपित्रोर्मरणेप्रथमाब्देकृताकृतइति त्रिस्थलीसेतौभट्टाः इदंच नित्यं काम्यं पुत्रानायुस्तथारोग्यमैश्वर्यमतुलंतथा प्राप्नोतिपंचमेदत्त्वाश्राद्धंकामांश्चपुष्कलानितिजाबाल्युक्तेः आषाढ्याः पंचमेपक्षेयः श्राद्धंनकरिष्यति शाकेनापिदरिद्रोपिसोंत्यजत्वमुपैष्यति आसनंशयनंभोज्यंस्पर्शनंभाषणंतथा तेनसार्द्धंकरिष्यंतियेतेपापपरानराः इति नागरखंडोक्तेश्च वृश्चिकेसमतिक्रांते पितरोदेवतैःसह विश्वस्यप्रतिगच्छंतिशापंदत्त्वासुदारुणमितिकार्ष्णाजिनिवचनात् तदतिक्रमेप्रायश्चित्तमुक्तमृग्विधाने दुरोत्रश्वत्थमंत्रंचदशवारंद्विमासयोः महालयंयदान्यूनंतदासंपूर्णमितितदिति द्विमासयोः कन्यातुलयोर्महालयश्राद्धं यदा हीनमित्यर्थः इदंचाश्विनापरपक्षपार्वणं

नित्यंश्राद्धंदेयंदिनेदिनेइतिफलनिरपेक्षश्रवणात्संध्यावंदनवत् सूर्येकन्यांगतेश्राद्धंयोनकुर्याद्दिनेदिने धनं
पुत्राः कुतस्तस्यपितृनिः श्वासपीडनादिति काम्यमपि पार्वणमिदं तदुक्तं वायुपुराणे प्र
तिपद्धनलाभायलब्धंचास्यननश्यति द्वितीयायांतुयः कुर्याद्द्विपदाधिपतिर्भवेत् परार्थिनीतृतीयातुशत्रुघ्नीपा
पनाशिनी श्राद्धंचतुर्थ्यांकुर्वाणः शत्रोःछिद्रंसपश्यति पंचम्यांचैवकुर्वाणः प्राप्नोतिपरमंपदं षष्ठ्यांश्रा
द्धंप्रकुर्वाणोद्विजास्तंपूजयंत्युत कुरुतेयस्तुसप्तम्यांश्राद्धंतुसततंनरः महाशत्रुगणाध्यक्षोवहुवंधुश्चजायते
महासत्त्वमवाप्नोतियोष्टम्यांकुरुतेनरः श्राद्धंनवम्यांकर्त्तव्यमैश्वर्य्यंस्त्रैणमिच्छता कुर्वन्दशम्यांतुनरोब्राह्मींश्रिय
मवाप्नुयात् वेदांश्चावाप्नुयात्सर्वान्विप्राणांकुरुतेतथा एकादश्यांपरंदानमैश्वर्य्यंसंततिंतथा द्वादश्यांजयलाभंच
राज्यमायुः प्रजावसु प्रजावृद्धिंपशून्मेधांस्वातंत्र्यंपुष्टिमुत्तमां दीर्घमायुरथैश्वर्य्यंकुर्वाणस्तुत्रयोदशीं अमा
वास्यांप्रयत्नेनश्राद्धंकुर्याद्विचक्षणः सर्वान्कामानवाप्नोतिस्वर्गंचानंत्यमश्नुते एवंब्रह्मपुराणेऽपि कालाविशेषा
भिधानात् चतुर्दश्यांतुशस्त्रहतानामेवश्राद्धंभवति तथाच ब्रह्मपुराणे जलानशनशस्त्राग्निविषोद्बंधगतां
तथा चतुर्दश्यांभवेत्पूजातृप्त्यर्थमितिनिश्चयः इतिमहालयनिर्णयः अथमहालयपक्षे प्रतिदिनकृत्यानि
तत्रादौ आश्विनकृष्णप्रतिपदायां तिथिपत्वाद्वह्निपूजा महालयश्राद्धंच स्कांदे सेतुखंडे
तस्माच्छुभेकृष्णपक्षेप्रथमायांतिथौतथा श्राद्धंमहालयंकुर्याद्योनरोभक्तिपूर्वकं दशकल्पसहस्राणिपितरोयां
तितृप्ततां आश्विनकृष्णद्वितीया भरणीयुता तृतीयाच कृत्तिकायुतापितृणामतिप्रीतिदा तदुक्तंपृथ्वी
चंद्रोदये वृहस्पतिः नभस्यापरपक्षेतु द्वितीयायादियाम्यभे तृतीयाजाग्नितारााभिःसहिताप्रीतिदापितुरि
ति स्कांदेसेतुखंडे वेदविद्ब्राह्मणोभुंक्तेद्वितीयायांमहालये विंशत्कल्पसहस्राणिपितरोयांतितृप्ततामिति

आश्विनकृष्णतृतीया कृत्तिकायुता महालयश्राद्धेऽतिपुण्यदेति प्रागुक्तं स्कांदे सेतुखंडे ऽपि तृतीयायांतुयोभक्त्याश्राद्धंकुर्यान्महालये तृप्यंतिपितरस्तस्यत्रिंशत्कल्पसहस्रकमिति अस्यामेव हस्तार्कयोगेवृहद्गौरीव्रतं भविष्योत्तरे नारदीयेऽपि अत्रान्यद्वृहतीगौरीव्रतंकन्यागतेरवौ मासिभाद्रपदे कृष्णतृतीयायांचतद्व्रतं भाद्रोऽत्रदर्शांतः अथवृहद्गौरीव्रतपूजा चतुर्भुजांसुवर्णाभांनानालंकारभूषितां हिमेंदुतुहिनाभासांमुक्तामणिविभूषितां पाशांकुशधरांदेवींध्यायेत्सर्वार्थसिद्धिदां कमंडलुधरांसूक्ष्मांपानपात्रंचबिभ्रतीं ध्यानं एहिमातर्विशुद्धेत्वंत्रिगुणेपरमेश्वरि आवाहयामिभक्त्यात्वांप्रसन्नाभवसर्वदा आवाहनं हेमरत्नकृतंदेविआसनंतेविनिर्मितं पाशांकुशधरेदेवीमासनेस्थापयाम्यहं आसनं अक्षमालांकुशधरेवीणापुस्तकधारिणि भक्त्यादत्तंमयातोयंपाद्यार्थंप्रतिगृह्यतां पाद्यं अर्घ्यंददामितेभक्त्याभक्तानामभयंकरे गृहाणत्वं वृहद्गौरिनमस्कारोऽस्तुतेमम अर्घ्यं भक्तानामिष्टदेमातःसर्वालंकारसंयुते आचम्यतांजगन्मातर्वृहद्गौरिनमोऽस्तुते आचमनं सपंचामृतंस्नानं स्नापयामिजगन्मातस्त्वांसतीर्थजलेनवै प्रार्थितासिमयादेविसद्यस्तापविनाशिनी स्नानं वस्त्रंधौतंमयादेविदुगूलंतवनिर्मितं भक्त्यासमर्पितंमातर्गृह्यतांजगदंबिके वस्त्रं अथसिंदूरहरिद्राकुंकुमादिसौभाग्यद्रव्याणिनिवेदयेत् मलयाचलसंभूतंघनसारंमनोहरं गंधंगृहाणदेवित्वंवृहद्गौरिनमोस्तुते गंधं अक्षतानरविंदाक्षिकुंकुमाक्तानखंडितान् गृहाणवरदेमातर्नमस्तेसकलेष्टदे अक्षताः ॥ चंपकादीनिपुष्पाणिभक्त्यानीतानिमेशुभे पूजार्थंगृह्यतांदेविजातिपुन्नागमालती पुष्पं धूपोऽयंगृह्यतांदेविकालागुरुघृतान्वितः आघ्रेयः सर्वदेवानांदेवद्रुमरसोद्भवः धूपं दीपंगृहाणदेवेशित्रैलोक्यतिमिरापहं वह्निनायोजितंमातर्वृहद्गौरिनमोस्तुते दीपं नैवेद्यंगृह्यतांदेविनानारसमनोहरं भक्ष्यभोज्यादिकंस्वादुप्रीयतांपरमेश्वरि नैवेद्यं कर्पूरेलालवंगा

दिनागवल्लीदलैर्युतं पूगीफलयुतंदेवितांवूलंप्रतिगृह्यतां तांबूलं हिरण्यगर्भगर्भस्थं हेमवीजंविभावसोः अनंत
पुण्यफलदमतःशांतिप्रयच्छमे दक्षिणाद्रव्यं क्षेमसंपत्करंदेविसर्वसौभाग्यदायिनि सर्वकार्य्यप्रदेदेविगृहाणा
र्घ्यंनमोस्तुते इत्यर्घ्यं धारयिष्यामिभद्रेत्वांत्वद्भक्त्यात्वत्परायणा आयुर्देहियशोदेहिसौभाग्यंदेहिमेशिवे इ
तिडोरकवंधनं गगनांतरसद्दीपक्षीराब्धिमथनोद्भव भाभासितदिगाभोगरमानुजनमोस्तुते चंद्रायार्घ्यंदान
मिति पक्वान्नफलसंयुक्तंवंशपात्रसदक्षिणं वायनंतेप्रयच्छामिवृहद्गौरिनमोस्तुते इतिवायनम् आहूतासिमयादे
विपूजितासियथाविधि ममसौभाग्यदानाययथेच्छातत्रगम्यतां इतिविसर्जनपूजाविधिः अथकथा भविष्योत्तरे
विजयोवाच अथान्यद्वृहतीगौरीव्रतंवक्ष्यामिकन्यके मासिभाद्रपदेकृष्णेतृतीयायांचतद्व्रतं आनेयद्वृहतींगौरींशा
खामूलफलैः सह निक्षिप्यदेवतावेद्यांतदधः सिकतांशुभां न्यसेच्चंद्रोदयंदृष्ट्वास्नात्वाधौतांवरावृता सखीभिः
सहितासम्यगलंकृत्यप्रपूजयेत् गौरीमावाह्यविधिवत्सिकतामंडलेशुभे गंधपुष्पाक्षतैर्दिव्यैर्धूपैर्दीपैरनेकशः
सर्वोपचारैर्वृहतींपंचपंचभिरर्चयेत् एवंपूज्ययथाशक्त्याकृत्वाचैवप्रदक्षिणां डोरकंवंधयेत्पश्चात्तंतुपंचकनिर्मितं
वध्नामिडोरकंभक्त्यात्वद्भक्तात्वत्परायणा आयुर्देहियशोदेहिसर्वसौभाग्यदायिनि सर्वकामप्रदेदेविगृहाणा
र्घ्यंनमोस्तुते गगनांगनसद्दीपक्षीराब्धिमथनोद्भव भाभासितदिगाभोगरमानुजनमोस्तुते डोरकंप्रथमंवद्ध्वा
चंद्रायार्घ्यंप्रदापयेत् कथामेतांचशृणुयाद्गौर्य्यग्रेतन्मनाःसदा ततोगोधूमचूर्णेनपंचाभिःकुडवैःकृतं पक्वान्नमर्धं
विप्रायदत्त्वाभुंजीतचस्वयं एवंवैपंचवर्षाणिकृत्वाव्रतमनुत्तमं सर्वान्कामानवाप्नोतिनात्रकार्याविचारणा कन्योवाच
केनचादौपुराचीर्णंव्रतंयत्तुत्वयोदितं ईप्सितंकोत्रलेभेवाव्रतस्यास्यप्रभावतः विजयोवाच शृणुध्वमृष
यःसर्वेनैमिषारण्यवासिनः पुराकृतयुगस्यादौसर्वभूतहितैषिणा शंभुनाकथितंगौर्य्यैतद्व्रतंकथयाम्यहं कदाचि

द्दुपविष्टंतंपार्वतीपर्य्यपृच्छत शंभोत्वांप्रष्टुमिच्छामिकरुणाकरशंकर सर्वबाधोपशमनंसर्वकामफलप्रदं व्रता
नांसर्वदानानामुत्तमंब्रूहितत्त्वतः आयुरारोग्यदंदेवपुत्रपौत्रप्रदायकं तद्व्रतंब्रूहिदेवेशयथाहंतववल्लभा ईश्वरउवाच
शृणुदेविपरंगुह्यंव्रतंपरमदुर्ल्लभं पुराभूद्द्वापरस्यांतेपांडोःप्रियवरांगना वर्षषोडशसंपूर्णासंपन्ननवयौवना अ
नपत्यातुसाकुंतीभर्तारमिदमब्रवीत् केनकर्मविपाकेनपुत्रहीनास्मिदुःखिता अनपत्येप्रतीकारमिदानींब्रूहित
त्त्वतः पांडुरुवाच ऋषिशापोस्तिमेभद्रेयतःसोनभविष्यति भर्तुस्तद्वचनंश्रुत्वा। पितृगेहेभ्यगात्स्वयं पितुर्गेहेवर्तमा
नाकुंतीव्यासंददर्शह नमस्कृत्यचतंप्राहकुंतीमुकुलितांजलिः कुंत्युवाच तातमेकथयाशुत्वंपुत्रसंतानदायक
सर्वसंपत्प्रदंनृणांव्रतमेकंमहामुने व्यासउवाच शृणुत्वंवृहतीगौर्य्याव्रतंसंतानदायकं भाद्रकृष्णतृतीयायांनि
शिचंद्रोदयेशुभे स्नानंकृत्वातुविधिवन्मौनंधृत्वाव्रतंचरेत् सर्वसंपत्करंस्त्रीणांधनपुत्रान्नसौख्यकृत् गोभूहिरण्य
दानानांसर्वेषामधिकंश्रुतं पंचवर्षंविधातव्यंततउद्यापनंचरेत् उद्यापनविधानेनसंपूर्णफलमश्नुते अंतेतुकार
येद्भद्रेसौवर्णंवृहतीफलं षडुत्तरचतुर्भिश्चशुभैर्बीजैर्युतंतुतत् देव्याःपुरस्तात्संस्थाप्यपूर्ववत्प्रतिपूजयेत् आचा
र्य्यंपूजयेद्भक्त्याविप्रान्पंचतथैवच सुवासिन्यःपंचपूज्यावस्त्रालंकारभूषणैः कंचुकैश्चैवताटंकैःकंठसूत्रैर्हरिद्रया
वंशपात्राणियुग्मानिसूत्रैःसंवेष्टितानिचसिंदूरंजीरकंचैवसौभाग्यद्रव्यसंयुतं गोधूमपिष्टजातंचवृहतीफलपंचकंवा
यनानिचपंचैवताभ्योदत्त्वातुभोजयेत् अर्घ्यंदत्त्वावायनानिस्वयंभुंजीतवाग्यता तत्फलंधारयेत्कंठेसर्वकामसमृ
द्धये ततःप्रातःसमुत्थायसालंकारासखीजनैः गीतवाद्ययुतानद्यांगौरींतांतुविसर्जयेत् आहूतासिमयादेविपू
जितासिमयाशुभे ममसौभाग्यदानाययथेष्टंगम्यतांत्वया एतद्व्रतप्रभावेणकाचिद्ब्राह्मणकन्यका पतिंसंपूज
यामासनिर्भर्त्स्यंयमकिंकरान् तस्माच्चरत्वंव्रतमेतदाद्यमायुःप्रदंपुत्रसमृद्धिदंवा पुत्रैश्चपौत्रैश्चयुताचपत्या गौरि।

प्रसादाद्भवजीवपुत्रा यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः सभुक्त्वाविपुलान्भोगानंतेशिवपदंव्रजेत् ॥ ४

इतिभविष्योत्तरेबृहद्गौरीव्रतम्

नारदीयेपि इषकृष्णतृतीयायांबृहद्गौरीव्रतंचरेत् पंचवर्षविधानेनपूर्वोक्तमिवनारद आचार्यंपूजयेदंतेविप्रान्पंचधनादिभिः सुवासिनीःपंचपूज्यावस्त्रालंकारचंदनैः कुंचुकैश्चैवताटंकैःकंठसूत्रैर्हरिद्रया वंशपात्राणिपंचैवसूत्रैःसंवेष्टितानिच सिंदूरंजीरकंचैवसौभाग्यद्रव्यसंयुतं गोधूमपिष्टजातंचनवापूपफलादिकं वायनानिचपंचैवताभ्योदद्याच्चभोजयेत् अर्घ्यंदत्त्वावायनानिपश्चाद्भुंजीतवाग्यता, तत्फलंधारयेत्कंठेसर्वकामसमृद्धयेततःप्रातःसमुत्थायसालंकारासखीजनैः गीतवाद्ययुतानद्यांगौरींतांतुविसर्जयेत् आहूतासिमयोदेविपूजितासियथाविधिममसौभाग्यदानाययथेष्टंगम्यतांत्वया एवंकृत्वाव्रतंनारीद्विजदेवीप्रसादतः भुक्त्वाभोगांस्तुदेहांतेगौरीलोकमवाप्नुयादिति अथहस्तर्क्षगतेसूर्ये रविवारप्राप्तहस्तगौरीव्रतं सूतउवाच कुंत्यांचतदपेतायांहस्तिनापुरमुत्तमं याचितायांनरेंद्रैश्चतनयैः पंचभिः सह तस्याः कुशलमान्विच्छन्नाजगामाथमाधवः अभिनंद्यसुखासीनंदेवदेवंजनार्दनं उवाचकुंतीसानंदाह्यप्रगल्भामिदंवचः कुंत्युवाच धन्याऽस्मिकृतकृत्याऽस्मिसनाथाऽस्मिपरंतप साहंसंभाविताह्यस्मित्वयासर्वजगत्पते यदिमेसुप्रसन्नोऽसितदाचक्ष्वव्रतंविभो यंविधायसुखंराज्यंप्राप्नुयांतनयैः सह श्रीकृष्णउवाच शृणुकुंतिप्रवक्ष्यामिव्रतानामुत्तमंव्रतं यत्कृत्वासुखसंतानधनधान्यसमन्विता विधूतदुष्कृतापुण्यासपुत्राराज्यमाप्स्यासि हस्तगौरीव्रतंभद्रेकुरुष्वशुचिमानसा यत्कृत्वासर्वतः संपल्लभतेवांछितंफलम् कुंत्युवाच यत्त्वयोक्तंव्रतंनाथविधानंतस्यकीर्त्तय केनपूर्वंकृतंदेवतन्मेब्रूहिजनार्दन श्रीकृष्णउवाच कैलासशिखरेदेवीहस्तर्क्षेचदिवाकरे दिवाप्रसुप्तागौरीतुहरसान्निधिमागता सासुप्तादेवदेवेशंस्वप्नेशंभुंददर्शह अर्धदेहंवृषारूढस्थमर्धचंद्र

कलाधरं किमिदंतन्ममाचक्ष्वतप्यतेमानसंमम ईश्वरउवाच देविपूर्वंचसुप्ताऽसिहस्तऋक्षगतेरवौ नस्वप्तव्यंदिवात
व्रतस्येदंविहितंफलं शृणुदेवित्वयायेनखंडितोहंविलोकितः त्वयारब्धंव्रतंदेविमदाराधनकाम्यया अपूर्णेऽस्मिन्प्र
सन्नोऽस्मितत्त्वयाचसमुज्झितं अपूर्णव्रतपातेनदृष्टोऽहंतादृशस्त्वया तत्कुरुष्वाधुनादेविहस्तगौरीव्रतंशुभं पार्वत्युवा
च आदिश्यतांव्रतंनाथविधानंचमहेश्वर आरंभोऽस्यकदाकार्य्यःकोविधिः कस्यपूजनं ईश्वरउवाच मंडपस्थाप
नंकुर्यात्सर्वालंकारभूषितं अन्वहंकांचनैः पुष्पैः फलमुक्तासमन्वितैः नैवेद्यैः पंचखाद्यैश्चशृणुयात्प्रत्यहंक
थां दिनेचतुर्दशेप्राप्तेस्थापयेत्प्रतिमांशुभां पक्वान्नैः सुरसैः शुभ्रैः सार्धंसार्धत्रयोदश सार्धत्रयोदशादिनं नैवे
द्यमुपकल्पयेत् फलमूलानिचान्यानितावंतिसमुपाहरेत् पूजयेच्चसुवर्णस्यपुष्पैश्चान्यैःसुगंधिभिः चंदनैर्धूपदी
पैश्चतांबूलैश्चफलादिभिः ध्यायेच्चहृदयेगौरींहरहेरंबसंयुतां दक्षिणांचततोदत्वानत्वादेवींविसर्जयेत् सार्धत्रयो
दशतथादीपिकाश्चोलिकान्विताः सुवासिन्यैस्त्रियै दत्वातावतः स्वयमाहरेत् व्रतंसमाददेद्देवियावद्वर्षंत्र
योदशं स्वर्णभाजनगौर्य्यादिप्रतिवर्षंविसर्जयेत् पूर्वोक्तविधिनापूज्यवासराणित्रयोदश चतुर्दशेऽथदिवसेसं
जातेप्रातरुत्थिता कृत्वोपवासनियमंगजेगौरींप्रकल्पयेत् पक्वान्नंस्वर्णपात्रेषुत्रयोदशाविनिःक्षिपेत् स्त्रीभ्यश्च
कंचुकीर्दद्याद्भोजयित्वाविसर्जयेत् एवंदेविव्रतंकृत्वासर्वान्कामानवाप्नुयात् अशक्तौतु तदाकार्य्या प्रतिमामृत्तिका
मयी पात्राणिवैणवान्येवपीतपुष्पाणिचैवहि श्रीकृष्णउवाच ततश्चक्रेव्रतंगौरीप्राप्तासावांछितंफलं त्वमप्येतद्व्रतं
कुंतिकुरुश्रद्धासमन्विता अथभक्त्याव्रतंकुंतीसविधानमथाकरोत् गांधारीचापितच्छ्रुत्वाव्रतंचक्रेयथाविधि तुष्टा
साभक्तिभावेनहस्तगौरीवचोऽब्रवीत् गौर्य्युवाच कुंतितेपरितुष्टास्मिवरंवरयसुव्रते कुंत्युवाच देहिमेसर्वसंपत्तिंसर्व
सौख्यंचसौहृदं प्रयच्छममपुत्राणांमहद्राज्यमनामयं व्रतमेतत्तुयाकुर्य्यात्तवलोकमवाप्स्यति नदारिद्र्यंनवैधव्यंन

शोकोनापिदुष्कृतंकृच्छ्रंनापत्कृतंदेविकदाचित्संभविष्यति तथेत्युक्त्वाततोगौरीतत्रैवांतरधीयत एतद्व्रतंसकलदुःखविनाशहेतुंसौभाग्यराज्यफलभाजनमाचरंति यायोषितःसुखमनंतमिहाऽपिराज्यंगौरीपतिव्रतरतास्तुततोलभंते इतिभविष्योत्तरेहस्तगौरीव्रतम् ॥

आश्विनकृष्णचतुर्थ्यांमासचतुर्थी गणेशव्रतंमहालयश्राद्धं स्कांदे सेतुखंडे चतुर्थ्यांतुतिथौमर्त्योयस्तुकुर्यान्महालयं पितरःकल्पसाहस्रंचत्वारिंशत्प्रहर्षिताः वहून्पुत्रान्प्रदास्यंतिश्राद्धकर्मणितर्पिताः आश्विनकृष्णपंचम्यांमहालयश्राद्धंपंचम्यांतुतिथौमर्त्योयः करोतिमहालयं पंचाशत्कल्पसाहस्रंतृप्यंतिपितरस्तदा संततिंचाप्यविच्छिन्नांतस्मैदास्यंतितर्पिताः पार्वतीतुप्रसन्नास्यान्महदैश्वर्यदायिनी एनामधिकृत्यदेवीपुराणे तत्रैवकारयेद्देवींपितृरूपांमहोदयां कन्यास्थेचरवौवत्सपूजनीयायथाविधि भौजंगींतिथिमासाद्ययावच्चंद्रार्कसंगमं तत्रापिमहतीपूजाकर्त्तव्यापितृदैवते ऋक्षेपिंडप्रदानंतुज्येष्टपुत्रीविवर्जयेत् भौजंगीतिथिः पंचमी तेनात्रापिपंचम्यादयः प्रशस्ताइति पितृदैवतमत्रभरणीनक्षत्रं मघाच अत्रपिंडप्रदाननिषेधविषयं मघाविषयेवक्ष्यते आश्विनकृष्णषष्ठ्यांमहालयश्राद्धं स्कंदपुराणेसेतुखंडे षष्ठ्यांतिथौतुयोमर्त्यः श्राद्धंकुर्यान्महालये षष्टिवर्षसहस्राणिपितरोयांतितृप्ततां पुत्रानपिप्रदास्यंतिश्रियंचाविपुलांतथा अस्यामेवरोहिणीव्यतीपातभौमवारयुक्तायां कपिलषष्ठीव्रतं तदुक्तं वाराहे नभस्यकृष्णपक्षेतुरोहिणीपातभूसुतैः युक्ताषष्ठिपुराणज्ञैः कपिलासाप्रकीर्त्तिता नभस्योभाद्रमासोऽत्रदर्शांतः व्रतोपवासनियमैर्भास्करंतत्रपूजयेत् कपिलांतुद्विजाग्र्यायदत्त्वाक्रतुफलंलभेत् पुराणसमुच्चये हस्तार्कयोगेनातिशस्तोक्ता भाद्रेमासिसितेपक्षेभानौचैवकरेस्थिते पातेकुजेचरोहिण्यांसाषष्ठीकपिलास्मृता तदुक्तं निर्णयामृते हेमाद्रौ स्कांदे संयोगेतुचतुर्णांहिनिर्दिष्टापरमेष्ठिनेति तत्रैवोक्तेः

अत्रविशेषेहेमाद्रौ स्कांदे देवदारुतथोशीरंकुंकुमैलामनःशिलां पत्रकंपद्मकंयष्टीमधुगव्येनपेषयेत् क्षीरेणालोडयकल्केनस्नानंकुर्यात्समंत्रकं तत्रमंत्रः आपस्त्वमसिदेवेशज्योतिषांपतिरेवच पापंशमयमेदेववाङ्मनः कायकर्मजं पंचगव्यकृतस्नानः पंचभंगैस्तुमार्जयेत् पंचभंगैः पंचपल्लवैः तथा तत्त्वैर्नानाविधैर्युक्तंसौवर्णंकारयेद्रविं शक्तितस्तुपलादूर्ध्वंतदूर्ध्वंकर्षतोपिवा सौवर्णमरुणंकुर्य्यान्नौकांचैवतथारथं अल्पवित्तो ऽ पियः काश्चित्सो ऽ पिकुर्य्यादिमंविधिं प्रभासखंडेच स्थापयेदव्रणंकुंभंचंदनोदकपूरितं रक्तवस्त्रयुगच्छन्नंताम्रपात्रेणसंयुतं तथारौक्मपलस्यैवएकचक्रः सुचित्रितः सौवर्णपलसंयुक्तांमूर्तिंसूर्यस्यकारयेत् ततः सूर्यंचकपिलांपूजयेदुपचारकैः दिव्यमूर्त्तिर्लोकचक्षुर्द्वादशात्मादिवाकरः कपिलासहितोदेवोममभक्तिंप्रयच्छतु यस्मात्त्वंकपिलेपुण्यासर्वलोकस्यपावनी प्रदत्तासहसूर्येणममभक्तिप्रदाभवेति अथकथा हेमाद्रौ स्कांदे विक्रांतउवाच रूपसंपदमारोग्यंसंततिंचापिपुष्कलां प्राप्नुवंतिनरायेनानियतंतद्वदस्वमे अगस्त्यउवाच साधुसाधुमहाप्राज्ञयत्पृष्टोहंत्वयानघ तत्सर्वंकथयिष्यामितवश्रेयोभविष्यति शृणुपार्थिववक्ष्यामिस्वर्गमोक्षप्रदंनृणां यच्चगुप्तंपुराराजन्ब्रह्मोपेंद्रादिदैवतैः असुराणांचसर्वेषांराक्षसानांतथैवच शंकरेणपुराचैवषण्मुखायनिवेदितं षण्मुखेनममाख्यातंमहापातकनाशनं यच्छ्रुत्वाब्रह्महागोघ्नः सुरापोगुरुतल्पगः आगारदाहीगरदः सर्वपापरतोपिवा मुच्यतेसर्वपापेभ्यः स्वर्गलोकंचगच्छति तच्चपुण्यंपवित्रंचनृणांदुष्कृतनाशनं उपकारायलोकानांतथातवनृपोत्तम शृणुभूपमहापुण्यंषष्ठीमाहात्म्यमुत्तमं प्रौष्ठपद्यासितेपक्षेषष्ठीभौमेनसंयुता। व्यतीपातेनरोहिण्या साषष्ठीकपिलामता द्वितीयातुमहापुण्यादुर्लभाव्रतिनांक्वचित् द्वितीयाकपिलाषष्ठीत्यर्थः षष्ठीसंवत्सरस्यांतेसापुनस्तेनसंयुता चैत्रवैशाखयोर्मध्येसितपक्षेशुभोदये वैशा

खेऽपिचराजेंद्रद्वारावत्यांपुरास्मृता तस्यांचैवहुतंदत्तंयत्किंचित्प्रतिपादितं तस्यसर्वस्यपुण्यस्यसंख्यावक्तुंनशक्यते यस्मिन्कालेभवेदेतैर्गुणैः षष्ठीयुतातदा पंचम्यामेकभक्तंचकुर्यात्तत्रविचक्षणः षष्ठ्यांप्रातः समुत्थायकृत्वादौदंतधावनं जलपूर्णांजलिंकृत्वाइमंमंत्रमुदीरयेत् निराहारोद्यदेवेशत्वद्भक्तस्त्वत्परायणः पूजयिष्याम्यहंभक्त्याशरणंभवभास्कर अर्घ्यंदत्त्वेतिसंकल्पंकृत्वायत्नाच्छुचिः स्थितः स्नानंकृत्वाप्रयत्नेननद्यांतीर्थोदकेनदे तडागेदीर्घिकायांचागृहेवानियतात्मवान् देवदारुतथोशीरंकुंकुमैलामनःशिलां पद्मकंपत्रकंयष्टिमधुगव्येनपेषयेत् क्षीरेणालोडयकल्केनकुर्य्यात्स्नानंसमंत्रकंः आपस्त्वमसिदेवेशज्योतिषांपतिरेवच पापंनाशयमेदेवमनोवाक्कायकर्मजं पंचगव्यकृतस्नानः पंचभंगैस्तुमार्जयेत् पंचभंगैः पंचपल्लवैः आनयेन्मृत्तिकांशुद्धांस्नानार्थंचैवयत्नतः मृत्तिकेब्रह्मदत्तासिकश्यपेनाभिमंत्रिता पवित्रकुरुमांनित्यंसर्वपापात्समुद्धर मंत्रेणानेनवरुणंपूजयेद्भक्तिमान्नरः पाशाग्रहस्तवरुणसर्ववागीश्वरप्रभो अद्याहंप्रार्थयामित्वांपूतंकुरुसुरेश्वर आदित्योभास्करोभानूरविःसूर्योदिवाकरः प्रभाकरोसित्वंवीरोदेवःसर्वेश्वरोहरिः गोमयेनोपलिप्तायां , भूम्यांवैकुंकुमेनतु मंडलंसर्वतोभद्रमालिखेद्बुद्धिमान्नरः तत्रमध्येलिखेत्पद्ममष्टपत्रंसकर्णिकं पूर्वपत्रेन्यसेत्सूर्यमाग्नेय्यांभास्करंन्यसेत् सुवर्णरेतसंयाम्येनैर्ऋत्येविन्यसेद्रविं आदित्यंवारुणेपत्रेवायव्येचदिवाकरं सौम्येप्रभाकरंतत्रसूर्यमीशानपत्रके तीव्ररश्मिधरंचैवब्रह्माणंचैवविन्यसेत् आधाररूपिणंदेवंमध्येवैचारुणंन्यसेत् सहस्ररश्मिंसूर्यंचस्थूलसूक्ष्मगुणान्वितं सर्वगंसर्वरूपंचमध्येभास्करमेवच सप्ताश्वरथमारूढंपद्महस्तंदिवाकरं अक्षसूत्रधनुष्पाणिंकुंडलैर्मुकुटेनच रत्नैर्नानाविधैर्युक्तंसौवर्णंतत्रकारयेत् शक्तितस्तुपलादूर्ध्वंतदूर्ध्वंकर्षतोपिवा सौवर्णमरुणंकृत्वानौकांचैवतथापरां सप्ताश्वैर्भूषितंकृत्वारथंतस्याग्रतःस्थितं अरुणंविनतापुत्रंगृहीताश्वमनूरुकं

एवंरूपंरथंकृत्वापद्मस्योपरिविन्यसेत्   तस्योपरिन्यसेद्देवंरक्तवस्त्रविभूषितं रक्तचंदनमाल्यादिमंडितंचातिशोभितं   अग्रतःसारथिंकृत्वापूजयेदरुणंशुचिः   रक्तपुष्पैःसुगंधैश्चतथान्यैरपिशक्तितः   विनतातनयोदेवःकर्मसाक्षीतमोनुदः   सप्ताश्वःसप्तरज्जुश्चअरुणोमेप्रसीदतु   मंत्रेणानेनसंपूज्यसारथिंतदनंतरं   देवस्यचासनंकल्प्यप्रभूतादिकपंचकं   प्रभूतविमलंसारमाराध्यपरमंशुभं   दीप्तादिशक्तिभिश्चैवततोभानुंप्रपूजयेत्   दीप्तासूक्ष्मातथाभद्राविभूतिर्विमलानना   अमोघावैद्युताचांतेनवमीसर्वतोमुखी   अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा   यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः   शिखायांभास्करंन्यस्यललाटेसूर्यमेवच   चक्षुर्मध्येन्यसेद्भानुमुखेतत्ररविंन्यसेत्   कंठेन्यसेद्भानुमंतंपद्मगर्भंहिहस्तयोः   तिमिरक्षयकृद्देवंस्तनयोरेवविन्यसेत्   उग्ररूपंगुह्यदेशेतेजोरूपंतुजंघयोः   पादयोःसर्वरूपंतुसूक्ष्मस्थूलगुणान्वितं   एवंयथोक्तंविन्यस्यपात्रंगृह्यततोर्चयेत्   करवीरार्ककुसुमैरक्तचंदनपंकजैः   पुष्पैःसुगंधैर्धूपैश्चकुंकुमैरुपशोभितं   मार्तंडंभानुमादित्यंभास्करंतपनंरविं   हंसंदिवाकरंचैवभास्करंहरिमेवच   सूर्यंचद्वादशात्मानंपूजयेच्चप्रयत्नतः   जानुभ्यामवनींनत्वासूर्यायार्घ्यंनिवेदयेत्   वेदगर्भनमस्तुभ्यंदेवगर्भनमोस्तुते   अव्यक्तमूर्त्तयेतुभ्यमर्घ्यंगृह्णनमोस्तुते   ब्रह्ममूर्त्तिधरस्त्वंच   चतुर्वक्त्रसनातन   सृष्टिस्थितौसंस्थितायगृहाणार्घ्यंनमोस्तुते   विष्णुरूपधरोदेवःपीतवस्त्रश्चतुर्भुजः   प्रभवःसर्वदेवानामर्घ्यंगृह्णनमोस्तुते   कालात्मासर्वभूतात्मावेदात्मासर्वतोमुखः   जन्ममृत्युजराशोकसंसारभयनाशनः   दारिद्र्यव्यसनध्वंसीश्रीमान्देवोदिवाकरः   सुवर्णःस्फटिकोभानुःस्वर्णरेतादिवाकरः   हरिदश्वांशुमालीचअर्घ्यंगृह्णनमोस्तुते   चतुर्भिर्मूर्त्तिभिः   संस्थाअष्टाभिःपरिगीयते   सामध्वनिस्तपोयज्ञअर्घ्यंगृह्णनमोस्तुते   अथगंधंचपुष्पंचतथाधूपप्रदीपकं   नैवेद्यंचयथाशक्त्याप्रार्थयेत्सूर्यदेवतां   अग्निर्मीलेनमस्तुभ्यंनमस्तेजातवेदसे   इषेचैवनमस्तुभ्यमग्नेचैवनमोस्तुते

व्र०र०
आश्वि०
॥९॥

शक्नोदेवीनमस्तुभ्यंजगच्छत्रनमोनमः   आत्मरूपिन्नमस्तुभ्यंविश्वमूर्त्तेनमोस्तुते   त्वंब्रह्मात्वंचवौविष्णु
स्त्वंधातात्वंहुताशनः   मुक्तिकाममभीप्सामिप्रार्थयामिसुरेश्वर   इतिमंत्रंसमुच्चार्य्यनमस्कुर्वीतभास्करं
संवर्च्चसेतिपाणिभ्यांतोयेनविसृजेन्मुखं   हंसःशुचिषदित्यृचासूर्यस्यैवावलोकनं   उदुत्यंचित्रमित्येतत्सूक्तंसू
र्याग्रतोजपेत्   प्रशस्तेचैवकोणेचफलकंचैवकारयेत्   प्रथमेस्तेशैवकोणइतिकौस्तुभेपाठः   अस्तप्रारंभसमये
ऐशान्यामितितदर्थः   फलैःपुष्पैरक्षतैश्चभक्ष्यैर्नानाविधैरपि   शय्यांतत्रचदेवस्यशुभेदेशेप्रकल्पयेत्   षड्धा
न्यंषट्संदेवंरौप्यंचैवमहाप्रभुं   पुरुषंखड्गहस्तंचकारयेच्चैववुद्धिमान्   वस्त्रयुग्मेनसंछन्नंलवणोपरिवर्त्तयेत्
अनेनैवतुमंत्रेणस्नानमभ्यर्च्चनंततः   नमस्तेक्रोधरूपायखड्गहस्तजिघांसवे   जिघांसुकामंत्वांदृष्ट्वादुद्रुवुः स
र्वदेवताः   त्वयाऽव्याप्तंमेरुपृष्ठंचंद्रभास्करसुप्रभ   अतस्त्वांपूजयिष्यामिअर्घ्यंगृह्णनमोस्तुते   क्षपयित्वातु
तांरात्रिंगीतवादित्रनिःस्वनैः   ततस्त्वभ्युदितेसूर्येहोमंकुर्यात्स्वशक्तितः   पूजयेत्तत्रशक्त्याचविप्रांश्चाविधिव
द्गुरुं   होमोर्कस्यसमिद्भिश्चघृतमिश्रैस्तिलैस्तथा   समिद्धेचरुकंचैवघृतंचजुहुयाद्द्विजः   आकृष्णेनेतिमंत्रेणशतम
ष्टोत्तरंक्रमात्   होमोऽव्याहृतिभिर्वाथस्विष्टकृत्तदनंतरं   कपिलांपूजयेद्देवींसवत्सांपापनाशिनीं   वस्त्रयुग्मांसघं
टांचस्वर्णश्रृंगविभूषितां   सौवर्णास्यांरौप्यखुरींकांस्यदोहनकान्वितां   मंत्रेणानेनतांदद्याद्ब्राह्मणायचशक्तितः मं
त्रेणेतितृतीयांतस्यपूजयेदित्यनेनान्वयः   कपिलेसर्वदेवानांपूजनीयासिरोहिणी   सर्वतीर्थमयीयस्मादतःशां
तिंप्रयच्छमे   यालक्ष्मीः   सर्वदेवानांयाचदेवेष्ववस्थिता   धेनुरूपेणसादेवीममशांतिंप्रयच्छतु   देहस्थाया
चरुद्राणांशंकरस्यचयाप्रिया   धेनुरूपेणसादेवीममपापंव्यपोहतु   विष्णोर्वक्षसियालक्ष्मीः   स्वाहाचैवविभावसौ
चंद्रार्कानलशक्तिर्याधेनुरूपास्तुसाश्रिये   चतुर्मुखस्ययालक्ष्मीर्यालक्ष्मीर्धनदस्यच   लक्ष्मीर्यालोकपालानांसा

धेनुर्वरदास्तुमे स्वधात्वंपितृमुख्याणांस्वाहायज्ञभुजामपि वषट्नाम्नोच्यतेलोकेसाधेनुस्तुष्टिदास्तुमे गावोममाग्रतः संतुगावोमेसंतुपृष्ठतः गावोमेहृदयेसंतुगवांमध्येवसाम्यहं इतिगोपूजामंत्रः गावः स्पृष्ट्वानमस्कृत्ययोवैकुर्यात्प्रदक्षिणां प्रदक्षिणीकृतातेनसप्तद्वीपावसुंधरा नमस्तेकपिलेदेविसर्वपापप्रणाशिनि संसारार्णवमग्नंमांगोमातस्त्रातुमर्हसि गोदानमंत्रः हिरण्यगर्भगर्भस्थंहेमवीजंविभावसोः अनंतपुण्यफलदमतः शांतिंप्रयच्छमे रक्तवस्त्रयुगंयस्मादादित्यस्यतुवल्लभं प्रदानादस्यमेदेवोभास्करोवरदोस्तुमे सुवर्णवस्त्रयुग्मंचपरिधानंचकारयेत् एभिः प्रकारैः संयुक्तांदद्याद्धेनुंद्विजातये भानोः प्रदक्षिणांदद्यान्मंत्रेणानेनयत्नतः भास्करोविधितोजातोद्रव्यस्थोभास्करः स्वयं भास्करःस्वःप्रदाताचतेनवैभास्करोमत इतिदानमंत्रः भास्करः प्रतिगृह्णातिभास्करोवैददातिच भास्करस्तारकोभूम्यांभास्करायनमोनम इतिप्रतिग्रहमंत्रः ब्राह्मणान्भोजयेत्पश्चात्पायसेनगुडेनच शक्त्याचदक्षिणांदद्यात्तेभ्यश्चैवविशेषतः अल्पवित्तोऽपियः कश्चित्सोऽपिकुर्य्यादिमंविधिं आत्मशक्त्यनुसारेणसोपितत्फलमाप्नुयात् आचार्यस्यततोभक्त्यासर्वंपाणौविनिःक्षिपेत् गोभूहिरण्यवासांसिग्राहयेल्लवणांतिलाः एतत्सर्वंप्रदत्त्वाच कपिलांप्रार्थयेत्ततः कपिले पुण्यकर्मासिनिष्पापेपुण्यकर्मिणि मांसमुद्धरदानंचददतोह्यभयंकुरु दिविवादित्रशब्दैश्चसेव्यसेकपिलेसदा तथा विद्याधराःसिद्धाभूतानागगणाग्रहाः कपिलारोमसंख्यातास्तत्पदेवाप्रतिष्ठिताः पुष्पवृष्टिंप्रमुचंतिनित्यमाकाशमास्थिताः ब्रह्मणोत्पादितादेवीअग्निकुंडात्समुद्भवा नमस्तेकपिलेपुण्येसर्वदेवनमस्कृते जयनित्यंमहासत्वे सर्वतीर्थादिमंगले दातारंस्वजनोपेतंब्रह्मलोकंनयस्वमां ततःप्रदक्षिणंकृत्वानत्वाब्राह्मणपुंगवान् आशीर्वादान्वदयुस्तेपुत्रपौत्रधनागमान् आरोग्यंरूपसौभाग्यंसर्वदुःखविवर्जितः अंतेगोलोकमासाद्यचिरायुःसुखभागभवेत्

यदा स्वर्गात्प्रपततिराजाभवतिधार्मिकः सप्तद्वीपवर्ती भुंक्तेभुक्काराज्यमकंटकम् अहोव्रतंमहत्पुण्यंसर्वदुःखविना
शनं अतः परंप्रवक्ष्यामिदानस्यफलमुत्तमम् यथोवदमयेपात्रेसद्वृत्तेचाक्षयंभवेत् तथासर्वव्रतेश्रेष्ठमिदम
ग्र्यूमहाफलम् उद्धरिष्यतिदातारंनूनमक्षयमव्ययम् एवंभूतगणाः सर्वेदेवसंघाः प्रहर्षिताः
प्राप्तमोदाःप्रव्रजंतिपुण्येस्मिन्दिवसागमे पात्रभूतायऋषयेश्रोत्रियायकुटुंबिने एवंयःकपिलांदद्य
द्विधिदृष्टेनकर्मणा सयातिपरमंस्थानंयावन्नच्यवतेपुनः तत्रैवस्कांदे प्रभासखंडे विशेषः उ
पलिप्तेशुभेदेशेकुशाक्षतविभूषिते स्थापयेदव्रणंकुंभंचंदनोदकपूरितं पंचरत्नसमायुक्तंदूर्वापुष्पाक्षतान्वितं
रक्तवस्त्रयुगाच्छन्नंताम्रपात्रेणसंयुतं रथोरौप्यमयश्चैवचतुष्कःसुविचित्रितः सौवर्णपलसंयुक्तांमूर्त्तिंसूर्यस्यका
रयेत् कुंभस्योपरिसंस्थाप्यगंधैःपुष्पैःसमर्चयेत् आदित्यंपूजयेद्देवंनामाभिःस्वैःप्रचोदितैः आदित्यभास्क
ररवेभानोसूर्यदिवाकर प्रभाकरनमस्तुभ्यंसंसारान्मांसमुद्धर भुक्तिमुक्तिप्रदोयस्मात्तस्माच्छांतिंप्रयच्छमे
प्रार्थनामंत्रः नमोनमस्तेवरदऋक्सामयजुषांपते नमोस्तुविश्वरूपायविश्वपात्रनमोनमः एवंसंपूज्यवि
धिवद्देवदेवंदिवाकरं पूजयेत्कपिलांधेनुंवस्त्रमाल्यानुलेपनैः तत्र दानमंत्रः विश्वमूर्त्तिर्जगच्चक्षुर्द्वादशात्मा
दिवाकरः कपिलासहितोदेवोमममुक्तिंप्रयच्छतु यस्मात्त्वंकपिलेपुण्यासर्वलोकस्यपावनी प्रदत्तासहसू
र्येणमममुक्तिप्रदाभव इतिहेमाद्रौ स्कांदे कपिलाषष्ठीव्रतं अथास्याःप्रयोगः कपिलाषष्ठीव्रतदिनात्पूर्वेद्युः
पंचम्यामेकभक्तंकृत्वा षष्ठ्यांप्रातर्दंतधावनं कृत्वा जलपूर्णमंजलिंकृत्वा निराहारोद्यदेवेश त्वद्भक्तस्त्वत्प
रायणः पूजयिष्यामित्वांभक्त्याशरणंभवभास्कर इत्यर्घ्यंदत्त्वाप्रणम्य नद्यादौगत्वा तत्र देवदारु उशीरकुं
कुम मनःशिला पद्मपत्रं यष्टीमधुकं युगपद्द्रव्याणांपेषणं कृत्वा क्षीरेणालोडयतेनकल्केनस्नानंकुर्यात्

तत्रःमंत्रः आपस्त्वमसिदेवेशज्योतिषांपतिरेवच पापेनाशयमेदेवमनोवाक्कायकर्मजं ततःपंचगव्यस्नानम् ततःपंचपल्लवैर्मार्ज्जनंकृत्वा विशुद्धांमृत्तिकांगृहीत्वा स्नायात् तत्रमंत्रः मृत्तिकेब्रह्मपूतासिकश्यपेनाभिमंत्रिता पवित्रंकुरुमांनित्यंसर्वपापात्समुद्धर ततोवरुणपूजामंत्रः पाशाग्रहस्त्वंवरुणसर्ववागीश्वरप्रभो अर्घ्याहंप्रार्थयामित्वांपूतंकुरुसुरेश्वरततःस्नात्वाभास्करंप्रणमेत् आदित्योभास्करोभानूरविःसूर्य्योदिवाकरः प्रभाकरोमितोवीरोदेवःसर्वेश्वरोहरिः ततोगृहमागत्य तिथ्यादिसंकीर्त्य ममाशेषपापक्षयपूर्वकरूपसंपदारोग्यविपुलसंतति स्वर्गलोकप्राप्तिद्वारा सर्वाभासकसर्वतेजोमयश्रीसूर्य्यनारायणप्रीत्यर्थं सोद्यापनं कपिलाषष्ठीव्रतंकरिष्ये ततःपुण्याहवाचनादि कृत्वा ततोवृताचार्यः स्वयंगोमयोपलिप्तायां भूमौ कुंकुमेनाष्टदलंपद्मंविधाय तदुपरिसर्वतोभद्रेकलशोपरिरक्तवस्त्रेष्टपत्रंसकर्णिकंपद्मंकृत्वा तत्रपूर्वादिक्रमेण देवताआवाहयेत् सूर्य्यं भास्करं भानुं सुवर्णरेतसं रविं आदित्यं दिवाकरं प्रभाकरं तीव्ररश्मिधरंमध्ये आधाररूपिणंच न्यसेत् तदुपरिसप्ताश्वभूषितंरथं तस्याग्रतःसौवर्णमरुणं सारथिंकृत्वा रक्तपुष्पैःसुगंधैश्चपूजयेत्तत्रमंत्रतः विनतातनयोदेवःकर्म्मसाक्षीसुरेश्वरः सप्ताश्वःसप्तरज्जुश्चसोरुणोभिप्रसीदतु एवमरुणं संपूज्य रथोपरिसूर्य्यंप्रतिमां आकृष्णेनेतिमंत्रेणावाह्य परितोदीप्तादिशक्तीर्न्यसेत् ताश्च दीप्ता सूक्ष्मा जया भद्रा प्रभा विमलानना अमोघा वैद्युता मध्येसर्वतोमुखींचन्यसेत् ध्यात्वा स्नानंपाद्यं ततःकरवीरार्कपुष्पाणि रक्तचंदनम् सुगंधम् रक्तपुष्पं कुंकुमयुतंपात्रेणादाय जानुभ्यामवनींगत्वा अर्घ्यं निवेदयेत् मंत्राः वेदगर्भनमस्तेस्तुदेवगर्भनमोस्तुते अव्यक्तमूर्त्तयेतुभ्यमर्घ्यंगृह्णनमोस्तुते ब्रह्ममूर्त्तिधरस्त्वंचचतुर्वक्त्रसनातन सृष्टिस्थितौसंस्थितायअर्घ्यंगृह्णनमोस्तुते विष्णुरूपधरोदेवःपंचवक्त्रश्चतुर्भुजः प्रभुस्त्वंसर्वदेवानामर्घ्यंगृह्णनमो

ऽस्तुते कालात्मासर्वभूतात्मावेदात्मासर्वतोमुखः जन्ममृत्युजराव्याधिसंसारभयनाशनः दारिद्र्यव्यसनध्वंसीश्रीमान्देवोदिवाकरः हरिदश्वोंशुमालीचअर्घ्यंगृहाणनमोऽस्तुते चतुर्भिर्मूर्त्तिभिःसंख्याअष्टभिःपरिगीयते सामध्वनिस्तपोज्ञेय अर्घ्यंगृहाणनमोऽस्तुते ततःपुष्पपूजांतेऽगपूजांकुर्यात् भास्करायनमःशिखांपूजयामि सूर्य्यायनमः ललाटंपूजयामि भानवेनमःचक्षुषीपूजयामि रवयेनमःमुखंपूजयामि भानुमतेनमःकंठंपूजयामि पद्मगर्भायनमःहस्तौपूजयामि तिमिरक्षयकृतेनमःस्तनौपूजयामि जातवेदसेनमः नाभिंपूजयामि भानवेनमः कटिंपूजयामि उग्ररूपायनमःगुह्यंपूजयामि तेजोरूपायनमःजंघेपूजयामि स्थूलसूक्ष्मरूपायनमःपादौपूजयामि एवंपूजांसमाप्यप्रार्थयेत् अग्निमीलेनमस्तुभ्यंनमस्तेजातवेदसे इषेत्वोर्ज्जेनमस्तुभ्यमग्नेचैवनमोनमः आत्मरूपिन्नमस्तुभ्यंविश्वमूर्त्तेनमोनमः त्वंब्रह्मात्वंचवैविष्णुस्त्वंधातात्वंहुताशनः मुक्तिकाममभीप्सामिप्रार्थयामिसुरेश्वरेतिनमस्कारः ततःसुवर्चसेतिमंत्रेण पाणिभ्यांतोयेनमुखंसंपूज्य हंसः शुचिषादित्यृचासूर्यमालोक्य उदुत्यंचित्रंदेवानामितिसूक्तंदेवाग्रतोजपेत् ततःपूर्वोक्तफलपुष्पाक्षतानां नानाविधैर्भक्ष्यैः फलकं कृत्वा तत्र शुभदेशेशय्यांप्रकल्पयेत् ततोलवणाचलोपरिरौप्यमयंखड्गंवस्त्रयुगच्छन्नं संस्थाप्यपूजयेत् तत्रमंत्रः नमस्तेक्रोधरूपायखड्गहस्तजिघांसवे जिघांसुकामंत्वांदृष्ट्वादुद्रुवुःसर्वदेवताः त्वयाव्याप्तंमेरुपृष्ठंचंद्रभास्करसुप्रभअतस्त्वांपूजयिष्यामिअर्घ्यंगृहाणनमोऽस्तुते ततस्तांरात्रिंकथादिभिरतिवाह्य अभ्युदितेसूर्य्येपुनःस्नात्वा देवंसंपूज्य अग्निंप्रतिष्ठाप्य अन्वादध्यात् तत्र प्रधानंसूर्य्यं अर्कसमिद्भिः घृताक्ततिलैःसिद्धचरुणा घृतेनच प्रतिद्रव्यं अष्टोत्तराष्टाविंशतिसंख्याकाभिः आकृष्णेनेतिमंत्रेण व्याहृतिभिर्वापीठावरणादिदेवता ब्रह्मादिदेवताश्चैकैकयाहुत्यायक्ष्ये ततःस्विष्टकृतं एवंहोमंसमाप्य ततःसर्वोपस्करसहितां कपिलां गामुक्तप्रकारेण

संपूज्यप्रार्थयेत् कपिलेसर्वदेवानांपूजनीयासिरोहिणी सर्वतीर्थमयीयस्मादतःशांतिंप्रयच्छमे ततआचार्य्यपूजनंकृत्वा तस्य हस्तेगोभूहिरण्यवासोव्रीहिलवणतिलान्दत्वा कपिलांप्रार्थयेत् कपिलेपुण्यजन्मासिनिष्पापेपुण्यकर्मिणि मांसमुद्धरदीनंचददतोह्यभयंकुरु ब्रह्मणोत्पादितादेवीअग्निकुंडात्समुद्भवा नमस्तेकपिलेपुण्येसर्वदेवनमस्कृते जयनित्यंमहासत्त्वेसर्वतीर्थादिसंगमे दातारंस्वजनोपेतंब्रह्मलोकंनयाशुमां ततःप्रदक्षिणंकृत्वा आचार्य्यहस्तेसोपस्करदक्षिणांगां पीठंच दत्वा प्रार्थयेत् दिव्यमूर्त्तिर्जगच्चक्षुर्द्वादशात्मादिवाकरः कपिलासहितोदेवोमममुक्तिंप्रयच्छतु यस्मात्त्वंकपिलेपुण्येसर्वलोकस्यपावनि प्रदत्तासहसूर्येणमममुक्तिप्रदाभवेति ततोन्यानपिब्राह्मणान्संपूज्यान्नादिभिःसंतर्प्याशिषोगृहीत्वा स्वयंससुहृदोभुंजीतइत्युद्यापनकौमुद्यां सोद्यापनंकपिलाषष्ठीव्रतं इयंषष्ठीतत्पुरुषकल्पादिरितिकल्पादिनिर्णये प्रागुक्तं अथाश्विनकृष्णसप्तम्यांतिथिपत्वेनसूर्यपूजा महालयश्राद्धंचकार्य्यं स्कांदेसेतुखंडे सप्तम्यांयोनरोभक्त्याश्राद्धंकुर्य्यान्महालये संततिःकल्पसाहस्रंपितरोयांतितृप्ततां संततिचाप्यविच्छिन्नांसंपदांविपुलांतथा पुत्रानपिप्रदास्यंतितुष्टाःपितृगणास्तदा आश्विनकृष्णाष्टम्यामाश्वलायनेनमाघ्यावर्षसंज्ञकंश्राद्धमुक्तं एतेनमाघ्यावर्षप्रौष्ठपद्याअपरपक्षइति इदंचसप्तम्यादित्रिष्वप्यहस्सुकार्य्यंइतिनारायणवृत्तौ हरदत्तस्तु मघायुक्तवर्षासुभवंत्रयोदशीश्राद्धमितिव्याचख्यौ पृथ्वीचंद्रोदयेत्वस्यामेवाष्टम्यांश्राद्धंगयातुल्यफलं तथाचोक्तं ब्रह्मांडे आषाढ्याःपंचमेपक्षेगयामाघ्याष्टमीस्मृता त्रयोदशीगजच्छायागयातुल्यातुपैतृकेइति हेमाद्रौपाद्मेपि वसुनामापिताकन्यांशशापानुग्रहायच प्रौष्ठपद्यष्टकाभूयःपितृलोकेभविष्यसि आयुरारोग्यदानित्यंसर्वकामफलप्रदेति एतस्याःपद्मसंज्ञाप्युक्ता तथाच जातूकर्ण्यः शंखंप्राहुरमावास्यांक्षीणसोमांद्विजोत्तमाः अष्टकाचभवेत्पद्मंतत्रदत्तमथाक्षयम्

26

अस्यांमहालयश्राद्धफलं पाद्मेसेतुखंडे योष्टम्यांश्रद्धयाश्राद्धंनरःकुर्य्यान्महालये अशीतिःकल्पसाहस्रंतृप्यंतिपितरोस्यवै आशीर्भिर्वर्धयंत्येनंविघ्नांश्चास्यव्यपोहति संततिंचाप्यविच्छिन्नांदद्युः पितृगणाः सदेति अस्यामेवाष्टम्यांविष्णुधर्मोत्तरोक्तंपुत्रीयव्रतं हेमाद्रौ प्रौष्ठपद्यामतीतायांकृष्णपक्षाष्टमीतुया सोपवासीनरस्तस्यांयोषिद्वातनयार्थिनी अत्रवासुदेवपूजनं पुरुषसूक्तेन पायसघृतादिहुत्वा पुत्रार्थीपुंनामभिः फलैः कन्यार्थीस्त्रीनामभिःप्राश्य संवत्सरव्रतं कुर्य्यादितिपुत्रीयंव्रतं अस्यामेवाष्टम्यांमहालक्ष्मीव्रतमुक्तं तत्रनिर्णयामृते पुराणसमुच्चये श्रियोव्रतंभाद्रपदेसिताष्टमीमारभ्यकन्यागतेचसूर्ये समापयेत्तत्रतिथौचयावत्सूर्यश्चपूर्वार्द्धंगतोयुवत्याइति तत्रैव कन्यागतार्कमारभ्यकर्त्तव्यंहिश्रियोर्चनं हस्तप्रांतदलस्थेर्केतद्व्रतंतुसमापयेत् पूजनीयागृहस्थानामष्टमीप्रावृषिश्रियः दोषैश्चतुर्भिःसंत्यक्तासर्वसंपत्करातिथिः पुत्रसौभाग्यसौख्यायुर्नाशिनीसाप्रकीर्त्तिता तस्मात्सर्वप्रयत्नेनत्याज्याहस्तगतेरवौ विशेषणपरित्याज्यानवमीदूषितायदीति दोषचतुष्टयंतत्रैवोक्तं त्रिदिनेचावमेचैवअष्टमींनोपवासयेत् पुत्रहानवमीविद्धास्त्रीघ्नीहस्तगतेरवौ त्रिदिनादिलक्षणमुक्तंरत्नमालायां यत्रैकः स्पृशतिदिनद्वयावसानंवारश्चेदवमदिनंतदुक्तमार्यैः यःस्पर्शोभवतितिथित्रयस्यचाह्निद्युस्पृग्वायमादिनंद्वयंचनेष्टं यएतेसर्वेनिषेधाः प्रथमारंभविषयाः मध्येतु सतिसंभवे ज्ञेयाः व्रतस्यषोडशाब्दसाध्यत्वेनमध्येसामान्ययोगात् इयंचचंद्रोदयव्यापिनीग्राह्या तत्रैवपूजाद्युक्तेः परदिने चंद्रोदयादूर्ध्वात्रिमुहूर्त्तव्यापित्वेपरैवकार्य्या अन्यथापूर्वैव पूर्वावापराविद्धावाग्राह्याचंद्रोदयेसदा त्रिमुहूर्त्तापिसाकार्य्यापरतश्चोर्ध्वगामिनीति मदनरत्नेनिर्णयामृते संग्रहोक्तेः अर्द्धरात्रमतिक्रम्यवर्त्ततेयोत्तरातिथिः तदातस्यांतिथौकार्य्यंमहालक्ष्मीव्रतंसदेतिवचनाच्चेतिसंक्षेपः इदंव्रतंच भाद्रशुक्लाष्टमीमारभ्याश्विनकृष्णाष्टम्यंतं षोडश

दिनसाध्यमर्द्धरात्रव्यापिन्यामष्टम्यांकार्य्यं प्रारंभस्तस्यांज्येष्ठायुतायांशुक्लाष्टम्यांकार्य्यः तथाचस्कांदे मासिभाद्रपदेपक्षेशुक्लेज्येष्ठायुताष्टमी प्रारब्धव्यंव्रतंतत्रमहालक्ष्म्यायतात्मभिः समापनंचकृष्णायामष्टम्यामेवतद्भवेत् चंद्रोदयव्यापिन्यामष्टम्यामेव चंद्रोदयव्रतेचैवतिथिस्तात्कालिकीस्मृतेति दिनद्वयेचंद्रोदयसत्त्वेऽसत्त्वेवा पूर्वैव परादिनेचंद्रोदयोत्तरंचेदष्टमीतदापरैव मदनरत्ने पुराणसमुच्चये पूर्वावापरविद्धावाग्राह्याचंद्रोदयेसदा त्रिमुहूर्तातुसापूज्यापरतश्चोर्ध्वगामिनीति अथव्रतविधिः हेमाद्रौ मदनरत्ने स्कांदे स्कंदउवाच सौभाग्यजननंस्त्रीणांदौर्भाग्यपरिकृंतनं परमैश्वर्य्यजननंतद्व्रतंब्रूहिशंकर ईश्वरउवाच साधुसाधुमहावाहोयत्पृष्टोहंत्वयानघ तत्तेहंसंप्रवक्ष्यामिव्रतानामुत्तमंव्रतं येनचीर्णेनननरोदुर्गतिंयातिकर्हिचित् सुभगावासपुत्रावावंध्यावापिस्त्रियोगुह अस्तिदेव्याव्रतंपुण्यंमहालक्ष्म्याःषडानन नारीणांचनराणांचव्रतंसर्वसुखावहं स्कंदउवाच देव्याश्चरितमाहात्म्यंमर्त्येकेनप्रकाशितं विधानंकीदृशंब्रूहिव्रतस्यास्य महाविभो शंकरउवाच देवासुरमभूद्युद्धंपूर्णमब्दशतंकृते महिषेसुराणामधिपेदेवानांचपुरंदरे तत्रदेवैर्महावीर्यैर्नारायणबलाश्रयात् असुरानिर्जिताः सर्वेपातालतलमाययुः केचिल्लंकांगताः केचित्प्रविष्टावरुणालयं गिरिदुर्गंसमाश्रित्य केचित्तस्थुर्महासुराः तत्रकोलासुरोनामदुर्जयस्समहाबलः गोमंतंदुर्गमंदुर्गंगिरिमाश्रित्यनिर्भयः याराजकन्यकालोकेरूपवत्योमहागुणाः आनीयगिरिदुर्गस्थोरमयामाससर्वशः रमयित्वाक्षिपन्नत्रकामरूपीविलंगमः एतस्मिन्नेवकालेतुह्यागतौमुनिसत्तमौ श्रुतप्रभावसंपन्नौपुलस्त्योगौतमस्तथा तीर्थयात्राप्रसंगेनश्रुत्वावाक्यंजनस्यच कोलासुरेणचरितंकन्याहेतोः शिखिध्वज तावूचतुर्जनंसर्वंसगस्त्योऽस्तिमहामुनिः येनतोयनिधिः पीतोविंध्याद्रिश्चनिवारितः तंब्रूवंयमोसर्वेकोलासुरवधाप्तये इत्यामंत्र्यययुः सर्वेगत्वा तमभि

वाघच ऊचुःसर्वेयथावृत्तंकोलासुरविचेष्टितं तच्छ्रुत्वाभगवानाहमैत्रावरुणिरग्र्यधीः सृष्टिस्थितिविनाशानांकारणंभक्तवत्सलाः रामस्याद्रौतपस्यंतिब्रह्मविष्णुमहेश्वराः तिस्रःसंध्यामूर्त्तिमत्यस्तेषांशुश्रूषणेरताः अपश्यतमहालक्ष्मींशक्तिरूपेणसंस्थितां सर्वशक्तियुतांदेवींलोकानांहितकाम्यया इत्युक्तास्त्वरितंगत्वाकोलासुरवधार्थे निवेद्यानिखिलंतेभ्यस्तस्थुःप्रांजलयोजनाः तच्छ्रुत्वानिखिलंतेभ्योब्रह्मविष्णुमहेश्वराः संध्यात्रयंसमाहूयवाचंप्रोचुःसुरेश्वराः वंदारुसुरवृक्षेभ्योमौलिमाणिक्यमंडला हरिष्यतिमहालक्ष्मीर्युद्धेकोलासुरंरिपुं भगवत्योमूर्त्तिमत्योदंडशूलादिभिर्वरैः आयुधैर्विधैः कृत्वाजायमाप्स्यथसंयुगे युष्माकंचमहान्योसौयुष्मत्क्रोधसमुद्भवः भूतनाथोभूतमन्युर्वःसहायोभविष्यति इत्युक्त्वात्वरितंगत्वारुरुधुःकोलराक्षसं निरुध्यचपुरींदेव्योजगर्ज्जुर्जलदस्वनाःभिंदंत्यश्चदिशोवद्धंवर्धयंत्यश्चतत्क्रुधां कोलासुरोहितच्छ्रुत्वाप्रोत्पपातमहास्वनः रोषणःक्रोधताम्राक्षोमेरोरिवमृगांतकःहस्त्यश्वरथपादातैश्चतुरंगबलान्वितः निर्ययौपृतनांयोद्धुंकालिकायाइवाशनिः सकुंडलशिरस्त्राणकवचीधृतबाणधिः बद्धगोधांगुलित्राणःक्रुद्धोवृत्रइवापरः ततोराक्षससैन्यंतद्भूतनाथेनसंगतं देवनारीजनेनापियुद्धंचक्रेतिभीषणं महारवैर्भीमघोषैर्बाणकेंकारनिःस्वनैः निःस्वानानिनदैश्चैवलोकःशब्दमयोभवत् जयेतिवदतांतेषांधावतामितरेतरं ववृधेसमरंघोरंमुष्टामुष्टिकचाकचि उद्धतेराक्षसबलेभूतनाथोमहाबलः ममर्दराक्षसानीकंशरवर्षैःसुदारुणैः हतंदृष्ट्वासुरबलंक्रुद्धःकोलासुरोरणे अभिद्रुत्यगदापाणिस्ताडयामासभैरवं ययौमूर्छांमहावीर्यस्तयाभिहतमस्तकः ततोदेव्योतिवेगेनह्यभिदुद्रुवुरुद्धतैः त्रिशूलैरभिजघ्नुस्तंपट्टिशैश्चव्यदारयन् मुष्टिभिस्ताडयामासुर्नखैश्चैवव्यदारयन् पादाघातैःसमाजघ्नुः सिंहाःकरिवरंयथा सकुंडलशिरस्त्राणोदष्टोष्ठोरक्तलोचनः कृतभ्रूकुटिवक्रोसौराक्षसस्तामुहुर्मुहुः गदयाताडयामास

शिरः कंठांसकुक्षिषु वभंजुस्तांगदांतास्तुहसंत्यःसुमदाकुलाः ततोधनुर्धरोभूत्वावाणजालमवा
किरत् तांसांशरीरमर्माणिभिंदञ्छरशतैःशितैः ननादवद्धवैरोसौहृदयंचाभिनच्छरैः ततः क्रुद्धतरास्तास्तुतंपादैर्ज
गृहुर्भृशं आकाशेभ्रामयित्वातंचिक्षिपुर्गगनेक्रुधा कोलासुरोपिपतितोयावदुत्थातुमिच्छति तादन्निर्गत्य
लक्ष्मीस्तंपादाभ्यांप्रत्यपीडयत् तत्पादपीडितंरक्षोविवृत्यनयनेभृशं मुक्तकंठःस्वनंकृत्वाततोमोहमुपेयिवान्
ततोदेवाः सगंधर्वामनुष्याऋषयोऽस्तुवन् देवनाथाश्चदेव्यश्चननृतुः सुमदाकुलाः देवदुंदुभयोनेदुःपुष्प
वृष्टिः पपातखात् दिशःप्रसेदुर्मरुतोववुर्मंदरवंजगत् सुरासुराशिरोरत्नवंद्यपादांवुजास्ततः देव्योदि
व्यैनयानेनयांतिकोलापुरंप्रति आयांतींपंकजांवीक्ष्यमुक्तपादाग्रशृंखलः तुष्टावपरयाभक्त्याराजकन्यागणो
मुदा पंकजां कमलां राजकन्याऊचुः वंदारुवीरसुरवृंदाकिरीटकोटीरोचिर्घटासिकरकल्पितरत्नदीपं देवि
त्वदीयचरणंशरणंजनानांसेवामहेसकलमंगलवर्द्धनाय १ उत्फुल्लकैरवदलायतलोचनायैगंडोल्लसच्चटुलकुंडलमंडि
तायै राकाशशिप्रतिभटाननकोमलायैतस्यैनमः कमललोचनवल्लभायै २ सद्रक्तकल्पलतिकांहरकंठभू
षांकेयूरहेमकटकोज्ज्वलकंकणांकां संसारसागरमुखेपततोममाद्यत्वत्पादपीठकरयष्टिरनंगमातः ३ दृष्ट्वादेवि
जनास्तवाद्यविविधाब्रह्माधिपत्यंगताः विष्णोर्वक्षसियाचकारतरलालीलाब्जमालाभ्रमं क्लेशाग्निप्रहितंत्वदीय
चरणद्वंद्वाब्जसेवारतं कारुण्यामृतसारपूरितदृशामामद्यपश्येश्वरि ४ मल्लीविफुल्लकुसुमोज्ज्वलमध्यभाग
धामिल्लभाराजिततारकचित्रिताभा उत्तप्तहेमनिकषोज्ज्वलकायकांतिर्लक्ष्मीः स्वयंप्रणमतांश्रियमातनोतु ५
इतिस्तुतामहालक्ष्मीर्भक्तानामिष्टदायिनी राजकन्यास्तुताःसर्वामुक्तास्वपुरमाययौ ततःप्रभृतिलोकेषुपूज्यास्ताः
सर्वकामदाः ताश्चतुःषष्टियोगिन्योमहालक्ष्मीपरिग्रहात् नृत्यंतिनिवहैस्तत्रगीतवादित्रनिःस्वनैः पुरोदेव्यामहा

लक्ष्म्याः करहाटपुरेनिशिं एवंप्रभावासादेवीविष्णुरामाषडानन व्रतस्यास्यविधानंचशृणुमत्तोविधानतःमासिभाद्र
पदेशुक्लेपक्षेज्येष्ठायुताष्टमीप्रारब्धव्यंव्रतंतत्रमहालक्ष्म्यामहात्माभिः करिष्यामिव्रतंदेवित्वद्भक्तस्तत्परायणः तदवि
घ्नेनमेयातुसमाप्तिंत्वत्प्रसादतः इत्युच्चार्य्यततोवद्ध्वाडोरकंदक्षिणेकरे षोडशग्रंथिसहितंगुणैःषोडशभिर्युतं तर्ता
न्वहंमहालक्ष्मींपूजयेन्नियतात्मवान् गंधपुष्पैःसनैवेद्यैर्यावत्कृष्णाष्टमीदिनं तस्मिन्दिनेतुसंप्राप्तेकुर्यादुद्यापनंव्रतं
वस्त्रमंडपिकांकृत्वामाल्यरत्नोपशोभितां त्रिभूमिकांचसुश्लक्ष्णांनानादीपैरलंकृतां चतस्रःप्रतिमाःकृत्वासौवर्णास्त
त्स्वरूपिणीः स्नपनंकारयेत्तासांपंचामृतविधानतः षोडशैरुपचारैश्चधूपदीपादिभिस्तथा जागरंतत्रकर्त्तव्यंगीत
वादित्रनिःस्वनैः ततोनिशीथसंप्राप्तेभ्युदितेऽमृतदीधितौ कृत्वातुस्थंडिलेपद्मंषडंगंतुप्रपूजयेत् दद्यादर्घ्यंचश
शिनेव्रतीतस्मैसमाहितः क्षीरोदार्णवसंभूतचंद्रलक्ष्मीसहोदर पीयूषधामरोहिण्यासहितोर्घ्यंगृहाणमे जानु
भ्यामवनींगत्वामंत्रेणप्रार्थयेत्ततः क्षीरोदार्णवसंभूतेकमलेकमलालये प्रयच्छसर्वकामान्मेविष्णुवक्षस्थलाल
ये पुत्रान्देहियशोदेहिसौख्यंसौभाग्यमेवच कालिकालिमहाकालिविकरालिनमोस्तुते त्रैलोक्यजननित्राहि
वरदेभक्तवत्सले एकनाथेजगन्नाथेजमदग्निप्रियेव्यये रेणुकेत्राहिमांदेविराममातःशिवंकुरु भूतनाथेजगन्नाथे
प्रसीदपुरुषोत्तमे कपालकर्त्तिकाशूलडमरुव्यग्रहस्तके श्रियंकुरुमहालक्ष्मिमह्यंश्रियंचाशुनाशय मंत्रैरेतैर्म
हालक्ष्मींप्रार्थ्यश्रोत्रिययोषितां श्रीसूक्तेनतथावह्नौपद्मानिजुहुयाच्छुचिः पायसंचैवविल्वानितदलाभेथवाघृतं
ग्रहेभ्यश्चैवहोतव्यंसमिच्चरुघृतादिकं चंदनंतालपत्रंचपुष्पतालादिकंतथा नवेशूर्पेथभक्ष्याणिक्षिप्त्वावहुविधा
निच प्रत्येकंषोडशैतानिपूगपूर्णानिचैवाहि तान्यन्नेनसमाच्छाद्यव्रतीदद्यात्समंत्रकं क्षीरोदार्णवसंभूतालक्ष्मी
श्चंद्रसहोदरा व्रतेनानेनसंतुष्टाप्रीयतांविष्णुवल्लभा इंदिराप्रतिगृह्णातिइंदिरावैददातिच इंदिरातारकोभाभ्यां

इंदिरायैनमोनमः दत्त्वार्घ्यंवायनादींश्चश्रोत्रियाणांचयोषितः चतस्त्रःप्रतिमास्तास्तुब्राह्मणायनिवेदयेत् एवंकृत्यंसुनिर्वर्त्यव्रतीभोजनमाचरेत् इतिव्रतविधानं अथकथा स्कंदउवाच केनेदंस्वीकृतंपूर्वंकथमस्मिन्प्रकाशितं ब्रूहिमेतत्त्वतोदेवयद्यहंवल्लभस्तव शंकरउवाच आसीद्राजासार्वभौमोमंगलाव्हइतिश्रुतः कुंडिनेनगरेरम्येतस्यपद्मावतीप्रिया तमागतःकश्चिदेकस्सेवकोब्राह्मणोत्तमः अज्ञातनामातस्यासौनामचक्रेनृपोत्तमः तवल्लकइतिख्यातोबभूवद्विजसत्तमः कदाचिन्मृगयासक्तोभूपालोवनमाविशत् तत्रविद्ध्वावराहादीन्मृगान्हत्वासहस्रशः क्षुत्तृट्परिवृतःश्रांतोवृक्षमूलमुपागतः उदकान्वेषणेचारान्प्रेषयामाससर्वतः वनेजलंतेनापश्यन्चिरंभ्रांत्वाप्रयत्नतः तेगत्वानृपतिंप्रोचुर्नात्रांभइतिदुःखिताः तवल्लकोपिबभ्रामाविपिनंतदतंद्रितः भ्रममाणस्तदापश्यन्कास्मिंश्चिद्वनगव्हरे रम्यंसरोवरंदिव्यंकुमुदोत्पलमंडितं तत्रापश्यद्देवकन्यादिव्यरूपामनोरमाः तन्वंगीश्चारुनयनाः पीनोन्नतपयोधराः हारकंकणकेयूरनूपुरालंकृताःशुभाः पूजयंतीर्महालक्ष्मींव्रतरूपेणसादरात् तवल्लकोपिपप्रच्छकिमिदंकथ्यतामिति स्त्रियऊचुः महालक्ष्मीव्रतमिदंसर्वकामफलप्रदं क्रियतेस्माभिरेकाग्रमनोभिस्त्वत्रभक्तितः तवल्लकोपितच्छ्रुत्वाव्रतंजग्राहभक्तिमान् तदनुज्ञांगृहीत्वास्यजलमादायसत्वरं आजगामजलंतस्मैदत्त्वाप्रांजलिनासह जलंपीत्वानृपस्तस्यदृष्टवान्डोरकंकरे किमिदंडोरकंविप्रकिंव्रतंकृतवानसि राज्ञापृष्टस्तवल्लोपिकथयामासतद्व्रतं तच्छ्रुत्वाराजशार्दूलोव्रतंजग्राहभक्तिमान् तवल्लेनैवसहितोराजास्वपुरमाययौ पद्मावतीगृहंगत्वातयारंतुंगतोरहः रममाणाथसादेवीतेनराज्ञाप्रियेणवै तंदृष्ट्वाडोरकंहस्तेकुपितात्यंतकोपना कयात्वंवंचितोब्रूहिकयावद्धंसुडोरकं मावादीरन्यथात्वेतल्लक्ष्मीव्रतमनुत्तमं इत्युक्तापिप्रियेणासौहस्तेचिच्छेदडोरकं ज्वालामालाकुलेवह्नौक्षिप्तवत्यतिकोपना हाहाकष्टमिदंपापंकृतंमूढधियात्वया इतिनिर्भर्त्स्यतां

व्र०र०
आश्वि०
॥१६॥

राजातस्याजवनगह्वरे साचहानिंययौपश्चात्तत्रहानिंययौनृपः महालक्ष्म्यपचारेणसारण्येजलवर्जिते मृगमाणावनेतास्मिन्नकांचिद्गतिमापसा विचरंतीवनेतत्रऋषेःकस्यचिदाश्रमं ददर्शमृगसंकीर्णंशांततृष्णमृगाश्रितं तत्रापश्यद्वनेरम्येवसिष्ठंमुनिपुंगवं ववंदेचरणौतस्यविसंज्ञादुःखकर्षिता चिरंध्यात्वामुनिस्तस्याज्ञातवान्दुःखकारणं महालक्ष्म्यपचारेणज्ञातंविज्ञानचक्षुषा तद्व्रतंकारयामासतस्यादुःखोपशांतये तद्दुःखंतत्क्षणादेवविनष्टमभवत्तदा पुनश्चमृगयासक्तोभूपालोवनमाविशत् कंचिन्मृगंसमाविध्यद्बाणेनैकेनवाहुमान् अन्वगच्छन्मृगपदंतस्याश्रममुपागमत् वरंमुनिंददर्शाथवसिष्ठंवीतकल्मषं कृतातिथ्यक्रियोदृष्ट्वाचरंतींवहिरंतिकात् हावभावविलासाग्र्यैर्हरंतींहरिणेक्षणां तदानिर्गत्यनृपतिःप्रोवाचमधुरंवचः वामोरुकासिकल्याणिकिमर्थंचरसेवने किन्नरीमानुषीवत्वंयक्षिणीचारुहासिनि किमत्रवहुनोक्तेनभजमानंभजस्वमां नृपेणतेनसापृष्टासास्मितावाक्यमब्रवीत् पुनर्भजामिचाहंत्वामवेहिमहिषींतव महालक्ष्म्यपचारेणत्वयाहीनाचराम्यहं मुनींद्रस्याश्रमेरम्येतरुगुल्मोपशोभिते ममोपरिकृपाविष्टोमहालक्ष्मीव्रतोत्तमं कारयामासविधिवत्सर्वविघ्नोपशांतये तयोक्तंवचनंश्रुत्वासचोत्फुल्लविलोचनः ऋषेरनुज्ञामादायप्रियामादायसत्वरः हृष्टपुष्टजनैर्जुष्टंपताकाध्वजशोभितं प्रविवेशतयासार्द्धंसपौरैरभिवंदितः महालक्ष्म्याव्रतंभूपस्तयासहचकारह भुक्तेहभोगान्विपुलान्पुत्रैःपौत्रैःसमावृतः भूपालःसार्वभौमोभूत्तवल्लामात्यतांययौ महालक्ष्मीप्रसादेनमंत्रिभिःसर्वसंपदां एवंप्रभावासादेवीनराणामिष्टदयिनी सर्वपापहरादेवीसर्वदुःखापहारिणी एवंषोडशवर्षंतुकर्त्तव्यंव्रतमुत्तमं याकरिष्यतितांभक्त्यास्वयंसिद्धिरुपासते लोकपालाश्चपुष्यंतिदासाइवमनोरथान् नारीवापुरुषःकरिष्यतिमुदाभक्त्याव्रतंयत्नतः सेवंतेहरिरुद्रपद्मजसुराःजुष्यंतितस्यप्रियं तत्पादौपरिरंजयंतिमनुजामौलिप्रभामंडलैस्तस्मिन्नेवकुटुंबिनीववसतेलक्ष्मीःस्व

यंविष्णुना येभक्त्याचाप्यभक्त्यावाकुर्वंतिव्रतमुत्तमं अंतकालेस्वयंविष्णुःसंसारात्परिरक्षति यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः नसंत्यजतितंलक्ष्मीरलक्ष्मीनैवतंभजेत् सर्वपापविनिर्मुक्तःस्वर्गलोकेमहीयते

॥ इतिस्कंदोक्तंमहालक्ष्मीव्रतं ॥

अथभविष्योत्तरंमहालक्ष्मीव्रतं युधिष्ठिरउवाच स्वस्थानलाभपुत्रायुःसर्वैश्वर्यसुखप्रदं व्रतमेकंममाचक्ष्वविचार्यपुरुषोत्तम श्रीकृष्णउवाच दुर्वारवृत्रदैतेयपरिग्यातेत्रिविष्टपे एतदेवकृतस्यादौदेवेंद्रःप्राहनारदं तस्यश्रुत्वाततोवाक्यंसमुनिःप्रत्यभाषत नारदउवाच पुरंदरपुरापूर्वंपुरमासीत्सभान्वितं रत्नगर्भाभवद्भूमिर्यत्ररत्नाढ्यभूधरैः यत्रांगनाजनापांगभंगलोचनसायकैः त्रैलोक्यंस्ववशंचक्रेदेवःकुसुमसायकः चतुर्वर्गजनिर्यत्रयच्चविश्वविभूषणं विश्वकर्मापियद्वीक्ष्यकंपयत्यनिशंशिरः तत्राभवन्महीपालोमंगलोमंगलाशयः विल्वदेवीप्रियातस्यदुर्भगैकाबभूवह अन्यातुचोलदेवीवामहिषीसायशस्विनी कदाचिन्मंगलोराजाचोलदेवीसहायवान् प्रासादशिखरारूढःस्थलीमेकामपश्यत तामालोक्यमहीपालःस्मरस्मेरमुखांबुजः चोलदेवीपतिःप्राहदंतद्योतितदिङ्मुखः चंचलाक्षितवोद्यानंकांतिनंदितनंदनं कारयामितवोद्दिष्टंतत्रोद्यानमकारयत् संपन्नंचतदुद्यानंनानाद्रुमलताकुलं अथागत्यमहाकोलस्तनुस्पृष्टनभस्तलः पंकप्रावृड्घनश्यामश्चक्षुराक्षिप्तचंचलः दंष्ट्रातर्जितचंद्रार्कःप्रलयांभोधरस्वनः क्वचिद्दंष्ट्राप्रहारेणक्वचिदंगविघर्षणैः अमूलयत्खनन्सर्वान्पादपान्पांडुनंदन तद्भनक्रीतिविज्ञायसमेत्योद्यानपालकाः सभयास्तस्यवृत्तांतमूचुस्तेनृपतेःपुरः तदाकर्ण्यततोराजाक्रोधाद्दूषितलोचनः वधायदंष्ट्रिणस्तस्यसंदिदेशाखिलंजनं ततश्चचालभूपालःस्वगंडगलितैर्गजैः आप्लावयन्महींसर्वांवाजिघंटावृतांबरां चालयन्निखिलान्शैलान्स्यंदनौघमरुद्रवैः पत्तिव्रातमहाध्वानैस्स्वरयन्यवनांतिकं तस्यावश्यंशिरःछेदंविदधामिरिपोरिव तस्यभूपस्यतद्वाक्य

समाकर्ण्यससूकरः जगामास्यैवमार्गेणप्राणिनश्चेष्टितंयथा ततःक्रुद्धोमहीपालःकशयाश्वंप्रताड्यच
व्रीडाकलंकितास्येंदुर्मार्गेतस्यैवसोऽगमत् गत्वाथविपिनंघोरंसिंहशार्दूलसंकुलं तमालतालहिंतालशालार्जु
नलतान्वितं झिल्लीझांकारसंराववाचालितदिगंतरं तत्रैकचेतसापश्यन्वहुवभ्रामभूपतिः कोलोवेलामवा
प्याथसोभवद्राजसन्मुखः भल्लेनसोवधीत्क्रोडंवज्रेणाद्रिंयथामवान् अथव्योम्निविमानस्थःस्मरसुंदरविग्रहः
कालरूपंपरित्यज्यसोब्रवीन्मंगलंनृपम् गंधर्वउवाच स्वस्त्यस्तुतेमहीपालत्वयामुक्तिःकृतामम तमाकर्णय
वृत्तांतंयेनाहंजातईदृशः एकदादेवतावृंदैःसंवृतःकमलासनः चंचत्पदादिभिःस्वानैःषड्गाद्यैःसप्तभिःस्वरैः मं
द्रादिभिस्त्रिभिर्गानैर्गीयमानंमयानृप नानास्थानगुणोपेतमश्रौषीद्गीतमुत्तमं गीयमानंच्युतस्थानंततोहंकर्मणा
मुना प्राप्तश्चित्ररथस्तेनब्रह्मणासृष्टिकर्मणा ब्रह्मोवाच कोलोभवेतिमेदिन्यांमुक्तिस्तेतुयदातदा निर्जि
ताखिलभूपालोमंगलस्त्वांहनिष्यति तदद्यघटितंसर्वंत्वत्प्रसादान्महीपते तद्गृहाणवरंभूपदेवस्यापिसुदुर्लभं म
हालक्ष्मीव्रतंदिव्यंचतुर्वर्गफलप्रदं लभस्वसार्वभौमत्वंगच्छराज्यंनिजंद्रुतं नारदउवाच चित्ररथोथगंधर्वउ
क्तेदंभूपतिंप्रति अंतर्धानंगतस्तुष्टःशरत्कालइवांवुदः अथमंगलभूपालःपार्श्वस्थंद्विजमाकुलं विलोक्यवटु
कंकिंचित्कक्षानिक्षिप्तशंवलं उवाचमधुरांवाचंस्मितपूर्वांशुचिस्मितः देवस्त्वंदानवस्त्वंवागंधर्वोवापिराक्षसः स
त्यंवदवटोकस्मात्किमर्थंत्वमिहागतः श्रुत्वात्वाशिष्यविप्रस्तंप्राहत्वद्देशसंभवः अहंसार्धंत्वयाजातस्तदादिशयथो
चितं राजाथतमुवाचेदंत्वंवटोभूतनायकः अपल्याणंविधायाश्वंतूर्णंतोयंचपायय अथविश्रम्यभूपालंवटुको
वटपादपे तथाकृत्यतुरंगंचसमारुह्यमहामतिः जगामपक्षिघोषेणयत्रास्तेसुंदरंसरः कमलैकविलासेनरथां
गाभरणेनच वनमालाश्रयत्वेनदधन्नारायणींतनुं भग्नवायुसुतोद्योगमक्षारंविषवर्जितं नाशितागस्त्यतृष्णार्त्ति

प्रसन्नंसागराधिकं पंकेमग्नोथतत्राश्वः पृष्ठादुत्तीर्यतस्यसः चतुर्दिशंनिरीक्ष्याथतस्यैवसरसस्तटे दिव्यवस्त्रपरीधानंदिव्याभरणभूषितं कथयंतंकथांदिव्यांस्त्रीणांसार्थमपश्यत उपसृत्याथतेसार्थंतद्वृत्तांतंनिवेद्यच कृतांजलिरितिप्राहवटुर्मधुरयागिरा वटुरुवाच एतत्किंक्रियतेसार्थंत्वयाभक्तिपरेणच कोविधिःकिंफलंच स्यब्रूहितन्मेयथातथं श्रुत्वेतितमुवाचेदंसार्थःकरुणयाऽन्वितः सार्थउवाच शृणुविप्रैकचित्तेनश्रद्धाभक्तिसमन्वितः यामायाप्रकृतिःशक्तिस्त्रैलोक्येष्वभिधीयते व्रतमेतन्महालक्ष्म्यास्तस्याःसर्वफलप्रदं आकर्णयविधिंचास्यकथ्यमानंवटोमया भाद्रेमासिसिताष्टम्यांप्रारंभोस्यविधीयते प्रातःषोडशकृत्वस्तुप्रक्षाल्यांघ्रिकरौमुखं तंतुषोडशसंयुक्तंग्रंथिषोडशसंयुतं मालतीपुष्पकर्पूरचंदनागुरुचर्चितं लक्ष्म्यैनमोथमंत्रेणप्रतिग्रंथ्यभिमंत्रितं धनंधान्यंधरांधर्मंकीर्तिमायुर्यशःश्रियं तुरंगान्दंतिनःपुत्रान्महालक्ष्मिप्रयच्छमे मंत्रेणानेनवद्ध्वाथडोरकंदाक्षिणेकरे कांडानिषोडशादायदूर्वायाश्चाक्षतानिच एकचित्तः कथांश्रुत्वापूजयेत्तैश्चडोरकं ततस्तुप्रातरारम्ययावत्स्यादसिताष्टमी तावत्प्रक्षाल्यहस्तौतुपादादीनिकथांतथा शृणुयात्प्रत्यहंदेव्यैतत्संख्यैरक्षतादिभिः अथकृष्णाष्टमींप्राप्यनक्तकालेजितेंद्रियः स्नातःशुक्लांबरधरोव्रतीपूजागृहंविशेत् तत्रोपविश्यपूर्वास्यश्चारुधौतासनोपरि श्वेतपट्टेलिखेदष्टदलंकमलमुत्तमं ऐंद्र्यादिशक्तिसंयुक्तंपार्श्वपत्रंसकेसरं कर्णिकायांततोलक्ष्मींकर्पूरक्षौद्रपांडुरां शुभ्रवस्त्रपरीधानांमुक्ताभरणभूषितां पंकजासनसंस्थांतांस्मराननसरोरुहां शारदेंद्वमलाकांतिंस्निग्धनेत्रांचतुर्भुजां पद्मयुग्मामभयदांवरव्यग्रकरांबुजां अभितोगजयुग्मेनसिच्यमानांकरांबुना संचिंत्यविलिखेद्देवींकर्पूरागुरुचंदनैः ततस्त्वावाहनंकुर्य्यान्मंत्रेणानेनसव्रती महालक्ष्मिसमागच्छपद्मनाभपदादिह पंचोपचारपूजेयंत्वदर्थंदेविसर्वदा आवाहनं ॥ १ ॥ आलयस्तेहकाल्पितःकमलेकमलालये कमलेकमलेलक्ष्मिस्थितात्वं

कृपयाकुरु स्थापनं २ गंगादिसलिलाधारंतीर्थमंत्राभिमंत्रितं दूरयात्राश्रमहरंपाद्यंमेप्रतिगृह्यतां पाद्यं ३ स्नानंतवमहालक्ष्मिकर्पूरागुरुवासितं सुतीर्थेभ्यःसमानीतंस्नानंतत्प्रतिगृह्यतां स्नानं ४ मलयाचलसंभूतंनानापन्नगरक्षितं शीतलंवहुलामोदंचंदनंप्रतिगृह्यतां चंदनं ॥ ५ ॥ मिलत्परिमलामोदंमत्तालिकुलसंकुलं आनंदिनंदनोद्यानपद्मायैकुसुमंनमः पुष्पं ॥ ६ ॥ अथांगपूजा चपलायैनमःपादौपूजयामि चंचलायै जानुनीपूजयामि कमलवासिन्यै- कटिंपू- शांत्यै- नाभिंपू- मन्मथवासिन्यै- स्तनौपूज- ललितायै. भुजद्वयंपू. उत्कंठिन्यै- कंठंपू. मायायै. मुखंपू. श्रियै शिरःपू. पद्मायैनमः सर्वांगंपूजामि गंधसंभारसंवद्धंपृथुवस्तुसमुद्भवं सुरासुरनरानंदिधूपंदेविगृहाणमे धूपं ॥ ७ ॥ श्रियं प्रजावतींलक्ष्मींवरदांविष्णुवल्लभां हिरण्याव्हयांस्वर्णमालिनींपद्मवासिनीं पद्मश्रियांमुक्तालंकारां सूर्यांचंद्रां विश्वमूर्त्तिंविश्वभूतिं ऋद्धिं समृद्धिं तुष्टिं पुष्टिंधनेश्वरींशुद्धांभोगिनींभोगदात्रींधारामिति मार्त्तंडमंडलाखंडचंद्रविंवाग्नितेजसां निधानंदेविदीपोयंनिर्मितस्तवभक्तितः दीपः ॥ ८ ॥ देवतालयपातालभूतलाधारधान्यजं षोडशाकारसंभारंनैवेद्यंतेश्रियेनमः नैवेद्यं ॥ ९ ॥ स्नानादिकंविधायापियतःशुद्धिरवाप्यते तदेतदाचमनीयंमहालक्ष्मिविधीयत्तां आचमनं ॥ १० ॥ पातालतलसंभूतंवदनांभोजभूषणं नानागुणसमाकीर्णंतांवूलंदेवितेनमः तांवूलं ॥ ११ ॥ तंतुसंतानसंवद्धंकलाकौशलनिर्मितं सर्वांगाभरणंश्रेष्ठंवसनंपरिधीयतां वस्त्रं ॥ १२ ॥ विष्णोर्वक्षसिपद्मेचशंखेचक्रेतथांवरे लक्ष्मीर्देवियथासित्वंमयिदेवितथाभव प्रार्थना उत्तार्य्यडोरकंवाव्होर्लक्ष्मीपार्श्वेनिधापयेत् लक्ष्मिदेविगृहाणत्वंडोरकंयन्मयाधृतं कथांश्रुत्वासुवर्णंवादत्त्वाचार्य्यायदक्षिणां एवंनिर्वर्त्यविधिवत्पूजनंवटुकाश्रियः हेवटुकेतिसंवोधनं चातुर्वर्ण्यायदेवाययथाशक्त्या

अदक्षिणां दीपान्षोडशपिंडांश्चगोधूमस्याद्विजातये दत्त्वातत्संख्ययाभुक्त्वारात्रौजागरणंचरेत् चंद्रोदयेथसंजातेद
द्यादर्घ्यंततोव्रती मंत्रेणानेनविप्रेंद्रशंखेनांबुफलादिना नमोस्तुतेनिशानाथलक्ष्मीभ्रातर्नमोस्तुते संपूर्णतांव्रतंया
तुगृहाणार्घ्यंविधोनमः इतिचंद्रायार्घ्यदानं प्रातर्विसर्जयेद्देवींमंत्रेणानेनसुव्रती पंकजंदेविसंत्यज्यममवेश्मनिसंवि
श मातःसपुत्रभृत्योहंसुखीस्यांत्वत्प्रसादतः इतिविसर्जनं षोडशाहेतुसंपूर्णेकुर्य्यादुद्यापनंव्रती विधिनायेनविप्रें
द्रशृणुश्रद्धासमन्वितः दातव्याधेनुरेकावैस्वर्णशृंगादिसंयुता श्रोत्रियायसुवर्णंचप्रदद्याद्वसनादिकं सार्थउवाच एत
त्तेकथितंविप्रव्रतानामुत्तमंव्रतं यद्विधानादनायासाल्लभतेवांछितंफलं कृत्वाव्रतवरंविप्रराजानंतंचकारय व्रतमेतत्त्व
याविप्रदेयंश्रद्धावतेपरं नास्तिकानांपुरस्तात्तुनप्रकाश्यंकथंचन नमस्कृत्वापितंसार्थंपंकादुत्थाप्यवाजिनं सपीत्वां
भस्तमादायपद्मिनीपत्रसन्निभं आरुह्यतुरगंविप्रोराजांतिकमुपागमत् नानाप्रकारसंभारशंवलान्युदकस्यच व्रत
प्रभावादभवन्बुभुजेभूभृतांवरः अथारुह्यमहीपालोवटुपर्य्याणितंहयं तद्व्रतस्यप्रभावेणतूर्णंस्वपुरमागतः त
मालोक्यसमालोक्यराजानंभूपुरंदरं उत्सवंचक्रिरेपौरास्तौर्य्यत्रिकपुरःसराः चलत्पताकाधामानंराजत्कल
शमौक्तिकं पुरंनृत्यदिवाभातिछत्रदंडोचितैःकरैः अथोत्सुकतयाद्वाराद्धावतिस्मवरांगना स्खलन्मुक्तालता
जालैश्चतुष्कमिवकुर्वती काचिद्विमुक्तकेशैवकृतैकनयनांजना काचिन्नितंबभारार्त्ताकाचित्पीनपयोधरा अथा
विशन्महीपालोवटुनासहितोगृहं पौरनारीजनाक्षिप्तलाजैःपूरितविग्रहः अथोत्तीर्य्यहयात्तस्माद्वटुहस्तावलं
बितः जगाममंगलोराजाचोल्लदेवीतुयत्रवै दृष्ट्वातुचोल्लदेवीसाडोरकंवलिवाहुके विमृश्यमनसाक्रुद्धाशंका
चक्रेनृपेत्विमां आखेटकस्यव्याजेनगतोन्यांवल्लभांप्रति सौभाग्यायतयाबद्धोडोरकोदक्षिणेभुजे तयैववटुकश्चा
यंमांद्रष्टुंप्रेषितोध्रुवं ततोदुर्दैवदुष्टात्साकोपादाच्छिद्यडोरकं चिक्षेपचमहीपृष्ठेस्वसौभाग्यसुखैःसह नववोधचतां

38

व्र०१०
आश्वि०
॥१८॥

राजात्रोटयंतींचडोरकं सामंतमांत्रिभिःस्याद्यःकुर्वन्वार्त्तांवनोद्भवां तद्व्रतस्यविधानार्थंस्वस्वामिन्यैनिवेदितं ततोनूतनमादायचिल्लदेव्यकरोद्व्रतं अथसंवत्सरेतीतेलक्ष्मीपूजादिनेनृपः तौर्यत्रिकस्यनिःस्वानंचिल्लदेव्यागृहे शृणोत् तदाकर्ण्यमहीपालोनूतनंवटुमब्रवीत् वटोस्त्यद्यदिनंलक्ष्म्याःसचतस्यकडोरकः वटोअद्यविधास्यामिमहालक्ष्मीव्रतंशुभं इतिपृष्टोनृपंप्राहडोरकस्त्रोटितोयथा तच्छ्रुत्वामंगलोराजाचिल्लदेव्यैप्रकुप्यच मयाद्यपूजनंकार्य्यंचिल्लदेवीगृहंप्रति अत्रांतरेमहालक्ष्मीर्वृद्धारूपंविधायच अथमंगलभूपालोवटुवाक्यबलान्वितः चचालकमलार्चायैचिल्लदेवीगृहंप्रति जिज्ञासार्थंगृहंतस्याश्चोलदेव्याःसमागता गच्छगच्छाद्यदुष्टेकिमिहागत्यकरोषिमे तयादुराशयात्यर्थंलक्ष्मीःसाप्यवमानिता ततःक्रुद्धामहालक्ष्मीश्चोलदेवीमभाषत शशापाथमहालक्ष्मीश्चोलदेवींपुनःपुनः कोलास्याभवदुष्टेत्वंययाहमवमानिता चोलदेवीतुश्रीशापात्कोलास्यासाभवत्तदा कोलापुरमितिख्यातंक्षितौतन्मंगलंपुरं अथायातामहालक्ष्मीश्चिल्लदेवीनिकेतनं यहुधाचिल्लदेव्यासालक्ष्मीः सम्मानितार्चिता वृद्धारूपंपरित्यज्यप्रत्यक्षासाभवत्तदा पंचोपचारपूजाभिःश्रियंराज्ञीततोर्चयत् अतितुष्टातदालक्ष्मीश्चिल्लदेवीमुवाचह श्रीरुवाच अर्चनात्तेप्रसन्नास्मिचिल्लदेविवरंशृणु वव्रेवरंततोराज्ञीचिल्लदेवीशुभाशया चिल्लदेव्युवाच येकरिष्यंतितेदेविव्रतमेतत्सुरेश्वरि तद्वेश्मनत्वयात्याज्यंयावच्चंद्रदिवाकरौ अद्यारभ्यकथाह्येषाभूपसंबंधिनीत्वया ख्यातिंयातुक्षितौदेविभक्तिर्भवतुमेत्वयि सद्भावेनकथामेतांयेशृण्वंतिपठंतिच तेषांतुवांछितंसर्वंत्वयासहसदैवहि तथेत्युक्त्वामहालक्ष्मीस्तत्रैवांतरधीयत अथमंगलभूपालस्तत्रागत्यश्रियोर्चनं चक्रेपरमयाभक्त्याचिल्लदेव्यासमान्वितः अथैषायादुराचाराचिल्लदेव्यागृहंप्रति चोलदेवीसमायाताद्वारस्थैर्वारिताजनैः ततोजगामविपिनंयत्रासीदंगिरामुनिः अथालोक्याद्भुताकारांज्ञात्वदृष्ट्याविचिंत्यतां

समुनिःश्रीव्रतंदिव्यंचोलदेवीमकारयत् कृतव्रताथसंजाताचोलदेवीमहायशाः दाक्षिण्यकेलिलीलादिलावण्यैकनिकेतनं ततःकदाचिदागत्यवनमाखेटकेनृपः मुनेःवेश्मनिराजातांददर्शवामलोचनां अथराजामुनिंप्राहकेयंधन्येतिकथ्यतां तद्वृत्तांतंसमाख्यायराज्ञेतांप्रददौमुनिः अथागत्यनिजंराज्यंचोलदेवीसमन्वितः चिल्लदेव्याचसहितोबुभुजेमंगलोनृपः चिल्लदेवीवरंवव्रेचोलदेवीसमागमं समुद्रस्ययथागंगायमुनेसंगतेसदा तथामंगलभूपस्यसंजातेवामलोचने परस्पराधिकेतेतुप्रियेराज्ञोबभूवतुः चिल्लदेव्यासमंसोथचोलदेव्यासहाखिलां सप्तद्वीपवतीपृथ्वींबुभुजेमंगलोनृपः व्रतस्यास्यैवसामर्थ्याद्वटुकःसोपिनूतनः अभून्मंगलभूपस्यमंत्रीतवयथागुरुः भुक्त्वाथसकलान्भोगान्मंगलोभूभुजांवरः सपुनःस्वर्गमेत्याभून्नक्षत्रंविष्णुदैवतं नारदउवाच एतत्तेकथितंशक्रव्रतानामुत्तमंव्रतं यत्कथाश्रवणेनापिलभतेवांछितंफलं प्रयागमिवतीर्थेषुदेवेषुभगवानिव नदीषुचयथागंगाव्रतेषुचतथाव्रतं धर्मंचार्थंचकामंचमोक्षंचयदिवांछसि तदेतच्चव्रतंशक्रकुरुश्रद्धासमन्वितः श्रीकृष्णउवाच व्रतमिदमथचक्रेनारदेनोपदिष्टंसुरपतिरपियस्माद्वांछितार्थंसलेभे त्वमपिकुरुतथैतद्धर्मसूनोयथास्यादभिमतफलसिद्धिःपुत्रपौत्रादिवृद्धिःधनंधान्यंधरांधर्मंकीर्त्तिमायुर्यशःश्रियं तुरंगान्दंतिनःपुत्रान्महालक्ष्मीःप्रयच्छति

इतिभविष्योक्तमहालक्ष्मीव्रतं ॥ ॥

अस्योद्यापनंव्रतोद्यापनंकौमुद्यां पूर्वोक्तविधिनाषोडशवर्षपर्यंतं व्रतं विधायोद्यापनंकार्यं तिथ्यादिसंकीर्त्यात्मनोऽखिलपापक्षयपूर्वकसकलदुःखदौर्भाग्यनिरसनधनधान्यैश्वर्यपुत्रपौत्राद्यभिवृद्धिद्वारा श्रीमहालक्ष्मीप्रीत्यर्थमाचरितमहालक्ष्मीव्रतोद्यापनंकरिष्ये आचार्यंवृत्वा सर्वतोभद्रपूजान्वितंपूजनंविधाय रात्रौजागरणंचकृत्वा प्रातरग्निंप्रतिष्ठाप्यअन्वादध्यात् प्रधानंमहालक्ष्मींश्रीसूक्तेन प्रत्यृचंकमलैःपुनर्घृताक्तपायससघृतबिल्वादिद्रव्येण

प्रत्येकमष्टोत्तरशतसंख्याकाहुतिभिर्लक्ष्मीमंत्रेणयक्ष्येमंडलदेवताश्चाज्येनएकैकयाहुत्याएवंहोमंकृत्वा आचार्यंसंपूज्यपीठंगांशय्यादिकंचदत्त्वा षोडशमिथुनानि वस्त्रादिभिः संपूज्य सूर्पेषोडशनानाविधभक्ष्याणिचंदनतालवृंतताडवृक्षपत्रपूगपूर्णफलनिचयंनिक्षिप्यसूर्पेणाच्छाद्यदद्यात् क्षीरोदार्णवेत्यादिमंत्रेणवायनंदत्त्वा ब्राह्मणान्संतर्प्याशिषोगृहीत्वाभुंजीतेतिसंक्षेपः अथमहालक्ष्मीव्रतस्यागमपुराणोक्तव्रतविधिः तत्रादौ भाद्रशुक्लाष्टम्यां प्रातरुत्थाय प्रातःषोडशकृत्वोंघ्रीकरौमुखंचप्रक्षाल्य स्नानादिकंविधाय संकल्पंकृत्वा पूजनं कुर्यात् महालक्ष्म्याश्चंदनादिनाप्रतिमांविधाय तदग्रेतंतुषोडशसंसिद्धषोडशग्रंथिसंयुतं सूत्रं लक्ष्म्यैनमइतिमंत्रेण प्रतिग्रंथ्यभिमंत्रितंसंस्थाप्यलक्ष्मीपूजनंडोरकपूजनंचकृत्वा हस्ते डोरकवंधनंकुर्य्यात् तत्रमंत्रः धनंधान्यंधरांहर्म्यंकीर्त्तिमायुर्यशःसुखं तुरगान्दंतिनःपुत्रान्महालक्ष्मिप्रयच्छमे मंत्रेणानेनवद्ध्वाथडोरकंदक्षिणेकरे कांडानिषोडशादायदूर्वायाश्चाक्षतानिच एकचित्तःकथांश्रुत्वापूजयेत्तच्चडोरकं ततस्तुप्रातरारभ्ययावत्स्यादसिताष्टमी तावत्प्रक्षाल्यतद्धस्तपादादीनिकथांतथा शृणुयात्प्रत्यहंतावत्तत्संख्यैरक्षतादिभिरिति अथलक्ष्मीपूजनविधिः तत्राष्टदलंविधायपंचदशोपचारैर्लक्ष्मींपूजयेत् तदुक्तं सारसंग्रहे आवाहनंचासनंस्यादर्घ्यपाद्याचमानिच मधुपर्काभिषेकौचवस्त्रालंकारचंदनं पुष्पंधूपंदीपभोज्येप्रोद्वासनमथापिच एतानिमंत्रवित्कुर्यादृक्पंचदशकेनहिं अथप्रयोगः प्रणवेनश्रीवीजेनवा प्राणायामत्रयं कृत्वा ऋष्यादिस्मरणपूर्वकमंगन्यासंकुर्य्यात् आनंदकर्दमरीचिक्लीतपुत्रेभ्यऋषिभ्योनमोमुखे अनुष्टुप्बृहतीत्रिष्टुप्प्रस्तारपंक्तिछंदोभ्योनमोहृदि श्रीविभावसुदेवताभ्यांनमइति विन्यस्य विध्यनुसारेण विनियोगमुक्का हिरण्मयायैनमोहृदयायनमः चंद्रायैनमःशिरसेस्वाहा रजतस्रजायैनमः शिखायैवषट् सुवर्णस्रजायैनमःकवचायहुं

हिरण्यस्त्रजायैनमोनेत्राभ्यांवौषट् हिरण्यवर्णायनमअस्त्रायफट् इतिषडंगमंत्रान्हृदयादिपदस्थाने अंगुष्ठादिपदेष्वंगुष्ठादिकरतलांतंकरयोर्यथास्थितान् हृदयादिषडंगेषु विन्यस्य हिरण्यवर्णामितिपंचदशाभिर्न्यासान्कुर्यात् शिरसिहिरण्यवर्णामित्यादि १ नेत्रयोः ताम्मआवहइति २ कर्णयोः अश्वपूर्णामिति ३ नासायां कांसोस्मितामि ४ गुह्येमनसइति ५ कर्दमेनेति ६ ऊर्वोः आपःसृजंत्विति ७ जान्वोःआर्द्रांसूर्यामिति ८ जंघयोःआर्द्रांचंद्रामिति ९ पादयोः ताम्मइति एवमेताः प्रणवादिनमोंताविन्यस्य सरसिजनिलयेइतिध्यात्वा मानसपूजांतेचतुर्द्वारं चतुरस्त्रत्रयावृतं अष्टदलंकमलंपूजाचक्रंस्वपुरतोनिधायार्घ्यपात्रस्थापनादिपीठार्चनांतेपीठशक्तीःपूजयेत् ॐविभूत्यैनमःकांत्यै सृष्ट्यै कीर्त्यै संतत्यै तुष्ट्यै पुष्ट्यै मध्ये ऋद्ध्यैनमः ततःप्रतिमादौदेव्यावाहनार्घ्यादि अथवा योगपीठन्यासं कृत्वा मूलमंत्रन्यासंकुर्यात् अस्याविद्यायाभृगुर्ऋषिस्त्रिष्टुप्छंदः श्रीर्देवतान्यासेविनियोगः भृगवेऋषयेनमःशिरसि त्रिष्टुप्छंदसेनमोमुखेश्रीदेवतायैनमोहृदये शंबीजायनमोगुह्ये ईंशक्तयेनमः पादयोः रंकीलकायनमोनाभौ श्रांअंगुष्ठाभ्यांनमः श्रींतर्जनीभ्यांनमः श्रूंमध्यमाभ्यांनमः श्रैंअनामिकाभ्यांनमः श्रौंकनिष्ठिकाभ्यांनमः श्रःकरतलकरपृष्ठाभ्यांनमः श्रां हृदयायनमः श्रींशिरसेस्वहा श्रूंशिखायैवषट् श्रैंकवचायहुं श्रौंनेत्रत्रयायवौषट् श्रःअस्त्रायफट् मूलेनव्यापकंकुर्यात् . ध्यानं कांत्याकांचनसन्निभांहिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोक्षिप्तहिरण्मयामृतघटैरासिच्यमानांश्रियं विभ्राणांवरमब्जयुग्ममभयंहस्तैःकिरीटोज्ज्वलां क्षौमाबद्धनितंबबिंबललितांवंदेरविंदस्थिताम् इतिध्यात्वामनसा संपूज्य मूलमंत्रंजपित्वा गुह्येतिमंत्रेणसंपूर्ण्यअर्घ्यस्थापनादिकृत्वा वाह्यपूजामारभेत् तत्रतांत्रिकंवैदिकंवाध्यानंकृत्वा प्रतिमादिप्राणप्रतिष्ठावाहनादिकंकुर्यात् तद्यथा हिरण्यवर्णांहरिणींसु

अ०र०
आश्वि०
॥२०॥

वर्णरजतस्रजं चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह १ महालक्ष्मिसमागच्छपद्मनाभपदादिह यथोपचारपूजेयंत्वदर्थंदेविनिर्मितेति मूलेनावाहनंकुर्यात् तवायंमहिमेति आलयस्तेहिकथितइतिमूलेनस्थापनं सर्वांतर्यामिणीत्यासनं अस्मिन्वरासनेइतिप्रतिष्ठापनं अनन्यातवेतिसान्निरोधनं अज्ञानाद्दुर्मदत्वादितिसंमुखीकरणं दृशापीयूषेतिस्थिरीकरणं अभक्त्यावाङ्मनइतिअवगुंठनं ततःषडंगेनसकलीकरणं धेनुमुद्रयाअमृतीकरणं महामुद्रयापरमीकरणं ततःप्राणप्रतिष्ठांकृत्वाआसनंदद्यात् तांमआवह श्रीलक्ष्म्यैनमःइदमासनं अथअर्घ्यःतापत्रयहरामिति अश्वपूर्णांरथमध्यांहस्तिनादप्रमोदिनीं श्रियंदेवीमुपह्वयेश्रीर्मादेवीजुषतां श्रीरेषतेअर्घ्यःस्वाहा ततःपाद्यं यद्भक्तिलेशेतिकांसोस्मितांहिरण्यप्राकारामार्द्रां ज्वलंतींतृप्तान्तर्पयंतीं पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं श्रीरेतत्ते पाद्यं अथाचमनीयं यंवेदानामपीति चंद्रांप्रभासां यशसाज्वलंतीं श्रियंलोकेदेवजुष्टामुदारां तांपद्मिनीमिहशरणमहंप्रपद्ये अलक्ष्मीर्मेनश्यतांत्वांवृणोमि मूलेनश्रीरेतत्तेआचमनीयं अथमधुपर्कः सर्वकालुष्यहीनेतिपठित्वा आदिवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथविल्वः तस्यफलानि तपसानुदंतुमायाअंतरायाचवाह्यांअलक्ष्मीः श्रीरेषतेमधुपर्कःस्वधा ततःपुनराचमनीयंस्वधा स्नानं परमानंदवोधाब्धिपइति उपैतुमांदेवसखः कीर्तिश्चमणिनासह प्रादुर्भूतोसिराष्ट्रेस्मिन्कीर्त्तिवृद्धिंददातुमे श्रीरेतत्ते स्नानंनमः ततः पुनराचमनीयं ततोवस्त्रं मयाचित्रेति यमाश्रित्येति तंतुसंतानमितिच क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहं अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात् श्रीरेतत्तेवासोनमः ततोभूषणानि स्वभावसुंदरेति गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानां तामिहोपह्वयेश्रियं श्रीरेतत्तेभूषणंनमः ततश्चंदनं मनसः काममाकूतिंवाचः सत्यमशीमहि पशूनां

रूपमन्नस्यमयिश्रीः श्रियतांयशः मलयाचलसंभूतंनानापन्नगसेवितं शीतलंबहुलामोदचंदनंप्रतिगृह्यतां श्रीरेषतेगंधः ततोक्षताः अक्षताश्चसुरश्रेष्ठकुंकुमाक्ताःसुशोभनाःगृहाणदेवदेवेशिमयादत्तानुभक्तितः श्रीरेतेतेअक्षताः ततःपुष्पाणि नानापरिमलामोदमुक्तालिकुलसंकुलं आनंदिनंदनोद्यानपद्मायैकुसुमंनमः कर्द्दमेनप्रजाभूतामयिसंभ्रमकर्द्दम श्रियंवासयमेकुलेमातरंपद्ममालिनीं श्रीरेतानितेपुष्पाणिवौषट् ततःपंचपुष्पांजली र्दत्त्वा पंचावरणपूजांकुर्य्यात् कर्णिकायांषडंगानिपूज्यांतः अष्टदले दिग्दलेषु वासुदेवायनमःसंकर्षणाय नमः प्रद्युम्नायनमः अनिरुद्धायनमः हिमपीततमालेतनीलाभान्पीतवाससः शंखचक्रगदापद्मचतुर्भुजान्पूजयेत् ततोविदिग्दलेषु सनकाय सलिलाय गुग्गुलवे कुरंटकाय इतिसंपूज्य देव्यादक्षिणे शंखनिधयेव सुधारासहिताय देव्यावामे वसुमतीसहितायपद्मनिधये तथाच यजेच्छंखनिधिंदेव्यादक्षिणेदयितान्वितं मुक्तामाणिक्यसंकाशौकिंचित्स्मितमुखांबुजौ अन्योन्यालिंगनपरौशंखपंकजधारिणौ वामेस्याःपंकजनिधिं प्रिययासहितंयजेत् सिंदूराभौभुजाश्लिष्टैरक्तपद्मदलान्वितौ निःसरद्रत्नवर्षाभ्यांपद्माभ्यांमूर्ध्निलांछितौ सुदले पंकजनिभांनत्वावसुमतीमिति इतिसंपूज्य अभीष्टेतिसंप्रार्थ्य हस्तौप्रक्षाल्य तृतीयावरणपूजां कुर्यात् वलाकायैनमः विमलायैनमः कमलायैनमः वनमालिकायैनमः विभीषणायैनमः मालिकायैनमः शांकर्यैनमः वसुमालिकायैनमः पंकजधारिण्यैनमः मुक्ताहारसमप्रभा एताःसंपूज्य मूलेनस्वेष्टदेवंसंपूज्य मूलेनपुष्पांजलिंदत्त्वा इंद्रादिपूजनं वज्रादिपूजनंकृत्वा पुष्पांजलिंदद्यात् गंधसंभारसन्नद्धंपृथुवस्तुसमुद्भवं सुरासुरनरानंदिधूपोयंप्रतिगृह्यतां आपःसृजंतुस्निग्धानिचिक्लीतवसमेगृहे निजांदेवींमातरं श्रियंवासयमे कुले लक्ष्म्यैनमः धूपंसमर्पयामीति धूपः मार्तंडमंडलाखंडचंद्रबिंबाग्नितेजसां निधानंदेवदीपोयंनिर्मितस्त

वभक्तितः आर्द्रांपुष्करिणींपुष्टिंसुपर्णांहेममालिनीं सूर्य्यांहिरण्मयींलक्ष्मींजातवेदोममावह इतिदीपः देवतालयपातालभूतलाधारधान्यजं षोडशाकारसंभारंनैवेद्यंतोश्रियेनमः आर्द्रांयस्करिणींयष्टींपिंगलांपद्ममालिनीं चंद्रांहिरण्मयींयष्टींजातवेदोममावह इतिनैवेद्यं स्नानादिकंविधायापियतःशुद्धिरवाप्यते एतदाचमनीयंमेमहालक्ष्मिविधीयतां इत्युत्तरापोशानं इदंफलमितिफलं पातालतलसंभूतंवदनांभोजभूषणं नानागुणसमाकीर्णंतांबूलंदेवितेनमः इतितांबूलं हिरण्यगर्भामितिदक्षिणा श्रियंजातइतिनीराजनं यानिकानिचेत्येकप्रदक्षिणा ततोनमस्कारः ततः श्रीसूक्तं पठित्वाप्रार्थनां कुर्यात् एवंप्रत्यहं पूजनं विधाय समाप्तिदिनें कृष्णाष्टम्यां महापूजां कुर्य्यात् अथ कृष्णाष्टमीप्रयोगः नक्तं स्नानं विधाय शुक्लांबरधरः पूजागृहंगत्व। आसनोपरि पूर्वमुखउपविश्य श्वेतवस्त्रेऽष्टदलं विलिख्य तत्कर्णिकायां गजकुंभस्थसलिलासिच्यमानां लक्ष्मीं संलिख्य पुष्पांजलिदानांतमुक्तपूजनं कृत्वा विष्णोर्वक्षसियापद्मेशंखचक्रेतथांवरे लक्ष्मिनित्यायथासित्वं मयिनित्यातथाभवेति संप्रार्थ्य उत्तार्य्य डोरकंवाहोर्लक्ष्मी। पार्श्वेनिवेदयेत् लक्ष्मिदेविगृहाणत्वंयन्मयाडोरकंधृतं व्रतंसंपूर्णतांयातुकृपाकार्य्यामयित्वयेति ततोवायनदानं षोडशपिंडान्षोडशदीपांश्चदद्यात् तत्रमंत्रः इंदिराप्रतिगृह्णातिइंदिरावैददातिच इंदिरातारिकोभाभ्यामिंदिरायैनमोनमइतिमूलेनार्घ्यंदत्त्वा तत्संख्यान्गोधूमचूर्णदीपान् पिंडांश्च दत्त्वारात्रौजागरणंकृत्वा चंद्रोदयेफलादियुक्तेनशंखेनार्घ्यंदद्यात् नमोस्तुतेनिशानाथलक्ष्मीभ्रातर्नमोस्तुते व्रतंसंपूर्णतांयातुगृहाणार्घ्यंखगोत्तम ततोनमस्कारंकृत्वा जानुभ्यामवनींगत्वाप्रार्थयेत् क्षीरोदार्णवसंभूतेकमलेकमलालये प्रयच्छकामान्मेसर्वान्विष्णोर्वक्षस्थलालये पुत्रान्देहियशोदेहिसौख्यंसौभाग्यमेवच कालिकालिमहाकालिविकरालिनमोस्तुते त्रैलोक्य

जननित्राहिवरदेभक्तवत्सले एकनाथेजगन्नाथेजमदग्निप्रियेऽव्यये रेणुकेत्राहिमांदेविराममातःशिवंकुरु वैदेहित्राहिमांसीतेप्रसीदपुरुषोत्तमे कपालकर्त्तिकाशूलडमरुव्यग्रहस्तके श्रियंकुरुमहालक्ष्मिमत्राश्रियंत्वाशुनाशयेति वंदारवीरसुरवृंदकिरीटकोटीरोचच्छटाग्निपरिकल्पितरत्नदीपं देवित्वदीयचरणंशरणंजनानांसेवामहेसकलमंगलवर्द्धनाय उत्फुल्लकैरवदलायतलोचनायैगंडोल्लसच्चटुलकुंडलमंडितायै राकाशशिप्रतिभटाननकोमलायैतस्यैनमःकमललोचनवल्लभायै सद्भक्तकल्पलतिकांहारिकंठभूषांकेयूरहेमकटकोज्ज्वलकंकणांकां संसारसागरमुखेपततोममाद्यदेहित्वदीयकरयाष्टिमनंगमातः दृष्ट्यादेविजनाययापिविविधाब्रह्माधिपत्यंगताः विष्णोर्वक्षसि याचकारतरलालीलाब्जमालाभ्रमं क्लेशाग्निप्रहितंत्वदीयचरणद्वंद्वाब्जसेवारतं कारुण्यामृतसारपूरितदशामामद्यपश्येश्वरि मल्लीविफुल्लकुसुमोज्ज्वलमध्यभागधामिल्लभारजिततारकचित्रताभ्रा उत्तप्तहेमनिकषोज्ज्वलकायकांतिर्लक्ष्मीःस्वयंप्रणमतांश्रियमातनोतु इतिमहालक्ष्मींस्तुत्वा प्रातर्विसर्जयेत् विसर्जनमंत्रस्तु ताम्मआवहजातवेदोलक्ष्मीमनपगामिनीं यस्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विंदेयंपुरुषानहं पंकजंदेविसंत्यज्यममवेश्मनिसंविश यथासपुत्रभृत्योऽहंसुखीस्यांत्वत्प्रसादतः इतिदेवीविसर्जनं याश्रीःपद्मासनस्थाविपुलकटितटीपद्मपत्रायताक्षी गंभीरावर्त्तनाभिस्तनभरनमिताशुभ्रवस्त्रोत्तरीया लक्ष्मीर्दिव्यैर्गजेंद्रैर्मदजलसलिलैः स्नापिताहेमकुंभै नित्यंसापद्महस्ताममवसतुगृहेदिव्यमांगल्ययुक्ता ॥ अथनारदीयपुराणोक्तं महालक्ष्मीव्रतं अथैनांतुसमारभ्यव्रतंषोडशवासरं महालक्ष्म्याःसमुद्दिष्टंसर्वसपद्विवर्द्धनं करिष्येऽहंमहालक्ष्मिव्रतंतेत्वत्परायणः तदविघ्नेनमेयातुनमामित्वत्प्रसादतः इत्युच्चार्य्यततोवद्ध्वाडोरकंदक्षिणेकरे षोडशग्रंथिसहितंगुणैःषोडशभिर्युतं ततोन्वहंमहालक्ष्मींगंधाद्यैरर्चयेद्व्रती यावत्कृष्णाष्टमींतत्रचरेदुद्यापनंसुधीः वस्त्रमंडपिकांकृत्वासर्वतोभद्रमंडले कल

शसुप्रतिष्ठाप्यदीपमुद्योतयेत्ततः उत्तार्य्यडोरकंवाहोःकुंभस्यादौनिवेदयेत् चतस्रःप्रतिमाःकृत्वासौवर्णास्तत्स्वरूपिणीः स्नपनंकारयेत्तासांजलैः पंचामृतैस्तथा उपचारैःषोडशभिःपूजयित्वाविधानतः जागरस्तत्रकर्त्तव्यो गीतवादित्रनिःस्वनैः ततोनिशीथेसंप्राप्तेऽभ्युदितेमृतदीधितौ कृत्वार्घ्यंचंदनद्रव्यैःश्रीखंडाद्यैर्विधानतः चंद्रमंडलसंस्थायैमहालक्ष्म्यैप्रदापयेत् क्षीरोदार्णवसंभूतेकमलेकमलालये विष्णुवक्षस्थलस्थेमेसर्वकामप्रदाभव एकनाथेजगन्नाथेजमदग्निप्रियेऽव्यये रेणुकेत्राहिमांदेविराममातःशिवंकुरु मंत्रैरेतैर्महालक्ष्मींप्रार्थ्यश्रोत्रिययोषितः सम्यक्संपूज्यस्रग्गंधवासोयावककज्जलैः संभोज्यजुहुयादग्नौविल्वपत्रकपायसं तदलाभेघृतंविप्रग्रहेभ्यःसमिधस्तिलान् मृत्युंजयायचपुरंसर्वरोगप्रशांतये चंदनंतालपत्रंचपुष्पमालांतथाक्षतान् दूर्वाकौसुंभसूत्रंचपूगंश्रीफलमेवच भक्ष्याणिचनवेसूर्प्पेप्रतिद्रव्यंतुषोडश समाच्छाद्यान्यसूर्प्पेणव्रतीदद्यात्समंत्रकं क्षीरोदार्णवसंभूतालक्ष्मीचंद्रसहोदरा व्रतेनानेनसंतुष्टाभवताद्विष्णुवल्लभा चतस्रःप्रतिमास्तास्तुश्रोत्रियेभ्यःसमर्पयेत् ततस्तुचतुरोविप्रान्षोडशाथसुवासिनीः मिष्टान्नंप्राशयित्वातुविसृजेत्प्राप्तदक्षिणान् समाप्तनियमःपश्चाद्भुंजीतेष्टैःसमन्वितः भुक्त्वेष्टानैहिकान्कामान्लक्ष्मीलोकेवसेच्चिरं एषाशोकाष्टमीचोक्तायस्यांपूर्णंरमाव्रतं अत्राशोकस्यपूजास्यादेकभक्ततयास्मृतं कृत्वाशोकव्रतंनारीह्यशोकाजन्मजन्मनि यत्रकुत्रापिसंजातानात्रकार्य्याविचारणेति इत्यशोकाष्टमीव्रतं सर्वास्वष्टमीषुप्रोक्तमप्याश्विनकृष्णाष्टम्यां मेवकार्य्यं तदुक्तंहेमाद्रावादित्यपुराणे अष्टमीषुचसर्वासुपूजनीयाह्यशोकिका गंधमाल्यनमस्कारधूपदीपान्नसंपदा तस्मिन्नहनियाभुंक्तेनक्तमिंदुविवर्जितं भवत्यथविशोकासायत्रयत्राभिजायते अष्टमीषुचसर्वासुनचेच्छक्नोतिवैमुने प्रौष्ठपद्यामतीतायांयास्यात्कृष्णाष्टमीद्विज तत्रकार्य्यंव्रतंचैतत्सर्वकामफलप्रदं इत्यशोकाष्टमीव्रतं इयंशिवाष्टमीतिभविष्योत्तरे कन्यागते

सवितरिकृष्णपक्षेष्टमीचया साचपुण्यापापहराशिवस्यानंददायिनी स्नानंदानंजपोहोमःपितृदेवाभिपूजनं सर्वंप्रीतिकरंस्याच्चप्रीतेतास्मिंस्त्रिलोचने आश्विनकृष्णनवम्यांरथनवमीव्रतं भविष्यपुराणे कृत्वैवाश्वयुजेमासिकृष्णपक्षेनराधिप नवम्यामुपवासंतुदुर्गांदेवींप्रपूजयेत् पुष्पधूपोपहारैस्तुब्राह्मणानांचतर्पणैः पूजयित्वारथंकृत्वानानावस्त्रोपशोभितं शोभितंध्वजमालाभिःछत्रदर्पणचामरैः कृत्वास्वर्णमयींदुर्गांमहिषेशूलशोभितां विन्यस्यरथमध्येतुपूजयेत्कृतलक्षणां नवम्यांभ्रामयित्वातुजलेदुर्गांनयेन्नृप तत्रजागरपूर्वंस्तुप्रदीपाद्युपशोभितं प्रभातेस्नपनंकुर्य्यात्तद्भक्तानांचपूजनं रथंशोभासमायुक्तंभगवत्यैनिवेदयेत् भुक्त्वाचबांधवैःसार्द्धंप्रणम्याद्यांगृहंव्रजेत् सर्वव्रतानांप्रवरंसर्वपापप्रणाशनं व्रतंरथनवम्याख्यंसर्वकामार्थसाधकं सर्वयज्ञेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं तत्फलंसकलंविंद्यान्नवमीव्रतपालनात् कल्पकोटिशतंसाग्रंविष्णुलोकेमहीयते ततोभुंजन्महींसर्वांसार्वभौमोभवेदिह रत्नोपकरणैर्युक्तांकृत्वादारुमयींशुभां शय्यांनिवेदयेद्यस्तुभगवत्यैनराधिप दुगूलतूलवस्त्राणांपलसंख्यातुयावती तावद्वर्षसहस्राणिदुर्गालोकेमहीयते वृषंशूलांकितंयस्तुभगवत्यैनिवेदयेत् आसप्तसंततिकुलंगृह्यदेव्यालयंव्रजेत् दत्त्वोभयमुखींगांचभगवत्यैसुशोभनां सप्तद्वीपांधरांदत्त्वायत्फलंतदवाप्नुयात् पादद्वयंशिरोर्द्धंचयावद्वत्सस्यनिर्गतं तावद्द्यौःपृथिवीज्ञेयादातास्याश्चमहीप्रदः इतिरथनवमीव्रतं अत्रशय्यादिदानानिस्वतंत्राणीतिफलश्रुतेः अथाश्विनकृष्णनवम्यां महालयश्राद्धंस्कांदे सेतुखंडे नवम्यांयस्तिथौमर्त्यः कुर्याच्छ्राद्धंमहालये नवतिःकल्पसाहस्रंतृप्यंतिपितरोस्यवै संततिंचाप्यविच्छिन्नांदद्युःपितृगणाःसदा अत्रैवनवम्यामन्वष्टकाश्राद्धंकात्यायनः अन्वष्टकासुनवभिःपिंडैःश्राद्धमुदाहृतं पित्रादिमातृमध्यंचततोमातामहांतकं हेमाद्रौछागलेयः केवलास्तुक्षयेप्रोक्तावृद्धावादौप्रकीर्त्तिताः अन्वष्टकासु

मध्यस्थानांत्याःकार्यास्तुमातरः पृथ्वीचंद्रोदये ब्रह्मांडपुराणे पितृणांप्रथमंदद्यान्मातृणांतदनंतरं ततोमातामहानांचअन्वष्टक्येक्रमःस्मृतः दीपिकायांमातुःश्राद्धमादौकर्त्तव्यमित्युक्तं निर्णयामृते मैत्रायणीयगृह्यपरिशिष्टेअन्वष्टक्यंतुक्रमशोमातृपूर्वंतादिष्यते अत्रशाखाभेदेन व्यवस्थेति पृथ्वीचंद्रोदयः जीवत्पितृकविषयमितिनिर्णयदीपः इदंचजीवत्पितृकेणापिकार्य्यं अन्वष्टक्यंगयाप्राप्तौसत्यांयच्चमृतेहनि मातुःश्राद्धंसुतःकुर्य्यात्पितर्य्यपिचजीवति यद्यपि जीवत्पितृकस्य पंचाष्टकाअवश्यंकर्त्तव्यास्तथाप्यशक्तस्येयमावश्यकी प्रौष्ठपद्यष्टकाभूयःपितृलोकेभविष्यतीति हेमाद्रौपाद्मोक्तेः यत्तु इयंमातृनवमीतिकथ्यते सर्वासामेवमातृणांश्राद्धंकन्यागतेरवौ नवम्यांहिप्रदातव्यंब्रह्मलब्धवरायतइतिसूतेनावश्यकोक्तेश्च अत्रसर्वासामित्युक्तेः मातरिजीवत्यामपिसपत्नमात्रादिभ्योदद्यात् तन्मरणेसतितस्यैताभ्यश्चदद्यादित्युक्तंजीवत्पितृनिर्णये सर्वैरप्याचार्य्यैः अत्रभर्तृमरणोत्तरंमातामृता तस्याः श्राद्धंनकार्य्यमितिकेचिदाहुः श्राद्धंनवम्यांकुर्य्यात्तुमृतेभर्तरिलुप्यते तदेतन्निर्मूलत्वान्मूर्खप्रतारणमात्रं श्राद्धदीपिकायांब्राह्मे पितृमातृकुलोत्पन्नायाःकाश्चनमृताःस्त्रियः श्राद्धार्हामातरोज्ञेयाःश्राद्धंतत्रप्रदीयतेइति अत्रदेशाचाराद्व्यवस्था इदंचानुपनीतेनापिकार्य्यं तदुक्तंश्राद्धशूलपाणौ मात्स्ये अमावस्याष्टकाकृष्णापक्षपंचदशीषुचेत्यभिधाय एतच्चानुपनीतोपिकुर्यात्सर्वेषुपर्वसु श्राद्धंसाधारणंनामसर्वकामफलप्रदं भार्य्याविरहितोप्येतत्प्रवासस्थोपिनित्यशः शूद्रोपिमंत्रवत्कुर्य्यादनेनाविधिनाबुधइति तथाग्निपुराणे अन्वष्टकासुवृद्धौचगयायांचक्षयेहनि अत्रमातुःपृथक्श्राद्धमन्यत्रपतिनासहेति यत्तु तमिस्रपक्षेनवमीपुण्याभाद्रपदेहिया चत्वारःपार्वणाःप्रोक्ताःपितृपक्षेमनीषिभिरिति तद्देशाचारतोव्यवस्थितं इदंचजीवत्पितृकेणापिसपिंडकंकार्य्यं हेमाद्रौविष्णुधर्मोत्तरे अन्वष्टकासुचस्त्रीणांश्राद्धंकार्य्यंतथैवचेत्युपक्रम्य पिंडनिर्वापणंकार्य्यं

तस्यामपिचसप्तमीत्युक्तत्वात् तस्यामन्वष्टकायामित्यर्थः अपिशब्देनतीर्थमहालयप्रत्याब्दिकानांग्रहणं तेनगुर्विणीपतेरप्येतेषुपिंडदानंकार्य्यंभवति अत्रातिदेशादेव पिंडदानेप्राप्ते गुर्विणीपतित्वादिप्रयुक्तनिषेधंप्रतिवचनस्यसर्वार्थत्वात् मातृश्राद्धेसुवासिनीपूजनमुक्तंमार्कंडेयपुराणे मातुःश्राद्धेतुसंप्राप्तेब्राह्मणैःसहभोजनं सुवासिन्यैप्रदातव्यमितिशातातपोब्रवीत् भर्तुरग्रेमृतानारीसहदाहेनवामृता तस्याःस्थानेनियुंजीतविप्रैः सह सुवासिनीं तत्रैव मदालसावाक्यं स्त्रीश्राद्धेषुप्रदेयाःस्युरलंकाराश्चयोषिते मंजीरमेखलादामकर्णिकाकंकणादयः अत्राशक्तावनुकल्पमाहाश्वलायनः अनडुहोयवसमाहरेत् अग्निनावाकृच्छ्रमुपोषेदेषोष्टकेतितत्वेच नष्टकल्पादिति हेमाद्रौपितामहः अमावास्याव्यतीपातपौर्णमास्यष्टमीषुच विद्वान्श्राद्धमकुर्वाणोनरकंप्रतिपद्यते अकरणेप्रायश्चित्तमुक्तम्ऋग्विधाने एभिर्ऋग्भिर्जपेन्मंत्रंशतवारंतुतद्दिने अन्वष्टक्यंयदाशून्यंसंपूर्णंयातिसर्वदेति अस्यामेवनवम्यां बिल्वशाखायांदेवीबोधनमुक्तं देवीपुराणे कन्यायांकृष्णपक्षेतुपूजयित्वार्द्रभेदिवा नवम्यांबोधयेद्देवींगीतवादित्रनिःस्वनैरिति अथदशम्यादिमहालयपक्षमाह यत्तु कृष्णपक्षेदशम्यादौवर्जयित्वाचतुर्दशीं श्राद्धेप्रशस्तास्तिथयोयथैतानतथेतराइतिप्रतिपदादिमहालयपक्षाणामप्रतिकर्षमाह कात्यायनः अत्रापरपक्षांतराणामपिनित्यत्वासिद्धे गौतमादिवचनैकवाक्यतया पंचम्यादिकल्पेसिद्धे शक्तेनप्रतिपदमारभ्य तदशक्तौपंचमीमारभ्य दशमीमारभ्यवा तदशक्तावेकस्यामपि तिथौ श्राद्धमवश्यंकर्तव्यमितिसिद्धं सकृत्करणादेवाश्विनापरपक्षादेषांभेदः तत्रसर्वत्रदेशाचारतोव्यवस्था एकाहपक्षेऽपिमृताहतिथिरावश्यकी यदाहुः आषाढ्याःपंचमेपक्षेकन्यासंस्थेदिवाकरे मृताहनिपुनर्योवैश्राद्धंदास्यतिमानवः तस्यसंवत्सरंयावत्तृप्ताःस्युः पितरोध्रुवमिति अत्रैवहस्तादित्यखंजनदर्शनमुक्तंज्योतिषे हस्तगतेऽबुजबंधौपश्येद्यदिखंजनंनृपोयांतं पश्येत्त

थागतस्यचक्षिप्रंमहीपतिर्वशंयाति १ खंजनकोनामायंविहगस्तस्यावलोकनेप्रथमे प्रोक्तानियानिमुनिभिः
फलानितानिवक्ष्येहम् २ समंतभद्रस्तदनुप्रभद्रस्ततोनुभद्रोतिवलादिकश्च एषांचतुर्णामथखंजनानामाचक्ष्म
हेसंप्रतिलक्षणानि ॥ ३ ॥ यःकंधरोरःशिरसासमंताद्बिभर्त्तिकार्ष्ण्यंससमंतभद्रः कृष्णेनवायःशिरसोरसाचेत्सतु
प्रभद्रःशितिकंठपृष्ठः ॥ ४ ॥ कंठोरसीयस्यचमेचकेस्तःसमंततश्चापिसितोनुभद्रः कृष्णाभवेत्कंठगतैक
रेखा यस्याथसोयंबलभद्रनामा ॥ ५ ॥ एवंचतुर्णामपिकार्यसिद्धौ योयोभवेत्पूर्वतरःसमुख्यः
६ ॥ आकंठमुखात्कृष्णःसंपूर्णःपूरयत्याशाः निंदितानाह आकारभद्रोगलमात्रकृष्णः सिताननःका
र्यविनाशनाय ७ अंगेहरिद्राद्रवसन्निकाशोगोमूत्रनामाखलुखंजरीटः निरीक्षितःप्राग्दिवसेप्रभूतंदुःखोदयंशं
सतियावदब्दम् ८ वाराहसंहितायामधिकृत्य अथसुरभिमधुकुसुमफलपादपसलिलांवुपूर्णेषु करितुरगयु
जाचप्राप्तोनद्युद्यानमूर्द्धहर्म्येषु ९ गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे हस्त्यश्वतुरगशालाछत्रध्व
जचामराद्येषु १० हेमसमीपसितांवरकमलोत्पलपूजितोपलिप्तेषु दधिपात्रधान्यकूटेदृष्टोभीष्टानिचेष्टतेविहगः
११ पंकेस्वादुधनानिगोरससंपच्चगोमयोपालिप्तेतु शाद्वलकेवस्त्राप्तिः शकटस्थेदेशविभ्रमोभवति १२ गृह
पटलेषुभ्रंशोवक्रेवंधोःशुचारोगः पृष्ठेष्वजाविकानांप्रियसंगममावहत्याशु १३ महिषीगर्दभास्थिश्मशान
गृहकोणशर्करादृष्टः प्राकारशुचिविमलसुनियतमसौमरणदोभयदः १४ पक्षौधुन्वन्नशुभःस्वादन्प्रपिबन्वावा
रिवाहस्थःसूर्योदयेप्रशस्तोनिष्टकरःखंजनोऽस्तमये १५ वारिवाहोऽत्रजलप्रणालिका आगमांतरेऽपि आजेषु
गोषुगजवाजिमहोरगेषुराज्यप्रदःकुशलदःशुचिशाद्वलेषु भस्मास्थिकारिनखलोष्टतुषेषुदृष्टःकष्टंददातिनियतंख
लुखंजरीटः अथास्यदर्शनेपठनीयोमंत्रः नीलग्रीवशुभग्रीवसर्वकामफलप्रद पृथिव्यामवतीर्णोसिखंजरीटनमो

स्तुते त्वंयोगयुक्तोमुनिपुत्रकस्त्वमदृश्यतामेषिशिखोद्गमेन त्वंदृश्यसेप्रावृषिनिर्गतायांत्वंखंजनाश्चर्यमयोनमस्ते आगमांतरे वित्तंब्राह्मणिकार्यसिद्धिरतुलाशक्रेहुताशेभयं याम्यामग्निभयंसुरद्विषिकलिर्लाभःसमुद्रालये वायव्यांवरवस्त्रमन्नसलिलंदिव्यांगनाचोत्तरे ऐशान्यांमरणंध्रुवंनिगदितंदिग्लक्षणंखंजने तथा कुचेष्टितोयःकुवपुःकुवेषोनिरीक्षितःखंजनकःकदाचित् द्रष्टाविशेषात्परितोषयेद्वाकिंघातयेत्संचितदुष्कृतंतु मासंनभुंजीतशयीतभूमौस्त्रियंनसेवेतादिनानिसप्त स्नायाज्जपेत्संजुहुयाच्चवह्नौपैष्टंपुमान्खंजनमर्चयेच्च वराहसंहितायामपि नृपतिरपिशुभप्रवेशेखगमवलोक्यमहीतलेविदध्यात् सुरभिकुसुमधूपयुक्तं शुभमभिनंदितमेवसिद्धं अशुभमपि विलोक्यखंजरीटंद्विजगुरुसाधुसुरार्चनेसुयुक्तः नचनृपतेरशुभंभवेत्कथंचित्सप्तदिनानिनसप्तमांसभोजी ॥ आश्विनकृष्णदशम्यांमहालयश्राद्धं स्कांदे सेतुखंडे दशम्यांतुतिथौमर्त्यःश्राद्धंकुर्यान्महालये शतंकल्पसहस्राणितृप्यंतिपितरोस्यवै संततिंचाप्यविच्छिन्नांदद्युःपितृगणाःसदा ॥ आश्विनकृष्णपक्षे इंदिरैकादशीव्रतं नारदीये इषस्यैकादशींकृष्णामिंदिरांसमुपोष्यवै शालिग्रामशिलाग्रेतुमध्याह्नेश्राद्धमाचरेत् विष्णोः प्रीतिकरंविप्रततःप्रातर्हरेर्दिने पद्मनाभंसमभ्यर्च्यभूदेवान्भोजयेत्सुधीः विसृज्यदक्षिणांदत्त्वातांस्ततोश्नीतचस्वयं एवंकृतव्रतोमर्त्योभुक्त्वाभोगानिहेप्सितान् पितॄणांकोटिमुद्धृत्ययात्यंतेवैष्णवंपदं स्कांदे सेतुखंडेऽपि एकादश्यांतिथौयस्तुश्राद्धंकुर्य्यान्महालये द्विशतंकल्पसाहस्रंतृप्यंतिपितरोस्यये अथैतस्याएकादश्याः कथा ब्रह्मवैवर्त्ते पाद्मेच युधिष्ठिरउवाच कथयस्वप्रसादेनममाग्रेमधुसूदन कृष्णायाचाश्विनेपक्षेकिंनामैकादशीतुसा श्रीकृष्णउवाच आश्विनेकृष्णपक्षेतुइंदिरानाममनामतः तस्याव्रतप्रभावेणमहापापंप्रणश्यति अधोयोनिगतानांचपितॄणांगतिदायिनी शृणुष्वावहितोराजन्कथांपापहरांशुभां यस्याःश्रवणमात्रेणवाजपेयफलंभवेत्

पुराकृतयुगेराजाबभूवरिपुसूदनः इंद्रसेनइतिख्यातोपुरीमाहिष्मतीपतिः सराज्यंपालयामासधर्मेणयशसान्वितः पुत्रपौत्रसमायुक्तोधनधान्यसमन्वितः माहिष्मत्यधिपोराजाविष्णुभक्तिपरायणः जपन्गोविंदनामानिमुक्तिदानिनराधिप कालंनिनायविधिवदध्यात्मपरिचिंतकः एकस्मिन्दिवसेराज्ञिसुखासीनेसभासने अवतीर्य्यागतोधीमानंवरान्नारदोमुनिः तमागतमभिप्रेक्ष्यसमुत्थायकृतांजलिः पूजयित्वार्घ्यविधिनाचासनेसंन्यवेशयत् सुखोपविष्टः समुनिःप्रत्युवाचनृपोत्तमं कुशलंतवराजेंद्रसप्तस्वंगेषुवर्तते धर्मेमतिर्वर्ततेतेविष्णुभक्तिरतः सदा राजोवाच त्वत्प्रसादान्मुनिश्रेष्ठसर्वत्रकुशलंमम अद्यक्रतुक्रियाः सर्वाः सफलास्तवदर्शनात् प्रसादंकुरुविप्रर्षेब्रूह्यागमनकारणं नारदउवाच श्रूयतांराजशार्दूलमद्वचोविस्मयप्रदं ब्रह्मलोकादहंप्राप्तोयमलोकंनरोत्तम शमनेनार्चितोभक्त्याचोपविष्टोवरासने धर्मशीलाः सत्यवंतोभास्करंसमुपासते व्रतपुण्यप्रकर्तारोव्रतवैकल्यदोषतः सभायांश्राद्धदेवस्यमयादृष्टः पितातव कथितस्तेनसंदेशस्तन्निबोधनृपोत्तम इंद्रसेनइतिख्यातोराजामाहिष्मतीप्रभुः तस्याग्रेकथयब्रह्मन्स्थितंमांयमसन्निधौ केनापिचांतरायेणपूर्वजन्मभवेनवै स्वर्गंप्रेषयमांपुत्रइंदिराव्रतदानतः इत्युक्तोहंसमायातः समीपंतवपार्थिव पितुःस्वर्गगतिंराजन्निंदिराव्रतदानतः राजोवाच कथयस्वप्रसादेनभगवन्निंदिराक्रमं विधिनाकेनकर्त्तव्यंकस्मिन्पक्षेतिथौतथा नारदउवाच शृणुराजन्हितंवच्मिव्रतस्यास्यविधिंशुभं आश्विनस्यासितेपक्षेदशमीदिवसेशुभ प्रातःस्नानंप्रकुर्वीतश्रद्धायुक्तेनचेतसा ततोमध्यान्हसमयेस्नानंकृत्वावहिर्जले पितॄणांतृप्तयेश्राद्धंकुर्याच्छ्रद्धासमन्वितः एकभक्तंततःकृत्वारात्रौभूमौशयीतवै प्रभातेविमलेजातेप्राप्तेचैकादशीदिने मुखप्रक्षालनंकुर्याद्दंतधावनवर्जितं उपवासस्यनियमंगृह्णीयाद्भक्तिभावतः अद्यस्थित्वानिराहारःस

र्वंभोगविवर्जितः श्वोभोक्ष्येपुंडरीकाक्षशरणंमेभवाच्युत शालिग्रामशिलाग्रेतुश्राद्धंकृत्वायथाविधि पूजयित्वाहृषीकेशंधूपदीपादिभिस्तथा बंधुदौहित्रपुत्राद्यैःस्वयंभुंजीतवाग्यतः अनेनविधिनाराजन्व्रतंकुरुप्रयत्नतः विष्णुलोकंप्रयास्यंतिपितरस्तवभूपते इत्युक्त्वानृपतिंराजन्मुनिरंतरधीयत यथोक्तविधिनाराजाचकारव्रतमुत्तमं अंतःपुरेणसहितःपुत्रभृत्यसमन्वितः व्रतेकृतेतुकौंतेयपुष्पवृष्टिरभूद्दिवः तत्पितागरुडारूढोजगामहरिमंदिरं इंद्रसेनोपिराजर्षिःकृत्वाराज्यमकंटकं इंदिराव्रतपुण्येनययौवैकुंठमेवहि पठनाच्छ्रवणादस्यसर्वपापैः प्रमुच्यते इति ब्रह्मवैवर्तपद्मपुराणयोरिंदिरैकादशीव्रतं आश्विनकृष्णद्वादश्यां संन्यासिनामपिमहालयश्राद्धं पुत्रादिभिः कार्यं तत्पार्वणेनैव तदुक्तंवायुपुराणे संन्यासिनोप्यौदकादिकुर्य्यात्पुत्रोयथाविधि महालयेतुयच्छ्राद्धंद्वादश्यामेवतद्भवेत् महालयेतुयच्छ्राद्धंद्वादश्यांपार्वणंनत्विति पृथ्वीचंद्रोदये संग्रहेपि यतीनांचवनस्थानांवैष्णवानांविशेषतः द्वादश्यांविहितंश्राद्धंकृष्णपक्षेविशेषत इतिस्कांदे सेतुखंडेपि द्वादश्यांभक्तितोयस्तुश्राद्धंकुर्यान्महालये षट्शतंकल्पसाहस्रंतृप्यंतिपितरोस्यवै आश्विनकृष्णत्रयोदशीश्राद्धंचंद्रिकायां त्रयोदशीभाद्रपदीमुख्याकृष्णापितृप्रिया तृप्यंतिपितरस्तस्यांवर्षाणामयुतायुतं स्कांदे सेतुखंडेच पितॄनुद्दिश्ययः कुर्य्यात्त्रयोदश्यांमहालयं साहस्रकल्पसाहस्रंतृप्यंतिपितरोस्यवै संततीश्चाप्यविच्छिन्नादद्युःपितृगणाः सदा हेमाद्रौ मनुस्मृतौ यत्किंचिन्मधुनामिश्रंप्रदद्याच्चत्रयोदशीं तदप्यक्षयमेवस्याद्वर्षासुचमघासुच यमस्मृतावपि गाथाश्चपितृभिर्गीताः कीर्त्तयंतिपुरातनाः अपिनःसकुलेजायाद्योनोदद्यात्त्रयोदशीं मघासुसर्पिषायुक्तंपायसंदक्षिणामुखः प्रयोगपारिजाते शंखः प्रौष्ठपद्यामतीतायांमघायुक्तांत्रयोदशीं प्राप्यश्राद्धंप्रकुर्वंतिमधुनापायसेनच प्रजामिष्टांयशः स्वर्गमारोग्यंचधनंतथा नृणांश्राद्धेसदाप्रीताः प्रयच्छंतिपितामहाः

एतन्नित्यमपि पृथ्वीचंद्रोदयेविष्णुधर्मे श्रौष्ठपद्यामतीतायांतथाकृत्वात्रयोदशीं एतांस्तुश्राद्धकालान्वैनित्यानाहप्रजापतिः श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यते इत्यादिवचनैरत्रैवत्रयोदश्यांश्राद्धंमहाफलं मघायुक्तायांत्वतिप्रशस्तंमघायुक्ताथतत्रापिशक्त्याराजन्त्रयोदशीतिवचनात् अत्रमलमासेपिश्राद्धंकार्य्यं अनन्यगतित्वात् मघात्रयोदशीयोगप्राशस्त्याच्च मघात्रयोदशीश्राद्धंप्रत्युपस्थितिहेतुकं अनन्यगतिकत्वेनकर्तव्यस्यान्मलिम्लुचइतिकाठकगृह्याच्च इदंचयुगादिविशेषप्रयुक्तत्वात्पिंडरहितंकार्य्यं अयनद्वितयेश्राद्धंविषुवत्रितयेतथा युगादिषुचकर्तव्यंपिंडनिर्वपणादृते अपिंडकश्राद्धेविशेषमाह छागलेयः पिंडोयत्रनिवर्तेतमघादिषुकथंचन सांकल्पंतुतदाकार्य्यंनियमाद्ब्रह्मवादिभिः सांकल्पंतुयदाकुर्यात्तत्कुर्य्यात्पात्रपूरणं नावाहनाग्नौकरणंनपिंडांविकिरंनच अशक्त्यापार्वणंश्राद्धंयथावत्कर्तुमक्षमः पिंडार्घ्यादिविहीनंतुसंकल्पश्राद्धमाचरेदिति वचनात् एतच्चपुत्रवतापुत्रांतरोद्देशेनकार्य्यम् कृष्णपक्षेत्रयोदश्यांयः श्राद्धंकुरुतेनरः पंचत्वंतस्यजानीयाज्ज्येष्ठपुत्रस्यनिश्चितमितिवचनात् अतएव योवांछतिनरोमुक्तिंपितृभिःसहचात्मनः असंतानश्चयस्तस्यश्राद्धेप्रोक्तात्रयोदशी नागरखंडे तत्रैव अद्यप्रभृतियःश्राद्धंत्रयोदश्यांकरिष्यति कन्यासंस्थेसहस्रांशौतस्यश्राद्धस्यसंक्षयइति तत्रबहुभिर्वचनैर्बहुलार्थतया विहितस्यात्यंतनिषेधायोगात् विषयभेदेनवक्तव्ये पिंडदानयुक्तत्वरूपविस्तारराहित्यरूपस्तावदेकस्तद्विषयो नागरखंडे उक्तः अतःश्राद्धंविनादेयंतद्दिनेमधुपायसंखडग्मांसंकालशाकंमांसंवाघ्रीणसस्यच तस्याभावेपिदातव्यंक्षीरौदनमनुत्तमं तस्मिन्नहनिदातव्यंपितॄणांतृप्तयेनृप तस्याभावेपिदातव्यंक्षीरौदनमनुत्तमं तस्मिन्नहनिदातव्यंपितॄणांतृप्तयेनृप तस्याभावेपिदातव्यंजलंतिलविमिश्रितमिति अत्र श्राद्धशब्दः पिंडदानपरः तस्यापि पितृ

दैवतत्वेनश्राद्धशब्दवाच्यत्वात् अग्रेब्राह्मणभोजनस्योक्तत्वेन तन्निषेधासंभवात् अत्रान्योप्येकवर्गोद्देश्यैकरूपो
निषेधविषयः कार्ष्णाजिनिनोक्तः श्राद्धंनचैकवर्गस्यत्रयोदश्यांसमाचरेत् अतृप्तासोत्रयेयस्यप्रजांहिंसंतितस्य
ते इतिएकवर्गस्य पितृवर्गमात्रस्यनकुर्यात् किंतुमातामहवर्गस्यापिकुर्य्यादितिविधेर्विषयः नचदर्शश्राद्धातिदे
शवत् त्रयोदशीश्राद्धेमातामहवर्गस्यापिप्राप्तत्वादेकवर्गोद्देश्यकश्राद्धनिषेधानुपपत्तिः दर्शश्राद्धएवमातामहव
र्गस्यश्राद्धानावश्यकत्वस्यमिताक्षरायामुक्तत्वात् तदवश्यकत्वेतुत्रयोदश्यामेकवर्गश्राद्धादिषुचवोध्यः पितृभ्यस्तद
नुश्राद्धदानमुपक्रमेदित्यादिमातामहश्राद्धेपुनर्वचनमूलं हेमाद्रावुदाहृतपैतृकेतु कुर्वन्त्रयोदशीश्राद्धंपुत्रवा
न्यःसुतायुषे एकस्यैवनकुर्य्याद्वपार्वणंतुसमाचरेत् एकस्यैववर्गस्यपार्वणं पर्वणिदर्शेक्रियमाणेत्रनावास्या
श्राद्धेनसार्धंषड्दैवत्यमित्यर्थः केचित्तु नतृप्तास्तत्रयस्यैतिदोषश्रवणात् पितृव्यादीनामपि महालयवत्त्रयोद
श्यां श्राद्धंकर्तव्यमितिवदंति तद्दूषणंकालविवेचनेद्रष्टव्यं तेनकृष्णत्रयोदशीमात्रेपुत्रवद्गृहिणात्रयोदश्यां
वहुपुत्रेच्छयाश्राद्धंनकर्त्तव्यं भाद्रकृष्णत्रयोदश्यांनैववहुप्रजाइतिवचनंपितृवर्गमात्रस्यनकर्तव्यं किंतुमातामहवर्ग
स्यापि तत्रेदंवचनं पितरोयत्रपूज्यंतेतत्रमातामहाअपि तत्रापिपिंडदानंनकर्तव्यं किंतु ब्राह्मणभोजनमात्रं
मधुप्लुतघृतपायसादिनेति सामान्यविशेषरूपाविधिनिषेधवचनानां व्यवस्थासिद्धा अस्मिन्पक्षे केवलमघापिश्रा
द्धकालः तथाचवसिष्ठः पितापितामहश्चैवतथैवप्रपितामहः उपासतेसुतंजातंपिप्पलंशकुनाइव मधुमांसैश्चशाकै
श्चपयसापायसेनच एषनोदास्यतेश्राद्धंवर्षासुचमघासुचेति अत्रपिंडदाननिषेधोभविष्यत्पुराणे संक्रांत्यामुपवासे
नपार्वणेनचभारत मघायांपिंडदानेनज्येष्ठपुत्रोविनश्यतीति अन्यत्रापि ऋक्षेपिंडप्रदानंतुज्येष्ठपुत्रीविवर्जयेत् ऋक्षं
मघातत्रज्येष्ठपुत्री विद्यमानज्येष्ठपुत्रकः अयंज्येष्ठपुत्रिणः श्राद्धनिषेधएव इतिनाशंकनीयं किंतु पिंडदानमात्रे

तथापिमघाधिकरणकेश्राद्धेपिंडदाननिषेधः पिंडपदेनश्राद्धाभिधानेनलक्षणापत्तेः अन्यथा सपिंडनदिनेपि मघासत्त्वेपिंडपर्युदासापत्तिः किंतुमघानिमित्तिके तथाच मघापुरस्कारेणज्येष्ठपुत्रिणा यदिश्राद्धंक्रियेत तदातत्तेनापिंडरहितंकार्य्यमितिशास्त्रार्थः मघाश्राद्धंकाम्यं तत्रपितापितामहश्चेत्यादिवसिष्ठवचनोदाहृतप्रामाण्येन त्रयोदशीश्राद्धंतुनित्यं तस्यानित्यगणेपाठात् एवंमघायांत्रयोदश्यांचकेवलायामपिश्राद्धं अनयोस्तु मिलितयोः प्राशस्त्यं तदुक्तंमहाभारते अपिनःसकुलेजायाद्योनोदद्यात्त्रयोदशीं पायसंसर्पिषापृक्तंमघासुदक्षिणायने तत्रैवच हस्तार्कयोगेगजच्छाया तदुक्तंब्राह्मे योगोमघात्रयोदश्योःकुंजरच्छायसंज्ञकः भवेन्मघायांसंस्थेचशशिन्यर्केकरसंस्थिते अपरार्केवायवीये हंसेहंसास्थितेयातुमघायुक्तात्रयोदशी तिथिर्वैवस्वतीनामसाछायाकुंजरस्यच अन्यत्रापि अपिनः सकुलेजायाद्योनोदद्यात्त्रयोदशीं पायसंसर्पिषायुक्तंप्राक्छायेकुंजरस्यच यावद्गजच्छायातावद्ब्राह्मणैर्नभोक्तव्यं सूतकेमृतकेचैवग्रस्तयोश्चंद्रसूर्ययोः छायायांकुंजरस्यापिभुक्त्वाचनरकंव्रजेत् प्रमादाद्ब्राह्मणोभुक्त्वातत्रचांद्रायणंचरेदिति ब्रह्मपुराणवचनात् अस्यामेवविष्णुधर्मोक्तंयुगावतारव्रतं ब्रह्मोवाच मासिप्रौष्ठपदेयातुकृष्णपक्षेत्रयोदशी अवतीर्णंयुगंतस्यांत्रेतायांतुतपोधनाः त्रेतायांविनिवृत्तायामेतस्यांतिथौयुगमवतीर्णमितिसंबंधः तेनद्वापरयुगमत्रलभ्यते अत्रकृत्यं गोमूत्रंगोमयंदूर्वांसमालभ्यचमृत्तिकां स्नायाद्ययांतडागेवातिथौतस्यांसमाहितः स्नात्वासतर्पयेद्देवपितृभ्यश्चतिलोदकं श्राद्धस्यतर्पणेनैवफलंयुगशतंभवेत् यःकरोतितिलैःश्राद्धंनरस्तस्यांसमाहितः कृतंतेनभवेच्छ्राद्धंगयायांतुनसंशयः युगादौयस्त्रिलोकेशंतर्पयेद्गरुडध्वजं घृतक्षीरजलैःपुष्पैःसगच्छेद्वैष्णवींपुरीं स्नापितोथविलिप्तस्तुपूजितोथनमस्कृतः युगादौयुगकर्त्ताचनृणांमुक्तिप्रदोहरिः अतोवैसर्वयत्नेनयुगादौजगतांपतिः पूजनीयोजनैर्भक्त्यासर्वदुःखहरोहरिः इति

युगावतारव्रतं अथाश्विनकृष्णपक्षेचतुर्दशीश्राद्धं तत्रमहालयश्राद्धंदुर्मरणमृतानांकार्यं पृथ्वीचंद्रोदये प्रचेताः वृक्षारोहणलोहाद्यैर्विद्युज्ज्वालाविषादिभिः नखिदंष्ट्रिविपन्नानांतेषांशस्ताचतुर्दशी ब्राह्मे युवानःपितरोयस्यमृताःशस्त्रेणवाहताः तेनकार्य्यंचतुर्दश्यांतेषांतृप्तिमभीप्सता नागरखंडे अपमृत्युर्भवेद्यस्यशस्त्रमृत्युरथापिवा श्राद्धंतस्यचतुर्दश्यांप्रकर्तव्यंनराधिप मरीचिः विषशस्त्रश्वापदादिशस्त्रब्राह्मणघातिनां चतुर्दश्यांक्रियाकार्य्याअन्येषांतुविगर्हिता अत्रब्रह्मघातीब्राह्मणेनहतोनतुब्रह्महा तस्यपतितत्वादितिशूलपाणेः येषांशस्त्रहतानांचाविषमृत्युमुपेयुषां वन्हिनाचप्रदग्धानांजलमृत्युमुपेयुषां सर्पव्याघ्रहतानांचशृंगैस्तद्बंधनैरपि श्राद्धंतेषांप्रकर्तव्यंचतुर्दश्यांनराधिपेति मार्कंडेयपुराणात् शृंगैःशृंगिभिः प्रायोनशनशस्त्राद्यैर्विषोद्बंधनिनांतथा चतुर्दश्यांभवेच्छ्राद्धमितिब्रह्मपुराणात् प्रायोमहाप्रस्थानं यत्तुशाकटायनः जलाग्निभ्यांविपन्नानांसंन्यासेवागृहेपथि श्राद्धंकुर्वीततेषांवैवर्जयित्वाचतुर्दशीमिति यत्प्रायश्चित्तार्थंजलादिमृतविषयमिति एतच्चदैवयुक्तमेकोद्दिष्टंकार्य्यं पित्रादीनामेकोद्दिष्टमेव नतु पार्वणं तथाचगार्ग्यः चतुर्दश्यांतुयच्छ्राद्धंसपिंडीकरणात्परं एकोद्दिष्टविधानेनतत्कार्य्यं पित्रादिषुशस्त्रहतेषुसर्वेषामेकोद्दिष्टान्येवकार्याणि पार्वणविधायकवचनाभावात् यत्तु पित्रादयस्त्रयोयस्यशस्त्रपातादिभिर्मृताः सभूतेपार्वणंकुर्य्यादाब्दिकानिपृथक्पृथगितिवचनं तत्प्रामाणिकग्रंथेष्वदर्शनादनाकरं इदंचैकोद्दिष्टंसदैवकंकार्य्यं प्रेतपक्षेचतुर्दश्यामेकोद्दिष्टविधानतःदैवयुक्तंतुतच्छ्राद्धंपितॄणामक्षयंभवेदिति प्रयोगपारिजातोदाहृतवचनात् यस्तुतस्यामेवचतुर्दश्यांमृतस्तस्यक्षयाहनिमित्तंपार्वणमेवकर्तव्यं अमायांचक्षयोयस्यप्रेतपक्षेथवापुनः पार्वणंतस्यकर्तव्यंनैकोद्दिष्टंकदाचनेतिविज्ञानेश्वरधृतवचनात् चतुर्दश्यांमहालयश्राद्धं स्कांदेसेतुखंडे चतुर्दश्यांतिथौयस्तुश्राद्धंकुर्य्यान्महालये

लक्षकोटिसहस्राणिलक्षकोटिशतानिच कल्पानिपितरस्तस्यतृप्यंत्येवनसंशयः नरकस्थाश्चपितरःस्वर्गं
यांतिप्रहर्षिताः संततीश्चाप्यविच्छिन्नादद्युःपितृगणास्सदा ॥ आश्विनस्यामावास्यायामपि गजच्छायायोग
माह अपरार्केयमः हंसेकरस्थितेयातुअमावास्याकरान्विता साज्ञेयाकुंजरच्छायाइतिबौधायनोब्रवीत् अत्र
सर्वलोहवर्णच्छागसन्निधानेश्राद्धमुक्तं महाभारते अजेनसर्वलोहेनवर्षासुनियतव्रतः हस्तिच्छायासुविधिवत्कर्ण
व्यजनवीजितं श्राद्धंदद्यादितिशेषः अमावास्यायांमहालयश्राद्धंस्कांदेसेतुखंडे अमायांतुनरोभक्त्याश्राद्धंकुर्या
न्महालये पितॄणांतस्यतृप्तिःस्यादनंतानात्रसंशयः स्वधामासाद्ययातृप्तिःसातृप्तिस्तुपितुर्भवेत् अनंताहिद
शीतृप्तिरमावास्यांमहालयात् अमावास्यामहापुण्यापितृदेवनमस्कृता एषातिथिस्तुपरमाशिवस्यपरमप्रिया
तस्यांमहालयश्राद्धभोजितेवेदवित्तमे तेनतृप्तिःपितॄणांस्यादनंतातुष्यतेशिवः ब्रह्महत्यादिकाःपंचपातकाना
शमाप्नुयुः कृताश्चस्युर्विधानेनसर्वेयज्ञाःसदक्षिणाः अनुष्ठिताःस्युर्विधिवत्सर्वेधर्माःसनातनाः योनकुर्याद
मावास्यांमहालयमचेतनः ब्रह्मलोकगताश्चास्यपितरोयांतिनारकीं गतिमितिशेषः संततिश्चास्यमूढस्यवि
च्छिद्यतैवतत्क्षणात् सएवहिमहानर्थोयदमायांतिथौनरः महालयार्थेविप्रेंद्राविधिवन्नैवभोजिताः मासिभा
द्रपदेपुण्येपितॄणांतृप्तिदायिनी एकैकंभोजयेद्विप्रंप्रत्यहंभक्तिपूर्वकं सप्तम्याःकृष्णपक्षस्यप्रारभ्यप्रत्यहंनरः वि
प्रान्यावदमावास्यांपितॄंस्त्रीनभिभोजयेत् आरभ्यद्वादशींविप्रांस्त्रीनवश्यंतुभोजयेत् अन्यथैश्वर्यहानिः
स्यान्महादारिद्र्यभाग्भवेत् भोजयेद्वेदविन्मुख्यांस्तृप्तिस्तेषांयथाभवेत् तेनब्रह्माहरिःशंभुस्तृप्ताःस्युःसर्वदेवताः
अग्निष्वात्तादिपितरउपेंद्राद्याधिदेवताः बहुनात्रकिमुक्तेनतृप्यत्येवजगत्त्रयम् ॥ * ॥ इतिमहालयानिर्णयः
समाप्तः ॥ अथस्त्रीकर्तृकपार्वणश्राद्धविधिः तस्याःषड्दैवतेविशेषउक्तःस्वभर्तृप्रभृतित्रिभ्यःस्वपितृभ्यः

तथैवच विधिवाकारयेच्छ्राद्धंयथाकालमतंद्रितेतिवचनात् तस्याअयंश्राद्धप्रयोगःतत्रादौविधवास्वयंस्नाताशुचिशुक्लवस्त्रयुग्मधरा मध्याह्नेश्राद्धदेशमागत्य पंचगव्योपलेपितं सुसमाहितं गौरमृत्तिकयाच्छादितं यथासादितश्राद्धीयद्रव्यंज्वलितप्रदीपंविकीर्णगौरसर्षपंकृत्वा तत्रागत्यासने प्राङ्मुखीउपविश्यसिद्धमन्नमितिज्ञात्वा ततःअपवित्रःपवित्रोवासर्वावस्थांगतोपिवा यःस्मरेत्पुंडरीकाक्षंसवाह्याभ्यंतरःशुचिरिति श्राद्धीयदेशंश्राद्धीयसंभृतिसहितंपरिषिच्य शंखचक्रधरंदेवंद्विभुजंपीतवाससं प्रारंभेकर्मणांविष्णुंपुंडरीकंस्मरेद्धरिम् इतियज्ञपुरुषंप्रणम्यपूजादिकंयथाशक्तिसंपाद्य श्राद्धकालेगयांध्यात्वाध्यात्वादेवंगदाधरं स्वपत्यादीन्क्षणंध्यात्वाततःश्राद्धंसमारभेत् इतिविप्रमुखाद्वाचयित्वा कुशतिलजलान्यादाय अद्यामुकगोत्रामुकदेवी अमुकगोत्राणामस्मद्भर्तृतत्पितृपितामहानां स्वस्यचपितृपितामहप्रपितामहानांमहालयनिमित्तंसवैश्वदैविकंपार्वणश्राद्धमहंकरिष्ये देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच नमःस्वधायैस्वाहायैनित्यमेवनमोनमइतिविप्रमुखेनवावाचयेत् ततोदक्षिणमुखीपातितवामजानुःसती मोटकतिलजलानिगृहीत्वा नमोनमोअद्यामुकगोत्राणांस्वभर्तृतत्पितृपितामहानांस्वस्यचपितृपितामहप्रपितामहानाममुकामुकशर्मणांमहालयनैमित्तिकश्राद्धसंबंधिनां विश्वेषां देवानामिदमासनंवोनमः अस्मद्भर्तृतत्पितृपितामहानांमहालयनैमित्तिकपार्वणश्राद्धसंबंधिनोविश्वेदेवानावाहयिष्ये ततोऽर्घ्यपात्रेतूष्णींगंधादिप्रक्षिप्त्वा अर्घ्यपात्रंवामहस्ते कृत्वा अर्घ्यपात्रस्थंपवित्रंभोजनपात्रेनिधाय तदुपरिकिंचिदुदकांतरंसिक्त्वा अर्घ्यपात्रं वामहस्ते कृत्वा अर्घोनम इतिनमस्कृत्य नमोनमोअद्यामुकगोत्राणामस्मद्भर्तृतत्पितृपितामहानाममुकामुकशर्मणां महालयनैमित्तिकपार्वणश्राद्धसंबंधिनोविश्वेदेवाएषहस्तार्घोवोनमःअस्मत्पित्रादित्रयसंबंधिनोविश्वेदेवाएषहस्तार्घोवोनमः ततोगंधादिदानं नमोनमोअद्यामुकगोत्राणामस्मद्भर्त्रादित्रय

पित्रादित्रयपार्वणश्राद्धसंबंधिनोविश्वेदेवा एतानिगंधार्घ्यपुष्पधूपदीपनैवेद्यतांबूलयज्ञोपवीतवासांसिवोनमः देवार्घ्यपात्रंदेवानांदक्षिणतःकुशोपरिउत्तानमेवस्थापयेत् देवेभ्यःस्थानमसि ततोदक्षिणमुखीपातितवामजानुःसती मोटकतिलजलयुतानि भर्त्रादित्रयस्वपित्रादित्रयासनानि गृहीत्वा नमोनमोऽद्यामुकगोत्राणामस्मद्भर्त्रादित्रयाणामस्मत्पित्रादित्रयाणाममुकामुकशर्मणांमहालयनैमित्तिकपार्वणश्राद्धइमान्यासनानिवोनमः स्वभर्त्रादित्रयंस्वपित्रादित्रयमावाहयिष्यामि इतिवाक्येन तिलान्विकिरेत् ततःस्वभर्त्रादित्रयपात्रेषुचपवित्राणि दक्षिणाग्राणिधृत्वा तिलजलगंधपुष्पयुतानिकृत्वा अर्घ्यपात्रं वामहस्तेकृत्वा तत्रस्थंपवित्रं भोजनपात्रेदत्त्वा उदकांतरेणसिक्त्वा मोटकतिलजलान्यादाय नमोनमोऽद्यामुकगोत्रास्मत्पतेऽमुकगोत्रामुकशर्मन् महालयनैमित्तिकपार्वणश्राद्धएषहस्तार्घ्यस्तेनमः एवमस्मद्भर्तृपितरमुकशर्मन् महालयनैमित्तिकपार्वणश्राद्धे अस्मद्भर्तृपितामहामुकशर्मन् महालयनैमित्तिकपार्वणश्राद्धे अमुकगोत्रास्मत्पितरमुकशर्मन्महालयनैमित्तिकपार्वणश्राद्धे ॥ १ ॥ अमुकगोत्रास्मत्पितामहामुकशर्मन् महालयनैमित्तिकपार्वणश्राद्धे ॥ २ ॥ अमुकगोत्रास्मत्प्रपितामहामुकशर्मन्महालयनैमित्तिकपार्वणश्राद्धे एषहस्तार्घ्यस्तेनमः अथवा नमोनमोऽस्मद्भर्तृतत्पितृपितामहा अस्मत्पितृपितामहप्रपितामहा अमुकामुकशर्माणोमहालयनैमित्तिक पार्वणश्राद्धे एषहस्तार्घ्यः षोढाविभज्यवोनमः ततोगंधादिदानं मोटकतिलजलान्यादाय नमोनमोऽद्यामुकगोत्राअस्मद्भर्तृतत्पितृपितामहाअस्मत्पितृपितामहप्रपितामहाअमुकामुकशर्माणएतानि गंधार्घ्यपुष्पधूपदीपतांबूलवासांसिषोढाविभज्यवोनमः ततोभोजनपात्रेभ्यः पवित्रादीन्यादायार्घ्यपात्रेषुकृत्वा अस्मद्भर्त्रादिभ्यःस्थानमसि अस्मत्पित्रादिभ्यः स्थानमसि इतिवामपार्श्वेकुशोपरिन्युब्जीकुर्यात् दक्षिणादानपर्यंतंनचालयेत् ततोजलादिनाभो

जनपात्राणिप्रदक्षिणावर्तेनवेष्टयेत् ततःश्राद्धदेयान्नाग्रभागमादायपुटकादिषुजलंदत्वा पूर्वाभिमुखासती अग्नये कव्यवाहनायनमः सोमायपितृमतेनमः इत्याहुतिद्वयमुत्सृजेत् ततोदक्षिणाभिमुखी सघृततिलव्यंजनमन्नमादायएतदन्नमेतद्भूस्वामिपितृभ्योनमः ततःपुनःपूर्वाभिमुखी विश्वदेवभोजनपात्रेषु देवतीर्थेनपुरुषाहारक्षमंसघृतंसव्यंजनमन्नं परिविष्य जलादिकंचोपनीय मधुवातेतिऋचं विप्रमुखाच्छ्रुत्वा भोजनपात्रेषु मधु दत्त्वा नमोनमोअद्यामुकगोत्रास्मद्भर्त्रादित्रयास्मत्पित्रादित्रय महालयश्राद्धसंवंधिनोविश्वेदेवाएतदन्नंसोपकरणं परिविष्टं परिविष्यमाणंच द्विधा विभज्यवोनमः विष्णोहव्यंरक्षमदीयमिति यवान्विकीर्य इत्यन्नमुत्सृजेत् ततोदक्षिणमुखी पितृतीर्थेन स्वभर्त्रादित्रयस्वपित्रादित्रयभोजनपात्रेषुसर्वव्यंजनयुतंसघृतमन्नंपरिविष्यजलादिकंचोपनीय मधुवातेति ऋचंविप्रमुखाच्छ्रुत्वामधुमधु इतिस्वयमुक्त्वा भोजनपात्रेषुमधुदत्त्वा मोटकतिलजलान्यादाय नमोनमोअद्यामुकगोत्राअस्मद्भर्तृतत्पितृपितामहाअमुकगोत्राअस्मत्पितृपितामहप्रपितामहाअमुकामुकशर्माणो महालयनैमित्तिकपार्वणश्राद्धे एतदन्नंसोपकरणं परिविष्टंपरिविष्यमाणममृतरूपेणवोनमः कृष्णकव्यंरक्षमदीयमित्यन्नोपरितिलान् विकीर्य्य नमोनम अन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत् तत्सर्वमाच्छिद्रमस्तु देवतीर्थेनविश्वेभ्योदेवेभ्यआपोशानंवोनमः पितृतीर्थेनअस्मद्भर्त्रादित्रिभ्यः आपोशानंवोनमः अस्मत्पित्रादित्रिभ्यआपोशानंवोनमः ततःसव्यंजनघृतातिलादिसहितंसर्वप्रकारमन्नमादाय अनग्निदग्धाश्चयेजीवायेप्रदग्धाःकुलेमम भूमौदत्तेनतृप्यंतुतृप्तायांतुपरांगतिमितिकुशोपरि सजलमन्नमुत्सृजेत् ततःनमस्तुभ्यंविरूपाक्षनमस्तेनेकचक्षुषे नमःपिनाकहस्तायवज्रहस्तायवैनमइतिनीलकंठस्तुतिंश्रुत्वाप्रणम्य रुचिस्तवादिस्तोत्राणिचश्रावयेत् ततोहस्तौप्रक्षाल्याचम्य पिंडपातना

थंवेदींकुर्यात् तत्रदर्भमूलेनप्रादेशमात्ररेखाद्वयंकृत्वा तदैशान्यां परित्यज्य ज्वलदंगारं भ्रामयित्वा दाक्षि
णतो निदध्यात् रेखोपरिच्छिन्नमूलकुशास्तरणंविधाय अवनेजनार्थंपुटकादौतिलजलपुष्पाणि क्षिप्त्वा मोटक
तिलजलान्यादाय नमोनमोऽद्यामुकगोत्राअस्मद्भर्तृतत्पितृपितामहाअमुकामुकशर्माणस्तथाचास्मत्पितृपितामह
प्रपितामहाअमुकामुकशर्माणो महालयनैमित्तिकपार्वणश्राद्धेपिंडस्थानेऽत्राऽवनेनिग्ध्वंवोनमः ततः तिलास्तोयंत
थाक्षीरंधूपोदीपावलिस्तथा मधुःसर्पिस्समायुक्तोह्यष्टांगःपिंडसंभव इत्यनेन षट्पिंडान्निर्मायप्रथमंपिंडंवामहस्ते
कृत्वादक्षिणेनमोटकतिलजलान्यादाय नमोनमोऽद्यामुकगोत्रअस्मद्भर्तरमुकशर्मन्महालयनैमित्तिकश्राद्धेएषतेपिं
डोनमः १ नमोनमोऽद्याऽमुकगोत्रास्मद्भर्तृपितरमुकशर्मन्महालयनैमित्तिकपार्वणश्राद्धेएषतेपिंडोनमः २ नमो
नमोऽद्यामुकगोत्रास्मद्भर्तृपितामहामुकशर्मन् महालयनैमित्तिकपार्वणश्राद्धेएषतेपिंडोनमः ३ नमोनमोऽद्यामु
कगोत्रास्मत्पितरमुकशर्मन्महालयनैमित्तिणपार्वणश्राद्धेएषतेपिंडोनमः ४ नमोनमोऽद्यामुकगोत्रास्मत्पितामहा
मुकशर्मन्महालयनैमित्तिकपार्वणश्राद्धेएषतेपिंडोनमः ५ नमोनमोऽद्यामुकगोत्रास्मत्प्रपितामहमहालयनैमित्तिक
पार्वणश्राद्धेएषतेपिंडोनमः ६ लेपभागभुजस्तृप्यंतुकुशमूलेनकरंप्रोंछ्य ततउदङ्मुखीभूत्वाश्वासंनियम्य पुनर्द
क्षिणमुखीभूत्वाश्वासंत्यजेत् स्वभर्त्रादीन्स्वपित्रादीन्त्रीन्भास्वरमूर्तीन्ध्यायेत् ततोवनेजनावशिष्टजलयुतमवनेज
नपात्रमादाय मोटकतिलजलान्यादाय नमोनमोऽद्यामुकगोत्रास्मद्भर्तृतत्पितृपितामहा अमुकामुकशर्माणोमहा
लयनैमित्तिकपार्वणश्राद्धेपिंडोपारि प्रत्यवनेनिग्ध्वंवःस्वधा ततोनीवींविस्रंस्याचम्यदक्षिणमुखो वामेनपाणिनासूत्र
मादाय दक्षिणेनपिंडोपरिदद्यात् नमोनमोऽद्यामुकगोत्राअस्मद्भर्तृतत्पितृपितामहाअमुकामुकशर्माणः अस्म
त्पितृपितामहप्रपितामहाअमुकामुकशर्माणोमहालयनैमित्तिकपार्वणश्राद्धेपिंडोपरिएतद्वासोवोनमः ततोगंधा

दिभिःपिंडानां पृथक्पूजनंकुर्य्यात् ततःशिवाआपःसंतु इतिजलं सौमनस्यमस्तु इतिपुष्पं अक्षतंचारिष्टमस्तुइत्यक्षतान् भोजनपात्रेषु निक्षिप्य ततोमोटकादीन्यादाय नमोनमोऽद्यामुकगोत्राअस्मद्भर्तृतत्पितृपितामहा अमुकामुकशर्माणस्तथाचास्मत्पितृपितामहप्रपितामहा अमुकामुकशर्माणोमहालयनैमित्तिकपार्वणश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतांवोनमः इत्यक्षय्योदकंदत्त्वा ततःपिंडोपरि अघोराअस्मद्भर्तृतत्पित्रादयोअस्मत्पित्रादयश्चसंतु इतिपूर्वाग्रांवारिधारांदत्त्वा पूर्वामुखीकृतांजलिर्भूत्वा नमोनमः गोत्रंनोवर्द्धतां दातारोनोभिवर्द्धतां वेदाःसंततिरेवच श्रद्धाचनोमाव्यगमत् वहुदेयंचनोअस्त्विति अन्नंचनोवहुभवेदतिथींश्च लभेमहि याचितारश्चनःसंतुमाचयाचिष्मकंचन एताःसत्याशिषःसंतुइतिप्रार्थयेत् ततोदक्षिणमुखी पिंडानामुपरिसपवित्रंकुशत्रयमास्तीर्य्य तदुपरिदक्षिणाग्रांवारिधारांनमोनम इतिदद्यात् ततोनम्रीभूयपिंडमाघ्रायोत्थापयेत् पिंडाधारकुशान् उल्मुकंचवह्नौक्षिपेत् ततःपूर्वाभिमुखी देवार्घ्यपात्रंसंचाल्य दक्षिणमुखीभूत्वा भर्त्रादीनां पात्राण्युत्तानीकुर्य्यात् ततःप्राङ्मुखीभूत्वा कुशत्रययवजलैर्देवेभ्योदक्षिणां दद्यात् नमोनमोऽद्यामुकगोत्राणामस्मद्भर्तृतत्पितृपितामहानाममुकामुकशर्मणां तथाचामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणांमहालयनैमित्तिकपार्वणश्राद्धसंवंधिनांकृतैतत्श्राद्धप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतंतन्मूल्यभूतं रजतंताम्रादिद्रव्यंयथानामगोत्राभ्यांब्राह्मणाभ्यांदातुमहमुत्सृजे इतिविश्वेदेवश्राद्धदक्षिणांदत्त्वा ततोदक्षिणमुखीभूत्वा स्वभर्त्रादीनां श्राद्धदक्षिणांदद्यात् नमोनमोऽद्यामुकगोत्राणामस्मद्भर्तृतत्पितृपितामहानांतथाचामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां कृतैतन्महालयनिमित्तिकपार्वणश्राद्धप्रतिष्ठार्थमिदं रजतं चंद्रदैवतं तन्मौल्यभूतांयथाशक्तिदक्षिणांयथानामगोत्रेभ्योब्राह्मणेभ्योदातुमहमुत्सृजे नमोनमोअ

भिरमंतुभवंत इतिभर्त्रादीन्विसर्जयेत् विश्वेदेवाः प्रीयंतामितिदेवान्विसर्जयेत् ततः पूर्वाभिमुखीभूय देवताभ्यः पितृभ्यश्चेतिपठितंश्रुत्वा दक्षिणमुखीरक्षादीपंनिर्वाप्य हस्तौपादौप्रक्षाल्याचम्य प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः ततोबलिदानं गोभ्योऽन्ननमः श्वभ्योन्नंनमः काकेभ्योऽन्ननमः चंडालेभ्योऽन्ननमःद्वारपालेभ्योऽन्ननमः भूमिपालेभ्योऽन्ननमः अशेषजीवेभ्योऽन्ननमः क्षेत्रपालेभ्योऽन्ननमः यमायधर्मराजायमृत्यवेचांतकायच वैवस्वतायकालायदध्नायपरमेष्ठिने वृकोदरायभीमायचित्रगुप्तायवैनमः पाशहस्तकृतांतायप्रेताधिपतयेनमः धर्मराजायबलिंनमः ततोऽस्मद्भर्त्रादित्रयास्मत्पित्रादित्रयाणां कृतस्यमहालयनैमित्तिकपार्वणश्राद्धस्यसांगफलप्राप्त्यर्थमिदंदक्षिणाद्रव्यं यथानामगोत्रायब्राह्मणायतुभ्यमहंसंप्रदे इतिदानप्रतिष्ठांदत्वा श्राद्धीयवस्तूनिब्राह्मणायप्रतिपादयेत्पिंडादिकंगोभ्योदद्यात् ॥ इतिस्त्रीकर्तृकपार्वणश्राद्धविधिः ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्मृतिसंग्रहेविधवायास्तुविशेषः चत्वारिपार्वणानीहविधवायाःसदैवहि स्वभर्तृश्वशुरादीनांमातापित्रोस्तथैवच ततोमातामहानांचश्राद्धदानमुपक्रमेदितितथा श्वश्रूणांचविशेषेणमातामह्यास्तथैवचेत्यपिपाठः तस्याः षड्दैवत्येविशेषः स्वभर्तृप्रभृतित्रिभ्यःस्वपितृभ्यस्तथैवच विधवाकारयेच्छ्राद्धंयथाकालमतंद्रिता अत्र चैकपाकःविश्वेदेववदेकतंत्रम् विधवास्वयंसंकल्पंकृत्वाश्राद्धमन्यद्वाराकारयेदितिप्रयोगपारिजातः ॥ ॥

॥ ॥ ॥ अथस्त्रीकर्तृकैकोद्दिष्टश्राद्धप्रयोगः ॥ ॥ ॥

तत्रादौस्त्रीस्नाताशुचिशुक्लवस्त्रयुग्मधरा मध्याह्नेश्राद्धदेशंसुसमाहितं पंचगव्योपलेपितं ज्वलदंगारशोधितं गौरमृत्तिकयाच्छादितंयथाप्रदेशासादितश्राद्धीयद्रव्यं ज्वालितप्रदीपं विकीर्णं गौरसर्षपं

कृत्वा तत्रगत्वासनेप्राङ्मुखीचोपविशेत् सिद्धमन्नमितिपाचकींपृच्छेत् ततः अपवित्रःपवित्रोवासर्वा
वस्थांगतोपिवा यःस्मरेत्पुंडरीकाक्षंसवाह्याभ्यंतरःशुचिरितिमंत्रेण श्राद्धीयद्रव्याण्यासिच्य शंखचक्र
धरंदेवंद्विभुजंपीतवाससं प्रारंभेकर्मणांविष्णुंपुंडरीकंस्मरेद्धरिमिति विष्णुंभगवंतंस्मृत्वा गयायैनमः
गदाधरायनमः ततःकुशतिलजलान्यादाय अमुकगोत्राऽमुकदेव्यहं अमुकगोत्रस्यामुकशर्मणःपत्युः
सांवत्सरिकैकोद्दिष्टश्राद्धमहंकरिष्ये इतिसंकल्पंविधाय देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच नमः
स्वधायैस्वाहायैनित्यमेवनमोनमः इतिविप्रमुखाच्छ्रुत्वा ततोदक्षिणमुखीपातितवामजानुःसती नमो
नमोऽद्यामुकगोत्रास्मत्पतेऽमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्ध इदमासनंतेनमः इतिपितृतीर्थेनमोटकरू
पमासनंदक्षकरांगुष्ठमूलेनदद्यात् ततोऽर्घ्यपात्रेतूष्णींतिलान्प्रक्षिप्यपवित्रजलातिलगंधपुष्पाणिदत्वा अर्घ्य
पात्रंवामहस्तेकृत्वा तत्रस्थंपवित्रमुत्तराग्रंभोजनपात्रेधृत्वा तदुपरिकिंचिदुदकांतरंदत्त्वा मोटकादीन्यादाय नमो
नमोऽद्यामुकगोत्रपतेऽमुकशर्मन्सांवत्सरिकैकोद्दिष्टश्राद्धएषतेहस्तार्घ्योनमः इत्यर्घ्यपात्रंपवित्रोपरिददत्युत्स
जेत् ततोऽवशिष्टजलपवित्रसहितमर्घ्यपात्रमासनभागेपत्येस्थानमसीतिन्युब्जीकुर्यात् ततोगंधादिदानंकृत्वा
मोटकतिलजलान्यादाय नमोनमोऽद्यामुकगोत्रास्मत्पतेऽमुकशर्मन्सांवत्सरिकैकोद्दिष्टश्राद्धेएतानिगंधार्घ्यपुष्प
धूपदीपतांबूलयज्ञोपवीतवासांसितेनमः ततोजलेनासनसहितंवेष्टयित्वामंडलंकुर्यात् ततः श्राद्धीयान्नभागसघृतव्यं
जनतिलजलान्यादाय इदमन्नमेतद्भूस्वामिपितृभ्योनमः इतिभूमावुत्सृजेत् ततोहस्ताभ्यांताम्रादिपात्रस्थम
न्नमादायस्वपतिंध्यात्वा परिवेषयेत् तत्रघृतव्यंजनजलादीन्युपनीय अन्नोपरिमधुदत्त्वा विप्रद्वारामधु
वातेतिऋचंजप्त्वा मधुमधुमधु इतिचस्वयमुच्चार्य्य उभाभ्यांव्यस्तहस्ताभ्यांभोजनपात्रमालभ्यतदन्नममृतंतयावि

ग्र०१० चिंत्यकृष्णकव्यंरक्षमदीयामितिपठित्वा दक्षिणहस्तमुत्थाप्य इदमन्नं इमाआपः इदमाज्यं इदंहविरि
आश्वि० त्यन्नादिषु प्रत्येकमंगुष्ठमारोप्यान्नोपरितिलान्प्रक्षिप्य मोटकतिलजलादीन्यादाय नमोनमोऽद्यामुकगोत्रास्मत्पते
॥३२॥ ऽमुकशर्मन्सांवत्सरिकैकोद्दिष्टश्राद्धइदमन्नंसोपकरणंतेनमः इत्यन्नमुत्सृजेत् ततोवामहस्तेनान्यतिलमुत्थाप्य
अन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत् तत्सर्वमच्छिद्रमस्तुइतिपठित्वा भूमौतिलान्विकीर्य दर्भेषूपविश्य
नमस्तुभ्यंविरूपाक्षनमस्तेनेकचक्षुषे नमःपिनाकहस्तायवज्रहस्तायवैनम इतिनीलकंठस्तुतिं पठित्वा रु
चिस्तवादिकंविप्रद्वाराश्रावयेत् ततउच्छिष्टसन्निधावास्तृतकुशत्रयभूमिं सतिलजलेन प्रोक्ष्य सतिलजलप्रो
क्षितंसव्यंजनममृतमन्नमादाय नमोअग्निदग्धाश्चयेजीवायेप्रदग्धाःकुलेमम भूमौदत्तेनतृप्यंतुतृप्तायांतुपरां
गतिमितिपठित्वा कुशोपरिकुशादिनाविकिरेत् ततआचम्य हरिंस्मृत्वा दक्षिणमुखी पिंडस्थाने प्रा
देशमात्रंपरिमाय करद्वयतर्जन्यंगुष्ठधृतमूलया दर्भपिंजुल्या तदुल्लिख्य दर्भपिंजुलीमुत्तरतःक्षिपेत् तत
स्तत्रज्वलदंगारंभ्रामयित्वा दक्षिणस्यांक्षिपेत् ततस्तत्ररेखोपरिच्छिन्नमूलकुशत्रयमास्तीर्य प्रत्यङ्मुखो दे
वताभ्यःपितृभ्यश्चमहायोगिभ्यएवच नमःस्वधायैस्वाहायैनित्यमेवनमोनम इतिविप्रमुखाच्छ्रुत्वा ॥
ततोदक्षिणमुखी पुटकेजलतिलगंधपुष्पाणिकृत्वा दक्षकरेण मोटकतिलजलान्यादाय नमोनमोऽद्यामुक
गोत्रास्मत्पतेऽमुकशर्मन्सांवत्सरिकैकोद्दिष्टश्राद्धेपिंडस्थानेऽत्रावनेनिक्ष्वतेनम इतिकुशोपरिअवनेजनजलंदद्या
त् शेषमवशेषयेत् ततः तिलास्तोयंतथाक्षीरंधूपोदीपावलिस्तथा मधुःसर्पिस्समायुक्तोह्यष्टांगःपिंडसंभव इ
तितिलमधुघृतयुतान्नेनपिंडनिर्माय मधुघृताभ्यांपिंडमवघार्यमोटकतिलजलान्यादाय नमोनमोऽद्यामुकगोत्रास्म
त्पतेऽमुकशर्मन्सांवत्सरिकैकोद्दिष्टश्राद्धएषतेपिंडोनमः इत्यवनेजनकुशोपरिवामान्वारब्धदक्षिणपाणिनापिंड

दद्यात् ततोद्विराचम्य हरिंस्मृत्वा ततउत्तराभिमुखी श्वासं नियम्य पतिंध्यायंती दक्षिणाभिमुखीभूयात् ततोदत्तावशिष्टजलयुतमवनेजनपात्रमादाय मोटकजलादीनिचादाय नमोनमोऽमुकगोत्रास्मत्पतेऽमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धेऽत्रप्रत्यवनेनिक्ष्वतेनमः इतिप्रत्यवनेजनंदद्यात् ततोनीवींविस्रंस्याचम्य दक्षिणाभिमुखीवामेनपाणिनासूत्रमादाय दक्षिणेन पिंडोपरिनिधाय नमोऽद्यामुकगोत्रास्मत्पतेऽमुकशर्मन्सांवत्सरिकोद्दिष्टश्राद्धेपिंडोपरिएतद्वासस्तेनमः इतिमोटकतिलजलेन सूत्रमुत्सृजेत् अथपिंडेगंधादिदानं ततःशिवाआपःसंतु इतिजलं सौमनस्यमस्तु इतिपुष्पं अक्षतंचारिष्टमास्त्विति तंडुलान्भोजनपात्रेनिःक्षिप्य मोटकादीन्यादाय नमोनमोऽद्यामुकगोत्रास्मत्पतेरमुकशर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धेदत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामित्यक्षय्योदकंदद्यात् ततःपिंडोपरि अघोरःपतिरस्तु इतिपूर्वाग्रांवारिधारांदद्यात् ततःपूर्वाभिमुखीकृतांजलिः नमोनमःगोत्रंनोवर्द्धतां दातारोनोभिवर्द्धंतांवेदाःसंततिरेवच श्रद्धाचनोमाव्यगमद्बहुदेयंचनोऽस्त्विति अन्नंचनोवहुभवेत् अतिथींश्चलभेमहि याचितारश्चनःसंतु माचयाचिष्मकंचन एताःसत्याशिषःसंतु इतिप्रार्थयेत् ततोदक्षिणमुखी पिंडोपरिसपवित्रंकुशत्रयं दक्षिणाग्रमास्तीर्य्य तदुपरिदक्षिणाग्रांजलधारांदद्यात् ततोनम्रीभूयपिंडमाघ्रायोत्थापयेत् पिंडाधारकुशानुल्मुकंचवह्नौक्षिपेत् ततोर्घ्यपात्रमुत्तानीकृत्य दक्षिणादानं अद्यामुकगोत्रस्यास्मत्पतेरमुकशर्मणः कृतैतत्सांवत्सरिकैकोद्दिष्टश्राद्धप्रतिष्ठार्थंरक्तिकादिमितंरजतंचंद्रदैवतं यथानामगोत्रायब्राह्मणायदक्षिणांदातुमहमुत्सृजे ततोभिरम्यतामितिविसर्जनं ततःपूर्वाभिमुखीभूय देवताभ्यइतिविप्रद्वारात्रिःस्मरेत् ततोदक्षिणमुखी हस्ताभ्यांदीपंनिर्वापयेत् हस्तौपादौप्रक्षाल्याचम्य बलिदानंकुर्यात् गोभ्योअन्नंनमःश्वभ्योऽन्नंनमःकाकेभ्योऽन्नंनमःद्वारपालेभ्योऽन्नंनमः चांडालेभ्यो

ऽन्ननमः अशेषजीवेभ्यो ऽन्ननमः क्षेत्रपालेभ्योऽन्ननमः इतिपूर्वमुखीदद्यात् ततोदक्षिणमुखीभूत्वा यमायबलिंनमइति ततःपूर्वाभिमुखीभूत्वा प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् स्मरणादेवतद्विष्णोः संपूर्णस्यादितिश्रुतिः ततोदानप्रतिष्ठां दत्त्वा श्राद्धीयवस्तूनि विप्राय प्रतिपादयेत् अंभसि वा पिंडादिकंनिःक्षिपेत् ततोबंधुयुतास्वयंभुंजीत इतिस्त्रीकर्तृकैकोद्दिष्टश्राद्धविधिः

॥ अथशूद्रस्यपार्वणश्राद्धप्रयोगः ॥

सचोपदेष्टृब्राह्मणवशादानियतशाखयाकार्य्यइति स्मृतिकौमुद्यांमदनपालः तन्न अनियतस्यधर्मत्वायोगात् तेनशूद्रावाजसनेयिनइतिगौडग्रंथेदक्षोक्तेः हरिहरभाष्यादिसंवादाच्छिष्टाचाराच्चमाध्यंदिनशाखयोच्यते तत्रकर्तापूर्वेद्युर्निरामिषंसकृद्भुक्त्वाप्रदोषे परेद्युः प्रातर्वा द्विजगृहं गत्वा मंडले तमुपवेश्य सव्येनदक्षिणं जान्वालभ्य शूद्रःप्रणतिपूर्वकमिति प्रणम्य देशकालौ संकीर्त्य श्वः करिष्यमाणपार्वणश्राद्धे पित्रादित्रयमातामहादित्रयविश्वेदेवार्थंत्वामहंनिमंत्रये यद्वाक्षणंकृत्वाभवद्भिः प्रसादःकार्य्यइति फलंतांबूलंवादत्त्वैवमेकंद्वौ वाविप्रौनिमंत्र्य तथा आमंत्रितोस्मीतिवातेनोक्ते अक्रोधनैःशौचपरैः संततंब्रह्मवादिभिः भवितव्यंभवद्भिश्चमयाचश्राद्धकर्मणि पूर्वदिनेतु सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः भवितव्यंभवद्भिश्चश्वोभूते श्राद्धकर्म्मणि इतिजपेत् शृणुयाद्वा एवमपरमपिब्राह्मणंवृत्वा ततस्तथैवापसव्येनवामंजान्वालभ्य वाचयःश्वः करिष्यमाणश्राद्धेपितृस्थानेत्वामहंनिमंत्रये पूर्ववत्फलतांबूलंदत्त्वा अक्रोधनैरित्यादिपठेत् एवंपितामहस्थाने प्रपितामहस्थाने मातामहादित्रयस्थाने इतिषट् विश्वेदेवपक्षेचत्वारइतिदश तत्रवैश्वदेवपक्षेऽष्टौ अथवा एकोदेवतंत्रे पित्रादिपक्षेएकोमातामहादौचैकइतित्रयोवा यद्वापित्रादिषण्णामेकः दैवेचैकःइतिद्वौ तदामान्न

वत्षोढाविभज्य यद्यपि दर्शेमातृमध्यंनवदैवतं मातामह्यंतंद्वादशदैवतंवाश्राद्धमुक्तमस्ति तथापिदेशाचाराद्यवस्थाषट्दैवतमेवतुवहुसंमतंसर्वथोक्तपात्रविप्रालाभेदर्भमयान्षट्विधाय श्राद्धप्रैषंप्रत्युक्तिपूर्वंकृत्वा तदामान्नंविप्रायदद्या दद्यौजलेवाक्षिपेत् सर्वत्रामंत्रितोस्मीतिप्रत्युक्तिरक्रोधनैरित्यादिजपश्च ततःपरेद्युःकर्ताप्रातःस्थानोपलेपनंकृत्वा सचैलःस्नातः श्राद्धसामग्रीसंपाद्य दिनस्यषण्मुहूर्तानंतरं द्विजानाहूय तेषामनिषिद्धदिनेश्मश्र्वादिकर्मकारयित्वा स्नानीयजलंतैलामलकोद्वर्तनादिप्रेषयित्वा मध्याह्नेस्नातांनागतास्तान्प्रांजलिस्तिष्ठन्स्वागतंपृष्ट्वा सुस्वागतमितितैरुक्ते द्विराचम्य देशकालौस्मृत्वास्मत्पितृपितामहप्रपितामहानांकाश्यपगोत्राणां अमुकामुकदासानांवसुरुद्रादित्यस्वरूपाणांतथाचैवंमातामहप्रमातामहवृद्धप्रमातामहानां पार्वणश्राद्धंसदैवतंसापिंडपार्वणविधिनामेनहविषा सद्यःकरिष्ये इतिसंकल्प्य गोमूत्रगोमयाभ्यांद्वारेप्रादेशमात्रमुत्तरदाक्षिणयोश्चतुरस्रंवृत्तंचमंडलंकृत्वा तत्रकुशान् दैवेयवान् पित्र्येतिलान् क्षिपेदितिमदनपालः तत्वंतु शूद्रस्याभ्युक्षणंमतमितिवचनादभ्युक्षणंकृत्वोत्तरे उदङ्मुखा सव्येन पुरूरवोमाद्रवसंज्ञाविश्वेदेवाःस्वागतमितिपृष्ट्वातेनोक्ते गंधपुष्पैरभ्यर्च्य सव्यंशूद्रायेतिवचनात् आदौसव्यं ततोदक्षिणमितिपादौसंपूज्य पुरूरवोमाद्रवसंज्ञाविश्वेदेवा इदंवःपाद्यमर्घ्यंचनमइतिपादयोर्जलंदत्वा एवंदैवद्वितीयविप्रेऽपिदत्वा ततःपित्र्येविप्रे कृतापसव्योऽस्मत्पितःकाश्यपगोत्रामुकदासवसुरूपेदंपाद्यमर्घ्यंचनमः एवंपितामहेरुद्ररूपप्रपितामहेआदित्यरूपेतिज्ञेयं एवमेवमातामहादित्रयेपिज्ञेयं ततोद्विराचांतस्तानाभ्यर्च दैवेद्वौप्राङ्मुखौ देवेभ्योनमः इदमासनमास्यतां इतिवामेनासनंस्पृष्ट्वा दक्षिणेविप्रानुपवेश्यैवंपित्र्येऽपसव्येनोदङ्मुखानुपवेश्य ततःप्राच्यां मातामहानांचैवमेवतंत्रेकार्यं श्राद्धारंभेवसानेचपादशौचेतथार्चने विकिरेपिंडदानेचद्विराचमनमिष्यते ततःकर्मपात्रेसव्येनजलमापूर्यगंधपुष्पकुशान्

क्षिप्त्वा तज्जलेन अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा यःस्मरेत्पुंडरीकाक्षंसवाह्याभ्यंतरःशुचिः पुंडरीकाक्षायनमः इतिश्राद्धीयद्रव्यंप्रोक्ष्य तिलाश्चरक्षंत्वसुरान् दर्भारक्षंतुराक्षसान् पंक्तिंवैश्रोत्रियोरक्षेदतिथिः सर्वरक्षकः इतितिलान्विकीर्य्य प्रतिद्विजंदीपान्दद्यात् आमान्नादीनांपवित्रतास्तु केचित्तु सप्तव्याधादशार्णेषुमृगाःकालंजरेगिरौ चक्रवाकाःसरिद्द्वीपेहंसाःसरसिमानसे तेपिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः प्रस्थितादूरमध्वानंयूयंकिमवसीदथ अमूर्तानांचमूर्तानांपितॄणांदिव्यतेजसां नमस्यामिसदातेषांध्यायिनांयोगचक्षुषां श्राद्धकालेगयांध्यात्वाध्यात्वादेवंजनार्दनं वस्वादींश्चपितॄन्ध्यात्वाततःश्राद्धंप्रवर्तयेत् इतिजपेत् ततोनीवीबद्ध्वा अपसव्येन देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच नमःस्वधायैस्वाहायैनित्यमेवनमोनमइतित्रिर्जप्त्वा ततोदेशकालौस्मृत्वा काश्यपगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकदासानां तथाद्वितीयकाश्यपगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकदासानां सदैवमुपक्रांतंपार्वणश्राद्धमहंकरिष्ये कुरुष्वेतिविप्रैरुक्ते दक्षिणजान्वास्यापित्रादित्रयमातामहादित्रयपार्वणश्राद्धसंवंधिनः पुरूरवोमाद्रवसंज्ञकाविश्वेदेवा इदमासनंवोनमः इतिकुशपत्रद्वयमासनंदद्यादिति टोडरपद्धतौ आसनदानेषष्ठीयुक्ता देवेक्षणंक्रियतामितिकुशंदत्त्वा तथेति तेनोक्तेप्राप्नोतुभवानित्याह प्राप्नुवानीतिविप्रः एवंद्वितीयदैवेपिकृत्वा ततोपसव्येनवामजान्वास्यकाश्यप गोत्रास्मत्पितरमुकदास वसुरूपेदमासनंतेस्वधानमइतिवाषड्विभज्यासनंदद्यात् सतिलद्विगुणभुग्नकुशान् पित्रेदत्त्वा पित्र्येक्षणः क्रियतामित्यादिप्राग्वत् एवंपितामहादौ मातामहादौचसव्येनदेवानावाहयिष्ये इतिपृष्ट्वावाहयेत्यनुज्ञातः दैवेद्विजांगुष्ठंगृहीत्वा आगच्छंतुमहाभागाविश्वेदेवामहावलाः येयत्रविहिताःश्राद्धेसावधानाभवंतुते इतिस्तुत्वा पुरूरवोमाद्रवसंज्ञका विश्वेदेवाआगच्छतेत्युक्त्वा

पादादिमूर्धांतंयवान्विकिरेत् ततोहस्तोदकंसयवंप्रतिपदार्थं ततोपसव्येन काश्यपगोत्रानस्मत्पितृपितामहप्रपितामहान् मातामहादीनपि पृथक्कर्तव्ये काश्यपगोत्रास्मत्पितरमुकदासवसुरूपागच्छ पितामहरुद्ररूपागच्छ प्रपितामहादित्यरूपागच्छ ततोदेवाग्रेसव्येनैकपात्रेकुशपवित्रेकृत्वा देवतीर्थेनदेवेभ्योनमइति जलं नमइतियवान् गंधपुष्पेचक्षिपेत् ततोपसव्येन पित्रेराजताम्रखड्गपालाशादिमयपात्रेष्वेकंद्रव्येषुवाद्वेद्वेदक्षिणाग्रेपवित्रेकृत्वा अद्भ्योनमइतिजलं तिलेभ्योनमइतितिलान् गंधपुष्पाणिचक्षिप्त्वा अर्घ्यपात्राणिसंपन्नानीत्युक्ता सुसंपन्नानीतिविप्रैरुक्ते सव्येनदेवकरेपवित्रंदत्त्वा दक्षिणहस्तेनाच्छाद्य पित्रादित्रयमातामहादित्रयश्राद्धसंवंधि पुरूरवोमाद्रवसंज्ञकाविश्वेदेवाएषवोर्घ्योनमः इतिदत्त्वा अद्भ्योनमइतिसंस्रवदभिमंत्र्यैवंद्वितीयेजलंदत्त्वा पात्रेपवित्रादिदत्त्वा देवेभ्यःस्थानमसि इत्युत्तरतोन्युब्जंकुर्यात् केचिदेतद्दैवेनेच्छंति न्युब्जतानेतिटोडरपद्धतौ ततोपसव्येनपित्र्यकरे दक्षिणाग्रंपवित्रंदत्त्वा काश्यपगोत्रास्मत्पितरमुकदासएषतेअर्घ्यःस्वधानम इतिपितृतीर्थेन दत्त्वाऽद्भ्योनमइतिसंस्रवानभिमंत्र्य तत्रपवित्रादिधृत्वा एवंपितामहप्रपितामहाभ्यां मातामहादिभ्यदद्यात् ततःप्रथमेपात्रेसंस्रवानेकीकृत्यपितृवामेकर्तुर्दक्षिणे पितृभ्यःस्थानमसि इतिन्युब्जंकृत्वा दक्षिणादानांतंनचालयेत् ततःसव्येनजलंदत्त्वा विश्वेदेवाएषगंधोवोनमः इमानिपुष्पाणिवोनमः एवंधूपदीपाच्छादनयज्ञोपवीतालंकारतांवूलानिदत्त्वा अपसव्येन काश्यपगोत्रास्मत्पितरमुकदासएषतेगंधोनमः एवंपुष्पधूपदीपाच्छादनालंकारतांवूलानिदत्त्वैवंपितामहप्रपितामहाभ्यांदद्यात् एवमेवमातामहादिभ्योपिदद्यात् ततोअर्चनपूर्णतांवाचयित्वा देवाग्रेभुवंसंमृज्य पालाशादिपत्रावलींन्यस्यगौरमृद्भस्मादिनावामंडलंकृत्वाश्राद्धीयामान्नादग्रंगृहीत्वा अग्नौकरिष्येइतिपंक्तिमूर्ध्वंदृष्ट्वा कुरुष्वेत्युक्ते सव्येनाद्यद्विजकरंपर्युक्ष्यदर्भानास्तीर्य विधानदर्भे

णद्विरवधार्याच्याग्नयेकव्यवाहनायनमः इतिहुत्वेदमग्नयेनममेतित्यक्त्वा पुनरादायसोमायपितृमतेनमः इदंसो
मायपितृमते अपसव्यपक्षे सोमाहुतिःपूर्वं अग्न्याहुतिरुत्तरा इतिहुत्वा हुतशेषं पिंडार्थमवशेषयेत् पिता
महादिमातामहादिपात्रेषु तूष्णींदद्यात् ततोदैवेप्यन्यदामान्नंदत्त्वा पात्राण्यभिघार्य्य देवपूर्वमामान्नंचतुर्गु
णंद्विगुणंसमंवादत्त्वा प्रोक्ष्यदैवेदक्षिणंजान्वास्योपवीती दक्षिणेनोत्तानसव्यपाणिभ्यामंगुष्ठंदत्त्वा तिलान्यवा
न्वाविकीर्य्योदकंस्पृष्ट्वा एवंप्रतिपात्रंकृत्वा वामकरेणदैवपात्रं धृत्वा दक्षिणे कुशयवजलान्यादा
य पित्रादित्रयमातामहादित्रयश्राद्धसंवंधि पुरूरवाद्रवसंज्ञाविश्वेदेवाइदंवआमान्नसपरिकरं गयेयंभूः
गदाधरोभोक्ता अयंच ब्रह्माग्रहीता ब्रह्मब्रह्मरूपमामंनमः सुवर्णपात्रस्थमक्षयवटच्छायास्थं
पुरूरवार्द्रवसंज्ञकेभ्यो विश्वेभ्योदेवेभ्योवअक्षयतृप्त्यर्थं संप्रददेस्वाहानमः नमम इदमामंसोपस्करम
मृतरूपेणसंपद्यतांहव्यंनमः काश्यांविश्वेश्वरायेदं दत्तमक्षय्यमस्तु गयागदाधरःप्रीतोभवतु ततोऽपसव्येन
द्विगुणभुग्नकुशतिलजलान्यादाय वामेनपात्रंधृत्वा वामंजान्वास्य काश्यपगोत्रास्मत्पितरमुकदासैतत्तेआमान्नंस
परिकरंगयेयंभूरित्यादिरजतपात्रस्थमक्षयवटच्छायास्थंकाश्यपगोत्रायास्मत्पित्रेऽमुकदासायवसुरूपायेदमामं
सोपस्करमक्षयतृप्त्यर्थंसंप्रददेस्वधानमः अमृतरूपेणस्वधासंपद्यतांकव्यंनमः काश्यामित्यादिप्राग्वत्पठेत् ए
वंपितामहप्रपितामहयोर्मातामहादिभ्यश्च दद्यात् असंस्कृतप्रमीतिभ्यएषापिंडइतिविकिरंदत्त्वा आमान्नमादायः
अनाग्निदग्धेभ्योऽग्निदग्धेभ्यश्चैषउच्छिष्टपिंडोनमइतिसोदकमामंपिंडंदत्त्वातिलोदकंवदत्त्वा मधुमधुमाध्वितित्रिर्ज
पेत् अथपिंडदानं तच्चगुडपाकेन पायसेन सक्तुभिर्मूलेनफलेनवाकार्य्यं पिंडार्थेवेदिंकृत्वा वामंजान्वास्याप
सव्येन दर्भमूलेन दक्षिणाग्ररेखांकृत्वैवंद्वितीयांकृत्वाऽपःस्पृष्ट्वा रेखाग्रेउल्मुकंनिधायोदपात्रेणाग्ररेखामूल

मध्याग्रेषु काश्यपगोत्रास्मत्पितरमुकदासावनेनिक्ष्वैवंपितामहप्रपितामहयोर्दत्त्वा द्वितीयरेखायांमातामहादिभ्यस्त्रिभ्योदत्त्वा सकृदाच्छिन्नकुशानूदक्षिणाग्रान्रेखाद्वयेनिक्षिप्य मध्वाज्यसर्वव्यंजनोपेतमन्नमग्नौकरणशेषसहितं पात्रेकृत्वा षट्पिंडान्कृत्वा पितृतीर्थेन काश्यपगोत्रास्मत्पितरमुकदासएतत्ते ऽन्नं स्वधा एषते पिंडोनमइतिवादत्त्वा इदंपित्रे ततःकुशानंतर्धाय काश्यपगोत्रास्मत्पितामहेत्यादिनात्रिभ्योदत्त्वा लेपभुग्भ्योदर्भमूलेषुकरंमार्जयित्वैवंमातामहादित्रिभ्योदत्त्वा करौप्रक्षाल्याचम्य उदङ्ङावृत्त्यमंत्रंप्राणानायम्य वसंतायनमः ग्रीष्मायनमः वर्षाभ्योनमः शरदेनमः हेमंतायनमः शिशिरायनमइतिषट्ऋतून् सव्येननमस्कृत्यापसव्येनपितृभ्योनम इत्यंजलिंवद्ध्वैव मातामहेभ्योनमइति ततोवामावर्तेनोदङ्मुखः श्वासंनियम्यपुनरावृत्त्य पितृभ्योनमः मातामहेभ्योनमइतिनत्वा काश्यपगोत्रास्मत्पितरमुकदासप्रत्यवनेनिक्ष्वेतिप्राग्वत् षट्सुपिंडेषुप्रत्यवनेजनंदत्त्वा नीवींविस्रंस्य पितृभ्योनमः मातामहेभ्योनम इतिनत्वाप्रतिपिंडंसूत्राणिदत्त्वा पितृभ्योनमः मातामहेभ्योनमइतिप्रत्यवनेजनशेषं पिंडपात्रक्षालनजलं पितृपिंडेषुनिषिच्य मातामहेभ्योनमः ततोदेवताभ्यःपितृभ्यश्चेतित्रिर्जप्त्वा पिंडेषुपित्रादिनाम्नागंधपुष्पधूपदीपनैवेद्यफलमूलतांबूलदक्षिणानिवेद्य कर्मपात्रंसुप्रोक्षितमस्तु ततःसव्येन शिवाआपःसंतु इतिजलं सौमनस्यमस्त्वितिपुष्पाणि अक्षतंचारिष्टमास्त्वित्यक्षतान् अपसव्येन पितृभ्योनमः मातामहेभ्योनमः शिवाआपः संत्वित्यादिदत्त्वा स्वमूर्ध्नि दीर्घमायुरस्तु पुष्टिरस्तु यच्छ्रेयस्तदस्तु यत्पापंतत्प्रतिहतमस्तु भूमौद्विपदचतुष्पद्भ्यःशांतिरस्तु अस्त्विति द्विजोक्ते ततः पूरूरवार्द्रवसंज्ञेभ्योविश्वेभ्योदेवेभ्योयद्दत्तमामान्नादितदक्षय्यमस्तु एवमपसव्येन काश्यपगोत्रस्यपितुरमुकदासस्ययद्दत्तमित्यादिअक्षय्यमस्तु एवंपितामहप्रपितामहयोर्मातामहादौचाक्षय्यमस्त्विति विप्रोक्तिः अघोराः

पितरःसंतु अघोरामातामहाःसंतु गोत्रंनोवर्द्धतांदातारोनोभिवर्द्धतांसंततिश्च श्रद्धाचनोमाव्यगमद्वहुदेयंचनोअस्तु अन्नंचनोवहुभवेदतिथींश्चलभेमहि याचितारश्चनःसंतुमाचयाचिष्मकंचन एताःसत्याशिषःसंतु तथास्त्वितिविप्राः ततःपित्रादिभ्योमातामहादिभ्यश्च स्वधावाच्यतां अस्तुस्वधेतिविप्राःकुशान्पिंडेषुन्यस्यार्घ्यपात्रमुत्तानंकृत्वा दैवेसुवर्णं पित्र्ये रजतं दक्षिणांदत्वा नानानामगोत्रेभ्य आमान्नं हिरण्यंच दत्वापिंडानुद्वास्याघ्राय विश्वेदेवाःप्रीयंतामितिब्रूहीत्युक्त्वावाचयित्वा एवंपित्र्येकृत्वासव्येनस्वस्तिभवंतोब्रुवंतु स्वस्तीत्युक्ते संपूर्णतांवाचयित्वा कुशैरुत्तिष्ठंतुपितरःविश्वेदेवैः सहेत्युद्वास्य मंडलेप्रदक्षिणीकृत्यविसर्जयेत् ततोवलिवैश्वदेवादिनित्यंसमापयेत् ॥

इतिशूद्रकमलाकरोक्तंशूद्रस्यपार्वणश्राद्धं शुभमस्तु

॥ अथशूद्रस्यामंत्रकैकोद्दिष्टश्राद्धं ॥

तत्रैकोद्दिष्टश्राद्धलक्षणमुच्यते एकोद्दिष्टंदैवहीनमेकार्घ्यैकपवित्रकं आवाहनाग्नौकरणरहितंत्वपसव्यवदिति अत्रविप्रनिमंत्रणेविशेषमाह प्रचेताः पादंवैदक्षिणंविप्रःसव्यंवैक्षत्रियस्तथा पादावादाय वैश्योद्वौ शूद्रःप्रणतिपूर्वकमिति पूर्वरात्रेपरेद्युर्वाप्रातरेव कर्तामंत्रवर्जं कृतप्राणायामोवाऽकृतप्राणायामः विष्णुं स्मृत्वा अपसव्येन वामंजान्वास्य काश्यपगोत्रस्यास्मत्पितुरमुकस्यश्वः करिष्यमाणैकोद्दिष्टश्राद्धे भवद्भिः क्षणोदेय इत्युक्त्वार्घ्यं प्रणिपत्य तांबूलंदत्वा ब्राह्मणाभावे कुशवटुंवा ततः अक्रोधनैःशौचपरैरित्यादिनियमान् श्रावयेत् ततोमध्यान्हसमये गोमयेनवर्तुलमंडलंविधाय तत्र विप्रमाहूय काश्यपगोत्रस्यपितुरमुकदासस्यैकोद्दिष्टश्राद्धे इदंतेपाद्यं एषपादार्घ्यइतिवा पादौप्रक्षाल्य प्रणम्य

वासनोपरि इदमासनंतेनम इत्यासनोपर्युपवेशयेत् ततःश्राद्धसामग्रींसंपाद्य स्वागतंपृष्ट्वा सुस्वागतमिति प्रत्युक्तेद्विराचम्य हरिंस्मृत्वा देशकालौस्मृत्वास्मत्पितुरमुकदासस्यकाश्यपगोत्रस्यैकोद्दिष्टश्राद्धंकरिष्ये कुरुष्वेतिप्रत्युक्ते अपसव्येन देवताभ्यःपितृभ्यश्चेतिजप्त्वा काश्यपगोत्रंपितरममुकदासमावाहयेत्युक्ते मूर्धादिपादांतंतिलान्विकीर्य काश्यपगोत्रास्मत्पितरमुकदासेहागच्छ ततएकस्मिन्पात्रे द्वेदक्षिणाग्रेपवित्रे धृत्वा अद्भ्योनम इतिजलं तिलेभ्योनम इतितिलान् गंधपुष्पाणिच अर्घ्यपात्रंसंपन्नमितिपृष्ट्वा संपन्नमितिप्रत्युक्ते विप्रकरेपवित्रंदत्त्वा काश्यपगोत्रास्मत्पितरमुकदासएषतेअर्घ्यः स्वधानमः अद्भ्योनमइतिसंस्रवानभिमंत्र्य तत्रपवित्रादिदत्त्वा पित्रेस्थानमसीतिन्युब्जीकुर्यात् दक्षिणांतंनचालयेत् ततोगंधादिदानं काश्यपगोत्रास्मत्पितरमुकदासएषतेगंधः इमानिपुष्पाणितेनमः एवंधूपदीपाच्छादनालंकारतांबूलादिदद्यात् अर्चनपूर्णतांवाचयित्वा पालाशादिपत्रावलिंन्यस्य गोरमृद्भस्मजलादिनामंडलंकृत्वा श्राद्धीयान्नादग्रंगृहीत्वा अग्नौकरणाभावे तूष्णींद्विजकरेजलेवा दत्त्वा भूस्वामिने अन्नंनमइति दत्त्वा ततःश्राद्धीयमामान्नं सपरिकरं गयेयंभूःगंगाधरोभोक्ता आमंचब्रह्म ब्रह्मग्रहीताब्रह्मरूपमामंनःसंकल्पितंरजतपात्रस्थमक्षयवटच्छायास्थंकाश्यपगोत्रायास्मत्पित्रेमुकदासायेदमामान्नममृतरूपेणाक्षयतृप्त्यर्थमहंसंप्रददेस्वधानमः अमृतरूपेणसंपद्यतां ततोअग्निदग्धेभ्योनाग्निदग्धेभ्योनमः इतिविकिरंपिंडरूपेणदद्यात् तिलोदकंदत्त्वा मधुमधुमध्वितित्रिर्जप्त्वा सप्तव्याधादशार्णेष्वित्यादिजप्त्वा पिंडपातनार्थंवेदिंकृत्वा दर्भमूलेनदक्षिणाग्रांरेखांकृत्वा उल्मुकंचस्थापयित्वा रेखायांकुशान्दत्त्वा अवनेजनंविधाय काश्यपगोत्रास्मत्पितरमुकदासात्रावनेनिक्ष्वेतिदत्त्वाप्रत्यवनेजनार्थमवशेषयेत् ततोगृहपाकेनपायससक्तुफलमूलादिभिःसतिलघृतंमधुयुतंपिंडंनिर्माय तिलजल

कुशानादाय काश्यपगोत्रास्मत्पितरमुकदासएषतेपिंडोनमःस्वधा ततःसव्येनाचम्यापसव्यंकृत्वा श्वासं
नियम्योदङ्मुखीभूय परावर्त्यपित्रेनमः पिंडेप्रत्यवनेनिक्ष्वेतिप्रत्यवनेजनं दत्त्वा पिंडेपित्रेनमइतिसू
त्रंदत्त्वा पितृभ्योनमः ततोदेवताभ्यः पितृपिंडगंधादिदानं काश्यपगोत्रायास्मत्पित्रेमुकदासायेति गं
धपुष्पधूपदीपनैवेद्यफलतांबूलदक्षिणादीनिनमः कर्मपात्रंसुप्रोक्षितमस्तु शिवाआपः संतु सौमनस्यमस्तु
अक्षतंचारिष्टमस्तु दत्तेतदन्नपानादिकमक्षय्यमस्तु अघोरः पितास्तु गोत्रंनोवर्द्धतां दातारोनोभिवर्द्धंता
मित्याद्याशीः प्रार्थयित्वा श्राद्धदक्षिणांदत्वा अर्घ्यपात्रमुत्तानीकृत्य पिंडमाघ्रायोत्थापयित्वा पितृभ्योनम
इतिनमस्कृत्यविसर्जयेत् ततोबलिवैश्वदेवादि नित्यकर्मशेषंसमापयेत् ॥ इतिशूद्रस्मृतिकौमुद्युक्तं

शूद्रस्यैकोद्दिष्टश्राद्धं

अथश्राद्धकालेपठनीयोरुचिस्तवोमार्कंडेयपुराणे

मार्कंडेयउवाच इत्यृषिर्वचनंश्रुत्वाब्रह्मणोऽव्यक्तजन्मनः नद्याविविक्तेपुलिनेचकारपितृतर्पणं ॥ १ ॥
तुष्टावचपितॄन्विप्रःस्तवैरेभिरथादृतः एकाग्रःप्रयतोभूत्वाभक्तिनम्रात्मकोरुचिः ॥ २ ॥ रुचिरुवाच नम
स्येहंपितॄन्भक्त्यायेवसंत्यधिदैवतं देवैरपिहितर्प्यंतेयेश्राद्धेषुस्वधोत्तरैः ॥ ३ ॥ नमस्येहंपितॄन्श्राद्धेतर्प्यं
तेयेप्यहर्निशं श्राद्धैर्मनोरमैर्भक्त्याभुक्तिमुक्तिमभीप्सुभिः ॥ ४ ॥ नमस्येहंपितॄन्स्वर्गेसिद्धाःसंतर्पयंति
यान् श्राद्धेषुदिव्यैःसकलैरुपहारैरनुत्तमैः ॥ ५ ॥ नमस्येहंपितॄन्भक्त्यायेर्च्यंतेगुह्यकैर्दिवि तन्मयत्वेनवांछद्भिः
ऋद्धिमात्यंतिकींपरां ६ नमस्येहंपितॄन्मर्त्यैरर्च्यंतेभुवियेसदा श्राद्धेषुश्रद्धयाभीष्टलोकपुष्टिप्रदायिनः ॥ ७
नमस्येहंपितॄन्विप्रैरर्च्यंतेभुवियेसदा वांछिताभीष्टलाभायप्राजापत्यप्रदायिनः ॥ ८ ॥ नमस्येहंपितॄन्येवैतर्प्यंते

रण्यवासिभिः वन्यैःश्राद्धैर्यताहारैस्तपोनिर्द्धूतकल्मषैः ॥ ९ ॥ नमस्येहंपितॄन्विप्रैर्नैष्ठिकव्रतचारिभिः येस
यतात्मभिर्नित्यंसंतर्प्यंतेसमाधिभिः १० नमस्येहंपितॄन्श्राद्धेराजन्यास्तर्पयंतियान् कव्यैरशेषैर्विधिवल्लोकद्वय
फलप्रदान् ११ नमस्येहंपितॄन्वैश्यैरर्च्यंतेभुवियेसदा स्वकर्माभिरतैर्नित्यंपुष्पधूपान्नवारिभिः १२ नमस्ये
हंपितॄन्श्राद्धेयेशूद्रैरपिभक्तितः संतर्प्यंतेजगत्यत्रनाम्नाख्याताःसुकालिनः १३ नमस्येहंपितॄन्श्राद्धेपाता
लेयेमहासुरैः संतर्प्यंतेस्वधाहारास्त्यक्तदंभमदैस्तथा १४ नमस्येहंपितॄन्श्राद्धेऽभ्यर्च्यंतेयेरसातले भो
गैरशेषैर्विविधैर्नागैःकाममभीप्सुभिः १५ नमस्येहंपितॄन्श्राद्धेसर्पैःसंतर्पितान्सदा तत्रैवविधिवन्मंत्रैर्भोग
संपत्समन्वितैः १६ पितॄन्नमस्येनिवसंतिसाक्षाद्येदेवलोकेपिमहीतलेवा तथांतरिक्षेचसुरादिपूज्यास्तेन्नंप्रती
च्छंतुमयोपनीतम् १७ पितॄन्नमस्येपरमाणुभूतायेवैविमानेनिवसंतिमूर्ताः यजंतियानस्तमलैर्मनोभिर्योगीश्वराः
क्लेशविमुक्तिहेतून् १८ पितॄन्नमस्येदिवियेचमूर्ताःस्वधाभुजःकाम्यफलाभिसंधौ प्रदानशक्ताः सकलेप्सितानांविमु
क्तिदायेनभिसंधितेषु १९ तृप्यंतुतेस्मिन्पितरःसमस्ताइच्छावतांयेप्रदिशंतिकामान् सुरत्वमिंद्रत्वमतोधिकंवाव
स्वात्मजान्क्ष्मामचलांगृहाणि २० सूर्यस्ययेरश्मिषुचंद्रबिंबेशुक्लेविमानेचसदावसंति तृप्यंतुतेस्मिन्पितरोन्न
तोयैर्गंधादिनातुष्टिमतोव्रजंतु २१ येषांहुतेग्नौहविषाचतृप्तिर्येभुंजतेविप्रशरीरसंस्थाः येपिंडदानेनमुदंप्रयांति
तृप्यंतुतेस्मिन्पितरोन्नतोयैः २२ येखड्गमांसैरसुरैरभीष्टैःकृष्णैस्तिलैर्दैत्यमहोरगैश्च कालेनशाकेनमहर्षिवर्गैः
संप्रीणितास्तेमुदमत्रयांतु २३ कव्यान्यशेषाण्यपियान्यभीष्टान्यतीवतेषाममरार्चितानां तेषांतुसांनि
ध्यमिहास्तुपुष्पगंधांबुभोज्येषुमयार्पितेषु २४ दिनेदिनेयेप्रतिगृह्णतेर्चांमासांतपूज्याभुवियेऽष्टकासु येवत्सरां
तेभ्युदयेचपूज्याः प्रयांतुतेमेपितरोत्रतुष्टिम् २५ पूज्याद्विजानांकुमुदेंदुभासोयेक्षत्रियाणांचनवार्कवर्णाः तथा

विशांयेकनकावदातानीलीनिभाः शूद्रजनस्ययेवे २६ तेस्मिन्समस्तामम पुष्पगंधधूपादितोयान्ननिवेद
नेन तथाग्निहोमेनचयांतुतृप्तिंसदापितृभ्यःप्रणतोस्मितेभ्यः २७ येदेवपूर्वाण्यतितृप्तिहेतोरश्नंतिकव्यानिशुभाहृ
तानि तृप्ताश्चयेभूतसृजोभवंतितृप्यंतुतेस्मिन्प्रणतोस्मितेभ्यः २८ रक्षांसिभूतान्यसुरांस्तथोग्रान्निर्नाशयंतस्त्वशि
वंप्रजानांआद्याःसुराणाममरेशपूज्यास्तृप्यंतुतेस्मिन्प्रणतोस्मितेभ्यः २९ अग्निष्वात्तावर्हिंषदआज्यपाःसोमपास्त
थाव्रजंतुतृप्तिंश्राद्धेस्मिन्पितरस्तर्पितामया ३० अग्निष्वात्ताःपितृगणाःप्राचींरक्षंतुमेदिशं तथावर्हिंषदःपांतुयाम्यां
येपितरःस्थिताः ३१ प्रतीचीमाज्यपास्तद्वदुदीचीमपिसोमपाः ऊर्ध्वंतस्त्वर्यमारक्षेत्कव्यवाडनलोप्यधः ३२ वि
श्वेदेवाअधःपांतुचोर्ध्वंपांतुमरुद्गणाः रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ३३ सर्वतश्चाधिपस्तेषांयमोरक्षांकरो
तुमे मिश्वोविश्वभुगाराध्योधर्मोधन्यःसनातनः ॥ ३४ ॥ भूतिदोभूतिकृद्भूतिःपितॄणांयेगणानव वरोवरेण्यो
वरदःपुष्टिदस्तुष्टिदस्तथा ॥ ३५ ॥ विश्वपातातथाधातासप्तैतेचगणाःस्मृताः कल्याणःकल्पदःकर्त्ताकल्पः
कल्पतराश्रयः ॥ ३६ ॥ कलनाहेतुरनघःषडित्येतेगणाःस्मृताः महान्महात्मामहितोमहिमावान्महावलः
गणाःपंचतथैवैते पितॄणांपापनाशनाः ॥ ३७ ॥ सुखदोधनदश्चान्योधर्मदोन्यश्चभूतिदः पितॄणांकथ्य
तेचैतत्तथागणचतुष्टयं ॥ ३८ ॥ एकत्रिंशत्पितृगणायैर्व्याप्तमखिलंजगत् तेमेत्रतृप्तास्तुष्यंतुयच्छंतुचसदा
हितम् ॥ ३९ ॥ मार्कंडेयउवाच एवंतुस्तुवतस्तस्यतेजसोराशिरुच्छ्रितः प्रादुर्बभूवसहसागगनव्या
प्तिकारकः ॥ ४० ॥ तद्दृष्ट्वासुमहत्तेजःसमाच्छाद्यास्थितंजगत् जानुभ्यामवनिंगत्वारुचिःस्तोत्रमिदंजगौ
४१ ॥ रुचिरुवाच अमूर्त्तानांसुमूर्त्तानांपितॄणांदीप्ततेजसां नमस्यामिसदातेषांध्यानिनांयोगचक्षुषां ॥ ४२ ॥
इंद्रादीनांचनेतारोदक्षमारीचयोस्तथा सप्तर्षीणांतथातेषांतान्नमस्यामिकामदान् ॥ ४३ ॥ मन्वादीनांचनेतारःसू

यांचंद्रमसोस्तथा तान्नमस्याम्यहंसर्वान्पितॄनप्स्वौषधीषुच ॥ ४४ ॥ नक्षत्राणांग्रहाणांचवाय्वग्न्योर्नभसस्तथ
द्यावापृथिव्योश्चतथानमस्यामिकृतांजलिः ॥ ४५ ॥ प्रजापतेःकश्यपायसोमायवरुणायच योगेश्वरेभ्यश्चतथानम
स्यामिकृतांजलिः ॥ ४६ ॥ नमोगणेभ्यःसप्तभ्यस्तथालोकेषुसप्तसु स्वयंभुवेनमस्यामिब्रह्मणेयोगचक्षुषे ॥ ४७
सोमाधाराःपितृगणायोगमूर्तिधराहिये नमस्यामितथासोमंपितरंजगतामहम् ॥ ४८ ॥ अग्निरूपांस्तथैवान्यान्न
मस्यामिपितॄनहं अग्नीसोममथंविश्वंयतएतदशेषतः ॥ ४९ ॥ येतुतेजसियेवायोसोमसूर्याग्निमूर्तयः जगत्स्व
रूपिणश्चैवयेचब्रह्मस्वरूपिणः ॥ ५० ॥ तेभ्योऽखिलेभ्योयोगिभ्यःपितृभ्योयतमानसः नमोनमोनमस्तेमेप्रसी
दंतुस्वधाभुजः ॥ ५१ ॥ मार्कंडेयउवाच एवंस्तुतास्ततस्तेनतेजसोमुनिसत्तम निश्चक्रमुस्तेपितरोभासयंतो
दिशोदश ॥ ५२ ॥ निवेदितंचयत्तेनपुष्पधूपानुलेपनं तद्भूषितानथसतान्ददर्शपुरतःस्थितान् ॥ ५३ ॥ प्रणिपत्य
रुचिर्भक्त्यापुनरेवकृतांजलिः नमस्तुभ्यंनमस्तुभ्यमित्याहपृथगादृतः ॥ ५४ ॥ ततःप्रसन्नाःपितरस्तमूचुर्मुनिस
त्तम वरंवृणीष्वेतिसतानुवाचानतकंधरः ॥ ५५ ॥ रुचिरुवाच सांप्रतंसर्गकर्तृत्वमादिष्टंब्रह्मणामम सोहंपत्नी
मभीप्सामिधन्यांदिव्यांप्रजावतीं ॥ ५६ ॥ पितरऊचुः अत्रैवसद्यःपत्नीतेभविष्यतिमनोरमा तस्यांचपुत्रोभवि
तारुचिरोमुनिसत्तम ॥ ५७ ॥ मन्वंतराधिपोधीमांस्त्वन्नाम्नैवोपलक्षितः रुचेरौच्यइतिख्यातिंप्रयास्यतिजगत्त्रये
५९ ॥ अस्यापिवहवःपुत्रामहावलपराक्रमाः भविष्यंतिमहात्मानः पृथिवीपरिपालकाः ॥ ५८ ॥ त्वंचप्रजापतिर्भू
त्वाप्रजाःसृष्ट्वाचतुर्विधाः क्षीणाधिकारोधर्मज्ञततःसिद्धिमवाप्स्यसि ॥ ६० ॥ स्तोत्रेणानेनचनरोयोस्मान्स्तोष्य
तिभक्तितः तस्यतुष्टावयंभोगान्दास्यामोज्ञानमुत्तमम् ॥ ६१ ॥ शरीरारोग्यमर्थंचपुत्रपौत्रादिकंतथा वांछद्भिस्स
ततंस्तव्याःस्तोत्रेणानेनभक्तितः ॥ ६२ ॥ श्राद्धेचयइमंभक्त्याचास्मत्प्रीतिकरंस्तवं पठिष्यंतिद्विजाग्र्याणांभुंज

तांपुरतःस्थिताः ॥ ६३ ॥ स्तोत्रश्रवणसंप्रीत्यासान्निधानेपरेकृते अस्माभिरक्षयंश्राद्धंतद्भविष्यत्यसंशयम् ॥ ६४
यद्यप्यश्रोत्रियंश्राद्धंयद्यप्युपहतंभवेत् अन्यायोपात्तवित्तेनयदिवाकृतमन्यथा ॥ ६५ ॥ अश्रद्धयावापुरुषैर्दंभमाश्रि
त्ययत्कृतं अस्माकंप्रीतयेश्राद्धंतदप्येतदुदीरणात् ॥ ६६ ॥ यत्रैतत्पठ्यतेश्राद्धेस्तोत्रमेतत्सुखावहं अस्माकंजायते
तृप्तिस्तत्रद्वादशवार्षिकी ॥ ६७ हेमंतेद्वादशाब्दानितृप्तिमेतत्प्रयच्छति शिशिरेद्विगुणाब्दानितृप्तिंस्तोत्रमिदंश्रुतं
६८ ॥ वसंतेषोडशसमास्तुष्टयेश्राद्धकर्मणि ग्रीष्मेचषोडशैवैतत्पठितंतृप्तिकारकं ॥ ६९ ॥ विकृतेपिकृतेश्राद्धेस्तोत्रे
णानेनशोधिते वर्षासुतृप्तिरस्माकमक्षयाजायतेरुचे ॥ ७० ॥ शरत्कालेपिपठितंश्राद्धकालेप्रयच्छति अस्माक
मेतत्पुरुषैस्तृप्तिंपंचदशाब्दिकीं ॥ ७१ ॥ यस्मिन्गृहेवालिखितमेतत्तिष्ठतिनित्यशः सन्निधानेकृतेतृप्तिस्तत्रास्मा
कंभविष्यति ॥ ७२ ॥ तस्मादेतत्त्वयाश्राद्धेविप्राणांभुंजतांपुरः श्रावणीयंमहाभागअस्माकंपुष्टिहेतुकं ॥ ७३ ॥
मार्कंडेयउवाच ततस्तस्मान्नदीमध्यात्समुत्तस्थौमनोरमा पुलोमानामतन्वंगीतत्समीपेवराप्सरा ॥ ७४ ॥
अप्सरोवाच अतीवरूपिणींकन्यांमत्सुतांवदतांवर जातांवरुणपुत्रेणपुष्करेणमहात्मना ॥ ७५ ॥ तांगृहा
णमयादत्तांभार्य्यार्थंवरवर्णिनींमनुर्महामतिस्तस्याःसमुत्पत्स्यतितेसुतः ॥ ७६ ॥ तथेतितेनसाप्युक्तातस्मात्तो
याद्वपुष्मतीं उज्जहारततःकन्यांमालिनींनामनामतः ॥ ७७ ॥ नद्याश्चपुलिनेतस्मिन्समुनिर्मुनिसत्तम पाणौजग्रा
हविधिवत्समानाय्यमहामुनीन् ॥ ७८ ॥ तस्यांतस्यसुतोजज्ञेमहावीर्य्योमहाद्युतिः रौच्योभवत्पितुर्नाम्नाख्यातो
थवसुधातले ॥ ७९ ॥ तस्यमन्वंतरेदेवास्तथासप्तर्षयश्चये तनयाश्चनृपाश्चैवतेसम्यक्कथितास्तव ॥ ८० ॥ धर्म
वृद्धिस्तथारोग्यंधनधान्यसमुद्भवः नृणांभवत्यसंदिग्धमस्मिन्मन्वंतरेश्रुते ॥ ८१ ॥ पितृस्तवंतथाश्रुत्वापितॄणां
चतथागणान् सर्वान्कामानवाप्नोतित्वत्प्रसादान्महामुने ॥ ८२ ॥

इतिश्रीमार्कंडेयपुराणे रौच्यमन्वंतरे रुचिकृतः पितृस्तवः समाप्तः ॥

अमावास्यांगतेसोमेगौर्याखादयतेतृणं दौहित्रीसातुविज्ञेयादौहित्रंतद्घृतंस्मृतं अथमातृनवम्यांमातृवर्गपूर्वश्राद्धंकर्तव्यं मातृवर्गश्चश्राद्धदीपिकायांब्राह्मे पितृमातृकुलोत्पन्नायाः काश्चनमृताःस्त्रियः श्राद्धार्हामातरोज्ञेयाःश्राद्धंतत्रप्रदीयते तत्रादौमातृमातामहीपूर्वकं षड्दैवत्यपार्वणंपिंडदानांतंकृत्वा ततश्चान्यासांमातृपितृकुल्यानामेकतंत्रमेवकुर्यात् तत्रादौदक्षिणाग्रकुशत्रयंगृहीत्वा अस्मत्कुलेमृतायाश्चगतिर्यासांनविद्यते आवाहयिष्येताःसर्वादर्भपृष्ठेतिलोदकैः ॥ १ ॥ वंधुवर्गकुलेयाश्चगतिर्यासांनविद्यते आवाहयिष्येताःसर्वादर्भपृष्ठेतिलोदकैः ॥ २ ॥ मातामहकुलेयाश्चगतिर्यासांनविद्यते आवाहयिष्येताःसर्वादर्भपृष्ठेतिलोदकैः ॥ ३ ॥ इतिमंत्रत्रयेणास्तृतदर्भेषुताआवाह्यगंधादिभिरभ्यर्च्य तत्र आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः तृप्यंतुमातरःसर्वामातृमातामहीमुखाः २ अतीतकुलकोटीनांसप्तद्वीपनिवासिनां आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं २ पूर्ववद्देवांजलिदानपूर्वकंमात्राद्यावाहनं विधाय पुनरपिमात्रादिभ्योयथासंवंधनामगोत्रग्रहणपूर्वकंसंकल्पेनपिंडान्दत्त्वा ततःषोडशपिंडान्दद्यात् अस्मत्कुलेमृतायाश्चगतिर्यासांनविद्यते तासामुद्धरणार्थायमातृपिंडंददाम्यहं २ वंधुवर्गकुलेयाश्चगतिर्यासांनविद्यते तासामुद्धरणार्थायमातृपिंडंददाम्यहं ३ अजातदंतायाःकाश्चिद्याश्चगर्भेषुपीडिताः तासामुद्धरणार्थायमातृपिंडंददाम्यहं ४ अग्निदग्धाश्चयाःकाश्चिन्नाग्निदग्धास्तथापराः विद्युच्चौरहतायाश्चताभ्यःपिंडंददाम्यहं ५ दावदाहेमृतायाश्चसिंहव्याघ्रहताश्चयाः आत्मोपघातनिहता स्ताभ्यःपिंडंददाम्यहं ६ अरण्येवर्त्मनिवनेक्षुधयातृषयाहताः भूतप्रेतपिशाचाद्यैस्ताभ्यःपिंडंददाम्यहम् ॥ ७ ॥ उद्बंधनमृतायाश्चविद्युच्छस्त्रहताश्चयाः दंष्ट्रिभिःशृंगिभिश्चैवताभ्यःपिंडंददाम्यहं ॥ ८ ॥ रौरवे

चांधतामिस्त्रकालसूत्रेचयागताः तासामुद्धरणार्थायपिंडमेनंददाम्यहं ९ अनेकयातनासंस्थाःप्रेतलोकंचयागताः
तासामुद्धरणार्थायपिंडमेनंददाम्यहम् १० अनेकयातनासंस्थायानीतायमकिंकरैः तासामुद्धरणार्थायपिंडमेनंद
दाम्यहम् ११ नरकेषुसमस्तेषुयातनासुचयाःस्थिताः तासामुद्धरणार्थायपिंडमेनंददाम्यहं १२ पशुयोनिगतायाया
श्चयाश्चपक्षिसरीसृपाः अथवावृक्षयोनिस्थास्ताभ्यःपिंडददाम्यहम् १३ जात्यंतरसहस्रेषुभ्रमंत्यःस्वेनकर्मणा
मानुष्यंदुर्लभंयासांताभ्यःपिंडंददाम्यहं १४ दिव्यंतरिक्षभूमिस्थाःपितरोवांधवादयः मृताअसंस्कृतायाश्चता
भ्यः पिंडंददाम्यहम् ॥ १५ ॥ याःकाश्चित्प्रेतरूपेणवर्तंतेमातरोमम ताःसर्वास्तृप्तिमायांतुपिंडदानेनसर्वदा १६
यावांधवावांधवायायाश्चान्यजन्मवांधवाः तासांपिंडोमयादत्तोह्यक्षय्यमुपतिष्ठतां ॥ १७ ॥ येमेकुलेलुप्तपिंडाः
पुत्रादिपरिवर्जिताः क्रियालोपगतायाश्चजात्यंधाःपंगवस्तथा विरूपाआमगर्भाश्चज्ञाताज्ञाताःकुलेषुमे ता
सांपिंडोमयादत्तोह्यक्षय्यमुपतिष्ठतां ॥ १८ ॥ आब्रह्मणोयाःपितृवंशजातामातुस्तथावंशभवामदीयाः वंशद्वयेयाम
मवासभूताभृत्यास्तथैवाश्रितसेवकाश्च मित्राणि.शिष्याःपशवश्चवृक्षादृष्टाअदृष्टाश्चकृतोपकाराः जन्मांतरेया
ममसंगताश्चताभ्यःस्वधापिंडमहंददामि १९ उच्छिन्नकुलजातायायासांदाताकुलेनहि धर्मपिंडोमयाद
त्तोह्यक्षय्यमुपतिष्ठतां २० आब्रह्मस्तंबपर्यंतंब्रह्मांडंसचराचरं जगत्तृप्यतुपिंडेनभक्त्यादत्तेनसर्वदा २१
इत्येकविंशतिपिंडान्दत्त्वा अवनेजनावशिष्टं प्रत्यवनेजनं दत्त्वा वस्त्रंदत्त्वा गंधादिभिःसंपूज्य अक्षय्यो
दकसंकल्पंकृत्वा सव्येन पिंडेषु पूर्वाग्रांवारिधारां दद्यात् अघोरामातरःसंतु ततोऽपसव्येन पिंडेषुकुशप
वित्रादिकंदत्त्वा ऊर्जंवहंतीरितिमंत्रेण सतिलमधुक्षीरनीरधारांदत्त्वा दक्षिणांचदत्त्वा पिंडान्विसर्ज्य बलि
दानादिकंकृत्वा प्रमादादितिविष्णुस्मरणपूर्वकं नत्वा यथासुखंविहरेत् इतिमातृनवमीश्राद्धं मातृषोडशी

श्राद्धंच अथात्यंताशक्तस्यात्यावश्यकंमहालयश्राद्धमेकाहपक्षमाश्रित्यलिख्यते तथाच नागरखंडे सेतुमाहात्म्ये आषाढ्याःपंचमेपक्षेकन्यासंस्थेदिवाकरे योवैश्राद्धंनरःकुर्य्यादेकस्मिन्नपिवासरे तस्यसंवत्सरंयावत्तृप्ताःस्युः पितरोध्रुवं चतुर्विंशतिमते एकस्मिन्ब्राह्मणेसर्वान्पित्रादीन्परिपूजयेत् दशद्वादश वापिंडान्कुर्य्यादकरणंनहीति तत्राप्यविज्ञातमातृपित्रादिमृतदिनमासालब्ध्याऽमावास्यायामेकाहपक्षश्राद्धंतच्चकतिपयदेशीयस्यसदाचारपरिगृहीतंपिंडदानमात्रमेव तस्यायंप्रयोगः आचम्य प्राणानायम्य ॐपुंडरीकाक्षायनमइतिश्राद्धीयवस्तून्यासिच्य श्राद्धकालेगयांध्यात्वाध्यात्वादेवंगदाधरं स्वान्पितॄन्मनसाध्यात्वाततःश्राद्धं समाचरेत् देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच नमःस्वधायैस्वाहायैनित्यमेवनमोनमः ॐमद्येत्यादिदेशकालौसंकीर्त्यामुकगोत्राणांपितृपितामहप्रपितामहानांमातामहप्रमातामहवृद्धप्रमातामहानां मातृपितामहीप्रपितामहीनां मातामहीप्रमातामहीवृद्धप्रमातामहीनामन्येषां चास्मदीयसप्तगोत्रांतर्गतैकविंशतिकुलोत्पन्नसमस्तसंबंधिनांमहालयामावास्याश्राद्धमहंकरिष्ये ततः पितृपक्षीयविश्वेदेवब्राह्मणायनमोमातृपक्षीयविश्वेदेवब्राह्मणायनमः इदमासनंवोनमः आगच्छंतुमहाभागाइत्यावाह्य गंधादिभिरभ्यर्च्य एतानिगंधार्घ्यपुष्पादीनि विश्वेदेवब्राह्मणायनमः ततोऽपसव्यं पितृमतेब्राह्मणायनमः मातृमतेब्राह्मणायनमः इदमासनंस्वधा पितॄनावाहयिष्यामि मातॄरावाहयिष्यामि यथाशक्तिगंधादिभिरभ्यर्च्य एतानिगंधादीनि पितृभ्यःस्वधा सव्यंकृत्वा विश्वेदेवब्राह्मणेभ्यइदमन्नंसोपकरणंद्विधाविभज्यवोनमः मधुवाताइतिपाठंकृत्वा पृथिवीतेपात्रंकृत्वा ततोऽपसव्यंकृत्वा पितृभ्योमातृभ्यश्च इदमन्नंस्वधा इत्येवंयथाशक्तिश्राद्धविधिंसंक्षेपेणकृत्वा ततः पिंडपातनार्थंवेदिकांकृत्वा पिंडदानंकुर्य्यात् तत्रवेदिकायां अपहताअसुराइतिमंत्रंपठित्वा कुशमूलेन

रेखाकरणं येरूपाणीतिपठित्वा ततःसव्यं देवताभ्यः अपसव्यं ॐमद्यामुकगोत्राअस्मत्पितृमात्रादयः समस्तसंवंधिनः पिंडस्थाने अत्रावनेनिग्ध्वंवःस्वधा ॐमद्यामुकगोत्रास्मत्पितरमुकशर्मन्नेषतेपिंडःस्वधा एवंपित्रादिभ्यः मातामहादिभ्यः मात्रादिभ्यः मातामह्यादिभ्यः प्रत्येकं गोत्रनामोच्चारणपूर्वकं द्वादशपिंडान्दत्वा शेषसंवंधिभ्योऽपिदद्यात् तत्रायंक्रमः तातांबात्रितयंसपत्नजननीमातामहादित्रयं सस्त्रीस्त्रीतनयादितातजननीस्वभ्रातरस्तत्स्त्रियः तातांबात्मभगिन्यपत्यधवयुग्जायापितृसद्गुरु शिष्याप्ताः पितरोमहालयविधौतीर्थेतथातर्पणे इत्येवंपिंडान्दत्वा प्रत्यवनेजनपूर्वकं सूत्रदानं गंधादिदानंच एवंपूजनंविधाय सव्येन पूर्वाग्रांवारिधारांदत्वा ऊर्जंवहंतीरिति दक्षिणादानांतंकृत्वा विश्वेदेवविसर्जनांतंचकृत्वा ततःषोडशीक्रमेणपिंडदानंकुर्य्यात् ऊनविंशतिपिंडदानार्थं वेदिकांविधाय तत्रकुशानास्तीर्य्य मोटकतिलजलान्यादाय अस्मत्कुलेमृतायेचगतिर्येषांनविद्यते आवाहयिष्येतान्सर्वान्दर्भपृष्ठेतिलोदकैः वंधुवर्गकुलेयेच गतिर्येषांनविद्यते आवाहयिष्ये ॥ २ ॥ मातामहकुलेयेचगतिर्येषांनविद्यते आवाहयिष्येतान्सर्वान्दर्भपृष्ठेतिलोदकैः ॥ ३ ॥ इत्यावाह्यगंधादिभिरभ्यर्च्य आब्रह्मस्तंवपर्यंतंदेवर्षिपितृमानवाः तृप्यंतु पितरःसर्वेमातृमातामहादयः अतीतकुलकोटीनांसप्तद्वीपनिवासिनां आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं इतितिलांजलिदानरूपमावाहनं कृत्वा पिंडदानंकुर्य्यात् पितापितामहश्चैवतथैवप्रपितामहः मातापितामहीचैवतथैवप्रपितामही मातामहस्तत्पिताचप्रमातामहकादयः तेषांपिंडोमयादत्तोह्यक्षय्यमुपतिष्ठतां इतिद्वादशभ्य एकमेवपिंडं दत्वा षोडशीक्रमेण पिंडान्दद्यात् अस्मत्कुलेमृतायेचगतिर्येषांनविद्यते तेषामुद्धरणार्थायइमंपिंडंददाम्यहम् १ मातामहकुलेयेचगतिर्येषांनविद्यते तेषांमुद्ध- इमंपिंडं

२ वंधुवर्गकुलेयेचगतिर्येषांनविद्यते तेषामु.इमंपिंडं अजातदंतायेकेचिद्येचगर्भेप्रपीडिताः तेषामु०इमंपिंडं ४
अग्निदग्धाश्चयेकेचिन्नाग्निदग्धास्तथापरे विद्युच्चौरहतायेचतेभ्यःपिंडंददाम्यहन् ५ दावदाहेमृतायेचसिंहव्या
घ्रहताश्चये दंष्ट्रिभिःशृंगिभिश्चैवतेभ्यःपिंडं ६ उद्बंधनमृतायेचविद्युच्छस्त्रहताश्चये आत्मोपघातिनोयेचते
भ्यःपिंडंद ७ अरण्येयेवर्त्मनिजलेक्षुधयातृषयाहताः भूतप्रेतपिशाचाश्चतेभ्यःपिंडंद ८ रौरवेचांधतामिस्रेकाल
सूत्रेचयेगताः तेषामु०पिंडमेनंद ९ अनेकयातनासंस्थाःप्रेतलोकंचयेगताः तेषामु०पिंडमेनंद १० अनेक
यातनासंस्थायेनीतायमसादनं तेषामु०पिंडमेनंद ११ नरकेषुसमस्तेषुयातनायांचयेस्थिताः तेषामु०पिंडमे
नंद- १२ पशुयोनिंगतायेचपक्षिकीटसरीसृपाः अथवावृक्षयोनिस्थास्तेभ्यःपिंडंद. १३ जात्यंतरसहस्रेषुभ्र
मंतः स्वेनकर्मणा मानुष्यंदुर्लभंयेषांतेभ्यः पिंडंद० १४ दिव्यंतरिक्षभूमिस्थाः पितरोवांधवादयः मृताअसंस्कृता
येचतेभ्यः पिंडंद- १५ येकेचित्प्रेतरूपेणवर्त्ततेपितरोमम तेसर्वेतृप्तिमायांतुपिंडदानेनसर्वदा १६ येवांधवा
वांधवायेयेन्यजन्मनिवांधवाः तेषांपिंडोमयादत्तोह्यक्षय्यमुपतिष्ठतां १७ पितृवंशेमृतायेचमातृवंशेचयेमृताः गुरुश्व
शुरवंधूनांयेचान्येवांधवामृताःविरूपाआमगर्भाश्चज्ञाताज्ञाताःकुलेमम तेषांपिंडोमयादत्तोह्यक्षय्यमुपतिष्ठतां ॥ १८
त्रिभिरेकोयंपिंडः आब्रह्मणोयेपितृवंशजातामातुस्तथावंशभवामदीयाः वंशद्वयेयेममवासभूताभृत्यास्तथैवा
श्रितसेवकाश्च मित्राणिशिष्याः पशवश्चयक्षादृष्टाअदृष्टाश्चकृतोपकाराः जन्मांतरेयेममसंगताश्चतेभ्यः
स्वधापिंडमहंददामि १९ पितामाताचभार्याचभगिनीदुहितापतिः पितृष्वसामातृष्वसासप्तगोत्राणिचैवहि उ
च्छिन्नकुलगोत्रायेयेषांदाताकुलेनहि धर्मपिंडोमयादत्तोह्यक्षय्यमुपतिष्ठतां ततःपिंडपूजनं दक्षिणादानादिकंयथा
विधिकार्यं इतिपितृषोडशीक्रमः महालयश्राद्धमाहात्म्यं स्कंदपुराणे ब्रह्मखंडे पूर्वभागे सेतुमाहात्म्ये

सूतउवाच धनुष्कोटिस्तुमाहात्म्यंभूयोपिप्रवदाम्यहम् दुराचाराभिधोयत्रस्नात्वामुक्तोबभूवह इत्युपक्रम्य दत्तात्रेयउवाच महापातकिसंसर्गात्दुराचारकृतात्पुरा ब्राह्मण्यंनष्टमभवद्वेतालस्तंततोऽग्रहीत् सचभाद्रपदेमासेकृष्णपक्षेमहालयें पार्वणेनविधानेनपितॄणांनाकरोत्सदा तैरेवपितृभिः शप्तोवेतालत्वमगादयं सोपिचास्याधनुःकोटेरवलोकनमात्रतः वेतालत्वंविहायैवविष्णुलोकमवाप्तवान् अतोभाद्रपदेमासेकृष्णपक्षेमहालये उद्दिश्यस्वपितॄन्यैतुनकुर्वंतिहिलोभतः महापापयुतास्तेतुवेतालाःस्युर्नसंशयः तस्माद्भाद्रपदेमासिकृष्णपक्षेमहालये पितॄनुद्दिश्ययेभक्त्याब्राह्मणान्वेदपारगान् भोजयेयुर्महाप्राज्ञास्तेनविंदंतिदुर्गतिं यस्तुभाद्रपदेमासिकृष्णपक्षेमहालये स्वशक्त्यान्नंमहाविप्रानेकंद्वौत्रीनकिंचन भोजयेदस्यदौर्मत्यं नभवेच्चकदाचन अयंभाद्रपदेमासिपितॄणामनपायनात्, वेतालतांययौविप्रयस्त्वांजग्राहपापिनं मासोभाद्रपदःकालस्तत्रापिहिविशिष्यते कृष्णपक्षोविशिष्टःस्यात्तत्रश्राद्धंप्रशस्यते तस्माच्छुभेकृष्णपक्षेप्रथमायांतिथौतथा श्राद्धंमहालयंकुर्य्याद्योनरोभक्तिपूर्वकं तस्यप्रीणातिभगवान्पावकःसर्वभावनः सवह्निलोकमाप्नोति वह्निनासहमोदते तस्मैप्रज्वलितोदेवःसर्वैश्वर्य्यंददात्यपि प्रथमायांतिथौसत्यांयोनकुर्य्यान्महालयं वह्निर्गृहंदहेत्तस्यश्रियंक्षेत्रादिकंतथा वेदविद्ब्राह्मणोभुंक्तेप्रथमायांमहालये दशकल्पसहस्राणिपितरोयांतितृप्तताम् १ द्वितीयायांतुयोभक्त्याकुर्य्याच्छ्राद्धंमहालये तस्यप्रीणातिभगवान्भवानीपतिरीश्वरः सकैलासमवाप्नोतिशिवेन सहमोदते विपुलांसंपदंतस्यप्रीतोदद्यान्महेश्वरः द्वितीयायांतिथौमर्त्योयोनकुर्यान्महालयं तस्यवैकुपितःशंभुर्नाशयेद्ब्रह्मवर्चसं रौरवंकालसूत्राख्यंनरकंचास्यदास्यति वेदविद्ब्राह्मणोभुंक्तेद्वितीयायांमहालये विंशत्कल्पसहस्राणिपितरोयांतितृप्ततां अनुग्रहात्पितॄणांतुसंततिश्चास्यवर्द्धते १ तृतीयायांनरोभक्त्याश्राद्धंकुर्य्यान्महालये

तस्यप्रीणातिभगवान्लोकपालोधनाधिपः महापद्मादिनिधयोवर्त्ततेतस्यवैवशे तस्यानुगास्त्रयोदेवाब्रह्म
विष्णुमहेश्वराः तृतीयायांतिथौमर्त्योयोनकुर्य्यान्महालये धनलोभवशात्तस्यसंपदंहरतिक्षणात् दारिद्र्यं
हिसदातस्यवहुदुःखसमाकुलं तृतीयायांतुयोमर्त्यःश्राद्धंकुर्य्यान्महालये तृप्यंतिपितरस्तस्यत्रिंशत्कल्पस
हस्रकं चतुर्थ्यांतुनरोभक्त्याश्राद्धंकुर्य्यान्महालये तस्यप्रीणातिभगवान्हेरंवः पार्वतीसुतः तस्यविघ्नानिन
श्यंतिगजवक्रप्रसादतः चतुर्थ्यांतुतिथौमर्त्योयोनकुर्य्यान्महालयं विघ्नेशोभगवांस्तस्यसदाविघ्नंकरोतिहि
चंडकोलाहलाख्येतुनरकेचपतत्ययं चतुर्थ्यांतुतिथौमर्त्योयःकरोतिमहालयं पितरःकल्पसाहस्रंचत्वारिंशत्प्र
हर्षिताः वहून्पुत्रान्प्रदास्यंतिश्राद्धकर्तुर्निरंतरम् ४ पंचम्यांचतिथौभक्त्याश्राद्धंकुर्य्यान्महालये तस्यलक्ष्मी
र्भगवतीप्रीणातिहरिवल्लभा गृहक्षेत्रकलत्रादितस्यनृत्यतिसर्वदा कीर्तिश्चवर्धतेतस्ययावदाचंद्रतारकं पंच
म्यांतुतिथौमर्त्योयोनकुर्य्यान्महालयं तस्यलक्ष्मीर्भगवतीपरित्यजतिमंदिरं अलक्ष्मीःकलहद्वारातस्यप्राप्ताभ
वेद्गृहे पंचम्यांतुतिथौमर्त्योयःकरोतिमहालयं पंचाशत्कल्पसाहस्रंतृप्यंतिपितरस्तथा संततिंचाप्य
विच्छिन्नांतस्मैदास्यंतितर्पिताः पार्वतीचप्रसन्नास्यान्महदैश्वर्य्यदायिनी ५ षष्ठ्यांतिथौनरोभक्त्याश्राद्धंकुर्य्या
न्महालये तस्यप्रीणातिभगवान्षण्मुखःपार्वतीसुतः तस्यपुत्राश्चपौत्राश्चषण्मुखस्यप्रसादतः षष्ठ्यांतिथौ
नरोयस्तुनकुर्य्याच्चमहालयं तस्यस्कंदोमहासेनोविमुखःस्यान्नसंशयः गर्भान्निर्गममात्रेणप्रजातस्यविन
श्यति पूतनादिग्रहगणैर्वाध्यतेचनिरंतरं वह्निज्वालाप्रवेशाख्येनरकेचपतत्ययं षष्ठ्यांतिथौतुयःश्राद्धंकु
र्य्यान्मर्त्योमहालये षष्टिवर्षसहस्रंतुपितरोयांतितृप्ततां पुत्रानपिप्रदास्यंतिश्रियंचविपुलांतथा ६ स
प्तम्यांतुतिथौमर्त्यःश्राद्धंकुर्यान्महालये हिरण्यपाणिर्भगवानादित्यस्तस्यतुष्यति आरोग्यंदृढगात्रंस्याद्धा

स्करस्यप्रसादतः हिरण्यपाणिर्भगवान्हिरण्यान्वाहरेत्स्वयं महालयश्राद्धकर्त्रेंददातिप्रीतमानसः सप्त
म्यांतुतिथौमर्त्योयोनकुर्य्यान्महालयं व्याधिभिःक्षयरोगाद्यैर्बाध्यतेसदिवानिशं तीक्ष्णधारास्त्रशय्याख्ये
नरकेचपतत्ययं सप्तम्यांयोनरोभक्त्याश्राद्धंकुर्य्यान्महालये सप्ततिःकल्पसाहस्रंपितरोयांतितृप्ततां पु
त्रानपिप्रदास्यंतिसंपदांविपुलांतथा संततिंचाप्यविच्छिन्नांदद्युःपितृगणाःसदा ७ अष्टम्यांतुतिथौमर्त्यःश्रा
द्धंकुर्यान्महालये मृत्युंजयःकृत्तिवासास्तस्यप्रीणातिशंकरः करस्थंतस्यकैवल्यंशंकरस्यप्रसादतः महालये
नश्राद्धेनतुष्टःसाक्षात्त्रियंबकः चतुर्दशसुलोकेषुदुर्लभंतस्यकिंभवेत् महालयंनकुर्याद्यअष्टम्यांमूढचेतनः सं
सारसागरेघोरेसदामज्जतिदुःखितः कदाचिदपितस्येष्टंनसिद्ध्यतिकथंचन वैतरण्याख्यनरकेपतत्याचंद्रतारकम्
योऽष्टम्यांश्रद्धयाश्राद्धंनरःकुर्य्यान्महालये अशीतिःकल्पसाहस्रंतृप्यंतिपितरोस्यवै आशीर्भिर्वर्धयंत्ये
नंविघ्नांश्चास्यव्यपोहति संततिंचाप्यविच्छिन्नांदद्युःपितृगणामुदा नवम्यांतुतिथौमर्त्यःश्राद्धंकुर्य्यान्महा
लये दुर्गादेवीभगवतीतस्यप्रीणातिशांभवी क्षयापस्मारकुष्ठादीन्क्षुद्रप्रेतपिशाचकान् नाशयत्यस्य
संतुष्टादुर्गामहिषमार्दिनी ॥ ९ ॥ नवम्यांतुतिथौचैवयेनकुर्य्युर्महालयं अपस्मारेणपीड्यंतेतथैवब्रह्मरा
क्षसैः अकृतंचाभिचारंसयातिनित्यंनिरंतरं नवम्यांयस्तिथौमर्त्यःश्राद्धंकुर्यान्महालये नवतिः
कल्पसाहस्रंतृप्यंतिपितरोस्यवै संततिंचाप्यविच्छिन्नांदद्युःपितृगणाः सदा ॥ ९ ॥ दशम्यांतुतिथौ
यश्चकुर्यात्श्राद्धंमहालये तस्यमृगधरश्चंद्रःषोडशात्माप्रसीदति ओषधीनामधीशोस्मिन्श्राद्धेना
नेनतोषितः व्रीह्यादीनितुधान्यानिदद्याद्देशादिकंतथा योनकुर्य्याद्दशम्यांतुमहालयमनुत्तमंओषध्यो
निष्फलास्तस्यकृषिश्चास्यापिनिष्फला दशम्यांतुतिथौमर्त्यःश्राद्धंकुर्य्यान्महालये शतंकल्पसहस्राणि

तृप्यंतिपितरोस्यवै संततिंचाप्यविच्छिन्नांदद्युःपितृगणाःसदा १० एकादश्यांतुयोभक्त्या श्राद्धंकुर्यान्महालये संहर्तासर्वलोकस्यतस्यरुद्रःप्रसीदति रुद्रस्यसर्वसंहर्तुः प्रसादेनजगत्पतेः शत्रून्पराजयत्येषश्राद्धकर्तानिरंतरं ब्रह्महत्यायुतंवापितस्यनश्यतितत्क्षणात् अग्निष्टोमादियज्ञानांफलंप्राप्नोत्यनुत्तमं एकादश्यांनरोभक्त्यायोनकुर्यान्महालयं तस्यैवविमुखोरुद्रोनकदाचित्प्रसीदति सर्वदावर्धमानंतंबाधतेचतथोद्यतं अग्निष्टोमादियज्ञाश्चकृताश्चबहुदक्षिणाः निष्फलाएवतस्यस्युर्भस्मन्यस्तसुहव्यवत् ब्रह्मघातकतुल्यश्च श्राद्धाकरणदोषतः एकादश्यांतिथौयस्तुश्राद्धंकुर्यान्महालये द्विशतंकल्पसाहस्रंतृप्यंतिपितरोस्यवै ११ द्वादश्यांतुतिथौमर्त्यःश्राद्धंकुर्यान्महालये तस्यलक्ष्मीपतिःसाक्षात्प्रसीदतिजनार्दनः प्रसन्नेसतिदेवेशेतृप्तेसतिजनार्दने चराचरंजगत्सर्वंप्रीतमेवनसंशयः भूमिर्हरिप्रियाचास्यसस्यान्वैवर्धयत्यलं लक्ष्मीश्चवर्धतेतस्यमंदिरेहरिवल्लभा गदाकौमोदकीनामनारायणकरस्थिता अपस्मारादिभूतानिनाशयत्येवसर्वदा तीक्ष्णधारंतथाचक्रंशत्रूनस्यदहत्यपि यातुधानपिशाचादीन्शंखश्चास्यव्यपोहति एवंसर्वात्मनादेवोनाशयत्यस्यकेशवः महालयंनकुर्याद्योद्वादश्यांमनुजाधमः तस्यक्षेत्राणिसंपच्चविनश्यंतिनसंशयः अपस्मारादिभूतानिशत्रवश्चमहाबलाः यातुधानाश्चबाधंतेतंवैविष्णुपराङ्मुखं पात्यतेनरकेचासौअस्थिमर्दननामके द्वादश्यांभक्तितोयस्तुश्राद्धंकुर्यान्महालये षट्शतंकल्पसाहस्रंतृप्यंतिपितरोस्यवै संततीश्चाप्यविच्छिन्नाःपितरोस्यददंत्यमी १२ त्रयोदश्यांनरोभक्त्याश्राद्धंकुर्यान्महालये प्रसीदत्यस्यभगवान्कंदर्पोरतिनायकः संक्रंदनादयोदेवाललनाश्चमनोरमाः कामदेवप्रसादेनतस्यसिद्ध्यंतिसर्वदा आजन्ममरणांतंचसुखमेवसविंदति योनकुर्यात्त्रयोदश्यांनरःश्राद्धंमहालये कामदेवोस्यविमुखःस्त्रियोभोगाश्चनाशयेत् अंगारशय्याभ्रमणेनरकेपा

ब्र०र०
आश्वि०
॥४४॥

तयत्यमुं पितॄनुद्दिश्ययःकुर्य्यात्त्रयोदश्यांमहालयं सहस्रकल्पसाहस्रंप्रीणंतिपितरोस्यवै संततीश्चाप्यविच्छिन्नादद्युःपितृगणाःसदा १३ चतुर्दश्यांनरोभक्त्याश्राद्धंकुर्य्यान्महालये तस्याभीष्टप्रदानायजागर्तिभगवान् शिवः उपदिश्यशिवज्ञानंस्वसाम्राज्यंददात्यसौ सुरापानायुतंचापिस्वर्णस्तेयायुतंतथा नश्यंतितत्क्षणादेवचतुर्दश्यांमहालयात् चंडालवृषलस्त्रीणांसंगदोषादिनश्यति अश्वमेधसहस्राणिपौंडरीकायुतस्यच पुष्कलाफलसिद्धिःस्याच्चतुर्दश्यांमहालयात् योनकुर्य्याच्चतुर्दश्यांनरःश्राद्धंमहालये संसाराध्वमहाकूपतमस्यस्यननिष्कृतिः अचोरयित्वाकनकमपीत्वापिसुरासवं सुरापानादिभिर्दोषैर्लिप्यतेसविमूढधीः कृताअपिविधानेनयज्ञाःस्युर्निष्फलास्तथा चतुर्दश्यांतिथौयस्तुश्राद्धंकुर्यान्महालये लक्षकोटिसहस्राणिकल्पकोटिशतानि च कल्पानिपितरस्तस्यतृप्यंतेचनसंशयः नरकस्थाश्चपितरःस्वर्गंयांतिप्रहर्षिताः संततीश्चाप्यविच्छिन्नादद्युःपितृगणास्तथा १४ अमायांतुनरोभक्त्याश्राद्धंकुर्य्यान्महालये पितॄणांतस्यतृप्तिःस्यादनंतानात्रसंशयः सुधामासाद्ययातृप्तिःसातृप्तिस्तुपितुर्भवेत् अनंताहीदृशीतृप्तिरमावास्यांमहालयात् अमावास्यामहापुण्यापितृदेवनमस्कृता एषातिथिस्तुपरमाशिवस्यपरमाप्रिया तस्यांमहालयेंश्राद्धेभोजितेवेदवित्तमे तेन तृप्तिःपितॄणांस्यादनंतातुष्यतेशिवः ब्रह्महत्यादिकाःपंचपातकानाशमाप्नुयुः कृताश्चस्युर्विधानेनसर्वेयज्ञाःसदक्षिणाः अनुष्ठिताःस्युर्विधिवत्सर्वेधर्माःसनातनाः योनकुर्य्यादमावास्यांमहालयमचेतनः ब्रह्मलोकगताश्चास्यपितरोयांतिनारकं संततिश्चास्यमूढस्यविच्छिद्येतैवतत्क्षणात् सएवहिमहानर्थोयदमायांतिथौनरैः महालयार्थेविप्रेंद्राविधिवन्नैवभोजिताः मासिभाद्रपदेमायांतुष्यंतिपितृदेवताः अस्मानुद्दिश्यसत्पुत्राभोजयेयुर्द्विजोत्तमान् तेननोनरकक्लेशोनभविष्यतिदारुणः प्राप्तश्चसर्वलोकःस्याद्यावदाचंद्रतारकं मासिभाद्रपदेप्राप्तेपि तॄणां

तृप्तिदायिनि एकैकंभोजयेद्विप्रंप्रत्यहंभक्तिपूर्वकं पितृमातृकुलोद्भूताःपितरस्तृप्तिमाप्नुयुः कृष्णपक्षे विशेषेणभोजयेद्ब्राह्मणान्सुधीः घृतापूपादिभिर्भक्ष्यैस्तैलाभ्यंगपुरस्सरं सुधांप्राप्स्यंतिपितरस्तस्यकल्पंप्रहर्षिताः सप्तम्याःकृष्णपक्षस्यप्रारभ्यप्रत्यहंनरः विप्रान्यावदमावस्यांपितॄंस्त्रीनभिभोजयेत् अन्यथैश्वर्य्यहानिःस्यान्महद्दारिद्र्यभाग्भवेत् अतिलाभंपरित्यज्यविप्रान्सूपघृतादिभिः पयसापायसान्नेनघृतापूपादिभिस्तथा सूपैर्लेह्यैश्चचोष्यैश्चभक्ष्यैश्चविविधैरपि भोजयेद्वेदविन्मुख्यांस्तृप्तिस्तेषांयथाभवेत् तेनब्रह्माहरिःशंभुस्तृप्ताःस्युर्नात्रसंशयः अग्निष्वात्तादिपितरउपेंद्राद्याधिदेवताः वहुनात्रकिमुक्तेनतृप्यत्येवजगत्त्रयं पार्वणेनविधानेनकुर्य्याच्छ्राद्धंमहालये नरोमहालयेश्राद्धेपितृवंशान्पितॄन्प्रति मातृवंश्यानपिपितॄन्भोजयेच्छ्रेयसेमुदा दक्षिणांचयथाशक्तिदद्याद्वित्तानुसारतः अस्मिन्महालयेश्राद्धेवित्तशाठ्यंनकारयेत् दक्षिणासर्वयज्ञानांकथितेयंपुरोगवा अतःपुरोगरहितातिथ्यमध्वर्यवेत्रिधा अदक्षिणस्तथाचार्यंपितृयज्ञोपलिप्यते तस्माद्यज्ञेषुदातव्यादक्षिणाल्पापिजानता विधवाभिरपिस्त्रीभिरपुत्राभिर्महालये भर्तुरुद्दिश्यकर्त्तव्यंभूरिभोजनकर्मणा अन्यथाधर्महानिःस्यान्नरकेचमहद्भयं मासेभाद्रपदेप्राप्तेयोनकुर्य्यान्महालयं तत्कालंशापमाप्नोतिब्रह्महत्यांचाविंदति महालयेचकुर्वंतिश्रद्धावंतःपितॄनपि नतेषांसंततिच्छेदोभवेत्संपदभंगुरा आलयस्त्वास्पदंप्रोक्तंमहत्कल्याणमुच्यते कल्याणस्यास्पदत्वाच्चमहालयमितीर्य्यते तस्मान्महालयंमर्त्यःकुर्य्यान्कल्याणसिद्धये अमंगलंभवेत्तस्यनकुर्य्याच्चेन्महालयं कर्तुंमहालयंश्राद्धंयदिशक्तिर्नविद्यते याचित्वापिनरःकुर्य्यात्पितॄणांतुमहालयं ब्राह्मणेभ्योविशिष्टेभ्योयाचेतधनधान्यकं पतितेभ्योनगृह्णीयाद्धनंधान्यंकदाचन ब्राह्मणेभ्योनलभ्येतयदिधान्यधनादिकं याचयेत्क्षात्रियश्रेष्ठान्महालयाचिकीर्षया दातारश्चेन्नभूपालावै

ब्र०र०
आश्वि०
॥४५॥

श्येभ्योपिचयाचयेत् वैश्याअपिहिदातारोयदिलोकेनसंतिवै दद्याद्भाद्रपदेमासिगोग्रासंपितृतृप्तये अथवारोदनंकुर्य्याद्बहिर्निर्गत्यकानने पाणिभ्यामुदरंस्वीयंपीडयाश्रूणिचपातयेत् अथवारण्यदेशेषुउच्चैवंरोदनेनरः शृएवंतुपितरःसर्वेमत्कुलीनावचोमम अहंदरिद्रःकृपणोनिर्लज्जःपापकर्मकृत् प्राप्तेभाद्रपदेमासेपितृप्रीतिविवर्द्धनं कर्तुंमहालयंश्राद्धंनचमेशक्तिरस्तिवै याचित्वापिमहींकृत्स्नांनवैकिंचित्तुलभ्यते अतोमहालयश्राद्धंनयुष्माकंकरोम्यहं क्षमध्वंममतद्यूयंभवंतोपिदयापराः उच्चैवंरोदनंकुर्य्याद्वनदेशेषुभूसुराः तस्यरोदनमाकर्ण्य पितरस्तत्कुलोद्भवाः दृष्ट्वातृप्तिंप्रयांत्येवअमृतेनेवनिर्ज्जराः महालयार्थंविप्राग्र्यैर्भुक्तैस्तृप्तिर्यथाभवेत् गोग्रासारण्यरुदितैःपितृतृप्तिस्तथाभवेत् मासिभाद्रपदेविघ्नोभवेच्चेत्सूतकादिना गतेषुसूतकाहस्सुतत्कुर्य्याद्वृश्चिकावधि अतोमहालयार्थंहिब्राह्मणान्वृणुयाच्छुचीन् द्विजमेकंतुवृणुयात्पितामहकृतेथवा प्रपितामहमुद्दिश्यतथैववृणुयाद्द्विजं तथामातामहाद्यर्थमेकैकंवृणुयाद्द्विजं एकैकंवृणुयादेवंमातुश्चप्रपितामहं तथैववैश्वदेवार्थेवृणुयाद्द्वौद्विजोत्तमौ विष्ण्वर्थंब्राह्मणंचैकंवृणुयाद्वेदवित्तमं एवंमहालयेश्राद्धेब्राह्मणान्वृणुयान्नव अथवापितृवर्गार्थेवरयेद्विप्रमेककं मातामहादींश्चोद्दिश्यवरयेद्विप्रमेककं वैश्वदेवार्थमेकैकंविष्ण्वर्थंचतथापरं एवंवैवृणुयाद्विप्रान्चतुरस्तुमहालये ब्राह्मणान्वेदसंपन्नान्सुशीलान्वरयेत्सुधीः दुःशीलान्वरयेद्यस्तुसवैश्राद्धस्यघातकः मासिभाद्रपदेप्राप्ते कृष्णपक्षेविशेषतः कुर्य्यान्महालयेश्राद्धंयोनरःश्रद्धयासह सस्नातःसर्वतीर्थेषुश्रद्धाचारान्महामते अग्निष्टोमादयोयज्ञाःशतशोप्यमुनाकृताः तुलापुरुषमुख्यानिदानान्यपिकृतानिवै चांद्रायणादिकृच्छ्राणिकृतान्येवनसंशयः चतुर्णांसांगवेदानांपारायणफलंलभेत् महालयसमंपुण्यंभूतनास्तिमहीतले ब्रह्मविष्णुमहेशानांलोकप्राप्तिर्महालये महालयादिकंश्राद्धंनित्यंकाम्याद्विशिष्यते

तस्मादकरणेतस्यप्रत्यवायोमहान्भवेत्   करणादिष्टसिद्धिश्चभविष्यतिनसंशयः   महालयस्यक
रणाद्भूतवेतालकादयः   अपस्मारग्रहाश्चापिशाकिनीडाकिनीगणाः   यातुधानाःपिशाचाश्चवेतालाश्च
भयानकाः नश्यंतितत्क्षणादेवभूतान्यन्यानिवैतथा महालयस्यकरणाद्विपुलांश्रियमश्नुते पुरादशरथोरा
जावसिष्ठस्योपदेशतः मासिभाद्रपदेप्राप्तेकृत्वाश्राद्धंमहालये रामादींश्चतुरःपुत्रान्प्राप्तवान्लोकसम्मतान् वि
श्वातिशायिनींलक्ष्मींप्रपेदेकिंत्वनुत्तमाम् महालयस्यकरणात्ययातीराजसत्तमः यदुमुख्यान्महापुत्रान्प्रपेदेवंश
वर्द्धनान् अनन्यदुर्लभंस्वर्गंप्रपेदेश्राद्धपुण्यतः दुष्यंतोभरतंलेभेमहालयविधानतः महालयविधानेनदमयंती
पतिर्नलः कृच्छ्रंमहत्तरंतीर्त्वापुनर्लेभेमहीमिमां निजग्राहकलिंघोरंपुष्करंचाप्यरातिनं इंद्रसेनाभिधानंचपुत्रं
लेभेतुधार्मिकं हरिश्चंद्रोमहाराजोमहालयविधानतः लेभेचंद्रमतींभार्य्यांलोहिताश्वसुतंपुनः महालयविधा
नेनकृतवीर्य्यसुतोबली अष्टादशानांद्वीपानांभूपत्वंसमवाप्तवान् शमोपिदंडकारण्येमहालयविधानतः हत्वा
तुरावणंसंस्थेसीतांपुनरवाप्तवान् महालयप्रभावेणधर्मराजोयुधिष्ठिरः दुःखसागरमुत्तीर्यधार्त्तराष्ट्रान्जघानह म
हालयस्यकरणाद्वसिष्ठोमुनिसत्तमः अत्रिर्भृगुःक्रतुश्चैवगौतमश्चांगिरास्तथा कश्यपश्चभरद्वाजोविश्वामित्र
श्चकुंभजः पराशरोमृकंडुश्चयेचान्येमुनिसत्तमाः विधायविधिवच्छ्राद्धंमहालयमनुत्तमं अणिमाद्यष्टसिद्धी
नांव्रतानांतपसांतथा निवासभूताःसंजातास्तथाश्राद्धप्रभावतः जीवन्मुक्ताश्चतेसर्वेह्यभवन्मुनिसत्तमाः अहो
महालयंश्राद्धंकर्तव्यंभूतिमिच्छता अतोयोपिदुराचारोनकुर्य्याद्वैमहालयं भूतवेतालप्रेतभ्योभूयात्तस्यमहद्भयं
महालयस्याकरणाद्वेतालत्वमवाप्तवान् त्वयानिष्टमिदंप्राप्तंविप्रस्त्वंपूर्वजन्मनि नाम्नावेदानिधिःपुण्यभारद्वा
जस्यवंशजः कुशस्थल्यभिधानेचवसन्ग्रामेमहामनाः नचकारविधानेनश्राद्धमेतन्महालये ततस्त्वंपितृणांशा

पाद्वेतालत्वमवाप्तवान् तस्माद्भाद्रपदेमासिदुराचारःपितॄन्प्रति ब्राह्मणान्भोजयेदेवपायसेनसभक्तिकं दारिद्र्यंतेनतेनस्यात्सुखीचैवभवान्भवेत् ॥

इतिस्कंदपुराणेब्रह्मखंडेपूर्वभागेसेतुमाहात्म्येमहालयश्राद्धमाहात्म्यम् ॥

अथाश्विनशुक्लप्रतिपदिमातामहस्यमहालयश्राद्धंदौहित्रेणकार्य्यं हेमाद्रौसंग्रहेच जातमात्रोपिदौहित्रोजीवत्यपिचमातुले कुर्य्यान्मातामहंश्राद्धंप्रतिपद्याश्विनेसिते इयंप्रतिपत्संगवव्यापिनीग्राह्येति प्रतिपद्याश्विने मासिदौहित्रेणैवपार्वणं श्राद्धंमातामहंकार्य्यंसापित्रासंगवेसदेति जातमात्रोपिदौहित्रोजीवत्यपिचमातुले प्रातःसंगवयोर्मध्येआचार्य्यप्रतिपद्भवेत् अत्रमूलंमृग्यं इदंचमलमासेनकार्य्यं स्पष्टमासविशेषाख्यंविहितंवर्जयेन्मले इतिनिषेधात् इदंचजीवत्पितृकेणापिकार्य्यमतिशिष्टाः शिष्टाचारात्सपिंडंकार्य्यमितिकेचित् पिंडरहितंतुयुक्तमितिकेचिद्वदंति मुंडनंपिंडदानंचापितृकर्मचसर्वशः नजीवत्पितृकःकुर्य्यात्तिलैस्तर्पणमेवचेत्यनेनजीवत्पितृकंप्रति पिंडदाननिषेधादन्वष्टकावर्जं विशेषवचनाभावात् पिंडरहितंकार्य्यमिति केचिद्वदंति अन्येतुवदंति नजीवत्पितृकंप्रतिपिंडदानमात्रमनेननिषिध्यते किंतु दर्शश्राद्धंगयाश्राद्धंश्राद्धंचापरपाक्षिकं नजीवत्पितृकःकुर्य्यात्तिलैःकृष्णैश्चतर्पणं पित्र्यंजीवत्पितुर्नेष्टं इत्यादिवचनैकवाक्यतयाश्राद्धमेवनिषिध्यते एवंच तंत्रविशेषवचनप्राप्तंश्राद्धंसपिंडमेवभवति ॥ इतिमहालयश्राद्धनिर्णयः समाप्तः

स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीरित्यादि १ रणवीरसिंहभूपेशकारितेकृत्यसागरे अभून्महालयश्राद्धकृत्यानांरत्नसंग्रहः २ अथाश्विनशुक्लप्रतिपदायां अशोकव्रतं नवरात्रव्रतारंभश्च नारदीये आश्विनेसितपक्षत्यांकृत्वाऽशोकव्रतंनरः व्रतांतेद्वादशेवर्षेमूर्तिंचाशोकशाखिनः समर्प्यगुरवेभक्त्या

शिवलोकेमहीयते अस्यामेवप्रतिपदिनवरात्रंसमारभेत् पूर्वाह्णेस्थापयेद्देवींघटस्थापनपूर्वकं अंकुरारोप
णंकृत्वायवैर्गोधूमामिश्रितैः ततःप्रतिदिनंकुर्य्यादेकभक्तमयाचितं उपवासंयथाशक्तिपूजापाठजपादिकं मार्कंडे
यपुराणोक्तंचरितत्रितयंतथा पठनीयंनवदिनंभुक्तिमुक्तिमभीप्सता कुमारीपूजनंतत्रप्रशस्तंभोजनादिभिः एवंकृ
त्वाव्रतंतत्रसर्वसिद्ध्यान्वितोनरः जायतेभुविदुर्गायाःप्रसादान्नात्रसंशयः तत्रादावशोकपूजाव्रतंभविष्योत्तरे अ
श्वयुक्शुक्लपक्षस्यप्रथमेन्हिदिनोदये अशोकंपूजयेत्तत्रप्ररूढनवपल्लवं प्ररूढैःसप्तधान्यैश्चतंतुभिर्मोदकैःशुभैःफलैः
कालोद्भवैर्दिव्यैर्नारिकेलैःसदाडिमैः धूपदीपादिनातद्वत्पूजयेत्तद्दिनेनगं सनरःपांडवश्रेष्ठशोकंनाप्नोतिकुत्रचित्
पितृभ्रातृपतिश्वश्रूसुतानांचतथैवच अशोकशोकशमनोभवसर्वत्रनःकुले इत्युच्चार्यततोदद्यादर्घ्यंश्रद्धासम
न्वितः पताकाभिरलंकृत्यप्रच्छाद्यघसुवाससा दमयंतीयथास्वाहायथावेदमतीसती तथाऽशोकव्रतादस्माज्जा
यतेपतिवल्लभा वनेव्रजंत्यासाधर्म्यंसीतयासंप्रदर्शितं दृष्ट्वाशोकवनेपार्थपल्लवालंकृतंनगं कृत्वासमीपेभ
र्तारंदेवरंचतिलाक्षतैः दीपालक्तकनैवेद्यैर्धूपस्रक्सफलार्चनैः अर्चयित्वाभ्यर्थितोसौरक्ताशोकोयुधिष्ठिर मैथि
लीप्रांजलिर्भूत्वाशृण्वतोराघवस्यच चिरंजीवतुमेवृद्धःश्वशुरःकोसलेश्वरः भर्त्तामेदेवरश्चैवजीवंतुपितृकादयः कौ
शल्यामपिजीवंतींपश्येयमितिमैथिली ययाचेयंमहाभागाद्रुममभ्यर्च्ययाचितं प्रदक्षिणमुपावृत्यप्रीतास्तेत्रय
युस्ततः एवमन्यापिभक्त्यायापूजयेद्ब्रुवतीनगं तिलतंडुलसंमिश्रैर्यवगोधूमसर्षपैः क्षमाप्यवंदयेन्मूलेपा
दपंरक्तपल्लवं मंत्रेणानेनकौंतेयप्रणम्यस्त्रीपतिव्रता महावृक्षमहाशाखमकरध्वजमंदिर प्रार्थयेत्वांमहाभा
गवनोपवनभूषण एवमाभाष्यतंवृक्षंदत्वाविप्रायदक्षिणां सखीभिःसहितासाध्वीततःस्वभवनंव्रजेत् याः
शोकनाशनमशोकतरुंतरुण्यःसंपूजयंतिकुसुमाक्षतधूपदीपैः ताःप्राप्यसौख्यमतुलंभुविभर्तृजातंगौरीवनंप्रमुदि

ताःपुनराप्नुवंति ॥ अथव्रतस्वरूपं निर्णयसिंधौ भविष्योत्तरे एवंचविंध्यवासिन्यांनवरात्रोपवासतः एकभक्तेननक्तेनस्वशक्त्यायाचितेनवा पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे गृहेगृहेशक्तिपरैर्ग्रामेग्रामेनरैर्नरैः स्नातैःप्रमुदितैर्हृष्टैर्ब्राह्मणैःक्षत्रियैर्नृपैः वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेंच्छैरन्यैश्चमानवैः स्त्रीभिश्चकुरुशार्दूलतद्विधानमिदंशृणु देवीपुराणेऽपि कन्यासंस्थेरवौशुक्लामाश्विनेप्राप्यनंदिकां अयाचिताशीचैकाशीनक्ताशीवाथवाय्ववदः भूमौशयीतचामंत्र्यकुमारीर्भोजयेन्मुदा वस्त्रालंकारदानाद्यैः संतोष्यप्रतिवासरं बलिंचप्रत्यहंदद्यादोदनमाषमांसवत् त्रिकालंपूजयेद्देवींजपस्तोत्रपरायणइति अत्रदेवीपूजैव प्रधानं व्रत उपवासादिकमंगं पूजयित्वाश्विनेमासिविशोकोजायतेनरः एवमन्यैरपिसदादेव्याःकार्यंप्रपूजनं विभूतिमतुलांलब्धुंचतुर्वर्गप्रदायिकामित्यादौपूजायाएवफलसंबंधात् मार्कंडेयपुराणेऽपि महापूजाविधानमत्रैवोक्तं शरत्कालेमहापूजाक्रियतेयाचवार्षिकीति वार्षिकीपूजानवरात्रव्रतविधानेन कर्तव्यतयाप्रोक्ता ॥

अथनवरात्रव्रतप्रारंभः

तन्निर्णयस्तु निर्णयामृते देवीपुराणे सुमेधाउवाच शृणुराजन्प्रवक्ष्यामिचंडिकापूजनक्रमं आश्विनस्यसितेपक्षेप्रतिपत्सुशुभेदिने पुण्याहवाचनंकृत्वा कन्यामावाहयेत्ततः कृत्वास्वर्णमयींदेवींपलमात्रात्मिकांबिकां भैरवाष्टकसंयुक्तांन्यसेदुद्यानपीठके पंचप्रणवमुच्चार्यपश्चाद्देवींसमर्चयेत् शुद्धेतिथौप्रकर्त्तव्यंप्रतिपच्चोर्ध्वगामिनी आद्यास्तुनाडिकास्त्यक्त्वाषोडशद्वादशापिवा अपराह्णेप्रकर्त्तव्यंशुद्धसंततिकांक्षिभिः इदंचापराह्णयोगिन्याःप्राशस्त्यं द्वितीयदिनेप्रतिपदोऽभावेज्ञेयं तथा तत्रैवदेवीवचनं अमायुक्तानकर्त्तव्याप्रतिपत्पूजनेमम मुहूर्तमात्राकर्त्तव्याद्वितीयादिगुणान्विता आद्याःषोडशनाड्यश्चलब्ध्वायःकुरुतेनरःकलशस्थापनंतत्रअरिष्टं

जायतेध्रुवम् वर्जनीयाप्रयत्नेन अमायुक्तातुपार्थिव द्वितीयादिगुणैर्युक्ता प्रतिपत्सर्वकामदा शर
त्कालेविधातव्यं नंदामाश्रित्ययत्नतः पूजनंगंधपुष्पाद्यै र्नाना भक्ष्यसमन्वितैः
देवीवचनं योमांसंपूजयेन्नित्यं द्वितीयादिगुणान्विते प्रतिपच्छरदिज्ञात्वा सोऽश्नुतेसुखमव्ययम्
यदिकुर्यादमायुक्तप्रतिपत्स्थापनंमम तस्यसंपद्विनाशःस्याज्ज्येष्ठःपुत्रोविनश्यति अमायुक्तानकर्तव्या प्रतिपच्चं
डिकार्चने उदयेद्विमुहूर्त्तापिग्राह्यासोदयगामिनी रुद्रयामले अमायुक्तासदाचैवप्रतिपन्निंदितासदा तत्रचेत्
स्थापयेत्कुंभंदुर्भिक्षंजायतेध्रुवं प्रतित्सद्वितीयास्यात्कुंभारोपणकर्मणि यत्तु कैश्चिदुक्तं नदर्शकलयेत्यादि
शतयज्ञफलप्रदमित्यंतान्यमायोगनिषेधकानि यानि द्वितीयाशेषसंयुक्ताप्रतिपच्चंडिकार्चने मोहादथोपदेशाद्वा
कृतापुत्रविनाशकृत् आरंभेनवरात्रस्याद्वितीयात्रुटिसंयुता नकेवलंतिथिंहंतिवेधात्सापुत्रसंपदइत्यादीनिद्वितीयायो
गनिषेधकानि तान्युभयविधान्यपिसर्वाणिनिर्मूलानि समूलत्वेपिवापरस्परंसत्प्रतिपक्षत्वादनिर्णायकानीतितत्प्रौ
ढिवादमात्रंप्रत्यक्षतोदेवीपुराणे सर्वेषामेवोपलंभात् वाक्योपपत्तिरपीत्थंकर्त्तव्या नदर्शकलयेत्यादिवाक्यानि
प्रतिपदःखंडत्वे पूर्वविद्धानिषेधकानि द्वितीयाशेषसंयुक्तेत्यादिवाक्यानितु यदामाविद्धाप्रतिपत्परदिने नास्ति
तदाविद्धापिग्राह्येतितत्पराण्येद्विषयाण्येव अमायुक्तैवकर्त्तव्याप्रतिपच्चंडिकार्चनइत्यादीनि नृसिंहप्रसादोदाहृता
नीति अत्रेदंतत्त्वं यापूर्वदिनेषष्टिदंडाभूत्वापरादिनेत्रिमुहूर्तापि साअमायोगाभावात्पूर्वैवग्राह्या पूर्णत्वात् आदि
त्योदयवेलायामारभ्यषष्टिनाडिका तिथिस्तुसाहिशुद्धास्यात्सार्वतिथ्योह्ययंविधिरितिनारदीयात् यानिचद्वि
तीयायोगनिषेधकानि वचनानि तान्यपि शुद्धाधिकनिषेधपराणि परदिनेप्रतिपदेत्यंतासत्त्वेतु प्रतिपदप्यमावास्ये
तियुग्मवाक्याद्दर्शयुतैवग्राह्येति तदाहलल्लः तिथिः शरीरंतिथिरेवकारणमित्यादि कालतत्त्वविवेचनकारैस्तदनु

सारिभिश्च माधवहेमाद्र्याद्युक्तनक्तव्रतानुरोधेन खंडाप्रतिपत्प्रदोषव्यापिनीग्राह्येत्युक्तं नक्तव्रतत्वंचननक्तभोजनत्वंतस्यपाक्षिकत्वाच्च किंतुपूजारूपस्यप्रधानस्य नक्तकालसाध्यत्वात् तच्चनिशिभ्रमंतिभूतानिशक्तयःशूलभृद्युताइत्यादिसामान्यवचनात् आश्विनेमासिमेघांतेमहिषासुरमर्दिनीं निशासुपूजयेद्भक्त्यासोपवासादिकंक्रमात् तथा आश्विनेमासिमेघांतेप्रतिपद्यातिथिर्भवेत् तस्यांनक्तंप्रकुर्वीतनवरात्रेविशेषतः संपूज्यनवदुर्गांचनक्तंकुर्यात्समाहितः नक्तंनक्तभोजनमितिपाक्षिकनक्तभोजनपरामर्शः रात्रिव्रतमिदंदेविसर्वपापप्रणाशनं सर्वकामप्रदंनृणांसर्वशत्रुनिवर्हणं तथा रात्रिव्रतमिदंतस्यरात्रौकर्त्तव्यतेष्यते इत्यादिदेवीपुराणादिवचनेभ्यश्चावगम्यते एवंचपूजारूपस्यप्रधानरात्रिकालत्वेस्थिते कर्मणोयस्ययःकालइतिवचनात् प्रदोषव्यापिनीग्राह्यातिथिर्नक्तव्रतेसदा तिथिः शरीरमित्यादिनक्तव्रतेष्वित्यादिवचनच्च प्रदोषव्यापिनी प्रतिपन्नवरात्रव्रतेग्राह्या अयमेव निर्णयोद्वितीयादिषु रात्रिपूजने द्रष्टव्यः कौस्तुभेप्येवमेव तत्र पूर्वदिनएवप्रदोषकालव्याप्तौपूर्वाएतद्विषयाण्येव अमायुक्तैवकर्त्तव्येत्यादिनृसिंहप्रसादोदाहृतवचनानि द्वितीयाशेषसंयुक्तेत्यादिलल्लसंहितावचनानिच तथा द्वितीयादिकलोपेताप्रतिपच्चंडिकार्चने वर्जनीयाप्रयत्नेन विषलेशोयथांभसि धवलनिबंधे देव्युवाच प्रतिपच्छेषसंयुक्तद्वितीयायां ममार्चनं कृतंधनंनाशयतिसंततिंपुत्रपौत्रिकीं अमायुक्तैवसाग्राह्याप्रतिपच्चंडिकार्चने अन्यथाकरणेतावद्राज्यभंगःप्रजायत इत्यादीनिच दिनद्वये तद्व्याप्तावुत्तरा दिनद्वये तदव्याप्तावुत्तरैव सायान्हरूपगौणकालव्याप्तिलाभात्एतद्विषयाण्येव द्वितीयायुक्तविधायकान्यमायुक्तनिषेधकानि वचनानि द्विमुहूर्तापीत्यपिशब्देन कैमुतन्यायप्रदर्शनात्कलादिशब्दा अविरुद्धाः यत्तु आद्यास्तुनाडिकास्त्याज्याः षोडशद्वादशापिवा अपराह्णेचकर्तव्यं शुद्धसंततिकांक्षिभिरितिवचनं नंदाषोडश नाड्यस्तु लब्ध्वायःकुरुतेनरः कलशस्थापनं तत्रअरिष्टंजायते

ध्रुवमिति वचनांतरैकवाक्यातया कुलाचारप्राप्तकलशस्थापनविषयं एवंद्वितीयाविद्धप्रतिपद्विधायकानि वचनानि वस्तुतस्त्वविषयाण्येवेत्येवमाहुः तत्र प्रारंभतिथेः खंडत्वे समग्रत्वेवा देवीपूजनरूपं व्रतं कदा प्रारब्धव्यमितिसंशयेकालव्याप्तीनिर्णयार्थः तत्रकालोनिर्णयः अत्रगौडाः पूर्वाह्णएवतत्कालः तद्व्याप्त्यैवचानिर्णयःतथाहिदेवीपुराणे प्रातरावाहयेद्देवींप्रातरेवप्रवेशयेत् प्रातःप्रातश्चसंपूज्यप्रातरेवाविसर्जयेदिति अत्रप्रातः शब्दः पूर्वाह्णपरःआश्विनस्यसितेपक्षेप्रतिपत्सुयथाक्रमंसुस्नातस्तिलतैलेनपूर्वाह्णेपूजयेच्छिवामितिवचनेननवतिथ्यधिकरणकप्रातःपूजाविधीयते प्रतिपत्स्वितिबहुवचनांतस्य लिंगसमवायेन प्रतिपत्तादितरातिथिपरत्वादितिकौस्तुभे अतएवकालतत्त्वविवेचनेप्रतिपदादीत्युक्तं तत्रैव भगवत्याः प्रवेशादिविसर्गांताश्चयाःक्रियाः तिथ्योरुदयगामिन्योःसर्वास्ताःकारयेद्बुधइत्यादिच तस्मात्पूर्वाह्णएवपूजादिकर्तव्यमितिप्राहुः अयमेवमुख्यःपक्षइति प्रतिभातिपूर्वाह्णेदैविकंकर्मेत्यादिपूर्वाह्णेवैदेवानामित्यादिश्रुतेः शरत्कालेमहापूजाक्रियतेयाचवार्षिकी साकायोंदयगामिन्यांनतत्रतिथियुग्मतेत्यादिनंदिकेश्वरपुराणादिवचनाच्च युग्मतेतिनयुग्मवाक्यानुरोधेननिर्णयइत्यर्थः वार्षिकीत्यनेन संवत्सरस्यादौ चैत्रशुक्लप्रतिपद्युपक्रम्य नवम्यंतापूजाभिधीयते ततश्चशरद्वसंतयोस्तुल्यएवदुर्गोत्सवः कार्यइतिफलितं निर्णयसिंधौतु गौडनिबंधेषुनिर्णयादौदयिकीग्राह्या तत्रापिघटिकैकेत्यस्यमुहूर्तस्तुतिस्त्वौक्तेर्द्विमुहूर्ताग्राह्या उदितेदैवतंभानावित्यत्र द्विमुहूर्तान्निरन्हश्चेतिवचनादौदयिक्याद्विमुहूर्तस्तुतिरितिस्थितं एवममायुक्तायानिषेधादपि पूर्वाह्णस्यमुख्यकर्मकालत्वं तथाचदेवीपुराणे कुहूकाष्ठोपसंयुक्तांवर्जयेत्प्रतिपत्तिथिं राज्यनाशायसाप्रोक्तानिंदिताचापिपूजन इति रुद्रयामले अमायुक्तासदाचैवप्रतिपन्निंदितामम तत्रचोत्थापयेत्कुंभंदुर्भिक्षंजायतेध्रुवं प्रतिपत्सर्वनाशायकुंभारोपणकर्मणीति उदयकालि

कातिथेः सविस्तरपूजापर्याप्तत्वे संक्षेपपूजायांकालिकापुराणे सम्यक्कल्पोदितांपूजांयदिकर्तुंनशक्नुयात् उपचारांस्तथादातुंपंचैतान्विचरेत्तदा गंधंपुष्पंचधूपंचदीपंनैवेद्यमेवच अभावेतोयपुष्पाभ्यांतदभावेतुभक्तितः संक्षेपपूजाकथितेति यत्तुकैश्चिदुक्तं रुद्रयामलडामरवचनंनिर्मूलमितितन्न तयोरपिवेदांगत्वावगमादन्यांगवत्प्रामाण्यस्यस्वीकर्तव्यत्वात् तदुक्तंशिवार्चनचंद्रिकायांकपिलापंचरात्रे नवेदःप्रणवंत्यक्त्वामंत्रोवेदसमुत्थितः तस्माद्वेदःपरोमंत्रोवेदांगंचागमःस्मृतः वश्याकर्षादिकंकर्मदृष्टादृष्टफलप्रदं वेदेनसाध्यतेसर्वंगृहयज्ञादिभिःकिल नवेदेनविनायज्ञानवेदायज्ञवर्जिताः तस्माद्वेदःपरोमंत्रोनमंत्रोवेदवर्जितः नमंत्रेऽत्राधिकारोस्तिशूद्राणां नियमःपरः मंत्राभावादमंत्रेणभाषितंसर्वकर्महीति व्यवस्थापितंच शारदाटीकायामागमानां श्रुतिमूलत्वं प्रत्यक्षोपलभ्यमानरामपूर्वोत्तरतापिनीयनृसिहपूर्वोत्तरतापिनीयसौराष्ट्राक्षरशिवपंचाक्षरश्रीविद्यात्मिकाचसाक्षात् श्रुतिराथर्वणउपलभ्यतएव अतएव उपासनाकांडमेवआगमशास्त्रात्मकंलोकप्रसिद्धं किंच ऋग्वेदचतुर्थाष्टकतृतीयाध्यायप्रथमवर्गेचतुर्थ्यामृचिश्रीविद्यामंत्रोद्धारःश्रूयते साचचत्वारईंविभ्रतिक्षेमयंतोदशगर्भंचरमेधापयंते त्रिधातवःपरमात्रस्यगावोदिवश्चरंतिपरिसद्योअंतानिति अस्याअर्थस्तुलक्ष्मीधरकृतसौंदर्यलहरीटीकायांद्रष्टव्यः तस्मात्सर्वथारुद्रयामलडामरादिवेदांगमेवेतिसर्वैरभ्युपेयंनिर्णयसिंधौतु एषुवचनेषुकलशस्थापनग्रहणात् तदेवप्रथमेदिनेनिषिध्यते नतूपवासादितस्यप्रतिपद्यप्यमावास्येतियुग्मवाक्याच्छुक्लास्यात्प्रतिपत्तिथिः प्रथमतइतिदीपिकोक्तेः शुक्लपक्षेदर्शाविद्धेतिमाधवोक्तेश्चपूर्वदिनेप्राप्तस्यवाधेमानाभावात् इतिकेचित् वस्तुतस्तुपूर्वोक्तवाक्येषु चंडिकार्चनपूजनग्रहणादुपवासादेश्चांगत्वात्प्रधानदेवीपूजादावपिपरेनियुक्तंकलशस्थापनग्रहणंतूपलक्षणं अतएवदेवलःव्रतोपवासनियमेघटिकैकापियाभवेत् सातिथिस्तद्दिनेपूज्याविपरीतातुपैतृकेइतिस्थितं प्रसंगात्द्वितीया

युक्तप्रतिपदोग्राह्यताबोधकान्यमायुक्तायानिषेधकान्यन्यान्यपिवाक्यानिलिख्यंते याचाश्वयुजिमासेस्यात्प्रतिपद्भद्रयान्विता शुद्धाममार्चनंतस्यांशतयज्ञफलप्रदं देशभंगोभवेत्तत्रदुर्भिक्षंचोपजायते नंदायांदर्शयुक्तायांयत्रस्यान्ममपूजनं तस्माद्भद्रान्वितानंदानवरात्रेप्रशस्यते आश्विनेमासिमेभक्तैःकर्तव्याशुक्लपक्षगा प्रतिपात्रिमुहूर्तापि पुत्रपौत्रप्रवर्द्धिनी धनवृद्धिकरीपुंसांसर्वसौख्यकरीतथा अतोन्यथानकर्तव्यानवरात्रव्रतेमम योन्यथाकुरुतेमोहाद्राजापूजाविधौमम तस्यराष्ट्रेप्रजानाशंकरिष्यामिनसंशयः सामयासहिताग्राह्या नकदाचिद्विचक्षणैः सर्वक्षयकरीयस्मात्तस्मात्तांपरिवर्जयेत् अमावास्यायुतांकुर्याद्यदिकश्चित्कदाचन राजानाशमवाप्नोतिपंचत्वंवापिगच्छति पूर्वविद्धातुयाशुक्लाभवेत्प्रतिपदाश्विने नवरात्रव्रतंतस्यांनकार्यंशुभमिच्छतेत्यादि तथा यथाद्वादशभिर्मासैर्मासोवृद्धोमलिम्लुचः तथातिथिस्त्वहोरात्रवृद्धौप्रोक्तामलिम्लुचा यथामलिम्लुचःपूर्वोमासोदैवस्तथोत्तरः त्याज्यातिथिस्तथापूर्वाग्राह्यादैवेतथोत्तरेत्यादि प्रतिपदि चित्रावैधृत्यादियोगनिषेधोभार्गवार्चनदीपिकायांदेवीपुराणे प्रारंभोनवरात्रेस्याद्धित्वाचित्रांचवैधृतिमिति त्वाष्ट्रवैधृतियुक्ताचेत्प्रतिपच्चंडिकार्चनं तांनारभ्य विधातव्यंकलशारोपणंगृहेइति रुद्रयामलेऽपि वैधृतौपुत्रनाशःस्याच्चित्रायांधननाशनं तस्मान्नस्थापयेत्कुंभंचित्रायांवैधृतौतथेति तत्रविशेषउक्तःकात्यायनेन प्रतिपद्याश्विनेमासिभवेद्वैधृतिचित्रया आद्यपादौपरित्यज्यप्रारभेन्नवरात्रकं भविष्ये चित्रावैधृतिसंयुक्ताप्रतिपच्चेद्भवेन्नृप त्याज्याह्यंशास्त्रयस्त्वाद्यास्तुरीयांशेतुपूजनमिति चित्रावैधृतियुक्तापिद्वितीयायुक्ताचेत्सैवग्राह्येत्युक्तंदुर्गोत्सवे भद्रान्विताचेत्प्रतिपन्नलभ्यतेविरुद्धयोगैरपिसंगतासती सेवापराह्णेविबुधैर्विधेयाश्रीपुत्रराज्यादिविवृद्धिहेतुरिति रुद्रयामले संपूर्णाप्रतिपच्चैवाचित्रायुक्तायदाभवेत् वैधृत्याचापियुक्तास्यात्तदामध्यंदिनेरवौ अभिजित्तुमुहूर्तंयत्तत्रस्थापनमिष्यतइति एवं

रात्रौचित्रावैधृत्योरलाभेऽपिदिवैवकलशस्थापनंकार्यंनरात्रौ नचकुंभाभिषेचनामितिवचनेन रात्रौतन्निषेधात् विष्णुधर्मे भास्करोदयमारभ्ययावत्तुदशनाडिकाः प्रातःकालइतिप्रोक्तःस्थापनारोपणादिकमिति अथविस्तरेणनवरात्रकृत्यं आश्विनेमासिशुक्लेतुकर्तव्यंनवरात्रकं प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् भविष्योत्तरे एवंचविंध्यवासिन्यांनवरात्रोपवासतः एकभक्तेननक्तेनस्वशक्त्यायाचितेनवा पूजनीयाजनैर्देवीस्थानेस्थाने पुरेपुरे गृहेगृहेशक्तिपरैर्ग्रामेग्रामेवनेवने स्नातैःप्रमुदितैर्हृष्टैर्ब्राह्मणैःक्षत्रियैर्नृप वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमानवैः स्त्रीभिश्चकुरुशार्दूलतद्विधानमिदंशृण्विति विंध्यवासिन्यामधिष्ठानेदेवीपूजनीयेतिसंभवाभिप्रायेण नतुनियतं स्थानेस्थानेपुरेगेहेतदसंभवात् अत्रोपवासादिदेवीपूजाकुमारिकापूजादिवहुकर्माभिधानेऽपिपूजायाएवप्राधान्यं पूजयित्वाश्विनेमासिविशोकोजायतेनरइति हेमाद्रौ भविष्ये तस्याएवफलसंबंधावगमात् व्रतत्वोक्तेश्चतथाहि भागवते चेरुर्हविष्यंभुंजानाःकात्यायन्यर्चनव्रतमितितद्द्वारापिकर्तव्यत्वाभिधानेनावश्यकताप्रतीयते स्वयंवाप्यन्यतोवापिपूजयेत्पूजयीतचेति पूजायाएवहित्रिविधत्वमुक्तंस्कंदपुराणे भविष्येणशारदीचंडिकापूजा त्रिविधापरिगीयते सात्त्विकीजपयज्ञाद्यैर्नैवेद्यैश्चनिरामिषैः माहात्म्यंभगवत्याश्च पुराणादिषुकीर्त्तितं पाठस्तस्य जपःप्रोक्तःपठेद्देवीमनास्तथा राजसीबलिदानेननैवेद्यैः सामिषैस्तथा सुरामांसाद्युपाहारैर्जपहोमैर्विनातुया विनामंत्रैस्तामसीस्यात्किरातानांतुसंमता ब्राह्मणैः क्षत्रियैर्वैश्यैःशूद्रैरन्यैश्चमानवैः एवंनानाम्लेच्छगणैः पूज्यते सर्वदस्युभिरिति अतएवहोमादेरपिपूजात्वमुक्तंलिंगपुराणे शारदीयामहापूजाचतुःकर्ममयीशुभा तांतिथिंयत्वमासाद्यकुर्याद्युक्तोविधानतइति अत्रस्नपनपूजनवलिदानहोमरूपाणिचत्वारिकर्माणीत्युक्तंकालतत्त्वविवेचने तिथित्रयंसप्तम्यादि मदनरत्नेदेवीपुराणे कन्यासंस्थेरवौशुक्रशुक्लामारभ्यनंदिकां आर्याचास्वथवैकाशीनक्ता

शीवापिवाव्रती प्रातःस्नायीजितद्वंद्वस्त्रिकालंशिवपूजकः जपहोमसमायुक्तःकन्यकांभोजयेन्मुदा वस्त्रालंकारदानैश्चसंतोष्यप्रतिवासरं बलिंचप्रत्यहंदद्यादोदनंमांसमाषवत् त्रिकालंपूजयेद्देवींजपस्तोत्रपरायणइति नंदिकाप्रतिपदितिमैथिलाः षष्ठीतिगौडाः साचकाम्यानित्याच एवमन्यैरपितथादेव्याःकार्यंप्रपूजनं विभूतिमतुलांलब्धुंचतुर्वर्गप्रदायकमिति योमोहादथवालस्याद्देवींदुर्गांमहोत्सवे नपूजयतिदंभाद्वाद्वेषाद्वाप्यथ भैरव क्रुद्धाभगवतीतस्यकामानिष्टान्निहंतिवै इतिकालिकापुराणेफलानिंदाश्रुतेः भविष्योत्तरेपि भवानी तुष्टयेपार्थसंवत्सरसुखायच भूतप्रेतपिशाचानांनाशार्थंचोत्सवायचेति अन्यत्रापि पूजयित्वाश्विनेमासिविशोकोजायतेनरइति वर्षेवर्षेविधातव्यंस्थापनंचविसर्जनमिति तिथितत्त्वे देवीपुराणाच्च पूजाचरात्रावपि कार्या आश्विनेमासिमेघातेमहिषासुरमर्दिनीं निशासुपूजयेद्भक्त्यासोपवासादिकंक्रमादितिदेवीपुराणात् संग्रहेपि आश्विनेमासिवर्षांतेप्रतिपद्यातिथिर्भवेत् तस्यांनक्तंप्रकुर्वीतरात्रौदेवींप्रपूजयेत् रात्रिरूपायतोदेवी दिवारूपोमहेश्वरः रात्रिव्रतमिदंदेविसर्वपापप्रणाशनं सर्वकामप्रदंन्हणां सर्वशत्रुनिवर्हणं रात्रिव्रतमिदंतस्यरात्रौ कर्तव्यतेष्यते नक्तव्रतमिदंयस्मादन्यथानरकेगतिरित्यादिवचनाच्च अष्टम्यांविशेषतोरात्रौपूजाविहिता निशायांपूजितादेवीवैष्णवीपापनाशिनी तस्मात्सर्वप्रयत्नेनअष्टम्यांनिशिपूजयेदिति कन्यासंस्थेरवावीषेयाशुक्लातिथिरष्टमी तस्यांरात्रौपूजितव्यामहाविभवविस्तरैरितिच यत्तु अतोर्थंपूजनीयासातस्मिन्नहनिमानवैरिति तत्राहः पदंतिथिरूपचंद्रादिनपरंतस्मिन्नितिप्रकृताष्टमीपरामर्शात् ननुआश्विनस्य सितेपक्षेइत्यादिपूर्वोक्तवचनैःरात्रिपूजाभिहिता प्रातरावाहयेद्देवीमित्यादिवचनैश्चपूर्वाह्णेपूजनमभिहितं एवमेतेषांवचनानांपरस्परविरोधे कुत्रपूजनंकर्तव्यमितिअनिर्णयइतिचेत् अत्रोच्यते प्रातर्मध्यान्हयोःसंक्षेपपूजनंअंगादिविस्तरपूजनंतुरात्रावेव रात्रौशक्तिपूजन

स्यफलाधिक्यात् एवंसतिप्रातरेवकलशस्थापनादिपूर्वकं देवीस्थापनं पूर्वाह्णेपूजयेच्छिवामित्यादिवचनानि प्रथमकालपूजार्थकानिवसंगच्छंते तथाचदेवीपुराणेकालत्रयेपिपूजनमुक्तंत्रिकालंपूजयेद्देवींजपस्तोत्रपरायणइति नवरात्ररूपंकर्मतुदशमीपर्यंतंकार्यं संपूज्यप्रेषणंकुर्याद्दशम्यांशावरोत्सवैरितिभविष्योत्तरात् अत्रप्रतिपदमारभ्यनवमीपर्यंतंवृद्ध्यापूजाजपकुमारीपूजनादिकंविहितं यश्चाद्येदिवसेकुर्याच्चंडिकापूजनादिकं द्विगुणंतद्द्वितीयेन्हि त्रिगुणंतत्परेहानि नवमीतिथिपर्यंतंवृद्ध्यापूजाजपादिकमिति अत्रकेचित् नवरात्रशब्दोनवाहोरात्रपर इतिमत्वा तिथिवृद्धौतिथिह्रासेनवरात्रमपार्थकमिति पूर्वपक्षे प्रारंभानवचंद्यांतुनवरात्रमतोर्थवदितिदेवीपुराणवचनेनसमादधिरेअन्येतुवचनमिदंनिर्मूलमितिमत्वातिथिविशेषपरतामेवाहुः युक्तंचैतत् अमावास्यारात्रौप्रतिपत्प्रवेशाभावेपिप्रतिपत्प्रभृत्येवात्यंतापचयेनाष्टरात्रिपूजने तिथिवृद्धावष्टम्यहोरात्रास्पर्शिनवमींगृहीत्वा दशरात्रिपूजने तिथिविशेषपरत्वस्यावश्यकत्वात् प्रारंभोनवरात्रस्येत्यादौतुनवरात्रशब्दस्यलक्षणयाकर्मपरत्वं अत्रकालतत्त्वविवेचनकाराः नवरात्रशब्दोरात्रिशब्दस्यतिथिविषयपूर्ववाक्यैकवाक्यतयोत्सर्गिकसंपूर्णतिथेरेवप्रायोऽव्यवहारविषयत्वेनसंप्रतिपत्त्याचतिथिलक्षकत्वात् सप्तम्यंतः कालरूपगुणविधिः द्वितीयातोपिक्वचिच्छ्रुतः कालाध्वनोरत्यंतसंयोगइतिवचनात्तादृशएवनतुनामधेयं तत्रैतद्ग्रंथेवाक्यांतरेणप्रवृत्तिनिमित्तकालसंवंधस्याविधानेनतत्प्रख्यन्यायाभावात् श्रुत्यागुणविधानेसंभवेतिबहुव्रीहौसमासांतानुपपत्त्यासमाहारद्विगुणत्वेतुरात्रिसमुदायवचनतयानिरूढप्रायस्यलक्षणयानामधेयत्वानौचित्यात् नवरात्रोपवासतइत्यत्रकथंचिदुपवाससामानाधिकरण्यसंभवेपि प्रधानेन पूजनेन वैकल्पिकैकभुक्तादिनित्यदेवीपूजनादिष्वघटितसमुदायेनवा सामानाधिकरण्याभावाच्च नचतिथिह्रासवृद्ध्योर्गुणविध्यसंभवान्नित्यवच्छ्रवणविरोधः नामधेयत्वंतुयदाकदा

चित्रवृत्तिनिमित्तसद्भावेनाप्युपपन्नं वैश्वदेवशब्दस्यैवैकदेवतासंबंधेनेतिवाच्यं रात्रिशब्दस्यतिथिपरत्वेन्हास
वृद्ध्योरपितद्गुणाविधिसंभवेनाविरोधात् न्हासेतिथिद्वयप्रयुक्तस्यपूजादेस्तंत्रानुष्ठानेन वृद्धौचैकतिथिप्रयुक्तस्यप्रक्रां
तनियमभंगभयादावृत्त्यानुष्ठानेनसर्वदानवतिथिप्रयुक्तकर्मसत्त्वादिति दीक्षितनिर्णयसिंधुकारप्रभृतयोप्येवमेवाहुः
अत्रमुख्यकल्पे समर्थस्यान्येपि पक्षाउक्ताः अथात्रनवरार्धंचसप्तपंचत्रिकादिवा एकभक्तेननक्तेनायाचितोपोषि
तैः क्रमादिति अत्रादिशब्देनाष्टरात्रद्विरात्रैकरात्रपक्षाः संगृहीता भविष्यपुराणे व्रतीप्रपूजयेद्देवींस
प्तम्यादिदिनत्रयमिति भविष्येपि आश्विनेमासिशुक्लेतुकर्तव्यंनवरात्रकं प्रतिपदादिक्रमेणैवयावच्चनवमी
भवेत् त्रिरात्रंवापिकर्तव्यंसप्तम्यादियथाक्रमामिति अष्टमीनवम्योरेववादेवीपूजनंकर्तव्यं अष्टम्यांचनवम्यांच
जन्ममोक्षप्रदांशिवां पूजयित्वाश्विनेमासिविशोकोजायतेनरइति केवलाष्टमीकेवलनवमीकल्पावुक्तौकालीपुराणे
यस्त्वेकस्यामथाष्टम्यांनवम्यांवापिसाधकः पूजयेद्वरदांदेवींमहाविभवविस्तरैरितिगोविंदार्णवेदेवीपुराणेपि नवरा
त्रव्रतेशक्तः त्रिरात्रंचैकरात्रकं व्रतंचरतियोभक्तस्तस्मैदास्यामिवांछितमिति भविष्ये प्रथमाद्वितृतीयाचच
तुर्थीचनराधिप एतास्तुचैकभक्तेनप्रवदंतिमनीषिणः नेयाइतिविशेषः पंचमीचतथाषष्ठीसप्तमीचाष्टमीषुव उ
पवासपरोभूत्वापूजयेच्चंडिकांबुधइति सप्तरात्रपक्षोरुद्रयामले दुर्गोत्सवेस्मृतंदेविउपवासस्यसप्तकं अष्टमेदिव
सेहोमस्ततःकिंचित्तुभक्षयेदिति पंचरात्रपक्षेभविष्ये एकभक्तस्तुपंचम्यांषष्ठ्यांनक्तंप्रवर्तयेत् अयाचितस्तुसप्तम्या
मष्टम्यांतुउपोषितः नवम्यांपारणंकुर्यादित्येवंपंचरात्रकमिति षष्ठ्यादिपक्षोप्युक्तः कालिकापुराणे बोधयेद्बिल्व
शाखायांषष्ठ्यांदेवींफलेषुच सप्तम्यांबिल्वशाखायांतामाहृत्यप्रपूजयेत् पुनःपूजांतथाष्टम्यांविशेषेणसमाचरेत्जाग
रंचस्वयंकुर्याद्बलिदानमहानिशि प्रभूतबलिदानंचनवम्यांविधिवच्चरेत् ध्यायेद्दशभुजांदेवीं दुर्गांतंत्रेणपूजयेत् वि

व्र०र०
आश्वि०
॥५२॥

सर्जनं दशम्यांतु कुर्याद्वैशारदोत्सवे धूलिकर्दमविक्षेपैः क्रीडाकौतुकमंगलैः भगलिंगाभिधानैश्च भगलिंगप्रगीत कैरिति कल्पांतर प्रतिपादकदेवीपुराणेपि इषेमासिसितपक्षेकन्याराशिगतेरवौ नवम्यां बोधये द्देवीं क्रीडाकौतुक मंगलैः जेष्ठानक्षत्रयुक्तायां षष्ठ्यांबिल्वाभिमंत्रणं सप्तम्यांमूलयुक्तायां पत्रिकायाः प्रवेशनं पूर्वाषाढायुता ष्टम्यां पूजाहोमाद्युपोषणं उत्तरेणनवम्यांतुवालिभिःपूजयेच्छिवां श्रवणेनदशम्यांतु प्रणिपत्यविसर्जयेदिति अत्र देवीपूजाप्रकारउक्तोरुद्रयामले स्नानंमांगलिकंकृत्वाततोदेवीं प्रपूजयेत् शुभाभिर्मृत्तिकाभिश्चपूर्वंकृत्वातुवेदिकां यवान्वैवापयेत्तत्रगोधूमैश्चापिसंयुतान् तत्रसंस्थापयेत्कुंभंविधिनामंत्रपूर्वकं सौवर्णंरजतंवापिताम्रंमृण्मयजंतुवा प्रतिमांपूजयेत्चेति प्रतिमांतुमंडलमध्यस्थापितकलशोपरिस्थापयित्वापूजयेत् पूजामंडलमध्यस्थेतिदेवीपुराणात् साचहेमादिमयीभवति तास्मिन्देवीप्रकर्तव्याहैमीवाराजतीयथा मृद्वार्क्षीलक्षणोपेतापट्टेशूलेथपूजयेत् तथा हैमराजतमृद्वार्क्षी शैलीचित्रार्पितापिवा खड्गेशूलेर्चितादेवी सर्वकामफलप्रदा तथा मृण्मयीं प्रतिमांकृत्वा चित्रस्थांयस्तुपूजयेत् आत्मवित्तानुसारेण सलभेन्मौक्तिकंफलमित्यादि देवी पुराणादिवचनात् अन्यत्रापि कांचनीराजतीताम्री पैत्तली मृण्मयीतथा वार्क्षीमणिमयी चैव वर्णकैर्लिखितातथेति हयशीर्षपंचरात्रे मृण्मयीदारुघटिता लोहजारत्नजातथा शैलजागंधजाचैव कौसुमीसप्तधास्मृता कौसुमी गंधजाचैव मृण्मयी प्रतिमाहिता तत्कालपूजिताश्चैताःसर्वकामफलप्रदाः अथासांफलानि दारुजाकामदाप्रोक्तासौवर्णीभुक्तिमुक्तिदा राजतीस्वर्गसुखदाताम्रीह्यायुर्विवर्द्धिनी कांस्यावव्हापदंहंतिरैतिकीशत्रुनाशिनी सर्वभोगप्रदाशैलीस्फाटिकीमोक्षकारका महाभोगप्रदाख्यातामृण्मयीखलुशोभना देवीमूर्तिस्थापनंदुर्गाभक्तितरंगिण्यां । देवीपुराणे याम्यास्याशुभदा

दुर्गापूर्वास्याजयवर्द्धिनी पश्चिमाभिमुखीस्थाप्यानस्थाप्यासौम्यदिङ्मुखी प्रतिमाभावेविशेषस्तत्रैव
यद्यद्यस्यायुधंप्रोक्तंतस्मिंस्तस्मिंस्तुपूजयेत् देवीभक्त्यार्चितापुंसांराज्यायुः कृतसौख्यदा कृत्यतत्त्वार्णवे
कालिकापुराणे लिंगस्थांपूजयेद्देवींमंडलस्थांतथैवच पुस्तकस्थांमहादेवींपावकेप्रतिमासुच चित्रेचत्रिशिखे
खड्गे जलस्थांवापिपूजयेत् चित्रमृल्लेप्यादौस्नानाद्यसंभवे तत्रैवोक्तं सद्यः स्निग्धेमृण्मयेवासर्पिः सिंदूरजेतथा
श्रीचंदनप्रतिष्ठेवालेपजेप्रतिमातनौ अंतिकेस्थापितेखड्गेस्नापयेद्दर्पणेऽथवेति अन्यत्रापि अंगुष्ठपर्वमारभ्य
वितस्तिर्यावदेवतु गृहेतुप्रतिमाकार्यानाधिकाशस्यतेबुधैरिति मानांगुलप्रमाणेन दशमंचांगुलात्मिका गृहेतु
प्रतिमापूज्यानाधिकाहिप्रशस्यतइति सौम्यातुहस्तमात्रावसुदाहस्तद्वयोच्छ्रिताप्रतिमा क्षेमसुभिक्षायभवेत्रि
चतुर्हस्तप्रमाणाचेतितुस्थापितप्रतिमाविषयंज्ञेयं मृण्मय्यांविशेषउक्तः मृण्मयींप्रतिमांवक्ष्येयथावत्तांनिबोधमे
पक्वापक्वाद्विधाप्रोक्तामृण्मयीप्रतिमाक्रमात् सर्वेलोकानशंसंतिप्रतिमांदग्धमृण्मयीं अपक्वाप्रतिशस्तावैसैव
कार्याविचक्षणैः सुधयाचैवकर्तव्यानाश्मचूर्णैःकदाचन अथमृद्भेदः मृदेवंमृण्मयींकुर्याद्यथावदनुपूर्वशः ब्राह्मण
स्यसितामृद्वैक्षत्रियस्यारुणास्मृता अन्यच्च नृपभयमत्यंगायांहीनांगायामकल्पताकर्तुः क्षामोदर्यांक्षुद्भयमर्थ
विनाशःकृशांगायां मरणंतुसक्षतायांशस्त्रनिपातेननिर्दिशेत्कर्तुः वामेविनतापत्नींदक्षेविनताहिनस्त्यायुः अंध
त्वमूर्ध्वदृष्टौकरोतिचिंतामधोमुखीदृष्टिः सर्वप्रतिमास्वेवंशुभाशुभंभास्करोक्तमवगच्छेदिति तथान्यत्रापि नाधि
कांगीनहीनांगीकर्त्तव्यादेवताक्वचित् अधिकाशिल्पिनंहन्यात्कृशाचैवार्थनाशिनी कृशोदरीतुदुर्भिक्षंनिर्मांसाधन
नाशिनी वक्रनासातुदुःखायसंक्षिप्तांगीभयंकरी चिपिटादुःखशोकायअनेत्रानेत्रनाशिनी दुःखदाहीनवक्त्रातु
इत्यादि पाणिपादविहीनायांजायतेनरकोमहान् जंघाहीनाचयामूर्त्तिःशत्रुकल्याणकारिणी पुत्रमित्रविना

शाय हीनावक्षस्थलेतुया संपूर्णावयवायातुआशुलक्ष्मीप्रदासदा एवंलक्षणमासाद्यकर्तव्यामूर्तिरुत्तमेति अन्यत्रविशेषः खंडितेस्फुटितेभ्रष्टेदग्धेमानविवर्जिते यागहीनेथवोच्छिष्टेपतितेदुष्टभूमिषु अन्यमंत्रार्चितेचैवपतितस्पर्शदूषिते दशस्वेतेषुनोचक्रुः सन्निधानंदिवौकसइति अत्रदेव्यादिगृहादिकमपिकुर्यात् तदुक्तंनिर्णयामृते भविष्योत्तरे देव्यागृहंप्रकर्तव्यंचतुरस्रंसुशोभनं रहस्यंस्वस्तिकाद्यैश्चचर्चितंवस्त्रमंडितं गौरमृद्गोमयाभ्यांचलिप्तंशस्त्रसमन्वितं तन्मध्येवेदिकाकार्याचतुर्हस्तासमाशुभा तस्यांसिंहासनंक्षौमंकंबलाजिनसंयुतं तत्रदुर्गांप्रतिष्ठाप्यसर्वलक्षणसंयुतां ग्रैवेयहारकेयूरनूपुराभरणान्वितां नानारत्नविचित्रेणमुकुटेनविराजितां अनेककुसुमाकीर्णकपर्देनसुशोभितां नितंबबिंबसंबद्धकिंकिणीक्वणनादितां शूलंचक्रंदंडशक्तीवज्रपाशासिधारिणीं भक्तघंटाक्षमालांककरपात्रलसत्करां तदग्रेछिन्नाशिरसंमहिषंरुधिरप्लुतं निः सृतार्धतनुंकुंतनाराचमसिधारिणं देवीकरधृतग्रीवंशूलेनोरसिताडितं दैत्यंकरालदंष्ट्रास्यंविद्युत्कपिलमूर्द्धजं नागपाशेनसंक्षिप्तंहर्यक्षेणापिविप्लुतं वमद्रुधिरवक्त्रेणह्युन्नतोर्ध्वसटंरुषा अर्द्धलांगूलदंडेनदंडाधिष्ठानशोभिना सर्वतोमातृचक्रेणसेव्यमानांसुरैस्तथा पूजयेत्प्रयतोदेवींनरोनियममास्थित इति वेदिकोणेष्वपि कलशस्थापनविधिना चत्वारः कलशाःस्थाप्याः चतुरःकलशान्यस्तुदद्याद्देवगृहेनरः चतुःसमुद्रवलयांसतुभुंक्तेवसुंधरामितिविष्णुधर्मोत्तरात् ततःपूजनंकुर्यात्अथपूजाविधिःतत्रप्रतिपदिपूर्वाह्णेपुष्पतैलादिनाकृतमंगलस्नानोनित्यक्रियांकृत्वानववाससी परिधाय चंदनमृगमदकुंकुमैःसर्वांगमनुलिप्यत्रिपुंड्रंकृत्वापूर्वाभिमुखोदेवीवासमुपविश्य सोपग्रहपाणिराचम्यममेहजन्मनिदुर्गाप्रीतिद्वारासर्वपापक्षयपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यविच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदाभीष्टसिद्ध्यर्थंशारदनवरात्रप्रतिपदिविहितकलशस्थापनदुर्गापूजादिकरिष्यइतिसंकल्प्य गणपतिपूजनंस्वस्तिवाचनंकृत्वा

शुभेदारुमयेदेवीपूजार्थमेवानिर्मिते कदलीस्तंभादिमंडितेगृहेउत्तमवस्त्रादिभूषिते पूर्वगृहएववाचतुरस्त्रंवतुर्हस्तंवेदिकोपरिसर्वतोभद्रादिमंडलंविधायमंडपंचकृत्वातत्रप्रतिमास्थापनंकुर्यात् तत्रक्रमः आदौगणानांत्वेतिमंत्रेणगणेशंसंस्थाप्य तदनंतरहेरंबत्वमेह्येहिचांबिकात्र्यंबकात्मज सिद्धिबुद्धिपतेत्र्यक्षलक्षसूर्यसमप्रभ नागास्यनागहारत्वंगणराजचतुर्भुज भूषितः स्वायुधैर्दिव्यैःपाशांकुशपरश्वधैः आवाहयामिपूजार्थंरक्षार्थंचममक्रतोः इहागत्यगृहाणत्वंपूजांकर्तुंचरक्षमां आवाह्यैवंगणेशानंपूजाद्रव्यैः प्रपूजयेदिति एवंयथासंभवंपूजयित्वाऽर्घ्यपात्रे गंधादिकंदत्त्वाऽर्घ्यंदद्यात् तत्रमंत्रः रक्षरक्षगणाध्यक्षत्र्यक्षत्रैलोक्यरक्षक भक्तानामभयंकर्तात्राताभवभवार्णवात् द्वैमातुरकृपासिंधोषाण्मातुराग्रजप्रभो। वरदत्वंवरंदेहिवांछितंवांछितार्थद गृहाणार्घ्यमिदंदेवसर्वदेवनमस्कृत अनेनफलदानेनफलदोस्तुसदाममेति विश्वेश्वरायवरदायसुरप्रियायलंबोदरायसकलायजगद्धिताय नागाननाय श्रुतियज्ञाविभूषितायगौरीसुतायगणनाथनमोनमस्ते भक्तार्तिनाशनपरायगणेश्वरायसर्वेश्वरायशुभदायसुरेश्वराय विद्याधरायविकटायचवामनायभक्तप्रसन्नवरदायनमोनमस्ते २ विघ्नराजनमस्तेस्तुउमापुत्राघनाशन तदविष्वकृतंतेस्तुमयाभक्त्याप्रपूजनं त्वांविघ्नशत्रुदलनेतिचसुंदरेतिभक्तप्रियेतिसुखदेतिफलप्रदेति विद्याप्रदेत्यघहरेतिचयेस्तुवंतितेभ्यो।गणेशवरदोभवनित्यमेव तेनतुष्टोममाप्याशुसर्वान्कामान्प्रपूरय विघ्नान्नाशयमेसर्वान्दुर्ग्रहादिभिरागतान् त्वत्प्रसादेनकार्याणिसर्वाणीहकरोम्यहं शत्रूणांबुद्धिनाशार्थंमित्राणामुदयायच नमस्तेब्रह्मरूपायविष्णुरूपायतेनमः विश्वरूपस्वरूपायनमस्तेरुद्ररूपिणे भाक्तिप्रियायदेवायनमस्तुभ्यंविनायक लंबोदरनमस्तेस्तुसततंमोदकप्रिय अविघ्नंकुरुमेदेवसर्वकार्येषुसर्वदेतिप्रार्थयेत् ततोमहीद्यौः पृथिवीचनइमंयज्ञंमिमक्षतां पिपृतांनोभरीमभिरितिभूमिंस्पृष्ट्वाओषधयः संवदंतेसोमेनसहराज्ञा। यस्मैकृणोतिब्राह्मणस्तंराजन्पारयामसीति

यवान्निक्षिप्य आकलशेषुधावतिपवित्रेपरिषिच्यतेउक्थैर्यज्ञेषुवर्द्धतेइतिकलशंसंस्थाप्य इमंमेगंगेयमुने सरस्वति शतद्रुस्तोमंसचतापरुष्ण्यां असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्याशिषोमयेतिजलेनापूर्य गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियमिति गंधंनिःक्षिप्य या ओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा मनैनुबभ्रुणामहंशतंधामानिसप्तचेतिसर्वौषधीः कांडात्कांडात्प्ररोहंतीपुरुषःपुरुषस्परि एवानोदूर्वेप्रतनुसहस्रेणशतेनचेतिदूर्वाः अश्वत्थेवोनिषदनंपर्णेवोवसानिष्कृता गोभाजइत्किलासथयत्सनवथपूरुषमिति पंचपल्लवान् स्योनापृथिवीनोभवानृक्षरानिवेशनी यच्छानःशर्मसप्रथाइतिसप्तमृदः याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसइतिफलं सहिरत्नानिदाशुषेसुवातिसविताभगः तंभागंचित्रमीमहेइतिपंचरत्नानि हिरण्यरूपःसहिरण्यसंदृगपानपात्सेदुहिरण्यवर्णः हिरण्ययात्परियोनेर्निषद्याहिरण्यदाददत्यन्नमस्मैइतिहिरण्यंनिक्षिप्य युवासुवासाःपरिवीतआगात्सउश्रेयान्भवतिजायमानः तंधीरासःकवयउन्नयंतिसाध्योमनसादेवयंतइतिवस्त्रेणावेष्ट्य पूर्णादर्विःपरापतसुपूर्णापुनरापत वस्नेवविक्रीणावहाइषमूर्जंशतक्रतोइतिपूर्णपात्रंनिधाय तत्रवरुणंसंस्थाप्य ॐतंत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः अहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीरितिवरुणंसंपूज्य पुष्पांजलिंदद्यात् कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधरा ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः अंगेषुसहिताःसर्वेकलशंतुसमाश्रिताः अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा आयांतुयजमानस्यदुरितक्षयकारकाः सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः ॥ इतिकलशंप्रार्थयेत् इतिऋग्वेदिनांकलशस्थापनविधिः अनेनैवप्रकारेण

चतुर्ष्वपिवेदिकोणेषुकलशचतुष्टयंस्थापयेत् अथकात्यायनानांकलशस्थापनविधिर्लिख्यते महीद्यौरिति भूमिंस्पृष्ट्वा याओषधीरित्यनेन धान्यमसीत्यनेन वा यवान्प्रकिरेत् धान्यमसिधिनुहिदेवान्प्राणायत्वोदानायत्वाव्यानायत्वा आजिघ्रकलशमितिकलशंसंस्थापयेत् आजिघ्रकलशंमह्यात्वाविशंत्विंदवः पुनरुर्जानिवर्त्तस्वसानः सहस्रंधुक्ष्वोरुधारापयस्वतीपुनर्माविशताद्रयिः वरुणस्योत्तंभनमसीतिजलेनपूरयेत् वरुणस्योत्तंभनमसि वरुणस्यस्कंभसर्जनीस्थोवरुणस्यऋतसदन्यसिवरुणस्यऋतसदनमसि वरुणस्यऋतसदनमासीद अश्वत्थेवइति पंचपल्लवान् याओषधीरिति सर्वौषधीर्निक्षिपेत् कांडादिति दूर्वानिक्षिपेत् स्योनापृथिवीतिसप्तमृदोनिक्षिपेत् परिवाजपतिरिति पंच रत्नानि परिवाजपतिः कविरग्निर्हव्यान्याक्रमीत् दधद्रत्नानि दाशुषे युवासवासाइति सूत्रेण वेष्टयेत् युवासवासाः परिवीत आगात्सउश्रेयान्भवति जायमानः तंधीरासः कवयउन्नयंतिसाध्योमनसादेवयंतः याः फलिनीरितिफलं हिरण्यगर्भेतिहिरण्यं हिरण्यगर्भःसमवर्तताग्रे भूतस्यजातःपतिरेकआसीत् सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम पूर्णादर्वी तंत्वायामीतिशुनःशेफऋषिःत्रिष्टुप्छंदःवरुणोदेवतावरुणावाहनेविनियोगः तंत्वायामिअस्मिन्कलशेवरुणइहागच्छइहतिष्ठ कलशस्यमुखेविष्णुरित्यादिदुरितक्षयकारकाइत्यंतंपठित्वा देवदानवसंवादेमथ्यमानेमहोदधौ उत्पन्नोऽसितदाकुंभविधृतोविष्णुनास्वय त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदः त्वत्प्रसादादिमंयज्ञंकर्त्तुमीहेजलोद्भव सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदेतिपठेत् अथस्वस्तिवाचनं ब्राह्म्यंपुण्यंमहर्यंचचसृष्ट्युत्पादनकारकं वेदवृक्षोद्भवंनित्यंतत्पुण्याहंब्रुवंतुनः अस्यकर्मणः पुण्याहंभवंतोब्रुवंतु इतित्रिः

पुनंतुमेतिपठित्वा पृथिव्यामुद्धृतायांतुयत्कल्याणंपुराकृतं ऋषिभिःसिद्धगंधर्वैस्तत्कल्याणंब्रुवंतुनः अस्यकर्मणः कल्याणंभवंतोब्रुवंत्विति त्रिः यथेमांवाचंकल्याणीमित्यादि सागरस्ययथाऋद्धिर्महालक्ष्म्यादिभिःकृता संपूर्णा सुप्रभावाचतांतामृद्धिंब्रुवंतुनः ऋद्धिंभवंतोब्रुवंत्वित्युक्त्वा सत्रस्यऋद्धिरस्यगन्मज्योतिरमृताअभूमदिवंपृथिव्या अध्यारुहामाविदामदेवान्स्वर्ज्योतिः स्वस्तिर्याऽविनाशाख्यापुण्यकल्याणवृद्धिदा विनायकप्रियानित्यंतांतांस्वस्ति ब्रुवंतुनः स्वस्तिभवंतोब्रुवंत्वित्युक्त्वा समुद्रमथनाज्जाताजगदानंदकारिका हरिप्रियाचमांगल्यातांश्रियंप्रब्रुवंतुनः श्रीश्चतेलक्ष्मीश्चतेपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तं इष्णन्निषाणामुम्मइषाणेतिपठेत इतिकातीयानांस्वस्तिवाचनं ॥ अपसर्पंतुतेभूतायेभूताभुविसंस्थिताः येभूताविघ्नकर्तारस्तेगच्छंतुशिवाज्ञयेति सर्वदिक्षुसर्षपान्विकीर्य सूर्यःसोमश्चकालश्चसंध्येभूतान्यहःक्षपाः पवनोदिक्पतिर्भूमिराकाशंसचराचराः ब्राह्मंशासनमास्थायकल्पध्वमिहसन्निधिं इत्यनेनभूमिं स्पृष्ट्वा दिग्बंधनंकुर्यात् पंचगव्येन भूमिं प्रोक्षयेत् ततोभूतशुद्धिप्राणप्रतिष्ठामातृकान्यासान्कृत्वा स्वेष्टदेवतामागममार्गेण मत्स्यपुराणोक्तमार्गेण वा ध्यायेत् तद्यथा जटाजूटसमायुक्तामर्द्धेन्दुकृतलक्षणां लोचनत्रयसंयुक्तांपद्मेंदुसदृशाननाम् अतसीपुष्पवर्णाभांसुप्रतिष्ठांसुलोचनां नवयौवनसंपन्नांसर्वाभरणभूषितां सुचारुवदनांतद्वत्पीनोन्नतपयोधरां त्रिभंगस्थानसंस्थानांमहिषासुरमर्दिनीं त्रिशूलंदक्षिणेदध्यात्खड्गंचक्रंक्रमादधः तीक्ष्णवाणंतथाशक्तिंवामतोपि निबोधत खेटकंपूर्णचापंचपाशमंकुशमूर्ध्वगं घंटांवापरशुंवापिवामतःसन्निवेशयेत् अधस्तान्महिषंतद्वद्विशिरस्कंप्रदर्शयेत् शिरश्छेदोद्भवंतद्वद्दानवंखड्गपाणिनं हृदिशूलेननिर्भिन्नंतिर्यग्यंत्रविभूषितं रक्तरक्तीकृतांगंचरक्तविस्फारितेक्षणं वेष्टितंनागपाशेनभ्रुकुटीभीषणाननं सपाशवामहस्तेनधृतकेशंचदुर्गया वमद्रुधिरवक्त्रंचदेव्याः

सिंहंप्रदर्शयेत् देव्यास्तुदक्षिणंपादंसमंसिंहोपरिस्थितं किंचिदूर्ध्वंतथावाममंगुष्ठंमहिषोपरि स्तूयमानंचतद्रूपममरैः सन्निवेशयेदिति एवंध्यात्वा अर्घ्यस्थापनंकुर्यात् ततोनूतनमूर्तिः स्वर्णादिमयीचेत्तदा अग्न्युत्तारणादिकंकुर्यात् तत्रक्रमः स्वर्णादिशलाकयाप्रतिमांमधुसर्पिर्भ्यामभ्यज्य इमंमेगंगेइतिपुरुषसूक्तेनचाभ्युक्ष्य पंचगव्येनप्रोक्ष्य अग्निसूक्तेनप्रतिमायांजलधाराकुर्यात् तच्चाग्निसूक्तं ऋग्वेदिनां अग्निपदरहितामंत्राः अग्निः सप्तिमिति सप्तर्चस्य सप्तिर्वाजंभरऋषिरग्निर्देवता त्रिष्टुप्छंदोऽग्न्युत्तारणेविनियोगः ॐसप्तिंवाजंभरंददातिवीरंश्रुत्यंकर्मनिष्ठं रोदसीविचरत्समंजन्नारींवीरकुक्षिंपुरंध्रिं १ अप्तसः समिदस्तुभद्रामहीरोदसीआविवेश एकंचोदयत्समत्सुवृत्राणिदयतेपुरूणि २ हत्यंजरतः कर्णमावांअद्भ्योनिरदहज्जरूथं अत्रिंधर्मउरुष्पदंतः नृमेधंप्रजयासृजत्सम् ३ वाद्रविणंवीरयेशाः ऋषिंयः सहस्रासनोतिदिविहव्यमाततानधामानिभृतापुरुत्रा ४ उक्थैर्ऋषयोविहूयंते नरोयामनवाधितासः वयोअंतरिक्षेयजंतः सहस्रापरिपातिगोनाम् ५ विषईलतेमानुषीर्या मनुष्योनहुषोविजाताः गांधर्वीपथ्यांमृतिर्गव्यूतिर्घृताअनिषाता ६ ब्रह्मऋभवस्ततक्षुमहामवोचामासुवृक्तिं प्रावजरितारंयविष्ठमहिद्रविणमायजस्व ७ इत्यग्निपदरहितंसूक्तं १ अथाग्निपदसहितंऋग्वेदिनामग्निसूक्तं अग्निंसप्तिंवाजंभरं ददात्यग्निर्वीरंश्रुत्यंकर्मनिष्ठं अग्नीरोदसी विचरत्समंजन्नग्निर्नारींवीरकुक्षिंपुरंध्रिं १ अग्नेरप्तसः समिदस्तुभद्रा अग्निर्महीरोदसीआविवेश अग्निरेकंचोदयत्सप्तमंजन्नाग्निर्वृत्राणिदयतेपुरूणि २ अग्निर्हत्यंजरतःकर्णमावाग्निरद्भ्योनिरदहज्जरूथं अग्निरत्रिंधर्मउरुष्पदंतरग्निर्नृमेधंप्रजयासृजत्सं ३ अग्निर्दाद्रविणंवीरयेशाअग्निर्ऋषिंयःसहस्रासनोतिअग्निर्दिविहव्यमाततानाग्नेर्धामानिविभृतापुरुत्रा ४ अग्निमुक्थैर्ऋषयोविहूयंतेग्निंनरोयामनवाधितासः अग्निंवयोअंतरिक्षेयजंतोग्निः सहस्रापरियातिगोनाम् ५ अग्निंविशइलतेमानुषीर्या अग्निंमनुष्योनहुषोविजाताः अग्नि

गांधर्वीपथ्यामृतस्याग्नेर्गव्यूतिर्घृतआनिषाता ६ अग्नयब्रह्मऋभवस्ततक्षुरग्निंमहामवोचामासुवृक्तिं अग्नेप्रावज
रितारंयविष्ठाग्नेमहिद्रविणमायजस्व ७ अत्रचपूर्वंअग्निशब्दराहितान्मंत्रान्सकृत्पठित्वाअग्निपदसहितान्मंत्रान्वार
द्वयंपठेत् अथकातीयानांअग्न्युत्तारणेसूक्तंनामअस्याजरासोदमामरित्राअर्चद्धूमासोअग्नयः पावकाः श्वितीवधः
श्वात्रासोभुरण्यवोवनर्षदोवायवोनसोमाः १ हरयाधूमकेतवोवातजूताउपद्यवियतंतेपृथगग्नयः २ यजानोमित्रा
वरुणायजादेवां ऋतंबृहत् अग्नेयक्षिस्वन्दमम् ३ युक्ष्वाहिदेवहूतमां अश्वां अग्नेरथीरिव निहूतापूर्व्यः
सदः ४ द्वेविरूपेचरतः स्वर्थे अन्यान्यावत्समुपधापयेते हरीरन्यस्यांभवतिस्वधावाञ्छुक्रो अन्यस्यांददृशेसुवर्चाः
५ अयमिहप्रथमोधायिधातृभिर्होतायजिष्ठोअध्वरेष्वीड्यः यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे ६
त्रीणिशतात्रीसहस्राण्यग्निंत्रिꣳशच्चदेवानवचासपर्यन् औक्षंघृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारन्यसादयंत ७
मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निम् कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ८
अग्निर्वृत्राणिजंघनद्द्रविणस्युर्विपन्यया समिद्धःशुक्रआहुतः ९ विश्वेभिःसोम्यंमध्वग्नइंद्रेणवायुना पिबामित्रस्यधा
माभिः १० आयदिषेनृपतिंतेजआनट्शुचिरेतोनिषिक्तंद्यौरभीके अग्निःशर्द्धमनवद्यंयुवानꣳस्वाध्यंजनयत्सूदयच्च
११ अग्नेशर्द्धमहतेसौभगायतवद्युम्नान्युत्तमानिसंतुसंजास्पत्यꣳसुयमाकृणुष्वशत्रूयतामभितिष्ठामहाꣳसि १२
हिमंद्रतममर्कशोकैर्वृमहेमहिनःश्रोष्यग्ने इंद्रंनत्वाशवसादेवतावायुंपृणन्तिराधसानृतमाः १३ त्वंअग्नेस्वाहुतप्रि
यासःसंतुसूरयःयंतारोयेमघवानोजनानामूर्वंदयंतगोनाम् १४ शुधिःश्रुत्कर्णवन्हिभिर्देवैरग्नेसयावभिः आसिदं
तुबर्हिषिमित्रोअर्यमाप्रातर्यावाणोअध्वरं १५ विश्वेषामदितिर्यज्ञियानांविश्वेषामतिथिर्मानुषाणां अग्निर्देवानामव
आवृणानःसुमृडीकोभवतुजातवेदाः १६ महोअग्नेःसमिधानस्यशर्मण्यनागामित्रेवरुणेस्वस्तये श्रेष्ठेस्यामसवितुः

सर्वामनितद्देवानामवोअयावृणीमहे १७ इतिकातीयानां कलशस्थापनाविधिः हिमस्यत्वाजरायुणाग्ने रिव्यधामसि पावकोअस्मभ्यꣳशिवोभव उपज्मन्नुपवेतसेऽवतरंनदीष्वा अग्नेपित्तमपामसिमंडकिताभिरागहिसेमन्नोयज्ञंपावकवर्णꣳशिवंकृधि अपामिदंन्ययनउसमुद्रस्यनिवेशनं अन्यांस्तेअस्मत्तपंतुहेतयः पावकोअस्मभ्यꣳशिवोभव अग्नेपावकरोचिषामंद्रयादेवजिव्हयाआदेवान्वक्षिजक्षिचसनःपावकोअस्मभ्यꣳशिवोभव अग्नेपावकरोचिषामंदयादेवजिव्हयाआदेवान्वक्षिजक्षिच सनःपावकदीदिवोग्नेदेवांइहावह उपयज्ञंहविश्चनः पावकयायश्चितयंत्याकृपाक्षामन्नुरुव उरवसोनभानुना तूर्णंनयामन्येतमस्यरूरणआयोघृणेनतज्जुषाणोअजरनमस्तेहरसेशोचिषेनमस्तेअस्त्वर्चिषे अन्यांस्तेअस्मत्तपंतुहेतयः पावकोअस्मभ्यꣳशिवोभव अग्निस्तिग्मेनशोचिषायासद्विश्वंन्यत्रिणंअग्निर्नोवननेरायें इतिवाजसनेयिनामग्निसूक्तं लेख्यामूर्त्तिश्चेत्लेख्यायांनाभिषेकः स्यादित्यादिवचनात् अभिषेकादिकंतत्रनकर्त्तव्यं किंतु तदग्रे पात्रंस्थापयित्वा तस्मिन्नेवकर्त्तव्यं ततःपंचगव्यपंचामृतादिनामूर्त्तिंसंस्थाप्य पुरुषसूक्तेनस्नापयित्वा पूज्यपूजकयोर्मध्येप्राचीप्रोक्ताविचक्षणैरितिप्राचींप्रकल्प्य मंडूकादिपीठपूजांकृत्वा सिंहासनंसंपूज्य ईशानादिक्रमतः विष्णुहरैकदंतरवीन्फलेषुचतुर्षुकलशेषुवा संपूज्य वंदिमध्यस्थकलशेस्वर्णादिमूर्त्तौदुर्गांपूजयेत् कलशएव देवीपूजनंचेत् मूर्त्तिस्थापनंसिंहासनोपरिकार्यं अत्रचतुर्भिरायतनैःसहदुर्गापूजनं गौडानुसारेण लिखितं अत्रप्रमाणत्वेनकालिकापुराणवचनंतैरुपन्यस्तं शिवंभास्करमग्निंचकेशवंकौशिकीमपि मनसानर्चयन्यातिदेवलोकादधोगतिमिति अत्राग्निशब्देनगणेशइतिशिवार्चनचंद्रिकायांपाठः कार्त्तिकेयोसौ कार्त्तिकेयोविनायकइतिभविष्योत्तरवचनात् यत्तु गौडैरग्निपूजनंपार्थक्येनक्रियते तन्मृग्यं एतच्च ब्राह्मणादिभिर्यथाधिकारंवैदिकादिकार्यं तदुक्तंमंत्रराजानुष्ठानविधाने श्रौतार्चनंतुविप्राणांविशेषे

णभवेत्तदा स्मार्त्तागमार्चनंक्षत्त्रवैश्यैः केवलमागमामिति एवंपूर्वोक्तक्रमेण चतुरायतनपूजानंतरं जटाजूटेत्यादिध्यात्वाहस्तस्थपुष्पांजलौ अथार्कतोवाहृदयारविंदादावाहयेदितिवचनात् सूर्यमंडलात्हृदयारविंदाद्वा देवीमागतांविभाव्य पुष्पाणिकलशेमूर्त्यांवाप्रक्षिपेत् ततआत्मसंस्थामिति एहिदुर्गेमहाभागेरक्षार्थंममसर्वदा आवाहयाम्यहंदेविसर्वकामार्थसिद्धये अस्यांमूर्त्तौसमागच्छस्थितिंमत्कृपयाकुरु रक्षांकुरुसदाभद्रेविश्वेश्वरिनमोस्तुतइति आगच्छवरदेदेविदैत्यदर्पनिषूदिनि पूजांगृहाणसुमुखिनमस्तेशंकरप्रिये सर्वतीर्थमयंवारिसर्वदेवसमन्वितं इमंघटंसमागच्छतिष्ठदेवगणैःसह दुर्गेदेविसमागच्छसान्निध्यमिहकल्पयबलिंपूजांगृहाणत्वमष्टाभिःशक्तिभिःसहेत्यावाहनमंत्रेणावाहयेत् मूर्त्तिपूजनेतुसर्वतीर्थमयमितिश्लोकोनपठनीयः पूजातुजयंतीमंत्रेणवाकार्या तदुक्तंदेवीपुराणे कुर्याद्देव्यास्तुमंत्रेणपूजांक्षीरघृतादिभिरिति जयंतीमंगलाकालीभद्रकालीकपालिनी दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते अनेनैवतुमंत्रेणजपहोमौतुकारयेदिति दुर्गामंत्रोवैदिकआगमिकोवावैदिकोजातवेदसइत्यादि आगमिकस्तुओंदुर्गेदुर्गेरक्षणिस्वाहेतिनवाक्षरः तल्लिंगैःपूजयेन्नमेदितिसाधारणवाक्यात् स्कांदेतु दुर्गेमेदुस्तरेकार्येभवदुःखविनाशिनी पूजयामिसदाभक्त्यादुर्गांदुर्गार्त्तिनाशिनीं अनेनैवतुमंत्रेणजपहोमादिकारयेदित्युक्तं पूजाचषोडशोपचारैःछत्रचामरादिभिर्यथाविभवंकार्या पूजायांवादित्राणामभावेघंटावादनंकार्यं तदुक्तं वादित्राणामभावेतुपूजाकालेचसर्वदा घंटाशब्दोनरैःकार्यःसर्ववाद्यमयीयतः पाद्यादौविशेषोदेवीपुराणे पद्मश्यामाकदूर्वाचविष्णुक्रांतादिरिष्यते गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः तत्रैवं बिल्वरक्ताक्षतैःपुष्पैर्दधिदूर्वांकुशैस्तिलैः सामान्यःसर्वदेवानामर्घ्योयंपरिकीर्तितः पुष्पंसारसुधानिर्यौ इक्षुर्मधुघृतंचैवपयोदधिसदैवतु प्रस्थप्रमाणंवाग्राह्यंमधुपर्कइहोच्यते आचमनेतु जातीलवंगकंकोलादिद्रव्याणिदेयानि पंचामृते स्कांदे क्षीराद्दशगुणंदध्नोघृतंचैवदशोत्तरं घृताद्दश

गुणंक्षौद्रंक्षौद्राच्चैवेक्षुजंतथेति पूजानंतरंमाषभक्तवलिं कूष्मांडादिवलिंवानिवेदयेत् ततोनीराजनंकृत्वायथाशक्ति वैदिकमागमिकंवादुर्गामंत्रंजपेत् दुर्गाग्रतोजपेन्मंत्रमेकचित्तस्समाहितइतिदेवीपुराणात् ततश्चंडीपाठंकृत्वा देवींप्रार्थयेत् महिषघ्निमहामायेचामुंडेमुंडमालिनि द्रव्यमारोग्यविजयंदेहिदेविनमःसदा भूतप्रेतपिशाचेभ्योरक्षोभ्यश्चमहेश्वरि देवेभ्योमानुषेभ्यश्चभयेभ्योरक्षमांसदा सर्वमंगलमांगल्येशिवेसर्वार्थसाधके शरण्येत्र्यंबके गौरिनारायणिनमोस्तुते रूपंदेहियशोदेहिभाग्यंभगवतिदेहिमे पुत्रान्देहिधनंदेहिसर्वान्कामान्प्रदेहिनइति ततः शिवरहस्योक्तांदुर्गास्तुतिंपठेन्नरःदुर्गांशिवांशांतिकरींब्रह्माणींब्रह्मणःप्रियां सर्वलोकप्रणेत्रींचप्रणमामिसदाशिवां मंगलांशोभनांशुभ्रांनिःकलांपरमांकलां विश्वेश्वरींविश्वमातांचंडिकांप्रणमाम्यहं सर्वदेवमयींदेवींसर्वरोगभयापहां ब्रह्मेशविष्णुनमितांप्रणमामिसदाउमां विंध्यस्थांविंध्यनिलयांदिव्यस्थाननिवासिनीं योगिनींयोगमातांचचंडिकांप्रणमाम्यहं ईशानमातरंदेवीमीश्वरीमीश्वरप्रियां प्रणतोस्मिसदादुर्गांसंसारार्णवतारिणीं यइदंपठतिस्तोत्रंशृणुयाद्वापियोनरः समुक्तःसर्वपापैस्तुमोदतेदुर्गयासहेति ततःपुष्पांजलिंदद्यात् इतिदुर्गापूजाविधिः विस्तृतपूजायामशक्तंप्रति संक्षिप्तपूजाविधिः कालिकापुराणे सम्यक्कल्पोदितांपूजांयदिकर्त्तुंनशक्नुयात् उपचारांस्तथादातुंपंचैतान्वितरेत्तदा गंधंपुष्पंचधूपंचदीपंनैवेद्यमेवच अभावेतोयपुष्पाभ्यांतदभावेतुभक्तितः संक्षेपपूजाकथितेतिस्मृतिकौस्तुभे अत्राखंडदीपदानमुक्तं नारदीये अखंडदीपकंदेव्याः प्रीतयेनवरात्रके प्रज्वालयेदहोरात्रमेकचित्तोधृतव्रतइति अथचंडीपाठविधिः देवीपुराणे माहात्म्यंभगवत्यास्तुपुराणादिषु कीर्त्तितं पठेच्चशृणुयाच्चापि सर्वकामसमृद्धये श्रावणंचब्राह्मणेनैवकारणीयं ब्राह्मणंवाचकंविद्यान्नान्यवर्णजमादरादिति भविष्योक्तेः तथा एकोत्तराभिवृद्ध्यातु नवमींयावदेवहि चंडीपाठं जपेच्चैव

जापयेद्वाविधानत इति वाराहीतंत्रे संकल्पितस्तोत्रपाठे संख्यांकृत्वांजपेत् सुधीः आवृत्तिसंख्या
भेदेनफलभेदश्च तत्रैवोक्तः चंडीपाठफलंदेवि शृणुष्वगदतोमम एकावृत्त्यादिपाठानां यथावत्कथयामिते
संकल्पपूर्वंसंपूज्यन्यस्यांगेषुमनून्सकृत् पाठद्बलिप्रदानाच्चसिद्धिमाप्नोतिमानवः उपसर्गोपशांत्यर्थंत्रिरावृत्तंपठे
न्नरः ग्रहोपशांतौकर्त्तव्यंपंचावृत्तंवरानने महाभयेसमुत्पन्नेसप्तावृत्तंसमुन्नयेत् नवावृत्ताद्भवेच्छांतिर्वाजपेयफलंल
भेत् राजवश्यायभूतैचरुद्रावृत्तमुदीरयेत् अर्कावृत्तेः काम्यसिद्धिर्वैरिहानिश्चजायते मन्वावृत्ताद्रिपुर्वश्यं तथास्त्री
वश्यतामियात् सौख्यंपंचदशावृत्त्याश्रियमाप्नोतिमानवः कलावृत्त्यापुत्रपौत्रधनधान्यागमंविदुः राज्ञांभीतिविमो
क्षायवैरस्योच्चाटनायच कुर्यात्सप्तदशावृत्तंतथाष्टादशकंप्रिये महाग्रहविमोक्षायविंशावृत्तंपठेत्सुधीः पंचविंशावर्त्त
नात्तुभवेद्बंधविमोक्षणं संकटेसमनुप्राप्तेदुश्चिकित्साभयेतथा जातिभ्रंशेकुलोच्छेदेआयुषोनाशआगते वैरिवृद्धौव्या
धिवृद्धौधननाशेतथाक्षये तथैवात्रिविधोत्पातेतथाचैवातिपातके कुर्याद्यत्नाच्छतावृत्तंततः संपद्यतेशुभं आयुर्वृद्धिः श
तावृत्ताद्राज्यवृद्धिस्तथापरा मनसाचिंतितंदेविसिद्ध्येदष्टोत्तराच्छतात् शताश्वमेधयज्ञानांफलमाप्नोतिसुव्रते सहस्रा
वर्त्तनाल्लक्ष्मीरावृणोतिस्वयंस्थिरा भुक्त्वामनोरथान्सर्वान्नरोमोक्षमवाप्नुयात् यथाश्वमेधःक्रतुराट्देवानांचय
थाहरिः स्तवानामपिसर्वेषांतथासप्तशतीस्तवः अथवाबहुनोक्तेनकिमेतेनवरानने चंड्याःशतावृत्तपाठात्
सर्वाःसिद्ध्यंतिसिद्धयइति सचैवंगुणयुक्तः विस्पष्टमद्रुतंशांतस्पष्टाक्षरपदंतथा कलस्वरसमायुक्तंरसभावसम
न्वितं बुध्यमानःसदाह्यर्थंग्रंथार्थंकृत्स्नशोनृप ब्राह्मणादिषुपाठार्थंग्रंथार्थंचार्पयेन्नृपः यएवंवाचयेद्ब्रह्मन्सविप्रो
व्यासउच्यतइति स्तोत्रपाठश्चनारायणंनमस्कृत्यकर्त्तव्यः नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतीं
चैवततोजयमुदीरयेदितिवचनात् जयशब्दार्थश्चभविष्ये अष्टादशपुराणानिरामस्यचरितंतथा विष्णुधर्मादि

शास्त्राणिशिवधर्माश्चभारत वेदार्थःकृत्स्नशोयत्रतन्महाभारतंस्मृतं शैवाश्चधर्माराजेंद्रमानवोक्तामहीपते जयेतिनामएतेषांप्रवदंतिमनीषिणइति पाठप्रकारश्च मत्स्यसूक्ते प्रणवंचादितोजप्त्वास्तोत्रंवासंहितांपठेत् अंतेचप्रणवंदद्यादित्युवाचादिपूरुषः सर्वत्रपाठेविज्ञेयोह्यन्यथाविफलंभवेत् शुद्धेनानन्यचित्तेनपठितव्यंप्रयत्नतः नकार्यासक्तमनसाकार्यंस्तोत्रस्यवाचनं आधारेस्थापयित्वातुपुस्तकंप्रजपेत्सुधीः हस्तसंस्थापनादेवयस्मादल्पफलंभवेत् स्वयंचलिखितंयत्तुयतिनालिखितंचयत् अब्राह्मणेनलिखितंतच्चापिविफलंभवेत् ऋषिच्छंदादिकंन्यस्यपठेत्स्तोत्रंविचक्षणः स्तोत्रेनदृश्यतेयत्रप्रणवन्यासमाचरेत् संकल्पितस्तोत्रपाठसंख्यांकृत्वापठेत्सुधीः अध्यायंप्राप्यविरमेन्नतुमध्येकदाचन कृतेविरामेमध्येतुअध्यायादिंपठेत्पुनरिति अथप्रसंगात्शतचंड्यादिविधानंलिख्यते रुद्रयामले शतचंडीविधानंचप्रोच्यमानंशृणुष्वतत् सर्वोपद्रवनाशार्थेशतचंडींसमाचरेत् षोडशस्तंभसंयुक्तंमंडपंपल्लवोज्ज्वलं वसुकोणयुतांवेदींमध्येकुर्यात्त्रिभागतः पक्वेष्टकाचितांरम्यामुच्छ्रयेद्धस्तसंमितां पंचवर्णरजोभिश्चकुर्यान्मंडलकंशुभं पंचवर्णवितानंचकिंकिणीजालमंडितं आचार्येणसमंविप्रान्वरयेद्दशसुव्रतान् ऐशान्यांस्थापयेत्कुंभंपूर्वोक्तविधिनाहरे वारुण्यांचप्रकर्तव्यंकुंडंलक्षणलक्षितं मूर्त्तिंदेव्याःप्रकुर्वीतसुवर्णस्यपलेनवै तदर्द्धेनतदर्द्धेनतदर्द्धेनमहीपते अष्टादशभुजांदेवींकुर्यादष्टभुजामपि पट्टकूलयुगच्छन्नांवेदीमध्येनिधापयेत वैकृतिरहस्ये आयुधान्यत्रवक्ष्यंतेदक्षिणाधःकरेक्रमात् अक्षमालाचकमलंवाणोसिःकुलिशंगदा चक्रंत्रिशूलंपरशुःशंखोघंटाचपाशकः दंडशक्तिश्चर्मचापंपानपात्रंकमंडलुः अलंकृतभुजामेभिरायुधैःकमलासनां तत्रैव दद्याच्चाष्टभुजांवाणमुसलेशूलचक्रभृत् शंखंघंटांलांगलंचकार्मुकंवसुधाधिप देवींसंपूज्यविधिवज्जपंकुर्युर्दशद्विजाः शतमादौशतंचांतेजपेन्मंत्रनवार्णकं चंडीसप्तशतीमध्येसंपुटोयमुदाहृतः सच ॐऐंह्रींक्लींचामुंडायै

।विद्येइति एकद्वित्रीणिचत्वारिजपेद्दिनचतुष्टयं रूपाणिक्रमशस्तद्वत्पूजनादिकमाचरेत् पंचमेदिवसेप्रातर्होमंकुर्या द्विधानतः गुडाज्यपायसंदूर्वांतिलाञ्छुक्लान्यवानपि चंडीपाठस्यहोमंतुप्रतिश्लोकंदशांशतः होमंकुर्याद्द्रुहादिभ्यः समिदाज्यचरून्क्रमात् हुत्वापूर्णाहुतिंदद्याद्विप्रेभ्योदक्षिणांक्रमात् कपिलांगांनीलमणिंश्वेताश्वंछत्रचामरे अभिषेकंततःकुर्युर्यजमानस्यऋत्विजः एवंकृतेऽमरेशानसर्वसिद्धिःप्रजायतइति इतिशतचंडीविधिः सहस्रचंडीविधिवच्छृणुविष्णोमहामते राज्यभ्रंशेमहोत्पातेजनमारेमहाभये राजमारेऽश्वमारेचपरचक्रभयेतथा इत्यादिविविधेदुःखेनृपरोगादिजेभये सहस्रचंडिकापाठंकुर्याद्वाकारयेत्तथा जापकास्तुशतंप्रोक्ताविंशद्धस्तश्चमंडपः भोज्याः सहस्रंविप्रेंद्रागोशतंदक्षिणांदिशेत् गुरवेद्विगुणंदेयंशय्यादानंतथैवच धनंधान्यंचभूदानंश्वेताश्वंचमनोहरं पंचनिष्कमितामूर्त्तिःकर्त्तव्यावार्द्धमानतः अष्टादशभुजादेवीसर्वायुधविभूषिता अवारितान्नंदातव्यंसहस्रंप्रत्यहंविभो शतंवानियताहारः पयः पानेनवर्तयेत् एवंयश्चंडिकापाठंसहस्रंतुसमाचरेत् तस्यस्यात्कार्यसिद्धिस्तुनात्रकार्याविचारणा इतिसहस्रचंडीविधिः अथकुमारीपूजनं तच्चप्रत्यहंयथाशक्तिएकद्व्यादिक्रमेणकार्यं तत्प्रकारश्चदेवीपुराणे ब्रह्मोवाच नतथातुष्यतेशक्तिर्होमदानजपेनतु कुमारीभोजनेनात्रयथादेवीप्रसीदति अत्रनवरात्रे पितरोवसवोरुद्राआदित्यागणलोकपाः सर्वेतेपूजितास्तेनकुमार्योयेनपूजिताः शुक्लाष्टमीचतुर्दश्योर्नवरात्रेविशेषतः कृष्णपक्षेविशेषेणभोजयेत्तुकुमारिकाइति अन्यत्रापि प्रक्षाल्यपादौसर्वासांकुमारीणांचवासव सुलिप्तेभूतलेरम्येतंत्रतश्चासनेस्थिताः पूजयेद्गंधपुष्पैश्चस्रग्भिश्चापिमनोरमैः पूजयित्वाविधानेनभोजनंताःसदापयेत् खंडलड्डुकगुडसर्पिर्दधिक्षीरंसमाक्षिकं तासांदेयंकुमारीणांशनैर्भुंजापयेत्तुताः पानीयंयाचितंदेयमन्नंवायाचितंशुभं तास्तृप्तास्तुयदासर्वास्तदास्वाचमनंददेत् आचम्यचाक्षतान्दत्वात्वयाक्षंतव्यमित्यु । दातुःशिरसिदातव्याः कन्यका

भिरथक्षताः तेनापिप्रणिपातस्तुकर्तव्योभक्तिपूर्वकम् अनेनविधिनाशश्वद्देवीक्षिप्रंप्रसीदति ददातिविविधान् कामान्मनोभीष्टान्सुराधिप राज्यंकृत्वाततःपश्चाद्देवलोकंचगच्छति कौस्तुभेतु एकांकन्यांभोजयित्वाऐश्वर्यं लभतेनरः कन्याद्वयंभुक्तिमुक्ती त्रिवर्गफलदंत्रयं चतुष्टयंराज्यदंचसर्वकामफलप्रदं विद्याप्रदंपंचकंचषटकंषट्कर्म सिद्धिदं सप्तभिर्लभतेराज्यमष्टभिर्गुणसंपदः नवभिःपृथिवीशःस्यात्कुमारीभिश्चपूजनादित्युक्तं स्कांदे एकैकां पूजयेत्कन्यामेकवृद्ध्यातथैवच द्विगुणांत्रिगुणांवापिप्रत्येकंनवकंवरं नवभिर्लभतेभूमिमैश्वर्यंद्विगुणेनतु एकवृद्ध्या लभेत्क्षेममेकैकेनश्रियंलभेत् एकवर्षातुयाकन्यापूजार्थंतांविवर्जयेत् गंधपुष्पफलादीनांप्रीतिस्तस्यानविद्यते द्विवर्षकन्यामारभ्यदशवर्षावधिक्रमात् तासांच क्रमेण कुमारिकात्रिमूर्त्ति कल्याणीरोहिणीकालीचंडिकाशांभवीदुर्गासुभद्रेतिनामान्युक्तानिस्कांदे कुमारिकाद्विवर्षातुत्रिवर्षातुत्रिमूर्त्तिर्ना चतुर्वर्षातुकल्याणी पंचवर्षातुरोहिणी षड्वर्षातुभवेत्कालीसप्तवर्षातुचंडिका अष्टवर्षाशांभवीतुदुर्गातुनवभिर्मता आसांक्रमेणफलान्याहसएव दुःखदारिद्र्यनाशायशत्रूणांनाशनायच आयुष्यवलवृद्ध्यर्थंकुमारींपूजयेन्नरः आयुष्कामस्त्रिमूर्त्तिंतुत्रिवर्गस्यफलाप्तये अपमृत्युव्याधिपीडादुःखानामपनुत्तये सौख्यधान्यधनारोग्यपुत्रपौत्राभिवृद्धये कल्याणींपूजयेद्धीमान्नित्यं कल्याणवृद्धये आरोग्यसुखकामस्तुलक्ष्मीकामस्तथैवच यशस्कामोनरोनित्यंरोहिणींपरिपूजयेत् विद्यार्थी चजयार्थीचराज्यार्थीचविशेषतः शत्रूणांचविनाशार्थंकालिकांपूजयेन्नरः संग्रामेजयकामीचचंडिकांपरिपूजयेत् दुःखदारिद्र्यनाशायनृपसंमोहनायच महापापविनाशायशांभवींचप्रपूजयेत् सबलोत्कटशत्रूणामुग्रसाधनकर्मणि दुर्गांदुर्गार्त्तिनाशायपूजयेद्यत्नतोबुधः सौभाग्यधनधान्यादिवांछितार्थफलाप्तये सुभद्रांपूजयेन्मर्त्योदासीदासविवृद्धये पूजाप्रकारश्च तत्रैव प्रातःकालेविशेषेणकृत्वायत्नंविशेषतः आवाहयेत्ततःकन्यांमंत्रेणानेन

122

व्र०र०
आश्वि०
॥६०॥

भार्गव मंत्राक्षरमयींलक्ष्मींमातृणांरूपधारिणीं नवदुर्गात्मिकांसाक्षात्कन्यामावाहयाम्यहं आवाहनमंत्रः तत्रसंपूजयेद्धीमान्मंत्रैरेभिः पृथक्पृथक् जगत्पूज्येसर्ववंद्येसर्वशक्तिस्वरूपिणि पूजांगृहाणकौमारिजगन्मातर्नमोस्तुते कुमार्य्याः त्रिपुरांत्रिपुराधारांत्रिवर्गज्ञानरूपिणीं त्रैलोक्यवंदितांदेवींत्रिमूर्तिंपूजयाम्यहं त्रिमूर्तेः कलात्मिकांकलातीतांकारुण्यहृदयांपरां कल्याणजननींनित्यंकल्याणींपूजयाम्यहं कल्याण्याः अणिमादिगुणाधारामकाराद्यक्षरात्मिकां अनंतशक्तिकांलक्ष्मींरोहिणींपूजयाम्यहं रोहिण्याः कामचारींशुभांकांतां कालचक्रस्वरूपिणीं कामदांकरुणोदारां कालींसंपूजयाम्यहं काल्याः श्रीमत्सुरासुराराध्य चरणांभोरुहद्वयीं चराचरजगद्धात्रीं चंडिकांपूजयाम्यहम् चंडिकायाः सदानंदकरींशांतां सर्वदेवनमस्कृतां सर्वभूतात्मिकांलक्ष्मीं शांभवींपूजयाम्यहं शांभव्याः दुर्गमेदुस्तरेकार्ये भवदुर्गविनाशिनीं भक्ताभीष्टप्रदांनित्यं दुर्गामावाहयाम्यहम् दुर्गायाः सुंदरींस्वर्णवर्णाभां सुखसौभाग्यदायिनीं सुभद्रजननींदेवीं सुभद्रांपूजयाम्यहं सुभद्रायाः एवमभ्यर्चनंकुर्यात्कुमारीणांप्रयत्नतः कंचुकैश्चैववस्त्रैश्च गंधपुष्पाक्षतादिभिः नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः प्रत्यहंब्राह्मणभोजनं योगिनीभोजनंचोक्तं नारदीये प्रत्यहंभोजयेद्विप्रान्कुमारीर्योगिनीरपि हीनाधिकांगींकुष्ठादिविकारांकुकुलांतथा ग्रंथिस्फुटितगभींगींरक्तपूयव्रणांकितां जात्यंधांकेकरींकाणांकुरूपांतनुरोमशां संत्यजेद्रोगिणींकन्यांदासीगर्भसमुद्भवां अरोगिणींसुपुष्टांगींसुरूपांव्रणवर्जितां एकवंशसमुद्भूतांकन्यांसम्यक्प्रपूजयेत् ब्राह्मणींसर्वकार्येषुजयार्थेनृपवंशजां लाभार्थेवैश्यवंशोत्थांसुतार्थेशूद्रवंशजां दारुणेचांत्यजातीयांपूजयेद्विधिनानरइति क्वचिन्मंत्राक्षरमयीमिति सर्वासामेकएवमंत्रउक्तः यथोक्तालाभेतु देवीपुराणे विवाहानंतरत्वासांकन्यात्वन्नोऽपगच्छति तावत्

संपूज्यतेकन्यायावत्पुष्पंनदृश्यते इतिकन्यापूजनं अत्रवेदपारायणमप्युक्तं रुद्रयामले एवंचतुर्वेदविदोविप्रान्वात्र प्रसादयेत् तेषांचवरणंकार्यंवेदपारायणायवाइतिशिष्टाः अथ वेदपारायणविधिः तत्रादौब्रह्मादिपूजाविधिर्महार्णवे तीर्थेदेवालयेगेहेप्रशस्तेसुपरिष्कृते कलशंविधिनातत्रवेदिमध्येन्यसेत्पुनः पंचाशद्भिःकुशैःकार्योब्रह्मापश्चान्मुखः स्थितः स्नापितःस्थापितःकुंभेचतुर्बाहुश्चतुर्मुखः वत्सजान्वाकृतिंवेदमुत्तराग्रैःकुशैःकृतं ब्रह्मोपधानेदत्त्वातंततःस्वस्त्ययनंपठेत् ब्रह्मयज्ञानमितिवागायत्र्यावाप्रपूजयेत् उपाध्यायंचसंपूज्ययथापाठंपठेत्ततः बौधायनःस्थंडिलंकलयित्वाग्निमुपसमाधाय संपरिस्तीर्याज्येनैताभ्योदेवताभ्योजुहोति अग्नये सोमायेन्द्राय विश्वेभ्योदेवेभ्यऋषिभ्यऋग्भ्योयजुर्भ्यः सामभ्योऽथर्वभ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै ह्रियै सावित्र्यै सवित्रे प्रजापतये काण्वऋषये सोमाय काण्वऋषये अग्नये काण्वऋषये विश्वेभ्योदेवेभ्यः काण्वऋषिभ्यः संहिताभ्योदेवताभ्यः उपनिषद्भ्यो याज्ञिकाभ्यो देवताभ्य उपनिषद्भ्योवारुणीभ्यो देवताभ्य उपनिषद्भ्योहव्यवाहाय विश्वेभ्यो देवेभ्यः स्वयंभुवे वारुणीभ्योऽनुमत्यै स्विष्टकृतेच पृथक्स्वाहाकारेण हुत्वा व्याहृतिभिश्चपुनः परिषिंचति समाप्ते चैतायजुषातर्पयति एवमृग्वेदस्य काण्वऋष्यादि वर्जमास्विष्टकृतस्त्वेषां स्थाने शतर्चिभ्योगृत्समदाय विश्वामित्राय वामदेवायात्रये भारद्वाजाय जामदग्न्याय गौतमाय वसिष्ठाय प्रगाथेभ्यःक्षुद्रसूक्तेभ्योमहानाम्नीभ्यइति ततोवेदादिमारभ्य संततमधीयेतेत्याह भगवान् बौधायनः इतिवेदपारायणविधिः शिष्टाः पुराणादिपारायणमपि कुर्वंति अथबलिदानं तत्राश्वमेषच्छागमहिषस्यमांसानामुत्तरोत्तरंप्राशस्त्यंफलविशेषश्च बलिद्रव्याणि कालिकापुराणे पक्षिणःकच्छपाग्राहामत्स्यानवविधामृगाः महिषोगोधिकागौरःछागोबभ्रुश्चसूकरः खड्गश्चकृष्णसारश्चगोधिकाशरभोहरिः शार्दूलश्चनरश्चैवस्वगात्ररुधिरंतथा आ

124

गारेगोधिकेतिग्राम्यत्वंज्ञाप्यते द्वितीयगोधाग्रहणमारण्याभिप्रायं क्षत्रियादिकंप्रति कृष्णसारनिषेधस्तत्रैव न कृष्णसारंवितरेद्बलिंतुक्षत्रियादिकः अददत्कृष्णसारंतुब्रह्महत्यामवाप्नुयात् हयोष्ट्रावपिपशुस्थानेनियोक्तव्याविति तिथितत्त्वे तच्चप्रत्यहंकार्यं तथाच देवीपुराणे बलिंचप्रत्यहंदद्यादोदनंमांसमाषवत् त्रिकालंपूजयेद्देवीं जपस्तोत्रपरायणइति यत्तुकैश्चिदुक्तं होमोऽष्टम्यांनवम्यांवाकार्यः बलिदानमप्यष्टमीनवम्योरेवेति तत्तुच्छं देवीपुराणे बलिंचप्रत्यहंदद्यादितिवाक्येन प्रतिदिनंतस्याभिधानात् होमोऽपिप्रत्यहंकार्यः पूर्वोक्तदेवीपुराणवाक्ये जपहोमसमायुक्तइत्युक्ते पुनःपूजांतथाष्टम्यामित्यादिवचनंतु अष्टमीनवम्योर्विशेषपूजापरं कौस्तुभेप्येवमेव अत्रचच्छागादिबलिदानमग्नीषोमीयपशुहिंसान्यायेन धर्म्यमपि क्षत्रियादिविषयमेव ब्राह्मणस्यतु सात्त्विकीजपयज्ञाद्यैर्नैवेद्यैश्चनिरामिषैरितिवाक्योपात्तसात्त्विकपूजायामेवाधिकारात् तथैव भगवद्गीतादिषुप्रतिपादितत्वात् यदपिकालिकापुराणादिषु मद्यस्वगात्ररुधिरनिवेदनादिकमुक्तं तदपिब्राह्मणस्यनभवति नदद्याद्ब्राह्मणोमद्यंतथादेव्यैकदाचन सिंहव्याघ्रनरान्दत्त्वाब्राह्मणोनरकंव्रजेत् इहापिस्यात्सहीनायुःसुखसौभाग्यवर्जितः स्त्रियंनदद्यात्तुबलिंदत्त्वानरकमाप्नुयात् स्वगात्ररुधिरंदत्त्वाब्राह्मण्यादेवहीयते कालिकापुराणएवनिषेधात् ब्राह्मणेनतु माषभक्तादिनाबलिदानंकार्यं तदुक्तं कालिकापुराणे माषकल्माषमासाद्यैर्देयोदिक्षुबलिर्निशि कूष्मांडमिक्षुदंडश्चमद्यमासवमेवच एतेबलिसमाःप्रोक्तास्तृप्तौछागसमाःस्मृताः एतेष्वपिब्राह्मणस्यमद्यमांसव्यतिरिक्तमेवभवति राजसीबलिदानाद्यैर्नैवेद्यैःसामिषैस्तथेति मांसबलिदानादेः राजसत्वाभिधानात् रुद्रयामलेऽपि छागाभावेऽपिकूष्मांडंश्रीफलंवामनोहरं वस्त्रसंवेष्टितंकृत्वाछेदयेच्छुरिकादिना तथा ब्राह्मणेनसदादेयंकूष्मांडबलिकर्मणि श्रीफलंवासुराधीशच्छेदंनैवतुकारयेत् ब्राह्मणस्यच्छेदननिषेधाच्छेदस्यब्राह्मणातिरिक्तकर्तृकता

कृत्वाघृतमयंव्याघ्रनरासहतथवच अथवापूपविकृतंयवक्षोदमयंचवा घातयेच्चंद्रहासेनमंत्रेणसंस्कृतंनरः कालिकापुराणे माषान्नेनबलिर्देयोब्राह्मणेनविजानता भुवनेशीपारिजातेऽपि अन्नव्यंजनपुष्पांबुबलिद्रव्यमुदाहृतमिति अथबलिदानविधानं तत्रादौदेवीप्रीत्यर्थं बलिदानमहंकरिष्येइतिसंकल्पयेत् कालिकापुराणे उत्तराभिमुखोभूत्वाबलिंपूर्वमुखंतथा निरीक्ष्यसाधकःपश्चादिमंमंत्रमुदीरयेत् पशोत्वंबलिरूपेणममभाग्यदुपस्थितः प्रणमामिततःसर्वरूपिणंबलिरूपिणं मंत्ररत्नप्रकाशे पशुंस्नापयित्वासिंदूरतिलकंदत्त्वाऽस्त्रेणावलोकयेत् मूलेनप्रोक्ष्यतीर्थमंत्रैःप्रोक्षयेत् तीर्थमंत्रावैदिकास्तांत्रिकाश्च अग्निःपशुरासीत्तेनायजंतसएतल्लोकमजयद्यस्मिन्नग्निःसतेलोकोभविष्यतितंजेष्यसिपिबैताअपः १ वायुःपशुरासीत्तेनायजंतसएवतंलोकमजयद्यस्मिन्वायुः सतेलोकोभविष्यतितंजेष्यसिपिबैताअपः २ सूर्यःपशुरासीत्तेनायजंतसएतल्लोकमजयद्यस्मिन्सूर्यः सतेलोकोभविष्यतितंजेष्यसिपिबैताअपः ३ वाचंतेशुंधामिप्राणंतेशुंधामिचक्षुस्तेशुंधामिश्रोत्रंतेशुंधामिनाभिंतेशुंधामिमेढ्रंतेशुंधामिपायुंतेशुंधामिचरित्रांस्तेशुंधामि मनस्त आप्यायतां चक्षुस्तआप्यायतां देव्यैत्वाजुष्टमुपाकरोमि वाराहीयमुनागंगाकरतोयासरस्वती कावेरीचंद्रभागाचसिंधुभैरवसागराः अजस्नानेसमायांतुयेचान्येनदसंज्ञकाःपशुपाशविनाशायहेमकूटस्थितायच परायपरमेष्ठिनेहुंकारायचमूर्त्तये एभिर्मंत्रैश्चसंप्रोक्ष्यवामेमंडलमालिखेत् चंडेश्वरींयजेत्तत्रकुमारींपूजयेत्ततः तद्बलिंतत्रसंस्थाप्यप्रोक्षयेत्साधकोत्तमः हूंहूंपशून्हनहनहूं १ फट्इत्यभ्युक्षेत् रज्जुमादायमस्तकेपशुंवंधयेत् मेषाकारस्तंभमध्येपशुंवंधय २ सशृंगेसर्वावयवंपशुंबंधय २ ब्रह्मांडखंडमध्येपशुंवंधय २ ओंहूंफट्इतिवद्ध्वापूजयेत् परमपशुरूपिणेनमःशिखायां रुधिरवंधनायनमःशिरसि चंडिकायैनमः ललाटे सरस्वत्यैनमोमुखे चंद्रादित्याभ्यांनासिकायां अग्रनासिकायैकर्णयोः वैष्णव्यैजिह्वायां पद्मनाभायैउदरे

भैरव्यैनाभौ रुधिरोन्मत्तायैपादेषु ततःकर्णेजपेत् हिलि २ बहुरूपधरायैचंडदुर्गायैइमंपशुंस्वर्गेनियोजय २ मुक्तिंप्रदर्शय ५ ह्रींचंद्रमंडलाधिष्ठितविग्रहायैपशुरूपचंडिकायैपशुंप्रोक्षयामिस्वाहा कुशाक्षतजलान्यादायोत्सृजेत् कृतांजलिःपठेत् यज्ञार्थेपशवःसृष्टाःस्वयमेवस्वयंभुवा अतस्त्वांघातायिष्यामितस्माद्यज्ञेवधोऽवधः पशुरुत्पादितोदेवैर्यज्ञार्थंचविधानतः इदानींत्वंमहोत्साहाच्छित्तव्योसिमयापुनः अजोसित्वंपशुत्वेनयज्ञार्थंनिर्मितःपुरा अतःसर्वनिदानेनत्वांश्रीपूजांकरोम्यहं पशुमेनंमयादत्तमपशुत्वंप्रदेहिमे देवताबलिदानेनमांसेनरुधिरेणच दातुरापद्विनाशायछागलायनमोनमः लोकानामुपकारार्थंपशुःसृष्टोमयाधुना प्रोक्षितोभवतीप्रीत्यैमामात्मानंचतारय अथखड्गपूजा कृष्णंपिनाकपाणिंचकालरात्रिस्वरूपिणं उग्रंरक्तास्यनयनंसर्वासुरभयंकरं रक्तांबरधरंचैवपाशहस्तंकुटुंबिनं पिवमानंचरुधिरंभुंजानंक्रव्यसंहतिं रसनात्वंचंडिकायाःसुरलोकप्रसादक इतिध्यात्वा पूजयेत ॐस्फ्रैं १ फट्वज्रेश्वरिखड्गरूपिणातीक्ष्णधारेणपशुंसंहर १ ॐह्रींकालिकालिवज्रेश्वरिलोहदंडायैनम इतिसंपूज्य असिर्विशसनःखड्गस्तीक्ष्णधारोदुरासदः श्रीगर्भोविजयश्चैवधर्मपालनमोस्तुते इत्यष्टौतवनामानित्वयमुक्तानिवेधसा नक्षत्रंकृत्तिकातेतुगुरुर्देवोमहेश्वरः हिरण्यंचशरीरंतेदैवतंचजनार्दनः पितापितामहोदेवस्त्वंमांपालयसर्वदा नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रःकृशोदरः भावशुद्धोऽमर्षणश्चअतितेजास्तथैवच इयंयेनधृताक्षोणीहतश्चमहिषासुरः तीक्ष्णधारायशुद्धायतस्मैखड्गायतेनमः इतिस्तुत्वा रक्षार्थंबंधनस्थोसिमुक्तयेमोचितोमया देवताः प्रीतिंसमुत्पाद्यस्वर्गंगच्छपशूत्तम इतिबंधान्मोचयित्वा मूलमंत्रंपठेत् अथापरेणमंत्रेणच्छेदयेत् ॐह्रींश्रींचौंचंडिकायैलोहदंडायैह्रींह्रींइमंपशुंमहातृप्तिमहानंदंकुरुकुरुमुर २ स्वेष्टंदेविगृह्ण २ स्वाहा कालिकालिस्फ्रैं १ कालिवज्रेश्वरिखड्गपाणिनितीक्ष्णधारेणहनिस्वाहा अयंबलिर्मयादत्तः पशूनांचपशूत्तमः गृह्ण २ महादेविरक्षनां

दुरितार्णवात् रुधिरंमस्तकंस्कंधंततोदेव्यैनिवेदयेत् घोरदंष्ट्राकरालास्येसुरामांसप्रियेसदा बलिंगृह्णमहादेविपशुरक्तंसमांसकं अंचंडिकेचंडिकायैकाकोलूकगृध्रपरिवृतायैह्रीं १ इदंपिशितंरक्ताक्तंगृह्ण १ स्वाहा आहारेरुधिराकांक्षिबलिंगृह्णजयंकुरु ममशत्रुसंहारिणिनवदुर्गेसुरार्चिते इमंपिशितं रक्ताक्तं स्वाहा ततोदेवीं स्तुत्वा नत्वा स्वहृद्युद्वास्य विहरेत् इतिमंत्ररत्नदीपिकोक्तबलिदानविधिः अथसंक्षिप्तबलिदानविधिः उत्तराभिमुखोभूत्वा बलिं पूर्वमुखंतथा निरीक्ष्यसाधकः पश्चादिमंमंत्रमुदीरयेत् पशुस्त्वंबलिरूपेणममभाग्यादुपस्थितः प्रणमामिनमःसर्वरूपिणंबलिरूपिणं चंडिकाप्रीतिदानेनदातुरापद्विनाशन चामुंडाबलिरूपायबलेतुभ्यंनमोऽस्तुते यज्ञार्थंबलयःसृष्टाःस्वयमेवस्वयंभुवा अतस्त्वांघातयाम्यद्यतस्माद्यज्ञेवधोऽवधः ऐंह्रींश्रीमितिमंत्रेणतंबलिंमंत्ररूपिणम् चिंतयित्वान्यसेत्पुष्पंमूर्ध्नितस्यतुभैरव ततोदेवींसमुद्दिश्यकाममुद्दिश्यचात्मनः अभिषिच्यबलिंपश्चात्करवालंचपूजयेत् अथमंत्रक्रमःबलिमभिषिच्यचंदनादिभिःसंपूज्याद्येत्यादिदशवर्षावच्छिन्नदुर्गाप्रीतिकामइमंछागबलिंवह्निदैवतंभगवत्यैदुर्गादेव्यैतुभ्यमहंघातयिष्यइतिसंकल्प्यखड्गंपूजयेदिति कृष्णंपिनाकपाणिंचकालरात्रिस्वरूपिणं उग्रंरक्तास्यनयनंरक्तमाल्यानुलेपनं रक्तांबरधरंचैवपाशहस्तंकुटुंबिनं पिबमानंचरुधिरंभुंजानंक्रव्यसंचयं रसनात्वंचंडिकायाः सुरलोकप्रसादक इतिध्यात्वाह्रींह्रींखड्गायनम इतिचंदनपुष्पधूपदीपनैवेद्यतांबूलानिदद्यात् तिथितस्वेतु ऐंह्रींश्रीं खड्गंपूजयेत् ततःकृतांजलिःपठेत् असिर्विशसनःखड्गस्तीक्ष्णधारोदुरासदः श्रीगर्भोविजयश्चैवधर्माधारनमोस्तुते इत्यष्टौतवनामानिस्वयमुक्तानिवेधसेत्यादि पूजयित्वाततःखड्गंआंहुंफडितिमंत्रकैः गृहीत्वाविमलंखड्गं छेदयेद्बलिमुत्तमं पंचाष्टलक्षणोपेतंगंधपुष्पसमन्वितं विधिवत्कालिकालीतिजप्त्वाखड्गेनघातयेत् उँकालिकालि

यज्ञेश्वरिलोहदंडायैनमइतिमंत्रः तदुत्थंरुधिरंमासंगृहीत्वापूतनादिषु आदिशब्दाच्चरकीविदारीपापराक्षस्यःनैर्ऋतेभ्यःप्रदातव्योमहाकौशिकमंत्रतः ॐऐंह्रींकौशिकीरुधिरेणाप्यायतामिति [तस्याग्रतोनृपःस्नायात्कृत्वाशत्रुंतुपैष्टिकं खड्गेनघातयित्वातुदद्यात्स्कंदविशाखयोः स्थानेनियोजयेद्रक्तंशिरश्चसप्रदीपकं एवंदत्त्वाबलिंपूर्णफलं प्राप्नोतिसाधकःबलिदानेतुदुर्गायाःसर्वत्रायंविधिःस्मृतइति अथ महिषबलिदानमंत्रः यथावाहंभवान्द्वेष्टियथावाहसिचंडिकां तथाममरिपून्हिंसशुभंवाहलुलायक यमस्यवाहनस्त्वंतुपशुरूपधराव्यय आयुर्वित्तंयशोदेहिकासरायनमोऽस्तुते विस्तरस्तु तिथितत्त्वेद्रष्टव्यः इतिसंक्षिप्तबलिदानं अत्रचतिथिद्वयनिमित्तं पूजादिमहालयश्राद्धवदेकदिनआवृत्त्याकार्यं वृद्धौतद्वदेवावृत्तिरितिनिर्णयसिंधौ एककालकर्त्तव्यत्वेनोपवासवत्पूजापितंत्रेणकार्येति कालतत्त्वविवेचने स्वस्याशक्तावन्येनपूजादिकारयेत् स्वयंवाप्यन्यतोवापिपूजयेत्पूजयीतवोक्तत्वात् इदंचदेवीपूजनंशुक्रास्तादावपिकार्यं तदुक्तंधर्मप्रदीपे नष्टेशुक्रेतथाजीवेसिंहस्थेचबृहस्पतौ कार्याचैवस्वदेव्यर्चाप्रत्यहंबलिकर्मतइति मलमासेतुवचनाभावान्नभवति अत्रदुर्गायात्रोक्ताशिवरहस्ये तत्रैवदुर्गाविमलातिष्ठत्यमललोचना सर्वदुर्गहरानित्यंस्वभक्ताभयदायिनी तत्राश्विनेशुक्लपक्षेप्रतिपद्यवधिक्रमात् नवमीदिनपर्यंतंपूजाकार्याप्रयत्नतः सासर्वार्तिहरानित्यंदेवीकाशिनिवासिनां पूजिताभक्तवरदाभवत्येवनसंशयइति इतिप्रतिपत्पूजनं प्रतिपदादिषुविशेषोदुर्गाभक्तितरंगिण्यां भविष्ये केशसंस्कारद्रव्याणिप्रदद्यात्प्रतिपद्दिने पट्टडोरंद्वितीयायांकेशसंचयहेतवे दर्पणंचतृतीयायां सिंदूरालक्तकंतथा मधुपर्कंचतुर्थ्यांतुतिलकंनेत्रमंडनं पंचम्यामंगरागंचशक्त्यालंकरणानिच षष्ठ्यांबिल्वतरोर्बोधंसायंसंध्यासुकारयेत् सप्तम्यांप्रातरानीयगृहमध्येप्रपूजयेत् उपोषणमथाष्टम्यामुग्रचंडाबलिंतथा कुमारीपूजनीयाचभूषणीयाचभूषणैः संपूज्यप्रेषणंकुर्याद्दशम्यांशावरोत्सवैः अनेनवि

धिनायस्तुदेवींप्रीणयतेनरः स्कंदवत्पालयेद्देवीतंपुत्रधनकीर्त्तिभिः कृत्यतत्त्वार्णवेलैंगे कन्यायांकृष्णपक्षेतुपूजयित्वार्द्रभेपिवा नवम्यांबोधयेद्देवींमहाविभवविस्तरैः शुक्लपक्षेचतुर्थ्यांतुदेवीकेशविमोक्षणे प्रातरेवतुपंचम्यां स्नापयेत्सुशुभैर्जलैः षष्ठ्यांसायंप्रकुर्वीतबिल्ववृक्षेऽधिवासनं सप्तम्यांपत्रिकापूजाअष्टम्यांचाप्युपोषणं पूजाच जागरश्चैवनवम्यांविधिवद्बलिः विसर्जनंदशम्यांतुक्रीडाकौतुकमंगलैः प्रत्यहंसाधारणंदानांतरमप्युक्तं देवीपुराणे नारिकेलिफलादीनिनवकंनवकंप्रिये तथामृण्मयपात्राणिसपर्यांसितथैवच वंशपात्राणिवस्त्राणिभक्ष्यभोज्यान्वितानिच यदिवातिलपात्राणिमृत्पात्राण्यथवापुनः अथवाचान्यपात्राणिपंचामृतभृतानिच सौभाग्यपात्राण्यथवाकुंकुमादिभृतानिच दुर्गादेवीप्रीयतांमइत्युक्त्वाविधिवद्ददेत् दुर्गादेवीप्रसन्नास्यादिति अत्रस्त्रीव्रते विशेषः परिभाषायां ज्ञेयः अथाशौचेविशेषोनिर्णयामृते विश्वरूपनिबंधे आश्विनस्यसितेपक्षेप्रारब्धेनवरात्रके शावाशौचेसमुत्पन्नेक्रियाः कार्याः कथंबुधैरिति प्रश्ने सूतकंवर्त्तमानेचसमुत्पन्नंयदाभवेत् देवीपूजाप्रकर्त्तव्यापशुपक्षिविधानतः अत्र नवरात्रे वर्त्तमाने सूतकंयदोत्पन्नंभवेदित्यन्वयः तथा सूतकेपूजनंदेव्या दानंचैवविशेषतः देवीमुद्दिश्यकर्त्तव्यंतत्रदोषोनविद्यतइति गौडनिबंधे तिथितत्त्वेप्युक्तं आश्विनकृष्णनवम्यादिशुक्लप्रतिपदादिषष्ठ्यादिसप्तम्यादिचैकंकर्म अतश्चमध्यआशौचपातेऽपिनदोषः संकल्पोव्रतसत्रयोरितिविष्णूक्तेः आरब्धंस्वयमेवकार्यं अनारब्धंत्वन्येनकारयेदितिदिवोदासीये रजस्वलात्वन्येनकारयेत् सूतकादिवद्विशेषवचनाभावात् अत्रनिर्णयामृतादौ यदाशौचेपिनवरात्रपूजादिकंस्वयमेवकर्तव्यमित्युक्तंतन्मृग्यंशिवार्चनचंद्रिकाग्रंथलिखितनारदादिपंचरात्रग्रंथविरोधात् तथाच तत्त्वसागरसंहितायां आतुरीसौतिकीचैवत्रासीदौर्बोधिकीतथा साधनाभाविनीचेतिपंचधाभिद्यतेपुनः यदिलंघनपर्यंतोव्याधिरात्मनिदृश्यते तदापूजानकर्त्तव्यास्थंडिलेप्रतिमा

सुच नस्नानंदंतकाष्ठंवाकुर्याद्धोममथापिवा रविमंडलमालोक्यप्रतिमामथवापुनः मूलमंत्रंसकृज्जप्त्वापुष्पंसाक्षतमुत्क्षिपेत् श्रांतोव्याधिभिरत्युग्रैःक्लांतश्चैवोपवासकैः निजसामयिकैर्वापिस्वकर्त्तव्यंसमापयेत् स्नात्वादेवमथाग्नींश्चगुरून्विप्रान्प्रपूज्यच एतावत्कालविच्छिन्नापूजायुस्मत्प्रसादतः नदोषोस्त्वितिसंप्रार्थ्यपुनःपूर्ववदाचरेत् यस्तु रोगवशान्मोहवशाद्दोषउपागतःजपेनक्षालनीयःस्याद्दानेनहवनेनचेत्यादि अथसूतकिनःपूजांवदाम्यागमबोधितां स्नात्वानित्यंचनिर्वर्त्यमानस्याक्रिययातुवै वाह्यपूजाक्रमेणैवस्थानयोगेनपूजयेत् यदिकामीनचेत्कामीनित्यंपूर्ववदाचरेत् त्रासिकीवक्ष्यतेपूजायथैवागमवोधिता लब्धंवायदिवालब्धमित्यादि सर्वालाभेतु पूजोदकेनकर्त्तव्या नचेत्तोयंचविद्यते तदासंपूजयेद्देवंभावनाकुसुमादिभिः दौर्वोधिकींप्रवक्ष्यामिपूजामागमबोधितां मूर्खस्त्रीबालवृद्धाद्यादुर्वोधाइतिभाषिताः मूलमूर्त्तिषडंगानितेषांपूजाविधीयते अन्येषामपिसर्वेषांप्रोक्तासंक्षेपकर्मणीति यानितुविष्ण्वादिवचनानि यज्ञव्रतविवाहेषुश्राद्धेहोमार्चनेजपे आरब्धेसूतकंनस्यादनारब्धेतुसूतकंप्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रियेतिजपोदेवार्चनाविधिःकार्योदीक्षान्वितैर्नरैः नास्तिपापंयतस्तेषां सूतकंवायतात्मनामिति देवीयामलवचनम् सूतकेमृतकेचैवधूमोद्गारादिकेतथा जप्यंचार्च्यंतथाकुर्यान्मंत्रन्यासपुरस्सरमितिमृडानीतंत्रवचनं अर्घ्यग्रहणंपूजोपलक्षणं शिवविष्ण्वर्चनेदीक्षायस्यचाग्निपरिग्रहः ब्रह्मचारियतीनांचशरीरेनास्तिसूतकमितिविष्णुयामलवचनं सूतकेमृतकेचैवनित्यंविष्णुयमस्यच सानुष्ठानस्यविप्रेंद्रसद्यःशुद्धिःप्रजायतइति नारदपंचरात्रवचनम् उपासनेतुविप्राणामंगशुद्धिःप्रजायतइति पाराशरवचनम् सूतकेमृतकेवापिनत्याज्यंशिवपूजनमिति लिंगपुराणवचनमेतानिसर्वाणि ब्राह्मणपराण्येव विप्राणामित्युक्तेः ब्राह्मणस्यैवपूज्योहंशुचेरप्यशुचेरपि पूजांगृहाणामिशूद्रस्यपुनःस्वाचारवर्त्तिनइतिशिववचनाच्च अत्रशूद्रस्येत्युपलक्षणं

क्षत्रियवैश्ययोरपि विप्राणामपि तांत्रिकनित्यपूजायामेवाधिकारः यज्ञादौतु न अग्निहोत्रादि कर्मार्थं शुद्धिस्तात्कालिकीमतेति वचनेनाऽग्निहोत्रादावेव शुद्ध्यभिधानात् तात्कालिकी यावता कर्म सिद्ध्यति नैमित्तिक काम्यतांत्रिक पूजायांतु तेषामप्यनधिकारः सूतकेमृतकेचापि वर्त्तमानेतु नारद कामतः पूजितेमंत्रे शांतिकादौचकुत्रचित् जपेत्पंचशतंमंत्री सिद्धमंत्रस्यभक्तितः शतत्र । माद्यप्रायश्चित्तविधौजपेदिति नारदपंचरात्रवचनात् कृत्यरत्नावल्यामपि मात्स्ये अंतशातुरजोर्ये।.. जामन्येनकारयेत् एवमाशौचेऽपि सूतकात्प्राक्समारब्धमनेकाहंतुयद्व्रतं कायिकंतत्तुकुर्वीतनतुदान।चेनंजपं सूतकाहेतुयत्किंचिद्दानाद्यंतरितंभवेत् सूतकानंतरेत्वन्हितत्कर्त्तव्यमतंद्रितैरिति तस्मात्सूतकिभिः पूजनंनकार्यंप्रतिनिधिद्वारातुकार्यमेव दीक्षितीयेप्येवमेव अतएवसूतकेशिष्टैः पूजनं न क्रियतइत्याचारोऽपीत्यलंविस्तरेण इतिनवरात्रसूतकादिनिर्णयः ॥ आश्विनशुक्लद्वितीयायांदानस्यानंतफलं वचनंतुद्वितीयाप्रकरणेवक्ष्यते आश्विनशुक्लपंचम्यामुपांगललिताव्रतंदाक्षिणात्येषुप्रसिद्धं तदुक्तंस्कांदे शुक्लपक्षस्यपंचम्यामिषेमासिचरेद्व्रतमित्यादि अत्रपंचमीरात्रिव्यापिनीग्राह्येतिकेचित् मध्यान्हव्यापिनीग्राह्येत्यपरे वचनानितुपंचमीप्रकरणेवक्ष्यंतेकथापूजनादिकमपि तस्मिन्नेवप्रकरणेबोध्यं इतिपंचमीकृत्यम् आश्विनशुक्लपक्षेमूलनक्षत्रेसरस्वतीस्थापनांकार्यम् यथोक्तंनिर्णयामृतेदेवीपुराणे मूलेषुस्थापनंदेव्याः पूर्वाषाढासुपूजनं उत्तरासुबलिंदद्याच्छ्रवणेनविसर्जयेत् रुद्रयामलेऽपि मूलर्क्षेचसुराधीशपूजनीयासरस्वती पूजयेत्प्रत्यहंदेवयावद्वैष्णवमृक्षकं नाध्यापयेन्नैवलिखेन्नाधीयीतकदाचन पुस्तकेस्थापितांदेवींविद्याकामोद्विजोत्तमः मूलस्याद्यपादेआवाहनमितिशिष्टाः श्रवणाद्यपादेचाविसर्जनं आदिभागोनिशायांतुश्रवणस्ययदाभवेत् संप्रेषणंतदादेव्यादशम्यांचमहोत्सवइतिचिंतामणौब्रह्मांडपुराणात् अथ

षष्ठीकृत्यंनिर्णयामृते आश्विनशुक्लपंचम्यांस्थापितायादेव्याः सप्तम्यापूजार्थंषष्ठ्यांनक्षत्रयुक्तायामसंभवे केवलायामपिबिल्ववृक्षनिमंत्रणंकार्यं कालिकापुराणे बोधयेद्बिल्वशाखायांषष्ठ्यांदेवींफलेषुचेत्यादि अत्रसर्वत्रतिथिनक्षत्रयोगादरोमुख्यःकल्पः तदभावेतु तिथिरेवग्राह्या तिथिःशरीरंदेवस्यतिथिंनक्षत्रमाश्रितं तस्मात्तिथिंप्रशंसंतिनक्षत्रंनतिथिंविनेतिविद्यापतिलिखितवचनात् देवलः तिथिनक्षत्रयोर्योगेद्वयोरेवानुपालनं योगाभावेतिथिर्ग्राह्या देव्याःपूजनकर्मणीति अत्रचषष्ठीसायंकालव्यापिनीग्राह्या षष्ठ्यांबिल्वतरौबोधंसायंसंध्यासुकारयेदितिभविष्यवचनात् पत्रीप्रवेशात्पूर्वेद्युःसायंकालेषष्ठ्यभावेतत्पूर्वदिनेऽधिवासनंकार्यंकालात्यंतासत्वेत्वधिवासनलोपः षष्ठ्यां सायंप्रकुर्वीतबिल्ववृक्षेऽधिवासनमितिवचनादितिकल्पतरुःसायंश्रुतिःफलातिशयमात्रार्थानतुकर्मलोपइत्याचार्यचूडामणिकृत्यरत्नावल्यांकालतत्वविवेचनेचैवमेवआमंत्रणंतुपत्रीप्रवेशाव्यवहितपूर्वदिनेकार्यं पत्रीप्रवेशनंरात्रौनकार्यं पत्रीविसर्जनं रात्रौ न कार्यं पत्रीविसर्जनंरात्रौप्रवेशंचकरोतियः तस्यराज्यविनाशःस्याद्राजाचविकलोभवेत् ऋक्षयोगानुरोधेनरात्रौपत्रीप्रवेशनात् विसर्गंवाचरेद्यस्तुसराष्ट्रंसविनश्यतीतिनिषेधात् तेनचपत्रीप्रवेशात्तस्याष्टमीविद्धायांसप्तम्यांप्रातःकर्त्तव्यत्वात्तदव्यवहितपूर्वदिनएवसायान्हेषष्ठ्यभावेप्यामंत्रणंकार्यं पत्रीप्रवेशात्पूर्वेद्युः सायान्हेबिल्ववासिनीं चंडीमामंत्रयेद्विद्वान्नात्रषष्ठीपुरस्क्रियेतिब्रह्मांडपुराणवचनात् मत्स्यसूक्तेऽपि ज्येष्ठाचाप्यथवाषष्ठीसायंकालेनचेद्भवेत् सायमेवतथापिस्यात्बिल्वशाखाभिमंत्रणं पूर्वांषष्ठींसनक्षत्रांसायंप्राप्तामपित्यजेत् यदातुपत्रिकापूजानपरेद्युर्भविष्यति संनिकृष्टंतुयत्पूर्वंपत्रिकादिवसस्यतु तद्दिनेवरणंकृत्वापरेशाखां प्रवेशयेदिति तत्रपूजनक्रमः बिल्वाभ्याशंगत्वाबिल्ववृक्षायनमइतिबिल्वतरुंसंपूज्य बिल्ववृक्षे जयंतीमंत्रेण दुर्गेइहागच्छेहतिष्ठेतिदुर्गामावाह्य षोडशभिः पंचभिर्वोपचारैस्तां तत्रैवसंपूज्य गीतवाद्यघोषपुरःसरंतत्रैवदेवीं

बोधयेत्तत्र मंत्रः रावणस्यवधार्थायरामस्यानुग्रहायच अकालेब्रह्मणाबोधोदेव्यास्त्वयिकृतःपुरा अहमप्याश्विने
षष्ठ्यांसायान्हेबोधयाम्यतः ततोबिल्वतरुमामंत्रयेत् मेरुमंदरकैलासहिमवच्छिखरेगिरौ जातःश्रीफलवृक्ष
स्त्वमंविकायाःसदाप्रियः श्रीशैलशिखरेजातश्रीफलश्रीनिकेतन नेतव्योऽसिमयावृक्षपूज्योदुर्गास्वरूपतइति
एवंदेवीमधिवास्यस्वगृहमागच्छेदितिषष्ठीकृत्यं ततः परदिने सप्तम्यांमूलयुक्तायांवा पूर्वदिनामंत्रितबिल्वतरुस
मीपंगत्वापुनस्तंसंपूज्यगृहंप्रवेशयेत् तदुक्तंहेमाद्रौलिंगे मूलाभावेतुसप्तम्यांकेवलायांप्रवेशयेत् युग्माभ्यांनव
विल्वस्यफलाभ्यांशाखिकांतथा तथैवप्रतिमांदेव्याः स्नात्वाभ्युक्ष्यप्रवेशयेत् अत्रचोपवासपूजादावौदयिकीसप्त
मीग्राह्या नतुयुग्मवाक्यात्पूर्वा युगाद्यावर्षवृद्धिश्चसप्तमीपार्वतीप्रिया रवेरुदयमीक्षंतेनतत्रतिथियुग्मतेति कृत्य
तत्त्वार्णवोदाहृतवचनात् भगवत्याःप्रवेशादिविसर्गांताश्चयाःक्रियाः तिथावुदयगामिन्यांसर्वास्ताःकारयेद्बुध
इति तिथितत्त्वेनंदिकेश्वरपुराणाच्च दुर्गाभक्तितरंगिण्यामप्येवम् तत्रापिघटिकातोन्यूनत्वेपरानकार्या व्रतोपवास
नियमेघटिकैकापियाभवेदितिदेवलोक्तेरितिगौडाः दाक्षिणात्यास्तुयुग्मार्थंकुर्वंति पत्रिकापूजाचपूर्वाह्णएवकार्या
नतुमूलानुरोधान्मध्यान्हादावितिकृत्यतत्त्वार्णवेउक्तः ज्योतिषेऽपि पूर्वाह्णेनचपत्रिकाशुभकरीसंग्रामधारावहासा
यान्हेवधवंधनादिकलहंसर्वक्षतंसर्वदा सप्तम्यामस्तगायांयदिविशतिगृहंपत्रिकाश्रीफलाद्या राज्ञःसप्तांगराज्यं
जनसुखमखिलंहंतिमूलानुरोधात् तस्मात्सूर्योदयस्थांनरपतिशुभदांसप्तमींप्राप्यदेवीं भूपालोवेशयेत्तांसक
लजनाहितांराक्षसर्क्षंविहायेति अथसप्तम्यादिदिनत्रयाविहितंपात्रिकापूजनंतत्कृत्यंचोच्यते नित्यविधिंनिर्वर्त्यपूर्व
निमंत्रितबिल्वसमीपंगत्वासंपूज्यागच्छवरदेदेवीतिपूर्वोक्तमंत्रंपठित्वाप्रार्थयेत् बिल्ववृक्षमहाभागसर्वदाशंकरप्रि
य गृहीत्वातवशाखांतुदुर्गापूजांकरोम्यहं शाखाच्छेदोद्भवंदुःखंनचकार्यंत्वयाप्रभोइति ततःफलद्वययुक्तांशोभना

मपराजितादिग्गतामेकांशाखां छेदयेद्वानस्पत्येनमंत्रेण मंत्रस्तु वनस्पतेशतवल्शोविरोहःसहस्रवल्शाविवयंरुहेम यंत्वामयंस्वधितिस्तेजमानःप्रणिनायमहतेसौभगायेति क्वचित्तुछिंधिफट् ओंहुंफट्स्वाहेतिमंत्रः ततस्तांशाखामानीयगृहांगणेपीठेसंस्थाप्यविल्वशाखायैनमइत्यादिभिः पूजयित्वा विल्वशाखायांमृण्मयप्रतिमायांच देवीमावाहनपुरस्सरंतथैवपूजयित्वा माषभक्तादिबलिंचदत्त्वादोलादिनाशाखांप्रतिमांचपूजागृहद्वारदेशमानीयतत्रैवस्थापयित्वापूजागृहस्थितानिभूतेभ्योनमइति गंधादिभिःसंपूज्य भूताःप्रेताःपिशाचाश्चयेवसंत्यत्रभूतले तेगृह्णंतुमयादत्तोबलिरेषप्रसाधितः पूजितागंधपुष्पाद्यैर्बलिभिस्तर्पितास्तथा देशादस्माद्विनिःसृत्यपूजांपश्यंतुमत्कृतांभूतेभ्यएषमाषभक्तबलिर्नमइतिसपुष्पजलोत्सर्गेणबलिंतेभ्योदत्त्वा अपसर्पंतुतेभूतायेभूताभूमिपालकाः भूतानामविरोधेनपूजाकर्मकरोम्यहमितिपठित्वा फडितितान्यपसारयेत् सर्षपादींश्चविकिरेत् तथाच कालिकापुराणे स्थितेषुतत्रभूतेषुनैवेद्यंमंडलंतथा विलुंपंतिमहालुब्धानचगृह्णंतिदेवताः तस्माद्यत्नेनकर्त्तव्यंभूतानामपसारणमिति शारदातिलके विकिरान्विकिरेत्तत्रसप्तसप्तान्शराणुना लाजाचंदनसिद्धार्थफलपुष्पकुशाक्षताः विकिराइतिसंप्रोक्ताः सर्वविघ्नविनाशनाइति शराणुःफडित्यस्त्रमंत्रः सचाभिमंत्रणेविकिरणेच ततःपुनःशाखायांप्रतिमायांदेवींसंपूज्यश्रीशैलेत्यादिनेतव्योसिमयागच्छपूज्योदुर्गास्वरूपत इतिदुर्गास्वरूपतयाशाखांध्यात्वागीतवाद्यादिघोषेणप्रतिमासहितांतांपूजागृहंप्रवेश्य आरोपितासिदुर्गेत्वंमृण्मयेश्रीफलेऽपिच स्थिरानितांतंभूत्वामेगृहेत्वंकामदाभवेतिपूजास्थानेशोभनपीठोपरिस्थिरीकृत्य पूर्वोक्तप्रकारेणप्राणप्रतिष्ठांकृत्वा प्राणप्रतिष्ठामंत्रेणप्रतिष्ठाप्यसपुष्पाक्षतानादाय आवाहयाम्यहंदेवींमृण्मयेश्रीफलेतथा कैलासाशिखराद्देविविंध्याद्रेर्हिमपर्वतात् आगत्यबिल्वशाखायांचंडिकेकुरुसन्निधिं भगवतिदुर्गेइहागच्छेत्युमामावाह्य स्थापितासिमयादेविश्रीफलेमृण्मयेपिच आयु

रारोग्यमैश्वर्यंदेहिदेविनमोस्तुते भगवतिदुर्गेइहतिष्ठेतिस्थापयित्वाकृतांजलिः दुर्गेदुर्गेस्वरूपासिसुरतेजोमहाबलेसदानंदकरेदेविप्रसीदममसिद्धये एह्येहिभगवत्यंबशत्रुक्षयजयप्रदे भक्तितः पूजयामित्वांदुर्गेदेविसुरार्चिते पल्लवैश्चफलोपेतैः पुष्पैश्चसुमनोहरैः पल्लवेसंस्थितेदेविपूजयेत्वांप्रसीदमे दुर्गेदेविइहागच्छसान्निध्यमिहकल्पय यज्ञभागान्गृहाणत्वंयोगिनीकोटिभिः सहेतिपठेत् ततोजयंतीत्यादिमंत्रेणानुलेपनांतंपूजयित्वा पुष्पांजलित्रयं दद्यादौदुर्गायैनमइत्यादिवृत्तेन ततःअमृतोद्भवंश्रीवृक्षंशंकरस्यसदाप्रियं बिल्वपत्रंप्रयच्छामिपवित्रंतेसुरेश्वरि इतिबिल्वपत्रं ब्रह्मविष्णुशिवादीनांद्रोणपुष्पंसदाप्रियं तत्तेदुर्गेप्रयच्छामिसर्वकामार्थसिद्धयेइतिद्रोणपुष्पं च निवेद्य जयंतीत्यादिइमानिपुष्पाणिदुर्गायैनमइति जातीचंपकादिसुगंधिपुष्पाण्यपिदत्त्वा तथैवधूपदीपनाना नैवेद्यपुनराचमनीयतांबूलानिदत्त्वापूजासाद्गुण्यार्थंकिंचिद्दक्षिणांचदत्त्वास्तुतिभिःस्तुत्वाप्रणम्यबद्धांजलिः प्रार्थयेत् महिषघ्निमहामायेचामुंडेमुंडमालिनि द्रव्यमारोग्यमैश्वर्यंदेहिदेविनमोऽस्तुते कुंकुमेनसमालब्धेचंदनेनविलेपिते बिल्वपत्रकृतापीडेदुर्गेऽहंशरणंगतः सर्वमंगलेतिरूपंदेहीतिचश्लोकद्वयंपठेत् ततःकदल्यादिपत्रिकासुपूजा तास्तु रंभाकचिहरिद्राचजयंतीबिल्वदाडिमौ अशोकोमानवृक्षश्चधान्यादिनवपत्रिकाइति कृत्यतत्त्वार्णवेउक्ताः तत्रकदल्यांब्रह्माणींदाडिमेरक्तदंतिकां धान्येलक्ष्मीं हरिद्रायांदुर्गां मानेचामुंडां कपौकालिकां बिल्वे शिवां अशोकेशोकरहितांजयंत्यांकीर्त्तिंचावाह्यपूजयेत् कौस्तुभेतु बिल्वालाभेपत्रिकांतरेऽपिबोधनंकार्यं दुर्गाभक्तितरंगिण्यांरंभादीनामपितत्समत्वेनाभिधानादितितिथितत्त्वेततोबलिंदद्याद्दुर्गांशिवामित्यादिच पठेत् कालतत्त्वविवेचने पत्रिकापूजाप्रतिपत्प्रतिष्ठापितदेवीप्रतिमासमीपएव[illegible]प्रतिमापूजायामपिसप्तम्यादिपक्षस्तदापत्रिकयैवसह प्रतिमायाअपिदेव्यर्थकृतग्रहप्रवेशादिविसर्जनांतंकर्तव्यमितिदुर्गाभक्तितरंगिण्यामिति एवमेवाष्टमीनवमीदशमीदिनेष्वपिपूजाबोध्याइतिसप्त

अ०र० मीपूजाविधिः अथाष्टमी साचपूर्णाचेत्सैवखंडाचेन्नवमीविद्धाग्राह्या सप्तमीविद्धायानिषिद्धत्वात्सर्वथानवमी
आश्वि० विद्धैव ग्राह्यवचनानितुअष्टमीप्रकरणेवक्ष्यंते अत्रकृत्यमुक्तंनिर्णयामृते भविष्योत्तरे तत्राष्टम्यांभद्रकाली दक्षयज्ञ
॥ ६७ ॥ विनाशिनी प्रादुर्भूतामहाघोरायोगिनीकोटिभिःसह अतोऽर्थंपूजनीयासातस्मिन्नहनिमानवैः उपोषितैर्वस्त्र
माल्यधूपरत्नानुलेपनैः आमिषैर्विविधैःशाकैर्होमैर्ब्राह्मणतर्पणैः बिल्वपत्रैःश्रीफलैश्चचंदनेनघृतेनवा पशुभिःपान
कैर्हृद्यैरात्रौजागरणेनवेति अयंचकेवलाष्टम्युपवासः पुत्रवतोनिषिद्धः उपवासंमहाष्टम्यांपुत्रवान्नसमाचरेत् यथा
तथावापूतात्माव्रतीदेवींप्रपूजयेदितिकालिकापुराणोक्तेः अहनीतिश्रवणाद्दिनपूजाप्रतीयते निशायांपूजितादेवीत्यने
नप्रागुक्तवचनेनकन्यासंस्थेरवावित्यादिनाचाष्टम्यांरात्रावपिपूजनंकर्त्तव्यमित्युक्तं विशेषतोऽपिपूजनंतत्रकर्त्तव्यमि
तितत्र पुनः पूजांतथाष्टम्यांविशेषेणसमाचरेत् जागरंचस्वयंकुर्याद्बलिदानंमहानिशीति कालतत्त्वविवेचने
देवीपुराणे पशुघातःप्रकर्त्तव्योगवयाजवधस्तथा देवींतुपूजयित्वायेअर्धरात्रेऽष्टमीषुच घातयंतिपशून्भक्त्याते
भवंतिमहाबलाः बलिंचयेप्रयच्छंतिसर्वभूतविनाशनं तेषांतुतुष्यतेदेवीयावत्कल्पंतुशांकरमित्यादि भविष्योत्त
रे तस्यांसदापूजनीयाचामुंडामुंडमालिनी तस्यांयेह्युपयुज्यंतेप्राणिनोमहिषादयः सर्वेतेस्वर्गतिंयांतिघ्नतांपापं
नविद्यते यावन्नचालयेद्गात्रंपशुस्तावन्नहन्यते नतथाबलिदानेनपुष्पधूपविलेपनैः यथासंतुष्यतेमेषैर्महिषैर्विं
ध्यवासिनी बलिदानंचमांसेनमद्येनसहितौदनं सप्तम्यांपत्रिकापूजाअष्टम्यांचाप्युपोषणं पूजाचजागरश्चैवन
वम्यांविधिवद्बलिरिति अत्रनवरात्रेषु स्वातिनक्षत्रेसाश्वस्याश्वपूजनमुक्तंदेवीपुराणे अश्वयुक्शुक्लप्रतिपत्स्वातियु
क्तेशुभेदिने पूर्वमुच्चैःश्रवानामप्रथमंश्रियमाहरत् तस्मात्साश्वैर्नरैः सोत्रपूज्योऽसौश्रद्धयान्वितैः पूजनीयाश्चतुरगा
नवम्यांयावदेवहि शांतिःस्वस्त्ययनंकार्यंतदातेषांदिनेदिने धान्यंभल्लातकंकुष्ठंवचासिद्धार्थकास्तथा पंचवर्णेनसूत्रेण

ग्रंथिंतेषांतुवंधयेत् वायव्यैर्वारुणैः सौरैःशाक्तैर्मंत्रैःसवैष्णवैः वैश्वदेवैस्तथाग्नेयैर्होमः कार्योदिनेदिने अत्रवायव्यैरित्यादिबहुवचनेभ्यः प्रत्येकंकपिंजलाधिकरणन्यायेन मंत्रेषुत्रित्वंलभ्यते तुरंगारक्षणीयास्तुपुरुषैः शस्त्रपाणिभिः नचताड्याः क्वचित्तत्रनचवाह्याः कथंचनेति एतदुत्तरकृत्यं भविष्योत्तरे जयाभिलाषीनृपतिःप्रतिपत्प्रभृतिक्रमात् लोहाभिसारिकंकर्मकारयेद्यावदष्टमीमिति लोहाभिसारिकविधानं तत्रैवोक्तं प्रागुदक्प्रवणेदेशेपताकाभिरलंकृतं मंडपंकारयेद्दिव्यंनवसप्तकरंवरं षोडशहस्तप्रमाणमित्यर्थः आग्नेय्यांकारयेत्कुंडंहस्तमात्रंसुशोभनं मेखलात्रयसंयुक्तंयोन्याश्वत्थदलाभया राजचिन्हानिसर्वाणिशस्त्राण्यन्यानियानिच आनीयमंडपेतानि सर्वाण्यत्राधिवासयेत् ततस्तुब्राह्मणःस्नातःशुक्लांवरधरःशुचिः ॐकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्घृतं लोहनामाभवत्पूर्वंदानवः सुमहाबलःसदेवैः समरेक्रूरोबहुधाशकलीकृतः तदंगसंभवंसर्वंलोहंसंदृश्यतेक्षितौ शस्त्रास्त्रमंत्रैर्होतव्यंपायसंघृतसंयुतं हुतशेषंतुरंगाणांराजातमुपहारयेत् लोहाभिसारिकंकर्मतेनैतदृषिभिःस्मृतं घृतपल्ययणानश्वान्गजांश्चसमलंकृतान् भ्रामयेन्नगरेनित्यंवंदिघोषपुरस्कृतान् प्रत्यहंनृपतिः स्नात्वासंपूज्यपितृदेवताः पूजयेद्राजचिन्हानिफलमाल्यविलेपनैः हुतशेषंप्रदातव्यमौपनायनिकेगजे तस्याभिसारणाद्राज्ञोविजयःसमुदाहृतः पूजामंत्रान्प्रवक्ष्यामिपुराणोक्तानहंतव यैःपूजिताः प्रयच्छंतिकीर्त्तिमायुर्यशोवलमिति शालिहोत्रे नीराजितैश्चतुरगैः कृतेचलोहाभिसारिकेऽश्वयुजे अभिषिक्तेराजाश्वेततोनृपाणांभवेद्यात्रा अश्वयुक्शुक्लतिथौद्वितीयादिकेसप्तरात्रंतु वडवारूपेणैकास्वातिः सूर्यस्यवहतिरथं साभारेणाक्रांताक्रुद्धाश्वपान्निरीक्षतेऽभीक्ष्णं तेषां तेजःसत्त्वंबलंचगृह्णातिसावडवा तस्मात्स्वात्युत्पाताद्वाजिनांपीडाचभवति एवंचसप्तरात्रंस्वातेःसंपातएषनिर्दिष्टः तत्रदिवाकरकिरणैरस्पृष्टावाजिनोरक्ष्याः अथप्रयोगः षोडशहस्तप्रमाणंमंडपंपताकोपशोभितमैशान

प्रवणदेशेविधायतदाग्नेय्यांहस्तमात्रमेखलमश्वत्थदलोपमयोनियुक्तं मनोहरंकुंडंविधायमंडपैशानदेशेराजाचिन्हानिशस्त्राणिस्थापयेत् अश्वशालांचगोमयलिप्तांसर्वतोवेष्टनेनजनसंचारवर्जितांनानापुष्पफलाद्यलंकृतांधूपितांकृत्वा तस्यामुदयात्प्रागेव स्नापितानलंकृतान्निर्जलपुष्पमालाभिरलंकृतांस्तुरगान्सूर्यकरस्पर्शवर्जं शस्त्रपाणयःपुरुषाः सप्ताहंरक्षेयुः तेषांकंठदेशेषु गुग्गुलामलकीधान्यभल्लातककुष्ठवचापामार्गवीजलोहश्वेतसर्षपाणांपंचवर्णसूत्रेणवस्त्रेपोटलिकांकृत्वाबध्नीयात् प्रतिपदः स्वातियोगाभावे यस्यांतिथौ स्वातियोगः प्रातर्भवति तामारभ्य नवमीपर्यंतमश्वपूजाकार्या अश्वयुक्शुक्लपक्षेतुस्वातियोगेशुभेदिने इतिप्रकृत्य ब्राह्मे वाजिनीराजनविधिरितिसंप्रदायविदः अन्येतु सत्यामसत्यामपिस्वात्यांप्रतिपदि चित्रावैधृतियोगद्वितीयायां पंचम्यांवाश्वपूजारंभः वाजिनीराजनंपश्चाद्धित्वाचित्रांचवैधृतिमित्यश्वशास्त्रोक्तेरित्याहुः द्वितीयाविधिश्च व्यवहारोच्चये आश्वयुजेशुक्लपक्षेतिथौद्वितीयादिसप्तरात्रंतु तत्रदिवाकरकिरणैरस्पृष्टावाजिनोरक्ष्याः गुग्गुलंहिंगलंचैववचापामार्गतंडुलान् लोहंसिद्धार्थकंचैवबध्नीयाद्वाजिकंठके ग्रहहोमश्चकर्तव्योग्रहणामर्चनंतथेति तृतीयापंचम्योऽपिविधिर्दृष्टोगोविंदार्णवे स्वात्यादित्येतृतीयादौसप्ताहंचाश्विनेसिते रक्षांकृत्वाहयानांतुशांत्यानीराजयेत्ततइति भूपालवल्लभे कार्त्तिकेमासिपूर्णायामष्टम्यांद्वादशीदिने आश्विनेशुक्लपंचम्यांहयनीराजनंस्मृतमिति अत्रपंचम्यंतोक्तकालेषुदैवात्तदनारंभेगौणकालत्वेनाष्टमीद्वादशीपूर्णमास्यो विहिताइतिबोध्यं सौगंधिकपुष्पंचसूर्यवल्लींचवर्जयेदितिहयशारीरवचनात् सौगंधिकंतुकल्हारमित्यमरः सूर्यवल्लीदुरदुरेतिप्रसिद्धा ततोयजमानोदेशकालौसंकीर्त्यसकलशत्रुजयसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंलोहाभिसारिकंयज्ञं वाजिनीराजनसहितंकरिष्यइति संकल्प्यगणेशपूजादिआचार्यवरणांतंकुर्यात् तत आचार्यः प्रत्यक्षाश्वपूजनात्पूर्वं प्रतिमादौउच्चैःश्रवः पूजांविधाय

रेवंतपूजनंकुर्यात् रेवंतस्वरूपंमार्कंडेयपुराणे रेतसोऽश्वस्यरेवंतःखड्गीधन्वीतनुत्रवान् अश्वारूढःसमुत्पन्नोवाण
तूणसमन्वितः तत्रमंत्रःशालिहोत्रे नमोदेवाधिदेवायतुरंगबलचारिणे सूर्यपुत्रायदेवायतुरंगसहितायच तुरंगप
रिषद्यस्यनृगजोपरिधावति अश्वारूढंमहातेजः सप्तिहस्तंमहाबलं अश्वारिष्टहरंदेवंदेवंतंहयवल्लभं सूर्यपुत्रन
मस्तेऽस्तुनमस्तेपंचवक्त्रक नमोगंधर्वदेवायरेवंतायनमोनमः सूर्यपुत्रंहयारूढंपंचवक्त्रंदशांबकं रक्तवर्णैकशाख
ड्गंरेवंतंद्विभुजंस्मरेत् साश्वमश्वाधिपंरक्षशरणंत्वांव्रजाम्यहमिति सूर्यपुत्रमहावाहोछायाहृदयनंदन शांतिं
कुरुतुरंगाणांरेवंतायनमोऽस्तुतेइतिवा सारसिंधौ कुंकुमागुरुकर्पूरचंदनाद्यनुलेपनैः पशुपुष्पार्घ्यधूपैश्चदधिमोदक
पायसैः येपूजयंतिरेवंतंतेषांश्रीरनपायिनीति ततः प्रत्यक्षाश्वपूजनांतं नीराजनंचकृत्वा सिंहासनांतांपूजांकुर्यात्
वक्ष्यमाणमंत्रैः कदाचिदेतासुपूजासुस्त्रीकर्तृकत्वप्रसक्तावपिरेवंतपूजांस्त्रीनकुर्यात् अभूद्वैपूर्वंभूपस्यपत्न्यारेवंतपू
जने सूनुनाशस्ततोनारीननियोज्यातदर्चनइतिगोविंदार्णवे सारसिंधुवचनात् सर्वपूजांते कुंडे गृह्योक्तविधिनाग्नि
स्थापनादिकृत्वा ततोग्रहाणामावाहनंततोगृह्योक्तविधिना वायव्यादिलिंगैर्मंत्रैरेकविंशतिमाज्याहुतीर्जुहुयात्
ॐकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्घृतमितिभविष्ये वायवायाहीतितिसृणांमधुच्छंदाविश्वामित्रोवायुर्गायत्रीवाजि
नीराजनप्रधानहोमेविनियोगः ॐवायवायाहिदर्शनेमसोमाअरंकृता तेषांयाहिश्रुधीहवंस्वाहा वायवइदं ॐवाय
नुक्थेभिर्जरंतेत्वामच्छाज्जरितारः सुनसोमाअहर्विदः स्वाहा वायवइदं ॐवायोतवप्रपृंचतीधेनाजिगाति
दाशुषे उरूचेसोमपीतयेस्वाहा वायवइदं नहितेइतितिसृणामार्जीगर्त्तोवरुणस्त्रिष्टुप् वाजिनीराजनप्रधानहोमे
विनियोगः ॐनहितेक्षत्रंसहोनमन्युचयश्चनामीपतयंतं आयुः नेमाआयोअनिमिषंचरंतीर्नये वातस्यप्रमिनं
त्यभ्वः स्वाहा वरुणायेदं ॐअबुध्नेराजावरुणोवनस्योर्ध्वंस्तूपंददतेस्यूतदक्षः नीचीनास्थपरिवुध्नएषामस्मे

अंतर्निहिताःकेतवःस्युःस्वाहा वरुणायेदं ओंउरुꣳहिराजावरुणश्चकारसूर्यायपंथामन्वेतुवाहु अपदेयपादाप्रतिधानवैकरुतापवक्ताहृदयाविधश्चित्स्वाहा वरुणायेदं उदुत्यमितितिसृणांप्रस्कण्वः सूर्योगायत्री वाजिनीराजनप्रधानहोमेविनियोगः ओंउदुत्यंजातवेदसंदेवंवहंतिकेतवः दृशेविश्वायसूर्यंस्वाहा सूर्यायेदं ओंपत्येतायवोयथा नक्षत्रायंत्यक्तभिःसूरायविश्वचक्षसेस्वाहा सूर्यायेदं उक्थमिंद्रायेशस्यवर्धनंपुरुनिषधे शक्रोयथासुतेषुणोरारणेत्सरव्येषुच तस्मिन्नूसखित्वइमहेंतंरायेनंसुवीर्यैंसशक्रनुतनः शक्रादिंद्रोवसुदयमानः स्वाहा इंद्रायेदं ज्येष्ठेनसोतारिंद्रायसोमंवीरायशक्राय भरापिबमर्पायस्वाहा इंद्रायेदं अतोदेवेतितिसृणांमेधातिथिर्विष्णुर्गायत्रीवाजिनीराजनप्रधानहोमेविनियोगः ओंअतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे पृथिव्याःसप्तधामभिः स्वाहा विष्णवइदं ओंइदंविष्णुर्विचक्रमेत्रेधानिदधेपदं समूढमस्यपाꣳसुरेस्वाहा विष्णवइदं ओंमंत्रिणिपदाविचक्रमेविष्णुर्गोपाअदाभ्यः अतोधर्माणिधारयन्स्वाहा विष्णवइदं ओमासइतितिसृणांमधुच्छंदाविश्वेदेवा गायत्री वाजिनीराजनप्रधानहोमे- ओंओमासश्चर्षणीधृतोविश्वेदेवासआगत दाश्वांसोदाशुषः सुजतंस्वाह विश्वेभ्योदेवेभ्यइदं ओंविश्वेदेवासोअसुरःसुनमागतरूर्णयः उस्राइवस्वराणिस्वाहा विश्वेभ्योदेवेभ्यइदं ओंविश्वेदेवासोअस्रिधएहिमायासोअद्रुहः मेधंजुषंतवन्हयेस्वाहा विश्वेभ्योदेवेभ्यइदं अग्निमीलेइतितिसृणांमधुच्छंदाअग्निर्गायत्री वाजिनीराजनप्रधानहोमे- ओंअग्निमीलेपुरोहितंयज्ञस्यदेवमृत्विजं होतारंरत्नधातमंस्वाहा अग्नयइदं ओंअग्निःपूर्वेभिर्ऋषिभिरीड्योनूतनैरुत सदेवांएहवक्ष्यतिस्वाहा अग्नयइदं ओंअग्निनारयिमश्नवत्पोषवादिवेदिवेयशसंवीरवत्तमंस्वाहा अग्नयइदं इतिऋक्शाखिनां अथयजुःशाखिनांयजमानापेक्षितास्तच्छाखीयमंत्रालिख्यंते पीवोपीनोअत्रांरयीत्यस्यरायेनुयमिति आनोतियुद्भिरितितिसृणांवसिष्ठऋषिः

वायुर्देवता त्रिष्टुप्छंदः वाजिनीराजनप्रधानहोमेविनियोगः एवमग्रेऽपिविनियोगोज्ञातव्यः ओंपीवोअत्रांशयिवृधःसमेधाःश्वेनःसिशक्तिनियुतामभिः श्रीतेवायवेसुमनसोवितस्थुर्विश्वेनरः स्वपत्याजिचक्रुःस्वाहा रायेनुयंजज्ञतूरोदसीमेरायेदेवीधिषणाधातिदेवं अधवायुर्नियतःसश्चतखाउतश्वेतंवसुधितिंनिरेकेस्वाहा आनोनियुद्भिःशतिनीभिरध्वरंसहस्रिणीभिरुपयाहियज्ञं वायोअस्मिन्सवनेमादयस्वयूयंपातस्वस्तिभिःसदानःस्वाहा। इदंवायवेनममइतितिसृणांत्यागः उरुꣳहिराजाइमंमेतत्वायामीतितिसृणामृचां शुनःशेफोवरुणःआद्यं तयोस्त्रिष्टुप् मध्यमायागायत्री उरुंहिराजावरुणश्चकारसूर्यायपंथामन्वेतवाउ अपदेपादाप्रतिधातवेकरुतापवक्ताहृदयाविधश्चित्स्वाहा इमंमेवरुणःशुधीहवमयाचमृडय त्वामवस्युराचकेस्वाहा तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीःस्वाहा ३ इदंवरुणाय उद्वयंतमुदुत्यमितिद्वयोःप्रस्कण्वःसूर्यःक्रमेणानुष्टुप्गायत्री चित्रमिति कुत्सआंगिरसःसूर्यस्त्रिष्टुप् उद्वयंतमसस्परिस्वःपश्यंतउत्तरंदेवंदेवत्राःसूर्यमगन्मज्योतिरुत्तमं उदुत्यंजातवेदसंदेवंवहंतिकेतवः दृशेविश्वायसूर्यं२ चित्रंदेवानामुदगादनीकं चक्षुर्मित्रस्यवरुणस्याग्नेः आप्राद्यावापृथिवीअंतरिक्षꣳसूर्यआत्माजगतस्तस्थुषश्चस्वाहा इदंसूर्याय त्राताशमित्यस्यगर्गःइंद्रः सुत्रामानस्यवयइत्यनयोः प्रजापत्यश्विसरितऋषयइंद्रोदेवतात्रिष्टुप् त्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳशूरमिंद्रं ह्वयामिशक्रंपुरुहूतमिंद्रꣳस्वस्तिनोमघवाधात्विंद्रःस्वाहा। इंद्रःसुत्रामास्ववाडअवोभिः सुमृडीकोभवतुविश्ववेदाः वाधतांद्वेषोअभयंकृणोतु सुवीर्यस्यपतयःस्यामस्वाहा तस्यवयꣳसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम सुसुत्रामास्ववाꣳइंद्रोऽअस्मेआराच्चिद्द्वेषःसनुतर्युयोतुस्वाहा ३ इदमिंद्राय इदंविष्णुरित्यस्यमेधातिथिऋषिर्विष्णुर्गायत्री इरावतीत्यस्यवसिष्ठोविष्णुःत्रिष्टुप् उरुविष्णो

इत्यस्यप्रजापतिर्विष्णुःअनुष्टुप् इदंविष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपाꣳसुरेस्वाहा इरावतिधेनुमतिहिभूतं सूयवासि नीमनवेदशस्ये व्यस्तन्नाद्रोदसीविष्णुरेतेदधारपृथिवीमभितोमयूखैःउरुविष्णोविक्रमस्योरुक्षयायनस्कृधि घृतंघृतयोनेपिवयज्ञपतिंरतिरस्वाहा ३ इदंविष्णवेनमः ओंमासइतिमधुच्छंदाविश्वेदेवासइत्यस्यगृत्समदः विश्वेदेवादेवता गायत्र्यौविश्वेदेवासइत्यस्याः सुहोत्रादयोविश्वेदेवाः त्रिष्टुप् ओंमासश्चर्षणीधृतोविश्वेदेवासआगतदाश्वाꣳसोदाशुषः सुतंस्वाहा विश्वेदेवासोऽप्तुरः सुतमागंततूर्णय उस्राइवस्वसुराणिस्वाहा विश्वेदेवाःशृणुतेमꣳहवंमेये अंतरिक्षे य उपद्यविष्ठ येअग्निजिव्हाउतवायजत्रा आसाद्यास्मिन्बर्हिषिमोदध्वꣳस्वाहा इदंविश्वेभ्योदेवेभ्योनमम अग्नेनयेत्यस्यअगस्त्यऋषिः अयन्नइतिप्रजापतिऋषिः अग्निर्देवतात्रिष्टुभौ यमग्नइतिमधुच्छंदाअग्निर्गायत्री अग्नेनयसुपथारायेऽ अस्मान्विश्वानि देववत्पुनातिविद्वान् युयोध्यजुहुराणेनोभूयिष्ठांतेनमउक्तिंविधेमस्वाहा अयन्नोअग्निर्वरिवस्कृणोत्वयंमृधःपुरएतुप्रभिंदन् अयंवाजंजयतुवाजसातावयꣳशत्रून्नयतुजर्हृषाणःस्वाहा यमग्नेपृत्सुमर्त्यमवावाजेषुयजुनाः सयंताशश्वतीरिषः स्वाहा इदमग्नये नमम शस्त्रास्त्रमंत्रैः प्रतिमंत्रमष्टोत्तरशतमष्टाविंशतिर्वाऽष्टौवाघृतपायसाज्याहुतीर्हुत्वा हुतशेषंतुरंगगजेभ्योदद्यादिति इतिप्रयोगः अथसमलंकृतान्सपल्ययणानश्वान्गजांश्च वाद्यघोषपुरस्सरंसंगरेप्रत्यहंभ्रामयेत् ततोराजाकृतमंगलस्नानःपितृदेवताःसंपूज्यविजयारोग्यादिवृद्ध्यर्थं छत्रादिपूजनमहंकरिष्यइतिसंकल्प्य छत्रायनमइत्यादिमंत्रेणगंधादिभिःसंपूज्यइतिपठेत् यथांबुदःछादयतिशिवायेमांवसुंधरां तथाच्छादयराजानंविजयारोग्यवृद्धये अथ चामरमंत्रःशशांककरसंकाशक्षीरडिंडीरपांडुर प्रोत्सारयाशुदुरितंचामरामरदुर्लभ अथखड्गमंत्रः असिर्विशसनःखड्गस्तीक्ष्णधारोदुरासदः श्रीगर्भोविजयश्चैवधर्मधारस्तथैवच इत्यष्टौतवनामानिस्वयमुक्तानिवेधसा

नक्षत्रंकृत्तिकातेतुगुरुर्देवोमहेश्वरः हिरण्यंचशरीरंतेधातादेवोजनार्दनः पितापितामहोदेवस्त्वंमांपालयसर्वदा नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः भावशुद्धोऽमर्षणश्चअतितेजास्तथैवच इयंयेनधृताक्षोणीहतश्च महिषासुरःतीक्ष्णधारायशुद्धायतस्मैखड्गायतेनमइति अत्रकेचिन्मंत्रामहानिबंधेष्वदृष्टाअपिपद्धतिदृष्टालिख्यंते अथकटारमंत्रः रक्षेमानिगजानक्षरक्षवाजिधनानिच ममदेहंसदारक्षकटारकनमोऽस्तुते अथछुरिकामंत्रः सर्वायुधानांप्रथमंनिर्मिताऽसिपिनाकिना शूलायुधाद्विनिष्कृष्यकृत्वामुष्टिग्रहंशुभं चंडिकायाःप्रदत्ताऽसिसर्वदुष्टनिवर्हिणी तयाविस्तारिताचासिदेवानांप्रतिपादिता सर्वसत्त्वांगभूतासिसर्वाशुभनिवर्हिणी छुरिकेरक्षमांनित्यंशांतियच्छनमोऽस्तुते अथचर्ममंत्रः चंडिकायाः प्रदत्तंत्वंसर्वदुष्टनिवर्हणं त्वयानिस्तारितादेवाः सुत्रातिषंपितामहैः अतस्त्वयिबलंसर्वैर्विन्यस्तंदेवसत्तमैः तस्मादायोधनेरक्षशत्रून्नाशयसर्वदा अथचापमंत्रः सर्वायुधमहामात्रसर्वदेवारिसूदन चापमांसमरेरक्षसाकंशरवरैरिह धृतः कृष्णेनरक्षार्थंसंहारायहरेणच त्रयीमूर्तिगतंदेवंधनुरस्त्रंनमाम्यहम् अथशक्तिपूजा शक्तिस्त्वंसर्वदेवानांग्रहस्यचविशेषतः शक्तिरूपेणदेवित्वंरक्षांकुरुनमोऽस्तुते अथकुंतमंत्रः प्रासपातयशत्रूंस्त्वमनयानाकमायया गृहाणजीवितंतेषांममसैन्यंचरक्षय अथाग्नियंत्रमंत्रः अग्निशस्त्रनमस्तेऽस्तुदूरतःशत्रुनाशन शत्रून्दहहिशीघ्रंत्वंशिवंमेकुरुसर्वदा अथपाशमंत्रः पाशत्वंनागरूपोऽसिविषपूर्णोविषोद्भवः शत्रवोहित्वयाबध्यानागपाशनमोऽस्तुते अथपरशुमंत्रः परशोत्वंमहातीक्ष्णसर्वदेवारिसूदन देव्याहस्तस्थितोनित्यंशत्रून्क्षयनमोऽस्तुते अथध्वजमंत्रः शक्रकेतोमहावीर्यसुपर्णस्त्वय्युपाश्रितः पक्षिराजनमस्तेऽस्तुतथानारायणध्वज काश्यपेयारुणभ्रातर्नागारेविष्णुवाहन अप्रमेयदुराधर्षरणेदेवारिसूदन गरुत्मान्मारुतगतिस्त्वयिसन्निहितोयतः साश्वचर्मायुधान्योधान्रक्षत्वंचरिपून्दह

अथपताकामंत्रः हुतभुग्वसवोरुद्रावायुः सोमोमहर्षयः नागकिन्नरगंधर्वयक्षभूतगणग्रहाः प्रमथास्तुसदादित्यैर्भूतेशोमातृभिःसह शक्रःसेनापतिःस्कंदोवरुणश्चाश्रितस्त्वयि प्रदहंतुरिपून्सर्वान्राजाविजयमृच्छतु यानिप्रयुक्तान्यरिभिरायुधानिसमंततः पतंतूपरिशत्रूणांहतानितवतेजसा हिरण्यकशिपोर्युद्धेयुद्धेदेवासुरे तथा कालनेमिवधेयुद्धेयुद्धेत्रिपुरघातने शोभिताऽसितथैवाद्यशोभयास्मांश्चसंस्मर नीलांश्वेतामिमांदृष्ट्वा नश्यंत्वाशुनृपारयः व्याधिभिर्विविधैर्घोरैः शस्त्रैश्चयुधिनिर्जिताः सद्यःस्वस्थाभवंत्वस्मात्वद्धातेनापमार्जिताः पूतनारेवतीनाम्नाकालरात्रिश्चयास्मृता दहस्वाशुरिपून्सर्वान्पताकेत्वंमयार्चिता अथकनकदंडमंत्रः प्रोत्सारणायदुष्टानांसाधुसंरक्षणायच ब्रह्मणानिर्मितश्चासिव्यवहारप्रसिद्धये यशोदेहिसुखंदेहिजयदोभवभूपतेः ताडयस्वरिपून्सर्वान्हेमदंडनमोऽस्तुते अथदुंदुभिमंत्रः दुंदुभेत्वंसपत्नानांघोरोहृदयकर्षणः तथाऽस्तुतवशब्देनहर्षोस्माकंमुदावहः भवभूमिपसैन्यानांतथाविजयवर्द्धनः यथाजीमूतघोषेणप्रहृष्यंतिचबर्हिणः तथाऽस्तुतवशब्देनहर्षोस्माकंमुदावहः यथाजीमूतशब्देनस्त्रीणांत्रासोऽभिजायते तथैवतवशब्देनत्रस्यंत्वस्मद्द्विषोरणे अथशंखमंत्रः पुण्यस्त्वंशंखपुण्यानांमंगलानांचमंगलं विष्णुनाविधृतोनित्यमतःशांतिप्रदोभव अथसिंहासनमंत्रः विजयोजयदोजेतारिपुहंताशुभंकरः दुःखहादुर्मदःशांतः सर्वारिष्टविनाशनः एतेवैसन्निधौयस्मात्तवसिंहामहाबलाः तेनासिंहासनेतित्वंवेदैर्मंत्रैश्चगीयसे त्वयिस्थितः शिवः शांतस्त्वयिशक्रः सुरेश्वरः त्वयिस्थितोहरिर्देवस्त्वदर्थंतप्यतेतपः नमस्तेसर्वतोभद्रभद्रदोभवभूपतेः त्रैलोक्यजयसर्वस्वसिंहासननमोस्तुते अथाश्वंसंपूज्यतद्दक्षिणकर्णेजपेत् कुलाभिजनजात्याचलक्षणैर्व्यंजनोत्तमैः भर्त्तारमभिरक्षत्वंशिवंतवभवेदिति कशाघातमधिष्ठानंक्षमस्वतुरगोत्तम ततोऽश्वायभक्ष्यंदत्त्वा अश्वराजपुरोधास्तुविष्णुस्तेपुरतः स्थितः वरुणः पाशहस्तस्त्वांपृष्ठतः परिरक्षतु

वैवस्वतकुबेरौचपार्श्वयोरभिरक्षतां चंद्रादित्यौपृष्ठवंशउदरंपृथिवीधरः रक्षंतुवक्रंगंधर्वाबलमिंद्रोददातुते हविःशेषमितिप्राश्यंविजयार्थंमहीपतेः ततआचमनीयंदत्वास्तुतिंपठेत् गंधर्वकुलजातस्त्वंमाभूयाः कुलदूषकः ब्रह्मणः सत्यवाक्येनसोमस्यवरुणस्यच प्रभावाच्चहुताशस्यवर्द्धयत्वंतुरंगमान् तेजसाचैवसूर्यस्यमुनीनांतपसातथा रुद्रस्यब्रह्मचर्येणपवनस्यबलेनच स्मरत्वंराजपुत्रंचकौस्तुभंचमणिंस्मर सुरासुरैर्मथ्यमानक्षीरोदादमृतादिभिः जातउच्चैःश्रवाः पूर्वंतेनजातोसितत्स्मर यांगतिंब्रह्महागच्छेन्मातृहापितृहातथा भूमिहाऽनृतवादीचक्षत्रियश्च पराङ्मुखः सूर्याचंद्रमसौवायुर्यावत्पश्यंतिदुष्कृतं व्रजाश्वतांगतिंक्षिप्रंतच्चपापंभवेत्तव विकृतिंयदिगच्छेथा युद्धाध्वनितुरंगम रिपुंविजित्यसमरेसहभर्त्रासुखीभव २० ततः सुखमानसिध्यर्थंशिविकांपूजयेत् तत्रमंत्रः महेंद्रनिर्मितेदिव्येदेवराजादिसेविते शिविकेरक्षमांनित्यंसदामेसान्निधौभव निर्मितासिकुबेरेणबाल्येनिद्रासुखार्थिना शिविकेपाहिमांनित्यंशांतिंदेहिनमोऽस्तुते रिपुक्षयकामोरथंपूजयेत् तत्रमंत्रः शस्त्रास्त्रधारणार्थायनिर्मितोविश्वकर्मणा रथनेमिस्वनैर्घोरैरिपोर्हृदयकंपनः २१ युद्धेजयप्राप्त्यर्थंगजंपूजयेत् कुमुदैरावणौपद्मः पुष्पदंतोथवामनः सुप्रतीकोंजनोनीलएतेऽष्टौदेवयोनयः तेषांपुत्राश्चपौत्राश्चवनान्यष्टौसमाश्रिताः मंद्रोभद्रोमृगश्चैवगजस्संकीर्णएवच वनेवनेप्रसूतास्तेस्मरयोनिंमहागज पांतुत्वांवसवोरुद्राआदित्याःसमरुद्गणाः भर्तारंरक्षनागेंद्रस्वामीचप्रतिपालयतां अवाप्नुहिजयंयुद्धेगमनेस्वस्तितांव्रज श्रीस्तेसोमाद्बलंविष्णोस्तेजः सूर्याज्जवोऽनिलात् स्थैर्यंमेरोर्जयंरुद्राद्यशोदेवात्पुरंदरात् युद्धेरक्षंतुनागास्त्वांदिशश्चसहदैवतैः अश्विनौसहगंधर्वैःपांतुत्वांसर्वतःसदा चिन्हपूजनं तथैवकर्मचिन्हानिपूज्यानिस्वानिशिल्पिभिः लोहाभिसारिकंकर्मकृत्वैवंमंत्रपूर्वकं एवंकृत्वातथाष्टम्यां पूर्वाह्णेस्नानमाचरेत् दारुणिविचित्रतोरणविन्यस्तेशोभनेस्थाने पुरतोविन्यस्तमृगांविचित्रगृहमध्यगांस्नातां

कुंकुमचंपकचंदनचतुस्समैःशैलपिष्टैश्च चर्चितगात्रांचंडींकुसुमैरभ्यर्च्यबहुभिः कुमुदैःसपत्रकुसुमैः सदीपधूपैः सनैवेद्यैः मांसैर्बल्युपहारैर्मंगलशब्दैः समुच्चरितैः विहितच्छत्रैर्यानैः स्यंदनशितशस्त्रधारिजनलोकैः तुष्टैर्वरवस्त्रादितुनिवेद्यसर्वमेवभगवत्यै जयंतीत्यादिपूजामंत्रः बिल्वपत्रमंत्रस्तु अमृतोद्भवंक्षीरवृक्षमित्यादि दुर्गासापूजनीयातुतद्दिनेद्रोणपुष्पकैरित्युक्तत्वादत्रापिद्रोणपुष्पंसमर्पयेत्तत्रमंत्रोब्रह्मविष्णुशिवानामित्यादिसप्तमीप्रकरणेद्रष्टव्यः ततःपुष्पांजलिंदद्यादिति इत्यष्टम्यामहःकृत्यं अत्रराजाविजयकामोऽर्धरात्रे विशेषपूजापूर्वकं बलिंदद्यात् तदर्धयामिनीशेषेविजयार्थंनृपोत्तमः पंचाब्दंलक्षणोपेतंगंधधूपस्रगार्चितं विधिवत्कालिकालीतिजप्त्वाखड्गेनघातयेदितिदेवीपुराणात् अत्रनैमित्तिकपूजोत्तरंरात्रौचतुःषष्टियोगिनीपूजाकार्या तन्नामानितु विजयायैनमः १ मंगलायैनमः २ ॐभद्रायैनमः ३ ॐधृत्यैनमः ४ ॐशांत्यैनमः ५ ॐक्षमायैनमः ६ ॐशिवायैनमः ७ ॐसिद्ध्यैनमः ८ ॐउमायैनमः ९ ॐश्रियैनमः १० ॐरत्यैनमः ११ ॐदीप्तायैनमः १२ ॐकांत्यैनमः १३ ॐयशस्विन्यैनमः १४ ॐलक्ष्म्यैनमः १५ ॐईश्वर्यैनमः १६ ॐवृद्ध्यैनमः १७ ॐसाध्व्यैनमः १८ ॐजयायैनमः १९ ॐब्राह्म्यैनमः २० ॐजयंत्यैनमः २१ ॐअपराजितायैनमः २२ ॐजितायैनमः २३ ॐमानस्यैनमः २४ ॐश्वेतायैनमः २५ ॐदित्यैनमः २६ ॐमायायैनमः २७ ॐमहामायायैनमः २८ ॐमोहिन्यैनमः २९ ॐरतिलालसायैनमः ३० ॐतारायैनमः ३१ ॐविमलायैनमः ३२ ॐगौर्यैनमः ३३ ॐशरण्यायैनमः ३४ ॐकौशिक्यैनमः ३५ ॐमत्यैनमः ३६ ॐदुर्गायैनमः ३७ ॐक्रियायैनमः ३८ ॐअरुंधत्यैनमः ३९ ॐघंटायैनमः ४० ॐकर्णायैनमः ४१ ॐकपालिन्यैनमः ४२ ॐरौद्र्यैनमः ४३ ॐकाल्यैनमः ४४ ॐमायूर्यैनमः ४५ ॐत्रिनेत्रायैनमः ४६ ॐसमरूपायैनमः ४७ ॐबहुरूपायैनमः ४८

ॐरिपुहायैनमः ४९ ॐअंबिकायैनमः ५० ॐचर्चिकायैनमः ५१ ॐसुरपूजितायैनमः ५२ ॐवैवस्वत्यैनमः ५३
ॐकौमार्यैनमः ५४ ॐमहालक्ष्म्यैनमः ५५ महासरस्वत्यैनमः ५६ ॐकार्त्तिक्यैनमः ५७ ॐशिवदूत्यैन
मः ५८ ॐचामुंडायैनमः ५९ ॐब्रह्माण्यैनमः ६० ॐमाहेश्वर्यैनमः ६१ ॐवैष्णव्यैनमः ६२ ॐवाराह्यै
नमः ६३ ॐइंद्राण्यैनमः ६४ ततःखड्गंनमस्कृत्यशत्रूणांवधसिद्धये इच्छेच्चविजयंराज्यंसुभिक्षंचात्मनोनृपः
ततःपुनःप्रणम्याथसंस्मरन्हृदयेशिवां ततोजयजयालापैः स्तवंकुर्यादिमंततः सर्वमंगलमांगल्येशिवेसर्वार्थ
साधिके उमेचत्र्यंबिकेगौरिनारायणिनमोऽस्तुते कुंकुमेनसमालब्धेचंदनेनविलेपिते बिल्वपत्रकृतापीडेदुर्गेऽहंश
रणंगतः सर्वंकृत्वेतिकौरव्यअष्टम्यांजागरंनिशि नटनर्त्तकगीतैश्चकारयेच्चमहोत्सवं एवंहृष्टोनिशांनीत्वाप्र
भातेचारुणोदये घातयेन्महिषान्मेषान्रटतोनतकंधरान् शतमर्द्धशतंचापितदर्द्धंवायथेच्छया सुरासवभृतैः
कुंभैस्तर्पयेत्परमेश्वरीं कापालिकेभ्यस्तद्देयंदीनानाथेभ्यएवच दासीदासजनेदेयंतद्भक्तेभ्यस्तथैवच सर्वंवि
भज्यकौंतेयसुहृत्संबंधिबंधुषु ततोपराह्णसमयेनवम्यांवैरथेस्थितां भवानींभ्रामयेद्राष्ट्रेस्वयंराजास्वसैन्यवान्
आदिष्टैःपुरुषैर्वापिरथयुक्तैःसुशिक्षितैः शनैःशनैरनुनयेज्ज्वलाद्भिर्दीपवृक्षकैः आकृष्टखड्गैर्योधैश्चधानुष्कैश्चप्र
गल्भितैः नदद्भिःशंखपटहैर्नृत्यद्भिर्बहुचारणैः कश्चिच्चोपोषितोवीरोविधृतोऽन्येनखड्गवान् भूतेभ्यश्चबलिंदद्या
न्मंत्रेणानेनसामिषं सरक्तंसजलंचान्नंगंधपुष्पाक्षतैर्युतं त्रींस्त्रीन्वारान्सशूलेनदिग्विदिक्षुकिरेद्बलिं मंत्राश्च
बलिंगृह्णंत्विमंदेवाआदित्यावसवस्तथा मरुतश्चाश्विनौरुद्राः सुपर्णाःपन्नगाग्रहाः असुरायातुधानाश्चपिशा
चोरगराक्षसाः डाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः जंभकाःसिद्धगंधर्वामालाविद्याधरानगाः दिक्पा
लालोकपालाश्चयेचविघ्नविनायकाः जगतांशांतिकर्त्तारोब्रह्माद्याश्चमहर्षयः माविघ्नंमाचमेपापंमासंतुपरिपंथि

व्र०र०
आश्वि०
॥ ७३ ॥

नः सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाइति महिषघ्निमहामायेत्यादिदुर्गांशिवांशांतिकरीमित्यादिचपठेत् अष्टम्यांचचतुर्दश्यांनवम्यांचैकचेतसइतिमार्कंडेयपुराणवचनात् चंडीपाठोऽपिविशेषतःकार्यः अत्र गौरीतृतीयावत्कर्मकालव्यापिशास्त्रंबाधित्वानवमीयुतायामेवरात्राववसत्यामष्टम्यांनवमीपूजयासहतंत्रेणाष्टमीपूजोपवासा उचिताविति कालतत्त्वविवेचने कौस्तुभेतु नवमीविद्धायांतु तस्यांपूजात्रयस्याप्येककालप्रसक्तावष्टमीपूजां नवमीपूजांतत्संबंधिपूजांचतंत्रेणकरिष्यइतिसंकल्पः अष्टमीनवमीपूजयोःपूर्वोत्तरदिनगतयोः प्रातःकालस्थयोः पृथक्संभवेसंधिकालस्यचततःपृथक्लाभेसंधिपूजापिदिवारात्रौवापृथगेवकार्या अष्टमीनवमीसंधौतृतीयाखलुकथ्यते तत्रपूज्यात्वहंपुत्रयोगिनीगणसंयुतेतिकालिकापुराणे देवीवाक्ये तृतीयसंधिपूजाविधानात् अस्याश्चकालविशेषेणफलतारतम्यंमत्स्यसूक्ते अष्टमीनवमीयोगेरात्रियोगोविशिष्यते अर्धरात्रेदशगुणंसंध्यायांत्रिगुणं भवेदिति संधिश्चतिथ्योरंत्याद्यदंडात्मकः अष्टम्याःशेषदंडश्चनवम्याःपूर्वएवच तत्रयाक्रियतेपूजाविज्ञेयासामहाफलेतिकामरूपीयनिबंधोक्तेः यदापूर्वनिबंधस्थितषष्टिदंडाष्टम्यां नवमीदिनशेषेभवति तदाऽष्टमीपूजापूर्वेद्युरेव संधिपूजाचनवमीपूजयासहपरत्रकार्येत्युक्तं इत्यष्टमीकृत्यम् अथनवमीकृत्यम् इयंचनवमीदुर्गापूजायामष्टमीविद्धाग्राह्यासायंत्रिमुहूर्त्तयोगेपूर्वानवमी श्रावणीदुर्गनवमीतिवचनात् दशमीविद्धानिषेधाच्च मुहूर्त्तयोगाभावेतुनिषिद्धापिपरैवकार्येतिनिर्णयसिंधौ मदनरत्नेतु बल्यादौपराकार्या अश्वयुक्शुक्लनवमीमुहूर्त्तंवाकलायदि सातिथिः सकलाज्ञेयालक्ष्मीविद्याजयार्थिभिरितिसौरपुराणात् सूर्योदयेपरंरिक्तापूर्णास्यादपरायदि,बलिदानंप्रकर्त्तव्यंतत्रदेयंशुभावहं बलिदानेकृतेऽष्टम्यांपुत्रभंगोभवेन्नृपेतिदेवीपुराणाच्च उपवासेपूर्वेति निर्णयदीपेऽपि महानवमीपरदिनेऽपराह्णव्यापित्वेपरा अन्यथापूर्ववचनानितु नवमीप्रकरणेवक्ष्यंते कालतत्त्वविवेचने यदातुनवम्य

ष्टमीविद्धाभूत्वाद्वितीयदिनेपिकियतीभवतितदानवमीप्रयुक्तस्यपूजादेः पूर्वदिनेऽनुष्ठानेऽपिमहाबलिदानमात्रंद्वितीयदिनेकर्त्तव्यं प्रभूतबलिदानंतुदीयतेतत्रमानवैः तद्राष्ट्रंनाशमायातिमारकोपद्रवैः किलेतिभविष्यवचनात् नवमीप्रयुक्तंबलिदानंसर्वथानवमीमध्यएवकार्यं नतुदशम्यां अत्रकेंचित् पूर्वाषाढायुताष्टम्यांपूजाहोमाद्युपोषणमितिकालिकापुराणवचनादष्टम्यांहोममाहुः कौस्तुभेतु शुंभासुरवधार्थायरक्तवीजोमहासुरः अष्टम्यांनिहतोदेव्यारात्रौचैवारुणोदये ततःप्रभृतिविंध्याद्रौस्थितापूजाप्रवर्त्तिका शस्त्रास्त्रमंत्रैर्होतव्यंपायसंघृतसंयुतं मांसानितत्रहोमार्थंमेषाद्यानिचसर्वशः अजस्त्वेकोहिहोतव्योरक्तवर्णोविशेषतः कृष्णवर्णस्तुहोतव्योगौरस्तित्तिरएववारोहितंमत्स्यमांसंचहोतव्यंजयमिच्छतेतिधौम्यवचनाद्धोमस्याष्टमीकृत्यत्वेनैवप्रतीतेस्तत्रैवहोमः कार्यइत्युक्तंअन्येतु नवम्यांबलिदानंतुकर्त्तव्यंवैयथाविधि जपहोमंचविधिवत्कुर्यात्तत्रविभूतयइत्यादिवचनैर्नवम्यामेवारभ्यं नवम्यांहोमंसमापयेदित्याहुः अपरेतु अष्टम्यामारभ्यनवम्यांसमापयंति तत्र मूलं शिष्टाचारएव वस्तुतस्तु अष्टमीहोमवचनानिलोहाभिसारकर्मपराणि लोहाभिसारिकंकर्मकारयेद्यावदष्टमीमितिभविष्योत्तरपुराणेऽष्टमीपर्यंतमेवतस्योक्तत्वात् नवमीहोमवचनं नवरात्रव्रतविषयमितिनकाप्यनुपपत्तिः अथवाष्टमीनवमीहोमवचनान्यष्टरात्रनवरात्रपक्षयोर्व्यवस्थया होमविधायकानि यत्तु निर्णयसिंधौ समुच्चयपक्षएवयुक्तइति तदेतेनपरास्तं यदपिरुद्रयामलेविकल्पउक्तस्तन्निर्मूलमितिप्रौढिवादमात्रं यामलस्यैवमूलत्वात् अथतस्यैवनिर्मूलत्वमित्यभिप्रायस्तत्रतंत्राणामपि वेदमूलकतयानारदपंचरात्रादिषूक्तत्वात् दुर्गाभक्तितरंगिण्यादिगौडग्रंथेष्वपि नवम्यांहोमउक्तः अत्रडामरतंत्रेविशेषः पायसंसर्पिषायुक्तंतिलैः शुक्लैर्विमिश्रितं होमयेद्विधिवद्भक्त्यादशांशेननृपोत्तमः रुद्राध्यायेयथाहोमोमंत्रेणैकेनसाध्यते तथास्तोत्रंजपेद्धोमंश्लोकेनैकेनसाधयेत् यद्वासप्तशतीजप्येहोमेमं

त्रोनवाक्षरः ऐंह्रींक्लींचामुंडायैइतिपूर्वोक्तः कृत्यरत्नावल्यांदेवीपुराणे पूजयेत्तिलहोमैश्चदधिक्षीरघृतादिभिरिति मंत्रश्च जयंतीत्यादिः अनेनैवतुमंत्रेणजपहोमादिकारयेत् देवीपुराणात् दुर्गाभक्तितरंगिण्यामप्येवं केचित्तु मार्कंडेयपुराणगतसप्तशतीस्तवेनप्रतिश्लोकंस्वाहांतेनतिलमिश्रपायसेनहोमंकुर्वंति प्रतिश्लोकंचजुहुयात्पायसंतिलसर्पिषेतिरहस्यग्रंथवाचनात् पुरश्चरणकार्येतुबिल्वपत्रयुतैस्तिलैरितिवचनाद्बिल्वपत्रयुक्ततिलैर्होमइतिस्मार्त्ताः यत्तु निर्णयासिंधौमानाभावादितिस्मार्त्तमतेदूषणमभिहितंतत्तुच्छंपूर्वोक्तवचनस्यमानत्वात् यदिचैतद्वचनस्यनवरात्रसंबंधिहोमांगत्वेनबिल्वपत्रयुततिलविधायकत्वे मानाभावइत्यभिप्रायस्तर्हिभावानवबोधः नवरात्रसंबंधिकाम्यपुरश्चरणांगहोमाभिप्रायेणतथाभिधानात् तिथितत्त्वेनवरात्रप्रकरणेकालिकापुराणेऽपिपुरश्चरणकार्येषुबिल्वपत्रयुतैस्तिलैः साक्षतैः सघृतैर्वापिशिवामुद्दिश्ययत्नतः जुहुयादनलंवृद्धंसंस्कृतंकार्यवृद्धये रुद्रयामलेऽपि प्रधानद्रव्यमुद्दिष्टंपायसान्नंतिलास्तथा रक्तचंदनखंडाश्चगुग्गुलाश्चमनोहराः प्रतिश्लोकंचजुहुयात्सर्वद्रव्याणिचक्रमादितिनवाक्षरेणवाहुत्वानमोदेव्याइतीतिवेति। एवंनवम्यांहोमकुमारीपूजनब्राह्मणभोजनादिकृत्वादक्षिणाद्याचार्यायनिवेदयेत् नवम्यांपूर्ववत्पूजाकर्त्तव्याभूतिमिच्छता दक्षिणांवस्त्रयुग्मंचआचार्यायनिवेदयेत् पूर्ववत्प्रतिपदादीतिकालतत्त्वविवेचने तत्रैव भविष्योत्तरे कृताभिषेकावरदाशुक्लेचाश्वयुजस्यच तस्मात्सातत्रसंपूज्यानवम्यांचंडिकाबुधैरिति इतिनवमीकृत्यम् विसर्जनंतुदशम्यामेवकार्यं संपूज्यप्रेषणंकुर्याद्दशम्यांशावरोत्सवैरितिभविष्यपुराणात् रुद्रयामले दशम्यामभिषेकंचकृत्वामूर्त्तिंविसर्जयेदिति तत्रदशम्याः पूर्णतिथित्वे प्रातस्तत्कृत्वा तदुत्तरंपारणोत्तरमपराजितापूजनमितिक्रमोनिः संदिग्धएव यत्रतुनवम्युत्तरमपराह्णेदशमीप्रवृत्ताउत्तरदिनेश्रवणाभावश्च तत्रविसर्जनव्रतपारणापराजितापूजनक्रमेभवतिसंदेहः पारणोत्तरकर्त्तव्यस्यतत्रैवापराह्णेशिष्टैः क्रियमाणस्यापराजितापूजनस्य विसर्जनं

विनानुपपत्तेः अत्रोच्यते नवमीदशमीपारणयाविधायकवचनद्वैविध्येनपारणाया नियतकर्त्तव्यत्वेऽपि संप्रेषणंतु कर्त्तव्यंदशम्यांशारदोत्सवैः प्रातरावाहयेद्देवींप्रातरेवविसर्जयेदित्यादिवचनैर्विसर्जनस्य दशम्यां प्रातःकर्त्तव्यत्वेननिर्णीतत्वात्पूर्वेद्युर्नवम्यांदशम्यांवायथाचारंपारणांकृत्वापराह्णेपराजितापूजनंविधायप्रातर्दशम्यां विसर्जनं कर्त्तव्यमिति तथाचरुद्रयामले अष्टम्यांजागरंकुर्यान्नवम्यांपारणंतथा दशम्यांचविसर्गःस्यादिति धवलनिबंधेतुविशेषः अंत्यपादोदिवाभागेश्रवणस्ययदाभवेत् संप्रेषणंतदादेव्यादशम्यांतुपुनर्दिवेति दिनद्वयेदशमीसत्वेपूर्वदशम्यांश्रवणांत्यभागयोगेतत्रैवविसर्जनं तत्रतद्योगाभावेतुपरत्रदशम्यामेवतत् पूर्वदिनेनक्षत्रयोगानुरोधेनाक्रियमाणविसर्जनेनपूर्वाह्णादरइत्याशयेनोक्तंराजमार्त्तंडे निर्माल्यस्यत्यागेन देवीविसर्जनमुपलक्ष्यते कृत्यतत्त्वाऽर्णवेपि नक्षत्रंश्रवणंतिथिंचदशमींसंप्राप्यसंप्रेषयेदिति रूपनारायणीयेतुदशम्यांप्रातः संप्रेषयेदितिवचनात्प्रातः कालस्यैवप्राशस्त्यमित्युक्तंकौस्तुभे अथनवरात्रपारणानिर्णयः तत्र द्विविधानिवचनानि कानिचिन्नवमीपारणविधायकानिदशमीनिषेधकानिच कानिचिद्दशमीपारणविधायकानिनवमीनिषेधकानिच तत्रयथाकुलाचारंव्यवस्थावचनानिदशमीप्रकरणेवक्ष्यंते नवरात्रव्रतेपारणाहेसत्यपि सूतकेपारणंकार्यं तदुक्तंरुद्रयामले सूतकेपारणंकुर्यान्नवम्यांहोमपूर्वकं तदंतेभोजयेद्विप्रान्दानंदद्याच्चशक्तितइति तदंतेसूतकांते माधवीये कौर्मेऽपि काम्योपवासेप्रक्रांतेत्वंतरामृतसूतके तत्रकाम्यव्रतंकुर्याद्दानार्चनविवर्जितमिति व्रतयज्ञविवाहेषुश्राद्धेहोमेऽर्चनेजपे आरब्धेसूतकंनस्यादनारब्धेतुसूतकमितिविष्णुवचनमपि अशौचमध्येतत्कर्त्तव्यतामवगमयति प्रारंभस्तुतेनैवोक्तः प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रियेतिस्त्रियातुरजोदर्शनमध्येऽपिपारणाकार्या तदाहसत्यव्रतः प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत् नतत्रापिव्रतस्यस्यादुपरोधः कदाचनेति निर्णयसिंधौ नियम

स्थायदानारीप्रपश्येदंतरारजः उपोष्यैवतुतारात्रीः स्नात्वाशेषंचरेद्व्रतमित्यंगिरोवचनं यच्च हारीतवचनं नियमस्थायदानारीरजः पश्येत्कथंचन त्रिरात्रंतुक्षिपेदूर्ध्वंव्रतशेषंसमापयेदिति तद्विधवोपवासविषयं तासांतत्रभोजननिषेधादितिकेचित् वयंतु प्रागुक्तसत्यव्रतवचने दीर्घतपसामितिविशेषोपादानाद्द्वादशाव्यतिरिक्तसकलैकाहोपवासविषयोऽयंनिषेधः त्रिरात्रनवरात्रादिदीर्घव्रतेषुतु रजोमध्यएवपारणेतिब्रूमइति अशौचमध्येतु सर्वापिपारणाभवति प्रागुक्तकौर्मवचनादितिस्थितं पारणायांविधिनिषेधयोः सत्वादाचारतोव्यवस्थेतिकेचित् मयूखेतु सत्यव्रतवचस्तुनसधवापरंकिंतुविधवापरंविधवायास्तुतत्रत्रिरात्रमध्येभोजननिषेधादित्यन्ये तत्र निषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधवपारणाविषयत्वायोगात् वस्तुतस्तु रजस्वलायाविधवायास्त्रिरात्रमध्येभोजननिषेधएव खपुष्पायमाणइति कृत्यरत्नावल्यांतु अत्रनवरात्रहोमस्य पूजारूपत्वेन प्रधानत्वात्तस्यचानन्यसाध्यत्वेनाशौचेऽसंभवान्नतुदानार्चनजपमितिनिषेधात्तत्समाप्तिंविनाचनियमरूपोपवाससमाप्त्यसंभवादाशौचांते होमादिपूर्वकंपारणंकर्त्तव्यं प्राचीनशिष्टाचारोप्येवमेव यैस्तुहोमोनक्रियतेतेषांपारणंभवत्येवेतिस्थितं इतिनवरात्रमध्येअशौचरजोदर्शनप्रांतेपारणानिर्णयः दुर्गाभक्तितरंगिण्यांदेवीपुराणे ततःप्रातःपूजयित्वादशम्यांविधिपूर्वकं संप्रेषणंतुकर्तव्यंगीतवादित्रनिःस्वनैरित्यादितत्रक्रमः प्रातःपूजांबलिदानरहितांविधायनीराजनांतंकृत्वादुर्गांशिवामितिरूपंदेहीतिमहिषघ्नीत्यादिचपठित्वापुष्पांजलिंदत्वा कर्त्तव्यंसमापयेत् विधिहीनंक्रियाहीनंभक्तिहीनं यदर्चितं पूर्णंभवतुतत्सर्वंत्वत्प्रसादान्महेश्वरीतिप्रसाद्य क्षमस्वेत्युक्त्वैकंपुष्पंउँदुर्गायैनमइत्यैशान्यांनिःक्षिपन्विसृजेत् महिषाघ्निमहामायेशुभांपूजांप्रगृह्यच कुरुष्वममकल्याणमष्टाभिः शाक्तिभिः सह कुत्रचित्तु उत्तिष्ठदेविचंडेशीतिपाठः उत्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वेमहे उपप्रयंतुमरुतसुदानवइंद्रप्राशुर्भवाशुचा अभ्यारमिदद्रयोनिषिक्तंपुष्करेमधु अथतस्य

विसर्जनं यातुदेवगणाः सर्वेपूजामितिपठित्वा गच्छगच्छपरंस्थानंस्वस्थानंदेविचंडिके व्रजस्त्रोतोजलंवृद्ध्यैतिष्ठगेहेचभूतय इत्युत्थापयेत् ततोगीतवाद्यघोषपुरःसरं स्त्रोतोजलसमीपंनीत्वा दुर्गेदेविजगन्मातःस्वस्थानंगच्छपूजिते षण्मासेषुव्यतीतेषुपुनरागमनायवै इमांपूजांमयादेवियथाशक्त्योपपादितां रक्षार्थंत्वंसमादायव्रजस्वस्थानमुत्तममिति जलेप्रवाहयेत् ततोगृहमागत्य शांतिकलशोदकेन ब्राह्मणैरभिषिक्तोदुर्गापूजाप्रतिष्ठासिद्ध्यर्थंब्राह्मणेभ्योदक्षिणांदत्त्वा ब्राह्मणान्भोजयित्वा वंधुभिःसहभुंजीतेति देवीपूजनोपकल्पितद्रव्यादिकंब्राह्मणायदेयं तदुक्तंमत्स्यसूक्ते देवेदत्त्वातुदानानिदेवेदद्याच्चदक्षिणां तत्सर्वंब्राह्मणेदद्यादन्यथाविफलंभवेदिति इति दशमीकृत्यं इयमेव विजयदशमीत्युच्यते साच श्रवणयोगवतीग्राह्या पूर्वदिवसेचेत्पूर्वा द्वितीये श्रवणयोगे एकादशीयुक्तापि ग्राह्या उभयदिने श्रवणयोगाभावेऽपराह्णयोगवती दशमी ग्राह्या दिनद्वयेपराह्णयोगवतीपूर्वा दिनद्वयेऽपराह्णयोगाभावे नक्षत्रयोगिनीग्राह्या वचनानितु दशमीप्रकरणे वक्ष्यंते तस्यामेवदशम्यांगोपथब्राह्मणोक्तःप्रस्थानविधिःकर्त्तव्यः मूलवचनानि दशमीप्रकरणे वक्ष्यंते तत्र राजास्वलंकृतोवीणादिमंगलशब्दान्शृण्वन् होमसभारानुपकल्प्य मैत्रेमुहूर्त्तेऽग्निप्रतिष्ठापनंकुर्यात् मैत्रमुहूर्त्तस्तु प्रातःकाले तृतीयमुहूर्त्तः ततः शांतिंप्रीतिपुरस्सरंकारयित्वावोढारंतेनाभिषिंचेरन् ऋत्विजइतिशेषः यजमानंवस्त्रादिभिरलंकृत्यसमीपउपवेश्याचार्योऽभयैरपराजितैःपुष्पैःस्वस्त्ययनैःशर्मवर्मभिर्जनवेदनैश्चहुत्वापार्थिवस्येतिमाप्रगामेतिच हुत्वा आगच्छतागतस्येतींद्रंस्थालीपाकेनेष्ट्वा आतिष्ठजिष्णुरनृक्षराऋजवइतिपंथानमास्थायजपेदिमौपादौयतइंद्रंत्रातारमिंद्रंमानोविदन्नभयंसोमाबृहस्पतिर्नः परिपातुपश्चादितित्रीन्विष्णुक्रमान्क्रांत्वेत्यादि मंत्रास्तु आथर्वणेराज्याभिषेकप्रकरणेद्रष्टव्याः अथापराजितादशम्यां पूर्वोक्तविजयमुहूर्तेउक्ते प्रास्थानिकमित्युपक्रम्य त

त्राप्येतेश्लोकाः अलंकृतोभूषितभृत्यवर्गःपरिष्कृतोत्तुंगतुरंगनागः वादित्रनादप्रतिनादिताशःसुमंगलाचारपरं
पराशीः राजानिर्गत्यभवनात्पुरोहितपुरोगमः प्रास्थानिकविधिंकृत्वाप्रतिष्ठेत्पूर्वतोदिशि गत्वानगरसीमांतंवा
स्तुपूजांसमारभेत् संपूज्यचाथदिक्पालान्पूजयेत्पथिदेवताः मंत्रैर्वैदिकपौराणैःपूजयेच्चशमीतरुं अमंगलानांश
मनींदुष्कृतस्यचनाशिकां दुःखस्यशमनींधन्यांप्रपद्येऽहंशमींशुभां ततःकृताशीःपूर्वस्यांदिशिविष्णुक्रमान्क्रमेत्
रिपोःप्रतिकृतिंकृत्वाकृत्वाचमनसाचतं शरेणस्वर्णपुंखेनविद्ध्येद्धृदयमर्मणि दिशांविजयमंत्राश्चपठितव्याःपुरोध
सा एवमेवविधिंकुर्याद्दक्षिणादिदिशास्वपि पूज्यान्निजांश्चसंपूज्यसांवत्सरपुरोहितौ गजवाजिपदातीनांप्रेक्षाकौतु
कमाचरेत् जयमंगलशब्देनततः स्वभवनंविशेत् नीराज्यमानःपुण्याभिर्गणिकाभिःसुमंगलं एवंयःकुरुतेराजा
वर्षेवर्षेसुमंगलं आयुरारोग्यमैश्वर्यंविजयंचाधिगच्छति नाधयोव्याधयस्तस्यभवंतिनपराजयः श्रियंपुण्य
मवाप्नोतिविजयश्चसदाभुवीत्यादिपुराणसमुच्चये ज्योतिर्निबंधे आश्विनस्यसितेपक्षेदशम्यांतारकोदये स
कालोविजयोज्ञेयःसर्वकार्यार्थसिद्धये रत्नकोशे ईषत्संध्यामतिक्रांतःकिंचिदुद्भिन्नतारकः विजयोनामकालो
यंसर्वकार्यार्थसाधकः इषस्यदशमींशुक्लांपूर्वविद्धांनकारयेत् श्रवणेनापिसंयुक्तांराज्ञांपट्टाभिषेचने नारदः सू
र्योदयेयदाराजन्नदृश्यतेनवमीतिथिः आश्विनेमासिशुक्लांतुविजयांतांविदुर्बुधाः अथविजयदशम्यांपूर्वभाजि
प्रयत्नात्क्षितिपतिरपराह्णेपूजयेदीशकोणे निखिलभुवनवंद्यांचंडिकामिष्टसिद्ध्यै श्रवणभसहिताचेत्प्राक्परावाप्र
शस्ता तथाचस्कांदे मार्त्तंडस्योदयेपुण्यावर्त्ततेदशमीतिथिः आश्विनेशुक्लपक्षेतुसाभवेज्जयदानृणां निषिद्ध
मपिकर्त्तव्यंतैलाभ्यंजनमादरात् अश्वानामपिकर्त्तव्यंतैलस्नानंनदीजले तूर्यघोषसमायुक्तान्पुरंप्रावेशयेद्धया
न् पुष्पमालापरीतांस्तान्हयांश्चंदनभूषितान् संपूज्यविधिवद्राजानमस्कुर्यात्प्रयत्नतः भक्ष्यंभोज्यंस्वहस्तेन

भोजयेदनुगान्नृपः वाहाधिकारिणःसर्वान्दानमानैस्तुतोषयेत् तथैववारणात्राजापूजयेच्चक्रमेलकान् नाना मंत्रेणविधिवच्चतुर्थ्यंतेनमंत्रवित् कृताभ्यंगोमहाघोषैस्तूर्याणांशुभलब्धये ततश्चपूजयेद्देवान्गंधपुष्पादिकैरलं आहूयब्राह्मणान्सर्वान्वाचयेत्स्वस्तिमंगलं ततस्तुरगमारुह्यतूर्यघोषसमन्वितः बंदिभिःस्तूयमानस्तुसन्मनाःशकुनैर्व्रजेत् ज्योतिःशास्त्रोदितांकाष्ठांसुहृद्भिःपरिपूरितः संप्राप्तस्तुशमीवृक्षमश्मंतकमथापिवा अवतीर्यअथोवाहाद्वेगात्सहपुरोधसा सनिषण्णःशमीमूलंविदध्यात्स्वस्तिवाचनं कार्योद्देशान्जनैःसाकंप्रयोगकुशलैर्वदन् ततःप्रोक्ष्यशमीमूलभूमिंभूमिपतिर्ध्रुवं उत्कृत्यमृत्तिकांतत्रप्रक्षिपेत्तंडुलान्शुभान् सपूगंहेमशक्त्यातुत्रभावेतारमुत्तमं ततःप्रदक्षिणांकुर्यात्तस्यवृक्षस्यभूपतिः तत्रमंत्रः शमीशमयतइत्यादि अश्मंतकमंत्रः अश्मंतकमहावृक्षमहादोषनिवारण इष्टानांदर्शनंदेहिशत्रूणांचविनाशनं ततोऽश्मंतकशम्योःपत्राणिगृहीत्वा तस्यांमृदितंडुलपुष्पादिप्रक्षिप्यगोलकंबद्ध्वासर्वकार्यसिद्ध्यर्थंगृह्णाति तंतुवृक्षंनमस्कृत्यदिग्लिंगैर्मंत्रैः प्राच्यादिविजयंगृहीतखड्गःकरोति एवंत्रिचतुःपादक्रमेणतु सर्वदिग्विजयंकृत्वाशत्रवोजिताइतिब्रूयात् इंद्रादीन्देवान्विप्रांश्च नमस्कृत्य स्वपुरंविशेत् ततःप्रविष्टःसमहाद्वारसमीपे पुण्यस्त्रीभिर्नीराजितोद्वारिन्यस्तेषु तूलिकोपरितंडुलैःकृतमूर्त्तिषुशत्रुषु पादंकृत्वालब्धविप्रानुज्ञोनिषण्णोभूत्वाद्रव्यवस्त्रतांबूलानिदद्यात् एवंकृत्वाविसर्ज्याशु सर्वान्पौरान्निजालयात् प्रतिवर्षंकृतंचैवसर्वकार्यपरोभवेत् एवंसर्वेषुघोरेषुविधिरेषःसनातनः निष्पादितोययाधर्मंविदधातिश्रियंसुखं एवंकृतेविधानेतुतुष्टिदेपुष्टिदेनृणां सर्वैःपौरजनैःसार्द्धंविजयंप्राप्नुयान्नृपइति अस्यामेवापराजितापूजोक्ता निर्णयामृते दशम्यांपूजयित्वातुमृण्मयींचापराजितां कलशींतोयसंपूर्णांजयंतीपल्लवाननां चतुर्वर्णैस्तदायात्रांसाधयेत्साधनेनच दशम्यांचबलंराजापूजयित्वाऽपराजितां दशदिक्षुमनोयोगान् ध्या

त्वाकृत्वाथवैन्नृपः   नीराजनंस्वस्तिकृत्वाततोनीराजयेद्बलमिति   अथपूजनक्रमः   आश्विनशुक्लदशम्यांक्षेम
सिद्ध्यर्थं वास्तु दिक्पाल मार्गदेवताऽपराजिता विष्णु शमीपूजनानि करिष्ये इति संकल्प्य पू
गीफलादिषुचंदनादिलिखिताष्टदलमध्येमृण्मयप्रतिमायांवा ॐअपराजितायैनमइत्यपराजितां तद्दक्षिणतः ॐ
क्रियाशक्त्यैनमइतिजयां तद्वामतः ॐउमायैनमइतिविजयांप्रतिष्ठाप्याऽऽवाहनाद्युपचारैः संपूज्य प्रणम्यप्रार्थ
येत् चारुणामुखपद्मेनविचित्रकनकोज्ज्वला जयादेवीभवेद्भक्तयासर्वकामान्ददातुमे कांचनेनविचित्रेणकेयूरे
णविभूषिता जयप्रदामहामायाशिवभावितमानसा विजयाचमहाभागाददातुविजयंमम हारेणसुविचित्रेण
भास्वत्कनकमेखला अपराजितारुद्ररताकरोतुविजयंममेति एवंसंप्रार्थ्य हरिद्रारक्तवस्त्रेदूर्वायुक्तसिद्धार्थकान्
प्रदक्षिणंवलयाकारेणावध्य सदापराजितेयस्मात्त्वंलतासूत्तमास्मृता सर्वकामार्थसिद्ध्यर्थंतस्मात्त्वांधारयाम्य
हं भवापराजितेदेविममसर्वसमृद्धये पूजितायांत्वयिश्रेयोममास्तुदुरितंहतमिति तद्वलयमभिमंत्र्य जयदेव
रदेदेविदशम्यामपराजिते धारयामिभुजेदक्षेजयलाभाभिवृद्धये बलमाधेहिवलयमयिशत्रौपराजयं त्वद्धा
रणाद्भवेयुर्मेधनधान्यसमृद्धयइतिमंत्रेण वाहौधारयित्वा इमांपूजांमयादेवियथाशक्तिनिवेदितां रक्षार्थंतुसमादा
यव्रजस्वस्थानमुत्तममितिविसर्जयेदिति सर्वैचजनास्तस्यांग्रामसीमानमुल्लंघ्यापराजितां पूजयेयुः तथाच पुरा
णसमुच्चये दशम्यांचजनैःसम्यक्पूजनीयापराजिता ऐशानींदिशमाश्रित्यचापराह्णेप्रयत्नतइति भविष्ये
पि शमींसुलक्षणोपेतामीशानाशाप्रतिष्ठितां संप्रार्थ्यतांचसंपूज्यवत्सरंससुखीभवेत् शमीमंत्रस्तुहेमाद्रौ गो
पथब्राह्मणे अमंगलानांशमनींशमनींदुष्कृतस्यच दुःस्वप्ननाशिनींधन्यांप्रपद्येऽहंशमींशुभां तथाभविष्ये श
मीशमयतेपापंशमीलोहितकंटका धारिण्यर्जुनबाणानांरामस्यप्रियवादिनी करिष्यमाणयात्रायांयथाकालं

सुखंमम तत्रनिर्विघ्नकर्त्रीत्वंभवश्रीरामपूजिते इति ततोरिपोःप्रतिकृतिंकृत्वेत्यादिकर्त्तव्यं पूर्वमेवोक्तं ततः शमीमूलमृदंगृह्णीयात् तदुक्तं गृहीत्वासाक्षतामार्द्रांशमीमूलगतांमृदं गीतवादित्रनिर्घोषैरानयेत्स्वगृहंप्रति ततोभूषणवस्त्रादिधारयेत्स्वजनैःसहेति अत्रबलनीराजनमुक्तं तत्रमंत्रः चतुरंगबलंमह्यंनिररिष्टंव्रजात्विहसर्वत्रविजयोमेस्तुत्वत्प्रसादान्महेश्वरीतिज्योतिषेकृत्वानीराजनंराजाबलवृद्ध्यैयथाक्रमंशोभनंखंजनंपश्येज्जलगोगोष्ठसन्निधाविति तत्रमंत्रास्तिथितत्त्वे नीलग्रीवशुभग्रीवसर्वकामफलप्रद पृथिव्यामवतीर्णोसिखंजरीटनमोस्तुते वसंतराजेत्वंयोगयुक्तोमुनिपुत्रकस्त्वमदृश्यतामेषिशिखोद्गमेनसंदृश्यसेप्रावृषिनिर्गतायांत्वंखंजनाश्चर्यमयोनमस्तेदर्शनफलंतिथितत्त्वे अब्जेषुगजवाजिमहोरगेषुराज्यप्रदःकुशलदःशुचिशाद्वलेषु भस्मास्थिकेशनखलोमतुषेषुदृष्टोदुःखंददातिबहुशः खलुखंजरीटःतत्रैव वित्तंब्रह्मणिकार्यसिद्धिरतुलाशक्रेहुताशेभयं याम्यामग्निभयंसुराद्विषिकलिर्लाभः समुद्रालये वायव्यांवरवस्त्रगंधसलिलंदिव्यांगनाचोत्तरेऐशान्यांमरणंध्रुवंनिगदितंदिग्लक्षणंखंजने इदंतुसर्वत्रनवरात्रप्रसंगादत्रलिखितं रामार्चनचंद्रिकायांतु आश्विनस्यसितेपक्षेदशम्यांश्रवणर्क्षगे कर्त्तव्यःस्वजनैःसार्द्धंसर्वत्रविजयार्थिभिः हनुमद्वाक्यमाकर्ण्यहृष्टातिजनकात्मजा आनंदपूर्णैः कपिभिर्विज्ञापितमुपस्थितं रथमारोप्यदेवेशंसर्वालंकारभूषितं सासितूणधनुर्बाणपाणिनंकंचरांतकं स्वलीलयाजगत्त्रातुमाविर्भूतमजंविभुं रथैरश्वैर्गजैःपद्भिःससौमित्रिहरीश्वरैः युतंरामंहृदिध्यायन्शमीवृक्षेप्रपूजयेत् विष्णुधर्मोक्तमार्गेणयात्रानिर्विघ्नसिद्धये शमीबिल्वार्चनंकुर्वन्नितिसंकल्प्यपूजयेत् सीताकांतंसमुद्युक्तंभक्तानामभयंकरं अर्चयित्वाशमीवृक्षमर्चयेत्तुततःपुनः शमीशमयतेपापंशमीलोहितकंटका धारिण्यर्जुनबाणानांरामस्यप्रियवादिनी करिष्यमाणयात्रायांयथाकालंसुखंमया तत्रनिर्विघ्नकर्त्रीत्वं भवश्रीरामपूजिते गृहीत्वासाक्षतांसार्द्रांशमीमूलगतांमृदं गीतवादित्रनिर्घोषैर्युतोदेवगृहंनयेत्

कैश्चिद्दक्षैस्तत्रभाव्यंकोसलेंद्रस्यतुष्टये निर्जितारक्षसादैत्यावैरिणोजगतीतले रामराज्यंरामराज्यंरामराज्यमिति ब्रुवन् आनीयस्थापयेत्स्वस्थं दिव्यसिंहासनेविभुं ततोनीराज्यदेवेशंप्रणमेद्दंडवद्भुवि देवोपभुक्तवस्त्रादिधारयेत्स्वजनैःसह ॥ इतिविष्णुधर्मोत्तरोक्तोविजयप्रस्थानोत्सवः ॥ अथदुर्गाशतनामस्तोत्रं ईश्वरउवाच शतनामप्रवक्ष्यामिशृणुष्वकमलानने यस्यप्रसादमात्रेणदुर्गाप्रीताभवेत्सती ॐसतीसाध्वीभवप्रीताभवानी भवमोचनी आर्यादुर्गाजयाद्याचत्रिनेत्राशूलधारिणी पिनाकधारिणीचित्राचंडघंटामहातपाः मनोबुद्धिरहंकाराविघ्नरूपाचिताचितिः सर्वमंत्रमयीनित्यासत्यानंदस्वरूपिणी अत्यंतभाविनीभव्याभाव्याभव्यासदागतिः शाकंभरीवेदमाताचिंतारत्नप्रियासदा सर्वविद्यादक्षकन्यादक्षयज्ञविनाशिनी अपर्णानेकपर्णातुपाटलापाटलावती पट्टांबरपरीधानाकलमंजीररंजिनी अमेयाविक्रमाक्रूरासुंदरीपुरसुंदरी बनदुर्गाचमातंगीमातंगस्नानपूजिता ब्राह्मीमाहेश्वरीरौद्रीकौमारीवैष्णवीतथा चामुंडाचैववाराहीलक्ष्मीःश्रीःपुरुषाकृतिः विलोमाकर्षिणीज्ञानाक्रिया सत्याचवन्हिका बहुलाबहुलप्रेमासर्ववाहनवाहना निशुंभाशुंभहननीमहिषासुरमर्दिनी मधुकैटभहंत्रेच चंडमुंडविनाशिनी सर्वासुरविनाशीचसर्वदानवघातिनी सर्वशस्त्रमयोसत्यासर्वास्त्रधारिणीतथा अनेकशस्त्रहस्ताचअनेकास्त्रादिधारिणी कुमारीचैवकन्याचकिशोरीयुवतीयतिः अप्रौढाचैवप्रौढाचवृद्धमाताबलप्रदा यइदंपठतेनित्यंदुर्गानामशताष्टकं नासाध्यंविद्यतेकिंचित्त्रिषुलोकेषुपार्वति धनंधान्यंसुताजायाहस्तीहस्तिन्यएवच चतुर्वर्गंतथाचांतेलभेन्मुक्तिंचशाश्वतीं कुमारींपूजयित्वाचध्यात्वादेवींसुरेश्वरीं पूजयेत्परयाभक्त्यापठन्नामशताष्टकं तस्यसिद्धिर्भवेद्देविसर्वैश्वरवरैरपि राजानोदासतांयांतिराज्यश्रियमवाप्नुयात् गोरोचनालक्तककुंकुमेनासिंदूरकर्पूरमधुत्रयेण विलिख्यमंत्रंविधिवद्विधिज्ञोभवेत्समाराधनतोमुरारिः भौमावास्यानिशाभागेचंद्रेशतभिषागते विलिख्यप्रलपन्

स्तोत्रंसभवेत्संपदांपदम् ॥ इतिविश्वसारोक्तं दुर्गानामशताष्टकस्तोत्रं समाप्तम् ॥

अथनवरात्रव्रतोद्यापनविचारः नवरात्रव्रतंप्रतिवर्षंसदाकर्त्तव्यतयानित्यं तत्रवचनानिनवरात्रानिर्णयेऽकरणेप्रत्यवायपराण्यपिवचनानिचतत्रैवोक्तान्यतोनित्यमुद्यापनानैरपेक्षमिति अथचफलनिर्देशात्काम्यमप्यतइदंनित्यं काम्यंचेति काम्यत्वादुद्यापनसापेक्षमतएवास्योद्यापनं महानवम्यांविधेयमेव तत्रानुक्रमणिका आदौमंडपंवेदिकांवाध्वजपताकावितानतोरणद्वारपूर्वकंविधाय तत्र संभृतसंभारोव्रती गोमयोपलिप्तायां वेदिकायां सर्वतोभद्रंलिंगतोभद्रंवापंचवर्णैर्धान्यैर्वापरिकल्प्यतस्मिन्यथाशक्त्याकलशं यथाविधि आचार्य्यवरणगणेशादिपूजादिपूर्वकंप्रतिष्ठाप्य ताम्रादिपात्रे घंटार्गलयंत्रंकुंकुमादिना विलिख्य ब्रह्मादिऋत्विग्वरणंचयथाविधिकृत्वा तत्रैवापरमंडले ग्रहान्लोकपालादिभिःसंस्थाप्यसंपूजयेत् घंटार्गलयंत्रेसावरणांदेवींप्रतिष्ठाप्यसर्वोपचारैःसंपूज्य चतुष्षष्टिकोष्ठमंडलेचतुष्षष्टियोगिन्यः प्रतिष्ठाप्यपूज्याः तथैवनवसंख्याककुंभेषु नवदुर्गायानवमूर्त्तीः प्रतिष्ठाप्य पूजयेत् यथाशक्तिदेवीमाहात्म्यपाठादिस्तवनंविधाय रात्रौजागरणंकृत्वाप्रातश्चकृतनित्यक्रियः सन्देवीपूजादिकंविधाय अग्निंस्वगृह्योक्तविधिनाप्रतिष्ठाप्यहोमंकुर्य्यात् अन्वाधानांतमाग्निकार्य्यंविधाय ततः प्रधानंश्रीदुर्गां सावरणां देवीसूक्तदेवीमाहात्म्यनवदुर्गाचतुष्षष्टियोगिनीमंत्रैराज्याक्तपायसतिलैर्बिल्वपत्रादिसमिद्भिर्हुत्वा ब्रह्मादिमंडलदेवतानवग्रहान्दिक्पालांश्चार्कादिसमिच्चर्वादिभिः शेषेणप्रायश्चित्तं स्विष्टकृद्धोमंविधाय होमांते देवतापूजांते बलिदानंपूर्णाहुतिमभिषेकंसंपाद्य देव्याः प्रार्थनांविधायाचार्य्यंसंपूज्यप्रधानप्रतिमांसदक्षिणामाचार्याय नवविप्रेभ्योनवसदक्षिणाः प्रतिमाः प्रतिपादयेत् सुवर्णदानप्रतिष्ठांदत्वा प्रतिमादानमंत्रेणाचार्य्यं प्रार्थयित्वा कन्यकापूजनंसुवासिनीपूजनंचकुर्यात् ततःपंचाशद्ब्राह्मणान् मधुसर्पिष्पायसादिनासंतोष्य तेभ्योदक्षिणांदद्यात्

ततश्चऋत्विग्भ्योदक्षिणांदत्त्वा भूयसींदापयेत् ततःसघृतं तिलपात्रंच दद्यात् शय्याश्वरथादिदानानि दद्यात् शय्यादिदानाशक्तौसुवर्णंसदक्षिणमन्नदानंचदद्यात् ततोब्राह्मणेभ्यः सतिलकमभिषेकं कारयित्वाऽऽशिषोगृहीत्वा क्षेत्रेशंपूजयित्वाव्रतस्याच्छिद्रावधारणंकृत्वा व्रतपारणंकुर्यात् इतिनवरात्रव्रतोद्यापनं ॥ इतिश्रीमन्महाराजाधिराजश्रीरणवीरसिंहकारिते कृत्यरत्नाकरे नवरात्रप्रकरणम्

अथात्रमहालक्ष्मीपूजाविधानमुक्तं तच्चाथर्वणे लक्ष्मीहृदये

यत्राश्विनेमासिचशुक्लपक्षेरमोत्सवेसन्निहितैकभक्त्या पठेत्तचैकोत्तरवारवृद्ध्यालभेतसौवर्णमयींसवृष्टिमिति अस्यश्रीआद्यादिश्रीमहालक्ष्मीहृदयस्तोत्रमंत्रस्य भार्गवऋषि र्नानाविधानि छंदांसि आद्यादिश्रीमहालक्ष्मीदेंवता श्रींवीजं ह्रींशक्तिः ऐंकीलकं आद्यादिश्रीमहालक्ष्मीप्रसादसिद्ध्यर्थेंजपेविनियोगः इतिव्यापकंकुर्यात् श्रींविज्ञानायनमः १ ह्रींऐश्वर्यायनमः २ ऐंशक्त्यैवषट् ३ श्रींबलायहुं ४ ह्रींतेजसेवौषट् ५ ऐंवीर्य्यायफट् ६ इतिकरङ्षडंगन्यासः ओंभूर्भुवःस्वरोमितिदिग्बंधः ओंह्रीं ओंसौं ओंक्लींलक्ष्मिकमलपत्रधारिणि सिंहवाहिनि स्वाहा ओंश्रींमहालक्ष्म्यैनमः ओंश्रींह्रींऐंध्यानं वंदेलक्ष्मींपरशिवमयींशुद्धजांवूनदाभां तेजोरूपांकनकवसनांसर्वभूषोज्ज्वलांगीं वीजापूरंकनककलशंहेमपद्मंदधाना माद्यांशक्तिंसकलजननींविष्णुवामांकसंस्थाम् ओंश्रींश्रीमत्सौभाग्यजननींस्तौमिलक्ष्मींसनातनीं सर्वकामफलावाप्तिसाधनैकसुखावहाम् १ स्मरामिनित्यंदेवेशित्वयाप्रेरितमानसः त्वदाज्ञांशिरसाधृत्वाभजामिपरमेश्वरीम् २ समस्तसंपत्सुखदांमहाश्रियंसमस्तकल्याणकरींमहाश्रियं समस्तसौभाग्यकरींमहाश्रियंभजाम्यहंज्ञानकरींमहाश्रियम् ३ विज्ञानसंपत्सुखदांसनातनींविचित्रवाङ्मूर्त्तिकरीं मनोहरां अनंतसंमोदसुखप्रदायिनींनमाम्यहंभूतिकरींहरिप्रियाम् ४ समस्तभूतांतरसंस्थितात्वंसमस्तभोक्त्री

श्वरिविश्वरूपे तन्नास्तियत्त्वद्व्यतिरिक्तवस्तुत्वत्पादपद्मंप्रणमाम्यहंश्रीः ५ दारिद्र्यदुःखौघतमोपहंत्रित्वत्पादप
द्मंमयिसन्निधत्स्व दीनार्त्तिविच्छेदनहेतुभूतेकृपाकटाक्षैरभिषिंचमांश्रीः ६ अंबप्रसीदकरुणासुधयार्द्रदृष्ट्या
मांत्वत्कृपाद्रविणगेहमिमंकुरुष्व आलोकयप्रणतहृद्गतशोकहंत्रित्वत्पादयुग्मंप्रणमाम्यहंश्रीः ७ ॐश्रीं
ह्रीं शांत्यैनमोऽस्तुशरणागतरक्षणायैकांत्यैनमोऽस्तुकमनीयगुणाश्रयायै क्षांत्यैनमोऽस्तुदुरितक्षयकारणायैधा
त्र्यैनमोऽस्तुधनधान्यसमृद्धिदायै ८ शक्त्यैनमोऽस्तुशशिशेखरसंस्तुतायैरत्यैनमोऽस्तुरजनीकरवल्लभायै भुक्त्यै
नमोऽस्तुभवसागरतारणायैमत्यैनमोऽस्तुमधुसूदनवल्लभायै ९ लक्ष्म्यैनमोऽस्तुशुभलक्षणलक्षितायैसिद्ध्यैनमोऽस्तु
शिवसिद्धसुपूजितायै धृत्यैनमोऽस्त्वमितदुर्गतिनाशनायैगत्यैनमोऽस्तुवरसद्गतिदायिकायै १० देव्यैनमोऽस्तु
दिविदेवगणार्चितायैभूत्यैनमोऽस्तुभवनार्त्तिविनाशनायै दांत्यैनमोऽस्तुधरणीधरवल्लभायैपुष्ट्यैनमोऽस्तुपुरुषोत्तमव
ल्लभायै ११ ॐह्रींऐं सुतीव्रदारिद्र्यविदुःखहंत्र्यैनमोऽस्तुतेसंचितपापहंत्र्यै श्रीविष्णुवक्षःस्थलसंश्रितायैनमोनमः
सर्वविभूतिदायै १२ ॐऐंश्रीं जयतुजयतुलक्ष्मीर्लक्षणालंकृतांगीजयतुजयतुपद्मापद्मसद्माभिवंद्या जयतु
जयतुविद्याविष्णुवामांकसंस्थाजयतुजयतुसम्यक्सर्वसंपत्करीश्रीः १३ जयतुजयतुदेवीदेवसंघाभिवंद्याजयतु
जयतुभद्राभार्गवीभाग्यरूपा जयतुजयतुनित्यानिर्मलज्ञानवेद्याजयतुजयतुसत्यासर्वभूतांतरस्था १४ पदबी
जं ॐआंईंयंरंलंलंहं जयतुजयतुरम्यारत्नगर्भांतरस्थाजयतुजयतुशुद्धाशुद्धजाबूनदाभा जयतुजयतुकांता
कांतिसद्भासितांगीजयतुजयतुशांताशीघ्रमागच्छसौम्ये १५ ॐह्रांह्रींऐंश्रांव्यांपांनांस ॐश्रींक्लीं यस्याः
कलायाःकमलोद्भवाद्यारुद्राश्चशक्रप्रमुखाश्चदेवाः जीवंतिसर्वाअपिशक्तयस्तेप्रभुत्वमात्मापरमायुषस्ते १६ लि
लेखपटलेविधिर्ममालिपिंविसृज्यांतरे त्वयाविलिखितव्यमेतदितितत्फलावाप्तये तदंतरफलेस्फुटंकमलवासि

नींश्रीमिमां समर्पयस्वमुद्रिकांसकलसौख्यसंसूचिकां १७ तदिदंलिखितंभालेस्फुटांकमलवासिनीं श्रियंसमु
द्रजांदेहिसर्वभाग्यस्यसूचिकां १८ कलयातेययादेविजीवंतिसचराचराः तथासंपत्करीलक्ष्मीःसर्वदासंप्रसीद
मे १९ यथाविष्णुर्ध्रुवांनित्यांस्वकलांसंन्यवेशयत् तथैवस्वकलांलक्ष्मिमयिसम्यक्समर्पय २० सर्वसौख्यप्र
देदेविभक्तानामभयप्रदे अचलांकुरुयत्नेनकलामात्मनिवेशितां २१ मुदास्तांमद्भालेपरमपदलक्ष्मीःस्फुटकला
सदावैकुंठश्रीर्निवसतुकलाभिर्नयनयोः नयनबीजं ओंघ्रांघ्रींघ्रूंघ्रैंघ्रौंघ्रः वसेत्सत्येलोकेममवचसिलक्ष्मीर्वरकला
श्रियःश्वेतद्वीपेनिवसतिकलामेऽस्तुकरयोः २२ सर्वमंगलसंपूर्णासर्वैश्वर्यसमन्विता आद्याहिश्रीर्महालक्ष्मित्व
त्कलामयितिष्ठतु २३ अज्ञानतिमिरंहंतुशुद्धज्ञानंप्रकाशय सर्वैश्वर्यप्रदामेऽस्तुत्वत्कलामयिसंस्थिता २४ अलक्ष्मीं
हरतुक्षिप्रं तमःसूर्यप्रभायथा वितनोतुममश्रेयस्त्वत्कलामयिसंस्थिता २५ ऐश्वर्यमंगलोत्पत्तिस्त्वत्कलायां
निधीयते अहंतस्मात्कृतार्थोऽस्मिपात्रमस्मिस्थिराभव २६ भवदावेशभाग्यार्होभाग्यवानस्मिभार्गवि त्वत्प्रसा
दात्पवित्रोऽहंलोकमातर्नमोऽस्तुते २७ निधिबीजं ह्रांह्रींह्रूंह्रैंह्रौंह्रः पुनातुमांत्वत्कलयैवयस्मादतः समा
गच्छममाग्रतस्त्वं परंपदंश्रीर्भवसुप्रसन्नामय्यच्युतेनप्रविशाद्यलक्ष्मि २८ ओंश्रींह्रीं श्रीवैकुंठस्थितेलक्ष्मि
समागच्छममाग्रतः नारायणेनसहमांकृपादृष्ट्यावलोकय २९ सत्यलोकस्थितेलक्ष्मित्वंसमागच्छसन्निधिं वासुदेवे
नसहिताप्रसीदवरदाभव ३० श्वेतद्वीपस्थितेलक्ष्मिशीघ्रमागच्छसुव्रते विष्णुनासहितेदेविजगन्मातःप्रसीदमे ३१
क्षीरांबुधिस्थितेलक्ष्मिशीघ्रमागच्छसुव्रते विष्णुनासहितेदेविजगन्मातःप्रसीदमे ३२ क्षारांबुधिस्थितेलक्ष्मिस
मागच्छसमाधवे त्वंकृपादृष्टिसुधयासंततंमाविलोकय ३३ रत्नगर्भस्थितेलक्ष्मिपरिपूर्णहिरण्मये समागच्छसमा
गच्छस्थित्वाशुपुरतोमम ३४ स्थिराभवमहालक्ष्मिनिश्चलाभवनिर्मले प्रसन्नकमलेदेविप्रसीदवरदाभव ३५

श्रीधरेश्रीर्महाभूमेत्वदंतःस्थंमहानिधिं शीघ्रमुद्धृत्यपुरतःप्रदर्शयसमर्पय ३६ वसुंधरेश्रीवसुधेवसुदोग्ध्रि
कृपामये त्वत्कुक्षिगतसर्वस्वंशीघ्रंमेसंप्रदर्शय ३७ विष्णुप्रियेरत्नगर्भेसमस्तफलदेशिवे त्वद्गर्भगतहेमादीन्सं
प्रदर्शयदर्शय ३८ आविर्भवमनोवेगे शीघ्रमागच्छमेपुरः मावत्सभैरिहेत्युक्त्वाकामगौरिवरक्षमां ३९
देविशीघ्रंसमागच्छधरणीगर्भसंस्थिते मातस्त्वद्भृत्यभृत्योऽहंमृगयेत्वांकुतूहलात् ४० उत्तिष्ठजागृहित्वंमे
समुत्तिष्ठस्वजागृहि अक्षयान्हेमकलशान्सुवर्णेनसुपूरितान् ४१ निक्षेपान्मेसमाकृष्यसमुद्धृत्यममाग्रतः स
मुन्नताननाभूत्वासम्यग्देहिधरांतरात् मत्सन्निधिंसमागच्छमदाहितकृपावशात् प्रसीदश्रेयसांदोग्ध्रिलक्ष्मिमे
नयनाग्रतः ४२ अत्रोपविश्यलक्ष्मीस्त्वंस्थिराभवहिरण्मये सुस्थिराभवसुप्रीताप्रसन्नवरदाभव ४३ समानीतां
स्त्वयादेविनिधीन्मेसंप्रदर्शय अद्यक्षणेनसहसादत्त्वासंरक्षमांसदा ४४ मयितिष्ठतथानित्यंयथेंद्रादिषुतिष्ठसि अ
भयंकुरुमेलक्ष्मिमहालक्ष्मिनमोऽस्तुते ४५ समागच्छमहालक्ष्मिशुद्धजांबूनदस्थिते प्रसीदपुरतःस्थित्वाप्रणतं
मांविलोकय ४६ लक्ष्मिभुव्यंगमाभासियत्रयत्रहिरण्मयी तत्रस्थितात्वंमेदेविस्वरूपंसंप्रदर्शय ४७ क्रीडंति
बहुधाभूमौपरिपूर्णकृपामये मममूर्धनितेहस्तमविलंबितमर्पय ४८ फलभाग्योदयेलक्ष्मिसमस्तपुरवासिनि
प्रसीदमेमहालक्ष्मिपरिपूर्णमनोरथे ४९ अयोध्यादिषुसर्वेषुनगरेषुसमास्थिते वैभवैर्विविधैर्युक्तासमागच्छमु
दान्विता ५० समागच्छसमागच्छममाग्रेभवसुस्थिरा करुणारसनिष्पंदनेत्रद्वयविलासिनि ५१ सन्निधत्स्व
महालक्ष्मित्वत्पाणिंमममस्तके करुणासुधयामांत्वमभिषिंचस्थिरंकुरु ५२ सर्वराजगृहाल्लक्ष्मिसमागच्छबला
न्विते स्थित्वाशुपुरतोमेऽद्यप्रसादेनाभयंकुरु ५३ सादरंमस्तकेहस्तंममत्वंकृपयार्पय सर्वराजगृहाल्लक्ष्मित्व
त्कलामयितिष्ठतु ५४ आद्यादिश्रीमहालक्ष्मिविष्णुवामांकसंस्थिते प्रत्यक्षंकुरुमेरूपंरक्षमांशरणागतम् ५५ प्र

सीदमेमहालक्ष्मिसुप्रसीदमहाशिवे अचलाभवसुप्रीत्यासुस्थिराभवमद्गृहे ५६ यावत्तिष्ठंतिवेदाश्चयावत्त्वन्ना
मतिष्ठति यावद्विष्णुश्चयावत्त्वंतावत्कुरुकृपांमयि ५७ चांद्रीकलायथाशुक्लेवर्धतेसादिनेदिने तथातवदयानि
त्यंवर्द्धतांमयिवर्द्धताम् ५८ यथावैकुंठनगरेयथावैक्षीरसागरे तथामद्भवनेतिष्ठस्थिराश्रीविष्णुनासह ५९ योगि
नांहृदयेनित्यंयथातिष्ठसिविष्णुना तथामद्भवनेतिष्ठस्थिराश्रीविष्णुनासह ६० नारायणस्यहृदयेभवतीयथा
स्तेनारायणोपितवहृत्कमलेयथास्ते नारायणस्त्वमपिनित्यमसौतथातौसंतिष्ठतांहृदिममापिदयावतिश्रीः ६१
ॐश्रींऐंक्लीं विज्ञानवृद्धिंहृदयेकुरुश्रीःसौभाग्यवृद्धिंकुरुमेगृहेश्रीः दयासुवृद्धिंकुरुतांमयिश्रीः सुवर्णवृद्धिंकुरु
मेकरेश्रीः ६२ नमांत्यजेथाःश्रितकल्पवल्लिसद्भक्तचिंतामणिकामधेनो विश्वस्यमातर्भवसुप्रसन्नागृहेकलत्रेऽपि
चपुत्रवर्गे ६३ कुक्षिबीजं ॐआंईंऊंऐंऔंअः आद्यादिमायेत्वमजांडबीजंत्वमेवसाकारनिराकृतिस्त्वं त्वयाधृता
श्चाजभवांडसंघाश्चित्रंचरित्रंतवदेविविष्णोः ६४ ब्रह्मरुद्रादयोदेवावेदाश्चापिनशक्नुयुः महिमानंतवस्तोतुंमंदोऽहं
शक्नुयांकथम् ६५ अंबत्वद्वत्सवाक्यानिसूक्तासूक्तानियानिच तानिस्वीकुरुसर्वज्ञेदयालुत्वेनसर्वशः ६६ भवतींश
रणंगत्वाकृतार्थाश्चपुरातनाः इतिसंचिंत्यसंचिंत्यत्वामहंशरणंव्रजे ६७ अनंतानित्यसुखिनस्त्वद्भक्तास्त्वत्परायणाः
इतिवेदेप्रसादार्थंदेवित्वांशरणंभजे ६८ तवप्रतिज्ञामद्भक्तानानश्यंतीत्यपिक्वचित् इतिसंचिंत्यमनसाप्राणान्संधा
रयाम्यहम् त्वदधीनस्त्वहंमातस्त्वत्कृपामयिविद्यते यावत्संपूर्णकामस्स्यांतावद्देहिदयानिधे ६९ क्षणमात्रंनश
क्नोमिजीवितुंत्वत्कृपांविना नजीवंतीहजलजाजलंत्यक्त्वाजलग्रहाः ७० पिताहिपुत्रवात्सल्याज्जननीप्रस्नुतस्त
नी वत्संत्वरितमागत्यसंप्रीणयतिवत्सला ७१ यदिस्यांतवपुत्रोऽहंमातात्वंयदिमामिकी दयापयोधरस्तन्यसुधाभि
रभिषिंचमाम् ७२ मृग्योनगुणलेशोपिमयिदोषैकमंदिरे पांसूनांवृष्टिबिंदूनांदोषाणांचनमेमितिः ७३ पापिनामह

मेवाग्र्यौदयालूनांत्वमग्रणीः दयनीयोमदन्योऽस्तितवकोऽत्रजगत्त्रये ७४ विधिनाऽहंनसृष्टश्चेन्नस्यात्तवदयालुता
आमयोवानसृष्टश्चेदौषधस्यवृथोदयः ७५ कृपामदग्रजाकिंतेअहंकिंवातदग्रजः विचार्य्यदेहिमेवित्तंतव
देविदयाधनम् ७६ मातापितात्वंगुरुसद्गतिःश्रीस्त्वमेवसंजीवनहेतुभूता अनन्यमन्येजगदेकनाथेत्वमेवसर्वंमम
देविसत्यम् ७७ हृदयबीजं ॐआंअंहः फट्कुरुस्वाहा आद्यादिलक्ष्मीर्भवसुप्रसन्नाविशुद्धविज्ञानसुखैकदोग्ध्री अज्ञा
नहंत्रीत्रिगुणातिरिक्ताप्रवालनेत्रेभवसुप्रसन्ना ७८ अशेषवाग्जाड्यमलापहारिणीनवंनवंस्पष्टसुवाक्यदायिनी
ममेहजिव्हाग्रसुरंगनर्त्तकीभवप्रसन्नावदनेचमेश्रीः ७९ समस्तसंपत्सुविराजमानासमस्ततेजःसुविभासमाना
विष्णुप्रियेत्वंभवदीप्यमानावाग्देवतेमेभवसुप्रसन्ना ८० सर्वप्रदेत्वंसफलार्थदेत्वंप्रभासुलावण्यफलासुदोग्ध्री
सुवर्णदेत्वंसुमुखीभवश्रीर्हिरण्मयीमेनयनेप्रसन्ना ८१ समस्तविघ्नौघविनाशकारिणीसमस्तभक्तोद्धरणेविचक्षणा
अनंतसौभाग्यसुखप्रदायिनीहिरण्मयीमेनयनेप्रसन्ना ८२ देविप्रसीददयनीयतमायमह्यंदेवाधिनाथभवदेवगणा
भिवंद्ये मातस्तथैवभवसन्निहितादृशोर्मेपत्यासमंममसुखेभवसुप्रसन्ना ८३ मावत्समैरभयदानकरोऽर्पि
तस्तेमौलौममेतिमयिदीनदयानुकंपे मातःसमर्पयमुदाकरुणाकटाक्षंमांगल्यवीजमहिमानमजस्यमातः ८४
ॐश्रांश्रींश्रूंश्रैंश्रौंश्रः कटाक्षइहकामधुक्त्वमतस्तुचिंतामणिः करः सुरतरुः सदानवनिधिस्त्वमेवेंदिरे भवेत्तव
दयारसोरसरसायनंचान्वहं मुखंतवकलानिधिर्विविधवांछितार्थप्रदम् ८५ यथारसस्पर्शनतोयसंगात्सुवर्णता
स्यात्कमलेतथाते कटाक्षसंस्पर्शनतोजनानाममंगलानामपिमंगलत्वम् ८६ देहीतिनास्तीतिवचः प्रवेशाद्भीतोर
मेत्वांशरणंप्रपद्ये अहंतुदासोऽस्म्यभयप्रदात्वंसहैवपत्यामयिसन्निधेहि ८७ कल्पद्रुमेणमणिनासहितासुरभ्या
श्रीस्तेकलामयिरसेनरसायनेन आस्तांयतोममचहृत्करपाणिपादाःस्पृष्टाःसुवर्णवपुषःस्थिरजंगमाःस्युः ८८

आद्यादिविष्णोः स्थिरधर्मपत्नीत्वमेवपत्यामयिसन्निधत्स्व आद्यादिलक्ष्मीस्त्वदनुग्रहेणपदेपदेमेनिधिदर्शनंस्यात्
८९ आद्यादिलक्ष्मीहृदयंपठेद्यः सराज्यलक्ष्मीमचलांतनोति महाद्दरिद्रोपिभवेद्धनाढ्यस्तदन्वयेश्रीः स्थिरतां
प्रयाति ९० यस्यस्मरणमात्रेणतुष्टास्याद्विष्णुवल्लभा तस्याभीष्टंददात्याशुतंपालयतिपुत्रवत् ९१ इदंरहस्यहृद
यंसर्वकामफलप्रदं जपेत्पंचसहस्रंतुपुरश्चरणमुच्यते ९२ त्रिकालमेककालंवानरोभक्तिसमन्वितः यःपठेच्छृणु
याद्वापिसयातिपरमांश्रियम् ९३महालक्ष्मींसमुद्दिश्यनिशिभार्गववासरे इदंश्रीहृदयंजप्त्वापंचवारंधनीभवेत् ९४
अनेनहृदयेनान्नंगर्भिण्याअभिमंत्रितं ददातितत्कुलेपुत्रोजायतेश्रीपतिःस्वयं ९५ नरेणवाथनार्यावालक्ष्मी
हृदयमंत्रिते जलेचपीतेतद्वंशेमंदभाग्योनजायते ९६ यआश्विनेमासिचशुक्लपक्षेरमोत्सवेसन्निहितैकभक्त्या
पठेत्तथैकोत्तरवारवृद्ध्यालभेतसौवर्णमयींसवृष्टिम् ९७यएकभक्तोऽन्वहमेकवर्षंपठेत्भक्त्यायत चित्तवृत्तिः समंदभा
ग्योऽपिरमाकटाक्षाद्भवेत्सहस्राक्षशताधिकश्रीः ९८ श्रीशांघ्रिभक्तिंहरिदासदास्यंप्रपन्नमंत्रार्थइहैकनिष्ठं गुरोः
स्मृतिंनिर्मलबोधवृद्धिंप्रदेहिमेत्वंपरमंपदंश्रीः ९९ पृथ्वीपतित्वंपुरुषोत्तमत्वंविभूतिवासंविविधार्थसिद्धिं वयःस्थि
रत्वंललनासुभोग्यंपुत्रादिलब्धिंसकलार्थसिद्धिम् १०० सुवर्णवृद्धिंकुरुमेगृहेश्रीः सुधान्यवृद्धिंकुरुमेगृहे श्रीः कल्या
णवृद्धिंकुरुमेगृहेश्रीर्विभूतिवृद्धिंकुरुमेगृहेश्रीः १०१ ध्यायेल्लक्ष्मींप्रहसितमुखींकोटिबालार्कभासां विद्युद्वर्णांबरवर
धरांभूषणाढ्यांसुशोभां बीजापूरंसरसिजयुगंबिभ्रतींस्वर्णपात्रं भर्त्रायुक्तांमुहुरभयदांमह्यमप्यच्युतश्रीः १०२

इत्यथर्वणरहस्योक्तंलक्ष्मीहृदयंसंपूर्णम्

ॐनमोनारायणाय ॐश्रीमन्नारायणोज्योतिरात्मानारायणःपरः नारायणः परंब्रह्मनारायणनमोऽस्तुते १
नारायणःपरोध्याताध्याननंनारायणःपरं नारायणःपरोध्येयोनारायणनमोऽस्तुते २ नारायणःपरोज्ञाताज्ञानं

नारायणःपरं नारायणःपरंधामनारायणनमोऽस्तुते ६ नारायणःपरोवेदोविद्यानारायणःपरा विश्वंनारायणः
साक्षान्नारायणनमोऽस्तुते ४ नारायणाद्विधिर्जातोजातोनारायणाच्छिवः जातोनारायणादिंद्रोनारायणनमोऽस्तुते
५ जातंनारायणात्तेजश्चंद्रोनारायणोमहान् वन्हिर्नारायणःसाक्षान्नारायणनमोऽस्तुते ६ नारायणोह्युपास्यः
स्याद्गुरुर्नारायणःपरः नारायणः परोबोधोनारायणनमोऽस्तुते ७ नारायणःफलंमुख्यंसिद्धिर्नारायणःसुखं
सर्वंनारायणःशुद्धोनारायणनमोऽस्तुते ८ इतिश्लोकाष्टकंचाथप्रार्थनादशकंशृणु नारायणत्वमेवासिदहराख्यंहृदि
स्थितः प्रेरकःप्रार्थमानानांत्वयाप्रेरितवानहम् ९ त्वदाज्ञांशिरसाधृत्वानमामिजनपावनम् नानोपासनमार्गेणत्वं
वैहृदयबोधकः १० भावार्थहृद्भावहितोभवसौख्यप्रदोमम त्वन्मायामोहितंविश्वंत्वयैवपरिकल्पितम् ११ त्वदधि
ष्ठानमात्रेणमायासर्वार्थकारिणी त्वमेवतांपुरस्कृत्यममकामान्समर्पय १२ नमेत्वदन्यस्त्राताऽस्तित्वदन्यंनहिदै
वतं त्वदन्यंनहिजानामिपालकंपुण्यवर्धकम् १३ तावत्सांसारिकोभावोमानसेभावनात्मके यावत्सिद्धिर्भवेन्नैवसर्व
थासर्वदाप्रभो १४ पापिनामहमेकोग्र्योदयालूनांत्वमग्रणीः दयनीयोमदन्योस्तितवकोऽत्रजगत्त्रये १५ त्वया
प्यहंनसृष्टश्चेन्नस्यात्तवदयालुता ममोपरिस्वसृष्टस्यदयातेकिंनजायते १६ पापेनसंपरिक्रांतःपापात्मापापरूपधृक
त्वदन्यःकोऽत्रपापेभ्यस्त्रातामेजगतीतले १७ त्वमेवमाताचपितात्वमेवत्वमेवबंधुश्चसखात्वमेव त्वमेवविद्याद्रविणं
त्वमेवत्वमेवसर्वंममदेवदेव १८ प्रार्थनादशकंचैवमूलाष्टकमिदंद्वयं यःपठेच्छृणुयान्नित्यंतस्यलक्ष्मीःस्थिराभवेत्
नारायणस्यहृदयंसर्वाभीष्टफलप्रदं लक्ष्मीहृदयसंवासंविष्णुसायुज्यदंनृणाम् १९

इतिश्रीनारायणहृदयंसमाप्तम्

अथलक्ष्मीसूक्तपूजाविधानंविचार्यते तत्राष्टदिनंयावत्प्रत्यहंत्रिसप्तत्यावृत्तिःसूक्तस्यकार्याऽनंतरंदिनत्रयेद्वि

सप्तत्यावृत्तिः प्रत्यहंकार्या तेनद्वादशसाहस्रमृचामावृत्तिर्भवतीति श्रीसामिद्भिर्बिल्वसामिद्भिर्होमःकार्यः तथा कुंदमंदारकुमुदमालतीपद्मकेसरं नंद्यावर्ताकयंजातीकल्हारंचंपकंतथा रक्तोत्पलादिपुष्पाणिलक्ष्म्याश्चातिप्रियाणिवै स्नानकालेऽर्चनेसूक्तैरभिषिंचेत्त्रिभिःसुधीः यावज्जपेद्द्रविमुखस्तर्पयेत्तावदेवहि पूर्वोक्तविधिनासम्यक्पूजयेत्परमेश्वरीं त्रिवारंप्रत्यहंमंत्रीजुहुयाच्चयथाविधि षण्मासंयःकरोत्येवंसाक्षाल्लक्ष्मीपतिःस्वयं विकचन्मात्रएवार्केनवनीतंप्रविन्यसेत् मध्येसकेसरेपद्मेसम्यक्पत्रांतरालके सुसमिद्धेऽनलेतच्चसमुद्धृत्यहुनेत्सुधीः अभ्यर्च्याष्टोत्तरशतंजपश्चभृगुवासरे चत्वारिंशद्भिरस्यस्यान्महालक्ष्मीरचंचला तुरीयर्चाचजुहुयादेतेनैकादशाहुतीः एवंकुर्वतएवास्यपक्षमासान्महदिंदिरा प्रधानतर्पणांतेचसंतर्प्याः शक्तयस्त्विमाः प्रणवाद्याहृदंताश्चश्रीलक्ष्मीपरदायिकाः विष्णुपत्नीचवसुधारूपास्यापिहिरण्यतः स्वर्णमालिन्यपिपरानूतनारजतस्रजा सुवर्णाढ्यगृहास्वर्णप्राकारापद्मवासिनी पद्महस्ताप्रियामुक्तालंकारासूर्यकापरा चंद्राविश्वप्रियेश्वर्यौमुक्तिश्चापितुभुक्तियुक् विभूर्ऋद्धिःसमृद्धिश्चतुष्टिःपुष्टिर्धनार्थदा भुवनेशीचशुद्धास्याद्योगिनीभोगदामता धात्रीविधात्रीद्वात्रिंशत्शक्तयःसमुदीरिताः द्वात्रिंशद्भिश्चपूजांतेमंत्रीमंत्रैर्बलिंहरेत् मंत्रैर्नाममंत्रैर्वैयथाश्रीरेषतेबलिर्नमइत्यादि श्रीःमंत्रजापिनांकेचिदुच्यंतेनियमाइह तैलाभ्यक्तश्चनाश्नीयान्नग्नस्तोयेनसंविशेत् अशुचिर्नस्वपेत्क्वापिद्राभ्यांस्यादशुचिर्भवेत् लवणंतिलसंभूतंनाश्नीयात्केवलंसुधीः लिंपेद्दरिद्रांनोवक्रेनानृतंप्रवदेत्क्वचित् कदाचिन्मालिनोनस्याद्भुवंनैवालिखेद्वृथा श्रीफलांबुजसद्द्रोणान्नमूर्द्धनिचधारयेत् तथाचनिर्मलाचारःशुक्लःशुद्धमनाभवेत् शुद्धमाल्यानुलेपश्चशुद्धाभरणभूषितः श्वेतवस्त्रपरीधानःशुद्धदेहःस्वलंकृतः उत्कृष्टगंधानुलेपःशुद्धदंतश्चसन्नखः विष्णुभक्तश्चविमलोनभ्यसूयोभवेत्सुधीः निंदितान्वयसंभूतांदुष्टांचकलहप्रियाम् दुष्टायोनिमनिष्टांचरोगग्रहनिवेशितां

अन्यासक्तामशुद्धांचकृशांगींसुदृढत्तनुं अतिह्रस्वातिदीर्घांचविरसांभोगलोलुपां अन्यांपुरुषलोलांचकाकाक्षीं राजयोषितं रजस्वलामेकवारंयोषितंनस्पृशेदपि शांतस्मितःशुचिर्वाग्मीमधुरालापवान्भवेत् दयार्द्रचित्तआचार्यदेवातिथ्यर्चनारतः गुर्वग्निपूजानिरतःपुण्यशीलोदृढव्रतः नित्यस्नायीपश्चिमाशामुखाशीशीलवान्भवेत् वर्णाश्रमरतःस्वीयदारतुष्टोऽल्पभाषणः एतादृशैश्चनियमैर्युक्तोलक्ष्मींलभेतसः नारायणीये नाजिघ्रेन्नाक्रमेद्धान्यंतद्बीजंनचभक्षयेत् नस्यान्मलिष्ठोनोछिंद्याद्बिल्वंभूमौशयीतन लवणामलकेवर्ज्ये नागादित्यतिथौक्रनात् नागादित्यातिथीपंचमीसप्तम्यौ पंचम्यामुत्तरेस्त्रीचवर्ज्याप्रत्यङ्मुखोऽशने विल्वैर्नार्जयेद्दंतांस्त्रिसंध्यंप्रणमेच्चतान् प्रातर्भक्ष्यास्तिलास्तेचधात्र्यांलक्ष्मीश्चभक्षयेत् धारयेन्मूर्ध्निनोपुष्पमुत्तरेमधुरान्नभुक् पायसंविल्ववीजंचभक्षयेच्छुक्लपर्वणि शुक्लपर्वणिपूर्णिमायां शारदातिलके शयीतशुद्धशय्यायांतरुण्यासहनान्यथा मलिनोनभवेज्जातुकुत्सितान्नंनभक्षयेत् द्रोणपंकजबिल्वानिरथ्यांजातुनलंघयेत् सहदेवींमित्रवल्लींश्रीदेवींविष्णुवल्लभां कन्यांजंबूत्रवालंचधारयेन्मूर्ध्निसर्वदा श्रीदेवीश्रीललिता विष्णुवल्लभाअपराजिता कन्याकुमारी प्रयोगसारे धान्यगोगुरुहुताशनराणांनस्वपेदुपरिनाप्यनुवंशं नोत्तरापराशिरानचनग्नोनार्द्रपाणिचरणः श्रियमिच्छन् अथयंत्रोद्धारः यंत्रसारे श्रीबीजंसाध्यसंयुक्तंकर्णिकायांसमालिखेत् वस्वादित्यद्व्यष्टसंख्यापत्रेष्वपियथाक्रमं श्रीसूक्तस्यपंचदशमर्द्धमृचामालिख्यतद्बहिः यःशुचिःप्रयतोभूत्वेत्यृचामातृकयापिच संवेष्ट्यधराबिंबंकोणेषुश्रियमालिखेत् श्रीसूक्तयंत्रमेतत्तुधारयेद्योयथाविधिः पुत्रारोग्यधराधान्यधनगोसस्यशालिनीं लब्ध्वातिबहुलांलक्ष्मींजीवेच्चशरदांशतं इदमेवताम्रपट्टेविलिख्यजप्त्वाचसिक्तसंपातं संस्थाप्यांगणभूमौलक्ष्मीमावाह्य साधुसंपूज्य भूयःपरिवारयुतांबलिंहरेद्भूतबलिंसमीकृत्य यस्मिन्नेवह्नियतेवर्द्धतेतस्यसंपद्भैः पुत्रैर्दारैरिष्टैर्वि

भवैर्भृत्यैश्चधान्यैश्च नागैरथैस्तुरंगैर्वृषभैर्गोभिश्चसंख्ययाहीनैः रमयंतीगेहेऽस्मिन्विहरत्याभूतसंप्लवंलक्ष्मीः अस्यार्थः अष्टदलकमलंकृत्वातत्कर्णिकायांश्रीबीजं साध्यसहितंविलिख्याष्टदले हिरण्यवर्णामित्यादिनारभ्य तामिहोपह्वयेश्रियमित्यंतमृचामर्द्धमालिख्य तद्बहिर्द्वादशदलकमलं कृत्वा तद्दलेषु स्वाग्रादिप्रादक्षिण्येन चंद्रांप्रभासामित्यारभ्यमयिश्रीःश्रयतांयशइत्यंतमृचामर्द्धमालिख्य तद्बहिःषोडशदलान्वितेषु कर्दमेनप्रजाभूतेत्यादिऋक्त्रयस्यार्द्धमर्द्धं गौरीमिमाय ११ द्विपदी १२ अष्टापदी १३ सहस्राक्षरा १४ प्रणोदेवी १५ धीनामवित्र्यवतु १६ तद्बहिर्वृत्तत्रयंकृत्वातत्राभ्यंतरवीथ्यां यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं श्रियःपंचदशर्चंचश्रीकामःसततंजपेत् इतिऋचा संवेष्ट्य बहिर्वीथ्यांमातृकयासंवेष्ट्य तद्बहिश्चतुरस्रंविलिख्य तत्कोणेषु श्रीबीजमालिखेत् एतद्यंत्रमुक्तफलदंभवति अथाश्विननवरात्रे वेदोक्तप्रकारेणमहालक्ष्मीपूजनमुच्यते तत्र ब्राह्मेमुहूर्त्तेउत्थाय स्वगुरुस्मरणकुंडलिनीस्मरणादिप्रातःकृत्यादिकंकृत्वा दंतधावनस्नानसंध्यानित्यतर्पणादिच कृत्वा पूजास्थानमागत्यदिग्बंधनादिपूर्वकभूतशुद्धिप्राणप्रतिष्ठादियोगपीठांतंकृत्वा मूलेनप्राणायामंकृत्वा गणपतिकुलदेवतादिस्मरणांतं ब्राह्मणादीन्नमस्कृत्य ॐसुमुखश्चैकदंतश्च शुक्लांबरधरंविष्णुं अभीप्सितार्थसंसिद्ध्यै यत्रयोगेश्वरःकृष्णो अनन्याश्चिंतयंतोमां स्मृतेःसकलकल्याणभाजनं सर्वेष्वारंभकार्येषुनास्तितेषाममंगलं येषांहृदिहरिः तदेवलग्नंसुदिनंतदेवताराबलंचंद्रबलंतदेव विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेंघ्रियुगस्मरामि इतिमंगलाचरणं अथास्मिन्मासि श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीतिपूर्वकदुरितनिवारणक्षेमायुरारोग्यैश्वर्यादिवृद्धिकामः प्रतिपदमारभ्य नवमीपर्यंतमिष्टदेवतास्वरूपिण्याः श्रीमहालक्ष्म्याः शोडशोपचारपूजां श्रीसूक्तचंडीपाठानां यथोक्तसंख्यायास्तद्दशांशहोमादिकृत्यंकरिष्येइतिसंकल्प्य तत्रनिर्विघ्न

तार्थंगणपतिपूजनंकरिष्ये ततोरक्ताक्षतादिभिर्भूमावष्टदलपीठे महागणपतये सिद्धिबुद्धिसहित सवाहन सायुध सपरिवारएह्येह्यागच्छागच्छ हेरंबत्वमभ्येहिअंबिकात्र्यंबकात्मज सिद्धिबुद्धिपतेत्र्यक्षलक्षलाभपितःपितः नागास्यनागहारत्वंगणराजचतुर्भुज भूषितःस्वायुधैर्दिव्यैःपाशांकुशपरश्वधैः आवाहयेत्वांपूजार्थंरक्षार्थंचममप्रभो इहागत्यगृहाणत्वंपूजांकर्त्तुंचरक्षमे आवाह्यैवंगणेशानंपूजाद्रव्यैःप्रपूजयेत् गणानांत्वागणपतिꣳ प्रियाणांत्वा० निधीनांत्वा० वसोममआह० गणानांत्वागणपतिंत्वाहवामहे कविंकवीनाम्० आवाहनं स्वागतं पाद्यं अर्घ्यं आचमनीयं मधुपर्कंपुनराचमनीय स्नानवस्त्राभरणानि गंधपुष्प धूपदीपनैवेद्य तांबूल दक्षिणानमस्कारान् विधाय हस्तद्वयेन नारिकेलाद्यर्घ्यपात्रस्थजलंसपुष्पं गृहीत्वोत्थाय प्रार्थयेत् रक्षरक्षगणाध्यक्षत्र्यक्षत्रैलोक्यरक्षक भक्तानामभयंकृत्वात्राताभवभवार्णवात् द्वैमातुरकृपासिंधोषाण्मातुराग्रजप्रभो वरदत्वंवरंदेहिवांछितंवांछितार्थद अनेनफलदानेनफलदोऽस्तुभवान्मम इतिफलं दत्त्वा प्रार्थयेत् विश्वेश्वराय वरदायसुधिप्रियाय लंबोदरायसकलायजगद्धिताय नागाननायश्रुतियज्ञविभूषितायगौरीसुतायगणनाथनमो नमस्ते भक्तार्त्तिनाशनपरायगणेश्वरायसर्वेश्वरायशुभदायसुरेश्वराय विद्याधरायविकटायचवामनायभक्तप्रसन्नवदनायनमोनमस्ते नमस्तेब्रह्मरूपायविष्णुरूपायतेनमः विश्वरूपस्वरूपायनमस्तेब्रह्मचारिणे भाक्तिप्रियायदेवायनमस्तुभ्यंविनायक इतिनमस्कृत्य त्वांशत्रुवर्गदलनेतिवसुप्रदेतिभक्तप्रियेतिसुखदेतिबलप्रदेति विद्याप्रदेत्यघहरेतिचयेस्तुवंति तेभ्योगणेशवरदोभवनित्यमेव इतिस्तुत्वा प्रणमेत् ततऋत्विग्वरणादियवाशेषंच विधाय कलशस्थापनं महीद्यौ० भूमिस्पर्शः स्योनापृथिवि० भूमिप्रार्थना ओषधयः संवदंतीतियवान्प्रक्षिप्य कलशंनिधाय वरुणस्योत्तंभनमसीतिजलप्रक्षेपः ओषधयः संवदंते इतिसर्वौषधिप्र०

स्योनापृथिवीतिसप्तमृदः अश्वत्थेवोनिषदनमिति पंचपल्लवाः कांडात्कांडात्प्ररोहंतीति दूर्वा याःफालिनीर्याअफलाइतिफलंक्षिप्त्वा परिवाजपतीतिपंचरत्नप्रक्षेपः हिरण्यगर्भः समवर्त्तताग्रेइतिदक्षिणाद्रव्यं युवासुवासाइतिवस्त्रेणाच्छाद्य रक्तवस्त्रेणसूत्रेणचवेष्टनं तत्वायामिब्रह्मणाब्रह्म इतिवरुणावाहनं ब्रह्मांडोदरतीर्थानिकरैःस्पृष्टानितेरवे क्रोमित्यंकुशमुद्रया तीर्थान्यावाह्य गंगेचयमुनेचैव. सर्वैसमुद्राः सरितइत्यावाह्यचंदनादिभिःकलशमलंकृत्य कलसस्यमुखेविष्णु- त्वत्प्रसादादिमं यज्ञं सान्निध्यं. प्रसन्नोभवसर्वदा इतिकलशस्थापनं ततोमूलेनप्राणायामत्रयंकृत्वा श्रीसूक्तन्यासंकुर्यात् अस्यश्रीसूक्तस्यानंदकर्दमचिक्लीतश्रीपुत्रेभ्यऋषिभ्योनमःशिरसिमुखेअनुष्टुप्बृहतीत्रिष्टुप्प्रस्तारपंक्तिच्छंदोभ्योनमो हृदि श्रीविभावसुदेवताभ्यांनमः ममसकुटुंबस्यायुरारोग्यैश्वर्याभिवृद्धयेविनियोगः इतिकृतांजलिरुक्त्वा हिरण्यायैनमः हृदयायनमः चंद्रायैनमःशिरसेस्वाहा रजतस्रजायैशिखायैवषट् हिरण्यस्रजायैकवचायहुं हिरण्मयायैनमोनेत्रत्रयायवौषट् हिरण्यायैनमोऽस्त्रायफट् एवंकरांगुलिन्यासोऽपि ।शिरसिहिरण्यवर्णां १ नेत्रयोःताम्मआवह २ कर्णयोःअश्वपूर्णां ३ नासिकायांकांसोस्मितां ४ मुखेचंद्रांप्रभासां ५ गलेआदित्यवर्णां ६ वाव्होःउपैतुमां ७ हृदिक्षुत्पिपासां ८ नाभौगंधद्वारां ९ गुह्येमनसःकामं १० गुदेकर्दमेन ११ ऊर्वोःआपस्रजंतु १२ जान्वोःआर्द्रांसूर्यां १३ जंघयोःआर्द्रांचंद्रां १४ पादयोःताम्मआवह १५ श्रांश्रींश्रूंश्रैंश्रौंश्रः इत्येवंषडंगानिविन्यस्य प्रागुक्तरीत्योर्ध्वकमलेदेवींध्यायेत् अरुणकमलसंस्थातद्रजःपुंजवर्णाकरकमलधृतेष्टाभीतियुग्मांबुजाच मणिमुकुटविचित्रालंकृतापद्मजालैर्भवतुभुवनमातासर्वदाश्रीःश्रियेनःइतिध्यात्वामानसोपचारैराराध्याऽर्घ्यादिस्थापनांते ॐह्रींश्रींहंसःसोहंस्वाहाइतिमंत्रेणत्मपूजांविधायपीठपूजामारभेत ॐमंडूकायनमः कालाग्निरुद्रायनमः मूलप्रकृत्यैनमः आधारशक्त्यै-कूर्माय-अनंताय

वराहायपृथिव्यै. सुधासमुद्राय. श्वेतद्वीपाय. स्वर्णपर्वताय-नंदनोद्यानायकल्पवृक्षवनायस्वर्णप्राकाराय. करुणामयपरिखायै. स्वर्णमंडपाय. पूर्वद्वारश्रियै-इंद्राय ब्रह्मणे-सत्त्वाय ऋग्वेदाय. आत्मनेकालतत्त्वाय-अंबिकायैइंद्राण्यै वेदमात्रे-शैलपुत्र्यै. ब्रह्मचारिण्यै. चंडघंटायै. कूष्मांडायै- कात्यायन्यै-कालरात्र्यै. महागौर्यै १ ततोदक्षिणद्वारे द्वारश्रियैनमः क्षमाय शांत्यै सिद्धायै क्षमायै विष्णवे यजुर्वेदाय रजसे विद्यातत्त्वाय जगन्मात्रे मायायै शिवायै शांत्यै ह्रींकारायै ह्लींकारायै मायाशक्त्यै वीरायै प्रवीरायै अनंतरात्मने दंडधराय २ ततःपश्चिमद्वारे द्वारश्रियै वरुणाय रुद्राय सामवेदाय आदित्याय वारुण्यै शंखायुधायै. हंसवाहिन्यै जगज्जीवायै जगद्बीजायै शोडशकलायै पूर्णकलशाय चित्रिण्यै चित्रमालायै चित्रायै चामुंडायै ३ ततउत्तरद्वारे द्वारश्रियै कपालहारिण्यै भक्तवत्सलायै हुंकारायै क्षांकारायै विमलरूपायै ईशानाय पार्वत्यै ब्रह्मणे अथर्वणवेदाय धात्रे ज्योत्स्नायै कल्याण्यै शर्वाण्यै चंद्रकलायै चंद्रवदनायै विभूत्यै परविभूत्यै भस्मधारिण्यै पावनायै गंगायै भागीरथ्यै गोदावर्य्यै प्रवरायै प्रणतायै ह्लींकारायै क्लींकारायै क्रौंकारायै सर्वबीजात्मने बीजप्रवाहिन्यै ४ मध्येरत्नवेदिकायै रत्नसिंहासनाय धर्माय. ज्ञानाय- वैराग्याय. ऐश्वर्याय- अधर्मायअज्ञानाय- अवैराग्याय. अनैश्वर्य्याय- श्वेतच्छत्राय. चिच्छक्त्यै. मायाशक्त्यै- आनंदपाराय. संवित्तालाय. प्रकृतिमयपत्रेभ्यो-विकृतिमयकेसरेभ्यो. पंचाशद्वर्णबीजायै. सर्वतत्त्वरूपायै. कर्णिकायै- अंअर्कमंडलाय. वंवन्हिमंडलाय- संसोममंडलाय. संसत्त्वाय. रंरजसे-तंतमसे. आंआत्मने- अंअंतरात्मने. पंपरमात्मने- ह्रींज्ञानात्मने. आत्मतत्त्वाय. मायातत्त्वाय विद्यातत्त्वाय कलातत्त्वाय परतत्त्वाय इतिसंपूज्य केसरेषु पूर्वाद्यष्टदिक्षुमध्येच ॐभूत्यै. उन्नत्यै. कांत्यै- धृत्यै कीर्त्यै- सन्नत्यैऽव्यापृत्यै- उत्कृष्टै. मत्यै. ऋद्ध्यैनमः इतिसंपूज्य ॐश्रीसर्वशक्तिकमलासनायनमइतिसमस्त

पीठंसंपूज्य मूलमुच्चार्य्य श्रीलक्ष्मीमूर्त्तिंपरिकल्पयामिनमइतिकलशोपरिमूर्त्तिंपरिकल्प्य घंटाब्जमकरांलक्ष्मीं दुर्गांदेवींव्यवास्थितां स्थापयामिमहादेवींसर्वसौभाग्यदायिनीमितिसंस्थाप्य स्वहृत्कमले प्राग्वद्देवीं ध्यात्वा देव्यास्तेजोदीपादीपांतरमिववहन्नासापुटाध्वनापुष्पांजलावानीय एह्येहिदेवदेवेशिपरिवारसमन्विते यावत्त्वांपूजयिष्यामितावत्त्वंचइहावह महापद्मवनांतस्थेकरुणानंदविग्रहे सर्वभूमिहितेमातरेह्येहिपरमेश्वरिइत्याबाहनादिदशमुद्राः प्रदर्श्य ध्यायेत् लक्ष्मींक्षीरसमुद्रराजतनयांश्रीरंगधामेश्वरीं दासीभूतसमस्तदेवनिकरांलोकैकदीपांकुरां श्रीमन्मंदकटाक्षविभ्रमलसद्ब्रह्मेंद्रगंगाधरां त्वांत्रैलोक्यकुटुंबिनींसरसिजांवंदेमुकुंदप्रियामितिध्यात्वा मूलमंत्रेणदीपिन्यामालिन्यार्घ्योदकेनच त्रिवारंप्रोक्षयित्वा प्राणप्रतिष्ठांविधाय पुष्पांजलिंगृहीत्वा ॐदुर्गेकात्यायनींदेविशांभविशंकरप्रिये भक्त्यामयाकृतांपूजांगृहाणत्वंसुरेश्वरि हिरण्यवर्णां- जातवेदसे- नमोदेव्यैमहालक्ष्म्यै आवाहनंपरिकल्पयामिइतिदद्यात् तप्तकांचनवर्णाभंमुक्तामणिविराजितं अमलंकमलंदिव्यमासनंपरिगृह्यतां ताम्मआवह जातवेदसे. नमोदेव्यै- महासरस्वत्यै- श्रीरेतत्तेस्वासनंनमः ॐस्वागतंकुशलंपृच्छेमहादेविमहेश्वरि सुस्वागतंत्वयाभद्रेकृपयाभक्तवत्सले ताम्मआवह- जातवेदसे. नमोदेव्यै- महासरस्वत्यै. श्रीरेतत्तेस्वागतंनमः गंगादितीर्थसंभूतंगंधपुष्पाक्षतैर्युतं पाद्यंददाम्यहंतुभ्यंनमस्तेकमलालये. अश्वपूर्वां जातवेदसे. नमोदेव्यै. श्रीरेतत्तेपाद्यंनमः अष्टगंधसमायुक्तंस्वर्णपात्रप्रपूजितं अर्घ्यंददाम्यहंतुभ्यंप्रसीदत्वंसुरेश्वरि तांसोऽस्मितां जातवेदसे. नमोदेव्यै. लोकमात्रे. श्रीरेतत्तेऽर्घ्यंस्वाहा सर्वलोकस्ययामातायामातालोकपावनी ददाम्याचमनंतस्यैमहालक्ष्म्यैप्रयत्नतः चंद्रांप्रभासां- जातवेदसे. नमोदेव्यै- भक्तप्रियायैश्रीरेतत्ते- आचमनीयंस्वधा कपिलादधिकुंदेंदुधवलंमधुसंयुतं स्वर्णपात्रस्थितंदेविमधुपर्कंगृहाणमे आदित्यवर्णे. जातवेदसे.

नमोदेव्यै. भक्तप्रियायै- श्रीरेत्ततेस्नानीयंनमः एहिपादुकयादेविस्नानार्थंस्नानमंडपं स्नानवारिगृहीत्वातु स्नानासनसमागता सुगंधितैलं गंधादि पंचामृतजलादिकं सुगंधिश्लक्ष्णचूर्णंचतथोद्वर्त्तनकादिकम् नाना तीर्थोद्भवंतोयंस्नानीयंचगृहाणमे आदित्यवर्णे. जातवेदसे. नमोदेव्यै- भक्तप्रियायै श्रीरेतत्तेस्नानीयंनमः आपोहिष्ठेतिमलापकर्षणस्नानं पयोदाधिघृतंचैवशर्करामधुसंयुतं पंचामृतंमयानीतंगृहाणपरमेश्वरि आदित्यवर्णे जातवेदसे. नमोदेव्यैभद्रायैनमः श्रीरेतत्तेपंचामृतस्नानं पुरुषसूक्तेनशुद्धोदकेनस्नानं जातवेदसे. पुनराचमनं दिव्यांबरंनवश्वेतंक्षौमंचातिमनोहरं त्रैलोक्यजननीदेविदीयमानंगृहाणमे. उपैतुमां. जातवेदसे. नमोदेव्यै श्रीलक्ष्म्यैनमः श्रीरेतत्तेवासोयुग्मंनमः एहिदेविविभूषार्थंनैपथ्यागारमुत्तमं विभूषासनमास्थायतथा दर्शविलोकयच केशप्रसाधनंकृत्वाभूषणान्यंगसात्कुरु रत्नकंकणवैदूर्य्यमुक्ताहारादिकानिच सुप्रसन्नेसदा लक्ष्मिभूषणानिगृहाणमे- क्षुत्पिपासा. नमोदेव्यै- जातवेदसे. हिरण्यायै- श्रीरेतानि विभूषणानि नमः एहिदेविनिजस्थानंसिंहासनमनुत्तमं पूजाचक्रंसमास्थायगंधंदिव्यंगृहाणमे चंदनागुरकर्पूरकुंकुमाद्यैः समन्वितं कस्तूरीरोचनयुतंगंधंदेविगृहाणमे गंधद्वारां- जातवेदसे. नमोदेव्यै. महादेव्यै- श्रीरेषतेगंधोनमः शुद्धमुक्ताफलैरेतैरक्षतैः शालिसंभवैः सर्वाधिपेमहालक्ष्मिद्योतयामिसुभक्तितः जातवेदसे. नमोदेव्यै- श्रीरेतास्तेअक्षताः हारिद्रांचमयानीतांदेविकल्याणदायिनि सौभाग्यंवर्द्धतांनित्यंगृहाणहरिवल्लभे जातवेदसे० नमोदेव्यै० हरिप्रियायैनमः श्रीरेतत्तेहारिद्रं कुंकुमंशोभनंदिव्यं सर्वदामंगलप्रदं मयानीतंमहादेवितुभ्यंदास्यामिसुंदरि जातवेदसे०नमोदेव्यै०मंगलायैनमःश्रीरेतत्तेकुंकुमंनमः सिंदूरंशुभदंनित्यंमहाशक्तिप्रियंसदा प्रयच्छामिमहादेविसर्वसौभाग्यदायिनि जातवेदसे० नमोदेव्यै० महादेव्यै० श्रीरेतत्ते

सिंदूरंनमः मालतीमल्लिकादीनिनवानिकुसुमानिच एकनाथेप्रयच्छामिपुष्पाणिप्रतिगृह्यतां मनसःकामं १० जातवेदसे० नमोदेव्यै० एकनाथायैश्रीरेतानिपुष्पाणिवौषट् रक्तैःश्वेतांबुजैःपुष्पैर्मल्लिकादिविचित्रितैः नानापुष्पैः कृतांमालांगृहाणहरिवल्लभे श्रीरेतांमालांसमर्पयामि पुष्पमालानमः सुगंधंशीतलंशुभ्रंनानागंधसमन्वितं प्रीत्यर्थंतवदेवेशिसुचूर्णंप्रतिगृह्यतां जातवेदसे०नमोदेव्यै सुभगायैनमः श्रीरेतत्तेपरिमलद्रव्यंनमः अथांगपूजा चंचलायैनमः पादौपूजयामि० एवं० चपलायै० गुल्फौपूजया० कांत्यै० जानुनीपूजया० मंगलायैजंघेपू० भद्रकाल्यैऊरूपू कमलिन्यैकटिंपू शिवायैनाभिंपू क्षमायैउदरंपू गौर्य्यै सिंहवाहिन्यैस्तनद्वयंपू स्कंदमात्रे काममात्रेभुजद्वयं कंबुकंठायै कंठंपूजयामि सरस्वत्यैमुखंपू सुवासिन्यैनासिकांपू स्वर्णकुंडलायै कर्णद्वयंपू चंडिकायैनेत्रद्वयंपू शिवायैललाटंपू कुमार्य्यै शिरःपू सर्वरूपायैनमः सर्वांगं पूजयामि इतिसंपूज्य ततोऽष्टोत्तरशतनामभिःपूजयेत् ॥ ॐअस्यश्रीमहालक्ष्म्यष्टोत्तरशतनाममालामंत्रस्य ब्रह्माऋषिरनुष्टुप्छंदः श्रीमहालक्ष्मीप्रीत्यर्थं श्रीमहालक्ष्मीमष्टोत्तरशतनामभिः पूजयिष्ये इतिविनियोगः ततः श्रीबीजषट्केन षडंगन्यासंकृत्वा लक्ष्मीं समुद्रराजतनयामित्यादिध्यात्वा पुष्पैरक्षतैर्वापूजयेत् तद्यथा ॐमहालक्ष्म्यैनमः महाकाल्यै महासरस्वत्यै महाकन्यायै महागौर्य्यै महादेव्यै भक्तानुग्रहकारिण्यै स्वप्रकाशात्मरूपायै महामायायै माहेश्वर्य्यै वागीश्वर्य्यै जगद्धात्र्यै कालरात्र्यै त्रिलोचनायै भद्रकाल्यै कपालिन्यै महागौर्य्यै त्रिलोकात्मिकायै सिद्धलक्ष्म्यै क्रियालक्ष्म्यै लोकमंत्रप्रदायिन्यै अरूपायै स्वरूपायै विश्वरूपिण्यै पंचभूतात्मिकायै देवमात्रे सुरेश्वर्य्यै दारिद्र्यध्वंसिन्यै वीणापुस्तकधारिण्यै सर्वशक्त्यै ब्रह्मात्मिकायै अष्टांगरूपिण्यै० नवदुर्गात्मिकायै० अष्टभैरव्यै० गंगायै० शारदायै० वेण्यै० सर्वशास्त्रधारिण्यै० समुद्रवसनायै

ब्रह्मांडमणिमेखलायै० अवस्थात्रयनिर्मुक्तायै० गुणत्रयविवर्जितायै० योगध्यानैकसंन्यासिन्यै० योगध्यानैकपरायणायै० देवत्रयविशोकायै० वेदांतज्ञानरूपिण्यै० पद्मावत्यै० विज्ञानलक्ष्म्यै० नागयज्ञोपवीतिन्यै० सूर्यचंद्रार्द्धमासायै० ग्रहनक्षत्ररूपिण्यै० वेदिकायै० वेदरूपिण्यै० गिरिसंभवायै० कैवल्यदायै० विशृंखलायै० सूर्यमंडलसंस्थितायै० सोममंडलमध्यस्थायै० वायुमंडलसंस्थितायै० वन्हिमंडलसंस्थितायै० चक्रिकायै० चक्रमध्यस्थितायै० चक्रमार्गप्रदायिन्यै० सिद्धांतमार्गदायिन्यै० षड्वर्गवर्जितायै० प्रत्यक्षादिप्रमावृतायै० विद्यामूर्त्तायै० त्रैलोक्यमोहिन्यै० विद्यायै० वर्मदायै० रक्षायै० ब्रह्मस्थापितरूपायै० कैवल्यज्ञानगोचरायै० करुणायै० मधुकैटभमर्दिन्यै० अचिंत्यलक्षणायै० गोप्त्र्यै० सदाभक्ताघनाशिन्यै० महारमायै० परमेश्वर्य्यै० सुसिद्धलक्ष्म्यै० महाकालिन्यै० सद्योजातायै० वामदेवायै० अघोरायै० तत्पुरुषायै० ईशानरूपिण्यै० एकाक्षरदेव्यै० योगिन्यै० योगध्यानपराक्रमायै० श्रीसिद्धलक्ष्म्यै० श्रियै० कमलायै० कमलालयायै० पद्मायै० नालिनयुग्मकरांबुजायै० शैलपुत्र्यै० ब्रह्मचारिण्यै० चंडघंटायै० कूष्मांडायै० स्कंदमात्रे० कात्यायन्यै० कालरात्र्यै० महागौर्य्यै० सिद्धिदायै० बुद्धिदायै० सर्वात्मिकायैनमः इतिसंपूज्य कर्णिकायां० आंहृदयायनमः ईंशिरसेस्वाहा ऊंशिखायैवषट् ऐंकवचायहुं औंनेत्रत्रयायवौषट् अःअस्त्रायफट् ततोऽष्टदलेषुपूर्वादिक्रमतः पद्मासनायैनमः पद्मवर्णायै- पद्मसंस्थायै- आर्द्रायै. तर्पयंत्यै. तृप्तायै. ज्वालिन्यै- स्वर्णप्राकारायै. ततोदलाग्रेषु. ब्राह्म्यै. माहेश्वर्य्यै. कौमार्य्यै- वैष्णव्यै- वाराह्यै-इंद्राण्यै- चामुंडायै महालक्ष्म्यै० ततोभूपुरे पूर्वादिक्रमेण० इंद्रायसायुधायसपरिवारायस्वशक्तियुतायनमः एवमग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० कुवेराय० ईशानाय० ब्रह्मणे० अनंतायनम० तद्बहिः वज्रायनमः शक्तयेनमः दंडायनमः खड्गाय० पाशाय० अंकुशाय

गदायै शूलाय पद्माय चक्रायनमः इतिसंपूज्य पुष्पांजलिंदत्त्वा दशांगगुग्गुलंधूपंचंदनागुरुसंयुतं भक्त्या दत्तंमयादेविप्रसीदत्वंसुरेश्वरि कर्दमेन० ११ जातवेदसे० नमोदेव्यै० भद्रकाल्यै० श्रीरेषतेधूपोनमः कर्पूरवर्त्तिसंयुक्तंगोघृतेनसमन्वितं दीपंगृहाणदेवेशिमहालक्ष्मिनमोऽस्तुते आपःसृजंतु० १२ जातवेदसे नमोदेव्यै श्रीमहालक्ष्म्यैनमः श्रीरेषतेदीपोनमः नैवेद्यंगृह्यतांदेविभक्ष्यभोज्यसमन्वितं षड्सैराचितंदिव्यंघृतेनपरिपूरितं आर्द्रांपुष्करिणींसूर्यां० १३ जातवेदसे नमोदेव्यैपूर्णमालिन्यै श्रीरेतत्तेनैवेद्यंनमः मध्येपानीयं उत्तरापोशानं पुनराचमनीयं कर्पूरचंदनोन्मिश्रंदिव्यगंधसमन्वितं करोद्वर्त्तनकंरम्यंगृहाणपरमेश्वरि जातवेदसेनमोदेव्यै पिंगलायैनमः श्रीरेतत्तेकरोद्वर्त्तनकंनमः पूगीफलैः सकर्पूरैर्नागवल्लीदलैर्युतं कर्पूरचूर्णसहितंतांबूलंप्रतिगृह्यतां आर्द्रां चंद्रां १४ जातवेदसे नमोदेव्यै पिंगलायैनमः श्रीरेतत्ते तांबूलंनमः जातवेदसे नमोदेव्यै देव्यैनमः श्रीरेतत्तेसुवर्णपुष्पंनमः इदंफलंमयादेविस्थापितंपुरतस्तव तेनमेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि जातवेदसे नमोदेव्यै सिद्धिदायैनमः श्रीरेतत्तेफलंनमः त्वंचंद्रसूर्यरत्नानिविद्युदग्निस्त्वमेवहि नीराजनंमयादत्तंगृहाणपरमेश्वरि तान्मआवह० १५ जातवेदसे०नमोदेव्यै यमुनादिनिवासिन्यैनमः श्रीरेतत्ते नीराजनंनमः गौरीमिमाय जातवेदसे नमोदेव्यै प्रणोदेवी समस्तंश्रीसूक्तं नमोदेव्यै महालक्ष्म्यै महाकाल्यै महालक्ष्म्यै महासरस्वत्यै श्रीरेतत्ते मंत्रपुष्पंनमः सर्वस्वरूपे जातवेदसे नमोदेव्यै महाकाल्यैनमः श्रीरेतानि प्रदक्षिणानिनमः सर्वतःपाणिपादंते यःशुचिःप्रयतइत्यादिसमस्तं नमस्तेऽस्तुमहादेव्यै नमस्तेऽस्तुहरिप्रिये नमस्तेस्तुजगद्धात्रिनमस्तेशिववल्लभे जातवेदसे नमोदेव्यै महामायायैनमः श्रीरेतानि चंदनानि नमः पद्मप्रिये यासापद्मासन यामातामधुकैटभप्रमथिनी मांपातुविश्वेश्वरी जातवेदसे नमोदेव्यै श्रीरेतत्तेप्रार्थनानि

ततः श्रीसूक्तचंडीपाठलक्ष्मीहृदयादिकं पठित्वा गुह्यातिगुह्यगोप्त्रीत्वंइत्यादिना जपं समर्पयेत् इति श्रीलक्ष्मीपूजाविधानम् ॥ श्रीसूक्तमाहात्म्यंविष्णुधर्मोत्तरे रामउवाच एकंमंत्रंसमाचक्ष्वदेवलक्ष्मीविवर्द्धनं प्रतिवेदंजगन्नाथयादोगणनृपात्मज पुष्करउवाच श्रीसूक्तंप्रतिवेदंचज्ञेयंलक्ष्मीविवर्द्धनं अस्मिंल्लोके परेवापियथाकामंद्विजस्यतु रामउवाच प्रतिवेदंसमाचक्ष्वश्रीसूक्तंपुष्टिवर्द्धनं श्रीसूक्तस्यतथासर्वंफलंधर्मभृतांवर पुष्करउवाच हिरण्यवर्णांहरिणीमृचःपंचदशद्विज श्रीसूक्तंकथितंपुण्यमृग्वेदेपुष्टिवर्द्धनं रथेअक्षेषु वाजेतिचतस्त्रस्तुतथाऋचः श्रीसूक्तंतुयजुर्वेदेकथितंपुष्टिवर्द्धनं आतीयंचतथासामसामवेदेप्रकीर्त्तितं श्रियंदातुर्मयिदेहिप्रोक्तमाथर्वणेतथा श्रीसूक्तंयोजपेद्भक्त्यातस्याऽलक्ष्मीर्विनश्यति जुहुयाद्यश्चधर्मज्ञहविष्येणविशेषतःश्रीसूक्तेनतुपद्मानांघृताक्तानांभृगूत्तम अयुतंहोमयेद्यस्तुवहूनोभक्तियुतोनरः पद्महस्तद्वयालक्ष्मीर्नरंतमुपतिष्ठते दशायुतंतुपद्मानांजुहुयाद्यस्तथानले नापैतितत्कुलाल्लक्ष्मीर्विष्णोर्वक्षस्थलाद्यथा घृताक्तानांतुबिल्वानांहुत्वारामायुतंतथा बहुवित्तमवाप्नोतिसयावन्मनसेच्छति बिल्वानांलक्षहोमेनकुलंलक्ष्मीमुपाश्नुते पद्मानामपिबिल्वानांकोटिहोमंसमाचरेत् श्रद्दधानः समाप्नोतिदेवेंद्रत्वमपिध्रुवं संपूज्यदेवींवरदांयथावत्पद्मैः सितैर्वाकुसुमैस्तथान्यैः क्षीरेणधूपैः परमान्नभक्ष्यैर्लक्ष्मीमवाप्नोतिविधानतश्च इतिविष्णुधर्मोत्तरे द्वितीयकांडेश्रीसूक्तविधानम् ॥ अथश्रीसूक्तं ॐहिरण्यवर्णांहरिणींसुवर्णरजतस्त्रजां चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह १ तांम्मआवहजातवेदोलक्ष्मीमलपगामिनीं यस्यांहिरण्यंविंदेयंगामश्वंपुरुषानहम्२ अश्वपूर्णांरथमध्यांहस्तिनादप्रमोदिनीं श्रियंदेवीमुपऽह्वये श्रीर्मादेवीजुषतां कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तान्तर्पयंतीं पद्मेस्थितांपद्मवर्णांतामिहोपऽह्वयेश्रियं चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदारां तांपद्मनेमिंशरणमहंप्रपद्ये अलक्ष्मीर्मेनश्यतां त्वांवृ

णोमि ९ आदित्यवर्णेतपसोऽधिजातोवनस्पतिस्तववृक्षोऽथविल्वः तस्यफलानितपसानुदंतुमायाअंतरायाश्चवा
ह्याअलक्ष्मीः ६ उपैतुमांदेवसखः कीर्त्तिश्चमणिनासह प्रादुर्भूतोऽस्मिराष्ट्रेऽस्मिन्कीर्त्तिमृद्धिंददातुमे ७ क्षुत्पि
पासामलाज्येष्ठामलक्ष्मींनाशयाम्यहं अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात् ८ गंधद्वारांदुराधर्षांनित्यपुष्टांक
रीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ९ मनसःकाममाकूतिंवाचःसत्यमशीमहि पशूनांरूपमन्विच्छ
मयिश्रीःश्रयतांयशः १० कर्दमेनप्रजाभूतामयिसंभ्रमकर्दमा श्रियंवासयमेकुलेमातरंपद्ममालिनीं ११ आपः
सृजंतुस्निग्धानिचिक्लीतवसमेगृहे नित्यंदेवींमातरंश्रियंवासयमेकुले १२ आर्द्रांपुष्करिणींपुष्टिंसुवर्णांहेममालि
नीं सूर्य्यांहिरण्मयींलक्ष्मींजातवेदोममावह १३ आर्द्रांपुष्करिणींयष्टिंपिंगलांपद्ममालिनीं चंद्रांहिरण्मयींल
क्ष्मींजातवेदोममावह १४ ताम्मआवहजातवेदोलक्ष्मीमलपगामिनीं यस्यांहिरण्यंप्रभूतंगावोदास्योऽश्वान्विंदेयं
पुरुषानहम् १५ इतिश्रीसूक्तं गौरीमिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी अष्टापदीनवपदीबहू
षीसहस्राक्षरापरमेव्योमन् १३ प्रणोदेवीसरस्वतीवाजिभिर्वाजिनीवती धीनामवित्र्यवतु १७ यःशुचिःप्रय
तोभूत्वाजुहुयादाज्यमन्वहं श्रियःपंचदशर्चंस्यश्रीकामः सततंजपेत् १८ पद्माननेपद्मऊरूपद्माक्षिपद्मसंभवे
तन्मेभजस्वपद्माक्षियेनसौख्यंलभाम्यहम् १९ अश्वदायिचगोदायिधनदायिमहाधने धनंमेजुषतांदेवीसर्वका
मार्थसिद्धये २० पुत्रंपौत्रंधनंधान्यंहस्त्यश्वाजगवंरथं प्रजानांभवतीमाताआयुष्मंतंकरोतुमां २१ चंद्राभांलक्ष्मी
माशानांसूर्य्याभांश्रियमीश्वरीं चंद्रसूर्याग्निसर्वाभांमहालक्ष्मीमुपास्महे २२ धनमग्निर्धनंवायुर्धनंसूर्योधनंवसुः
धनमिंद्रोबृहस्पतिर्वरुणोधनमश्नुते २३ वैनतेयसोमंपिवसोमंपिवतुवृत्रहा सोमंधनस्यसोमिनोमह्यंददातुसोमि
नी २४ नक्रोधोनचमात्सर्य्यंनलोभोनाशुभामतिः भवंतिकृतपुण्यानांश्रीसूक्तंजपतांसदा २५ वर्षंतुतेविभावरिदिवो

अभ्रस्यविद्युतःरोहंतिसर्वंबीजानिन्यवब्रह्मद्विषोजहि २६ पद्मप्रियेपद्मिनिपद्महस्तेपद्मालयेपद्मदलायताक्षि विष्णु
प्रियेविश्वमनोऽनुकूलेत्वत्पादपद्मंमयिसन्निधत्स्व २७ यासापद्मासनस्थाविपुलकटितटीपद्मपत्रायताक्षी गंभीरा
वर्त्तनाभिःस्तनभरनमिताशुभ्रवस्त्रोत्तरीया लक्ष्मीर्दिव्यैर्गजेंद्रैर्मणिगणखचितैःस्नापिताहेमकुंभैर्नित्यंसापद्महस्ता
ममवसतुगृहेदिव्यमांगल्ययुक्ता २८ लक्ष्मींक्षीरसमुद्रराजतनयांश्रीरंगशसेश्वरीं दासीभूतसमस्तलोक
वनितांलोकैकदीपांकुराम् श्रीमन्मंदकटाक्षलब्धविभवब्रह्मेंद्रगंगाधरां तांत्रैलोक्यकुटुंबिनींसरसिजांवंदेमुकुंद
प्रियाम् २९ शुद्धलक्ष्मीर्मोक्षलक्ष्मीर्जपलक्ष्मीःसरस्वती श्रीलक्ष्मीर्वरलक्ष्मीश्चप्रसन्नावरदाभव ३० श्या
मांविचित्रांशुकरत्नभूषितांपद्मासनांतुंगपयोधरान्वितां इंदीवराक्षींसुखसारमंजरीं शुभांदधानांवसुधांभजा
महे ३१ श्रियेजातःश्रियआनिर्यायश्रियंवयोजरितृभ्योददाति श्रियंवसानाअमृतमायुर्भवंतिसत्यासमि
थावितद्रौश्रियएवैताच्छ्रियमादधाति संततमृजावषट्कृत्यंसंतत्यैसंधीयते प्रजयापशुभिर्यएवंवेद ३२
पुनर्गौरीमिमाय प्रणोदेवी ३३ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्यु
तम् ३४ मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वरि यत्पूजितंमयादेविपरिपूर्णंतदस्तुमे ३५ ॥इतिश्रीसूक्तपाठः॥
सरसिजनयनेसरोजहस्तेधवलतरांशुकगंधमाल्यहस्ते भगवतिहरिवल्लभेप्रसीदात्रिभुवनभूतिकरिप्रसीदम
ह्यम् ३६ सौवर्णपद्मपद्मामलकमलकृतंयुग्मशःपाणियुग्मे बिभ्रंतीशोभयोद्ग्राहितजलधिजलोच्छन्नगात्रीविधात्री
बाहुद्वंद्ववराभयार्द्रहृदयाभक्तप्रियोल्लासिनी लक्ष्मीर्मेभवनेवसत्वनुदिनंचंद्राहिरण्मय्यपि ३७ ॥ अथावशिष्ट
माश्विनशुक्लपक्षकृत्यम् आश्विनशुक्लद्वितीयायांदानस्यानंतफलमुक्तंस्कांदे नारदीयेच आश्विनेमासिवैपुण्या
द्वितीयाशुक्लपक्षगा दानंप्रदत्तमेतस्यामनंतंफलमुच्यते आश्विनशुक्लतृतीयायामपिबृहद्गौरीव्रतमुक्तं नारदी

ये इषशुक्लतृतीयायांवृहद्गौरीव्रतंचरेत् पंचवर्षविधानेनपूर्वोक्तेनैवनारद आचार्य्यंपूजयेदंतेविप्रान्पंचधनादिभिः सुवासिनीःपंचपूज्यावस्त्रालंकारचंदनैः कंचुकैश्चैवताटंकैःकंठसूत्रैर्हरप्रिया वंशपात्राणिपंचैवसूत्रैः संवेष्टितानिच सिंदूरंजीरकंचैवसौभाग्यद्रव्यसंयुतं गोधूमपिष्टजातंचनवापूपफलादिकं वायनानिचपंचैवताभ्योदद्याच्चभोजयेत् अर्घ्यंदत्वावायनानिपश्चाद्भुंजीतवाग्यता तत्फलंधारयेत्कंठेसर्वकामसमृद्धये ततःप्रातःसमुत्थायसालंकारासखीजनैः गीतवाद्ययुतानद्यांगौरींतांतुविसर्जयेत् आहूताऽसिमयाभद्रेपूजिताचयथाविधि ममसौभाग्यदानाययथेष्टंगम्यतांत्वया एवंकृत्वाव्रतंभक्त्याद्विजदेवीप्रसादतः भुक्त्वाभोगांस्तुदेहांतेगौरीलोकमवाप्नुयात् इदंव्रतमाश्विनशुक्लतृतीयायांप्रागुक्तंदेशाचारव्यवस्थयाविधेयम् ॥ आश्विनशुक्लचतुर्थ्यांकपर्दिविनायकव्रतं नारदीये इषशुक्लचतुर्थ्यांतुकपर्दीशंविनायकं पौरुषेणचसूक्तेनपूजयेदुपचारकैः अकणान्मुष्टिगणितांस्तंडुलान्सकपर्दिकान् विप्रायवटवेदद्याद्गंधपुष्पार्चितायच तंडुलाविष्णुदैवत्याहरंदेवंसमाश्रिताः कपर्दीगणनाथो सौप्रीयतांतैःसमर्पितैः अथव्रतविधिः तिथ्यादिस्मृत्वाममचतुर्विधपुरुषार्थसिद्ध्यर्थं कपर्दीश्वरगणेशव्रतमहं करिष्ये मूलमंत्रेण करषडंगन्यासं कृत्वा पूजामारभेत् तत्रादौ पीठपूजा ॐनमोभगवतेसकलगुणात्मशक्तियुतायानंताययोगपीठायनमः अष्टदलकेसरेषु तीव्रायैनमः ज्वालिन्यैनमः गदायैनमः ॐनंदिन्यैनमः कामरूपिण्यैनमःउग्रायैनमः ॐतेजोवत्यैनमः ॐसत्यायैनमः ॐमध्येविघ्ननाशिन्यैनमः अथध्यानं एकदंतं महाकायंलंबोदरगजाननं विघ्ननाशकरंदेवंहेरंबंप्रणमाम्यहं इमांपूजांगृहाणेशकपर्दिगणनायक आगच्छागच्छ देवेश समागच्छामरार्चित विनायकनमस्तुभ्यमुमांगमलसंभव इमांमयाकृतांपूजांगृहाणसुरसत्तम सहस्रशीर्षेत्यावाहनं अलंकारसमायुक्तंमुक्तामणिविभूषितं स्वर्णसिंहासनंचारुप्रीत्यर्थंप्रतिगृह्यतां पुरुषएवेदमासनं

गौरीसूनोनमस्तेऽस्तुशंकरप्रियकारक भक्त्यापाद्यंमयादत्तंगृहाणप्रणतप्रिय एतावानितिपाद्यं व्रतमुद्दिश्यविघ्नेश गंधपुष्पादिसंयुतं गृहाणार्घ्यंमयादत्तंसर्वसिद्धिप्रदायक त्रिपादूर्ध्वैत्यर्घ्यं गणाधिपनमस्तुभ्यंगौरीसुतगजानन गृहाणाचमनीयंत्वंसर्वसिद्धिप्रदायक तस्माद्विराडित्याचमनं अनाथनाथसर्वज्ञगीर्वाणपतिपूजित स्नानंपंचामृतं देवगृहाणगणनायक आप्यायस्व- दधिक्राव्णो. घृतवती- मधुवाता. स्वादुपवस्वेति- पंचामृतस्नानं गंगाजल समायुक्तमानीतंकृपयामम स्नानंस्वीकुरुदेवेशकपर्दिगणनायक यत्पुरुषेणेतिस्नानं. हरिद्वस्त्रद्वयंदेवदेवांगवसनोपमं भक्त्यादत्तंगृहाणेशलंबोदरहरात्मज तंयज्ञमितिवस्त्रं- नानालंकारसंयुक्तंनानारत्नविभूषितं अनेकदिव्याभरणंप्रीत्यर्थंप्रतिगृह्यतां इत्याभरणं राजतंब्रह्मसूत्रंचकांचनंचोत्तरीयकं भालचंद्रनमस्तुभ्यं गृहाणवरदोभव तस्माद्यज्ञादितियज्ञोपवीतं. गंधकर्पूरसंयुक्तंदिव्यचंदनमुत्तमं विलेपनंसुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यतां तस्माद्यज्ञात्सर्वेतिगंधं- अक्षतान्धवलान्देव सिद्धगंधर्वपूजित भक्त्यादत्तान्गृहाणेमान्सर्वसिद्धिप्रदोभव इत्यक्षताः सुगंधीनिचपुष्पाणिवरसिद्धिप्रदायक कपर्दिगणनाथायश्वेतपुष्पंददाम्यहं तस्मादश्वेतिपुष्पं- अथांगपूजा कपर्दिगणनाथायनमः पादौपूजयामि गणेशायनमः जानुनी पूजयामि गणनाथायनमः ऊरूपूजयामि गणक्रीडायनमः कटिंपूजयामि वक्रतुंडायनमः हृदयंपूजयामि लंबोदरायनमः कंठंपूजयामि गजाननायनमः स्कंधौपूजयामि हेरंबायनमः हस्तौपूजयामि विकटायनमः मुखं पूजयामि विघ्नराजायनमः नेत्रेपूजयामि धूम्रवर्णायनमः शिरःपूजयामि कपर्दिनेनमः सर्वांगंपूजयामि तत आवरणपूजामारभेत् गांहृदयानमः गींशिरसेस्वाहा गूंशिखायैवषट् गैंकवचायहुं गौंनेत्रत्रयायवौषट् गःअस्त्राय फट् इतिप्रथमावरणं १ ब्राह्म्यैनमः माहेश्वर्य्यैनमः कौमार्य्यैनमः वैष्णव्यैनमः वाराह्यै- इंद्राण्यै चामुंडायै-

महालक्ष्म्यैनमः इतिद्वितीयावरणं २ इंद्रायनमः अग्नयेनमः यमाय. निर्ऋतये. वरुणाय. वायवे- कुबेराय. ईशानाय. अनंताय- ब्रह्मणेनमः इतितृतीयावरणं ३ वज्रायनमः शक्तये. खड्गाय. पाशाय.अंकुशाय- गदायै- त्रिशूलाय- चक्राय. पद्मायनमः इतिचतुर्थावरणं ४ दशांगंगुग्गुलंधूपंचंदनागुरुसंयुतं उमासुतनमस्तुभ्यंगृहाण वरदोभव यत्पुरुषंव्यदधुरितिधूपं- गृहाणमंगलंदेवघृतवर्त्तिसमान्वितं दीपंज्ञानप्रदंचारुरुद्रप्रियनमोऽस्तुते ब्राह्मणोस्येतिदीपं. अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितंभक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां चंद्रमामनसइतिनैवेद्यं इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि इतिफलं पूगीफलसमायुक्तंनागवल्लीदलैर्युतं चूर्णकर्पूरसंयुक्तंगृहाणगणनायक नाभ्याआसीदितितांबूलं- हिरण्यगर्भगर्भस्थंहेमवीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे सप्तास्यासन्नितिदक्षिणा. गणाधिपनमस्तेऽस्तुनमस्तेस्तुगजानन लंबोदरनमस्तेस्तुनमस्तेस्त्वीप्सितप्रद यज्ञेनयज्ञेतिमंत्रपुष्पांजलिः प्रदक्षिणंतुदेवेशसर्वकार्येषुसर्वदा कपर्दिगणनाथस्त्वमीप्सितार्थप्रदायकइति प्रदक्षिणा नमस्करोमिदेवेशसर्वविघ्नहरोभव शीघ्रंममवरंदेहिपरत्रचपरांगतिं इतिनमस्कारः अथ ब्रह्मचारिपूजा अकणान्मुष्टिगणितांस्तंडुलान्सवराटिकान् विप्रायवटवेदद्याद्गंधपुष्पार्चितायच तंडुलावैश्वदेवत्याः पाकेनानेनशोभनाः कपर्दिगणनाथोऽसौप्रीयतांतंडुलैःसदा ततःकथांश्रुत्वाविसर्जयेत् अथकथा कदाचिदुपविष्टश्च पार्वत्यासहशंकरः इतिप्राहप्रियांतांकिंद्यूतेच्छारतिरस्तितेपणःप्रकल्पनीयोऽसौपश्चाद्द्यूतंप्रवर्त्ततां दुरोदरमिषाज्ज्ञातुंवांछितंप्रत्युवाचसा ममापितस्मिन्सास्त्येवयत्त्वयादीयतेपणः एतच्छ्रुत्वाशिवायास्तुमहादेवउवाचतां तवकिंकिमभीष्टंतुदास्यामिपरमेश्वरि लोकत्रयंचयाचस्वकिमन्यैर्वचनैस्तथा उमोवाचपृच्छामिपश्चादेतन्मेदातव्यमितिनोच्यतेयदिज्ञात्वातदानींतुविश्वासोनास्तिमेत्वयि वाक्यमेवंविधंश्रुत्वाशर्वःप्रोवाचतामुमां नविश्वासयितुंकेनशक्यसे.

किंपुनर्मया सोल्लुंठनेनाकिंदेविद्यूतेच्छास्तितवैवचेत् पणःप्रकल्प्यक्रियतांपणोतिष्ठाम्यहंसदा भावंसंचिंत्यपार्वत्याःपणमाकल्प्ययत्नतः त्रिशूलंत्रिदशान्सर्वान्साक्ष्यार्थंचदुरोदरे तस्मिन्कर्मणितंजित्वापणमप्यग्रहीच्छिवा एवंडमरुकादीनितान्यथाप्यजयत्पृथक् दीनोभूत्वामहादेवोभवानीमब्रवीदिति शार्दूलंचर्मतन्मध्येप्रयच्छगिरिजे मम उमोवाच नचैवंवक्तुमुचितंकिंदेवःप्रीतिमानिह दास्यामिसतिकिंपृष्टेसर्वंस्मरसिकिंनहि अविचिंत्यब्रवीषित्वंजगदीशकृपानिधे इतिकृत्वाकृतपणोदेवकोऽन्योयथामया आद्वादशदिनंदेवनकरिष्यामिभाषणं तथेत्युक्त्वामहादेवस्तत्क्षणाच्चतिरोदधे रक्षरक्षकगच्छामिकिंजीवनमतःपरं इतिसंचिंत्यसान्वेष्टुमुद्यानंप्रत्यपद्यत गिरिजातत्रवनितावृंदंदृष्ट्वाऽब्रवीदिदं किमर्थमागताःसर्वाःकिमेतत्क्रियतेऽधुना कपर्दिगणनाथस्यव्रतंकर्तुमिहागताः पूजैषातस्यचेदानीमस्माभिःक्रियतेतथा किमर्थंतुव्रतंनार्य्योयुष्माभिःक्रियतेवने फलमस्त्यथवानास्तिपार्वतीप्राहताःप्रति प्रष्टव्यंकिंत्वयादेविनरैर्नारीभिरंबिके अभीष्टसिद्धिरस्मात्तुलभ्यतेभुवनत्रये उमोवाच मत्तःकुपित्वागतवान्निष्कृपस्तुमहेश्वरः तस्यसंदर्शनायैवतत्करिष्येव्रतोत्तमं व्रतस्यैतस्यकिंदानंविधानंकीदृशंमम सर्वंविचिंत्यमनसाकथयध्व सुरांगनाः कालोविधानंदानंचव्रतस्यास्यफलानिच तत्सर्वंसावधानेनवक्ष्यामःशृणुपार्वति स्त्रियऊचुः मौढ्यादिदोषरहितेचतुर्थ्यांभानुवासरे मासेकार्यंव्रतंसम्यग्गणेशार्पितमानसैः तैलतांबूलभोगादीन्वर्जयित्वाशिवप्रिये मंदवारेचभुंजीयादेकवारंमितंतथा प्रातःकालेशुचिर्भूत्वास्नानंकुर्याद्विधानतः नद्यांतडागेकूपेवाशुद्धैःशुक्लतिलैःसह संध्यादिकंयथान्यायंसर्वंनिर्वर्त्त्ययत्नतः अर्चनागारमासाद्यगोमयेनोपलिप्यच गोचर्ममात्रंतन्मध्येकुर्य्याद्गंधेनमंडलं तन्मध्येऽष्टदलंपद्मंतन्मध्येगणनायकं पूजयेत्स्वच्छकुसुमैर्हरिद्रामिश्रिताक्षतैः गांगींगूंगैंगौंगअंगन्यासंकृत्वा ततःपरं मंत्रेणानेनकुसुमैर्देवमावाह्यनिःक्षिपेत् अथवा

गणनाथस्यप्रतिमामेवपूजयेत् ततस्तद्गतचित्तातुध्यानंकुर्य्याद्विधानतः एकदंतंमहाकायंलंबोदरगजाननं
विघ्ननाशकरंदेवंहेरंबंप्रणमाम्यहं इमांपूजांगृहाणेशकपर्दिगणनायक आगच्छेतित्रिरुच्चार्य्यकुर्य्यादावाहना
दिकं तत्तत्प्रकाशकैर्मंत्रैर्गंधपुष्पाक्षताभिः इंद्रादिलोकपालांश्चपूजयेद्देवसन्निधौ लंबोदरनमस्तेऽस्तुनमस्तेचां
बिकासुत एकदंतनमस्तेऽस्तुनमस्तेऽस्त्वीप्सितप्रद कपर्दिगणनाथस्यसर्वसंपत्प्रदायिनः पूजाप्रकारःकथि
तस्तवैतावान्शुचिस्मिते अकणान्मुष्टिगणितान्हविष्यव्रीहितंडुलान् स्वच्छान्यत्नेनसंमृज्यचूर्णीकुर्य्या
न्महेश्वरि शिवेतुचूर्णंप्रथमेभानुवारेऽर्धचंद्रवत् कुर्याद्द्वितीयेसंपूर्णंचंद्रवत्पिष्टकाष्टकैः तृतीयेपायसान्नंचदद्याद
न्नंचतुर्थके आनीयाष्टांशकंसम्यग्देवंसंपूज्यभक्तितः कल्पितान्नानिविधिवद्द्वियंतेयानियानिच तेषांतेषामष्ट
मांशंतस्मैसम्यक्समर्पयेत् ततःशुद्धायवटवेदद्यादेकांवराटिकां पुष्पान्वितांस्तंदुलांश्चभुंजीयाद्ग्राससप्तकं य
त्कामयंतेयेभक्त्यापूजांतेप्राप्नुवंतिहि इत्युचुस्ताभवानींतुस्त्रियोविगतकल्मषाः तासांतद्वचनंश्रुत्वातदोमाप्यकराद्व्र
तं ततःक्षणाद्धिविश्वेशःप्रत्यक्षंसमजायत त्रिलोकनाथदेवेशकरुणाकरशंकर दीनामनन्यगतिकांभक्तवत्सल
पाहिमां तुष्टश्चशंकरःप्राहकिमेतद्देव्याकृतं कपर्दिगणनाथस्यमाहात्म्यात्किंनसिद्ध्यति उमोवाच व्रतस्यै
तस्यमाहात्म्यंज्ञातंचभवतास्वयं उद्दिश्यागमनंविष्णोरकरोत्तद्व्रतंशिवः तदाचगरुडारूढःसमागम्यैनमब्रवीत्
मदागमनिमित्तंहिकिंकृतंशंकरत्वया ममापिज्ञापनीयंतदित्युक्तोऽज्ञापयच्छिवः अथैतदकरोद्विष्णुरुद्दिश्यागमनं
विधेः आगतश्चविधिःशीघ्रंममाज्ञापयमाधव प्रयोजनंनास्तिविधेत्वदागमनकारणे एकदंतव्रतंत्वेतद्भवत्ये
वनसंशयः इंद्रागमनमुद्दिश्यतदानींतेनतत्कृतं आगत्यसहसाप्राहममाज्ञापयविश्वसृक् हेरंबव्रतमाहात्म्यंद्र
ष्टुमेवंकृतंमया ममापिज्ञापनीयंतदित्युक्तेविधिनोदितं विक्रमादित्यमुद्दिश्यवज्रीतदकरोद्व्रतं आगत्याहमनुष्यस्त्व

मिंद्रौमत्तःकिमीप्सितं कपर्दिहस्तिवदनव्रतमाहात्म्यमीदृशं इतिज्ञातंममाभीष्टमेतल्लब्धंतदाऽब्रवीत् विधानंतस्यमाहात्म्यंज्ञापनीयंत्वयेतिमेपप्रच्छविक्रमादित्यंप्राहतस्मैपुरंदरःपुरंदरमुखाद्ज्ञात्वातत्सर्वंस्वपुरींप्रतिप्रहृष्टःप्रययौराजापराक्रमपरायणः कपर्दीशव्रतंकृत्वामाहिष्याःपुरतोऽब्रवीत् जेष्यामिसकलान्शत्रून्प्राप्तमेवंमहाव्रतंतस्यव्रतस्य किंदानमितिसाप्राहविक्रमंप्रत्युवाचप्रियामर्कोदद्यादेकंवराटकं एवंचेत्तन्नकर्त्तव्यंमद्गेहेयत्रकुत्रचित् इत्यादिदोषपादाशुकुष्ठव्याधिमवापसानस्थातव्यंत्वयात्रेतिसर्वंराज्यंविनश्यति अर्कस्यवचनंश्रुत्वाऋष्याश्रममवापसा परिपर्यावशात्तुष्टास्तस्याःसर्वेमुनीश्वराः निश्चित्ययोगमार्गेणसर्वेतामब्रुवन्सतीं कपर्दीशव्रताभावादेवंप्राप्तंत्वयेत्युत कुरुष्वैतद्व्रतंसम्यक्सर्वासिद्धिर्भविष्यति ऋषीणामाज्ञयाकृत्वाकपर्दीशव्रतंमहत् तदानींराजमहिषीदिव्यदेहमवापसा एतस्मिन्नंतरेकालेभवान्यासहशंकरः द्रष्टुंययौवृषारूढोभुवनानिचतुर्दश मध्यंमार्गेद्विजेंद्रस्यरोदनंभयवर्द्धनं श्रुत्वाब्राह्मणमारोदीःकिमर्थंतवरोदनं नाकिमप्यस्तिमेदेवदारिद्र्यादेवकेवलात् एवं यदिभवेद्विप्रकपर्दीशव्रतंकुरु एतत्कर्त्तुंव्रतंदेवसामर्थ्यंनास्तिमेऽधुना विक्रमार्कपुरेसर्वेवैश्योदास्यातितत्कुरु कपर्दीशव्रतेनैवमित्रत्वंप्राप्स्यसिध्रुवं दारिद्र्यमोचनंसम्यग्भविष्यतिनसंशयः गृहंप्रतिसमागच्छगृहीत्वातंडुलान्द्विज वैश्याद्गृहीत्वातत्सर्वंतदानीमकरोद्व्रतं तस्मिन्नर्कपुरेविप्रस्तन्मंत्रित्वमवाप्तवान् आज्ञापयत्कपर्दीशव्रतंवैश्यस्यतत्क्षणात् अकरोत्तत्सुताराजाविक्रमःपतिरस्त्विति व्रतप्रभावादादित्यउपयेमेविशःसुतां अनेनैवविवाहेनपरांप्रीतिमवापसः एवमंतरितेकालेमृगयार्थंप्रविश्यसः गहनंक्षुत्तृषार्त्तःसन्ययौमुनिवराश्रमं उपचारैःश्रमंनीत्वातेषामर्कोमनोरमां रमणीमाश्रमेतस्मिन्दर्शयामासविक्रमः इतिपृच्छन्नृषीन्सर्वान्दातव्यैषाममांगना तवेयंमहिषीत्युक्त्वानयेत्येनांसमर्पयन् सैमंमहिष्यास्वपुरींदिव्यनारीनरैर्युतां हृष्टःसन्विक्रमादित्यःपुरुषान्प्राहभूपतिः कपर्दिगणनाथस्यव्रतंकृत्वास्त्रि

यासहे अजयद्विक्रमादित्यःसकलान्शत्रुमंडलान् गणनाथव्रतेनैवपुत्रपौत्रवृतश्चसः धनधान्यादिसंपन्नःसुखेनन्यवसद्भुवि एतद्व्रतंतुकुर्वीतयेकेचनाविधानतः चतुरःपुरुषार्थांश्चनियतंप्राप्नुवंतिहि हयमेधस्यविघ्नेतुसंजाते सगरःपुरा एतदेवव्रतंकृत्वापुनरश्वंसलब्धवान् इमांकथांपंचवारंप्रथमेभानुवासरे द्वितीयेचतृतीयेच श्रद्धयाशृणुयाद्व्रती एकार्द्धमेतदेकोनाशीतिश्लोकप्रकाशिनीं संक्षिप्तैरन्यथाकृत्वागतिंयातियथेप्सिताम्

॥ इतिस्कांदेकपर्दिविनायकचतुर्थीव्रतम् ॥

अथाश्विनशुक्लपंचम्यामुपांगललिताव्रतं नारदीये आश्विनेशुक्लपंचम्यामुपांगललिताव्रतं तस्यांस्वर्णमयींमूर्त्तिंशक्त्यानिर्मायनारद उपचारैःषोडशभिःपूजयेत्तांविधानतः पक्वान्नफलसंयुक्तंसघृतंदक्षिणान्वितं द्विजवर्यायदातव्यंव्रतसंपूर्त्तिहेतवे सवाहनाशक्तियुतावरदापूजितामया मातर्मामनुगृह्याथगम्यतांनिजमंदिरमिति अत्रदाक्षिणात्यशिष्टाचारएवमानं पूजैवप्रधानमिति तत्पूजयानिजगृहेपरामृद्धिमवाप्स्यसीतिकथायांपूजायाः फलसंबंधात् फलवत्सन्निधानफलंतदंगमितिन्यायेनजागरणवायनदानवटकादिभक्षणादेस्तदंगत्वात् तच्च पूजनं मध्याह्नव्यापिन्यांकार्य्यं पूजाव्रतेषुसर्वेषुमध्याह्नव्यापिनीतिथिरितिमाधवीयेहारीतोक्तेः दिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वायुग्माग्नियुगभूतानामितिवाक्यात् एतेनजागरणमंगमुक्त्वाजागरणंनक्तेचंद्रायार्घ्यव्रतेतथा ताराव्रतेषुसर्वेषुरात्रियोगोविशिष्यते इतिहेमाद्रिलिखितवचनाद्रात्रिव्यापिनीग्राह्येति कस्यचिदुक्तिरुपेक्षणीया अंगानुरोधेन निर्णयस्यक्वाप्यदृष्टत्वात्वचनंतुजागरणप्रधानकेसावकाशमिति अथव्रतविधिः आचम्य प्राणानायम्य मासपक्षाद्युल्लिख्यपुत्रपौत्रधनवृद्धिविद्यारोगनिवृत्तिसुखभोगाविजयपुष्ट्यादिकामः स्त्रीत्वऽवैधव्यसौभाग्यादिकामा उपांगललिताप्रीत्यर्थंयथामिलितोपचारैरुपांगललिताव्रतेतत्पूजनमहंकरिष्ये इतिसंकल्प्यपूजांकुर्य्यात्अथपूजा

विधानंचकुर्य्यादेकाग्रमानसः सौवर्णींप्रतिमांकृत्वामंत्रैःशक्त्याप्रपूजयेत् ध्यानम् नीलकौशेयवसनांहेमाभां कमलासनां भक्तानांवरदांनित्यंललितांचिंतयाम्यहं निजासनेस्वपुत्रैश्चसहितेभक्तवत्सले उपांगललितेमातरेहिमेव्रतकर्मणि हिरण्यवर्णामित्यावाहनं ॥ आगच्छललितेदेविनानामणिगणार्चिते अनेकशक्तिसंयुक्तेआसनंप्रतिगृह्यतां तास्मआवहेत्यासनं गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां अश्वपूर्णामितिपाद्यं निधानंसर्वरत्नानांत्वमनर्घ्यगुणाश्रया तथाविभक्त्याललितेगृहाणार्घ्यंनमोऽस्तुते कांस्योस्मितामित्यर्घ्यं पाटलोशीरकर्पूरसुरभिस्वादुशीतलं तोयमाचमनीयार्थंललितेप्रतिगृह्यतां चंद्रांप्रभासामित्याचमनं पंचामृतंमयानीतंपयोदधिघृतंमधु शर्करामधुसंयुक्तंस्नानार्थंदेविगृह्यतां पंचमंत्रैः पंचामृतं मंदाकिन्याःसमानीतंहेमांभोरुहवासितं स्नानायतेमयाभक्त्यागांगंस्वीक्रियतांजलं आदित्यवर्णेतिस्नानं सर्वभूषाधिकेसौम्येलोकलज्जानिवारणे मयोपपादितेतुभ्यंवाससीप्रतिगृह्यतां मलयाचलसंभूतंनानापन्नगरक्षितं शीतलंबहुलामोदंचंदनंप्रतिगृह्यतां उपैतुमांदेवसखेतिगंधं अक्षतानरविंदाक्षिकुंकुमादिभिरंजितान् गृहाणललितेदेविप्रसीदपरमेश्वरि क्षुत्पिपासामित्यक्षताः मिलत्परिमलामोदंमत्तालिकुलसंकुलं आनंदिनंदनोद्यानपुष्पंतेललितेनमः कर्दमेनप्रजेतिपुष्पं गंधसारसमुन्नद्धंपृथुवस्तुसमुद्भवं सुरासुरनरानंदिधूपंदेविगृहाणमे आपःसृजंत्वितिधूपं मार्त्तंडमंडलाखंडचंद्रबिंबाग्नितेजसां निधानंदेविदीपोयंनिर्मितस्तवभक्तितः आर्द्रांपुःपुष्टिइतिदीपः देवतालयपातालभूतलाधारधान्यजं षोडशाकारसंभारंनैवेद्यंललितेनमः आर्द्रांपुष्करिणीं चंद्रामितिनैवेद्यं स्नानादिकंविधायाथयतःशुद्धिरवाप्यते एतदाचमनीयंमेललितेदेवितेनमः इत्याचमनं पातालतलसंभूतंवदनांभोजभूषणं नानागुणसमाकीर्णंतांबूलंदेवितेनमः इतितांबूलं हिरण्यगर्भगर्भस्थ

मितिदक्षिणा अत्रपुष्पांजल्यंतेऽष्टचत्वारिंशत्परिमितान्दूर्वांकुरान्हस्तेनादाय बहुप्ररोहपूर्वैयंसंततममृतालिका यथेयंललितेदूर्वातथामेस्युर्मनोरथाःइतिमंत्रेणसमर्पयेत् प्रदक्षिणनमस्कारान्शक्तितश्चसमाचरेत् अथवायनमादायवटकोदुंबरादिभिः कइत्यादिकमंत्रेण कइदं कोदादित्यादि आचर्य्यायनिवेदयेत् पक्वान्नफलसंयुक्तंसघृतंदक्षिणान्वितं द्विजवर्य्यायदास्यामिव्रतसंपूर्त्तिहेतवे उपांगललितादेव्यात्रतसंपूर्त्तिकारकं वायनंद्विजवर्य्यायसहिरण्यंददाम्यहं इतिवायनमंत्रः ततःकथांसमाकर्ण्यवाचकान्पंचसंख्यया स्वयमेवतदेवान्नंवाग्यतःसहबांधवैः रात्रौजागरणंकुर्य्याद्गीतवादित्रमंगलैः प्रभातेपूजयेद्देवींततः कुर्य्याद्विसर्जनं सवाहनाशक्तियुक्तावरदापूजितामया मातर्मामनुगृह्याद्ययथेष्टंगच्छमंदिरं इतिपूजा अथकथा कैलासशिखरेरम्येसुखासीनंषडाननं कथयंतंकथांदिव्यामिदमूचुर्महर्षयः ऋषयऊचुः महासेनमहादेवनंदनानंतविक्रम आख्यानानिसुपुण्यानिश्रुतानित्वत्प्रसादतः कथास्त्वद्वदनाद्देवप्रसृताभूरिभूतयः नतृप्तिमाधिगच्छामःपायंपायंसुधामिव शुश्रूषवोवयंदेव्याव्रतंतत्कथयस्वनः मनोभिलषितार्थायासिद्धिर्यास्मिन्कृतेभवेत् स्कंदउवाच साधुपृष्टंमहादेव्यामाहात्म्यंमुनिपुंगवाः तस्मात्सर्वविधानेनतच्छृणुध्वंजगद्धितं भृगुक्षेत्रेकिलपुराविप्रोभूद्गौतमाभिधः श्रुतिस्मृतिपुराणज्ञोधनीचबहुबांधवः अनपत्यस्यतस्याथजज्ञातेजरतःसुतौ श्रीपतिर्गोपतिश्चैवनामनीविदधेतयोःअचिरेणैवकालेनसपंचत्वमगाद्द्विजः तौतुबालौधनंबंधून्हित्वासाधर्मचारिणी सतीविवेशदहनंस्वर्यातापतिनासह अथतद्बांधवाःसर्वेहाकष्टमितिचुक्रुशुःनिंदंतोदुःखिताश्चक्रुस्तत्क्रियांपारलौकिकीं पितृव्यस्तद्दिनेष्वेवसर्वंचहृतवान्धनं अथतस्यसपत्नोऽभूद्राजासतुगृहंधनं आक्रोशंतौचतौगेहंनिजमानीयसंपदः नास्तिचक्रेधनंसर्वंताभ्यांकिंचिन्नवैददौ ततोमौंजीधरौबालौबंधुभिःकथितंवसु ययाचतुःपितृव्यंतंदेहिनोद्रविणंहितत्

सतावूचेगतंद्रव्यंयुवांकेनप्रतारितौ निर्गच्छतंममगृहादित्याहपरुषंवचः तौतद्वचोभिनिर्विण्णौबालौ श्रीपतिगोपती बभाषतुर्मिथःकष्टंधिगहोपितृहीनता यावोदेशांतरंयत्रस्वजनोनास्तिकश्चन अनाभाष्यैवसुहृदोजग्मतुर्दिशमुत्तरां भिक्षाचारौबहून्देशान्वनानिसरितोगिरीन् समतिक्रम्यययतुर्वैशालीं नामतत्पुरीं कासारमीक्षांचक्रातेततोऽस्यास्सन्निधौशुभं पुंडरीकवनाकीर्णंरक्तसंध्याविभूषितं संध्याभ्रकपिशंचारुयथातारकितंनभः श्रांतौपथिगतौबालौक्षणंविश्रम्यतत्तटे आचम्यशिशिरंतोयंसस्नतुश्चयथाविधि गताध्वखेदौविश्रम्यपुरींप्राविशतांततः वीथीचतुष्पथयुतांचारुगोपुरमंडितां देवतागाररुचिरांसौधराजिविराजितां नानावीथीरतिक्रम्यविप्रावासमवापतुः कस्यचित्त्वथविप्रस्यक्षुत्पिपासार्दितौगृहं ईयतुर्वैश्वदेवांतेउपविष्टौश्रमातुरौ स्वामीततोऽस्यगेहस्यविवेकइतिविश्रुतः आयातौवैश्वदेवांतेसददर्शातिथीहितौ अनापृच्छ्य तयोःशीलंतथाचकुलनामनी ऋषिवत्पूजयामासस्मरन्धर्मंसनातनं अतिथीभोजयामाससदन्नंसहचात्मना तौब्रह्मचारिणौविप्रौसपर्ययातांविलोक्यच देशबंधुपरित्यागखेदमुक्तौबभूवतुः अथापृच्छत्कृपालुस्तौकौ युवांकुतआगतौ किमर्थमल्पवयसौनिर्गतौस्वगृहादिति तद्विवेकस्यवचनमाकर्ण्यश्रीपतिस्तदा आनुपूर्वेण सकलंवृत्तांतंसमभाषत पितृहीनौचतौज्ञात्वात्यक्तौबंधुजनेनच आश्वास्यस्थापयामासस्वगृहेबहुवासरं प्रचक्रमेऽथशिष्यैश्चसहाध्यापयितुंश्रुतिं बभूवतुश्चतौबालौगुरुशुश्रूषणेरतौ गुरोर्गेहेन्यवसतामागताविमलाशरत् फुल्लपद्मविशालाक्षीप्रसन्नेंदुशुभानना तस्यांसशिष्यमाचार्य्यंचरंतंव्रतमुत्तमं पप्रच्छतुर्मौःकिमिदमावाभ्यामपिकथ्यतां उपागललितादेव्याव्रतंदेवर्षिपूजितं सर्वकामकरंनृणामस्माभिःसमुपास्यते विद्याकामेनकर्तव्यंतथैवधनकाम्यया सुतार्थिनाचकर्तव्यंव्रतमेतदनुत्तमं विद्याकामौचतौबालौव्रतमाचेरतुर्मुदा भक्तितोगुर्वनुज्ञा

तौयथाशक्तियथाविधि तौतत्प्रसादात्सकलंशास्त्रंवेदानवापतुः अन्यस्मिन्हायनेभक्त्याविवाहार्थंप्रचक्रतुः
श्रीपतिर्गोपतिश्चैवव्रतमेतत्तपोधनाः अचिरेणैवकालेनमाघेमासितयोर्गुरुः स्वांविवाहोचितांकन्यांनाम्नागुणव
तीमिति विनीतायव्रतवतेपूनेश्रीपतयेतदा विचार्य्यबांधवैः साकंददौपुण्यर्क्षवासरे पारिवर्हंबहुमुदाप्रादा
दुहितृवत्सलः विवेकोऽपिमुदंलेभेसानुरागौविलोकयतौ अन्याब्देपुनरेतत्तुव्रतंदेव्याःप्रचक्रतुः भ्रातरौतौनि
जंदेशंवांछतौचधनादिकं अथान्येऽहनिकस्मिंश्चित्तावुपाध्यायमूचतुः स्वामिन्युष्मत्प्रसादेनलब्धाविद्यातथा
वसु अनुजानीहिगच्छावोनिजंदेशमितः पुनः इत्याकर्ण्यसमालोक्यशुभवासरमादृतः स्वयंप्रापयितुंतातौ
विप्रौकन्यांचनिर्ययौ अथदेव्याःप्रसादेनपितृव्यस्यतयोःकिल अन्वेषणमतिर्जाताकुतः श्रीपतिगोपती नि
र्गतौक्वगतौदेशंवसतःक्वेत्यचिंतयत् क्वचित्सनगरंप्रापद्द्विजोबालौगवेषयन् तदेवनगरंप्राप्तोविवेकाख्योद्विजो
त्तमः सशिष्यःकन्ययासार्द्धंक्रमन्मार्गशनैःशनैः तत्रतेषांसमजनिसंगमोमुनिपुंगवाः विदांचकारतौकृच्छ्रान्म
ध्यमेवयसिस्थितौ तौमूर्ध्न्याघ्रायपरमांमुदंलेभेसुतौतदा अशक्नुवन्मुदंवक्तुंप्रेमगद्गदयागिरा पादानतांगुणव
तींविवेकेनप्रणोदितां आशीर्वादैर्बहुविधैस्तांस्नुषांसमयोजयत् विवेकस्तुतदातत्रसंविभाष्यपरस्परं सुता
वेतौमयाविप्रपालितौपाठितौतथा यातास्मिसंप्रापयितुंभवतांग्राममुत्तमं इतिसंभाषमाणास्तेभृगुक्षेत्रेययुर्मुदा
ज्ञातिभिः सहसंगम्यशृण्वद्भिस्तद्विचेष्टितं स्वपितृव्यगृहेकांश्चिदुषित्वादिवसांस्तथा लब्ध्वापितृधनंगेहंसर्वंश्री
पतिगोपतौ ईयतुस्तदनुज्ञातोविवेकःस्वांपुरीययौ श्रीपतिर्गोपतेस्तत्रविवाहमकरोत्तदा तावेकचित्तावेकत्रच
क्रतुर्दैवतर्पणं श्रीपतिःश्रद्धयायुक्तःकनीयानविशंकितःविचार्य्यभार्य्ययासाकंविभक्तःश्रीपतेरभूत् सभोगान्वि
विधान् भुंजन्प्रमादीवहुसंपदा नदेव्याराधनंचक्रेगोपतिः खलुलंपटः अथस्वल्पेनकालेननष्ट

तस्यशनैर्धनं अकिंचनोगताश्चिंतांभार्ययाश्वासितस्तदा तवभ्रातृगृहेविप्राभुंजतेबहवःसदा गच्छावोऽनुदिनंकांततत्रभोक्तुमुभावपि एवंभोजनवेलायामागत्यागत्यतद्गृहं भुंजन्भुंजन्निजगृहंगतौतावनुवासरं कदाचिदागतोयावद्गोपतिर्भार्ययासह उपविष्टेषुविप्रेषुभोक्तुंनाविंददासनं अथान्नराशेरभ्याशेभोजनायक्षुधातुरः उपविष्टःश्रीपतेश्चभार्ययासनिवारितः अस्मादुत्तिष्ठवैतूर्णंत्वमुत्तिष्ठकरिष्यसि तिष्ठतिष्ठक्षणंचैवपश्चाद्भुंक्ष्वेतिसाब्रवीत् गोपतिःकांतयादृष्टस्ततोविमनसावुभौ अभुक्त्वाचैवनिष्क्रांतौजग्मतुर्निजमंदिरं ततःस्वजायांप्रोवाचनिजमार्गमचिंतयत् अत्रावयोःसमंवित्तंसंविभक्तमपिप्रिये दुर्गतोऽहंधनोन्मत्तःश्रूयतामत्रकारणं पुरावाभ्यांगुरुकुलेव्रतमाचरितंशुभम् उपांगललितादेव्याविद्यादिसकलंततः प्राप्तंमयातत्सकलंपरित्यक्तंप्रमादतः ज्येष्ठत्राचरतेनित्यंतस्माच्छ्रीस्तस्यवर्त्तते तस्मादहंतदाभोक्ष्येयदाद्रक्ष्यामितांशिवां इत्युक्त्वानिर्गतस्तस्माद्गृहादकृतभोजन ःतद्भार्याचिंतयाविष्टासापितस्थावनाशिनी भुक्तवत्सुब्राह्मणेषुश्रीपतिःपर्य्यपृच्छत् क्वगतोगोपतिरितितच्छ्रुत्वासोऽपिदुःखितः पंचमेवासरेप्राप्तेक्षुत्पिपासार्दितोवने अलब्धदर्शनोदेव्यादुःखितोबहुशोऽभ्रमत् पृच्छंश्चपथिकान्मार्गेनदेव्याःपदमभ्यगात् तंकृच्छ्रगतमालोक्यभवानीभक्तवत्सला कृतापराधमपितमनुजग्राहवैतदा गतमूर्च्छःसमुत्थायदिगंतान्प्रविलोकयन् ददर्शदूरतोगोपंचारयंतंगवांगणं तंदृष्ट्वाकिंचिदाश्वस्तोययौतस्यांतिकंशनैः अपृच्छत्क्वभवान्जातःकुत्रत्यःकुतआगतः कोऽयंदेशःक्वभूपालःकिंपुरंनामतद्वद निशम्यवचनंतस्यवक्तुंगोपःप्रचक्रमे गोपउवाच उपांगंनामनगरमुपांगोनामभूपतिः तत्रत्योऽहंसमायातःपुनस्तत्रव्रजाम्यहं उपांगललितादेव्याविद्यतेतत्रमंदिरं इत्याकर्ण्यवचस्तस्यविप्रःसमुदितोऽभवत् सगोपसहितःसायंनगरंप्रविवेशह दूराद्ददर्शभवनंपुरमध्येतपोधनाः उपांगललितादेव्याःस्पाटिकंगगनंलिहं सौवर्णेनविचित्रेणकलशेनोपशो

भितं यथोदयाचलः शैलोदधानोभानुमंडलं त्वरितोगोपमामंत्र्यप्रासादंसययौमुदा प्रणम्यदंडवद्भूमौ बद्धांजलिपुटस्तदा उपांगललितादेविमथस्तोतुंप्रचक्रमे गोपतिरुवाच नमस्तुभ्यंजगद्धात्रिभक्तानांहितकारिणि जगद्भीतिविनाशिन्यैसर्वमंगलमूर्त्तये हत्वानिशुभमहिषप्रभृतीन्सुरारीनिंद्रादयोनिजपदेषुययाभिषिक्ताः लोकत्रयावनगृहीतमहावतारेमातःप्रसीदसततंकुरुमेऽनुकंपां त्वांमुक्तयेमुनिजनाः कुटिलीकृतांगीं गौरीं निजेवपुषिकुंडलिनींभजंति मुक्त्यैचदेवमनुजाः कनकारविंदबद्धासनामविरतंकमलांस्तुवंति सापराधोऽस्मि शरणंप्राप्तस्त्वांजगदंबिके इदानीमनुकंप्योऽहंयद्वांछामिकुरुष्वतत् इतिस्तुत्वाचशर्वाणींप्रणिपत्यमुहुर्मुहुः कृतसंध्याविधिस्तत्रशेतेस्माऽकृतभोजनः स्वप्नेमूर्त्तिमयीदेवीविप्रमेवंसमादिशत् गोपतेवत्सतुष्टाऽस्मिगच्छोपांगमहीपतिं मत्पूजनकरंडस्यप्रार्थयस्वापिधानकं तत्पूजयान्निजगृहेपरामृद्धिमवाप्स्यसि स्वप्नइत्याप्तआदेशःप्रभाते गोपतिस्तदा राजदर्शनवेलायांनृपद्वारंसमभ्यगात् सविप्रोऽपिनृपसभांप्रतिहारनिवेदितः राज्ञासंमानितस्तत्रनिषसादासनेशुभे पृष्टागमनहेतुश्चययाचेनृपपुंगवं देव्यर्चनकरंडस्यपिधानंदेहिभूपते इत्यर्थितोऽसौविप्रणज्ञातादेशोनृपोददौ पिधानकंनमस्कृत्यतस्मैचाभ्यर्चनादिकं आशीर्भिरभिनंद्याथतमामंत्र्यचभूपतिं उपांगललितादेव्याःप्रासादंपुनरागतः प्रणिपत्यांबिकांविप्रस्त्वरितोनिर्ययौपुरात् पूजयित्वापिधानंतद्विदधेपारणंततः एवमाराध्यमानस्तुससमृद्धोऽभवत्पुनःसोऽपिमंत्रंसमारेभेद्विजाग्र्येवहुवासरं अथैतस्याऽभवत्कन्याललितानामसुंदरी सापिधानकमादायविहर्तुंयातिसर्वदा प्रसन्नत्वात्प्रियत्वाच्चपितृभ्यामनिवारिता कदाचित्स्ववयस्याभिःस्नातुं गंगाजलेशुभे क्रीडंतीददृशेतोयेलीयमानंकलेवरं पिधानहस्तासासिंचदस्यंतांजलिभिस्तदा ससर्पदष्टउत्तस्थौततोदेव्याःप्रसादतः साविश्रांतांद्विजंदृष्ट्वामनसाचिंतयत्पतिं जुहावाभ्यवहारायजनकस्यनिवेशनं मार्गेचपरि

पप्रच्छकुलंशीलंचतस्यसा सोऽपिसर्वंसमाचख्यौगुणराशीतिनामतः ललितामंत्रयामासगुणराशिमितिद्विजं परि
विष्टेषुचान्नेषुपितृवेश्मनिमेद्विज गृहीतापोशनोभूत्वाभार्यार्थंमांत्वमर्थय मयानुमोदितस्तातःसमांतुभ्यंप्रदास्यति
यथोक्तोगुणराशिस्तुतथासर्वंचकारह गोपतिर्भार्ययाभ्रात्रासमालोच्यस्वबांधवैः परीक्षितायविप्रत्वेविद्यायांकुल
शीलयोः प्रतिजज्ञेततः कन्यांललितांगुणशालिने शुभेमुहूर्त्तेचतिथौविवाहंकृतवान्प्रभुः वरायब्राह्मणेभ्यश्चद
त्तंबहुधनंतदा विदधेचतयोर्गेहंनातिदूरेस्ववेश्मनः तत्रोषतुःसानुरागौमिथस्तौदंपती चिरं पिधानकंतयानी
तंनिजंललितयागृहं शनैरथधनंसर्वंगोपतेरगमद्गृहात् गुणराशिर्धनीजातोमहादेव्याःप्रसादतः करंडस्य
पिधानंतज्जनन्याबहुवासरं याचिताऽपिनवैप्रादाल्ललितापूजितंगृहे अथसागोपतेर्जायातस्यैवानर्धनाद्गतं इत्थं
विचिंत्यचायाताजामातरमयाचत समिधार्थंवनंयातःस्वयंतद्गेहमाययौ शोचंतीकिलतांकन्यांसतुदेव्याः प्रसा
दतः उत्थायविपिनादेत्यभुक्त्वाशेतेसुखंगृहे पादसंवाहनंतस्यकुरुतेललितानच तंदृष्ट्वादुःखिताभूमौप्रणिपत्य
पुनःपुनः लज्जिताकृच्छ्रतःपृष्टानिजमाहसपातकं गुणराशिरदात्तस्याःप्रायश्चित्तंतदाबहु स्वात्मानंबहुकालेन
पूतंकृच्छ्रैश्चकारह श्रीपतेस्त्ववलांलक्ष्मींसमालोकयतपोधनाः गोपतिस्तमथापृच्छद्भ्रातस्त्ववर्त्तसेकथं किमाचरसिक
ल्याणंतवश्रीरनपायिनी इतितस्यवचःश्रुत्वाश्रीपतिर्विस्मितःपुनः अस्माभिस्तद्व्रतंदेव्यायत्कृतंगुरुमंदिरे तेनैवमे
ऽचलालक्ष्मीस्त्वमप्येतद्व्रतंकुरु सोपिभक्त्यापुनश्चक्रेव्रतंभ्रात्रोपदर्शितं लेभेसपरमामृद्धिंपुत्रांश्चमुदितोऽभवत् उपांग
ललितादेव्याः प्रसादेनाभवत्सुखी एवमेतत्पुरावृत्तंमाहात्म्यंकथितंमया कृतमन्यैश्चबहुभिस्तेऽपिलब्धमनो
रथाः विधानंतस्यवक्ष्यामितच्छृणुध्वंतपोधनाः शुक्लपक्षेतुपंचम्यामिषेमासिचरेद्व्रतं गर्जितंसंध्ययोस्त्य
ज्यंदिनवृद्धिक्षयेतथा निर्वर्त्यावश्यकंकर्मशुचीरागविवर्जितः चत्वारिंशत्तथाष्टौचकल्पितानिविधानतः दंतका

ष्टान्युपादायतडागंवानदींव्रजेत् आयुर्बलंयशोवर्चःप्रज्ञापशुधनानिच ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते दं
तधावनपूर्वाणिमज्जनानिसमाचरेत् ततोयथाविधिस्नात्वाशुक्लवासागृहंव्रजेत् उपचारैःषोडशभिरेभिर्मंत्रैः स
माहितः कुर्य्यात्पूजांप्रयत्नेनदूर्वाभिश्चविशेषतः शुचौदेशेमंडपंचकृत्वातविमनोहरं सौवर्णींप्रतिमांशक्त्या
कल्पयेन्मंत्रपूर्वकं द्विजायवायनंदद्याद्विंशत्यावटकादिभिः ततःकथांसमाकर्ण्यवायनान्नस्यसंख्यया स्वयनद्या
त्तदेवान्नंवाग्यतः सहबंधुभिः रात्रौजागरणंकुर्य्याद्गीतनृत्यादिमंगलैः प्रभातेपूजयेद्देवींततःकुर्य्याद्विसर्जनं सवाह
नाशक्तियुतावरदापूजितामया मातर्मामनुगृह्याथगम्यतांनिजमंदिरं तामर्चांगुरवेदद्यान्निशिवास्याद्विसर्जनं व्रत
मेवंतुयःकुर्य्यात्पुत्रवान्धनवान्भवेत् विद्यवान्रोगनिर्मुक्तःसुखीगोमांश्चजायते अवैधव्यंचलभतेस्त्रीकन्यावर
मुत्तमं विजयःपुष्टिरारोग्यंयच्चान्यदपिवांछितं इत्येतद्व्रतमाहात्म्यंसेतिहासंमहर्षयः शृण्वन्नपिनरोभक्त्या
सुखमाप्नोतिनिश्चितं इतिस्कांदेउपांगललितापंचमीव्रतं अथास्यप्रयोगोव्रतोद्यापनकौमुद्यां प्रातर्दंतधावनपूर्वकं
नद्यादौस्नात्वाशुक्लवासःपरिधाय मंडपादिकंविधायतिथ्यादिसंकीर्त्यात्मनः पुत्रपौत्रविद्यारोग्यसुखगोधनविजया
युष्यादिकामनया स्त्रीत्वऽवैधव्यसौभाग्यादिकामनया उपांगललिताप्रीत्यर्थमष्टवर्षाचरितोपांगललितापंचमीव्रतो
द्यापनंकरिष्ये आचार्य्यंवृत्वा एकचित्तोभूत्वा कलशोपरिसौवर्णींललिताप्रतिमांपूजयेत् पौराणिकैर्मंत्रैः श्रीसूक्तेनच
ध्यानं नीलकौशेयवसनांहेमाभांकमलासनां भक्तानांवरदांनित्यंललितांचिंतयाम्यहं पूर्वोक्तपौराणिकश्रीसूक्तमंत्रैः
पुष्पपूजांतंविधाय अंगपूजांचविधाय धूपदीपादिकंकृत्वा पुष्पांजल्यंतेऽष्टचत्वारिंशत्परिमितान् दूर्वांकुरान्हस्तेना
दायानेनमंत्रेणसमर्पयेत् बहुप्ररोहासततममृताहरितालिका यथेयंललितेमातस्तथामेस्युर्मनोरथाः इतिदूर्वामंत्रः
बहुप्ररोहादूर्वेयंयथेयममृतालिका ललितेत्वत्प्रसादेनतथामेस्युर्मनोरथाः इतिमंत्रेण समर्पयेत् एवमेवाष्टचत्वा

रिंशत्वारंतर्पयेत् ततःप्रदक्षिणानमस्कारान्कुर्यात् कथाश्रवणादिनारात्रौजागरणंकृत्वा प्रातःस्नात्वा नित्यकर्मनिर्वर्त्य देवींपुनः संपूज्यअष्टौवटकान्समर्प्य अग्निंप्रतिष्ठाप्य अन्वादध्यात् तत्रप्रधानं ललितागौरीमिमायेति मंत्रेणअष्टोत्तरशतदूर्वात्रिकाहुतिभिः नमोदेव्याइतिमंत्रेणाष्टोत्तरशताहुतिभिस्तिलसर्पिःपंचखाद्ययुताज्याहुतिभिः ब्रह्मादिदेवताश्चैकैकाहुत्यायक्ष्येसर्वहोमंसमाप्य अष्टौब्राह्मणान्वस्त्रादिभिःसंपूज्य तेभ्यःपक्वान्नपूरितान्दक्षिणासहितानष्टौकलशान्दत्त्वा ततआचार्यंवस्त्रालंकरणादिभिः संपूज्य विंशतिवटकसहितंवायनंदद्यात् तत्रमंत्रः पक्वान्नफलसंयुक्तंसघृतंदक्षिणान्वितं उपांगललिताप्रीत्यैब्राह्मणायददाम्यहं सवाहनाशक्तियुतावरदापूजिता मया मातर्मामनुगृह्याद्यगम्यतांनिजमंदिरं एवंविसृज्यसोपस्करंपीठंगांचाचार्यायदत्त्वा ब्राह्मणान्सदन्नेनभोजयित्वा आशिषोगृहीत्वा स्वयंविंशतिवटकान्भुंजीत ॥ इतिललितापंचमीव्रतोद्यापनम् ॥ अथास्यामेव शांतिपंचमीव्रतम् तत्रशचीसहितान्कुशमयान्नागान् घृतसहितैस्तिलैर्दुग्धेनचस्नापयित्वासंपूज्यचक्षीरसिक्तगोधूमान्ननैवेद्यंदद्यात् तदुक्तंहेमाद्रौभविष्योत्तरे सुमंतुरुवाच तथाचाश्वयुजेमासिपंचम्यांकुरुनंदन कृत्वाकुशमयान्नागानिंद्राण्यासहपूजयेत् अनंतंवासुकिंशंखंपद्मंकंबलमेवच तथाकर्कोटकंनागंनागमश्वतरंतथाधृतराष्ट्रंशंखपालंकालियंतक्षकंतथा शचींद्विबाहुंसंतानमालाहस्तांगजस्थितां घृतोदकाभ्यांपयसास्नापयित्वाविशांपते गोधूमैःपयसासिक्तैर्भक्ष्यैश्चविविधैस्तथा ध्यात्वावैविधिवन्नागान्शुचिर्भूत्वासमाहितः पूजयेत्कुरुशार्दूलतस्यशेषादयोनृप नागाःप्रीताभवंतीहशांतिमाप्नोतिवैविभो सशांतिलोकमासाद्यमोदतेशाश्वतीःसमाः अत्रायंकथ्यतेमंत्रःसदाविश्वनिषेधकः उँकुरुकुलेहुंफट्स्वाहा ॥ इतिशांति पंचमीव्रतं अथाश्विनशुक्लपक्षे मूलनक्षत्रे सरस्वतीस्थापनाकार्य्यानिर्णयामृतेदेवीपुराणे मूलेषुस्थापनंदेव्याःपूर्वाषाढासुपूजनम् उत्तरासुबलिंदद्याच्छ्रवणेनविसर्जयेदि

त्यादि नाध्यापयेन्नचलिखेन्नाधीयीतकदाचन पुस्तकेस्थापितांदेवींविद्याकामोद्विजोत्तमइति नवरात्रेषु प्रपंचितं आश्विनशुक्लषष्ठ्यांदेवीनिमंत्रणं नवरात्रप्रकरणे ज्ञेयं कात्यायनीपूजांतं नारदीये अथेषशुक्लषष्ठ्यांतुपूज्या कात्यायनीद्विज गंधाद्यैर्मंगलैर्द्रव्यैर्नैवेद्यैर्विविधैस्तथा ततःक्षमाप्यदेवेशींप्रणिपत्यविसर्जयेत् पूज्यात्रसै कातीमूर्त्तिर्यद्वाद्विजसतोमुदा वस्त्रालंकारणैर्भक्ष्यैःकात्यायन्याःप्रतुष्टये कन्यावरंप्राप्नुयाच्चवांछितंलभतेनरः कात्यायनीप्रसादाद्वैनाऽत्रकार्याविचारणा अत्रषष्ठ्यांबिल्वशाखायां देव्याबोधनमुक्तं नवरात्रप्रकरणे तत्रादौ बिल्ववृक्षनिमंत्रणादिकृत्यमपि नवरात्रेषु प्रपंचितं आश्विनशुक्लसप्तम्यांशुभसप्तमीव्रतं नारदीये आश्विने शुक्लपक्षेतुसप्तमीशुभसप्तमी तस्यांकृतस्नानपूजान्वाचयित्वाद्विजोत्तमान् आरभ्यकपिलांगांचसंपूज्य प्रार्थयेत्ततः त्वामहंवच्मिकल्याणिप्रीयतांवर्द्धयस्वमां पालयत्वंजगत्कृत्स्नंयतोऽसिब्रह्मसंभवा इत्युक्त्वा वेदविज्ञायदत्त्वाचवरदक्षिणां नमस्कृत्यविसृज्यैतान्प्राशयेद्गव्यपंचकं व्रतंचेत्थंविधायात्रश्वोभूतेऽथद्विजोत्तमान् भोजयित्वायथाद्यन्नं यदन्नमवशेषितं कृत्वाह्येतद्व्रतंविप्र सुभाव्यंश्रद्धयान्वितैः देवदेवप्रसादेनभुक्तिंमुक्तिमवाप्नुयात् अत्रविशेषोहेमाद्रौपाद्मे शुक्लायामाश्विनेमासिकृतस्नानजपःशुचिः वाचयित्वा ततो विप्रानारभेच्छुभसप्तमीं तत्र कपिलां गां गंधादिभिःसंपूज्यप्रार्थयेत् नमामिसूर्यसंभूतामशेषभुवनात्मिकां त्वामहंसर्वकल्याणशरीरांसर्वसिद्धयेइति ततस्ताम्रपात्रेवस्त्रवेष्टितंसौवर्णंवृषभं तिलप्रस्थोपरिसंस्थाप्यघृतपायसादियुतं अर्घ्यमाप्रीयतामित्युक्त्वा ब्राह्मणायदद्यात्स्वयंपंचगव्यंप्राशयित्वा द्वितीयेऽन्हिब्राह्मणान्संभोज्य स्वयमपिभुंजीत एवंसप्तवर्षपर्यंतंव्रतंकृत्वा तदंतेइक्षुदंडान्वितंशयनादिदद्यादित्युद्यापनेविशेषः शेषंसामान्योद्यापनवदितिशुभसप्तमीव्रतं अस्यामेवसप्तम्यांदेवीत्रिरात्रव्रतमुक्तं हेमाद्रौ प्रतिपदादितिथिषूपवासादिकरणासामर्थ्ये

सप्तम्यादिदिनत्रयेकुर्य्यात् तदाहधौम्यः आश्विनेमासिशुक्लेतुकर्त्तव्यंनवरात्रकं प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् त्रिरात्रंवापिकर्त्तव्यंसप्तम्यादियथाक्रमामिति अथवानवरात्रंचसप्तपंचात्रिकंदिवा एकभक्तेननक्तेन अयाचितेनउपोषणेनच यथाक्रमंकुर्यात् दिवेतिशब्देनैकरात्रमप्युक्तं तथाचगोविंदार्णवे देवीपुराणे नवरात्रव्रते शक्तस्त्रिरात्रंचैकरात्रकं व्रतंचरतियोभक्त्यातस्मैदास्यामिवांछितमिति तत्रापिसप्तम्याःपूर्वोक्तोनिर्णयः अत्रयोगपद्येतंत्रेणोपवासः तिथिद्वयनिमित्तं पूजादिकंतिथिभेदेनकर्त्तव्यं आश्विनशुक्लाष्टमी महाष्टमी अत्र कृत्यं नारदीये आश्विनेशुक्लपक्षेतुप्रोक्ताविप्रमहाष्टमी तत्रदुर्गार्चनंप्रोक्तंसर्वैरप्युपचारकैः उपवासंचैकभक्तंमहाष्टम्यां विधायतु सर्वतोविभवंप्राप्यमोदतेदेववच्चिरं इयमेवमूलनक्षत्रेणनवमीयुताचेन्महानवमीप्रोच्यते अश्वयुक्शुक्लपक्षेयाअष्टमीमूलसंयुता सामहानवमीप्रोक्तात्रैलोक्येऽपिसुदुर्लभा इयंचशुक्लपक्षस्थत्वादुपवासादौ परयुताग्राह्येत्युक्तं शुक्लपक्षेऽष्टमीचेतिब्रह्मवैवर्त्तात् वसुरंध्रयोरितियुग्मवाक्याच्च षष्ट्येकादश्यमावास्येतिपूर्वनिषेधाच्च तथा नाष्टमीसप्तमीयुक्तासप्तमीनाष्टमीयुता नवम्यासहकार्य्यास्यादष्टमीसर्वदाबुधैः अष्टमीनवमीयुग्मेमहोत्साहेमहोत्सवइति दुर्गोत्सवे प्रतिपद्याहरत्खड्गंद्वितीयायांधृतंधनुः तृतीयायांकरेशंखंचतुर्थ्यांचर्मनिर्मलं पंचम्यामाददच्छूलंषष्ठ्यांचपरशुंतथा गदांचविभ्रत्सप्तम्यामष्टम्यांशुक्तिमुत्तमां नवमीचसदादेव्या मूर्त्तिर्दैत्यविनाशिनी अतएवाहिपूज्यास्यादष्टमीनवमीयुतेति पद्मपुराणेऽपि अष्टमीनवमीविद्धानवमीचाष्टमीयुता अर्द्धनारीश्वरप्रायाउमामाहेश्वरीतिथिरिति सप्तमीयुक्तातु सतिसंभवेसर्वथावर्जनीया तत्रमहादोषश्रवणात् पुत्रान्हंतिपशून्हंतिहंतिराष्ट्रंसराजकं हंतिजातानजातांश्चसप्तमीसंयुताष्टमी तस्मात्सर्वप्रयत्नेनसप्तमीवेधसंयुता वर्जनीयाष्टमीचाथभुवोराज्यमभीप्सुभिरितिमदनरत्ने स्मृतिसमुच्चये शरन्महाष्टमीपूज्यानवमीसंयुतासदा

सप्तमीसंयुतानित्यंशोकसंतापकारिणी तथा जंभेनसप्तमीयुक्तापूजितातुमहाष्टमी इंद्रेणनिहतोजंभस्तदादानवपुंगवः तस्मात्सर्वप्रयत्नेनसप्तमीमिश्रिताष्टमी वर्जनीयाहिसततंमनुजैः शुभकांक्षिभिः सप्तमीशल्यसंविद्धां मोहादज्ञानतोऽपिवा महाष्टमींप्रकुर्वाणोनरकंप्रतिपद्यते सप्तमीकलयायत्रपरतश्चाष्टमीभवेत् तेनशल्यमिदंप्रोक्तंपुत्रपौत्रधनक्षयइतिनिर्णयामृते भोजराजीयेभीमपराक्रमेऽपि नदिवाननिशापिचविष्टिहतानचसप्तमिशल्यलवोपहता यदिचाष्टमिशेषयुतानवमीविबुधैरपिपुण्यतमाकथितेति निर्णयसिंधावपि घटिकामात्राप्यौदयिकी ग्राह्येत्युक्तं गौडा अप्येवं व्रतोपवसानियमेघटिकैकापियाभवेदितिदेवलोक्तेः अष्टमीनवमीयुक्तानवमीचाष्टमीयुतेति पाद्मवचनाच्च रूपनारायणधृतदेवीपुराणेऽपि सप्तमीवेधसंयुक्तायैःकृतातुमहाष्टमी पुत्रदारधनैर्हीनाभ्रमंतीहपिशाचवत् अत्रवेधोनत्रिमुहूर्त्तात्मकः किंतुकलामात्रात्मकोऽपि तथा सप्तमीशल्यसंविद्धावर्जनीयासदाष्टमी स्तोकापिसातिथिःपूर्णायस्यांसूर्योदयोभवेदिति इयमष्टमीनवम्याभौमवारेणचयुक्ताऽतिप्रशस्ता तदुक्तं अष्टम्यामुदितेसूर्येदिनांतेनवमीभवेत् कुजवारेभवेत्तत्रपूजनीयाप्रयत्नत इति इयंमूलनक्षत्रेण पूर्वाषाढानक्षत्रेणवा युक्ता महानवमीत्युच्यते तदुक्तं अश्वयुक्शुक्लपक्षेतुयाऽष्टमीमूलसंयुता पूर्वयाषाढयावापिऋक्षद्वययुताऽथवा सामहानवमीनामत्रैलोक्येऽपिसुदुर्लभेति हेमाद्रौस्कांदाच्च निर्णयामृतेभविष्ये कन्यागतेसवितरिशुक्लपक्षेऽष्टमीतुया मूलनक्षत्रसंयुक्तासामहानवमीस्मृता कालतत्त्वविवेचनेदेवीपुराणे प्रावृट्कालेविशेषेणआश्विनेह्यष्टमीषुच महाशब्दोनवम्यांचलोकेख्यातिंगमिष्यति मूलनक्षत्रयुक्ताऽपिसप्तमीलेशसहितादुष्टैव तदुक्तंदुर्गोत्सवे मूलेनापिहिसंयुक्तासदात्याज्याऽष्टमीबुधैः लेशमात्रेणसप्तम्याअपिस्याद्यदिदूषितेति तथामूलापूर्वाषाढयोरेव पूजाप्रशस्ताउत्तराषाढायांतुनिषिद्धा तदुक्तंनिर्णयामृते रूपनारायणीये मूलेनपूजयेद्देवींतथासलिलदैवते वैश्वदेवेतुनक्षत्रे

पूजितादुःखदाभवेत् उत्तराषाढानिषेधस्तुसतिसंभवे ज्ञेयः नसर्वथा तदुक्तंदुर्गोत्सवे मूलाभावेतुकर्त्तव्याअष्टमी
तिथिसंयुता विश्वयुक्ताऽपिकर्त्तव्याअष्टमीनवमीयुतेति अत्रपूर्वोक्तविशेषवचनैर्गौरीतृतीयावत्कर्मकालव्यापिशा
स्त्रंबाधित्वानवमीयुतायामेवरात्रावसत्यामष्टम्यांनवमीपूजयासहतंत्रेणाष्टमीपूजोचिता अतएवकामरूपीयादिनि
बंधेषुवचनं अष्टम्याःशेषदंडश्चनवम्याःपूर्वएवच तत्रयाक्रियतेपूजाविज्ञेयासामहाफलेति अष्टमीनवमीसंधौतृ
तीयाखलुकथ्यते तत्रपूज्यात्वहंपुत्रयोगिनीगणसंयुतेति कालिकापुराणोक्ततृतीयासंधिपूजाप्यष्टमीनवमीपूजा
यांतंत्रेणैवसिद्ध्यति उपोषितोद्वितीयेह्निपूजयेत्पुनरेवतामित्यष्टम्योपवासपरदिनविहितातुनवमीपूजाप्रातर्वर्त्तमा
नायांनवम्यांकर्त्तुंशक्यैव विसर्जनात्पूर्वमितितदनुरोधेनापिसप्तमीयुतायामष्टम्यामुपवासादिमदनरत्ने यत्तुमहाष्ट
म्याश्विनेमासिशुक्लाकल्याणकारिणी सप्तम्यापियुताकार्य्यामूलेनतुविशेषतः तथा अहंभद्राचभद्राहमावयोर्नांतरं
क्वचित् सर्वसिद्धिप्रदास्यामिभद्रायामर्चितात्वहं भद्रायांभद्रकाल्याश्चमध्येस्यादर्चनाक्रिया तस्माद्वैसप्तमी
विद्धाकार्य्यादुर्गाष्टमीबुधैरित्यादीनि पूर्वविद्धाविधायकानि परदिनेऽष्टम्यभावविषयाणि पूर्वोदाहृतवचनविरोधात्
यत्तुनिर्णयामृते महाष्टम्यांभगवतीभद्रायामपिपूजिता ददातिचायुरारोग्यंयतोभद्रास्वरूपिणीतिवचनं अ
त्रभद्राशब्दोनसप्तमीवचनः यानितु सप्तम्यामुदितेसूर्य्येपरतश्चाष्टमीभवेत् तत्रदुर्गोत्सवंकुर्य्यान्नकुर्य्याद
परेऽहनि तथा यदाष्टमीतुसंप्राप्यअस्तंयातिदिवाकरः तत्रदुर्गोत्सवंकुर्य्यादपरेऽहनिवर्जयेत् दुर्भिक्षंतत्रजा
नीयान्नवम्यांयत्रपूज्यते इत्यादीनि परदिनेऽष्टमीलाभेऽपि सप्तमीविद्धाविधायकानि तानि सूर्योदयकालेनवम्य
भावविषयाणि तदुक्तंस्मृतिसंग्रहे यदासूर्य्योदयेनस्यान्नवमीचापरेऽहनि तदाष्टमींप्रकुर्वीतसप्तम्यासहितांनृ
पेति दुर्गोत्सवेऽपि उत्तरास्तिथयोयत्रक्षयंयांतिनराधिप पूर्वाष्टमींतदाकुर्य्यादन्यथानशुभंभवेदिति निर्णया

मृतहेमाद्र्यौस्तु सप्तम्यामुदितेसूर्य्ये इत्यादिवचनमाश्विनकृष्णाष्टमीविषयं कृष्णपक्षेऽष्टमीचेति पूर्वविद्धायाः कृष्णपक्षलवप्राशस्त्यात् कृष्णाष्टम्यांपूजनंच कृष्णपक्षनवम्यांक्रियमाणदेवीप्रबोधनांग कन्यायांकृष्णपक्षेच बोधयित्वाऽष्टमीदिने नवम्यांबोधयेद्देवींगीतवादित्रनिःस्वनैरितिदेवीपुराणात् महाष्टम्यापूर्वे गुःपूर्वाह्ण०रापश्चे पूर्वाऽन्यथापरैवेति निर्णयदीपमानमिति निर्णयसिंधौ अत्रकृत्यमुक्तं कन्यासंस्थेरवावीषशुक्लाष्टम्यांप्रपूजयेत् सोपवासोनिशार्द्धेतुमहाविभवविस्तरैः देवीपुराणे कन्यासंस्थेरवावीषशुक्लाष्टम्यांप्रपूजयेत् द्रोणपुष्पैश्चबिल्वैश्चजातिपुन्नागचंपकैरिति अत्रविशेषउक्तोमदनरत्ने विष्णुधर्मोत्तरे आश्विनेशुक्लपक्षस्यअष्टम्यां प्रयतःशुचिः तत्रैवायुधवर्माद्यंछत्रंवस्त्रंचपूजयेत् राजलिंगानिसर्वाणितथाशस्त्राणिपूजयेत् रात्रौजागरणंकुर्य्यात्तत्रैववसुधाधिपः उपोषितोद्वितीयेन्हिपूजयेत्पुनरेवतां आयुधाद्यंचसकलंपूजयेद्वसुधापतिः विस्तरेणाष्टमीकृत्यंनवरात्रप्रकरणएवोक्तमतोनेहप्रपंच्यते इत्याश्विनशुक्लाष्टमीनिर्णयः

आश्विनशुक्लनवम्याअपिमहानवमीविधानंनारदीये

आश्विनेशुक्लनवमीमहापूर्वाप्रकीर्त्तिता अपराह्णेशमीपूजाकार्य्यास्यांप्राग्दिशिद्विज ततोनिशायांप्राग्यमेखड्गं धनुरिषून्गदां शूलंशक्तिंचपरशुंछुरिकांचर्मखेटकं छत्रंध्वजंगजंचाश्वंगोवृषंपुस्तकंतुलां दंडंपाशंचक्रशंखौगधाद्यैरुपचारकैः संपूज्यमहिषंतत्रभद्रकाल्यैसमालभेत् एवंबलिंविधायाथभुक्तापक्वान्नमेवच द्विजेभ्योदक्षिणां दत्वाव्रतंतत्रसमापयेत् एवंयःपूजयेद्दुर्गांनृणांदुर्गतिनाशिनीं इहभुक्त्वावरान्भोगानंतेस्वर्गतिमाप्नुयात् इयं दुर्गा व्रतपूजादौ पूर्वा ग्राह्या युग्मवाक्यात् भविष्योत्तरेऽपि अश्वयुक्शुक्लपक्षेतुअष्टमीमूलसंयुता सामहानवमी नामत्रैलोक्येऽपिसुदुर्लभेति कन्यागतेसवितरिशुक्लपक्षेऽष्टमीयुता मूलनक्षत्रसंयुक्तासामहानवमीस्मृतेति

अत्रमूलग्रहणंमूलादिनक्षत्रत्रयोपलक्षणं तदुक्तंलिंगपुराणे दुर्गांपूजासुनवमीमूलाद्यृक्षत्रयान्विता महतीकीर्त्ति
तातस्यांदुर्गांमहिषवाहिनीं चंडिकामुपहारैस्तुपूजयेद्राज्यवृद्धयइति अस्यांपूजाहोमादि प्राग्वत्कृत्वा बलिदानं
कार्य्यं प्रभूतबलिदानंचनवम्यांविधिवच्चरेदितिकालिकापुराणात् यदातुनवम्यष्टमीविद्धाभूत्वाद्वितीयदिनेऽपि
कियतीभवति तदा नवमीप्रयुक्तस्यपूजादेः पूर्वदिनेऽनुष्ठापितबलिदानमात्रं द्वितीयदिनेकर्त्तव्यं अष्टम्यामुदिते
सूर्येदिनांतेनवमीभवेत् प्रभातेबलिदानेतुकियन्मात्राऽपिलभ्यते नवम्यांतत्रसंपूज्यादुर्गांदुर्गतिनाशिनीतिवच
नात् मदनरत्नेऽपि बल्यादौपराकार्य्याउपवासेतुपूर्वैवेति प्रतापमार्त्तंडेऽपि द्वितीयदिनेनवम्याअलाभेतुपूर्वेद्युरेव
नवमीमध्येकार्य्यं दशम्यांबलिदानंतुदीयतेयत्रमानवैः तद्राष्ट्रंनाशमायातिमारकोपद्रवैःस्फुटमिति भविष्ये नव
मीप्रयुक्तस्यबलिदास्यदशम्यांकरणेदोषश्रवणात् नंदायांज्वलतेवन्हिःपूर्णायांपशुघातनं भद्रायांगोकुलक्रीडात
त्राज्यंविनश्यति नबम्यामपराह्णेतुबलिदानंप्रशस्यते दशमींवर्जयेत्तत्रनाऽत्रकार्य्याविचारणेति नंदायांदर्शने
रक्षाबलिदानंदशासुच भद्रायांगोकुलक्रीडादेशनाशायजायतेइतिमदनरत्ने यानितु नकार्य्यादशमीविद्धान
वमीतुसदाबुधैः नवमींदशमीविद्धांयेकुर्वंतिविमोहिताः वृथातेषांभवेत्सर्वंबलिपूजाविधानकमित्यादीनि
क्वचिद्वचनानि तानिशुद्धाधिकानिषेधपराणि अन्यथा पूर्वोदाहतसूर्य्योदयेपरंरिक्तेति वाक्यविरोधप्रसंगइति

अत्र निर्णयसिंधुकारः वेधश्च त्रिमूहूर्त्तात्मकः यत्तु हेमाद्रिमते मूहूर्तद्वयात्मकोपिवेधोऽस्ति तथापि
सूर्योदयएवसः सायंतु त्रिमुहूर्तएव तदुक्तंदीपिकायां त्रिमुहूर्त्तगातुसकलासायामिति माधवोपि सायंभूत
यातद्वन्न्यूनयातुनाविध्यतइति तेन त्रिमुहूर्तयोगेपूर्वानवमीतिपूर्वोक्तवचनात् नकुर्यान्नवमींतातदशम्यातुकदा
चनेतिस्कांदे परानिषेधाच्च त्रिमुहूर्तयोगाभावेतु परैव कार्य्येतिनिष्कर्षः इत्याहुः निर्णयदीपेतु महानवम्याः

परादिनेऽपराह्णव्यापित्वेपराअन्यथापूर्वैवेत्युक्तं आवर्त्तनात्पूर्वकालेनवमीस्यात्परेऽहनि दुर्गापूजाऽत्रपूर्वेद्युःपूर्वाह्णेत्वष्टमीयदेतिधौम्यवचनात् अस्यशारदनवमीविषयत्वेसमूलत्वेच प्रमाणाभावाद्विमृश्यमेतत् नवम्यामेव दुर्गापूजनहोमबलिदानाद्युपक्रम्यसमापनीयमितिराजमार्त्तंडः नवम्यांचजपंहोमंसमाप्यविधिवद्बलिमितिवचनात् ब्रह्मवैवर्त्तेऽपि अत्रापराह्णिकेकालेबलिदानंप्रशस्यते दशमींवर्जयेत्तत्रनात्रकार्याविचारणेतिदेवीपुराणेऽपिसूर्योदयेपरंरिक्तापूर्णास्यादपरायदि बलिदानंप्रकर्त्तव्यंतत्रदेव्याःशुभावहं बलिदानेकृतेऽष्टम्यांराष्ट्रभंगोभवेन्नृपेति नवम्यांचजपंहोमंसमाप्यश्रवणेऽपिचेतिसंग्रहोक्तेः व्रतंचजागरश्चैवनवम्यांविधिवद्बलिरितिदेवीपुराणाच्च इदंबलिदानंनवमीप्रयुक्तंअष्टमीप्रयुक्तस्याष्टम्यामेवकर्त्तव्यत्वात् इयंचनवम्युपवासादिष्वतिप्रशस्ता तदुक्तंभविष्योत्तरे तस्मादियंमहापुण्यानवमीपापनाशिनी उपोष्यासुप्रयत्नेनसततंसर्वपार्थिवैरिति हेमाद्रौदेवीपुराणेऽपि आश्विनेनवमीशुक्लातस्यांकोटिगुणंफलं तथा आश्विनस्यतुमासस्यनवमीशुक्लपक्षगा जायतेकोटिगुणितंदानंतस्य। नराधिपेति इयं मन्वादिरपि इतिमहानवमीनिर्णयः ॥ अस्यामेवविष्णुधर्मोत्तरोक्तं भद्रकालीव्रतं राम उवाच विधिनापूजयेत्केनभद्रकालींनराधिप नवम्यामाश्विनेमासिशुक्लपक्षेनरोत्तम पुष्करउवाच पूर्वोत्तरेतुदिग्भागेशिववास्तुमनोहरे भद्रकालीगृहंकुर्य्याच्चित्रवस्त्रैरलंकृतं भद्रकालीपदंकृत्वातत्रसंपूजयेद्द्विज अत्रमंत्रआगमोक्तः यद्वा जयंतीमंगलाकालीभद्रकालीकपालिनी दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोऽस्तुते इतिपौराणिकमंत्रोवा भद्रकालीस्वरूपंतुविष्णुधर्मोत्तरे अष्टादशभुजाकार्य्याभद्रकालीमनोहरा आलीढस्थानसंस्थानाचतुःसिंहरथेस्थिता अक्षमालांचशूलंचखड्गंचर्मचयादव बाणचापेचकर्त्तव्येपद्मशंखौतथैवच स्रुक्स्रुवौचतथाकार्य्यौतथावेदिकमंडलू दंडशक्तीचकर्त्तव्येतथाशक्तिहुताशनौ हस्तानांभद्रकाल्याश्चभवेच्छांतिकरःकरः एक

श्चैवमहाराजरक्तपात्रधरोभवेदिति आश्विनेशुक्लपक्षस्यअष्टम्यांप्रयतःशुचिः तत्रैवायुधवर्माद्यंछत्रंवस्त्रंचपूजयेत् राजलिंगानिसर्वाणितथाशस्त्राणिपूजयेत् पुष्पैर्गंधैः फलैर्भक्ष्यैर्भोज्यैश्चसुमनोहरैः बलिभिश्चविचित्रैश्चप्रेक्षादानैस्तथैवच रात्रौजागरणंकुर्य्यात्तत्रैववसुधाधिपः उपोषितोद्वितीयेऽन्हिपूजयेत्पुनरेवतां आयुधाद्यंचसकलंपूजयेद्वसुधाधिपः एवंसंपूजयेद्देवींवरदांभक्तवत्सलां कात्यायनींकामगमांबहुरूपांवरप्रदां पूजितासर्वकामैःसायुनक्तिवसुधाधिपं एवंहिसंपूज्यजगत्प्रधानांयात्रातुदेयावसुधाधिपेन प्राप्नोतिसिद्धिंपरमांमहीशोजनस्तथान्योपिशुभंत्रिशक्त्याः इतिभद्रकालीव्रतं ॥ अथमहानवम्यामुत्सवविधानं भविष्योत्तरेऽपि श्रीकृष्णउवाच पुण्यामहानवम्येषातिथीनामुत्तमातिथिः अनुष्ठेयानरैः सर्वैः प्रजापालैर्विशेषतः भवानीतुष्टयेपार्थसंवत्सरसुखायच भूतप्रेतपिशाचानांप्रीत्यर्थमुत्सवायच युधिष्ठिरउवाच कस्मात्कालात्प्रवृत्तेयंनवमीमहशब्दिका किमादावपिकृष्णासीद्याभवान्याः प्रियातिथिः यशोदागर्भसंभूताकुत्रसाऽत्रप्रवर्त्तिता उताहोपूर्वमेवासीत्कृतत्रेतायुगादिषु येचान्येप्राणिनःसर्वेवध्यंतेघातयंतिच हतानांप्राणिनांतेषांकागतिः पारलौकिकी स्वयंघ्नतांघातयतामनुमोदयतांतथा एतन्मेसंशयंसर्वंछेत्तुमर्हसिकेशव श्रीकृष्णउवाच पार्थयापरमाशक्तिरनंतालोकपूजिता आद्यासर्वगताशुद्धाभावगम्यामनोहरा अर्द्धाष्टमीकालकालीसुषुम्णासर्वमंगला मायाकात्यायनीदुर्गाचामुंडाशंकरप्रिया ध्यायंतियांयोगरतास्सादेवीपरमेश्वरी रूपभेदैर्नामभेदैर्भवानीपूज्यतेशिवा अष्टम्यांतुनवम्यांतुदेवदानवराक्षसैः गंधर्वैरुरगैर्यक्षैःपूज्यतेकिन्नरैर्नरैः अन्यैरपियुगादौतुसृष्टेःपूर्वंप्रपूजिता पूजितेयंपुरादेवैस्तेभ्यःपूर्वैर्नरैःशुभैः अश्वयुक्शुक्लपक्षेतुअष्टमीमूलसंयुता सामहानवमीनामत्रैलोक्येऽपिसुदुर्लभा कन्यागतेसवितरिशुक्लपक्षेतथाऽष्टमी मूलनक्षत्रसंयुक्तासामहानवमीस्मृता अष्टम्यांचनवम्यांचजन्ममोक्षप्रदांबिकां पूजयित्वा

श्विनेमासिविशोकोजायतेनरः संतर्जयंतीहुंकारैर्विघ्नौघान्घातकान्परान् नवम्यांपूजितादेवीददात्यनुपमंफलं
सापुण्यासापवित्राचसाधर्मसुखदायिनी तस्यांसदापूजनीयाचामुंडामुंडमालिनी तस्यांयेह्युपयुज्यंतेप्राणिनोम
हिषादयः सर्वेतेस्वर्गतिंयांतिघ्नतांपापंनविद्यते नतथाबलिदानेनपुष्पधूपविलेपनैः यथासंतुष्यतेमेधैर्माहिषैर्विंध्य
वासिनी उद्दिश्यदुर्गांहन्यंतेविविधायत्रजंतवः स्वर्गतिंयांतिकौंतेयघातयंतोयशस्विनः भवानीप्रांगणेप्राणायेषां
यांतियुधिष्ठिर तेषांस्वर्गेऽनुलोवासोवीरास्तेऽप्सरसांप्रियाः मन्वंतरेषुसर्वेषुकल्पेषुकुरुनंदन तेषुसर्वेषुपूज्यासी
न्नवमीयंसुरार्चिता प्रासिद्धानादिनिधनावर्षेवर्षेयुधिष्ठिर भूयोभूयोवतारैश्चभवानीपूज्यतेसुरैः अवतीर्णा वर्णाचभु
विदैत्यानिबर्हिणी स्वर्गपातालमर्त्येषुकुरुतेस्थितिपालने सैवकालीमहादेवीयशोदागर्भसंभवा कंसासुरस्योत्त
मांगेपदंदत्त्वागतावियत् ततःप्रभृतिदैत्यघ्नीयशोदानंदिनीमया विंध्याचलेस्थापयित्वापुनःपूजाप्रवर्तिता पूर्वप्र
सिद्धोपिपुनर्भगिन्यामहिमाकृतः भुविसत्त्वोपकारायसर्वोपद्रवशांतये एवंचविंध्यवासिन्यांनवरात्रोपवासतः
एकभक्तेननक्तेनस्वशक्त्यायाचितेनच पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे गृहेगृहेशक्तिपरैर्ग्रामेग्रामेवनेवने स्ना
तैःप्रमुदितैर्हृष्टैर्ब्राह्मणैःक्षत्रियैर्नृप वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमानवैः स्त्रीभिश्चकुरुशार्दूलतद्विधानमिदंशृ
णु एतदनंतरंजयाभिलाषीनृपतिरित्यादि भूताःसुखावहाइत्यंतोग्रंथोऽष्टमीकृत्येलोहाभिसारप्रकरणेज्ञेयः इत्येवंभ्रा
मयेद्देवींदुर्गांदेवींरथेस्थितां नरयानेनवापार्थततोविघ्नंसमापयेत् अथोत्पन्नेषुविघ्नेषुभूयःशांतिंसमाचरेत् येनविघ्ना
नजायंते यात्रासंपूर्णतांव्रजेत् एवंयेकुर्वतेयात्रांराजानोऽन्येऽपिमानवाः महानवम्यांनंदायाःपुत्रिकाहृष्टमानसाः
तेसर्वेपापनिर्मुक्तायांतिभागवतींपुरीं नतेषांशत्रवोनाग्निर्नचौरानविनायकाः विघ्नंकुर्वंतिराजेंद्रयेषांतुष्टामहेश्वरी
इत्येषतेसमाख्यातोदुर्गादेव्यामहोत्सवः पठतांशृण्वतांचैवसर्वाशुभनिवर्हणः शूलाग्रभिन्नमाहिषासुरपृष्ठपीठ

मध्यस्थितांसुरुचिरांगदबाहुदंडां अभ्यर्च्यपंचवदनानुगतांनवम्यांदुगांतुदुर्गगहनानितरंतिमर्त्याः इतिमहानवमीदुर्गोत्सवः आश्विनशुक्लनवम्यामेव भविष्यत्पुराणोक्तं रथनवमीव्रतम् सुमंतुरुवाच कृत्वैवाश्वयुजेमासिशुक्लपक्षेनराधिप नवम्यामुपवासंतुदुर्गादेवींप्रपूजयेदित्युपक्रम्य वस्त्रादिशोभितंनवंरथंकृत्वा कृत्वास्वर्णमयींदुर्गांमहिषासनशोभितां दुर्गास्वरूपं आलीढस्थानसंस्थानातथाराजंश्चतुर्भुजा असृक्पात्रकरादेवीशूलखड्गधरातथा चतुर्थश्चकरस्तस्यास्तथाकार्यस्तुसामिषइति रथमध्येतांविन्यस्य तंरथं राजमार्गेभ्रामयित्वादुर्गालयेसंस्थाप्य प्रभातेपुनःपूजांकृत्वा ब्राह्मणान्संभोज्यस्वयंभुंजीतेत्युक्तं अत्रभगवतीप्रीत्यर्थंशय्यादानंशूलांकितवृषदानमुभयतोमुखीदानंचकर्तव्यं तदुक्तं रत्नोपकरणैर्युक्तांदंतदारुमयींशुभां शय्यांनिवेदयेद्यस्तुभगवत्यैनराधिप संपूज्यगंधपुष्पाद्यैर्विधिवच्चंडिकांनृप दुकूलवस्त्रतूलानांपरिसंख्यातुयावती तावद्वर्षसहस्राणिदुर्गालोकेमहीयते वृषंशूलांकितंयश्चभगवत्यैनिवेदयेत् आसप्तमंसतुकुलंमहादेवालयंव्रजेत् दत्त्वोभयमुखींगांचभगवत्यैसुशोभनाम् सप्तद्वीपांधरांदत्त्वायत्फलंतदवाप्नुयात् पदद्वयंशिरोर्द्धंचयावद्वत्सस्यनिर्गतम् तावद्यौःपृथिवीज्ञेयातद्दानात्स्यान्महीप्रदः इतिरथनवमीव्रतम् अस्यामेवारभ्यंब्रह्मपुराणोक्तंशौर्यव्रतं अगस्त्यउवाच अतःपरंप्रवक्ष्यामिशौर्यव्रतमनुत्तमम् येनभीरोरपिमहच्छौर्यंभवतितत्क्षणात् मासिचाश्वयुजेशुद्धेनवम्यांसमुपोषितः सप्तम्यांकृतसंकल्पःस्थित्वाष्टम्यांनिरोधतः नवम्यांप्राशयेत्पिष्टं प्रथमंभक्तितोनृप ब्राह्मणान्भोजयेच्छक्त्यादेवींचैवतुपूजयेत् दुर्गांदेवींमहाभागांमहामायांमहाप्रभाम् एवंसंवत्सरंयावदुपोष्यतुविधानतः व्रतांतेभोजयेद्धीमान्यथाशक्तिकुमारिकाइतिशौर्यव्रतम् ॥ अथास्यामेवाश्विनशुक्लनवम्यामुल्कानवमीव्रतं श्रीकृष्णउवाच उल्काख्यांनवमींराजन्कथयामिनिबोधतां याकश्यपेनकथितातारक

स्यार्त्तिनाशिनी अश्वयुक्शुक्लपक्षेयानवमीलोकविश्रुता तस्यांस्नात्वासमभ्यर्च्यपितृन्देवान्समाधिना पश्चात्संपूजयेद्देवींचामुंडांभैरवप्रियां पुष्पैर्धूपैःसनैवेद्यैर्मांसमत्स्यसुरासवैः पूजयित्वास्तवंकुर्य्यान्मंत्रेणानेनमानवः समारोप्यांजलिंमूर्ध्निजानुभ्यामवनींगतः महिषघ्निमहामायेचामुंडेमुंडमालिनि द्रव्यमारोग्यविजयंदेहिदेविनमोऽस्तुते कुमारीर्भोजयेद्भक्त्यानवतानीलकंचुकैः परिधानैर्भूषणैश्चभूषयित्वाक्षमापयेत् सप्तपंचतथैकांवानिजवित्तानुरतः श्रद्धयातुष्यतेदेवीइतिधीरानुशासनं अभ्युक्ष्यमंडलंकृत्वागोमयेनशुचिस्ततः तत्रासनेचोपविशेत्पात्रंचपुरतोन्यसेत् ततःसंसिद्धमन्नंयत्तत्सर्वंपरिवेषयेत् सघृतंवापसेभ्यश्चदत्त्वान्नंपात्रसन्निधौ तृणानांमुष्टिमादायगृह्णीयादष्टमात्रकं प्रज्वालयेत्ततोभोज्यंयावज्ज्वलतिपावकः प्रशांतेभोजनंत्यक्त्वासमाचम्यप्रसन्नधीः चामुंडांहृदयेध्यात्वागृहकृत्यपरोभवेत् अनेनविधिनासर्वमासिमासिसमाचरेत् ततःसंवत्सरस्यांतेभोजयित्वा कुमारिकाः वस्त्रैराभरणैःपूज्यप्रणिपत्यक्षमापयेत् सुवर्णंशक्तितोदद्याद्गांचविप्रायशोभनां यएवंकुरुतेपार्थ पुरुषोनवमीव्रतं नतस्यशत्रवोनाग्निर्नराजानोनतस्कराः भूताःप्रेताःपिशाचाश्चजनयंतिभयंगृहे समुद्यतेषु शस्त्रेषुहंतातस्यनविद्यते रक्षतेतंसदोद्युक्तासर्वास्वापत्सुचंडिका नरोवायदिवानारीव्रतमेतत्समाचरेत् उल्कावत्ससपत्नानांज्वलन्नास्तेसदाहृदि संशुष्ककोटरमुखींसुकरालदंष्ट्रांकापालिनींसमवलंबितमुंडमालां उल्काव्रतेन पुरुषोनवमीषुचंडींसंपूज्यकस्यहृदयंनचमत्करोति इतिभविष्योत्तरे उल्कानवमीव्रतम् आश्विनशुक्लदशमी विजयादशमी नारदीये आश्विनेशुक्लदशमीविजयासाप्रकीर्त्तिता दशगोमयपिंडांस्तुप्रातर्न्यस्यगृहांगणे चक्रवालस्वरूपेणतन्मध्येरामलक्ष्मणौ तथाभरतशत्रुघ्नौसंपूज्याश्चतुरोऽपिहि सापिधानासुपालीषुगोमयस्य चतसृषु छिन्नंधान्यंसरोप्यंतु धृत्वाशुक्लांबरावृतः पितृमातृभ्रातृपुत्रजायाभृत्यसमन्वितः

संपूज्यगंधपुष्पाद्यै नैवेद्यैश्चविधानतः नमस्कृत्याथभुंजीतद्विजान्संभोज्यपूजितान् एवंकृत्वाविधानंतु नरोवर्षंसुखान्वितः धनधान्यसमृद्धश्चनिश्चितंजायतेद्विज अथापराह्णसमयेनवम्यांसुनिमंत्रितां पूर्वदिक्स्थां शमींविप्रगत्वातन्मूलमृत्तिकां गृहीत्वास्वगृहंप्राप्यगीतवादित्रनिःस्वनैः संपूज्यतांविधानेनसज्जीकृत्यनिजंबलं निर्गत्यपूर्वद्वारेणग्रामाद्बहिरनाकुलः ततः शत्रुप्रतिकृतिंनिर्मितांपत्रिकादिभिः मनसाकल्पितांवापिस्वर्णपुंखशरेणवै विध्येदतिभृशंप्रीतः प्राप्नुयात्स्वगृहंनिशि एवंकृतविधिर्वापिगच्छेद्वाशत्रुनिग्रहे एषैवंदशमीविप्रविधिना चरितासदा धनंजयंसुतान्गाश्चगजाश्वंचाप्यजाविकं दद्यादिहशरीरांतेस्वर्गतिंचापिनारद ॥ इयंचतारकोदयव्यापिनीग्राह्येतिसामान्यनिर्णयः तदुक्तंचिंतामणौ आश्विनस्यसितेपक्षेदशम्यांतारकोदये सकालोविजयोनामसर्वकार्य्यार्थसाधकः रत्नकोशेऽपि ईषत्संध्यामतिक्रांतःकिंचिदुद्भिन्नतारकः विजयोनामकालोऽयंसर्वकार्य्यार्थसाधकः दिनद्वयेतद्व्याप्तावव्याप्तौवाअपराजितापूजायांपूर्वैव तदुक्तं हेमाद्रौ स्कांदे दशम्यांतुनरैः सम्यक्पूजनीयाऽपराजिता ऐशानींदिशमाश्रित्यअपराह्णेप्रयत्नतः यापूर्णानवमीयुक्तातस्यांपूज्याऽपराजिता क्षेमार्थंविजयार्थंचपूर्वोक्तविधिनानरैः नवमीशेषसंयुक्तदशम्यामपराजिता ददातिविजयंदेवीपूजिताजयवर्द्धिनी तथा आश्विनेशुक्लपक्षेतुदशम्यांपूजयेन्नरः एकादश्यांनकुर्वीतपूजनंचापराजितामिति अत्रयात्रात्वेकादशेमुहूर्त्तेकार्य्या तथाचभृगुः आश्विनस्यासितेपक्षेदशम्यांसर्वरात्रिषु सायंकालेशुभायात्रायदिवाविजयक्षणे एकादशोमुहूर्त्तोयं विजयः संप्रकीर्त्तितः तस्मिन्सर्वैर्विधातव्यायात्राविजयकांक्षिभिरिति दिनद्वयेएकादशमुहूर्त्तव्याप्तौ श्रवणयुताग्राह्या तथाचहेमाद्रौमदनरत्नेकश्यपः उदयेदशमीकिंचित्संपूर्णैकादशीयदि श्रवणर्क्षंयदाकालेसातिथिर्विजयाभिधा श्रवणर्क्षेतुपूर्णायांकाकुत्स्थःप्रस्थितायतः उल्लंघयेयुःसीमानंतद्दिनर्क्षेततोनराइति कालेऽपराह्णयोगाभावेतु

सर्वपक्षेषुपूर्वैव मदनरत्नेऽप्येवं ज्योतिर्निबंधेरत्नकोशेचनारदः ईषत्संध्यामतिक्रांतःकिंचिदुद्भिन्नतारकः विजयोनामकालोऽयंसर्वकार्यार्थसाधकःइषस्यदशमींशुक्लांपूर्वविद्धांनकारयेत् श्रवणेनापिसंयुक्तांराज्ञांपट्टाभिषेचने सूर्योदये यदाराजन्दृश्यतेदशमीतिथिः आश्विनेमासिशुक्लेचविजयांतांविदुर्बुधाः अत्रायंनिर्गलितार्थःअपराह्णोमुख्यःकालः तत्रैवपूजाद्युक्तं प्रदोषोगौणः तत्रदिनद्वयेप्यपराह्णव्यापित्वेचपूर्वा प्रदोषव्याप्तेराधिक्यात् दिनद्वयेप्रदोषव्यापित्वे परा अपराह्णव्याप्तेराधिक्यात् श्रवणस्तुरोहिणीवदप्रयोजकः दिनद्वयेऽपराह्णसत्त्वेच पूर्वा तत्राप्यपराह्णेश्रवणसत्त्वेपरैवेति अत्रापराजितापूजादिकं पूर्वविद्धाविधायकं नवरात्रप्रकरणेलिखितं शमीपूजादिकमपि तत्रैव नवरात्रपारणानिर्णयोऽपि तत्रैवाभिहितः अथात्रप्रस्थानादिविधानंतत्र दिशांविजयमंत्राश्च पठितव्याःपुरोधसेति आशादशमीपूजाव्रतवदत्रविधानं अस्यांगोपथब्राह्मणेविवाहमुद्दिश्योक्तंप्रस्थानविधिं कुर्यात् तद्यथा अथप्रस्थानंव्याख्यास्यामः ननेषुगच्छत्सुपार्थिवास्तत्रत्यादुंदुभीर्वीणावादयेरन्हृष्टालंकृताश्वारुवदना उदगयनेपुण्यनक्षत्रे केशश्मश्रुरोमनखानिवापयित्वा संभारानुपकल्प्य मैत्रंमुहूर्त्तमुपसमाधाय शांतिप्रतिसरंकारयित्वा कर्त्तान्वालभ्यजुहोत्यभयैरायुष्यैः स्वस्त्ययनैः शर्मवर्मभिर्जनवदनैश्चहुत्वा पार्थिवस्येतिमात्रगामेतिचहुत्वा आगच्छतागतस्वेतींद्रंस्थालीपाकेनेष्ट्वा विष्णुनृक्षराऋजवइतिपंथानमास्थायजपेदिमौ पाशेयत इंद्रंतारमिंद्रंमानोविंदन्नभयसोमोबृहस्पतिर्नरः परिपातुपश्चादितित्रीन् विष्णुक्रमान्क्रांत्वेत्यादि- अपराजिता पूजनादिकं नवरात्रवशात्तत्रैवोक्तं दिशांविजयमंत्राश्चपठनीयाः पुरोधसेतिप्रागुक्तं तत्रमंत्रा आशादशमीव्रतोक्ताभविष्योत्तरे त्वयिसन्निहितःशक्रःसुरासुरनमस्कृतः पूर्वस्त्वंभुवनस्यास्यऐंद्रदिग्देवतेनमः परिगृह्य दिशेशत्वंत्वमाग्नेयीतिपठ्यसे तेजोरूपापराशक्तिराग्नेयीजयदाभव २ धर्मराजंममाश्रित्यलोकान्

यमयत्यसौ ॥ तेनसंयमनीचासि ॥ याम्येमत्कामदाभव ॥ ३ ॥ खड्गहस्तातिविकृतनिर्ऋतिस्थान
माश्रिता तेननैर्ऋतिनामासित्वमाशांपूरयस्वमे ४ त्वय्यास्तेभुवनाधारोवरुणोयादसांपतिः कामार्थंमम
धर्मार्थंवारुणिप्रवणाभव ५ अधिष्ठितासियस्मात्त्वंवायुनाजगदायुना वायव्येत्वमतःशांतिंनित्यंयच्छममा
नघे ६ धनदेनाधिष्ठितासिप्रख्यातात्वमिहोत्तरा निरुत्तराभवास्मासुदत्त्वासद्योमनोरथम् ७ दृशाभिमतवे
षेणशंभुनात्वमलंकृता पूरयस्वाशुमेदेविवांछितानिनमोऽस्तुते ८ भुजगाष्टकुलेनत्वंसेविताऽसियतोह्यधः ना
गांगनाभिःसहिताहितायभवमेऽनघे ९ सर्वलोकोपरिगतासर्वदात्वंशिवायच सनकाद्यैःपरिवृतासर्वदा
पाहिमांभयात् १० नक्षत्राणिचयोगाश्चग्रहास्तारागणास्तथा नक्षत्रमातरोयाश्चभूतप्रेतविनायकाः सर्वेमेभी
ष्टसिद्ध्यैतुभवंतुप्रवणास्सदेति अथात्रखंजरीटपूजनंदर्शनमपिवदंति तस्यमंत्रोज्योतिःशास्त्रे तिथितत्त्वे कृत्वानीराजनविधिंविधिप्रोक्तंयथाक्रमं
शोभनंखंजनंपश्येज्जलगोष्ठादिसन्निधौ नीलग्रीवशुभग्रीवसर्वकामफलप्रद
पृथिव्यामवतीर्णोऽसिखंजरीटनमोऽस्तुते वसंतराजेऽपि त्वंयोगयुक्तोमुनिपुत्रकस्त्वमदृश्यतामेषिशिखोद्गमेन
त्वंदृश्यसेप्राद्वृषिनिर्गतायांलंखंजनाश्चर्य्यमयोनमस्ते अस्यपूजनं हस्तादित्येयमहालयप्रकरणेऽस्तीतिविजयादशमीविधानं
आश्विनशुक्लैकादशी पापांकुशा तदुक्तंनारदीये एकादशीमिषेशुक्लांविप्रपापांकुशाह्वयां उपोष्य
विधिवद्विष्णोर्दिनेविष्णुंसमर्चयेत् ततः संभोज्यविप्राग्र्यान्दत्त्वातेभ्यश्चदक्षिणां भक्त्याप्रणम्यविसृजेदश्नी
याच्चस्वयंततः एवंयःकुरुतेभक्त्यानरःपापांकुशाव्रतं सभुक्त्वेहवरान्भोगान्यातिविष्णोःसलोकतां अथकथा वारा
हभविष्यपुराणयोः युधिष्ठिरउवाच कथ्यतांदेवदेवेशह्यनादिस्त्वंजगत्प्रभो धातात्वंचविधाताचकर्ताहर्तात्वमेवच
इषस्यशुक्लपक्षेतुकावाह्येकादशीभवेत् किंनामकोविधिस्तस्याएतद्विस्तरतोवद श्रीकृष्णउवाच शृणुष्वत्वंमहाराज

कथांपापप्रणाशिनीं इषस्यशुक्लपक्षेयातस्यानामवदामिते पापांकुशेतिविख्यातापापकुंजरभीतिहा आश्विनेमासि
देवेशंपद्मनाभमनामयं पूजयेच्चैवमांराजन्स्वर्गमोक्षप्रदायकं तुलसीमंजरीभिश्चपुष्पैस्तदृतुसंभवैः तपस्तप्त्वानर
स्तीव्रंसमवाप्नोतितत्फलं तत्फलंसमवाप्नोतिपूजयित्वाजनार्दनं कृत्वाचसुमहत्पापंयोनरोहरिमर्चयेत् नयातिनरकं
घोरंयतःपापहरोहरिः पृथिव्यांयानितीर्थानिपुण्यान्यायतनानिच तानिसर्वाणिचाप्नोतिविष्णोर्नामानुकीर्त्तनात् देवं
शार्ङ्गधरंविष्णुंयेप्रपन्नाजनार्दनं नतेयमपुरंयांतियांतिलोकंचशाश्वतं उपोष्यैकादशीमेतांप्रसंगेनापिमानवः नया
तियातनांयामीमितिवैवस्वताच्छ्रुतं हरिनिंदापराराजन्हरिपूजापराङ्मुखाः नयांतिवैष्णवंलोकंनरकंयांति
दारुणम् नदृश्यंपावनंकिंचित्त्रिषुलोकेषुविद्यते सर्वपापविनाशाययादृशोहरिवासरः तावत्पापानिदेहेऽस्मिन्वसंति
मनुजाधिप यावन्नोपोषितंमर्त्यैःपद्मनाभदिनंमहत् अश्वमेधसहस्राणिराजसूयशतानिच एकादश्युपवासस्य
कलानार्हंतिषोडशीं एकादशेंद्रियैःपापंयत्कृतंमानवैःसदा एकादश्युपवासेनतत्सर्वंशांतिमाव्रजेत् एका
दशीसमंकिंचित्पुण्यंलोकेनविद्यते व्याजेनापिकृतायैस्सानतेपश्यंतिभास्करिं स्वर्गमोक्षप्रदापुंसांशरीरारो
ग्यदायिनी सुकलत्रप्रदाचैवनकाशीनचपुष्करं यमुनाचंद्रभागाचनैवतुल्याकदाचन आयासवर्जंव्रतिनः
प्राप्नुवंतिहरेःपदं तर्पणंतुहरेःकुर्य्यात्पितृनुर्द्दिश्यमानवः दशैवपितृपक्षेचमातृपक्षेतथादश भार्यायादशप
क्षेचपुरुषानुद्धरेद्व्रती तेद्वंद्वमोहनिर्मुक्ताःसर्वेगरुडवाहनाः स्रग्विणःपीतवस्त्राश्चप्रयांतिहरिमंदिरं किरी
टिनःकुंडलिनोघनश्यामाश्चतुर्भुजाः शंखचक्रगदापद्मधारिणोवनमालिनः बालत्वेयौवनेवापिवार्द्धकेचनृपोत्तम
उपोष्यैकादशींमर्त्यःसत्यंनाप्नोतिदुर्गतिं यथोक्तविधिनाराजन्कृत्वासत्तीर्थमज्जनं दत्त्वाहेम्नश्चभाराणिमर्त्योयत्फल
मश्नुते तत्फलंसमवाप्नोतिकृतेचैकादशीव्रते संक्षेपेणनृपश्रेष्ठविधिमस्यावदामिते यथाशक्त्याचदानंतुकुर्य्यात्स्वहित

काम्यया उपानच्छत्रवस्त्रादिकंदमूलंफलंजलं नवंध्यंतुदिनंकार्य्यंप्राणिमात्रेणकेनचित् इहलोकेयशःप्राप्यमृतोमोक्षमवाप्नुयात् कर्त्तारोनैवपश्यंतिदारुणंयमशासनं दीर्घायुषोधनाढ्याश्चभवंतीहपुनःपुनः किमत्रबहुनोक्तेननतेगच्छंतिदुर्गतिं आरोहंतिनराःसर्वेदिवंदेवैः सुपूजिताः इतितेकथितंराजन्नेकादश्याःकथानकं येपठंतिनराराजन्येशृण्वंतितथैवच तेषांपापानिनश्यंतिमृतामोक्षंव्रजंतिते ॥ इतिवाराहपुराणेपाद्मेचपापांकुशाश्विनशुक्लैकादशीव्रतकथानकम् ॥ अथाश्विनशुक्लैकादशीमारभ्यकार्त्तिकस्नानादिकृत्यारंभइतिदाक्षिणात्याः आश्विनस्यतुमासस्ययाशुक्लैकादशीभवेत् कार्त्तिकस्यव्रतानीहतस्यांवैप्रारभेत्सुधीरितिपाद्मोक्तेः भार्गवार्चनेच आरभ्यैकादशींशुक्लामाश्विनस्यतुमानवःप्रातःस्नानंप्रकुर्वीतयावत्कार्त्तिकभास्करइतिविष्णुरहस्योक्तेःप्राच्याश्च तुलार्कमारभ्यकुर्वंतीतितत्रैवप्रपंच्यते ॥ आश्विनशुक्लैकादशीमारभ्य त्रिंशद्दिनपर्य्यंतंमासोपवासव्रतं हेमाद्रौ विष्णुरहस्ये नारदउवाच भगवन्श्रोतुमिच्छामिव्रतानामुत्तमंव्रतं विधिंमासोपवासस्यफलंचास्ययथोदितं यथाविधिनरैःकार्य्याव्रतचर्य्यायथाभवेत् आरभ्यतेयथापूर्वंसमाप्याहियथाविधि यावत्संख्यंहिकर्त्तव्यंतद्ब्रूहिप्रपितामह। व्रतमेतत्सुरश्रेष्ठविस्तरेणममानघ ब्रह्मोवाच साधुनारदयच्चैतत्पृष्टंवरतपोधन यादृङ्मतिमतांश्रेष्ठतच्छृणुष्वब्रवीमिते सुराणांहियथाविष्णुस्तेजसांचयथारविः मेरुःशिखरिणांयद्वद्वैनतेयस्तुपक्षिणां तीर्थानांतुयथागंगाप्रजानांतुयथावणिक् श्रेष्ठंसर्वव्रतानांतुतथामासोपवासकं सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषुयद्भवेत् सर्वदानोद्भवंवातुलभेन्मासोपवासकृत् अग्निष्टोमादिभिर्यज्ञैर्विधिवद्भूरिदक्षिणैः नतत्पुण्यमवाप्नोतियन्मासपरिलंघनात् तेनदत्तंहुतंजप्तंतपस्तप्तंस्वधाकृतं यःकरोतिविधानेननरोमासचतुष्टयं प्रविश्यवैष्णवंयज्ञंतत्राभ्यर्च्यजनार्दनं गुरोराज्ञांततोलब्ध्वाकुर्य्यान्मासोपवासकं वैष्णवानियथोक्तानिकृत्वासर्वव्रतानिच द्वादश्यादीनिपुण्यानिततोमासमुपावसेत् अतिकृच्छ्रपराकंचकृच्छ्रचांद्रायणंत

था मासोपवासंकुर्वीतज्ञात्वादेहबलाबलं वानप्रस्थोयतिर्वापिनारीवाविधवामुने मासोपवासंकुर्वीतगुरुंविज्ञापये
ततः आश्विनस्यामलेपक्षेएकादश्यामुपोषितः व्रतमेतद्गृह्णीयाद्यावात्रिंशद्दिनावधि वासुदेवंसमुद्दिश्यकार्त्ति
कंसकलंनरः मासंचोपवसेद्यस्तुसमुक्तिफलभाग्भवेत् अच्युतस्यालयेभक्त्यात्रिकालंकुसुमैःशुभैः मालतींदीवरैः
पद्मैः कमलैस्तुसुगंधिभिः कुंकुमोशीरकर्पूरैर्विलिप्यवरचंदनैः नैवेद्यैर्धूपदीपाद्यैरर्चयेत्तुजनार्दनं मनसाकर्मणा
वाचापूजयेद्गरुडध्वजं कुर्य्यान्नरस्त्रिषवणंवृहद्भक्तिंजितेंद्रियः नाम्नामेवजपालापंविष्णोः कुर्य्यादहर्निशं भक्त्या
विष्णोःस्तुतिर्वाच्यामृषावादंविवर्जयेत् सर्वसत्त्वदयायुक्तःशांतवृत्तिरहिंसकः सुप्तोवाह्यासनस्थोवावासुदेवंप्रकी
र्त्तयेत् स्मृत्यालोकनगंधादिस्वादनंपरिकीर्त्तितं अन्नस्यवर्जयेत्सर्वंग्रासानांचाभिकांक्षितं गात्राभ्यंगंशिरोभ्यं
गंतांबूलंसविलेपनं व्रतस्थोवर्जयेत्सर्वंयच्चान्यत्रनिराकृतं व्रतस्थोनस्पृशेत्कंचिद्विकर्मस्थान्नचालपेत् देवतायतने
तिष्ठन्नगृहस्थोव्रतंचरेत् कृत्वामासोपवासंतुयथोक्तविधिनानरः नारीवाविधवासाध्वीवासुदेवंसमर्चयेत् अन्यूना
धिकमेवंतुव्रतंत्रिंशद्दिनैरिदं कृत्वामासोपवासंतुसंयतात्माजितेंद्रियः ततोऽर्चयेन्महद्भक्त्याद्वादश्यांगरुडध्वजं पूज
येत्पुष्पमालाभिर्गंधधूपनिवेदनैः वस्त्रालंकारवाद्यैश्चतोषयेदच्युतंनरः स्नापयेत्तुहरिंभक्त्यातीर्थचंदनवारिभिः च
दनेनानुलिप्तांगंपुष्पधूपैरलंकृतं वस्त्रदानादिभिश्चैवभोजयेत्तुद्विजोत्तमान् दद्याच्चदक्षिणांतेभ्यः प्रणिपत्यक्षमा
पयेत् क्षमापयित्वाविप्रांश्चविसृज्याभ्यर्च्यभोज्यच एवंवित्तानुसारेणभक्तियुक्तेनचेतसा एकंमासोपवाःसंतुकृ
त्वाऽभ्यर्च्यजनार्दनं भोजयित्वाद्विजांश्चैवविष्णुलोकेमहीयते एवंमासोपवासान्हिसम्यक्कृत्वात्रयोदश समा
पयेत्ततःशक्त्याविधिनायेनतच्छृणु कारयेद्वैष्णवंयज्ञमेकादश्यामुपोषितः पूजयित्वाचदेवज्ञमाचार्य्यानुज्ञ
याहरिं अर्चयित्वाततोभक्त्याअभिवाद्यगुरुंतथा भोजनीयान्यासनानिब्रह्मसूत्राणिचैवहि दत्त्वाचैवद्विजाग्र्येभ्यः

पूजयित्वाप्रणम्यच ततोऽनुकल्पयेच्छक्त्याशय्यायांकीर्त्तयंतिवै येप्रयच्छंतिविप्रायेतेतरंतिभवार्णवं आनंदार्णवमग्नश्चदुःखसंसारबंधनैः नवाध्यतेनरोनित्यंवासुदेवमनुस्मरन् स्थावरेजंगमेसर्वेस्थूलेसूक्ष्मेशुभाशुभे विष्णुं पश्यतिसर्वत्रयःसविष्णुःस्वयंनरः एवंविष्णुमयंज्ञात्वात्रैलोक्यंसचराचरं यस्यशांतामतिस्तेनपूजितोगरुडध्वजः इतिकल्पानुकल्पानांव्रतानामुत्तमस्यच करणाच्चमहाराजतथाविष्ण्वर्चनान्नरः विष्णुलोकमवाप्नोतिप्रसादाच्चक्रपाणिनः विधिर्मासोपवासस्ययथावत्परिकीर्त्तितः तवस्नेहान्मुनिश्रेष्ठसर्वलोकहितायच कृत्वाश्रुत्वातु यंभक्त्यानरोविष्णुपुरींव्रजेत् नाभक्तायप्रदातव्यंनदेयंदुष्टचेतसे इतिविष्णुरहस्योक्तं मासोपवासव्रतम् अथास्यप्रयोगः तिथ्यादिसंकीर्त्यात्मनोऽशेषपापक्षयपूर्वकचतुर्विधपुरुषार्थसिद्धिद्वाराश्रीमहाविष्णुप्रीत्यर्थंमासोपवासव्रतंकरिष्ये तत्रप्रत्यहंत्रिकालस्नानं विष्णुमंत्रजपः विष्णुपूजनं तुलसीदलसहितपुष्पादिसमर्पणं निषिद्धालापवर्जनं पुराणपठनं श्रवणंच ब्राह्मणपूजनं यथाशक्तिदानं एवमादिनियमैर्व्रतंयथाशक्तिसमाप्यांते शुक्लैकादश्यामुद्यापनंकुर्य्यात् उक्तप्रकारेणाचार्य्यंवृत्वासर्वतोभद्रकलशेहैमंलक्ष्मीनारायणं सहस्रशीर्षेत्यादिपुरुषसूक्तमंत्रेणद्वादशाक्षरमनुनावासंस्थाप्य पूजयित्वाकथाश्रवणादिनारात्रिमतिवाह्य प्रातःस्थंडिलेऽग्निंप्रतिष्ठाप्य अन्वादध्यात् तत्रप्रधानंलक्ष्मीनारायणं पायसद्रव्येणसहस्रसंख्याकाहुतिभिर्ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यापक्षे एवं होमंसमाप्यपीठंगांचाचार्य्यायदत्त्वा वेदशास्त्रसंपन्नान्त्रिंशद्ब्राह्मणान्बस्त्रान्नदानभूषणादिभिःसंपूज्यत्रिंशद्गास्तन्मौल्यंवादक्षिणात्वेनदत्वा सोपस्करांशय्यां ज्ञानादिगुणवतेद्विजायदत्त्वा सदन्नेन ब्राह्मणान्संतोष्याशिषो गृहीत्वा विष्णुलोकगमनार्थंद्विजान्प्रार्थयेत् भोद्विजाअनुमोदध्वंभवतांकृपयाऽधुना सर्वपापविनिमुक्तो।विष्णुलोकं व्रजाम्यहम् ततोद्विजानांप्रतिवचनं व्रजव्रजनरश्रेष्ठविष्णुलोकमनामयं विमानंवैष्णवंदिव्यंसपर्य्यापरिकल्पितं

216

तेनविष्णुपदंयाहिसच्चिदानंदरूपिणंततोदीनानाथादीन्भूरिदक्षिणयासंतोष्य स्वयंमौनीभुंजीत अत्राशक्तेनकंद
व्र०र० मूलफलादिना मासोपवासव्रतशेषंविप्रानुमत्यासमापनीयं एवंकृत्वासर्वपापविमुक्तोभवति एवमेवचातुर्मास्य
आश्वि० व्रतोद्यापनमपिविधेयम् ॥ इतिविष्णुरहस्योक्तंमासोपवासव्रतोद्यापनं अथाश्विनशुक्लद्वादशीकृत्यं नारदीये
॥१०७॥ द्वादश्यामिषशुक्लेगांदत्त्वानत्वाविसर्जयेत् ॥ गंधाद्यैरुपचारैस्तांतदग्रेभोजयेद्द्विजान् मधुरान्नेनवस्त्राढ्यां
सौवर्णांदक्षिणांददेत् व्रतेनानेनसंतुष्टःपद्मनाभोद्विजोत्तम श्वेतद्वीपंगतिंदद्यादिहभोगांश्चशाश्वतान् आश्विन
शुक्लैकादश्यामुपवासजागरणादिकंकृत्वा द्वादश्यादिषु विष्णुपूजादिकं कुर्य्यात् तदुक्तंब्रह्मपुराणे सोपवासै
श्चकर्त्तव्यएकादश्यांप्रजागरः द्वादश्यांवासुदेवश्चपूजनीयश्चसर्वदा यात्रोत्सवश्चकर्त्तव्यस्त्रयोदश्यांतुवैष्णवैः उप
वासश्चतुर्दश्यांपौर्णमास्यांहरिंव्रजेत् अथपद्मनाभद्वादशीव्रतं हेमाद्रौ धरणीव्रतेषु वाराहे दुर्वासाउवाच
तद्वदाश्वयुजेमासिद्वादशींसितपक्षिणीं संकल्प्याभ्यर्चयेद्देवंपद्मनाभंसनातनं पद्मनाभायवैपादौकटिंवैपद्मयो
नये उदरंसर्वदेवायपुष्कराक्षायवैउरः अव्यग्रायतथावाहूप्राग्वदस्त्राणिपूजयेत् प्रभवायशिरः पूज्य
प्राग्वदग्रेघटंन्यसेत् तमेवदेवंसंपूज्यगंधपुष्पादिभिःक्रमात् प्रभातायांतुशर्वर्य्यांब्राह्मणायनिवेदयेत् प्रीयतांपद्म
नाभोमेपद्मनाभस्वरूपकइतिमंत्रः इतिपद्मनाभद्वादशीव्रतं अस्याविष्णवालयेदीपदानं महापुण्यकरं अथकथा
आसीत्कृतयुगेराजाभद्राश्वोनामवीर्यवान् तस्यनाम्नाऽभवद्वर्षंभद्राश्वंनामनामतः तस्यागस्त्यःकदाचित्तुगृहमाग
त्यभूपतेः उवाचपंचरात्रंतुवसामिभवतोगृहे तंराजाशिरसानत्वास्थीयतामित्यभाषत तस्यकांतिमतीनाम्नाभार्या
परमशोभना तामागतांतथादृष्ट्वारूपतेजोन्वितंशुभां सपत्न्यश्चभयात्तस्याःकुर्वंत्यःकर्मशोभनाः साधुसाधुजग
न्नाथःस्त्रीशूद्राःसाधुसाध्विति ॥ एवमुक्त्वाननर्त्तोच्चैरगस्त्योराजसन्निधौ ॥ किंहर्षकारणंब्रह्मन्येनैवंनृत्य

तेभवान् ॥ अगस्त्यउवाच ॥ इयंराज्ञीत्वदीयाभूद्दासीवैश्यस्यवैदिशे नगरे हारिदत्तस्य त्वमस्याः
पतिरेवच तस्यैवकर्मकारोऽभूच्छूद्रोविंध्येतिनामतः सवैश्योऽश्वयुजेमासि द्वादश्यांनियतः शुचिः स्वयं
विष्ण्वालयंगत्वागंधपुष्पादिभिर्हरिं समभ्यर्च्यगृहंप्रायाद्भवंतौरक्षपालकौ स्वगृहेस्थाप्यदीपानांज्वालना
र्थंगृहांगणे गतेतास्मिन्भवंतौतद्दीपप्रज्वालनेस्थितौ यावत्प्रभातारजनीनिःशाठ्येननरोत्तम ततःकालेनमहतामृतौ
द्वावपिदंपती तेनपुण्येनतेजन्मप्रियव्रतगृहेऽभवत् इयंचपत्नीतेजातायावैश्यपरिचारिका पारक्यस्यापिदीपस्य
ज्वालितस्यहरेर्गृहे इयंव्युष्टिः पुराजाताभक्तियुक्तस्यतेनृप स्वेनयःपुनरर्थेनविष्णुमभ्यर्च्यदीपकं ज्वालयेत्तस्यय
त्पुण्यंसंख्यातुंनैवशक्यते इतिवाराहेधरणीव्रतेषुपद्मनाभद्वादशीव्रतेदीपदानमाहात्म्यं अस्यामेवभविष्योत्तरोक्तं
पुत्रप्राप्तिव्रतं युधिष्ठिरउवाच ऋणैस्त्रिभिःपरिवृतःपुरुषोजायतेकिल ऋणत्रयात्प्रमुच्येतसपुनःपुत्रदर्शनात् पुन्ना
म्नोनरकाद्यस्मात्पितरंत्रायतेसुतः तस्मात्पुत्रइतिप्रोक्तःस्वयमेवस्वयंभुवा दिगंबरंगतव्रीडंजटिलंधूलिधूसरं
पुण्यहीनानपश्यंतिगंगाधरमिवात्मजं तस्मात्सुपुत्रलाभाययद्व्रतंतदुदीरय श्रीकृष्णउवाच एकादश्यांचाश्व
युजेस्नात्वोपोष्यार्चयेद्धरिं गांराज्ञौपूजयेद्दद्यात्सवत्सांगांगबाह्लिकं अपरेऽह्नितथाभ्यर्च्यनिशिभुंजीतवाग्यतः
अपराजितोऽजातशत्रुःपुरुहूतःपुरंदरः वर्द्धमानःसुरेशश्चमहाबाहुःप्रभुर्विभुः संभूतिःसुमनाश्चैवसुप्रचेताइती
रयेत् एवंद्वादशभिर्वर्षैर्मासैर्वापारयेद्व्रतं व्रतांतेजुहुयादेभिर्नामभिर्घृतपायसं ब्राह्मणान्भोजयेत्पश्चात्क्षीरान्नैर्मास
संख्यया मासेमासेयथाशक्तिदानंप्रार्थनमेवच यथाऽदितेर्भवान्पुत्रःशाश्वतश्चाक्षयोऽच्युतः तथाभवतुमेदेवपुत्रो
जन्मनिजन्मनि सुरभीवैष्णवीदेवीब्रह्मण्यादेवपूजिता गृहाणेमंमयादत्तंपिंडंसतृणमूलकं वस्त्राभरणगो
दानैर्ब्राह्मणान्प्रीणयेद्गुरुम् इतिभविष्योत्तरोक्तंपुत्रप्राप्तिव्रतं ॥ अथाश्विनशुक्लद्वादशीव्रतंभविष्ये पुण्यमाश्वयु

जेमासिविशोकद्वादशीव्रतं दशम्यांलघुभुग्विद्वानारभेन्नियमेनतु उदङ्मुखःप्राङ्मुखोवादंतधावनपूर्वकं एका
दश्यांनिराहारःसमभ्यर्च्यचकेशवं श्रीशंचाभ्यर्च्यविधिवद्भोक्ष्यामितुपरेऽहनि एवंनियमकृद्भूत्वाप्रातरुत्थायमान
वः स्नात्वासर्वौषधियुतपंचगव्यजलेनतु शुक्लांबरधरस्तद्वत्पूजयेत्श्रीशमुत्पलैः विशोकायनमःपादौजंघेच
वरदायच श्रीशायजानुनीतद्वदूरूचजलशायिने कंदर्पायनमोगुह्यंमाधवायनमःकटिं दामोदरायेत्युदरंपार्श्वेच
विपुलायवै नाभिंतुपद्मनाभायहृदयंमन्मथायच श्रीधरायविष्णोर्वक्षःकरौमधुनिहेनमः चक्रिणेवामबाहुंचदक्षिणं
गादिनेनमः वैकुंठायनमःकंठमास्यंयज्ञमुखायच नासामशोकनिधयेविश्वामित्रायचक्षुषी ललाटंवामनायेतिरामाये
तिपुनर्भ्रुवौ अलकान्माधवायेतिकिरीटंविश्वरूपिणे नमःसर्वात्मनेतद्वत्शिरइत्यभिपूजयेत् एवंसंपूज्यगोविंदंफल
माल्यानुलेपनैः ततस्तस्याग्रतोभव्यंस्थंडिलंकारयेन्मृदा चतुरस्रंसमंताच्चारत्निमात्रमुदक्प्लवं नदीवालुकयातत्र
लक्ष्म्याःप्रतिकृतिंन्यसेत् स्थंडिलेसूर्पमारोप्यलक्ष्मीमित्यर्चयेन्नरः नमोदेव्यैनमःशांत्यैनमोलक्ष्म्यैनमःश्रियैनमः
पुष्टैचनमस्तुष्ट्यैविशोकायैनमोनमःविशोकवास्तुसंपत्त्यैविशोकैश्वर्यसिद्धये ततःशुक्लांबरः सूर्पंवेष्ट्यसंपूज्यसत्फ
लैः भक्ष्यैर्नानाविधैस्तद्वत्सुवर्णकमलेनच रजनीषुचसर्वासुपिवेद्दर्भोदकंबुधः सर्वासुरजनीष्वव्रतोक्तदिवसानांरा
त्रिष्वित्यर्थः ततस्तुगीतनृत्यादिकारयेत्सकलांनिशां यामत्रयेततोयातेसुत्वाभ्युत्थायमानवः अभिगम्यच
विप्राणांमिथुनानितदार्चयेत् शक्तितस्त्रीणिचैकंवावस्त्रमाल्यानुलेपनैः शयनस्थानिपूज्यानिनमोऽस्तुजलशायिने
ततस्तुगीतनृत्यांतेरात्रिजागरणेकृते प्रभातेविमलेस्नानंकृत्वादांपत्यमर्चयेत् भोजनंतुयथाशक्त्यावित्तशाठ्यवि
वर्जितः भुक्त्वाश्रुत्वापुराणंतुतद्दिनंचातिवाहयेत् अनेनविधिनासर्वंमासिमासिसमाचरेत् व्रतांतेशयनंदद्या
द्गुडधेनुसमन्वितं सोपधानकशय्यांचस्वास्तरावरणान्वितां यथानलक्ष्मीर्देवेशत्वांपरित्यज्यगच्छति तथा

सुरूपतारोग्यमशोकस्त्वस्तुमेसदा। यथादेवेनरहितानलक्ष्मीर्जायतेक्वचित् तथाविशोकतामेऽस्तुभक्तिरग्र्याच केशवे मंत्रेणानेनशयनंगुडधेनुसमन्वितं सूर्पंचलक्ष्म्यासहितंदातव्यंभूतिमिच्छता। उत्पलंकरवीरंचबाणमम्लानपंकजं केसरंसिंधुवारंचमाल्लिकाशोकपाटला कदंबंकुब्जकंजातीशस्तान्येतानिपूजने युधिष्ठिरउवाच गुडधेनोर्विधानंचसमाचक्ष्वजगत्पते किंरूपंकेनमंत्रेणदातव्यमितिहोच्यतां श्रीकृष्णउवाच गुडधेनुविधानस्ययद्रूपमिहयत्फलं तदिदानींप्रवक्ष्यामिसर्वपापप्रणाशनं कृष्णाजिनंचतुर्हस्तंप्राग्ग्रीवंविन्यसेद्भुवि गोमयेनतुलिप्तायां कुशानास्तीर्य्यसर्वतः लघ्वेणकाजिनंतद्वद्वत्सस्त्वेपरिकल्पयेत् प्राङ्मुखींकल्पयेद्धेनुमुदक्पादांसवत्सकां उत्तमागुडधेनुः स्यात्सदाभारचतुष्टयं वत्संभारेणकुर्वीतभाराभ्यांमध्यमामता अर्द्धभारेणवत्सः स्यात्कनिष्ठाभारकेणतु चतुर्थांशेनवत्सः स्याद्गृहवित्तानुसारतः धेनुवत्सौघृतास्यौतुसितसूक्ष्मांबरावृतौ शुक्तिकर्णाविक्षुपादौशुचिमुक्ताफलेक्षणौ सितसूत्रसिरालौतुसितकंबलकंबुलौ ताम्रगंडुकपृष्ठौतुसितचामररोमकौ विद्रुमभ्रूयुगोपेतौनवनीतस्तनाविमौ क्षौमपुच्छौकांस्यदोहाविंद्रनीलकतारकौ इत्येवंरचयित्वातुधूपदीपैरथार्चयेत् यालक्ष्मीः सर्वभूतानांयाचदेवेष्ववस्थिता धेनुरूपेणसादेवीममपापंव्यपोहतु विष्णोर्वक्षसियालक्ष्मीः स्वाहायाचविभावसौ चंद्रार्कशक्रशक्तिर्याधेनुरूपाऽस्तुसाश्रिये चतुर्मुखस्ययालक्ष्मीर्लक्ष्मीयार्धनदस्यच यालक्ष्मीर्लोकपालानांसाधेनुर्वरदाऽस्तुमे स्वधात्वंपितृमुख्यानांस्वाहायज्ञभुजांयतः सर्वपापहराधेनुस्तस्माच्छांतिंप्रयच्छमे एवमामंत्र्यतांधेनुंब्राह्मणायनिवेदयेत् विधानमेतद्धेनूनांसर्वासामिहपठ्यते यास्तुपापविनाशिन्यःश्रूयंतेदशधेनवः तासांस्वरूपंवक्ष्यामिनामानिचनराधिप प्रथमागुडधेनुःस्याद्घृतधेनुस्तथाऽपरा तिलधेनुस्तृतीयास्याच्चतुर्थीजलसंज्ञिका क्षीरधेनुश्चविख्यातामधुधेनुस्तथाऽपरा सप्तमीशर्कराधेनुर्दधिधेनुस्तथाऽष्टमी रसधेनुश्चनवमीदशमीस्यात्स्वरूपतः कुंभाःस्युर्द्रवधेनूना

मितरासांतुराशयः सुवर्णधेनुमप्यत्रकेचिदिच्छंतिसूरयः नवनीतेनधान्यैश्चतथाप्यन्येमहर्षयः एतदेवविधानंस्यात्तएवोपस्करामताः मंत्रावाहनसंयुक्ताःसदापर्वणिपर्वणि यथाश्रद्धंप्रदातव्याभक्तिमुक्तिफलप्रदाः गुडधेनुप्रसंगेनसर्वास्तवमयोदिताः अशेषयज्ञफलदाःसर्वाःपापहराःशुभाः व्रतानामुत्तमंयस्माद्विशोकद्वादशीव्रतम् तदंगत्वेनचैवैषागुडधेनुःप्रशस्यते अयनेविषुवेचैवव्यतीपातेऽथवापुनः गुडधेन्वादयोदेयाउपरागादिपर्वसु विशोकद्वादशीचैषासर्वपापहराशुभा यामुपोष्यनरोयातितद्विष्णोःपरमंपदं इहलोकेतुसौभाग्यमारोग्यायुष्यमेवच वैष्णवंपदमाप्नोतिमरणेस्मरणंहरेः नृत्यगीतपरोनित्यंसोऽपितत्फलमाप्नुयात् इतिनरवरइत्थंयःशृणोतीहमर्त्त्योंमधुमुरनरकारेरर्चनंवाथपश्येत् मतिमपिचनराणांयोददातीहलोके वसतिसविबुधौघैःपूज्यमानःसदैव

॥ इतिविशोकद्वादशीव्रतम् ॥

अथाश्विनशुक्लत्रयोदश्यामशोकत्रिरात्रव्रतंनारदीये इषशुक्लत्रयोदश्यांत्रिरात्राशोककव्रतम् हैमंह्यशोकंनिर्माय पूजयित्वायथाविधि उपवासपरानारीनित्यंकुर्य्यात्प्रदक्षिणं अष्टोत्तरशतंविप्रमंत्रेणानेनसादरं हरेणनिर्मितःपूर्वं त्वमशोककृपालुना लोकोपकारकरणस्त्वत्प्रसादाच्छिवंप्रिये ततस्तृतीयेदिवसेवृक्षेतस्मिन्वृषध्वजं समभ्यर्च्यविधानेनद्विजान्संपूज्यदापयेत् एवंकृतव्रतानारीवैधव्यंनाप्नुयात्क्वचित् पुत्रपौत्रादिसहिताभर्त्तुःस्यादतिवल्लभा आश्विनशुक्लचतुर्दश्यां धर्मराजप्रतिमादानं नारदीये इषशुक्लचतुर्दश्यांधर्मराजंद्विजोत्तम गंधाद्यैःसम्यगभ्यर्च्यसौवर्णंभोज्यवाडवं दद्यात्तस्मै धर्मराजःप्रीयतामितिनारद एवंयःकुरुतेधर्मप्रतिमादानमुत्तमं सभुक्त्वेहवरान्भोगान्दिवंधर्माज्ञयाव्रजेत् ॥ आश्विनपौर्णमासीकृत्यान्युच्यंते तत्रादौससुवर्णघृतपूर्णकांस्यपात्रदानं मत्स्यपुराणे आश्विनेपंचदश्यांतुयोदद्याद्धेमसंयुतं परांसिद्धिमवाप्नोतिपुनरावृत्तिदुर्लभां हेमसंयुतंघृतपूर्णंकांस्यपात्रंदद्यादित्यर्थः

तथाचविष्णुधर्मोत्तरे आश्वयुज्यांकांस्यपात्रंघृतपूर्णंद्विजातये ससुवर्णंतथादत्वादीप्तांगस्त्वभिजायते अत्राश्विनीयोगोनविवक्षितः तथाचानंतरंपौर्णमासीषुसर्वासुमासर्क्षसहितासुच एतेषामेवदानानांफलंदशगुणंभवेत् महत्पूर्वासुचैतासुफलमक्षयमश्नुते महत्पूर्वासुदृश्येतेसहितौचेंदुगीष्पती तत्रदानोपवासादिचाक्षयंपरिकीर्त्तितमिति विष्णुवचनेनलक्षितौसहितौमाससंज्ञानिमित्तर्क्षगौ एतच्चपौर्णमासीसाधारणमेववोध्यं अथैतस्मिन् शुक्लपक्षेदशम्यादिपौर्णमास्यंततिथिषुनवान्नेष्टिविधानंतत्राश्विनाधिकारे ब्रह्मपुराणे शुक्लपक्षेनवंधान्यंपक्वंज्ञात्वासुशोभनं सुतिथौचसुनक्षत्रेमुहूर्त्तेचशुभेसति गच्छेत्क्षेत्रेविधानेननृत्यवाद्यपुरःसरः तत्रैववन्हिंप्रज्वाल्यधान्यैः संस्तीर्य्यशास्त्रवित् स्वगृह्योक्तविधानेनपूजांकुर्य्याद्विचक्षणः होमंकृत्वाततःपश्चान्नयेद्धान्यंविभूषितं पुष्पैर्वस्त्रैःफलैर्मूलैर्हस्त्यश्वरथसंयुतैः तेनदेवान्पितॄन्बंधूंस्तर्पयित्वायथाक्रमं विभज्याच्चयथाशक्त्यादेवताःसस्यरक्षिणः नववस्त्रावृतःस्रग्वी स्वनुलिप्तः स्वलंकृतः स्थितःपूर्वमुखस्तुष्टोब्रह्मघोषपुरःसरः शृण्वन्ब्रह्म रवंहृष्टोमंगलालंभनादिमान् प्राश्नीयाद्दधिसंयुक्तंनवंविप्राभिमंत्रितं ॥ पितॄनिति व्रीहिपाकसमये व्रीहिभिःश्राद्धं कुर्यादित्यर्थः हारीतोप्याह गृहमेधीशरद्वसंतयोर्व्रीहियवाभ्यांयजेत् वनीवर्षासुश्यामाकैः गृहीगृहस्थः वनीवानप्रस्थः वर्षासु श्रावणशुक्लपक्षे इदंचश्राद्धंपार्वणंनित्यं व्रीहियवपाकौचेतिविष्णुना नित्यप्रकरणे पठनात् इदंचनवैर्व्रीहिभिस्तदभावेपुरातनैस्तदभावेचान्नांतरैरनिषिद्धैरवश्यंकार्य्यमिति गोभिलसूत्रटीकायां इदमाश्विनीकर्मोक्तमाश्वलायनेन आश्वयुज्यामाश्वयुजेकर्मेति अत्रपूर्वाण्हव्यापिनीग्राह्या दैवकर्मत्वात् आग्रयणंतुपर्वणि कार्यंशरद्याग्रयणंयत्तुपर्वणिस्यात्तदुच्यतेइतिशौनकोक्तेः तत्रापिशेषपर्वणिकार्य्यमितिप्रागुक्तं तच्चदर्शेष्ट्याःपौर्णमासेष्ट्याश्चप्रागभवति दर्शेष्ट्याः पूर्वमुक्तमाग्रयणं प्राक्पौर्णमास्यांचतत् इतिदीपिकोक्तेः तत्राग्रयणंत्रेधा

व्रीह्याग्रयणं यवाग्रयणं श्यामाकाग्रयणंचेति एषांकालः श्रुतौगृहमेवव्रीहियवाभ्यांशरद्वसंतयोर्यजेत् श्यामा
कैर्नीवारैर्वर्षास्वापत्कालंविनानवान्नेनपुराणैर्वेति ॥ तत्राऽपि श्यामाकाग्रयणमनित्यमितरेतु अनाहिताग्नेर्नित्यं
यवाग्रयणंचकर्त्तव्यमितिस्मार्त्तानांकृतावुक्तत्वात् सूत्रेव्रीहियवदेवतासंबंधानामेव मंत्रेणाम्नाताच्च आहिता
ग्नेस्तुयवाग्रयणस्याप्यतिनित्यत्वं अपिवाक्रियायवेष्वितिसूत्रात् यद्वा व्रीह्याग्रयणेनसमानतंत्रता ॥ श्यामा
कैस्तुप्रस्तरंकुर्यात् यवाग्रयणं यदिवा तदपि समानतंत्रमित्यादिनाग्रयणस्मृतौ परिश्रमवतां सुलभमि
त्यलं इदंच पर्वाभावे देवनक्षत्रेकृत्तिकाविशाखांते कार्य्यमितिस्मृत्यर्थसारेउक्तं वौधायनीयकेशवस्वामि
नाप्येवमुक्तं यदाश्विनपौर्णमास्यांक्रियते तदेककालत्वादाश्वयुजकर्मणोऽस्यचसमानतंत्रताभवति तदेतद्वृत्ति
कृताएकबर्हिरिध्माज्येतिसूत्रेस्पष्टमुक्तं एतदकरणे प्रायश्चित्तमुक्तं चंद्रिकायां कात्यायनः नित्ययाज्यात्यये
चैववैश्वदेवाह्वयस्यच अनिष्ट्वानवयज्ञेननवान्नप्राशनेतथा ॥ वैश्वानरायकर्त्तव्यश्चरुर्वैश्वानरोभवेत् ॥ कारि
कापि अकृत्वाग्रयणंचैव नवान्नंयदिवानरैः वैश्वानरायकर्त्तव्यश्चतुःपूर्णाहुतिस्तुवेति ॥ ऋग्विधानेतु समि
दारण्यमंत्रंचवर्षैवर्षैजपेच्छतं आग्रयणंयदाशून्यंतदासंपूर्णमेतितादित्युक्तं एतच्चापदि मलमासेच कर्त्तव्यम
न्यथानेतिप्रागुक्तं अन्योप्याहिताग्न्यादिविशेषःशौनकादेर्ज्ञेयः ब्रह्मपुराणे आश्वयुज्यांवालुकायांनिकुंभोवालु
कार्णवात् आयातिसेनयासार्द्धंकृत्वायुद्धंसुदारुणं तस्मात्तत्रनरैर्मार्गाःस्वगृहस्यसमीपगाः शोभितव्याःप्रय
त्नेनभूषितव्याश्चमंडलैः पुष्पार्घ्यफलधूपान्नसर्षपप्रकरैस्तथा वेश्मानिभूषितव्यानिनानारंगैश्चसर्वतः सुस्नातैर
नुलिप्तैश्चनरैर्भाव्यंसबालकैः दिवातत्रनभोक्तव्यंमानुषैश्चविवेकिभिः स्त्रीवृद्धमूर्खबालैश्चभोक्तव्यंपूजितैःसुरैः पूज्या
श्चसफलैःपात्रैस्तथाद्वारोर्ध्वभित्तिभिः द्वारोपांतेप्रदीपाश्चसंपूज्योहव्यवाहतः यवाक्षतघृतोपेतैस्तंदुलैश्चसुतर्पितः

संपूजितव्यःपूर्णेंदुःपयसापायसेनच रुद्रःसभार्य्यःस्कंदश्चतथानंदीश्वरोमुनिःगोमाद्भिःसुरभिःपूज्याछागवद्भिर्हुताशनःडौरभ्रवद्भिर्वरुणोगजवद्भिर्विनायकः पूज्यःसाश्वैश्वरेवंतोमहाविभवविस्तरैः ततःपूज्योनिकुंभस्तुसमाषैस्तिलतंदुलैः सुगंधिभिर्घृतोपेतैःकृशरान्नैश्चभूरिभिः ब्राह्मणान्भोजयित्वातुभोक्तव्यमांसवर्जितं ततःप्रभातसमयेअनुलिप्तैःस्वलंकृतैः मंगलालंभनंकार्य्यंवह्निसंपूजनंतथा भोक्तव्यंब्राह्मणैःसार्द्धंक्रीडितव्यंयथासुखं तस्यांरात्र्यांव्यतीतायांद्वितीयायामनंतरं प्रभातेकर्दमाक्तैस्तुक्रीडितव्यंपिशाचवत् निर्जलैश्चाथसर्वत्ररुद्रवत्सर्ववेश्मसु आनीयचाथमित्राणिलेपनीयानिकर्दमैः कामाग्निजनकैर्नाट्यैः स्त्रीपुल्लिंगानुवादिभिः वाचापैशाचमाचारंकीर्त्तयद्भिरितस्ततः तस्मिन्नहनिपूर्वाह्णेनिकुंभस्यानुयायिनः क्रांतवेषाः पिशाचाश्चप्रविशंतिनरांश्चतान् अपराह्णेततःस्नातांस्त्यक्त्वागच्छंतिबंधुवत् दर्पाभिमानदोषेणतत्रयेनागतानराः नपूजयंतिमोहेनक्रीडनंनैवकुर्वते तान्निर्दहंतितेकोपात्पिशाचारौद्रदर्शनाः ततःस्नातैर्नरैःपूज्योदेवोदामोदरोहरिः संपूज्यविप्रान्भोक्तव्यमनुलिप्तैःस्वलंकृतैः बंधुमित्रकलत्रैश्चसहभृत्यायथाक्रमं ततःप्रभृतिषण्मासान्स्वेषुवेश्मसुमानवैः अग्निःसन्निहितःकार्य्योरात्रौसिद्धालकस्तथा मासंसमग्रंदेयश्चदीपोनित्यंगृहाद्बहिरिति ॥ अस्यामेवपौर्णमास्यांकोजागरव्रतं नारदीये आश्विनेमासिपूर्णायांव्रतंकोजागराभिधं तत्रस्नातोविधानेनसोपवासोजितेंद्रियः लक्ष्मीमभ्यर्च्यसौवर्णघटेस्थाप्याथताम्रजे मृण्मयेवासवस्त्रांतामुपचारैः पृथग्विधैः ततःसायंतनेकालेऽभ्युदिते तारकाधिपे हैमान्रौप्यान्मृण्मयान्वाघृतदीपान्प्रदीपयेत् लक्षंतदर्धमयुतंसहस्रंशतमेववा घृतशर्करसंमिश्रंविपाच्यबहुपायसं वंशपात्रेषुसंस्थाप्यकौमुद्यांशीतदीधितेः याममात्रेगतेरात्र्यालक्ष्म्यैतद्विनिवेदयेत् ततःसंभोजयेत्तेनविप्रान्भक्त्याशनैःशनैः सहैवजागरंकुर्य्यान्नृत्यगीतसुमंगलैः ततोऽरुणोदयेस्नात्वातांमूर्त्तिंगुरवेऽर्प

येत् अस्यारात्रौमहालक्ष्मीर्वराभयकराबुजा निशीथेचरतेनित्यंकोजागर्त्तिमहीतले यस्मैवित्तंप्रयच्छामिजाग्रते पूजकायवै वर्षेवर्षेकृतंचैतद्व्रतंलक्ष्मीप्रतोषणं समृद्धिमैहिकींदद्याद्देहांतेपारलौकिकीमिति तथाचमहार्णवेलैंगेऽपि आश्विनेपौर्णमास्यांतुचरेज्जागरणंनिशि कौमुदीसासमाख्याताकार्य्यालोकैर्विभूतये कौमुद्यांपूजयेल्लक्ष्मीमिंद्रमैरावणस्थितं सुगंधिभिर्भक्ष्यद्रव्यैरात्रौजागरणंचरेत् निशीथेवरदालक्ष्मीःकोजागर्त्तीतिवादिनी यस्मैवित्तंप्रयच्छामि अक्षैःक्रीडांकरोतियः नारिकेलैश्चपिटकैःपितृदेवान्समर्चयेत् बंधूंश्चप्रीणयेत्तेनस्वयंतदशनीभवेत् मदनरत्ने नारिकेलोदकंपीत्वाअक्षैर्जागरणंनिशि तस्मैवित्तंप्रयच्छामियोजागर्त्तिमहीतले इदंकोजागरव्रतं यद्दिनेपूर्णिमा प्रदोषेनिशीथेचोभयव्यापिनी तद्दिनेकार्य्यं यदातुपूर्वेद्युर्निशीथव्याप्तिस्तदापूर्वा नक्तादिव्रतवदहोरात्रयोगोविशिष्यतेइतिपरेद्युःनक्तादिव्रतयोगेतुरात्रियोगोविशिष्यतेइतिवचनात् लक्ष्मीपूजामंत्रस्तु नमस्तेसर्वभूतानांवरदाऽसिहरिप्रिये यागतिस्त्वत्प्रपन्नानांसामेभूयात्त्वदर्चनात् इंद्रपूजामंत्रस्तु विचित्रैरावतस्थायपौलोम्यालिंगिताय च भास्वत्कुलिशहस्तायसहस्राक्षायतेनमः यवाक्षतघृतोपेतैरित्यत्र यवानां पृथगुपादानात् अक्षतपदंतंडुलविशेषपरं एवमत्राप्यनुसंधेयं लक्ष्मीद्रव्यातिरिक्तार्थमित्यादिसुरपूजनं पूर्वाह्णेस्त्रीवृद्धबालकैस्तुभोक्तव्यंपूजितैःसुरैरित्यत्रपूर्वाह्णस्यपूर्वाह्णएवकुर्वीतइत्यादिवाक्यात् पूजाकर्त्तव्यव्रतेभोजनस्यतदुत्तरस्यच ततःशरीरस्त्रोतोभ्योमलविस्पंदविप्लवात् अन्नादीनांप्रवेशाच्चस्यादशुचिर्विशेषत इतिवाक्यादाचाराच्चप्राप्तेः दिवातत्रनभोक्तव्यमित्यादिनिषिद्धदिवाभोजनस्त्रीमूर्खादिगोचरतयादिवातनत्वमात्रविधौवाक्यैक्यलाघवंच अन्यथा दिवोर्ध्वामित्यादिपूजनेदिवातनपूजोत्तरकालीनभोजनंचविधेयमितिवाक्यभेदेविशिष्टविधौविधिगोचरत्वलक्षणायाः प्रसंगात् नचकालांतरदीपदनस्य रात्रिकर्त्तव्यत्वस्थैर्य्यं युगपत्तत्रकर्त्तव्याद्वादशैतेमहोत्सवाइत्यनेनैवयौगपद्यविधानात् अ

न्येपिरात्रौकर्त्तव्य।एवेतिवाच्यं तत्रेतिपूर्वप्रक्रांताश्वयुजेमात्रेपरामर्शस्यावश्यकत्वेतत्रेतिपदंतदुपस्थापकमेवलाघ
वात् एवमाकांक्षाविच्छेदं शंखवाद्यरवोन्मिश्रैर्नृत्यगीतैश्चशालिना वन्हिपार्श्वगतैर्नयाइत्यस्यरात्रिसाहचर्यात् रा
त्रिकालीनत्वंतूक्तंयत्तुकृष्णचतुर्दश्यांरात्रौनिकुंभादिपूजादर्शनोद्भावनंतत्रानुपयुक्तमेवेति स्कांदेऽपि अस्तिकोजाग
रंनामव्रतानामुत्तमंव्रतं यत्कृत्वासमवाप्नोतिजंतुर्लोकाननुत्तमान् पूर्णिमाश्वयुजेमासिकौमुदीपरिकीर्त्तितातत्राराध्य
महालक्ष्मीमिंद्रंचैरावणस्थितं उपवासंप्रकुर्वीतदीपान्दद्याच्चभक्तितः लक्षंतदर्धमयुतंसहस्रंशतमेववा घृतेनदीपये
द्दीपांस्तिलतैलेनवाव्रती रात्रौजागरणंकुर्यान्नृत्यगीतपुरःसरं यथाविभवतोदेयाःपुरवीथिषुदीपिकाःदेवतायतनेचै
वआरामेषुगृहेषुच ततः प्रभातेसुस्नातः संपूज्यचशतक्रतुं ब्राह्मणान्भोजयेत्क्षीरघृतशर्करपायसैः वासोभिर्दक्षिणा
भिश्चसवस्त्रान्पूजयेद्द्विजान् यथाशक्तिचदातव्यादीपाःस्वर्णविनिर्मिताः एवंनिर्वर्त्यविधिवद्व्रतपारणमाचरेत् व्रत
स्यास्यप्रभावेण कल्पानेवाप्यसंख्यकान् अप्सरोभिःपरिवृतःस्वर्गलोकेमहीयते इहचायुष्यमारोग्यं पुत्रपौत्रा
दिसंपदः लभतेव्रतमाहात्म्यात्कुलश्रैष्ठ्यगुणोत्तरं निशीथेवरदालक्ष्मीःकोजागार्त्तीतिभाषिणी जगत्रभ्रमतेतस्यां
लोकचेष्टावलोकिनी नालिकेरोदकंपीत्वाअक्षक्रीडांसमाचरेत् तस्मैवित्तंप्रयच्छामिकोजागर्त्तिमहीतले

॥ इतिस्कांदे आश्विन्यांपूर्णिमायांकोजागरव्रतम् ॥

अस्योद्यापनं तिथ्यादिसंकीर्त्य आत्मनःस्वकुलस्यचाखंडितलक्ष्मीप्राप्तिपूर्वकसुखादिप्राप्तये श्रीमहालक्ष्मी
महेंद्रयोः प्रीत्यर्थमाचरितकोजागरव्रतोद्यापनंकरिष्ये तत्रादावाचार्य्यवरणादिविधानंकृत्वा गणेशपूजादिमंड
लपूजांतंविधाय ततोलक्ष्मीपूजनमिंद्रपूजनंचाविधाय परितोदीपान्घृतेनतिलतैलेनलक्षमयुतंसहस्रं तदर्धंशतंवा
दीपान्यथाशक्तिवीथिषुचतुष्पथेवाप्रज्वाल्य नारिकेलोदकंप्राश्यअक्षैर्दीव्येत् एवंरात्रिमुत्सवेननीत्वा प्रातरग्निंप्र

तिष्ठाप्याऽन्वादध्यात् प्रधानंलक्ष्मीमिंद्रंचप्रत्येकं सहस्रसंख्याहुतिभिर्ब्रह्मादिदेवताग्रहान् लोकपालाश्चैकैक
याहुत्यायथाशक्तिहुत्वा आचार्य्यंसंपूज्यसौवर्णंराजतंवादीपंसुवर्णवर्त्तिसहितंसदक्षिणंदत्त्वाप्रतिमामप्याचार्याय
दत्त्वा घृतशर्करादिनाब्राह्मणान्संतर्प्य तेभ्योदक्षिणादत्त्वाशिषोगृहीत्वा शय्यादिकंयथाशक्तिदत्त्वा भूयसींद
क्षिणांदत्त्वेष्टजनैःसहभुंजीत ॥ इतिकोजागरव्रतोद्यापनं ॥ अत्राश्वयुज्यांगजनीराजनं कार्य्यं तच्चवाजिनीराजन
वदितिसंप्रदायात् ॥ अत्राश्विनपौर्णमास्यांनारदीयपुराणदानमुक्तं माहात्म्ये पंचविंशतिसाहस्रंनारदीयमथो
च्यते तदीषपंचदश्यांतुदद्याद्धेनुसमन्वितं परमांसिद्धिमाप्नोतिपुनरावृत्तिदुर्लभाम् नारदीये यस्त्वेतदिष
पूर्णायांधेनूनांसप्तकान्वितं प्रदद्याद्द्विजवर्य्यायसलभेन्मोक्षमेवचेति तुलासंक्रांतौवामनपुराणदानं नारदीये
एवंपरंपराप्राप्तंपुराणंवामनंशुभं लिखित्वैतत्पुराणंतुयः शरद्विषुवेऽर्पयेत् विप्रायवेदविदुषेघृतधेनुसमन्वि
तं ससमुद्धृत्यनरकात्पितॄन्स्वर्गंनयेत्स्वकान् देहांतेभुक्तभोगोऽसौयातिविष्णोः परंपदम् ॥ इतिनारदीयवा
मनपुराणयोर्दानंमाहात्म्यम् ॥ स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीः १ रणवीरसिंहभूपेशकारिते
कृत्यसागरे अभूदाश्विनकृत्यानांरम्योरत्नसमुच्चयः २ इतिश्रीमत्सूर्यवंशावतंसरघुवंशतिलकश्रीरणवीर
सिंहमहाराजकारितेकृत्यरत्नाकरेआश्विनमासकृत्यरत्नसमुच्चयः ॥ ॥ छ ॥ ॥

॥ निधिपतिशोधिताश्विनमासस्समाप्तः ॥

228

॥ श्रीरघुनाथमुद्रायंत्रालये ॥

लालाशिब्बामल्लाधिकारेआश्विनमासोमुद्रितस्समाप्तिमगमत्

संवत् १९४१ मार्गशीर्ष प्र. २३

1

कार्त्तिकमासप्रारम्भः

2

ओंअथ कार्त्तिकमासकृत्यनिर्णयः तत्रादौ तुलासंक्रमेप्रागपरादशघटिकाः पुण्यकालः मध्याविषुवतावुक्तेतिसामन्यवचनात् रात्रौसंक्रमेतु पूर्वोक्तसंक्रमनिर्णयाद्ज्ञेयं कार्त्तिकमासस्य स्नानदानव्रतादावतिप्राशस्त्यमुक्तं नारदीये एकतःसर्वतीर्थानिसर्वेयज्ञाःसदक्षिणाः अन्यतःकार्त्तिकोमासःसर्वपुण्याधिकोमतः सुवर्णमेरुतुल्यानिसर्वदानानिचैकतः एकतःकार्त्तिकोमासःसदादामोदरप्रियः अव्रतेनक्षिपेद्यस्तुमासंदामोदरप्रियं तिर्यग्योनिमवाप्नोतिसर्वधर्म्मवहिष्कृतः अत्रविष्णुव्रतप्रशंसा तत्रैव व्रतानामिहसर्वेषामेकजन्मानुगंफलं इहविष्णुव्रतानांहिफलंजन्मशताधिकं यतिश्चविधवाचैवविशेषेणवनाश्रमी कार्त्तिकेनरकंयातिस्नानदानव्रतैर्विना तथा जन्मप्रभृतियत्पुण्यंविधिवत्समुपार्जितं भस्मीभवतितत्सर्वमकृत्वाकार्त्तिकेव्रतं कार्त्तिकेनार्चितोविष्णुर्भक्तियोगेन येर्नरैः नरकांस्तेगमिष्यंतियमदूतैःप्रपीडिताः अथकार्त्तिकस्नानं तुलामकरमेषेषुप्रातःस्नानंविधीयते हविष्यं ब्रह्मचर्य्यंचमहापातकनाशनं अत्रसौरमासउक्तः प्राच्याश्चैतदेवाद्रियंते दाक्षिणात्यास्तु आश्विनस्यतुमासस्यया शुक्लैकादशीभवेत् कार्त्तिकस्यव्रतानीहतस्यांवैप्रारभेत्सुधीरितिपाद्मोक्तेः भार्गवार्चने प्रारभ्यैकादशींशुक्लामाश्विनस्यतुमानवः प्रातःस्नानंप्रकुर्वीतयावत्कार्त्तिकभास्करइतिविष्णुधर्म्मोक्तेः हेमाद्रावादित्यपुराणेच पूर्णेचाश्वयुजेमासिपौर्णमास्यांसमाहित इत्युक्का मासंसमग्रंवृणुयाच्च समाप्यतेकार्त्तिकपौर्णमास्यामिति पौर्णमास्यांसमापयेदित्याहुः मदनपारिजातेविष्णुः कार्त्तिकंसकलंमासंप्रातः स्नायीजितेंद्रियः जपन्हविष्यभुग्भूत्वासर्वपापैःप्रमुच्यते विष्णुः कार्त्तिकोऽग्निदैवत्योऽग्निर्देवानांमुखं तस्मात्कार्त्तिकेमासि वहिःस्नायीगायत्रीजपनिरतः सकृदेवहविष्याशीसंवत्सरकृतात्पापात्पूतोभवति अत्र प्रातःकालोनोक्तइत्यतोमध्यान्हस्नानेऽपीदं फलं वहिर्ग्रामाद्गृहाच्च कार्त्तिकंसकलंमासंनित्यस्नायीजितेंद्रियः जपन्हविष्यभुक्शांतः सर्वपापैःप्रमुच्यते नित्यस्नानंप्रा

तःस्नानमितिशंखोक्तेः आचाराच्च सकलमासमित्यनेनैवप्रत्याह्निकेप्राप्ते नित्यपदवैयर्थ्यापत्तिःअत्रस्नानंप्रधानं हविष्यभोजनादिकमंगमितिसंप्रदायः अत्रदेशविशेषः कार्त्तिकंप्रक्रम्य कुरुक्षेत्रेकोटिगुणोगंगायामपितत्समः दुर्लभःकार्त्तिकोविप्रामथुरायांनृणामिह यत्रार्चितःस्वकंरूपंभक्तेभ्यःसंप्रयच्छतीति इदंचस्नानं काशीस्थपंचनदेप्यतिशस्तं शतंसमास्तुयैस्तप्त्वानरैर्यत्प्राप्यतेफलं तत्कार्त्तिकेपंचनदेसकृत्स्नानेनलभ्यते कार्त्तिकेविंदुतीर्थेयोब्रह्मचर्यपरायणः स्नास्यत्यनुदितेभानौभानुजातस्यभीःकुतइति तथाचकाशीखंडे कार्त्तिकेमेविंदुयात्राकृतायैर्भक्तितत्परैः विंदुतीर्थकृतस्नानैस्तेषांमुक्तिर्नदूरतः भानुजातोयमः स्नानमंत्रश्चतत्रैव कार्त्तिकेऽहंकरिष्यामिप्रातःस्नानंजनार्दन प्रीत्यर्थंतवदेवेशदामोदरमयामह मयासहश्रियासहेत्यर्थः इमंमंत्रंसमुच्चार्य्यमौनीस्नायाद्व्रतीनरइति अर्घ्यमंत्रोऽपितत्रैव व्रतिनः कार्त्तिकेमासिस्नातस्यविधिवन्मम गृहाणार्घ्यंमयादत्तंदनुजेंद्रनिषूदन नित्येनैमित्तिकेकृष्णकार्त्तिकेपापनाशन गृहाणार्घ्यंमयादत्तंराधयासहितोहरे इमौमंत्रौसमुच्चार्य्ययोनरोऽर्घ्यं प्रयच्छति सुवर्णरत्नपुष्पांबुपूर्णशंखेनपुण्यवान् सुवर्णरत्नपृथिवीतेनदत्तानसंशयइति एवंसंपूर्णस्नानाशक्तौ त्र्यहंस्नायात् वाराणस्यांपंचनदेत्र्यहंस्नातस्तुकार्त्तिके अमीहिपुण्यवपुषःपुण्यभाजोऽतिनिर्म्मलाःअथमालाधारणं स्कांदे द्वारिकामाहात्म्ये निवेद्यविष्णवेमालांतुलसीकाष्ठसंभवां वहतेयोनरोभक्त्यातस्यनैवास्तिपातकं नजह्यात्तुलसीमालांधात्रीमालांविशेषतः महापातकसंहत्राधर्म्मकामार्थदायिनीं विष्णुधर्म्मे स्पृशेत्तुयानिलोमानि धात्रीमालाकलौनृणां तावद्वर्षसहस्राणिवैकुंठेवसतिर्भवेत् मालायुग्मंतुयोनित्यंधात्रीतुलसिसंभवं वहतेकंठदेशेयःकल्पकोटिंदिवंवसेत् तुलसीकाष्ठमालामंत्रः ॥ तुलसीकाष्ठसंभूतेमालेहरिजनाप्रिये विभर्म्मित्वामहं कंठेकुरुमांकृष्णवल्लभं एवंसंप्रार्थ्यविधिवन्मालांकृष्णगलेऽर्पितां धारयेत्कार्त्तिकेमासिसवसेद्वैष्णवेपदइति अत्र

मूलंचिंत्यम् । अथपुष्पनिवेदनं । भार्गवार्चनदीपिकायां । नृसिंहपुराणे ॥ अगस्तिकुसुमैर्देवंयोर्चयेच्चजनार्द्दन दर्शनात्तस्यदेवस्यनरकंनाश्नुतेनरः विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवं कार्त्तिकेयोर्चयेद्भक्त्यावाजिपेयफलंलभेत् स्कांदेकार्त्तिकमाहात्म्ये ॥ मालतीमालयाविष्णुःकेतक्याचैवपूजितः समासहस्रंसुप्रीतोभवेद्वैमधुसूदनः तथा । कार्त्तिकेकेशवीपूजायेषांनाम्नासुतैःकृता तेनिर्भर्त्स्यरवेःपुत्रंवसंतित्रिदिवेसदा तथाच । तुलसीदलशतकेनकार्त्तिकेयोर्चयेद्धरिं पत्रेपत्रेमुनिश्रेष्ठलभतेमौक्तिकंफलं तथाचस्कांदे कार्तिकमाहात्म्ये धात्रीफलविलिप्तांगोधात्रीफलविभूषणः धात्रीफलकृताहारोनरोनारायणोभवेत् तच्छायायान्तुयःकुर्य्यात्पिण्डदानंमहामुने मुक्तिंप्रयांतिपितरःप्रसादान्माधवस्यतु ॥ धात्रीछायांसमाश्रित्ययोर्च्चयेच्चक्रधारिणं पुष्पेपुष्पेऽश्वमेधस्य फलंप्राप्नोतिमानवः तथास्कांदे कार्तिकेमासिविप्रेंद्रधात्रीवृक्षोपशोभिते वनेदामोदरंविष्णुंचित्रान्नैस्तोषयेद्विभुं मूलेनपायसेनाथहोमंकुर्य्याद्विचक्षणः ब्राह्मणान्भोजयेद्भक्त्यास्वयंभुजीतबंधुभिरिति पद्मपुराणे रसधेनुंचयोदद्यात्कार्तिकेमासिपार्थिव सर्वान्कामानवाप्नोतिनित्यंसुगतिभाग्भवेत् अथकार्तिकेवर्ज्यान्याह ॥ पाद्मेकार्तिकमाहात्म्ये राजिकामादकंचैवनैवाद्यात्कार्तिकेव्रती द्विदलंतिलतैलंचतथान्नमतिदूषितं स्कांदेपि कार्तिकेवर्जयेत्तद्वद्द्विदलंबहुवीजकं माषमुद्गमसूराश्चचणकाश्चकुलत्थकाः निष्पावाराजमाषाश्चआढक्योद्विदलंस्मृतं नूतनान्यपिजीर्णानिसर्वाण्येतानिवर्जयेत् अत्रउत्पत्तिसमयेदलद्वयंभवति तस्यतत्पूर्वगत्वाद्विदलमुच्यतइत्याहुः उदाहरंतिच बीजमेवसमुद्भूतंद्विदलंचांकुरंविना दृश्यतेयत्रसस्येषुद्विदलंतन्निगद्यतइति अन्येतु लक्षणायांमानाभावात्वचनं तस्यनिर्मूलत्वाद्द्विदलात्मकंयस्यस्वरूपं तदेववर्जयेदित्याहुः तथानारदीये ॥ कार्तिकेवर्जयेत्तैलंकार्तिकेवर्जयेन्मधु कार्तिकेवर्जयेत्कांस्यंकार्तिकेशुक्तसंस्थितं कास्यंकांस्यपात्रभोजनं शुक्तं पर्य्युषितलवणकशा

काः तथाच ॥ निष्पावान्राजमाषांश्चसुप्तेदेवेजनार्द्दने येभक्षयंतिराजेंद्रचांडालादधिकाहिते कार्तिकेतुविशे
षेणराजमाषांस्तुभक्षयेत् निष्पावान्राजशार्दूलयावदाभूतनारकी कदंवानिपटोलानिवृंताकसहितानिच नत्यजे
त्कार्त्तिकेमासियावदाभूतनारकी एतानिभक्षयेद्यस्तुसुप्तेदेवेजनार्द्दने शतजन्मार्जितंपुण्यंदहतेनात्रसंशय इतिभ
विष्योत्तरादिषूक्तं तथा ॥ कार्त्तिकेकृष्णसेवीयःप्राजापत्यपरोथवा एकांतरोपवासीवात्रिरात्रोपोषितोपिवा
षड्वाद्वादशपक्षंवामासंवावरवर्णिनि एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनभैक्षेणव्रजतेपरमंपदमिति अन्ये
पिनियमाःप्राक्चातुर्मास्यप्रारंभोक्तास्ते कार्तिकेयथाशक्तिरवश्यंसेव्याः अत्रग्राह्यमुक्तंस्कांदे ॥ व्रीहयोयवगो
धूमाःप्रियंगुतिलशालयः एतेहिसात्त्विकाःप्रोक्ताभोगमोक्षप्रदायकाः काशीखंडे ऊर्जेयवान्नमश्नीयाद्देवान्नम
थवापुनः वृंताकंसूरणंचैवशूकाशिंविंचवर्ज्जयेत् पृथ्वीचंद्रोदये अव्रतेनाक्षिपेद्यस्तुमासंदामोदरप्रियं निर्यग्योनि
मवाप्नोतिनात्रकार्य्याविचारणा मांसवर्ज्जनंमहाभारते मासिमास्यश्वमेधेनयोयजेतशतंसमाः नस्वादयातियोमां
संसममेतद्युधिष्ठिर यस्तुवर्षशतंपूर्णंतपस्तप्येत्सुदारुणं तथैकंवर्ज्जयेत्मांसंसमंस्यात्तुयुधिष्ठिर कौमुदेतुविशे
षेणशुक्लपक्षेनराधिप वर्ज्जयेदत्रमांसानिधर्म्मोह्यत्राविधीयते नंदिपुराणे योनरःकार्त्तिकेमासेमांसंतुपरिवर्ज्जयेत्
संवत्सरस्यलभतेफलंमांसविवर्ज्जनात् तथाच तथाजन्मसहस्रैस्तुमानुष्यंप्राप्यदुर्लभं कार्त्तिकेनार्चयेद्विष्णुंतस्य
स्याद्यमयातना गवांकोटिप्रदानस्यस्वर्णकोटिषुयत्फलं तत्फलंकोटिगुणितमेकाहंकेशवार्चनात् ददातिवैष्णवान्
पुत्रान्भक्तिंचाव्यभिचारिणीं यःकरोतिनरोभक्त्याकार्त्तिकेपत्रभोजनं नदुर्गतिमवाप्नोतियावदिंद्राश्चतुर्दश भोजनं
ब्रह्मपत्रेषुमहापातकनाशनं कार्त्तिकेमुक्तिदंप्रोक्तंब्रह्मपत्रेषुभोजनं ब्रह्मपत्रंपलाशपत्रं वाराहपुराणे नगृहेकार्त्तिकंकु
र्य्याद्विशेषेणतुकार्तिकीं तीर्थेतुकार्त्तिकंकुर्य्यात्सर्वयत्नेनभावितइति अत्रग्रहणमधिकृत्यदेवीपुराणे कार्त्तिकेग्रहणे

श्रेष्ठंगंगायामुनसंगमे अथकार्तिकेदीपदानं भविष्यपुराणे यः कुर्यात्कार्तिकेमासिशोभनांदीपमालिकां चंडिकायतनेभक्त्यासहिसूर्य्योपमोव्रजेत् चंडिकायतनमत्रोपलक्षणं । विष्ण्वादीनामप्यायतनेषुकार्तिकदीपदानंकार्य्यं तथा॥ ददातिकार्तिकेयस्तुममायतनदीपकं जातिस्मरत्वंप्रज्ञांचप्राकाम्यंसर्वजंतुषु अव्याहतेंद्रियत्वंचसमाप्नोतिनसंशय इति विष्णुधर्मोत्तरे कार्तिकेदीपदानेनसर्वत्रौज्ज्वल्यमाप्नुयात् ब्रह्मोवाच दीपंप्रयच्छतिनरः सूर्य्यस्यायतनेतु यः तेजसारविसंकाशः सर्वयज्ञफलंलभेत् कार्तिकेतुविशेषेणकौमुदेमासिदीपकं दत्त्वायत्फलमाप्नोतिनतदन्येनलभ्यते कार्तिकेतुविशेषेणकौमुदेमासिदीपकं दत्त्वातुसूर्य्यायतनेनयातिनरकंनरः एष प्रभावोदीपस्यकार्तिकेमासिसुव्रत अर्कायतनदीपस्यएतद्रुद्रवचोयथा ॥ ससर्वकालंचक्षुष्मान्मेधावीदीपदोनरः ज्ञायतेनरकंनापितमस्संज्ञानपश्यति षष्ठींवासप्तमींवापिप्रतिपक्षंतुयोनरः दीपंददातिदत्त्वाचयत्फलंतन्निबोधत कार्वुरंमणिमुक्ताढ्यंमनोज्ञमतिशोभनं दीपमालाकुलंदिव्यंविमानमधिरोहति कार्बुरंकांचनमित्यर्थः । तस्मादायतनेभानोर्दीपंदद्यात्सदाच्युतं । तंप्रदत्तंनहिंसेतनकुर्य्यात्तैलवर्जितं कुर्याच्चदीपहंताचमूषकोंऽधश्चजायते तस्माद्दद्यान्नचहरेच्छ्रेयोर्थीदीपकंनरः तथाचगौडाः उच्चैः प्रदीपमाकाशेयोदद्याद्विष्णवेनरः ससर्वंकुलमुद्धृत्यविष्णुलोकमवाप्नुयात् । कार्तिकप्रकरणात् । यश्चकेशवमुद्दिश्यदीपंदद्याच्चकार्तिके आकाशस्थंज्वलंतंचशृणुतस्यापियत्फलम् धनधान्यसमृद्धश्चपुत्रवानीश्वरोभवेत् लोचनेचशुभेतस्यविद्वानपिप्रजायते तथा । तुलायांतिलतैलेनसायंसंध्यासमागमे आकाशदीपंयोदद्यान्मासमेकंनिरंतरं श्रीकामोयः श्रीपतयेसश्रियानावियुज्यते महतींश्रियमाप्नोतिरूपसौभाग्यसंपदमिति तद्विधिश्चादित्यपुराणे । दिवाकरेऽस्ताचलमौलिभूतेगृहांगणेतुपुरुषप्रमाणं यूपाकृतिंयज्ञियवृक्षजातामारोप्यभूमावथतस्यमूर्ध्नि कृत्वाचतस्रोऽष्टदलाकृतीस्तुयाभिर्भवेदष्टदिशानुचारी तत्कर्णिकायां

तुमहाप्रकाशोदीपः प्रदेयोदलगास्तथाष्टौ निवेद्यधर्मायहरायभूम्यैदामोदरायाप्यथधर्म्मराज्ञे प्रजापतिभ्यस्त्व
थवापितृभ्यः प्रेतेभ्यएवाथचतुः स्थितेभ्यः । अपरार्केऽन्योमंत्रः । दामोदरायनभसितुलयालोलयासह प्रदीपंते
प्रयच्छामिनमोऽनंतायवेधसे अत्रैकभक्तव्रतं महाभारते। कार्त्तिकंतुनरोमासंयः कुर्यादेकभोजनं शूरश्चवहुभा
र्य्यश्चकीर्त्तिमांश्चैवजायते भविष्पपुराणे । एकभक्तेनयानारीकार्त्तिकंतुक्षिपेद्यदि क्षमाहिंसादिनियमैस्संयताव्रत
चारिणी गुडादिमिश्रशाल्यन्नंभास्करायनिवेदयेत् पक्षयोरुभयोःस्नात्वाश्रद्धयापरयान्विता पुष्पाणिकरवीरा
णिगुग्गुलुंसाज्यमादरात् सप्तम्यांवाथषष्ठ्यांवाउपवासरतिर्भवेत् इंद्रनीलप्रतीकाशैरालोकैः सर्वकालिकैः
नारीयुगशतैस्साग्रैः सूर्य्यलोकेमहीयते तस्मादागत्यलोकेऽस्मिन्यथेष्टंविंदतेपतिम् इत्येवंसर्वधर्म्मज्ञवि
धिस्तुल्यः प्रकीर्त्तितः एकभक्तोपवासस्यफलंतुसदृशंभवेत् स्कंदपुराणे । योनरः कार्त्तिकंमासमेकभक्ते
नतिष्ठति सोऽश्वमेधफलंप्राप्यवन्हिलोकेमहीयते कार्त्तिकमासोऽग्निदैवत्यइति विष्णुनाकार्त्तिकस्याग्निदे
वत्वमुक्तं विष्णुधर्मोत्तरे द्विजवेश्मनियोदद्यात्कार्त्तिकेमासिदीपकं अग्निष्टोमफलंतस्यप्रवदंतिमनीषिणःभवि
ष्पपुराणे । यः कुर्यात्कार्त्तिकेमासिशोभनांदीपमालिकां सप्तम्यामथवाषष्ठ्याममावस्यामथापिवा भास्करा
युतसंकाशस्तेजसाभासयन्दिशः दिव्याभरणसंपन्नःकुलमुद्द्योत्यसर्वशः दीपवृक्षसमुद्द्योत्यभास्करस्यालयेशु
भे सर्वलोकमयेवीरवीरलोकेमहीयते भविष्यपुराणे । घृतदीपप्रदानेनाशिवायशतयोजनं विमानंलभतेदिव्यं
सूर्य्यकोटिसमप्रभं यः कुर्य्यात्कार्त्तिकेमासिशोभनांदीपमालिकां घृतेनचचतुर्दश्याममावस्यांविशेषत; याव
द्दीपस्यसंख्यावैघृतेनापूर्य्यवोधिता तावद्युगसहस्राणिहरलोकेमहीयते इतिशिववाक्यं स्कंदपुराणे प्रदीपमालां
यःकुर्य्यात्कार्त्तिकेमासिवैमम अवसानेतुदीपानांव्राह्मणान्भोजयेच्छुचिः प्राज्ञापत्यंचलभतेदीप्यतेचरविर्यथा

यःकुर्य्यात्कार्त्तिकेमासिशोभनांदीपमालिकां चंडिकायतनेभक्त्यासूर्य्यायतनकेपुनःघृतेनकुरुशार्दूलअमावस्यांतुभक्तितः विशेषतोनवम्यांतुभक्तिश्रद्धासमन्वितः यावंतोदीपसंघास्तुतैलेनापूर्य्यवोधिताः तावद्वर्षसहस्राणिदुर्गालोकेमहीयते अथविष्णुपुराणोक्तं कार्त्तिककृत्यं ॥ मैत्रेयउवाच कार्त्तिकः खलुमासोऽयंसर्वदेवमयोमहान् यानि कृच्छ्राणिचोक्तानिसर्वपापहराणिवै कृतानिमुनिभिस्तानिभनुजाधिपसर्वशः देवपितृमनुष्येभ्योदत्तंघृतमधुप्लुतं तत्रान्नमक्षयंप्रोक्तंब्रह्मणालोककर्तृणा समभ्यर्च्यहरिंभक्त्यादीपंदद्याद्दिवानिशं सर्वपापविशुद्धात्मानरोयात्यभवंनृप इतिविष्णुधर्मोक्तं कार्त्तिककृत्यं अथादित्यपुराणोक्तंदीपदानम् ॥ सनत्कुमारउवाच दामोदरस्य वाक्यंतुश्रुत्वाप्रश्नंचकारसः केनोपायेनभगवन्नदृश्येतमहत्तमः नाकलोकसमंसौख्यंप्रेतलोकेभवेत्कथं भववान्देवकीपुत्रस्तद्वाक्यस्योत्तरंददौ रहस्यंपरमंगुह्यंमनोरथफलप्रदं भोःशृणुष्वमहावुद्धेयत्प्रवक्ष्यामितेऽनघ पूर्णे आश्वयुजेमासिपौर्णमास्यांसमाहितः प्रथमेचनिशारंभेमनोवाक्कायसंयुतं नमःपितृभ्यःप्रेतेभ्योनमोधर्म्माय विष्णवे नमोयमायरौद्रायकांतारपतयेनमः दद्यादनेनमंत्रेणदीपंश्रद्धासमन्वित इत्यादि अनेनदीपेनमनोरथानांसंप्राप्तिरस्तीतिनसंशयोत्र एतानिचोक्त्वाकतिचिद्वचांसिदामोदरश्चांतरितोबभूवेत्यादित्यपुराणोक्तंप्रदीपव्रतम् अथात्रजयावाप्तिव्रतं विष्णुधर्मोत्तरे ॥ वज्रउवाच भगवन्कर्म्मणाकेनसर्वत्रजयमाप्नुयात् व्यवहारेरणेद्यूतेविवादेचद्विजोत्तम जयावाप्तेःपरंनास्तिसौख्यंलोकेषुसत्तम जयावाप्तिपदंसौख्यंयदस्तिव्रतमुच्यतां मार्कंडेय उवाच आश्वयुज्यामतीतायांप्रतिपत्प्रभृतिक्रमात् पूर्ववत्पूजयेद्देवंलोकनाथंत्रिविक्रमं त्रिरात्रांतेतुकार्त्तिक्यां दद्यादुक्षाणमुत्तमं सर्वसस्यधरंकृत्वाशक्त्यारत्नैरलंकृतं कृत्वाव्रतंमासमिदंयथोक्तंप्राप्नोतिलोकंसुचिरंनृवीर उपोष्यकालंसुचिरंनृवीरःप्राप्नोतिसर्वत्रजयंचलोके इतिविष्णुधर्म्मोक्तं जयावाप्तिव्रतं रूपावाप्तिवदत्रपूज।

अथकृच्छ्रव्रतं ॥ सुपुण्येकार्त्तिकेमासिदेवर्षिपितृसेविते क्रियमाणेव्रतेन्दृणांस्वल्पेऽपिस्यान्महाफलं कृत्स्नःसंवत्सरःपुण्यस्तस्माद्वर्षाःसुपूजिताः वर्षाभ्यःकार्त्तिकः पुण्यःकार्त्तिकाद्ग्रीष्मपंचकं नैवेद्यंपुष्पधूपंचअर्चितंसुविलेपनं निवेद्यकार्त्तिकेविष्णोःफलंसांवत्सरंफलं अतःकार्त्तिकमासाद्यसदैवशुभकांक्षिभिः हरिमुद्दिश्यकर्त्तव्यंस्वशक्त्यासुकरंव्रतं कार्त्तिकस्यासितेपक्षेवायुभक्ष्यश्चतुर्दशीं समुपोष्यनरोभक्त्यापूजयेद्गरुडध्वजं उपवासस्तुकर्त्तव्योवारिमध्येस्थितेनच जलकृच्छ्रमिदंकृत्वाविष्णुलोकंव्रजेन्नरइत्यादि, यथोक्तेनविधानेनकृच्छ्राणिसमुपाचरेत् व्रतोपवासनियमैर्युक्तास्तेमुक्तिभागिनः इतिविष्णुधर्म्मोत्तरेकृच्छ्रव्रतानि अथात्रैवदेवीव्रतं ॥ ब्रह्मोवाच क्षीराशीकार्त्तिकेयस्तुदेव्याभक्तिरतोनरः शाकयावकमेकाशीप्रातःस्नायीशिवारतः पूजयेत्तिलहोमस्तुमधुक्षीरघृतादिभिः कार्य्यस्तुदेवीमंत्रेणशृणुपुण्यफलंहरे महापातकसंयुक्तोयुक्तोवाह्युपपातकैः मुच्यतेनात्रसंदेहोयस्मात्सर्वगताशिवा इतिदेवीपुराणोक्तं कार्त्तिकेदेवीव्रतं वामनपुराणेऽपि रजतंकांचनंदीपान्मणिमुक्ताफलादिकं दामोदरस्यप्रीत्यर्थंप्रदद्यात्कार्त्तिकेनरः अथमासोपवासव्रतंकार्य्यं तच्चाश्विनशुक्लैकादशीमारभ्यकर्त्तव्यत्वात्तत्रैवलिखितं अथकार्त्तिकप्रतिपदायां कार्त्तिकमासव्रतनियमादीनामारंभः कार्य्यः। तिथीशत्वाद्वन्हिपूजाद्यपिकर्त्तव्यंनान्यदत्रविशेषकृत्यं एवंद्वितीयायामपि तिथीशत्वाद्ब्रह्मणःपूजा अश्विनोर्यमस्यापिपूजादिकंकार्य्यं तृतीयायांगौरीपूजाव्रतादिकंयथाविहितंकार्य्यमितिदिक् कार्त्तिककृष्णचतुर्थ्यांकृत्यविशेषः संवत्सरप्रदीपे ॥ आश्विनेकृष्णपक्षस्यचतुर्थ्यांरात्रियोगतः मृण्मयेऽवास्थितः पूज्योराजादशरथस्तथा दुर्गाचतत्रसंपूज्यासर्वसौख्यविवृद्धये अथाश्विनोमुख्यचान्द्रेणेतितत्रैवोक्तं इयंप्रदोषव्यापिनीग्राह्या उभयत्रतथात्वेपरैवेतितत्रैवोक्तं अस्यामेवकरकचतुर्थीव्रतं साचचंद्रोदयव्यापिनीग्राह्या उभयत्रतथात्वेसंकल्पकालसत्त्वात्परा अत्रस्त्रीणामेवाधिकारः

तासामेवफलश्रुतेः अथव्रताविधिः मासपक्षाद्युल्लिख्यात्मनःसौभाग्यसौख्यपुत्रदौहित्रादिसुस्थिरश्रीप्राप्तयेकरकचतुर्थीव्रतंकरिष्ये गोमयोपलिप्तभूमौवटंपिप्पलंवोल्लिख्य तदधस्ताच्छिवंगणेशषण्मुखयुक्तांगौरींचालिख्यषोडशोपचारैःपूजयेत् तत्रमंत्रः॥ नमः शिवायैशर्वाण्यैसौभाग्यंसंततिंशुभां प्रयच्छ भक्तियुक्तानांनारीणांहरवल्लभे ततोनमोंतमंत्रेणशिवषण्मुखयोः पूजाकार्या ततः सपक्वान्नान्दशकरकान्ब्राह्मणेभ्योदद्यात् ततः पिष्टकैनैवेद्यंभोजनंसर्वंनिवेदयेत् ततश्चंद्रोदयोत्तरंचंद्रायार्घ्यंदद्यात् क्षीरसागरसंभूतचंद्रलक्ष्मीसहोदर गृहाणार्घ्यंशशांकेशरोहिणीसहितप्रभो अथकथा। मांधातोवाच अर्जुनेतुगतेजेतुमिंद्रलोकगतिंप्रति विषण्णमानसासुभ्रूर्द्रौपदीसमचिंतयत् अहोकिरीटिनाकर्म्मसमारब्धंमहत्तरं विघ्नप्रवणमेतद्धिबहवः परिपंथिनः चिंतयित्वेतिसादेवीकृष्णाकृष्णंजगद्गुरुं भर्त्तुःप्रियंचिकीर्षंतीसाऽपृच्छद्विघ्नवारणे द्रौपद्युवाच कथयस्वजगन्नाथव्रतमेकंसुदुर्ल्लभं यत्कृत्वायांतिविघ्नानिविजयस्तेजसःश्रियः श्रीव्यासउवाच एतदेवमहाभागेशंभुःपृष्टःकिलोमया एतत्पृष्टंदेविपूर्वं पार्वत्याशंकरंप्रति तस्यास्तद्वचनंश्रुत्वाप्राहदेवोमहेश्वरः शृणुदेविवरारोहेवक्ष्यामित्वांमहेश्वरि पतिविघ्नहरीत्याहकरकाख्याचतुर्थिका पार्वत्युवाच भगवन्कीदृशीप्रोक्ताचतुर्थीकरकाभिधा विधानंकीदृशंप्रोक्तं केनेयंचपुराकृता ईश्वरउवाच शक्रप्रस्थेपुरेरम्येविद्वज्जनसमाकुले स्वर्णरौप्यसमाकीर्णेरत्नप्राकारशोभिते दिव्यनारीजनालोकवशीकृतजगत्त्रये वेदध्वनिसमायुक्तेस्वर्गादपिमनोरमे वेदधर्म्माद्विजस्तत्रवसन्वेदविदांवरःपत्नीतस्यैवविप्रस्यनाम्नालीलावतीशुभा सास्वयंजनयामासपुत्रान्सप्तामितौजसः कन्यांवीरवतींनाम्नासर्वलक्षणसंयुतां नीलोत्पलाभनयनांपूर्णेंदुसदृशाननां ततःकालेशुभदिनेविधिवत्तां द्विजोत्तमः ददौवैवेदविदुषेविप्रायविधिपूर्वकं अत्रांतरेतुसंप्राप्ताचतुर्थीकरकाभिधा वीरवत्यासमारब्धंव्रतंकामप्रदंशुभं कुड्यांबोधिद्रुमंचक्रेगौरींतस्मिन्नलीलिखत्

शिवेनविघ्ननाथेनषण्मुखेनसमान्वितां गंधपुष्पाक्षतैर्गौरींपूजयामासमंत्रतः नमःशिवायैशर्वाण्यैसौभाग्यंसंततिंशुभां प्रयच्छभक्तियुक्तानांनारीणांहरवल्लभे तस्याःपार्श्वेमहादेवंविघ्ननाशंषडाननं पुनःपुष्पाक्षतैर्धूपैरानर्चचपृथक्पृथक् पक्वान्नाक्षतसंपन्नान्सदीपान्करकान्दश तथापिष्टकनैवेद्यंभोज्यंसर्वंन्यवेदयत् प्रतीक्षंतीस्त्रियः सर्वाश्चंद्रायार्घ्यपरायणाः सावालाव्याकुलादीनाक्षुत्तृड्भ्यांपरिपीडिता निपपातमहीपृष्ठेरुरुदुर्वांधवास्तदा समाश्वास्यचतांतेवैमुखमभ्युक्ष्यवारिणा तद्भ्रातातुविचिंत्यैवमारुरोहमहावटं हस्तेनोल्कांसमादायज्वलंतींस्नेहपीडितः भगिन्यैदर्शयामासचंद्रंव्याजोदितंतदा तद्दृष्ट्वाचार्त्तिमुत्सृज्यवुभुजेसुमनास्तदा चंद्रोदयंसमासाद्यअर्घ्यंदत्त्वा विधानतः तद्दोषेणमृतस्तस्याःपतिर्धर्म्मश्चदूषितः पतिंतथाविधंदृष्ट्वाशिवमभ्यर्च्यसापुनः व्रतंनिरशनंचक्रे यावत्संवत्सरोगतः चक्रुःसंवत्सरेऽतीतेव्रतंतद्भ्रातृयोषितः पूर्वोक्तेनविधानेनसाऽपिचक्रेशुभानना तदायाताशची कन्यासखीभिःपरिवारिता एतदेवव्रतंकर्त्तुमागतास्वर्गलोकतःवीरवत्यतदभ्याशमगमद्भाग्यतःस्वयं दृष्ट्वातांमानुषीं देवीपप्रच्छसकलंशची तयापृष्टावीरवतीप्रोवाचविनयान्विता अहंपितृगृहंप्राप्तामृतोऽयंमेपतिःप्रभुः नजानेकर्म्मणःकस्यफलंप्राप्तंमयाधुना ममभाग्यवशाद्देविआगतासिमहेश्वरि अनुगृह्णीष्वमांमातर्जीवयाशुपतिंमम इंद्राण्युवाच त्वयापितृगृहेपूर्वंकुर्वंत्याकरकाव्रतं वृथैवार्घ्यस्त्वयादत्तोविनाचंद्रोदयंशुभे तेनैवव्रतदोषेणपतिर्लोकांतरं गतः इदानींकुरुयत्नेनकरकाव्रतमुत्तमं पतिंतेजीवयिष्यामिव्रतस्यास्यप्रभावतः कृष्णउवाच तस्यास्तद्वचनं श्रुत्वाव्रतंचक्रेविधानतः प्रसन्नासाऽभवद्देवीशक्रस्यप्राणवल्लभा तयाव्रतेकृतेदेवीजलेनाभ्युक्ष्यतत्पतिं जीवयामासचेंद्राणीदेववच्चबभूवसः ततश्चागाद्गृहंस्वीयंरेमेसापतिनासह धनंधान्यंसुपुत्रांश्चदीर्घमायुश्चलब्धवान् तस्मात्त्वयापियत्नेनव्रतमेतद्विधीयतां सूतउवाच द्वैपायनवचःश्रुत्वाचकार द्रौपदीव्रतं तद्व्रतस्यप्रभावेणाजित्वातान्

कौरवान्रणे लभिरेराज्यमतुलंधनधान्यसमान्वितं अस्योद्यापनं आचम्य मासपक्षाद्युल्लिख्यात्मनः सौभाग्यपुत्रपौत्रादिसुस्थिरश्रीप्राप्तयेसपरिवारषण्मुखगणेशशिवसहितगौरीप्रीत्यर्थमाचरितकरकचतुर्थीव्रतोद्यापनंकरिष्ये तत्रादावाचार्य्यंवृत्वा सर्वतोभद्रेलिंगतोभद्रेवाकलशस्थापनंविधाय तत्र ताम्रादिपात्रे हैमींगौरींशिवषण्मुखगणेशसहितांवटवृक्षतलस्थितां संस्थाप्य षोडशोपचारैःपूजयेत् ॥ नमःशिवायैशर्वाण्यैसौभाग्यसंततिंशुभां प्रयच्छभक्तियुक्तानांनारीणांहरवल्लभे ॐनमःशिवायैगणेशस्कंदहरसहितायैनमः एताभ्यामेव मंत्राभ्यांसर्वोपचारपूजांकुर्य्यात् रात्रौगीतवाद्यादिभिर्जागरणंकुर्य्यात् प्रातःपुनःपूजांविधाय स्वगृह्योक्तविधिनाग्निंप्रतिष्ठाप्यअन्वादध्यात् तत्र प्रधानंगौरींशिवंस्कंदंगणेशंच पायसाज्यतिलवटादिसमिद्भिः प्रत्येकमष्टोत्तरसहस्राहुतिभिरष्टोत्तरशतसंख्याकाभिर्वाहुत्वा ब्रह्मादिदेवतानवग्रहदिक्पालादीनेकैकयाहुत्या चरुसमिद्भिर्हुत्वा स्विष्टकृद्धोमांते आचार्य्यंसंपूज्य प्रतिमासहितंकलशंदत्त्वा ततः करकंक्षीरसंपूर्णंतोयपूर्णमथापिवा ददामिरत्नसंयुक्तंचिरंजीवतुमेपतिरिति सदक्षिणकरकान्दशसुवासिनीभ्योयथाशक्तिदद्यात् ततोव्रतसंपूर्त्यै शय्यादिदानंयथाशक्तिदत्त्वा सदन्नेनब्राह्मणान्परितोष्याशिषोगृहीत्वा भूयसींदक्षिणांदद्यात् अशक्तौचैकमेवकरकं दद्यात् घृतपूर्णंच करकंक्षीरपूर्णमथापिवा ददामिरत्नसंयुक्तंचिरंजीवतुमेपतिः इतिमंत्रेणकरकान्प्रदद्याद्द्विजसत्तमे सुवासिनीभ्योदद्याच्चआदद्यात्ताभ्यएवच एवंव्रतंयाकुरुतेनारीसौभाग्यकाम्यया सौभाग्यंपुत्रपौत्रादीन्लभतेनात्रसंशयः ॥ इतिश्रीवामनपुराणे करकचतुर्थीव्रतं सोद्यापनं

कार्तिककृष्णपंचम्यां तिथिपत्वेनशेषादयोनागाःपूज्याःतथाचोक्तंपक्षद्वयगतासुसर्वासुपंचमीषु तिथिपत्वेन नागाःशेषादयःपूज्याःपंचम्यां पूजनंभवेदिति अत्रषष्ठ्यांस्कंदपूजा तथाचपक्षद्वयगतासुसर्वासुषष्ठीषु तिथिपत्वेनस्कंदंसंपूजयेत् तदुक्तम् षष्ठ्यां

पूजागुहस्यचेति कार्तिककृष्णसप्तमीवैकुंठकल्पादिः अत्रादिकल्पादिकल्पोक्तंकृत्यं तिथिपत्वेनादित्यपूजा
तथाचोक्तंसप्तमीनिर्णये पक्षद्वयगतासुसप्तमीषुतिथिपत्वेनादित्यः पूज्यः सप्तम्यांभास्करस्येत्युक्तेः अस्या
मेवाष्टम्यां दांपत्याष्टमीव्रतं हेमाद्रौभविष्योत्तरे ॥ कार्तिकेमासिविप्रेंद्रपुत्रकामोनरोमुने अष्टम्यांकृष्णप
क्षस्यपूजयेद्विधिवन्नरः उमयासहितंदेवंकृत्वादर्भमयंविभुं अस्यामेवमथुरावासिभीराधाकुंडेस्नानमरुणोदये
सूर्योदयेकार्य्यमितिमथुरासेतौज्ञेयम् कार्तिककृष्णाष्टमीकरकाभिधा सामहाराष्ट्रेषुप्रसिद्धा सापिचंद्रोदयव्या
पिनीग्राह्या अस्याविधानंकरकचतुर्थीवदिति अस्यामेव कार्तिककृष्णाष्ठम्यां अहोयदिवव्रितं पद्मपुरा
णेकार्तिकमाहात्म्ये ॥ पृथुरुवाच देवर्षेवदतांश्रेष्ठसर्ववेदार्थपारग त्वाहंप्रष्टुमिच्छामित्वत्तः संदेहच्छेदक
तादृशंव्रतमाख्याहियत्पुत्रधनवर्द्धनम् नारदउवाच ॥ महाविद्यामहामायामहामेधास्मृतिः महामोहाभगव
तीमहादेवीमहेश्वरी अहोयीचेतिविख्यातासैवसर्वेश्वरेश्वरी तस्याव्रतंमहापुण्यंसर्वलोकहितप्रदं पृथुरुवा
च ॥ अहोयीनामसादेवीकथंजाताचनारद तथाव्रतंतिथौकस्यांकोविधिश्चवदस्फुटं नारदउवाच ॥ आसीत्पु
राकृतयुगेऽकालमृत्युर्न्नराधिप ततोनराश्चवहवः पक्षिणश्चक्षयंगताः तदाजनपदाःसर्वेक्षयंयाताश्चभूरिशः वी
जमात्राणिभूतानितदाऽभूवन्नृपाधिप तदासर्वेसमागम्यब्राह्मणान्वेदपारगान् पप्रच्छुर्विनयोपेताः किंकार्य्यं
वदतद्विजाः ब्राह्मणावेदविद्वांसोविचार्य्यचमुहुर्मुहुः शास्त्राण्यालोक्यतत्त्वज्ञाःकालमृत्योःशमायच अहोय्याश्च
महादेव्याआराधनमकुर्वत कार्तिकेकृष्णपक्षस्यसप्तम्यांध्यानतत्पराः ततःप्रदोषसमयेभूवन्सर्वेपिदुःखिताःअथा
गच्छत्तदातत्रकाचिद्धीवरयोषिता सोवाचब्राह्मणान्सर्वान्किमर्थंव्रतमासत तऊचुस्तांनरश्रेष्ठकालमृत्युक्षयायच
प्रोक्ताचसत्यमित्येवंसापितत्रसमासदत् ततःसर्वाःप्रजाविप्राःसापिधीवरयोषिता अहोय्याश्चमहादेव्याभूय

आराधनंदधुःएतास्मिन्नेवकालेतुदेवीसाक्षाददृश्यत चामुंडामुंडहस्ताचकरालाकृष्णवर्णिका कालिकेतिसमाख्याता अहोयीतत्रविश्रुता एकान्हैवप्रसन्नत्वादहोयीनामतेऽब्रुवन् सापितत्रसमासीनान् ब्राह्मणानभ्यभाषत अहंरुद्रगणैःसार्द्धंकालमृत्युसमन्विता विहारार्थंसमायाताविश्वपापमवेक्ष्यच अद्यविप्रावेदहीनादांभिकानिरपत्रपाः अरक्षकाःक्षत्रियाश्चवैश्यादुष्टाश्चपादजाःस्त्रियःपतिप्रतीपाश्चस्वेच्छाचारसमान्विताःएतांसमीक्ष्यपापस्यगतिंघोरांभयावहां निर्धर्म्मकांश्चनिर्यज्ञान्निर्होमान्निर्जपांस्तथा आगताःस्वगणैःसार्द्धंविश्वाभावायकेवलं अथैवकार्त्तिकेमासिव्रतादिफलकोटिभिः सप्तम्यांचविशेषेणपूजितायांद्विजोत्तमाः प्रसादमागताविप्रावरंवृणुतमाचिरं ततःसकललोकाश्चप्रार्थयंतिस्मतांनृप दुर्भिक्षंनभवेद्देविनातंकश्चभवेत्क्वचित् नाकालमृत्युर्नव्याधिर्नचापुत्रत्वमेवच नारदउवाच ततोब्रवीन्महादेवीशृणुध्वंहेद्विजोत्तमाः कार्तिकेकृष्णपक्षेतुअष्टम्यांचविशेषतः तारानक्तंचैकभक्तमथवाद्यप्रभृत्यकैः कर्त्तव्यंचविशेषेणसप्तम्यांचव्रतंमम चंद्रनक्तंचसप्तम्यामष्टम्यांचैवनक्तकं अवश्यंयाहिव्रतंकार्य्यंनरैर्नारीभिरेवच दिवाचात्रनभोक्तव्यंबालवृद्धातुरंविना सायंप्रपूजयेन्नाम्नाऽहोयीत्येवचमांसुधीः कर्त्तव्याहिप्रयत्नेन मदीयाप्रतिमानरैः तत्रकुड्यांचस्तंभेवामंडपेमेसमाचरेत् चतुर्वर्णैश्चसवर्णैःश्यावपीतासितासितैः मूलकाभिस्तथास्कंधैरिक्षुदंडादिभिस्तथा एवंकृत्वानरैःसर्वैःसर्वसुखमवाप्यते तत्रमांपूजयेद्भक्त्याचंद्रिकामंडबर्बरैः संयावशणपुष्पैश्चधूपदीपैस्तथैवच यतोऽनयापूजयास्यांतृप्तामृत्युगणैःसमं तथेत्युक्तास्ततःसर्वेजगृहुर्व्रतमुत्तमं ततस्तुप्रांजलिर्भूत्वासाहधीवरयोषिता महादेवींचदेवेशिपाह्यस्मान्नीचयोनिजान् ततोऽब्रवीन्महादेवीअहोयीविश्रुताचया एहित्वंममभक्तासिप्रसन्नातेनसंशयः त्वयाप्यहंसदापूज्यापूर्वोक्तेनविधानतः पूजावसानेभवतीसाहि तांपूजयेत्तुयः तस्यपूजाहिसफलाविपरीतमतोऽन्यथा तथापूज्याःकुमार्य्यश्चमालिनीचतदैवहि नारदउवाच

एवंप्रोच्यततःपश्चात्तत्रैवांतरधीयत ततःसर्वेगृहीत्वातुव्रतमेतन्नसंशयः अधुनातेमयाप्रोक्तंतवस्नेहस्यकारणात् गृहस्थवासिभिर्जीवैरावश्यकमिदंव्रतं कुर्वंतिव्रतमेतद्येतेषांसौख्यंभवेद्ध्रुवं नाकालमृत्युर्नव्याधिर्नभयंनृपशत्रुतः सप्तमीचाष्टमीवापितिथिरस्यव्रतस्यहि सप्तमीचंद्रनक्तेचतारानक्तेतुचाष्टमी उभेएवसमानेहिव्रतेतिथ्युभयेनृप नारदउवाच एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि अहोय्याश्चव्रतंजन्मप्रसादश्चविधिस्तिथिः फलंचैवमहाराजकिंभूयः श्रोतुमिच्छसि कार्त्तिकस्यैवमाहात्म्यंयदेकान्हाप्रसाधिता जनैरहोयीदेव्याप्तिर्नकार्त्तिकसमंशुभं एकान्हास्मरणादेवाकालमृत्योर्व्यमोचयत् अहोयीतन्मतादेवीतत्कार्तिकप्रभावतः कार्तिकेनसमोमासोनभूतोनभविष्यति इतिपाद्मेकार्तिकमाहात्म्ये कार्तिककृष्णाष्टम्यामहोयीव्रतम् ॥ कार्तिककृष्णनवम्यां सर्वास्वपि नवमीषु सरस्वतीदुर्गापूजाकार्य्या सरस्वत्यानवम्यांवेत्युक्तंनवमीनिर्णये दशम्यांचधर्म्मराजपूजा दशम्यामंतकस्यचेतिदशमीनिर्णयोक्तवचनात् कार्तिककृष्णैकादशीरमा अस्याःकथा ब्रह्मवैवर्ते पद्मपुराणेच ॥ युधिष्ठिरउवाच कथयस्वप्रसादेनममस्नेहस्यकारणात् कार्तिकेकृष्णपक्षेतुकानामैकादशीभवेत् किंनामकोविधिस्तस्याएतन्मेवदविस्तरात् यस्मिन्मासेहरिर्देवीनिद्रांत्यजतिमाधवः श्रीकृष्णउवाच शृणुत्वंराजशार्दूलकथांपापप्रणाशिनीं कार्तिकस्यासितेपक्षेरमानामेतिविश्रुता तस्याउपोषणाद्राजन्वैकुंठंलभतेनरः पुरात्रेतायुगेराजन्नयोध्यानगरेनृपः मुचुकुंदइतिख्यातोन्यवसद्धर्मतत्परः इंद्रेणसहयस्यैवसख्यंश्रेष्ठंप्रवर्तते हरिवासरसंधारीहरिभक्तिपरायणः तस्मिंश्चनृपतिश्रेष्ठेभूतधात्रींप्रशासति दुहिताचंद्रभागाख्याजातातस्यगृहेनृप जामातातस्यचैवासीत्शोभनोनामनामतः चंद्रसेनस्यराज्ञस्तुपुत्रोधर्म्मपरायणः श्वशुरस्यगृहेसोथसमायातोनृपात्मजः कियंतोदिवसाश्चैवचंद्रभागाव्याचिंतयत् किंभविष्यतितत्राथममभर्त्ताति

17

दुर्वलः समागतंब्रतंचैवदेवानामपिदुर्ल्लभं एकादशीदिनंपुण्यंसमायातंनृपोत्तम क्षुधयापीडितोभर्त्तापितृशासनमुत्तमं नभोक्तव्यंनभोक्तव्यंसंप्राप्तेहरिवासरे इतिशुश्रावसततंपटहंदारुणंकिल ब्रतस्यमहिमानंनैवज्ञात्वाचैवप्रयत्नतः चिंतयामासतत्रैवशोभनश्चप्रतापवान् किंकरोमिमहाप्राज्ञेक्षुधयापीडितोस्म्यहं पप्रच्छ वल्लभांस्वांसकिंकरिष्यामिशोभने चंद्रभागोवाच पितुर्वेश्मनिमेकांतभोक्तव्यंनैवकेनचित् चातुर्वर्ण्यादिकैश्चैवह्यष्टवर्षाधिकैस्तथा गजैरुष्ट्रैस्तथैवाश्वैः पशुभिः पक्षिभिस्तथा तृणमन्नंतथानीरंभुज्यतेनैवशोभन मानवैश्चतथाभर्त्तर्भुज्यतेनैववासरे यदिचेद्भुज्यतेकांततर्हितंगर्हयत्यसौ इतिसंचिंत्यभोःकांतसुदृढंमानसंकुरु नह्यन्यत्रहिगंतव्यंभोजनार्थंनृपात्मज शोभनउवाच सत्यंचेत्तत्प्रियेनाहंकरिष्यामिब्रतंशुभं दैवेनविहितंचैवतत्तथैव भविष्यति इत्येवंसंमतिंकृत्वातद्गेहेदुःखपीडितःपुनःस्मृत्वापुनःस्मृत्वातथाचविवशोभवत् अन्नेनधार्यतेप्राणश्चान्ने सर्वंप्रतिष्ठितं अन्नमेवपरित्यज्यकथंप्राणावलंबनं शोभनश्चिंतयामासकागतिर्मेभविष्यति इतिचिंतयतस्तस्य रविरस्तमयंगतः वैष्णवानांजनानांतुसानिशापुण्यवर्द्धिनी श्रीकृष्णपूजनेनैवतथाजागरणेनच शोभनस्यतुतस्यैवसानिशादुः खदायिनी अन्नहीनस्यतस्यैवतथैवक्षुधितस्यच अतीवदुःखतप्तस्यरविश्चैवादयंगतः तस्मिन्कालेतुराजेंद्रपंचत्वंशोभनोगतः दाहयामासराजातंराजयोग्यैश्चदारुभिः चंद्रभागानात्मदेहंददाहपतिनासह कृत्वौर्ध्वदैहिकंतस्यतस्थौजनकसद्मनि शोभनेननृपश्रेष्ठरमाब्रतप्रभावतः प्राप्तंदेवपुरंरम्यंमंदराचलमूर्धनि और्ध्वदैह्यंकृतंतस्यक्रियाश्चविधिवत्कृताःचिंतयासाससातत्रचंद्रभागायशस्विनी किंकरोमिक्वगच्छामिसाहंदुःखेनपीडितापातिब्रत्यंकरिष्येहंकाष्ठभक्षणमेवच इतिसंचिंत्यसापश्चादनुबंधंचकारसा एकादशीब्रतेनैवजीर्यतेजीर्यतेस्वयम् इतिबुद्धिंसमास्थायसतीनांधुरिकीर्तिता कश्चिद्द्विप्रोवसन्तत्रनगरेनागरस्तदा सोमशर्म्मेतिविख्या

तोधनहीनोदारिद्रकः साधुकार्य्यंतयाविप्रःकुरुतेप्राणरक्षणं भ्रमतेतत्रसर्वत्रसोन्नार्थीद्विजसत्तमः एवंभ्रमन् सदेशांश्चकुटुंबंपरिपालयन् एकस्मिन्दिवसेमार्गेसूर्योस्तंचतदागतः आरुरोहद्विजोवृक्षंसिंहव्याघ्रभयाकुलः चिंतयानस्यतस्याधः समीयुस्तंमृगादयः श्वापदाः शूकरास्तत्रपुरतस्तुसमागताः पुरंतत्राभवद्देवदेवेनविहितंपुरा अनूपममतिहृद्यंपुण्यवद्भिर्निषेवितं द्वितीयमिंद्रलोकंवैअप्सरोगणसेवितं ललितंगानसंयुक्तैर्गंधर्वैरुपशोभितं; नारायणादिदेवानांप्रासादैरुपशोभितं धनधान्यसमाकीर्णंचातुर्वर्ण्यविराजितं विद्वद्भिः सेवितंभक्त्याकमनीयंकलायुतं किमत्रबहुनोक्तेनगुणैःसर्वैःसमन्वितं तुलसीविटपाकीर्णं भूषणैरतिभूषितं ईदृशंनगरंदृष्ट्वाविप्रोविस्मयमागतः सवृक्षेणांबरात्तूर्णंप्रविवेशपुरंतदा दृष्ट्वासमस्तंनगरंराजवेश्मनिवैगतः राजवेश्ममनोहारिस्वर्णस्तंभविराजितं स्फाटिकोपलसंमिश्रंनानारत्नैरलंकृतं सुमनोवत्सुलालितंतद्गृहंवर्ततेसदा साविप्रस्तद्गृहंदृष्ट्वाराजानंचददर्शह सिंहासनसमारूढंछत्रचामरशोभितं केयूरैः कुंडलैश्चैवकिरीटेनाविराजितं इंद्रतुल्यंसदस्यैश्चतत्रतत्रोपशोभितं राजानंचतदादृष्ट्वाविप्रोसौशोभनंतदा नृपजामातरंज्ञात्वातत्समीपंजगामसः शोभनोऽपितदाज्ञात्वासोमशर्माणमागतं आसनादुत्थितस्तूर्णंनमश्चक्रेद्विजोत्तमं चकारकुशलप्रश्नंश्वशुरस्यतुपश्यतां कांतायाश्चंद्रभागायास्तथैवनगरस्यतु सोमशर्मोवाच कुशलंवर्त्ततेराजन्श्वशुरस्यगृहेतव चंद्रभागाकुशलिनीसर्वतः कुशलंपुरे परंतुकथ्यतांराजन्नेतदाश्चर्य्यकंतथा प्राप्तंत्वयापुरंरम्यं किंव्रतस्यप्रभावतः पुरंविचित्रंराजेंद्रनदृष्टंकेनचित्क्वचित् एतदाचक्ष्वमेसर्वंकस्मात्प्राप्तंपुरंतव शोभनउवाच कार्त्तिकस्यासितेपक्षेरमानामेतिविश्रुता तामुपोष्यमयाप्राप्तंद्विजेंद्रपुरमध्रुवं ध्रुवंभवतियेनैतत्तत्कुरुष्वद्विजोत्तम सोमशर्म्मोवाच कथयाध्रुवमेतद्धिकथंभवतितद्ध्रुवं तत्त्वंकथयराजेंद्रतत्करिष्यामिनान्यथा शोभनउवाच

मयैताद्विहितांविप्रश्रद्धाहीनंद्विजोत्तम तेनाहमध्रुवंमन्येध्रुवंभवातितच्छृणु मुचुकुंदस्यदुहिताचंद्रभागासुशोभना तस्यैकथयवृत्तांतंध्रुवमेतद्भविष्यति इतिश्रुत्वावचस्तस्यागतोविप्रः स्ववेश्मनि कथयामासवृत्तांतंराजकन्याग्रतोद्विजः श्रुत्वाथसाद्विजवचोविस्मयोत्फुल्ललोचना प्रत्यक्षमथवास्वप्नस्त्वयैतत्कथ्यतेद्विज सोमशर्मोवाच प्रत्यक्षंदयितःकांतस्तवदृष्टोमयाशुभे देवतुल्यमनाधृष्यंदृष्टंतस्यपुरंमया अध्रुवंतेनतत्प्रोक्तंध्रुवंभवतितत्कुरु चंद्रभागोवाच नयमांतत्रविप्रेंद्रपतिदर्शनलालसां आत्मनोव्रतपुण्येनकरिष्यामिध्रुवंपुरं आवयोर्द्विजसंयोगोयथाभवतितत्कुरु प्राप्नुहित्वंमहापुण्यंकृत्वायोगंवियुक्तयोःइतिश्रुत्वावचस्तस्याःसोमशर्माजगामह आश्रमंवामदेवस्य मंदराचलसन्निधौ वामदेवोऽशृणोत्सर्वंवृत्तांतंकथितंतयोः अभ्यषिंचच्चंद्रभागांवेदमंत्रैरथोर्जितैः ऋषिमंत्रप्रभावेणविष्णुबासरसेवनात् दिव्यदेहाबभूवासौदिव्यांगतिमवापच पत्युः समीपमगमत्प्रहर्षोत्फुल्ललोचना जहर्षशोभनोऽतीवदृष्ट्वाकांतांसमागतां समागम्यस्वकेवामपार्श्वेतांसन्यवेशयत् अथोवाचप्रियाहर्षाच्चंद्रभागाशुभंवचः शृणुकांतहितंवाक्यंयत्पुण्यंविद्यतेमयि अष्टवर्षाधिकाजातायदाहंपितृवेश्मनि ततःप्रभृत्येवमया कृतमेकादशीव्रतं यथोक्तविधिनायुक्तंश्रद्धापूतनचेतसा। तस्याःपुण्यप्रभावेणपुरंभवतुमेध्रुवं सर्वकामसमृद्धंचयावदाभूतसंप्लवम् किमत्रबहुनोक्तेनदत्तंपुण्यंमयाखिलम् श्रीकृष्णउवाच एवंचनृपशार्दूलसारेमेपतिनासह दिव्यभोगादिव्यरूपादिव्याभरणभूषिता शोभनोऽपितयासार्द्धंरमतेदिव्यविग्रहः रमाव्रतप्रभावेणमंदराचलमूर्द्धनि चिंतामणिसमाह्येषाकामधेनुसमाथवा रमाभिधानानृपतेतवाग्रेकथितामया एकादशीव्रतानांचपक्षयोरुभयोरपि यथाशुक्लातथाकृष्णाविभेदंनैवकारयेत् सेवितैकादशीनृणांभुक्तिमुक्तिप्रदायिनी धेनुःशुक्लातथाकृष्णातूभयोःसदृशंपयः तथैवतुल्यफलदंस्मृतमेकादशीद्वयं एकादशीव्रतानांचमाहात्म्यंशृणुतेनरः सर्वपापविनि

मुक्तोविष्णुलोकेमहीयते ॥ इतिब्रह्मवैवर्तेपद्मपुराणेचकार्त्तिककृष्णारमैकादशीव्रतकथा कार्त्तिककृष्णद्वादशीगोवत्ससंज्ञा साप्रदोषव्यापिनीग्राह्या दिनद्वयेतथासत्त्वेपूर्वैतियुग्मवाक्यात् तथाच वत्सपूजाविधिश्चैव कर्त्तव्याप्रथमेहनीतिनिर्णयामृतेऽभिधानात् हेमाद्रौ आग्नेये ॥ कार्त्तिकःखलुमासोवैसर्वदेवमयोमहान् कृष्णपक्षेविशेषेणनवम्यादिदिनानितु पुण्यानितेषुयद्दत्तमक्षय्यंसर्वकामिकमिति नारदउवाच आश्विनेकृष्णपक्षेतुद्वादश्यादिषुपंचसु तिथिषूक्तःपूर्वरात्रेनृणांनीराजनाविधिः नीराजयेयुर्देवांश्चविप्रांश्चैवतुरंगमान् ज्येष्ठान्श्रेष्ठान्जघन्यांश्चमातृमुख्याश्चयोषितः अत्राश्विनग्रहणंमुख्यचांद्राभिप्रायेण अत्रविशेषोमदनरत्ने भविष्ये सवत्सांवाऽसवत्सांचशीलिनींगांपयस्विनीं चंदनादिभिरालिप्यपुष्पमालाभिरर्चयेत् अर्घंताम्रमयेपात्रेकृत्वापुष्पाक्षतैस्तिलैःपादमूलेतुदद्याद्वैमंत्रेणानेनपांडव क्षीरोदार्णवसंभूतेसुरासुरनमस्कृते सर्वदेवमयेमातर्गृहाणार्घंनमोस्तुते. तद्दिनेतैलपक्वंचस्थालीपक्वंयुधिष्ठिर गोक्षीरंगोघृतंचैवदधितक्रंचवर्जयेत् अथान्योपिप्रकारःनरोवायदिवानारीनक्तंसंकल्प्यचेतसीत्युपक्रम्य माषान्नकामतोऽश्नीयाद्रात्रौविगतमत्सरः प्रतीक्षेतागमंभक्त्यागवांगोस्थानतत्परः इति गोष्ठागतासुसंध्यायां गोपूजाविधानाच्च वत्सस्यपूजाशिवरात्रिरेषापराविनिघ्नंतिनृपंसराष्ट्रमिति मातारुद्राणांदुहितावसूनां स्वसादित्यानाममृतस्यनाभिःप्रणुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ट स्त्रीशूद्राणांमहावाहोमंत्रःपौराणिकोयथा क्षीरोदार्णवसंभूतइत्यादि ॥ ततोमाषादिसंसिद्धान्वटकांश्चनिवेदयेत् पंचसप्तदशैकंवायथाविभवमात्मनः तत्रमंत्रः सुरभिस्त्वंजगन्मातर्नित्यंविष्णुपदेस्थिता सर्वदेवमयेग्रासंमयादत्तमिमंग्रस ततःप्रार्थना सर्वदेवमयेदेविसर्वरत्नैरलंकृते मातर्ममाभिलषितंसफलंकुरुनंदिनि इतिगोवत्सद्वादशीव्रतम् ॥ अथकथा युधिष्ठिरउवाच अक्षौहिण्योदशाष्टौचममह्यर्थेक्षयंगताः तेनपापेनचित्तंमेजुगुप्सातीव

जायते तत्रब्राह्मणराजन्यवैश्यशूद्रादयोहताः भीष्मद्रोणकलिंगादिकर्णशल्यमुखाहताः तेषांवधेन यत्पापंतन्मेमर्माणिकृंतति पापप्रक्षालनंकिंचिद्व्रतंब्रूहिजनार्दन श्रीकृष्णउवाच महापुण्यव्रतंस्त्रीणांगोवत्सद्वादशीव्रतं अस्त्यत्रभुवनेपार्थमहापातकनाशनं गोरूपिणीपुरादेवीपूजिताब्रह्मवादिभिः सवत्साकार्तिकेमासि कृष्णपक्षेयुधिष्ठिर द्वादश्यांभक्तियुक्तैस्तैर्नंदिनीनाम्नामतः ततःप्रभृतिराजेंद्रप्रथितापृथिवीतले उत्तानपादेनतदाव्रतंचीर्णंमहाफलं उत्तानपादनामासीत्क्षत्रियःक्षितिभूषणं तस्यभार्याद्वयंचासीत् सुरुचीरुचिराख्यकम् सुरुच्यातुध्रुवःपुत्रोवालःपादचरोयदा रुच्यैसमर्पितःस्रुच्यावालोयंरक्ष्यतामिति अहंकरिष्येशुश्रूषांशुचिस्तद्गतमानसा रुचिःसौभाग्यमासाद्यसुखमास्तेगृहेसदा करोतिभर्त्तुःशुश्रूषांसातुनित्यंपतिव्रता कदाचित्क्रोधमासाद्य सापत्न्यंजनितंतया स्वयंरुच्यानिहत्यासौपार्थखंडदलीकृतः पक्त्वासुसंस्कृतःस्थाल्यामाहारार्थंनृशंसया ततोभोजनवेलायांदत्तोऽसौनृपतेःस्वयं तस्याथभोक्तुकामस्यध्रुवोजीवनमाप्तवान् ततःपलाय्यसोराजन्मातुरुत्संगगोभवत् तद्दृष्ट्वामहदाश्चर्यंस्रुचिंपप्रच्छविस्मिता किमेतद्ब्रूहिवृत्तांतयस्येयंव्युष्टिरुत्तमा किंत्वयाचरितंभद्रेव्रतंदानंतपस्तथा सत्यंकथयमेत्वद्ययेनतेजीवितःसुतः मयायंसप्तवारांस्तुनिहत्यशकलीकृतः पक्वःसुसंस्कृतःस्थाल्यांभोजनेव्यंजनैःसह पात्रेदत्तःपुनश्चैवजीवत्येवहितेसुतः किंतेसिद्धामहाविद्यामृतसंजीवनीतुवा मणिमंत्रमहायंत्रमथवांजनमौषधं कथयस्वमहाभागेवेपथुर्हृदयेमम श्रीकृष्णउवाच एवमुक्तातुरुच्यासातामुवाचयशस्विनी भद्रेनदत्तंनहुतंतपस्तप्तंमयातथा सिद्धानकाचिद्विद्यास्तिमममंत्रौषधवेदिनी किंतुचीर्णंमया भद्रेगोवत्सद्वादशीव्रतं व्रतस्यास्यप्रभावेणपुनर्जीवतिमेसुतः वत्सोमेववत्सवेलायामतोर्थंक्रियतेसदा समागमश्चभवतिपुत्रपौत्रशतैरपि यथावत्तेसमाख्यातंत्वमप्येतत्समाचर तवचाप्यचिरात्पुत्रोभविष्यतियथामम ए

वमुक्तेव्रतंचीर्णेरुच्यापुत्रधनेच्छया अवापसोत्तमंपुत्रंमनुवंशविवर्धनम् युधिष्ठिरउवाच कथंगोद्वादशीनामविधानं तत्रकीदृशं कथमेषासमुत्पन्नाकस्मिन्कालेजनार्दन एतत्सर्वंबूतंब्रूहित्राहिमांनरकार्णवात् श्रीकृष्णउवाच पुराकृयुगेपार्थमुनिकोटिःसमागता तपश्चकारविपुलंनानाव्रतधरागिरौ हर्षेणमहताविष्टादेवदर्शनकांक्षया जंबूमार्गेमहापुण्येनानातीर्थविभूषिते पारियात्रेसिद्धपात्रेरम्येतुंडलिकाश्रमे पंचागिरीतिविख्याताउत्तमेशिखरेनृप तापसारण्यमतुलंदिव्यकाननभूषितं वसिष्ठशुक्रांगिरसक्रतुदक्षादिभिर्वृतं वल्कलाजिनसंवीतैर्मृगैराश्रममंडलं नानामृगगणैर्युक्तंशाखामृगगणैर्युतं प्रशांतासिंहहारिणावक्रसर्पगणाकुलं गहनंनिर्जरैरम्यंलतासंतानसंकुलं सिंहव्याघ्रगजैश्चित्रैर्हरिणैःशंबरैःशशैःवाराहैरुरुभिश्चित्रैःसमंतादुपशोभितं तपस्यतांतत्रतेषांमुनीनांदर्शनार्थिनां व्याजंचक्रेमहीनाथद्वादशार्द्धार्द्धलोचनः बभूवब्राह्मणोवृद्धोजटापांडुरमूर्धजः श्लथच्चर्मतनुःकुब्जोयष्टिपाणिःसवेपथुः उमापिचक्रेगोरूपंशृणुतत्पार्थकीदृशं क्षीरोदतोयसंभूतायाःपुरामृतमंथने पंचगावःशुभाःपार्थसर्वलोकस्यमातरः नंदासुभद्रासुरभीसुशीलाबहुलाश्रपि एतालोकोपकारायलोकानांतर्पणायच जमदग्निभरद्वाजवसिष्ठात्रिसगौतमाः जगृहुःकामदाःपंचगावोदत्ताःसुरैस्तदा गोमयंरोचनामूत्रंक्षीरंदधिघृतंगवां षडंगानिपवित्राणियासांसिद्धिकराणिच गोमयादुत्थितःश्रीमान्बिल्ववृक्षः शिवाप्रियः तत्रास्तेपद्महस्ताश्रीःश्रीवृक्षस्तेनसस्मृतः वीजान्यत्पलपद्मानांपुनर्जातानिगोमयात् गोरोचनाच्चमांगल्यापवित्रासर्वसत्त्विका गोमूत्राद्गुग्गुलुर्जातःसुगंधिःप्रियदर्शनः श्राघ्रेयःसर्वदेवानांशिवस्यचविशेषतः यद्बीजंजगतःकिंचित्तद्ज्ञेयंक्षीरसंभवं दध्नःसर्वाणिजातानिमंगलान्यर्थसिद्धये घृतादमृतमुद्भूतंदेवानांतृप्तिकारकं ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतं एकत्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठति गोषुयज्ञाःप्रवर्त्तंतेगोषुदेवाःप्रतिष्ठिताः गोभिर्वेदाःसमुद्गीर्णाःसषडंगपदक्रमाः शृंगमूलेगवांनित्यं

ब्रह्माविष्णुश्चसंस्थितौ शृंगाग्रेसर्वतीर्थानिस्थावराणिचराणिच शिरोमध्येमहादेवःसर्वकारणकारणं ललाटेसंस्थितागौरीनासाग्रेचषडाननःकंबलाश्वतरौनागौनासापुटमुपाश्रितौ कर्णयोरश्विनौदेवौचक्षुर्भ्यांशशिभास्करौ दंतेषुवायवःसर्वेजिव्हायांवरुणःस्थितः सरस्वतीचहुंकारेयमःकुक्षौचगंडयोः संध्याद्वयंतथैवोष्ठग्रीवायांचपुरःसरं ऋक्षाणिककुदिद्यौश्चपार्ष्णिषुसंव्यवस्थिताः चतुष्पात्सकलोधर्मोनित्यंसंध्यासुतिष्ठति खुरमध्येतुगंधर्वाः खुराग्रेषुचपन्नगाः खुराणांपश्चिमेभागेराक्षसाःसंप्रतिष्ठिताः रुद्राएकादशपृष्ठेवसवः सर्वसंधिषु श्रोणीतटस्थाः पितरोरोमकूपेषुमातरः श्रीरपानेगवांनित्यंस्वाहालांगूलमास्थिता आदित्यरश्मयोवालाः पिंडीभूयव्यवस्थिताः साक्षाद्गंगाचगोमूत्रेगोमयेयमुनास्थिता उदरेपृथिवीसर्वासशैलवनकानना चत्वारःसागराःप्रोक्तागवांयेतुपयोधराः पर्जन्यःक्षीरधारासुमेघाविंदुष्ववस्थिताःजठरेगार्हपत्योग्निर्दक्षिणाग्निर्हृदिस्थितः मुखआहवनीयोग्निस्त्रेताग्निस्तालुसंस्थितः अस्थिष्वेवास्थिताःशैलामज्जायांशुक्रसंस्थितिः ऋग्वेदोथर्ववेदश्चसामवेदोयजुस्तथा सितरक्तपीतकृष्णागवांवर्णेषुसंस्थिताः तासांरूपाण्यनुस्मृत्वासुरभीणांयुधिष्ठिर संस्मृत्यतत्क्षणाद्गौरीनंदिन्यासदृशींतनुंआत्मनोविदधेदेवीधर्मराजशृणुष्वतां षडुन्नतांपंचास्निग्धांमंडूकाक्षींसवालधीं ताम्रस्तनींरक्तकंठींसुखुरांसुमुखींसितां सुगातिंचसुशीलांचस्नेहक्षीरपयोधरां गोरूपिणीमुमांदृष्ट्वातांचधेनुंसवत्सकां पर्य्यायप्रचुरांदृष्ट्वामहादेवःस्वचेतसि शनैःशनैर्ययौपार्थविप्ररूपीतमाश्रमं गत्वाकुलपतेःपार्श्वेभृगोःस्वांगांन्यवेदयत् तपः स्यतांचसर्वेषांमुनिकोटिषुपांडव न्यासरूपांददौधेनुंरक्षध्वंनंदिनींमम यावत्स्नात्वाइतस्तीर्थाज्जंबूमार्गात् प्रयाम्यहम् रक्षिष्यामःप्रतीक्षामोवयंतुसुरभीमिमां अंतर्हितोमहादेवःपुनर्व्याघ्रोवभूवह वक्रक्रूरनखोदंष्ट्रोज्वलपींठठवेरः दंष्ट्राकरालवदनोजिह्वालांगूलदारुणः प्रायादाश्रमपदंतांचधेनुंसवत्सकां त्रासयामासन

देनसर्वैंनादेनकंपिताः ऋषयोपिसमाहूताआर्त्तनादंप्रचक्रिरे हाहेत्युच्चैःकेचिदूचुर्हुंकारांश्चतथापरे तालस्फोटान्दधुःकेचिद्व्याघ्रंदृष्ट्वातिभैरवं सापिहंभारवंचक्रेगौरुत्प्लुत्यसवत्सका तस्याव्याघ्रभयार्तायाःकपिलायायुधिष्ठिर पलायंत्याःशिलामध्येक्षुण्णंखुरचतुष्टयं व्याघ्रवत्सकयोस्तत्रवंदितंसुरकिन्नरैः दृश्यतेतीवसुव्यक्तंतदद्यापिचतुष्पदं सजलंशिवलिंगंचशंभोस्तीर्थंतदुत्तमं यस्तंस्पृशतिराजेंद्रसगोहत्यांव्यपोहति तत्रस्नात्वामहातीर्थेजंबूमार्गेनराधिप ब्रह्महत्यादिभिःपापैर्मुच्यतेनात्रसंशयः ततस्तेमुनयःक्रुद्धाब्रह्मदत्तांमहास्वनां जघ्नुर्घंटांसुरैर्दत्तांगिरिकंदरपूरिणीं घंटाशब्देनव्याघ्रोपिमुक्तातांगांसवत्सकां विप्रैस्तैस्तुकृतंनामघंटागिरिरितिश्रुतं तंप्रपश्यंतियेपार्थरुद्रास्तेनात्रसंशयः अथप्रत्यक्षतांयातस्तेषांदेवोमहेश्वरः शूलपाणिस्त्रिपुरहाकामघ्नोवृषभेस्थितः उमासहायोवरदःसस्वामीसविनायकः सनंदीसमहाकालःसभृंगीसगणोहरः सवीरभद्रचामुडोघंटाकर्णादिभिर्वृतः मातृभिर्गौः सवत्साचपूजिताब्रह्मचारिभिः कार्त्तिकेकृष्णपक्षेतुद्वादश्यांनंदिनीव्रतं ततःप्रभृतिराजेंद्रह्यवतीर्णंमहीतले उत्तानपादेनतथाव्रतंचीर्णमिदंशृणु यावंतिगात्रेरोमाणिगवांकौरवनंदन तावद्वर्षसहस्राणिगोलोकेवसतेनरः मेरौपुर्यष्टकंरम्यमिंद्राग्नियमरक्षसां वरुणानिलयक्षाणांरुद्रस्यचयुधिष्ठिर तासामुपरिगोलोकस्तत्रयातिसगोव्रती ऊर्जेऽसितेद्विदशमेहनिगांसवत्सांसंपूजयंतिकुसुमैर्वटकैश्चहृद्यैः ताःसर्वकामसुखभोगसमृद्धिभाजोभक्त्यावसंतिसुचिरंभुविजीववत्साः ॥ इतिश्रीभविष्योत्तरे कार्तिककृष्णगोवत्सद्वादशीव्रतं

अस्यामेवकार्तिकद्वादश्यांनीराजनद्वादशीव्रतंज्योतिर्निबंधे ॥ नारदउवाच आश्विनेकृष्णपक्षेतुद्वादश्यादिषुपंचसु तिथिषूक्तःपूर्वरात्रेनृणांनीराजनाविधिः नीराजयेयुर्देवांश्चविप्रान्गाश्चतुरंगमान् ज्येष्ठान्श्रेष्ठान्जघन्यांश्चमातृमुख्याश्चयोषितइति ॥ अत्राश्विनोमासश्चांद्रमासाभिप्रायेणाऽमांतोग्राह्यः अथकार्त्तिककृष्णात्रयोदशी

कृत्यंनिर्णयामृते ॥ कार्त्तिकस्यासितेपक्षेत्रयोदश्यानिशामुखे यमदीपंवहिर्दद्यादपमृत्युर्विनश्यति । अत्रयमदैवतत्वाद्दक्षिणमुखेनदीपदानंकार्य्यं आचाराद्दीपपूजनमपि अत्र त्रयोदशीप्रदोषव्यापिनी ग्राह्या निशामुखइतिवाक्यात् मंत्रश्च ॥ मृत्युनापाशदंडाभ्यांतुलयालोलयासह त्रयोदश्यांदीपदानात्सूर्यजःप्रीयतामिति अथ गोत्रिरात्रव्रतकथा । स्कंदउवाच देवदेवमहादेवपरंब्रह्ममहेश्वर आयुर्यशोर्थपुत्राश्वधर्मसत्कुलकारकं व्रतंब्रूहिमहेशानसर्वशोकप्रणाशनं जाताःपुत्राःप्रजायंतेअरोगाःसुखिनस्तथा तेषांपुत्राश्चवध्वश्चदृश्यंतेयेचशोभनाः सौभाग्यंचातुलंप्राप्यसपत्नीनैवजायते येनसर्वसुखंभुक्त्वावैकुंठभवनंव्रजेत् ईश्वरउवाच व्रतानामुत्तमंस्कंदतववक्ष्येसनातनं येनैवचीर्णमात्रेणसर्वयज्ञफलंलभेत् यत्कृत्वासर्वदानस्यफलमाप्नोतिमानवः गोत्रिरात्रमितिख्यातंसर्वपापप्रणाशनं नारीवाथनरोवार्थत्रिरात्रंव्रतमाचरेत् प्रातःस्नात्वात्रयोदश्यांकृत्वावैदंतधावनं त्रिरात्रंनियमंकुर्य्याद्गोविंदेभक्तिभावतः गोविंदजगतीनाथगोवर्धनधरानघ गोत्रिरात्रंकरिष्यामिशरणंमेभवाच्युत नियममंत्रः गोष्ठेवागोपथेवाथकृत्वाभूमिगृहंशुभं अष्टहस्तंचतुर्हस्तंचतुरस्रंसुशोभनं वितानंपुष्पमालाभिःफलैर्नानाविधैरपि मध्येवेदींततःकृत्वामंडलंतत्रकारयेत् सर्वतोभद्रमथवानवनाभमथापिवा तन्मध्येविन्यसेद्देवंगोवर्द्धनधरंहरिं रुक्मिणींमित्रविंदांचसत्यांजांबवतींतथा वामभागेतुदेवस्यपूज्यावैभक्तिभावतः सत्यभामांलक्ष्मणांचशैव्यांनाग्नजितींतथा दक्षिणेचैवपूज्यास्तुनंदंचपुरतोयजेत् बलभद्रंयशोदांचपृष्ठतःपूजयेच्छुभाः सुरभीचसुनंदाचसुभद्राकामधेनुका एताश्चतस्रोदेव्यश्चकृष्णस्यपुरतोन्यसेत् सुवर्णमाषकैःकार्य्याःषोडशप्रतिमाःशुभाः गोवर्द्धनश्चकर्त्तव्योराजतःपलसम्मितः छत्राकारोमहावृक्षैःशोभितःपक्षिभिवृतः गोपीगोपसमाकीर्णोमहाव

समन्वितः एवंसंस्थाप्ययत्नेनततः पूजांसमाचरेत् आगच्छभगवन्कृष्णगोपीगोपसमन्वित रुक्मिण्यादिभिरासीनममपूजांगृहाणच । इत्यावाहनमंत्रः । नमःकृष्णायपादौचहरयेजानुनीनमः उदरेबलदेवायमुकुंदाय नमःकटिंचक्रिणेचभुजौपूज्यौकंठंश्रीवत्सधारिणे मुखंपद्ममुखायेतिगोविंदायनमःशिरः प्रणवादिनमोंतैश्चअष्टांगं पूजयेद्धरेः । रुक्मिण्यैनमःमित्रविंदायैनमःशैव्यायैनमःजांववत्यैनमःसत्यभामायैनमः सुदेवायैनमः सत्यायैनमः नाग्नजित्यैनमः यशोदायैनमः बलभद्रायनमः नंदायैनमः सुरभ्यैनमः सुनंदायैनमः सुभद्रायैनमः कामधेनवेनमः गोवर्द्धनधराधारगोकुलत्राणकारक कृष्णवाहुकृतोद्धारपूजयामिनमोनमः एवंसंपूज्यविधिवत्पश्चादर्घ्यंप्रदापयेत् गवामाधारगोविंदरुक्मिणीवल्लभप्रभो गोपीगोपसमोपेतअर्घ्यंगृह्णनमोस्तुते एवंपूजांसमाप्यैवभक्तिभावपुरस्सरं गवामर्घ्यःप्रदातव्यस्सायाह्नेतुदिनत्रयं मंत्रेणानेनविधिवद्विंशतीनांस्वशक्तितः रुद्राणांचैवयामातावसूनांदुहिताचया आदित्यानांचभगिनीसानःशांतिंप्रयच्छतु इत्यर्घ्यमंत्रः । नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच नमोधर्मसुताभ्यश्चपवित्राभ्योनमोनमः । सुरभीवैष्णवीमातानित्यंविष्णपदेस्थिता प्रतिगृह्णातुमेग्रासंसुरभीमेप्रसीदतु गोग्रासमंत्रः । गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृदयेसंतुगवांमध्येवसाम्यहम् नवियोगोस्तुमेपुत्रैर्भृत्यैश्चसहवांधवैः त्वत्प्रसादनमेभक्तिर्निश्चलास्यात्सदात्वयि प्रार्थनामंत्रः एवंसंपूज्यगाश्चैवगोविंदंचाविशेषतः पुष्पैर्गंधैश्चधूपैश्चदीपैश्चविविधैस्तथा नैवेद्यैर्घृतपक्कैश्चफलैर्नानाविधैरपि सप्तधान्यैर्विरूढैश्चवंशपात्रास्थितैःशुभैः सुवासिन्यस्तथापूज्यानित्यंतांबूलकुंकुमैः कंठसूत्रैस्तथापुष्पैस्तथावाद्यानकादिभिःएवंसंपूज्यविधिवद्गोविंदंतंदिनत्रयं उपवासत्रयंचैवचतुर्थेदिवसेपुनः प्रातःशुचिःसमुत्थायकृत्वास्नानंप्रयत्नतः प्रणम्यमुख्याचार्य्येणहोमंतत्रैवकारयेत् तिलैरष्टोत्तरशतंगायत्र्याहोमसमाचरेत् ततोविसृज्यदेवेशं

गुरवेप्रतिपाद्यच ; गवांःपुच्छंसमालंब्यपुरस्कृत्यद्विजर्षभान् हृष्टेनमनसास्कंदगृहमागत्यसत्कृतः मिथुनानि द्वादशाष्टौभूषणाच्छादनादिभिः संपूज्यभोजनंदत्त्वागोदानानिचदापयेत् गुरोर्दांपत्यमर्चित्वावासोभूषणसंयुतं भक्त्यागोवर्द्धनंकृष्णंगोपगोपीसमन्वितं गृहोपकरणैर्युक्तंयथाशक्त्याचभक्तितः गुरौसंपादयेद्देवंदक्षिणासहितंतंहरिं क्षमाप्यचगुरुंतत्रभुंजीतशुचिसंस्कृतं इष्टैःशिष्टैःसहासीनोवाग्यतोविष्णुतत्परः दीपोत्सवेव्रतमिदं शुचिमानसेनकृत्वानरःसकलसंततिवृद्धिकारि भुक्त्वासभोगनिचयंसुखसंप्रयुक्तअंतेप्रयातिभुवनंमनुजोमुरारेः ॥ इतिस्कंदपुराणोक्तंकार्तिककृष्णत्रयोदश्यांगोत्रिरात्रव्रतम् अत्रत्रयोदशीऔदयिकीग्राह्या दिनद्वयेतूदयव्यापिनीकृष्णपक्षस्थत्वेनपराकार्या | षष्ठ्यष्टमीह्यमावस्याकृष्णपक्षेत्रयोदशी ; एताःपरयुताःकार्याः पराःपूर्वयुतास्तथेत्यादिबहुवाक्यसत्त्वात् अथकार्तिककृष्णचतुर्दश्यां चंद्रोदयेअभ्यंगस्नानंकार्य्यं तदुक्तंहेमाद्रौ भविष्ये ॥ कार्तिकेकृष्णपक्षेतुचतुर्दश्यामिनोदये तिलतैलेनकर्त्तव्यंस्नानंनरकभीरुभिरिति मदनरत्नेकालादर्शेच विधूदय इतिपाठः निर्णयामृतेदिनोदयइतिपाठः मयूखेतुइनोदयइति इनःसूर्यस्तस्योदयइतिव्याख्यातं अत्रच यथाचारंव्यवस्थेतिकेचित् ॥ इनःसूर्येप्रभौराज्ञिमृगांकेऽपिप्रकीर्त्तितं इत्यभिधानात् ब्रह्मपुराणेपि तैलेलक्ष्मीर्जलेगंगादीपावल्याश्चतुर्दशीं प्राप्येतिशेषः प्रातःस्नानंतुयःकुर्य्याद्यमलोकंनपश्यतीति अपामार्गमथोतुंबीप्रपन्नादुमथापरं भ्रामयेत्स्नानमध्येतुनरकस्यक्षयायवै प्रपन्नादुश्चक्रमर्द्दकः तथा अपामार्गस्यपत्राणिभ्रामयेन्मस्तकोपरि ततश्चतर्पणंकार्य्यंधर्मराजस्यनामभिः नारदसंहितायामपि ॥ इषासितचतुर्दश्यामिंदुक्षयतिथावपि नागाख्येस्वातिसंयुक्तेतदादीपावलीभवेत् तैलेलक्ष्मीर्जलेगंगादीपावलितिथौवसेत् अलक्ष्मीपरिहारार्थमभ्यंगस्नानमाचरेत् कुर्य्यात्संलग्नमेतच्चदीपोत्सवदिनत्रयमिति ॥ इंदुक्षयेपिसंक्रांतावारेपातेदिनत्र

ये तत्राभ्यंगोनदोषायप्रातः पापापनुत्तय इति । अत्रइषः अमांतमासेनग्राह्यः येतु अरुणोदयतोन्यत्ररिक्तायांस्नातियोनरः तस्याब्दिकभवोधर्मोनश्यत्येवनसंशय इति दिवोदासीये भविष्यवचनं तन्मुख्यकालेचतुर्दश्यभावेपि तत्रैवस्नातव्यमित्येवपरं यद्यपि कार्तिकव्रतिनां तैलाभ्यगवर्जनमपि नियमेषूक्तं । तैलाभ्यंगंतथाशय्यांपरान्नंकांस्यभाजनं कार्तिकेवर्जयेद्यस्तुपरिपूर्णव्रतीभवेदितिपाद्मे तथापि अत्रतैलाभ्यंगः स्नातैरपिकार्य्यो नरकस्यचतुर्दश्यांतैलाभ्यंगंचकारयेत् अन्यत्रकार्तिकस्नायीतैलाभ्यंगं विवर्जयेत् इति तत्रैवप्रतिप्रसवश्रुतेः इयंचतुर्दशी प्रातःकालव्यापिनी ग्राह्या विधूदय इति पूर्वोक्तत्वात् कृत्यरत्नावल्यांतु दिनोदयप्रातःशब्दयोः समानार्थत्वात् प्रातःकालव्यापिनीग्राह्येत्युक्तं दिनद्वयेचंद्रोदयव्याप्तौचपूर्वाग्राह्या ॥ पूर्वविद्धचतुर्दश्यांकार्तिकस्यासितेतरे पक्षेप्रत्यूषसमयेस्नानंकुर्यात्प्रयत्नत इति निर्णयामृतोक्तवचनात् दीक्षितीयेतु दिनद्वयेचंद्रोदयेचतुर्दश्यभावे अभावेचचतुर्दश्यारात्रितुर्य्ययामेस्नानमितिनिर्णयसिंधावपि चतुर्थयामगामिनीग्राह्येत्युक्तं अतएव सर्वज्ञनारायणः तथाकृष्णचतुर्दश्यामाश्विनेर्कोदयात्पुरा यामिन्याः पश्चिमेभागेतैलाभ्यंगोविशिष्यतइति कालादर्शेपि । मृगांकोदयवेलायांत्रयोदश्यांयदाभवेत् दर्शेवामंगलस्नानंदुःखशोकभयप्रदमिति त्रयोदशीनिषेधः मयूखेतु दिनद्वयेचंद्रोदयव्याप्त्यभावेपूर्वैतिगौणकालेसत्त्वात् अत्रचंद्रोदयोमुख्यः सूर्योदयोगौणः उत्तरभावित्वात् स्वकालादुत्तरोगौणः कालः सर्वस्यकर्मणइतिवचनात् अतएवपूर्वोक्तोद्विविधोपिपाठः संगच्छते तिथ्यादौतुभवेद्यावाग्रासेवृद्धिः परेऽहनीतिवाक्येनत्रयोदश्यंतेचतुर्दशीग्रासप्रक्षेपेण चंद्रोदये पारिभाषिकचतुर्दशीसद्भावात् अतएवचंद्रप्रकाशे त्रयोदशी यदाप्रातःक्षयंयातिचतुर्दशी रात्रिशेषेत्वमावास्यातदाभ्यंगत्रयोदशीति एवं दिवोदासीयेऽपि अत्र विभूतिकामैः

सुगंधितैलेनस्नानंकार्य्यम् तदुक्तंस्मृतिदर्पणे। चतुर्दशीयाश्वयुजस्यकृष्णा स्वात्यृक्षयुक्ताचभवेत्प्रभाते स्नानंसमभ्यर्च्यनरैश्चकार्य्यंसुगंधितैलेनविभूतिकामैरिति इदंचस्नानंचतुर्दशीमारभ्यादिनचतुष्टयंप्रत्यहंकार्य्यं तदुक्तंपृथ्वीचंद्रोदयेब्राह्मे इषेभूतेचतुर्दशेकार्तिकेदशमेदिने यदास्वातीतदाभ्यंगस्नानंकुर्य्यादिनोदये ऊर्जेशुक्लाद्वितीया. यातिथौयस्तुशुभेदिने मानवोमंगलस्नायीनैवलक्ष्म्यावियुज्यते दीपैर्नीराजनादत्रसैषादीपावलीस्मृतेति । अथस्नानविधिः तत्रादौदंतधावनादिकृत्वा ओमद्ययमलोकदर्शनाभावकामोभ्यंगस्नानंकरिष्ये इतिसंकाल्प्य तैलेनाभ्यंगंकृत्वोदकेनस्नायात् ततः स्नानमध्ये सीतालोष्टसहितानि अपामार्गपत्राणि सतुंबीकानि प्रपुन्नादुंचमस्तकोपरिवक्ष्यमाणमंत्रेणभ्रामयेत् अत्रमंत्रः । सीतालोष्टसमायुक्तसकंटकदलान्वित हरपापमपामार्ग भ्राम्यमाणःपुनःपुनरिति ततोयमतर्पणं तत्प्रकारस्तुमदनरत्ने स्कंदपुराणे दक्षिणाभिखोभूत्वातिलैःसव्यंसमाहितः दैवतीर्थेनदेवत्वात्वक्ष्यमाणैश्चनामभिः यमायधर्मराजायमृत्यवेचांतकायच वैवस्वतायकालयसर्वभूतक्षयायच औदुंबरायदध्नायनीलायपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायवैनमइति यज्ञोपवीतिनाकार्य्यंप्रावीनावीतिनाथवा देवत्वंचपितृत्वंचयमस्यास्तिद्विरूपतेति अत्रचहेतूक्तिबलाच्छुक्लकृष्णतिलैः सकृत्त्रिरावृत्तादिरूपदैवपित्र्यधर्मविकल्पोद्रष्टव्यः इदंचयमुनायामतिप्रशस्तं तदुक्तं कृत्यतत्त्वार्णवे यां काचित्सरितंप्राप्यकृष्णपक्षेचतुर्दशीं यमुनायांविशेषेणनियतस्तर्पयेद्यमंमिति इदंचतर्पणंजीवत्पितृकेणापिकार्य्यं जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोरितिपाद्मोक्तेः अस्यामेवप्रदोषेदीपदानंकार्य्य तदुक्तं दिवोदासीयेब्राह्मे । अमावस्याचतुर्दश्योःप्रदोषेदीपदानतःयममार्गांधकारेभ्योमुच्यतेकार्तिकेनर इति तथा । ततःप्रदोषसमयेदीपान्दद्यान्मनोरमान् ब्रह्मविष्णुशिवादीनांभुवनेषुमठेषुच प्राकारोद्यानवीथीषुप्रतोलीनिष्कुटेषुच मंदु

अ०र०
कार्ति०
१४

रासुविविक्तासुहास्तिशालासुचैवहीति लैंगे । ततःप्रेतचतुर्दश्यांभोजयित्वातपोधनान् विप्रान्शैवांस्त्वथ परान्शिवलोकेमहीयते दानंदत्वातुतेभ्यस्तुयमलोकंनपश्यति माषपत्रस्यशाकेनभुक्त्वातत्रादिनेनरः प्रेताचतुर्दशीकालेसर्वपापैः प्रमुच्यते अत्रनरकोद्देशेनचतुर्वर्त्तियुक्तदीपदानंकार्य्यं तत्रपूर्वाभिमुखोभूत्वा दीपंसंपूज्यदीपदानंकुर्य्यात् तत्रमंत्रः । दत्तोदीपश्चतुर्दश्यांनरकप्रीतयेमया चतुर्वर्त्तिसमायुक्तः सर्वपापापनुत्तयइति पश्चादन्यानपि दीपान्दद्यात् ज्योतिर्ग्रंथे । तुलासंस्थेसहस्रांशौप्रभातेभूतदर्शयोः उज्ज्वलज्ज्योतिषादेहंदहेयं व्योमवर्त्मनेति तद्दानेमंत्रः अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम उज्ज्वलज्ज्योतिषादग्धास्तेयांतुपरमांगतिम् तद्विसर्जनेमंत्रः यमलोकंपरित्यज्यआगतायेमहालये उज्ज्वलज्ज्योतिषावर्त्मप्रपश्यंतोव्रजंतुतेइति अस्यामेवनक्तभोजनमुक्तं लैंगे ॥ नक्तंप्रेतचतुर्दश्यांयःकुर्य्याच्छिवतुष्टये नतत्क्रतुशतेनापिप्राप्यतेपुण्यमीदृशमिति ॥ पूर्वदिनेप्रदोषचतुर्दशी स्नानयोगेचोत्तरदिनेचेत्तदा पूर्वदिने प्रदोषेदीपदानादिकृत्वापरेद्युः स्नानंकार्य्यं क्रमानुरोधेनकालबाधस्यान्याय्यत्वात् कृत्यतत्त्वार्णवेभाविष्ये ॥ कार्त्तिकेभौमवारेतुचित्रायुक्ताचतुर्दशी अस्यामाराधितःस्थाणुर्नयेच्छिवपुरंध्रुवं अतोभौमवारचित्रानक्षत्रयोगेचेयं महाफलेति तत्रैवव्याख्यातं निर्णयामृतेतु इयंभौमवारयुक्ताचित्राख्या इत्युक्तापुष्करपुराणेत्विदमेवं वचनं किंचित्पाठांतरेणलिखितं तस्यपूर्वार्द्धंतु पूर्ववत् उत्तरार्द्धंतु ॥ तस्यांभूतेशमभ्यर्च्यगच्छेच्छिवपुरंनरइति अस्यांकार्त्तिककृष्णचतुर्दश्यां हनुमज्जन्मदिनं तदुक्तं आश्विनस्यासितेपक्षेभूतायांचमहानिशि भौमवारेंजनीपुत्रंहनुमंतमजीजनत् इतिकार्त्तिककृष्ण चतुर्दशीकृत्यानि अथकार्तिकस्यामावास्यादीपावलीतिप्रसिद्धा तत्र प्रातरभ्यंगस्नानंकुर्यात् तदुक्तं कालादर्शे । प्रत्यूषआश्वयुग्दर्शेकृताभ्यंगादिमंगलः भक्त्याप्रपूजयेद्देवीमलक्ष्मीविनिवृत्तये अत्रादिपदेन पंचत्वगुदक

स्नानादेरुपसंग्रहः तदुक्तंपुष्करपुराणे । स्वातिस्थितेरवाविंदुर्यदिस्वातिगतोभवेत् पंचत्वगुदकस्नायीकृताभ्यंगविधिर्नरः नीराजितोमहालक्ष्मीमर्चयन्श्रियमश्नुते भविष्योत्तरेऽपि एवंप्रभातसमयेत्वमावास्यांनराधिप स्नात्वादेवान्पितॄन्सम्यक्संपूज्याथप्रणम्यचेति नारदेनापि तिथित्रयेदीपावलित्वनाभिधानात् तत्रतैलेलक्ष्मीरित्यादिमंत्रेणाभ्यंगस्नानमुक्तं पूर्वत्राश्वयुग्दर्शशब्दःप्रत्यूषे स्वातियुक्तपरः तदुक्तंब्राह्मे । ऊर्जशुक्लद्वितीयायांतिथिषुस्वातिऋक्षगे मानवोमंगलस्नायीनैवलक्ष्म्यावियुज्यते इषेदर्शेचभूतेचकार्तिकेप्रथमोदिने यदिस्वातितदाभ्यंगस्नानंकुर्यादिनोदये कश्यपसंहितायामपि दीपावलिंप्रथम्योक्तं इंदुक्षयेपिसंक्रांतौरवौपाते दिनक्षये तदाभ्यंगोनदोषायप्रातः पापापनुत्तये । अतोत्रस्वातियोगंविनाप्यभ्यंगस्नानमुक्तं मात्स्येपीयंदीपावल्युक्ता दीपैर्नीराजनादत्रसैषादीपावलीस्मृतेति अथादित्यपुराणोक्तं दीपावल्यमाकृत्यं सनत्कुमारउवाच अमावस्यातुदेवेशात्कार्तिकेमासिकेशवात् अभयंप्राप्यसंसुप्तासुखंक्षीरोदसानुषु लक्ष्मीदैत्यभयान्मुक्तासुखं सुप्तांबुजोदरे अतोर्थंविधिवत्कार्य्यामनुष्यैः सुखसुप्तिका दिवातत्रनभोक्तव्यमृतेबालातुराज्जनात् प्रदोषसमयेलक्ष्मींपूजयित्वायथाक्रमंदीपवृक्षास्तथाकार्य्याःशक्त्यादेवगृहेषुच चतुष्पथेश्मशानेचनदीपर्वतसानुषु वृक्षमूलेषुगोष्ठेषुचत्वरेषुगृहेषुच वस्त्रैः पुष्पैर्भूषितव्याः क्रयविक्रयभूमिकाः दीपमालापरिक्षिप्तेप्रदोषेतदनंतरं ब्राह्मणान्भोजयित्वातुसंभोज्यचबुभुक्षितान् अलंकृतेनभोक्तव्यंनववस्त्रोपशोभिना स्निग्धैर्मुग्धैर्विदग्धैश्च बांधवैर्निर्वृतैः सहेति ॥ भविष्योत्तरेतु चतुर्दशीकृत्यमभिधायामावास्याकृत्यमुक्तं ॥ एवंप्रभातसमयेह्यमावास्यांनराधिप स्नात्वादेवान्पितॄन्भक्त्यासंपूज्याथप्रणम्यच कृत्वातुपार्वणंश्राद्धंदधिक्षीरघृतादिभिः भक्ष्यैर्नानाविधैःसम्यग्भोजयित्वाक्षमापयेत् ततोपराह्णसमयेघोषयेन्नगरेनृपः अद्यराज्यंबलेर्लोकायथेष्टंचेष्टतामिति लोकश्चापि

पुरेहृष्टःसुधाधवलिताजिरे वृक्षचंदनमालाभिरलंकृतगृहेपुरे तथापानरजोद्रिक्तनरनारीमनोहरे नृत्यवादित्रसंघुष्टेप्रज्वालितप्रदीपके अन्योन्यप्रीतिसंहृष्टेदत्ततालकरेजने तांबूलहृष्टवदनेकुंकुमक्षोदचर्चिते दुकूलपटनैपथ्यस्वर्णमाणिक्यभूषिते अद्भुतोत्कटशृंगारप्रदर्शितकुतूहले युवतीजनसंकीर्णेवस्त्रोज्ज्वलविहारिणि दीपमालाकुलेरम्ये विध्वस्तध्वांतवंधने प्रदोषेदोषरहितेशस्तवंदिजनैर्युते यात्राविहारसंचारजयजीवेतिवादिभिःक्षुद्रोपसर्गरहितेराजचौरभयोज्झिते मित्रस्वजनसंबंधिसुहृत्प्रेमाभिरंभिते ततोर्द्धरात्रसमयेस्वयंराजाव्रजेत्पुरं अवलोकयितुंरम्यंपद्भ्यामेवशनैःशनैःमहतातूर्य्यघोषेणज्वलद्भिर्हस्तदीपकैःसुदृशोयांतुसंपश्यन्कृतरक्षः स्वकैर्नरैःतंदृष्ट्वामहदाश्चर्य्यमृद्धिंचैवात्मनःशुभां वलिराज्यप्रमोदंचततःस्वगृहमाव्रजेत् एवंगतेनिशीथेतुजनेनिद्रांधलोचने तावन्नगरनारीभिःशूर्पडिंडिमवादनैः निःक्राम्यतेप्रहृष्टाभिरलक्ष्मीःस्वगृहांगणादिति । कृत्यरत्नावल्यांतु सूर्पडिंडिमैरितिपाठः अस्यामेवरात्रौकौमुदीमहोत्सवइतिनिर्णयामृते हेमाद्रौतु चतुर्दशीमारभ्यप्रतिपदंतंकौमुदीव्रतमुक्तं कौमुदीशब्दव्युत्पत्तिरपीत्थंकृता ॥ कौमोदतिजनोयस्यांनानाभावैःपरस्परं हृष्टास्तुष्टाःसुखापन्नास्तेनेयंकौमुदी स्मृतेति । अत्रैव वन्हिपुराणे पंचदिनसाध्यमपिकौमुदीव्रतमुक्तं ॥ मैत्रेयउवाच कार्तिकःखलुमासोवैसर्वदेवमयोमहान् कृष्णपक्षेविशेषेणतत्रपंचदिनानितु पुण्यानितेषुयद्दत्तमक्षयंसर्वकामदं एकादश्यांनरैर्दत्तंदीपंप्रज्वाल्यमूषिका मानुष्यंदुर्लभंप्राप्यपरांगतिमवापसा लुब्धकोपिचतुर्दश्यांपूजयित्वाजनार्दनं निर्भक्तिःपरसंगत्याविष्णुलोकंजगामसः श्वपाक्यपित्रयोदश्यांदीपान्दत्वापरैःकृतान् वेश्यालीलावतीभूत्वाजगामपदमक्षयम् गोपःकश्चिदंमावास्यांपूजांदृष्ट्वाचशार्ङ्गिणः मुहुर्जातःप्रजापालोराजराजेश्वरोभवत् तस्माद्दीपाःप्रदातव्यारात्रावस्तमितेरवौ गृहेषुसर्वगोष्ठेषुचैत्येष्वायतनेषुच देवानांचैवरथ्यासुश्मशानेषुसरस्सुच नाकेशिनाशुभार्थायकार्यंपंचदिनानितु

पापिनःपितरोयेचलुप्तपिंडोदकक्रियाः चतुर्दश्याममावास्यांपितरःप्राप्नुवंतिते दिवामितिशेषः ॥ तत्रश्रीःपूजनीयातुमनुष्यैश्चप्रयत्नतः श्रीकामैस्तत्रतैःसर्वैःक्रीडितव्यंप्रयत्नतःबंधुभिःसहितैर्यत्नाद्गीतनृत्यप्रजागरैः योहिहर्षं प्रयातीहतस्यसंवत्सरंजयः द्यूतेतुक्रीडितेहानिर्विजयःस्याज्जयेध्रुवं सुखंप्रीतिःसुलाभःस्यात्तस्माद्द्यूतंप्रवर्त्तयेत् गौर्य्याजितःपुराशंभुस्तथाद्यूतेपिताजितःतेनासौशंकरोदुःखीसर्वदोमासुखान्विता।श्रियासार्द्धंजगद्योनिःशेतेविष्णुः सुखान्वितः तस्यांरात्रौजनानांतुअतोर्थंसुखसुप्तिका । इतिसुखसुप्तिकाव्रतं तत्रदीपदानं अमावास्या प्रदोषव्यापिनीग्राह्यातस्याःकर्म्मकालेत्युक्तेः दिनद्वयेप्रदोषव्याप्तौपरैव दंडैकरजनीयोगोदर्शस्यस्यात्कदाचन तदाविहायपूर्वेद्युःपरेद्युःसुखसुप्तिकेति तिथितत्त्वेज्योतिर्निबंधवचनात् उभयदिनेप्रदोषव्याप्त्यभावेअर्द्धरात्रव्यापिनीग्राह्या, तस्यांलक्ष्म्यागमनकाललाभात् दिवोदासीयेप्रदोषस्यकर्मकालत्वात् ॥ अर्द्धरात्रेभ्रमत्येवलक्ष्मीराश्रयितुंगृहान् अतःस्वलंकृतालिप्तादीपैर्जाग्रज्जनोत्सवाःसुधाधवलिताःपुष्पमालाज्वालोपशोभिताइति ब्राह्मोक्तेच प्रदोषार्द्धव्यापिनीमुख्याएककालव्याप्तौपरैव प्रदोषस्यमुख्यत्वादर्धरात्रेनुष्ठेयाभावाच्चेतिपूर्वेद्युरेवप्रदोषव्यापिन्यमावास्याश्राद्धयोग्यापरदिनेनयदितदापूर्वेद्युरेवप्रदोषे लक्ष्मींसंपूज्यदीपदानंकर्त्तव्यं श्राद्धंतुपरदिनेऽपराह्णेकार्य्यं ॥ यत्तु अप्यशक्तैःप्रकर्त्तव्यंश्राद्धंपितृपरायणैः प्रदोषसमयेराजन्कर्त्तव्यादीपमालिकेतिक्रमःसंपूर्णतिथ्यभिप्रायेणानुवादोनविधिः तत्कर्मकालव्याप्तेर्बलत्वात्संपूर्णतिथौप्राप्ताखंडतिथावव्याप्त्याविध्यनुवादानुवादविरोधाच्च अत्रचामामात्रेरात्रिभोजननिषेधेपि रात्रिभोजनंकार्य्यं निषेधस्यरागप्राप्तभोजनविषयत्वात् विधिस्पृष्टेनिषेधानवकाशाच्च अथात्रकृत्यं तत्रसंध्यासमयेलक्ष्मीपूजनमुक्तं लक्ष्म्यैनमइतिनाममंत्रेणकार्य्यं महाक्ष्म्यांतुतुलसींपिंडिकांकांचनंतथावर्ज्जयेदिति पूजनानंतरंलक्ष्मीसूक्तंपठित्वा लक्ष्मींप्रार्थयेत्। नमस्तेस

वंदेवानांवरदासिहरिप्रिये यागतिस्त्वत्प्रपन्नानांसामेभूयात्त्वदर्चनात् । तथाचात्रेंद्रकुवेरयोरपिपूजाविधेया तयोःपूजामंत्रौ । ऐरावतसमारूढोवज्रहस्तोमहाबलः शतयज्ञाधिपोदेवस्तस्माइंद्रायतेनमइति कुवेरस्यपूजायांतु । धनदायनमस्तुभ्यंनिधिपद्माधिपायच भवंतुत्वत्प्रसादेनधनधान्यादिसंपदइति अथलक्ष्मीपूजाप्रयोगः देशकालौ संकीर्त्याऽस्यांदीपावल्याममावास्यायांममाऽलक्ष्मीनिवृत्तिपूर्वकस्थिरलक्ष्मीसर्वसौख्य सौभाग्यावाप्तयेसर्वांगसंपन्नलक्ष्मीपूजनंकरिष्ये इतिसंकल्पंविधाय स्वस्त्ययनपूर्वकंगणपतिपूजांविधाय लक्ष्मींपूजयेत् ॥ याश्रीःपद्मासनस्थाविपुलकटितटीपद्मपत्रायताक्षी गंभीरावर्त्तनाभिस्तनभरनमिताशुभ्रवस्त्रोत्तरीयालक्ष्मीर्दिव्यैर्गजेंद्रैर्मणिगणखचितैःस्नापिताहेमकुंभैः नित्यंसापद्महस्ताममवसतुगृहेदिव्यमांगल्ययुक्ता इतिध्यात्वा ओंभूर्भुवः स्वर्लक्ष्मीइहागच्छ इहतिष्ठ महालक्ष्मिसमागच्छपद्मनाभगृहादिह नानोपचारपूजेयंत्वदर्थंपरिकल्पिता इत्यावाहनं ॥ एह्येहिविश्वजननिकमलेकमलालये कमलेस्मिन्स्थितिंदेविसदात्वंकृपयाकुरु इत्यासनं गंगादिसालिलाधारंनाममंत्राभिमंत्रितं दूरयात्राश्रमहरंपाद्यंमेप्रतिगृह्यतां इतिपाद्यं रत्नाकरसमुद्भूतेरत्नभूषाभिभूषिते निधीनामधिपेत्वंहिगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यं शीतलंजलमानीतंकर्पूरैलासुगंधितं एतदाचमनीयार्थसलिलं प्रतिगृह्यतां इत्याचमनं स्नानंतवमहालक्ष्मिकर्पूरागुरुवासितं सुतीर्थेभ्यःसमानीतंस्नानंतत्प्रतिगृह्यतां इतिस्नानं । तंतुसंतानसंनद्धंकलाकौशल्यानिर्मितं सर्वांगाभरणंश्रेष्ठंवसनंपरिगृह्यतां इतिवस्त्रं । मलयाचलसंभूतंनानापन्नगसेवितं शीतलंबहुलामोदंचंदनंपरिगृह्यतां इतिगंधं अक्षतानरविंदाक्षिनक्षत्रेशसहोदरे माणिक्यपद्मान्पद्माक्षिगृहाणत्वंमयार्पितान् इत्यक्षताः मिलत्परिमलामोदमत्तालिकुलसंकुलं नंदनोद्यानसंभूतंपद्मायैकुसुमंनमः इतिपुष्पं गंधसंभारसंनद्धंपृथुवस्तुसमुद्भवं सुरासुरनरानंदिधूपंदेविगृहाणमे इतिधूपं

मार्त्तंडमंडलाकारंचंद्रबिंबाग्नितेजसं निधानंदेविदीपोयंनिर्मितस्तवभक्तितः इतिदीपं देवतालयपातालभूतलाधारसंभवम् षोडशाकारसंभारंनैवेद्यंतेश्रियैनमः इतिनैवेद्यं स्नानादिकंविधायापियतःसिद्धिरवाप्यते एतदाचमनंदत्तं महालक्ष्मिप्रगृह्यतां इतिपुनराचमनं पातालतलसंभूतंवदनांभोजभूषणं नानागुणसमाकीर्णंतांबूलंदेवितेनमः इतितांबूलं नारिकेलंसनारंगंकदलीमातुलुंगकं देशकालोद्भवंपद्मेगृहाणफलमुत्तम इतिफलं स्वर्णप्रदपदांभोजेसमर्पितमिदंवसु यथाशक्त्यागृहाणत्वमनंतफलशुद्धये इतिदक्षिणाद्रव्यम् अथांगपूजा अचलायैनमःपादौपूजयामि चंचलायैनमःजानुनीपूजयामि कमलायैनमःकटिंपूजयामि हरिवल्लभायैनमः उदरंपूजयामि ललितायैनमः भुजौपूजयामि कमलायैनमः हृदयंपूजयामि उत्कंठिन्यैनमः कंठंपूजयामि अमलायैनमः मुखंपूजयामि श्रियैनमः शिरः पूजयामि ॥ ततः कुवेरपूजा ओंभूर्भुवः स्वः कुवेरइहागच्छ इतिकुवेरमावाह्य कुवेरायनम इतिमंत्रेण पाद्यादिभिर्दक्षिणांतंसंपूज्य प्रार्थना । कुवेरायननमस्तुभ्यंनिधिमद्माधिप। च भवंतुत्वत्प्रसादेनधनधान्यादिसंपदः ततो ऽगस्त्यपूजा । ओंभूर्भुवः स्वः अगस्त्यइहागच्छ अगस्त्यायनमइतिपाद्यादिभिर्दक्षिणांतंसंपूज्य प्रार्थना । काशपुष्पप्रतीकाशवन्हिमारुतसंभव मित्रावरुणयोः पुत्रकुंभयोनेनमोस्तुते अथेंद्रपूजनं । ओंभूर्भुवः स्वरिंद्रइहागच्छ इत्यावाह्य । ओंइंद्रायनमइतिपाद्यादिभिः संपूज्य प्रार्थनांकुर्य्यात् । विचित्रैरावणस्थायपौलोम्यालिंगितायच भास्वत्कुलिशहस्तायसहस्राक्षायतेनमः इतिसंपूज्य । श्रीसूक्तपाठंकुर्यात् । ओंहिरण्यवर्णांहरिणींसुवर्णरजतस्रजं चंद्रोहिरण्मयींलक्ष्मींजातवेदोममावह १ ताम्मेआवहजातवेदोलक्ष्मीमनपगामिनीं यस्यांहिरण्यंविंदेयंगामश्वंपुरुषानन् २ अश्वपूर्वांरथमध्यांहास्तिनादप्रमोदिनीं श्रियंदेवीमुपव्हयेश्रीमान्देविजुषतां ३ कांसोस्मितांहिरण्यप्रकारामार्द्रांज्वलं

तींतृप्तान्तर्पयंतीं पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं ४ चंद्रप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टा
मुदारां तांपद्मेनेमिंशरणंप्रपद्येअलक्ष्मीमेनश्यतांत्वांवृणोमि ५ आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृ
क्षोथविल्वः तस्यफलानितपसानुदंतुमयाआंतराथावाह्याअलक्ष्मी उपैतुमांदेवसखः कीर्त्तिश्चमणिनासह ६।
दुर्भूतासिराष्ट्रेस्मिन्कीर्त्तिवृद्धिंददातुमां ७ क्षुत्पिपासामलाज्येष्ठाअलक्ष्मींनाशयाम्यहं अभूतिमसमृद्धिंचसर्वा
श्चनुदमेगृहात् ८ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ९ मनसःका
ममाकूतिंवाचःसत्यमशीमहि पशूनांरूपमन्यस्य मयिश्रीःश्रयतांयशः १० कर्दमेनप्रजाभूतामयिसंभ्रमक
र्दमाः श्रियंवासयमेकुलेमातरंपद्ममालिनीं ११ आपःस्रजंतुस्निग्धानिचिक्लीतवसमेगृहान् निजांदेवींमात
रंचश्रियंवासयमेकुले १२ आर्द्रांपुष्करिणींपुष्टिंसुवर्णांहेममालिनीं सूर्यांहिरण्मयींलक्ष्मींजातवेदोममावह १३ आ
र्द्रांपुष्करिणींपुष्टिंपिंगलांपद्ममालिनीं चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह १४ ताम्मआवहजातवेदोलक्ष्मीमनप
गामिनीं यस्यांहिरण्यंप्रभूतंगावोदास्यश्वान्विंदेयंपुरुषानहं १५ इतिसूक्तंपठित्वा पुष्पांजलिंसमर्पयेत् ततो
नीराजनं । सुरासुरशिरोरत्नप्रभातारकितक्रमे तवसौभाग्यसंसिद्ध्यैकुर्वेनीराजनंरमे इतिनीराजनम् दक्षिणे
दक्षिणकरेस्वभक्तानांवरप्रदे करोमितेसदाभक्त्याविष्णुक्रांतप्रदक्षिणं इतिप्रदक्षिणांकृत्वा प्राणायामंकुर्यात् ततः
सर्वत्रदीपान्प्रज्वल्य ॥ दीपवृक्षास्तथादेयाःशक्त्यादेवगृहेषुच गोपुरोद्यानचैत्येषुनदीपर्वतवेश्मसु वृक्षमूलेषुगो
ष्ठेषुचत्वरेषुगृहेषुच मंदुराकरिशालायांक्रयविक्रयभूमिषु वस्त्रैःपुष्पैर्भूषितव्याःक्रयविक्रयभूमिकाः सर्वत्रदीपदाने
मंत्रः अग्निर्ज्योतीरविर्ज्योतिश्चंद्रोज्योतिस्तथैवच उत्तमोज्योतिषांज्योतिर्दीपज्योतिर्नमोस्तुते एवंदीपदानंकृत्वा
महालक्ष्मींप्रार्थयेत् नमस्तेसर्वलोकानांवरदासिहरिप्रिये यागतिस्त्वत्प्रपन्नानांसामेभूयात्त्वदर्चनात् यालक्ष्मी

र्दिवसेपुण्येदीपावल्यांचभूतले गवांगोष्ठेषुकार्त्तिक्यासालक्ष्मीर्वरदामम इतिवारत्रयंपठित्वा । यासापद्मासनस्थाविपुलकटितटीपद्मपत्रायताक्षी गंभीरावर्त्तनाभिःस्तनभरनमिताशुभ्रवस्त्रोत्तरीया लक्ष्मीर्दिव्यैर्गजेंद्रैर्मणिगणखचितैःस्नापिताहेमकुंभै र्नित्यंसापद्महस्ताममवसतुगृहेदिव्यमांगल्ययुक्ता सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते अथविज्ञप्तिः । रुपंदेहियशोदेहिभाग्यंभवतिदेहिमे पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे इतिलक्ष्मीपूजनंकृत्वा ततोदीपश्राद्धंकुर्य्यात् । तद्यथा ॐमद्येत्युच्चार्य्यास्मत्पितृपितामहप्रपितामहानाममुकशर्म्मणांतथामातृपितामहीप्रपितामहीनांतथाचमातामहप्रमातामहवृद्धप्रमातामहानांसपत्नीकानांविश्वेदेवपूर्वकंदीपश्राद्धंकरिष्ये इतिसंकल्प्य । ततअस्मत्पित्रादित्रयमातामहादित्रयाणांसपत्नीकानांदीपश्राद्धसंबंधिनोविश्वेदेवाएतेदीपावोनमः ॐमद्यास्मत्पितृपितामहप्रपितामहामातृपितामहीप्रपितामह्योमातामहप्रमातामह वृद्धप्रमातामहाः सपत्नीकाएतेदीपावोनमइति देवतीर्थेनैव दद्यादिति ततोदानप्रतिष्ठांदत्त्वा । भूयसींदक्षिणांदद्यात् एवंदीपदानादि कृत्वा ततोनंतरकृत्यंकुर्यात् । ब्राह्मणान्भोजयेद्भक्त्यासंभोज्यचबुभुक्षितान् अलंकृतेनभोक्तव्यंनववासोपशोभिना स्निग्धैर्मुग्धैर्विदग्धैश्चानिर्वृतैर्बंधुभिसहेत्यादित्यपुराणात् स्वयमलंकृतोनववस्त्रावृतोबंधुसुहृद्युतोमिष्टप्रधानमन्नं भुंजीत अत्रान्यदपिकृत्यं भविष्योत्तरे ततोपराह्नसमयेघोषयेन्नगरेनृपः अद्यराज्यंबलेर्लोकोयथेष्टंचेष्टतामित्यादिकथां प्रक्रम्य एवंगते निशीथेतुजनेनिद्रार्द्धलोचने तावन्नगरनारीभिस्सूर्प्पडिंडिमनिस्वनैः निष्कास्यतेप्रहृष्टाभिरलक्ष्मीःस्वगृहांगणादिति अतोनंतरमन्यदपिकृत्यंतत्रैव सुखरात्रेरुषःकालेप्रदीपोज्ज्वालितालये सर्वान्वंधूनवंधूश्चवाचाकुशलयार्चयेत् प्रदीपवंदनंकार्य्यंलक्ष्मीमंगलहेतवे गोरोचनाक्षतंचैवदद्यादंगेषुसर्वतः तत्रमंत्रः । विश्वरूपस्यभार्य्यासि

पद्मेपद्मालयेशुभे महालक्ष्मिनमस्तुभ्यंसुखरात्रिंकुरुष्वमे पर्वकालेमहाघोरेयन्मयादुष्कृतंकृतं सुखरात्रिप्रभावेणतंनोलक्ष्मीर्व्यपोहतु यारात्रिःसर्वभूतानांयाचदेवेष्ववस्थिता संवत्सरप्रियायाचसाममास्तुसुमंगला मातात्वंसर्वदेवानांदेवानामृद्धिसंभवा आख्याताभूतलेदेविसुखरात्रिनमोस्तुते इतिदीपावलिकृत्यं अस्यांभानुभौमार्किवारस्वातिनक्षत्रायुष्मद्योगसहितायांस्वातिसंपातयोगउक्तोज्योतिःशास्त्रे ॥ भानुभौमार्किवारेषुकार्त्तिकेदुक्षयोभवेत् आयुष्मान्स्वातिसंयुक्तोनृपनाशःपशुक्षयः अस्योपपत्तिःशालिहोत्रे अश्वयुक्शुक्लपक्षेतिथौ द्वितीयादिकेसप्तरात्रं वडवारूपेणैकास्वातितारावडवारूपेणसूर्य्यस्यवहतिरथं साभारेणाक्रांताक्रुद्धाऽश्वान्निरीक्षतेभीक्ष्णं तेषांतेजःसत्त्ववलंचगृह्णातितस्मात्स्वात्युत्पातोत्थासाऽधिपानामश्वानां महतीपीडाभवति एवंचसप्तरात्रंस्वातेः संपातएषनिर्दिष्टः तत्रदिवाकरकिरणैरस्पृष्टावाजिनोरक्ष्याः ॥ पूर्वोक्तारिष्टशंकापहतयेनवरात्रप्रकरणोक्तोवाजिनीराजनाविधिर्गृहमखेनसहितःकार्य्यः विष्णुधर्मोत्तरोक्तंस्वातिस्नानमपि कार्य्यं कृष्णचतुर्दश्यादिशुक्लद्वितीयांतंदिनचतुष्टयेपंचभंगस्नानमभ्यंगपूर्वकं महालक्ष्मीनीराजनसहितंविधेयमेवंकृते पूर्वोक्तारिष्टशंकानिवृत्ताभवतीति अस्यामेवकार्त्तिकामायांपद्मपुराणेपातालखंडोक्तं केदारगौरीव्रतं दाक्षिणात्याःसमाचरंति तत्रायंविधिः ओमद्येदंगुणविशेषविशिष्टायामस्यांतिथौमनोवांछिताविच्छिन्नसंपत्प्राप्त्यर्थंदारिद्र्यदुःखदुःस्वप्नादिप्रशमनार्थं पुत्रपौत्राभिवृद्ध्यर्थं आयुरारोग्याभिवृद्ध्यर्थं श्रीकेदारगौरीप्रीत्यर्थं यथाशास्त्रज्ञानेनयथामिलितोपचारैः पुरुषसूक्तसहितपुराणोक्तमंत्रैः श्रीकेदारगौरीव्रतांगभूतं तत्पूजनंकरिष्ये तत्रादौप्रथमाब्देनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनंचकरिष्ये इंद्रंवोमंत्रस्यमधुच्छंदऋषिरिंद्रोदेवता गायत्रीछंदः इंद्रावाहनेविनियोगः ओंइंद्रोविश्वतस्परिहवामहेजनेभ्यः जनेभ्यअस्माकमस्तु केवलः इंद्रइहागच्छेत्यावाह्य

पूजयेत् अग्निंदूतामिति काण्वोत्रमेधातिथिर्ऋषिरग्निर्देवता गायत्रीछंदः अग्न्यावाहनेविनियोगः अग्निं दूतंवृणीमहेहोतारंविश्ववेदसंअस्ययज्ञस्यक्रतुअग्निः अग्नेइहागच्छ. यमायसोममित्यस्ययमऋषिर्यमोदेवता त्रिष्टुश्छंदःयमावाहनेविनियोगः यमायसोमसुनुतयमायजुहुताहविः यमंहयज्ञोगच्छत्यग्निअरंकृत यमइहागच्छ- मोषुणइत्यस्यगौरकण्वोऋषि निर्ऋतिर्देवता गायत्रीछंदः निर्ऋत्यावाहनेविनियोगः मोषुणपरापरातिर्ऋतिर्ऊंहेणावधात्यर्दादिण्णाथासह निर्ऋतेइहागच्छ. तत्त्वायामीत्यस्यशर्कऋषिःवरुणोदेवतात्रिष्टुप्छंदः वरुणावाहनेविनियोगःतत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिःअहेडमानोवरुणेहबोध्युरुसꣳसमानआयुःप्रमोषीः वरुणइहागच्छ. तववायोमंत्रस्यविश्वपांगिरसऋषिर्वायुर्देवता गायत्रीछंदः वायोरावाहनेविनियोगः ॥ तववायोऋषस्त्यतेत्वष्टर्जामातुरद्भुतः अवास्यांवृणीमहे वायोइहागच्छ.आप्यायस्वेति गौत्तमऋषिःसोमोदेवता गायत्रीछंदःसोमावाहनेविनियोगः आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यंभवावाजस्यसंगथे सोमइहागच्छ. तमीशानमितिगौत्तमऋषि ईशानोदेवता जगतीछंदःईशानावाहनेविनियोगः तमीशानंजगतस्तस्थुषस्पतिं धियंजिन्वमवसेहूमहेवयं पूषानोयथावेधसामशद्वृधे रक्षितापायुरदब्धः स्वस्तये भोईशानइहागच्छममपूजांगृहाण एवंसमस्तलोकपालानामासनादिपूजांकुर्यात् ततोनंदिकेशगणेशपूजनंचपंचोपचारैः कुर्य्यादितिप्रथमवर्षे द्वितीयादौतु तिथ्यादिसंकीर्त्यममसकलाभीष्टसिद्ध्यर्थं केदारगौरीव्रतेतत्पूजनमहंकरिष्ये ततोध्यानंपठेत् । त्रिलोचनंचतुर्बाहुंचंद्रार्धकृतशेखरं गौर्य्यालिंगितवामांगंवृषभोपरिसंस्थितम् १ गौरीसहितायकेदारायनमोध्यानयुक्तंपुष्पंसमर्पयामिनमः ॥ सहस्रशीर्षापुरुष. आगच्छ देवदेवेशउमयासहितप्रभो केदारनामकस्वामिन्सर्वकामफलप्रद आवाहनं । पुरुषएवेदमिति सिंहाननामिदांदिव्यं

व्र०र०
कार्त्ति०
१९

तप्तकांचनसन्निभं ददामितेभवानीशसंसारार्णवतारक गौरीसहितायकेदारायनमः आसनं । एतावानस्येति गांगजलंसमानीतंसुवर्णकलशेधृतं पाद्यंगृहाणदेवेशसर्वदेवनमस्कृत इतिपाद्यं । त्रिपादूर्ध्वं. मंदाकिन्याःसमानीतंसुशीतलमिदंजलं मयोपपादितंदेवगृहाणाचमनीयकं इत्याचमनं । ततोविराडजायत अर्घ्यंगृहाणदेवेशगंधपुष्पाक्षतैर्युतं मुक्तारत्नादिसंयुक्तंकृपयाजगदीश्वर इत्यर्घ्यं । यत्पुरुषेण. स्नानंपंचामृतैःसम्यग्विधायसुसमन्वितं मयादत्तंगृहाणेशसर्वकामफलप्रद इतिपंचामृतस्नानं । आप्यायस्वेत्यादि वेदोक्तमंत्रैः पंचब्रह्मादिभिर्मंत्रैरर्चितंजान्हवीजलं ममोपरिकृपांकृत्वागृहाणपरमेश्वर इतिशुद्धोदकस्नानं । तंयज्ञमिति मृदुसूक्ष्माणिवस्त्राणिदुकूलानिमयाप्रभो आनीतानित्वदर्थंतुगृहाणसुरसत्तम इतिवस्त्रं ।तस्माद्यज्ञात्-संभृतं कर्पासकृततंत्नांसंयुक्तंविधिनाततः भक्त्यात्वदर्थमानीतंगृहाणसुरसत्तम इतियज्ञोपवीतं । अनर्घ्यहेमसंयुक्तंमुक्तामणिविभूषितं अनर्घ्याभरणंदिव्यंगृहाणपरमेश्वर इत्याभरणं । तस्माद्यज्ञात्सर्वहुतऋचःसामानिः श्रीगंधागुरुकपूरकुंकुमेनसमन्वितं कस्तूरीचंदनाढ्यंचगंधंतेर्पितमीश्वर इतिचंदनं । तस्मादश्वा- अक्षतान्धवलान्देवशालितंडुलसंभवान् गृहाणपार्वतीनाथकृपयापरमेश्वर इत्यक्षतं । तंयज्ञमिति कमलंसेवतीपुष्पंविल्वपत्राणि शंकर मयार्पितानितेनाथगृहाणसुरसत्तम इतिपुष्पं ।अथांगपूजा- शंभवेनमः पादौपूजयामि शिवायनमः गुल्फौ-पूजयामि रुद्रायनमः जानुनीपूजयामि भीमायनमः जंघेपूजयामि अभीष्टदायिनेनमः ऊरूपूजयामि सर्वज्ञायनमः कटिंपूजयामि पशुपतयेनमः नाभिंपूजयामि उमापतयेनमः हृदयंपूजयामि नीलकंठायनयः कंठंपूजयामि सर्वास्त्रधारिणेनमः मूर्द्धानंपूजयामि सदाशिवायनमः सर्वांगंपूजयामि तत्पुरुषंव्यदधुः दशांगंगुग्गुलंधूपंकालागुरुसमान्वितं धूपंगृहाणदेवेशमनःशोकविनाशन धूपं ब्राह्मणोस्य- गोघृतेनसमायुक्तं

कार्पासकृतवर्त्तिकं दीपार्थंतेमयादत्तंवह्निनायोजितंप्रभो इतिदीपं चंद्रमामनसः शर्कराघृतसंयुक्तंकर्पूरैलासमन्वितं मयानिवेदितंदेवनैवेद्यंप्रतिगृह्यतां इतिनैवेद्यं नाभ्याआसीत् इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसुकलावाप्तिर्भवेज्जन्मनिजन्मनि इतिफलं सप्तास्यासन्. दक्षिणार्थंतुयत्नेनसुवर्णरजतव्रजं मयानिवेदितंतुभ्यंव्रतसाद्गुण्यहेतवे इतिदक्षिणा नानारत्नसमायुक्तंनानाचित्रोपशोभितं मयानिवेदितंभक्त्याआर्त्तिकंप्रतिगृह्यतां इतिनीराजनं प्रदक्षिणा नमःकेदारदेवायनमस्तेशूलपाणये नमःसर्वात्मनेतुभ्यंभक्तानांवांछितप्रद इतिनमस्कारः । अज्ञानाज्ज्ञानतोवापियद्व्रतंतुमयाकृतं न्यूनातिरिक्तंतत्सर्वंसंपूर्णंकुरुशंकर इतिप्रार्थना । नंदीश्वराययवान्दत्त्वाचंडीश्वरायतंडुलान्दद्यात् । व्रतंकरोमिदेवेशत्वद्भक्तस्त्वत्परायणः गौरीकेदारभवतुसमाप्तंत्वत्प्रसादतः डोरकबंधनं आचार्यपूजनं उद्यापनदानमंत्रश्च ॥ शतपूरिकयोपेतान्फलतांबूलमिश्रितान् उद्यापनंगृहाणत्वंकेदारवरदोभव नमस्तेदेवदेवेशनमस्तेजगतांपते गौरीपतेनमस्तुभ्यंत्राहिमांपरमेश्वर इतिक्षमापनं । इतिगौरीकेदारव्रतपूजनं अथकथा । पुरातुऋषयःसर्वे नैमिषारण्यवासिनः शौनकाद्यामहात्मानः सर्वशास्त्रविशारदाः तीर्थयात्राप्रसंगेनगंगाद्वारमुपागमन् तत्रस्नाताः कृतजपा विधिवद्दक्षिणाददुः ॥ यावत्सुखोपविष्टास्तेहर्षनिर्भरमानसाः अदूरेददृशुस्तत्रसूतंशास्त्रार्थकोविदं ददर्शसोपितांस्तत्रऋषीन्विगतकल्मषान् ननामदंडवद्भक्त्यातैश्चापिपरिपूजितः तेचचक्रुस्तथातिथ्यंकुशलप्रश्नमेवच सुखोपविष्टंतंसूतंपप्रच्छुरिदमादरात् ऋषयऊचुः सूतसूतमहाप्राज्ञचिरंदृष्टोऽसिसुव्रत कस्मिंस्तीर्थेथवादेशेकालोयंविहितस्त्वया त्वद्दर्शनेनातिसौख्यंप्राप्तंहिपरमंमहत् किंचिद्विज्ञप्तुमिच्छामस्तच्छृणुष्वमहामते त्वयोक्ताविविधाधर्मास्तथानानाविधाः कथाः व्रतानिचविचित्राणिमनोरथकराणिच इदानींवदनःसूत व्रतंपरमपावनं यत्कृत्वासर्वासिद्धिः स्यान्नराणांवांछितप्रदा

सूतउवाच साधुपृष्टंमुनिवराव्रतंदेव्यामहाद्भुतं ममापिकथितुंहर्षोजायतेनात्रसंशयः अस्तिकेदारगौरीतिव्रतंपरमकामदं विष्णुनाकथितंलक्ष्म्यैलक्ष्म्याशच्यैतथैवच ऋषयऊचुःकेनप्रकाशितंमर्त्येविधानंतस्यकीदृशं देवताकाचपूज्यास्यात्सर्वंविस्तरतोवद सूतउवाच आंध्रदेशेपुराकश्चिद्विप्रोभूच्छास्त्रकोविदः नाम्नाभास्करशर्मेतिस्वकर्मपरिनिष्ठितः आकिंचिनोपिसद्वृत्तः कुटुंबंपरिपालयन् सत्यव्रतीतितस्यासीद्भार्यापरमशोभना कन्याद्वयंसुतश्चैकश्चंद्रशर्मेतिविश्रुतः कमलाविमलाचेतिनामनीतितयोः पृथक् तेकदाचिद्वनंयातेइंधनार्थंतपोधनाः असंत्यौचवनेतस्मिन्क्रीडंत्यौचपरस्परं । तावत्सौगंधिकोवायुस्तयोरंतिकमागमत् । कुतोयंवायुरायातीतिचिंतयंत्यौपुनःपुनः प्रयातेतेनमार्गेणायत्रोत्पन्नस्सचानिलः ददृशातेगणेशंवैपुरतोद्वारपालकं गणेशोपितदाप्राहवचनंद्विजकन्यके वनमेतद्दुर्विलंघ्यंसदेवासुरमानवैः विशेषतोमहेशेनदेव्याचापिसुरक्षितं अतःपरंनगंतव्यमीश्वराज्ञाबलीयसी स्थीयतांतावदत्रैवनियमाद्गम्यतेमया देव्यैदेवायचमयायुवाभ्यामागतंत्विति गणेशोपितदागत्वामात्रेसर्वंन्यवेदयत् श्रुत्वावाक्यंगणेशस्यदेवीप्राहगिरेःसुता गच्छानयद्विजसुतेपश्येयतांममपूजनं इतिश्रुत्वागणेशेनागच्छतंद्विजकन्यके सहैवेंधनभारेणकंदमूलफलादिना शरीराच्छादनंचैवतयोःकिंचिन्नदृश्यते कौपीनमात्रमेवासीत्केवलंगुह्यगुप्तये तथैवतेगृहीत्वाज्ञांमातुरंतिकमागमन् देव्यापिदृष्टंतद्युग्ममतिदीनंक्षुधातुरं एतास्मिन्नंतरेचैवतेकन्येशुभलक्षणे चक्रातेदंडवद्भूमौप्रणामंचोचतुस्तथा कन्येऊचतुः मातःकमलपत्राक्षिकिमिदंक्रियतेत्वया कृपयावददेवेशिसर्वज्ञासिनसंशयः अद्यनौसफलंजन्मजीवितंचसुजीवितं देवित्वद्दर्शनादेवधन्यौतौपितरौचनौ नस्त्रातुंशक्तिरस्माकमस्तिकाचिज्जगन्मये पार्वत्युवाच व्रतंकेदारगौर्य्याख्यंक्रियतेऽद्यमयाशुभं यस्यानुष्ठानमात्रेणलभ्यंतेसर्वसिद्धयः इदंसाक्षान्महेशेनकथितंकृपयामम यस्मिन्कृतेसर्वसिद्धिस्तदिदंक्रियतेमया

कन्येऊचतुः वदमातःकथंकार्यंव्रतंपरमपावनं कस्मिन्दिनेथवामासेदेवतांकांप्रपूजयेत् देव्युवाच आश्वि
नस्यासितेपक्षेअमावास्यायदाभवेत् तस्यांव्रतमिदंकार्य्यंयथोक्तंशंभुनापुरा प्रथमेब्देयदाकार्य्यंतद्वदामितपो
धने कृत्वाकार्पाससूत्राणिदशैवचप्रयत्नतः कृतानिचकुमार्याथप्रक्षाल्यविमलोदकैः तत्संख्ययाथपत्राणिक्रमु
कस्यफलानिच तत्संख्यायाह्यपूजाश्चकर्त्तव्यावैप्रयत्नतःनानाविधानिपुष्पाणिऋतुकालोद्भवानिच सूर्पंवंशम
यंचैकंसौभाग्यद्रव्यसंयुतं श्लक्ष्णमेकंनारिकेलंनैवेद्यंकालसंभवं एवंसंभृत्यसंभारान्ततःपूजांसमाचरेत् सौ
वर्णीप्रतिमाकार्य्याशिवस्यांबिकयासह तस्याग्रेसूत्रदशकंविन्यसेच्चसुशोभनं पूजनंविधिवत्कार्य्यंधूपदीपादि
भिःक्रमात् दक्षिणांचयथाशक्त्यादद्याद्देवस्यतुष्टये विप्रःपुरुषसूक्तेनपूजयेत्स्त्रीपुराणजैः एवंसंपूज्यविधिवद्भो
जयेद्द्विजदंपती सापूजानैवकस्यापिदद्याद्विप्रायदक्षिणांनैवेद्यंस्वयमश्नीयात्तांबूलंचविशेषतः वर्षमध्येकार्य
सिद्धिर्भवत्येवनसंशयः वर्षेद्वितीयेतत्सर्वंद्विजायप्रतिपादयेत् एकाविंशतिसूत्राणिसपर्णानिफलानिच अपूपा
श्चैवकर्त्तव्याएकविंशतिसंख्यया विधिनानेनकर्त्तव्यंव्रतंपरमपावनं सूतउवाच इतिश्रुत्वावचोदेव्यास्तेक
न्येशुभलक्षणे ययाचतुर्व्रतंदेव्याभक्त्यापरमयामुदा तथेत्युक्त्वातदादेवीकारुण्यहृतमानसा ददौतयोर्विधाने
नयथोक्तंशूलपाणिनं न्यग्रोधसूक्ष्ममूलानिफलानिचदलानिच आनीयसत्वरंतत्रप्रत्येकंदशसंख्यया अपूपा
श्चफलान्यत्रमृण्मयाःशुभलक्षणाः माल्याभावेवृहत्याश्चकुसुमैःपूजनंकृतं कुसुमानांकेसराणितेषांचैवाक्षतास्तथा
एवंसंपूज्यविधिवद्गौरीपुनरुवाचते वध्यतांस्वकरेसूत्रंनैवत्याज्यंकदाचन इममिंधनभारंचकंदमूलफलानिच गृ
हीत्वागम्यतांसर्वंपश्चान्नैवविलोकयेत् तथेत्युक्त्वाचतेकन्येप्रयातेस्वगृहंप्रति तत्सर्वंव्रतसामर्थ्याद्दिव्यंसमभव
त्तदा अपूपाश्चैवसंजातादिव्याःषड्रससंयुताः तानिसर्वाणिवासांसिक्षणात्कौशेयतांययुः सएवेंधनभारस्तुस्वर्ण

भारस्तदाभवत् मात्रादृष्टंतुतत्सर्वंहार्षिताविस्मिताभवत् माताप्रोवाचतेकन्येकिमिदंभात्यपूर्ववत् किंकृतंकिंहुतंजप्तं युवाभ्यांकिंतपःकृतं इतिमातुर्वचःश्रुत्वा तेकन्येप्रोचतुस्तदा कन्येऊचतुः नजप्तंनहुतंकिंचिन्नैवकिंचित्तपःकृतं भवानी शंकरौविघ्नोनान्यंदेवंकदाचन ताभ्यांदत्तंव्रतमिदंप्रसन्नाभ्यांमनोरमं तेनाभूत्सर्वसपत्तिरियंमातर्नसंशयः त्वमप्यंबव्रतमिदंकुरुष्वयतमानसा सूतउवाच तदासत्यव्रताचक्रेव्रतंकन्योपदर्शितं तथैवतत्कुलंजातंधनधान्यसमाकुलं अथतेकन्यकेजातेविवाहार्थंयथोचिते राजानौद्वौसमायातौपद्माकरसुधाकरौ दक्षिणापतिरेकश्चउत्तरेशस्तथापर। द्वाभ्यांकन्याद्वयंदत्तंव्रतस्यास्यप्रभावतः पद्माकरेणकमलानीतास्वसदनंप्रति सुधाकरेणविमलाप्राप्तातीवसुसंभ्रमात् ताभ्यांतत्क्रियतेनित्यंव्रतंपरमभक्तितः एकदातूपविष्टासास्वगृहेस्त्रीगणैर्युता स्त्रीभिस्ताभिस्तत्र दृष्टंतद्धस्तेतत्सुडोरकं ताऊचुःकिमिदंभद्रे डोरकस्यविभूषणं किंतेनसंतिरौक्माणिभूषणानिशुचिस्मिते नानाविधानिरत्नानित्वद्गेहेकिलसुंदरि आकर्ण्यसत्यव्रतयास्त्रीभिरीरितमाशुतत् निष्कास्यसूत्रंतद्दैवाद्भाविनोर्थस्य गौरवात् नैवचास्यफलंपुण्यंकदाचिद्दृश्यतेपुरा सत्यव्रतायास्तद्भाग्यंक्षणात्तत्क्षीणतांययौ यथापूर्वमभूत्सर्वंभाग्येविलयतांगते शाकवल्लीफलैर्नित्यंक्रियतेभोजनादिकं अथभोक्तुंयदानैवकिंचित्सासुतमब्रवीत् भगिन्यौ तेचंद्रशर्मन्वर्त्तेतेनृपतेर्गृहे तयोःसमीपंगत्वाचकिंचिद्भक्ष्यार्थमानय मातुर्वचनमाकर्ण्यचंद्रशर्माद्विजोत्तमः पद्माकरस्यनृपतेर्नगरंप्रथमंययौ भगिनीकमलायत्रवर्त्ततेपतिदेवता सतन्नगरमासाद्यनदीतीरेवहिःस्थितः दास्यस्तुतस्यानीरार्थमागताःशतशस्तदा तंचदासीगणंदृष्ट्वाप्रत्युवाचद्विजर्षभः युष्माकंस्वामिनीयास्तिममसाभगिनीशुभा भ्राताहंचंद्रशर्मेतिस्तस्याश्चैवानिवेद्यतां तास्तुतस्योपहासंतुचक्रुर्नानाविधंतदा भ्रातृत्वेनैवयोग्योसिपश्य वैभवमात्मनः तन्मध्येचाभवत्येकाशुभाचारासुलक्षणा द्विजवर्यमहाभागतवादेशंब्रवीम्यहं सासमागम्यतत्सर्वं

कमलायैन्यवेदयत् तत्समाकर्ण्यकमलातंसमानीयसत्वरं आकिंचनाकृतिंदृष्ट्वाभ्रातरंभृशदुर्बलं तस्याश्चवैभवंदृष्ट्वा सोपिलज्जानताननःनीत्वातंगृहमध्येतुबहुसन्मानपूर्वकं दिवसान्यथसप्ताष्टौसमास्थायप्रयत्नतः ततःपंचदशाहेचकृत्वापाथेयमुत्तमं हिरण्येनसमायुक्तंदत्त्वातस्मैव्यसर्जयत् पाथेयंतद्गृहीत्वासव्रतस्थोद्विजपुंगवःगच्छन् शनैस्तुमार्गेण तृषयापरिपीडितःतावद्ददर्शविमलांद्विजःपुष्करिणींशुभां तटेविन्यस्यपाथेयंस्वयंजलमथाग्रहीत् तावत्तुजलवीचीभिर्हृतंभक्ष्यंक्षणेनहि पुनःप्रायाच्चंद्रशर्माभगिनीसदनंप्रति निवेदयामासतदायद्वृत्तंपथिकौतुकं श्रुत्वासापुनरेवान्यद्धिरण्यंप्रददौतथा पादत्राणेहिरण्यंसधृत्वासप्रययौद्विज पादत्राणंचमार्गेतत्पंकेमग्नंक्षणेनहि पुनरेवसमायातोभगिनींप्रतिसद्विजः तद्वृत्तंसर्वमाचष्टभगिन्यैब्राह्मणर्षभः तन्निशम्याथविमलापुनरेवधनंददौ निक्षिप्ययष्टिमध्येतद्धृत्वायाष्टिंप्रतास्थिवान् यावन्मार्गेसमागच्छद्यष्टिमादायसत्वरः तावत्कश्चित्समायातःपुनर्यष्टिमुपहरत् पुनःप्रयातोभगिनींचंद्रशर्मामहामतिः उवाचपथियद्वृत्तंनिशम्याथसुविस्मिता मात्रानक्रियतेभ्रातर्व्रतंपरमपावनं नेतिसोप्याहवचनंचंद्रशर्मापुनःपुनः कमलोवाच तावदत्रैवतिष्ठत्वं भ्रातःपंचदिनावधि षष्ठाहआश्विनस्याथअमावास्याभविष्यति व्रतंकेदारगौर्याख्यंतस्यांकृत्वायथाविधिः ततोगच्छस्वभवनंकृतकृत्योभविष्यसि तथेत्युक्त्वास्थितस्तत्रव्रतंचक्रेयथाविधि तांसमामंत्र्यभगिनींप्रययौस्वगृहंप्रति आगतस्तेनामार्गेणयत्रपुष्करिणीह्यभूत् पुनरेवतृषाक्रांतस्तज्जलंजगृहेततः जलांतर्गतपाथेयंद्विजहस्तेतदाऽभवत् ततोजगामपुरतःपादत्राणंचलब्धवान् याष्टिंचपुरुषःप्रादा त्पूर्वंयापहृताबलात् एवंसर्वंपुनर्लब्धंव्रतस्यास्यप्रभावतः गृहं समागम्यततोमात्रेसर्वंन्यवेदयत् श्रुतंपुत्रमुखात्सर्वंविस्तृतंव्रतमादरात् तदेवसूत्रंसंगृह्ययत्त्यक्तंपूर्वमेवच यथोक्तेनविधानेनचकारातीवभक्तितः पुनरेवयथापूर्वंधनधान्ययुताऽभवत् तदारभ्यव्रतमिदंमर्त्यलोकेप्रकाशितं सर्वा

निरूपितथंनांसच:प्रत्ययकारकं सूतउवाच इदंकेनापिनज्ञातंविनाशंभुंमुनीश्वराः शंभुनाविष्णवेदत्तंतस्मायैविष्णुनार्पितं लक्ष्म्याचदत्तमिंद्राण्यैइंद्राण्याबहुलीकृतं तदारभ्यव्रतमिदंक्रियतेमानवैर्भुवि यस्याराधनमात्रेणप्राप्यंतेसर्वसिद्धयः भूमौव्रतानिचान्यानिसंतिनानाविधानिच परमेतस्यसर्वाणिकलांनार्हंतिषोडशीं इतिपूर्वमयादृष्टंपुराणेषुनिपुंगवाः तदाद्यकथितंविप्राः किमन्यच्छ्रोतुमिच्छथ ॥ इतिपाद्मेकेदारगौरीव्रतम् अन्यदप्युक्तंभविष्योत्तरे ॥ योयादृशेनभावेनतिष्ठत्यस्यांयुधिष्ठिर हर्षदैन्यादिरूपेणतस्यवर्षंप्रयातिहि रुदितेरोदनंवर्षंहृष्टेवर्षंप्रहृष्यति भुक्तेभोगोभवेद्वर्षंस्वस्थेस्वस्थंभविष्यति तस्मात्प्रहृष्टैस्तुष्टैश्चकर्त्तव्याकौमुदीनरैः वैष्णवीदानवीचैषातिथिःपैत्रीयुधिष्ठिर अन्यच्चतत्रैव । प्रभातसमयेराज्ञातोषणीयाःसुहृजनाः सुवासिनीभ्योदेयानिवस्त्राण्याभरणानिच सद्भावेनैवसंतोष्याभोजनेनद्विजोत्तमाः भोजयेत्पूजयेद्यत्नैरंतःपुरविलासिनीः स्वजातिवनितास्तोष्यादानेनचतथाद्विजाः वस्त्रैस्तांबूलदानैश्चनैवेद्यैःकुसुमैःशुभैः स्वनामांकैःस्वयंराजा तोषयेत्स्वजनान्पृथक् तथागणाधिपत्यांश्चतथामल्लान्भटान्नरान् वृषभान्माहिषांश्चैवयुद्ध्यमानान्नरैःसह गजानश्वांश्चयोधांश्चपदातीन्समलंकृतान् मंचारूढःस्वयंपश्येन्नटनर्त्तकचारणान् क्रुद्धापयेत्त्रासयेच्चगोमहिष्यादिकंतथा वृषान्धर्षापयेद्वाभिरुक्तिप्रत्युक्तिवादिभिरिति । अस्यांसंक्षेपकृत्यं नारदीये ॥ ऊर्ज्जामायांदीपदानंदेवागारगृहेषुच नद्यारामतडागेषुचैत्यगोष्ठापणेषुच समर्चनंतथालक्ष्म्याःस्वर्णरौप्यकृताकृतैःद्यूतंचवर्षफलदंजयेवापिपराजये गवांपूजात्रविहिताशृंगाद्यंगानुरंजनैःपायसाद्यन्नदानैश्चनमस्कारप्रदक्षिणै अथदीपावलीकथाभविष्योत्तरे श्रीकृष्णउवाच पुरावामनरूपेणयाचयित्वाविमांधराम् बलेर्यज्ञेहरिः सर्वक्रांतवान्विक्रमैस्त्रिभि इंद्रायदत्तवान्राज्यंबलिंपातालवासितं कृत्वादैत्यपतेर्वधमहोरात्रंपुनर्नृप एकएवहिभोगार्थंबलीराज्येभिषेचितः रहस्यंहितदेतत्तेकथयामि

नरोत्तम कार्त्तिकेकृष्णपक्षस्यपंचदश्यांनिशागमे यथेष्टचेष्टादैत्यानांराज्यंतेषांमहीतले युधिष्ठिरउवाच ॥ विशेषेणहृषीकेशकौमुदींवदमेप्रभो किमर्थंदीयतेदानंतस्यांकादेवताभवेत् किंचतेषांभवेद्देयंकेभ्योदेयंजनार्दन प्रहर्षःकोत्रनिर्दिष्टःक्रीडाकात्रप्रकीर्त्तिता श्रीकृष्णउवाच ॥ कार्त्तिकेकृष्णपक्षेतुचतुर्दश्यांविनोदये अवश्यमेवकर्त्तव्यं स्नानंनरकभीरुभिः अपामार्गस्यपत्राणिभ्रामयेन्मस्तकोपरि ततश्चतर्पणंकार्य्ययधर्मराजस्यनामभिः यमायधर्मराजायमृत्यवेचांतकायच नरकायप्रदातव्योदीपःसंपूज्यदेवताः ततःप्रदोषसमयेदीपान्दद्यान्मनोरमान् । ब्रह्मविष्णुशिवादीनांभवनेषुविशेषतः कूटागारेषुचैत्येषुसभासुचनदीषुच तडागोद्यानवापीषु प्रतोलीनिष्कुटेषुच सिद्धार्थबुद्धाचामुंडाभैरवायतनेषुच मंदुरासुविविक्तासुहस्तिशालासुचैवहि एवंप्रभातसमयेह्यमावास्यांनराधिप स्नात्वादेवान्पितॄन्भक्त्यासंपूज्याथप्रणम्यच कृत्वातुपार्वणंश्राद्धंदधिक्षीरघृतादिभिः भोज्यैर्नानाविधैर्विप्रान्भोजयित्वाक्षमाप्यच ततोपराह्णसमयेघोषयेन्नगरेनृपः अद्यराज्यंबलेर्लोकोयथेष्टंचेष्टतामिति लोकश्चापिपुरेहृद्येसुधाधवलिताजिरे वृक्षचंदनमालाद्यैश्चार्चितेचगृहेगृहे द्यूतपानरतोद्रिक्तनरनारीमनोहरे नृत्यवादित्रसंघुष्टसंप्रज्वलितदीपके अन्योन्यप्रीतिसंहृष्टदत्ततालकरेजने तांबूलहृष्टवदनेकुंकुमक्षोदचर्चिते दुकूलपटनेपथ्यस्वर्णमाणिक्यभूषिते युवतीजनसंकीर्णे दीपोज्वलविहारिणि अद्भुतोद्भासितांगेश्चसंदर्शितकुतूहले दीपमालाकुलेरम्येविध्वस्तध्वांतसंचये प्रदोषेदोषरहितेध्वस्तदोषागमेशुभे आशीःपूर्णमुखाभिश्च कन्याभिःक्षिप्ततंडुले नीराजनंप्रकर्त्तव्यंवृक्षशाखास्थदीपकैः भ्राम्यमानाततोमूर्द्ध्निमनुजानांनराधिप योजनानामरक्षस्स्त्रीहर्षात्प्रचरतेजनं वृक्षशाखांतदीपानांनिश्चयोदर्शनाद्भवेत् नीराजनंतुतमसःप्रोच्यतेविजयप्रदे तस्माज्जनेनकर्त्तव्यंरक्षोदोषभयावहंयात्राविहारसंचारेजयजीवेतिवादिभिः क्षुद्रोपसर्गरहितेराजकोपभयो

ज्झिते मित्रस्वजनसंबंधिसुहृत्प्रेमानुरंजिते ततोर्धरात्रसमयेस्वयंराजाव्रजेत्पुरं अवलोकयितुंरम्यंपद्भ्यामेवशनैः शनैः महतातूर्यघोषेणज्वलद्भिर्हस्तदीपकैः हट्टशोभायुतंपश्यन् कृतरक्षःस्वकैर्जनैः तद्दृष्ट्वामहदाश्चर्यंमूर्द्धनिचैवात्मनः प्रभां बलिराज्यप्रसादंच ततःस्वगृहमाव्रजेत् एवंगतेनिशीथेतुजनेनिद्रार्द्धलोचने तावन्नगरनारीभिर्मंडुडिंडिमवादनैः निष्कास्यतेप्रहृष्टाभिरलक्ष्मीः स्वगृहांगणात् । ततः प्रबुद्धेसकलेजनेजातमहोत्सवे माल्यदीपकहस्तेचस्नेहनिर्भरवत्सले वेश्याविलासिनीसार्थेस्वस्तिमंगलकारिणि गृहात्गृहंव्रजतितुपादष्टंभप्रदायिनी । पिष्टकोद्वर्तनपरेगुरुशुश्रूषणाकुले द्विजाभिवादनपरेसुखरागादिवादिनि सुवासिनीभिश्चधनंदीयमानेयदृच्छया तथाप्रभातसमयेयथार्हंमानयेज्जनान् सद्भावेनैवसंतोष्यदेवान्स्वपुरुषाद्द्विजान् इतरानन्नपानैर्वावाक्यदानेनपंडितान् वित्तताबूलदानैश्चधनैःसामंतपार्थिवान् पदातिजनसंलग्नान्ग्रैवेयकटकादिभिः स्वनामांकैः स्वयंराजातोषयेन्स्वजनान्पृथक् यथार्हंतोषयित्वातुततोमल्लभटान्नरान् वृषभान्महिषांश्चैवयुध्यमानान्परैःसह गजानश्वांश्चयोधांश्चपदातीन्समलंकृतान् मंचारूढःस्वयंपश्येन्नटनर्तकचारणान् उद्दीपयेत्त्रासयेच्चगोमहिष्यादिकंततः वृषान्धर्षापयेद्गोभिर्युक्तिमत्युक्तिकावदेत् ततोपराह्णसमयेपूर्वस्यांदिशिभारत मार्गपालींप्रबध्नीयात्तुंगस्तंभेथपादपे कुशकाशमयीं दिव्यांलंबकैर्बहुभिर्वृतां दीक्षयित्वावाजिगजान्सार्द्धयामत्रयेगते गावोवृषाश्चमाहिष्योमंडिताघटितोत्कटाःकृतेहोमेद्विजेंद्रैश्चगृह्णीयात्मार्गपालिकां राष्ट्रमेन्ननवाराजन्सहस्त्रेणशतेनच स्वशक्त्यपेक्षयावापिगृह्णीयाद्ग्राम्यभोजनैः मातुःकुलंपितृकुलमात्मानंसहबंधुभिः संतारयेच्चसततंमार्गपालींददातियः नीराजनंचतत्रैवकार्यंराज्ञोजयप्रदं मार्गपालींततोलंघ्ययांतुगावोगजावृषाः राजानोराजपुत्राश्च ब्राह्मणाः शूद्रजातयः मार्गपालींसमुल्लंघ्यनीरुजःस्यात्सुखीतदा कृत्वैवंसर्वभावेनरात्रौदैत्यपतेर्बलेः पूजांकुर्यान्नृपःसाक्षाद्भूमौमंडलकेकृते बलिमालिख्य

दैत्येंद्रवर्णकैः पंचरंगकैः सर्वाभरणसंपन्नविंध्यावल्यासहासितं कूष्मांडबाणजंभाख्यमुरदानवसंयुतम् संपूर्णहृष्टवदनंकिरीटोत्कटकुंडलं द्विभुजंदैत्यराजानंकारयित्वानृपःस्वयं गृहस्यमध्येशालायांदत्त्वार्घ्यादिततोर्चयेत् भ्रातृमंत्रिजनैः सार्धं संतुष्टोवंदिभिस्तुतः कमलैःकुमुदैःपुष्पैःकल्हारैरक्तकोमलैः गंधधूपान्ननैवेद्यैरक्षतैर्गुडपूपकैः मद्यमांससुरालेह्यदीपमाल्योपहारकैः मंत्रेणानेनराजेंद्रसमंत्रीसपुरोहितः बलिराजनमस्तुभ्यंविरोचनसुतप्रभो भविष्येंद्रसुराराते पूजेयंप्रतिगृह्यतां एवंपूजांनृपःकृत्वारात्रौजागरणंततः कारयेत्प्रेक्षणीयादिनटनृत्यकथानकैः लोकश्चापिगृहस्यांतेशय्यायांशुक्लतंडुलैः संस्थाप्यबलिराजानंफलैःपुष्पैःप्रपूजयेत् बलिमुद्दिश्यदीयंते दानानिकुरुनंदन यानितान्यक्षयाण्याहुर्मयेदंसंप्रदर्शितं यदस्यांदीयतेदानं स्वल्पं वायदिवाबहु तदक्षयंभवेत्सर्वंविष्णोःप्रीतिकरंपरं विष्णुनावसुधालब्धातुष्टेनबलयेपुनः उपकारकरंदत्तमसुराणांमहोत्सवं ततःप्रभृतिराजेंद्रप्रवृत्ताकौमुदीशुभा सर्वोपद्रवविद्रावासर्वविघ्नविनाशिनी लोकशोकहरीकाम्या धनपुष्टिसुखावहा कुशब्देनमहीज्ञेयामुदोहर्षेततोद्वयं धातुज्ञैर्निगमज्ञैश्चतेनैषाकौमुदीस्मृता एकमेवमहोरात्रंवर्षेवर्षेविशांपते दत्तंदानवराजस्यचादर्शमिवभूतले यःकरोतिनृपोराष्ट्रेतस्यव्याधिभयंकुतः कुतोवैरिभयंतत्रनास्तिमृत्युकृतंभयं सुभिक्षंक्षेममारोग्यंसंपदांपदमुत्तमं नीरुजश्चजनाःसर्वेसर्वोपद्रववर्जिताः कौमुदीकरणाद्राजन्भवंतीहमहीतले योयादृशेनभावेनानिष्ठत्यस्यांयुधिष्ठिर हर्षदैन्यादिरूपेणतस्यवर्षंप्रयातिहि रुदितेरोदनंवर्षंहृष्टेवर्षंप्रहृष्यति भोगेभोक्ताभवेद्वर्षे स्वस्थः स्वस्थोभवेदिति तस्मात्प्रहृष्टैस्तुष्टैश्चकर्तव्याकौमुदीनरैः वैष्णवीदानवीचेयंतिथिःप्रोक्तायुधिष्ठिर उपशमितमेघनादं प्रोद्दलितदशाननंरामं रामायणमिव सुभगंदीपदिनंहरतुवोदुरितं कूष्मांडबाणरम्यंकुवलयखण्डैश्चधेनुषाभद्रं शरदिवहरिगतनिद्रंदीपदिनंहरतुवो

दुरितम् दीपोत्सवेजनितसर्वजनप्रसादंकुर्वीतियेसुमतयोबालिराजपूजां दानोपभोगसुखबुद्धिशतानिचैवहर्षेण वृद्धिमिवपार्थिवयातितेषां नशुक्रदोषोनसुरेज्यदोषस्ताराबलंचंद्रबलंनशुद्धं विवाहितायानवकन्यकायादीपोत्सवे सिद्धिकरःप्रवेशः ॥ इतिश्रीभविष्येकर्त्तव्यं तथाहेमाद्रौ आदित्यपुराणे ॥ शंकरस्तुपुराद्यूतंससर्ज्जसुमनोहरं कार्त्तिकेशुक्लपक्षेतुप्रथमेहानिसत्यवान् जितश्चशंकरस्तत्रजयंलेभेचपार्वती अतोर्थंशंकरोदुःखीउमानित्यंसुखान्विता तस्माद्यूतंप्रकर्त्तव्यंप्रभातेतत्रमानवैः तस्मिन्द्यूतेजयोयस्यतस्यसंवत्सरंजयः पराजयेविरुद्धंतुलब्धनाशस्ततोभवेत् श्रोतव्यंगीतवाद्यादिस्वनुलिप्तैःस्वलंकृतैः दीपमालापरिक्षिप्तंतथाधूपेनधूपितं दयिताभिश्चसहितैर्नेयासाचभवेन्निशा नववस्त्रैश्चसंयोज्याद्विजसंबंधिबांधवाइति अत्रान्यदपिकृत्यं तत्रैव ततः प्रबुद्धेसकलेजनेप्राप्तमहोत्सवे माल्यदीपकहस्तेचस्नेहनिर्भरवत्सले वेश्याविलासिनीसार्धंस्वस्तिमंगलचारिणि गृहाद्गृहंव्रजतिचपादाभ्यंगप्रदायिनि पिष्टकोद्वर्त्तनपरेगुरुशुश्रूषणाकुले द्विजातिवंदनपरेसुखरात्र्यादिवादिनि प्रभातसमयेराज्ञातोषणीयास्ततोजनाः सुवासिनीभ्योदेयानिवस्त्राण्याभरणानिच सद्भावेनैवसंतोष्यादानेनचतथाद्विजाः वस्त्रैस्तांबूलदानैश्चपुष्पकर्पूरकुंकुमैः भोजयेत्पूजयेद्रत्नैरंतःपुरविलासिनीःददातिजनसंघातान्ग्रैवेयैः कंकणैःशुभैः स्वनामांकैःस्वयंराजातोषयेत्स्वजनान्पृथक् तथागणाधिपत्यांश्चतथामल्लान्भटान्नरान् वृषभान्महिषांश्चैवयुध्यमानान्परैःसह गजानश्वांश्चयोधांश्चपदातीन्समलंकृतान् मंचारूढःस्वयंपश्येन्नटनर्त्तकचारणान् क्रुद्धापयेच्चसर्वत्रगोमहिष्यादिकांस्ततःवृषान्धर्षापयेद्गोभिरुक्तिप्रत्युक्तिवादिभिः ततोपराह्णसमयेपूर्वस्यांदिशिभारत मार्गपालींप्रबध्नीयात्तुंगस्तंभेथपादपे कुशकाशमयींदिव्यांलंबकैर्बहुभिर्वृतां दीक्षयित्वागजानश्वान्सार्धयामत्रयगेते गावोवृषाःसमहिषामंडिताघंटिकोत्कटाः कृतेहोमेद्विजेंद्रैस्तुवध्नीयान्मार्गपालिकां दुर्गामंत्रेण

होमस्तुघृतेनाष्टोत्तरंशतं नमस्कारंततःकुर्य्यान्मंत्रेणानेनसुव्रतः मार्गपालिनमस्तुभ्यंसर्वलोकनमोस्तुते विधेयैःपुत्रदाराद्यैःपुनरेहिव्रजस्वभो नीराजनंचकर्त्तव्यंतत्रैवराष्ट्रवर्द्धनं मार्गपालीतलेनैवनेयागावोगजावृषाः राजानोराजपुत्राश्चब्राह्मणाःशूद्रजातयःमार्गपालिंसमुल्लंघ्यनीरुजःस्युःसुखान्विताःयोयादृशेनभावेनतिष्ठत्यस्यांयुधिष्ठिर हर्षदैन्यादिरूपेणतस्यवर्षंप्रयातिहि रुदितेरोदितेवर्षंहृष्टेवर्षंप्रहृष्यति भुक्तौभोक्ताभवेद्वर्षंस्वस्थःस्वस्थेभविष्यति तस्मात्प्रहृष्टैस्तुष्टैस्तुकर्त्तव्याकौमुदीनरैः वैष्णवीदानवीचेयंतिथिःपैत्रीयुधिष्ठिरेति ॥ इतिकार्त्तिकशुक्लप्रतिपदायांकौमुदीमहोत्सवैः कौमुदीमहोत्सवःशक्तेनदिनद्वयेकार्य्यःअशक्तेनैकदिनेएव अथास्यानिर्णयःइयंचबलिपूजनेगोपूजनादौचपूर्वविद्धाग्राह्या तथाचबृहद्यमः ॥ श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी पूर्वविद्धैवकर्त्तव्याशिवरात्रिर्बलेर्दिनमिति । तथाच प्रतिपद्दर्शसंयोगेपूजनंतुगवांमतं परविद्धेतुयःकुर्यात्पुत्रदारधनक्षयः याकुहूःप्रतिपन्मिश्रातत्रगाःपूजयेन्नृपः पूजनेत्रीणिवर्द्धन्तिप्रजागावोमहीपतिरितिदेवलवचनाच्च माधवोपि बल्यर्चनंचपूर्वेद्युरुपवासवदाचरेदिति । दिनद्वयेसायाह्नव्याप्तौतुपरैवग्राह्या तदुक्तंनिर्णयामृतेपुराणसमुच्चये वर्द्धमानतिथौनंदासार्द्धयामात्रिकायदा द्वितीयावृद्धिगामित्वादुत्तरेतत्रचोच्यते तत्रगोपूजनादौ स्मृत्यंतरेपि ॥ त्रियामगादर्शतिथिर्भवेच्चेत्सार्द्धत्रियामाप्रतिपद्विवृद्धौ दीपोत्सवेतेमुनिभिःप्रदिष्टेऽतोन्यथापूर्वयुतेविधेये । इति त्रियामगेत्यनेनचंद्रदर्शनाभावउक्तः द्वितीयायाःपंचधाविभक्तदिनचतुर्थांशरूपापराह्णदीप्त्याभावेचंद्रदर्शनासंभवात् अत्रदीपोत्सवपदेनगोपूजनादिकमेवगृह्यते कालानुरोधात् ननुबलिपूजादिकालप्रसंगान् चंद्रदर्शनाभावप्रयोजकसार्द्धयामोक्तिसामर्थ्याच्चपूजायां दीपदानसत्वेनदीपोत्सवपदस्यउभयत्रसंभवाच्चअमावास्यांयामपिस्त्रियःक्रीडंत्यमायांचगावोनंदासुकार्त्तिके इतिवचनोक्तेःस्त्रीक्रीडनंपीपसंबंधात्तत्रापिदीपोत्सवपदस्यसं

वंधात् यानितु भद्रायांगोकुलक्रीडासदेशोवैविनश्यति भद्रायां द्वितीयायां तथाप्रतिपद्याधिकरणं द्वितीयायांतुगोर्चनं पत्रच्छेदंचकुरुतेवित्तनाशंकुलक्षयमित्यादीनि निषेधवाक्यानिपूर्वदिनेप्रतिपदःसायाह्नव्यापित्वे द्वितीयादिनेचंद्रदर्शनसंभवेज्ञेयानि यद्यपि पूर्वान्हेक्रीडनंगवां । चंद्रोदयेतुतत्रैवपूजयेत्सुरभीस्तथेत्यादिवचनाच्च प्रातःकालव्यापिन्युत्तरैवगोक्रीडनादौप्रतिभाति तथापि गवांक्रीडादिनेयत्रराात्रौदृश्येतचंद्रमाः सोमो राजापशून्हंतिसुरभेःपूजकांस्तथेति देवलेनप्रतिषिद्धत्वात्सानतत्रग्राह्या नीराजनमंगलपालिकेतूत्तरस्यामेवकार्य्ये तथाचमदनरत्ने ब्रह्मपुराणे ॥ कार्त्तिकेशुक्लपक्षेतुविधानद्वितयंभवेत् नारीनीराजनंप्रातःसायंमंगलपालिका अथचेत्प्रतिपत्स्वल्पानारीनिराजनंभवेत् द्वितीया यांतदाकुर्य्यात्सायंमंगलपालिकामिति लभ्यते यदिवाप्रातःप्रतिपद्घटिकाद्वयं तस्यांनीराजनंकार्य्यंसायंमंगलपालिकेति भविष्यपुराणाच्च देविपुराणेपि ॥ प्रातर्वायदिलभ्येतप्रतिपद्घटिकाद्वयं द्वितीयायांतदाकार्यासायंमंगलपालिका आश्विनांतेयदादर्शेनारीनीराजनं भवेत् नारीणांतत्रवैधव्यंदेशेदुर्भिक्षमेवच कार्तिकेशुक्लपक्षादौअमावास्याघटीद्वयं देशभंगभयान्नैवकुर्यान्मंगलपालिकामिति इयंप्रतिपत्तैलाभ्यंगेतुपूर्वविद्धैवग्राह्या बलिराज्येतस्योक्तेः बल्युत्सवंचपूर्वेद्युरितिवचने बल्युत्सवेपूर्वविद्धायाएवपूर्वग्राह्योक्तिः यत्तुतिष्यर्केनंदायामुदयेभ्यंगंकृत्वानीराजनंततः सुवेषःसत्कथागानैर्दानैश्च दिवसंनयेदितिज्योतिर्निबंधधृतवचनादभ्यंगेउत्तरविद्धाग्राह्येत्युक्तं तन्न एतद्वचनस्य हेमाद्र्यादिसकलनिबंधकारैरलिखनान्निर्मूलं ॥ अत्रतैलाभ्यंगोनित्यः । वत्सरादौवसंतादौबलिराज्येतथैवच तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यत इतिवृद्धवसिष्ठवचनात् । अत्रस्नानादिनित्यकर्मानंतरंगोवर्द्धनपूजादिकार्य्यं तदुक्तंभविष्योत्तरेहेमाद्रौ ॥ प्रातर्गोवर्द्धनःपूज्योद्यूतंचापिसमाचरेत् भूषणीयास्तथागावःपूज्याश्चावाहदोहनाइति गोवर्द्धनपूजामंत्रः

॥ गोवर्द्धनधराधारगोकुलत्राणकारक विष्णुबाहुकृतोच्छ्रायगवांकोटिप्रदोभव गोवर्द्धनःप्रकर्त्तव्योराजतःपलसम्मितः छत्राकारोमहावृक्षैःशोभितःपक्षिभिर्वृतःगोपगोपीसमाकीर्णोमहावृक्षसमान्वितइत्यादि ॥ कार्त्तिककृष्णत्रयोइयांगोत्रिरात्रिव्रतोक्तंसाविस्तरंगोवर्द्धनपूजादकंसर्वंविधेयं अथगोपूजनमंत्रः ॥ लक्ष्मीर्यालोकपालानांधेनुरूपेणसंस्थिता घृतंवहतियज्ञार्थेममपापंव्यपोहतु अग्रतःसंतुमेगावोगावोमेसंतुपृष्ठतः गावोमेहृदयेसंतुगवांमध्येवसाम्यहमिति ततोऽपराह्णेमार्गपाल्युल्लंघनादिकार्य्यं तद्विधिःपुर्वमुक्तःसचेत्थं ततोपराह्णसमये पूर्वस्यांदिशिभारत मार्गपालींप्रबध्नीयात्तुंगेस्तंभेथपा दपे कुशकाशमयींदिव्यांलंबकैर्बहुभिर्वृतां दीक्षयित्वा गजानश्वान्सायंतस्यास्तलेनयेत् गावोवृषाःसमाहिषः मंडिताघंटिकोत्कटाः कृतेहोमेद्विजेंद्रस्तुबध्नीयान्मार्गपालिकां दुर्गामंत्रेणहोमस्तुघृतेनाष्टोत्तरंशतं दुर्गामंत्रोत्रजात वेदसइत्यादिर्वैदिकाः उँदुर्गेरक्षिणीत्याद्यागमोक्तोवा ॥ नमस्कारंततःकुर्य्यान्मंत्रेणानेनसुव्रतः मार्गपालिनमस्तेस्तुसर्वलोकसुखप्रदे विधेयैःपुत्रदाराद्यैःपुनरेहिव्रजस्वमे नीराजनंचतत्रैवकर्त्तव्यंराष्ट्रवृद्धिदं मार्गपालीतलेचेत्थंयांतिगावोगजावृषाः राजानोराजपुत्राश्चब्राह्मणाःशूद्रजातयः मार्गपालींसमुल्लंघ्यनीरुजःस्युःसुखान्विताः अत्रशेषआदित्यपुराणे । कुशकाशमयींकुर्याद्यष्टिकांसुदृढांनवां तामेकतोराजपुत्राहीनवर्णास्तथान्यतःगृहीत्वाकर्षयेयुस्तांयथासारंमुहुर्मुहुः जयोत्रहीनवर्णानांजयोराज्ञोनवत्सरं जयचिन्हमिदंराजाविदधीतप्रयत्नतः । ततोबलिपूजाविधानं । कृत्वैतत्सर्वमेवेहरात्रौदैत्यपतेर्बलेः पूजांकृत्वान्नृपःसाक्षाद्भूमौमंडलकेशुभे बलिमालिख्यदैत्येंद्रंवर्णकैःपंचरंगकैः सर्वाभरणसंपूर्णंविंध्यावल्यासहोषितं कूष्मांडवाणजंभोरुमुरुदानवसंवृतं संपूर्णहृष्टवदनंकिरीटोत्कटकुंडलं द्विभुजंदैत्यराजानंकारयित्वान्नृपःस्वयंगृहस्यमध्यशालायांविशालायांततोर्चयेत् भ्रात

मातृजनैःसार्द्धंसंतुष्टोबंधुभिस्ततः कमलैःकुमुदैःपुष्पैःकल्हारैःकुमुदोत्पलैः गंधपुष्पान्ननैवेद्यैरक्षतैर्गुडपूपकैःमद्यमांससुरालेह्यदीपवल्युपहारकैःमंत्रेणानेनराजेंद्रसमंत्रीसपुरोहितः बलिपूजामंत्रः । बलिराजनमस्तुभ्यंविरोचनसुतप्रभो भविष्येंद्रसुराराते पूजेयंप्रतिगृह्यतां एवंपूजांनृपःकृत्वारात्रौजागरणंततः कारयेत्प्रेक्षणीयादिनटनर्त्तकनाटकैः लोकश्चापिगृहस्यांतःशय्यायांशुक्लतंडुलैः संस्थाप्यबलिराजानंफलैःपुष्पैश्चपूजयेत् बलिमुद्दिश्यदीयंतेदानानिकुरुनंदन यानितान्यक्षयाण्याहुर्मयैतत्संप्रदार्शितं अत्रवल्युद्देशेनदीपदानमप्युक्तंवामनपुराणे वामनकर्तृवरदानव्याजेन ॥ वीरप्रतिपदंप्राप्यतवभावीमहोत्सवः तत्रत्वांनरशार्दूलहृष्टास्तुष्टाःस्वलंकृताः अर्घ्यदीपप्रदानेनअर्चयिष्यंतिमानवाः ॥ इतिब्रह्मपुराणे एवंपूजांनृपःकृत्वारात्रौजागरणंततइति इतिकार्त्तिकशुक्लप्रतिपदांतंकौमोदकीमहोत्सवः कार्त्तिकशुक्लद्वितीयायमद्वितीयासाचपराह्णव्यापिनीग्राह्येत्युक्तं निर्णयामृतादौ मध्याह्नव्यापिनीपूर्वविद्धाचेतिहेमाद्रिः इयंयाकर्म्मकालव्यापिनीसैवग्राह्या दिनद्वयेकर्म्मकालव्याप्तावव्याप्तौवाद्वितीयासामान्यनिर्णयेद्रष्टव्येतिमदनः अष्टधाविभक्तदिनपंचमभागव्यापिनीग्राह्येतिस्मार्त्ताः अपराह्णशब्देनात्रिधाविभक्तदिनोत्तरविभागोग्राह्य इतितु युक्तमिति कृत्यरत्नावल्यां अत्रकृत्यमुक्तं स्कांदे ऊर्जशुक्लद्वितीयायामपराह्णेर्चयेद्यमं स्नानंकृत्वाभानुजायांयमलोकंनपश्यति ऊर्ज्जशुक्लद्वितीयायांपूजितस्तर्पितोयमः महिषासनमारूढोदंडमुद्गरधारीभिःवेष्टितःकिंकरैर्हृष्टैस्तस्मैयच्छतिवांछितं यमुनायांस्नानंकृत्वायमंसंतर्पयेच्च अस्यांभगिनीभिर्भ्रातृपूजनंकार्य्यं तथाचलिंगपुराणे कार्त्तिकेतुद्वितीयायांशुक्लायांभ्रातृपूजनं यानकुर्य्याद्विनश्यंतिभ्रातरःसप्तजन्मसु तस्याइतिशेषः भविष्योत्तरेपि कार्त्तिकेशुक्लपक्षेतुद्वितीयायांयुधिष्ठिर यमोयमुनयापूर्वंभोजितःस्वगृहेस्वयं अतोयमद्वितीयासाप्रोक्तालोकेनराधिप अस्यांनिजगृहेपार्थनभोक्तव्य

मतोबुधैः यत्नेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्द्धनं दानानिचप्रदेयानिभगिनीभ्योविशेषतः स्वर्णालंकारवस्त्रादिपूजासत्कारभोजनैःसर्वाभगिन्यःसंपूज्याअभावेप्रतिपन्नकाः ॥ प्रतिपन्नकाः प्रतिपन्नाभगिनीत्वेनव्यवहृताइत्यर्थः पितृव्यभगिन्यइतिहेमाद्रिः मित्रभगिन्यइत्यपिहेमाद्रिः ब्रह्मांडेतु ॥ यातुभोजयतेनारीभ्रातरंयुग्मकेतिथौअर्चयेद्वापितांबूलैर्नसावैधव्यमाप्नुयात् भ्रातुरायुःक्षयोराजन्नभवेत्तत्रकर्हिचित् चित्रगुप्तस्यपूजांतुकुर्याद्ज्ञानविवृद्धये मसीपात्रंलेखनींचसंपूज्यचप्रयत्नतः सर्वान्कामानवाप्नोतियमलोकंनपश्यति गौडग्रंथेतु यमंचचित्रगुप्तंचयमदूतांश्चपूजयेत् अर्घ्यश्चात्रप्रदातव्योयमायसहजद्वये भ्रातृभगिनीभिरित्यर्थः अत्रार्घ्यदानमंत्रः ॥ एह्येहिमार्त्तंडजपाशहस्तयमांतकालोकधरामरेश भ्रातृद्वितीयाकृतदेवपूजांगृहाणसर्वांभगवन्नमस्ते पूजानंतरं प्रणाममंत्रः धर्म्मराजनमस्तेस्तुनमस्तेयमुनाग्रज पाहिमांकिंकरैःसार्द्धंसूर्यपुत्रनमोऽस्तुते यमुनापूजामंत्रः ॥ यमस्वसर्नमस्तेस्तुयमुनेलोकपूजिते वरदाभवमेनित्यंसूर्य्यपुत्रिनमोस्तुते क्वचिद्भ्रातृभोजनदानेऽपिमंत्रः ॥ भ्रातस्तवानुजाताहंभुंक्ष्वभक्तमिमंशुभं प्रीतयेयमराजस्ययमुनायाविशेषतः । ज्येष्ठाभगिनीचेत्सातवाग्रजाताहमितिपठेत् इतिहेमाद्र्यादिषुप्रोक्तं यमद्वितीयाकृत्यं अथभविष्योत्तरोक्तं यमद्वितीयाकृत्यं ॥ श्रीकृष्णउवाच संत्येतास्तिथयःपार्थद्वितीयाद्याश्चविश्रुताः मासैश्चतुर्भिश्चतस्रःप्रावृट्कालेमलापहाः गोपितास्ताःसदापार्थनप्रोक्ताश्चमयाक्वचित् प्रकाशयामिताःसम्यक्शृणुसर्वाःसमाहितः प्रथमाश्रावणेमासितथाभाद्रपदेपरा तृतीयाश्वयुजेमासिचतुर्थीकार्त्तिकेभवेत् श्रावणेकलुषानामतथाभाद्रेतुगीर्मला आश्विनेप्रेतसंचाराकार्तिकेयाम्यकामता युधिष्ठिरउवाच कस्मात्साकलुषानामकस्मात्सागीर्मलामता कस्मात्साप्रेतसंचाराकस्माद्याम्याप्रकीर्त्तिता श्रीकृष्णउवाच पुरावृत्रवधेवृत्तेप्राप्तराज्येपुरंदरे ब्रह्महत्यापनोदार्थमश्वमेधेप्रकीर्त्तिते क्रोधादिंद्रेणवैब्रह्महत्यासा

विनिषूदिता षड्विधासाक्षितौक्षिप्तावृक्षेतोयेमहीतले नार्य्यांवन्हौब्रह्महणिसंविभज्ययथाक्रमं तत्पापंश्रावणेव्यूढंद्वितीयायांदिनोदये नारीवृक्षनदीभूमिवान्हिब्रह्महणंतथा निर्मलीकरणाज्जातायतःसाकलुषामता मधुकैटभयोरक्तेपुरा मग्नातुमेदिनी अष्टांगुलापवित्रास्यान्नारीणांतुरजोमलं नद्योजलमलाःसर्वावन्हेर्धूमशिखामलं कलुषाविचरंत्यस्यांतेनसाकलुषामता कृतप्रायश्चित्तान्परित्यज्यअकृतप्रायश्चित्तान्गृहीतुंविचरंति अतएवतस्यांप्रातिवर्षंप्रायश्चित्तंकर्त्तव्यमित्यर्थः ॥ गीर्गिराभारतीवाणीगीतामेधासरस्वती गीर्मलंवाहतेयस्माद्द्वितीयागीर्मलामता देवर्षिपितृधर्म्मणामिदंकानास्तिकाःखलाःतेषांसावाङ्मलंव्यूहाद्वितीयागीर्मलामता अनध्यायेषुशास्त्राणिपाठयंतिपठंतिचशाब्दिकास्तार्किकाःश्रौतास्तेषांयेशब्दजाःस्मृताः मलाव्यूहाद्वितीयायांततोर्थगीर्मलामता अतस्तेषांसरस्वती पूजाकार्य्येत्यर्थः ॥ प्रेतास्तुपितरःप्रोक्तास्तेषांतस्यांतुसंचरः द्वितीयायामतोलोकेतेनसाप्रेतसंचरा अग्निष्वात्तावर्हिषदआज्यपाःसोमपास्तथा पितामहादयःसर्वेयेचान्येप्रेतसंचराः पुत्रैःपौत्रैश्चदौहित्रैःस्वधामंत्रैश्चपूजिताः श्राद्धदानमखैस्तृप्तायांत्यतःप्रेतसंचरा अतस्तस्यांपथिश्राद्धंकार्य्यमित्यर्थः ॥ कार्त्तिकेशुक्लपक्षस्याद्वितीयायांयुधिष्ठिर यमोयमुनयापूर्वंभोजितःस्वगृहेतदा द्वितीयायांमहोत्सर्गेनारकीयाश्चतर्पिताःपापेभ्योपिविनिर्मुक्तास्तेमुक्ताःसर्ववंधनात् अंशिताश्चापिसंतुष्टाःस्थिताःसर्वेयदृच्छया तेषांमहोत्सवोवृत्तोयमराष्ट्रसुखावहः अतोयमद्वितीयासाप्रोक्तालोकेयुधिष्ठिर अस्यांनिजगृहेपार्थनभोक्तव्यमतोवुधैः स्नेहेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्द्धनं दानानिचप्रदेयानिभगिनीभ्योविधानतः स्वर्णालंकारवस्त्राणिपूजासत्कारभोजनैः सर्वाभगिन्यःसंपूज्याअभावेप्रतिपन्नकाःपितृव्यभगिनीहस्तात्प्रथमायांयुधिष्ठिर पितृव्यभगिनीपितृव्यसुतेत्यर्थः मातुलस्यसुताहस्ताद्द्वितीयायातथानृप पितुर्मातुःस्वसुःकन्येतृतीयायांतयोःकरात् भोक्तव्यंसहजायाश्चभगिन्याहस्ततः

परं सर्वासुभगिनीहस्ताद्भोक्तव्यंबलवर्द्धनं सर्वासुसर्वद्वितीयास्वित्यर्थः धन्यंयशस्यमायुष्यंधर्म्मकामार्थसाधकं आख्यातंसकलंपार्थसरहस्यंमयातव यस्यांतिथौयमुनयायमराजदेवःसंभोजितश्चभवतिस्वसृसौहृदेन तस्यांस्वसुःकरतलादिहयोभुनक्तिप्राप्नोतिवित्तमथभोगचयंतदेव ॥ श्रावणशुक्लद्वितीयायां भाद्रशुक्लद्वितीयायामाश्विनशुक्लद्वितियायांकार्त्तिकशुक्लद्वितीयायांचेदंयमद्वितीयाकृत्यंयथासंभवमनुष्ठेयम् इतिभविष्योत्तरोक्तंकार्त्तिकशुक्लयमद्वितीयाव्रतंसमाप्तंशुभम् कार्त्तिकशुक्लतृतीयायांविष्णुगौरीव्रतं नारदीये ऊर्ज्जशुक्लतृतीयायांविष्णुगौरीव्रतंचरेत् पूजयेत्तांजगद्वंद्यामुपचारैःपृथग्विधैः सुवासिनीर्भोजयित्वामंगलद्रव्यपूजिताः विसर्जयेत्प्रणम्यैताविष्णुगौरीप्रतुष्टये कार्त्तिकशुक्लचतुर्थ्यां नागव्रतं स्कांदे कार्त्तिकशुक्लपक्षमाधिकृत्य ॥ तिथौयुगाव्हयायांतुसमुपोष्ययथाविधि शंखपालादिनागानांशेषस्यचमहात्मनः पूजाकार्य्यापुष्पगंधक्षीराप्यायनपूर्विकेतिमदनरत्ने कूर्मपूराणे नारदीये ॥ ऊर्जशुक्लचतुर्थ्यांतुनागव्रतमुदाहृतं प्रातःकृत्वातुसंकल्प्यधेनुशृंगजलंशुचिः पीत्वास्नात्वाचमध्याह्नेशंखपालादिपन्नगान् शेषंचाव्हानपूर्वैस्तुपूजयेदुपचारकैः क्षीरेणाप्यायनंकुर्य्यादेतन्नागव्रतंस्मृतं एवंकृतेतुविप्रेंद्रऋद्धिर्नागव्रतेशुभा विषाणिनश्यंत्यचिरान्नचदंशंतिपन्नगा इति०

एतच्चमध्यान्हव्यापिन्यांकर्त्तव्यं तथाचस्कंदपुराणे ॥ युगेमध्यंदिनेयत्रतत्रोपोष्यफणीश्वरान् विषाणितस्यनश्यंतिनाहिहिंसंतिपन्नगाः इतिनागव्रतं कार्त्तिकशुक्लपंचम्यां जयापंचमीव्रतं नारदीये ॥ कार्त्तिकेशुक्लपंचम्यांजयाव्रतमनुत्तमं कर्त्तव्यंपापनाशायश्रद्धयाद्विजसत्तम पूजयित्वाजयांविप्रयथाविधिसमाहितः उपचारैःषोडशभिस्ततःशुचिरलंकृतः विप्रैकंभोजयित्वापितस्मैदद्याच्चदक्षिणां विसर्जयेत्ततःपश्चात्सायंभुंजीतवाग्यतः यस्तुवैभक्तिसंयुक्तःस्नानंकुर्याज्जयादिने नश्यंतितस्यपापानिसिंहाक्रांतामृगायथा यदश्वमेधावभृथेफलंस्नानेन

कीर्त्तितं तत्फलंप्राप्यतेविप्रवंध्यागर्भंचविंदति रोगीरोगात्प्रमुच्येतबद्धोमुच्येतबंधनात् इतिनारदीयपुराणे चतुर्थपादेकार्तिकशुक्लाजयापंचमी अथकार्त्तिकशुक्लंपचम्यांजयापंचमीव्रतं भविष्योत्तरे ॥ श्रीकृष्णउवाच माहात्म्यमपिवक्ष्यामिपंचम्यास्तवभारत जयेतियाचविख्याताव्रतिनांपापनाशिनी परिपूर्णंकृतंयस्यांसाज्ञेयाजयपंचमी जयाचविजयाचैवजयंतीपापनाशिनी जयाकार्त्तिकशुक्लायापंचमी ॥ केशवोभगवान्शंभुर्गंगाद्याःसरितस्तथा प्रभासाद्यानितीर्थानिजंबूद्वीपसरांसिच प्रयागंपुष्करंचैवकुरुक्षेत्रंगयातथा एतान्यन्यानितीर्थानिव्रतिनःस्नापयंत्पुत तस्मात्सर्वप्रयत्नेनस्नानंकुर्याज्जयादिने स्नेहनोद्वर्त्तनेनैवद्विजान्संस्नापयेद्बहून् तीर्थैप्रस्रवणेगत्वास्थापयेत्सजयंहरिं जयासहितंसजयमित्यर्थः । शंखचक्रगदापाणिंवामभागेजयास्थितां वरदाभयहस्तांचश्वेतांहंसोपरिस्थितां पूजयेद्विविधैः पुष्पैर्धूपनैवेद्यजातिभिः एभिर्मंत्रैस्तुतंदेवंजयांचप्रतिपूजयेत् पादौवैपद्मनाभायजानुभ्यामाधवायच ऊरूवैनारसिंहायमेढ्रंवैमन्मथायच दामोदरायोदरंचवक्षः श्रीवत्सधारिणे श्रीवत्सायेतिकंठंचवाहूसर्वास्त्रधारिणे मुखंपद्ममुखायेतिशिरः सर्वात्मनेनमः अनेनविधिनाचैवपूजयेद्गरुडध्वजं अनंतरंतुतांदेवींवंशपात्रोपरिस्थितां जातीलताधोभागस्थांतांदेवींप्रतिपूजयेत् नमः पुष्ट्यैपादयुग्मेजानुभ्यांतुश्रियेनमः नंदायैकटिदेशेचविजयायैचवक्षसि शिरःसर्वार्थदायिन्यैसर्वांगेविजयांतथा विधिनानेनसंपूज्यपूजयेद्विजयाहरी जयायजयरूपायजयगोविंदरूपिणे जयदामोदरायेतिजयसर्वनमोस्तुते अर्घ्यमंत्रः । वेणुपात्राणिसर्वाणिसप्तधान्ययुतानिच रक्तसूत्रेणसंसूत्र्यसफलानिनिवेदयेत् संसूत्र्यसंवेष्ट्य यथावेणुदलंदृष्ट्वातुष्यतेमधुसूदनः तथामेऽस्तुशुभंसर्वंवेणुपात्रप्रदानतः वेणुपात्रदानमंत्रः । अनेनविधिनाचैवदद्यात्पात्राणिगोसुरे व्रह्मांडपुराणे । रक्षावंधंततःकुर्यात्सुहृत्स्वजनवांधवैः अक्षताःसर्षपादूर्वारक्षामध्येचरोचनाः येनबद्धोवलीराजा

दानवेंद्रोमहाबलः तेनत्वामनुबध्नामिरक्षेमाचलमाचल इतिरक्षामंत्रः । रक्षाबंधंनरोयस्तुकुर्याद्भक्तिसमान्वितः नतस्यग्रहपीडास्यान्नचमृत्युभयंतथा भूतवेतालयक्षाद्यैःपिशाचैर्नाभिभूयते रक्षायाबंधनंकृत्वासंग्रामंप्रविशेन्नरः जयतेसरिपून्सर्वान् जीयतेनचकेनचित् तस्मात्सर्वप्रयत्नेनरक्षाबंधंतुकारयेत् यस्तुवैभक्तिभावेनस्नानंकुर्याज्जयादिने कुतस्तस्यैवपापानिमाघमासप्लवेयथा यथाश्वमेधावभृथंतादृशंकारयेद्बुधः जलांजलिस्तुविधिना क्षिप्यतेयत्रमूर्द्धनि ब्रह्महत्यादिपापेभ्योमुच्यतेनात्रसंशयः अपुत्रोलभतेपुत्रान्वंध्यागर्भंचाविंदति रोगीरोगैर्विमुच्येतप्रयातिहरिमंदिरं ॥ इतिभविष्योत्तरोक्तंकार्तिकशुक्लपंचम्यांजयापंचमीव्रतम् कार्त्तिकशुक्लषष्ठ्यांभौमवारयुतायांवह्निंसंपूज्यमहोत्सवंकुर्यात् तदुक्तंनारदीये ॥ कार्त्तिकेशुक्लषष्ठ्यांतुषण्मुखेनमहात्मनादेवसेनामहाभागलब्धासर्वसुरार्चितः अतस्तस्यांसुरश्रेष्ठान्देवसेनांचषण्मुखं संपूज्यनिखिलैरेवउपचारैर्मनोहरैः प्राप्नुयादतुलां सिद्धिंमनोभीष्टांद्विजोत्तम अत्रैववह्निपूजोक्तातांचसम्यक्समाचरेत् विविधैर्द्रव्यहोमैश्चवन्हिपूजापुरस्सरं मत्स्यपुराणे । वृश्चिकार्केशुक्लषष्ठीभौमवारउपास्थिता महाषष्ठीतुसाप्रोक्तासर्वपापहरातिथिः तस्यांस्वपितिवैवन्हिःपूर्वत्रोपोष्यवैदिने षष्ठ्यांवान्हिंसमभ्यर्च्यकृत्वावन्हिमहोत्सवं ०। वृश्चिकार्केकार्त्तिकेमासीतिकालादर्शे सर्वासु षष्ठीषुविशेषात्कार्त्तिकेकृत्यविशेषोभविष्योत्तरेपि ॥ षष्ठ्यांफलाशनोराजन्विशेषात्कार्त्तिकेनृप राज्यच्युतोविशेषेण स्वंराज्यंलभतेचिरात् दत्त्वार्घ्यंकार्त्तिकेमासिस्थित्वावैदक्षिणामुखः दध्नाघृतोदकैःपुष्पैर्मंत्रेणानेनसुव्रत सप्तर्षिदारजस्कंदसेनाधिपमहाबल रुद्रोमाग्निजषड्वक्त्रगंगागर्भनमोस्तुते प्रीयतांदेवसेनानीःसंपादयतुहृद्गतं दत्त्वा विप्रायचामान्नंयच्चान्यदपिवर्त्तते पश्चाद्भुक्तेत्वसौरात्रौभूमिंकृत्वातुभाजनमिति ॥ एवमब्दपर्यंतंषष्ठीषुराजंतस्कंदंसंपूज्यविप्रायदद्यादितिदिवोदासः ॥ इतिकार्त्तिकशुक्लषष्ठीकृत्यं कार्त्तिकशुक्लसप्तम्यांशाकसप्तमीव्रतं ॥

नारदीये अथकार्त्तिकशुक्लायांशाकाख्यासप्तमीव्रतं तस्यांतुसप्तशाकानिसुवर्णकमलानिच प्रदद्यात्सप्तविप्रेभ्यः शाकाहारस्ततःपरं द्वितीयेह्निद्विजान्भोज्यदद्यात्तेभ्योथदक्षिणां विसृज्यबंधुभिः सार्द्धस्वयंभुंजीतवाग्यतइति कार्त्तिकशुक्लाष्टमीगोपाष्टमी तत्रगोपूजाकार्य्या तदुक्तंनिर्णयामृते कूर्मपुराणे ॥ शुक्लाष्टमीकार्त्तिकेतु स्मृतागोपाष्टमीबुधैः तत्रकुर्य्याद्गवांपूजांगोग्रासंगोप्रदक्षिणां गवानुगमनंकार्य्यंसर्वान्कामानवाप्नुयात् नारदीयेपि । गोपाष्टमीतुसाप्रोक्ताकार्त्तिकेधवलेदले तत्रकुर्य्याद्गवांपूजांगोग्रासंगोप्रदक्षिणां गवानुगमनंदानंवाञ्छन्सर्वाश्चसंपदः भविष्योत्तरेपि । गोपाष्टम्यांगवांपूजागोग्रासंगोप्रदक्षिणं गवानुगमनंदानंसर्वपापप्रणाशनमिति । अत्रगोपूजादिकं गोदानविधिना कार्य्यम् इयंचकंदर्पकल्पादिः कल्पादिप्रकरणोक्तंश्राद्धादिकमपिकार्य्यम् कार्त्तिकशुक्लनवमी कृतयुगादिः तदुक्तं वैशाखमासस्यतुयातृतीयानवम्यसौकार्त्तिकशुक्लपक्षइत्यादियुगादिनिर्णये ॥ इयंच पूर्वाह्नव्यापिनीग्राह्याशुक्लपक्षस्थत्वात् निर्णयस्तुपूर्वमेवोक्तः तदुक्तंहेमाद्रौ देवीपुराणे । शुक्लपक्षेनवम्यांयःकार्त्तिकस्यसमाहितः स्नायान्नद्यांनमस्कुर्य्यादक्षयंलभतेफलमिति अत्रश्राद्धंकर्त्तव्यं तथाचकृत्यतत्त्वार्णवे ॥ कार्त्तिकेनवमीशुक्लापितॄणांतृप्तिदासदा तस्यांस्नानंतथादत्तमनंतफलसाधकमिति ब्रह्मांडपुराणे । आषाढ्यामथकार्त्तिक्यांमाघ्यांमन्वंतरादिषु युगादिषुचदुःस्वप्नेजन्मर्क्षेग्रहपीडिते प्रौष्ठपद्यसितेपक्षेश्राद्धंकुर्वीतयत्नतः । अस्यांगोदानादिकमुक्तं विष्णुपुराणे । अस्मिंश्चगोभूमिहिरण्यवस्त्रदानेनसर्वंप्रविहायपापं शृरत्वमिंद्रस्यसुहृत्त्वमेतिमर्त्याधिपत्यंलभतेमनुष्यइति अस्यामेवकूष्मांडदानाचारः तथाच सनत्कुमारसंहितायांकार्त्तिकमाहात्म्ये ॥ बालखिल्याऊचुः कार्त्तिकेशुक्लनवमीतत्राभूद्द्वापरंयुगं पूर्वापराह्णगाग्राह्याक्रमाद्दानोपवासयोः अत्रकूष्मांडकोनामहतोदैत्यस्तुविष्णुना तद्रोमभिःसमुद्भूतावल्ल्यः कूष्मांडसंभवाः

तस्मात्कूष्मांडदानेनफलमाप्नोतिनिश्चितं   अत्रकूष्मांडदानविधिःतत्रकर्ताशुचिर्भूत्वाप्राङ्मुखउपविश्याचम्यकू-
ष्मांडंसुवर्णगर्भितं वस्त्रेणावेष्ट्य देयव्राह्मणंसंपूज्य ॐमद्यकार्त्तिकशुक्लनवम्यांयुगादितिथौव्रह्महत्यादिसकलपा
पक्षयपूर्वकसर्वारिष्टशांतिकामइदंकूष्मांडफलंससुवर्णवस्त्रसंवेष्टितं विष्णुदैवतं यथानामगोत्रायव्राह्मणायदातुम
हमुत्सृजे सुवर्णदानदक्षिणांदत्वा मंत्रंपठेत् ॥ व्रह्महत्यादिपापानांव्रह्मणानिर्म्मितंपुरा कूष्मांडंवहुवीजाढ्यमतः
शांतिंप्रयच्छमे पापानामित्यनंतरंक्षयार्थमितिशेषः अत्रैवमथुरासेतुप्रोक्ता मथुरादिनगरप्रदक्षिणा तथाचोक्तं
पाद्मे ॥ नारदउवाच प्रदक्षिणोद्भवंपुण्यंनभूतंनभविष्यति कार्त्तिकेशुक्लपक्षेतुनवमीयामहेश्वर तस्यांप्रदक्षि
णीकृत्यसर्वपापात्प्रमुच्यते तथासत्ययुगादिश्चनवमीकार्त्तिकेसिता अत्रद्वापरकृतयुगयोर्युगादिदिनत्वंकल्पभेदेन
ज्ञेयं । तस्यांस्नानंहुतंदत्तमनंतफलदंभवेत् कुमुदस्यतुमासस्यमथुरायांनृपोत्तम प्रदक्षिणैर्नवम्यांतु पूतोभव
तिपातकात् । क्रमतःपादविन्यासायावंतःसर्वतोदिशं तावंतःकुलसंभूतालोकेतिष्ठंतिशाश्वते मथुरादूरसंस्था वे
त्तदन्यांतुमहापुरीं अभावेयत्रसंस्थश्चकुर्य्यात्तस्याःप्रदक्षिणाः तदशक्तौविप्रहरिगोगृहाणांप्रदक्षिणा गुह्याद्गु
ह्यतरंचान्यद्वक्ष्यामितवप्रीतितः सालिग्रामस्यदेवस्यतुलस्याश्चप्रदक्षिणा तत्समाभूपतिश्रेष्ठनभूतानभवि
ष्यति सप्तद्वीपवतीभूमिःसवनौषधिसागरा तस्याःप्रदक्षिणापुण्यंसालिग्रामप्रदक्षिणात् कृताप्रदक्षिणायेनसालि
ग्रामस्यशार्ङ्गिणः तेनकृताःपंचक्रोश्याःशतशश्चप्रदक्षिणाः गोकोटिदानेग्रहणेप्रयागेवासउत्तमः अश्वमेधायुतंपुण्यं
सालिग्रामप्रदक्षिणात् गवांचव्राह्मणानांचतथासंन्यासिनामपि देवालयानांसर्वेषांसालिग्रामसमामता सालिग्रामा
धिकानैवकस्यापिचप्रदक्षिणा तस्मान्नवम्यामूर्ज्जेतुकर्त्तव्यातत्प्रदक्षिणा यतोनेकाद्विजागावोदेवालयमठादयः
तुलसीवनान्यनेकानिसालिग्रामास्त्वनेकशः देशांतरागताःपुण्यायोगिनःसाधवस्तथा वैरागिणश्चमुक्ताश्चगृह

स्थाः पुण्यशालिनः पुराणानिचवेदाश्चउपवेदागृहेषुच देवतानांचप्रतिमाः संतिग्रामपुरादिषु अतःप्रदक्षिणा
कार्यातेषांसर्वोत्तमोत्तमा तत्रकल्यंसमुत्थायशुचिस्तद्गतमानसःस्नानंकृत्वानोपानत्कः कमंडलुधरःपुरा वहिर्गत्वा
जपन्स्तोत्रंमंत्रंनामानिवाहरेः प्रदाक्षिणंचरेद्विद्वान्सर्वपापापनुत्तये अष्टाक्षरंजपन्मंत्रमथवाद्वादशाक्षरं षडक्षरंजप
न्मंत्रंकुर्याद्विद्वान्प्रदाक्षिणं यावल्लोकाःस्थिताश्चांतर्गावोवैमंदिरेषुच तावत्पुरस्यग्रामस्यपुण्याःप्रोक्ताःप्रदक्षिणाः
एकातिस्रश्चतस्रोवापुरग्रामप्रदक्षिणाः यावत्सूर्योदयोनैवयावन्नास्तंगतः पुनः तावत्प्रदक्षिणाकार्यापुरग्रामाद्व
हिर्नरैः एकातिस्रश्चतस्रोवाअतःशीघ्रंहिजागृयात् सूर्योदयानंतरतःपुरग्रामप्रदक्षिणा तत्रदेवालयेवाथस्वगृहे
तुलसीवनं सालिग्रामंमहापुण्यंकुर्याद्विद्वान्प्रदक्षिणां अथाद्विजांस्तुसंपूज्यभोजयित्वाचपायसैः प्रदक्षिणंप्रकु
र्वीतदत्त्वातेभ्यश्चदाक्षिणां इतिप्रदाक्षिणाध्यायंयेपठंतिद्विजोत्तमाः शृण्वंतिचैवयेभक्त्यातेपियांतिपरांगतिम् सुध
न्वोवाच अहमासंपुराशक्रगृध्रःपापाविशेषतः व्याधेनघातितोवाणैः प्रातर्विष्णुगृहांगणे मयिकंठगतप्राणेभष
कोमांसलोलुपः जग्राहमांसवक्रेणश्वभिरन्यैरनुद्रुतः वहन्मांस्वमुखेनैवभीतोन्यैर्भषकैस्तथा गतःप्रदक्षिणाकारं
विष्णोस्तन्मंदिरंप्रभोः तेनैवतुष्टिमापन्नअंतरात्माजगन्मयः ममचापिशुनांचैवदत्तवान्परमंपदं प्रदक्षिणाकार
तयागतस्यापीदृशंफलं ममायंविवुधश्रेष्ठाकिंपुनःसम्यगर्चनादितिकार्तिकशुक्लनवम्यां प्रदक्षिणामाहात्म्यं अ
स्यामेवाश्वत्थतर्पणादिकमुक्तं नारदीये कार्तिकेशुक्लनवमीयाक्षयासाप्रकीर्तिता तस्यामश्वत्थमूलेतुतर्पणंसम्यगा
चरेत् देवानांचऋषीणांचापितॄणामपिनारद स्वशाखोक्तैस्तथामंत्रैःसूर्य्यायार्घ्यंततोर्पयेत् ततोद्विजान्भोजयि
त्वामिष्टान्नेनमुनीश्वर स्वयंभुक्त्वाचविहरेद्द्विजेभ्योदत्तदक्षिणः एवंयःकुरुतेभक्त्याजपंदानंद्विजार्चनं होमंचस
र्वमक्षय्यंभवेदितिविधेर्वचः भविष्योत्तरेतु कार्त्तिकामलपक्षस्यनवमीभूतिवृद्धये प्रवुद्धांतुजगद्धात्रींपूजयेद्दीपमालया

मासैश्चतुर्भिर्यत्पुण्यंविधिनापूज्यचंडिकां तत्फलंप्राप्यतेवीरनवम्यांकार्त्तिकस्यच ॥ अत्रैवतुलसीविवाहउक्तः पद्मपुराणे कार्त्तिकेशुक्लनवमीमवाप्याविजितेंद्रियः हरिंविधायसौवर्णंतुलस्यासहितंविभुं पूजयेद्दीधवत्तत्रव्रतीभक्त्यादिनत्रयं एवंयथोक्तविधिनाकुर्य्याद्वैवाहिकांविधीमिति अथतुलसीविवाहविधिः विष्णुयामले आदावारोप्यतुलसींवनेवास्वगृहेपिवा मासत्रयेणसंवर्ध्यततःपूजांसमारभेत् सौम्यायनेप्रकर्तव्यंगुरुशुक्रोदयेतथा अथवाकार्तिकेमासिभीष्मपंचादिनेपिवा वैवाहिकेषुऋक्षेषु पूर्णिमायांविशेषतः मंडपंकारयेत्तत्रकुंडंवेदींविवाहवत् ब्राह्मणांश्चशुचीन्दांतान्वेदवेदांगपारगात् ब्राह्मणंदैशिकंचैवचत्वारश्चतथर्त्विजः ग्रहयज्ञंपुरस्कृत्यमातृणांपूजनंतथा कृत्वानांदीमुखंश्राद्धंसौवर्णंस्थापयेद्धरिं कृत्वाचरौप्यतुलसींलग्नेत्वस्तामितेरवौ ज्योतिःशास्त्रप्रसिद्धे गोधूलिकलग्नइत्यर्थः । संपूज्यालंकृतांतांचप्रदद्याद्विधिनाहरेः अत्रषष्ठीचतुर्थ्यर्थे वासःश्रुतेनमंत्रेणवस्त्रयुग्मेनवेष्टयेत् यथावध्नंतिमंत्रेणकंकणंपाणिपल्लवे कोदादित्यादिमंत्रेणकरग्राहोविधीयते आचार्योवेदिकाकुंडेजुहुयाच्चनवाहुतीः । चतस्रोव्याहृतयः ओंभूःस्वाहा ओंभुवःस्वाहा ओंस्वःस्वाहा ओंभूर्भुवःस्वःस्वाहा पंचाहुतयः त्वन्नोअग्नेइत्यादिकाःपंच कर्तव्यश्चततोहोमोविशेषाद्विधिपूर्वकं ओंनमोभगवतेवासुदेवायनमःस्वाहा ओंनारायणायस्वाहा माधवायस्वाहा गोविंदायस्वाहा ओंविष्णवेस्वाहा ओंमधुसूदनायस्वाहा ओंत्रिविक्रमायस्वाहा ओंवामनायस्वाहा ओंश्रीधरायस्वाहा ओंहृषीकेशायस्वाहा ओंपद्मनाभायस्वाहा ओंदामोदरायस्वाहा ओंवासुदेवायस्वाहा ओंअनिरुद्धायस्वाहा ओंअच्युतायस्वाहा ओंअनंतायस्वाहा ओंगदिनेस्वाहा ओंचक्रिणेस्वाहा ओंविष्वक्सेनायस्वाहा ओंवैकुंठायस्वाहा ओंजनार्दनायस्वाहा ओंमुकुंदायस्वाहा ओंअधोक्षजायस्वाहा ॥ यजमानःसपत्नीकः सहामात्यैश्चगोत्रजैः प्रद-

अ०२०
कार्ति०
३१

क्षिणाः प्रकुर्वीतचतस्रोविष्णुनासह तुलस्याइत्यर्थः । पठेयुःशांतिकाध्यायंतथावैमित्रसंहितां गायंतिमंगलंनाद्यैर्भेरीतूर्य्यादिनिस्वनैः गांपदंचतथाशय्यामाचार्य्यायप्रदापयेत् ऋत्विग्भ्योदापयेद्वस्त्राण्यन्येषांचैवदक्षिणाः ब्राह्मणान्भोजयेत्पश्चात्सर्पिःक्षीरैःसशर्करैः एवंप्रतिष्ठितांदेवींविष्णवेचसमर्पयेत् आजन्मोपार्जितंपापंदर्शनाद्देवनश्यति ॥ इतिविष्णुयामलोक्तस्तुलसीविवाहः अथतुलसीविवाहकथा सनत्कुमारसंहियां कार्तिकेशुक्लनवमीतत्राभूद्द्वापरंयुगम् पूर्वापराह्णगाग्राह्याक्रमाद्दानोपवासयोः अत्रकूष्मांडकोनामहतोदैत्यस्तुविष्णुना तद्रोमभिःसमुद्भूतावल्ल्यःकूष्मांडसंभवाः तस्मात्कूष्मांडदानेनफलमाप्नोतिनिश्चितम् अस्यामेवनवम्यांतुकुर्यात्कृष्णेनयोनरःस्वशाखोक्तेनविधिनातुलस्याःकरपीडनं कन्यादानफलंतस्यजायतेनात्रसंशयः कार्तिकेशुक्लनवमीमवाप्यविजितोंद्रियः हरिंविधायसौवर्णंतुलस्यासहितंशुभं पूजयेद्विधिवद्भक्त्याव्रतीतत्रादिनत्रयम् एवंयथोक्तविधिनाकुर्य्याद्वैवाहिकंविधिम् ग्राह्यंत्रिरात्रमत्रैवनवम्याअनुरोधतः मध्याह्नव्यापिनीग्राह्यानवमीपूर्ववेदिता धात्र्यश्वत्थौचएकत्रलापयित्वासमुद्वहेत् ननश्यतेतस्यपुण्यंकल्पकोटिशतैरपि अत्रैवोदाहरंतीममितिहासंपुरातनम् वभूवविष्णुकांच्यांतुक्षत्रियःकनकाभिधः धनाढ्योवैश्यवृत्तिश्चवैष्णवोराजपूजितः वहुकालोगतस्तस्यविनापत्यंमुनीश्वराः ततोनानाव्रतैर्जाताकन्याकमललोचना सुरूपालक्षणोपेतानानागुणसमन्विता पितातस्यानामचक्रेकिशोरीतिचाविश्रुतम् एकदातद्गृहेयातोजन्मपत्रीनिरीक्षकः दर्शयित्वाजन्मपत्रींकथंकन्याभवेदियं ततस्तेनक्षणंध्यात्वाकनकश्शृणुमेवचः यदिब्रवीमिसत्यंचेत्तवदुःखंभाविष्यति यद्यसत्यमहंब्रूयांमिथ्यात्वंममजायते तस्मात्सत्यंवदिष्यामियद्रोचतितथाकुरु योस्याःकरग्रहंकुर्य्यादसौवज्रान्मरिष्यति इतितद्वचनंश्रुत्वाकनकोदुःखितोभवत् नचाकारिविवाहोस्याःसाचब्राह्मणपूजने नियुक्तात्वगमत्सैषानानेयामन्मुखाग्रतः दृष्ट्वेमांरूप

संपन्नांदुःखंमेवाधायिष्यति स्थितायास्मिन्गृहेसातुद्विजातिथ्यमचीकरत् कदाचिद्दैवयोगेनतत्रागाद्द्विजपुंगवः यात्रार्थंविष्णुकांच्यांसवैशाखेमासिशंकरः हेमकोविप्रशुश्रूषींज्ञात्वात्रैवसमागतः आगत्यांगनमध्येतूपविष्टाद्विजोत्तमः किशोर्यागत्यचातिथ्यंशंकरस्यकृतंतदा दृष्ट्वातांतरुणींनाम्नासुवेषांविनयान्विताम् अजातकरपीडचसखींदृष्ट्वाभ्युवाचसः शंकरउवाच चंदनेवदशीघ्रंत्वंकिशोरीनविवाहिता किमत्रकारणंजातातरुणीकामरूपिणी इतितद्वचनंश्रुत्वाचंदनासर्वमब्रवीत् तदाकृपालुनानेनतात्पित्रग्रेनिवेदितं अस्यैमंत्रंप्रयच्छामिश्रीविष्णोर्द्वादशाक्षरम् करोतुवर्षत्रितयंजपंतस्यसुलोचना प्रातःस्नानवतीनित्यंतुलससीवनपालिका कार्तिकस्यासितेपक्षेनवम्यांविष्णुनासह सौवर्णेनतुलस्याश्चविवाहंकारयत्वियम् तेनव्रतप्रभावेणविधवानभाविष्यति तत्पित्रापितथेत्युक्तंप्रायाश्चित्तंसदत्तवान् किशोर्यैवैष्णवंधर्म्मंससमग्रंचादिदेशसः तेनव्रतेनयत्प्रोक्तंकिशोर्य्यपितथाकरोत् वर्षत्रयंयथाशास्त्रंकिशोर्यातद्व्रतंकृतं चतुर्थेकार्तिकेमासिकिशोरीस्नपनायच प्रातःकालेगतावालादृष्टामार्गेविलेपिना क्षात्रियेणयदादृष्टाप्रापमोहंजडात्मकः पृष्ठतस्यास्तुसंलग्नोभावयंस्तामानिदिताम् केचित्तांददृशुर्दूरात्केचित्पश्यंतिगुप्ततः स्त्रियोपितांप्रपश्यंतिपुरुषाणांतुकाकथा यथाद्वितीयाचंद्रस्यदर्शनेचोत्सुकाजनाः तथारात्रौप्रतीक्षंतेतद्द्वारेसकलाजनाः निमेषमात्रमप्येकंदृष्ट्वास्थित्वातुनालिकां अधिकंकिंवर्णनीयंतत्सौंदर्य्यंमुनीश्वराः केचिद्वदंतिदेवीयंनागकन्येतिचापरे रुद्रसंमोहनार्थायजातासामोहिनीतिच सानपश्यतिलोकांश्चनमार्गेनसखीगणान् ध्यायंतीहृदयेविष्णुंतुलसींदेवरूपिणीम् तांगृहीतुंमनश्चक्रेविलेपीद्रव्यवान्वली नानाभेदाःकृतास्तेननलेभेचांतरंक्वचित् मालाकार्यागृहंगत्वातस्यैद्रव्यंप्रयच्छता येनकेप्रकारेणकिशोर्यासहसंगमः यथास्यात्क्रियतांभद्रेदेयमस्माच्चतुर्गुणम् तथाचबहवोपायाः कृतास्तद्ग्रहणायच नददर्शयदोपायमवदत्साविलेपिनम् न

दृश्यतेमयोपायस्त्वयायत्प्रोच्यतेधुना मयातदेवकर्त्तव्यंद्रव्यग्रहणासिद्धये विलेप्युवाच तवकन्यातुभूत्वाहंन
यामिकुसुमानिच अग्रेयद्वाविभवतुगृहाणाह्निशतंशतम् तयापिचतथेत्युक्तंसप्तम्यांनिश्चयःकृतः अष्टम्यांसा
गतातत्रकिशोरीतामुवाचह मालाकृतेश्वोनवमीतुलस्याःपाणिपीडनम् तिष्ठात्रैवत्वयानेयामुकुटाःपुष्पसं
भवाः मालिन्युवाच मत्पुत्रीचागताग्रामान्नानाकौतुककारिणी यद्यत्प्रोक्तंत्वयावालेसासमानयतित्वरा तया
सापितथेत्युक्तामालिनीस्वगृहंययौ कथितःसर्ववृत्तांतोविलेप्यग्रेततोभवत् प्राप्तास्मेंद्रपदवीत्येवंसुखमवापस
मालिन्यारचितारात्रौमुकुटाविविधास्तदा विष्णुकांच्यांतदाराजाजयसेनोबभूवह तस्यपुत्रोमुकुंदोभूत्सूर्यभक्ति
परायणः किशोर्यास्तुश्रुतातेनवार्त्तेयमतिसुंदरी तदातेनमुकुंदेनसंकल्पः कृतएवहि किशोरीयदिभार्यामे
भविष्यतिदिवाकर तदान्नमहमश्नामिह्यन्यथामेमृतिर्भवेत् कृत्वेत्थंसतुसंकल्पमुपवासान्प्रचक्रमे सप्तमेहः
निसूर्योसौस्वप्नेवचनमब्रवीत् किशोर्याविधवायोगोवर्ततेतेकथंभवेत् राजपुत्रप्रदास्यामितेन्यांपद्मायतेक्षणात्
मुकुंदउवाच यदिदेवप्रसन्नोसिविश्वंत्वंसृजसिप्रभो बालवैधव्ययोगंचहंतुंकिंनक्षमोह्यसि इतितस्यवचःश्रुत्वा
सांत्वनाबहुलाकृता नमन्यतेमुकुंदोसौतथेत्युक्त्वागतोरविः तुलसीव्रतमाहात्म्याद्विधवात्वंगमिष्यति रात्रौस्व
प्नःकिशोर्यास्तुतस्यामेवाभ्यजायत आगताकन्यकाकाचिद्भर्त्रासहशुचिस्मिता भर्तारंवदतिस्वप्नेमममाताकिशोरि
का तद्भर्त्रापितथेत्युक्तंप्रदास्येबालिमुत्तमं एतद्धस्तेनपश्चात्तुविवाहोस्याभविष्यति श्रुत्वावलिप्रदानंसास्वप्नेचिं
तातुराऽभवत् क्वद्वादशाक्षरीविद्याक्वेदंविष्णुसमर्च्चनं नरकद्वारमूलंहिमद्धस्तात्पशुमारणम् एवंसातुसमुत्थाय
स्वप्नोयमितिनिश्चितम् भावयित्वासमाहूयचन्दनांवाक्यमब्रवीत् निवेद्यदृष्टंस्वप्नंतुकीदृशंस्यात्फलंवद चंद
नोवाच फलंतुसम्यक्कल्याणितवानिष्टंविनश्यति विवाहोभविताशीघ्रंतुलसीव्रतकारणात् इत्थंस्वप्नफलंश्रुत्वा

दृश्यतेमयोपायस्त्वयायत्प्रोच्यतेधुना मयातदेवकर्त्तव्यंद्रव्यग्रहणासिद्धये विलेप्युवाच तवकन्यातुभूत्वाहंन
ब्र०ख० यामिकुसुमानिच अग्रेयद्वाविभवतुगृहाणाह्निशतंशतम् तयापिचतथेत्युक्तंसप्तम्यांनिश्चयःकृतः अष्टम्यांसा
का।र्ति० गतातत्रकिशोरीतामुवाचह मालाकृतेश्वोनवमीतुलस्याःपाणिपीडनम् तिष्ठात्रैवत्वयानेयामुकुटाःपुष्पसं
३२ भवाः मालिन्युवाच मत्पुत्रीचागताग्रामान्नानाकौतुककारिणी यद्यत्प्रोक्तंत्वयावालेसासमानयतित्वरा तया
सापितथेत्युक्तामालिनीस्वगृहंययौ कथितःसर्ववृत्तांतोविलेप्यग्रेततोभवत् प्राप्तास्मेंद्रपदवीत्येवंसुखमवापस
मालिन्यारचितारात्रौमुकुटाविविधास्तदा विष्णुकांच्यांतदाराजाजयसेनोबभूवह तस्यपुत्रोमुकुंदोभूत्सूर्यभक्ति
परायणः किशोर्यास्तुश्रुतातेनवार्त्तैयमतिसुंदरी तदातेनमुकुंदेनसंकल्पः कृतएवहि किशोरीयदिभार्यामे
भविष्यतिदिवाकर तदान्नमहमश्नामिह्यन्यथामेमृतिर्भवेत् कृत्वेत्थंसतुसंकल्पमुपवासान्प्रचक्रमे सप्तमेहः
निसूर्योसौस्वप्नेवचनमब्रवीत् किशोर्याविधवायोगोवर्ततेतेकथंभवेत् राजपुत्रप्रदास्यामितेन्यांपद्मायतेक्षणात्
मुकुंदउवाच यदिदेवप्रसन्नोसिविश्वंत्वंसृजासिप्रभो बालवैधव्ययोगंचहंतुंकिंनक्षमोह्यसि इतितस्यवचःश्रुत्वा
सांत्वनाबहुलाकृता नमन्यतेमुकुंदोसौतथेत्युक्त्वागतोरविः तुलसीव्रतमाहात्म्याद्विधवात्वंगमिष्यति रात्रौस्व
प्नःकिशोर्यास्तुतस्यामेवाभ्यजायत आगताकन्यकाकाचिद्भर्त्रासहशुचिस्मिता भर्तारंवदतिस्वप्नेममाताकिशोरि
का तद्भार्त्रापितथेत्युक्तंप्रदास्येबालिमुत्तमं एतद्धस्तेनपश्चात्तुविवाहोस्याभविष्यति श्रुत्वावलिप्रदानंसास्वप्नेचिं
तातुराऽभवत् क्वद्वादशाक्षरीविद्याक्वेदंविष्णुसमर्च्चनं नरकद्वारमूलंहिमद्धस्तात्पशुमारणम् एवंसातुसमुत्थाय
स्वप्नोयमितिनिश्चितम् भावयित्वासमाहूयचन्दनांवाक्यमब्रवीत् निवेद्यदृष्टंस्वप्नंतुकीदृशंस्यात्फलंवद चंद
नोवाच फलंतुसम्यक्कल्याणितवानिष्टंविनश्यति विवाहोभविताशीघ्रंतुलसीव्रतकारणात् इत्थंस्वप्नफलंश्रुत्वा

तावत्कुक्कुटनिस्वनं श्रुत्वासासहसोत्थायस्नानोद्योगमचीकरत् यावदायातिसास्नानंकृत्वागेहेकिशोरिका ताव
द्विलेपीमालिन्याःपुत्रीभूत्वासमाययौ कृत्वाकेशांश्चगोपुच्छैःश्मश्रुचोत्पाटितंबलात् अंतरेशाटिकांगृह्यनिम्बू
भ्यांचस्तनौकृतौ सर्वालंकारशोभाढ्याकटाक्षयतिचापरान् नज्ञातोसौतुकेनापिपुमान्स्त्रीरूपधारकः ध्यानंकृत्वात
याहस्तौप्रसार्यैतेयदातदा दत्तेविलेपीपुष्पाणिचित्तेचिंतयतिस्थितःकथमस्याममस्पर्शोभविष्यतिविचिंतयत् एवंदि
नत्रयात्त्रस्यप्रभातेतुमुनीश्वराःतस्मिन्नहनिसंजातःकनकःशोकपीडितः किंकार्य्यमधुनास्माभीराजपुत्रीमरिष्यति
एवंचिंतयतस्तस्यप्रातःकालोवभूवहराजलोकाःसमायातागृहीत्वावस्त्रवाहनम्अभ्यंतरेसमागत्यमंत्रीवचनमब्रवीत्
गृहेस्तितवकन्यैकामुकुंदार्थंप्रदीयतां माविचारोस्तुभवनेनृपाज्ञापरिपाल्यताम् कनकेनतथेत्युक्तंममभाग्यमुप
स्थितम् महाराजकुमारस्य वधूः कन्याभविष्यति ततःप्रोवाचमंत्रीतं द्वादश्यांलग्नमुत्तमं रात्रौतिष्ठतियुग्मा
ख्येरविःषष्टेविधुश्चखे भवेभौमोगुरुर्धर्मेपंचमेबुधभार्गवौ शनिस्तृतीयेष्टेराहुर्विवाहसमयःसतु उभौसंभृतसं
भारावुभावपिधनान्वितौ द्वादश्यामाययौसायंराजपुत्रःससैनिकः अब्रवीत्तत्रकनकंतेकीराजपुरोहितः तेक्यु
वाच अथोनिरोधःक्रियतांकिशोर्याश्चनृपाज्ञया भविष्यतिमहादेवीनोद्दश्यापुरुषैःक्वचित् इतितद्वचनंश्रुत्वापु
रुषास्तुनिराकृताः नारीरूपोविलेपीतुदैवात्तत्रैवसंस्थितःततोर्द्धरात्रवेलायांमुकुंदोभ्यंतरंययौ तुलस्यग्रेस्थितावाला
किशोरीसंस्मरन्हरिम् ततश्चटचटाशब्दस्तुमुलःसमपद्यतमहावायुर्ववौतत्रप्रशांताः सर्वदीपिकाःविद्युच्छतासता
मिस्त्राअंधीभूतोखिलोजनः मिथ्यानभास्करवचोमुकुंदोचिंतयत्हृदि अन्यैःप्रतर्कितंलोकैर्वैधव्यस्यतुकारणम्
भीतोमुकुंदोहृदयेयावद्ध्यायतिभास्करम् तस्यांसंधौधृतंतस्याःकरपद्मंविलेपिनातस्याः करस्यसंसर्गात्स्वर्गाद्वज्रंपपा
तहनीतस्तेनविलेपीतुतत्कालंयममंदिरं वाह्यआसीत्कलकलोमुकुंदोयंमृतस्त्विति क्षणादेवततोज्ञातंमालाकारसुत।

मृता ततस्तयोर्विवाहोभूद्राज्यंप्रापकिशोरिकाकिशोर्य्यास्तुसमुत्पन्नाभ्रातरस्तुलसीव्रतात् आदौशास्त्रसत्यमासीत्ततोदेवोदिवाकरःतुलसीव्रतमाहात्म्यात्कथंनस्युर्मनोरथाः सौभाग्यार्थेचविद्यार्थेधनार्थेरुङ्निवृत्तये संतत्यर्थंप्रकर्त्तव्यं तुलस्याः पाणिपीडनम् ॥ इतिश्रीसनत्कुमारसंहितायांकार्तिकमाहात्म्येतुलसीविवाहोनामैकोननवतितमोध्यायः ॥ इतिकार्तिकीशुक्लनवमीकृत्यं ॥ अथकार्तिकशुक्लदशम्यांसार्वभौमव्रतं वाराहपुराणे सार्वभौमव्रतंचान्यत्कथयामिसमासतः येनसम्यक्कृतेनाशुसार्वभौमोभवेन्नृपः कार्तिकस्यतुमासस्यदशमीशुक्लपक्षगा तस्यांनक्ताशनो नित्यंदिक्षुशुद्धबलिंहरेत् शुद्धबलिः पवित्रद्रव्यैः पूजोपहारइत्यर्थः ॥ विचित्रैः कुसुमैर्भक्ष्यैःपूजयेच्चद्विजांस्तथा सर्वाभवत्यःसिद्ध्यंतुममजन्मनिजन्मनिभवत्योदशादिशइत्यर्थःएवमुक्त्वाबलिंतासुदत्त्वाशुद्धेनचेतसा ततोर्द्धरात्रेभुंजीतदध्यन्नंचसुसंस्कृतं पूर्वंपश्चाद्यथेष्टंचएवंसवत्सरंनृपः यःकरोतिनरोनित्यंतस्यदिग्विजयोभवेत् इदमेवव्रतंनारदीये दशम्यांकार्तिकेशुक्लेसार्वभौमव्रतंचरेत् कृतोपवासश्चैकाशीनिशीथेपूपकादिभिः दशदिक्षुबलिंदद्याद्गृहाद्वापिपुराद्बहिः मंडलेनदलेक्लृप्तेगोविट्लिप्तधरातले मंत्रैरेभिर्द्विजश्रेष्ठगणेशादिकृतार्चनः योमेपूर्वगतःपाप्मा पापकेनेह कर्मणा तमिंद्रोदेवराजोयंनाशयत्वखिलेष्टदः १ योमेवह्निगतः पाप्मापापकेनेहकर्म्मणा तेजोराजोथवन्हिस्तंनाशयत्वखिलेष्टदः२योमेदक्षगतः पाप्मापापकेनेहकर्म्मणा तंयमः प्रेतराजोमेनाश यत्वखिलेष्टदः ३ योमेनैर्ऋत्यगः पाप्मापापाकेनेहकर्म्मणा तंराक्षसेंद्रोनिर्ऋतिर्नाशयत्वखिलेष्टदः ४ योमेपश्चिमगःपाप्मापापकेनेहकर्म्मणा यादःपतिस्तंवरुणोनाशयत्वखिलेष्टदः ५ योमेवायुगतःपाप्मापापकेनेहकर्म्मणा वायुस्तंमरुतांराजानाशयत्वखिलेष्टदः ६ योमेसौम्यगतःपाप्मापापकेनेहकर्म्मणा सोमस्तमृक्षयक्षेशोनाशयत्वखिलेष्टदः७ योमईशानगः पाप्मापापकेनेहकर्म्मणा ईशानोभूतनाथस्तंनाशयत्वखिलेष्टदः८ योमऊर्ध्वगतः पाप्मापापकेनेहकर्म्मणा ब्रह्मा

प्रजापतिशिरस्तंनाशयत्वाखिलेष्टदः ९ योमेचाधोगतःपाप्मापापकेनेहकर्म्मणा अनंतोनागराजस्तंनाशयत्वखिलेष्टदः १०इत्येवंदिक्षुदशसुबालिंदत्त्वासमाहितः क्षेत्रपालायतद्बाह्योक्षिपेद्बलिमतंद्रितः एवंकृतविधिःशेषांनिशांतांनि नयेत्सुधीः गीतैःसुमंगलैर्नृत्यैः स्तवपाठादिभिर्जपैः प्रातः स्नात्वासमभ्यर्च्य लोकपालान्द्विजोत्तमान् द्वादशाभ्यर्च्यसंभोज्यशक्तितोदक्षिणांददेत् इत्थंकृत्वाव्रतंविप्र भोगान्भुक्त्वैहिकान्शुभान् युगंस्वर्गसुखंभुक्त्वासार्वभौमोनृपोभवेत् ॥ अथकार्तिकमासमारभ्यशुक्लदशम्यांविधेयं राज्यावाप्तिव्रतं ॥ मार्कंडेयउवाच क्रतुर्दक्षोवसुः सत्यः कालः कामोमुनिस्तथा कुरुवान्मनुजोविप्रोराममसारश्चतेदश । कुरुवान्मनुजएकः । विश्वेदेवाः समाख्याता दशात्मा केशवोविभुःतस्यसंपूजनंकार्य्यंसितपक्षेनराधिपआरभ्यकार्तिकान्मासाद्दशम्यांमुनिपुंगव मंडलेष्वथपुण्येषुयदिवार्चासुयादव गंधमाल्यनमस्कारधूपदीपान्नसंपदा। अर्चाप्रतिमा । व्रतांतेकनकंदद्याद्यथाशक्तिद्विजातये कृत्वाव्रतंकेवलमेतदिष्टंप्राप्नोतितेषांसुविधंतुलोकान् तत्रोष्यकालेपुरुषत्वमेत्यराजाभवेद्ब्राह्मणपुंगवोवा इतिविष्णुधर्मोत्तरोक्त राज्यावाप्तिव्रतं ⊛ अथवाशुक्लदशमीमात्रसाध्यंब्रह्मावाप्तिव्रतम् ॥

तत्रैव ॥ मार्कंडेयउवाच आत्मास्वायुर्मनुर्दक्षो मदः प्राणस्तथैवच हविष्मांश्चगविष्टश्च दत्तः सत्यश्चतेदश देवाआंगिरसोनामदशम्यांपूजयेन्नरः सोपवासःपूर्वपक्षे पूर्वोक्तविधिनानरः पूर्वपक्षेशुक्लपक्षे पूर्वोक्तविधिनानिरंतरोक्तविधिना कृत्वाव्रतंकेवलमेतदिष्टंप्राप्नोतितेषांसविधंतुलोकानित्यादि ॥ इतिब्रह्मावाप्तिव्रतं ॥ अथकार्त्तिकशुक्लैकादशीहरिबोधिनीनारदीये ॥ ऊर्जस्यशुक्लैकादश्यांसमुपोष्यप्रबोधिनीं केशवंबोधयेद्रात्रौसुप्तंगीतादिमंगलैः ऋग्यजुःसाममंत्रैश्च वाद्यैर्नानाविधैरपि द्राक्षेक्षुदाडिमैश्चान्यैरंभाशृंगाटकादिभिः समर्पणैस्ततोरात्र्यांव्यतीतायांपरेहनि स्नात्वानित्याक्रियांकृत्वाराधादामादरंयजेत् उपचारैः षोडशभिः

सूक्तैःपौरुषवैष्णवैः संभोज्यविप्रान्विसृजेद्दक्षिणाभिश्चतोषितान् ततस्तांप्रतिमांहैमीं सधेनुंगुरवेर्पयेत् एवंयः कुरुतेभक्त्यावोधिनीव्रतमादृतः सभुक्त्वेहवरान्भोगान्वैष्णवंलभतेपदम् ॥ अथेमांप्रक्रम्य भविष्योत्तरेऽस्याःकथा ॥ युधिष्ठिरउवाच ॥ कृष्णकृष्णमहाप्राज्ञसर्वलोकहितावह कथयस्वप्रसादेनशुक्लांकार्त्तिकसंभवां किंनाम कोविधिस्तस्याएतद्विस्तरतोवद त्वद्दासदासदासोऽहंनात्रकार्याविचारणा ॥ श्रीकृष्णउवाच कार्त्तिकस्यसितेपक्षेनाम्नाचैवप्रवोधिनी शृणुतस्याश्चमाहात्म्यंपापघ्नंपुण्यवर्द्धनं अश्वमेधाधिकंपुण्यंसमवाप्नोतिमानवः तावद्गर्जतिराजेंद्रगंगाभागीरथीक्षितौ यावन्नायातिपापघ्नीकार्तिकेहरिवोधिनी अश्वमेधसहस्राणिराजसूयशतानिच एकेनैवोपवासेनपापंदहतिवोधनी दशम्यांनियमैःस्थित्वाक्रोधमानविवर्जितः एकादशीदिनेप्राप्तेतत्पूर्वेनियमोभवेत् स्नात्वाविष्णोर्जपंकृत्वापूजयित्वारमापतिं मंत्रेणानेनराजेंद्रदेवमुत्थापयेद्धरिं उत्तिष्ठोत्तिष्ठगोविंदत्यजानिद्रांजगत्पते त्वयिसुप्तेजगत्सुप्तमुत्थितेह्युत्थितंभवेत् यामादूर्ध्वंततोरात्रौभ्रामयेत्स्यंदनोपरि उत्थितंदेवदेवेशनगरेपार्थिवःस्वयं दीपोद्योतकरेमार्गे नृत्यगीतसमाकुले देवंदामोदरंपश्येदुत्थितंधरणीधरं स्वयंचप्रणमेद्भक्तोरात्रौमुक्तत्रपःशुचिः स्वदेशेराजराजेंद्र सर्वैमोक्षायकल्प्यते रात्रौ, जागरणंकार्य्य मेकादश्यांसुरालये प्रभातेविमलेस्नात्वा द्वादश्यांविष्णुमर्चयेत् होमयेद्धव्यवाहंचहविर्द्रव्यैर्घृतादिभिः ततोविप्राञ्छुचिःस्नात्वाभोजयेदन्नविस्तरैः दाधिक्षीरघृतक्षौद्रकर्पूरागुरुमोदकैः अर्चयेच्चंदनैः पूगैःपुष्पगंधैर्द्विजोत्तमान् शास्त्रोक्ताविधिनाराजन्भोजयेद्भगवद्रतान् विप्रेभ्यश्चततोदद्यात्स्ववाचायाचतेप्सितम् गावोहिरण्यंवासांसिमध्वन्नंचचतुर्विधं फलंमूलंतथाकंदंपत्रंपुष्पंफलादिकं चतुरोवार्षिकान्मासानेवंकृत्वाक्षिपेतुयः सनरःपापनिर्मुक्तोमोक्षंतुफलमाप्नुयात् अवश्यमेवराजेंद्रवासुदेवपुरंव्रजेत् एवंयःकुरुतेराजन्प्रबोधिन्याः

तंशुभं विष्णुतुल्यःसविज्ञेयोनात्रकार्य्याविचारणा शृणोतिध्यायतिस्तौतिजुहोत्याश्रयतेप्रभो हरिभक्तिक-
ःपार्थ सगच्छेद्वैष्णवंपदं धर्म्मार्थकाममोक्षाणांसर्वेषांसंगतिर्व्रतात् दुग्धाब्धिभोगशयनोभगवाननंतोय
स्मिन्दिनेस्वापितिचाप्यवबुध्यतेच तस्मिन्ननन्यमनसामुपवासभाजांपुंसांददातिसुगतिंगरुडांगसंगी ॥ इति-
विष्योत्तरेप्रबोधिन्यामाहात्म्यं ॥ पाद्मेकार्तिकमाहात्म्ये ब्रह्मनारदसंवादे ॥ ब्रह्मोवाच अश्वमेधसहस्रा-
णिवाजपेयशतानिच एकेनैवोपवासेनप्रबोधिन्याभवंतिहि पूर्वजन्मसहस्त्रेषुयत्पापंसमुपार्जितं जागरेणप्र-
ोधिन्यादह्यंतेतूलराशिवत् प्रबोधिन्याश्चमाहात्म्यंपापघ्नंपुष्टिवर्धनं मुक्तिदंतत्वबुद्धीनांशृणुष्वमुनिसत्तम यत्फ-
लंसर्वतीर्थेषुसर्वदानेषुयत्फलं तत्फलंकोटिगुणितंप्रबोधिन्याःप्रजागरे नतथातुष्यतेयज्ञैर्दानैस्तीर्थनिषेवणैः
थाशास्त्रकलालापैःकार्तिकेमधुसूदनः जागरेवासुदेवस्यकर्पूरेणतुदीपकं प्रज्वालयतिकोटीनांकपिलानांलभे
फलं आरार्त्तिकंहरेर्यस्तुसकर्पूरंतुजागरे कुरुतेमोक्षमाप्नोतिकुलायुतसमन्वितः जागरेतुहरेर्धूपंसकर्पूरंस
केसरं युक्तंमृगमदेनापिसगच्छेद्वैष्णवंपदं स्नानंकारयतेविष्णोर्दधिक्षीरघृतांबुभिः रात्रौजागरणंविप्रमुक्ति
भागीभवेन्नरः दिव्यांवराणियोदद्याज्जागरेसमुपस्थिते मन्वंतराणिवसंते मानवस्तंतुसंख्यया दद्यादाभ
रणंविष्णोरपूर्वरत्नसंभवं सदाकल्याणवसातिसोत्यर्थंविष्णुवेश्मनि शंखस्थितेनतोयेनयःस्नापयातिकेशवं क-
पिलाशतदानस्यफलंप्राप्नोतिमानवः हृदिरूपंमुखेनाममनैवेद्यमुदरेहरेः पादोदकंचनिर्माल्यंमस्तकेयस्यसोच्यु
तः एकादश्यांचशुक्लायांकार्तिकेमासिकेशवं प्रसुप्तंबोधयेद्विप्रःश्रद्धाभक्तिसमन्वितः नृत्यैर्गीतैस्तथावाद्यैरृ
ग्यजुःसाममंगलैः वीणापणवशब्दैश्चपुराणश्रवणेनच वासुदेवकथाभिश्चस्तोत्रैरन्यैश्चवैष्णवैः पुष्पैर्धूपैःस
नैवेद्यैर्दीपवृक्षैःसुसोभनैः ब्रह्मेंद्ररुद्राग्निकुवेरसूर्य्यसोमादिभिर्वंदितपादपद्म बुध्यस्वदेवेशजगन्निवासमंत्रप्रभा-

वेणसुखेनबुद्धः उत्तिष्ठोत्तिष्ठगोविंदत्यजनिद्रांजगत्पते त्वयिसुप्तेजगत्सुप्तमुत्थितेतूत्थितंजगत् गतामेघा
यश्चैवनिर्मलंनिर्मलादिशः शारदानिचपुष्पाणिगृहाणकेशवप्रभो समुत्थितेततोविष्णौक्रियासर्वाप्रवर्तते
शिस्वापोदिवोत्थानंसंध्यायांपरिवर्तनं विष्णुभक्तःशुचिर्दांतःकुर्यादेकादशीदिने एकादश्यांव्यतीतायांद्वादश्याम
रुणोदये आदावुद्वर्त्तनंविष्णोःस्नानंपंचामृतेनच गौरोचनेनतिलकंस्वनुलिप्तंस्वलंकृतं सुवाससंपूजयेच्चसुम-
नोभिःसुकुंकुमैःधूपदीपैःसनैवेद्यैर्होमेनपायसस्यच एवंसंपूज्यगोविंदंब्राह्मणान्भोजयेत्ततः वासोभिर्भूषणैरत्नैः
पायसेनचभूरिणा कुंकुमैश्चफलैपुष्पैर्गोभिरश्वैःसदाक्षिणैः चातुर्वार्षिकमासेषुनियमोयेनयःकृतः कथयित्वाद्वि-
जेभ्यश्चदद्याद्वस्त्यासुदाक्षिणां दत्वाविसर्जयेद्विप्रान्ततोभुंजीतचस्वयम् ॥ इतिपद्मपुराणेप्रवोधिनीकथा ॥
॥ अथकार्तिकशुक्लैकादशीकथा ॥ ब्रह्मोवाच ॥ वोधिन्याश्चैवमाहात्म्यंपापघ्नंपुण्यवर्द्धनं मुक्तिप्रदंसुवुद्धी
नांशृणुष्वमुनिसत्तम १ तावद्गर्जंतितीर्थानिआसमुद्रसरांसिच यावत्प्रवोधिनीविष्णोस्तिथिर्नायातिकार्तिके २
तावद्गर्जंतिविप्रेंद्रगंगाभागीरथीक्षितौ यावन्नायातिपापघ्नीकार्तिकेहरिवोधिनी अश्वमेधसहस्राणिराजसूयश-
तानिच एकैनैवोपवासेनवोधिन्यांकुरुतेनरः ४ यद्दुर्लभंचदुःप्राप्यंत्रैलोक्यस्यनगोचरं यद्यप्यप्रार्थितंपुत्रद
दातिहरिवोधिनी ५ मेरुमंदरमात्राणिपापान्युग्राणियानितु एकैनैवोपवासेनदहतेपापहारिणी ३ पूर्वज
न्मसहस्रेषुयत्तुदुःकर्मसंचितं जागरेणप्रवोधिन्यांदहतेतूलराशिवत् ७ यथोक्तंकुरुतेयस्तुविधिवत्सुकृतंनरः
स्वल्पंमुनिवरश्रेष्ठमेरुतुल्यंभवेत्फलं ८ उपवासंप्रवोधिन्यांयःकरोतिस्वभावतः विधिवन्मुनिशार्दूलयथोक्तं
लभ्यतेफलं ९ विधिहीनंतुयःकुर्यात्सुकृत्मेरुमात्रकं अणुमात्रंनचाप्नोतिफलंधर्म्मस्यनारद १० योध्या
यतिमनोवृत्त्याकरिष्यामिप्रवोधिनीं वसंतिपितरोहृष्टाविष्णुलोकेमहीयते ११ विमुक्तानारकैर्दुःखैर्यांतिविष्णोः

परंपदं कृत्वातुपातकंघोरंब्रह्महत्यादिकंनरः १२ कृत्वातुजागरंविष्णोर्वीतपापोभवेन्नरः दुःप्राप्यंयत्फलंवि
प्रअश्वमेधादिभिर्मखैः १३ प्राप्यतेतत्सुखेनैवप्रवोधिन्यांतुजागरे आप्लुत्यसर्वतीर्थेषुदत्वागाःकांचनंमहीं १४
नरस्तत्फलमाप्नोतियत्कृत्वाजागरंहरेः जातःसएवसुकृतीकुलंतेनैवपावितं १५ कार्तिकेमुनिशार्दूलकृतायेन
प्रवोधिनी यथाध्रुवंनृणांमृत्युर्द्धननाशस्तथाध्रुवं १६ इतिज्ञात्वामुनिश्रेष्ठकर्त्तव्यंवैष्णवंदिनं यानिकानि-
चतीर्थानित्रैलोक्येसंभवंतिच १७ तानितस्यगृहेसम्यक्यःकरोतिप्रवोधिनीं सर्वकृत्यंपरित्यज्यतुष्ट्यर्थंचक्र
पाणिनः १८ उपोष्यैकादशींसम्यक्कार्त्तिकेहरिवोधिनीं किंतस्यबहुभिःपुण्यैःकृतायेनप्रवोधिनी १९ पर
लोकप्रदाह्येषाकार्त्तिकेहारिबोधिनी सज्ञानीसचयोगीचसतपस्वीजितेंद्रियः २० भोगमोक्षश्चतस्यास्तिउ-
पास्तेहरिबोधिनी विष्णोःप्रियतराह्येषाधर्मसारसहायिनी २१ यःकरोतिनरोभक्त्यामुक्तिभाक्सभवेन्नरः
प्रवोधिनींमुपोषित्वागर्भेनविशतेनरः २२ सर्वधर्मान्परित्यज्यतस्मात्कुर्वीतनारद कर्म्मणामनसावाचापापं
यत्समुपार्ज्जितं २३ तत्क्षालयतिगोविंदःप्रवोधिन्यास्तुजागरे स्नानंदानंजपोहोमःसमुद्दिश्यजनार्दनं २४
नरैर्यत्क्रियतेवत्सप्रवोधिन्यांतदक्षयं यत्कर्म्मक्रियतेवत्सप्रवोधिन्यांतदक्षयं २५ येर्चयंतिनरास्तस्यांभक्त्या
देवंचमाधवं समुपोष्यप्रमुच्यंतेपापैस्तेशतजन्मजैः महाव्रतमिदंपुत्रमहापापौघनाशनं २६ प्रबोधवासरे
विष्णोर्विधिवत्समुपोषयेत् व्रतेनानेनदेवेशंपरितोष्यजनार्दनंविराजयन्दिशःसर्वाप्रयातिहरिमंदिरं कर्त्तव्यै
षाप्रत्नेननरैःकीर्त्तिधनार्थिभिः २८ बाल्येयच्चार्ज्जितंवत्सयौवनेवार्द्धकेतथा शतजन्मकृतंपापंस्वल्पंवायदि
वाबहुः २९ तत्क्षालयतिगोविंदस्तस्यामभ्यर्चितःखलु धनधान्यवहापुण्यासर्वपापहराशुभा ३० तामु
पोष्यहरेर्भक्त्यादुर्ल्लभंनभवेत्क्वचित् चंद्रसूर्योपरागेचयत्फलंपरिकीर्तितं ३१ तत्सहस्रगुणंप्रोक्तंप्रवोधिन्य

प्रजागरे स्नानंदानंजपोहोमःस्वध्यायोभ्यर्चनंहरेः ३२ तत्सर्वंकोटिगुणितंप्रबोधिन्यांतुयत्कृतं जन्मप्रभृ
तियःपुण्यमार्जितंकृतिभिर्भवेत् ३३ वृथाभवतितत्सर्वमकृत्वाकार्त्तिकेव्रतं अकृत्वानियमंविष्णोःकार्त्तिकंयः
क्षिपेन्नरःजन्मार्जितस्यधर्म्मस्यफलंनाप्नोतिनारद परान्नंवर्ज्जयेद्यस्तुकार्त्तिकेविष्णुतत्परः ३५ परान्नवर्ज्जना
त्ससचांद्रायणफलंलभेत् नतथातुष्यतेयज्ञैर्नदानैर्वानपादिभिः ३६ यथाशास्त्रकथालापैःकार्त्तिकेमधुसूद
नःकुर्वंतियेकथांविष्णोर्येशृण्वंतिसभाविताः ३७ श्लोकार्द्धंश्लोकपादंवाकार्त्तिकेगोशतफलं सर्वधर्मान्परित्य
ज्यकार्त्तिकेकेशवाग्रतः ३८ शास्त्रावधारणंकार्य्यंश्रोतव्यंचमहामुने श्रेयसालोभवुद्ध्यावायःकरोतिहरेःक
थां ३९ कार्त्तिकेमुनिशार्दूलजनानांतारयेच्छतं नियमेननरोयस्तुश्रृणुतेवैष्णवींकथाम् ४०
कार्त्तिकेतुविशेषेणगोसहस्रफलंलभेत् प्रबोधवासरेविष्णोः श्रृणुतेयोहरेः कथाम् ४१ सप्तद्वीपावतीदानफलं
सलभतेमुने कृत्वाभुविकथांविष्णोर्येचर्चयंतिकथाविदम् ४२ स्वशक्त्यामुनिशार्दूलतेषांलोकोक्षयः स्मृतः गीत
वाद्यविनोदेनकार्त्तिकेयोनयेन्नरः ४३ नतस्यपुनरावृत्तिर्मयादृष्टाकलिप्रिय एकादशीसुनिपुणावेश्यादेवांगनोप
मा ४४ गीतेनमोहितालोकास्तयास्युस्तेविचेतसः नेक्षेतविषयाधानंनृत्याच्चक्षुर्हृतंतया ४५ यदातस्याभवेद्वा
रोनृत्यस्यहरिसन्निधौ विशेषतः समायांति जनाःशून्यंभवेत्पुरम् ४६ धनंप्रलोभ्यसर्वेषांहृतंकिमितिवर्ण्यते यत्प्र
माणंमुहुस्तस्यांदधारधरणीधरः ४७ कदाचित्कार्त्तिकेमासिप्रबोधिन्याः प्रजागरे ननर्त्तसाविशेषेणपश्यतीप्र
तिमांहरेः ४८ तत्रकृष्णस्यसान्निध्येरूपशृंगारमोहिता कृष्णेभवत्प्रीतिमतीचित्तेनैताद्विचिंतयत् ४९ अयंना
रायणः साक्षादत्यंताद्भुतभोगवान् मयासहैवनृत्येतकथांसंभावितोत्विदम् ५० रम्यरागांगहारश्च कीदृशः सं
विभाव्यते रूपेणैवाहियस्याहं मुग्धचित्तास्मिरागिणी ५१ बव्हीष्वन्यासुनारीषुमय्येवाधिकप्रीतिमान् नृत्येतासौ।

मयासार्द्धंकंठाश्लेषादिभावकृत् ५२ इत्थंमनोरथंबालाकुर्वतीनृत्यमुत्सुका हरिप्रीत्याचसर्वांतांरात्रिमेवात्यवा
हयत् ५३ ततः प्रातश्चतत्पुण्यंजागरस्यन्ययोजयत् तस्मिन्मनोरथेकाम्येयच्चकारातिनृत्यके ५४ ततःसा
कतिभिर्वर्षैस्तत्रत्यक्ताकलेवरं वित्तंहित्वाखिलंस्वर्गेगत्वादेवांगनाभवत् ५५ तत्रापिगीतनिपुणानृत्याभिनयको
विदा रेमेरम्येविमानाग्रेरूपयौवनशालिनी ५६ कदाचित्स्फाटिकेकुड्येस्वंरूपंददृशेंगना चिंतयामासमेरूपं
पुंसोयोग्यंनकस्यचित् ५७ इत्युदीरितमात्रेणपूर्वजन्ममनोरथं सस्मारसतिचार्वंगीकृष्णेनसहवर्त्तनं ५८ नपतिं
कामयत्कंचिद्ब्रह्मचर्य्येस्थितासदा तामेवमूर्तिंध्यायंतीचंद्रकांतिर्वरानना ५९ श्रीकृष्णगाथांगायंतीरोमांचोद्भेद
लक्षणा अस्मिन्मन्वंतरेप्रीत्याश्रीकृष्णप्रियवार्त्तया ६० एतदंतरवासौभूमिर्भारप्रपीडिता तदर्थंवासुदेवश्चाव
तितीर्षुरभूदिह ६१ कृष्णक्रीडार्थमादिष्टाब्रम्हणासुरयोषितः वासुदेवावतारेस्यह्येकंभार्याव्रतंमहत् ६२ आ
सीत्तथाचतत्प्रीत्यैसंभवंतुसुरस्त्रियः कैशोरीगोपकन्यास्तायौवनेराजकन्यकाः ६३ भूत्वादेवांगनाः सर्वाः ज
नयंतुहरेर्मुदं इत्याज्ञप्तासुतास्वेषाचंद्रकांतिरुवाचतं ६४ पूर्वजन्मोद्भवोनूनंममह्येकोमनोरथ. भूमौगताया-पू
र्यैतत्वत्प्रसादात्स्थितामह सतीष्वन्यासुनारीषुजगन्मोहनरूपधृक् मय्येवातिप्रीतिमांश्चनृत्यतांभगवान्मया इमं
मनोरथंतस्याअनुमोद्यपितामहः देवांशानवतारायस्वधामभ्यस्तथादिशत् वृषभानुरितिख्यातोगोपोनंदव्रजेव
सत् तस्यकन्यावरारोहासुधानाम्न्प्रभवत्सुरा ६८ याचंद्रकांतिरित्यासीदित्येतत्कथितंमया प्रबोधिनीजागरपु
ण्यवैभवात्प्रसन्नईशोविधिवाक्यसत्यकृत् चकाररासोत्सवनर्त्तनंसदावृंदावनेन्याभिरपीहराधया ६९ सानृत्य
मानाद्भुतगोपरूपिणाकृष्णेनजन्मांतरवांछितेन राधामहाप्रेमजवाकुलेंद्रियानिन्येन्यलोकंकथयाकृतार्थतां ७० त
स्मात्सुबोधिनींकृत्वारात्रौकृत्वातुजागरं सुप्तोत्थितंहरिंदृष्ट्वाकामात्संसारजाद्विजाः ७१ मथुरायांतुसंवासेजागरेह

रिसन्निधौ कार्त्तिकेबोधिनींप्राप्यततः श्रेयः परंनहि ७२ गीतंनृत्यंचवाद्यंचनाट्यंविष्णुकथांमुने यः करोति
चपुण्यात्मात्रैलोक्योपरिसंस्थितः ७३ बहुपुष्पैर्बहुफलैः कर्पूरागुरुकुंकुमैः हरेः पूजाविधातव्याकार्तिकेवु
धवासरे ७४ वित्तशाठ्यंनकर्त्तव्यंसंप्राप्तेहरिवासरे यस्मात्पुण्यतमंख्यातंप्राप्यतेमुनिसत्तम ७५ पुष्पै
र्नानाविधैर्दिव्यैः प्रबोधिन्यांतुजागरे शंखतोयंसमादायअर्घ्योदेयोजनार्दने ७६ यत्फलंसर्वतीर्थेषुसर्वदानेषु
यत्फलं तत्फलंकोटिगुणितंदत्वार्घ्यंवुधवासरे ७७ गुरुपूजाततः कर्य्याभोजनाच्छादनादिभिः दक्षिणाभिश्च
देवर्षेतुष्टयर्थंचक्रपाणिनः ७८ भगवंतमभिध्यायन् पुराणंप्रपठेन्नरः प्रत्यक्षंचभवेत्तस्यकपिलादानजंफलं ७९
कार्त्तिकेमुनिशार्दूलमद्भक्तोवैष्णवंव्रतं यः करोतियथोक्तंतुमुक्तिस्तस्यसुनिश्चयात् ८० केतक्याएकपत्रेणपूजि
तोगरुडध्वजः समाः सहस्रंसंप्रीतोजायतेमधुसुदनः ८१ अगस्त्यकुसुमैर्देवंपूजयेद्योजनार्दनं दर्शनात्तस्यदे
वर्षेनरकाग्निः प्रनश्यति ८२ मुनिपुष्पार्चितोविष्णुः कार्तिकेपुरुषोत्तमः ददात्यभिमुखान्कामान्शशिसूर्य
स्थितीयथा ८३ विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवं कार्त्तिकेयोर्चयेद्भक्त्याचाजिमेधफलंलभेत् ८४ तु,
लसीदलपुष्पाणियोयच्छतिजनार्दने कार्तिकंसकलंवत्सपापंजन्मायुतंहरेत् ८५ दृष्टास्पृष्टाथवाध्याताकीर्तिता
नमितास्तुता रोपितासिंचितानित्यंपूजितातुलसीशुभा ८६ नवधातुलसीभक्तिंयेकुर्वन्तिदिनेदिने युगकोटिस
हस्राणितन्वंतिसुकृतंमुने यावत्शाखप्रशाखाभिर्बीजपुष्पफलैर्मुने रोपितातुलसीपुंभिर्वर्द्धतेवसुधातले तेषांवं
शतुयेजातायेभविष्यंतियेगताःआकल्पयुगसाहस्रंतेषांवासोहरेर्गृहे यत्फलंसर्वतीर्थेषुसर्वदानेषुनारद तुलसीदले
नचैकेनकार्तिकेप्राप्यतेतुतत् संप्राप्तंकार्तिकंदृष्ट्वानियमेनजनार्दनः पूजनीयोमहाविष्णुः कोमलैस्तुलसीदलैः इष्ट्वा
क्रतुशतैरेवदत्वारत्नान्यनेकशः तुलसीदलैस्तुतैरेवप्राप्यतेकेशवार्चनात् इतिश्रीस्कंदपुराणेकार्तिकशुक्लपक्षीय

बोधनीमाहात्म्यंसंपूर्णम् ॥ ॥ अथवराहपुराणोक्तंकार्तिकशुक्लैकादशीव्रतं ॥ अगस्त्यउवाच शृणुष्वभक्तितो
राजन्कार्तिकैकादशींतथा उपोष्यविधिनानेनसर्वासांप्राप्नुयात्फलं १ प्राग्विधानेनसंकल्प्यतद्वत्स्नानंसमाचरेत्
विलोमेनार्चयेद्देवंनारायणमकल्मषं २ नमः सहस्रशिरसेशिरः संपूज्यवैहरेः पूरुषायेतिचभुजौकंठंवैविश्वरू
पिणे ३ ज्ञानात्मानेतिचास्त्राणिश्रीवत्सायतथाउरः जठरंप्रभाविष्णवेचोदरंदिव्यमूर्तये ४ कटिंसहस्रपादाय
पादौदेवस्यपूजयेत् अनुलोमेनदेवेशंपूजयित्वाविचक्षणः ५ नमोदामोदरायेतिसर्वांगंपूजयेद्धरेः एवंसंपूज्यवि
धिनातस्याग्रेचतुरोधटान् ६ स्थापयेद्रत्नगर्भांस्तुसितचंदनचर्चितान् स्रग्दामवद्धग्रीवांस्तूसितवस्त्रावगुंटितान्
७ स्थगितास्ताम्रपात्रैस्तुतिलपूर्णैः सकांचनैः चत्वारः सागराश्चैतेकल्पिताद्विजसत्तम ८ तन्मध्येप्राग्विधा
नेनसौवर्णंस्थापयेद्धरिं षोडशारेरथांगेतुरजोभिर्बहुभिकृतं ९ रथांगेचक्रेयोगेइवरयोगनिद्राशायिनेपीतवाससे त
मप्पेवंतुसम्पूज्यजागरंतत्रकारयेत् १० कुर्यात्तुवैष्णवंयोगमंतेयोगेश्वरंहरिं एवंकृत्वाप्रभातेतुब्राह्मणान्पंचभोज
येत् ११ चत्वारःकलशादेयाश्चतुर्णांपंचमस्यतु योगेश्वरंतुसौवर्णंप्रदद्यात्प्रयतःशुचिः १२ प्रीयतांदामोदरोयोगी
इवररूपीतिमंत्रतः वेदाध्येत्रेसमंदत्तंतद्विदेद्विगुणंतथा आचार्येपंचरात्राणांसहस्रगुणितंभवेत् यस्त्विमंसरहस्यं
चसमंत्रंचोपपादयेत् विधानंतस्यभक्त्यावैदत्तंकोटिगुणोत्तरं योग्येतिष्ठतियस्त्वन्यमासन्नंपूजयेत्कुधीः सदुर्गति
मवाप्नोतिदत्तंतस्यचनिष्फलं एवंदत्वाविधानेनतत्वतोविष्णुमच्युतं विप्राणांभोजनंदद्याद्यथाशक्त्यासदक्षिणं
धरणीव्रतमेतद्धिपुराचीर्त्वाप्रजापतिः प्रजांलेभेतथामुक्तिंब्राह्मण्यमविचालितं युवनाश्वश्चराजर्षिरेतेनविधिना
पुरा मांधातारंसुतंलेभेपरंब्रह्मचशाश्वतं तथाहैहयदायादः कृतवीर्योनराधिपः १९ कार्त्तवीर्यंसुतंलेभेपरं
ब्रह्मचशाश्वतं शकुंतलाप्येवमेवव्रतंचीर्त्वामहामुने २० लेभेशाकुंतलंपुत्रंदुर्ज्जयंचक्रवर्त्तिनं अनेनविधिनाप्रा

षंचक्रवार्तित्वमुत्तमं २१ धरण्याअपिपातालेमग्नयातुकृतंपुरा व्रतमतत्ततोनाम्नाधरणीव्रतमुच्यते २२ समा
प्तास्मिन्धरादेवीहरिणाक्रोडरूपिणा उद्धृताद्यापितुष्टेनधारितानौरिवाम्भसि २३ यइदंशृणुयाद्भक्त्यायश्चकु
र्यान्नरोत्तम सर्वपापविनिर्मुक्तोविष्णुसालोक्यतांव्रजेत् २४ आपत्तिंहरतेचैकाराज्यमेकंवयच्छति किंपु
नर्द्वादशैतास्तुयेनेष्टानदद्दुःपरं २५ इतिवाराहपुराणोक्तंयोगीश्वरद्वादशीव्रतंसमाप्तम् ॥ अथप्रवोधैका
दशीकृत्यं तदुक्तंमदनरत्ने ॥ ब्रह्मउवाच एकादश्यांचशुक्लायांकार्तिकेमासिकेशवं प्रसुप्तंवोधयेद्रात्रौश्र
द्धाभक्तिसमन्वितइति नृत्यैर्गीतैस्तथावाद्यैर्ऋग्यजुस्साममंगलैः वीणापणवशब्दैश्चपुराणश्रवणेनच २ वा
सुदेवकथाभिश्चस्तोत्रैरन्यैश्चवैष्णवैः सुभाषितैरिंद्रजालैर्भूरिशोभाभिरेवच पुष्पैर्धूपैश्चनैवेद्यैर्दीपवृक्षैःसुशोभनैः
होमैर्भक्ष्यैर्पूपैश्चफलैःशार्करपायसैः ४ इक्षोर्विकारैर्मधुरैर्द्राक्षाक्षोटैःसदाडिमैः कुवेरकस्यमंजर्यामालत्याकमलेनच
५ कुवेरकःपर्णाशःकृष्णतुलसीतिकेचित् हृद्याभ्यांश्वेतरक्ताभ्यांचंदनाभ्यांचसर्वदा ६ कुंकुमालक्तकाभ्यांचरक्तसू
त्रैःसकंकणैः नव्यैर्नानाविधैःपुष्पैर्द्रव्यैर्वीरक्रयाहृतैः ७ वीरक्रयोविक्रयंवाप्रथमतोभिहितंमूल्यंदत्वाक्रियमाणक्रयः
तस्यांरात्रौव्यतीतायांद्वादश्यामरुणोदये आदौघृतेनैक्षवेणमधुनास्नापयेत्ततः ८ दाध्नाक्षीरेणचततःपंचगव्येन
शास्त्रवित् उद्वर्तनंमाषचूर्णमसूरामलकानिच ९ सर्षपाश्चप्रियंगुश्चमातुलिंगरसैस्तथा सर्वौषध्यःसर्वगंधः
सर्वबीजानिकांचनं १० मंगलानियथाकामंरत्नानिचकुशोदकं एवंसंशोध्यदेवेशंदद्याद्गोरोचनांशुभां ११
ततस्तुकलशादेयायथाप्राप्ताःस्वलंकृताः जातीपल्लवसंयुक्ताःसफलाश्चसकांचनाः पुन्याहेवेदशब्देनवीणावेणुरवेणच
एवंसंस्नाप्यगोविंदमनुलिप्तं स्वलंकृतंसुवाससंतुसंपूज्यसुमनोभिःसुकुंकुमैः दीपैर्धूपैर्मनोज्ञैश्चपायसे
नचभूरिणा पात्रेभ्यश्चान्नदानैश्चहोमैःपुष्पैःसदक्षिणैः वासोभिर्भूषणैरम्यैर्गोभिरश्वैर्मनोजवैः ब्राह्मणाःपूजनीयाश्च

विष्णोरीड्याश्चमूर्त्तयः यत्तुशिष्टामृतंपश्चाद्भोक्तव्यंब्राह्मणैःसहेति १६ अथरामार्चनचंद्रिकोक्तप्रकारेणबो
धिनीविधिः ॥ शयन्युक्तप्रकारेणरथमारोप्यमाधवं विधायमहतींपूजांविष्णोरभ्यर्च्यवैष्णवान् वाद्यघोषेण
महतादेवंनीत्वाजलाशयं धौतांघ्रिपाणिःकुर्वीतसंकल्पंवैष्णवैःसह एवंगुणविशिष्टायांबोधिन्यामिंदिरापतेः कु
र्वंप्रबोधनांविष्णोर्वराहोक्तमनूंपठेत् भविष्योत्तरेपि। कार्तिकेशुक्लपक्षेतुएकादश्यांपृथासुत मंत्रेणानेनराजेंद्र
देवमुत्थापयेद्द्विजः ॥ मंत्राः ब्रह्मेंद्ररुद्राग्निकुवेर सूर्यकीनाशसोमादित्यवंदनीय वुध्यस्वदेवेशजगन्निवासमं
त्रप्रभावेणसुखेनदेव १ इयंतुद्वादशीदेवप्रबोधायविनिर्मिता त्वयैवसर्वलोकानांहितार्थंशेषशायिना २ त्वयिसु
प्तेजगन्नाथजगत्सुप्तंभवेदिदं उत्थितेचेष्टतेसर्वमुपतिष्ठस्वमाधव ३ इदंविष्णुरनेनैवतस्मादुत्थापयेत्प्रभुं हिर
ण्यगर्भइतिचप्राजापत्यंपठेत्तथा गायत्रंवैष्णवंसूक्तमतोदेवाअवंत्विति । श्रीसूक्तद्वयन्तु हिरण्यगर्भऋषिः प्रा-
जापत्योदेवता त्रिष्टुप्छंदः जपेविनियोगः ओंहिरण्यगर्भःसमवर्तताग्रेभूतस्यजातः पतिरेकऽआसीत् सदाधारपृ
थिवींद्यामुतेमांकस्मैदेवायहविषाविधेम १ यऽआत्मदाबलदायस्यविश्वऽउपासतेप्रशिषंयस्यदेवाः यस्यच्छायामृ
तंयस्यमृत्युः कस्मैदेवायहविषाविधेम २ यःप्राणतोनिमिषतोमहित्वैकइंद्राजाजगतोबभूव यईशेऽअस्यद्विप
दश्चतुष्पदःकस्मैदेवायहविषाविधेम ३ यस्येमेहिमवतोवहित्वायस्यसमुद्रंरसयासहाहुः यस्येमाःप्रदिशोयस्य
बाहू कस्मैदेवायहविषाविधेम ४ येनद्यौरुग्रापृथिवीचदृढायेनस्वस्तिजितंयेननाकः योऽअन्तरिक्षेरजसोविमा
नः कस्मैदेवायहविषाविधेम ५ यंक्रंदसीऽअवसीतस्तभानेऽअभ्यैक्षेतांमनसोरेजमाने यत्राधिसूरउदितोविभाति
कस्मैदेवायहविषाविधेम ६ आपोहयद्बृहतीर्विश्वमायन्गर्भन्दधानाजनयंतीरग्निं ततोदेवानांसमवर्ततासु
रेकः कस्मैदेवायहविषाविधेम ७ यश्चिदापोमहिनापर्यपश्यद्दक्षंदधानाजनयंतीर्यज्ञम् योदेवेष्वधिदेवएकआ

व्र०र०
कार्तीक
३१

सत्किस्मैदेवायहविषाविधेम ८ मानोहिंसीज्जनितायाःपृथिव्यायोवादिवंसधर्म्माजजान पश्चाझाद्वहतीर्जजा
न कस्मैदेवायहविषाविधेम ९ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव यत्कामास्तेजुहुमस्तन्नोऽअस्तु
वयंस्यामपतयोरयीणां १० उत्तिष्ठोत्तिष्ठदेवेशयोगनिद्रांविहायच अनेनमनुनोत्थाप्यघंटावादित्रनिःस्वनैः तीरे
समुपवेश्येशंमहानुग्रहमर्थयेत् सोसावदभ्रकरुणोभगवान्प्रवृद्धप्रेमस्मितेननयनांवुरुहंविजृम्भन् उत्थायविश्व
विजयायचनोविषादंमाध्व्यागिशापनयतात्पुरुषःपुराणः इतिपुष्पांजलिंदत्त्वासूक्तमाथर्वणंजपेत् तच्चोक्तंऋग्वेदस
र्वानुक्रमण्यां याओषधीस्त्र्यधिकाथर्वणोभिषगोषधिस्तुतिरानुष्टुभं याओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा म
नैनुबभ्रूणामहंशतंधामानिसप्तच शतंवोअंबधामानिसहस्रमुतवोरुहः अधाच्छतक्रत्वोपूयमिमंमेअगदंकृत ओ
षधीः प्रतिमोदध्वंपुष्पवतीः प्रसूवरीः अश्वाइवसजित्वरीर्वीरुधःपारयिष्णवः ओषधीरितिमातरस्तद्वोदेवीरु
पब्रुवे सनेयमश्वंगांवासआत्मानंतवपूरुष अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता गोभाजइत्किलासथयत्सन
वथपूरुषं ॥ १ ॥ यन्नौषधीःसमग्मतराजानःसमिताविव विप्रःसउच्यतेभिषग्रक्षोवामीवघातनः अश्वा
वतीसोमवतीमूर्जयंतीमुदोजसं आवित्सिसर्वाओषधीरस्माअरिष्टतातये उच्छुष्माओषधीनांगावोगोष्ठादिवे
रते धनंसनिष्यंतीनामात्मानंतवपूरुषः इष्कृतिर्नामवोमाताथोयूयस्थनिष्कृतीः सीराःपतत्रिणीःस्थनयदा
मयतिनिष्कृथ अतिविश्वाःपरिष्ठास्तेनइवव्रजमक्रमुः औषधीःप्राच्युच्यवुर्यत्किंचतन्वोरयः २ यदिमाव्रजय
न्नहमोषधीर्हस्तआदधे आत्मायक्ष्मस्यनश्यतिपुराजीवगृभोयथा यस्यौषधीःप्रसर्पथोगमगंपरुस्परुः ततोय
क्ष्मंविवाधध्वउग्रोमध्यमशीरिव साकंयक्ष्मप्रपतचाषेणकिकिदीविना साकंवातस्यधृज्यासाकंनश्यतिहाकया
अन्यावोअन्यामवन्वन्यान्यस्याउपावत तासांसर्वाःसंविदानाइदंमेप्रावतावचः याःफलिनीर्याऽफलाअपुष्पा

81

याश्चपुष्पिणीः वृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः ३ मुंचतुमाशपथ्यादथोवरुण्यादुत ॥ अथोयमस्यवाडिशात्स
र्वस्माद्देवकिल्विषात् अवपतंतीरवदन्दिवओषधयस्परि यंजीवमश्नवामहैनसपरिष्यातिपूरुषः याओषधीः
सोमराज्ञीर्बह्वीःशतविचक्षणाः तासामसित्वमुत्तमारंकामायसंहृदे याओषधीःसोमराज्ञाविष्ठिताःपृथिवीमनु वृह
स्पतिप्रसूताअस्यैसंदत्तवीर्यं ओषधयःसमदवतसोमेनसहराज्ञायस्मैकृणोतिब्राह्मणस्तंराजन्यारयामासि त्वमुत्त
मास्योषधेतववृक्षाउपस्तयः उपस्तिरस्तुसोस्माकंयोअस्मांअभिधासति एवमाथर्वणसूक्तंजपित्वापुनःपुष्पांज
लिंदद्यात् गतामेघावियच्चैवनिर्मलंनिर्मलादिशः शारदानिचपुष्पाणिगृहाणममकेशवेति समुत्थितेततोविष्णौ
क्रियाः सर्वाःप्रवर्त्तयेत् स्नापयेद्राघवंपंचामृतैःपुरुषसूक्ततः नीराज्यमंत्रविन्यस्यवस्त्रालंकारचंदनैः स्रग्धूपदी
पदिव्यान्नैस्तांबूलैस्तोषयेत्प्रभुं एवंकृत्वामहापूजांगृहीत्वासाक्षतंजलं प्रतिमासंव्रतान्युक्त्वाराघवायनिवेदयेत् व्रत
समापनमंत्रस्तुसनत्कुमारेणोक्तः इदंव्रतंमयादेवकृतंप्रीत्यैतवप्रभो न्यूनंसंपूर्णतांयातुत्वत्प्रसादाज्जनार्दनेति
अनुष्ठितैर्मयानानाचातुर्मास्यव्रतैःप्रभुः प्रभूतपातकस्यांतेराघवःप्रीयतांमम व्रतारम्भस्तत्समाप्तिश्चतुर्धा तदुक्तं
वाराहे चतुर्द्धा एकादशीद्वादशीपूर्णिमाकर्कसंक्रांतिष्वारब्धव्यामित्यर्थः तद्योग्यद्रव्यदानानितु शयनीप्रकरणेद्र
ष्टव्यानि एवंव्रतान्यर्पयित्वास्तुवीतपरमादृतः श्रुतिस्तुत्यावेदवादैःस्तोष्यमाणंरमापतिं स्तुतिस्तु यद्रोषविभ्रमवि
वृत्तकटाक्षपातसंक्रांतनक्रमकरोभयगीर्णघोषः सिंधुःशिरस्यर्हणंपरिगृह्यरूपीपादारविंदमुपगम्यबभाषएतत् न
त्वांवयंजडधियोनुविदामभूमन्कूटस्थमादिपुरुषंजगतामधीशं यत्सत्त्वतःसुरगणारजसःप्रजेशाअन्येचभूतपत
यःसभवान्गुणेशः २ कामंप्रयाहिजहिविश्रवसोऽवमेहंत्रैलोक्यरावणमवाप्नुहिवीरपत्नीं बध्नीहिसेतुमिहतये
शसोवितत्यैगायंतिदिग्विजयिनोयमुपेत्यभूपाः ३ स्वस्त्यस्तुविश्वस्यखलःप्रसीदतांध्यायंतुभूतानिशिवंमिथोधि

या मनश्चभद्रंभजतादधोक्षजेआवेश्यतान्नोमतिरप्यहैतुकी ४ इत्याशिषःसमभ्यर्च्यगीतवाद्यजयःस्वनैः देवंर
थोपरिस्थाप्यजयशब्दपुरस्सरं महातूर्यरवैरात्रौभ्रामयेत्स्यंदनास्थितं उत्थितंदेवदेवेशंनगरेपार्थिवःस्वयं युक्तः
शैव्यादिवाहैर्मरकतसुरणत्किंकिणिजालमाला रत्नाद्यैर्मौक्तिकानामविरलमणिभिःसंभृतैश्चैवहारैः हैमैःकुंभैःप-
ताकाशिवतररुचिभिर्भूषितःकेतुमुख्यैश्चित्रैर्ब्रह्मेशवंद्योदुरितहरहरेःपातुजैत्रोरथोवः १ वक्त्रंनीलोत्पलरुचिल
सत्कुंडलाभ्यासुमृष्टं चंद्राकारंरचिततिलकंचंदनेनाक्षतैश्च गत्यालीलांजनसुखकरींप्रेक्षणेनामृतौघं पद्मावासं
सततमुरसाधारयन्पातुविष्णुः २ मोदंतांस्वजनास्त्वनिंदितधियस्त्यक्ताखिलोपद्रवाः स्वस्थाःसुस्थिरवुद्धयःप्र-
तिहतामित्रारमंतांसुखं रेदैत्यागिरिगह्वराणिगहनान्याशुव्रजध्वंभया द्दैत्यारिर्भगवानयंनरहरिर्यानंसमारोहति
३ पलायध्वंपलायध्वंरेरेदनुजदानवाः संरक्षणायलोकानांरथारूढोनृकेसरी ॥ इत्यादिविष्णुधर्मोक्तमंत्रैःसंतोष्य
सादरं प्रसादमालान्नृहरेर्गृह्णीयाद्भक्तिभावतः जयदेवमहादेवदेवदेवाखिलेश्वर वरदेशाखिलंविश्वंरक्षरक्षर
मापते नृत्यैर्वाद्यैर्भागवतैर्घंटावाद्यजयस्वनैः भ्रामयन्स्यंदनंविष्णोःपुरमध्येसमंततः ६ रथस्याकर्षणंपूर्वं-
कुरुतेदैत्यनायकः ततःसुराःसिद्धसंघामुनिगंधर्वमानवाः ७ यावत्पदानिकृष्णस्यरथस्याकर्षणंनरः करोति-
क्रतुभिस्तानितुल्यानिनरनायक ८ रथेनसहगच्छंतिपुरुषाःपृष्ठतोऽग्रतःमहाविष्णुसमाह्येतेभवंत्यग्रिभवाअपि ९
श्रीकृष्णरथशोभांयेप्रकुर्वंतिवदंतिच जपंतिचपुनर्येवैतेषांलोकाःसनातनाः १०रथस्थितोनरैर्यैस्तुपूजितोमधुसूदनः
ददातिवांछितंतेषामंतेचपरमागतिम् ११ दोलायमानंगोविंदंमंचस्थंमधुसूदनं रथस्थंवामनंदृष्ट्वापुनर्जन्मनविद्य
ते १२ रथस्थंयेनगच्छंतिभ्रममाणंजनार्दनं विप्रावेदविदस्तेऽपिविज्ञेयाःश्वपचाधमाः १३ येषांगृहागतोया
तिरथस्थःश्रीनृकेसरी पूजातैस्तैःप्रकर्त्तव्यावित्तशाठ्यविवर्जितैः १४ अनर्चितोयदायातिप्रमादात्स्वगृहाद्धरिः

पितरस्तस्याविमुखायावत्संवत्सरंनृप ॥ १५ ॥ स्त्रियोपिमुक्तिमायांतिरथयात्रापरायणाः सशैलवनसस्याढ्यातेनदत्तावसुंधरा १६ इतिपौरजनैःसार्द्धंभ्रामयित्वारथंगृहं गत्वानीराज्यदेवेशंशयीतवैष्णवंस्मरन् १७ वैष्णवंमंत्रंनामेत्यर्थः इतिरथोत्सवमाहात्म्यम् । शयीतेतिद्वादश्यभिप्रायेण एकादश्यांतुरात्रौजागरणंकुर्यात् एकादश्यांसुरालयइतिवचनात् रात्रिजागरणमत्यावश्यकं इयमेकादशीसोमवारोत्तराभाद्रपदयोगे महापुण्येत्युक्तं मदनरत्ने वराहपुराणे शुक्लपक्षंप्रक्रम्य ॥ एकादशीसोमयुक्ताकार्तिकेमासिभामिनि उत्तराभाद्रयोगेचअनंता साप्रकीर्तिता तस्यांयात्क्रियतेभद्रेसर्वमानंत्यमश्नुते अनंतपुण्यफलदातेनाऽनंतास्मृताप्रियइति ।अथवराहपुराणे वोधिन्येकादशीविधिः एकादश्यांरात्रौकुंभेघृतपात्रोपरिहैमंमाषमितंमत्स्यं पंचामृतेनसंस्नाप्य कुंकुमपीतवस्त्रयुगपद्माद्यैः सम्पूज्य मत्स्यरूपोजगद्योनिः प्रीयतांमेजनार्दनइतिदत्त्वा दक्षिणांचदत्त्वाब्राह्मणान्भोजयेदिति इतिकार्त्तिकशुक्लैकादशीकृत्यंसमाप्तम् अथप्रवोधकालनिर्णयः निशिस्वापोदिवोत्थानंसंध्यायांपरिवर्तनमितिब्रह्मपुराणवचनेरात्रौसुप्तमित्याचार्य्यचूडामणिः वराहपुराणेतु द्वादश्याप्रबोधोत्सवउक्तः इयंचरेवत्यंतादियुक्ता प्रबोधिनीप्रशस्ता आभाकासितपक्षेषुमैत्रश्रवणरेवती आदिमध्यावसानेषुप्रस्वापावर्तनोत्सवाःनारदीयेऽपि मैत्राद्यपादेस्वपितीहविष्णुः श्रुतेश्चमध्येपरिवर्त्तमेति पौष्णावसानेचसुरारिहंता प्रवुध्यतेयामचतुष्टयेनेति यदातुद्वादशीषु तत्तन्नक्षत्रभागोनास्ति तदाद्वादशीनक्षत्रयोगोपिरात्र्यादिगतोग्राह्यः पादयोगोयदानस्यादृक्षेणापितदाभवेदिति वराहपुराणात् विष्णुर्दिवानस्वपितिनचरात्रौप्रबुध्यते द्वादश्यामृक्षसंयोगेपादयोगोनकारणमिति विष्णुधर्मोत्तराच्च यदातुद्वादशीषुतानिनक्षत्राणिनसंत्येव किंत्वेकादशीषुवा तदातत्रापि तत्तदृक्षभागएवनिशादिवेलानादरेणप्रस्वापादिकार्यं अप्राप्तेद्वादशीमृक्षेउत्थानंशयनंहरेः पादयोगेनकर्त्तव्येअहोरात्रंविचिंतयेदितिजीमूतवा

हनवचनात् पादयोगादन्यतिथाद्वादश्यामैक्षसंगमादितिवचनाच्च द्वादश्यांनक्षत्रसंयोगस्यरात्र्यादावभावेपितत्रैवकार्य्यमित्यर्थः अतएववराहोपि द्वादश्यांसंधिसमयेनक्षत्राणामसंभवे आभाकासितपक्षेषुशयनावर्तनादिकमिति संधिसमयश्चसायंसंध्यैवप्रबोधोपितत्रैवकार्य्यः तदुक्तंरेवत्यंतेयदारात्रौद्वादश्याचसमागमः तदाविबुध्यते विष्णुर्देवावैश्राप्यैरेवतीमिति जीमूतवाहनधृतवचनात् विष्णुधर्मोत्तरेतु एकादश्यादिषुपंचस्वपि प्रस्वापवोधोत्सवावुक्तौ क्वचित्पूर्णमास्यामेव रामार्चनंचंद्रिकायांतु । पारणाहेपूर्वरात्रेघंटादीन्वादयेन्मुहुरिति अत्रच वहुषुवचनेषु चतुर्थभागवाचिपादग्रहणात् चतुर्धाविभक्तयोरनुराधारेवतिन्यायेनत्रेधाविभागएव अतएव मध्यभागग्रहणेनविशेषश्रवणादश्रुतत्वादितिन्यायेनत्रेधाविभागएव अतएवमध्यग्रहणमप्युपपद्यतइतिवाच्यं वचनांतरेषुपादग्रहणेनाविशेषश्रवणादिश्रुतित्वादितिहेतोरसिद्धेः श्रवणस्यतुत्रेधाविभक्तस्यमध्यभागएवग्राह्यः । अथप्रबोधमंत्रो वाराहे । ब्रह्मेंद्ररुद्रादिकुवेरसूर्यैत्यादिकथासूक्तःइयंतुद्वादशीदेवप्रबोधार्थेतुनिर्मिता त्वयैवसर्वलोकानांहितार्थंशेषशायिना त्वयिसुप्तेजगन्नाथजगत्सुप्तंभवेदिह उत्थितेचेष्टतेसर्वमुत्तिष्ठोत्तिष्ठमाधव उत्तिष्ठोत्तिष्ठगोविंदत्यजनिद्रांजगत्पतेइत्यादि मेघागताः शारदपूर्णचंद्रशारद्यपुष्पाणिमनोहराणि अहंददानीतिचपुण्यहेतोर्जागृष्वजागृष्वथलोकनाथ एवंप्रबोध्यपुष्पांजलिदानं इदंविष्णुरितिप्रोक्तोमंत्रउत्थापनेहरेरिति तत्रमंत्रः गतामेघाइत्यादिपूर्वोक्तः वाराहे एवंकर्माणिकुर्वंतिद्वादश्यांयेयशस्विनि मद्भक्ताहिनरश्रेष्ठास्तेयांतिपरमांगतिम् एवंवैशारदंकर्म्मनिखिलंकथितंमया मोदतेदेविसंसारेममभक्तः सुखावहइति । इतिहरिप्रबोधोत्सवविधानम् अथात्रैकादश्यादिपूर्णिमांतं पंचदिनात्मकभीष्मपंचकव्रतविधानं दीपदानंच ॥ पाद्मकार्तिकमाहात्म्येब्रह्मनारदसंवादे अतः परंप्रवक्ष्यामिमुनेऽहंभीष्मपंचकं मयावर्षसहस्रेषुसमभ्यर्च्यजनार्दनं पुराप्राप्तंव्रतंह्येतत्सर्वं

यज्ञफलप्रदं मयाचभृगवेप्रोक्तंभृगुणोशनसेतथा ततस्त्वन्यैर्गृहीतंतत्पारंपर्य्यसमागतं एकादश्यांतुगृह्णीयाद्व्रतंपंचादिनात्मकं व्रतीस्नायाद्विधानेनदेवादीनांचतर्पणं धौतवस्त्रश्चमौनीचहरिमर्चेज्जितेंद्रियःभूमिशायीतथाखंडंदीपंपंचस्वहस्सुच ॐनमोवासुदेवायजपेदष्टोत्तरंशतं पूजांतेचार्घ्यमावेद्यजुहुयात्तिलसंयुतान् यवान्व्रीहीन्पायसंचमंत्रेणाष्टाक्षरेणच पूजाविधिविशेषेणदिनेष्वेवहिपंचसु प्रथमेदिवसेपद्मैर्हरेःपादौप्रपूजयेत् द्वितीयेविल्वपत्रैश्चजानुनीसंप्रपूजयेत् तृतीयेपूजयेन्नाभिंतुलस्याथचतुर्थके जातिपुष्पादिभिःस्कंधौमालत्यापंचमेशिरः एकादश्यामथाभ्यर्च्यमंत्रवद्गोमयंपिबेत् द्वादश्यांचगवांमूत्रंत्रयोदश्यांचगोपयः चतुर्दश्यांगोघृतंचपूर्णिमायांतथादधि पंचस्वपिदिनेष्वेवविधिवत्स्नानपूजने नंदायांकांचनंदद्याद्द्वादश्यांवस्त्रमुत्तमं गोदानंचत्रयोदश्यांरिक्तायांघृतपायसं सितासिततिलैस्स्नानंपूर्णिमायांविशेषतः भीष्मपंचदिनेष्वेषुदद्याद्भीष्मायचांजलिं संवत्सरकृतंपापंतत्क्षणादेवनश्यति सत्यव्रतायशुचयेगांगेयायमहात्मने भीष्मायवैददाम्यर्घ्यमाबाल्यब्रह्मचारिणे वसूनामवतारायशंतनोरात्मजायच अर्घ्यंददामिभीष्मायसोमवंशोद्भवायच वैयाघ्रपदगोत्रायसांकृत्यप्रवरायच अनपत्यायभीष्मायतस्मैदद्याज्जलांजलिं सव्येनानेनमंत्रेणतर्पणंसार्ववर्णिकं प्रतिपद्दिवसेविप्रान्भोजयेत्पायसेनच पूर्णायामेवअथवाब्राह्मणान्भोजयेद्व्रती विप्रशेषान्नभोक्तायोमुक्तिस्तस्यकरेस्थिता इतिपाद्मेकार्तिकमाहात्म्येभीष्मपंचकव्रतविधानं ॥ अथभविष्योत्तरोक्तं भीष्मपंचकव्रतं ॥ श्रीकृष्णउवाच कार्तिकेशुक्लपक्षस्यशृणुधर्मंपुरातनं एकादश्यांसमारभ्यविज्ञेयंभीष्मपंचकं दुस्तरंभीष्ममित्याहुरशक्यंतदिहोच्यते दारुणंभीषणंभीष्ममित्यभिधानात् । यस्तंकरोतिराजेंद्रतेनसर्वंकृतंभवेत् वसिष्ठभृगुगर्गाद्यैश्चीर्णंकृतयुगादिषु सीरभद्रादिभिर्वैश्यैःशूद्रैरन्यैःकलौयुगे दिनानिपंचपुण्यानिचीर्णमेतन्महाव्रतं ब्राह्मपौत्र

ह्मचर्य्येणजपहोमक्रियादिभिः क्षत्रियैश्चतथावैश्यैःसत्यशौचपरायणैः पापार्द्धैःपरिहर्तव्याब्रह्मचर्येणानिष्ठया मद्यंमांसंपरित्याज्यंमैथुनंपापभाषणं शाकाहारेणकर्तव्यंकृष्णार्चनपरैर्नरैः स्त्रीभिर्वाभर्तृवाक्येनकर्त्तव्यंसुखवर्धनं विधवाभिश्चकर्त्तव्यंपुत्रपौत्राभिवृद्धये सर्वकामसमृद्ध्यर्थंमोक्षार्थमपिपांडव नित्यंस्नानेनदानेनकार्त्तिकीयावद्दंवतु वैश्वदेवश्चकर्त्तव्योविष्णुध्यानपरायणैः पापस्यप्रतिमाकार्य्यारौद्रवक्त्रातिभीषणा खड्गहस्ताचविकृतासर्वलोहमयीनृप तिलप्रस्थोपरिस्थाप्याकृष्णवस्त्राभिवेष्टिता करीरकुसुमापीडाचलत्कांचनकुंडला संपूज्यपरया भक्त्याधर्म्मराजस्यनामभिः इममुच्चारयन्मंत्रंगृहीतकुसुमांजलिः यदन्यजन्मनिकृतमिहजन्मनिवापुनः पापं प्रशममायातुतत्सर्वंतवपूजनात् ब्राह्मणायततोदेयंकृष्णोमेप्रीयतामिति अन्येषामपिदातव्यंस्वशक्त्यावांछितं वसु कृतकृत्यःस्थिरोभूत्वाविरक्तःसंगतोभवेत् शांतचित्तोनिराबाधःपरमंपदमाप्नुयात् नीलोत्पलदलश्यामश्चतुर्वक्त्रश्चतुर्भुजः अष्टपाच्चैकनयनःशंकुकर्णोमहाशनःजटीद्विहस्तस्ताम्रास्योमृगराजतनुच्छदः चिंतनीयोमहादेवोयस्यरूपंनाविद्यते इदंभीष्मेणकथितंशरतल्पगतेनच तदेतत्तेसमाख्यातंदुष्करंभीष्मपंचकं धन्यंपुण्यंपापहंतयुधिष्ठिरमहाव्रतं यच्चीर्त्वाब्रह्महागोघ्नःसर्वपापैःप्रमुच्यते यद्भीष्मपंचकमितिप्रथितंपृथिव्यामेकादशीप्रभृतिपंचदशीनिरुद्धं उत्पन्नभोजनपरस्यनरस्यतस्मिन्निष्टंफलंदिशतिपांडवशार्ङ्गधन्वा इतिभविष्योत्तरेभीष्मपंचकव्रतं अथभीष्मपंचकव्रतमाहात्म्यं पाद्मेकार्तिकमाहात्म्ये पृथुरुवाच व्रतंयज्जगतिख्यातंदेवर्षेविष्णुतोषणं भीष्मपंचकमित्येवंकुतःख्यातंतदाख्यया नारदउवाच राजन्परंपराप्राप्तंकालेनेहतिरोहितं द्वापरेपुनरेवेदंश्रीकृष्णेनप्रकाशितम् भीष्मायकथितंयस्मात्तेनादौकृतमित्युत अतस्तदाख्ययालोकेकथितंभीष्मपंचकं पृथुरुवाच कदासासंगतिस्तस्यगांगेयस्यमहात्मनः कृष्णेनसहदेवर्षेकदापृष्टश्चकेशवः नारदउवाच यदागतोदौत्यविधौकुरूंश्चकृष्णःपृथा

सूनुभिःश्चरितश्च   गृहंगतोविदुरस्यातिथेयंचकारगोप्यात्मनिसुप्रमोदं   मन्येनजातिर्नचपंडितत्वंनवाधनित्वंन-
चशूरताच   सर्वैर्गुणास्तस्यनतोषकारणंभक्त्यैवकारुण्यनिधिःप्रतुष्यते   उपविष्टंकृतातिथ्यंश्रुत्वाभीष्मोमहामनाः
जगामकृष्णसान्निध्यंदर्शनानंदनिर्वृतः   भीष्ममागतमाज्ञायप्रीत्यासौयदुनंदनः   समुत्थायाभिवाद्याथबाहुभ्यां-
परिरभ्यच   उपविश्यासनेस्वेस्वेकृष्णभीष्मौपरस्परं   पप्रच्छतुःशिवंप्रीतौभीष्मःपुनरपृच्छत   भीष्मउवाच यदू-
विलासचलदुल्लसतित्रिधेयंसर्गंसृजत्यवतिहंतिगुणैश्चमाया   ब्रह्मादयोयमिहवेदितुमीश्वरानोसोयंपृथातनयदू-
तविधिंकरोति इदंविचित्रंभगवन्चित्तेमेपरिवर्तते   साम्येनवर्तमानोपिजीवानांत्वंसुहृत्सखा   अथान्यान्सेवमानां
श्चत्यक्त्वाचैपांडवेष्वथ   बंधुत्वंचसुहृत्वंचगुरुत्वंसुकराश्रयं   पितृत्वंकार्यकारित्वंपांडवेषुयदुनंदन   किमेतेषांतथाक
र्म्मतवाराधनमीश्वर   अथतेषुचकाशक्तिर्वशीकरणमद्भुतं यथात्वमीश्वरोमायीबलान्नीतश्चवश्यतां   कारणंकथ्य
तांविष्णोयतस्त्वं वश्यतांगतः   श्रीकृष्णउवाच   गंगात्मजमहाभागनप्रष्टव्यमिदंत्वया   गोपनीयमिदंमेचभक्ति
योगस्तु[illegible]त्   यतःप्रचरितंलोकेयद्धृतंजनतानयत्   भक्तियोगेनमेलोकःसर्वोमुक्तोभविष्यति   भीष्मउवाच ॥
त्वदाराधनधर्म्मांश्चमुनिभिर्बहुबोधिताः   ईशवश्यकरंधर्म्मंत्वमेवाख्यातुमर्हसि   श्रीनारदउवाच   तेनैवमभ्या-
र्थितोयदाहरिःपृष्टस्तुलोकस्यहितायनूनं   संसारिणांजन्मभृदादिदुःखंविद्वान्दयासिंधुरुवाचभीष्मम् ॥श्रीकृष्ण-
उवाच   अवंतिसंस्थाःपंचपूर्वकल्पेद्विजोत्तमाः   कविःशुचिर्दृढोदांतोहंसोनामतएवते   संगीतकंपाठयंतःकंठैःकिन्न-
रवत्स्वराः   तेऽनेकपारिषत्सुपार्श्वभ्रमंतोदेशांतरेषुविविधंददृशुश्चरित्रं   वित्तंतदाप्यबहुवस्त्रविभूषणादिसार्द्धंवर[illegible]
मकार्षुर[illegible]   तेकदाचित्सुवीरस्यराज्ञोमधुपुरींययुः   श्रुत्वासंगीतव्यसनंसंभ्रातस्यादिदृक्षवः   अहोअभाग्यं-
लोकस्यनपतिंयमुनाजलं   गोविंदोगोपिकासंगीयत्रक्रीडतिकंसहा   यथास्पर्शमणिस्पर्शाल्लोहंयातिसुवर्णतां

तथाकृष्णाजलस्पर्शात्पातकंयातिपुण्यतां स्नात्वातीर्थेतदोपोष्यस्थित्वादिनचतुष्टयं पप्रच्छूराजचरितमवरोधविदं
जनं विचार्य्यमनसाप्राहसजनोतिविचक्षणः राज्ञएकाभोगपत्नीनाम्नाकादंबिनीवरा संगीतविद्यानिपुणारा,
गेकंठेचकिन्नरी स्त्रियएवहितांबालांनर्त्तयंतिनृपाग्रतः द्रष्टुंनशक्यतेतस्यानृत्यमन्येनकेनचित् एतच्छ्रुत्वावि
चार्य्याथनिश्चयंचागमन्निदं यत्रतच्छ्रूयतेवाद्यंनृत्यतालादिकध्वनिः तत्स्थलेप्राप्यतस्थुस्तेराज्ञोदर्शनकांक्षि-
णः श्रुत्वासम्यग्ध्वनिंविप्राःपप्रच्छुरुपजीविनः विप्राऊचुः अहोवतात्रसान्निध्येराज्ञोनास्तिचकोविदः संगी-
तज्ञोयतोवाद्येनृत्येचापिनशुद्धतातंत्रीद्वयंतुशिथिलंकिन्नरैर्वाद्यतेपरं तालंचापत्स्थितंदत्तमित्यवद्यंसभासदां तच्छ्रु
त्वाराजसान्निध्यंगत्वाराज्ञेन्यवेदयन् तच्छ्रुत्वावचनंराजाप्रतीहारंसमादिशत् गच्छानयेहतान्विप्रान्गुणदो-
षविचक्षणान् इतिराज्ञोवचःश्रुत्वाससद्यस्तान्समाह्वयत् प्रविष्टास्तत्रयत्रासौराजाकादंबिनीवरा राज्ञेआशि-
षमावेद्यविविशुस्तेतदासने तेषांचसाज्ञायविशेषाविज्ञतांविशेषतश्चारभताथनर्तनं यद्गीतलास्याभिनयैर्मनोह,
रैः कृतातदैकाग्रमनाःसभाखिला साचक्रेणयदातालंददतीतैर्निवारिता त्यक्त्वाचक्रेपुनर्ग्राह्यंतालेनाभूत्सखंडितः
इत्येवमालोक्यतदीयमद्भुतंरूपंगुणांस्तेगुणिनोपिमोहिताः साचापितेषांगुणविज्ञतांपरांरूपंमनोहारिचजातह
च्छया उत्थितेराज्ञितेचापिकृच्छ्राद्राज्ञोगृहाद्बहिः गताःसापिचलज्जंतीवीक्षिंतीविरहातुरा राजभीत्यागृहांतःस्थाव
भूवविमनाभृशं ततःसख्यादिवचनैराहतान्मनसःप्रियान् एकैकोमेरहोविद्यांदृष्ट्वादर्शयतुस्वकां नगरस्योत्तरे·
कोणेयमुनायास्तटेमहत् अनंततीर्थंविख्यातंयत्रदेवालयोहरेः नगराद्दूरतोरम्यंनिर्जनंवनवेष्टितं तत्रगच्छेद्भव,
त्स्वेकोयास्येहंछलवेषधृक् वीणारागस्यनृत्यस्यदर्शयिष्यामिकौतुकं भवंतोपिक्रमेणाथदर्शयंतुस्वकंगुणं साग
तातत्रचाज्ञातराज्ञोगेहादिहैकला भवतांकोपिगच्छेतेत्युक्तंद्रष्टुंतदीप्सितं श्रीकृष्णउवाच मथुरामाश्रितवने

काश्चित्तिष्ठत्यहार्निशं नैष्ठिकोब्रह्मचारीसमदाराधनतत्परः भिक्षार्थमपिनायातिपुरेदुःसंगशंकितः भीष्मपंचदिनेष्वे
षुतस्मिन्देवालयेशुभे ममपूजांप्रकुर्वाणोव्रतमेतच्चकारह तेषुपंचसुविप्रेषुकविर्नामजगामह. एकादश्यांरहस्त
स्यारूपरागदिदृक्षया आदौगतोमुनेःपार्श्वेकविर्दृष्ट्वाविधिंततः पूजयामासतेनैवविधिनापिसमाहितः ततःक्षणा
त्समायातारामाकादंबिनीशुभा मुनिंनत्वाथपूजादिदृष्ट्वावीणांसमग्रहीत् मत्प्रीतियुक्ताचित्तेनसविशेषंजगौचसा,
क्रतुधाम्नश्चमेगाथांमधुरस्वरभूषितां शृण्वतोनाभवत्क्षोभःस्त्रीसंगाद्विजितात्मनः मुनेःसंगतिमासाद्यमहतोऽपित
योस्तदा मनःशुद्धमभूत्कामोमद्भक्त्यापर्य्यपूजयत् रात्रौजागरणंनृत्यंचक्रेकादंबिनीकविः वीण्याचगायतौमेग्र.
एकचित्तौजहर्षतुः गोमयाचमनंतेनदृष्ट्वातुमुनिनाकृतं कविनापिकृतंपश्चात्प्रातःसायान्नृपालयं कविरागत्यन.
गरंस्वधनंभूषणानिच द्वादश्यामददात्सर्वंविरक्तोभक्तिवृद्धये द्वितीयेदिवसेप्रागाच्छुचिस्तस्यादिदृक्षया द्वाद
श्यांप्रातरेवासावासीनंददृशेमुनिं तेनापिपूजितोहंवैशुचिनामुनिसंगतः तत्क्षणादागतांतत्रददृशेतांमनोरमां सा
तस्यददृशेनृत्यंगीतंपश्चात्स्वयंतथा चक्रेस्वकीयंलावण्यंतत्सर्वंशुचयेऽर्पयत् तथैवगीतनृत्याभ्यांभक्तिरस्याप्यजा
यत मुनिस्संप्राश्यगोमूत्रंरात्रौभक्तिपरायणः पूजनान्मेव्रतस्यापिमुनिसंगतितःशुचिः विरक्तइंद्रियार्थेभ्यःसर्वं
स्वमददात्ततः इदंप्रोवाचवचनंमद्भक्त्यासजितेंद्रियः अहोमोहस्यमाहात्म्यंविषयासक्तचेतसां यत्सेवयामहा
नंदरसमज्ञाविदंतिन संसारंदुःखदावंचनोपेक्षंतेर्थजंसुखं तंहारिंहृदयस्थंचत्यक्त्वान्यांमृगतृष्णिकां धावंतोहि
ततःकिंतुमहादुःखकरंपरं तथापितादृशींवालांनृत्यगीतमनोहरां दृष्ट्वापिनाभवत्क्षोभोमहानंदभुजोमुनेः तस्मा
त्संत्यज्यसंसक्तिंसर्वतोजगदीश्वरे कुर्य्यात्प्रेमभरांभक्तिमेकएवाचरेत्क्षितिं इत्युक्त्वातानदृष्टैवगतस्तीर्थांतरंप्रति
एवमेवत्रयोदश्यांदृढोगात्तांदिदृक्षया मुनिनासहसंगम्यतथैवापूजयच्चमां गोपयःप्राशितंतेनदृढःप्राशत्प्रसन्नधीः

तस्यान्नृत्यंचगीतंचदृष्ट्वारागविवर्जितः दृढस्तद्वचनंप्रोच्यगतस्तीर्थांतरंप्रति दत्त्वासर्वस्वदानंचममभक्तिपरायणः
चतुर्दश्यांगतोदांतोमुनिसंगतितस्ततः नृत्यगीतोत्सवंकृत्वामत्पूजांचाविशेषतः मुनिशेषंघृतंप्राश्यशुद्धसत्त्वोभ
वत्क्षणात् तस्यागुणांश्चरूपंचदृष्ट्वासम्याग्विरक्तिमान् तथैवोक्तातथादत्त्वादानंसर्वस्वमात्मनः निष्किंचनो
भक्तियुक्तोगतस्तीर्थांतरंप्रति पौर्णमास्यांगतोहंसोदृष्ट्वासीनंमहामुनिं नत्वास्नात्वातटेनद्याधात्रीछायांसमाश्रि
तः सस्मारपूर्णिमापुण्यांपितॄणांश्राद्धमाचरत् धात्रीछायांसमाश्रित्यस्नानंदानंचकार्तिके मत्पूजनंभोजनंच
कोटियज्ञसमंस्मृतं कार्तिकेपावनीधात्रीस्पर्शनेभक्षणेतथा तेभ्यस्तदधिकंजातंसंयोगान्मुनिसन्निधौ तथैवमुनि
संगत्यामत्पूजागीतनर्तनं सचक्रेतांददर्शाथनतयामोहितोह्यभूत् दधिप्राश्याथमुनिनासहैवाभूद्विरक्तिमान् द
त्वासर्वस्वमत्रैवगतस्तीर्थांतरंप्रति कादंबिन्याःश्रुतंराज्ञागमनंविष्णुमंदिरे निगृहीतापुनर्नैयंगतादेवालयेबलात्
क्रमेणपंचभिर्विप्रैर्व्रतमेकंकृतंमम मथुरायांचगांगेयतैरेवमुनिसंगतः अथातएषामातिवल्लभासीत् कादंबि
नीसागुणरूपमूर्तिः व्रतेनपूजाविधिनाचगीतनृत्यादिनाराज्यमवाप्तमेभिः प्रीतिर्ममात्यंतपरापगेयजातातथै
षांवशगोप्यभूवं धात्रीछायाकृतंश्राद्धंकार्त्तिकेतेनकर्मणा तन्मध्येसार्वभौमोऽयंजातोहंसोयुधिष्ठिरः एकादश्यां
विशेषाच्चजागरेसौमदंशकः नरोभूदर्जुनोमित्रंमत्सहायोतिवल्लभः सहदेवःशुचिर्दांतोनकुलोभून्महाभुजः दृढ
एषमहावीर्योभीमसेनोव्यजायत एवमेतैःपुराचीर्णंव्रतंपरमतोषणं तेनास्मिवशगोह्येषांदास्यामिपदमव्ययं
त्वयाकृतंव्रतं पश्चादाख्यातं भीष्मपंचकं येत्वत्रकर्मभूमौमे करिष्यंतिमहाव्रतं मथुरायांतुगांगेयतेषां,
मुक्तिः करेस्थिता सार्वभौमंचस्वर्लोकंब्रह्मलोकंसनातनं योगासिद्धीश्च मुक्तिंच प्रीतोयच्छामि सर्वथा,

सितपक्षेद्वादश्यांप्रयतोनरःस्नानंकुर्यात्प्रयत्नेनदंतधावनपूर्वकं नित्यकर्माणिनिर्वर्त्यपश्चाद्विष्णुंप्रपूजयेत् धातारंचविधातारंपूजयेत्स्तंभकेद्वये हरिद्राक्षतगंधाद्यैःशुक्लमाल्यैर्विशेषतः विंशतिर्हस्तमात्रंवैस्थंडिलंचोपालिप्यच आधायाग्निंस्वगृह्योक्तंचाज्यभागादिकंक्रमात् जुहुयात्पायसंचैवघृतमष्टोत्तरंशतं ततोमंगलवाद्यैश्चसूक्तपाठैश्चशोभनैः नृत्यैश्चतत्रपठनैर्नयेद्विल्वालयंध्वजं देवेशद्वारदेशेवाशिखरेवामनोरमे भक्षभोज्यादिभिर्युक्तैर्नैवेद्यैश्चहरिंयजेत् नमस्तेपुंडरीकाक्षनमस्तेविश्वभावन नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज यत्रेदमखिलंजातंसर्वंयत्रप्रतिष्ठितं लयमेष्यतियत्रैवतंप्रपन्नोस्मिमाधवं यन्मुखाद्ब्राह्मणाजाताबाहूभ्यामभवन्नृपाः वैश्यायस्योरुतोजाताःपद्भ्यांशूद्राश्चजज्ञिरे मायासंगममात्रेणवदंतिपुरुषंतुयं स्वभावनिर्मलंशुद्धंनिर्विकल्पंनिरंजनं सद्भक्तवत्सलंदेवंभक्तिगम्यंजनार्दनं निर्गुणंपरमंसूक्ष्मंप्रपन्नोस्मिपुनःपुनः इतिस्तुत्वानमेद्विष्णुंब्राह्मणान्भोजयेत्ततः आचार्य्यंपूजयेत्पश्चाद्दक्षिणाच्छादनादिभिः पुत्रमित्रकलत्राद्यैर्बंधुभिःसहवाग्यतः कुर्वीतपारणंविप्रविष्णुव्रतपरायणः यस्त्वेतत्कर्मकुर्वीतध्वजारोपणमुत्तमं तस्यपुण्यफलंवक्ष्येशृणुध्वंमुनिपुंगवाः पटोध्वजस्यविप्रेंद्रयावच्चलतिवायुना तावद्वैपापजालानिनश्यंतेवनसंशयः महापातकयुक्तोपियुक्तोवाह्युपपातकै ध्वजंविष्णुगृहेकृत्वासर्वपापैःप्रमुच्यते सर्वपापविनिर्मुक्तोविष्णुसायुज्यमाप्नुयात् यावद्दिनानिवसतिध्वजोविष्णुगृहेस्थितः तावद्युगसहस्राणिविष्णुसारूप्यमश्नुते आरोपितंध्वजंदृष्ट्वायेभिनंदंतिधार्मिकाः तेपिसर्वेप्रमुच्यंते महापातककोटिभिः ॥ अथैतस्यविधिः । कार्तिकेशुक्लपक्षस्यदशम्यांनियमान्वितः एकादश्यांयथाविध्युपोषितः विष्णुगाथाश्रवणादितत्परः द्वादश्यांयथाविधिस्नात्वानित्यकर्मनिर्वर्त्य संकल्पंकुर्यात् तिथ्यादिसंकीर्त्य ममाशेषपापक्षयोत्तरसकलाभीष्टसिद्धिपूर्वकविष्णुसारूप्यकामः विष्णुद्वारेध्वजारोपणंकरिष्य इति

संकल्प्य ॥ पुण्याहवाचनस्वास्तिवाचनादिकृत्वा आचार्य्यमृत्विजंश्चकृत्वातैः सहदेवालये विष्णुंपौरुषसूक्तेनसंपूज्य ततअत्युच्चध्वजस्तंभौगायत्र्याप्रोक्ष्य ध्वजयुक्तौतौकृत्वा तत्रसूर्य्यंवैनतेयं हिमांशुंधातारंच नाममंत्रैः संपूज्य ध्वजौहरिद्राक्षतगंधपुष्पादिभिः संपूज्य शुद्धभूमौस्थंडिलेग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानंविष्णुमष्टोत्तरंपायसघृतादिभिः सूर्यंवैनतेयं हिमांशुंधातारंच विधातारमष्टाष्टसंख्यापायसाहुतिभिः शेषणस्विष्टकृतमित्यादि होममंत्राः षोडशर्चंपौरुषसूक्तं विष्णोर्नुकंव्वीर्य्याणिप्रवोचंयःपार्थिवानिव्विममेरजाꣳसि योअस्कभयदुत्तरꣳसधस्थम्विचक्रमाणस्त्रेधोरुगायोव्विष्णवित्वा इरावतीधेनुमतीभूतꣳसूयवसिनीमनवेदशस्याव्यस्कभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितोमयूखैः स्वाहा इत्यादिभिः इतिद्रव्यं अष्टादशभिर्मंत्रैः षडावृत्याहोमःउदुत्यंतजातवेदसमितिसूर्यस्य सामध्वनिशरीरस्त्वामितिगरुडस्य सोमोधेनुꣳसोमोत्यर्व्वंतमाशुꣳसोमोव्वीरङ्कर्मण्यंददाति सादन्यंव्विदथ्यꣳसभेयंपितृश्रवणंयोददाशमस्मै तिहिमांशोःधातुर्धाताददातुनोगायमीशानोजगतस्पतिः सनपुण्येनचखनविधातुर्योनः ततोअभ्यासज्जतातइति ततः सौरमंत्रान् शांतिसूक्तानिचपठित्वाजागरणादिनारात्रिंनिनयेत् ततोदेवंसंपूज्य ततोसूक्तपाठैः स्तोत्रपठितैः नृत्यमंगलवाद्यघोषैः सहदेवंप्रदक्षिणीकृत्य देवालयंध्वजंचानीयदेवस्यद्वारदेशेशिखरेवासुस्थिरौकृत्वा ध्रुवसूक्तपठित्वा तौसंपूज्य पुनर्देवंविशेषेणसंपूज्य नमस्तेपुंडरीकाक्षनमस्तेविश्वभावन नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज यत्रेदमखिलंजातंयत्रसर्वंप्रतिष्ठितं लयमेष्यतियत्रैवतंप्रपन्नोस्मिकेशवंनजानंतिपरंभावंयस्यब्रह्मादयःसुराः योगिनोयंनपश्यंतितंवंदेईशरूपिणं यन्मुखाद्ब्राह्मणोजातायद्बाहूरभवन्नृपाः वैश्यायस्योरुतोजाताःपद्भ्यांशूद्राश्चजज्ञिरेमायासंगममात्रेणवदंतिपुरुषंतुयं स्वभावनिर्मलंशुद्धंनिर्विकारंनिरंजनं एकोविष्णुर्महद्भूतंपृथग्भूतानिसर्वशः

त्रीँल्लोकान्व्याप्यविश्वात्माभुंक्तेविश्वभुगव्ययः योदेवःसर्वभूतानामंतरात्माजगन्मयः निर्गुणः परमानंदः स
मेविष्णुःप्रसीदतु यश्चतुर्भिश्चतुर्भिश्चद्वाभ्यांपंचभिरेवच हूयतेचपुनर्द्वाभ्यांतस्मैयज्ञात्मनेनमः यःपरेशःपरा
नंदःपरात्परतरःप्रभुः चिद्रूपश्चित्परिज्ञेयःसमेविष्णुःप्रसीदतु ज्ञानिनांकर्मिणांचैवतथाशक्तिमतांनृणां ग
तिदाताचगम्यश्चसमेविष्णुःप्रसीदतु यइदंकीर्तयेन्नित्यंस्तोत्राणामुत्तमोत्तमं सर्वपापविनिर्मुक्तःपरंसायुज्यमा
प्नुयादिति ततोद्वादशब्राह्मणान्सदन्नेनभोजयित्वा दक्षिणादिनापरितोष्याशिषोगृहीत्वाभुंजीत एवमेवशि
वादिदेवतानांदेवालयेषुध्वजारोपणंकार्यं तत्रगरुडस्थानेवृषभंसंपूजयेत् अन्यत्समानंसर्वत्र होमेतुपौरुषंसूक्तं
त्र्यंबकं कद्रुद्रायेत्यादिमंत्राः यथासंभवंज्ञेयाः इतिध्वजारोपणव्रतम् अथभीष्मपंचकव्रतविधिः तत्रादौपूजा
र्थंदीपस्थापनार्थंचशुचिनिर्वातस्थानेरक्षार्थंमृण्मंदिरंविधाय ततोव्रतकर्ताशुचिराचम्य ओमद्येत्यादि देशकालौ
संकीर्त्यममसमस्तपापक्षयपूर्वकश्रीराधादामोदरप्रीत्यर्थंभीष्मपंचकव्रतंकरिष्ये तस्यपूर्वांगत्वेनस्वस्तिवाच
नाचार्यादिवरणसहितंपंचभीष्मपूजनसहितं श्रीराधादामोदरपूजनंदीपदानंचकरिष्ये अथआवाहनं आ
गच्छागच्छदेवेशशंखचक्रगदाधरव्रतपूजाविधानार्थंराधिकासहितप्रभो ओंभूर्भुवःस्वराधादामोदरइहागच्छ १
शंतनोःसुतगांगेयरणविद्याविशारद वैयाघ्रपदगोत्रत्वंमूर्तावत्रास्थिरोभव ओंभूर्भुवःस्वर्भीष्मइहागच्छ २
अवंतिसंभवाःपंचपूर्वकल्पेद्विजोत्तमाः कविःशुचिर्दृढोदांतोहंसोनारीमनोहरा ओंभूर्भुवःस्वःपंचपांडवाद्रौपदीस
हिताइहागच्छत ३ अहमावाहयिष्यामिधर्मराजंयुधिष्ठिरं अजातशत्रोएह्येहिसर्वधर्मभृतांवर १ अहमावहाजि
ष्यामिभीमसेनंमहाबलं भीमसेनत्वमभ्येहिसर्वशत्रुनिवर्हण २ अहमावाहयिष्यामीपार्थंरिपुनिसूदनं अ
र्जुनाभ्येहिमेशीघ्रंलक्ष्मीकृतवसुंधर ३ आवाहयिष्येनकुलंरुपेणाप्रतिमंभुवि नकुलत्वमिहागच्छखड्गचर्म

धराच्युत ४ अहमावाहयिष्यामिसहदेवंरणप्रियं सहदेवत्वमभ्येहिरूपद्रविणसंयुत ५ अहमावाह
यिष्यामियाज्ञसेनींयशस्विनीं द्रौपदित्वमिहागच्छप्रतिमायांसुशोभने ६ अहमावाहयिष्यामि जी
वंसर्वगतंविभुं पंचधावास्थितंदेहेपरमात्मानमव्ययं इत्यावाह्यजीवादानं कृत्वा ॐनमोऽस्त्वनंतायस
हस्रमूर्तयइतिमंत्रेण श्रीराधादामोदरायनम इतिषोडशोपचारैः संपूज्य ॐभीष्मायनमः ॐयुधिष्ठिरायनमः
ॐभीमसेनायनमः ॐअर्जुनायनमः ॐनकुलायनमः ॐसहदेवायनमः ॐयाज्ञसेन्यैनम इति
नाममंत्रैः सर्वेषां पूजा कार्या ततो भीष्मतर्पणं वैयाघ्रपदगोत्रायसांकृत्यप्रवरायच वसूनामवतारा
यशंतनोरात्मजायच आत्मनिष्ठायमुनयेआवाल्यब्रह्मचारिणे अनपत्यायभीष्मायतस्मायेदंतिलोदकम्
इतिभीष्माय तिलोदकंदत्त्वा ततोदीपंप्रज्वाल्य दीपायनम इति संपूज्य यस्मिन्लोकेनिरालोकेनसू
र्येनैवचंद्रमाः तंदेशंतर्त्तुमिच्छामिदीपंदत्त्वाजनार्दन यत्रास्तिमातानापितानबंधुर्भ्रातापिनोयत्रसुहृज्जनश्च नज्ञाय
तेयत्रदिनंनरात्रिस्तत्रापिदीपंशरणंप्रपद्ये इतिदीपप्रार्थनंकृत्वा पूजाफलसाद्गुण्यार्थमाचार्य्यायदक्षिणांदत्त्वैकाद
श्यादिपूर्णिमांतंव्रतमेवंचरेदिति इक्षुदंडकूष्मांडादिकंयथाचारमत्रभीष्मपंचकव्रतेविधिनाविधेयं पूजांतेउद्यापनं
तत्रस्थंडिलेअग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानंविष्णुः इदंविष्णु अतोदेवेतिमंत्राभ्यां प्रत्येकमष्टोत्तरमा
ज्याहुतिभिर्भीष्मपंचपांडवान्द्रौपदीसहितान्प्रत्येकंनाममंत्रैरष्टाष्टाहुतिभिः प्रायश्चित्ताहुतिभिः शेषेणस्विष्टकृ
दाहुत्याहंयक्ष्ये एवंहोमंसमाप्य ततोभीष्मादिमूर्तिकलशानांदानं शय्यागोदानादिकं कृत्वा पूर्णाहुतिमभिषेकं
विधाय छिद्रावतारणं इत्युद्यापनंकार्तिक्यांवाकुर्य्यात् अथकार्तिकशुक्लद्वादश्यांविशेषकृत्यं नारदीये द्वा
दश्यामूर्ज्जशुक्लायांदेवंदामोदरंविभुं समभ्यर्च्योपचारैस्तुगंधाद्यैःसुसमाहितः तदग्रेभोजयेद्विप्रान्पक्वान्नेनार्कसं

स्यया ततःकुंभानपः पूर्णान्वस्त्राच्छन्नान्समर्चितान् सपूगमोदकैः पूर्णान्प्रीत्यातेभ्यः समर्पयेत् एवंकृतेप्रियो विष्णोर्जायतेऽखिलभोगभाक् देहांतेविष्णुसायुज्यंलभतेनात्रसंशयः नीराजनव्रतंचात्रगदितंतन्निबोधमे सुप्तोत्थितंजगन्नाथमलंकृत्यनिशागमे अलंकृतोभवेद्वह्निमुत्पाद्याभ्यर्च्ययत्नतः हुत्वातत्रसमुद्दीप्तेरौप्यदीपिकयामुने गंधपुष्पाद्यर्चितंतंजनैर्नीराजयेद्द्वारि तत्रैवानुगतांलक्ष्मींब्रह्माणंचंडिकांतथा आदित्यंशंकरंगौरींयक्षंगणपतिंतथा मातृपितृजनान्मान्यान्सर्वान्नीराजयेत्क्रमात् नीराजनंगजाश्वादेर्महिष्यादेश्चमंडनं नमोजयेतिशब्दैश्चघंटाशंखादिनिस्वनैः सिंदूरालिप्तशृंगाणांचित्रांगानांचवर्णकैः गवांकोलाहलेवृत्तेनीराजनमहोत्सवे तुरगान्लक्षणोपेतान्गजांश्चमदविप्लुतान् राजचिह्नानिसर्वाणिछत्त्रादीनिचनारद राजापुरोधसासार्द्धंमंत्रिभृत्यपुरःसरं पूजयित्वायथान्यायंनीराज्यस्वयमादरात् शंखतूर्य्यादिघोषैश्चनानारत्नविनिर्मिते सिंहासनेनवेक्लृप्तेतिष्ठेत्सम्यगलंकृतः ततःसुमंगलैर्युक्तावेश्यावाथकुलांगना शीर्षोपरिजनेंद्रस्यतथानीराजयेच्छनैः एवमेषामहाशांतिःकर्तव्याप्रतिवत्सरं राज्ञावित्तवतानेनस्वानामारोग्यमिच्छता एषाराष्ट्रेपुरेग्रामेक्रियतेशांतिरुत्तमा नीराजनाभिधाविप्रकुरोगायांतिसंक्षयम् भविष्योत्तरे ॥ श्रीकृष्णउवाच ॥ पुराबभूवराजर्षिरजापालइतिश्रुतः प्रार्थितःसप्रजाभिश्चसर्वदुःखापनुत्तये दुःखापनोदंहिकुरुव्याधितानानरेश्वर एवमुक्तश्चिरंध्यात्वाकृतव्याधिनिवारणं व्याधिनिवारणंनीराजनविधिनेतिशेषः पालयामाससंहृष्टोह्यजापालस्ततोऽभवत् तेनैषानिर्मिताशांतिर्नाम्नानीराजनाजने तस्यास्तुपांडवश्रेष्ठलक्षणंवच्मितच्छृणु राज्ञापुरोधसासार्द्धमनुष्ठेयाविधानतः तस्मिन्कालेबभूवाथरावणोराक्षसेश्वरः लंकास्थितःसुरगणान्नियुयोजस्वकर्मसु अखंडमंडलंचंद्रमातपत्रंचकारह इंद्रं सेनापतिंचक्रेवायुंपांसुप्रमार्जकं वरुणंदंतिकर्मस्थंधनदंधनरक्षकं यमंसंयमनेऽरीणांयुयुजेमंत्रणेमनुं मेघाः

सिंचंतिलिंपंतिसलिलेनाखिलाद्रुमाः पुष्पाणिचिक्षिपुःसर्वेमुनयःशांतिपाठकाः ऋग्यजुःसाममंत्रैश्चब्रह्मणासह संस्थिताः नागाद्यास्तस्यकक्षायागंधर्वागीततत्पराः प्रेक्षणीयेप्सरोवृंदंवाद्येविद्याधरावृताः गंगाद्याःसरितः पानेगार्हपत्येहुताशनः विश्वकर्मातुसंस्कारेयमःशल्यप्रयोजने तिष्ठंतिपार्थिवाःसर्वेपुरसेवाविधायिनः दृश्यंतेभास्करारत्नैः प्रस्खलंतोविभूषणैः तान्दृष्ट्वारावणःप्राहप्रहस्तप्रतिहारकं सेवांकर्तुंममस्थानेब्रूहिकोत्रसमागतः उवाचसप्रणम्याग्रेदंडपाणिर्निशाचरः एषराजासमांधाताधुंधुमारोनलोर्जुनः ययातिर्नहुषोभीमोराघवोयंविदूरथः एतेचान्येचवहवोराजानइहशासने सेवाकरास्तवस्थानेनाऽजापालइहागतः रावणः कुपितः प्राहशीघ्रंदूतंविसर्जयन् धूम्राक्षगच्छब्रूहित्वमजापालंममाज्ञया सेवांकुरुसमागच्छकरंवायच्छपार्थिव अन्यथाचंद्रहासेनत्वांकरिष्येविकंधरं रावणेनैवमुक्तस्तुधूम्राक्षोगरुडोयथा संप्राप्तस्तांपुरींरम्यांतत्रराजकुलंगतः ददर्शायांतमेकांतमजापालमजावृतं मुक्तकेशंमुक्तकक्षंमुक्तपृष्ठकरद्वयं यष्टिस्कंधेरेणुभूतंव्याधिभिः परिवारितं निहतामित्रशार्दूलंसर्वोपद्रवनाशनं मह्यामालिख्यनामानि निघ्नंतंविद्विषांगणं स्नातंभुक्तंशुभेस्थानेकृतकृत्यंमनुंयथा दृष्ट्वाहृष्टमनाः प्राहधूम्राक्षोरावणोदितं साक्षेपमजपालोपिप्रत्युक्ताकारणोत्तरं प्रेषयामासधूम्राक्षंततः कृत्यंसमादधे ज्वरमाकारयित्वातंप्रोवाचेदंमहीपतिः गच्छलंकाधिपस्थानमाचरस्वयथोदितं नियुक्तस्त्वजपालेनज्वरोराजन्जगामह गत्वासकंपयामासरावणंराक्षसेश्वरम् रावणस्तंविदित्वातुज्वरंपरमदारुणं प्रोवाचतिष्ठतुवसतवमेनप्रयोजनं ततः सविज्वरोराजन्बभूवधनदानुजः तेनैषानिर्मिताशांतिः सर्वोपद्रवनाशिनी कार्तिकेशुक्लपक्षेतुद्वादश्यांरजनीमुखे सुप्तोत्थितेविनिद्रेतुदेवेदामोदरेतदा वेद्यांतोरणमालाभिर्युक्तायामनुलिप्तके ज्वालयित्वानवंवन्हिंहुत्वामंत्रैर्यथोदितैः वर्द्धमानतरूत्थाभिःसमिद्भिःसघृतैस्तिलैः ततःकृत्वा

हरेः पूजांहरिंनीराजयेच्छनैः पुष्पैरभ्यर्च्यदेवेशंसमालभ्यचचंदनैः वदरैःकदरैश्चैवत्रपुषैरिक्षुभिस्तथा गंधधूपैरलंकारैर्वस्त्रैरत्नैश्चभूषितं तस्यैवानुगतांलक्ष्मींब्रह्माणंचंडिकांतथा आदित्यंशंकरंगौरींयक्षंगणपतिंग्रहान्मातृपितृंस्तथानागान्सर्वान्नीराजयेत्ततः गवांनीराजनंकुर्य्यान्माहिष्यादेश्चमंडनम् भ्रामयेत्त्रासयेच्छब्दैर्घंटावादनभाजनैः गावोवत्सावृतायांतिसापीडस्तवकांगदाः सिंदूरकृतशृंगाग्रा रंभारावाः सवत्सकाः अनुयांतिसगोपालाः काल्यंतोललितानिते स्वेदानुलिप्तसर्वांगारक्तपीतासितांबराः एवंकोलाहलेवृत्तेगवांनीराजनोत्सवे तुरगान्लक्षणैर्युक्तान्द्विरदांश्चसुपूजितान् राजचिन्हानिसर्वाणिउद्धृत्यस्वगृहांगणे राजापुरोधसासार्द्धंमंत्रिभृत्यपुरस्सरः सिंहासनोपविष्टश्चशंखतूर्यादिनिःस्वनैः पूजयेद्गंधकुसुमैर्वस्त्रैर्दीपैर्विलेपनैः ततःस्त्रीलक्षणैर्युक्तावेश्यावाथकुलांगना शीर्षोपरिनरेंद्रस्यभ्रामयेद्दीपवार्तिकं शातिंसमुच्चरद्भिश्चाद्विजैर्वेदिजनैःसह ततोनीराजयेत्सैन्यंहस्त्यश्वरथसंकुलम् एवमेषामहाशांतिःख्यातानीराजनाजने येषां राष्ट्रपुरग्रामेक्रियतेपाण्डुनंदन तेषांरोगाःक्षयंयांतिसुभिक्षंवर्त्ततेसदा शांतिर्नीराजनालोकेसर्वान्रोगान्व्यपोहति लोकानांवर्द्धयत्यायुरजापालवचोयथा एवंरोगादिपीडासुलोकानांहितमिच्छता वर्षेवर्षेप्रयोक्तव्याशांतिर्नीराजनाभिधा नीराजयंतिनवमेघनिभंहरिंयेगोब्राह्मणानथगजांश्चनरेंद्रचिन्हैः तेसर्वरोगरहिताअजितानरेंद्रैरिंद्रप्रभाभुविभवंत्यजपालवाक्यात् ॥ इतिश्रीभविष्योत्तरेकार्त्तिकशुक्लद्वादश्यांनीराजनाख्यमहाशांतिविधिः ॥ इयंशांतिःकार्तिककृष्णद्वादश्यामपिसूचिता स्वात्यादित्येसातियथासंभवंकार्य्या भानुभौमार्कवारेषुदर्शयोगेऽपीयंकार्य्या अत्रचातुर्मास्ये समानांमासानांसमाहिशांतिरप्युक्ता तदुक्तंमहाभारते ॥ चतुर्धागृह्यवैचीर्णंचातुर्मास्यव्रतंनरैः कार्तिकेशुक्लपक्षेतुद्वादश्यांतत्समापयेत् लघुनारदीयेऽपि चातुर्मास्यव्रतानांतुसमाप्तिः

कार्त्तिकेस्मृता मंत्रश्चनिर्णयामृते इदंव्रतंमयादेवकृतंप्रीत्यैतेवप्रभा न्यूनंसंपूर्णतांयातुत्वत्प्रसादाज्जनार्द्दन भविष्योत्तरेऽपि चातुर्मास्येहियत्त्यक्तंभक्ष्यभोज्यादिकंनरैः चतुरोवार्षिकान्मासान्नियमोयेनयःकृतः कथयित्वा द्विजेभ्यस्तंदद्याद्भक्त्याचदक्षिणां नत्वाविसर्जयेद्विप्रांस्ततोभुंजीतचस्वयं अत्र वराहोक्तबोधिनीविधिरप्युक्तः एकादश्या रात्रौ घृतपूर्णपात्रोपरिहेममाषनिर्मितं मत्स्यंसंस्थाप्य कुंकुमपीतवस्त्रैः पद्माद्यैः संपूज्य मत्स्यादिदशावतारान्संपूज्य जागरणंचकृत्वा प्रातर्देवमाचार्यंच वस्त्राद्यैः संपूज्यप्रार्थयेत् जगदात्माजगद्रूपोजगदादिरनादिमान् जगदादिर्जगद्योनिःप्रीयतांमेजनार्द्दन इतिदक्षिणांदत्त्वा ब्राह्मणान्भोजयेदिति तथाचपाद्मे शंखतूर्यरवैरात्रौभ्रामयेत्स्यंदनेस्थितं उत्थितंदेवदेवेशंनगरेपार्थिवःस्वयं चतुरोवार्षिकान्मासान्नियमंयत्कृतंतद्दद्यात् इदंशुक्रास्तादावपिसदाकार्य्यम् अशौचादौपूजामन्येनकारयेदितिसंक्षिप्तप्रकारः अस्यांद्वादश्यां रेवत्यंतपादयोगेपारणंनकार्य्यं सुप्तिप्रबोधपरिवर्त्तनमेववर्ज्जमितिप्राग्लिखितत्वात् सनत्कुमारसंहितायामपि रेवतीतुर्य्यचरणेद्वादशीसंयुतेनरः नकुर्यात्पारणंकुर्वन्व्रतंनिष्फलताव्रजेदिति इयंचद्वादशीमन्वादितिथिः कार्त्तिकेशुक्लत्रयोदश्यां शिवपूजनव्रतमुक्तं नारदीये ऊर्ज्जशुक्लत्रयोदश्यामेकभोजीद्विजोत्तमः पुनःस्नात्वाप्रदोषेतुवाग्यतः सुसमाहितः प्रदीपानांसहस्रेणशतेनाप्यथवाद्विज प्रदीपयेच्छिवंवापिद्वात्रिंशद्दीपमालिकां घृतेनदीपयेद्दीपान्गंधाद्यैः पूजयेच्छिवं फलैर्नानाविधैश्चैवनैवेद्यैरपिनारद ततःस्तुवीतदेवेशंशिवनाम्नांशतेनचयानि नामानिकीर्त्यंतेसर्वाभीष्टप्रदानिवै ओंनमोरुद्रायभीमायनीलकंठायवेधसे कपर्दिनेसुरेशायव्योमकेशायते नमः दिगम्बरायभर्गायउमाकांतायवर्म्मिणे तपोमयायव्याप्तायशिपिविष्टायतेनमः व्यालप्रियायव्यालायव्यालानांपतयेनमः महीधरायव्याघ्रायपशूनांपतयेनमः त्रिपुरांतायसिंहायशार्दूलर्षभचर्म्मिणे मितायामित

नाथायसिद्धायपरमेष्ठिने वेदगीतायगुप्तायवेदगुह्यायतेनमः दीर्घायदीर्घरूपायदीर्घार्थायमहायच नमोजगत्प्रतिष्ठायव्योमरूपायवैनमः कल्याणायविशिष्टायशिष्टायपरमात्मने गजकृत्तिधरायाथअंधकासुरभेदिने नीललोहितशुक्लायचण्डमुण्डप्रियायच भक्तिप्रियायदेवाययज्ञांतायाव्ययायच महेशायनमस्तुभ्यंमहादेववरायच त्रिनेत्रायात्रिवेदायवेदांगायनमोनमः अर्थायार्थस्वरूपायपरमार्थायवैनमः विश्वरूपायविश्वायविश्वनाथायतेनमः शंकरायात्रिकालायकालावयवरूपिणे अरूपायाविरूपायसूक्ष्मसूक्ष्मायवैनमः श्मशानवासिनेतुभ्यंनमस्तेकृत्तिवाससे शशांकशेखरायाथरुद्रभूमिश्रितायच दुर्गायदुर्गपारायदुर्गावयवसाक्षिणे लिंगाय लिंगरूपायलिंगिनापतयेनमः नमः अभावरूपायअभावार्थायवैनमः हरायबहुरूपायप्रसन्नायनमोनमः योगाययोगगम्याययोगिनांपतयेनमः नमस्तेनिष्कलंकायनिश्चयायामितात्मने ज्ञानायज्ञानगम्यायपरज्योतिःस्वरूपिणे नमोनमःकारणकारणायमृत्युंजयायात्मभवस्वरूपिणे त्रियंबकायशितिकंठभर्गिणेगौरीयुजेमंगलहेतवेनमः नाम्नांशतमिदंविप्रपिनाकिगुणकीर्तनम् पठेत्प्रदक्षिणीकृत्यप्रयातिशिवकेतनम् एवंकृत्वाव्रतंविप्रमहादेवप्रसादतः भुक्त्वेहभोगानाखिलानंतेशिवपदंलभेत् कार्त्तिकशुक्लचतुर्दशीवैकुंठचतुर्दशी साच निशथिव्यापिनीग्राह्या दिनद्वयेऽव्याप्तौ निशीथप्रदोषोभयव्यापिनीग्राह्या तदुक्तं हेमाद्रौ भविष्ये ॥ कार्तिकस्यचतुर्दश्यांशुक्लपक्षेनराधिप सोपवासस्तुसंपूज्यहरिंरात्रौजितेंद्रियः तथाचनारदीये ब्रह्मकूर्चव्रतंचात्रकर्तव्यंशुद्धिमिच्छता सोपवासःपंचगव्यंपिवेद्रात्रौजितेंद्रियः कपिलायास्तुगोमूत्रंकृष्णायागोमयस्तथा श्वेतायाःक्षीरमुद्रितंशुक्लायाश्चतथादधि गृहीत्वाकर्वुरायाश्चघृतमेकत्रमेलयेत् कुशांबुचततःप्रातःस्नात्वासंतर्प्यदेवताः ब्राह्मणान्भोजयित्वातुभुंजीयाद्वाग्यतःस्वयं ब्रह्मकूर्चव्रतंह्येतत्सर्वपातकनाशनम्

यच्चबाल्येकृतंपापंयौवनंवार्द्धकेऽपिवा ब्रह्मकूर्च्चोपवासेनतत्क्षणादेवनश्यतीति ॥ अत्रसनत्कुमारसंहितायां काशीविश्वेश्वरपूजाविधानमुक्तं ॥ वर्षेवैहेमलंबाख्येमासेश्रीमतिकार्तिके शुक्लपक्षेचतुर्दश्यामरुणाभ्युदयंप्रति महादेवतिथौब्राह्मेमुहूर्तेमणिकर्णिके स्नात्वाविश्वेश्वरोदेव्यादिश्वेश्वरमपूजयत् देव्यासहविश्वेश्वरःस्वयंविश्वेश्वर लिंगमपूजयदित्यर्थः ॥ संक्षेपंज्योतिषस्तस्यप्रतिष्ठाख्यंतदाकरोत् स्वयमेवस्वमात्मानंचरन्पशुपतंव्रतं भस्मोद्धूलितसर्वांगोनानाव्रतमहाव्रतः जपन्वैशतरुद्रीयंपूजयंस्तमहर्निशं अत्र पूजा कृतोपवासैः कार्य्या ततः प्रभातेविमलेकृत्वापूजांमहाद्भुतां दंडपाणेर्महाधाम्निव्रतेऽस्मिन्कृतपारण इतितत्रैवोक्तेः अत्र परकृतिरूपेणार्थवादेनकृतोपवासेन स्नात्वाविश्वेश्वरंपूज्यइतिकल्प्यते इयंचतुर्दशी खंडत्वे यदिपूर्वदिनेऽपराह्णेवर्त्तते तदोपवासे पूर्वाग्राह्या पूजाव्रतेषुसर्वेषुकर्त्तव्यासंमुखीतिथिरितिवचनात् पूजादावरुणोदयव्यापिनीग्राह्या कर्मणोयस्ययःकालइतिवचनात् कैश्चित्तुखंडतिथौ वाऽखंडतिथौवा पूर्वदिने कृतोपवासाः परदिनेऽरुणोदये पूजादिकं कुर्वंति अत्रकाश्यांविश्वेश्वरयात्रोक्ताकाशीखंडे कार्तिकस्यचतुर्दश्यांविश्वेशंयोविलोकयेत् स्नात्वाचोत्तरवाहिन्यांनतस्य पुनरागतिरिति शिवरहस्येऽपि । पुरात्रकार्तिकेमासिचतुर्दश्यांसुराः शिवे सायंकालेसमागत्यपूजांकृत्वा स्थितामुदेत्युक्ता ततःपरेऋषिगणाः सर्वेऽपिमदनुग्रहात् संपूज्यनिशियत्नेनचक्रुर्जागरणंशिवे कार्तिकस्यचतुर्दश्यांविल्वैश्चकनकाव्हयैः द्रोणपुष्पैश्चपूजांचचक्रुर्म्मयिमहेश्वरे रात्रिंनीत्वाप्रयत्नेनमत्कथाश्रवणादिभिःततोऽरुणोदयेजातेस्नात्वास्नात्वाचभस्मना त्रिपुण्ड्रधारणंकृत्वाकृत्वारुद्राक्षधारणं संध्यांसमाप्यविश्वेशंसमभ्यर्च्ययथाविधि मद्भक्तान्भोजयामासुर्ऋषयोबुभुजुस्तथा ऊर्ज्जेशुक्लचतुर्दश्यामुपोष्यप्रयतः शिवे सामर्चयति विश्वेशंसमुक्तोभवतिध्रुवं माल्लिंगपूजनंपुण्यंसर्वदासर्वकामदम् ऊर्ज्जशुक्लचतुर्दश्यांकाश्यांविश्वेश्वरंप्रभुम् स

मर्चयितुमिंद्राद्यैर्गम्यतेऽस्माभिरादरात् ॥ अस्यामेवरात्रौविष्णुपूजाकार्य्या तदुक्तं हेमाद्रौ भविष्ये ॥ कार्तिकस्यासितेपक्षेचतुर्दश्यांनराधिप सोपवासस्तुसंपूज्यहरिंरात्रौजितेंद्रियइति अत्र चतुर्दशी रात्रिव्यापिनी ग्राह्या रात्रौपूजाविधानात् दिनद्वयेतद्व्याप्तौनिशीथप्रदोषोभयव्यापित्वात्पूर्वैव इयंपूजोपवासादिभिर्विष्णुप्रीतिकरणाद्वैकुंठलोकप्रदा अतएवेयं वैकुंठचतुर्दशीतिप्रसिद्धा इतिवैकुंठचतुर्दशीनिर्णयः अस्यामेव पाषाणचतुर्दशीव्रतं तदुक्तंनिर्णयामृते ॥ देवीपुराणे ॥ कार्त्तिकेशुक्लपक्षेतुयापाषाणचतुर्दशी तस्यामाराधयेद्गौरींनक्तंपाषाणभक्षकः ऐश्वर्यसौख्यसौभाग्यरूपाणिप्राप्नुयान्नरइति हेमाद्रौतु पाषाणभक्षणैरितिपाठः पाषाणाकारपिष्टपक्वान्नैरितिव्याख्यातं नारदीयेऽपि पाषाणव्रतमप्यत्रप्रोक्तंतच्छृणुनारद सोपवासोदिवानक्तंपाषाणाकारपिष्टकं प्रार्च्यगंधादिभिर्गौरींघृतपक्वमुपाहरेत् व्रतमेतच्चरित्वातुयथोक्तंद्विजसत्तमइतिपाषाणचतुर्दशीव्रतं अथकार्त्तिकेपौर्णमासीकृत्यनिर्णयः नारदीये कार्त्तिक्यांपौर्णमास्यांतुकुर्यात्कार्त्तिकदर्शनं विप्रत्वलब्धयेभूयःसर्वशत्रुजयायच अत्रैवदीपदानेनविधेयस्त्रिपुरोत्सवः निशामुखेद्विजश्रेष्ठसर्वजीवसुखावहः कीटाःपतंगामशकाश्चवृक्षाजलेस्थलेयेविचरंतिजीवाः दृष्ट्वाप्रदीपान्नहितेनजन्मिनःपुनश्चमुक्तिंहिलभंतएव अत्रचंद्रोदयेविप्राःसंपूज्याःकृत्तिकाश्चषट् कार्त्तिकेयस्तथाखड्गीवरुणश्चहुताशनः गंधैःपुष्पैस्तथाधूपैर्दीपैर्नैवेद्यविस्तरैः परमान्नैःफलैःशाकैर्वन्हिब्राह्मणतर्पणैः एवंदेवान्समभ्यर्च्यदीपोदेयोगृहाद्बहिः दीपोपांतेतथागर्तश्चतुरस्रोमनोहरः चतुर्दशांगुलःकार्य्यःसिच्यश्चंदनवारिणा गवांपूरेणसंपूर्य्यहेमतत्रविनिःक्षिपेत् मुक्तानेत्रसमायुक्तंमत्स्यंसर्वांगशोभनम् महामत्स्यायचनमइतिमंत्रंसमुच्चरन् गंधाद्यैस्तत्रसंपूज्याद्विजायप्रतिपादयेत् क्षीरसागरदानंतेमयोक्तंद्विजसत्तम दानस्यास्यप्रभावेणमोदतेहरिसन्निधौ अत्रकृत्वावृषोत्सर्गंव्रतंनक्तंचनारद रुद्रलोकमवाप्नोतिनात्रकार्य्याविचारणेति अस्यांचकल्प

भेदेनमत्स्यावतारउक्तः पाद्मे कार्त्तिकमाहात्म्ये ॥ वरान्दत्त्वायतोविष्णुर्मत्स्यरूपोभवत्ततः तस्यांदत्तंहुतंजप्तंतदक्षयफलंस्मृतमिति अथास्यामाचारप्राप्ततुलसीपूजनं पद्मपुराणे नारदउवाच रोप्यतेयेनविधिनातुलसीपूज्यतेसदा तमाचक्ष्वमहादेवमदनुग्रहकारणात् महादेवउवाच ॥ शुभेपक्षेशुभेवारेशुभेऋक्षेशुभोदये केशवाग्रेशुभांशेचरोपयेत्तुलसींमुने गृहस्यांगनमध्येवागृहस्योपवनेऽपिवा शुभेदेशेचतुलसीमर्चयेद्भक्तितत्परः मूलेचवेदिकांकुर्य्यादालवालसमान्वितां प्रातःसंध्याविधिंकृत्वास्नानपूर्वंदिनेदिने गायत्र्यष्टशतंजप्त्वातुलसींपूजयेन्नरः प्राङ्मुखोदङ्मुखोवापिसुस्थित्वाप्रयतमानसः ध्यायेच्चतुलसींदेवींश्यामांकमललोचनां प्रसन्नांपद्मकह्लारवराभयचतुर्भुजां किरीटहारकेयूरकुंडलादिविभूषितां धवलांशुकसंयुक्तांपद्मासननिषेदुषीं इतिध्यानम् देवित्रैलोक्यजननीसर्वलोकैकपावनि आगच्छभगवत्यत्रप्रसीदतुलसिप्रिये इत्यावाहनम् सर्वदेवमयेदेविसर्वदाविष्णुवल्लभे देविस्वर्णमयंदिव्यंगृहाणासनमुत्तमम् इत्यासनम् सर्वदेवमयाकारेसर्वदेवनमस्कृते इदंपाद्यंगृहाणात्रतुलसित्वंप्रसीदमे इतिपाद्यम् सर्वतीर्थमयाकारेसर्वागमनिषेविते इदमर्घ्यंगृहाणत्वंदेविदैत्यांतकप्रिये इत्यर्घ्यं सर्वलोकस्यरक्षार्थंसदासन्निधिकारिणि गृहाणतुलसिप्रीत्यादत्तमाचमनीयकम् इत्याचमनीयम् गंगादिभ्योनदीभ्यश्चसमानीतमिदंजलं स्नानार्थंतुलसिस्वच्छंप्रीत्यातत्प्रतिगृह्यतां इतिस्नानम् क्षीरोदमथनोद्भूतेचंद्रलक्ष्मीसहोदरे गृह्यतांपारिधानार्थमिदंक्षौमांवरंशुभं इतिवस्त्रम् श्रीखंडकुंकुमंदिव्यंकर्पूरागुरुमिश्रितं कल्पितंतेमहादेविप्रीत्यर्थंप्रतिगृह्यतां इतिगंधम् नीलोत्पलसकह्लारमालत्यादीनिशोभने गंधवंतीचपद्मानिपुष्पाणिप्रतिगृह्यताम् इतिपुष्पम् धूपंगृहाणदेवेशिमनोहारिसगुग्गुलं आज्यमिश्रंतुतुलसिभक्ताभीष्टप्रदायिनि इतिधूपम् अज्ञानतिमिरांधस्यज्ञानदीपप्रदायिनि लयैततुलसी

प्रीत्यादीपोऽयंप्रतिगृह्यतां इतिदीपम् नमस्तेजगतांनाथेप्राणिनांप्रियदर्शने यथाभक्त्यामयादत्तंनैवेद्यंप्रतिगृह्यतां इतिपानीयम् अमृतेऽमृतसंभूतेतुलस्यमृतरूपिणि कर्पूरादिसमायुक्तंतांबूलंप्रतिगृह्यतां इतितांबूलम् दक्षिणेदक्षिणकरेत्वद्भक्तानांप्रियंकरे करोमितेसदाभक्त्याविष्णुकांतेप्रदक्षिणं इतिप्रदक्षिणम् हिरण्यगर्भेतिदक्षिणाद्रव्यं नमोनमोजगद्धात्र्यैजयदायैनमोनमः नमोनमोजगद्भूत्यैनमस्तेपरमेश्वरि इतिनमस्कारः प्रसीदममदेवेशिकृपयापरयासदा अभीष्टफलसिद्धिंचकुरुमेमाधवप्रिये इतिप्रार्थना इत्येवमर्चयेन्नित्यंप्रातरेवशुचिर्नरः मध्यान्हेवाथसायान्हेपूजयेत्प्रयतोनरः सर्वोपचारैरथवाचातुर्मास्येविशेषतः पूजयेत्तुलसींदेवीमपूपफलपायसैः एकादशीयदास्वल्पातदोपोष्यव्रतीनरः तद्रात्रावेवकुर्वीततुलसीपूजनंसदा इदंतुतुलसीपूजामाहात्म्यंशृणुयान्नरः सकृद्वापिपठेन्नित्यंसगच्छेद्वैष्णवंपदं इतितुलसीपूजाविधिः अथतुलसीविवाहप्रयोगः तत्रादौतिथ्यादिसंकीर्त्य ममाखिलविधपातकशमनपूर्वकाभीष्टसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थंतुलसीविवाहंकरिष्ये इतिसंकल्पः तदंगत्वेनस्वस्तिवाचनपूर्वकंग्रहयज्ञंकृत्वा आचार्य्यंऋत्विगादिवरणंकृत्वा तुलस्याआलवालात्परितोमंडपंचकृत्वा विवाहवत्तत्रतुलस्याःपुरतोवेदींकृत्वा तुलस्याहरिद्रारोपणादिमंगलंकृत्वा वेद्यांसर्वतोभद्रे हैमंविष्णुमिदंविष्णुरितिमंत्रेण रौप्यमयींतुलसीं तुलसीश्रीसखिशुभेपापहारिणिपुण्यदे नमस्तेनारदनुतेनारायणमनःप्रिये इतिमंत्रेणसंस्थाप्य संपूज्य वस्त्रविभूषणादिभिर्भूषयित्वा गोधूलीलग्ने मध्ये अंतःपटं धृत्वा विवाहवत्सर्वमंगलमंगल्ये इतिमंगलानिपाठित्वा अतःपरंनिस्सार्य्य ओमद्येत्युक्त्वा संकल्पपूर्वकंसालंकारांविवाहवत् वस्त्रयुग्मेनवेष्टयित्वा हरयेतुलसींप्रतिपाद्य यदावध्नंतिमंत्रेणउभयोःकंकणंबद्ध्वा ओंजंददादितिमंत्रेण करग्रहंचकृत्वा आचार्योवेदिकायां ग्रहयज्ञविधानेन अग्निंप्रतिष्ठा

प्य तुलसीविवाहहोमे देवतापरिग्रहार्थमन्वाधानंकरिष्ये इतिसंकल्पः अत्रप्रधानं विष्णुद्वादशाक्षरेणवामनुनावाज्याहुतिंयक्ष्येशेषेणस्विष्टकृदिति ततोयजमानश्चतस्रःप्रदक्षिणाःकृत्वा शांतिपाठादिकृत्वा तूर्य्यघोषपूर्वकं यथाविभवंतुलसींच संपूज्य पीठंगांचाचार्य्यायदत्त्वा ब्राह्मणान्भोजयेदिति अथात्रसंक्षेपा पूजाप्रकारः संकल्पंविधाय ध्यायेच्चतुलसींदेवीमितिध्यात्वा भगवत्यैतुलस्यैनमआवाहनम् विष्णुवल्लभायैआसनं सर्वदेवमयायैपाद्यं सर्वतीर्थमयायैअर्घ्यं दैत्यांतकप्रियायै आचमनम् सर्वलोकहितायैस्नानं लक्ष्मीसहोदरायैवस्त्रं महादेव्यैगंधं रमावासायैपुष्पं अभीष्टप्रदायैधूपं पापहारिण्यैदीपं भगवत्यैनैवेद्यं अमृतसंभूतायैतांबूलं अमृतरूपिण्यैदक्षिणा जगद्धात्र्यैनीराजनं सुदक्षिणायैप्रदक्षिणा परमेश्वर्यैनमस्कारः अभीष्टदायैनमः प्रर्थना ततस्तुतुलसीमंत्रमष्टोत्तरशतंजपेत् अस्यश्रीतुलसीमंत्रस्य नारदऋषिरनुष्टुप् छंदः श्रीतुलसीभगवती देवता अभीष्टसिद्ध्यर्थेपाठेविनियोगः तुलसिश्रीसखिशुभेपापहारिणिपुण्यदे नमस्तेनारदनुतेनारायणमनःप्रिये इतिकरषडंगन्यासः ध्यायामितुलसींदेवीमित्यादिध्यानं ततःस्कांदोक्तंतुलसीकवचंपठेत् ओंअस्यश्रीतुलसीकवचस्तोत्रस्य विष्णुऋषिः अनुष्टुप्छंदः श्रीतुलसीभगवतीदेवता अभीष्टसिद्ध्यर्थेपाठेविनियोगः ओंतुलसीमेशिरःपातुभालंपंकजधारिणी दृशौमेपद्मनयनाश्रीसखीश्रवणौमम घ्राणंसुगंधामेपातुमुखंचसुमुखीमम जिह्वांमेपातुसुभगाकंठंविष्णुप्रियामम स्कंधौकह्लारिणीपातुभुजौमेपापहारिणी करौपद्मकरापातुहृदयंविष्णुवल्लभा पुण्यदामध्यमंपातुनाभिंसौभाग्यदायिनी कटिंकुंडलिनीपातुऊरूनारदवंदिता ज्वालिनीजानुनीपातुजंघेसकलवंदिता नारायणप्रियापादौसर्वांगंसर्वरक्षका संकटेविषमेदुर्गेभयेवादेमहाहवे निश्यन्हिसंध्ययोः पातुतुलसीसर्वतःसदा इतीदंपरमंदिव्यंतुलस्याःकवचामृतं तुलसीकाननेतिष्ठन्नासीनोवाजपेदिदम् सर्वान्कामा

नवाप्नोतिविष्णुसायुज्यमृच्छति ॥ इतिपद्मपुराणेतुलसीमाहात्म्येतुलसीकवचम् अथविष्णुधर्मोत्तरोक्तंधात्रीपूजाव्रतं ॥ तच्चाश्विनपौर्णिमामारभ्य कार्त्तिकपौर्णिमापर्य्यंतंकर्त्तव्यं तत्राशक्तौ कार्त्तिकांतिमदिनत्रयंकर्त्तव्यं तत्राप्यशक्तौकार्त्तिक्यामेवकार्य्यं तत्रादौतिथ्यादिसंकीर्त्य ममाखिलपातकक्षयपूर्वकचतुर्विधपुरुषार्थसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं धात्रीमूले धात्रीपूजान्वितंश्रीविष्णुपूजनंकरिष्ये इतिसंकल्पः धात्रीमूलेआलवालंकृत्वा तन्मूलेपंचरंगोपेतांवेदिकांकृत्वा तत्राष्टदलपद्मोपरिश्रीविष्णुमूर्त्तिंसंस्थाप्य शांताकारंभुजगशयनमितिध्यात्वा पूरुषसूक्तेनषोडशोपचारैःश्रीदामोदरंपूजयेत् पुष्पपूजांते अंगपूजांकुर्य्यात् ॐदामोदरायनमःपादौपूजयामि सहस्राक्षायनमोमध्यंपूजयामि सर्वेश्वरायनमोमुखंपूजयामि विष्णवेनमःशिरःपूजयामि त्रिविक्रमायनमःसर्वांगंपूजयामि नमस्कारांते विप्रायार्घ्यंश्रीफलयुतंदद्यात् तत्रमंत्रः नमःसहस्रशीर्षायसहस्राक्षायतेनमः सहस्रपादहस्तायपुरुषायनमोऽस्तुते सहस्रनाम्नेदेवेशप्रसीदत्वंममाच्युत अर्घ्यंगृहाणभगवन्सर्वकामप्रदोभव ततःप्रार्थना भगवन्देवदेवेशलोकनाथनमोऽस्तुते अक्षयासंततिर्मेऽस्तुदामोदरनमोऽस्तुते ततोधात्र्यैनम इतिनाममंत्रेण तुलसीपूजोक्तषोडशोपचारमंत्रैर्धात्रींसंपूज्य अथवा षोडशनामभिः षोडशोपचारपूजांकुर्यात् शांत्यैनमः कांत्यैनमः मेधायैनमःधृत्यैकृत्यैनमः विष्णुवत्यैनमः महालक्ष्म्यैनमः रमायैनमः कमलायैनमः इंदिरायैनमः कल्याण्यैनमः कमनीयायैनमः सावित्र्यैनमः गायत्र्यैनमः भृत्यैनमः अव्यक्तायैनमः पुष्पपूजांते अंगपूजा विश्वरूपायैनमः कटिंपूजयामि अब्धिसंभवायैनमोहृदयंपूजयामि लोकधात्र्यैनमोमुखंपूजयामि धात्र्यैनमःशिरःपूजयामि इतिसंपूज्य ततोऽष्टदिक्षु दीपावलींदत्त्वा धात्र्यैनमइतिमंत्रेण अष्टकृत्वःसूत्रेणवेष्टयित्वा अष्टकृत्वःप्रदक्षिणा नमस्कारांश्चकृत्वा प्रार्थयेत् धात्रिदेविनमस्तुभ्यंसर्वपापक्षयंकरि।

वर्चस्कंकुरुमानित्यंनवतंतुंतथाकुरु पुत्रान्पौत्रान्बलंप्रज्ञांदेहिमेजगदीश्वरि संवत्सरकृतंपापंदूरीकुरुममाक्ष
ये ततोधात्रीमूले सव्येनैवपितृतर्पणंकुर्य्यात् पितापितामहश्चैवतथैवप्रपितामहः मातापितामहीचैवतथैवप्र
पितामही मातामहस्तत्पिताचतथैवप्रपितामहः तेपिबंतुमयादत्तंधात्रीमूलेऽक्षयंपयः मातृवंशेपितृवंशेअत्रा
प्तायेचगोत्रिणः तेपिबंतुमयादत्तंधात्रीमूलेऽक्षयंपयः पितामाताचभार्य्याचभगिनीदुहितुःपतिः पितृष्वसा.
मातृष्वसासप्तगोत्राणितर्पयेत् चतुर्विंशच्चविंशच्चषोडशद्वादशैवहि रुद्राश्चवसवश्चैवकुलमेकोत्तरंशतं तेपि
बंतुमयादत्तंधात्रीमूलेऽक्षयंपयः तेसर्वेतृप्तिमायांतुधात्रीमूलेनिषेचनात् एवंप्रत्यहंमासपर्यंतंकृत्वा अंते तदुद्या
पनंकुर्य्यात् सर्वतोभद्रमंडले सौवर्णीं धात्रीं तन्मूले हैमंविष्णुं पूर्वोक्तमंत्राभ्यां संपूज्य मंडलपूजांते
अग्निंप्रतिष्ठाप्य वैष्णवमंत्रेण धात्रीनाममंत्रैश्च मंडलदेवतामंत्रैश्चाष्टोत्तरशताज्याहुतीर्हुत्वा आचार्या
यपीठं व्रतपूर्त्तयेगांचदत्त्वा सर्वसंपूर्णतासिद्धये सुवर्णयुक्तं घृतपूरितंकांस्यपात्रंदद्यात् तत्रमंत्रःकांस्यंब्रह्ममयं
प्रोक्तमाज्यंभोज्यंदिवौकसां सुवर्णंचाग्निदैवत्यमतःशांतिंप्रयच्छमे ततोऽन्यांश्चद्विजान्सदन्नेनसंभोज्यतेभ्योद
क्षिणांदत्त्वा आशिषोगृहीत्वास्वयंभुजीत इतिधात्रीपूजोद्यापनम् ॥ अथपद्मपुराणीयसृष्टिखंडोक्तं धात्रीवृक्षमाहा
त्म्यं ॐनमःश्रीपरदेवतायै स्कंदउवाच अपरस्यापिवृक्षस्यफलसंपूजनात्तरोः सर्वलोकहितार्थायवदनोभवनाशनं
ईश्वरउवाच पावनंवासुदेवस्यफलंप्रीतिकरंशुभं यस्यभक्षणमात्रेणमुच्यतेसर्वकल्मषात् भक्षणेचभवेदायुः
पानेवैधर्मसंचयः अलक्ष्मीनाशनंस्नानेसर्वैश्वर्यमवाप्नुयात् यस्मिन्गृहेमहासेनधात्रीतिष्ठतिसर्वदा तस्मि
न्गृहेनतिष्ठंतिप्रेतादैत्याश्चराक्षसाः नगंगानगयाचैवनकाशीनचपुष्करं एकैवपावनीधात्रींसंप्राप्तेहरिवासरे
एकादश्याशुभेपक्षेधात्रीस्नानंकरोतियः सर्वेपापाःक्षयंयांतिविष्णुलोकेमहीयते धात्रीफलैर्महासेनभक्षणंस्ना

नसेवच नियतेपारणेविष्णोःस्नानमात्रंहरेर्दिने संप्राप्तेपारणेचैवधात्र्येकस्पर्शनेनरः भक्त्यातूल्लंघयेद्यस्तु
एकादश्यांसितासिते एकेनैवोपवासेनकृतेनतुषडानन सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः अक्षयंल
भतेस्वर्गंविष्णुसायुज्यतांव्रजेत् तस्मात्सर्वप्रयत्नेनचरेद्धात्रीव्रतंनरः धात्रीद्रवेणस्नातस्ययस्यकेशाःसुरंजि
ताः नपिबेत्सपुनर्मातुःस्तनंकश्चित्षडानन धात्रीदर्शनसंस्पर्शान्नाम्नउच्चारणेपिच वरदःसंमुखोविष्णुःसं
तुष्टोभवतिप्रियः धात्रीफलंतुयत्रास्तितत्रातिष्ठतिकेशवः तत्रब्रह्मास्थिरापद्मातस्मात्तांतुगृहेन्यसेत् अल
क्ष्मीर्नश्यतेतत्रयत्रधात्रीप्रतिष्ठते संतुष्टाःसर्वदेवाश्चनत्यजंतिक्षणंमुदा धात्रीफलेननैवेद्यंयोददातिमहाबल
तस्यतुष्टोभवेद्विष्णुर्नान्यैःक्रतुशतैरपि स्नात्वाधात्रीफलैरेवपूजयेद्यस्तुमाधवं सोभीष्टफलमाप्नोतियद्यामनसि
वर्त्तते तथैवलवणंस्पृष्ट्वापूजयित्वाफलेनतु सुवर्णशतसाहस्रंफलमेतिनरोत्तमः यागतिर्ज्ञाननिष्ठानांमुनीनांयो
गसेविनां गतिंतांसमवाप्नोतिधात्रीसेवारतोनरः तीर्थसेवावगाहैश्चव्रतैश्चविविधैस्तुया सागतिर्लभ्यतेपुंसां
धात्रीफलसुसेवया प्रीतिश्चसर्वदेवानांमातृणांनोगणस्यच संमुखावरदाःस्नानेनधात्रीफलनिषेवणे ग्रहा
दुष्टाश्चयेकेचिदुग्रायेदैत्यराक्षसाः सर्वेनिर्दुष्टतांयांतिधात्रीफलसुसेवनात् सर्वेषुयज्ञकार्येषुपुण्यंप्रोक्तंतथा
मलं सर्वदैवतपूजायांवर्जयित्वारवेर्दिनं तस्माद्रविदिनेतातसप्तम्यांचविशेषतः धात्रीफलानिसातत्यंदूरत
परिवर्जयेत् यस्तुस्नातितथाक्रांत्वाधात्रींचरविवासरे आयुर्वित्तंकलत्रंचसर्वंतस्यविनश्यति संक्रांत्यांभृगु
वारेचषष्ठ्यांप्रतिपदिध्रुवं नवम्यांचाप्यमायांचधात्रींदूरात्परित्यजेत् नासिकाकर्णतुंडेषुमृतस्यांघ्रिकरेषुच ति
ष्ठेद्धात्रीफलंयस्यसयातिविष्णुमंदिरं धात्रीस्पर्शनमात्रेणनरोयात्यच्युतालयं सर्वपापक्षयस्तस्यस्वर्गंयाति
रथेनतु धात्रीपत्रंकरेकृत्वायस्तुस्नानंसमाचरेत् पदेपदेऽश्वमेधस्यफलंप्राप्नोतिधार्मिकः अस्यदर्शनमात्रेण

येवैपापिष्ठजंतवः सर्वेतेऽत्रपलायंतेग्रहादुष्टाश्चदारुणाः पुरैकःपुष्कसःस्कंदमृगयार्थंवनंगतः मृगपक्षिगणान्हत्वातृषयापरिपीडितः क्षुधयामलकीवृक्षंपराचीनफलान्वितं दृष्ट्वासंरुह्यसहसाचखादफलमुत्तमं ततोदैवात्सवृक्षाग्रात्पपातधरणीतले वेदनामनुसंवद्धःपंचत्वमगमत्तदा ततःप्रेतगणाःसर्वैरक्षोभूतगणास्तथा तनुंवोढुंमुदासर्वे येवैशमनसेवकाः नशक्नुवंतिचंडालंमृतंद्रष्टुंमहाबलाः अन्योन्यंविग्रहस्तेषांममायमितिजल्पतां ग्रहीतुंचविनेतुंचनशक्तास्तेपरस्परं ततस्तेतुसमालोक्यगतामुनिगणान्प्रति किमर्थंमुनयोधीराश्चंडालंपापकारिणं प्रेक्षितुंनवयंशक्तानचापियमसेवकाः म्रियंतघातितायेचास्थिरायुद्धात्पलायिताःसाहसैर्घातिताभीतावृक्षाग्निकाष्ठपीडिताःसिंहव्याघ्रहतामर्त्याव्याघ्रैर्वाजलजंतुभिः जलप्लवेमृताःप्रेतावृक्षपर्वतपाततः पशुपक्षिहतायेचकारागारेगरैर्मृताःआत्मघातमृतायेचश्राद्धादिकर्मवर्जिताः गूढकर्मरताधूर्त्तागुरुविप्रनृपद्विषः पाषंडाःकौलिकाः क्रूरागरदाः कूटसाक्षिणः अशौचान्नस्यभोक्तारःप्रेतभाग्यानसंशयः ममायमितिभाषंतोनेतुंतंचनशक्नुमः आदित्यइवदुःप्रेक्ष्यःकिंवाकस्यप्रभावतः मुनयऊचुः अनेनभक्षितंप्रेताः पक्वमामलकीफलं तत्संगाद्यांतितस्यैवफलानिप्रचुराणिच तेनैवकारणेनाऽयंदुःप्रेक्ष्योभवतामयं वृक्षाग्रात्पतितश्चायंप्राणान्खेदात्तदाऽत्यजत् नैवोच्चारेणमंत्रस्यनचान्येनापिकर्मणा धात्रीभक्षणमात्रेणपापात्पूतोऽव्रजाद्दिवं वःपृच्छामःसविज्ञानान्नवयंनिंदकाश्चवः विष्णुलोकाद्विमानंतुयावन्नैवात्रगच्छति प्रेताऊचुः उच्यतांमुनिशार्दूलावोढुंतंमनसिस्थिरं यावद्द्विजानघोषंतिवेदमंत्रादिकल्पितं घोष्यंतेयत्रवेदाश्चमंत्राणिविविधानिच पुराणस्मृतयोयत्रक्षणंस्थातुंनशक्नुमः यज्ञहोमजपस्थानंदेवतार्चनकर्मणां पुरतोनैवतिष्ठामस्तद्वार्तांचसमुच्चितां किंवाकृत्वाप्रेतयोनिंलभंतेहिनराद्विजाः श्रोतुमिच्छामहेसम्यक्कथ्यमानमिदंवचः द्विजाऊचुः शीतवाततपक्लेशैःक्षुत्पिपासाविशेषकैः अन्यैरपिचदुःखैर्येपीडिताः कूटसाक्षिणः वधवं

धप्रमीतायेप्रेतास्तेनिरयंगताः छिद्रान्वेषपरायेचद्विजानांकर्मघातिनः तथैवचगुरूणांचतेप्रेताश्चापुनर्भवाः दीयमानंद्विजाग्रेतुदातारंप्रतिषिध्यति चिरंप्रेतत्वमाश्रित्यरनरकान्निवसंतिते परगामात्मगांचैवकृत्वापिंडंनदीयते नपालयंतियेमूढास्तेप्रेताःकर्मजाभुवि हीनप्रतिज्ञाःसंन्यस्तास्तथाभग्नव्रतानरः नलिनीदलभोक्तारस्ते प्रेताःकर्मजाभुवि विक्रीणंतिश्रुतिंशुद्धांस्त्रियंसाध्वीमकंटकां पितृव्यमातुलादींश्चप्रेतास्तेकर्मजाभुवि त्यजंतीतिशेषः एतेचान्येचवहवःप्रेतास्तेकर्मजाभुवि प्रेताऊचुः नभवंतिकथंप्रेताःकर्मणाकेनवाद्विजाः हितायवदतांतूर्णंसर्वलोकहितंपरम् द्विजाऊचुः येनचैवकृतंस्नानंजलतीर्थस्यधीमता नमस्कृतंपरंलिंगंनप्रेतोजायतेनरः एकादश्यामुपोष्यैवद्वादश्यांतुविशेषतः पूजयित्वाहरिंमर्त्याःप्रेतत्वंनव्रजंतिते वेदाक्षरप्रसूतैश्चस्तोत्रमंत्रादिभिस्तथा देवानांपूजनेरक्तानवैप्रेताभवंतिते श्रुत्वापौराणिकंवाक्यंदिव्यांचधर्मसंहितां पाठयित्वापठित्वाचपिशाचत्वंनगच्छति व्रतैश्चविविधैःपूतारुद्राक्षाभरणैस्तथा तथारुद्राक्षमालायांप्रेतत्वंनैवगच्छति धात्रीफलद्रवैःस्नातानित्यंतद्भक्षणेरताः तथाविष्णुंसुसंपूज्यनगच्छंतिपिशाचताम् प्रेताऊचुः सतांसंदर्शनात्पुण्यमितिपौराणिकाविदुः तस्माद्वोदर्शनंजातंहितंकर्त्तुमिहार्हथ प्रेतभावाद्यथामुक्तिःसर्वेषांनोभविष्यति व्रतोपदेशकंधीरायुष्माकंशरणंगताः ततोदयालवःसर्वेतानूचुर्द्विजसत्तमाः धात्रीणांभक्षणंशीघ्रंक्रियतांमुक्तिहेतवे प्रेताऊचुः धात्रीणांदर्शनेविप्रावयंस्थातुंनशक्नुमः कथंतेषांफलानांचशक्तावैभक्षणेऽधुना द्विजाऊचुः अस्माकंवचनेनात्रधात्रीणांभक्षणेशिवं अथतैस्तुवरंलब्ध्वाधात्रीवृक्षपिशाचकैः समारुह्यफलंप्राप्यभक्षितंलीलयातदा ततोदेवालयात्तूर्णंरथंपीतंसुशोभनं आगतंतेसमारुह्यसचंडालपिशाचकाः गतास्तेत्रिदिवंपुत्रव्रतैर्यज्ञैःसुदुर्लभं स्कंदउवाच धात्रीभक्षणमात्रेणपुण्यंमत्वादिवंगताः कथंतद्भक्षिणःस्वर्गंनगच्छंतिनरादयः ईश्वरउवाच ॥

पूर्वंयेधनलोभाच्चनजानंतिहिताहितं उच्छिष्टंश्वभिरुत्स्पृष्टंश्लेष्ममूत्रकृतंतुवा मत्याचमोहितैश्चेष्टंप्रेतादंतिसदैवहि सकृच्छौचजलंवातंवलिमूषकमर्कटैः सूतकेमृतकेजप्यंनत्यक्तंयेनकेनचित् तस्यान्नंचजलंभुक्ताप्रेतास्तेवैसदैवहि दुर्दांतागृहिणीयस्याशुचिःसंयमवर्जिता गुरुनिःसारितादुष्टाःसंतिप्रेताश्चतत्रवै अपुंगवाःकुलेजातावलोत्साहविवर्जिताः वधिरांधकृशादीनाःपिशाचाःकर्मजातयः क्षणंचमंगलंनास्तिदुःखहेतुयुताभृशं तेनैवविकृताकाराः सर्वभोगविवर्जिताः नास्तिकारोगसंतप्ताःमृतारूक्षामलीमसाः एतेचान्येचदुःखार्त्ताःसदैवप्रेतजातयः तेनकर्मविपाकेनजायंतेकर्मणेदृशाः पितृमातृगुरूणांचदेवनिंदापराश्चये पाषंडाःकौलिकाःपापास्तेप्रेताःकर्मजाभुवि गलपाशैर्जलैःशस्त्रैर्गरलैरात्मघातकाः इहलोकेचप्रेताश्चचंडालादिषुसंभवाः अंत्यजाःपतिताश्चैवपापरोगमृताश्चये अंत्यजैर्घातितायुद्धेतेप्रेतानिश्चिताभुवि महापातकसंयुक्ताविवादैश्चवहिष्कृताः चौराःसाहसिकायेच पितॄणांद्रोहचिंतकाः दानाध्ययनहीनाश्चव्रतैर्देवार्चनादिभिः अमंत्राः स्नानहीनाश्चगुरुस्त्रीगमनेरताः तथैवचांत्यजस्त्रीषुदुर्गतासुचसंगताः महाक्रूरोपवासेनम्लेच्छदेशेस्थितामृताः म्लेच्छभाषायुताऽशुद्धास्तथा म्लेच्छोपजीविनः अनुवर्तंतियेम्लेच्छान्स्त्रीधनैरुपजीविनः स्त्रियश्चैवनरक्षंतितेप्रेतानात्रसंशयः क्षुधासंतप्तदेहंतुश्रांतंविप्रंगृहागतं गुणपुण्यातिथिंत्यक्त्वापिशाचत्वंव्रजंतिते विक्रीणंतिचवैगाश्चम्लेच्छादिषुगवाशिषु प्रेतलोकेचिरंस्थित्वातेचयांत्यपुनर्भवं अशौचाभ्यंतरेयेचजाताश्चपशवोमृताः चिरंप्रेताःपिशाचाश्चमृता जाताःपुनःपुनः जातकर्ममुखैश्चैवसंस्कारैर्येविवर्जिताः एकैकस्याप्यसंस्कारेप्रेतत्वंपरिधीयते स्नानसंध्यासुरार्चाभिर्वेदयज्ञव्रताक्षरैः आजन्मवर्जिताःपापास्तेप्रेताश्चापुनर्भवाः भोजनोच्छिष्टपात्राणियानिदेहमलानिच येपातयंतिसत्तीर्थेतेप्रेतानात्रसंशयः दानमानार्चनैर्विप्रानैवेद्यैर्नैवतर्पिताः पितरोगुरवश्चैवप्रेतास्तेकर्मजाभुवि प-

तीन्त्यक्त्वाचयानार्यौनिवसंतीतरेजने प्रेतलोकेचिरंस्थित्वाजायंतेचांत्ययोनिषु पतींश्चवंचयित्वायाविषयेंद्रियमोहिताः मिष्टंखादंतियाःपापास्तास्तुप्रेताश्चिरंभुवि विण्मूत्रभक्षकायेचब्रह्मस्वहरणेरताः अभक्ष्यभक्षकाश्चांतेतेप्रेताश्चापुनर्भवाः बलाद्येपरवस्तूनिगृह्णंतिचदहंत्यपि अतिथीनवमन्यंतेप्रेतानिरयमास्थिताः तैर्नरैःकर्मजंभुक्तंसुखंवादुःखमेववा तस्मादामलकींभुक्त्वास्नात्वातस्यद्रवेणतु सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते तस्मात्सर्वप्रयत्नेनसेवयामलकींशिवां यइदंशृणुयात्स्कंदपुण्याख्यानमिदंशुभम् श्रावयेत्सततंलोकेवैष्णवेषुविशेषतः सयातिविष्णुभवनमितिपौराणिकाविदुः इतिपद्मपुराणेसृष्टिखंडेयात्राफलमाहात्म्यंषष्टितमोध्यायः अथकार्त्तिकीकृत्यं इयंमन्वादिः सापूर्वाह्णव्यापिनीग्राह्याशुक्लपक्षस्थत्वात् अत्रविशेषोहेमाद्रौब्राह्मे ॥ पुण्यामहाकार्तिकीस्याज्जीवेंद्वोःकृत्तिकास्थयोः पाद्मे विशाखासुयदाभानुः कृत्तिकासुचचंद्रमाः सयोगःपद्मकोनाम, पुष्करेत्वतिदुर्लभः पद्मकेपुष्करेऽमायांकपिलांयःप्रयच्छति साहित्वासर्वपापानिवैष्णवंलभतेपदं यमःकार्त्तिक्यांपुष्करेस्नातःसर्वपापैःप्रमुच्यते अन्यत्रापि आग्नेयंतुयदाऋक्षंकार्त्तिक्यांभवतिक्वचित् महतीसातिथिर्ज्ञेयास्नानदानेषुचोत्तमा यदायाम्यंतुभवतिऋक्षंतस्यांतिथौक्वचित् तिथिःसापिमहापुण्यामुनिभिःपरिकीर्त्तिता प्राजापत्यंयदाऋक्षंतिथौतस्यांनराधिप सामहाकार्त्तिकीप्रोक्तादेवानामपिदुर्लभेति अस्यामेवसायंकालेमत्स्यावतारोजातइत्युक्तं पाद्मे कार्त्तिकमाहात्म्ये वरान्दत्वायतोविष्णुर्मत्स्यरूपोभवत्ततः तस्यांदत्तंहुतंजप्तंतदक्षयफलंस्मृतमिति अत्रैवत्रिपुरोत्सवउक्तोभविष्ये पौर्णमास्यांतुसंध्यायांकर्तव्यस्त्रिपुरोत्सवः दद्यादनेनमंत्रेणसुदीपांश्चसुरालये कीटाःपतंगामशकाश्चवृक्षेजलेस्थलेयेविचरंतिजीवाः दृष्ट्वाप्रदीपंनहिजन्मभागिनस्तेमुक्तरूपाहिभवंतितत्रेति अत्रपौर्णमासीसंध्याकालव्यापिनीग्राह्या पूर्वोक्तभविष्यवाक्ये संध्यायामित्युक्तेः

अत्रकार्त्तिकेयदर्शनंकार्यं तदुक्तं काशीखंडे कार्त्तिक्यांकृत्तिकायोगेयःकुर्यात्स्वामिदर्शनं सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगइति अस्यांक्षीरसागरदानमुक्तं निर्णयामृते ब्रह्मपुराणे पौर्णमास्यांतुसंपूज्योभक्त्यादामोदरःसदा ततश्चंद्रोदयेःपूज्यास्तापस्यःकृत्तिकास्तुषट् शिवासंभूतिर्नामाचप्रीतिःसंततिरेवच अनसूयाक्षमाचैवषडेताःकृत्तिकामताइति कार्त्तिकेयस्तथाखड्गीवरुणश्चहुताशनः धान्यैःसशूकैर्द्वारोर्ध्वंभूषितस्सानिशागमे माल्यैर्धूपैस्तथादीपैर्भक्ष्यैरुच्चावचैस्तथा परमान्नैःफलैःशाकैर्वह्निब्राह्मणतर्पणैः एवंदेवांस्तुसंपूज्यदीपोदेयोगृहाद्बहिः दीपोपांतेतथागर्त्तश्चतुरस्रोमनोहरः चतुर्विंशांगुलःकार्यःसिक्तश्चंदनवारिणा गवांक्षीरेणसंपूर्णःसर्वतःपरिरक्षितः तत्रहेममयोमत्स्योमुक्तानेत्रमनोहरः प्रक्षेप्तव्योविधानेननमोस्तुहरयेपठन् ब्राह्मणायाथयोग्यायदद्यात्तंक्षीरसागरमिति अत्रविधानेनेत्यस्यदद्यादित्यनेनान्वयः अस्यांदामोदरंपूज्यनक्तंकार्यं तदुक्तं कृत्यतत्त्वार्णवे ब्रह्मपुराणे पौर्णमास्यांतुसंपूज्यभक्त्यादामोदरंसदा तस्मिन्नहनियत्नेनकर्त्तव्यंनक्तभोजनम् तथाकार्त्तिकेपौर्णिमास्यांतुसोपवासोऽर्चयेद्धरिम् अग्निष्टोमफलंप्राप्यसूर्यलोकंचविंदति अस्यामेववृषभदानंकार्यं तदुक्तं मदनरत्ने विष्णुधर्मोत्तरे कार्त्तिक्यांचंद्रवर्णाभमन्यवर्णमथापिवा रत्नैर्गंधैस्तथाधान्यैर्बीजैर्वस्त्रैस्तथैवच एतैर्युक्तामितिशेषः कृत्वाचोक्षमथोक्षाणंदत्त्वादीपंसमंततः चंद्रोदयेनरोदत्त्वासर्वपापैःप्रमुच्यते कांतारेयममार्गेतुतेनासौव्रजतेसुखं प्राप्नोतिपुत्रपौत्रांश्चसूर्यलोकंचगच्छतीति अत्रैवकाम्यवृषोत्सर्गःकार्यः तदुक्तं निर्णयामृते भविष्योत्तरे कार्त्तिक्यांतुवृषोत्सर्गोविवाहःपुण्यलक्षणः कार्यःकुरुकुलश्रेष्ठहरेर्नीराजनंतथा गजाश्वरथदानंचधनधेन्वादयस्तथा प्रदेयाःपुण्यकृद्भिस्तुतस्यांसंकल्प्यदेवतां इति मात्स्येऽपि कार्त्तिक्यांतुवृषोत्सर्गंकृत्वानक्तंसमाचरेत् शैवंपदमवाप्नोतिशैवव्रतमिदंस्मृतमिति अत्रैवब्रह्मपुराणे नीलवृषदानमुक्तं नीलंचवृषभंदद्याच्चतुर्व-

त्सतरीयुतं सर्वसस्यवरंरम्यंसर्वगंधसमन्वितं सुवाससंब्राह्मणायमहाकांतारतारणं यावंतितस्यरोमाणिशरीरेसंतिसंख्यया तावद्युगसहस्राणिस्वर्गेवसतितत्प्रदः पूजयित्वाततोविष्णुंरक्तमाल्यानुलेपनैः भोक्तव्यंगोरसप्रायंसुप्तव्यंस्थंडिलेततइति नीलवृषलक्षणंत्वाह हरिहरः लोहितोयस्तुवर्णेनमुखेपुच्छेचपांडुरः श्वेतःखुरविषाणाभ्यांसवृषोनीलउच्यते तथान्यत्र चरणाश्चमुखंपुच्छंयस्यश्वेतानिगोपतेः लाक्षारससुवर्णश्चतंनीलमितिनिर्द्दिशेत् भूमौकर्षतिलांगूलंप्रलंबस्थलवालधिः पुरस्तदुन्नतोनीलोवृषभस्सप्रशस्यते अन्यत्राऽपि श्वेतोदरःकृष्णपृष्ठोब्राह्मणस्यप्रशस्यते स्निग्धवर्णेनरक्तेनक्षत्रियस्यप्रशस्यते कांचनाभेनवैश्यस्यकृष्णःशूद्रस्य शस्यते यस्यप्रागायतेशृंगेभ्रूमुखाभिमुखेसदा सर्वेषामेववर्णानांसचसर्वार्थसाधकइति अस्यामेवभविष्योत्तरोक्तं संतानव्रतंकार्यं तदुक्तं हेमाद्रौ ॥ श्रीकृष्णउवाच कार्त्तिक्यामुपवासंयः कन्यांदद्यात्स्वलंकृतां स्वकीयांपरकीयांवानदीसंगमकेशुभे एतत्संतानकंनामव्रतंसुगतिदायकमिति अस्यामेवराशिव्रतं तदुक्तं हेमाद्रौ भविष्योत्तरे । श्रीकृष्णउवाच ॥ कार्त्तिक्यांनक्तभुग्दद्यान्मेषंहेमविनिर्मितं मार्गशीर्षेवृषेपुष्येमिथुनेतद्वदेवाहि एवंक्रमेणयोदद्याद्राशीन्वस्त्रविभूषितान् पौर्णमास्यांतुकौंतेयसुवस्त्रान्बहुदक्षिणान् एतद्राशिव्रतंनामग्रहोपद्रवनाशनं सर्वाशापूरकंतद्वत्सोमलोकप्रदायकमिति ॥ अस्यामेवकृत्तिकाव्रतंकार्यं तदुक्तं हेमाद्रौ भविष्ये ॥ श्रीकृष्णउवाच ॥ अथातःशृणुभूपालकृत्तिकाव्रतमुत्तमं राज्ञीचभद्रलिंगस्यापुरायस्यप्रभावतः अतीवमहतीं लब्ध्वाश्रियंजातिस्मराऽभवत् योगेनांतेतनुंत्यक्त्वापरेब्रह्मण्यलीयत युधिष्ठिरउवाच ॥ कीदृशंतद्व्रतंकृष्णमंत्र एवतुकीदृशः विधानंकृत्तिकानांचतंचकालंवदस्वमे श्रीकृष्णउवाच ॥ कार्त्तिक्यांपौर्णमास्यांतुगृह्णीयात्कृत्तिकाव्रतं षण्मासांस्तद्व्रतंयावदिदंसंचिंत्यचेतसीत्यादि सौवर्णरौप्यानवनीतासिद्धाः षट्कृत्तिकाश्चणकापिष्टमयाश्च

कृत्वा पात्रेनिधायकुसुमाक्षतधूपदीपैः संपूज्यजन्मगहनंनविशंतिमर्त्याइति इतिकृत्तिकाव्रतं अत्रवमनोरथपूर्णिमाव्रतमारंभणीयं तदुक्तंहेमाद्रौ भविष्योत्तरे ॥ कार्त्तिकींतुसमारभ्यसंपूर्णशशलक्षणं पूजयेदुदयेराजन्सदानक्ताशनोभवेदित्यादि जनाभिरामश्चशशांकवत्स्याद्धनाधिपालश्चतथैवलक्ष्म्या शक्रेणतुल्यश्चतथैवशक्त्यामानुष्यमासाद्यभवेत्सराजेत्यंतेन । इतिमनोरथपूर्णिमाव्रतं अत्रैवसौभाग्यव्रतंकार्यं तदुक्तंहेमाद्रौ विष्णुधर्मे कार्त्तिकेपौर्णमास्यांतुपूर्णंशिशिरदीधितिं पद्मेषोडशपत्रेतुकृत्तिकायांतुपूजयेदित्यादि सौभाग्यदंरूपविवर्द्धनंचलावण्यदंस्त्रीरतिभोगदंच कार्यंप्रयत्नेननरेंद्रपुंसांधार्यंतथास्त्रीभिरदीनसत्त्वेत्यंतेन । इतिविष्णुधर्मोक्तं सौभाग्यव्रतम् अस्यामेवाऽनुष्ठेय कार्त्तिकव्रतोद्यापनप्रसंगात् कार्तिकस्नानविधिर्लिख्यते तत्र पृथ्वीचंद्रोदये विष्णुस्मृतिपाद्मयोः ॥ तुलामकरमेषेषुप्रातःस्नानंविधीयते हविष्यंब्रह्मचर्यंचमहापातकनाशनमितिसौरमासउक्तः प्राच्याश्चैतदेवाद्रियंते दाक्षिणात्यास्तु आश्विनस्यतुमासस्ययाशुक्लैकादशीभवेत् कार्त्तिकस्यव्रतानीहतस्यांवैप्रारभेत्सुधीरितिपाद्मोक्तेःभार्गवार्चनेच आरभ्यैकादशींशुक्लामाश्विनस्यतुमानवः प्रातःस्नानंप्रकुर्वीतयावत्कार्त्तिकभास्करइतिविष्णुरहस्योक्तेः हेमाद्रौच आदित्यपुराणे ॥ पूर्णआश्वयुजेमासिपौर्णमास्यांसमाहितइत्युक्ता मासंसमग्रंपरयाचभक्त्या समाप्यतेकार्त्तिकपौर्णमास्यामित्यं तेनाऽभिधानाच्चाऽऽश्विनशुक्लैकादश्यांपौर्णमास्यांवासमापयेदित्याहुः मदनपारिजाते विष्णुः कार्त्तिकंसकलंमासंनित्यस्नायीजितेंद्रियः ॥ जपन्हविष्यभुक्शांतःसर्वपापैःप्रमुच्यते । अत्रदेशविशेषः पाद्मे कार्त्तिकंप्रक्रम्य कुरुक्षेत्रेकोटिगुणोगंगायामपितत्समः ततोधिकः पुष्करेस्याद्द्वारावत्यांचभार्गव पुण्याः पुर्यश्चसप्तैवमुनयोमथुराधिकाः दुर्लभः कार्त्तिकोविप्रामथुरायांनृणामिह यत्रार्चितःस्वकंरूपंभक्तेभ्यः संप्रयच्छतीति इदंचस्नानं काशीस्थपंच

नदेप्यतिप्रशस्त ॥ शतंसमास्तपस्तप्त्वाकृतेयल्लभ्यतेफलं तत्कार्त्तिकेपंचनदेसकृत्स्नानेनलभ्यते कार्त्तिकेविंदुती
र्थेयोब्रह्मचर्यपरायणःस्नास्यतेनुदितेभानौभानुजातस्यभीःकुतइत्यादिकाशीखंडोक्तेःसंपूर्णस्नानाऽशक्तौ ब्रह्मपुराणे
कार्त्तिकमधिकृत्य ॥ एकादश्यादिषुतथातत्रपंचसुरात्रिषुच दिनेदिनेचस्नातव्यंशीतलासुनदीषुच वर्जितव्यातथा
हिंसामांसभक्षणमेवचेति काशीखंडे वाराणस्यांपंचनदेत्र्यहंस्नातास्तुकार्त्तिके अमीतिपुण्यवपुषः पुण्यभाजो
तिनिर्मला इति कार्त्तिकेमासिवैयात्रायैःकृताभक्तितत्परैः विंदुतीर्थकृतस्नानैस्तेषांमुक्तिर्नदूरतइति ॥ मुहूर्ताव
शेषितायांरात्रौतीर्थादौगत्वाप्रत्यहंस्नानंकार्यं नाडीद्वयावशिष्टायांरात्रौगच्छेज्जलाशयमित्यादिपाद्मवचनात् अ
त्रैवप्रसंगात्संक्षेपेणनित्यनैमित्तिकस्नानविधिरुच्यते अंगिराः विनादर्भैश्चयत्स्नानंयच्चदानंविनोदकं असंख्या
तंचयज्जप्तंतत्सर्वंनिष्फलंभवेत् अन्यत्रापि कुशहीनंतुयत्स्नानंमंत्रहीनाचयाक्रिया दानंचदक्षिणाहीनंत्रयंतन्निष्फ
लंभवेत् योगियाज्ञवल्क्यः अरुग्दिवाचरेत्स्नानंमध्यान्हात्प्राग्विशेषतः प्रयतोमृदमादायदूर्वामार्द्रंचगोमयं अरु
गनातुरःविशेषतइतिवचनात् अपराह्णेऽप्यभ्यनुज्ञायते ॥ स्थापयित्वातथादर्भास्ततःस्नानंसमाचरेत् प्रक्षाल्य
हस्तौपादौचशिखावंधंसमाचरेत् अत्रकुशदूर्वादिकंस्वयमेवानयेत् नतुनद्यादौकंचित्प्रार्थयेत तदुक्तंस्मृतिसागरे ।
जलांतेतिलदर्भास्तुयोनुष्ठानाययाचते नानुष्ठानफलंतस्यदातुरेवाहितत्फलं मनुःस्नानोपकरणंसर्वंन्यस्यदक्षिणभा
गतःएवंयःकुरुतेस्नानंश्रेयोमहदवाप्नुयात् संग्रहे जलेदेवगृहेचैवशयनेचाद्विजालये निर्णिक्तपादःप्रविशेन्नानिर्णि
क्तःकथंचनेति । अतःस्नाने मललेपसम्भवे शारीरमलक्षालनस्य जलमध्येनिषेधादुद्धृतोदकेनवहिरंगंप्रक्षाल्यन
द्यादौप्रविशेत् शिखावंधनप्रकारमाहव्यासः स्मृत्वोंकारंचगायत्रींनिवध्नीयाच्छिखांततः पुनराचम्यहृदयंबाहू
स्कंधौचसंस्पृशेत् कात्यायनसूत्रेच ॥ अथातोनित्यस्नानमित्युपक्रम्य प्रक्षाल्यपाणिपादंकुशोपग्रहोवद्धाशिखी

यज्ञोपवीतिचजपेदित्युक्तं कुशयुक्तउपग्रहोस्यउपगृह्यतेऽनेनेत्युपग्रहोहस्तः अत्रसदोपवीतिनाभाव्यंसदावद्धशिखे-
नचेत्येवंनित्यतयाशिखादिधारणेसिद्धेपि पुनर्विधानंकर्मांगत्वसंपत्त्यर्थंनित्याहितद्धारणंपुरुषार्थं सदापदात्तेनदैवा.
द्विनष्टेऽपियज्ञोपवीतेतदुत्पाद्यस्नानमितिसिद्ध्यतीतिश्रीदत्तचंडेश्वरादयः तच्चिंत्यं विशिखोव्युपवीतश्चयत्करोति
तत्कृतमित्युत्तरार्द्धेनकर्मांगतायाअपिवोधनात् केवलपुरुषार्थत्वेहि शिखोपवीतयोः कर्मार्थितया नित्यप्राप्तत्वान्नत
दर्थंविधानमुपपद्यते यदपिपुरुषार्थविधिप्राप्तेयज्ञोपवीतीतिद्वितीयवस्त्रधारणार्थमितिकात्यायनभाष्यं तदपिचिंत्य
परिसंख्याप्रसंगात् तस्माद्दैवादुत्तरीयासंपत्तौ तदर्थमाधिकमेकंयज्ञोपवीतंविधीयते अतएवोक्तंद्वितीयमुत्तरीयार्थं
वस्त्राभावेतदिष्यतइति एवमनियतकेशवेषाइति स्नानेकेशमोक्षश्रवणाच्छिखामोक्षेपिशंक्यतेतितद्धारणार्थंपुनः
शिखावंधवचनं यद्यपिमुक्ताशिखावर्ज्जमिति तत्रास्ति तथापिप्रमादनिवृत्त्यर्थंदोषभूयस्त्वार्थंवचनमितिकथंचिद्व्या
ख्येयंवामनपुराणे॥निषिच्यतीरेकुशपिंजुलानिपूर्वोत्तराग्राणिमृदंन्यसेच्च प्रक्षाल्यपादौचसदेवकंठेयज्ञोपवीतंचजलं
पिवेत्त्रिः कंठेकृत्वानिवीतंकृत्वाप्रक्षालयेदित्यर्थः यमः कराभ्यांधारयेद्दर्भाज्छिखावंधंविधायच प्राणायामांस्तथाकु
र्यात्कालज्ञानंयथाविधिकालज्ञानंतात्कालिकतिथिनक्षत्रादिस्मरणंविधायेत्यर्थःमनुःप्रक्षाल्यपादौहस्तौचशुचिराच
म्यवाग्यतःतिथिवारादिकंज्ञात्वासुसंकल्पोयथाविधि अत्रादिपदेनवारयोगसंक्रांत्यादेरपिसंग्रहःतत्रतत्रपृथक्श्रव
णात् तत्रतिथिनक्षत्रादीनितात्कालिकान्येवस्मर्त्तव्यानि तदुक्तमाचारसारे जन्माज्ञाभ्यंगपातादिस्नानदंतक्रियासु
च तिथिस्तात्कालिकीज्ञेयापारणेलेखनेतथेति वारेषुतुदेशांतरवियोगाभ्यांक्वचित्उदयात्प्रागूर्ध्वंवारप्रवृत्तिः तदु
क्तं रत्नमालायां वारप्रवृत्तिंमुनयोवदंतिसूर्योदयाद्रावणराजधान्यां ऊर्ध्वंतथाधोप्यपरत्रतस्माच्चरार्द्धदेशांतरना
डिकाभिः लंकायांसूर्योदयादूर्ध्वमेववारप्रवृत्तिःअन्यदेशेदेशांतरचरवशेनतस्मात्सूर्योदयादूर्ध्वमधोवावारप्रवृत्तिः

इदमेवस्फुटीकृत्याह चरार्द्धदेशांतरयोर्वियोगयोगात्समानीयपलैश्चसम्यक् सूर्योदयादूर्ध्वमृणेधनेऽधोवारप्रवृत्तिंमुनयोवदंति अयमर्थः स्फुटगणितद्वारा स्फुटचरधनमानीयदेशांतरमथानयेत् तदोभयोरंकयोर्द्धनत्वे ऋणत्वेच योगःकार्यः वैजात्येचाधिकेऋणेअपात्यं शेषेऋणांकेसतितावद्घटिकाभिर्वारप्रवृत्तिः धनांकेतु प्रागिति एवंस्थिते उषसिस्नानविधानाद्रविवारस्नानविधानाद्रविवारादेरुदयोत्तरंप्रवृत्तौ तन्निमित्तकस्नानादौचार्वाक् शनिवासरःकीर्त्तनीयः रविवारस्नानंतुसोमवासरेप्रागुदयात्कार्यमेवमुत्तरमप्यपकर्ष्यइतिप्राप्तंनचैतन्न्याय्यं आचारविरोधात् अत्राहुः एतद्देशांतरवियोगयोगाभ्यांवारप्रवृत्त्यभिधानं तत्प्रयुक्तकार्येषु गुणदोषप्राबल्याप्राबल्यबोधनपरं पातंगिवारस्य दिनाधिपत्यमित्याधिपत्याभिधानवत् अतऐकैकस्मिन्नपिवासरेऽनेकवारप्रवृत्त्यभिधानं यात्रादौ गुणदोषाभावप्रतिपादकमेव एवंच नित्यावारप्रवृत्तिरर्द्धबिंबदर्शनादेव सामान्यशास्त्रसिद्धत्वात् एवंचनित्यस्नानादौ यद्यप्युषःकालेउपरितनोवारोनास्ति तथापि तस्यतिथिवशात्तात्कालिकत्वस्मरणाद्भाविनोपिकीर्त्तनं किंच अस्तेतस्यक्रियाःसर्वाभवंतिह्यफलायतः प्रातःसमाचरेत्स्नानंतच्चनित्यमितिस्मृतमितिमार्कंडेयवचनेन प्रातःस्नानस्याहःकर्त्तव्यकर्मांगतयाबोधितत्वात्तदहः कर्त्तव्यकर्मोद्देशके स्नाने तदहस्तिथिवारादिचकीर्त्तयितुमुचितम् तिथौतु वचनाद्बाधः नत्वेतद्वारेऽस्ति अतएवसंध्ययोर्भेदेनोपादानमित्यन्यत्रविस्तरः एवंच तदहर्वर्त्तितरणिकिरणावच्छिन्नेपिकाले सएववारउत्कीर्तनीयइतिसिद्धं यत्पुनर्वारयोगसापेक्षंनैमित्तिकमर्द्धोदयादिस्नानं तत्तदानींनभवति अर्कवारादेर्वस्तुतस्तदभावात् अहःकर्म्मानंगत्वाच्च नतदनुरोधेनतदुन्नयनमपीति एवंमलापकर्षणस्नानेऽपिनतदार्कवारादिप्रयुक्तोनिषेधः महाजनाचारोप्येवमेव अतएवकाम्यमपि सूर्यार्द्धबिंबदर्शनादूर्ध्वमेवभवति काम्येमुख्यकालस्यैवांगत्वात् यदितुकाम्येपौषार्कस्नानादावनुदितकोविधिरपितत्रवचनादेवभाविनोप्यर्कवारादेः

कीर्त्तनंकार्यमिति वस्तुतस्तु रविवासरनिमित्तिकस्नानं शनिवासरान्वितायामस्यां तिथौ करिष्य इत्येव संकल्प
यितुमुचितम् कालविशेषस्यवासरस्य सप्तम्यधिकरणेनोत्कीर्त्तितस्य विद्यमानस्यैवाधिकरणत्वसंभवेनाविद्यमा
नस्याधिकरणत्वेनोत्कीर्त्तनासंभवात् एवंव्यतीपातादियोगादेरपिविद्यमानस्यैवसंकल्पादावुत्कीर्त्तनंवोध्यम् न
चतिथौतात्कालिकत्ववचनादविद्यमानस्यापि वारादेः संकल्पादावुत्कीर्त्तनासंभवइतिवाच्यम् तिथौतात्कालिक
त्ववचनस्य त्रिदोषपारिसंख्याविधिवत्प्रसंगेन यांतिथिमित्यादिसाकल्यवोधकवचनप्रसक्तसाकल्यलेन वारा
दौतात्कालिकव्यवच्छेदकत्वासम्भवात् यद्यपि निमित्तस्यस्वस्मिन्स्वत्ववशानुष्ठापकस्यविद्यमानस्यैवोल्लेखायु
क्तस्तथापिग्रंथादौमंगलाचरणेनिमित्तत्वस्यदृष्टत्वेनाविद्यमानस्यापि रविवासरादेररुणोदयकालेविधायकवचन
वशादरुणोदयकालेऽनुष्ठीयमानंरविवासरसंवंधिक्रियांगं प्रातःस्नानं प्रतिनिमित्तत्वं युक्तं नचाचारविरो
धः प्राप्ताचारानुरोधेन शास्त्रार्थस्य व्यवस्थापयितुमशक्यत्वादितिकृतवुद्धयोविदांकुर्वंत्वित्यलम् इदंचप्रातः
स्नानंसंध्यांकृत्वाकार्यं तेनविनेतरकर्मानाधिकारादितिवर्द्धमानः यद्यपि प्रातःस्नानोत्तरंप्रातःसंध्यायाः ॥
पूर्वमेवकार्त्तिकादिस्नानंविधातुमुचितं प्रातःसंध्यायाः सूर्योदयोत्तरं समाप्यत्वेनानुदिते भानौ विहितस्यस्नानस्य
प्रातःपश्चादनुष्ठेयत्वंच तत्रैव कार्त्तिकेऽहंकरिष्यामिप्रातःस्नानंजनार्दन प्रीत्यर्थंतवदेवेशदामोदरमयासह
ध्यात्वाहंत्वांचदेवेशजलेऽस्मिन्स्नातुमुद्यतः तवप्रसादात्पापंमेदामोदरविनश्यतु इमौमंत्रौसमुच्चार्यमौनी
स्नायाद्व्रतीनरइति अर्घ्यमंत्रावपि तत्रैव व्रतिनःकार्त्तिकेमासिस्नातस्यविधिवन्मम गृहाणार्घ्यंमयादत्तंदनुजें
द्रनिषूदन नित्येनैमित्तिकेकृष्णकार्त्तिकेपापनाशनं गृहाणार्घ्यंमयादत्तंराधयासहितोहरे इमौमंत्रौसमुच्चार्य
योर्घ्यंमह्यंप्रयच्छति सुवर्णरत्नपुष्पांबुपूर्णशंखेनपुण्यवान् सुवर्णपूर्णापृथिवीतेनदत्तानसंशयइति अन्योपि

८८
[illegible]
ध०६०

स्नानगतोविशेषः पाद्मे स्मृत्वाभागीरथींविष्णुंशिवंसूर्यंजलेविशेत् नाभिमात्रेजलेतिष्ठन्व्रतीस्नायाद्यथाविधि तिलामलकचूर्णेनगृहीस्नानंसमाचरेत् वनस्थानांयतीनांचतुलसीमूलमिश्रितमिति स्नानसाधनमितिशेषः सप्तमीदर्शनवमीद्वितीयादशमीषुच त्रयोदश्यांचनस्नायाद्धात्रीफलतिलैः सहेति पाद्मे कार्त्तिकेनार्चितोयैस्तुकमलैःकमलेक्षणः जन्मकोटिषुविप्रेंद्रनतेषांकमलागृहे नारसिंहे विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवं कार्त्तिकेयोऽर्च्चयेद्भक्त्यावाजिपेयफलंलभेत् ॥ कार्त्तिकेतुलसीमाहात्म्यं पाद्मे तुलसीकाननंराजन्गृहेयस्यावतिष्ठते तद्गृहंतीर्थरूपंतुनायांतियमकिंकराः रोपणात्पालनात्स्पर्शान्नृणांपापहरातथा तुलसीहरतेपापंवाङ्मनःकायसंभवं तुलसीमंजरीभिर्यःकुर्याद्धरिहरार्च्चनं नसगर्भगृहंयातिमुक्तिभागीनसंशयइति तुलसीविपिनच्छायायत्रयत्रभवेन्नृप तत्रश्राद्धंप्रकुर्वीतपितृणांदत्तमक्षयमिति तुलसीदललक्षेणकार्त्तिकेयोऽर्चयेद्धरिं पत्रेपत्रेमुनिश्रेष्ठलभतेमौक्तिकंफलं स्कांदे कार्त्तिकमाहात्म्ये ॥ मालतीमालयाविष्णुःकेतक्याचैवपूजितः समासहस्रंसंप्रीतोभवतेमधुसूदनः तथा कार्त्तिकेकैशवीपूजायेषांनाम्नासुतैःकृता तेनिर्भर्त्स्यरवेःपुत्रंवसंतित्रिदिवेसदा तथा स्कांदेद्वारिकामाहात्म्ये ॥ निवेद्यकेशवेमालांतुलसीकाष्ठसंभवां वहतेयोनरोभक्त्यातस्यनास्तीहपातकं नजह्यात्तुलसीमालांकार्त्तिकेचविशेषतः महापातकसंहर्त्रीं धर्मकामार्थदायिनीं स्पृशेत्तुयानिलोमानिधात्रीमालाकलौनृणां तावद्वर्षसहस्राणिवैकुंठेवसतिर्भवेत् मालांनित्यंनरोभक्त्याधात्रीतुलसिसंभवां वहतेकंठदेशेतुकल्पकोटींदिवंवसेत् तुलसीकाष्ठसंभूतेमालेकृष्णप्रियंकरि बिभर्मित्वामहंकंठेकुरुमांकृष्णवल्लभं एवं संप्रार्थ्यविधिवन्मालांकृष्णगलेर्पितां धारयेत्कार्त्तिकेयोवैसगच्छेद्वैष्णवंपदमिति स्कांदे कार्त्तिकमाहात्म्ये ॥ धात्रीमूलेतुयःकुर्यात्पिंडदानंमहामते मुक्तिंप्रयांतिपितरःप्रसादान्माधवस्यतु धात्रीफल

विलिप्तांगोधात्रीफलविभूषितः धात्रीफलकृताहारोनरोनारायणोभवेत् धात्रीछायांसमाश्रित्ययोर्चयेच्चक्रपाणिनं पुष्पेपुष्पेऽश्वमेधस्यफलंप्राप्नोतिमानवः तीर्थानिमुनयोदेवायज्ञाःसर्वेऽपिकार्त्तिके नित्यंधात्रींसमाश्रित्य तिष्ठंत्यर्केतुलास्थितइति अत्रैव धात्रीपूजनं कृत्वाप्रार्थयेत् धात्रिदेविनमस्तुभ्यंसर्वपापक्षयंकरि पुत्रान्देहि महापुण्येयशोदेहिबलंचमइति ॥ तथास्कांदे ॥ कार्त्तिकेमासिविप्रेंद्रधात्रीवृक्षोपशोभिते वनेदामोदरंविष्णुं चित्रान्नैस्तोषयेद्विभुं मूलेनपायसेनाथहोमंकुर्याद्विचक्षणः ब्राह्मणान्भोजयेच्छक्त्यास्वयंभुंजीतवंधुभिरिति अथजागरणविधिः पाद्मे जागरंकार्त्तिकेमासियःकुर्यादरुणोदये दामोदराग्रेसेनाग्यूगोसहस्रफलंलभेदित्यादि कार्त्तिके द्विदलव्रतंप्रागुक्तं कार्त्तिकेद्विदलंत्यजेदिति पाद्मे कार्त्तिकमाहात्म्ये ॥ राजिकांमादकंचैवनैवाद्यात्कार्त्तिकेव्रती द्विदलंतिलतैलंचतथान्यत्सुविदूषितं स्कांदेपि कार्त्तिकेवर्जयेत्तद्वद्द्विदलंबहुवीजकं माषमुद्गमसूराश्चचणकाश्चकुलत्थकाः निष्पावाराजमाषाश्चआढक्योद्विदलंस्मृतं नूतनान्यपिजीर्णानिसर्वाण्येतानिवर्जयेत् अत्रकेचिदुत्पत्तिसमयेदलद्वयंयस्यभवतितद्गतपूर्वगत्याद्विदलमुच्यतइत्याहुः उदाहरंतिच वीजमेवसमुद्भूतंद्विदलंचांकुरंविना दृश्यतेयत्रसस्येषुद्विदलंतन्निगद्यते अन्येतु लक्षणायांमानाभावाद्वचनस्यच निर्मूलत्वाद्द्विदलात्मकंयस्यस्वरूपंतदेववर्जयेदित्याहुःअन्यान्यपिवर्ज्यान्युक्तानि पाद्मे पलांडुंलशुनंहिंगुंछत्राकंगृंजनं तथानालिकांमूलकंशिग्रुंवर्जयेत्कार्त्तिकेव्रती अलाबुंचापिवृंताकंकूष्मांडंवृहतीफलं कलिंगंचकपित्थंचवर्जयेद्वैष्णवोव्रती कार्त्तिकेतुविशेषेणराजमाषान्नभक्षयेत् निष्पावान्मुनिशार्दूलयावदाभूतनारकीति पटोलान्यपिनभक्षयेदित्यादि लघुनारदीये ॥ कार्त्तिकेवर्जयेत्तैलंकार्त्तिकेवर्जयेन्मधु कार्त्तिकेवर्जयेत्कांस्यं कार्त्तिकेशुक्तसंधितं कांस्यंतत्पात्रभोजनं । कार्त्तिके यत्यादिर्मासोपवासंकुर्यान्नतुगृहस्थः ॥ वानप्रस्थोयतिर्वापिनारीवाविधवामुने मा

सोपवासंकुर्वीतगुरोर्विप्राज्ञयायतः आश्विनस्यामलेपक्षेएकादश्यामुपोषितः व्रतमेतत्तुगृह्णीयाद्यावत्त्रिंशद्दिनानित्विति प्रकृत्य नगृहस्थश्चरेद्व्रतमिति पाद्मोक्तेः । संधितंलवणशाकःयत्स्वयमम्लंकेवलकालपरिवासेन द्रव्यांतरसंसर्गकालपरिवासाभ्यांवाअम्लीभवति तत् शुक्तमितिमिताक्षरायाम् तथा कार्त्तिकेकृष्णसेवीयः प्राजापत्यपरोथवा । एकांतरोपवासीवात्रिरात्रोपोषितोऽपिवा यद्वाद्वादशपक्षंवामासंवावरवर्णिनि एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनभैक्षेणव्रतमेतत्परंपदं तथा कार्त्तिकेआकाशदीपउक्तोनिर्णयामृते पुष्करपुराणे ॥ तुलायांतिलतैलेनसायंकालेसमागते आकाशदीपंयोदद्यान्मासमेकंहरिंप्रति महतींश्रियमाप्नोतिरूपसौभाग्यसंपदमिति तद्विधिश्च हेमाद्रौ आदित्यपुराणे ॥ दिवाकरेऽस्ताचलमौलिभूतेगृहाददूरेपुरुषप्रमाणं यूपाकृतिंयज्ञियवृक्षदारुमारोप्यभूमावथतस्यमूर्ध्नि पंचांगुलच्छिद्रयुतास्तुमध्येद्विहस्तदीर्घाअथपट्टिकास्तु कृत्वाचतस्रोष्टदलाकृतीस्तुयाभिर्भवेदष्टदिशानुसारी तत्कर्णिकायांतुमहाप्रकाशोदीपः प्रदेयोदलगास्तथाष्टौ निवेद्यधर्मायहरायभूम्यैदामोदरायाप्यथधर्मराज्ञे प्रजापतिभ्यस्त्वथचसपितृभ्यः प्रेतेभ्यएवाथनभःस्थितेभ्य इत्यदिविस्तरस्तत्रैववोध्यः ॥ अपरार्के भविष्योत्तरेतु ॥ विष्णोरायतनेयस्तुसहस्रंयादिदीपकान्। प्रज्वालयत्यनुदिनंदिवारात्रमतंद्रितः ॥ तमिस्रमश्वयुक्पक्षंशुक्लपक्षंतु कार्त्तिकं सयातिभवनंविष्णोस्तेजोमयवपुःपुमान् दीपदानेमंत्रउक्तः यथा दामोदरायनभसितुलायांदोलयासह प्रदीपंतेप्रयच्छामि नमोनंतायवेधसइति अन्यदपि स्कांदे व्रीहयोयवगोधूमाः प्रियंगुतिलशालयः एतेऽतिसात्त्विकाः प्रोक्ताः स्वर्गमोक्षफलप्रदाः काशीखंडे ऊर्जेयवान्नमश्नीयादेवान्नमथवापुनः वृंताकंसूरणंचैवशूकाशिंवींश्चवर्जयेत् पृथ्वीचंद्रोदये पाद्मे नोर्जोवंध्योविधातव्योव्रतिनाकेनचित्क्वचित् अव्रतेनक्षिपेद्यस्तुमासंदामोदर

प्रियं तिर्यग्योनिमवाप्नोति नाऽत्रकार्याविचारणा अन्यान्यपितांवूलतैलकेशकर्त्तनादिवर्ज्जसंकल्परूपाणि
प्रागुक्तानि अत्रैव प्रसंगात् भीष्मपंचकव्रतं लिख्यते नारदीयपुराणे नारदउवाच यदेतदचलंपुण्य
व्रतानांपरमंव्रतम् कर्त्तव्यंकार्त्तिकेमासिप्रयत्नाद्भीष्मपचकं विधानंतस्यविस्पष्टंफलंचसुरसत्तम कथय
स्वप्रसादान्मेजनानांहितकाम्यया ब्रह्मोवाच प्रवक्ष्यामिमहापुण्यंव्रतंव्रतवतांवर भीष्मेणैतद्यतःप्राप्तंव्र
तंपंचदिनात्मकं सकाशाद्वासुदेवस्यतेनोक्तंभीष्मपंचकं व्रतस्यास्यगुणान्वक्तुंकःशक्तःकेशवादृते व्रतंचैत
न्महापुण्यंमहापातकनाशनं अतोनरैःप्रयत्नेनकर्त्तव्यंभीष्मपंचकं कार्त्तिकस्यामलेपक्षेस्नात्वासम्यक्यतव्रतः
एकादश्यांतुगृह्णीयात् व्रतंपंचादिनात्मकं प्रातःस्नात्वाविधानेनमध्यान्हेचतथाव्रती नद्यांनिर्जरगर्त्तेवासमा
लभ्यचगोमयं यवव्रीहितिलैःसम्यक्पितृन्संतर्पयेत्क्रमात् स्नात्वामौनंततःकृत्वाधौतवासादृढव्रतः ततःसंपूजये
द्देवंसर्वपापहरंपरं स्नापयेच्चाच्युतंभक्त्यामधुक्षीरघृतेनच तथैवपंचगव्येनगंधचंदनवारिणा चंदनेनसुगंधे
नकुंकुमेनाथकेशवं कर्पूरोशीरमिश्रेणलेपयेद्गरुडध्वजं अर्चयेद्रुचिरैःपुष्पैर्गंधधूपसमन्वितैः गुग्गुलंघृतसंयु
क्तंदहेदक्षयभक्तिमान् दीपकंतुदिवारात्रौदद्यात्पंचदिनानितु नैवेद्यंदेवदेवस्यपरमान्नंनिवेदयेत् एवमभ्यर्च्य
देवेशंस्तुत्वाचैवप्रणम्यच ॐनमोभगवतेवासुदेवेतिजपेदष्टोत्तरंशतं जहुयाच्चघृताभ्यक्तंतिलव्रीहियवंव्रती ॥
षडक्षरेणमंत्रेणस्वाहाकारान्वितेनच ॐनमोविष्णवेइतिषडक्षरः उपास्यपश्चिमांसंध्यांप्रणम्यगरुडध्वजं जपि
त्वापूर्ववन्मंत्रंक्षितिशायीभवेन्नरः सर्वमेतद्विधानंतुकार्यंपंचदिनेष्वपि विशेषोक्तंव्रतेचास्मिन्यदन्यूनंशृणुष्व
तत् विशेषोक्तंदिनविशेषपुरस्कारेणोक्तं ॥ प्रथमेऽह्निहरेःपादौपूजयेत्कमलैर्नरः द्वितीयेविल्वपत्रेणजानुदेशंस-
मर्चयेत् पूजयेच्चतृतीयेह्निनाभिंभृंगारकेणतु बाणविल्वजपाभिश्चततःस्कंधौसमर्चयेत् ततोऽनुपूजयेच्छी-

पुस्तकालय
गुरुकुल कांगड़ी

र्षमालत्याचक्रपाणिनः कार्त्तिक्यांदेवदेवस्यभक्त्यातद्गतमानसः पूजयेज्जपमंत्रेणगंधधूपंनिवेदयेत् अर्चयित्वाहृषीकेशमेकादश्यांसमाहितःत्रिःप्राश्यगोमयंसम्यगेकादश्यामुपावसेत् गोमूत्रंमंत्रवद्भूयोद्वादश्यांप्राशयेद्व्रतीक्षीरंचैवत्रयोदश्यांचतुर्दश्यांतथादधि संप्राश्यंकायशुद्ध्यर्थंलंघनीयंचतुर्थकं प्राशनंहोममंत्रेणकर्त्तव्यंभूतिमिच्छता पंचमेतुदिनेस्नात्वाविधिवत्पूज्यकेशवं भोजयेद्ब्राह्मणान्भक्त्यातेभ्योदद्याच्चदक्षिणां ततोनक्तंसमश्नीयात्पंचगव्यपुरस्सरं एवंसम्यक्समाप्यंस्याद्यथोक्तंव्रतमुत्तमं जन्मप्रभृतियन्मांसंत्यक्त्वापुण्यमवाप्नुयात् तत्फलंसमवाप्नोतित्यक्त्वासौभीष्मपंचके मद्यपोयस्तुजन्माद्यज्जन्मतोमरणांतिकं तद्भीष्मपंचकेत्यक्त्वासंप्राप्नोत्यधिकंफलं भविष्योत्तरे । श्रीकृष्णउवाच कार्त्तिकेशुक्लपक्षस्यशृणुधर्मंपुरातनं एकादश्यांसमारभ्यविज्ञेयंभीष्मपंचकं दुष्करंसत्त्वहीनानामशक्यंवालचेतसां परार्द्धैःपरिहर्तव्याब्रह्मचर्येणनिष्ठया मद्यमांसमसत्यंचवर्जयेत्पापभाषणं शाकाहारेणमुत्यन्नैःकृष्णार्चनपरैर्नरैः स्त्रीभिर्वाक्येनकर्त्तव्यंस्वपतेःपुण्यवर्द्धनं विधवाभिस्तुकर्त्तव्यंपुत्राणां शुभवृद्धये सर्वकामसमृद्ध्यर्थंमोक्षार्थंचैवपांडव नित्यंस्नानेनदानेनकार्त्तिकंयावदेवतु वैश्वदेवस्तुकर्त्तव्यो विष्णुध्यानपरायणैः वैश्वदेवःसर्वदेवताहोमः ततश्चविभूतित्वेनभावनायाः यमस्यप्रतिमाकार्यारौद्रवक्त्रातिभीषणा हस्वह'स्ता तिविकृतालौहीदंष्ट्राकरालिनी तिलप्रस्थोपरिस्थाप्याकृष्णवस्त्रेणवेष्टिता रक्तपुष्पकृतापीडाज्वलत्कांचनकुंडला संपूज्यपरयाभक्त्याधर्मराजस्यनामभिः इममुच्चारयेन्मंत्रंगृहीतकुसुमांजलिः यदन्यजन्मनिकृतमिहजन्मनिवापुनः पापंमेशममायातुतवपादप्रसादतः एवंसंपूज्यविधिवत्प्रतिमांचसकांचनां सकांचनासुवर्णदक्षिणायुक्ता ॥ वाचकायप्रदातव्याधर्मोमेप्रीयतामिति तद्वच्चदेवदेवस्य कृष्णस्याक्लिष्टकारिणः तद्वदितियमप्रतिमावदेवकृत्वापूजांयथाशक्त्याविप्राणांवेदवेदिनां दद्याद्धिरण्यंगांचै

वकृष्णोमेप्रीयतामिति ॥ कृतकृत्यःस्थिरोभूत्वाविरक्तः संयतोभवेत् शांतचेतानिरावाधः परंपदमवाप्नुयात् नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः अष्टपादेकनयनः शंकुकर्णोमहास्वनः जटीद्विजिव्हस्ताम्रास्योमृगराजतनुच्छदःचिंतनीयोमहादेवोयस्यरूपंनस्याविद्यते ॥ व्रतदेवतायामहाविष्णोरिदंरूपंचिंत्यं पूज्यंच मृगराजतनुच्छदः प्रावृतसिंहवल्कलः ॥ पाद्मेतु ॥ स्नात्वामौनेननरःकृत्वाधौतवासादृढव्रतः भीष्मायोदकदानंचअर्घ्यंचैवप्रयत्नतः दद्यादितिशेषः पूजाभीष्मस्यकर्त्तव्यादानंदद्यात्प्रयत्नतः पंचरत्नंविशेषेणदद्याद्विप्राययत्नतः अर्घ्योदकदानमंत्रौभीष्माष्टमीप्रकरणेद्रष्टव्यौ इदंभीष्मेणकथितंशरतल्पगतेनमे तदेतत्तेमयाख्यातंदुष्करंभीष्मपंचकं धन्यंपुण्यंपापहरंयुधिष्ठिरमहाव्रतं यच्चीर्त्वाब्रह्महागोघ्नःसर्वपापैःप्रमुच्यते यद्भीष्मपंचकमितिप्रथितंपृथिव्यामेकादशीप्रभृतिपंचदशीनिरुद्धं मुन्यन्नभोजनपरस्यनरस्यतस्मिन्निष्टंफलंदिशतिपांडवशार्ङ्गधन्वा इतिभीष्मपंचकव्रतम् * अथकार्तिकोद्यापनविधिः॥ अथोर्जव्रतिनःसम्यगुद्यापनविधिंनृप त्वंशृणुष्वमयाख्यातंसविधानंविशेषतःऊर्जशुक्लचतुर्दश्यांकुर्यादुद्यापनंव्रती व्रतसंपूर्णतार्थायविष्णुप्रीत्यर्थमेवच तुलस्याउपरिष्टात्तुकुर्यान्मंडपिकांशुभांद्वारेषुद्वारपालांश्चपूजयेन्मृण्मयान्पृथक् पुण्यशीलंसुशीलंचजयंविजयमेवच तुलसीमूलदेशेतुसर्वतोभद्रमेवच पंचभिर्वर्णकैःसम्यक्शोभाढ्यंसमलंकृतंसप्तधान्यंचोपरिष्टात्पंचरत्नसमन्वितंमहाफलेनसंयुक्तंकुंभंतत्रनिधायचपूजयेत्तत्रदेवेशंशंखचक्रगदाधरं कौशेयपीतवसनंयुक्तंजलधिकन्ययाइंद्रादिलोकपालांश्चमंडलेपूजयेद्व्रती द्वादश्यांप्रतिवुद्धोसौत्रयोदश्यांयतःसुरैः दृष्टोर्चितश्चतुर्दश्यांतस्मात्पूज्यस्तथात्विह तस्यामुपवसेद्भक्त्याशांतःप्रयतमानसः पूजयेद्देवदेवेशंसौवर्णंगुर्वनुज्ञया उपचारैःषोडशभिर्नानाभक्ष्यसमन्वितैः रात्रौजागरणंकुर्याद्गीतवाद्यादिमंगलैः ततस्तुपौर्णमास्यांचसपत्नीकान्द्विजोत्तमान् त्रिंशन्मितांस्तथाचैकंस्वशक्त्यावानिमंत्रयेत् अतोदेवाइतिद्वाभ्यां

जुहुयात्तिलपायसं प्रीत्यर्थंदेवदेवस्यदेवानांचपृथक्पृथक् दक्षिणांचयथाशक्तिप्रदद्यात्प्रणमेच्चतान् गुरुंव्रतोपदेष्टारंवस्त्रालंकरणादिभिः सपत्नीकंसमभ्यर्च्यतांश्चविप्रान्क्षमापयेत् युष्मत्प्रसादाद्देवेशःप्रसन्नोममकेशवः पापंप्रणाशमायातुस्थिरामेचास्तुसंततिः मनोरथाश्चसफलाःसंतुनित्यंतवार्चनात् देहांतेवैष्णवंस्थानं प्राप्नुयामतिदुर्लभं इतिक्षमाप्यतान्विप्रान्प्रसाद्यचविसर्जयेत् तामर्चांगुरवेदद्याद्वस्त्रयुक्तांतदाव्रती ततोगांकपिलांदद्याच्छय्यांसोपस्करांततः सुहृद्गुरुयुतःसायंस्वयंभुंजीतभक्तिमान् कार्त्तिकेवाथतपासिविधिरेवंविधोमतइति कपिलाधेनुदानं मदनरत्ने व्यासः । रुक्मशृंगींरौप्यखुरांसवस्त्रांकांस्यदोहनां सवत्सांकपिलांदत्त्वावंशान्सप्तसमुद्धरेत् यावंतिचास्यांरोमाणित्सवत्सायांभवंतिहि सुरभीलोकमासाद्यरमते तावतीःसमाः अस्यादानमंत्रोमत्स्यपुराणे । कपिलेसर्वभूतानांपूजनीयासिरोहिणी तीर्थदेवमयीयस्मादतःशांतिंप्रयच्छमे॥यमः॥ रुक्मशृंगींरौप्यखुरांमुक्तालांगूलभूषितां कांस्योपदोहनांधेनुंवस्त्रच्छन्नामलंकृतां दत्त्वाद्विजेंद्रायनरः स्वर्गलोकेमहीयते दशधेनुप्रदानेनतुल्यैकाकपिलातथा॥आदित्यपुराणे ॥ सहस्रंयोगवांदद्यात्कपिलांवापिसुव्रत सममेवपुराप्राहब्रह्माब्रह्मविदांवर कूर्मपुराणे दशसौवर्णिकेशृंगेखुराःपंचपलान्विताः पंचाशत्पालिकंताम्रंकांस्यंवैतावदेवच वस्त्रं तुद्विगुणंधेन्वादक्षिणाचचतुर्गुणा एतैरलंकृतांधेनुंघंटाभरणभूषितां कपिलांविप्रमुख्यायदत्त्वामोक्षमवाप्नुयात् द्विगुणोपस्करोपेतामहतीपरिकीर्तिता दत्तासाविप्रमुख्यायस्वर्गमोक्षफलप्रदा सप्तजन्मकृतात्पापान्मुच्यतेदशसंयुतः ॥ दशभिःपुत्रादिभिःपुरुषैःसंयुतः ॥ यान्यान्प्रार्थयतेकामांस्तांस्तानाप्नोतिमानवः अंतेस्वर्गापवर्गौचफलमाप्नोत्यसंशयं वस्त्रदक्षिणयोस्त्रैगुण्यादिकंगोदानसामान्योपकल्पवस्त्राद्यपेक्षयेतिज्ञातव्यं विधिस्तुगोदानप्रकरणेवक्ष्यते इयमेववर्णभेदेनदशधोक्ता वराहपुराणे ॥ सवर्णाकपिलापूर्वाद्वितीयागौरपिंगला तृतीयाचैव

रक्ताक्षीचतुर्थागुडपिंगला नवमीपाटलाज्ञेयादशमीपुच्छपिंगला एतादशसमाख्याताःकपिलास्तावरानने सर्वाह्येतामहाभागास्तारयंतिनसंशयः सर्वाएवप्रशस्ताश्चसर्वपापप्रणाशनाः अतिदानानिरूपणं भविष्यत्पुराणे त्रीण्याहुरतिदानानिगावःपृथ्वीसरस्वती नरकादुद्धरंत्येताजपवापनदोहनैः तत्रगोदाननिरूपणंमहाभारते दानानामिहसर्वेषांगवांदानंविशिष्यते गावःश्रेष्ठाःपवित्राश्चपावनाजगदुत्तमाः ऋतेदधिघृताभ्यां चनेहयज्ञंप्रवर्त्तते तेनयज्ञावशेषंचगोमूलंसंप्रचक्षते लिंगपुराणे । यान्यागाराणिविप्राणांदेवतनायतानिच पूर्यंतेशकृतायासांकिंदेयमधिकंततः ॥ हारीतः ॥ बहुक्षीरांचयोगांवैब्राह्मणायोपपादयेत् उत्तारयेत्सत्रात्मानंसदा समकुलानिच देवलः सुशीलांलक्षणवतींयुवतींवत्ससंयुतां वराश्चाप्सरसोयत्रतत्रगच्छंतिगोप्रदाः तथा यावंतिरोमाणिभवंतिधन्वास्तावंतिवर्षाणिमहीयतेरिव स्वर्गाच्च्युतस्यापिततोत्रलोकेकुलेसमुत्पत्स्यतिगोमतांसः जावालिः होमार्थमग्निहोत्रस्ययोगांदद्यादयाचितां सुदित्तपूर्णपृथिवीतेनदत्तानसंशयः आत्रेयः अकुलीनाय मूर्खायलुब्धायपिशुनायच हव्यकव्यव्यपेतायगौर्नदेयाकथंचन ब्रह्मपुराणे पीतोदकांरोगवतींदुग्धघोषां निरिंद्रियं उन्मत्तामंगहीनांचमृतवत्सांमहाशनां केशवेलपुरीषास्थिक्रव्यादांसंधिनींखलां पुटधेनुंस्खलद्गर्भांनित्यंप्रश्रवणस्तनीं नदद्याद्ब्राह्मणेभ्यश्चसदोषंवृषभंतथा पीतोदकांजग्धतृणामितिवृद्धोपलक्षणम् दुग्धघोषांस्वकीयस्तनपायिनीं पुटधेनुर्बालवत्सैवयागर्भिणी व्यासः नकृशांपापवत्सांवावंध्यांरोगान्वितांतथा नव्यंगांनपरिश्रांतांदद्याद्गांब्राह्मणायच विश्वामित्रः नैकशृंगांचलच्छृंगांस्फुटिताक्षींचलत्खुरां नदद्यात्रिस्तनींचैवगांशुभामेवदापयेत् महाभारते अंतर्जातासक्रयाज्ञानलब्धाः प्राणक्रीतानिर्जिताः स्वौकजाश्च कृच्छ्रोत्सृष्टाःपोषणाभ्यागताश्चद्वारैरेतैर्गोविशेषाःप्रशस्ताः अंतर्जातगर्भिण्यःज्ञानंविद्या प्राणक्रीतायुद्धादिना स्वौ

कजागृहजाताः कृच्छ्रोत्सृष्टाइत्यादिव्याध्याक्रांतास्संत्यः स्थानात्त्यक्ताःस्वयंपोषणंकृत्वालब्धाः तत्रैव एकांगादशगुर्दद्यादशदद्याच्चगोशती शतंसहस्रगुर्दद्यात्सर्वास्तुल्यफलान्विताः नंदिपुराणे विधिनातुयदादत्तायोत्रधेनुःसदाक्षिणा तदातारयतेजंतून्कल्पानामयुतैःशतैः अथगोदानाविधिः विश्वामित्रः। प्राङ्मुखींगामवस्थाप्यसवत्सांतांसुपूजितां पुच्छदेशेतुदातावैस्नातोबद्धशिखोभवेत् उदङ्मुखस्तुविप्रःस्यात्पात्रलक्षणलक्षितः आज्यपात्रंकरेकृत्वाकनकेनसमन्वितं निक्षिप्यपुच्छंतस्मिंस्तुघृतादिग्धंप्रसह्यच सतिलंविप्रपाणिंतुप्रागग्रंतुनिधापयेत् सतिलंसकुशंचापिगृहीत्वादानमाचरेत् अनेनैवतुमंत्रेणपात्रहस्तेजलंक्षिपेत् यज्ञसाधनभूतायाविश्वस्याघप्रणाशिनी विश्वरूपधरादेवःप्रीयतामनयागवा अनुव्रज्यचतांधेनुंब्राह्मणेनसमन्वितां गोमतींतुततोविद्यांजपेतप्रयतःशुचिः उद्दिश्यवासुदेवंचप्रीयतामितिवाचनं पात्रंमनासिसंचिंत्यतोयमप्सुविनिःक्षिपेत् जलशायीब्रह्मपितापद्मनाभःसनातनः अनंतभोगशयनःप्रीयतांपरमःपिता गोमतीविद्यामहाभारतेदर्शिता ॥ गावोमामुपतिष्ठंतुहेमशृंग्यःपयोमुचः सुरभ्यःसौरभेय्यश्चसरितःसागरंयथा गावैपश्याम्यहंनित्यंगावःपश्यंतुसर्वदा गावोस्माकंवयंतासांयतोगावस्ततोवयं तथायमेनापि गावःसुरभयोनित्यंगावोगुग्गुलुगंधिकाः गावःप्रतिष्ठाभूतानांगावःस्वस्त्ययनंमहत् अन्नमेवपरंगावोदेवानांहविरुत्तमम् जीवनंसर्वभूतानांक्षरंतिचवहंतिच हविषामंत्रपूतेनतर्पयंत्यमरान्दिवि ऋषीणामपिहोतृणांगावोहोमेप्रतिष्ठिताःसर्वेषामेवभूतानांगावोमंगलमुत्तमं गावःसर्वस्यलोकस्यगावोधन्याःसुवाहनाः नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतं एकत्रमंत्रास्तिष्ठंतिहविरन्यत्रतिष्ठतीति अत्रदक्षिणामाहवसिष्ठः सुवर्णंदक्षिणापरा सुवर्णंपावनंप्राहुःपरिमाणंपरंतथा अत्रपारिमाणंपरंतथेत्यत्रापि

सुवर्णशब्दसंबंधात्परिमाणविशेषावगतेरैच्छिक्यपरिमाणसुवर्णदक्षिणादानंव्यावर्त्यते तच्चशक्तविषयं अत्राऽशक्तस्यतु यजमानस्ततोदद्याद्यथाशक्त्यातुदक्षिणामिति ब्रह्मवैवर्त्तवाक्येन ततोप्यल्पायाअपिदक्षिणायाअभ्यनुज्ञानात् गोदानमात्रप्रार्थनामंत्रमाह वासिष्ठः घृतक्षीरप्रदागावोघृतयोन्योघृतोद्भवाः घृतनद्योघृतावर्त्तास्तामेसंतुसदागृहे घृतंमेहृदयेनित्यंघृतंताभ्यांप्रतिष्ठितं घृतंमेसर्वतश्चैवगवांमध्येवसाम्यह मितिगोदानविधिः । अथकार्त्तिकोद्यापनविधिः । एवंचातुर्मास्यव्रतोद्यापनमपिकार्यं अथात्रैवभीष्मपंचकोद्यापनम् तच्चैकादश्यांकृतस्थापनपूजनांतेअग्निंप्रतिष्ठाप्य अन्वादध्यात् अत्रप्रधानंविष्णुं इदंविष्णु अतोदेवाइतिमंत्राभ्यामष्टाक्षरविद्याभ्यांप्रत्येकमष्टोत्तरशताहुतिभिश्चभीष्मपंचपांडवद्रौपदीनांनाममंत्रै ब्रह्मादिमंडलदेवताग्रहादींश्चपायसचर्वाज्यैः प्रत्येकमेकैकयाहुत्याप्रायश्चित्तांतेस्विष्टकृद्धोमेनाहंयक्ष्ये ततोभीष्मादिमूर्त्तिशय्यागोदानादिकृत्वा पूर्णाहुतिमभिषेकंचकृत्वा अच्छिद्रावधारणम् अच्छिद्रावधारणमंत्रः व्रतच्छिद्रंतपच्छिद्रंयच्छिद्रंयज्ञकर्म्मणि एकमासंद्विमासंवात्रिमासंवाचतुष्टयम् दिनानिदशपंचादीदिनमेकंदिनद्वयं यत्किंचिन्नियमंचापि शाकपत्रादिभोजनम् मूलिकामत्स्यमांसादिवृंताकादिफलानिवा तत्सर्वंपूर्णतांयातुनिवृत्तेभीष्मपंचके सर्वंभवतुचाच्छिद्रंब्राह्मणानांप्रसादतः ब्राह्मणायानिभाषंतेतानिमन्यंतिदेवताः उपवासोव्रतंतीर्थस्नानदानफलंचयत् विप्रैसंपादितंयस्यसंपूर्णंतस्यतद्भवेत् ब्राह्मणाजंगमंतीर्थंनिर्म्मलंसर्वकामिकम् एषांवाक्योदकेनैवशुद्ध्यंतिमलिनाजनाः यद्ब्राह्मणास्तुद्भुतमावदन्ति तद्देवताः कर्म्मभिराचरन्ति तुष्टेषुतुष्टान्मुनयोवदंतिप्रत्यक्षदेवेषुपरोक्षदेवान् व्यासवाल्मिकिवचनात्पराशरवसिष्ठयोः नारदस्यभृगोरुक्त्यासफलंकृतमस्तुते मंत्रार्थाःसफलाः संतुसफलासंतुवोमखाः शत्रूणांबुद्धिनाशोस्तुमित्राणामुदयोस्तुवः इत्यच्छिद्रावधारणंसर्वव्रतांतेज्ञेयं तत

स्त्रिंशन्ननामानिपूजयेच्चयथाविधिः विष्णुंजिष्णुंमहाविष्णुंहरिंकृष्णमधोक्षजं केशवंमाधवंरामंचाच्युतंपुरुषोत्तमं गोविंदंवामनंश्रीशंश्रीकंठंविश्वसाक्षिणं नारायणंमधुरिपुमनिरुद्धंत्रिविक्रमं वासुदेवंजगद्योनिंशेषतल्पगमंतथा संकर्षणंचप्रद्युम्नंदैत्यारिंविश्वतोमुखं जनार्दनंधराधारंश्रीधरंचसमर्चयेत् इतित्रिंशन्नामानिमासोपवासचातुर्मास्यादिव्रतेषुविष्णुपूजनेविप्रपूजनेचयथासंभवमूह्यानि अथकार्त्तिक्यां मार्कंडेयपुराणदानमुक्तं नारदीये मार्कंडेयाभिधंवत्सलभेत्सपरमांगतिं यस्तुव्याकुरुतेचैतच्छैवंसलभतेपदं तत्प्रयच्छेल्लिखित्वायःसौवर्णकरिसंयुतं कार्त्तिक्यांद्विजवर्यायसलभेद्ब्रह्मणःपदमिति मार्कंडेयपुराणदानं ॥ स्वस्ति श्रीरणवीरसिंहधरणीपालोवदान्याग्रणी र्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेःपदांबुजार्चारतो जीयात्पुत्रकलत्रमित्रसहितः संपालयन्क्ष्मांसदा १ रणवीरसिंहभूपेशकारितेकृत्यसागरे अभूत्कार्त्तिककृत्यानांरम्योरत्नसमुच्चयः ॥ इतिश्रीकृत्यरत्नाकरेकार्त्तिकमासकृत्यरत्नसमुच्चयः ॥

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिब्बामल्लाधिकारेकार्त्तिकमासोमुद्रितस्समाप्तिमगमत्
संवत् १९४१ पौष प्र. १९

॥ ओं अथमार्गशीर्षमासकृत्यम् ॥ ❀ ॥ वृश्चिकसंक्रमणेपूर्वाःषोडशघाटिकाःपुण्यकालः देवीपुराणे मार्गेरसोत्तमंदद्याद्घृतंपौषेमहाफलं तिलान्माघेमुनिश्रेष्ठसप्तधान्यानिफाल्गुने विचित्राणिचवस्त्राणिचैत्रेदद्याद्द्विजोत्तमे वैशाखेयवगोधूमान्ज्येष्ठेतोयभृतंघटं आषाढेचंदनंदेयंसकर्पूरंमहाफलं नवनीतंनभोमासिछत्रंप्रोष्ठपदेस्मृतं गुडशर्करस्वर्णाढ्यान्लुड्डुकानाश्विनेमुने दीपदानंमहापुण्यंकार्त्तिकेयःप्रयच्छति सर्वान्कामानवाप्नोतिक्रमेणैतदुदाहृतं व्रतांतेगांशुभांदद्यात्सवत्सांकांस्यदोहनां स्वभावशुद्धेविधिवत्पूजयित्वाद्विजोत्तमे दातव्यावीतरागेचकामक्रोधविवर्जिते अयाचकेसदाचारेविनीतेविनयान्विते गोदानाल्लभतेकामान्गोलोकेसुमनोहरान् इतिमार्गमाससमारभ्यवर्षमात्रसाध्यं एकवत्सरनिर्वाह्यंप्रतिवर्षमेकैकमासक्रमेण द्वादशवर्षसाध्यमपि क्रमेणेदमुदाहृतमितिव्यर्थत्वप्रसंगात् द्वादशवर्षैसमाप्तिरिति इतिमार्गादिव्रतं अस्मिन्मासेविष्णुपूजाव्रतं वाराहे येयजंतिवरारोहेमार्गेमासितुवैद्विजाः तान्सर्वाननुगृह्णामिहव्यकव्यपथिस्थितान् यजंतिमामितिशेषः अत्रदानविशेषोदानसागरे खराश्वाश्वतरीनागान्सकलान्युज्यजाविकान् केशवप्रीणनार्थायमासिमार्गशिरैनरैः पुजीयुगयुक्तोरथइतिदानसागरः अजःछागःअविर्मेषःएतान्मार्गशिरेदेयानाहुः अत्रलवणदानं मार्गेरसोत्तमंदद्यात् रसोत्तमंलवणं विष्णुधर्मोत्तरे लवणंमार्गशीर्षेतुदत्त्वासौभाग्यमश्नुते अत्रव्रतानि महाभारते मार्गशीर्षंतुयोमासमेकभक्तेनसंक्षिपेत् भोजयेद्ब्राह्मणान्भक्त्यामुच्यतेसोथकिल्विषैरिति स्कांदे एकभक्तेनयोमर्त्योमार्गमासंतुसंक्षिपेत् सतेनकर्मणायुक्तःसुभगोभवतिसदा अथतीर्थविशेषः ग्रहणमुपक्रम्य देवीपुराणे मार्गशीर्षेतुदेविकेति पद्मपुराणे षष्टितीर्थसहस्राणितिस्रःकोट्योर्धकोटिका आयांतिदेविकातीर्थेमार्गशीर्षेनसंशयः क्षालयित्वाघनिचयंप्रयांतिनिजलेखया मार्गकृष्णप्रतिपदायांयोगविशेषउक्तोभविष्योत्तरे रोहि

णीप्रतिपद्युक्तामार्गेमासिसितेतरा कृष्णाप्रतिपादित्यर्थः गंगायांयदिलभ्येतसूर्यग्रहशतैःसमा मार्गकृष्णद्वितीयायांकृत्याविशेषाभावात् तिथिपत्वेनब्रह्मणोर्चनादिव्रतं द्वितीयामासान्यनिर्णयेभिहितं मार्गतृतीयामारभ्यसौभाग्यसुंदरीव्रतं कर्णाटेषुप्रसिद्धंतच्चतुर्थीविद्धायांकार्य्यं नद्वितीयाविद्धायां द्वितीयावेधरहितातृतीयायासिताभवेत् चतुर्थीयोगिनीकिंचिच्छुद्धावापियदाभवेदितिकथायामुक्तेः व्रतार्के नारदउवाच भगवंस्ते प्रजाःसृष्टानानावर्णास्तथागुणाः स्वेदजाअंडजाश्चैवउद्भिजाश्चजरायुजाः देवासुराःसगंधर्वाःसयक्षोरगराक्षसाः एकेसुरूपाः सुभगा वलिनश्चापरेतथा तथान्येदुःखसंयुक्ताः काणामूकाश्चपंगवः दुःशीलादुर्भगादीनाः परकर्मकराः पराः एतन्मेहृदिसंतापसंशयंछेत्तुमर्हसि ब्रह्मोवाच शृणुवत्सप्रवक्ष्यामित्वंभक्तोसिप्रियोसिमे कर्मवीजप्ररूढंहिशरीरंपाचभौतिकं येदत्तदानाजायंते सुरूपाःसुखिनोनराः तपः प्रभावाज्जायंते वलिनः सुभगास्तथा अदत्तदानाजायंते परकर्मपराः सदा परापवादवक्तारः परद्रव्यापहारिणः हंतारःप्राणिनांचैव अभक्ष्याणांचभक्षकाः क्रमशोनरकान्भुक्त्वाजायंतेकुत्सितानराः दरिद्राः पंगवोमूकाः काणाद्यादुर्भगाः कृशाः नारदैवंस्वकर्मोक्तैर्नरानार्य्यश्चदुःखिताः नारदउवाच उपायंब्रूहिभगवन्येनकर्मक्षयोभवेत् तपोदानंव्रतंतीर्थं शरीरस्यचशोषणं दुःखसंतापतप्तानां जीवानांतातमेवद ब्रह्मोवाच शृणुनारदयद्गुह्यंव्रतानामुत्तमंव्रतं सर्वदुःखप्रशमनं व्याधिदारिद्र्यनाशनं सुखसौभाग्यजननंपुत्रपौत्रप्रदायकं सुरूपदंचसौभाग्यकारणंकामदंतथा नारीणांचविशेषेणसुखसौभाग्यदायकंवसिष्ठायपुराप्रोक्तमृषीणांचसमागमे कैलासशिखरेरम्येशंकरेणमहात्मना नारदउवाच कस्मात्प्रोवाचभगवान्कृपाकस्मादजायत एतन्मेब्रूहिभगवन्शंकरोलोकशंकरः ब्रह्मोवाच दृष्ट्वाद्भुतंच सौभाग्यमरुंधत्याजगत्प्रभुःतथारूपंचशीलंचसौभाग्यमतुलंतथा कृत्वाशिरःप्रकंपंच जहासमृदुशंकरःपृष्टवान्

करुणंदेवं वसिष्ठः स्मितकारणं ईश्वरउवाच अहोव्रतस्यमाहात्म्यंश्रूयतामृषिसत्तमाः पुराजन्मनिशूद्रस्यदास्यकर्मकरीसदा उच्छिष्टभोजनानित्यमुच्छिष्टशयनासदा कुरूपादुर्भगादीना रूक्ष गद्गदभाषिणी नाम्नामेघवतीख्यातादुर्दर्शवदनाशुभा एकदापेषणार्थंसागताब्राह्मणसन्निधौ श्रुतंव्रतंचनारीणांवाच्यमानंद्विजन्मना सौभाग्यसुंदरीनामतृतीयासर्वकामदा ज्ञानचौरागमेशास्त्रेप्रार्थितेनोमयातथा चीर्णंतासांप्रसंगेनमेघवत्यापितद्व्रतं कुत्सितंचैवनैवेद्यंदत्तंदानंनाकिंचन हविष्यंचतथोच्छिष्टंविहितंपारणेतथा केवलंचव्रतंचीर्णंश्रद्धापूतेनचेतसा श्रद्धयाधार्यतेधर्मोबहुभिर्नार्थराशिभिः ऋषयश्चाक्रिरेधर्मंश्रद्धापूतेनचेतसा तेनकर्मविपाकेननिषधाधिपतेःसुता सुरूपाचसुशीलाचसर्वलक्षणसंयुता संपूर्णावयवाशांतातस्यादेव्याःप्रभावतः उच्छिष्टभोजनाज्ञातानिषदानांचयोनिषु अदत्तदानात्संजातातापसीभोगवर्जिता व्रतप्रभावाज्जायंतेसुरूपाश्चपतिव्रताःमहासौभाग्यसंयुक्तासाक्षाल्लक्ष्मीरिवापरा सर्वकामप्रदादेवीनांदिनीवसतेगृहे तद्व्रतंचास्यदेवर्षेसर्वकामफलप्रदं नारदउवाच व्रतस्यास्यविधिंब्रूहिकोविधिःकिंचपूजनं कस्मिन्मासेप्रकर्तव्यंदेवताकाप्रकीर्तिता किंपुण्यंकिंचनैवेद्यंध्यानंकस्यचपूजनं ब्रह्मोवाच व्रतस्यारंभणंकार्यंमार्गशीर्षेथमाघके द्वितीयावेधरहितातृतीयायासिताभवेत् चतुर्थीयोगिनीकिंचिच्छुद्धावापियदाभवेत् उपवासंप्रकुर्वीतदंतधावनपूर्वकं अपामार्गेणकुर्वीतदंतशुद्धिंतदाव्रती उमेदेविनमस्तुभ्यंशंकरस्यार्द्धहारिणि प्रसीदश्रीमहेशानिकरिष्येव्रतमुत्तमं सान्निध्यंकुरुमेदेविव्रतेस्मिन्हरवल्लभे इतिनियममंत्रः सौभाग्यसुंदरीनामवशिनीसाप्रकीर्तिता सर्वकामप्रदादेवीसर्वसत्ववशंकरी तस्यादर्शनमात्रेणसदासंजायतेजगत् द्रोणपुष्पैश्चसंपूज्यादाडिमैश्चास्यहेतवे नैवेद्यंमोदकान्दद्यात्कर्पूरं प्राशयेत्ततः वत्सपौषासितेपक्षेतृतीयायांव्रतंभवेत् मल्लिकादंतकाष्ठंचमत्तकेनचपूजयेत् राज्यसौभाग्यदं-

नामसुदरींपूजयेत्ततः धात्रीफलंददेदर्घ्यंकंकोलंप्राशयेन्निशि नैवेद्यंवटकान्दद्याद्घृतशर्करयान्वितान् कंकोलांवुतदाप्राश्यंराज्यसौभाग्यहेतवे घृतेनवोधयेद्दीपंरात्रौजागरणंसदा सर्वकामप्रदादेवीसर्वदुःखहरापरा सर्वैश्वर्य्यप्रदादेवीसर्वपापहरापरा एकापिवहुधात्मानंनामरूपविभेदतः माघमासेतुसंप्राप्तेवदर्यादंतधावनम् प्रातः कुर्वीतनियमंरूपसौभाग्यहेतवे अपराह्नेततः स्नाता सर्वाभरणभूषिता चूतपुष्पैश्चसंपूज्यारूप-सौभाग्यसुंदरी नारिकेलार्घ्यदानंचनैवेद्यंशष्कुलीस्मृतं प्राशनंचैवकस्तूरीरूपसौभाग्यसंयुता पूजयेत्तरसासर्वकामसौभाग्यसुंदरीं फाल्गुनस्यासितपक्षेप्रातर्नियमसंयुता सौभाग्यसुंदरींविल्वंदंतकाष्ठंतुकारयेत् स्नानंकृत्वातथानारीकांचनारैश्चपूजयेत् नैवेद्यंसक्तवस्तत्रघृतशर्करयान्विताः यक्षकर्दमजोलेपो धूपश्चागुरुसंभवः सर्वासुचतृतीयासुविधिरेषउदाहृतः वीजपूरार्घ्यदानंचप्राशनंचंदनोदकम् प्राशनस्यप्रभावेणसर्वान्कामानवाप्नुयात् पारणंचप्रकर्त्तव्यंसहसर्वैश्चवांधवैः चैत्रेमासिप्रकर्त्तव्यातृतीयापापनाशिनी प्रयत्नेनचकर्तव्यासुखसौभाग्यसुंदरी दंतकाष्ठंप्रकुर्वीत जंवूवृक्षसमुद्भवम् पूजादमनकैश्चैवह्यर्घ्यंविल्वफलंस्मृतम् नैवेद्यंमंडकाः प्रोक्ताः शर्कराघृतसंयुताः सुखसौभाग्यसिद्ध्यर्थंप्राशनंवज्रधारिणः वैशाखस्यासितेपक्षेतृतीयायामुपोषयेत् मालतीदंतकाष्ठंचनियमग्रहणंततः पतिसौभाग्यदांदेवींसुंदरींपूजयेत्ततः पद्मैः सितैः सुरकैश्चमल्लिकाभिश्चपूजनम् दधिभक्तंसकर्पूरंशर्कराघृतसंयुतम् नैवेद्यंकल्पयेद्देव्याअर्घ्यंचाम्रफलम्भवेत् हेम्नोदकंचसंप्राश्यंपुष्टिसौभाग्यमाप्नुयात् ज्येष्ठेमासितृतीयायामुपवासपराभवेत् यूथिकादन्तकाष्ठंचलावण्यशुभगाशिनी माल्लिकाकुसुमैः पूज्या यक्षकर्दमचर्चितैः लावण्यसुभगांदेवींसुंदरींपूजयेत्ततः कदलीफलार्घ्यदानंचनैवेद्यंघृतपूरिकाः मौक्तिकांवुततःपीत्वा लावण्यशुभगोभवेत् आषाढेचततोमासिपक्षसौभाग्यसुंदरीम् दन्तकाष्ठंप्रकुर्वीत

प्रातश्चाशोकवृक्षजं नियमंचप्रगृह्णीयात्तृतीयायांप्रयत्नतः विल्वपत्रैःकोमलैश्चपतिसौभाग्यसुंदरीं जंबूफलार्घ्यं दानंचनैवेद्यंपायसंस्मृतं सपत्नीनांमुखंनैवसापश्यतिकदाचन श्रावणेमासिसंप्राप्ते तृतीयायामुपोषयेत् विभीतदंतकाष्ठंचजातीपुष्पैश्चपूजनं सर्वैश्वर्य्यंचसौभाग्यसुंदरींपूजयेत्ततः नैवेद्यंशुभ्रकासारं धूपदीपादिकंतथा कदलीफलार्घ्यदानंचप्राशनेराजतंपयः गजाश्वरथदासीनांहेमरत्नादिवाससां ईश्वरींसर्वलोकानां भगवत्याःप्रसादतः मासिभाद्रपदेप्राप्तेपूज्यासौभाग्यसुंदरी दंतकाष्ठंतुकर्त्तव्यंमातुलिंगसमुद्भवं उत्पलैःपूजयेद्देवीमर्घ्यंकर्कटकीफलं नैवेद्यंशोकवर्त्तिस्त्वंपिवेन्माणिक्यजंपयः कर्पूरागुरुकस्तूरी मुखदेशेसुगंधिता आश्वयुज्यासितेपक्षेतृतीयायांव्रतंचरेत् दंतकाष्ठंप्रकर्त्तव्यंप्लक्षवृक्षसमुद्भवं पूजयेत्परयाभक्त्यापूज्यासौभाग्यसुंदरी उत्पलैःशतपत्रैश्चपूजाकार्य्याप्रयत्नतः नारंगमर्घ्यदानंच कूष्मांडंवापिकल्पयेत् नैवेद्यंचणकांच्छुभ्रान्घृतशर्करयान्वितान् औदुंबरपयःप्राश्यसुंदरीप्रीयतांमम पुत्रपौत्रसमायुक्तासुखसौभाग्यसुंदरी कार्त्तिकेमासिसंप्राप्तेतृतीयामुपवासतः औदुंबरंदंतकाष्ठंकृत्वाव्रतमुपाचरेत् केतकीभिश्चसौभाग्यनाम्नासंयोगसुंदरी निवेदयेदपूपांश्चसुगंधांछालिसंभवान् आक्षोटंचार्घ्यदानेचलवंगंप्राशयेत्तुतां सावियोगंनचाप्नोतिपितृमातृसुतादिभिः एवंचीर्णेव्रतेकुर्य्यादुद्यापनविधिंततः सर्वशास्त्रमधीयानंसर्वागमविशारदं आचार्य्यंप्रार्थयेत्प्रातर्मार्गशीर्षेयथाविधिः चीर्णव्रतोमहाचार्य्यउद्यापनविधिंमम व्रतवैकल्यनाशाययथाशास्त्रसमाहितः सुंदरीमंडलंकार्य्यंगौरीतिलकमेवच उमामहेश्वरंदेवंसौवर्णेनतुकारयेत् व्रतारंभेयथाशक्त्याराजतंवापिकारयेत् वित्तशाठ्यंनकुर्वीतसतिद्रव्येफलार्थिनी वर्षंप्रपूज्यतांमूर्त्तिमामेवंमंडलेर्चयेत् सर्वोपहारैर्गंधैश्चपुष्पैर्नानाविधैरपि एकैवसाजगन्मातावहुरूपैर्व्यवस्थिता रूपैर्द्वादशभिश्चैवपूज्यासौ

॥ ३ ॥
भा०पू०
१०१

भाग्यसुंदरी ततःपद्मनिभांदेवींरक्तवस्त्रोपशोभितां रक्ताभरणशोभाढ्यांरक्तकुंकुमचर्च्चितां ध्यात्वाह्येवंविधांदेवींपूजयेदेकमानसा मंदारमालाकुलितालकायैकपालमालांकितशेखराय दिव्यांबरायैचदिगंबराय नमःशिवायैचनमःशिवाय । इतिसर्वोपचारपूजामंत्रः ततःसर्वाणिपुष्पाणिनैवेद्यानिफलानिच अर्घ्यार्थं परिकल्प्यानिसर्वकामार्थसिद्धये उमेदेविनमस्तुभ्यंशंकरस्यार्द्धहारिणि प्रसीदश्रीमहेशानिगृहाणार्घ्यंनमोस्तुते रात्रौजागरणंकार्य्यंगीतवादित्रनिस्वनैः ततःप्रभातेविमलेस्नात्वाकृत्वाविधानतः कुसुंभकुसुमैर्होमंकिंशुकैर्वापिकारयेत् अष्टोत्तरशतंपूर्णंमध्वाज्ययवसैर्युतं तदभावेतुकर्तव्यं शतपत्रैर्विधानतः आसुरेणचमंत्रेणपौर्णमुख्यंसमाचरेत् भोजयेच्चप्रयत्नेनचत्वार्य्यष्टौप्रयत्नतः मिष्टान्नेनसपत्नीकान्भुक्त्वावैपरिधापयेत् वस्त्रालंकरणैश्चैवयथाशक्त्याप्रपूजयेत् सौभाग्यवस्त्रंचैकैकंनारीणांचैवदापयेत् ततोहस्तेप्रदातव्यंकुंकुमंलवणंगुडं नारिकेलंजपावल्लीदूर्वासिंदूरकज्जलं मंगलाष्टकमेतद्वैदत्त्वासौभाग्यमाप्नुयात् आचार्य्यंचसपत्नीकंवस्त्रालंकरणैः शुभैः परिधाप्ययथाशक्त्यामंडलंतत्समर्पयेत् प्रार्थयेच्चततोदेवींसर्वसौभाग्यसुंदरीं पूजितासिमयादेविसर्वसौभाग्यसुंदरि दत्त्वामत्प्रार्थितान्कामान्गच्छदेवियथासुखं । मूर्त्तिदानांतेआचार्यंप्रार्थयेत् मूर्तींचमंडलंदेव्याउपहारांश्चसर्वशः गुरोगृहाणसर्वंत्वंसुंदरीप्रीयतामिति त्वत्प्रसादात्मयाचीर्णंव्रतमेतत्सुदुर्ल्लभं क्षमस्वविप्रशार्दूलप्रसादसुमुखोभव एवंचीर्णव्रतानारीकृतकृत्याभवेत्सदा येनेदंचकृतंवत्ससंप्राप्तंजन्मनःफलं नातःपरतरंकिंचिद्व्रतंसौभाग्यकारकं देहांतेशिवलोकेतुभोगान्भुक्त्वायथेप्सितान् ॥

इतिव्रतार्केमार्गकृष्णासौभाग्यसुंदरीतृतीयाव्रतं मार्गकृष्णचतुर्थ्यांविशेषव्रतानुक्तेः तिथिपत्वेनगणेशपूजाव्रतं संकष्टचतुर्थीविधिनाकार्य्यम् एवं मार्गशीर्षपंचम्यामापिविशेषकृत्याभावे पक्षद्वयगतासुसर्वासुपंचमीषुतिथिपत्वेन

शेषादयोनागाः पूज्याःउक्तंच शेषादीनांफणीनांचपंचम्यांपूजनंभवेदिति पंचमीसामान्यनिर्णयोक्तं।अथमार्गकृष्णषष्ठ्यादिसर्वासु षष्ठीषुसूर्यषष्ठीव्रतं भविष्योत्तरे ॥ कृष्णषष्ठ्यांप्रयत्नेन कृत्वानक्तंयथाविधिः मासिमार्गशिरस्यादावंशुमानितिपूजयेत् विधिवत्प्राश्यगोमूत्रमनाहारोनिशिस्वपेत् अतिरात्रस्ययज्ञस्यफलंप्राप्नोतिमानवः पौषेप्येवंसहस्रांशुंभानुमंतमुशंतिच वाजपेयफलंतस्यघृतंप्राश्यलभेन्नरः उशंतिवदंतीत्यर्थः माघेदिवाकरंनामकृष्णषष्ठ्यांनियोजयेत् निशिपीत्वातुगोमूत्रंगोमेधफलमश्नुते मार्त्तंडंफाल्गुणेमासिपूजयेद्भक्षयेत्तिलान् राजसूयस्ययज्ञस्यफलंपुण्यमवाप्नुयात् चैत्रेतुहंसनामानंकृष्णषष्ठ्यांप्रपूजयेत् शुक्लंपुष्पंनरःप्राश्यहयमेधफलंलभेत् वैशाखेकृष्णनामानंकृष्णषष्ठ्यांप्रपूजयेत् पीत्वाकुशोदकंपुण्यंजितक्रोधोजितेंद्रियः माह्याश्वमेधयज्ञस्यवैनतेयफलंलभेत् ज्येष्ठेदिवस्पतिंपूज्यगवांशृंगोदकंपिबेत् गवांकोटिप्रदानस्यनिखिलंफलमाप्नुयात् आषाढेत्वर्कनामानमिष्ट्वाप्राश्यचगोमयं प्रयात्यर्कसलोकत्वंवर्षाणांचशतंविभो श्रावणेयमनामानंपूजयित्वा पयःपिबेत् वर्षाणामयुतंसाग्रंमोदतेभास्करालये मासिभाद्रपदेषष्ठ्यांभास्करंनामपूजयेत् प्राशनंपंचगव्यस्य सर्वयज्ञफलंलभेत् मासिचाश्वयुजेषष्ठ्यांभगाख्यंनामपूजयेत् दूर्वांकुरंसकृत्प्राश्यराजसूयफलंलभेत् कार्त्तिकेमासिषष्ठ्यांतुभगाख्यंनामपूजयेत् गोमूत्रमथप्राष्णीयादश्वमेधफलंलभेत् वर्षांतेभोजयेद्विप्रान्सूर्यभक्तिसमन्वितान् पायसंमधुसंयुक्तमाज्येनसुपरिप्लुतं शक्त्याहिरण्यवासांसिभक्त्यातेभ्योनिवेदयेत् सूर्य्यायगांच कृष्णांचसंप्रदद्यात्पयस्विनीं वर्षमेकंचरेदेवंनैरंतर्येणयोनरः कृष्णषष्ठ्यांव्रतंभक्त्यातस्यपुण्यफलंशृणु सर्वपापविनिर्मुक्तः सर्वकामसमन्वितः मोदतेसूर्यलोकेतुसनरः शाश्वतीःसमाः ॥

इतिश्रीभविष्योत्तरेमार्गादिकृष्णषष्ठीव्रतं मार्गकृष्णसप्तम्यामप्येवं व्रतंकार्य्यंसप्तम्याःसूर्य्यदैवतत्वादिति

सप्तमीकृत्यं मार्गकृष्णाष्टम्यांकालभैरवोत्पत्तिः तस्यामुपवासादिकार्य्यं तदुक्तंकाशीखंडे ॥ मार्गशीर्षसिताष्टम्यांकालभैरवसान्निधौ उपोष्यजागरंकुर्वन्सर्वपापैःप्रमुच्यते त्रिस्थलीसेतौ कृत्वाचाविविधांपूजां महासंभारविस्तरैः नरोमार्गासिताष्टम्यांवार्षिकंविघ्नमुत्सृजेत् आविरासीत्तदालोकान्भीषयन्नखिलानपीतितत्रैवोक्तेः नारदीयेपि यत्किंचिदशुभंकर्मकृतंमानुष्यजन्मनि तत्सर्वंविलयंयातिकालभैरवदर्शनादिति अत्रपूजोपवासजागरणानिप्रधानानि एतेनोपोषणस्यांगभूतमर्घ्यमिहस्मृतं तथाजागरणंरात्रौपूजायामचतुष्टयमितिवचनादुपोषणस्यैवप्राधान्यमितिप्रत्युक्तंवाक्यांतराविरोधेनोपोषणस्यांगभूतामितितस्योत्तरार्द्धेऽनुषंगात् इयंपूर्वविद्धाग्राह्याकृष्णपक्षगतत्वाद्रुद्रव्रतत्वात्कालव्याप्तिलाभाच्च यत्तुकैश्चिन्मध्याह्नस्याविर्भावकालत्वान्मध्याह्नव्यापिनीग्राह्येत्युक्तं तदुक्तं आविर्भावेकालव्यापिन्याःकर्त्तव्यत्वेनानभिधानात् वस्तुतस्तु आविर्भावोपिनमध्याह्नएव मध्येवहुकृत्याभिधानात् अतःसूर्यश्चास्तमुपागमदित्यभिधानात् अस्यामेवाष्टम्यामनघाष्टमीव्रतं हेमाद्रौभविष्ये कृष्णाष्टम्यांमार्गशीर्षेदांपत्यंदर्भनिर्मितं अनघंचानवद्यांचबहुपुत्रैःसमन्वितं स्थापयित्वाशुभेदेशेगोमयेनानुलेपिते पूजयेदितिशेषः इदंव्रतंवर्षमात्रंकर्तव्यं इत्यनघाष्टमीव्रतं इयंमार्गकृष्णाष्टमी लक्ष्मीकल्पादिः कल्पादिकृत्यश्राद्धदानाद्यक्षयफलंभवतीत्युक्तेः अस्यामेवाष्टम्यांशैवव्रतारंभोभविष्यपुराणे कृष्णाष्टम्यांप्रयत्नेनकृत्वानक्तंप्रयत्नतः मासिमार्गशिरेवीरशंकरंदेवमर्चयेत् पीत्वाशक्त्याचगोमूत्रमनाहारंनिशिस्वपेत् अतिरात्रस्ययज्ञस्यफलमष्टगुणंभवेत् एवंपौषेतुसंपूज्यशंभुमीशानमीश्वरं कृष्णाष्टम्यांघृतंप्राश्यवाजपेयफलंलभेत् माघे महेश्वरंदेवं कृष्णाष्टम्यांप्रपूजयेत् निशिपीत्वाचगोमूत्रंगोमेधफलमश्नुते फाल्गुनेचमहादेवं संपूज्यप्राशयेत्तिलान् राजसूयस्ययज्ञस्यफलमष्टगुणंभवेत् चैत्रेचस्थाणुनामानंकृष्णाष्टम्यांप्रपूजयेत् यवांश्चभार्जितान्प्राश्यसोश्वमेधफ

लंलभेत् वैशाखेशिवनामानंपूजयित्वाप्रयत्नतः रात्रौकुशोदकंपीत्वासर्वमेधफलंलभेत् ज्येष्ठेपशुपतिंपूज्य
गवांशृंगोदकंपिबेत् गवांकोटिप्रदानस्ययत्फलंतदवाप्नुयात् आषाढेचोग्रनामानमिष्ट्वाप्राश्यचगोमयं वर्षा
णाचशतंसाग्रंशिवलोकेमहीयते श्रावणेमासिपूजार्कंप्राशयेन्निशिगोरसं गोसवस्यतुयज्ञस्यफलंप्राप्नोतिमा
नवः त्रियंबकंभाद्रपदेकृष्णाष्टम्यांप्रपूजयेत् संप्राश्यविल्वपत्रंचवाजपेयफलंलभेत् मासिचाश्वयुजेप्रोक्तंप्रा
शनंतंडुलोदकं नाम्नोमेशंयजेद्देवंपुंडरीकफलंलभेत् मासेतुकार्त्तिकेष्टम्यामीशानाख्यंप्रपूजयेत् पंचगव्यंसकृ
त्पीत्वापंचयज्ञफलंलभेत् वर्षांतेभोजयेद्विप्रान्शिवभक्तिपरायणान् पायसंमधुसंयुक्तंघृतेनसुपारिप्लुतं निवेदये
त्तुरुद्रायकृष्णांगांसुपयस्विनीं वर्षमेकंतथाकुर्य्यान्नैरंतर्येणयोनरः कृष्णाष्टमीव्रतंभक्त्यातस्यपुण्यफलंशृणु सर्व
पापविनिर्मुक्तः सर्वैश्वर्य्यसमान्वितः वसेच्छिवपुरेनित्यंनचेहायातिनाकतः ॥ तदेतयोःषष्ठ्यष्टमीसूर्यव्रतयोःकृत्वान
क्तमिति नक्तंव्रतंसंकल्प्येत्यर्थः नतुनक्तभोजनानंतरंरात्रावेवपूजेतिवोद्धव्यं एवंपौषेपीतिप्राशनं तदनंतर
मनाहारत्वंचातिदिश्यते एवंमासांतरेष्वपिविहितद्रव्यविशेषंनिशिप्राश्यानाहारःस्वपेत् यत्रापिविशिष्यति
थिर्निशाचनश्रुतात्तत्रापि मासेकृष्णाष्टम्यांनिश्यचैतिवोध्यंपूर्वापरपरामर्शात् तदेतयोर्व्रतयोःप्रतिमासंप्राशन
फलंगुणरीत्या संवत्सरफलंचाधिकारविशेषणमितिसमंजसामितिकेचित् अन्येतुतत्प्रयोगमध्येसमानात्तल्लघु
तात्पर्य्यकतयाप्रकरणप्रयुक्तांद्वयोपजीवन्येतत्तथास्तु अत्रतुफलश्रुतेरविशेषादधिकारसंबंधप्रयोगापेक्षत्वेतौल्या
परप्रयुक्त्युपजीवितामिति नगुणफलरीतिः किंतुप्रतिमाससंवत्सरयोःफलश्रुतेरविशेषान्नियोगभेदः इच्छाभे
दाच्चानुष्ठानव्यवस्थेति ॥ इतिभविष्योत्तरोक्तंमार्गादिशैवाष्टमीव्रतं मार्गकृष्णनवम्यां
कृत्यविशेषाभावात्सामान्यनिर्णयोक्तंविधेयमिति मार्गकृष्णैकादशीउत्पन्नाख्या महाभारते ॥ अर्जुन

उवाच एकादश्युपवासस्यनक्तभक्तस्यवैतथा एकभक्तव्रतस्यापिफलंब्रूहिजनार्दन श्रीकृष्णउवाच हेमंतेचैव संप्राप्तेमासेमार्गशिरेतथा कृष्णपक्षेतथापार्थएकादश्यामुपोषणात् नक्तंचैवतथाज्ञायदशम्यांनियतःसदा दिवसस्याष्टमेभागेमंदीभूतेदिवाकरे दशम्यांचैकभक्तंचशुचिःशांतोदृढव्रतः ततःप्रभातेसंजातेनियमंतुव्रतस्यच मध्यान्हेचततःपार्थस्नानंशुचिसमाहितः स्वगृहेष्वधमंस्नानंवापीकूपेषुमध्यमं उत्तरंपुष्करिण्यांतुनदीनामुत्तमोत्तमं नदीनांब्राह्मणंतोयंतडागेक्षत्रियोदकम् वैश्यंकूपगतंतोयं गृहपात्रेषुशूद्रकं क्रोधलोभौपरित्यज्यमिथ्यावादंतथैवच येधर्मनिंदांकुर्वंतितेषांसंगंपरित्यजेत् वर्जयेत्तद्दिनेपार्थनिद्राहंकारमैथुनं धर्मशास्त्रविनोदेनतद्दिनंगमयेत्सदा केशवंपूजयित्वातुनैवेद्यंभक्तिपूर्वकम् गंधमाल्यंतथाधूपंदीपंचैवप्रदापयेत् रात्रौजागरणंकार्य्यंकथांश्रुत्वाहरेःप्रियां विप्रेभ्योदक्षिणांदत्त्वाप्रणिपत्यक्षमापयेत् यथाशुक्लातथाकृष्णाभेदंचैवनकारयेत् विकल्पंयदिकुर्वीतविष्ठायांजायतेकृमिः एवंयःकुरुतेपार्थशृणुतस्यापियत्फलम् वाराणस्यां स्थितिःपार्थषष्टिवर्षसहस्रकैः एकादश्युपवासस्यकलांनार्हंतिषोडशीं वैधृत्यामपिदानस्यलक्षमेकंतुयत्फलम् संक्रांतौयदिदानानिलक्षसंख्यानिपांडव एकादश्युपवासस्यकलांनार्हंतिषोडशीं प्रभासेचैवयत्पुण्यं सोमपर्वसहस्रके एकादश्युपवासस्यकलांनार्हंतिषोडशीं कुरुक्षेत्रेचयत्पुण्यंरविलक्षग्रहेस्मृतं एकादश्युपवासस्यकलांनार्हंतिषोडशीं वैशाखीकार्तिकीमाघीस्नानेदानेकृतेयदि एकादश्युपवासस्यकलांनार्हंतिषोडशीं यदिलक्षंगृहेयस्यभुनक्तिचदिनेदिने एकादश्युपवासस्यकलांनार्हंतिषोडशीं गंगासरस्वतीसूर्यतनयास्नानदानकं एकादश्युपवासस्यकलांनार्हंतिषोडशीं तद्योगशतदानानिनपूजानचभावना एतद्व्रतसमंपुण्यंनभूतंनभविष्यति गोसहस्रेणयत्पुण्यंवेदवेदांगपारगे तस्माद्दशगुणंपुण्यंब्रह्मचारिणिपांडव ब्र

ह्मचारिसहस्त्रस्यदानंलक्षशताधिकं तस्मादपिसहस्त्रस्यभूमिदानंमहाफलंभूमेर्दशगुणाकन्यासर्वरत्नोपशोभिता कन्यादशगुणाविद्यालभतेनात्रसंशयः विद्यादशगुणंचान्नंयोददातिवुभुक्षिते अन्नदानात्परंदानंनभूतंनभविष्यति भूमिदानेनतृप्यंतिस्वर्गस्थाःपितृदेवताः अन्नाच्छतगुणंपुण्यंगोमेधेचमखेकृते गोमेधात्तद्दशगुणमश्वमेधेकृते सति अश्वमेधसहस्त्रेणनरमेधेनतत्फलम् नरमेधसहस्त्राणिकेदारोदकपानतः केदारमुदकंपीत्वामंत्रपूताश्चये नराः तेषांदेहेत्रयोदेवाब्रह्मविष्णुमहेश्वराः केदारमुदकंपीत्वापुनर्जन्मनाविद्यते तथैवैकादशीपुण्यागर्भवा सक्षयंकरी एवंतवमयाख्यातंयत्सुरैरपिदुर्लभम् पुण्यसंख्यांनजानामि यत्त्वंपृच्छसिपाण्डव एतस्यचार्धं पुण्यंस्यात् नक्तभोजनतोनघ नक्तस्यचार्धपुण्यंस्यादेकभक्तेतथैवच तेनराःपुण्यकर्माणोयेतांभक्त्याप्रकुर्वते अर्जुनउवाच उत्पन्नासाकथंदेवकथंपुण्याधिकाशुभा कथंदेवपवित्राचकथंदेवतवप्रिया श्रीकृष्णउवाच ॥ एकादशीयदापार्थभानुवारेप्रजायते अश्वमेधसमंपुण्यंकोटिहत्याविनश्यति पुरासत्ययुगस्यादौमुरोनामासदानवः महाघोरोमहारौद्रःसर्वदेवभयंकरः बलादुत्थापितस्तेननिजस्थानात्पुरंदरः आदित्याद्याग्रहाःसर्वेवायुरग्निस्तथैवच नैवप्रतिष्ठितस्तत्रदेवानांकश्चिदर्जुन देवतानिर्जिताःसर्वास्तेनोग्रेणदुरात्मना देवतास्तागताःसर्वायत्रदेवोमहेश्वरः उपायंब्रूहिनोदेवस्वर्गाणामद्यकागतिः ईश्वरउवाच गच्छंतुदेवताःसर्वेयत्रदेवोजनार्दनः शरणागतदीनार्तपरित्राणपरायणः ईशस्यवचनंश्रुत्वागताःसर्वेसवासवाः त्रिदशास्तत्रसंतस्थुर्यत्रदेवोजनार्दनः तत्रैवसजगन्नाथःप्रसुप्तोजलमध्यगः जलमध्येमहायोगीदेवदेवोजगत्पतिः इंद्रउवाच ॥ नमस्तेदेवदेवेशमहासुरविमर्दन दैत्यारेपुंडरीकाक्षत्राहिनोमधुसूदन त्रिदशाआगताःसर्वेभयार्त्ताःपुरुषोत्तम रक्षनोदेवदेवेशत्वंगतिःसर्वदेहिनाम् देवाःसर्वेजगन्नाथभयार्त्तास्त्वांसमागताः शरणंभवदेवेशदेवानांतुभवान्

गतिः त्वंमातासर्वलोकानात्वमेवजगतःपिता त्वंसृष्टिस्त्वंस्थितिश्चैवत्वंचसंहारकारकः त्वंस्वाहात्वंस्वधादे
ववषट्कारस्त्वमेवच ओंकारोदेवदेवेशत्वमेवगरुडध्वज त्वंशिवस्त्वंतथाब्रह्मात्वंसूर्यस्त्वंचचंद्रमाःत्वमग्निर्देवदेवेश
वायुराकाशमेवच नत्वयारहितंकिंचित्त्रैलोक्येसचराचरं स्थावरंजंगमंचैवत्वयिसर्वंप्रतिष्ठितं दानवैर्निर्जितादेवाः
स्वर्गस्थानान्निराकृताःरक्षमांदेवदेवेशशरणागतवत्सल इंद्रस्यवचनंश्रुत्वा हरिर्वचनमब्रवीत् श्रीभगवानुवाच ॥
कीदृशोदानवःशक्रनामाकिंकीदृशंबलं किंस्थानंतस्यदैत्यस्यसर्वंब्रूहिममाग्रतः॥इंद्रउवाच॥सर्वंजानासियोगीशब्र
ह्मवंशसमुद्भवःतालजंघस्तुनामासीदत्युग्रोवैमहासुरःमहाबलोमहावीर्योब्रह्मवीर्येणगर्वितःतस्यपुत्रोतिविख्यातो
मुरोनाममहाबलःपुरींचंपावतीनामतस्यामेववसत्यसौपुरंदरमुखादेवाःस्वर्गात्तेननिराकृताःरक्षास्मान्देवदेवेशप्रप
न्नान्गरुढध्वज अन्यइंद्रःकृतस्तेनचान्यस्तेनहुताशनःसचंद्रग्रहनक्षत्रराश्यादिसहितंचयत् सर्वमन्यत्कृतंतेनस
त्यंसत्यंगदाधर इतिश्रुत्वावचस्तेषांप्रोवाचगरुडध्वजः हन्मितंदानवंदुष्टंसर्वदेवभयंकरं त्रिदशैःसहितोदेवोग.
तश्चंपावतींपुरीं दृष्ट्वादेवान्समायातान्गर्जमानोमहासुरः असंख्याताःसहस्राणिदिव्यप्रहरणायुधाः असुरास्ता
डयामासुःपुनर्देवान्बलाधिकाः हन्यमानास्तुतेदेवादुद्रुबुः सर्वतोदिशः ततस्तेनिर्गताःसर्वेभयभीतादिशोद
श हरिस्तमसुरंतत्रातिष्ठातिष्ठेत्युवाचह चक्रंनिरीक्षयामासक्रोधादरुणलोचनः हेदानवदुराचारममबाहूनिरीक्षय
ततस्तदुन्मुखंसर्वेपतितादानवर्षभाः एकोयंदानवोतिष्ठत्सयुयोधसहारिणा युद्धंकृत्वादानवेननिर्जितोमधुसूदनः
निर्जितोदेवदेवेशोबाहुयुद्धमयाचत बाहुयुद्धंकृतंतेनदिव्यंवर्षसहस्रकं बाहुयुद्धमभूत्पार्थसर्वलोकभयंकरं बिष्णुः
संत्रासितस्तेनयुद्धभूमेर्विनिर्गतः दानवःपृष्ठतश्चापिगतोवदरिकाश्रमे गुहासिंहावतीनामतत्रसुप्तोजनार्दनः
योजनद्वादशमध्येएकद्वारेधनंजय तत्रप्रसुप्तोदेवेशोभयभीतोजनार्दनः दानवःपृष्ठतोलग्नःप्रविष्टस्तांमहागुहां

प्रसुप्तंसहरिंदृष्ट्वादानवेंद्रःप्रहर्षितः सुप्तोमयाहरिर्दृष्टःप्रविष्टःसंकटेकथं मारयामिनसंदेहोदानवानांभयंकरं निर्गताकन्यकातस्यशरीरान्माधवस्यच तेजस्विनीचशोभाढ्यादिव्यप्रहरणायुधा विष्णोस्तेजःसमुद्भूतामहावलपराक्रमा तयासंमोहितोदैत्योमुरोनामेतिपांडव युद्धंकृतंतयातेनदानवेंद्रेणकांक्षितं साकन्यायुद्ध्यततदाकोपादारुणलोचना तस्याःकोपेनकौंतेयभस्मीभूतःसदानवः वहवोदानवास्तत्रसवंधुसपरिग्रहाः निहतेदानवेतत्रवरेणदेवप्रबोधितः पतितंदानवंदृष्ट्वाहरिर्विस्मयमागतः केनायंनिहतोदैत्यअत्युग्रोममवैरकृत् अत्यद्भुतंकृतंकर्ममकौतूहलंपरं नदेवोनचगंधर्वोयोजघानतुदानवं सविस्मयोहरिर्जातोवागुवाचाशरीरिणी मयाविनिहतोदैत्यः सर्वदेवभयंकरः देवाश्चभयभीताश्चयेनस्वर्गान्निराकृताः हरिंप्रसुप्तंदृष्ट्वातुदैत्यान्दृष्ट्वामदोद्धतान् गताश्चशरणं सर्वेदृष्ट्वादैत्यंनिपातितं तस्यास्तद्वचनंश्रुत्वाहरिर्वचनमब्रवीत् निहतोदानवोदुष्टःसर्वदेवभयंकरः अहंचनिर्जितस्तेनकथंसोपिनिपातितः विष्णोस्तद्वचनंश्रुत्वावाचावचनमब्रवीत् एकादशीह्यहंदेवसर्वपापभयंकरी क्षीयमाणंहरिंदृष्ट्वाप्रहृष्टंदानवेश्वरं त्रिलोकेषुभयंकुर्य्यादित्युग्रश्चैषदानवः मयाकुपितयादेवकिमाश्चर्यंतवप्रभो ममकोपेनदेवेशत्रैलोक्यंविलयंव्रजेत् श्रीभगवानुवाच तुष्टोहंतवदेवेशिवांछितंचददामिते अत्यद्भुतंकृतंभद्रेउपकारस्त्वयानघे निहतंदानवंदृष्ट्वासंतुष्टाःसर्वदेवताः प्रब्रूहितंवरंभद्रेयत्तेमनसिवर्त्तते ददाम्यहंनसंदेहोयद्देवैरपिदुर्लभम् एकादश्युवाच जगत्त्रयेषुदेवेशसंचरामिहसुव्रत अहंतवप्रियाशक्तिस्तादृशींकुरुमांप्रभो अहंतिथिप्रधानास्यांसर्वविघ्नविनाशिनी सर्वपापक्षयकरीह्यायुर्वलविवर्द्धिनी उपोष्यमांचयेभक्तास्तवभक्तिपरायणाः सर्वसिद्धिर्भवेत्तेषांयादितुष्टासिमेप्रभो उपवासेनयत्पुण्यंतस्यार्द्धंनक्तभोजनं नक्तंह्यार्धेनपुण्येनएकभक्तंविशिष्यते दिवसस्याष्टमेभागेमंदीभूतेदिवाकरे इतितंनक्तमित्याहुर्ननक्तंनिशिभोजनं ददामिवैष्णवंस्थानंकल्प-

कोटिशतान्यपि गर्भवासोनभवतिताद्दशंमेफलंप्रभो श्रीभगवानुवाच यत्त्वंवदसिकल्याणितत्सर्वंवैभविष्यति धर्मार्थकाममोक्षाणांसिद्धिंप्राप्स्यंतिमानवाः ममभक्ताश्चयेलोकास्तवभक्तास्तथापिच चतुर्युगेषुविख्यातास्त्रिषुलोकेषुवैपरं तंचभक्तमहंमन्येएकादश्यांव्रतेस्थितं ममपूजांकरिष्यंतिएकादश्यांनसंशयः सर्वतिथ्युत्तमाचत्वंमत्प्रसादाद्भविष्यसि एवमुक्तातत:सातुतत्रैवांतरधीयत पुराकैटभकेदेशेकार्णिकानगरोत्तमे कर्णसेतुर्हिराजर्षिर्न्यवसद्वृद्धिमत्प्रजः ब्राह्मणैःक्षत्रियैर्वैश्यैः शूद्रैश्चैवानुमोदितः नदुर्भिक्षंनदारिद्र्यंराज्ञितास्मिन्स्थतेप्रभौ राष्ट्रेस्यकश्चनापुत्रीविधवावनाविद्यते पुत्रदुःखंपिताक्कापिनपश्यतिचकुत्रचित् एताद्दशेमहाराजेप्रजाःशासतिचप्रभौ धनहीनोद्विजःकोपिक्षुत्क्षामोविपदांगतः कुटुंबभरणेशक्तः कृच्छ्रंतदनुवर्तते सुदामानाममविप्रर्षिर्भार्य्यासाध्वीचतत्समा भर्त्तुः शुश्रूषणेसक्तासदाचारेगृहस्यच रहःपृच्छतिभार्त्तारं म्लायतीवदनेनसा स्वामिन्पापेक्तेपूर्वंधनहीनस्तुजायते धर्महीनेधनंनास्तिधनहीनेक्रियानहि तस्मात्केनाप्युपायेनधर्मस्यजननंकुरु-एतस्मिन्नंतरेपार्थ देवर्षिःसमुपागतः दंपतीउत्थितौतत्रमधुपर्कायआदरात् आसनेतिष्ठभोस्वामिंस्तंद्विजातिरिभाषत अद्यमेसफलंजन्मअद्यमेसफलाः क्रियाः अद्यमेसफलंसर्वंभवतांदर्शनेनच अस्मिन्पुरेतुहेस्वामिन्सर्वेवैसुखिनोजनाः अहंतुधनहीनस्तु महादुःखेनपीडितः कथयस्वप्रसादेनधनाढ्योभवितास्मिच धनहीनस्य लोकेस्मिन् वृथासर्वेमनोरथाःएतच्छ्रुत्वातुवचनंद्विजंतंनारदोब्रवीत् ॥ नारदउवाच ॥ मार्गशीर्षासितेपक्षेउत्पत्तिर्नाममनामतः तदुपोषणमात्रेणधनाढ्योजायतेध्रुवं तथापापानिनश्यंतिएतत्सत्यंवचोमम सर्वसौख्यकरोन्नृणांहरिवासरउत्तमः गतेतुनारदेपश्चाद्व्रतंकृत्वाप्रयत्नतः स्वयमेवाश्रियातस्मिन्नवात्सीद्द्विजमंदिरे भोगान्सविपुलान्भुक्त्वागतोवैहरिसन्निधौ एतस्मात्कारणात्पार्थकर्तव्योहरिवासरः अंतरंनैवकर्तव्यंसमस्तव्रतकारिभिः

तिथिरेकाभवेत्सर्वा पक्षयोरुभयोःसमा अतऊर्ध्वंपद्यपंचकमंकितवैष्णवदुष्टैः क्षिप्तं विष्णुधर्मोक्तत्रिस्पृशयात्रास्याविरोधादतोनुमीयते एकादश्युदयेस्वल्पाअंतेचैवत्रयोदशी मध्येचद्वादशीपूर्णात्रिस्पृशासाहरिप्रिया एकामुपोष्यलभतेसहस्रैकादशीफलं सहस्रगुणितंदानादेकादश्यास्तुपारणे अष्टम्येकादशीषष्ठीतृतीयाचचतुर्दशी पूर्वेविद्धानकर्त्तव्याकर्तव्यापरसंयुता एकांतूपोषयेत्तांतुद्वादशींविष्णुवल्लभां दशमीवेधसंयुक्ताहंतिपुण्यंपुराकृतं एकादशीअहोरात्रंप्रभातेघटिकाभवेत् सकलापरिकर्त्तव्याउपोष्याद्वादशीयुता एवंविधामयाप्रोक्तापक्षयोरुभयोरपि एकादश्यांप्रकुर्वंति उपवासंनसंशयः तेयांतिपरमंस्थानंयत्रास्तेगरुडध्वजः धन्यास्तेमानवालोकेविष्णुभक्तिपरायणाः एकादश्यास्तुमाहात्म्यंव्रतकालेतुयःपठेत् गोसहस्रफलंतस्यपुण्यंभवतिभारत दिवावायदिवारात्रौ यःशृणोतीहभक्तितः कुलकोटिसमायुक्तोविष्णुलोकेवसेद्ध्रुवं एकादश्याश्चमाहात्म्यंपठ्यमानंशृणोतियः ब्रह्महत्यादिपापानिनश्यंतेनात्रसंशयःविष्णुनामसमंनास्तिगीतायाश्चधनंजय एकादशीसमंनास्तिसर्वपापप्रणाशनम् ॥

॥ इतिश्रीभविष्योत्तरेमार्गकृष्णोत्पन्नैकादशीव्रतमाहात्म्यम् ॥

अस्यामेवमार्गकृष्णैकादश्यांवैतरिणीव्रतम् ॥ हेमाद्रौभविष्ये शरतल्पगतंभीष्मंपर्यपृच्छद्युधिष्ठिरः व्रतेनयेनपुण्येनयमलोकोनदृश्यते नारीवापुरुषोवापियमंनैवचपश्यति तत्समाचक्ष्वधर्मज्ञपितामहकृपांकुरु भीष्मउवाच एकादशींवैतरिणींतांकृत्वातुसुखीभवेत् यमलोकंनपश्येच्चशोकंचैवनपश्यति युधिष्ठिरउवाच केनतातविधानेनकर्त्तव्यासामहाफला पितामहसमाख्याहितत्रदानंममप्रभो भीष्मउवाच एकादशीतिथिःकृष्णामार्गशीर्षे-

गताभवेत् तामासाद्यनरःसम्यग्गृहीत्वानियमंशुचिः एकादशीमार्गकृष्णानाम्नावैतरणीशुभा साव्रतेनसदा
कार्य्यावर्षंनक्तोपवासिना मध्याह्नेतुनरःस्नात्वानित्यानिर्वर्त्यसत्क्रियाः रात्रौसुरभिमादायकृष्णांसर्वांयथावि-
धि पूर्वास्यासाविधातव्याकृष्णागौर्भूतलेशुभे अग्रपादौसमारभ्यपश्चात्पादद्वयावधि गोपुच्छंतुसमासाद्यकुर्य्या
द्वापितृतर्पणं पितापितामहश्चैवतथैवप्रपितामहः मातापितामहीचैवतथैवप्रपितामही मातामहस्तत्पिता-
चप्रमातामहकादयः तेसर्वेमेप्रगृह्णंतुगोपुच्छोदकतर्पणं पितामाताचभार्य्याचभगिनीदुहितापतिः पितृष्वसा
मातृष्वसासप्तगोत्राणितर्पयेत् ततःपूजाप्रकर्तव्याशास्त्रदृष्टाविधानतः गांचैवश्रद्धयायुक्तश्चंदनेनानुलेपयेत्
गंधतोयेनचरणौशृंगेप्रक्षाल्यभक्तितः ततोनुपूजयेद्भक्त्यापुष्पगंधानुलेपनैः मंत्रैःपुराणसंप्रोक्तैर्यथास्थानं
यथाविधि ॥ अथगोपूजा गोअग्रपादाभ्यांनमः इत्यादिपूजाक्रमोगोदानप्रयोगेज्ञेयः ॥ स्थानेष्वेते
षुपाद्यादीन्प्राक्षिपेच्छुद्धमानसः पश्चात्प्रदापयेद्धूपं गोधूपःप्रतिगृह्यतां असिपत्रादिकंघोरंनदींवै
तरिणींतथा प्रसादात्तेतरिष्यामिगोमातस्तेनमोनमः सुखेनतीर्यतेयस्मा न्नदीवैतरिणीध्रुवं यस्मादे
कादशींकृत्वातस्माद्वैतरिणीस्मृता आनंदकृत्सर्वलोकेदेवानांचसदाप्रिया गौस्त्वंपाहिजगन्नाथेदीपोयंप्रतिगृह्यतां
आच्छादनंगवेदद्यात्सम्यक्शुद्धंसुनिर्मलं सुरभीवस्त्रदानेनप्रीयतांपरमेश्वरः मार्गशीर्षादिकेभक्त्यायावत्मासतुचष्ट
यं अन्यमासचतुष्कंहियावकाशनमेवच नैवेद्यंहिमयादत्तंसुरभिप्रतिगृह्यतां द्वितीयंगुरवेदद्यात्तृतीयंस्वयमेवच
यावन्मासंप्रकुर्वीतमासद्वादशकंव्रतं उद्यापनंततःकुर्य्या त्पूर्णेसंवत्सरेतथा शय्यांसतूलिकांकृत्वादंपत्याःपरिधा
नकं सवस्त्राकृष्णवर्णातु धेनुःकार्य्यापयस्विनी सौवर्णासुरभिंकृत्वास्थापयेत्तूलकोपरि ततस्तांपूजयेन्मंत्रैः पू
र्वोक्तैर्भक्तिसंयुतः ततस्तांगुरवेदद्यात्सर्वंदत्वाक्षमापयेत् यमद्वारेमहाघोररेघोरावैतरणीनदी तांतर्तुकामोद

स्यामितुभ्यंवैतरिणींतुगां नारीवापुरुषोवापिव्रतस्यास्यप्रभावतःराज्यंबहुविधंभुक्तास्वर्गलोकेमहीयते भारोलोहस्यदातव्यः कार्पासोद्रोणसंयुतः वैतरिण्याःसमाप्त्यर्थं ब्राह्मणायकुटुंबिने ॥

इतिभविष्योत्तरेमार्गकृष्णैकादश्यावैतरिणीव्रतम् ॥

मार्गकृष्णद्वादश्यांकृत्यविशेषाभावाद्धरिदैवत्यादुभयोर्दैवतंहरिरित्युक्तेरेकादशीकृत्यमेवात्रकार्य्यम् ॥

मार्गकृष्णत्रयोदश्यांतूभयपक्षगतत्रयोदशीप्रदोषव्रतवत् प्रदोषव्रतंकार्य्यं मार्गकृष्णचतुर्दश्यांदेविकातीर्थावतारउक्तः पाद्मेदेविकामाहात्म्ये मार्गशीर्षकृष्णपक्षेचतुर्दश्यांदिनोदये अष्टादशेद्वापरांतेप्रादूर्भुतामहानदीति ॥ अतोस्यांचतुर्दश्यांदेविकायात्राकार्या शुद्धिक्षेत्रेहरिद्वारेपुष्पकाख्येंद्रतीर्थयो। इंद्रघाटंसमारभ्या मरतीर्थंमहाफलं प्रभासेसंगमांतेचस्नात्वासंपूज्यशंकरं दत्त्वादानान्यनेकानियत्फलंलभतेनरः तत्फलंकोटिगुणितंपूजनाद्देविकातटे अत्रदत्तानिदानानिफल्गुमात्राण्यपिक्वचित् सर्वाण्यक्षयतांयातिकल्पकोटिशतेष्वपि अन्यपात्रेषुयद्दत्तं तदनंतफलंस्मृतं कदाचित्तस्यचांतस्याद्देविकातीरवासिने विप्रवर्य्याययद्दत्तंतस्यांतंनैवविद्यते सुवर्णंवसनंशय्यांगावोन्नंरजतंमहीं पुस्तकंमंदिरंगेहंदासीदासांश्चभूषणं देविकायाःकथांचापि दत्त्वाक्षय्यंफलंलभे दित्यादिप्रतिपुराणेषुसविशेषमुक्तमत्रविस्तरभयात्सूचितमेव मार्गामायां पितृपूजोक्तानारदीये मार्गामायांपितृपूजाश्राद्धैर्ब्राह्मणभोजनैः ब्रह्मचर्य्यादिनियमैर्जपहोमार्चनादिभिरिति अस्यामेवमार्गामायां गौरीतपोव्रतं सूतसंहितायां तथाचहेमाद्रौकालिकापुराणे महातपापरंनामधेयंगौरीतपोव्रतं सूतउवाच इंद्राणीप्रांजलिर्भूत्वास्वपतिंवाक्यमब्रवीत् एकंव्रतंसमाचक्ष्वपुत्रपौत्रसुखप्रद इतिवाक्यंतदाश्रुत्वा ह्युवाचवचनंवृषः शृणुचार्वंगिसकलंयन्मयासुकृतंकृतं वृहस्पतेस्तुजनकःपृष्टःप्राहांगिराःसुधीः तद्व्रतंकथयाम्य

घसद्यःसुखकरंपरं पतिपुत्रसुखावाप्तिर्जायतेजगतिस्थिता गौरीप्रीत्यर्थमेवादौस्त्रीभिर्यत्क्रियतेतपः गौरीतप
इतिख्यातंतस्मात्तद्व्रतमुत्तमं तस्मात्स्त्रीभिस्तपोभिश्चतोपणीयाशिवप्रिया आदौमार्गशिरेमासिह्यमावास्यांशु
भेदिने गृह्णीयान्नियमंतत्रदंतधावनपूर्वकं उपवासस्यनक्तस्यगौरीशप्रीतयेमुदा ईशार्द्धांगहरेदेविकरिष्येहंव्रतं
तव पतिपुत्रसुखावाप्तिंदेहिदेविनमोस्तुते इतिनियममंत्रः ततोमध्याह्नसमयेस्नात्वानद्यादिकेव्रती सूर्य्यायार्घ्यं
ततोदद्याद्दत्वागौरींमहेश्वरं अहंदेवव्रतमिदंकर्तुमिच्छामिशाश्वतं तवाज्ञयामहादेवतत्रनिर्वहणंकुरु उक्त्वैवंनियमं-
गृह्यत्ववर्घ्याण्येवतुषोडश गृहमागत्यपूजार्थमुपहारान्प्रकल्पयेत् शिवालयंततोगत्वाशिवंसंपूजयेत्सुधीःगौरीमभ्यर्च
येत्पश्चाद्विधिनायेनतच्छृणु पार्वतीतुततःपादौ जान्वोर्हैमवतीतिच जंघयोरंबिकेत्येवंगुह्यंगिरिशवल्लभे नाभिंगं
भीरनाभीतिचापर्णेत्युदरंपुनः महादेवीतिहृदयंकंठेश्रीकंठकामिनी मुखंषण्मुखमातेतिललाटेलोकमोहिनी मेनि
काकुक्षिरत्नेतिशिरस्यभ्यर्चयेत्ततःदक्षिणेगणपःपूज्यो वामेस्कंदस्सवाहनः धूपदीपादिनैवेद्यंनत्वाकृत्वाप्रदक्षिण
फलेनार्घ्यंततोदद्याद्ध्यात्वादेवींमहेश्वरीं कृत्वाताम्रमयंपात्रंमृण्मयंचसुभाजनं अष्टतंतुमयींवर्त्तितस्मिन्पात्र
निवेशयेत् घृतेनापूर्य्यगव्येनतत्पात्रंविमलेनच दीपंप्रज्वालयेत्पश्चाद्यावत्सूर्योंतरेस्थितः एवंसंक्षिप्य
तांरात्रिंजागरेणसमन्विता ब्राह्मेमुहूर्त्तेचोत्थायपूजयेद्द्विजदंपती कुर्य्याद्दौर्भाग्यदलिनींयांकाचिद्यामिनींतदा
एकांतेनगुडान्नाद्यैःपूर्णांपूर्णफलप्रदां ऋतूद्भवैफलैश्चैवपूपिकाफललड्डुकैः सौभाग्याष्टकसंयुक्तंपात्रंकुर्य्याच्च
धातुजं तस्योपरिगतंदीपंभ्रामयेन्निशिनामभिः सुवासिनीवचोग्राह्यंदीपंसूर्य्यायदर्शयेत् यावत्कलकलाश
ब्दंकुर्वंत्येवककाःककाःतावत्पुरस्तात्कर्त्तव्यमिदमेवादरात्प्रभो उत्तिष्ठंतेचदिनगाविहंगाश्चारुलोचने तदाकर्ण
नमात्रेणसौभाग्यंव्रजातिस्त्रियः अतएतद्व्रतेनारीपश्चादुत्थापयेच्चतान् तिथिमेकांसमाप्यैवंदंपतीभोज्यशक्तितः

परिधाप्याप्यलंकृत्य वासोभिर्भूषणांजनैः माल्यैःसुगंधैर्विविधैः फलैःसिंदूरकुंकुमैः संतोष्यसमनुज्ञाप्यस्वयंभुंजीतबंधुभिः एवंद्वितीयेवर्षेचप्रतिपत्प्रभृतिश्चरेत् वर्षेवर्षेक्रमादेवंद्वितीयादिषुचाचरेत् एवंषोडशवर्षाणिकृत्वाचैवतुवत्सरं पश्चादुद्यापनंकुर्याद्व्रतसंपूर्तिहेतवे मार्गशीर्षेप्यसंप्राप्तेमासेगौरीश्वरप्रिये पौर्णमास्यांदिनेरम्येनिमंत्र्यद्यष्टदंपतीन् मध्यान्हेष्टदलेपद्मेमौनीनारीःसमर्चयेत् यथोक्तेनविधानेनपुष्पधूपादिभिस्तथा सौहालिकाभिःकासारैः पूपापूपैश्चभामिनि पायसेनघृतेनापिशर्करामोदकैस्तथा पूरयित्वाष्टसंख्याकान्धातुम्मृण्मयसंयुतान् दंपतीभोजयित्वातुतेभ्योदद्याद्यथाविधि अलंकृत्ययथाशक्त्या।गौरीमेप्रीयतामिति गुरवेदक्षिणोपेतां गौरींकनकनिर्मितां दद्या।द्धेनुंसवयसां सवत्सांचसदक्षिणां अन्यान्यपियथाशक्ति दद्याद्दानानिभामिनी यद्यदिष्टतमंलोकेतत्तद्देयंद्विजन्मने चापल्यमायुषोज्ञात्वासंपदस्त्वपिचसुंदरी षोडशाब्दंव्रतमिदंकुर्य्याद्धर्षेणभक्तितः गौरीतपोव्रतमिदंयाकरोतीहभामिनी वाल्येयौवनकालेवावार्द्धकेवाहरप्रिया क्षम्याःसौभाग्यमतुलंधनधान्यसुतान्वितं क्षम्याअपराधाइति शेषः भवेदव्याहतैश्वर्य्यंभर्तृसौख्यंनसंशयः दुर्लभंमानुषंजन्मतत्रापिद्विजजन्मतासदाचारपरत्वंचतत्रापिचविशिष्यते एवंवारत्रयंयास्त्रीकुरुतेव्रतमुत्तमं मातापित्रोःप्रियंचापिप्राप्नुयाच्छुद्धवंशतां निर्मलंजन्मनोवापिमनसश्चापिसंपदः लभतेशुभतेजश्चपतिपुत्रसमन्विता इहभोगान्यथाकामंभुक्त्वास्वर्गमवाप्नुयात् इत्थंगिरोवचनःमाद्यपुराणप्रोक्तंगौरीतपोव्रतमिदंविदधेयथेच्छं तस्यप्रभाववशतःसुलभंहिराज्यंसौख्यंचसर्वमतुलंपतिपुत्रयुक्तं

इतिसूतसंहितायांगौरीतपोव्रतं इदमेवमहाव्रतापरनामधेयंकालिकापुराणे ॥

तिलादउवाच ॥ महाव्रतमथोवक्ष्येयेनारोहतितत्पदं सुरासुरमुनीनांतुदुर्लभंतद्विधिंशृणु पर्वण्याश्वयुजस्यां

तेपायसंचघृताप्लुतं नक्तंभुंजीतशुद्धात्माओदनंचैक्षवान्वितं आश्वयुज्यश्चांद्रोमासः सकार्तिकस्तस्यांतेचं
द्रकार्तिकमासस्यांतेमार्गामायामित्यर्थः ऐक्षवमिक्षुरसः शवर्ध्यतेशुचिर्भूत्वाविल्वजंदंतधावनं भुक्त्वाचैतन्म
हादेवंनत्वाभक्तियुतोव्रती अहंदेवव्रतमिदंकर्तुमिच्छामिशाश्वतं तवाज्ञयामहादेवतत्रनिर्विहणंकुरु उक्त्वैवंनियमं
गृह्णन्वर्षाण्येवतुषोडश तिथिःप्रतिपदाद्यास्तुपारयिष्याम्यनुत्तमाः ततोमार्गशिरेमासिप्रतिपद्यपरेहनिउपावसेद्गुरुं
पृष्ट्वामहादेवंस्मरन्मुहुःमहादेवंस्मरन्विप्रान्नमस्योच्छन्नविग्रहान् षोडशाष्टौतदर्द्धंवादांपत्यांश्चनिमंत्रयेत् आमंत्र्य
चगृहंगत्वामहादेवंस्मरन्क्षितौ शुचिवस्त्रास्तृतांतस्तुनिराहारोनिशिस्वपेत् अथोदयेसहस्रांशोःस्नात्वाचादायदी
पकान् नैवेद्यस्नापनाद्यंचादायगच्छेच्छिवालयं स्नापयेत्पंचगव्येनघृतेनतदनंतरं मधुनाथतथादध्नाभूयश्चपयसात
थारसेनचाथखंडेनफलैश्चस्नपयेत्पुनः तिलांवुनातथास्नाप्यपश्चादुष्णेनवारिणा लेपयेदथतंपश्चात्कर्पूरागुरुचंदनैः
एवंसंपूज्यतंभक्त्याहेमंन्यस्यव्रजेद्गृहं हैमंसुवर्णपुष्पं नानाफलैश्चसंपूज्यदद्यान्नैवेद्यमेवहि गृहेगत्वायथा
न्यायंहिरण्यरेतसंविभुं जातवेदसमादायतर्पयेत्तिलसार्पिषा व्रतिनश्चतथाचार्यामिथुनानिचभोजयेत् हेम
वस्त्रादिदानानियथाशक्त्यातुदापयेत् आरभ्यैवंविधिंकुर्य्याद्दरिद्रोवाथवेश्वरः वित्तसामार्थ्यतश्चैवप्रतिमासं
तुकारयेत् एवंविसृज्यतान्सर्वान्सार्द्धंवंधुजनैःस्वयं पीत्वादौपंचगव्यंतुहृष्टोभुंजीतवाग्यतः यत्किंचिदेतदुद्दिष्टंम
हादेवमुदीरयेत् द्वितीयेऽब्देद्वितीयांतूपवसेत्कार्त्तिकावधि आददीततिथिंचैकांमार्गमासेततःपरं पूर्ववत्संत्य
जेत्पौषेप्रत्यब्दंचैवमाचरेत् दर्शेनक्तंप्रतिपद्युपवासइतिप्रथमवर्षे प्रतिपदिनक्तंद्वितीयायामुपवासइतिद्वितीयेऽब्दे
तृतीयेऽब्देतुद्वितीयायांनक्तं तृतीयामुपवासः एवंशेषेषुवर्षेषु कृत्वैवंषोडशेपूर्णेपूर्णमास्यांसमापयेत् कार्त्ति
क्यामुदयइत्यर्थः पूर्ववद्देवमभ्यर्च्यकृशरान्नंसमर्पयेत् महादेवायगांदद्याद्दीक्षितायद्विजायच हेमशृंगींकांस्य

दोहांसघंटांकांस्यदोहना शिवव्रतधरान्विप्रान्सहाचार्य्यांश्चषोडश संभोज्यहेमवस्त्राद्यैर्यथाशक्त्यातुदक्षिणां छत्रोपानहकुंभांश्चदद्यात्तेभ्यःपृथक्पृथक् भोजयित्वाविसृज्यैवंमिथुनानितुषोडश ब्राह्मणांश्चयथाशक्त्याभोजयेद्वेदपारगान् एवंमहाव्रतंचैतद्ब्रह्मघ्नोप्यघमर्षणं धर्म्यमायुःप्रदंनित्यंरूपसौभाग्यदंपरं स्त्रीपुंसोश्चैवनिर्दिष्टव्रतमेतत्पुरातनं विधिनैतच्चकर्तव्यंभवेच्चसधवायदि उपोष्यप्रतिमासंतुभुंजीतवंधुभिःसह एकद्वित्रिचतुष्यादिसर्वैष्वब्देषुशक्तितः अंतेचांतेचवर्षाणांप्रारंभाविधिमाचरेत् अथारब्धेव्रतेकश्चिदसमाप्तेमृतोभवेत् सोपितत्फलमाप्नोतिव्रतारंभप्रभावतः वाचकाःश्रावकाश्चैवश्रोताराश्चव्रतस्यये भवंतिपुण्यसंयुक्तास्तत्पदाभिमुखाश्चये इतिकालिकापुराणे महाव्रतापरनामधेयंगौरीतपोव्रतम् हेमाद्रौप्रोक्तम् ॥

अथमार्गशुक्लप्रतिपदायांधनव्रतं नारदीये अथमार्गसिताद्यायांधनव्रतमनुत्तमं नक्तंविष्ण्वर्चनंहोमः सौवर्णंहुतभुक्तनुं रक्तवस्त्रयुगाछन्नांद्विजायप्रतिपादयेत् एवंकृत्वाधनैर्धान्यैःसमृद्धोजायतेभुवि वह्निनादग्धपापस्तुविष्णुलोकेमहीयतइति मार्गशुक्लद्वितीयायांश्राद्धंपितृपूजनंच नारदीये आरोग्यंलभतेचापिपुत्रपौत्रसमन्वितः मार्गशुक्लतृतीयायांश्राद्धंनपितृपूजनमिति मार्गशुक्लतृतीयायांहरगौरीव्रतंशुभं कृत्वापूर्वविधानेनपूजयेज्जगदंविकां एतद्व्रतप्रभावेनभुक्तान्भोगान्मनोरमान् देवलोकंसमासाद्यमोदतेचतयासहेति- अथहरगौरीव्रतकथा भविष्योत्तरपुराणे युधिष्ठिरउवाच कर्मणाकेननारीणांव्रतेननियमेनच सौभाग्यंजायतेतीवपुत्राश्चबहवःशुभाः धनंधान्यंसुवर्णंच वस्त्राणिविविधानिच अवियोगंचसततं लभतेपतिपुत्रयोः श्रीकृष्णउवाच शृणुपार्थप्रवक्ष्यामिव्रतानामुत्तमंव्रतं यत्कृत्वासुभगानारीवहुपत्याप्रजायते धनंधान्यंहिरण्यंचदासीदासांस्तथैवच उत्पद्यतेगृहेतेनतद्व्रतंकथयाम्यहं उमामाहेश्वरंनाम चाप्सरोभिःपुराकृतं वि

द्याधरैःकिन्नरैश्चऋषिकन्याभिरेवच रुक्मिण्यारंभयाचैवसीतयाचाप्यहल्यया रोहिण्यादमयंत्याचतारयाचानसूयया एताभिश्चरितंपूर्वंव्रतंसर्वव्रतोत्तमं सौभाग्यारोग्यफलदंदारिद्र्यव्याधिनाशनं मर्त्यलोकेस्त्रियोयाश्चदुर्भगारूपवर्जिताःअपुत्रानिर्द्धनाश्चैवसर्वसौभाग्यवर्जिताःतासांहितार्थंपार्वत्याउमामाहेश्वरंव्रतं अवतारितंतयापाथतयासत्यधर्माःस्त्रियःपूर्वंमार्गशिरेमासि ।नारीधर्मपरायणाशुक्लपक्षेतृतीयायांसोपवासाजितेंद्रियास्नात्वासंपूज्यललितांहरकायार्द्धवासिनीं पुनःप्रभातसमयेस्नानंचाकृत्रिमेजले ततोदेवांस्तर्पयित्वाइदंवाक्यमुदीरयेत् नमस्तेदेवदेवेशउमादेहार्द्धहारक महादेविनमस्तेस्तुहरकायार्द्धहारिणि हृदिकृत्वाशिवंदेवंजपेज्जाप्यंगृहंगतःपूजयेद्देवमीशानं पुष्पैःकालोद्भवैस्ततः वामपार्श्वेउमांदेवींदक्षिणेनमहेश्वरं धूपंचगुग्गुलंचापिदत्वादीपंघृतान्वितं नैवेद्यंचयथाशक्त्याघृतपक्वंनिवेदयेत् कारयेद्वैश्वदेवंतुतिलाज्येनतुसंस्कृतं पंचगव्यंततःप्राश्यआत्मकायविशोधनं एवंद्वादशमासंतुपूजयित्वामहेश्वरौ उद्यापनंततः कुर्यात्प्रहृष्टेनांतरात्मना शिवंरौप्यमयंकृत्वाउमांहेममयींतथा आरूढौवृषभेरौप्येसर्वालंकारभूषितौ चंदनैः शिवमभ्यर्च्य कुंकुमेनचपार्वतीं अर्चयेत्कुसुमैः पश्चात्सुगंधैश्च मनोरमैः वेष्टयेच्छुक्लवस्त्रेणशिवंरक्तेनपार्वतीं पश्चाद्धूपंददेन्नारीभक्तिभावेनभाविता भोजयेच्छिवभक्तांश्चब्राह्मणान्वेदपारगान् भुक्तेभ्योदक्षिणादेयाभक्त्याशाठ्यविवर्जिता ततःप्रदक्षिणीकृत्यइदमुच्चारयेद्वचः उमामाहेश्वरौदेवौसर्वलोकपितामहौ व्रतेनानेनसुप्रीतौभवेतांममसर्वदा एवमुक्त्वाजितक्रोधेब्राह्मणेवेदपारगे व्रतंनिवेदयेद्भक्त्यातारकेगुणशालिनि तारकेव्रतोपदेष्टृत्वादितिविशेषणं इदंकृत्वाव्रतंनारीमहेशार्पितमानसा प्रयातिपरमंस्थानंयत्रदेवोमहेश्वरः शिवलोकेवसेत्तावद्यावदिंद्राश्चतुर्दश अप्सरोभिःपरिवृताकिन्नरीभिस्तथैवच यदामानुष्यमायातिजायतेविमलेकुले रूपयौवनसंपन्नावहुपुत्रपतिव्रता धनधान्यसमायुक्तेसुवर्णमणिघाटिते

यावज्जीवंगृहेरम्येतिष्ठत्यव्याहतेंद्रिया वियोगंनैवसापश्येद्भर्तृमित्रसुतादिकैः मृताशिवपुरंयातिशिवगौरीप्रसादतः हैमीमुमाप्रतिकृतिंरजतंमहेशंरौप्येसुशुद्धवृषभेशुभमाल्यवंतौ संपूज्यरक्तसितवस्त्रयुगावगूढौनारीभवत्यविधवासुतसौख्ययुक्ता ॥

॥ इतिश्रीभविष्योत्तरेशिवगौरीव्रतं अथा स्यामेवभविष्योत्तरपुराणोक्तमवियोगव्रतम् ॥

युधिष्ठिरउवाच इहावियोगमासाद्यभर्तृबंधुजनैःसह वदनारीनरश्रेष्ठयजेद्येनशिवालयं विधवाचपरेलोकेन भूयोपिवियुज्यते सुखसंदोहसौभाग्य युक्ताभवतिभामिनीत्यादि एवंकालीपुराणेपीदंमतम् अथास्यप्रयोगः मार्गशुक्लद्वितीयायां चंद्रदर्शनंकृत्वा चांद्रायार्घ्यदानंविधाय नक्तंविधाय शिवालयंगत्वा आचम्य देवदेवमहादेवपार्वत्यासहितप्रभो नमस्तेस्तुव्रतेदेवसान्निध्यंकुरुमेसदेतिनमस्कृत्वागृहमागता उत्तराशागतमष्टांगुलमौदुंबरंविल्वकाष्ठंवादंतधावनंप्राङ्मुखीभूत्वाभक्षयेत् द्वितीयायांरात्रौभूमौस्वपेत् तृतीयायांब्राह्मेमुहूर्तेउत्थाय पंचगव्यसर्वौषधिजलैःस्नात्वा अहतेशुक्लवाससीपरिधाय शालिपिष्टमयेस्त्रीपुंसोः प्रतिमेविधाय वेणुमयेपात्रेसंस्थाप्य षोडशोपचारपूजांकुर्य्यात् तत्रादौदेशकालौसंकीर्त्य ओमद्याहं सर्वपापक्षयपूर्वकभर्तृवियोगावैधव्यपुत्रपौत्रादिसुखसिद्धिद्वाराश्रीउमामहेश्वरप्रीत्यर्थमावियोगतृतीयाव्रतंकरिष्ये पूजासंभारंदिवापरिकल्प्यसोपवासापाखंडालापवर्जितातिष्ठेत् । ततोदिनांतेस्नात्वाशुक्लांबरा तत्पैष्टंपुत्तिकाद्वयं पूजयेत् ओंमंदारमालाकुलितालकायैकपालमालांकितशेखराय दिव्यांबरायैचादिगंबराय नमःशिवायैचनमःशिवायेतिमंत्रेणषोडशोपचारपूजांगौरीव्रतविधिनापूजयेत् ततःसपत्नीकमाचार्य्यंसंपूज्यरात्रौकथागीतवादित्रादिभिर्जागरणंकुर्य्यात् प्रभातेस्नात्वा गौरीमहेश्वरपूजांविधाय यथाशक्तिद्विजामिथुनानिगौरीशप्रीतये संपू

ज्यभोजयेत् आचार्यस्तुगौरीश्वरप्रतिमे कृतस्वस्त्ययनेगाधेजलेक्षिपेत् ततोव्रतफलभूयस्त्वायान्यानपिशिवभक्तादीन्दक्षिणान्नदानादिभिः परितोष्यस्वयंमिष्टान्नादिभुंजीत तत्रप्रतिमासंनामपूजाप्रकारोयथा मार्गशीर्षेशंकरायनमः गौर्य्यैनमः पौषेगौरीशायनमः पार्वत्यैनमः माघेभवायनमः भवान्यैनमः फाल्गुने महादेवायनमः उमायैनमः चैत्रेत्रिलोचनायनमः ललितायैनमः वैशाखेस्थाणवेनमः लोलनेत्रायैनमः ज्येष्ठेरुद्रायनमः रुद्राण्यैनमः आषाढेपशुनाथायनमः सत्यायैनमः श्रावणेश्रीकंठायनमः सुभगायैनमः भाद्रपदेभीमायनमः कालरात्र्यैनमः आश्विनेशिवायनमः गंगायैनमः कार्त्तिकेईशानायनमः शिवायैनमः इतिप्रतिमासंपूजानामानि अथपुष्पाणि नीलोत्पलं रक्तोत्पलं करवीरं विल्वपत्रं किंशुकं कुब्जमल्लिकां पाटलां कुंदं चंपकं तगरं द्रोणं मालतीं क्रमेणार्पयेत् वर्षांते उद्यापनं तत्रव्रतदिने पंचगव्यप्राशनं सर्वतोभद्रलिंगतोभद्रंवाविधाय आचार्य्यादिवरणं सर्वतोभद्रमंडलादिपूजा अग्निस्थापनंअन्वाधानंकृत्वा होमंकुर्य्यात् राजतीमुद्राद्वयं हैमी गौरीशप्रतिमेसंपूज्य सौवर्णं पंकजं निवेद्यवितानंध्वजंचनिवेद्य दीपवस्त्रयुग्मंचनिवेदयेत् नीराजनंकृत्वा रात्रौजागरणंविधाय चतुरस्रंत्रिकोणंचभूषणद्वयं चतुष्षष्टिमौक्तिकप्रवालान्वितंगौरीशप्रीत्यर्थं सपुष्परागाणिदद्यात् अशक्त्यातन्मौल्यंदेयं एतत्सर्वमाचार्य्यायदत्त्वा व्रतिनांविप्राणांमिथुनानिसंपूज्य हिरण्यशय्यागोदानादिदत्त्वा चत्वार्य्यष्टौवाकुंभान्सोपानहछत्रयुतान्दद्यादिति ॥ एवमेवकालीपुराणोक्तमप्यवियोगव्रतम् ॥ तृणविंदुरुवाच येनावियोगमासाद्य व्रतेननियमेनच सदानारीसुतैश्चैवव्रजेद्येनपदंचतत् विधवापरलोकेतुभर्त्रातुनवियुज्यते सुखेनापिसदाब्रह्मन्वदयेनधनेनच तिलादउवाच उमयाचरितंयच्चभवान्याललिताव्रतं वाल्येहिमवतोजन्यादक्षकोपाद्विमुक्तया

महासौभाग्यसंदोहंदृष्ट्वादेव्यामहात्मना अरुंधत्यावसिष्ठेनकथितंतद्व्रतंशृणु वसिष्ठउवाच अरुंधतिशृणुष्वेदं सुखसौभाग्यवर्द्धनं अवैधव्यप्रदंस्त्रीणामावियोगव्रतंशृणु मार्गशीर्षेसितेपक्षेस्नाताशुक्लांबरप्रिया दृष्ट्वाचंद्रंद्वितीयायांनक्तंभुंजीतवाग्यता आचम्यचशुचिर्भूत्वादंडवत्शंकरंनमेत् मुदान्वितानमस्कृत्यविज्ञाप्यपरमेश्वरं उदुंबरमयंकाष्ठंग्राह्यमष्टांगुलंशुभं उत्तराशागतंसाग्रंसत्वचंनिर्व्रणंदृढं वाग्यताप्राङ्मुखीभूत्वा भक्षयेद्दंतधावनं द्वितीयायांततःस्वप्याद्भूमौतद्गतमानसा तृतीयायांसमुत्थायमुहूर्तेब्रह्मणःशुभे कृतकार्याचसुस्नाताशुक्लमाल्यांबराततः शालिपिष्टमयेकृत्वास्त्रीपुंसोःप्रतिमेशुभे वेणुपात्रेतुसंस्थाप्यपूजयेद्भक्तितत्परा उपवासंचकुर्वीतसर्वभोगविवर्जितं पाखंडादिभिरालापंकृतस्नानाविवर्जतेत् ततोनिशायांसुश्रोणिकृतपूजाकृतोत्सवा कृत्वावादित्रनिर्घोषंजागरंतत्रकारयेत् विधिवत्पूजयित्वातुपैष्टंतत्पुत्रिकाद्विकंसुप्रभातेद्विजाग्र्यांश्चपूजयित्वाप्रदापयेत् यथाशक्त्यामहाभागेवित्तशाठ्यंविवर्जयेत् उमामाहेश्वरंह्येतत्कल्पयित्वास्वचेतसि ब्राह्मणोपिजलेगाधेपैष्टंतन्मिथुनंक्षिपेत् एवंकृतस्वस्त्ययनामिथुनानितुभोजयेत् शिवभक्त्याद्विजान्भोज्यामिष्ठान्नेनस्वशक्तितः प्रतिमासंप्रकुर्वीतविधानेनसुसंयुतं मार्गशीर्षेपुनर्मासिकार्तिकांतेसमुद्यपेत् नामानितेप्रवक्ष्यामिप्रतिमासंक्रमेणतु पूजाजपनिमित्तंचसिद्ध्यर्थंचिंतितस्यच शंकरंमार्गशीर्षेतुनामगौर्य्यासमान्वितं गौरीशंपार्वतींचैवपुष्पमा,सतुपूजयेत् भवंचैवभवानीशमाघमासेप्रपूजयेत् फाल्गुणेतुमहादेवमुमयासाहितंयजेत् ॥ चैत्रेत्रिलोचनंदेवंललितांचप्रपूजयेत् स्थाणुंवैशाखमासेतुलोलनेत्रासमन्वितं रुद्राण्यामहितंरुद्रंज्योष्ठेमासियजेतवै आषाढेपशुनाथंचसत्यासार्द्धंशुचिस्मिते श्रीकंठंश्रावणेदेवंसुभगांपरमेश्वरीं भीमंभाद्रपदेतद्वत्कालसख्यासमन्वितं शिवमाश्वयुजेमासिगंगयासहितंयजेत् ईशानंकार्त्तिकेमासिशिवादेवीयुतंविभुं प्रति

मासंविनानाम्नाव्रतासिद्धिर्नविद्यते प्रतिमासंतुपुष्पाणियानिपूजासुयोजयेत् तानितेसंप्रवक्ष्यामिसद्यःप्रीतिकराणिवै आदौनीलोत्पलंयोज्यंतदभावेपराण्यपि पवित्राणिसुगंधीनियोजयेद्भक्तितोर्चने करवीरंविल्वपत्रंकिंशुकंकुब्जमल्लिकां पाटलाकुंदचंपकतगरद्रोणमालतीःभक्त्यायोज्यानिरंभोरुदेवस्यप्रियकाम्यया तथाचपंचगव्यस्यप्राशनंप्रातिमासकं नचान्यत्पावनंकिंचित्पंचगव्यात्परंस्मृतं एवंव्रतंकृतंभद्रेशिवभक्तिसमन्विता वत्सरांतेवितानंचध्वजंकिंकिणिमालिनं दीपंचवस्त्रयुग्मंचसिवेभक्त्यानिवेदयेत् स्नापयित्वाविलिप्त्वाचसौवर्णमूर्तिपंकजंयथाविभवतोदेयंदेवदेवस्यतुष्टयेरौप्यंचरूपपुगलंदेवस्यपुरतोन्यसेत् बहुप्रकारंनैवेद्यंगीतवाद्यसमन्वितं कुर्यान्नीराजनंशंभोस्ततोगच्छेत्स्वकंगृहं चतुरस्रमहादेवंयुग्माचैवत्रिकोणकांध्यात्वाचार्यायतद्युग्मंमौक्तिकादियुतंददेत् कार्यैकैकप्रमाणंचशातकुंभमयंशुभं उमामहेश्वरंचैवकारयित्वासुशोभनं मौक्तिकानिचतुःषष्टिस्तावंतोपिप्रवालकाःतावतिपुष्परागाणिताम्रपात्रोपरिन्यसेत् वस्त्रेणवेष्ठयित्वातुगंधपुष्पैःसमर्चयेत् एतत्सर्वंसारयुक्तमाचार्य्यायनिवेदयेत् व्रतिनांब्राह्मणानांतुमिथुनानामथापिवा अशक्त्यानिष्क्रयंदद्याद्वित्तशाठ्यविवर्जिता दत्वाहिरण्यवासांसिप्रणिपत्यक्षमापयेत् चत्वारिंशत्तथाष्टौचकुंभान्छत्रमुपानहौ सहिरण्याक्षतान्सर्वान्दद्यात्पुष्पोदकान्वितान् दीनांवधधिरादीनांतद्दिनेचानिवारितं कल्पयेदन्नपानंचसुमिष्टंरुच्यमात्मनःन्यूनाधिकंनकर्तव्यंस्वस्ववित्तानुसारतः संपूजयेत्कल्पनयायदिवित्तंनविद्यते अवियोगकरंचैतद्रूपसौभाग्यवित्तदं आयुःपुत्रप्रदंकाम्यांशिकलोकप्रदायकं इतिकालिकापुराणोक्तमवियोगव्रतम् * मार्गशुक्लतृतीयायामारभ्यभविष्योत्तरोक्तंरंभाव्रतम् ॥ मार्गशीर्षेशुभेमासितृतीयायांनराधिप शुक्लायांप्रातरुत्थायदंतधावनपूर्वकं उपवासस्यनियमंगृह्णीयाद्भक्तिभावितः सौभाग्यार्थंपुराचीर्णंरंभयाराजसत्तम तेनरंभातृतीयेयंपरंसौभाग्यवर्द्धिनीति इयंपूर्वाग्राह्या वृहत्तपास्तथारंभा

सावित्रीवटपैतृकी   कृष्णाष्टमीचभूताचकर्त्तव्यासंमुखीतितिथीतिस्कांदात् रंभातृतीयांवक्ष्यामिसर्वपापप्रणाशिनीम् सुखसौभाग्यफलदांसर्वामयनिवारणीम् सर्वदुःखहरांपुण्यांपुत्रपौत्रप्रदांतथा सपत्नीदर्पदलनींरूपैश्वर्यकरींशुभां शंकरेणपुराख्यातांपार्वत्यैप्रियकाम्यया तामिमांशृणुभूपालभूतानांपरमंहितम् मार्गशीर्षेशुभेमासितृतीयायानराधिप शुक्लायांप्रातरुत्थायदंतधावनपूर्वकं उपवासस्यनियमंगृह्णीयाद्भक्तिभाविता देविसंवत्सरंयावत्तृतीयायामुपोषिताप्रतिमासंकरिष्यामिपारणंचापरेहनि   तदविघ्नेनमेयातुसमाप्तिंव्रतमुत्तमम् शरणंत्वांप्रपन्नास्मिदौर्भाग्यादुद्धरस्वमाम् एवंसंकल्प्यविधिवत्कौंतेयकृतनिश्चया   भक्त्यानारीध्यानपरास्नानंकृत्वाजितेंद्रिया नद्यां तडागेवाप्यांवागृहेवानियतेंद्रिया पूजयेत्पार्वतींनाम्नारात्रौप्राश्यकुशोदकम् प्रभातेभोजयेद्विप्रांश्छिवभक्तान्विशेषतःसहिरण्यंचलवणंदद्यात्तेषांचदक्षिणाम् गौरिणीश्चयथाशक्त्याभोजयेत्प्रयताःसतीःअनेनविधिनाराजन्या कुर्यात्पार्वतीव्रतम् साकुलानांशतंसाग्रंतारयेन्नात्रसंशयः इहलोकेसुखंभुक्त्वाशिवलोकेमहीयते पौषेमासितृतीयायांगिरिजांनामपूजयेत् गोमूत्रंप्राशयेद्रात्रौप्रभातेभोजयेद्द्विजान् हिरण्यंजीरकंचैवस्वशक्त्यादापयेत्ततः शक्रलोकेवसेत्कल्पंततःशिवपुरंव्रजेत् माघमासेतृतीयायांसुदेवींनामपूजयेत् गोमयंप्राशयेद्रात्रौस्वपेद्रात्रौ यतव्रता सहिरण्यंकुसुंभंतुदिवादद्याद्द्विजातये विष्णुलोकेचिरंस्थित्वाप्राप्नोतिशिवमंदिरं गौरीतिफाल्गुणे नामगोक्षीरंप्राशयेन्निशि प्रभातेभोजयेद्विप्रान्यथाशक्त्यासुवासिनीः कुस्तुम्बुरून्सकनकांस्तेभ्योदत्वाविसर्जयेत् वाजपेयातिरात्राणीफलंप्राप्वादिवंव्रजेत् चैत्रेमासिविशालाक्षींपूजयेद्भक्तितत्परा दधिप्राश्यस्वपेत्प्रातर्दद्याद्धेमसकुंकुमं शुभसौभाग्यसंपन्नामृताशिवपुरंव्रजेत् वैशाखस्यतृतीयायांश्रीमुखींनामपूजयेत् घृतंचप्राशयेद्रात्रौपुनर्दद्याद् द्विजातये   कनकंशर्करांचैवपूजयित्वाक्षमापयेत् सर्वान्कामानवाप्नोतिमृताशिवपुरंव्रजेत् ज्येष्ठेनारायणींनामपूज

येत्कुसुमैःशुभैः प्राशयेल्लवणंरात्रौततश्चैकानिशिस्वपेत् शिवभक्तान्द्विजान्प्रातर्भोजयित्वायथेप्सितं सुवासिनीर्यथाशक्त्याभक्ष्यभोज्यैश्चभोजयेत् तांबूलंकनकंदद्यात् प्रणिपत्यक्षमापयेत् अंतकालेसुखंयातियत्रदेवोमहेश्वरः आषाढेमाधवीनामप्राशयीततिलोदकम् प्रभातेभोजयेद्विप्रान्हेमपुष्पंगुडंददेत् सर्वसंपत्सुखंभुक्त्वादेवांश्चानुचरीभवेत् श्रावणेतुश्रियंपूज्यपिबेद्गोशृंगजंजलम् प्रभातेब्राह्मणान्भोज्यदद्याद्धेमातिलैःसह भोगान्भुक्त्वामहीपृष्ठेगोलोकमाधिगच्छति अथभाद्रपदेमासिसुभद्रांनामपूजयेत् विल्वपत्रंचसंप्राश्यस्वपेतब्रह्मचारिणी प्रभातेविप्रमुख्यायदद्याद्धेमफलैःसह सर्वलोकेश्वरीभूत्वाभुक्त्वाभोगाननेकधा प्राप्नोतिब्रह्मसदनंव्रतस्यास्यप्रभावतः आश्विनस्यतृतीयायांपूजयित्वाशिवप्रियाम् प्राशयेत्तंडुलंप्रातस्तथाविप्रांश्चभोजयेत् दक्षिणाचात्रदेयातुचंदनंचसकांचनम् सर्वयज्ञफलंप्राप्यगौरीलोकेमहीयते पद्मोद्भवाकार्तिकेचपंचगव्यंपिबेन्निशि वादित्रैर्जागरंकृत्वाप्रभातेभोजयेत्तदा उमामहेश्वरंहैमंसमाप्तेकारयेच्छुभम् ॥ उमामहेश्वरस्वरूपंविष्णुधर्मोत्तरेभिहितं ॥ वामार्धेपार्वतीकार्याशिवःकार्यश्चतुर्भुजः अक्षमालात्रिशूलंचडमरुंचांवरंदधत् एकवक्त्रस्त्रिनेत्रश्चवामेचदयितातनुः यथाविभवसारेणवितानंपंचवर्णकम् शय्याचात्रचिनिर्दिष्टासर्वोपस्करसंयुता सवत्सांशीलसंपन्नांगांचदद्यात्पयस्विनीम् आसनंमृदुलंदद्यात् श्वेतछत्रंकमंडलुम् पादुकोपानहौदिव्येवस्त्रयुग्मंचपांडुरम् पीतंयज्ञोपवीतंचपट्टसूत्रसमुद्भवम् शंखशुक्तिसमोपेतंदर्पणंचसमुज्ज्वलम् रक्तंचकटकंदेयंस्त्रियाश्चपारिधानकं उमामहेश्वरःस्थाप्यआसनेतामजेनृप पूजांविरचयेद्भक्त्याध्यायमानामहेश्वरम् नानाविधैःसुगंधैश्चपत्रैःपुष्पैःफलैस्तथा घृतपक्वैश्चनैवेद्यैर्दीपमालाविभूषितैः कूष्मांडैर्नारिकेलैश्चदाडिमैर्वीजपूरकैः जीरकैर्लवणैश्चैवकुसुंभैःकुसुमैस्तथा रसपात्रैःसुमिष्टैश्चगतिवाद्यैरनेकधा पूजयेद्देवदेवेशंसपत्नीकंक्षमापयेत् ततोद्विजंसमाहूयवेदवेदांगपारगम् वेदध्वनिसमायुक्तमुवेश्य

शुभासने सपत्नीकंनृपश्रेष्ठदिव्यंचंदनचार्चितम् परिधाय्यस्वलंकृत्यसर्वंतस्मैनिवेदयेत् एवंकृतेफलं यत्स्यान्नतच्छक्यंमयेरितुम् सर्वोक्तफलसंयुक्तासर्वदेवैः सुपूजिता जाताजातामहाकल्पेसर्वान्कामानवाप्नुयात् तदंतेशिवसायुज्यंनारीप्राप्नोत्यसंशयम् पुरुषोवान्नृपश्रेष्ठशिवभक्तश्चसुव्रतः सोपितत्फलमाप्नोतिनान्यथाशिवभाषितम् सौभाग्यार्थंपुराचीर्णंरंभयाराजसत्तम तेनरंभातृतीयेयंपरंसौभाग्यदायिनी सोहं सएवभूतेशोगौरीसेवीनसंशयः इतिमत्वामहाभागशरणंव्रजपार्वतीम् एषाहिमाद्रिदुहितुर्दयितातृतीयारंभाभिधानमभवद्भुवितत्कृतेति संप्राशनैरुचिरनामयुतामुपोष्यप्राप्नोतिवांछितफलान्यवलावहूनि ॥

इतिरंभातृतीयाव्रतम् मार्गशुक्लचतुर्थ्यांहरिगणपतिव्रतं वर्षचतुष्टयसाध्यमिदमुक्तम् ॥

नारदीये मार्गशुक्लचतुर्थ्यांतुवर्षंयावन्मुनीश्वर क्षपयेदेकभक्तेननक्तेनाथद्वितीयकं अयाचितोपवासाभ्यांतृतीयकचतुर्थके एवंक्रमेणविधिवच्चत्वार्य्यब्दानिमानदः समाप्यचततश्चांतेकृतस्नानोमहाव्रतीकारयेत्स्वर्णघटितंभूभागेमौषकंरथं अशक्तौवर्णकैरेवरथंशुभ्रंसपुत्रकं तस्योपरिघटंस्थाप्यताम्रपात्रेणसंयुतं पूरयेत्तंडुलैःशुभ्रैस्तस्योपरिगणेश्वरं श्रीमूषकरथारूढंगणेशंस्थापयेदिह न्यसेद्वस्त्रयुगाच्छन्नं गंधाद्यैःपूजयेच्चतं नैवेद्यंमोदकैःकल्प्यं गणेशः प्रीयतामिति जागरंगीतनृत्याद्यैः पुराणाख्यानकैश्चरेत् प्रभातेविमलेस्नात्वाहोमंकृत्वाविधानतः तिलव्रीहियवश्वेतसर्षपाज्यैःसखंडकैः गणोगणाधिपश्चैवकूष्मांडस्त्रिपुरांतकः लंवोदरैकदंतौचरुक्मदंडश्चविघ्नपः ब्रह्मायमोथवरुणः सोमसूर्यहुताशनः गंधमालीपरमेष्ठीत्येवंषोडशनामभिः प्रणवाद्यैर्नमोंतैश्चप्रत्येकंदहनेहुनेत् वक्रतुंडेतिङेंतेनचमांतेनाष्टयुक्शतं ततोऽव्याहृतिभिःशक्त्याहुत्वापूर्णाहुतिंचरेत् दि

क्पालान्पूजयित्वाथब्राह्मणान्भोजयेत्ततः चतुर्विंशतिसंख्याकान्मोदकैः पायसेनच सवत्सांगांततोदद्यादाचार्यायसदाक्षिणां अन्येभ्योपियथाशक्तिभूयसींचततोददेत् प्रणम्यदक्षिणीकृत्यविसृज्यचद्विजोत्तमान् वंधुभिः सहभुंजीतस्वयंचप्रीतमानसः एतद्व्रतंनरःकृत्वाभुक्त्वाभोगानिहोत्तमान् सायुज्यंलभतेविष्णोर्गणेशस्यप्रसादतःकेचिद्धरिव्रतंनामप्राहुरेतस्यनारद विधानमेतदेवापिफलंचापीहतत्समम् ॥

इतिनारदीयेपूर्वभागेतुर्यपादेहरिगणपतिव्रतं अथभविष्यपुराणोक्तंगणेशचतुर्थीव्रतम्

ब्रह्मोवाच गणेशःपूजितःकुर्य्याच्चतुर्थ्यांसर्वकर्मसु अविघ्नंसुरलोकेचगतिमिष्टांप्रयच्छति कर्म्मस्वविदुषोविघ्नं कुर्य्याच्चैवनसंशयः अविदुषांकर्मकालेस्मरणमकुर्वतांतैरप्यवश्यंस्मर्त्तव्यःपूज्यश्च पूजामंत्राःस्वसंज्ञाभिरंगमंत्राश्चकीर्तिताः अभ्यर्च्याभिलिखेत्पद्मंकुंकुमेनाष्टपत्रकं कुंकुमस्याप्यभावेतुरक्तचंदनमिष्यते अथतत्पद्ममध्यस्थःकर्तव्यःसतिथीश्वरः तिथीश्वरोत्रगणेशः गंधपुष्पोपहारैश्चयथाशक्तिप्रपूजयेत् चत्वारःकारकाःकार्य्या भक्ष्यभोज्यसमन्विताः तंडुलैस्तुषशालीयैःपद्मरागैश्चसंयुताः चतुष्कोणेषुतान्कृत्वाफलानिविविधानिच गंधमाल्यादिकंसर्वंतथैवाविनिवेदयेत् पूजायावित्तसाठ्येनकृतापिनफलप्रदा आज्यधारासमिद्भिश्चदधिक्षीरान्नमाक्षिकैः पूर्वोक्तफलदोहोमःकृतःशांतेनचेतसा ॥ नृसिंहपुराणेपि ॥ सूतउवाच चतुर्थ्यांतुनभुंजीतस्नात्वानद्यांनृपोत्तम रक्तांवरधरोभूत्वारक्तगंधानुलेपनः रक्तवस्त्रोगणाधीशंविनायकमथार्चयेत् रक्तचंदनलेप्येनस्नानपूर्वंविधानतः विलिप्यरक्तगंधेनरक्तपुष्पैरथार्चयेत् ततोस्मैचागुरुंधूपमाज्ययुक्तंसचंदनं नैवेद्यंचैवहारिद्रंगुडखंडसमन्वितं एवंसंवत्सरंपूज्यविनायकमथोस्तुवन् नमस्कृत्वामहादेवंस्तोष्येहंतंविनायकं महागणपतिंशूरमूर्जितं

जयवर्धनं एकदंतंद्विदंतंच चतुर्दंतंचतुर्भुजं त्र्यक्षंत्रिशूलहस्तंचरक्तनेत्रंवरप्रदं आंविकेयंशंकुकर्णंप्रचंडंदंडनायकं आरक्तंदंडिनंचैववाह्निवक्रंहुतप्रियं अनर्चितोविघ्नकरः सर्वकार्य्येषुयोन्नृणां तंनमामिगणाध्यक्षंभीममुग्रमुमासुतं मदमत्तंविरूपाक्षंभववक्त्रसमुद्भवं सूर्यकोटिप्रतीकाशंभिन्नांजनसमप्रभं वुधंसुनिश्चलंशांतंनमस्यामिविनायकं नमोस्तुब्रह्मरूपायविष्णुरूपायतेनमः नमोस्तुगजरूपायगणानांपतयेनमः मत्तमंदररूपायनमःकैलासवासिने नमोविघ्नविनाशायनमस्तेब्रह्मचारिणे भक्तस्तुतायदेवायनमस्तुभ्यंविनायकलया पुरावैसर्वेषांदेवानांकार्यसिद्धये गजरूपंसमास्थाय त्रासिताःसर्वदानवाः ऋषीणांदेवतानांच कृताःसर्वेमनोरथाः ततस्त्वंतुसुरैः सर्वैःपूज्यसेत्वंभवात्मज त्वामाराध्यगणाध्यक्षंसर्वज्ञंकामरूपिणं कामार्थैरक्तकुसुमैरक्तचंदनवारिभिः रक्तांबरधरोभूत्वाचतुर्थ्यामर्चयेज्जपेत् त्रिकालमेककालंवानियतोनियताशनः राजानंराजपुत्रंचराजमंत्रिणमेवच राज्यंवासर्वविघ्नेशवशीकुर्य्यांसराष्ट्रकं अविघ्नंतपसामह्यकुरुविघ्नविनाशक मयात्वंसंस्तुतोभक्त्यापूजितश्चविशेषतः यत्फलंसर्वतीर्थेषुसर्वयज्ञेषुयत्फलं तत्फलंसर्वमाप्नोतिस्तुत्वादेवंविनायकं विषमंनभवेत्तस्य नसगच्छेत्पराभवं नचविघ्नोभवेत्तस्यजातोजातिस्मरोभवेत् यइदंपठतिस्तोत्रंषड्भिर्मासैर्वरंलभेत् संवत्सरेण सिद्धिंचलभतेनात्रसंशयः

इतिनृसिंहपुराणेगणेशस्तोत्रं ॥ ❀ ॥ अस्यामेवमार्गशुक्लचतुर्थ्यां कृष्णचतुर्थीव्रतम् ॥

स्कंदउवाच केनभोगानवाप्नोतिनिर्विघ्नंपुरसूदन पुत्रपौत्रांस्तथारोग्यंव्रतेनाप्नोतिशंकर ईश्वरउवाच पुरादेवासुरेयुद्धेअसुरैर्निर्जितारणे शक्राद्यादेवताःसर्वा स्त्रिपुरावासिभिर्जिताः तदाविवर्णवदनास्तेसर्वेमामुपागताः त्राहित्राहिवदंतस्तेमयाप्याश्वासितास्तदा विघ्नैरुपहतानांचतदादिष्टंव्रतंमया तत्कृतंतैस्तदास्कंदतेषांतुष्टोगणा

धिपः गणेशेनतुपुष्टेनविघ्नानांसंक्षयःकृतः स्कंदउवाच विधिनाकेनदेवेशव्रतमेतन्महाफलं कृतंभवतिदेवेशतन्मेव्रूहिवृषध्वज ईश्वरउवाच मार्गशीर्षेशुभेमासिशुक्लपक्षेतुषण्मुख चतुर्थ्यांनियमंगृह्यविघ्नेशंपूज्ययत्नतः पुष्पैर्गंधैश्चनैवेद्यैर्लड्डुकैश्चसुसंस्कृतैः पललोडेरकैश्चैवतथासौहालिकैःशुभैः पललंतिलपिष्टं उडेरकाःपिष्टादिमयावर्तुलाकाराः पूजयित्वाविधानेनप्रार्थयेत्तंचमानवः त्वत्प्रसादेनदेवेशव्रतंवर्षचतुष्टयं निर्विघ्नेनतुमेयातुप्रमाणंमूषकध्वज ॥ प्रमाणंसमाप्तिं प्रमाणंहेतुमर्यादाशास्त्रेयत्ताप्रमातृष्वित्यभिधानकोशात् संसारार्णवदुस्तारंसर्वविघ्नसमाकुलं तस्माद्दीनंजगन्नाथत्राहिमांगणनायक एवंप्रार्थ्यगणाध्यक्षंभुंजीयाद्वाग्यतस्ततः एवंक्रमेणसंपूज्यएकभक्तोनरोत्तमः गणेशंमनसाध्यायंस्ततोरात्रौस्वपेद्बुधः एवंसंवत्सरयावच्चतुर्थीप्रति षण्मुख ततोमार्गशिरेमासिविधिनानेनपूजनं नक्ताशीचभवेत्तद्वद्यावत्संवत्सरंपुनः मार्गशीर्षेपुनः प्राप्तेतथैवायाचितीभवेत् अयाचितेनाब्दमेकंततोमार्गशिरेपुनः आरभ्योपवसेदब्दमेकंतद्वच्चपूजनं एवं क्रमेणविधिवच्चत्वार्य्यब्दानिमानवः समाप्यचततोह्यंतेजलस्नातोमहाव्रती कारयेद्धेमघटितंस्वशक्त्याखुरथं शुभं आखुरथंगणेशं कारयेद्वर्णकैः शुभ्रैररविंदंसुपत्रकं तस्योपरिघटंस्थाप्यताम्रपात्रेणसंयुतम् पूजयेच्छुभ्रशालेयैस्तंडुलैरेवषण्मुख तस्योपरिन्यसेद्देवंवासोभिर्वेष्ट्यसुव्रतः पूजयेत्पुष्पधूपाद्यैर्नैवेद्यैर्विविधैस्तथा मोदकैश्चततःशुभ्रैःपक्वान्नैर्घृतपाचितैः नैवेद्यंकल्पयेत्तत्रगणेशःप्रीयतामिति जागरंकारयेद्विद्वान्गीतवादित्रनिस्वनैः पुराणाख्यानकैश्चैवतांरात्रिंक्षपयेद्बुधः प्रभातेविमलेस्नातोहोमकर्माणिकारयेत् तिलव्रीहियवैश्चैवतथासिद्धार्थकैःशुभैः होमश्चैतैर्मंत्रैःकार्य्यः ॐगणायस्वाहा गणाधिपतयेस्वाहा मेघवर्णायस्वाहा कूष्मांडाय स्वाहा त्रिपुरांतकायस्वाहा एकदंतायस्वाहा रुक्मदंष्ट्रायस्वाहा विघ्नेश्वरायस्वाहा ब्रह्मणेस्वाहा इंद्राय

स्वाहा यमायस्वाहा सोमायस्वाहा सूर्यायस्वाहा गणेशायस्वाहा अष्टोत्तरशतंहुत्वा ततोव्याहृतिभिर्हुनेत्यावच्छक्त्यामहावाहोततोहोमःसमाप्यते ततस्तुपूजयेद्विद्वानाचार्य्यंभक्तिभावतः वस्त्रैराभरणैर्दिव्यैःपूजयित्वाक्षमापयेत् तत्पत्नींपुरुषोभक्त्यावस्त्रैराभरणैरपि शय्यांदद्यात्ततस्तस्मैसोपधानांसगंडुकां गांसवत्सांततोदद्यात्सर्वालंकारभूषितां प्रीयतांगणनाथोत्रइतिमंत्रमुदीरयेत् ब्राह्मणान्भोजयेद्भक्त्याचतुरोवैकमेववा तेभ्यस्तुकरकान्दद्यात्तिलपात्रसमन्वितान् अनेनविधिनायस्तुकरोतिव्रतमुत्तमं नविघ्नैरभिभूयेतगणनाथप्रसादतः यंकरोतिसमारंभंनिर्विघ्नंतत्फलप्रदं पूर्वंतथाकृतंसर्वैरिंद्राद्यैस्त्रिदशैर्विभो रुद्रेणब्रह्मणाचैवविष्णुनाचकृतंपुरा अन्येश्चैवउमापुत्रराजभिर्बहुभिःकृतं एतदेवव्रतंचीर्णंमानुषैर्भूतलेसुत अनेनाक्रियमाणेननविघ्नैरभिभूयते स्वर्गलोकात्परिभ्रष्टस्ततोयातिपरांगतिम् इतिस्कंदपुराणोक्तंसोद्यापनंकृच्छ्रचतुर्थीव्रतम् अस्यामेववर्षचतुष्टयसाध्यं सर्वार्थसाधकं वरचतुर्थीव्रतम् स्कंदपुराणे चतुर्थ्यांमार्गशीर्षेनुशुक्लपक्षेनरोत्तमैः प्रारभ्यंप्रतिमासंचचतुर्थ्यांगणनायकं संपूज्यविधिनाकुर्य्यादेकभक्तंसमाहितः अक्षारलवणंत्वेवंपूर्णेसंवत्सरेततः द्वितीयेवत्सरेनक्तंप्रतिमासचतुर्थके कुर्याद्गणेशमभ्यर्च्यतृतीयेयाचितंतथा एवमेवप्रकुर्वीतचतुर्थेस्यादुपोषणं ततश्चतुर्थेसंपूर्णेतदुद्यापनमाचरेत् इदंवरचतुर्थ्याख्यंव्रतंसर्वार्थसाधकमिति ॥ इदंस्कंदपुराणोक्तंवरचतुर्थीव्रतं अत्रप्रथमवर्षेएकभक्तंतत्स्वरूपं तुहिनार्द्धसमयइत्यादिनापूर्वमेवोक्तंयत्तुकेनचिदुक्तं भोजनंतुविधिप्राप्तंद्वात्रिंशद्ग्रासाइतिफलितोर्थइतितुतुच्छभिक्षुकस्यैकभक्तेकदाचित्स्वल्पभिक्षाप्राप्तावेतन्नियमस्यासंभवाद्वचनाभावाच्चस्वल्पभिक्षावतएकोनत्रिशद्ग्रासासादनासंभवाच्च नन्वष्टौग्रासामुनेर्भक्ष्याःषोडशारण्यवासिनः द्वात्रिंशतंगृहस्थानाममितंब्रह्मचारिणइतिवचनमस्तीतिचेत्सत्यं एतद्वचनस्यपरिगृहीनियतसायंप्रातरनुष्ठेयप्राणाग्निहोत्रविषयत्वात् एतद्वच

नस्यतद्विषयत्वंचवौधायनसूत्रेस्पष्टम् ग्रासलक्षणम् कुक्कुटांडसमाग्रासोयथावामुखमाविशेदितियावदेवग्रसितुंशक्यामिति याज्ञवल्क्यधर्मप्रतिश्रयैरुक्तंतस्मान्न्यूनंग्रासत्रयेणत्वितिसग्रासत्रयेशब्दोन्यूनत्वोपलक्षणार्थ

इतिमार्गशुक्लचतुर्थीव्रतानि ॥ अथमार्गशुक्लपंचम्यांनागपूजोक्ता स्कांदे ॥

शुक्लमार्गशिरेपुण्याश्रावणेयाचपंचमीस्नानेदानेबहुफलानागलोकप्रदायिनी इयंचोत्तराग्राह्या पंचमीनागपूजायांकार्याषष्ठीसमन्विता तस्यांतुतुपिनागाः पूजनीयागृहांगणे नारदीये मार्गशुक्लेतुपंचम्यांनागानिष्ट्वा विधानतः नागेभ्यस्त्वभयंलब्ध्वामोदतेसहवाधवैः इयंश्रीपंचमी अत्रश्रीपंचमीव्रतंकार्य्यं श्रीपंचमीव्रतकथा युधिष्ठिरउवाच कथंसाप्राप्यतेलक्ष्मीर्दुर्ल्लभायानरैरपि दानेनतपसावापिव्रतेनापिवदस्वतत् जपहोमनमस्कारैःसंस्कारैर्वापृथग्विधैःएतद्वदयदुश्रेष्ठसर्ववित्त्वंमतोमम श्रीकृष्णउवाच भृगोःख्यात्यांसमुत्पन्नापूर्वंश्रीःश्रूयतेशुभा वासुदेवायदत्ताचमुनिनासासमृद्धयेवासुदेवोपितांप्राप्यपीनोन्नतपयोधरां पद्मपत्रविशालाक्षींपूर्णचंद्रनिभाननां भाभासितदिगंतांतांसाक्षाद्भानोः प्रभामिव नितंवाडंवरवतींमत्तमातंगगामिनीम् रेमेसहतयाराजन्विभ्रमोद्भ्रांतवित्तया साचविष्णुंजगज्जिष्णुंपतिंश्रीजगतांपतिं प्राप्ताकृतार्थमात्मानंमेनेसानयशोधरा नष्टकष्टंजगत्सर्वंभगवद्धारितंमया लक्ष्म्याचपालितंसर्वंसद्धृष्येवमहीतलं सुभिक्षंक्षेममारोग्यक्रमानंदमनामयं हूयतेब्राह्मणैर्वह्नौ भुज्यतेत्रिदशैर्दिवि चातुर्वर्ण्यसमाकीर्णंपाल्यतेपार्थिवैरपि विरोचनादिभिःसर्वैर्दैत्यैर्वलवत्तरैः तपस्तप्तमथारब्धमर्थमाश्रित्यसंयतैः सोमसंस्थाहविःसंस्थापाकसंस्थादिभिर्मखैः सदाचारैःसमारब्धयष्टमक्लिष्टकारिभिः एवंधर्मप्रधानैस्तुदेवैर्दाररतात्मभिः जगदासीत्समाक्रांतंविक्रमेणवलेनच लक्ष्मीविलासप्रभवोदेवीनांचमहामदः

शीलसत्यंचशौचंचसद्योलीनमभूद्गृहे सत्यशौचविहीनांस्तान्देवान्संत्यज्यचंचला जगामदानवकुलंकुलदेवानुरागतः लक्ष्मीप्रभावमदतःपुनरुद्धतमानसैः व्यवहर्तुंसमारब्धमन्यायेनमदोद्धतैः वयंदेवावयंयज्ञावयंविप्रावयंजगत् ब्रह्मविष्ण्वीशशक्राद्यावयंसर्वेदिवौकसः अहंकारविमूढांस्तान्ज्ञात्वादानवसत्तमान् सागरेसांविवेशाथभ्रांतचित्ताभृगोःसुता क्षीराब्धिमध्यगतयालक्ष्म्याक्षीणार्थसंचयं निरानंदंगतश्रीकमभवद्भुवनत्रयं गतश्रीकमथात्मानंमत्वाथबलसूदनः पप्रच्छांगिरसंविप्रंब्रूहिकिंचिद्व्रतंमम येनसंप्राप्यतेलक्ष्मीलब्धानचलतेपुनः निश्चलापिसुहृन्मित्रभोग्याभवतिसामुने नसाश्रीरपिमंतव्यायाकन्यापाल्यतेगृहे परार्थयासुहृन्मित्रभृत्यैर्नैवोपभुज्यते सुहृद्बंधुजनाःसर्वेयांभुंजंतिसदाशुभाः शक्रस्यैतद्वचःश्रुत्वा वृहस्पतिरुदारधीः कथयामाससंचिंत्यशुभंश्रीपंचमीव्रतं यत्पुराकस्यचिन्नोक्तंव्रतानामुत्तमंव्रतं तदिदंकथयामाससरहस्यमशेषतः तच्छ्रुत्वाकर्त्तुमारब्धंशुभंतदमरैःसह देवदानवगंधर्वैर्यक्षैरक्षीणकल्मषैः सिद्धैःप्रसिद्धचरितैर्विष्णुनाप्रभुविष्णुना ब्राह्मणैर्ब्रह्मतत्वज्ञैः समर्थैःपार्थिवैःसहकैश्चित्सात्विकभावेनराजसेनापरैरपि तामसेनतथाकैश्चित्कृतंव्रतमिदं तथा व्रतेसमाप्तभूयिष्ठेनिष्ठयापरयाशुभो देवानांदानवानांचबुद्धिरासीदथोद्यता निर्मथ्यभुजवीर्येणसागरंसरितांपतिंसमाहरामोह्यमृतंहितायत्रिदिवौकसां इत्थंतेसमयंकृत्वाममंथुर्वरुणालयं मंथानंमंदरंकृत्वानेत्रंकृत्वातुवासुकिं मथ्यमानजलाज्जात श्चंद्रःशीतांशुरुज्ज्वलः अनंतरंसमुत्पन्नालक्ष्मीः क्षीराब्धिमध्यगा तयाच लोकिताःसर्वेदैत्यदानवसत्तमाःआलोक्यतान्जगामाशुविष्णोर्वज्ञः स्थलंशुभंविधिनाविष्णुनाचीर्णंव्रतंतेनाब्धिसंकया शरीरस्थावभूवास्याविभ्रमोद्भ्रांतलोचना किंचराजसभावेनशक्रेणैतत्कृतंयतः ततस्त्रिभुवनैश्वर्यंप्राप्तंतेनमहर्द्धिमत् तमसाधृताचित्तैस्तुसंचीर्णंदैत्यदानवैः तेनतेषामथैश्वर्यंदृष्टनष्टमभूत्किल एवंसश्रीकमभवत्सदेवासुरमानुषंजगच्चज

गतांश्रेष्टव्रतस्यास्यप्रभावतः युधिष्ठिरउवाच कथमेतद्व्रतंकृष्णक्रियतेमनुजैःकदा प्रारभ्यतेप्राप्यतेचसर्वमेवजनार्दन श्रीकृष्णउवाच यदिंद्रेणपुराचीर्णं श्रीवियुक्तेनपार्थिव श्रीसमृद्धिकरंताद्वैशृणुश्रीपंचमीव्रतं मार्गशीर्षेसितेपक्षे पंचम्यापन्नगोत्सवे उपवासस्यनियमंकुर्यात्पद्मांहृदिस्मरन् स्वर्णरौप्यांयथाशक्त्याताम्रांमृत्काष्ठजामथ चित्रपट्टगतांदेवींलक्ष्मींक्ष्मापालकारयेत् पद्मासनांपद्महस्तांलक्ष्मींपद्मदलेक्षणां दिग्गजेंद्रैःस्नाप्यमानां कांचनैःकलशोत्तमैः ततोयामत्रयेजातेनिम्नगायांगृहेथवा स्नानंकुर्यादसंभ्रांतःशक्तवच्चोपचारतः देवान्पितॄंश्चसंतर्प्यततोदेवगृहंव्रजेत्तत्रस्थांपूजयेद्देवींपुष्पैस्तत्कालसंभवैः चपलायैपुनःपादौ चंचलायैचजानुनी कटिंकमलवासिन्यै नाभिंख्यात्यैनमोनमः स्तनौमन्मथवासिन्यैललितायैभुजद्वयं उत्कंठितायैकंठंचमाधव्यैमुखपंकजं नमःश्रियेशिरः पूज्यदद्यान्नैवेद्यमादरात् फलानिचयथालाभंविरूढंधान्यसंचयं ततःसुवासिनीःपूज्याःकुसुमैःकुंकुमेनच भोजयेन्मधुरान्नेनप्रणिपत्यविसर्जयेत् ततस्तुतंडुलप्रस्थंघृतपात्रेणसंयुतं ब्राह्मणायप्रदातव्यंसाश्रीर्मेप्रीयतामिति एनविष्णुनासहवर्ततेइतिसाविष्णुसहिताश्रीरित्यर्थः निवर्त्यैतदशेषेणततोभुंजीतवाग्यतः मासानुमासंकर्तव्यंविधिनानेनभारत श्रीर्लक्ष्मीःकमलासंपत्पद्मानारायणीप्रिया तथाधृतिःस्मृतिस्तुष्टिःपुष्टिःसिद्धिःक्षमाक्रमात् मासानुमासंराजेंद्रप्रीयतामितिकीर्तयेत् ततोद्वादशकेमासिसंप्राप्तेपंचमीदिने वस्त्रमंडपिकाकृत्वापुष्पगंधादिवासितां शय्यायांस्थापयेल्लक्ष्मींसर्वोपस्करसंयुतां सौभाग्याष्टकसंयुक्तांश्वेतपट्टावृतस्तनीं समधान्यसमोपेतांरसधान्यसमन्विता पादुकोपानहच्छत्रभाजनासनसत्कृतां देवींसंपूज्यविधिवद्ब्राह्मणायकुटुंविने व्यासायवेदविदुषेयस्मैवारोचतेस्वयं व्यासायव्यासप्रणीतपुराणशास्त्रज्ञाय॥ सोपस्करांसवस्त्रांचधेनुंदत्त्वा क्षमापयेत् क्षीराब्धिमथनोद्भूतेविष्णोर्वक्षस्थलालये सर्वकामप्रदेदेविऋद्धिंयच्छनमोस्तुते ततः सुवा

सिनीः पूज्यवस्त्रैराभरणैः शुभैः भोजयित्वास्वयंपश्चाद्भुंजीतसहवंधुभिः यएवंकुरुतेपार्थभक्त्याश्रीपंचमीव्रतं तस्यश्रीर्भवनेभातिकुलानामेकविंशतिं नारीयाकुरुतेयातुप्राप्यानुज्ञांस्वभर्तृतः सुभगादर्शनीयाचवहुपुत्राचजायते यःपंचमीव्रतमिदंदयितंमुरारेर्भक्त्यासमाचरतिपूज्य भृगोस्तनूजां राज्यंश्रियंसभुवि भव्यजनोपभोग्यांभुक्त्वाप्रयातिभुवनंमधुसूदनस्य ॥

इतिभविष्योत्तरोक्तंश्रीपंचमीव्रतम् मार्गशुक्लषष्ठ्यांमल्लारिपूजोक्ता

साचोत्तरविद्धायांकार्य्याषण्मुन्योरितियुग्मवाक्यात् तदुक्तंब्रह्मांडपुराणे मल्लारिमाहात्म्ये मार्गशीर्षेविशेषेणप्रतिपत्षाष्टिकांतरे पूजार्चनंकृतंभक्त्यातदक्षय्यमसंशयं धनधान्याश्वधेन्वादिदासीदासगृहादिकं मल्लारिप्रीतयेदेयं विशेषात्मार्गशीर्षके चंपाषष्ठ्यांस्कंदषष्ठ्यांतथासर्वेषुपर्वसु चैत्रश्रावणपौषेषुप्रीतोमल्लारिरर्चितः अत्रचंपाषष्ठीयोगः मासिमार्गशिरेशुक्लेषष्टीचध्रुवसंयुत। रविवारेणसंयुक्तासचंपेतिप्रकीर्तिता इयमेवस्कंदषष्ठी तदुक्तं नारदीये मार्गशीर्षेशुक्लषष्ठ्यांनिहतस्तारकोसुरः स्कंदेनसत्कृतिःप्राप्ता ब्रह्माद्यैःपरिकल्पिता ततोस्यांपूजयेत्स्कंदं गंधपुष्पाक्षतैःफलैः वस्त्रैराभरणैर्वापिनैवेद्यैर्विविधैस्तथा रविवारेणसंयुक्तातथाशतभिषान्विता यदिलेसासमुद्दिष्टाचंपाह्वा मुनिसत्तम तस्यांविश्वेश्वरोदेवो द्रष्टव्यःपापनाशनः पूजनीयोवंदनीयःस्मर्तव्यःसौख्यमिच्छता स्नानदानादिकंचात्रसर्वमक्षय्यमुच्यतइति ॥ इमांषष्ठीमारभ्यवर्षपर्यंतंराजतंस्कंदंविधायसंपूज्यचविप्रायदद्यात् तत्रमंत्रः सेनाविनायकस्कंदमहासेनमहाबल हरोमाग्निजषड्वक्त्रगंगागर्भनमोस्तुते भविष्योत्तरे॥ श्रीकृष्णउवाच येयंमार्गशिरेमासिशुक्लाषष्ठीचभारत पुण्यापापहराधन्याशिवाशांतागुहाप्रिया स्नानदानादिकंकर्मतस्यामक्षयमुच्यते येस्यांपश्यंतिगांगेयंदक्षिणापथमास्थितं गांगेयंस्कंदं ब्रह्महत्यादिपापैस्तेमुच्यंतेनात्रसंशयः तस्मादस्यांसोपवा

सः कुमारंस्वर्णसंभवं राजतंवामहाराजमृण्मयंवापिकारयेत् अपराह्णेततःस्नात्वा समाचम्ययतव्रती पद्मासनस्थोगांगेयंध्यायंस्तिष्ठेत्समाहितः ब्राह्मणस्तुततोविद्वान्गृहीत्वाकरकंनवं पातयेत्तस्याशिरासिधारांवैदक्षिणामुखः चंद्रमंडलसंभूताभवभूतिपवित्रता गंगाकुमारधारेयंपातितातवमस्तके एवंस्नात्वासमभ्यर्च्यभास्करंभुवनाधिपं पुष्पपूजार्पणात्पश्चात्पूजयेत्कृत्तिकासुतं देवसेनापतेस्कंदकार्त्तिकेयभवोद्भव अपारगुणगांगेयशक्तिहस्तनमोस्तुते एभिर्नामपदैस्तुत्वानैवेद्यंतुनिवेदयेत् फलानिदाक्षिणात्यानिचंदनंमलयोद्भवं पार्श्वस्थौपूजयेच्छागकुक्कुटौस्वामिवल्लभौसकलापंमयूरंचप्रत्यक्षंहैमजंतथा चंद्रकाराजितंपार्श्वेसंपूज्यस्कंदवल्लभं व्रीहिभिःसयवैर्होमः कार्यःसाज्यैस्तिलैस्ततः एवंनिर्वर्त्यविधिवत्फलमेकंयुधिष्ठिर भक्षयित्वास्वपेद्भूमौस्वामिनंदर्भसंस्तरे नारिकेलंमातुलिंगंनारंगंपनसंतथा जंबीरंदाडिमंद्राक्षांहृद्यान्यत्रफलानिच श्रीफलामलकंतद्वत्त्रपुसंकदलंफलं क्रमादेतानिमासेषुभक्षयेन्नियतोव्रती अभावेखलुकालोत्थंफलमद्यादतंद्रितः प्रत्यक्षोहेमघटितच्छागोवाकुक्कुटोथवा प्रातर्दद्याद्द्विजायोच्चैः सेनानीप्रीयतामिति सेनानीःशरसंभूतःक्रौंचारिःषण्मुखोगुहः गांगेयःकार्त्तिकेयश्चस्वामीवालग्रहाग्रणीः छागप्रियःशक्तिधरःकुमारोद्वादशस्मृताः प्रीयतामितिसर्वेषुमासेषुपरिकीर्त्तयेत् ब्राह्मणान्भोजयित्वादौपश्चाद्भुंजीतवाग्यतः एवंसंवत्सरस्यांतेकार्त्तिकेमासिशोभने कार्त्तिकेयंसमभ्यर्च्यवासोभिर्भूषणैस्तथा प्रतिमासंसमाश्रित्यसर्वदैवेदमाचरेत् संवत्सरविधिंकृत्वापूजाहोमपुरःसरम् दद्याद्विप्रायराजेंद्रवाचकायविशेषतः विज्ञाविप्राःस्मृतादिव्या भौमाश्चान्येद्विजातयः पारितेस्मिन्व्रतेपार्थ तीर्णःस्याद्भवसागरः एवंयःकुरुतेभक्त्यानरोयोषिदथापिवा संप्राप्येहशुभान्कामान् गच्छतींद्रसलोकतां सदैवपूजनीयस्तुकार्त्तिकेयोमहीपते कार्त्तिकेयादृतेनान्योराज्ञापूज्यःप्रचक्षते संग्रामंगच्छमानोयःपूजयेत्कृत्तिकासुतं ससर्वंजयति·

वीरोयथेंद्रोदानवानरणे तस्मात्सर्वप्रयत्नेनपूजयेच्छंकरात्मजं पूजयानस्तुतंभक्त्यासर्वान्कामानवाप्नुयात् यस्तुषष्ठ्यांनरःपूजांकुर्य्याद्भरतसत्तम सर्वपापविनिर्मुक्तोगांगेयस्यपदंव्रजेत् त्रिःकृत्वादक्षिणांवासोदत्वाश्रद्धासमन्वितः प्रणमेद्देवदेवंयःसगच्छेच्छिवमंदिरं ॥ य पूजयेच्छरवनोद्भवमादिदेवंशंभोःसुतंसदयितंगिरिजात्मजंच स्वर्गेनिरर्गलसुखान्यनुभूयभूयःसेनापतिर्भवतिपांडुधुरंधरोसौ ॥

इतिभविष्योत्तरेमार्गशुक्लेकार्त्तिकेयषष्ठीव्रतं स्कंदपुराणेचंपाषष्ठीव्रतम् ॥

स्कंदउवाच प्राप्तराज्यंतुराजानंधर्मपुत्रंयुधिष्ठिरं कदाचिदागतोद्रष्टुंदुर्वासामुनिसत्तमः तंपप्रच्छमहातेजाधर्मसूनुःकृताजलिःतद्व्रतंश्रोतुमिच्छामिकर्त्तुंचमुनिसत्तम दुर्वासाउवाच शृणुराजन्महाभागव्रतानामुत्तमंव्रतं अस्तीहयच्चीर्णेमात्रंसर्वकामांस्तुपूरयेत् भविष्योत्तरे श्रीकृष्णउवाच शृणुपांडवयत्नेनफलषष्ठीशुभातथा यामुपोष्यनरः पापाद्विमुक्तः स्वर्गभाग्भवेत् मार्गशीर्षेशुभेमासिपंचम्यांनियतव्रतः षष्ठीमुपोष्यकमलंकारयित्वासकांचनं शर्करासंयुतंदद्याद्ब्राह्मणायकुटुंबिने रूपंचकांचनंकृत्वाफलस्यैकस्यधर्मवित् दद्यात्प्रातःकृतस्नातो भानुर्मेप्रीयतामिति भक्त्यातुविप्रान्संपूज्यसप्तम्यांक्षीरभोजनं कृत्वाकुर्य्यात्फलत्यागंयदास्यात्कृष्णसप्तमी एतामुपोष्यविधिवदनेनैवक्रमेणतु तद्वद्धेमफलंदत्वासुवर्णकमलंतथा रक्तचंदनपुष्पैश्चरक्तवस्त्रसमान्वितं भानुरर्कोरविर्ब्रह्मः सूर्य्यः शक्रोहरिः शिवः श्रीमान्विभावसुस्त्वष्टा वरुणःप्रीयतामिति व्रतांतेविप्रमिथुनंपूजयेत्स्त्रग्विभूषणैः शर्कराकलशंदद्याद्धैमंपद्मंफलान्वितं यथावैसफलाःकामा स्त्वद्भक्तानांसदारवेः तथानंतफलावाप्तिरस्तुजन्मनिजन्मनि इमामनंतफलदांफलषष्ठींकरोतियः सर्वपापविनिर्मुक्तः सूर्यलोकेमहीयते सुरापानादिकंकिंचिद्यदत्रामुत्रवाकृतं त

त्सर्वैनाशमायातिसूर्यलोकंसगच्छति भूतान्भव्यांश्चपुरुषांस्तारयेदेकविंशतिं शृणुयाद्वापठेद्वापिसोपिकल्याणभाग्भवेत् हैमंफलंसकमलंससितंसितायांषष्ठीमुपोष्यविधिवद्द्विजपुंगवाय दत्त्वासुरासुरशिरोमणिघृष्टपादंभानुंप्रणम्यफलसिद्धिमुपैतिमर्त्यः॥

इतिभविष्योत्तरेफलषष्ठीव्रतम् ॥ मार्गशुक्लसप्तम्यांमित्रसप्तमीव्रतम् ॥

नारदीये मार्गस्यसितसप्तम्यांमित्रव्रतमुदाहृतं यद्विष्णोर्दक्षिणंनेत्रंतदेवाकृतिमानिह अदित्यांकश्यपाज्जातोमित्रोनामदिवाकरः अतोस्यांपूजनंतस्ययथोक्तविधिनाद्विज कृत्वाद्विजान्भोजयित्वासघैतवमधुरादिना सुवर्णंदक्षिणांदत्त्वाविसृज्याश्नीतवैस्वयं उपोष्यभानुंत्रिसंध्यंसमभ्यर्च्यधराशयः क्षीरासिक्तान्नसंवद्धंमोदकंप्रस्थसम्मितं द्विजायदत्त्वाभोज्यानिसप्ताश्वत्थप्रदक्षिणाः पृथग्गावःसुवर्णंवाविसृज्याश्नीतचस्वयं अभयाख्यंव्रतंचैतत्सर्वस्याभयदंस्मृतं मार्त्तंडाख्यंव्रतंनाम कथयंतिद्विजाः परे एकमेवेतिचप्रोक्तमेकदैवंतथाबुधैः ॥ इयंपूर्वाकार्य्या एताःपूर्वयुताग्राह्या इतिवचनात् कृत्यतत्त्वार्णवेपि अदितेःकश्यपाज्जातोमित्रोनामदिवाकरः मार्गशीर्षस्यमासस्यशुक्लपक्षेशुभेतिथौ सप्तम्यांतेनसाख्यातालोकेस्मिन्मित्रसप्तमी तत्रोपवासःकर्त्तव्योभक्ष्याण्यथफलानिचेति ॥ अस्यविधिर्निर्णयामृते ॥ तत्रपूर्वदिनेउपोष्यकृतवपनः स्नात्वा रविं सर्वोपचारैःसंपूज्यब्राह्मणान्भोजयेत्ततः स्वयंमधुप्लुतंमिष्टान्नंभुंजीत ॥ तदुक्तंब्रह्मपुराणे ॥ यद्विष्णोर्दक्षिणंनेत्रंतदेवाकृतिमत्पुनः अदित्यांकश्यपाज्जातोमित्रोनामदिवाकरः सप्तम्यांतेनसाख्यातालोकोस्मिन्मित्रसप्तमी षष्ठ्यांतुस्नपनंकार्य्यंतस्मैमित्रायभानवे तत्रोपवासःकर्तव्योभक्ष्याण्यथफलानिच रात्रौजागरणंकार्य्यंगीतनृत्यपुरस्कृतं सप्तम्यांवपनंकार्य्यंस्नात्वासंपूजयेद्रविं नानाकुसुमसंभारैर्भक्ष्यैःपिष्टमयैःशुभैः मधुनासंप्रभूतेनहोमोजाप्यंसमाधिना

ब्राह्मणान्भोजयेत्पश्चाद्दीनानाथांश्चमानवान् अष्टम्यांसंविभुज्याथतथाचनटवर्त्तकान् दिनद्वयेचभोक्तव्यंमिष्टान्नंमधुनाप्लुतं ॥ दिनद्वयेनसप्तम्यामष्टम्यांच ॥ अत्रमित्ररविरूपंवीरमित्रोदये शूलंवामकरेतस्यदक्षिणेसोमएवच मित्रनामात्रिनयनःकुशेशयविभूषितः विष्णुधर्मोत्तरेविशेषः मार्गशीर्षस्यमासस्यशुक्लपक्षेनराधिप सोपवासस्तुसप्तम्यामित्यादि ततः कमलैरविं रक्तचंदनपुष्पैश्चसंपूज्य वटकैः पूरणेनपूजयेदितिप्रकारांतरेण मित्रसप्तमीव्रतं अस्यामेवकाश्यांलोलार्कयात्रोक्ताकाशीखंडे ॥ मार्गशीर्षस्यसप्तम्यांषष्ठ्यांवाराविवासरे विधायवार्षिकींयात्रां नरःपापाद्विमुच्यतइति ॥ इयंमार्गशुक्लसप्तमीत्रितयसप्तमी सत्कुलजन्मारोग्यधनप्रदत्वात् तत्रकृत्यंहेमाद्रौ योमार्गशीर्षेसितसप्तमीदिने हस्तर्क्षयोगेजगतःप्रसूतिं संपूज्य भानुंविधिनोपवासी स्रग्गंधधूपान्नफलोपहारैरिति एवंसंवत्सरंसंपूज्यतदंते घृतसुवर्णादिकंदद्यादितित्रितयसप्तमी इयमेवनंदासप्तमी भविष्यत्पुराणे यातुमार्गशिरेमासिशुक्लपक्षेचसप्तमी नंदासाकथितावीरसर्वानंदकरीशुभेति अत्रापिसूर्यपूजादि पूर्ववत्कार्य्यमितिमार्गशुक्लसप्तमीव्रतानि अत्रकालभैरवयात्रोक्ता नारदीये मार्गशीर्षसिताष्टम्यांकालभैरवसन्निधौ उपोष्यजागरंकृत्वासर्वपापैःप्रमुच्यते यत्किंचिदशुभंकर्मकृतंमानुषजन्मनि तत्सर्वंविलयंयातिकालभैरवदर्शनादिति ॥ कृष्णाष्टम्यांकालभैरवजयंतीव्रतं ॥ शिवरहस्ये कालाष्टमीतिविज्ञेयाकार्त्तिकस्यासिताष्टमी दर्शांतमासाभिप्रायेणेयं कार्त्तिककृष्णाष्टमी तस्यामुपोषणंकार्यंतथाजागरणंनिशि भैरवस्यतुकर्त्तव्यापूजायामचतुष्टये कार्यंशिवकथालापैर्निशिजागरणंसदा जागरंचोपवासंचकृत्वाकालाष्टमीदिने प्रयतःपापनिर्मुक्तःशैवोभवतिशोभनइति रात्रौयामचतुष्टयेजागरणंशिवपूजादि काशीवासिनांनित्यं ॥ योदेवि भैरवाष्टम्यामुपवासंप्रयत्नतः नकरिष्यतिमोहेनयास्यत्येवहियातनामिति शिवरहस्यवचनात् काशीखंडेपि

मार्गशीर्षासिताष्टम्यांकालभैरवसान्निधौ उपोष्यजागरंकुर्वन्महापापैःप्रमुच्यते यत्किंचिदशुभंकर्मकृतंमानुषजन्मनि तत्सर्वंविलयंयातिकालभैरवदर्शनात् अनेकजन्मनियुतैर्यत्कृतंजंतुभिस्त्वघं सर्वंविलयमायातिकालभैरवजागरात् तद्वद्दर्शनंस्नात्वाकर्त्तव्यमित्युक्तंतत्रैव तीर्थेकालोदकेस्नात्वाकृत्वाचपितृतर्पणम् विलोक्यकालराजानंनिरयादुद्धरेत्पितृन् कृत्वाचविविधांपूजांमहासंभारविस्तरैः नरोमार्गासिताष्टम्यांवार्षिकंविघ्नमुत्सृजेदिति उपोष्यजागरंकुर्वन्सर्वपापैःप्रमुच्यतइतिच उपोषणांगत्वेनार्घ्यदानंकार्य्यमित्युक्तं शिवरहस्ये उपोषणान्यासभूतमर्घ्यदानमिदंस्मृतं अर्घ्यमंत्राअपितत्रैव भैरवार्घ्यंगृहाणेदंभीमरूपाव्ययानघ अनेनार्घ्यप्रदानेनतुष्टोभवशिवप्रिय सहस्राक्षिशिरोबाहोसहस्रचरणाजर गृहाणार्घ्यंभैरवेदंसपुष्पंपरमेश्वर पुष्पांजलिंगृहाणेशवरदोभवभैरव पुनरर्घ्यंगृहाणेशसपुष्पंयातनापह अत्रपूजोपवासजागरणानिप्रधानानिफलसंबंधात् अस्मिन्व्रतेउपवासजागरणयोःप्रधानयोरहोरात्रसाध्यत्वेनाहोरात्रयुताऽष्टमीग्राह्या अहोरात्रव्रतंयच्चेतिस्मृतेः यदातुपूर्वदिनेसायान्हेतदुत्तरस्मिन्नपिप्रदोषेतुल्यातदापिपूर्वैव कृष्णपक्षगतत्वात्तत्कालस्यापिलाभाच्च रुद्रव्रतेषुसर्वेषुकर्त्तव्यासंमुखीतिथिरितिब्रह्मवैवर्त्ताच्च दिनद्वयेंशतोरात्रिव्याप्तावुत्तरैवतत्रैवभैरवोत्पत्तेः प्रदोषकालीनत्वादितिकेचित्तत्रशिवरहस्ये मध्यान्हेभैरवोत्पत्तिश्रवणात् तथाच तत्रैवनित्ययात्रादिकंकृत्वा मध्यान्हेसंस्थितेरवावित्युपक्रम्य ब्रह्मणोरुद्रेजातेउक्तं तदोग्ररूपादनघान्मत्तः श्रीकालभैरवःआविरासीत्तदा लोकान्भीषयन्नखिलानपीति तस्मान्मध्यान्हव्यापिनीग्राह्येत्यपरे अन्येत्वेतदपिनाद्रियंते आविर्भावकालिन्याः कर्त्तव्यत्वेनानभिधानात् आविर्भावोपिमध्यान्हएव शिवरहस्ये मध्यान्होत्तरं कृत्तिवासोश्वरंप्रापुर्देवा विल्वादिसाधना इत्यादिनामध्येवहुकृत्याभिधानात् अंतेसूर्य्योप्यस्तमुपागमदित्यभिधानाच्च तिथ्यर्केचसिं

धुकारज्येष्ठैरुक्तं भैरवसन्निधावित्युक्तेर्जागरणोपवासादिकंकाश्यामेवकर्त्तव्यमितितत्प्रमाणाभावादुपेक्ष्यमिति तदोपादेयं मार्गशीर्षासिताष्टम्यामित्युत्पत्तिवाक्येकालभैरवसन्निधावित्यस्योपात्तत्वेनाविवक्षितत्वेप्रमाणाभावात् यत्तुनिर्णयासिंधौ मार्गकृष्णाष्टमी कालाष्टमीत्युक्तं तद्भ्रमसात् कालाष्टमीभाद्रकृष्णाष्टमीति हेमाद्युक्तेः तल्लक्षणमपितत्रैवभाद्रकृष्णाष्टमीनिर्णयेद्रष्टव्यं इतिकालभैरवाष्टमीव्रतनिर्णयः॥ मार्गशुक्लनवमीनंदिनीनवमी नारदीयेपि मार्गेतुशुक्लनवमीनंदिनीपरिकीर्त्तिता तस्यामुपोषितोविष्णुंजगदंबांप्रपूजयेत् गंधाद्यैःसोश्वमेधस्यफलभाङ्नात्रसंशयः मदनरत्नेभविष्ये मासिमार्गशिरेवीरशुक्लपक्षेतुयाभवेत् सानंदिनीमहापुण्यानवमी परिकीर्त्तिता यस्तस्यांपूजयेद्देवीं त्रिरात्रोपोषितोनरः सोश्वमेधमवाप्येह विष्णुलोकेमहीयते॥

इतिमार्गशुक्लनवमी अथमार्गशुक्लदशम्यांव्रतविशेषाभावादत्रदशमीमात्रे सर्वदानुष्ठेयमारोग्यदशमीव्रतं गरुडपुराणे सनत्कुमारउवाच अथत्वंशृणुदेवर्षेदशमीव्रतमुत्तमंसर्वरोगार्त्तिशमनंसर्वपुष्टिप्रदंशुभं व्रतमेतन्महाबुद्धेकार्य्यमारोग्यमिच्छता सर्वदाकार्य्यमेतद्धिलिप्सताचिरजीवितं उपवासश्चकर्तव्योनवम्यामपिसुव्रत दशम्यांचकृतस्नानोमंगलायतनंहरिं देवामिंदिरयासार्द्धंन्यायेच्चजगतांपतिं वैनतेयभुजासक्तंवनमालाविभूषितं शंखचक्रगदापद्मशार्ङ्गासिधरमच्युतं फलैश्चमधुरैः पुष्पैः पायसेनसमर्चयेत् अग्रतःस्थापयेत्कुंभं तीर्थतोयेनपूरितं तस्मिन्नावाहयेत्पंचचक्रादीन्यायुधानिच चक्रगदामुशलधनुः खड्गानीति हेमाद्रिः पूजयेद्रक्तपुष्पैस्तुगुडान्नेनसमाहितः द्रोणमात्रतिलैरक्तंकारयेदजिनोपरि तस्मिन्नष्टदलंपद्मंसौवर्णंहि निधायच मनःषष्ठानींद्रियाणिप्राणबुद्धिदलेष्वथ कर्णिकायांतथाकालंक्रमेणैवंसमर्चयेत् मनःश्रोत्रंचत्वक्चक्षुर्जिह्वाघ्राणप्राणबुद्धिरितिक्रमात् अनामयानितिष्ठंतुप्राणश्चचिरसंस्थितः अनाकुलाचमेबुद्धिः सर्वेस्युर्निरुपद्रवाः

मनसाकर्मणावाचामयाजन्मानिजन्मनि संचितंक्षपयत्वेनः कालात्माभगवान्हरिः एवंसंप्रार्थ्यगुरवेसदक्षिणमुपस्करं दत्त्वाविप्रान्भोजयित्वा अाचार्यःकुंभवारिणा साधकंस्नापयेच्छिष्योगुर्वनुज्ञापुरः स्सरं बांधवैः सह भुक्तातुनियमानुत्सृजेत्पुनः एवंकृतेक्षिप्रमारोग्यंभवति ॥ इतिगरुडपुराणोक्तमारोग्यदशमीव्रतं ॥ नारदीये मार्गशुक्लदशम्यांतुचरेदारोग्यकंव्रतम् गंधाद्यैरर्चयेद्विप्रानष्णन्तच्चरणोदकं पीत्वाचदक्षिणांदत्त्वाविसृजेदेकभोजनः एतत्कृत्वाव्रतंविप्रअस्यामेवपदार्थदशमीव्रतारंभोविष्णोधर्मोत्तरे ॥ मार्गशीर्षादथारभ्ययावत्संवत्सरंभवेत् गंधमाल्यनमस्कारैर्धूपदीपान्नसंपदा दिगीशपूजनंकार्यंतथैवेंद्रादयोदश वत्सरांतेद्विजेंद्रायगांप्रदद्यात्पयस्विनीं पदार्थसिद्धिमाप्नोतियात्राकालेवणिग्जनः वाणिज्यकामस्यनरस्यशस्तं राज्ञस्तथोर्वीविजिगीषतश्च विद्यार्थिनोवैरिपुनाशनार्थंहितंपदार्थव्रतमेतदुक्तम् ॥

इतिपदार्थदशमीव्रतम् ॥ मार्गशुक्लैकादशीमोक्षदा ॥ नारदीये

मार्गशुक्लैकादशींवैमोक्षदांसमुपोष्यवै द्वादश्यांप्रातरभ्यर्च्यदनंतंविश्वरूपिणं सर्वैरेवोपचारैस्तुविप्रान्संभोज्यवैव्रती विसृज्यदक्षिणांदत्त्वास्वयंभुंजीतबांधवैः एवंकृत्वाव्रतंविप्रभुक्त्वाभोगानिहेप्सितान् दशपूर्वान्दशपरान्समुद्धृत्यहारिंव्रजेत् ॥ अथब्रह्मांडपुराणोक्तंमार्गशीर्षशुक्लैकादशीव्रतं युधिष्ठिरउवाच वंदेविष्णुंप्रभुंसाक्षाल्लोकत्रयसुखप्रदं विश्वेशंविश्वकर्त्तारंपुराणंपुरुषोत्तमम् १ वदमेदेवदेवेशसंशयोस्तिमहान्मम लोकानांचहितार्थायपापानांक्षयकारणम् २ मार्गशीर्षेसितेपक्षेद्वादशीचैवकाभवेत् किंनामकोविधिस्तस्याकोदेवस्तस्यपूज्यते ३ एतदाचक्ष्वमेस्वामिन्विस्तरेणयथातथं श्रीकृष्णउवाच साधुस्त्वंचैवभोराजन्साधुतेविमलंयशः कथयिष्यामिराजेंद्रहरिवासरमुत्तमं उत्पन्नावासितपक्षेद्वादशीममवल्लभा ५ मार्गशीर्षसमुत्पत्तिर्ममदेहसमुद्भवा

मुरस्यचवधार्थायउत्पन्नाराजवल्लभा कथिताचमयासावैत्वदग्रेराजसत्तम पूर्वमेकादशीराजन्त्रैलोक्येसचराचरे ७ मार्गशीर्षासितेनपक्षेउत्पत्तिरितिनामतः अतःपरंप्रवक्ष्यामिमार्गशीर्षेसितेतुया ॥ ८ ॥ यस्याःश्रवणमात्रेणवाजपेयफलंलभेत् प्रसिद्धामोक्षनाम्नीतिसर्वपापहरापरा ॥ ९ ॥ देवंदामोदरंचैवपूजयेच्चप्रयत्नतः तुलस्यामंजरीभिश्चधूपैर्दीपैःप्रयत्नतः ॥ १० ॥ तत्रापिपूजनंचैवगीतैर्नृत्यैस्तथापरैः शृणुराजेंद्रवक्ष्यामिकथांपौराणिकींशुभां ॥ ११ ॥ अधोयोनिगताःसर्वेपितृमातृसुतास्तथा अस्याःपुण्यप्रभावेणस्वर्गंयांतिनसंशयः १२ एतस्याःकरणादस्यामहिमानंशृणुष्वतत् पुरातुनगरेरम्येकोशलेष्ववसन्नृपः १३ वैखानसेतिराजार्षिः पुत्रवत्पालयन्प्रजाः द्विजाश्चन्यवसंस्तत्रचतुर्वेदपरायणाः १४ ऋद्धिमंतस्तुवैतस्यवैखानस्यमहात्मनः एवंसराज्यंकुर्वाणोरात्रौस्वप्नमपश्यत १५ ददर्शपितरंस्वंतुअधोयोनिगतंनृपः हठाद्दृष्ट्वातुतंतत्रविस्मयोत्फुल्ललोचनः १६ कथयामासवृत्तांतंद्विजाग्रेस्वप्नसंभवं राजोवाच मयातुस्वपितादृष्टोनरकेथगतोद्विजाः १७ तारयस्वेतिमांतातअधोयोनिगतंत्वितः इतिब्रुवाणः सतदामयादृष्टःपितास्वयं तदाप्रभृतिभोविप्रानांगशर्मलभामहे एतद्राज्यसुखंमह्यंनसुखायमतंतथा १९ अश्वागजारथाःसर्वेमामेतेरोचयंतिन कोशोपिनसुखायैतिनाकिंचित्सुखदंमम २० नदारानसुतामह्यंरोचयंतिद्विजोत्तमाः किंकरोमिक्वगच्छामिशरीरंमेतुदह्यते दानंव्रतंतपोयोगंयेनवैममपूर्वजाः मोक्षयांतिचयेनैवतदेवकथयंतुमे किंतस्यजीवितंलोकेसुपुत्रस्यवलीयसः पितातुयस्यनरकेतस्यजन्मनिरर्थकम् २३ ब्राह्मणाऊचुः पर्वतस्यमुनेरत्रआश्रमोनिकटेनृप गम्यतांराजशार्दूलभूतंभव्यंविजानतः २४ तेषाश्रुत्वाततोवाक्यंवैखानोराजसत्तमः जगामतत्रयत्रासावाश्रमेपर्व

तोमुनिः २५ ब्राह्मणैर्वेष्टितस्तत्रपूजाभिश्चसमंततः आश्रमोविपुलस्तस्यमुनिभिःसन्निषेवितः २६ ऋग्वेदै
श्चयजुर्वेदैःसामाथर्वणकोविदैः वेष्टितोमुनिभिस्तत्रद्वितीयइवपद्मजः २७ दृष्ट्वातुमुनिशार्दूलंराजावैखानसस्तदा
जगामचावनींमूर्द्धादण्डवत्प्रणिपत्यच २८ पप्रच्छकुशलंतत्रसप्तस्वंगेष्वसौमुनिःराज्येनिष्कंटकत्वंचराजसौख्य
समन्वितं २९ राजोवाच तवप्रसादाद्धोविप्रकुशलंत्वंगसप्तके भवनेष्वनुकूलत्वंकोशलेष्वप्यविघ्नता ३० म
यास्वप्नेष्वद्यदृष्टोजनकोदुर्गतिंगतः केनापिव्रतदानेनमोक्षोभवतितस्यवै ३१ एतंमेसंशयोब्रह्मन्हृद्दोलांसमुपा
गतः एतच्छ्रुत्वानृपवचः पर्वतोमुनिसत्तमः ३२ ध्यानास्तिमितनेत्रोसौभूतंभव्यंविचिंतयत् मुहूर्त्तमेकंध्यात्वा
चप्रत्युवाचनृपोत्तमं ३३ मुनिरुवाच जानेहंतस्यराजेंद्रपितुस्तेपूर्वकर्मणः तवाद्यजन्मानिपिताक्षात्रियस्सुसमा
हितः ३४ कामासक्तेनकस्याश्चिदृतुभंगःकृतःस्त्रियः त्रायस्वमेतिजल्पंत्याऋतुदानान्नराधिप ३५ तेनैवतव
पित्रावैभग्नंतदृतुदानकं कर्मणातेनसततंनरकेपतितस्त्वयं ३६ राजोवाच केनैवव्रतदानेनमोक्षस्तस्यमहामु
ने निरयात्पापसंस्थानात्तन्ममाचक्ष्वपृच्छतः ३७ मुनिरुवाच मार्गशीर्षेसितेपक्षेमोक्षानामेतिनामतः सर्वै
स्तुतद्व्रतंकृत्वापित्रेपुण्यंप्रदीयतां ३८ तस्याःपुण्यप्रभावेणमोक्षस्तस्यभविष्यति मुनेर्वाक्यंततःश्रुत्वानृप स्वगृह
मागतः ३९ आग्रहायणिकःकृच्छ्रात्प्राप्तोभरतसत्तम अंतःपुरचरैःसर्वैःपुत्रदारैस्तथानृपः ४० व्रतंकृत्वावि
धानेनपुण्यंदत्तंनृपायतत् तस्मिन्दत्तेतदातत्रपुष्पवृष्टिरभूद्दिवः ४१ वैखानसपितातत्रगतःस्वर्गेस्तुतोगणैः रा
जानमंतरिक्षाच्चविप्रलोप्यभ्यभाषत ४२ स्वस्तिस्वस्तीतिपुत्रत्वामित्युक्त्वासदिवंगतः एवंयःकुरुतेराजन्मोक्षा
मेकादशीमिमां ४३ तस्यपापंक्षयंयातिमृतोमोक्षमवाप्नुयात् नातःपरतराकाचिन्मोक्षदाविमलाशुभा ४४ पुण्य
संख्यांतुराजेंद्रनजानेहंपरंतप पठनाच्छ्रवणात्तस्यावाजपेयफलंलभेत् चिंतामणिसमाह्येषास्वर्गमोक्षप्रदायिनी४५

इतिब्रह्मांडपुराणेमार्गशीर्षशुक्लपक्षेमोक्षैकादशीमाहात्म्यंसमाप्तम् ॥

अस्यामेवैकादश्यांवह्निपुराणोक्तंसुनामद्वादशीव्रतं हेमाद्रौ अंबरीषउवाच कथंसुनामभिर्देवोद्वादश्यांमुनि सत्तम पूजितःकेशवोमर्त्यैर्मुक्तिकामफलार्थिभिः वसिष्ठउवाच शृणुष्वैकमनाभूपसुनामद्वादशींशुभांसर्वपापहरां स्वर्ग्यांभुक्तिमुक्तिप्रदायिकां मनसापिचिकीर्षतिद्वादशींयेनरोत्तमाः तेपिघोरंनपश्यंतिपुनःसंसारसागरं आद्यं सर्वव्रतानांतुवैष्णवानांनृपोत्तम नरैःस्त्रीभिश्चकर्त्तव्यंविष्णोस्तुष्टिकरंपरं मार्गशीर्षेशुभेमासिशुक्लपक्षेघृतंव्रतः प्रथमंचैवगृह्णीयाद्द्वादशींविधिनानरः मनोवाक्कायचेष्टाभिः सुविशुद्धोजितेंद्रियः दशम्यांनियतंस्नात्वाप्रणिपत्यजनार्दनं हविष्यान्नकृताहारः शुचिर्भूत्वाभवेद्व्रती उपलिप्तेशुचौदेशेभक्षयेदंतधावनं उपोष्यैकादशींसम्यक्पूजयित्वाजनार्दनं सुनामद्वादशींदेवअहंभोक्ष्येपरेहानि एवंसंकल्प्यनियमंप्रणम्यगरुडध्वजं दशम्यामेकभक्ताशीसंयतःसंवसेन्निशि एकादश्यांततःप्रातरेकचित्तःसमाहितः पूर्वंसंपूजयेत्सूर्यंततोदेवंप्रपूजयेत् देवंविष्णुं नमस्तेदेवदेवेशनमस्तेभक्तवत्सल भास्करायनमस्तुभ्यंरवयेर्कायभानवे नमःसूर्यायदेवायनमस्तेसप्तसप्तये एकस्मैहिनमस्तुभ्यंएकचक्ररथायच ज्योतिषांपतयेनित्यंसर्वतेजोहरायच दिवाकरनमस्तेस्तुप्रभाकरनमोस्तुते एवंसंपूज्यविधिवत्पुष्पधूपानुलेपनैः दीपैर्वस्त्रैःसुनैवेद्यैस्ततोविष्णुगृहंव्रजेत् नैवेद्यंहरयेदद्यात्फलमोदकफाणितैः गीतवाद्यैर्हरिंहृष्टः प्रणम्यचमुहुर्मुहुः एवंपूजांहरेःकृत्वाद्विजंज्ञानप्रदायकं पूजयेदंतरंनास्तिविप्रकेशवयोरपि ततोव्रणंसमालभ्यचंदनेननवंघटं स्रग्विणंतोयपूर्णंचन्यसेद्देवस्यसन्निधौ सुनीलंमौक्तिकाख्यंचवज्ररत्नंसुवर्णकं न्यस्यगर्भेसुवस्त्रंतुपूजयेत्तत्रकेशवं यस्यरोम्णिस्थितामेघाः सर्वेसविषपन्नगाः सागराःकुक्षिदेशस्थाःस्तोत्रायातुजगत्पतिः वनस्पतिरसोदिव्यःसर्वगंधेषुचोत्तमः घृतेनदेवसं-

मिश्रोधूपोयंप्रतिगृह्यतां केशवःकेशिहादुष्टकंसदैत्यनिषूदनः सर्वकामप्रदोदेवःसमेपापंव्यपोहतु एवमभ्यर्च्यदेवेशंप्रणिपत्यक्षमापयेत् द्वादश्यांगंधतोयेनस्नापयित्वेहमाधवं सर्वपापविनिर्मुक्तोवैष्णवींलभतेतनूं कृताभिषेकः पुण्यात्मासम्यगभ्यर्च्यकेशवं नवसूतांतथाधेनुंब्राह्मणायोपपादयेत् . केशवः प्रीयतांदेवः केशिहंतामहाद्युतिः सतुमेभगवान्प्रीतइष्टान्कामान्प्रयच्छतु एवंप्रदक्षिणंकृत्वाशृणुतस्यापियत्फलं त्रिंशदव्दकृतंपापंहित्वासत्रिविधंनरः षष्टिवर्षसहस्राणिस्वर्गेमोदातिदेववत् यदाकालादिहायातिसधर्मव्रतवान्भवेत् अभावादथधेनूनांतन्मात्रांकल्पयेत्ततः तत्फलंहिविनिर्दिष्टंयथाशक्त्यातुदक्षिणा भक्त्यैवफलमाप्नोतिभक्तिरेवात्रकारणं पौषेचैवतुमासेचकुर्याद्देवंनरोत्तमः समाहितमनाभूत्वारसधेनुप्रदायकः आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्यतत्प्रोक्तंतेननारायणःस्मृतः नारायणःप्रीयतांमेदेवदेवोनरःसदा इष्टकामप्रदोनित्यं समेपापंव्यपोहतु ततःप्रदक्षिणंकृत्वाब्राह्मणान्भोजयेत्ततः एवंहिक्रियमाणस्यतस्यपुण्यफलंशृणु षष्टिवर्षकृतंपापंस्वल्पंवायदिवाबहु हित्वास्वर्गंसमाप्नोतिवर्षाणामयुतंशुभं माघस्यैवतुमासस्य द्वादशींशुक्लपक्षतः यः क्षिपेद्विशुचिर्भूत्वाएकचित्तःसमाहितः स्नापयेत्पूजयेन्नित्यंब्राह्मणानांचतर्पणे प्रदानेनृपशार्दूलइमंमंत्रमुदीरयेत् मालक्ष्मीश्चपुरात्रेयीभगिनीशशिनोनुजा धनस्त्वमसितस्यास्तुसर्वकामदमाधव प्रीयतांदेवदेवोमेमधुकैटभसूदनः कंसहाकेशिहंताचममपापंव्यपोहतु एवंयःकुरुतेनित्यंतस्यपुण्यफलंशृणु यावजन्मकृतंपापंहित्वासर्वमशेषतः दिव्यवर्षसहस्राणिस्वर्गेवसतिषोडश गुडधेनुप्रदोमाघेइहायातःसदासुखी भवेद्राजानिरातंकःसवैश्वर्यसमन्वितः तत्रविष्णुपरोभूत्वाक्रमान्मोक्षमवाप्नुयात् फाल्गुनामलपक्षस्यद्वादश्यांनियतःशुचिः पूजयित्वा विधानेनगंधपुष्पादिनाहरिं तिलधेनुंततोदद्याद्वृषंवापिसुभक्तितः मंत्रेणानेनराजेंद्रगोविंदःप्रीयतामिति गवांभक्तो

सिगोस्वामीगोवासोगोकृतालयः सर्वकामप्रदोनित्यंसमेपापंव्यपोहतु ततःप्रदक्षिणीकृत्यशृणुपुण्यंयथातथा वली
वर्दसहस्राणांदशानांधुरवाहिनां दत्तैस्तत्फलमाप्नोतिद्वादश्यांयद्भवेन्नृप दिव्यवर्षसहस्राणिस्वर्गेतिष्ठतिदेववत्
चैत्रस्यद्वादशींशुक्लांसमुपोष्यनृपोत्तम स्नात्वासंपूजयेद्विष्णुंजगतींतरचारिणं पूर्वोक्तविधिनास्नात्वागो
मूत्रैर्गोमयेनवा स्नापयित्वामृतश्चैवपंचभिर्गंधसंयुतैः जलैःपश्चात्प्रपूज्यैवंगंधधूपविलेपनैः पुष्पवासोभि
रेवंहि मंत्रेणानेनवुद्धिमान् व्यापकस्त्वंहिभगवान्साधूनांरक्षणायच दुर्वृत्तांश्चविनिर्जेतुमसिविप्ररतोह
रिः विष्णुर्भवतुमेप्रीतो जिष्णुर्देवःसनातनः सर्वपापविनाशायविष्णुर्मेप्रीयतामिति मधुधेनोरभावाच्चश
क्तितःपात्रमेवच दत्त्वायत्फलमाप्नोतितदिहैकमनाःशृणु पात्रंमधुयुतंपूर्वमिहजन्मनिसांप्रतं वर्त्ततेसक
लंहित्वास्वर्गलोकेमहीयते वैशाखस्यतुमासस्यपूजयेन्मधुसूदनं मासस्यद्वादश्यांप्रकरणात् पूर्वोक्तवि
धिनाराजन्सौवर्णंमधुसूदनं जलकुंभेतुसंस्थाप्यमंत्रेणानेनपूजयेत् एकार्णवेजलेधातुर्हतावेदाःपुराहरे मधुना
निहतःसोपितेनासिमधुसूदनः घृतधेनुमथोदत्त्वाब्राह्मणान्भोजयेचतः ततःप्रदक्षिणाःकुर्याद्विप्रंदत्त्वातथैवगां
एवंतुक्रियमाणस्यतस्यपुण्यफलंशृणु कपिलायाःसहस्रस्यसम्यग्दत्तस्यपुष्करे यत्फलंतदवाप्नोतिभक्तियुक्तो
नसंशयः यावदिंद्रोवसेत्स्वर्गेतावदेवसतिष्ठति ज्येष्ठस्यैवतुमासस्यशुक्लपक्षेतुद्वादशीं पूजयेद्विधिवद्भक्त्यास
मुपोष्यात्रिविक्रमं जलधेनुमथोदत्त्वाविप्रायनियतःशुचिः यज्ञभागभुजोदैत्यान्सन्निहत्यक्रमैस्त्रिभिः त्रैलोक्यमाहृ
तंतस्मात्तेनासित्वंत्रिविक्रमंत्रिविक्रमंत्रिलोकेशंप्रीणयामित्रिविक्रमं ततःप्रदक्षिणंकृत्वाब्राह्मणेभ्यश्चदक्षिणां दत्त्वा
संभोजयेचांस्तुशृणुतस्यापियत्फलं वाजपेयस्ययज्ञस्यसम्यगिष्टस्यपार्थिव तत्फलंलभतेमर्त्यःपरत्रचसुखीभवेत्
वामंनतुतथाषाढ समुपोष्यप्रयत्नतः उद्दिश्येतिशेषः द्वादश्यांनियताहारोवामनंतत्रपूजयेत् हितायसर्वदेवाना

मादित्यःकामदोयथा तथात्वंभवमेदेववामनोवालिवंधनः तिलधेनुंततोदद्यात्वामनःप्रीयतामिति तदभावात्तथापात्रंयथाशक्त्यासदक्षिणां पात्रंतिलपात्रं पूर्वजन्मकृतंपापमिहजन्मकृतंचयत् तत्सर्वंविनिहत्याशुपरत्रैवशुभानिच श्रावणस्यतुमासस्यद्वादश्यांशुक्लपक्षतः यःक्षिपेन्नियतोभूत्वासमुपोष्यजनार्दनं समर्चयेद्यथाशक्तिपूर्वोक्तविधिनाततः धेनुंसर्वगुणोपेतांब्राह्मणायनिवेदयेत् मंत्रेणानेनराजेंद्रपुराणविहितेनच समासाद्ययतोलक्ष्मीं लोकेभ्यःक्षीरसागरे स्वपितिश्रावणेमासिश्रीधरोसिजगत्पते श्रावणेश्रीधरोदेवःश्रीवत्सःश्रीनिकेतनः प्रीयतांहिश्रियःकांतो गतिमिष्टांददातुमे गवांदशसहस्रेणपात्रदत्तेनयत्फलं सकलंलभतेमर्त्योभक्तियुक्तोनसंशयः स्वर्गेसुविपुलान्भोगान्भुनक्तिसुरराडिव तेनैवाविधिनाराजन्मासेभाद्रपदेतथा समुपोष्यनरोभक्त्याहृषीकेशंप्रपूजयेत् मुक्ताधेनुंततोदद्याद्यथाविभवविस्तरात् हृषीकाणींद्रियाण्याहुस्तेषामीशोजगत्पतिः करोतिकर्त्तृभूतोसौहृषीकेशोभवास्ततः देवदेवंहृषीकेशंभूतेषुप्रभवाप्ययं प्रीणयामिसुसंप्रीतोममपापंव्यपोहतु एवंप्रदक्षिणंकृत्वा शृणुतस्यापियत्फलं इहजन्मकृतंपापंपूर्वजन्मकृतंचयत् सर्वंतद्भस्मासात्कृत्वाविष्णुलोकेमहीयते द्वादश्यां समुपोष्यैवंपद्मनाभंतथाश्विने पूजयेद्विधिवद्भक्त्यागंधधूपविलेपनैः गंधधेनुंततोदद्यात्कर्पूरागुरुचंदनैःकुंकुमेनहिराजेंद्रवित्तशाठ्यंविवर्जयेत् एकार्णवेगतेतोयेस्वपतोयस्यवेधसः निवासायाभवन्नाभ्यांपद्मनाभोसिहेच्युत प्रीयतांपद्मनाभोमेदुष्कृतंचोपशाम्यतु इत्युक्त्वातंसमभ्यर्च्यदद्याद्धेनुंद्विजातये इत्येवंक्रियमाणस्यतस्यपुण्यमतःशृणु सप्तजन्मकृतंपापंस्वल्पंवायदिवाबहु दग्ध्वातत्सकलंभूपविष्णुलोकंसगच्छति कार्त्तिकस्यतुमासस्यएकादश्यामुपोषितः प्रसुप्तंबोधयेद्रात्रौश्रद्धाभक्तिसमन्वितः नृत्यैर्गीतैस्तथावाद्यैर्ऋग्यजुःसाममंगलैः वीणापणवशब्दैश्चपुराणश्रवणेनच वासुदेवकथाभिश्चस्तोत्रैरन्यैश्चवैष्णवैः सुभाषितैरिंद्रजालैर्भूमिशोभाभिरेवच

पुष्पैर्धूपैश्चनैवेद्यैर्दीपवृक्षैश्चशोभनैः होमैर्भक्ष्यैरपूपैश्च फलैःशाकैश्चपायसैः इक्षोर्विकारैर्मधुनाद्राक्षाक्षाटैःसदाडिमैः अक्षोटंमदनफलाकारांस्निग्धंमधुरफलं अखोटइतिप्रसिद्धं कुठेरकस्यमंजर्यामालत्यालवणेनच कुठेरकार्जकः हृद्याभ्यांश्चेतरक्ताभ्यांचंदनाभ्यांचसर्वदा कुंकुमालक्तकाभ्यांचरक्तसूत्रैः सकंकणैः तथानानाविधैःपुष्पैर्द्रव्यैर्वाविक्रयाहृतैः तस्यांरात्र्यांव्यतीतायांद्वादश्यामरुणोदये स्नात्वानदीजलैःपुण्यैः प्रतिमांस्नापयेत्ततः उत्थितांचपरांरम्यांताम्रींरौप्यांसुवर्णजां वैष्णवीप्रतिमायत्रचेद्भवेच्चित्रलेखिता तत्रस्नानादिपूजाचवैद्यांकार्याचवैष्णवे आदौघृतेनतैलेनमधुनातदनंतरं दध्नाक्षीरेणच तथापंचगव्येनशास्त्रवित् उद्वर्तनंमाषचूर्णमसूरदलकानिच लोध्रंकालीयकंचैवतगरंवर्णकंतथा कालीयकंपीतचंदनवर्णकुंकुमं सर्षपाश्चप्रियंगुश्चमातुलुंगरसस्तथा सर्वौषध्यःसर्वगंधाःसर्ववीजानिकांचनं मंगलानियथालाभंरत्नानिवहुशोदकं हस्तिदंतोद्धृतामृच्चवृषच्छृंगोद्धृतातथा नदीतीराहृतास्थानाद्वल्मीकात्संगमाद्ध्रदात् इंद्रस्थानाच्चसरसस्तदापर्वतमस्तकात् इंद्रस्थानंयत्रेंद्रयष्टिरारोपिता एताभिःस्नाप्यदेवेशं दद्याद्गोरोचनांशुभां तथाचकलशादेयायथाप्राग्वत्स्वलंकृताः जातीपल्लवसंयुक्ताःसफलाश्चसकांचनाः पुण्याहवेदशब्देनवीणावेणुरवेणच शब्देनमधुरेणैवसूतमागधवंदितां एवंसंस्नाप्यगोविंदंस्वनुलिप्तंस्वलंकृतम् सुवाससंपूजयेत्तंसुमनोभिश्चकुंकुमैः दीपैर्धूपैर्मनोज्ञैश्चपायसेनतुभूरिणा मात्रारत्नप्रदानैश्चहोमैःपुष्पैःसदक्षिणैः वासोभिर्भूषणैर्हृद्यैर्गोभिरश्वैर्गजैरपि ब्राह्मणाःपूजनीयाश्चविष्णोःराद्याःसमूर्त्तयः विष्णोरात्रौप्रसुप्तस्यदामोदरगतंयतः ब्रह्मांडस्यतुतेनासिदामोदरइतिस्मृतः दामोदरइमांधेनुंगृह्णातुस्वयमेवहि द्विजरूपेणतेविष्णो प्रकृत्येषासनातनी विभक्तिलोपश्चार्षः इत्येवंपृथिवीदानफलंप्राप्नोतिमानवः सुवर्णस्यमहाधेनुंदत्त्वानृपवरोत्तम

हत्वापापान्यशेषाणिशतजन्मांतराणिवै वैष्णवंलोकमाप्नोतिमानवःक्षीणपातकः सुवर्णस्यमहाधेनुंदत्त्वानृपवरोत्तम हत्वापापान्यशेषाणिशतजन्मांतराणिवै वैष्णवंलोकमाप्नोतियावदिंद्राश्चतुर्दश सम्यगत्रव्रतेचीर्णेसप्तजन्मानुगंफलं ददातिभगवान्विष्णुःक्रमान्मोक्षंनरेश्वर ब्राह्मणान्भोजयेद्भक्त्याभक्ष्यैरुच्चावचैरपि उच्चावचमनेकविधं ततःप्रदक्षिणांकृत्वायथाशक्त्याचदक्षिणां कलशान्वैद्वादशभ्योब्राह्मणेभ्य प्रदापयेत् वस्त्रेणवेष्टितग्रीवान्हेमगर्भोपशोभितान् दधिक्षीरयुतांश्चैवसगुडान्नृपभूरिशः भक्तिर्यथातथादद्याद्भक्तिरेवात्रकारणं प्रसंगेनापियोराजन्सुनामद्वादशींनरः करोतिपुण्यभागीसयथादैत्योभवद्बलिः एवंयःकुरुतेराजन्सुनामद्वादशींनरः राजसूयस्ययज्ञस्यफलंसमधिकंभवेत् सर्वदानेषुयत्पुण्यंयच्चपुण्यंतपोवने सर्वतीर्थेषुयत्पुण्यंतत्सर्वंसमवाप्नुयात् गावोद्वादशदातव्यावस्त्रयुग्मानिकांचनं अलाभेचैवगामेकांपात्रंवास्वर्णसंयुतं समासेनतथाप्येवंचंचलंतीवतं यतः वहुविघ्नानिधर्मस्यकर्त्तुश्छिद्रंप्रजायते एतद्ज्ञात्वातुमेधावीव्रतेयुज्येतयत्नतः नतस्यावित्तलोभोस्तिभक्तिग्राह्योस्तिकेशवः अनेनविधिनायस्तुद्वादशींप्रतिवत्सरं कृत्वानरःपरंयाति विष्णुलोकमनामयं सुनामद्वादशीचैषाव्रतानामुत्तमानृप आद्यानरैस्तुकर्त्तव्यातोषयद्भिर्जनार्दनं यश्चैनांकीर्त्तयेत्पुण्यंशृणुयाद्द्वादशींनरः

तावुभौगच्छतःस्वर्गं कर्त्ताविष्णुपुरंव्रजेत्

इतिवह्निपुराणोक्तंसुनामद्वादशीव्रतं अथैकादशीव्रतोद्यापनं तदुक्तं हेमाद्रौभविष्योत्तरे ॥ नारदउवाच ॥ भगवन्देवदेवेशपुराणपुरुषोत्तम किंचित्पृच्छामिसंदेहंकारुण्यात्कथयप्रभो अखंडद्वादशीयासौपुराणेकथितात्वया सासर्वव्रतखंडानांपूरणायकिमुच्यते ययासर्वव्रतानांतुवैकल्यंपूर्यतेप्रभो तस्याउद्यापनविधिर्नसम्यक्कथितस्त्वया नतद्व्रतस्यवक्तास्तिश्रोताचापिसुदुर्लभः विष्णुरुवाच मार्गशीर्षेशुभेमासिशुक्लपक्षेशुचिर्व्रती

दशम्यांकेशवंपूज्यहविष्यान्नकृताशनः निर्वर्त्यपश्चिमांसंध्यांगृह्णीयाद्दंतधावनं उपस्पृश्ययथान्यायंमंत्रमेतदुदीरयेत् कृष्णविष्णोहृषीकेशकेशवक्लेशनाशन करिष्येहंव्रतारंभंभवेद्यावद्दिनत्रयं इतिसंप्रार्थ्यगोविंदंमंत्रेणादौततःस्वपेत् व्रतग्रहणमंत्रः ततःप्रभातेचोत्थाययथोक्तंव्रतमाचरेत् चतुर्भिःपारणंयामैःकथितंयद्द्विजोत्तमतत्पात्रदानविधिनाभिद्यतेनाहिपारणं एवंद्वादशनिर्वर्त्यद्वादशीःपद्मजोद्भव उद्यापनंततःकुर्य्याद्विधिमंत्रपुरस्कृतं एकादश्यांशुचिःस्नातः शुद्धांबरधरोव्रती सर्वतीर्थेषुयत्पुण्यंसर्ववेदेषुयत्फलं त्वत्पादपद्मतोयेनसर्वंमेभवतुप्रभोइतिस्नानमंत्रः स्नानंकृत्वाततोदेवंपूजयेद्गरुडध्वजं एकत्रमूर्त्तिसंपन्नंलक्ष्मीनारायणंप्रभुं यथाशक्त्याथकुर्वीतसौवर्णैरत्नभूषितं सहस्रशीर्षमंत्रेणस्नापयेद्गंधवारिणा मधुवातादिभिर्मंत्रैर्मधुनास्नापयेद्धरिं आप्यायस्वेतिमंत्रेणपयसास्नापयेत्ततः दधिक्राव्णेतिमंत्रेणदध्नातुस्नापयेत्ततः तेजोसीतिचमंत्रेणस्नापयेत्सर्पिषाप्रभुं मधुवातेतिमंत्रेणमधुनास्नापयेत्पुनः स्वादुपवस्वमनुनाततःशर्करयापिच एकीकृत्यततः सर्वंशर्कराखंडसंयुतैः स्नापयेत्परयाभक्त्याजयशब्दादिमंगलैः मापकर्णादिभिश्चूर्णैर्निघृष्टांप्रतिमांततःचंदनोशीरकर्पूरकुंकुमादिभिरर्चयेत् तैर्विलिप्यहरिंभक्त्याततोमंत्रमुदीरयेत् यथाशक्त्यामयादेवस्नापितश्चविलेपितःन्यूनातिरिक्तंतत्सर्वंलक्ष्मीनारायणःक्षमेत् अनुलेपनमंत्रः ततोवस्त्रयुगंश्रेष्ठमानीयपरिधापयेत् पीतंवालोहितंवापिश्वेतंनानाविचित्रितं परिधानंयथाशक्त्यातवदेवमयार्पितंन्यूनातिरिक्तंतत्सर्वंलक्ष्मीनारायणःक्षमेत्।परिधानमंत्रः परिधाप्यततोदेवंपुष्पैर्नानाविधैःशुभैःसंछाद्यपुष्पमालाभिर्मंत्रमेतदुदीरयेत् पुष्पैरपियथाशक्त्यापूजितोसिजनार्दन न्यूनातिरिक्तंतत्सर्वंलक्ष्मीनारायणःक्षमेत् पुष्पमंत्रः एवंकृत्वाविधानेनशय्यांचविनिवेदयेत् तूलीपर्यंकयुक्तांतुश्वेतप्रच्छदगंडकैः प्रतिपादसमानां वैचतुष्पादप्रतिष्ठितैः निवेश्यतत्रदेवेशंलक्ष्मीनारायणप्रभुं नैवेद्यानिनिवेद्यानिनानाभक्ष्ययुतानिच लेह्यान्यप्यवहार्याणिचोष्याणिचर्वणानिच पानकानिचवैयत्नाद्यास्मिन्देशेयथातथा तानिसर्वाण्युपादायदेवायविनिवेदयेत् फ

लनिचसुगंधीनिपक्वानिचनिवेदयेत् एवंनिवेद्यतत्सर्वंभक्त्यामंत्रमुदीरयेत् यथावित्तोपसंयुक्तंमयातवानिवेदितं लक्ष्मीनारायणविभोभक्त्यातत्प्रतिगृह्यतां इतिनैवेद्यमंत्रः देवस्यतुशिरःपूर्वंपादौपश्चात्प्रकल्पयेत् शिरःस्थानेततःकुंभंवारिपूर्णंमनोहरम् स्थापयेत्कर्करीयुग्मंसरत्नंवस्त्रभूषितं कर्करीगलंतिका स्थापयित्वातुतत्कुंभंततोमंत्रमुदीरयेत् यावत्पूजासमारब्धाचांचल्यंवर्जयेत्सदा भुक्त्वापीत्वातथाचम्यतोयेनानेनकेशव मद्भक्त्यापूजितोदेवस्वपत्वंसुसुखीस्वयं इतिस्वापनमंत्रः शय्योपचारंयत्किंचित्सर्वंवैविनिवेदयेत् शय्योपचारंस्रग्गंधादि यावत्पूजासमारब्धास्नानादिशयनांततः सघृतंगुग्गुलुंतावद्दहेद्देवाग्रतोनिशि ततोविप्रंसमानीयभार्ययासहितंशुभं सर्वदुर्लक्षणैर्हीनं सांगोपांगसमन्वितं वेदविद्याव्रतस्नातं पूजितंस्वकुलोद्भवैः देवस्याग्रेततोविप्रंभार्ययासहितंन्यसेत् प्राङ्मुखंविमलंशुद्धंभक्त्यातंपूजयेत्ततः वहुनाकिंप्रलापेनकथितेनेहनारद देवःसंपूजितोयद्वत्तद्वद्विप्रंप्रपूजयेत् विष्णुब्राह्मणयोर्भेदंनकदाचिद्विकल्पयेत् इतियेषांहृदिसदातेपूज्याश्चयतीश्वराः द्वादशान्यान्नवान्कुंभान्पूर्णान्शुद्धेनवारिणा स्थापयेद्देवपर्य्यंकेपरितःशुद्धचेतसा द्वादशैवतथागावः सवत्साःकांस्यदोहनाः क्षीरवत्यःसुशीलाश्चस्थापयेद्देवसन्निधौ अथवावित्तवैकल्येकुर्य्याद्गोत्रितयंनरः दद्यात्तुसम्यग्भुक्तायतत्राशक्तिमतोमता एकाप्यनुत्तमगुणातस्यस्याद्द्वादशाधिका स्ववित्तशक्त्यायत्किंचिद्दातुमुत्सहतेनरः तत्सर्वंद्विजदेवाभ्यांसान्निधौसंप्रकल्पयेत् उपस्कराणिदिव्यानिछत्रोपानत्प्रपादुकाः गोसंख्यादिकृतंसर्वंदानंत्वस्मिन्प्रकल्पयेत् यदादानेतुगौरेकाकल्प्याशक्तिप्रपूर्वकं सासंपूर्णातुकर्त्तव्यावत्सेनसहपूजिता सुवर्णश्रृंगीरौप्यखुराघंटाभरणभूषिता तद्वर्णवस्त्रसंवीतावत्सेनसहपूजयेत् एवंनिर्वर्त्यविधिनादानपूजादिनासमं देवब्राह्मणयोर्भक्त्या ततोविप्रंक्षमापयेत् एतद्गृहाणमेविप्र भार्ययासहितःप्रभो एतेनावाह्यतांविप्रं

तस्मिन्सर्वंनिवेदयेत् प्रतिगृहीतादाताचव्रतीविष्णुर्यथातथा मयादत्तमिदंसर्वंगृहाणत्वंद्विजोत्तम दाताचविष्णुर्भगवाननंतः प्रतिगृहीताचसएवविष्णुः तस्मात्त्वयादत्तमिदंचसर्वंप्रतिगृहीतंचमयाशुभाय ब्राह्मणप्रतिग्रहमंत्रः अन्येभ्योपियथाशक्त्यातस्मिन्कालेप्रदीयते दीनांधकृपणादिभ्यस्तदक्षयफलंभवेत् वित्तशाठ्यंनकुर्वीतसमग्रंफलमाप्नुयात् इत्यखंडव्रतस्यैषउद्यापनविधिःस्मृतः कथितस्तेमयावत्ससतस्यपुण्यफलंशृणु यावज्जगज्जलधिशैलचरादिमत्स्या तावज्जनोभवतिपुण्यफलोपभोक्ता तावच्चविष्णुभवनात्परिवर्ततेसावंतेह्ययंसपरमात्मनियातिविष्णौ ॥

इतिभविष्योत्तरोक्तअखंडद्वादश्यांव्रतोद्यापनविधिः अथभविष्योत्तरोक्तंधरणीव्रतम् ॥

युधिष्ठिरउवाच पदंतत्परमंगुह्यंसर्ववेदेषुपठ्यते सदेवः पुंडरीकाक्षः स्वयंनारायणोहरिः सयज्ञैर्विविधैरिष्टैर्दानैर्दत्तैश्चसत्तमः प्राप्यतेपरमोदेवो वासुदेवः सनातनः बहुवित्तेनभगवानृत्विग्भिर्वेदपारगैः प्राप्यतेतुसहायैश्चक्वचिद्यज्ञाःसुदुष्कराः वित्तेनचमहादानंदातुंकृष्णनशक्यते ।विद्यमानेपिनमतिःकुटुंबासक्तचेतसः तस्यमोक्षःकथंकृष्णसर्वथादुर्लभोहरे अल्पायासेनलभ्येतयेनदेवःसनातनः तन्मेसामान्यतोब्रूहिसर्ववर्णेषुयद्भवेत् श्रीकृष्णउवाच कथयामिपरंगुह्यंरहस्यंदेवनिर्मितम् धरण्यापिकृतंपूर्वंमज्जंत्यावसुधातले पृथिव्यांपार्थवोभावः सलिलेनातिवाहिता तस्मिन्सलिलसंलग्नेमहीप्रायाद्रसातलं साभूतधात्रीधरणीरसातलगताशुभा आराधयामासविभुंदेवंनारायणंपरम् उपवासव्रतैर्देवीनियमैश्चपृथग्विधैः कालेनमहतातस्याःप्रसन्नोगरुडध्वजःउज्जहार ।स्थितौचैमांस्थापयामाससोच्युतः युधिष्ठिरउवाच कोसौधरण्यासंचीर्णउपवासोयदूत्तम कानिव्रतानिचतथातन्मेत्वं

वक्तुमर्हसि श्रीकृष्णउवाच मासेमार्गशिरेराजन् दशम्यांनियतात्मवान् स्नात्वादेवार्चनंकृत्वाअग्निकार्य्यंयथाविधि शुचिवासाप्रसन्नात्माहव्यमंत्रसुसंस्कृतं भुक्त्वापंचपदंगत्वापुनःशौचंचपादयोः कृत्वाष्टांगुलिमात्रंतुक्षीरवृक्षसमुद्भवं भक्षयेद्दंतकाष्ठंतुततश्चाचम्ययत्नतः स्पृष्ट्वास्वांगानिसर्वाणिचिरंध्यात्वाजनार्दनं स्मृत्वार्घ्यपादयोस्तस्यकरतोयेनमानवः एवमुच्चारयेद्वाचंतस्मिन्कालेमहामते एकादश्यांनिराहारः स्थित्वाहमपरेहनिभोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत एवमुक्त्वाततःपश्चात्प्रभातेविमलेतथा स्नानार्थंसंगमेगत्वानदींप्राप्यसमुद्रगां इतरावाताडागंवागृहेवापियतात्मवान् आनीयमृत्तिकांशुद्धांमंत्रेणानेनमानवः धारणंपोषणंत्वत्तोभूतानांदेविसर्वदा तेनसत्येनमांपापंपापान्मोचयसुव्रते ॥ इतिमृत्तिकामंत्रः ॥ व्रह्मांडोदरतीर्थानिकरैःस्पृष्टानितेरवे भवंतिभूतानिसतांमृत्तिकामालभाम्यतः ॥ इतिसूर्यप्रार्थनामंत्रः ॥ त्वयिसर्वेरसानित्यंस्थित्वावरुणसर्वदा तेनमांमृत्तिकांप्लाव्यपवित्रंकुरुसर्वदा एवंरविमृदंतोयंप्रसाद्यात्मानमालिपेत् निष्कृष्यशेषमृदयाकुंडमालिख्यवैजले ततः स्नात्वानरःसम्यक्संध्यामावर्त्यवाग्यतः आचम्यावश्यकंकृत्वापुनर्देवगृहंव्रजेत् ततोराध्यमहायोगंदेवंनारायणंप्रभुं केशवायनमःपादौकटिंदामोदरायच ऊरूयुग्मंनृसिंहायउरःश्रीवत्सधारिणे कंठंकौस्तुभनाथायवक्षः श्रीपतयेतथा त्रैलोक्यविजयाये तिवाहूसर्वात्मनेशिरः रथांगधारिणेचक्रंशंकरायेतिवारिजं गंभीरायेतिचगदामभयंशांतिमूर्तये एवमभ्यर्च्यदेवेशंदेवंनारायणंप्रभुं ततस्तस्याग्रतःकुंभांश्चतुरःस्नापयेद्बुधः जलपूर्णान्समाल्यांश्चसितचंदनचर्चितान् चतुर्भिर्जलपात्रैश्चस्थगितान्रत्नसंयुतान् चत्वारस्तेसमुद्राश्चकलशाःपरिकीर्तिताः तेषांमध्येसप्तपीठंस्थापयेद्वस्त्रसंयुतं तस्मिन्सुवर्णंरौप्यंवाताम्रंवादारवंतथा पात्रंतोयभृतंकृत्वातस्यमध्येततोन्यसेत् सौवर्णंमत्स्यरूपेण कृत्वादेवंजनार्दनं वेदवेदांगसंयुक्तं श्रुतिस्मृतिविभूषितं भक्तैर्बहुविधै

राजन्फलैः पुष्पोपशोभितैः गंधैःपुष्पैर्मंत्रवरैरर्चयित्वायथाविधि रसातलगतावेदायथादेवत्वयाहृताः मत्स्यरूपेणतद्वन्मांभवादुद्धरकेशव एवमुच्चार्य्यतस्याग्रेजागरंतत्रकारयेत् यथाविभवसारेणप्रभातेविमलेपुनः चतुर्णांब्राह्मणानांचचतुरोदापयेद्घटान् पूर्वंतुगुरवेदद्याच्छंदोगेदाक्षिणंतथा यजुःशाखान्वितेदद्यात्पश्चिमंघटमुत्तमं उत्तरंकामतोदद्यादेषएवविधिक्रमः ऋग्वेदःप्रीयतांपूर्वः सामवेदस्तुदक्षिणः यजुषःपश्चिमोनाम्ना अथर्वाणोत्तरंतथा ताम्रपात्रैस्तुसलिलैः स्थापितान्कारयेद्घटान् ततस्तंजलपात्रस्थंब्राह्मणायकुटुंबिने तंसौवर्णंमत्स्यंदद्यादित्यर्थः दद्यादेवंमहाभाग ततःपश्चाच्चभोजयेत् ब्राह्मणान्पायसेनाग्र्यान्ततः पश्चात्स्वयंनरः भुंजीतभृत्यसहितोवाग्यतःसंयतेंद्रियः अनेनविधिनायस्तुद्वादशींक्षपयेन्नरः तस्यपुण्यफलंचाद्यशृणुसत्यवतांवर यदिवक्त्रसहस्राण्यांसहस्राणिभवंतिहि आयुश्चब्रह्मणस्तुल्यंभवेद्यदिमहाव्रतं तदातस्यफलंसंख्याकर्त्तुंशक्यंनवाभवेत् यःसकृद्द्वादशीमेनामनेनविधिनानृप सब्रह्मलोकमाप्नोतितत्कालंचैवतिष्ठति द्वादशद्वादशीशब्दोव्रतेष्वेकादशीपरः तत्कालंब्रह्मायुःकालमित्यर्थः ततस्तल्लयकालेतुअलयस्तिष्ठतेचिरं अलयःब्रह्मणासह श्रीविष्णौलयेकालेतिष्ठतीत्यर्थः पुनःसृष्टौभवेद्देवोवैराजंनामतःस्मृतः करोतिब्रह्मणोलोकंसमाप्नोतिनसंशयः ब्रह्महत्यादिपापानिजन्मांतरकृतानिच अकामतःकामतोवा तानिनश्यंतितत्क्षणात् इहलोकेदरिद्रोवाराज्यभ्रष्टोथवापुनः उपोष्यतुविधानेनमेश्वरोराज्यभाग्भवेत् मेश्वरोलक्ष्मीश्वरः वंध्यानारीभवेद्यातु अनेनविधिनाशुभा उपोषतिभवेत्तस्याःपुत्रःपरमधार्मिकः अगम्यागमनंयेनजानताजानताकृतं सइमांविधिमास्थायतस्मात्पापात्प्रमुच्यते ब्रह्मक्रियायालोपेनवहुवर्षकृतेनवा उपोष्येमांसकृद्भक्त्यावेदसंस्कारमाप्नुयात किंचात्रबहुनोक्तेनतदस्तिजगत्त्रये अप्राप्यंव्रतराजेनसत्यंसत्यंनसंशयः इहजन्मनिचारोग्यंधनंधान्यंवरास्त्रियः भवंतिविविधायस्तुउपोषतिविधानतः ॥

इतिश्रीभविष्योत्तरेधरणीव्रतेषुमत्स्यद्वादशीव्रतम् ॥

नारदीये द्वादश्यांमार्गशुक्लायांसाध्यव्रतमनुत्तमं भानुभौमस्तथाप्राणोनरोयामश्चवीर्यवान् निमिर्हयोनयश्चैवहंसो नारायणस्तथा विभुश्चापिप्रभुश्चापिसाध्याद्वादशकीर्त्तिताः पूजयेद्गंधपुष्पाद्यैरेतांस्तंडुलकल्पितान् ततोद्विजाग्र्यान्संभोज्यद्वादशात्रसदक्षिणान् दद्याद्धेनूश्चविसृजेत्प्रीयान्नारायणस्त्विति एतस्यामेवनिर्दिष्टंद्वादशादित्यसंज्ञितं व्रतंतत्रार्चयेद्धीमानादित्यान्द्वादशापिच धातामित्रोर्यमापूषाशक्रोंशोवरुणोभगः त्वष्टाविवस्वान्सविताविष्णुर्द्वादशईरिताः प्रतिमासंतुशुक्लायांद्वादश्यामर्चयेत्ततः वर्षंनयेद्व्रतांतेतुप्रतिमाद्वादशापिच हैमीःसंपूज्यविधिवद्भोजयित्वाद्विजोत्तमान् मधुरान्नैस्तुसंपूज्यप्रत्येकंप्रार्चयेद्व्रती एवंव्रतंनरःकृत्वाद्वादशादित्यसंज्ञकं सूर्यलोकंसमासाद्यभुक्त्वाभोगांश्चिरंनरः जायतेभुविधर्मात्मामानुषोरोगवर्जितः ततोव्रतस्यचीर्णस्यपुनरेतद्व्रतंलभेत् तत्पुण्येनरवेर्भित्वामंडलंचाद्विजोत्तम मूर्त्तिंनिधायसौवर्णींजनार्दनसमाह्वयां अभ्यर्च्यगंधपुष्पाद्यैस्तदग्रेभोजयेद्द्विजान् द्वादशप्रतिमासंतुनक्ताशीस्याज्जितेंद्रियः ततःसमांतेतांमूर्त्तिंसमभ्यर्च्यविधानतः गुरवेधेनुसहितांदत्वासंप्रार्थयेत्ततः सप्तजन्मसुयत्किंचिन्मयाखंडंव्रतंकृतं भगवंस्त्वत्प्रसादेनतदखंडमिहास्तुमे ततः संभोज्यविप्राग्र्यान्सखंडाज्यैस्तुपायसैः सौवर्णेनविमानेनयातिविष्णोःपरंपदम्

इतिनारदीयेमार्गशुक्लद्वादश्यांसाध्यव्रतंद्वादशादित्यव्रतमखंडद्वादशीव्रतंच

अथास्यामेवतारकद्वादशीव्रतं भविष्योत्तरे युधिष्ठिरउवाच अहमागस्करःपापः पृथिवीक्षयकारकःपरिपृच्छामि

गोविंदत्वांनमस्कृत्यपादयोः गुह्याद्गुह्यतरंब्रूहिव्रतांकिंचिदनुत्तमं तरामियेनपापौघंभीष्मद्रोणवधार्णवं श्रीकृष्णउवाच आसीत्पुरानृपोनाम्नाविदर्भायांकुशध्वजः सोंतःपुरसुतोपेतश्चक्रेराज्यमतंद्रितः जघानतापसंसोथप्रमादात्मृगयांगतः मृगहत्यांमहारण्येब्राह्मणंदैवमोहितः तेनकर्मविपाकेनदेहांतेरौरवंगतः तत्रासौयातनाघोराअनुभूयातिपीडितः तस्मादिहागतोमर्त्येरौद्रोविषधरोभवत् अदशत्सोपिराजेंद्रब्राह्मणंचरणेरुषा लगुडाहतःसपंचत्वंजगामद्विजसूनुतः विपन्नश्चततःसिंहोद्वितीयेभूत्सुदारुणः विदारितमुखोहिंस्रोनानासत्वभयंकरः जघानासौपुनःश्रेष्ठराजन्यंमृगयांगतं ततोसौबहुभिःशस्त्रैराजलोकैर्निपातितः पुनर्व्याघ्रोबभूवासौतृतीयेपिभवांतरे तीक्ष्णपादनखाघातैर्व्यापादितमृगान्वयः तेनापिवैश्योनिधनं नीतःकश्चिद्वनांतरे सनीतःकृमिराशित्वंलोकैःखातनिपातनात् संजातस्ताम्रदृग्रक्षोनखराहतजंतुभुक् जघानवालंचंडालादसौमृत्युमवाप्तवान् पंचमेमकरोजातःसमुद्रेतिभयंकरः स्त्रियंजघानतरुणींभर्तृकामामथागतां प्रभासेशंकरस्याग्रेशशांकग्रहणेनिशि तत्रापिवाडिशंदत्वाजाल्मैःप्राणैर्वियोजितः पुनःषष्ठेभवेजातःपिशाचःपिशिताशनः क्रूरश्छिद्रमतिःक्षुद्रोनृणांप्राणवियोजकः सौवतीर्णोनरस्यांगंशंकयामासकस्यचित् मंत्रेणरूपासिद्धेन चांतिकेनव्यसुःकृतः सप्तमेतुभवेजातोदुर्निरीक्ष्यवपुर्भृशं तीक्ष्णदंष्ट्रःकरालाक्षोमांसशोणितभोजनः दिग्वासामरभूमीषुपापिष्ठोब्रह्मराक्षसः सराष्ट्रंगौर्जरंशून्यंसर्वंचक्रेवधादिषु आक्रम्यभीमसेनेनराज्ञाराक्षसशत्रुणा समारोप्यधनुःसंख्येब्राह्मास्त्रेणनिपातितः भूयोभवद्व्याघ्रसमःश्वजन्मन्यष्टमेतुसः वनेचरोहिक्षुण्णांगोव्रणार्त्तोनिधनंगतः नवमेजंबुकेजातः सचवीभत्समांसभुक् लौल्यात्सनिधनंप्राप्तःश्मशानेचितिवह्निना दशमेप्यभवद्गृध्रस्तीक्ष्णतुंडोंडजोमहान् पूतिमांसवसाहारोदुष्टदृष्टिःसदारुणः सितरक्तासितवपुःकर्बुरोलोकनिंदितः सहतस्तीक्ष्णभल्ले

नमातंगेनधनुष्मता एकादशेतुचांडालोयवमध्योतिभीषणः ऊर्द्धकेशोतिरक्ताक्षो जातः कृष्णतनुर्दृढः पापोधर्मध्वजोभक्ष्योदेवतामाल्यभुक्ततः सदंडपाशकेनोच्चैर्वृक्षाग्रेष्ववलंबितः द्वादशेतुपुनर्जातःपुष्कसःक्लेशभोजनः पुष्कसोवाग्विलगतोव्याधिनाविनिपातितः तेनचासीत्कृतंपूर्वंतारकद्वादशीव्रतं तस्यप्रभावाज्जातोसौदुष्टयोनौपुनःपुनः अवापशीघ्रंपंचत्वंसंसारभवसागरे पुनरेवाभवद्राजाविदर्भायांसधार्मिकः भूयश्चोपोषितानेनतारकद्वादशीशुभा पश्यतावतमाहात्म्यंजातौजातौपुनःपुनः तस्याव्रतप्रभावेनभुक्त्वाराज्यमकंटकं प्रापविष्णुपुरेस्थानंयावदाभूतसंप्लवं ॥ युधिष्ठिरउवाच ॥ कथमेतद्व्रतंकृष्णकर्त्तव्यंपुरुषोत्तमैः स्त्रीभिर्वाभर्तृवाक्येनस्नानदानजपादिकम् ॥ श्रीकृष्णउवाच ॥ मार्गशीर्षसितेपक्षेगृहीत्वाद्वादशीव्रतं अकृत्रिमजलेस्नानमपराह्णेसमाचरेत् प्रणम्यभास्करायादौकृत्वादेवार्चनंयथा होमंचतावत्स्थातव्यंयावदस्तमितोरविः ततोमुक्ताफलैःपुष्पैर्गंधधूपविलेपनैः सजलंशीतलंकृत्वासहिरण्यंशुभैःफलैः रम्येताम्रमयेपात्रेजानुभ्यांधरणींगतः पूर्वमुखःप्रदोषाग्नेमूर्न्द्धिकृत्वार्घ्यभाजनं भूमौमंडलकंकृत्वागोमयेनसतारकं चंदनेनसमालिख्यध्रुवंहिगगनोन्मुखः सहस्रशीर्षामंत्रेणभूमौभक्त्याशनैःशनैःतारकाणांकुरुश्रेष्ठदद्यादर्घ्यमतंद्रितः पर्य्युक्ष्यधूपमुत्क्षिप्यदद्याद्विप्रायदक्षिणां क्रमेणसर्वंनिर्वर्त्यभोज्यंभोज्यंनिशागमे मार्गशीर्षेखंडखाद्यैःपौषेसौहालिकैः शुभैःमाघेतिलान्नकृसरैःफाल्गुनेतिलपूपकैः वसंतेमोदकैर्दिव्यैर्वैशाखेखंडवेष्ठकैः ज्येष्ठेसक्तुभृतैःपात्रैराषाढेगुडपूपकैः श्रावणेमधुशीर्षैश्चनभस्येपायसेनच घृतपूर्णैराश्वयुजेकासारैःकार्त्तिकेपुमान् एभिर्द्वादशभिर्भक्ष्यैर्भोजयित्वाद्विजातये भुंजीतभक्त्याराजेंद्रपश्चाद्देवंक्षमापयेत् समाप्तेतुव्रतेकुर्य्याद्राजतंतारकागणं पैष्टंवापूर्वविधिनापूजयित्वाक्षमापयेत् कुंभाद्वादशदातव्याः सोदकामोदकान्विताःब्राह्मण्याःपरिधानंचपद्मरागंसकुंकुमं ब्राह्मणस्यतुगांदद्याच्छय्यां-

पुष्पोपशोभितां चोलकंचोपवीतंचपुष्पंदत्त्वाक्षमापयेत् एवंचविधिनाराजन्यः करोतिव्रतंनरः नारीवाभरतश्रेष्ठभक्तिभावपुरःसरं नक्षत्रलोकंव्रजतिविमानेनार्कवर्चसा अप्सरोगणगंधर्वयक्षविद्याधरादिभिः सदाभर्त्रास्वर्गलोकेपूज्यमानादिवौकसः वसेत्कल्पायुतंयावत्पुनर्विष्णुपुरंव्रजेत् एतद्व्रतंपुराचीर्णंशच्याराज्ञ्याश्रियोमया सरस्वत्यापुनःस्वर्गेउर्वश्यादेवदत्तया अन्याभिरपिनारीभिः पुरुषैश्चपृथग्विधैः चीर्णमेतद्व्रतंपार्थसर्वपापभयापहं ॥ जन्मांतरेष्वपिकृतानिदहत्यघानि यासंदधात्यहरहस्ससुतोपयोगात् साद्वादशीजगतितारकनामधेयातन्नास्तियन्नविदधातिकृतामनुष्यैः

॥ इतिभविष्योत्तरेतारकद्वादशीव्रतं अस्यामेवमल्लद्वादशीव्रतम् ॥

युधिष्ठिरउवाच शंखचक्रगदापाणेश्रीवत्सगरुडध्वज ब्रूहिमेमल्लद्वादश्याविधानंदेवकीसुत ॥ श्रीकृष्णउवाच ॥ यदाभांडीरन्यग्रोधेरमामियमुनातटे गोपालमध्येगोवत्सैरष्टवर्षोस्मिलीलया कंसासुरवधार्थायमथुरोपवनेतथा अवालोवालरूपेणगोपमल्लैर्वलोत्कटैः तएवमल्लगोपाश्चवलेनसहकानने आस्फोटयंतिनृत्यंतित्रिदिवेत्रिदशाइव सुभद्रेमंडलेभद्ररंगवर्द्धनगोभटाः यक्षेंद्रमल्लइत्यादितेषांनामानिगोकुले गोपीनामपिनामानिप्रधानानिनिबोधमे गोपालीपालिकाधन्याविशाखीचधनाष्टिका राधानुराधासोमाभातारकादशमीतथा इत्येवमादिभिरहमुपविश्यवरासने पूजितोस्मिशुभैर्गंधैर्दधिदुग्धाक्षतैस्तथा शतानित्रीणिषष्टीनिमल्लानांपूजयंतिमां मालित्यश्चसुरामांसैरंगजागरनर्तकैः मल्लयुद्धैर्बहुविधैर्वाद्यैर्मल्लभटैःशुभैः भक्ष्यैर्भोज्यैस्तथापानैर्दधिदुग्धघृताशनैःगोदानैर्वृक्षदानैश्चस्य-

द्वैया।विप्रपूजनैः गोष्ठीप्रबंधैर्वंधूनांस्नेहसंभाषणैर्मिथः एवंद्वादशद्वादश्योगृहीतव्यायथेच्छया संचरंतिक्रमेणैवमल्लानांताःपृथक्पृथक् पूजयंतिक्रमेणैवमासेमासेतनुंमम मार्गशीर्षात्कार्त्तिकांतंभक्त्याद्वादशनामभिः मिष्टान्नंपारणेदद्यान्माल्लिकानिद्विजातये ॥ केशव १ नारायण २ माधव ३ गोविंद ४ विष्णु ५ मधुसूदन ६ त्रिविक्रम ७वामन ८ श्रीधर ९ हृषीकेश १०पद्मनाभ ११ दामोदरनमोनमः १२इति गंधैःपुष्पैस्तथा।धूपैर्दीपैर्जागरणैर्निशि गीतवाद्यैर्नटैर्नृत्यैर्मल्लक्ष्वेडांगयुद्धकैः घृतदानैःक्षीरदानैःकृष्णोनःप्रीयतामितिएवमेवविधिः प्रोक्तःशैशवेयोमयाकृतः द्वादशीयंमयाद्यापिमनसःप्रीतिवर्द्धिनी मल्लैःप्रवर्तिता यस्मादतोयंमल्लद्वादशी तेषाम परमल्लानांमद्भक्तानांयुधिष्ठिर गोष्ठचभूवस्त्रशय्यागोमहिष्याद्यजाविकं अरण्यस्थैर्यथाभोज्यंनर्त्तकैस्तुपरस्परंक्रमेणभ्राम्यतेयस्मात्तेनैपाक्रमद्वादशी मत्प्रसादाद्धनंपुत्रान्वलंकीर्त्तियशोधनं एवमन्येपिपुरुषाश्र्वलामल्लद्वादशीं करिष्यंतिव्रतंभक्त्यातेषांदास्यामिहृद्गतं आरोग्यंवलमैश्वर्य्यंविष्णुलोकंचशाश्वतं ॥ भांडीरपादपतलेमिलितैर्महद्भिर्मल्लैरनावलित्तवाहुवलाद्विशिष्टैःसंपूजितः सपदियत्रविधूतपापासाद्वादशीभुविमतावतमल्लसंज्ञा

इतिभविष्योत्तरेमार्गशुक्लायांमल्लद्वादशीव्रतं अथास्यामेवारण्यद्वाशीव्रतम्

भविष्योत्तरे युधिष्ठिरउवाच भगवन्ब्रूहिमेसम्यगरण्यद्वादशीव्रतं सोपवासंसमुत्सर्गंसरहस्यंसमंत्रकं श्रीकृष्णउवाच कौंतेययत्पुराचीर्णंसीतयावनसंस्थया व्रतंराघववाक्येनअगस्त्येनप्रदर्शितंलोपामुद्रालयेसाध्व्योमुनिपत्न्योवर्द्धप्रजाः भोजितास्तर्पिताः सर्वाअाहारैः सर्वकामिकैःपद्मिनीपत्रविस्तीर्णैःसोपदंशैर्यथानवैः

भक्ष्यैर्भोज्यैस्तथालेह्यैश्चोष्यैश्चापियदृच्छया तामिहैकमनाःपार्थशृणुष्वारण्यद्वादशीं मार्गशीर्षेसितेपक्षेएका-
दश्यांदिनोदये स्नात्वानरःसोपवासः कृत्वापूजांजनार्दनेगंधपुष्पान्नधूपैश्चदीपजागरणैर्निशि नीत्वाप्रभा
तेगत्वाचवेदवेदांगपारगं भोजयित्वाफलप्रायंस्वयंभुंजीतवाग्यतः पंचगव्यंप्राशयित्वापूर्णमेवाथतद्दिने वर्ष
मेकंसुसंपूर्णंपारयित्वायुष्ठिर श्रावणेकार्तिकेमाघेचैत्रेवासमुपोषयेत् अन्नंपश्चाच्चसुंस्निग्धंखंडखाद्यकसंयुतं
कटुतिक्तमधुरसैर्लवणैः सुरसीकृतं अशोकवर्त्तिलावण्यंघृतपूर्णकरंवकैः सोपदंशैःपत्रशाकैस्तिलशष्कुलका
दिभिः सूपापूपैःखंडवटैश्चारितैःसहकेसरैः धूलीमुखैरल्लपल्लैःस्वादुकोकरसैःशुभैः शीतलैस्तर्पयेद्विप्रान्सर्वे
पुष्पैःसमालकैः दधिक्षीराज्यफलकैश्चांतजीवकसंस्कृतैः कर्पूरनखविद्धैश्चमधुरैःपानकोत्तमैः वहुवृक्षवनं
गत्वासुस्वादुसलिलंशिवं सुखासनेषूपविष्टान्प्रागुदग्रमुखान्मुनीन् भोजयेद्दशवाद्वौचमुनीनारण्यवासिनः एक
दंडीत्रिदंडीचगृहस्थानापिसुव्रतान् ब्राह्मण्योऽविधवाःसप्तएकपत्न्यःपतिव्रताः चार्वंग्यश्चार्चिताःस्नाताःसर्वा
वयवसुंदराः सवस्त्राःकुंकुमाक्रांताःस्रग्गंधकुसुमार्चिताः सग्रैवेयाभोजनीयास्तास्ताश्चोद्दिश्यदेवताः वासुदेव
जनार्दनदामोदरमधुसूदन पद्मनाभविष्णोगोवर्धन त्रिविक्रम श्रीधर हृषीकेश पुंडराकाक्षआदिवराह एभि
र्द्वादशभिर्मंत्रैर्नमस्कारांतयोजितैः गंधचंदनस्रग्वस्त्रधूपंदत्त्वापृथक्पृथक् भोजयित्वाशुभान्नानिस्वाचांतांस्ता
न्संदक्षिणान् प्रणम्यप्रेषयेद्भक्त्याविष्णुर्मेप्रीयतामिति ततोभुंजीतसहितोभृत्यैःपोष्यजनेनतु अमात्यानुगतै
र्लोकैः सुहृत्संवंधिभिस्तथाएवंकौंतेयकुरुतेयोरण्यद्वादशींनरः सदेहांतेविमानस्थोदिव्यकन्याशतावृतः याति
ज्ञातिसमायुक्तःश्वेतद्वीपेहरेःपदं यत्रलोकाःपीतवस्त्राःश्यामदेहाश्चतुर्भुजाः शंखचक्रगदापद्मव्यग्रहस्ताःसकौ
स्तुभाः गरुडासनाःसाभरणामुकुटोज्ज्वलकुंतला- नीलोत्पलदलोद्दामपद्ममालांकितोरसः लक्ष्मीधवा

मेघवर्णाः केयूरांगदभूषणाःतिष्ठंतिविष्णुसामान्यायावदाभूतसंप्लवं तस्माद्विष्णुपुरादेत्यपृथिव्यांनृपपूजिताः मर्त्यलोकेकीर्त्तिकराःसंभवंतिनरोत्तमाः ततोयांतिपरंस्थानंमोक्षंमार्गपरंशिवं यत्रगत्वानशोचंतिसंसारेभवनिर्भरे ॥ येद्वादशीमुपवसंतीसितामरण्यनाम्नींवनेद्विजवरानपिभोजयंति साध्व्यःस्त्रियःसुचरिताभरणाश्चतेषांविष्णुःप्रसादमुपलभ्यददातिमोक्षम्

॥ इतिभविष्योत्तरोक्तमरण्यद्वादशीव्रतम् ॥

मार्गशुक्लत्रयोदश्यामनंगत्रयोदशीव्रतम् नारदीये मार्गशुक्लत्रयोदश्यामनंगंविधिनार्चयेत् त्रिकालमेककालंवाशिवासंगमसंभवं गंधाद्यैःसोपचारैस्तुपूजयित्वाविधानतः घटेसमर्चयेद्देवान्भोजयेद्द्विजदंपती ततस्तुदक्षिणांदत्वास्वयमेकाशनंचरेत् एवंकृतेचविधिवद्व्रतेसौभाग्यभाग्जनः जायतेभुविविप्रेंद्रमहादेवप्रसादतः॥ भविष्योत्तरेप्येवं ॥ श्रीकृष्णउवाच ॥ शृणुपार्थव्रतंश्रेष्ठंनाम्नानंगत्रयोदशीं याशिवायैपुराप्रोक्ताप्रसन्नेनेंदुमौलिना ॥ गौर्य्युवाच ॥ पुत्रसौभाग्यकरणीख्यातानंगत्रयोदशी तस्याव्रतंमहादेवममापिकथयप्रभो कस्मिन्मासेप्रकर्तव्यंसपूर्णंचकथंभवेत् पूज्यानिकानिनामानिविधिनाकेनवैमृड दुर्भगानांचनारीणांसौभग्यकरणंशुभं वंध्यानांपुत्रजननंधनधान्यविवर्द्धनं एतद्व्रतंमहादेवप्रसादाद्वक्तुमर्हसि ॥ ईश्वरउवाच ॥ कथयामिनसंदेहोमहापुण्यंमहाफलं चीर्णेनयेनदेवेशिसर्वंसंपद्यतेसुखं नारीणांचनृणांचैवविधातव्यंप्रयत्नतः हेमंतेहिऋतौप्राप्तेमासिमार्गशिरेशुभे शुक्लपक्षेत्रयोदश्यामुपवासंसमाचरेत् मल्लिकादंतकाष्ठंचपूजाचप्रणवेणतु नारंगेणार्घ्यदानंतुनैवेद्यंफेणिकातथा गंधैःपुष्पैस्तथाधूपैरर्चयेच्चयथाविधि अक्षतैश्चफलैश्चैवएकाग्रहृदयःस्थितः

सम्यग्जितेंद्रियोभूत्वाअनंगंहृदिकल्पयेत् पश्चात्प्रदाक्षिणंकृत्यअर्घ्यंचैवनिवेदयेत् नमस्कुर्यादनंगंचमंत्रेणानेनभामिनि नमोस्त्वनंगदेवायशर्वसंगनिवासिने हृदयस्थायनित्यायसूक्ष्मायपरमेष्ठिने स्वर्गेचैवतुपातालेमर्त्यलोकेतथैवच सर्वव्यापित्वनंगत्वंगृहाणार्घ्यंनमोस्तुते ॥ इत्यर्घ्यमंत्रः ॥ पूजयेत्स्वस्थचित्तेनमधुचप्राशयेन्निशि रंभातुल्याभवेन्नारी सौभाग्यमतुलंभवेत् नश्यंतिसर्वपापानिसप्तजन्मकृतानिच लावण्यमतुलंचैवरूपैश्वर्यसमन्वितं अश्वमेधस्ययज्ञस्यफलंप्राप्नोतिमानवः पौषस्यैवतुमासस्यौदंवरंदंतधावनं जातीपुष्पैःपूजनंचदाडिमेनार्घ्यदानकम् अशोकवर्त्तिकास्निग्धानैवेद्यंचप्रकल्पयेत् ॐनमोनाथेश्वरायईश्वरायनमोनमः ॥ नमस्तेभुवनेशायगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यं ॥ व्रतस्थः स्वस्थचित्तेनचंदनंप्राशयेन्निशि सर्वपापविशुद्धात्मासौभाग्यमतुलंलभेत् माघस्यैवतुमासस्यविष्णुकांतारदार्दनं रदार्दनंदंतकाष्ठं कुंदपुष्पैःसमभ्यर्चेद्दर्घ्यंवैवीजपूरकैः नैवेद्यंशर्करादेयादेवोयोगेश्वरस्तथा ॐनमोयोगेश्वराय योगजंतुनिवासिनेगृहाणार्घ्यंमयादत्तंयोगेश्वरनमोस्तुते इत्यर्घ्यं मौक्तिकंप्राशयेद्रात्रौवाजपेयफलंलभेत् फाल्गुनस्यतुमासस्यवदरीदंतधावनं कंकोलेनचदेवेशंवीरेशंनामपूजयेत् सर्वाभिलाषसिद्ध्यर्थंवीरेशंनामपूजयेत् ॐवीरशूरवीरभद्रउमाकांतसुरेश्वर हिममध्यनिवासीलंगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यं सीतातुल्यभवेन्नारीकंकोलंप्राशयेन्निःशि चैत्रस्यैवतुमासस्यनवमल्लीरदार्दनं दमनेनार्चयेद्देवंपाद्यार्घ्यंचप्रकल्पयेत् नैवेद्यंखर्जुकान्दद्याद्विश्वरूपंतुपूजयेत् नमस्तेविश्वरूपायस्वरूपायमहात्मने गृहाणार्घ्यंमयादत्तंविश्वरूपनमोस्तुते इत्यर्घ्यं उमातुल्याभवेन्नारीकर्पूरंप्राशयेन्निशि वैशाखस्यतुमासस्यापामार्गंदंतधावनं पूजाचमल्लिकापुष्पैराम्रस्यार्घ्यंतुदापयेत् नैवेद्यंवटकान्दद्यान्महारूपंतुपूजयेत् नमस्तेमहारूपायसर्वविज्ञानरूपिणे गृहाणार्घ्यंमयादत्तंमहा

रूपनमोस्तुते ततःशुद्धमनाभूत्वानक्तंजातीफलाशनं अश्वमेधस्ययज्ञस्यफलमष्टगुणंभवेत् ज्येष्ठस्यैवतु मासस्यसहदेवीरदार्दनं पूजाबकुलपुष्पैस्तुश्रीफलेनार्घ्यकल्पना नैवेद्यंमंडकान्दद्याल्लवंगंप्राशयेन्निशि प्रद्युम्नंपूजयेद्देवंसर्वपापप्रणाशनं नमस्तेपशुपतयेप्रद्युम्नभुवनेश्वर गृहाणार्घ्यंमयादत्तंप्रद्युम्नपरमेश्वर इत्यर्घ्यं सुवर्णशतदानस्यफलमष्टगुणंभवेत् आषाढस्यतुमासस्यनारंगीदंतधावनं कदंवैःपूजयेद्देवंनारिकेलार्घ्यकल्पना नैवेद्यंदधितक्रंचोमापतिंपरिपूजयेत् प्राशयेत्तिलवीजानिनिशिस्वस्थनचेतसा उमापतेमहावाहोकामस्तेकामदाहक गृहाणार्घ्यंचंद्रमौलेउमाकांतनमोस्तुते वाजपेयस्ययज्ञस्यफलमाप्नोतिमानवः श्रावणस्यतु मासस्यजातीभिर्दंतधावनं पूजयेत्पद्मपुष्पैश्चजंबूभिरर्घ्यकल्पना नैवेद्येक्षुरसंदद्याच्छूलपाणिंतुपूजयेत् प्राशयेद्गंधतोयंतुरात्रौचैवसमाहितः ओंनमःशक्तिधरायचभक्तिभावेनशूलिने गृहाणार्घ्यंमयादत्तंशूलपाणेनमोस्तुते सौत्रामण्याख्ययज्ञस्यफलमष्टगुणंलभेत् भाद्रपदस्यमासस्यअंकोलंदंतधावनं अर्चयेच्चंपकैः पुष्पैर्नैवेद्यंघृतपूरिका अर्घ्यंपूगीफलंदद्यात् सद्योजातंतुपूजयेत् ततःस्वस्थमनाभूत्वाअगुरुंप्राशयेन्निशि त्रिदशेश्वरदेवाय सद्योजातायतेनमः गृहाणार्घ्यंमयादत्तंसद्योजातनमोनमः दशानामश्वमेधानांफलंप्राप्नोतिमानवः आश्विनस्यतुमासस्यकंकनीदंतधावनं अर्चयेत्करवीरैस्तुअर्घ्यंकर्कटिकाफलं पूज्यश्चत्रिदशाधीशोनैवेद्यंशुभमंडिकाप्राशयेत्कनकंतोयंनिशिदेवंप्रपूज्यच ओंत्रिदशाधिपदेवेशउमाकांतमहेश्वर त्रिधारूपमयस्त्वंहिअर्घ्योमेप्रतिगृह्यता चातुर्मासस्ययज्ञस्यफलंदशगुणंभवेत् कार्त्तिकस्यतुमासस्यकादंवंदंतधावनं रक्तोत्पलैः पूजनंचकूष्मांडार्घ्यंप्रदापयेत् नैवेद्यंपूरिकादद्यात्पूजयेज्जगदीश्वरं प्राशयेन्नंदनफलंनिशिचैवंसमाहितः नमस्तेजगदीशायव्यापिनेशूलपाणये गृहाणार्घ्यंमहेशानजगदीशनमोस्तुते अर्घ्यं पूजांतेजागरंकुर्याद्गीतवाद्यमहोत्सवैः अर्द्धनारी

श्वरंकुर्य्यात्सौवर्णंरौप्यमेवच वस्त्रयुग्मेनसंवेष्ट्यशय्यायांविनिवेशयेत् एवंकृत्वातुदेवेशंतत्रशोभांतुकारयेत् श्वेतपुष्पैस्तुसंपूज्यश्वेतचंदनचर्चितं धूपंसुगंधिसंक्षिप्यसवत्सांगांप्रदापयेत् श्वेतवस्त्रपरीधानांघंटाभरणभूषितां सुसूक्ष्मवस्त्रयुगलमाचार्यायनिवेदयेत् तथैवदक्षिणांदद्यादासनंपादुकेतथा छत्रंचमुद्रिकांचैवकर्णयोश्चैवभूषणंखट्वादिव्याप्रदेयाचतूल्याछादनसंयुता गृहोपस्करसंयुक्ताभक्तिसंयुक्तचेतसा तत्रोपवेश्यचाचार्य्यमुपवासव्रतीततः पादौ मूर्द्ध्निसमारोप्यप्रणिपत्यवचोवदेत् भगवन्त्वत्प्रसादेनव्रतंसंपूर्य्यतांमम एवमस्त्वितिसंब्रूयात्तवतुष्टास्तुशंकरः ईश्वरउवाच एवंकृत्वाप्रयत्नेनदंपतीचैवपूजयेत् तयोश्चभोजनंदद्याद्दंपत्योःपरितोषकं अनेनविधिनातुष्याम्यहंयुक्तस्त्वयानघे तेभ्योदत्तंचयत्किंचिदक्षयंनात्रसंशयः आचार्य्यमग्रतःकृत्वातस्यादेशंतुकारयेत् नह्याचार्य्यसमंतीर्थंनह्याचार्य्यसमंतपः तस्याहंकायमास्थायधर्मसिद्धिंनयेद्ध्रुवं तेनैवाचार्य्यमानेनसर्वंभवतिचाक्षयं एतद्व्रतोत्तमंश्रेष्ठंगुह्याद्गुह्यतरंपरंराज्यमर्थान्सुतान्सिद्धिमवैधव्यंचयच्छति रूपंधनंधान्यमायुरारोग्यंचप्रदापयेत् इष्टलाभंचसौभाग्यंवर्द्धयेच्चवरानने त्रयोदशीव्रतान्नास्तिसौभाग्यकरणंपरम् ॥

इतिभविष्योत्तरेअनंगत्रयोदशीव्रतम्

अथापरमनंगत्रयोदशीव्रतंभविष्योत्तरएव युधिष्ठिरउवाव भगवन्भूतभव्येशसंसारार्णवतारक यत्त्वंकथयाकिंचिन्मेरूपसौभाग्यदायकं अनंगःप्रीयतेयेनप्रीतोयच्छतिकेशव आत्मवद्रूपसौभाग्यंतन्मेविस्तरतोवद श्रीकृष्णउवाच अनंगःश्रूयतेदेवः शूलपाणिःपिनाकधृत् तस्मिन्संपूजितेपार्थकिन्नाप्नोतिनरोभुवि तेनतेकथयिष्यामिशूलपाणिव्रतंत्विदं यन्नकस्यचिदाख्यातंव्रतानामुत्तमंव्रतं चीर्त्वाभक्त्यानरोमर्त्योयद्यदिच्छतिपांडव तत्तदा

प्रोत्यसंदिग्धंमनगाख्यत्रयोदशीं किंव्रतंबहुभिपार्थउक्तमात्रफलप्रदैः त्रयोदशीत्वियंपुण्यासर्वव्रतफलप्रदा तस्मात्कार्य्याप्रयत्नेनवहुपुण्यमभीप्सता त्रयोदशीह्यनंगाख्यासर्वाघौघविनाशिनी सर्वदुष्टोपशमनीसर्वमंगलवर्द्धिनी अतुल्यसुखसौभाग्यरूपलावण्यदायिनी पुरादग्धेनकामेनत्रिनेत्रनयनाग्निना भस्मीभूतेनलोकेस्मिन् संकल्पस्थेनपांडव अनंगेनकृताह्येषातेनानंगत्रयोदशी प्रसिद्धिंसमनुप्राप्तानित्यंसर्वफलप्रदा मार्गशीर्षसितेपक्षेत्रयोदश्यांसमाहितः स्नात्वानद्यांतडागेवागृहेवाकूपतोयतः कृत्वाभ्यर्च्यमहादेवंविधानाच्छिवतोषणं लिंगंस्वयंचसंभूतमभावेयत्प्रतिष्ठितं तदनंगमितिप्रोक्तंपूजयेद्भक्तितोव्रती पयोदधिघृतक्षौद्रै मंत्रपूतैर्जलान्वितैःशर्कराद्यमृतैःपश्चात्स्नापयेद्गंधवारिणा धूपदीपादिनैवेद्यैः पुष्पैस्तत्कालसंभवैः फलैर्नानाविधैर्भक्ष्यैर्गीतवादित्रनिःस्वनैः पूजयेदितिशेषः शंभुनामान्यथोच्चार्य्यहोमः कार्य्यस्तिलाक्षतैः अक्षतायवाःअश्वत्थजातीनारंगपायसैर्मधुनापिच अश्वत्थादीनिक्रमाद्धुतकाष्ठफलनैवेद्यप्राशनानिच एवमुत्तरमासेष्वपि अनंगंपूजयेदादौमधुमत्यासमन्वितं आदौआदिमासेमार्गशीर्षमासे अनंगनाम्नासंपूज्यमधुप्राश्यस्वपेन्निशि मधुप्राशनयोगेनजायतेमधुरध्वनिः अश्वमेधस्ययज्ञस्यफलंप्राप्नोतिभक्तिमान् पौषेचौदुंवरकरवीरदाडिममोदकैः चंदनेनचयोगीशंहैमवत्यायुतंयजेत् स्नाप्यक्षीरादिभिःपार्थपूजायित्वाविधानतः योगेश्वरेतिसंस्मृत्यचंदनंप्राशयेन्निशि सौम्यः शीतः सुगंधश्चचंदनप्राशनाद्भवेत् राजसूयस्ययज्ञस्यमद्भक्तःफलमाप्नुयात् माघेन्यग्रोधसत्कुंदमातुलुंगसुहालिकैः मुक्तांभोभिश्चनाठयेशंसुंदर्य्यासहितंयजेत् नाठ्येश्वरेतिसंस्मृत्यप्राशयेन्मौक्तिकोदकं प्राशनस्यप्रभावेननिर्मलाधीःप्रजायते रूपाढ्यंचवपुःस्त्रीणांमनोनयननंदनं मुक्तावर्णोपमेनेत्रेपद्मपत्रायतेशुभे बहुस्वर्णप्रदानस्यप्राप्नोत्यविकलंफलं फाल्गुनेवदरीकांचनारजंवीरगोरसैः कंकोलेनचदेवेशंसशांतं

निशिपूजयेत् वीरनामजपेद्रात्रौकंकोलंप्राशयेन्निशितेनास्यसुरभिर्गंधोजायतेकायवक्त्रयोः तथागुणगणावासोद्भुतकांचनसान्निभःगोमेधस्यफलंप्राप्यशक्रलोकेमहीयते चैत्रेकरंजमदनद्राक्षावटकशीतलैःशीतलःकर्पूरः देवंस्वरूपनामानंयजेत्सुभगयासह पूर्वोक्तविधिनापार्थकर्पूरंप्राशयेन्निशि कर्पूरवत्प्रियोलोकेगंधगौरवसंयुतःचंद्रवत्सर्वलोकानांलोचनाह्लादकारकः जायतेसनरःपार्थयःकरोतीहभक्तितः नरमेधफलावाप्तिर्जायतेनात्रसंशयः वैशाखेसहकारार्कपुष्पाम्रफलसक्तुभिः जातीफलैर्महारूपामिंद्राण्यासार्हितंयजेत् प्राशयेद्रात्रिसमयेजातीफलमनुत्तमम् अस्यप्राशनयोगाच्चजातिंप्राप्नोत्यनुत्तमां सफलास्तस्यसर्वाशाभवंतिभुविभारत गोसहस्रफलंप्राप्यरुद्रलोके महीयते ज्येष्ठेजंबूविल्वपत्रैःश्रीफलैःपूपकैस्तथा लवंगेनाथसंपूज्यप्रद्युम्नंललितान्वितं लवंगंप्राशयेद्रात्रौलावण्यंतेनचाप्नुयात् वाजपेयफलंलब्ध्वामोदतेदिविभारत आषाढेपामार्गनीपनालीयककदंबकैः नीपकदंबौवृक्षाविशेषौ तिलैरुमापतिंरात्रौपूजयेच्चतिलोत्तमं उमापतिंयजेत्प्राज्ञःप्राशयेच्चतिलोदकं तिलोत्तमेवभवतिरूपसंपदनुत्तमा प्राप्नोतिपुंडरीकस्यफलंकुरुकुलोद्वह श्रावणेसुमनांभोजकदलीफलमंडितैः सुमनामालती गंधतोयैःशूलपाणिंशुभवासोन्वितंयजेत् गंधोदकंप्राश्यस्वपेद्रात्रौविगतमत्सरःसुगंधसर्वसौख्याढ्यश्चिरायुश्चोपजायते अग्निष्टोमस्ययज्ञस्यप्राप्नुयात्फलमुत्तमं भाद्रेपलाशचंपेयकर्कट्याज्यपुरैस्तथा आज्यपुरोघृतपुरः यजेतागुरुणासद्योजातंगौर्य्यासमन्वितं अगुरुंप्राशयित्वातुगुरुर्भवतिभूतले तुलापुरुषदानस्यहैमस्यफलमाप्नुयात् आश्विनेकुंदवाणापामार्गकर्कंधुमडकैः स्वर्णांभोभिःसुवर्णंचत्रिदशाधिपतिंयजेत् हेमोदकंचसंप्राश्यहेमवर्म्माप्रजायते वाजपेयस्ययज्ञस्यसकलंफलमश्नुते ऊर्ज्जेकदंबकद्रोणकूष्मांडलवणेनतु फलैश्चविद्याधिपतिंयजेन्मदनयायुतं फलैरमृतफलाख्यैर्लवणमंतेज्ञेयं लवणंप्राशयेत्तत्रशुद्धयापरयान्वितः रूपलावण्यसंयुक्तःप्राशनादस्यजायते वाजपेयस्य

यज्ञस्यफलंप्राप्नोतिनिश्चितं आद्यमाद्यंदंतकाष्ठंकुसुमंतत्परंफलं नैवेद्यंप्राशनंनामक्रमान्मासेषुकीर्तितं अलाभेदंतकाष्ठानांखादिरंस्याच्छिवप्रदं पुष्पाणामप्यलाभेतुतत्पत्रैर्वाथकोमलैः अलाभेतत्फलानांचवीजपूरंप्रशस्यते नैवेद्यानामप्यलाभेहविष्यान्नंप्रकल्पयेत् इहप्रतिश्लोकंदंतधावनकुसुमनैवेद्यप्राशनानांयथाक्रमविहितानांतस्यतस्याभावेअयमनुकल्पउक्तः सर्वेषुपारणेष्वत्रभोजयित्वाद्विजोत्तमान् सदक्षिणंततोऽश्नीयाद्बंधुभिःसहितोवशी व्रतविघ्नंयदाचस्यात्सूतकेमृतकेथवा उपोष्यचैवोपविशेत्तदह्निअपरेपुनः तदह्निउपोष्यअपरेऽग्रिममासांतर्गतताद्दिने पूर्ववत्प्रोक्तंभवति एवंसंवत्सरस्यांतेशक्त्यारत्नाद्यलंकृतंउमामाहेश्वरंहैममधिवास्यततोनिशि पुष्पैर्धूपैस्तथागंधैर्नैवेद्यैःक्रमुकैःफलैःततःप्रभातसमयेकृतहोमबलिक्रियः वक्ष्यमाणमिदंसर्वंप्रदद्यात्तुद्विजातये लिंगाकारसनंगंच सौवर्णंकारयेच्छिवं ताम्रपात्रोपरिस्थाप्यकलशोपरिविन्यसेत् शुक्लवस्त्रेणसंछाद्यनैवेद्यपुष्पपूजितं ब्राह्मणाय प्रदातव्यंशिवभक्तायसुव्रत द्वादशात्रप्रकर्तव्यास्रक्चंदनाविभूषिताः सितपक्वान्नसंपन्नाब्राह्मणेभ्योनिवेदयेत् देवस्यैवप्रदातव्याः कुंभाद्वादशलड्डुकाः वितानंपंचवर्णंचव्यंजात्किंकिणिनादितं घंटांचमुखरांभद्रावध्नीयाच्छिवमंदिरे तस्मिन्नेवदिनेपार्थध्यात्वात्मानंसमर्चयेत् आत्मानंपरमात्मानंदेवदेवंत्रिविधेशंपुष्पनैवेद्यदीपकैः गीतवादित्रनृत्यादिप्रेक्षणैर्विविधैरपि दानान्यत्रप्रदेयानिस्ववित्तस्यानुसारतः सूर्योपरागसदृशोयतःसद्दिवसोमतः भोजनंचयथाशक्त्याषड्रसंमधुरोत्तरं प्रदद्याच्छिवभक्तानांवस्त्राणिचविशेषतः अर्थितोनावमन्येतनक्षिप्येन्नरुषावदेत् यथाशक्त्याप्रदद्याच्चबहुधामधुरंवदेत् एवंतदुत्सवंकृत्वा।शिवयज्ञमनुत्तमं द्विजेभ्योभोजनंदद्याच्छक्रराज्यपरिप्लुतं पश्चात्स्वयंतुभुंजीयाद्भृत्यवर्गसमन्वितः शांतवागेकनिष्ठस्तुहृदिदेवंनिवेश्यच पूजांनिर्वर्त्यविधिवद्ब्राह्मणान्परितोषयेत् एवंकृत्वानरःसम्यग् भक्तिभावेनभावितः मुच्यतेसर्वपापौघैर्ब्रह्महत्यादिकैरपि

इहसौख्यमवाप्योच्चै मृतःस्वर्गेमहीयते पुण्यशेषादिहागत्यसार्वभौमोनृपोभवेत् व्रतस्यास्यप्रभावेनमूर्त्तिमान्मदनोभवेत् सौभाग्यधनसौख्याढ्यःशांतचित्तोजितेंद्रियः पुत्रपौत्रैःसुसंपूर्णोजीवेच्चशरदांशतम् शिवभक्तिपरोभूत्वाशिवैकगतमानसः अंतकालेशिवंस्मृत्वाशिवसायुज्यतांव्रजेत् कामेनयाकिलपुरासमुपोषितासीच्छुद्धातिथिस्त्रिदशदेहपराप्तिहेतोः तंप्राशनैरुदितनामयुतेरुपोष्यदिव्यंप्रयातिपरमंपदमिंदुमौलेः ॥

॥ इतिभविष्योत्तरोक्तमपरमनंगत्रयोदशीव्रतम् ॥

अथप्रदोषव्रतानि तत्रादौप्रदोषमाहिमास्कांदे ब्रह्मोत्तरखंडे सत्यंब्रवीमिपरलोकहितंब्रवीमिसारंब्रवीम्युपनिषद्धृदयंब्रवीमि संसारमुल्बणमसारमवाप्यजंतोः सारोयमीश्वरपदांबुजयुगस्यसेवा येनार्चयंतिगिरिशंमहितंप्रदोषेयेभ्यर्चितंशिवपदंप्रणमंतिनान्ये केतत्कथांश्रुतिपुटैर्नपिबंतिमूढास्तेजन्मजन्मनिभवंतिनरादरिद्राः येवैप्रदोषसमयेपरमेश्वरस्यकुर्वंत्यनन्यमनसोंघ्रिसरोजसेवां नित्यंप्रवृद्धधनधान्यकलत्रपुत्रसौभाग्यसंपदधिकास्तइहैवलोकाः कैलासशैलभुवनेत्रिजगज्जनित्रींगौरींनिवेश्यकनकांचितरत्नपीठे नृत्यंविधातुमभिवांछतिशूलपाणौ देवाःप्रदोषसमयेनुभजंतिसर्वे वाग्देवीधृतवल्लकीशतमखोवेणुरणत्पद्मजस्तालोन्निद्रकरारमाभगवतीगेयप्रयोगान्विता विष्णुःसांद्रमृदंगवादनपटुर्देवाःसमंतात्स्थिताः सेवंतेतमनुप्रदोषसमयेदेवंमृडानीपतिं गंधर्वयक्षपतगोरगसिद्धसाध्या विद्याधराःसुरनराप्सरसांगणाश्च येन्येत्रिलोकनिलयाःसहभूतवर्गाः प्राप्तेप्रदोषसमयेहरपार्श्वसंस्थाः तस्मात्प्रदोषसमयेशिवएकएवपूज्योथनान्येहरिपद्मजाद्याः तस्मिन्महेशेविधिनेज्यमानेसर्वेप्रसीदंतिसुराधिनाथाः ॥ इतिप्रदोषमहिमा ॥ अथास्यनिर्णयः हेमाद्रौविश्वादर्शे प्रदोषोस्तमयादूर्ध्वंघटिकात्रयमुच्यतइति गौडग्रंथेषु दंडद्वयात्मकएवप्रदोषउक्तः प्रदोषोस्तमयादूर्ध्वंघटिकाद्वय-

मिष्यइतिवत्सोक्तेः यत्तुत्रिमुहूर्त्तःप्रदोषःस्याद्रवावस्तंगतेसतीतिस्कंदपुराणवचनं तद्गौणप्रदोषकालपरं विश्वादर्शवाक्योपात्तघटिकात्रयात्मकमुख्यकालाधिककालबोधकत्वात् अतएवमाधवाचार्याअपिनक्तप्रकरणे भोजनेघटिकात्रयमुत्तमः कालः घटीषट्कंमध्यमः कालः एतदेवाभिप्रेत्यस्मर्यते ॥ प्रदोषोस्तमयादूर्ध्वमितित्रिमुहूर्त्तप्रदोषस्यादितिच निशीथपर्यंतोजघनःकालःनक्तंकुर्वीतरात्रावितिसामान्येनाभिधानादिति अत्रशिवपूजानक्तभोजनात्मकंप्रदोषव्रतं तत्रप्रदोषव्यापिनीत्रयोदशीग्राह्या ॥ तथाचस्कंदपुराणे एवंवत्सरपर्यंतंप्रक्षिपेद्यस्त्रयोदशीं प्रदोषेशिवमभ्यर्च्यनक्तंभोक्ष्यामिशंकरेति पूजारंभकालोपितत्रैव ततस्तुलोहितोभानोस्नात्वासनियमोव्रती पूजास्थानंततोगत्वाप्रदोषेशिवमर्चयेदिति ब्रह्मोत्तरखंडेतु घटीकात्रयमस्तमयात्पूर्वमुपक्रमकालउक्तः पक्षद्वये त्रयोदश्यांनिराहारोभवेद्दिवा घटीत्रयादस्तमयात्पूर्वंस्नानंसमाचरेदितिमुख्यतरः पूजाकालस्तुसूर्य्यास्तादिनक्षत्रोदयांतः प्रदोषरजनीमुखमितिकोशबलात् कैश्चित्तुत्रिमुहूर्तात्मकएवमुख्यःकालःप्रदोषकालःकृतः तेषां माधवोक्तउत्तममध्यमविभागोनुपपन्नः द्वयोरपिमुख्यकालत्वस्वीकारात् तत्रान्यतरदिनेप्रदोषव्याप्तौतत्स्पर्शैवासैवग्राह्यादिनद्वयेसाम्येप्रदोषव्याप्तौतदेकदेशस्पर्शैवाउत्तरा प्रातःसंकल्पयेद्विद्वानुपवासव्रतादिकमिति संकल्पकालमारभ्यसत्वात् दिनद्वयेप्रदोषव्याप्त्यभावेतु पूजोपक्रमकालव्यापिनीग्राह्या कर्मोपक्रमकालगातुकृतिभिर्ग्राह्यानयुग्मादरइतिवचनात् यत्तुकैश्चिदुक्तं दिनद्वयेप्रदोषव्याप्तौपूर्वैवग्राह्या त्रयोदशीतुकर्त्तव्याद्वादशीसंहितामुने इतिसुमंतुवचनादितितत्तुच्छं अस्यसामान्यवचनत्वेनाहोरात्रसाध्योपवासादिषुसावकाशत्वेनकालविशेषसाध्यप्रदोषव्रतेनिर्णायकत्वात् अधिकंचनक्तप्रकरणेद्रष्टव्यं अथपक्षप्रदोषविधिःब्रह्मोत्तरखंडे शांडिल्यउवाच पक्षद्वयेत्रयोदश्यांनिराहारोभवेद्दिवा घटीत्रयादस्तमयात्पूर्वंस्नानंसमाचरेत् शुक्लांबरध

रेभूत्वावाग्यसोनियमान्वितः कृतसंध्याविधिरतः शिवपूजांसमाचरेत् देवस्यपुरतःसम्यगुपलिप्यनवांभसा विधायमंडपंरम्यंधौतवस्त्रादिभिर्बुधः वितानाद्यैरलंकृत्यफलपुष्पनवांकुरैः विचित्रंपद्ममुद्धृत्यवर्णपंचकरंजितं तत्रोपविष्टःसुसमे सूपविष्टःस्थिरासने सम्यक्संपादिताशेषपूजोपकरणःशुचिः आगमोक्तेनमंत्रेणनैगमेनचमंत्रवित् ततःकृत्वात्मशुद्धिंचभूतशुद्धिमनुक्रमात् प्राणायामत्रयंकुर्याद्बीजमंत्रैःसमंत्रकैः मातृकान्यासविधिवद्ध्यात्वातोदेवतांपरां समाप्यमातृकांभूयोध्यात्वादेवंपरंशिवं वामभागेगुरुंनत्वादक्षिणेगणपंयजेत् अंसयोर्युगधर्मांश्चन्यसेन्नाभौचपार्श्वयोः अधर्मादीननंतादीन्हृदिपीठेमनुंन्यसेत् आधारशक्तिमारभ्यक्षानात्मांतमनुक्रमात् उक्तक्रमेणाविन्यस्यहृदयेसाधुभाविते नचशक्तिमयेरम्येध्यायेद्देवमुमापतिं चंद्रकोटिप्रतीकाशंत्रिनेत्रंचंद्रभूषणं आपिंगलजटाजूटंरत्नमौलिविराजितं नीलग्रीवमुदारांगंनागहारोपशोभितं वरदाभयहस्तंचहरिणंचपरश्वधं दधानंनागवलयंकेयूरांगदमुद्रिकां व्याघ्रचर्मपरीधानंरत्नसिंहासनेस्थितं ध्यात्वातद्वामभागेचचिंतयेद्गिरिकन्यकां भास्वज्जपाप्रसूनाभामुदयर्कसमप्रभां विद्युत्पुंजनिभांतन्वींमनोनयननंदिनीं बालेंदुशेखरांस्निग्धनीलकुंचितकुंतलां भृगुसंघातरुचिरनीलालकबिराजितां मणिकुंडलविद्योतन्नखमंडलविभ्रमां नवकुंकुमपंकाक्तकपोलतलदर्पणां मधुरस्मितविभ्राजदरुणाधरपल्लवां कुंवुकंठींशिवामुद्यन्कुचपंकजकुंडलां पाशांकुशाभयवरैर्विलसंतींचतुर्भुजां अनेकरत्नविलसत्कंकणांगदमुद्रिकां मध्यत्रिवलयांहृद्यांहेमकांचींगुणान्वितां दिव्यमाल्यांबरधरांदिव्यचंदनचर्चितां दिक्पालवनितामौलिसन्नतांघ्रिसरोरुहां रत्नसिंहासनारूढां सर्पराजपरिच्छदां एवंध्यात्वामहादेवंदेवींचगिरिकन्यकां न्यासक्रमेणसंपूज्यदेहेगंधादिभिःक्रमात् पंचभिर्व्रह्मभिःकुर्यात्प्रोक्तस्थानेषुवाहृदि पृथक्पुष्पांजलिंदद्यान्मूलेनचहृदित्रिधा पुनःस्वयंशिवोभूत्वामूलमंत्रेण

सायकः ततःसंपूजयेद्देवंवाह्यपीठेपुनःक्रमात् संकल्प्यपूजयेत्तत्रपूजारंभेसमाहितः कृतांजलिपुटोभूत्वार्चितयेद्धृदिशंकरम् ऋणपातकदौर्भाग्यदारिद्र्यविनिवृत्तये अशेषाघविनाशायप्रसीदममशंकर दुःखशोकाग्निसंतप्तंसंसारभयपीडितं बहुरोगाकुलंदीनंपाहिमांवृषवाहन आगच्छदेवदेवेशमहादेवाभयंकर गृहाणसहपार्वत्यातवपूजांमयाकृतां इतिसंकल्प्यविधिवद्वाह्यपूजांसमारभेत् गुरुंगणपतिंचैवयजेत्सव्यापसव्ययोः क्षेत्रेशमीशकोणेचवन्हौकात्यायनींयजेत् धर्मंज्ञानंचवैराग्यमैश्वर्यंचनमोंतकैः स्वैररग्न्यादिकोणेषुपीठपादाननुक्रमात् दिक्षुविंदुविसर्गाभ्यामधर्मादीन्सुपूजयेत् मंत्ररूपांश्चतुर्दिक्षुमध्येनंतंसतारकं सत्वादींस्त्रिगुणांस्तत्रपूजापीठेप्रविन्यसेत् अतऊर्ध्वच्छदेमायाविद्यांलक्ष्मींशिवेनच तदंतेचांबुजंभूयःसकलंमंडलत्रयं पत्रकेसरकिंजल्कव्याप्तंतारक्षरैःक्रमात् आत्मत्रयंसमभ्यर्च्यमध्येमंडलमादरात् ज्येष्ठांलक्ष्मींचरौद्रींचसुभगाद्यैर्दिक्षु. पूजयेत् वामाद्यानवशक्तीश्चनवस्वरयुतायजेत् हृदिवीजत्रयाढ्येनपीठमंत्रेणचार्चयेत् आवृत्तिःप्रथमांगैस्तु पंचभिर्मूर्त्तिशक्तिभिः त्रिशक्तिमूर्त्तिभिश्चान्यानिधिद्वयसमन्वितैः अनंताद्यैःपरस्त्वन्यामातृभिश्चवृषादिभिः सिद्धिभिश्चाणिमाद्याभिरिंद्राद्यैश्चतदायुधैः वृषभक्षेत्रचंडीशौदुर्गाचस्कंदनंदिनौ गणेशः सैन्यपश्चैवस्वस्वलक्षणलक्षितः अणिमामहिमाचैवगरिमालघिमातथा ईशित्वंचवशित्वंचप्राप्तिःप्राकाम्यमेवच अष्टैश्वर्याणिप्रोक्तानितेजोरूपाणिकेवलं पंचभिर्बहुभिःपूर्वंहृल्लेखाद्याभिरप्यनु अंगैरुपायैरिंद्राद्यैःपूर्वोक्तामुनिभिस्तुतैउमामहेश्वरौपश्चात्पूजयेदुत्तरादितः यथामाणवकैर्युक्तंतेजोरूपंसदाशिवं उमयासहितंदेवमुपचारैःप्रपूजयेत् सुप्रतिष्ठितशंखस्यतीर्थैःपंचामृतैरपि अभिषिंचेन्महादेवंरुद्रसूक्तैः समाहितः कल्पयेद्विविधैर्मंत्रैरासनाद्युपचारकान् तैरेवाचमनंदद्यान्मधुपर्कंमधूत्तरं पुनराचमनंदद्यात्स्नानमंत्रैः प्रकल्पयेत् आसनंकल्पयेद्धैमंस्वागतं

विहितांजलिः अर्घ्यमष्टगुणोपेतंपाद्यंशुद्धोदकेनतु उपवीतंतथावासोभूषणानिनिवेदयेत् गंधमष्टांगसंयुक्तंसफलंविनिवेदयेत् ततश्चाविल्वमंदारकह्लारसरसीरुहं धत्तूरंकर्णिकारंचद्रोणपुष्पंचमाल्लिकां कुशापामार्गतुलसीमाधवीवकुलान्वितां वृहतीकरवीराणियथालब्धानिसाधकः निवेदयेत्सुगंधीनिमाल्यानिविविधानिच धूपकालागुरुयुतंदीपंचविविधंशुभं अथपायसनैवेद्यंसघृतंसोपदंशकं मोदकापूपसंयुक्तंशर्करागुडसंयुतं मधुनाक्तंदधियुतंजलपानसमन्वितं तेनैवहविषावह्नौजुहुयान्मंत्रभावितः अगमोक्तेनविधिनागुरुवाक्यानियंत्रितः नैवेद्यंशंभवेभूयाद्दत्वातांबूलमुत्तमं धूपंनीराजनंरम्यंछत्रंदर्पणमुत्तमं समर्पयित्वाविधिवन्मंत्रैर्वैदिकतांत्रिकैः यद्यशक्तस्त्वयंनिःस्वोयथाविधिसमर्चयेत् भक्त्यादत्तेनगौरीशः पुष्पमात्रेणतुष्यति अथांगभूतान्सकलान्गणशादीन्प्रपूजयेत् सर्वैर्नानागुणैःस्तुत्वासाष्टांगंप्रणमेद्बुधः ततःप्रदक्षिणीकृत्यवृषचंडेश्वरादिकान् पूजांसमाप्यविधिवत्प्रार्थयेद्गिरिजापतिं ॥ अथैतदनुसारिपद्धतिक्रमः ⊛ तत्रादौ स्नानंकृत्वाभूतशुद्धिप्राणप्रतिष्ठामातृकान्यासादिकान्कृत्वा हृदयकमलेशिवंध्यात्वामानसोपचारैःसंपूज्य यथाशक्तिमंत्रंजप्त्वाजपंदेवायसमर्प्यमूलेन स्वदेहपुष्पांजलिंदत्वा स्वात्मानंशिवरूपंध्यात्वा कृतांजलिपुटोभूत्वा ऋणपातकदौर्भाग्यदारिद्र्यविनिवृत्तये अशेषाघविनाशायप्रसीदममशंकर दुःखशोकाग्निसंतप्तंसंसारभयपीडितं वहुरोगाकुलंदीनंपाहिमांवृषवाहन आगच्छदेवदेवेशमहादेवाभयंकर गृहाणसहपार्वत्यातवपूजांमयाकृतां इतिसंकल्प्यविधिवद्बाह्यपूजांसमाचरेत् शंखादिस्थापनंकृत्वायोगपीठादिपद्मासनांतंसंपूज्य सर्वशक्तिमयेरम्येइत्यादिपूर्वोक्तप्रकारेणमहादेवं देवींचध्यात्वा न्यासक्रमेणसंपूज्यदेहेगंधादिभिःक्रमात् ततोवहन्नासापुटेनकरस्थपुष्पेषुस्वाभीष्टांदेवतामागतांविभाव्य पुरस्थितलिंगेमूर्त्तौवाप्रक्षिपेत् ततःदेवेशभक्तिसुलभसर्वाभरणसंयुत यावत्त्वांपूजयिष्यामितावत्त्वंसु

स्थिरोभवेत्यादिप्राणप्रतिष्ठांकृत्वा भवानीशंकराभ्यांनमः इतिमंत्रेण अक्षतचंदनपुष्पादिभिः संपूज्य आवरणपूजांकुर्यात् तच्चअंगैः प्रथमं १ पंचमूर्त्तिशक्तिभिर्द्वितीयं २ त्रिशक्तिमूर्त्तिभिर्हरिविधिभ्यांचतृतीयं ३ अनंताद्यैश्चतुर्थं ४ मातृभिः पंचमं ५ कृष्णादिभिः षष्ठं ६ अणिमादिभिः सप्तमं ७ वज्राद्यैरष्टमं ९ ततोनीराजनांतानुपचारान्कृत्वा प्रदक्षिणीकृत्य पूजांसमाप्यविधिवत्प्रार्थयेद्गिरिजापतिं जयदेवजयाजयजयशंकरशाश्वत जयसर्वसुराध्यक्षजयसर्वसुरार्चित जयसर्वगुणातीतजयसर्ववरप्रद जयनित्यनिराधारजयविश्वंभराव्यय जयविश्वैकवंद्येशजयनागेंद्रभूषण जयगौरीपतेशंभोजयचंद्रार्द्धशेखर जयकर्पूरसंकाशजयानंतगुणाकर जयरुद्रविरूपाक्षजयाचिंत्यनिरंजन जयनाथकृपासिंधोजयभक्तार्तिभंजन जयदुस्तरसंसारसागरोत्तारणप्रभो प्रसीदमेमहादेवसंसारार्तस्यखिद्यतः सर्वपापक्षयंकृत्वारक्षमांपरमेश्वर महादारिद्र्यमत्तस्यमहापापहतौजसः सहाशोकनिविष्टस्यमहारोगातुरस्यच ऋणभारपरीतस्यदह्यमानस्यकर्मभिः ग्रहैःप्रपीड्यमानस्यप्रसीदममशंकर दरिद्रःप्रार्थयेद्देवं पूजांतेगिरिजापतिं अर्थाढ्योवापिराजावाप्रार्थयेद्देवमीश्वरं दीर्घमायुःसदारोग्यं कोशवृद्धिर्वलोन्नतिः ममास्तुनित्यमानंदः प्रसादात्तवशंकर शत्रवःसंक्षयंयांतु क्षयंयांतुसदेतयः सर्वसस्यसमृद्धिश्चभूयात्सुखमयादिशः एवमाराधयेद्देवंप्रदोषेगिरिजापतिं १३ ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिश्चतोषयेत् सर्व पापक्षयकरी सर्वदारिद्र्यनाशिनी शिवपूजेयमाख्याता सर्वाभीष्टफलप्रदेति

इतिस्कांदेब्रह्मोत्तरखंडेप्रदोषव्रतम् ॥

अथकेदारखंडोक्तशनिप्रदोषव्रतम् देवाऊचुः गुरोकेनविधानेनकीदृशेनव्रतेनच आराधनीयोगौरीशोह्यस्माभिः

जयकामुकैः तद्वदस्वसुराचार्य त्वंहिनःपरमागतिः ॥ वृहस्पतिरुवाच ॥ कार्त्तिकेशुक्लपक्षेतुमंदवारे त्रयोदशी कार्त्तिकेचांद्रेमासेवामार्गेवा समग्रायदिलभ्येतशर्वप्राप्त्यैनसंशयः तस्यांप्रदोषसमयेतिलामलकसंयुतं शिवस्यचार्चनंकुर्याद्गंधपुष्पफलादिभिः पश्चात्प्रदोषवेलायांस्थावरंलिंगमर्चयेत् स्वयंभुस्थापितं वापिपौरुषयेमपौरुषं जनेवाविजनेवापिअरण्येवातपोवने तल्लिंगमर्चयेद्भक्त्याविधिदृष्टेनकर्मणा ग्राममध्येतुयल्लिंगंस्वयंभुमपिवानघ तल्लिंगंपूजयेद्भक्त्याप्रदोषेतुविशेषतः ग्रामाद्बहिःस्थितंलिंगंग्रामाच्छतगुणफलं बाह्याच्छतगुणंपुण्यंलिंगमारण्यमुत्तमं वन्याच्छतगुणंपुण्यंलिंगंपार्वतमुच्यते पार्वताच्चैवलिंगाच्चफलंचायुतसंज्ञितं तपोवनाश्रितंलिंगंपूजितंवामहाफलं काश्यादिसंस्थितंलिंगंपूजितंस्यादनंतकं तस्मादेतद्विभागे नशिवपूजार्चनंबुधैः कर्त्तव्यंनिपुणत्वेनतीर्थस्नानादिकंतथा पंचपिंडाननुद्धृत्यवाप्यांस्नानंसमाचरेत् नस्नायात्परवारिणीत्यपिपाठः कूपस्नानंप्रकुर्वीतउद्धृतेनविशेषतः तडागेदशपिंडानामुद्धृत्यस्नानमाचरेत् ततःप्रदोषेसमलस्नानंमौनीसमाचरेत् प्रदीपानांसहस्रेणदीपनीयः सदाशिवः तथादीपशतेनापिद्वात्रिंशद्दीपमालया घृतेनदीपयेद्दीपान्शिवस्यपरितुष्टये. तथाफलैश्चदीपैश्चनैवेद्यैर्गंधधूपकैः पूज्यःप्रदोषवेलायां नृभिःसर्वार्थसिद्धयेप्रदक्षिणंप्रकुर्वीतशतमष्टोत्तरंतथा नमस्कारान्प्रकुर्वीततावत्संख्यान्प्रयत्नतः प्रदक्षिणनमस्कारैः पूजनीयः सदाशिवः नाम्नांशतेनरुद्रोसौस्तवनीयोयथाविधि उँनमोरुद्रायभीमायनीलकंठायवेधसे कपर्दिनेसुरेशा.यव्योमकेशायवैनमः वृषध्वजायसोमायसोमनाथायवैनमः दिगंबरायभर्गायउमाकांतकपर्दिने तपोमयायव्याप्तायाशिपिविष्टायवैनमःव्यालप्रियायव्यालायव्यालानांपतयेनमःमहीधरायव्याघ्रायपशूनांपतयेनमःत्रिपुरांतकायसिंहायशार्दूलर्षभचर्मणे सितायसितनाथायसिद्धायपरमेष्ठिने कामांतकायवुद्धायवुद्धीनांपतयेनमः

कारणायाविशिष्टायाशिष्टायपरमात्मने वेदायवेदवीजायवेदगुह्ययवैनमः दीर्घायदीर्घरूपायदीर्घार्थायमहौजसे नमोजगत्प्रतिष्ठायव्योमरूपायवैनमः गर्भकृत्सुमहादैत्यअंधकासुरभेदिने नीललोहितशुक्लायचंडमुंडप्रियायच भक्तिप्रियायदेवायज्ञातज्ञानाव्ययायच महेशायनमस्तुभ्यंमहादेवहरायच त्रिनेत्रायत्रिवेदायवेदांगायनमोनमः अर्थायअर्थरूपायपरमार्थायवैनमः विश्वरूपायविश्वायविश्वनाथायवैनमः शंकरायचकालायकालावयवरूपिणे अरूपायचसूक्ष्मायसूक्ष्मसूक्ष्मायवैनमः श्मशानवासिनेतुभ्यंनमस्तेकृत्तिवाससे शशांकशेखरायैवरुद्रभूमिशयायच दुर्गायदुर्गसारायदुर्गावयवसाक्षिणे लिंगरूपायलिंगायलिंगानांपतयेनमः नमःप्रणवरूपायप्रणवार्थायवैनमः नमोनमःकारणकारणायमृत्युंजयायात्मभवस्वरूपिणे त्रिपंचकायशितकंठभर्गगौरीपतेमंगलहेतवेनमः बृहस्पतिरुवाच नाम्नांशतंमहेशस्यउच्चार्यव्रतिनातदा प्रदक्षिणनमस्कारैरेतत्संख्यैःप्रयत्नतः कार्य्याप्रदोषसमयेपूजेयंशंकरस्यच एवंव्रतंसमुद्दिष्टंतवशक्रमहामते शीघ्रंकुरुमहाभागपश्चाच्छुद्धिंकुरुप्रभो शंभोःप्रसादात्सर्वंतेभविष्यातिजयादिकं शक्रउवाच वृत्रःपुरामहेशानंसमाराधयदादरात् कथंप्रापवरंब्रह्मन्पुराकश्चाभवद्द्विज बृहस्पतिरुवाच वृत्रःस्वयंमहातेजाउग्रेणतपसापुरा शिवंप्रसादयामासपर्वतेगंधमादने नाम्नाचित्ररथोराजावनेचित्ररथस्यतत् एतज्जानीहिभोशक्रतवपुर्य्याःसमीपतः यस्मिन्वनेमहाभागनसंतिमहदूर्मयः तस्माच्चैत्ररथंनामवनंपरममंगलं तस्यराज्ञःशिवेनैवयानंचपरमाद्भुतं कामगंकिंकिणीयुक्तंसिद्धचारणसेवितं गंधर्वैरप्सरोयक्षैःकिन्नरैरुपशोभितं ततोतेनैवयानेनपृथिवींपर्य्यटन्पुरातथा गिरीशमुख्यांश्चद्वीपांश्चविविधांस्तथा एकदापर्य्यटन्राजानाम्नाचित्ररथोमहान् कैलासमागतस्तत्रसददर्शपराद्भुतं तथासभांमहेशस्यगणैश्चविराजितां अर्द्धांगलग्नयादेव्याशोभितंचमहेश्वरं निरीक्ष्यदेव्यासहितं

सदाशिवंन्यायान्वितंवाक्यमिदंवभाषे वयंचशंभोविषयान्विताश्चमर्त्यादयःस्त्रीविजितास्तथान्ये तैलोकमध्येवयमेवचाज्ञाःस्त्रीसेवनंलज्जयानैवकुर्म्मः एतद्वाक्यंनिशम्याहमहेशःप्रहसन्निव उवाचन्यायसंयुक्तंसर्वेषा मपिशृण्वतां भयंलोकापवादाच्चसर्वेषामपिनान्यथा अशितंकालकूटंच सर्वेषामपिदुर्जरं लोकातीतंचमेवृत्ततयाप्युपहसत्यसौ ततश्चित्ररथंदेवीगिरिजावाक्यमब्रवीत् उमोवाच रेदुरात्मन्कथंत्वद्यशंकरश्चोपहासितः मयासहैवमंदात्मन्नीक्ष्यसेकर्मणःफलं साधूनाशमकामानामुपहासंकरोतियः देवोवाप्यथवामर्त्यःसविज्ञेयोधमाध मः एतेमुनींद्राश्चमहानुभावास्तथाह्यमीयेखलुवेदगर्भाः तथैवसर्वेसनकादयोह्यमीतज्ज्ञाश्चसर्वेशिवमर्चयंति रे मूढसर्वेषुजनेष्वतिज्ञस्त्वमेकएवाद्यनचापरेजनाः तस्मादभिज्ञंहिकरोमिदैत्यंदेवैर्द्विजैश्चापिवहिष्कृतंत्वां एवंश प्तस्तयादेव्याभवान्याराजसत्तमः राजाचित्ररथःसद्यः पपातसहसादिवः आसुरींयोनिमासाद्यवृत्रोनामाभव तदा तपसापरमेणैवत्वष्टासंयोजितःक्रमात् तपसातेनमहताअजेयोवृत्रउच्यते तस्माच्छंभुंसमभ्यर्च्यप्रदो षेविधिनामुना गुरोस्तद्वचनंश्रुत्वाउवाचाथशतक्रतुः सोद्यापनविधिंब्रूहिप्रदोषस्यचमेधुना कार्त्तिकेमासिसं प्राप्तेमंदवारेत्रयोदशी संपूर्णायाभवेत्साहिसंपूर्णाव्रतसिद्धये वृषभोराजतःकार्य्यःपृष्ठेतस्यतुपीठकं तस्यो पारेन्यसेद्देवमुमाकांतंत्रिलोचनं पंचवक्त्रंदशभुजंवामांगेगिरिजांसतीं सौवर्णीप्रतिमांकृत्वा ताम्रकुंभे जलावृते पंचरत्नफलोपेतेपंचपल्लवचर्चिते चंदनेनसुगंधेनमिश्रितेशोभितेतथा रूप्यपात्रंततः कृत्वा कुंभस्योपरिविन्यसेत् अशक्तौमृण्मयेकुंभेवंशपात्रमथापिवा पर्णंशरावंचास्थायसौवर्णीप्रतिमांतथा शक्त्याकृतां परिस्थाप्यवस्त्रमाल्यविभूषितां पूजयित्वाविधानेनरात्रौजागरणंचरेत् पुष्पमंडपिकामादौकृत्वाश्रद्धासमन्वितः एह्येहित्वमुमाकांतसुखस्पर्शेसुनिर्मले उपविश्यमृडेदानींसर्वशांतिप्रदोभव आसनं पाद्यंचतेमयादत्तंपुष्पगंध

समान्वितं गृहाणदेवदेवेशप्रसीदवरदोभव पाद्यं ताम्रपात्रस्थितंतोयंफलगंधादिसंयुतंअर्घ्यंगृहाणदेवेशमयादत्तंहिभक्तितः अर्घ्यं शीतलंनिर्मलंतोयंकर्पूरेणसुवासितं आचम्यतांमहादेव गिरिजासहितप्रभो आचमनं पंचामृतेनस्नपनं कार्य्यमादौप्रयत्नतः गोक्षीरेणचदेवेशगृहाणपरमेश्वर दध्नाचैवमहादेवस्नपनंक्रियतेतव गृहाणाशुमयादत्तंसुप्रसन्नोभवाव्यय सर्पिषाचमयादेवस्नपनंक्रियतेधुना गृहाणत्वंसुरश्रेष्ठममचायुःप्रदोभव इदंमधुमयादत्तंतवप्रीत्यर्थमेवच गृहाणत्वंसुरश्रेष्ठ ममचायुःप्रदोभव इदंमधुमयादत्तंतवप्रीत्यर्थमेवच गृहाणत्वंमहादेवममशांतिप्रदोभव सितयादेवदेवेशस्नपनंक्रियतेधुना गृहाणश्रद्धयादत्तंसुप्रसन्नोभवप्रभो एवं पंचामृतेनैवस्नापनीयोवृषध्वजः कावेरीनर्मदावेणीतुंगभद्रासरस्वती गंगाचयमुनाचैव ताभ्यःस्नानार्थमाहृतं गृहाणत्वमुमाकांतस्नानायश्रद्धयाजलं स्नानं एतद्वासोमयादत्तंसोत्तरीयंसुशोभनं पूजार्हंश्रद्धयादत्तंतवप्रीत्यर्थमेवच यज्ञोपवीतंसौवर्णमुक्तामणिसमन्वितं तवप्रीत्यामयादत्तंब्रह्मकर्मप्रसादनं यज्ञोपवीतं सुगंधिचंदनंदिव्यंकुंकुमादिसमन्वितं गंधंगृहाणदेवेशसुगंधिपुष्टिवर्द्धनं गंधं अक्षताश्चसदादिव्याःकुंकुमादिभिरंजिताः मयादत्तामहादेवतवप्रीत्यैसुभक्तितः अक्षताः मालतीचंपकादीनिकुमुदान्युत्पलानिच विल्वपत्राणिपूजार्थंस्वीकुरुत्वमुमापते पुष्पाणि धूपंविशिष्टंपरमंसर्वौषधिविजृंभितं गृहाणपरमेशानममशांत्यर्थमेवच धूपं दीपावलिंमयादत्तांगृहाणपरमेश्वर आरार्तिकप्रदानेनममतेजोविवर्द्धय आरार्तिकं शाल्योदनंघृतंपूपंपायसादिसमन्वितं नैवेद्यंविधिवद्दत्तंभक्त्यामेप्रतिगृह्यतां नैवेद्यं कर्पूरैलालवंगादिपूगीफलसमन्वितं तांवूलं कल्पितंभक्त्यागृहाणगिरिजाप्रिय तांवूलं इदंफलमितिफलं हिरण्यगर्भेतिदक्षिणा निपत्यदंडवद्भूमौप्रणम्यचपुनःपुनः पश्चाज्जागरणंकार्यंगृहेवादेवतालये वितानंमंडपंकृत्वानानावर्णैःसमन्वितं गीतवादित्रनृत्येन

अर्चनीयःसदाशिवः प्रभातायांतुशर्वर्य्यामुदितेरविमंडले स्नात्वापुनःसमभ्यर्च्यजुहुयात्पायसेनच अथाचार्यंसपत्नीकंवस्त्रालंकारचंदनैः तोषयित्वासुविद्वांसंगांप्रदद्यात्पयस्विनीं ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिःप्रतोषयेत् दीनानाथांश्चसंतर्प्यअछिद्रंवाचयेत्ततः लब्धानुज्ञांब्राह्मणेभ्यो बंधुभिःसहितःशुचिः हृदिस्मरन् शिवंभक्त्याभुंजीतनियतोव्रती अनेनैवविधानेनप्रदोषोद्यापनाविधिः कार्य्याविधिवताशक्रसर्वकार्यार्थसिद्धये गुरुणाकथितंसर्वंसचकारशतक्रतुः तेनैवचसहायेनमहेंद्रोयुद्धतत्परः वृत्रंप्रतिसुरैःसार्द्धं युयुधेसशतक्रतुः

इतिकेदारखंडोक्तशनिप्रदोषव्रतम्

अथनिर्णयामृतस्कंदपुराणोक्तशन्यादिवारयुक्तंप्रदोषव्रतं देव्युवाच देवकेनविधानेनप्रदोषव्रतमुत्तमंविधातव्यंनरैस्त्रीभिःसंतानफलसिद्धये ईश्वरउवाच यदात्रयोदशीशुक्लामंदवारेत्रयोदशी आरब्धव्यंव्रतंतत्रसंतानफलसिद्धये ऋणनिर्मोचनार्थंतुभौमवारेणसंयुता आयुरारोग्यसिद्ध्यर्थंभानुवारेणसंयुतेति अथास्यांप्रातः स्नात्वापुत्रादिकामदंप्रदोषव्रतंकरिष्ये इतिसंकल्प्य गुरूपदिष्टविधिनागममंत्रैर्वे॰ मंत्रैर्वाषोडशोपचारैर्यथाविभवंपूजां कुर्य्यात् ततश्च भवायभवनाथायमहादेवायधीमते रुद्रायनीलकंठायशर्वायशशिमौलये उग्रायोग्रौघनाशायभीमायभयहारिणे ईशानायनमस्तुभ्यंपशूनांपतयेनम इतिमंत्रेणसंपूज्य प्रार्थयेत् यथाभवान्समस्तानांपशूनांपाशमोचकः तथाव्रतेनसंतुष्टःपुत्रंदेहिसुलक्षणं सयावकंचनैवेद्यंसाज्यंसफलशर्करं दत्वाथोमुखवासंचतांबूलंक्रमुकादिकं समर्थोष्टसुदिक्ष्वष्टदीपानाज्यपरिप्लुतान् भवाद्यैर्नामभिर्दद्यात्तैरेवाष्टप्रदक्षिणाः नमस्काराष्टकंकृत्वाजपंपूजांसमर्प्यच वृषराजंसमभ्यर्च्यवृषमंत्रेणमंत्रवित् मंत्रश्च धर्मस्त्वंवृषरूपेणजगदा

व्र०र०
मार्ग०
४१

नंदकारक अष्टमूर्त्तेरधिष्ठानमतः पाहिसनातनेति वृषायदूर्वाचषकंपानीयंचानिवेद्यच वृषस्यवृषणंस्पृष्ट्वाशृंगयोर्मध्यतःशिवं विलोक्यसहितंदेव्याः पूजितंप्रार्थयेच्छिवं प्रार्थनामंत्रश्च ऋणरोगादिदारिद्र्यपापादिक्षयमृत्यवः भयशोकमनस्तापानश्यंतुममसर्वदेति पृथिव्यांयानितीर्थानिसागरांतानियानिच अंडमाश्रित्यतिष्ठंति प्रदोषेवृषभस्यतु स्पृष्ट्वातुवृषणौतस्यशृंगमध्येविलोक्यच पुच्छंचककुदंचैवसर्वपापैःप्रमुच्यतइति निवेद्यव्रतराजंतुदद्याद्वित्तानुसारतः दक्षिणाब्राह्मणेभ्यश्चततोमौनंविसर्जयेत् एवंसंवत्सरंकुर्यात्त्रयोदश्यामिदंव्रतं अथवामंदवारेणयुक्तासेवत्रयोदशीं चतुर्विंशतिकुर्वीतसोभीष्टफलमाप्नुयादिति स्कंदपुराणोक्तंशनिप्रदोषव्रतम् ब्रह्मोत्तरखंडेतु सोमवारेणयुक्तायामपियस्यांकस्यांचित्त्रयोदश्यांप्रदोषादौशिवपूजोक्ता सोमवारेविशेषेणप्रदोषादिगुणैर्युतं केवलंवापियेकुर्युः सोमवारेशिवार्चनमिति अथनृसिंहपुराणोक्तंनृसिंहत्रयोदशीव्रतं हेमाद्रौ गुरुवारेत्रयोदश्यामपराह्णेजलाप्लुतः तर्पयित्वादेवान्पितॄनृषींश्चतिलतंडुलैः नरसिंहंसमभ्यर्च्य यःकरोत्युपवासकं सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते ॥ इतिनृसिंहपुराणोक्तंनृसिंहत्रयोदशीव्रतम्

अथकूर्मपुराणोक्तंत्रिलोचनत्रयोदशीव्रतम् हेमाद्रौ

त्रयोदश्यांतथारात्रौसोपवासस्त्रिलोचनं दृष्ट्वातुप्रथमेयामेमुच्यतेसर्वपातकैरिति ॥ अथकामत्रयोदशीव्रतं हेमाद्रौ ब्रह्मोवाच कामंपूज्यत्रयोदश्यांसुरूपोजायतेनरः इष्टांरूपवतींभार्यांलभेत्कामांश्चपुष्कलान् मूलमंत्राः स्वसंज्ञाभिरंगमंत्राश्चकीर्तिताः पूर्ववत्पद्मपत्रस्थः कर्तव्यश्चतिथीश्वरः गंधपुष्पोपहारैश्च यथाशक्तिविधीयते पूजातुवित्तशाठ्येनकृतापिनफलप्रदा आज्यधारासमिद्भिश्चदधिक्षीरान्नमाक्षिकैः पूर्वोक्तफलदोहोमः कृतः

शांतेनचेतसा इतिभविष्योत्तरेकामत्रयोदशीव्रतं अथवाराहपुराणोक्तंमहावुधसंज्ञंत्रयोदशीव्रतम् ॥ सनत्कुमारउवाच अथस्वस्त्ययनंपुंसांशृण्वतामघनाशनं व्रतमतत्त्रयोदश्यांप्रदोषेस्यान्महावुधे नवनीतपंचगव्यंरजतांशसमप्रभं कपित्थफलमात्रंतत्समादाय ताम्रादिपात्रेप्राङ्मुखोनिक्षिप्य अष्टदलपद्मकर्णिकायां लक्ष्मीनारायणंदलेष्वष्टशक्तीः दिक्ष्विंद्रादीन्संपूज्यदेवाग्रेतन्नवनीतंद्विधाविभज्य प्रत्येकमभिमंत्रयेत् तत्रमंत्रः पुरुषःपूर्णकामश्च हरिर्भद्रंकरोतुनः योषिद्द्वारासदालक्ष्मीर्मंगलंदिशतुस्वयमितिवारद्वयं पत्न्यैप्राशयतीमभिमंत्रयेत् यस्त्वंतरात्माभूतानामनादिनिधनोच्युतः सपरःपरयाशक्त्याकुक्षिंरक्षतुमेसदा सर्वपुष्टिप्रजननीसर्वार्त्तिशमनीतव लक्ष्मीःकुक्षिगतंगर्भंरक्षतादच्युतप्रिया सर्वार्त्तिक्षयदक्षादिदिव्यशक्तियुतान्यपि त्वांरक्षंतुसदा विष्णोः सर्वग्रहरणान्यपि तथादिक्पतयः सर्वेरक्षंतुग्रहदेवताः पांतुसंसारसंयुक्ताः सर्वेरक्षंतुसर्वदेति पत्नीमभिमंत्र्य ब्राह्मणान्भोजयित्वा वध्वासहतांरात्रिमतिवाह्य चतुर्दश्यांपुनर्द्विजान् भोजयित्वा स्वयंभुंजीतेतितत्कलं मंगल्यपरमप्राप्त्यैदीर्घमायुष्यंविंदतीत्यंतेनतत्रैवोक्तम् ॥ इतिवाराहपुराणोक्तंपुत्रप्राप्तित्रयोदशीव्रतं अथसौरपुराणोक्तंशिवत्रयोदशीव्रतं व्यासउवाच मंदवारयुतापुण्याशुक्लपक्षेत्रयोदशी तस्यामुपोष्यविधिनासंपूज्यगिरिजापतिम् ब्रह्महत्यादिभिःपापैर्मुक्तोभवतिमानवइति ॥ इतिशुक्लत्रयोदश्यां शनित्रयोदशीव्रतम् ॥ अथमार्गशीर्षादिमासत्रयोदश्यांवर्षसाध्यं यमादर्शनव्रतं यमउवाच पूर्वाह्णेमार्गशीर्षादौवर्षमेकंनिरंतरं त्रयोदश्यांसौम्यदिनेआर्क्यंगारवर्जिते ममनाम्नाद्विजानष्टौपंचचैवसमाह्वयेत् पुराणवेदतत्वज्ञान्स्वाचारांस्तत्वदर्शिनः मय्येकशरणान्साधून्सर्वभूतहितेरतान् शुचौदेशेशुभेपट्टेप्राङ्मुखानुपवेशयेत् अंतर्वासोयुतान्भक्त्यायत्नेनाभ्यंजयेच्चतान् अंतर्वासोयुतान्सर्वानधोवस्त्रमात्रयुतान् आरभ्यउत्तमां

गंतुतिलतैलेनमर्दयेत् स्नापयेद्गंधकाषायैः सुखोष्णेनचवारिणा पृथक्पृथक्स्नापयित्वासर्वान्वाद्विजोत्तमान् सुखस्नातांस्तथाचांतान्व्रतीभक्तिपरायणः सपुत्रभृत्यःशुश्रूषांतेषांकुर्य्यात्समाहितः प्राङ्मुखानुपविष्टांश्चत्रयोदशपृथक्पृथक् संस्थापयेच्चाभिमुखान्गुडापूपांसुयाचितान् सव्यंजनंसपक्वान्नंभूयोभूयोनिवेदयेत् यथासुखंयथातृप्तियथाकाममयार्चितं दैन्यंभावंसमालक्ष्यइच्छाद्भिःश्रेयआत्मनः शुचिर्भूत्वातथाचांतानर्चयेत्तिलतंडलैःप्रस्थमात्रैरथैकैकंताम्रपात्रसमन्वितंसदक्षिणैःसच्छत्रैश्चजलकुंभैः पवित्रकैःचर्मप्रावरणैःश्रेष्ठैर्वस्त्रयुग्मैश्चदूतकाः मंत्रेणानेनविप्रेंद्रानर्चयेमान्पृथक्पृथक् ब्राह्मणान्समभूष्यस्तान्पंक्तिभेदंनकारयेत् यमः शनैश्चरोमृत्युर्दंडहस्तोघनायकः अभावःप्रलयःशांतिर्दुःखप्रशमनोंतकः लोकपालोश्विनीपुत्रस्तथाक्रूराननःशिवः ममप्रसादसुमुखोददात्वभयदक्षिणां इत्युक्त्वासंप्रयच्छेतदेयंदत्वाव्रतीपुनः द्विजांश्चानुव्रजेत्प्राप्तान्स्वगृहंविधिनार्चितान् एवंयः पुरुषःकश्चित्सकृद्व्रतमिदंचरेत् समृतोनेक्षतेदूतान्नयातियममंदिरं अदृष्टोसौसमायातिविमानेनार्कमंडलम् तस्माद्यातिपुरींविष्णोस्ततःशिवपुरंव्रजेत्

इतिभविष्योत्तरोक्तंयमादर्शनत्रयोदशीव्रतम् ॥

अथमार्गशीर्षशुक्लचतुर्दश्यामारभ्य मत्स्यपुराणोक्तंशिवचतुर्दशीव्रतं नंदिकेश्वरउवाच शृणुष्वावहितोब्रह्मन्वक्ष्येमाहेश्वरंव्रतम् त्रिषुलोकेषुविख्यातंनाम्नाशिवचतुर्दशी मार्गशीर्षेत्रयोदश्यांसितायामेकभोजनम् प्रार्थयेद्देवदेवेशंत्वामहंशरणंगतः मार्गशीर्षश्चात्रप्रतिपदादिरमावास्यांतश्चांद्रोमासः चतुर्दश्यांनिराहारःसमभ्यर्च्यतुशंकरम् सुवर्णवृषभंदत्वाभोक्ष्येहंचापरेहनि एवंनियमकृत्सुप्त्वाप्रातरुत्थायमानवः कृतस्नानजपः

पश्चादुमयासह शंकरम् पूजयेत्कमलैःशुक्लैर्गंधधूपानुलेपनैः पादौनमःशिवायेतिशिवःसर्वात्मनेनमः ललाटंतुत्रिने
त्रायनेत्राणिहरयेनमः मुखमिंदुमुखायेतिश्रीकंठायेतिकंधराम् सद्योजातायकर्णौतुवामदेवायवैभुजौ अघो
रंहृदयायेतिहृदयंचापिपूजयेत् स्तनौतत्पुरुषायेतिईशानायतथोदरम् पार्श्वेचानंतधर्म्मायज्ञानभूतायवैकटिम् ऊरू
चामुत्रवैराग्यासिंहायेतिप्रपूजयेत् अनंतैश्वर्यनाथायजानुनीचार्चयेद्बुधः प्रधानायनमोजंघेगुल्फौव्योमात्मनेनमः
व्युप्तकेशात्मरूपायपृष्ठमभ्यर्चयेन्नरः नमःपुष्ट्यैनमस्तुष्ट्यैपार्वतींचापिपूजयेत् ततस्तुवृषभंहैममुदकुंभसमन्वितं शुक्ल
माल्यांबरधरंपंचरत्नसमन्वितं भक्ष्यैर्नानाविधैर्युक्तंब्राह्मणायनिवेदयेत् प्रीयतांदेवदेवोत्रसद्योजातःपिनाकधृक्
ततस्तुविप्रानन्नेनतर्पयेच्छक्तितःशुभान् पृषदाज्यंतुसंप्राश्यस्वपेद्भूमावुदङ्मुखः पंचदश्यांततःपूज्यविप्रान्भुंजीतवाग्यतः
तद्वत्कृष्णचतुर्दश्यामेतत्सर्वंसमाचरेत् चतुर्दशीषुसर्वासुकुर्यात्पूर्ववदर्चनं येतुमासविशेषाःस्युस्तान्निबोधक्रमादिह
मार्गशीर्षादिमासेषुक्रमादेतदुदीरयेत् शंकरायनमस्तुभ्यंनमस्तेकरवीरक त्र्यंबकायनम
स्तेस्तुमहेश्वरततः परं नमस्तेस्तुमहादेवस्थाणवेचततः परं नमःपशुपतेनाथनमस्तेशंभवेपुनः नमस्तेपरमानंदनमःसोमार्धधारिणे
नमोभीमायइत्येवंत्वामहंशरणंगतः गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं पंचगव्यंविल्वपत्रयवागोशृंगवारिच
तिलाश्चकृष्णाविधिवत्प्राशनंक्रमशःस्मृतं प्रतिमासंचतुर्दश्योरेकैकंप्राशनंस्मृतं
मन्दारैर्मालतीभिश्चतथाधत्तूरकैरपि सिंदुवारैरशोकैश्च मल्लिकाभिःसपाटलैः अर्कपुष्पैःकदंबैश्चशतपत्रैस्तथोत्पलैः
एकैकेनचतुर्दश्योरर्चयेत्पार्वतीपतिं मार्गशीर्षादिमासेष्वित्यतद्गुणसंविज्ञानोबहुव्रीहिःतेनमार्गशीर्षेसद्योजा
तःप्रीयतामितिसद्योजातस्योदीरणात्पौषादिष्वेकादशसुशंकरादीनुदीरयेत् पृषदाज्यस्यमार्गशीर्षेप्राशनाद्गोमूत्रादयःपौषादिषुप्राशनीयाःमार्गशीशीर्षेश्वेतकमलैः पूजाविधानान्मंदाराद्यैः पौषादिषुपूजाकार्येत्यर्थः पुनश्चकार्ति-

केमासिसंप्राप्तेतर्पयेद्द्विजान् अन्नैर्नानाविधैर्भक्ष्यैर्वस्त्रमाल्याविभूषणैः कृत्वानीलवृषोत्सर्गंश्रुत्युक्ताविधिनानरः उमामहेश्वरंहैमंवृषभंचगवासह मुक्ताफलाष्टकयुतंसितनेत्रपटान्वितं नेत्रपटः तेनइतिप्रसिद्धः ताम्रपात्रोपरिपुनःशालितंडुलसंयुतं स्थाप्यविप्रायशांतायदेवव्रतपरायवे ज्येष्ठसामाविदेदेयंनचकुव्रतिनेक्वचित् गुणज्ञेश्रोत्रियेदद्यादाचार्येतत्त्ववेदिनि अव्यंगांगायसौम्यायसदाकल्याणकारिणे सपत्नीकायसंपूज्यमाल्यवस्त्रविभूषणैः गुरौसतिगुरोर्देयंतदभावेद्विजातये नवित्तशाठ्यंकुर्वीतकुर्वन्दोषान्यतत्परः सर्वोपस्करसंयुक्तांशय्यांदद्यात्सकुंभिकां अनेनाविधिनायस्तुकुर्याच्छिवचतुर्दशीं सोश्वमेधसहस्रस्यफलमाप्नोतिमानवः ब्रह्महत्यादिकंकिंचिदत्रवामुत्रवाकृतं पितृभिर्भ्रातृभिर्वापितत्सर्वंनाशमाप्नुयात् ॥ दीर्घायुरारोग्यकुलाभिवृद्धिरत्रासुयामुत्रचतुर्भुजत्वं गणाधिपत्यंदिविकल्पकोटि शतंवसित्वापदमेतिशंभोः ॥ नबृहस्पतिरप्यनंतमस्याः फलमिंद्रोनपितामहोपिवक्तुं नचसिद्धगणोप्यलंनचाहंयदिजिह्वायुतकोटयोपिवक्त्रे ॥ भवत्यमरवल्लभः पठतियःस्मरेद्वायदाशृणोत्यपिविमत्सरःसकलपापनिर्मोचनीं इमांशिवचतुर्दशीममरकामिनीकोटयःस्तुवंतिममानिंदितांकिमुसमाचरेद्यःसदा ॥ यावाथनारीकुरुतेचभक्त्याभर्त्तारमापृच्छ्यगुरुंसुतंवा सापिप्रसादात्परमेश्वरस्यपरंपदंयातिपिनाकपाणेः ॥ इतिशिवचतुर्दशीव्रतं ॥ ❀ ॥ नारदीये मार्गशुक्लचतुर्दश्यामेकभक्तंपुरोदितं निराहारोवृषंस्वर्णंप्राच्यदद्याद्द्विजातये परेह्निप्रातरुत्थायस्नात्वासोमंमहेश्वरं पूजयेत्कमलैःशुक्लैर्गंधमाल्यानुलेपनैः द्विजान्संभोज्यमिष्टान्नैस्तोषयेद्दक्षिणादिभिः एतच्छिवव्रतंविप्रभुक्तिमुक्तिप्रदायकं कर्त्तॄणामुपदेष्टॄणांसार्थानामनुमोदिनां अस्यांमार्गशुक्लचतुर्दश्यांपिशाचमोचनतीर्थेश्राद्धमुक्तं त्रिस्थलीसेतौ साचापराह्णव्यापिनीग्राह्या अज्ञातानामपिपिशाचाद्युद्देशत्वादेकोदिष्टत्वाच्चमध्याह्नव्यापिनीतियथाकुलधर्मं व्रतादावुत्तरैवेतिकाशीखंडेपि मार्गशुक्लचतुर्दश्यां

कपर्दीश्वरसन्निधौ स्नात्वान्यत्रापिमरणान्नपैशाच्यमवाप्नुयुः इमांसांवत्सरींयात्रां येकरिष्यंतिमानवाः तीर्थप्रतिग्रहात्पापान्निस्तरिष्यंतितेनराइति अथमार्गपौर्णमास्यांलवणाढकदानमुक्तं नारदीये मार्गशीर्ष्यांपौर्णमास्यांस्वर्णाढ्यंलवणाढकं देयंविप्रायशांतायसर्वकामसमृद्धयइति अस्यांचंद्रपूजोक्ता निर्णयामृते ॥ ब्रह्मपुराणे मार्गशीर्षेतिथिप्रक्रमे वामनेत्रंहियद्विष्णोस्तदेवभुवनत्रयेयअनसूयायतश्चंद्रममृतेनाभ्यषेचयत् पौर्णमास्यांचतस्यांतंपूजयेत्तत्रसर्वदा शुक्लैःपुष्पैश्चपयसा स्नापयेत्परयामुदा रत्नदीपैश्चबलिभिर्होमैर्ब्राह्मणतर्पणैः गोभ्यश्चलवणंदेयंतास्मिन्नहनिसर्वदा यतश्चलवणंचंद्राद्दक्षशापाद्विनिस्सृतं मातास्वसाचदुहितापूज्याश्चस्वकुलांगनाःकांतिर्लक्ष्मीश्चकल्याणंपूर्णेंदोःपूजनाद्भवेदिति अस्यामेवमृगशिरोनक्षत्रयुक्तायांससुवर्णंलवणंदेयं तदुक्तंविष्णुना मागशीर्षेशुक्लपंचदश्यांमृगशिरोयुक्तायांलवणस्यसुवर्णनाभंप्रस्थमेकंचंद्रोदये ब्राह्मणायप्रतिपादयेत् अनेनकर्मणासौभाग्यभागभिजायते अस्यांदत्तात्रेयोत्पत्तिःस्कांदे सह्यखंडे मार्गशीर्षेतथामासिदशमेह्निसुनिर्मले मृगशीर्षेयुतेपौर्णमास्यांज्ञस्यचवासरे।ज्ञस्यवासरेबुधवासरे। जनयामासदेदीप्यमानंपुत्रंसतीशुभं तंविष्णुमागतंज्ञात्वात्रिर्नामाकरोत्स्वयं दत्तवान्स्वस्यपुत्रत्वाद्दत्तात्रेयमितीश्वरमिति दशमेमासीत्यन्वयः इयंपूर्वविद्धाग्राह्येति वदंतिप्रदोषव्यापिनीतिनिर्णयसिंधौ अस्यामेवचंद्रव्रतारंभःकार्यः तदुक्तंहेमाद्रौविष्णुधर्मोत्तरे मार्गशीर्षादथारभ्यचंद्रमंडलकेनरः सोपवासःपौर्णमास्यांपूज्ययज्ञफलंलभेत् नक्ताशनस्तुसंपूज्यचाग्निष्टोमफलंलभेत् कृत्वाव्रतंवत्सरमेतदिष्टंप्राप्नोतिलोकांश्चनिशाकरस्य तत्रोष्यलोकेसुचिरंसकालंसायुज्यमायातिततस्तुशंभोरिति अस्यांप्रत्यवरोहणंकार्य्यं तदुक्तमाश्वलायनेन मार्गशीर्ष्यांप्रत्यवरोहणं चतुर्दश्यांपौर्णमास्यांवेति अत्रश्राद्धमुक्तमिति यत्तुविष्णुः मार्गशीर्षेचपौषेचमाघेप्रौष्ठेचफाल्गुने कृष्णपक्षेषुसर्वेषुचान्वष्टक्यस्तथाष्टकेति पौषमासा

दिषुत्रिष्विति तच्चतुर्धा अनावश्यकत्वार्थेचाप्यन्याचतुर्थीस्यात्तांचकुर्य्यात्प्रयत्नतइति वायुब्रह्मांडपुराणात् श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यत इतिप्रत्यवायश्रवणात् अथास्यांमार्गपौर्णिमास्यामाग्नेयपुराणदानमुक्तंनारदीये एतदाग्नेयकंनामपुराणंपरिकीर्तितं तल्लिखित्वाचयोदद्यात्सुवर्णकमलान्वितं तिलधेनुयुतंवापिमार्गशीर्ष्यांविधानतः पुराणार्थविदेसोथस्वर्गलोकेमहीयते इतितिलधेनुसहिताग्नेयपुराणदानविधिः ॥ अथवतिशीपौर्णिमोच्यते साच मार्गशीर्षसितपक्षेपौर्णिमास्यांशुचिव्रता प्रातःशुक्लतिलैःस्नात्वापरिधायांबरंसती पूजासंभारमासाद्यपिष्टदीपंविधायच पुत्रसौभाग्यप्राप्त्यर्थंमध्याह्नेपूजयेच्छिवं साचमार्गशीर्षपौर्णिमामध्याह्नव्यापिनीग्राह्यातिथ्यादिसंकीर्त्यममेहजन्मनिजन्मांतरेच अखंडसौभाग्यपुत्रपौत्रप्राप्त्यर्थंवतिशीपौर्णिमाव्रतंकरिष्ये तत्रनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंकलशाराधनंचकरिष्ये पंचवक्त्रंत्रिनेत्रंचजटाखंडेंदुमंडितं व्यालयज्ञोपवीतिंचभक्तानांवरदंशिवं आगच्छभगवञ्छंभोसर्वालंकारभूषित यावद्व्रतंसमाप्येततावत्त्वंसन्निधौभव आवाहनं सिंहासनंस्वर्णपीठंनानारत्नोपशोभितं अनेकशक्तिसंयुक्तमासनंप्रतिगृह्यतां आसनं ॥ त्रिपुरांतकदेवेशसृष्टिसंहारकारक पाद्यंगृहाणदेवेशमयादत्तांहिभक्तितः।पाद्यं।चदनाक्षतसंयुक्तंनानापुष्पसमन्वितं गृहाणार्घ्यंमयादत्तमीश्वरप्रतिगृह्यतां ॥अर्घ्यं। तोयमेतत्सुखस्पर्शंकर्पूरेणसमन्वितं शंभोशंकरसर्वेशगृहाणाचमनीयकं ।आचमनं । पयोदधिघृतंचैवमधुशर्करयायुतं पंचामृतेनस्नपनंकरिष्येभक्तवत्सल ॥ पंचामृतस्नानं ॥ मयानीतानितोयानिगंगादीनांचहैमजैः स्नानंतैः कुरुदेवेशममशांतिर्विधीयतां । स्नानं । श्वेतांबर युगंदेवंसर्वकामार्थसिद्धये अंबिकाकांतदेवेशमयादत्तप्रगृह्यतां वस्त्रंकुंकुमाक्तंसुरश्रेष्ठक्षौमसूत्रविनिर्मितं उपवीतंमयादेवभक्त्यादत्तंप्रगृह्यतां ॥ उपवीतं ॥ काश्मीरजेनसंयुक्तंकर्पूरागुरुमिश्रितं कस्तूरिकासमायुक्तंचंदनंप्रतिगृह्यतां ॥ चंदनं ॥ प्रक्षालिताश्चधौताश्चतंडुलाश्चशिवप्रियाः मयानिवे·

दिताभक्त्यागृहाणजगदीश्वर अक्षताः कमलैर्मालतीपुष्पैश्चंपकैर्जातिसंभवैः विल्वपत्रैर्महादेवकरिष्येतवपूजनं पुष्पाणि दशांगोगुग्गुलूद्भूतःसुगंधिश्चमनोहरः आघ्रेयतामयंधूपोदेवदेवदयानिधे धूपं कार्पासवर्त्तीभिर्युक्तंघृताक्तंतिमिरापहं भक्त्यासमाहृतंदीपंमयादत्तंप्रगृह्यतां दीपं नैवेद्यंगृह्यतांदेवभक्तिंमेह्यचलांकुरु ईप्सितंचवरंदेहिपरत्रचपरांगतिं नैवेद्यं नैवेद्यमध्येयानिपंचवक्त्रध्यानानितानिपठनीयानि उत्तरापोशानं हस्तप्रक्षालनं पूगीफलंमहाद्दिव्यंनागवल्यादलैर्युतं कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्यतां तांबूलं इदंफलंमयादेवफलं वक्ष्यमाणषोडशनामभिः पूजयेत् शंकरायात्रिनेत्रायकालरूपायशंभवे महादेवायरुद्रायशर्वायचमृडायचईश्वरायाशिवायेतिभूतेशायकपर्दिने मृत्युंजयायचोग्रायाशितिकंठायशूलिने दूर्वा. तेजोययंसलक्ष्मीकंदेवानामपिदुर्लभं हिरण्यंपार्वतीनाथमयादत्तंप्रगृह्यतां दक्षिणा. प्रसीददेवदेवेशचराचरजगद्गुरो वृषध्वजमहादेवत्रिनेत्रायनमोनमः नीराजनं यानिकानिचपापानीतिप्रदक्षिणाः इमानिविल्वपत्राणिपुष्पाणिविविधानिचमयादत्तानिविश्वेशगृहाणवरदोभव पुष्पांजलिः नमोस्त्वनंतायसहस्त्रमूर्त्तयइतिनमस्काराः भवायभवनाशायमहादेवायधीमते रुद्रायनलिकंठायशर्वायचनमोनमः ईशानायनमस्तुभ्यंपशूनांपतयेनमः गुणत्रयात्मनेतुभ्यंगुणातीतायतेनमः नमःप्रसीददेवेशसर्वकामांश्चदेहिमे त्वमेवशरणंनाथक्षमस्वमयिशंकर प्रार्थनाउपायनमिदंतुभ्यंव्रतसंपूर्णहेतवे वाणकंद्विजवर्यायसहिरण्यंददाम्यहं वायनं अस्यव्रतस्यसिध्यर्थंहिरण्यंपापनाशनं ददामितुभ्यंविप्रेंद्रप्रणतोस्मिप्रगृह्यतां दक्षिणां महात्मन्गच्छकैलासंवृषारूढोगणैर्युत आहूतस्तत्क्षमस्वत्वंप्रसादसुमुखोभव विसर्जनं इतिपूजाविधिः अथकथा यशोदोवाच कृष्णत्वंसर्वदेवानांस्थितिसंहारकारकः अवैधव्यकरंस्त्रीणांयथार्थंवदतद्व्रतं श्रीकृष्णउवाच यशोदेसाधुपृष्टोहंसौभाग्यप्रा

ष्टयेस्त्रियः वतिशीनामविख्यातंपौर्णमास्यांव्रतंभवेत् तद्व्रतस्यप्रभावेनस्त्रीणांसौभाग्यदंभवेत् अवैधव्यकरं नामशिवप्रीतिकरंमहत् यशोदोवाच केनचीर्णंव्रतमिदंमृत्युलोकेकदावद विधानंकीदृशंदेवयेनशंभुःप्रसीदति श्रीकृष्णउवाच कांतिकानामनगरीप्रसिद्धाभुविमंडले अनेकरत्नसंपूर्णाचंद्रहासेनपालिता तत्रैवासीद्द्विजः कश्चिद्धनेश्वरेतिनामतः तस्यभार्याशुभाचारानाम्नारूपवतीसती अनपत्यौमहाभागावुभौतौदुःखितौसदा तन्नगर्यांद्विजःकश्चिद्योगारूढोद्विजोजटी भिक्षांचकारसर्वज्ञस्तद्गृहंचाप्यवर्जयत् तद्गृहेनैवभिक्षांसरूपवत्यासमर्पितां ययौतडागतीरंसाभिक्षांप्रक्षालयत्पुनः धनेश्वरेणतद्दृष्टंयोगिनायत्कृतंशुभं भिक्षांग्रह्णासिसर्वेषांगृहस्थानांद्विजोत्तम कदापिमद्गृहेविप्रानायासिवदकारणं योग्युवाच अपुत्रस्यगृहस्थस्ययदन्नमुपभुज्यते पतितान्नसमंतत्तुनभोक्तव्यंकदाचन धनेश्वरेणश्रुत्वैतदात्मानंगर्हयन्बहु धनधान्यसमृद्धिश्चपुत्रहीनस्त्वहंप्रभो इत्युक्तोसौजटीप्राहगच्छाराधायचंडिकां तस्यतद्वचनंश्रुत्वागेहेभार्यांनिवेद्यच तपसेनिर्जगामासौचंडयाराधनमाचरत् उपवासैःषोडशभिःस्वप्नेचैवाहचंडिका भोधनेश्वरगच्छत्वंतवपुत्रोभविष्यति स्वसामर्थ्यवशाद्दयादीपावैपिष्टसंभवाएकैकवृद्ध्यादातव्याःषोडशद्वयपूर्णिमाः इदंव्रतंस्वपत्न्यैत्वंकथयस्वयथास्थितं आरुरोहाशुचाम्रत्वंफलमादायसत्वरं स्वगृहंगच्छभार्यायैदेहिगर्भोभविष्यति ततःप्रभातसमयेसहकारमपश्यत आरोढुंनैवशक्तःसचिंताव्याकुलमानसःस्तुतिंचक्रेगणेशस्यकृपांकुरुदयानिधे मनोरथोममैवास्तुत्वत्प्रसादाद्दयानिधे इत्युक्त्वाचततःशीघ्रंफलमादायवेगतः त्रिवारमावृतिंकृत्वाफलमेकंददर्शसः वराल्लब्धंतदेवासीन्नान्यत्स्यादर्थनिश्चयः आगत्यकथितंतत्त्वभार्यायैदत्तवान्फलं यदातदारूपवत्याभक्षितंगर्भमादधे तदादेव्याःप्रसादेन रूपौदार्यगुणान्वितः तस्यास्तदाभवत्पुत्रो देविदासेतिनामतः व्रतवंधंततश्चक्रे विवाहंनकरोतिसः मात्राचाग्रहतः

पृष्ठस्सोवदत्सर्वंचेष्टितं ततस्तुदैवयोगेनकाश्यांनेयोमयाशिशुः इतिबुद्धिस्तदाजातापितुस्तस्यमहात्मनःतंप्रेषय
स्सहाश्वेनमातुलेनसहैवच कियंतिसमतीतानिदिनानिपथिगच्छतोः गच्छन्काशीपुरींप्राप्तोभागिनेयेनसंवृतः
कस्याचित्त्वथविप्रस्यमंडलेप्राप्तवान्निशि तस्मिन्दिनेगृहस्वामीकन्यामुद्वाहयन्कृती तैलादिरोपणंचक्रेकृत्वावरनिवे
शनंलग्नस्यसमयेप्राप्तेधनुर्वातयुतोनरः धनुर्वाताख्यवातव्याधिमानित्यर्थः वरपित्रादिभिस्सर्वैर्विचार्यचपुनःपुनः
असौकार्पटिकोबालः सुंदरोयंसुरोयथा सार्द्धत्वनेनलग्नंवैकरिष्यामः क्रमेणतु इतिनिर्धार्यमनसाप्रार्थयामा-
समातुलं घटिकाद्वयपर्यंतंदेहित्वंभागिनीसुतं मातुलउवाच मधुपर्केतथाकन्यादानेयद्यत्प्रदीयते तदस्माकंयदि
भवेत्तर्ह्यसौभवतांवरः तथाभवतुतेनोक्तोविधिर्वैवाहिकोभवत् पाणिंचग्राहयामासवरेणचयथाविधि वद्वासार्द्धं
तथाभोक्तुंसचनोत्सहतेताशिशुः उत्तिष्ठामीतिसांचिंत्यकस्यभार्याभवेदियं ततस्त्वेकांतसमयेनिःश्वासान्मुमुचेवहून्
साब्रवीत्कथमेतस्मादन्यथाब्रह्मसूत्रता त्वंमेपतिरहंपत्नीदेवाग्निद्विजसन्निधौ सोब्रवीन्माकुरुष्वेदंममायुःस्वल्पमे
वच तथातेपिगतिर्भूयात्सेयंमह्यंभवेदिति उत्तिष्ठभोनमोनाथक्षुधितोसिनसंशयः प्रीत्याप्रीतितयासार्द्धंभुक्तवा
न्सद्विजस्तथा अंगुलीयंददौतस्याः स्पष्टरत्नगतंनवं अंशुकंचददौतस्याः स्थानत्रयविभूषितं नवरत्नमयीं
मुद्रांगृहीत्वाप्यंशुकंचसा इतिसंकेतकंकृत्वामद्वचःकुरुमेप्रिये ममसंजीवनार्थायकुरुजात्यादिवाटिकां मनो
रमःपुष्पजातिसुगंधिनवमल्लिकाः सिंचसिंचप्रतिदिनंक्रीडांकुरुयथासुखं यस्मिन्दिनेतुमत्प्राणवियोगः सम
जायते तदासपुष्पवल्लीनांप्राणत्यागोभविष्यति पुनःसंजीवितास्ताश्चेत्तर्ह्यहंजीवितोदृढं ततोब्राह्मेमुहूर्तेतुनिर्ज
गामवरःपथिअथप्रभातसमयेवाद्यनादोवभूवह आकारिताचसाकन्याब्रूतेनायंपतिर्मम यदिचायंपतिस्तातब्रूयादे
वमयार्पितं मधुपर्केतथाकन्यादानेयद्भूषणादिकंकथयिष्यतिचेद्वाच्यमवृत्तांतंरात्रिभाषितं इतिकन्यावचःश्रुत्वाउवाच

सवरस्तदा नैवजानामितद्धक्तुंव्रीडितोनिर्जगामह कृष्णउवाच ततस्तुवालकःकाशींप्राप्तोप्यध्ययनेरतः दिनानिकतिचिज्जग्मुःकालस्यवशमागतः ततः कृष्णोमहानागोरात्रौभक्षितुमागतः परितःशयनात्तस्यदीपज्वालाभिरावृतः नैवशक्तस्तमत्तुंवैव्रतराजप्रभावतः तन्मात्रावतिशीनामपूर्णिमायांव्रतंकृतं ततोमध्यान्हसमयेकालएवागमत्स्वयम् ततस्तुकालसंविद्धस्त्वधोंदकनियोजितः शंकरोप्यगमत्तत्रभवान्यासहएवच भवानीप्रार्थयामासदृष्ट्वावस्थांतुतस्यतां अस्यमात्राकृतंपूर्वंवातिशीव्रतमुत्तमं तस्यप्रभावतःसोयंवालोयंजीवतात्प्रभो तथैवकृतवांस्तत्रभवानीप्रेमवत्सलः तद्व्रतस्यप्रभावेनमृत्युनापिनिराकृतः तांपुष्पवाटिकांपश्यत्पत्रपुष्पविवर्जितां अतिदुःखातुराशोचत्यत्तिस्नेहेनकातरापुनःसंजीवितांदृष्ट्वापितरंकन्यकाब्रवीत् अत्रसत्रंकुरुष्वत्वंजामातुस्तुगवेषणे पत्यर्थंकुरुभोतावत्काशीतोनिरगात्तुसः पुनस्तत्रैवसंप्राप्तोयत्रोद्वाहोभवत्पुरा ज्ञात्वाचपरमंप्रीत्यादेवदत्तोनयद्गृहं ततोजनपदाःसर्वे इतिब्रूयुः परस्परं प्रीत्याह्यूचुस्ततःसर्वैसाधुसाधुसमन्वितं उत्साहोद्याभवत्तत्रनिर्जगामाथतत्पुरात् श्वशुरेणतथा वध्वामातुलेनसमन्वितं सपितुःप्रेषयामासभवत्पुत्रःसमागतः तावूचतुःकुतोस्माकंदुर्भगानांतुपुत्रकः कथितोन्यैरपिजनैस्ततःसंहृष्टमानसः सुहृद्भिर्बांधवैःसर्वैरानयामासवालकं ततोमहोत्सवंकृत्वादत्वाचवहुदक्षिणां एवंसपुत्रवान्जातोवतिशीव्रतसेवया यःकुर्वंतिव्रतमिदांविधवानभवंतिताः जन्मजन्मनिसौभाग्यंप्राप्स्यंतिचवचोमम एतत्तेकथितंसर्वंपुत्रपौत्रविवर्द्धनं यंयंचिंतयतेकामंतंतंप्राप्नोतिनिश्चितं यशोदोवाच उद्यापनविधिंब्रूहिपूर्णिमायाःसुरेश्वर भक्तितःश्रोतुमिच्छामिव्रतसंपूर्णहेतवे कृष्णउवाच पौर्णिमामार्गशीर्षस्यमाघवैशाखयोस्तथा व्रतंप्रारंभयेत्तस्यांपौषभाद्रंतुवर्जयेत् उमयासहितोदेवःपूजनीयोवृषध्वजः उपचारैःषोडशभिरागमोक्तविधानतः एकैकंदीपकंकृत्वामासिमासिचदापयेत् एवंसार्द्धद्वयंवर्षंद्विमासावधिआचरेत् ज्येष्ठस्यपूर्णिमायांचकुर्यादुद्यापनंततःअथवा

शुभमासस्यपूर्णिमायांसमाचरेत् चतुर्दश्यामुपवसेद्रात्रौपूजनमाचरेत् अष्टहस्तप्रमाणेनमंडपंकारयेत्ततः तन्मध्येस्थापयेत्कुंभमव्रणंमृण्मयंनवं तस्योपरिन्यसेत्पात्रंवैणवंचसुवेष्ठितं माषमात्रसुवर्णेनप्रतिमांकारयेत्सुधीः तदर्धार्धेनवाकुर्याद्वित्तशाठ्यविवर्जितः कृत्वारूपंप्रयत्नेनपार्वत्याश्च हरस्यच तत्पात्रेप्रतिमेस्थाप्यवृषभेणसमन्विते पूर्वोक्तेनविधानेनसुपुष्पैश्चैवपूजयेत् धूपैर्दीपैश्चनैवेद्यैः फलैश्चाविविधैः शुभैः एवं पूजाप्रकर्त्तव्यारात्रौजागरणंचरेत् गीतनृत्यादिसंयुक्तंकथापुस्तकसंयुतं ततः प्रभातसमयेकृत्वादानादिकाः क्रियाः पूर्ववदर्चयेद्देवंपश्चाद्धोमंप्रकल्पयेत् स्वगृह्योक्तविधानेनकृत्वाग्निस्थापनंवुधः प्रारभेच्चततोहोमंपंचाक्षरमनुःस्मृतः तिलैर्यवैस्तथाज्येनपृथगष्टोत्तरंशतं नमःशिवायमंत्रेण उमयाइतिनामतःएवंसमाप्यहोमंतुआचार्यादीन्प्रपूजयेत् द्वात्रिंशद्वंधनैर्युक्तंवंशपात्रंमनोरमं द्वात्रिंशच्चमहादीपैर्द्वात्रिंशच्चमहाफलैः मातुलिंगंनारिकेलंजंवीरंखर्जरीफलं अक्षोटंदाडिमंनिंबंनारंगादिशुभानिच कर्कट्यादिशुभैःसर्वै ऋतुकालोद्भवैः शुभैः द्वात्रिंशद्भिःफलैर्युक्तं सदीपवस्त्रवेष्टितं व्रीहीणामुपरिस्थाप्यआचार्यायनिवेदयेत् वाणकंतवतुष्ट्यर्थंददामिगिरिजापते तत्रमंत्रः महेशःप्रतिगृह्णाति महेशोवैददातिच महेशस्तारकोभाभ्यांमहेशायनमोनमः द्वात्रिंशद्ब्राह्मणांश्चैवद्वात्रिंशद्योषितस्तथा अन्येभ्योब्राह्मणेभ्यश्चभोजनंषड्रसैः सह पुमान्वत्सयुतांधेनुमाचार्यायनिवेदयेत् पश्चात्पूर्णाहुतिंकृत्वाहोमशेषंसमापयेत् पश्चाद्भुंजीततच्छेषंयदेवब्राह्मणार्पितान् इत्येवंपूर्णिमायास्तुउद्यापनविधिः स्मृतः इत्येतत्कथितंसर्वंव्रतस्योद्यापनंमया याः कुर्वंतिव्रतमिदंविधवानभवंतिताः इह भुक्तातुविपुलान्कामान्सर्वान्मनोगतान् स्वर्गंमंतेगमिष्यंतिकुलकोटिशतैरपि ॥

इतिभविष्यत्पुराणेकृष्णयशोदासंवादेवातिशापूर्णिमाव्रतकथासंपूर्णा ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसारसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेःपादांबुजार्चारतोजीयात्पुत्रकलत्रमित्रसहितःसंपालयन्क्ष्मांचिरम् ॥ १ ॥ रणवीरसिंहभूपेनकारितेकृत्यसागरे अभूच्चमार्गकृत्यानां रम्योयंरत्नसंग्रहः ॥ १ ॥

इतिश्रीमत्सूर्यवंशावतंसरघुकुलतिलकश्रीरणवीरसिंहमहाराजकारितेकृत्यरत्नाकरेमार्गमासकृत्यरत्नसमुच्चयः ॥

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिब्बामल्लाधिकारेमार्गशीर्षमासोमुद्रितस्समाप्तिमगमत्
संवत् १९४१ माघ प्र. १५

(T)

पौषमासप्रारम्भः

॥ ओंस्वस्तिश्रीगणेशायनमः ॥ अथपौषमासकृत्यनिर्णयः ॥ धनुःसंक्रमेपराः षोडशघटिकाः पुण्यकालः अत्रान्योविचारः संक्रांतिनिर्णयेद्रष्टव्यः अथपौषव्रतानि अत्रैकभक्तमुक्तं महाभारते पौषेमासेतुकौंतेयएकभक्तंसमाचरेत् सुभगोदर्शनीयश्चयशोभागीचजायते प्रासादभूषणादीनिगृहप्रावरणानिच नारायणस्यतुष्ट्यर्थंपौषेदेयानियत्नतइति वामनपुराणे विष्णुधर्मोत्तरे पुष्यमासंतदालभ्यएकभक्तेनयःक्षिपेत् शुश्रूषणपरः शूरो नरोगीजायतेनरः अथात्रशीलावाप्तिव्रतम् विष्णुधर्मोत्तरे वज्रउवाच भगवन्कर्मणाकेनशीलवान्पुरुषोभवेत् मार्कंडेयउवाच आग्रहायण्यतीतायांसंप्राप्तेप्रथमेदिने पूर्ववत्पूजयेद्देवंघृतेनजुहुयाद्धविः घृतंद्विजेभ्योदद्याच्चघृतमेवनिवेदयेत् त्रिरात्रोपोषितः पौष्यांघृतमात्रेणवैद्विजः पूजयेच्चसुवर्णेन यथाशक्तिनराधिप कृत्वाव्रतंमासमिदंयथोक्तमासाद्यनाकंसुचिरंमनुष्यः मनुष्यमासाद्यचशीलवान्स्यात् प्राप्नोतिपुष्टिंचिरजीवितत्वम् इतिविष्णुधर्मोत्तरोक्तं पौषकृष्णप्रतिपदमारभ्यपौष्यंतंशीलावाप्तिव्रतम् अत्रदानविशेषोविष्णुधर्मोत्तरे पौषेकनकदानेनपरांपुष्टिंतथैवच पुष्पाणांचसितेदानंलक्ष्मीप्राप्तिकरंस्मृतम् फलानांचतथादानं कृष्णपक्षेमहाफलमिति देविपुराणोक्तंनक्तव्रतम् पौषेमासेतुसंप्राप्ते यःकुर्य्यान्नक्तभोजनं जितेंद्रियःसत्यवादीकामक्रोधविवर्जितइति पौषमुपक्रम्यतीर्थविशेषो देवीपुराणे पौषेतुनर्मदापुण्यास्नानदानादिकर्मणीति पौषकृष्णद्वितीयायां बृहस्पतिवारयोगेद्वितीयासामान्योक्तं विधिपूजनमुक्तं ब्रह्मपुराणे बृहस्पतौद्वितीयायां विधिवद्विधिपूजनं कृत्वानक्तंसमश्नीयाल्लभतेभूमिमुत्तमां विधिर्ब्रह्मातस्यपूजनं गायत्र्या पौराणमंत्रेणवेति तृतीयायांतिथिसामान्योक्तंगौरीपूजाव्रतम् देवीपुराणे तृतीयायांयजेद्देवींशंकरेणसमन्वितां कुंकुमागुरुकर्पूरमणिवस्त्रसुगंधकैःस्रग्गंधधूपदीपैश्चेत्यादि सौवर्णीतुउमाकार्य्याराजतःशंकरस्तथा चतुर्भुजस्तु-

देवेशोद्विभुजातुउमासतीति चतुर्थ्यांसंकष्टनाशनव्रतत्वेनमासचतुर्थीव्रतम् स्कांदे चतुर्थ्यांदेवदेवोसौपूजनीयःप्रयत्नतःकृष्णपक्षेविशेषेणनक्तंकुर्य्याद्व्रतात्स्त्रियामिति चतुर्थ्यांगणपस्यचेतितिथिसामान्योक्तेश्च पंचम्यांतिथिपत्वेननागपूजोक्ता नागानांस्वरूपंमात्स्ये नागाश्चैवतुकर्तव्याः खड्गखेटकधारिणः अधःसर्वाकृतिस्तेषांनाभेरूर्द्धंतुमानुषी फणाश्चमूर्द्ध्निकर्तव्याद्विजिह्वावाहवोसमाः असमाविषमाः अत्रषष्ठ्यांस्कंदपूजाव्रतम् षष्ठ्यांपूजागुहस्यचेति तिथिसामान्योक्तेः सप्तम्यांभास्करवेत्युभयसप्तमीव्रतम् पौषकृष्णाष्टम्यामष्टकाश्राद्धं नारदीये अथपौषासिताष्टम्यामष्टकाश्राद्धमिष्यते पितृणांतृप्तिदंवर्षंकुलसंततिवर्द्धनमिति ब्रह्मपुराणेविशेषः पौषकृष्णाष्टकायांतु शाकैःश्राद्धंसुशोभनं वायुपुराणेपि पित्र्यानंदायमूलेस्युरष्टकास्तिस्रएवहि कृष्णपक्षेवरिष्ठाहिपूर्वाचैंद्रीविभावरी प्राजापत्याद्वितीयास्यात्तृतीयावैश्वदेविकी आद्यापूपैः सदाकार्य्या मांसैरन्यायथातथा शाकैः कार्य्यातृतीयातु देयद्रव्ययुतोविधिःअन्वष्टक * पितृणांतुनित्यमेवविधीयते पद्मपुराणेच तस्यामेवशाकविधानात् तदनयोर्विरोधेव्यवस्थाशाखाभेदेनहेमंतशिशिरयोश्चतुर्णामपरपक्षाणामन्वष्टकाइत्याश्वलायनात् तत्र पूर्वेद्युरष्टकाश्राद्धं उत्तरादिनेषुचान्वष्टक्यं पूर्वेद्युः पितृभ्योदद्यादपरेद्युरन्वष्टक्यमित्याश्वलायनात् कौर्मेपि अमावास्यष्टकास्तिस्रः पौषमासादिषुत्रिष्विति अत्राष्टमी अपराह्णव्यापिनीग्राह्यापूर्वेद्युः श्राद्धस्यान्वष्टक्यस्य चाष्टम्यनुरोधेननिर्णयः पूर्वेद्युः पितृभ्योदद्यादपरेद्युरन्वष्टक्यमितिसूत्रात् अत्रश्राद्धाशक्तौतत्रैव अकरणेप्रायश्चित्तमुक्तमृग्विधाने एभिर्द्युभिर्जपेन्मंत्रशतवारंतुतद्दिने अन्वष्टक्यंयदाशून्यंपूर्णतांयातिसर्वथेति अशक्तौत्वाश्वलायनः अथाश्वोभूतेऽष्टकापशुनास्थालीपाकेनवा अनुडुहोयवसमाहरेदग्निनावाकक्षमुपोषदेषामेष्टकेतिभक्तेनष्टकःस्यादितिमार्गशीर्षादिषुमलमासे तत्राष्टकानकार्य्याचतुर्णामितिग्रहणादित्युक्तंनारायणवृत्तौ तथाकाठकगृ-

ह्यपि महालयाष्टकाश्राद्धोपाकर्माद्यपियद्भवेत् स्यष्टमासविशेषाख्यंविहितंवर्जयेन्मलइतिविष्णुपुराणे अन्नेनवायथाशक्तिकालेस्मिन्भक्तिनम्रधीः भोजयिष्यतिविप्राग्र्यानित्यादि अत्राशक्तौतत्रैव असमर्थोन्नदानस्यधान्यमानाव्यशक्तितः प्रदास्यतिद्विजाग्रेभ्यःस्वल्पामपिचदक्षिणां अत्राप्यसामर्थ्ययुतःकराग्रावस्थितांस्तिलान् भक्तिनम्रः समुद्दिश्यभुव्यस्माकंप्रदास्यति यतःकुतश्चित्संप्राप्यगोभ्योवापिगवाह्निकं अभावेप्रीणयत्रस्माद्भक्तियुक्तःप्रदास्यतीति एतासुश्राद्धाकरणेदोषोभिहितोवायुपुराणे यस्यैतेप्रतिगच्छेयुरष्टकाभिरपूजिताः मोघस्तस्यभवेल्लोकोलब्धंचास्यविनश्यति देवांस्तुदायिनोयांतितिर्यग्गच्छंत्यदायिनइति अत्रश्राद्धाकरणं विहितंवर्जयेन्मले अस्यांरुक्मिण्यष्टमीव्रतम् तत्रकृष्णंरुक्मिणींप्रद्युम्नंचपूजयेदित्युक्तम् इतिरुक्मिण्यष्टमीव्रतम् इतिपौषकृष्णाष्टमीकृत्यम् * अथपौषस्योभयपक्षनवमीकृत्यम् देवीपुराणे पौषेमासेतुसंप्राप्ते यःकुर्यान्नक्तभोजनं जितेंद्रियःसत्यवादीकामक्रोधविवर्जितः पक्षयोर्नवमींयत्नाद्भगवत्यैघृतादिभिः कृत्वाध्यानंमहापूजांचंडिकायैप्रकल्पयेत् नैवेद्यंतंडुलप्रस्थंक्षीरयुक्तंनराधिप कुमारीर्भोजयेच्चाष्टौविप्रान्भागवतांस्तथा। कृत्वापिमृण्मयींदेवींनाम्नाचार्यातिपूजयेत् चतुर्भुजांशूलधरांकुंदपुष्पैःसगुग्गुलैः स्नानंकृत्वातिलैर्विप्रस्तिलानांप्राशनं तथा एवंसंपूजयेदार्य्यांतस्यपुण्यफलंशृणु सूर्यकोटिप्रतीकाशंविमानवरमास्थितः दोधूयमानश्चमरैःस्तूयमानः सुरासुरैः गच्छेद्दुर्गापुरंरम्यंयत्रास्तेचंडिकास्वयम् क्रीडतेदेवगंधर्वैर्यावदाभूतसंप्लवम् त्रिःसप्तकुलजैः सार्द्धंभोगान्भुक्त्वायथेप्सितान् पुनरेत्यभुवंवीरोराजाभवतिभूतले यःपूजयेत्सदापूज्यंभानुंसर्वार्थसिद्धिदंघृताभिषेकंयःकुर्यादहोरात्रंचभास्करे कुंभैर्नानाविधैर्द्रव्यैःपौषमासेसमुद्यतः नृत्यगीतोपहारेणशंखवादित्रनिःस्वनैः कुर्य्याज्जागरणंदेविप्रदीपाद्यैः सुशोभनैः वसेत्सूर्यपुरेश्रीमान्सूर्य्यतुल्यपराक्रमः

व्र०र०
पौष०
२

ग्रहणेविषुवेचैवपुण्येषुदिवसेषुच घृताभिषेकंयःकुर्यादहोरात्रंशिवस्यतु सूक्ष्मधारेणभांडेनपुष्यमांसेद्विजोत्तम गीतनृत्योपहारेणशंखवादित्रनिःस्वनैः कुर्य्याज्जागरणंवापिप्रदीपाद्युपशोभितम् समस्तपापनिर्मुक्तःसमहाकुलवर्द्धनःयुक्तःशिवपुरेश्रीमान्मोदतेशिववत्सुखी इतिपौषमासस्योभयनवम्योर्विशेषाविधिः * अत्रदशम्यादशम्यामंतकस्येतिसामान्यनिर्णये धर्मराजपूजनंकार्य्यम् अथपौषकृष्णैकादशीसफलाव्रतम् नारदीये पौषस्यकृष्णैकादश्यांसफलांसमुपोष्यवै द्वादश्यामच्युतंप्राचर्यवरैरेवोपचारकैः संभोज्यविप्रान्मधुरैर्विसृजेल्लब्धदक्षिणान् एवंकृत्वाव्रतंविप्रसकलायाविधानतः भुक्त्वेहभोगानखिलानंतेविष्णुपदंव्रजेत् अथास्याःकथोच्यते युधिष्ठिरउवाच पौषस्यकृष्णपक्षस्यैकादशीकाभवेत्प्रभो किंनामकोविधिस्तस्याःकोदेवस्तत्रपूज्यते एतदाचक्ष्वमेस्वामिन्विस्तरेणजनार्दन श्रीकृष्णउवाच कथयिष्यामिराजेंद्रभवतःस्नेहकारणात् तथातुष्टिर्नमेराजन्क्रतुभिश्चाप्तदक्षिणैः यथामांतुष्टिरायातिएकादश्यांव्रतेनवै तस्मात्सर्वप्रयत्नेनकर्तव्यंहरिवासरं पौषस्य. कृष्णपक्षेतुद्वादशीयाभवेन्नृप तस्याश्चैवातिमाहात्म्यंशृणुष्वैकाग्रमानसः आब्दिकाश्चैवभोराजन्नेकादश्यांभवंतिहि तासामेवतुसर्वासांविकल्पंनैवकारयेत् एकादश्यास्तथाप्यस्याःशृणुराजन्कथानकं अतः परप्रवक्ष्यामिपौषेयाकृष्णद्वादशी लोकानांतेहितार्थायकथयामिविधिंतथा पौषस्यकृष्णपक्षेवैसफलानामनामतः नारायणोहंदेवोस्याः पूजनीयःप्रयत्नतः पूर्वेणविधिनाराजन्कर्तव्यैकादशीजनैः नागानांचयथाशेषःपक्षिणांगरुडोयथा देवानांचयथाविष्णुर्द्विपदांब्राह्मणोयथा यथाश्वमेधो यज्ञानांतीर्थानांजाह्नवीयथा व्रतानांचतथाराजन्नेकादशीविशेषतः तेजनाभरतश्रेष्ठममपूज्याश्चसर्वशः हरिवासरसंसक्तावर्त्ततेयजनाभृशम् सफलानामनामेति तस्याःपुण्यंशृणुष्वयत् फलैर्मांपूजयेत्तत्रकालदेशोद्भवैःशुभैः नारिकेलफलैःशुद्धै

स्तथावैवीजपूरकैः जंवीरैर्दाडिमैश्चैवतथापूगफलैरपि लवंगैर्विविधैश्चान्यैस्तथैवाम्रादिभिःफलैःपूजयेद्देवदेवेशंधूपदीपैर्यथाक्रमं फलैश्चदीपदानंचाविशेषेणप्रकल्पयेत् रात्रौजागरणंतत्रप्रकर्तव्यंप्रयत्नतः यावदुन्मीलयेन्नेत्रेतावज्जागर्तियोनिशि एकाग्रमानसोभूत्वातस्यपुण्यफलंशृणु तत्समोनास्तिवैयज्ञस्तीर्थंतत्सदृशंनहि तत्समंनव्रतं किंचिदिहलोकेनराधिप पंचवर्षसहस्राणितपस्तप्तेनयत्फलं तत्फलंसमवाप्नोतिसफलायाव्रतेनहि श्रूयतांराजशार्दूलसफलायाः कथानकं चंपावतीतिविख्यातापुरीमाहिष्मतीतिचमाहिष्मतस्यराजर्षेश्चत्वारश्चाभवन्सुताः तेषांमध्येतुयोज्येष्ठःसमहापातकैर्युतः परदारानुगामीचवैश्यासंगरतः सदा पितुर्द्रव्यंसपापिष्ठोनाशयंश्चमुहुर्मुहुः असद्वृत्तरतोनित्यंदेवताद्विजानिंदकः वैष्णवानांचदेवानांनित्यंनिंदारतोत्रवै ईदृग्विधंतदादृष्ट्वापुत्रंमाहिष्मतोनृपः लुंपकोनामनाम्नेतिकृतवानप्यमर्षितः राज्यान्निष्कासितस्तेनपित्राचैवापिबंधुभिः तस्यैवंपरिवारैस्तुत्यक्तोराज्ञोभयादिति लुंपकोपितदात्यक्ताश्चिंतयामासएकलः किंकरोमिक्वगच्छामित्यक्तः पित्राचबंधुभिः इतिचिंतापरोभूत्वामतिंपापेचकारह त्यक्तोहंबांधवैःपित्रा राज्यान्निष्कासितस्तथा मयागंतव्यमेवाद्यह्यरण्येगहनेवने तस्माच्चैदंपुरंसर्वंलुंठयिष्याम्यहंपितुः इत्यवंसमतिंकृत्वालुंठको दैवयोगतः निर्जगामपुरात्तस्माद्गतोसौगहनेवने जीवघातकरोनित्यंस्तेयद्यूतकलानिधिःसर्वंचनगरंतेनमुषितंपापकर्मणा स्तेयकृन्नगरेतत्रगृहीतःपुरपालकैः तानुवाचसुतोहंवैराज्ञोमाहिष्मतस्यच गृहीतोपिसतैर्मुक्तोराज्ञोमाहिष्मतोभयात् आमिषाहारकृन्नित्यंफलाहाररतस्तथा आश्रमस्तस्यदुष्टस्यवामदेवस्यसन्निधौ अश्वत्थोविद्यतेतत्रजीर्णःसबहुवार्षिकः सचासीत्सर्ववृक्षाणांराजानारायणालयः तस्यमूलेवसत्तत्रलुंपकःपापकृत्परःगतेबहुतिथेकालेपूर्वपुण्यप्रभावतः पौषस्यकृष्णपक्षेतुदशम्यांदिवसेतथा फलानिभुक्त्वावृक्षाणांरात्रौशांतेनयायतः

लुंपकोनामपापिष्टोवस्त्रहीनस्तुदुःखितः पीडयमानस्तुशीतेनहरिवृक्षसमीपतः ननिद्रानसुखंतस्यमृतप्रायइवाभवत् ताडितोदंशकैस्तीव्रैरेवंनीतानिशाखिला प्रातःसूर्योदयेजातेनलेभेचेतनांतदा लुंपकोगतसंज्ञस्तुसफलायांदिनेतिथौरवौमध्यगतेचैवसंज्ञांलेभेनलुंपकः इतस्ततोविलोक्याथचोत्थितःकष्टतःश्वसन्स्खलत्पद्भ्यांप्रचलितःसयावत्संचरन्छनैः वनमध्येगतस्तत्रक्षुत्तृषापीडितोभवत् नशक्तिर्जीवघातेस्यलुंपकस्यदुरात्मनः फलादिभूमिपतितान्याजहारसलुंपकः यावत्सआगतस्तत्रतावदस्तमगाद्रविः किंभविष्यत्युवाचेतिविललापातिदुःखितः फलानितानिसर्वाणिवृक्षमूलेन्यवेदयत् प्रत्युवाचफलैरेभिः प्रीयतांभगवान्हरिः उपविष्टोलुंपकश्च ननिद्रांलभतेनिशि रात्रौजागरणंमेनेभगवान्मधुसूदनः फलानांपूजनंमेनेसफलायांतिथौव्रतं इतिकृत्वा लुंपकस्तुतदकस्माद्व्रतोत्तमं तेनव्रतप्रभावेनप्राप्तंराज्यमकंटकंपुण्येनसफलायास्तुयथाप्राप्तंतथाशृणु रवेरुदयवेलायांदिव्योवाज्याजगामह दिव्यवस्तुपरीवारोलुंपकस्यसमीपतः तस्थौसतुरगोराजन्वागुवाचाशरीरिणी प्राप्नुहित्वंनृपसुतराज्यंनिहतकंटकं वासुदेवप्रसादेनसफलायाः प्रसादतः पितुःसमीपंगच्छत्वंकुरुराज्यमकंटकं तथेत्युक्त्वात्वसौतत्रदिव्यरूपधरोभवत् कृष्णेमतिश्चतस्यासीत्परमावैष्णवीतथा दिव्याभरणभूषोसौतातंनत्वास्थितोगृहे वैष्णवायतदादत्तंपित्राराज्यमकंटकं कृत्वाराज्यंतुतत्रैववर्षाणिसुबहून्यपि रविवासरसंलीनोविष्णुभक्तिरतःसदामनोज्ञास्तस्यपुत्रास्तुदाराःकृष्णप्रसादतः पश्चाद्राज्यमसौत्यक्त्वापुत्रेराज्यंसमर्पयत् वनंगतःसंयतात्माविष्णुभक्तिपरायणः साधयित्वातथात्मानंविष्णुलोकंजगामह गतःकृष्णस्यसान्निध्येयत्रगत्वानशोचते एवंवैयेप्रकुर्वंतिसफलैकादशीव्रतं इहलोकेयशःप्राप्यअंतेमोक्षमवाप्नुयुः धन्यास्तेमानवालोकेसफलायाउपोषकाः तेषांचजन्मसफलमेवमेवनसंशयः पठनाच्छ्रवणाद्वापिकरणाद्वाविशांपते राजसू-

यफलंयस्मात्सदाप्राप्नोतिमानवः इतिपद्मपुराणेपौषकृष्णासफलैकादशीव्रतम् ॥ अथपौषकृष्णद्वादश्यांसंप्राप्तिद्वादशीव्रतम् श्रीकृष्णउवाच कृष्णपक्षेतुपौषस्यसंप्राप्तांद्वादशीं शृणु यामुपोष्यसमाप्नोतिसर्वानेवमनोरथान् पाषंडादिभिरालापमकुर्वन्विष्णुतत्परः पूजयेत्प्रयतोदेवमेकाग्रमतिरच्युतं पौषादिपारणामासैःषड्भिर्ज्येष्ठांतकंस्मृतं प्रथमेपुंडरीकाक्षंनामकृष्णस्यगीयते द्वितीयेमाधवाख्यंविष्णुरूपंतुफाल्गुने पुरुषोत्तमाख्यंचततःपंचमेप्यच्युतेतिच षष्ठेजयेतिदेवस्यगुह्यनामप्रकीर्तितं पूर्वेषुषट्सुमासेषुस्नानप्राशनयोस्तिलाः आषाढादिषुमासेषुपंचगव्यंप्रकीर्तितं स्नानंचप्राशनंचैवपंचगव्यंतदिष्यते पूजयेत्पुंडरीकाक्षपुनस्तैरेवनामभिः प्रतिमासंचदेवस्य कृत्वापूजांयथाविधि विप्रायदक्षिणांदत्वाश्रद्दधानःस्वशक्तितः पारणेचैवदेवस्यप्रणम्यभक्तिपूर्वकं एवंसंवत्सरस्यांतेयदभिप्रेतमात्मनः धेनुंवस्त्रंहिरण्यंचधान्यंभाजनमासनं शक्त्यावाब्राह्मणेदद्यात्केशवः प्रीयतामिति एतामुपोष्यविधिवद्विष्णुप्रीणनतत्परः सर्वान्कामानवाप्नोतिसर्वपापैःप्रमुच्यते यतःसर्वमवाप्नोतियद्यदिच्छति चेतसा ततोलोकेषुसंप्राप्ति द्वादशीकीर्त्तितेतिच कृताभिलपिताद्दृष्टाप्रारब्धाधर्मतत्परैः पूरयत्यखिलान्कामान्संस्मृतापिदिनेदिने ॥ संप्राप्तिकामुपवसंतिविचार्यसम्यक्येमानवामनुजपुंगवविष्णुभक्ताः तेषांसमीहितफलानिभवंतिसम्यक्वासःसुरेशभवनेभगवत्प्रसादात् ॥ इतिभविष्योत्तरेपौषकृष्णासंप्राप्तिद्वादशीव्रतं ॥ ❁ ॥

अस्यामेवपौषद्वादश्यांस्वरूपद्वादशीव्रतम् ॥ नारदीये पौषस्यकृष्णद्वादश्यांस्वरूपव्रतमुत्तमम् दशम्यांविधिवत्स्नात्वागृह्णीयाद्गोमयंव्रती श्वेतायाश्चैकवर्णायाअंतरिक्षगतंद्विज अष्टोत्तरशतंतेनपिंडिकाःकल्प्यनारद शोषयेदातपेधृत्वापात्रेताम्रेथमृण्मये एकादश्यांसोपवासःसमभ्यर्च्यविधानतः सौवर्णीप्रतिमांविष्णोर्निशायांजागरंचरेत् सुमंगलैर्गीतवाद्यैः स्तोत्रपाठैर्जपादिभिः ततःप्रभातेद्वादश्यां तिलपात्रोपरिस्थितां

अंबुपूर्णघटेन्यस्य पूजयेदुपचारकः ततोग्निंनवमुत्पाद्य काष्ठसंघर्षणादिभिः होमयेत्सतिलाज्यंच द्वादशाक्षरविद्यया वैष्णव्याथर्वपूर्णाचशतमष्टोत्तरंतथा भोजयेत्पायसैर्विप्रान्दत्त्वानत्वाविसर्जयेत् नरोवायदिवानारीव्रतंकृत्वैवमादरात् लभतेरूपसौभाग्यंनात्रकार्य्याविचारणेति अथगुर्जराचारप्राप्तंस्वरूपद्वादशीव्रतम् श्रीईश्वरउवाच पौषेमासेतुसंप्राप्तेपुष्यर्क्षंतुयदाभवेत् तस्यांरात्रौसंयतात्माध्यात्वाविष्णुंसनातनं श्वेतागौरेकवर्णायातस्याग्राह्यंतुगोमयं अंतरिक्षात्तुपतितंशुचिर्मौनिव्यवस्थितः तस्यकृत्वाहुतीनांतुशतमष्टोत्तरंतिलैः प्रतीक्ष्यद्वादशींकृष्णामुपवासपरायणः स्नात्वानद्यांतडागेवाविष्णुमेवार्थचिंतयेत् सौवर्णंतुहरिंकृत्वारौप्यंवाभक्तिशक्तितः तिलपात्रोपरिस्थाप्यततोविष्णुंप्रपूजयेत् इतिसंपूज्याविहितैः पुष्पैर्धूपैस्तुदीपकैः नैवेद्यंतिलमिश्रंतुफलानित्रिविधानिच नमःपरमशांतायविरूपाक्षनमोस्तुते सर्वसंकष्टनाशायगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यमंत्रः एवंसंपूज्यदेवेशंहोमंकुर्य्यात्समाहितः आवाह्यदेवंलक्ष्मीशंहोमयेद्धोमयाहुतीः शतमष्टाधिकंचैवतिलान्व्याहृतिसंयुतान् सहस्रशीर्षामंत्रेणहृदिध्यात्वाजनार्दनं लक्ष्मीयुतंचमेघाभंशंखचक्रगदाधरं होमांतेकारयेच्छ्राद्धंवैष्णवं द्विजसत्तम दत्त्वाचभोजनंतेभ्योघृतकुंभंचदक्षिणां धर्मश्रवणसंयुक्तंजागृयातुततोनिशां कृत्वातुवैष्णवीं मूर्तिंविज्ञाप्यप्रतिपादयेत् मंत्रहीनं क्रियाहीनं विधिहीनंचयत्कृतं क्षमस्वदेवदेवेश सर्वमेवसमापय उमोवाच भगवन्प्रष्टुमिच्छामिप्रसादंकुरुमेप्रभो कथितव्यंप्रसादेनयद्यस्तिमयिसौहृदं व्रतेनकेनचीर्णेनविरूपत्वंप्रणश्यति सौभाग्यंचैवमतुलंप्राप्यतेकस्यपूजनात् तन्मेकथयदेवेशपरमाभीष्टदायकं ईश्वरउवाच श्रूयतांपरमंगुह्यंव्रतंपापहरंशुभम् सुरूपाद्वादशीनाममहापातकनाशिनी विरूपनाशिनीचैवसुरूपत्वप्रदायिनी कुलवृद्धिकरीचैवसर्वसौख्यप्रदायिनी तच्छृणुष्वप्रयत्नेनकथ्यमानंमयानघे पुरावैद्वापुरस्यांतेविष्णुर्दैत्यनि

सूदनः अवतीर्णोमर्त्यलोकेवसुदेवकुलेकिल तेनोढारुक्मिणीनामभीष्मकस्यसुतापुरा अत्यंतरूपसुभगापतिव्रतपरायणा नहितस्याविनाकृष्णःस्तोकमुद्वहतेसुखं श्वश्रूश्वशुरयोःपादौववंदेसापुनःपुनः केनापिकर्म.दोषेनकुपिताविष्णुमातरः नप्रसादयतिंक्षिप्रमितिज्ञात्वातुदेवकी कृष्णंप्रोवाचकुपितायदितेजननीह्यहं ततस्त्वयाहिवैबाह्याकुलरूपगुणाधिका मद्वाक्यमन्यथाकर्तुंनार्हसित्वंकुलोद्वह श्रीकृष्णउवाच मायांतुरुक्मिणींत्यक्त्वाउद्वहेहंकथंशुभे यःपरित्यजतेभार्य्यामविक्लवशरीरिणीं संप्राप्नोतिहिमंदत्वंदौर्भाग्यंसप्तपौरुषं विरूपत्वमवाप्नोतिनसुखंविंदतेक्वचित् व्याधिर्वाजायतेलोकेनिंदनीयःसदेहिनां इत्यहंदेविजानामिकथंकुर्य्यांवचस्तव देवक्युवाच सर्वेषामेवदेवानांतीर्थादीनामपिध्रुवं मातागुरुतरापुत्रकस्तस्यावचनंत्यजेत् ममवाक्यस्यकरणात्कथंपापिष्ठताभवेत् जननीपूज्यतेतेनभार्य्याचयदुनंदन श्रीकृष्णउवाच परित्यजामिनोभीरुप्रियाप्राणधनेश्वरीं इतितूष्णींपराभूतांमातरंप्रेक्ष्यकेशवः चिंतयामासपरमंकथंसौख्यंभवेदिति एतास्मिन्नेवकालतुनारदोभगवान्नृषिः अभ्युज्जगामसहसाविष्णुंसंप्रेक्ष्याविस्मितं पूजितःपरयाभक्त्याअर्घ्यंजग्राहनारदः उपविष्टोयथान्याय्यंपर्य्यपृच्छदनामयम् नारदउवाच किंत्वंखेदंकरोषीत्थंकथमुद्वेगकारणं किंनासिध्यतितेभीष्टंत्यजोद्वेगंयदूत्तम श्रीकृष्णउवाच मात्रानियुक्तोदेवर्षेपरिणेतुंद्विजोत्तम कन्यामुद्वहयिष्यामिसुरूपांकस्याचित्प्रभो नारदउवाच श्रूयतामभिधास्यामिपूर्ववृत्तांतमादरात् लक्ष्मीयुक्तःपुरानाथः क्रीडमानोहिनंदने तत्रागमत्सभगवान् दुर्वासा.ऋषिसत्तमः अभ्युत्थानादिविधिनासत्कृतंज्ञानमूर्त्तिना प्रेक्ष्यवभित्सरूपंतंदेव्याहास्यंकृतंतदा सकोपेनमहातेजावैश्वानरसमप्रभः शशापलक्ष्मींदुर्वासामुनिःक्रोधेनसंयुतः हसितोहंत्वयामुग्धेआत्मनोरूपमीक्ष्यच विरूपाभवदुर्वृत्तेकिंनज्ञातोह्यहंत्वया इत्युक्तयातयादेव्यायथाशक्त्याप्रसादितः प्रसन्नोजगदेवाक्यंमच्छापोनान्यथा-

भवेत् जन्मांतरेणास्यफलं भविष्यतिविरूपिता सेयंमर्त्यैवतीर्णाहि गोपकस्यगृहेशुभा सत्यभामाविरूपाक्षाविरूपदशनातथा कर्णनासातिविकृतासंजातातत्प्रभावतः पाणिपादकटिग्रीवंसर्वंवैरूप्यलक्षणं तत्रगच्छमहाप्राज्ञसतेकन्यांप्रदास्यति श्रीकृष्णउवाच विरूपवदनांब्रह्मन्कथंद्रक्ष्यामिनित्यशः कांगतिंवैगमिष्यामितांविवाह्यकुरूपिणीम् नारदउवाच रुक्मिण्यास्तुप्रसादेनशापान्मुच्येततत्क्षणात् उत्तमंप्राप्स्यतेरूपंसौभाग्यंपरमंसुखम् देवक्याश्चप्रसादेनधर्मकामार्थसिद्धये एवंभविष्यातितवसंबंधोविहितःसुरैः त्वयाचनान्यथाकार्य्यंगुरूणांवचनंमहत् मातागुरुतराभूमेरितिवेदेषुगीयते ईश्वरउवाच एवमुक्तामहादेविनारदस्त्रिदिवंगतः कृष्णोपिमातरंप्राहवैवाह्यांहिविधीयते विवाहिताचसानेनवेदोक्तविधिनाततः आनीयस्वगृहंमातुर्दर्शयामासतांवधूं पश्याद्यवचनंभामापरिणीताशुचिव्रता निर्वृत्तिंपरमांगच्छप्रसादपरमाभव इत्युक्तावीक्ष्यतां कृष्णः प्रणिपत्यतुमातरं जगामाकृतकार्य्याणांकरणायमहाबलः तांदृष्ट्वादेवकीमातावभौदुःखाधिकाभृशं इयं विरूपाविकृताकथंभर्त्रास्तिगोपिता चिंतामवापमहतींमतरुद्विग्नमानसा कस्यापिनाचचक्षेथाविरूपंतच्छरीरजं अथकास्मिंस्तुकालेतुरुक्मिणीतुसमागता नमस्कृत्यततः पश्चात्संस्पृष्ट्वांघ्रियुगंतथा उवाचप्रसृतंवाक्यंभक्तियुक्तंशुभावहं अथाहंद्रष्टुमिच्छामिसपत्नींकृष्णवल्लभाम् शीघ्रंतांदर्शयाश्वद्यप्रसादंसुविधीयताम् । देवक्युवाच ॥ शुश्रह्यहंतेसुभगेममापिवचनंकुरु पूर्वमाचरितंसुभ्रुसुरूपाद्वादशीव्रतं संप्रयच्छसिचेत्तस्यैदर्शनंतेभविष्यति रुक्मिण्युवाच कष्टेनक्रियतेधर्मोव्रतंचापिसुदुष्करं कथंतस्यैप्रयच्छामिफलंदेवैःसुदुर्लभं देवक्युवाच अर्द्धंप्रदीयतामस्यैतदर्द्धमथवापुनः पंचमांशमथोषष्ठंषोडशांशमथापिवा रुक्मिण्युवाच सुरूपाद्वादशीपुण्यंतिलार्द्धमपिनोत्सहे किंपुनःषोडशांशंतुसपत्न्यांदुष्टचेतसि एवमुक्ताजगामाथमंदिरंस्वंशुभेक्षणा पुनःपप्रच्छकृष्णंसाप्रणिपातेन

वैरुषा देवपृच्छामिचैवोक्तनतुशोषिममप्रभो कथंपश्यामितांसांतर्नवोढांकृष्णवल्लभाम् श्रीकृष्णउवाच अत्राज्ञया पश्यसुभ्रु विरूपांतांसुमध्यमां विरूपश्रवणाक्षींतांकुरूपांविकृताननां अदृष्टवैचित्र्यकृतंरूपमस्यानसंशयः ततः सादेवकीतांतुसत्यभामांब्रवीद्वचः सपत्नींगच्छसुश्रोणिस्वरूपंदर्शयस्वच यथातेसुप्रसन्नास्यात्तथाकुरुममस्नुषे श्रुत्वैवसत्यभामासागतारुक्मिणिमंदिरं प्रणम्यसुकुमारांगीमस्तौषीत्प्रणयेनसा नादर्शयन्मुखंतस्यैगूढास्या।विकृताननाः प्रार्थयामासतांसुभ्रूंसुरूपाद्वादशीव्रतं तिलाह्वीपाद्धषष्ठांशंदेहिमेसेवकास्म्यहं इत्युक्ताबहुशःसापि सपत्न्यानददौफलं तदापलायितागच्छद्गृहंदत्त्वाकपाटकं रुदंतीरोदनगृहेनिगूढावस्थिताभवत् समागतारुक्मिणीसातन्मुखालोकनेच्छया नोद्घाटयतिसाद्वारंतिरस्कारेणशोचति रुक्मिणींसातुसत्यभामाशुचिस्मितां एकामप्याहुतिंदेविदेहिभीष्मकनंदिनि अर्द्धाहुतिमथोदेहितदास्यंदर्शयाम्यहं सपत्नीत्वंनजानामितवाहंसेविकास्म्यहं व्रतात्तिलफलंदेहियद्यस्तिमहिसौहृदं रुक्मिण्युवाच कोयंमतिभ्रमस्तेयंसुरूपाद्वादशींप्रति तिलाहुतिंप्रयच्छामिउद्घाटयकपाटकं इत्युक्त्वात्वरितंस्नात्वादत्त्वाह्येकांतिलाहुतिं तस्यामेवप्रदत्तायांरूपेणास्याधिकाभवत् तांदृष्ट्वाविस्मयपरापप्रच्छदयिताहरेः ॥ रुक्मिण्युवाच ॥ कथ्यतांममकाहित्वंकिमर्थमिहचागता ॥ सत्यभामोवाच ॥ तवाहंभगिनिभद्रेकृष्णेनोढास्मिधार्मिके सत्यभामेतिमेनामनमामिचरणौतव इतिश्रुत्वातुवचनंविस्मयोत्फुल्ललोचना नोवाचाकिलचार्वंगीचिंतामापमहत्तमां अपश्यद्रूपमानेवसुरूपाद्विस्मिताभवत् एतस्मिन्नेवकालेतुवागुवाचाशरीरिणी व्रतदानप्रभावेनसत्यव्रतपरायणा सुरूपाद्वादशीपुण्यादेवानामपिदुर्लभा पार्वत्युवाच कर्मणाकेनकर्तव्याकिमाचारंवदस्वमे नियमंहोमदानंच प्रसादंमेविधीयताम् श्रीईश्वरउवाच पौषमासेतुसंप्राप्तेपुष्यर्क्षंयदाभवेत् तस्यांरात्रौसंयतात्माध्यात्वाविष्णुं

सनातनं श्वेतागौरेकवर्णा या तस्याग्राह्यंतुगोमयं अंतरिक्षात्तुपतितंशुचिर्मौनमवस्थितः तस्यकृवतहुतीनांतुशतमष्टोत्तरंतिलैः प्रतीक्षेद्द्वादशींकृष्णामुपवासपरायणः स्नात्वानद्यांतडागेवाविष्णुमेवाथचिन्तयेत् इति संपूज्यविहितैः पुष्पधूपैःसदीपकैः नैवेद्यंतिलमिश्रंतुफलानिविविधानिच नमःपरमशांतायविरूपाक्षनमोस्तु ते सर्वसंकष्टनाशायगृहाणार्घ्यंनमोस्तुते एवंसंपूज्यदेवेशंकुर्याद्धोमंसमाहितः आवाह्यदेवंलक्ष्मीशंहोमयेद्धोमयाहुतीः शतमष्टाधिकंचैवतिलान्व्याहृतिसंयुतान् सहस्रशीर्षामंत्रेणहृदिध्यात्वाजनार्दनं लक्ष्मीयुक्तंशंखचक्ररक्ताब्जगदाधरं होमांतेकारयेच्छ्राद्धंवैष्णवंद्विजसत्तमैः दत्त्वाचभोजनंतेभ्योनत्वादत्त्वाचदक्षिणां धर्मश्रवणसंयुक्तंजाग्रयित्वाततोनिशां तत्सर्वंवैष्णवींमूर्तिंविप्रायप्रतिपादयेत् मंत्रहीनंभक्तिहीनंसर्वंतत्रक्षमापयेत् श्रीईश्वरउवाच एवंयःकुरुतेदेविसुरूपाद्वादशीव्रतं नरोवायदिवानारीतस्यपुण्यंशृणुष्वमे दौर्भाग्यंनश्यतेतस्यअपिजन्मांतरार्जितं अपिपापंसुसंपक्वंजायतेकारणांतरात् तस्यापिनश्यतेदुःखंवैरूप्यंतस्यजन्मनि बंधुभिर्नचवैलोकेनेष्टैःसहवियोगिता जायतेगोत्रवृद्धिश्चकीर्तिमान्जायतेभुवि जातिस्मरण माप्नोतिपदंनिर्वाणमाप्नुयात् पठ्यमानमिदंभक्त्यायःशृणोतिसमाहितः पुण्यंप्राप्नोतिसततंस्वर्गलोकेमहीयते ॥

इतिश्रीव्रतार्केस्कंदपुराणोक्तंसुरूपाद्वादशीव्रतम्

इदंचपौषमासेपुष्यनक्षत्रादारभ्यकृष्णद्वादशीपर्य्यंतंविधेयम् पौषकृष्णत्रयोदश्यांपक्षत्रयोदशीव्रतंकार्य्यम् पौषकृष्णचतुर्दश्यांमासशिवरात्रिव्रतम् नान्यदत्रविशेषकृत्यम् पौषामायामर्द्धोदययोगसंभवःसच महाभारते एवमुक्तः अमार्कपातश्रवणैर्युक्ताचेत्पौषमाघयोः अर्द्धोदयःसविज्ञेयः कोटिसूर्य्यग्रहैःसमइति सचार्द्धोदयः प्रायशो

माघामायामेवभवति पौषमाघयोः पौर्णमास्योर्मध्यवर्त्तिन्याममायांसंभवति नतुपौषामायामित्यर्थः इतियत्कैश्चिदाधुनिकैरुक्तंतदसत् उदपत्त्यनभिज्ञत्वाद्ग्रंथकृतां सर्वत्रपुराणवाक्याभ्यामेवविरोधात् श्रवणस्यापिसंभवोभतिथीनांह्रासवृद्ध्या॥ यच्चोच्यते पातसंभवोनभवतिपूर्वपत्रिकास्वदृष्टत्वात् तदप्यसत् तिथिनक्षत्रयोगानांह्रासवृद्धिभ्यांतत्संभवविचारः केनरुध्यते शतावधिपत्रिकाणांस्थित्यासहस्रावधिषुपत्रिकासुक्वचिज्जातेतद्ज्ञातृपुरुषस्याभावात्संभवेंगीकार्य्यएव पुराणवाक्यप्रामाण्यात् अन्यथानास्तिकत्वापत्तेश्चेतिसंभवसामंजस्यामिति नारदीयेप्यत्रामाकृत्यमुक्तम् पौषेमाघेचविप्रेंद्रपितृश्राद्धंफलाधिकं अमायांकर्णपातार्कयुक्तायांतुगयाधिकमिति अथ पौषशुक्लप्रतिपदाकृत्यम् नारदीये पौषशुक्लप्रातिपदिभानुमभ्यर्च्यभक्तितः एकभक्तव्रतोमर्त्योभानुलोकमवाप्नुयात् पौषशुक्लद्वितीयापितत्रैवोक्ता पौषशुक्लद्वितीयायांगोशृंगोदकमार्जनं सर्वकामप्रदंन्नृणामस्तेबालेंदुदर्शनम् योर्घ्यदानेनबालेंदुंहविष्याशीजितेंद्रियः पूजयेत्साध्यमुदितंधर्मकामार्थसिद्धिदं अत्रारोग्यव्रतं विष्णुधर्मोत्तरे पौषशुक्लद्वितीयायांगवांशृंगोदकेनतु स्नात्वाशुक्लांबरोभूत्वासूर्येत्वस्तमुपागते बालेंदोःपूजनंकार्य्यं गंधमाल्यानुलेपनैः आहारंगोरसंप्राय मधःशायीनिशांनयेत् एवंप्रतिमासशुक्लद्वितीयासुबालेंदुपूजनम् वर्षांतेमार्गशीर्षेबालेंदुपूजनंकृत्वोद्यपेत् वासांसिरसकुंभंचकांचनंतुद्विजातये दत्त्वातुपूर्ववद्भुक्त्वाव्रतपारंगतोभवेत् व्रतेनानेनधर्मज्ञोरोगमेवंव्यपोहति सौभाग्यमाप्नोतितथापुष्टिंचमनुजोत्तम कामंसचाप्नोत्यथवैकनिष्ठयशस्तथाग्र्यंप्रचुरंचधर्मं अभ्यासतस्तस्यसमस्तकामान्नरस्तथाप्नोत्यथवाचनारी इतिविष्णुधर्मोत्तरोक्तं पौषशुक्लद्वितीयायामारोग्यव्रतम् पौषशुक्लतृतीयायांब्रह्मगौरीव्रतम् नारदीये पौषशुक्लतृतीयायांब्रह्मगौरीव्रतंचरेत् पूर्वोक्तेनविधानेनपूजयित्वाद्विजोत्तमं ब्रह्मगौरीप्रसादेनमोदतेब्रह्मसंगतेति गौरीपूजनं ब्रह्मपूजासहितमित्यत्रविशेषकृत्यं पौषशुक्लचतुर्थ्यां

विघ्नेशपूजोक्ता तत्रैव पौषमासचतुर्थ्यांतुविघ्नेशंप्राचर्य्यभक्तितः विप्रैकंभोजयेद्भक्त्यामोदकैर्दक्षिणांददेत् एवंकृतेमुनेभूयाद्व्रतीसंपत्तिभाजनः पौषशुक्लपंचम्यांमधुसूदनपूजोक्ता नारदीये पौषेपिशुक्लपंचम्यांसंपूज्यमधुसूदनं लभतेवांछितान्कामान्नात्रकार्य्याविचारणा पंचम्यांप्रतिमासंतुशुक्लेकृष्णेचनारद पितॄणांपूजनंशस्तं नागानामपिसर्वथा पौषषष्ठ्यांविष्णुरूपिदिनेशपूजोक्तातत्रैव पौषमासेशुक्लषष्ठ्यांदिवादिनपतिर्द्विजः विष्णुरूपीजगद्धाता प्रादुर्भूतःसनातनः सतस्मात्पूजनीयोस्यांपुष्पैर्गंधपुरस्कृतैः नैवेद्यैर्वस्त्रभूषाद्यैः सर्वसौख्यमभीप्सुभिरिति पौषशुक्लसप्तम्यादितोवर्षसाध्यमुभयसप्तमीव्रतम् जयसिंहकल्पद्रुमे सप्तम्यामुपोषणम् त्रिसंध्यंसूर्य्यपूजां रात्रावधःशयनंचकृत्वा पूर्णेमासिसप्तम्यांघृतादिभिर्भानुंसंपूज्य मोदकप्रस्थंनिवेद्यद्विजान्भोजयित्वाकपिलांदद्यात् एवंकृतेसर्वकामाप्तिर्भवतीत्युभयसप्तमीव्रतम् ॥ अत्रैवमार्त्तंडसप्तमीव्रतं प्रतिमासंमार्त्तंडंपूजयित्वागवान्हिकंदद्यादितिमार्त्तंडसप्तमीव्रतम् ॥ पौषशुक्लाष्टम्यांशिवपूजा नारदीये शुक्लाष्टम्यांतुपौषस्यशिवंसंपूज्यभक्तितः ॥ भुक्तिंमुक्तिमवाप्नोतिभक्तमेकंसमाचरेत् भक्तंभोजनमित्यर्थः । अत्रविशेषोभविष्योत्तरेकल्पतरौ ॥ श्रीमहादेवउवाच ॥ पौषेमासिमहादेविशुक्लाष्टम्यांबुधोभवेत् ॥ तदासातुमहापुण्यामहाभद्रेतिकथ्यते तस्यांस्नानंमहापुण्यंजपोहोमस्तुतर्पणम् विप्रभोज्यंचमाप्रीत्यैशतसाहस्रिकंभवेत् तस्मात्तस्यांमहादेवपूज्योहंविविधैर्बुधैः गंधपुष्पोपहारैश्च ब्राह्मणानांचभोजनैरिति इयमेवभरणीयुताजयंतीप्रोक्ता पौषेमासिमहादेविअष्टम्यांशुक्लपक्षके नक्षत्रंजायतेपुण्यंयल्लोकेरौद्रमुच्यते तदातुसामहापुण्याजयंतीह्यष्टमीशुभा तस्यांस्नानंतथादानंजपोहोमश्चतर्पणं सर्वंकोटिगुणंदेविकृतंभवतिकृत्स्नशइतिपौषशुक्लाष्टमीव्रतम् ॥ * पौषशुक्लनवम्यांदेवीपूजाव्रतं नारदीये पौषेशुक्लनव

ष्यांतुमहामायांप्रपूजयेत् ॥ एकभक्तव्रतधरोवाजिपेयफलाप्तये ॥ भविष्योत्तरेपीदंव्रतमुक्तं श्रीकृष्णउवाच महिषासुरेविनिहतेभगवत्यामहासुरैः ॥ पूर्ववैरमनुस्मृत्यसंग्रामावहवःकृताः ॥ नानारूपधरादेवीह्यवतीर्यपुनःपुनः धर्मसंस्थापनार्थायनिजघ्नेदैत्यसत्तमान् ॥ अथरक्तासुरोनाममहिषस्यसुतोमहान् ॥ आसीत्तेनतपस्तप्तंवर्षाणामयुतंनिषट् ॥ तस्मैददौचतुर्वक्त्रोराज्यंत्रैलोक्यमंडले ॥ तेनलब्धवरेणाथमेलयित्वादनोःसुतान् ॥ प्रारब्धंसहशक्रेणयुद्धंगत्वामरावतीं ॥ तंदृष्ट्वादानवबलंसन्नद्धाश्चोद्यतायुधाः ॥ युयुधुरसुरैःसार्द्धंसुराःशक्रपुरोगमाः ॥ ततःप्रावर्त्ततदीर्णाशोणितौघतरंगिणी ॥ पाशनक्रगदाग्राहाह्यसुरेंद्रककच्छपा ॥ वहंतीपितृलोकायसुरासुरमहारणे अथरक्तासुरोरोषाद्युयुधेविबुधैःसह तेहन्यमानाविबुधारक्ताक्षेणमहारणे ॥ नष्टाःस्वर्गंपरित्यज्यत्यक्तप्रहरणाद्रुतं ॥ कंठछत्रांपुरींप्राप्तायत्रास्तेभववल्लभा ॥ दुर्गाचामुंडयासार्द्धंनवदुर्गासमन्विता ॥ अथतावन्महालक्ष्मीनंदाक्षेमंकरीतथा ॥ शिवदूतीमहादंडाभ्रामरीचंद्रमंगला ॥ रेवतीचपरासिद्धिर्नवैताःपरिकीर्त्तिताः ॥ एताःसर्वास्तुतिंचक्रुस्त्रिदशाःप्रणताननाः ॥ जयतिसुरपतिमुकुटचुंबितचरणांबुजसकलभुवनसुखजननी ॥ जयतिजगदीशवंदितसकलामतिविकलादुर्गाविष्कृतनखदशभूषणरुचिरवक्त्राच्छुरितखड्गकृतहस्ता ॥ जयतिनरमुंडमंडितामितशिरा हारकूर्चंडी ॥ जनितशिखिगणोज्ज्वलविकटजयनद्धचंद्रमाणिशोभा ॥ जयतिदिगंबरभूषासिद्धघंटेशामहालक्ष्मीकरकमलशोभापद्मासनबद्धपद्मचरणाच जयतिकमंडलुहस्तानंदादेवीनतार्त्तिहरादिग्वसनाविकृतमुखाफेत्कारादामपूरितदिशौघा जयतिविकरालदेहाक्षेमंकरीरुद्रभावस्था क्षोभितब्रह्मांडोदरसूकरमुखसुखरहुंकृतनिनादा ॥ जयतिडमरुहस्ताशिवदूतीप्रथमशिवशक्तिमुक्ताट्टहासभैरवदुःसहचर्वितसकलदिग्वक्त्रा ॥ जयतिभुजगेंद्रबंधनशोभितकर्णामहारुंडा ॥ पटुपटहमुरजमर्दलझल्लरिझांकारनार्त्तितावयवापायातिमधुव्रतरूपादैत्यहराभ्रामरीदेवी ॥ शांताप्रशांतवचनासिंहरवाध्यानयोग

तन्निष्ठा जयतिचतुर्भुजदेहाचंद्रकलाचंद्रमंडलादेवी पक्षिपुटचंचुघातैः संचूर्णितविबुधशत्रुसंघाता जयंतीसितशूलहस्ताबहुरूपारेवतीरौद्रपर्यटा जयतिहष्टापितृवदनानिलयेषुयोगिनीसहिता जयति हरसिद्धिनाम्नीहरसिद्धिवंदितादेवैः इतिनवदुर्गाःसंस्तवमनुपममार्य्याभिरमराःकृत्वा ॥ इदमूचेसहदेवैर्ब्रह्माद्यस्मान्ससर्वभीतिभ्यः पुनःपुनःप्रणम्योचुर्भक्तास्तांसिंहवाहिनी अस्माकंभयभीतानांशरण्येशरणंभव देवानांतद्वचःश्रुत्वातेभ्योदत्वाभयंततः सिंहाधिरूढानिर्गत्यदुर्गाभिःसहितापुरात् युयुधेदानवैःसार्द्धं महासमरमूर्द्धनि कुमारीविंशतिभुजाघनबिल्वफलोपमाः सर्वैलब्धवराःशूराः संतुष्टतपसास्तथा महाग्रहापरिक्रांताः स्वस्वमायाविनश्चते अब्रह्मण्याह्यधर्मिष्टानामतश्चनिबोधतान् इंद्रोमरोमुरःकेशीप्रलंबोमरकंटकः रिष्टःपुलोमाशरभः शंबरोदुंदुभिश्चयः इल्वलोनमुचिर्भौमोवातापीधेनुकोबलिः मयोवृत्रोबलोधुंधुर्मधुकैटभकालजित् एतेपौंड्रादयोदैत्याप्राधान्येननिरूपिताः दारुणाभिजनाःसर्वे सन्नद्धाश्चोद्धतध्वजाः रूपतोवर्णतश्चैवध्वजास्तेषांपृथक्पृथक् प्रत्यदृश्यंतराजेंद्रज्वलिताइवपावकाः कांचनाः कांचनापीडाः कांचनस्रगलंकृताः पताकाविविधैर्वर्णैरुद्धतालक्षणान्विताः नीलाःपीताःसितारक्ताः कृष्णास्ताः पंचवर्णकाः नेत्रपट्टपटीसूत्रकृतबुद्बुलकर्बुराः पताकाः कांतितरलानर्तक्यइवशोभना ततोहलहलाएवं चक्रुस्तेदानवोत्तमाः प्रस्फालयंतः पणवान्भेरीझल्लरगोमुखान् वादयंत्यानकानन्येशंखान्डमरुडिंडिमान् एवंविधेसमाजेतांभवानींदैत्यनायकाः समाजग्मुःशरैःशूलैःपरिघैःशक्तितोमरैः असिभिर्मुद्गरैःकुंतैःशतघ्नीकूटमुद्गरैः साहन्यमानारोषेणजज्वालसमरेंबिका सिंहारूढाद्रुतंदेवीरणमध्येप्रधाविता आच्छिद्यचिह्नानितदाध्वजान्नानाविधांस्तथा बलात्कारेणदैत्यानामुन्मथ्यसमरेरुषा चिह्नकानिददौतुष्टादेवेभ्यःशीघ्रचारिणी सुरैरपिगृहीतानिजयदेवीतिवादिभिः अंबिकासाभृशंरुष्टातेषांचक्रेक्षणात्क्ष

यं कालरात्रीदानवानांमारीवनिपपातसा जीवितानिचजग्राहदैत्यानांदेवनंदना: अथरक्तासुरंकंठेगृहीत्वापात्यभूतले देवीजघानतीक्ष्णेनात्रिशूलेनभृशंहृदि सभिन्नहृदयोमायाश्चक्रेदैत्यःसुदारुणः तथापिदेव्यासहतः पपातसमरेसुरः देवितानसुरान्जित्वातत्रवज्रपुरेद्रुतम् ददृशुस्तोरणप्रांतेलंबमानान्महाध्वजान् यात्रांचक्रुःसुराहृष्टानवम्यांध्वजचिह्नितां अतोद्यापीहभूपालैर्जयलब्धैःश्रियान्वितैः उपोष्यतेनरैर्भक्त्यानारीभिरपिपांडव युधिष्ठिरउवाच कीदृग्विधानंतस्यास्तिनवम्याब्रूहिमेप्रभो सरहस्यंसमंत्रंचतुष्यतेयेनचंडिका श्रीकृष्णउवाच। पौषस्यशुक्लपक्षेवानवमीपरिसंश्रुता तस्यांस्नात्वाशुभैःपुष्पैरर्चनीयाहरेःस्वसा साकुमारीभगवतीसिंहस्थानंददायिनी ध्वजान्नानाविधान्कृत्वापुरतस्तांश्चपूजयेत् मालतीकुसुमैर्दीपैर्गंधधूपाविलेपनैः बलिभिःपशुभिर्मेध्यैः सुरामांसस्रगंबरैः दधिचंदनचूर्णैश्चभक्ष्यैश्चानाग्निपाचितैः मंत्रेणानेनकौंतेयब्राह्मणांश्चैवपार्थिवः इंद्रोभगवतींकृष्णांविश्वस्यजगतोहितां सर्वदुःखसंयमनींग्रहनक्षत्रमालिनीं प्रपन्नोहंशिवांरात्रिंभद्रेपारमसीमहि सर्वभूतपिशाचेभ्यःसर्वसत्वसरीसृपैः देवेभ्योमानवेभ्यश्चभयेभ्योरक्षमांततः ततश्चारोपयेद्राजन्देवीनांभवनेध्वजान् भोजयीतकुमारीश्चप्राणिपत्यक्षमापयेत् उपवासेनकुर्वीतएकभक्तेनवापुनः भक्त्याभूपालयेचास्यभक्तिस्तेषांगरीयसी एवंयेपूजायिष्यंतिध्वजैर्भगवतींनराः तेषांदुर्गादुर्गमार्गेचौरव्यालाग्निसंकटे रणेराजकुलेगेहेबुद्धमध्ये स्थलेजले रक्षांकरोतिसततंभवानीसर्वमंगला अस्यांबभूवविजयोनवम्यांपांडुनंदन भगवत्यास्तुतेनैषानवमीसततंप्रिया धन्यापुण्यापापहरासर्वोपद्रवनाशिनी अनुष्ठेयाप्रयत्नेनसर्वान्कामानभीप्सितान् ॥ देव्यर्चनाहितमतिर्मनुजोनवम्यांदुर्गाग्रहेध्वजवरानवरोपयेद्यः कामानवाप्यमनसोऽभिमतान्प्रकामंदेहांविहायसमुपैतिच. वीरलोकम् इतिभविष्योत्तरेपौषशुक्लाध्वजारोपदुर्गानवमीव्रतम् ॥

॥ पौषशुक्लदशम्याविश्वेदेवपूजाव्रतम् ॥ नारदीये ॥

पौषेदशम्यांशुक्लायांविश्वेदेवान्समर्चयेत् क्रतुर्दक्षोवसुःसत्यःकालकाममुनीनज स्थापयित्वादर्भमयानासनै
षुचसंस्थितान् गंधैर्धूपैस्तथादीपैर्नैवेद्यैश्चापिनारद प्रत्येकंदक्षिणांदत्त्वाप्रणिपत्यविसर्जयेत् दक्षिणांतां
द्विजाग्रेभ्योगुरवेवासमर्पयेत् एवंकृतविधिश्चैकभक्तभोजीव्रतीभवेत् लोकत्रयस्यविप्रर्षेनात्रकार्य्याविचारणा
इयंपौषशुक्लदशमीईशानकल्पादि अस्यांश्राद्धदानादिसर्वमक्षयफलंभवतीतिकल्पादिनिर्णयेभिधानात् पौष
शुक्लैकादशीपुत्रदैकादशी नारदीये पौषस्यशुक्लैकादशींपुत्रदांसमुपोष्यवैद्वादश्यांचक्रिणंप्रार्च्यगंधाद्यैरुपचा
रकैः ततःसंभोज्यविप्राग्र्यान्दत्त्वातेभ्यश्चदक्षिणां विसृज्यस्वयमश्नीयाच्छेषान्नंबांधवैःसह एवंकृतव्रतोवि
प्रभुक्त्वाभोगानिहेप्सितान् विमानवरमारुह्ययात्यंतेहरिमंदिरम् अथकथा पद्मपुराणे युधिष्ठिरउवाच
कथ्यतांचैवभोकृष्णकृपांकृत्वाममोपरि पौषस्यशुक्लपक्षेयातिथिरेकादशीभवेत् किंनामकोविधिस्तस्याः को
देवस्तत्रपूज्यते कस्यतुष्टोहृषीकेशवदमेपुरुषोत्तम श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिशुक्लापौषस्ययाभवे
त् कथयामिमहाराजलोकानांहितकाम्यया पूर्वोक्तविधिनाराजन्कर्त्तव्याचप्रयत्नतः पुत्रदानामविख्याताास
र्वपापक्षयंकरी नारायणोहिदेवोस्याःसर्वकामफलप्रदः नातःपरतराकाचित्त्रैलोक्येसचराचरे विद्यावंतंयश
स्वंतंकरोतिमनुजंहरिः शृणुराजन्प्रवक्ष्यामि पुत्रदायाःकथांशुभां पुरीभद्रावतीनामराजातत्रसुकेतुमान् राज्ञ
स्तस्यतुपत्न्योवैपंचैवासन्सुलोचनाः पुत्रहीनेनराज्ञावैकालोतीतोमनोरथैः पुत्रंनलेभेराजावैशोभनंवंशवर्द्धनंनरा
ष्ट्रेनपुरेसौख्यंराजालेभेसुकेतुमान् सौराज्यंशोभनंराजानभेनेपुत्रवर्जितः राजाराज्ञीतथाजातावन्योन्यमतिदुः

खितौ पितरौतस्यपानीयंकवोष्णमुपभुंजते राज्ञःपुत्रोनवैजातोयोस्मान्संतर्पयिष्यति इत्थंसंचिंतयानास्तुन
लेभेयुःसुखंतदा नऋणान्मुच्यतेपुत्रोदेवन्दणांतथापितुः तस्मात्सर्वप्रयत्नेनपुत्रउत्पाद्यतेनरैः इहलोकेय
अ०र० शस्तेषांपरलोकेशुभागतिः येषांनरोत्तमानांहिपुत्रजन्माभवेद्ध्रुवं आयुरारोग्यसंपत्तिस्तेषांलोकेप्रवर्द्धते पुत्र
पौष० हीनंतथाराज्यंचंद्रहीनायथानिशा इत्थंसंचिंत्यमनसाशर्मलेभेनपार्थिवः एकदैच्छत्सराजेंद्रःप्राणान्हंतुंहिकेतु
१० मान् दृष्ट्वापतितमात्मानंपुत्रहीनंसुदुःखितं अश्वारूढस्तदाराजाजगामगहनंवनं जानंतिस्मप्रजानैवसेवकाम
त्रिणस्तथा संप्राप्तोघोरविपिनंविचरंश्चततस्ततः अपश्यच्चवटाश्वत्थवृक्षान्वहुविधान्वने चंपकान्सप्तपर्णां
श्चतिंदुकांस्तिलकांस्तथा शालांश्चैवतमालांश्चखदिरांश्चविशेषतः कदलीरिंगुदीश्चापिवदरीश्चमनोरमाः व्या
घ्रांश्चैववराहांश्चवानरानपितत्रसः गवयांश्चमृगांश्चैवशृगालान्शशकानपि वनमार्जारकांश्चैवभल्लूकांश्च
सरीसृपान् दृष्ट्वातान्चिंतयामासस्वात्मनःप्राणनाशनम् वनेविचरतस्तस्यरविर्मध्यगतोभवत् क्षुत्तृषापीडि
तोराजावनेवभ्रामसर्वतः मुखेनशुष्यतात्यर्थंचिंतयामासपार्थिवः पातकंकिंकृतंदेवयत्प्राप्तंदुःखमीदृशं मया
तुतोषितादेवायज्ञपूजाभिरादरात् भक्त्याभूमिसुराश्चैवयोषिताःश्रेष्ठभोजनैः प्रजाश्चपालिताःसर्वाःपुत्रवत्सर्व
दामया कस्माद्दुःखंमयाप्राप्तमीदृशंदारुणंमहत् इतिचिंतातुरोराजाजगामपुरतोवने स्वपूर्वजानांचसरःपुण्यं-
प्राप्तंमहीभुजा मानसंस्पर्द्धतेयद्वैपद्मिनीखंडमंडितं हंसकारंडवाकीर्णंचक्रवाकोपशोभितं मकरैर्मत्स्यसंघैश्च-
पक्षिभिश्चसमान्वितं समीपेतस्यसरसोमुनीनामाश्रमान्शुभान् ददर्शराजावाल्मीकिशिष्याणांसतपास्विनां-
प्रास्फुरद्दक्षिणंनेत्रंप्रास्फुरद्दक्षिणोभुजः सद्यस्तस्यमहीपस्यशशंसशुभलक्षणं तस्यतीरेचमुनयस्तपश्चक्रुःसुदा-
रुणं हर्षादुत्फुल्लनयनोमुनीन्दृष्ट्वावभूवसः अवतीर्य्यहयात्तस्मा न्मुनीनामग्रतःस्थितः पृथक्पृथग्ववंदेसौ

मुनीनाश्रमसंस्थितान् प्रत्यूचुस्तेचमुनयः प्रसन्नाःस्मोवयंतव राजोवाच कुतस्त्याश्चभवंतोवैयैर्भृशंतप्यतेतपः किमर्थमागताश्चेहकथयंतुममाग्रतः । मुनयऊचुः । विश्वेदेवावयंराजन्सरसिस्नातुमागताः अयंचैकादशीराजन्शुक्लापौषेहिपुत्रदा पुत्रंददातिवैकुंठस्तत्रतस्माद्व्रतंचरेत् तस्मादेकादशीमेतांपुत्रदेतिप्रचक्षते इत्थंमुनिवचः श्रुत्वामुनयोवाक्यमब्रुवन् अद्यास्मिन्दिवसेराजन्पुत्रदानामवर्त्तते एकादशीमहापुण्याक्रियतांव्रतमुत्तमं अस्मत्प्रसादतश्चैवकृष्णस्यानुग्रहात्तथा व्रतस्यास्यप्रभावाच्चावश्यंतेभवितासुतः सराजावचनात्तेषांचकारैकादशीव्रतं तत्रैवविपनेस्थित्वा मुनिभिःसहितस्तदा रात्रौजागरणंकृत्वानृत्यगीतैस्तवैर्हरेः द्वादश्यांपारणंचक्र मुनिभिःसहितस्तदा आजगामगृहंराजाहर्षोत्फुल्लमुखांबुजः पुत्रदायाःप्रभावेनराज्ञीगर्भंततोदधे पुत्रोजातस्ततस्तस्यास्तेजस्वीरूपवान्गुणी तस्तेनसहायेनराज्ञासंपालिताःप्रजाः एतस्मात्कारणाद्राजन्कर्तव्यंपुत्रकांक्षिभिः मोक्षार्थिभिश्चभक्त्यावैपुत्रदैकादशीव्रतं एकचित्तेनयोराजन्करोत्येकादशीव्रतं गुणिनोलभतेपुत्रानिहामुत्रचसद्गतिं अस्यामाहात्म्यश्रवणाद्दीर्घायुर्धनधान्यवान् पुण्यवांश्चभवेन्मर्त्योनात्रकार्य्याविचारणा

॥ इतिब्रह्मपुराणेब्रह्मांडोक्तापुत्रदैकादशीव्रतकथा ॥

पौषशुक्लैकादशीमन्वादिरितिमन्वादिनिर्णयोक्तान्येवकुर्य्यात् ॥ अस्यामेवमाघस्नानप्रारंभंकेचिदाहुः तदुक्तंब्रह्मपुराणे एकादश्यांशुक्लपक्षेपौषेमासिसमारभेत् द्वादश्यांपौर्णमास्यांवाशुक्लपक्षेसमापयेत् माघस्नानमितिशेषःपक्षांतरमाहविष्णुःदर्शेवापौर्णमास्यांवाप्रारभ्यस्नानमाचरेत् पुण्यान्यहानित्रिंशत्तुमकरस्थेदिवाकरइति पुनरापिसएवा

हतुलामकरमेषेषुप्रातःस्नायीसदाभवेत् हविष्यंब्रह्मचर्य्यंचमहापातकनाशनमिति स्नानकालउक्तो ब्रह्मपुराणे एकादश्यांशुक्लपक्षेपौषेमास्यरुणोदये संप्राप्तेमाघमासस्यस्नानकालेविचक्षणः माधवांघ्रियुगंध्यात्वायः स्नातिसुरपूजितइति अरुणोदयमारभ्यप्रातःस्नानावधिप्रभो माघस्नानंभवेत्पुण्यंनात्रकार्य्याविचारणा उत्तमंतुसनक्षत्रंलुप्ततारंतुमध्यमं सवितर्युदितेभूपततोहीनंप्रकीर्त्तितं एवंसति संप्राप्तेमाघमासेतुतपस्विजनवल्लभे क्रोशंतिसर्ववारीणिसमुद्गच्छतिभास्करे यानितु माघमासेरटंत्यापः किंचिदभ्युदितेरवौ ब्रह्मघ्नंवासुरापंवाकंपतं तंपुनीमहि इत्यादिनारदीये वचनान्यशक्तविषयाणि तत्रैव तडागेष्वथवास्नायात्कूपेभांडाश्रितेतथा माघमासेवरारोहे प्रशस्तांनिम्नगाजलं भांडाश्रितेतुविशेषः सरित्तोयंमहावेगंनवकुंभस्थितंतथा वायुनाताडितं रात्रौगंगास्नानसमंस्मृतं स्नातोवह्निंनसेवेतह्यस्नातोवाकथंचन सेवेतापिचहोमार्थंनशीतार्थंकथंचन स्नानविधिमाहविष्णुः तत्रचोत्थायनियमंगृह्णीयाद्विधिपूर्वकं माघमासेसनियमंस्नास्येहंदेवमाधव तीर्थस्यास्यजलेनित्यमितिसंकल्प्यचेतासि ततःस्नात्वाशुभेतीर्थेदत्त्वाचाशिरसिमृदं वेदोक्तविधिनाराजन्सूर्य्यायार्ध्यंनिवेदयेत् पितृणांतर्पयित्वातुअवतीर्य्यजलात्ततः शंखचक्रधरंदेवंमाधवंनामतर्पयेत् वह्नौहुत्वाविधानेनततस्त्वेकाशनोभवेत् भूशय्याब्रह्मचर्य्येणशक्तः स्नानंसमाचरेत् अशक्तस्यधनाढ्यस्यबहुदानंप्रकुर्वतः अवश्यमेवकर्त्तव्यमाघस्नानमितिश्रुतिः तिलस्नायीतिलोद्वर्त्तीतिलहोमीतिलोदकीतिलदास्तिलभोक्ताचषट्तिलीनावसीदति तैलमाभलकाश्चैवतीर्थेदेयास्तुनित्यशः तथाप्रज्वालयेदग्निंसेवनार्थेद्विजन्मनां एवंस्नानावसानेतुभोज्यंदेवमवारितं भोजयेद्द्विजदांपत्यंभूषयेद्वस्त्रभूषणैः कंबलाजिनरत्नानिवासांसिविविधानिच चौलकान्यपिदेयानिप्रच्छादनपटास्तथा उपानहौतथागुप्तमोचकौपापमोचकौ अनेनविधिनादद्यान्माधवः प्रीयतामिति सवित्रेप्रसवित्रेचपरं-

धामयुतेनमः त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधा दिवाकरजगन्नाथप्रभाकरनमोस्तुते परिपूर्णंकरिष्येहंमाघस्नानंतवाज्ञया इतिमाघस्नानसमापनमंत्रः अहन्यहनिदातव्यास्तिलाःशर्करयान्विताः माघावसानेसुभगेषड्रसंभोजनंतथा सूर्य्योमेप्रीयतांदेवोविष्णुमूर्त्तिर्निरंजनं दंपत्योर्वाससीसूक्ष्मेसप्तधान्यसमान्विते त्रिंशतुमोदकादेयाशर्करातिलसंयुताः भागत्रयंतिलानांतुचतुर्थःशर्करांशकः अनाभ्यंगोवरारोहेसर्वमासंनयेद्व्रती इतिमाघस्नानविधिः ॥ पौषशुक्लद्वादश्यांसुजन्मद्वादशीव्रतम् नारदीये पौषस्यशुक्लद्वादश्यांसुजन्मद्वादशीव्रतं तत्रस्नानविधानेनगृह्णीयाद्वार्षिकंव्रतं पत्विागोश्रृंगवार्य्यर्दौतांचकृत्वाप्रदक्षिणं प्रतिमासंततःशुक्लद्वादश्यांव्रतमाचरेत् घृतप्रस्थचतुष्कंचक्रमाद्व्रीहेर्यवस्यच द्विरक्तकंहेमातिलाःप्रस्थार्द्धंपायसंघटं रौप्यस्यमाषमेकस्यतृप्तिकृत्पिष्टपक्वकं छत्रमाषार्द्धहेम्नश्चप्रस्थंफाणितमुत्तमं चंदनंपलिकंवस्त्रंपंचहस्तोन्मितंतुतत् एवंतुमासिकंदानंनित्यंदेयंयथाक्रमं गोमूत्रंजलमाज्यंचत्र्यापःशाकंचदूर्विका दधिभक्तंयवान्नंचतिलान्पावकतापितान् दर्भावलीरनुदिनंप्राशनंप्रतिमासकं एवंकृतव्रतोवर्षेसौवर्णींप्रतिमांरवेः कलशेताम्रपात्रेचन्यस्याभ्यर्च्चेयद्विधानतः गुरवेधेनुसहितांसमर्प्यप्रणमेत्ततः विप्रान्द्वादशसंभोज्यतेभ्योदद्याच्चदक्षिणां एवंकृतव्रतोवर्षंजन्माप्नोत्युत्तमेकुले नीरोगोधनधान्याढ्योभवेच्चाविकलेंद्रियः अथविष्णुधर्मोत्तरोक्तसुजन्मद्वादशीव्रतं हेमाद्रौवीरमित्रोदये पुलस्त्य उवाच पौषेमासेसितेपक्षेद्वादश्यांशक्रदैवते नक्षत्रयोगगेविष्णुंप्रथमंतुततोर्चयेत् ततःप्रभृतिविप्रेंद्रमासिमासिजनार्दनं उपोषितःपूजयेत यावत्संवत्सरंगतं मासेचमासेविधिनोदितेनतस्यांतिथौदानमितिब्रवीमि प्राश्यंयथावद्विधिवत्क्रमेणतदुच्यमानंनिखिलंनिबोध घृतंयथाव्रीहियवंहिरण्यंयवान्नमंभःकनकान्नपानं छत्रंपयोन्नंगुडपुष्पताम्रंसुचंदनंवस्त्रमनुक्रमेण एकैकपदोक्तमेकैकदानमेकैकस्मिन्मासेक्रमेणदेयं गोमूत्रमंभोघृतमाम

शाकंदूर्वादधिव्रीहियवास्तिलाश्च सूर्यांशुतप्तंजलमंबुदाभःक्षीरंचमासक्रमशःप्रदिष्टं आमशाकंअपक्वशाकं सूर्यांशुतप्तमिति जलविशेषणं दाभ्रमंबु कुलेप्रधानेधनधान्यपूर्णेविवेकवत्यस्तसमस्तदुःखेप्राप्नोतिजन्माविकलेंद्रियश्चभवत्यरोगोमतिमान्सुखीच इविष्णुधर्मोत्तरोक्तंसुजन्मद्वादशीव्रतम्

ब्र०र०
पौष०
१२

अथास्यामेवभविष्योत्तरोक्तं गोविंदद्वादशीव्रतम्

श्रीकृष्णउवाच अथान्यदपितेवच्मिगोविंदद्वादशींशृणु यस्याःसम्यगनुष्ठानात्प्राप्नोत्यभिमतंफलं पौषमासे सितेपक्षेद्वादश्यांसमुपोषितः सम्यक्संपूज्यगोविंदंदेवदेवमधोक्षजं धूपपुष्पोपहारैश्चनैवेद्यैश्चसमाहितः गोविंदेतिजपन्नामपुरस्तद्गतमानसः विप्रायदक्षिणांदद्याद्यथाशक्त्यासमाहितः स्वपन्विबुध्यन्स्खलितोगोविंदेतिचकीर्तयेत् पाखंडिभिर्विकर्मस्थैरालापंचविवर्जयेत् गोमूत्रंगोमयंचापिदधिक्षीरमथापिवा गोदेहतःसमुद्भूतं समश्नीयाद्विशुद्धये द्वितीयेह्नितत‌ःस्नात स्तथैवाभ्यर्च्यकेशवं तेनैवनाम्नासंपूज्य दद्यात्तेभ्यश्चदक्षिणां ततोभुंजीतगोदेहसंभूतेनसमन्वितः एवमेवाखिलान् मासा नुपोष्यप्रयतःशुचिः दद्याद्गवाखिलान्मासानुपोष्यप्रयतःशुचिः दद्याद्गवाह्निकंविद्वान्प्रतिमासंस्वशक्तितः पारितेचपुनर्वर्षेगोविंदंपद्मयासह कारयित्वास्वर्णमयंपुष्पैर्धूपैःस्रगवरैः गोविंदोगोपतिर्गोप्ताश्रीकांतःश्रीधरोहरिः सर्वकामफलावाप्तिंकरोतुममकेशवः इत्युच्चार्य्यततोदद्यात्तस्मिन्नह्निगवाह्निकं भक्त्यापरमयाराजन्शृणुयत्फलमाप्नुयात् स्वर्णशृंगींरौप्यखुरांसपृष्ठांसवृषांनरः प्रतिमासंद्विजातिभ्योदत्वायत्फलमश्नुते तदाप्नोत्यखिलंसम्यग्व्रतमेतदुपोषितः तंचलोकमवाप्नोतिगोविंदोयत्रतिष्ठति गोविंदद्वादशीमेतामुपोष्यादिवितारकाः विद्योतमानादृश्यंते लोकेऽद्यापिशशांकवत् गोविंदमर्चयतिगोर

सभोजनश्चगावोविनोदयातिदत्तगवाह्निकश्च गोद्वादशीयुक्तव्रतोपवासःप्राप्नोत्यसौसुरभिलोकमपेतशोकः

इतिभविष्योत्तरोक्तंगोविंदद्वादशीव्रतम् ॥

पौषशुक्लत्रयोदश्यामच्युतपूजाव्रतं पौषशुक्लत्रयोदश्यांसमभ्यर्च्याच्युतंहरिं घृतपात्रंद्विजेंद्रायदद्यात्सर्वार्थसिद्धये इतिनारदीयोक्तमच्युतत्रयोदशीव्रतम् ॥ कृत्यतत्त्वार्णवेप्येवमेव पौषमासित्रयोदश्यांघृतंविप्रायपार्थिव समभ्यर्च्यस्वयंदद्यात्सर्वान्कामानवाप्नुयात् इतिपौषशुक्लत्रयोदशीकृत्यम् ॥

पौषशुक्लचतुर्दश्यांविरूपाक्षव्रतं नारदीये पौषशुक्लचतुर्दश्यांविरूपाक्षव्रतंस्मृतं कपर्दीश्वरसान्निध्यंप्राप्यविप्रविचिंत्यच स्नात्वागाधजलेतत्र विरूपाक्षंशिवंयजेत् गंधमाल्यनमस्कार धूपदीपान्नसंपदा भोज्यंद्विजातयेदद्यान्मोदतेदिविदेववत् हेमाद्रौ विष्णुधर्मोत्तरेप्येतदुक्तम् मार्कंडेयउवाच पौषशुक्लचतुर्दश्यांविरूपाक्षंतुपूजयेत् पौषमासादथारभ्ययावत्संवत्सरंभवेत् गंधमाल्यनमस्कारधूपदीपान्नसंपदा तत्स्थंद्विजातयेदद्याद्व्रतांतेतुपरंतप तत्स्थंतदुपकरणंमहोक्षादिपूजादानादि कृत्वाव्रतंवत्सरमेतादिष्टभयंनचाप्नोतिसराक्षसेभ्यः कामानवाप्नोतिभवत्यरोगोभयंचराजन्नचतस्यकिंचित् इतिविष्णुधर्मोत्तरोक्तंविरूपाक्षव्रतम् ॥

पौषपौर्णमास्यांलक्ष्मीपूजाव्रतम् नारदीये इदंजगत्पुरालक्ष्म्यात्यक्तमासीत्ततोहरिः पुरंदरश्चसोमश्चतथातिष्यबृहस्पतीपंचैतेपुष्ययुक्तायांपौर्णमास्यांजगद्बलात् अहंकृतंपुनश्चक्रुः सर्वसौभाग्यवृद्धये गौरसर्षपकल्केनसमालभ्यस्वकांतनुं स्नायात्सर्वौषधिजलैर्धारयेच्चनवांशुकं दृष्ट्वाचमंगलद्रव्यंस्पृष्ट्वानलाततोर्चयेत् हरिद्राकुंदपुष्पैश्चगंधाद्यैरुपचारकैः विधायहोमंविप्रांश्चभोजयेत्पायसंशनैः एवंकृत्वाव्रतंविप्ररमाश्री

तिविवर्द्धनं अलक्ष्मीनाशनंचैवमोदतेत्रपरत्रच कृत्यतत्त्वार्णवे ब्रह्मलोकेतपस्तप्त्वापितरोलेभिरेवरं
पौषेतुपुष्यनक्षत्रेपिष्टकैर्विविधैः पितॄन् अभ्यर्चयतियोदेवान्निजमात्मानमेवच गौरसर्षपकल्केनसमालभ्यस्व
कांतनुं कृतस्नानैस्तथाकार्य्यमलक्ष्मीनाशनंपरं उद्वर्त्यदेवंचतथासर्वौषधियुतैर्जलैः स्नापयित्वानववस्त्रंगृही
ब्र०र० त्वाकांचनंतथा द्रष्टव्यंमंगलंशांतंधूपस्त्रङ्माल्यशोभितं ततोनारायणंशुक्रचंद्रशक्रबृहस्पतीन् संपूज्यपुष्पै
पौष० धूपैश्चनैवेद्यैश्चपृथकपृथक् प्रशस्तैर्वैदिकैर्मंत्रैः कृत्वाग्निहवनंशुभं दानैर्विप्रांश्चसंतर्प्यनवैर्वस्त्रैश्चशोभि
१३ तान् ततः पुष्टिकरंहृद्यं भोक्तव्यंघृतपायसं पुष्ययोगेतुकर्त्तव्यंराज्ञास्नानंतुसर्वदा विष्णुरपि पौषीचेत्पुष्ययुक्ता
स्यात्तस्यांगौरसर्षपकल्केनोत्सादितशरीररोगः गव्यघृतपूर्णकुंभेनाभिषिक्तः सर्वगंधैः सर्वबीजैश्च स्नातोघृतेन
भगवंतंवासुदेवंस्नापायित्वापुष्पधूपदीपगंधनैवेद्यादिभिश्चाभ्यर्च्य वैष्णवैःसूक्तैर्बार्हस्पत्यैर्मंत्रैश्चानलंहुत्वा ससुव
र्णेनघृतेनब्राह्मणंस्वस्तिवाचयेत् ततोवासोयुगंचकर्त्रेदत्त्वा अनेनकर्मणामुच्यते सर्वौषध्यउक्तश्छांदोगपरिशिष्टे
कुष्ठमांसीहरिद्रेद्वेमुराशैलेयचंदनं वचाचंपकमुस्ताचसर्वौषधिगणः स्मृतः ॥ अस्यामेवपौष्यां ईशानव्रतमुक्तं
हेमाद्रौ कालिकापुराणे पिप्पलादवाच अथोपोष्यचतुर्दश्यांपौर्णमास्यांगुरोर्दिने पूजयेद्विधिनायेनशार्वंलिंगं
निबोधतत् ब्रह्माणंपश्चिमेभागेवामेलिंगस्यवैहरिं खखोल्कंदक्षिणेरुद्रमीश्वरंप्राग्दिशिस्थितं खखोल्कसूर्य्यम् गु
ग्गुलंचाज्यसंयुक्तमगुरुंवासितंशुभं दद्यान्नीराजनंकुर्य्याद्दत्त्वागोयुग्मपंचकं नैवेद्याद्यंबलिंचैवपूर्ववत्स्वगृहंव्रजेत्
पंचगव्यं ततःप्राश्य आचार्य्यब्राह्मणांस्तथा व्रतिनोमिथुनान्यवभोजयेच्चस्वशक्तितः हेमवस्त्रादिकंचैवयत्नात्कृ
त्वाथपूजयेत् इष्टदेवाःप्रपूज्यावै वेद्याद्यंचप्रपूजयेत् नत्वाग्निंपूजयित्वातुपंचवक्त्रंशिवंस्मरेत् प्राप्तेऽब्देपंचवैगावःपं
चपंचनियोजयेत् तेषामुद्दिश्यतेष्वेवंन्यूनंवापिततोधिकं पंचपंचेतिवचनात् द्वितीयेऽब्दे तृतीयेतिस्रः चतुर्थेचतस्रः

वृषभस्तुप्रथमाब्दवदेकएव तेषांब्रह्मादीनांपंचानांचक्रेदेवानांपंचवर्गानुद्दिश्य व्रतेयन्न्यूनाधिकंतत्तेष्वेवनियोजयेत् निखिलंप्राग्विशेषंचकर्त्तव्यंतत्पदेप्सुभिः सुखंकीर्त्तिश्रियोर्थंचइहैवविभवायच रहस्यमेतद्गदितंनदेयंयस्यकस्यचित् इतिनिर्णयामृते ब्रह्मपुराणोक्तंपौष्यामीशानव्रतम् ॥ अथास्यांभविष्योत्तरेपुराणदानमुक्तम् नारदीये चतुर्दशसहस्रंतुपुराणंपरिकीर्त्तितं भविष्यंसर्वदेवानांसाम्यंयत्रप्रकीर्त्तितं गुणानांतारतम्येनसमंब्रह्मेतिहिश्रुतिः तल्लिखित्वातुयोदद्यात्पौष्यांविद्वान्विमत्सरः गुडधेनुयुतंहेमवस्त्रमाल्यविभूषणैः वाचकंपुस्तकंचापिपूजयित्वाविधानतः गंधाद्यैर्भक्ष्यभोज्यैश्चकृत्वानीराजनादिकं योवैजितेंद्रियोभूत्वासोपवासःसमाहितः अथवैकहविष्याशीकीर्त्तयेच्छृणुयादपि समुक्तःपातकैर्घोरैः प्रयातिब्रह्मणः पदम् ॥ अथपौष्यांपुष्यनक्षत्रस्थेचंद्रेतृतीयायांवापुष्यस्नानविधानमुक्तंकालिकापुराणे और्वउवाच शृणुराजन्प्रवक्ष्यामिपुष्यस्नानविधाक्रमम् येनविज्ञानमात्रेणविघ्नानश्यंतिसंततं पौषेपुष्यर्क्षगेचंद्रेपुष्यस्नानंनृपश्चरेत् सौभाग्यकल्याणकरंदुर्भिक्षमरकापहं विष्ट्यादिदुष्टकरणेव्यतीपातेचवैधृते वज्रशूलेहर्षणादौयोगेतुयदिलभ्यते तृतीयापुष्ययुक्तार्क्षेरविशौरिकुजाहनि तदासमस्तदोषाणांस्नानंहरणकंपरं ग्रहदोषाश्चजायंतेयदिराज्येषुचेतयः तदापुष्यर्क्षमात्रेतुकुर्यान्मासांतरेपिच इयंतुब्रह्मणाशांतिरुद्दिष्टागुरवेपुरा शक्रार्थंसर्वदेवानांशांत्यर्थंचजगत्पते तुष केशास्थिबल्मीककीटदोषादिवर्जिते सुस्थानेचंपकाशोकबकुलादिविभूषिते हंसकारंडवाकीर्णेसरस्तीरेथवाशुचौ पुण्यस्नानायनृपतिर्गृह्णीयात्स्थानमुत्तमं ततः पुरोहितोराजा नानावादित्रनिःस्वनै प्रदोषसमयेगच्छेत्तत्स्थानंपूर्ववासरे तस्यस्थानस्यकौवेर्य्यां दिशिस्थित्वापुरोहितः स्रग्गंधचंदनैः पानैः कर्पूराद्यधिवासितैः गोरोचनादिसिद्धार्थैरक्षतैश्चफलादिभिः गत्वावेदादिभिर्मंत्रैः सर्वसाध्याधिवासितैः अधिवास्यतुतत्स्थानं पूजयेत्तत्रदेवताः

अ०र०
पौष०
१४

गणेशंकेशवंशक्रंब्रह्माणंचापिशंकरं उमयासहितंदेवं सर्वांश्चगणदेवताः मातॄश्चपूजयेत्तत्रनृपतिः सपुरोहितः मंगलान्कलशान्कृत्वानानानैवेद्यसंचयं प्रदद्यात्पायसंस्वादुफलंमोदकयावकौ अधिवास्यतुतत्स्थानंदूर्वासिद्धार्थकाक्षतैः तस्मात्स्थानात्तुभूतानिसारयेन्मंत्रमीरयन् अपसर्पंतुतेभूताःयेभूताः स्थानपालकाःभूतानामविरोधनपूजाकर्मकरोम्यहं ततःकरौपुटीकृत्य मंत्रेणानेनपार्थिवः आवाहयदिमान्देवान्पूज्यात्पुष्पांजलीकरः आगच्छतुसुराःसर्वेयेत्रपूजाभिलाषिणः दिशोहियानगाःसर्वेयेचान्येप्यंशभागिनः ततःपुष्पांजलिंकृत्वापुनर्मंत्रंपठेदिदं अद्यतिष्ठंतुविबुधाःस्थानमासाद्यमामकं स्वपूजांप्राप्ययातारोदत्त्वाशांतिमहीभुजे ततस्तांनृपतिराविनयेत्तुसपुरोहितः कृत्वापूजांतुदेवानांरात्रौतत्रनृप स्वपेत् शुभाशुभंफलंविप्रैर्ज्ञेयंदैवज्ञसंमतैः दुःस्वप्नदर्शनंचेत्स्यात्तदापुष्पाभिषेचने होमंचतुर्गुणंकुर्य्याद्दद्याद्वापिगवांशतं गोवाजिकुंजराणांतुप्रासादस्यगिरेस्तरोः आरोहणंशुभकरंराज्यश्रीवृद्धिदायकं दधिदेवसुवर्णानांभुजंगस्यचदर्शनं वीणादूर्वाक्षतफलपुष्पछत्रविलेपनं शीतांशुछत्रशंखानांपद्मस्यसुहृदांतथा लाभःक्षयकरःशत्रोरलंकारस्यभूभृतः दर्शनंचोपरागस्यनिगडेनचवंधनं मांसस्यभोजनंचैवपर्वतस्यबिवर्तनं नाभिमध्येतरूत्पत्तिर्मृतंप्रत्यंतरोदनम् अगम्यागमनं कूपपंकगर्त्तावतीर्य्यता पर्वतस्यतथानद्याःप्रोत्तारःशत्रुकर्त्तनं स्वपुत्रमारणंचैवपानंरुधिरमद्ययोः भोजनं पायसस्यापिमनुष्यारोहणंतथा कल्याणसुखभोग्यायराज्ञःशत्रुक्षयस्तथा एतेस्वप्नाश्चकुर्वंतिनृपस्यनृपसत्तम खरोष्ट्रमहिषाणांतुआरोहोराज्यनाशकः नृत्यंगीतंतथाहास्यंपाठश्चाप्यशुभप्रदः रक्तवस्त्रपरीधानंरक्तमाल्यांगसंजनं रक्तांकृष्णांस्त्रियंचैवकामयन्मृत्युमाप्नुयात् कूपांतरेप्रवेशःस्याद्दक्षिणाशागतिस्तथा पंकेनिमज्जनंस्नानंभार्य्यापुत्रविनाशनं नाभौयस्यतरूत्पत्तिर्भवेत्स्वप्नेनृपस्यतु आदायगर्भनाडींतुशकुनोयातिखंद्रुतंसतुरा

31

ज्यांतरंप्राप्यमहाकल्याणमाप्नुयात् दीर्घंविंशतिहस्तंतुहस्तषोडशसम्मितं कुर्यात्तुलक्षणोपेतंयज्ञमंडपमुत्तमं ततोपरेन्हिपूर्वाह्निमातृणांपूजनंचरेत् कुडयलग्नांवसोर्धारांवृद्धिश्राद्धंतथैवच चंदनागुरुकस्तूरीधूपकर्पूरचूर्णकैः संमृज्यमंडलस्थानंतस्मिन्होमंसमाचरेत् अस्त्रायहुंफडित्येवंलिखेन्मंत्रद्वयंवुधः मंत्रविन्मंडलंयज्ञ सूत्रैः कंबलसंभवैः कौशेयैर्वास्वस्तिकाख्यंप्रथमंमंडलंलिखेत् चतुर्हस्तप्रमाणंतुमंडलंविलिखेत्ततः हस्तप्रमाणंपद्मंतुमंडलस्यप्रकीर्त्तितं द्वाराणिसार्द्धहस्तानिकर्णिकाकेसरोज्वलं सितंरक्तंचपीतंचकृष्णंहारितमेवच शालिचूर्णैश्चकौसुम्भैर्हारिद्रैर्हरिदुद्भवैः कुर्यात्तथांजनैश्चूर्णैरजोमंडलवृद्धये पश्चात्तुतत्समारभ्यतांश्चपश्चिमगामिनीं पश्चिमद्वारमारभ्यशतहस्तांविनिर्दिशेत् प्रत्येकंवारमध्येतुपद्मंचैवाष्टपत्रकं कुर्य्यान्मंडलभागज्ञश्चूर्णैरेवपृथक्पृथक् चूर्णैस्तुमंडलंकृत्वासूत्रानुत्सारयेत्ततः भवनायनमइतिततोहस्तौवियोजयेत् सव्यावलंबहस्तंतु रजः पातंसमाचरेत् मध्यमानामिकांगुष्ठैरुपरिष्टाद्यथेच्छया अधोमुखांगुलिंकृत्वापातयेच्चविचक्षणः समरेखातुकर्त्तव्याः विच्छिन्नाः पुंजवर्जिताः संसक्तं विषमंस्थूलंविषमाकृष्टमावृतं पर्यंतसार्पितंह्रस्वमालिखेन्नकदाचन संसक्तेकलहंविंद्यादूर्द्धरेखोरुविग्रहं अतिस्थूलेभवेद्व्याधिर्नित्यंपीडाविमिश्रिते विंदुभिर्भयमाप्नोतिशत्रुपक्षान्नसंशयः कृशायांचार्थहानिःस्याच्छिन्नायांमरणं भवेत् वियोगोवाभवेत्तस्यइष्टद्रव्यसुतस्यवा अविदित्वालिखेद्यस्तुमंडलंतुयथेच्छया सर्वदोषानवाप्नोतियेदोषाःपूर्वभाषिताः सितसर्षपदूर्वाद्यारेखाकार्य्याप्रमाणतः विमलंविजयंभद्रंविशालंशुभदंशिवं वर्द्धमानंचदेवंचशताक्षंकामदायकं रुचकंस्वस्तिकाख्यंचद्वादशैतेतुमंडलाः यथास्थानंयथायज्ञंयोजनीयाविचक्षणैः सागरेमथ्यमानेतुपीयूषार्थंसुरासुरैः पीयूषधारणार्थायनिर्मिताविश्वकर्मणा कलाकलास्तुदेवानामार्पित्वातेपृथक्पृथक् यतः कृतास्तेकलशास्ततस्तेपरिकीर्त्तिताःनचैवकलशाःप्रोक्तानामतस्तान्निबोधतगाह्योपगाह्योमरुतोमयूखश्चतथापरः

मनोहाबलभद्रश्चविजयस्तनुमोषकइंद्रियघ्नोथविजयोनवमः परिकीर्त्तितःतेषामेवक्रमाद्रूपनवनामानियानितुशृणुतान्यपराण्येवशांतिदानिसदैवहिक्षितींद्रःप्रथमःप्रोक्तोद्वितीयोजलसंभवःपावनाग्नीततोद्वौतुयजमानस्ततःपरं कोषसंभवनामातुषष्ठःसपरिकीर्त्तितः सोमस्तुसप्तमःप्रोक्त आदित्यश्चाष्टमःस्मृतः विजयोनामकलशोयोसौनवमउच्यते सतुपंचमुखप्रोक्तोमहादेवस्वरूपधृक् घटस्यपंचवक्त्रेषुपंचवक्त्रःस्वयंतथा यथाकाष्ठास्थितःसम्यग्वामदेवादिनामतः मंडलस्यतुपद्मांतःपंचवक्त्रंघटंन्यसेत् क्षितींद्रंपूर्वतोन्यस्यपश्चिमेजलसंभवं वायव्येवायवंन्यस्यऐशान्यांकोपसंवभं सौम्यमुत्तरतोयोज्यंसौरंदक्षिणतोन्यसेत् न्यस्यैवंकलशांश्चैवतेषुचैतान्विचिंतयेत् कलशानांमुखेब्रह्माग्रीवायांशंकरःस्थितःमूलेतुसंस्थितोविष्णुर्मध्येमातृगणाःस्थिताः दिक्पालदेवताःसर्वावेष्टयंतिदिशोदशकुक्षौतुसागराःसप्तसप्तद्वीपाश्चसंस्थिताः गंगाद्याःसरितासर्वावेदाश्चत्वारएवच कलशेषुस्थिताःसर्वास्तेषुतानिविचिंतयेत् रत्नानिसर्ववीजानिपुष्पाणिचफलानिच वज्रमौक्तिकवैडूर्य्यमहापद्मेंद्रस्फाटिकैः सर्वधाममयंबिल्वंनागरोडुंबरंतथा बीजपूरकजंवीरआम्राम्रातकदाडिमान् वचांशालिंचनीवारंगोधूमंसितसर्षपं कुंकुमागुरुकर्पूरमदनंलोचनंतथा चंदनंचतथामांसींबालांकुष्ठंतथैवच कर्पूरपत्रचंडश्चजलानिर्यासकांबुदं शैलेयंवदरंजातीपत्रपुष्पेतथैवच पलाशानांतथायूकांदेवींपणकमेवच वचाधात्रीसमंजिष्ठांतुरुष्कंमंगलाष्टकं दूर्वांमोहनिकांभद्रांशतमूलींशतावरीं पर्णानांपूरणांक्षुद्रांसहदेवींगजांक्षमां पूर्णकोषांसितांपाठांगुंजाशिरासिकाननौठ्यामकंगजदंतंतु शतपुष्पांपुनर्नवां ब्राह्मींदेवींशिवांरुद्रांसर्वसंध्यानिकांस्तथा समाहृत्यशुभानेतान्कलशेषुनिधापयेत् कलशस्ययथादेशं विधिंशंभुंगदाधरं यथाक्रमंपूजयित्वा शंभुंमुख्यंतथायजेत् प्रासादेनतुमंत्रेणशंभुंमंत्रेणशंकरं प्रथमंपूजयेन्मध्येनानानैवेद्यचंदनैः दिक्पालानांघटेष्वेवदिक्पालानपिपूजयेत् पूर्वंबहिःस्थापितेषुग्रहाणां

कलशेषुच नवग्रहान्पूजयेत्तुमातृर्मातृघटेषुच सर्वेदेवाघटेपूज्या घटास्तेषांपृथक्पृथक् नवैवतत्रपूर्वोक्त स्मृतामुख्यतमानृप भक्ष्यैर्भोज्यैश्चपेयैश्च पुष्पैर्नानाविधैफलैः यावकैःपायसैर्वापि यथासंभवयोजितैः पुष्पस्नानाद्यनृपतिः पूजयेत्कलशान्सुरान् दक्षिणेमंडलस्यास्य कुंडंनिर्मायपायसैः समिद्भिःशालिसिद्धार्थैं घृतैर्दूर्वाक्षतैस्तथा केवलैश्चतथैवाज्यैपूजितान्कलशान्सुरान् होमयेतोषयेद्वृद्ध्यै नृपस्यर्त्विक्पुरोहितः होमांतेमंडलोदीच्यां देविकायांसपट्टिकं लोचनाख्यमलंकारां स्तथासर्वान्नियोजयेत् वृध्याद्यंगुलमंगुल्याषड्विंशदंगुलावधि वृत्तंवाचतुरस्रंवापद्मकंत्रिकसंज्ञितं रत्नेशान्पद्ममध्येतुगोस्वास्तिकाविनायकैः श्री श्रीवृक्षवरारोह स्वामिदेवीशुभान्विता रत्नैःसर्वैरलंकारैः पट्टंकार्य्यंद्विहस्तकं हस्तविस्तारउच्छ्रायंनवहस्तदशांगुलं स्नानाख्यंसार्द्धहस्तंतुपट्टवृत्तार्गलान्वितं शय्यांचतुर्गुणांदीर्घां धनुर्माणंचपीठकं गज सिंहकृताटोपं हेमरत्नाविभूषितं सिंहाख्यंसार्द्धविस्तारं कुंडासनमथापिवा व्याघ्रंचित्रकपट्टैर्वाउपधान: निकारयेत् अन्वैवंनिर्मितैस्तैश्चतूलकैश्चविनिर्मितान् शय्यादैर्घ्यार्द्धविस्तीर्णाचतुर्हस्तासुलक्षणा वितस्त्य धिकमिच्छांतिनृपस्यगुरुविद्यया अर्धचंद्रंसमंकुर्यात्यानंवाचतुरस्त्रकं उपधानानिशय्यायाःकर्णादिमूलभेदतः षोडशैवात्रकार्य्याणिकर्णचित्रयुतानिच यानंसिंहासनं पट्टंशय्योपकरणादिकं राज्ञोनूतनयोग्यंतद्वेधामुत्तरतो न्यसेत् तेषांतुपश्चिमेस्वर्णरत्नौघखचितेनवै पर्य्यंकेयज्ञदार्वाच निर्मितंमहदास्तरं ऊर्ध्वाच्छादनसंयुक्ते चर्मा. वृतचतुष्टयं वृषभस्यतथोर्णायाः सिंहशार्दूलयोरपि पादपीठेरत्नयुते पादचारोथपार्थिवः तस्मिन्पर्य्यंकपृष्ठ

स्थेचर्मखंडचतुष्टये नानापर्य्यंकपीठस्थे चर्मखंडचतुष्टये नानालंकारभूषाढ्यंनृपतिंरत्नमालिनं स्नापयेद्ब्राह्मणैःसार्द्धंराजानंमुखसंगत संवीतंकंबलंकृष्णंरत्नवस्त्रादिशोभितं कलशैर्बलिपुष्पाद्यैःसार्षपैश्चूर्णैश्चस्नापयेत् अष्टौषोडशाविंशाष्टशतमष्टाधिकंचवा कलशानांसमाख्याताअधिकस्योत्तरोत्तरं जयकल्याणदैर्मंत्रै मंगलोत्थैश्च शांभवैः वैष्णवैरथदिक्पालै ग्रहमंत्रैश्चतांत्रिकैः आज्यंतेजःसमुद्दिष्ट माज्यंपापहरंपरं आज्यंसुराणामाहारआज्येलोकाःप्रतिष्ठिताः भौमांतरिक्षंदिव्यंवा यत्तकल्मषमागतं सर्वंतदाज्यसंस्पर्शात्प्रणाशमुपगच्छतु ततोपनीयगात्रात्तुकेवलवस्त्रमेवच कलशैःस्नापयेद्धूपपुष्पस्नानांबुपूरितैः एभिर्मंत्रैर्नरश्रेष्ठतत्त्वतत्त्वार्थसाधकैः सुरास्तामभिषिंचंतुयेचासिद्धाः पुरातनाः ब्रह्माविष्णुश्चरुद्रश्चसाध्याश्चमरुतांगणाः आदित्यावसवोरुद्राआश्विनेयौभिषग्वरौ अदितिर्देवमाताचस्वाहालक्ष्मीःसरस्वती कीर्त्तिर्लक्ष्मीर्धृतिःश्रीश्चसिनीवालीकुहूस्तथा दितिश्चसुरमाचैववनिताकद्रुरेवच ऋक्षाणिचमुहूर्त्तानि पक्षाहोरात्रसधयः देवपत्न्यश्चयाःप्रोक्तादेवमातरएवच सर्वास्त्वामभिषिंचंतु शुभाश्चाप्सरसांगणाःसंवत्सरानिमेषाश्च कालस्यावयवास्तथा वैमानिकाःसुरगणामनवः सागरैःसह सरितश्चमहानागाःनागाःकिंपुरुषास्तथा वैखानसामहाभागाद्विजावैहायनाश्चये सप्तर्षयःसदाराश्चध्रुवस्थानानिवैसदा मरीचिरत्रिःपुलहःपुलस्त्यःक्रतुरंगिराः भृगुःसनत्कुमारश्चजैगीषव्योभिनंदनः एकतश्चाद्वितश्चैवात्रितोजाबालिकाश्यपौ दुर्वासादुर्विनीतश्चकल्यःकात्यायनस्तथा मार्कंडेयोदीर्घतपाःशुनःशेफो विदूरथः और्वःसंवर्त्तकश्चैवच्यवनोत्रिःपराशरः द्वैपायनोयवक्रीतो देवरातःसहानुजः एतेचान्येचबहवोवेद·

व्रतपरायणाः सशिष्याअभिषिंचंतुसदाराश्चतपोधनाः पर्वतास्तरवोवल्ल्यः पुण्यान्यायतनानिच प्रजापतिः क्षितिश्चैवगावोविश्वस्यमातरः वाहनानिचदिव्यानिसर्वेलोकाश्चराचराः अग्नयःपितरस्ताराजीमूतंखंदिशोदिशः तोयैस्त्वामभिषिंचंतुसर्वोत्पातानिवर्हणैःइत्येवंशुभदैरेतैर्मंत्रैर्दैवंतथापरैः आपोहिष्ठाहिरण्येतिशंभवेतिसुरेतिच मानस्तोकेतिमंत्रेणलामुद्वारेत्यनेनच सर्वमंगलमांगल्येश्रीश्चतेग्रहयोगिभिः इत्येवंस्नानमावर्त्य कंबलैःसर्वमंगलमंत्रेणवस्त्रंकार्पासिकंध्रियात् आचम्यचततोदेवान्गुरून्विप्रांश्चपूजयेत् ध्वजंछत्रंचामरंचघंटाश्चाश्वान्गजांस्तथा मंत्रजप्तान्धारयेत्तुततोगच्छेद्धुताशनं तत्रगत्वावह्निमध्ये वह्निंतंवीक्ष्यपार्थिवः स्वनिमित्तानिवह्नेश्च लक्षयेत्तत्रवेदिभिः दैवज्ञकंचुकामात्यवंदिपौरजनैर्वृतः वादित्रघोषैस्तुमुलैस्तथातौर्य्यत्रिकैःशुभैः कृत्वाशेषंपुनःशांतिमाशीर्वाच्यचवैद्विजान् पूर्णांविधायविधिवद्दक्षिणांकनकैर्युतः धान्यानिचोपवासांसिहत्वाकृत्वाविसर्जनंततःशेषजलैःसर्वानमात्यादीन्पुरोहितः सेचयेच्चतुरंगंच अंगंचापिसराष्ट्रकं एवंकृत्वानृपःपश्चात्त्रिरात्रंसंयतोभवेत् मांसमैथुनहीनश्चकुर्य्यान्मंगलसेवनं पुष्यनक्षत्रयुक्तातुतृतीयायदिलभ्यते तस्यांपूज्यासदादेवीचंडिकाशंकरेणहि पांचालिकाविवाहाद्यैः शिशूनांकौतुकैस्तथा वैवाहिकेनविधिनामोदयेच्चंडिकांशिवां चतुष्पथेषुसर्वेषुदेवदेवगृहेषुच पताकाभिरलंकारंकुर्य्याद्देवीगृहेतथा एवंकृत्वामहाशांतिं यागंपुष्पाभिषेचनं चतुर्वर्गैःसमंराजाभार्य्याभिस्तनयैःसह राज्यमंडलसंयुक्तः परत्रेहनसीदति नातःपरतराशांतिर्नातःपरतरःस्तवः नातःपरतरोयज्ञो नातःपरतरंशिवं अनेनैवविधानेन नृपतेरभिषेचनं युवराज्याभिषेकंचकुर्य्याद्राजपुरोहितः नृपाभिषे

ककरणमादौयदिसमाचरेत् अनेनैवविधानेनास्थिरंस्यात्सुनृपस्तदा स्वयंयज्ञः समुदिष्टःशक्रार्थंब्राह्मणपुरा
एवंयज्ञंनृपोयष्ट्वापरत्रेहनसीदति ॥ इतिकालिकापुराणेऔर्वसगरसंवादेपुष्यस्नानाविधिः ॥ मकरसं
क्रांतौकूर्मपुराणदानं नारदीये योदद्यादयनेकौर्म्यंहैमकूर्मसमान्वितं गोप्रदानसहस्त्रस्यसफलं
प्राप्नुयान्नरः ॥ इतिकूर्मपुराणदानम् ॥ स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्या-
ग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेः
पादांबुजार्चारतोजीयात्पुत्रकलत्रमित्रसहितःसंपालयन्क्ष्मांचिरम् १
रणवीरसिंहभूपेनकारितेकृत्यसागरे अभूत्सहस्यकृ
त्यानांरम्योरत्नसमुच्चयः ॥ २ ॥

॥ संपूर्णंसमाप्तम् ॥

॥ शुभंभूयात् ॥

॥ तत्सद्ब्रह्म ॥

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिब्बामल्लाधिकारेपौषमासोमुद्रितस्समाप्तिमगमत्
संवत् १९४१ फाल्गुन प्र. १७

माघमासप्रारम्भः

2

1—9
1—57
1—64
1—112
1—125

ीतादः
णे ति
। सर्वान्का
हंदत्त्वारोगैर्वि
पमंददेत् उत्
ंचमल्कंनै

॥ श्रीरघुनाथोजयति ॥

ॐश्रीगणेशायनमः ॥ अथमाघमासकृत्यनिर्णयः ॥ मकरसंक्रमेतु

हेमाद्रिमतेनसंक्रांतिकालात् चत्वारिंशत्घटिकाः पुण्यकालः त्रिंशत्कर्कटकेनाड्योमकरेतुदशाधिका इतिब्रह्मवै वर्त्तवचनात् माधवमतेतुविंशतिः त्रिंशत्कर्कटकेपूर्वामकरेविंशतिःपराः अतीतानागतेपुण्येद्वेतूदग्दक्षिणायने इतिवासिष्ठोक्तेः रात्रौमकरसंक्रमेतुपरदिनेसूर्योदयोत्तरंपूर्वमहर्दलंपुण्यं त्रिंशत्कर्कटकेनाड्योमकरेतुदशाधिका इतिचत्वारिंशत्घटिकापुण्यकालत्वात् भविष्योत्तरेपि कार्मुकंतुपरित्यज्यझषंसंक्रमतेरविः प्रदोषेचार्द्धरात्रेवास्नानंदानंपरेहनीति वृद्धगार्ग्योपि यदास्तमनवेलायांमकरंयातिभास्करः प्रदोषेवार्द्धरात्रेवास्नानंदानंपरेहनीत्युक्तेपि पूर्वार्द्धएवपरेहनीति रात्रौस्नानंनकुर्वीतविनावैराहुदर्शनादितिवचनसामर्थ्याच्च दिवासंक्रमेतु तद्दिनएव आसन्नसंक्रमंपुण्यंदिनार्द्धंस्नानदानयोरितियज्ञपार्श्वदेवलवचनादितिदिक् अत्रकृत्यंशिवरहस्ये तस्यांकृष्णतिलैःस्नानंकार्य्यंचोद्वर्त्तनंतिलैः तिलाश्चे [illegible] न्निविप्रेभ्यःसर्वदैवोत्तरायणे तिलतैलेनदीपाश्चदेयाः शिवगृहेशुभाः मकरेदानविशेषोहेमाद्रौ धेनुंति [illegible] न्प्रदद्याच्चोत्तरायणे सर्वान्कामानवाप्नोतिविंदतेपरमंसुखमिति विष्णुधर्मोत्तरे उत्तरेत्वयनेविप्रव [illegible] कलं तिलपूर्णमनड्वाहंदत्त्वारोगैर्विमुच्यते इतिकल्पतरौ कालिकापुराणे होमंतिलैःप्रकुर्वीतसर्वदैवे [illegible] देवायविप्रायहाटकेनसमंददेत् उत्तरायणमासाद्यनरःकस्मात्सशोचतीति अत्रमूलकभक्षणनिषेधउ [illegible] स्वेस्कांदे पितृणांदेवतानांचमूलकंनैवदापयेत् ददन्नरकमाप्नोतिभुंजं।तत्राह्मणोयदि ब्राह्मणोमूलव [illegible] चांद्रायणंव्रतं अन्यथानरकंयातिक्षत्रोविट्शूद्र एवच वरंभुक्तमभक्ष्यंतुपिवे

कवि यो त्वंरवे मृतःस्वर्गे त्वा संयुता ामहे व।यश

द्वार्गर्हितंचयत् वर्जनीयंप्रस्तुकोपस्थापकंमदिरासमामिति माघस्नानमुपक्रम्य देवीपुराणे मकरस्थेरवौमाघेनस्नात्यनुदिनेरवौ कथंपशेवंवीक्ष्यदेवैःकथंवात्रिदिवंव्रजेत् मकरस्थेरवौमाघेगोविंदाच्युतमाधव स्नानेदानेहृषीकेशयथोक्तफलदोभव गन्निदं शिवानर्च्यस्नायान्मौनसमन्वितः वासुदेवंहरिंकृष्णंमाधवंव्याहरन्पुनः तिलदानंमहाभारतेपि माघेमासंप्रकुर्वंत्यातुब्राह्मणेभ्यःप्रयच्छति सर्वसत्वसमाकीर्णंनरकंनसपश्यति विष्णुधर्मोत्तरे तिलप्रदानान्माघेतुरागदा शल्काच्छति वामनपुराणे माघेमासितिलादेयास्तिलधेनुश्चमानद इध्मेंधनादयश्चान्येमाधवप्रीणनायतु ये, हुंकालेमोपयोगीदारुइंधनमग्निदीपनोचितं संवर्त्तः इंधनानिचयोमाघेविप्रेभ्यः संप्रयच्छति ससुखीदीप्तकायाग्निः सुभगश्चैवजायते शिशिरोपक्रमेदानाद्यारंभस्तस्यमासद्वयव्यापित्वात् विष्णुधर्मोत्तरे वहिःस्नानंनरः कृत्वा सूर्य्यस्योदयनंप्रति शिशिरेसततंवन्हिंतर्पयित्वातथातिलैः कुल्माषंसघृतंदत्त्वायथाशक्तिद्विजातये कायाग्निदीप्तिप्राकाश्यंशत्रुनाशंचविंदति शिशिरर्तूपक्रमादिनेउदितमात्रसूर्येउदितमात्रेग्रामाद्वहिर्जलाशयेस्नात्वा अग्नौप्रजापतयेस्वाहेतितिलान्हुत्वा शूद्रोब्राह्मणद्वाराहोमंकारयित्वा सतंडुलान्घृतसहितान्स्विन्नान्माषान्दद्यात् भविष्यपुराणे शीतकालेंधनंदद्यान्नराणांशीतनाशनं भानोरायतनेदेविसोश्वमेधफलंलभेत् नरसिंहपुराणे शीतकालेसदावन्हिंप्रज्वालयतियोनरः सर्वसत्त्वहितार्थायस्वर्गेसोप्सरसंलभेत् एतज्ज्वालनमात्रे विष्णुधर्मोत्तरे शिशिरेसकलंकालंग्रासंपरगवेतथा दत्त्वास्वर्गमवाप्नोतिसंवत्सरशतानि च यमः प्रातःस्नायीतुद्वौमासौमानवोमाघफाल्गुणौ देवान्पितॄन्समभ्यर्च्यसर्वपापैःप्रमुच्यते विष्णुरपि प्रातःस्नायीभवेन्नित्यंद्वौमासौमाघफाल्गुणौ यदीच्छेद्विपुलान्भोगान्चंद्रसूर्यग्रहोपमान् यमवाक्यानुसारेणदेवपितृतर्पणसहितंस्नानं कृतसंकल्पेनाशौचेपिकार्य्यं विष्णुवाक्यंतु अशौचेस्नानमात्रपरं अत्रप्रयागम

5

हिमा मत्स्यपुराणे षष्टितीर्थसहस्राणिषष्टितीर्थशतानिच माघेमासिगमिष्यंतिगंगायमुनसंगमे गवांश
तसहस्रस्यसम्यग्दत्तस्ययत्फलं तत्फलंमाघमासेतुत्र्यहं स्नानस्यतद्भवेत् सितासितेतुयत्स्नानंमाघेमासि
युधिष्ठिर नतेषांपुनरावृत्तिःकल्पकोटिशतैरपि माघेमास्युषसिस्नानंकृत्वादांपत्यमर्चयेत् भोजयित्वायथा
शक्तिवस्त्रमाल्यविभूषणैः सूर्यलोकेवसेत्कल्पंसूर्यतुल्यवपुःपुमान् अथव्रतानि माघेमासितुसंप्राप्तेयःकुर्या
न्नक्तभोजनं पिण्याकंसघृतंमिष्टंभुंजानःसंयतेंद्रियः उपवासंचसप्तम्यांपक्षयोरुभयोरपि घृताभिषेकंसप्त
म्यांकुर्य्याद्भानोर्नराधिप गांचदत्वादिनेशायतरुणींनीलसन्निभां गत्वादित्यपुरंरम्यंभोगान्भुंक्तेयथेप्सितान्
अत्रनक्तभोजनं मासठ्यापिपिण्याकंतिलकल्कः नीलसन्निभामिंद्रनीलश्यामां तथाच माघेमासेचसंप्राप्तेयः
कुर्य्यान्नक्तभोजनम् कृशरंघृतसंयुक्तंभुंजानःसंयतेंद्रियः उपवासपरोष्टम्यांपक्षयोरुभयोरपि पूजयेत्र्यंबकं
भक्त्याकृत्वागोधूमचूर्णतः दुर्गामष्टभुजांवीरत्र्यंबकामितिनामतः गंधपुष्पोपहारैस्तुपूर्वोक्तैरनुपूजयेत् धूपं
कृष्णागुरुंदद्यान्मासंदद्याच्चमाहिषं वा न्यसिद्धार्थकाःस्नानेप्राशनेचयवाःस्मृताः यएवंमाघमासेतुपूजयेत्र्यंब
कांनृप दिव्यंविमानमारूढः स उर ाकेमहीयते माघकृष्णप्रतिपदायां तिथिपत्वेनवह्निपूजनं प्रतिपद्य
ग्निपूजास्यादितिसामान्यनिर्णये त्वंरवे घकृत्यनामारंभोपिविधेयइति माघकृष्णद्वितीयायांतुविशेषकृत्याभावा
त्तिथिपत्वेन विधिपूजनम् भूतःस्वर्गे द्वितीयायांविधिवद्विधिपूजनं कृत्वानक्तंसमश्नीयाल्लभतेभूतिमुत्तमा।मिति
ब्रह्मपूजनंचात्रगायत्र्यापौ त्वा गसंयुता ध्य माघकृष्णतृतीयायांसौभाग्यसुंदरीव्रतांगत्वेन श्रीनाम्नागौरीपूज
नव्रतं लवंगप्राशनंमौक्तिव ग्रमह सामिति माघकृष्णचतुर्थ्यांसंकष्टनाशनव्रतं नारदीये माघकृष्णचतुर्थ्यांतु
संकष्टव्रतमुच्यते तत्रोपवास्व।यश्च्यप्रातर्नियमपूर्वकं चंद्रोदयमभिव्याप्यातिष्ठेत्प्रयतमानसः ततश्चंद्रोदयेप्रा

प्तेमृण्मयंगणनायकं कि [illegible] ापयेत्पीठसायुधंचसवाहनं उपचारैःषोडशभिःसमभ्यर्च्चयविधानतः मोदकं चापिनैवेद्यंसगुडंतिलकंदु [illegible] र्तिताम्रजेपात्रेरक्तचंदनमिश्रितं सकुशंचसदूर्वंचपुष्पाक्षतसमन्वितं सतंडुलंचसदधिकृत्वाचंद्राय [illegible] नार्णवमाणिक्यचंद्रदाक्षायणीपते गृहाणार्घ्यंमयादत्तंगणेशप्रतिरूपक एवंदत्त्वागणेशायदत्त्वार्घ्यं [illegible] शक्त्यासंभोज्यविप्राग्र्यान्स्वयंभुंजीतवाग्यतः एवंकृत्वाव्रतंसम्यक्संकष्टाख्यंशुभावहं समृद्धोधनधा [illegible] चसंकष्टमाप्नुयात् ॥ * ॥ अथकथा शिवंशांतंनमस्कृत्यउमादेवींसरस्वतींगणाधिपंनमस्कृत्यसर्वदेवजगद्गु [illegible] वैशंपायनउवाच ॥ उद्यतेभारतेयुद्धेकृतशोकोयुधिष्ठिरः उवाचवाक्यं धर्मात्माकृष्णंदेवकिनंदनं ॥ युधिष्ठिरउवाच ॥ किंकरोमिह्यहंयुद्धेयुद्धंभवतिमाधव भीष्मकर्णौमहायोधौकथंममजयोभवेत् ॥ श्रीकृष्णउवाच ॥ विनायकोमहानीशोगणेशःशिवनंदनः तस्यपूजाविधिंकृत्वा जयोभवतिनिश्चितं ॥ युधिष्ठिरउवाच ॥ शिवःशंभुर्महायोगीउमादेवीपतिव्रता कथंतयोःपुत्रजन्मसंशयोमेजनार्दन ॥ श्रीकृष्णउवाच ॥ साधुपार्थमहावाहोयत्त्वयापरिशंकितं तत्कथांकथयिष्यामिलोकानां हितकारिणीं प्रातःस्नानादिकंकुर्य्याद्गंगातीरेदिनेदिने स्वयंगच्छतिगौरीशःस्नातुंगौर्य्यपिचैकदा उत्थायोद्वर्त्तनंचक्रेस्वतनौमलशुद्धये शारीरमलपिंडंतुसागृहीत्वाकरांवुजे नराकारमसौचक्रेदिव्यरूपमनुत्तमं सउत्थायाब्रवीद्देवींवद्धांजलिपुटस्तदा किंकरोमिक्वगच्छामिमातराज्ञांप्रदेहिमे तदाकर्ण्यवचस्तस्यप्रहस्यभरतर्षभ तमुवाचतदादेवीप्रातिहारंप्रकल्प्यच ॥ पार्वत्युवाच ॥ शृणुवाक्यंपुत्रममयथाज्ञांप्रकरोमिते तैलाभ्यंगमलोद्भूतपुत्रोसिममदेहजः पुरुषोनैवमेकश्चिदागच्छेत्सदनंमम अथस्नात्वाजगामाथमहादेवोगृहंनिजं भुजंगमुंडमालीसः सेवितोगणकिंकरैः मत्पितेतिनजानातिसनरोवालभावतः तिरस्कृत्यसगौरीशमातुराज्ञाव-

लेनतं श्रुत्वावाक्यंतदातस्यचुकोपातिगिरीश्वरः शूलेनतच्छिरच्छित्वाजगामागिरिजांतिके शिरोगतंशंभुलोकेक
वंधोभुविदृश्यत गृहागतंशिवंवीक्ष्यदेवीवचनमब्रवीत् देव्युवाच द्वास्थेनममपुत्रेणकथंदेवनवारितः तस्यावाक्य
शिवः श्रुत्वा प्रोवाचप्रहसन्निदं शिवउवाच ब्रूहिदेविकथंपुत्रस्त्वयाद्यप्रकटीकृतः मन्निदेशंविनापुत्रइदंविस्मय
कारणं देव्युवाच तैलाभ्यंगंप्रकुर्वंत्यालीलयानिजविग्रहात् मलपिंडसमुद्भूतः पुत्रोदेवमयाकृतः शिवउवाच
तवपुत्रंनजानामितेनाहंवारितोयदा शूलेनतच्छिरश्छिन्नंकालोहिदुरतिक्रमः कालदेवाद्विनश्यंतिसर्वेकालवशानु
गाः कालः सुप्तेपुजागर्त्ति सर्वंकालवशंजगत् ततोहाहाकृतंदेव्यापुत्रदुःखेनदुःखिता विललापभृशंदेवीक्व
गतोममपुत्रकः शिवोगत्वागृहद्वारंह्यप्रसन्नमनास्तदा ददर्शसमहानागंशूलेनाछिद्यतच्छिरः संयोज्यतत्क
वंधेनजीवयामासतंतदा तंचकारगणाध्यक्षंगृहीत्वोवाचपार्वतीं तवपुत्रोह्ययंदेविगणानामधिपोमम देव्युवाच
ममपुत्रःकथंदेव कोवायंनरकुंजरः लम्य मपुत्रस्ययद्रूपं दिव्यमद्भुतदर्शनं शिवउवाच अयंगजाननोदेवितवपुत्रो
मयाकृतःसर्वसिद्धिप्रदातायंनार नाविघ्न शृणुष्वमे द्वादशैवतुनामानिकृतान्यस्यशुभानिच यः पठेत्प्रातरुत्था
यमुच्यतेसर्वपातकैः प्रथमः शीपरि उवा एकदंतोद्वितीयकः तृतीयः कपिलोनाम चतुर्थोगजकर्णिकः लंबोद
रः पंचमश्च षष्ठोविकटः यच त्वंरवेलन्त्रं विघ्ननाशोयमष्टमश्चविनायकःनवमोधूम्रकेतुश्चदशमश्चगणाधिपः एकाद
शोभालचंद्रोद्वादशश्चग मृतःस्वर्गे त्वां तानिनामानि शृणुतेयःपठेन्नरःसर्वसिद्धिर्भवेत्तस्यसंकटंनैवजायते युधिष्ठिरउ
वाच जनार्दनविधिंब्रूहि गसंपुतामृं आदतः कस्मिन्मासेतिथौकस्यांव्रतंपूजांकथंचरे श्रीकृष्णउवाच माघेमासेव्र
तंकुर्यात्सर्वदुःखनिव गमद्द सानामकरेमासेविशेषेणफलंभवेत् कृष्णपक्षेतिथिः पुण्याचतुर्थीसिद्धिदायिनी
स्वर्णमूर्त्तिंगणाध्यक्षंपूजायेत्व। यथाविधि धूपंदीपंचनैवेद्यंमोदकंचैवभोजनं तिलपिष्टंप्रदातव्यंवासांसिविविधद

क्षिणा उपवासंव्रतंकुर्य्यासेमेन [illegible]न्निशाकरे अर्घ्यंचंद्रोदयेदत्त्वाफलंमलंचभक्षयेत् द्वितीयेदिवसेप्राप्तेब्राह्मणंभोजयेत्तदा ब्राह्मणोब्रह्मणी ब्रह्म [illegible] मन्तुष्टेहमेवाहि ब्राह्मणेभोजनंदत्त्वापश्चाद्भुंजीतवैस्वयं एकादशीसहस्रास्यंकन्याकोटिशतद्वयं द्विजोत्तम दे[illegible]स्राणिव्रतेपुण्याधिकंकृते हरिद्वारेप्रयागेचनैमिषेचैवयत्फलम् स्नात्वातीर्थेषुयत्पुण्यंव्रतंकृत्वाफलंप्राहिसर्वकालंतु [illegible]ण्योत्तरे माघकृष्णासंकष्टचतुर्थीव्रतं माघकृष्णपंचम्यांतिथिपत्वेन नागानांपूजेतिपंचमीमासान्दृशरीरांहिव्रतं [illegible] माघकृष्णषष्ठीविशोकषष्ठीभविष्योत्तरे युधिष्ठिरउवाच षष्ठीविधानमधुनाकथयस्वजनार्दन ज्ञात्वा [illegible] दुःखशमनंसर्वकामफलप्रदं श्रुतंमयापूज्यमानोभानुःसर्वंप्रयच्छति दिवाकराराधनंमेतस्मात्कथयकेशव [illegible] कृष्णउवाच विशोकषष्ठीमतुलांवक्ष्यामिमनुजोत्तम यामुपोष्यनरःशोकंनकदाचिदिहस्पृशेत् माघेकृष्णातिलैः स्नातः पंचम्यांकृष्णपक्षतः कृताहारः कृशरयादंतधावनपूर्वकं उपवासव्रतंकृत्वाब्रह्मचारीभवेन्निशि ततःप्रभातेचोत्थायकृतस्नानजपःशुचिः कृत्वातुकांचनंरूपंपद्मेणमतिसुंदरं करवीरेणरक्तेनरक्तवस्त्रयुगेनवा यथानवैशोकभवस्तथैवादित्यसर्वदा तथाविशोकतामेस्याचद्भक्तिर्जन्मजन्मनि एवंसंपूज्यषष्ठ्यांतुशक्त्यासंपूजयेद्द्विजान् ततःसंप्राश्यगोमूत्रमुत्थायकृतनित्यकः संपूज्यविप्रमन्नेनगुडपात्रसमन्वितंसुश्लक्ष्णंवस्त्रयुगलंब्राह्मणायनिवेदयेत् अतैललवणंभुक्त्वासम्यग्मौनेनसंयुतः ततः पुराणश्रवणंकर्तव्यंभूतिमिच्छता अनेनविधिनासर्वपक्षयोरुभयोरपि कुर्य्याद्यावत्पुनर्माघशुक्लपक्षस्यसप्तमी व्रतांतेकलशंदद्यात्सुवर्णकमलान्वितं शय्यांसोपस्करांतद्वत्कपिलांचयशस्विनीं अनेनविधिनायस्तुवित्तशाठ्यविवर्जितःविशोकषष्ठींकुरुतेसयातिपरमांगतिं यावज्जन्मसहस्राणिसाग्रंकोटिशतंभवेत् तावन्नशोकमभ्येतिरोगदौर्गत्यवर्जितः

यंयंप्रार्थयतेकामंतंतंप्राप्नोतिपुष्कलं निष्कामंकुरुतेयस्तुसपरंब्रह्मगच्छति यःपठेच्छृणुयाद्वापिषष्ठींशोकविनाशिनीं सोपींद्रलोकमाप्नोतिनदुःखीजायतेक्वचित् येभास्करंदिनकरंकरवीरपुष्पैः संपूजयंत्यभिनमंतिकृतोपवासाःतेदुःखशोकरहिताःसहिताःसुहृद्भिर्भूमौविहृत्यरविलोकमवाप्नुवंति इतिभविष्योत्तरे माघकृष्णाविशोकषष्ठीव्रतं माघकृष्णसप्तम्यांसर्वाप्तिसप्तमीव्रतं हेमाद्रौभविष्ये कृष्णपक्षेतुमाघस्यसर्वाप्तिसप्तमींशृणु यामुपोष्यसमाप्नोतिसर्वान्कामान्पुमानिह अत्रोपवासःकर्तव्यःसूर्यपूजायथाविधि व्रतांतेअर्कसमिदाज्यादिभिः सूर्यमंत्रेणहोमंकृत्वाभास्करप्रतिमासहितंपीठशय्यादिधेनुसहितं आचार्यायसंपूज्यप्रतिपादयेत् ब्राह्मणान्यथाशक्तिसदक्षिणंसदन्नेनभोजयित्वाशिष्योगृह्णीयादितिसर्वाप्तिसप्तमीव्रतम् माघकृष्णाष्टम्यांमांसेनश्राद्धमुक्तं ब्रह्मपुराणे कृष्णाष्टम्यांतुमाघस्यमांसैःश्राद्धंमहाफलं पितृभिःप्रार्थितंपूर्वं तस्मात्तत्रकारयेत् अत्रवह्निपुराणोक्तं कृष्णाष्टमीव्रतंतत्रगौरीशयोःपूजा प्रतिमासंचतेपूजांयेकरिष्यंतिमानवाः ममचैवाखिलान्कामानाप्नुवंतिनसंशयइति माघकृष्ण[illegible]म्यामन्वष्टकाश्राद्धं तच्चमाघसप्तम्यष्टमीनवमीषुपूर्वेद्युः कार्यमितिषण्णवतिश्राद्धगणेभिधानात् माघ[illegible]ननविधि[illegible]मीउद्योतकल्पादि तत्रश्राद्धादिकल्पादितिथिगणोक्तमक्षयफलदंभवति माघकृष्णैकादशीषट्तिल[illegible]शोपरि [illegible]द्रीये माघस्यकृष्णैकादशींषट्तिलांसमुपोष्यवै स्नात्वादत्त्वातर्पयित्वाहुत्वाभुक्त्वासमर्प्यच [illegible]यच त्वंरवे[illegible]ष्टद्वादश्यांप्रातरेवहि वैकुंठंसम्यगभ्यर्च्यसर्वैरेवोपचारकैः विप्रान्संभोज्यविसृजेद्दत्त्वातेभ्यश्[illegible] मृतःस्वर्गे[illegible]कृत्वाव्रतंविप्रविधिनासुसमाहितः भुक्त्वेहवांछितान्भोगानंतेविष्णुपुरंव्रजेत् अस्याः कथा भा[illegible]संयुता[illegible]युधिष्ठिरउवाच साधुकृष्णजगन्नाथआदिदेवजगत्पते स्वेदजाश्चांडजाश्चैवउद्भिजाश्चजरायुजाः तेषांक[illegible]वैकःपालकः क्षयकृत्तथा माघस्यकृष्णपक्षेतुकावाह्येदशीभवेत् किंनामास्यावि

धिःकोवा चेताद्विस्तरतोवद्[illegible]ष्टोसि कृष्णउवाच शृणुष्वराजशार्दूलकृष्णमाघस्ययाभवेत् षट्तिलानामसाख्याता सर्वपापप्रणाशिनी [illegible]ब्राह्मणी कथांपुण्यां शृणुपापहरांपरां यांपुलस्त्योमुनिश्रेष्ठोदाल्भ्यार्षिमुवाचह दाल्भ्यउवाच मर्त्यलोकमासैर्द्विजोत्तम[illegible]ं कुर्वंतिजंतवः ब्रह्महत्यादिकंस्तेयंयथाजीववधादिकं परद्रव्यापहारं वाऽज्ञानेनमहतावृताः [illegible]रतासाहिसर्वक भगवन्दानेनचव्रतेनच नृणांपापानिनश्यंतियेनतद्वक्तुमर्हसि पुलस्त्य उवाच साधुपृष्टंत्वयाब्रह्मन्नस्याःशरीरा काम्यया यन्नकस्यचिदाख्यातंब्रह्मरुद्रादिदैवतैः तदहंसंप्रवक्ष्यामि सावधानमनाःशृणु देवदे[illegible] एवंज्ञात्वापादौप्रक्षाल्यवारिणा भूमावपतितंगृह्यगोमयंतत्रसुव्रत तिलान्प्रक्षाल्यतस्यात्रापिंडिकांचैवकारयेत् [illegible]वैष्णवंलोकंनात्रकार्याविचारणा तपोमासेचसंप्राप्तेआषाढार्क्षंभवेद्यदि मूलावाकृष्णपक्षस्यचैकादश्यांतथानघ नियमंचप्रगृह्णीयाच्चैकादश्यांविधिंशृणु देवदेवंसमभ्यर्च्यसुस्नातःप्रयतःशुचिःकृष्णनामानिसंकीर्त्यभक्तियुक्तोभवेन्नरः रात्रौजागरणंकुर्य्याद्रात्रौहोमंचकारयेत् अर्चयेद्देवदेवेशंशंखचक्रगदाधरं चंदनागुरुकर्पूरनैवेद्यैःशर्करादिभिः कूष्मांडैर्नारिकेलैश्चह्यथवाबीजपूरकैः एतेषामप्यलाभेतुऋतुमूलफलादिभिःअर्घ्यंदद्याद्विधानेनपूजयित्वाजनार्दनं कृष्णकृष्णकृपालोत्वमगतीनांगतिर्भव संसारार्णवमग्नानांप्रसीदपुरुषोनम जितंतेपुंडरीकाक्षनमस्तेविश्वभावन सुब्रह्मण्यनमस्तेस्तुमहापुरुषपूर्वज गृहाणार्घ्यंमयादत्तंलक्ष्म्यासहजगत्पते ततस्तुपूजयेद्विप्रानुदकुंभांश्चदापयेत् छत्रोपानत्समायुक्तान्कृष्णोमेप्रीयतामिति कृष्णाधेनुःप्रदातव्या यथाशक्तिद्विजन्मने तिलपात्रंद्विजश्रेष्ठदद्यात्कुर्य्यात्प्रदक्षिणां स्नानप्राशनयोस्ताततथाकृष्णतिलानिच तिलाः प्रहारोजायंतेयावत्संख्यातिलाद्विज तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते तिलस्नायीतिलोद्वर्त्तीतिलहोमीतिलोदकी तिलदाताच भोक्ताचषट्तिलाः पापनाशनाः ॥ दाल्भ्यउवाच ॥ एतद्व्रतस्यभगवन्कीदृशंफलमीरितं

सोपाख्यानंममब्रूहियादितुष्टोसिमेनघ ॥ पुलस्त्यउवाच ॥ शृणुब्रह्मन्यथावृत्तमाख्यानंकथयामिते मर्त्यलो
केपुरात्वासीन्नारदीनामब्राह्मणी ब्रह्मचर्यरतानित्यंदेवपूजारतासदा मासोपवासनिरताकृष्णभक्तिपरायणा
तयासंशोषितोदेहउपवासैर्द्विजोत्तम देवानांब्राह्मणानांचकुमारीणांविशेषतः गृहाणिसाप्रयच्छंतीसर्वकालं
महासती अतिकृच्छ्ररतासाहिसर्वकालंतुवैद्विज नदत्ताभिक्षवेभिक्षाब्राह्मणानचतर्पिताः ततःकालेनमहताम
यावैचिंतितंद्विज शुद्धमस्याःशरीरंहिव्रतकृच्छ्रैर्नसंशयः अर्जितोवैष्णवोलोकःकामशोषेनचानया नदत्तम
न्नदानंहियेनतृप्तिपराभवेत् एवंज्ञात्वातदाकृष्णोमर्त्यलोकमुपागतः कपिलंरूपमास्थायतस्याभिक्षामयाचत
अवोचद्ब्राह्मणीसातुसादरंमधुरंवचः कस्मात्त्वमागतोब्रह्मन्वक्तुमर्हसिशोभन पुनरेवचतेनोक्तंदेहिभिक्षांमहा
सति ततःकोपेनमहतामृत्पिंडस्ताम्रभाजने क्षिप्तोवाडवयाब्रह्मन्पुनःस्वर्गगतोहरिः ततःकालेनमहतातापसीसामहाव्रता स्वदेहात्स्वर्गमायाताब्रह्मचर्यप्रभावतः मृत्पिंडिकाप्रदानेनगृहंप्राप्तंमनोरमं संजातंचैवविप्रर्षे
धान्यराशीविवर्जितं गृहंयावद्यमोल्यफ पश्यत्तत्राकिंचन तावद्गृहाद्विनिःक्रांताकश्चित्तत्रागतोद्विजः क्रोधेन
महताविष्टावचनंचेदमब्रवीत् अनेनाविधिनाचकृष्णश्चउपवासैरनेकधा पूजयाराधितोदेवः सर्वलोकस्यभावनः नै-
वात्रदृश्यतेकिंचिद्गृहेममलशोपरि उवाच य क्तंरमेशेनगृहंगच्छपतिव्रते आगमिष्यंतिसुतरांकौतूहलसमान्विताः
देवपत्न्योयत्वांद्रष्टुंवि नायच त्वंश्वेत नृ ट वे द्वारंनोद्घाटनीयंहितासांभद्रेतपस्विनि षट्तिलाव्रतजंपुण्यंयाचनी
यंत्वयानघे एवमुक्त्वा मृतःस्वर्गे त्वा नुषीतदा अथांतरेसमायातादेवपत्न्यस्तपोनिधे ताभिश्चकथितंतत्र
त्वांद्रष्टुंहिसमागताः णसंयुताः यंत्वांनैवपश्यामशोभने ॥ मानुष्युवाच ॥ यदिद्रष्टुंमयाकार्य्यंसत्यंवच्मि
विशेषतः षट्तिलाव्रतयन्नाम द्वारमुद्घाटकारणं एलापितत्रब्रह्मर्षेनददातिमहाव्रतं अन्ययाकथितंतत्रद्रष्ट

व्यामानुषीमया दत्तंप र्कंग्रहे:स्म्यैषट्तिलाव्रतसंभवं ततोद्वारंसमुद्घाट्यतुष्टाताभिश्चमानुषी नदेवीनचगं
धर्वीनासुरीनचपन्नगी यनकृतंभवेत् नारीयादृशीसाद्विजोत्तम रूपकांतिसमायुक्ताक्षणेनप्रत्यपद्यत धनंधान्यं
चवस्त्रादिरूपंलावण्य गेषुपुष्करात्रितये पर्णषट्तिलायाःप्रसादतःअतितृष्णानकर्तव्यावित्तशाठ्यंविवर्जयेत् आत्म
वित्तानुसारेणतिलान्वस्त्रं ष्टामिष्टापूर्त्तंचतैःकृ चैवमारोग्यंनरोजन्मनिजन्मनि दारिद्र्यंनचसंक्लेशंनचदौर्भाग्यमेवच
नभवेद्वैद्विजश्रेष्ठषट्तिल ोहिविपुलंव्रतकर्त्ता अनेनविधिनाविप्रतिलदानान्नसंशयः मुच्यतेसर्वपापेभ्योह्यनायासे
नमानवः दानंचविधिनादत्तंस र्कलोकेषुलो शनं नार्थव्ययोनचायासःशरीरेमुनिसत्तम ईदृशंतुव्रतंराजन्येकुर्वंतिनराः
सदा नतेषांपुनरावृत्तिःकल्पकोटि भूलोका माहात्म्यश्रवणादस्याःसर्वपापक्षयोभवेत् इतिभविष्योत्तरेमाघकृ
ष्णैकादशीषट्तिलाव्रतकथा * माघकृष्ण द्वादश्यांतिलद्वादशीव्रतं नारदीये माघेतुकृष्णद्वादश्यांयमोहिभगवा
न्पुरा तिलानुत्पादयामासतपःकृत्वासुदारुणं तस्यामुपोषितःस्नानंतिलैस्तस्यांयजेद्धरिं भविष्योत्तरे तिलतैलेनदी
पाश्चदेयादेवगृहेष्वपि निवेदयेत्तिलानेवहोतव्याश्चतिलास्तथा तिलान्दत्वाचविप्रेभ्योभक्षयेच्चतिलानपि तत्रैव
युधिष्ठिरउवाच अल्पायासेनभगवन्दानेनानेनमाधव पापंप्रशममायातियेनतद्वक्तुमर्हसि श्रीकृष्णउवाच शृणुपा
र्थपरापुण्यांद्वादशींपापनाशिनीं यामुपोष्यपरंपुण्यमाप्नुयाच्छ्रद्धयान्वितःमाघमासेतुसंप्राप्तेआषाढर्क्षंभवेद्यदि मूलं
वाकृष्णपक्षस्यद्वादश्यांनियमंततः गृह्णीयात्पुण्यफलदंविधानंतस्यमेशृणु देवदेवंसमभ्यर्च्यस्नातःसंप्रयतः
शुचिः कृष्णनाम्नातुसंस्तूयएकादश्यांमहामते उपोषितोद्वितीयेह्निपुनःसंपूज्यकेशवं संस्तूयनाम्नातेनैवकृष्णा
ख्येनसमाहितःदद्यात्तिलांश्चविप्रायकृष्णोमेप्रीयतामिति स्नानप्राशनयोःशस्तास्तथाकृष्णातिलान्नृपविष्णुप्री
णनमत्रोक्तंसमाप्तिव्रतपारणं कृष्णकुंभांस्तिलैःसार्द्धपक्वान्नेनचसंयुतान् छत्रोपानद्युगैर्वस्त्रैःसंवीतैरत्नगर्भिणैः

ब्राह्मणानांप्रदेयास्ते यथावन्मासंसंख्यया तिलप्रहारोजायतेयावत्संख्यास्तिलानृप तावद्वर्षसहस्राणिदातास्वर्गेमहीयते आरोग्यंजायतेनित्यंराजन्जन्मनिजन्मनि नांधोनवधिरश्चैवनकुष्ठीनचकुत्सितः भवत्येतामुपोषित्वातिलाख्यांद्वादशींनरः अनेनविधिनाराजांस्तिलदानान्नसंशयः मुच्यतेपातकैःसर्वैरनायासेनभारतदानविधिस्तथाश्रद्धासर्वपातकनाशनम् नार्थःप्रभूतोनायासःशरीरंनृपसत्तम ॥ सर्वोपभोगनिरतोह्निपरेदशम्याः स्नातःपरेतिलनिवेदनकृत्यशीलः दत्त्वातिलान्द्विजवरायविराजकेतुंसंपूज्यपूज्यपदवींसमुपैतिमर्त्यः ॥ * ॥

॥ इतिभविष्योत्तरेमाघकृष्णातिलद्वादशीव्रतं माघकृष्णत्रयोदश्यांपक्षत्रयोदशीव्रतम् ॥

तत्रनक्तभोजनव्रतं प्रदोषेशिवए[illegible]मिति माघकृष्णचतुर्दश्यामपियमतर्पणं यमोद्देशेनतिलदानं तदुक्तंहेमाद्रौ अनर्काभ्युदितेकृ[illegible]ष्णचतुर्दशीं स्नातःसंतर्प्यचयमंसर्वपापैःप्रमुच्यते यमायधर्मराजा यमृत्यवेचांतकायच वैवस्[illegible]क्ष्यमाल्यर्थसर्वभूतहरायच इतिसप्तनामभिर्यमपूजाहोमादिसहितंपितृभ्यो ब्राह्मणेभ्य अनेनविधि[illegible]शरान्नमपिदत्वास्वयमपिकृशरान्नंभुंजीततदुक्तं * ब्रह्मपुराणे ॥ माघकृष्णचतुर्दश्यांविष्फलशोपरि [illegible] कृशराश्चातिसंजाताः सर्वपापक्षयावहाइति ततोविसृज्यबंधुभ्यः कृशरंभोजयेत्स्वयमि[illegible]नायच त्वंरवे[illegible]रात्रिव्रतमितिकैश्चिदुक्तं तच्चशिवरात्रिव्रतवदितिमूलमत्रान्वेष्टव्यं माघामायामर्द्धोदययो[illegible] मृतःस्वर्गे[illegible]त्नेभारतेउक्तः अमार्कपातश्रवणै युक्ताचेत्पुष्यमाघयोः अर्द्धोदयः सविज्ञेयः कोटिसूर्यग्रहैः[illegible]निर्णयामृतेतु दिवैवयोगःशस्तोयंनतुरात्रौकदाचनेत्यर्द्धश्लोकमधिकंपठंति अमार्कपातश्रवणैर्युक्ताचे[illegible]षमाघयोः अर्द्धोदयःसविज्ञेयःकोटिसूर्यग्रहैःसमः निश्यर्द्धोदयसंज्ञस्तुमहानर्द्धो

दयोदिवा पुष्यमाघयोदे[illegible]वीरमित्रोदयेपाठः पुष्यमाघयोरितिपुष्यमघानक्षत्राभ्यां युक्तयोःपौर्णमास्योर्मध्यवर्त्तिन्याममावास्यार्कग्रहैःसम[illegible]गु इतिपौषेनिर्णीतत्वान्नसिद्धांतः किंचिन्न्यूनोमहोदयइत्यपिकेचित्पठंति कचित्तुसोमवारेसतिमहीनकृतंभवेत् ष्वेतिपठंति अथात्रकृत्यमुक्तंस्कंदपुराणे अर्द्धोदयेतुसंप्राप्तेसर्वंगंगासमंजलं शुद्धात्मानोद्विजा[illegible]षुपुष्करात्रितयेतथा[illegible]भाः यत्किंचित्क्रियतेदानंसर्वंमेरुसमंभवेदिति अत्रपायसपूरितससुवर्णकांस्यादिपात्रदानमु[illegible]मिष्टापूर्त्तंचतैःकृतं [illegible]पलमुख्यममत्रंतत्रकारयेत् चत्वारिंशत्पलंवापिपंचविंशतिरेववा अमत्रंपात्रं अत्रामत्रंचे[illegible]विपुलंव्रतकर्त्ता[illegible]नात् तच्चसुवर्णादिधातुघटितंयथाविभवंबोध्यमितिवीरमित्रोदये निर्णयसिंधौकृत्यरत्नावल्यांतुकै[illegible]ोकेषुश्लोकयुक्तं तथा एवंसुघटितंकार्य्यंकांस्यभाजनमुत्तमामितिशास्त्रांतरसंवादात् पंचविंशतिरितिपंचविंशतिपलं [illegible]ध्यायसंतत्रपद्ममष्टदलंलिखेत् तत्रपाद्मे पद्मस्यकर्णिकायांतुकर्षमात्रं सुवर्णकं तदभावेतदर्द्धंवातदर्द्धं[illegible] भूमौतुतंडुलैःशुद्धैःपद्ममष्टदलंशुभं अमत्रंस्थापयेत्तत्रब्रह्मविष्णुशिवात्मकं तत्रपाद्मे तेषांपूजातुकर्त्तव्या श्वेतमाल्यैःसुशोभनैः वस्त्रादिभिरलंकृत्यब्राह्मणायनिवेदयेत् तत्रमंत्रः सुवर्णपायसामत्रंयस्मादेततत्त्रयीमयं आवयोस्तारकंयस्मात्तद्गृहाणद्विजोत्तम समुद्रमेखलांपृथ्वींसम्यग्दत्त्वातुयत्फलं तत्फलंलभतेमर्त्यःकृत्वादानममत्रकं अमत्रकंपात्रदानंआवयोस्तारकमितिप्रतिग्रहदोषाभावउक्तः महोदयंचाह ब्रह्माण्डपुराणे पातस्यांतःपूर्वभागस्त्वमायाःश्रोणामध्यंभास्करस्योदयेच भानोर्वारेपुण्यमर्द्धोदयःस्याच्चांद्रेवारेतन्महापूर्वमाहुः महापूर्वंमहोदयंप्राहुः अन्यदपिस्कंदपुराणेअर्द्धोदयव्रतं ॥ अगस्त्यउवाच ॥ भगवंस्त्वत्प्रसादेनश्रुतोयंव्रतविस्तरः अर्द्धोदयंतुमेब्रूहिदुर्लभंसचराचरे जीवितंप्राणिनांपुण्यंयदिचेद्वदसिप्रभो कथंकार्यंकृतेकिंस्यात्फलंकथयषण्मुख ॥ स्कंदउवाच ॥ श्रूयतांपुण्ययोगोयं

दुर्लभोर्द्धोदयाह्वयः देवतिर्यङ्मनुष्याणांदुःप्रापःसर्वकामदः माघामायांव्यतीपातेआदित्येविष्णुदैवते अ
र्द्धोदयंतमित्याहुःसहस्रार्कग्रहैःसमं पुराकृतंवसिष्ठेनजामदग्न्येनसुव्रत सनकाद्यैर्मनुष्यैश्चदृष्टंभवतिकुंभज दा
नानांयज्ञतीर्थानां फलंयेनकृतंभवेत् ससागराधरातेन सप्तद्वीपसमन्विता दत्तास्यात्सर्वभावेनयेनचार्द्धोदय
कृतः गंगागयाप्रयागेषुपुष्करात्रितयेतथा मानसादिषुतीर्थेषुयत्पुण्यंस्नानदानतः तत्समंवानवाविप्रव्रतेनानेनः
कुंभज अश्वमेधायुतंचेष्टामिष्टापूर्त्तंचतैःकृतं अर्द्धोदयंकृतंयैस्तुविधिदृष्टेनकर्मणा वाचिसत्यंगृहेलक्ष्मीःसंतति
श्चानपायिनी आयुर्यशोहिविपुलंव्रतकर्त्ताफलंलभेत् इंद्राग्नियमलोकेषुनिर्ऋतेरप्यपांपतेः वायोःकुवेरस्येशस्य
लोकेषुसुकृतीप्रभो वसेच्चंद्रार्कलोकेषुलोकपालैश्चसेवितः गोकोटिदानाद्यत्पुण्यंक्षेत्रतीर्थनिवासिनां अर्द्धोदय
स्यपुण्यस्यकलांनार्हंतिषोडशीं भूलोकाधिपतिश्चैवभुवोलोक .धपस्तुसः स्वर्लोकेशोजनानांचतपोलोकस्यचे
श्वरः महर्लोकेवसेन्नित्यंयावदिंद्राश्च ततोहिरण्यगर्भस्यपुरुषोव्रतकारकः अर्द्धोदयप्रभावेनब्रह्मलोकेवसे
न्नरः तथामानेनतस्याथरुद्रस्म मांडवे कृष्ण विलोकेगणैःपूज्योदेवराजसमान्वितः वसेच्छक्रेणमानेनव्रतस्या
स्यप्रभावतः ततोविष्णुस्व भक्ष्यमाल्यफलादि तिर्भवेत् शंखचक्रगदाधारीवनमालीहरिःस्वयं व्रतप्रभावाल्ल
क्ष्मीशोदेवोनारायणोभवेत् अनेनविधिना स्कंदकेनविधानेनकर्तव्यंव्रतमुत्तमं अर्द्धोदयेमनुष्याणांजीवितुदुर्ल
भंभुवि स्कंदउवाच कलशोपरि उवाच यारघुणाकृतं द्वापरेधर्मराजेनकलौपूर्णोदरेणतु अन्यैर्देवमनुष्यैश्च
दैत्यैश्चद्विजसत्तम कृत नायच त्वंरवे वकामफलप्रदं माघमासेकृष्णपक्षेपंचदश्यांरवेर्दिने वैष्णवेनतुऋक्षेण
व्यतीपातेनदुर्लभं पूर्व मृतःस्वर्गे त्वाशुचिर्भूत्वासमाहितः सर्वपापविशुद्ध्यर्थंनियमस्थोभवेन्नरः तत्रमंत्रः त्रि
दैवत्यव्रतंदेवाःकरिष्ये पर्णसंपुटा तुसन्निधौमेद्यत्रयोदेवास्त्रयोग्नयः ब्रह्मविष्णुमहेशानांसौवर्णपलसंख्यया
दृष्यन्नाम

कांतायनमो

कर्त्तव्यार्चास्तदर्द्धेन भोवाङ्को: नीलक अर्चा:प्रतिमासार्द्धशतत्रयंशंभोर्द्रोणानांतिलपर्वत: कर्त्तव्योविष्णुरुद्रा भ्यांगिरीपूर्वोक्तसंख्य कायच पूज ह्मा शय्यात्रयंतत:कुर्य्यादुपस्करसमान्वितं देवानांत्रयमुद्दिश्यकर्त्तव्यंभक्ति तस्तदा ब्रह्मविष्णु जयेद्भक्त्यावस्त्र वांत्रय हिरण्यंभूमिधान्यादिदानंविभवसारत: दातव्यंश्रद्धयोपेतंब्राह्मणेभ्य:प्रयत्नत: म युगंविष्णोर्ल चिर्भूत्वासमाहित: तिलपर्वतमध्यस्थंपूजयेद्देवतात्रयं तत्रादौपूजामंत्रा: नमोविश्वसृजेतुभ्य लसंभवैर्दिव्यै:पू देवायदेवपतयेज्ञानानांपतयेनम: इतिब्रह्मपूजा अथास्यांगपूजा उंब्रह्मणेनम:पादयो: अथव्रतांगहोमस धात्रेनमोजान्वो: हिरण्णगर्भायनमऊर्वो: वेधसेनमोगुह्ये पद्मोद्भवायनमोहस्तयो:हंसव इत्यंतेनैवमंत्र देशे शतानंदायनमोवक्षसि सावित्रीपतयेनमोवाङ्को ऋग्वेदायनम:पूर्वमुखे: यजुर्वेदायन णमुखे सामवेदायनम:पाश्चिमास्ये अथर्ववेदायनमउत्तरास्ये चतुर्वक्त्रायनम:शिरसि लोकपालायनम: सर्वांगेषु तत इंद्रायनमइत्यादिलोकपालपूजापूर्वादिदिक्षुविदिक्षुच अथप्रार्थनामंत्र: ॥ हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपवान् प्रसादसुमुखोभूत्वापूजांगृह्णनमोस्तुते ॥ इतिब्रह्मपूजा ॥ नारायणजगन्नाथनमस्तेगरुडध्वज पीतांबरनमस्तुभ्यंजनार्दननमोस्तुते ॥ अथांगपूजा ॥ अनंतायनम: ॥ पादौपूजयामि गोविंदायनमोजंघयो: मुकुंदायनमोजान्वो: ॥ विश्वरूपायनमऊर्वो:प्रद्युम्नायनमोगुह्ये पद्मनाभायनमोनाभौ भुवनोदरायनमउदरे कौस्तुभवक्षसेनमोवक्षसि चतुर्भुजायनमोवाहुषु विश्वतोमुखायनमोवदने सहस्रशिरसेनम:शिरसि तत:प्रार्थना आदित्यचंद्रनयनदिग्वाहोदैत्यसूदन पूजांदत्तांमयाभक्त्यागृहाणकरुणाकर ॥ इतिविष्णुपूजा ॥ महेश्वरमहेशाननमस्तेत्रिपुरांतक नमोजीमूतकेशायनमस्तेवृषभध्वज ततोंगपूजा ईशानायनम:पादयो: चंद्रशेखरायनमोजंघयो: पशुप

तयेनमऊर्वोः उमाकांतायनमोगुह्ये नीललोहितायनमोनाभौ कृत्तिवाससेनमउदरे नागोपवीतिनेनमोवक्षसि योगिरूपायनभोवाह्वोः नीलकंठायनमःकंठे पंचवक्त्रायनमोमुखेषु कपर्दिनेनमोमौलौ ततःप्रार्थनाअंधकारेश्नमेयात्मन्नमोलोकांतकायच पूजांदत्तांमयाभक्त्याग्रहाणवृषभध्वज इति शिवपूजाक्रमःप्रोक्तो मंत्रैरेतैःप्रयत्नतः आचार्य्यंपूजयेद्भक्त्यावस्त्रालंकारभूषणैः हस्तमात्राकर्णमात्रापीठंछत्रंकमंडलुं श्वेतवस्त्रयुगंदेयंब्रह्मणेसर्वमूर्त्तये पीतवस्त्रयुगंविष्णोर्लोहितंशंकरस्यच पंचामृतेनस्नपनंपूजनंकुसुमैःस्वकैः कमलैस्तुलसीपत्रैर्विष्णुपत्रैरखंडितैः तत्कालसंभवैर्दिव्यैःपूज्यादेवायथाक्रमं यथाशक्तिःप्रकर्त्तव्यंव्रतमेतत्सुदुर्लभं जीवितंप्राणिनामेतदनित्यंनिश्चितंयतः अथव्रतांगहोमस्यविधानंश्रृणुतत्त्वतः देवतात्रयमुद्दिश्यशास्त्रदृष्टेनकर्मणा प्रजापतयेविश्वरूपायरुद्रायनमः इत्यंतेनैवमंत्रेणवह्निंसंस्थाप्यभक्तितः ततोहोमंप्रकुर्वीतयथाविभवसंभवं अग्नयेप्रजापतयेस्वाहा अग्नयेविष्णवे [illegible] कृष्णा[illegible]येरुद्रायस्वाहा एवंविधश्चरुहोमःप्रजापतयेनत्वदेतान्यन्योविश्वारूपाणिजातानियदितावभ्भक्ष्यमाल्यफलादीभ[illegible]द्विपदेचतुषपदेवयंस्यामपतयोरयीणांस्वाहा- ओंइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् [illegible] अनेनाविधिनासर्वंससम्या[illegible] यंबकंयजामहेसुगंधिपुष्टिवर्द्धनं उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात ॥ [illegible]लशोपरि रवियुक्तंद्वि[illegible]न्यासं[illegible]प[illegible]विष्णवेस्वाहा ॥ २ ॥ रुद्रायस्वाहा ॥ ३ ॥ ब्रह्मणेविष्णवेमहादेवायस्[illegible]नायच त्वंरवेतारयस्वास्मान्[illegible]तास्म[illegible]मानवाप्नोतीतिव्रतांगोहोमः अथहोमावसानेतुगांचदद्यात्पयस्विनीं [illegible] मृतःस्वर्गेमहीयते [illegible]भरणभूषितां[illegible] ताम्रपृष्ठांकांस्यदोहांसर्वोपस्करसंयुतां सदक्षिणांसुशीलांतामाचार्य्याय[illegible]संयुतां[illegible]द्विहुतंजप्तमिष्टंयद्[illegible]सहस्रधा कृतकृत्योभवेद्विप्रव्रतस्यास्यप्रभावतः एतत्सर्वंसमाख्यातंदु[illegible]दध्यन्नामतः अर्द्धोदयंयथादृष्टंकिमन्यच्छ्रोतुमिच्छसि इतिस्कंदपुराणोक्तमर्द्धोदयव्रतं अथा-

स्यसंक्षिप्तप्रयोगः एत्रयंवाकृत्वावैमुद्यां तिथ्यादिसंकीर्त्यअात्मनअखिलपापक्षयपूर्वकधर्मार्थकाममोक्षचतुर्विध पुरुषार्थसिद्धिद्वाराश्री ततआचार्यब्रह्मर्द्धोदयव्रतोद्यापनंकरिष्ये आचार्यादीन्वृत्वाभूमौदर्भास्तृतायांसार्द्ध शतत्रयद्रोणपरिमितअन्नंकृत्वा अन्वादध्यात् अवत्प्रमाणम्हेश्वतिलपर्वतंविष्णवे तथाविधमेवतिलपर्वतंरुद्राय अ शक्तौपर्वतमेकमेवकुर्वेवताश्चैकैकयाहुत्यायक्षे एवंहोमंसमाप्यात्रयंयथासंभवंविधाय ब्रह्मयज्ञानमितिब्रह्माणं इदं विष्णुरितिविष्णुं अ संकीर्त्यकोटिसूर्यग्रहसमे अर्द्धोदयेल्लोकपालान्नाममंत्रैर्वेदमंत्रैश्चसंपूज्य ततोब्रह्मविष्णुशिवानांमूर्त्तिष्वंगपूजां चंद्रोपेंद्रादिसमस्तलोकप्राप्त्युत्तरमि हिरण्यगर्भायऊरू०परमेष्ठिनेजंघे० वेधसेगुह्यं-हंसवाहनायकटिं० शतानंत्रयमूर्त्तिः सोपस्कर[illegible]यवाहून्० पूर्वादिचतुर्मुखेषु ऋग्वेदायनमः यजुर्वेदायनमः सामवेदायनमः अथर्ववेदायन्विष्णुमहेश्वरा[illegible]यनमोनेत्रेषु कपिलायललाटे हंसायाशिरःपूजयामि ॥ १ ॥ अथविष्णोः अनंतायनमःपादौ०विष्णुरूपायनम ऊरू०मुकुंदायनमोजानुनी०गोविंदायनमोजंघे०प्रद्युम्नायनमः गुह्ये पद्मनाभायनमः नाभिम् कौस्तुभवक्षसेनमः वक्षसि चतुर्भुजायनमः वाहून् विश्वतोमुखायनमोमुखं सहस्रसिरसेनमइतिशिरःपूजयामि २ अथशिवस्य ईशानायनमः पादौपूज०चंद्रशेखरायनमोजंघे०पशुपतये-नमोजानुनीपू० शंकरायनमः ऊरूपू०उमाकांतायनमोगुह्यं०नीललोहितायनमःनाभिंपू०कृत्तिवाससेनमःवाहून्० नीलकंठायनमः कंठं०पंचवक्त्रायनमःमुखंपू० कपर्दिनेनमःशिरःपू० ततःक्रमेणप्रार्थयेत् नमोविश्वसृजेतुभ्यं सत्यायपरमात्मने देवायदेवपतयेयज्ञानांपतयेनमः १ नारायणजगन्नाथनमस्तेगरुडध्वज पीतांवरनमस्तेस्तुजनार्दननमोस्तुते महेश्वरमहेशाननमस्तेत्रिपुरांतक नमोजीमूतकेशायनमस्तेवृषभध्वज ३ ब्रह्मविष्णुमहेशानाः कर्मणांफलहेतवः भक्त्यामयाकृतांपूजांगृह्णीध्वंजगदीश्वराः ४ इतिसंप्रार्थ्य ततः सपत्नीकंब्राह्मणं

वेदशास्त्रविदमेकंब्राह्मणत्रयंवाकृत्वावस्त्रालंकारादिभिः संपूज्य पुनरपिब्रह्मविष्णुमहेशान्पंचामृतपुरः सरतुलसीविल्वादिकैः पूजयेत् ततआचार्यब्रह्मादिवरणंवेदिकायां अग्निंप्रतिष्ठाप्य सर्वतोभद्रादिसमस्तमंडलदेवतापूजांते अग्निपूजनंकृत्वा अन्वादध्यात् ब्रह्मविष्णुमहेशान्घृताक्ततिलद्रव्येणप्रतिदैवतंसहस्रसंख्याकाहुतिभिर्लोकपालान्मंडलदेवताश्चैकैकयाहुत्यायक्षे एवंहोमंसमाप्य ततस्तिलपर्वतसहितंप्रतिमात्रयसंयुतंदद्यात् ॐतत्सदित्यादिदेशकालौसंकीर्त्यकोटिसूर्यग्रहसमे अर्द्धोदयपर्वणिसशैलवनसप्तसमुद्रादिसंयुतधरादानपुण्यजन्यसमग्रफलप्राप्तिद्वारासूर्यचंद्रोपेंद्रादिसमस्तलोकप्राप्त्युत्तरपरमैश्वरपदप्राप्तये अर्द्धोदयपूर्वोक्तसमस्तफलप्राप्त्यर्थंतिलपर्वतमध्यस्थदेवतात्रयमूर्त्तीः सोपस्कराः अत्रभूततापवेदाविदेब्राह्मणायदातुमहमुत्सृजे ततः प्रार्थना ॥ तिलपर्वतमध्यस्थाब्रह्मविष्णुमहेश्वराः दहंतुपातकंसर्वंयच्छंतुममसंततिमित्युक्त्वा दद्यात् ततोदानस्य सांगतार्थं रक्तकृष्णश्वेतवर्णंसभांडिवे कृष्णादिकं आचार्य्यायदद्यात् अत्रहोमद्रव्याणिपलाशसमित् चरुतिलान्यानि ब्रह्मणः अपूपभक्ष्यमाल्यफलादिभिः विष्णोः चर्वाज्यव्रीहयः शंकरस्य ततोभूमौ श्वेततंडुलैः कल्पिताष्टदलोपरिपायसं अनेनविधिनासर्वंसप्तम्यां[illegible]णायसंपूज्यदद्यात् तत्रमंत्रः सुवर्णपायसामत्रंयस्मादेतत्त्रयीमयं आवयोःकलशोपरि रवियुक्तंद्विजेंद्राया[illegible]पात्रदानंविधाय भूशय्यादिदानंकृत्वा ब्राह्मणाशिषोगृहीत्वा भूयसींभवनायच त्वंरवेतारयस्वास्मान्व्रतास्म[illegible]र्द्धोदयदानव्रतं अस्यामेवमाघमायां सावित्रीसहितं ब्रह्माणंपूजयित्वा मृतःस्वर्गेमहीयते [illegible]ष्योत्तरे अमायांमाघमासस्यपूजयित्वापितामहं गायत्र्यासहितंदेवंवेदा[illegible]संयुतां[illegible]धेनुंफलनानाविधैर्युतां सहिरण्यांसवस्त्रांचब्राह्मणायनिवेदयेत् कीर्त्तयेत्प्रीयतां[illegible]ध्यन्नामतः सनातनः स्थानंस्वर्गेथपातालेयन्मर्त्येकिंचिदुत्तमं तदवाप्नोत्यसंदिग्धं

०र०व्र
०माघ
॥१॥

यञ्चगोभिः प्रसा [illegible] न्यानिदानानिदीयंतेसुवहून्यपि युगादिषुमहाराजअक्षयाणिभवंतिहि वित्तहीनःस्वशक्त्यायो [illegible] दप्यक्ष[illegible]नेनात्रकार्य्याविचारणा वित्तानुसारंस्वंदद्याद्धनीवा निर्द्धनोध्रुवं भूहिरकृष्णउवाच अथान्यामा[illegible]स्यामितृती[illegible]हयानानिदेयानिशुभमिच्छता एवंदत्त्वायथाशक्त्या भोजयित्वाद्विजोत्तमेतुसंप्राप्यतृतीयांशुक्लपक्षतः प्रातर्ग[illegible]भिःसह यत्किंचिद्वाचिकंपापंमानसंकायिकंतथा तत्सर्वनाशमायातियुगादिःपूजाप्रकर्त्तव्याजात्यावैकुंकुमेनच [illegible] स्तूयमानःसुरासुरैः रुद्रस्यानुचरोभूत्वा रुद्रलोकेवसेन्नरः यद्दीयतेकिंमाथार्चयेत् जंघजानूतथाशांत्यैतथैवे[illegible]मक्षयमेवचात्र स्यादक्षयंसुयुगपूर्वतिथीषुराजन्व्यासादयोमुनिवराइहनान्यथैवंधरं साङ्गंभुजाग्रंमाधव्यैकु[illegible]ग्रामायांयुगादितिथिकृत्यम् ॥ अथमाघशुक्लप्रतिपदाकृत्यं नारदीये माघशुक्लप्रातः नम[illegible]न्महेश्वरं समभ्यर्च्यविधानेनसमृद्धोजायतेभुवि द्वितीयाकृत्यमपितत्रैव माघशुक्लद्वितीयायां भानुरूपंप्रजापतिं समभ्यर्च्ययथान्यायंपूजयेद्गंधपुष्पकैः रक्तैर्गंधैस्तथास्वर्णमूर्त्तिंविप्रायशक्तितः ततः पूर्णताम्रपात्रेगोधूमैर्वापितंडुलैःसमर्प्यदेवंभक्त्यैवसमूर्त्तिंप्रददेद्द्विजे एवंकृतेव्रतेविप्रसाक्षात्सूर्यइवोदितः दुरासदोदुराधर्षोजायतेभुविमानवः इहकामान्वरान्भुक्त्वायात्यंतेब्रह्मणःपदं सर्वदेवस्तुतोभीक्ष्णं विमानवरमास्थितः माघशुक्लतृतीयायां ललितासौभाग्यसुंदरीव्रतं नारदीये माघशुक्लतृतीयायांपूज्यासौभाग्यसुंदरी पूर्वोक्तेनविधानेननारिकेलार्घ्यदानतःप्रसन्नादिशतिस्वीयंलोकंतुसमुपोषिता अस्याविधानकथाभविष्योत्तरे युधिष्ठिरउवाच अथपृच्छामिभगवन्व्रतंद्वादशमासिकं ललिताराधनंनाममासमासक्रमेणच श्रीकृष्णउवाच शृणुपाण्डवयत्नेनयथापृष्टंपुरातनं कैलासशिखरेरम्येवहुपुष्पलतावृते शंकरस्यमहादेव्यासंवादंकुरुसत्तम सचूतपल्लवयुतेचंपकाशोकभूषिते कदंबवकुलामोदवशीकृतमधुव्रते मयूररवसंघुष्टेराजहंसो

पशोभिते मृगर्क्षगजसिंहैश्चशाखामृगगणावृते गंधर्वयक्षदेवर्षिसिद्धकिन्नरपन्नगैः तपस्विभिर्महाभागैः सेव्यमानंसमंततः सुखासीनंमहादेवं भूतसंघैःसमावृतं अप्सरोभिःपरिवृतमुमानत्वेदमब्रवीत् ॥ उमोवाच ॥ भगवन्देवदेवेशशूलपाणेवृषध्वज कथयस्वमहेशान तृतीयाव्रतमुत्तमं सौभाग्यंलभतेयेन धनपुत्रान्पशून्सुखं नारीरूपंशुभंस्वर्गमारोग्यंश्रियमुत्तमां एवमुक्तोदयितयाभार्ययाप्रीतिपूर्वकं विहस्यशंकरःप्राहकिंव्रतेनतवप्रिये येकामास्त्रिषुलोकेषुदिव्यभौमांतरिक्षजाः सर्वेपितेतवायत्तायस्यास्त्वहंपतिर्यतः उमोवाच सत्यमेतत्सुरेशान त्वयितुष्टेनदुर्लभं किंचित्तुभुवनाभोगभूषणेशशिभूषण भक्त्यास्त्रियोहिमांदेवप्रयुंजंतिशुभाभुवि सुरूपाः सुभगा काश्चिदपुत्रावहुपुत्रिकाः सुशीलास्तपसाकाश्चिच्छ्वश्रूभिःपीडिताभृशं शौचाचारसमायुक्ता नरोचंतेतथकस्यचित् एवंवहुविधैर्दुःखैः पीड्य[illegible]दारुणैः शरणंमांप्रपन्नास्ताः कृपाविष्टाततोप्यहं येनताः सुखसंभोगरूपलावण्यसंपदा[illegible]वस्त्रभक्ष्यमाल्यफलादि[illegible]युक्ताः स्युः सुरसत्तम तन्मेकथययत्नेनव्रतानामुत्तमंव्रतं ईश्वरउवाच माघेमासे[illegible]शि अनेनविधिनासर्वंसप्तम्यां[illegible]ल्यहस्तौचपादौचैवसमाहितःउपवासस्यानियमंदंतधावनपूर्वकं मध्याह्नेतुतत[illegible]यकलशोपरि रवियुक्तंद्विहं[illegible]जलाच्छुद्धेवाससीपरिधायच सुगंधैःसुमनोभिश्चप्रभूतैःकुंकुमादिभिःअर्च[illegible]भवनायच त्वंरवेतारयस्वास्मात्रतास्[illegible]द्यैस्तथाधूपैर्नैवेद्यैःशर्करादिभिः यदृच्छालाभसंपन्नैधूपदीपार्चनादिभि[illegible]मर्त्यो मृतःस्वर्गेमहीयते [illegible]इमामघोघ[illegible]था पात्रेताम्रमयेशुद्धेजलाक्षतादिभिश्चिते सहिरण्यंद्विजंकृत्वामंत्रपू[illegible]नसेप्सितं ब्रह्मावर्त्तः समाख्यातोब्रह्मयोनिविनिर्गतः भद्रे[illegible]करप्रिया [illegible]द्वारेहरंप्राप्तागंगाजलपवित्रता सौभाग्यारोग्यपुत्रार्थमर्चयेद्धरवल्लभे [illegible]भद्रेप्रतीछस्वनमोनमः दत्त्वाहिरण्यंतस्मैसप्राशयीतकुशोदकं आचम्यप्रयता

भूत्वाभूमिस्थाक्षप [illegible] ष्मानामुदादेवींहारितेभवविस्तरे द्वितीयेह्निपुनः स्नात्वा तथैवाभ्यर्च्यपार्वतीं यथा
शक्त्याद्विजान्पूज्य [illegible] एवंतुप्रथ [illegible] अजनीयातुकालिका द्वितीयेपार्वतीनामतृतीयेशंकरप्रिया
चतुर्थेगिरिजादेवीपै [illegible] ष्यक्ष [illegible] सप्तमेस्मृता मृडानीचाष्टमेमासिगौरीतुनवमेस्मृता
कृष्णउवाच अथान्याम [illegible] क्ष्यामितृ
दशेममासिविख्या [illegible] सेतुसंप्राप्यतृतीयांशुक्लपक्षतः प्रात [illegible] सिगौरीतुद्वादशीपरा कुशोदकंपयःसर्पिगोमूत्रंगोम
यंफलं निंबपत्रंकंट [illegible] नःपूजाप्रकर्त्तव्याजात्यावैकुंकुमेनच [illegible] प्राशनानिक्रमादमी मासिमासिस्थिताह्येवमुपवास
परायणा ददातिश्रद्ध [illegible] थार्चयेत् जंघेजानूतथाशांत्यैतथै [illegible] लवणंजीरकंगुडमेवच देयैरेभिःश्रद्धयात्वं सूर्यस्थैस्तु
ष्यसिप्रिये मासिमासि [illegible] कंधरं साक्षंभुजाग्रंमाधव्यैकु [illegible] रपूर्विकैर्देविनमस्कारांतदीपितैः एभिस्त्वंपूजितामंत्रैः
स्तुष्यसित्वंहरप्रिये तुष्ट [illegible] र्चितः नमस्क [illegible] प्रीतिपूर्वकं समाप्तेतुव्रतेतस्मिन्ब्राह्मणंवेदपारगं सहि
तंभार्ययाभ्यर्च्यगंधपुष्पादिभिःशुभ [illegible] ध्वजंमहेश्वरंकृत्वाउमांभार्य्यांतथैवच अन्नंसदक्षिणंदद्यात्तथाशुभ्रेचवाससी
रक्तवासोयुगंदद्यात्त्वामुद्दिश्यहरप्रिये ब्राह्मणेश्रद्धयायुक्तातस्याःफलमिदंशृणु दशवर्षसहस्राणिलोकान्प्रा
प्यपरात्परान् मोदतेभर्तृसहितायथेंद्रेणशचीतथा मानुषत्वंपुनःप्राप्यनवैधव्यमवाप्नुयात् पुत्रान्भोगांस्तथारू
पंसौभाग्यंश्रियमेवच एकपत्न्यंतथाभर्त्तुःप्राणेभ्योप्यधिकाभवेत् शृणुयाद्वाच्यमानंतुभक्त्यायाललिताव्रतं
मद्गास्नेहेनकथितंसापितत्फलभागिनी संपूज्यपूज्यांललितांगयष्टींगंधोदकैर्मृतघटींशिरसिक्षिपेद्या सास्व
र्गेमर्त्यललनासुलभामभूताभूत्वाधिपंपतिमवाप्यभुवंभुनक्ति

इतिश्रीभविष्योत्तरेमाघशुक्लाललितातृतीयाव्रतं ॥

अथैवरसकल्याणिनीव्रतम्

भविष्योत्तरे श्रीकृष्णउवाच अथान्यामपिवक्ष्यामितृतीयांपापनाशिनीं रसकल्याणिनीमेतांपुराकल्पविदोविदुः माघमासेतुसंप्राप्यतृतीयांशुक्लपक्षतः प्रातर्गव्येनपयसातिलैःस्नानंसमाचरेत् स्नापयेन्मधुनादेवींतथैवेक्षुरसेनच पुनःपूजाप्रकर्त्तव्याजात्यावैकुंकुमेनच दक्षिणांगानिसंपूज्यवामांगानिचपूजयेत् ललितायैनमः पादौ गुल्फौतद्वदथार्चयेत् जंघेजानूतथाशांत्यैतथैवोरूश्रियैनमः मदनालसायैकटिंमदनायैतथोदरं स्तनंमदनवासिन्यैकुमुदायैचकंधरं साङ्गंभुजाग्रंमाधव्यैकमलायैमुखस्मितं भ्रुवौललाटंरुद्राण्यैशंकरायैतथालकान् मुकुटंविश्वव्यापिन्यैपरायेतिपूर्वतः नमस्कादनायैललाटंतुमोहनायैपुनर्भुवं नेत्रेतथाविदारिण्यैपुष्ट्यैचवदनंपुनः उत्कंठिन्यैतथप्रांतवायव्येयंचभांडवे कृष्णायोमवाहुंचाविशोकायैचदक्षिणं हृदयंमन्मथारिण्यैवामदेव्यैजगच्छ्रिये आर्द्रवस्त्रैसमावेष्ट्यभक्ष्यमाल्यफलादिभिःसंपूज्यविधिवद्द्विजदांपत्यमर्चयेत् भोजयित्वान्नपानेनमधुरेणविमत्सरः ङ्मुखोनिशि अनेनविधिनासर्वंसप्तम्यतासुवर्णकमलंगंधमाल्यैरथार्चयेत् प्रीयतामत्रकुमुदागृह्णीयाल्लक्षांतेतुविधायकलशोपरि रवियुक्तंद्विजेन्द्र्यासवत् लवणंवर्जयेन्माघेफाल्गुनेचगुडंपुनः तुवराजंतथा चैत्रे[illegible]यमंदारभवनायच त्वंरवेतारयस्वास्मान्व्रतास्मयाँ श्रावणेवर्जयेत्क्षीरंदधिभाद्रपदेतथा घृतमाश्वयुजे तद्वदूप्मासुमुखीमर्त्यो मृतःस्वर्गेमहीयते इमाममघौघपशर्करा व्रतीतुकरकान्पूर्णान्नेषांवैमासिमासिच दद्याद्द्विकालवेल [illegible] मंदारषष्ठीयसंयुतान् [illegible] लिङ्गकान्वड [illegible] यवयावसयपूरिकान् घातिकाघृतपूराश्वगुडपूर्णाश्वमंडकान् क्षीरेश [illegible] दध्यन्नामडयोशाकवर्तिकाः म[illegible]दाक्रमशोदद्यादेतानिकरकोपरि कुमुदामाधवीगौरी

रंभाभद्राजशुश्रि[illegible] उमासतीशचीतद्वन्मंगलारतिल[illegible]सा क्रमान्माघादिसर्वत्रप्रीयतामितिकीर्तयेत् सर्वत्रपंचगव्यं[illegible]सनातन [illegible]हृतं [illegible]भवेन्नित्य[illegible]धः पुष्पनक्तमिष्यते पुनर्माघेचसंप्राप्तेसाक्षसूत्रकमंडलुं तद्वद्गोत्रि[illegible]यत्नतोभूयात्मोदतेतत्प्रसादतः इयंमंदारषष्ठी [illegible]नीप्रीयतामिति अनेनविधिनायस्तुरसकल्याणिनीव्रतं पार्थप्रवक्ष्यामिसर्वपापप्रणाशिनीं सर्वकामप्रदांप[illegible]दसहस्रंतुनदुःखीजायतेक्वचित् अग्निष्टोमसहस्रेणयत्फलंत[illegible] दंतकाष्ठंततःकृत्वास्वपेद्धूमौजितें[illegible]सुवर्ण विधवावावराकीवासापितत्फलभागिनी सौभाग्यारोग्यसंपन्न[illegible]दारंप्राशयेन्निशि मंदारोराजार्कवृक्षः [illegible]शृणोतिप्रसंगात्सकलकलुषमुक्तः पार्वतींलोकमेति माणिमपिचनराणां[illegible]रकुसुमाष्टकं सौवर्णपुष्पंतद्वत्पद्म[illegible]यकःस्यादमेयः ॥ इतिभविष्योत्तरेरसकल्याणिनीमाघशुक्लातृतीयाव्रतम् [illegible]स्करायेतिपूर्वतः नमस्कारेणत[illegible]चरंतिशिष्टाःमाघशुक्लतृतीयायांकन्यासम्यग्वरार्थिनी प्रातः स्नात्वार्चयेद्गौरींपुष्पै[illegible]ठ्येयंचभांडवे कृष्णा[illegible]पुराणे माघमासेतुचैत्रेवागुडधेनुप्रदोभवेत् गुडव्रतंतृतीयायांगौरीलोकेमहीयते गुडव्रतो गुडमि[illegible]त्रदानपरः भविष्यपुराणे माघमासितृतीयायांगुडस्यलवणस्यच दानंश्रेयस्करंराजन्स्त्रीणांचपुरुषस्यच गुडेनतुष्यतेदेवीलवणेनमहेश्वरः इत्युमामहेश्वरप्रीतिकरंगुडलवणदानव्रतं अथ. माघशुक्लचतुर्थीकृत्यानि माघशुक्लचतुर्थीवरदाख्याकुंदचतुर्थीतिच हेमाद्रौनिर्णयामृतेचोक्तं कुंभार्केतिप्रशस्तासाप्रदोषव्यापिनीग्राह्या अत्रकुंदपुष्पैः शिवमभ्यर्च्यनरोनक्तभोजीश्रियमाप्नोति तदुक्तंकूर्मपुराणे कुंभशुक्लचतुर्थ्यांतुकुंदपुष्पैःसदाशिवं संपूज्य योहिनक्ताशीसप्राप्नोतिनरः श्रियमिति अस्यामेवब्रह्मपुराणोक्तंगौरीचतुर्थीव्रतं उमाचतुर्थ्यांमाघेतुशुक्लायांयोगिनीगणैः प्राहक्षयित्वासृष्टाचभूयः स्वांगात्स्वकैर्गुणैः ससृजुःसहितायस्मात्तस्मात्प्रोक्तासतीपुरा तस्मात्सातत्रसंपूज्यानरैःस्त्रीभिर्विशेषतः कुंदपुष्पैःप्रयत्नेनस

म्यग्भक्त्यासमाहितैः कुंकुमालक्तकाभ्यांचरक्तसूत्रैःसकुंडकैः अर्घ्यैःपुष्पैस्तथाधूपैर्दीपैर्बलिभिरेवच गुडार्द्र
काभ्यांपयसालवणेनाथपालकैः पूज्यास्त्रियश्चाविधवास्तथाविप्रास्सुलोचनाः सौभाग्यवृद्धयेपश्चाद्भोक्तव्यं
बंधुभिःसहेतिकुंडकैर्मृद्भांडाविशेषैरित्यर्थः अविधवाइत्यनेनसधवाःकुमार्य्यश्चसंगृहीता इतिगौरीचतुर्थीव्रतं
देवीपुराणेत्वियंकुंडचतुर्थीत्युक्तं माघमासेतुसंप्राप्तेचतुर्थीकुंडसंज्ञिता उपोष्यसासुरश्रेष्ठततोराज्यंभविष्यति
सर्वोपहारसंयुक्तंसर्वोपस्करमाहरेत् पुष्पपत्रफलंनालंकंदमूलाप्तियानिच वन्यानिचैवधान्यानितद्देयानिविशेषतः
त्वक्टारचारुबीजानिनवानिपल्लवानिच वलभद्रवल्लभंशाकंलवणंगुडशर्करा खंडजीरककुस्तुंबुधान्यानिविविधा
निचदातव्यानिसुरश्रेष्ठक सं भक्तितः अर्घ्यपात्रंतथाभांडंमृण्मयानिविशेषतःउद्दिश्यदापयेद्देवींप्रीयतांमेस.
दाइति अनेनवि रायेतिपूर्ववतः नमस्कैद वर्द्धतेनात्रसंदेहोनान्यथाममभाषितं इतिदेवीपुराणोक्तंकुंडच
तुर्थीव्रतं माघ तिवायव्येयंचभांडवे कृष्णायों इयमेवतिलचतुर्थीत्युच्यते माघशुक्लचतुर्थ्यांतुनक्तंव्रतपरायणाः
येत्वांबुद्धिम कवस्त्रैसमावेष्ट्यभक्ष्यमाल्यफलादिभिः कींयात्रांचतुर्थींप्राप्यतापसीं तपोमाघस्तस्येयंतापसीचतुर्थी
त्यर्थः ढमुखोनिशि अनेनविधिनासर्वंसप्तम्यां नायायात्रांनात्रयःकुर्य्यान्नैवेद्यंतिललड्डुकैः उपसर्गसहस्रैस्तु
सहंत लंशांतेतुविधायकलशोपरि रवियुक्तंद्विजश्रेष्ठास क्तितः तस्यांचतुर्थ्यांमंत्रज्ञस्तस्यमंत्रःअसेप्सतीति तथाच
मा र ायमंदारभवनायच त्वंरवेतारयस्वास्मान्नतास्म देवींजागरंतत्रकारयेदिति त्रिस्थलीसेतौलैंगेपि तिथि
तत्त्वेभ प्सासुमुखीमर्त्यो मृतःस्वर्गेमहीयते इमामघौघपमतस्यांगौरीसुपूजिता सौभाग्यमज्वलंकुर्य्याच्चतुर्थी
श्रीरपिश्रियं मंदारषष्ठ्यैं घिशुक्लचतुर्थ्यांशांतिचतुर्थीव्रतं यथोत्तरे सुमंतुरुवाच माघेमासितथाशुक्लायाचतुर्थी
महीपते ए सर्वशांतिदानित्यंशांतिंकुर्य्यात्सदैवहि नंदानंवालिंकर्मसर्वमस्यांकृतंविभो भवेत्सहस्रगुणि

तत्प्रसादाद्दं शुभः सदा दंतिनोगणेशस्य कृत्वोपवासं सास्तस्यांपूजयेद्विघ्ननायकं तस्यहोमादिकंकर्मभवेत्साह [illegible]कन्नृप [illegible]सनातनं पांश्चघृताक्तांस्त्वथभारत [illegible]शुकः पु[illegible]द्यैःपुष्पैस्तैवविघ्नेशेफलंसाहस्त्रिकंलभेत् विशेषतस्तथारा [illegible]पू यत्नतोभूयात्मोदतेतत्प्रसादतः इयंमंदारषष्ठी इतिभविष्योत्तरोक्तंशांतिचतुर्थीव्रतं नारदीयेपि इदं गौरीपार्थ वक्ष्यामिसर्वपापप्रणाशिनीं सर्वकामप्रदांषष्ठीं [illegible]भिश्चनरैस्तथा ढुंढिव्रतंपरैःप्रोक्तंकश्चित्कुंडव्रतंस्मृतं [illegible]त[illegible] दंतकाष्ठंततःकृत्वास्वपेद्भूमौजितेंद्रियः [illegible]होमः सर्वमस्यांकृतंनरैः भवेत्सहस्त्रगुणितंप्रसादाद्दंतिनःसदा [illegible]दारंप्राशयेन्निशि मंदारोराजार्कवृक्षः [illegible]तेइयंपूर्वाग्राह्या हेमाद्रिमतेपरा तत्रमदनंसंपूज्यवसंतोत्सवारा[illegible]करकुसुमाष्टकं सौवर्णंपूषणंतद्वत्पद्म[illegible] [illegible]तपंचमीतिभट्टोजिदीक्षिता अत्रादौरतिकामपूजनंश्रीपूजापूर्वंकृत्वाततोवे[illegible]स्कारयेतिपूर्वतः नमस्कारेणत[illegible] समुच्चये माघेमासिसुरश्रेष्ठशुक्लायांपंचमीतिथौ रतिकामौतुसंपूज्यकर्त[illegible]व्येयंचभांडवे कृष्ण[illegible] प्रदेयानिकर्त्तव्यः सुमहोत्सवः तथाश्रीपूजनंकार्य्यंतेनतुष्यतिमाधवइति [illegible]विष्योत्तरे माघशुक्लमधिकृत्य चतुर्थीवरदानामतस्यांगौरीसुपूजिता सौभाग्यमतुलंकुर्य्यात्पंचम्यांश्रीरपिश्रियं हेमाद्रौभविष्ये माघेशुक्लचतुर्थ्यांतुवरमाराध्यचश्रियः पंचम्यां कुंदकुसुमैःपूजांकुर्य्यात्समृद्धये अथरतिकामयोर्ध्यानं हेमाद्रौ शुभारतिःप्रकर्तव्यावसंतोज्ज्वलभूषणा नृत्यमानाशुभांदेवीसमस्ताभरणैर्युता वीणावादनशीलाचमदकर्पूरचर्चिता कामदेवस्तुकर्त्तव्योरूपेणाप्रतिमोभुविअष्टबाहुःसकर्तव्यःशंखपद्मविभूषणः चापबाणकरश्चैवमदाद्रंचितलोचनः रतिःप्रीतिस्तथाशक्तिर्मदशाक्तिस्तथोज्ज्वलाचतस्त्रस्तस्यकर्त्तव्याःपत्न्योरूपमनोहराः चत्वारस्तुकरास्तस्यकार्य्याभार्य्यास्तथोपगाः केतुश्चमकरःकार्य्यःपंचबाणमुखोमहानिति अत्रश्रीपूजनंमार्गशुक्लपंचम्योक्तमनुसंधेयं ॥ इतिमाघशुक्लाश्रीपंचमीवसंतपंचमी

कृत्यं माघशुक्लषष्ठीअरुणाख्योक्तानारदीये माघेमासेसिताषष्ठीसारुणाख्यास्मृताशुभा तस्यामरुणमभ्यर्च्यविष्णुरूपंसनातनं रक्तैर्गंधांशुकैः पुष्पै नैवेद्यैःपुष्पधूपकैः सम्यगभ्यर्च्यविधिव द्यदत्रविलिखेन्नरः ततश्चायत्नतोभूयात्मोदतेतत्प्रसादतः इयंमंदारषष्ठी भविष्योत्तरे ॥ * ॥ श्रीकृष्णउवाच ॥ शृणुपार्थप्रवक्ष्यामिसर्वपापप्रणाशिनीं सर्वकामप्रदांषष्ठींनाम्नामंदारसंज्ञितां माघस्यमलपक्षेतुपंचम्यांलघुभुङ्नरः दंतकाष्ठंततःकृत्वास्वपेद्भूमौजितेंद्रियः सर्वभोगविहीनस्तुषष्ठीमुपवसेन्नरः प्राप्यानुज्ञां द्विजश्रेष्ठान्मंदारंप्राशयेन्निशि मंदारोराजार्कवृक्षः ततःप्रातःसमुत्थाय कृतस्नानःपुनर्द्विजान् संपूज्य संहतंकृत्वामंदारकुसुमाष्टकं सौवर्णपूषणंतद्वत्पद्महस्तंसुशोभनं पद्मकृष्णातिलैःकृत्वाताम्रपात्रेदलाष्टकं पूज्यमंदारकुसुमैर्भास्करायेतिपूर्वतः नमस्कारेणतद्वच्चसूर्य्यायेत्यनलेदले दक्षिणेतद्वदर्काययज्ञेशायचनैर्ऋते पश्चिमेवसुधाम्नेतिवायव्येयंचभांडवे कृष्णायोत्तरतःपूज्यश्चानंदायेशानकेदले कर्णिकायांचपुरुषंपूज्यसर्वात्मनाहारं शुक्लवस्त्रैसमावेष्ट्यभक्ष्यमाल्यफलादिभिः एवमभ्यर्च्यतत्सर्वमुपाध्यायेनिवेदयेत् भुंजीतातैललवणं वाग्यतःप्राङ्मुखोनिशि अनेनविधिनासर्वंसप्तम्यांमासिमासिच कुर्य्यात्संवत्सरंयावद्वित्तशाठ्यविवर्जितः एतदेवव्रतांतेतुविधायकलशोपरि रवियुक्तंद्विजेंद्रायदातव्यंभूतिमिच्छता रवियुक्तंसौवर्णंरवियुक्तामित्यर्थःनमो मंदारनाथायमंदारभवनायच त्वंरवेतारयस्वास्मानस्मात्संसारसागरात् विधिनानेनयःषष्ठींमंदारभवसंज्ञितां विपाप्मासुमुखीमर्त्यो मृतःस्वर्गेमहीयते इमांमघौघपटलध्वांतोद्वासनदीपिकां प्रगृह्यगच्छन्संसारगर्तायां नस्खलेन्नरः मंदारषष्ठींविख्यातांवांछितार्थफलप्रदां यःपठेच्छृणुयाद्वापिसोपिपापैःप्रमुच्यते षष्ठीमुपोष्य तिलपंकजकर्णिकायांसंपूज्यभास्करमहासुरवृक्षपुष्पैः यत्प्राप्नुवंतिपुरुषानहितत्कदाचिद्गोभूहिरण्यतिलदाःफ

लमाप्नुवंति इतिभविष्योत्तरेमाघशुक्लामंदारषष्ठीव्रतम् ॥ अथमाघशुक्लसप्तमीकृत्यानि नारदीये माघस्यशुक्लसप्तम्यामचलाख्यंव्रतंस्मृतं त्रिलोचनाजयंतीयंसर्वपापहरास्मृता रथाख्यासप्तमीचेयंचक्रवर्त्तित्वदायिनी अस्यांसमर्च्यसवितुःप्रतिमांतुहैमींहेमाम्बराश्वरथगांतुददेत्सहेमां योभावभक्तिसहितःसगतोहिलोकंशंभोःप्रसादतइहापिचभुक्तभोगः भास्करीसप्तमीचेयंकोटिभास्वद्ग्रहोपमा अरुणोदयवेलायामस्यांस्नानंविधीयते अर्कस्यचबदर्य्याश्चसप्तसप्तदलानिच विधायशिरसिस्नायात्सप्तजन्माघनाशनं पुत्रप्रदंव्रतंचात्रप्राहादित्यःस्वयंप्रभुः योमाघसितसप्तम्यांपूजयेन्मांविधानतः तस्याहंपुत्रतांयास्येस्वांशेनभृशतोषितः तस्यांजितेंद्रियोभूत्वा समुपोष्यादिवानिशं पूजयेदपरेचाह्निहोमंकृत्वाद्विजांस्तथा दध्योदनेनपयसापायसेनचभोजयेत् अनेनविधिनायस्तुकुरुतेपुत्रसप्तमीं लभतेसतुसत्पुत्रांचिरायुषमनामयं इयमचलासप्तमीत्रिलोचनाजयंतीत्युक्तंभविष्योत्तरे माघस्यशुक्लपक्षेतुसप्तमीसात्रिलोचना जयंतीनामसाप्रोक्तासर्वपापहरातिथिरिति मत्स्यपुराणे यस्यांमन्वंतरस्यादौ रथमापदिवाकरः जयंतीनामसाप्रोक्ताशुक्लामाघस्यसप्तमीति सास्नानादावरुणोदयव्यापिनी ग्राह्या सूर्यग्रहणतुल्यातुशुक्लामाघस्यसप्तमी अरुणोदयवेलायांतस्यांस्नानंमहाफलमितिविष्णूक्तेः दिनद्वयेऽरुणोदयेचेत्पूर्वैवषण्मुन्योरितियुग्मवाक्यादितिभट्टोजिदीक्षिताः अयंचस्नानकालोरुणोदये येमाघेस्नानंकुर्वंतिततान्प्रत्येव अन्यान्प्रतितुसूर्योदयएव माघमासस्यसप्तम्यामुदयत्येवभास्करे विधिवत्तत्रचस्नानंमहापातकनाशनमित्यपरार्केविष्णूक्तेरित्युक्तंतन्मृग्यं मदनरत्नादिसर्वप्राचीननवीनग्रंथेष्वतद्वचनस्यानुपलंभात् तद्ग्रंथविरोधाच्चमाघस्नानकालस्तुसूर्य्योदयएव खमुद्गच्छतिभास्करइति माघमासेरटंत्यापःकिंचिदभ्युदितेरवाविति योमाघमास्युषसिसूर्यकराभिततेस्नानंसमाचरतीत्यादि नारदीयभविष्योत्तरप्रभृतिवचनडिंडिमस्यजागरूकत्वात्

29

तस्मान्माघस्नानंसूर्य्योदयेकर्त्तव्यं अचलासप्तमीस्नानंत्वरुणोदयएवेतिसिद्धांतः यत्तुदिवोदासीये अचलासप्तमीदुर्गाशिवरात्रिर्महान्नरः द्वादशीवत्सपूजायांसुखदाप्राग्युतासदेतिषष्ठीयुक्तमुक्तं तद्यदिपूर्वेह्निषष्ठीघटिकाद्वयंसप्तमीचपरेद्युःक्षयवशादरुणोदयात्पूर्वंसमाप्यतेतत्परंज्ञेयं तत्रषष्ठ्यांसप्तमीक्षयंप्रवेश्यारुणोदयेस्नानंकर्त्तव्यं इयंचप्रयागेप्रशस्ता अरुणोदयवेलायांशुक्लामाघस्यसप्तमी प्रयागेयदिलभ्येतकोटिसूर्य्यग्रहैःसमेतिवचनात् तथा माघेमासिसितेपक्षेसप्तमीकोटिभास्करा कुर्य्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपदइतिइदंचस्नानंतिथ्यादिसंकीर्त्त्यसप्तार्कपत्राणिसप्तवदरीपत्राणिचसुवर्णादिपात्रस्थातिलतैलकुसुंभवर्त्तिप्रज्वालितंदीपंचाशिरसिकृत्वाइक्षुदंडेनजलंचालयित्वाभास्करंहृदयेध्यात्वा नमस्तेरुद्ररूपायरसानांपतयेनमः वरुणायनमस्तेस्तुहारिवासनमोस्तुते इतिश्लोकंपठित्वा दीपंप्रवाहेविसृज्यशुक्लतिलैरंगोद्वर्त्तनंकृत्वास्नानंकर्तव्यं दिवोदासीयेमदनरत्नेतुइक्षुदंडेनजलंचालयित्वा सप्तार्कपत्राणिसप्तवदरीपत्राणिचाशिरसिकृत्वा वक्ष्यमाणमंत्रैः स्नात्वातिलापिष्ठमयापूपैर्हैमंसूर्य्यंसंपूज्य विप्रायदद्यादित्युक्तं स्नानमंत्राश्चकाशीखंडे यद्यज्जन्मकृतंपापंमयासप्तसुजन्मसु तन्मेरोगंचशोकंचमाकरीहंतुसप्तमी एतज्जन्मकृतंपापंयच्चजन्मांतरार्जितं मनोवाक्कायजंयच्चज्ञाताज्ञातंचयत्पुनः इतिसप्तविधंपापंस्नानान्मेसप्तसप्तिके सप्तव्याधिसमाकीर्णंहरमाकरिसप्तमीति एतन्मंत्रजपंजप्त्वास्नात्वापादोदकेनरःकेशवादित्यमालोक्यनरोनिष्कलुषोभवेत् ततोअर्घ्यंदद्यात् सचसौरागमेप्रोक्तःअर्कपत्रैस्सवदरैर्दूर्वाक्षतसचंदनैः अष्टांगविधिनाचार्घ्यंदद्यादादित्यतुष्टये अर्घ्यदानमंत्रोमदनरत्ने सप्तसप्तिवहप्रीतसप्तलोकप्रदीपन सप्तम्यासहितोदेवगृहाणार्घ्यंदिवाकरेति ततःसप्तमीप्रार्थना जननीसप्तलोकानां सप्तमीसप्तसप्तिके सप्तव्याहृतिकेदेविनमस्तेसूर्यमंडल इति अथसप्तमीध्यानं ताम्रवर्णाज्यपात्रासाहयस्थासप्तमीमतेति नीलकुंत

लकंठासाजटाखंडेंदुभूषिता इभस्थासप्तमीगौरीद्विभुजावज्रपात्रिणीति उभयसप्तमीध्यानं ततोनित्यविधिं
निर्वर्त्य चंदनेनाष्टपत्रकमलंविलिख्यतत्कर्णिकायांप्रणवसहितंसपत्नीकांशिवंसंपूज्यपूर्वादिदलेषु रविं भानुंविव
स्वंतंभास्करंसवितारं अर्कं सहस्रकिरणंसर्वात्मानं क्रमेण प्रणवादिनमोंतनामभिर्वस्त्रादिभिः संपूज्यस्वस्था
नंगम्यतामितिविसृजेत् ततस्ताम्रदिपात्रेकांचनंकर्णाभरणं घृतगुडतिलपिष्टसाहितं अशक्तश्चेत्तिलपिष्टजंसं
स्थाप्यरक्तवस्त्रेणाच्छाद्यपुष्पादिभिःसंपूज्य ब्राह्मणे स्वस्तिवाचनंकारयित्वाब्राह्मणायदद्यात् तत्रमंत्रः आदित्य-
स्यप्रसादेनप्रातःस्नानफलेनच दुष्टदौर्भाग्यदुःखघ्नंमयादत्तंतुतालकमिति ततोगुरुंसंपूज्य सूर्यंध्यायन्विप्रान्सं
भोज्यस्वयंभुंजीतइतितालकदानं ततः ससारथिरथंवर्णकैर्विलिख्य तथायथाशक्तिस्वर्णादिघटितंभानुसं
पूज्यदद्यात् इतिरथदानविधिः अत्रान्योपिविशेषः कथायांद्रष्टव्यः इयंमन्वादिः शुक्लपक्षस्थत्वात् पौर्वाह्णिकी
ग्राह्यामाघस्यमलमासत्वेमन्वादिकश्राद्धमुभयत्रापिकार्य्यं मन्वादिकमितिपूर्वोक्तवचनात् अस्यांकाशीखंडेविशे
षउक्तः लोलार्कैरथसप्तम्यांस्नात्वागंगादिसंगमे सप्तजन्मकृतैःपापैर्मुक्तोभवतितत्क्षणादिति पद्मयोगोप्यत्रस
तिसंभवेज्ञेयः सचनिर्णयामृतेप्रोक्तः षष्ठीचसप्तमीचैववारश्चेदंशुमालिनः योगोयंपद्मकोनामसूर्यकोटिग्रहैःसमइति
अथभविष्योत्तरोक्ताऽचलासप्तमीव्रतकथा युधिष्ठिरउवाच अध्रुवेणशरीरेणसुपुष्टेनापिकिंफलं माघस्नानंविना
देवत्वयोक्तंयदुनंदन प्रातःस्नानासमर्थेतु शरीरंयस्यदेहिनः किंतेनवदकर्तव्यंमाघेसंसारभीरुणा सोकुर्य्या
च्छरीरस्यअबलत्वात्तथैवच कथंस्त्रियःसुरूपास्युः सुभगाःसुप्रजास्तथा पुण्यस्यमहतश्चैवसर्वमेतत्फलंयतः
अल्पायासेनसुमहद्येनपुण्यमवाप्यते स्त्रीभिर्माघेममब्रूहिस्नानमेकंजगद्गुरो श्रीकृष्णउवाच श्रूयतांभरतश्रेष्ठर
हस्यंमुनिभाषितं यन्मयाकस्यचिन्नोक्तमचलासप्तमीव्रतं वेश्याचेंदुमतीनामरूपौदार्य्यगुणान्विता आसीत्कुरु

कुलश्रेष्ठसागरस्यविलासिनी सावसिष्ठाश्रमंपुण्यंजगामगजगामिनी वसिष्ठमुनिमासीनंप्रणम्यानतकंधरा कृतांजलिपुटाभूत्वाप्राहेदंजगतोहितं मयानदत्तंनहुतंनोपवासव्रतंकृतं भक्त्यासंपूजितःशंभुः स्वामिन् शार्ङ्गधरोनच सांप्रतंतप्यमानायाव्रतंकिंचिद्दिशस्वमे येनदुःखांवुपंकौघादुत्तरामिभवार्णवं एतत्तस्याश्चवहुशःश्रुत्वातिकरुणंवचः कारुण्यात्कथयामासवसिष्ठोमुनिसत्तमः वसिष्ठउवाच माघस्यसितसप्तम्यांसर्वकामफलप्रदं रूपसौभाग्यजननंस्नानंकुरुवरानने कृत्वाषष्ठ्यामेकभक्तंसप्तम्यांनिश्चलंजलं रात्र्यंतेचालयेथास्त्वंदत्त्वाशिरसिदीपकं माघस्यासितसप्तम्या मचलाचालितंचयत् जलंमलानांसर्वेषांस्मृतंप्रक्षालनंततः वसिष्ठवचनंश्रुत्वातस्मिन्नहनिभारत चकारेंदुमतीस्नानंदानंसम्यग्यथाविधि स्नानस्यास्यप्रभावेनभुक्त्वाभोगान्यथेप्सितान् इंद्रलोकेप्सरामध्येनायकात्वमुपागता अचलासप्तमीस्नानंकथितंतेविशांपते सर्वपापप्रशमनंसुखसौभाग्यवर्द्धनं ॥ युधिष्ठिरउवाच ॥ सप्तमीस्नानमाहात्म्यंश्रुतंकृष्णविशेषतः सांप्रतंश्रोतुमिच्छामिविधिं मंत्रसमन्वितं श्रीकृष्णउवाच एकभक्तेनसंतिष्ठेत्षष्ठ्यांसंपूज्यभास्करं सप्तम्यांतुप्रतिप्रातःसुगंभीरंजलाशयं सरित्सरस्तडागंवा देवखातमथापिवा सुखावगाहमन्वेष्टंदुष्टसत्वैरदूषितं व्यालांवुपक्षिभिश्चैवजलगैमत्स्यकच्छपैःनकेनचाल्यतेयावत्तावत्स्नानंसमाचरेत् सौवर्णेराजतेपात्रेभक्त्यालांवुमयेतथा तैलवार्त्तिस्तुदातव्यामहारंजनरंजिता महारंजनंकौसुंभं समाहितमनाभूत्वादत्त्वाशिरसिदीपकं भास्करंहृदयेध्यात्वाइमंमंत्रमुदीरयेत् नमस्तेरुद्ररूपायरसानांपतयेनमः वरुणायनमस्तेस्तुहरिवासनमोस्तुते जलोपरितरेद्दीपंस्नात्वासंतर्प्यदेवताः चंदनेनलिखेत्पद्ममष्टपत्रंसकार्णिकं मध्येशिवंसपत्नीकंप्रणवेनसमन्वितं शाक्रेदलेरविः पूज्यो भानुश्चैवानलेतथा याम्येविवस्वान्नैर्ऋत्येभास्करंपूजयेद्बुधः पश्चिमेसवितापूज्योतथार्कश्चानिलेदले सौम्येसहस्रकिरणःशैवेसर्वात्मने

नमःपूज्याःप्रणवपूर्वास्तु नमस्कारयुतास्ततःपुष्पैःसुगंधधूपैश्च पृथक्त्वेनयुधिष्ठिर विसर्गवस्त्रसंवीतंस्वस्थानंगम्यता
मिति विसर्ज्यतेसहस्रांशौसमागम्यस्वमालयं ताम्रपात्रेयथाशक्त्यामृण्मयेवाथभक्तिमान् स्थापयेत्तिलपिष्टंचसघृतं
सगुडंतथाकांचनंतालकंकृत्वाअशक्तास्तिलपिष्टकंसंछाद्यरक्तवस्त्रेणपुष्पैर्धूपैरथार्चयेत् ततस्तंचालयेद्विप्रंदद्यान्म
न्त्रेणतालकं आदित्यस्यप्रसादेन प्रातःस्नानफलेनच दुष्टदौर्भाग्यदमनंमयादत्तंतुतालकं पूजायित्वोपदेष्टारं
विप्रानन्यांश्चपूजयेत् ततोदिनेसमग्रेचभास्करध्यानतत्परः ताएवचकथाः शृण्वन्नन्यावाधर्मसंहिताः पाखं
डादिभिरालापंदर्शनस्पर्शनादिकं वर्जयेत्क्षपयेत्प्राज्ञस्ततोबंधुजनैः सह एतत्तेकथितंपार्थरूपसौभाग्यकारकं
अचलासप्तमीस्नानंसर्वकामफलप्रदं इतिपठतियइत्थंयःशृणोतिप्रसंगा त्कलिकलुषविनाशंसप्तमीस्नान
मेतत् इदमपिचजनानांयोददातिप्रयत्नात्सुरसदनगतोसौमोदतेचाप्सरोभिः इतिभविष्योत्तरोक्तमचलासप्त
मीव्रतम् ॥ अथोद्यापनकौमुदीप्रोक्तंसंक्षेपेणाचलासप्तमीविधानं तत्रमाघशुक्लषष्ठ्यां प्रातःस्नात्वा देशका
लौसंकीर्त्यममाखिलपापक्षयपूर्वकरूपसौभाग्यसर्वकामफलप्राप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थ मचलासप्तमीव्रतंक
रिष्यइतिसंकल्प्य भास्करंसंपूज्यस्वयमेकभक्तंकुर्य्यात् ततः सप्तम्यांसुगंभीरंजलाशयंतडागंदेवखातंन
दींवागत्वा नकेनापिचलितं जलमिक्षुदंडेन चालयित्वा सौवर्णेराजतेताम्रमयेपात्रेअशक्तावलाबु
मये कौसुंभरंजितवर्त्तितिलतैलप्रज्वालितंदीपंसंस्थाप्य सप्तार्कपत्राणिसप्तबदरीपत्राणिचसिरसिधृत्वाभास्करं
ध्यायन् इमंमंत्रमुदीरयेत् नमस्तेरुद्ररूपायरसानांपतयेनमः वरुणायनमस्तुभ्यंहरिवासनमोस्तुते इत्यु
क्त्वाजलेदीपंन्यसेत् ततः स्नात्वा देवताःसंतर्प्य तत्तीरेचंदनेनाष्टदलंविलिख्य तत्रपूर्वादिक्रमेण रविं १
भानुं २ विवस्वंतं ३ भास्करं ४ सवितारं ५ अर्कं ६ प्रभाकरं ७ सहस्रकिरणं मध्यउमासहितंशिवं

सप्त्रणवनाममंत्रैः संपूज्यविसृज्यचस्वगृहमागत्य तत्रताम्रपात्रेथवामृण्मयेघृतगुडयुततिलपिष्टयुतंसौवर्णं ता
ब्रपत्रंकर्णाभरणमिति भविष्योत्तरे रक्तवस्त्रेणाच्छाद्यसंपूज्य ब्राह्मणाञ्चालयेत् ततोब्राह्मणंसंपूज्य तत्सर्वंनिवे
दयेत् तत्रमंत्रः आदित्यस्यप्रसादेन प्रातःस्नानफलेनच दुष्टदौर्भाग्यदुःखघ्नंमयादत्तंहितालकं इतिपठित्वा
निवेदयेत् ततःसमग्रंदिनंहृदिभास्करंध्यायन् क्षपयित्वा वंधुजनैः सहभुंजीत इत्यचलासप्तमीव्रतविधिः अ
स्यामेवरथसप्तमीव्रतं भविष्योत्तरे कथंसाक्रियतेकृष्णमनुष्यैरथसप्तमी चक्रवर्त्तित्वफलदायाविख्यातात्वया
मम श्रीकृष्णउवाच आसीत्कांबोजविषयेयशोवर्म्मीनराधिपः वृद्धेवयसितस्यासीत्सर्वव्याधियुतःसुतः तत्क
र्मपाकंसोपृच्छद्विनीतोद्विजपुंगवं सचाहराजन्वैश्योयंक्षपणःपूर्वजन्मनि ददर्शरथसप्तम्यांक्रियमाणंव्रतंनृप व्रतद
र्शनमाहात्म्यादुत्पन्नोजठरेतव अदाताविभवेतस्मात्तेनायंव्याधितोभवत् ततःसराजापप्रच्छकिमेतस्यविधीयतांद्वि
जउवाच यस्यसंदर्शनाज्जातःपुत्रोयंतवसद्मनि तदेवक्रियतांराजन्रथसप्तमिसंज्ञितं व्रतंपापहरंयेनचक्रवर्त्तित्व
माप्यते राजोवाच ब्रूहिविप्रव्रतंकृत्स्नंसविधानंसमंत्रकं ईश्वराणांदरिद्राणांसर्वसंपत्प्रदायकं द्विजउवाच शुक्ल
पक्षेतुमाघस्यषष्ठ्यामामंत्रयेद्गृही स्नानंशुक्लतिलैःकार्यं नद्यभावेतुकुत्रचित् विमलेसलिलेराजन्विधितद्वर्णधर्मतः
देवादीन्पूजयित्वातुगत्वासूर्य्यालयंततः सूर्यंसम्यङ्नमस्कृत्य पुष्पधूपाक्षतैःशुभैः आगत्यभवनंपश्चात्पंचय
ज्ञांश्चनिर्वपेत् संतोष्यातिथिभृत्यांश्चबालवृद्धाश्रितान्स्वयं विद्यमानेदिनेश्नीयाद्वाग्यतः स्नैतलवर्जितं रात्रौ
विप्रंसमाहूयविधिज्ञंवेदपारगं संपूज्यनियमंकुर्य्यात्सूर्य्यमाधायचेतसि सप्तम्यांतुनिराहारोभूत्वाभोगविवर्जितःभो
क्ष्येष्टम्यांजगन्नेत्रनिर्विघ्नंतत्रमेकुरु इत्युच्चार्य्यनृपश्रेष्ठतोयंतोयेपुनिक्षिपेत् ततोविसृज्यतंविप्रंस्वपेद्भूमौजितेंद्रियः
ततःप्रातःसमुत्थायकृतावश्यःशुचिर्नरः कारयित्वारथंदिव्यंकिंकिणीजालमालिनं सर्वोपस्करसंयुक्तंरत्नैः सर्वांग

चित्रितं कांचनंराजतंवाथहयसारथिसंयुतं ततोमध्याह्नसमयेकृतस्नातादिकोव्रती अतिर्यग्वीक्षमाणस्तुपाखंडाला
पवर्जितः सौरसूक्तंजपन्प्राज्ञः समागच्छेत्स्वमालयं निवृत्तानन्यकार्य्यस्तुकृत्वाब्राह्मणवाचनं वस्त्रमंडापिकामध्ये
स्थापयित्वारथोत्तमं कुंकुमेनसुगंधेनचर्चयित्वासमंततः मालाभिःपुष्पदीपानांसमंतात्परिवेष्टयेत् धूपेनागुरुमि
श्रेणधूपयित्वातथोपरि रथेसंस्थापयेद्भानुंसर्वलक्षणलक्षितं वित्तानुरूपंहैमंचावित्तशाठ्यविवर्जितः शाठ्याद्व्रज
तिवैकल्पंवैकल्प्याद्विकलंफलं ततोदेवंसमभ्यर्च्यसरथंसहसारथिं पुष्पैर्धूपस्तथागंधैर्वस्त्रालंकारभूषणैः फलै
र्नानाविधैर्भक्ष्यैर्नैवेद्यैर्घृतपायसैः पूजयेद्भास्करंभक्त्यामंत्रैरेभिस्त्रिभिःक्रमात् भानोदिवाकरादित्यमार्त्तंडजगतां
पते अपांनिधेजगद्रक्षभूतभावनभास्कर प्रणतार्त्तिहराचिंत्यविश्वाचिंतामणेप्रभो विष्णोहंसादिदेवेशआदि
मध्यांतकारक भक्तिहीनंक्रियाहीनंमंत्रहीनंजगत्पते प्रसादात्तवसंपूर्णमर्चनंतादिहास्तुमे एवंसंपूज्यदेवेशं
प्रार्थयेत्स्वमनोगतं ददातिप्रार्थितोभानुर्भक्त्यासंतोषितोनरैः वित्तहीनोपिविधिनासर्वमेतत्प्रकल्पयेत् रथंस
सारथिंसाश्ववर्णकैर्भित्तिलेखितं सौवर्णंचतथाभानुंयथाशक्त्याप्रकल्पितं प्रागुक्तेनविधानेनपूजयित्वासुविस्तरं
जागरंकारयेद्रात्रौगीतवादित्रनिःस्वनैः प्रोक्षणीयैर्विचित्रैश्चपुण्याख्यानकथादिभिः रथयात्रांप्रपश्येतभानो
रायतनंश्रितः अनिमीलितनेत्रस्तुनयेत्तांरजनींबुधः प्रभातेविमलेस्नानःकृतकृत्यस्ततोद्विजान् अर्चयेद्वि
विधैःकामैर्दानैर्वासोविभूषणैः अश्वमेधेनतुल्यस्यादिदंब्रह्मविदोविदुः अतोदेयानिदानानियथाशक्त्याविचक्षणैः
रथंचगुरवेदद्यात्सर्वोपस्करसंयुतं रक्तंचवस्त्रयुगलंरक्तधेनुसमन्वितं एवंचीर्णेव्रतेराजन्किंनाप्नोतिजगत्त्रये तस्मा
त्सर्वप्रयत्नेनकुरुत्वंरथसप्तमीं येनारोगोभवेत्पुत्रस्त्वदीयोनृपसत्तम व्रतस्यास्यप्रभावेनप्रसादाद्भास्करस्यच
भविष्यतिमहातेजामहाबलपराक्रमः भुक्त्वाभोगान्सुविपुलान्कृत्वाराज्यमकंटकं दत्त्वासौरथसप्तम्यांमृते

त्वयिमहाभुजः उत्पाद्यपुत्रान्पौत्रांश्चसूर्यलोकंप्रयास्यति तत्रस्थित्वाकल्पमेकंचक्रवर्त्तीभविष्यति श्रीकृष्णउवाच इतिसर्वंसमाख्यायक्षितिपायद्विजोत्तमः यथागतंजगामासौनृपःसर्वंचकारह यदादिष्टंद्विजेंद्रेणतत्सर्वंसंबभूवह एवंसचक्रवर्त्तित्वंप्राप्तवान्नृपनंदन श्रूयतेयस्तुमांधातापुराणेषुपरंतप यइदंशृणुयाद्भक्त्यायश्चापिपरिकीर्तयेत् तस्मैप्रतुष्यतेभानुर्यच्छतेवाभयंसदा एवंविधंरथवरंरथवाजियुक्तंहैमंचहेमशतदीधितिनासमेतं तथाद्य माघसितसप्तमिवासरेयः सोभग्नचक्रगतिरेवमहींभुनक्ति इतिभविष्योत्तरेरथसप्तमीव्रतकथा यदासप्तमीहस्तर्क्षयुतास्यात्तदामहापूर्वारथसप्तमीभवति ॥ तदुक्तंहेमाद्रौमत्स्यपुराणे इत्येषाकथितावीररथाख्यासप्तमी परा महतीचसमाख्यातामहापातकनाशिनी तथाच शुक्लपक्षेतु सप्तम्यां यदार्क्षंतुकरोभवेत् तस्मात्सासुमहापुण्या सप्तमीपापनाशिनी तस्यांसपूज्यदेवेशं चित्रभानुंदिवाकरं सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः यश्चोपवासंकुरुतेतस्यांनियतमानसः सर्वपापविशुद्धात्मासूर्यलोकेमहीयते इतिमाघशुक्लायांसप्तम्यांरथसप्तमीव्रतं अस्याअनुष्ठानविधिरुद्यापनकौमुद्यां तत्रषष्ठ्यांप्रातः शुक्लतिलैर्नद्यादौस्नात्वा देवादीन्पूजयित्वासूर्यालयंगत्वासूर्यंनत्वा पुष्पधूपाक्षतैः संपूज्य गृहमागत्यअतिथिपूजादिकंविधाय विद्यमानेदिने अतैलभोजनंस्वयमश्नीयात् रात्रौविप्रंसमाहूय नियमंकुर्य्यात् सप्तम्यांचनिराहारोभूत्वाभोगविवर्जितः भोक्ष्येष्टम्यांजगन्नाथनिर्विघ्नंकुरुमेव्रतं इत्युच्चार्य्यसंकल्प्यजलंजलेक्षिपेत् विप्रंसंपूज्य भूमौस्वपेत्ततः सप्तम्यांप्रात अरुणोदयवेलायां हरिद्रामलकचूर्णमृत्तिकाभिः सहस्नात्वा कृतावश्यकःसौरसूक्तंचजप्त्वा गोमयोपलिप्तायांभूमौनदीतीरेगृहांगणेऽश्वत्थमूलेतुलसीवनेवावस्त्रादिभिर्मंडपंकृत्वा तन्मध्येवेदिकातदुपरिधातूनांरजोभिः कुंकुमेनवाअष्टदलंविधाय तदुपरि आरक्तवस्त्रंप्रसार्य्योपरिएकचक्रंतुरंगान्वितंसौवर्णंसोपस्करंरथं अशक्तौ राजतंसंस्था

प्यतदुपरिसूर्यमावाह्य तत्रध्यानं द्विभुजंशंखचक्राढ्यंपद्मासनसमन्वितं मुहूर्त्तसमयेसम्यग्ध्येयंनारायणंशुभं रक्तगंधाक्षतपुष्पगुग्गुलागुरुधूपैः पायसान्न नैवेद्यं एवंषोडशोपचारैःसंपूज्य तदग्रेधातूनांरजनीचूर्णेनवाष्टदलंपद्मंविरच्यपूर्वादिक्रमेण रविं आदित्यं सवितारं सितृत्रं खगपतिं सूर्यं भास्करं मित्रं मध्येनारायणंपूजयित्वा भक्तिहीनंक्रियाहीनंमंत्रहीनंजगत्पते प्रसादात्तवसंपूर्णंकृतंतचादिहास्तुमे इतिसंप्रार्थ्य स्ववाहुमूलेरवौप्राप्तेसतिस्वेष्टंप्रयोजनं रविंसंप्रार्थ्य दक्षिणाशिरस्कंधौतुवस्त्रेणाच्छाद्यसुखंस्वपेत् यावदुल्लंघ्यभास्करो गच्छेत्तावत्स्वप्नेयत्पूर्वंमनोभिलषितंकथयेत् ततउत्थायबालमुक्तासहितंगर्भंधातुरत्नपूर्णंदुकूलवेष्टितंसदक्षिणंसतांबूलंकूष्मांडंदद्यात् तदभावेमातुलिंगंकदंबंवा अकिंचनेनससारथिंरथंपंचवर्णकेनानिर्मायसौवर्णप्रतिमांपूर्ववदर्चयेत् ततोरात्रौजागरणंकृत्वाप्रातस्तत्सर्वंगुरवेदत्वागांचदद्यात् ततइष्टजनैःसहभुंजीतएवंव्रतकर्त्ताइह पुत्रपौत्रानुत्पाद्यांतेसूर्यलोकंयास्यतीतिकथायां अत्रापिस्नानविधिरचलासप्तमीविधिनाज्ञेयः इतिरथसप्तमीव्रतविधानं अस्यामेवभविष्योत्तरोक्तरथांकसप्तमीव्रतं हेमाद्रौ माघमासीत्यादिसप्तम्यामुपोष्यभानुंपूजयित्वावर्षांतेस्वर्णरथेसूर्यसंपूज्यब्राह्मणायदद्यादितिरथांकसप्तमीव्रतं इयमेवमहासप्तमी अस्यांपूपाभिधानसूर्यपूजाव्रतं शुक्लायांमाघसप्तम्यांपूपानाममहारविः आदित्यांकश्यपाज्जज्ञेसहस्रकिरणोमहान् तस्मात्तंपूजयेत्तत्रसोपवासोजितेंद्रियः अर्घ्यैः पुष्पैस्तथाधूपैर्दीपैर्भक्ष्यैर्मनोरमैः गीतैर्नृत्यैस्तथावाद्यैर्होमैर्ब्राह्मणतर्पणैः अपूप्यांचपुनर्भक्ष्यैर्भूयोमधुघृतादिभिः भक्ष्याणितानिदेयानिभक्षणीयानियानिवै इतिमाघशुक्लसप्तम्यांसूर्यपूजाव्रतम्

अस्यामेववाराहोक्तमारोग्यसप्तमीव्रतं वराहउवाच कथयामिमहापुण्यंसर्वपापप्रणाशनं तथैवमाघसप्त

स्यांसितायासमुपोषितः पूजयेद्भास्करंदेवंविश्वरूपंसनातनं आदित्यभास्कररवेभानोसूर्यदिवाकर प्रभाकरेतिसंपूज्योदेवःसर्वेश्वरोरविः षष्ठ्यांचैवकृताहारःसप्तम्यामुपवासकृत् अष्टम्यांचैवभुंजीतएषएवविधिःस्मृतः अनेनवत्सरंपूर्णंपूजयेद्विधिनारविं तस्यारोग्यंधनंधान्यमिहजन्मनिजायते अथास्यामेवरथसप्तमीव्रतं मदनरत्नेआदित्यपुराणे आदित्यउवाच माघमासेतुसप्तम्यांशुक्लायांसमुपोषितः यःपूजयेत्तुमांभक्त्यातस्याहंपुत्रतांव्रजे एवंचोभयसप्तम्यांमासिमासिसुरोत्तम यस्तुमांपूजयेद्भक्त्यासमैकमेकमादरात् समैकंवर्षमेकं प्रयच्छामिसुतंतस्यह्यात्मनोंशसमुद्भवं वित्तंयशस्तथापुत्रमारोग्यंपरमंपदं माघेमासेतुयोब्रह्मन्शुक्लपक्षेजितेंद्रियः पाखंडान्पतितानन्यानजल्पन्विजितेंद्रियः उपोष्यविधिवत्षष्ठ्यांश्वेतमाल्यविलेपनैः पूजयित्वातुमांब्रह्मन्वीरहोमंसमाचरेत् प्रीणयित्वाहरिंभक्त्याहविर्भिःपद्मलोचनं वीरहोममग्निहोत्रं हरिरत्रादित्यः दध्योदनेनपयसापायसेनाद्विजांस्तथा अनेनावशेषः तस्यैवकृष्णपक्षस्यषष्ठ्यांसम्यगुपोषितः तस्यैवेतिमाघमासस्य रक्तोत्पलैः सुगंधाढ्यैरक्तपुष्पैश्चपूजयेत् एवंयःपूजयेद्भक्त्यानरोमांविधिवत्सदा उभयोरपिदेवेंद्रसपुत्रंलभेतवरमिति पुत्रसप्तमीव्रतं इयंमाघशुक्लसप्तमीमन्वादिः तत्रमन्वादिगणोक्तंश्राद्धादिविधेयम् अथमाघशुक्लसप्तम्यारभ्य संवत्सरसाध्यंविशोकसप्तमीव्रतं हेमाद्रौ तत्रसूर्यंसंपूज्य अतैललवणंभुंजीत अस्यामेवारोग्यसप्तमीव्रतं तत्रसप्तम्यांउपवासादिकंकृत्वा अष्टम्यांपारणंकुर्यादिति अथभविष्योत्तरोक्तं द्वादशसप्तमीव्रतंभविष्ये श्रीकृष्णउवाच अथान्यत्तेप्रवक्ष्यामिसप्तमीकल्पमुत्तमं माघमासात्समारभ्यशुक्लपक्षेयुधिष्ठिर सप्तम्यांकृतसंकल्पोवर्षमेकंव्रतीभवेत् वरुणंमाघमासेतुभानुंसंपूज्यकारयेत् ब्रह्मकूर्चविधानंचयथाशक्त्यानृपोत्तम अष्टम्यांभोजयेद्विप्रांस्तिलपिष्टगुडोदनैः अग्निष्टोमस्ययज्ञस्यफलंकृत्स्नमवाप्यते ॥ १ ॥ तद्वच्चफाल्गुनेमा

सिसूर्यायेतिप्रपूजयेत् वाजपेयस्ययज्ञस्य यथोक्तंलभतेफलं सप्तम्यांचैत्रमासेतु वेदांशुरितिपूजयेत् उक्थ्याध्वरसमंपुण्यंनरःप्राप्नोत्यसंशयः वैशाखस्यतुसप्तम्यांधातारमभिपूजयेत् पशुबंध्वाध्वरंपुण्यंनरःप्राप्नोत्यसंशयम् ॥ ४ ॥ सप्तम्यांज्येष्ठमासेतुइंद्रमित्याभिपूजयेत् अश्वमेधफलावाप्तिर्जायतेनात्रसंशयः ॥ ५ ॥ तथाषाढस्यसप्तम्यांपूजयित्वादिवाकरं बहुस्वर्णस्ययज्ञस्यफलंप्राप्नोतिपुष्कलम् ॥ ६ ॥ आतपीतिश्रावणेचनाम्नादेवंप्रपूजयेत् सौत्रामणिफलंपार्थनरःप्राप्नोतिभारत ॥ ७॥ रविंभाद्रपदेमासिसप्तम्यामर्चयेच्छुचिः तुलापुरुषस्यसूक्तेनगुडेनफलमाप्नुयात् ॥ ८ ॥ अश्वयुक्शुक्लसप्तम्यांसवितारंप्रपूजयेत् गोसहस्रप्रदानस्यफलंप्राप्नोतिमानवः ॥ ९ ॥ कार्त्तिकेशुक्लसप्तम्यांसप्ताश्वंनामपूजयेत् योभ्यर्चयतिपुण्यात्मापुंडकस्यफलंभवेत् ॥ १० ॥ मार्गशीर्षेतथाभानुंपूजायित्वाविधानतः चतुर्णामपिवेदानांस्वाध्यायस्यफलंलभेत् भास्करंपौषमासेतुपूजायित्वाविधानतः राजसूयमखस्यापिफलभागीभवेन्नरः तथैवकृष्णसप्तम्यांनामपूजादिकंचयः सोपवासःप्रयत्नेन वर्षमेकं समाचरेत् पारितेनियमेपार्थयागंतत्रसमाचरेत् शुद्धभूमौशुभेदेशेरक्तचंदनलेपिते एकहस्तंद्विहस्तंवाचतुर्हस्तमथापिवा सिंदूरेणातिरागेणसूर्यमंडलमालिखेत् रक्तपुष्पैःपायसैश्चधूपैःकुंदुरकादिभिः संपूज्यदद्यान्नैवेद्यंविचित्रंघृतपाचितं पुरतःस्थापयेत्कुंभान्जलपूर्णान्सदक्षिणान् द्वादशात्रनृपश्रेष्ठरक्तवस्त्रान्सुचार्चितान् अग्निकार्य्यंततःकार्य्यंसम्यगर्च्यहुताशनं आकृष्णेनेतिमंत्रेणसामिद्भिश्चार्कसंभवैः तिलैराज्यगुडोपेतैर्दद्यादष्टशताहुतीः दक्षिणाचततोदेयाब्राह्मणेभ्यः पृथक् पृथक् देयानिरक्तवासांसिद्वादशानांद्विजन्मनां द्वादशान्नप्रशंसंतिगावावस्त्रादिभूषिताः छत्रोपानद्युतंचैवमेकैकस्मैप्रदापयेत् वित्तहीनोनशक्नोति दातुंद्वादशधेनवः एकाह्यपिसुशीलाच रक्तवर्णापयस्विनी उपदेष्ट्रेप्रदातव्यावित्तशाठ्यमकुर्वता

ततोविसृज्यतान्विप्रान्स्वयंभुंजीतवाग्यतः यएवंकुरुतेपार्थसप्तमीव्रतमादरात् नीरुजोरूपवान्वाग्मीशीलवान्जायतेनरः विशेषाद्दीर्घरोगेणग्रस्तःकुष्ठादिभिस्तुयः तेनकार्य्यंप्रयत्नेनव्रतमेतद्भुजापहं नह्यस्तिभास्करादन्यदौषधंरोगहानिदं भास्करैकगतिर्यस्तुसर्वभूतहितेरतः नस्यसंदर्शनात्स्पर्शाद्रोगहानिःप्रजायते कुतस्तुसूर्यभक्तानां रोगदौर्गत्यसंभवः जायतेभरतश्रेष्ठप्रत्यक्षेपरमेष्ठिनि सप्तम्याप्रतिमासंतुजन्मव्रतधरोहियः उपवासीरवेर्भक्तः सर्वभूतहितेरतः अष्टम्यांविप्रसाहितोहविष्यंभोजयेन्नरः एकादशीसमायस्मान्नित्यरूपातिसप्तमी सूर्यस्यमंडलं भित्वायातिब्रह्मसनातनं येसप्तमीमुपवसंतिसितासितांवानानाक्षरैरहिमदीधितिमर्चयंति तेसर्वरोगरहिताःसुखिनःसदेवभूत्वारवेरनुचराःसपुरेवसंति इदमुद्यापनयुक्तद्वादशसप्तमीव्रतंज्ञेयं अथभविष्यपुराणोक्तं सिद्धार्थकादि सप्तमीव्रतं तदुक्तंहेमाद्रौ माघेवामार्गशीर्षेवाकार्य्याशुक्लार्थसप्तमीत्यादि तत्रजलेसिद्धार्थकंकृत्वाप्राशयेदिति ।सिद्धार्थसप्तमीव्रतं अथात्रैवसूर्य्यारुणसंवादोक्ताःसप्तमीभेदाः अर्कसंपुटकैरेकाद्वितीयामरिचैस्तथा तृतीयानिंवपत्रैश्चचतुर्थीफलसप्तमी सप्तमीकामिकाज्ञेयाविधिंतासांनिबोधमे शुक्लपक्षेरविदिनेप्रवृत्तेचोत्तरायणे पुन्नामध्येये नक्षत्रेपूजयेच्चदिवाकरं उत्तरायणेमाघमासे पुन्नामनक्षत्राणिज्योतिःशास्त्रे हस्तोमैत्रस्तथापुष्योमृगशीर्षंपुनर्वसुः पुन्नामध्येयनक्षत्राण्येतान्याहुर्मनीषिणइति आसांफलानि अर्कसंपुटकैर्वित्तमलंसाप्तपौरुषं मारिचैःसंगमःस्यापिप्रियपुत्रादिभिःसदा सर्वेरोगाःप्रणश्यंतिनिंवपत्रैर्नसंशयः फलैश्चपुत्रपौत्राश्चदौहित्राश्चापिपुष्कलाः अन्नोदकंघृतंधान्यंसुवर्णरजतंतथा तथायशोहिरण्यंचआरोग्यंसंततिर्नृप उपोष्यविजयांशत्रून्राजाजयतिनिश्चितं साधयेत्सर्वकामानिविधिवद्युपासिता पुत्रादीन्सर्वानित्यर्थः अथविजयासप्तमीव्रतंहेमाद्रौ भविष्योत्तरे माघेमासेसितेपक्षेसप्तम्यांकुरुनंदन निराहारोरविंभक्त्यापूजयेद्विधिनानृप पूर्वोक्ते

नजपेज्जप्यंदेवस्यपुरतःस्थितःवायोवालिषुभद्रंतेसुभद्रेतस्तुवैसदौ ममापकुरुभंद्रवप्राशनाच्छत्रुहाभव अनेनमंत्रेणपीतपवनोरात्रिमतिवाह्याद्वितीयेह्निपारणंकुर्य्यात् इतिविजयासप्तमीव्रतं अथनानासप्तमीव्रतानि हेमाद्रौ सुमंतुरुवाच यःक्षिपेदेकभक्तेनशुक्लाद्वादशसप्तमी राजेंद्रयावकाहारःशीर्णपर्णाशनोपिवा क्षीराशीचैकभक्तोवाभिक्षाहारोथवापुनः जलाहारोर्थवाभूत्वापूजयित्वादिवाकरं एवंभक्त्याविवस्वंतंप्रतिमासंसमाहितःपूजयेद्विधिवद्भक्त्यानामानिपरिकीर्त्तयेत् तत्रनामानिचैत्रादिक्रमेण मधौविष्णुः माधवे अर्य्यमा शुक्रेविवस्वान्शुचौ दिवाकरः श्रावणेपर्जन्यः नभस्येवरुणः अश्वयुजेमित्रः कार्त्तिकेमार्त्तंडः मार्गशीर्षेअंडजः पौषेपूषा माघेभगःफाल्गुनेत्वष्टेति इतिभविष्योत्तरोक्तंगोमयादिसप्तमीव्रतं अथोदकसप्तमीव्रतं उदकप्रसृतिपीत्वाक्रियते याचसप्तमी सैवोदकसप्तमीस्यात्सर्वदासर्वकामदेत्युदकसप्तमी वराटकासप्तमी हेमाद्रौ वराटत्रयमूल्येनयावदन्नादिलभ्यते तदेवभक्ष्यंकल्पयित्वा उपोषणंकुर्य्यादितिभविष्योत्तरे वराटकासप्तमीव्रतं अथसप्तमीमात्रेआदित्यमंडकव्रतं तत्ररक्तचंदनजेमंडलेसूर्यंसंपूज्य साहिरण्यंसवस्त्रंमंडकंदद्यात् तत्रमंत्रः आदित्यतेजसोत्पन्नंराज्ञीकरविनिर्मितं श्रेयसेभक्ष्याविमलंप्रतीच्छापूपमुत्तमं प्रतिग्रहमंत्रः कामदंधनदंधर्म्यंपुत्रदंसुखदंतथा आदित्यप्रीतयेदत्तंप्रतिगृह्णामिमंडकं एवंप्रतिसंवत्सरंकर्त्तव्यमिति इत्यादित्यमंडकव्रतं माघशुक्लाष्टम्यां भीष्माष्टमीव्रतं नारदीये माघमासेसिताष्टम्यांभीष्मंसंतर्प्पयेद्द्विज संततिंप्राप्यविच्छिन्नामिच्छंश्चैवापराजयं पाद्मेपि माघमासिसिताष्टम्यांसतिलंभीष्मतर्पणं श्राद्धंचैवतुयेकुर्य्युस्तेस्युःसंततिभागिनइति अत्र श्राद्धंकाम्यं तर्पणंतुकाम्यंनित्यमपि ब्राह्मणाद्याश्चयेवर्णादद्युर्भीष्मायनोजलं संवत्सरकृतंतेषांपुण्यंनश्यतिसत्तमेति इतिमदनरत्नवचनात् इदंचजीवत्पितृकेनापिकार्य्यं जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोः

रितिपाद्मवचनात् यत्तुसपितुःपितृकार्य्येषुनाधिकारःकथंचनेतिनिषेधः सत्वेतद्व्यतिरिक्तपितृकार्य्यपरः एतच्चापसव्येनतेनापिकार्य्यमितिनिर्णयसिंधौ दिवोदासीये मंत्राश्चमहाभारते भीष्मःशांतनवोवीरःसत्यवादी जितेंद्रियः आभिरद्भिरवाप्नोतुपुत्रपौत्रेप्सितांगतिं वैयाघ्रपदगोत्रायसांकृतिप्रवरायच अपुत्रायददाम्येतत्सलिलंभीष्मवर्मणे वसूनामवतारायशंतनोरात्मजायच अर्घ्यंददामिभीष्मायआवालब्रह्मचारिणे ॥ माघशुक्लनवमीमहानंदाप्रोक्ता नारदीये माघेमासेतुयाशुक्लानवमीलोकापूजिता महानंदेतिसाख्यातामहानंदकरी नृणां तस्यांस्नानंतथादानंजपोहोमउपोषणं सर्वमक्षयतांयातिनात्रकार्य्याविचारणेति ॥ माघशुक्लदशम्यामांगिरसदेवानांपूजोक्ता नारदीये माघशुक्लदशम्यांतुसोपपासोजितेंद्रियः देवानांगिरसोनामदशसम्यक्प्रपूजयेत् कृत्वास्वर्णमयान्विप्र गंधाद्यैरुपचारकैः आत्माह्यायुर्मनुर्दक्षो मदःप्राणस्तथैवच हविष्मांश्चगविष्ठश्चदत्तःसत्यश्चतेदश दशविप्रान्भोजयित्वामधुरान्नेननारद मूर्तीस्तेभ्यःप्रदद्यात्ताःस्वर्गलोकाप्तयेक्रमात् इत्यांगिरसदशमीव्रतं ॥ अथारोग्यदशमीव्रतं सनत्कुमारउवाच अथत्वंशृणुदेवर्षेदशमीव्रतमुत्तमं सर्वरोगारिशमनंसर्वपुष्टिप्रदंशुभं व्रतमेतन्महाबुद्धेकार्य्यमारोग्यमिच्छता सर्वदाकार्य्यमेतद्धिलिप्सताचिरजीवितं उपवासश्चकर्त्तव्योनवम्यामपिमानद दशम्यांचकृतस्नानोमंगलायतनंहरिं देवमिंदिरयासार्द्धंध्यात्वाचजगतांपतिं वैनतेयभुजाशक्तंवनमालाविभूषितं शंखचक्रगदापद्मशार्ङ्गासिधरमच्युतं फलैश्चमधुरैःपुष्पैःपायसेनसमर्चयेत् अग्रतःस्थापयेत्कुंभंतीर्थसंत[illegible]पूरितं तस्मिन्नावाहयेत्पंचचक्रादीन्यायुधानिच चक्रगदामुशलधनुःशार्ङ्गाणीतिहेमाद्रिः पूजयेद्रक्तकुसुमैर्गुडान्नेनसमाहितः द्रोणमात्रातिलैरब्जंकारयेदजिनोपरि तस्मिन्नष्टदलंपद्मंसौवर्णंहिनिधायचमनः षष्ठानींद्रियाणिप्राणबुद्धिदलेष्वथकर्णिकायांतथाकालं क्रमेणैवंसमर्चयेत्

व्र०र०
माघ०
॥२०॥

42

मनःश्रोत्रंचत्वक्चक्षुर्जिह्वाघ्राणप्राणोबुद्धिरितिक्रमात् पूर्वादिदलेषु अनामयानितिष्ठंतुप्राणाश्चाचिरसांस्थिताः अनाकुलाचमेबुद्धिः सर्वैस्युर्निरुपद्रवः मनसाकर्मणावाचामयाजन्मनिजन्मनि संचितंक्षपयत्वेनःकालात्माभगवान्हरिः इतिसंप्रार्थ्यदद्याद्गुरवेसदक्षिणमुपस्करं दत्त्वा ब्राह्मणान्पायसादिसदन्नेनभोजयित्वा आचार्य्येणमंत्रपारायणपुरःसरंस्नात्वाततोअवशिष्टेनान्नेन गुर्वनुज्ञापुरःसरंबांधवैःसहभुक्त्वानियमानुत्सृजेत एवंकृतेक्षिप्रमारोग्यंभवतीति गरुडपुराणोक्तमारोग्यदशमीव्रतम् ※ अत्रशुक्लदशमीध्यानंवीरमित्रोदये हेमाद्रौ सिंहासनस्थिताशुभ्रादशमीपीतकुंडला ज्ञानमुद्राभयाचेयंपीतवस्त्राब्जमालिनी १ कृष्णवर्णालुलायस्थादशमीदंडपात्रिणी अथविष्णुधर्मोत्तरोक्तं धर्मव्रतत्रयं शुक्लपक्षेदशम्यां कार्य्यं मार्कंडेयउवाच शुक्लपक्षेदशम्यांचसोपवासस्तुमानवः धर्मंसंपूजयेद्देवंसर्वलोकसुखावहं मार्गशीर्षादथारभ्यनित्यमेतदरिंदम ततोगंधनमस्कारधूपदीपान्नसंपदा संपूज्यसर्पिषावह्नौहुत्वाविप्रान्प्रपूजयेत् व्रतांतेपयस्विनींगांदत्त्वाश्वमेधफलंप्राप्नोति कृष्णपक्षेतथाप्येतत्कृत्वासंवत्सरंव्रतं राजसूयमवाप्नोतिकुलमुद्धरतेः स्वयं कृत्वापक्षद्वयेप्येतद्व्रतंमनुजसत्तम राजसूयाश्वमेधाभ्यांफलंप्राप्नोत्यसंशयं इदंव्रतंशुक्लायां कृष्णायां द्वयोर्वैतित्रीणिव्रतानिच स्वर्गलोकमवाप्नोति कुलमुद्धरतिस्वकं धर्मेमतिर्भवेत्तस्यधर्मंप्राप्नोतिमानवः यत्रयत्राभिजायेततत्रधर्मपरोभवेत् आरोग्यमायुष्यकरंयशस्यंज्ञानप्रदंपापविनाशकारि कर्त्तव्यमेतत्पुरुषैर्यथावत्पूज्योहिविष्णुर्भगवान्सधर्मः इतिविष्णुधर्मोत्तरोक्तंधर्मव्रतत्रयं अथभविष्योत्तरेयमव्रतं दशम्यांयमउद्दिष्टः सर्वव्याधिहरोध्रुवं मूलमंत्राःस्वसंज्ञाभिरंगमंत्राश्चकीर्त्तिताः मूलमंत्राः प्रधानमंत्राः अंगमंत्राःपरिवारदेवतामंत्राः पद्मपत्रेषुपरिवारसहितंकर्णिकास्थंतिथीशंकृत्वा गंधादिभिःसंपूज्य समित्क्षीरान्नदधिमाक्षिकादिकैः

होमंकुर्य्यात् अत्रादौपूजा ततोघृताक्तधान्यहोमस्ततआज्यधारादिहोमः इतिभविष्योत्तरोक्तंयमव्रतं * अथविश्व
व्रतम् पुलस्त्यउवाच दशम्यामेकभक्ताशीसमांतेदशधेनवः दिशश्चकांचनीर्दद्यान्नारीरूपामहीपते तिल
द्रोणोपरिगताः सार्वभौमोभवेन्नृपः एतद्विश्वव्रतंनाममहापातकनाशनं इतिपद्मपुराणोक्तंविश्वव्रतम् अथद
शादित्यव्रतम् कश्यपउवाच भानुवारेसितेपक्षेदशम्यांचैवनारद प्रातःकालेथमध्यान्हेस्नानंकुर्य्याद्यथाविधि
स्नात्वानद्यांदेवखातेतीर्थेप्रस्रवणेतथा विधायनित्यकर्माणि तर्पयेत्पितृदेवताः ततआगत्यस्वगेहेस्थंडिलं
कारयेच्छुभम् तस्योपरिन्यसेत्पद्मंद्वादशारंप्रकीर्त्तितम् ततः पूजाप्रकर्त्तव्यागभस्त्वरनुक्रमेणच सूर्यपूजनं
सौरमंत्रैरावाहनादिषोडशोपचारैःकार्य्यं तद्यथा नमः सवित्रे आवाहनम् आसनं पाद्यं अर्घ्यं आच
मनं स्नानं वस्त्रं यज्ञोपवीतं गंधाक्षतपुष्पधूपदीपनैवेद्यफलतांवूलदक्षिणाश्चविसर्जनम् ततोदुर्मुखादिपूजनम
कृष्णवर्णादशपुत्रिकाःकुर्य्यात् दुर्मुखायैनमः दीनवदनायैनमः मलिन्यैनमः सुवुद्धिनाशिन्यैनमः हिं
स्रायैनमः दुष्टायैनम मित्रविरोधिन्यैनमः उच्चाटकारिण्यैनमः बहुचिंताप्रदायैनमः एभिर्नाममंत्रैः प्र
तिष्ठांपूजांचकृत्वा गोमयेनलेपयेत् ततः प्रार्थना नित्यपापकरेपापेदेवद्विजविरोधिनि गच्छत्वंदुर्दशेदेवि
नित्यंशास्त्रविरोधिनि इतिविसर्जनम् दशग्रंथिसमायुक्तंदशसूत्रोपशोभितं डोरकंतुप्रतिष्ठाप्यकरेबध्वाप्र
पूजयेत् सौरमंत्रेणषोडशोपचारैर्डोरकपूजनम् ततः क्षमापयेद्देवंभास्करंचदिशाकरं दुर्दशानाशनंदेवांचित
येद्विश्वरूपिणम् अनेननमस्कारैः [illegible]ायनमंत्रः ॥ फलानांदशकंदद्याच्छ्रोत्रियायकुटुंविने दक्षिणासहितंते
नप्रीतोभवदिवाकर भास्वरविवुद्धिदाताचद्रव्यस्थोभास्करः स्वयं भास्करस्तारकोभाभ्यांभास्करायनमोस्तुते
अनेनवायनदानम् अथदशापूजनम् कुड्यस्थानेचंदनेनकारयेद्दशपुत्रिकाः सुवुद्धिदायिन्यैनमः सुखका

रिण्यैनमः सर्वसंपत्तिदायैनमः इष्टभोगप्रदायैनमः लक्ष्म्यैनमः कांतिदायैनमः दुःखनाशिन्यैनमः पुत्रदायैननः विजयायैनमः धर्मदा[illegible]यैनमः एभिर्नाममंत्रैः षोडशोपचारपूजांकृत्वा अथप्रार्थना विशुद्धवसनांदेवींसर्वाभरणभूषितां ध्याये परांदेवींवरदामभयप्रदाम् इतिध्यानम् इत्येवंपूजनंकुर्य्यात् अथकथा सूतउवाच मेरुपार्श्वेभद्रपीठेसुखासीनंजगद्गुरुं कश्यपंसृष्टिकर्त्तारंतापसंशुद्धमानसं नारदोवैष्णवश्रेष्ठस्त्रैलोक्यभ्रमणप्रियः कदाचिद्दुर्दशांप्राप्तःकश्यपंशरणंगतः नारदउवाच देवदानवगंधर्वाऋषिपन्नगमानवाः स्त्रष्टासिसर्वभूतानांधर्मोधर्मवतांवर दुष्टग्रहाभिभूतानांदुर्दशाहतचेतसां स्तुत्वाविज्ञापयामीहकश्यपंधर्मवत्सलम् कश्यपउवाच देवानांदुर्दशाचैवजायतेब्रह्मवादिनां प्रसन्नोहंमुनिश्रेष्ठलोकानांहितकाम्यया नारदउवाच देवदानवगंधर्वामानवाश्चविशेषतः प्राप्तास्तुदुर्दशांकेनकेनमुक्ताभवंत्युत कश्यपउवाच साधुपृष्टंमहाभागजगदानंदकारकं वक्ष्येसौरव्रतंपुण्यंदुर्दशानाशनंपरं दशाकरंहिभूतानांमनोरथफलप्रदं भानुवारेसितेपक्षेदशम्यांचैवनारद प्रातःकालेथमध्याह्नेस्नानंकुर्य्याद्यथाविधि भानुंध्यायेत्त्रिमूर्तिंचसर्वदैन्यविनाशनं सूर्यपूजाप्रकर्त्तव्यातथागंधानुलेपनैः उपचारैःषोडशभिर्नैवेद्यैस्तुफलादिभिः वहिर्देशेलिखेत्कृष्णादुर्दशादशपुत्रिकाः पूजयेत्ताःप्रयत्नेन गंधपुष्पादिभिर्बहिः पूजयेद्दुर्दशास्तत्रलिखित्वादशपुत्रिकाः दुर्मुखादीनवदनामलिनीसत्वनाशिनी सुवुद्धिनाशिनीहिंस्त्रादुष्टामित्रविरोधिनी उच्चाटनकरीनामबहुचिंताप्रवर्धिनी एताः पुज्याःकृष्णवर्णा भक्तियुक्तेनचेतसा आदौपूज्याःप्रयत्नेन गोमयेनानुलेपयेत् नित्यपापकरेपापेदेवद्विजविरोधिनि गच्छत्वंदुर्दशेदेविनित्यंशास्त्रविरोधिनि अनेनप्रार्थ्यमानाश्चविसर्ज्याश्चप्रयत्नतः ततःपूजाप्रकर्त्तव्याडोररूपधरस्यच दशग्रंथिसमायुक्तंदशसूत्रोपशोभितं डोरकंतुप्रतिष्ठाप्यकरेवध्वाप्रपूजयेत् आवाह

नादिदानांतंपूजनंकारयेत्ततः भक्तिभावेचंदनेनलेखयेद्दशपुत्रिकाः सुवुद्धिदासुखकरीसर्वसंपत्प्रदायिनी इष्टभोगप्रदालक्ष्मीः कीर्त्तिदादुःखनाशिनी पुत्रप्रदाचाविजया दशमीधर्मदायिनी एताभिर्नाममंत्रैश्चपूजयेच्चपृथक्पृथक् प्रतिष्ठापूजनंकुर्य्यान्नैवेद्यंचयथाविधि ततःप्रार्थ्यक्षमाप्यैव भक्तानुग्रहकारिणीं विशुद्धवसनांदेवींसर्वाभरणभूषितां ध्यायेद्दशदशां देवींवरदांचाभयप्रदां इतिध्यानंप्रकुर्वीतदशायास्तुप्रयत्नतः फलकैर्दशसंख्याकैर्भुंजीततैलपाचितैः एवंव्रतंप्रकर्त्तव्यंदशाकारकमुत्तमम् नारदउवाच कथयस्वप्रसादेनव्रतमेतत्तपोधन दशाव्रतंकृतंकेनकस्यतुष्टोहिभास्करः कश्यपउवाच पुराभून्नलभूपालश्चक्रवर्त्तीसधार्मिकः राज्यभ्रष्टोदशाहीनोह्येतैनैवहिनारद तेनापिपूजितः सूर्य्योव्रतंकृत्वाप्रयत्नतः दुर्द्दशांनाशयित्वातुप्राप्तराज्यश्रियास ततश्चद्वापरेविप्रपांडवोदुर्दशान्वितः भ्रममाणंवनेघोरे प्राप्तंसत्यवतीसुतं अभिवाद्यमुनिश्रेष्ठंसर्वज्ञंकरुणान्वितं धर्मराजउवाच राज्यभ्रष्टोदशाहीनो जातोहंकेनकर्मणा प्रत्युपायंहितंब्रूहिराज्यप्राप्तिकरंमुने क्षणंध्यात्वामुनिश्रेष्ठोदृष्ट्वासूर्य्यंदशाकरं दशाव्रतंप्रकर्त्तव्यंप्रयत्नेननराधिप एतद्व्रतस्यसामर्थ्यात्प्राप्स्यसेवसुधामिमाम् व्यासस्यवचनंश्रुत्वाधर्मराजोयुधिष्ठिरः व्रतंकृत्वाप्रयत्नेनचतुर्भिर्भ्रातृभिःसह व्रतस्यतस्यसामर्थ्यात्प्राप्तराज्योबभूवह श्रुत्वैवंनारदोवाक्यं पुनःपप्रच्छसारवित् नारदउवाच केनकर्मविपाकेनदुर्दशाप्राप्यतेनरैः जायतेमुनिशार्दूलतत्त्वतस्त [illegible] कश्यपउवाच तुषभस्मास्थिमुशलंकदाचिल्लंघयेन्नरः कुमारींरजकींवृद्धांपशुयोनिंव्रजेद्यदा [illegible]रः [illegible]गुदगामीचब्राह्मणीगमनेनच संध्यासुपर्वसमयेरमतेचरजस्वलां पितृमातृपरित्यागीस्वामिनंसंकटेत्यजेत् त्यजेद्वाधर्मपत्नींचदुर्दशाप्राप्यतेनरैः तस्मात्सर्वप्रयत्नेनन्यायमार्गरतोभवेत् आयुर्दशाततोराज्यंन्यायमार्गेणवर्तते इतिस्कंदपुराणेकश्यपनारदसंवादेदशादित्यव्रतम् ⊛ ॥

व्र०र०
माघ ०
॥२२॥

पक्षद्वयगतासुसर्वास्वपिदशमीषुतिथिपत्वेनांतकःसदापूज्यः इतिदशमीव्रतम् माघशुक्लाजयैकादशीव्रतं नारदीये माघशुक्लैकादशींतुजयाख्यांसमुपोष्यवै प्रातर्हरिदिनेभ्यर्च्चेत्श्रीपतिंपुरुषोत्तमं भोजयेद्दक्षिणांदत्वाविप्रान्विसृज्यचस्वयं ततोभुंज् [illegible] प्रयतोनिजबांधवैः यएवंकुरुतेविप्रव्रतंकेशवतोषणं सभुक्त्वेहवरान्भोगानंतेविष्णुपदंव्रजेत् अथास्याःकथा॥ [illegible] धीष्ठरउवाच ॥ साधुकृष्णपरंब्रह्मन्नादिदेवजगत्प्रभो स्वेदजाश्चांडजाश्चैवउद्भिजाश्चजरायुजाः तेषांकर्त्ताविकर्त्तात्वंपालकः क्षयकारकः माघस्यकृष्णपक्षेतुषट्तिलाकथितात्वया शुक्लाचैकादशीयाचकथयस्वप्रसादतः किंनामकोविधिस्तस्याः कोदेवस्तत्रपूज्यते ॥ श्रीकृष्णउवाच ॥ कथयिष्यामिराजेंद्रशुक्लामाघस्ययाभवेत् जयानामेतिविख्यातासर्वपापहरापरा पवित्रापापहर्त्रीचकामदामोक्षदान्नृणां ब्रह्महत्यापहंत्रीचपिशाचत्वविनाशिनी नैवतस्याव्रतेचीर्णेप्रेतत्वंजायतेनृणां नातःपरतराकाचित्पापघ्नीमोक्षदायिनी एतस्मात्कारणाद्राजन्कर्त्तव्येयंप्रयत्नतः श्रूयतांराजशार्दूलकथांपौराणिकींशुभांपंकजाख्येपुराणेचमहिमाकथितामया एकदानाकलोकेवाइंद्रोराज्यंचकारह देवास्तत्रसुखेनैवनिवसंतिमनोरमे पीयूषपाननिरताअप्सरोगणसेविताः नंदनाख्यंवनंतत्रपारिजातोपशोभितं रेमुस्तत्रसमंताच्चअप्सरोभिर्दिवौकसः एकदाररममाणोसौदेवेंद्रःस्वेच्छयानृप वर्त्तयामासहर्षात्तुपंचाशत्कोटिनायकः गंधर्वास्तत्रगायंतितन्मध्येपुष्पदंतकः चित्रसेनस्तुनाम्नावैतत्रास्तेतत्सुतस्तथा मालिनीतिचनाम्नातुचित्रसेनस्ययोषिता मालिन्यांतुसमुत्पन्नाकन्यापुष्पवतीशुभा पुष्पदंतस्यपुत्रोवैमाल्यवान्नामनामतः पुष्पवतीचतेनैवमाल्यवतातुमोहिता कामबाणैःसुतीक्ष्णैश्चविद्धांगीसाबभूवह तयाहावैःकटाक्षैश्चमाल्यवांश्चवशीकृतः लावण्यरूपसंपन्नातस्यारूपंनृपशृणु बाहूतस्यास्तुकामेनकंठपाशीकृताविव चंद्रवद्वदनंतस्यानेत्रेकर्णायतेतथा कर्णौसंशोभितौतस्याः

कुंडलाभ्यांनृपोत्तम कंबुग्रीवायुतासैवदिव्याभरणभूषिता पीनोन्नतौकुचौतस्यामुष्टिग्राह्यंतुमध्यमं नितंबोविपुलस्तस्याविस्तीर्णंजघनस्थलं चरणौशोभमानौचरक्तोत्पलसमद्युती गायमानौचतौतत्रअप्सरोगणसंगतौमदनातिपरीतांगौपरस्परवशानुगौ परस्परानुरागेणमोहितौमदविह्वलौ मघवंतंनजानीतःकाममार्गेणमोहितौ नरागशुद्धिमायातौकामस्यवशवर्तिनौ कुपितोमघवानाहमाल्यवंतंसुरागिणं धिक्त्वांपापंदुराचारंयस्यपापेरतामतिः अशपच्चातिकोपात्सामाल्यवंतंपुरंदरः पिशाचत्वंगच्छमूढमाल्यवत्यासहानया एवंशप्तौतुशक्रेणपेततुर्धरणीतले मर्त्यलोकमनुप्राप्तौभुंजानौकर्मणःफलं एवंमघवताशप्तौचातिदुःखितमानसौ हिमवंतंगिरिंप्राप्ताविंद्रशापविमोहितौ उभौपिशाचतांप्राप्तौदारुणंदुःखमेवच संतप्तमानसौतत्रमहादुःखगतावुभौ गंधर्वत्वंचाप्सरात्वंनजानीतौहिमोहितौ पीड्यमानौनिदाघेनतुषारपवनेनच दंतघर्षंप्रकुर्वाणौरोमांचितवपुर्धरौ सपिशाचस्तदाप्राहस्वांतुपत्नींपिशाचिकां किमावाभ्यांकृतंपूर्वंपापंवैलोमहर्षणं येनप्राप्तंपिशाचत्वंदुःखंदुःकृतकर्मणा नराणामधमंमत्वापिशाचत्वाच्चदुःखितौ तस्मात्सर्वप्रयत्नेनपापंनैवसमाचरेत् इतिचिंतापरौतत्रसंजातौदुःखकर्षितौ दैवयोगात्तयोः प्राप्तामाघस्यैकादशीसिताजयानामेतिविख्यातातिथीनामुत्तमातिथिः तस्मिन्दिनेतुतौपार्थसर्वाहारविवर्जि[illegible] चिंतयानौचनृपतेजलपानविवर्जितौ नकृतोजीवघातोहिनपत्रफलभक्षणं अश्वत्थस्यसमीपेतुपतितौदुःखसं[illegible] रविरस्तंगतोराजंस्तथैवास्थितयोस्तयोः संप्राप्ताचानिशाघोरादारुणाशीतकारिणी वेपमानौ[illegible]सुखार्थंमिथुनीकृतौ परस्परेणसंलग्नगात्रयोर्भुजयोरपि ननिदानरतिस्तत्रनतौसौख्यमविंदतां एवंतौराज शार्दूलशापेनेंद्रस्यपीडितौ एवंतयोर्दुःखितयोर्निजगामतदानिशा मार्त्तंडस्योदयोजातोद्वादशीदिवसागमे मयातुराजशार्दूलतयोर्भक्तिर्धृताहृदि जयायास्तुव्रतेचीर्णेरात्रौजागरणेकृते त

स्माद्व्रतप्रभावाच्चयथाह्यासीत्तथाशृणु द्वादशीदिवसेप्रातः प्राकीर्णेतुप्रजायते विष्णोः प्रभावान्नृपते पिशाचत्वंतयोर्गतं पुष्पवतीम ंश्चपूर्वरूपौबभूवतुः पुनस्ततः स्नेहयुतौपूर्वालंकारधारिणौ विमानमधिरूढौताअप्सरोगणसेवितौ वन्यसेद्दव ंधर्वैस्तुंवुरुप्रमुखैस्तथा हावभावसमायुक्तौगतौनाकेमनोरमे देवेंद्रस्याग्रतोराजन्प्रणामंचक्रतुर्मुदा शंब्राह्म धौतुतौदृष्ट्वामघवाविस्मितोब्रवीत् वदतांकेनपुण्येनपिशाचत्वंविनिर्गतं ममशापवशंप्राप्तौकेनदेवेनमोचितौ लं माल्यवानुवाच वासुदेवप्रसादेनजयायास्तुव्रतेनच पिशाचत्वंगतंस्वामिंस्तवभक्तिप्रभावतः प्रतिश्रुत्यवचस्तस्यप्रत्युवाचसुरेश्वरः पवित्रपावनौजातौवंदनीयौममापिच हरिवासरकर्त्तारौविष्णुभक्तिपरायणौ हरिवासरकर्त्तारोविष्णुभक्तिपराश्चये अस्माकमपितेमर्त्याः पूज्यावंद्यानसंशयः विचचारयथासौख्यंपुष्पवत्यासुरालये एतस्मात्कारणाद्राजन्कर्त्तव्योहरिवासरः जयाव्रतंतुराजेंद्रब्रह्महत्यापहारकं सर्वदानानिदत्तानियज्ञास्तेनकृतान्नृप सर्वतीर्थेषुसुस्नातःकृतंयेनजयाव्रतं यःकरोतिनरोभक्त्याश्रद्धायुक्तोजयाव्रतं कल्पकोटिशतंयावद्वैकुंठेमोदतेध्रुवम् पठनाच्छ्रवणाद्राजन्नग्निष्टोमफलंलभेत् * इतिभविष्योत्तरेपद्मपुराणेचमाघशुक्लाजयैकादशीव्रतकथा इयंकल्पांतरेभीमसेनोपोषिताभीमसेनेतिचलोकेविख्याताऽस्याःकथापुराणांतरेज्ञेया अथात्रैव वाराहद्वादशीव्रतं वाराहपुराणे दुर्वासाउवाच एवं माघेसितपक्षेद्वादशींधरणीभृतः वाराहस्यशृणुष्वास्यां पुण्यंपरमपावनं प्रागुक्तेनविधानेनसंकल्पंस्नानमेवच कृत्वादेवंसमभ्यर्च्यएकादश्यांविचक्षणः पुष्पैर्नैवेद्यगंधैस्तमर्चयित्वाच्युतंनर पश्चात्तस्याग्रतःकुंभंजलपूर्णंतुविन्यसेत् वाराहायेतिपादौचमाधवायेतिवैकटिं क्षेत्रज्ञायेतिजठरंविश्वरूपे ुरोहरेः सर्वज्ञायेतिवैकंठंप्रजानांपतयेशिरः प्रद्युम्नायेतिचभुजौदिव्यास्त्रायसुदर्शनं अमृतोद्भवायशंखंचएषएवार्चनेविधिः एवमभ्यर्च्यमे-

धावीतास्मिन्कुंभेतुविन्यसेत सौवर्णंरौप्यताम्रंवाशक्त्यापात्रंचभक्तितः सर्वबीजैस्तुसंपूर्णंस्थापयित्वाविचक्षणः तत्रशक्त्यातुसौवर्णंवाराहंस्थापयेद्बुधः दंष्ट्राग्रेणोद्धृतापृथ्वीसपर्वतवनद्रुमा माधवंमधुहंतारंवाराहंरूपशालिनं सितवस्त्रयुगच्छन्नंताम्राभावेतुवैणवे स्थाप्यार्चयेद्गंधपुष्पैर्नैवेद्यैर्विविधैःफलैः पुष्पमंडपिकांकृत्वाजागरंतत्रकारयेत् प्रादुर्भावान्हरेस्तत्रकारयेद्गापयेद्बुधः एवंसंस्तूयमानस्यप्रभातेभ्युदितेरवौ शुचिःस्नातोहरिं पूज्यब्राह्मणायानिवेदयेत् एवंविधानतोदत्वाहरिंवाराहरूपिणं वेदवेदांगविदुषेसाधुवृत्तायधीमते विष्णुभक्तायविप्रर्षेविशेषेणतुदापयेत् ब्राह्मणायभवेद्यच्चफलंतस्यनिशामय इहजन्मनिसौभाग्यंश्रीकांतिस्तुष्टिरेवच ज्ञानवान्पुत्रवान्भोगीअपुत्रःपुत्रवान्भवेत् इतिवाराहपुराणे धरणीव्रतेषु वाराहद्वादशीव्रतम् *

माघशुक्लद्वादश्यांतिलद्वादशीव्रतम् तस्यांतिलैःस्नात्वातिलैर्विष्णुमभ्यर्च्य तिलतैलेनदीपंदत्वा तिलनैवेद्यम् तिलदानंचकृत्वा तिलान्भुंजीत तदुक्तंब्रह्मपुराणे माघेतुशुक्लद्वादश्यांयमोहिभगवान्पुरा तिलानुत्पादयामासतपःकृत्वासुदारुणं राजादशरथोभूमौतस्यांतानवतारयत् तिलानामाधिपत्येतुविष्णुस्तत्रकृतः सुरैः तस्यामुपोषितःस्नातस्तिलैस्तत्स्थंयजे[illegible]रिं तिलतैलेनदीपाश्चदेयादेवगृहेष्वथ निवेदयेत्तिलानेवहोतव्याश्चतथातिलातिलान्दत्वाचविप्रेभ्यो[illegible]श्चतिलानिह इतिब्रह्मपुराणोक्तंतिलद्वादशीव्रतं इयंचपद्मपुराणे भीमद्वादश्युक्ता यथोक्तं [illegible]मिदंवीरतवनाम्नाभविष्यति साभीमद्वादशीनामसर्वपापहराशुभेति हेमाद्रौ इयंपूर्वयुताग्राह्या [illegible]यांनिराहारः समभ्यर्च्यचकेशवमितिसंकल्पेमंत्रलिंगात् भीमद्वादशीकथाभविष्योत्तरे श्रीकृष्णउवाच विद[illegible]धिपतिःश्रीमानासीत्पूज्यःसुधार्मिकः धर्मविद्धर्मकर्ताचशास्त्रदृष्टेनवर्त्मना दमयंत्याःपितापूर्वंनलस्यश्वशुरोभुवि सत्यवाग्दानशीलश्चप्रजापालनतत्परः आजगाममहाभागःपुलस्त्यो

ब्रह्मणः सुतः सर्वज्ञानविधिः श्रीमांस्तीर्थयात्राप्रसंगतः तमागतमथोदृष्ट्वाब्रह्मयोनिमकल्मषं उत्थायप्रददौराजास्वमासनमभीप्सितं [illegible]र्घ्यंचयत्किंचित्तस्मैतत्प्रददौप्रभुः राज्यंचैवात्मनासार्धंनिवेद्यसुकृतांजलिः तेनचैवाभ्यनुज्ञातोनिषसाद[illegible]न्यसेद्दवे[illegible] पप्रच्छकुशलप्रश्नंतपस्यध्ययनेतथा तथेतिचोक्तासमुनिस्तंराजानमभाषत पुलस्त्यउवाच कच्चित्तेकुश[illegible]शंब्राह्मण[illegible]नपदेतथाधर्मेमतिस्तेरमतेकच्चित्पार्थिववर्त्तते राजोवाच सर्वत्रकुशलंब्रह्मन्येषांकुशलमिच्छसि तव[illegible]लं[illegible]जेनाहंप्लावितोमृतवारिणा एवंतौसंविदंकृत्वासंभाष्याथपरस्परं रेमातेपूर्ववृत्ताभिः कथाभिरितरेतरं ततःक[illegible]थांतरेराजापुलस्त्यंजातविस्मयः पप्रच्छसर्वलोकस्यहितायजगतःपतिः राजोवाच भगवन्प्राणिनःसर्वेसंसारार्णवमध्यगाः दृश्यंतेविविधैर्दुःखैःपीड्यमानादिवानिशंनरकेगर्भवासेच व्याधिभिर्जरयातथा तथैवेष्टवियोगादिदुःखदौर्गत्यसंभवैः लालप्यमानाबहवःपरपिंडोपजीविनः एवंविधान्यनेकानिदुःखानिमुनिपुंगव दृष्ट्वाहितानितान्येवभृशंमेव्यथितंमनः तेषांदुःखाभिभूतानांप्राणिनांभुविमानद उपकारकरंब्रूहिममानुग्रहकाम्यया उपवासंव्रतंचापिदानंवामुनिसत्तम स्वल्पायासेनयेनेहजायतेचमहत्फलम् ॥ पुलस्त्यउवाच ॥ शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतं यामुपोष्यनदुःखानांभाजनंजायतेक्वचित् माघमासेसितेपक्षेद्वादशीयाचसास्मृता तस्यांजलार्द्रवसनउपोष्यसुखभाग्भवेत् शृणुराजन्नवहितो व्रतंपापप्रणाशनं तवशुश्रूषणाद्वाच्यंमयाप्येतन्नसंशयः अदीक्षितायनोदेयंनाशिष्यायकदाचन विष्णुभक्तायदांतायधर्मनिष्ठायचैवहि वाच्यमेतन्महाराजभुविनान्यस्यकस्यचित् ब्रह्महागुरुघातीचगोघ्नःस्त्रीघातकस्तथा कृतघ्नोमित्रध्रुक्क्रूरोनग्नोभग्नव्रतस्तथा मुच्यतेपातकैःसर्वैःव्रतेनानेनभूपते शुद्धेतिथौमूहूर्तेचमंडपंकारयेद्बुधःदशहस्तप्रमाणेनदेशेपूर्वोत्तरेतथा तन्मध्येह्येकहस्तांतुवेदिकांपरिकल्पयेत् श्लक्ष्णांसुकुट्टिमांभूमिंवेद्यांकृत्वा

प्रयत्नतःविलिखेन्मंडलंतत्रपंचवर्णैर्विधानतः ब्राह्मणोवेदसंपन्नोविष्णुभक्तोजितेंद्रियःपंचविंशतितत्वज्ञःस्वाचारनिरतस्तथा कुंडानिकल्पयेत्तत्रअष्टौचत्वारिवापुनः ब्राह्मणांस्तेषुयुंजीतचातुश्चरणिकान्शुभान्मध्येचमंडलस्याथकर्णिकायांजनार्दनं प्रत्यङ्मुखंन्यसेद्देवंचतुर्वाहुमरिंदम पूजयित्वाविधानेनशास्त्रोक्तेनविचक्षणः गंधैःपुष्पैस्तथाधूपैर्नैवेद्यैर्विविधैरपि एवंसंपूज्यदेवेशंब्राह्मणैःसहदैशिकैःन्यसेत्स्तंभद्वयंपश्चात्तिर्यक्काष्ठसमन्वितं देवस्याभिमुखंतत्र श्रीपीठंपरिकल्पयेत् षट्त्रिंशदंगुलंशुभ्रंचतुरस्रंसमंततः तत्रशिक्यंसमालंव्यसुवृत्तंसुदृढंनवं आरोपयेद्घटंतत्रयादृशंतच्छृणुष्वमे कलधौतंतथारौप्यंताम्रंवाप्यथमृण्मयं सर्वलक्षणसंपन्नंदृढंव्यंगविवर्जितं तंसहस्रस्रवंकुर्य्यात्सलिलंवस्त्रगालितं होमार्थंकल्पयित्वापिपालाशीसमिधास्तथा तिलान्घृतंतथाक्षीरंशमीपत्राणिचैवहि वेद्याःपूर्वोत्तरेभागेग्रहपीठंप्रकल्पयेत् तत्रपूज्याग्रहाःसर्वैग्रहयज्ञविधानतःपूर्वस्यांदिशिशक्रस्यपूजांकुर्वीतयत्नतः दक्षिणस्यांयमस्याथप्रतीच्यांवरुणस्यच कुवेरस्यतथोदीच्यांवलिपुष्पफलाक्षतैःएवंसंभृतसंभारंशुक्लांवरधरंतदा समालब्धंशुभैर्गंधैर्दर्भपाणिमतंद्रितं पीठमारोपयेद्युक्तंयजमानंद्विजोत्तमःयजमानोपिदेवस्यसन्मुखःप्रयतःशुचिः उपविश्यपठेन्मंत्रंपुरुषोक्तमिदंशृणु नमस्तुतेदेवदेवेशनमस्तेभुवनेश्वर व्रतेनानेनमांत्राहिपरमात्मन्नमोस्तुते तत्रोदकस्यधारास्ताःप्रत्यङ्मध्याःसमीप[illegible]शूरसाधारयेत्तूष्णींतद्व्रतेनांतरात्मना होमंकुर्य्युस्ततोविप्रादिक्षुसर्वासुतत्पराः पठेयुःशांतिकान्पाठान्विष्ण[illegible]गानिच वादित्रैस्ताड्यमानैस्तुशंखभेरीस्वनैस्तथा पुण्याहजशब्दैश्चवेदध्वनिविमिश्रितैः मंग[illegible]क्तैःकारयीतमहोत्सवं प्रणम्यदेवदेवस्यवैकुंठस्यमहात्मनः हरिवंशादिकंसर्वंश्रावयेद्ब्राह्मणोपरः [illegible]थाख्यानंमहाभारतमेवच व्याख्यानकुशलाः केचिच्छ्रावयेयुरतंद्रिताः अनेनविधिनासर्वांतांरात्रिंपुण्यवर्धिनीं। यजमानोनयेद्धीमान्यावत्सूर्य्योदयोभवेत् ब्राह्मणाश्चापितांरात्रिंजुह्वतो

जातवेदसं मंत्रैस्तुवैष्णवैर्दिव्यैःक्षिपयेयुर्महीपते वासुदेवस्याशिरसिवसोर्धारांप्रपातयेत् क्षीरेणपयसाराजन्सर्वसिद्धिप्रदायिनीं ततःप्रभात[illegible]श्चय भानोद्विजैःसह स्नानंकुर्य्यात्कुरुश्रेष्ठनद्यांसरसिवापुनः गृहेवाशक्तिहीनस्तुयजमानोष्णवारिणा तत तुभुंजीतवा[illegible]णिपरिधाययतव्रतः अर्घ्यंदद्याद्भास्करस्यसविधानंप्रसन्नधीः पुष्पैर्धूपैःसनैवेद्यैःपूजयेत्पुरुषोत्तमं हुत्वा देवीपु[illegible]त्त्यादत्वापूर्णाहुतिंततःपूजयेद्ब्राह्मणान्सर्वान्होतारोयेत्रकल्पिताः शय्याभोजनगोदानैर्वस्त्रैराभरणैस्तथा कृत्यं श्र[illegible]र्य्यःपूजनीयोत्रसर्वस्वेनापिभारत येनवातुष्टिमायातिदेवतुल्योगुरुर्यतः वित्तशाठ्यविहीनस्तुभक्तिशक्तिसमन्विते दीनानाथविशिष्टाश्चवंदिनश्चसमागताः तेषांगावोहिरण्यंचदद्याच्छुद्धेनचेतसा एवंसंपूज्यविप्रादीन्भोजयित्वायथेप्सितान् यथाविभवसारेणपश्चाद्भुंजीतवाग्यतः हविष्यमन्नंयत्नेनसभृत्यःसातिथिस्तथा मयैवंकथितंराजन्वैष्णवास्तेप्रकीर्त्तिताः यत्कृत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः वाजपेयातिरात्राभ्यांयेयजंतिशतंसमाःसर्वेतेविष्णुयोगेभ्यःकलांनार्हंतिषोडशीं सप्तजन्मनिसौभाग्यमायुरारोग्यमेवच प्राप्नोतिद्वादशीमेतामुपोष्यविधिवन्नरः मृतोविष्णुपुरंयातिविष्णुनासहमोदते चतुर्युगानिद्वात्रिंशद्विष्णुरूपधरःसदा रुद्रलोकंतथाराजन्युगानिद्वादशैवतु ब्रह्मलोकेतथात्रीणिसूर्यलोकेयुगेतथा पुण्यक्षयादिहागत्यराजाभवति धार्मिकः पृथिव्यधिपतिःश्रीमान्विजितारिःप्रतापवान् व्रतमेतत्पुराचीर्णंसगरेणमहात्मना नलेनधुंधुमारेणदिलीपेनययातिना एतैश्चपृथिवीपालैःपालिताशेषभूतलैः स्त्रीभिर्वैश्यैस्तथाशूद्रैःधार्मिकैस्तुसदानृप भृग्वाद्यैर्मुनिसंघातैर्ब्राह्मणैर्वेदपारगैः त्वयापृष्टेनचमयाकथितंयन्नराधिप अद्यप्रभृतिचैवेयंख्यातिंयास्पति भूतले भीमाख्याद्वादशीचेतिकृताभीमेनवैयतः एषापुलस्त्यमुनिनाकथिताकुरुनंदन यश्चैनांशृणुयात्कुर्याद्यत्नाद्भक्तिस्वभावतः सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते सद्द्रव्येणापिवापार्थवित्तशाठ्यविवर्जितः विष्णु

भक्तेनकर्त्तव्यंसंसारभयभीरुणा ॥ भीमेनयत्किलपुरासमुपोषिताभूद्रात्रौगलच्छिशिरशीतलवारिधारा तांद्वादशींदशमुखारिमुखंस्मरन्यःसम्यक्समाचरतिपार्थिवविष्णुलोकं इतिभविष्योत्तरेमाघशुक्लाभीमाद्वादशीव्रतम् ❁ नारदीयेपि माघस्यशुक्लद्वादश्यांशालिग्रामशिलांद्विज अभ्यर्च्यविधिवद्भक्त्यासुवर्णंतन्मुखेन्यसेत् तांस्थाप्य रौप्यपात्रेवासितवस्त्रयुतांवृतां प्रदद्याद्वेदविदुषेतंचसंभोजयेत्ततः पायसान्नेनखंडाज्यसहितेनहितेनच एवंकृतैकभक्तस्सन्विष्णुचिंतनतत्परः वैष्णवंलभतेधामभुक्ताभोगानिहेप्सितान् माघशुक्लत्रयोदश्यांमाघत्रिरात्रस्नानम् नारदीये माघशुक्लत्रयोदश्यांसमारभ्यदिनत्रयं माघस्नानव्रतंविप्रकार्य्यंमासफलावहं प्रयागेमाघमासेतुत्र्यहेस्नानस्ययत्फलं नाश्वमेधसहस्त्रेणतत्फलंलभतेभुवि तत्रस्नानजपोहोमोदानंचानंत्यमश्नुते महामाघींपुरस्कृत्यस्नायात्तत्रदिनत्रयमिति पाद्मेपि माघशुक्लचतुर्दश्यांयमतर्पणमुक्तंनारदीये माघशुक्लचतुर्दश्यांयमतर्पणमीरितं अनर्काभ्युदितेकालेस्नात्वासंतर्पयेद्यमं द्विसप्तनामभिःप्रोक्तैःसर्वाघाविनिवृत्तये तिलदर्भांबुभिःकार्य्यंतर्पणंद्विजभोजनं कृशरान्नंस्वयंचापितद्देवाश्नीतवाग्यतः माघपौर्णमास्यांतिलकार्पासकंबलदानं नारदीये पूर्णमास्यांततोमाघ्यांतिलकर्प्पा[illegible]कंबलं रत्नानिकंचुकोष्णीषपादत्राणनिबंधनं दत्वाप्रमोदतेस्वर्गेदानंवित्तानुसारतः यस्तत्रशंकरंदेवं[illegible]भा[illegible]धिपूर्वकं सोश्वमेधफलंप्राप्यविष्णुलोकेमहीयते अस्यांस्नानदानादिप्राशस्त्यं भविष्योत्तरे वैशं[illegible]माघीतिथयोतीवपुण्यदाः स्नानदानविहीनास्ताननेयाःपांडुनंदनेति तथाचतत्रैव माघ्यांस्ना[illegible]स्संतर्प्यपितृदेवताः तिलपात्राणिदेयानिकंचुकाःकंवलास्तथा कर्पासदानमत्रैवधेनुदानंप्रशस्यते भ[illegible]गनेयानीमातुलानीपितृष्वसा दरिद्राणांचबंधूनांदानंकोटिगुणोत्तरं अत्रतिलपात्रदानं ब्रह्मपुराणे ताम्रपात्रंतिलैः पूर्णंप्रस्थमात्रंद्विजायतु सहिरण्यंचयोदद्याच्छ्रद्धावित्तानुसा-

रतः सर्वपापविशुद्धात्मालभतेतुपरांगतिं अत्रविशेषः ॥ ताम्रपात्रेतिलान्कृत्वापलषोडशकल्पिते सहिरण्यंस्व शक्त्यावाकल्पितेविधिपूर्वकं विप्रा र्यं तरातिपापंजन्मशतोद्भवामितिकूर्मपुराणात् तत्रैव तिलपूर्णंताम्रपात्रंसहि रण्यंद्विजातये प्रातर्दत्वातुविधि श्रये पातिहंतिसःतिलपात्रंत्रिधाप्रोक्तंकनिष्ठोनममध्यमं ताम्रपात्रंदशपलंजघ न्यंपरिकीर्तितं द्विगुणंमध्यमंप्रो जीतवांधवैः तमोत्तमं स्वर्णमेकंजघन्यंतुद्विगुणंमध्यमंचयत् त्रिगुणंचोत्तमंतद्वत्सु वर्णंपरिकीर्तितं सुवर्णदक्षिणांद पुराणे पक्षयोभवेत् अथतिलपात्रदानमंत्रः तिलाःस्वर्णयुतास्तुभ्यंप्रद त्ताह्यघनाशनाः विष्णुप्रीतिकर श्राद्ध मतःशांतिंप्रयछत गोदानमंत्रः गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश यस्मात्तस्माच्छिवंमेस्यादिहलोकेपर पूजयं और्णवस्त्रदानमंत्रः और्णपट्टमनुध्येयंस्वर्णवीजंतवप्रभो दत्तंगृहाण देवेशपापंमेहरसत्वरं मदनरत्नेतु नीक र्णमेषसमुत्पन्नाशीतदुःखभयापहा यस्मात्तुषारहारीस्यादतःशांतिंप्रय च्छतु वस्त्रदानमंत्रः शरणंसर्वलोकानांलज्जासंरक्षणंपरं सुवेशैर्धारितंयस्माद्वासःशांतिंप्रयच्छमे रक्तवस्त्रयुगंय स्मादादित्यस्यप्रियंसदा प्रदानादस्यमेसूर्य्यअतः शांतिंप्रयच्छतु उपानद्दानमंत्रः उपानहौप्रदास्यामिकंटकादिनिवारणे सर्वस्थानेषुसुखदेअतःशांतिंप्रयच्छतं रत्नदानमंत्रः यथ सर्वेषुरत्नेषुसर्वेदेवाव्यवास्थिताः तथाशांतिंप्रयच्छंतुरत्नदानेनमेसुराः तथाचान्यात्किंचिन्मात्रंदीयते तस्यमंत्रः तन्माघस्नानिनादेवविप्राणांभूतिमिच्छता स्वल्पदानेपिदातव्यंमाधवःप्रीयतामिति इयंमाघपूर्णिमामघानक्षत्रयुतामाघीप्रोक्ता योगविशेषेणमहामाघीति तथाचगार्ग्यः मेषराशौयदाशौरिःसिंहेचैववृहस्पतिः भास्करःश्रवणर्क्षेचमहामाघीतिसास्मृता महामाघीप्रयागेतुनैमिषफाल्गुणेतथा शालिग्रामेमहाचैत्रीकृत्वापुण्यंमहाफलामितिगार्ग्यवचनात् अत्र विशेषमाहविष्णुः माघीमघायुक्ताचेत्तस्यांतिलैःश्राद्धंकृत्वापूतोभवतीति ब्रह्मपुराणे पौर्णमास्यांमघायोगे-

वायसाःपंचजज्ञिरे इंद्राद्वावरुणाद्वायोर्यमादथचनैर्ऋतेः श्राद्धंपितृभ्यःकर्त्तव्यं ।तिलैः पूज्यास्तथाकिलेति ऐंद्रवारुणवायव्यायाम्यानैर्ऋतिकाश्चये वायसाःप्रतिगृह्णंतुभूमौदत्तंमयान्नकं दद्यादनेनमंत्रेणतेभ्योभोज्यंमधुप्लुतं ब्राह्मणान्भोजयित्वातुभुंजीतबांधवैःसहेति माघ्यांकृत्वातिलैःस्नानंसर्वपापैःप्रमुच्यते अन्यत्रच माघ्यां पूजातुकर्त्तव्यादेवींवैमंगलांयजेत् देवीपुराणे धेनुंगुडमयींकृत्वामाघ्यांयश्चोत्तरायणे सर्वकाममवाप्नोतिज्येष्ठ्यां जलमयींतथा इयमन्वष्टका तत्कृत्यंश्राद्धादि अथमाघस्नानविधिरुच्यते तत्रकालमाहविष्णुः तुलामकरमेषेषु प्रातःस्नायीसदाभवेत् हविष्यंब्रह्मचर्य्यंचमाघस्नानेमहाफलमिति अत्रतुलामकरमेषेष्वित्यनेन सौरमासउक्तः ब्राह्मे एकादश्यांशुक्लपक्षेपौषमासेसमारभेत् द्वादश्यांपौर्णमास्यांवाशुक्लपक्षेसमापनमिति पाद्मेपि पौषस्यैकादशीशुक्लामारभ्यस्थंडिलेशयः मासमात्रंनिराहारस्त्रिकालंस्नानमाचरेत् त्रिकालमर्च्चयेद्विष्णुंत्यक्तभोगोजितेंद्रियः माघस्यैकादशीशुक्लायावद्विद्याधरोत्तमेति अत्रत्रिकालस्नानं मासोपवासविषयंनिराहारइत्युक्तेः पृथ्वीचंद्रोदयेपक्षांतरमाह विष्णुः दर्शंवापौर्णमासींवाप्रारभ्यस्नानमाचरेत् पुण्यान्यहानित्रिंशत्तुमकरस्थेदिवाकरइति अत्रदर्शमिति शुक्लादिमुख्यचांद्रायणाभिप्रायेणेति बालवृद्धयुवानश्चनरनारीनपुंसकाः स्नात्वामाघेशुभेतीर्थेप्राप्नुवंतीप्[illegible]ाभा[illegible]र्गमिति पाद्मे सर्वेधिकारिणोह्यत्रविष्णुभक्तौयथानृप ब्राह्मे उष्णोदकेनवास्नानमशक्येसतिकुर्वते [illegible]वंगात्रेषुनोष्णोदकविशेषता वैष्णवामृतेगौडनिबंधे स्कांदे पौष्यांतुसमतीतायांयावद्भवतिपूर्[illegible]मासस्यतावद्धिविष्णुपूजाविधीयते पितॄणांदेवतानांचमूलकंनैवदापयेत् ब्राह्मणोमूलकंभुक्त्वा[illegible]णव्रतं अन्यच्चयातिनरकंक्षत्रविट्शूद्रएवच वर्जनीयंप्रयत्नेनमूलकंमदिरोपमम् यदामाघेमलम[illegible]भवातितदाकाम्यानांतत्रसमाप्तिनिषेधान्मासद्वयंप्रातःस्नानंतन्नियमाश्चकर्त्त

ठ्याः मासोपवासचांद्रायणा[illegible]ल्लमासएवसमापयेत् तदुक्तंदीपिकायाम् नियतत्रिंशद्दिनत्वाच्छुभेमावास्यारभ्यसमापयेत् मा[illegible] तदष्टा[illegible]वासव्रतमिति स्नानारंभेचमंत्रोविष्णुनोक्तः तत्रचोत्थायनियमंगृह्णीयाद्विधिपूर्वकं माघमासमिमं[illegible] इतिव्रह्मंदेवमाधव तीर्थस्यास्यजलेनित्यमितिसंकल्प्यचेतसीति ततःस्नात्वा शुभेतीर्थेदत्त्वाशिरसिवैमृदं [illegible]तुयोदधिनाराजन् सूर्य्यायार्घ्यंनिवेदयेत् पितॄणांतर्पयित्वातुअवतीर्य्यततो जलात् प्रत्यहंस्नानमंत्रश्च [illegible]सि[illegible] दुःखदारिद्र्यनाशायश्रीविष्णोस्तोषणायच प्रातःस्नानंकरोम्यद्यमाघे पापविनाशनं मकरस्थेरवौमा[illegible]दाच्युतमाधव स्नानेनानेनमेदेवयथोक्तफलदोभव इमंमंत्रंसमुच्चार्य्य स्नायान्मौनसमन्वितइतिसेतौ ब्र[illegible]त्रविशांचैवमंत्रवत्स्नानामिष्यते तूष्णीमेवतुशूद्राणांतथैवकुरुनंदन नमस्कारोथवाकार्य्यःसर्वपापौघहानिद इति प्रत्यहंसूर्य्यायार्घ्यदानमंत्रश्चपृथ्वीचंद्रोदयेपाद्मे सवित्रेप्रसवित्रेचपरंधामजलेमम त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधेति स्नानकालश्चसूर्य्योदयउक्तः त्रिस्थलीसेतौ संप्राप्तेमाघमासेतुतपस्विजनवल्लभे क्रोशंतिसर्ववारीणिसमुद्गच्छतिभास्करे हनामःसर्वपापानित्रिविधानिनसंशयइति नारदोक्तेः मकरस्थेरवौयोहिनस्नात्यभ्युदिरवौ इति माघमासेरटंत्यापःकिंचिदभ्युदितेरवौ इतिपाद्मवचनात् योमाघमास्युषसिसूर्यकराभितप्ते स्नानंसमाचरतिचारुनदीप्रवाहे उद्धृत्यसप्तपुरुषान्पितृमातृवंश्यान्स्वर्गं प्रयात्यमरदेहधरोनरोसौ इतिभविष्योत्तरवचनाच्च ब्राह्मेतु अरुणोदयउक्तः अरुणोदयेतुसंप्राप्तेस्नानकालेविचक्षणः माधवांघ्रियुगंध्यायन्यःस्नातिसुरपूजितइति तथा अरुणोदयमारभ्यप्रातःकालविधिःप्रभो माघस्नानभवंपुण्यंक्रमात्तत्रावधारणा उत्तमंतुसनक्षत्रंमध्यमंलुप्ततारकं सवितर्य्युदितेभूपततोहीनंप्रकीर्त्तितमिति तेनात्रशक्ताशक्तापेक्षयाव्यवस्थेति इदंचस्नानंप्रयागेऽतिप्रशस्तं काश्यांशतगुणंप्रोक्तंगंगायमुनसंगमे सहस्र

गुणितासापिभवेत्पश्चिमवाहिनी पश्चिमाभिमुखीगंगाकालिंद्यासंगतायदा हंतिकल्पकृतंपापंसामाघेनृपदुर्लभेत्यादिपाद्मादिवचनेभ्यः
प्रयागासंभवेकाश्यांदशाश्वमेधोत्तरस्थप्रयागतीर्थस्नानमुक्तंकाशीखंडे काश्यु
द्भवेप्रयागेयेतपसिस्नांतिमानवाः दशाश्वमेधजनितंफलंतेषांभवेद्ध्रुवमिति ब्राह्मे तडागेषुतुवास्नायात्कूपभांडा
श्रितेतथा माघेमासेवरारोहेशस्तंवैनिम्नगाजलं भांडाश्रितेत्वयंविशेषः सरित्तोयमहावेगंनदकुंभस्थितंतथा
वायुनाताडितंरात्रौगंगास्नानसमंमतं यत्रकुत्रापिवामाघेप्रयागस्मरणान्वितः करोतिमज्जनंतीर्थेसलभेद्गांगमज्ज
नं इदंचस्नानंनैरंतर्य्येणकार्य्यं तदुक्तंपृथ्वीचंद्रोदयेप्रभासखंडे माघेमासिचयःस्नायान्नैरंतर्य्येणभावतः
पौंडरीकफलंतस्यादिवसेदिवसेभवेत् माघस्नानंकाम्यमेवेतिकेचित् विष्णवादिवाक्येनसदावश्यशब्दान्नित्यताव
गतेर्नित्यंकाम्यामितियुक्तं मासपर्य्यंतस्नानासंभवेतुत्र्यहमेकाहंवास्नायात् महामाघींपुरस्कृत्यस्नायात्तत्रदिनत्रय
मितिलिंगात् अस्मिन्प्रयागेत्वशक्तोपिस्नायादपिचदिनत्रयं प्रयागेमाघमासेतुत्र्यहंस्नातस्ययत्फलं नाश्वमेधसह
स्रेणतत्फलंलभतेभुवीत्यादिवचनात् अत्रमकरसंक्रमस्थसप्तमीमाघीतित्र्यहमित्येके माघशुक्लदशम्यादीत्यन्ये
मकरादित्र्यहइत्यन्येमाघस्याद्यत्र्यहइतिकेचित् त्रयोदश्यादीतिवहवःयत्किंचिद्दिनत्रयमितिभट्टाः अत्रत्रयोदश्या
दिपक्षएवज्यायान् अन्येतुवचनाभावान्निर्मूलाः माघस्नानेनियमास्तुनारदीये नवह्निंसेवयेत्स्नातोह्यस्नातोपि
वरानने होमार्थंसेवयेद्वह्निं [illegible] दाचन अहन्यहनिदातव्यास्तिलाःशर्करयान्विताः त्रिभागस्तुति
लानांच चतुर्थःशर्करान्वि [illegible] गीवरारोहेसर्वमासंनयेद्व्रती असंवृत्तशरीरस्तु यःकथंस्नानमाचरेत्
पदेपदेश्वमेधस्यफलंप्राप्नो [illegible] तथा शंखचक्रधरंदेवंमाधवंनामपूजयेत् वन्हिंहुत्वाविधानेनततस्त्वेका
शनोभवेत् भूशय्याब्रह्मचर्येण शक्तःस्नानंसमाचरेत् अशक्तोब्रह्मचर्य्यादौस्वेच्छासर्वत्रकथ्यते अशक्तत्वंधना

ह्यस्येतिपाठः कृत्यरत्नावल्यां बहुधनदानंकुर्वतइति तिलस्नायीतिलोद्वर्त्तीतिलहोमीतिलोदकी तिलभुक् तिलदाताच षट्तिलाःप पतंर नः तदं इति स्नानोत्तरंकृत्यमाह मदनपारिजाते विष्णुः काष्ठमौनंपुरस्कृत्य पूजयेत्पुरुषोत्तमं अवश्य यते इति घस्नानामितिश्रुतिः भविष्ये तैलमामलकाश्चैवतीर्थेदेयास्तुनित्यशः ततः प्रज्वालयेद्वन्हिं सेवनः [illegible] तत्तुयं एवंस्नात्वावसानेतुभोज्यंदेयमवारितम् भोजयेद्द्विजदांपत्यंभूषयेद्वस्त्रभूषणैः कंबलाजिनरत्नानिवासांसिर वधानिच चोलकानिचदेयानिप्रच्छादनपटास्तथा उपानहौतथागुह्यमोचकौपापमोचकौ अनेनविधिनादद्यान्माधवः प्रीयतामिति भूमौशयीतहोतव्यमाज्यंतिलसमान्वितं तथा अन्नंचैवयथाशक्त्यादेयंमाघेनराधिप सुवर्णरक्तिकामात्रंदद्याद्वेदविदेतथा माघांतेविशेषोनारदीये माघावसानेसुभगेषड्रसंभोजनंस्मृतं सूर्योमेप्रीयतांनित्यंविष्णुर्मूर्त्तिर्निरंजनः दंपत्योर्वाससीसूक्ष्मेसप्तधान्यसमान्विते त्रिंशत्तुमोदकादेयाःशर्करातिलसंयुताः इति अत्रोद्यापनं एकादशीविधानेनव्रतस्योद्यापनंतथेतिवचनात पूर्वेह्निउपवासपूजनादि परेन्हितिलाज्यैरष्टोत्तरशतंहोमंकृत्वा सवित्रेप्रसवित्रेतिपूर्वोक्तंमंत्रमुक्त्वा दिवाकर जगन्नाथप्रभाकरनमोस्तुते परिपूर्णंकुरुष्वेह माघस्नानमुपस्यते इतिक्षमापयेदितिसंक्षेपः इतिनिर्णयसिंधावुक्तं कार्त्तिकेवाथतपासिविधिरेवंविधोत्तम इतिकार्त्तिकोद्यापनेविशेषवचनात् कार्त्तिकोद्यापनविधिरेवात्र विधिरिति अथात्रैवघृतकंबलविधिःकार्य्या तदुक्तंहेमाद्रौ भविष्यपुराणे माघशुक्लचतुर्दश्यामुपोष्यानियमस्थितः शिवायपौर्णमास्यांतुकर्त्तव्यंघृतकंबलं कृष्णगोमिथुनंपश्चात्स्वरूपंविनिवेदयेत् दिव्यंवर्षशतंसाग्रंशिवलोकेमहीयते आलिंगंवेदिपर्य्यंतंयोदद्याद्घृतकंबलं तस्यानंतंभवेत्पुण्यंमाघपौर्णिमपर्वाणि जागरंगीतनृत्याद्यैः सकृत्कृत्वातुपर्वाणि मन्वंतरशतंसाग्ररुद्रलोकेमहीयते इतिमाघ्यांघृतकंबलविधिः माघ्यांब्रह्म

वैवर्त्तपुराणदानमुक्तं मत्स्यपुराणे रथंतरस्यकल्पस्यवृत्तांतमधिकृत्यच सावर्णिनानारदायकृष्णमाहात्म्यसंयुतं
यत्रब्रह्मवराहस्यचरितंवर्ण्यतेपुनः तदष्टादशसाहस्रंब्रह्मवैवर्त्तमुच्यते ांब्रह्मवैवर्त्तंयोदद्यान्माघमासिच
पौर्णमास्यांधेनुयुतंब्रह्मलोकेमहीयते इतिब्रह्मवैवर्त्तपुराणदानम् अ राणमपिदेयम् स्कांदेसर्वो
त्तमकथेशिवमाहात्म्यवर्णनम् लिखित्वैतत्तुयोदद्याद्धेमशूलसमन्वितं त्कृत्याविप्रायसशैवेमोदतेपदे
इतिस्कंदपुराणदानम् ॥ स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्र १ णवीरसिंहभूपेशकारितेकृत्यसा
गरे अभवन्माघकृत्यानांरम्योरत्नसमुच्चयः इतिश्रीमत्सूर्यवंशावतंस र कृत्ला तेलकरणवीरसिंहमहाराजकारिते
कृत्यरत्नाकरे माघमासकृत्यरत्नसमुच्चयःसमाप्तिमगमत् ७ ७ ७ ७ ७ ७ ७ ७ ७

62

पृ २८

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिब्बामल्लाधिकारेमाघमासोमुद्रितस्समाप्तिमगमत्
संवत् १९४२ वैशाख प्र. २०

(1)

फाल्गुणमासप्रारम्भः

ॐश्रीरघुनाथोजयति ॥

ॐश्रीगणेशायनमः ॥ ॐअथफालल्गुनमासकृत्यनिर्णयः तत्रादौ कुंभार्कपूर्वाः षोडश नारदीये याम्यायनेस्थिरेत्वाद्याःपराःसौम्येद्विमूर्त्तिभे मध्याविषुवतिप्रोक्ताःपुण्याःषोडशनाडिका ॥ इतिशेषसंक्रांतिनिर्णयेज्ञेयं अत्रकृत्यं भविष्यपुराणे देवार्चांफाल्गुनेमासिकृत्वापिष्टमयींतुवै गंधमाल्यैरलंकृत्यस्थापयेद्भास्करालये विमानैःसूर्यसंकाशैर्गीतवाद्यसमाकुलैः समैकादशसाहस्रंसूर्यलोकेमहीयते समागत्यइमंलोकंयथेच्छंविंदतेसुखमिति व्रतमाधिकृत्य स्कंदपुराणे एकभक्तंतुकुर्वाणः फाल्गुनेमासिनित्यशः स्त्रीपुसौभाग्यमाप्नोतिस्त्रियश्चपरमप्रियः ॥ विष्णुधर्मोत्तरे प्रियंगुफाल्गुनेदत्त्वाप्रियोभवतिभूतले प्रियंगुःकंगुइतिप्रसिद्धः फाल्गुनेमासिराजेंद्रयःकुर्य्यान्नक्तभोजनं श्यामाकक्षीरनीवारैर्जितक्रोधोजितेंद्रियः षष्ठ्यांवाचाथसप्तम्यामुपवासपरोभवेत् अष्टम्यांतुमहास्नानंपंचगव्यघृतादिभिः त्वग्भिश्चक्षीरवृक्षाणांस्नापयित्वाप्रपूजयेत् सौरभेयींततोदद्याद्रक्तांगांरश्मिमालिने गत्वादित्यपुरंरम्यंमोदतेशाश्वतीःसमा इति वामनपुराणे भगदैवंतुयोमासमेकभक्तेनसंक्षिपेत् ऐश्वर्यमतुलंश्रेष्ठंपुमान्स्त्रीवाप्रपद्यते स्त्रीषुवल्लभतांयातितस्याश्चैवभवांतिते विष्णुधर्मे क्षपयेदेकभक्तेनशुश्रूषुश्चैवफाल्गुणे सौभाग्यस्वजनानांचसर्वेषांचेतसोन्नतिं विष्णुशुश्रूषुः वामनपुराणे फाल्गुणे व्रीहियोगावोवस्त्रंकृष्णाजिनान्वितं गोविंदप्रीणनार्थायदातव्यंपुरुषर्षभ ॥ तथा प्रातःस्नायीभवेन्नित्यंद्वौमासौमाघफाल्गुनाविति वाराहे फाल्गुनस्यतुमासस्यपुष्पाणिसुरभीनिच कर्माण्यानिशुभानीहगृहीत्वाभक्ति

मान्नरः जानुभ्यांधरणींगत्वाकराभ्यामंगुलैःपुटं ॐनमोनायणाय नमस्तेदेवदेवेशचक्रनिर्मथनप्रभो नमस्तेलोकनाथायसुप्रदीरनमोस्तुते आदिमध्यावसानंतुनजानातीहकश्चन वसंतागमपुष्पाणिगृहाण पुरुषोत्तम यएतेनविधानेनकुर्य्यान्मासेतुफाल्गुने नचागच्छतिसंसारंपरलोकंसगच्छति ॥

इतिफाल्गुणविधिः ॥ फाल्गुनकृष्णप्रतिपदायां तिथिपत्वेनवन्हिपूजा द्वितीयायांब्रह्मणःपूजा तृतीयायांगौरीव्रतम् फाल्गुनकृष्णचतुर्थ्यांविघ्नविनायकगणेशव्रतम् भविष्योत्तरे ॥ श्रीकृष्णउवाच ॥ अथाविघ्नंविघ्नराजं कथयामिव्रतंतव येनसम्यक्कृतेनेहनविघ्नमुपजायते चतुर्थ्यांफाल्गुनेमासिगृह्णीयात्तुव्रतं शुभं नक्ताहारेणराजेंद्रतिलपारणकंस्मृतं तदेववन्हौहोतव्यंब्राह्मणायचदापयेत् ॥ तत्रमंत्रः ॥ शूराय वीरायगजाननायलंबोदरायैकरदान्विताय एवंचसंपूज्यपुनश्चहोमंकुर्य्याद्व्रतीविघ्नविनाशहेतोः चातुर्मास्यंव्रतं चैवकृत्वाथपंचमेतथा सौवर्णंगजवक्त्रंतुकृत्वाविप्रायदापयेत् हेरंबराजतंतद्वद्विधानेनप्रदापयेत् रुद्रस्यच पुरंयातिवराहवचनंयथा विघ्नानितस्यनभवंतिगृहेकदाचिद्धर्मार्थकामसुखसिद्धिकराणिचैव यस्तंविनायकव्रतं कुरुतेमनुष्योविघ्नेशमर्चयतिकृष्णतिलैश्चतुर्थ्यां इतिभविष्योत्तरे अविघ्नविनायकव्रतं ॥ फाल्गुनकृष्णपंचम्यांतिथीशत्वेननागानांपूजाव्रतं फाल्गुनकृष्णषष्ठ्यांतिथिपत्वेनस्कंदपूजेतितिथिसामान्यनिर्णयात् फाल्गुनकृष्णसप्तम्याअष्टम्योरष्टकाअन्वष्टकाकार्य्या फाल्गुनकृष्णाष्टम्यांसोमादेवीपूजानारदीये फाल्गुनेत्वासिताष्टम्यांसोमादेवींप्रपूजयेत् नक्तव्रतधरोविप्रःसर्वकामसमृद्धये ब्रह्मपुराणे कृष्णाष्टम्यांफाल्गुनेतुद्वादश्यांश्रवणेनतु चकारभगवान्विष्णुःपिंडनिर्वपणंमहत् पितापितामहेभ्योपितिलैश्चकृतवान्पुरा सोपवासोहरिंतस्मात्त्रसंपूजयेत्तिलैःतिलैरभ्यर्चयेद्देवांस्तिलांश्चजुहुयात्तथा तिलतैलेनदीपाश्चदातव्यादेवसद्मनि तिलान्दद्यात्तुदे

S

वेभ्यःपितृभ्यश्चातिलोदकं तिलांश्चभक्षयेत्तत्रधर्मवृद्ध्यर्थमात्मनः फाल्गुनकृष्णनवम्यां तिथिदेवतात्वाद्दुर्गा पूजाव्रतं फाल्गुनकृष्णदशम्यां दशम्यामंतकस्यचेति धर्मराजपूजाव्रतमितिदशमीतिथिसामान्यनिर्णये ॥ फाल्गुनकृष्णैकादशीविजया नारदीये तपस्यैकृष्णैकादशींवैविजयांसमुपोष्यच द्वादश्यांप्रातरभ्यर्च्चयोगीशं गंधपूर्वकैः ततःसंपूज्यभूदेवान् दक्षिणाभिः प्रतोष्यतान् विसृज्यबांधवैःसार्द्धंस्वयंभुंजीतवाग्यतः देहांतेवैष्णवंलोकंयातिदेवैःसुसंस्कृतः अस्याःकथास्कंदपुराणे ॥ सूतउवाच पप्रच्छदेवदेवेशंब्रह्माणंजगतांपतिं नारदःसर्वतत्वज्ञःसर्वर्षिगणसंवृतः ॥ नारदउवाच कथंव्रतमिदंब्रह्मन्पुरारामेणवैकृतं प्रब्रूहिमेविस्तरतःकथां रामस्यपावनीम् ॥ ब्रह्मोवाच शृणुवत्सप्रवक्ष्यामिराघवेणयथाकृतं रामोवसद्वनेतत्रवर्षाणिनवपंचच न्यवसत्पंचवट्यांचससीतः सहलक्ष्मणः तत्रैववसतस्तस्यराघवस्यमहात्मनः रावणेनहृताभार्य्यासीतानामतपस्विनी तेनदुःखेनरामोपिमोहमभ्याजगामह भ्रमन्जटायुषमथोददर्शविगतायुषं कबंधोनिहतःपश्चाद्भ्रमतारण्यमध्यगः रक्षसोमरणंचैववालिनोवैवधस्तथा सुग्रीवेणसहैवादौमित्रत्वंसमजायत वानराणामधिष्ठातावानरैः सहसंगतः ततोहनुमताद्दृष्टालंकोद्यानेतुजानकी रामसंज्ञापनंतस्यैदत्तकर्ममहत्कृतं समेत्यतत्ररामेणसर्वमस्मै निवेदितं अथश्रुत्वारामचंद्रोवाक्यंचैवहनूमतः सुग्रीवानुमतेचैवप्रापद्यताहिसत्वरं सगत्वावानरैःसार्द्धंयत्रैषोरि ह्यपांनिधिः दृष्ट्वाब्धिंदुस्तरंरामोविस्मितोभूत्कलिप्रिय आरक्तलोचनोभूत्वालक्ष्मणंचेदमब्रवीत् सौमित्रेकेन चीर्णेनतीर्य्यतेवरुणालयः अगाधसलिलैःपूर्णोनक्रैर्मत्स्यैःसमाकुलः उपायंनैवपश्यामोयेनायंसुतरोभवेत् ॥ लक्ष्मणउवाच आदिदेवस्त्वमेवासिपुराणपुरुषोत्तमः वकदाल्भ्योमुनिश्चात्रवर्त्ततेद्वीपमध्यगः अस्मात्स्थानाद्योजनार्द्धमाश्रमस्तस्यराघव अनेनदृष्ट्वाबहवोब्राह्मणारघुनंदन तंपृच्छगत्वाराजेंद्रपुराणमृषिपुंगवं इति

तस्यवचःश्रुत्वालक्ष्मणस्यातिशोभनं जगामराघवोद्रष्टुंकुतोरामतवागमः ॥ रामउवाच ॥ त्वत्प्रसादादहंविप्रवरुणालयसमीपतः आगतोस्मिससैन्योत्रलंकांजेतुंसराक्षसां भवतश्चानुकूलत्वात्तीर्यतेऽब्धिर्यथामया तदुपायंवदमुनेःप्रसादंकुरुसत्तम एतस्मात्कारणादेवप्रष्टुंत्वामहमागतः ॥ मुनिरुवाच ॥ कथयिष्याम्यहंरामव्रतानामुत्तमंव्रतं कृतेनयेनसहसाविजयस्तेभविष्यति लंकांजित्वारिपुंहत्वाव्रतंतत्तुनिशामय फाल्गुनस्यासितेपक्षेविजयैकादशीभवेत् तस्याव्रतेकृतेरामविजयस्तेभविष्यति निःसंशयंसमुद्रंत्वंतारिष्यसिसवानरः विधिस्तुश्रूयतांरामव्रतस्यास्यफलप्रदः दशम्यादिवसेप्राप्तेकुंभमेकंतुकारयेत् हैमंवाराजतंवापिताम्रंवाप्यथमृण्मयं स्थापयेच्छोभितंकुंभंजलपूर्णंसपल्लवं तस्योपरिन्यसेद्देवंहैमंनारायणंविभुं एकादशीदिनेप्राप्तेप्रातःस्नानंसमाचरेत् निश्चलंस्थापयेत्कुंभंकंठेमाल्यानुशोभितं दाडिमैर्नारिकेलैश्चपूजयेच्चविशेषतः सप्तधान्यमधस्तस्ययवानुपरिविन्यसेत् गंधैर्धूपैस्तथादीपैर्नैवेद्यैर्विविधैरपि कुंभाग्रेतद्दिनंरामनीयतेभक्तिभावतः रात्रौजागरणंचैवतस्याग्रेकारयेद्बुधः द्वादश्यादिवसेप्राप्तेमार्त्तंडस्योदयेतुतं नीत्वाकुंभंजलेशुभ्रेनद्यांप्रस्रवणेतथातडागेस्थापयित्वावापूजयित्वायथाविधि दद्यात्सदैवतंकुंभं ब्राह्मणेवेदपारगे कुंभेनसहराजेंद्रमहादानानिदापयेत् अनेनविधिनारामयूथपैःसहसंगतः कुरुव्रतंप्रयत्नेनविजयस्तेभविष्यति इतिश्रुत्वाततोरामोयथोक्तमकरोत्ततः कृतेव्रतीसविजयीवभूवरघुनंदनः प्राप्तासीतातुलंकायांपौलस्त्योनिहतोरणे अनेनविधिनापुत्रयेकुर्वंतिनराव्रतं इहलोकेजयस्तेषांपरलोकस्तथाक्षयः एतस्मात्कारणात्पुत्रकर्तव्यंविजयाव्रतंपठनाच्छ्रवणाच्चैववाजपेयफलंलभेत्

इतिस्कंदपुराणोक्तंफाल्गुनकृष्णाविजयैकादशीव्रतमाहात्म्यम् ॥

फाल्गुनकृष्णद्वादश्यांविशेषकृत्याभावात्तिथिदेवतात्वेनद्वादश्यांहरिपूजनमित्युक्तत्वाद्धरिपूजैवकार्य्या फाल्गुनकृष्णत्रयोदश्यांपक्षप्रदोषंकार्य्यं तच्चसविस्तरंमार्गमासकृत्येप्रपंचितम् ॥ फाल्गुनचतुर्दश्यांशिवरात्रिव्रतम् ॐनमोभगवतेरुद्राय ॥ अथामांतमासेनमाघकृष्णचतुर्दश्यांशिवरात्रिव्रतमुक्तम् ॥ अस्याःस्वरूपंशिवरहस्येमदनरत्ने ॥ तत्प्रभृत्यथदेवर्षेमाघकृष्णचतुर्दशीशिवरात्रिःसमाख्यातासाप्रियात्रिपुरद्विषइति स्कांदेपि माघफाल्गुनयोर्मध्येऽसितायाचतुर्दशीशिवरात्रिस्तुसाख्यातासर्वयज्ञोत्तमोत्तमेति ॥ तथाहि ॥ तत्रशिवरात्रिरितितत्पुरुषसमासेनयोगेनप्रवर्त्तमानःशब्दोरूढ्यामाघकृष्णचतुर्दशीरूपेकालीविशेषेनियम्यते शिवरात्रिर्यस्मिन्व्रते इतिवहुव्रीहिसमासेनयोगेप्रवृत्तः शब्दोरूढ्याव्रताविशेषेनियम्यते इति कालतत्त्वविवेचनेतुरात्रिशब्दस्यतिथिपरत्वाद्योगेनाशिवव्रतेयोग्यतिथि लाभाद्रूढ्याच तद्विशेषलाभात् अत्रयोगरूपोयंरात्रिशब्दः यस्तुक्वचिद्व्रतेकेवलशिवरात्रिशब्दप्रयोगः सलक्षणयानवरात्रादिशब्दवत् नचमुख्येसंभवति लक्षणाश्रयणाश्रवणमनुचितमितिवाच्यं लक्षणाया अभावेव्रतविषयत्वप्रसंगाभावात् अतएवप्राचुर्य्येणशिवरात्रिव्रतशब्दएवव्रतेप्रयुज्यते तिथिविशेषसंज्ञाकरणप्रयोजनंचतेनशब्देनतांनिर्दिश्यतत्रोपवासपूजादिविधानमिति तत्राशिवरात्रिव्रतमेकादशीजयंतीव्रतवत्संयोगपृथक्न्यायेननित्यंकाम्यंचेत्युभयविधं तत्राकरणे प्रत्यवायः स्कंदपुराणेपठ्यते परापरतरंमासिशिवरात्रिः परात्परं नपूजयंतिमुक्तीशंरुद्रंत्रिभुवनेश्वरं जंतुर्जन्मसहस्रेणभ्रमतेनात्रसंशयइति वीप्सापितत्रैवपठिता वर्षेवर्षेमहादेविनरोनारीपतिव्रता शिवरात्रौमहादेवंकामंभक्त्याप्रपूजयेदिति

नित्यनिश्चलशब्दौचतत्रैव माघकृष्णचतुर्दश्यां यःशिवंसंशितव्रतः मुमुक्षुःपूजयेन्नित्यं सलभेदीप्सितंपदमिति सागरोयदिवाशुष्येत्क्षीयतेहिमवानपि मेरुमंदरशैलाश्चश्रीशैलोविंध्यएवच चलंत्येतेकदाचिद्वैनिश्चलंहि शिवव्रतमिति काम्यत्वंचफलश्रवणादवगंतव्यं तथाहस्कंदपुराणे शिवंचपूजयित्वायोजागर्त्तिचचतुर्दशीं मातुःपयोधररसंनपिवेत्सकदाचन यदीच्छेद्वांछितान्भोगान्दिविदेवमनोरमान् आगमोक्तविधिंकृत्वाप्राप्नोतिपरमंपदं ममभक्तस्तुयोदेविशिवरात्रिमुपोष्यच गणपत्वमयंदिव्यमक्षयंशिवशासनमिति सर्वान्भोगान्सभुक्त्वातुमृतोभूयोनजायतइति काम्यव्रतस्येशासनसंहितायांवर्षसंख्यापठ्यते एवमेतद्व्रतंकुर्य्यात्प्रतिसंवत्सरंव्रती द्वादशाब्दिकमेतत्स्याच्चतुर्दशाब्दिकंतथा सर्वान्कामानवाप्नोतिप्रेत्यचेहचमानवइति अत्रोपवासाशिवपूजा जागरणानित्रीण्यपिसमुदितानि प्रधानकर्माणि आधिकारवोधकेषुनागरखंडादिवाक्येषुत्रयाणामपिफलसंवंधश्रवणात् तथाचनागरखंडे उपवासप्रभावेनवलादपिचजागरान् शिवरात्रेस्तथामर्त्यासतस्याचप्रपूजया अक्षयांल्लभतेभोगान्शिवसायुज्यमाप्नुयादिति संग्रहेपि स्वयंचलिंगमभ्यर्च्यसोपवासः सजागरः अजानन्नपिनिष्पापोनिषादोगणतांगतइति तस्मादुपवासादित्रयाणांसमुदायस्यैवव्रतरूपत्वं अस्यैवोद्वलकलिंगमभिधीयते लुब्धकस्यभद्राश्वजन्मप्राप्तवतोदुर्वाससाहससंवादेपठ्यते कृष्णपक्षेचतुर्दश्यांनकंचन्मृगमाप्तवान् अत्रोपिप्राथरक्षार्थंक्षुधासंपीडितोवसदिति उपक्रम्यधनुःकोट्या विल्वपत्राणिमानव पतितानिमहाराजशंभोः शिरसि भूतले तत्रैवतस्थौराजेंद्रसर्वरात्रमतंद्रितःरात्रिशेषेस्ततोव्याधस्तव्यधद्दष्टिरनामिषः प्रभातेविमलेजातेकंदमूलैश्चपारितइति ननुक्वचिदुपवासादित्रयंविधायपुनः पक्षांतररूपेणोपवासव्यतिरिक्तंद्वयंपठ्यते अथवाशिवरात्रिंच प्रजागरैर्नयेदिति नायंदोषः अथवेत्यनुकल्पोयंक्रमेणाशक्ताविषयत्वोपपत्तेः यान्यपि अखंडितप्रभावोहि

शिवरात्रिमुपोषयेत् सर्वान्कामानवाप्नोतिशिवेनसहमोदते तथा कश्चित्पुण्यविशेषेणव्रतहीनोपिमानवःजागरंकुरुते तत्रसरुद्रसमतामियात् तथा यःपूजयतिभक्त्येशमनेकफलतांव्रजे दित्यादीनिकेवलोपवासजागरणपूजाविधायकानितान्युपकल्पत्वादशक्तविषयाणि हेमाद्रिमाधवीयमदनरत्नादावप्येवम् ॥ नित्यंकाम्यरूपस्याप्यस्यव्रतस्यसर्वाधिकारत्वमीशानसंहितायामुक्तं शिवरात्रिव्रतंनामसर्वपापप्रणाशनं आचांडालमनुष्याणां भुक्तिमुक्तिप्रदायकमिति नृसिंहपरिचर्यायांवैष्णवैरप्येतद्व्रतंकार्यमित्युक्तंसौरोवावैष्णवोवान्योदेवतांतरपूजकः नपूजाफलमाप्नोतिशिवरात्रिवहिर्मुखइतियमवचनात् नतेतत्रगमिष्यंतियेद्विषंतिमहेश्वरमिति शिवविद्वेषिणो वैष्णवपदप्राप्तिनिषेधाच्च ॥ अधिकारिनियमाः स्कंदपुराणेदर्शिताः ॥ माघमासेतुकृष्णायाफाल्गुनादौचतुर्दशी साचपुण्यातिथिर्ज्ञेयासर्वपातकनाशिनीति अहिंसासत्यमक्रोधोब्रह्मचर्यंदयाक्षमा शांतात्माक्रोधहीनश्चतपस्विष्वनसूयकः तस्मैदेयमिदंदेविगुरुपादानुगोयदि अन्यथायोददातिदंसतदानरकंव्रजेदिति ॥ इतिव्रतस्वरूपतदुपयोगिनिर्णयः ॥

अथतिथिर्निर्णीयते साचाद्विधाशुद्धाविद्धाच तत्रसूर्योदयमारभ्यपुनःसूर्योदयपर्यंताशुद्धा तदन्याविद्धा तत्रशुद्धायांनास्तिसंदेहः विद्धातुप्रदोषनिशीथोभयव्यापिनीग्राह्या प्रदोषवेधोवायुपुराणेदर्शितः॥ त्रयोदश्यस्तगेसूर्येचतसृष्वेववरात्रिषु भूतविद्धातुयातत्रशिवरात्रिव्रतंचरेदिति स्मृत्यंतरेपि ॥ प्रदोषव्यापिनी ग्राह्याशिवरात्रिचतुर्दशी रात्रौजागरणंयस्मात्तस्मात्तांसमुपोषयेदिति ॥ त्रयोदशीदिनास्तांतेप्रदोषेचचतुर्दशी त्रिवर्गप्राप्तयेकार्य्या गृहस्थैःशिवतोषणी माघेचतुर्दशीकृष्णायाभवेद्रजनीमुखे तद्दिनेह्युपवासः स्यात्तिथ्यंतेपारणंभवेत् त्रयोदशीयुताकार्य्याशिवरात्रिचतुर्दशी पारणाहिचतुर्दश्यांयद्यस्तंयातिनोरविः शिवरात्रिः पराकार्य्या

यद्विरात्रौत्रयोदशी अन्यथातुभवेत्पूर्वापरेमाचेद्बुजिक्षमा इतिनिशीथवेदस्तु ॥ ईशानसंहितायां माघकृष्णचतुर्दश्यामादिदेवोमहेश्वरःशिवलिंगतयोद्भूतः कोटिसूर्यसमप्रभः तत्कालव्यापिनीग्राह्याशिवरात्रिव्रतेतिथि अर्द्धरात्रादधश्चोर्द्ध्वंयुक्तायत्रचतुर्दशी तत्तिथावेवकुर्वीतशिवरात्रिव्रतंव्रती अर्द्धरात्रादयश्चोर्द्ध्वंमुक्तायत्रचतुर्दशी नैवतत्रव्रतंकुर्य्यादायुरैश्वर्यहानिदइति व्याप्यार्द्धरात्रंयस्यांतुजायतेयाचतुर्दशी तस्यामेवव्रतंकार्य्यंमत्प्रसादार्थिभिर्नरैः पूर्वेद्युरपरेद्युर्वामहतीस्याच्चतुर्दशी व्याप्तासादृश्यतेयस्यांतस्यांकुर्य्याद्व्रतंनरः लिंगाविर्भावकालेतुव्याप्ताग्राह्याचतुर्दशी तदूर्द्धाधोन्विताभूतासाकार्याव्रतिभिःसदा ममप्रियकरीह्येषामाघकृष्णचतुर्दशी महानिशान्वितायातुतत्रकुर्य्यादिमंव्रतमिति ॥ अतएतस्यव्रतस्यरात्रिप्राधान्यमुक्तंस्कंदपुराणे निशिभ्रमंतिभूतानिशक्तयःशूलभृद्यतः अतस्तस्यांचतुर्दश्यांसत्यांतत्पूजनंभवेत् एतस्यार्थः निशिभ्रमंतिचरंतिभूतानिपिशाचादयः शक्तयोदेव्यःशूलभृत्शंकरः यतोतस्तस्यांचतुर्दश्यांतेषांभूतशक्तिशिवानांपूजनंकार्य्यं नागरखंडे माघमासस्यकृष्णायांचतुर्दश्यांसुरेश्वर अहंयास्यामिभूपृष्ठेरात्रावस्तेदिवाकरे लिंगेषुचसमस्तेषुस्थावरेषुचरेषुच संक्रमिष्यामिसंदग्धंवर्षपापविशुद्धये तस्माद्रात्रौहिमेपूजांयःकरिष्यतिमानवाः मंत्रैरेतैःसुरश्रेष्ठविपाप्मासभविष्यति एवंसतीति पूर्वेद्युरेवपरेद्युरेववायत्रप्रदोषनिशीथो भयव्याप्तिस्तत्रव्रतमाचरणीयं पूर्वेद्युरेवोभयव्याप्तौस्कंदपुराणेपठ्यते त्रयोदशीयदादेविदिनभुक्तिप्रमाणतः जागरेशिवरात्रिःस्यान्निशिपूर्णाचतुर्दशी दिनभुक्तिरत्रास्तसमयः परेद्युरेवोभयव्याप्तौकामिकेपिपठ्यते निशाद्वयेचतुर्दश्यांपूर्वात्याज्यापराशुभेति तथातत्रैव आदित्यास्तमयेकालेअस्तिचेद्याचतुर्दशी तद्रात्रिःशिवरात्रिःस्यात्साभवेदुत्तमोत्तमेति दिनद्वयेप्युभयव्याप्तिरनुभयव्याप्तिश्चनसंभाव्यते यामद्वयवृद्धेः यामद्वयक्षयस्यचाभावात् यदापूर्वेद्युर्निशीथव्याप्तिःपरेद्युःप्रदोषव्याप्तिस्तदापूर्वेद्युरेवो

पवासःकार्यः कृष्णाष्टमीस्कंदषष्ठीशिवरात्रिश्चतुर्दशी एताःपूर्वयुताःकार्य्यास्तिथ्यंतेपारणंभवेत् जन्माष्टमीरोहणीचशिवरात्रिस्तथैवच पूर्वविद्धैवकर्त्तव्यातिथ्यंतेपारणेशुभा श्रावणीदुर्गनवमीतथादूर्वाष्टमीचया पूर्वविद्धैवकर्त्तव्यातिथ्यंतेपारणेच्छुना जयंतीशिवरात्रिश्चकार्येभद्राजयान्विते इत्यादिस्कंदपुराणादिवचनैर्जया योगस्याद्दर्शनेनतस्यप्राशस्त्यावगतेः माघफाल्गुनयोर्मध्येयास्याच्छिवचतुर्दशी अनंगेनसमायुक्ताकर्त्तव्यासातिथिःसदेतिनागरखंडवचनाच्च महतामपिपापानांदृष्टावैनिष्कृतिःपुरा नदृष्टाकुर्वतांपुंसांकुहूयुक्तांतथाशिवामिति तत्रैवदर्शयुक्तायानिंदाश्रवणात् यदातुपूर्वेद्युर्निशीथादूर्ध्वंप्रवृत्ताचतुर्दशीपरेद्युः क्षयवशान्निशीथादर्वागेवसमाप्तापरेद्युरेवोपवासः प्रदोषव्याप्तेरेकस्याःसद्भावात् एतदभिप्रेत्यमाधवीयेस्मर्यते माघासितेभूतदिनंकदाचिदुपैतियोगंयदिपंचदश्या जयाप्रयुक्तांननुजातुकुर्य्याच्छिवस्यरात्रिः प्रियकृच्छिवस्येति ॥ अत्रत्रयोदश्याप्रकर्षेणयुतामित्युक्तत्वात्पूर्वेद्युस्त्रयोदश्यांबहुरात्रिव्याप्तिप्रतीतिः एतन्माधवमतानुसारेणोक्तं हेमाद्रिमदनरत्नादौतुनिशीथव्याप्त्यानिर्णयः कार्यइत्युक्तं निर्णयामृतेतुप्रदोषव्यापिनीग्राह्येत्युक्तं मयूखे यदाचतुर्दशीपूर्वेद्युर्निशीथेपरेद्युश्चप्रदोषे तदापूर्वेद्युरेव अर्द्धरात्रात्परस्ताच्चेज्जयायोगोयदाभवेत् पूर्वविद्धैवकर्तव्याशिवरात्रिःशिवप्रियेतिमयूखेभिहितं यत्तुएतस्मादेववचनाद्दिनद्वयेपिनिशीथव्याप्तौपूर्वेतिहेमाद्रिमदनौ ॥ इत्यत्र एतस्यवचसउत्तरादिनेनिशीथव्याप्ताभावेप्युपपत्तेः उत्तरादिनेगतप्रदोषानिशीथव्याप्तौदिवारात्रिव्रतमितिपूर्वोक्तवचसः संकल्पकालस्यचबाधोयोगादितितच्चिंत्यं तत्रैतादृशग्रंथानुपलंभात् उत्तरदिनेप्रदोषनिशीथोभयव्याप्तिसत्वोपग्राह्यातिथिनिर्णायकजयायोगसंग्राहकामपीडानिषेधसत्वेनपूर्वविद्धाया एवग्रहीतुंयुक्तत्वाच्च दिवारात्रिव्रतमित्यस्यव्रतांतरेचरितार्थत्वेन विशेषवचनप्रकृतव्रतनिर्णायकत्वाच्चसंकल्पस्यचांगत्वेनतत्कालव्या

प्तरुद्भावनार्हत्वाच्च वैष्णवानात्रयोदशीनिषिद्धा ॥ पाद्मेहरिभक्तिविलासे शिवरात्रिव्रतेभूतंकामाविद्धंविवर्जयेदित्युक्तं तत्रैवपराशरः ॥ माघासितंभूतादिनंहिराजन्नुपैतियोगंयदिपंचदश्या जयाप्रयुक्तंनतुजातुकुर्य्याच्छिवस्यरात्रिंप्रियकृच्छिवस्य ॥ योगउक्तोलैंगाक्षिणा ॥ द्विमुहूर्त्तोभवेद्योगोयोगोमौहूर्त्तिकःस्मृतः अस्यटीका प्रमाणमाह ॥ माघासितेत्यादि एवंचमाघफाल्गुनयोर्मध्येयास्याच्छिवचतुर्दशी अनंगेनसमायुक्ताकर्तव्यासर्वदातिथिरितिवचः शिवरात्रिव्यतिरिक्तशिवचतुर्दशीव्रताविषयकं अथवापरदिनेअमायोगाभावविषयंसकामावैष्णवविषयकंवाज्ञेयं इत्थंच यदाचतुर्दशीक्षयःस्यात्तर्हिवैष्णवानामपिविद्धोपवासः प्रसज्जेतैव अन्यथा अमावास्यासंयोगव्यवस्थायाअत्रलोपप्रसंगात् अतःसाव्यवस्थावैष्णवजनसंमतास्यादित्युपेक्षा अतएवनृसिंहपरिचर्यायांतुदर्शविद्धैवोपोष्येत्युक्तं इयंत्रिस्पृशाचेदतिप्रशस्तातदुक्तं माधवीयपुराणे त्रयोदशीकलाप्येकामध्येचैवचतुर्दशी अंतेचैवसिनीवालीत्रिस्पृश्यांशिवमर्चयेदिति ॥ यथात्रिस्पृशाप्रशस्ता तथावारविशेषेणयोगविशेषेणापिप्रशस्ताभवति तथाचस्कंदपुराणेपठ्यते माघकृष्णचतुर्दश्यांरविवारोयदाभवेत् सोमोवाथभवेद्देविकर्त्तव्यंव्रतमुत्तमं शिवयोगस्ययोगेवैतद्भवेदुत्तमोत्तमं शिवरात्रिव्रतंत्वेतत्तद्भवेदुत्तमोत्तमामिति ॥

इतिग्राह्याशिवरात्रिव्रततिथिनिर्णयः ॥ अथपारणानिर्णयः ॥ यदोत्तरदिनेपूर्वमेवचतुर्दशीसमाप्यते तथातिथ्यंतेकार्य्यं तथाचस्कंदपुराणे कृष्णाष्टमीत्यक्त्वा एताःपूर्वयुताः कार्य्यातिथ्यंतेपारणंभवेदिति पठितं यदातुदिवानसमाप्यते तदाचतुर्दशीमध्येपूर्वाह्णेकार्य्यं तदप्युक्तंतत्रैव उपोषणंचतुर्दश्यांचतुर्दश्यांतुपारणम् कृतैः सुकृतलक्षैश्चलभ्यतेवाथवानवा ब्रह्मास्वयंचतुर्वक्त्रःपंचवक्त्रस्तथाप्यहं वक्ष्येयदिफलंतस्यशक्तोवक्तुंनपार्वति ब्रह्मांडोदरमध्येतुयानितीर्थानिसंतिवै संस्नातानिभवंतीहभूतायांपारणेकृते तिथीनामेवसर्वासामुपवास

व्रतादिषु तिथ्यंतेपारणंकुर्य्याद्विनाशिवचतुर्दशीमितिमदनरत्ने कालादर्शेपि सात्वस्तमयपर्यंतंव्यापिनीचेत्परेहनि दिवैवपारणंकुर्य्यात्पारणान्नैवदोषभागिति केचित्तुशक्तिस्तिथ्यंतेअशक्तिस्तिथिमध्यइत्यूचुः मयूखेतु मध्यकालोमुख्यस्तदंतकालोगौणइत्युक्तं यत्तु निर्णयसिंधौ यामत्रयादर्वाक्चतुर्दशीसमाप्तौतुतदंतेतदूर्ध्वगामिन्यांतुप्रातःस्तिथिमध्यएवेति हेमाद्रिमाधवादयोऽव्यवस्थामाहुस्तत्र तिथिभांतेचपारणमत्रयोदितयामत्रयोर्ध्वगामिन्यांप्रातरेवाहिपारणेत्यादि तच्चिंत्यं तिथिमध्येपारणाविधायकवचनानामेकमूलकल्पनालाघवानुरोधेनएतद्वचनासिद्धार्थानुवादकत्वस्यैवयुक्तत्वात् यदप्युक्तं वयंतुतिथ्यंतेपारणंभवेदितिकृष्णाष्टम्यादिविषयकमितिब्रूमइति तदपिचिंत्यंतिथ्यंतेपारणंभवेदित्यत्रतिथिशब्देनप्रक्रांतसर्वतिथिपरामर्शस्या सिद्धत्वेनसंकोचस्यान्याय्यत्वात् यदपिसाह्यस्तमयपर्यंतव्यापिनीचेत्परेहनीतिमदनरत्नकालादर्शधृतवचनंशिवरात्रिव्रतभिन्नव्रतपरमिति तदपिनप्रकरणबाधापत्तेः तच्छब्दस्यप्रक्रांतशिवरात्रिपरामर्शकत्वेनतद्भिन्नव्रतपरामर्शकत्वानुपपत्तेश्चेति ॥ इतिपारणनिर्णयः शिवरात्रौअवश्यंकर्त्तव्याशिवपूजातदुपयोगित्वेनप्रासंगिकंकिंचिन्निरूप्यते तत्रादौ शिवलिंगमहिमालैंगभविष्यपुराणयोः आयुष्मान्बलवान्श्रीमान्धनवान्पुत्रवान्सुखी वरमिष्टंलभेल्लिंगंपार्थिवंयःसमर्चयेत् मृद्भस्मगोशकृत्पिंडंताम्रकांस्यमयंतथा कृत्वालिंगंसकृत्पूज्यवसेत्कल्पायुतंदिवि कामनाविशेषेणलिंगभेदाः देवीपुराणे वार्क्षंवित्तप्रदंलिंगंस्फाटिकंसर्वकामदं नर्मदागिरजंश्रेष्ठमन्यद्वापिहिलिंगवत् कृत्वापूजयविप्रेंद्रलप्स्यसेवोप्सितंफलं अथफलविशेषोहेमाद्रौलक्षणसमुच्चये आयुष्यंहीरजज्ञेयंरोगहृन्मौक्तिकोद्भवं सुखकृत्पुष्परागोत्थंवैडूर्य्यंशत्रुदर्पहृत् पद्मरागंचलक्ष्मीदमैंद्रनीलंयशःप्रदं

लिंगंमारकतंपुष्ट्यैस्फाटिकंसर्वकामदमिति ॥ शिवनारेदसवांद पित्तृणांमुक्तये पूज्यंलिंगंरजतसंभवंकौरिकामोर्चयेन्नित्यंलिंगंकांस्यसमुद्भवं पूजयेत्ताम्रजंलिंगंपुष्टिकामोहिमानवः तुष्टिकामस्तुसततंलिंगंपैत्तलसंभवं शत्रुमारणकामस्तुलिंगंलोहमयंसदा तथासीसमयंलिंगमायुःकामोर्चयेत्सदा तथा ब्रह्मस्वपरिहारार्थंसौवर्णंलिंगमर्चयेत् स्थिरलक्ष्मीप्रदंहैमंराजतंचैवराज्यकृत् प्रजावृद्धिकरंरागंताम्रमायुःप्रवर्द्धनमिति लिंगे ॥ श्रीप्रदंशार्वलंलिंगंशिलाजंसर्वसिद्धिदमिति कालोत्तरे ॥ गंधपुष्पमयंलिंगंतथान्नादिविनिर्मितं सर्वकामप्रदंपुंसांलिंगंतात्कालिकंस्मृतमिति लक्षणसमुच्चये गांधंसौभाग्यदंपौष्पंभुक्तिमुक्तिप्रदायकं प्रभुमानप्रदंशाङ्र्गंसैन्यदंनागदंतजं शालिपिष्टोद्भवंपुष्ट्यैपैष्टिकंधनवर्द्धनं गोधूमंवातरोगघ्नंयमजंवलपुष्टिदं रिपुभेदकरंमौद्गंस्त्रीदंस्यान्माषपिष्टजं आन्नमायुःप्रदंज्ञेयंगौडंप्रीतिविवर्द्धनं नानाफलोद्भवंलिंगंनानाकामप्रदायकं तैलपिष्टंकरोत्यग्निसैद्धार्थंभयनाशनं तैलमिश्रितपिष्टोद्भवंलिंगंक्षुधांकरोतीत्यर्थः सुखकृत्वावनेयंचगोमयंरोगनाशनं गुणदंसैकतंभूरिसौभाग्यायचलावणं उच्चाटनेतुपांशव्यंमौलंशत्रुक्षयावहं वंशांकुरसमुद्भूतंवंशवृद्धिप्रदंभवेत् पुरक्षोभकरंमौरंरामठंचाग्निकारकं मौरंगौग्गुलंरामठंहिंगुमयं पूज्यंगंधमयं लिंगंत्रिकालंसुसुखावहं चंद्रेणचंदनेनाथकुंकुमेनसुगंधिना चतुःसमेनवाकार्यंलघुनाकेवलेनवा चंद्रःकर्पूरः लघुरगुरुःचतुसमलक्षणं गारुडे कस्तूरिकायाद्वौभागौचत्वारश्चंदनस्यच कुंकुमस्यत्रयश्चैवशशिनश्चचतुःसमइति शिवनारदसंवादे तत्रापिपार्थिवंश्रेष्ठंक्षिप्रसिद्धिप्रदंभवेत् पार्थिवेनतुलिंगेनवहवःसिद्धिमागताः कृते रत्नमयंलिंगंत्रेतायांहेमसंभवं द्वापरेपारदंश्रेष्ठंपार्थिवंतुकलौयुगे ॥ श्रेष्ठमित्यनुषंगः ततश्चकलावपिनालिंगांतरनिषेधःअथपार्थिवलिंगेतुसंख्याभेदेनफलविशेषः ॥ नारदउवाच ॥ देवकेनप्रकारेणकर्तव्यंसार्वकामिकं यस्य

पूजनमात्रेणकृतकृत्योभवेन्नरः ॥ शिवउवाच ऋषेसर्वप्रयत्नेनपार्थिवंलिंगमुत्तमं कर्त्तव्यंहिनृभिर्नित्यंकाममुद्दिश्ययत्नतः मल्लिंगंपार्थिवंलक्षंभुक्तिमुक्तिफलप्रदं देशकालवलंज्ञात्वाकुर्य्याल्लिंगंफलप्रदं विद्यार्थीलिंगसाहस्रंधनार्थीचतदर्धकं पुत्रार्थीसार्धसाहस्रंकन्यार्थीचशतत्रयं वद्धोलिंगायुतंकुर्य्यात्सर्वपापहरंपरं राज्यार्थीशतसाहस्रंकांतार्थीशतपंचकं मोक्षार्थीकोटिगुणितंभूकामश्चसहस्रकं रूपार्थीत्रिसहस्रंतुतीर्थार्थीद्विसहस्रकं सुहृत्कामः सहस्रंतुवश्यार्थीशतपंचकं उच्चाटनपरश्चैवसहस्रंचयथोक्तवत् स्तंभनेचसहस्रंचमारणेचतदर्द्धकं निगडान्मुक्तिकामस्यसहस्रंसार्द्धमीरितं महाराजभयेपंचशतंघोराध्वसंकटे शतद्वयंचडाकिन्याभयेपंचशतंपरं दारिद्र्येपंचसाहस्रंतस्यार्धसर्वकामिकमितिपूर्वोक्तमहासंख्यापूर्वप्रत्यहंकियल्लिंगसंख्याविधेयेत्यपेक्षायामाह एकंपापहरंप्रोक्तंद्विलिंगंचार्थसिद्धिदं त्रिलिंगंसर्वकामानांकारणंपरमीरितं मारणेतुचतुर्लिंगंपुत्रकाम्येचपंचकं उत्तरोत्तरमेवंस्यात्पूर्वोक्तगणनावधीति ॥ अन्यत्रापि ॥ लिंगानामयुतंकृत्वामहाराजभयंहरेत् सहस्रमेकंलिंगानांव्याधीनांतुभयंहरेत् सहस्राणितथापंचनिगडान्मुक्तयेनृणाम् कारागृहविमुक्तार्थमयुतंकारयेद्बुधः डाकिन्यादिभयेसप्तसहस्रंकारयेत्तथा सहस्राणांतुपंचाशदपुत्रोपिहिकारयेत् लिंगानामयुतंनैवकन्याकामस्तुकारयेत् एकलिंगार्चनेनैवअतुलांश्रियमाप्नुयात् लक्षमेकंतुलिंगानां यःकरोतिनरोभुवि शिवएवभवेत्सोपिनात्रकार्य्याविचारणेति क्रियासारे ॥ लिंगस्यशिवनाभेस्तुनहिपीठप्रकल्पनं तदाधाराशिलैवस्याचस्यपीठमितिस्मृतं उत्तमंमध्यमंहीनामितिलिंगंत्रिधास्मृतं एकैकंत्रिविधातद्वदुत्तमांगुलिमानतः नवाष्टसप्तांगुलिकंलिंगंश्रेष्ठंतथास्मृतं षट्पंचकंचतुर्मानंमध्यमंत्रिविधंस्मृतं त्रिद्वेकांगुलिकंलिंगंत्रिविधंतुकनीयकं उत्तमंवुद्बुदाकारंमध्यमंकुक्कुटांडवत् अधमंगोककुव्वच्चइतिलिंगंत्रिधास्मृतं अक्षादल्पपरीमाणंतल्लिंगंकुत्रचिन्नरः कुर्वीतांगुष्ठतोह्रस्वंनकदाचि

त्समाचरेत् अक्षोशीतिगुंजः गुंजःपंचाज्यमाषकःतेशोडशाक्षःकर्षौस्त्रीत्यमरकोशात् तस्मादशीतिगुंजपरिमाणयामृदापार्थिवलिंगंकर्त्तव्यं रुद्राक्षंशिवलिंगंचस्थूलंस्थूलंप्रशस्यते ॥ इतिवचनाच्च ॥ सिद्धांतशेखरे अंगुलादिवितस्त्यंतंलिंगंगेहेप्रपूजयेत् प्रासादेतुतदूर्द्ध्वंस्यात्पूजनीयंप्रयत्नतइति पाद्मे शालिग्रामशिलालिंगेयःकरोतिममार्चनं तेनार्चितःकार्त्तिकेयः युगानामेकसप्ततिं प्रागादिदिगभिमुखनियमःसारसमुच्चये प्रागाननोधनददिग्वदनोथवेति अन्यत्रापि रात्रावुदङ्मुखःकुर्य्याद्देवकार्य्यंसदैवहि शिवार्चनंसदाप्येवंशुचिःकुर्य्यादुदङ्मुखइति वाचस्पतिमिश्रास्तु प्राक्पश्चिमोदगास्यस्तुप्रातःसायंनिशासुचेतिवचनात्कालभेदेनव्यवस्थामाहुः पारिजातेगृह्यपरिशिष्टे प्रतिमाःप्राङ्मुखीरुदङ्मुखोयजेत एतच्चस्थिरप्रतिमाविषयं अन्यत्रप्राङ्मुखः अन्यत्रचलादाविति निर्णयसिंधौ ॥ अन्यत्रतु चरेलिंगेर्चयेद्देवंपूर्वाभिवदनंबुधः स्थिरलिंगेयथाक्लृप्तासतमेवप्रपूजयेदिति गोभूहिरण्यवस्त्रादिवलिपुष्पनिवेदने ज्ञेयोनमः शिवायेति मंत्रः सर्वार्थसाधकः सर्वत्राप्यधिकश्चायमोंकाराद्यः षडक्षरः ॥ नंदिपुराणात्पंचाक्षरेणवापूजनंकार्य्यं लिंगेर्चास्थंडिलेवापिशंकरंविधिपूर्वकं पूजयेतिशेषः ॥ युगदोषांविनिर्जित्यरुद्रलोकेप्रसीदते ॥ पार्थिवंलिंगमधिकृत्यब्राह्मे॥हरोमहेश्वरश्चैवशूलपाणिःपिनाकधृक् पशुपतिःशिवश्चेतिमहादेवेतिपूजयेत् मृत्तिकाग्रहणेचैवघटनेचप्रतिष्ठितौ आवाहनेचस्नपनेपूजनेचविसर्जनइति ॥

अथमंत्रमहोदधिस्थंपार्थिवपूजनाविधानम् ॥

अथपार्थिवलिंगस्यविधानमभिधीयते स्नातोनित्यंविधायादौगत्वाशुद्धांभुवंसुधीः उपरिस्थामथाकृत्यषडर्णेनाभिमंत्रयेत् ॥ आकाशः पृथिवीशेषास्थितोविंदुसमान्वितः पृथवीचचतुर्थ्यंतानमोंतः स्यात्षडक्षरः ततोमृदुमुपादायकृत्वानिःशर्करांततः पात्रेनिदध्यात्संशुद्धेप्रत्यहंपूजनायतां सद्दिनेसद्गुरोर्मंत्रौगणेश्वरकुमारयोः हराद्यां

17

श्वमनून्सप्तगृह्णीयाद्योगसिद्धये अथार्चनंशुभेघस्रेआरभेतप्रसिद्धये कृत्वानित्यक्रियाःशुद्धोदद्यादर्घ्यंविवस्वते
मृदमादायतोयेनसुधयामंत्रेतेनच आसिच्यपिंडयेत्स्त्रेष्टमानपात्रेनिधापयेत् तदाकालमनुस्मृत्यकामनामपिहृद्ग
तां लिंगानिपार्थिवानीहपूजयेमुकसंख्यया संकल्पैवंमृदापिंडादादायाल्पांमृदंसुधीः एकादशार्णमनुनाकुर्य्या
द्वालगणेश्वरं मायागणेशभूवीजैर्जातोगणपतेःपुटः एकादशोर्णमंत्रोयंस्मृतोवालगणेशितुः वराभयलसत्पाणि
पद्मंवालगणेश्वरं निर्मायस्थापयेत्पीठेलिंगानिरचयेत्ततः हरमंत्रेणगृह्णीयादक्षमानाधिकांमृदं ॥
महेश्वरस्यमंत्रेणलिंगंकुर्यात्तथाशुभं अंगुष्ठमानादधिकंवितस्त्यवधिसुंदरं पार्थिवंरचयेल्लिंगंनन्यूनंनाधिकंततः
शूलपाणेस्तुमंत्रेणलिंगंपीठेनिधापयेत् एवमन्यानिकुर्वीतयथासंकल्पमादरात् अवशिष्टमृदाकुर्य्यात्कुमारं
तस्यमंत्रतः स्थापयेल्लिंगपंक्त्यंतेस्वमंत्रेणार्चयेच्चतं वाग्वर्मकर्णविद्याढ्यइचरमोमीनकेतनः कुमारा
यनमोंतोयंगुहमंत्रोदशाक्षरः मंत्रेणावाहयेद्देवंप्रतिमंत्रापिनाकिनं ततोलिंगस्थितंध्यायेत्सप्रसन्नंमहेश्वरं
दक्षांकस्थगजपतिमुखंप्रामृशन्दक्षदोष्णा वामोरुस्थानगपतितनयांकेगुहंचापरेण इष्टाभीतिंवरकरयु
गेधारयत्पिंडकांतिरव्यादस्मान्त्रिभुवनमतोनीलकंठस्त्रिनेत्रः एवंध्यात्वापशुपतेर्मंत्रेणस्थापयेच्छिवं
शिवमंत्रेणगंधादीनर्पयेद्वह्निरेतसे प्रागादिवामावर्तेनदिक्ष्वष्टौपरिपूजयेत् शर्वंभवंरुद्रमुग्रंभीमंपशुपतिं
तथा महादेवमथेशानंक्रमात्क्षित्यादिमूर्तिकान् क्षित्यप्तेजोनिलाकाशयजमानेंदुभास्कराः क्षित्याद
यः स्युः शर्वाद्या स्ततइंद्रादिकान्यजेत् धूपदीपनिवेद्यादिनमस्कारप्रदक्षिणाः जयंचकृत्वाविसृजेन्महादेव
स्यमंत्रतः तारानंतादिकांडे ताहराद्यामनवोद्रष्टव्यः ॥ प्रतिलिंगेयजेद्देवमखिलानिसहैववा पूजितौनिजमंत्रेण
विसृजेद्गणभृद्गुहौ धनपुत्रादिकामैस्तु शिवोऽर्घ्यःप्रोक्तलक्षणः विद्याकामैश्चिंतनीयः परशुंहरिणंवरं

ज्ञानमुद्रांदधद्धस्तैवटमूलमुपाश्रितः पुंसोर्विरुद्धयोः संधौ कुर्य्याल्लिंगानिसाधकः नदीतीरद्वयानीतमृदातानिचपूजयेत् तत्रध्येयोहरिहरः शंखपद्मादिशूलभृत् इंद्रनीलशरच्चंद्रभूतिभूषणपुंजवान् दंपत्योरविरोधार्थमर्धनारीश्वरः स्मृतः पीयूषपूर्णकलशंदधत्पाशांकुशावपि उच्चाटमारणोद्वेषे ध्यातव्यः पुनरीदृशः कालीहस्तांवुजालवः शूलप्रोताद्विषच्चयः मुंडमालाक्षरुत्कंठोरावाविनाहिताखिलः इत्थंतुकामनाभेदाद्ध्यानभेदाःप्रकीर्त्तिताः पूजयेत्कार्य्यसिद्ध्यर्थंलक्षावाधिसहस्रतः लक्षंपार्थिवलिंगानांपूजनाद्भुक्तिमुक्तिभाक् लक्षंतुमुंडलिंगानांपूजनात्पार्थिवोभवेत् यानारीशिवलिंगानिसंपूज्येष्टमवाप्नुयात् भस्मनेगोमयस्यापि वालुकायास्तथाफलं क्रीडंतःशिशुकाभूमौलिंगंकृत्वारजोमयं पूजयंतिविनोदेन तेपि स्युःक्षितिनायकाः प्रातर्गोमयलिंगानिनित्यंयस्त्रीणि पूजयेत् वृहतीविल्वयोःपत्रै नैवेद्येगुडमर्पयेत् एवंमासत्रयंकुर्वन्ननल्पंलभतेधनं एकादशैवलिंगानिगोमयोत्थानिमर्चयेत् प्रातर्मध्याह्नयोः सायंनिशीथेप्रतिवासरं ससर्वाः संपदोयायात्षण्मासानेवमादरात् एकादशयजेन्नित्यंशालिपिष्टकृतानियः लिंगानिमासमात्रेणसकल्मषचयंदहेत् स्फाटिकंपूजितंलिंगमेनोनिकरनाशनं सर्वकामप्रदंपुंसामुदुंवरसमुद्भवं रेवाश्मजंसर्वसिद्धिप्रदंदुःखविनाशनं यथाकथंचिल्लिंगस्यपूजानित्यंकृतेष्टदा योर्चयेत्पिचुमंदोत्थैः पत्रैर्गोमयजंशिवं क्रुद्धमहेश्वरंध्यायन्सपराजयतेरिपून् लिंगंसंपूज्ययन्नित्यंशिवभक्तिपरायणः मेरुतुल्योपितस्याशुपापराशिर्लयंव्रजेत् चतुर्दश्यांतथाष्टम्यांपौर्णमास्यांविधुक्षये पयसास्नापितोशंभोधरादानफलंलभेत् दोग्ध्रीणांतुगवांलक्षंयोदद्याद्वेदपाठिने पार्थिवंयोर्चयेल्लिंगंतयोर्लिंगार्चकोवरः लिंगपूजांविधायाग्रेस्तोत्रंवाशतरुद्रियं पूजयेत्तन्मनाभूत्वाशिवेस्वंविनिवेदयेत् यत्संख्याकंयजेल्लिंगंतन्मितंहोममाचरेत् आज्यान्वितैस्तिलैरन्नैर्घृतैर्वापायसेनवा शिवमंत्रेणतस्यांतेब्राह्मणान्भोजयेच्छतं एवंकृतेसमस्तेष्टसिद्धिर्भवतिनिश्चितमिति ॥

इतिमंत्रमहोदधिस्थपार्थिवविधानम् ॥

अथपंचसूत्रीविधानं लिंगवृत्तसममध्यमूर्द्धविस्तीर्णमेवच तदर्द्धंगोमुखंप्राहुःपंचसूत्रमिदंमतं कालोत्तरे ॥ लिंगमस्तकविस्तारोलिंगोच्छ्रायसमोभवेत् त्रिगुणःपरिणाहःस्याततःपिंडीप्रतिष्ठिता लिंगतुल्यंप्रणालंस्यात्पंचसूत्रस्यलक्षणं पंचसूत्रसमायुक्तंशिवलिंगंसमर्चयेत् भुक्तिदंमुक्तिदंदेविधनारोग्यसुखप्रदं गौतमीतंत्रे लिंगमस्तकविस्तारोलिंगोच्छ्रायसमोमतः परिधिस्तत्त्रिगुणितस्तद्वत्पीठंव्यवस्थितं प्रणालिकातथैवस्यात्पंचसूत्रविनिर्णयः लिंगमस्तकविस्तारंपूजाभागसमंभवेत् नाहंतत्त्रिगुणंकुर्य्यान्नाहवत्पीठविस्मृतिः पूजांशाद्द्विगुणंकुर्य्यादुन्नतंपीठमुत्तमं वृत्तंवाचतुरस्रंवामध्येकंठसमन्वितं द्विगुणंलिंगनाहाच्चकंठनाहंसमाचरेत् त्रिमेखलमधश्चोर्द्धसमंवाथद्विमेखलं लिंगमस्तकविस्तारंषड्भागांविभजेत्ततः मेखलामेकभागेन कुर्य्यात् वातंचतत्समंलिंगदैर्घ्यसमंकुर्य्यात्प्रणालंपीठबाह्यतः विस्तारंतत्समंमूलतदर्द्धंचतदग्रतःजलमार्गःप्रकर्त्तव्य स्तस्यमध्येत्रिभागतः कुर्य्यात्पीठार्द्धदैर्घ्यंवाप्रणालंचतथोदितं सर्वेषांतत्रलिंगानांसपीठानांविशेषता लोहादीनांचालिंगानामेवंलक्षणमाचरेत् लिंगनाहसमपीठविस्मृतंविस्मृतस्यसमभागतुंगकं तुंगकार्द्धसमगोमुखांतकंगोमुखांतसमकंठनाहकं शिल्पिशास्त्रेपि लिंगमस्तकविस्तारंलिंगौच्चयवत्समंकृत्वा ॥ तत्त्रिगुणवेष्टनार्हंलिंगस्थौल्यंकृत्वा तत्समंवृत्तंचतुरस्रंवापीठविस्तारं अधउर्द्धंचकुर्य्यात् ॥ पीठोच्चतातुलिंगौच्यमतोद्विगुणा पीठमध्यंलिंगाद्द्विगुणंस्थूलं पीठोच्चतातृतीयांशेनकंठंकृत्वा तस्योर्द्धमधश्चसमंवप्रत्रयंवाकृत्वा लिंगविस्तारषष्ठांशेनपीठोपरिबाह्यमेखलांकृत्वातदंतः संलग्नंतत्समंखातंकृत्वा पीठाद्बहिर्लिंगसमदीर्घ्यंपीठार्द्धदीर्घांवामूलदैर्घ्यसमविस्तारामग्रेतदर्द्धविस्तारांतृतीयांशेनमध्येखातां पीठवत्समेखलांप्रणालिकांकुर्य्यादिति ॥

इतिपंचसूत्रविधानम्

इदंपंचसूत्रीविधानंपार्थिवेनविधानंकुर्य्यात् तदुक्तंपार्थिवेश्वराचिंतामणौ पंचसूत्रविधानंचपार्थिवेनचकारयेत् यथाकथंचिद्विधिनारमणीयंप्रकल्पयेत् रत्नादिलिंगेप्येवं ॥ तदुक्तंहयशीर्षपंचरात्रे नकुर्य्याल्लक्षणोद्धारंरत्नजानां चलात्मनां स्वप्रभालक्षणंतेषांस्वर्णजातामपिध्रुवं तस्मान्नलक्षणोद्धारंकुर्य्यात्पाषाणलिंगवत् अचलानांतैजसानांकाश्चिदिष्येतलक्षणं लक्षणंकल्पनीयंतुस्थाप्यलिंगेयथाविधि चललिंगेकुशाग्रेणलक्षणंकल्पयेद्गुरुः मनसाचिंतयेद्वाचिलक्षणंलिंगसंस्थितं सोमशंभावपि रत्नजेलक्षणोद्धारोनलोहेनसरिद्भवे लिंगेषुचललोहेषुनदृष्टं क्वचिदागमे स्वरूपंलक्षणंतेषांप्रभारत्नेषुनिर्मलेति अन्यत्रसंख्याविशेषेनिषेधः गृहेलिंगद्वयंनार्ध्यंशालिग्रामद्वयंतथा द्वेचक्रेद्वारिकायाश्चगणेशत्रयमेवच ॥

अथशिवपूजामधिकृत्यकालिकापुराणे कपिलापंचगव्येनकुशवारियुतेनच स्नापयेत्मंत्रपूतेनब्राह्मंस्नानंतदुच्यते ॥ एकाहमपियोलिंगेब्राह्मंस्नानंसमाचरेत् विधूयसर्वपापानिरुद्रलोकेमहीयते कपिलापंचगव्येनदधिक्षीरयुतेनच स्नानेशतगुणंपुण्यमितरेभ्योनसंशयः वर्षकोटिसहस्रेणयत्पापंसमुपार्जितं घृतस्नानेन तत्सर्वंदहत्यग्निरिवेंधनं कृष्णाष्टम्यांघृतस्नानं कृत्वालिंगेसकृन्नरः कुलैकविंशमुत्तार्य्यशिवलोकेमहीयते स्नाप्यदग्धासकृल्लिंगंशिवलोकेमहीयते ॥ ब्रह्मपुराणे देवानांप्रतिमायत्रघृताभ्यंगक्षमाभवेत् पलानितस्यैदेयानिश्रद्धयापंचविंशतिः अष्टोत्तरंपलशतंस्नानदंपंचसर्वदा द्वेसहस्रेपलानांतुमहास्नानेतुसंख्यया दातव्यंयेनसर्वासुदिक्षुनिर्य्यातितद्वृतं पंचविंशपलांलिंगेअभ्यंगंकारयेदथ शिवस्यसर्पिषास्नानंप्रोक्तंपलशतेनच तावतैवचक्षीरेणगव्येनैवभवेत्ततः भूयःसार्द्धसहस्रेणपलानामैक्षयेद्वचः रसेनकारयेत्स्नानंभक्त्याचोष्णांबुनाततः

शीतांबुनापिदत्त्वाचवस्त्रपूतेनमंत्रवित् स्नापयेद्भक्तितोभूयोगंधपात्रास्थितेनतु महास्नपनोतरंकौस्तुभेविशेषः॥महादीपद्वयंदेयंशतमष्टोत्तरंपुनरिति पूजारंभप्रभृतिसंततएकोदीपःपरोभूयःपूजानंतरंशतमष्टोत्तरंदीपादेयाइतिबोध्यम्॥ विल्वादौतुस्कांदे ॥ क्षीराद्दशगुणंदध्नाघृतेनैवदशोत्तरं वृताद्दशगुणंक्षौद्रंक्षौद्राश्चैवेक्षुजंतथा वस्त्रंयामले पीतकौशेयवसनंविष्णुप्रीत्यैप्रकीर्तितं रक्तंशक्त्यर्कविघ्नानांशिवस्यचासितांप्रियं मलहीनंतथाछिद्रंक्षौमंकार्पासमेव चांते अथचंदनं चंदनागुरुकर्पूरैःश्लक्ष्णपिष्टैःसकुंकुमैः शिवस्यार्चांसमालिप्यकल्पकोटिवसेद्दिवि हेमाद्रौतु विशेषः विधिनास्नाप्यचानेनततोरोचनयालिपेत् कृष्णागुरुसकर्पूरचंदनागुरुयुक्तया लेपयित्वाततोलिंगमापीठजघनंशुभं अनुलेपनपरिमाणंलैंगे अनुलिंगेच्चतत्सर्वंपंचविंशफलेनचेति अथपुष्पाणि धत्तूरकैस्तुयोलिंगं कृष्णैः संपूजयेन्नरःसगोलक्षफलंप्राप्याशिवलोकेमहीयते नीलोत्पलसहस्त्रस्यमालांवध्वाप्रपूजयेत् अलाभे तुसहस्त्राणामर्द्धार्द्धैनैवपूजयेत् उत्पलानामलाभेतुपत्रैश्चश्रीतरोर्यजेत् श्रीतरोर्विल्वस्य विल्वपत्रैरखंडैश्चयोलिंगंपूजयेत्सकृत् सर्वपापविनिर्मुक्तःशिवलोकेमहीयते सर्वकामप्रदंविल्वंदारिद्रस्यविनाशनं विल्वादन्यत्परंनास्तियेनतुष्यतिशंकरः शुष्काण्यपिचपत्राणिश्रीवृक्षस्यसदैवहीति ॥ पारिजातोक्रियासारे ॥ मध्यमानामिकामध्येपुष्पंसंगृह्यपूजयेत् अंगुष्ठतर्जन्यग्राभ्यांनिर्माल्यमपनोदयेत् अपनीतंचनिर्माल्यंचंडेशायनिवेदयेत् अशून्यमस्तकंलिंगंसदाकुर्वीतपूजकः॥ अथशिवेवर्ज्यपुष्पाणिभाविष्यपुराणे ॥ केतकीजातिमुक्तंचकुंदोयूथीमदंतेका शिरीषंसर्जवंधूकंकुसुमानिविवर्जयेत् निर्गंधीन्युग्रगंधीनिकुसुमानिविवर्जयेत् गंधहीनमपिग्राह्यंपवित्रंयत्कुशादिकं प्रासाददीपिकायां जपावंधूकासिंदूरं तथात्रैसंधिकीशुभेमदंतीकेतकीपुष्पंमालतीपुरजातिचघुसृणंचाश्वमारंचप्रमादेनापिनार्पयेत् ॥ अथधूपःशिवपुराणे ॥ गुग्गुलंघृतसंयुक्तंशिवेयश्चनिवेदयेत् रुद्रलोकमवाप्नोति

गाणपत्यंचाविंदति अथदीपः भविष्यपुराणे घृतदीपप्रदानेनशिवायशतयोजनं बिमानंलभतेदिव्यंसूर्यकोटिसमप्रभं अथनैवेद्यं तत्परिमाणंहेमाद्रौ दशद्रोणैस्तुनैवेद्यैरष्टद्रोणैरथापिवा शतद्रोणसमंपुण्यमाढकेनविधीयते वित्तहीनस्यमर्त्यस्यनात्रकार्य्याविचारणेति गुडखंडघृताक्तानांभक्ष्याणांचनिवेदनैः घृतनपाचितानांचतेषांशतगुणंफलं अथफलं मातुलिंगफलाद्यानिसुपक्कानिनिवेदयेत् शिवायसत्फलंतस्यतद्भक्ष्याणांनिवेदने अथप्रदक्षिणाः तत्रविशेषउक्तोगृह्यपरिशिष्टे एकांविनायकंकुर्य्याद्द्वेसूर्य्येत्रिणीशंकरे चत्वारिकेशवे दद्यात्सप्ताश्वत्थेप्रदक्षिणाः आदित्यपुराणे प्रदक्षिणत्रयंकुर्य्यात् शिवस्यायतनेनरः अश्वमेधसहस्रस्यफलंप्राप्नोतिमानवः वृहन्नारदीयेतु एकांचंडयांरवौसप्ततिस्रोदद्याद्विनायके चतस्रःकेशवेदद्याच्छिवेत्वर्द्धप्रदक्षिणं तत्रैव पदांतरैःपदंतस्य करौचलनवर्जितौ स्तुतिर्वाचिहृदिध्यानं चतुरंगंप्रदक्षिणं शिवलिंगेविशेषो लिंगपुराणे सव्यंव्रजेत्ततोऽसव्यं प्रणालंनैवलंघयेत् वृहन्नारदीये शिवप्रदक्षिणीमर्त्यःप्रणालंनैवलंघयेत् वृषंचंडंवृषंचैवसोमसूत्रंपुनर्वृषं चंडंचसोमसूत्रंचपुनश्चंडंपुनर्वृषं ॥ हेमाद्रौप्रातिष्ठाकांडे ॥ प्राच्यां नंदिमहाकालौयाम्येभृंगिविनायकौ वारुणोवृषभस्कंधोदेवीचंडौतथोत्तरे त्रैविक्रम्यांतुऐशान्येचंडस्थापनमुक्तं तथा अपसव्यंयतिः कुर्य्यात्सव्यंतुब्रह्मचारिणः सव्यापसव्यंगृहिणो नित्यंशंभोः प्रदक्षिणं तृणैःकाष्ठैस्तथा पर्णैर्दृषद्भिर्वेष्टकादिभिः अंतर्द्धानंपुरःकृत्वासोमसूत्रंनलंघयेत् सोमसूत्रप्रमाणमपि तत्रैव प्रासादविस्तारमात्रं तुभवेदुदीच्यांसूत्राद्बहिर्लंघनतोनदोषः स्याद्दोषस्त्वाभ्यंतरलंघनेन सोमस्यदिशिमंडपादुदीच्यांदिशिप्रासादविस्तारसमानंसोमसूत्रंपरित्यज्यवहिःप्रदक्षिणेनदोषइत्यर्थः ॥ विशेषांतरमुक्तं तत्रैव सोमसूत्रद्वयंयत्रयत्रवाविष्णुमंदिरम् अपसव्यंनकुर्वीतकुर्वीतैवप्रदक्षिणामिति ॥ अथनमस्कारः ॥ जानुभ्यांचैवपाणिभ्यांशिरसाच

विचक्षणः कृत्वाप्रणामंसर्वेशेसर्वान्कामानवाप्नुयात् अश्वमेधादिसर्वक्रतुफलंभवतीति भविष्योत्तरे अथशिवागारेनिषिद्धवाद्ययोनितंत्रे शिवागारेचफलकंसूर्यागारेचशंखकं दुर्गागारेवंशवाद्यंमधुरींचनवादयेत् ॥ अथनिर्माल्यलंघने निषेधोनृसिंहपुराणे शांतरथंप्रतिनारदः ॥ अद्यप्रभृतिनिर्माल्यंलंघयंतिमहामते नरसिंहस्यदेवस्यतथान्येषांदिवौकसां पच्यंतेनरकेघोरेयावदाभूतसंप्लवम् ॥ भविष्यपुराणेपि ॥ निर्माल्यलंघनकरस्तामिस्रंनरकंव्रजेदिति ॥ अथनिर्माल्यप्रतिपत्तिः ॥ रुद्रांगलग्नमग्नौतुदहेत्सर्वंचतत्क्षणात् वैष्णवंस्नानकेभ्यश्चभस्मांगेभ्यश्चशांभवमिति यानितुस्कांदे शिवनिर्माल्यभोक्तारः शिवनिर्माल्यलंघकाः शिवनिर्माल्यदातारःस्पर्शस्तेषामपुण्यकृत् स्पृष्ट्वारुद्रस्यनिर्माल्यंसवासाआप्लुतः शुचिरिति नैवेद्यंमेनरोभुक्त्वाशुद्ध्यैचांद्रायणंचरेदिति॥कालिकापुराणे॥अग्राह्यंशिवनैवेद्यंपत्रंपुष्पंफलंजलं शालिग्रामशिलास्पर्शात्सर्वंयातिपवित्रतामितिपरिशिष्टे दत्वानैवेद्यवस्त्रादिनाददीतकदाचनत्यक्तंयच्छिवमुद्दिश्यतदादानेनतत्फलमिति भविष्येच शिवनिर्माल्यधारणनिषेधवचनानि निर्माल्यंयोहिमद्भक्त्याशिरसाधारयिष्यति अशुचिर्भिन्नमर्यादोनरःपापसमन्वितःनरकेपच्यतेघोरेतिर्यग्योनौचसंवसेत् ब्रह्महापिशुचिर्भूत्वानिर्माल्यंयस्तुधारयेत् तस्यपापंमहच्छीघ्रंनाशयिष्येमहाव्रत ॥ इतिस्कंदपुराणाशुचिनानतत्रग्राह्यंकिंतुशुचिनास्नानादिनाशुचिनेत्येवंपराणीतिस्मार्ताः अपनीततन्नग्राह्यमितिश्रीदत्तः शिवदीक्षारहितैर्ज्योतिर्लिंगातिरिक्तैर्वानग्राह्यमिति शैवाः स्कांदे ॥ अनर्हंममनैवेद्यंपत्रंपुष्पंफलंजलं शालिग्रामशिलासंगात्सर्वंयातिपवित्रतामित्युक्तत्वात् पंचायतनपूजायांसालिग्रास्यापितत्रसत्वान्नैवेद्यादावदोषइतिसूचितम् तथा नैवेद्यंमेनरोभुक्त्वाशुद्ध्यैचांद्रायणंचरेदिति एतदपवादःशिवनारदसंवादे ॥ बाणलिंगेस्वयंभूतेचंद्रकांतेहृदिस्थिते चांद्रायणसमंज्ञेयंशंभोर्नैवेद्यभक्षणमिति ॥ तथाचकाशीखंडे ॥

जलस्यधारणंमूर्द्धनिविश्वेशस्नानजन्मनः ॥ इत्युपक्रम्य ॥ स्नापयित्वाविधानेनयोलिंगस्नपनोदिकं त्रिःपिवेत्त्रिविधंपापंतस्येहाशुचिनश्यति ॥ लिंगस्नपनवाग्भिर्यःकुर्य्यान्मूर्द्धन्यभिषेचनं गंगास्नानफलतस्यजायतेत्रविपाप्मनइति अत्रभक्षणप्रतिप्रसवःशिवदीक्षाविषयः ज्योतिर्लिंगंविनालिंगंयःपूजयतिसत्तमः तस्यनैवेद्यनिर्माल्यभक्षणात्तप्तकृच्छ्रकं सालिग्रामोद्भवेलिंगेवाणालिंगेस्वयंभुवि रसलिंगेतथार्षेचसुरसिद्धप्रतिष्ठते हृदयेचंद्रकांतेचस्वर्णरूप्यादिनिर्मिते शिवदीक्षावताभक्तेनेदंभक्तमितीर्यते ॥

॥ इतिभविष्योत्तरेज्योतिर्लिंगेनैवेद्यादिस्वीकारस्तुदीक्षारहितैरपिकार्य्यः ज्योतिर्लिंगंविनेत्युक्तवचनात् तथा पादोदकंचनिर्माल्यंभक्तैर्धार्य्यंप्रयत्नतः ॥ इत्यग्निपुराणात् ॥ आदित्यपुराणेच ॥ निर्माल्यंधारयेद्भक्त्याशिरसापार्वतीपतेः रायसूयस्ययज्ञस्यफलंप्राप्नोतिनिश्चितं लोभादिनातुनधार्य्यं लोभान्नधारय ञ्छंभोर्निर्माल्यंनचभक्षयेत् नस्पृशेदपिपादेनलंघयेन्नापिनारद लिंगांतरेषुतीर्थोदकवंदनमात्रंच श्रद्धावच्छिवभक्तमात्राधिकारिकाः श्रद्धावतांस्वभक्तानामुपसर्गेमहत्यपि नोपायतरमस्त्येवविनेशचरणोदकं येऽव्याधयोहिदुःसाध्यावहिरंतःशरीरिणां श्रद्धयैवोदकस्पर्शात्तेनश्यंत्येवनान्यथेतिरत्नेश्वरोपाख्यानेस्कांदवचनात् सवैरपिचंडेशंदत्त्वैवधार्य्यमिति क्वचित्तु वाणरावणचंडीशनंदिभृंगिरिटादयः सदाशिवप्रसादोयंसर्वेगृह्णंतुशांभवाइति क्वचिच्चंडाभावोऽप्युक्तोऽग्निपुराणे वाणलिंगेचलेलोहेसिद्धलिंगेस्वयंभुवि प्रतिमासुचसर्वासुनचंडोधिकृतोभवेत् ॥ आदित्यपुराणे ॥ लिंगेस्वायंभवेवाणेरत्नतेजसिनिर्मिते सिद्धेप्रतिष्ठितेलिंगेनचंडोधिकृतोभवेत् ॥ येषुचंडाधिकाज्ञेनास्ति तन्निर्माल्यधारणेनदोषइत्याहुः ॥ अथरुद्राक्षधारणंतन्महिमाच ॥ शिखायांहस्तयोःकंठेकर्णयोश्चापियोनरः रुद्राक्षंधारयेद्भक्त्यासशैवंलोकमाप्नुयात् नववक्त्रंतुरुद्राक्षंधारयेद्वामवा

हुना चतुर्दशमुखंचैवशिखायांधारयेद्बुधः ॥ तत्रविशेषः ॥ एकवक्त्रःशिवःसाक्षाद्ब्रह्महत्यांव्यपोहति अवध्यत्वंप्रतिस्रोतोवन्हिस्तंभंकरोतिच द्विवक्त्रोहरगौरीस्याद्गोवधाघविनाशकृत् त्रिवक्त्रोह्यग्निजन्माचपापराशिं प्रणाशयेत् चतुर्वक्त्रःस्वयंब्रह्माब्रह्महत्यांव्यपोहति पंचवक्त्रस्तुकालाग्निरगम्यागम्यपापनुत् षड्वक्त्रस्तुगुहोज्ञेयोभ्रूणहत्यांविनाशयेत् सप्तवक्त्रस्त्वनंतःस्यात्स्वर्णस्तेयादिपापहृत् विनायकोष्टवक्त्रःस्यात्सर्वानृताविनाशकृत् भैरवोनववक्त्रस्तुशिवसायुज्यकारकः दशवक्त्रःस्मृतोविष्णुर्भूतप्रेतभयापहः एकादशमुखोरुद्रोनानायज्ञफलप्रदः द्वादशास्यस्तथादित्यःसर्वरोगनिवर्हणः त्रयोदशमुखःकामःसर्वकामफलप्रदः चतुर्दशास्यःश्रीकंठोवंशोद्धारकरःपर इति ॥ निश्छिद्राश्चसुपक्वाश्चरुद्राक्षाधारणेस्मृताः पंचामृतंपंचगव्यंस्नानकालेप्रयोजयेत् रुद्राक्षस्यप्रतिष्ठायांमंत्रंपंचाक्षरंतथा त्र्यंबकादिमंत्रस्तुयथातत्रनियोजयेत् त्र्यंबकंयजामहे०मामृतात् इति ॥ यद्वा अघोरमंत्रेण अघोरेणापिमंत्रेणरुद्राक्षस्यद्विजोत्तम प्रतिष्ठांविधिवत्कुर्य्यात्ततोधिकफलंलभेत् ततोयथास्वमंत्रेणधारयेद्भक्तिसंयुतः एकवक्त्रादीनांक्रमेणमंत्राः ओंओंभृंशंनमः ॥ १ ॥ ओंओंनमः ॥ २ ॥ ओंह्रींनमः ॥ ३ ॥ ओंहुंनमः ॥ ४ ॥ ओंहूंनमः ॥ ५ ॥ ओंओंहूंहूंनमः ६ ओंसःहूंनमः ७ ओंहूंनमः ॥ ८ ॥ ओंह्रींनमः ॥ ९ ॥ ओंश्रींनमः ॥ १० ॥ ओंहूंह्रींनमः ॥ ११ ॥ ॥ ओंश्रींनमः ॥ १२ ॥ ओंक्षींक्षौंनमः ॥ १३ ॥ ओंनमोनमः ॥ १४ रुद्राक्षेदेहसंस्थेतुकुक्कुटोम्रियतेयदि सोपिरुद्रपतिंयातिकिंपुनर्मानवोगुरुः कचिन्मालायांविशेषउक्तः ॥ अष्टोत्तरशतैः कार्य्या चतुः पंचाशताथवा सप्तविंशतिमानावाततोहीनाधमामता ॥ तथाचप्रजापतिः ॥ मोक्षार्थीपंचविंशत्याधनार्थीत्रिंशताजपेत् पुष्ट्यर्थीपंचविंशत्यापंचदश्याभिचारिके सप्तविंशतिरुद्राक्षमालयादेहसंस्थया यत्करोतिनरः पुण्यंसर्वंकोटिगुणंभवेत् योददातिद्विजातिभ्योरुद्राक्षंशृणुषण्मुख

तस्यप्रीतोभवेद्रुद्रःस्वपदंचप्रयच्छति पदार्थादर्शेवोपदेवःरुद्राक्षान्कंठदेशेदशनपरिमितान्मस्तकेविंशतीद्वे षड्षड् कर्णप्रदेशेकरयुगलकृतेद्वादशद्वादशैव वाह्वोरिंद्रैःकलाभिर्नयनयुगकृतेएकमेकंशिखायां वक्षस्यष्टाधिकंयत्कलयतिशतकंसःस्वयंनीलकंठ इतिरुद्राक्षधारणम् ॥ अथशिवरात्रिकृत्यमुच्यते ॥ तत्रप्रातःसंध्यादिकृत्वाधृतत्रिपुंड्ररुद्राक्षस्ताम्रपात्रंगृहीत्वातिथ्याद्युल्लिख्य ओमद्याशिवप्रीत्यर्थंशिवरात्रिव्रतंकरिष्ये॥व्रतधारणमंत्रः॥शिवरात्रिव्रतंह्येतत्कारिष्येहंमहाफलं निर्विघ्नमस्तुमेचात्रत्वत्प्रसादाज्जगत्पते चतुर्दश्यांनिराहारोभूत्वाशंभोपरेहनि भोक्ष्येहंभुक्तिमुक्त्यर्थं शरणंमेभवेश्वर इमौमंत्रौपठित्वाजलमुत्सृजेत् ततोनित्यकृत्यंविधायशिवनामस्मरणेनदिनमतिवाह्य संध्याकालात्पूर्वंसंध्यासमयोत्तरंवास्नानंकृत्वा सायंसंध्यांनिर्वर्त्यविभूतिरुद्राक्षमालाधारणंकुर्य्यात् इदंचशिवपूजायां नित्यं विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया पूजितोपिमहादेवोनस्यात्तस्यफलप्रदः तस्मान्मृदापिकर्त्तव्यंललाटे तुत्रिपुंड्रकमितिलिंगपुराणवचनात् ततोरात्रौप्रथमप्रहरेशिवायतनंगत्वा शुचिराचांत आसनेप्राङ्मुखउपविश्य शिवसन्निधौपूजासंकल्पंकुर्य्यात् तद्यथा एवंगुणविशेषणविशिष्टायांपुण्यतिथौ एतद्वर्षकृतसमस्तपातकोपपातक प्रकीर्णकादिकायिकवाचिकमानसज्ञाताज्ञातप्रकाशरहस्यपापस्यक्षयार्थं पुत्रधनदीर्घायुः प्रभृति सकलकामावाप्त्यर्थं शिवरात्र्यांशिवपूजनंकरिष्यइतिसंकल्प्य अपसर्पंत्वितिसर्षपान्विकीर्य्य सोमादिसाक्षिदेवतामंत्रंपठित्वासामान्यार्घ्यंसंस्थाप्यभूतशुद्धिंकृत्वाप्राणप्रतिष्ठोत्तरंमातृकान्यासंचकृत्वा श्रीकंठादिमातृकान्यासंकुर्यात् ॥ तद्यथा अस्यश्रीकंठादिमातृकान्यासस्यदक्षिणामूर्त्तिऋषिर्गायत्रीछंदः अर्द्धनारीश्वरो देवता हलोवीजानिस्वराशक्तयः ज्ञातविज्ञानार्थेविवियोगः अंकंखंगंघंङं आंह्रांअंगुष्ठाभ्यांनमः ॥

इंचंछंजंझंञं ईंह्रींतर्जनीभ्यांस्वाहा उंटंठंडंढंऊं ह्रूंमध्यमाभ्यांवषट् एंतंथंदंधंनं ऐंह्रैंअनामिकाभ्यांहुं ओंपंफंवंभंमं

ओंह्रौंकनिष्ठिकाभ्यांवौषट् अंयंरंलंवं शंषंसंहंक्षंह्रःकरतलकरपृष्ठाभ्यांवौषट् एवमेवहृदयादिषडंगन्यासंकुर्य्यात्
॥ ततोध्यानम् ॥ वंधूककांचननिभंरुचिराक्षमालांपाशांकुशौवरदांनिजवाहुदंडैः विभ्राणमिंदुशकलाभरणं
त्रिनेत्रमर्द्धांविकेशमनिशंवपुराश्रयामि ॥ २ ॥ दक्षाधःकरमारभ्यवामधःकरपर्यंतमायुधध्यानंकृत्वा ततोन्यासं
कुर्य्यात् ओंह्रौंअंश्रीकंठपूर्णोदरीभ्यांनमः इतिमस्तके ॥ १ ॥ ओंह्रौंआंअनंतेशविरजाभ्यांनमइतिआननवृत्ते
॥ १ ॥ ओंइंसूक्ष्मेशशाल्मलीभ्यांनमइतिदक्षिणनेत्रे ॥ ३ ॥ ओंह्रौंईंत्रिमूर्त्तिलोलाक्षीभ्यांनमइतिवामनेत्रे ॥ ४ ॥
ओंह्रौंउंअमरेशवर्त्तुलाक्षीभ्यांनमइतिदक्षकर्णे ॥ ५ ॥ ओंह्रौंऊंअर्धीशघोणाभ्यांनम इतिवामकर्णे ॥ ६ ॥ ओंह्रौंऋं
भारभूतीशदीर्घमुखीभ्यांनम इतिदक्षनासापुटे ॥ ७ ॥ ओंह्रौंॠंअतिथीशसुमुखीभ्यांनमइतिवामनासापुटे ॥ ८ ॥
ओंह्रौंऌंस्थाण्वीशदीर्घजिव्हाभ्यांनम इतिदक्षगंडे ॥ ९ ॥ ओंह्रौंॡंहरेशकुंडोदरीभ्यांनमइतिवामगंडे॥१०॥ ओंह्रौं
एंझिंटीशोर्द्धकेशीभ्यांनमइतिउर्ध्वोष्ठे ॥११॥ ओंह्रौंऐंमौक्तिकेशविकृतमुखीभ्यांनम इतिअधरोष्ठे ॥१२॥ओंह्रौंओं
सद्योजातज्वालामुखीभ्यांनमइतिऊर्धदंतपंक्तौ ॥१३॥ओंह्रौंऔंअनुग्रहेशोल्कामुखीभ्यांनमइतिअधोदंतपंक्तौ ॥१४
ओंह्रौंअंअक्रूरेशश्रीमुखीभ्यांनम इतिशिरसि॥१५॥ओंह्रौंअः महासैन्येशविद्यामुखीभ्यांनमइतिमुखमध्ये ॥ १६
ओंह्रौंकंक्रोधीशमहाकालीभ्यांनमइतिदक्षस्कंधे ॥१७॥ ओंह्रौंखंचंडीशसरस्वतीभ्यांनमइतिदक्षकूर्परे॥१८॥ओंह्रौं
गंपंचांतकेशगौरीभ्यांनमइतिदक्षमणिवंधे ॥ १९ ॥ ओंह्रौंघंशिवोत्तमेशत्रैलोक्यविजयाभ्यांनमइतिदक्षकरांगुलि
मूले ॥२०॥ ओंह्रौंङं-एकरुद्रेशमंत्रशक्तिभ्यांनमइतिदक्षकरांगुल्यग्रेषु ॥२१॥ ओंह्रौंचंकूर्मेशात्मशक्तिभ्यांनम इति
वामस्कधे ॥२२॥ ओंह्रौंछंएकनेत्रेशभूतमैत्रिकाभ्यांनमइतिवामकूर्परे ॥२३॥ ओंह्रौंजंचतुराननेशलंवोदरीभ्यांनम
इतिवाममणिवंधे ॥२४॥ ओंह्रौंझंअजेशविद्रावणीभ्यांनम इतिवामकरांगुल्यग्रे ॥२५॥ ओंह्रौंटंसोमेशखेचरीभ्यां

नमइतिदक्षोरुमूले ॥२६॥ ॐह्रौंठंलांगलीशमंजरीभ्यांनमइतिदक्षजानुनि॥२७॥ ॐह्रौंडंवाहुमूलेषु ॥३०॥ॐह्रौं
ढंउमाकांतेशवृक्षोदरीभ्यांनमइतिदक्षपादांगुल्यग्रेषु ॥ ३१॥ ॐह्रौंतंआषाढीशपूतनाभ्यांनमोवामोरुमूले ॥३२
ॐह्रौंथंचंडीशभद्रकालीभ्यांनमइतिवामजानुनि॥३३॥ॐह्रौंदंअत्रीशयोगिनीभ्यांनमइतिवामगुल्फे॥३४॥ॐह्रौंधं
मीनेशशंखिनीभ्यांनमोवामपादागुलिमूलेषु ॥ ३५ ॥ ॐह्रौंनंमायेशतर्जनीभ्यांनमइतिवामपादांगुल्यग्रेषु
॥ ३६ ॥ ॐह्रौंपंलोहितेशकालरात्रिभ्यांनमइतिदक्षकुक्षौ ॥ ३७ ॥ ॐह्रौंफंशिखीशकुंडलिनीभ्यांनमइ
तिवामकुक्षौ ॥ ३८ ॥ ॐह्रौंवंछागलांडेशकपर्दिनीभ्यांनमइतिपृष्ठे ॥ ३९ ॥ ॐह्रौंभंहिरंडेशवज्राभ्यांनमइति
नाभौ४०ॐह्रौंमंमहाकालीशसुभुजाभ्यांनमोजठरे॥४१॥ॐह्रौंयंत्वगात्मनेवाणीशसुसुखीभ्यांनमइतिहृदये४२ ॥
ॐह्रौंरंअसृगात्मनेभुजंगेशरेवतीभ्यांनमइतिदक्षांसे ॥ ४३ ॥ ॐह्रौंलंमांसात्मनेपिनाकीशमाधवीभ्यांनमइति
ककुदि ॥४४॥ ॐह्रौंवंमेदआत्मनेखड्गीशवारुणीभ्यांनमइतिवामांसे ॥४५॥ ॐह्रौंशंअस्थ्यात्मनेविकेशवायवी
भ्यांनम इतिहृदयादिदक्षकराग्रांतं ॥४६॥ ॐह्रौंषंमज्जात्मनेश्वेतशरक्षोविदारणीभ्यांनमइतिदक्षपादाग्रांतं ४७॥
ॐह्रौंसंशुक्रात्मनेभृग्वीशसहजाभ्यांनमइतिवामकराग्रांतं ॥ ४८ ॥ ॐह्रौंहंप्राणात्मनेनकुलीशमहालक्ष्मी
भ्यांनमइतिहृदयादिवामपादाग्रांतं ॥ ४९ ॥ ॐह्रौंलंशक्त्यात्मनेशिवेशव्यापिनीभ्यांनमइतिहृदया
दिनाभ्यंतं ॥ ५० ॥ ॐह्रौंलंपरमात्मनेसंवर्त्तकेशमायाभ्यांनमइतिहृदयादीशिरोंतं ॥ ५१ ॥ इत्येवं
मातृकास्थानेषुन्यसेत् अत्ररुद्राःस्मृतारक्ताधृतशूलकपालकाः शक्तयोरुद्रपीठस्थाःसिंदूरारुणाविग्रहाः
रक्तोत्पलकपालाभ्यामलंकृतकरांबुजाः ॥ इतिमूर्त्तिशक्तीनांध्यानम् ॥ इतिश्रीकंठादिन्यासः ततः
प्राणायामंकृत्वा स्वदेहेमंडूकादिपरतत्वांतदेवताभ्योनमइत्युच्चार्य ॥ वामादिशक्तिपूजनंकृत्वाशिवषडक्षरादि

मंत्रन्यासंकुर्य्यात् अस्यश्रीशिवपंचाक्षरमंत्रस्यवामदेवऋषिः पंक्तिछंदःसदाशिवोदेवता ओंवीजं नमःशक्ति शिवायेतिकीलकं चतुर्विधपुरुषार्थसिद्ध्यर्थेन्यासेविनियोगः शिरसिवामदेवऋषयेनमः मुखे पंक्तिछंदसेनमः हृदि सदाशिवदेवतायैनमः ओंवीजायनमोगुह्ये नमःशक्तये नमःपादयोः शिवायकीलकायनमोनाभौ न्यासेविनियोगः इतिसर्वांगेऽव्यापकंकुर्य्यात् ओंहृदयायनमःनंशिरसेस्वाहा मंशिखायैवषट् शिंकवचायहुं वांनेत्रत्रयायवौषट् यंअस्त्रायफट् एवंकरन्यासमपिकुर्य्यात् ॥ ओंतत्पुरुषायनमः तर्जन्योः ओंमंअघोरायनमः मध्यमयोः शिंसद्योजातायनमःकनिष्ठिकयोः ओंवांवामदेवायनमः अनामिकयोः ओंयंईशानायनमः अंगुष्ठयोः ओंनंतत्पुरुषायनमः मुखे ओंमंअघोरायनमः हृदये ओंशिंसद्योजातायनमःपादयोः ओंवांवामदेवायनमोगुह्ये ओंयंईशानायनमोमूर्द्ध्नि ओंनंतत्पुरुषायप्राग्वक्त्रायनमः ओंमंअघोरायदक्षिणवक्त्रायनमःदक्षिणकर्णे ओंशिंसद्योजातायपश्चिमवक्त्रायचूडाधः ओंवांवामदेवायोत्तरवक्त्रायनमः वामकर्णे ओंयंईशानायोर्द्ध्ववक्त्रायनमः ऊर्धभागे ओंसर्वज्ञशक्तिधाम्नेहृदयायनमः नंनित्यतृप्तिशक्तिधाम्नेशिरसेस्वाहा मंअनादिबोधशक्तिधाम्ने शिखायैवषट् शिंस्वतंत्रधाम्ने कवचायहुं वांनित्यमलुप्तशक्तिधाम्नेनेत्रत्रयायवौषट् यंअनंतशक्तिधाम्ने अस्त्रायफट् ततो मूलमंत्रेण नमोस्तुस्थाणुभूतायज्योतिर्लिंगामृतात्मने चतुर्मूर्त्तिवपुस्थायभासितांगायशंभवे इत्यनेनऽव्यापकंकुर्य्यात् लिंगादिमुद्रादर्शनपूर्वकं ॥ स्वेष्टदेवंस्वाभेदेनध्यात्वा शिरसिमूलमंत्रेणपुष्पांजलिंदत्वा पुनर्हृदयकमलेऽध्यात्वामानसपूजांकारिष्ये ॥ इतिसंप्रार्थ्य कृतांजजिपुटोभूत्वाचिंतयेद्धृदिशंकरं ऋणपातकदौर्भाग्यदारिद्रविनिवृत्तये अशेषाघविनाशायप्रसीदममशंकर दुःखशोकाग्निसंतप्तसंसारभयपीडनं वहुरोगाकुलंदीनंपाहिमांवृषवाहन आगच्छदेवदेवेशमहादेवाभयंकरगृहाणसहपार्वत्यातवपूजांमयाकृतां स्वागतंदेवदे

वेशसान्निधौतवशंकर गृहाणसहपार्वत्यायथार्थपरिभाषितामित्युक्त्वा मानसैरुपचारैर्नैवेद्यांतंसंपूज्य यथाशक्तिजपित्वातत्समर्पणंकृत्वा वाह्यपूजार्थमनुज्ञाप्यविशेषार्घ्यस्थापनंकुर्यात् तद्यथा स्ववामाग्रेचतुरवृत्तत्रिकोणात्मकंमंडलंविलिख्य ओंह्रींआधारशक्तयेनमइतिसपूज्य तत्रत्रिपादिकांसंस्थाप्य मंदशकलात्मनेवह्निमंडलायइतिसंपूज्य वृताकारेणवह्निर्दशकलाःपूजयेत् यंधूम्रार्चिषेनमः ॥ वंऊष्मायैनमः ॥ लंज्वालिनीकलायैनमः ॥ शंविस्फुलिंगिन्यैनमः ॥ षंसुश्रियैनमः ॥ संस्वरूपायैनमः ॥ हंकपिलायैनमः ॥ लंहव्यवाहनायैनमः ॥ क्षंकव्यवाहनायैनमः ॥ इतितदुपरिअस्त्रमंत्रप्रक्षालितंपात्रंनिधाय अंद्वादशकलात्मनेसूर्यमंडलायनमः ॥ इतिसंपूज्य ॥ वृत्ताकारेणतत्रसूर्यस्यद्वादशकलाःपूजयेत् ॥ कंभंतापिन्यैनमः ॥ खंबंतापिन्यैनमः ॥ गंफंधूम्रायैनमः ॥ घंपंमरीच्यैनमः ॥ ङंभंज्वालिन्यैनमः ॥ चंधंरुचिन्यैनमः ॥ छंदंसुषुम्णायैनमः ॥ जंथंभोगदायैनमः ॥ झंतंविश्वान्यैनमः ॥ ञंणंबोधिन्यैनमः ॥ ठंडंक्षमायैनमः ॥ क्षंलंहंसंषंशंवंरंयंमंभंबंफंपंनंधंदंथंतंणंढंडंठंटंञंझंजंछंचंङंघंगंखंकंअःअंऔंओंऐंएंॡंऌंॠंऋंऊंउंईंइंआंअं । इतिविलोममातृकांजपन् ॥ मूलेनसुधाबुध्याजलेनापूर्य्यजलमध्येडंषोडशकलात्मनेचंद्रमंडलायनम इतिसंपूज्य वृताकारेणचन्द्रस्यषोडशकलाःपूजयेत् ॥ अंअमृतकलायैनमः ॥ आंमानदायैनमः ॥ इंपूषायैनमः ॥ ईंतुष्ट्यैनमः ॥ उंपुष्ट्यैनमः ॥ ऊंमत्यैनमः ॥ ऋंधृत्यैनमः ॥ ॠंशशिन्यैनमः ॥ ऌंचांद्रिकायैनमः ॥ ॡंकांत्यैनमः ॥ एंज्योत्स्नायैनमः ॥ ऐंश्रियैनमः ॥ ओंप्रीत्यैनमः ॥ औंअंगदायैनमः ॥ अंपूर्णायैनमः ॥ अःपूर्णामृतायैनमः ॥ अत्रअमृतादिकलानांप्राणप्रतिष्ठांविधाय सूर्यमंडलात्तीर्थमावाह्यमूलमंत्रेणार्घ्यजलेसंयोज्यतीर्थंसंपूज्य मूलमंत्रेणलिंगमुद्रांप्रदर्श्य वमिति धेनुमुद्रयाअमृतीकृत्य तत्रदेवंध्यात्वादेवस्यदेहेषडंगंविधायकवचेनावगुंठ्य नेत्रमंत्रेणसंवीक्ष्य

शंखमुद्रयातत्पात्रमवष्टभ्ययोनिमुद्रयातज्जलंस्पृष्ट्वा मूलेनगंधादिभिःसंपूज्य प्राग्वत्षडंगानिसंपूज्य मूलमंत्रेणाष्टवारजलमभिमंत्र्यमत्स्यमुद्रयाछादयेत् तत्पात्रस्योत्तरेपंक्त्यात्रिकोणमंडलत्रयंकृत्वा तेषुमंडलद्वयेसाधारं सजलंपात्रद्वयं तृतीयमंडले घृतमधुदधियुक्तंकांस्यपात्रंचेतिपात्रत्रयंसंस्थाप्य. मूलमंत्रेणपृथक्पृथक्गंधादिभिःसंपूज्य तेषुपात्रांतरेणार्घ्यजलंकिंचित्कृत्वामूलमंत्रेणपृथकपृथग ष्टवारमभिमंत्र्यमत्स्यमुद्रयाच्छादयेत् ततोर्घ्यपात्रेश्यामाकदूर्वाब्जविष्णुक्रांतादिनिःक्षिप्याचमनपात्रेजातीफललवंगकंक्कोलचूर्णानिक्षिपेत् अत्रार्घ्यादिपात्रालभिप्रक्षालितान् तंडुलान् पुष्पाणिदत्त्वा ततःपूजाक्रमस्यदक्षिणेत्रिकोणमंडले साधारंसजलंपुनराचमनपात्रंनिधाय तत्रार्घ्यपात्रजलंकिंचित्पात्रांतरेणोद्धृत्यदत्त्वामूलमंत्रेणाभिमंत्र्यसंप्रोक्ष्यस्वदेहंगंधपुष्पैरलंकृत्य स्वेष्टदेवतारूपंसंचिंत्यपीठमंडूकादिपरतत्वांतं संपूज्य ॐनमोभगवतेसकलगुणात्मशक्तियुताय अनंताययोगपीठाय कमलासनायनमः ततस्तत्केसरेषुस्वाग्रादिप्रादक्षिण्येन वामदेव्यैनमः ज्येष्ठायैनमः रौद्र्यैनमः काल्यैनमः कालविकरण्यैनमः वलायैनमः वलविकरण्यैनमः वलप्रमथिन्यैनमः सर्वभूतमन्यैनमः मध्य मनोन्मन्यैनमः ॐनमोभगवतेसकलगुणात्मशक्तियुताय अनंतायययोगधर्मपीठायनमः ॥ इतिपीठपूजा ॥ अथ पार्थिवविधिः सर्वाधारधरारूपेत्वद्रूपांमृत्तिकामिमां ग्रहिष्यामिप्रसन्नात्वंलिंगार्थंभवसुव्रते इतिभूमिंसंप्रार्थ्य उपरितनांमृदमपाकृत्य ततःल्हांपृथिव्यैनमः इतिपृथिवींनमस्कृत्य ततोनिःशर्करामक्षाधिकाम् अशीतिगुजादिमानंमृदमित्यर्थःहरायनमइतिमंत्रेणसंगृह्य सद्योजातमितिमंत्रंपठित्वा वामदेवायेतिमंत्रेणजलंप्रक्षिप्य महेश्वरायेतिसंघटनंकुर्यात् अघोरेणइतिलिंगकरणं तत्पुरुषायेतिवाणंकृत्वा ईशानइतिवेदिकायांवाणंसंयोज्य॥ मूलेनशूलपाणयेनमइतिवेद्यांशिवंसंस्थाप्यहस्तेपुष्पादिगृहीत्वा मूलाधारात्कुंडलिनीमुत्थाप्यमदचक्रादिक्र

मेणहृदयकमलात्स्वेष्टदेवतां तेजोरूपांब्रह्मरंध्रंनीत्वा परमामृतांबुधौपरमशिवशक्त्यात्मकंतत्तेजः प्रवहन्ना
सापुटाध्वनिकरस्थपुष्पांजलौनिः सार्घ्यं पुरः स्थितमूर्त्तिशिरसिपुष्पांजलिंनिःक्षिपेत् आत्मसंस्थमजंशुद्धंत्वा
महंपरमेश्वर अरण्यामिवहव्याशंमूर्त्तामावाहयाम्यहं आयाहिभगवन् शंभोशर्वत्वंगिरिजापते प्रसन्नोभवदे
वेशनमस्तुभ्यंहिशंकर ततोमूलमुच्चार्यपिनाकधृषेनमः आवाहनमतेवेयंमहिमामूर्त्तिस्तस्यांसर्वगतांशिव भ
क्तिस्नेहसमाकृष्टंदीपवत् स्थापयाम्यहम् देवेशभक्तिसुलभसर्वाभरणसंयुत यावत्त्वांपूजयिष्यामितावत्त्वंसु
स्थिरोभव ततोमूलंपठित्वाशिवत्वंइहतिष्ठतिष्ठ इतिसंस्थाप्य सन्निधापनंकुर्य्यात् अनन्यातवदेवेशमूर्त्तिश
क्तिरियंप्रभो सान्निध्यंकुरुतस्यांतंभक्तानुग्रहतत्पर ततोमूलमुच्चार्य्यशिवइहसन्निधौभव ॥ इतिसन्निधानंकृत्वा
सन्निरोधनंकुर्य्यात् आज्ञयातवदेवेशकृपांभोधेसुखांबुधे आत्मानंदैकतृप्तंत्वांनिरुणध्मिपितुर्गुरो मूलांतेशि
वइहसन्निरुध्यस्व ततःसंमुखीकरणं अज्ञानादुर्मनस्त्वाद्वावैकल्पात्साधनस्यच यदपूर्णंभवेत्कृत्यंतदप्यभि
मुखोभव ततअवगुंठनं अभक्तवाङ्मनश्चक्षुश्रोत्रदूरांचितद्युते स्वतेजः पंजरेणाशु वेष्टितोभवसर्वतः मू
लांतेशिवअवगुंठितोभव ततः षडंगेनसकलीकरणं मूलेनमहामुद्रयापरमीकरणं ततोमूलमंत्रमुच्चार्य्य
ऐंवदवदवाग्वादिनि ऐंक्लींक्लिन्नेक्लेदयमहाक्षोभंकुरुक्लींसौंमोक्षंकुरु २ सौःह्सौमिति दीपिनीमकारादिक्षकारां
तांमातृकामुच्चार्य्य अर्घ्योदकेनदेवंत्रिःप्रोक्ष्य देवस्यहृदयंस्पृशन् प्राणप्रतिष्ठांकुर्य्यात् सायथा ॐआंह्रीं
क्रौंहंसः शिवस्यजीवइहस्थितिः पुनःआंह्रींक्रौंहंसः शिवस्यवाङ्मनश्चक्षुः श्रोत्रघ्राणरसनप्राणाइहागत्यसु
खंचिरंतिष्ठंतुस्वाहा इतिप्राणप्रतिष्ठा विश्वेश्वरमहाराजप्रियेश्वरप्रजापते आसनंदिव्यमीशानदास्येहंपरमे
श्वर मूलेनासनं महानंदमहेशानमहदानंददायक पाद्यंगृहाणदेवेशपार्वतीपरमेश्वर मूलेनपाद्यं त्रियंबक

सदाधारवियदादिविधायक अर्घ्यंगृहाणदेवेशशंभोसर्वार्थसाधक मूलेनार्घ्यंदत्त्वा त्रिपुरांतकदीनार्त्तिनाशिन् श्रीकंठशूलधृक् गृहाणाचमनंचालंपवित्रोदककल्पितं मूलेनाचमनं घृतमध्वाज्यसंयुक्तंपरिपूर्णसुखात्मनेमधुपर्कमिदंदेवकल्पयामिप्रसीदमे मूलेनमधुपर्कंदत्त्वा मूलेनपुनराचमनं पंचामृतंसमानीतंपयोदधिघृतंमधु शर्कराजलसंमिश्रंगृहाणपरमेश्वर मूलेनपंचामृतस्नानं त्रिकालकाशिकालश्रीः स्थितिसंहारकारक स्नातंतीर्थाहतैस्तोयैर्गृहाणपरमेश्वर मूलेनस्नानंदत्त्वापुनर्मूलेनाचमनंदद्यात् कालाग्निरुद्रदेवेशवरदाभयदायक वस्त्रंगृहाण सर्वेशदिव्यंगंधोदवासितं ॥ मूलेनश्वेतवस्त्रम् ॥ पशुपतयेनमः ॥ पुनराचमनम् ॥ यज्ञोपवीतंपरमंपवित्रंविधिनिर्मितं नीलकंठोपवीतंचमयादत्तंगृहाणभो मूलंपशुपतयेनमः ॥ यज्ञोपवीतं ततोभूषणानि स्वभावसुंदरांगाय नानाशक्त्याश्रयायते भूषणानिविचित्राणिकल्पयामिसुरार्चित पशुपतयेनमः भूषणानिसमर्पयामिनमः ततः कनिष्ठांगुष्ठयोगेनगंधमुद्रयागंधंदद्यात् चंदनागुरुकर्पूरतमालजलकुंकुमं उशीरकुष्ठसंयुक्तंशैवंगंधाष्टकंविभो गृहाणदेवदेवेशसमस्तसुरपूजित पशुपतयेनमः गंधसमर्पयामि सदाशिवसदानंदअक्षतान्परमेश्वर गृहाण त्वमुमाकांतदयांकृत्वाममोपरि मूलेनपशुपतयेअक्षतान्समर्पयामि पुष्पाणिचविचित्राणिमालत्यादीनिवैप्रभो हृद्यानिचसुगंधीनिविल्वपत्रंगृहाणमे मूलपशुपतयेनमः पुष्पाणिसमर्पयामि अमृतोद्भवंश्रीवृक्षंशंकरस्य सदाप्रियं विल्वपत्रंगृहाणेशभक्तानांसर्वकामद ॥ मूलंपशुपतयेनमः ॥ विल्वपत्रंसमर्पयामि तर्जन्यंगुष्ठयोगेन पुष्पमुद्रयामूलेनपशुपतयेवौषडित्यनेनपंचपुष्पांजलीन्दत्त्वा सदाशिवमहेशानजगद्वंद्यमहाप्रभो अनुज्ञांदेहिभगवन्परिवारार्चनाययमां एवंपूजार्थमनुज्ञाप्यप्रथमेष्टदलेदिग्दलेषु पूर्वदलमारभ्य ओंनंतत्पुरुषायनमःओंमंअघोरायनमः ओंशिंसद्योजातायनमः ओंवांवामदेवायनमः ओंयंईशानायनमः मध्ये इतिदेवाग्रादाग्नेयादि

प्रादक्षिण्यन ओंनिवृत्त्यैनमः ओंप्रतिष्ठायैनमः ओंविद्यायैनमः ओंशांत्यैनमः ओंमध्येशांत्यतीयैनमः ॥ अभीष्टसिद्धिंमेदेहिशरणागतवत्सल भक्त्यासमर्चयेत्तुभ्यंप्रथमावरणार्चनं इतिप्रार्थयेत् ॥ एवमग्रेपिद्वितीयाष्टदलांतकेसरेषुदेवस्यदक्षाग्रे ॥ ओंहृदयायनमः वामाग्रे नंशिरसेनमः पृष्ठदक्षिणे मंशिखायैनमः वामेः शिंकवचायनमः अग्रे वांनेत्रत्रयायनमः अग्न्यादिक्षुअस्त्रायनमः इति अभीष्टसिद्धिंद्वितीयावरणार्चनं द्वितीये अष्टदलेदेवाग्रदलमारभ्य प्रादक्षिण्येन ओंअनंतायनमः सूक्ष्मायनमः शिवोत्तमायनमः एकनेत्रायनमः त्रिमूर्त्तायनमः श्रीकंठायनमः शिखंडिनेनमः इतिसंपूज्यअभीष्टसिद्धिं० तृतीयाष्टदलेदेवस्यवामदलमारभ्यप्रादक्षिण्येन ॥ उमायैनमः चंडेश्वरायैनमः नंदिनेनमः महाकालायनमः गणेश्वरायनमः वृषभायनमः भृंगिणेनमः स्कंदायनमः अभीष्टसिद्धिं चतुर्थावरणं चतुरस्त्ररेखात्रयांतरालगतवीथ्यां यथास्थितपूर्वदिशमारभ्य ॥ लंइंद्रायनमःअग्नयेनमः यमायनमः निर्ऋतयेनमः वरुणायनमः वायवेनमः सोमायनमः ईशानायनमः ईशानेंद्रमध्ये ब्रह्मणे निर्ऋतिवरुणमध्येह्रींअनंतायनमः इतिसंपूज्य अभीष्टेति पंचमावरणं द्वितीयवीथ्यां अंवज्रायनमः शक्तयेनमः दंडायनमः खड्गायनमः पाशायनमः अंकुशायनमः गदायैनमः त्रिशूलायनमः पद्मायनमः चक्रायनमः इतिलोकपालायुधानितत्समीपस्थानेषुसंपूज्य अभीष्टेतिप्रार्थयेत षष्टावरणं ततःमूलमुच्चार्य सांगायसपरिवारायसवाहनायसशक्तिकायसायुधायपुष्पांजलिंसमर्प्यधूपादिनापूजयेत् महादेवमृडाधीशजगदशानिरंजन धूपंगृहाणदेवेशसाज्यंगुग्गुलुकल्पितं वनस्पतिरसोइतिपठित्वामूलेनधूपमुद्रयाधूपंदद्यात् तर्जन्यंगुष्ठयोगेनधूपमुद्रा हिरण्यवाहोसेनानीईशानीशायतेप्रभो दीपंगृहाणकर्पूरकपिलाज्यत्रिवार्त्तिकं आज्यंत्रिवर्त्तिसंयुक्तमितिदीपं मध्यमांगुष्ठयोगेनदीपमुद्रया अज्ञानामापिसर्वेषांपतेदीनार्त्तिनाशक

षड्रसैश्चसमायुक्तंगृहाणान्नंनिवेदितं नैवेद्यंगृह्यतांदेवेतिपठित्वाऽमृतोपस्तरणमसि प्राणाय स्वाहेत्याद्युक्ता ॥ नमस्तेदेवदेवेश सर्वतृप्तिकरंवरं अन्ननिवेदितंशुद्धं प्रकृतिस्थंसुशीतलं परमानंदसंपूर्णं गृहाणजलमुत्तममित्यनेनमध्येपानीयंदत्त्वा ब्रह्मेंद्राद्यैरितिचपठित्वा ब्रह्मेंद्राद्यैः सदसमभितःसोपविष्टैःसमंता द्गौर्य्यासिंजद्वलयकरयासादरंवीज्यमानःनर्मक्रीडाप्रहसनपरेहासयन्पंक्तिभोक्तृन्भुंक्तेपात्रेकनकघटितेषड्रसान्श्रीमहेशःयथाशक्ति जपित्वोत्तरापोशानंचदत्त्वानैवेद्यशेषंनिर्माल्यभोजनेचंडेश्वरायसमर्प्यसुगंधिचंदनेन करोद्वर्तनंकारयित्वामूलेनाचमनंचदत्त्वा राजाधिराजदेवेशनिराकारनिरास्पद फलंगृहाणदेवेशनारिकेलादिकंशुचेत्यनेनफलंदद्यात् इदंफलमितिमूलेनच शाश्वतश्रीमयानंदमदनांतकधूर्जटे गृहाणपूगतांबूलचूर्णंचैवसखादिरं पूगीफलमितिमूलेनतांबूलंदद्यात् तांवूलमुखवासावितिकौस्तुभे तल्लक्षणंहेमाद्रौरत्नकोशे महापिप्पलपत्राणिक्रमुकस्यफलानिच नारिकेलफलोपेतंमातुलुंगसमायुतं एलाकर्पूरकंकोलैर्मुखवासंप्रचक्षते एतेषामप्यलाभेतुतनद्द्रव्यंस्मरेद्बुध इति हिरण्यगर्भस्थमितिदक्षिणांदद्यात् ततःपुष्पांजलिंदद्यात् हरविश्वाखिलाधारनिराधारनिराश्रय पुष्पांजलिशिवंशंभोगृहाणवरदायकेति पुष्पांजलिंदत्त्वानीराजनंकुर्य्यात् तत्र विशेषोहेमाद्रौ चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच सर्वेषांज्योतिषांज्योतिरार्त्तिक्यंप्रतिगृह्यतां शालिपिष्टोद्भवैःशुद्धैर्घृतपूर्णैः समुज्वलैःततोनीराजनंदीपैःषड्विंशत्यानुकारयेत् सर्षपैर्दधिसंयुक्तैर्दूर्वागोरोचनादिभिः शांतिकुंभततःपद्ममष्टपत्रंसकर्णिकं ध्यात्वानिवेदयेन्मूर्द्ध्निलिंगस्यकुसुमैःसह ततोवस्त्रयुग्मचामरदर्पणादीन्यर्पयेत् ततःप्रदक्षिणंकृत्वा साष्टांगंप्रणमेत् मृडानीनाथमेसर्वानपराधाननेकधा क्षमस्वाभिप्रणामंतेकरोम्यष्टांगसंभवमितिनमस्कारं कृत्वा ईश्वरवेद्याअष्टदिक्षुआग्नेय्यांतमष्टमूर्त्तिपूजनंकुर्य्यात् तथाचभविष्ये मूर्त्तयोष्टौशिवस्यैतापूर्वादिक्रम

योगताःआग्नेयांताःप्रपूज्यास्तुवेद्यांलिंगेशिवंयजेदिति अष्टमूर्त्तिपूजनंतुप्राचीमग्रतःशंभोरितिरुद्रयामले देवाग्रेस्वस्ववाप्यग्रेप्राचीप्रोक्तागुरूत्तमैरित्यागमिकांप्राचीमारभ्य प्राच्यैशान्यादिक्रमेणाग्नेयी वामावर्त्तनकुर्य्यात्तच्चेत्थं नमःशिवायेतिमंत्रेणपूर्वंलिंगेशिवंसंपूज्य ततोवामावर्त्तेन अष्टौमूर्त्तीःपूजयेदिति कालतत्त्वविवेचनप्रभृतयः ॥ ॥ वस्तुतस्तुरुद्रयामलीयपदार्थादर्शादिमहानिबंधेष्वदर्शनान्निर्मूलमेव मंत्रमहोदधौतुमुखेपुष्पांजालिदानोत्तरंआवरणपूजनादर्वागष्टमूर्त्तिपूजनंतद्यथा ऊँशर्वायक्षितिमूर्त्तयेनमःऊँभवायजलमूर्त्तयेनमः रुद्रायआग्निमूर्त्तयेनमः उग्रायवायुमूर्त्तयेनमः भीमायआकाशमूर्त्तयेनमः पशुपतयेयजमानमूर्त्तयेनमः महादेवायसोममूर्त्तयेनमः ईशानायसूर्यमूर्त्तयेनमः मध्येशिवायनमः ॥ ॥ चंदनादिपंचोपचारैःसंपूज्य यथाशक्तिजप्त्वास्तोत्रैः स्तुत्वानमस्कृत्य ॥ प्रथमप्रहरार्घ्यंदद्यात् ॥ शिवरात्रिव्रतंदेवतवपूजापरायणं करोमिविधिवद्दत्तंगृहाणार्घ्यंमहेश्वर अथप्रार्थना नमोयज्ञजगन्नाथनमस्त्रिभुवनेश्वर पूजांगृहाणमद्दत्तांमहेशप्रथमेपदइति ॥ ततःपुष्पांजलिंदत्त्वातन्मंत्रजपेनतत्कथाश्रवणादिनाजागरणंकुर्य्यात् ततोद्वितीयप्रहरे पूर्ववत्पूजनंकृत्वाद्वितीयप्रहरार्घ्यंदद्यात् ॥ नमःशिवायशांतायसर्वपापहरायच शिवरात्रौददाम्यर्घ्यंप्रसीदउमयासह ततःप्रार्थना ॥ नमोऽव्यक्तायसूक्ष्मायनमस्तेत्रिपुरांतक पूजांगृहाणदेवेशयथाशक्त्योपपादितामिति ततस्तृतीयप्रहरपूजनं यथावत्कृत्वातृतीयप्रहरार्घ्यंदद्यात् दुःखदारिद्र्यशोकेनदग्धोहंपार्वतीपते शिवरात्रौददाम्यर्घ्यमुमाकांतगृहाणमे ततःप्रार्थना बद्धोहंविविधैःपाशैःसंसारभयवर्द्धनैः पतितंमोहजालेमांत्वंसमुद्धरशंकर ततश्चतुर्थप्रहरपूजनं यथाविधिकृत्वाचतुर्थप्रहरार्घ्यंदद्यात् ॥ मयाकृतान्यनेकानिपापानिहरशंकर शिवरात्रौददाम्यर्घ्यमुमाकांतगृहाणमे ॥ ततःप्रार्थना किंनजानासिमांबद्धंतावद्भक्तिंप्रयच्छमे स्वपादाग्रतलेदेवदास्यं

देहजगत्पते ॥ इतिचतुर्थप्रहरपूजांसमर्प्य ॥ पुनः प्रार्थयेत् अविघ्नेनव्रतंदेवत्वत्प्रसादात्समर्पितं क्षमस्वजगतांनाथत्रैलोक्याधिपतेहर यन्मयाद्यकृतंपुण्यंतद्रुद्रस्यसमर्प्पितं त्वत्प्रसादान्महादेवव्रतमद्यसमर्प्पितं प्रसन्नोभवमेश्रीमन्सद्गतिंप्रतियातुसत् तदालोकनमात्रेणपवित्रोस्मिनसंशयइतिप्रसादपुष्पपत्रादिगृहीत्वाव्रतसाद्गुण्यार्थंगोदानंकृत्वापरदिनेयथाशक्तिब्राह्मणान्भोजयित्वा संसारेंधनदग्धस्यव्रतेनानेनशंकर प्रसादसुमुखोभूत्वाज्ञानदृष्टिप्रदोभवेतिसंप्रार्थ्य वंधुभिःसहपारणंकुर्य्यादिति कालतत्त्वविवेचनेतु ओंह्रौंईशानायनम इतिप्रथमप्रहरे ॥ दुग्धेनस्नपनंपूजनंच ॥ अर्घ्यादिकंचपूर्ववदेव द्वितीयप्रहरे ओंह्रौंअघोरायनम इतिदध्नास्नपनं तृतीये ओंवामदेवायनम इतिघृतेनस्नपनं चतुर्थे ओंह्रौंसद्योजातायनम इतिमधुनास्नपनमित्युक्तं नृसिंहपरिचर्य्यायांतु शतरुद्रियंपंचार्य्यावा पयसासर्पिषामधुरान्नरसेनेक्षुरसेनोदकेनवासंततधारयाशिवंसंस्नाप्यप्राणायामं ॥ शिवायनमः ॥ इतिगंधपुष्पतिलतंडुलमाषगोधूमादिभिर्महापूजांकृत्वापंचब्रह्ममंत्रैः ओंसद्योजातायनमः पश्चिमे उत्तरेवामदेवायनमः पूर्वेतत्पुरुषायनमः दक्षिणेअघोरायनमः ऊर्द्ध्वमुखे ईशानायेतिपंचवक्त्राणि पुष्पादिभिः संपूज्यतांबूलादिकंनिवेद्यअर्घ्यंदद्यात् तत्रमंत्रः गौरीवल्लभदेवेशशर्वाद्यशशिशेखर वर्षपापविशुद्ध्यर्थमर्घ्योमेप्रतिगृह्यतां इत्यर्घ्यंदत्त्वाजागरणंकुर्य्यात् द्वितीयप्रहरे शंकरायनमः ॥ तृतीयेमहेश्वरायनमः चतुर्थेरुद्रायनमःएवंसंपूज्य प्रभातेनित्यंकृत्वा शिवमभ्यर्च्य शिवभक्त्याद्विजान्भोज्यपारणंकुर्य्यादितिवार्षिकशिवरात्रिपूजनम् अथवार्षिकशिवयोगयुक्ताशिवरात्रिकथा॥श्रीशिवउवाच आसीद्राजाविदेहायांप्रजापालनतत्परः सुधर्मानामविख्यातःसदापरमधार्मिकःपृथिव्याःसर्वराजानोवर्त्तंते वशवर्त्तिनःतस्यराज्येनवैकाश्चेद्व्याधितोदुःखितोभवत् एवंगुणविशिष्टस्यतस्यराज्ञः प्रियाशुभा भार्य्यातिलोत्तमानामसर्वैःसमुदितागुणैःरूपला

वण्यसंयुक्तास्थिरयौवनसंस्थिताहंसकोकिलसंभाषयामत्तमातंगगामिनी यथारूपातथाशीलातस्यभार्य्यामहीपतेःभर्त्तुःप्रियहितेयुक्ताभर्त्तुश्चैवहिवल्लभा याश्चतस्यापराभार्य्याःशतसाहस्रसम्मिताः सर्वास्तागुणसंयुक्तादास्य एवव्यवस्थिताः एवंगच्छतिकालेतुकस्मिंश्चित्सुरसुंदरि अंतःपुरंसधर्मात्माजगामरिमुमर्दनः पतिंतिलोत्तमा देवीसर्वैःसमुदितागुणैः आगच्छंतंततोदृष्ट्वाराजानंरिमुमर्दनं ततश्चस्वयमुत्थायददौराजासनंतदा वदंत्येव तदाराज्ञीप्रियेतिचपुनःपुनः उपविष्टातदाराज्ञःसमीपेवरवर्णिनी सचराजातदाराज्ञाशिवेतिस्वमुदीरितं श्रुत्वेतिशेषंसंस्मारप्राक्तनंकर्मयत्कृतं तत्याजासौतदास्मृत्वातांबूलंकरसंस्थितं चकारमनसाराजासंकल्पं शिवपूजने पप्रच्छसातदादेवीकिमिदंत्यागकारणं यदिवक्षसिनोतत्वंमरिष्यामितवाग्रतः सोपिराजातदा देवींमरणेकृतनिश्चयां विज्ञायकथयामासपूर्वजन्मविचेष्टितं श्रूयतामभिधास्यामिसावधानाभवप्रिये अहमासंपुरावैश्यःस्वधर्मनिरतःशुचिः कालेनगच्छतादेविपूर्वकर्मवशेनच स्वकर्मनिरतस्यापिचौर्येभक्तिरजायत निशिनिष्क्रमणंकृत्वाचौर्य्यंकर्तुमहंगतः ममवैभ्रममाणस्यअर्द्धरात्रमभूत्तदा मयाहिभ्रमतादृष्टःसमवायोजनस्यच ॥ जागरणंतुप्रकुर्वाणः शिवस्यायतनेशुभे अंतरंतुसमासाद्यउपविष्टस्ततःक्षणं कस्याश्चिद्गृहमेधिन्याःकर्णसंस्थंचकुंडलं हृत्वापलायमाणस्तुदृष्टोहंतत्रपालकैः ततस्तुसहिताःसर्वेखड्गहस्ताधनुर्धराः तद्भयाद्धिमयातत्रमुखेक्षिप्तंतुकुंडलं ततःक्रुद्धेनचैकेनशिरच्छिन्नंमहासिना ततश्चकर्मणातेनरात्रौजागरणेन च व्रतेनचकृतेनापि राजा हंसवभूवह ततश्चजातिस्मरणंजातंममातिलोत्तमे चतुर्दशीतिथिज्ञात्वातांबूलंतन्मयोर्जितं एतच्छ्रुत्वाचसादेवीविस्मयंपरमंमहत् उवाचैनंपुनाराज्ञी विस्मयेनसमन्विता यदिमेप्रत्ययं किंचिदुत्पादयसिभूमिप तदाजीवामिभूपालनान्यथासंप्रतारणां एतच्छ्रुत्वातदाराजाउवाच सुरसुंदरि

एतदेवशिरोमेद्यपश्यैतत्कूपसंस्थितं कालेनकूपःपूर्णोयंमृत्काष्ठैस्तृणसंचयैः उत्थायचगतौतत्रदंपतीविस्मयान्वितौ खातयित्वाततोदिव्यैदर्शयामासताच्छिरःकुंडलंचमुखेदृष्ट्वाविस्मयंपरमंगतौ ततस्तौदंपतीतत्रचक्रतुर्नियमंपरं उपवासस्यनियमं तथाजागरणस्यच कालेनगच्छतातौतुपुत्रपौत्रसमन्वितौ संपूर्णेचतयोःकालेमरणंसमुपागतौ शिवरात्रिप्रभावेनदंपतीशिवसन्निधौ शिवरात्रिमिमंदेवियःकरोतिनरोभुवि निर्मुक्तःसर्वपापेभ्योशिवलोकेमहीयते यइमांशृणुयान्नित्यंशिवरात्रिकथांनरः कृतातेनमहादेविशिवरात्रिर्नसंशयः॥ इतिशिवयोगयुक्तशिवरात्रिव्रतमाहात्म्यम् ॥ अथाशक्तविषयेप्युक्तमन्यत्र कुर्वंतिसांवत्सरिकींशिवस्यपूजांसुशक्त्यातुयथाकथंचित् कृत्वाप्रयांत्येवशिवस्यलोकंव्याधोपियातोह्यघकृत्परंतादिति ॥ ओंनमोभगवतेरुद्राय ॥ अथशिवरात्रिव्रतकथा हेमाद्रौ स्कंदपुराणेनागरखंडे अश्वसेनउवाच कलिकालकृतोकिंचिद्व्रतमेवदषण्मुख स्वल्पायासंमहापुण्यंसर्वपापप्रणाशनं लक्षायुषःसदामर्त्याब्रह्मन्कृतयुगेपुरा त्रेतायांद्वापरेचापिनतुप्राप्तेकलौयुगे तस्माद्वर्षव्रतंत्यक्त्वाकिंचिदेकाहिकंवदश्वःकार्य्यमद्यकुर्वीतपूर्वाह्णेचापराह्णिकं नहिमृत्युःप्रतीक्षेतकृतंवानचवाकृतं तस्यतद्वचनंश्रुत्वाभर्तृयज्ञउदारधीःअब्रवीत्सुचिरंध्यात्वाज्ञात्वादिव्येनचक्षुषा अस्तिराजन्व्रतंपुण्यंशिवरात्रीतिसंज्ञितं एकाहिकं महाराजन् सर्वपापप्रणाशनं तस्यांचदीयतेदानंहुतंजप्तंतथैवच सर्वमक्षयतांयातिरात्रिजागरणेकृते अपुत्रोलभते पुत्रान्निर्द्धनोधनमाप्नुयात् स्वल्पायुर्दीर्घमायुश्चशत्रूणांचैवसंक्षयं यंयंकाममपिध्यायन्व्रतमेतत्समाचरेत् तंतंसमाप्नुयान्मर्त्योनिष्कामोमोक्षमाप्नुयात् तथावर्षकृतात्पापान्मुच्यतेनात्रसंशयः कपटेनापिचित्तेनयदिकुर्य्यात्प्रजागरं यानिकान्यत्रलिंगानिस्थावराणिचराणिच तत्रसंक्रमतेदेवस्तुष्टस्तस्यांयतोहरः शिवरात्रिस्ततःख्यातास्तेनसाहरवल्लभा प्रार्थितासासुरैःसर्वैर्लोकानुग्रहकाम्यया भगवन्कलिकालेस्मिन्सर्वपापसमाश्रिते वर्षपापवि

शुद्ध्यर्थंदिनमेकंक्षितौव्रज येनत्वांपूजयापूज्यंमर्त्याःशुद्धिमवाप्नुयुः ततोदत्तंद्रुतंचैषामस्माकमुपतिष्ठतु तेरु
च्छिष्टैश्वयद्दत्तंतत्तत्तस्यांयतोखिलं कालेकालेनचास्माकंकिंचिन्नैवोपतिष्ठति श्रद्धयामानवैर्दत्तंप्रभूतमपिशंकर
शिवउवाच माघमासस्यकृष्णायांचतुर्दश्यांसुरेश्वराः अहंयास्यामिभूपृष्ठंरात्रौचैवदिवाकलौ लिंगेषुच
समस्तेषुस्थावरेषुचरेषुच संवसिष्यामिसंदिग्धं सर्वपापविशुद्धये तस्यांरात्रौहिमेपूजां यःकरिष्यतिमानवः
मंत्रैरेतैःसुरश्रेष्ठ विपाप्मासभविष्यति ॥ मंत्राश्च ॥ ह्रांसद्योजातायनमः ह्रींवामदेवाय ह्रूं अघोराय-
ह्रैंतत्पुरुषाय- ह्रौंईशानायनमः पंचवक्त्राणिसंपूज्य गंधपुष्पानुलेपनैः वस्त्रैर्दीपैश्चनैवेद्यैस्ततोर्घ्यंसंप्रदापये
त् मंत्रेणानेनमद्भक्तो मांध्यात्वामनसिस्थितं गौरीवल्लभदेवेश शर्वाख्यशशिशेखर वर्षपापविशुद्ध्यर्थ
मर्घ्योमेप्रतिगृह्यतां ततःसंपूजयेद्विप्रंभोजनाच्छादनादिभिः दत्त्वाचदक्षिणांतस्मैवित्तशाठ्यविवर्जितः ततोजागरणं
कुर्या द्गीतवादित्रनिः स्वनैः धर्माख्यानगताभ्यश्चसल्लास्यैस्तांडवादिभिः तांडवैरुदितैर्नृत्यैः तांडवोस्त्रीनृ
णांतरे भवेदुद्धतनृत्यंचेतिमेदिनीकोशात् एवंकरिष्यतेयोत्रव्रतमेतत्सुरेश्वराः सर्वपापविशुद्ध्यर्थंप्रायश्चित्तंभवि
ष्यति तस्येतिशेषः तच्छ्रुत्वात्रिदशाः सर्वेप्रणम्यशशिशेखरं संप्रहृष्टान्नृपश्रेष्ठस्वानिस्थानानिभेजिरे प्रेष
यामाससद्बोध्यंनारदंमुनिसत्तमं प्रबोधनायलोकानांशिवरात्रिकृतेतदा सोपिगत्वाधरापृष्ठेबोधयामाससर्वतः
शिवरात्रेस्तुमाहात्म्यंयदुक्तंशूलपाणिना ततः प्रभृतिसंजाता शिवरात्रिर्धरातले तत्रतेकथयिष्यामिपुरावृत्तंकथां
तरं यद्वृत्तंनैमिषारण्येलुब्धकस्यापिकुत्राचित् तत्रासील्लुब्धकः कश्चिज्जातिमात्रानुकर्मतः व्यसनेनाभिभूतात्मा
परवित्तापहारकः नकदाचिद्व्रतंतेननदत्तंनजपः कृतः केवलंतुहृतंवित्तंलोकानांछलसंश्रयात् कस्याचित्त्वथकाल
स्यशिवरात्रिः समागता । माघमासेसितेपक्षे सर्वपातकनाशिनी तत्रास्त्यायतनंपुण्यंदेवदेवस्यशूलिनः तत्र

जागरणंरात्रौप्रारब्धंवहुभिर्जनैः नारीभिर्नरशार्दूल भूषिताभिः सुभूषणः अथासौचिंतयामासचौर्य्याचित्तोव्रजागरः गच्छामियदिकाचित्स्त्रीभूषणैः परिभूषिता निष्क्रांतावाह्यतश्चास्माद्वासादन्यत्रयास्यति ततोगत्वासमादाय भूषणानिव्रजाम्यहं इतिनिश्चित्यमनसागतस्तस्यसमीपतः कार्णिकारंसमारुह्यास्थितोगुप्तस्ततोहिसः वीक्ष्यमाणोदिशः सर्वा नारीनिष्क्रमणोद्भवाः चौर्य्यकर्मप्रवृत्तस्यशीतार्त्तस्याविशेषतः स्वल्पापिनिद्रानोजाताकापिनारीविनिर्गता ॥ तस्याधस्तात्ततोलिंगमनुद्भूतमवस्थितं एतस्मिन्नेवकालेतुप्रोद्गतस्तीक्ष्णदीधितिः असतांचैवचौराणांकामिनामसुखावहः ततोनराश्चनार्यश्चजग्मुःस्वंस्वंनिवेशनंउपवासपराःशांताःप्रणिपत्यमहेश्वरं सोपि चौरोनिराशश्चक्षुत्क्षामःशीताविह्वलः अवतीर्य्यद्रुमात्तस्माद्धर्म्याग्रंकंचिदाश्रितः कालेनमहतासोपिपंचत्वंसमपद्यत जातोजातिस्मरोभूत्वादशार्णाधिपतेःसुतः उपवासप्रभावेनजागरस्यफलादपि शिवरात्रौतथातस्यालिंगस्यापिप्रपूजनात् ततोराज्यंसमासाद्यापितृपैतामहंमहत् कारयामासलिंगस्यप्रासादंतस्यशोभनं वर्षेवर्षेसमागत्यशिवरात्र्यांप्रजागरात् उपवासपरोभूत्वागीतवादित्रनिःस्वनैः धर्माख्यानकथाभिश्च सामस्तुतिभिरेवच पूर्वोक्तमंत्रैःसंपूज्यअर्घ्यंदत्त्वाविधानतः समर्प्यब्राह्मणान्कामैर्जगामविषयंनिजं कस्यचित्त्वथकालस्याशिवरात्रिःसमागता प्रासादेतत्रमुनयःप्राप्ताःशांडिल्यपूर्वकाः शांडिल्योथभरद्वाजोयवक्रीतश्चगालवः पुलस्त्यःपुलहोगार्ग्य स्तस्यलिंगस्यचाग्रतः पूजयित्वाततोदेवंप्रणिपत्यऋषींश्चतान् उपविष्टस्तुतस्याग्रेअनुज्ञातोद्विजातिभिः तेतुतस्याग्रतश्चक्रुःकथावहुविधान्नृप राजर्षीणामतीतानांब्रह्मर्षीणांविशेषतः अथतस्मिन्कथांतेवैतैःपृष्टोब्रह्मवादिभिः कौतुकाविष्टचित्तैश्चविस्मयोत्फुल्ललोचनैः राजन्पृच्छामहेसर्वेवयंकौतूहलान्विताः यदिब्रवीषिनःसत्यंदेवतायतनेस्थितः ॥ राजोवाच ॥ यदिज्ञास्यामिविप्रेंद्राः कथयिष्याम्यसंशयं देवस्याग्रेतुसंपूज्यसत्येनात्मानमालभे

॥ ऋषयऊचुः ॥ सुलभानिपरित्यज्यकस्माद्दानान्यनकेशः जागरंकर्त्तुकामोत्रस्वदेशादुपतिष्ठासि वर्षेवर्षेसदा प्राप्तेनूनंत्वंवेत्सिकारणं रहस्यंयदितेनस्यात्तद्ब्रूहित्वंनराधिप सविलक्ष्यस्थितंकृत्वाततः प्राहसुदुर्मनाः रहस्यं परमंह्येतदवाच्यंहिद्विजोत्तमाःतथापिकथयिष्यामिममदेवोयतो।अतःततःसकथयामासपूर्वदेहसमुद्भवं मलिम्लुचकरोनूनंवृत्तांतंहिनराधिपः चौर्य्यभावेनदेवस्यपूजनंजागरस्तथा उपवासंविनान्नेनाशिवरात्रौपुराभवत् जातिस्मरणसंयुक्तं तेषांसर्वंयथातथं कथयामासभूपालोवृत्तांतंपूर्वजन्मनःततस्तेमुनयः सर्व साधुवादान्पृथग्विधान् व्ययान्तमस्यराजर्षे सदाशीर्भिः समन्वितः रात्रौजागरणंकृत्वाप्रजग्मुः स्वांस्तदापुमान् सोपिराजासमभ्यर्च्यतं देवंतान्द्विजोत्तमान् जगामस्वपुरंपश्चात्कृत्वारात्रिप्रजागरम्॥भर्तृउवाच॥शिवरात्रिःसमुत्पन्नाएवंभूमितलेनृप एवंविधंचमाहात्म्यंतथाग्रेपरिजल्पितं तस्मात्सर्वप्रयत्नेनकार्यासानृपसत्तम कलिकालेविशेषेणयदीच्छेद्गतिमात्मनः यश्चैनांशृणुयाद्वापिपठेद्वाशिवसन्निधौ तनुजात्पातकात्सोपिमुच्यते नात्रसंशयःनास्तिगंगासमंतीर्थंनास्थिदेवोहरोपमःशिवरात्रिसमंनास्तिव्रतंसत्यंमयोदितं सर्वरत्नमयोमेरुःसर्वाश्चर्यमयंनभः सर्वधर्ममयाराजन्शिवरात्रिःप्रकीर्त्तिता गरुडःपक्षिणांयद्वन्नदीनांसागरोयथा प्रधानंसर्वधर्माणांशिवरात्रिस्तथोत्तमा॥इतिस्कंदपुराणेनागरखंडे शिवरात्रिव्रतमाहात्म्यंसमाप्तम् ॥ अथवार्षिकशिवरात्रिव्रतोद्यापनम् ॥ स्कंदउवाच ॥ व्रतस्योद्यापनंकर्मकर्त्तव्यं किंचमानवैःकोविधिःकानिद्रव्याणिकथंकार्यंवदप्रभो ॥ ईश्वरउवाच ॥ शृणुषण्मुखतत्त्वेनलोकानांहितकाम्यया चतुर्दशाब्दंकर्त्तव्यंशिवरात्रिव्रतंशुभं एकभक्तंचतुर्दश्यांचतुर्दश्यामुपोषणं संपाद्यसर्वसंभारान्मंडपंतत्रकारयेत् वस्त्रैःपुष्पैःसमाछन्नंपट्टकूलैश्चशोभितं तन्मध्येलेखयेद्दिव्यंलिंगतोभद्रमंडलं अथवासर्वतोभद्रंमंडपांतःप्रकल्पयेत् शोभोपशोभासंयुक्तंदीपैःसर्वत्रचोज्ज्वलं आचार्य्यंवरयेत्तत्रऋत्विग्भिःसहितंशुभं शिवरूपाश्चतेज्ञेयाः

पूज्याश्चंदनपुष्पकैः अनुज्ञातश्चतैर्विप्रैः शिवपूजांसमाचरेत् रुद्रनाम्नानमोंतेनब्राह्मणानापिपूजयेत् अव्रणंसजलंकुंभतस्योपरितुविन्यसेत् सौवर्णराजतंवापिमृण्मयंवापिकारयेत् कुंभोपरिन्यसेद्देवमुमयासहितंशिवं सौवर्णंप्यथवारोप्येवृषभेसंस्थितंशुभे रत्नैराभरणैर्हेमै रलंकृत्यप्रपूजयेत् वस्त्रयुग्मेनसंवेष्ट्य विल्वपत्रैःप्रपूजयेत् पलेनवातदर्द्धेनतदर्द्धेनाथवापुनः उमामाहेश्वरींमूर्तिंपूजयेद्वृषभास्थिताम् अथपूजा हृदिसांचिंतयेद्देवंशुद्धस्फटिकसन्निभं व्याघ्रचर्मपरीधानंचिंतयेदव्ययंहृदि इतिध्यानम् आगच्छदेवदेवेशमर्त्यलोकहितेच्छया पूजयामिविधानेनप्रसन्नसुमुखोभव इत्यावाहनं प्राज्यासनंकुरुप्राज्ञनिर्मलंस्वर्णनिर्मितं भूषितंविविधैःरत्नैः कुरुत्वंपादुकासनं इत्यासनं गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां इति पाद्यं गंधोदकेनपुष्पैश्चचंदनेनसुगंधिना अर्घ्यंगृहाणदेवेशभक्तिंमेह्यचलांकुरु इत्यर्घ्यं गंगाजलंसमानीतं सुवर्णकलशेस्थितं आचम्यतांमहादेवत्रैलोक्यव्याधिनाशन आचमनं स्नानंपंचामृतंदिव्यंपयोदधिघृतंमधुशर्कराजलसंयुक्तंसर्वतीर्थोदकान्वितं स्नानं वस्त्रंसूक्ष्मंदुकूलंचदेवानामपिदुर्लभंगृहाणत्वमुमाकांतप्रसन्नस्त्वं सदाभव श्रीखंडचंदनादिव्यंमलयाचलसंभवं विलेपनंसुरश्रेष्ठगृहाणपरमेश्वर इतिगंधं यज्ञोपवीतंसहजब्रह्मणानिर्मितंपुरा आयुष्यंब्रह्मवर्चस्यमुपवीतंगृहाणमे इतियज्ञोपवीतं अक्षतान्धवलान्देवकुंकमाद्येनरंजितान् मुक्तारत्नमयानन्यान्गृहाणसुरपूजित इत्यक्षताः माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यतां इतिपुष्पाणि वनस्पतिरसोधूपोगंधाढ्यःसुमनोहरः आघ्रेयःसर्वदेवानां धूपोयं प्रतिगृह्यतां इतिधूपः आज्यंचवर्तिसंयुक्तंवन्हिनायोजितंचयत् ईप्सितंमेवरंदेहिपरत्रचशुभांगतिं इतिनैवेद्यंइदफलंमयादेवस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि इतिफलं पूगीफलंमहादिव्यंनागवल्लीदलै

युतं कर्पूरादिसमायुक्तंतांवलंप्रतिगृह्यतां इतितांवूलं हिरण्यगर्भगर्भस्थंहेमवीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे इतिदक्षिणा सोमंचसगणंचैवपूजयित्वामहेश्वरं ततोरात्रौप्रतियाममर्घ्यंदद्याद्यथाविधि ततःपारायणस्तोत्रैरात्रिशेषंनयेद्बुधः ततःप्रभातसमयेकृत्वासंध्यादिकाःक्रियाः पुनःपूजांप्रकुर्वीतततोहोमंसमाचरेत् तिलव्रीहियवैश्चैवपायसेनचभक्तितः त्र्यंवकंचेतिमंत्रेणततोनमःशंभवेतिच गौरीमिमेतिमंत्रेणशतमष्टोत्तरद्वयं होमंचकुर्य्यान्मतिमान्विल्वपत्रैस्तुनामभिः पूर्णाहुतिंततोदद्याद्धोमशेषंसमापयेत् ब्राह्मणान्भोजयेद्भक्त्यापूजयेच्चचतुर्दशीं आचार्य्यंचसपत्नीकंवस्त्रालंकारभूषणैः यज्ञोपवीतवस्त्रादिदद्यात्तेभ्यःपृथक्पृथक् गांसवत्सांसवसनांनानालंकारभूषितां दद्यादाचार्य्यवर्य्यायशिवोमेप्रीयतामिति ततःसकुंभांतांमूर्त्तिंसवस्त्रांवृषभस्थितां सर्वालंकारसहितामाचार्य्यायनिवेदयेत् शंभोप्रसीददेवेशसर्वलोकेश्वरप्रभो तवदेवप्रदानेनममसंतुमनोरथाः व्रतमेतत्कृतंयन्मेपूर्णंवापूर्णमेवच सर्वंसंपूर्णतांयातुप्रसादाद्भवतोमम इतिसंप्रार्थ्यतान्विप्रान्प्रणम्यचपुनःपुनः अजैकपादादिदेवेभ्योदद्यात्कुंभान्पृथक्पृथक् अजैकपादहिर्वुध्न्यो भवः शर्वउमापतिः रुद्रःपशुपतिःशंभुर्वरदःशिवईश्वरः महादेवोहरोभीमोनामान्येवंचतुर्दश ॥ अथप्रयोगः ॥ संकल्पपूर्वकंनांदीश्राद्धांतंकृत्वाआचार्यस्यचतुर्दशऋत्विजांचवरणंकुर्य्यात् ततोमंडपमध्येलिंगतोभद्रेचएकः पूर्वादिदिक्षुप्रत्येकंस्त्रींस्त्रीन्मध्यकलशदक्षिणोत्तरयोर्द्वावित्येवंचतुर्दशकलशान् महीद्यौरित्यादिकलशस्थापनविधिमारभ्यवरुणपूजनंकुर्य्यात् ततोमध्यकलशेनंदिनंतास्मिन्नुमामहेश्वरौचसंस्थाप्यचतुर्दशकलशेषुलिंगानिस्थापयेत् मध्यकलशस्थप्रतिमायामुक्तैः पौराणमंत्रैर्वैदिकमंत्रसहितैर्यथासंभवषोडशोपचारैः पूजांकुर्य्यात् इतरकलशेषुप्रादक्षिण्येनाजपदेनमः अहिर्वुध्न्यायनमइत्यादिनाममंत्रैःपूजांकुर्य्यात् पात्रासंभवेआवृत्तिः पुष्पानिवेदनांते

आह्निकप्रकरणस्थाशिवपूजायामुक्तआवरणगणःपूज्यः पंचामृतादिगतविशेषाः शिवरात्रिप्रकरणस्थायथासंभवं द्रष्टव्याः ततोजागरणं प्रातर्नित्यक्रियांते आचार्य्योहोमंसंकल्प्यांतेयदत्रसंस्थितमित्यादिसर्षपादिविकरणं पंचगव्यप्रोक्षणादिनाभुवंसंशोध्याग्निंप्रतिष्ठाप्यतद्ध्यानांते तदैशान्यांलोकपालांतदेवता सहितग्रहपूजांविधाय तदैशान्यांविधिनास्थापितकलशेवरुणंसंपूज्य कलशस्यमुखे० देवदानवसंवादे इत्यादिसंप्रार्थ्य ॥ अग्नेःपश्चादुपविश्यचादध्यात् चक्षुषीआज्यमित्यंतम् आदित्यादीनुद्दिश्यार्कादिसमिच्चर्वाज्याहुतिषु अंगदेवतोद्देशकतदाहुतिचाष्टोत्तरशतादिचिकीर्षितसंख्यासंकीर्तनंकार्य्यं प्रधानदेवतांरुद्रंअष्टोत्तरशतसंख्याकाभिर्विल्वसमिदाहुतिभिस्तावतीभिः पायसाहुतिभिस्तावतीभिराज्याहुतिभिरुमांनंदिनं अजैकपादमहिर्बुध्न्यंभवंशिवंउमापतिंरुद्रंपशुपतिंशंभुंवरदंशिवंईश्वरं महादेवंहरंभीमंएताःषोडशदेवता एकैकयाज्याहुत्याशेषेणास्विष्टकृतमित्यादिततः स्थालीपाकविधिनापायसंश्रपयित्वागुरुंसिद्ध मादायाज्यभागांतेयथान्वाधानंयजमानेत्यागेकृतेयथात्यागं ग्रहतदंगोद्देश्यकंऋत्विजः कुर्य्युः प्रधानदेवताहोममाचार्य्यःकुर्य्यात् कद्रुद्रायेतित्रिभिस्त्रिभिरेकैकमष्टोत्तरशतंकुर्य्यात् एकैकंवाषट्त्रिंशदाहुतयइत्येवमष्टोत्तरशतसमिद्धिः उमायै नंदिनेऽअजैकपदेइत्यादिषोडशदेवताभ्यएकैकयापायसाहुत्या स्विष्टकृदादिप्रायश्चितहोमांतेवलिदानपूर्णाहुतिः ततःप्रणीतानियमनससर्यापरिस्तरणविसर्जनान्यग्न्यर्चनानि ततोवरुणकलशोदकेनयजमानाभिषेकः आचार्य्यायधेनुदानं ततोजैकपादादिसहितस्योमायुतश्रीरुद्रस्यग्रहाणांचोत्तरपूजांतेश्रीरुद्रप्रतिमामाचार्य्यहस्तेप्रतिपाद्यसोपस्कराश्चतुर्दशप्रतिमा अजैकपादादिनाममंत्रैः पूर्ववृतेभ्यश्चतुर्दशविप्रेभ्यःप्रतिपाद्य व्रतमेतत्कृतंयन्मेपूर्णंवापूर्णमेववा सर्वंसंपूर्णतांयांतुप्रसादाद्भवतांममेतितान्संप्रार्थ्यपूर्ववृत्तांश्चतुर्दशविप्रान्वस्त्रोपवीतकुंडलादिभिः संपूज्यसाचार्य्यांस्तान्सं

भोजयित्वाचतुर्दशभ्योयथाशक्तिदक्षिणांदत्त्वेश्वरार्प्पणंकुर्य्यात् ॥ इतिशिवरात्रिव्रतोद्यापनविधिः अथ मासशिवरात्रिनिर्णयः तदारंभस्तुमार्गशीर्षकार्त्तिकमाघचतुर्दशीषुवा न्यतमचतुर्दश्यांकार्य्यः तदुक्तंमदनरत्नेस्कंदपुराणे आदौमार्गशिरेमासिदीपोत्सवदिनेपिवा गृह्णीयान्माघमासेवाद्वादशैवमुपोषयेत् तथा दीपोत्सवमथासाद्यकृष्णायाचचतुर्दशी द्वादशस्वपिमासेषुप्रकुर्य्यादिहजागरं तथाकृष्णपक्षेशिवरात्रिमुपक्रम्य-यतः प्रतिचतुर्दश्यांपूजायत्नेनमेकृता तथाजागरणंरात्रौसंन्निधौमेकृतंतथेति अस्यव्रतस्यवर्षसंख्योक्तातत्रैव एवंद्वादशवर्षांतेद्वादशैवतपोधनानिति हेमाद्रौकालोत्तरखंडेषु चतुर्दश्याव्दंकर्त्तव्यंशिवरात्रिव्रतंशुभामित्युक्तं अत्रचतुर्दशीवहुरात्रिव्यापिनीग्राह्या तस्यांरात्रौप्रतियामंपूजायाः जागरस्यचएकैकंवाषट्त्रिंशदाहुतयइत्येवमष्टोत्तरशतसामिद्भिः उमायै नंदिनेऽजैकपदेइत्यादिषोडशदेवताएकैकयापायसाहुत्या स्विष्टकृदादिप्रायश्चितहोमांतेवलिदानपूर्णाहुतिः ततःप्रणीतानियमनसपर्यापरिस्तरणविसर्जनान्यग्न्यर्चनानि ततो वरुणकलशोदकेनयजमानाभिषेकः आचार्य्यायधेनुदानं ततोजैकपादादिसहितस्योमायुतश्रीरुद्रस्यग्रहाणांचोत्तरपूजांतेश्रीरुद्रप्रतिमामाचार्य्यहस्ते प्रतिपाद्यसोपस्कराश्चतुर्दशप्रतिमाअजैकपादादिनाममंत्रैः पूर्ववृत्तेभ्यश्चनुर्दशविप्रेभ्यः प्रतिपाद्य व्रतमेतत्कृतंयन्मेपूर्णंवापूर्णमेववा सर्वंसंपूर्णतांयातुप्रसादाद्भवतांममेति तान्संप्रार्थ्यपूर्ववृत्तांश्चतुर्दशविप्रान्वस्त्रोपवीतकुंडलादिभिः संपूज्यसाचार्य्यांस्तान्संभोजयित्वाचतुर्दशभ्योयथाशक्तिदक्षिणांदत्त्वेश्वरार्प्पणंकुर्य्यात्

* * *

इतिशिवरात्रिव्रतोद्यापनविधिः   अथमासशिवरात्रिनिर्णयः

तदारंभस्तुमार्गशीर्षकार्त्तिकमाघचतुर्दशीषुवान्यतमचतुर्दश्यांकार्य्यः तदुक्तंमदनरत्नेस्कंदपुराणे आदौमार्गशिरेमासिदीपोत्सवदिनेपिवा गृह्णीयान्माघमासेवाद्वादशैवमुपोषयेत् तथा दीपोत्सवमथासाद्यकृष्णायाचचतुर्दशी द्वादशस्वपिमासेषुप्रकुर्य्यादिहजागरं तथाकृष्णपक्षेशिवरात्रिमुपक्रम्य यतःप्रतिचतुर्दश्यांपूजायत्नेनमेकृता तथाजागरणंरात्रौसान्निधौमेकृतंतथेति अथव्रतस्यवर्षसंख्योक्तातत्रैव एवंद्वादशवर्षाणिद्वादशैवतपोधनानिति हेमाद्रौकालोत्तरखंडेषु चतुर्दशाब्दंकर्तव्यंशिवरात्रिव्रतंशुभमित्युक्तं अत्रचतुर्दशीवहुरात्रिव्यापिनीग्राह्या तस्यांरात्रौप्रतियामंपूजायाः जागरस्यचविधानात् तयोःसंकल्परात्रिसाध्यत्वात् दिनद्वयेरात्रौसत्यधिकरात्रिव्यापिनीग्राह्या तुल्यैकदेशव्याप्तौपूर्वा रुद्रव्रतेषुसर्वेषुकर्त्तव्यासंमुखीतिथिरितिब्रह्मवैवर्त्तात् जयायोगप्रशस्त्याच्चकृत्यरत्नावली कालतत्त्वविवेचनेदीक्षितीयादावप्येवंमदनरत्नेनिर्णयसिंधुमयूखादौतुवार्षिकशिवरात्रिनिर्णयइत्युक्तं यत्तुप्रदोषव्यापिनीग्राह्येति तत्सत्यस्तविषयमितिदीक्षिताः मोक्षमार्गरतानांचमुनीनामूर्द्ध्वरेतसां तेषामेवतुसाप्रोक्तासामावास्याचतुर्दशीति विश्वरूपनिवंधे अथान्यापिवार्षिकशिवरात्रिकथा सूतउवाच कैलासशिखरासीनोदेवदेवोजगद्गुरुः पंचवक्त्रोदशभुजस्त्रिनेत्रःशूलपाशधृक् भस्मांगव्यालभोगाढ्यःशशांककृतशेखरः नीलजीमूतसंकाशःसूर्यकोटिसम प्रभः क्रीडतेभगवांस्तत्रगणैःसपरिवारितः विसृज्यदेवताःसर्वास्तिष्ठतेउमयासह दृष्ट्वातंदेवदेवेशंप्रहस्योत्फुल्ललोचना। एकाकिनंसुरश्रेष्ठमपृच्छत्तत्रपार्वती पार्वत्युवाच कथयस्वमहादेवयद्गोप्यंव्रतमुत्तमं श्वेताश्वदेवदेवेशव्रतानांविषयाःशु

भाः दानधर्माण्यनेकानितपस्तीर्थान्यनेकशः नास्तिमेनिश्चयोदेवभ्रामिताहंत्वयापुनः व्रतानामुत्तमंदेव भुक्तिमुक्तिप्रदायकं तदहंश्रोतुमिच्छामिप्रसीदकथयस्वमे ईश्वरउवाच शृणुदेविपरंगुह्यंव्रतानामुत्तमंव्रतं यन्नकस्यचिदाख्यातंरहस्यंमुक्तिदायकं येनवैकथ्यमानेनयमोपिविलयंव्रजेत् कथयामिव्रतंगोप्यंशृणुष्वेकमनाःप्रिये माघफाल्गुनयोर्मध्येआसितायाचतुर्दशी शिवरात्रीतिसाज्ञेयासर्वयज्ञोत्तमोत्तमा दानधर्मैस्तपोयज्ञैः किंवातीर्थशतैरपि शिवरात्रिसमंनास्तिकृत्वास्नानसहस्रकं कृष्णायाकलिहंत्रीचयममार्गविनाशिनीनतेयमपुरंयांतिकृतायैः साचतुर्दशी ॥ देव्युवाच ॥ कथंयमपुरंत्यक्त्वानरः शिवपुरंव्रजेत् एतन्मेकौतुकंदेवकथयस्वममप्रभो ॥ शिवउवाच ॥ शृणुदेविशियावृत्ताकथापौराणिकीशुभा यमशासनहंत्रीच शिवस्थानप्रदायिनी कश्चिदासीत्पुराकालेनिषादस्त्वामिषप्रियः अत्यंतदेशवासीचत्रचिंकित्स्योतिनिर्घृणः मृगयाव्यसनीतत्रकुटुंबपरिपालकः तत्वापीनोधनुर्धारीश्यामांगःकृष्णकंचुकः बद्धगोधांगुलित्राणोवामबाहौसचर्मकः धनुर्गृहीत्वावामेतुदक्षिणेशरमुत्तमं निर्गतोसौवनंदुर्गंनिषादश्चामिषप्रियः जीवघातेनतेनैवकुटुंबपरिपालकः वनंगत्वानिरीक्ष्यैवदिक्षुमार्गमितस्ततः पदंचपदमार्गंच आश्रमेमृगसूकरात् इतश्चेतश्चधावत्सआमिषेलुब्धमानसः वनंचपर्वतंचैवभ्रममाणोनिशांगतः नप्राप्तंतेननोकिंचिन्मृगसूकरतित्तिरं निराशोलुब्धकोभूत्वा तदाह्यस्तंगतोरविः चिंतयत्जलमासाद्यतडागेजीवघातकः जालमध्येमहालिंगंतिष्ठेतानादिसंभवं विल्ववृक्षोमहादिव्योजालमध्येहिसंस्थितं गृहीत्वातस्यपात्राणिमार्गशुद्ध्यर्थमाक्षिपत् लिप्तानितानिपत्राणिवायुनाभ्याहृतानिच दक्षिणाशास्थितान्येवपल्लवैर्जालकैःसह लूतानिदैवादनिलाल्लिंगमूर्ध्निचाक्षपत् लुब्धकेनकृतंपापमपानीतंचतत्क्षयं तद्दिवाभोजनंतस्यह्यामिषेलुब्धचेतसः

ततश्चिंतयमानस्यननिद्रासमजायत तस्यगंधंसमाघ्रायलुब्धकस्यवरानने नतिष्ठंतिमृगाःसर्वेशरपातभया
र्दिताः निषादमपितेदृष्ट्वारात्र्यंतेसमुपस्थिते नानीतमामिषंतेननिराशाःशिशवोगताः रुदंतिकरुणैःप्राहुर्भो
जनंदीयतांचनः ततस्तूष्णींपिताभूत्वाह्यधोवदनदुःखितः भोजनंचकृतंतेनयथादत्तंतुभार्ययाधर्महीनोनिषा
दोसौधर्मवार्तापराङ्मुखः अकामंजागरंरात्रौशिवरात्र्यांवरानने कृत्वासौकालपर्यंतेगृहीतोयमकिंकरैः यमे
नहंतुमारब्धःशूलपट्टिशधारिभिः शिवेनप्रेषितास्तावद्विमानगणकोटयः शीघ्रमानीयतांगत्वाशिवरात्रेउपोषकः
यःपूर्वंलुब्धकोभूत्वाकरोतिप्राणिनांवधं इतिश्रुत्वावचोदिव्यंगणास्तंनेतुमुद्यताः स्तूयमानाःपरंदेवंशिवंशांतनि
रामयं यावद्गच्छंतितेसर्वेतावत्पश्यंतिलुब्धकं हन्यमानंलोहदंडैर्बहुभिर्मुष्टिभिस्तथा सर्वेकोलाहलंचक्रुरस्मा
कमितितेगणाः परस्परंयुध्यमानानूचुस्तेयमकिंकराः किंकराऊचुः मुंचामोनत्विमंदुष्टंपापिष्ठंजीवघातकं यमं
यावन्नपश्यतशुद्धिश्चनभवेत्ततः गणाऊचुः लुब्धकोयंपूर्वमासीत्पापिष्ठोयमकिंकराः अनेनशिवरात्रिस्तुकृता
कामेनकानने तस्माच्छिवाज्ञयासर्वेविमानैर्द्रुतमागताः यावच्छिवंनपश्यामोनमुंचामोवयंह्यमुं ततोहंतुंस
मारब्धखड्गमुद्गरपट्टिशैः प्रवृत्तंतन्महद्युद्धमन्योन्यजयकांक्षिणां भग्नांगसंधयः केचित्केचित्मूर्च्छांसमाश्रिताः
जर्जरीकृतदेहास्तु क्रंदमानाः सुदारुणं त्राहित्राहीतितेराजन् गतास्तेयममंदिरं निषादोपिगणैर्नीतोय
त्रदेवोमहेश्वरः दृष्टमात्रस्तुदेवेननिषादोगणतांगतः स्थितोसौदेवदेवस्यकुंडलाभरणोज्ज्वलः तस्यदत्तंमहे
शेनविमानंसार्वकामिकं रुद्रकन्याशताकीर्णंपुष्पमालाकुलांबरं नानातूर्यसमायुक्तंसर्वरत्नोपशोभितं क्रीड
तेसचिरंकालंयावदाभूतसंप्लवं एवंसलुब्धकोभूत्वाक्रीडतेशिवशासने अथदूतावदंतस्तेधर्मराजानमग्रतः रुधि
रारुणवर्ष्माभाभिन्नगात्राःसमंततः पृष्टास्तेधर्मराजेनकोसौकालेनयोजितः दूताऊचुः शृणुराजन्यदस्माकं युद्धंशि

वगणैः सह नीतोसौपापकर्मापिनिषादोजीवघातकः अस्माभिर्गृह्यमाणस्तुगणैःशैवैर्वयंहताःधर्मात्माक्रुद्धरूपस्तु चित्रगुप्तमथाब्रवीत् आमिषाशीसपापिष्ठोलुब्धकोजीवघातकःकथंशिवपुरंयातश्चित्रगुप्तविचारय निरीक्ष्यपुस्तकं तेननाकिंचित्सुकृतंकृतं धर्मेबुद्धिर्नतस्यास्तिधर्माधर्मंनविंदति एतन्मेलिखितंज्ञातंसत्यंदेववदाम्यहं इतिश्रुत्वानिषादस्यचित्रगुप्ताच्छुभाशुभं नाहंचिंतांकरोमीहजंतूनांपापकर्मणां गत्वानिवेदयिष्यामिनियोगंतुशिवाग्रतः एवमुक्त्वागतःशीघ्रंयत्रास्तेशंकरःस्वयं दृष्ट्वातंदेवदेवेशंस्तोत्रमेतदुदाहरत् नमस्त्रैलोक्यनाथायसृष्टिसंहारकारक कालकूटविनाशायकामनिर्दहतेनमः अशुद्धोदेवदेवासौ निषादः पापकर्मकृत् मेरुमंदरतुल्यानिदुष्कृतानिबहून्यपि ईश्वरउवाच केनापराधितोधर्मःकेनमानस्तुमर्दितः किमर्थंदंडमुद्रांत्वंत्यक्त्वाब्रूहिममाग्रतः धर्मउवाच त्वद्गणैर्देवदेवेशत्वपापस्यचकारणात् मदीयाकिंकरादेवघातिताः शक्तिमुद्गरैः जीवघातीनिषादोसौसर्वधर्मबहिःकृतः कर्मणोपार्जितंयेन्द्यनिश्चितंममशासनं अयोग्यस्त्वद्गणैर्देवगणेषुविनियोजितः तेनाहमागतोदेवत्यक्त्वामुद्रांवदाम्यहं शंकरउवाच निषादःपापककर्माचजीवन्प्राणिवधेरतः कदाचित्सवनंगत्वानाकिंचिदाप्तवांस्तथा सचविल्वस्यपत्राणिगृहीत्वामार्गतोक्षिपत् कथंचिद्दैवसंयोगाद्वायुनाशिवमूर्द्धनि निक्षिप्तानिप्रेतराजकोमलान्यस्यकामतः शिवरात्रिःकृतातेनजाग्रतामार्गहेतुना शिवरात्रिप्रभावेनसगतोममशासनंगृह्णगृह्णमहाधर्ममुद्रांदंडंयथेच्छया पालनायस्वधर्मस्यसत्यंसत्यंमहायम स्वगृहंगम्यतांशीघ्रंग्राह्यमेतत्सदंडकं ताडयन्पापकर्माणंपालयन्वैसुधर्मिणं एवमुक्तोधर्मराजोगतोसौस्वगृहंशुभं एवंदेविमयाख्यातंशिवरात्रिमहाव्रतं देव्युवाच अकामाल्लुब्धकोदेवकृत्वाह्यमरतांगतः आश्चर्य्यमेतद्देवेशममाद्भुततमंमहत् कामतः शास्त्रदृष्टेनयत्कर्त्तव्यंशिवव्रतं तदहंश्रोतुमिच्छामिप्रसादाद्वक्तुमर्हसि शिवउवाच शृणुदेविमहाभागेसर्वतच्चारुभा

S1

षिणी शिवरात्रिप्रभावश्चनकथ्य:पापकर्मणां माघमासेत्वयाकृष्णाफाल्गुनादौचतुर्दशी सातुपुण्यातितिर्ज्ञेया सर्वपापप्रणाशिनी शांतात्माक्रोधहीनस्तुतपस्वीह्यनसूयकः तस्मैदेयमिदंदेविगुरुपादानुगेसदा अन्यथायो ददातीदंसदातानरकंव्रजेत् वर्षेवर्षेमहादेविनरोनारीपातिव्रता वक्षियामिजगत्सर्वंकोमांभक्त्याप्रपूजयेत् शिवमंत्रैर्जपंकृत्वाहोममर्चनपूर्वकं जागरंशिवरात्र्यांतुशिवंपश्येत्समाहितः ममभक्तोजनोदेविशिवरात्र्यामुपोषकः गणत्वमक्षयंदिव्यमक्षयंशिवशासनं सर्वंकृत्वातुवुभुजेभोगानमृतसंभवान् एवंद्वादशवर्षाणिशिवरात्र्यामुपोषकःयोमांजागरतेरात्रिंमनुजः स्वर्गमारुहेत् अकृत्वामांनजानातिव्रतमेतदुदाहृतं शिवंचपूजयित्वायोजागर्त्तिचचतुर्दशींमातुः पयोधररसं नपिवेत्सकदाचन यदीश्छेच्चाक्षयान्भोगान्दिविदेवसमोपमान् आगमोक्तविधिंकृत्वाप्राप्नोतिसकलंफलं आदौमार्गशिरेमासिदीपोत्सवदिनेपिवा गृह्णीयान्माघमासेवाद्वादशैवमुपोषयेत् निशिजागरणंकृत्वादीपोद्योतितदिङ्मुखः गीतवाद्यविनोदेनपूजाजाप्येसदारतः एवंद्वादशवर्षांतेद्वादशैवतपोधनात् आचार्य्यशिवशास्त्रज्ञंब्राह्मणांश्चविशेषतः आमंत्र्यपरयाभक्त्यागृहंगत्वातपोधनात् आचार्य्यभक्तियुक्तश्चगृहीत्वाचरणद्वयं आगच्छमेगृहंतातकृतकृत्यंगृहंकुरु आमंत्र्यनिशितानेवंप्रभातेविमलेपुनः गृहीतोभयलिंगंतुस्थावरंजंगमंपुनः घृतेनाभ्यज्ययत्नेनसुगंधैर्माल्लिकादिभिः पंचामृतेनदिव्येनस्नाप्यचोद्वर्त्तनादिभिः स्नापयेद्वारिकुंभानांसहस्त्रेणशतेनच पंचाशतातदर्धेनस्नापयेच्छीतलेनतु चंदनेनविलिप्याथस्थावरंजंगमंतथा शतपत्रैर्जातिपुष्पैरर्चयेद्बिल्वपत्रकैः दीपान् दिक्षुचसर्वासुप्रज्वाल्यसघनांस्तथा सघनान्सकर्पूरान् नैवेद्यमपिभक्ष्यांश्चक्षीरखंडसमंडकान् गुडाढ्यान्लड्डुकांश्चैवतथान्नंरुचिरंबहु निवेदयेदथैतानिगुरुदेवतपस्विनाम् देवाग्रेतुगुरुंपूज्यकृत्वामंडलकंशुभं सुसूक्ष्माणिचवस्त्राणिशय्यांसोपस्करामपि द्वादशैवतुगादद्यात्परिधानादिकंतथा अथवादक्षिणामेवप्रद

द्याज्जुहुयात्तिलान् दत्त्वातुभोजयेत्सर्वान्गुरूंश्चैवतपास्विनः पश्चात्क्षमापयेद्देवंप्रीयतांमेमहेश्वरः सर्वैचैवतथाचार्य्यैशिवव्रतपरायणेदद्यादितिशेषः गंधादिविविधैः सर्वानन्यांस्तत्रसमागतान् दक्षिणाभिश्चकुंभैश्चनवान्नैश्चप्रपजयेत् तस्मान्नच्यवतेस्थानात्कल्पकोटिशतैरपि अथातः कालपर्य्याये द्रष्टुंयातिस्वयंभुवं सहितोलोकपालैश्चाविमानैः सार्वकामिकैः ततः पश्येन्महादेवं नानागणसमन्वितं तंदृष्ट्वास्तौतिदेवेशंशिवंत्रिभुवनेश्वरं नमस्तुभ्यंजगन्नाथचंद्रार्धकृतशेखर नमस्तेउमयायुक्तभुक्तिमुक्तिप्रदायक नमस्तेकालकालोग्रकलातीतोसिशंकर शिवउवाच तुष्टोहंतवभक्तस्यशिवरात्रिउपोषक वरंददाम्यहंतुभ्यंदेवदानवदुर्ल्लभं एताः कन्यामहादिव्यास्त्रिनेत्राश्चचतुर्भुजाः रूपयौवनसंपन्नाः पीनोन्नतपयोधराः हेमगौर्य्योमहातेजाः संयुक्ताः सूर्यसन्निभाः देवांगवस्त्रसंछन्नाश्चंदनागुरुचर्चिताः सर्वलक्षणसंयुक्ताः कुंडलैर्द्योतिताननाः एवंविधामयादत्तामनास्विन्यः सुमध्यमाः विमानकोटिसंयुक्ताः सर्वाभरणभूषिताः क्रीडांकुरुमहाभागगणस्त्वंममपुत्रकः सर्वगामीभवाद्यहलोकलोकंचरारं तुष्टोहंतवभक्तस्याशिवव्रतपरस्यच रुद्रलोकेषुयाः कन्यास्त्रिनेत्राश्चचतुर्भुजाः अतीवभक्त्याभक्तैश्चयथाहमुमयासह ताभिःसार्द्धंमहाभागभुंक्ष्वभोगान्यथेप्सितान् कल्पकोटिसहस्राणिकल्पकोटिशतानिच तदंतेप्रेतभावेनाशिवसायुज्यतांव्रज सर्वंव्यापभिवत्वंचलीयसेपरमेपदे परात्परतरंनास्तिशिवरात्रिव्रतात्परम् नपूजयतिभूतेशंरुद्रंत्रिभुवनेश्वरं जंतुर्जन्मसहस्रेषुभ्रमतेनात्रसंशयः यदातद्भावसंयुक्तःसरुद्रगणतांव्रजेत् सूर्यग्रहेकुरुक्षेत्रेहिमवत्कुरुजांगले शिवरात्र्यांतथाभक्त्यादत्तमक्षयतांव्रजेत् अखंडितव्रतोयोहिशिवरात्रिमुपोषयेत् ससर्वकाममवाप्नोतिरुद्रेणसहमोदते अर्णवायदिशुष्यंतिक्षीयतेहिमवानपि मेरुमंदरलंकाश्चश्रीशैलोविंध्यएवच चलंतेवैकदासर्वेनिश्चलंहिशिवव्रतं अतस्तस्यांत्रयोदश्यांकृष्णायामेकभुङ्नरः मंत्रेणानेनगृह्णीय

न्नियमंभक्तिमान्नरःशिवरात्रिव्रतंह्येतत्करिष्येहंमहाफलं निर्विघ्नमस्तुमेचात्रत्वत्प्रसादाज्जगत्पते रात्रिंप्रपद्येजन
नींजगत्यांवैसमाहितः ऋग्वेदेप्रसिद्धावेतौमंत्रौ गृह्णीयाद्ब्राह्मणांश्चैवनियमंवेदविद्विभोः शिवमिष्ट्वागुरुंदृष्ट्वास्वा
चांतःशुचिरात्मवान् संकल्पैवव्रतंकुर्य्यात्पूर्वेद्युः प्रातरेवच ततोह्नश्चरमेभागेस्वगायत्र्याद्यतंद्रितः स्नानं
कृष्णातिलैःकुर्य्याद्गृहेचाथजलाशये रम्यंनिशामुखेगच्छेच्छिवस्यायतनंव्रती दिनांतेस्नपनंकुर्य्याच्छिवनाम्ना
प्रपूजयेत् धूपैर्नैवेद्यगंधैश्चनृत्यगीतैःसदीपकैः शंखतूर्यनिनादैश्चकुर्य्यात्पुस्तकवाचनं द्वितीयप्रहरेचैवना
म्नाशंकरमर्चयेत् पूर्वोक्तेनविधानेनपूजयेत्परमेश्वरं तृतीयेप्रहरेदेवंनाम्नामाहेश्वरंतथा यामेचतुर्थेसंप्राप्तेरुद्रं
नाम्नातुपूजयेत् यएवंभक्तिसंयुक्तोजागरंकारयेन्निशि सकलंफलमाप्नोतिसत्यमेतद्वरानने उषःस्नानंजपोहोमो
भोजयेच्छिववत्सलान् श्वेतान्कुंभान्प्रदद्याच्चयथाशक्त्यासदक्षिणान् पूजयेद्ब्राह्मणान्भक्त्याव्रतेमाहेश्वरेस्थितान्
वाचयेच्छिवशास्त्रंचसगच्छेच्छिवमंदिरं उभौतौपुण्यकर्माणौ नियतस्वर्गगामिनौ शिवव्रतीतदाख्यानं यःपठे
च्छिवसान्निधौ शिवलोकमवाप्नोतिशिवेनसहमोदते ॥ इतिस्कंदपुराणे इत्यन्याशिवरात्रिव्रतकथा अथ
फाल्गुनामावास्याकृत्यं साचयुगादिअमावास्याचमाघस्येतिमात्स्यात् दर्शेतुमाघमासस्येतिस्कंदाच्च अत्रमाघो
मांतमासेनग्राह्यः अस्यांयुगादित्वादपिंडश्राद्धंकार्य्यं प्रकृतिपार्वणेनसहतंत्रेणप्रयोगोपिशतभिषानक्षत्रयुक्तायांतु
श्राद्धादिकंपितृणांमहातृप्तिदंभवति तदुक्तं हेमाद्रौविष्णुपुराणे माघासितेपंचदशीकदाचिदुपैतियोगंसहवारुणेन
ऋक्षेणकालःसपरःपितॄणांनह्यल्पपुण्यैरुपलभ्यतेसाविति अस्यामेपूर्वाभाद्रपदायुक्तायांपितॄणांश्राद्धेसहस्त्रयुगतृ
प्तिरिति तत्रैवोक्तं तत्रैवचेद्भाद्रपदातुपूर्वाकालेतदायत्क्रियतेपितृभ्यःश्राद्धंपरांतृप्तिमवाप्नुवंतियुगान्सहस्त्रंपितरश्च
तेनेति यदिचेयंधनिष्ठायुक्तातदावर्षायुतंतृप्तिरित्युक्तंमहाभारते युगादिमाघामावास्याप्रकरणे कालेधनिष्ठाय

दिनामतीस्मन्भवंतिभूपालतदापितृभ्यः दत्तंजलान्नंप्रददातितृप्तिंवर्षायुतंतत्कुलजैर्मनुष्यैरिति पूर्वाभाद्रपदा योगेपाठांतरविशेषः अत्रैवचेद्भाद्रपदातुपूर्वाकालेतदायात्क्रियतेमनुष्यैः श्राद्धंतदातृप्तिमवाप्यतेतद्युगंसहस्रंपितरस्त्वदंतीति अत्रमाघ्यनंतरपक्षस्यैवशुक्लादिरित्यामाघासितत्वमुक्तं इदंचकुंभादित्यज्ञेयामितिहेमाद्रिः इदंमन्वादिरपिअस्यामेवामायांरुद्रादिपूजोक्तालैंगेफाल्गुनप्रक्रमे अमावास्यांपूजनीयारुद्रोग्निर्ब्राह्मणास्तथा मांसोदनैःपोलिकाभिःपूज्याश्चात्मास्ववांधवैरिति फाल्गुनामावास्याकृत्यं फाल्गुनशुक्लप्रतिपत्कृत्यं नारदीये अथफाल्गुनशुक्लादौ देवदेवंगिरिप्रियं धूलिधूसरसर्वांगंजलैरुक्षेत्समाहितः कर्मणालौकिकेनापितस्यतुष्टोमहेश्वरः स्वसायुज्यंप्रदिशतिभक्त्यासम्यक्समर्चितःइमामेव फाल्गुनशुक्लप्रतिपदमारभ्यद्वादशदिनपर्यंतंपयोव्रतमुक्तं श्रीभागवतेऽष्टमस्कंधे तच्चतत्रैवान्वेष्टव्यम् फाल्गुनशुक्लद्वितीयायांप्रारभ्यंवन्हिपूजाव्रतं तच्चशुक्लासुकृष्णासुचसर्वस्वेवद्वितीयाषुप्रोक्तं नारदीये अथफाल्गुलशुक्लायांद्वितीयायांद्विजोत्तम पुष्पैःशिवंसमभ्यर्च्यसुश्वेतैरष्टगांधिभिःपुष्पैर्वितानकंकृत्वापुष्पालंकरणैःशुभैः नैवेद्यैर्विविधैर्धूपैर्दीपैर्नीराजनादिभिः प्रसाद्यप्रणमेच्चैवसाष्टांगपतितोभुवि एवमभ्यर्च्यदेवेशंमर्त्योऽव्याधिविवर्जितः धनधान्यसमायुक्तोजीवेद्वर्षशतंभुवि यद्विधानंद्वितीयासुशुक्लपक्षगतासुच प्रोक्तंतदेवकृष्णासुकर्त्तव्यंविधिकोविदैः वन्हिरेवपृथक्तासुनानारूपवपुर्धरः पूज्यतेहिद्वितीयासुब्रह्मचर्य्यादिपूर्ववत् इतिद्वादशमासगतोभयपक्षद्वितीयाकृत्यं अथफाल्गुनशुक्लद्वितीयादिदिनद्वयगताद्वितीयाकृत्यं नारदीये फाल्गुनस्यसितेपक्षेतृतीयाकुलसौख्यदा पूजितागंधपुष्पाद्यैःसर्वमांगल्यदाभवेत् सर्वासुचतृतीयासुविधिःसाधारणोमुने देवीपूजाविप्रपूजादानंहोमोविसर्जनं इत्येवंकथितानीहतृतीयायाव्रतानिते भक्त्याकृतानिचेष्टांस्तुदद्युःकामान्मनोगतानिति अस्यामेवभूषिकातृतीयाव्रतम् भविष्योत्तरे कश्यपउवाच फाल्गु

न्स्यासितेपक्षेतृतीयायामुपोषिता प्रातःस्थित्वाब्रह्मचर्यैततोन्यस्मिन्दिनेपुनः व्रतिनीभुवनेगौरींपूजयेत्तद्व्रतातुसा मंत्रेणानेनध्यायेत्तांपार्वतीप्रतिमांशुभां मृगाजिनावृतकुचांजटामुकटशोभितां गोधारथगतांदेवींरुद्रध्यानपरायणां पूजयेद्गंधकुसुमैर्दीपालक्तकचंदनैः केसरैर्मधुरैर्द्रव्यैःस्वर्णमाणिक्यपूज्यया भूषिकारुषिकादेवीभूषिकाललिताउमा तपोवनरतागौरीसौभाग्यंमेप्रयच्छतु कालिकाश्रीशुभादेवीरुद्राणीपार्वतीशिवा स्तुता मयाष्टांगभक्त्यापतिपुत्रान्प्रयच्छतु दौर्भाग्यंप्रशमंयातुसुप्रसन्नमनाःसदा अवैधव्यंकुलेजन्मददात्वपरजन्मनि अंगेचांगेतथोपांगेपर्वेपर्वेस्थितामृतं सुखदृष्टिस्पर्शरसंगौरीसौभाग्यमृच्छतु एवमुच्चार्य्यमंत्रांश्चनारीज्ञानवती सती पूजयेद्ब्राह्मणोक्तैस्तुमंत्रैर्मुख्याःसुवासिनीः जीरकैःकुटुहुंडैश्चलवणैर्गुडसर्पिषा हृद्यैरार्द्रैःफलैःस्वर्णैर्मनोज्ञैःपुष्पवंधनैः कुसुमैःकुंकुमैर्गंधैःकालेयागुरुचंदनैः सिंदूरेणातिरक्तेनवस्त्रैर्नानाविधैःशुभैः अन्नैरनेकदेशोत्थैः पूपकैस्तिलतंडुलैः इत्येवमादिनैवेद्यैःपूजायित्वामहाद्रुमं प्रदक्षिणंततःकृत्वाविप्रायचप्रदाक्षिणां महाद्रुममश्वत्थवटादिपुण्यवृक्षं एतत्करोतितेपुत्रिदुहिताव्रतमुत्तमं ततःप्राप्स्यसिद्धिःप्राप्तंत्रैलोक्येश्रीधरंपातिं एतद्व्रतंमया ख्यातंयास्यतिशाश्वतीःसमाः व्याख्यातंकश्यपेनादौरुक्मिण्यैव्रतमुत्तमं याश्चारिष्यंतिताःसर्वाभविष्यंतिनिरामयाः अंगप्रत्यंगसुभगालोकेदृष्टिमनोहराः स्थित्वावर्षशतंमन्येततोरुद्रपरंशुभं यास्यंतिहंसयानस्था किंकिणीशब्दनादिताः तत्रगत्वारामिष्यंतिस्वभर्त्रावत्सरान्बहून् दिव्यभोगभुजोदृष्टाःसिद्ध्यष्टकसमन्विताः अर्घ्यंमहार्घ्यमणिकुंकुमकेसराढ्यंस्रग्गंधमुग्धमुखरालिकुलोपगतिं दत्त्वाफलाक्षतयुतंमधुपादपस्यगौरीविलोकपहिताभवतीहनारी ॥ इतिभविष्योत्तरे भूषितव्यानक्तेनशुचिनासत्यभाषिणा सश्रीकंहरिमभ्यर्च्यरुद्रंवाद्युमया सहेति अथफाल्गुनचतुर्थ्यांढुंढिराजव्रतंनारदीये चतुर्थ्यांफाल्गुनेमासिढुंढिराजव्रतंशुभं तिलपिष्टैर्द्विजान्भो

ज्यस्वयंचाश्नीतवाग्यतः गणेशाराधनपरोदानहोमपरायणः तिलैरेवकृतेसिद्धिंप्राप्नुयात्तत्प्रसादतः सौ
वर्णंगजवक्त्रंचकृत्वासंपूज्ययत्नतः द्विजायपश्चाद्दद्यात्तंसर्वसौभाग्यवृद्धये यस्मिन्कस्मिंस्तुवामासेचतुर्थीरवि
वारयुक् सांगारकावाविप्रेंद्रसाविशेषफलप्रदा सर्वासुचचतुर्थीषुशुक्लाकृष्णासुनारद विघ्नेशएवसंपूज्योदेवे
शोभक्तितत्परैः अथांगारकचतुर्थीविशेषकृत्यं अंगारकचतुर्थ्यांतुस्नात्वोत्तरवहांभसि अभ्यर्च्यांगारकेशानं
नमस्यंतिनरोत्तमाः नतेषांग्रहपीडास्यात्कदाचिदपिकुत्रचिदिति अंगारचतुर्थ्यामंगारकपीडानिवृत्तिर्भवती-
ति अथमत्स्यपुराणोक्तमंगारकचतुर्थीव्रतम् शुक्रउवाच चतुर्थ्यांगारकदिनेयदाभवतिदानव मृदास्नानंतदा
कुर्य्यात्पद्मरागविभूषणैः अग्निर्मूर्द्धादिवोमंत्रंजपंतिष्ठेदुदङ्मुखः शूद्रस्तूष्णींस्मरन्भौममास्तेभोगविवर्जितः
अथास्तमितआदित्येगोमयेनोपलिप्यच प्रांगणंपुष्पमालाभिरक्षताभिःसमंततः अभ्यर्च्याभिलिखेत्पद्मंकुंकु
मेनाष्टपत्रकं कुंकुमस्याप्यभावेतुरक्तचंदनमिष्यते चत्वारःकरकाःकार्य्याभक्ष्यभोज्यसमन्विताः तंडुलैरक्तशा
लीयैःपद्मरागैश्चसंयुताः चतुःकोणेषुतान्कृत्वाफलानिविविधानिच गंधमाल्यादिकंसर्वंतथैवाविनिवेदयेत् सुव
र्णशृंगींकपिलामथार्च्यरौप्यैःखुरैःकांस्यदुहांसवत्सां धुरंधरंरक्तमतीवसाम्यंधान्यानिसप्तांवरसंयुतानि यव
गोधूमधान्यंतिलकंगुश्यामाकमुद्गानि अंगुष्ठमात्रंपुरुषंतथैवसौवर्णमत्यायतवाहुदंडं चतुर्भुजंहैममयंनिविष्टंपात्रे
गुडस्यामलसर्पिषायुते सामस्वरज्ञायजितेंद्रियायपात्रायसामध्वनिसंयुताय दातव्यमेतत्सकलंकुटुंविनेद्विजा
यवैनैवचदंभयुक्ते अत्रभौममंत्रः भूमिपुत्रमहातेज स्वेदोद्भवपिनाकिनः रूपार्थीत्वांप्रसन्नोहंगृहाणार्घ्यंन
मोस्तुते मंत्रेणानेनदत्त्वार्घ्यंरक्तचंदनवारिणा ततोर्चयेद्द्विजवरंरक्तमाल्यांवरादिभिः दद्यान्मंत्रेणतेनैवभौ
मंगोमिथुनान्वितं भौमंपूर्वोक्तसुवर्णप्रतिमामयं गोमिथुनंपूर्वोक्तमेव पूर्वोक्तगुणसंपन्नायब्राह्मणायदद्यादिति

शय्यांचशक्तितोदद्यात्सर्वोपस्करसंयुतां दद्यादिष्टतमंलोकेयच्चान्यदपिस्वगृहे तत्तद्दरापतेर्देयंतदेवाक्षयमि
च्छतेति अन्यत्रापि अंगारकदिनेप्राप्तेचतुर्थीवाचतुर्दशी षष्टिवर्षसहस्राणितत्कर्त्ताविंदतेफलमित्यनेनांगार
कचतुर्थीव्रतमप्येतत्फलकं इत्यंगारकचतुर्थीव्रतंच चतुर्थीभूमिपुत्रेणेत्यादि सामान्यव्रतप्रकरणेपिद्रष्टव्यं अथा
त्रोपयुक्तोभौमपूजाविधिर्लिख्यते आंह्रांहंसः खइत्यनेनप्राणायामत्रयंकृत्वा अस्यभौममंत्रस्य विरूपाक्षऋ
षिर्गायत्रीछंदो भौमोदेवता ॐबीजं ह्रांशक्तिः खःकीलकं भौमप्रीत्यर्थेविनियोगः
ऋष्यादीन् शिरःप्रभृतिषु विन्यस्य षड्बीजैः षडंगन्यासंविधाय जपाभंशिवस्वेदजंहस्तपद्मैर्ग
दाशूलशक्तीर्वरंधारयंतं अवंतीसमुत्थंसुमेषासनस्थंधरानंदनंरक्तवस्त्रंतमीडे इतिध्यात्वामानसोपचारैः संपूज्यावाह्यचपूजांचकृत्वा षड्भिर्वर्णैःषडंगानिसंपूज्यैकविंशतिकोणकोष्टेषुमंगलादीन्पूजयेत् मंगलायनमः १
भूमिपुत्रायनमः ॥ २ ॥ ऋणहर्त्रेनमः ॥ ३ ॥ धनप्रदायनमः ॥ ४ ॥ स्थिरासनायनमः ॥ ५ ॥
महाकायायनमः ॥ ६ ॥ सर्वकर्मावरोधकायनमः ॥ ७ ॥ लोहितायनमः ॥ ८ ॥ लोहिताक्षायन
मः ॥ ९ ॥ सामगानांकृपाकरायनमः ॥ १० ॥ धरात्मजायनमः ॥ ११ ॥ कुजायनमः ॥ १२ ॥ भौमायनमः
॥ १३ ॥ भूमिदायनमः ॥ १४ ॥ भूमिनंदनायनमः ॥ १५ ॥ अंगारकायनमः ॥ १६ ॥ यमायनमः ॥ १७ ॥ सर्वरो
गापहारकायनमः ॥ १८ ॥ वृष्टिकर्त्रेनमः ॥ १९ ॥ वृष्टिहर्त्रेनमः ॥ २० ॥ सर्वकामफलप्रदायनमः ॥२१ ॥ इतित
द्बाह्ये इंद्रादीन् वज्रादींश्चपूजयेत् ततोधूपादिविशेषपूजांसमाप्य विशेषार्घ्यंदद्यात् प्रदक्षिणांततःकृत्वाविसृ
ज्यद्विजपुंगवं नक्तामक्षारलवणमश्नीयाद्घृतसंयुतं यस्तुव्रतंपुमान्कुर्य्यादेवमंगारकाष्टकं चतुरोवाथवातस्यत
त्पुण्यंप्रवदामिते रूपसौभाग्यसंपन्नःपुनर्जन्मनिजन्मनि वैष्णवोवाशिवोभक्तः सप्तद्वीपाधिपोभवेत् सप्तकल्प

सहस्राणिरुद्रलोकेमहीयते इत्यंगारकचतुर्थीव्रतपूजा अंगारकशुक्लचतुर्थ्यांसुखचतुर्थीव्रतकथा भविष्योत्तरे सुमंतुरुवाच ॥ सुखावहांशृणुसुखांसौभाग्यकरणींपरां चतुर्थींकुरुशार्दूलरूपसौभाग्यदांशुभां सुखव्रतंमहापुण्यं रूपारोग्यप्रदायकं सुसूक्ष्मंसुंदरंधन्य मिदंपुण्यंसुखावहं परत्रफलदंवीरं दिव्यरूपप्रदायकम् विलासाचित्रमाक्षेपहसितंचेष्टितंशुभं सुखव्रतेनसर्वस्याच्छुभंकुरुकुलोद्वह कृतेव्रतेतुदेवेशोविघ्नेशशिवयोःसुते यद्वाशुक्लचतुर्थ्यांतुवारोभौमस्यवाभवेत् तदासासुखदाज्ञेयाचतुर्थीवैसुखेतिच पुरामैथुनमाश्रित्यस्थिताभ्यां तुहिमाचले भीमोमाभ्यांमहारौद्रंरक्तोविंदुश्च्युतःक्षितौ मेदिन्यासप्रयत्नेनसुखेनतुधृतोयतः जातस्तस्यांमहावीरोरक्तोरक्तसमुद्भवः उमायाआर्त्तवोत्पन्नस्तस्मादंगारकोह्ययं अंगदोंगारकांतिश्चअंगानांसुखदायकः सौभाग्यादिकरोयस्मात्तस्मादंगारकोमतः भक्त्याचतुर्थ्यांनक्तेनयोवैश्रद्धासमन्वितः उपोष्यतिनरोराजन्नारीवानन्यमानसा पूजयेच्चकुजंभक्त्यारक्तपुष्पविलेपनैः गणेशंप्रथमंभक्त्यासंपूज्यश्रद्धयान्वितः सतुतुष्टःप्रयच्छेतसौभाग्यरूपसंपदम् पूर्वंतुकृतसंकल्पः स्नानंकृत्वायथाविधि गृहीत्वामृत्तिकांवदेन्मंत्रेणानेनभारत देवैस्त्वंवंदितापूर्वंकृष्णेनोद्धारिताकिल तस्मान्मेदहपाप्मानंयन्मयापूर्वसंचितं इदंमंत्रंपठन्वीरआदित्यायप्रदर्शयेत् आदित्यरश्मिभिः पूतांगंगाजलकणोक्षिता दत्त्वामृदंशिरसितांसर्वांगेषुनियोजयेत् ततःस्नानंप्रकुर्वीतमंत्रपूर्वंजलेशुभे यूयमापःस्थसर्वेषांदेवदानवसेविताः स्वेदांडजोद्भिजानांचजंतूनांसुखयोनयः स्नातोहं सर्वतीर्थेषुसर्वप्रस्रवणेषुच तथाकाश्यादिक्षेत्रेषुमानसादिसरस्सुच नदीषुदेवखातेषुस्नातोहंतेषुतेषुवैध्यायन्पठन्निमंमंत्रं ततःस्नानंसमाचरेत् ततःस्नातः शुचिर्भूतो गृहमागत्यचस्पृशेत् दूर्वाश्वत्थशमींस्पृष्ट्वागांतुमंत्रेणमंत्रवित् दूर्वानमस्येमंत्रेणअश्वत्थशमयस्तथा गांदृष्ट्वातुततोदेव्यैदद्याद्वीरप्रदक्षिणां समालभ्य

केनविभोश्चतस्त्रःकुजसंयुताः   सर्वास्वंगारकचतुर्थीषुसमान्यविधिनोपोष्यमानासुतिसृभिरितसृभिरंतरितायांच
तुर्थ्यांविशेषविधिंशृण्वित्यर्थः दशसौवर्णिकंमुख्यंदद्याद्दर्द्धमथापिवा   सौवर्णपात्रेरौप्येवाशक्त्याताम्रयेपिवा
विंशत्पलानिपात्राणिविंशत्यर्द्धमयान्विता   विंशत्कर्षाणिवावीरअतोहीनंनकारयेत् शक्त्यावित्तस्यभक्त्यातुपा
त्रेताम्रमयेपिवा   प्रतिष्ठाप्यकुजंपात्रेरक्तवस्त्रेणवेष्टितं   पुष्पमंडपिकांकृत्वादिव्यैर्धूपैश्चभूषितां   तत्रस्थंपूजये
द्देवंपूर्वमंत्रैः क्रमेणतु भक्ष्यभोज्यैरनेकैश्चफलैरत्नैश्चसंयुतैः   वस्त्रैःप्रावरणैर्यानैःशय्योपानद्वरासनैःछत्रैःपुष्पैर्गं
धवैः शक्त्याबित्तानुसारतःब्राह्मणायचतंदद्याद्दक्षिणासहितंनृप   वाचकायमहाबाहोगुणिनेश्रेयसेनघ अंगार
केणसंयुक्तांधेनुंशीलसमन्वितां   अनेनविधिनादत्त्वायथोक्तफलभाग्भवेत्   इतितेकथितापुण्यातिथीनामुत्तमा
तिथिः   यामुपोष्यनरोरूपंदिव्यमाप्नोतिभारत   कांत्यात्रेयसमंवीरतेजसार्कंविसुप्रभं   प्रतापेहरितुल्यंतुसर्वतो
वलसम्मितं   ईदृग्रूपवरंप्राप्ययातिभौमसदोनृप   प्रसादाद्विघ्ननाथस्यगणेशस्यगुणायते   पठतांशृण्वतांराज
न्कुर्वतांचविशेषतः   ब्रह्महत्यादिपापानिक्षीयंतेनात्रसंशयः ॥ इतिभविष्यपुराणेसुखांगारकचतुर्थीव्रतं एवमे
वगणपतिचतुर्थी भविष्यत्पुराणे हेमाद्रौ चतुर्थ्यांतुसदाराजन्निराहारोव्रतान्वितः चतुर्थ्यांचसदाराजननारवारेव्र
तान्वितइतिनिर्णयामृतेपाठः   दत्त्वातिलान्नंविप्रायस्वयंभुक्तेतिलोदनं   दिवानिराहारोरात्रौभुंक्ते इतिविरोध
परिहारः वर्षद्वयेसमाप्तिर्हिव्रतस्यतुयदाभवेत् विनायकस्तस्यतुष्टोददातिफलमीहितं इतिभविष्यपुराणेगणपति
चतुर्थीव्रतं अथकूर्मपुराणोक्तंयमचतुर्थीव्रतं भरण्यांतुचतुर्थ्यांतुशनैश्चरदिनेयमं पूजयेत्सप्तजन्मोत्थैर्मुच्यतेपात
कैर्नर इतियमचतुर्थीव्रतं अथफाल्गुनादिचातुर्मास्यचतुर्थीव्रतं वाराहपुराणे अगस्त्यउवाच   अथविघ्नहरंराजन्क
थयामितवानघ येनसम्यक्कृतेनैवनविघ्नउपजायते चतुर्थ्यांफाल्गुनेमासिगृहीतव्यंव्रतंत्विदं नक्ताहारेणराजेंद्र

तुहस्तेनततोमंत्रमुदीरयेत् सर्वदेवमयीदेविनिर्ऋतिस्त्वंप्रपूजिता तस्मात्स्पृशामिवंदेत्वांवंदितापापहाभव ततोमौनेनवागत्यवंदित्वागृहदेवताः प्रक्षाल्यचमृदापादावाचांतोग्निगृहंविशेत् होमंतत्रप्रकुर्वीतएतैर्मंत्रपदैःशुभैः शर्वायशर्वपुत्राय पार्वतीशसुतायच कुजायलोहितांगाय ग्रहेशांगारकायच ओंकारपूर्वकैर्मंत्रैः स्वाहाकारसमन्वितैः अष्टोत्तरशतंवीर चार्द्धमर्द्धार्द्धमेववा एतैर्मंत्रपदैर्भक्त्याकामतोऽकामतोपिवा खादिरीभिः समिद्भिश्चआज्यमिश्रैर्यवैस्तिलैः भक्ष्यैर्नानाविधैश्चान्यैः शक्त्यभक्तिसमन्वितः कृत्वाहोमंततोवीरदेवं संस्थापयेत्क्षितौ सौवर्णराजतंताम्रभद्रदारुमयंतथा भद्रदारुः सरलः गांगेयपात्रेरौप्येवा अर्घ्यः कुंकुमकेसरैः अन्यैर्वालोहितैर्भव्यैःपत्रैःपुष्पैः फलैरपि रक्तैश्चविविधैर्वीरअथवाभक्तितोर्चयेत् यावद्विसृज्यतेवित्तंपुष्पंवावीरभक्तितःतावद्विवर्द्धतेपुण्यंदातुःशतसहस्रकंयद्वाताम्रमयेपात्रेवंशजेमृण्मयेथवा पूजयेत्तुनरोभक्त्याशक्त्याकुंकुमकेसरैः ओंअंगारकायनमःपादयोः कुजायनमोवदने भौमायनमःस्कंदयोः मंगलायनमोवाह्वोः वज्रायनमऊर्वोः वक्रायनमोजंघयोः लोहितायनमःशिखायां पुरुषाकृतिंकुजपात्रेएभिर्मंत्रपदैर्यजेत् भूमिपुत्रोमहातेजः स्वेदोद्भवपिनाकिनः रूपार्थीत्वांप्रपन्नोस्मिगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यमंत्रः महादेवांगसंभूतमेदिनीगर्भसंभव अंगारकमहाराजलोहितांगनमोस्तुते सुगंधपुष्पधूपाद्यैर्ब्राह्मणोयःप्रपूजयेत् गुडोदनघृतक्षीरगोधूमान्शीलतंडुलान् अवेक्ष्यशक्तिंदद्याद्वै ब्राह्मणेभ्योजितेंद्रियः वित्तशाठ्यंतुकुर्वाणो नामुत्रफलभाग्भवेत्

शतानीकउवाच अंगारकेणसंयुक्ताश्चतुर्थ्यानक्तभोजनैः उपोष्याःकतिसंख्यास्तु उताहोसकृदेवहि सुमंतुरुवाच चतुर्थीतुचतुर्थीतुयदांगारकसंयुता चतुर्थ्यांतुचतुर्थ्यांतुविधानंशृणुयादृशं एकश्चतुर्थीशब्दस्तिथिपरः द्वितीयस्तत्संख्यापरइत्यर्थः उपोष्यातव्रतत्रैवप्रदेयोविधिवत्कुजः यायाशुक्लाअंगारकचतुर्थीसासोपोष्या उपोष्यन

तिलानांपारणंस्मृतं तदेवाग्नौचहोतव्यंतद्देयंब्राह्मणेषुच तत्रमंत्रः दिव्यायशूरायगजाननायदंष्ट्राकरालायनमः शिवाय नगात्मजादेहमलोद्भवायकुठारहस्तायनमोवराय ताम्रपात्रैः पायसाद्यै श्चतुर्भिः साहितंनृप पंचमेनतिलैः सार्द्धं गण शांतिकरेणच निर्णयामृतेतु आयसैः पंचभिः पात्रै रुपेतंनवभिस्तथेतिपाठः मृण्मयानिदरिद्रस्तुविधिनानेनकारयेत् चातुर्मास्यव्रतंचैवकृत्वैवंपंचमेतथा अनेनमंत्रेणपूजांकृत्वा स्वाहांतेनतिलान्हुत्वातिलान्नंब्राह्मणेभ्योदत्त्वास्वयमपितदेवाश्नीयात् सौवर्णंगजवक्त्रंतुकृत्वाविप्रायदापयेत् इत्थंव्रतमिदंकृत्वासर्वविघ्नात्प्रमुच्यते निर्णयामृतेतु एवंमासचतुष्टयेव्रतंकृत्वा आषाढशुक्लचतुर्थ्यांसौवर्णविनायकदानमात्रंकुर्यादिति हयमेधस्याविघ्नेतुसंजातेसगरः पुरा एतदेवचरित्वातुहयमेधंसमाप्तवान् एतदेवहरश्चक्रेत्रिपुरोयेनघातितः मयासमुद्रमथनेत्वेतदेवव्रतंकृतं अन्यैरपिमहीपालैरेतदेवपुराकृतं ततोनिर्विघ्नसिद्ध्यर्थंविघ्नोपशमनंपरं अनेनकृतमात्रेणसर्वविघ्नैः प्रमुच्यते ततोरुद्रपुरींयातिवाराहवचनंयथा विघ्नानितस्यनभवंतिगृहेकदाचिद्ध र्थकामसुखसिद्धिविघातकानि यःसप्तसिन्धुशकलाकृतिकंतदंतंविघ्नेशमर्चयतिनक्तकृतीचतुर्थ्यां इतिवाराहपुराणोक्तमविघ्नविनायकव्रतं निर्णयामृते वैनायकचतुर्थीव्रतम् मत्स्यपुराणे चतुर्थ्यांनक्तभुग्दत्त्वाअब्दांतेहैमवारणं व्रतंवैनायकंनाम शिवलोकफलप्रदं इदंव्रतंविशेषानभिधानाद्द्वादशस्वपिषुशुक्लकृष्णोभयचतुर्थीमात्रेविधेयमितिगम्यते एवंमनोरथचतुर्थ्यादिविनायकव्रता निकुंदचतुर्थ्यादिगौरीव्रतानिच तृतीयायुक्तचतुर्थ्यामेवकार्य्याणि अन्यानि नागचतुर्थ्यादिव्रतानिपंचमीयुक्तायांचतुर्थ्यांकार्य्याणीतिसिद्धांतः पक्षद्वयगतास्वपिचतुर्थीषुतिथित्वेनगणेशः पूज्यः चतुर्थ्यांगणनाथस्येत्युक्तत्वात् सर्वासुचतुर्थीषु ढुंढीराजगणपाति यात्रोक्ता काशीखंडे कुर्य्यात्प्रतिचतुर्थीहयात्रांविघ्नेशितुःसदा ब्राह्मणेभ्यस्तुतस्यांवै देवाःसूयमोंदकामुदेति अथभविष्यपुराणोक्तंगणे

शचतुर्थीव्रतं ॥ ब्रह्मोवाच ॥ गणेशःपूजितःकुर्य्यां च्चतुर्थ्यांसर्वकर्मसु अविघ्नंसुरलोकेषुगातिमिष्टांप्रयच्छति कर्मस्वविदुषांविघ्नंकुर्य्यांच्चैवनसंशयः अतोभवतिविघ्नमविदुषांस्मरणमकुर्वतां तेनकर्मकालेअवश्यं स्मर्त्तव्यःपूज्यश्च मूलमंत्राःस्वसंज्ञाभिरंगमंत्राश्चकीर्त्तिताः पूर्ववत्पद्ममध्यस्थःकर्त्तव्यश्चातिथीश्वरः अव्रतिथीश्वरोगणेशः अस्यमंत्रः गणेशायनमः एभिरेवमंत्राक्षरैःषडंगादिन्यासः गंधपुष्पोपहारैश्चयथाशक्तिविधीयते पूजास्यवित्तशाठ्येनकृतापिनफलप्रदा आज्यधारासमिद्भिश्च दधिक्षीरान्नमाक्षिकैः पूर्वोक्तफलदोहोमः कृतःशांतेनचेतसा इतिभविष्योत्तरोक्तंसदागणेशचतुर्थीव्रतं अथवर्षसाध्यंगणपतिव्रतं सूतउवाच चतुर्थ्यांनतुभुंजीतस्नात्वानद्यांनृपोत्तम रक्तांवरधरोभूत्वारक्तगंधानुलेपनः रक्तवीतोगणाधीशंविनायकमथार्चयेत् रक्तचंदनतोयेनस्नाप्यपूर्वविधानतः विलिप्यरक्तगंधेनरक्तपुष्पैरथार्चयेत् ततःसौगंधिकंधूपमाज्ययुक्तंसचंदनं नैवेद्यंचैवहारिद्रंगुडखंडघृतप्लुतं एवंसंवत्सरंपूज्यविनायकमथास्तुवत् इक्ष्वाकुरुवाच नमस्कृत्वामहादेवंस्तोष्येहंतंविनायकं महागणपतिंशूरमूर्जितंजयवर्द्धनं एकदंतंद्विदंतंचचतुर्दंतंचतुर्भुजं त्र्यक्षंत्रिशूलहस्तंचरक्तनेत्रंवरप्रदं आंविकेयंशंकुकर्णंप्रचंडंदंडनायकं आरक्तदंडिनंचैववह्निवक्त्रंहुताप्रियं अनर्चितोविघ्नकरःसर्वकार्य्येषुयोनृणां तंनमामिगणाध्यक्षंभीममुग्रमुमासुतं मदमत्तंविरूपाक्षंभववक्त्रसमुद्भवं सूर्य्यकोटिप्रतीकाशंभिन्नांजनचयप्रभं वुधंसुनिश्चलंशांतनमस्यामिविनायकं नमोस्तुब्रह्मरूपायविष्णुरूपायतेनमःनमोस्तुगजरूपायगजानांपतयेनमः मेरुमंदररूपाय नमः कैलासवासि ने नमोविघ्नविनाशायनमस्तेब्रह्मचारिणे जगत्स्तुतायदेवायनमस्तुभ्यंविनायक त्वयापुरातुपूर्वेषांदेवानांकार्यसिद्धये गजरूपंसमास्थायत्रासिताःसर्वदानवाः ऋषीणांदेवतानांचकृताःसर्वेमनोरथाःयतस्ततःसुरैःसर्वैःपूज्यसेत्वंभवात्मज त्वामाराध्यगणाध्यक्षंसर्वज्ञंकामरूपिणं कामार्थे

रक्तकुसुमैरक्तचंदनवारिभिः रक्तांबरधरोभूत्वाचतुर्थ्यामर्चयेज्जपेत् त्रिकालमेककालंवानियतोनियताशनः राजानंराजपुत्रंचराजमंत्रिणमेवच राज्यंवासर्वविघ्नेशंवशीकुर्य्यात्सराष्ट्रकं अविघ्नंतपसामद्य कुरुविघ्नविनायक मयात्वंसंस्तुतोभक्त्यापूजितश्चविशेषतः यत्फलंसर्वतीर्थेषुसर्वयज्ञेषुयत्फलं तत्फलंसर्वमाप्नोतिस्तुत्वादेवंविनायकं विषमंनभवेत्तस्यनसगच्छेत्पराभवं नचविघ्नोभवेत्तस्यजातोजातिस्मरोभवेत् यइदंपठतिस्तोत्रंषड्भिर्मासैर्वरंलभेत् संवत्सरेणसिद्धिंचलभतेनात्रसंशयः॥इतिश्रीनरसिंहपुराणोक्तंगणेशचतुर्थीव्रतं तदुपयोगिगणेशस्तोत्रंगणेशचतुर्थीव्रतमात्रेवश्यंपठनीयं अथभविष्योत्तरोक्तं स्नपनचतुर्थीव्रतं युधिष्ठिरउवाच ॥ यन्नसिद्ध्यंतिकार्य्याणिप्रारब्धानिनरोत्तमैः तत्केनकारणेनैवपृष्टोमेब्रूहिमाधवः श्रीकृष्णउवाच विनायकश्चसिद्ध्यर्थेलोकस्यविनियोजितःगणानामाधिपत्येचरुद्रेणब्रह्मणातथा तेनोपसृष्टोयस्तस्यलक्षणानिनिबोधमे स्वप्नेवगाहतेत्यर्थंतैलंमुंडंचपश्यति कषायवाससश्चापिक्रव्यादांश्चाधिरोहति अंत्यजैर्गर्दभैरुष्ट्रैः सहैवायातिनिंदति व्रजमानंतथात्मानंमन्यतेनुगतंपरैः विमानाविफलारंभोऽनष्टेसीदत्काचित्ततः पताकाविहितछायां प्रयातिहतलक्षणः करभारूढमात्मानंमहिषंखरगंतथा यातुधानान्वितंयांतंप्रासादोपारिधावनं पश्यतेकुरुशार्दूलस्वप्नांतेयस्तुमानवः शृंखलालानसंयुक्तंकरवीरविभूषितं तेनोपयुक्तस्तुनरोनराज्यंलभतेतथा कुमारीनचभर्तारमपत्यंगुर्विणीतथा आचार्यत्वंश्रोत्रियश्चनाशिष्योध्ययनंतथा वणिग्लाभंनचाप्नोतिकृषिंचापिकृषीवलः स्नपनंतस्यकर्त्तव्यंपूर्वोह्निविधिपूर्वकं गौरसर्षपकल्केनवस्त्रेणाच्छादितस्यतु सर्वौषधैःसर्वगंधैर्विलिप्तशिरसस्तथा शुक्लपक्षेचतुर्थ्यांतुवारेणधिषणस्यतु तिथौचवीरनक्षत्रेतस्यैववपुषस्यच भद्रासनोपविष्टस्यस्वस्तिवाच्यंद्विजोत्तमैः चत्वारऋग्यजुःसामाथर्वाणप्रवणास्तथा व्योमकेशंतुसंपूज्यपार्वतीभूमिजंतथा धिषणंक्लेदपुत्रंवाकांतलक्ष्यंचभारत विधुंतुदंवाहुलेयंनरकस्यच

द्वारुणं कृष्णस्यपितरंतातअवतारंसितंतथा अश्वस्थानाद्गजस्थानाद्वल्मीकाद्ह्रदसंगमात् मृत्तिकासेवनंरक्तंगुग्गुलंचाप्सुनिक्षिपेत् पटावृतेषुकोणेषुचतुर्भिःकलशोद्भवान् चर्मण्यानडुहेरक्तेस्थाप्यभद्रासनंतथा सहस्राक्षं शतधारमृषिभिःपावनंकृतं तेनत्वामाभिषिंचामिपावमान्यःपुनंतुते भगंमिंद्रश्चवायुश्चभगंसप्तर्षयोविदुः यन्मेके शेषुदौर्भाग्यंसीनंतेयश्चमूर्द्धनि ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुसर्वदा स्नातस्यसार्षपं तैलं श्रावयेदुंवरेणतु जुहुयान्मूर्द्धनिकुशान्सव्येनप्रतिगृह्यच सितस्त्वमासितश्चैवत्तथाशालकटंकटः सकूष्मांडःसपुत्रोवाचेतिहास समन्वितैः नामभिर्वलिमंत्रैश्च नमस्कारसमन्वितैः दद्यात्संतोष्यसंतर्प्यकुशानास्तीर्य्यसर्वतः कृताकृतांस्तंडुलांश्चपललोदनमेवच मत्स्यान्पक्कांस्तथामाषान्मांसेमतावेदवत पुष्पान्वितंचगंधंचसुरांश्चत्रिविधामपि मूलकंपूरिकापूपास्तथैवेंदुरिकास्तथा दध्यन्नंपायसंचैवगुडापिष्टंसमोदकं विनायकस्यजननीमुपतिष्ठेत्ततोंविकादूर्वासर्षपपुष्पाणांदत्वार्घ्यंपूर्णमंजलिं रूपंदेहियशोदेहिमह्यंदेह्यभयंशिवे अवलंकुरुमेवित्तंबलंचज्ञातिसंभवं ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः भोजनंब्राह्मणान्दद्याद्वस्त्रंयुग्मंपुराण्यपि एवंविनायकंपूज्यग्रहांश्चैवविधानतः कर्मणांफलमाप्नोतिश्रियमाप्नोत्यनुत्तमां आदित्यस्ययदासत्यंत्रिलोकस्वामिनस्तथा महागणपतेश्चैवकुर्वन्सिद्धिमवाप्नुयात् विनायकंसत्यवतांनराणांस्नानंप्रशस्तामिहविघ्नविनाशकारि कुर्वंतियेविधिवदत्रसदैवतेषांकार्य्याण्यभीष्टफलदानिनसंशयोत्र ॥ इतिभविष्योत्तरेविनायकस्नपनचतुर्थीव्रतम् ॥ इदमेवविनायकशांतिविधानम् फाल्गुणशुक्लपंचम्यां पितृपूजनं नागपूजनंच नारदीये पंचम्यांप्रतिमासंतुशुक्लेकृष्णेपिनारद पितॄणांपूजनंशस्तंनागानांचतदैवहि फाल्गुनशुक्लषष्ठ्यां पशुपतिपूजाव्रतं नारदीये फाल्गुणेशुक्लषष्ठ्यांतुदेवंपशुपतिंद्विज मृण्मयंविधिनाकृत्वापूजयेदुपचारकैः संस्नाप्यशतरुद्रेणपृथक्पंचामृतैर्जलैः गंधै-

रालिप्यसुश्वेतैरक्षतैःश्वेतपुष्पकैः विल्वपत्रैश्चधत्तूरकुसुमैश्चफलैस्तथा संपूज्यनानानैवेद्यैर्नीराज्यंविधिवत्ततः समाप्यप्रणिपत्यैनं कैलाशायविसर्जयेत् एवंकृताशिवार्चस्तुनरोनार्य्यथवामुने इहभुक्त्वावरान्भोगानंतेशिवगतिंलभेत् ॥ अथदारिद्र्यहरषष्ठीव्रतं स्कंदपुराणे षष्ठीनामतिथिःपूज्यासामान्यादैवतैरपि एकभक्तेननक्तेनतथैवायाचितेनवा उपवासेनदानेनतैलक्षारविवर्जिताः अयंहिभास्करोदेवोभगवान्भास्करद्युतिः येनशैघ्र्येणदृश्येतत्तद्गुह्यंकथयाम्यहं गोपनीयंव्रतंदिव्यमिहलोकफलप्रदं अस्मिन्कृतेव्रतेचैवदारिद्र्यंनभवेत्कुले षष्ठीतिथिंसमुद्दिश्यब्राह्मणस्याहिभोजनं शाल्योदनंचपयसिकृत्वाशर्करयायुतं वर्त्तुलंघृतसंयुक्तंवर्षमेकंप्रदापयेत् कुलेतस्यैवयेजातायेभविष्यंतिमानवाः अक्षयास्तेमहात्मानोव्रतेनपुण्यपावना इहतस्यैवयेसंतितद्दारिद्र्यंचगच्छति ॥ इतिदारिद्र्यहरषष्ठीव्रतं पक्षद्वयगतासुसर्वासु षष्ठीषुतिथिपत्वेनस्कंदंपूजयेत् तदुक्तंषष्ठ्यांपूजागुहस्यचेति फाल्गुनशुक्लसप्तम्यामर्कपुटव्रतं नारदीये तपस्यशुक्लसप्तम्यांव्रतमर्कपुटं. भवेत् अर्कपत्रैर्यजेदर्कमर्कपात्राणिचाप्नुयात् अर्कपत्राण्यपिपाठःपात्रपाठेतु अर्कवत्सुवर्णपात्राणीत्यर्थःपत्रपाठेतु पत्रवाहनपत्रयोरित्यभिधानात् अर्कवाहनाप्तिरश्वप्राप्तिरितिफलं अर्कनामजपेत्पश्चादित्येवार्कपुटव्रतं धनदंपुत्रदंचैतत्सर्वपापप्रणाशनं त्रिवर्गदमितिप्राहुःकेचिदेतद्व्रतंद्विज यज्ञव्रतंतथाह्यन्येविधिवद्धोमकर्मणा सर्वासु सर्वमासेषुसप्तमीषुद्विजोत्तम भास्कराराधनंप्रोक्तंसार्वकामिकमित्यलं अत्रविधिः खखोल्कायनमः इत्यनेनसूर्यं संपूज्य अष्टम्यामर्कपत्रंप्राश्यभुंजीतेति इत्यर्कपुटसप्तमीव्रतं अस्यामेवभविष्योत्तरोक्तं त्रिवर्गेष्टदासप्तमीव्रतं तदुक्तंहेमाद्रौ सप्तम्यांशुक्लपक्षेतुफाल्गुनस्येहयोनरः जपेद्वलीतिदेवस्यनाम्नात्रिषवणेचनं त्रिवर्गेष्टफलंदद्यादित्यादितेनैवपूजनादिकंकर्तव्यमिति अस्यामेवभविष्यपुराणोक्तंकामदासप्तमीव्रतं पितामहउवाच फाल्गुनेम

लपक्षस्यसप्तम्यांक्ष्माधराधर उपोषितोनरोनारीसमभ्यर्च्यतमोपहं सूर्य्यनामजपन्भक्त्याभावयुक्तोजितेंद्रियः उत्तिष्ठन्प्रस्वपंश्चैवसूर्यमेवानुकीर्त्तयेत् ततोन्यद्दिवसेप्राप्ते अष्टम्यांनियतोरविं स्नात्वासम्यक्समभ्यर्च्यदद्याद्विप्रायदक्षिणां रतिमुद्दिश्यचैवाग्नौकृतहोमकृतक्रियः प्रणिपत्यजगन्नाथमितिवाक्यमुदीरयेत् यमाराध्यपुरादेवीसावित्रीकाममापवै समेददातुदेवेशःसर्वान्कामान्विभावसुः समभ्यर्च्यदितिःप्रापतां स्तान्कामान्यथेप्सितान् सददात्वखिलान्कामान्प्रसन्नोमेदिवस्पतिः भ्रष्टराज्योभवेद्भूपःसमभ्यर्च्यदिवाकरं कामार्थमाप्तवान्राज्यंसमेकामान्प्रयच्छतु एवमभ्यर्च्यपूजांतुनिष्पाद्येहविशेषतः भुंजीतप्रयतःसम्यग्हविष्यंपतगध्वज फाल्गुनेचैत्रवैशाखेज्येष्ठमासितथापरं चतुर्भिःपारणमासैरेभिर्निष्पादितंभवेत् करवीरैश्चचतुरोमासान्संपूजयेद्रविं कृष्णागुरुदहेद्धूपंप्राश्यगोशृंगजंजलं नैवेद्यंखंडवेष्टांश्चदद्याद्विप्रेभ्यएवच ततश्चश्रूयतामन्यात्वाषाढादिषुयाक्रिया जातीपुष्पाणिशस्तानिधूपोगुग्गुलरेवच कुतपोदकमश्नीयान्नैवेद्यंपायसंमतं स्वयंतदेवचाश्नीयाच्छेषंपूर्ववदाचरेत कुतपोदकंकुशोदकं कार्त्तिकादिषुमासेषुगोमूत्रंकायशोधनं महगांधूपःसंदिष्टःपूजारक्तोत्पलैस्तथा महांगधूपो भविष्योत्तरेउक्तः कर्पूरंकुंकुमंपुष्पमगुरुचंदनंतथा शर्कराकुष्ठमुद्दिष्टंमहांगंसिह्लकंतथा महांगोयंस्मृतोधूपःप्रियेदेवस्यदिक्पतेः पलासपुष्पमितिवीरामित्रोदयेस्वरसः महांगंमांसी कासारंचैवनैवेद्यंवित्तशाठ्यंविवर्जयेत् सद्भावेनैवसप्ताश्वःपूजितःप्रीयतेततः पारणांतेयथाशक्त्यास्थापितःपूजितोरविः प्रीणितश्चेप्सितान्कामान्दद्यादव्याहतान्रविः एषापुण्यापापहरासप्तमीसर्वकामदा यथाभिलषितान्कामान्ददातिगरुडध्वज अपुत्रःपुत्रमाप्नोतिअधनोधनमाप्नुयात् रोगाभिभूतश्चारोग्यंकन्याविंदतिसत्पतिं समागमंप्रवासीभिरुपोष्यैतदमाप्नुयात् सर्वान्कामानवाप्नोतिरोगतश्चापिमुच्यते गोगतश्चापिमोदतेइतिपाठःसाधुःगोगतःस्वर्गतः पुनरेत्यमहींकृष्ण

धनदेनसमोनरः क्ष्मातलेस्यान्नसंदेहः प्रसादाद्भोपतेर्नरः इतिकामदासप्तमीव्रतं रविवारयुतासप्तमीकल्याणसप्तमी विजयाचभवति तस्यांश्रीसूर्यंसंपूज्य सोदकुंभंसकनकंघृतपात्रंचदत्त्वा गुडक्षीरघृतादिभिः पायसेनद्वितीय दिवसेविप्रान्संभोज्यस्वयंपायसभोजनं कुर्य्यादिति कल्याणविजयासप्तमीव्रतं अथयस्यांकस्यांचत शुक्लसप्तम्यां मत्स्यपुराणोक्तं सप्तमीस्नपनं सप्तमीस्नपनंनामव्याधिपीडाविनाशनं वालानांमरणंयत्रक्षीरपाणांतु दृश्यते जातस्यमृतवत्सायाः सप्तमीमासिनारद अथवाशुक्लसप्तम्यामेतत्सर्वंप्रशस्यते गोमयेनोपलिप्तायां भूमावेकाग्निवत्तदा तंडुलैरक्तशालीयैश्चरुंगोक्षीरसंयुतं निर्वपेत्सूर्य्यरुद्राभ्यांमातृभ्यश्चविशेषतः कीर्त्तयन्सूर्यदेवत्यंसप्तचैवघृताहुतीः जुहुयाद्रुद्रसूक्तेनकद्रुद्रायेतिनारद होतव्याःसमिधश्चात्रतथैवार्कपलाशयोः यवकृष्णातिलैर्होमः कर्तव्याष्टशतंपुनः व्याहृतीभिरथाज्येनतथैवाष्टशतंद्विज हुत्वास्नानंप्रकर्त्तव्यंमंत्रैस्तैरेवधीमता विप्रेणवेदाविदुषाविधिवद्दर्भपाणिना स्थापयित्वातुचतुरःकुंभान्कोणेषुशोभनान् पंचमंचपुनर्मध्येदध्यक्षतविभूषितं स्थापयेद्व्रणंकुंभंसप्तर्चेणाभिमंत्रितं मंत्रोयथा सप्तऋषयः प्रतिहिताःशरीरेसप्तरक्षंतिसदमप्रमादं सप्तापःसप्ततोलोकमीयुस्तत्र जाग्रतौ अस्वप्नजौसत्रसदौचदेवौ सौरेणतीर्थतोयेनपूर्णरत्नसमन्वितं सर्वान्सर्वौषधियुतान्पंचसंगजलान्वितान् पंचरत्नफलैर्युक्तान्वासोभिःपरिवेष्टितान् सप्तधान्यसमायुक्तान्सप्तमृद्भिर्जलैस्तथा चतुर्ष्वपिचकुंभेषुतोयगर्भेषुमध्यमं गृहीत्वाब्राह्मणस्तत्रसौरमंत्रानुदीरयेत नारीभिःसप्तसंख्याभिरव्यंगांगीभिरत्र च पूजिताभिर्यथाशक्त्यामाल्यवस्त्रादिभूषणैः सविप्राभिश्चकर्तव्यंमृतवत्साभिषेचनं दीर्घायुरस्त्वयंवालोजीवपुत्रात्वियंतथा आदित्यश्चंद्रमाः सार्द्धं ग्रहनक्षत्रमंडलैः शक्रःसलोकपालोवैब्रह्माविष्णुमहेश्वराः एतेन्येचदेवाद्याःसदापांतुकुमारकं माशनिर्माचराहुश्चमात्रवालग्रहाःक्वचित् पीडांकुर्वंतुवालस्यया

माःतुर्जनकस्यच ततःशुक्लांवरधराकुमारपतिसंयुता सप्तकंपूजयेत्स्त्रीणामाचार्य्यभार्ययासह कांचनींच
ततःकृत्वाताम्रपात्रोपरिस्थितां प्रतिमांधर्मराजस्यगुरवेविनिवेदयेत् वस्त्रैःकांचनरत्नाद्यैर्भक्ष्यैःसघृतपायसैः
पूजयेद्ब्राह्मणांस्तत्रवित्तशाठ्यविवर्जिता भुक्त्वाचगुरुणाचेदमुच्चार्य्यंपुत्रसंततिः दीर्घायुरस्तुवालोयंयावद्वर्षशं
तंसुखी यत्किंचिदस्यदुरितंतत्क्षिप्तंवडवामुखे ब्रह्मारुद्रोहरिःस्कंदोविष्णुःशक्रोहुताशनः रक्षंतुसर्वदुष्टे
भ्योवरदाःसंतुसर्वदा एवमाद्यानिचान्यानिवदंतंपूजयेद्गुरुं शक्तितःकपिलांदद्यात्प्रणिपत्यविसर्जयेत् गुरुं
चपुत्रसहिताप्रणम्यरविशंकरौ हुतशेषंतदश्नीयादादित्यायनमोस्तुते इतिमत्स्यपुराणोक्तं सप्तमीस्नपनं
अथसौरव्रतंपद्मपुराणे पक्षोपवासीसप्तम्यांसमांतेहैमपंकजं गावश्चशक्तितोदद्याद्धोमांतेघटसंयुताः एतत्सौ
रव्रतंप्रोक्तंसूर्य्यलोकप्रदायकं इतिसौरव्रतं अथान्यान्यपिसूर्य्यप्रियाणिव्रतानि शाल्योदनंतथामुद्गान्सु
गंधंघृतमेवच अपूपानाहपूर्णांश्चपयोदधितथागुडं एतैस्तृप्ततांयातिभास्करोन्नेनसप्तमीः वर्षाणिभरत
श्रेष्ठनात्रकार्य्याविचारणा कुलुत्थकान्मसूरांश्चवल्लांश्चाटकएवच शिंविंकुंदंतथात्यम्लंराजमाषांस्तथैवच एता
न्भास्करेदद्याद्यइच्छेच्छ्रियमात्मनः सप्तम्यांनस्पृशेत्तैलंनीलवस्त्रंनधारयेत् नजाप्यामलकैःस्नायादित्यादिनि
षेधास्तुहेमाद्रौस्पष्टाः पक्षद्वयगतासुसर्वासुसप्तमीषुतिथित्वेनादित्यःपूज्यः उक्तंच सप्तम्यांभास्करस्यचेति
अथफाल्गुनशुक्लाष्टम्यां शिवयोः पूजाव्रतंनारदीये शुक्लाष्टम्यांफाल्गुनस्यशिवंचापिशिवांद्विज गंधाद्यैः स
म्यगभ्यर्च्यसर्वसिद्धीश्वरोभवेत् अस्यामेवाष्टम्यांशीतलाव्रतमप्युक्तंतत्रैव फाल्गुनापरपक्षेतुशीतलामष्टमीदि
ने पूजयेत्सर्वपक्वान्नैःसप्तम्यांविधिवासितैः शीतलेत्वंजगन्माताशीतलेत्वंजगत्पिता शीतलेत्वंजगद्धात्रीशीत
लायैनमोनमः ॥ १ ॥ वंदेहंशीतलांदेवींरासभस्थांदिगंबरां मार्जनीकलशोपेतांविस्फोटकविनाशिनीं २

69

शीतलेशीतलेचेतियेजपंतिजलेस्थिताः तेषांतुशीतलादेवीस्याद्विस्फोटकशांतिदा ॥ ३ ॥ इत्येवंशीतलांमंत्रैर्यःसमर्चयतेद्विज तस्यवर्षंभवेच्छांतिःशीतलायाःप्रसादतः सर्वमासेद्वयेपक्षेविधिवच्चाष्टमीदिने शिवंचापिशिवांप्राचर्य्यलभतेवांछितंफलम् ॥ इतिशीतलाष्टमीव्रतम् ॥ अथात्रत्रिरात्रोत्सवविधानं फाल्गुनशुक्लपक्षमुपक्रम्योक्तं ब्रह्मपुराणे स्वल्पान्नभुग्भिरष्टम्यांसुस्नातैश्चस्वलंकृतैः लक्ष्मींसीतांचसंपूज्यगंधमाल्यादिभिर्दिवा ततःप्रदोषसमयेदीपाःशतसहस्रशः नरैर्गृहेगृहेदेयाःसर्वदेवेभ्यएवच देवेभ्यश्चपितृभ्यश्चततोवाह्येस्ववेश्मनः दत्तमिष्टंततोभोज्यंभक्षितव्यंस्ववंधुभिः तृतीयेहनिमध्यान्हेशोभनैर्धान्यराशिभिः गृहाणिभूषणीयानितथादेवगृहाण्यपि सीतांरामंचसंपूज्यगीतनृत्यसमाकुलं पक्वान्नंनित्यदानंचतत्रदेयंचयाचते नान्यत्किंचित्प्रार्थितव्यंलब्धंग्राह्यंप्रयत्नतः इयंप्रदोषव्यापिनीग्राह्या तत्रैवदीपदानादेरुक्तत्वात् दिनद्वयेतद्व्याप्तावव्याप्तौवापरैवशुक्लपक्षेतिनिर्णयवाक्यात् अथफाल्गुनशुक्लपक्षेपुष्यनक्षत्रेसतिहरिपूजनं तत्र गौडाः फाल्गुनेसितपक्षस्थेपुष्यर्क्षेपूजयेद्धरिं पद्ममष्टदलंकृत्वानवम्यांवार्चयेद्धरिं दशम्यांवापिकर्त्तव्यंवलिकर्मतथात्मनःमंगलालंभनंकार्य्यमुत्सवश्चविशेषतः ब्राह्मणेभ्योधनंदेयंभृत्येभ्यश्चयथाक्रमं धान्यमन्नंसुवर्णंचवस्त्रमाभरणंतथा गोभूमिरत्नवेश्मानिदेयानिप्रयतात्मना संप्राप्तान्ग्राहयेत्सम्यङ्नतत्रग्लपयेन्मनः शय्यासनेचकर्तव्येगंधपुष्पाधिवासिते स्त्रियःपूज्याःस्त्रजःकार्य्याः प्रहृष्टाश्चसुरक्षिताः निशायांक्रीडमानावैनृत्येषुकृतभोजनाः अथ वुधाष्टमीव्रतं यदाष्टम्यांपूर्णायांवुधवारोभवति तदाकल्पोक्तविधिनैकभक्तव्रतंकार्य्यं तदुक्तंनिर्णयामृतेभविष्योत्तरे यदयादासिताष्टम्यांवुधवारोभवेत्किल तदातदाहिसंग्राह्यासैकभक्ताशनैर्नृप वुधाष्टमीतुसंपूर्णायथोक्तफलदायिनी संध्याकालेतथाचैवप्रसुप्तेचजनार्दने वुधाष्टमीनकर्त्तव्याहंतिपुण्यपुराकृतं अस्याः कथाविधा

नंचभविष्ये श्रीकृष्णउवाच वुधाष्टमीव्रतंपार्थशृणुष्वेकाग्रमानसः आसीद्राजाविदेहानांमिथिर्नामसवैरिभिः संग्रामेनिहतोवीर स्तस्य भार्य्यादरिद्रिणी ऊर्मिलानामवभ्राममहींवालकसंयुता परेषांकर्मकुर्वाणाताद्रधूमानचूचुरत् उपयेमेकुलीनत्वात्तत्कन्यांश्यामलांयमः ससप्तवासरान्हित्वाविहरस्वेतितांपतिः उवाचसाचतानेवनिषिद्धापिव्यलोकयत् ददर्शमातरंतेषुपच्यमानांमहाभटैः तांविषण्णांयमःप्राहचौर्य्यपापफलंत्विदं मातातवानुभवतीत्यत्रोपायस्त्वयापुरा वुधाष्टमीव्रतंचीर्णंतच्छ्रेयोस्यैसमर्पयतथाकृतेश्यामलया निःष्पापास्वर्गतोर्मिलासातुभर्त्तुस्समीपेचदृश्यतेद्यापिभारत बुधस्यपार्श्वेनभासिमिथिराजसमीपगा विस्फुरंतीमहाराजवुधाष्टम्याः प्रभावतअथातः संप्रवक्ष्यामिवुधाष्टम्याविधिंनृप यदायदासिताष्टम्यांवुधवारोभवेत्क्वचित् तदातदाहिसंग्राह्याएकभक्ताशनैर्नृभिः स्नात्वानद्यांतुमध्याह्नेगृहीत्वाकरकंनवं जलपूर्णं सहेमानं कृत्वाखाद्यैः समन्वितं दद्याद्विप्रायतंगत्वागृहंचैवक्रमेणतु अष्टम्योष्टविधातव्याविचित्रान्नैःपृथक्पृथक् प्रथमामोदकैर्भक्ष्यैर्द्वितीयागुणकैस्तथा तृतीयाघृतपूरैश्चचतुर्थीवटकैर्नृप पंचमीशुभ्रकासारैःषष्ठीसौहालकैःशुभैः अशोकवर्त्तिभिः शुभ्रैः सप्तमीचातिवाहयेत् अष्टमीफणितापूर्णैः खंडवेष्टैर्युधिष्ठिर एवंक्रमेणकर्तव्याः सुहृत्स्वजनवांधवैः सहैकत्रस्थितैर्भोज्यंभोक्तव्यंप्रीतिपूर्वकं उपाख्यानामिदंपार्थकीर्त्तयद्भिः शनैः शनैः

आख्यानोपरमेपार्थभोजनंसहसात्यजेत् ततोभुक्त्वावुधस्याग्रेआचम्यचसमाहितः विप्रायवेदविदुषेवाचकायप्रदापयेत् साक्षतंसहिरण्यंचजातरूपमयंशुभं शोभितंचार्चितंगंधैःपुष्पैर्धूपैःसुगंधिभिः पीतवस्त्रैःसमाछन्नं वुधंसोमात्मजाकृतिम् माषकेनसुवर्णस्यतदर्द्धार्द्धेनवाकृतां वुधरूपंतुमत्स्यपुराणेउक्तं पीतमाल्यांवरधरःकर्णिकारसमद्युतिः खड्गचर्मगदापाणिःसिंहस्थोवरदोवुधः भक्तियुक्तस्तुकौंतेयदद्यादेवंसमुच्चरन् ऊंविवुधायनम

ॐसोमात्मजायनमः ॐदुर्वुद्धिनाशायनमः ॐसुवुद्धिप्रदायनमः ॐतारात्मजायनमः ॐसौम्यग्रहायनमः ॐसर्वसौख्यप्रदायनमः इमेपूजामंत्राः ॐवुधोयंप्रतिगृह्णातिद्रव्यदस्तुवुधःस्वयं दीयतेवुधरूपेणतुष्यतांसवुधो मम दानमंत्रः दुर्वुद्धिवोधदुरितंनाशयित्वावयोर्वुधः सौख्यंसौमनसंनित्यंकरोतुशशिनंदन इत्युच्चार्य्यगृहीत्वातुदत्वामंत्रपुरस्कृतं सप्तजन्मानिराजेंद्रभवेज्जातिस्मरोभुवि धनधान्यसमायुक्तः पुत्रपौत्रसमृद्धिमान् दीर्घायुर्विपुलान्भोगान्वहून्भुक्तामहीतले सत्तीर्थेषुरणेचैववध्यात्वानारायणंलभेत् मृतोसौस्वर्गमाप्नोतिपुरंदरपुरींनृप यत्रास्तेयावदासृष्टेर्यावदाभूतसंप्लवं एवमेषासमाख्यातागुह्यापार्थवुधाष्टमी यांश्रुत्वाब्रह्महागोघ्नःसर्वपापैः प्रमुच्यते योवाष्टमींप्राप्यवुधेनयुक्तांभक्त्यार्चयेच्छशिसुतंकरकोपरिस्थं पक्वान्नपानैःसहिरण्यवस्त्रंपश्यत्स्य सौयमपुरंनकदाचिदेव ॥ इतिभविष्योनरेवुधाष्टमीव्रतं ॥ अथसोमाष्टमीव्रतं हेमाद्रौभविष्योत्तरेवारेसोमस्यचाष्टम्यां पक्षयोरुभयोरपि विधिवच्चंद्रचूडात्तं सोमंसंपूजयेन्निशि सोममुमासहितंशिवंपूजयेदितिशेषः इतिसोमाष्टमीव्रतं अथार्काष्टमीव्रतं भविष्ये हेमाद्रौ यदाष्टम्यांशुक्लपक्षेरविवारोभिजायते उपोष्यासाप्रयत्नेननक्तेनविधिवन्नृप अर्चयेद्देवदेवेशंसहदेव्यामहेश्वरं विशेषएषएवात्रशिवस्यनयनेस्थितं भानुंसंपूजयेद्भक्त्या गंधपुष्पाक्षतैः शुभैः शिवंवासितपुष्पैस्तुरक्तपुष्पैस्तथांविकां पूजयेदितिशेषः इत्यर्काष्टमीव्रतं अथशुक्रवारश्रवणयोगेमहाव्रतं हेमाद्रौ शुक्रश्रवणयोगस्तुयदाष्टम्यांप्रजायते चतुर्दश्यामथोवत्स तदाव्रतमिदंचरेत् उपोषितस्तुविधिनामहास्नानंसमाचरेत् तत्रशिवपूजनंकृत्वारात्रौजागरणंकृत्वापरेद्युः पारणंकुर्य्यात् इतिकालांतरोक्तं शुक्राष्टमीव्रतं अथरेवतीशनियोगेविश्वरूपाष्टमीव्रतं हेमाद्रौ रेवतीशनियोगस्तुसिताष्टम्यांयदाभवेत् भूतायांवामहासेनविश्वरूपव्रतंशृणु अत्रशिवपूजनंकृत्वा कुशोदकंतुप्राश्नीयाद्रा

त्रौजागरणंतथेति इतिविश्वरूपाष्टमीव्रतं एवंविश्वरूपचतुर्दशीव्रतमपिज्ञेयं अथाशोकाष्टमीव्रतं भानुरुवाच अष्टमीषुचसर्वासुपूजनीयाप्यशोकिका अशोकलतिकापूज्येत्यर्थः गंधमाल्यनमस्कारदीपधूपान्नसंपदा तस्मिन्नहनियाभुंक्तेनक्तमिंदुविवर्जिते कृष्णपक्षेइत्यर्थः भवत्यथावशोकासायत्रयत्राभिजायते अष्टमीषुचसर्वासुनचेच्छक्नोतिवैमुने प्रौष्ठपद्यामतीतायांयास्यात्कृष्णाष्टमीद्विज तस्यामवश्यंकर्त्तव्यंव्रतंपूजायथाविधि इत्यादित्यपुराणोक्तं इत्यशोकाष्टमीव्रतं अथसुगातिव्रतं अष्टम्यांचनवम्यांचपक्षयोरुभयोरपि योब्दमेकंनभुंजीतचंडिकाराधनेरतः सयातिपरमंस्थानंयत्रसाचांडिकास्थितोतिभविष्योत्तरे चंडिकाष्टमीव्रतं अथोद्यापनविधिःतत्र कर्त्ताअष्टम्यां प्रातःस्नानादिनित्यनैमित्तिकेविधायमंडपादिशोभांकृत्वा पुनःसंध्यासमयेसायंसंध्यादिनिर्वर्त्य उद्यापनसंकल्पंविधाय गणपतिपूजनादिकलशस्थापनांतंकृत्वा तदुपरिताम्रपात्रेरक्तवस्त्रोपरिमंडूकादिपरतत्वांतंसंपूज्यसौवर्णींस्विष्टदेवतांसांगांनीराजनांतोपचारैः संपूज्यरात्रौजागरणंकृत्वा नवम्यांपुनः पूजयित्वा वैदिकेनमूलमंत्रेणवाष्टोत्तरशतसंख्ययाहोमंविधायगांसुवर्णादियुतांदत्त्वा आचार्य्यायमूर्त्तिसमर्प्यदंपतीः कुमारीश्चसंपूज्य स्वयमपिभोजनंकुर्यात् इत्यष्टमीव्रतोद्यापनविधिः फाल्गुनशुक्लनवम्यांनंदानवमीव्रतं नारदीये फाल्गुनामलपक्षस्यनवमीयाद्विजोत्तम आनंदासामहापुण्यासर्वपापहरास्मृता सोपवासोर्चयेत्तत्रयस्त्वानंदांद्विजोत्तम सलभेद्वांछितान्कामान्सत्यंसत्यमयोदितं एवमेवब्रह्मपुराणेपि आनंदानवमीव्रतंफाल्गुनामलपक्षेतुनवमीयामहीपते आनंदासामहापुण्यासर्वपापहरास्मृता इत्यानंदानवमीव्रतं भविष्यपुराणेपि आनंदानंदिनीनंदा महानंदामहीपते तथाचनवमीपुण्या पंचमीमहतीस्मृता फाल्गुनामलपक्षस्यनवमीयामहीपते आनंदासामहापुण्यासर्वपापहरास्मृता कृत्वैकभक्तंपंचम्यांषष्ठ्यांनक्तंतथानृप अयाचितंचसप्तम्यामुपवासःपरेहनि

नवम्यामर्चनंदानं पारणंचसमाचरेत् यएवंपूजयेद्भक्त्यानवम्यांविधिवन्नृप सलभेद्वांछितान्कामान्नात्रकार्या विचारणा इतिफाल्गुनशुक्लानंदानवमीव्रतम् ॥ फाल्गुनशुक्लदशम्यां यमपूजनव्रतमुक्तं नारदीये अंत्यशुक्लदशम्यांतुचतुर्दशयमान्यजेत् यमश्चधर्मराजश्चमृत्युश्चांतकएवच वैवस्वतश्चकालश्चसर्वभूतक्षयस्तथा औदुंबरश्चदध्नश्चद्वौनीलपरमेष्ठिनौ वृकोदरश्चचित्रश्चचित्रगुप्तश्चतुर्दश गंधाद्यैरुपचारैस्तुसमभ्यर्च्याथतर्पयेत् तिलांबुमिश्रांजलिभिर्दर्भैःप्रत्येकशस्त्रिभिः ततश्चदद्यात्सूर्यार्घ्यंताम्रपात्रेणनारद रक्तचंदनसंमिश्रंतिलाक्षतयवांबुभिः मंत्रश्च एहिसूर्यसहस्रांशोतेजोराशेजगत्पतेः गृहाणार्घ्यंमयादत्तंभक्त्यामामनुकंपय इतिमंत्रेणदत्त्वार्घ्यं विप्रान्भोज्यचतुर्दश रौप्यंतुदक्षिणांदत्त्वाविसृज्याश्नीतचरुस्वयं एवंकृतविधिर्विप्रधर्मराजप्रसादतः भुक्त्वाभोगांश्चपुत्राद्यैरैहिकान्देवदुर्लभान् विमानवरमास्थायदेहांतेविष्णुलोकभाक् इतिनारदीयोक्तंयमदशमीव्रतं अथ यस्यांकस्यांचिद्दशम्यामारभ्य भविष्योत्तरोक्तमाशादशमीव्रतं युधिष्ठिरउवाच राज्याशयाराजपुत्रः कृष्यर्थीचकृषीबलः वाणिज्यार्थीवणिक्पुत्रःपुत्रार्थंगुर्विणीतथा धर्मकामार्थसंसिद्ध्यैलोकःकन्यावरार्थिनी यष्टुकामोद्विजवरोरोगीश्रेयोर्थमेवच चिरप्रवासितेप्रेष्टवालेदंतनिपीडिते कथयस्वप्रसादेनसर्वकामप्रदंव्रतं श्रीकृष्णउवाच शृणुष्वेतन्महाराज व्रतानामुत्तमंव्रतं एतेष्वन्येषुकर्त्तव्यमाशाव्रतमिदंतथा यस्माद्यस्यभवेदार्त्तिःकार्यंतेनतदाव्रतं शुक्लपक्षेदशम्यांतुस्नात्वासंपूज्यदेवताः नक्तमाशास्तुपूज्यावैपुष्पालक्तकचंदनैः गृहांगणेलेखयित्वायवैःपिष्टातकेनवा स्त्रीरूपअधिदैवस्यशस्त्रवाहनचिह्निताः अधिदैवस्यतत्तद्दिक्पालस्येंद्रादेस्तत्तच्छस्त्रैर्वाहनैश्चचिह्नितालेखयित्वेत्यर्थः दत्त्वाघृतान्ननैवेद्यंपृथग्दीपांश्चदापयेत् फलानिकालजातानिततः कार्यंनिवेदयेत् आशाःस्वाशाः सदासंतुसिद्ध्यंतांमेमनोरथाः भवतीनांप्रसादेनसदाकल्याणमस्त्विति ए

वंसंपूज्यविधिवद्दत्त्वाविप्रायदक्षिणां अनेनक्रमयोगेनमासिमासिसमाचरेत् वर्षमेकंकुरुश्रेष्ठ ततः पश्चात्समुद्यपेत् अर्वाक्संवत्सरस्यापि रौप्याः पिष्टातकेनवा ज्ञातिवंधुजनैःसार्द्धं स्नातः सम्यगलंकृतः पूज्याः प्राक्क्रमयोगेनमंत्रैरेभिर्गृहांगणे त्वयिसान्निहितःशक्रःसुरासुरनमस्कृतः पूर्वात्वेभुवनस्यास्यऐंद्रिदिग्देवते नमः अग्नेःपरिग्रहादाशेत्वमाग्नेयीतिपठ्यसे तेजोरूपापराशक्तिराग्नेयीवरदाभव धर्मराजंसमाश्रित्यलोकान्संयमयत्यसौ तेनसंयमनीचासियाम्येमत्कामदाभव खड्गहस्तोतिविकृतोनिर्ऋतिस्वांसमाश्रितःतेननैर्ऋतिनामासित्वमाशांपूरयस्वमे त्वय्यास्तेभुवनाधारोवरुणोयादसांपतिः कामार्थमथधर्मार्थंवारुणिप्रवणाभव अधिष्ठितासियस्मात्त्वंवायुनाजगदायुना वायव्येत्वमतःशांतिं नित्यंयच्छममालये धनदेनाधिष्ठितावैश्रस्यातास्त्वमिहोत्तरा निरुत्तराभवास्मासुदत्त्वासद्योमनोरथम् ऐशानिजगदेशानिशंभुनात्वमलंकृता पूरयस्वाशुमेदेविवांछितानिनमोनमः भुजंगाष्टकुलेनत्वंसेवितासियतोह्यधः नागांगनाभिः सहिताहिताःभवममाद्यवै सर्वलोकोपरिगतासर्वदात्वंशिवायच सनकाद्यैःपरिवृता व्राह्मिमांपाहिसर्वदा नक्षत्राणिचसर्वाणिग्रहास्तारागणास्तथा नक्षत्रमातरोयाश्चभूतप्रेतपिशाचकाः सर्वेममेष्टसिद्ध्यर्थंभवंतुप्रवणाःसदा एभिर्मंत्रैः समभ्यर्च्यपुष्पधूपादिनातथा वासोभिरभिसंछाद्यफलानिविनिवेदयेत् ततोवंदिनिनादेनगीतवादित्रमंगलैः नृत्यंतीभिर्वरस्त्रीभिर्जागरेणनिशांनयेत् कुंकुमाक्षततांवूलदानमानादिभिःसुखं प्रभातेवेदविदुषेव्राह्मणायनिवेदयेत् अनेनविधिनासर्वंक्षमाप्यप्रणिपत्यच भुंजीतमित्रसहितःसुहृद्बंधुजनेनच यएवंकुरुतेपार्थदशमीव्रतमादरात् सर्वान्कामानवाप्नोति मनसोभिमता न्नरः स्त्रीभिर्विशेषतःकार्य्यंव्रतमेतद्युधिष्ठिर प्राणिवर्गेयतो नार्यःश्रद्धाकामपरायणाः धन्यंयशस्यमायुष्यंसर्वकामफलप्रदं कथितंतेमहाराजमयाव्रतमुनुत्तमं येमान

वामनुजपुंगवकामकामाः सं
मलंवहुनोदितेन ॥ इतिभवि
फाल्गुनशुक्लाआमर्दक्येकादशनि
श्यांप्रातरर्चयेत् पुंडरीकाक्षम
विधानेनामलक्याःपूजनादिकं
मांधातोवाच आमर्दकीव्रतंब्रूं
अत्रैवोदाहरंतीमामितिहासंपुरात
ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चसमि
न्पुरेजनः तत्रसोमान्वयोराजा
लःश्रीमान्सर्वशास्त्रार्थपारगः सु
ति विष्णुभक्तानराराजन्राजा
नाम्नाह्यामर्दकीशुभा शुक्लामेका
प्यजनाः सर्वे सवालस्थविरान्नृप
र्जले ययौदेवालयंराजापौराश्च
व्यगंधाधिवासितं दीपमाला
स्मिन्नेवकालेतुव्याधस्तत्रसमागत

२९।३५

५०।२८

११५।१२
२९।३६
२१।३०
११ १५

४८।३३

75

चैत्रवद्य ५ [illegible]
४८।३३ [illegible]

जन्मचक्रम्



स्यल
क्रम्
द्वाद
त्वा
राणे
॥
वतं
स्मि
तव
स्य
पक्षे
मवा
र्वैहि
दि-
एत
क्तो

वामनुजपुंगवकामकामाः संपूजय
मलंवहुनोदितेन ॥ इतिभविष्यो
फाल्गुनशुक्लाआमर्दक्येकादशीनारदी
श्यांप्रातरर्चयेत् पुंडरीकाक्षमतुलैर
विधानेनामलक्याःपूजनादिकं एक
मांधातोवाच आमर्दकीव्रतंब्रूहिमह
अत्रैवोदाहरंतीमामितिहासंपुरातनं य
ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चसमधिष्ठित
न्पुरेजनः तत्रसोमान्वयोराजाविख्
लःश्रीमान्सर्वशास्त्रार्थपारगः सुभिक्ष
ति विष्णुभक्तानराराजन्राजाचैववि
नाम्नाह्यामर्दकीशुभा शुक्लामेकादशीं
प्यजनाः सर्वे सवालस्थविरानृप नि
जले ययौदेवालयंराजापौराश्चास्यपु
व्यगंधाधिवासितं दीपमालासमायु
स्मिन्नेवकालेतुव्याधस्तत्रसमागतः

76।

इस्तहार

सब लोगों को विदित हो कि ज्योतिषी परमानन्दजी श्रीकाशीजीसे सूर्य सिद्धान्तादि गणित और फलित ग्रन्थों को पढ़कर आए हैं जो प्रश्न और जन्मपत्र वर्षफलादिकोंका फलादेश बहुत उमदा बतलासक्ते हैं और जन्मपत्र वर्षफल को पांच सौ(५००) रुपया तक की बना सक्ते हैं और पुत्रादि के होने का उपाय शास्त्र प्रमाण से उमदा बतला सक्ते हैं और जो विद्यार्थी ज्योतिष के पढ़ने की इच्छा करते हों निम्नलिखित पते पर कृपा करें॥ पता बाजार

रघुनाथजी के मंदिर में
निहालदासजी के ठाकुरद्वारे

सं. २९५ २
वार शनि.
तिथि ५ चैत्र

ह. ज्यो. परमानन्द पास्ते जैनेका

اشتہار

عوام الناس کو واضح ہووے۔ کہ جوتشی پرمانند صاحب سری کاشی جیؤ سے علوم جوتش
کے سورج سدھانت وغیرہ گنت اور پھل گرنتھونکو پڑھکر چند ایام سے واپس تشریف لائے ہین جو
کہ پرشن و جنم پتر و برکھ پھل کے پھل کو بہت عمدہ بتلا سکتے ہین اور جنم پتری و برکھ پھل
حسب گنت عمدہ بنہایت پانچسو روپیہ تک کے بنا سکتے ہین۔ اور لڑکا وغیرہ کے ہونیکا اوپاے
شاستر کے قاعدہ سے بہت عمدہ بتلا سکتے ہین۔ اور جو ودیارتھی علوم جوتش کے پڑھنے
کا شوق رکھتے ہین۔ قدم رنجہ فرماوین بتاریخ ۵ ماہ چیتر سمت ۱۹۵۱

پتہ شہر بازار

۹۶/۱۶

المشتہر پنڈت پرمانند جوتشی

2

वामनुजपुंगवकामकामाः संपूजयंतिदशमीषुसदादशांशं तेषांविशेषनिहितःहृदयेभिकामानाशाःफलंत्वलमलंवहुनोदितेन ॥ इतिभविष्योत्तरोक्तमाशादशमीव्रतं अस्याश्चाश्विनशुक्लदशम्यांपूजामात्रमेवोक्तम् फाल्गुनशुक्लाआमर्दक्येकादशीनारदीये फाल्गुनस्यासितेपक्षेएकादश्यांद्विजोत्तम उपोष्यमर्दकींभक्त्याद्वादश्यांप्रातरर्चयेत् पुंडरीकाक्षमतुलैरुपचारैस्ततोद्विजान् भोजयित्वावरान्नेनदद्यात्तेभ्यश्चदक्षिणां एवंकृत्वा विधानेनामलक्याःपूजनादिकं एकादश्यामंत्यसितेव्रजेद्विष्णोःपरंपदमिति अस्याःकथा ब्रह्मांडपुराणे मांधातोवाच आमर्दकीव्रतंब्रूहिमहापातकनाशनं सरहस्यंमुनिश्रेष्ठगोसहस्रफलप्रदं ॥ वसिष्ठउवाच ॥ अत्रैवोदाहरंतीममितिहासंपुरातनं यथा मुक्तिमनुप्राप्तो व्याधोहिंसापरायणः वैदिशंनामनगरंहृष्टपुष्टजनान्वितं ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चसमधिष्ठितं रुचिरंराजशार्दूलब्रह्मघोषेणनादितं ननास्तिकोनदुर्वृत्तःकश्चित्तस्मिन्पुरेजनः तत्रसोमान्वयोराजाविख्यातश्चयथाशशी नाम्नाचैत्ररथोनामधर्मात्मासत्यसंगरः नागायुतवलःश्रीमान्सर्वशास्त्रार्थपारगः सुभिक्षंक्षेममारोग्यंतस्मिन्पुरवरेभवत् साधुसेवारताःसर्वेतस्मिन्राज्यंप्रशास्यति विष्णुभक्तानराराजन्राजाचैवविशेषतः ततःकालेनसंप्राप्तैकादशीपुण्यवर्द्धिनी फाल्गुनस्यासितेपक्षे नाम्नाह्यामर्दकीशुभा शुक्लामेकादशींराजन्शुक्लांनचजहुर्जनाः सर्वधर्मान्परित्यज्यहरिभक्तिपरायणाः तामवाप्यजनाः सर्वे सवालस्थविरान्नृप नियमंचोपवासंचभक्त्याचक्रुर्मुदान्विताः महाफलंव्रतंज्ञात्वास्नानंचक्रुर्वहिर्जले ययौदेवालयंराजापौराश्चास्यमुदान्विताः पूर्णकुंभमवस्थाप्यछत्रोपानहमेवच पंचरत्नसमायुक्तंदिव्यगंधाधिवासितं दीपमालासमायुक्तमग्निहोत्रसमन्वितं तत्रजागरणंचक्रुर्जनाः सर्वस्वशक्तितः एतस्मिन्नेवकालेतुव्याधस्तत्रसमागतः क्षुधाश्रमपरिक्षीणो भयार्तोनिःश्वसन्मुहुः संप्राप्तोमलसंपृक्तो

महाभारेणपीडितः कुटुंवार्थेजीवघातीसर्वधर्मवहिष्कृतः जागरंतत्रसोपश्यदामर्दक्याःक्षुधान्वितः दीपमालाकुलंदृष्ट्वातत्रैवसांनिवेशितः किमेतदितिसंचित्यप्राप्तोविस्मयमात्रतां ददर्शकुंभेतत्रैवदेवंदामोदरंतथा ददर्शामलकीवृक्षंतदधस्थांचदीपकां वैष्णवींचकथांरम्यांपठतांशृण्वतांनृणां एकादश्याश्चमाहात्म्यंशुश्रावक्षुधितोपिसन् जाग्रतस्तस्यसारात्रिर्गतासर्वापितत्रवै ततःप्रभातसमयेविविशुर्नगरंजनाः व्याधोपिगृहमागत्यवुभुजेप्रीतमानसः ततःकालेनमहताव्याधःपंचत्वमागतः एकादश्याःप्रभावेनरात्रिजागरणस्यच राज्यंप्रपेदेसुमहच्चतुरंगवलान्वितं जयंतीनामनगरीतस्याराजाबृहद्रथः तस्यचैवसुतोजज्ञेनाम्नासत्यरथोवली तेजसादित्यसंकाशःकांत्याचंद्रसमःसतुचतुरंगवलोपेतोधनधान्यसमन्वितः सहस्राणिदशप्रोक्तमयुतंगणकोत्तमैः तस्यराज्यंवभूवाथइतिभीतिविवर्जितं पराक्रमेशक्रसमःक्षमयापृथिवीसमः धर्मात्मासत्यवादीसाविष्णुभक्तिपरायणः एकदासगयांयातोदैवान्मार्गपरिच्युतः नदिनंनैवचदिशोविवेदसमहीपतिः अथोपश्यत्परिश्रांतोन्यग्रोधंशाखिनांवरं तस्यछायांसमाश्रित्यसुष्वापसमहीपतिः उपधानीकृतभुजःसोत्रैकाक्यजनेवने अत्रांतरेम्लेच्छगणःपर्वतांतरवासकृत् आययौतत्रयत्रासीद्राजापरवलार्दनः धृतवैरास्तुतेसर्वेम्लेच्छादैवोपपादिताःपरिवार्य्यनृपंतस्थुःसमंताद्धृतहेतयः हन्यतांहन्यतामेषराजास्माकंदिरोधकृत् अनेननानिहिताःपूर्वैपितरोभ्रातरःसुताःपौत्रानोभागिनेयाश्चमातुलाश्चनिपातिताः निष्कासिताश्चस्वस्थानात्प्रापिताश्चदिशोदश एवमुक्त्वातुतेसर्वेराजानहंतुमुद्यताः पाशैश्चपट्टिशैःखड्गैर्वाणैर्धनुषिसंधितैः मुक्तानितैःशस्त्रशतानिभूरिनवैशरीरेप्रविशंतितस्य तेचापिसर्वेहतसत्वसंघा म्लेच्छावभूवुर्धृतदारुसंघाःयदापिचालितुंतन्नशक्तास्तेदुराशयाः शस्त्राणिकुंठतांजग्मुस्तीक्ष्णान्यपिभृशंतदा दीनावभूवुस्तेसर्वेयेतंहंतुंसमुद्यताः एतस्मिन्नेवकालेतुतस्यराज्ञःशरीरतः निर्गताकृत्यकातत्रसर्वा

भरणभूषिताः दिव्यगंधसमायुक्ताविमलांवरधारिणी दिव्यमाल्यधराचारुभृकुटीकुटिलानना सविस्फुलिंगनेत्राभ्यांवमंतीपावकंमुहुः चक्रवेत्रधराचैवकालरात्रिरिवापरा अभ्यधावतसंक्रुद्धाम्लेच्छानत्यंतदुःसहा निहताश्च तयाम्लेच्छास्तेविकर्मपरायणाः ततोराजाविवुद्धःसंन्दृष्ट्वातन्महदद्भुतं हतान्म्लेच्छगणान्दृष्ट्वासराजासमचिंतयत इहकेनहताम्लेच्छाअत्यंतंवैरिणोमम केनेदंचकृतंकर्ममहदस्मद्धितार्थिना एतस्मिन्नेवकालेतुवागुवाचाशरीरिणी शरणंकेशवादन्योनास्तिकोपिमहीयते वनेरणेशत्रुजलाग्निमध्येमहार्णवेपर्वतमस्तकेवा सुप्तंप्रमत्तंविषमास्थितंवासपातिभक्तंखलुशाङ्र्गधन्वा इतिश्रुत्वासकुशलीवनादेत्यनिजंपुरं राज्यंचकारराजेंद्रः सभायामुदितोवसन् वसिष्ठउवाच आमर्दकीव्रतंराजन्येकुर्वंतिनरोत्तमाः तेयांतिवैष्णवंलोकंनात्रकार्य्याविचारणा. माहात्म्यश्रवणादस्याःसर्वपापैःप्रमुच्यते चकंपूजयेद्भक्त्यावसुद्रविणभूषणैः ॥ इतिब्रह्मांडपुराणोक्ताफाल्गुनशुक्लामर्दक्यैकादशीव्रतकथा अथास्यामेवगोविंदद्वादशीव्रतंभविष्योत्तरे श्रीकृष्णउवाच फाल्गुनामलपक्षस्यएकादश्यामुपोषितः नरोवायदिवानारीसमभ्यर्च्यजगत्पतिं हरेर्नामजपेद्भक्त्याभावयुक्तोयुधिष्ठिरः संतिष्ठन्प्रचलंश्चैवहरिनामानुकीर्त्तयेत् ततोन्यदिवसेप्राप्तेद्वादश्यांनियतोहरिं स्नात्वासम्यक्समभ्यर्च्यदत्त्वाविप्रायदक्षिणां हरिमुद्दिश्यचैवाग्नौघृतहोमकृतक्रियः प्रणिपत्यजगन्नाथमितिवाणीमुदीरयेत् पातालसंस्थावसुधायं. प्रसाद्यमनोरथान् यमभ्यर्च्यादितिः प्राप्ता सकलान्स्वमनोरथान् सवासुदेवःसकलान्प्रददातुमनोरथान्. एवमभ्यर्च्यपूजांचनिष्पाद्यचहरेःस्वयं भुंजीतप्रयतःसम्यग्भविष्यंपाडुनंदन फाल्गुनंचैत्रवैशाखौज्येष्ठमासंचसत्तम चतुर्भिःपारणंमासैरेभिर्निष्पादितंभवेत् रक्तपुष्पैस्तुचतुरोमासान्कुर्वीतचार्चनं प्रददेच्चजलंप्राश्यगोशृंगक्षालनंजलं हविष्यान्नंचनैवेद्यमात्मनश्चापिभोजनं ततश्चश्रूयतांपार्थआषाढादिषुयाक्रिया जातीपुष्पानिधूप

श्चशक्रसर्जरसोद्भवः प्राश्यंदर्भोदकंचैवशाल्यन्नंश्चनिवेदयेत् स्वयंतदेवचाश्नीयात्शेषंपूर्ववदाचरेन् कार्त्तिकादिषुमासेषुगोमूत्रंकायशोधनं सुगंधंचेच्छयाधूपंपूजाभृंगारकेणच कासारंचैत्रनैवेद्यंतदेवाश्नीतचस्वयं प्रति. मासंचविप्रायदातव्यादक्षिणातथा प्रीणनंचेच्छयाविष्णोःपारणेपारणंगते यथाशक्त्यायथाप्रीत्यावित्तशाठ्यं. विवर्जयेत् सद्भावेनैवगोविंदः पूजितः प्रीयतेयतः पारणांतेयथाशक्त्य स्नापितः पूजितोहरिः प्रीणितश्चेप्सितान्कामन्दद्यादव्याहतान्नृप वर्षांतेप्रतिमांविष्णोः कारयित्वासुशोभनां स्वर्णेकेनयथाशक्त्याशंखशाङ्र्गविभूषितां पुष्पवस्त्रयुगच्छन्नांब्राह्मणायनिवेदयेत् द्वादशात्रप्रदातव्याःकुंभाःसान्नजलान्विताः द्वादशब्राह्मणांस्तत्रभोजयित्वाक्षमापयेत् छत्रोपानद्युगैःसार्द्धंदक्षिणाभिश्चभारत एषापापहराप्रोक्ताद्वादशीफलमिच्छतां यथाभिलषितान्कामान्ददातिनृपसत्तम पूरयित्वाखिलान्कामान्यतश्चैवमनोरथान् मनोरथद्वादशीयंततोलोकेषुविश्रुता उपोष्यैतांत्रिभुवनंलब्धमिंद्रेणवैपुरा आदित्यश्चैवशितान्पुत्रान्धनमौशनसातथा धौम्येनाध्ययनंश्रेष्ठमन्यैश्चाभिमतंफल राजर्षिभिस्तथाविप्रैःस्त्रीविट्शूद्रैश्चभूतले यंयंकाममभिध्यायव्रतमेतदुपोषितं तत्तदाप्नोतिसंदिग्धंविष्णोराराधनाद्यतिः अपुत्रोलभतेपुत्रमधनोलभतेधनं रोगाभिभूतश्चारोग्यं कन्याप्राप्नोति सत्पतिं समागमंप्रवसितैरुपोष्यैतामवाप्यते सर्वान्कामानवाप्नोति नरस्त्वग्र्यंचमोदते नापुत्रोनाधनोनेष्टवियोगीनचनिर्गुणः उपोष्यैतद्व्रतंमर्त्यःस्त्रीशूद्रोवापिजायते सूर्यलोकेसहस्राणिवर्षाणामयुतानिच भोगानभिमतान्भुक्त्वासचतत्रयथेच्छया इहपुण्यवतान्दृणांधनिनांसाधुशीलिनां गृहेप्रजापतेराजन्सर्ववाधाविवर्जितः न द्वादशीमुपवसंतिमनोरथाख्यांनैवार्चयंतिपुरुषोत्तममादिदेवं गोब्राह्मणान्ननमयंतिनपूजयंतियेतेमनोभिलषितं कथमाप्नुवंति ॥ इतिभविष्योत्तरोक्तमनोरथद्वादशीव्रतं अत्रैवगोविंदद्वादशीव्रतं नारदीये अतेसितायां

द्वादश्यांसौवर्णींप्रतिमांहरेः अभ्यर्च्यगंधपुष्पाद्यैर्दद्याद्वेदविदेतथा द्विषङ्कसंख्यान्विप्रांश्चभोजयित्वासदक्षिणां दत्त्वाविसर्जयेत्पश्चात्स्वयंभुजीतवाग्यतः फाल्गुनेद्वादशीशुक्लायापुष्पार्क्षेणसंयुता गोविंदद्वादशीनामसास्याद्गोविंदभक्तिदा तस्यामुपोष्यविधिनाभगवंतंप्रपूजयेत् लिखितःपापनाशिन्याविधिर्योपिहिसस्मृतः तन्माहात्म्यंब्रह्मपुराणे फाल्गुनामलपक्षेतुपुष्यर्क्षेद्वादशीयदि गोविंदद्वादशीनाममहापातकनाशिनी तस्यामुपोष्यविधिवन्नरःसक्षीणकल्मषः प्राप्नोत्यनुत्तमांसिद्धिंपुनरावृत्तिदुर्लभामितिटीकायांद्वादशीचेतिद्वादश्येदकादश्योरभेदाभिप्रायेण किंवाद्वादश्यापुष्यनक्षत्रेसातितस्यामेवोपवासापेक्षयेति अथैकादश्यांकर्त्तव्यंभविष्ये फाल्गुनेमासिशुक्लायामेकादश्यांजनार्दनःवसत्यामलकीवृक्षेलक्ष्म्यासहजगत्पतिः तत्रसंपूज्यदेवेशंशक्त्याकुर्य्यात्प्रदक्षिणं- उपोष्यविधिवत्कल्पंविष्णुलोकेमहीयत इतिगोविंदद्वादशीव्रतंहरिभक्तिविलासे फाल्गुनेद्वादशीशुक्लाया पुष्यर्क्षेणसंयुता गोविंदद्वादशीनामसास्याद्गोविंदभक्तिदा तस्यामुपोष्यविधिनाभगवंतंप्रपूजयेत् लिखितः पापनाशिन्याविधिर्योपिहिस्मृतः ॥ अथनृसिंहपरिचर्य्योक्तमां मर्दकीकृत्यमियमेवपापनाशिनीद्वादशी तत्रव्रतग्रहणमंत्रः द्वादश्यांतुनिराहारःस्थित्वाहमपरेहनि भोक्ष्यामिजामदग्न्येशशरणंमेभवाच्युत ततआमलकीमूलेसामान्यकलशस्थापनं पूर्वोक्तप्रकारेणस्थापिते कलशेताम्रेवैणवेवालाजान्वितेपात्रषोडशमाष तदर्धतदर्धनिर्मितंसौवर्णंपरशुरामं क्षत्रांतकरणंघोरमुद्वहन्परशुंकरे जामदग्न्यः प्रकर्तव्योरामोरोषारुणेक्षण इतिध्यात्वा षोडशोपचारपूजाक्रमेण पंचामृतस्नापितमुपवेश्यवस्त्रयुगंछत्रोपानद्युगंसमर्प्य श्वेतचंदनेनानुलिप्यतुलसीपुष्पैरभ्यर्च्यावयवपूजांकुर्य्यात् पादयोर्विशोकायनमःजान्वोःसर्वरूपिणेनमः ऊर्वोर्हयग्रीवायनमः वाह्वोर्हेमांगदायनमः उरसिवैकुंठायनमः चक्षुषोर्ज्योतिरूपिणे नासिकायांशोकनाशनाय- लला

टेवामनायनमः भ्रुवोरामाय. शिरसि सर्वात्मनेनमः स्वनाम्ना आयुधानिसंपूज्य धूपदीपादिदत्त्वार्घ्यं दद्यात् अथार्घ्यमंत्रः नमस्तेदेवदेवेशजामदग्न्यनमोस्तुते गृहाणार्घ्यंमयादत्तंमालत्यासहितप्रभो ॥ १ ॥ ततःपरशुरामंप्रार्थयेत् जादग्न्यनमस्तेस्तुक्षत्रियांतकरायच सर्वाणियानिपापानिसप्तजन्मकृतान्यपि क्षयं यांतुममैवाद्यत्वत्प्रसादाच्चभार्गव वाचिकंमानसंपापंज्ञानतोज्ञानतोपिवा आयुर्यशस्तथारोग्यंधनंधान्यंचसंपदाः सौभाग्यंतवभक्तस्यसंतानंविपुलंभवेत् सर्वान्कामानवाप्नोतुदिविसौख्यंनिरंतरं अंतेचास्तुममेशानभक्तिस्त्वच्चरणांवुजेजनार्दनहृषीकेशलक्ष्मीनाथसुरार्चित रामराममहावाहोकार्त्तवीर्यविनाशन एतत्सर्वंमयादत्तंज्ञानज्ञेयतवाच्युत मामुद्धरजगन्नाथकृपांकृत्वाममोपरि. अथधात्रीमभिषिंचेत् तत्रमंत्रः॥ पितापितामहश्चान्येअपुत्रायेचगोत्रिणः वृक्षयोनिंगतायेचयेचकीटत्वमागताः रौरवेनरकेयेचमहारौरवसंज्ञके वियोनिंचगतायेचयेचब्रह्मांडमध्यगाः पिशाचत्वंगतायेचयेचप्रेतत्वमागताः तेपिवंतुमयादत्तंधात्रीमूलेसदापयः सर्वेतृप्तिमायांतुधात्रीमूलनिषेचनादिति ततोऽष्टोत्तरशतकृत्वोवाष्टाविंशतिकृत्वो वामलकींप्रदक्षिणीकृत्य हरिंनीराज्यजागरणंकृत्वा नित्यकर्मनिर्वर्त्य गुरवेदेवंसपरिकरं निवेद्य ब्राह्मणान्संभोज्यस्वयंवंधुभिः सममश्नीयात् ॥ इतिब्रह्मपुराणे आमर्दकीपापनाशिनीद्वादशीव्रतम् ॥ अथास्यामेवफाल्गुनशुक्लद्वादश्यां नृसिंहद्वादशीव्रतं वाराहे ॥ दुर्वासाउवाच ॥ तद्वच्चफाल्गुनेमासिशुक्लपक्षेतुद्वादशी उपोष्याप्रोक्तविधिनाहरिमाराधयेद्बुधः नरसिंहायपादौतुगोविंदायोदरंतथा कटिविश्वभुजेपूज्यअनिरुद्धेःपुरस्तथा कंठंचशितिकंठाय पिनाकेशायवैशिरः असुरध्वंसनायेतिचक्रंतोयात्मनेतथा शंखमित्येवसंपूज्यगंधपुष्पफलैस्तथा तदग्रेस्थाप्य तुघटंसितवस्त्रयुगान्वितं तस्योपरिनृसिंहंतुसौवर्णंताम्रभाजने सौवर्णंशक्तितः कृत्वादारुवंशमयेपिवा रत्नगर्भे

घटंस्थाप्यतत्संपूज्यविधानतः द्वादश्यांवेदविदुषेब्राह्मणायनिवेदयेत् गोविंदनृसिंहरूपीतिमंत्रः एवंकृतेफलंप्राप्तंयत्पुरापार्थिवेनतु वत्सनाम्नातुतत्तेहंप्रवक्ष्यामिमहामुने तस्यव्रतांतेभगवान्नरसिंहस्तुतोषच चक्रंप्रादाच्चशत्रूणांविध्वंसनकरंमृधे तेनास्त्रेणस्वकंराज्यंजितवान्नृपसत्तमः राज्येस्थित्वाश्वमेधानांसहस्रमकरोद्विभुः अंतेवब्रह्मलोकाख्यंपदमागाच्चसत्तमः एषाधन्यापापहराद्वादशीभवतोमुने कथितेयंप्रयत्नेनश्रुत्वाकुरुयथेच्छसि इतिवाराहेधरणीव्रतेषुफाल्गुनशुक्लैकादश्यांनरसिंहद्वादशीव्रतं अथफाल्गुनशुक्लासुकृतद्वादशीव्रतं भविष्योत्तरे युधिष्ठिरउवाच यन्नतायायवैपुंसांभवत्यामुष्मिकंकृतंतापाययच्चभवतितदाचक्ष्वयदूत्तम उपवासप्रभावंचकृष्णाराधनकांक्षिणः कथयेहमहावाहोनचतृप्यामिजल्पिते श्रीकृष्णउवाच श्रूयतांपार्थयत्पृष्टःकौतुकाद्भवतायथा आमुष्मिकंनतापाययच्चतापायजायते उपोषितप्रभावेणकृष्णाराधनकांक्षिणाम् कथयामियथापृष्टं पूर्वमेवनरोत्तमः वैदिशंनामनगरंप्रख्यातंनृपसत्तम तत्रवैश्योभवत्पूर्वंशूरभद्रइतिश्रुतः भार्ययामातृदुहितृपुत्रपौत्रसमन्वितः प्रभूतभृत्यवर्गैश्चवहुव्यापारकारकः पुत्रपौत्रादिभरणव्यासक्तमतिरेवच परलोकंप्रतिमतिस्तस्यनासीत्कथंचन चकारानुदिनंसोथन्याय्यान्याय्यंधनार्जनं सर्वथान्यत्रनिःस्नेहपरस्वेष्वतितर्षितः नजुहोत्युदितेकालेनददात्यतितृष्णया वभूवचोद्यमस्तस्यपुत्रादिभरणेपरः नित्यनैमित्तिकानांचहानिंचक्रेसकर्मणां तृष्णाभिभूतो राजेंद्रस्ववर्गभरणादृतः कालेनगच्छतासोथमृतोवेत्रवतीतटे यातनादेहभृत्प्रेतोग्रीष्मकालेभवन्नृप तंददर्शमहाभागोदिव्यज्ञानसमन्वितः वेदवेदांगविद्विद्वान्विपीतोनामवैद्विजः भास्करस्यांशुभिर्दीप्तैर्दह्यंतमतिदारुणैः प्रतप्तवालुकामध्येतृषयार्तिनिपीडितः क्षुधार्त्तंशुष्ककंठास्यमूर्द्धोन्मीलितलोचनं विक्रांगाजिनमंगेषुविस्फोटैः सर्वतोवृतं निश्वासायासखेदेनवेपंतंचासमोदरं निजेनकर्मणावद्धमसमर्थसमर्थनं तंतादृशमथोदृष्ट्वाजद्भेयोमहामुनिः

विपीतः प्राहराजेंद्र कारुण्यार्थमिदंवचः जानन्नपियथाप्राप्तंतदनुष्ठानजंफलं जंतोस्तस्योपकारायसर्वतोऽभाव
यन्निव विपीतउवाच अधः सूर्यांशुभिस्तप्तै र्वहुभिः पथिपांशुभिः उपर्य्यर्ककरैस्तीव्रैस्तृषाचांतर्निपीडितं अ
न्यैस्तथाविधैघोरै रविपद्मैः सुदारुणैः कथयेहयथातन्वाएकाकीदह्यसेकथं तस्यैतद्वचनंश्रुत्वाविपीतस्यसवेदनं
ब्र०र० वेदनार्तउवाचेदं कृत्वादुःखस्यनंदकं शीरभद्रउवाच अशाश्वतेशाश्वतधीस्तेनदह्यामिदुर्मतिः धनापणगृह
फा० क्षेत्रपुत्रदारहितेरतः नात्मनोहंहितारंभीतेनदह्यामिदुर्मतिः १ इदंकरिष्याम्यपरंत्विदंकृत्वात्विदंपुनः इतीच्छा
॥४०॥ शतमारुह्यतेनद. २ शीतोष्णवर्षादिभवंलोभात्सोढुंमयाशुभं तदेवाहिनधर्मार्थंतेनद- ३ जुहोमियादितन्नास्तिददा
मियादिसीदति कुटुंवमातिमूढोहंतेनद. ४ पितृदेवमनुष्याणामदत्वापोसिताहिमे तेनापिकेपिवर्त्ततेदह्यामेकोत्रदु
र्मतिः ५ पुत्रक्षेत्रकलत्रेषुममत्वाहतचेतसा वहुसाधुकृतंकर्मतेनद. ॥ ६ ॥ मृतमपिधर्मस्तास्मिन्नन्यायोपार्जि
तंमयानूनमन्येपिवर्त्ततेदह्याम्येकोत्रदुर्मतिः ॥ ७ ॥ नमयापूजितागेहान्निर्गत्वाद्विजसत्तमाः स्ववर्गहितकामेनते
नदह्यामिदुर्मतिः यन्मेनपूजितादेवाः कुटुंवंपोषितंपरं एकाकीतेनदह्यामियेपुष्टास्तेन्यतोगताः ॥ ८ ॥ नित्यं
नैमित्तिकंकर्मकृतंयेषांनमेकृतं एकाकीतेनदह्यामितैर्मर्त्यैः क्वापिरम्यत यन्मेपरिजनस्यार्थेकृतंकर्मफलंशुभं
एकाकीतेनदह्यामिगतास्तेफलभागिनः दारापुत्राश्चभृत्याश्चपापवुद्ध्यामयाभृताः एकाकीतेनदह्यामिगतास्ते-
फलभागिनः पुत्रदारादिभृत्यर्थेमयायापार्थसंचयाः कृतास्तेनात्रदह्यामिगतास्तेफलभागिनः कृतंपापंमया
मुक्तमन्यैः सत्कर्मसंचितं दह्यामेकोहमत्यंतंगतास्तेफलभागिनः यन्ममत्वाभिभूतेनमयापापमपार्जितं नद-
त्तंयस्यकस्यापितेननतप्येहमाकुलः अंतर्दुःखेनदग्धोहंवहिर्दह्यामिभानुना नांतर्दुःखंनभानुर्मेपापपंकांद्विधाछि-
नत् कुतस्तस्मात्समुद्धारंपश्याम्यसुखसागरात् तत्तयापादावितुमामाप्नुयान्मुनिसत्तमः विपीतउवाच अल्प-

कालिकमुद्धारंतवपश्याम्यसंशयं प्रक्षीणंपापमेतत्तेसुकृतंचास्तितेपरं अतीतेदशमेजन्मअच्युताराधनेच्छया सुकृताद्द्विपदांभद्रद्वादशीत्वमुपोषितः सर्वंतस्याःप्रभावेनपापमत्यंतदुर्जयं अल्पैरहोभिःसंक्षीणमामपात्रेयथाजलम् गतंपापमयंतस्याःप्रभावोत्यंतदुर्लभः नराःपापस्यकुरुतेजयंसुकृतकर्मणा सत्कर्मजयदाह्येषाततोवै द्वादशीस्मृता याचेतद्वेदनार्तेनभवतापरिवेदितम् तत्तथानात्रसंदेहोममतापापहेतुकी पापमत्रकृतंभद्रप्रेत्यतापायजायते आह्लादयेत्तथापुण्यमिहपुण्यकृतांनृणां सौरभद्रंसमाश्वास्यययावितिमहामुनिः सोप्यल्पेनापिकालेनततोमोक्षमवाप्तवान् उपवासप्रभावश्चकथितस्तेनरोत्तम येनाल्पैरेवदिवसैर्भूरिपापंगतंक्षयं तस्मा न्नरेणपुण्याययतितव्यंनपातके उपवासश्चकर्तव्यःसदैवात्महितैषिणा ॥ युधिष्ठिरउवाच ॥ अहो तिकृतपापानांविपाकोनरकस्थितैः पुरुषैर्भुज्यतेशश्वत्तन्मोक्षंवदसत्तम श्रीकृष्णउवाच जयेयतेतपुरुषः सदा सुकृतकर्मणः जयायद्वादशीशस्तासदासुकृतकर्मणां फाल्गुनामलपक्षस्यएकादश्यामुपोषितः द्वादश्यांतुनृपश्रेष्ठपूजयेन्मधुसूदनं एकादश्यांसमुत्तिष्ठन्विष्णोर्नामानुकीर्त्तनात् पूजायांवासुदेवस्यभुंजतिसुसमाहितः कामंक्रोधं चलोभंचदंभमोहंचवर्जयेत् मानद्रोहादिदोषांश्चसर्वानात्ममदोद्भवान् भावयेद्विष्णुभक्तश्चसंसारासारतांतथा एवंभावितचित्तेनप्राणिनांहितमिच्छता नमोनारायणायेतिवाच्यंतुस्वपतानिशि तथैवकुर्य्याद्द्वादश्यांनाम्नश्चो च्चारणंहरेःसौवर्णताम्रपात्राणिमृण्मयान्यपिपांडव यवपात्राणिपूर्वंतुदद्यान्मासचतुष्टयं आषाढादिद्वितीयांतुपारण यन्महीपते तत्रापिघृतपात्राणिदद्याच्छ्रद्धासमन्वितः कार्त्तिकादिषुमासेषुमघांतेषुतथातिलान् दद्याद्विप्रायशक्त्यान्नप्रतिमासमुपोषितः नामत्रयमशेषेणमासिमासिदिनद्वयं तथैवोच्चारयेद्दद्यान्मासिमासियवादिकं प्रणम्यचहृषीकेशंकृतपूजःप्रसादयेत् विष्णोनमस्तेजगतःप्रसूतेश्रीवासुदेवायनमोनमस्ते नारायणत्वांप्रणतो.

स्म्यचिंत्यजयोस्तुतेशाश्वतपुण्यराशेः प्रसीदपुण्यंजयमस्तुविष्णोओंवासुदेवार्द्धिमुपैतिपुण्यं नारायणाद्भूमिमुपैतुपुण्यंप्रयातुचाशेषकुबुद्धिनाशं विष्णोपुण्योद्भवोमेस्तुवासुदेवास्तुमेशुभं नारायणास्तुमेधर्मोजहिपापमशेषतः अनेकजन्मजनितंवाल्ययौवनवार्द्धकैः पुण्यत्ववृद्धिमायातुयातुपापचयःक्षयं आकाशादिषुशव्दादौश्रोत्रादौमहदादिषु प्रकृतौपुरुषेचैवब्रह्मण्यपिचसप्रभुः यथैकएवधर्मात्मावासुदेवोव्यवस्थितः तेनसत्य नमेपापंनरकार्त्तिप्रदंक्षयं प्रयातुसुकृतस्यास्तुममानुदिवसंजयं पापस्यहानिःपुण्यस्यवृद्धिमेभ्योत्वनुत्तमंएवमुच्चार्य्यविप्रायप्रदद्यात्कथितंतव भुंजीतकृतकृत्यस्तुपारणेपारणेकृते पारणांतेतुदेवस्यप्रीणनंशक्तितोनृप कुर्वीताखिलपाखंडैरालापंचविवर्जयेत् एवंसंवत्सरस्यांतेकांचनींप्रतिमांहरेः पूजयित्वावस्त्रपुष्पैर्घृतपात्रेणसंयुतां तांगांसवत्सांविप्रायदद्याच्छ्रद्धासमन्वितः विष्णवेतंचयत्पूर्वंदेवान्पात्रंभवेद्यदि तस्मिन्नहनिदातव्यंभोजनंचानिवारितं इत्येषाकथितापुण्यासुकृतस्यजयावहा द्वादशींनरकपार्थयामुपोष्यनपश्यति नाग्रयोनचशस्त्राणिनचलोहमुखाः खगाः भवत्यपापश्चपुनर्नरकेगमनंकुतः नमोनारायणायेतिवासुदेवेतिकीर्त्तयेत् नयातिनरकंमर्त्यः संक्षीणाशेषपातकः तस्मात्पाषंडिसंसर्गमकर्वन्द्वादशीमिमां उपोष्यद्वादशीमेतांनरकंयातिनक्वचित्पापं क्षिणोतिसुकृतस्यकरोतिवृद्धिंप्रज्ञानयच्छतिनियच्छतिसर्वदोषान् याद्वादशीहसुकृतानिकृतानिधत्तेकस्मान्नतामुपवसंतिविमूढाचित्ताः ॥ इतिभविष्योत्तरेसुकृतद्वादशीव्रतं फाल्गुनशुक्लत्रयोदश्यांधनदव्रतारंभः नारदीये फाल्गुनेतुसितपक्षेत्रयोदश्यामुपोषितः नमस्कृत्यजगन्नाथंप्रारभेद्धनदव्रतं महाराजंयक्षपतिंगंधाद्यैरुपचारकैः लिखितंवर्णकैः पट्टेपूजयेद्भक्तिभावतः नरारूढंगदाहस्तंशिविकासंस्थितंतुवा एवंशुक्लत्रयोदश्यांप्रतिमासंद्विजोत्तमसंपूजयेत्सोपवासश्चैकभक्तोथवानरः ततोव्रतांतेसौवर्णसंपूज्यधननायकं निधायनिधिभिः सार्द्धं सौवर्णाभि

द्विजोत्तम उपचारैःषोडशभिःस्नानैःपंचामृतादिकैः नैवेद्यैर्विविधैर्भक्त्या पूजयेत्सुसमाहितः ततोधेनुमलंकृत्यवस्त्रस्रग्गंधभूषणैः सवत्सांदापयेद्विप्रसम्यग्वेदविदेशुभां संभोज्यविप्रान्मिष्टान्नैर्द्वादशाथत्रयोदश गुरुंतमर्च्य वस्त्राद्यैः प्रतिमांतांनिवेदयेत् द्विजेभ्योदक्षिणांशक्त्यादत्त्वानत्वाविसृज्यच स्वयंभुजीतमतिमानिष्टैःसहसमाहितः एवंकृतेव्रतेविप्रनिधिनेतुः प्रसादतः मोदतेभुविविख्यातोराजराजइवापरः इतिविष्णुधर्मोक्तंधनदव्रतं मार्कंडेयउवाच शुक्लपक्षेमहाराजत्रयोदश्यामुपोषितः फाल्गुनात्तुसमारभ्यनित्यंसंपूजयेन्नरः यक्षराजं महाराजंधनदंनिधिनायकं गंधमाल्यनमस्कारधूपदीपान्नसंपदा सुवर्णंब्रह्मणेंद्रायव्रतांतेप्रतिपादयेत् कृत्वाव्रतं वत्सरमेतदिष्टंयक्षेषुराजन्सुचिरंयथोष्य मानुष्यमासाद्यधनान्वितःस्यात्सौभाग्यमाप्नोतितथाविरोगइतिफाल्गुनशुक्लत्रयोदश्यादिधनदव्रतम् सर्वासुत्रयोदशीषुप्रदोषव्रतम् तन्मार्गशीर्षकृत्यनिर्णयेद्रष्टव्यं मार्गशुक्लचतुर्दश्यां दुर्गापूजाव्रतं नारदीये अत्यशुक्लचतुर्दश्यांदुर्गांसंपूज्यभक्तितःगंधाद्यैरुपचारैस्तुविप्रान्संभोज्यभक्तितःएवंकृत्वा व्रतंविप्रदुर्गायाश्चैकभोजनः लभतेवांछितान्कामानिहामुत्रचनारद ॥ अस्यामेवविष्णुधर्मोत्तरोक्तंमाहेश्वरव्रतं मार्कंडेयउवाच शुक्लपक्षादथारभ्यफाल्गुनस्यनराधिप पूजयेत्तुचतुर्दश्यांसोपवासोमहेश्वरं गंधमाल्यनमस्कारधूपदीपान्नसंपदा व्रतांतेचतथादद्यादग्निष्टोमफलंलभेत् एतदेवव्रतंकृत्वाशुक्लपक्षेतुवत्सरं पौंडरीकमवाप्नोतिकुलमुद्धरतिस्वकं चतुर्दशीद्वयेचैतत्कृत्वासंवत्सरंनरः मासिमासितथासर्वान्कामानाप्नोतिनिश्चितं आसाद्यकामान्समहेश्वरात्तुतत्रोष्यकालंसुचिरंचराजन् सायुज्यमाप्नोतिमहेश्वरस्यपरात्परस्यप्रातिमस्यतस्येति अत्रैववृषभवाहनमुक्तंवीरमित्रोदये अग्निपुराणे यश्चरेदब्दमेकंतुनक्तांशिवपरोनरः पूजयेच्चचतुर्दश्यांफाल्गुनस्याशिवंयतः संपूज्यविधिवद्भक्त्यावृषंसर्वगुणान्वितं दद्याद्विप्रायराजेंद्रशिवोमेप्रीयतामिति एताच्छिवव्रतंनाममहापातकना

शनं शिवरूपधरोनित्यंशिवलोकेमहीयते इतिफाल्गुनशुक्लचतुर्दश्यांशिवव्रतं फाल्गुनपूर्णिमायां सूर्यसोमपू
जाव्रतं कृत्यतत्वार्णवे फाल्गुन्यामर्यमाजातअदित्यांकश्यपादपि अत्रैवचानसूयायां जातः पूर्णकरः शशी
तौतत्राविधिनापूज्यौप्राप्तेचंद्रोदयेसति नृत्यैर्गीतैस्तथावाद्यैः कार्यस्तत्रप्रजागरइति अत्रोपवाह्यव्रताभावान्न
क्तंकार्य्यं इयंमन्वादिः अत्रापिगोविंदपूजांकृत्वादोलोत्सवः कार्य्यः तदुक्तंकृत्यचिंतामणौब्राह्मे नरोदोलागतंद्र
ष्ट्वागोविंदंपुरुषोत्तमं फाल्गुन्यांसंयतोभूत्वागोविंदस्यपुरंव्रजेदिति अत्रदानविशेषमाहविष्णुः फाल्गुनीफाल्गु
नीयुक्ताचेत्तस्यांब्राह्मणायसुसंस्कृतं शयनंनिवेद्यभार्य्यांमनोज्ञांपुत्रवतींद्रविणवतींचाप्नोति नार्य्यपिएकपत्नी
व्रतंसुरूपंद्रविणशीलयुतंभर्तारमिति अत्रशयनंदेयं मंत्रपाठोयथा यस्मादशून्यशयनंकेशवस्यशिवस्यच श
य्याममाप्यशून्यास्तुतस्माज्जन्मनिजन्मनि अशून्यंशयनंनित्यमशून्याश्रियमुन्नतिं सौभाग्यंदेहिमेनित्यंशय्या
दानेनकेशव मत्स्यपुराणेभुवनदानमुक्तं त्रिरात्रोपोषितोदद्यात्फाल्गुन्यांभुवनंशुभं आदित्यलोकमाप्नोतिधाम
व्रतमिदंस्मृतं अस्यांविष्णुधर्मोत्तरोक्तं अशोकव्रतं मार्कंडेयउवाच अशोकपूर्णिमामेतांशृणुष्वगदतोमम
उपोष्यतुनराशोकंप्राप्नोतिस्त्रीतथापिवा फाल्गुनस्यामलेपक्षेपौर्णमास्यांनृपोत्तम मृज्जलेननरास्नात्वादत्वाशिर
सिवैमृदं घृतप्राशनंततः कृत्वा कृत्वाचस्थंडिलंमृदा पुष्पैर्गंधैः समभ्यर्च्य भूधरंनामनामतः देवंचैवतथादेवी
मशोकेतिचकीर्त्तयेत् यथाविशोकांधरणींकृतवांस्त्वंजनार्दनइत्यादि व्रतमेतत्ससाश्रित्यपारणंचयथाविधि स
वैव्याधिविनिर्मुक्तोदशजन्मांतराण्यसौ विशोकः सर्वकल्याण भाजनंस्यान्नसंशयः यथात्वमेववसुधेसंप्राप्ता
निर्वृतेः पदं तथासपरमंलोकेसुखंप्राप्स्यतिमानवः एवमेतन्महापुण्यंसर्वशांतिप्रदायकं विशोकाख्यव्रतंपुण्यंत
त्कुरुष्वमहाव्रतं इतिविशोकाख्यंमहाव्रतं अथास्यामेवलक्ष्मीनारायणव्रतमुक्तं हेमाद्रौविष्णुधर्मोत्तरे पुलस्त्य

उवाच पंचदश्यांशुक्लपक्षेफाल्गुनस्यनराधिप पाखंडपतितांश्चैवतथैवांत्यावसायिनः नास्तिकान्भिन्नवृत्तींश्चपा
पिनश्चापिमालयेत् नारायणेगतमनाः पुरुषोविजितेंद्रियः तिष्ठन्व्रजन्खलन्नश्नन्क्षतेचापिजनार्दनं कीर्तये
त्सत्क्रियाकाले सप्तकृत्वापुनः पुनः लक्ष्म्यासमन्वितंदेवमर्चयेतजनार्दनं संध्याव्युपरमेचेंदुस्वरूपंहरिमीश्वर
रविंलक्ष्मींचसंचिंत्यसम्यगर्घ्येणपूजयेत् श्रीनिशाचंद्ररूपस्त्वंवसुदेवजगत्पते मनोभिलषितंदेवपूरयस्वनमोनमः
मंत्रेणानेनदत्वार्घ्यंदेवदेवस्यशक्तितः नक्तंभुंजीतमौनेनतैलक्षारविवर्जितं तथैवचैत्रवैशाखेज्येष्ठेचमुनिसत्तम
अर्चयेतयथाप्रोक्तंमासिमासिचतद्दिने निष्पादितंभवेदेवंपारणंदाल्भ्यभक्तितः द्वितीयंतत्रवक्ष्यामिपारणंत
न्निबोधमे आषाढेश्रावणेमासिप्राप्तेभाद्रपदेतथा तथैवाश्वयुजेभ्यर्च्यश्रीधरंचश्रियासह सम्यक्कंद्रमसेद
त्वाभुंजीतार्घ्यंयथाविधि द्वितीयमिदमाख्यातंतृतीयमपिपारणं प्रतिपूज्यततोदद्याद्ब्राह्मणेभ्यश्चदक्षिणां प्रति
मासंप्रवक्ष्यामिप्राशनंकायशुद्धये चतुरःप्रथमंमासान्पंचगव्यमुदाहृतं कुशोदकंतथैवान्यदुक्तंमासचतुष्टयं सू
र्य्यांशुतप्तंतद्वच्चजलंमासचतुष्टयं गीतवाद्यादिकंरात्रौतथाकृष्णकथाःशुभाः कारयेद्देवदेवस्यपारणेपारणेगते
जनार्दनंसलक्ष्मीकमर्चयेत्प्रथमंततः सश्रीकंश्रीधरंतद्वत्तृतीयंभूतिकेशवं एवंसंपूज्यविधिवत्सपत्नीकंजनार्दनं
नाप्नोतीष्टवियोगार्तिंपुमान्योषिद्यथापिवा यावंतिजन्मान्यसुखंनाप्नोतीष्टवियोगतां देवस्यचप्रभावेनमरणेप्रा
प्तेस्मृतः कुलेसतांस्फीतधनेभोगान्भुक्तेयथेप्सितान् ॥ इतिविष्णुधर्मोत्तरोक्तंफाल्गुन्यांलक्ष्मीनारायण
व्रतं अथास्यांफाल्गुनपूर्णिमायां होलिकापूजनं नारदीये फाल्गुनेपूर्णिमायांतुहोलिकापूजनंस्मृतं संचयं
सर्वकाष्ठानांपलालानांचकारयेत् तत्राग्निंविधिवद्हुत्वारक्षोघ्नैर्मंत्रविस्तरैः अदृकूटाभयत्रस्तैःकृतात्वंहोलिबालिशैः
अतस्त्वांपूजयिष्यामिभूतिभूतिप्रदायिनीं इतिमंत्रेणसंदीप्यकाष्ठादिक्षेपणैस्ततः परिक्रम्योत्सवःकार्य्योगी

तवादित्वनिःस्वनैःहोलिकाराक्षसीचेयंप्रह्लादभयदायिनी अतस्तांप्रदहत्येवकाष्ठाद्यैर्गीतमंगलैः संवत्सर
स्यदाहोयंकामदोहोमतांगतः इतिजानीहिविप्रेंद्रलोकेस्थितिरनेकधा भविष्योत्तरेपि अयंपंचदशीशुक्ला
फाल्गुनस्यनराधिप जल्पंत्वशंकितालोकानृत्यंतुचहसंतुच दारुजानिचखड्गानिगृहीत्वासमरोत्सुकाः योद्धा
रद्रवमेयांतुशिशवःसंप्रहर्षिताःसंचयंशुष्ककाष्ठानांपलालानांचकारयेत् तत्राग्निंविधिवद्हुत्वारक्षोघ्नैर्मंत्रविस्तरैः
ततःकिलकिलाशब्दैस्तालीशब्दैर्मनोरमैःतमग्निंत्रि परिक्रम्यगायंतुचहसंतुच जल्पंतुस्वेच्छयालोकानिःशंकाय
स्ययन्मनः भगंवहुविधैः शब्दैःकीर्त्तयेद्देशभाषया विस्तारयंश्चगायंश्चतस्यनामसहस्रकं सर्वदुष्टापहोहोमः
सर्वरोगोपशांतिकृत् क्रियतेस्यांद्विजैः पार्थ तेनसाहोलिकामता अस्यांनिशागमेपार्थसंरक्ष्याःशिशवोगृहे
गोमयेनोपलिप्तेचसचतुष्केगृहांगणे आकारयेच्छिशून्प्राप्तान्वहुव्यग्रकरान्नरान्तेकाष्ठखड्गैरसंस्पृष्टइयगीतैर्हा
स्यकरैःशिशून् भक्ष्यंचतेषांदातव्यंगुडपक्वान्नमेवच होलिकापूजनेमंत्रःप्रागुक्तःहोलिकाप्रदीपनंप्रदोषेकार्य्यंतथा
चपृथ्वीचंद्रोदये दुर्वाससोवचनं निशागमेतुसंपूज्याहोलिकासर्वतोमुखैरिति तच्चभद्रायांसत्यांनकार्य्यंतथा
च भद्रायांदीपिताहोलीराष्ट्रभंगंकरोतिवै नगरस्यनचेष्टास्यात्तस्मात्तांपरिवर्जयेदितिपुराणसमुच्चयवचनात् तथा
चभद्रायांद्वेतुकर्तव्येश्रावणीफाल्गुनीतथा श्रावणीनृपतिंहंतिग्रामंदहतिफाल्गुनी दिनार्द्धात्परतोपिस्यात्फाल्गु
नीपूर्णिमायदि रात्रौभद्रावसानेतुहोलिकादीपिकातदेति यदातुपूर्वदिनेचतुर्दशीप्रदोषव्यापिनी परदिनेचक्ष
यवशात्सायान्हेप्रागेवसमाप्यतेतदापूर्वदिनेसंपूर्णरात्रौभद्रसत्वात् तत्रैवतन्निषेधात् परेहनिप्रातिपद्येवकुर्य्या
त् सार्धयामत्रयंवास्याद्द्वितीयदिवसेयदा प्रतिपद्वर्द्धमानातुतदासाहोलिकास्मृतेतिनिर्णयामृते भविष्यवच
नात् मदनरत्नेतु एवंयत्तुवन्हौवन्हिंपरित्यजेदिति भविष्योक्तं वन्हौहोलिकायांवन्हिंप्रातिपदंवर्जयेदित्यर्थः

तदेतद्भिन्नविषयमिति तत्रैवोक्तं अन्येतुतस्यांभद्रामुखंत्यक्त्वेति प्रदोषव्यापिनीनस्याद्यदापूर्वदिनेतदा भद्रामुखंवर्जयित्वाहोलिकायाःप्रदीपनमितिनारदवचनात् निशागमेप्रपूज्येहंहोलिकासर्वदाबुधैः तद्दिवापूजयद्भद्रांपूजितादुःखदाभवेदितिदिवोदासीयवचनात् यामत्रयोर्द्धयुक्ताचेत्प्रतिपत्तुभवेत्तिथिः भद्रामुखंपरित्यज्य कार्य्याहोलीमनीषिभिरिति विद्याविनोदेभिधानाच्च भद्रामुखंविहायपूर्वदिनएवकार्य्येत्याहुः नाडयस्तुपंचपदमितिरत्नमालायां अन्यच्च राकायायामपूर्वार्द्धचतुर्दश्यांभवेद्यदि होलींभद्रावसानेतुनिशांतेपिप्रदीपयेदितिभविष्योत्तरवचनात् यदातुपूर्वदिनेभद्रारहितः कालेनलभ्येत तदाउत्तरदिनेचसूर्य्यास्तात्पूर्वमेवपूर्णमासमाप्तातदाभद्रापुच्छेकार्य्यं पृथिव्यांयानिकार्याणिशुभानित्वशुभानितु तानिसर्वाणिसिद्ध्यंतिविष्टिपुच्छेनसंशयइतिलल्लवचनात् विष्टिपुच्छंतुज्योतिषे इष्वर्कनखनारीभ्योभद्रापुच्छंघटीत्रयं क्रमेणधवलेवक्षेव्युत्क्रमेणासितेतरइति इषु ५ अर्क ७ नख २० अस्मिन्नेवपलेयदोत्तरापूर्णमासीसार्द्धयामत्रयपरिमिता अधिकायाप्रतिपदोत्तरदिनेवृद्धिगामिनी तदापौर्णमास्युत्तरत्रप्रतिपत्प्रदोषएवकर्त्तव्यम् नतुपूर्वरात्रौ विष्टिपुच्छइतिभविष्योत्तरे पूर्वोदाहृतवचनम् एवंसतियाउत्तरादिनेपिकृत्स्नप्रदोषेतदेकदेशेवावर्त्तते सासुतरामुत्तरा पूर्वोक्तंतु पूर्वविद्धाग्राह्यत्वमुत्तरत्रप्रदोषास्पर्शेवृद्ध्यभावेचज्ञेयं नतुयदापूर्वरात्रिः सर्वाभद्राव्याप्ता उत्तरदिनेप्रदोषश्चपूर्णमासीशेषयुक्तोपिचंद्रग्रहणाक्रांतोग्रस्तोदयोवा तदा सर्वेषामेववर्णानांसूतकंराहुदर्शनइति शुचित्वाभिधानात्तत्रकथंहोलिकादीपनंस्यादितिचेत् उच्यते स्नात्वाकर्माणिकुर्वीतशृतमन्नंचवर्जयेदिति स्नातोत्तरंनित्यनैमित्तिककृत्याधिकारात् काम्यानितु ग्रहणात्पूर्वंग्रहणोत्तरं नभवंत्येव तथाचज्योतिर्ग्रंथे त्रयोदश्यादितोवर्ज्यदिनानांनवकंबुधैः मांगल्येषुसमस्तेषुग्रहणेचंद्रसूर्ययोः द्वादश्यादितृतीयांतोवेधइंदुक्षयेस्मृतः एकादश्यादिकःसौरेच

तुर्थ्यंतः प्रकीर्त्तितः खंडग्रहतयोःप्रोक्तउभयत्रादिनत्रयम्मिति अस्यापवादस्तत्रैव नित्यनैमित्तिकेजप्येहोमयज्ञक्रियासुच उपाकर्मणिचोत्सर्गेग्रहवेधोनविद्यतइति होलिकानिर्णयः अथास्याहंजाविधानं ओमद्यहोलिकापूर्णिमायांममसपरिवारस्यअसुपादिभयनिवृत्ति पूर्वकानायासेनाकांक्षितसर्वमनोसिद्धिसकलानिवृत्तिनैमित्तिकंचडांडाहुंडालिकादीनांसापत्यानांप्रीतिसहितस्वसंतानरक्षार्थंहोलिकापूजनंकारिष्ये इतिसंकल्प्य तत्राग्निंविधिवत्प्रतिष्ठाप्य ततोग्निंसंक्षेपविधिनाचंदनादिभिः संपूज्यहोमंकुर्य्यात् तत्ररक्षोघ्नमंत्रैः सघृतलाजाहुतीनामष्टोत्तरशतंजहुयात् रक्षोघ्नमंत्राश्च ओंरक्षोहणोवोवलगहनंवैष्णवीमिदमहंतंवलगमुत्किरामिप्रियम्मेनिष्ट्योयममात्योनिचखानेदमहंतंवलगमुत्किरामिस्वाहा ॥ १ ॥ यम्मेसवंधुर्यमसवंधुर्निचखानेदमहंतंवलगमुत्किरामियन्मेसजातोनिचखातोत्कृत्यांकिरामिस्वाहा २ स्वराडसिसपत्नराडस्समभिमातिहाजनराडसि रक्षोहासर्वराडसिमित्रहास्वाहा ३ रक्षोहणोवोवलगहनोवनयामिवैष्णवान्स्वाहा ४ रक्षोहणोवोवलगहनोवस्तृणामिवैष्णवान् ५ रक्षोहणोवोवलगहनाउपदधामिवैष्णबान्स्वाहा ६ रक्षोहणोवोवलगहनोबनयामिवैष्णवीवैष्णवमसिवैष्णवरस्थस्वाहा ७ यानःशꣳसोअररुषोधूर्त्तिः प्रणङ्मर्त्यस्यरक्षाणोब्रह्मणस्पतेप्रत्युष्टꣳरक्षःप्रतिष्ठाः स्वाहा ८ अरातयोनिष्टप्तꣳरक्षोनिष्टप्ता अरातयउर्वंतरिक्षमन्वेमि ९ रक्षोहाविश्वचर्षिणीरभियोनिमयोहते द्रोणसधस्थमासदतस्वाहा १० एभिर्मंत्रैर्दशावृत्यालाजाहोमः अथवाष्टोत्तरशतीः प्रथममंत्रेणसर्वैरेववा शतमष्टोत्तरंपूर्वमष्टाविंशतिरेववा ततोविधिवदग्निंसंपूज्यप्रार्थना असुपाभयसंत्रस्तैःकृतात्वांहोस्मिबालकैः अतोमांपाहिभीतिभ्योमातेवापत्यमात्मनः १ आयुर्देहियशोदेहिशिशूनांकुरुरक्षणं शत्रूणांचक्षयंधेहिहोलिकेपूजितासदा इतिपूजांतेप्रार्थनामंत्रः ततोग्निंत्रिःपरिक्रम्यजल्पंतुचहसंतुचजल्पंतुस्वेच्छयाचैवयस्यय

स्यचयन्मनः होलिकेचनमस्तुभ्यंढुंढातेजोविमर्दिनि सर्वोपद्रवशांत्यर्थंगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यंदत्त्वाऽग्निप्रार्थयेत् यन्मयाशीतभीतेननिषिद्धाचरणंकृतं तत्सर्वंक्षम्यतांवह्नेयतः सर्वसहोभवान् अनेनमत्कृतेनाग्निपूजितनअसुपाअंडाडाढुंढाहोलिकादयः सर्वाःप्रीताभवंतु तथाचविधिकृतेनहोमेनभगवान्सर्वोपद्रवनाशकोवह्निः प्रीयतां ततोदक्षिणासंकल्पंकृत्वा तिलकधारणंविधायहुतशेषंधानादिसर्वैःप्राशनीयं तस्यांरात्रौगानक्रीडाहास्यालापादिकंरुचिविधेयं अद्यास्यकृतस्यहोलिकापूजादिकर्मणोन्यूनातिरिक्तदोषपरिहारार्थमिदंदक्षिणाद्रव्यं यथानामगोत्रायदातुमहमुत्सृजे ततोविभूतिधारणमंत्रः वंदितासिसुरेंद्रेणब्रह्मणाशंकरेणच अतस्त्वंपाहिमांदेवि विभूतिभूतिदाभव इतिहोलिकापूजा एवंहोलिकापूजनंविधाय दोलागतंगोविंदंनिरीक्ष्यपुमान् सर्वदोषविमुक्तो भवतीत्याचारः नरोदोलागतंदृष्ट्वागोविंदंपुरुषोत्तमं फाल्गुन्यांसंयतोभूत्वागोविंदस्यपुरंव्रजेदिति कृत्वाचावश्यकर्माणिसंतर्प्यपितृदेवताः वंदयेद्धोलिकाभूतिंसर्वदोषोपशांतये अथहोलिकाकथा भविष्योत्तरे युधिष्ठिर उवाच किमर्थंफाल्गुनस्यांतेपौर्णमास्यांजनार्दन उत्सवोजायतेलोकेदेशग्रामेतथापुरे कोह्यस्यांपूज्यतेदेवोनियमंकिंव्रतादिकं किमस्यांपूज्यतेकृष्णएतद्विस्तरतोवद श्रीकृष्णउवाच आसीत्कृतयुगेपार्थरघुर्नामनराधिपः शूरःसर्वगुणोपेतःप्रियवादीवहुश्रुतः ससर्वांपृथिवींजित्वावशीकृत्यनराधिपान् नदुर्भिक्षंनचव्याधिर्नाकालमरणं तथा नाधर्मंचरतेलोकस्तस्मिन्राज्यंप्रशासति पौराःसर्वेसमागत्यत्राहित्राहितिचाब्रुवन् अस्माकंचगृहेराजन् ढुंढानामेतिराक्षसी दिवारात्रौसमागत्यवालान्संपीडयतेवलात् रक्षायांधूपदीपैश्चभेषज्यैर्वानराधिप मंत्रज्ञैर्मार्जनाद्यैस्सानियंतुंनैवशक्यते पौराणांतद्वचःश्रुत्वारघुर्विस्मयमागतः विभ्रमाविष्टहृदयोवसिष्ठंवाक्यमब्रवीत् रघुरुवाच ढुंढेतिराक्षसीकेयंकिंप्रभावाद्विजोत्तम कथमेषानिहंतव्यामयादुष्टांतकारिणी रक्षणात्प्रोच्यतेराजाप्र

थिवीपालनात्पतिः अरक्ष्यमाणःपृथिवींराजाभवतिकिल्विषी वसिष्ठउवाच शृणुराजन्परंगुह्यंनाख्यातंकस्य चिन्मया ढुंढानामेतिविख्याताराक्षसीमालिनःसुता तपसाराधयामासमहादेवंवरप्रदं प्रीतस्तामाहभगवान्वरंवरयसुव्रते यत्तेभिलषितंतत्तत्प्रदास्येत्वविचारतः ढुंढाप्राहमहादेवंयादितुष्टःस्वयंमम तदावध्यांसुरादिनांमनुजानांमहेश्वर मांकुरुष्वत्रिलोकेशशस्त्रघातैस्तथैवच शीतोष्णवातवर्षासुदिवारात्रौगृहांतरे अभयंसर्वदामेस्यात्त्वत्प्रसादात्सुरेश्वर एवमस्त्वितिप्रोक्तातांपुनःप्रोवाचशूलभृत् उन्मत्तेभ्यःशिशुभ्यश्चभयंतेसंभविष्यति ऋतुसंधौमहाभागेमाव्यथांहृदयेकृथाः एवंदत्त्वावरंतस्याःप्रेक्षंत्याभगवान्भवः स्वप्नेलब्धोयथाह्यर्थस्तथैवांतरधीयत एवंलब्ध्वावरंतस्माद्राक्षसीकामचारिणी नित्यंपीडयतेवालान्संस्मृत्यहरभाषितं अडाडयानिगृह्णातिसिद्धमन्नंकुटुंविनां गृहेषुतेनसालोकेअडाडेत्यभिधीयते एवंतेसर्वमाख्यातंढुंढायाश्चरितंमया सांप्रतंकथयिष्यामियेनोपायेनहन्यते इयंपंचदशीशुक्लाफाल्गुनस्यनराधिप शीतकालांतसंप्राप्तौप्रातर्मधुभविष्यति अभयंसर्वलोकानांदीयतांपुरुषोत्तम यथाह्यशंकितालोकारमंतिचहसंतिच दारुजानितुखड्गानिगृहीत्वासमरोत्सुकाः युध्यंतुवंधुभिःसार्द्धंशिशवःसंप्रहर्षिताः नानारंगमयैर्वस्त्रैश्चंदनागुरुमिश्रितैः अवीरंचगुलालंचमुखेतांवूलमक्षतं वंशोत्थंजलयंत्रंचचर्मयंत्रंकरैर्धृतं गालिदानंतथाहास्यंललनानर्त्तनंस्फुटं वेषसंन्यासिनांकार्य्यं नटानांयोगिनांध्रुवं वेश्यानांयोगिनीनांचमोहिनीनांचकारयेत् तत्राग्निंविधिवद्हुत्वारक्षोघ्नैर्मंत्रविस्तरैः ततः किलकिलाशब्दैर्मृदंगैश्चविशेषतः तमग्निंत्रिःपरिक्रम्यगायंतुचहसंतुच जल्पंतुस्वेच्छयासर्वेनिश्शंकाद्यस्य. जन्मनं तेनशब्देनसापापाहोमेनचनिराकृता अदृष्टघातैर्डिंभानांराक्षसीक्षयमेष्यति श्रीकृष्णउवाच तस्य तद्वचनंश्रुत्वासनृपःपांडुनंदन सर्वंचकारविधिवद्यदुक्तंतेनधीमता गतासाराक्षसीनाशंतेनोग्रेणचकर्मणा ततः

प्रभृतिलोकेस्मिन्साढुंढाविमुखाभवत् सर्वदुष्टापहोहोमःसर्वरोगप्रशांतिदः क्रियतेस्याद्द्विजैःपार्थतेनसाहोलिकामता शिशिरस्यांतिमाह्येषापोर्णमासीयुधिष्ठिर सदास्याःफाल्गुनस्यांतेपरमानंददायिनी अस्यांनिशागमेपार्थसंरक्ष्याःशिशवोगृहे गोमयेनोपलिप्तेचसचतुष्केगृहांगणे आकारयेत्शिशून्प्राप्तान्खड्गव्यग्रकरान्नरान् कृत्वासकाष्ठखड्गैश्चस्पृश्यगीतपरान्शिशून् तथाचतेषांदातव्यंगुडंपक्वान्नमेवच एवंढुंढादिसंजातंसर्वदोषंप्रशाम्यति बालानांरक्षणंकार्य्यंतस्मिन्प्रहरेनिशागमे युधिष्ठिरउवाच प्रभातेकिंजनैःकार्य्यंसदासुखमभिप्सुभिः प्रवृत्तेमाधवेमासिप्रतिपद्भास्करोदये श्रीकृष्णउवाच कृत्वाचावश्यककर्मसंतर्प्यपितृदेवताः वंदयेद्धोलिकाधूलिंसर्वदुष्टोपशांतये मंडितेचर्चितेरम्येउपलिप्तेगृहांगणे चतुष्कंकारयेच्छ्रेष्ठंवर्णकैश्चाक्षतैःशुभैः तन्मध्येस्थापयेत्पीठंशुक्लवर्णांवरच्छदं अव्रणंपूर्णकलशंस्थापयेत्पंचपल्लवैः साक्षतंसहिरण्यंचसितचंदनचर्चितं आसनेचोपविष्टस्यब्रह्मघोषेणभारत अर्चयेच्चंदनैर्नारीअव्यंगाशुभलक्षणा पद्मरागोत्तरपटाश्रेष्ठांशुकविभूषणा वस्त्रंधार्य्यंशिरोत्तंसंदधिदूर्वाक्षतान्वितं वर्द्धापयित्वाश्रीखण्डमायुरारोग्यवृद्धये वस्त्रधार्य्यमितिपादादारभ्यमूर्द्धानंचंदनेनचर्चयेत् तच्चंदनंवर्द्धापयित्वाकिंचिदवशेष्यतु पश्चाच्चप्राशयेद्विद्वान् चूतपुष्पंसचंदनं मनोभवस्यसापूजाऋषिभिःसंप्रदर्शिता तत्पिबंतिवसंतादौचूतपुष्पंसचंदनं प्राशनमंत्रश्च दूतमग्र्यंवसंतस्यमाकंदकुसुमंतव सचंदनंपिबाम्यद्यसर्वकामसमृद्धये अनंतरंद्विजेंद्राणांसूतमागधवंदिनां दद्याद्दानंयथाशक्त्या।कामोमेप्रीयतामिति ततोभोजनवेलायांश्रृतंपाकेनतेनहि प्राशयेत्प्रथमंपत्रंततोभुंजीतकामतः एवंयःकुरुतेपार्थशास्त्रोक्तंफाल्गुणोत्सवं अनायासेनसिध्यंतितस्यसर्वेमनोरथाः अधर्मश्चैवपापानियांतिनाशंनसंशयः पुत्रपौत्रसमायुक्ताःसुखिनोनित्यमानवाः पुण्यापवित्रासापूजासर्वविघ्नविनाशिनी

एषातेकथितापार्थफाल्गुनीपूजितातिथिः वृतेतुषारसमयेपिचपंचदश्यां प्रातर्वसंतसमयेसमुपस्थितेच प्राश्ये
तुचूतकुसुमंसहचंदनेनसत्यांहिपार्थपुरुषःससुखीसदास्यात् ॥ इतिभविष्योत्तरेफाल्गुनीपूर्णिमांतेवसंतमहोत्सवः
अथप्रसंगात्सकलपौर्णमासीनांसाधारणव्रतान्युच्यंते अथायुर्व्रतंहेमाद्रौगारुडे चतुर्दश्यांशुचिःस्नात्वादंतधाव
नपूर्वकं चरितब्रह्मचर्यश्चयतवाक्कायमानसः पौर्णमास्यांतथाकृत्वादेवपूजांसमारभेदित्यादि पौर्णमास्याम
पिस्नात्वादेवार्चनादिकृत्वोपोषितश्च रात्रौचंद्रोदये अर्घ्यदानंकृत्वा ब्राह्मणंसंपूज्यहविष्यान्नंदत्वास्वयंतदेवभुंजीतइतिगारुडोक्तमायुर्व्रतं अथदेवीव्रतं पयोव्रतंपंचदश्यांमन्वांतेगोयुगप्रदः लक्ष्मीलोकमवाप्नोतिदेवी
व्रतमुदाहृतं इतिपद्मपुराणेदेवीव्रतं उपोषितश्चतुर्दश्यांपौर्णमास्यांनराधिप पंचगव्यंपिबेत्पश्चाद्धविष्याशी
तथाभवेत् शक्रव्रतमिदंकृत्वामासपापात्प्रमुच्यते तस्मात्सर्वप्रयत्नेनमासिमासिसमाचरेत् संवत्सरात्प्राप्यसुरेंद्रपूज्यस्ततोऽथराजासुचिरंमनुष्यः मानुष्यमासाद्यसुरेंद्रपूज्योराजाभवेद्वाद्विजपुंगवोवा इतिविष्णुधर्मोक्तंकूर्चव्रतं अथैतासांद्वादशमासोपपौर्णमासीनांप्रत्येकंस्थानविशेषेणपुण्यतमत्वमुक्तंगार्ग्येण महामाघीप्रयागेतु १ नैमिषेफाल्गुनीतथा २ शालग्रामेमहाचैत्रीकृताःस्युःपुण्यहेतुकाः ३ गंगाद्वारेतुवैशाखी ४ ज्येष्ठी
चपुरुषोत्तमे ५ आषाढीवैकनखले ६ केदारेश्रावणीतथा ७ बदर्यांचप्रौष्टपदी ८ कुब्जाम्रेतुमहाश्विनी ९
पुष्करेकार्त्तिकी १० कन्याकुब्जेमार्गशिरीतथा ११ अयोध्यायांमहापौषीकृताःस्युस्तामहाफलाइति ॥
महामार्गादिविकायामपिस्यात्सामहाफलेति शालिग्रामादिव्यतिरिक्तस्थानेष्वपिमहाचैत्र्यादिकमनंतफलंभवति
तदाहगार्ग्यः आसुयत्क्रियतेश्राद्धंयच्चदानंयथाविधि उपवासादिकंयच्चतदनंतफलंस्मृतामिति मासनक्षत्रयुक्तास्तुमहाचैत्रादिकामताः एतासांलक्षणंगार्ग्येणाप्युक्तं माससंज्ञेयदाऋक्षे चंद्रः संपूर्णमंडलः गुरुणायातिसं-

योगंसातिथिर्महतीस्मृतेति शंकरगीतायामपि एकराशिगतौवालेयदागुरुनिशाकरौ सापौर्णमासीमहतीसर्वपापहरास्मृता तथाच पौर्णमासीषुसर्वासुमासर्क्षसाहितासुच दनानामिहदानानांफलंदशगुणंभवेदिति अथास्यांफाल्गुनपौर्णमास्यांलिंगपुराणदानमुक्तंमत्स्यपुराणे तत्राग्निलिंगमध्यस्थःप्राहदेवींमहेश्वरः धर्मार्थकाममोक्षार्थमाग्नेयमधिकृत्यच कृतंतल्लैंगमित्युक्तंपुराणंब्रह्मणास्वयं तदेकादशसाहस्रंफाल्गुन्यांयःप्रयच्छति तिलधेनुसमायुक्तंसयातिशिवसाम्यतां इतिलिंगपुराणदानं ॥ स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेः पादांवुजार्चारतोजीयात्पुत्रकलत्रमित्रसहितः संपालयन्क्ष्मांचिरम् १ रणवीरसिंहभूपेशकारितेकृत्यसागरेअभूत्फाल्गुनकृत्यानांरम्योरत्नससुच्चयः २ ॥ इतिश्रीमत्सूर्यवंशावतंसरघुकुलतिलक श्रीरणवीरसिंहमहाराजकारितेकृत्यरत्नाकरेफाल्गुनमासकृत्यरत्नसमुच्चयः ॥ छ छ छ छ छ छ छ छ छ

* * *

ब्र०१०
फा०
॥४७॥

॥ श्रीरघुनाथमुद्रायंत्रालये ॥
लालाशिब्बामल्लाधिकारेफाल्गुणमासोमुद्रितस्समाप्तिमगमत्
संवत् १९४२ ज्यैष्ठ प्र. २६

श्रावणमासप्रारम्भः

2

[illegible] | 30 | 22 | 66 | 150

A

पुस्तकालय
गुरुकुल कांगड़ी

स्तश्रीगणेशायनमः ॥ श्रीशंगणेशंसशिवांशिवांच वाग्देवतामर्कमुखांश्चखेटान् श्रुतिस्मृतीनामपिसंप्रणेतॄन् वंदामहेदेवमुनीश्वरांश्च ॥ १ ॥ विश्वसर्गविसर्गादि तरंगादियथांबुधौ वितन्यतेयथायस्मिं स्तौवंदेप्रकृतीश्वरौ ॥ २ ॥ सकलदेवगणार्चितपंकजौ निजजनेप्सितदानसुरद्रुमौ कथमपिस्मरतांदुरितापहौ हरिहरौनिजचेतसिसंश्रये ॥ ३ ॥ त्वमेषांलोकानांसकलसुखहेतोरुदयसे निहंस्येवध्वांतंप्रतिवसतिनैशांधतमसं रवेर्यावद्भूमीतलकमलजालांतरभवं तमोनिघ्नन्नेकंहृदयकमलंमेपिकलय ॥ ४ ॥ प्रसन्नतांयानगताभिषेकतस्तथानमम्लेवनवासदुःखतः मुखांबुजश्रीरघुनायकस्यसा सदास्तुमेमंजुलमंगलप्रदा ॥ ५ ॥ श्रीलावण्येक्षणकृतरुचेरप्रमेयप्रभूते लीलालोकप्रथितुरभितःसुप्तसर्वात्मशक्तेःयस्मिन्कल्पेप्रथममभवच्छ्वेतवाराहसंज्ञेविष्णोःशेषेशयितुरुदधौनाभिपद्माद्विधाता ॥ ६ ॥ तन्मानसान्मुनिरभूत्प्रथमंमरीचिर्मन्त्रादिसर्वनिगमार्थविचारदक्षः योवेदवोधितविधानविदाविधात्रा कर्म्मोदितंमुनिभिराकलयांचकार ॥ ७ ॥ तेपेतिदुष्करमसंस्कृतमानसानां सृष्टिंविवर्द्धयिषुरुग्रतमंतपोयः येनोच्यतेसकृदियंखलुकाश्यपीसा तस्माद्बभूवभगवानथकश्यपर्षिः ॥ ८ ॥ आशाविभागजनकोऽखिललोकसाक्षी वर्षर्तुमासादिविधेरदित्यां हेतुस्ततोधिकतरः समभूद्विवस्वान् दक्षप्रजापतितनूभुविभासमानः ॥ ९ ॥ तस्माज्जातः सूर्यवंशोतिपुण्यो यस्मिन्भूपाः पुण्यपुंजावभूवुः सर्वान्वक्तुंतांश्चकर्माणितेषां कोस्मिंश्छक्तस्तत्प्रधानान्ब्रुवेहम् ॥ १० ॥ तत्रप्रसिद्धाः खलुयेनरेंद्रा महेंद्रदुस्साध्यतरार्थसिद्धेः संसाधकाधर्मभृतांवरिष्ठा स्तेषांतुकांश्चित्कृतजान्ब्रवीमि ॥ ११ ॥ रामायणेभारतादौ श्रीमद्भागवतेपिच महाकविनिबंधेषुज्ञेयोवंशस्यविस्तरः ॥ १२ ॥ विवस्वतोभूरियशामनस्वी वैवस्वतोनाममनुर्वभूव आद्योनृपाणांमुनिमाननीयो यथाश्रुतीनांप्रणवःपुरस्त्यः ॥ १३ ॥ इक्ष्वाकुरभवत्तस्मात्पुत्रस्तस्यपुरंजयः इंद्रवाहःककुत्स्थश्च ख्यातोयःकर्मभिस्त्रिभिः ॥ १४ ॥ महेंद्रमास्थायमहोक्षरूपंयःसंयतिप्राप्तपिनाकिली

लः चकारवाणैरसुरांगनानां गंडस्थलीःप्रोषितपत्रलेखाः ॥ १५ ॥ उत्तंकस्यमुनेर्मुकुवलयाश्वोपिक्षितींद्रस्ततःख्या
तस्तत्रचधुंधुमारइतितंधुंधुंनिहत्यासुरंयःसाध्योनसुरैरणेनृपसुतायद्वक्रजाताग्निा दग्धास्तत्क्षणमेकविंशतिसहस्रा
ण्यवशिष्टास्त्रयः ॥ १६ ॥ सप्तद्वीपवतींप्रशासतिमहींयास्मिन्नृपेदस्यवो भीतुरयमपास्यपर्वतगुहावासादशास्याद
यःयस्यक्षेत्रमभूदुदेतितरणिर्यावच्चसंतिष्ठते मांधातासमहीपतिःक्षितिलेलंकारभूतोभवत् ॥ १७॥ वदान्योभूद्धरिश्चं
द्रःसगरःसागरोपमःयेनगंगासमानीतासवभूवभगीरथः १८ ॥एमन्येपिभूपालाःकृतेऽभूवन्महाबलाः अथैवमेव
भूपालांस्त्रेताजातान्ब्रवीम्यहम् १९ सवभूवतदन्वयेधिजेताऽजितांतत्त्वविचार्च्ययोत्रातिष्ठन् अजयत्परलोकमप्यु
दारं भुविखट्वांगनृपोमुहूर्त्तमात्रे ॥ २० जातःकुलेतस्यकिलोरुकीर्त्तिः कुलप्रदीपोनृपतिर्दिलीपः अतिष्ठदेकोनश
तक्रतुत्वे शक्राभ्यसूयाविनिवृत्तयेयः ॥ २१ यस्मिन्महींशासतिनकीनांनिद्रांविहारार्द्धपथेगतानां वातोपिनास्त्रंस
यदंशुकानि कोलंबयेदाभरणायहस्तम् ॥ २२ सनंदिनींसमाराध्यगांत्रिरात्रव्रतेनच पुत्रंविश्वस्यजेतारंरघुनामान
माप्तवान् २३ ख्यातोरघुस्तस्यपदंप्रशास्यमहाक्रतोर्विश्वजितश्चयोक्ता चतुर्दिगावर्जितसंभृतांयोमृत्पात्रशेषामक
रोद्विभूतिम् ॥ २४ ॥ आरूढमद्रीनुदधीन्प्रतीर्णं भुजंगमानांवसतिंप्रविष्टम् ऊर्ध्वंगतंयस्यनचानुबंधि यशःपरि-
च्छेतुमियत्तयालम्॥ २५ ॥ रघुवंशतयावनीप्रसिद्धोरविवंशोप्यधुनापियेनभूयः कुलशब्दवणवान्सविश्वजेता रघुना-
मासतदात्मजोनृपोजः ॥ २६ ॥ अजोपींदुमतींलब्ध्वाजित्वाशत्रुगणारणे पुत्रेराज्यधुरंन्यस्यपरंनिर्वाणमीयिवान्
॥ २७ ॥ अजसुतोवनिमेकरथेनयो दशदिगंतपयोध्युपलक्षितम् अजयदप्रतिषिद्धरथागमो दशरथो।वरथोद्धत-
वैरिपः ॥ २८ सईजेपुत्रकामेष्ट्याचतुरात्मानमीश्वरम् तस्याविरासीत्पुत्रत्वेरमेशोमाहिषीत्रये ॥ २९ हत्वाबाल्येवय
विकटांताडकांकारयित्वा गाधेःपूज्याध्वरमृषिवधूंशापतोमंचयित्वा भंक्त्वाशंभोर्धनुरवनिजांप्राप्यहत्वाखरादीन्

S

वासेतुंदशकमवधीत्सानुजोरामचंद्रः ३० सोपिकृत्वाश्वमेधांस्त्रीन्पुत्रान्दत्त्वाष्टधाधरां साकेतंस्वपुरंनिन्येस्वपदं
चापुनर्भवम् ॥ ३१ ॥ कुशेतरेसप्तरघुप्रवीरा ज्येष्ठंपुरोजन्मतयागुणैश्च चक्रुःकुशंरत्नविशेषभाजं सौभ्रात्रमेषांहि
कुलानुसारि ॥ ३२ ॥ परितापवतींवीक्ष्यनिश्ययोध्यापुरेश्वरीं त्यक्त्वाकुशावतींसद्योभेजेयोध्यापुरींकुशः॥३३॥ एवम
न्येपिभूपालाद्वापरेर्कान्वयोद्भवाःवभूवुस्तिष्ययुगजानानादेशनरेश्वराः॥३४॥ विख्यातश्रीनिजभुजबलोत्सादितारा
तिवर्गोयुद्धाकांक्षीप्रतिदिशमगाद्यःप्रतिद्वंद्व्यभावात् चक्रेभूभृद्गुरुतरशिलाक्षेपणंतोलनंच सोस्मिन्वंशेनिखिलजगती
पालकोमालदेवः॥३५॥तस्यान्ववायेप्रथितप्रभावः कर्पूरदेवोऽजनिधर्मनिष्ठःराज्ञीषुसप्तस्वपिसुव्रतासु द्वाविंशति
स्ततनयावभूवुः॥३६॥तद्वंशेप्रियसंग्रामोनीतिज्ञोपिनृपोभवत् संग्रामदेवइतियः संज्ञामान्वर्थिकीमधात् ॥ ३७ ॥
अपियत्रविरुद्धधर्मिणीद्वे यमुपाशिश्रयतुर्यशांतिशौर्ये अधुनाप्यवनीतलेध्रुवश्रीर्ध्रुवदेवोधरणीश्वरोवभूव ३८ ॥
तस्याऽपत्यचतुष्टयीस्वमहसाजाज्वल्यमानासभा वेद्यांविश्वहितायसाधुविहितास्वर्लोकपानामिव लोकेष्वागम
पंक्तिरेवरुरुचेसद्वर्णमालोल्लसत् सन्मंत्रादिविधानबोधकुशलाप्रज्ञाहितार्थप्रदा ॥३९॥ तत्राद्योरणजीतदेवधरणी
भृद्येननीतावशे कुल्लूभोटबुसेहराधिपतयोजालंधरेशाश्चये यैत्रैगर्तसुखेतभूमिपतयोमंडीकल्हूरेश्वराःप्रत्यब्दंप्रद
दुः प्रियायनियंतयद्वार्षिकोपायनम् ॥४०॥ तस्यश्रीधनसारदेवइतिचश्रीसूर्त्तसिंहाभिधः पश्चात्योबलवंतसिंहइ
तियः सोदर्य्यवर्य्योत्रमी जेतारोरणदुः सहारिपृतनावीराग्रणीसंहते स्तत्सूनुर्व्रजराजदेवइतियः काश्मीरमन्हा
छिनत् ॥४१॥ योऽभूत्सूरतसिंहवर्मविदितोवीराग्रगण्योबली तस्यप्रौढमतेर्वभूवतनयोगोविप्रसंरक्षकः श्रीजो
रावरसिंहइत्यभिधयाख्यातोभवत्तत्सुतो भूभाग्यायकिशोरसिंहधरणीपालोबलीयान्सुधीः॥४२॥ पुत्रास्त्रयोधिक
रुचोबलिनोवभूवु स्तस्यप्रतापनिधयोरिपुतापदक्षाः ज्येष्ठोजिगायधरणींसगुलाबसिंहःश्रीध्यानसिंहनृपतिश्चसुचे

तसिंहः ॥४३॥ एषाभूपवरत्रयीगुणमयीसर्वात्ममूर्त्तित्रयी देवानांत्रितयीव यात्ममहसापर्य्याप्तलोकत्रयी शक्ती
नांत्रितयीवसाधुसकलासौराज्यधर्मत्रयी साधूनामवनायपुण्यानिचयै स्वैरात्तव्यक्तित्रयी ॥ ४४ ॥ आसीद्यश्चगु
लाबसिंहनृपतिर्भूमंडालाखंडलो भूयोयेनचनिर्जितानिजधराधीशो[illegible]निर्यावती तामासाद्यपदातिदुर्गममपिक्ष्माभ
त्पथंवाजिगं रम्यीकृत्यलदाखभोटाविषयाधीशाञ्जिगायोद्धतान् ॥४५॥ देशारूसवनायुपारसमहाचीनार्वचीना
दिकागांधारादितुरुष्कपूर्वविषयायेयावनीयाःपरे रूमाद्याश्चपि शोरकावलमुखायेयारकंदादयो यस्मिन्मंत्रमुपाश्रि
तेसपतयोविभ्युर्नदेशाश्रिताः ४६ यंसन्नद्धमभीकमुद्यतमहाखड्गंविलोक्याग्रतो दत्त्वापृष्ठमुपाद्रवन्महदपिल्मेच्छा
धिपानांबलं उक्तंयेनापिशोरखेव्हररणेमत्वेतियत्काबलं मन्येतेनतद्वादितत्पुरमापिख्यातांक्षितौकावलं ४७ मोद्राभद्र
तरोवभूवसाचिरंयेनाशतद्रोरलं लावण्योपचितश्रियाजनपदंसंस्पर्धिजातंदिवः यद्वाचोमृतशीलनंसुमनसांसर्वागम
द्योतकं यन्मंत्रंननिजोपिवेदविधिवत्कोन्योनिगूढंजनः ४८ आदित्सवोलवपुरंसवलांगरेजानीतावशेमातिमतापाथिये
नतेभ्यःसाम्राज्यशासनमवाप्यदुरापमन्यैस्त्यक्तंहितच्च सिकतालवतांप्रपेदे ॥४९॥ कृतोनीतिविदायेनपुरारिरपि
नामतःशंकरोदेविकातीर्थपुरमंडलमंडनः ॥ ५० ॥ गंडक्यानर्मदायाश्चगयायाश्चापिसच्छिलाःआनाय्यदेविकादेवी
सर्वदेवमयीकृता ॥५१॥ काशीब्रह्मसरःप्रयागमथुरागंगावनंगाव्हरं वृंदाद्यंगजवाजिगोभिरधिकंवासोगृहैर्भूसुरा
न् रत्नाढ्यैर्वलयांगुलीयमुकुटैः केयूरसत्कुंडलैःसन्मान्योत्तमरांकवै सयुवतीञ्छय्याभिरातोषयत् ॥५२॥ शौर्य्यं
यस्यतुरुष्कराजसुभटैरद्यापिजेगीयते धैर्य्यंधीश्चचतुःसमुद्रधरणीपालैरलंस्तूयते औदार्य्यंद्विजराजराजिभिरलंसं
श्लाघ्यतेप्रत्यहं प्रायोयत्प्रकृतिःपरैरपिनिजैरन्यैरभिज्ञैरपि ॥५३॥ यस्संभाव्यधराधुरंनिजधियावोढुंसमर्थंनिजपुत्रं
रिणवीरसिंहमाखिलप्रेमास्पदंसद्गुणैः तस्मिन्नौरसिकेनि धायसकलांराज्यश्रियंसन्मनाध्यायंश्रीरघुनाथमप्रक

टयंल्लोकेनिजात्मज्ञताम् ॥ ५४ ॥ सोयंश्रीरणवीरसिंहधरणीपालोगुणीयोधुना शास्तिक्ष्मांससुतःस्वधर्मविधिनाव
र्णाश्रमस्थापकः वीरश्रीविलसद्भुजार्जितमहाराजेतिशब्दोबली क्षात्रोधर्मइवात्मकर्मकलनासंसिद्धयेमूर्त्तिमान् ॥५५॥
येनात्मीयकुलप्रधानधरणीपालाप्तराज्याधिका राज्यश्रीःसमुपार्जिताप्रतिदिनंवृद्धिंप्रणीताः श्रियः आपूर्वापरद
क्षिणोत्तरपयोराशेः समुद्भाविताः सर्वत्रक्षितिपेषुकुंदधवलाः श्लाघ्याः सतांकीर्त्तयः ॥ ५६ ॥ योसाविंगिलिजाधिपै
रिपुकुलक्ष्माजिद्भिरभ्यर्थितो दिल्लींदृप्ततमैर्निजैरपिबलैरालोक्यरुद्धांपरैः साहाय्येसवलोबलंप्रहितवांस्तत्प्रीतयेसोऽ
धिकं तैरप्याप्तमनोरथैरनुसदः संश्लाघ्यतेदीर्घदृक् ॥ ५७ ॥ प्रातः प्रत्यहमीश्वरार्चनविधिंदानंविधायादरादाम
ध्यान्हविधेयराज्यरचनाभिज्ञाप्तगोष्ठ्युत्सवः मध्यान्होत्तरमप्युदारधिषणः कृत्वासमाजंपुनः सायंपश्यतियोन्वहंस्व
पृतनाव्यूहंचसांग्रामिकं ॥ ५८ ॥ आहतान्कालिनाशंखासुरेणैवविभात्यसौ उद्धर्त्तुकामःसन्नद्धोहयग्रीवइवागमान्
॥ ५९ ॥ उद्धृतः केवलोवेदोहयग्रीवेणनापरं उद्धारयातिविद्वाद्भिः सोपवेदागमानयम् ॥ ६० ॥ येनाहूयनिबंधकूप
विशदग्रामोर्वराऽऽरामभूभूषाभिः परितोषिताः सुविदुषा सर्वागमज्ञाद्विजाः सौराष्ट्रद्रविडांध्रगुर्जरगयाकाशीकु
रुक्षेत्रतः शास्त्रस्योद्धरणायपंककुहरप्रायेमिमंक्षोः कलौ ॥ ६१ ॥ नाऽसंस्कृतः कोपिमदीयराष्ट्रेभवेत्त्रिवर्णेष्वितिभू
रिदत्त्वा धनंचतुर्वेदविदोपिविप्राः काशीपुरीयेनसतोपहूताः ॥ ६२ ॥ यस्त्वैवएर्यविधिंविधित्सुरखिलेराज्येनिजेनैगमं
प्रत्याहूयतदुद्भवायचतुरोविप्रांश्चतुर्वेदिनः प्रत्येकंशतमुद्रिकारजतजास्तेषांविधायान्हिकं तेभ्योन्नांबरसंशयादिरहि
तान्संपाठयत्यर्भकान् ॥६३॥ यःसंध्याःसमुपास्यतामुपदिशत्येवंद्विजैरार्य्यवन्नोधीतायदिपठ्यतांचकुशलावेदेविधेयाः
सुताःएभ्यःपुंसवनादिकाश्रुतिभवासंपाद्यतांसंस्कृतिर्यःकुर्य्यादधिकंप्रियोस्तिसहिमेनोचेदपांक्तोहिसः ॥६४॥ नकोपि
मूर्खोविषयेमदीयेभवेत्कृतोयेनहिदानिदेशः विधायशास्त्राप्रतिशालमेकः सुपंडितोस्थापिसुपाठनाय ॥ ६५ ॥ न।

नाशास्त्रश्रौतशैलांसरित्सुनिष्णातायेसंस्कृतप्राकृताब्धौ गोष्ठींतेषांयोर्थसिद्धौविधत्तेप्रातः प्रेम्णाप्रत्यहंपंडितानाम्
॥ ६६ ॥ तर्कार्कतार्किककुलैरसकर्मयुक्तैर्विज्ञैर्भिषग्वरजनैरथशाब्दिकैश्च वैशेषिकैर्बहुविशेषविचारदक्षैः सांख्यैः
सुयोगनिपुणैर्नयनीतिविद्भिः ॥ ६७ ॥ सद्वैदिकैःपरिलसच्चतुरागमज्ञैर्मीमांसकैर्मिथुनकर्मकलापदक्षैः वेदांतिभिश्च
विधिवद्विदितात्मतत्त्वैः काव्यामृताद्भुतकथाकुशलैःकवीशैः ॥ ६८ पौराणिकैः प्रणयवद्भिरुदारगाथासंकीर्त्तनैर्ग
णितशास्त्रविशारदैश्च अन्यैरुदभ्यसितरीतिमदन्यविद्यापारंगतैरमलकैरलिशाकुनैश्च ॥ ६९ ॥ मंत्रप्रयोगनिपुणै
रुभयस्वरज्ञैःस्वीयैःसुवर्णवलयांगदकुंडलाढ्यैः आगंतुकैरनुविशद्भिरुषोऽनिशंयत्पूजागृहंविशदनुप्रतिभासतेलम्
॥ ७० ॥ आलोकयतेनविदुषाविदुषांसमाजंवर्णान्स्ववर्णविधितःकलिनावधूतान् संचित्यचोक्तमखिलाब्दतिथिव्रता
नांधर्मोदयायजगतीक्रियतांप्रबंधः ॥ ७१ ॥ तस्याज्ञयावीक्ष्यमहानिबंधान्विद्वद्भिरग्र्यैरनुमोदितेन विलिख्यतेश्रीर
णवीरसिंहरत्नाकरोयंशिवशंकरेण ॥ ७२ ॥ दास्यंत्येवकरावलंबमभितोरत्नाकरेयेबुधाः येसंतः सततोपकारनि
रतादृष्टापदंमेस्खलत् येतुब्रह्मकुलावमानपटवोहास्यंविधास्यंतिवै तेकुर्वंतुनकुर्वतेकिमहितंदृप्ताविवेकोज्झिताः ७३॥
सद्वेलोविधिसेतुरुत्सवमहोच्छ्वासः प्रकारोद्गमोदानोर्मिर्व्रतविभ्रमोव्रतकथाकल्लोलकांतांतरः पूर्णोद्यापननौः सुपर्वाणि
महादानादिकल्पद्रुमो भूयाद्धर्मजलांचितोरघुपतेरत्नाकरोयंमुदे ॥ ७४ ॥

अथोच्यतेनिबंधस्यसंक्षिप्तोयमनुक्रमः अत्रादौधर्मरूपस्यप्रथमोरत्नसंग्रहः द्वितीयःकालरूपाख्यस्तृतीयस्तिथिवेध
युक् यावदेकादशीतुर्येसामान्यतिथिनिर्णयः पंचमेपौर्णमास्यंतःषष्ठेमापर्वनिर्णयः सप्तमेपितृयज्ञेष्टिपर्वकालादि
निर्णयः त्रैवर्णिकस्यशूद्रादेश्चोद्यापनमखोष्टमे नवमोवत्सरारंभप्रमुखश्चैत्रकृत्यवान् ततोवैशाखकृत्यानांदशमो
रत्नसंग्रहः ज्यैष्ठमासव्रतादीनांविधानंरुद्रसंख्यके प्रोक्तश्चाषाढकृत्यानांद्वादशोव्रतसंग्रहः त्रयोदशेश्रावणस्यव्रता

देश्चाप्यनुक्रमः ततःप्रौष्ठपदस्यापिविधानंमनुसम्मितं आश्विनस्यव्रतादेश्चविधानंतिथिसंख्यके षोडशेतूर्जमासी
यव्रतादेर्विधिसंग्रहः मार्गमासव्रतादीनांविधिः सप्तदशेखिलः ततश्चाष्टादशेपौषमासस्यविधिसंचयः ऊनविंशेतु
माघस्यसमस्तविधिरुत्तमः विंशेतपस्यकृत्यानांव्रतादीनांविधिःस्फुटः एकविंशे प्रकृत्याख्येऽधिमासादिसंकीर्णति
थिकृत्यता अधिमासादिसंकीर्णतिथिकृत्यंततोधिके द्वाविंशेसर्वसंक्रांतिपंचांगव्रतसंचयः त्रयोविंशेलक्षपूजाद्युद्यो
द्यापननिर्णयः चतुर्विंशेतरुसुतसत्यनारायणार्चनं पंचविंशेतुगंगायाधरायांस्थितिनिर्णयः एवमेतेत्रसंक्षेपात्कृत्य
रत्नसमुच्चयः ॥ धर्माज्जन्मकुलेशरीरपटुतासौभाग्यमायुर्धनं धर्मेणैवभवंतिनिर्मलयशोविद्यामहीसंपदः कांतारेषुम
हाभयेषुसततंधर्म्मःपरित्रायते धर्म्मःसम्यगुपासितोभवतिहिस्वर्गापवर्गप्रदः १ यन्नागामदभिन्नगंडकतटास्तिष्ठंति
निद्रालवो द्वारेहेमविभूषिताश्चतुरगाहेषंतियद्दर्पिताः वीणावेणुमृदंगशंखपणवैःसुप्तस्तुयोबोध्यते तत्सर्वंसुरराजलो
कसदृशंधर्मस्यविस्फूर्जितम् २ यावद्वेदाश्चगंगाचहरिनामजगत्त्रये तावत्सद्धर्मसंबद्धाकीर्त्तिस्तिष्ठतुश्रीमताम् ३ ॥
श्रीः ❋ अथात्रवक्ष्यमाणव्रताद्यनुष्ठाननिबंधे धर्मादर्थश्चकामश्चमोक्षश्चभरतर्षभेति स्वर्गापवर्गादिपरमपुरुषार्थजनक
त्वेनाऽभ्यर्हितत्वाद्व्रतादीनां तस्य मुख्यतमांगत्वाच्चादौ धर्मोनिरूप्यते तत्रचोदनालक्षणोर्थोधर्मइत्याद्यभियुक्तस्मृतेः
यद्यप्यपूर्वविशेषाएवधर्मास्तथापितज्जनिकासुक्रियास्वपिशिष्टानांप्रयोगइतिताएवनिरूप्यंते तत्रतत्स्वरूपेमनुः वि
द्वद्भिःसेवितः सद्भिर्नित्यमद्वेषरागिभिः हृदयेनाभ्यनुज्ञातोयोधर्म्मस्तन्निबोधत एवंरूपःसधर्मइत्येकोयोगस्तन्निबो
धतेति विश्वामित्रः यमार्य्याः क्रियमाणंहिशंसंत्यागमवेदिनः सधर्मोयंविगर्हंतितमधर्मंप्रचक्षते आर्य्याःशिष्टाः फल
तोधर्मनिरूपणेतैत्तिरीयश्रुतिः धर्मोविश्वस्यजगतः प्रतिष्ठालोकेधार्मिष्ठंप्रजाउपसर्पंति धर्मेणपापमपनुदति धर्मेसर्वंप्र
तिष्ठितं तस्माद्धर्मंपरमंवदंति गौतमः वर्णाश्रमाश्चस्वधर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेणविशिष्टदेशजा

तिकुलरूपाढ्याः श्रुतवित्तसुमेधसोजन्मप्रतिपद्यंते विष्वंचोविपरीतानश्यंति शेषणधर्मशेषणमेधावीर्य्यंदेशोभारतवर्षादिः जातिर्ब्राह्मणत्वादिः कुलंकठादि रूपं सौंदर्य्यं तदाद्यमौदार्य्यादि एतदंतः विष्वंचः सर्वतोगामिनोऽतिनिषिद्धाचाराः अतएवपूर्वोक्तविपरीतानश्यंति उक्तविपरीतफलभाजोभवंतीत्यर्थः धर्मप्रमाणेमनुः वेदोऽखिलोधर्ममूलंस्मृतिशीलेचतद्विदां आचारश्चैवसाधूनामात्मनस्तुष्टिरेवच स्मृतिविभागेशंखलिखितौ स्मृतयोधर्मशास्त्राणितेषांप्रणेतारोमनुविष्णुयमदक्षांगिरोऽत्रिवृहस्पत्युशनआपस्तंबवसिष्ठकात्यायनपराशरव्यासशंखलिखितसंवर्त्तगौतमशातातपहारीतप्रचेतसादयः आदिपदग्राह्या देवललोमशजमदग्निप्रजापतिविश्वामित्रपैठीनसिपितामहवौधायनछागलेयजावालच्यवनमरीचिकश्यपनारददक्षाः ॥ एतेषामेव षट्त्रिंशन्मतमभ्यर्हितम् ॥ स्मृत्यंतराणिपुराणेषु तत्राविष्णुपुराणं अष्टादशपुराणानिपुराणज्ञाःप्रचक्षते ब्राह्मंपाद्मंवैष्णवंचशैवंभागवतंतथा तथान्यन्नारदीयंचमार्कंडेयंचसप्तमं आग्नेयमष्टमंचैववभविष्यंनवमंतथा दशमंब्रह्मवैवर्त्तंलैंगमेकादशंतथा वाराहंद्वादशंचैवस्कांदंचात्रत्रयोदशं चतुर्दशं वामनंचकौर्म्मंपंचदशंस्मृतं मात्स्यंचगारुडंचैवब्रह्मांडंचततःपरं कूर्मपुराणे ब्राह्मंपुराणंप्रथमंपाद्मंचैवमनंतरं शैवं भागवतंचैवभविष्यंनारदीयकं मार्कंडेयमथाग्नेयंगारुडंचततःपरं लैंगंतथैववाराहंस्कांदंवामनमेवच कौर्म्मंमात्स्यंच वैवर्त्तंवायवीयमतः परं अष्टादशंसमुद्दिष्टंब्रह्मांडमितिसंज्ञितं अत्रविष्णुपुराणवायुपुराणयोः पुराणत्वेविकल्पःनरासिंहपुराणादीनितदंतर्गतान्येव तदुक्तंमत्स्यपुराणे पाद्मेपुराणेयत्प्रोक्तंनारासिंहोपवर्णनं तदष्टादशसाहस्रंनारासिंहमिहोच्यते नंदायायत्रमाहात्म्यंकार्त्तिकेयेनवर्णितं नंदापुराणंतल्लोकेनंदाख्यमितिकीर्त्तितं यत्रसांवंपुरस्कृत्यभाविष्येपिकथानकं प्रोच्यतेतत्पुनर्लोकेसांवमेवमुनिव्रताः एवमादित्यसंज्ञोपितत्रैवपरिपठ्यते कालिकापुराणादीनि तत्तदुक्तत्वात्तत्तद्ग्रहणेनगृहीतानि तथाचमत्स्यपुराणे अष्टादशभ्यश्चपृथक्पुराणंयत्तुदृश्यते विजानीध्वंतदेतेभ्यः पुराणेभ्योविनि

11

गीतामिति चतुर्लक्षैतत्संख्यापूरकमित्यर्थः उपपुराणानिकूर्मपुराणे अन्यान्युपपुराणानिमुनिभिःकथितानितुअष्टादशपुराणानिश्रुत्वासंक्षेपतोद्विजाःपुराणफलमाप्नोतिव्यासस्यवचनंयथा आद्यंसनत्कुमारोक्तंनारसिंहमनंतरं तृतीयंपाद्ममुद्दिष्टंकुमारेणप्रभाषितंचतुर्थंशिवधर्माख्यंसाक्षान्नंदिप्रभाषितंदुर्वाससोक्तमाश्चर्यंनारदोक्तमतःपरंकापिलंवामनंचैव तथैवोशनसोदितं तथैवविष्णुधर्माख्यंकालिकाह्वयमेवच माहेश्वरंतथासांवंसौरधर्मार्थसंश्रयं पराशरोक्तमपरंमारीचंभार्गवाह्वयं इदंतुतत्पंचदशंपुराणंकौर्म्ममुच्यते एतानितुतथान्यानिस्मृतिकारेणशिष्टपरिगृहीतानि धर्मशास्त्राणि अथशीलंभारते अद्रोहः सर्वभूतानांकर्मणामनसापिवा अनुग्रहश्चज्ञानंचशीलमेतद्विदुर्बुधाः आचारोलौकिकावगीतः आत्मतुष्टिः नानापक्षसंभवे एकपक्षेपरितोषःअत्रैवभट्टाःतेनवैवैदिकानेकधर्मधीसंस्कृतात्मनां आत्मतुष्टेःप्रमाणत्वंसिद्धंधर्मप्रसिद्धये अथ सकलानुष्ठानोपकारकत्वादत्रपरिभाषानिरूप्यते तत्र जाबालः श्रुतिस्मृतिविरोधेतुश्रुतिरेवगरीयसीअविरोधेसदाकार्य्यंस्मार्त्तंवैदिकवत्सदापंडितेनेत्यर्थः भविष्यपुराणेस्मृत्यर्थयोर्विरोधेतुह्यर्थशास्त्रस्यबाधनं परस्परविरोधेतुन्याययुक्तंप्रमाणवत् स्मृतिर्धर्मशास्त्रंअर्थोऽर्थशास्त्रं तेनधर्मशास्त्रस्यमन्वादेरर्थशास्त्रस्यदंडनीत्यादेर्विरोधे दंडनीत्यादिर्बाध्यते तस्यधर्मेनभियोगात् तदुक्तंजैमिनिनापि तत्रतत्त्वमभियोगविशेषात्स्यादिति अर्थशास्त्रयोर्विरोधेनि[illegible]क्तिकं वाध्यते स्मृतिशास्त्रविकल्पस्तु व्यवस्थासंभवेसति अदृष्टे धर्मशास्त्रेभिन्नविषयेऽव्यवस्थासंभवेसतिविकल्पः शास्त्रार्थः यथा अग्नौकरणहोमस्तुकर्त्तव्यउपवीतिना प्राङ्मुखेनैवदेवेभ्योजुहोतीतिश्रुतिः श्रुतेः अपसव्येनवा कार्योदक्षिणाभिमुखेनतु निरूप्यहविरन्यस्माअन्यस्मैनहिहूयते इतिकात्यायनवचनेनाग्नौकरणहोमे सव्यापसव्यविकल्पउक्तः सच शाखाभेदान्नियतः स्मृतिशास्त्रविकल्पस्तु आकांक्षापूरणेसति यथासूत्रंतुकर्त्तव्यतयाकर्मानुष्ठानेइति कर्त्तव्यांतरेण तदर्थकसूत्रस्यनसमुच्चयः अधिकस्यतु तदर्थस्यसमुच्चयएव सर्वशाखाप्रत्ययमेकंकर्मेतिन्यायात् मनुः आर्षंधर्मोपदेशंच वेदशास्त्राविरोधिना यस्तर्केणानुसंधत्तेसधर्मंवेदनेतर इति तात्पर्य्यम्

भविष्यत्पुराणे सम्यक्संसाधनंकर्मकर्त्तव्यमधिकारिणा निष्कामेनयदार्थेणकाम्यंकामान्वितेनच आचारयुक्तःश्रद्धावान्वेदज्ञोध्यात्मचिंतकःकर्मणांफलमाप्नोतिन्यायार्जितधनश्चयःअधिकारिणेतिशुचिविहितकालजीविनेत्यर्थःआर्येण सामर्थ्येनविदुषेत्यर्थः निष्कामेनेति एतच्चानित्यपरं मुमुक्षुपरंवा न्यायेति तत्क्रियानुष्ठानोपयुक्तधनपरं सामर्थ्यंचविहितेकालेशुचिजीविनोऽनिषिद्धदेशस्थानुष्ठानक्षमस्य तत्रदेशेयाज्ञवल्क्यःमिथिलास्थःसयोगींद्रःक्षणंध्यात्वाब्रवीन्मुनीन् यस्मिन् देशेमृगःकृष्णस्तत्रधर्मान्निबोधत मनुःकृष्णसारोविचरतिमृगोयत्रस्वभावतःसज्ञेयोयाज्ञिकोदेशोम्लेच्छदेशस्तुतत्परःकालस्तुपर्वादिःस्नातोधिकारीभवतिदैवेपित्र्येचकर्माणि पवित्राणांतथाजप्येदानेचविधिदर्शने पवित्राणांमंत्राणांपवित्रंमंत्रमितिनिरुक्तात् भविष्यपुराणेस्नानानामिहसर्वेषांवारुणेनैवमानवः कर्त्तुमर्हतिकर्माणिविधिवत्सर्वदाद्विजःअसामर्थ्याच्छरीरस्यकालदेशव्यपेक्षया मंत्रस्नानादयःपंचकेचिदिच्छंतिसूरयःअसामर्थ्यंवारुणस्नानसंबंधिशरीरापाटवंतत्रचअशिरस्कंभवेत्स्नानंस्नानाशक्तौतुकर्मिणांआर्द्रेणवाससावापिदैहिकंमार्जनंविदुःमनुःप्रभुःप्रथमकल्पस्ययोनुकल्पेनवर्त्तयेत् नसांपरायिकंतस्यजायतेदुर्मतेःफलं सांपरायिकं मार्कंडेयपुराणे सूर्योदयंविनानैवस्नानदानादयःक्रियाःअग्नौविकरणंचैवक्रतुभावश्चलक्ष्यते अत्रसूर्योदयेन उषःकालोलक्ष्यते तथाचतद्दिवारात्रौनस्नानंप्रातःस्नाय्यरुणग्रस्तांप्राचीमवलोक्यस्नायादितिविष्णुवचनात् इदमनुदितहोमांतरपरं तथाच सदोपवीतिनाभाव्यंसदाबद्धशिखेनच विशिखोव्युपवीतश्चयत्करोतिनतत्कृतं सदेत्यनेनशिखाबंधनोपवीतधारणयोः पुरुषार्थतोक्ता ततश्चाधारणेप्रत्यवायकल्पनात् सदाधारणेऽकर्मकालेपि धारणोपपत्तिः तत्कर्मांगतानास्त्येवैतदुक्तं विशिखइतिनतत्कृतं विगुणेतिनफलापार्थक्यमित्यर्थः केवलपुरुषार्थत्वेहि अधारणेहिकर्मसांगमेवनस्यात् पुरुषः परंप्रत्यवायीस्यात् नन्वेवमिति कर्मांगत्वोपदेशप्रयोजनकतुपुरुषार्थत्वमुभयथाप्युक्तं अतएव पिवतोमिहतश्चैवभुंजतोनुपवीतिनः प्राणायामत्रिषट्कंतुनक्तंत्रि

क्रयुतंक्रमादितिप्रायश्चित्तमुक्तम् यज्ञोपवीते गोभिलः यज्ञोपवीतंकुरुते सूत्रंवस्त्रंकुशरज्जुमेववा।अत्रैवकारेण कुशरज्ज्वोर्यज्ञोपवीतानुकल्पयोस्त्रिशरमित्यादिव्यवच्छेदः सूत्रंसूत्रविशेषःकात्यायनः ऊर्ध्वंतु त्रिवृतंकार्य्यंतंतुत्रयमधोमुखं त्रिवृतंचोपवीतंस्यात्तस्यैकोग्रंथिरिष्यते ऊर्ध्वमित्यादिवामावर्त्तवलितंत्रिगुणंकृत्वा तदेवात्रिगुणंसदक्षिणावर्त्तंकार्य्यं तदेव त्रिवृतंकार्य्यं तदेवत्रिवृतंत्रिशरंसदेकमुपवीतं तस्यैकोग्रंथिः एकमेककौटिल्यंभ्रमीप्रवरानुसारेणेत्यर्थः मनुः कार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतंत्रिवृत् शणसूत्रमयंराज्ञोवैश्यस्याविकसूत्रकं त्रिवृत् नवगुणं नववैत्रिवृदादितिश्रुतेः पैठीनसिःकार्पासमुपवीतंस्यात्तत्षट्तंतुकृतंत्रिवृत् ब्राह्मणस्यचक्षौमं राजन्यस्यशाणं वैश्यस्यवाडिति नवतंतुभवेत्कौशंक्षौमंक्षुमाअतसी तदीयशणकृतं निगमपरिशिष्टे वाससायज्ञोपवीतंकुरुते तदभावे त्रिवृताभावेकुशमुंजवालपरिसररज्जुभिर्वा तदभावे यद्वस्त्राभावे सूत्रविधानं तत्त्रितंतुकमात्रपरमतोनगोभिलविरोधः वालमन्त्रगोभिलः शणवल्कलकार्पासक्षौमवालतृणोद्भवम् सदासंभवतोधार्य्यमुपवीतंद्विजातिभिरिति तृणमुलपादिपरिसरोप्ययमेव संभवत इत्यभिधानात् पूर्वपूर्वाभावे उत्तरोत्तरविधिः वौधायनः कौशंसौत्रंत्रिवृतंयज्ञोपवीतमानाभेः कौशंक्रमिकोशोद्भवं पट्टमयमित्यर्थः आनाभेरितितैत्तिरीयपरं तस्य तत्सूत्रकारकत्वात् वाजसनेयिनस्त्वन्यथैव ॥ तदुक्तंकात्यायनेन पृष्ठवंशेचनाभ्यांचधृतंयद्विंदतेकटिं तद्धार्य्यमुपवीतंस्यान्नातिलंबंनचोच्छ्रितमिति इदंचवामस्कंधे धृत्वापरिधेयं वस्त्रं गौतमः वासांसिक्षौमचीरकुतपाः सर्वेषांकार्प्पासंवाविकृतंधार्य्यं विकृतमप्येकेरक्तं ब्राह्मणस्य मांजिष्ठहारिद्रेतरयोः शाणंशणमयं क्षौमंक्षुमाअतसीतत्कृतं चीरंत्वगादिनिष्पन्नं कुतपःपार्वतीयच्छागरोमनिर्मितः अविकृतंरंजनद्रव्यासक्तं रंजनपक्षेतु ब्राह्मणस्यवृक्षकाषायरक्तं क्षत्रियस्य मांजिष्ठं वैश्यस्यहारिद्रं वसिष्ठः ॥ शुक्लमहतंवासोब्राह्मणस्य हारिद्रं क्षत्रियस्यपीतं कौशेयं वैश्यस्य सर्वेषांवा तांतवमरक्तं तांतवंकार्पासं शंखः क्षौमदुकूलसौत्राणिवासां

सित्रयाणांवर्णानां दुकूलंपट्टवस्त्रं यमः क्षौमकार्पासकुतपाश्चमेकंबलवल्कलाः सर्वेषांतुभवेच्छुक्लंवासस्तत्परिधानिकं मार्कंडेयपुराणे नचापिरक्तवासाः स्याच्चित्रांबरधरोपिवा नचकुर्याद्विपर्यासंवाससोनचभूषणे विपर्य्यासमुत्तरीयादेरधरीयत्वं वर्ज्यंचविदशंवस्त्रमत्यंतोपहतंचयत् अत्यंतोपहतंसुरादिलिप्तं नरसिंहपुराणे नरक्तमुल्वणंवासोननीलंच प्रशस्यते मलाक्तंचदशाहीनंवर्जयेदंबरंवुधः महाभारते अन्यदेवभवेद्वासः शयनीयेसदैवहि अन्यद्रथ्यासुदेवानांपूजायामन्यदेवहि वौधायनः यत्किंचिदिज्यासंयुक्तंस्यात्तदरक्तेनैववाससाकुर्य्यात् आपस्तंबः नीलरक्तंयदावासोब्राह्मणोंगेविधारयेत् अहोरात्रोषितोभूत्वापंचगव्येनशुध्यति उषितउपोषितः भृगुः स्त्रीधृताशयनेनीलीब्राह्मणस्यनदुष्यति नृपस्यर्द्धेवैश्यस्यापर्वण्येवंविधारणं कंबलेपट्टवस्त्रेचनीलीरागोनदुष्यति नृपः क्षत्रियः वौधायनः काषायवासाः कुरुतेजपहोमप्रतिग्रहान् नतद्दैधंसंभवतिहव्यकव्येयथाविधि काषायवासावृक्षत्वगादिनारक्तवासाइतिकल्पतरुः व्यासः आर्द्रवासास्तुयः कुर्य्याज्जपहोमप्रतिग्रहं सर्वंतद्राक्षसंविंद्याद्वहिर्जानुचयत्कृतं वहिर्जानु जान्वोर्वहिः स्थितहस्तोयथानस्यात् वौधायनः होमवेदार्च्चनाद्यासुक्रियास्वाचमनेतथा नैकवासाःप्रवर्त्तेतद्विजवाचनिकेजपे द्विजवाचनिकेस्वस्त्ययनादौ द्विवस्त्रत्वेप्येकवस्त्रत्वमाह शातातपः सव्यादंगात्परिभ्रष्टंकटिदेशधृतांबरं एकवस्त्रंविजानीयाद्दैवेपित्र्येचवर्जयेदिति स्कंधादधःपतितउत्तरीयेएकवस्त्रताभवतीत्यर्थः योगियाज्ञवल्क्यः परिधानाद्वहिःकक्षानिवद्धाआसुरीभवेत् धर्म्येकर्मणिविद्वद्भिर्वर्जनीयाप्रयत्नतः वहिः कक्षा असंवृतपरिधानोभयांतः असंवृतंपश्चादंचलमित्यन्ये वसिष्ठः जपहोमोपवासेषुधौतवस्त्रधरोभवेत् असंवृतः शुचिर्मौनीश्राद्धादौविजितेंद्रियः शातातपः दानमाचमनंहोमोभोजनंदेवतार्चनं प्रौढपादोनकुर्वीतस्वाध्यायंपितृतर्पणं आसनारूढपादस्तुजानुनोर्जंघयोरपि कृतावसक्थिको यस्तु प्रौढपादःसउच्यते कृतावसक्थिकः कृतपर्य्यंकवंधः कात्यायनः आसीनऊर्ध्वः प्रह्वोवानियमोयत्रयादृशःसदा

सीनेनकर्त्तव्यंनप्रह्वेननतिष्ठता प्रह्वोऽवनतकायः तथाच यत्रदिङ्नियमोनास्तिजपहोमादिकर्मसु तिस्रस्तत्रदिशं.
ज्ञेयाऐंद्रीसौम्यापराजिता सौम्याउत्तरा अपराजिता ऐशानी कर्मोपदिश्यतेयत्रकर्त्तुरंगंनचोच्यते दक्षिणस्तत्रक
र्त्तव्यः कर्मणांपारगः करः लघुहारीतः जपेहोमेतथादानेस्वाध्यायेपितृतर्पणे अशून्यंतुकरंकुर्यात्सुवर्णरजतैः कुशैः
बहुवचनमेकस्यसुवर्णस्यरजतसुवर्णैकस्य धारणेप्युपपद्यते सुवर्णादिजातेरवयवावयविवृत्तत्वात् बहुवचनं कपिंजल
न्यायात्त्रित्वपरं अशून्यमित्यादिनासुवर्णरजतकुशत्रयाणांधारणविधानादर्थात्समुच्चयः तत्रदक्षिणकरानामिकायां
सुवर्णधारणं अनामिकायांतद्धार्य्यंदक्षिणस्यकरस्यचेति हेमधारणप्रकरणस्य देवीपुराणवचनात् रजतधारणमपित
त्रैव तत्सममित्यध्याहारादितिकल्पतरुः रजतधारणमपितत्रैव तर्जन्यांरजतंधार्य्यमितेपठंति केचित्तर्ज्जन्यांरजतधार
णमाहुः तच्चनिर्मूलं कुशेषुकात्यायनः हरितायज्ञियादर्भाः पीतकाःपंचयज्ञियाः समूलाःपितृदैवत्याः कल्माषा
वैश्वदैविकाः ह्रस्वाः प्रचरणीयाः स्युःकुशादीर्घास्तुवर्हिषः दर्भाःपवित्रमित्युक्तमतःसंध्यादिकर्मसु सव्यः
सोपग्रहःकार्योदक्षिणः सपवित्रकः यज्ञियादर्शादियज्ञार्हाः पीतकाःपीतवर्णाः पंचयज्ञार्हाः समूलाः साग्राःपितृक
र्मदेवकर्म्मसुसाग्राः समूलकाइतिब्रह्मवैवर्त्तपुराणवचनात् कल्माषाश्चित्रवर्णास्तेच वैश्वदेवश्राद्धार्हाः ह्रस्वाअर
त्निन्यूनपरिमाणाः गोकर्णपरिमाणादीर्घाहरिताःश्राद्धेसाग्राः समूलका इतिवायुपुराणात् तेच प्रचरणीयाः प्रच
रणमनुष्ठानं तत्साधनभूता दीर्घाअरत्न्यधिकप्रमाणादर्भाइति यज्ञादौ हरितादयोविशेषविहिताः अतःसंध्यादिषुद
र्भमात्रंपवित्रंशुचि नतुपवित्रलक्षणमेतत् अतइत्यस्यान्वयात् नचात्रापीतिपदान्वयः इत्यतइत्यन्वयविवक्षितत्वा
त् अतएवपवित्रलक्षणमाहसएव अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवच प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् तदेववै
णिंजलिकालक्षणंसमुदाहृतं आज्यस्योत्पवनार्थंयत्तदप्येतावदेवतु अनंतर्गर्भिणमिति गर्भोऽस्यास्तीतिगर्भी अनं

तर्गर्भांचएतत्त्रयंत्यक्त्वाचतुर्थंग्राह्यं द्विदलमितिपत्रद्वयमित्यर्थः तेनैतादृशंपत्रद्वयमेकंपवित्रंभवति एवंपिजल्यपि एवं सर्वत्रवैधेकर्मणिवामपाणौकुशत्रयं दक्षिणेनच कुशपत्रद्वयंधार्य्यं जपहोमदानस्वाध्यायपितृतर्पणेषु दक्षिणकरेकुशत्रयधारणमपिपूर्वलिखितं हारीतवचनादिति याज्ञवल्क्यः कनिष्ठातर्जन्यंगुष्ठमूलान्यग्रंकरस्यतु पितृप्रजापतिब्रह्मदेवतीर्थान्यनुक्रमात् मनुः ब्राह्मणविप्रस्तीर्थेननित्यकालमुपस्पृशेत् कायत्रैदशिकाभ्यांवानापित्र्येणकदाचन उपस्पृशेत् आचामेत् हारीतः मार्जनार्चनबलिकर्म दैवेन पित्र्यर्थान्पैत्रेण प्रतिग्रहमाग्नेयेन गृह्णीयात् आग्नेयंकरतलमध्यंमध्यआग्नेयमितिवचनात् कात्यायनः अक्रियात्रिविधाप्रोक्ताविद्वद्भिःकर्मकारिणां अक्रियाचपरोक्ताचद्वितीयाचयथाक्रिया अक्रियेति यथोक्ताक्रियाविरहः सतुत्रेधा क्रियाविरहात् परोक्ताचरणात् स्वोक्तक्रमविघाताच्च तत्राद्ये सएवाह प्रधानास्यात्क्रियायत्रनांगंतत्क्रियतेपुनः तदंगस्याक्रियायांतुनावृत्तिर्नापितत्क्रिया तत्क्रियातदंगमात्रक्रिया सापिनास्ति किंतु तत्रयोगियाज्ञवल्क्योक्तं विष्णुस्मरणमात्रं द्वितीयेत्वाहसएव स्वशाखाश्रयमुत्सृज्यपरशाखाश्रयंतुयः कर्त्तुमिच्छतिदुर्मेधामोघंतत्तस्यचेष्टितं इदंतुतत्कर्मणःस्वशाखीयत्वेसतिद्रष्टव्यं अन्यथापारशाखिकमपि ग्राह्यमाह सएव यन्नाम्नातंस्वशाखायांपारक्यमविरोधियत् विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् यत्रतु स्वशाखायां स्तोकाभिधानं तदंगाकांक्षापूरकंपारक्यमपि ग्राह्यं तदाह स्मृतिशास्त्रविकल्पस्तु आकांक्षापूरणेसति यत्र कर्मैव सूत्रेणनवासामान्यविधिनाप्तं किंतु परोक्तंनकार्य्यमित्याह सएव बह्वल्पंवास्वगृह्योक्तंयस्यकर्मप्रकीर्त्तितं तस्यतावतिशास्त्रार्थेकृतेसर्वःकृतोभवेदिति तृतीयेत्वाहसएव प्रवृत्तमन्यथाकुर्य्याद्यदिमोहात्कथंचन यतस्तदन्यथाभूतंततएवसमापयेत् प्रारब्धंकर्मयतः पदार्थादन्यथाकृतमितिमध्ये स्मर्यते पुनस्ततएवारभ्य शेषंकुर्यादित्यर्थः अन्यथाकरणं यदि कर्मसमाप्तौज्ञातं तदात्वाहसएव समाप्तेयदिजानीयान्मयैतदन्यथाकृतं तावदेवततःकुर्य्यान्नावृत्तिः

सर्वकर्मणइति तावदेवेति अयथाकृतंयत्तन्मात्रमेव करणीयं नतु तदुत्तरपदार्था अपीत्यर्थः इदमपि तदनुष्ठानसुकरत्वेसतिद्रष्टव्यं दुष्करत्वेतु विष्णुस्मरणमितितट्टीका प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् स्मरणादेवतद्विष्णोः संपूर्णंस्यादितिश्रुतिः याज्ञवल्क्यस्तु विधिदृष्टंतुयत्कर्मकरोत्यविधिनानरः फलंनाकिंचिदाप्नोति क्लेशमात्रंतु तस्यतत् अत्रेयंव्यवस्था अकृतस्यपुनः करणाद्विष्णुस्मरणाच्च फलाभावः प्रत्यवायाभावश्च संपद्यते अपिच आसीनः प्राङ्मुखोदर्भपाणिः पत्नीतदुत्तरा मंत्राचांतोवद्धशिखीसर्वकर्मस्वयंविधिः वायुपुराणे क्रियामाचरतेमोहादनाचम्यहनास्तिकः भवंतिहिवृथातस्याक्रियाःसर्वानसंशयः तथा दानंप्रतिग्रहोहोमोभोजनंबलिरेवच सांगुष्ठेनसदाकार्यमसुरेभ्योन्यथाभवेत् एतान्येवतुकर्माणिदानादीनिविशेषतः अंतर्जानुविशेषेणतद्वदाचमनंनृप अंतर्जानु जानुमध्येयथाहस्तौभवेतां तथा कर्त्तव्यानीत्यर्थः वौधायनः कर्मयुक्तोनरोनाभेरधः स्पर्शंचवर्जयेत् कात्यायनः यथोक्तवस्त्वसंपत्तौग्राह्यंतदनुकारियत् यवानामिवगोधूमाव्रीहीनामिवशालयः ❀ स्वस्तिश्री.रणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेःपादांबुजार्चारतो जीव्यात्पुत्रकलत्रमित्रसहितःसंपालयन्क्ष्मांचिरम् १ रणवीरसिंहभूपेशकारितेकृत्यसागरे आद्यःसंपूर्णतामापधर्मरत्नसमुद्रकः १ अथैवंसकलपुरुषार्थनिदानभूतंसांगंधर्मंनिरूप्यतस्यच कालनियतत्वादादौकालस्वरूपंनिर्णयश्चोच्यते कालस्वरूपंच हेमाद्रौकूर्मपुराणे अनादिरेषभगवान्कालोनंतोऽजरोऽमरइत्यादि कालेनैवहिसृज्यंतेसएवग्रसतेपुनः तस्मात्कालात्मकंविश्वंसएवपरमेश्वरः विष्णुधर्मोत्तरे अनादिनिधनः कालोरुद्रः संकर्षणःस्मृतः कालनात्सर्वभूतानांसकालः परिकीर्तितः सर्वभूतशामित्वाच्चसरुद्रः परिकीर्त्तितः कर्षणात्सर्वभूतानांसतुसंकर्षणः स्मृतः अनादिनिधनत्वेनसमहान्परमेश्वरः तस्यसूक्ष्मातिसूक्ष्मस्येत्यादि यद्यप्यपरिच्छिन्नसंज्ञावत्त्वेनास्य दुर्विज्ञानस्य

क्रियानंगत्वेन न निर्णेयत्वं तथापि सूर्य्यादिगत्युपाधिपरिच्छिन्नस्य क्रियांगत्वान्निर्णेयत्वमुपपद्यते तस्य सूर्य्यादिगतिपरिच्छेद्यत्वं विष्णुधर्मोत्तरेभिहितं तस्यसूक्ष्मातिसूक्ष्मस्यतथातिमहतोद्विज मानसंख्याबुधैर्ज्ञेयाग्रहगत्यनुसारतइति प्रत्यक्षोपलभ्यमाननिमेषक्रियापरिच्छेदश्चतत्रैवदर्शितः लघ्वक्षरसमामात्रानिमेषः परिकीर्त्तितः अतःसूक्ष्मतरःकालोनोपलभ्योभृगूत्तम नोपलभ्यंयथाद्रव्यंसूक्ष्मंतुपरमाणुतः द्वौनिमेषौत्रुटिः प्रोक्ताप्राणोदशत्रुटिःस्मृतः विनाडिकातुषट्प्राणास्तत्षष्ठ्यानाडिकास्मृता अहोरात्रंचतत्षष्ठ्यानित्यमेवंप्रकीर्त्तितम् ज्योतिःशास्त्रेपि गुर्वक्षरैः खेंदुमितैरसुस्तैःषड्भिः पलंतैर्घटिकाखषड्भिरित्यादि विष्णुधर्मोत्तरे त्रिंशन्मुहूर्त्ताश्चतथाअहोरात्रेणकीर्त्तिताः तत्रपंचदशप्रोक्तारामनित्यंदिवाचराः नक्तंचरास्तथैवंहिमुहूर्त्तादशपंचच उत्तरांतुयदाकाष्ठांक्रमात्संक्रमतेरविः तथातथा भवेद्वृद्धिर्दिवसस्यमहाभुज दिवसश्चयदारामवृद्धिंसमधिगच्छति तदाश्रितमुहूर्त्तानांतथावृद्धिःप्रकीर्त्तिता दिनवृद्धिर्यथा रामदोषाहानिस्तथातथा तदाश्रितमुहूर्त्तानांहानिर्ज्ञेयातथातथा दक्षिणाशांयदारामक्रमादाक्रमतेरविः दिवसस्यतथा हानिर्विज्ञेयातावदेवतु क्षीयंतेतस्यहानौतुतन्मुहूर्त्तास्तथैवच रात्र्याश्रिताश्चवर्द्धंतेरात्रिवृद्धिस्तथातथा यदामेषंसहस्रांशुस्तुलांचैवप्रवर्त्तते समरात्रिंदिवःकालोविषुवद्द्वयवाचकइति ननुकालोनविधातुंशक्यः विधानापादनयोरभेदात् कालस्यचानुपादेयत्वात् उच्यते उपादानस्यानुष्ठानरूपत्वेन पुंव्यापारत्वाद्विधानस्यवाप्रवृत्तप्रवर्त्तमानात्मकत्वेनशब्दधर्मत्वान्नविधानोपादानयोरैक्यं अतोविधेयप्राप्तविषयत्वात्प्राप्तकर्मानुवादेनाऽप्राप्तकालासंबंधंविदधदयं विधिः स्वरूपतोऽनुपादेयंकालंतद्विशेषणतयास्पृशतीतिभवतिकालस्यविधेयत्वं नन्वस्तुकालस्यविधेयत्वं कर्मांगत्वनिर्णयस्तुकथं उच्यते प्रतिपदाद्यधिकरणन्यायेनलाघवादेकस्मादपूर्वमितिनिश्चितेतत्रकर्मणस्तावदेकश्रुत्याफलभावनाकरणत्वेनिर्णीते यदेकस्मादपर्वंतदेतरत्तदर्थमितिन्यायेन कालस्यकर्मांगत्वनिर्णयः अतएवगार्ग्येणोक्तं

तिथिनक्षत्रवारादिसाधनंपुण्यपापयोः प्रधानगुणभावेननस्वातंत्र्येणतेक्षमाः प्रधानगुणभावेनप्रधानकर्मांगत्वेन तस्मात्कालः कर्मांगत्वेन निर्णेयइतिसिद्धं सचकालः संवत्सरायनर्तुमासपक्षदिवसादिभेदादनेकविधोपि तावत्संक्षेपतःषोढा संवत्सराऽयनर्तुमासपक्षदिवसश्चेति तत्रसंवत्सरायनाद्यवयवित्वादादौ तन्निर्णयःक्रियते सच संवत्सरः सम्यग्वसंत्यस्मिन्मासादयइति संवत्सरशब्देन योगरूढ्याभिधीयमानोद्वादशमासात्मकः कालविशेषः द्वादशमासाः संवत्सरइति श्रुतेः सच मासस्त्रैविध्येन चांद्रःसावनः सौरइतित्रिविधः तदुक्तं ब्रह्मसिद्धांते चांद्रसावनसौराणां मासानांतुप्रभेदतः चांद्रसावनसौरास्तुत्रयः संवत्सराअपीति ननुचांद्रः संवत्सरःकदाचिदधिमासे सति त्रयोदशमासात्मकोभवतितत्कथंसंवत्सरस्यद्वादशमासात्मकत्वमितिचेन्न अधिकमासस्य षष्टिदिनात्मकमासैकदेशत्वेन माससंख्याधिक्यानापादकत्वात्षष्टिदिनात्मकंचतस्योक्तंस्मृत्यंतरे षष्ट्यातुदिवसैर्मासःकथितोबादरायणैरिति अतोद्वादशमासत्वमविरुद्धं अस्तित्रयोदशोमासइत्यादिश्रुतिस्तु त्रिंशद्दिनात्मकमासाभिप्रायेण क्वचित्तु ज्योतिःशास्त्रे पंचविधत्वं तत्परिमाणंचोक्तं सौरबृहस्पतिसावनशशधरनाक्षत्रिकाःक्रमेणस्युरिति माधवमतेप्यब्दःपंचधा अब्दःपंचविधश्चांद्रोव्रतादौतिलकादिके सुजन्मादौव्रतेसौरोगोसत्रादिषुसावनः त्रयोप्याचार्यसेवादौविकल्प्यंतेनिजेच्छया आयुर्दायर्त्तुनाक्षत्रोवार्हस्पत्योधिवत्सरइतितेनोक्तत्वात् गुरोर्मध्यमराशिभोगेन वार्हस्पत्यः हेमाद्रिस्त्वेतयोर्धर्मशास्त्रेऽनुपयोगात्तिस्रएवविधाआह तत्रचांद्रसंवत्सरस्यतिलकव्रतादावुपयोगोद्रष्टव्यः सौरस्यतुसुजन्मावाप्तिव्रतादावुपयोगः तद्विधिस्तुहेमाद्रौद्रष्टव्यःसावनस्यतुसत्रादावुपयोगःनाक्षत्रसंवत्सरस्यतुपुष्पस्नानादौनिमित्तत्वेनोपयोगःवार्हस्पत्यसंवत्सरस्योपयोगः स्कांदे द्वारिकामाहात्म्ये सिंहस्थेगुरौगोदावरीयात्राकर्त्तव्या कन्यास्थेद्वारिकायात्राकुंभस्थेगंगाद्वारयात्रालोकप्रसिद्धा तत्रचांद्रोब्दःषष्टिभेदःतत्राहगर्गः प्रभवोविभवःशुक्लःप्रमोदोथप्रजापतिःअंगिराःश्रीमु

खोभावोयुवाधातेश्वरस्तथा चित्रभानुःसुभानुश्चतारणःपार्थिवोऽव्ययः।विंशतिर्ब्रह्मविंशत्यावत्सराःपरिकीर्त्तिताः २० सर्वजित्सर्वधारीचविरोधीविकृतिःखरः नंदनोविजयश्चैवजयमन्मथदुर्मुखाः हेमलंबोविलंबश्चविकारीशर्वरीप्लवः शुभकृच्छोभनः क्रोधीविश्वावसुपराभवौ वत्सराविष्णुविंशत्यामुनिभिःपरिकीर्त्तिताः २० प्लवंगःकीलकःसौम्यस्तथासाधारणोमतः विरोधकृत्तमःप्रोक्तःपरिधाविप्रमाथिनौ आनंदोराक्षसश्चैवनलपिंगलसंज्ञकाः कालयुक्तश्च सिद्धार्थीरौद्रोदुर्मतिदुंदुभी रुधिरोद्गारिरक्ताक्षौक्रोधनःक्षयकृत्स्मृतः वत्सरारुद्रविंशत्यानामतुल्यफलप्रदाः २० तदानयनं रत्नमालायांश्रीपतिराह शकेंद्रकालःपृथगाकृतिघ्नःशशांकनंदाश्वियुगैःसमेतः शराद्रिवस्विंदुहृतःसलब्धः षष्ट्यात्मशेषेप्रभवादयोऽब्दाः एषांफलानि ज्योतिःशास्त्रे ज्ञेयानि एतत्प्रारंभक्रममाह श्रीपतिः तपसिखलुयदा सावुद्गमंयातिमासि प्रथमलवगतःसनूवासवेवासवेज्यः निखिलजनहितार्थंवर्षवृंदेवरिष्ठः प्रभवइतितदानीं जायतेऽब्दस्तदानीं यद्यपि ज्योतिषेगुरोर्मध्यमराशिभोगेन प्रभवादीनांमाघादौ प्रवृत्तिरुक्ता तथापि प्रभवादीनांचांद्रत्वमप्यस्ति चांद्राणांप्रभवादीनां पंचके युगमितिमाधवोक्तेः तानिच युगंभवेद्वत्सरपंचकेनयुगाश्चतेद्वादशवर्षषष्ठ्या भवंतितेषामधिदेवताश्चक्रमेणवक्ष्यामिमुनिप्रणीताः ॥ विष्णुर्जीवःशक्रोदहनः त्वष्टाहिर्बुध्न्यःपितरः विश्वसोमश्चंद्रज्वलनौनासत्यावंतकश्चभगः इति द्वादशयुगदैवतानि युगस्यपंचवर्षाणांनामान्याहयथाक्रमं सएव संवत्सरश्चप्रथमोद्वितीयःपरिवत्सरः तस्मादिडावत्सरश्चचतुर्थश्चानुवत्सरः इद्वत्सरःपंचमश्चफलमेषांयथाक्रममिति तेनचांद्रोऽब्दादिश्चैत्रसितेप्रवर्त्तते वार्हस्पत्यस्तु माघादौ तयोर्नियोगोज्योतिर्निबंधे ब्रह्मसिद्धांते व्यावहारिकसंज्ञोयंकालः स्मृत्यादिकर्मसुयोज्यःसर्वत्र तत्रापिजैवोवानर्मदोत्तरे आर्षिषेणः स्मरेत्सर्वत्रकर्मादौ। चांद्रंसंवत्सरंसदा नान्यंयस्माद्वत्सरादौप्रवृत्तिस्तस्यकीर्त्तितेति इति संवत्सरनिर्णयः ॥ * ॥ अथायनं तत्र

सौरमृतुत्रयं सौरर्तुत्रितयंप्रदिष्टमयनमितिदीपिकोक्तेः सौरमानमधिकृत्यविष्णुधर्मोत्तरेऽपि ऋतुत्रयंचायनंस्यादिति अयननिरुक्तिस्तु माधवीये अयनेयात्यनेनऋतुत्रयेणसूर्य्योदक्षिणाशामुत्तराशांचेत्यृतुत्रयमयनं तथाच वाजसनेयिनः पंचाग्निविद्यायां दक्षिणोत्तरमार्गयोःसमामनंति यान्षण्मासान्दक्षिणादित्यएति यान्षण्मासानुत्तरादित्यएतीति केचित्तु चांद्रमानेनायनद्वयमभ्युपगच्छंति मार्गशिरमासादिकैस्त्रिभिर्ऋतुभिःकल्पितःकालःषण्मासात्मकमुत्तरायनं ज्यैष्ठमासादिकैर्दक्षिणायनमिति तत्रप्रमाणंज्योतिःशास्त्रादौमृग्यं तच्चद्विविधं दक्षिणमुत्तरंचेति कर्कसंक्रांतिमारभ्यदक्षिणं मकरसंक्रांतिमारभ्योत्तरं अनयोर्विनियोगोमदनरत्ने सत्यव्रतेनोक्तः देवतारामवाप्यादिप्रतिष्ठोदङ्मुखेरवौ दक्षिणाशामुखेकुर्वन्नतत्फलमवाप्नुयादिति वैखानसः मातृभैरववाराहनारसिंहत्रिविक्रमाः महिषासुरहंत्र्यश्चस्थाप्यावैदक्षिणायने अत्र वैशब्दोऽप्यर्थे निषेधप्रतिप्रसवोयं देवविशेषरत्नमालायां गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबंधपूर्वं सौम्यायनेकर्मशुभंविधेयंयद्गर्हितंतत्खलुदक्षिणेचेति इत्ययननिर्णीतम् ❋ अथऋतुःहेमाद्रौ ऋतवश्चषट् हेमंतशिशिरयोःसमासेनपंचषड्वाऋतवः पंचर्त्तवः हेमंतशिशिरयोःसमासेनेतिश्रुतेः प्रयाजानुमंत्रणोपयोगितयाचहेमंतशिशिरयोरेकीकरणं वसंतऋतूनां ग्रीष्मऋतूनां वर्षाऋतूनां शरद्ऋतूनामितिचतुर्णामनुमंत्रणमभिधाय हेमंतशिशिरावृतूनामितिपंचमस्यानुमंत्रणेद्वयोर्द्वंद्वोपादानात् ऋतुशब्दार्थोमाधवीये ऋतुशब्दऋगतावित्यस्माद्धातोर्निष्पन्नइति अशोकपुष्पविकासादि असाधारणलिंगमिति वसंतादिकालविशेषऋतुः तेचवसंतोपक्रमाः मुखंवाषण्णामृतूनांयद्वसंतइतिश्रुतेः निरूपिताश्चतेक्रमेण श्रुतौ मधुश्चमाधवश्चवासंतिकावृतू शुक्रश्चशुचिश्चग्रैष्मावृतू नभश्चनभस्यश्चवार्षिकावृतू इषश्चोर्जश्चशारदावृतू सहश्चसहस्यश्चहैमंतिकावृतू तपश्चतपस्यश्चशैशिरावृतू अत्रऋतूइतिद्विवचनं ऋत्ववयवमासद्वित्वाभिप्रायेण मध्वादिशब्दाश्चैत्रादिवचनाः तथाचाहुः

चैत्रोमासोमधुः प्रोक्तोवैशाखोमाधवोभवेत् ज्यैष्ठमासस्तुशुक्रः स्यादाषाढः शुचिरुच्यते नभोमासः श्रावणःस्यान्नभस्योभाद्रउच्यते इषश्चाश्वयुजोमासः कार्तिकश्चोर्जसंज्ञकः सहोमासोमार्गशिरः सहस्यः पौषनामकः माघमासस्तपः प्रोक्तस्तपस्यः फाल्गुणःस्मृतइति सौरवसंतादयस्तु मीनादिसौरद्वयात्मकावा बौधायनेन मीनमेषयोर्मेषवृषयोर्वावसंतइत्यभिधानात् तदनुसारेणेतरेषामपि द्वैविध्यकल्पना एतेषांचतुर्णांवसंतेब्राह्मणोग्नीनादधीतेत्यादिवाक्येभ्योवगंतव्यः श्रौतस्मार्तक्रियाःसर्वाः कुर्याच्चांद्रमसर्तुषु तदभावेतुसौरर्तुष्वितिज्योतिर्विदांमतमिति त्रिकांडमंडनः हेमाद्रौ यदात्वधिकमासोभवति तदाचांद्रमानेनमासत्रयात्मकोपि कश्चिदृतुःसंपद्यते तथाचत्रिकांडमंडनेनोक्तं चांद्रमानेयदाचैत्रमासादिमलिनस्तदा शुद्धेपिमलिनेचैत्रेवैशाखेपिवसंतता ननुसैवेयमायाता मासत्रयवसंतता सत्यं गत्यंतराभावात्सैवात्राभ्युपगम्यते मासास्त्रयोवसंतः स्यात्त्यक्ताद्यमथवांतिमं अत्रोच्यतेविकल्पोहिसौरमासेषुयुज्यते नतुचांद्रेषुयुक्तोसौमलमासानुवर्त्तिष्वित्याद्युक्त्वा षड्वाऋतवइत्येषाश्रुतिः सप्तमचारिका तस्मादधिकमासः स्यात्तेष्ववर्त्तुषुकुत्रचित् यत्रैषोथभवेन्मासः सऋतुः सत्रिमासिकः यद्वा षष्टिदिनैर्मास एकएवोभयात्मकः अतोत्रापिवसंतत्वंस्यात्तयोरेवमासयोः ॥ इतिवसंतादिषड्ऋतुनिर्णयः ॥ अथमलमासनिर्णयो मदनरत्ने सचमासोमस्यतेपरिमीयतेचंद्रवृद्धिक्षयादिनेतिव्युत्पन्नेन मासशब्देन योगरूढ्याभिधेयःमाधवीयेतु तत्र सकारांतंमासितिप्रातिपदिकंचंद्रवाचितस्यायंकालइतिमासः मासश्चतुर्धा सावनः सौरश्चांद्रोनाक्षत्रश्चेति त्रिंशद्दिनः सावनः अर्कसंक्रांत्यवधिः सौरः पक्षद्वययुक् चांद्रः चंद्रस्यसर्वनक्षत्रभोगेन नाक्षत्रः विष्णुधर्मोत्तरे सर्वर्क्षपरिवर्त्तैस्तुनाक्षत्रोमासउच्यते एतदुपयोगोनाक्षत्रसत्रेद्रष्टव्यः चांद्रस्तुचित्राद्यन्वितपौर्णमासीयोगाच्चैत्रादिसंज्ञांलभते पंकजादिशब्दवत् चैत्रादिशब्दायोगरूढाः नक्षत्रेणयुक्तः कालः सास्मिन्पौर्णमासीतिसूत्राभ्यांपाणिनारूढिबोधक

संज्ञायामित्यभिधानपूर्वकंकात्यायनेन चास्मिन्नेवार्थेचैत्रादिशब्दानांव्युत्पादनात् ननुचैत्र्यादीनांचित्रादियोगव्यभिचारित्वात्कथं चैत्रादियुक्तचांद्रमासवचनत्वं चैत्रादिशब्दानामितिचेन्न चित्रादिपदेन यथायथं चित्रास्वात्यादिनक्षत्रद्विकत्रिकोपलक्षणात्तद्योगस्यच सकलचैत्राद्यनुगतत्वेन चैत्रादीनां तदव्यभिचारात् चांद्रोमासोद्विधाशुक्लादिरमांतः कृष्णादिः पूर्णिमांतश्च अनयोश्च चांद्रोपि शुक्लपक्षादिःकृष्णादिश्चेतिसाद्विधेत्युक्तादेशभेदेनव्यवस्थामाह त्रिकांडमंडनः कृष्णपक्षादिकंमासंनांगीकुर्वंतिकेचन येपीच्छंतिनतेषामपीष्टोविंध्यस्यदक्षिणइतिविंध्यस्यदक्षिणेकृष्णादिर्निषेधादुत्तरतोद्वयोरप्यनुगमः तत्रापि शुक्लादिर्मुख्यः कृष्णादिर्गौणः ज्योतिर्निबंधेगर्गः पौर्णमास्यवसानः स्यान्मासो देवऋतुस्तथा दर्शांतोमानुषोह्येतौ विंध्यादुत्तरयाम्यगौ आर्ष्टिषेणः दर्शांतोवैदिकोमासोराकांतः स्मार्तउच्यते शास्त्रेचैत्रशुक्लप्रतिपद्येव चांद्रसवत्सरारंभोक्तेः तथाचदीपिकायां चंद्राब्दोमधुशुक्लगप्रतिपदारंभइति नहियेकृष्णादिंमन्यंतेतेषांसंवत्सरारंभोभिद्यते अतःशुक्लादिर्मुख्यः कृष्णादिना मलमाससंभवाच्च चांद्रादीनांव्यवस्थोक्ता हेमाद्रौ ब्रह्मसिद्धांते अमावास्यापरिच्छिन्नोमासः स्याद्ब्राह्मणस्यतु संक्रांतिपौर्णमासीभ्यां तथैवनृपवैश्ययोः अत्र ब्राह्मणादीनांयत्रकर्मविशेषेवचनांतरेण वसंतेब्राह्मणोग्नीनादधीतेत्यादिवन्मासउक्तस्तत्र दर्शांतत्वमात्रंनियम्यते नतु सर्वकर्मसुदर्शांतएवेति दृष्ट्याद्यर्थंसौभरेण महिषादिनिधननियमवद्विधिलाघवात्त्रैवर्णिकानांसर्वकर्मसु मासविशेषविधेः सावनादीनांशूद्रानुलोमादिपरत्वापत्तेश्च ज्योतिर्गर्गः सौरोमासोविवाहादौयज्ञादौसावनःस्मृतः आब्दिकेपितृकार्य्यादौचांद्रोमासः प्रशस्यते ऋष्यशृंगः विवाहव्रतयज्ञेषुसौरंमानंप्रशस्यते पार्वणेत्वष्टकाश्राद्धेचांद्रमिष्टंतथाब्दिके स्मृत्यंतरे एकोद्दिष्टविवाहादावृणादौसौरसावनौ ज्योतिर्गर्गः आयुर्दायविभागश्च प्रायश्चित्तक्रियातथा सावनेनैवकर्तव्याशूद्राणांचाप्युपासना विष्णुधर्मे नक्षत्रसत्राण्ययनानिचंद्रोर्मासेनकुर्य्याद्गणात्मकेनेति ब्राह्मे तिथिकृत्येचकृष्णादिंव्रतेशुक्लादिमेवच विवाहादौतुसौरादिंमासंकृत्येविनिर्दिशेदिति ॥

इतिशुद्धमासनिर्णयः ॥ अथमलमासनिर्णयः ॥ तत्रैके संक्रांतिरहितश्चांद्रोमासोमलमासः संक्रांतिद्वयवतःक्षयमासस्य संग्रहार्थैकइति सचद्विविधः अधिमासःक्षयमासश्च तदुक्तंमदनरत्ने काठकगृह्ये यस्मिन्मासिनसंक्रांतिःसंक्रांतिद्वयमेव वा मलमासः सविज्ञेयोमासः स्यात्तुत्रयोदशइति नसंक्रांतिरित्यनेन अधिमासग्रहणं संक्रांतिद्वयमेववेति क्षयमासस्य सत्यव्रतोपि राशिद्वयंयत्रमासिसंक्रमेतदिवाकरः नाधिमासोभवेदेषोमलमासस्तुकेवलमिति अयंच मासश्चांद्रएव अतश्चयत्रामावास्याद्वयमध्येसंक्रांतिर्नस्यात्संक्रांतिद्वयंवाभवेत्समलमासइत्यर्थः तदाहगार्ग्यःअमावास्याद्वयंयत्ररविसंक्रांतिवर्जितं मलमासः सविज्ञेयोमासः शुद्धस्ययउत्तरइति अस्यैव मलिम्लुचइत्यपिसंज्ञा तदुक्तं ज्योतिःशास्त्रे रविणालंघितोमासश्चांद्रः ख्यातोमलिम्लुचइति चांद्रोपिशुक्लादिरेवविवक्षितः तदुक्तं लघुहारीतेन इष्टौयत्रहूयेतेमासादिः सप्रकीर्तितः अग्नीषोमौस्मृतौमध्येसमाप्तौपितृसोमकौ तमतिक्रम्यतुयदारविर्गच्छेत्कदाचन आद्योमलिम्लुचोज्ञेयोद्वितीयःप्राकृतःस्मृतः अधिमासस्यमलत्वं अधिकमासत्वात् तदुक्तंगृह्यपरिशिष्टे मलंवदंतिकालस्यमासंकालविदोधिकमिति कालाधिक्यंच विष्णुधर्मोत्तरेदर्शितं सौरेणाब्दस्तुमानेनयदाभवतिभार्गव सावनेहितदामानंदिनषट्केनपूर्यते दिनराश्यस्तताराम प्रोक्ताः संवत्सरेणषट् सौरसंवत्सरस्यांतेमानेनशशिजेनतु एकादशातिरिच्यंतेदिनानिभृगुनंदन समाद्वयेसाष्टमासेतस्मान्मासोतिरिच्यते सचाधिमासकः प्रोक्तः प्रोक्तकर्मसु गर्हितइति अत्राधिकमासस्य ज्योतिःशास्त्रे संभवकालउक्तः दिवसस्यहरत्यर्कः षष्टिभागमृतौगतः करोत्येकमहश्छेदंतथैवैकंचचंद्रमाः एवमर्धतृतीयानामब्दानामधिमासकं अस्यार्थः दिवसस्याहोरात्रस्यतिथेर्वा षष्टिभागंदंडात्मकं अर्कःप्रतिदिनंहरतिनलंघयति अतऋतौ षष्ठ्यहोरात्रेःषष्टिनाड्याकर्षणात्तिथिरेकासूर्येणाकृष्टाभवति एवमिंदुनापि चंद्रार्काभ्यामृतुप्रतिदिनद्वयापकर्षेणाब्दार्धेण द्वादशदिनानिलभ्यंते एवंसार्धमब्दद्वयपर्यंतेनाधिमासो

लभ्यते अयंनपुंसकइत्यप्युक्तंज्योतिःशास्त्रे असंक्रांतोहियोमासःकदाचित्तथाद्वतःकालांतरात्समायातिसनपुंसकउ
च्यतेर्नपुंसकत्वंचमासपुंस्त्वप्रयोजकसूर्यस्याभावात् तदपितत्रैवोक्तं वरुणःसूर्योभानुस्तपनश्चंडोरविर्गभस्तिश्च अर्य्य
माहिरण्यरेतोदिवाकरामित्रविष्णूच एतेद्वादशसूर्य्यामाघाद्येषूदयंतिमासेषु निःसूर्योधिकमासोमलिम्लुचाख्यस्ततःपा
पःमासेषुद्वादशादित्यास्तपंतेहियथाक्रमं नपुंसकेधिकेमासिमंडलंतपतेरवेरिति मलिम्लुचत्वंतस्यकर्मफलचौरैराक्षसा
दिभिराक्रांतत्वात् तदुक्तंशातातपेन वत्सरांतर्गतःपापोयज्ञानांफलनाशकृत् नैर्ऋतैर्यातुधानाद्यैःसमाक्रांतोविना
र्कैः मलिम्लुचैःसमाक्रांतंसूर्यसंक्रांतिवर्जितं मलिम्लुचंविजानीयाद्गर्हितंसर्वकर्मसुइति अत्रस्फुटमानागतासंक्रांति
रेवाधिमासत्वेन ग्राह्या नतु मध्यमा अनेनशुक्लप्रतिपदादिदर्शांतादसंक्रांतमासस्यविधिनिषेधोपयोग्यधिमासत्वम
धिगम्यते नचमध्यममानागतसंक्रांतिनियमेन शुक्लप्रतिपदादिदर्शांतः अस्याहि.नियतोभवनकालोवसिष्ठसिद्धांतेद
र्शितः द्वात्रिंशद्भिर्गतैर्मासैर्दिनैःषोडशभिस्तथा घटिकानांचतुष्केणपतत्येकोधिमासकइति एतत्तुसंभवार्थं नतुनिय
मार्थं अन्यथाषोडशदिनाधिकद्वात्रिंशन्मासानंतरंकृष्णपक्षनियमेन शुक्लादित्वभंगापत्तेः तेनन्यूनाधिककालेमलमा
सपातेपिनैवदोषः यान्यपिमासेत्रिंशत्तमेभवेदित्यादीनिवचनानि तान्यपिसंभवाभिप्रायेणैव नतु नियमाभिप्रायेणव्य
भिचारस्यस्फुटत्वात् निर्णयामृते द्विसंक्रांतिमासस्तुमलमासएवनत्वधिमासः तदाहसत्यव्रतः राशिद्वयंयत्रमासेसं
क्रमेत्तदिवाकरः नाधिमासोभवेदेषमलमासस्तुकेवलं अयंद्विसंक्रांतिमासः क्षयाख्योपि तदुक्तंज्योतिःशास्त्रे असंक्रां
तिमासोधिमासःस्फुटःस्याद्द्विसंक्रांतिमासःक्षयाख्यःकदाचित् क्षयःकार्त्तिकादित्रयेनान्यतःस्यात्तदावर्षमध्येधिमास
द्वयंचेति स्फुटःस्फुटमानलभ्यः द्विसंक्रांतिमासोयदाभवति तत्रवर्षमध्येमासद्वयमधिकंभवति तत्रपरोदुष्टः आद्यः
शुद्धःतदुक्तंतत्रैव एकत्रमासद्वितयंयदिस्याद्वर्षाधिकंतत्रपरोधिमासः त्रयोदशांतुश्रुतिराहवेदेचतुर्दशःक्वापिनचास्ति

दृष्टइति जावालिरपि मासद्वयेब्दमध्ये तुसंक्रांतिर्नयदाभवेत् प्राकृतस्तत्रपूर्वःस्यादधिमासस्तथोत्तरःप्राकृतः शुद्धकर्मार्हइत्यर्थः उत्तरइति उत्तरएवाधिमासःकर्मार्हइत्यर्थः तथासएव एकस्मिन्नपिवर्षेचद्वौमासावधिमासकौ पूर्वोमासःप्रशस्तःस्यादपरस्तुमलिम्लुचइति अयंचत्रयोदशोमासश्चांद्रएव नसौरः तदुक्तं अस्तित्रयोदशोमास एवंश्रुत्यानिगद्यते असौचांद्रोनसौरःस्यान्नास्त्यसौहिचतुर्दशइति यत्तुब्रह्मसिद्धांते चैत्रादर्वाङ्नाधिमासःपरतस्त्वधिकोभवेत् यत्तुज्योतिःसिद्धांते घटकन्यागतेसूर्येवृश्चिकेवाथधन्विनि मकरेवाथकुंभेवानाधिमासोविधीयतइति तद्वृश्चिकादिचतुष्टयेमलमासेसति पूर्वंतुलाकन्यागतेसूर्ये क्षयात्पूर्वभाव्यधिमासस्यकालाधिक्यमात्रनिषेधार्थं नत्वधिकमात्रस्य दशानांफाल्गुणादीनांप्रायोमाघस्यचक्वचित् नपुंसकत्वंभवतीत्येषशास्त्रस्यनिश्चयइति हेमाद्रौ विष्णुधर्मविरोधात् मलमासेष्टकादिनिषेधानुपपत्तेश्च मकरेथवाकुंभेचेतिइष्टार्थप्राप्त्यभावात् अस्यागमनकालउक्तःसिद्धांतशिरोमणौ गतोब्ध्यद्रिनंदैर्मितेशाककालेतिथीशैर्भविष्यत्यथांगाक्षसूर्यैः गजाद्यग्निभूमिस्तथाप्रायशोयंकुवेदेंदुवर्षैः क्वचिद्गोकुभिश्च १ अस्यार्थः चतुःसप्तत्यधिकनवशत ९७४ वर्षशाककालेक्षयमासोगतः तथा पंचदशाधिकैकादशशत ॥ १११५ ॥ वर्षमितेशाकेक्षयमासोभविष्यति तथाषट्पंचाशदधिकद्वादशशतवर्षमिते ॥ १२५६ शाकेभविष्यति अष्टसप्तत्यधिकत्रयोदशशतवर्षमिते ॥ १३७८ ॥ शककालेभविष्यति अस्यसंभवएकचत्वारिंशदधिकशतवर्षमितकाले १४१ नियतःक्वचिद्गोकुभिश्च एकोनविंशतिवर्षैपिसचाप्यनियतएवेतिवोध्यम् एतावद्भिर्वर्षैःक्वचित् पूर्वोत्तरक्षयमासयोर्व्यवधानंभवतीति नतुनियमेन सोयं क्षयमासोमाससंज्ञाप्रयोजकसंक्रांतिद्वययुक्तत्वान्मासद्वयात्मकः सएवायंचांहस्पतिसंज्ञकः अस्मात्पूर्वभाव्यसंक्रांतिमासःसंसर्पः उत्तरभाव्यसंक्रांतिमासोधिमासः एतदेवाभिप्रेत्योक्तंवार्हस्पत्ये ज्योतिर्ग्रंथे यस्मिन्मासेन

संक्रांतिःसंक्रांतिद्वयमेववा संसर्प्पांहस्पतीमासावाधिमासश्चानिंदितइति अत्र पूर्वासंक्रांतद्विसंक्रांतयोः संसर्प्पांहस्पतिमाससंज्ञकत्वमुत्तरासंक्रांतमासस्याधिमासत्वंक्रमेणाभिधानादवगम्यते संसर्प्पोऽसंक्रांतोपि न मलमासः किंतुशुद्धतुल्यः उत्तरएवासंक्रांतोमलमासइत्युक्तंप्राक् इतिमलमासस्वरूपनिर्णयः ॥ अथ ससंक्रांतमासे कश्चिद्विशेषनिर्णयःप्रस्तूयते तत्रादौ तदुपयोगिचैत्रादिलक्षणं तच्च कमलाकरोक्तमेषादिसंक्रांतिपरिसमाप्तामवास्याकत्वमित्यादि तथाचमाधवमतेज्योतिषवचनं मेषादिस्थेसवितरियोयोमासः प्रपूर्य्यतेचांद्रः चैत्राद्यःसज्ञेयःपूर्त्तिद्वित्वेधिमासोंत्यइति नचैतत्तत्पूर्वासंक्रांतेऽव्याप्तमितिवाच्यं षष्टिभिर्दिवसैरित्याद्युक्तयःपृथगेवलक्ष्यत्वात् अतएव मेषादीनांशुद्धमाससंज्ञांप्रत्येवप्रयोजकत्वंमलमासस्योत्तरमासशेषत्वश्रवणादितिमाधववचःसंगच्छते यदाभाद्रपदोत्तरमधिकं तत आश्विनःततःकार्त्तिकःततोमार्गशीर्षोद्विसंक्रांतःततःपौषःततोमाघ.ततःफाल्गुणोऽसंक्रांतस्ततश्चैत्रइतिक्रमःतदामेषसंक्रांतिपरिसमाप्तामावास्याकत्वंचैत्रत्वमित्येवरीत्या धनुःसंक्रांतिपरिसमाप्तामावास्याकत्वं मार्गशीर्षकत्वमन्यत्र मार्गशीर्षेप्रसिद्धं तस्यात्रद्विसंक्रांतेरभावात् मार्गशीर्षोलुप्तःअतएवक्षयइतिव्यवह्रियते एवंसतिमासपक्षतिथिस्पष्टइत्यादिनातत्तन्मासविशेषणपुरस्कारेण विहितप्रत्याब्दिकादीनांसद्यस्कालायात्र्योयज्ञायरमतामित्यादेरविलोपप्रसंगःतत्र स्मृतानामागामिवर्षसंबंधितत्तन्मासेलोपप्रसंगश्च यदिचमकरसंक्रांतिपरिसमाप्तामावास्याकत्वरूपपौषत्वसद्भावेपि रविसंक्रमहीनेयोवर्ज्यावर्ज्यविधिःस्मृतः सएवतुद्विसंक्रांतेमलमासेप्युदीरितइति काठकगृह्येण पौषप्रयुक्तानामपि लोपप्रसंगः यदिचपूर्वोक्ततत्तन्मलमासलक्षणं तदुत्तरसंक्रांतेऽतिव्याप्तमित्युच्यते तदानीं तस्याद्यतिथिकत्वं चैत्रत्वं आद्यातिथिःशुक्लाप्रतिपत् तत्त्वंचप्रतिपदाद्यक्षणावच्छेदेनैवेत्येवंपरिपाट्या वृश्चिकस्थाद्यतिथिकत्वंमार्गशीर्षकत्वं धनुःस्थाद्यतिथिकत्वमितिविभाव्यते तदापौषोलुप्तइतितत्पुरस्कृतपूर्वोक्तकार्य्यविलोपः अतिदेशेतु मार्गशीर्षपुरस्कृत

कार्य्याप्रसंगः नचेष्टापत्तिः प्रत्यवायश्रवणादिति अत्रोच्यते तिथ्यर्द्धे प्रथमेपूर्वौद्वितीयेर्द्धेतदुत्तरः मासाविति बुधैश्चित्यौक्षयमासस्यमध्यगाविति ज्योतिषवचनात् क्षयमासेद्वयत्वोत्तद्यातत्तन्मासप्रयुक्तदोषस्यपरिहृतत्वात तत्र लक्षणभेदेनान्यतरोमासविशेषोगौणः मुख्यासंभवेगौणपरिग्रहस्यावश्यकेषुअन्यत्रप्रसिद्धेः अतिदेशप्रयुक्तलोपोद्धारस्तुइत्थं तत्राद्याब्दिकस्यमलेलोपविहितत्वादेवनलोपः द्वितीयादेस्तु मलेनन्यगतिः कुर्यान्नित्यानैमित्तिकींक्रियामितिकाठकगृह्ये पौषविधानात् मलत्वंचास्य अंहस्पतित्वात् एवंवार्द्धापनाष्टकादावपियोज्यं तत्रतत्तत्तिथिपूर्वोत्तरार्धयोस्तत्तत्कर्मकालव्याप्तौ व्याप्तौच एकदेशव्याप्तौवाकर्मकालाव्याप्तिव्याप्तिशासनमनुसर्त्तव्यं तत्राब्दिकविषये दर्शंचपौर्णमासंचपितुःसांवत्सरंदिनं पूर्वविद्धमकुर्वाणोनरकंप्रतिपद्यते इतिनारदीयवचनं तद्द्व्यहव्यापिनीचेत्स्यान्मृताहस्यचसातिथिः पूर्वविद्धैवकर्त्तव्यात्रिमुहूर्त्तैवयाभवेदिति वृद्धमानवीयं ह्यपराह्णव्यापिनीचेदाब्दिकस्ययदातिथिः महतीयत्रतांविद्धांप्रशंसंतिमनीषिणइति मारीचंवचः द्व्यहेपिव्यापिनीचेत्स्यान्मृताहस्ययदातिथिः पूर्वविद्धाप्रकर्त्तव्यात्रिमुहूर्त्ताचयाभवेदिति सुमंतुवचः कमलाकरैरप्युक्तं अत्र मृताहस्येत्यनेन कांक्षितमासपक्षइति मृताहत्वलक्ष्याबोधकवाक्यैकवाक्यतया तत्तन्मासविशिष्टत्वविधिविशेषाभावस्य अपराह्णद्वयेनबाधनात् विशेष्याभावप्रयुक्तविशिष्टाभावमादाय तिथ्यंतरेकर्त्तव्यताबोधनवत् विशेषणाभावप्रयुक्तविशिष्टाभावमादाय मासांतरेपितद्बाधनात् इदंचावश्यकं अन्यथायदाअमाचतुर्विंशतिघटिका प्रतिपत् अष्टादशघटिका तदाप्रतिपत्श्राद्धंमासांतरतिथ्यंतरसंबंध्यपराह्णेनस्यात् नचेष्टापत्तिः शिष्टैरनुष्ठीयमानत्वात् अस्यचप्रकृतेरुदाहरणं यदाप्रतिपच्चतुर्विंशतिघटिका द्वितीयाष्टादशतदामार्गद्वितीयाश्राद्धंपौषप्रतिपदि कर्त्तव्यं यदातु द्वितीयास्तमानेप्रवृत्तातदात्रिमुहूर्त्ताभावात् पूर्ववाक्याभावात् मार्गद्वितीयाश्राद्धंपौषद्वितीयायां त्रिमुहूर्त्तानचग्राह्या परत्रकुतपेहिसेति वचनात् कर्त्तव्यमित्येवंसर्वत्रसंयोज्यं वार्द्धापनेश्रादि

स्योदयकालिकी तदभावेयुग्मादिनानिर्णयइति नचेदंव्यर्थं त्रिंशत्तिथिसमूहात्मकमासस्यावयवीभूतयावत्तिथीनांमार्गशीर्षत्वपौषत्वस्यचसत्त्वानिर्वहतितत्रोक्तप्रकारेणान्यतरस्यारोपितत्वात् आरोपितानारोपितयोर्विरोधाभावात् विभागस्वीकारंविनैव सर्वतिथीनां प्रत्येकंतदुभयात्मकत्वोपपादनाद्यक्तुंशक्यत्वादितिवाच्यं अत्रमृतस्यजातस्यचाग्रिमवर्षीयतन्मासद्वयेपि आब्दिकश्राद्धवार्द्धापनानुष्ठापनापत्तेः तच्चानिष्टं अतएवतिथ्यर्द्धेप्रथमेपूर्वोद्वितीयेर्धेतदुत्तरइत्युक्तं अयंभावः मासावित्येकविशेषेणमासद्वयविधिर्यद्यप्यविशेषेणप्रतीयतेतथापि यदग्नयेचप्रजापतयेचसायंजुहोतीत्यनेन मंत्रवर्णप्राप्तविध्यनुवादेनप्रजापतिदेवताविधानवन्मुख्यमासानुवादेन पूर्वार्धाद्यवच्छेदकपुरस्कारेण मासांतरतादात्म्यातिदेशोविधीयते मुख्यमासत्वानुवादावच्छेदकविधानार्थोसमानांतरस्यावच्छेदकत्वंतूत्पत्तिविशिष्टमिति अवयवांतरेतन्मासत्वाभावः मुख्यमासत्वंयद्यप्यवयवांतरेसंभवति तथापि तदकिंचित्करं अतिदिश्यमानधर्मविरुद्धस्याश्रयप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात् यद्यपि अवच्छेदकभेदेनमासद्वयकल्पकवचनजातस्यकमलाकरेण क्षयंजातपुरस्कारेणाभिधानंकृतं तथापिमाधवेनापिविशेषणंतदुपन्यस्य द्वादशमासाः संवत्सरइत्यादिश्रुतिविरोधपरिहारस्य कृतत्वात्तदुपलक्षणं अन्यथा तिथिपूर्वार्द्धेप्रसूतायाःपौषप्रयुक्तशांत्याद्यापत्तेः मलेसति प्रसूतकर्णवेधस्य तिथिपूर्वार्द्धे अनुष्ठानेपिपौषप्रयुक्तप्राशस्त्यापत्तेश्च किंचएकएवयदामासइत्यादिना तिरस्कृतमासद्वयात्मकत्वस्य तिथ्यर्द्धेप्रथमेपूर्वमित्यादिवचनमंतरेण मासद्वयात्मकविधायकवचनानुपलंभात् अनेनतु अवच्छेदकभेदेनैव तद्विधास्यते उपलंभेवा पूर्वोक्तवैचित्र्यसिद्ध्यर्थंएतदेकवाक्यतयाअन्यायत्वाच्च एतच्चाग्रेविस्तरेणवक्ष्यते अतःसर्वत्रावच्छेदकभेदेनैवमासद्वयात्मकस्यगृहीतुमुचितत्वात्संकोचोयुक्तः एतेनमार्गशीर्षगतंचाब्दिकमेकस्मिन्नेवमासेतिथिपूर्वार्द्धादिविभागंविनैवकार्यमित्याचार्य्योक्तं यथाश्रुतकमलाकराशयवर्णनमात्रंबोध्यं विभागविभागाभावपक्षयोः क्वचित्फलैक्येपि

क्वचित्फलभेदात् तथाहि यदापूर्वदिनेप्रतिपद्घट्योष्टादश १८ ॥ द्वितीयाउत्तरदिने त्रयोविंशतिर्दंडा ॥ २३ ॥तद्दि
विभागाभावपक्षे मार्गशीर्षद्वितीयाश्राद्धंपौषद्वितीयाश्राद्धंचपूर्वदिने कृत्स्नापराह्णव्याप्तेः विभागपक्षेतु गतैष्ययोगे
नसर्वास्तिथिघट्यः ॥ ६५ ॥ तत्रसार्धद्वात्रिंशद्घटिकापर्यंतंमार्गशीर्षः तदुत्तरंपौषः मार्गशीर्षद्वितीयाश्राद्धंपूर्वदि
ने पौषद्वितीयाश्राद्धंतूत्तरदिने एवंबहुशःस्थलेषुबोध्यं अत्रजातानांमृतानांचतत्तत्तिथिपूर्वोत्तरार्धभेदेनाग्रिमवर्षसंबं
धितत्तन्मासनिर्णयः वर्षेवर्षेतुयच्छ्राद्धंमातापित्रोर्मृतेहनि मासद्वयेपितत्कुर्य्याद्व्याघ्रस्यवचनंयथेतिगालवीयव
चनं एकएवयदामासः संक्रांतिद्वयसंयुतः मासद्वयगतंश्राद्धंमलमासेपिशस्यते इतिशातातपीयं तत्राक्संज्ञयाधिमा
सक्रोयादिभवेत्तत्रत्यसांवत्सरं तस्मिन्शुद्धतयाक्षयेपिवचनात्कुर्य्याद्द्वयोःकोविद इतिदीपिकावचनं चैकमूलकत्वक
ल्पनानुरोधात् क्षयव्यवहितपरं परंतुवक्ष्यमाणप्राकृतत्वविषयं तस्मिन्शुद्धतयेत्युक्तेः वटेश्वरीयचालनप्रकारोपि
नात्र तथाहि मासःसंक्रांतिहीनोधिक इतिकथितः शीघ्रवक्रप्रचारैः संसर्पोंहस्पतिः स्यात्समविषमतयाचालनं
तत्क्षयस्य पूर्वैश्चंद्रार्कयोगैर्विरहितरविसंक्रांतितश्चालनंस्याद्वक्रश्चार्कोधिमासेयदिनचलतितदामासयुग्मंविलिप्त
मितितद्वचनं माधवाचार्य्यैर्लिखितं अस्यार्थः संक्रांतिशून्यः अधिकः अध्यारूढशब्दात्त्वनुत्तरपदलोपश्चेति अधि
कमितिसूत्रेणनिपातः शीघ्रवक्रप्रचारैःशीघ्रप्रचारैःवक्रप्रचारैरित्यर्थःशीघ्रप्रचाराधिकदिनोल्लंघनं वक्रप्रचारान्न्यूनदि
नोल्लंघनं तत्रपूर्वेणसंसर्पः द्वितीयेनअंहस्पतिः तद्विभक्तिप्रतिरूपकमव्ययं तयोर्मध्यइत्यर्थः क्षयस्यैवचालनंकर्त्तव्य
मितिशेषः तच्चसमविषमतारूपंविशेषणेतृतीया तत्रसमत्वं कृतेपिचालनेपूर्वमासापरित्यागः विषमत्वं तत्त्यागः
कैःकर्त्तव्यमित्याशंकायां पूर्वैरित्यादि क्षयात्पूर्वभाविभिरित्यर्थः चांद्रदिवसैरर्कदिवसैरस्य अध्याहृतंकर्तव्यमित्यने
नान्वयःक्वकर्त्तव्यमित्याशंकायामाह विरहितेति विरहितारविसंक्रांतिर्यत्रास्मिन्नर्थे सप्तम्यंतात्तसिःयच्चालनमुक्तंतत्तत्र

तत्पर्यंतवास्यादित्यनेनान्वयः सत्रकाचिदव्यवहितः क्वचिदेकेनव्यवहितः क्वचिद्द्वाभ्यां तच्चसाक्षात्परंपरयावा यदि वक्रअर्कः पूर्वोक्ताविषमचालनेवैषम्यासिद्ध्यर्थमाह अर्कमासेइतिससंक्रांतेइत्यर्थः तच्चद्विसंक्रांते एकसंक्रांतेवान चलतितत्रैवास्थिरोभवतीत्यर्थः मासयुग्मंतदा।अस्यतदेत्यादिशेषः तिथिपूर्वार्धेएकः अपरार्धे एकइतिमासद्वयंबोध्यं प्रकृते अनयारीत्याधनुःस्थोऽर्को यद्यपिपूर्वत्रचलति तथापि वृश्चिकस्थोर्कोनचलतीतिसाक्षात्परंपरयावा असंक्रांतपर्यंतचालनंनसंभवतीति क्षयादव्यवहितसंक्रांतोपिमधवद्वेमाद्रेश्चसंभाव्यते क्षयादेकेनद्वाभ्यांवाव्यवहितस्तुधर्मशास्त्रेचोदाहृतएव तत्रक्षयसामान्यलक्षणंतु द्विसंक्रांतित्वमात्रं तदुक्तंज्योतिःसिद्धांते असंक्रांतिमासोधिमासः स्फुटःस्याद्द्विसंक्रांतिमासःक्षयाख्यःकदाचित् क्षयःकार्त्तिकादित्रयेनान्यतः स्यात्तदावर्षमध्येधिमासद्वयंचेति तन्नियत सहचारि रूपंतु तत्पूर्वमासत्रयान्यतमासंक्रांतित्वेसतिउत्तरमासत्रयान्यतमासंक्रांतित्वं अत्रवर्षमध्येधिमासद्वयंचेति तुवैश्वानराधिकरणन्यायेनावयुत्यानुवादः अन्यथा द्व्यंगेंद्रशाकेक्षयमासआसीत्तताग्निखाष्टी १६०३ प्रमितेतुभावी वेदार्णवात्यष्टि १७४४ युतेग्रगोन्योभविष्यतिखाष्टधृतिप्रमेन्यइति ज्योतिःशास्त्रप्रसिद्धप्राकृतक्षयेअव्याप्त्यापत्तेः मासद्वयेब्दमध्येतुसंक्रांतिर्नयदाभवेत् प्राकृतस्तत्रपूर्वस्स्यादधिमासस्तथोत्तरइतिजावाल्याद्युक्तप्राकृतत्वमपि प्रकृते नास्ति अब्दमध्येइत्युक्तेः नचेदमपिपूर्ववदवयुत्यनुवादः यस्मिन्मासेनसंक्रांतिः संक्रांतिद्वयमेववा संसर्पांहस्पतीमासावधिमासश्चनिंदित इतिवचनविहितस्य त्रयाणांनिंदितत्वस्यवैयर्थ्यापत्तेः नचैवं संसर्पइतिसमाख्यावलादत्र निंदितत्वानन्वयइतिवाच्यं तस्याः सर्वतोदुर्बलत्वाद्वाक्यादिप्रमाणप्राप्ततदन्वयस्यबाधायोगात् नच साचरितार्था पूर्वोक्तप्राकृतत्वेनवाधितानन्वयस्थलेचारितार्थ्यादितिप्रकृतमलप्रयुक्तदानादितुत्रिष्वपिमासेषुअनुष्ठेयं अत्राश्विनपूर्वा संक्रांतस्यमलत्वं यद्यपि न कालाधिक्यप्रयुक्तं अन्यासंक्रांतवत्तथापि वत्सरांतर्गतः पापोयज्ञानांफलनाशकृत्

नैर्ऋतैर्यातुधानाद्यैः समाक्रांतोविनाशकैः मलिम्लुचैः समाक्रांतंरविसंक्रांतिवर्जितं मलिम्लुचंविजानीयात्सर्वकर्मसुगर्हितं इतिमाधवकृते शातातपोक्तंद्रष्टव्यं क्षयस्यांहस्पतित्वात् एकएवयदामासःसंक्रांतिद्वयसंयुतः मासद्वयगतंश्राद्धंमलमासेपिशस्यतइत्यत्र मलइत्यस्य क्षयमासइतिहेमाद्रिणाव्याख्यातत्वाच्चेति प्रकृतेत्राद्याब्दिकमसंक्रांतेद्वितीयाद्याब्दिकंतुशुद्धएव एवंदौहित्रप्रातिपच्छ्राद्धं नवरात्रदुर्गोत्सवादिषु शुद्धएवेति नचेदंसर्वग्रंथकारैर्नोक्तमितिवाच्यं तत्र किमेवमानुपूर्व्यान्नोक्तमुततात्पर्यतोनोक्तं नाद्यं अनुपूर्वभेदस्याऽकिंचित्करत्वात् न द्वितीयं माधवादितात्पर्यपर्यवसितत्वादितिदिक् ॥ अथप्रसंगादेकाब्दवर्त्यसंक्रांतद्वये पूर्वस्यप्राकृतत्वं तत्र कर्त्तव्याकर्त्तव्यनिर्णयः तत्र प्राकृतेतदुत्तरस्मिन्मासेचाब्दिकंनवरात्रादिकंचावृत्त्यानुष्ठेयं नतुसकृत्करणेन शास्त्रस्य कृतार्थत्वमितिन्यायस्यवसंतेब्राह्मणोग्नीनादधीतेत्यादौवीप्साश्रवणात् अन्यथाहि मासपक्षतिथिस्पृष्टेत्यनेनैकवाक्यता तथाच तस्मिंस्तस्मिन्वर्षेअसतिप्रतिबंधके प्रतियोगिव्यधिकरणतदनुष्ठानाभावस्य प्रत्यवायप्रयोजकत्ववत् तदंतर्गततत्तन्मासेतत्तत्पक्षेतत्तत्तिथिव्यक्तौच तादृशाभावस्य प्रत्यवायप्रयोजकत्वमन्यत्रप्रसिद्धं तस्यात्रापिसत्त्वेनाहरहः संध्यामुपासीतेत्यादिवदावृत्तेर्न्याय्यत्वात् नचाश्विनत्वपुरस्कारेणाविहितानामुत्तरत्र काम्यतुलादीनांतु प्राकृते इति वैचित्र्यंजातिदैशिकोपदेशिककृतंवक्तुंशक्यं षष्टिभिर्दिवसैरित्यादिना एकमासत्वपक्षे मुख्यतमैकमाश्विनत्वं तदंशेउक्तन्यायस्य संचारएवनास्ति किंतुशुद्धत्वांशेसवक्तव्यःतत्रतुलादीनामपिकाम्यंकर्मनकिंचनेतिनिषेधात् शुद्धत्वापेक्षायांउक्तन्यायसंचारेणोत्तरत्रैवानुष्ठानेप्राकृतत्वस्यवैयर्थ्यापत्त्याविनिगमनाविरहस्योभयत्रतुल्यत्वात् षष्टिभिर्दिवसैरित्यस्याभावेनतत्पूर्वस्यासंक्रांतस्याश्विनत्वादिकंतु आश्विनत्वपुरस्कारेणविहितानांदुर्गास्थापनादीनांमलमासप्रकरणे निषेधोज्ञापकात्सिद्ध्यतितच्चयदाप्राकृतत्वंतदातत्रप्राकृते तेषामनुष्ठानंविनानोपकारकत्वादिति तत्रोत्तरत्रचानुष्ठानावृत्तिः

काम्यतुलादानादेस्तु सकृदनुष्ठानेनकामनासिद्धेः उक्तन्यायसंचारेउत्तरत्रैवानुष्ठानंयुक्तं प्राकृतत्वंतु ज्ञापकसिद्धाश्विनत्वपुरस्कारेणविहितकार्य्यसंपादनेनकृतार्थमितिभाति यदातु द्विसंक्रांतादव्यवहितपूर्वोऽसंक्रांतः संभाव्यते उत्तरस्त्वसंक्रांतः एतदुभयमानवत्सरांतर्गतस्तदातस्यप्राकृतत्वंनिर्विवादं उत्तरशेषत्वंच तथा तत्रोत्तरस्यतिथ्यर्द्धेप्रथमेइत्यनेनविभागेन मासद्वयात्मकत्वंवाक्यांतरेणविभागेनोभयात्मकत्वंवा तत्रान्यतरोमासोगौणः अन्यतरे मुख्यः तत्रमुख्यशेषत्वेमुख्यप्रयुक्तकार्य्याकार्य्यैस्तः उभयशेषत्वे उभयप्रयुक्तकार्य्याकार्य्यैस्तः प्राकृतत्वंच स्वोत्तरवृत्तिधर्मवत्त्वमुपदिश्यते अथवा स्वोत्तरवृत्तिशुद्धत्वं अथवाक्षयानधिकरणवत्सरांतर्गतस्वस्थानापन्नमासवृत्तिशुद्धत्वंवा आद्ये स्वस्वोत्तरयोरुभयोरपिमलेनन्यगतिः कुर्यादिति उभयत्रश्राद्धादिप्राप्तौनदीपिकावचनमवकाशमर्हति द्वितीयेपि स्वोत्तरत्रशुद्धत्वाभावात्पूर्ववदेवनावकाशमासादयेत् तृतीयेतु शुद्धत्वात् तत्रैवोभयशेषत्वपक्षे मासद्वयप्रयुक्तंश्राद्धादि नतु क्षयेऽनन्यगतेरभावात् क्षयवचनादित्यस्यानवसरः एकएवेत्यत्रहेमाद्रिव्याख्यानंतु मलेनन्यगतिमित्येतन्मूलकमितिनात्रसंचरति यदिस्वोत्तरासंक्रांतोभिन्नवत्सरांतर्गतस्तदा प्राकृतत्वमेवनास्तीति मलेनन्यगतिःकुर्य्यादित्येतन्मात्रविषयः एवंचमुख्यशेषत्वपक्षे तृतीयंप्राकृतत्वं गृहीत्वाऽव्यवहितदीपिकावचनस्यावकाशोवाच्यः तथाचात्यल्पविषयतातदपेक्षयाऽव्यवहिताव्यवहितसाधारण्यंयुक्तं किंचयत्रोत्तरोमुख्यःतत्रतच्छेषत्वात् अस्य तत्प्रयुक्तमत्रस्यात् पूर्वप्रयुक्तंक्षयेस्यादितिव्यत्ययरूपंविरुद्धमापद्येत ततोदीपिकावचनं व्यवहितविषयमितियुक्तं किंच तत्प्रागित्यस्ययद्यव्यवहितएवप्रवृत्तिः स्यात्तर्हि संगीत्यस्यवैयर्थ्यंस्यात् कृतेतुतस्मिंस्तत्प्राचः संगीतिषष्ठीतत्पुरुषेण एकव्यवहितमेवगृह्णीयादितिव्यवहितमेव प्राक्संगिग्रहणंतु स्पष्टार्थं अत्रशुद्धतयेतिप्राकृतत्वमूलकं नत्वनन्यगतिमूलं तथासति तस्मिन्क्षयेवचनादित्येववदेत् नतुशुद्धतयेति एतेनप्राकृतत्वमपि अनन्यगतिमूलकमित्यपास्तं किंच

तस्यतन्मूलकत्वे तत्रत्वब्दमध्येइत्यादेर्वैयर्थ्याच्च माधवप्रभृतिभिरनन्यगतिकं क्षयेऽव्यवहितमेव उदाहरणद्वयमुक्त्वा प्राकृतत्वोक्तेश्च क्षयादप्यव्यवहितस्तुसंभावितःप्रकृते प्राकृतत्वाभावस्तु द्वितीयासंक्रांतस्यभिन्नाब्दप्रवृत्तित्वात्सहजतएवसिद्धइति तदर्थमेवायं प्रयासोमहतोवंशस्तंभादितिन्यायमनुसरतीतिदिक् उभयात्मकत्वंतुतिथिपूर्वार्द्धादिविभागेनैवसर्वत्रबोध्यं नत्वविभागेन तथाहि नतावत्प्रकृतेमुख्ये मार्गशीर्षपौषातिदेशः आरोपितानारोपितयोर्विरोधाभावेनोभयसमावेशेपि अतिदिश्यमानधर्मविरुद्ध इतिन्यायेन मार्गशीर्षकार्य्यासिद्धेः नचोभयत्वेनातिदेशः उभयतावच्छिन्नोद्देश्यकेहेमंतशिशिरयोरित्यादिविहितमासद्वयात्मकं ऋतूद्देश्यकादिकमेवातिदिश्यते नतु मार्गशीर्षाद्यवच्छिन्नोद्देश्यकप्रत्याब्दिकं नचमार्गशीर्षत्वपौषत्वएतदुभयवदतिदेशः तथासत्यपि उभयत्वावच्छिन्नावच्छेदकताकोद्देश्यताकार्यादेरेवातिदेशेनसिद्धिःस्यात् नतुनिरवच्छिन्नपौषत्वादिनिष्ठावच्छेदकताकोद्देश्यताकप्रत्याब्दिकादेरिति तिथ्यर्द्धेप्रथमेइत्यनेनयोयत्रनास्तिसचेत्पूर्वः तस्य तिथिपूर्वार्द्धे अतिदेशः योयत्रनास्तिसचेदुत्तरःतस्य तिथ्युत्तरार्द्धेतिदेशः मासावितितु लक्ष्यभेदाभिप्रायकं अतिप्रसंगस्तु अतिदिश्यमानेतिन्यायेन वारणीयः रात्रौश्राद्धप्रसंगस्तु पूर्वं वारितएव कार्त्तिकादिषुमासेषुयदिस्यातांमलिम्लुचौ सर्वकर्महरःप्रोक्तःपूर्वस्तत्रमलिम्लुच इतिवचनंतु यथाश्रुतमेव प्रकृतानुपयोगि यदिच कार्त्तिकादिमासेषुक्षयेसतिमलिम्लुचौस्यातामित्यर्थः तदा प्रकृतोपयोगेपिकार्त्तिकादिष्वित्यव्यावर्त्तकं किंच पूर्वएवसर्वकर्महरइत्येवनियमाकारे उत्तरस्य सर्वकर्महरत्वाभावःसिद्ध्यति पूर्वःसर्वकर्महरएवेत्येतस्यापिनियमस्यसंभवात् एतत्फलंतु पूर्वस्मिन्दिनाधिक्यप्रयुक्तमलत्वस्योत्तरत्र यथासद्भावस्तद्वदभावेनाऽस्यकर्मार्हत्वेप्राप्तेऽनेनपूर्वोक्तमलिम्लुचाधिष्ठितस्वरूपमलत्वव्यवस्थापनं तस्यापि यत्रप्राकृतत्वंतत्रतेनापहारइतिवचनांतरविरोधइत्यलं अथास्यकालदोषवत्त्वान्मलमासमात्रे वर्ज्यावर्ज्यनिर्णयः तत्र सत्यव्रतः मलिम्लुचस्तुयोमासःसमासः

पापसंज्ञितः वर्जितःपितृदेवाभ्यांसर्वकर्मसुवर्जयेदितिवापाठःसाधुः मनुःएकराशिस्थितेसूर्येयदादर्शद्वयंभवेत् हव्य
कव्यक्रियाहंतातदाज्ञेयोधिमासकः शातातपः वत्सरांतर्गतःपापोयज्ञानांफलनाशकृत् नैर्ऋतैर्यातुधानाद्यैःसमाक्रां
तोधिमासकःमलिम्लुचैःसमाक्रांतंसूर्यसंक्रांतिवर्जितं मलिम्लुचंविजानीयाद्गर्हितंसर्वकर्मसु गृह्यपरिशिष्टे मलिम्लु
चस्तुमासोवैमलिनः पापसंभवः गर्हितःपितृदेवेभ्यःसर्वकर्मसुतंत्यजेत् ब्रह्मसिद्धांते यदाशशीयातिगभस्तिमंडलंदि
वाकरःसंक्रमणंकरोत्यनु तदाधिमासःकथितोविरंचिनाविवाहयात्रोत्सवयज्ञदोषकृत् सिनीवालीमतिक्रम्ययदासंक्र
मतेरविः आनुमालंघितोमासेह्यनर्हःसर्वकर्मसु ज्योतिःशास्त्रांतरे सवितृमंडलमेतियदाशशीतदनुसंक्रमणंकुरुतेर
विः मखमहोत्सवनाशकरस्तदामुनिवरैःकथितोधिकमासकः पैठीनसिः श्रौतस्मार्तक्रियाःसर्वाद्वादशस्वेवकीर्तिताः
त्रयोदशेतुताःसर्वानिष्फलाइतिकीर्तिताः तस्मात्त्रयोदशेमासिनकुर्यात्ताःकथंचन कुर्वन्ननर्थमेवाशुकुर्यादात्मविना
शनमिति त्रयोदशत्वंच संक्रांतियुक्तद्वादशमासापेक्षया अत्रनिष्फलाइत्यभिधानात्फलकामनयाप्रवृत्तंकर्मनिषिध्यत
इतिगम्यते तथाचस्मृत्यंतरम् इष्ट्यादिसर्वकाम्यंतुमलमासेविवर्जयेदिति यद्यपि पूर्ववचनेषुसर्वकर्मकर्तव्यतानिषेधो
मलमासेप्रतीयते तथापि नकुर्याद्धिकेमासिकाम्यंकर्मकदाचन मलवद्दंतिकालस्यमासंकालविदोधिकं नकुर्याद
धिकेमासिकर्माकर्मकथंचन मुक्त्वानैमित्तिकंकर्मतद्धितत्रैवकीर्तितमित्यादिशंखवसुमंतुवचनेभ्योनित्यनैमित्तिककुर्या
त्प्रयतःसन्मलिम्लुचइत्यादिप्रतिप्रसववचनेभ्यश्च काम्यानामेवसः तत्रशंखवचने कर्माकर्मशब्देन काम्यंकर्मोच्य
तेतद्धिफलकामैःक्रियमाणत्वात्कर्मतदकामैरक्रियमाणत्वादकर्म कर्मचतदकर्मचेतिकर्मधारयः नित्यनैमित्तिकानां
तुकरणमेव नित्यनैमित्तिकेकुर्याच्छ्राद्धंकुर्यान्मलिम्लुचे तिथिनक्षत्रवारोक्तंकाम्यंनैवकदाचनेति जाबालिवचनात्
तदन्यगतिकानामेव अनन्यगतिकंनित्यंकुर्यान्नैमित्तिकंतथेतिस्मरणात् मलेऽनन्यगतिंनित्यंकुर्यान्नैमित्तिकींक्रिया

पुस्तकालय
गुरुकुल कांगड़ी

मितिकाठकवचनात् अनन्यगतिकंचयस्यनित्यस्यमुख्यकालातिक्रमेजघन्यस्यकालांतरस्याननुज्ञातत्वादस्यतलोपे प्रायश्चित्तंप्रसज्येत तत् मलमासेकाम्यनिषधोप्यारंभसमाप्तिविषयएव असूर्यानामयेमासानैतेषुममसंमतः व्रतानांचैवयज्ञानामारंभश्चसमापनमिति ब्रह्मसिद्धांतवचनात् प्रारब्धासमाप्तंतुकाम्यकर्म मलमासेपि भवत्येव प्रारब्धंकर्मयत्किंचित्तत्तुकार्य्यंमलिम्लुच इतितत्रैवोक्तत्वात् चातुर्मास्यव्रतारंभानंतरंतत्समाप्तिकालादर्वाङ्मध्यपतितेऽधिमासे अधिमासनिपातेपिह्येषएवविधिक्रम इतिवचनेन तद्व्रतस्याभ्यनुज्ञादर्शनेन काम्यकर्मांतरेष्वित्यपितथाकल्पयितुमुचितत्वात् आवश्यकंतु काम्यकर्ममलमासेप्यारभ्यकर्त्तव्यं यथातीव्रज्वराद्यभिभवे तद्व्यावृत्त्यर्थं श्रीरुद्रजपाद्यनुष्ठानंमलमाससमाप्तिवीक्षायामनर्थप्रसंगात् तदाहमरीचिःरोगेचालभ्ययोगेचसीमंतपुंसवेपिच यद्दानादिसमुद्दिष्टंपूर्वत्रापिनदुष्यतीति पूर्वत्रापि मलमासेपीत्यर्थः तथाभिचरतःप्रतिचरतश्चेष्ट्यादिकमप्यग्नावैष्णवमेकादशकपालंनिर्वपेदभिचरन्निति प्रतिवैपरस्तादभिचरंतिइत्यादिवाक्यविहितंतदप्यावश्यकत्वात्तत्रकार्य्यमेव तथाराजद्रोहादिनापमृत्योःप्रसक्तस्तत्रयोमृत्योर्बिभियात्तस्माएतांप्राजापत्यांशतकृष्णलांनिर्वपेदित्यादिना विहितेष्टिरपिकर्त्तव्यैव कृष्णलाःसुवर्णशकलानि यवत्रयपरिमितानियस्यां निर्वपणीयानिसेष्टिःशतकृष्णला तथा यदावृष्ट्यभावात्सस्यानि शुष्यंति मलमासश्चागतस्तदा कारीर्यां वृष्टिकामोयजेतेतिविहितेष्टिरपि न कालविलंबंसहते एवंस्मार्त्तान्यप्यावश्यकान्युदाहरणीयानि अनन्यगतिकानितुनित्यानि गृह्यपरिशिष्टउदाहृतानि अवषट्कारहोमाश्चपर्वचाग्रयणंतथा मलमासेपिकर्त्तव्यंकाम्याइष्टीर्विवर्जयेदिति अवषट्कारहोमा अग्निहोत्रवैश्वदेवादयः पर्वदर्शपौर्णमासौपार्वणस्थालीपाकश्च आग्रयणकर्त्तव्यताचपुराणालाभे तल्लाभेस्वकर्त्तव्यतैव अनेनैवाभिप्रायेण पैठीनसिनापि संक्रांतिरहितमासिकुर्य्यादाग्रयणंनवेतिविकल्प उक्तः नैमित्तिकान्यपि कानिचिदावश्यकानि नियमेनदर्शितानि चंद्रसूर्यग्रहेस्नानंश्राद्धदान

जपादिकं कार्य्याणिमलमासेपिनित्यंनैमित्तिकंतथेतिस्मृत्यंतरे चंद्रसूर्यग्रहे चैवमरणेपुत्रजन्मनि मलमासेपिदेयंस्याद्दत्तमक्षयतांव्रजेदिति चंद्रसूर्यग्रहणंचकपिलषष्ठ्याद्यलभ्ययोगानामप्युपलक्षणं गत्यंतरयुतानितुनित्यनैमित्तिकान्यपितत्रनकार्य्याणि तान्यपिकानिचित्काठकगृह्यपरिशिष्टेदर्शितानि सोमयागादिकर्माणिनित्यान्यपिमलिम्लुचे षष्ठीज्याग्रयणाधानचातुर्मास्यादिकान्यपि महालयाष्टकाश्राद्धोपाकर्माद्यपिकर्मयत् स्पष्टमासविशेषाख्याविहितंवर्जयेन्मलइतिसोमयागोवसंतेविहितस्तस्यमलमासेवर्जनेपिशुद्धेमासेऽनुष्ठानेवसंतेऽननुष्ठितिसंभवात्सगतिकत्वंषष्ठीष्टिःकाठकशाखादौप्रसिद्धा पुत्रेष्टिरित्यन्यत्रपाठःतत्रपुत्रगतपूतत्वादिफलार्थइष्टिरेवतस्यानैमित्तिकत्वात् निमित्तानंतरंकरणेप्रसक्तेपि शेषविरोधान्निमित्तानंतर्य्यबाधनशौचकालरूपांगोपसंग्रहव्यवस्थापनेनाशौचापगमेनानुष्ठानमिवमलमासेप्यतीतेसत्यनुष्ठानंतस्यन्याय्यत्वादुपपद्यतइतिसगतिकाजातेष्टिर्मलमासे न क्रियते हेमाद्रौपुष्टीतिपाठः तत्रापि पुत्रपुष्ट्यर्थत्वात्पुत्रेष्टिरेव अन्यस्या ईदृश्या इष्टेरदर्शनात् महालयोभाद्रपदस्यापरपक्षः अतएवानावश्यकनिषेधोगृह्यपरिशिष्टे मलंवदंतिकालस्यमासंकालविदोधिकं नेहेतात्रविशेषज्यामन्यत्रावश्यकाद्विधेरिति यच्च प्रवृत्तंमलमासात्प्राग्यत्काम्यमसमापितं आगतेमलमासेपितत्समाप्यमसंशयमिति मलमासेपिकाम्यकर्मणःसमाप्तिप्रतिपादकंकाठकगृह्यंतत्सावनमानोपजीविकृच्छ्रचांद्रायणादिविषयमितिकेचित् हेमाद्रिस्तु प्रवृत्तंमलमासात्प्रागिति समाप्त्यभ्यनुज्ञानंमलमासात्प्रागारब्धस्यानियतकालस्यापि असूर्याइति समाप्तिनिषेधस्तु मोहात्तत्रैवप्रक्रांतस्यकाम्यस्यमलमासेसमापनेदोषातिशयद्योतनार्थइत्याह तदयुक्तं प्राक्प्रवृत्तस्याप्यनियतकालस्यसमाप्तेःसुगतित्वेनमलमासेनुचितत्वात्प्रतिप्रसवस्याप्यगतिकविषयत्वात् मलमासेप्यनुवर्त्तनेनच प्रयोगप्राशस्त्याभावभंगाभावात् प्रवृत्तेतिवचनस्यनियतकालकर्मरूपविषयांतरसत्त्वादिति तदेतदपानरमणीयं प्रवृत्तवचने नियतकालानियतकालसाधारणशब्देनाभिधानात्

असूर्य्याद्वाविवचनव्यवस्थार्थं येमलमासप्रारब्धस्यैव समाप्तिस्तत्रनिषिध्यत इत्यत्राप्येवकारस्याप्यनर्थकत्वेन तुशब्दस्यचानुवृत्तिद्योतकत्वेनसर्वसंमतार्थकृतेनैवव्याख्यातुंशक्यत्वाच्चेति तस्मादावश्यकमेवकाम्यं अनन्यगतिकानिनित्यनैमित्तिकानिचकर्माणिमलमासआरंभणीयानिसमापनीयानिच सावनमाससाध्यानिचकाम्यान्यपिप्रारब्धव्यानि समापनीयानि तदितरेषांत्वारंभःसमाप्तिश्चनकर्त्तव्यौ अनुवर्त्तनमात्रंतुकर्त्तव्यमिति एवंसामान्यतोवर्ज्यावर्ज्यविवेकसिद्धे विशेषतोवर्ज्यावर्ज्याणि संगृह्यप्रदर्श्यंते तत्रपुंसवनसीमंतोन्नयनजातकर्मान्नप्राशनांतानिकर्माण्येतत्सर्वनिमित्तिकाभ्युदयिकश्राद्धंचंद्रसूर्यग्रहप्रयुक्तस्नानश्राद्धदानजपादिकंरोगशांत्यर्थंकर्मार्धोदयाद्यलभ्ययोगनिमित्तश्राद्धदानव्रतादिकमंत्येष्टिदहनोदकदानपिंडदानास्थिसंचयननवश्राद्धैकादशाहिकवृषोत्सर्गषोडशश्राद्धसपिंडीकरणानि मघात्रयोदशाश्राद्धसंध्यावंदनाग्निहोत्रातिपातगोवधादिनिमित्तप्रायश्चित्तमग्निनाशादिनिमित्तकं पुनराधानप्रतिमादिसंस्कारनाशहेतुकाः पुनःप्रतिष्ठापूर्वदृष्टतीर्थश्राद्धगजच्छायाश्राद्धादीनिनिमित्तवशान्मलमासेपिकर्त्तव्यानि तथाचस्मृतिसंग्रहे जातकर्मचपुंसूतिः सीमंतोन्नयनंव्रतं मलिम्लुचेपिकुर्वीतनिमित्तंयदिजायते पुंसूतिःपुंसवनं व्रतशब्देन अलभ्ययोगादिनिमित्तकव्रतानामावश्यकप्रायश्चित्तरूपकृच्छ्रचांद्रायणादीनांचग्रहणं यमः गर्भेवार्धुषिकेभृत्येश्राद्धकर्मणिमासिके सपिंडीकरणेनित्येनाधिमासंविवर्जयेत् तीर्थस्नानंजपोहोमोयवव्रीहितिलादिभिः जातकर्मांत्यकर्माणिनवश्राद्धंतथैवच मघात्रयोदशीश्राद्धंश्राद्धान्यपिचषोडश चंद्रसूर्यग्रहेस्नानंश्राद्धदानजपादिकं कार्य्याणिमलमासेपिनित्यंनैमित्तिकंतथेति गर्भेगर्भसंस्कारे पुंसवनादौ वार्धुषिकेतत्कृत्येवृद्धिग्रहणे भृत्येन तत्कृत्येभृतिग्रहणे मासिकं श्राद्धकर्मामावास्याश्राद्धं षोडशश्राद्धानांपृथगुपादानात् नित्यंनित्यदानं होमोत्रोपासनहोमः यवव्रीहितिलादिभिरित्यग्निहोत्रहोमोविहितकरणद्रव्योपादानता अंत्यकर्माणिदहनोदकपिंडदानास्थिसंचयनादीनि कालादर्शकारेऽपि द्वादशाहःसापिंडांतं

कर्मग्रहणजन्मनोः सीमंतपुंसवेश्राद्धंद्वावेतौजातकर्मच रोगेशांतिरलभ्येचयोगेश्राद्धंव्रतानिच प्रायश्चित्तनिमित्तस्यवशात्पूर्वंपरत्रवा अब्दोदकुंभमन्वादिमहालययुगादिषु श्राद्धंदर्शेप्यहरहः श्राद्धमूनाब्दमासिकं मलिम्लुचान्यमासेषुमृतानांश्राद्धमाब्दिकं श्राद्धंतुपूर्वदृष्टेषुतीर्थेष्वेवंयुगादिषु मन्वादिषुतुयद्दानंदानंदैनंदिनंचयत् तिलगोभूहिरण्यानांसंध्योपासनयोःक्रियाः पर्वहोमश्चाग्रयणंसाग्नेरिष्टिश्चपर्वणोः नित्याग्निहोमाश्चबलिर्दैवतातिथिपूजनं स्नानंचस्नानविधिनाअभक्ष्यापेयवर्जनं तर्पणंचनिमित्तस्यनित्यत्वादुभयत्रच अनित्यमनिमित्तंचदानंचमहदादिकं अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेक्षणं देवारामतडागादिप्रतिष्ठामौंजिबंधनं आश्रमस्वीकृतिःकाम्यवृषोत्सर्गश्चनिष्क्रमः राजाभिषेकःप्रथमश्चूडाकर्मव्रतानिच अन्नप्राशनमारंभोग्रहाणांचनिवेशनं स्नानंविवाहोनामातिपन्नेदेवमहोत्सवं व्रतारंभसमाप्तीचकर्मकाम्यंचपाप्मनः प्रायश्चित्तंतुसर्वस्यमलमासेविवर्जयेत् उपाकर्मोत्सर्जनंचपवित्रदमनार्पणं अवरोहश्चहैमंतःसर्पाणांबलिरष्टकाः ईशानस्यबलिर्विष्णोःशयनंपरिवर्त्तनं दुर्गेंद्रस्थापनोत्थानंध्वजोत्थानंचवज्रिणः पूर्वत्रप्रतिषिद्धानिपरत्रान्यच्चदैविकमिति अत्रद्वादशाहइत्यारभ्यनित्यत्वादुभयत्रचेत्यंतेन ग्रंथेन कर्त्तव्यसंग्रहः अनित्यमनिमित्तंचेत्यारभ्यवर्जयेदित्यंतेनवर्ज्यसंग्रहः उपाकर्मेत्यारभ्यान्यच्चदैविकमित्यंतेनमलमासवर्जितानांशुद्धमासेवश्यकर्त्तव्यत्वेनसंग्रहः अत्रगर्भेत्यादीनिसाक्षिवचनान्युदाहृतानिद्वावेतौजातकर्मचेत्यत्रएतौपुंसवनसीमंतौ एतच्चगर्भाधानाद्यन्नप्राशनांतसंस्कारोपलक्षणं तदुक्तंदीपिकायां गर्भाधानमुखंचचौलविधितःप्राग्जातयागंविना कृच्छ्रेष्वाग्रयणंगजेंद्रपुरतश्छायामघानंगयोःतीर्थेदुक्षययोश्चपित्र्यमधिकेमास्येवमाद्याचरेदिति स्मृतिसंग्रहेपि यागादिकं मासिकंचश्राद्धंचापरपाक्षिकं मन्वादिकंतैर्थिकंचकुर्य्यान्मासद्वयेपिचेति अपरपाक्षिकंप्रतिकृष्णपक्षविहितंश्राद्धं न तु महालयापरपक्षश्राद्धंतन्निषेधस्याग्रेवक्ष्यमाणत्वात् मत्स्यपुराणे दर्शेचाहरहः श्राद्धंदानंचप्रतिवासरं गोभूतिल

हिरण्यानांमासेपिस्यान्मलिम्लुचइति व्यासः जातकर्मणियच्छ्राद्धंदर्शश्राद्धंतथैवच मलमासेपितत्कार्य्यंव्यासस्य
अ०२० वचनंयथेति यत्तु संवत्सरातिरेकेणमासोयःस्यान्मलिम्लुचः तस्मिंस्त्रयोदशेश्राद्धंनकुर्य्यादिंदुसंक्षय इत्यृष्यशृंगवच
॥१९॥ नंगौडग्रंथेषुलिखितं तत्कार्त्तिकादिमासविशेषसंबद्ध.मावास्याविहितफलविशेषार्थश्राद्धपरं स्पष्टमासविशेषाख्यं
विहितंवर्जयेन्मले इत्येतदेकवाक्यत्वात्सर्वकामार्थविहितकाम्यश्राद्धविषयंच नकुर्य्यादधिकेमासिकाम्यंकर्मकदा
चनेति स.भान्यवचनेन तस्यापिनिषेधात् केचित्तुनकुर्य्यादिंदुसंक्षयइतिप्रमादपाठः नकुर्य्यान्नोपतिष्ठतइतिबहु
ग्रंथदृष्टपाठोज्यायानित्याहुः स्मृत्यंतरे श्राद्धजातकनामानिसंस्काराश्चैवसव्रताः मलिम्लुचेपिकर्त्तव्याइष्टीः
काम्याश्चवर्जयेदिति संस्कारा अन्नप्राशननिष्क्रमणादयः जनार्दनशयनादारभ्योत्थापनं यावद्धुत्वाग्निंधारणपार
णादिकं करिष्यामीतिसंकल्पसहिताःसव्रताःकाम्याअपि इष्टिग्रहणं काम्यपशुबंधादिकर्मोपलक्षणं सर्वेषामपि
काम्यानामावश्यकत्वेनवर्जनीयत्वात् हारीतोपि अधिमासेनकर्त्तव्यंश्राद्धमाभ्युदयंतथा तथैवकाम्यंयत्कर्मेतियत्का
म्यंकर्मेष्ट्यादिकंतत् मलमासे न कर्त्तव्यमित्यर्थः गभस्तिः एकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिकमुच्यते तत्कार्य्यंपूर्वमासे
चकालाधिकेपिधर्मतइति गौतमोपि जातकर्मणियच्छ्राद्धंनवश्राद्धंतथैवच ग्रहणेपुंसवादौचतत्पूर्वत्रपरत्रचेति निमि
त्तवशादितिवाक्यशेषःआदिशब्दात्सीमंतादिसंस्काराणामलभ्ययोगादीनांचोपसंग्रहःमरीचिः रोगेचालभ्ययोगेचसी
मंतेपुंसवेपिच यद्दानादिसमुद्दिष्टंपूर्वत्रापिनदुष्यतीति ज्योतिःशास्त्रे तत्रदत्तमदत्तंचहुतंचाहुतमेवच सुजप्तमप्यजप्तंस्या
न्नोपवासःकृतोभवेत् नयात्रांनविवाहंतुनचवास्तुनिवेशनं नप्रतिष्ठांचदेवानांप्रासादग्रामभूरुहामिति प्रजापतिरपि
उपाकर्मचहव्यंचकव्यंपर्वोत्सवंतथा उत्तरेनियतंकुर्य्यात्पूर्वेतन्निष्फलंभवेत् अन्यत्रापि अवरोहश्चहेमंतःसर्पाणांबलि
रष्टकाः ईशानस्यबलिर्विष्णोःशयनंपरिवर्त्तनं प्रायश्चित्तंतुसर्वस्यमलमासेविवर्जयेत् गार्ग्यः अपूर्वदेवतांदृष्ट्वाशुचः

स्युर्नष्टभार्गवे मलमासेत्वनावृत्तस्तीर्थयात्रांविवर्जयेत् शातातपोपि अस्तंगतेगुरौशुक्रेवृद्धेबालेमलिम्लुचे व्रतारंभापवर्गेचनकुर्य्यान्मौंजिवंधनमिति गार्ग्योपि नामान्नप्राशनंचौलंविवाहंमौंजिबंधनं निष्क्रमंजातकर्मादिकाम्यंवृषविसर्जनं अस्तंगतेगुरौशुक्रेबालेवृद्धेमलिम्लुचे उद्यापनमुपारंभंव्रतानांनैवकारयेदितिनामेतिस्वकालेऽकृतनामविषयं तदाहगार्ग्यः नामकर्मचजातेष्टिंयथाकालंसमाचरेत् अतिपातेनकर्त्तव्यंप्रशस्तेमासिपुण्यभइति वासिष्ठोपि वापीकूपतडागादिप्रतिष्ठांयज्ञकर्मच नकुर्य्यान्मलमासेपिमहादानव्रतानिचेति मरीचिरपि गृहप्रवेशगोदानस्थानाश्रममहोत्सवान् नकुर्य्यान्मलमासेपिशुक्रगुर्वोरुपप्लवइति पराशरः अग्न्याधेयप्रतिष्ठांचयज्ञदानव्रतानिच वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः मांगल्यमभिषेकंचमलमासेविवर्जयेत् अस्यापवादः चंद्रसूर्यग्रहेचैवमरणेपुत्रजन्मनि मलमासेपिदेयंस्याद्दत्तमक्षय्यकारकमिति। अग्न्याधेयप्रतिष्ठांचेत्यत्रानावश्यकत्वेसतीतिशेषोद्रष्टव्यः तेनमलमासेपिप्रायश्चित्तभूतमग्न्याधेयमग्न्यनुगत्यनंतरकर्त्तव्यंनप्रतिषिध्यते एवं प्रतिमासंस्कारनाशे पुनःप्रतिष्ठानप्रतिषिध्यते कौथुमिः अब्दमंबुघटंदद्यादन्नंचापिसुसंस्कृतं संवत्सरेविवृद्धेपिप्रतिमासंचमासिकमिति तथाच त्रिंशत्सोदकुंभाअन्नदानानि एकंमासिकंचतदाधिकंभवतीत्यर्थः अतएववसिष्ठः संवत्सरमध्येयद्यधिमासोभवेन्मासिकार्थंदिनमेकंवर्द्धयेदिति यत्तु ज्योतिःपराशरेणोक्तं उपाकर्मतथोत्सर्गप्रसवाहोत्सवाष्टकाः मासवृद्धौपराःकार्य्यावर्जयित्वातुपैतृकं पराः कार्य्याउत्तरेमासिकार्य्याइत्यर्थःतत्रप्रसवाहोत्सवशब्देनजातेष्टिरेवगृह्यते नपुनराभ्युदयिकंजातकर्मचतयोरपिग्रहणे श्राद्धजातकनामानीत्यादिस्मृतिविरोधापत्तेः पैतृकग्रहणमावश्यकविषयंनतुकेवलसांवत्सरिकविषयं अमावास्यादिश्राद्धस्यापि मलमासेविधानात् काठकगृह्येपि प्रेतमाल्यादिमारभ्यश्राद्धंनैमित्तिकादृते मघात्रयोदशीश्राद्धंप्रत्युपस्थितिहेतुकं अनन्यगतिकत्वेनकर्त्तव्यंस्यान्मलिम्लुच इति प्रत्युपस्थितिहेतुकमित्यनेन संध्यावंदनाद्यतिपात

निमित्तप्रायश्चित्ताग्निनाशादिनिमित्तपुनराधानादेरुपसंग्रहः वृहस्पतिः नित्यनैमित्तिकेकुर्य्यात्प्रयतः सन्मलिम्लुचे
तीर्थश्राद्धंगजच्छायाप्रेतश्राद्धंतथैवच अत्रगजस्ययापूर्वस्यांदिशिछाया सा गजच्छाया परमान्नंतुयोदद्यात्पितॄणांमधु
नासह छायायांतुगजेंद्रस्यपूर्वस्यांदक्षिणामुख इति विश्वामित्रोक्ता मुख्याग्राह्या नतुयदेंदुःपितृदैवत्येहंसश्चैवकरेस्थि
तः याम्यातिथिर्भवेत्सापिगजच्छायाप्रकीर्त्तितेतितेनैवोक्ता पारिभाषिकी मलमासे तदसंभवात् मघायुक्तत्रयोदश्यां
करेहस्तेचसूर्यस्यावस्थानेसतिभाद्रमासेकन्यासंक्रांतिरवश्यंभावेन तस्यमलमासेत्यागसंभवात् नागरखंडे नभोवा
थनभस्योवामलमासोयदाभवेत् सप्तमःपितृपक्षःस्यादन्यत्रैवतुपंचमइति तत्राषाढीमवधिंकृत्वासप्तमपंचमौद्रष्ट
व्यौ आषाढ्याः पंचमे पक्षइतिवचनात् आषाढमासांतर्गतभागे कर्कसंक्रांतौ नभसोऽधिकमासत्वं श्रावणमास
स्यांतभागे सिंहसंक्रांतौनभस्यस्याधिकमासत्वं तयोरुभयोरपि पक्षयोः कन्यायां वर्त्तमानेसवितरि यःकृष्णपक्षः
ससप्तमोभवति असतिद्विविधेअधिमासेतुपंचमः देवलः अर्केनभस्येकन्यास्थेश्राद्धपक्षःप्रकीर्त्तितः सिनीवाली
मतिक्रम्ययदाकन्यांव्रजेद्रविः तदाकालस्यवृद्धत्वादतीतिचापितृक्रियेति अतीतिपंचमपक्षमतिक्रांते एवंच यत्कैश्चि
दुक्तं कन्यासंक्रांतिनिमित्तानां श्राद्धानां षोडशदिवसेषुनैमित्तिकस्यचश्राद्धस्यमलमासेनिषेधाभावात्तानिकार्य्याणि
तदुक्तं प्रजापतिना मुक्त्वानैमित्तिकंश्राद्धमिति ब्रह्मसिद्धांते सूर्येणलंघितोमासोनकर्मण्यःस्मृतोबुधैः तस्मात्तत्रन
कुर्वीतश्राद्धंनैमित्तिकादृते निमित्तत्वं श्राद्धंप्रति कन्यासंक्रांतेः पुराणोक्तं कन्यांगतेसवितरियान्यहानितुषोडश क्रतु
भिस्तानितुल्यानिपितॄणांदत्तमक्षयमिति तन्निरस्तं कार्ष्णाजिनिः नभस्यस्यापरेपक्षेतिथिषोडशकस्तुयः कन्याग
तान्वितश्चेत्स्यात्सकालःश्राद्धकर्मणि प्रशस्तइतिशेषः यत्तु जातूकर्ण्यवचनम् आषाढीमवधिंकृत्वायः स्यात्पक्ष
स्तुपंचमः श्राद्धंतत्रप्रकुर्वीतकन्यांगच्छतुवानवा तत्पूर्वदर्शितवाक्यनिचयपर्य्यालोचनयापक्षोपक्रमाभिप्रायं तथाच

कार्ष्णाजिनिः अंतेवायदिवामध्येयत्रकन्यांरविर्व्रजेत् पक्षस्तुपंचमः पूज्यःश्राद्धषोडशकंप्रति तेन कन्यांगतेसवितारिइत्यादिपुराणवचनंपक्षमध्येयास्तिनन्नहाने कन्यासंक्रमणेसति प्रतिपदादिषोडशाप्यहानि उपादेयानि इत्येवंव्याख्येयं नतुसंक्रमणात्पूर्वाणि हेयानीत्येवंशुद्धमासमृतस्यप्रथमाब्दिकं मलमासमृतानां प्रत्याब्दिकश्राद्धंच तत्संबंधिमासेमृतस्यप्रथमाब्दिकश्राद्धंचतत्संबंधिमासस्य मलमासत्वे मलमासएव कार्य्यं तदाह वृद्धवसिष्ठः असंक्रांतिरिकर्त्तव्यमाब्दिकंप्रथमंसुरैः तथैवमासिकंश्राद्धंसपिंडीकरणंतथेति यमः आब्दिकंप्रथमंयत्स्यात्तत्कुर्वीतमलिम्लुचे, त्रयोदशेतुसंप्राप्ते कुर्वीतपुनराब्दिकं द्वितीयादिवार्षिकंत्रयोदशेमासेसमाप्तेसति चतुर्दशप्रवेशादिनेकुर्वीतेत्यर्थः लघुहारीतोपि प्रत्यब्दंद्वादशेमासिकार्य्यापिंडक्रियासुतैः क्वचित्त्रयोदशेपिस्यादाद्यंमुक्त्वातुवत्सरमिति द्वादशेमास्यतीतेऽनंतरदिने क्वचिन्मृतिमासे मलिनेत्रयोदशेतीतेऽनंतरदिनेपि स्यात् किंत्वाद्यंवत्सरंमुक्त्वाआद्यवत्सरानंतरमृतिमासएव मलिंनेतुद्वादशेतीतेऽनंतरदिन एवेत्यर्थः अत्रयमः संवत्सरस्यमध्येतुयदिस्यादधिमासकः तदात्रयोदशमासिक्रियाप्रेतस्यवार्षिकी इतिविष्णुधर्मोत्तरात् त्रयोदशेऽतीतेवार्षिक्यूनाब्दिकसपिंडीकरणरूपा मासपक्षतिथिस्पष्टैर्योयस्मिन्म्रियतेहनि प्रत्यब्दंतुतथाभूतंक्षयाहंतस्यतंविदुरितिव्यासवचनाच्च अन्यथाकार्त्तिकमृतस्याश्विनेप्रथमाब्दिकप्रसंगः प्रथमवर्षेऽधिमासपातेऽधिकमासिकाविधानाच्च यद्वा षष्ट्यातुदिवसैर्मास इतिवचनाच्छुद्धाशुद्धमासयोरेकमासत्वमभिप्रेत्यतत्रापिद्वादशेऽतीतएवाब्दिकं एतादृशव्यवहारोपपादनार्थमेकमासत्वाभिधानात् तेनमलमासमृतानांकालक्रमेणयदाकदाचिन्मृतिमासएवमलमासस्तदानींतनमाब्दिकं यदाच मृतिमासात्त्रयोदशएवमलमासस्तदा प्रथमाब्दिकंच मलमासएव मलमासेमृतानांतुयच्छ्राद्धंप्रतिवत्सरं मलमासेतुकर्त्तव्यंनान्येषांतुकदाचनेति भृगुवचनेन आब्दिकंप्रथमंयत्स्यात्तत्कुर्वीतमलिम्लुचइतिस्मरणेनच मलमासएवकर्त्तव्यं शुद्धमासमृतानां

द्वितीयाद्याब्दिकंतु तन्मासेधिकेसतिशुद्धमास एवकर्त्तव्यमिति पैठीनासिरपि मलमासेपिकर्त्तव्यंश्राद्धंयत्प्रतिवत्सरं सांवत्सरंनवर्द्धेतश्राद्धंतत्रमृतेहनि अत्रपूर्वार्द्धं मलमासमृतविषयं मलमासेशुद्धमासमृतप्रत्याब्दिकश्राद्धनिषेधात् मलमासेपीत्यपिरवधारणे उत्तरार्द्धंशुद्धमासमृतप्रथमाब्दिकाविषयं सांवत्सरंप्रथमाब्दिकं नवर्द्धेतनोभयत्रकरणीयं किंतु तत्रमलमासेकर्त्तव्य.मित्यनुषज्यते यत्तुसत्यव्रतः वर्षेवर्षेतुयच्छ्राद्धंमातापित्रोर्मृतेहनि मलमासेनतत्कार्य्यं व्याघ्रस्यवचनंयथेति तद्द्वितीयाब्दादिवार्षिकविषयं आब्दिकंप्रथमंयत्स्यात्तत्कुर्वीतमलिम्लुचइतिपूर्वोक्तवचनात् तेनाद्वितीयादिशुद्धमासएव पृथ्वीचंद्रोदये दिवोदासीये मदनपारिजातेचैवं अत्रकेचित् मलमासेसांवत्सरिकंश्राद्धंकृत्वापुनस्तदुत्तरमासेतदेवावर्त्तनीयं आब्दिकंप्रथमंयत्स्यादितिपूर्वोक्तयमवचनात् अत्रच त्रयोदशेतुसतिचतुर्दशमासप्रवेशादिनेपुनराब्दिकंकुर्वीतेत्यर्थःसांवत्सरंनवर्द्धेतेत्यस्यायमर्थःनवर्धेतनविच्छिद्येतेति तेनैतदेवमासद्वयेपिश्राद्धमनुष्ठेयमितिप्रतिपादयतीतितदसत् उभयत्रश्राद्धानुष्ठानेप्रमाणाभावात् यमवचनस्यतु प्रथमाब्दिकद्वितीयाद्याब्दिकविषयत्वेनव्यवस्थापितत्वात् नवर्द्धेतेत्यस्यनाविच्छिद्येतेत्यर्थकत्वेक्लिष्टत्वापत्तेश्च यत्तु वृद्धवासिष्ठः श्राद्धीयाहनिसंप्राप्ते ह्यधिमासोभवेद्यदि मासद्वयेपिकुर्वीतश्राद्धमेवंनमुह्यते यच्चव्यासः उत्तरेदेवकार्य्याणिपितृकार्य्याणिचोभयोरिति तन्मासिकादिविषयं योगादिकंमासिकंचश्राद्धंचापरपाक्षिकं मन्वादिकंतैर्थिकंचकुर्य्यान्मासद्वयेपिचेतिचंद्रिकोक्तेः तैर्थिकंतीर्थश्राद्धंयच्चमासद्वयेपितत्कार्य्यमितित्रिस्थलीसेतौभट्टाः केचित्तु प्रतिमासंमृताहेचश्राद्धंयत्प्रातिवत्सरं मन्वादौचयुगादौचतन्मासोरुभयोरपि इतिमरीचिवचनात् वर्षेवर्षेतुयच्छ्राद्धंमातापित्रोर्मृतेहनि मासद्वयेपितत्कुर्य्याद्व्याघ्रस्यवचनंयथेति गालवोक्तेश्च प्रत्याब्दिकंमासद्वयेपिकार्यमित्याहुः तत्तुच्छंप्रतिमासंमृताहेक्रियमाणं मासिकंप्रतिसंवत्सराक्रियमाणं कल्पादिश्च द्वमितिमरीचिवचसोमदनरत्नेव्याख्यानात् गालवीयस्यच मासद्वयात्मके

क्षयमासइतिमाधवेनव्याख्यानात् अतएवकौथुमिः अधिमासेनकर्त्तव्यंश्राद्धंसांवत्सरादिकं वर्षवृद्ध्याभिषेकादिकर्त्तव्यमधिकेनत्विति यदपिनिर्णयामृते पूर्वोक्तकालादर्शवचनान्मलमासेश्राद्धदिनस्यवंध्यत्वनिरासार्थंपित्रुद्देशेनब्राह्मणान्भोजयित्वा शुद्धमासेसपिंडकंश्राद्धंकुर्यात् पिंडवर्जमसंक्रांतेसंक्रांतेपिंडसंयुतं प्रतिसंवत्सरंश्राद्धमेवंमासद्वयेपिचेति वृद्धपराशरोक्तेरिति तदपिचिंत्यं पूर्वोक्तवचनस्य क्षयपूर्वभाव्यधिकमासविषयत्वात् तत्रहिमासद्वयेश्राद्धमुक्तम् तथाच सत्यतपाः एकएवयदामासः संक्रांतिद्वयसंयुतः मासद्वयगतंश्राद्धंमलमासेऽपिशस्यते मासद्वयगतं पूर्वापरसंक्रांतिगतंक्षयमासगतंच मलमासेक्षयमासे अपिशब्दात्पूर्वाधिमासेचेति हेमाद्रिदीपिकायामपि तत्प्राक्संइयधिकमासोयदिभवेत्तत्र्यसंवत्सरं तस्मिन्शुद्धतयाक्षयेचवचनात्कुर्य्याद्द्वयोः कोविदइति कालादर्शेऽपि कथंचिदेतद्विषयतयैवव्याख्येयइत्याह एवंमलमासेवर्ज्यावर्ज्यनिर्णयेकृते क्षयमासेऽपि मलमासत्वान्मलमासनिषेधप्राप्तौ रविसंक्रमहीनोयोवर्ज्यावर्ज्यविधिः स्मृतः सएवतुद्विसंक्रांतौमलमासेप्युदीरितइतिकाठकगृह्यवचनादधिमासप्रयुक्तनिषेधप्राप्तौचविशेषोऽभिधीयते अत्रकाम्यव्रतादिकर्मणांप्रथमारंभमेवनकुर्य्याद्द्वितीयाद्यारंभंसमाप्तिंचकुर्य्यादेव अन्यथापौषमार्गशीर्षयोः क्षयमासांतःपाते चातुर्मास्यव्रतानामसमाप्तिः प्रसज्येत प्रारब्धकर्मणामसमाप्तौपुनरनारंभेचसंकल्पविरोधः आरंभानियमेदोषश्चासमाप्तौस्यादितिकात्यायनवचनविरोधश्च अधिमासेशुद्धमासांतरसद्भावादारंभसमाप्त्योस्तत्रोपपत्तेरधिमासे तयोः प्रतिषेधे न कश्चिद्विरोधः प्रथमारंभोऽपिक्षयशुद्धमासांतराभावात्कस्मान्नस्यादितिचेन्न न कुर्य्यान्मलमासेतुमहादानव्रतादिकंचेतिवचनविरोधात् अस्यच प्रथमारंभव्यतिरिक्तारंभसमाप्त्यादिनिषेधपरत्वे संकल्पविरोधस्योक्तत्वात् काम्यव्रतादीनां क्षयमासे प्रथमारंभनिषेधपरत्वेऽविरोधाच्चेति नन्वेवंसति यदिकार्त्तिकेऽधिमासोभवतितदाकार्त्तिकव्रतानांशुद्धाश्विनएवारंभः शुद्धकार्त्तिकेचसमाप्तेर्मासोपवासव्रतस्यापि मासद्वयएवानुष्ठानं

प्राप्नोति तच्चाऽशक्यं उच्यते यदीह मासोपवासव्रतस्याश्विनेप्रारंभविधानं शुद्धकार्त्तिकेच समाप्तिविधानंस्यात्स्यादेवं
नत्वेवमस्ति किंत्वस्याश्विनशुक्लद्वादश्यामारंभमभिधायोपरितनशुक्लद्वादश्यां समाप्तिर्विष्णुरहस्येऽभिहिता आश्विन
स्यामलेपक्षेएकादश्यामुपोषितः व्रतमेतत्तुगृह्णीयाद्यावत्त्रिंशद्दिनानितु अन्यूनाधिकमेवंतुव्रतंत्रिंशद्दिनैःकृतं कृत्वा
मासोपवासंतुसंयतात्माजितेंद्रियः ततोर्चयेतवैपुण्यंद्वादश्यांगरुडध्वजं पूजयेत्पुष्पमालाभिर्गंधपुष्पविलेपनैः वस्त्र
दानादिभिश्चैवभोजयेच्चद्विजोत्तमान् दद्याच्चदक्षिणांतेभ्यःप्रणिपत्यविसर्जयेत् अतःशुद्धाश्विनशुक्लद्वादश्यामेवतद्व्र
तमारभ्योपरितनकार्त्तिकशुद्धद्वादश्यां समापनीयं मासद्वयमनुष्ठेयं मासोपवासव्रतस्यचकाम्यत्वात्काम्यस्यच मलमा
सात्प्रागारब्धस्यमलमासेऽपिसमाप्तिविधानान्नकश्चिद्दोषः मासद्वयसंवंधीनि क्षयाहादिश्राद्धान्यपि क्षयमासएवकर्त्त
व्यानि तदाह सत्यव्रतः एकएवयदामासः संक्रांतिद्वयसंयुतः मासद्वयगतंश्राद्धंमलमासेऽपिशस्यतइति एवंमासद्व
यसंबंधीन्यन्यान्यपिकर्माणितत्रैवानुष्ठेयान्यगतिकत्वात् मासद्वयगतंकर्मतत्रकुर्य्याद्विनिर्णयः एकस्मिन्मासिमासौ
द्वौयदास्यातांतदाद्वयोः तावेवपक्षौताएवतिथयस्त्रिंशदेवहीतिस्मृत्यंतरवचनाच्च क्षयमासस्यमासद्वयात्मकेनक्षयमा
सेयावतीयातिथिस्तस्याःपूर्वार्धे मृतस्य जातस्यच क्रमेणवर्षांतरेक्षयाहश्राद्धंवार्द्धापनोत्सवंच क्षयमासांतर्गतपूर्वमास
संज्ञिकेकुर्य्यात् तदुक्तम् तिथ्यर्द्धेप्रथमेपूर्वोद्वितीयेऽर्धेतथोत्तरःमासावितिवुधैश्चिंत्यौक्षयमासस्यमध्यगाविति इदंचक्ष
यमासतिथिपूर्वोत्तरार्द्धयोः क्रमेण पूर्वोत्तरमाससंबंधीत्यस्य व्यवस्थापकंवचनं क्षयमासकर्त्तव्यमासद्वयसंवंधिश्राद्धव्र
तादिविषयं अपराह्णादिकालविधायकानेकवचनबाधप्रसंगात् तस्मात्कार्त्तिकमार्गशीर्षयोःक्षयमासांतःपाते कार्त्ति
कसंवंधीनिमार्गशीर्षसंवंधीनियानिश्राद्धव्रतादीनियस्मिन्पक्षे यस्यां तिथौयस्मिन्नपराह्णादिकालेविहितानि तानि
क्षयमासे तत्रैव कर्त्तव्यानि एवं क्षयमासांतरेऽपिद्रष्टव्यं ततश्चकार्त्तिकशुक्लप्रतिपत्प्रयुक्तं पितृक्षयाहैकोद्दिष्टंमार्गशुक्ल

प्रतिपत्प्रयुक्तंमातृक्षयाहैकोद्दिष्टंचक्षयमासशुक्लप्रतिपदिमध्यान्हएवकर्त्तव्यं एवमन्यान्यपीतिदिक् अत्रसौरमानेन तु लावृश्चिकधनुषांमध्येएकतरराशिसंक्रांतिवशेन तत्पूर्वोत्तरसौरमासयोःशुक्लकृष्णपक्षौद्वावेवशिष्येते द्वौचक्षीयेते एवं क्षयमासव्यवस्था पूर्वाचार्य्यैः कृतादृश्यते अथात्र यानिमलमासेवर्ज्यानितानिसर्वाण्यपिशुक्रास्तादावपिप्रसंगाद्वर्ज्यान्युच्यंते तथाचोक्तं बालेवायदिवावृद्धेशुक्रेचास्तमुपागते मलमासइवैतानिवर्जयेद्देवदर्शनमिति अत्रकेचित् मलमासइवेति सिद्धवद्दृष्टांतीकरणान्यथानुपपत्त्यामलमासेप्रथमदेवदर्शनानिषेधः सिद्धः अपरेतु मलमासइवेत्युत्तरवचनोपात्ताग्न्याधेयादिष्वेवयोजयंति यथामलमासेचंद्रसूर्यग्रहणादिकालव्यतिरेकेणतेषांनिषेधस्तथैवशुक्रबाल्यादिष्वपि यथास्यादिति तस्मिन्पक्षे मलमासेदेवतादर्शनस्य न प्रतिषेधः वस्तुतस्तु अपूर्वदेवतांदृष्ट्वाशुचः स्युर्नष्टभार्गव इत्यत्रोत्तरार्धगतमलमासेपीन्यन्वयेनमलमासेऽपूर्वदेवतादर्शननिषेधोयुक्तएवेति लल्लोपि नीचस्थेवक्रसंस्थेऽप्यतिचरणगतेबालवृद्धास्तगेवा संन्यासोदेवयात्राव्रतनियमविधिःकर्णवेधस्तुदीक्षा मौंजीबंधोथचूडापरिणयनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्याःसद्भिःप्रयत्नात्त्रिदशपतिगुरौसिंहराशिस्थितेचेति नीचस्थोमकरस्थः दीक्षा यागदीक्षा आगमदीक्षाच तथा उद्यानचूडाव्रतबंधदीक्षाविवाहयात्राचवधूप्रवेशः तडागकूपत्रिदशप्रतिष्ठाबृहस्पतौसिंहगतेनकुर्य्यात् दिवोदासीये गुर्वादित्येगुरौसिंहेनष्टशुक्रेमलिम्लुचे गृहकर्मव्रतंयात्रांमनसापिनचिंतयेत् अस्यापवादस्तत्रैवब्राह्मे मुंडनंचोपवासंचगौत्तम्यांसिंहगेगुरौ कन्यागतेतुकृष्णायांनतुतत्तीरवासिनां तथा आद्यासागौत्तमीगंगाद्वितीयाजाह्नवीस्मृता सर्वतीर्थफलंस्नानाद्गौत्तम्यांसिंहगेगुरौ शुक्रादीनामस्तउक्तोब्रह्मसिद्धांते रविसंयुतिरन्येषांग्रहाणामस्तउच्यते ततोर्वाग्वार्द्धकंमौढ्यादूर्ध्वंबाल्यंप्रकीर्तितमिति वार्धकबाल्ययोर्मानमपि तत्रैव पक्षंप्राग्दिशिवृद्धत्वंपश्चात्पंचदिनंकवेः शैशवंप्राक्कुपंचाहंपश्चाद्दशदिनंस्मृतं शैशवंवार्द्धकंपक्षंप्राक्पश्चाच्चबृहस्पतेरिति कविः शुक्रः

संहिताप्रदीपे स्यात्सप्तरात्रंगुरुशुक्रयोश्चबालत्वमन्हादशकंचवार्धे वृद्धौसितेज्यावशुभौशिशुत्वेशस्तौयतस्तावुपचीयमानौ वृत्तशते बालः शुक्रोदिवसदशकंपंचकंचैववृद्धः पश्चादन्हांत्रितयमुदितःपक्षमैंद्यांक्रमेण जीवोवृद्धः शिशुरपितथापक्षमन्यैः शिशूतौ वृद्धौप्रोक्तौ।दिवसदशकंप्राग्दिनान्यष्टबालः पश्चादस्तेपंचदिनानिवृद्धः पूर्वोदये दिनत्रयंबालःपरोदये दिनत्रयंबालः पूर्वास्ते दशादिनानिवृद्धइत्यर्थः जीवोगुरुस्तुपंचदशदिनान्युभयत्रैवेति अन्यत्रान्यथोक्तं प्राक्पश्चादुदितःशुक्रः पंचसप्तदिनंशिशुः विपरीतंतुवृद्धत्वंतद्वदेवगुरोरपीति रत्नमालायामपि प्रागुद्यतःशिशुरहस्त्रितयंसितःस्यात्पश्चाद्दशाहमथपंचदिनानिवृद्धः प्राच्यांतुपक्षममरेंद्रगुरोस्तुपक्षंप्राग्प्यवागपिवदंतिवसिष्ठमुख्याः अत्रविशेषः पक्षंवृद्धोमहास्तेतुबालश्चात्रदशाहिकः पादास्तेतुदशाहानिवृद्धोबालोदिनत्रयं महास्तपादास्तलक्षणं तु द्वात्रिंशद्दिवसाश्चास्तेसमहान्परिकीर्त्तितः न्यूनाःपादास्ते अत्रव्यवस्थामाह मिहिरः वहवोदर्शिताःपक्षायेबाल्येवार्धकेपिवा ग्राह्यास्तत्राधिकाः शेषादेशभेदादुतापदीति देशभेदश्चगार्ग्येणदर्शितः शुक्रोगुरुःप्राक्पराक्कबालोविंध्येदशावंतिषुसप्तरात्रं वंगेषुहूणेषुचपंचषट्चशेषेतुदेशेत्रिदिनंवदंतीति वृद्धत्वमप्येतत्प्रमाणंद्रष्टव्यं सिंहस्थगुरौविशेषमाहमांडव्यः श्रुतिवेधजातकान्नप्राशनचूडादिकंसर्वं रविभवनस्थेजीवे कार्य्यंवर्ज्यौविवाहस्त्विति तथा रविक्षेत्रगतेजीवेजीवक्षेत्रगतेरवौ वर्जयेत्सर्वकर्माणिव्रतस्वस्त्ययनानिच तथा गुर्वादित्येगुरौसिंहेशुक्रेचास्तमुपागते त्यजेद्यानंमहादानंव्रतंदेवविलोकनं लल्लः गुरुक्षेत्रगतोभानुर्भानुक्षेत्रगतोगुरुः गुर्वादित्यःसविज्ञेयः सर्वकर्मसुगर्हितः शौनकः एकराशिगतौभानुजीवौस्यातांयदापुनः व्रतबंधविवाहादिशुभं कर्माखिलंत्यजेत् राजमार्त्तंडे यात्रांचूडांविवाहंश्रुतिविवरविधिंशंखपद्मप्रवेशं प्रासादोद्यानहर्म्यंसुरनरभवनारंभविद्याविधानं मौंजीबंधप्रतिष्ठांमाणिकनकरदाधारणंकुर्वतेये मृत्युःसिंहस्थितेज्येगुरुदिनकरयोरेकराशिस्थितौच तथा

गुर्वादित्येगुरौसिंहेनष्टेशुक्रेमलिम्लुचे याम्यायनेहरौसुप्तेसर्वकर्माणिवर्जयेत् सिंहस्थेगुरौविशेषमाह शातातपः माघ्यांयदिमघानास्तिसिंहेगुरुरकारणं अन्यत्रापि मघाऋक्षंपरित्यज्ययदासिंहेगुरुर्भवेत् तदाचेत्कन्यकाऊढासुभगासुप्रियाभवेत् तथा माघीमघर्क्षसंयुक्तामघायांचगुरुर्भवेत् महामाघस्तदाप्रोक्तोव्रतोद्वाहौपरित्यजेत् वृद्धगार्ग्यः मीनेधनुषिसिंहेचस्थितेसप्ततुरंगमे क्षौरकर्मनकुर्वीतविवाहंगृहकर्मच तथा वापीकूपतडागयागगमनंक्षौरप्रतिष्ठाव्रतं विद्यामंदिरकर्णवेधनमहादानंवनासेचनं तीर्थस्नानविवाहदेवभवनमंत्रादिदेवेक्षणं दूरेणैवजिजीविषुःपरिहरेदस्तंगतेभार्गवइति लल्लोत्रपुनर्विशेषमाह उपप्लवेशीतलभानुभान्वोरूर्ध्वोदयेवाकपिलाख्यषष्ठ्यां सुरासुरेज्यास्तमयेचतीर्थयात्राविधिःसंक्रमणेचशस्तः गुरुशुक्रास्तमयादिनिषिद्धकालेग्रहणादौनदोषइत्यर्थः वसिष्ठः अतिचारगतोजीवस्तंराशिंनैतिचेत्पुनः लुप्तसंवत्सरोज्ञेयःसर्वधर्मबहिष्कृतः अस्यापवादः वृषमेषझषकुंभयद्यतीचारगोगुरुःनतत्रकाललोपःस्यादित्याहगालवोमुनिरिति राजमार्त्तंडेत्वन्येषांवाधकांतर्भूतत्वेनाभिमतः संध्याकालोऽपि पृथगुक्तः भवेत्संध्यागतःपश्चादंतमेष्यन्दिनत्रयं दिनानिपंचपूर्वेणतत्कृतेकर्मवर्जयेत् बालवृद्धेचसंध्यांशेचतुःपंचत्रिवासरान् जीवेचभार्गवेचैवविवाहादिषुवर्जयेत् बालेवृद्धेचसंध्यायांनष्टेचभृगुनंदने दुर्गताचासतीवंध्यामृत्युयुक्ताफलंक्रमात् बालेयचदुर्भगानारीवृद्धेनष्टप्रजाभवेत् नष्टेचमृत्युमाप्नोतिसर्वमेतद्गुरावपीति अत्र चतुःपंचाद्यल्पकालकथनमापद्विषयं यस्तु दक्षिणायने चातुर्मास्येच कर्मनिषेधः समयेषूदगयननियमस्तद्विषयः काम्ययज्ञादिविषयश्च यथा विष्णुधर्मोत्तरे शेतेचचतुरोमासान्यावद्भवतिकार्त्तिकः विशिष्टानप्रवर्त्ततेतदायज्ञादिकाःक्रियाः नाभिषेक्योनृपश्चैत्रेयावद्भवतिकार्त्तिकःभविष्योत्तरेपि सुप्तेवापिजगन्नाथेकेशवेगरुडध्वजे निवर्त्ततेक्रियाःसर्वाश्चातुर्वर्ण्यस्यभारत ताश्च विवाहव्रतबंधादिचूडासंस्कारदीक्षणं गृहयज्ञप्रवेशादिदानार्चनप्रतिष्ठितिः पुण्यानियानिकर्माणिवर्जयेद्दक्षिणायनइतिसर्वास्तत्र

परिगणिताः भोजराजीये सुप्तेहरौप्रकटशेषफणोपधानेलक्ष्मीकराब्जपरिभाजितपादपद्मे मीनेरवौधनुषिचास्तमितेचशुक्रेवास्तुक्रियाविधिरसौमुनिभिर्निषिद्ध इति एवंगुर्वतिचारसिंहस्थमकरस्थगुरुकेत्वद्भुतेतरसप्ताहादिसर्वेषांशुभानामावश्यकर्मणां अकालवृष्ट्याद्युत्तरैकाहादिषुच परिगणितानामेवयात्रादीनांनिषेधस्तत्रज्योतिःशास्त्रवचनेभ्योज्ञेयइत्यलमन्यथाप्रसक्तानुप्रसक्तचिंतया प्रकृतमनुसरामः यदुक्तमनावृत्ततीर्थस्नानमनादिदेवतादर्शनंमलमासादौनकर्त्तव्यमिति तस्यगयायांप्रतिप्रसवोवायुपुराणे गयायांसर्वकालेषुपिंडंदद्याद्विचक्षणः अधिमासेजन्मदिनेअस्तेचगुरुशुक्रयोःनत्यक्तव्यंगयाश्राद्धंसिंहस्थेपिबृहस्पतौइति अत्र श्राद्धस्ययात्रापूर्वकत्वाद्द्वयंप्रतियात्रापिननिषिद्धेत्यर्थःतथा गोदावर्य्यांगयायांचश्रीशैलेग्रहणद्वये सुरासुरगुरूणांचमौढ्यदोषोनविद्यते ग्रहणद्वये तन्निमित्तिककुरुक्षेत्रकयात्रादावित्यर्थःअस्तादेरपवादःकाशीखंडे नग्रहास्तोदयकृतोदोषोविश्वेश्वरालये सदासौम्यायनंतत्रसदातत्रमहोदयइतिएतानिकाशीस्तुतिपराणीतिमयूखे तत्रएतेषांकाशीस्तुतिपरत्वेपिउपरिहिदेवेभ्योधारयतीतियावत् बलवत्तरबाधकासत्त्वेविधिकल्पकत्वस्ययुक्तत्वादित्यलंबहुपल्लवितेन इतिश्रीमन्महाराजाधिराजरघुवंशतिलकश्रीरणवीरसिंहमहाराजकारिते कृत्यरत्नाकराभिधेये धर्मोदयनिबंधेऽधिमासक्षयमासभेदद्वयात्मकमलमासनिर्णयः

॥ अथासंक्रांतिमासानिर्णयप्रसंगात् संक्रांतिनिर्णयश्चोच्यते ॥

तत्रमेषादिद्वादशराशिषुक्रमेणसंचरतःसूर्यस्य पूर्वस्माद्राशेरुत्तरराशौसंक्रमणंप्रवेशःसंक्रांतिशब्देनोच्यते तास्तुराशिसंख्यानुक्रमेण द्वादशप्रसिद्धाः तासांसंज्ञाअपि द्वादशैव तदाहवसिष्ठः अयनेद्वेविषुवतीचतस्रःषडशीतयः चतस्रोविष्णुपद्यश्चसंक्रांत्योद्वादशस्मृताः झषकर्कटसंक्रांतीद्वेतूदग्दक्षिणायने तुलामेषौविषुवतीतयोर्मध्येततोपराः वृषवृश्चिककुंभेषुसिंहेचैवयदारविः एतद्विष्णुपदंनामविषुवादधिकंफलमिति कन्यायांमिथनेमीनेधनुष्पाणौरवेर्गतिः

षडशीतिमुखाःप्रोक्ताःषडशीतिगुणाःफलैःदीपिकायामपि हर्य्यंघ्रिर्वृषसिंहवृश्चिकघटेष्वर्कस्ययःसंक्रमः कन्यामीन धनुर्नृयुक्षुषड्शीत्याख्यस्तुलामेषयोः प्रोक्तंतद्विषुवंहयेयनमुदक्कर्कटकेदक्षिणामिति हर्य्यंघ्रिर्विष्णुपदं नृयुक्‌मिथुनं आसामेव संक्रांतीनां वारभेदेननामभेदोरत्नमालायां घोरारवौध्वांक्ष्यमृतद्युतौचसंक्रांतिरारेचमहोदरीस्यात् मंदाकिनीज्ञेचगुरौचमंदामिश्राभृगौराक्षसिकार्कपुत्रे इति तत्फलान्यपि तत्रैव आसुच पुण्यकालउक्तः त्रिचतुःपंचसप्ताष्ट नवद्वादशएवच क्रमेणघटिकाह्येतास्तत्पुण्यंपारमार्थिकामिति आसुचस्नानादिकमुक्तं नागरखंडे रवेःसंक्रमणंराशौ संक्रांतिरितिकथ्यते स्नानदानजपश्राद्धहोमादिषुमहाफला हेमाद्रौविष्णुधर्मे श्राद्धंसंक्रमणेभानोःप्रशस्तंपृथिवीपते संवर्त्तः अमावास्याद्वादशीचसंक्रांतिश्चविशेषतः एताःप्रशस्तास्तिथयोभानुवारस्तथैवच अत्रस्नानंजपोहोमोदेवतानांचपूजनं उपवासस्तथादानमेकैकंपावनंस्मृतमिति देवीपुराणे विषुवेषुचयज्जप्तंदत्तंभवतिचाक्षयं एवंविष्णुपदेचैवषडशीतिमुखेषुच भरद्वाजः षडशीत्यांतुयद्दत्तंयद्दत्तंविषुवद्वये दृश्यतेसागरस्यांतस्तस्यांतोनैवदृश्यते वसिष्ठःअयने कोटिपुण्यंचलक्षंविष्णुपदेफलं षडशीतिसहस्रंतुषडशीत्यांस्मृतंबुधैःशतमिंदुक्षयेदानंसहस्रंतुदिनक्षये विषुवेशतसाहस्रंव्यतीपातेत्वनंतकामिति स्कांदेनागरखंडे यएतेतेमयाप्रोक्ताःकालाःसंक्रांतिपूर्वकाःनैतेषुविद्यतेविघ्नोयतश्चाक्षयसंज्ञिताःअश्रद्धयापियद्दत्तंकुपात्रेभ्योपिमानवैः अकालेऽपिचतत्सर्वंसत्यमक्षयतांव्रजेत् अत्र स्नानाकरणेदोषमप्याहहेमाद्रौशातातपः रविसंक्रमणेप्राप्तेनस्नायाद्यस्तुमानवःसप्तजन्मानिरोगीस्यान्निर्धनश्चप्रजायते संक्रांतौयानिदत्तानि हव्यकव्यानिदातृभिः तानिनित्यंददात्यर्कःपुनर्जन्मनिजन्मनीति पापक्षयकामस्य संक्रांतिनिमित्ताहोरात्रोपवासोऽयनविषुवयोस्त्रिरात्रोपवासश्च विहितोवासिष्ठेन उपोष्यैवंतुसंक्रांतौस्नातोयोभ्यर्चयेद्धरिं प्रातःपंचोपचारेणसकाम्यंफलमश्नुते इति हरिं सूर्य्यं वृद्धवासिष्ठः अयनेविषुवेचैवत्रिरात्रोपोषितोनरः स्नात्वायस्त्वर्चयेद्भानुंसर्वकामफलंलभेत्

अशक्तावाहापस्तंबः अयनेविषुवेचैवग्रहणेचंद्रसूर्ययोः अहोरात्रोषितःस्नातःसर्वपापैःप्रमुच्यतइतिएतच्चपुत्रवद्गृहस्थव्यतिरिक्तविषयं पुत्रवतागृहस्थेनसकामेनापिसंक्रांतिनिमित्तोपवासोनकार्य्यः आदित्येहनिसंक्रांतौग्रहणेचंद्रसूर्ययोः उपवासोनकर्त्तव्योगृहिणापुत्रिणातथेतिवचनात् संक्रांत्यामुपवासंचकृष्णैकादशिवासरे चंद्रसूर्य्यग्रहेचैवनकुर्य्यात्पुत्रवान्गृहीतिनारदवचनाच्च अत्र विहितस्य श्राद्धस्यनित्यत्वमाहाऽपरार्केविष्णुः आदित्यसंक्रमणंविशेषेणविषुवदयनद्वयंव्यतीपातोजन्मर्क्षमभ्युदयश्च एतांस्तुश्राद्धकालान्नित्यानाहप्रजापतिरिति तच्चपिंडरहितंकार्य्यं अयनद्वितयेश्राद्धं विषुवद्वितयेतथा संक्रांतिषुचसर्वासुपिंडनिर्वपणादृते इत्यपरार्केमात्स्योक्तेः अत्रचद्वादशदिनैरर्वागयनांशप्रवृत्तावपिपुण्यंवक्तुमयनग्रहणं अन्यथासंक्रमणेनतात्सिद्धेरयनग्रहणंव्यर्थंस्यादित्यपरार्कः वस्तुतस्तु अयनांशाः षष्टिघ्नाःस्फुटरविगत्याभाजिताः लब्धेनदिनादिनातद्राशिसंक्रमात्पूर्वंचलसंक्रांतिः एवंधनायनांशकाले ऋणायनांशकालेतु लब्धदिनादिनोर्ध्वंचलसंक्रांतिर्भवति ऋणायनांशास्तुपूर्वंस्थिताः तदुक्तंवेदांगज्योतिषे प्रपद्येतेश्रविष्ठादौसूर्य्याचंद्रमसावुदक् सार्पार्द्धेदक्षिणोर्कस्तुमाघश्रावणयोःसदा एतादृशंसंक्रमणंत्रयोविंशतिऋणायनांशकालेमहायुगादावयनांशाभावः तत्र रेवतीयोगतारामेषादिज्ञापिका अन्यदासर्वासांताराणां स्वस्वस्थानात् सौरवर्षेण चतुःपंचाशद्विकलाभिः पश्चिमतः पूर्वतश्चलनंभवति तत्र विषुवत्संक्रांतिवृत्तसंपातात् पश्चिमतःक्रांतिवृत्तेऽष्टादशशतसौरवर्षैश्चलनमृणसंज्ञंभवति तस्यसप्तविंशत्यंशपर्यंतमुपचयः पुनस्तथैवधनसंज्ञानामुपचयापचयौ एवंद्विशताधिकसप्तसहस्रैरेकोभगणोभवतिस एवपुनरयनांशाभावकालः पुनस्तथैवायनांशप्रवृत्तिः एवंतेभगणाः युगेखखारिमिताः ६०० भवंति तदुक्तं सूर्यसिद्धांते त्रिंशत्कृत्योयुगेभानांचक्रंप्राक्परिलंबते तद्गुणाद्भूदिनैर्भक्ताद्द्युगणाद्यदवाप्यते तद्दोस्त्रिघ्नादशाप्तांशा विज्ञेया अयनाभिधाः त्रिंशत्कृत्यैर्विंशतिभिस्तद्गुणितैस्त्रिंशद्भिरित्यर्थः स्फुटंदृक्तुल्यतांगच्छेदयनेविषुवद्वये प्राक्चक्रंफालितं

हीने छायार्कात्करणागते अंतरांशैरथावृत्यपश्चाच्छेषेतथाधिके यत्तुपूर्वैरुक्तम् संक्रांतेरर्वाक्द्वादशदिनैरयनसंक्रांतिस्तद्वनद्वादशांशायनकाले इदानींतुशाके ॥ १७८९ ॥सूर्यसिद्धांतानुसारिकरणमतेन मकरंदाख्येनसाधनंयथा भूलोचनाब्धिरहितः ॥ ४२१ ॥ स्वदिगंशहीनःशाकः खतर्क॥६०॥ विहृतोयनभागकाःस्युरित्यनेन साधितेन विंशत्यंशाद्वात्रिंशत्कलामिताअयनभागकाइति मेषार्कात्पूर्वंदशकलोनैकविंशतिभिर्दिनैर्विषुवद्दिनमितिसर्वसिद्धांतरहस्यकरणेमुंजालाद्यार्षमतेनोक्तं तद्यथासिद्धांतशिरोमणौ अयनचलनंयदुक्तं मुंजालाद्यैः सएवायं तत्पक्षेतद्भगणाः कल्पे गोंगर्तुनंदगोचंद्राः ॥१९९६६९॥ इति तत्साधनंग्रहलाघवे वेदाब्ध्यध्यूनःखरसहृतःशकोयनांशाइति तेनद्वाविंशत्यंशाः पंचविंशतिकलाअयनभागाःसंति गालवः अयनांशकतुल्येनकालेनैवस्फुटंभवेत् तत्तत्संक्रांतिकालेस्युरुक्तविष्णुपदादयः अयनांशच्युतिरूपसंक्रांतिकाले विष्णुपदादयःप्रवर्त्तंते तेनतत्प्रयुक्तंपुण्यकालादितत्रापिज्ञेयमित्यपरार्कः अस्याश्चसंक्रांतेः सूर्यमंडलनेमिरेखैकदेशस्य तन्मध्यकेंद्रस्यवापूर्वराशिसंवंधस्याग्रेणोत्तरराशिप्रवेशरूपायाःकालस्यातिसूक्ष्मतायादुर्ज्ञानतयाचतत्रैकस्यापिस्नानादिकर्मणोऽनुष्ठातुमशक्यत्वाद्बहूनांसुतरां तथात्वात्सन्निहितकाले तान्यनुष्ठातव्यानि संधिसन्निहितकालइवदर्शपूर्णमासौ सचकालः किमुभयतः किंवान्यतरतः कियांश्चेत्याकांक्षायां हेतुपूर्वकं ग्राह्यकालोदेवलेनदर्शितः संक्रांतिसमयः सूक्ष्मोदुर्ज्ञेयःपिशितेक्षणैः तद्योगाच्चाप्यधश्चोर्ध्वंत्रिंशन्नाड्यः पवित्रिताइति अधश्चत्रिंशन्नाड्य ऊर्ध्वंच त्रिंशन्नाड्यः संक्रांतिनिमित्तस्नानदानादियोग्याइत्यर्थइतिमाधवः हेमाद्रिस्तु अधःपंचदश ऊर्ध्वंपंचदशेत्येवंमिलित्वात्रिंशदित्यपिव्याचख्यौ यत्तुकैश्चिदुक्तं अतीतानागतोभोगोनाड्यःपंचदशस्मृताइतिदेवीपुराणविरुद्धं भुज्येतेपाल्येतेविधिनिषेधावस्मिन्नितिभोगः भुजपालनाभ्यवहारयोरितिस्मरणात् तत्प्रागल्भ्यविजृंभितंसामान्यकालस्योक्तत्वात् विशेषकालस्यतु त्रिंशत्कर्कटकेनाड्योयायाःसन्निहिताइत्यादिवक्ष्य

अ०२० ॥२६॥

माणत्वात् तथाच सामान्येनानध्यायप्रकरणे हेमाद्रौ अह्निचेद्रात्रियुग्मंस्याद्रात्रौचेद्वासरद्वयं संक्रांतिःपक्षिणीज्ञेया दानाध्ययनकर्मस्वित्यादिवाक्यएव सामान्येन कालविधानात् माधवोक्तावपिनदूषणोद्भावनंयुक्तं इदंच सामान्यतः सर्वसंक्रांतिविषयं विशेषस्तूच्यते कर्कटेपूर्वास्त्रिंशन्नाड्यःपुण्याः मकरेतु माधवमते पराविंशतिनाड्यःपुण्याः तदाहवृद्धवसिष्ठः अतीतानागतेपुण्येद्वेउदग्दक्षिणायने त्रिंशत्कर्कटकेनाड्योमकरेविंशतिःस्मृताइति हेमाद्रिमतेतु मकरसंक्रांतौचत्वारिंशद् घटिकाः पुण्यकालः तदुक्तंब्रह्मवैवर्त्ते त्रिंशत्कर्कटकेनाड्योमकरेतुदशाधिकाः भविष्यंत्ययनेपुण्याअतीतेचोत्तरायणे दशाधिकाश्चत्वारिंशदित्यर्थः बृहस्पतिः अयनेविंशतिःपूर्वामकरेविंशति पराः वसिष्ठः मध्ये तुविषुवेपुण्यंप्राग्विष्णौदक्षिणायने षडशीतिमुखेपुण्यमतीतेचोत्तरायणइति मध्ये उभयतइत्यर्थः विष्णौ विष्णुपदे पुण्यमितिचतुर्ष्वप्यनुषंगः प्रागित्यस्य दक्षिणायनइत्यनंतरमपि यत्तुनव्यैरुक्तं अत्रचशब्दादुत्तरायणेनागतेपुण्यमिति हेमाद्रिः तत्रमानंमृग्यमिति तन्न हेमाद्रौ संक्रांतिसामान्यकालाभिप्रायेण तथाभिधानात् अतीतानागतेपुण्येद्वेउदग्दक्षिणायने उत्तरेत्वयनेपुण्यमतीतेचोत्तरायणइतिवसिष्ठवचनं पूर्वार्द्धेनोदग्दक्षिणायनयोरतीतानागतकालस्य पुण्यत्वमभिधायोपात्तस्योत्तरार्द्धशेषस्यातीतेचोत्तरायणइत्यस्यानागतपुण्यत्वबोधकेनैवसार्थक्यात् हेमाद्रौतथैवव्याख्यानाच्च विषुवयोस्तु प्राक्पश्चाद्दशनाड्यः पुण्यायथासएवाह वर्त्तमानेतुलामेषेनाड्यस्तूभयथादशेति विष्णुपदीषुतुप्राक्षोडशपश्चाच्चषोडशनाड्यःपुण्याः तदाहवृद्धवसिष्ठः पुण्यायांविष्णुपद्यांतुप्राक्पश्चादपिषोडशेति षडशीतिषु पश्चात् षष्टिनाड्यःपुण्याः तदाह वृद्धवसिष्ठः षडशीत्यांव्यतीतायांषष्टिरुक्तास्तुनाडिकाः पुण्याख्याविष्णुपद्याश्चप्राक्पश्चादपिषोडश स्मृत्यर्थसारेतु षडशीतिमुखेपश्चात्षोडशघटिकाःपुण्याइत्युक्तं अत्र हेमाद्रिःषडशीतिमुखानांचतसृणामेकैकस्याः पंचदशपंचदशपंचदशपंचदशेतिमिलित्वाषष्टिनाड्यःपुण्याइत्यर्थः तथाचस्कांदे

षडशीतिमुखेऽतीतेनाडयःपंचदशस्मृताइति कालतत्वविवेचनेतुपरमार्थतस्त्वष्टिरितिपाठः अष्टिःषोडश तच्छंदसः षोडशाक्षरत्वात् विष्णुपद्याःपराःषोडशघटिकाःपुण्यतमाइतिव्यवस्थाद्रष्टव्या याम्यायनेविष्णुपदेतथादौ दानाद्यनंतंविषुवेतुमध्ये वदंत्यतीतेषडशीतिवक्त्रेमहर्षयःखल्वयनेचसौम्ये षडशीतिमुखेऽतीतेवृत्तेचविषुवद्द्वय इत्यादिलौगाक्षाद्यनेकवचनेपूर्वकालस्यपुण्यत्वप्रतिपादनात् क्वचिदतीतेविषुवद्द्वयइतिपाठः कन्यायांमिथुनेचैवमीनेधनुषिच द्विजाः घटिकाःषोडशज्ञेयाःपरतःपुण्यदायिकाः वृषभेवृश्चिकेचैवसिंहेकुंभेतथैवच पूर्वमष्टमुहूर्त्तंतुग्राह्यंस्नानजपादिषु इतिवृहन्नारदीयवचनात् यमः विष्णुपद्यांधनुर्मीननृयुक्कन्यासुवैयदा पूर्वोत्तरगतंरात्रौभानोःसंक्रमणंभवेत् पूर्वाह्णे पंचनाडयस्तुपुण्याःप्रोक्तामहर्षिभिः अपराह्णेचपंचैवश्रौतेस्मार्त्तेचकर्मणीति नृयुक् मिथुनं स्कांदे धनुर्मीनावतिक्रम्य कन्यांचमिथुनंतथा पूर्वापरविभागेनरात्रौसंक्रमतेरविः दिनांतेपंचनाड्यस्तुतदापुण्यतमाःस्मृताः उदयेचतथापंचदैवपित्र्येचकर्मणीति ननुसंक्रांतसामान्यविषयत्वेनपश्चादधश्चत्रिंशन्नाडयः पवित्राइत्युक्तं वाक्यांतरेतु षोडशादीनां पुण्यत्वमुक्तमिति परस्परविरोधइतिचेन्न त्रिंशन्नाडीनांपुण्यत्वंषोडशादीनां तदपेक्षया सन्निहितत्वात्पुण्यतरत्वं ततोपिसन्निहितानांपुण्यतमत्वमितिविरोधप[illegible]रात् तदाहवसिष्ठः यायाःसन्निहितानाडयस्तास्ताःपुण्यतमाःस्मृताः इतिसंक्रांतीनांपूर्वोत्तरकालौपुण्यतयानिर्णीतौ ताश्चसंक्रांतयः कदाचिदन्हिभवंति कदाचिद्रात्रौभवंति तद्भेदादनुष्ठानभेदमाह वृद्धवसिष्ठः अन्हिसंक्रमणेपुण्यमहःकृत्स्नंप्रकीर्त्तितं रात्रौसंक्रमणेपुण्यंदिनार्द्धंस्नानदानयोः अर्द्धरात्रादधस्तस्मिन्मध्यान्हस्योपरिक्रियाः ऊर्द्ध्वंसंक्रमणेचोर्द्ध्वमुदयात्प्रहरद्वयमिति अर्द्धरात्रात्पूर्वरात्रौसंक्रमेपूर्वदिनार्द्धोत्तरं पुण्यंअर्द्धरात्रादूर्ध्वसंक्रमेउत्तरदिनपूर्वार्द्धंपुण्यंस्नानदानादियोग्यमित्यर्थःतथाच आसन्नसंक्रमंपुण्यंदिनार्द्धंस्नानदानयोरिति यदासंपूर्णे अर्द्धरात्रे संक्रांतिःस्यात्तदादिनद्वयंपुण्यं तदाह वृद्धवसिष्ठः संक्रमस्तुनिशीथेस्यात्षड्यामाः

पूर्वपश्चिमाः संक्रांतिकालेविज्ञेयास्ततः स्नानादिकंचरेदिति ज्योतिर्वासिष्ठेपि पुण्यंचैवार्द्धरात्रेतुयदासंक्रमतेरविः तदादिनद्वयंपुण्यंमुक्त्वामकरकर्कटाविति मकरकर्कटयोस्तु विशेषोवक्ष्यते गार्ग्यः कालेन्यूनेर्द्धरात्रेतुयदासंक्रमणंभवेत् तदहः पुण्यमिच्छंतिगर्गगालवगौत्तमाः देवीपुराणे संपूर्णेचार्द्धरात्रेचेदुदयास्तमयेऽपिच मानार्द्धेभास्करेपुण्यमपूर्णेशर्वरीदले संपूर्णेऽर्द्धरात्रे निशीथइत्यर्थः उदयः प्रातःसंध्या अस्तमयः सायंसंध्या मानार्द्धे प्रहरद्वयं अस्तमयेपूर्वदिनप्रहरद्वयंउदयेतूत्तरदिनप्रहरद्वयं प्रत्यासत्तेः संपूर्णेअर्द्धरात्रदलद्वयसंधौसंक्रमणे उभयोः पूर्वोत्तरदिनयोरुत्तरपूर्वार्द्धे पुण्ये अपूर्णेशर्वरीदले सायंप्रातः संध्योरुत्तरपूर्वभागयोरित्यर्थः योगेनलक्षणयावा भास्करोदिवसः देवीपुराणे अर्द्धरात्रेतुसंपूर्णेदिवापुण्यमनागते संपूर्णेचोभयोर्ज्ञेयमतिरेकेपरेहनि अत्रसंपूर्णार्द्धरात्रशब्देनसायंसंध्या निशीथपूर्वभागश्चगृह्यते तत्रसंक्रमणे नविद्यते आगतंआगमनंयस्यतत् अतीतमित्यर्थः नपुंसकेभावेक्तः एवमर्द्धरात्रसंक्रमणेदिनद्वयस्यार्द्धस्यविकल्पेनग्राह्यत्वेप्राप्तेव्यवस्थाकृता देवीपुराणे आदौपुण्यंविजानीयाद्यद्यभिन्नातिथिर्भवेत् अर्द्धरात्रेव्यतीतेतुविज्ञेयमपरेहनीति अर्धरात्रसंक्रमणे यदि संक्रमकालीनायास्तिथेः पूर्वदिवसोत्तरार्द्धवर्त्तिनीतिथ्यभिन्नाभवतितदापूर्वदिनोत्तरार्द्धंग्राह्यं यदिभिन्नाभवतितदापूर्वदिनार्धनग्राह्यं किंतु परदिनपूर्वार्द्धमित्यर्थात्सिद्धम् अर्द्धरात्रेव्यतीतेतुसंक्रमणेतत्कालीनातिथिभिन्नत्वेऽपि परदिनपूर्वार्द्धमेवपुण्यमित्यर्थः यदात्वर्धरात्रसंक्रमणेतत्कालीनातिथिर्दिनद्वयेपिभवेत्तदाविष्णुपद्यां पूर्वदिनोत्तरार्द्धंग्राह्यं षडशीतिमुखेतूत्तरदिनपूर्वार्द्धंग्राह्यं विषुवेतुपूर्वदिनार्धमुत्तरदिनार्द्धंचग्राह्यं कौस्तुभेतु दिनद्वयव्याप्तितिथ्यभेदेऽपि अयनव्यतिरिक्तसर्वसंक्रांतिषु पूर्वदिनार्धमेवपुण्यमित्युक्तं मकरस्यतुरात्रौसंक्रमेपरदिनंपुण्यं कर्कटस्यतुरात्रौसंक्रमेपूर्वदिनंपुण्यं अतएवगार्ग्यः यदास्तमनवेलायांमकरंयातिभास्करः प्रदोषेवार्द्धरात्रेवास्नानंदानंपरेहनि अस्तमयवेलायांअस्तमयसन्निहिते तदुत्तरकाले

प्रदोषेपूर्वरात्रे भविष्योत्तरेऽपि कार्मुकंतुपरित्यज्यमृगंसंक्रमतेरविः पुनस्तत्रैव मिथुनात्कर्कसंक्रांतिर्यदिस्यादंशुमालिनः प्रभातेवानिशीथेवा कुर्यादहनिपूर्वतः एवंमकरकर्कटयोरात्रौसंक्रमेपूर्वोक्तवचनानियमेन दिवैवस्नानदानादिकर्त्तव्यताप्रतिपादिता इदानींरात्रावपितत्रस्नानदानादिकर्त्तव्यताप्रतिपादकानिवचनानिलिख्यंते भविष्यपुराणेरात्रौस्नानंनकुर्वीतदानंचैवविशेषतः नैमित्तिकंतुकुर्वीतस्नानंदानंचरात्रिषु वृद्धवसिष्ठः पुत्रजन्मनियज्ञेचतथासंक्रमणेरवेः राहोश्चदर्शनेस्नानंप्रशस्तंनान्यथानिशि अयनेविषुवेतुअनध्यायेविशेषः स्मृत्यंतरे अह्निचेद्रात्रियुग्मंस्याद्रात्रौचेद्वासरद्वयं संक्रांतिःपक्षिणीज्ञेयादानाध्ययनकर्मसु दानंवेददानंअध्यापनमितियावत् अन्यत्रापि निशाद्वयंदिवारात्रौसंक्रमेवासरद्वयंअनध्यायंप्रकुर्वीतअयनेविषुवेतथेति संक्रांतिवत्तदयनेपुण्यकालमाहजाबालिः संक्रांतिषुयथाकालस्तदीयेप्ययनेतथा अयनेविंशतिःपूर्वामकरेविंशतिःपराइतिअयनेमकरायनेपूर्वाःपुण्यतमाःमकरेमकरसंक्रांतौतुपराःपुण्यतमाइत्यर्थः माधवोपि मकरव्यतिरिक्तैकादशसंक्रांतिसंवंधिनित्वयनेसंक्रांतिवत्पुण्यमिति आदित्यस्यराशिसंक्रमवत् नक्षत्रसंक्रमेऽपि स्नानदानादिकंकार्य्यं तदाहजैमिनिः नक्षत्रराश्योरविसंक्रमेस्युरर्वाक्परत्रापिरसेंदु ॥ १६ ॥ नाड्यः पुण्यास्तथेंदोस्त्रिधरापलैर्युगे एकैवनाडी ॥ १।३ मुनिभिःशुभोदिता नाड्यश्चतस्रःसपलाः ॥४।४ ॥ [कुजस्यबुधस्यतिस्रोमनवःपला ॥ ३।१४ ॥ नि सार्द्धाश्चतस्रःपलसप्तयुक्ता ॥ ४।३७ ॥ गुरोश्चशुक्रस्यपला ॥ ४।४ ॥ ॥ श्चतस्रः द्विनागनाड्यःपल ॥ ८२।०७ ॥ सप्तयुक्ताः शनैश्चरस्याभिहिताःसुपुण्याः आद्यंतमध्येजपदानहोमंकुर्वन्नवाप्नोतिसुरेंद्रधाम ग्रहांतरस्ययदासंक्रमस्तदैवपुण्यकालः नतुदिवैव तत्रापवादाभावात् गार्ग्यः यस्यजन्मर्क्षमासाद्यरविसंक्रमणंभवेत् तन्मासाभ्यंतरेतस्यवैरक्लेशधनक्षयाः तगरसरोरुहपत्रैरजनीसिद्धार्थलोध्रसंयुक्तैः स्नानंजन्मर्क्षगतेरविसंक्रमणेनृणां शुभदं अथसंक्रांतिकृत्यं हेमाद्रौ अयनादौसदादेयंद्रव्यमिष्टंगृहेषुयत् षडशीतिमुखेचैवविमोक्षेचंद्रसूर्ययोः ब्रह्म

पुराणे शुक्लपक्षेतुसप्तम्यांयदासंक्रमतेरविः महाजयातदासावैसप्तमीभास्करप्रिया स्नानंदानंजपोहोमःपितृदेवादि
पूजनं सर्वंकोटिगुणंप्रोक्तंतपनेनमहौजसा अस्यांघृतपयोभ्यांरविंस्नात्वा अश्वमेधफलंप्राप्य सूर्यलोकतांयातीत्यादि
तत्रैवोक्तं अथसंक्रांतिविशेषप्रदानानितिथितत्त्वे ददातियोहिमेषादौसक्तूनंबुघटान्वितान् पितृनुद्दिश्यविप्रेभ्यःसर्व
पापैः प्रमुच्यते मेषादौ मेषसंक्रमणे हेमाद्रौ विश्वामित्रः मेषसंक्रमणेभानोर्मेषदानंमहाफलं वृषसंक्रमणेदानंग
वांप्रोक्तंतथैवच वस्त्रान्नदानपानानिमिथुनेविहितानितु घृतधेनुप्रदानंतुकर्कटेपरिशस्यते ससुवर्णंछत्रदानंसिंहे
चविहितंसदा कन्याप्रवेशेवस्त्राणांसुरभीणांतथैवच तुलाप्रवेशेधान्यानांवीजानामेवचोत्तमं कीटप्रवेशेवस्त्राणांवेश्म
नांदानमेवच कीटोवृश्चिकः धनुः प्रवेशेवस्त्राणांधानानांचमहाफलं झषप्रवेशेदारूणांदानमग्नेस्तथैवच कुंभप्रवे
शेदानंतुगवामंबुतृणस्यच मीनप्रवेशेस्थानानांमाल्यानामपिचोत्तमं दानान्यथैतानिमयाद्विजेंद्राः प्रोक्तानिकालेतुनरः
प्रदत्त्वा प्राप्नोतिकामंमनसेप्सितंचतस्मात्प्रशंसंतिहिकालदानं धेनुंतिलमयींराजन्दद्याच्चैवोत्तरायणे सर्वान्कामा
नवाप्नोतिविंदतेपरमंसुखं विष्णुधर्मोत्तरे उत्तरेत्वयनेविप्र वस्त्रदानंमहाफलं तिलपूर्णमनड्वाहंदत्त्वारोगैर्विमुच्यते मं
गलकृत्येज्योतिर्निबंधेनारदः त्याज्याः सूर्य्यस्यसंक्रांतेः पूर्वतः परतस्तथा विवाहादिषुकार्येषुनाड्यः षोडशषोडशे
ति एतत्पुण्यकालोपलक्षणं भानोःसंक्रांतिभोगश्चकुलिकश्चार्द्धयामकइति ज्योतिःप्रकाशे वर्ज्येषुसंक्रांतिभोगस्य
परिगणनात् अथसंक्रांतीनांफलविशेषकथनायपुनरपिताएवसंज्ञाज्योतिषकल्पतरौ विषुवन्मेषतुलयोरयनंमकरे
रवौकुलीरेच षडशीतिर्द्विशरीरेविष्णुपदीसुस्थिरेराशौ अथ मेषविषुवत् पुरुषचक्रं शीर्षेसप्तमुखेत्रीणिहृदयेपंचचैव
हि हस्तयोःपादयोस्त्रिस्त्रिरेतद्विषुवलक्षणं रविसंक्रांतिनक्षत्रं मुखे दत्त्वा स्वजन्मनक्षत्रं यत्र पतति तदंगजं
फलं ब्रूयात् तद्यथा कपालेभूपालस्तदनुवदनेपंडितवरोधनाध्यक्षोवक्षस्यथवरवधूर्दक्षिणकरे करेवामेभिक्षाप्यट
विगमनंदक्षिणपदेपदेवामेमृत्युर्भवतिनिजनक्षत्रपतनात् अथ तुलापुरुषः रसशरब्रह्मानन


कर्कसंक्रांती
मकरसंक्रांती
तुलासंक्रांती
मेषसंक्रांती
वृ·सिं·वृ·कुं·संक्रान्त्यः
मि·कं·यं·मीनसंक्रां·
दक्षिणायनपुरुषः
उत्तरायणपुरुषः
तुलाविषुवपुरुषः
मेषविषुवपुरुषः
स्थिरविष्णुपदीपुरुषः
द्विस्वभावषडशीति·

दशनेत्रंशिरमुखंहृदयकरचरणेषुमानंवैरंवहुसुखलाभंभोगंत्रासंतुलविषुवेच अथोत्तरायणपुरुषः। कपालेहरनेत्राणिवदलेचत्रयंतथा हस्तयोश्चद्वयंदद्यात्स्कंधयोश्चद्वयंद्वयंहृदयेशरसंयुक्तंनाभावेकंतथागुदे पादयुग्मेवसून्दद्यादुत्तरायणपूरुषे अर्थलाभोमिष्टपानमैश्वर्य्यंस्थानमानता अनुपद्रवसौख्यंचकिंचिल्लाभश्चनाभितः ईहितंचतथागुह्येप्रवासश्चपदद्वये। दक्षिणायनपुरुषः। शीर्षेत्रीणिमुखेत्रीणिहृदयेपंचकंतथा हस्तेपादेकलामाहुर्दक्षिणायनमीरितं फलमेतस्योत्तरायणपुरुषवत्। अथषडशीतिपुरुषः मुखेचैकंकरेपंचपदयुग्मेद्वयंद्वयं क्रोडेवाणास्तथावेदाःकरेसप्तेपिपंचच द्वयंद्वयं तथानेत्रेमस्तकेशिवलोचनं एकंभंचतथागुह्येषडशीतिमुखेश्रुतिः मुखेदुःखंकरेलाभःपादयोर्भ्रमणंभवेत् कांतासौ

स्कंधेद्वादशपदानिहस्तेषड्वदने सप्तानिनेत्रयोश्चवशीर्षेचाधिक्यमायुषः गुह्यचवतथामृत्युःषडशातिफलश्रुतिः । अथ
अ०१० विष्णुपदीपुरुषः ऋक्षेसंक्रमणंयत्रतद्भक्रेविनियोजयेत् चत्वारिदक्षिणेबाहौत्रीणित्रीणिपदद्वयेचत्वारिवामहस्तेचहृद
॥२९॥ येपंचनिर्दिशेत् अक्ष्णोर्द्वयंद्वयंप्रोक्तंनाभौद्वेचैकंभंगुदे रोगोभोगस्तथाध्वाचबंधनंभ्रममेवच ऐश्वर्यंराजपूजाचत्र
पमृत्युरितिक्रमात् । इतिद्वादशराशीनांसंक्रांतिफलानि । यस्मिन्नृक्षेरविसंक्रमणंस्यात्तन्नक्षत्रंएकांकादियथास्थानेद
त्वायस्यजन्मनक्षत्रंयदंगेपतातितदंगफलंगोचरेजातकेचतस्मैब्रूयात् । अत्रचक्रसारःसंक्रांतिमात्रेप्रोक्तः चक्रंसारंविलि
ख्यग्रहपतिरयनंसंक्रमेचेत्करोतियस्मिन्नृक्षेतदृक्षंमरणभयकरंशूलपार्श्वेर्थलाभः सौख्यंस्याच्चक्रगर्भेज[illegible]यनविभुता




सं
क्रांतिन
क्षत्रमादौक्र
त्वाशूलमध्यादिनःस
नक्षत्रंयावक्रमाणित्वाफलंहि
ये
१
२
३
४
५
६
७
८
९
१०
११
१२
१४
१५
१६
१७
१८
१९
२०
२१
२२
२३
२४
२५
२६
२७

राजसन्मानलाभः यस्मिन्नृक्षेरविसंक्रमणंउत्तरेवादक्षिणायनेवाभवेत् तन्नक्षत्रंप्रथमंशूलेदत्वाततोवचनानुसारेणफलंब्रूयादिति इतिषट्संज्ञोक्तद्वादशसंक्रांतिपुरुषफलज्ञानम् ॥ अथचंद्रपुरुषः जन्मराशेश्चनक्षत्रान्नक्षत्रंवर्तमानकं गणयेद्गणकः प्राज्ञश्चंद्रस्यैवशुभाशुभं षडास्येपृष्ठकेषट्चत्रयंबाहौत्रयंगुदे त्रयंपादेत्रयंकंठेदद्याद्ज्ञेयंशुभाशुभंमुखे हानिश्चविज्ञेयाधनलाभोहिपृष्ठके हस्तेराजभयंराजसन्मानंगुह्यकेभवेत् स्थानभ्रंशोभवेत्पादेकंठेसर्वसुखंभवेत् अथ त्रिकोणचक्रंसंक्रमणेज्ञेयं कोणेत्रयंषट्चमध्येत्रिरावृत्यायथाक्रमं संक्रमर्क्षपरंज्ञात्वागणयेज्जन्मभावधि प्रथमेकोणे संक्रमनक्षत्रंदत्वाक्रमेणत्रिरावृत्यायत्रजन्मनक्षत्रंपततितत्फलंब्रूयात् प्रवासोभोगलाभश्चज्वरोग्निस्तापसंपदौ।विजयोमृत्युरर्थाप्तिः फलमेतद्यथाक्रमं अथसूर्यादीनांगोचरफलानिज्योतिःशास्त्रे सूर्यःशत्रुभयंशशीसदशनंभौमो विवादंऋणं सौम्योवंचनमंगिरामतिधनभ्रंशंभयंवैरितः हर्षंदैत्यपुरोहितोधनहतिंदैन्यंचसूर्यात्मजो राहुर्वित्तहतिं करोतिनिधनंचेज्जन्मराशिगतः १ सूर्योमित्रजनैःकलिंहिमरुचिःक्लेशक्षयंभूमिजो धर्मार्थक्षयमिंदुजोवहुसुखंलाभं सदासर्वतः जीवोज्ञानसुखेतपश्चवहुधाभोगंभृगोरात्मजो राहुःसूर्यसुतश्चवित्तहरणंयातोविधत्तेधने ॥ २ ॥ भानुर्भूरिधनंशशीरिपुकुलभ्रंशंकुजोर्थागमं स्थानप्राप्तिधनंस्थिरंशशिसुतःसंतापमंतर्गतं जीवोबंधुविदेशया।नविभवध्वंसंसितोरिक्षयंसौरिर्भूरिधनंतमश्चकुरुतेनित्यंतृतीयस्थितः ३ सूर्योदुःखपरंपरांहिमरुचिःसूक्ष्मामयंक्ष्मासुतःशत्रोवैभववर्धनंशशिसुतोलाभंप्रसादंयशः जीवोवुद्धिहतिंभृगुर्वहुविधाःपूजादिकाःसंपदः सौरिर्वित्तहतिंतमोरिपुभयंकुर्याच्चतुर्थंगतः ४ सूर्यःशोकवियोगरोगममृताधारश्चकार्यक्षयं भौमश्चंचलताशुबंधनहतिंरोगंवुधोवैशसं जीवोज्ञानधनात्मजान्भृगुसुतःपुष्टिंतथाश्रीरतिं शौरिर्वंधुशुचिंतमोरिपुभयंकुर्याद्गतःपंचमे ५ भास्वान्वैभवमुत्तमंहिमरुचिश्चित्तप्रसादंपरंभौमावैरिविमर्दनंशशिसुतोमानंयशःसन्मतिंजीवः शत्रुसमृद्धिमर्थमतुलंशुक्रोविषादंशनिर्वित्तंशत्रुहतिंतमोबहु

धनंषष्ठेकरोतिस्थितः ॥ ६ ॥ उद्योगंदिननायकोहिमकरःस्त्रीरत्नवित्तोदयंभौमोदुःखहतिंशुचःशशिसुतोरोगंभयंभूपतेः
जीवःकांचनमानवाप्तिविभवंशुक्रोरुजंसूर्यजो राहुश्चापिविदेशयानमरणंकुर्याद्गतःसप्तमे ७ भानुःशोकवियोगरोगम
मृताधारोभृशंवैभवंभौमः प.रकवैरिभीतिमतुलांसौम्यः सुखंसर्वतः स्थानत्यागमथेगुरुर्भृगुसुतः पुत्रार्थलाभं
शनिः पातश्चापिधनक्षयंनृपभयंयातोविधत्तेष्टमे ॥ ८ ॥ सूर्योवित्तविनाशनंहिमकरोरोगंभयंभूमिजो भीतिंवै
रिंनृपाद्भयंशशिसुतस्तापंसदासर्वतः जीवोमानधनाभिवृद्धिविभवंशुक्रोर्थलाभंशनि र्विद्वेषंस्वजनैस्तमश्चिररुजं
कुर्य्याद्गतोधर्मभे ॥ ९ ॥ सूर्योर्थापचयंगणाधिपतितांचंद्रःसमृद्धिंपरां भौमःख्यातिमनुत्तमांशशिसुतःशांतिंपरांसं
पदं जीवोबांधवविग्रहंनृपभयंशुक्रःसुमित्रक्षयं सौरिर्व्याधिविनाशनंविधुरिपुर्वित्तंविधत्तेखगः ॥ १० ॥ भानुर्वै
भवमुत्तमांहिमरुचिर्मिष्टान्नप.नंकुजः ख्यातिंचंद्रसुतोर्थलाभमतुलंजीवःपरांनिर्वृतिं शुक्रोगीतकवित्वधर्मकुतुकंसौ
रिःपरांसंपदं । राहुर्वैरिविमर्दनंवहुविधंकुर्य्यात्सदैकादशे ॥ ११ ॥ भानुर्बंधुवियोगशोकममृताधारोभयंभूमिजो बंधं
चंद्रसुतोधनात्मजयशोधर्मान्गुरुःक्लिष्टतां शुक्रः सौख्यमहर्निशंवहुधनंसौरिर्विदेशस्थितिं राहुर्ज्ञानविलोपनंवहुशु
चःकुर्य्याद्गतोद्वादशे ॥ १२ ॥ अस्यापवादः पशुपतिसंज्ञायां सुहृद्गतःस्वोच्चगतोपिवास्यान्मित्रेक्षितोवास्वगृहे
गतोवा अनिष्टसंस्थोपिध्रुवंनराणांसर्वोग्रहः श्रेष्ठफलंददाति ॥ १३ ॥ इतिगोचरफलम् अथगोचरफलप्र
संगादेतेषांग्रहाणामनिष्टफलपरिहारार्थमुपचारोज्योतिःशास्त्रे येचांवरस्थाः खलगोचराद्यैर्दशाक्रमाद्यैरशुभाभवं
ति दानादिनातेचयथाप्रसन्नाभवंतिदानादिविधिंप्रवक्ष्ये ॥ १ ॥ कौशेयंत्वथहेमताम्रकलशंचोर्णांबरंकुंकुमं मा
णिक्यंचगुडप्रवालममलंमध्येलयावः क्षितिं प्रावारासनरक्तचंदनघृतंगोधूमनानाफलं सूर्यायव्यजनंचरक्तवसनं
धेनुंसवत्सांगृहम् ॥ २ ॥ इतिसूर्यस्य शंखस्फाटिकमौक्तिकंगजमदंवज्रंधनुस्तंडुला दुग्धंदुग्धविकारपट्टवसनं
क्षौद्राज्यरौप्यंफलं कर्पूरंसितवस्त्रपांडुवृषभंकस्तूरिकाचंदनंप्रावारंलवणेक्षुगांचतुरगंचंद्रायदद्यात्सुधीः इतिचंद्रस्य

॥ २ ॥ ताम्रंचामरमायुधंक्षितिगुडंकौशेयरक्तांबरं तिक्तंरक्तमहोक्षरक्तकुसुमंगोधूमकंकुंकुमं प्रावारंचमसूरिकां मृगमदंस्वर्णंफलंविद्रुमं वक्रायप्रवदंतिचासनमथोगोरक्तकंकंबलं इतिभौमस्य ॥ ३ ॥ दासीदासमहीफलानि तुरंगंगारुत्मकंगोघृतं मुद्गाचामरतंडुलायुधगजंकांस्यंगृहंहाटकं कर्पूरंहरिचंदनंमरकतंचेन्नागदंतासनंदूर्वांभास्वरपट्टंसंमृगमदंसौम्यायदेयंमुदा इति बुधस्य ॥ ४ ॥ नागोनागमदंनृयानकनकंकौशेयपीतांबरं छत्रंचामरपुष्परागतुरंगंक्षोणीगृहंशर्करा पीतान्नंरजनीचमौक्तिकफलंरौप्यंचकस्तूरिका क्षौद्रंगोयुगलोर्णवस्त्रलवणंसंदीयतेवै गुरोः इतिजीवस्य ॥ ५ ॥ वज्रंगोक्षितितंडुलाश्वरजतंशुभ्रांवरंमौक्तिकं कस्तूरीसितचंदनंसितहयः प्रावारमूर्णाविकं कौशेयाम्लकगंधपुष्पकमथोगंत्रीरथंकंबलं शालिग्रामशिलांचगांचरजतंशुक्रायदद्यान्मुदे इतिशुक्रस्य ॥ ६ ॥ माषान्नंक्षितिमिंद्रनीलमहिषींदासःपतत्रीशिला स्तैलंलोहधराश्वसीसकरभोदासः कुलत्थास्त्रपुःस्याद्माषान्नमुपानहौमृगमदंगांकृष्णवर्णांतथा मंदायप्रवदंतिषोडशमहादानानिसत्कंबलं इतिशनेः ॥ ७ ॥ गोमेदंतिलकांस्यपात्रमहिषींतैलंतथाकंबलं राजावर्तगजोष्ट्रदासमहिषींकौशेयनीलांवरं दासींहिंगुफलास्त्रकार्मुकशराः शय्यासनंगोमही दानंदेयमुपानहौसतुरगंदैत्यस्यतुष्ट्यैसदा इतिराहोः ॥ ८ ॥ केतोर्दानमुदीरितंहिलवणंकौशेय नीलांबरं वैदूर्य्यंतिलकंबलोर्णवसनंसद्गंधतैलासनं कस्तूरीहरिचंदनंदशविधंगांदंतिदंतंहयं खट्वांगायुधमम्लकं चमहिषींदासींचदासंफलं इतिकेतोः ॥ ९ ॥ इतिनवग्रहदानानि । सौरमासस्वरूपेणाखिलसंक्रांतिनिर्णयः । सांगोपांगंचतत्कृत्यंसप्रसंगंनिरूपितं अथपक्षोनिर्णीयते तत्रपक्षशब्दः पक्षपरिग्रहे इत्यस्माद्धातोर्निष्पन्नोदेवकार्यार्थेपितृकार्यार्थंपरिगृह्यते यः कालविशेषस्तंवदंति अथवाचंद्रस्यपंचदशकलामापूरणंक्षयोवापरिगृह्यते यत्रसपक्षः सचद्विविधः शुक्लः कृष्णश्चचंद्रकला वृद्ध्युपलक्षितः शुक्लः चंद्रकलाक्षयोपलक्षितः कृष्णः एतौशुक्लकृष्णप

क्षौपूर्वापरपक्षावित्युच्यते पक्षौपूर्वापरौशुक्लकृष्णौमासस्तुतावुभावित्यमरसिंहेनाभिधानात् शुक्लपक्षश्चापूर्यमाण.
अ०२० इत्युच्यते अनयोश्चविनियोगोज्योतिःशास्त्रादौदर्शितः उभौनियुक्तौखलुशुक्लकृष्णौशुभाशुभेकर्मणितौप्रशस्ता
॥३१॥ वित्यादिभिः इतिपक्षनिर्णयः ॥ अथदिवसनिर्णयः सचतुर्विधः चांद्रसौरसावननाक्षत्रभेदात् एतेषांस्वरूपमुक्तं
विष्णुधर्मोत्तरे तिथिनैकेनादिवसश्चांद्रेमानेप्रकीर्तितः अहोरात्रेणचैकेनसावनोदिवसः स्मृतः आदित्यभागभोगे
नसौरोदिवसउच्यते चंद्रनक्षत्रभोगेननाक्षत्रोदिवसःस्मृतइति तिथिभागयोर्लक्षणंतत्रैवदर्शितं त्रिंशांशश्चतथारा
शेर्भागइत्यभिधीयते आदित्याद्विप्रकृष्टस्तुभागद्वादशकंयदा चंद्रमाः स्यात्तदारामतिथिरित्यभिधीयतइतिदिवसनि
र्णयः। अथतिथिनिर्णयः। तत्रातिथिशब्दस्तनोतेर्धातोर्निष्पन्नः तनोतिविस्तारयति वर्द्धमानांक्षीयमाणांचंद्रकलामे
कांयः कालविशेषः यद्वायथोक्तकालपात इतितिथिः तदुक्तंसिद्धांताशिरोमणौ तन्यंतेकलयायस्मात्तास्तस्मात्ति
थयः स्मृताइति एतदभिप्रेत्यस्कांदेपठ्यते अमाषोडशभागेनदेविप्रोक्तामहाकला संस्थितापरमामायादेहिनांदे
हधारिणी अमादिपौर्णमास्यंतायाएवशशिनःकलाःतिथयस्ताः समाख्याताः षोडशैववरानन इति अयमर्थः
यामहामायाधारशक्तिरूपादेहिनांदेहधारिणी संस्थितासाचंद्रमंडलस्यषोडशभागेनपरिमिताचंद्रदेहधारिणी अ
मानाममहाकलेति प्रोक्ताक्षयोदयरहितानित्यानित्यसंज्ञकैव इतराअपिपंचदशकलादिवसव्यवहारोपयोगिन्यः
क्षयोदयवत्यः पंचदशतिथयोभवंति तेनतिथयः षोडशेतिविरुद्धवचनं श्रुतिरपि तस्यरात्रयएवपंचदशकलाध्रु
वैवास्यषोडशकलेति एवंसत्यत्रसामान्यविशेषरूपेणातिथिद्वैविध्यमुक्तंभवति तत्रयेयममेत्युक्ताक्षयोदयवर्जिताध्रुवा
षोडशीकलातद्युक्तः कालस्तिथिसामान्यरूपस्त्ववशिष्टावृद्धिक्षयोपेताः पंचदशकलास्ताभिर्निविष्टाः कालवि
भागास्तिथिविशेषास्तासांपंचदशानामेकैकांकलांवन्ह्यादयः प्रजापत्यंताः पंचदशदेवताः क्रमेणापिबंति त

त्र्वाक्षरकापवतिप्रथमेत्युच्यते तयामुक्तः कालः प्राथम्यवाचिनाप्रतिपच्छब्देनाभिधीयते एवंचाद्वितीयादिपंचदश्यंतानांनामान्यवगंतव्यानिताएताः कृष्णपक्षतिथयोभवंति पुनश्चताः पीताः कलाअनेनैवक्रमेणवह्न्यादिदेवताभ्योनिर्गत्यचंद्रमंडलंपूरयंति ताभिर्युक्ताः कलाविशेषाः शुक्लपक्षगताः प्रतिपदाद्यास्तिथयोभवंति वह्न्यादिदेवतानांकलापानंसोमातृप्तिविषये प्रथमांपिवतेवह्निर्द्वितीयांपिवतेरविः विश्वेदेवास्तृतीयांतुचतुर्थींसलिलाधिपः पंचमींचवषट्कारः षष्ठींपिवतिवासवः सप्तमीमृषयोदिव्याअष्टमीमजएकपात् नवमींकृष्णपक्षस्य यमः प्राश्नाति नैकलां दशमींपिवतेवायुः पिवत्येकादशींपुमान् हेमाद्रौतु रुद्राएकादशींकलामितिपाठः द्वादशींपितरः सर्वेसमंप्राश्नंतिभागशः त्रयोदशींधनाध्यक्षः कुवेरः पिवतेकलां चतुर्दशींपशुपतिः पंचदशींप्रजापतिः सनिष्पीतः कलाशेषश्चंद्रमानप्रकाशते कलाषोडशिकायातुअपः प्रविशतेतदा अमायांतुसदासोमओषधीः प्रतिपद्यते तमौषधिगतंगावः पिवंत्यंबुगतंचयत् तत्क्षीरममृतंभूत्वामंत्रपूतंद्विजातिभिः हुतमग्निषुयज्ञेषुपुनराप्ययतेशशी दिनेदिनेकलावृद्धिः पौर्णमास्यांतुपूर्णतेति ॥ इतितिथिशब्दार्थनिर्णयः ॥ स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेःपादांबुजार्चारतोजीव्यात्पुत्रकलत्रमित्रसहितः संपालयन्क्ष्मांचिरम् ॥ १ ॥ रणवीरसिंहभूपेनकारितेकृत्यसागरे द्वितीयः परिपूर्णोयंकालरत्नसमुद्गकः ॥ २ ॥

इति श्रीमहाराजाधिराजश्रीरणबीरसिंहकारितेकृत्यरत्नाकरेसंवत्सरादिकालनिर्णयः समाप्तः ॥ २ ॥ ❀ ॥

अथसामान्यतः सर्वासांतिथीनांनिर्णयः तिथिर्द्वेधासंपूर्णाखंडाच तत्रसंपूर्णाः स्कंदपुराणेदर्शिताः प्रतिपत्प्रभृतयः सर्वाउदयादुदयंरवेः संपूर्णाइतिविख्याताइतिज्योतिः सिद्धांते सर्वाह्येताश्चसंपूर्णाश्चोदयादुदयंस्थिताः षष्टिघटिकात्मिकासंपूर्णातिथिरितिनारदीये अथघटिकासाधनं निर्णयामृतेमहाभारतेनिरूपितं कर्षेणाप्यधिकैः ष

द्भिः पलैस्ताम्रस्यभाजनं त्रिंशदंगुलविस्तारमुच्छ्रितंचतुरंगुलं स्वर्णमाषेणकृत्वाष्टचतुरंगुलकाषिका मध्यभागेतथा विद्धं नाडिकाघटिकास्मृता तद्रंध्रेणांभसापात्रंयावत्कालेनपूर्यते सकालोनाडिकातस्याः षष्टिभागोविनाढिका नाडिद्वयंमुहूर्तस्तुतेपंचदशवासरः एवंरात्रिस्तथापक्षमासर्त्वयनवत्सराः ॥ इति ॥ स्वर्णमाषादिमानं चागस्त्येनोक्तं यवःस्यात्सर्षपैः षड्भिर्गुंजाचस्यात्त्रिभिर्यवैः गुंजाभिः पंचभिश्चैकोमाषकः परिकीर्तितः भवेत्षोडशभिर्माषैः सुवर्णस्तैः पुनः स्मृतं ॥ पलंसुवर्णाश्चत्वारः पंचवापिप्रकीर्तितमिति कर्षस्तुपलस्यचतुर्थोभागः तदुक्तं त्रिकांड्यां मानंतुलांगुलप्रस्थैर्गुंजापंचाद्यमाषकाः तेषोडशाक्षः कर्षोस्त्रीपलंकर्षचतुष्टयमिति असंपूर्णातिथिर्दिनद्वयसंबंधिनीखंडा तस्यांदिनद्वयसंबंधिन्यांसत्यां व्रताद्यनुष्ठानेपूर्वापरावोपादेयेत्यादिसंदेहे निर्णयःक्रियते तत्रप्रतिपदाद्याः सर्वाःखंडास्तिथयोमध्याह्नादिकालविशेष विहितेष्वेकभक्तादिषुयस्मिन्यस्मिन्दिनेतत्रतत्रतत्कालव्यापिन्योलभ्यंते तत्तद्दिनगताएवग्राह्याः कर्मणोयस्ययःकालस्तत्कालव्यापिनीतिथिः तया कर्माणिकुर्वीतह्रासवृद्धीनकारणमिति वृद्धगार्ग्यवचनात् गार्ग्यः निमित्तकालमादायवृत्तिर्विधिनिषेधयोः विधिःपूज्यतिथौतत्रनिषेधःकालमात्रके तिथीनांपूज्यतानामकर्मानुष्ठानयोग्यता निषेधस्तुनिवृत्त्यात्माकालमात्रमपेक्षते इति नचकेवलंवाचनिकएवायमर्थः किंतुन्यायोपीतिनिषेधस्त्वत्यनेनसूचयति तथाहि विधिषुविधेयानुष्ठानस्पाभ्युदयहेतुत्वंप्रमेयं सकृदनुष्ठानादेवत्वभ्युदयसिद्धेस्तिथिद्वैधेकुत्रानुष्ठेयमितिविधेयेजायतेसंदेहः निषेधेषुतुकालविशेषेकर्मविशेषस्याननुष्ठानस्यानर्थहेतुत्वंप्रमेयं यदाकदाचिदपितत्कालेतत्कर्मानुष्ठानेऽनर्थप्रसंगात्सदैवतत्कालेतद्वर्ज्यंभवतीतिनास्तिसंदेहः नन्वेवंवचनात्तत्रागतश्चकालविशेषः प्रागुक्तसर्वनिषेधानांतावत्कालिकत्वसिद्धौ अभ्यंगमैथुनदंतधावननिषेधेषु पुनस्तात्कालिकत्ववचनंकिमर्थमभ्यंगेचोदधिस्नानेदंतधावनमैथुने जातेचमरणेचैवतत्कालव्या

पिनीतिथिरिति सत्यं विधेयकर्मविशेषएवसाकल्यापवादार्थंतस्मिन्वचनेनिषेध्यानांकेषांचिदुपादानं दृष्टांतत्वेनजन्ममरणयोरनुष्ठेययोः साकल्यवचनंप्रवर्ततेयेनतदपवादः साकल्यवचनेस्नानदानजपादिष्वित्यादिवचनेतदर्थेकेन दानाध्ययनकर्मस्विति बहुवचनेनचानुष्ठेयानामेवकर्मणांग्रहणात् अतएवनिषेध्यानामप्यल्पसादृश्यात्तत्रानुपादानं न चजननमरणाभ्यांतन्निमित्तकस्यानुष्ठेयकर्मणएवोपादानं तन्निमित्तकश्राद्धादौसाकल्यस्येष्टत्वादेवतदपवादसंभवात् तस्माज्जननमरणयोस्तद्वन्निषेध्यानामपिदृष्टांततयैवतत्रोपादानं अतएवतिथिविशेषाधिकरणकोपात्तादिनिमित्तानांसकलनिषेध्यानांचोपलक्षणमेवनग्रहणमिति नतुयुग्मादिवाक्यविरोधात् कथमयंनिर्णयः तथाहि युग्माग्नियुगभूतानांषण्मुन्योर्वसुरंध्रयोः रुद्रेणद्वादशीयुक्ताचतुर्दश्याचपूर्णिमा प्रतिपद्यप्यमावास्यातिथ्योर्युग्मंमहाफलं एतद्व्यस्तं महादोषंहंतिपुण्यंपुराकृतमितिनिगमवचनं युग्मंद्वितीया अग्निस्तृतीया ॥ १ ॥ युगंचतुर्थी भूतंपंचमी ॥ २ ॥ षट्षष्ठी मुनिः सप्तमी ॥ ३ ॥ वसुरष्टमी रंध्रंनवमी ॥ ४ ॥ रुद्रएकादशी द्वादशी ॥ ५ ॥ अत्रद्वितीयातृतीयेत्येकंयुग्मं अत्रद्वितीयादिप्रतिपदंतासुक्रमेणद्वयोर्द्वयोस्तिथ्योः परस्परमेवयुग्मं अक्षय्यफलं नपुनर्व्यस्तं तिथ्यंतरयुग्ममित्यर्थः अस्मिन्युग्मसप्तके पूर्वातिथिरुत्तरतिथिविद्धाग्राह्या उत्तरातुपूर्वविद्धेत्यर्थः ततश्चानेनवचनेन अमावास्याविद्धाप्रतिपत्सर्वदाग्राह्येतिविधीयते कर्मणोयस्ययः कालइत्यनेनतु द्वितीयायुतायाः प्रतिपदः कर्मकालाव्यापित्वेसाग्राह्येत्युच्यतेइत्यनयोर्विरोधः तथा खर्वोदर्पस्तथाहिंसा त्रिविधंतिथिलक्षणं खर्वदर्पौपरौ पूज्यौहिंसास्यात्पूर्वकालिकीतिव्याघ्रोशनसोर्वाक्यं खर्वस्तिथेःसाम्यं दर्पोवृद्धिः हिंसाक्षयः एतेवृद्धिसाम्यक्षयाः पूर्वतिथ्यपेक्षया यथा एकापूर्वाह्णेमध्याह्नादधिकावर्तते अन्याप्यन्यस्मिन् तथैवपूर्वतिथेरधिका खर्वः समातिथिः पूर्वदिनेमध्यान्हव्यापिनी अन्याप्यन्यास्मिन्तावत्येवेति हिंसातिथेर्ह्रासः तद्योगात्तिथिरपिहिंसेत्युच्यते यथाएकापूर्वदि

अ०र०
॥३३॥

नेमध्याह्नान्न्यूनाअन्याप्यन्यस्मिन्तथैवपूर्वतिथेर्न्यूनेति ततश्चवृद्धिसाम्ययोरुत्तराग्राह्याद्वयोस्तुपूर्वेत्यर्थः प्रतिपादकेनानेनकर्मकालव्यापिन्येवतद्विपरीतातिथिर्ग्राह्येतिप्रतिपादकस्यकर्मणोयस्येत्येवमादेर्विरोधइति तथा शुक्लपक्षेतिथिर्ज्ञेयायस्यामभ्युदितोरविः कृष्णपक्षेतिथिर्ग्राह्यायस्यामस्तमितोरविरितिमार्कंडेयवचनेनापिविरोधः तस्मात्परस्परवचनविरोधात् कथंपूर्वोक्तनिर्णयइतिचेत् उच्यते तत्रखंडातिथिः पंचधाभवति अन्यतरस्मिन्नेवदिनेसकलकर्मकालव्यापिनी १ अन्यतरस्मिन्नेवदिनेकर्मकालैकदेशव्यापिनी २ दिनद्वयेपिसकलकर्मकालव्यापिनी ३ दिनद्वयेपि कर्मकालैकदेशव्यापिनी ४ तत्रव्याप्तौप्रकारद्वयंसाम्यंचेतिदिनद्वयेपिकर्मकालसंबंधरहिताचेति ५ तत्राद्यपक्षद्वयेव्रतदानादावेकोद्दिष्टादिश्राद्धेचकर्मणोयस्ययः कालइत्यनेनैवनिर्णयः नतुयुग्मवाक्यादिभिः १ तत्रहियुग्मवाक्येननिर्णयेकदाचिदमावास्यादिविद्धाः कर्मकालव्यापिन्यः प्रतिपदादितिथयोग्राह्याः स्युःतथाखर्वदर्पवाक्येनात्र निर्णयेकदाचित्तिथिवृद्धौकर्मकालव्यापिन्युत्तरविद्धाग्राह्यास्यात् ॥ तथाच तत्कर्मविशेषप्रतिपदादितिथिविधायकानेकवाक्यवाधः स्यात् संभवतिचबाधेबाधकल्पनमयुक्तं तृतीयपंचमपक्षयोस्तुयुग्मवाक्येनखर्वदर्पवाक्येननिर्णयः पूर्वोक्तदोषाभावात् तत्राप्येवंव्यवस्थायुग्मादिवाक्यंव्रतदानादिविषयमेव द्वितीयादिकयुग्मानांपूज्यतानियमादिषुएकोद्दिष्टादिवृद्ध्यादौह्रासवृद्ध्यादिचोदनेतिव्यासोक्तेः नियमादिषुव्रतदानादिदैवकर्मसु एकोद्दिष्टादीत्यादिशब्देनाभ्युदयिकव्यतिरिक्तश्राद्धग्रहणंवृद्ध्यादिशब्देनाभ्युदयिकश्राद्धग्रहणं चतुर्थपक्षे यदादिनद्वयेपिकर्मपर्याप्तकालव्यापिनीतदायुग्मादिवाक्येननिर्णयः एकस्मिन्नेवदिनेकर्मपर्याप्तकालव्यापिनीतदासैवग्राह्याविहिततिथिलाभात् यदोभयत्रापिनकर्मपर्याप्तकालसंबद्धाकिंतूभयत्रापिकर्मकालैकदेशसंबंधिनी तत्रन्यूनाधिक्येऽधिककालव्यापिनीग्राह्यानान्यायोयस्यविहितः कालः कर्मणस्तदुपक्रमे तिथिर्याभिमतासातुकार्य्यानोपक्रमोज्झितेतिबौधायनवचनात् स्कांदेपि

योयस्यविहितः कालः कर्मणस्तदुपक्रमे विद्यमाने।भवेदंगंनोज्झितोपक्रमेणतु सर्वथाकर्मकालव्याप्त्यभावेतुकर्मोपक्रमकालगैवग्राह्या कर्मोपक्रमकालगातुकृतिभिर्ग्राह्यानयुग्मादर इतिदीपिकोक्तेरितिनिर्णयसिंधौ अतएवयांतिथिंसमनुप्राप्यउदयंयातिभास्करः सातिथिः सकलाज्ञेयास्नानदानजपादिषु यांतिथिंसमनुप्राप्यअस्तंयातिदिवाकरः सातिथिः सकलाज्ञेयास्नानदानादिकर्मस्वित्यादीनिदेवलवचनानि दिनद्वयेपिकर्मकालव्यापितिथ्यभावेयुग्मादिवाक्यविहिततिथेः संपूर्णत्वंप्रतिपादयंति इदंच उदयास्तमयकालिकतिथेः संपूर्णत्वाभिधानं यदोदयादूर्ध्वं मुहूर्तत्रयं मुहूर्त्तद्वयंवाविहितातिथिर्भवति अस्तमयात्प्राक् मुहूर्त्तत्रयं तदावगंतव्यं तदुक्तं विष्णुधर्मोत्तरे उदितेदैवतंभानोःपित्र्यंचास्तमितेरवौ त्रिमुहूर्त्तात्रिरह्नश्चसातिथिर्हव्यकव्ययोरिति भानावुदितेसत्यह्नोमुहूर्त्तद्वयंदैवतं अस्तमितेतत्पूर्वकालीनमह्नोमुहूर्त्तत्रयंपित्र्यंअतस्तत्कालव्यापिनीतिथिर्हव्यकव्ययोर्ग्राह्या सातिथिस्तदहोरात्रंयस्याभ्युदितोरविः वर्धमानस्यपक्षस्यह्रासस्त्वस्तमयेस्थितः त्रिमुहूर्त्तानकर्त्तव्यायातिथिः क्षयगामिनी द्विमुहूर्त्तापिकर्त्तव्यायातिथिर्वृद्धिगामिनीति दक्षवचने द्विमुहूर्त्ताग्रहणं उदयसंवंधिन्यामेव अस्तगायाश्चत्रिमुहूर्त्तायाएवग्राह्यत्वात् तदुक्तंस्कंदपुराणे यांतिथिंसमनुप्राप्ययात्यस्तंपद्मिनीपतिः सातिथिस्तद्दिनेप्रोक्तात्रिमुहूर्त्तानसाभवेदिति अत्रत्रिमुहूर्त्तानेतिदक्षवचनात् ह्रासवृद्धिवशेनतिथिनिर्णयः आमश्राद्धविषयः तस्यास्तुत्रिमुहूर्त्तायाः क्षयवृद्धित्वंकारणमिति स्कांदवचनं व्रतादिविषयं द्वितीयादिकेव्यासनिगमवचनात् यानितु व्रतोपवासस्नानादौघटिकैकापियाभवेत् उदयेसातिथिर्ग्राह्याविपरीतातुपैतृके आदित्योदयवेलायांयास्तोकापितिथिर्भवेत् पूर्णाइत्यवगंतव्याप्रभूतानोदयंविनेत्यादीनिस्कंदपुराणेबौधायनवचनानि मुहूर्त्तत्रयादल्पकालव्यापिन्यामपितिथौसंपूर्णत्वप्रतिपादकानि तानिवैश्वानराधिकरणन्यायेनावयुत्यानुवादरूपतयात्रिमुहूर्त्तव्याप्ततिथिप्रशंसापराणि युग्मवाक्यादिनिर्णयस्तु

नक्षत्रवारादियोगप्रशस्ततिथिव्यतिरिक्तविषयः अतएवगोभिलः यातिथीऋक्षसंयुक्तायाचयोगेननारदमुहूर्त्तंत्रयमात्रापिसापिसर्वाप्रशस्यते द्वितीयोऽपिशब्दः भिन्नक्रमः सर्वापीत्यन्वयः उदये त्रिमुहूर्त्तगायाअस्तमयेचत्रिमुहूर्त्तगायाः संपूर्णत्वाभिधानं वक्ष्यमाणाभ्यंगादिव्यतिरिक्तविषयं तदुक्तंस्कंदपुराणे ॥ अभ्यंगेचोदधिस्नानेइत्यादिमन्वादौचयुगादौचग्रहणेचंद्रसूर्ययोः व्यतीपातेवैधृतौचतत्कालव्यापिनीक्रियेति मन्वादिषुस्नानदानश्राद्धादिक्रियामन्वादिकालएवकर्त्तव्या नकालांतरइतिमन्वादावित्यस्यार्थः नारदीये पारणेमरणेन्दृणांतिथिस्तात्कालिकीस्मृता यदात्वेकैवतिथिः पूर्वाग्राह्येत्येकवचनेनोच्यते उत्तराग्राह्येत्यनेनतदाशुक्लपक्षेतिथिर्ग्राह्येतिमार्कंडेयवचनंव्यवस्थापकंसर्वंसमंजसम् इतिसामान्यतः सर्वतिथिनिर्णयः ⊛ ॥ अथैकभक्तकालनिर्णयः ॥ ब्रह्मपुराणे वैश्वानरव्रतेपठ्यते प्रतिपद्येकभक्ताशीसमाप्तेकपिलाप्रदइति तत्रादावेकभक्तंत्रिविधं स्वतंत्रंअन्यांगमुपवासप्रतिनिधिरूपंचेति तत्रस्वतंत्रैकभक्तस्वरूपं तन्निर्णयश्चस्कांदे दिनार्द्धसमयेतीतेभुज्यतेनियमेनयत् एकभक्तमितिप्रोक्तमतस्तस्माद्दिवैवहीति देवलोपि दिनार्द्धसमयेतीतेभुज्यतेनियमेनयत् एकभक्तंतुतत्प्रोक्तंन्यूनंग्रासत्रयेणत्विति तच्चैकभक्तंमध्याह्नव्यापिन्यांकार्य्यं तदुक्तंब्रह्मपुराणे मध्याह्नव्यापिनीग्राह्याएकभक्तव्रतेतिथिरिति बौधायनोपि उदयेतूपवासस्यनक्तस्यास्तमयेतिथिः मध्याह्नव्यापिनीग्राह्याएकभक्तव्रतेतिथिः अत्रमध्याह्नोनामपंचधाविभक्तस्याह्नस्तृतीयोभागः तत्रअहोरात्रयोस्त्रिंशन्मुहूर्त्ताः अह्निपंचदशरात्रौपंचदश एतेषांमुहूर्त्तानांनामानिज्योतिःशास्त्रेकाश्यपेनोक्तानि गौरीवल्लभसर्पामित्रपितरोवस्वंबुविश्वाह्वया ब्रह्मांभोरुहशंभुवह्निनिर्ऋतिभूतेशनक्तंचरातोयेशार्यमयोनयोदशतथापंचक्षणावासरे इत्यादि रुद्राजाहिर्बुध्न्यपूषाश्विनाःस्युःकीनाशयोग्निर्धातृचंद्राश्विनीज्याःविष्णुर्भानुस्त्वाष्ट्रवातामुहूर्त्ता रात्रौक्रूरास्त्वंतकालाग्निरुद्राइति स्मार्त्तानिनामानिपुराणेदर्शितानि रौद्रः श्वेतश्चमैत्रश्च

तथासारभटः स्मृतः सावित्रोवैश्वदैवश्चगांधर्वः कुतपस्तथा रौहिणस्तिलकश्चैवविभवोनिर्ऋतिस्तथा शावरोविजयश्चैवभेदाः पंचदशस्मृताइति एतेपंचदशसूर्योदयादारभ्यक्रमेणदिवामुहूर्त्ताः तथारात्रिमुहूर्त्ताः शंकरश्चाजपाच्चैवतथाहिर्बुध्न्यपूषकौ आश्विनोयाम्यवाह्नेयौवैधात्रश्चांद्रएवच आदितेयोथजैत्रश्चवैष्णवः सौरएवच ब्राह्मयोतोमरुतश्चैवमुहूर्त्ताः क्रमशोनिशीति अत्रघटिकाद्वयात्मकोमुहूर्त्तः तदुक्तंनिर्णयामृतेमहाभारते नाडीद्वयंमुहूर्त्तस्त्विति यदुक्तंरत्नमालायां दिनस्ययःपंचदशोविभागोरात्रेस्तथातद्धिमुहूर्त्तमानमिति तल्लक्षणाभिप्रायेणज्ञेयं यद्यपिअह्नोविभागः त्रेधाचतुर्धापंचधादृश्यते तथापि बहुसंमतत्वात्पंचधाविभागएवगृह्यते पूर्वाह्णोअपराह्णइति द्वेधाविभागः सचोक्तः स्कांदे आवर्त्तनात्तुपूर्वाह्णोह्यपराह्णस्ततः परइति तस्यचपर्वनिर्णयादावुपयोगः त्रेधाविभागमाह शातातपः यस्मादह्नस्तुपूर्वाह्णेदेवाअशनमभ्यवहरंति मध्यंदिनेमनुष्याः अपराह्णेपितरइति श्रुतावपि पूर्वाह्णोदेवानांमध्याह्नोमनुष्याणामपराह्णःपितृणामिति एतस्यश्राद्धादावुपयोगः चतुर्धाविभागमाह गोभिलः पूर्वाह्नः प्रथमंसार्द्धंमध्याह्नःप्रहरेतथा आतृतीयादपराह्णः सायाह्नश्चततःपरमिति एतस्यचयत्रकर्मविशेषेगमकसद्भावस्तत्रोपयोगः पंचधाविभागस्तुव्यासेनोक्तः उदयादिमुहूर्त्तत्रयंप्रातःकालः तदनंतरंमुहूर्त्तत्रयंसंगवः ततः परंमुहूर्त्तत्रयंमध्याह्नः ततः परंमुहूर्त्तत्रयमपराह्णः ततः परंमुहूर्त्तत्रयंसायाह्नः ननुत्रिंशद्घटिकात्मकेदिवसेपंचधाविभागेसतिएकैकस्यकालस्यमुहूर्त्तत्रयात्मकत्वंसंभवति षडशीत्यादिषुदिनमानह्रासेकथंत्रिमुहूर्त्तात्मकत्वेनायंविभागइतिचेत् उच्यते त्रिमुहूर्त्तात्मकमित्यह्नः पंचमभागोपलक्षणं अतश्चअह्नांह्रासवृद्धौचनदोषः एवंचषट्घटिकात्मकमध्याह्नेन्तरस्मिन्घटिकात्रये एकभक्तंकर्त्तव्यम् ॥ अन्यथादिनार्धसमयेतीतइतिवचनस्यानर्थक्यंप्रसज्येत इत्थमेवनिर्णीतं निर्णयामृते हेमाद्रौमदनरत्नेच अत्रमध्याह्नशब्दोदिनार्धसमयेतीतइ

पुस्तकालय
गुरुकुल कांगड़ी

तिवचनान्मध्याह्नोत्तरदलेपटोदग्धइतिवत् तत्रस्वतंत्रमेकभक्तं यस्यांतिथौविहितंतस्यांमध्याह्नोत्तरदलव्यापिन्यां कर्त्तव्यंदिनद्वयेपितद्व्यापिन्यांयुग्मवाक्यान्निर्णयः दिनद्वयेपिमुख्यकालास्पर्शेपूर्वैवग्राह्या गौणकालव्यापित्वात् तस्यामप्येकभक्तं मुख्यकालएवकर्त्तव्यं तिथ्यादिषुभवेद्यावान्ह्रासोवृद्धिः परेहनि तावान्ग्राह्यस्तुपूर्वेद्युरदृष्टोपि स्वकर्मणीतिवचनेन पूर्वतिथेरपि तावतोह्रासस्यकल्पनेनमुख्यकालेपिएकभक्तादितिथिसंभवात् केचित्तु तिथ्यां परस्थाघटिकाश्चयाःस्युर्न्यूनास्तथैवाभ्यधिकाश्चतासां अर्द्धंवियोज्यंचतथाप्रयोज्यंह्रासेचवृद्धौप्रथमेदिनेस्यात् इति लौगाक्षिवचनेनोत्तरतिथिह्रासार्द्धस्यपूर्वतिथौ योजनान्मुख्यकालेतत्संभवमाहुः दिनद्वयेमुख्यकालैकदेशस्य तुल्यकालव्याप्तौपूर्वैवग्राह्या गौणकालस्यापिव्यापनात् यदाचैकामुख्यकालैकदेशमधिकंव्याप्नोति तदाधिक मुख्यकालव्यापित्वेनसैवग्राह्या अयंनिर्णयः स्वतंत्रैकभक्तविषयः अन्यगतत्वैकभक्तंप्रधानव्रतेनमध्याह्नेपूजयेन्नृपेत्यादिवचनान्मुख्यकालानुरोधेगुणविरोधेचतादर्थ्यादितिन्यायेनमुख्यकालात्प्रच्युतमपिगौणकालेकर्त्तव्यं यथादक्षिणायनेष्टिः प्रधानसोमयागानुरोधेनेष्टिकालात्पर्वणः प्रच्युताकालांतरेक्रियते उपवासप्रतिनिधिरूपंत्वेकभक्तमुपवासदिनेमध्याह्ने उपवासतिथेःसद्भावेऽसद्भावेपिवातत्रैवकर्त्तव्यं तिथिर्ययोपवासेस्यादेकभक्तेपिसातथेतिसुमंतुवचनात् ॥ इतिश्रीरघुवंशतिलकश्रीमहाराजरणवीरसिंहकारितेकृत्यरत्नाकरेएकभक्तकालनिर्णयः ॥

अथनक्तकालनिर्णयः ॥

नक्तंनामाहश्शनंवर्जयित्वारात्रौभोक्तव्यमितिनियमाद्दिवारात्रिव्रतं तस्मादेतद्दिवारात्रिव्यापिन्यामेवतिथौकर्त्तव्यं तदुक्तंस्कंदपुराणे दिवारात्रिव्रतंयच्चएकमेवतिथौस्मृतं तस्यामुभयव्यापिन्यांकुर्यादेवव्रतंव्रती अत्रोभयव्यापिन्या

अलाभेप्रदोषव्यापिन्यांकार्य्यं तदाहवत्सः प्रदोषव्यापिनीग्राह्यातिथिर्नक्तव्रतेसदा एकादशींविनासर्वाः शुक्ले कृष्णसमाःस्मृताः एकादश्युपवासप्रतिनिधिरूपंनक्तमेकादश्युपवासदिनएवकार्य्यं नतत्रैकादश्याः प्रदोषव्यापित्वापेक्षेत्यर्थः प्रदोषपरिमाणंस्कंदपुराणेप्रोक्तम् उदयात्प्राक्तनीसंध्याघटिकात्रयमिष्यते सायंसंध्यात्रिघटिका अस्तादुपरिभास्वतः प्रदोषस्त्रिमुहूर्त्तःस्याद्रवावस्तंगतेसतीति व्यासोपि त्रिमुहूर्त्तःप्रदोषः स्याद्भानावस्तंगते सति नक्तंतत्रप्रकर्त्तव्यमितिशास्त्रस्यनिश्चयइति विश्वादर्शे प्रदोषोस्तमयादूर्ध्वंघटिकात्रयमिष्यते ॥ अस्यचनक्तस्यकालद्वयंभविष्यपुराणेदर्शितं मुहूर्त्तोनदिनंनक्तंप्रवदंतिमनीषिणः नक्षत्रदर्शनान्नक्तमहंमन्येगुणाधिकमिति अत्राधिकारिभेदेनव्यवस्थामाहदेवलः नक्षत्रदर्शनान्नक्तंगृहस्थस्यबुधैःस्मृतं यतेर्दिनाष्टमेभागेतस्यरात्रौनिषध्यतइति स्मृत्यंतरेपि नक्तंनिशायांकुर्वीतगृहस्थोविधिसंयुतः यतिश्चविधवाचैवकुर्यात्तत्सदिवाकरं सदिवाकरंतुतत्प्रोक्तमंतिमेघटिकाद्वये निशानक्तंतुविज्ञेयंयामार्धेप्रथमेसदेति इत्थंव्यवस्थानक्तकालद्वयस्यमाधवेनोक्ता मदनरत्नेतुप्रकारांतरेणव्यवस्थोक्ता अयंचप्रदोषेनक्तव्रतस्यमुख्यकालः अस्तमयात्प्राचीनोमुहूर्त्तोनकल्पः मुहूर्त्तोनंदिनंनक्तमितिभविष्यपुराणे शिवेननक्षत्रदर्शनोत्तरप्रदोषकालस्याहंमन्यइतिस्वाभिमतत्वेनाभिधानात् इतरस्यतुपराभिमतत्वेनाभिधानाद्गौणत्वस्याभिप्रेतत्वात् अत्रवचनेननक्षत्रदर्शनादितिल्यप् लोपेपंचमी अतश्चनक्षत्रदर्शनंप्राप्यनक्तंविहितभोजनंविधेयमित्यर्थः अतथात्वेपरत्रस्यादर्वागस्तगतेहिसेतिजाबालिवाक्येदिनद्वयेपि प्रदोषव्याप्त्यभावेसायाह्नव्याप्तेराश्रयणाच्च यदानक्ततिथिःपूर्वदिनेप्रदोषंव्याप्नोति अपरदिनेअस्तमयादर्वाचीनांत्रिमुहूर्त्तंव्याप्नोति किंचिद्वास्पृशति तदापूर्वत्रैवनक्तंकार्य्यं तदुक्तंजाबालिना अहःसुतिथयःपुण्याःकर्मानुष्ठानतोदिवा नक्तंव्रतेषुसर्वेषुरात्रियोगःप्रशस्यतइति यदानक्ततिथिःपूर्वापरयोरह्नोःप्रदोषंव्याप्नोति तदापरैवग्राह्यादिवारात्रिव्यापित्वात् तदाहजा

बालिः यदिस्यादुभयोरह्नोःप्रदोषव्यापिनीतिथिः तदोत्तरत्रनक्तंस्यादुभयत्रापिसायत इतिदिवारात्रावपीत्यर्थः यत्तु कूर्मपुराणे प्रदोषकालस्यअस्तमयात्प्राचीनमुहूर्त्तत्रयस्यनक्तकालत्वाभिधानं प्रदोषव्यापिनीयत्रत्रिमुहूर्त्तादिवायदितदानक्तव्रतंकुर्यात्स्वाध्यायस्यनिषेधवत् तन्मुख्यगौणसाधारण्येनावगंतव्यं यत्तुभविष्यपुराणादादितोप्यल्पकालग्रहणम् तद्ऽमुख्यकालेपितत्प्राशस्त्यायेति तेनास्यनविरोधः ननुउदयात्प्राक्तनीसंध्याघटिकात्रयमुच्यतेसायंसंध्यात्रिघटिकाअस्तादुपरिभास्वत इतिस्कंदपुराणे संध्याया घटिकात्रयात्मकत्वाभिधानात्तस्यांच चत्वारीमानिकर्माणिसंध्यायांपरिवर्जयेत् आहारंमैथुनंनिद्रांस्वाध्यायंचचतुर्थकमितिवचनेनभोजनप्रतिषेधात्कथंनक्षत्रदर्शनानंतरंनक्तभोजनविधानमितिचेन्न भोजनानिषेधस्यमुख्यसंध्याकालसंबंधेनैववक्तुंशक्यत्वात् गौणत्रिघटिकात्मकसंध्यात्रयेकारणाभावात् संध्यानामदिनरात्र्योःसंधौबिहितासंध्योपासनादिक्रियासंधिश्चखंडमार्त्तंडमंडलोपलब्धिसमयः तस्याल्पत्वात् क्रियायाश्चविस्तृतत्वेनतावतिकालेकर्त्तुमशक्यत्वान्मुख्यार्थबोधेसतिसंध्यासंबंधेनसंधिसंबंधः पूर्वापर क्रियापर्याप्तःकालोलक्ष्यते यायाःसन्निहितानाड्यस्तास्ताःपुण्यतमामता इतिसंक्रांतिकालवत् अतश्चसर्वलोकप्रसिद्धः खंडमार्त्तण्डमंडलोपलब्ध्यादितारकोदयांतोमुख्यः सायंसंध्याकालः तथाच याज्ञवल्क्यः प्रातःसंध्यांसनक्षत्रांसायंसंध्यांसभास्करांजपन्नासीतसावित्रींप्रत्यगातारकोदयात् पूर्वांसंध्यांसनक्षत्रांतिष्ठेदासूर्यदर्शनात् स्मृत्यंतरेच नक्षत्रदर्शनात्संध्यासायंतत्परतःस्थितं तत्परारजनीज्ञेयारात्रिधर्मान्विवर्जयेदितित्रिघटिकात्मकसंध्याकालस्तु दैवादकृतानांसंध्योपासनादीनांघटिकात्रयपर्यंतकर्त्तव्यताभ्यनुज्ञानार्थः संध्यागर्जितादिनाविहितानध्यापनादिपरश्चहेमाद्रौमदनरत्नेच अस्तुवाघटिकाद्वयंसंध्याशब्दार्थः तथापिनतत्रनिषेधः तस्यरागप्राप्तभोजनविषयत्वात् यत्तुनिर्णयसिंधौ गौडास्तु प्रदोषोस्तमयादूर्ध्वंघटिकाद्वयमिष्यते इतिवत्सोक्तःप्रदोषःसंध्याच दिनरात्र्योःसंधौमुहूर्त्तः अर्द्धार्कास्तम

यात्संध्याव्यक्तीभूताननतारकेतियावत् तेजोपरिहानिवशाद्भानोरर्द्धोदयंयावदितिवराहोक्तेरित्याहुः तन्न अस्तसंध्यावंदनानध्यायादिपरत्वादिति तत्प्रागल्भ्यविजृंभितं शिवपूजनेनक्तभोजनेचतस्यैवप्रदोषकालस्यसर्वत्रविहितत्वात् यदप्युक्तंमदनरत्ने नक्तस्यवैधत्वाद्रागप्राप्तभोजनगोचरोनिषेधइति तन्न विधेर्निषेधाविरोधात् अन्यथाकपिंजलानित्यत्रत्रिभ्योऽधिकानांहिंसनंस्यादितितत्सर्वविधिस्पृष्टनिषेधानवकाशादितिमीमांसाविरोधात् घटिकाद्वयत्रयप्रदोषप्रतिपादकमाधवग्रंथविरोधाच्चोपेक्ष्यं कालतत्त्वविवेचनेपि घटिकात्रयसंध्याग्रहणेपिवैधनक्तभोजनेनक्षत्रदर्शनानंतरं घटिकात्रयमध्येपिक्रियमाणेनदोषःतद्विषयत्वेतु विधिप्राप्तेनिषेधप्रवृत्तौविहितनिषिद्धत्वेनादृष्टदोषदुष्टविकल्पापत्तेरिति अनेनैवन्यायेनादित्यवारसंक्रांत्यादिषुरात्रिभोजनानिषेधस्यरागप्राप्तविषयादष्टम्यादिनक्तव्रतंरविवारादियोगेपिरात्रावेवकर्त्तव्यं यदादिनद्वयेपिनप्रदोषसंबंधःतदोत्तरदिनेसायाह्नेकर्त्तव्यं तदुक्तंस्कांदे प्रदोषव्यापिनीनस्याद्दिवानक्तंविधीयते आत्मनोद्विगुणच्छायामतिक्रामतिभास्करे तन्नक्तंनक्तमित्याहुर्ननक्तंनिशिभोजनं एवंज्ञात्वाततो विद्वान्सायाह्नेतुभुजिक्रियां कुर्यान्नक्तव्रतीनक्तफलंभवतिनिश्चितमिति अतथात्वेपरत्रस्यादित्याद्युक्तमेवअवशिष्टेषु पक्षेष्वेकभक्तवन्निर्णयोद्रष्टव्यः सौरनक्तमपियत्सप्तमीरविवारादौविहितंतत्सायाह्नएवकर्त्तव्यं तदुक्तंसुमंतुना त्रिमुहूर्त्तस्पृगेवाह्निनिशिचैतावतीतिथिः तस्यांसौरंचरेन्नक्तमहन्येवतुभोजनमिति कूर्मपुराणेपि नरस्यद्विगुणच्छायामतिक्रामतिभास्करः तदासौरंचरेन्नक्तंननक्तंनिशिभोजनमिति भविष्यपुराणेपि येत्वादित्यदिनेब्रह्मन्नक्तंकुर्वंतिमानवाः दिनांतेतेतुभुंजीरन्निषेधोरात्रिभोजनइति हरिनक्तेविशेषःस्कांदे उदयस्थासदापूज्याहरेर्नक्तव्रतेतिथिरिति अन्यनक्ते तु संक्रांत्यादावपिरात्रावेवनिषेधस्यरागप्राप्तभोजनगोचरत्वेनवैधबाधकत्वात् यानितु यदातुद्विगुणांछायांकुर्वंस्तपति भास्करःतत्रनक्तंविजानीयान्ननक्तंनिशिभोजनमित्यादीनिसौरधर्मादिवचनानिदिवानक्तविषयाणि तानियथायथंदिन

द्वयेपिप्रदोषव्याप्त्यभावविषयाणियतिनक्तविषयाणिवाद्रष्टव्यानि अत्रमाधवः येत्वादित्यदिनेब्रह्मान्निति भविष्यपुराणमधिकृत्य अस्मिंश्चदिवानक्तभोजनेउत्तमोंतिममुहूर्त्तोमध्यमउपांत्यः ततःप्राचीनोजघन्यः एवंचसत्यंतिमभागत्रिभागमुहूर्त्तवचनान्युपपद्यंतेरात्रिभोजनेपि घटिकात्रयमुत्तमःकालः घटिकाषट्कंमध्यमःकालः एतदेवाभिप्रेत्यवचनंस्मर्य्यते प्रदोषोस्तमयादूर्ध्वंघटिकात्रयमिष्यते त्रिमुहूर्त्तःप्रदोषःस्याद्रवावस्तंगतेसतीतिच निशीथपर्य्यंतोजघन्यःकालः नक्तंप्रकुर्वीतइतिसामान्येनाभिधानादिति कालतत्त्वविवेचनकारास्तु मुख्यकालेपि त्रिमुहूर्त्तात्मकेआद्यंमुहूर्त्तद्वयंमुख्यतरं निशानक्तंतुविज्ञेयंयामार्धेप्रथमेसतीतिस्मृत्यंतरादित्युक्तवंतः अनेनैवन्यायेनसौरनक्तेतुसाम्येनवैषम्येणवादिनद्वयेप्रदोषैकदेशव्याप्तौपरेद्युरेवनक्तकार्य्यंसायंकालस्यमुख्यतिथिव्याप्तत्वात् सायंकालदेशव्याप्तौपूर्वातिथिर्ग्राह्या प्रदोषकालस्यगौणस्यतुतिथिव्याप्तत्वात् एकभक्तनक्तयोरेकस्मिन्दिनेप्रसक्तौएकभक्तप्राथम्यात् एकभक्तंमुख्यकालएवानुष्ठेयं नक्तंतुद्वितीयदिने नातिथिः सायंकालेगौणसत्त्वेद्वितीयदिनेअनुष्ठेयम् द्वितीयदिनेगौणकालेपितिथेरसत्त्वेतुभार्यापुत्रादिना तद्दिनेकार्य्यमितिनक्तकर्त्तुर्नियमोव्यासेनदर्शितः मदनरत्ने हविष्यभोजनंस्नानंसत्यमाहार

लाघवम् अग्निकार्य्यमधःशय्यांनक्तभोजीषडाचरेदिति ॥

इतिश्रीमन्महाराजरणवीरसिंहकारितकृत्यरत्नाकरेनक्तकालनिर्णयः ॥

॥ अथायाचितनिर्णयः मदनरत्ने निर्णयामृतेच ॥

नविद्यतेयाचितंयस्मिन्नभ्यवहरणेतदयाचितं अहोरात्रेयाचितमन्नंनभोक्ष्येइत्येवंरूपोऽयाचितोऽन्नभोजनाभावविषयः संकल्पइतियावत् अतएवप्राजापत्यकृच्छ्रप्रकरणेगौतमेनोक्तम अथापरंत्र्यहंनकंचनयाचेतेति अभ्यवहरणंचभक्ष्य

भोज्यलेह्यपेयचोष्यभेदेनपंचविधं तत्रदंतैरेवावखंडयावखंड्ययन्निगीर्यतेतद्भक्ष्यंदंतावखंडनमंतरेणमुख व्यापारेणैवयन्निगीर्य्यतेतद्भोज्यम् जिह्वयागृहीत्वायदंतर्गिल्यतेतल्लेह्यं पेयंपयोजलादिप्रसिद्धं चोष्यंनामयद्द्रव्यांतर्गतसारंरसं मुख व्यापारेणैवगृहीत्वांतर्गिलपते असारमन्यत्त्यज्यतेतत् यथाम्रफलेक्षुदंडादितत् अस्यचोपवासवदहोरात्रसाध्यत्वादयाचितंतच्चतिथेर्दिवारात्रियोगित्वे तस्यामेवानुष्ठानम् दिवारात्रिव्रतंयच्चेतिस्कंदपुराणवचनात् यदातुतिथिरेकस्मिन्दिनेदिवैव अन्यस्मिन्रात्रावेवतदहव्यापिन्येवग्राह्या अहस्सुतिथयःपुण्याइतिजाबालिवचनात् अयाचितान्नलाभेतु दिवारात्रौवा अनिषिद्धकालेसकृद्भोजनंकर्त्तव्यंतथैवशिष्टाचारात् अलाभेतूपवासएव तत्रापि याचितान्नभोजनपरित्यागनिर्वाहान्नलोपः अत्रमाधवः अयाचितशब्दस्यअर्थद्वयंप्रतिषेधः पर्य्युदासश्च प्रतिषेधपर्य्युदासयोः प्रतिषेधपक्षंप्राजापत्यकृच्छ्रव्याख्यानेगौतमोव्याजहार अथापरंत्र्यहंनकंचनयाचेतेति पर्य्युदासंबृहस्पतिर्व्याजहार त्र्यहंप्रातस्त्र्यहंसायंत्र्यहमद्यादयाचितं त्र्यहंपरंचनाश्नीयात्प्राजापत्यंचरन्द्विजइति स्मृत्यंतरेपि अयाचिताशीमितभुक् परांसिद्धिमवाप्नुयादिति मितभोजित्वं दशग्रासमात्रं तदुक्तंचतुर्विंशतिमते प्रातस्तुद्वादशग्रासान्नक्तेपंचदशैवतु अयाचितेतुद्वौचाष्टौप्राजापत्योविधिःस्मृतइति तच्चभोजनद्रव्यंपरकीयप्रयत्नोपनीतं अयाचिताहृतंग्राह्यमपिदुष्कृतकर्मणां अन्यत्रकुलटाषंडपतितेभ्यस्तथाद्विषइति ॥ याज्ञवल्क्यवचनात् ॥ तथायतिधर्मेप्युशनाः भिक्षाशनमनुद्योगात्प्राक्केनाप्यनिमंत्रितंअयाचितं तुतद्भैक्ष्यंभोक्तव्यंमनुरब्रवीत् यदिप्रतिषेधः यदिवापर्य्युदासः उभयथाप्येकभक्तादिवन्नकालोविशेषणीयः प्रतिषेधकालविशेषानपेक्षणात् पर्य्युदासेपराधीनत्वात् असतितुकालविशेषविधौकर्मकालव्याप्तिवचनमत्रप्रवर्त्तते किंतु युग्मवाक्येनैवनिर्णयइति यत्तुमयूखे अयाचितेविशेषवचनाभावादुपवासनिर्णयइति केचित् तन्न एकभक्तायाचितयोर्द्वयोर्विंशद्घटिका

वधि सातिथिः सर्वदाज्ञेयानक्तेसायाह्नसंगतेतिशार्ङ्गधरीयेनारदोक्तेरिति तच्चिंत्यं एतद्वचनस्यहेमाद्यादिनिबंधादावदर्शनात्निर्मूलत्वं इत्ययाचितकालनिर्णयः ॥ एकभक्तादिव्रतानांखंडतिथौप्रारंभसमाप्त्योःप्रतिषिद्धत्वात्खंडास्वरूपमभिधीयते निर्णयामृते यातिथिरुदयादारभ्यदिनार्द्धव्यापिनीनस्यात्साखंडा तस्यांव्रतानांप्रारंभसमाप्तिंचनकुर्य्यात् तदाहसत्यव्रतः उदयस्थातिथिर्याहिनभवेद्दिनमध्यगा साखंडानव्रतानांस्यादारंभोनसमापनमिति अखंडायांतुप्रारंभसमाप्तीआह वसिष्ठः अखंडवर्त्तिमार्त्तंडाद्याह्यखंडाभवेत्तिथिःव्रतप्रारंभणंतस्यामनष्टेगुरुशुक्रयोरिति नन्वत्रवचने समाप्तिपदाश्रवणात् तत्रसमाप्तिःकर्त्तव्येतिकुतोवगम्यते इतिचेत्सत्यं खंडतिथौनिषेधवलादेवाखंडतिथौविधानंप्राप्तं भावाभावौविहायतृतीयावस्थायाःक्वचिददर्शनादिति । इतिखंडतिथिस्वरूपनिर्णयः । अत्रैवप्रसंगात् नक्षत्रगामिनाक्षत्रं दिनद्वयेप्यस्तमयकालव्यापिभवति तदार्धरात्रादर्वाक्चंद्रेणयुक्तेनक्षत्रेकार्य्यं तदुक्तंविष्णुधर्मोत्तरे उपोषितव्यंनक्षत्रंयस्मिन्नस्तमियाद्रविःयुज्यतेयत्रैवतारानिशीथेशशिनासहेति अत्रनिशीथशब्देनार्धरात्रादर्वाचीनःकालोलक्ष्यते अन्यथासुमंतुवचनविरोधःस्यात् यदुक्तं यदार्द्धरात्रादर्वाक्नक्षत्रंप्राप्यतेतिथौतन्नक्षत्रव्रतंकुर्य्यादतीतेपारणंतथेति नक्षत्रोपवासेयातिथिः सैवनक्षत्रविहितनक्तैकभक्तयोरपिग्राह्या तदुक्तंस्कंदपुराणे तत्रैवोपवसेदृक्षेयन्निशीथादधोभवेत् उपवासेयदृक्षंस्यात्तथानक्तैकभक्तयोरिति इतिनक्षत्रव्रततिथिनिर्णयः अथतस्याएवतिथेर्दानहोमव्रतादिषुफलस्यतारतम्यविज्ञानार्थंदैवमानुषराक्षसकालात्मकविभागनिर्णयःप्रोच्यते एतेषांचपूर्वाह्णः कालोदैविकःपूर्वाह्णेवैदेवानामितिश्रुतेः तथाच पूर्वाह्णोदैविकःकालोमध्याह्नश्चापिमानुषः अपराह्णः पितॄणांचसायाह्नोराक्षसःस्मृतइतिव्यासवचनाच्च तेनैतानिहोमदानार्चनादीनिपूर्वाह्णव्यापिन्यांतिथौकार्य्याणि अतएवयाज्ञवल्क्यः ॥ पौर्वाह्णिकास्तुतिथयोदेवकार्य्येफलप्रदाइति नन्वेकस्मिन्दिनेतिथिद्वयविहितस्यैकभक्तादेःकथमनुष्ठानं यस्यदान

होमैकभक्तादेर्मिथोनविरोधस्तत्क्रमेणतत्रानुष्ठेयं तत्रैकंस्वयंकृत्वाऽन्यद्भार्य्यादिनाप्रतिनिधिनाकारयेदितिमाधवमदनरत्नादयः यत्रतुचतुर्दश्यादौ एकभक्तादिनाह्निभोजनंप्राप्तं भूताष्टम्यांदिवाभुक्त्वारात्रौभुक्त्वातुपर्वाणि एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरेदिति तन्निरोधश्चतत्रैकभक्तादेर्वैधत्वाद्दिवैवभोजनं निषेधस्तुरागप्राप्तभोजनविषयःतच्चभोजनमुपवासानिषेधेत्वितिवचनादनुकल्पेनकार्य्यं एवंचतुर्दश्यांशिवरात्रिव्रतपारणायापिवैधत्वाद्दिवैवभोजनं एवमष्टम्यादौनक्तव्रतेसंक्रांत्यादौरवौसंकटचतुर्थ्यांरात्रौभोजनं यत्रत्वष्टम्यांदिवाभुजिनिषेधः संक्रमेचरात्राविितिनिषेधद्वयं तत्रोपवासःकार्य्यः यद्यपिपुत्रिणउपवासोपिनिषिद्धः तथाप्युपवासनिषेधेतुकिंचिद्भक्ष्यंप्रकल्पयेदितिवचनात् किंचिद्भक्षयित्वोपवासःकार्य्यः यत्तुनिर्णयसिंधौचांद्रायणमध्येएकादश्यादौतुभोजनं कार्य्यमेवचांद्रायणस्यकाम्यत्वेननित्यबाधकत्वादित्युक्तं तन्मृग्यं फलाद्यशनेनापिचांद्रायणव्रतसंपत्तौएकादश्यांभोजनंनिषेधवाक्यानामानंत्यत्वेन बाधानौचित्यात् ॥ इतिश्रीरघुवंशतिलकश्रीमहाराजरणवीरसिंहकारितेकृत्यनिबंधेसखंडखंडाविद्धाविद्धतिथिनिर्णयेहोमादिकालनिर्णयः ॥ १ ॥

स्वस्ति श्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसा
ररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेःपादांबुजार्च्चारतो जीयात्पुत्रकलत्रमित्रसहितःसंपालयन्क्ष्मां
भृशम् ॥ १ ॥

रणवीरसिंहभूपेनकारितेकृत्यवारिधौ तिथिरूपलसत्कांतिस्तुरीयोरत्नसंग्रहः ॥ २ ॥

॥ ४ ॥

अथप्रतिपदादिसामान्यनिर्णयः प्रस्तूयते

अत्रनिर्णयोनामविप्रतिपन्नानांवाक्यानांपरस्परविरोधपरिहारः तदेवतत्त्वदर्शनमुच्यते तदुक्तम् तत्त्वेविप्रातिपन्नानां

वाक्यानामितरेतरं विरोधपरिहारोत्रनिर्णयस्तत्त्वदर्शनामिति तत्रादौशुक्लप्रतिपदःसंवत्सरादित्वप्रसिद्धेस्तावदादौ तस्याएवनिर्णयःप्रतिपाद्यते अथसामान्यतःशुक्लाकृष्णा शुक्लायाप्रतिपत्तस्याध्यानं हेमाद्रौ तिथयोह्यधुनोच्यंतेप्रतिपद्द्विभुजारुणा मेषगाशक्तिपात्रासासितपक्षादिमामतेति अथकृष्णप्रतिपद्ध्यानं धूसराकृष्णपक्षाद्याभासरंस्थाचतुर्मुखा अक्षसूत्रंध्रुवंपुस्तंपात्रंधत्तेचतुर्भुजेति अथात्रप्रतिपत्सामान्यतोनिर्णीयते अस्याश्चनामनिरुक्तिर्भविष्योत्तरे तिथीनांप्रवरायस्माद्ब्रह्मणासमुदाहृता प्रतिपद्यापदेपूर्वेप्रतिपत्तेनसोच्यतइति तत्रशुक्लप्रतिपदमावास्यायुतैवकार्य्या युग्माग्नीत्यादिवचनात् पैठीनसिनाप्युक्तं पंचमीसप्तमीचैवदशमीचत्रयोदशी प्रतिपन्नवमीचैव कर्त्तव्यासंमुखीतिथिरिति संमुखीसायाह्नव्यापिनीतिनिर्णयामृतोक्तोर्थःप्रामादिकः उत्तरवचनविरोधात् हेमाद्रिविरोधाच्च संमुखीपूर्वविद्धेतियुक्तं सापियदापंचधाविभक्तस्याह्नश्चतुर्थभागव्यापिनीतदैवपूर्वविद्धाग्राह्या तदभावे सायाह्नव्यापिनीग्राह्येतिमाधवमतं तदभावेतुसायान्हव्यापिनीपरिगृह्यतामित्युक्तेः अपराह्णोत्तरकालेप्रवृत्तावुत्तरविद्धैवग्राह्येति मदनरत्ने प्रतिपत्संमुखीकार्यायाभवेदपराह्णिकीतिस्कंदपुराणवचनात् नन्वेतद्वचनंप्रतिपन्मात्रविषयमस्तु विशेषाश्रवणात् नचप्रतिपत्सद्वितीयास्यादितिवचनविरोधः तेषामपराह्णिकान्यप्रतिपद्विषयत्वेनोपपत्तेरितिचेन्न अस्यकृष्णप्रतिपद्विषयत्वेन वचनांतराप्राप्तस्यपूर्वविद्धत्वस्यापराह्णिकत्वस्यचविधेयत्वेगौरवापत्तेः शुक्लप्रतिपन्मात्रविषयत्वेतु तस्य वचनांतरेणपूर्वविद्धत्वस्यान्यताभावादपराह्णिकमात्रस्यविषयत्वेनगौरवम् यत्तु प्रतिपत्सद्वितीयास्याद्द्वितीयाप्रतिपद्युतेत्यापस्तंबवचनं तत्कृष्णप्रतिपद्विषयं अपराह्णोत्तरकालप्रवृत्तशुक्लप्रतिपद्विषयंच पूर्वोदाहृतवचनविरोधात् तस्मादापराह्णिकीशुक्लप्रतिपत्पूर्वैवग्राह्या अन्याशुक्लप्रतिपदुत्तरैवेति मदनरत्नादिसिद्धांतः कृष्णातूत्तराकृष्णातूत्तरतोखिलेतिदीपिकोक्तेः कृष्णापिपूर्वेत्यनंतभट्टइतिनिर्णयासिंधौ उभयथातु शुक्ल

कृष्णप्रतिपत्पूर्वैवग्राह्या प्रतिपत्पंचमीचैवउपोष्यापूर्वसंयुतेतिजाबालिवचनात् प्रतिपत्पंचमीभूतसावित्रीवटपूर्णिमा नवमीदशमीचैवनोपोष्याःपरसंयुताइतिब्रह्मवैवर्त्तवचनेनच द्वितीयापंचमीचैवदशमीचत्रयोदशी चतुर्दशीचोपवासेहन्युःपूर्वोत्तरेतिथी उपवासेसप्तमीतुवेधाद्धंत्युत्तरंदिनमितिवृद्धवसिष्ठवचनेनच द्वितीयाविद्धायाअनुपोष्यत्वाभिधानाच्च वेधश्चपैठीनसिनासर्वासुतिथिषुसामान्यतोदर्शितः पक्षद्वयेपितिथयस्तिथिंपूर्वांतथोत्तरां त्रिभिर्मुहूर्त्तैर्विध्यंतिसामान्योयंविधिःस्मृतइति उदयानंतरंस्थितात्रिमुहूर्त्तापूर्वांतिथिर्विध्यति अस्तमयात्प्राक्स्थिता त्रिमुहूर्त्तोत्तरा तिथिःपूर्वतिथिंविध्यतीत्यादिपूर्वमुक्तमेव निषिद्धपूर्वतिथिवेधस्तूपवासविषये स्वल्पोऽपि त्याज्यः तथाच स्मृत्यंतरे घटिकामात्रवेधोपिदूषयत्युत्तरांतिथिंषट्त्रिंशन्मतेपि घटिकार्द्धस्त्रिभागोवास्वल्पोवादूषयेत्तिथिंपंचगव्यघटंपूर्णं सुरायाविंदुकोयथेति इदंचवाक्यमुपवासस्यदूषकमितिनिषेधाभिधानात् अतएवबौधायनेनाप्युपवासतिथेरुदयकालीनत्वनियमउक्तःउदयेतूपवासस्यनक्तस्यास्तमयेतिथिरिति भविष्योत्तरपुराणे व्रतोपवासनियमेघटिकैकायदाभवेत् सातिथिःसकलाज्ञेयापित्र्यर्थेचापराह्णिकीति पाद्मस्कांदयोरप्येवं यदातूत्तरदिने उपवासतिथिःस्वल्पापिनलभ्यते तदानिषिद्धापूर्वतिथिविद्धाप्युपोष्या तथाचऋष्यशृंगः अविद्धानिनिषिद्धैश्चेन्नलभ्यंतेदिनानितु मुहूर्त्तैःपंचभिर्विद्धाग्राह्यैवैकादशीतिथिः तदार्धविद्धान्यन्यानिदिनान्युपवसेन्नरइति अरुणोदयमारभ्यपंचमुहूर्त्तकोवेधः सूर्योदयमारभ्य सार्द्धमुहूर्त्तद्वयवेधोपिज्ञातव्यः अविद्धानामलाभेतुपयोदधिफलानिवा सकृदेवाल्पमश्नीयात्तूपवासस्ततोभवेदिति अथसिद्धविरुद्धादिकंलिख्यते इयंशुक्रवारेणसिद्धोच्यते तदुक्तम् शुक्रेणप्रतिपत्षष्ठ्यैकादशीचत्रयोदशी सिद्धाभगोत्तराषाढाहस्तश्रवणरेवती अत्रसर्वाणिशुभकर्माणिसिद्ध्यंतीति भौमवारेणेयंविरुद्धा तदुक्तम् कुजेतुवैश्वदेवार्द्राप्रतिपत्पूर्वभादित्यादि बुधवारयुक्ताचेत्संवर्त्तकयोगोभवति बुधेधनिष्ठाभरणीप्रतिपच्चविवर्जयेत् अत्र तिथिपत्वेन

वह्निःपूज्यअस्यांयोगिनीसांमुख्यात्पूर्वस्यांयात्रात्याज्या इतिप्रतिपत्सामान्यानिर्णयः अथद्वितीयानिर्णीयते तत्रादौ शुक्लकृष्णद्वितीयाध्यानं हेमाद्रौ द्वितीयाहंसगाशुद्धापात्रपुस्तकधारिणी कृष्णाचकुमुदाभासावृक्षस्थासाक्षकुंडिकेति अथद्वितीयासामान्यनिर्णयः तत्रकृष्णापूर्वाशुक्लोत्तरेतिहेमाद्रिः कृष्णाद्वितीयादिमा पूर्वाह्णेयदिसासितातुपरतःसर्वेतिदीपिकोक्तेः साद्वितीयापरोपोष्या पूर्वविद्धाततोन्यथेतिस्मृत्यंतरं एकादश्यष्टमीषष्ठीद्वितीयाचचतुर्दशी त्रयोदशी आमावास्याउपोष्याःस्युःपरान्विता इतिविष्णुधर्मोत्तराच्च मदनरत्नेपि शुक्लद्वितीयापराग्राह्यायुग्माग्नीतिवचनात् कृष्णद्वितीयातुपूर्वविद्धैवग्राह्या द्वितीयाप्रतिपद्युतेत्यापस्तंबवचनात् प्रतिपत्संमुखीकार्याद्वितीयाद्विजसत्तमेति व्रह्मवैवर्तवचनाच्च प्रतिपत्संमुखीप्रतिपत्संगतातद्विद्धेत्यर्थः इत्युक्तं नन्वेतेषुवचनेषुद्वितीयामात्रश्रवणात्कथंद्वितीयाविशेषविषयत्वमेषामितिचेदुच्यते युग्मवाक्येप्रतिपदोऽमावास्यायुक्तत्वासंभवाच्छुक्लप्रतिपदोऽमावास्यायुक्तायायुग्मवाक्ये प्राशस्त्यमुक्तंतथाच शुक्लप्रतिपद्द्वितीयायुग्ममेतच्छस्तमितिदोषानभिधानेननिषिद्धत्वाभावान्निगमवाक्यस्यविषयः एवंचप्रतिपत्सद्वितीयेत्यादिवाक्यस्यशुक्लप्रतिपद्द्वितीयातृतीयायुग्मविषयत्वेनिगमवाक्यविरोधः निगमवाक्यस्य चद्वितीयाविषयत्वेनिरवकाशादापस्तंबवचनविरोधइतियथोक्तविषयत्वमेवांगीकर्त्तव्यं इतिद्वितीयासामान्यनिर्णयः वृहस्पतिवारयुक्तद्वितीयासुविधिपूजनमुक्तं व्रह्मपुराणे वृहस्पतौद्वितीयायांविधिवद्विधिपूजनं कृत्वानक्तंसमश्नीयाल्लभतेभूतिमुत्तमामिति विधिर्व्रह्मातत्पूजनंचगायत्र्यापौराणमंत्रेणवा अस्यानक्तव्रतविशेषेतुतत्कालव्यापिन्येवद्वितीया ग्राह्येतिसिद्धांतः अत्रसिद्धविरुद्धादिकं द्वितीयाबुधवारेणसिद्धा ज्योतिषे वुधवारेद्वितीयाचद्वादशीसप्तमीपुनः मृगोनुराधाहस्तश्चकृत्तिकासिद्धिदायिकेति अत्रकार्य्यारंभःसिद्धोभवति इयंशुक्रवारेणविरुद्धा अत्रशुभकार्य्यंनकार्य्यम् भार्गवेरोहिणीज्येष्ठाद्वितीयासप्तमीपुनः पुष्योमघातथाश्लेषासर्वकार्येषुवर्जिताइति अथात्रद्वितीयायांवैवाहिकंकर्मभूषण

कर्मरथादीनांकर्ममार्गगमनंव्रतारंभंपौष्टिकंकर्मचकुर्वीततदुक्तंभास्करेण व्रतपौष्टिकेद्वितीयाद्वादश्योःसप्तमीषुकुर्वीत पत्न्युद्वहनगृहासनशयनशकटयानाश्वकर्माणीति द्वितीयायांविट्क्षत्रियशूद्रैर्मलापहंस्नानंनकर्त्तव्यंतदुक्तंभास्करेण त्रयोदश्यांद्वितीयायांदशम्यांचविशेषतःशूद्रविट्क्षत्रियाः स्नानंनाचरेयुः कथंचनेतिस्नातुस्तनूजान्दशमीत्रयोदशीति द्वितीयाद्वितयंतिहं अत्रमलापहस्नाननिषेधएव ननित्यनैमित्तिककाम्यवाधःअत्रोत्तरस्यांदिशियात्रानकार्य्या धनुर्मीनस्थेरवौद्वितीयादग्धाभवति इतिद्वितीयानिर्णयः॥ अथतृतीयानिर्णयःतत्रादौ शुक्लाकृष्णाभेदेन तृतीयाध्यानम् तृतीयावृषगागौरीशूलपात्रधरासिता तृतीयातार्क्ष्यगानीलाशंखपात्रधराद्विदोः द्विभुजाइत्यर्थःतृतीयारंभाव्यतिरिक्ताचतुर्थीयुतैवोपोष्या एकादश्यऽष्टमीषष्ठीपौर्णमासीचतुर्द्दशी अमावस्यातृतीयाचताउपोष्याःपरान्विता इतिविष्णुधर्मोत्तरवचनं युग्मवाक्यंरंभाव्रतविषयं रंभाख्यांवर्जयित्वातुतृतीयांद्विजसत्तम अन्येषुसर्वकार्य्येषुगणयुक्ताप्रशस्यत इतिब्रह्मवैवर्त्तात् गणयुक्ताचतुर्थीयुक्ता आपस्तंवोऽपि चतुर्थीसंयुतायाचसातृतीयाफलप्रदा अवैधव्यकरीस्त्रीणांपुत्रसौभाग्यदायिनीतिअस्यांद्वितीयावेधनिषेधोब्रह्मवैवर्त्तेद्वितीयांशेषसंयुक्तांयाकरोतिविमोहिता सावैधव्यमवाप्नोतिप्रवदंतिमनीषिणः दीपिकायामपिरंभांविहायोत्तरतस्तृतीयामित्यादि अयंचद्वितीयावेधःस्वल्पोऽपिगौरीव्रतेषुत्याज्योनमुहूर्त्तत्रयपरिमितएवअतएवमदनरत्नेस्कंदपुराणेकलाकाष्ठापिवाचैवद्वितीयासंप्रदृश्यतेसातृतीयानकर्तव्यकर्त्तव्यागणयंयुतेतितेनैतेषुगौरीव्रतेषुत्तरदिनेस्वल्पापितृतीयाग्राह्यानत्रिमुहूर्त्तत्वकर्मकालव्यापित्वाद्यादरःमुहूर्तमात्रसत्वेऽपिदिनेगौरीव्रतांतरेशुद्धाधिकायामप्येवंगणयोगप्रसंसनादितिमाधववचनात्यदातूत्तरदिनेस्वल्पापिनलभ्यतेतदाद्वितीयाविद्धापिग्राह्यातदाचवृद्धवसिष्ठःएकादशीतृतीयाचषष्ठीचैवत्रयोदशीपूर्वविद्धापिकर्तव्यायदिनस्यात्परेहनीतिरंभाव्रतविषयेतुपूर्वैवग्राह्या कृष्णाष्टमीवृहत्तपासावित्रीवटपैत्रिकी अनंगत्रयोदशीरंभाउपोष्याःपूर्वसंयु

ता इतिनिगमवचनात् एवंचसर्वांणितृतीयाव्रतानिचतुर्थीयुतायामेवकार्य्याणीतिसिद्धांतःपक्षद्वयगतास्वपितृतीयासु तिथिशत्वेनगौरीपूज्या तदुक्तं चतुर्थीगणनाथस्यगौर्य्यास्तत्पूर्ववासरइति अत्रसिद्धविरुद्धादिकंलिख्यते तृतीया भौमवारेणसिद्धा तदुक्तं भौमेषष्ठीतृतीयास्यादष्टमीचत्रयोदशी मूलाश्विनीमृगोऽश्लेषासिद्धाउत्तरभाद्रपात्तृतीयावुधवारेणविरुद्धा वुधधनिष्ठाभरणीदास्त्रमूलसमन्विता तृतीयानवमीप्रतिपद्रेवतीभिर्विवर्जितेति विरुद्धयोगेषुशुभंकर्मनकार्य्यं अत्रकृत्यानि जयासुसंग्रामवलोपयोगिकार्य्याणिसिद्धांतिविनिर्मितानीति तृतीयायामाग्नेय्यांयोगिन्योवसंत्यतस्तत्संमुखीयात्रानकार्य्याइतितृतीयाप्रकरणं अथचतुर्थीनिर्णीयते तत्रादौशुक्लाकृष्णाभेदेनचतुर्थीध्यानं नीलोत्पलदलश्यामाचतुर्थीमूषकस्थिता परशुंविभ्रतीपात्रंपीतवस्त्राहिसंयुता १ चतुर्थीकज्जलाभासामाहिषस्थाचतुर्भुजा धत्तेक्षमालिकांदंडचतुर्थीयाचदंष्ट्रिणीति २ साचतुर्थीतिथिर्गणेशकुंडचतुर्थीवहुलाव्रतव्यतिरिक्तेषुपंचमीयुतैवग्राह्या तथाच गणेशकुंडवहुलाव्यतिरिक्ताःप्रकीर्तिताः चतुर्थीपंचमीविद्धादेवतांतरयोगतइतिमदनरत्ने ब्रह्मवैवर्त्तवचनात् युग्मभूतानीतियुग्मवाक्यात् एकादशीतथाषष्ठीअमावास्याचतुर्थीकाउपोष्याःपरसंयुक्ताःपराःपूर्वेणसंयुताइति वृद्धवासिष्ठोक्तेश्च गणेशव्रतेचतुर्थीतृतीयायुतैवोपोष्या चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यत इतिवृहस्पत्युक्तेः हेमाद्रौब्रह्मवैवर्त्तेपि चतुर्थीसहितायातुसातृतीयाफलप्रदाचतुर्थीचतृतीयायांमहापुण्यफलप्रदा कर्तव्याव्रतिभिर्वत्सगणनाथसुतोषिणीति गणनाथंसुतरांतोषयतीत्यर्थः तथाचस्कंदपुराणे कृष्णाष्टमीचतुर्थीचसावित्रीवटपैतृकीशुक्लत्रयोदशीरंभानोपोष्याःपरसंयुताःअत्रापिचतुर्थीगणेशचतुर्थ्येववेदितव्याअन्यथायुग्मभूतानामिति निगमवाक्यविरोधः स्यात् नाथचतुर्थीतुमध्याह्नव्यापिनीग्राह्येतिनिर्णयामृतेमाधवीये चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यतेमध्यान्हव्यापिनीचेत्स्यात्परतश्चेत्परेहनीतिवृहस्पतिवचनात् प्रातःशुक्लतिलैःस्नात्वामध्यान्हेपूजयेन्नृपेतितत्कथाभिधानाच्च

तनपेरादिने तथात्वेपरा अन्यथापूर्वैवेत्युक्तं जयाचयदिसंपूर्णाचतुर्थीसंयुतायादि सजयाचैवकर्त्तव्यानागविद्वांनकारयेदितिवचनात् एवंभाद्रशुक्लचतुर्थ्यपिमध्यान्हव्यापिनीग्राह्या दिनद्वयेतथात्वेमातृयोगस्यसत्त्वात्पूर्वैवेति केचित् अन्येतुपूर्वदिने मुहूर्त्तत्रयादिरूपस्य तृतीयायोगस्याभावात् परादिने माधवोक्तमध्यान्हव्यपित्वासत्त्वात्संपूर्णत्वाच्चपरेत्याचक्षते दिनद्वयेतदभावेतुगौरीव्रतेपूर्वैवेतिनिर्णयसिंधौ अयमेव पक्षोज्यायान् योयस्यविहितः कालः कर्मणस्तदुपक्रमे तिथिर्याभिमतासातुकार्य्यानोपक्रमान्वितेति बौधायनवचनात् कर्मोपक्रमकालगातुकृतिभिर्ग्राह्यानयुग्मादर इतिनिर्णयदीपेलल्लः उपक्रमस्तु तैलाभ्यंगंप्रकुर्वीतरात्रौपूजांसमाचरेदित्यत्रोक्तः विशेषस्तत्रत्यकृत्यनिर्णयेवक्ष्यते अथसिद्धविरुद्धादिकं चतुर्थीशनिवारेणासिद्धा जीवेनाविरुद्धा शनौचतुर्थीनवमीचतुर्दश्यथरोहिणी शततारास्वातिमघाभाग्यंचैवतुसिद्धयइति जीवेष्टमीचतुर्थीचआर्द्राचोत्तरफाल्गुनी रोहिणीवारुणंचैचाविरुद्धं मृगशीर्षकामिति अत्रकृत्यमुच्यते शत्रुवधाग्निविषप्रयोगाद्यनिष्टं कर्मचतुर्थ्यादिरिक्तातिथिषुकार्यं तदुक्तंभास्वरेण चतुर्थ्यांचचतुर्दश्यांनवम्यांमुष्कमर्दनं दमनंबंधनंभेदमाभियोगाभिचारकं विषाग्निसंप्रयोगंचकुर्वीतकपटानिचेतिचतुर्थ्यांनैर्ऋतेयोगिन्यःप्रतिवसंति अतस्तत्संमुखीयात्रातत्रनकर्त्तव्या क्रमात्पूर्वोत्तराग्नेयानैर्ऋत्यइत्युक्तत्वात् रविभौमशनीनामन्यतमेक्रूरग्रहेकर्कटस्थेसतिचतुर्थीशुभकार्येषुवर्जिता आद्याश्चतस्त्रइत्युक्तत्वात् सूर्येवृषकुंभस्थितेसतिचतुर्थीदग्धाभवतीति ॥ इतिश्रीरणवीरसिंहमहाराजकारितेकृत्यरत्नाकरेचतुर्थीनिर्णयप्रकरणम् ॥ ॥ ॥ ॥

॥ अथपंचमीनिर्णीयते ॥

तत्रादौशुक्लकृष्णपंचमीध्यानम् ग्राहस्थाचंद्रगौरासापंचमीसाक्षकुंडिकेति १ पंकजस्थाप्रवालाभाफणामस्तकभूष

णा शंखमुद्रांतथापाशंविभ्राणापंचमीमता पंचम्योमाधवमतेसर्वाश्चतुर्थीयुताःकार्याःचतुर्थीसंयुताकार्य्यापंचमीपरयानतु दैवेकर्मणिपित्र्येचशुक्लपक्षेतथासितइतिहारीतोक्तेः स्कंदपुराणेपि पंचमीचतुर्थीसहिताविभोइति तथापद्मपुराणभविष्योत्तरपुराणयोः पूर्वोत्तराविद्धाविषयौविधिनिषेधौस्मर्येतेपंचमींचचतुर्थ्यांतुषष्ठ्यायुक्तांनकारयेदितिमदनरत्ने पूर्वविद्धाग्राह्येत्युक्तं युगभूतानामितियुग्मवचनात् पंचमीसप्तमीचैवदशमीचत्रयोदशी प्रतिपन्नवमीचैवकर्तव्यासंमुखीतिथिरितिपैठीनसिवचनाच्च स्कंदोपवासव्रतेतु माधवमतेप्युत्तराकार्य्या स्कंदोपवासेस्वीकार्य्यापंचमीपरसंयुतेतिजावालिवचनात् ब्रह्मवैवर्त्तात् मदनरत्नेनिर्णयामृतेच स्कंदोपवासपंचमीव्यतिरिक्तासर्वापिपंचम्युपवासेपूर्वविद्धैवग्राह्या प्रतिपत्पंचमीचैवउपोष्यापूर्वसंयुतेतिजावालिवचनात् नागव्रतेतुपंचमीपरविद्धाग्राह्या तदुक्तंस्मृत्यंतरे श्रावणेपंचमीशुक्लासाप्रोक्तानागपंचमी तांपरित्यज्यपंचम्यश्चतुर्थीसहिताहिता इतिहेमाद्रिमतेतुकृष्णापूर्वापरासिताइति दीपिकायामपि कृष्णापूर्वयुतासितापरयुतास्यात्पंचमीति यत्तु पंचमीतुप्रकर्त्तव्याषष्ठ्यायुक्तातुनारदेत्यापस्तंबीये तन्नागपूजाविषयमित्यनंतभट्टनिर्णयामृतादयः चमत्कारचिंतामणौच पंचमीनागपूजायांकार्य्याषष्ठीसमन्विता तस्यांतुतुषितानागाइतरासचतुर्थिकेतिनागपूजायांपरैवेति अथपंचम्यासिद्धविरुद्धादिकं पंचमीगुरुवारेणसिद्धा गुरौदशमिपंचम्यौपौर्णमासीविशाखिका भाग्यानुराधासिद्धाःस्युस्तथापुष्यपुनर्वसूइति भाग्यंपूर्वाफाल्गुनी पंचमीशनिवारेणनिषिद्धा सौरेहस्तोत्तराषाढारेवतीचित्रयासह पंचमीचैवषष्ठीचअर्यम्णासहवर्जितेतिपंचम्यादिपूर्णातिथषुमांगल्यविवाहयात्रापौष्टिकादिशांतिककर्माणिकार्याणि तथाचश्रीपतिःपूर्णासुमांगल्यविवाहयात्रासपौष्टिकंशांतिककर्मकार्य्यं सदैवदर्शेपितृकर्ममुक्त्वानान्यद्विदध्याच्छुभमंगलादि पौष्टिकंनामायुर्वृद्ध्यर्थंक्रियमाणंहोमादिकंकर्म शांतिकंग्रहोत्पातादिशांतयेक्रियमाणं शुभंशांतिकादिमंगलंविवाहादिइयंपंचमीरवि

भौमशनीनामन्यतमेक्रूरग्रहे मेषादिराशिचतुष्टयस्थितेदुष्टाभवति अत्रचदक्षिणस्यांयोगिनीसांमुख्यात्यात्रानकार्यापक्षद्वयगतासुसर्वासुपंचमीषुतिथिपत्वेननागाःशेषादयःपूज्याःउक्तंच शेषादीनांफणीनांचपंचम्यांपूजनंभवेदिति

श्रीमन्महाराजरणवीरसिंहकारितेकृत्यरत्नाकरेपंचमीसामान्यानिर्णयप्रकरणम् ॥

अथषष्ठीसामान्यनिर्णयः तत्रादौशुक्लकृष्णभेदेनषष्ठीध्यानम् हेमाद्रौ मयूरगारुणाषष्ठीपात्रकुक्कुटधारिणी १ कृष्णपक्षे त्र्यक्षामयूरगारक्ताशशिकुक्कुटधारिणी एकास्याद्विभुजाषष्ठीरक्तवस्त्रासुभूषणा नीलकुंडलकंठासाजटाखड्गेंदुभूषिताइति शुक्लपक्षेषष्ठीतिथिरुपवासव्रतादिषुस्कंदव्रतातिरिक्तेषुसप्तमीयुतैवग्राह्या षण्मुन्योरितियुग्मवाक्यात् बृहस्पतिनाप्युक्तं एकादश्यष्टमीषष्ठीद्वितीयाचचतुर्दशी अमावास्यातृतीयाचताउपोष्याःपराश्रिताइति स्मृतिसमुच्चयविष्णुधर्मोत्तरयोरप्येवमेव स्कांदेपि नागविद्धानकर्त्तव्याषष्ठीचैवकदाचन सप्तमीसंयुताकार्य्याषष्ठीधर्मार्थचिंतकैरिति नागविद्धातुयाषष्ठीशिवविद्धातुसप्तमी दशम्येकादशीविद्धानोपोष्याःस्युःकथंचनेति शिवरहस्यसौरपुराणवचनेनपूर्वविद्धायानिषेधाच्च अत्रपंचमीवेधःषण्मुहूर्त्तात्मकोज्ञेयः तथाचमाधवीयेस्कंदपुराणे नागोद्वादशनाडीभिर्दिक्पंचदशभिस्तथा भूतोष्टादशनाडीभिर्दूषयत्युत्तरांतिथिमितितेनषण्मुहूर्त्तन्यूनपंचमीयोगे पूर्वैवोपोष्या तदुक्तंस्कंदपुराणे कृष्णाष्टमीस्कंदषष्ठीशिवरात्रिश्चतुर्दशी एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेदिति अस्यांसप्तमीभानुयोगे पद्मकाख्योयोगउक्तोनिर्णयामृते षष्ठीचसप्तमीयोगेवारेचेदंशुमालिनः योगोऽयंपद्मकोनामसूर्यकोटिग्रहैःसमइति अत्रस्नानदानादिकृतमक्षयफलदंभवतीति सर्वेष्वपिमासेषुविशेषादयंयोगोबोद्धव्यइतिनिर्णयसिंधौ अचलासप्तम्यामित्यन्ये अस्यामेवरविवासरयोगेलोलार्कयात्रोक्ताकाशीखंडे कृतानियानिपापानिनरैःसंवत्सरादपि नश्यंतिक्षणतस्तानिषष्ठ्यर्कैलोलदर्शनादितिवार्षिकयात्राप्युक्ता तत्रैव मार्गशीर्षस्यसप्तम्यांषष्ठ्यांवारविवासरे विधाय

वार्षिकींयात्रांनरःपापात्प्रमुच्यतइति षष्ठीव्रतानां विशेषकृत्यंचैत्रादितोवक्ष्यते अथात्रषष्ठ्यांसिद्धाविरुद्धादिकमुच्यते शुक्रेणप्रतिपत्षष्ठीतिप्रतिपन्निर्णयेप्रोक्तंप्राक्भौमेनापिसिद्धा भौमेषष्ठीतृतीयास्यादितिचोक्तमेव षष्ठीशनिवारेणाविरुद्धा तदुक्तं सौरेहस्तोत्तराषाढेरेवतीचित्रयासह पंचमीचैवषष्ठीचअर्यम्णासहवार्जितेति षष्ठ्यांशनिवारेणक्रकचाभिधोयोगः तदुक्तंरत्नमालायां तिथेश्चवारस्यचयत्रसंख्ययात्रयोदशस्युर्मिलनेकृतेसति स्मृतःसयोगःक्रकचाभिधानकोविवर्जनीयःशुभकर्मसुध्रुवमिति अत्रदंतकाष्ठतैलाभ्यंगस्नानंचनिषिद्धं यथा दंतकाष्ठेकुलद्रव्यज्ञातिनाशो यथाक्रमं जायतेषष्ठ्यमावास्याप्रतिपत्सुकृतेसति तथाचरत्नमालाया षष्ठीषुतैलंपलमष्टमीषुक्षौरक्रियांचैवचतुर्दशीषु स्त्रीसेवनंनष्टकलासुपुंसामायुःक्षयार्थंमुनयोवदंतीति अत्रदंतकाष्ठादिनिषेधस्तात्कालिकतिथ्यामेव तदुक्तंस्नानेचाभ्यंजनेचैवदंतधावनमैथुने तिथिस्तात्कालिकीग्राह्यातथामरणजन्मनोरिति अत्रषष्ठीषुतैलंतिलतैलमेवनिषिद्धं नतु सर्वतैलं तदुक्तंस्मृतिसमुच्चये यत्रतैलंनिषिद्धंस्यात्तिलतैलंनिषिध्यते अभ्यंगायानिषेधेतुसार्षपादेरपीष्यतइति पुष्पयुक्तेषुसर्वथाप्यऽनिषेधः सार्षपंगंधतैलंचयत्तैलंपुष्पवासितं अन्यद्रव्ययुतंतैलंनदुष्यतिकदाचनेतिप्रचेतोवचनात् रविभौमशनीनामेकतमेक्रूरग्रहेसिंहास्थितेषष्ठीदुष्टाभवति पराःपरेषामित्युक्तत्वात् तथाकर्कमेषस्थेसूर्येषष्ठीदग्धा भवति तत्रशुभकर्मनकार्य्यं षष्ठ्यां पश्चिमेयोगिनीसांमुख्याद्यात्रा न कार्या इतिसर्वषष्ठीनिर्णयः इतिश्रीरघुवंशातिलकश्रीमहाराजरणवीरसिंहकारितेकृत्यरत्नाकरेषष्ठीसामान्यनिर्णयः ॥

अथसप्तमीसामान्यनिर्णयः ॥

तत्रादौशुक्लकृष्णभेदेनसप्तमीध्यानम् ताम्रवर्णाजपाभासाहयस्थासप्तमीमतेति कृष्णपक्षे नीलकुंतलकंठासाजटाखड्गेंदुभूषिता इभस्थासप्तमीगौरीद्विभुजावज्रपात्रिणी हेमाद्रौ शुक्लपक्षेसप्तमीतिथिरुपवासादिषुषष्ठीयुतैवग्राह्या युग्मवक्यात्षष्ठीयुतासप्तमी

चेत्कर्त्तव्यासाचसर्वदा षष्ठीचसप्तमीयत्रतत्रसन्निहितोहरिरितिमदनरत्नादयः स्कंदवचनात् षष्ठ्येकादश्यमावस्यापूर्वविद्धातथाष्टमी सप्तमीपरविद्धाचनोपोष्यांतिथिपंचकमितिस्कंदपुराणवचने परविद्धायाःसप्तम्याउपवासेनिषेधाच्च अत्रमाधवःयदापूर्वेद्युरस्तमयपर्यंताषष्ठी परेद्युस्तिथिक्षयेणास्तमयादर्वागष्टमी त्रिमुहूर्त्ता तदापूर्वविद्धायाअलाभादुत्तरविद्धायाश्चप्रतिषिद्धत्वात्कुत्रानुष्ठानमितिचेत् निषेधमुल्लंघ्याप्युत्तरविद्धायामितिब्रूमः यद्यप्यस्मिन्नर्थेवचनंनोपलभ्यते तथापिशेषिलोपस्यान्याय्यत्वादुत्तरविद्धागौणकालत्वेनस्वीकार्य्येति इतिसप्तमीसामान्यनिर्णयः अथसप्तम्यांसिद्धाविरुद्धादिकमुच्यते सप्तमीबुधवारेणसिद्धा तदुक्तम् बुधवारेद्वितीयाचद्वादशीसप्तमीपुनरिति सप्तम्यांरविवारेणसंवर्त्ताख्योयोगोविरुद्धोभवति सप्तम्यांदिनकरवासरोयदिस्याद्वारश्चेत्प्रतिपदिचेंदुनंदनस्य संवर्तोमुनिभिरुदीरितःसयोगःसंत्याज्यःशुभसुखकांक्षिभिःप्रयत्नादिति सप्तमीरवियोगादिविरुद्धयोगेषु कश्चियथाविरुद्धयोगास्तिथिवारजातानक्षत्रवारप्रभवाश्चयेच हूणेषुवंगेषुखशेषुवर्ज्याअन्येषुदेशेषुनतेविद्धिशेषोलिख्यतेरुद्धाइति सप्तम्यांचद्वितीयायांव्रतपौष्टिकादिकर्मकार्य्यं व्रतपौष्टिकेद्वितीयासप्तमीद्वादशीसप्तमीषु कुर्वीतेत्युक्तत्वात् सप्तम्यामामलकस्नानंलक्ष्मीनाशनकरम् तदुक्तंसप्तम्यनिंदुनवमीषुचसंपदिच्छुःस्नायात्कदाचिदपिनामलकैर्मनुष्यः रविभौमशनीनामन्यतमेक्रूरग्रहेकन्याराशिस्थितेसप्तमीशुभकर्मसुनिषिद्धा तदुक्तं पराःपरेषामित्यादिसप्तम्यांवायव्यांयेःगिनीसांमुख्याद्यात्रानकार्य्या वायव्येशानयोरित्युक्तत्वात् इतिश्रीमन्महाराजरघुवंशतिलकश्रीरणवीरसिंहकारितेकृत्यरत्नाकरेसप्तमीसामान्यनिर्णयप्रकरणम्

अथाष्टमीनिर्णीयते

तत्रशुक्लाष्टमीध्यानम् घंटापात्रधरागोस्थागोक्षीरधवलाष्टमी अथकृष्णाष्टमीध्यनं प्रेतगाचाष्टमीरक्ताकृष्णग्रीवासि

तांशुका अक्षंखेटंतथाखड्गंपात्रंधत्तेचतुर्भुजेति अष्टमीतिथिःसर्वमतेपूर्वासितापरा व्रतमात्रेऽष्टमीकृष्णापूर्वाशुक्लाष्टमीपरेतिमाधवोक्तेःपरयुक्शुक्लाष्टमी पूर्वयुक्कृष्णेतिदीपिकोक्तेश्चशुक्लपक्षेऽष्टमीचैवशुक्लपक्षेचतुर्दशी।पूर्वविद्धानकर्त्तव्याकर्त्तव्यापरसंयुतेतिकृष्णपक्षेऽष्टमीचैवकृष्णपक्षेचतुर्दशी।पूर्वविद्धैवकर्त्तव्या।परविद्धानकुत्रचित् उपवासेषुराजेंद्र एषधर्मस्सनातनइतिनैगमाच्च हेमाद्रिमाधवनिर्णयसिंधुकालविवेचनप्रभृतिसर्वमतेकृष्णाष्टम्युपवासादिषु पूर्वविद्धैवेतिसिद्धांतःमदनरत्नेतूपवासेषुपक्षद्वयेऽप्यष्टमीपरयुतैव ग्राह्या उपवासेसप्तमीतुवेधाद्दत्युत्तरंदिनं पक्षयोरुभयोरेष उपवासाविधिःस्मृतइतिनारदीयवचनेनपक्षद्वयेऽपिसप्तमीविद्धायानिषेधात् एकादश्यष्टमीषष्ठीतिपूर्वोदाहृतभृगुवचनाच्चेतिनिगमवचनमुपवासग्रहणेरुद्रोपवासविषयं रुद्रव्रतेषुसर्वेषुकर्त्तव्यासंमुखीतिथिःअन्येषुव्रतकल्पेषुयथोद्दिष्टमुपावसेदितिस्मृत्यंतरवचनान्नतेनास्यविरोधःशक्तिपूजायांत्वष्टमीरात्रिव्यापिनीग्राह्या तदुक्तंदेवीपुराणे निशायां पूजितादेवीवैष्णवीपापनाशिनी तस्मात्सर्वप्रयत्नेनअष्टम्यांनिशिपूजयेदिति अतएवदुर्गाभक्तितरंगिण्यामपि रात्रिपूजायामष्टमीरात्रिव्यापिनीग्राह्येत्युक्तं कालव्यापिशास्त्रात् शुक्लपक्षेपूर्वविद्धादरेण कृष्णपक्षेविचाराभावाच्च दिनद्वयेरात्रिव्याप्तावधिकरात्रिव्यापिनीग्राह्या तुल्यव्याप्तावुत्तरैव प्रातरारभ्यकालपर्यंतंसद्भावात् शिवार्चनचंद्रिकायांकुलार्णवे नित्यार्चनंदिवाकुर्य्याद्रात्रौनैमित्तिकार्चनमित्यभिधानाच्चेति इत्यष्टमीसामान्यनिर्णयःअथाष्टमीकृत्यानि तत्रसर्वास्वष्टमीषुभैरवयात्रोक्ताकाशीखंडे अष्टम्यांचचतुर्दश्यांरविभूमिजवासरेयात्रांचभैरवींकृत्वानरःपापात्प्रमुच्यते इतितत्रैव अष्टम्यांचचतुर्दश्यांभौमवारेविशेषतःसंपूज्यसततंकाश्यांदुर्गामार्त्तिविनाशिनीमिति इत्यष्टमीमात्रसामान्यकृत्यम् अथसिद्धाविद्धादिकमुच्यते अष्टमीभौमेनसिद्धा भौमेषष्ठीतृतीयास्यादष्टमीचत्रयोदशीतिइयंगुरुवारेणविरुद्धा यथाजीवेऽष्टमीचतुर्थीचेति अत्रसंग्राममवलोपयोगीनिकार्य्याणिकुर्य्यात् यथा जयासुवीदधतिशुवल

कार्य्याणिनिर्वृतइति अत्रतैलस्नानंमांसभक्षणंनारिकेलभक्षणंचनिषिद्धं यथा नार्कारवारेनचसंक्रमेचनवैधृतौनव्यति
पातयोगे नपक्षमध्येपिनविष्टिषष्ठ्योरभ्यंगइष्टोनचपर्वसूक्तः पक्षमध्येऽष्टम्यांपलमष्टमीषुच अष्टम्यादिषुनाद्याद्दिष्टग
तीच्छुःकदाचिदपिविद्वान् शीर्षकपालांत्राणिनखचर्मतिलानिचक्रमशइति अयमर्थः अष्टम्यांशीर्षंनारिकेलंनाद्यात्
नवम्यांकपालंअलाबुफलं दशम्यांआंत्रंनालीशाकमितिनिर्णयामृते पटोलमितिहेमाद्रिः एकादश्यांनखान्शणपुष्पा
णीतिनिर्णयामृते निष्पावानितिहेमाद्रिः निष्पावशब्देनवल्लाःभाषायांवालाइतिप्रसिद्धाःशिंबीफलानिवा द्वादश्यांच
र्मबिल्वफलं पोतीत्यपिपत्रशाकविशेषसंज्ञा त्रयोदश्यांतिलंवृंताकमित्यर्थः एतेषांभक्षणंप्राण्यंगशीर्षादिभक्षणतुल्य
मितिभावः तथाष्टम्यांदिवानभोक्तव्यं तदुक्तं भूताष्टम्योर्दिवाभुक्त्वारात्रौभुक्त्वातुपर्वणि एकादश्यांदिवारात्रौभुक्त्वाचांद्रा
यणंचरेत् तत्रपर्वाणि चतुर्दश्यष्टमीचैवअमावास्याचपूर्णिमा पर्वाण्येतानिराजेंद्ररविसंक्रांतिरेवच अत्रअष्टमीद्वयम
ष्टमीत्वेनचतुर्दशीद्वयंचतुर्दशीत्वेनैकीकृत्य अमावास्यापूर्णिमासंक्रांतिश्चेति एवंपंचपर्वाणि अत्रसर्वेषांपर्वत्वेनोक्त्वा
भूताष्टम्योरपि पर्वत्वेतयोः पूर्ववाक्येपृथगुपादानं गोबलीवर्दन्यायेन यद्वा शुक्लाष्टमीकृष्णचतुर्दशीचदर्शोथराका
रविसंक्रमश्चेतिग्रंथांतरे शुक्लकृष्णचतुर्दश्योरेवपर्वत्वाभिधानात् कृष्णाष्टमीशुक्लचतुर्दश्योरपिदिवाभोजननिषेधप्रा
प्त्यर्थं पर्वणीत्युक्त्वाभूताष्टम्योःपुनर्वचनं अथपर्वसुनिषिद्धानि स्त्रीसंभोगतैलाभ्यंगमांसभक्षणक्षौरदंतकाष्ठवीरुत्तरु
च्छेदनकुशच्छेदनानिवर्ज्याणीतिहेमाद्रिः पक्षद्वयगतासुसर्वास्वष्टमीषुतिथिपत्वाच्छिवःपूज्यः अष्टम्यांचचतुर्दश्यामि
त्याद्युक्तमेव अष्टमीदशमीक्रूरग्रहेतुलास्थितेसतिशुभकार्येषुवर्ज्यामिथुनकन्यागतेरवावष्टमीदग्धाभवति अष्टम्यामै
शान्यांयात्राविशेषतोनकार्य्या इत्यष्टमीसामान्यनिर्णयः ॥ इतिश्रीरघुवंशतिलकश्रीमहाराजरणवीरसिंह
कारितेकृत्यरत्नाकरेअष्टमीसामान्यनिर्णयप्रकरणम् ॥ (*) (⊛) ॥

अथनवमीनिर्णयः तत्रादौशुक्लकृष्णानवमीध्यानम् नवमीसिंहगाशुभ्रापाशपात्रधराशुभा इति कृष्णा अक्षंखड्गं तथाखेटंपात्रंधत्तेचतुर्भुजा सर्पगानवमीनीलादंष्ट्रिणीपात्रतर्जनी इयंसर्वमतेउपवासादिष्वष्टमीयुतैवग्राह्या वसुरंध्रयोरितियुग्मवाक्यात् अष्टम्यानवमीविद्धाकर्त्तव्याफलकांक्षिभिः नकुर्य्यान्नवमींतातदशम्यांतुकदाचनेति ब्रह्मवैवर्त्तवचनाच्च नवम्येकादशीचैवदशविद्धायदाभवेत् तदावर्ज्याविशेषेणगंगांभः सुरयायथेतियमपुराणाच्च इतिनवमीसामान्यनिर्णयः ॥ अथात्रसिद्धविरुद्धादिकं नवमीशनिवारेणसोमवारेणचसिद्धा तदुक्तं शनौचतुर्दशीनवमीति सोमेतुनवमीपुष्यःश्रवणोरोहिणीमृगःएतानिसर्वदावत्ससिद्धिदानिस्वकर्मस्विति बुधवारेणचाविरुद्धा तृतीयानवमीत्याद्युक्तमेवनवम्यांशत्रुवधबंधनाद्युग्रकर्मकार्य्यं चतुर्थ्यांचचतुर्दश्यांनवम्यांचारिमर्दनमित्यादि अत्रामलकस्नानंनकार्य्यमित्याद्युक्तमेव सप्तम्यानिंदुनवमीषुचेत्यादि अत्रदंतकाष्ठमपिवर्ज्यमुक्तंव्यासेन प्रतिपत्पर्वषष्ठीषुनवम्यांहरिवासरे दंतानां काष्ठसंयोगोदहत्यासप्तमंकुलमिति अत्रयोगिनीनांसंमुख्यात्पूर्वदिशियात्रानकार्य्या वृश्चिकस्थेक्रूरग्रहेनवमीदशमीचाशुभाभवतिपराःपरेषामित्यादि नवम्यांतुश्रीफलमपिनभक्ष्यमिति इतिश्रीमन्महाराजरणवीरसिंहकारितेकृत्य

॥ रत्नाकरेनवमीसामान्यनिर्णयप्रकरणम् ॥

॥ अथदशमीनिर्णीयते ॥

तत्रक्रमेणशुक्लकृष्णदशमीध्यानं हेमाद्रौ वीरमित्रोदयेच सिंहासनस्थिताशुभ्रादशमीपीतकुंतला ज्ञानमुद्राभयाचेयंपीतवस्त्राब्जमालिनी ॥ १ ॥ कृष्णवर्णालुलायस्थादशमीदंडपात्रिणीतिसापूर्वविद्धैवग्राह्या ॥ तथाच स्कंदपुराणे ॥ दशमीचप्रकर्त्तव्यासदुर्गाद्विजसत्तमेति यदा दिनद्वये कर्मकालव्यापिनी तदा पूर्वा परावेति हेमाद्रिः संपूर्णादशमीकार्य्यापूर्वयापरयाथवा युक्तानदूषितायस्मादतः सासर्वतोमुखीत्यंगिरोवचनात्

कृष्णापूर्वोत्तराशुक्लादशम्येवंव्यवस्थितेतिमाधवः मदनरत्ननिर्णयामृतानिर्णयसिंधुषुतूपवासादिषुनवमीविद्धैवग्राह्या तदुक्तंपैठीनसिना पंचमीसप्तमीचैवदशमीचत्रयोदशी प्रतिपन्नवमीचैवकर्त्तव्यासंमुखीतिथिरिति आपस्तंबोपिदशमी तुप्रकर्तव्यासदुर्गाद्विजसत्तमेति यत्तुसंपूर्णादशमीकार्य्येत्यंगिरोवचनं ततूनवमीयुक्तायाअलाभे उदयकालव्यापिनी ग्राह्येत्येवपरं अथवा एकादशीव्रतांगत्वेनक्रियमाणंदशम्यामेकभक्तादिपरं यत्तुनंदाविद्धेतिकूर्मपुराणवचनमुत्तरविद्धानिषेधकं तत्कृष्णपक्षविषयमितिकालतत्त्वविवेचने अत्रकेचित् यत्तुहेमाद्रिः दिनद्वयंकर्मकालव्यापित्वाभावेऐच्छिकोविकल्पइत्याह तत्राशास्त्रतोव्यवस्थासंभवे ऐच्छिकस्यायोगादित्यूचु तन्मृग्यं दिनद्वयेहेमाद्रिणाकर्मकालव्याप्त्यभावे ऐच्छिकविकल्पाभिधानेनानुक्तोपलंभप्रसंगात् इतिदशमीसामान्यनिर्णयः ॥ अथदशमीकृत्यानि तानिचैत्रशुक्लादितोवक्ष्यंते अथात्रसिद्धविरुद्धादिकंलिख्यते दशमीगुरुवारेणसिद्धा यथा गुरौदशमीपंचम्याविति दशम्यां भौमवारेणक्रकचयोगः दशम्यांपंचम्यांयन्मंगल्यंविवाहयात्रादिकार्य्यमेव वृश्चिकस्थेसूर्येदशमीदग्धाभवति दशम्यांक्षत्रियादित्रयोवर्णा अभ्यंगस्नानं न कुर्युः उक्तंच त्रयोदश्यांद्वितीयायांदशम्यामित्यादिप्रागुक्तं अत्रनालीशाकं नाद्यात् उक्तंच शीर्षकपालांत्राणि इति दशम्यामुत्तरदिशिगमनं योगिनीसांमुख्यान्नकुर्यादितिदशमीसामान्यनिर्णयः इतिश्रीमहाराजरणवीरसिंहकारितकृत्यरत्नाकरेदशमीसामान्यनिर्णयः ॥

अथैकादशीनिर्णीयते ॥

तत्रशुक्लकृष्णैकादशीध्यानं एकादशीवृषस्थातुनीलशुभ्रात्रिशूलिनी ताम्रवर्णावृषारूढापत्रखेटासिपंकजा १ एकादशीमहांगस्था तुलाकर्तरिकायुता सिंहाननारुणगलातुंदिनीलासिनीपरेति अथैकादशीमहिमाहेमाद्रौ तत्त्वसागरे मातेवसर्वबालानामौषधंरोगिणामिव रक्षार्थंसर्वलोकानांनिर्मितैकादशीतिथिः तथा एकादश्युपवासीयःसधन्यःसच

बुद्धिमान् तथा एकादशींपरित्यज्ययोन्यद्व्रतमुपासते सकरस्थंमहारत्नंत्यक्त्वालोष्टंहियाचते तथा॰ एकामेकादशीं चापिसमुपोष्यजनार्दनं कामेनापिसमभ्यर्च्यसंसारान्मोक्षमाप्नुयात् तोयेनापिसमभ्यर्च्येतिवापाठः प्रसंगादथवादंभाच्छोभाद्वात्रिदशाधिपं एकादश्यांनमस्कृत्वासंसाराद्विप्रमुच्यते संसाराख्यान्महाव्याधेर्दुःखिनांसर्वदेहिनां एकादश्युपवासोयंनिर्मितःपरमौषधं संसारोरगदष्टानांनराणांपापकर्मणां एकादश्युपवासेनसद्यएवसुखंभवेत् नारदीयपुराणेवसिष्ठः एकादश्याःसमुत्थेनवह्निनापातकेंधनं भस्मतांयातिराजेंद्रअपिजन्मशतोद्भवं तावत्पापानिदेहेस्मिंस्तिष्ठंतिमनुजाधिप यावन्नोपवसेज्जंतुःपद्मनाभदिनंशुभं अश्वमेधसहस्राणिवाजपेयशतानिच एकादश्युपवासस्य कलांनार्हंतिषोडशीं एकादशेंद्रियैःपापंकृतंयद्भवताप्रभो एकादश्युपवासेनतत्सर्वंविलयंव्रजेदित्यादि हेमाद्रौद्रष्टव्यं ब्रह्मवैवर्त्ते सर्वप्रायश्चित्तमिदंसंसारोत्तारकारकं एकादशीव्रतंविप्रकुर्वन्मुक्तिमवाप्नुयात् नरोदिनैर्यद्दशभिश्चतुर्भिश्चकरोत्यघं उपोष्यपंचदशमंदिनंविष्णोर्हिमुच्यते कलावस्मिन्निमग्नानामहिंसापावितात्मनां एकादशींविनाविप्रनसंसाराद्विमोक्षणं पद्मपुराणे एकतःपृथिवीदानमेकतोहरिवासरः नसमःकविभिःप्रोक्तोवासरोह्यधिकोमतः भविष्यत्पुराणे एकाविष्णुमयीशक्तिरनंताह्यक्षयास्थिता सत्येनान्याप्रद्रष्टव्यामुख्याचैकादशीसतीतिसनत्कुमारप्रोक्तम् कृत्वापापसहस्राणिब्रह्महत्याशतानिवै एकादशींनरोभक्त्यासमुपोष्यशुचिर्भवेत् देवीरहस्यस्कंदपुराणयोः पापंच त्रिविधंप्रोक्तंपातकंचोपपातकं लघुपातकसंज्ञंचमहापातकमेवच प्रकीर्णकंचतत्सर्वमेकादश्यामुपोषणात्विलयंयाति तोयस्थंयथामृण्मयभाजनं सौरधर्मेषु एकतश्चाग्निहोत्रादिद्वादशीमेकतःप्रभुः तुलयातोलयत्तत्रद्वादशीचाविशिष्यते देवीरहस्ये गायत्रीहयथासर्वपापपंजरभेदिनी एकादशीतथासर्वपापपंजरभेदिनी स्कंदपुराणेपि अभोज्यभोजनाज्ञातमगम्यागमनाच्चयत् अयाज्ययाजनाद्यच्चअभक्ष्याणांचभक्षणात् अस्पृश्यस्पर्शनाद्यच्चपरवित्तापहारतःज्ञाता

ज्ञातकृतंयच्चपातकंचोपपातकं तत्सर्वंविलयंयातिएकादश्यामुपोषणात् वैष्णवतंत्रे एकादशीमहापुण्याविष्णोरीशस्य वल्लभा तस्यामुपोषितोयस्तुद्वादश्यांपूजयेद्धरिं तस्यपापानिनश्यंतीत्यादि स्कंदभविष्यत्पुराणयोः येद्वादशीमुपवसंत्यनिलांबुभक्ष्यायेवाङ्मयैस्सुकुसुमैर्हरिमर्चयंति तेधौतपांडुरपयोनिधिराजहंसाःसंसारसागरजलस्यतरंतिपारं रुद्रपुराणे यःकरोतिनरोभक्त्याएकादश्यामुपोषणं सयातिविष्णुसालोक्यंयातिविष्णोःसरूपतां विष्णुपुराण ओंकारःसर्वं देवानांयथैवाद्यःप्रपूजितः तथासर्वव्रतानांतुद्वादशीव्रतमुत्तमम् इत्येकादशीमहिमा तत्रैकादश्युपवासोद्वेधा निषेधपरिपालनात्मकोव्रतरूपश्च तत्राद्यः नशंखेनापिबेत्तोयंनखादेत्कूर्मसूकरौ एकादश्यांनभुंजीतपक्षयोरुभयोरपीति क्रमो देवलाद्युक्तः अग्निपुराणेऽपि गृहस्थोब्रह्मचारीचह्याहिताग्निस्तथैवच एकादश्यांनभुंजीतपक्षयोरुभयोरपीत्यादि व्रतरूपस्तुब्रह्मवैवर्त्ते प्राप्तेहरिदिनेसम्यग्विधायनियमंनिशि दशम्यामुपवासश्चप्रकुर्य्याद्वैष्णवंव्रतमिति शिवधर्मेपि वैष्णवोवाथशैवोवाकुर्यादेकादशीव्रतं इदंशिवभक्तादिभिरपिकार्य्यमित्युक्तं सौरपुराणेऽपि वैष्णवोवाथशैवोवासौरोप्येतत्समाचरेदिति सोपिद्वेधा नित्यःकाम्यश्च उपोष्यैकादशींनित्यंपक्षयोरुभयोरपीति पक्षेपक्षेप्रकर्त्तव्यमेकादश्यामुपोषणमिति नारदोक्तेश्चनित्यता यदीच्छेद्विष्णुसायुज्यंस्थिरांसंततिमात्मनः एकादश्यांनभुंजीतपक्षयोरुभयोरपीतिकौर्मादिषुफलश्रुतेश्चकाम्यता उपोष्यमेकादशीव्रतंच गृहस्थातिरिक्तानामेवनित्यं गृहस्थस्यतुशुक्लायामेवव्रतंनित्यं नकृष्णायां एकादश्यांनभोक्तव्यंपक्षयोरुभयोरपि वनस्थयतिधर्मोयंशुक्लामेवसदागृहीति देवलोक्तेः नचानेननिषेधकलनमेव वनस्थयतिविषयेउपसंह्रियते नतुव्रतमितिवाच्यं अस्यपर्य्युदासितविधिपरत्वात् अन्यथा पूर्वोक्तपुराणवचनेनिषेधपालने गृहस्थाधिकारोक्तिविरोधःस्यात् निषेधेनिवृत्तमात्रफलकत्वेननाविशेषानपेक्षणात् उपसंहारायोगात् अभावस्यधर्मत्वाभावाच्च तस्मादनेनसर्वेषामेवैकादशीव्रतविधायिनांसामान्यवाक्यानांवनस्थ

यतिविषये उपसंहारान्न गृहस्थस्य कृष्णायांनित्यव्रतसमाप्तिः कथंतर्हिसंक्रांत्यामुपवासंचकृष्णैकादशवासरे चंद्रसूर्यग्रहेचैवनकुर्यात्पुत्रवान्गृहीतिनारदादिवचनेषुकृष्णानिषेधः प्राप्तभावादितिचेच्छ्रूयतां शयनीबोधिनीमध्येया कृष्णैकादशीभवेत् सैवोपोष्यागृहस्थेननान्याकृष्णाकदाचनेति पाद्मे गृहस्थस्यत्वाषाढीकार्त्तिकीमध्यस्थायाकृष्णाविहितापुत्रवतोनानिषिध्यते अन्यकृष्णायांतुनविधिःसर्वविधीनांवनस्थयतिषूपसंहारात् शयन्यादिवाक्यंतुपुत्रिगृहस्थगोचरमित्यनंतभट्टहेमाद्र्यादिग्रंथाःदीपिकायामपि असितात्वंशयनीबोधांतरस्थाप्यर्थोनस्यात्तन्मार्जिनोतीतिमदनरत्ने भविष्येऽपि यथाशुक्लातथाकृष्णाद्वादशीमेसदाप्रियाशुक्लागृहस्थैःकर्त्तव्याभोगसंतानवर्द्धिनीमुमुक्षुभिस्तथाकृष्णासाकाम्यागृहिणांभवेत् पुत्रवांश्चसभार्य्यश्चबंधुयुक्तस्तथैवच उभयोःपक्षयोःकाम्यंव्रतंकुर्य्यात्तुवैष्णवमितिनारदोक्तेः एतत्सर्वैकालादर्शे उक्तं विधवायावनस्थस्ययतेश्चैकादशीद्वये उपवासोगृहस्थस्यशुक्लायामेवपुत्रिणः भुजेर्निषेधःकृष्णायांसिद्धस्तस्यततोव्रतइति प्राच्यास्तुवैष्णवगृहस्थानांकृष्णापिनित्या नित्यंभक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः पक्षेपक्षेचकर्त्तव्यमेकादश्यामुपोषणं सपुत्रश्चसभार्यश्चसजनोभक्तिसंयुतः एकादश्यामुपवसेत्पक्षयोरुभयोरपीतिनारदोक्तेरित्याहुः अत्रपुत्रशब्दश्चापत्यमात्रवचनः नारायणवृत्तौ पुमांसएवमेपुत्राजायेरन्नित्यत्रापत्यमात्रत्ववाचित्वोक्तेः जनयेद्बहुपुत्रानितिलिंगात् पौत्रीमातामहस्तेनेतिमनूक्तेःपुत्र्याअपत्यमित्यर्थेतुस्त्रीभ्योढकिपौत्रेयइत्यापत्तेःपुमान्पुत्रोजायतइतिचउपवासनिषेधविशेषोवायवीयेउक्तः उपवासनिषेधेतुभक्ष्यंकिंचित्प्रकल्पयेत् नदुष्यत्युपवासश्चउपवासफलंभवेत् भक्ष्यंचतत्रैवोक्तं नक्तंहविष्यान्नमनोदनंवाफलंतिलाक्षीरमथांबुचाज्यं यत्पंचगव्यंयादिवापिवेयुः प्रशस्तमत्रोत्तरमुत्तरंचेत्युक्तं अत्रोपवासेनिषेधव्यवस्थांपुनराहमत्स्यपुराणे एकादश्यांतुकृष्णायामुपोष्यविधिवन्नरः पुत्रानायुःसमृद्धिंचसायुज्यंचैवगच्छतिदिनद्वयेपिपुत्रवतोगृहस्थस्योपवासोनिषिद्धः मदनरत्नेव्यासः एकादशीषुनष्टासुरवौसंक्रमणेतथा पारणंचो

पवासंचनकुर्य्यात्पुत्रवान्गृहीदिनक्षयेतुसंप्राप्तेनोपोष्यादशमीयुता यदीच्छेत्पुत्रपौत्राणामृद्धिंसंपदमात्मनः मत्स्यपुराणेपि दिनद्वयेर्कसंक्रांतौग्रहणेचंद्रसूर्ययोःउपवासंनकुर्वीतपुत्रपौत्रसमान्वित इति दिनक्षयलक्षण पद्मपुराणे द्वौ।तिथ्यंतावेकवारेयस्मिन्स्यात्तद्दिनक्षयइति वसिष्ठोपि एकस्मिन्सावनेत्वह्नितिथीनां।त्रितयंभवेत् तदादिनक्षयःप्रोक्तस्तत्रसाहस्त्रिकंफलमिति फलमत्रपुत्रवतउपवासव्यतिरिक्तविषयमितिद्रष्टव्यं अत्रत्रिस्पृग्वर्णनंविष्णुधर्मोत्तरे प्रथमकांडेशंकरगीतासुशंकरवाक्यम् दिवागतातुदशमीव्यतीतास्यात्तिथिर्द्विज रात्रिशेषेतथान्याचभविष्यांस्पृशतेतिथिं तिथित्रतयसंस्पर्शादहोरात्रेभृगूत्तम त्र्यहस्पृक्साविनिर्दिष्टापुण्यास्तास्तितयःस्मृताः तत्रोपोष्यशिरःस्नातैःकर्त्तव्यंदेवतार्चनं जपंहोमंतथादानंकामयद्भिर्महत्फलं कर्मणांपरिशेषाणामकर्मण्यंचतद्दिनं श्रीविष्णुप्रीतयेरामब्राह्मणांस्तत्रभोजयेदितिवाक्यात्तुवैष्णवैर्गृहस्थैर्विष्णुप्रीतयेपूर्वैवकार्येति तस्योपवासनिषेधःउपवासनिषेधेपिभक्ष्यंकिंचित्प्रागुक्तमेव भक्ष्यंचविद्धाविषयेवश्यमुक्तं अविद्धानामलाभेतुपयोदधिघृतानिच सकृदेवाल्पमश्नीयादुपवासफलंभवेत् भक्ष्यंच नक्तंहविष्यान्नमित्यादि अथैकादशीनिर्णीयतेसाचद्विविधाशुद्धाविद्धाचयासंपूर्णासाशुद्धा अथोपवासानुष्ठानासिद्ध्यर्थंशुद्धविद्धादिभेदेनैकादश्याअष्टादशभेदाउच्यंते षष्टिघटयः ६०॥ समता ॥१॥ षष्टितोन्यूनाश्चेद्घटयस्तदान्यूनता॥२॥ षष्टितोऽधिकाश्चेत्तदाऽधिकताज्ञेया ॥ ३ ॥ अत्रशुद्धैकादशी समन्यूनताऽधिक्ययोगात्त्रिविधाभवति सात्रिधापि द्वादशीसाम्यन्यूनताधिक्ययोगात्प्रत्येकंत्रिधाभवति एवंनवभेदाभवंति तेयथा शुद्धसमैकादशी ॥ ६० ॥ द्वादशी ॥ ६० ॥ समा १ ॥ शुद्धसमैकादशी ६०द्वादशी ५९ । ५८ ।५७ न्यूना २ शुद्धसमैकादशी ६० द्वादश्य ६१ । ६२ । ६३ धिका ३ ॥ शुद्धन्यूनैकादशी ५९। ५८। ५७ द्वादशी ६० समा ४ ॥ शुद्धन्यूनैकादशी ५९ । ५८। ५७ द्वादशी ५९। ५८ । ५७। न्यूना५ ॥ शुद्धन्यूनैकादशी ५९ ५८ । ५७ द्वादश्य ६१ । ६२ । ६३ धिका ६ ॥शुद्धाधिकैकादशी

६१ । ६२। ६३ द्वादशी ६० समा ७ ॥ शुद्धाधिकैकादशी ६१ । ६२ । ६३ द्वादशी ५९ । ५८। ५७ न्यूना ८ ॥ शुद्धाधिकैकादशी । ६१ । ६२ । ६३ द्वादश्य । ६१ । ६२ । ६३ धिका ९ ॥ एवंदशम्याविद्धापिसाम्यन्यूनताधिक्ययोगात्त्रिधाभवति साविद्धापिद्वादश्याःसमन्यूनाधिक्ययोगात्प्रत्येकंत्रिधा भवति एवंनवभेदाः तेपियथा दशम्याविद्धैकादशीसमा ६०द्वादशी ६० समा १ दशम्याविद्धैकादशीसमा ६० द्वादशी ५९ । ५८ । ५७ न्यूना २ ॥ दशम्याविद्धैकादशीसमा ६० द्वादश्य ६१ । ६२ । ६३ धिका ३ ॥ दशम्याविद्धैकादशीन्यूना ५९ । ५८ । ५७ द्वादशी ६० समा ४ ॥ दशम्याविद्धैकादशीन्यूना ५९ । ५८ । ५७ द्वादशी ५९ । ५८ । ५७ न्यूना ५ ॥ दशम्याविद्धैकादशीन्यूना ५९ । ५८ । ५७ द्वादश्य ६१ । ६२ । ६३ धिका ६ ॥ दशम्याविद्धैकादश्यधिका ६१ । ६२ । ६३ द्वादशी ६० समा ७ ॥ दशम्याविद्धैकादश्यधिका ६१ ६२ । ६३ द्वादशी ५९ । ५८ । ५७ न्यूना ८ ॥ दशम्याविद्धैकादश्यधिका ६१ । ६२ । ६३ द्वादश्य ६१ । ६२ । ६३ धिकाचेति ९ ॥ एवंमिलित्वाऽष्टादशभेदाभवंति तत्रतावद्दशमीविद्धायावैष्णवैस्त्याज्या सदशमीवेधः प्रपंच्यते दशमीवेधस्त्रिविधः ॥ अरुणोदयवेधः सूर्योदयवेधः पंचदशनाडीवेधश्चेति तत्रारुणोदयवेधोभविष्यपुराणे ॥ अरुणोदयवेलायांदिशागंधोभवेद्यदि दुष्टंतत्तुप्रयत्नेनवर्जनीयंनराधिपेति दिशागंधःदशमीसंवंधः गारुडेऽपि दशमीशेषसंयुक्तोयदिस्यादरुणोदयः नैवोपोष्यंवैष्णवेनतद्दिनैकादशीव्रतमिति वैष्णवलक्षणंच स्कांदे परमापदमापन्नोहर्षेवासमुपस्थिते नैकादशींत्यजेद्यस्तुयस्यदीक्षास्तिवैष्णवी समात्मासर्वभूतेषुनिजाचारादविप्लुतः विष्णवार्पिताखिलाचारःसहिवैष्णवउच्यतइतिवचनोक्तएववैष्णवइतिसिद्धंस्मृत्यंतरेपि वैखानसाद्यागमोक्तदीक्षायुक्तोपि वैष्णवइतितन्न यद्यपिपित्रादेरागमदीक्षायांतन्मात्रस्यैव वैष्णवत्वं नतत्पुत्रादेस्तथाऽपि पारंपर्य्यप्रसिद्धमेववैष्णवत्वं

स्मार्त्तत्वंचमन्यंतेबुधाःतत्त्वसागरेभविष्ये यथाशुक्लातथाकृष्णायथाकृष्णातथेतरा तुल्येतेमन्यतेयस्तुसवैवैष्णवउच्यत
इति अरुणोदयप्रमाणंतुस्कंदनारदाभ्यामुक्तं उदयात्प्राक्चतस्रस्तुघटिकाअरुणोदयइति हेमाद्रौ चतस्रोघटिकाः
प्रातररुणोदयउच्यते यतीनांस्नानकालस्तुगंगांभःसदृशःस्मृतइति तथा निशिप्रांतेतुयामार्द्धेदेववादित्रवादने सार
स्वतानध्ययनेचारुणोदयउच्यते तथा अरुणोदयवेधस्तुसार्धंतुघटिकात्रयमिति एतेषांसर्वेषांवचनानांरात्रिमानह्रा
सवृद्धिभ्यां मुहूर्तद्वयपरतैव उदयात्प्राक्यदाविप्रमुहूर्त्तद्वयसंयुतेति आदित्योदयवेलायाःप्राक्मुहूर्तद्वयान्विता संपूर्णै
कादशीनाम तत्रैवोपवसेद्व्रतीति गारुडे सौरधर्मादिवचनम् यच्चभविष्ये आदित्योदयवेलायाःप्राङ्मुहूर्त्तद्वयान्विता
एकादशीतुसंपूर्णाविद्धान्यापरिकीर्त्तितेति तदप्युपसंहारन्यायेन दंडचतुष्टयपरमेव हेमाद्रावप्येवं यत्तुब्रह्मवैवर्त्ते च
तस्रोघटिकाप्रातररुणोदयनिश्चयः चतुष्टयविभागोत्रवेधादीनांकिलोदितः अरुणोदयवेधःस्यात्सार्द्धंतुघटिकात्रयं अ
तिवेधोद्विघटिकःप्रभातंदर्शनाद्रवेः महावेधोपितत्रैवदृश्यतेर्कोनदृश्यते तुरीयस्तत्रविहितोयोगःसूर्योदयेबुधैरिति
तदप्यवयवद्वारारुणोदयवेधविशेषपरमेवेतिमाधवीये मदनरत्नेच अन्यस्तूदयवेधः तथान्येपिवेधाःहेमाद्रौ माधवी
येगारुडेच उदयात्प्राक्त्रिघटिकाव्यापिन्येकादशीयदा संदिग्धे कादशीनामवर्ज्यैयंधर्मकांक्षिभिः उदयात्प्राङ्मुहूर्त्ते
नव्यापिन्येकादशीतुया संयुक्तैकादशीनामवर्ज्यैयंधर्मकांक्षिभिः हेमाद्रौ रात्रेरंत्याष्टमभागेप्यरुणोदयउक्तः निशा
प्रांतेतुयामार्द्धइत्यादि अत्रैके एतेषांसर्वपक्षाणां मुहूर्तद्वयेनक्रोडीकारान्निशःप्रांतइतिवचनाच्च रात्रिमानवशात्सार्द्ध
त्रिदंडादयोऽनेकेऽरुणोदयाः हेमाद्रिःसार्द्धत्रिघटिकारूपोक्तिरष्टाविंशतिघटीमानरात्रिविषया महत्तरायास्तुरात्रेरं
तेचतस्रोघटिकाइत्युक्तमाहुः अतोऽरुणोदयशब्दस्यानेकार्थत्वापत्तेः नचमुहूर्त्तद्वयमर्थः दंडद्वयैकमुहूर्तादिवेधानांतथा
प्यनुपपत्तेः नहितेषांयामार्द्धत्वमरुणोदयतैवास्ति मुहूर्त्तद्वयस्ययामार्द्धस्यचचतस्रोघटिका इत्यनेनैवोपसंहाराच्च न

अ०र० ॥४९॥

ादर्थः नचसार्द्धचघटिकात्रयमित्यनेनापितदापत्तिः शक्या तेनचतुर्दंडवेधस्यैवचतुर्थदंडेघटिकादशमीसत्त्वेहिवेधस्तदर्थः द्विघटिकादौतदयोगाच्च यच्चमतं कियताऽरुणोदयइत्यपेक्षायांसार्द्धघटिकातोन्यूनदशमीसत्त्वेनदोषइतियत्ततुच्छं द्विदंडादावपितदापत्तेः दशमीशेषसंयुक्तोयदिस्यादरुणोदयः नैवोपोष्यंवैष्णवेनतद्दिनैकादशीव्रतमिति गारुडभविष्येचयोगमात्रनिषेधात् नारदीयेपि लववेधेपिराजेंद्रदशम्येकादशींत्यजेत् सुरायाविंदुनास्पृष्टंगंगांभइवनिर्मलं स्कांदेपि कलाकाष्ठादिगत्यैवदृश्यतेदशमीविभो एकादश्यांनकर्त्तव्यंव्रतंराजन्कथंचनेति माधवोप्याहसोयंकलादिवेधोऽरुणोदयवेधेसूर्योदयवेधेचसमानइतिनिगमेपि सर्वप्रकारवेधोयमुपवासस्यदूषकइति अतएवमाधवेनारुणोदयार्द्धदंडेऽल्पदशमीस्पर्शेसंपृक्ता कृत्स्नघटिकायोगेसंदिग्धामुहूर्त्तव्याप्तौसंयुक्ता उदयेसंकीर्णाप्युक्ता अरुणोदयवेलायांदशमीयदिसंयुता संपृक्तैकादशींतांतुमोहिन्यैदत्तवान्प्रभुरितिगोभिलाद्युक्तेः पूर्वोक्तगारुडादेश्चसामान्यतोविशेषतश्चारुणोदयवेधोनिषिद्धः यत्त्वष्टमभागोरुणोदयइति हेमाद्रिणोक्तं यच्चमहत्तरारात्रिरितितत्परंस्वयमेवदूषितं अंतेप्युक्तंवेधतारतम्यंचदेशतारतम्यादुपपद्यतइति दोषतारतम्यंचप्रायश्चित्ततारतम्यादवगम्यतेतच्चोक्तंहेमाद्रौस्मृत्यंतरेअज्ञानाद्यदिवामोहात्कुर्वन्नेकादशींनरः दशमीशेषसंयुक्तांप्रायश्चित्तमिदंचरेत् कृच्छ्रपादंनरश्चीर्त्वागांचदद्यात्सवत्सकांसुवर्णस्याढकंदेयंतिलद्रोणसमन्वितं विधानांतरं तत्रैव ब्राह्मणान्भोज्यत्रिंशच्चगांचदद्यात्सवत्सकां धरणस्यार्द्धकंदेयंतिलहोममथापिवेति अत्रवेधतारतम्याद्व्यवस्थेतिहेमाद्रिः वैष्णवैःशंकरस्वामिनाजितैस्तज्जितैस्तत्कालेपुराणवाक्यालाभादेवभ्रष्टमतप्रवृत्तैरंकितैः पश्चात्पुराणेषुतत्तत्स्थलेषुस्वस्वोपयोगीनिवाक्यानिप्रकल्प्यस्वेच्छाचारीयंमतंक्षिप्तं तत्रत्यान्येववाक्यानीतिज्ञायंते सुवर्णाढकदानस्यैकादश्यर्थंराज्ञोप्यसमर्थत्वात् एतत्करणेभीत्युत्पादकत्वाच्चाऽसत्निशाप्रांतेसत्यपिदोषाधिक्यार्थमेव तस्माच्चचतुर्घटिकात्मकएवारुणोदयइतिसिद्धंतेनषट्पंचाशद्दंडानंतरंदशमीप्रवेशेअरुणोदयवेधउक्तोभवति

अंत्योपितत्रैवकएवेनोक्तः उदये।परिविद्धातुदशम्येकादशी।यदि दानवेभ्यःप्रीणनार्थंदत्तवान्पाकशासनइति स्मृत्यंतरेपि दशम्याःप्रांतमादाययदोदेतिदिवाकरः तेनस्पृष्टंहरिदिनंदत्तंजंभासुरायत्विति तत्रारुणोदयवेधोवैष्णवविषयः तद्वाक्येषुवैष्णवग्रहणात् तत्स्वरूपंतुमाधवीयेस्कांदे वैष्णवलक्षणमुक्तंप्राक् केचित्तुदशम्यांनवमीवेधमपित्यजंतितत्र मूलंमृग्यं उदयवेधस्तुपरिशेषाद्वैष्णवगोचरः अरुणोदयवेधस्तुवेधः सूर्योदयेतथा उक्तौद्वौदशमीवेधौवैष्णवस्मार्त्तयोःक्रमात्इत्यादिवाक्यैः स्मार्त्तस्यविधेरेवस्मृत्यंतरवाक्यानांपूर्वोक्तानांपूर्वानुमितिसिद्धिरिति हेमाद्रिस्तु केषांचिदर्धरात्रेपिदशमीवेधमाह अर्धरात्रेतुकेषांचिद्दशम्यावेधइष्यते कपालवेधइत्याहुराचार्य्यायेहरिप्रियाः नतन्मममते यस्मात्त्रियामारात्रिरिष्यते इतिब्रह्मवैवर्त्तात् अस्यार्थः अनद्यतनेऽतीतेलङित्यत्रातीतायारात्रेःपश्चिमयामद्वयमागामिन्याःरात्रेः पूर्वयामद्वयंदिवसश्चसकलः एषोऽद्यतनः इत्युक्तंमहाभाष्ये वर्तमानःकालः एकादश्यहोरात्रेउपोष्यः तन्मध्येदशमीप्रवेशविद्धासात्याज्या अतएवहेमाद्रौ दशम्याःसंगदोषेणअर्धरात्रात्परेणतु वर्ज्जयेच्चतुरोयामान्दिवसस्यउपोषणइति स्वमतेतुरात्रेस्त्रियामत्वात् प्रहरत्रयपूर्वशेषः तेनचतुर्थप्रहरएववेधोयुक्तः सोप्यरुणोदयएव सूर्योदयंविनानैवस्नानदानादिकक्रमइति मार्कंडेयपुराणवचनात् प्रत्यूषोहर्मुखंकल्य इतिकोशादरुणोदयमारभ्य सूर्यांशुप्रवृत्तेस्तत्रैवनिषेधः तेनमतभेदाद्व्यवस्थेतिकेचित् कैमुत्तन्यायेनारुणोदयवेधस्यैवस्तुतिरितितुमाधवःयत्तुदिकूपंचदशभिस्तथेतिवेधः सउपवासातिरिक्तविषयइतिमाधवः सर्वप्रकारवेधोयमुपवासस्यदूषकः सार्द्धसप्तमुहूर्त्तस्तुयोगोयंवाधतेव्रतमितिनिगमादित्यलं माधवमतेवैष्णवैररुणोदयविद्धात्याज्यायदात्वेकादश्येवशुद्धाद्वादशीवोभयंवातदापरोपोष्या एकादशीद्वादशीवाधिकाचेत्यज्यतद्दिनं पूर्वंग्राह्यंतूत्तरंस्यादितिवैष्णवनिर्णयइतिमाधवोक्तेः स्मार्त्तैस्तुसूर्य्योदयविद्धात्याज्या यदात्वेकादशीशुद्धासतीवर्धतेद्वादशीचसमान्यूनावातदागृहस्थैः पूर्वायतिभि

रुत्तराकार्य्या प्रथमेहनिसंपूर्णाऽव्याप्याहोरात्रसंयुता द्वादश्यांचतथातातदृश्यतेपुनरेवच पूर्वाकार्य्यागृहस्थैश्चयतिभिश्चोत्तराविभो इतिस्कांदोक्तेः वर्द्धमानोप्याह उभयवृद्धौतुशुद्धायांवासर्वेषांपरैव संपूर्णैकादशीयत्रप्रभातेपुनरेवसा सर्वैरेवोत्तराकार्य्यापरतोद्वादशीयदीति नारदोक्तेः द्वादशीमात्रवृद्धौशुद्धायांपरैव नचेदेकादशीविष्णौद्वादशीपरतःस्थिता उपोष्यैकादशीतत्रयदीच्छेत्परमंपदमिति नारदोक्तेः द्वादशीमात्रवृद्धौतुशुद्धाविद्धेऽव्यवस्थिते शुद्धापूर्वोत्तराविद्धास्मार्त्तनिर्णयईदृशइति माधवोक्तेः मदनरत्नेप्येवं यत्तु विद्धाप्यविद्धाविज्ञेयापरतोद्वादशीनचेत् अविद्धापिचविद्धास्यात्परतोद्वादशीयदीति हेमाद्रौपाद्मवचनं तदेकादश्यावृद्धौज्ञेयं तदुक्तंमाधवेन एकादशीद्वादशीचेत्युभये वर्द्धतेयदा तदापूर्वदिनंत्याज्यंस्मार्त्तैर्ग्राह्यंपरंदिनमिति विद्धैकादश्यांद्वादशीमात्रवृद्धौच सर्वेषांपरैव तत्रचैकादशीमात्रवृद्धौगृहिणः पूर्वायतेरुत्तरेतिपूर्वोक्तपाद्मोक्तेः एकादशीविवृद्धाचेच्छुक्लेकृष्णेविशेषतः उत्तरांतुयतिःकुर्य्यात्पूर्वामुपावसेद्गृहीति प्रचेतसोक्तेः एतच्छुद्धाविशुद्धातुल्यमितिमाधवः त्रयोदश्यांनोपलभ्येद्द्वादशीयादिकिंचन उपोष्यैकादशीतत्रदशमीमिश्रितापिचेतिस्कांदात् अविद्धानिनिषिद्धैश्चेन्नलभंतेदिनानितु मुहूर्त्तैःपंचभिर्विद्धाग्राह्याचैकादशीतिथिरिति ऋष्यशृंगोक्तेः मुहूर्त्तपंचकमरुणोदयमारभ्यज्ञेयं अन्यथोत्तरेह्निएकादश्यभावासंभवात् तथाचस एव सर्वत्रैकादशीकार्य्याद्वादशीमिश्रितानरैः प्रातर्भवतुवामाभूद्यस्मान्नित्यमुपोषणमिति यद्यपिहेमाद्रिणाशुद्धसमाशुद्धन्यूनाधिकद्वादशिकाचेत् सर्वेषांपरैवेत्युक्तं तदपिवैष्णवविषयं स्मार्त्तानांपूर्वैवेत्यविरोधः हेमाद्रिमतेत्युच्यते तत्र शुद्धाविद्धाद्वयानंदात्रेधान्यूनसमाधिकैः षट्प्रकारापुनस्त्रेधाद्वादश्यूनसमाधिकैरित्यष्टादशैकादशीभेदाः तत्रशुद्धाधिकान्यूनद्वादशिकाशुद्धाधिकासमद्वादशिकाचसकामैः पूर्वानिष्कामैरुत्तराकार्य्या प्रथमेहनिसंपूर्णेतिपूर्वोक्तस्कांदात् ऊनद्वादशिकायांतु विष्णुप्रीतिकामैरुपवासद्वयंकार्य्यं संपूर्णैकादशीयत्रप्रभातेपुनरेवसा लुप्यतेद्वादशीयस्मिन्नुपवासः

अत्यये प्राणात्ययकष्टे वर्ज्याण्याहविष्णुः गात्राभ्यंगंशिरोभ्यंगंतांबूलंचानुलेपनं व्रतस्थोवर्जयेत्सर्वंयच्चान्यत्र
निराकृतं प्रायश्चित्तमुक्तंनिर्णयामृतसंग्रहे स्तेनहिंसकयोःसख्यंकृत्वास्तैन्यंचहिंसनं प्रायश्चित्तंव्रतेकुर्य्याज्जपेन्नाम
शतत्रयं मिथ्यावादेदिवास्वापेवहुशोंबुनिषेवणे अष्टाक्षरंव्रतीजप्त्वाशतमष्टोत्तरंशुचिः ओंनमोनारायणायेतिमंत्रोष्टाक्ष
रईरितः तत्रैवपैठीनासिः तांबूलचर्वणेस्त्रीसंभोगेमांसानिषेवणे व्रतभंगोनचेत्कुर्यात्कृष्णावद्व्रतवर्जनमिति संभोगेऋतु
कालादन्यत्र रेतःसेकात्मसंभोगमतेनात्रक्षयःस्मृतइति दंतकाष्ठवर्जनंहेमाद्रौवासिष्ठः उपवासेतथाश्राद्धेनकुर्य्याद्दं
तधावनं दंतानांकाष्ठसंयोगोदहत्यासप्तमंकुलमिति काष्ठग्रहणान्मृल्लोष्ठकाद्यनिषेधइतिहेमाद्रिः विष्णुरहस्ये श्रा
द्धोपवासदिवसेखादित्वादंतधावनं गायत्र्याशतसंपूतमंबुप्राश्यविशुध्यतीति निर्णयामृतेव्यासः वर्जयेत्पारणेमांसं
व्रताहेप्यौषधंसदेति एकादश्यांश्राद्धप्राप्तौकात्यायनः उपवासोयदानित्यःश्राद्धंनैमित्तिकंभवेत् उपवासंतदाकुर्यादा
घ्रायपितृसेवितं मातापित्रोःक्षयेप्राप्तेभवेदेकादशीयदि अभ्यर्च्यपितृदेवांश्चआजिघ्रेत्पितृसेवितामिति हेमाद्या
दिसर्वनिवंधेष्वप्येवम् एतेनैकादशीनिमित्तकंश्राद्धंद्वादश्यांकार्यमितिवदंतःपरास्ताः किंचमहालये सपक्षःसकलः
पूज्यः श्राद्धषोडशकंप्रतीति श्रुतं षोडशकत्वंचैकादश्यांचमन्वादिश्राद्धंच क्षयाहात्परिज्ञानेचतत्पक्षैकादश्यां
विहितंश्राद्धंवाधितमेवस्यात् यदपिस्मृतिचंद्रिकायांपठंति अन्नाश्रितानिपापानितद्भोक्तुर्दातुरेववा मज्जंतिपित
रस्तस्यनरकेशाश्वतीःसमाः इतितस्यापिरागप्राप्तभुजिगोचरस्य वैधेश्राद्धंकृतवतांमहत्साहसमित्यलं एकादश्यांतु
यःपित्र्येदिनेचश्राद्धनिश्चयात् जलपिंडंविनादानंकृत्वानरकमाव्रजेदिति लघुनारदीयेएकादश्यांश्राद्धनिषेधः समा
तापितृभिन्नविषयः पूर्ववाक्येतदग्रहणात् यद्वाश्राद्धनिश्चयः श्राद्धेप्रतिग्रहः अथव्रतघ्नान्याह मदनरत्नेदेवलः स
र्वभूतभयंव्याधिःप्रमादोगुरुशासनं हविर्ब्राह्मणकाम्याचगुरोर्वचनमौषधं नारदीये अनुकल्पोनृणांप्रोक्तःक्षीणानांव

खाणीनि फलंमूलंपयस्तोयमुपभोज्यंभवेच्छुभे नत्वेवभोजनंकैश्चिदेकादश्यांबुधैःस्मृतं अस्यापवादः शयनेचमदुत्थानेमत्पार्श्वपरिवर्त्तने नरोमूलफलाहारीहृदिशल्यंममार्पयेत् इदंचातिसंकष्टविषयं व्रतत्वविरोधिनोनिर्णयामृते सर्वव्रतेषुज्ञेयाः तत्रैकादश्यांसंकल्पः गृहीत्वौदुंबरंपात्रंवारिपूर्णमुदङ्मुखः उपवासंतुगृह्णीयाद्यद्वावाचाभिधारयेत् इति माधवीयेवराहोक्तेःमंत्रस्तुविष्णूक्तः एकादश्यांनिराहारःस्थित्वाहमपरेहनि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युतेति शैवादीनांतुसौरागमे सावित्र्याप्यथवानाम्नासंकल्पंतुसमाचरेत् शिवादीनांगायत्र्योयजुर्वेदेप्रसिद्धाःवाराहे इत्युच्चार्यततोविद्वान्पुष्पांजलिमथार्पयेत् ततस्तुजलंपिबेत् अष्टाक्षरेणमंत्रेणत्रिर्जपेदभिमंत्रितं उपवासफलप्रेप्सुः पिबेत्पात्रगतंजलमिति कात्यायनेनोक्तेः मध्यरात्रेउदयेवादशमीवेधेरात्रौसंकल्पइतिमाधवः दशम्याःसंगदोषेण अर्धरात्रपरेणतु वर्जयेच्चतुरोयामान्संकल्पार्चनयोःसदा विद्धोपवासेनत्वंतद्दिनंत्यक्त्वासमाहितः रात्रौसंपूजयेद्विष्णुं संकल्पंचतदाभवेत् इतिनारदीयोक्तेः तत्रैवपूजामभिधाय देवस्यपुरतःकुर्याज्जागरंनियतोव्रती द्वादश्यांनिवेदनसंकल्पउक्तः कात्यायनेन अज्ञानतिमिरांधस्यव्रतेनानेनकेशव प्रसादसंमुखोदेवज्ञानदृष्टिप्रदोभवेतिनारदीये ब्राह्मणान्भोजयेच्छक्त्यादद्याद्वैदक्षिणांततः स्कांदे कृत्वाचैवोपवासंतुयोश्नातिद्वादशीदिने नैवेद्यंतुलसीमिश्रंहत्याकोटिविनाशनं द्वादश्यांचवर्ज्यान्याहबृहस्पतिः दिवास्वापंपरान्नंचपुनर्भोजनमैथुनं क्षौद्रंकांस्यामिषंतैलंद्वादश्यामष्टवर्जयेत् हेमाद्रौब्रह्मांडपुराणे पुनर्भोजनमध्यायोभारआयासमैथुने उपवासफलंहन्युर्दिवानिद्राचपंचमी स्कांदे परान्नंकांस्यतांबूलंलोभंवितथभाषणंवर्जयेदितिशेषः विष्णुधर्मेषु असंभाष्याह्निसंभाष्यतुलस्यतसिकादलं आमलक्याःफलंवापिपारणेप्राश्यशुद्ध्यति बृहन्नारदीये रजस्वलांचचंडालंमहापातकिनंतथा सूतिकांपतितंचैवउच्छिष्टंरजकादिकं व्रतादिमध्येशृणुयाद्यद्येषांध्वनिमुत्तमः अष्टोत्तरसहस्रंतुजपेद्वावेदमातरं एतद्व्रतंसूतकेपि कार्य्यम् सूतकेमृतके

कथंभवेत् उपोष्येद्वैतिथीतत्रविष्णुप्रीणनतत्परैरिति वृद्धवसिष्ठोक्तेः शुद्धन्यूना शुद्धसमा विद्धसमा वाधिकद्वादशीकाचेत् सर्वेषांपरैवेति हेमाद्रिः मदनरत्नेतु शुद्धाधिकापरासंपूर्णैकादशीयत्रेतिपूर्वोक्तेः अन्यापूर्वा शुद्धायदासमाहीनाएकादशीमुपवसेन्नशुद्धांवैष्णवीमर्पीतिस्कांदात् शुद्धाएकादशीउत्तराद्वादशी नचैवैकादशीविष्णाविति नारदोक्तेश्च यत्तुअविद्धापिचविद्धास्यादितिपाद्मे तच्छुद्धाधिकपरं यत्तु संपूर्णैकादशीत्याज्यापरतोद्वादशीयदि उपोष्याद्वादशी शुद्धाद्वादश्यामेवपारणमित्यादि तद्वैष्णवपरं स्मार्त्तानांतुपूर्वैवेत्युक्तं विद्धन्यूनासमद्वादशिकातुमुमुक्षूणांपरा अन्येषांपूर्वा पुत्रवतोपिपूर्वैतिमदनरत्ने विद्धसमासमद्वादशिकोनद्वादशीकातु मुमुक्षुभिःपराऽन्यैःपूर्वाकार्या दशमीमिश्रितापूर्वाद्वादशीयदिलुप्यते शुद्धैवद्वादशीराजन्नुपोष्यामोक्षकांक्षिभिरितिव्यासोक्तेः मोक्षकांक्षिग्रहणादन्येषांपूर्वैव तत्रैकादशीकार्य्याद्वादशीमिश्रितानरैः प्रातर्भवतुवामावायतोनित्यमुपोषणमितिपाद्मोक्तेः विद्धाधिकासमद्वादशिकासर्वेषांपरैव पारणाहेनलभ्येतद्वादशीकलयापिचेत् तदानींदशमीविद्धाप्युपोष्यैकादशीतिथिरिति ऋष्यशृंगोक्तेश्च माधवमतेतु अत्रगृहिणांपूर्वायतेरुत्तरा विद्धाधिकान्यूनद्वादशिका मोक्षपापक्षयविष्णुप्रीतिकामैः पराकार्य्या गृहस्थेनतुनक्तंकार्य्यं एकादशीद्वादशीचरात्रिशेषेत्रयोदशी उपवासंनकुर्वतिपुत्रपौत्रसमन्विताइति कौर्म्ये दिनक्षयेउपवासनिषेधात् दशम्येकादशीविद्धाद्वादशीचक्षयंगता क्षीणासाद्वादशीज्ञेयानक्तंतुगृहिणःस्मृतामितिवृद्धशातातपोक्तेश्च गृहिणःपूर्वत्रोपवासःएकादश्याःशुद्धन्यूनत्वेशुद्धसमत्वेवाद्वादश्यान्यूनसमत्वयोरेकादश्यामुपवासःयानितु दशम्यनुगताहंतिद्वादशद्वादशीफलं धर्मापत्यधनायूंषित्रयोदश्यांतुपारणमिति कौर्म्यादीनांदशमीवेधेत्रयोदशीपारणयोर्निषेधकानिविहितभिन्नपराणि अत्रमूलवचनानितद्व्यवस्थाचाकरेज्ञेयायत्तुकालेहमाद्रौ बहुवाक्यविरोधेनसंदेहोजायतेयदा द्वादशीतुतदाग्राह्यात्रयोदश्यांचपारणमितिमार्कंडेयोक्तेः संदिग्धेषुचवाक्येषुद्वादशींसमुपोषयेत् तथा

विवादेषुचसर्वेषुद्वादश्यांसमुपोषणं पारणंतुत्रयोदश्यामाज्ञेयंमामकीमुनेरितिपाद्मोक्तेश्च वेधसंदेहेज्योतिर्विदांविप्रातिपत्तौचापराकार्य्येत्युक्तं तद्वैष्णवविषयमित्यलंबहुप्रपंचितेन अत्रोपयुक्तंकिंचिदुच्यते तत्रदशम्येकादशीयोगेदशमीमध्यएवभोजनंकार्य्यमेकादश्यांनभुंजीतेतितस्याएवनिषिद्धत्वात् निषेधस्तुनिवृत्त्यात्मककालमात्रमपेक्षत इति देवलोक्तेश्च केचित्तु एकादशीव्रतांगत्वेनपूर्वेद्युरेकभक्तविधानाद्विधिस्पृष्टेचनिषेधानवकाशान्नकाम्यव्रतांगेभोजननिषेधः प्रवर्त्तते तेनैकादशीमध्येपूर्वदिनमित्याहुः अत्राधिकारी माधवीयेकात्यायनेनोक्तः अष्टवर्षाधिकोमर्त्योह्यशीतिन्यूनवत्सरः एकादश्यामुपवसेत्पक्षयोरुभयोरपीतिभविष्ये ब्रह्मचारीचनारीचशुक्लामेवसदागृहीति यत्तुविष्णुः पत्यौजीवतियानारीउपोष्यव्रतमाचरेत् आयुष्यंहरतेभर्त्तुर्नरकंचैवगच्छति इतिभर्त्रननुज्ञाविषयमितिप्रागुक्तं उपवाससामर्थ्येतु मार्कंडेयकौर्मयोः एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनदानेननानिर्द्वादशिकोभवेत् अत्रैकभक्तयोर्मध्यउपवासव्रतंचरेदिति एकभक्तादिषु उपवासशब्दस्तद्धर्मातिदेशार्थः तेनतत्प्रयुक्ताःसर्वेधर्माः तत्स्थानापन्नेनक्तादावपिभवंति संकल्पनेत्रवैकभक्तादिपदेनोहःकार्य्यइतिमदनरत्ने तथाऽसामर्थ्येप्रतिनिधिनाकारयेदितिप्रागुक्तं व्रताकरणे प्रायश्चित्तमाह माधवीयेकात्यायनः अर्कपर्वद्वयेरात्रौचतुर्दश्यष्टमीषुवा एकादश्यामहोरात्रेभुक्त्वाचांद्रायणंचरेदिति अथ काम्यव्रताविधिःलघुनारदीये दशम्यादिदिनंयत्तुत्रिदिनंपरिवर्जयेत् गंधतांबूलपुष्पादिस्त्रीसंभोगंमहायशाः तत्र दशम्याविधिःकौर्म्मे कांस्यंमांसंमसूरांश्चचणकान्कोरदूषकान् शाकंमधुपरान्नंचत्यजेदुपवसन्स्त्रियम् तथा शाकंमांसं मसूरांश्चपुनर्भोजनमैथुनं द्यूतमत्यंबुपानंचदशम्यांवैष्णवस्त्यजेत् मदनरत्नेनारदीये अक्षारलवणाः सर्वेहविष्यान्ननिषेविणः अवनीतलपशयना स्त्रियाः संगमवर्जिताः अथव्रतघ्नान्याह हेमाद्रौदेवलः असकृज्जलपानाच्चसकृत्तांबूलभक्षणात् उपवासःप्रणश्येतदिवास्वापाच्चमैथुनात् अत्राशक्तौमदनरत्नेदेवलः अत्ययेचांबुपानेननोपवासःप्रणश्यति

केवापिनत्याज्यंद्वादशीव्रतमिति तत्रत्यक्तंदानादिसूतकांतेकार्य्यं सूतकांतेनरःस्नात्वापूजयित्वाजनार्दनं दानंदत्त्वा विधानेनव्रतस्यफलमश्नुत इतिमात्स्योक्तेः एतद्रजोदर्शनेपिकार्य्यं एकादश्यांनभुंजीतनारीदृष्टेरजस्यपीतिपुलस्त्योक्तेः अथयदाद्वादश्यांश्रवणर्क्षंतदाशुद्धामप्येकादशींत्यक्त्वातत्रैवोपवासःकार्य्यः शुक्लावायदिवाकृष्णाद्वादशीश्रवणान्विता तयोरेवोपवासश्चत्रयोदश्यांचपारणमितिनारदीयोक्तेः एतेचनियमाःकाम्यव्रतेनियताःनित्यव्रतेसतिसंभवेकार्य्याः शक्तिमांस्तुपुनःकुर्य्यान्नियमंसाविशेषणमितिकात्यायनोक्तेः अशक्तौतुमाधवीयेब्रह्मवैवर्त्ते इतिविज्ञायकुर्वीतावश्यमेकादशीव्रतं विशेषनियमाशक्तोहोरात्रोपोषितोभवेत् अथप्रसंगादष्टौमहाद्वादश्यः तत्रशुद्धाधिकैकादशीयुताद्वादशीउन्मीलनीसंज्ञा ॥ १ ॥ द्वादश्येवशुद्धाधिकावर्द्धतेचेत् सावंजुली ॥ २ ॥ वासरत्रयस्पर्शिनीत्रिस्पृशा ॥ ३ ॥ अग्रेपर्वणःसंपूर्णाधिकत्वेपक्षवार्द्धिनी ॥ ४ ॥ पुष्यर्क्षयुताजया ॥ ५ ॥ श्रवणयुताविजया ॥ ६ ॥ पुनर्वसुयुतापापनाशिनी ॥ ७ ॥ फाल्गुनशुक्लाआमलकी ॥ ८ ॥ सैवआमर्दिकी अथद्वादशद्वादश्योजयंतीसंज्ञकाः ॥ १२ ॥ ताश्चसर्वाद्वादशमासेषुक्रमशोवक्ष्यंते तासामनुष्ठानविशेषोपितत्रैवोच्यते एताभ्यश्चान्येपिद्वादशीभेदविशेषास्तेपिकृत्यविस्तारएववक्ष्यंते एताःसर्वाअपिपापक्षयमुक्तिकामोयथासंभवमुपवसेत् अत्रमूलंहेमाद्रौज्ञेयं एकादशीद्वादश्योरेकत्वेचोपवासः पार्थक्येतुशक्तस्योपवासद्वयं तथा एकादशीमुपोष्यैवद्वादशींसमुपोषयेत् इतिविष्णुरहस्यात् अशक्तौतुद्वादश्यामेव एकामेकादशींस्तुत्वाविष्णुंचसमुपोषयेत् पूर्ववासरजंपुण्यंसर्वंप्राप्नोत्यसंशयमिति तत्रैवोक्तेः यदात्वल्पाद्वादशीतदोक्तंमात्स्ये यदाभवतिस्वल्पापिद्वादशीपारणादिने उषःकालेद्वयंकुर्य्यात्प्रातर्मध्याह्निकंतदा नारदीये अल्पायामपिराजेंद्रद्वादश्यामरुणोदये स्नानार्चनाक्रियाकार्य्यादानहोमादिसंयुताइति संकटेतुमाधवीयेदेवलः संकटेविषमेप्राप्तेद्वादश्यांपारयेत्कथं अद्भिस्तुपारणंकुर्य्यात्पुनर्भुक्तेनदोषकृदिति संकटे त्रयोदशीश्राद्धप्रदोषादौ अत्र

केचिदाहुः अपकर्षवाक्यानिन्यूनाधिकाहिताग्निविषयाणि अग्निहोत्रादीनां श्रौतत्वेनापकर्षायोगादिति द्वादश्यांचप्रथमपादमतिक्रम्यपारणंकार्य्यं द्वादश्याःप्रथमःपादोहरिवासरसंज्ञितः तमतिक्रम्यकुर्वीतपारणंविष्णुतत्परइति निर्णयामृते मदनरत्नेच विष्णुधर्मोक्तेः अत्रकेचित्संगदंते यदाभूयसीद्वादशीतदापिमुहूर्त्तत्रयेपारणंकार्य्यम् सर्वेषामुपवासानांप्रातरेवहिपारणमितिवचनादितिनिर्णयसिंधौ तत्रैवोक्तं वस्तुतस्तुवहूनांकर्मकालानामपिनाकारणंवाधापन्ने प्रागुक्तवचनैश्चाल्पद्वादश्यामेवापकर्षविधानादपराह्णएवकार्यमिति प्रातःशब्दस्तुसायंप्रातर्द्विजातीनामशनंश्रुतिचोदितमितिवचनादपराह्णवाच्यप्युपपन्नः नचवाक्यवैयर्थ्यंपुनर्भोजनात्सायंपारणनिवृत्त्यर्थत्वात्तस्येत्याहुः ऽमादेन एकादश्युपवासातिक्रमेऽपराह्णे वाराहे एकादशीविस्तुताचेत्परतोद्वादशीस्थिता उपोष्याद्वादशीतत्रयदीच्छेत्परमंपदमिति अत्राविरोधिनोनियमाः सर्वव्रतेषुबोद्धव्याः अन्येचनवरात्रेवक्ष्यंते इतिदिक् अथैकादश्यांसिद्धविरुद्धादिकंलिख्यते एकादशीशुक्रवारेणसिद्धा यदुक्तं शुक्रेणप्रतिपत्षष्ठीएकादश्यपिसिद्धिदाइति चंद्रेचित्रोत्तराषाढापूर्वाषाढाविशाखिका एकादशीत्रयोदश्योर्नष्टयोगाः प्रकीर्त्तिताइति एकादश्यांनर्त्तनादिकार्य्यं नंदासुनर्त्तनंक्षेममित्युक्तमेव एकादश्यांशणपुष्पाणिनखादेत् तच्चोक्तमेव नखचर्मतिलानिति सर्वास्वेकादशीषुतिथिपत्वेनशिवःपूज्यः तदुक्तं एकादश्यांशिवस्यचेति स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेःपादांबुजार्चारतोजीव्यात्पुत्रकलत्रमित्रसहितःसंपालयन्क्ष्मांचिरम् १ रणवीरसिंहभूपशकारितेकृत्यसागरे एकादश्यामभूदत्रपंचमोरत्नसंग्रहः २ अथद्वादशीसामान्यनिर्णयः तत्रादौकृष्णशुक्लद्वादशीध्यानम् द्वादशीगरुडारूढामेघवर्णाचपात्रिणी द्वादशीशुक्लवस्त्रेयंनीलकुंतलभूषितेति द्वादशीतूपवासादिषुपक्षद्वयेप्येकादशीयुतैवग्राह्या रुद्रेणद्वादशीयुक्तेतियुग्मप्राधान्यात् द्वादशीतुप्रकर्त्तव्याएकादश्यायुताप्रभो

सदाकार्य्यातुविद्धाद्भिर्विष्णुभक्तैश्चमानवैरितिस्कांदवचनाच्च दानार्चनादिविशेषकृत्येषूत्तरेति इतिद्वादशीसामान्यनिर्णयः अथसिद्धविरुद्धादिकंलिख्यते द्वादशीबुधवारेणयुक्तासिद्धा तच्चोक्तं बुधवारेद्वितीयाचसप्तमीद्वादशीतिच रविवारेणक्रकचाख्योयोगोविरुद्धोभवति तदुक्तम् सूर्य्येविशाखाभरणीद्वादशीचचतुर्दशी मघानुराधाज्येष्ठाचवर्जनीयाप्रयत्नतइति द्वादश्यांव्रतपौष्टिकादिकार्य्यं तच्चोक्तं व्रतपौष्टिकेद्वितीयाद्वादश्योरिति अत्रविल्वफलंनभक्षयेत् नखचर्मतिलानिचेत्यादि पूर्वमेवोक्तत्वात् तुलामकरस्थेसूर्य्येद्वादशीदग्धाभवति द्वादश्यांयोगिनीसांमुख्यान्नैर्ऋत्यां दिशियात्रानकार्य्या सर्वास्वपिद्वादशीषुतिथिपत्वेनविष्णुरर्चनीयः इतिद्वादशीसामान्यनिर्णयप्रकरणम् अथत्रयोदशीसामान्यनिर्णयः तत्रकृष्णशुक्लत्रयोदशीध्यानं चापबाणधरागौरीमकरस्थात्रयोदशीति अशोककलिका बाणचापपात्रात्रयोदशी मंचासनस्थिताश्यामाहरिद्वस्त्रामदालसा गदापात्रधरागौरीनिधिस्थास्यात्त्रयोदशीति शुक्लात्रयोदशी सर्वमतेपूर्वाग्राह्या त्रयोदशीप्रकर्त्तव्याद्वादशीसहितामुने भूतविद्धानकर्त्तव्यादर्शःपूर्णाकथंचन वर्जनीयामुनिश्रेष्ठसावित्रीव्रतउच्यतइति ब्रह्मवैवर्त्ते पूर्वविद्धाविधानादुत्तरविद्धानिषेधाच्च त्रयोदशीकर्त्तव्यायाभवेदापराह्णिकीति स्कांदाच्च आपराह्णिकीपूर्वविद्धेत्यर्थः पंचमीसप्तमीचैवदशमीचत्रयोदशी प्रतिपन्नवमीचैवकर्त्तव्यासंमुखीतिथिरितिपैठीनसिवचनाच्च एतानिशुक्लत्रयोदशीविषयाणि यद्यप्यत्रशुक्लपक्षबोधोनास्ति तथापिकृष्णत्रयोदश्याःपरविद्धतायावाचनिकत्वात् विद्धतायाःशुक्लपक्षविषयत्वंपरिशिष्यते कृष्णत्रयोदश्याः परविद्धत्वमुक्तं निगमे षष्ठ्यष्टमीअमावास्याकृष्णपक्षेत्रयोदशी एताःपरयुताःपूज्याःपराःपूर्वयुतास्तथेति तस्मात्तुशुक्लात्रयोदशीपूर्वयुताकृष्णात्रयोदशीपरयुतेतिसिद्धं शुक्लत्रयोदशीपूर्वापराकृष्णात्रयोदशीतिमाधवोक्तेश्च त्रयोदशीतिथिःपूर्वासितेपश्चादितिदीपिकोक्तेश्च यदातुकृष्णपक्षेपरविद्धानलभ्यते तदापूर्वविद्धाग्राह्या तदाहवसिष्ठः एकादशीतृतीयाचषष्ठीचैव

त्रयोदशी पूर्वविद्धातुकर्त्तव्यायदिनस्यात्परेहनीति उपवासेप्ययमेवानिर्णयः एकादश्यष्टमीषष्ठीद्वितीयाचचतुर्दशी त्रयोदशीअमावास्याउपोष्याःस्युःपरान्विताः द्वितीयापंचमीवेधाद्दशमीचत्रयोदशी चतुर्द्दशीचोपवासेहन्युःपूर्वोत्तरे तिथी इतिवृद्धवसिष्ठवचनयोर्मिथोविरोधेपूर्वोक्तनिगमवचनेनक्रमेणकृष्णशुक्लत्रयोदशीविषयत्वेनव्यवस्थापनात् इतिसामान्यत्रयोदशीनिर्णयः अथसिद्धविरुद्धादिकंलिख्यते त्रयोदशीभौमवारेणसिद्धा तदुक्तं भौमेषष्ठीतृतीयास्याद्दशमीचत्रयोदशीति सोमेनतुविरुद्धा त्रयोदश्यांक्षत्रियादिभिर्मलापहस्नानंनकार्य्यम् तदुक्तं स्नातुर्जनस्य दशमीतनयांस्त्रयोदशीत्यादिमलापहस्नानंनिषिध्यतइत्याद्युक्तमेव त्रयोदश्यांदक्षिणदिशि योगिनीसांमुख्याद्यात्रा नकार्या क्रूरग्रहेकुंभस्थितेत्रयोदशीशुभकार्य्येषुवर्ज्या त्रयोदश्यांवृंताकानिनभक्षयेत् ॥

इतिश्रीमहाराजरणवीरसिंहरत्नाकरेत्रयोदशीतिथिसामान्यनिर्णयप्रकरणम् ॥

अथचतुर्दशीनिर्णीयते तत्रकृष्णचतुर्दशीध्यानम् अबूजस्थापाटलाभासाफलपात्रसुरामृता नीलकंठींद्रगोपाभलोचनेयंचतुर्द्दशी अथशुक्ला खड्गभल्लधरानीलकुन्तलाशुभ्रभूषणा द्विभुजातुरगारूढाकृष्णवर्णाचतुर्दशी चतुर्दशीतुशुक्लापराग्राह्या चतुर्द्दश्याचपूर्णिमेति युग्मवाक्यात् एकादश्यष्टमीषष्ठीपौर्णमासीचतुर्दशी अमावास्यातृतीयाचउपोष्याःस्युःपरान्विता इतिबृहस्पतिवाक्याच्च शुक्लाचतुर्दशीग्राह्यापरविद्धासदाव्रत इतिव्यासवाक्याच्च कृष्णचतुर्दशी पूर्वविद्धैवकर्त्तव्या पूर्वविद्धैवकर्त्तव्यापरविद्धानकुत्रचित् उपवासादिकार्येषुएषधर्मःसनातन इत्यापस्तंबवचनात् मदनरत्नादिषुतु उपवासेतुशुक्लकृष्णेपरएवग्राह्ये तदाहवसिष्ठः एकादश्यष्टमीषष्ठीउभेपक्षेचतुर्दशी अमावास्यातृतीयाचउपोष्याःस्युःपरान्वितोइत्युक्तं हेमाद्रौतु यदातुशुक्लकृष्णचतुर्दश्यौपूर्वदिनापराह्णंव्याप्नुतस्तदात्रयोदशीयुतेएवग्राह्ये तथाचस्कंदपुराणे चतुर्दशीतुकर्त्तव्यात्रयोदश्यायुताविभो ममभक्तैर्महाबाहोभवेद्याचापराह्णिकी

दर्शविद्धानकर्त्तव्याराकाविद्धाकदाचनेति मदनरत्नकालतत्त्वविवेचनयोस्तु शैवव्रतेपक्षद्वयगतायाअपिचतुर्दश्याअपराह्णिक्याः पूर्वविद्धानभिधायकमिदंवाक्यमुपन्यस्तं ममभक्तैरितीश्वरोक्तिलिंगात् यदाचापराह्णंनव्याप्नुतस्तदापरयुतेग्राह्ये अष्टम्येकादशीषष्ठीकृष्णपक्षेचतुर्दशी अमावास्यातृतीयाचकर्त्तव्यापरसंयुतेतिब्रह्मवैवर्त्तवचनात् यत्तूपवासादिकार्येष्वित्यापस्तंबवचने उपवासेकृष्णचतुर्द्दश्याःपूर्वविद्धत्वाभिधानं तद्रुद्रोपवासविषयमिति तत्रैव प्रपंच्यते इतिचतुर्द्दशीसामान्यनिर्णयः अथसिद्धविरुद्धादिकालिख्यते चतुर्दशीशनिवारेणसिद्धा रविवारेणविरुद्धा सूर्येविशाखाभरणीत्युक्तमेव अत्रशत्रुवधादिकंकार्य्यं तदुक्तं चतुर्द्दश्यांचतुर्थ्यांचनवम्यांचारिमर्द्दनमिति अत्रक्षौरंयात्रांचवर्जयेदिति अत्रविशेषतोयोगिनीसांमुख्यात् वायव्येयात्रानकार्य्या अत्रपर्वत्वाद्दंतधावनंवर्ज्यं अत्रसर्वचतुर्दशीषुतिथीशत्वाच्छिवःपूज्यः इतिश्रीमन्महाराजरणवीरसिंहरत्नाकरेचतुर्दशीसामान्यनिर्णयप्रकरणम् ॥

अथपौर्णमासीनिर्णीयते तत्रादौपौर्णमासीध्यानम् शशिगापूर्णिमाशुभ्रामौक्तिकाभरणान्विता सुधापूर्णघटाधारावामदक्षिणबाहुकेति पौर्णमासीतु वटसावित्रीव्यतिरिक्तसर्वव्रतेषुपराग्राह्या भूतविद्धनकर्त्तव्येदर्शपूर्णेकदाचन वर्जयित्वामुनिश्रेष्ठसावित्रीव्रतमुत्तममिति ब्रह्मवैवर्त्तात् पूर्वविद्धाऽवकर्त्तव्यासावित्रीव्रतिभिर्नरैः पौर्णमासीमहीपालपरैव निगमेमतेतिमाधवीयेपद्मपुराणवचनाच्च सावित्रीव्रतमंतरेपौर्णमास्यःपराइतिदीपिकोक्तेश्च उपवासेपरैव एकादश्यष्टमीषष्ठीपौर्णमासीचतुर्दशी अमावास्यातृतीयाचताउपोष्याःपरान्विता इतिनिर्णयामृतधृतवचनात् यत्तु षष्ठ्येकादश्यमावास्यापूर्वविद्धातथाष्टमी पूर्णिमापरविद्धाचनोपोष्यंतिथिपंचकमिति ब्रह्मवैवर्त्तपुराणवचनं चतुर्दश्याचपूर्णिमेतियुग्मवाक्यं तत्सावित्रीव्रतविषयं पूर्वोदाहृतैकादश्यष्टमीति वचनविरोधात् सावित्रीव्रतेतुपूर्वैवग्राह्या प्रतिपत्पंचमीभूतःसावित्रीवटपूर्णिमा नवमीदशमीचैवनोपोष्याः परसंयुताइति ब्रह्मवैवर्त्तेपरविद्धायानिषेधात्

पुस्तकालय
गुरुकुल कांगड़ी

यदा चतुर्दश्यष्टादशनाडिकाभवति तदासावित्रीव्रतमपितत्रपरित्याज्यं भूतोष्टादशनाडीभिर्दूषयत्युत्तरांतिथिमितिस्मृतेरिति माधवः अन्यास्मिन्विषयेऽष्टादशनाडीवचनस्यवर्जयित्वेति विशेषवचनेनवाधाद्भूतविद्धैवग्राह्येति निर्णयसिंधौ सावित्रीव्रतंज्यैष्ठपूर्णिमायांवक्ष्यते सर्वास्वपिपूर्णिमासुअमावास्यावच्छ्राद्धंनित्यं अमावास्याव्यतीपातपौर्णमास्यष्टकासुच विद्वांछ्राद्धमकुर्वाणोनरकंप्रतिपद्यत इतिपितामहेन अकरणेप्रत्यवायोक्तेः तच्चापिंडकं कार्य्यं तदुक्तं निर्णयप्रदीपेगर्गेण पौर्णमासीषुसर्वासुनिषिद्धंपिंडपातनं वर्जयित्वाप्रौष्ठपदींयथादर्शस्तथैवसेति इतिसामान्यपौर्णमासीनिर्णयः अथसिद्धविरुद्धादिकंलिख्यते पूर्णिमागुरुवारेणसिद्धा गुरौदशमीपंचम्यौपूर्णमासीति पंचमीवद्विवाहयात्रोत्सवंकार्य्यं अत्रापितिथिपत्वाच्चंद्रःपूज्यः तदुक्तं पर्वणींदोर्भवेत्पूजेति क्रूरग्रहधनराशिस्थचतुष्केपूर्णिमाऽशुभाभवतिपूर्णिमायांयोगिनीसांमुख्यादैशान्यांयात्रानकार्य्या ॥ ॥ स्वस्ति श्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेःपादांवुजार्चारतोजीयात्पुत्रकलत्रमित्रसहितःसंपालयन्क्ष्मांसदा १ रणवीरसिंहभूपनकारितेकृत्यवारिधौ सामान्यनिर्णयोजातःपौर्णमासीतिथेरयम् २ इतिश्रीरणवीरसिंहरत्नाकरेपौर्णमासीसामान्यनिर्णयः अथव्रताद्युपयुक्तोऽमावास्यासामान्यनिर्णयः प्रपंच्यते तत्रादावमावास्याध्यानम् खड्गभल्लधरानीलकुंतलांशुकभूषणा अमावास्याचध्यातव्याद्विदोर्मरकतप्रभा द्विदोर्द्विभुजा दर्भासनस्थिताचेयंदर्भपिंडधराकृशेति उपवासादिष्वमावास्याप्रतिपद्युतैवग्राह्या प्रतिपद्यमावास्येतियुग्मवाक्यात् अमावास्यातृतीयाचताउपोष्याःपरान्विताइतिस्मृतेश्च पद्मपुराणेपि षष्ठ्यष्टमीतथादर्शःकृष्णपक्षेत्रयोदशी भूतविद्धाप्यमावास्यानग्राह्यामुनिपुंगव उत्तरोत्तरविद्धास्ताःकर्त्तव्याःकाठकश्रुतेरिति सावित्रीव्रतेतु पूर्वविद्धैवग्राह्या तथाचस्कंदपुराणे भूतविद्धासिनीवालीनतुतत्रव्रतंचरेत् वर्जयित्वातुसावित्रीव्रतंतुशिखिवाहनेति

भूतविद्धनकर्त्तव्येदर्शपूर्णेकदाचन वर्जयित्वामुनिश्रेष्ठसावित्रीव्रतमुत्तममितिनिर्णयसिंधौ ब्रह्मवैवर्त्तोक्तेश्च इत्थमेव मदनरत्नहेमाद्रिप्रभृतयःमाधवीयेतुविशेषःयदाचतुर्दश्यष्टादशनाडिकाभवति तदासावित्रीव्रतमपित त्रपरित्याज्यंभूतोष्टादशनाडीभिरितिवाक्यात् अमायांयोगविशेषाणिअपरार्केव्यासःअमावास्याभवेद्वारेयदाभूमिसुतस्यवै जाह्नवीस्नानमात्रेणगोसहस्रफलंलभेत् तथा अमातुसोमवारेणरविवारेणसप्तमी। चतुर्थीभौमवारेणविषुवत्सदृशंफलं तत्रैवव्यासः सिनीवालीकुहूर्वापियदिसोमदिनेभवेत् गोसहस्रफलंतेनदत्तंचेन्मौनिनाकृतं हेमाद्रौवृहन्मनुः श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके यद्यमारविवारेणव्यतीपातःसउच्यते नागदैवतमश्लेषा शिरोमृगशिरा अत्रश्राद्धंनित्यं अमावास्याव्यतीपातपौर्णमास्यष्टकासुच विद्वाञ्छ्राद्धमकुर्वाणोनरकंप्रतिपद्यत इतिपितामहोक्तेः श्राद्धीयाऽमावास्यानिर्णयस्त्वग्रेवक्ष्यते अस्याश्चपर्वत्वात्प्रसंगेनान्यान्यपिपर्वाण्यत्रैवप्रदर्श्यंते तथाचविष्णुपुराणे चतुर्दश्यष्टमीचैवअमावास्याचपूर्णिमा पर्वाण्येतानिराजेंद्ररविसंक्रांतिरेवचेति अमाश्राद्धप्रसंगतः षण्णवतिश्राद्धकालानाह तेषामयंसंग्रहः अमा १३ मनु १४ युग ४ संक्रांति ॥ १२ ॥ वैधृति ॥ १३ ॥ पात ॥ १३ ॥ महालयाः ॥ १६ ॥ अन्वष्टक्यंच ॥ ४ ॥ पूर्वेद्युः ॥ ४ ॥ वृद्धिः ॥ १ ॥ क्षयाहः ॥ १ ॥ त्रिस्पृक् ॥ १ ॥ षण्णवत्यष्टकास्तथेति अत्रापिंडदानविधिनिषेधादिःप्रागुक्तः अत्रकृत्यविशेषोहेमाद्रौ सावित्राञ्छालिहोमांश्चकुर्यात्पर्वसुनित्यशइति सावित्रान्सावित्रीदैवतान् अस्मिंश्चहोमेगायत्रीमंत्रः अथसिद्धविरुद्धादिकंलिख्यते अमावास्यागुरुवारेणसिद्धा शनिवारेणविरुद्धा अत्रैशान्यांयोगिनीसांमुख्याद्यात्राविशेषतोन्यत्रापिनकार्य्या अस्यांस्त्रीसेवनंनकार्य्यं अथप्रतिपदादिदर्शांतासुपर्वतिथिषुवह्न्यादयोदैवताःप्रत्येकंपूज्यत्वेनाभिहितास्तेच रत्नमालायामुक्ताः वह्निर्विरंचिर्गिरिजागणेशोनागोविशाखोदिनकृन्महेशः दुर्गांतकोविष्णुहरीस्मरश्चशर्वः शशीचेतिपुराणदृष्टाः कालादर्शेपि अग्निर्विरंचिरि

त्याद्युक्ताः रत्नमालायामेकादशीद्वादश्योर्विष्णुरेवदेवतोक्तःकालादर्शेएकादश्याःशिवोद्वादश्याविष्णुरितीयान् विशेषः आसांप्रतिपदादिपंचदश्यंतानांतिथीनांत्रिरावृत्त्या नंदाचभद्राचजयाचरिक्तापूर्णेतिसर्वास्तिथयःक्रमात्स्युः कनिष्ठमध्यादिफलास्तुशुक्लेकृष्णेभवंत्युत्तममध्यहीनाः अथप्रतिपदादिसर्वतिथिषुसामान्यतःप्रत्येकंवर्ज्यवर्गमुक्तं मुहूर्त्तदीपिकायां कूष्मांडंबृहतीफलानिलवणंवर्ज्यंतिलाम्लंतथा तैलंचामलकंदिनप्रसवनंशीर्षकपालांत्रकं निष्पावाश्चमसूरिकाफलमथोवृंताकसंज्ञंमधुद्यूतंस्त्रीगमनंक्रमात्प्रतिपदादिष्वेवमाषोडशीति अथातिथिसामान्यनिर्णयप्रसंगात्कल्पादितिथयोप्युच्यंते मत्स्यपुराणे कल्पानुकीर्त्तनंवक्ष्येसर्वपापप्रणाशनं यस्यानुकीर्त्तनादेववेदपुण्येनयुज्यते प्रथमःश्वेतकल्पस्तु ॥ १ ॥ द्वितीयोनीललोहितः ॥ २ ॥ वामदेवस्तृतीयस्तु ॥ ३ ॥ तुरीयस्तुरथंतरः ॥ ४ ॥ रौरवःपंचमःप्रोक्तः ॥ ५ ॥ षष्ठःप्राणइतिस्मृतः ॥ ६ ॥ सप्तमोथबृहत्कल्पः ॥ ७ ॥ कंदर्पश्चाष्टमः स्मृतः ॥ ८ ॥ साध्योथनवमःप्रोक्तः ॥ ९ ॥ ईशानोदशमःस्मृतः ॥ १० ॥ ध्यानएकादशःप्रोक्त ॥ ११ ॥ स्तथासारस्वतःपरः ॥ १२ ॥ त्रयोदशउदानस्तु ॥ १३ ॥ गारुडोथचतुर्दशः ॥ १४ ॥ कौर्मःपंचदशःप्रोक्तः ॥ १५ ॥ पौर्णमास्यःप्रजापतेः ब्राह्मणः कौर्मकल्पस्यैवपौर्णमास्यइतिसंज्ञांतरं षोडशोनारसिंहस्तु ॥ १६ ॥ समानस्तुततोपरः ॥ १७ ॥ आग्नेयोऽष्टादशः प्रोक्तः १८ सोमकल्पस्ततोपरः १९ वैकुंठाख्यस्ततःप्रोक्तः २० लक्ष्मीकल्पस्ततःपरः २१ मीनकल्पस्ततःप्रोक्त २२ स्तत्पुमानितिचापरः २३ चतुर्विंशस्ततःप्रोक्तःसावित्रीकल्पसंज्ञकः २४ पंचविंशत्तमोघोरो २५ वाराहश्चततःपरः २६ सप्तविंशस्तुवैराजो २७ गौरीकल्पस्ततःपरं २८ माहेश्वरस्ततःप्रोक्तास्त्रिपुरंयत्रघातितं २९ पितृकल्पस्ततःप्रोक्तोयाकुहूर्ब्रह्मणःस्मृता ३० इत्ययंब्रह्मणोमासःसर्वपापप्रणाशनः आदावेवहिमाहात्म्यंयस्ययस्मिन्विधीयते तस्यकल्पस्यतन्नामविहितंब्रह्मणापुरा यस्तुदद्यादिमान्कृत्वाहैमान्पर्वणिपर्वणि ब्रह्मविष्णुपुरेकल्पंपूजितोमुनिभि

र्वसेत् अत्रश्राद्धादिमहाफलमित्युक्तं हेमाद्रौनागरखंडे अथकल्पादयः पुण्याः कथ्यंतेतिथयःशुभाः यासुश्राद्धेकृते
तृप्तिःपितॄणामक्षयाभवेत् चैत्रशुक्लप्रतिपदिश्वेतकल्पःपुराभवत् १ तस्यशुक्लत्रयोदश्यामुद्गानःसमजायत २ कल्प
स्तुनारसिंहाख्यःकृष्णायांप्रतिपद्यभूत् ३ अथकृष्णत्रयोदश्यांगौरीकल्पोऽपिकल्पितः ४ वैशाखस्यद्वितीयायांशुक्ला
यांनीललोहितः ५ चतुर्दश्यांतुशुक्लायांप्रवृत्तोगारुडाभिधः ६ समानस्तुद्वितीयायांकृष्णायामुदपद्यत ७ महेश्वर
श्चतुर्दश्यांकृष्णपक्षेसमागमत् ८ ज्येष्ठशुक्लद्वितीयायांवामदेवस्यसंभवः ९ पौर्णमास्यांतुतस्यैवकौर्मःप्रववृतेनृप १०
कृष्णपक्षेद्वितीयायामाग्नेयःसमपद्यत ११ पंचदश्यांतुकृष्णायांपितृकल्पःसमागमत् १२ शुक्लांचतुर्थींचाषाढेप्राप्यरा
थंतरोभवत् १३ चतुर्थ्यांतस्यकृष्णायांसोमकल्पःसमापतत् १४ श्रावणेशुक्लपंचम्यांरावणःसमवर्त्तत १५ तस्यैवशु
क्लपंचम्यांसमानःप्रत्यपद्यत १६ षष्ठींप्रौष्ठपदींशुक्लांप्राप्यप्राणाभिधोभवत् १७ सितेतरायांषष्ठ्यांतुतस्यतत्पुरुषाह्व
यः १८ बृहत्कल्पस्तु सप्तम्यांशुक्लायामाश्विनस्यतु १९ कृष्णायामपिवैकुंठःप्रविवेशविशांपते २० कार्त्तिकस्यासि
ताष्टम्यांकल्पःकंदर्पसंज्ञकः २१ असितायांपुनर्जज्ञेलक्ष्मीकल्पस्यकल्पना २२ मार्गेशुक्लनवम्यांतुकल्पःसद्योभ्यप
द्यत २३ असितायांवसावित्रीकल्पःप्रारंभमभ्ययात् २४ पौषेदशम्यांशुक्लायामीशानःप्रादुरासह २५ असिताया
मघोरस्यकल्पस्योपक्रमोभवत् २६ एकादश्यांतुशुक्लायांमाघेव्यानःप्रजज्ञिवान् २७ तस्यामेवतमिस्रायां
वाराहःसमपद्यत २८ सरास्वतस्तुद्वादश्यांशुक्लायांफाल्गुनस्यच २९ कृष्णायामपिवैराजो विरराजमहामनाः
३० एतास्रमांतमासाभिप्रायेण ज्ञेया इतित्रिंशदमीकल्पास्तिथयः परमेष्ठिनः तासुश्राद्धेकृतेपुण्यमाकल्प
स्थायिकल्प्यतइति एतत्कर्त्तुमसमर्थंप्रतिमात्स्ये ब्रह्मणोयद्दिनादर्वाक्कल्पस्यादिःप्रकीर्त्तितः वैशाखस्यतृतीया
वाकृष्णायाफाल्गुनस्यच पंचमीचैत्रमासस्यतस्यैवान्यातथापरा तस्यचैत्रस्यैवपराकल्पादिरित्यर्थः शुक्लात्रयो

अ०२० ॥८७॥

दशीमाघेकार्त्तिकस्यतुसप्तमी मार्गशीर्षस्यचतथासप्तैताः संस्मराम्यहं कल्पानामादयोह्येतादत्तस्याक्षयकारिका इतिकल्पादिषु ब्रह्मणः पूजां विधाय दानश्राद्धादिकरणेऽक्षयफलमितिसंप्रदायः अघमन्वादितिथयः मत्स्यपुराणे अश्वयुक्शुक्लनवमी १ द्वादशीकार्त्तिकेतथा २ तृतीयाचैत्रमासस्य ३ तथाभाद्रपदस्यच ४ फाल्गुनस्यत्वमावास्या ५ पौषस्यैकादशीतथा ६ आषाढस्यापिदशमी ७ माघमासस्यसप्तमी ८ श्रावणस्याष्टमीकृष्णा ९ तथाषाढेतुपूर्णिमा १० कार्त्तिकी ११ फाल्गुनी १२ चैत्री १३ ज्यैष्ठपंचदशीतथा १४ मन्वंतरादयश्चैतादत्तस्याक्षयकारिकाः अथयुगादितिथयोप्युच्यंते ताश्चनारदेनोक्ताः कार्त्तिकेशुक्लनवमीचादिःकृतयुगस्यसा त्रेतादिर्माधवेशुक्लातृतीयापुण्यसंमिता कृष्णापंचदशीमाघेद्वापरादिरुदीरिता कल्पादिःस्यात्तथाकृष्णानभस्येचत्रयोदशी मन्वादियुगादितिथिषुश्राद्धंभारतादिषुप्रोक्तं यामन्वाद्यायुगाद्याश्चतिथयस्तासुमानवः स्नात्वाहुत्वाचजप्त्वाचदत्त्वानंतफलंलभेत् तथाचमनुः सहस्रगुणितंदानंभवेद्दत्तंयुगादिषु कर्मश्राद्धादिकंचैवतथामन्वंतरादिषु अत्रयुगादिप्रसंगात्युगांततिथयोपिहेमाद्रौब्रह्मपुराणे सूर्यस्यासिंहसंक्रांत्यामंतःकृतयुगस्यतु अथवृश्चिकसंक्रांत्यामंतस्त्रेतायुगस्यतु ज्ञेयस्तुवृषसंक्रांत्यांद्वापरांतस्तुसंख्यया तथाकुंभस्यसंक्रांत्यामंतःकलियुगस्यतु अत्रापिश्राद्धमुक्तं युगादिषुयुगांतेषुश्राद्धमक्षयमुच्यते तत्रैव युगाद्येषुयुगांतेषुस्नानदानजपादिकं यत्किंचित्क्रियतेतस्ययुगांतफलमीरितं अत्रसमुद्रस्नानं प्रशस्तं पृथ्वीचंद्रोदये सौरपुराणे युगादौतुनरःस्नात्वाविधिवल्लवणांबुधौ गोसहस्रप्रदानस्यकुरुक्षेत्रेहियत्फलं तत्फलंलभतेमर्त्यौभूमिदानस्यचध्रुवमिति आश्वलायनः समुद्रेपर्वसुस्नायादमायांचविशेषतः पापैर्विमुच्यतेसर्वैरमायां स्नानमाचरेत् भृगुभौमदिनेस्नानंनित्यमेवविवर्जयेत् महाभारते अश्वत्थसागरौसेव्यौनस्प्रष्टव्यौकदाचन अश्वत्थंमंदवारेतुसागरंपर्वसुस्पृशेत् पृथ्वीचंद्रोदये स्कांदे पुनातिपर्वणिस्नानात्तर्पणैःसरितांपतिः कदाचिदपिनैवात्रस्नानं

कुर्य्यादपर्वाणि अस्यापवादस्तत्रैवप्रभासखंडे पर्वकालेचसंप्राप्तेनदीनांसंगमेतथा सेतुबंधेतथासिंधौतीर्थेष्वन्येषुसंयतः एवमादिषुसर्वेषुमेध्योन्यत्रतुपर्वाणि तथा विनामंत्रंविनापर्वक्षुरकर्मविनानरैः कुशाग्रेणापिदेवेशिनस्प्रष्टव्यो महोदधिः तथाच नकालनियमः सेतौसमुद्रस्नानकर्मणि तद्विधिश्चतत्रैव पिप्पलादसमुत्पन्नेकृत्येलोकभयंकारि पाषाणंतेमयादत्तमाहारार्थंप्रकल्प्यतामिति पाषाणंप्रक्षिप्य विश्वाचीतुघृताचीचविश्वयोनेविशांपते सान्निध्यंकुरुमेदेवसमुद्रेलवणांभसि नमस्तेविश्वगुप्तायनमोविष्णोंभसांपते नमोजलधिरूपायनदीनांपतयेनमः नमस्तेजगदाधारशंखचक्रगदाधर देहिदेवममानुज्ञांतवतीर्थनिषेवणे त्रितत्वाधिकमीशानंनमोविश्वमपांपतिं सान्निध्यंकुरुदेवेशसागरेलवणांभसि अग्निश्चयोनिरनिलश्चदेहोरेतोधाविश्वममृतस्यनाभिः एवंस्तुवन्पांडवसत्यवाक्यंततोवगाहेतपतिंनदीनामिति भारतोक्तमंत्रान्पठित्वा विधिवत्स्नात्वा सर्वरत्नोभवान् श्रीमान्सर्वरत्नाकरोमतः सर्वरत्नप्रधानश्चगृहाणार्घ्यंमहोदधे इत्यर्घंदत्त्वातर्पयेत् तथोक्तं पृथ्वीचंद्रोदये स्कांदे षिप्पलादंविकंठंचकृतांतंजीवकेश्वरं वासिष्ठंवामदेवंचपराशरमुमापतिं वाल्मीकिंनारदंचैवबालखिल्यांस्तथैवच नलंनीलंगवाक्षंचगवयंगंधमादनं जांबवंतंहनूमंतंसुग्रीवंचांगदंतथा मैंदंचद्विविदंचैववृषभंशरभंतथा रामंचलक्ष्मणंचैवसीतांचैवयशस्विनीं एतांस्तुतर्पयेद्विद्वान्जलमध्येविशेषतः आब्रह्मस्तंबपर्यंतंयत्किंचित्सचराचरं मयादत्तेनतोयेनतृप्तिमेवाभिगच्छतु इतिसमुद्रस्नानम् स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेःपादांबुजार्चारतो जीयात्पुत्रकलत्रमित्रसहितः संपालयन्क्ष्मांसदा १ रणवीरसिंहभूपेनकारिते रत्नवारिधौ सामान्यपर्वविज्ञानःषष्ठोयं
रत्नसंग्रहः ॥ २ ॥ इतिश्रीरणवीरसिंहरत्नाकरेधर्मकृत्यनिबंधेअमावास्यादिसामान्यपर्वनिर्णयप्रकरणम् ॥

ॐश्रीपरमात्मनेनमः श्रीदंगणेशंशिवयोस्तनूजंसुरासुरैरर्चितपादपीठं स्वर्गापवर्गादिफलप्रभू
त्यैवंदामहेनित्यमुदारसत्त्वम् १ श्रीरामचंद्रायनमः

अथश्राद्धीयामावास्यानिर्णीयते

साचश्राद्धेअपराह्णंपितॄणामितिश्रुतेः शातातपोपि दर्शश्राद्धंतुयत्प्रोक्तंपार्वणंतत्प्रकीर्त्तितम् अपराह्णेपितॄणांतुतत्र दानंप्रशस्यते यमोऽप्याह पक्षांतेनिर्वपेत्तेभ्योह्यपराह्णेतुपैतृकमिति एवंचापराह्णस्यमुख्यकालत्वात्पूर्वेद्युरेवापरेद्युरेववापराह्णव्यापिन्यमावास्यागृहीतव्या पूर्वतिथेरपराह्णव्यापिन्याग्राह्यतामाहहारीतः यस्यांसंध्यागतःसोमोमृणालमिवदृश्यते अपराह्णेतुयातस्यांपिंडानांकरणंध्रुवमिति यत्तु कार्ष्णाजिनिवचो भूतविद्धाममावास्यांमोहादज्ञानतोपिवा श्राद्धकर्मणियेकुर्युस्तेषामायुःप्रहीयतइति तत्पूर्वदिनेपराह्णव्याप्त्यभावविषयं तथाभूतायाउत्तरतिथेर्ग्राह्यतामाहहारीतः अपराह्णेपितॄणांतुयापराह्णानुयायिनी साग्राह्यापितृकार्येतुनपूर्वास्तानुयायिनीति उभयत्रसाम्येनैकदेशव्याप्तौखर्वदर्पादिवाक्यान्निर्णयः स्मृत्यंतरेपि तिथिक्षयेसिनीवालीतिथिवृद्धौकुहूर्मतासाम्यैचैवकुहूर्ज्ञेयावेदवेदांगवेदिभिरिति पूर्वासिनीवाली उत्तराकुहूः तदुक्तं व्यासेन दृष्टचंद्रासिनीवालीनष्टचंद्राकुहूर्मतेति शिवराघवसंवादेपि अमावास्यातुयाहिस्यादपराह्णद्वयेपिसा क्षयेपूर्वापरावृद्धौसाम्येपिचपरास्मृतेति वैषम्येऐकदेशव्याप्तौस्मृत्यंतरे अपराह्णद्वयव्यापिन्यमावास्यायदाभवेत् तत्राल्पत्वमहत्त्वाभ्यांनिर्णयःपितृकर्मणीति याधिकव्यापिनी साग्राह्येत्यर्थः यदादिनद्वयेप्यपराह्णंनस्पृशति तदा साग्निकनिरग्निकभेदेनव्यवस्थाद्रष्टव्या यदुक्तंजाबालिना अपराह्णद्वयव्यापीयदिदर्शस्तिथिक्षये आहिताग्नेःसिनीवालीनिरग्न्यादेः कुहूर्मतेति आदिपदेन स्त्रीशूद्रयोरपिसंग्रहः तदुक्तंलौगाक्षिणा सिनीवालीद्विजैः कार्यासाग्निकैःपितृकर्मणि स्त्रीभिःशूद्रैः

कुहूर्ज्ञेयातथावानाग्निकैर्द्विजैरिति हेमाद्रौतु यदामादिनद्वयेप्यपराह्णव्यापिनीनभवति तदातिथिक्षये पूर्वदिनसंबंधेनीसिनीवाल्येवग्राह्या तथाचकात्यायनः यदाचतुर्दशीयामंतुरीयमनुपूरयेत् अमावास्याक्षीयमाणातदैवश्राद्धमिष्यते क्षीयमाणपरदिनेपराह्णव्यापिनीनेत्यर्थः दिनद्वयेप्यपराह्णव्यापिनीनेतिफलितार्थइतिस्थितं अत्र यद्यपिपूर्वाह्णोवैदेवानांमध्यंदिनोमनुष्याणामपराह्णः पितॄणामितिश्रुत्यालोचनयात्रेधाविभक्तदिनांत्यभागएवापराह्णः प्रतीयते पिंडान्वाहार्यकंश्राद्धंक्षीणेराजनिशस्यते वासरस्यतृतीयेंशेनातिसंध्यासमीपतइति छंदोगपरिशिष्टादपि तथा पिंडैःपिंडपितृयज्ञःतमनुआह्रियते क्रियतेइतिपिंडान्वाहार्यकंपिंडपितृयज्ञानंतरंभवतीतियावत् राजनिचंद्रे तस्मिन्क्षीणेऽमावास्यायामित्यर्थइतिचंद्रक्षयकालश्चतुर्दश्यष्टमप्रहरादिकोमावास्यासप्तमप्रहरपर्यंतः तदाहसएव अष्टमेंशेचतुर्दश्याःक्षीणोभवतिचंद्रमाः अमावास्याष्टमेंशेचपुनः किलभवेदणुरिति तथापि सायाह्नस्त्रिमुहूर्त्तः स्याच्छ्राद्धंतत्रनकारयेत् राक्षसीनामसाप्रोक्तागर्हितासर्वकर्मस्विति यमेनसायाह्नस्यश्राद्धकालत्वेप्रतिषिद्धेर्थादेकादशद्वादशमुहूर्त्तयोस्तत्कालत्वंसिद्ध्यति यत्तु दीपिकायांहेमाद्रिसिद्धांतउक्तः त्रिधासितदिनस्यांतेपराह्णेचरेदितिसोप्येतत्परतयैवकथंचिद्व्याख्येयः माधवीयेपि सायाह्नस्यप्रतिषेधेसत्यपराह्णकर्मकालेनपरिशिष्यतइति मदनरत्नेतु सानाग्निकैः स्वस्वान्वाधानदिनेअमावास्याश्राद्धंकर्त्तव्यं तथाचश्रुतिः तस्मात्पितृभ्यःपूर्वेद्युः क्रियतेउत्तरमहर्देवान्यजंतेपितृभ्यएव तद्यज्ञंनिष्कामजपमानः प्रतनुतइति अतएवबौधायनः चतुर्दश्यांचतुर्यामेअमायत्रनदृश्यते श्वोभूतेप्रतिपद्यत्रभूतेकव्यादिकीक्रियेति नदृश्यतइत्यत्र नञअल्पार्थत्वादल्पादृश्यतइत्यर्थः निराग्निकैस्तुयापराह्णव्यापिनीसैवग्राह्या तदाहशातातपः दर्शश्राद्धंतुयत्प्रोक्तंपार्वणंतत्प्रकीर्त्तितं अपराह्णेपितृणांतुतत्रदानंप्रशस्यतइतिहेमाद्रौतु सकलापराह्णव्यापिन्यांसिनीवाल्याममावास्यायांश्राद्धविधानमग्निमद्विषयं अनग्निकानांतुकुतुपकालव्यापिन्यांकुहूनामावास्या।

यांश्राद्धविधानं तथाचहारीतः भूतविद्धाप्यमावास्याप्रतिपन्मिश्रितापिवा पित्र्येकर्मणिविद्वद्भिः कार्य्याकुतपकालिकीतिकुतपलक्षणंतुमत्स्यपुराणे अह्नोमुहूर्त्ताविख्यातादशपंचचसर्वदा अत्राष्टमोमुहूर्त्तोयः सकालःकुतपःस्मृतः अन्यत्रापि मुहूर्त्तात्सप्तमादूर्ध्वंमुहूर्त्तान्नवमादधःसकालःकुतपोज्ञेयःपितॄणांदत्तमक्षयमिति एवंसतिदिनद्वयसंबंधिन्याममावास्यायांसत्यांयाकुतपकालव्यापिनीसैवानाग्निकैर्ग्राह्येत्युक्तंभवतीति निर्णयामृतेतु नोभयत्रापराह्णव्यापिनीतुपरैवकुतपादिकालव्यापिनीग्राह्या तदुक्तंहारीतेन भूतविद्धाप्यमावास्येति अत्रकुतपशब्देननाष्टममुहूर्त्तमात्रमुच्यते किंतुकुतपरौहिणविरंच्यामुहूर्त्ताउच्यंते तदुक्तमापस्तंबेन कुतपाद्यान्मुहूर्त्तांस्त्रीन्यदाचरतिभास्करः सकालःकुतपस्तत्र पितॄणांदत्तमक्षयमिति कालतत्त्वविवेचनेपि उभयत्रापराह्णव्यापित्वाभावेस्वातंत्र्येणकुतपकालव्यापिनीविधीयतइति माधवीयेतु एतदेकोद्दिष्टविषयं तस्यैकोद्दिष्टंतुमध्यान्हइत्यादिवचनेनकुतपकालत्वाभिधानात् यद्वाप्रतिपन्मिश्रितायाअपराह्णव्यापित्वाभावेनिरग्निकैरपिहेयत्वाशंकायांग्राह्यत्वेकुतपव्याप्तिरनुकल्पस्तेनाभिधीयते अपराह्णव्याप्तिःपार्वणेमुख्यःकल्पः कुतपव्याप्तिरनुकल्पः तथाचमुख्यासंभवेनुकल्पस्योपादेयत्वान्निरग्निकैः प्रतिपन्मिश्रितागृहीतुंशक्यत इतिनिर्णयसिंधावप्येवं मयूखेतुनारदवचनम् मध्याह्नेत्रिमुहूर्त्तेतुयदाचरतिभास्करः सकालः कुतपोनामपितॄणांदत्तमक्षयमिति यदपिकुतपाद्यानिति पूर्वोक्तमापस्तंबवचनंतत्कुतपरौहिणयोरष्टमनवममुहूर्त्तयोरारभ्यकुतपेश्राद्धंरौहिणंतुनलंघयेदित्यनेनैकोद्दिष्टारंभसमानाधिकरणतयाविनियोगोविशिष्टदशममुहूर्त्ते पार्वणारंभपरइतिकेचित् युक्तंतु एकोद्दिष्टंतुमध्याह्नइत्यादिनामुहूर्त्तत्रयात्मकमध्याह्नस्यैकोद्दिष्टकालतयाविधानेष्टमनवममुहूर्त्तयोस्तत्कालतयाविनियोगेवशिष्टस्यदशमस्योपयोगाकांक्षायांउत्तरभावितयागौणकालतापरत्वमिति यत्तुमात्स्ये अष्टमभास्करोयस्मान्मंदीभवतिसर्वदा तस्मादनंतफलदमत्रारंभोविशिष्यते ऊर्ध्वंमुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयं

मुहूर्त्तपंचकंह्येतत्स्वधाभवनमिष्यतइति तदेतदेकोद्दिष्टपार्वणकालक्रोडीकाराभिप्रायं पार्वणेत्वेकादशद्वादशमुहूर्त्तयोरेवमुख्यकालत्वंनमुहूर्त्तत्रयस्यतदेवंनिर्णीतायांश्राद्धोपयोगिन्याममावास्यायांयान्युच्चावचानिबहूनिवाक्यानितानिसर्वाणिनिरूपितेष्वमाभेदेष्वन्यतमविषयत्वेनयथायोगंयोजनीयानि तथाहि मध्याह्नात्परतोयत्रचतुर्दश्यनुवर्त्तते भूतविद्धातुसाज्ञेयानसापंचदशीभवेदिति बौधायनवृहस्पतिवचसा मध्याह्नात्परतोपराह्णंव्याप्यचतुर्दश्यनुवर्त्तते मध्याह्नादूर्ध्वंअपराह्णमतिक्रम्यपुरस्तादमावास्याप्रवर्त्तत इति व्याख्येये परेद्युरेवापराह्णव्याप्तौ योजनीयेच यत्तु कात्यायनवचः पिंडान्वाहार्यकमित्यादिपूर्वमलिखितनापिपिंडान्वाहार्यकंपिंडपितृयज्ञोत्तरंक्रियमाणंदर्शश्राद्धंतत्क्षीणेराजनिइंदौकर्त्तव्यंवासरस्यतृतीयांशइतिअनेन किंच अह्नोपराह्णः सायाह्नसहितोभिधीयते तत्रनातिसंध्यासमीपत इतिसायाह्नस्यप्रतिषेधेसत्यपराह्णः कर्मकालत्वेन परिशिष्यते तथाच कर्मकालव्यापिनीग्राह्येति भंग्यंतरेणोक्तंभवति यदपि प्रतिपत्स्वप्यमावास्यापूर्वाह्णव्यापिनीयदि भूतविद्धैवसाकार्यापित्र्येकर्मणिसर्वदेति जावालिवचनं तत्रापिपूर्वाह्णव्यापिनीतिविशेषकथनाद्विशेषविधिनिषेधौशेषनिषेधाभ्यनुज्ञाफलकावितिन्यायेनापराह्णव्यापित्वंनास्तीत्यवगम्यते तादृशीचद्विधापूर्वेद्युरपराह्णव्यापिनीतत्साहिताचेति आद्यपक्षेसर्वैरपिभूतविद्धाकार्या द्वितीयपक्षेसाग्निकैरेवभूतविद्धाकार्येतियच्च पूर्वाह्णेचेदमावास्याअपराह्णेनचेत्तुसा प्रतिपद्यपिकर्त्तव्यंश्राद्धंश्राद्धविदोविदुरितिजावालिवचनं तद्दिवसद्वयेप्यपराह्णव्यापित्वाभावेसति निरग्निकविषयंद्रष्टव्यं यदपि वौधायनेनोक्तं घटिकैकाप्यमावास्याप्रतिपत्सुनचेत्तदा भूतविद्धैवसाग्राह्यादैवेपित्र्येचकर्मणीति तदपि प्रतिपत्सुघटिकैकाकर्मकालसंवंधिनीयदिनस्यात्तदाभूतविद्धैवग्राह्येत्येवंबोध्यं प्रतिपत्स्वप्यमावास्येतिजावालिवचनसमानार्थत्वलाभात् हेमाद्रौ यत्तुवृद्धवसिष्ठवचनम् अरुणोदयवेलायाममावास्यायदाभवेत् सकालः परमोज्ञेयः पितृणांदत्तमक्षयमिति

तत्पितृतर्पणादिविषयं अतएवपद्मपुराणे अमायाप्रतिपद्युक्तासर्वपापहरातिथिः चंद्रसूर्यग्रहैस्तुल्यास्नानदानजपादिषु यदपिप्रचेतोवचनम् घटिकैकाप्यमावास्याभवेद्यदिचतुर्दशी तदाप्यमातद्दैवेपित्र्येकर्मणिचोदितमिति तदपिदेवपितृप्रधानोपवासविषयं यत्तुहारीतवचनं कन्यानकरमीनेषुतुलायांमिथुनेतथा भूतविद्धैवसर्वेषांपूज्याभवतियत्नत इति तद्व्रतविषयं तथाचजाबालिः तुलायांमिथुनेमीनेकन्यायांमकरेतथा भूतविद्धाव्रतेग्राह्या।शेषतुप्रतिपद्युतेति एवमन्यान्यपिवचनानियथायोगंव्यवस्थयाव्याख्येयानीत्यलं अमाश्राद्धातिक्रमेप्रायश्चित्तमुक्तमृग्विधाने न्यूषवाचंजपेन्मंत्रंशतवारंतुतद्दिने अमाश्राद्धंयदानास्तितदासंपूर्णमेतितदिति ॥ इत्यमावास्याश्राद्धकालनिर्णयः ॥ अथात्रप्रसंगात्क्षयाहश्राद्धकालनिर्णयोलिख्यते तत्क्षयाहस्वरूपंस्मृतावुक्तम् मासपक्षतिथिस्पृष्टेयोयस्मिन्म्रियतेहनि प्रत्यब्दंतुयथाभूतंक्षयाहंतस्यतंविदुरितिमासश्चांद्रएवग्राह्यः आब्दिकेपितृकार्येचमासश्चांद्रमसः स्मृत इति व्यासवचनात् यत्तु यस्मिन्राशौगतेसूर्येविपत्तिंयातिमानवः तद्राशावेवकर्त्तव्यंपितृकार्य्यंमृतेहनीतिवचनं तदधिमासमृतविविषयं अधिमासमृतानांतुसौरमासंसमाश्रयेत् सएवदिवसस्तस्यश्राद्धपिंडोदकादिक इतिस्मृत्यंतरवचनात् एतच्चद्विविधं एकोद्दिष्टंपार्वणंच आद्यमाहयमः सपिंडीकरणादूर्ध्वंप्रतिसंवत्सरंसुतैः मातापित्रोःपृथक्कार्यमेकोद्दिष्टंमृतेहनीति अन्यमाहशातातपः सपिंडीकरणंकृत्वाकुर्यात्पार्वणवत्सदा प्रतिसंवत्सरंश्राद्धंछागलेयोदितोविधिः यः सपिंडीकृतंप्रेतंपृथक्पिंडेनियोजयेत् विधिघ्नस्तेनभवतिपितृहाचोपजायतइति अनयोःपक्षयोर्देशाचाराद्व्यवस्थेतिसर्वनिबंधसिद्धांतः तच्चक्षयाहश्राद्धमेकोद्दिष्टंचेत् क्रियतेतदातन्मध्याह्नेकार्यंपार्वणंचेत्तदापराह्णेकार्यं मध्याह्नव्यापिनीयास्यात्सैकोद्दिष्टेतिथिर्भवेत् अपराह्णव्यापिनीयापार्वणेसातिथिर्भवेदितिगौतमवचनात् एकोद्दिष्टस्यमध्याह्नकालत्वं शिवराघवसंवादादपि मध्याह्नव्यापिनीयास्यात् सैकोद्दिष्टेतिथिर्भवेदिति अस्यचस्वरूपमुक्तंव्यासेन

एकमुद्दिश्ययच्छ्राद्धंदैवहीनंविधीयते एकोद्दिष्टंतुतत्प्रोक्तंमध्याह्नेतत्प्रकीर्त्तितमिति मध्याह्नश्चसप्तमाष्टमनवममुहूर्त्तात्मकः तेचमुहूर्त्तागांधर्वकुतपरौहिणसंज्ञकाः अस्यचपूर्वोत्तरभागावेकोद्दिष्टोपक्रमेइच्छयाविकल्पितौव्यासेन कुतपप्रथमेभागएकोद्दिष्टमुपक्रमेत् आवर्त्तनसमीपेवातत्रैवानियतात्मवान् इतिसमाप्तिकालश्चगौत्तमेनोक्तः आरभ्यकुतपाच्छ्राद्धंकुर्यादारौहिणंवुधः विधिज्ञोविधिमास्थायरौहिणंतुनलंघयेदिति कुतपशब्दनिरुक्तिश्चस्कंदवायुपुराणयोः कुंयत्रगोषति गोभिःकार्त्स्न्येनतपातिक्षणे सकालःकुतपोज्ञेयस्तत्रदत्तंमहाफलमिति तदेवंकुतपस्यैकोद्दिष्टश्राद्धकालत्वेनिर्णीतेतत्कालव्यापिनीतत्रातिथिर्ग्राह्या तत्रान्यतरदिनएवतद्व्याप्तौनकोपिसंदेहः उभयत्रसाम्येनतद्व्याप्तौतदव्याप्तौवापूर्वेद्युरेवतदनुष्ठेयं अमावास्याप्रकरणेउदाहृतानांपार्वणश्राद्धप्रकरणेउदाहरिष्यमाणानांचापराह्णसायाह्नास्तमयव्याप्तिविषयाणांवचनानामनुग्रहात् उभयत्रसाम्यनैकदेशव्याप्तौखर्वादिवाक्यान्निर्णयः तच्चसामान्यतिथिनिर्णयप्रस्तावेदर्शितंवैषम्येणैकदेशव्याप्तावधिकव्याप्त्यानिर्णयइति तदेवंसंक्षेपेणैकोद्दिष्टकालोनिर्णीतः अथपार्वणश्राद्धकालोनिर्णीयते तत्रयद्यपिपर्वणिभवंपार्वणमितिव्युत्पत्त्यादर्शश्राद्धंतुयत्प्रोक्तंपार्वणंतत्प्रकीर्तितमिति शातातपवचनेनचत्रिपुरुषोद्देशेनामायांक्रियमाणंश्राद्धमेवपार्वणशब्देनाभिधातुंशक्यमथापितद्विकृतरूपतयात्रीनुद्दिश्यतुयत्तद्धिपार्वणंमुनयोविदुरितिकएववचनेनात्रिपुरुषोद्देशेनकर्त्तव्यान्दिकादेरपिपार्वणत्वंव्यवहर्त्तुंशक्यं तच्च पार्वणश्राद्धमपराह्णव्यापिन्यांकर्त्तव्यं अपराह्णव्यापिनीयायापार्वणेसातिथिःस्मृता पूर्वस्यांनिर्वपेत्पिंडमित्यादिऋषिभाषितमितिवचनात् दर्शंचपौर्णमासंचापितुःसांवत्सरंदिने पूर्वविद्धमकुर्वाणोनरकंप्रतिपद्यतइतिनारदीयपुराणाच्च अन्यत्रापि अपराह्णःपितृणांतुयापराह्णानुयायिनी साकार्यापितृकृत्येपुनपूर्वाह्णानुयायिनीति ननु उदितेदैवतंभानौपित्र्यंचास्तमितेरवौ द्विमुहूर्त्तास्त्रिमुहूर्त्तश्चेत् सकालःपुण्यदायकः दिनांतेपंचनाड्यस्तुपुण्याःप्रोक्तामनीषिभिः उदयेचतथापित्र्येदैवेचैवचकर्मणीत्यादिवचनैःसाया

ह्णस्यापिपितृकालत्वमुक्तं तत्कथमपराह्णस्यैवपार्वणश्राद्धकालत्वमुच्यतइतिचेन्मैवंतस्यप्रतिषिद्धत्वात् तथाहिस्कंदपुराणे उपसंध्यंनकुर्वीतपितृपूजांकथंचन सकालआसुरःप्रोक्तःश्राद्धंतत्रविवर्जयेदिति मत्स्यपुराणे सायाह्नस्त्रिमुहूर्त्तःस्याच्छ्राद्धंतत्रनकारयेत् राक्षसीनामसावेलागर्हितासर्वकर्मस्विति वौधयनहारीतावप्येवं तर्हिसायाह्नविधायकपूर्वोक्तवचनानांकोविषयइतिचेत्शृणु श्राद्धांगत्वेन निषिद्धस्य सायाह्नगौणकालतयाभ्यनुज्ञानं अतएवव्यासःस्वकालातिक्रमेकुर्याद्रात्रेः पूर्वतयाविधिरिति व्याघ्रपादोपि विधिज्ञःश्रद्धयोपेतःसम्यक्पात्रनियोजकः रात्रेरन्यत्रकुर्वाणःश्रेयःप्राप्नोत्यनुत्तमं पृथक्चंद्रोदयेतु पूर्वोक्तवचनेषुयत्रसायाह्नसमययोगिनी तिथिरुक्तातत्रापराह्णव्यापिनीज्ञेया सायाह्नस्त्रिमुहूर्त्तःस्यादितिमत्स्यादौ सायाह्ननिषेधात् यत्रत्रिमुहूर्त्तादिग्रहणंतच्छ्राद्धाहापराह्णरूपत्रिमुहूर्त्तपरमिति कालतत्त्वविवेचने यच्च वायुपुराणवचनं शुक्लपक्षस्यपूर्वाह्णेश्राद्धंकुर्याद्विचक्षणः कृष्णपक्षेपराह्णेतुरौहिणंतुनलंघयेत् इति तद्द्वेधाविभक्तपूर्वाह्णांतर्गतस्यकुतपपूर्वभागस्य तादृशापराह्णांतर्गतस्यच तदुत्तरभागस्य पक्षभेदेनोपक्रमकत्वव्यवस्थापनपरं एवं व्यवस्थायां न कस्यचिद्बाधोपेक्षितविधानंच लभ्यते विष्णुनाऽपि पूर्वाह्णापराह्णयोः पक्षभेदेनोपक्रमोदर्शितः शुक्लपक्षस्यपूर्वाह्णेकृष्णपक्षापराह्णके विप्रान्स्नातांस्तुविधिवन्नत्वातानुपवेशयेदिति हेमाद्रौतुवायुपुराणवचनस्यैकोद्दिष्टविषयत्वमप्युक्तं एकोद्दिष्टमपिपक्षभेदेनकुतपपूर्वोत्तरभागयोरुपक्रमणीयमिति ननुसायाह्नेपियदाकथंचित्प्रत्यूहस्तदाश्राद्धस्यकिंलोपएवकिंवारात्रावपिकर्त्तुंशक्यते अत्रमाधवः नतावद्रात्रौ सर्वात्मनाश्राद्धस्यनिषेधोवक्तुंशक्यतेआपस्तंवेनरात्रौश्राद्धसमाप्त्यभ्युपगमात् नचनक्तंश्राद्धंकुर्वीतारब्धेचभोजनसमापनमिति अन्नभोजनग्रहणंपिंडदानोपलक्षणं नन्वेवमपिरात्रौसमाप्तिरेवाभ्यनुज्ञायते नत्वारंभइतिचेत् मैवं आरंभस्यापिसमाप्त्या उपलक्षणीयत्वात् आब्दिकश्राद्धपरित्यागेप्रत्यवायबाहुल्यस्मरणात् तानिचप्रत्यवायवोध

कानिवचनान्यग्रेवक्ष्यंते कालतत्त्वविवेचनेतुप्रारब्धेश्राद्धेदैवमानुषप्रतिबंधादसमाप्तेयदिरविरस्तमियात्तदा प्रारब्धत्वाद्रात्रावपितत्समाप्तेःप्रसक्तिः नचनक्तंश्राद्धंकुर्वीतेतिनिषेधः तथाचअसमाप्तिकृतमेवस्थापयित्वा परेद्युः कृत्वा तत्समापनीयं यजमानेनापितदुत्तरमेवभोक्तव्यं नतुपूर्वदिन इतिश्रुतमेवोत्तरसूत्रं प्रारब्धेचाभोजनमसमापनादितिहरदत्तः प्रारंभश्चपूर्वेद्युर्निवेदनमिति नन्वेवंसतिरात्रेरन्यत्रकुर्वाणःश्रेयः प्राप्नोत्यनुत्तममितिस्मरणात् अपराह्णवन्मुख्यत्वेनसायाह्नवद्गौणत्वेनवाप्रातः संगवावपि कालौप्रसज्येयातांनायंदोषः शिवराघवसंवादेप्रातःकालस्य निषिद्धत्वात् प्रातः कालेषुचश्राद्धंनकुर्वीतद्विजोत्तमः नैमित्तिकेषुश्राद्धेषुनकालनियमः स्मृतइति यद्यपिसंगवोनसाक्षान्निषिद्धस्तथापिकुतपमुहूर्त्तेमुख्योपक्रमस्यगांधर्वमुहूर्त्तेगौणोपक्रमस्याभिधानेसतिअर्थान्निषेधः परिशिष्यते उपक्रमद्वयं शिवराघवसंवादेदर्शितं ग्रहादिव्यतिरिक्तस्यप्रक्रमेकुतपःस्मृतःकुतपादथगांधर्वादासनंकुतपेभवेदिति ग्रहग्रहणं आदिशब्देनसंक्रांत्यादिनिमित्तमुच्यते तस्यनिमित्ताधीनत्वात्कुतपोनियंतुंनशक्यते इतरस्यचसांवत्सरिकादेरस्ति कुतपनियमः कदाचित्कार्यवशात् श्राद्धस्य सहसाकरणीयत्वेसतिकुतपादर्वाचीनोगांधर्वोप्युपक्रमः कालतयाभ्यनुज्ञायते कुतपस्यमुख्यत्वमनेकवचनविहितत्वादवगंतव्यम् तदेवंपार्वणश्राद्धस्यापराह्णःकुतपः प्रारंभकालइतितदुभयव्यापिनीतिथिर्ग्राह्या यदातुकुतपापराह्णोभयव्यापिनीनसंभवति तदा केवलापराह्णव्यापिन्येवतिथिर्गृहीतव्या पित्र्येचापराह्णिकीतिभविष्यत्पुराणाभिधानात् यत्तु मध्यान्हव्यापिनीयास्यात्तिथिःपूर्वापरापि वा तत्रकर्माणिकुर्वीतह्रासवृद्धिर्नकारणमितिवचनं तदेकोद्दिष्टंतुमध्यान्हइति वचनांतरसंवादेनैकोद्दिष्टविषयं कालतत्त्वविवेचनेऽपि मुहूर्त्तपंचकंसार्द्धमुहूर्त्तचतुष्टयंवापार्वणप्रयोगकालः यदिच तावत्कालव्यापिनीलभ्यतेतदाउदारः कल्पः यदाच तादृशीनलभ्यतेतदाप्रधानप्रयोगकालत्रिमुहूर्त्तात्मकापराह्णव्यापिनीग्राह्येति तत्रयदैकस्मिन्नेव

दिनेकार्त्स्न्येनैकदेशेनवोक्तकालव्यापिनी सैव दिनद्वयेवैषम्येण तदेकदेशव्याप्तौतदाधिक्यवतीग्राह्या तदाहमरीचिः द्व्यपराह्णव्यापिनीचेदाब्दिकस्ययदातिथिः महतीयत्रतांवृद्धांप्रशंसंतिमहर्षयइतिमदनरत्ने यदिदिनद्वयेऽपितुल्यापराह्णैकदेशव्याप्तिस्तदा।तिथिक्षयेपूर्वाकर्त्तव्यावृद्धौतूत्तरा तथाचक्षयाहप्रसंगेवौधायनः अपराह्णद्वयव्यापिन्यतीतस्ययदातिथिः क्षयेपूर्वानुकर्त्तव्यावृद्धौकार्यातथोत्तरेति तिथिसाम्येतुपूर्वैवग्राह्या दर्शंचपौर्णमासंचेति पूर्वोदाहृतनारदीयपुराणवचनात् यच्चखर्वोदर्पइतिवचनं तत्क्षयाहव्यतिरिक्तश्राद्धविषयं द्विरन्हव्यापिनीचेत्स्यादाब्दिकस्य यदातिथिः पूर्वविद्धाप्रकर्त्तव्यात्रिमुहूर्त्ताभवेद्यदीति स्मृत्यंतरवचनविरोधात् कालतत्त्वविवेचनेतु दिनद्वयेसाम्येनतदेकदेशव्याप्तिस्तस्याएवतिथेः क्षयेनसाम्येनवृद्ध्याचभवतितत्रखर्वोदर्पस्तथाहिंसेतिवचनात् निर्णयःखर्वःसाम्यवांस्तिथिः दर्पोवृद्धिमान् हिंसाक्षयस्तद्वानित्यादिमुख्यवचनस्यापिसांप्रतिकलक्षणयाप्रयोगः अतएवलिंगत्यागोगंगाशब्दवत् तिथिलक्षणंतिथिस्वरूपंभावपरत्वेनखर्वादिशब्दानांव्याख्यानपरंपूर्वकालिकीत्यनेनानन्वयादुपेक्षितं अत्रखर्वादीनांपरपूर्वविभागेनग्राह्यत्वाभिधानात्स्पष्टमेवखर्वत्वादीनांग्राह्यातिथिगतत्वं अपराह्णद्वयव्यापिन्यतीतस्ययदातिथिरितिपूर्वोक्तवौधायनवचनंतु दिनद्वयेसंपूर्णकर्मकालव्याप्तिविषयमेव द्व्यहेतुव्यापिनीचेत्स्यान्मृताहस्यतुयातिथिःपूर्वस्यांनिर्वपेत्पिंडमित्यांगिरसभाषितमिति मनुवचनमपिकार्त्स्न्येन दिनद्वयेकर्मकालव्याप्तिविषयं अत्रचबौधायनवचनेक्षयवृद्धिसाम्यानिदिनद्वयसंपूर्णकर्मकालव्याप्तेर्वृद्ध्येकनियतत्वात्तत्रतिथौचसंभवेनग्राह्यातिथ्युत्तरतिथिगतानिग्राह्याणि दर्शंचपौर्णमासंचपितुःसांवत्सरंदिनं पूर्वविद्धमकुर्वाणोनरकंप्रतिपद्यतइति नारदीयपुराणमपिपूर्ववचनसंवादि अतएवतत्रतत्रोक्तम् यत्कालव्याप्त्यनिर्णयं तत्रपूर्वोत्तराविद्धाग्राह्यत्ववचनानिप्रवर्त्तंतइति यत्रमूलंतिथिःप्रोक्ताशास्त्रज्ञैः कालकोविदैः यस्यामस्तंरविर्यातिपितरस्तामुपासते पराह्णव्यापिनीयातुपार्वणेसा

उदाहृतेत्यादीनिवचनान्यप्यत्रोपोहनीयानि यदातुदिनद्वयेप्यपराह्णसंबंधाभावस्तदापूर्वैवग्राह्या तदाहमनुः नद्वय
ह्व्यापिनीचेत्स्यान्मृताहस्यचयातिथिः पूर्वविद्धैवकर्त्तव्यात्रिमुहूर्त्तापियाभवेदिति यद्यापव्याप्त्यभावएकदेशसत्त्वेपिसं
भवतितथापित्रिमुहूर्त्तापियाभवेदिति वाक्यशेषात्स्पर्शाभावएवात्रह्रासः श्राद्धंत्वेकभक्तादिवत्स्वकालएव तन्न तत्तिथ्य
भावेपिकर्त्तव्यं तिथ्यादौचभवेद्यावान्ह्रासोवृद्धिःपरेहनि तावान्ग्राह्यःसपूर्वेद्युरदृष्टोपिस्वकर्मणीतिवचनात्तत्तिथिक्षय
स्यपूर्वतिथौप्रक्षेपेणयांतिथिंसमनुप्राप्यअस्तंयातीतिसाकल्यवचनेनच तत्र तत्तिथेः सत्त्वात् तिथ्यादावित्यादिपदेन
नक्षत्रयोगोगद्यते तदेतत्क्षयाहश्राद्धमवश्यंकर्त्तव्यमित्युक्तं ब्रह्मपुराणे श्राद्धप्रकरणे प्रतिसंवत्सरंकार्यंमातापित्रो
र्मृतेहनि पितृव्यस्याप्यपुत्रस्यभ्रातुर्ज्येष्ठस्यचैवहि पितृव्यादिग्रहणं मातामहादीनामप्युपलक्षणं भविष्यत्पुरा
णे सर्वेषामेवश्राद्धानांश्रेष्ठंसांवत्सरंमतं क्रियतेतत्खगश्रेष्ठमृतेहनिबुधैःसदा मृतेऽहनिपितुर्यस्तुनकुर्याच्छ्राद्धमा
दरात् मातुश्चखगशार्दूलवत्सरांतेमृतेऽहनि नाहंतस्यखगश्रेष्ठपूजांगृह्णामिनोहरिः नब्रह्मानचवैरुद्रोनचा
न्येदेवतागणाः तस्माद्यत्नेनकर्त्तव्यंवर्षेवर्षेमृतेहनि प्रतिवर्षंखगश्रेष्ठभोजकेनविशेषतः भोजकोयस्तुवैश्राद्धं
नकरोतिखगाधिप मातापितृभ्यांसततंवर्षेवर्षेमृतेऽहनि सयातिनरकंघोरंतामिस्रंनामनामतः ततोभवतिदुष्टा
त्मानगरेशूकरःखगेति भोजकोभोजयितासंपद्युक्तइत्यर्थः एतत्क्षयाहश्राद्धं सूर्यग्रहणादिनेभोक्तुर्वाब्राह्मणस्यालाभे
तद्दिन एवामान्नादिनाकर्त्तव्यं तदुक्तंगोभिलेन दर्शेरविग्रहेपित्रोः प्रत्याब्दिकमुपस्थितं अन्नेनासंभवेहेम्ना
कुर्यादामेनवासुत इति दर्शेपित्रोःसुप्तरवीतिचसर्वमविवक्षितमुपलक्षणं आमपदेनच वितुषतंडुलादिगृह्यतेनतुसतुषं
सस्यंक्षेत्रगतंप्राहुः सतुषंधान्यमुच्यते आमंतुवितुषंप्रोक्तंस्विन्नमन्नमुदाहृतमितिवसिष्ठवचनात् प्रत्याब्दिकग्र
हणंच अन्नेनैवाब्दिकंकुर्यात् हेम्नावामेननक्वचिदिति वार्षिकेसर्वथासाधनत्वं ननिषिद्धस्यामादेः प्रतिप्रसवार्थं

128

अ०र०
॥६३॥

एतच्चमासिकस्याप्युपलक्षणं यानितु ग्रहणात्तुद्वितीयेह्निरजोदोषात्तुपंचमे तथाग्रस्तोदयेचंद्रेप्रत्यब्दंसमुपस्थितं तद्दिनेचोपवासःस्यात्प्रत्यब्दंतुपरेहनि तथा ग्रस्तावेवास्तमानंतुरवींदूप्राप्नुतोयदि प्रत्यब्दंतुतदाकार्यंपरेहन्येवसर्वदा चंद्रसूर्योपरागेतुतथाश्राद्धंपरेहनि इत्यादीनि वचनानि तानिमहानिबंधेषुक्वाप्यनुपलंभात् पूर्वोक्तवचनजातविरोधाच्च निर्मूलानि अमावास्यादिश्राद्धंतुतत्रामेनैवभवति श्राद्धविघ्नेद्विजातीनामामश्राद्धंप्रकीर्त्तितं अमावास्यादिनियतं मासंसंवत्सरादृतइतिहारीतवचनात् श्राद्धस्यपाकश्राद्धस्यविघ्नअसंभवेवामाससंवत्सरशब्दाभ्यांमासिकसांवत्सरिकोपादानं सूतकेनाब्दिके श्राद्धेंतरिते सूतकानंतरदिनेतत्कुर्यात् तदाहऋष्यशृंगः आब्दिकेचैवसंप्राप्तेअशौचंजायते यदि अशौचेचव्यतिक्रांतेतत्रश्राद्धंविधीयतइति अशौचानंतरदिनेपिकरणासंभवे अमावास्यायांकुर्य्यात् तदाह गोभिलः दैवात्प्रत्याब्दिकेश्राद्धेत्वंतरामृतसूतके अशौचानंतरंकुर्य्यात्तन्मासेंदुक्षयेऽपिवेति मरीचिनैकादश्यप्युक्ता श्राद्धविघ्नेसमुत्पन्नेप्यविज्ञातेमृतेहनि एकादश्यांतुकर्त्तव्यंकृष्णपक्षेविशेषतइति तत्रविघ्नपदंसूतकात्तदितरविघ्नसामान्यपरं अशौचेतरविघ्नेएतादेति माधवीये पृथ्वीचंद्रोदयेच केचित्त्वशौचानंतरंपुनः क्षयाहतिथावेवकार्य्यमित्याहुः यथा तदहश्चेत्प्रमुच्येतकेनचित्सूतकादिना सूतकानंतरंकुर्य्यात्पुनस्तदहरेवचेति अत्रसूतकानंतरमितिसूतकपदंविघ्ननिमित्तस्योपलक्षणं तदहइत्युत्तरमासगतेतस्मिन्नेवदिनइत्यर्थः अत्राशौचांत्यआद्यःपक्षः मुख्यकालप्रत्यासत्तेः ततोदर्शः ततःकृष्णैकादशी ततःशुक्लाततउत्तरमासे तदहरितिहेमाद्रिरितिमयूखे एतन्मासिकविषयमित्यन्ये यच्च देवलवचनं एकोद्दिष्टेतुसंप्राप्तेयदिविघ्नःप्रजायते मासेन्यस्मिंस्तिथौतस्मिञ्छ्राद्धंकुर्यात्प्रयत्नतइति तदपिमासिकपरमितिमदनरत्नेहेमाद्रौचेति निर्णयसिंधौ पत्न्यांरजस्वलायांतुक्षयाहश्राद्धंपक्वान्नेनैवकर्त्तव्यं पुष्पवत्स्वपिदारेषुविदेशस्थोप्यनग्निकः अन्नेनैवाब्दिकंकुर्याद्धेम्नावामेननक्वचिदितिलौगाक्षिवचनात् अत्रआमस्यपृथगुपादानादन्नेनैवे

त्यत्रान्नशब्दःसिद्धांतपरः तेनपत्न्यांरजस्वलायामपि तदहरेवपक्केनैवसर्वस्यापिसांवत्सरिकश्राद्धानुष्ठानमुचितं मरीचिरपि अनाग्निकःप्रवासीचयस्यभार्यारजस्वला आमश्राद्धंद्विजःकुर्यान्नतत्कुर्यान्मृतेहनीति कार्ष्णाजिनिः आपन्नोप्याब्दिकंनैवकुर्यादामेनकुत्रचित् अन्नेनतदमायांतुकृष्णेवाहरिवासरे रजस्वलायांभार्यायांक्षयाहंयःपरित्यजेत् सवैनरकमाप्नोतियावदाभूतसंप्लवं देवयाज्ञिकनिबंधेपि भर्त्तुःश्राद्धंपंचमेह्निकुर्य्याद्भार्य्यारजस्वला पुत्रःपित्रोःप्रकुर्वीत मृताहन्यशुचिर्यतः कालादर्शेऽपि विदेशकोवाविगताग्निकोवारजस्वलायामपिधर्मपत्न्यां श्राद्धमृताहेविदधीतपाकैर्नामेनहेम्नानतुपंचमेह्निएवंमासिकेपि यत्तु मृताहनितुसंप्राप्तेयस्यभार्यारजस्वला श्राद्धंतदानकर्त्तव्यंकर्त्तव्यंपंचमेहनीतिहेमाद्रिमाधवादिलिखितवचनं तद्यस्यमृतस्यश्राद्धकर्त्रीभार्यारजस्वलेतिव्याख्येयं नतुयस्यश्राद्धकर्तुर्भार्यारजस्वलेति पूर्वोक्तवचनजातविरोधात् अतएवश्लोकेगौतमः अपुत्रातुयदाभार्यासंप्राप्तेभर्त्तुराब्दिके रजस्वलाभवेत्सातुकुर्य्यात्तत्पंचमेऽहनीति नन्वशुचित्वादेवाधिकारप्रतिबंधवचनंव्यर्थमितिचेत्सत्यं गर्भिणीसूतिकादिश्वकुमारीवाथरोहिणी यदाशुद्धातदान्येनकारयेत्प्रयतास्वयमिति हेमाद्रिधृतभविष्यवचनेनाधिकारप्रसक्तेःसत्त्वात् यत्तु आपद्यनग्नौतीर्थेचप्रवासेपुत्रजन्मनि आमश्राद्धंप्रकुर्वीतभार्यारजसिसंक्रम इतिकात्यायनवचनं तन्मासिकाब्दिकव्यतिरिक्तविषयं श्राद्धविघ्नेद्विजातीनामिति पूर्वोक्तहारीतवचनात् हेमाद्रिस्तु पाणिग्रहणाद्धिसहत्वंकर्मस्वितिवचनेनगृहस्थस्यश्राद्धेपिभार्ययासहैवाधिकारात्तस्याश्चरजस्वलादशायामशुचित्वेननाधिकारेव्यासज्यवृत्तेर्भर्तृगतस्याप्यधिकारस्यविघातात्तस्यास्तद्दशापगमएवाधिकारः एवमेवैकभार्यस्यश्राद्धमुचितमिति यस्यश्राद्धकर्त्तुरित्यादिरेवमृताहनीतिवचनार्थः पुष्पवत्यपीतिवचनंतु सहाधिकृतभार्यांतरसद्भावविषयमित्याह दीपिकायामपि भार्यर्त्तौसतिपंचमेचादिवसेस्याद्वार्षिकंमासिकं पक्कान्नैर्बहुभार्यकस्त्वधिकृतेपत्न्यंतरेतिष्ठति कुर्यात्तद्विक्षयेस्वमु

स्यादिवसइति पाणिग्रहणाद्धीतिवचनस्यहि शब्दस्वरसादनुवादरूपत्वेनन्यायमूलकत्वादुभयसंयोगोत्पन्नाग्निसाध्यश्रौतस्मार्त्तकर्मविषयत्वेनानुभयसाध्यश्राद्धविषयत्वे प्रमाणाभावाच्चिंत्यमेतदिति कालतत्त्वविवेचने निर्णयसिंधुमयूखादावप्येवं परमार्थतस्तु मीमांसकधुरीणस्यहेमाद्रेर्मतंयुक्तमेव यद्देवेभ्योयच्चपित्रादिकेभ्यःकुर्याद्भर्त्ताभ्यर्चनंसत्क्रियां व तस्यार्द्धंवैसाफलंनान्यचित्तानारीभुंक्तेभर्तृशुश्रूषयैवेति स्कांदवचने अनग्निसाध्यदैवपित्र्याभ्यर्चनसत्क्रियादिसकलकर्मजन्यफलार्धभागित्वस्यप्रतीतेस्तदंतर्गतश्राद्धेपिसहाधिकाराविघातात् श्राद्धेपिपितृतृप्तिप्रत्यवायपरिवारातिरिक्तायुरादिफलानांश्रवणाच्च प्रजासहत्वकर्मभ्यइतिश्रुतेः पूर्वोक्तस्कांदवचनानुरोधेनाग्निसाध्यकर्मविषयत्वेनसंकोचेप्रमाणाभावाच्च आपस्तंबीयधर्मसूत्रमपि ब्राह्मे विवाहेबंधुशीलश्रुतारोग्याणिबध्वाप्रजासहत्वकर्मभ्यः प्रतिपादयेच्छक्तिविषयेणालंकृत्येति व्याख्यातंचैतद्धरदत्तेन प्रजार्थंसहत्वकर्मार्थंचेति किंच मृतेहनीतिवचनस्यापुत्रा तुयदाभार्येतिगौत्तमीयवचनसमानार्थतयाव्याख्याने अधिकारिण्याः स्त्रियाःशुद्धौ तदंतेश्राद्धानुष्ठानस्यजननमरणाशौचवन्न्यायादेवसिद्धेस्तद्वचनवैयर्थ्यापत्तेः नचगर्भिणीति पूर्वोक्तवचनेनाधिकारप्रसक्तिः एतद्वचनस्यारब्धव्रतादिविषयत्वेनमृताहश्राद्धविषयत्वाभावात् तस्मान्मृतेहनीतिवचनस्यरजोदर्शनकालेश्राद्धाननुष्ठानबोधकस्यपुष्पवत्स्वपीतिवचनस्यचतदनुष्ठानबोधकस्यपरस्परंविरोधेएकभार्येणतस्यांरजस्वलायांश्राद्धंनकर्त्तव्यं अनेकभार्येणतुज्येष्ठायांरजस्वलायांतस्यांशुद्धायांतुकनिष्ठयांतादृश्यामपिकर्त्तव्यंज्येष्ठयानाविनेतरेतिवचनेनज्येष्ठायाएवसहाधिकारप्रतिपादनादितिसर्वंसुस्थं माधवस्तुमतद्वयमिदंलिखितवान् नतुकिंचिन्निर्णीतवान् इतिदर्शेश्राद्धंतुभार्यारजसि आमेनकार्यं श्राद्धविघ्नेद्विजातीनामितिहेमाद्रौहारीतोक्तेःअन्यत्रापि आर्त्तवेदेशकालानांविप्लवेसमुपस्थिते आमश्राद्धंद्विजैःकार्यंशूद्रःकुर्यात्सदैवहीति दीपिकायामपि दर्शेतुभार्यार्त्तवेप्यामश्राद्धविधिरित्यादिमयूखे श्राद्ध

विघ्नोऽत्रपत्नीरजोदर्शनं अपत्नीकःप्रवासीचयस्यभार्यारजस्वला सिद्धान्नेननकुर्वीतआमंतस्यविधीयतइत्युशनोवा
क्यात् आमाभावेतुव्यासः द्रव्याभावेद्विजाभावेप्रवासेपुत्रजन्मनि हेमश्राद्धंप्रकुर्वीतयस्यभार्यारजस्वलेति निर्णयसिं
धौतुइदंचामहेमविधानंपाकासंभवे पाकाभावेद्विजातीनामामश्राद्धंविधीयतइतिसुमंतूक्तेः मासिकानिसपिंडंचअनावा
स्यातथाब्दिकं आमान्नेनतुकर्त्तव्यंयस्यभार्यारजस्वलेति कालिकावचनाच्च कालादर्शेतु स्त्रियारजोदर्शनेदर्शश्रा
द्धंपंचमेहनीतिपक्षांतरमुक्तं पारिजातेप्येवं एवंमहालययुगादावपीति यस्यतु क्षयाहोनज्ञायते मासस्तु ज्ञाय
तेतस्यतन्मासस्यामावास्यायामेकादश्यांवा क्षयाहश्राद्धंकर्त्तव्यं तदाहवृहस्पतिः नज्ञायतेमृताहश्चेत्प्रोषितेसंस्थि
तेसति मासश्चेत्प्रतिविज्ञातस्तद्दर्शेस्यादथाब्दिकमिति मदनरत्नेतु मृताहनीतिपाठः मृताहेयत्कर्त्तव्यंतद्दर्शेक
र्त्तव्यमित्यर्थः प्रोषितइति मृततिथ्यज्ञानकारणोपलक्षणं अतएवसामान्यतोभविष्यत्पुराणं मृताहंयोनजानाति
मानवोविनतात्मज तेनकार्यममावास्याश्राद्धंसांवत्सरंनृपेति श्राद्धविघ्नसमुत्पन्नइति पूर्वोक्तमरीचिवचनमपि यद्य
पि चात्रकृष्णपक्षेविशेषतइत्युक्त्याशुक्लैकादश्यनुकल्पस्तथापि शुक्लपक्षमृतइतिज्ञानेसैवग्राह्या पक्षस्याप्यज्ञाने
तुसानुकल्पइति द्रष्टव्यं मरणदिनज्ञाने मासाज्ञाने मार्गशीर्षभाद्रमाघानामन्यतमेमासे तद्दिने कर्त्तव्यं तथाचभ
विष्यपुराणे ॥ दिनमेवविजानातिमासंनैवतुयोनरः मार्गशीर्षेथवाभाद्रेमाघेवाथसमाचरेदिति अत्रापिशुक्लपक्षज्ञा
नेतद्गतातिथिः नोचेत्कृष्णपक्षगतैवतस्याः पित्र्येप्रशस्तत्वात् निर्णयामृतेतु आषाढोप्युक्तःयदामासोनविज्ञातो
विज्ञातंदिनमेवतु तदात्वाषाढकेमासिमाघेवातद्दिनंभवेदिति वृहस्पत्युक्तेः कालादर्शेपि मासाज्ञाने कार्यमाषा
ढमाघयोरित्युक्तं यदोभयमपि न ज्ञायते तदा प्रवासमासदिवसोग्राह्यः तदाह वृहस्पतिः दिनमासावविज्ञा
तौमरणस्ययदापुनः प्रस्थानमासदिवसौग्राह्यौपूर्वोक्तयादिशेत्यस्यायमर्थः प्रस्थानस्यापिमासाज्ञानेचमार्ग

शीर्षादिषु तस्यां तिथौ तिथ्यज्ञानेतु मार्गमायांश्राद्धंकार्यंतदभावेप्रस्थानतिथाविति शुक्लपक्षेतदज्ञानयोः पूर्ववत् यदामरणप्रस्थानमासादिनज्ञातंतदामरणवार्ताश्रवणदिने तत्राप्यसंभवेवार्ताश्रवणमामावास्यायांकुर्यात् तदुक्तंप्रचेतसा अपरिज्ञातेमावास्यायांश्रवणादिनेवेति भविष्यपुराणेपि मृतवार्ताश्रुतेर्ग्राह्यौतौपूर्वोक्तक्रमेणत्विति पूर्वोक्तक्रमेणत्वित्यस्यायमर्थः मरणवार्ताश्रवणसंबंधिमासमात्रस्मरणे तदमावास्यादिषु तद्दिनमात्रस्मरणे मार्गशीर्षादिसंबंधिनितद्दिनेशुक्लपक्षादि तदज्ञानयोः पूर्ववत् यस्यतुमरणंतत् श्रवणप्रस्थानानां सर्वेषामपि दिनमासयोरज्ञाने तदाब्दिकविषयेप्रभासखंडे मृतस्याहर्नजानातिमासंवापिकथंचन तेनकार्यममावास्यांश्राद्धंमाघेथमार्गकइति कथंचनेति मरणादिरूपेणकेनापिचिह्नेनेत्यर्थः यस्यत्वज्ञातदेशगतस्यजीवनमरणाद्यन्यतरानिर्द्धारणात्पंचदशवर्षाणि प्रतीक्ष्यपश्चात्प्रतिकृतिदाहाद्यौर्ध्वदैहिकंक्रियते तस्यदाहकालतिथावेवाब्दिकंकार्यं तथाचजातूकर्ण्यः पितरिप्रोषितेयस्यनवार्तानैवचागतिः ऊर्ध्वंपंचदशाद्वर्षात्कृत्वातत्प्रतिरूपकं कुर्यात्तस्यचसंस्कारंयथोक्तविधिनाततः तदानीमेवसर्वाणिप्रेतकर्माणिसंचरेदिति पितरीत्येतत्प्रोषितमात्रस्योपलक्षणमितिमदनरत्ने तदानीमिवतदानींमृतस्येवत्रनेनसर्वत्रदाहादिनस्यावधित्वं भविष्योत्तरेतु तदादीन्येवेतिपाठः कालतत्त्वविवेचनेतु पंचदशवर्षप्रतीक्षापितृविषयापितरीतिवचनात् यत्तु यस्यनश्रूयतेवार्तायावत्द्वादशवत्सरं कुशपुत्रकदाहेनतस्यस्यादवधारणमिति बृहस्पतिवचनं प्रोषितस्ययदाकालोगतश्चेत्द्वादशाब्दिकः प्राप्तेत्रयोदशेवर्षेप्रेतकार्याणिकारयेत् जीवन्यदिसआगच्छेत् घृतकुंभेनियोजयेत् उद्धृत्यस्नापयित्वास्यजातकर्मादिकारयेत् द्वादशाहंव्रतंकुर्यात्त्रिरात्रमथचास्यतु स्नात्वोद्वहेततांभार्यामन्यांवातदभावतः अग्नीनाधायविधिवद्व्रात्यस्तोमेनवायजेत् अथैंद्राग्नेनपशुनागिरिगत्वाचतत्रतु इष्टिमायुष्मतींकुर्यादीप्सितांश्चक्रतूंस्ततइति वृद्धमनुवचने तत्पित्रातिरिक्तविषयं जीवान्नित्यादितुपितर्यपिभवत्येवव्रतचर्याब्र

ह्मचर्यरूपापंचाशद्वर्षन्यूनवयस्कस्यपंचदशवर्षप्रतीक्षातदधिकवयस्कस्यद्वादशवर्षाणीतिकेचित् दर्शेचवार्षिकादिश्राद्धप्राप्तौकालादर्शेविशेषउक्तः दर्शस्यचोदकुंभस्यदर्शमासिकयोरपि नित्यस्यचाब्दिकस्यापिदर्शकाब्दिकयोरपि इत्युक्त्वा संपातेदेवताभेदात् श्राद्धयुग्मंसमाचरेत् निमित्तनियातिश्चात्रपूर्वानुष्ठानकारणमिति अत्रक्रमोनिर्णयदीपउक्तः नष्टचंद्रेयदाकालेक्षयाहदिवसोभवेत् वैश्वदेवंक्षयश्राद्धंकुर्यात्प्राक्दर्शकर्मणः वैश्वदेवामतिक्षयाहश्राद्धविशेषणंतेनपार्वणमितिलभ्यते एतच्चोपरंजकंनतुव्यावर्त्तकं अमावास्यायांक्रियमाणस्याब्दिकश्राद्धस्यनियतपार्वणरूपात्वात् तदुक्तंशंखेन अमावास्याक्षयोयस्यप्रेतपक्षोथवापुनः पार्वणंतस्यकर्तव्यंनैकोद्दिष्टंकदाचनेति आमश्राद्धंचानुपनीतोपिकुर्यात् तदुक्तंश्राद्धशूलपाणौमात्स्ये अमावास्याष्टकाकृष्णपक्षपंचदशीषुचेत्युपक्रम्य एतच्चानुपनीतोपि कुर्यात्सर्वेषुपर्वसु श्राद्धंसाधारणंनामसर्वकामफलप्रदं भार्याविरहितोप्येतत्प्रवासस्थोपिनित्यशः शूद्रोप्यमंत्रवत्कुर्यादनेनविधिनाबुधइति स्मृत्यर्थसारेतु अनुपनीतस्त्रीशूद्राश्चश्राद्धंऋत्विजाकारयेयुः स्वयंवामंत्रवर्जंकुर्युरिति आब्दिकादिदिनेद्रव्याद्यभावात् श्राद्धकरणासंभवेपिंडदानमात्रंकुर्यात् तस्याप्यसंभवेप्युपवासंकुर्यात् तदुक्तंपिंडमात्रंप्रदातव्यमभावेद्रव्यविप्रयोः श्राद्धाहनितुसंप्राप्तेभवेन्निरशनोपिवेति पात्राभावेतुविशेषःस्मृत्यंतरेप्रोक्तः पात्राभावेपरंकृत्वापितृयज्ञविधिंनरः निर्दिश्याप्यन्नमुद्धृत्ययत्रपात्रंनभोजयेदिति पितृयज्ञविधिः श्राद्धविधिःअन्यत्रापि सर्वाभावेक्षिपेदग्नौगवेदद्यात्तथाप्सुवा नतुप्राप्तस्यलोपोस्तिपैतृकस्याविशेषत इति सर्वस्योक्तस्यानिषिद्धस्य च पात्रस्याभावइत्यर्थः अतिदरिद्रस्यतर्पणमात्रेऽपि तिलाद्यभावेवृद्धवसिष्ठेनविशेषउक्तः अग्निनावादहेत्कक्षंश्राद्धकाले समागते तस्मिन्नुपवसेदह्निजपेद्वाश्राद्धसंहितामिति कक्षंतृणसमूहं विष्णुपुराणेतु सर्वाभावेवनंगत्वाकक्षमूलप्रदर्शकः सूर्यादिलोकपालानामिदमुच्चैः पठेत्ततः नमेस्तिवित्तंनधनंनचान्यच्छ्राद्धोपयोगिस्वपितॄन्नतोस्मि तृप्यंतुभ

त्त्वयापितरौमम्वैतौभुजौकृतौवर्त्मनिमारुतस्य इत्येतत्पितृभिर्गीतंभावाभावप्रयोजकं यःकरोतिकृतंतेन श्राद्धंभवतिपार्थिवेति इत्याब्दिकश्राद्धतिथिनिर्णयः अथेष्टिकालोनिरूप्यते यद्यपीष्टिप्रतिपदिकर्त्तव्यतयाप्रतिपत्प्रकरणएव अयमभिधातुमुचितः तथापि पर्वचतुर्थांशस्यापिप्रतिपदइष्टिकालत्वेनसंधौयजेतेतिश्रुत्यासंधिकालसापेक्षत्वेनचपर्वनिर्णयानंतरमस्यानिर्णयस्यावसर इति पर्वनिर्णयानंतरंनिर्णीयते यद्यपि संधौयजेतेतिश्रुतौसंधिकालमात्रस्ययागांगत्वंप्रतिभाति तथापितस्यातिसूक्ष्मत्वेनतत्रसांगप्रयोगानुष्ठानानुपपत्तेः संधिशब्दोलक्षणयाकर्मानुष्ठानयोग्यंसंधिंपार्श्वद्वयवर्त्तिकालविशेषंलक्षयति अतएवश्रुतिः संधिमभितोयजेतेति बौधायनोपि सूक्ष्मत्वात्संधिकालस्यसंधेर्विषयउच्यते सामीप्यंविषयंप्राहुः पूर्वेणाह्नापरेणवा वाशब्दश्चार्थे तच्चपर्वद्विविधं पौर्णमास्यमावास्याचेति तत्रशुक्लापंचदशोचंद्रमंडलकलाभिः सर्वात्मनापूर्यते सोममंडलेपरिपूर्णेपूर्णिमेत्यनेननाम्नाज्ञायते तदुक्तं ब्रह्मांडमत्स्यपुराणयोः कलाक्षयेव्यतिक्रांतेदिवापूर्णेपरस्परं चंद्रादित्यौपराह्णेतुपूर्णत्वात्पूर्णिमास्मृतेति अह्नःपरोभागःपराह्णः सूर्यास्तमयकालइत्यर्थः तत्रयथादित्यः संपूर्णमंडलः सन्नस्तमेति तथोत्तरेक्षणेचंद्रः संपूर्णमंडलः सन्नुदेतीतिदृष्टांतदार्ष्टांतिकभावस्यविवक्षितत्वात् द्वयोरादित्यचंद्रयोरुपन्यासः यथामंडलपूर्णत्वविवक्षया पूर्णिमाशब्दःप्रयुज्यते तथापूर्णत्वविवक्षयापौर्णमासीशब्दःप्रयुज्यते तदुक्तंभविष्योत्तरे पूर्णमासोमहाराजसोमस्यदयितातिथिः पूर्णोमासोभवेद्यस्मात्पौर्णमासीततःस्मृतेति पूर्णिमामावास्ययोर्विकल्पोमासप्रस्तावेदर्शितः अमावास्याइत्यनेननाम्ना बहवोर्थाःकथ्यंते तत्राऽमाशब्दस्यचत्वारोर्थाः सूर्यरश्मिश्चंद्रकलाकन्यासहभावश्चेति वसुशब्दस्यापिचत्वारोर्थाः पितृविशेषःनिवासश्चंद्रइंद्रश्चेति तत्रामाशब्दस्यसूर्यरश्मिवाचित्वेवसुशब्दस्यानिवासवाचित्वेअमायांरविरश्मौवसुर्वासोयस्यांइतिनिर्वचनं तथाचस्कांदे नागरखंडे अमानामविधोरश्मिःसहस्रप्रमुखःस्मृता यस्यात्रतेजसासूर्यः

प्रोक्तस्त्रैलोक्यदीपकः तस्मिन्वसतियेनेंदुरमावास्याततःस्मृतेति अमाशब्दस्यसहभाववाचित्वेवसुशब्दस्यनिवासवाचित्वे अमासहवसुर्निवासोयस्यामितिनिर्वचनं तदुक्तंमत्स्यवायुब्रह्मांडपुराणेषु अमावसेतामृक्षेतुयदाचंद्रदिवाकरौ एषापंचदशीरात्रिरमावास्याततःस्मृतेति अमाशब्दस्यचंद्रकलावाचित्वंस्कांदेदर्शितं अमाषोडशभागेनदेविप्रोक्तामहाकलेति तांकलामुपजीवतीतिनिर्वचनं भगवतीपुराणेदर्शितं कलावशिष्टोनिष्क्रांतः प्रविष्टःसूर्यमंडलं अमायांविशतेयस्मादमावास्याततःस्मृतेति अमाशब्दस्यकन्यावाचित्वे वसुशब्दस्यपितृवाचित्वेअमावसुंऐच्छत् अस्यांरात्रावित्यमावास्येतिनिर्वचनं तथाचब्रह्मपुराणे अग्निष्वात्ताइतिख्यातायज्वानोयज्ञसंस्थिताः अच्छोदानामतेषांतुमानसीकन्यकानदी तमथामावसुंनामपितरंवीक्ष्यसंगतेत्यादि वसुशब्दस्यचंद्रवाचित्वे अमाशब्दस्यसहभाववाचित्वमंगीकृत्य अमाभिः ओषधीभिःसहचंद्रोवसत्यस्यांरात्रावित्यमावास्येतिनिर्वचनं अयमर्थः शतपथब्राह्मणात् तद्यदेष एतांरात्रिमिहावसति तस्मादमावास्यानामेति बृहदारण्यकेप्येवम् अमाशब्दस्यसहभाववाचित्वे वसुशब्दस्य इंद्रवाचित्वे अमासहवसुरिंद्रोयस्यास्तीत्यमावास्येतिनिर्वचनं अयमर्थः शतपथब्राह्मणेदर्शपूर्णमासप्रकरणेश्रूयते तेदेवाअब्रुवन् अमावैनोद्यवसुर्वसातियोनःप्रावात्सीदिति तैत्तिरीयब्राह्मणेपिस्पष्टमयमेवार्थः श्रूयते इंद्रोहिदेवानांवसुस्तदमावास्यायाअमावास्यात्वमिति अमावास्याशब्दपर्यायेदर्शशब्दोपिदृश्यते सचद्विविधःसूर्याचंद्रमसौपरस्परंपश्यतोत्रेतिदर्शः आश्रित्यताममावास्यांपश्यतः सुसमागतौ अन्योन्यंचंद्रसूर्यौतौयदासौदर्शउच्यत इतिमत्स्यवायुपुराणयोरभिधानात् तेचपौर्णमास्यमावास्येद्विविधे राकाचानुमतिश्चैवपौर्णमासीद्विधास्मृता सिनीवालीकुहूश्चैवअमावास्याद्विधैवात्विति पुराणवाक्यात् अत्रानुमतिः सिनीवालीच चतुर्दशीमिश्रे राकाकुहूश्चप्रतिपन्मिश्रे तथाचकाठकःश्रुतिः यापूर्वापौर्णमासीसानुमतिर्योत्तरासाराका यापूर्वामावास्यासासिनीवाली

योत्तरासाकुहूरिति वृद्धवसिष्ठः राकाचानुमतिश्चैवपौर्णमास्यौद्वयंविदुः एकासंपूर्णचंद्रास्यात् कलोनानुमतिःस्मृता पौर्णमासीदिवादृष्टेशशिन्यनुमतिःस्मृता रात्रिदृष्टेपुनस्तस्मिन्सैवराकेतिकीर्त्तिता भगवतीपुराणे यदास्वस्तमियात्सूर्यः पूर्णश्चेंदुरुपागमेत् युगपत्सोत्तराराकातदाभवतिपूर्णिमा मत्स्यब्रह्मांडपुराणयोः यस्मात्तामनुमन्यंते पितरोदेवतैःसह तस्मादनुमतिर्नामपूर्णिमाप्रथमास्मृता अत्यर्थंराजतेयस्मात्पौर्णमास्यांनिशाकरः राजनाच्चैवचंद्रस्यराकेतिकवयोविदुः मत्स्यब्रह्मांडपुराणयोः सिनीवालीप्रमाणस्तुक्षीणशेषोनिशाकरः अमावास्यांविशत्यर्कं सिनीवालीततःस्मृता अवासेतेतियावत् अल्पोवलोस्यास्तीतिबालीसिनीचासौवालीचेतिसिनीवालीसिनीवालीप्रमाणः वालाग्रमात्रइत्यर्थः कुह्वितिकोकिलेनोक्तेयावत्कालःसमाप्यते तत्कालसंज्ञिताह्येषाअमावास्याकुहूःस्मृता तथा अनुमतिश्चराकाचसिनीवालीकुहूस्तथा एतासांद्विलवः कालःकुहुमात्राकुहूःस्मृता इत्येषपर्वसंधीनांकालोवैद्विलवःस्मृतः ननुपौर्णमास्यांपौर्णमास्यांयजेत अमावास्यायाममावास्यायांयजेतेतिवचनात् कृत्स्नेष्टिप्रयोगस्तुपर्वकालत्वेप्राप्ते तत्कथं संधिकालापेक्षत्वमितिचेत् उच्यते पूर्वेद्युरग्निंगृह्णाति उत्तरमहर्यजतीत्यादिश्रुत्यंतरादन्वाधानाद्यनुष्ठानेनोपक्रमोत्रपर्वाणि इतरसकललाभापेतप्रधानानुष्ठानंतुप्रतिपदीति द्व्यहकालसाध्यत्वात्तत्सापेक्षत्वं अतएवगोभिलेनोक्तं पक्षांताउपवस्तव्याः पक्षादयोभियष्टव्याइति अत्रोपवासशब्देनाग्न्यान्वाधानादिविवक्षितंतस्मिन्क्रियमाणे यजमानसमीपेदेवतानांनिवासात् तथाचतैत्तिरीयब्राह्मणंउपास्मिन्श्वोयक्ष्यमाणेदेवतावसंतियएवंविद्वानग्निमुपस्तृणातीति एवंपौर्णमास्योर्द्वयोः प्रयोगैकदेशान्वयेनसंकोचः पौर्णमास्यांपौर्णमास्यामित्यादिश्रुतेः पौर्णमास्यमावास्याशब्दयोस्तिथिविशेषेरूढत्वात् एवंसंधौयजेतेतिश्रुतिरपिसंधिमभितोयजेतेति श्रुत्यंतरैकवाक्यत्वात्पर्वप्रतिपत्समुदायलक्षणयाकृत्स्नप्रयोगकालविधायिकैव एवंचसतिपौर्णमास्यमावास्याश्रुतिरप्यमावास्यायाम

पराह्णे पिंडापितृयज्ञेनचरंतीत्यादौ वृत्तिकारादिभिःसंधिवाचित्वेनव्याख्यानात् पौर्णमास्यमावास्याशब्दनिर्वचनार्थवादोपदर्शितप्रयोगाच्च पौर्णमास्यमावास्याशब्दयोरपिसंधिवाचित्वादपराह्णादिशब्दसमभिव्याहारस्य चाहोरात्रलक्षणाबीजस्यात्रभावात्पूर्वोक्तरीत्या पार्श्वद्वयवर्त्तितिथिद्वयलक्षणयासंधौयजेतेतिवत्कृत्स्नप्रयोगेकालविधायिकेत्यपिवक्तुंशक्यं तत्रपूर्वस्मिन्पर्वदिनेयागप्रारंभःसचान्वाधानमिध्माबर्हिः संपादनमध्वर्युणागार्हपत्यादिषुसमाम्नायतइत्यादिभिःसमिदाधानेक्रियमाणेयजमानेनाग्निंगृह्णामीतिमंत्रपठनरूपोऽग्निपरिग्रहउपस्तरणंचेत्येवमादिः तथाचतैत्तिरीयब्राह्मणेश्रूयते पूर्वेद्युरिध्माबर्हिः करोति यज्ञमेवारभ्यगृहीत्वोपवसतीतिशतपथब्राह्मणेपि पूर्वेद्युरग्निंगृह्णातिउत्तरमहर्यजतीतिप्रतिपादितेनतुकर्मणैवदेवेभ्य इत्यादिभिरध्वर्युहस्तप्रक्षालनतंडुलनिर्वापपुरोडाशप्रदानादिलक्षणंप्रयोगंकरोतितदिदंयजनं तत्रापिनसंपूर्णंपर्वान्वाधानकालः नापिसंपूर्णः प्रतियागकालः किंतुपर्वणोंशत्रयमन्वाधानस्यकालः पर्वचतुर्थांशसहितंप्रतिपदः आद्यमंशत्रयंचयागस्य तथाचलौगाक्षिः त्रीनंशानौपवस्तस्ययागस्यचतुरोविदुः द्वावंशावुत्सृजेदंत्यौयागेचव्रतकर्मणि औपवस्तस्योपवासस्याग्न्यन्वाधानादेस्त्रीनंशान्विदुः यागस्यचतुरंशान्विदुः अंत्यावंशौपंचदशीप्रतिपत्संबंधिनावुत्सृजेत् अंत्यमंशंपंचदश्याः व्रतकर्मणियागेच प्रतिपदश्चतुर्थमंशं अयंचप्रतिपत्पर्वांत्यचतुर्थांशभिन्नांस्त्रींश्चतुरश्चेतिपर्युदासविधयापूर्वशेषएवनतुस्वतंत्रस्त्यागविधिः पर्वणोयश्चतुर्थांशइत्यादिवाक्यांतरवशाद्वाक्यभेदापत्तेश्च अन्वाधानेपर्वचतुर्थांशवर्जनंचसद्यस्कालव्यतिरिक्तविषयंसद्यस्कालतायांतत्रैवतदनुष्ठानात् कथंतर्हियागेचतुरइत्यपेक्षणेयज्ञपार्श्वे पंचदश्याःपरःपदःपक्षादेःप्रथमास्त्रयः कालःपर्वणियागेस्यादन्यथातुनविद्यते कात्यायनःनयष्टव्यंचतुर्थांशेयागैः प्रतिपदःक्वचित् रक्षांसितद्विलुंपंतिश्रुतिरेषासनातनी तत्राप्यहनियागः कर्त्तव्यः पूर्वेद्युरग्निं गृह्णातिउत्तरमहर्देवतायजेतेत्यहर्विधानात् तत्रापिपूर्वाह्णएवपूर्वाह्णोवैदे

वानामितिश्रुतेः तत्रापिप्रातरेव पर्वणोयश्चतुर्थांशः आद्याःप्रतिपदास्त्रयः यागकालःसविज्ञेयःप्रातरुक्तोमनीषिभिरिति वृद्धशातातपवचनात् प्रातर्यजध्वमश्विनेतिमंत्रलिंगाच्च प्रातःकालश्चपंचविध।विभक्तदिनस्याद्यस्त्रिमुहूर्त्तोभागः लेखाप्रभृत्यथादित्येत्रिमुहूर्त्तोस्थितेतुवै जातकालइतिप्रोक्तोभागश्चाह्नः सपंचमः समुहूर्त्तत्रितयंप्रातरित्यादिवचनाच्च यस्तुचतुर्द्धाविभागपक्षेसार्धप्रहरात्मके आद्यभागे संगवाध्यर्द्धसंयुक्तः प्रातरित्यभिधीयत इतीदानींतनानां प्रातः शब्दप्रयोगः सलक्षणयाअनेकार्थत्वस्यान्याय्यत्वात् पूर्वाह्नप्रहरंसार्द्धमितिगोभिलेन तस्यपूर्वाह्णत्वोक्तेश्च ऋग्भिः प्रातर्द्दिविदेवइयतइतित्रेधाविभक्तदिन।द्यविभागाविषयोपिप्रयोगस्तथा एवंचगोभिलीयादौपूर्वाह्नग्रहणंयोगेनेदृशप्रातःपरमेव पर्वण्यन्वाधानादिकंप्रतिपदीष्टिरितिसंधिपार्श्वयोः आरंभसमाप्तीव्यवस्थितेएवंयागान्वाधानकालेस्थिते यदापौर्णमास्यमावास्ययोस्तदुत्तरप्रतिपदोश्चसूर्योदयास्तमयस्पार्शित्वं तदा न कोपिसंदेहः तयोःखंडत्वेतुनिर्णयोभिधीयते तत्रगोभिलः आवर्त्तनेयदासंधिः पर्वप्रतिपदोर्भवेत् तदहर्यागइष्येतपरतश्चेत्परेहनि पर्वप्रतिपदोःसंधिरर्वागावर्त्तनाद्यदि तस्मिन्नहानियष्टव्यंपूर्वेद्युस्तदुपक्रमः आवर्त्तनात्परःसंधिर्यदितस्मिन्नुपक्रमः परेद्युरिष्टिरित्येषपर्वद्वयविनिश्चयइति मदनरत्नेपि यदारात्रौअपराह्णेवासंधिदिनेन्वाधायपरेद्युर्यष्टव्यं तदाहलौगाक्षिः अपराह्णेथवारात्रौयदिपर्वसमाप्यते उपोष्यतास्मिन्नहनिश्वोभूतेयागइष्यतइति यदातुपूर्वाह्णमध्याह्णेवासंधिस्तदासंधिदिनेयागः पूर्वदिनेन्वाधानम् तदाहसएव पूर्वाह्णेवाथमध्याह्णेयदिपर्वसमाप्यते उपोष्यतत्रपूर्वेद्युस्तदहर्यागइष्यते इतिमाधवीयेषु वचनेषु मध्याह्नादिशब्दायौगिकाः नतु पंचधाविभागमाश्रित्यप्रवृत्तास्तथासत्यह्नोमध्योमध्याह्नइतिव्युत्पत्तेः संवर्त्तनंमध्याह्नशब्देनाभिधीयते अतएवगोभिलेनावर्त्तनशब्दःप्रयुक्तः शातातपेनमध्यमशब्दःप्रयुक्तः पूर्वाह्णेमध्यमेवापि यदिपर्वसमाप्यते तदोपवासः पूर्वेद्युस्तदहर्यागइष्यतइति अह्नःपूर्वभागः पूर्वाह्णः अह्नोऽपरोभागोऽपराह्णः

अतस्ताभ्यांशब्दाभ्यामावर्त्तनात्पूर्वोत्तरभागवाचकौ आवर्त्तनात्तुपूर्वाह्णोह्यपराह्णस्ततःपरः मध्याह्नस्तुतयोःसंधिर्यदावर्त्तनमुच्यते इत्येतत्प्रकरणपठितवचनात् आवर्त्तनादिति आवर्त्तनात् आङ्मर्य्यादायांतेनसूर्योदयमारभ्यावर्त्तनंमर्य्यादीकृत्यपूर्वाह्णइत्यर्थः अस्मादेववचनादेतत्प्रकरणेमध्याह्नशब्द आवर्त्तनरूपदिनमध्यभागमात्रवचन इति निर्णयसिंधावपि अत्रद्वेधाविभागः आवर्त्तनात्तुपूर्वोक्तवचनादितिमाधवीये वाजसनेयिनांतुविशेषमाहभाष्यार्थसंग्रहकारः मध्यंदिनात्स्यादहनीहयस्मिन्प्राक्पर्वणःसंधिरियंतृतीया साखार्विकावाजसनेयिसत्यातस्यामुपोष्याथपरेद्युरिष्टिरिति आवर्त्तनादूर्ध्वमस्तमयादर्वाग्यदासंधिर्भवति तदहःसंधिमतीतिथिःप्रथमारात्रौसंधिश्चेत्सातिथिर्द्वितीया उभेअपेक्ष्यपूर्वाह्णेसंधिमतीपर्वतिथिस्तृतीयाभवतितस्यांतिथौ पर्वकालस्याल्पत्वात्साखार्विकेत्युच्यत्युच्यतेशाखांतराध्यायिनामीदृशेविषयेपूर्वेद्युरन्वाधानादिकंसंधितिथाविष्टिः वाजसनेयिनांतुसंधितिथावन्वाधानंउत्तरतिथाविष्टिः एवंसतिवाजसनेयिनां नक्कापिसंधिदिनात् पूर्वेद्युरन्वाधानादिकमस्तिसोयंविशेषइति एतद्वचनंपौर्णमासीपरमितिमदनरत्नेअपराह्णे पूर्णिमासंधावुत्तरेद्युःप्रातःप्रतिपच्चतुर्थांशसंभवेतत्रयागकरणेपिनदोषः यदाहवृद्धशातातपःसंधिर्यद्यपराह्णेस्याद्यागंप्रातःपरेहनि कुर्वाणःप्रतिपद्भागेचतुर्थेपिनदुष्यतीति नयष्टव्यंचतुर्थंशइतिकात्यायनवचनंतुपूर्वाह्णेपर्वसंधौवेदितव्यं यदाह संगवादूर्ध्वमध्याह्नात्प्राक्चेदावर्त्तनाद्रवेः सापौर्णमासीविज्ञेयासद्यस्कालविधौतिथिरितिआपस्तंबोपि पौर्णमास्यामन्वाधानपरिस्तरणोपवासावासद्यस्कालायांसर्वक्रियत इति संगवावर्त्तनयोर्मध्येपौर्णमासीप्रतिपदोःसंधौसतिपूर्वोदाहृतैर्वचनैःसंधिदिनात्पूर्वेद्युरन्वाधानादिकंप्राप्तंतत्रसद्यस्कालवाक्यैःसंधिदिनउत्कृष्यते ननुतथापिपर्वप्रतिपदोःसंधिरर्वागावर्त्तनाद्यदितस्मिन्नहनियष्टव्यंपूर्वेद्युःस्यादुपक्रमइति गोभिलवचनेनविरोधोभविष्यतीतिचेत्नसंगवात्पर्वण्यपिसंधेरर्वाचीनत्वात्तद्विषयत्वंगोभिलवाक्यस्य कात्यायनवाक्यंतु संगवो

द्वैभाविमध्याह्नादर्वाचीनसंधिविषयत्वं यद्वा गोभिलवचनंपर्वद्वयसामान्यविषयंकात्यायनमितिविशेषवचनेनसामान्यवचनबाधइत्यविरोधः यदाचावर्त्तनतत्पूर्वसंध्योःपर्वचतुर्थांशेयागानुष्ठानं तदा नयागप्रयोगः पर्वमध्येसमापनीयः किंतुप्रतिपदिप्रविष्टायांसमापनीयः प्रतिपद्यप्रविष्टायांयदिचेष्टिःसमाप्यते पुनःप्रागीयकृत्स्नेष्टिःकर्त्तव्यायागवित्तमैरितिगार्ग्यवचनेन्यथादोषस्मरणात् प्रणीयाग्निमितिविशेषः अत्रचप्रातरारभ्यसर्वकर्मनिर्वर्त्यविष्णुक्रमादिकःसमाप्तिपदार्थः प्रतिपदंशेकर्त्तव्यइतिमदनरत्ने प्रतिपदिप्रविष्टायांब्राह्मणभोजनमंत्यपदार्थःसमाप्तिःकर्त्तव्येतिहेमाद्रौ परिशिष्टेतुपक्षादिचरोरुपक्रमोपिपक्षेप्रतिपदंप्रतीक्ष्यैवकर्त्तव्यइत्युक्तं पक्षादावेवकुर्वीतसदापक्षादिकंचरुपूर्वाह्णएवकुर्वीतविद्धेप्यन्येमनीषिणइति विद्धपूर्वविद्धे अमावास्यायांविशेषमाह वृद्धशातातपः द्वितीयात्रिमुहूर्त्ताचेत्प्रतिपद्यापराह्णिकी अन्वाधानंचतुर्दश्यांपरतःसोमदर्शनादिति बौधायनोप्येवं वृद्धवसिष्ठोपि इंदौनिरुप्तेपयसिपुरस्तादुदितेविधौ यद्वैगुण्यंहुतेतास्मिन्पश्चादापिहितद्भवेदिति अयमर्थः संपूर्णचतुर्दश्याममावास्याभ्रांत्यान्वाधानंकृत्वाहविषिनिरुप्ते उषसि पूर्वस्यां दिशिचंद्रोदयेसतियद्दर्शयागस्यवैगुण्यंतद्यागादिनेपश्चिमायांदिशिचंद्रोदयेसतियद्दर्शयागस्यवैगुण्यंतद्यागादिनेपिभवतीति श्रुतिरप्यमुमेवार्थंबोधयति यस्मिन्नहनिपुरस्तात् पश्चाच्चसोमोनदृश्येततदहर्यजेतेति अयमर्थः सिनीवाल्यांपुरस्ताच्चंद्रोदृश्यतेद्वितीयायुक्तायांप्रतिपदिपश्चाच्चंद्रोदृश्यते अनयोरुभयोरपियागोनकर्त्तव्यः किंतु चंद्रदर्शनरहितायाममावास्यायांप्रतिपदिच यागः कर्त्तव्यः चंद्रदर्शनोपेतायांशुक्लप्रतिपदियागानुष्ठानेप्रायश्चित्तमाहकात्यायनः यजनीयेह्निसोमश्चेद्वारुण्यांदिशिदृश्यते तत्रव्याहृतिभिर्हुत्वादंडंदद्याद्द्विजातयइति दंडंदक्षिणांब्रह्मदंडमितिमदनरत्ने अत्रचेच्छब्दोयजतिनिमित्तत्वप्रतीतेर्विशेषणसंक्रमादेवंनिमित्तवाक्याभिव्यक्तिः वारुणीसोमदर्शनवदहोयजनीययागसंबंधित्वान्मोहाच्चोभत्रयजेततदाव्याहृतिभिर्हुत्वादंडंदद्यादिति

हविरार्त्तिमादित्यस्यहविश्चदार्त्तिप्राप्तिविशिष्टस्यस्यादितिवचनेननयजनीयत्वोक्तिरप्यनुपपन्नास्मृत्यंतरे अर्वागस्तमयाद्यत्राद्वितीयातुप्रदृश्यते तत्रयागंनकुर्वीतविश्वेदेवाःपराङ्मुखाः यंतइत्यर्थः अत्राद्वितीयात्रिमुहूर्त्तेतिद्रष्टव्यं त्रिमुहूर्त्ताद्वितीयाचेदितिवाक्यांतरात् अत्रायंच पर्य्युदासःचंद्रदर्शनार्हः प्रतिपद्भिन्नायांप्रतिपदीतिसामान्यप्राप्त्युपजीवनिषेधोवानद्रष्टव्यमितिवत् ननु यथाचंद्रदर्शनवतोदिनस्ययागे पर्य्युदासः श्रुतस्तथान्वाधानेऽपि तस्माद्यदेवैनंपुरस्तात्परस्तात्पश्येत्तर्ह्येवोपरमेदित्यादिसत्यंद्वयोरपि चंद्रदर्शनरहितकालः ससंपूर्णायाममावास्यायां प्रतिपदिचदिनद्वयेऽपि चंद्रदर्शनाभावादुभयत्राप्यनुगद्यते यदात्वेकस्मिन्नेवदिने चंद्रदर्शनंतदोत्तरयोः स्वकालत्वासंभवेऽंगगुणविरोधोभवतीतिन्यायेन चंद्रादर्शनदिनेयागस्यपूर्वास्मिंश्चंद्रदर्शनवत्यप्यन्वाधानस्यानुष्ठानंयुक्तं अतएव श्रुतिरपि तद्वैकेदृष्ट्वोपवसंतीति गोभिलोप्याह दृश्यमानेप्येकदेति तैत्तिरीयब्राह्मणेतु चंद्रदर्शनदिनेपि याग उक्तः एषावैसुमनानामेष्टिर्यजद्येजानंपश्चाच्चंद्रमाअभ्युदेत्यस्मिन्नेवास्मैलोकेद्धकंभवति अयमर्थः येयमिष्टिश्चंद्रदर्शनदिनेपश्चाच्चंद्रमासिउदितेतस्मैयजमानायांस्मिल्लोकेसमृद्धिर्भवतीति श्रुत्यंतरेऽपि यदहःपश्चाच्चंद्रमाअभ्युदेति तदहर्यजन्निमांल्लोकानभ्युदेति आपस्तंबसूत्रभाष्यार्थसंग्रहकारेणापि तत्रैवयागइत्युक्तम् अपराह्णेथवारात्रौयदिपर्वसमाप्यते उपोष्यातत्रराकास्यात्सापूर्णात्सार्पिर्लक्षणं पूर्वाह्णेवाथमध्याह्नेयदिपर्वसमाप्यते उपोष्यानुमतिस्तत्रसाश्वपूरितलक्षणा अपराह्णेक्षयायांवायदिपर्वसमाप्यते उपोष्यातुकुहूस्तत्रयदहर्नेतिलक्षणा पूर्वाह्णे वाथमध्याह्णेपर्वसंधिर्यदाभवेत् तत्रोपोष्यासिनीवालीश्वोनद्रष्टारंक्षणेति अत्रपदद्वये स्वस्वसूत्रानुसारेण व्यवस्था ज्ञातव्येतिमदनरत्ने माधवीयेपि सोयंविशेषोनाश्वलायनापस्तंबविषयइति हेमाद्रिस्त्वपराह्णसंधावपि परदिनेपि यच्चतुर्थांशे चंद्रोदयेच सतिद्वितीयादियष्टव्यं नक्षयेसतिपूर्वेद्युर्यागःकर्त्तव्यः नचंद्रदर्शनइत्याह

पर्वणोंशेतुतुर्येतुयष्टव्यंतुद्विजातिभिः द्वितीयासहितंयस्मात्दूषयत्याश्वलायन इतिवचनात् कितीयेत्विवितपाठोमदन
रत्नेसोपकैमुतिन्यायेनचतुर्थांशपरएव भूतेपंचदशीपू[illegible]द्वितीयाक्षयगामिनी चरुरिष्टिरमायांस्याद्भूतेकव्यादकीक्रि
येत्युक्तेश्च इत्थमेवनिर्णयामृतकालतत्त्वविवेचनयोः सिद्धांतितं वौधायनमतानुसारिणामन्वाधानवद्दर्शश्राद्धमपिस्व
ल्पामावास्योपेतायांचतुर्दश्यांकर्त्तव्यं यदाचतुर्दशीयामामित्यादिवौधायनवचनात् एवंतेषांपितृयज्ञस्यापितत्रैवानुष्ठा
नं चंद्रक्षयवत्वपराह्णे तस्यापिविधानात् अपराह्णेददातीतितस्मिन्क्षीणेददातीति कर्मप्रदीपेतु पक्षांतकर्मनिर्व
र्त्यवैश्वदेवंचसाग्निकः पिंडयज्ञंततःकुर्यात्ततोन्वाहार्यकंवुधइत्यादिवचनैरन्वाधानपिंडपितृयज्ञश्राद्धानामेकदिनसा
ध्यत्वात्पितृयज्ञश्राद्धयोश्चाहत्यचंद्रक्षयेविधानादन्वाधानकालवाक्यगतमपिचंद्रादर्शनंचंद्रक्षयोपलक्षणमित्युक्तं य
दुक्तेयदहस्त्वेवदर्शनंनैतिचंद्रमाः तत्क्षयापेक्षयाज्ञेयंक्षीणेराजनिचेत्यपीति एतच्चयत्स्वशाखायामेकदिनेनुष्ठेय
त्वमुक्तंतद्विषयंद्रष्टव्यं संधिनिर्णयश्चातिथिसाम्येयथास्थितएववृद्धिक्षययोस्तुतत्रविशेषमाहलौगाक्षिः तिथेःपरस्या
घटिकास्तुयाःस्युर्न्यूनास्तथैवाभ्यधिकाश्चतासां अर्द्धंवियोज्यंचतथाप्रयोज्यंह्रासेचवृद्धौप्रथमेदिनेतादिति ततश्चयदा
चतुस्त्रिंशन्नाडीरूपपरमदिनसमयेपौर्णमासीषोडशघटिकासप्तदशघटिकारूपपरमक्षीणदिनसमयेचद्वादशघटिका त्र
योदशघटिका एवं विषुवदादावप्यूह्यम् परमादिनेचप्रतिपत्त्रिमुहूर्त्तवृद्धातदायथास्थितसंध्यालोचने आवर्त्तनतत्पूर्वसं
धेःपर्वचतुर्थांशरूपयागकालालाभाच्चसंधिदिनेयागःप्राप्नोति अर्धवृद्धिप्रक्षेपेणतुसंधिनिर्णयेपरदिने एवमन्यदप्यूह्य
म्परदिनेप्रतिपत्त्रिमुहूर्त्तन्यूना दापराह्णसंधौ संधिर्यद्यपराह्णेस्यादितिवचनात्प्रतिपच्चतुर्थांशस्यापिकेषांचिन्मते
यागकालत्वात्परदिनेयागःप्राप्नोतियथास्थितसंध्यालोचने अर्धक्षयप्रक्षेपेणतुसंधिदिनएवेतिविशेषः अत्रकेचित् यदि
चतुर्दशीदशदंडापर्वचपंचदशदंडमितं प्रतिपत्तु एकोनविंशतिदंडाप्रतिपद्वृद्धेरर्द्धदंडद्वयंपर्वांतेप्रक्षिपंति एवंचतुर्दशी

यदिपंचविंशतिदंडा पर्वैकोनविंशतिदंडं प्रतिपच्चतुर्दशदंडातदाप्रतिपद्ध्रासार्द्धघटिकाद्वयंपर्वणिप्रक्षिपंति तदुक्तं ईदृशविषयेपर्वापेक्षयाप्रतिपदोह्रासस्यवृद्धेर्वाभावात् प्रत्युतवृद्ध्युदाहरणेह्रासएवास्ति ह्रासोदाहरणेचवृद्धिरिति घटिकान्यूनाधिक्यभावेह्रासवृद्धीभवतः किंतुचतुर्दश्युत्तरममावस्याःपर्वघटिकास्त्यक्त्वा आधिक्येन्यूनत्वेप्रतिपदोह्रासवृद्धीइति एवमालोच्यसंधिनिर्णयः मयूखेयदाप्रतिपद्दिनेपंचधाविभक्तदिनचतुर्थभागरूपापराह्णव्यापिद्वितीयाप्रवेशेनचंद्रदर्शनं तदाचतुर्दश्यामन्वाधानं संधिदिनेचयागः तथाचवृद्धवसिष्ठः आदित्येस्तमितेचंद्रइत्यादिकात्यायनः पूजनीयेह्निसोमश्चेदिति वृद्धशातातपः त्रिमुहूर्ताद्वितीयाचेदिति यच्चतत्रोक्तं एतानिवचनान्यपराह्णेऽमाप्रतिपत्संधिपराणीतिहेमाद्रिः तन्न रात्रिसंधावपितथापत्तेरितिताच्चिंत्यं तदाकैमुतिकन्यायेनतत्रसंधौतथापत्तिविरहात् नचापराह्णशब्देनयोगवृत्त्यावर्त्यावर्त्तनोत्तरभागाभिधानेरात्रिसंधौकैमुतिकन्यायाप्रवृत्तिरितिवाच्यम् दिनचतुर्थभागरूपापराह्णे काले संधौ यदि उत्तरदिनेयागस्तर्हिरात्रौपर्वप्रतिपदोः संधौ उत्तरदिनेयागइतिकिमुवक्तव्यमित्येवंरूपकैमुतिकन्यायः प्रवृत्तोबाधकाभावात् तस्माद्विनिगमनाविरहादेतानिवचनान्यावर्त्ततेततः पूर्वमुत्तरं वाऽमाप्रतिपत्संधौ प्रवर्त्तनापराह्णसंधावेवेति युक्तमिति यदुक्तं तदेवायुक्तं यदपिमयूखे यत्तुकेचिच्चंद्रदर्शनमेवयागनिषेधकंनत्रिमुहूर्त्तद्वितीयाप्रवेशइति तन्न त्रिमुहूर्त्ताद्वितीयाचेदित्यादिवाक्यपाक्षिकानुवादतापत्तेरिति तदप्युपेक्ष्यं परतः सोमदर्शनादितिहतुतस्यैवत्रिमुहूर्तेत्यस्योपलक्षणप्रतीतेः ननुप्रकृतेर्यथोक्तकालात्कालांतरंकाचित्स्मर्यते षोडशेहन्यभीष्टेष्टिर्मध्यापंचदशेहनि चतुर्दशेजघन्येष्टिः पापासप्तदशेहनीति अयमर्थः पूर्वप्रतिपद्दिनमारभ्यगणनायामागामिप्रतिपद्दिनषोडशंभवति तत्रेष्टिरभीष्टोत्तमा ततःपूर्वस्मिन्नेवदिनेमध्यमा ततःपूर्वस्मिंश्चतुर्दशेऽहनिजघन्यातदेवकालत्रयेविहिता उत्तमकालात्षोडशादिनादूर्ध्ववर्त्तिनिसप्तादशादिनेप्रतिषिद्धा वादंतत्रोत्तममध्यमपक्षौशास्त्रीयौतिथीनांवृद्धिक्षयाभावे

सत्युत्तमः पक्षःप्राप्नोतिएकस्मिन्दिनेक्षीणेसतिमध्यमःप्राप्नोति जघन्यपक्षस्तुनशास्त्रीयः दिनद्वयक्षयाभावात् अतो जघन्यशब्दोनिषेधविवक्षयाप्रयुक्तः नतुपक्षांतरविवक्षया यदाषोडशदिनेमावास्यादशघटिकासप्तदशदिनेप्रतिपद्वर्द्धेततदाभ्रांत्याप्रतिच्चतुर्थांशेनुष्ठानंप्रसक्तं पापासप्तदशेचेतिवचनेननिवार्य्यते तच्चन्याय्यं पूर्वाह्णसंध्युपेतादिनेइष्टेः कर्त्तव्यत्वेननिर्णीतत्वात् यदातुमहत्यावृद्ध्याषोडशदिने प्रतिपद्वर्द्धेततदा न प्रतिषिध्यते पवसथ्यंकर्मपजनीयात्त्रयोदश भवेत्सप्तदशेपितत्प्रयत्नेनवर्जयेदिति तत्रत्रयोदशीसप्तदशीनिषेधौनित्यानुवादावेव दिनद्वयवृद्धेर्दिनद्वयक्षयस्यवाभावात् हेमाद्रिकालतत्त्वविवेचनयोस्तु षोडशेहन्यभीष्टिरितिवचनंप्रधानयागविषयतयावभासमानमपिइष्ट्युपक्रमान्वाधानपरतयाव्याख्यातं अस्यवचनस्यपूर्वार्द्धममावास्याविषयमुत्तरार्द्धंपौर्णमासीविषयमित्यपिपक्षांतरंहेमाद्रौस्थितं यत्तुवचनांतरं ऊनेपंचदशीयाज्यासमेयाज्यातुषोडशी ऊनेवाप्यधिकेवापिनेज्यासप्तदशीक्वचिदिति सप्तमीनिषेधपरमन्वाधानयागविषयतयाकथंविद्वद्व्याख्येयमितिदिक् निर्णयसिंधौ यत्तुमाधवः यस्तुवाजसनेयीस्यात्तस्यसंधिदिनात्पुरा नक्वाप्यन्वाहुतिः किंतुसदासंधिदिनेहिसेत्याह यच्चकालादर्शेप्युक्तं आवर्त्तनादधःसंधिर्यद्यन्वाधायतद्दिने परेद्युरिष्टिरित्याहुर्विप्र.वाजसनेयिनइति यच्चमदनरत्ने मध्यंदिनात्स्यादहर्नीहयस्मिन्नित्यादितत्कर्कभाष्यदेवजानीश्रीमंतभाष्यादिसकलतच्छास्त्रीयग्रंथविरोधाद्वृद्धानादराच्चोपेक्ष्यमित्युक्तं तदेतत्तत्तद्ग्रंथपर्यालोचनयावधातव्यं योयामिष्टिकालनिर्णयः सस्यात्तस्थालीपाकेप्यवगंतव्यः तत्रस्थालीपाकान्वाधानगृहप्रवेशनीयहोमानंतरभाविन्यांपौर्णमास्यामारंभणीयो नतुदर्शे यद्यारंभकालेमलमासपौषशुक्रास्तादिभवतितदेष्ट्यारंभःकार्य्यः यानितु उपरागोधिमासश्चयदि प्रथमपर्वणि तथामालिम्लुचेपौषेनान्वारंभणमिष्यते गुरुभार्गवमौढ्येचचंद्रसूर्यग्रहेतथेत्यादिसंग्रहवचनानितान्यालस्यादिनातिक्रांतशुद्धकालप्रारंभविषयाणि नामकर्मचदर्शेष्टिर्यथाकालंसमाचरेत् अतियातेसतितयोः प्रशस्ते

मासिपुण्यभे इत्यपरार्केगर्गवचनादितिप्रयोगपारिजाते मयूखेतु आधानानंतरंपौर्णमासीचेन्मलमासजा तस्यामारंभणीयान्नानकुर्वीतकदाचिनेति मंडनवचनादन्वारंभणीयामलमासोत्तरं शुद्धकालेकार्या तत्रकालातिक्रमनिमित्ताभ्रेषेष्टिरप्यादौकार्येतिकेचित् तत्रपुरुषापराधकालातिक्रमरूपविभ्रेषेष्टिनिमित्ताभावादिति याज्ञिकास्तुपूर्वोक्तत्रिकांडमंडनवचनाच्छुद्धकालएवविभ्रेषेष्टिंकृत्वान्वारंभणीयांकुर्वंति कालादर्शसंग्रहेपि आरंभंदर्शपूर्णेष्टेरग्निहोत्रस्यचादिमं प्रतिष्ठाः पंचकर्माद्यांमलमासेविवर्जयेदिति एवंप्रकृतिकालोनिर्णीतः अथविकृतिकालोनिर्णीयते सचश्रुतौअभिहितः यदीष्ट्वायदिपशुनायदिसोमेनयजेत सोऽमावास्यायांपौर्णमास्यांवेतिपौर्णमासीकालीनोपांशुयाजाग्नीषोमीयादिविकाराणांपौर्णमास्यामेवामावास्याकालीनसान्नाय्यादिविकाराणांचामावास्यायामेवेतिव्यवस्थाप्रमादव्यवस्थार्थमिदंवचनं पौर्णमास्याममावास्यायामिति विधेयकालगतैकवचनस्यविवक्षितत्वेनैकस्यांपौर्णमास्याममावास्यायांसांगप्रयोगोपादानात्सद्यस्कालीनत्वार्थंचेतिनिर्णीतंतंत्ररत्ने नचेष्टिपशुसोमानामनेकेषामुद्देश्यत्वात्तन्निमित्तामावास्यापौर्णमास्योर्द्वयोर्निमित्तत्वाच्चवाक्यभेदः स्यादितिवाच्यंइष्टिपशुसोमेष्वनुगतस्ययागत्वस्यैकस्योद्देश्यतावच्छेदकस्यामावास्यापौर्णमास्यनुगतस्यचपर्वत्वस्यविधेयतावच्छेदकस्यसद्भावात्तस्यपरिहर्तुंशक्यत्वात् अत्रपौर्णमास्यामावास्याशब्दाभ्यांतदंत्यक्षणोगृह्यतेतेनतद्वत्यहोरात्रइत्यर्थमाहारामांडारइतिनिर्णयसिंधौ सोमस्यवैराज्ञोर्द्धमासस्यरात्रयः पत्नियआसन्नासाममावास्यांचपौर्णमासीचनोपैदित्याद्यर्थवादगतवैदिकप्रसिद्धेश्च तयोस्तिथिवाचित्वमेवेति कालतत्वविवेचने तत्रसंपूर्णपर्वएवपराह्णसंधौतदाप्रकृतिप्रधानानुष्ठानाभावाद्विकृतिंकृत्वाप्रकृतिरुपक्रमितव्यायदीष्ट्वेवाक्यविहितकाललाभादितिमीमांसकानांयाज्ञिकानांचविप्रतिपन्नमेव पूर्वाह्णसंधौत्वौदयिकपर्वणः प्रकृत्यावरुद्धत्वात्पर्वण्येवोपदिष्टपर्वकालत्वानुरोधनातिदेशप्राप्तं प्रातःकालंद्व्याहकालवद्बाधित्वाविकृत्यनुष्ठानंयुक्तमितिमीमांसकाः तदुक्तंतंत्ररत्ने एवंचपद्ध

त्तंस्वाम्यादिभिरुच्यते आगावर्त्तनात्प्रतिपत्पंचदशीसंधौसतिकृत्वाप्रकृतिःप्रतिपदिविंकृतिःकर्त्तव्येति तदन्याय्यमनभिमतंभगवतोभाष्यकारस्येति नचपूर्वाह्णसंधिदिनएवविकृतिमनुष्ठायप्रकृतिरनुष्ठीयतां तस्याः प्रतिपद्यप्यविरोधादिति वाक्यंप्रकृतावुपदिष्टस्यप्रातः कालस्यबाधितुमशक्यत्वात्पूर्वेद्युरनुष्ठानेतूपदिष्टपर्वकालत्वानुरोधेनविकृतावतिदिष्टतद्बाधस्यन्याय्यत्वात् निशीथ्यादिवदनन्यगतिकवचनाभावे पूर्वेद्युरन्वाधानेनोपक्रांतस्यप्रकृतिप्रयोगस्यमध्येकर्मांतरानुष्ठानस्यानुचितत्वाच्च अतएवसंपूर्णपर्वएवपराह्णेसंधौचविकृत्यनुष्ठानानंतरमेवप्रकृत्यन्वाधानंयुक्तं अतिदिष्टविकृतिप्रधानांगप्रातः कालानुरोधाच्च प्रकृत्यन्वाधानस्यतूपदिष्टोपि प्रातःकालोयागकालत्वाद्बाध्यएवेति याज्ञिकमतानुसारेणतूक्तेयदासंपूर्णपर्वतदापर्वणिविकृतियागंकृत्वातत्रैवपश्चादन्वाधायप्रतिपदिप्रकृतीष्टिः कर्त्तव्या खंडपर्वणितुआवर्त्तनतत्पूर्वसंध्योःप्रकृत्यनुष्ठानंकर्त्तव्यं तदुक्तंकात्यायनत्रिकांडमंडनाभ्यां आवर्तनात्प्राग्यदिपर्वसंधिः कृत्वातुतस्मिन्प्रकृतिंविकृत्याः तदैवयागःपरतोयदिस्यात्तस्मिन्विकृत्याः प्रकृतेः परेद्युरिति आवर्त्तनात्प्राक्पर्वसंधौप्रकृतिंकृत्वापश्चाद्विकृतिःकर्त्तव्येति आपस्तंबनाप्युक्तं प्रकृतेःपूर्वोक्तत्वादपूर्वमतेस्यादिति अपूर्वविकृतिप्रकृत्योरंतेप्रकृतेः समाप्तौ सत्यां तत्स्यात् प्रकृतेःपूर्वोक्तत्वाद्वेदेप्रथमतः सकलांगोपेतत्वेनोपदिष्टत्वादित्यर्थइति एतच्चहेतुवादेन श्रुतिमूलत्वाभावादंगवासमभिव्यवहारादितिवदप्रमाणमितिनिर्णयसिंधौकालतत्त्वविवेचनेतु श्रुतिमूलकंवचनमेवैतदित्यंगीकृत्ययाज्ञिकमतेश्रद्धातव्यमित्युक्तं मयूखेतुअत्रपइष्ठ्येत्यादिश्रुत्यासांगायाविकृतेः पर्वणि विधानादावर्त्तनपूर्वसंधावपि पर्वणोधिकरणत्वश्रुतेः कर्मणोयस्ययः कालस्तत्कालव्यापिनीतिथिरितिस्मृतेश्चप्रकृतिविकृतिपर्यामपवासस्त्वेतद्दिन एवोभयोः कर्त्तव्यत्वेप्राप्तेक्रमः पूर्वार्द्धेविधीयतेप्रकृतेः पूर्वोक्तत्वादपूर्वंमतेस्यादितिवचनमप्येतत्परमेवनचसंधिमभितोयजेतेतिवचनात्प्रकृतिसमाप्तेः प्रतिपदिकर्त्तव्यत्वेननकर्मणिकर्मारंभइतिनिषेधेनचतन्मध्येविकृत्यनुष्ठानमनुचित

भितिवाच्यं नकर्मणिकर्मारंभइत्यस्यप्रयोगप्रांशुभावभंगप्रसंगमूलकत्वेन श्रुतिमूलकत्वात्तावान् प्रयोगप्रांशुभावाभं गस्यवात्रप्रतिपत्प्रतीक्षय।विकृत्यनुष्ठानेप्यावश्यकत्वादित्युक्तं अन्वारंभणीयातुचतुर्दश्यांकार्येतिहिरण्यकेशिवृत्तौमा तृदत्तीयेअन्येषांपर्वण्येवकालांतरमप्याहबौधायनःआमावास्यैनवान्नहाविषेष्ट्वा।नक्षत्रेवेतिशुक्लपक्षेकृत्तिकादिविशाखां तेषुदेवनक्षत्रेष्वितिकेशवस्वामीव्याचख्यौचतुर्मास्येष्वापिद्वादशाहपथाप्रयोगपक्षयोर्नक्षत्रेष्वप्यारंभः यावज्जीवसाव त्सरप्रयोगयोस्तुफाल्गुण्यांचैत्र्यांवारंभः आग्रयणकालानाहापस्तंबः वर्षासुश्यामकैर्यजेतशरदिव्रीहिभिर्वसंतेयवैर्य थर्तुवेणुपर्वैरिति श्रुतिरपिगृहमेधीव्रीहियवाभ्यांशरद्वसंतयोर्यजेतश्यामकैर्नीवारैर्वर्षास्वापत्कालेचान्येनपुराणैर्वेतिवा र्त्तिककारोपि यजेत्पूर्वपूर्णमाहर्ध्वं दर्शान्नवेज्याआग्रयणेष्टिः दीपिकायांदर्शेष्ट्याः परमुक्तमाग्रयणकं प्राक्पौर्णमासाच्च तादिति श्रुतिरपिसायातास्मिन्कालेमान्नास्योयंसंपद्येत तयेष्ट्याप्येतयायजेतइतिपौर्णमासेनयजेतेति आमावास्या दर्शेष्टिः तयाआमावास्ययाएतयाग्रयणेष्ट्याअनयावाचोक्तम्याचेदंपर्यवसन्नंपौर्णमास्यमावास्येष्ट्योरंतराग्रयणाननुष्ठान एतच्चव्रीहिभिरिष्ट्वाव्रीहिभिरेवयजेतायवेभ्योयवैरिष्ट्वापर्वैरेवयजेताव्रीहिभ्य इतिश्रुतिवलाद्व्रीहियवाग्रयणरूपपूर्वो त्तरावधिव्यवस्थितं प्रकृतौयेषांव्रीहियवानुष्ठानंतद्विषयंपौर्णमासेकहविष्कत्वानियमाद्दर्शस्यतथावाथयदहश्चंद्रमानद्द श्येत ताममावास्यामितिगोभिलगम्यंतद्भाष्यम् अथशब्दःपूर्वप्रकृतापेक्षः तत्पौर्णमास्यांयागार्थहविरुपक्लृप्तंतदमा वास्यायामप्युपलक्षणीयामित्यर्थः दर्शांतंपौर्णमासाद्येकंकर्मेतिवचनात् येनहाविषाप्रक्रांतंतेनैवसमापनीयमितिन्या याच्च हेमाद्रिस्तु पौर्णमास्यांपूर्वमाग्रयणानुष्ठानंसद्यस्कालप्रकृत्यनुष्ठानाविषयमिति पशौकालनिर्णयमाह गोविंदा र्णवेकात्यायनः अर्द्धोदद्रोभवतिनियतःपर्वसंधिःपरस्मात्कृत्वातास्मिन्प्रकृतमथतुस्यात्पशुःसद्यएव आधिकार पशुस्त्वग्नीषोमीयेणसवनीयेन वा समानतंत्रः कार्यइतित्रिकांडमंडनः सोमेत्वाहापस्तंबः आमावास्यायांदीक्षाजनीये

वासुत्यमहः पौर्णमास्यांदीक्षाजनीयेवापौर्णमास्यांजनीयेवासुत्यमरिति लापापभसूत्रेपि पूर्वपक्षस्यप्रथमेहनिदीक्षितनक्षत्रयोगेवेति पूर्वपक्षः शुक्लपक्षयोगेवेत्ययमर्थः चैत्र्यादिपूर्णिमायाश्चित्रादिनक्षत्रयोगेदीक्षेतेतिकालतत्त्वविवेचनेखंडपर्वणितुपशौसोमेपिमीमांसकमतेतिथेरेवांगत्वेनोपदेशात्तस्याश्चनिष्कटयोरावर्तनंतत्पूर्वसंध्योः पूर्वेद्युर्भूयः प्रयोगैकदेशव्याप्तिलाभात् विकृतीष्ट्यादिवत् तयोस्तत्रैवानुष्ठानंयाज्ञिकमतेतुपौर्णमास्यमावास्याशब्दयोस्तिथिवचनबलादेवेष्ट्यादिवदेवपशुसोमयोरपिपरेद्युरनुष्ठानं तयोःसंध्योःतद्विषयमपिक्वचित्प्रामाणिकयाज्ञिकग्रंथे खंडपर्वणिसोमश्चेत्प्रतिपन्मिश्रपर्वणि सोमसुत्याप्रयोक्तव्येत्याहकौषीतकीश्रुतिरितित्रिकांडवचनं एतेन सोमकालःप्राख्यातइतिदर्शपूर्णमासविकृतिकालनिर्णयप्रकारातिदेशकंसंकर्षकाणसूत्रवचनंलिखितं संधिवचनत्ववादिनांतुयाज्ञिकानां तद्वदहोरात्रलक्षणायाआवश्यकत्वान्न्यायोप्येतद्वचनानुग्रहकोलभ्यतइति सुतरांतथानुष्ठानंयुक्तंयाज्ञिकाचारोप्येवमेवेति आधानंतुपर्वणिनक्षत्रेषुचोक्तं तत्रपर्वनक्तंगार्हपत्यमादधाति इत्यादिकर्मकालव्यापिग्राह्यं दिनद्वयेत्वेतत्परंग्राह्यंसंकल्पपर्वणिलाभात् पूर्वनक्षत्रयोगेतदेवग्राह्यं यत्रत्रीणिसन्नियतितान्यर्जुनंक्षत्रंपर्वतत्समर्द्धविप्रतिषेधेनक्षत्रवलीयइतिहिरण्यकेशिसूत्रात्ततस्तुवसंतेब्राह्मणोग्नीनादधीतेत्यादिः रेणुकारिकायांतु माघादिपंचमासेषुश्रावणेचाश्विनेतथा मार्गशीर्षेशुक्लपक्षेआधानमथकारयेदित्युक्तं अत्रमूलंमृग्यं आधाननक्षत्राणित्वापस्तंबसूत्रे कृत्तिकारोहिणीमृगशीर्षपुनर्वसुपूर्वोत्तराहस्तचित्राविशाखानुराधाश्रवणोत्तराभाद्रपदाइति ज्योतिःशास्त्रेतु पुष्यरेवत्यानप्युक्तेसोमपूर्वाधानेविशेषमाहापस्तंबः सोमेनयक्ष्यमाणोनर्तून्मूर्खेनक्षत्रमितिनर्त्तुपृच्छेदित्याश्वलायनसूत्रे अत्रप्रकरणादाधानकालबाधःतेनसोमस्यवसंतकालतानबाध्यतइतिरुद्रदत्तवृत्तौनारायणवृत्तौचोक्तं धूर्तस्वामीतुसोमस्यापिनर्त्तून्मूर्खेइतिलिखनादुभयकालबाधंमन्यते श्रीरामांडारस्तुकालांतराविधानंवासर्वकालानादरोवेतिपक्षद्वयमुक्तवान् तत्रा

येकृत्तिकादिकालांतरस्ययथानैवंसताद्यवाधेनविधानंतथासोमेप्युदगयनपूर्वपक्षपुण्याहसान्निपातेयज्ञकालोनादेशइतिछंदोगसूक्तोदगयनाबाधेनसोमाभिसंधिरूपकालांतरविधानादुदगयनंत्वपेक्ष्यतइत्युक्तं द्वितीयपक्षेतुयदैवैनंश्रद्धायनमेदितिसर्वकालानादरउक्तइतिभारद्वाजसूत्रात् सर्वशब्दस्यचविश्वाजित्सर्वकालवाधइति तेनदाक्षिणायनेपिभवतीत्युक्तम् षड्गुरुभाष्येदेवत्रातभाष्ये तत्ररलोचषट्स्वपिऋतुषुभवतीत्युक्तमितिदिक् पिंडपितृयज्ञस्तुकात्यायनैर्यागदिनात्पूर्वेद्युः कार्यः पूर्वोवांगत्वात् पिंडपितृयज्ञइति सूत्रात्तमाख्यातंचैतत्कर्काचार्यः पूर्वएवदर्शात्पिंडपितृयज्ञोनपश्चात कुतः अंगत्वात् तथाचस्मृतिः तस्मात्पूर्वेद्युः पितृभ्यः क्रियत उत्तरमहर्देवान्यजतइतितेनकर्कमतेचतुर्दशीयुक्तदर्शेपिंडपितृयज्ञ इति श्री अनंतभाष्येतुपरेद्युरित्युक्तं तत्रद्वेधाप्याचारोदृश्यते इत्थंकात्यायनानांपिंडपितृयज्ञकालोनिर्णायितःआपस्तंबादिभिस्त्वमावास्यायामपराह्णे पिंडपितृयज्ञेनचरंतीतिश्रुतेः संधिमदहोरात्रापराह्णेपिंडपितृयज्ञोनुष्ठेयः अत्रयः परमोविप्रकर्षः सूर्याचंद्रमसोः सपौर्णमासीयः परमः सन्निकर्षः सामावास्येतिगोभिलोक्तेरमावास्यापर्दंयद्यपिसूर्याचंद्रमसोःपरमसंन्निकर्षवत्यंत्यक्षणेशक्यंतथापि तत्रकर्मानुष्ठानाशक्तेस्तद्वदहोरात्रंलक्षयति अतएव यदहश्चंद्रमसंनपश्यंति तदहः पिंडपितृयज्ञंकुरुतइत्यापस्तंबसूत्रंअस्यचैवंरुद्रदत्तीयाव्याख्या पिंडैर्युक्तः पितृयज्ञःपिंडपितृयज्ञः सचकर्मांतरंनतुदर्शशेषः यथावक्ष्यति पितृयज्ञःस्वकालविधानादमांगंस्यादिति तंचयदहश्चंद्रमसंनपश्यंतिपंचदश्यांप्रतिपदिवातदहः कुरुते यदहस्तयोः संधिस्तदहरित्यर्थइति श्रीरामांडारोप्याहपिंडपितृयज्ञस्तुपर्वसंधिमदहोरात्रापराह्ण इति अतएवयदैवैवनपुनस्तादृशेनपश्चादथापितृभ्योनिर्वपतीतिशतपथश्रुतिरपि पर्वसंधिदिनेहि पूर्वतःपश्चाच्चंद्रोनदृश्यतएवअतोमावास्यातिथेरपराह्णव्याप्त्यभावेपिअंत्यक्षणावच्छिन्नाहोरात्रएवापितृयज्ञः पूर्वदिनापराह्णव्याप्तेरत्वनादरइत्याश्वलायनापस्तंबसूत्रवृत्तिभाष्यकाराः अतएवमुहूर्त्तस्पृगमावास्याप्रतिपद्यपिचेद्भवेत् तद्द

त्तमक्षयंज्ञेयंपर्वशेषंतुपर्ववदिति हेमाद्रौवचनंपिंडपितृयज्ञपरमुक्तंप्रयोगपारिजाते मयूखेतु अमावास्याशब्दस्यप्रयो
गस्तावत्तिथिविशेषेसार्वजनीनोनिर्विवादः तत्रचैकदेशवर्त्तिनोपिपरमसन्निकर्षस्यसंभवति प्रवृत्तिनिमित्तत्वंचाक्रियत
इवविश्वेषांदेवानां यद्यपितिथिविशेषेलक्षणा तथापिनिकटत्वात्सैवयुक्तानाहोरात्रे आधुनिकी चंद्रदर्शनंतुअमायुक्ता
पराह्णएवत्यहोरात्रेप्यवशिष्टंईदृगहोरात्रेप्यवशिष्टंईदृगहोरात्रपूर्वाभाव्युषः कालीनंतुचंद्रदर्शनंपूर्वाहोरात्रवर्त्तित्वान्न
विरुद्धंअथपुरस्तात्पदसार्थक्यायतदेवविरुद्धंतदापरस्तात्पदसार्थक्यायसंध्युत्तराहोरात्रगतमपितत्तथास्यात् अतोप
राह्णयुक्तैवामायाह्यानतुसंधेराग्रहइत्यपराह्णस्त्वत्रपंचधाविभक्तदिनोपांत्योभागइति वृत्तिकारोक्तएवदिनद्वयेपराह्णेस्प
र्शभावेतुपूर्वदिनएव तत्रस्मृत्याद्यापादितचंद्रक्षयस्योत्तरदिनेचतादृश्याश्चंद्रवृद्धेःसत्त्वात् यथाहहारीतः चतुर्दश्यष्टमे
भागेक्षीणोभवतिचंद्रमाः अमावास्याष्टमेभागेपुनःकिलभवेदणुपूर्वाह्णोवैदेवानांमध्यंदिनोमनुष्याणामपराह्णःपितृणा
मित्यस्यपितृयज्ञप्रकरणपाठात् त्रेधाविभक्तादिनांत्यभागस्तुयुक्तः हारीतवचनस्तूपवासपरंयदहरेवैषनपुरस्तात्पश्चा
द्दृशेतदहरुपवसेदितिश्रुतेः यायजूकास्तुवृत्तिभाष्याद्युक्तंसंधिमदहोरात्रंप्रायःपंचधाविभागंचारुध्याचरंतीत्युक्तं अ
यंचस्यात्ताग्निमतासंपूर्णंदर्शश्राद्धंव्यतिषंगेणकार्यःव्यतिषंगोनामोभयोःसहानुष्ठानंएतच्चस्थालीपालेनसहपिंडार्थमुद्धृ
तोतिसूत्रेवृत्तिकृतोक्तं खंडपर्वणितुपूर्वदिनेकेवलंश्राद्धं परदिनेतुकेवलपितृयज्ञःकालभेदेनतंत्रन्यायाप्रवृत्तेः अतएवो
क्तंवृत्तिकृतानात्रापूर्वस्थालीपाकश्चोद्यते सर्वश्राद्धेषुप्रसंगादिति।पिंडपितृयज्ञाकरणे प्रायश्चित्तमाहपराशरमाधवीये
कात्यायन पितृयज्ञात्ययेचैववैश्वदेवात्ययेपिच भोजनेपतितान्नस्यचरुर्वैश्वानरोभवेदित्यलम्॥

॥ इतिश्रीमन्महाराजाधिराजश्रीरणवीरसिंहकारितेकृत्यरत्नाकरेपर्वसंधिनिर्णयः ॥

॥ अथेष्टिनिर्णयफलायितमग्निचर्य्याफलम्

हलायुधीयब्राह्मणसर्वस्वे तत्रपद्मपुराणम् त्रीनग्नीनथवाचैकंचार्योहन्यहनिसेवते सर्वभूतदयापन्नोनाप्रजोजायतेनरः तथाच दर्शंचपौर्णमासंचयेयजंतिद्विजातयः नतेषांपुनरावृत्तिर्ब्रह्मलोकात्कदाचन यमः नाग्निहोत्रात्परोधर्मोनाग्निहोत्रात्परंतपः नाग्निहोत्रात्परंदानंनाग्निहोत्रात्परंदमः तथा स्वर्गतान्यग्निहोत्राणिनयंतिपरमांगतिं अत्र स्वर्गश्चमोक्षश्चयेयोयथागंतुमिच्छति जाबालिः संतोषामृतमासाद्यततन्मनाधर्मवित्तुयः अकामेनाग्निहोत्रस्यहोतास्वर्गतिमाप्नुयात् देवलः नाग्निहोत्रंसमादायजीविकार्थंपरित्यजेत् सर्वैवेदास्तदर्थाहिलोकाब्राह्मणजन्मच अस्याकरणेदोषःकूर्मपुराणे त्रयाणामिहवर्णानांगृहस्थाश्रमवासिनां नास्तिक्यादथवालस्याद्योग्निंनाधातुमिच्छति यजेतवानयज्ञेनसयातिनरकान्बहून् तामिस्रमंधतामिस्रंमहारौरवरौरवौ कुंभीपाकंवैतरणीमसिपत्रवनंतथा अन्यांश्चनरकान्घोरान्संप्राप्यंतेसुदुर्गतिं अंत्यजानांकुलेविप्रशूद्रयोनौचजायते तस्मात्सर्वप्रयत्नेनब्राह्मणोवैविशेषतः स्वाध्यायाग्निविशुद्धात्मायजेतपरमेश्वरम् भविष्ये वेदैरुक्तैर्यथावीरस्वराज्यंसमुपेत्यवै अस्मान्येब्राह्मणाभूमावभ्यस्यंतिह्यनाग्निकाः क्लिश्यंतितेसदासर्वेमूढावैफलकांक्षया अनुष्ठानविहीनानामस्मानभ्यस्यतांभुवि क्लेशोहिकेवलोदेवनास्मदभ्यसनेफलम् तथा अनुष्ठानपदंदेवमस्मात्स्वभ्यसनात्सदा इत्येवंराजशार्दूलवेदाऊचुर्हिवेधसं व्यासशातातपौ योगृहीत्वाविवाहाग्निंगृहस्थइतिमन्यते अन्नंतस्यनभोक्तव्यंवृथापाकोह्यसौभवेत् अथपक्षादिकालः छंदोगपरिशिष्टकात्यायनः पक्षादावेवकुर्वीतसदापक्षादिकंचरुं पूर्वाह्णएवकुर्वंतिविद्धेप्यन्येमनीषिणः लघुहारीतः पर्वणोंशेतुरीयेतुकार्य्याइष्टिर्द्विजातिभिः द्वितीयासहितंयस्माद्दूषयत्याश्वलायनः अथपक्षादिकर्म तत्र पारस्करः पक्षादिषुस्थालीपाकंश्रपयित्वा दर्शपौर्णमासदेवताभ्योहुत्वाजुहोति ब्रह्मणेप्रजापतये विश्वेभ्योदेवेभ्यो द्यावापृ

थिवीभ्यामिति विश्वेभ्योदेवेभ्योबलिहरणं भूतगृह्येभ्यःस्वाहा आकाशायवैश्वदेवस्याग्नौजुहोति अग्नयेस्वाहा प्रजापतयेस्वाहा विश्वेभ्योदेवेभ्यःस्वाहा अग्नयेस्विष्टकृतेस्वाहा इतिबाह्यतःस्त्रीबलिंहरतिपुंसवेधसेनमः शुक्लायकृष्णायदंतायपापिनांपतयेनमः येमेप्रजामुपलोभयंतिग्रामेवसंत उतआरण्येतेभ्योनमस्तुवमेभ्योहराम्यस्तिमेस्तु प्रजाम्मेददाचेतिशंखमद्भिःप्रपलाव्य ततोब्राह्मणभोजनम् अत्रदर्शानंतरंप्रतिपदिदर्शदेवताभ्यःस्थालीपाकंहुत्वा पौर्णमास्यनंतरंप्रतिपदिपूर्णमासादेवताभ्यःस्थालीपाकंहुत्वा ब्राह्मणादीनांस्थालीपाकेनहोमोविधेयः तत्रदर्शदेवताःअग्निर्विष्णुरिंद्राग्नीचपौर्णमासेचदेवताः अग्नीषोमौचछंदोगपरिशिष्टे कात्यायनः यामताहोमनिर्वृत्तिर्भवेद्यायत्रकीर्तिता शेषंचैवभवेत्किंचित्तावत्तुनिर्वपेत्चरुं अथस्रुवादिपात्रनिर्माणानंतरं सामान्यधर्मेकात्यायनः तेषांप्राक्शःकुशैः कार्येसंमार्ग्याग्नौजुहुयात्प्रतापंचालिप्तानांप्रक्षाल्योष्णेनवारिणा पात्रासादनेकात्यायनः श्रपणस्यपश्चादुत्तरतोवेत्यत्रचप्रांच्युदंचिकर्मणीतिसामान्यपरिभाषावचनात्प्रागग्राण्येवयजुर्वेदिनापात्राण्यासादीनि यज्ञपार्श्वः कंडनंसेचनंचैव तथैवोल्लेखनक्रिया सकृदेवपित्र्येणस्याद्दैवेत्रित्वंविधीयते गोभिलः दक्षिणोत्तराभ्यांपाणिभ्यांत्रिवलीकृतांस्तंडुलांस्त्रिर्देवेभ्यःप्रक्षालयेदित्याहुः द्विर्मनुष्येभ्यः सकृत्पितृभ्यः इतिपवित्राहितांस्तंडुलानावपेत् कुशलश्रितमिवस्थालीपाकंश्रपयेत् प्रदक्षिणमुदायुवन्प्रदक्षिणमुदन्नरन्निति दक्षिणावर्त्तेनस्थालीपाकेनसमंन्नविलोडयन्नित्यर्थः श्रितमभिघार्य्योद्वास्यप्रत्यभिधारयेत् इतिपक्षादिकर्म्मप्रयोगः ॥

॥ इतिश्रीमहाराजकारितेकृत्यरत्नाकरेपर्वसंधिनिर्णयानंतरंपक्षादिकर्मविधिः ॥ *

अथामापितृपक्षमृतानांक्षयाहेस्मृतिसुधाकरोक्ताव्यवस्था तत्रपूर्वंसामान्यैकोद्दिष्टस्वरूपं एकोद्दिष्टश्राद्धंतु एकपिंडकमेकार्घकमेकपवित्रकमेकपात्रकमेकब्राह्मणकमग्नौकरणावाहनविश्वेदेवरहितं कर्त्तव्यमिति तत्रैकोद्दिष्टपदं योगशक्त्यै

वेकोद्दिष्टवाचकमित्याह एकमुद्दिश्ययच्छ्राद्धंतदेकोद्दिष्टमुच्यते त्रीन्समुद्दिश्ययच्छ्राद्धंपार्वणंमुनयोविदुः इतिवचनादिति पिंडादीनामेकत्वंआवाहनादिराहित्यंचकात्यायनसूत्रंप्रमाणयति अथैकोद्दिष्टमेकोब्राह्मणएकोर्घएकंपवित्रं एक पिंडोनाग्नौकरणंनावाहनंनविश्वेदेवाइतिकात्यायनसूत्रादिति सूत्रबलादेव कतिप यदेशीयात्रिपुरुषक्षयाहश्राद्धसंप्रदायंदूषयति एतेनैकोद्दिष्टक्षयाहेत्रिपिंडाचरणंसर्वथानिर्मूलमितिस्मर्त्तव्यंत्रिपिंडीनिषेधेत्वंतरमाह क्षयाहेपार्वणंकुर्वन्नधोधोयातिमानवइतिवचनात् वस्तुतस्त्विदमसंगतमेव तथाहिकात्यायनसूत्रंहि यत्रएवोद्दिश्यते तत्रेतिकर्त्तव्यतामाह नतुत्रिपिंडीनकर्त्तव्येतितिनिषेधः अतएव पतिव्रताधर्मपत्नीपितृपूजनतत्परा मध्यमंचततःपिंडमद्यात्सम्यक्सुतार्थिनीतिमनुस्मरणात् मत्प्रसादादसंदिग्धंशृणुचेदंभुजंगम श्राद्धावसानेभुंजीरन्मध्यमंपिंडमात्मजाः तथा चकृतवान्श्राद्धंसनागःकंबलानुजः पिंडंचमध्यमंतद्वद्यथावदुपभुक्तवानिति मार्कंडेयपुराणेऽश्वतरंप्रतिशिववचश्चसंगच्छते नह्येकोद्दिष्टादौमध्यमत्वमेकस्यपिंडस्यसंभवति लेपभाजश्चतुर्थाद्याःपित्राद्याःपिंडभागिन इति श्राद्धविवेकनिबंधमपिवचनंत्रयाणामेवपिंडाधिकारमाह किंचनैकमुद्दिश्यत्रिपिंडीमाचरति काश्चिद्येनसूत्रविरोधःस्यात् किंतु त्रिपुरुषीमुद्दिश्येतिनदोषः अपिच सर्वथात्रिपिंडाचरणनिषेधे सपिंडीकरणादूर्ध्वंयत्रयत्रप्रदीयते तत्रतत्त्रयंकुर्यादितिशातातपवचनंव्याकुप्येत यच्चत्रिपिंडीनिषेधेक्षयाहेपार्वणंकुर्वन्नितिवचनंहेतुत्वेनोपन्यस्तंतदत्यसंगतं यतस्तद्विश्वेदेवपूर्वकषट्पुरुषकश्राद्धंनिषेधयति तत्रैवपार्वणपदवृत्तेःसर्वसंमतत्वात् तस्यक्षयाहस्थानीयंषट्पिंडकपार्वणमेव पार्वणेनविधानेनदेयमग्निमतासदेत्यादिवदता स्वयमपितथैवस्वीकारात् अन्यथापूर्वापरविरोधात् तस्मादमावास्यातिरिक्तक्षयाहेत्रिपिंडीनिषिद्धा वर्जयित्वामृताहनीतिवचनस्यपर्वातिरिक्तक्षयाहपरत्वात् अमायांचक्षयोयस्येत्यादि प्रतिप्रसवविषयातिरिक्तस्थलएव निषेधप्रवृत्तेः उत्सर्गस्यनिषेधविषयमिवनिषेधस्यप्रतिप्रसवविषयंपरि

त्यज्यैव प्रवृत्तेरितिध्येयं प्रसंगात्साग्निक्षयाहंनिर्णेतुमाह साग्निस्तुइत्यादि इदानींप्रेतपक्षादिक्षयाहे विश्वेदेवपूर्वकमेकोद्दिष्टसंप्रदायंदूषयति अमावास्यामाश्विनापरपक्षेवेत्यादिनातदुन्नेयं तेनहेतुमाह निर्मूलत्वादिति तत्रापि हेतुः शक्तिलक्षणयोरभावादितिशंकते तत्त्वेति तत्त्वालपनंशक्तिकल्पनंसमाधत्ते कृष्णपक्षेइत्यादि अयमर्थः प्रेतानांपक्षःप्रेतपक्षइतिव्युत्पत्त्यादिकल्पनात् साचकृष्णपक्षेऽपिसमाना शुक्लोदेवानांकृष्णःपितॄणामितिप्रसिद्धेः दूषणांतरमाह अशेषेति तत्प्रकृतिकत्वात्पार्वणप्रकृतिकत्वादित्यर्थः वृत्त्यभावादेवमहालयपदमपिनाश्विनापरपक्षवाचकमित्याह महालयइत्यादि येयंदीपान्वितेत्यादौतीर्थवाचकत्वेनाप्युपपत्तेरितिभावः तदेतदपिविचारपदवींनारोहति तत्रानेकनिबंधग्रंथाप्रसिद्धस्यशातातपवचनस्य निर्मूलत्वोक्तिरेवनिर्मूला अथवाक्यस्यपार्वणविधानांशेनिर्मूलता एकोद्दिष्टस्ययोग्यत्वादितिचेन्न दर्शादिक्षयाहेपार्वणस्यैवसर्वसम्मतत्वात् औरसक्षेत्रजौपुत्रौविधिनापार्वणेनतु प्रत्यब्दमितरेकुर्य्युरेकोद्दिष्टंसुतादशेतिशंखलिखितौ क्षयाहमात्रेपार्वणंस्मरतः किंतुदर्शपितृपक्षयोःक्षयाहे पार्वणमितिवाक्यं दर्शाद्यतिरिक्तपरंपर्वणिपार्वणस्यवाक्यांतरेणासिद्धौवचनद्वयस्यनियमपरत्वेन त्रिपिंडीपरत्वेनैवाप्युपर्युक्तेयच्चोक्तं शक्तिलक्षणयोरभावादिति तदेवोदाहृतं पंकजादिपदवत्प्रेतपपक्षस्ययोगरूढित्वात् कन्यागते सवितरियान्यहानितुषोडश क्रतुभिस्तानितुल्यानिपितॄणांदत्तमक्षयमित्यादि वचनबलादाश्विनापरपक्षस्यैवाभ्यर्हितत्वेसामान्यकल्पनायाअसंगतत्वात् किंचवाक्येऽमावास्यापृथङ्निर्दिष्टानाहिसामान्यकृष्णपक्षपरत्वेपृथङ्निर्देशार्हतेति सैवाश्विनापरपक्षत्वेसाक्षिणी यच्चाह महालयपदस्यतीर्थवाचकत्वेनापरपक्षवाचकतानुपपत्तिरिति तदप्यसंबद्धं नह्येकवाचकत्वेपरवाचकताक्षीयते अनेकार्थशब्दबोधापत्तेः प्रत्युतकालप्रकरणे तीर्थवाचकतैवासंगताप्रकरणविरोधात् तस्मादमावास्यांक्षयेयस्येतिशातातपवचनादौरसक्षेत्रजौपुत्रौविधिनापार्वणेनतु

इतिशंखवचनात्पर्वणिपार्वणन्यायप्राप्तत्वाच्च क्षयाहेपार्वणमितिवचनस्यपर्वातिरिक्तक्षयाहपरत्वेपार्वणंकर्त्तव्यं पतिव्रधर्मपत्नीतिमनुस्मरणात् मत्प्रसादादसंदिग्धामित्यादिमार्कंडेयपुराणवचनाच्च उद्धृतास्तिवराहेणपृथिवीभयविह्वला तत्रस्थित्वाप्रकुर्वीतश्राद्धंपिंडत्रयंतथेति वराहपुराणात् पर्वणिपार्वणस्यान्यवाक्यैरेवासिद्धौपुनर्विधानस्यत्रिपिंडपरत्वात्क्षयाहेपार्वणस्यहिनिषेधानुरोधाच्च त्रिपुरुषकंवाकर्त्तव्यमितिनिष्कंटकःपंथाः अथस्मृतिसुधाकरोमूलपाठोलिख्यते एकोद्दिष्टश्राद्धंत्वेकमेवार्घमेकपात्रमेकब्राह्मणमग्नौकरणावाहनविश्वेदेवरहितंकर्त्तव्यम् एकमुद्दिश्ययच्छ्राद्धं तदेकोद्दिष्टमुच्यते इतिवचनात् अथैकोद्दिष्टमेकोब्राह्मणएकोर्घपात्रमेकंपवित्रमेकः पिंडोनाग्नौकरणं नावाहनंनात्रविश्वेदेवा इतिकात्यायनसूत्रात् एतेनैकोद्दिष्टक्षयाहेत्रिपिंडाचरणंसर्वथानिर्मूलमितिस्मर्त्तव्यम् क्षयाहेपार्वणंकुर्वन्नधोधोयातिमानव इतिवचनात् साग्निस्तुक्षयाहनिश्राद्धंनास्त्येव नदर्शेनविनाश्राद्धमाहिताग्नेर्द्विजन्मन इतिवचनात् अतएव तस्यक्षयाहस्थानीयं षट्पिंडकंपार्वणमेव पार्वणेनविधानेनदेयमग्निमतासदेति अमावास्यायामाश्विनापरपक्षेच मृतस्यैकोद्दिष्टमपिसदैवकर्त्तव्यं अमायांचक्षयोयस्यप्रेतपक्षेथवापुनः सपिंडीकरणादूर्ध्वंतस्योक्तःपार्वणोविधिरितिवाक्यात् विश्वेदेवातिदेशात् विध्यंतरस्यप्रकृतित्वेनैवप्राप्तेरितिप्राचोनिर्बंधतत्कल्पनंकृष्णपक्षेएव कल्पनापत्तेः अशेषपार्वणधर्मप्राप्त्यापत्तेश्च तत्प्रकृतिकत्वादिति महालयपदस्यापितिथिविशेषवाचकत्वेनाश्विनापरपक्षवाचकत्वाभावादितिवक्ष्यमाणवचनाच्च पार्वणश्राद्धेचनित्येअपराह्णोमुख्यः कालः तथाश्राद्धस्यपूर्वाह्णादपराह्णोविशिष्यते इतिमनुवचनात्एतत्समस्तंसविस्तरंप्रागेवप्रपंचितमित्यलंबहुपल्लवितेन ॥ इतिक्षयाहश्राद्धेपार्वणैकोद्दिष्टत्वादिकर्त्तव्यतानिर्णयः

॥ अथग्रहणकालनिर्णयःकल्पद्रुमे ॥ ॥

तत्रग्रहणंनामप्रतिपत्संधौराहुणासूर्याचंद्रमसोर्ग्रसनं तदाहवृद्धगार्ग्यः पूर्णिमाप्रतिपत्संधौराहुःसंपूर्णमंडलं ग्रसतेचं

द्रमर्कंचदर्शप्रतिपदंतरइति तत्रपर्वणोंतभागः स्पर्शकालः प्रतिपदआद्यभागोमोक्षकालः तदुक्तंब्रह्मसिद्धांते यावान्कालःपर्वणोंतितावत्प्रतिपदादिमः रवींदुग्रहणानेहाः राहुग्रहणकालः तत्रकर्त्तव्यमुक्तंहेमाद्रौ माधवाद्युदाहृतायांस्मृतौ ग्रस्यमानेभवेत्स्नानंग्रस्तेहोमोविधीयते मुच्यमानेभवेद्दानंमुक्तेस्नानंविधीयतइति तथाचब्रह्मवैवर्तेस्नानंस्यादुपरागादौमध्यंहोमः सुरार्चनं अन्यदपिकृत्यंमहाभारते गंगास्नानंतुकुर्वीतग्रहणेचंद्रसूर्य्ययोः महानदीषुचान्यासुस्नानंकुर्याद्यथाविधीति अत्रचग्रहणेयद्यपि वापीकूपतडागेषुगिरिप्रस्रवणेषुच नद्यंतरेदेवखातेसरसीषूद्धृतांबुना इति उष्णोदकेनवास्नायाद्ग्रहणेचंद्रसूर्ययोरितिशंखवचनेन सर्वत्रोक्तंसाम्यंच सर्वंजलानां सर्वभूमिसमंदानंसर्वेब्रह्मसमाद्विजाः सर्वंगंगासमंतोयंराहुग्रस्तेदिवाकरे स्वर्धुन्यंतः समानिस्युः सर्वाण्यंभांसिभूतले कूपस्थान्यपिसोमार्कग्रहणेनात्रसंशयइतिव्यासेनोक्तं तथापितत्प्रशंसामात्रं तारतम्यत्वावश्यकं अतएवमार्कंडेयेनोक्तं भूमिष्ठमुद्धृतात्पुण्यंततः प्रस्रवणोदकं ततोपिसारसंपुण्यंततःपुण्यंनदीजलं तीर्थतोयंततःपुण्यंमहानद्यंबुपावनं ततस्ततोपिगंगांबुपुण्यंस्याच्चततोंबुधिः शीतमुष्णोदकात्पुण्यमपारक्यंपरोदकादिति तत्रापिगंगाकुरुक्षेत्रंचसर्वदाग्रहणस्नानादौश्रेष्ठं तदाहवृद्धवसिष्ठः इंदोर्लक्षगुणंपुण्यंरवेर्दशगुणंततः गंगातोयेतुसंप्राप्तेइंदोःकोटीरवेर्दश गवांकोटिसहस्रस्यसम्यग्दत्तस्ययत्फलंतत्फलंजाह्नवीस्नानेराहुग्रस्तेदिवाकरे पुनस्तत्रकुरुक्षेत्रेदशसंख्यमुदाहृतं तथाच चंद्रसूर्यग्रहेचैवयोवगाहेतजाह्नवीं सस्नातःसर्वतीर्थेषुकिमर्थमटतेमहीमिति अन्यकालीनेतत्तत्तीर्थस्नानेयत्पुण्यं तदिंदोर्ग्रहणेतत्रस्नानेलक्षगुणंरवेः ग्रहणेदशलक्षंएवंकोटिर्दशकोटयः स्कंदपुराणे उपरागेकुरुक्षेत्रंपवित्रंमुनयोविदुरिति मत्स्यपुराणे दशजन्मकृतंपापं गंगासागरसंगमे जन्मांतरसहस्रेषुयत्पापंसमुपार्जितं तत्तन्नश्येत्सन्निहत्यांराहुग्रस्तेदिवाकरे सन्निहत्यांकुरुक्षेत्रे अत्र गंगाशब्देनकृष्णावेणीगोदावरीजाह्नव्यउच्यंते तदुक्तं ब्रह्मपुराणे तिस्रोनद्योमहापुण्यागोदावेणीचजाह्नवी गांहरी

शांघ्रिकप्राप्तागंगाइतिहकीर्त्तिता हरिश्चेशश्चहरीशौतयोरंघ्रिः पादः कंशिरः अंघ्रिश्चकंचअंघ्रिकं हरेःपादादीश्वरस्यशिरसोगांभूमिंप्राप्ता गंगायद्यपिजाह्नव्येवतादृशी नतुवेणीगोदे तथापिछत्रिन्यायेन जाह्नव्यासहनिर्दिष्टयोरपिगंगात्वमविरुद्धं गंगायाअसंनिधाने अन्यनदीषुस्नानंकुर्य्यात् ताश्चब्रह्मपुराणेदर्शिताः गोदावरीभीमरथीतुंगभद्राचवेणिका तापीपयोष्णीविंध्यस्यदक्षिणेतुप्रकीर्त्तिताः भागीरथीनर्मदाचयमुनाचसरस्वती विशोकाचवितस्ताचाविंध्यस्योत्तरतस्तथेति उष्णोदकस्यातुरविषयत्वं व्याघ्रआह आदित्यकिरणैःपूतंपुनःपूतंचवह्निना अतोव्याध्यातुरःस्नायाद्ग्रहणेप्युष्णवारिणेति अतएवपूर्वंगंगातोयमारभ्योष्णोदकांतेषूत्तरोत्तरानुकल्पत्वमुक्तं अतएवानातुराभिप्रायेणैव तन्निषेधोभिहितः मृतेजन्मनिसंक्रांतौग्रहणेचंद्रसूर्य्ययोः अस्पृश्यस्पर्शनेचैवनस्नायादुष्णवारिणेत्यादियमादिवचनेषु पृथ्वीचंद्रोदयेप्रभासखंडे गावोनागास्तिलाधान्यंरत्नानिकनकंमही संप्रदायकुरुक्षेत्रेयत्फलंलभतेनरः तदिंदुग्रहणेंभोधौस्नानाद्भवतिषड्गुणं तत्रैवसौरपुराणे अंबुधिस्नानमुपक्रम्य दानानीमानिलोकेषुविख्यातानिमनीषिभिः तेषांफलमवाप्नोतिग्रहणेचंद्रसूर्ययोः ग्रहणविशेषेनदीविशेषस्तत्रैवाभिहितः गोदावरीमहापुण्याचंद्रेराहुसमन्विते सूर्य्येचराहुणाग्रस्तेतमोभूतेमहामुने नर्मदातोयसंस्पर्शात्कृतकृत्याभवंतिते येसूर्येसैंहिकेयेनग्रस्तेरवाजलंनराः स्पृशंतिचावगाहंतिनसाप्रकृतिमानवीतिदेवीपुराणे गंगाकनखलंपुण्यंप्रयागंपुष्करंतथा कुरुक्षेत्रंमहापुण्यं राहुग्रस्तेदिवाकरेइति मासविशेषेग्रहणे तन्निमित्तस्नानादेस्तीर्थविशेषसंबंधेफलातिशयउक्तस्तत्रैव कार्त्तिकेग्रहणंश्रेष्ठंगंगायमुनसंगमे मार्गेतुग्रहणंपुण्यंदेविकायांमहामुने पौषेतुनर्मदापुण्यामाघेसन्निहिताशुभा फाल्गुनेवरणापुण्याचैत्रेपुण्यासरस्वती वैशाखेतुमहापुण्याचंद्रभागासरिद्वरा ज्यैष्ठेतुकौशिकीपुण्या आषाढेतापिकानदी श्रावणेसिंधुनामातुतथाभाद्रेचगाङ्किका आश्विनेसरयूःश्रेष्ठाभूयः पुण्यातुनर्मदेति ब्रह्मवैवर्त्ते मकरेवर्त्तमानेतुग्रहणेचंद्रसूर्ययोः दुर्लभंत्रिषुलोकेषुगंगा

दां पिंडपातनमिति स्नानवत्स्मरणादिष्वपिपुण्यमाह मार्कंडेयः स्मृत्वाशतक्रतुफलंदृष्ट्वासर्वाघनाशनं स्पृष्ट्वागोमे
धजंपुण्यंपीत्वासौत्रामणिंलभेत् स्नात्वावाजिमखंपुण्यंप्राप्नुयादविचारतः रविचंद्रोपरागेचअयनेचोत्तरेतथा एवंगंगा
पिद्रष्टव्यातद्वदेवसरस्वतीति वारविशेषयोगेनचग्रहणेफलविशेषोव्यासेनोक्तः सूर्यवारेरवेर्ग्रासः सोमेसोमग्रहस्तथा
चूडामणिरितिख्यातस्तत्रानंतफलंलभेत् वारेष्वन्येषुयत्पुण्यंग्रहणेचंद्रसूर्ययोःतत्पुण्यंकोटिगुणितंग्रासेचूडामणौस्मृत
मिति अत्रस्नानमावश्यकमेव ग्रहणेसंक्रमेचैवनस्नायाद्यदिमानवः तस्याशौचंभवेत्तावन्मद्यावदपरोग्रहइति संक्रांति
प्रकरणोदाहृतवृद्धवसिष्ठवचनेनअकरणेप्रत्यवायस्मरणात् काम्यमपिफलश्रवणात् तथाचदक्षःउषस्युषसियत्स्ना
नंसंध्यायामुदितेरवौ चंद्रसूर्योपरागेतुप्राजापत्येनतत्सममिति तच्चस्नानमाद्यंतयोः कार्य्यंग्रस्यमानइतिवचनात् विमु
क्तेयदिनस्नायाच्चंद्रसूर्यग्रहेतथा तस्यस्यात्तावदाशौचंयावदन्यः परोग्रहइति तत्रैवमुक्तस्नानेदोषश्रवणाच्च उभयत्रापि
सचैलं ग्रहणेशावमाशौचंविमुक्तौसौतिकंस्मृतं तयोःसंपत्तिमात्रेणउपस्पृश्यक्रियाक्रमइति ब्रह्मांडपुराणे शावाशौ
चनिमित्तत्वोक्त्याविमुक्तेश्चप्रसववत्त्वोक्त्या तथाजननमरणयोः सचैलस्नानादेवनिवृत्तिस्तदुत्तरमेवच कर्माधिकार
स्तथात्रापीत्यर्थस्यप्रतिपादनात् सर्वेषामेववर्णानांसूतकंराहुदर्शने सचैलंतुभवेत्स्नानंसूतकान्नंचवर्जयेदिति वृद्धव
सिष्ठोक्तेश्च सचैलमितिमुक्तिस्नानांतपरमितिमदनरत्नउक्तं इदंचस्नानममंत्रकंकार्यमितिस्मृतिरत्नावल्यां अत्रचवृद्ध
वसिष्ठवचनेसूतकमाशौचंबहुसूतके इतिपाठे पूर्वसूतकशब्देनास्पृश्यत्वमुच्यते सूतकान्नंग्रहणाशौचांतरितं पूर्वपक्वं
अतएवषट्विंशन्मते सर्वस्यैवपूर्वाह्णस्योत्तरार्द्धस्य स्नात्वाकर्माणिकुर्वीतमृतमन्नंविवर्जयेदिति मृतंतदंतरितस्योपल
क्षणम् नवश्राद्धेषुयच्छिष्टंग्रहपर्य्युषितंचयदितिमिताक्षरावचनात् केषुचित्प्रतिप्रसवः आरनालंतथाक्षीरंकिलाटंघृत
सक्तवः स्नेहपक्वंचतैलंचनकदाचित्प्रदुष्यतीति तत्रविशेषोवचनांतरे आरनालंचतक्रंचस्यादेवंघृतपाचितं उदकंच

कुशच्छन्नंनदुष्येद्राहुदर्शनइति मणिकस्योदकंचैवेतिपाठांतरं मंत्रमुक्तावल्यां अन्नंपक्कमिहत्याज्यंस्नानंसवसनंग्रहे वा
रितक्रारनालादितिलदर्भैर्नदुष्यतीति जलेत्वदोषोगंगाविषयः ग्रहोषितजलंपीत्वापादकृच्छ्रंसमाचरेदिति तत्रैवचतु
र्विंशतिमतेजलस्यापिदोषोक्तेः अन्नपानवत् श्राद्धमपिनित्यंकार्यं सर्वस्वेनापिकुर्वीतश्राद्धंवैराहुदर्शने अकुर्वाणस्तुना
स्तिकयाल्पंकेगौरिवमज्जतीतिमहाभारते नैमित्तिकंतुकर्त्तव्यंग्रहणेचंद्रसूर्ययोः वांधवानांचमरणेनारकोस्यादतोन्यथेति
कूर्मपुराणोक्तप्रत्यवायश्रवणात् यत्तुमार्कंडेयवचनं विशिष्टब्राह्मणेप्राप्तेसूर्येन्दुग्रहणायने जन्मर्क्षग्रहपीडासुश्राद्धंकुर्वी
तचेच्छयेतितदपिइच्छयाचेत्यन्वयेनश्राद्धं प्रतिरुचिश्चैवेत्येतत्समानार्थतयाव्याख्यातंकाम्यमपीहश्राद्धं तथाहविष्णुः
राहुदर्शनदत्तंहिश्राद्धमाचंद्रतारकं गुणवत्सर्वकामीयंपितॄणामुपतिष्ठतीति ऋष्यशृंगोपि चंद्रसूर्यग्रहेयस्तुश्राद्धंवि
धिवदाचरेत् तेनैवसकलापृथ्वीदत्ताविप्रस्यवैकरेइति शातातपोप्याहसैंहिकेयोयदासूर्यंग्रसतेपर्वसंधिषु गजच्छायातु
साज्ञेयापितॄणांदत्तमक्षयमिति तथालिंगपुराणे व्यतीपातक्षणंयावद्यावच्चंद्रग्रहेक्षणः गजच्छायातुसाप्रोक्तापितॄणांदत्त
मक्षयमिति चंद्रग्रहणनिमित्तंस्नानश्राद्धादिरात्रावपिभवेदितितदाहशातातपः स्नानंदानंततः श्राद्धमनंतंराहुदर्शने आ
सुरीरात्रिरन्यत्रतस्मात्तांपरिवर्जयेदिति देवलोपि यथा स्नानंदानंचसूर्यस्यग्रहणेचयथादिवा सोमस्यापितथारात्रौ
स्नानंदानंविधीयतइति विष्णुरपि संध्यांनरात्रौकुर्वीतश्राद्धंचैवविशेषतः द्वयोरपिचकर्त्तव्यंयदिस्याद्राहुदर्शनमिति
अपरार्केव्यासोपि ग्रहणोद्वाहसंक्रांतियात्रार्त्तिप्रसवेषुच दानंनैमित्तिकंज्ञेयंरात्रावपितदिष्यतइति इदंचश्राद्धमामेनहे
म्नावाकार्य्यं तदुक्तंशातातपेन आपद्यनग्नौतीर्थेचचंद्रसूर्यग्रहेतथा आमश्राद्धंप्रकुर्वीतहेमश्राद्धमथापिवेति वौधायनो
पि अन्नाभावेद्विजाभावेप्रवासेपुत्रजन्मनि हेमश्रद्धंसंग्रहेचकुर्यात्शूद्रःसदैवहीति इत्थमेवनिर्णीतवंतोहेमाद्रिमाधवम
दनरत्नादयोनिखिलनिबंधकाराः निर्णयसिंधौतु अपरार्कसंमतंप्रकारांतरमपिलिखितं ग्रहणेद्विजातीनामामश्राद्धं

पाकासंभवेद्रष्टव्यंतीर्थेश्राद्धवत् पाकाभावेद्विजातीनामामश्राद्धंविधीयतइतिसुमंतूक्तेः सैंहिकेयोयदासूर्य्यमित्युपक्रम्य घृतेनभोजयेद्विप्रान् घृतंभूमौसमुत्सृजेत् इतिवायवीयोक्तेश्च विज्ञानेश्वरोप्याह ग्रहणेश्राद्धभोक्तुर्दोषोदातुश्चाभ्युदयइतिसूतकेमृतकेभुक्तेग्रहीतेशशिभास्करे छायायांहास्तिनश्चैवनभूयःपुरुषोभवेदित्यापस्तंबेनभोजननिषेधाच्च अयंचभोजननिषेधः श्राद्धभोक्तुर्हस्तिच्छायासाहचर्य्यात् ननुग्रहणेश्राद्धंसपिंडकमपिंडकंवाकर्त्तव्यमितिसंशयःनिर्णयसिंधौस्मृतिरत्नावल्यां पुत्रेजातेव्यतीपातेग्रहणेचंद्रसूर्ययोः श्राद्धंकुर्यात्प्रयत्नेनपिंडनिर्वपणादृतइति श्राद्धकाशिकायांतुमत्स्यपुराणे ततःप्रभृतिसंक्रांतावुपरागादिपर्वसु त्रिपिंडमाचरेच्छ्राद्धमेकोद्दिष्टंमृताहनीति प्रजापतिरपि संक्रांतावुपरागेचवर्षोत्सवमहालये निर्वपेदत्रपिंडांस्त्रीनितिप्राहप्रजापतिरिति अत्रग्रहणनिमित्तकश्राद्धेनैवामासंक्रांत्यादिनिमित्तकानांसिद्धिः दर्शकालात्ययोरपीतिकालादर्शोक्तेरिति किंचिद्दानंचात्रेतिअयनादौसदादेयमितिशातातपीये सदाशब्दश्रवणात् नित्यत्वादेवचमलमासेपितद्भवतीत्युक्तंमात्स्ये चंद्रसूर्यग्रहेचैवमरणेपुत्रजन्मनि मलमासेपिदेयंस्याद्दत्तमक्षयकारकमितिकाम्यमपीदं भूमिर्गावःसुवर्णंवाधान्यंवायद्यदीप्सितं तत्सर्वंग्रहणेदेयमात्मनः श्रेयइच्छतेतिभारतवचनात्ग्रहणेयद्यद्दानंतत्पात्रेकर्त्तव्यं तदुक्तंतत्रैव अयनेविषुवेचैवग्रहणेचंद्रसूर्ययोः पात्रभूतायविप्रायभूमिंदद्यात्सदक्षिणां पात्रलक्षणंतूक्तंयाज्ञवल्क्येन नविद्ययाकेवलयातपसावापिपात्रता यत्रस्यातामिमेचोभेतद्धिपात्रंप्रकीर्तितमिति अत्रानुकल्पमाहबौधायनः अश्रोत्रियःश्रोत्रियोवा पात्रंवापात्रमेववा विप्रब्रुवोपिवाविप्रोग्रहणेदानमर्हतीति यद्यपिपूर्वंसर्वेव्याससमाद्विजाइत्युक्तं तथापितद्ब्राह्मणस्तुत्यर्थंदानस्यावश्यकत्वार्थंच नतुपात्रत्यागेनयस्मैकस्मैविद्वान्प्रतिपादनार्थं अतएवपात्रतारतम्येनफलतारतम्यमुक्तं दक्षस्मृतौ सममब्राह्मणेदानंद्विगुणंब्राह्मणब्रुवे श्रोत्रियेशतसाहस्रंपात्रेत्वानंत्यमश्नुते इति अब्राह्मणोजातिमात्रब्राह्मणःसंस्कारादिरहितः ब्राह्मणब्रुवस्तु उक्तश्चतुर्विंश

तिमते गर्भाधानादिसंस्कारैर्वेदोपनयनैर्युतः नाध्यापयतिनाधीतेसभवेद्ब्राह्मणब्रुवइति श्रोत्रियःसर्वसंस्कारपूर्वक वेदाध्ययनवान् तुलापुरुषदानादिकालप्रक्रमे यच्चंद्रसूर्यग्रहणे तन्न नतेषांतान्निमित्तकत्वाय किंतु तत्कालकत्वाय कालसंदर्शनात् आदिमध्यावसानेषुयद्याद्विहितंतस्यतस्यफलातिशयउक्तोब्रह्मपुराणे उपमर्देलक्षगुणंग्रहणेचंद्रसूर्ययोः पुण्यंकोटिगुणंमध्येमुक्तिकालेत्वनंतकमिति ग्रहणकालेजननमरणाशौचसत्त्वेपिस्नानादिभवत्येव तदुक्तंलिंगपुराणे चंद्रसूर्यग्रहेस्नायात्सूतकेमृतकेपिच अस्नायीमृत्युमाप्नोतिस्नायीपापंनविंदति वृद्धवसिष्ठेनापि सूतकेमृतकेचैवनदोषोराहुदर्शने तावदेवभवेच्छुद्धिर्यावन्मुक्तिर्नदृश्यते इति राहुलक्षितचंद्रसूर्योपरागनिमित्तस्नानादौहेमाद्रौदानंश्राद्धादिविषयमेतत् ननु स्नानमात्रविषयं ग्रहणेशावमाशौचंविमुक्तेसूतकंस्मृतं तयोःसंपातमात्रेयउपस्पृश्यक्रियाक्षमइति ब्रह्मांडपुराणवचनविरोधात् स्नानहोमदेवपूजादानक्रियानुष्ठानेहिक्रमउपपद्यते स्नानमात्रानुष्ठाने स्नानस्यपूर्ववाक्येनैवसिद्धौ द्वितीयवाक्यवैयर्थ्यप्रसंगाच्च भवत्पक्षेद्वितीयवाक्येनैवस्नानासिद्धेः पूर्ववाक्यवैयर्थ्यप्रसंगइतिचेन्न अस्नातस्यानिष्टविशेषसंबंधप्रतिपादनार्थत्वात् यावत्त.वच्छब्दानुपपत्तिप्रसंगाच्च तावत्कालव्यापिकर्मसुश्रद्धायामवभिधातव्यायांहितौसार्थकौ स्नानमात्रंतु नतादृशं अतएवाविशेषेणैवजननमरणनिमित्ताशौचप्रयुक्तानधिकाराभावोग्रहणनिमित्तकर्मसु स्मर्य्यते सूतकेमृतकेचैवयदिस्याद्राहुसूतकं तावत्तुसूतकंनास्तियावद्राहुर्नमुंचतीति स्कंदपुराणे सूतकेसूतकंनैवसूतकंराहुदर्शने तावदेवभवेत्शुद्धिर्यावन्मुक्तिर्नदृश्यते कालादर्शे अंगिराः सर्वेवर्णाविशुद्धाःस्युःसूतकेराहुदर्शने स्नात्वाश्राद्धंप्रकुर्वीरन्वित्तशाठ्यविवर्जितामिति षट्त्रिंशन्मतेपि स्मार्त्तकर्मपरित्यागोराहोरन्यत्रसूतके श्रौतकर्माणितत्कालंस्नातःशुद्धिमवाप्नुयादिति सूतकेआशौचे राहोस्तदुपलक्षितोपरागादन्यनिमित्तकानांस्मार्त्तकर्मणांपरित्यागोनतुतन्निमित्तकानामित्यर्थइति हेमाद्रिः सूतकेयः स्मार्त्तकर्म

परित्यागःसराहुसूतकान्नतुकालप्राप्तानांतेषांत्यागइत्यर्थतेन तेनश्राद्धंकिंचिद्दानंचोपरागनिमित्तकमाशौचेवश्यंभवतिन स्नानमात्रं संवत्सरप्रदीपादिषुचेदंस्मृतिवचनंलिखितं सूतकेमृतकेचैवनदोषोराहुदर्शने स्नानमात्रंतुकर्त्तव्यंदानंश्राद्धविवर्जितंएतच्चपूर्वोदाहृतबहुश्रुतिविरोधान्निर्मूलम् मदनरत्नपारिजातेप्येवंनिर्णयसिंधावपि इयंचशुद्धिरविशेषात्तंत्रदीक्षापुरश्चरणादिसर्वस्मार्त्तकर्म्मविषयेति मदनरत्नेप्येवं रजस्वलायास्तुविशेषोभार्गवार्चनदीपिकायां सूर्योदयनिबंधे सूतकादिषुदोषोऽस्तिग्रहेहोमजपादिषु ग्रस्तेस्नायादुदक्याहितीर्थादुद्धृत्यवारिणेति अत्रच स्नानेनैमित्तिकप्राप्तेनारीयदिरजस्वला पात्रांतरिततोयेनस्नानंकृत्वाव्रतंचरेदितिमिताक्षरोक्तोविधिर्द्रष्टव्यः यत्तु ग्रहणनिमित्तमाशौचं तत्स्नानेन निवर्त्यं तदुक्तंब्रह्मांडपुराणे आशौचंजायतेन्नृणांग्रहणेचंद्रसूर्य्ययोः राहुस्पर्शेतयोःस्नात्वा दानादौकल्पतरुइति निर्णयामृते ग्रहणकालस्यसर्वस्यापिपुण्यत्वेस्पर्शकालः स्नानादिकर्मसुश्रेष्ठः मध्यकालो मध्यमः मोक्षकालस्त्वधमःतदाहव्यासः त्रिदशाः स्पर्शसमयेतृप्यंतिपितरस्तथा मनुष्यामध्यमेकालेमोक्षकाले तुराक्षसाइति एतच्चवचनमविशेषात्सर्वदेवपितृदैवत्यकर्मपरमिति केचित् स्नानंस्यादुपरागादौमध्येहोमसुरार्चनमित्यादिभिर्वचनैर्होमदेवार्चनयोर्मध्येविधानात् ग्रस्यमानेभवेत्स्नानमितिपूर्वोदाहृतवचनाच्चनैतद्युक्तं किंतुहोमदेवपूजाव्यातिरिक्तविषयमेतदितिहेमाद्रौ एतानिचग्रहणनिमित्तकानिकर्माणिसंक्रांतिष्विवततःपूर्वमुत्तरंवा भवति उत्तरग्रहणकाल इत्यपेक्षायां जाबालिः संक्रांतौपुण्यकालस्तु षोडशोभयतःकलाः चंद्रसूर्योपरागेतुयावद्दर्शनगोचराइति अत्रकल्पतरुकारप्रभृतयः दर्शनशब्दश्चाक्षुषज्ञानपरः नशास्त्रार्थज्ञानवचनः निमित्तस्यज्ञातस्यैवनैमित्तकप्रयोजकत्वेननिमित्तत्वबोधकश्रुत्यैवतल्लाभेनदर्शनशब्दप्रयोगस्यवैयर्थ्यप्रसंगः तच्चदर्शनंस्वकीयमेवनिमित्तं परकीयदर्शनस्यपरकीयस्नानादिप्रयोजकत्वाभावात् एवंचस्वयंग्रहणेदृष्टेस्नानादिकर्त्तव्यं नमेघावृतेइतिपर्य्यव

सन्नं अत्रकेचित् गोचरशब्दोत्रव्रतफलोपधानपरः तत्काले एकस्यापिकर्मणः कर्तुमशक्यत्वात् किमुतबहूनांकिंतु योग्यतापरः साचप्रयत्नापनेयचाक्षुषज्ञानप्रतिबंधराहित्ये तथाचयोग्यत्वाभावादपिनमेघाच्छन्नेस्नानादीत्याहुः निर्णयामृतेप्येवं तदेतत्तुच्छंचाक्षुषज्ञानाविषयत्वविवक्षायां नेक्षेतोद्यंतमादित्यंनास्तंयांतंकदाचन नोपरक्तंनवारिस्थंनमध्यंनभसोगतमिति स्नानप्रकरणपठितमनुवाक्येन स्नातकानांग्रस्तादित्यदर्शननिषेधात् स्नानाद्यभावप्रसंगात् श्रंधादीनांतदभावप्रसंगाच्च नचेष्टापत्तिः सूर्यग्रहोयदारात्रौदिवाचंद्रग्रहस्तथा तत्रस्नानंनकुर्वीतदद्याद्दानंतुनक्वचिदिति निगमवचनस्य स्नानादिनिषेधस्यवैयर्थ्यप्रसंगात् चाक्षुषज्ञानाभावेनतत्प्राप्त्यभावात् निषेधस्यप्राप्तिपूर्वकत्वात् यदप्येतद्वचनस्यग्रस्तास्तपरत्वेनव्याख्याने रविचंद्रयोरस्नानांतरंरात्रिदिवाग्रहत्वादिति तदपितुच्छं यावद्दर्शनगोचर इत्यनेनैवास्तोत्तरभागयोर्निमित्तत्वपर्युदासेनवैयर्थ्यपरिहारात् राहुदर्शनदत्तंहिश्राद्धमाचंद्रतारकं स्नानंदानंजपः श्राद्धमनंतंराहुदर्शनइत्यादिषुकर्मविशेषवचनेष्वपिदर्शनपदापादानेग्रस्तास्तोत्तरभागस्य दर्शनागोचरत्वेननिमित्तत्वाप्रसक्तेश्च किंचदर्शननिमित्तानंतर्भावेतदावृत्तौस्नानाद्यावृत्तिप्रसंगः प्रतिनिमित्तंनैमित्तिकावृत्तिरितिन्यायात् दशिरहितेषुवहुवचनेषुतत्पदाध्याहारप्रसंगश्च किंचनिमित्तेषुनिमित्तवतएवाधिकारादधिकारिणश्चतदकरणेप्रत्यवायदर्शनेसति स्नानाद्यकरणे प्रत्यवायप्रसंगात्तदभावेतुतदभावात् प्रत्यवायकश्चकर्मानुष्ठानान्यतरप्रयोजकंदर्शनवुद्धिपूर्वकारीकोपिनकुर्य्या देवेतितन्नियोज्यकःस्नानादिविधिर्दुस्थितत्वात् नन्वेवमाधानाध्ययनाभ्यामग्निविसर्जनमपि कोपिनकुर्यात् तस्मिन्सत्यग्निहोत्रादिकर्मकरणे प्रत्यवायस्यतत्परिहार्य्यकष्टाकर्मकरणस्यापत्तेः आधानाध्ययनयोः कर्मविधिप्रसज्यत्वेनासिद्धाग्निविद्यावत्वस्यकर्माधिकाराभ्युपगमात् सत्यंव्रात्यतानाहिताग्नितयोरुपपातकगणनयाद्योतकंकिंचिदस्ति अथैतद्दोषपरिहारायदर्शनस्यस्नानाद्यंगत्वेनविधेयतैवस्वीक्रियते विधेयत्वंच तस्यसं

वत्सरप्रदीपोदाहृतमार्कंडेयवचन उपवाससाहचर्य्यात्स्पष्टंप्रतीयते एकरात्रमुपोष्यैवराहुंदृष्ट्वाक्षणंनरः पुण्यमाप्नोतिकृत्वाचस्नानंश्राद्धंविधानतइतिनिमित्तज्ञानत्वेनतस्याधिकारसंपादनेनोपयोगिता अध्ययनाधानवत्प्रमाणाभावात्तु तयोर्नांगत्वंकिंतूपकारकतामात्रं दर्शनस्यतुप्रमाणवशागतापातेनैवोपकारेण अत्रच यद्यप्युपवासदर्शनयोःस्नानश्राद्धयोश्चाक्षयंपुण्यमाप्नोतीत्यनेनसर्वेषांतुल्यत्वंभासते तथापि वहुषुवचनेषु स्नानश्राद्धयोरेवफलसंवंधश्रवणादत्राप्युपवासदर्शनपूर्वकस्नानश्राद्धेविधायाक्षयंपुण्यमाप्नोतीतियोजनयोपवासदर्शनयोरंगत्वंद्रष्टव्यं विशेषविधिनाचाग्नीषोमीयादिहिंसाविधिनेवनाहिंस्यादितिनिषेधस्युनोपरक्तामित्यादिनिषेधस्यवाधेन रागप्राप्तेक्षणविषयत्वकरणात्सर्वंनैमित्तिकार्थंतंत्रेणसकृद्दर्शनंकृत्वासर्वंकर्त्तव्यं एवंजन्मादिराशिस्थोपितद्विषयत्वस्यापिदर्शनानिषेधस्यरागप्राप्तविषयत्वात् तस्माद्दर्शनाविधिविषयत्वेनजन्मादिराशिस्थोपरागवतामितरवत्सकृद्दर्शनस्नानादिभवत्येव अंधादीनामेवतदशक्तेरनधिकारात्तन्नभवतीतिचेत् अत्रवदामः अस्तुदर्शनाविधिः तद्बलादेवच पूर्वोक्तप्रकारेणत्वस्यांगत्वमपि तथापिसोपूर्वविधिस्तावन्नसंभवति निमित्तज्ञानतयादर्शनसापेक्षप्राप्तत्वात् किंतर्हिनिमित्तज्ञानस्याधिकारसंपादकत्वानेकरूपस्यसंभवात् पक्षेप्राप्तस्यदर्शनस्यानियमविधिरयं अवघातादिवत् ततश्चनैमित्तिकेष्वप्यशक्यांगहानेनाप्यधिकारस्यन्यायसिद्धत्वादंधादीनांमेघाद्यावरणेवाक्यदर्शननियमरूपासंभवेपिस्नानादियुक्तमेवेति नेष्टसिद्धिः अधिकारसंपादकत्वेनास्यांगस्यत्र्यग्निविद्यादिवत् नयथाशक्तिन्यायाविषयत्वमितिचेत् वैषम्यात् अग्निविद्यादिषुहिकर्मप्रयोगविध्यप्रयोज्यत्वान्नयथाशक्तिन्यायवत्त्वंनाधिकारसंपादकत्वात् उपरागदर्शनानियमस्तुप्रयोगविधिप्रयोज्यएवेतिभवति यथाशक्त्यायंवंधस्यविषयः अस्तुतर्हिनिमित्तत्वमेवेतिचेन्न दत्तोत्तरत्वात्किंचयदिदृष्टग्रहणंस्नानादेर्निमित्तं तथासत्युद्दश्यस्यग्रहणस्यविशेषणंदर्शनमविवक्षितंस्यात् यस्योभयंहविरार्त्तिमार्च्छेदित्यत्रे

रस्थान्प्रतितयोरपिदर्शनयोग्यत्वस्यचानिषेधबलादेवलाभात् अतिसूक्ष्मतरकालतयाअनादेश्यानांतुकस्यापिदर्शनयोग्यानाम् तद्योग्यताविशेषणादेवानिमित्तत्वपर्य्युदासः यदपि मुक्तिंदृष्ट्वातुभोक्तव्यंस्नानंकृत्वाततःपर मित्यादिषु दृष्ट्वेतिपदं तदपिशास्त्रीयज्ञानपरं अत्रगौडनिबंधेस्मृतिवचनम् मेघमालादिदोषेणयदिमुक्तिर्नदृश्यते आकलय्यततःकालंस्नात्वाभुंजीतवाग्यतइति नचग्रस्तास्तमयेचंद्रसूर्योदयात्प्रागपिशास्त्रतोमुक्तिंविज्ञायस्नानभोजनादिप्रसंगः ग्रस्तावेवास्तमानंत्वितिवक्ष्यमाणभृगुवचनेनादिनांतरेस्नानभोजनाविधानात् अहोरात्रंनभोक्तव्यमितिवक्ष्यमाणविष्णुधर्मोत्तरवचनेनग्रस्तास्तमयेचंद्रसूर्य्योदयात्प्राग्भोजननिषेधाच्च तस्माच्छास्त्रावगतंदर्शविशेषावच्छेदेन चाक्षुषज्ञानयोग्यमेववाग्रस्तास्तग्रहणंस्नानादिनैमित्तिकानुष्ठानप्रयोजकमित्याहुः योग्यताचस्वरूपेणैवतत्कालएव स्नानादिनतुसंक्रांतिवत्पूर्वापरयोःभोजनंतुतत्कालेतत्पूर्वकालेचनिषिद्धम् तथाचब्रह्मपुराणे नाश्नीयादथतत्कालेग्रस्तयोश्चंद्रसूर्य्ययोः मुक्तयोश्चकृतस्नानः पश्चाद्भुंज्यात्स्ववेश्मनीति अत्रस्ववेश्मनीतिवाक्यभेदेन तद्दिनेपरान्नभोजननिषेधः विष्णुधर्मोत्तरे चंद्रस्ययदिवाभानोर्यस्मिन्नहनिभार्गव ग्रहणंतुभवेत्तत्रनपूर्वंभोजनक्रिया शंखलिखितौ तस्मिन्नहनिनाश्नीयाच्चंद्रसूर्यग्रहोयदि मुक्तिंदृष्ट्वातुभुंजीतस्नात्वाचैवयथाविधीति पूर्वकालभोजननिषेधविशेषमाह वसिष्ठः ग्रहणंतुभवेदिंदोः प्रथमादधियामतः भुंजीतावर्त्तनात्पूर्वंपश्चिमेप्रथमादधः रवेस्त्वावर्त्तनादूर्ध्वमर्वागेवनिशीथतः चतुर्थेप्रहरेचेत्स्याच्चतुर्थप्रहरादध इति रात्रौप्रथमयामोत्तरंचंद्रग्रहणं चेन्मध्याह्नात्पूर्वंभुंजीत रात्र्यंतयामेचेद्रात्रिप्रथमयामात्पूर्वंभुंजीत दिनस्यतृतीयप्रहरेचेद्रविग्रहस्तदापूर्वदिनस्यार्द्धरात्रात्प्राक्भुंजीत अह्नश्चतुर्थप्रहरेचेद्रविग्रहणंतदारात्रेश्चतुर्थप्रहरादधोभुंजीत इदंचनरात्रिभोजनपरं किंतुसूर्यग्रहेपूर्वंयामचतुष्टयंत्याज्यम् चंद्रग्रहेयामत्रयमित्येवंपरमितिमाधवः तदुक्तंवृद्धगौतमेन सूर्यग्रहेतुनाश्नीयात्पूर्वंयामचतुष्टयं चंद्रग्रहेतुयामांस्त्रीन्बालवृद्धा

वहविषउभयत्वं अतःकेवलंग्रहणमेवनिमित्तमितिवक्तव्यम् तच्चज्ञातमेवनिमित्तंसर्वनिमित्तानां ज्ञातानामेवनैमित्तिकप्रयोजकत्वमिति विज्ञानेश्वरादिभिस्तत्रतत्रनिरूपितत्वात् तच्चज्ञानं शास्त्रीयमेवनलौकिकं नचशास्त्रीयज्ञानविवक्षयादेशांतरग्रहणेपिस्नानादिप्रसंगइतिवाच्यं सूर्यग्रहोयदारात्राविति पूर्वोक्तनिगमवचनेनतत्रस्नानादिनिषेधात् ननुतर्हिवहुपुत्रवाक्येषुप्रयुक्तस्यदर्शनपदस्यकागतिरितिचेत् अत्रदाक्षिणात्याः दृशेरुद्देशविषयत्वेनग्रहैकत्ववदविवक्षयाआक्षिप्तज्ञानानुपादकत्वमेवप्रयुक्तश्चदृशिर्ज्ञानसामान्ये अष्टमीरोहिणीयुक्तानिश्यर्द्धेदृश्यतेयदेत्यादिषुमनसापश्यतीत्यादौ लौकिकप्रयोगेच पश्यार्थैश्चानालोचनइति व्याकरणस्मृत्या दृशेर्ज्ञानसामान्यवाचित्वमनुमन्यंते भवतुवाचाक्षुषज्ञानमेवतस्यवाच्यमितरत्रलाक्षणिकत्वं तथाप्यत्रतदाश्रयणेपिनदोषः चंद्रसूर्य्यग्रहेनाद्यात्तस्मिन्नहनिपूर्वतः राहोर्विमुक्तिंविज्ञायस्नात्वाकुर्वीतभोजनमिति गौतमवचसस्तात्पर्य्यग्राहकस्यसत्त्वात् विधिलाघवार्थमनुवादत्वापेक्षणात् तस्याअदोषत्वाच्च श्रुत्वापुत्रस्यजन्मचेत्यादिवत् अन्यथा रजसोदर्शनेनारीत्रिरात्रमशुचिर्भवेदित्यादावप्यंधस्त्रीणामशौचाभावप्रसंगः यद्वा यावद्दर्शनगोचर इत्यादौ गोचरशब्दोयोग्यतापरएव तेनयश्चंद्रसूर्य्योपरागोयस्मिन्देशेयावत् कर्मपर्य्याप्तश्चाक्षुषज्ञानयोग्यः सतत्रदेशेतावत्सुकर्मसुनिमित्तमित्यर्थः पर्यवस्यति तादृशस्यचशास्त्रतोज्ञानंतदनुष्ठानंप्रयोजकं तच्चतत्कालएवनतुसंक्रांताविवतत्पूर्वोत्तरकालयोः अतश्चाक्षुषज्ञानयोग्येप्यकालीयेग्रहणेस्नानपूर्वकंदानादिस्नानमात्रंवायावदेवतुप्रकर्त्तुंशक्यम् तावदेवकर्त्तव्यंवर्त्तमानमेव ग्रहणंतादृशमाशौचवत्निमित्तम् नत्वतीतंनचभाविचेतिपर्य्यवसितोर्थः देशविशेषणंच सूर्यग्रहेयदारात्रावितिवचनेन द्वीपांतरस्थानिमित्तत्वपर्य्युदासोवगम्यते अतएवचाक्षुषज्ञानयोग्यतायानिमित्तांतर्गतत्वे रात्रिरविग्रहस्य दिवाचंद्रग्रहस्यातथात्वेनानिमित्तत्वादप्रसक्तस्यस्नानादेस्तत्रनिषेधः पर्य्युदासोवानतथैकइत्यपास्तं द्वीपांत

तुरैर्विना अर्धरात्रादधश्चोर्ध्वंयदिचंद्रग्रहोभवेत् पूर्वेपूर्वत्रभोक्तव्यमुत्तरेचोत्तरेपिचेति अधोद्वितीयप्रहरे ऊर्ध्वंतृतीये पूर्वत्रपूर्वाह्ने दिनप्रथमद्वितीयप्रहरयोः उत्तरेपि एवंसति सूर्यग्रहनिमित्तभोजननिषेधविषययामचतुष्टयस्याप्यवध्यपेक्षस्यग्रहणयामएवावधिः चंद्रस्यग्रस्तोदयेविशेषमाहवृद्धवसिष्ठः ग्रस्तोदयेविधोःपूर्वंनाहर्भोजनमाहरेत् ग्रस्तास्तमयेविशेषमाहभृगुः ग्रस्तावेवास्तमानंतुरवींदूप्राप्नुतोयदि परेतुरुदयेस्नात्वाशुद्धोभ्यवहरेन्नरइति वृद्धगार्ग्योपि संध्याकालेयदाराहुर्ग्रसतेचंद्रभास्करौ तदहर्नैवभुंजीतरात्रावपिकदाचनेति यदासूर्यस्यग्रहणंसायंसंध्यायां चंद्रग्रहणंप्रातःसंध्यायां तदासूर्यस्यग्रस्तास्तमयेपूर्वस्मिन्नहनितस्यांरात्रौनचभोक्तव्यं चंद्रग्रस्तास्तमयेपूर्वरात्रौतूत्तरस्मिंश्चाह्निनभोक्तव्यमित्यर्थः विष्णुधर्मोत्तरेपि अहोरात्रंनभोक्तव्यंचंद्रसूर्यग्रहोयदा मुक्तिंदृष्ट्वातुभोक्तव्यंस्नानंकृत्वाततःपरमिति तदपिग्रस्तास्तमयपरं पूर्ववचनैकवाक्यत्वात् तत्र सूर्यग्रस्तास्तमयेसम्यगेव चंद्रग्रस्तास्तेतु सायाह्नेदर्शनोत्तरमित्यात्राहारित्यहोरात्रंद्रष्टव्यं अमुक्तयोरस्तगयोर्दृष्ट्वास्नात्वापरेहनीतिवचनात् शातातपः नाद्यात्सूर्यग्रहात्पूर्वमह्निसायंशशिग्रहात् ग्रहकालेचनाश्नीयात्स्नात्वाश्नीयात्तुमुक्तयोः मुक्तेशशिनिभुंजीतयदिनस्यान्महानिशा स्नात्वादृष्ट्वापरेह्न्यद्याद्ग्रस्तास्तमितयोरिति महानिशाचमार्कंडेयेनोक्ता महानिशाद्वेघटिकेरात्रिमध्यमयामयोः नैमित्तिकंतदाकार्यंकाम्यंतुनमनागपीति प्रतियामंघटिकाद्वयमेकैकावाघटिका तेनमुहूर्त्तद्वयमेकोवामुहूर्त्तः सार्द्धप्रहरानंतरंमुहूर्त्तचतुष्टयंमहानिशेतिकल्पतरुः शिवरहस्येपि नाचरेत्सग्रहेचैवतथैवास्तमुपागते यावत्स्यन्नोदयस्तस्यनाश्नीयात्तावदेवतु मुक्तिंदृष्ट्वातभुंजीतस्नानंकृत्वायथाविधीति सग्रहेग्रहणेसहितेतद्वर्त्तमानकालेतथैव स्मृत्यंतरेपि संध्याकालेयदाराहुर्ग्रसतेचंद्रभास्करौ तदादिवानभोक्तव्यमातुरस्त्रीशिशून्विनेतिदिवेत्यहोरात्रोपलणं बालादीनामसमर्थानांतुमुहूर्त्तत्रयात्मकसायाह्नादिग्रहणकालात् प्राचीनेएकैकस्मिन्नेवतादृशपराह्णादौभोजननिषेध

तथाचमात्स्यमार्कंडेययोः सायाह्नेग्रहणंचेत्स्यादपराह्नेनभोजनं अपराह्नेनमध्याह्नेमध्याह्नेनतुसंगवे भुंजीतसंगवेचेत्स्यान्नपूर्वभोजनक्रियेति सायाह्नादौग्रहणेक्रमेणापराह्णादौबालवृद्धातुरैर्नभोक्तव्यं अपराह्णादिपूर्वकालेतुभोजनेतेषांनदोषइत्यर्थः विशेषनिषेधस्यशेषांशेनदोषइत्यर्थः विशेषनिषेधस्यशेषांशेभ्यनुज्ञाफलकत्वात् कालतत्त्वविवेचनेतु सूर्य्योपरागविषयमेवेदं बालादीनांभोजननिषेधप्रतिपादकंचंद्रग्रहणं रात्रितृतीयचतुर्थप्रहरगते बालादिभिर्यामत्रयमपिनिषेधपरिपालनसंभवात् तेषामपिउत्सर्गतः सर्वस्यामपिरात्रौभोजनंविनैवावस्थानात् यदातुतेषां रात्रिप्रथमद्वितीययामगतेचंद्रग्रहेयामद्वयव्यापिनिषेधपरिपालनासंभवस्तदारात्रेरपिपंचभागान्कृत्वाग्रहणकालभूतभागावधिकात्रिमुहूर्त्तात्मकैकभागात्मकएवरविग्रहवद्भोजननिषेधकालोद्रष्टव्यः यत्तुग्रहणंकालावधिकभागद्वये भोजननिषेधप्रतिपादकंस्मृत्यंतरवचनं सायाह्नेसंगवेश्नीयात्पराह्नेसंगवादधः मध्याह्नेपरतोश्नीयान्नोपवासोरविग्रह इतिशारदेअपराह्नेइत्यर्थःयदपराह्णेथशरदितिश्रुतेः रविग्रहःशशिग्रहस्याप्युपलक्षणःएतच्चपुत्रवद्गृहस्थविषयं आदित्येहनिसंक्रांतौग्रहणेचंद्रसूर्ययोःउपवासोनकर्त्तव्योगृहिणापुत्रिणातथेति स्मृत्यंतरवचनाच्च कालतत्त्वविवेचनेतुवचनमिदंबालादिविषमेवग्रस्तास्तसूर्य्यास्तमयविषयं नोपवासोरविग्रहइतिवाक्यशेषात् तत्रैवचाहोरात्रव्यापिनिषेधात्मकोपवासप्रसक्तेःअपराह्णप्रांतोपरागेग्रस्तास्तमयःसंभवत्येव मध्याह्नेपरतोश्नीयादित्युक्तंतत्रोपरागेग्रस्तास्तमयसंभवात् यद्यपिचतत्रपूर्ववाक्यादुपरागात्पूर्वसंभवमात्रंवर्जयित्वाप्रातर्भोजनंसंभवतितथापि भागद्वयवर्जनस्यात्रवाक्येनप्रतिपादनादन्यत्रापिभागद्वयवर्जनं मुख्यःकल्पः पाकभागवर्जनंत्वनुकल्पइतिसूच्यते इत्युक्तं ग्रहणवेधकालोहेमाद्रौ त्रयोदश्यादितोवर्ज्यंदिनानांनवकंध्रुवंमांगल्येषुचसर्वेषुग्रहणेचंद्रसूर्ययोरिति अन्यत्रापि द्वादश्यादितृतीयांतोवेधइंदुग्रहेस्मृतः एकादश्यादिकःसौरेचतुर्थ्यंतः प्रकीर्त्तितः इदंसंपूर्णग्रहे खंडग्रहेतुनियतंदिनत्रयं त्र्यहंखंडग्रहेतयोरिति

वचनात् इदंचग्रस्तास्तेत्रिदिनंपूर्वमितिनारदवचनेनग्रस्तास्तभिन्नग्रहणपरंज्योतिर्निबंधेच्यवनःग्रहणोत्पातभंत्याज्यं मांगल्येषुऋतुत्रयं यावच्चरविणाभुक्तामुक्तंभंदंतकाष्ठवत् अन्यद्वर्णविकारादितत्फलंचदैवज्ञेभ्योज्ञेयं अत्रकाम्योपवासमाहदक्षःअयनेविषुवेचैवग्रहणेचंद्रसूर्ययोः अहोरात्रोषितःस्नात्वासर्वपापैःप्रमुच्यतइति आदिकर्मणिक्तः केचित्तु भूतेक्तमभिप्रेत्यग्रहणपूर्वदिनेप्युपवासमाहुःअतएवग्रहणादौ आदित्येहनिसंक्रांताविति वचनेनपारणानिषेधउपयुज्यते व्रह्मपुराणे नित्यंद्वयोरयनयोस्तथाविषुवतोर्द्वयोः चंद्रार्कयोर्ग्रहणयोव्यतीपातेषुकर्मसु अहोरात्रोषितःस्नानंश्राद्धंदानंतथाजपं यःकरोतिप्रसन्नात्मातस्यस्यादक्षयंहितत् इतिकालतत्त्वविवेचने अयंचोपवासः सत्यामपिनिष्ठायामयनग्रहणादिमत्यहोरात्रएवनतुपूर्वस्मिन् अयनादिसमभिव्याहारात् तद्वदहोरात्रस्यैवप्रतीतेस्तुग्रहणस्यैवयुक्तत्वात् तथैवशिष्टसमाचाराच्चक्तःपूर्ववत् एकरात्रमुपोष्यैवस्नायाद्दद्याच्चशक्तितः कंचुकादिवसर्पस्यनिवृत्तिःपापकोशत इतिलिंगपुराणगतल्यप्प्रत्यययोपिसमानकर्तृत्वमात्रे मुखंव्यादायस्वपितीतिवत् तत्रैबात्रिरात्रोपवासोयुक्तः त्रिरात्रंसमुपोष्यैवंग्रहणे चंद्रसूर्य्ययोःस्नात्वादत्त्वाचविधिवन्मोदतेव्रह्मणासहेति अत्रापित्रितयमुपवाससहितमेवतद्घटितस्यैवत्रिरात्रस्योपरागाद्दिनोपलक्षणात् पुत्रवद्गृहस्थस्तुपापक्षयकामोपि ग्रहणनिमित्तोपवासंनकुर्य्यात् तदुक्तंनारदेन संक्रांत्यामुपवासंचकृष्णैकादशिवासरे चंद्रसूर्य्यग्रहेचैवनकुर्य्यात्पुत्रवान्गृही यदातुरविर्ग्रस्तस्तदापुत्रिणाप्रहरद्वयंहित्वाबालादिवद्भोजनंकार्य्यंनतूपवासः सायाह्नेग्रहणंचेत्स्यादिति मार्कंडेयवचनात्सायाह्नेसंगवेश्नीयादितिस्मृतेश्चेतिहेमाद्रिः माधवमतेतुपुत्रिणोपितत्रोपवासएव अहोरात्रंनभोक्तव्यमिति पूर्वोक्तनिषेधस्य तेनापि पालनीयत्वात् उपवासानिषेधस्तुव्रतरूपोपवासपरः कृष्णैकादशीवदितिमदनरत्नेप्येव युक्तंचैतत् यतःतत्प्रयुक्तोपवासस्यनिषेधोयमुदाहृतइति वाक्यशेषेणविहितकाम्योपवासनिषेधोनानुषंगप्राप्तस्यनानुषंगप्राप्तौयतोनित्यमुपोषणमितिवाक्यात् किंचउपवासश

ब्दः संकल्पात्मकव्रतरूपोपवासपरएवशक्तौनतुभोजननिवृत्तौतस्यलाक्षणिकत्वात् अन्यथोपवासव्रतंचरेदितिव्रतशब्दसमर्भिव्याहारात्संकल्पसिद्धावपिकेवलोपवासशब्दघटितवाक्येषुसंकल्पासिद्ध्यप्रसंगात् तथाचोपवासनिषेधेषु गौणमुख्ययोर्मुख्येकार्य्यसंप्रत्ययइतिन्यायेन मुख्यस्यैवग्रहणौचित्यमिति यदाचैवंकारणांतरप्रयुक्तभोजनाभावमात्रेणव्रतरूपोपवासप्रसक्तिस्तदाग्रहणनिमित्तश्राद्धाधिकारिणा प्रारब्धेचाभोजनमासमापनादितिविहितश्राद्धांगभोजननिषेधपरिपालनेपिनक्षतिःग्रहणनिमित्तेपिच श्राद्धेपूर्वेद्युरपरद्युर्वाप्राथमिकंब्राह्मणनिवेदनं श्राद्धप्रारंभत्वेन ख्यातंसंभवत्येव नभुंजतेचप्राच्याः श्राद्धाधिकारिणोग्रहणदिनेततः पूर्वं तस्माद्सूर्यग्रस्तास्तेपुत्रवद्गृहिणोप्यहोरात्रंभोजननिषेधः परिपालनीयएव व्रतरूपःकाम्यउपवासःपरंनकार्य्यः चंद्रग्रस्तास्तेतूत्तरदिनेसंध्याहोमादौनदोषः तदाहोशनाः ग्रस्तेचास्तंगतेत्विंदौज्ञात्वामुक्त्यवधारणं स्नानहोमादिकंकार्य्यंभुंजीतेंदूदयेपुनः एतदनाहिताग्निविषयं अपराह्णेव्रतीपानीयमश्नात इतिकात्यायनोक्तेर्व्रतस्यश्रौतत्वेविहितत्वेनचप्राबल्यात् आद्भिर्व्रतंकुर्य्यादितिनिर्णयदीपः रागप्राप्तभोजनेकालनियमोयं तेनज्वरादाविवभोजनमितिकर्कानुसारिणः ग्रहणांतरितस्यपूर्वसंकल्पितस्यद्रव्यस्यादत्तस्यद्वैगुण्यंभवतीतिशिष्टाः पठंति तच्चब्रह्मवैवर्त्ते दातव्यमितिनोकास्यांवक्तव्यंकुत्रचित्क्वचित् दशोत्तरंपर्वसुस्याच्छतंचंद्रग्रहेभवेत् सूर्यग्रहेसहस्रंतन्मरणेनंतकंस्मृतमिति अत्रमूलंचिंत्यमितिनिर्णयसिंधौ ग्रहणेतत्पूर्वकालभोजनेप्रायश्चित्तं षट्त्रिंशन्मतेभिहितं चंद्रसूर्यग्रहेभुक्त्वाप्राजापत्यंसमाचरेत् तस्मिन्नेवदिनेभुक्त्वात्रिरात्रेणैवशुध्यतीति त्रिरात्रेणत्रिरात्रोपवासेनतेनप्राजापत्यार्द्धमुक्तंभवति प्राजापत्यस्यषडुपवासतुल्यत्वात् ग्रस्तास्तोत्तरंनिषिद्धंकालभोजनेपित्रिरात्रमेवतस्मिन्दिनइत्यविशेषाभिधानात् स्त्रीबालवृद्धादीनांतदर्थं ग्रहणप्रसंगात्कुरुक्षेत्रप्रतिग्रहेप्रायश्चित्तमुच्यते अरुणस्मृतौ प्रतिग्राहीकुरुक्षेत्रेनभूयःपुरुषोभवेत् तथापिमनसःशुद्ध्यैप्रायश्चित्तंसमाचरेत् तप्तकृच्छ्रेत्र

यंकुर्य्यादैंदवेनसमन्वितं सत्रेणवायजेताथजपेद्वालक्षसप्तकं वापीकूपतडागादिखननैर्विसृजेद्धनमितिएतच्चयद्गार्हे तेनार्जयंतिब्राह्मणाःकर्मणाधनं तस्योत्सर्गेणशुद्ध्यंतिदानेनतपसापिचेति मनूक्तैरुत्सर्गोत्तरं ज्ञेयमितिदिक् अथग्रहणेसामान्यतोवर्ज्याणि नस्वपेन्नचभुजीतनकुर्य्यान्मूत्रमेहने नमैथुनंनचाभ्यंगंभोजनंनचवंधनं पत्रपुष्पतृणानांगंछिंद्यात्केशान्नशोधयेत् नमिथ्याभाषणंकुर्य्यान्नकेशांबरधारणम् एतेषांफलानिस्मृतिसंग्रहे विष्ठायांजायतेव्याधिमूत्रेदुःखमवाप्नुयात् पुरीषेकृमियोनिःस्यान्मैथुनेग्रामशूकरः अभ्यंगेनभवेत्कुष्ठीभोजनेस्यादधोगतिः वंधनेचभवेत्सर्पोवधेचनरकंव्रजेदिति कालमाधवे ग्रहणदिनेनिषिद्धमाहगार्ग्यः नमंगलंनप्रतिष्ठानप्रपारामसत्क्रियाः नाग्निहोत्रंप्रगृह्णीतनयज्ञारंभमाचरेत् नजातकादिसंस्कारंनक्रयंनचाविक्रयं ग्रहणादानरूपंतुव्यवहारंतुलौकिकं दिवाकरेनिशानाथेराहुणासंधितेसति कुर्य्यात्तत्रदिनेकिंचिन्नक्षौराभ्यंगमज्जनं ग्रहणंजन्मराश्यादौनिषिद्धं तदुक्तं ज्योतिषे त्रिषड्दशायोपगतंनराणांशुभप्रदंस्याद्ग्रहणंरवींद्वोः द्विसप्तनंदेषुचमध्यमंस्याच्छेषेष्वनिष्टंकथितंमुनींद्रैरिति आयएकादश नंद नव इषुपंचमं मदनरत्नेगर्गः जन्मसप्ताष्टरिफांकदशमस्थेनिशाकरे दृष्टोरिष्टप्रदोराहुर्जन्मर्क्षेनिधनेपिच रिफोद्वादश अंकोनवनिधनंसप्तमतारा पृथ्वीचंद्रोदये विष्णुधर्मोत्तरे यन्नक्षत्रगतोराहुर्ग्रसतेचंद्रभास्करौ तज्जातानांभवेत्पीडायेनराःशांतिवर्जिताः अभिभवतिसैंहिकेयश्चंद्रार्कौयस्यजन्मनक्षत्रे तस्यांतकादिवभयंविंद्यादुःखंमनस्तापम् हेमाद्रौ येषांतुभास्करस्थानेराहुश्चंद्रमुपक्रमेत् कर्मक्षयपरिक्लेशान्प्राप्नुवंतिचतेजनाः पितृपक्षविनाशायसूर्यस्थानेभवेद्ग्रहः मातृपक्षविनाशायचंद्रस्थानेभवेद्ग्रहः होरायांग्रसतेयस्यनक्षत्रवानिशाकरं प्राणसंदेहमाप्नोतिसवामरणमृच्छति पृथ्वीचंद्रोदये पुराणांतरे सूर्यस्यसंक्रमोवापिग्रहणंचंद्रसूर्ययोःयस्यत्रिजन्मनक्षत्रेतस्यरोगोथवामृतिः तस्यदानंचहोमंचदेवार्चनजपोथवा उपरागेभिषेकंचकुर्याच्छांतिर्भविष्यति

स्वर्णेनवाथपिष्टेनकृत्वासर्पस्यचाकृतिं ब्राह्मणायददेत्तस्यनरोगादिश्चतत्कृतः जन्मनक्षत्रंततःपूर्वोत्तरंच त्रिजन्मनक्षत्रमित्युच्यते जन्मदशमैकोनविंशताराइतिकेचित् सर्पस्यतदाकारस्यराहोरित्यर्थः अद्भुतसागरेभार्गवः यस्यराज्यस्यनक्षत्रेस्वर्भानुरुपरज्यते राज्यभंगसुहृन्नाशंमरणंवाविनिर्दिशेत् राज्यस्यनक्षत्रमभिषेकनक्षत्रमिति तत्रैवव्याख्यातं मंडलाधिपदैवत्यैर्मंत्रमृत्युंजयादिभिः होमंकुर्य्यात्प्रयत्नेनतत्तन्मंत्रान्जपेत्सुधीरिति मंडलाधिपानि तत्तन्नक्षत्रगणात्मकान्याग्नेयवारुणवायव्यैशानाख्यानि तदधिपाअग्न्यादयस्तद्दैवत्यैरित्यर्थः नक्षत्रविशेषेषुग्रहणेगणदोषाज्योतिः शास्त्रतोवगंतव्याः राजभिस्तुप्रजाहितार्थंतत्तन्मंडलेषु तत्तच्छांतयोअथर्ववेदोक्ताःकरणीयाः आग्नेयींकारयेच्छांतिंशांतिंकुर्याच्चवारुणीं वायव्यांकारयेच्छांतिमैशानींकारयेत्तथा त्रिंशत्पलैस्तथाद्वाभ्यांकृत्वानागपतिंनरः त्रिंशन्माषमितंनागंहैमंतत्रचकारयेत् वस्त्रयुग्मेनसंवेष्ट्यकांस्यपात्रेनिधापयेत् तत्पात्रंताम्रपात्रेचत्रिंशत्पलमितेन्यसेत् घृतकुंभोपरिन्यस्यदद्याच्चंद्रंसमौक्तिकं रूप्यंचवस्त्रसहितंब्राह्मणायकुटुंबिने सुवर्णंदक्षिणांदद्याततःशांतिमवाप्नुयादिति सारसंग्रहेच तथाकुर्य्यान्माहेंद्रींतत्रकारयेदितिकात्यायनवचनात् ग्रथांतरेप्रकारांतरमुक्तं ग्रहणेग्रहपीडितनाडीनक्षत्रदोषशमनाय ॥ सहशतपुष्पैः स्नायात्कलिनीफलचंदनोशीरैः ताम्रपात्रंतिलैः पूर्णंपूर्णंवागव्यसर्पिषा भास्करग्रहणेदद्यान्नाडीदोषोपपीडितः घृतकुंभोपरिनिहितंशंखंनवनीतपूरितंदद्यात् नाड्यादिदोषशांत्यैद्विजायदोषाकरग्रहणे नाडीनक्षत्राण्याह दशमषोडशाष्टादशत्रयोविंशपंचविंशति भार्गवार्चनदीपिकायां ज्योतिः सागरे सौवर्णंकारयेन्नागंपलेनार्धपलार्धतः तदर्धेनतदर्धेनफणायांमौक्तिकंन्यसेत् ताम्रपात्रेनिधायाथघृतपूर्णेविशेषतः कांस्येवाकांतिलोहेवान्यस्यदद्यात्सदक्षिणं चंद्रग्रहेतुरूप्यस्यबिंबंदद्यात्सदक्षिणं नागंरुक्ममयंसूर्यग्रहेबिंबंचहेमजं तुरंगरथगोभूमितिलसर्पिश्चकांचनं कालतत्त्वविवेकेपि सुवर्णनिर्मितंनागंसतिलंकांस्यभाजनं

सदक्षिणंसवस्त्रंचब्राह्मणायानिवेदयेत् सौवर्णंराजतंवापिबिंबंकृत्वास्वशक्तितः उपरागभवक्लेशच्छिदेविप्रायकल्पयेत् मंत्रस्तु तमोमयमहाभीमसोमसूर्यविमर्द्दन हेमनागप्रदानेनममशांतिप्रदोभव विधुंतुदनमस्तुभ्यंसिंहिकानंदनाच्युत दानेनानेननागस्यरक्षमांवेधजाद्भयादिति अत्रशांतिरप्युक्तामात्स्येयस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः स्नानंतस्यच वक्ष्यामिसर्वौषधिसमन्वितं चंद्रोपरागंसंप्राप्यकृत्वाब्राह्मणवाचनं संप्रार्थ्यचतुरोविप्रान्रक्तमाल्यानुलेपनैः पूर्वमेवोपरागस्यसमानीयौषधादिकं स्थापयेच्चतुरः कुंभानग्रतः सागरान्निधीन् गजाश्वरथवल्मीकसंगमाद्व्रजगोकुलात् राजद्वारप्रवेशाच्चमृदमानीयनिक्षिपेत् पंचगव्यंपंचरत्नंपंचत्वक्पात्रपल्लवान् रोचनंपद्मकंशंखंकुंकुमंरक्तचंदनं शुक्तिस्फटिकतीर्थांबुसितसर्षपगुग्गुलून् मधुकंदेवदारुंचविष्णुक्रांतांशतावरीं बलांचसहदेवींचनिशाद्वितयमेवच एतत्सर्वंविनिक्षिप्यकुंभेष्वावाहयेत्सुरान् सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः योसौवज्रधरोदेवआदित्यानांप्रभुर्मतः सहस्रनयनश्चंद्रोग्रहपीडांव्यपोहतु मुखंयःसर्वदेवानांसप्तार्चिरमितद्युतिः चंद्रोपरागसंभूतांग्रहपीडांव्यपोहतु यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः यमश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु रक्षोगणाधिपःसाक्षान्नीलांजनसमप्रभः खड्गहस्तोतिभीमश्चग्रहपीडांव्यपोहतु नागपाशधरोदेवःसदामकरवाहनः सजलाधिपतिर्देवोग्रहपीडांव्यपोहतु प्राणरूपोहिलोकानांसदाकृष्णमृगप्रियः वायुश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु योसौनिधिपतिर्देवःखड्गशूलगदाधरः चंद्रोपरागकलुषंधनदोत्रव्यपोहतु योसाविंदुधरोदेवःपिनाकीवृषवाहनः चंद्रोपरागपापानिसनाशयतुशंकरः त्रैलोक्येयानिभूतानिस्थावराणिचराणिच ब्रह्मविष्ण्वर्करुद्राश्चदहंतुममपातकं एवमावाहयेद्देवान्मंत्रैरेभिश्चवारुणैः एतानेवतथामंत्रान्स्वर्णपट्टेविलेखयेत् ताम्रपट्टेथवालिख्यनववस्त्रेतथैवच मस्तकेयजमानस्यनिदध्युस्तेद्विजोत्तमाः कलशान्द्रव्यसंयुक्तान्जातरूपसमन्वितन् गृहीत्वास्नापये

द्धूपंभद्रपीठोपरिस्थितं पूर्वैरेवतुमंत्रैश्चयजमानंद्विजोत्तमाः अभिषेकंततःकुर्युर्मंत्रैर्वारुणसूक्तकैः आचार्य्यंवरयेत्पश्चात्स्वर्णपट्टंनिवेदयेत् आचार्यंदक्षिणांदद्याद्गोदानंचस्वशक्तितः होमंचापिप्रकुर्वीतसप्तव्याहृतिभिस्तथा। दानंचशक्तितोदद्याद्यदीच्छेदात्मनोहितं सूर्यग्रहेसूर्यनामयुक्तान्मंत्रान्प्रकीर्त्तयेत् अनेनविधिनायस्तुग्रहणेस्नानमाचरेत् नतस्यग्रहजोदोषःकदाचिदपिजायते ग्रहणदर्शनंतुगूढंकार्य्यमितिशिष्टाः प्रत्यक्षंदर्शनंयथानभवति तथावस्त्रादिनाकृतव्यवधानमित्यर्थः इतिमात्स्योक्ताग्रहशांतिः ग्रंथांतरेतु दूर्वाकुशोशीरशमीशिलाजित्सर्वार्थसर्वौषधिपंचमृद्भिः स्नानंविदध्याद्ग्रहणेरवींद्वोःपीडाहरंशांतिवहंहितस्य भार्गवार्चनचंद्रिकायां ब्रह्मसिद्धांते सर्वैःपट्टस्थितंवीक्ष्यंस्वच्छतैलांबुदर्प्पणैः ग्रहणंगुर्विणीयातुनपश्येत्तुपटंविना अत्रग्रहणादिसप्तदिनपर्य्यंतंरामगोपालाद्यागमदीक्षोक्ताशिवार्चनचंद्रिकायाम् ज्ञानार्णवे मंत्राद्यारंभणंकुर्य्याद्ग्रहणेचंद्रसूर्य्ययोः ग्रहणाद्वापिदेवेशिकालःसप्तदिनावधीति रत्नसागरेसतीर्थेर्काविधुग्रासेतथादमनपर्वणि मंत्रदीक्षांप्रकुर्वाणोमासर्क्षादीन्नशोधयेत् तत्र सूर्यग्रहणकालेतुनान्यदन्वेषितंभवेत् सूर्यग्रहणकालेनसमोनान्यःकदाचन मासतिथिवारादिशोधनम् सूर्य्यपर्वणीतितत्रैवकालोत्तरवचनात् चंद्रग्रहेतुयादीक्षायादीक्षाव्रतचारिणां व्रतस्थस्यचयादीक्षादारिद्र्यंसप्तजन्मस्विति तत्रैवयोगिनीतंत्रे निषेधाच्च अथपुरश्चरणचंद्रिकाद्युक्तोरहस्यपुरश्चरणविधिः अथवान्यप्रकारेणपुरश्चरणमिष्यते ग्रहणेर्कस्यचेंदोर्वाशुचिःपूर्वमुपोषितः नद्यांसमुद्रगामिन्यांनाभिमात्रोदकेस्थितः यद्वापुण्योदकेस्नात्वाशुचिःपूर्वमुपोषितः ग्रहणादिविमोक्षातंजपेन्मंत्रंसमाहितः अनंतरंदशांशेनक्रमाद्धोमादिकंचरेत् तदंतेमहतींपूजांकुर्य्याद्ब्राह्मणतर्पणम् ततोमंत्रप्रासिद्ध्यर्थंगुरुंसंपूज्यतोषयेत् एवंचमंत्रसिद्धिःस्याद्देवताचप्रसीदति अथवान्यःप्रकारोयंपौरश्चरणिकोविधिः चंद्रसूर्योपरागेचस्नात्वाप्रयतमानसः स्पर्शादिमोक्षपर्य्यंतंजपेन्मंत्रंसमाहितः जपाद्दशांशतोहोमंतथाहोमाच्चतर्पणं एवं

कृत्वातुमंत्रस्यजायतेसिद्धिरुत्तमा होमाशक्तोजपंकुर्याद्धोमसंख्याचतुर्गुणं षड्गुणंचाष्टगुणितंयथासंख्यंद्विजातयः तेषांस्त्रीणांतुविज्ञेयस्तेषामेवसमोजयः पंचार्णमाश्रितःशूद्रस्तज्जयस्तस्यकीर्त्तितः मूलमंत्रंसमुच्चार्यतदंतेदेवताभिधां द्वितीयांतामहंपश्चात्तर्पयामिनमोंतकः तर्पणस्यदशांशेनमार्जनंपरिकीर्त्तितं तच्चैवंदेवतारूपंध्यात्वात्मानंप्रपूज्यच नमोंतमंत्रमुच्चार्यतदंतेदेवताभिधां तोयैरंजलिनाशुद्धैरभिषिंचेतमूर्द्धनि मार्जनस्यदशांशेनब्राह्मणानपिभोजयेत् विप्राराधनमात्रेणसर्वसांगंभवेद्यतःजपोर्चापूर्वकोहोमस्तर्पणंचाभिषेचनं भूदेवपूजनंपंचप्रकारैश्चपुरस्क्रियैरित्यादितच्चरहस्यपुरश्चरणंग्रस्तास्तेग्रस्तोदयेचभवति स्पर्शादिमुक्तिपर्यंतमित्यभिधानात् तयोश्चयावद्दर्शनगोचरइत्युक्त्यादर्शनयोग्यत्वापेक्षणादित्यलम् इतिग्रहणकालेकार्य्याकार्य्यनिर्णयः स्वस्तिश्रीरणवीरसिंहधरणीपालो०१॥ रणवीरसिंहभूपेशकारितेकृत्यसागरेपितृयज्ञोपरागादेर्द्योतकोरत्नसंग्रहः२इतिश्रीरघुवंशतिलकश्रीमन्महाराजाधिराजश्रीरणवीरसिंहकारिते कृत्यरत्नाकरेसमस्तपर्वणिनिर्णयकःसमाप्तोरत्नसंग्रहः ॥

उँश्रीगणेशायनमः श्रीदंगणेशंशिवयोस्तनूजं सुरासुरैरर्चितपादपीठं स्वर्गापवर्गादिफलप्रभूत्यै वंदामहेनित्यमुदारसत्त्वम् १ एतावताप्रबंधेन व्रतानुष्ठानोपयोगभूतकालंसामान्यतोनिरूप्येदानींप्राधान्येन प्रतिज्ञाविषयीभूतंव्रतस्वरूपं तदुपयोगिचान्यदपिनिरूप्यते तत्र व्रतनामाभियुक्तप्रसिद्धिविषयः संकल्पविषयः अभियुक्तप्रसिद्धिविषयमंत्रवतुस्वकर्त्तव्यविषयोनियतःसंकल्पोव्रतमितिश्रीदत्तादयः तत्त्वग्निहोत्रसंध्यावंदनादिविषयेसंकल्पेतिप्रसक्तं नचसंकल्पस्यव्रतत्वेव्रतंसंकल्पयेदित्यन्वयःपाकंपचति दानंदद्यादितिवत्प्रत्ययानुग्रहार्थप्रयोगापत्तेःअत्रकर्त्तव्यतयायत्संकल्पितंतद्व्रतं संकल्पश्चात्रांगं अन्येतुतादृशार्थविषयःसंकल्पएव व्रतं नागृहीताविशेषणान्यायात् उभयथापि संकल्पंविनाकर्मानुष्ठानदर्शितफलानन्वये विशिष्टकर्मासिद्धेःसचसंकल्पःकामाद्यभिलाषपूर्वःसंकल्पः कर्ममानसमितिनिरुक्तेश्च सचसंकल्पः मानसकायिकोभयनियमरूपतयाकुशतिलजलत्यागादिरूपः संकल्पशास्त्रार्थः एतेन मानसकामाद्यभिलाषपूर्वोजपहोमार्चनदानोपवासादिशास्त्रविहितदेशकालनियमोधर्मोव्रतसामान्यलक्षणम् उभयविधेःसंकल्पएवास्यमुख्यमंगमिति अभुक्त्वाप्रातराहारंव्रतंसंकल्पयेद्व्रतीतिवक्ष्यमाणविधानाच्च व्रतजिज्ञासा नागरखंडे कलिकालकृताकिंचिद्व्रतंशंसमहामुने स्वल्पायासंमहापुण्यंसर्वपापप्रणाशनं वव्हायुषः सदामर्त्याब्रह्मन्कृतयुगेयथा त्रेतायांद्वापरेचैवनतेकलियुगेतथा तस्माद्वर्षव्रतंत्यक्त्वा किंचिदेकाहिकंवद श्वःकार्यमद्यकुर्वीतपूर्वान्हेचापरान्हिके नहिमृत्युःप्रतीक्षेतकृतमस्यनवाकृतम् भर्तृयज्ञउवाच अस्तिराजन्व्रतंपुण्यंशिवरात्रीतिसंज्ञितं एकाहिकंमहाराजसर्वपापप्रणाशनं तत्रयद्दीयतेदानंहुतंजप्तंतथैवच सर्वमक्षयतांयातिशिवव्रतप्रभावतः शिवरात्रीत्युपलक्षणं एवंसर्वव्रतेषुज्ञेयं अथव्रतप्रशंसा विष्णुधर्मोत्तरे व्रतोपवासैर्यैर्विष्णुर्नान्यजन्मनितोषितः तेनरामुनिशार्दूलग्रहरोगादिबाधिताःतथाचस्कंदपुराणे नपूजितोभूतपतिः पुरायैर्व्रतंनचीर्णंनचसत्यमुक्तं दारिद्य

शोकामयदुःखदग्धाः प्रायोत्रशोचंतितएवमर्त्याः राज्यंश्रियंजगतिसाधुजनोपभोगंप्राप्नोतिचापिशिवलोकमथामृत
त्वम् लानाप्यमस्तिभुवनेषुदृढव्रतानांतस्मात्सदाव्रतपरेणनरेणभाव्यम् पद्मपुराणे नाग्निचिन्नरकंयातिनसत्पत्नी
नसद्व्रती नाश्वमेधादियाजीचगोसहस्रप्रदोनच तथागौरींप्रतिशिववाक्यं देवत्वंदेवताःप्राप्ता नियमैर्नियमान्विते
तारारूपाज्वलंत्येतेनियमाद्धैतपोधने स्कांदे नियमानांचदृश्यंतेसमृद्धाःफलसिद्धयः यथाविनियमानांचघोराव्याघ्रा
दियोनयः तथावायुपुराणे किंचिद्व्रतंवाक्रियतेपूज्यतेवात्रिलोचनः विप्रेभ्योदीयतेनवैनतज्जन्मतरोःफलम् नक्तंह
विष्यान्नमनोदनंवाहविस्तिलाक्षीरमथांबुचाज्यं यत्पंचगव्यंयदिवापिवायुःप्रशस्तमत्रोत्तरमुत्तरंच एतत्सर्वं शक्त्यनु
सारेण किंचिद्व्रतविषयं अथव्रताधिकारिणः स्कंदपुराणे निजवर्णाश्रमाचारनिरतःशुद्धमानसः अलुब्धः सत्यवा
दीचसर्वभूतहितेरतः व्रतेष्वधिकृतोराजन्नन्यथाविफलश्रमः श्रद्धावान्पापभीरुश्चमददंभविवर्जितः पूर्वनियममाश्रि
त्ययथावत्कर्मकारकः अवेदनिंदकोधीमानधिकारीव्रतादिषु निश्चयोनिष्ठायस्यनिजवर्णाश्रमाचेरत्यनेनचतुर्णाम
पिवर्णानांव्रतेष्वधिकारः संकोचेमानाभावात् व्रतोपवासनियमैःशरीरोत्तापनंतप इतिदेवलेन व्रतादेस्तपोहेतुत्वा
भिधानात् तपश्च श्राद्धकर्मतपश्चैवसत्यमक्रोधएवच स्वेषुदारेषुसंतोषः शौचंनित्यानसूयता आत्मज्ञानंतितिक्षाच
धर्मः साधारणोनृपेति महाभारते साधारणधर्मत्वश्रवणात् शूद्रोवर्णश्चतुर्थोपिवर्णत्वाद्धर्ममर्हति वेदमंत्रस्वधा
स्वाहावषट्कारादिभिर्विनेतिव्यासोक्तेः शूद्रस्तूष्णींजपेन्मौनमास्तेभोगविवर्जितइतिविशेषविधानाच्च ब्राह्मणाक्ष
त्रियाःवैश्याःशूद्राश्चैवद्विजोत्तम अर्चयंतिमहादेवंयज्ञदानजपादिभिः व्रतोपवासनियमैर्होमस्वाध्यायतर्पणैः तेषांवै
रुद्रसायुज्यंसामीप्यंचातिदुर्लभं सालोक्यताचसारूप्यंजायतेतत्प्रसादतइतिकूर्मपुराणाच्च वैश्याः शूद्राश्चयेमोहा
दुपवासंप्रकुर्वतेत्रिरात्रंपंचरात्रंवातेषांपुष्टिर्नविद्यते इतिमहाभारतेविशेषनिषेधाच्च कश्चिन्म्लेच्छादीनामप्यधिकारः

वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमानवैरिति नवरात्रप्रकरणेभिधानात् स्वर्गकामादाविवाधिकारिविशेषणस्य लिंगस्याविवक्षितत्वात् स्त्रीणामप्यधिकारः अतएव नरोवायदिवानारीत्यादि तत्राभिधानम् यत्तु अनग्नयस्तुयेविप्रास्तेषांश्रेयोभिजायते व्रतोपवासनियमैर्नानादानैस्तथानृपेतिभविष्यवचनं तदनग्नीनामिष्टयाद्यनधिकाराद्व्रतादिभिरेव तेषामिव श्रेय इतिप्रतिपादनार्थं नतु साग्न्यधिकारार्थं दानेप्यनधिकारापत्तेः निर्णयसिंधौ अत्रानग्निग्रहणमुपवासविषयं अतएवदेवलः आहिताग्निरनड्वांश्चब्रह्मचारीचतेत्रयः अश्नंतएवसिद्ध्यंतिनैषांसिद्धिरनश्नतामिति एकादश्यांतुविशेषवचनेन तेषामपि उपवासेधिकारोवक्ष्यते सभर्तृकस्त्रीणां भर्त्रनुज्ञां विना व्रतेष्वनधिकारः नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणमितिमनुवचनात् भर्तृ समानव्रतचारित्वमिति विष्णुवचनात् पत्यनुज्ञयातु पृथगप्यधिकारःयथाहव्यासः पत्नीपत्यनुज्ञाताव्रतादिष्वधिकारिणीति शंखलिखितावपि कामंभर्त्रनुज्ञातायांव्रतोपवासनियमेज्यादीनामभ्यासः स्त्रीधर्म इति अभ्यासः पुनःपुनरनुष्ठानं तथाआदित्यपुराणे पत्युरभ्यधिकंनारीनोपवासव्रतंचरेत् अनायुष्यंद्विजश्रेष्ठपत्युस्तस्यास्तदुच्यते देवताराधनंकुर्यात्कामंवाब्राह्मणोत्तम नारीयद्यननुज्ञाताभर्त्रापित्रासुतेनवा विफलंतद्भवेत्तस्यायत्करोत्यौर्ध्वदैहिकमिति और्ध्वदेहिकंलोकांतरोपयोगिव्रतादिकं कात्यायनोऽपि भार्य्याभर्तृमतेनैवव्रतादीनाचरेदिति यत्तु स्कांदे नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणं भर्तुःशुश्रूषयैवैतालोकानिष्टान्व्रजंतिहि धर्मार्थकामसंसिद्धौनारीभर्तुःसहायिनी यद्देवेभ्यो यज्ञपित्रादिकेभ्यः कुर्याद्भर्ताभ्यर्चनंसत्क्रियांच तस्यार्धंवैसाफलंनान्यचित्तानारीभुंक्तेभर्तृशुश्रूषयैवेति तद्भर्त्रनुज्ञाविषयं एवंच पत्यौजीवतियानारीउपोष्यव्रतमाचरेत् आयुश्चहरतेभर्तुर्नरकंचैवगच्छतीति विष्णूक्तेः सामान्यत उपवासनिषेधोप्यननुज्ञातायाःपृथगुपवासविषयः अथव्रतभेदाः अहिंसासत्यमस्तेयंब्रह्मचर्यमकल्मषं

179

एतानिमानसान्याहुर्व्रतानिव्रतचारिणां एकभक्तंतथानक्तमुपवासादिकंचयत् तत्सर्वंकायिकंपुंसांव्रतंभवतिनान्यथा क्वचित्रैविध्यमप्युक्तं कायिकंवाचिकंचैवमानसंत्रिविधंस्मृतम् यज्ञोदानंतपश्चैववदतस्तच्छृणुष्वमे अहिंसाब्रह्मचर्यंचतपःकायिकमुच्यते वाचिकंसत्यवचनंभूतद्रोहविवर्जितं मानसंमनसःशांतिःसर्ववैराग्यलक्षणमिति अथ व्रताधिकारिधर्माभविष्यत्पुराणे क्षमासत्यंदयादानंशौचमिंद्रियनिग्रहः देवपूजाग्निहवनंसंतोषःस्तेयवर्जनं सर्वव्रतेष्वयंधर्मस्सामान्योदशधास्थितः शौचंपाषंडादिसंसर्गविसर्जनं मृदादिनास्नानमाचमनादि च इंद्रियनिग्रहोऽवलोकनादिवर्जनं देवलः ब्रह्मचर्यमहिंसाचसत्यमामिषवर्जनं व्रतेष्वेतानिचत्वारिचरितव्यानिनित्यशः ब्रह्मचर्यं स्मरणंकीर्त्तनंकेलिःप्रेक्षणंगुह्यभाषणं संकल्पोध्यवसायश्चक्रियानिर्वृतिरेवच एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणइतिदक्षोक्ताष्टविधमैथुनत्यागः देवलः स्त्रीणांतुप्रेक्षणात्स्पर्शात्ताभिःसंकथनादपि विपद्यतेब्रह्मचर्यंनदारेष्वृतुसंगमादिति परदारेष्वितिपाठोनिर्णयामृते ऋतुशब्देनात्रषोडशषोडशनिशाया अर्वाचीनः सावनःसावकाशःकालोविवक्षितइति तत्रव्याख्याने परस्त्रीणामपि मात्रादितुल्यदर्शनेनदोषः निषेधस्तुसरागविषयःषोडशदिवसात्मक ऋतुकालः तत्र सर्वथाऽसंभवे व्रतादिनेऽपिऋतुर्देयः निर्णयामृते कात्यायनः रेकःसेकात्मकंभोगमृतेन्यत्रक्षयःस्मृतइति अतःस्वदाराणांस्पर्शनादिभिरपि ब्रह्मचर्यभंगोनास्तीतितत्सिद्धांतः आमिषंमांसं तथा आमिषंदतिपानीयंगोवर्ज्जंक्षीरमामिषं मसूरमामिषंसस्येफलेजंबीरमामिषआमिषंशुक्तिकाचूर्णमारनालंतथामिषमिति पृथ्वीचंद्रोदये अग्निपुराणे नित्यस्नायीनिराहारोगुरुदेवद्विजार्चकः क्षारंक्षौद्रंचलवणंमांसानिपरिवर्जयेदिति क्षाराणितुतत्रैवोक्तानि तिलमुद्गादृतेसिंव्यसस्येगोधूमकोद्रवौ धान्यकंदेवधान्यंचशमीधान्यंतथैक्षवं स्विन्नधान्यंतथापण्यंमूलंक्षारगणः स्मृतः गो ।तत्रैवप्रतिप्रसवः मदन

रत्नेऽग्निपुराणे व्रीहिषष्टिकमुद्गाश्चकलायाःसतिलंपयः श्यामाकाश्चैवनीवारागोधूमाद्याव्रतेहिताः कूष्मांडालाबुवार्त्ताकपालिकींज्योत्स्निकास्त्यजेत् चरुभैक्ष्यंशक्तुकणाःशाकंदधिघृतंपयः श्यामाकाःशालिनीवारायावकंमूलतंडुलं हविष्यंव्रतनक्तादावग्निकार्यादिकेहितं मधुमांसंविहायान्यद्व्रतेवाहितमीरितमिति शमीधान्यंमाषादिवार्त्ताकःशाकबिल्वकइतिरभसः पालिकीमध्यदेशे योद्र इतिप्रसिद्धा ज्योत्स्निका कोशातकीमिताक्षरायांगौतमः चरुभैक्ष्यसक्तुकणयावकशाकपयोदधिघृतमूलफलोदानि हवींष्युत्तरोत्तरंप्रशस्तानि पयोदधिघृतंगव्यमिति मदनरत्नेछांदोग्यपरिशिष्टे हविष्येषुयवामुख्यास्तदनुव्रीहयःस्मृताः माषकोद्रवगौरादाःसर्वाभावेपिवर्जयेत् भविष्योत्तरे हैमंतिकसितास्विन्नंधान्यंमुद्गायवास्तिलाः कलायंकंगुनीवारावास्तुकंहिलमोचिकाः षष्टिकाःकालशाकंचमूलकंकेमुकतरत् कंदंसैंधवसामुद्रेगव्येचदधिसर्पिषी पयोनुद्धृतसारंचपनसाम्रहरीतकी पिप्पलीजीरकंचैवनागरंचैवतिंतिणी कदलीलवलीधात्रीफलानिगुडमैक्षवम् अतैलपक्वंमुनयोहविष्याणिप्रचक्षते इत्यगस्त्यसंहितायां हमंतिकाद्युक्ता नारिकेलफलंचैवकदलीलवलीतथा आम्रमामलकंचैवपनसंचहरीतकी व्रतांतरप्रशस्तंचहविष्यंमन्वतेबुधाःसितंचअसितंचेति विग्रहःकलायोद्विविधःत्र्यस्त्रोवर्त्तुलश्च लोकेवाटाणेइतिमहाराष्ट्रभाषायांप्रसिद्धःकुलत्थइति स्मृतिकौस्तुभेअभिहितं गौडेषुहिलासेतिप्रसिद्धः केमुकंगौडेषुकेंबुप्रसिद्धः मूलकंलवलीराजामलकीतिकेचित् लवलीस्थानेदाडिमीतिक्वचित्पाठः अतैलपक्वमित्युक्तं हविष्याणांविशेषणं सर्वभूतभयंव्याघ्रादिसत्त्वेभ्योभूतेभ्योभयंव्याधिःप्रतिबंधक्षमःप्रमादोविस्मरणंगुरुशासनंगुरोराज्ञासत्याभिधानेष्वपिनिमित्तेषु पुनःपुनस्त्यागेदोषएव ब्रह्मपुराणेव्रतस्थःप्राणरक्षार्थं कदाचिदुदकंपिबेत् फलमूलेपयःक्षीरंयज्ञशिष्टंतथाहविः व्रतमध्येचरोगार्त्तोवैद्यप्रोक्तमहौषधं करोतिचगुरोर्वाक्यंव्रतस्थस्तत्क्षणादपि ब्राह्मणस्याभिलषितंसाधयेदविचारयन् एतान्यष्टौव्रतस्थानांनव्रतघ्नानिकुत्रचित् पद्मपुराणेपि

अष्टैतान्यव्रतघ्नानिआपोमूलंपयोदधि हविर्ब्राह्मणकाम्याचगुरोर्वचनमौषधं पयःपानादीनामव्रतघ्नत्वं स्त्रीबालाद्यत्यंतपीडितविषयं अन्येपिधर्मा हरिवंशेप्रदर्शिताः अशल्यविद्धंशयनमासनंचतथाविधं स्वयंप्रक्षालितंचापि पादयोरनुशब्दितं अनुशब्दितंव्रतोपयोगितयाकथितं अश्रुप्रपातोरोषश्चकलहस्यकृतिस्तथा उपवासाद्व्रताद्वापि सद्योभ्रंशयतिस्त्रियम् स्त्रियमित्युपलक्षणं शुक्लमेवसदावासःप्रशस्तंचंद्रसंभवे अंतर्वासोऽपरंचैवउपवासव्रतेतथा ॥ वशिष्ठः जपहोमोपवासेषुधौतवस्त्रधरोभवेत् अलंकृतःशुचिर्मौनीश्रद्धावान्विजितेंद्रियः वौधायनः काषायवासाः कुरुतेजपहोमपरिग्रहं सर्वंतद्राक्षसांविद्धिदैवेपित्र्येचवर्जयेत् याज्ञवल्क्यः परिधानाद्वहिःकक्षानिवद्धाआसुरीभवेत् धर्मकर्मणिविद्वद्भिर्वर्जनीयाप्रयत्नतः वहिःकक्षावहिर्विगतेत्यर्थः गोयानमुष्ट्रयानंचकथंचिदपिनारुहेत् खरयानंचसततंव्रतेचाप्युपसंकरमिति उपसंकरोऽस्पृश्यस्पर्शः विष्णुधर्मोत्तरे व्रतेषुतूपवासेषुपुमान्वाथसुवासिनी धारयेच्छुक्लवस्त्राणिकुसुमानिसितानिच एतच्च मंगलादिव्रतविषयम् पादुकार्थस्तृणैःकार्यस्सर्वदाव्रतकेसति उपवासेपिचाविधिरेषएवप्रकीर्त्तितः अंजनंरोचनंचापिगंधान्सुमनसस्तथा व्रतकेचोपवासेचनित्यमेवविवर्जयेत् रोचनंकुंकुमादिनामुखोज्ज्वलीकरणं दंतकाष्ठंशिरःस्नानमुद्वर्त्तनमथापिवा विवर्जितंमृदासर्वंशौचार्थंतुविधीयते तिलामलफलैर्नित्यंश्रीफलैश्चविधीयते प्रक्षालनंतुशिरसःसदामृन्मिश्रितैर्जलैः शिरसोभ्यंजनंसौम्येनैवमत्र प्रशस्यते नपादयोर्नगात्रस्यस्नेहेनेतिस्थितिःस्मृतेति अत्रगंधादिवर्जनाभिधानं पुण्यकव्रतविषयं व्रतांतरेतु सभर्तृकायानदोषः दंतधावनपुष्पादिव्रतेष्वस्यानदुष्यतीतिव्यासवचनात् अंजनंचसतांबूलंसिंदूरंरक्तवाससी विभृयात्सोपवासापिअवैधव्यकरंपरमिति भविष्यपुराणाच्च गंधालंकारवासांसिपुष्पमाल्यानुलेपनं उपवासेन दुष्यंतिदंतधावनवर्जनमिति वृद्धशातातपवचनात् गंधःसौरभं अनुलेपनस्य पृथगुपादानात् उपवासेतथा

श्राद्धेनखादेद्दंतधावनं दंतानांकाष्ठसंयोगोदहत्यासप्तमंकुलम् अनेनकाष्ठेनदंतधावनंनिषिद्धं नतु मृल्लोष्टपत्रादिना पैठीनसिः अलाभेवानिषिद्धेवाकाष्ठानांदंतधावने पर्णादिनाविशुध्येतजिव्होल्लेखःसदैवचेति अलाभेदंतकाष्ठानां निषिद्धायांतिथावपि अपांद्वादशगंडूषैर्विभूयाद्दंतधावनम् स्मृत्यर्थसारेपि पर्णोदकेनांगुल्यावादंतान्धावयेत् प्रदेशिनीवर्जमध्यमानामिकांगुष्ठैर्दंतधावनेभवत्यपिप्रायश्चित्तमुक्तम् विष्णुधर्मोत्तरे श्राद्धोपवासदिवसेखादित्वा दंतधावनं गायत्र्याशतशः पूतमंवुप्राश्यविशुद्ध्यतीति कौर्मे वहिर्ग्रामांत्यजान्सूतिंपतितंचरजस्वलांनस्पृशेन्नाभिभाषेतनेक्षेतव्रतवासरे उपवासस्वरूपंविष्णुधर्मोत्तरे उपावृत्तस्यपापेभ्योयस्तुवासोगुणैःसह उपवासःसविज्ञेयः सर्वभोगविवर्जितः निषिद्धानिसुमंतुराह विहितस्याननुष्ठानमिंद्रियाणामसंयमः निषिद्धसेवनंजैह्मंवर्जनीयंप्रयत्नतः हारीतः पतितपाखंडिनास्तिकादिसंभाषणमश्लीलादिकमुपवासदिनेवर्जयेदिति विष्णुपुराणेपि तस्मात्पाषंडिभिः पापैरालापस्पर्शनंत्यजेत् विशेषतःक्रियाकालेयज्ञादौचापिदीक्षितइति पाषंडादिस्पर्शनविषयेपिप्रायश्चित्तं विष्णुपुराणएवोक्तं स्पर्शनेचनरः स्नात्वाशुचिरादित्यदर्शनात् संभाष्यतान्शुचिपदंतर्पयेदच्युतंवुधःतेपामालोकनात्सूर्यंपश्येतमतिमान्नृप इतिशुचिपदंशुद्धिप्रदं विष्णुधर्मोत्तरे असंभाष्यंसमाभाष्यतुलस्यतसिकादलं आमलक्याः फलंचापिपारणेप्राश्यशुद्ध्यतीति गुणैःसहवासइत्युक्तं तत्रगुणाविष्णुधर्मोत्तरेउक्ताः यथा तज्जप्यजपनंध्यानंतत्कथाश्रवणादिकं तदर्चनंचतन्नामकीर्तनश्रवणादयः उपवासकृतामेतेगुणाः प्रोक्तामहर्षिभिरितितच्छन्देनात्राव्यवहितपूर्वोक्तत्वाद्विष्णुरेवोच्यते उपवासकृतांनियमाउच्यन्ते उपवासव्रतीदंतधावनंहिंसामनृतंचौर्य्यमसकृज्जलपानंसकृत्ताम्बूलभक्षणंस्त्रीसंयोगंदिवास्वापंमांसंचपरिवर्ज्जयेत् विष्णुधर्मोत्तरे असकृज्जलपानंचादिवास्वापंचमैथुनं तांवूलचर्वणंमांसंवर्जयेद्व्रतवासर इति यत्तुकैश्चिदुक्तंमांसानिषेधः पारणांते पारणांतंव्रतंज्ञेय

मित्युक्तेः नतुप्रधानदिनेप्रसक्त्यभावात्इात तन्न   तांवूलचर्वणमांसभक्षणनिषेधस्यैकवाक्योपात्तत्वाद्व्रतादिनएव
न्याय्यत्वात् रागप्रसक्तेःसत्त्वात् वर्जयेत्पारणेमांसामितिपारणादिने पृथङ्निषेधस्यवैयर्थ्यापत्तेश्च   तांवूलभक्षणे
स्त्रीसंभोगेमांसनिषेवणेव्रतलोपोभवेत् ऋत्व्यवद्व्राजिवर्जनामिति   निर्णयामृतधृतव्रतलोपप्रायश्चित्तप्रकरणपठि
तपैठीनसिवाक्ये   तांवूलभक्षणादावेकप्रायश्चित्ताम्नायाच्च   अशक्तौतु अत्ययेचांवुपानेचनोपवासः   प्रणश्य
तीति अत्ययेप्राणात्यये हेमाद्रौ प्रवृत्तमन्यथाकुर्याद्यदिमोहात्कथंचन यतस्तदन्यथाभूतंततएवसमापयेदिति भ
वंतिहिवृथातस्यक्रियाःसर्वाह्यसंशय इत्थंधर्मरत्नसमुच्चयेभिहितमत्राप्यूह्यम् आचमननिमित्तान्याहयमः उत्तीर्यो
दकमाचामेदवतीर्यतथैवचेति वृहस्पतिः अधोवायुसमुत्सर्गेआक्रंदेक्रोधसंभवे मार्जारमूषकस्पर्शेप्रवासेनृतभाषणे
निमित्तेष्वेषुसर्वेषुकर्मकुर्वन्नपःस्पृशेदिति अथद्विराचमननिमित्तानियाज्ञवल्क्यः स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्यो
पसर्पणे आचांतः पुनराचामेद्वासोविपरिधायचेति आचमनासंभवेतु कुर्वीतालंभनंवापिदक्षिणश्रवणस्यत्विति मा
र्कंडेयोक्तदक्षिणकर्णालंभनंवोध्यं अथहस्ततीर्थानिहेमाद्रौहारीतः   अंगुष्ठस्यान्तरतोरेखाब्राह्मंतीर्थंकनिष्ठायाः
पश्चात्प्राजापत्यमग्रेसर्वांगुलीनां दैवमंगुष्ठप्रदेशिन्योरन्तरापित्र्यंमध्यआग्नेयं   प्रतिग्रहमाग्नेयेनगृह्णीयादित्यभि
हितंप्राक्   छागलेयः हस्तमध्येवह्नितीर्थंदक्षिणाग्रहणेतुतत् ब्रह्मपुराणे   मूलेरेखामुखांगुष्ठमाणिवंधेषुम
ध्यमं प्राजापत्यंमहातीर्थंविप्रस्तेनाचमेत्सदा   धनायुर्दाररेखातुसोमतीर्थंतुमध्यमं   लाजादिहवनंतेनकर्तव्यं
वपनंतथा वपनमत्रव्रीह्यादिनिर्वापः दधिप्राशनंसोमतीर्थेनकर्त्तव्यं   स्नातोऽधिकारीभवतिदैवेपित्र्येचकर्म
णि पवित्राणांतथाजप्येदानेचविधिनोदिते शाकटायनः दानमाचमनंहोमंभोजनंदेवतार्चनं   प्रौढपादोनकुर्वी
तस्वाध्यायंपितृतर्पणम्   आसनेरूढपादस्तुजान्वोर्वाजंघयोस्तथा   कृतावसक्थिकोयश्चप्रौढपादःसउच्यते

//

ग्र०र० ॥९१॥ आपस्तंबः तस्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाःप्रवर्त्तंतेविधानोक्ताःसततंब्रह्मवादिनां त्रिमात्रास्तुप्रयोक्तव्याः कर्मारंभेषसर्वशः त्रिस्त्रःसार्द्धास्तुकर्त्तव्यामात्रास्तत्तार्थचिंतकैः यमः पुण्याहवाहनंदैवेब्राह्मणस्यविधीयते एतदेवनिरोंकारंकुर्यात्क्षात्रियवैश्ययोः मार्कंडेयपुराणे सूर्योदयंविनानैवस्नानदानादिकाःक्रियाः अग्नेर्विहरणे चैवक्रत्वभावश्चलक्ष्यते सूर्योदयशब्देन उषःकालोलक्ष्यते तेनरात्रौनकुर्यादितितात्पर्यं दक्षः दैवकार्याणिपूर्वाह्णेमनुष्याणांसुमध्यमे पितृणामपराह्णेतुकार्याणीतिविनिश्चयः अंगिराः संध्ययोरुभयोर्जप्येभोजनेदंतधावने पितृकार्येचदैवेचतथामूत्रपुरीषयोः गुरूणांसन्निधौदानेयागेचैवविशेषतः एषुमौनमुपातिष्ठन्स्वर्गंप्राप्नोतिमानवः व्रतांगलोपप्रायश्चित्तानि त्वेकादशीप्रकरणेवक्ष्यंते गृहीतव्रतत्यागे दोषउक्तोमदनरत्ने छागलेन पूर्वंव्रतं गृहीत्वातुनाचरेत्काममोहितः जीवन्भवतिचांडालोमृतःश्वाचाभिजायतेइति व्रतत्यागे प्रायश्चित्तमप्युक्तंपृथ्वीचंद्रोदये गारुडे क्रोधात्प्रमादाल्लोभाद्वाव्रतभंगोभवेद्यदि दिनत्रयंनभुंजीतमुंडनंशिरसोथवेति प्रायश्चित्तानंतरमुपक्रांतानुष्ठानंकार्य्यम् प्रायश्चित्तमिदंकृत्वापुनरेवव्रतीभवेदितिवायुपुराणोक्तेः अन्योपिविशेषस्तत्रैव दानंप्रतिग्रहोहोमोभोजनंबलिरेवच सांगुष्ठेनसदाकार्य्यमसुरेभ्योन्यथाभवेत् एतान्येवतुकर्माणिदानानीतिविशेषतः अतर्जानुविधेयानि तत्तदाचमनंनृप याज्ञवल्क्यः शैवपित्र्यान्सुरान्मंत्रांस्तथाह्येवाभिचारकान् व्याहृत्यालभ्यचात्मानमुपस्पृश्यान्यदाचरेत् स्त्रीव्रतेविशेषोहरिवंशे स्नात्वास्त्रीप्रातरुत्थायपतिंविज्ञापयेत्सती तथा गृहीत्वौदुंबरंपात्रंसकुशंसाक्षतंतथा गोःशृंगंदक्षिणंसिच्यप्रगृह्णीयाच्चतज्जलं औदुंबरंताम्रमयंसकुशंसाक्षतंचयत् ततोभर्त्तुःसतीदद्यात्स्नातस्यप्रयतस्यच आत्मनश्चाभिषेक्तव्यंभर्तुःशिरसितज्जलं त्रैलोक्येसर्वतीर्थेषुस्नानमेतदुदाहृतं उपवासेषुकर्त्तव्यमेतद्धिव्रतकस्यचेति अथसर्वव्रतानामारंभे संकल्पविधिश्चोक्तोमहाभारते गृहीत्वौदुंबरंपात्रंवारिपूर्णमुदङ्मुखः उप

वासंतुगृह्णीयाद्यथासंकल्पयेद्बुधः देवलः अभुक्त्वाप्रातराहारंस्नात्वाचम्यसमाहितः सूर्य्यायदेवताभ्यश्चनिवेद्यव्रतमाचरेत् अत्रप्रातर्व्रतमाचरेदितिसंबंधः प्रधानक्रियान्वयस्याभ्यवहितत्वादितिवीरमित्रोदयः व्रतंनिशामुखेग्राह्यंवहिस्तारकदर्शनादितिविष्णुनोक्तं प्रकरणात्प्रायश्चित्तविषयम् अन्यव्रतेष्वपि यच्च पूर्वदिनेव्रतग्रहणं श्रूयते तत्रपूर्वदिनएवव्रतग्रहणं अथव्रतारंभकालःमदनरत्नेगार्ग्यः अस्तगेचगुरौशुक्रेवालेवृद्धेमलिम्लुचे उद्यापनमुपारंभंव्रतानांनैवकारयेत् रत्नमालायां सोमसौम्यगुरुशुक्रवासराःसर्वकर्मसुभवंतिसिद्धिदाः॥ भानुभौमशनिवासरेषुच प्रोक्तमेवखलुकर्मसिध्यति तथा विरुद्धसंज्ञाइहयेचयोगास्तेषामनिष्टःखलुआद्यपादः सवैधृतिस्तुव्यतिपातनामासर्वोप्यनिष्टःपरिघस्यचार्धं तिस्रस्तुयोगेप्रथमेसवज्रेव्याघातसंज्ञेनवपंचशूले गंडेतिगंडेचषडेवनाड्यःशुभेषुकार्य्येषुविवर्जनीयाः संग्रहे कृष्णेग्निदिशयोरूर्ध्वंसप्तमीभूतयोरधः शुक्लेवेदेशयोरूर्ध्वंभद्राप्राग्वसुपूर्णयोः श्रीपतिः नसिद्धिमायातिकृतंचविष्ट्यांविषारिघातादिकमत्रसिद्धं व्यवहारसमुच्चये दशम्यामष्टम्यांप्रथमघटिकापंचकपरं हारिद्युःसप्तम्यांद्विदशघाटिकांतेत्रिघाटिकं तृतीयाराकायांस्वयमघटिकाभ्यःपरभवंशुभंविष्टेःपुच्छंशिवतिथिचतुर्थ्योस्तुविरमे तत्रैव सर्पिणीतुसितपक्षेकृष्णेचैवतुवृश्चिकी सर्पिण्यास्तुमुखंत्याज्यंवृश्चिक्याःपुच्छमेवच माधवीये विष्टिर्यदाहनितिथेरपरार्धजातापूर्वार्धजानिशितथाशुभदाचपुच्छे ब्रह्मयामले दिनभद्रायदारात्रौ रात्रिभद्रायदादिवा नत्याज्याशुभकार्येषुप्राहुरेवंपुरातनाः टोडरानंदे देवीपुराणे व्रतेचतीर्थेध्ययनेश्राद्धेपिच विशेषतः परान्नभोजनाद्देवियस्यान्नंतस्यतत्फलम् प्रतिमास्वरूपं मदनरत्ने भविष्ये अनुक्तद्रव्यतत्संख्यादेवताप्रतिमानृप सौवर्णीराजतीताम्रीवृक्षजामार्त्तिकीतथा चित्रजापिष्टलेखोत्थानिजचित्तानुसारतः आमाषात्पलपर्यंतंकर्त्तव्याशाठ्यवर्जिता निजवित्तानुसारतइत्यपिपाठः अथकुशपवित्रंकात्यायनः अनंतर्गर्भकंसाग्रंकौशंद्विदलमेवच

प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् अथसमिधः पालाशाश्वत्थखदिररोहितोदुंबरोद्भवाः तदभावे कंटकवर्जं सर्ववनस्पतीनांसमिधोग्राह्याः तस्यामानंकर्मप्रदीपे नांगुलादधिका कार्यासमित्स्थूलतयाक्वचित् नवियुक्तात्वचावैवनसंकोचनपाटिता प्रादेशान्नाधिकन्यूनानतथास्याद्विशाखिका नसपर्णासमित्कार्याहोमकर्मणिजानता इति कात्यायनः योनार्चिषिजुहोत्यग्नौव्यंगारिणिचपावके मंदाग्निरामयावीचदरिद्रश्चोपजायते तस्मात्समिद्धेहोतव्यं नासमिद्धेकथंचन नकुर्यादग्निधमनंकदाचिद्व्यजनादिना मुखेनैवधमेदग्निंमुखाद्ध्यग्निरजायत तत्रैवब्राह्मे ॥ आज्यंद्रव्यमनादेशेजुहोतिषुविधीयते मंत्रस्यदेवतायाश्चप्रजापतिरितिस्थितिः होमाहुतिसंख्यामानंमात्स्ये अनुक्तसंख्यायत्रस्याच्छतमष्टोत्तरंस्मृतं अष्टाविंशतिरष्टौवायथाशक्तिविधीयतेइति मदनरत्ने ब्राह्मे यथोक्तवस्त्वसंपत्तौ ग्राह्यंतदनुकारियत् यवानामिवगोधूमाव्रीहीणामिवशालय इति हेमाद्रौ दध्यभावेपयः कार्यंमध्वभावेतथागुडः घृतंहोमेगव्यंमुख्यं तदभावेमाहिषमाजंवा तैलेसार्षपंकौसुंभंवा मंत्रस्यदेवतायाश्चविधानेप्रजापतिर्देवतासमस्तव्याहृतिमंत्रः स्मृत्यंतरेपि नव्याहृत्यासमंहुतमितिगरुडे प्रणवादिनमोंतंचचतुर्थ्यंतंचसत्तम देवतायाःस्वकंनाममूलमंत्रः प्रकीर्तितः व्रतोद्यापनानुक्तौतु पृथ्वीचंद्रोदये नंदिपुराणे कुर्यादुद्यापनंतस्यसमाप्तौयदुदीरितं उद्यापनंविनायत्तुतद्व्रतंनिष्फलंभवेत् यदिचोद्यापनंनोक्तंव्रतानुगुणतश्चरेत् वित्तानुसारतोदद्यादनुक्तोद्यापनेव्रते गाश्चैवकांचनंदद्याद्व्रतस्यपरिपूर्तये अशक्तौतुनारदीये सर्वेषामप्यलाभेतुयथोक्तकरणंविना विप्रवाक्यंस्मृतंशुद्धंव्रतस्यपरिपूर्तये पृथाविप्रवचोयस्तुगृह्णातिमनुजःशुभं अदत्त्वादक्षिणांपापःसयातिकरकंध्रुवम् अथदानविभागनिर्णयः हेमाद्रौअंगिराः बहुभ्योनप्रदेयानिगोगृहंशयनंस्त्रियः विभक्तदक्षिणाह्येतादातारंपातयंतिहि एकाएकस्यदातव्यानबहुभ्यःकथंचन सातुविक्रयमापन्नादहत्यासप्तमंकुलम् विक्रेतुरेवैतद्दोषप्रदर्शनं नदातुरितिकात्यायनोपि

कन्याशय्यागृहंचैकंदेयंयच्चास्त्रियादिकं तदेकस्मैप्रदातव्यंनवहुभ्यःकथंचनेति वैजवापः शिवनेत्रोद्भवं यस्माद्रजतंशिववल्लभं अमंगलंतद्यत्नेनदेवकार्येषुवर्जयेत् कलशलक्षणं तद्देवताश्चोक्तादेवीपुराणे पंचाशांगुलवैपुल्यमुत्सेधःषोडशांगुलः कलशानांप्रमाणंतुमुखमष्टांगुलंभवेदिति विष्णुधर्मोत्तरेच हेमरजतताम्राश्चमृण्मया लक्षणान्विताः यात्रोद्वाहप्रतिष्ठादौकुंभाःस्युरभिषेचने तथाच पूर्णाःपूतेनतोयेनसितास्त्वेकांततोज्ज्वलाः सरित्सरःखातजेनतडागेनजलेनवा वापीकूपोत्थदिव्येनसामुद्रेणसुखावहाः कलशाःसर्वमांगल्याःसर्वकिल्विषनाशनाः अभिषेकेसदाग्राह्याःकलशाःसुदृढाःशुभाः यात्राविवाहादिकालेप्रतिष्ठायज्ञकर्मणि योजनीयाविशेषेणसर्वकामप्रसाधकाः तथा कलशस्यमुखेव्रह्माग्रीवायांचमहेश्वरः मूलेचसंस्थितोविष्णुर्मध्येमातृगणाःस्मृताः शेषास्तुदेवतास्सर्वाविष्टयंतिचतुर्दिशं पृथिव्यांयानितीर्थानिकलशेनिवसंतिहि ग्रहादेवाश्चशांतिश्चपुष्टिश्चमतिरेवच ऋग्वेदश्चयजुर्वेदःसामवेदस्तथैवच अथर्ववेदसहितास्सर्वेकलशमास्थिताइति अथपंचपल्लवाः व्रह्मांडपुराणे अश्वत्थोदुंवरप्लक्षचूतन्यग्रोधपल्लवाः अथपंचरत्नानि कालिपुराणे कनकंकुलिशंनीलंपद्मरागंचमौक्तिकं एतानिपंचरत्नानिशास्त्रेदृष्टानिसूरिभिः कुलिशं हीरः आदित्यपुराणे सुवर्णरजतंमुक्ताराजावर्त्तःप्रवालकं रत्नपंचकमाख्यातमिति ॥

अभावेसर्वरत्नानांहेमंसर्वत्रयोजयेत् तथामुक्ताफलंहिरण्यंचवैदूर्यंपद्मरागकं पुष्परागंचगोमेदंनीलंगारुत्मतंतथा प्रवालयुक्तान्युक्तानिमहारत्नानिवैनव मदनरत्नेतु हिरण्यस्थानेहीरकमितिपाठांतरम् अथ सौभाग्याष्टकं मत्स्यपुराणे इक्षवस्तरुराजंचनिष्पावाजीवधान्यकं विकारवच्चगोक्षीरंकुसुंभकुसुमंतथा लवणंचाष्टमंतत्रसौभाग्याष्टकमुच्यते मिताक्षरायांपराशरः गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं पंचगव्यमितिप्रोक्तंपवित्रंकायशोधनं गोमूत्रंताम्रवर्णायाःश्वेतायास्त्वथगोमयं पयःकांचनवर्णायानीलायास्त्वथवैदधि घृतंवैकृष्णवर्णायाः सर्वंकापिलमेववा

अ०२० अलाभेसर्ववर्णाया:पंचगव्येष्वयंविधिः गोमूत्रंमाषकास्त्वष्टौगोमयस्यतु षोडश क्षीरस्यद्वादशप्रोक्तादध्नस्तुदशकी
॥९३॥ र्तिताः गोमूत्रवद्घृतस्यापितदर्धंतुकुशोदकमिति नृसिंहपुराणे गोशकृद्द्विगुणंमूत्रंसर्पिर्दद्याच्चतुर्गुणं क्षीरमष्टगुणं
प्रोक्तंपंचगव्येतथादधि वीरमित्रोदये स्कांदे ताम्रारुणश्वेतकृष्णानीलानामाहरेद्गवां गोमूत्रंगोमयंक्षीरंदधिसर्पिषि
चक्रमात् विष्णुवह्नींदुवाय्वर्कदैवतानियथाक्रमं विद्यैतानिकुशोदंचपितृराजाधिदैवतान् प्रोक्ताभावेह्यथैतानिकपि
लायाःप्रकल्पयेत् गोमूत्रभागस्तस्यार्धंशकृत्क्षीरस्यचत्रयम् द्वयंदध्नोघृतस्यैकमेकश्चकुशवारिणः गायत्र्याचैवगो
मूत्रंगंधद्वारेतिगोमयं आप्यायस्वेतिचक्षीरंदधिक्राव्णेतिवैदधि तेजोसिशुक्रमित्याज्यं देवस्यत्वाकुशोदकम्
एभिस्तुपंचभिर्मंत्रैः पंचगव्यंप्रचक्षते एतदेवमहापुण्यंब्रह्मकूर्चमितिस्मृतम् इतिपंचगव्यविधिः पंचामृतंशिवधर्मे
पंचामृतंदधिक्षीरसितामधुघृतंतथेति अथ सप्तधान्यानि ग्रंथांतरे व्रीहयोयवगोधूमामुद्गामाषाःप्रियंगवः ति
लाश्चसप्तमाःप्रोक्ताधान्यसप्तकमुच्यते तथाच यवगोधूमधान्यानितिलाः कंगुस्तथैवच श्यामाकंदेवधान्यंचसप्त
धान्यमुदाहृतम् अष्टादशधान्यानिमार्कंडेयपुराणे वीरमित्रोदये व्रीहियवगोधूमकंगुसर्षपप्रियंगूदारकोरदूषस
तीनकमाषमुद्गमसूरनिष्पावकुलत्थाढकीचीणकचणहैमंतिकानि व्रीहयः षष्टिकाः उदारोदेवधान्यं कोरदूषः
कोद्रवः सतीनकोवर्तुलकलायः निष्पावोवल्लः मदनरत्ने स्कंदपुराणेतु यवगोधूमधान्यानितिलकंगुकुलत्थ
काः माषमुद्गमसूराश्चनिष्पावाःश्यामसर्षपाः गवेधुकाश्चनीवाराआढक्योथसतीनकाः चणकाश्चीणकाश्चै
वधान्यान्यष्टादशैवतु श्यामःश्यामाकः सप्तधातवोभविष्यत्पुराणे सुवर्णंरजतंताम्रमारकूटंतथैवच लोहंत्रपु
स्तथासीसंधातवःसप्तकीर्त्तिताः अथ सुवर्णादिमानं पंचगुंजात्मकोमाषस्तेसुवर्णस्तुषोडश पलंसुवर्णाश्चत्वारः
पंचचापिप्रकीर्त्तितम् धान्यमानंच पलंचकुडवःप्रस्थआढकेद्रोणएवच धान्यमानेषुबोद्धव्याःक्रमशोमीचतुर्गुणाः

षोडशद्रोणाःखारीभवतीतिदिक् सर्वधातुगणोमत्स्यपुराणे तालकंचशिलावज्रमंजनंश्याममेवच काक्षीकांसीसमाक्षीकंगैरिकंचादितःक्रमात् तालकंहरितालं शिला मनःशिला वज्रंवज्राभ्रकं अप्रस्तरंकठोरांगंगुरुकज्जलसन्निभं यन्नशब्दायतेवन्हौनैवोच्छूनंभवेदपि सदाकरसमुद्भूतंवज्रेतिप्रथितंचतत् श्याममंजनं काक्षीसौराष्ट्रमृत्तिका कांसीकांस्यं माक्षिकं माक्षीकंतथैव आपःक्षीरंकुशाग्राणिदध्यक्षततिलास्तथा यवाःसिद्धार्थकाश्चेतिह्यर्घोष्टांगःप्रकीर्त्तितः पंचरात्रे रजांसिपंचवर्णानिमंडलार्थंतुकारयेत् शालितंडुलजंशुक्लंरक्तंकौसुंभसौंदुरम् हरितालोद्भवंपीतंकृष्णदग्धयवोद्भवं रजांसिपंचवर्णानिहरितंपीतकृष्णयुगिति कौतुकाख्यानिभविष्ये दूर्वायवांकुराश्चैवनूतनाश्चूतपल्लवाः हरिद्राद्वयसिद्धार्थाःशिखिपत्रोरगत्वचः कंकणौषधयश्चैवकौतुकाख्योद्भवाःस्मृताइति मत्स्यपुराणे अथ सप्तमृत्तिकाः गजाश्वरथवल्मीकसंगमाह्रदगोकुलात् राजद्वारप्रवेशाच्चमृदमानीयनिक्षिपेत् चत्वरेतिवापाठः इतिसप्तमृत्तिकाः सर्वौषध्यः छांदोग्यपरिशिष्टे कुष्ठमांसीहारिद्रेद्वेमुराशैलेयचंदनं वचाचंपकमुस्ताचसर्वौषध्योदशस्मृताः अथसर्ववीजानिदेवीपुराणे यवगोधूममुद्गाश्चशालीषाष्टिकमाढकं तिलामाषाः प्रसातीचश्यामाकाशववालकाः आढकंआढकीफलं दाक्षिणात्यभाषायांतूरीतिप्रसिद्धम् प्रसातीनीवारः आशवंआशुधान्यफलं वालकाःकंगुः मधुरत्रयंकात्यायनःआज्यंक्षीरंमधुतथामधुरत्रयमुच्यते अथयक्षकर्दमोःगरुडपुराणे कर्पूरमगुश्चैवकस्तूरीचंदनंतथा कंकोलंचभवेदेभिः पंचभिर्यक्षकर्दमः सर्वगंधंयथा गृह्यपरिशिष्टे कर्पूरंचंदनंदर्पः कुंकुमंचचतुःसमं सर्वगंधमितिख्यातंसमस्तसुरवल्लभम् अथगंधाष्टकं शक्तेर्यथा चंदनागुरुकर्पूरचौरकुंकुमरोचनाः जटामांसीकपियुताःशक्तेर्गंधाष्टकंविदुः चौरः कृशटी कपि कठियान। गौत्तमीये चंदनागुरुह्रीबेरकुष्ठकुंकुमरोचनाः जटामांसीमुरमितिविष्णोर्गंधाष्टकंविदुः इतिविष्णोर्गंधाष्टकं ह्रीबेरंवाला शैवंगंधाष्टकंशारदायां चंदनागुरुकर्पूरतमालजल

कुंकुमं कुसीतकुष्ठसंयुक्तंशैवंगंधाष्टकंविदुः तमालंतमालपत्रं जलंवाला कुसीतंरक्तचंदनं गणेशगंधाष्टकं संहितायां स्वरूपंचंदनंचौरंरोचनागुरुमेवच मदंमृगद्वयोद्भूतंकस्तूरीचंद्रसंयुतं गंधाष्टकंविनिर्दिष्टंगणेशस्यमहात्मनः भविष्यपुराणे अगुरुशिल्हकंमुस्ताचंदनंवृषणंतथा समभागंचकर्त्तव्यंधूपोयममृताव्हयः यथा कर्पूरंचंदनं मांसीत्वकपत्रैलालवंगकं अगुरुशिल्हकंधूपंप्राजापत्यंप्रचक्षते शिल्हकंशिलारसमितिनिर्घंटः दशांगधूपः षड्भागकुष्ठंद्विगुणोगुडश्चलाक्षात्रयंपंचनखस्यभागाः हरीतकीसर्जरसः समांसीभागैकमेकंत्रिलवंशिलाजं घनस्यचत्वारिमुरस्यचैकोधूपोदशांगोगदितोमुनींद्रैः अथव्रतेसूतकादिनिर्णयः तत्रशावसूत्याशौचयोःसर्वकर्मनिवृत्तिः सूतकेचसमुत्पन्नेज्वरकर्माणिमैथुने धूमोद्गारेतथाजातौनित्यकर्माणिसंत्यजेत् द्रव्येभुक्तेत्वजीर्णेचनैवभुक्त्वापिकिंचन कर्मकुर्यान्नरोनित्यंसूतकेमृतकेतथेति कालिकापुराणात् गौडास्तुक्षताशौचादावपितामाहुः पठंति च जानूर्ध्वंक्षतजेजातेनित्यकर्मनचाचरेत् नैमित्तिकंचतदधः स्रवद्रक्तोनवाचरेत् हेमाद्रौपाद्मे गर्भिणीसूतिकादिश्चकुमारीवाप्यरोगिणी यदाशुद्धातदान्येनकारयेत्प्रयतास्वयमिति पुंसोप्येवंविधिः लिंगस्याविवक्षितत्वात् तेनयस्मिन्व्रतेयत्पूजाद्युक्तंतदन्येनकारयेत् शारीरनियमान्स्वयंकुर्यादितिशुद्धितत्त्वे विष्णुः वहुकालिकसंकल्पोगृहीतश्चपुरायदि सूतकेमृतकेचैवव्रतंतन्नैवदुष्यतीति एतत्काम्यपरम् नित्यंत्वनारब्धमपिकार्यमितिगौडाः मदनरत्ने पूर्वसंकल्पितंयच्चव्रतंसुनियतव्रतैः तत्कर्तव्यंनरैःश्राद्धदानार्चनविवर्जितम् माधवीयेकौर्म्ये काम्योपवासेप्रक्रांतेत्वन्तरामृतसूतके तत्रकाम्यव्रतंकुर्य्याद्दानार्चनविवर्जितमिति ॥ सत्यव्रतः रजस्वलायाव्रतविधिमाह ॥ प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत् नतत्रापिव्रतस्यस्यादुपरोधः कदाचनैतत्प्रतिनिधिनाकारयेदित्येतदपरं तदुक्तंमदनरत्नेमात्स्ये अंतरातुरजोयोगेपूजामन्योनकारयेदिति प्रतिनिधयश्चनिर्णयामृते

पैठीनसिनोक्ताः भार्यापत्युर्व्रतंकुर्याद्भार्यायाश्चपतिर्व्रतं असामर्थ्येपरस्ताभ्यांव्रतभंगोनजायते कालतत्त्वविवेचने ब्रह्मवैवर्त्ते उपवासासमर्थश्चेदेकंविप्रंतुभोजयेत् तावद्धनादिकंदद्याद्यद्भुक्ताद्द्विगुणंभवेत् सहस्रसम्मितांदेवींजपेद्वा प्राणसंयमान् कुर्याद्द्वादशसंख्याकान्यथाशक्तिव्रतेनर इति राज्यस्थक्षत्रियाद्यर्थंएकादश्यामुपोषितः पुरोधाःक्षत्रियस्यार्धंफलंप्राप्नोतिनिश्चितं पितामहादीनुद्दिश्यएकादश्यामुपोषिते सुतेनतत्फलंविप्राः समग्रंसमवाप्नुयुः कर्त्तादशगुणंपुण्यंप्राप्नोत्यत्रनसंशयः यमुद्दिश्यकृतंसोऽपिसंपूर्णफलभाग्भवेत् स्कांदेऽपि पुत्रंवाविनयोपेतंभागिनींभ्रातरंतथा एषामभावएवान्यंब्राह्मणंविनियोजयेत् तथा भ्रातरंभगिनींशिष्यंकारयेद्ब्राह्मणादिभिरिति हेमाद्रौवाराहपुराणे असामर्थ्येशरीरस्यव्रतेतुसमुपस्थिते कारयेद्धर्मपत्नींवापुत्रंवाविनयान्वितं भगिनींभ्रातरंवापिव्रतमस्यनलुप्यते माधवीयेस्मृत्यंतरेपि पितृमातृभ्रातृशिष्यश्वश्रूगुर्वादिभूभुजां अदृष्टार्थमुपोषित्वास्वयंतत्फलभाग्भवेत् नारीचपतिमुद्दिश्यएकादश्यामुपोषिता पुण्यंक्रतुशतंप्राहुर्मुनयः पारदर्शिनः कात्यायनः पितृमातृभ्रातृपतिगुर्वर्थंचाविशेषतः उपवासंप्रकुर्वाणः पुण्यंशतगुणंलभेत् दक्षिणानात्रदातव्याशुश्रूषाविहिताहिसा मदनरत्नेप्रभासखंडे भर्त्तापुत्रःपुरोधाश्चभ्रातापत्नीसखापिच यात्रायांधर्मकार्येचकर्तव्याः प्रतिहस्तकाः एभिः कृतंमहादेविस्वयमेवकृतंभवेत् स्वयंकर्त्तुमशक्तश्चेत्कारयेतपुरोधसा दक्षस्मृतौ स्वयंहोमेफलं यत्स्यान्नतदन्येनजायते ॥ ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोऽ ट्पतिः एभिरेवकृतंयत्तुतद्धृतंस्वयमेवतु शूद्रस्य ब्राह्मणः प्रतिनिधिर्युक्तः जपस्तपस्तीर्थसेवाप्रव्रज्यामंत्रसाधनं ॥ विप्रैःसंपादितंयस्यसम्पन्नंतस्यतत्फलमितिमरीचिवचनात् यत्तुनिर्णयसिंधावुक्तं प्रव्रज्यादीनांशूद्रेऽसंभावान्नेदंवचनंब्राह्मणस्यशूद्रप्रतिनिधित्वपरं किंतुसंपूर्णतावाचनपरमितितन्न प्रव्रज्यामात्रस्यशूद्रेऽसंभवेपि जपादीनांसंभवेनतद्विषयेसंकोचायोगात्

एतद्वचनस्यप्रतिनिधिप्रकरणे पाठेनसंपूर्णतावाचनपरत्वायोगाच्च हेमाद्रौ कात्यायनः पुरोधास्तुक्षत्रियोवाह्वयोःसममितीरितं उपवासफलंताभ्यांसमग्रंसमवाप्यते वायुपुराणे उपवासेत्वशक्तस्तुआहिताग्निरथापिवा पुत्राद्वाकारयेदाद्यंब्राह्मणादपिकारयेत् अथवाविप्रमुख्येभ्योदानंदद्यात्स्वशक्तितः उपवासफलंतेनसमग्रंसमवाप्यते तत्रभोजनदोषोपितत्क्षणादेवनश्यति द्रव्यदातोपवासस्यफलंप्राप्नोत्यसंशयं कर्त्तातुनतदाप्नोतिनात्रकार्याविचारणा घृणयावान्यमुद्दिश्यएकादश्यामुपोषितः यमुद्दिश्यकृतंविप्रास्तस्यपूर्णंकृतंभवेत् अत्रविशेषमाह त्रिकांडमंडनः काम्येप्रतिनिधिर्नास्तिनित्येनैमित्तिकेचसः काम्येप्युपक्रमादूर्ध्वंकेचित्प्रतिनिधिंविदुः तस्मात्प्रतिनिधिंमंत्रस्वामिदेवाग्निकर्मसु स्वदेशकालयोर्नास्तिनारणेरग्निरेवसा नापिप्रतिनिधातव्यंनिषिद्धंवस्तुकुत्रचित् हरिकेशसूत्रेऽपि नस्वामिनोऽस्यभार्यायाःपुत्रस्यदेशस्यकालस्याग्नेर्देवतायाःकर्मणःशब्दस्यचप्रतिनिधिर्विद्यतइति स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणी र्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविचारकृद्रघुपतेःपादांबुजार्चारतो जीव्यात्पुत्रकलत्रपौत्रसहितःसंपालयन्क्ष्मांचिरम् १ ॥ रणवीरसिंहभूपेशकारितेकृत्यसागरे परिभाषाभिधोजातश्चाष्टमोरत्नसंग्रहः २ ॥ इतिश्रीरघुवंशतिलकश्रीमहाराजरणवीरसिंहकारिते कृत्यरत्नाकरे धर्मनिबंधे परिभाषाप्रकरणंनामाष्टमम् ८ अथसर्वव्रतेपुत्रेताधिवात् देवतापूजोपयोगीसर्वदेवतासामान्यपूजाक्रमोलिख्यते तत्रादौपूजोपचाराःपदार्थादर्शेज्ञानमालायां अष्टात्रिंशत् षोडशवादशपंचोपचारकाः तान्विभज्यप्रवक्ष्यामिकेतेतैश्चकृतैश्चकिम् अर्घ्यंचपाद्याचमनेमधुपर्कमुपस्पर्शं स्नानंनीराजनंवस्त्रमाचमनंचोपवीतकम् पुनराचमनंचैवदर्पणालोकनंतथा गंधपुष्पेधूपदीपौनैवेद्यंचततः क्रमात् पानीयंतोयमाचामंहस्तवासस्ततःपरं करोद्वर्त्तनमित्यर्थःताम्बूलमनुलेपंचपुष्पदानंपुनःपुनः पुष्पांजलिदानं

लक्षपुष्पव्रतादिविधिनेतियावत् ॥ गीतंवाद्यंतथानृत्यंस्तुतिश्चैवप्रदक्षिणम् ॥ पुष्पांजलिर्नमस्काराश्चाष्टा
त्रिंशत्समीरिताः इत्यष्टात्रिंशत् ३८ ॥ आसनंस्वागतंचार्घ्यंपाद्यमाचमनीयकम् मधुपर्काचमस्नानवसनाभ
रणानिच सुगंधःसुमनोधूपदीपमन्नेनतर्पणम् माल्यानुलेपनंचैवनमस्कारोविसर्जनम् इतिषोडशोपचाराः १६ ॥
अर्घ्यपाद्याचमान्येवमधुपर्काचमान्यपि गंधादयोनिवेद्यांताउपचारादशक्रमात् इतिदशोपचाराः १० ॥ गंध
पुष्पेधूपदीपौनैवेद्यंपंचमंस्मृतं इतिपंचोपचाराः ५ ॥ महानिबंधेषुचतुःषष्ट्युपचाराअप्युक्तास्तेविस्तरभयादत्र
नोक्ताः शारदातिलके षोडशोक्ताः तेयथाआसनस्नानवस्त्रभूषणानिपरित्यज्यद्वादशाप्युक्ताः कपि
लपंचरात्रे गंधतैलमथोदद्याद्देवस्यप्रतिमांततः दूर्वाचविष्णुक्रांताचश्यामाकंपद्ममेवच पाद्यांगानिचचत्वारि
कथितानिसमासतः इतिपाद्यं कर्पूरमगुरुपुष्पद्रव्याण्पाचमनीयकं सिद्धार्थमक्षतंचैवदूर्वापस्तिलमेवच यवा
गंधफलंपुष्पमष्टांगंत्वर्घ्यमुच्यते इत्यर्घः स्नानेवस्त्रेतथाभोज्येदद्यादाचमनीयकं उद्वर्त्तनमपितत्रैव रजनीस
हदेवीचशिरीषंलक्ष्मणापिच सहाभद्राकुशाग्राणिउद्वर्त्तनमिहोच्यते मंत्रतंत्रप्रकाशिकायां अक्षतागंधपुष्पाणि
स्नानपात्रेतथात्रयं तत्रैव द्रव्याभावेप्रदातव्याःक्षालितास्तंडुलाःशुभाः अगस्त्यसंहितायां तथाचमनपात्रैश्चद
द्याज्जातीफलंमुने लवंगमपिकंकोलंशस्तमाचमनीयके तंत्रांतरे तंडुलान्प्रक्षिपेत्तेषुद्रव्याभावेषुतत्स्मरन् प्र
योगपारिजाते व्यासः प्रतिमांपटयंत्राणांनित्यंस्नानंनकारयेत् कारयेत्पर्वदिवसेयदाचामलधारणम्
ज्ञानमालायां नाक्षतैरर्चयेद्विष्णुंनतुलस्यागणाधिपं नदूर्वयायजेद्देवींविल्वपत्रैर्दिवाकरं उन्मत्तमर्कपुष्पंचवि
ष्णोर्वर्ज्यंसदाबुधैः अक्षतास्तुयवाःप्रोक्ता इतिपदार्थादर्शे उक्तत्वाद्यवानामेवायंनिषेधोनतंडुलादीनां तंत्रांतरे
महाभिषेकंसर्वत्रशंखेनैवप्रकल्पयेत् सर्वत्रैवप्रशस्तोब्जःशिवसूर्यार्चनंविनेति अन्यत्रापि कुंदंशिरीषंतुलसी

गणेशेधत्तूरविल्वंतगरंतथार्के धत्तूरमर्काक्षतमब्जपाणौवर्ज्यंशिवेकेतकशंखवारिइति अथावाहनादिमुद्राः देव
तानेनसंतुष्टासर्वदासुमुखीभवेत् अंगुष्ठौनिक्षिपेत्पाणौमुद्राचावाहनीस्मृता संक्षिप्यनिक्षिपेत्सेयंमुद्रात्वास
नसंज्ञिता अधोमुखीत्वियंचैवस्थापितामुद्रिकामता अंगुष्ठावुच्छ्रितौकुर्यात्संमुखीकरणीभवेत् प्रसृतांगुलिकौ
हस्तौमिथःश्लिष्टौतुसंमुखौ कुर्यात्स्वहृदयेचेयंमुद्राप्रार्थनसंज्ञिका इत्येवंसर्वदेवानांपूजनेषट्प्रदर्शयेत् शिव
पूजायांलिंगमुद्रा उच्छ्रितंदक्षिणांगुष्ठंवामांगुष्ठेनवंधयेत् वामांगुलीर्दक्षिणाभिरंगुलीभिश्चवेष्टयेत् लिंगमुद्रे
यमाख्याताशिवसान्निध्यकारिणीति श्रीकामःशीर्ष्णिकुर्वीतराज्यकामस्तुनेत्रयोः मुखेत्वन्नाद्यकामस्तुपादयोः
सुखकामकृत् हृदयेसर्वकामीचज्ञानार्थीनाभिमंडले राज्यकामस्तुगुह्येवैग्रीवायांरोगशांतिकृत् हेमाद्रौ सम्मु
खीकृत्यहस्तौद्वौकिंचित्संकुचिताङ्गुलीति समाख्यातापंकजीचपंकजप्रसृतैवसा पूर्वोक्तामुकुलीयाचप्रदेशेनिःसृता
गुलिः व्याकोशमुद्रामुकुलापद्ममुद्राप्रदर्शिता अंगुष्ठौवावितानौतुस्वकीयांगुलिवेष्टितौ उच्चौचाभिमुखौहस्तौ
योजयित्वातुनिष्कुरा तर्जन्याकुंचितंकृत्वातथैवचकनीयसी अधोमुखीदृष्टनखास्थितामध्येकरस्यतु चतस्रश्चो
त्थिताःपृष्ठेअंगुलीरेकतः करे नालव्यावस्थितौद्वौतुव्योममुद्राप्रकीर्तिता रामपूजने सप्तदशमुद्रा रामार्चनचंद्रिका
यामगस्त्यः आवाहनीस्थापनीचसान्निधीकरणीतथा सुसन्निरोधिनीमुद्रासंमुखीकरणीतथा सकलीकरणीचैवम
हामुद्रातथैवच आसांलक्षणानि प्रागेवाभिहितानि शंखचक्रगदापद्मधेनुकौरतुनगारुडाः श्रीवत्सवनमालेच
योनिमुद्रांप्रदर्शयेत् एताभिः सप्तदशभिर्मुद्राभिस्तुविचक्षणः योराममर्चयेन्नित्यंमोहयेत्ससुरेश्वरं द्रावयेदपि
विप्रेंद्रततः प्रार्थितमाप्नुयात् मूलाधाराद्द्वादशांतमानीतकुसुमांजलिः त्रिस्थानगततेजोभिर्विनीताप्रतिमादिषु
आवाहनीयंमुद्रास्याद्देवार्चनविधौमुने एषैवाधोमुखीमुद्रास्नपनेशस्यतेबुधैः उन्नतांगुष्ठयोगेनमुष्टीकृतकरद्वयं

सन्निधीकरणीमुद्रादेवार्चनविधौमुने अंगुष्ठगर्भिणीसैवमुद्रास्यात्सन्निरोधिनी उत्तानमुष्टियुगलासंमुखीकरणीमता अंगैरेवांगविन्यासः सकलीकरणीभवेत् अन्योन्यकरसंलग्नाविस्तारितकरद्वयी महामुद्रेयमाख्यातान्यूनाधिकसमापनी कनिष्ठानामिकामध्यान्तस्थांगुष्ठातदग्रतः गोपितांगुष्ठमूलेनसन्नद्धामुकुलीकृता करद्वयेनमुद्रास्याच्छंखाख्येयंसुरार्चने अन्योन्याभिमुखस्पर्शव्यत्ययेनतुवेष्टयेत् अंगुलीभिःप्रयत्नेनमंडलीकरणंमुने चक्रमुद्रेयमाख्यातागदामुद्राततः परम् अन्योन्याभिमुखाश्लिष्टाततः कौस्तुभसंज्ञिता कनिष्ठेन्योन्यसांश्लिष्टे ऽभिमुखेहिपरस्परं वामस्यतर्जनीमध्येमध्यानामिकयोरपि वामानामिकसंस्पृष्टातर्जनीमध्यशोभिता पर्यायेणनतांगुष्ठद्वयीकौस्तुभलक्षणा कनिष्ठान्योन्यसंलग्नाविपरीतातुयोजिता अधस्तात्प्रापितांगुष्ठामुद्रागारुडसंज्ञिका तर्जन्यंगुष्ठमध्यस्थामध्यमानामिकाद्वयी कनिष्ठानामिकामध्यतर्जन्यग्रकरद्वयी श्रीवत्ससंज्ञामुद्रेयंवनमालाभवेत्ततः कनिष्ठानामिकामध्यामुष्टिरुन्नततर्जनी परिभ्रांताशिरस्युच्चैस्तर्जनीभ्यांदिवौकसः योनिमुद्रासमाख्याताह्येतत्करद्वयाश्रिता तर्जन्याकृष्टमध्यांतास्थितानामिकयुग्मिका मध्यस्थलस्थितांगुष्ठायेयंशस्तामुनेर्चने इतिमुद्रालक्षणं अथसर्वव्रतेषु सामान्यतः पूजाविधिस्तत्रादौविष्णुव्रतेषु सामान्यतोविष्णुपूजाक्रमोलिख्यते व्रतदिवसे व्रतकर्ताकृताह्नित्यक्रियःसंभृतपूजोपचारः धृतशुद्धद्विवासा यागमंडलमागत्य स्वेष्टदेवंनमस्कृत्य व्रतपूजासंकल्पंकुर्यात् ओमद्येत्यादिपंचांगस्मरणपूर्वकं स्वगोत्रनामस्मरणंकृत्वात्मनः सर्वपापक्षयादिकामोविष्णुप्रीत्यर्थमेकादश्यादिव्रतांगभूतविष्णुपूजनमहंकरिष्यइति संकल्पः ततःकलशपूजनंकुर्यात् कलशजले गंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिं कुरु ब्रह्माडोदरतीर्थानिकरैःस्पृष्टानितेरवे तेनसत्येनमेदेवतीर्थंदेहिदिवाकर गायत्र्यामूलमंत्रेणचदेववुध्यातज्जलं संपूज्यस्ववामेषट्कोणमंडले शंखस्थापनंकुर्यात् त्रिपादिकायांवह्निमंडलायनम इतिसंपूज्य तत्रशंखंस्थापयित्वा

अर्कमंडलायनम इतिसंपूज्य त्वंपुरासागरोत्पन्नो विष्णुनाविधृतःकरे नामितःसर्वदेवैश्चपांचजन्यनमोस्तुते इतिसंप्रार्थ्य तत्रकलशजलंदत्त्वा चंद्रमंडलायनम इतिसंपूज्य ततोघंटापूजनंकुर्यात् आगमार्थंतुदेवानांगमनार्थंतुरक्षसां कुर्वेघंटारवंतस्माद्देवताह्लादलक्षणं सर्ववाद्यमयीघंटाविष्णोश्चात्यन्तवल्लभा यस्यावाद्यप्रभावेणजायतेभुविमंगलम् इतिघंटापूजनम् ततःस्वदेहेपुरुषसूक्तन्यासान्कुर्यात् तत्रादौविनियोगः सहस्रशीर्षेत्यादीनांषोडशऋचांनारायणऋषिः आद्यानां पंचदशानां अनुष्टुप्छंदः अन्त्यायाश्चात्रिष्टुप्छंदः सर्वासांषोडशऋचां महापुरुषोदेवता जगद्बीजं न्यासे पूजायांच विनियोगः ॥ ॐसहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् सभूमिꣳसर्वतस्पृत्वात्यतिष्ठद्दशांगुलम् वामकरायनमः १ ॥ पुरुषएवेदꣳ सर्वंयद्भूतंयच्चभाव्यम् उतामृतत्वस्येशानोयदन्नेनातिरोहति दक्षिणकरायनमः २ ॥ एतावानस्यमहिमातोज्यायांश्चपूरुषः पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि वामपादायनमः ३ त्रिपादूर्ध्वउदैत्पुरुषः पादोस्येहाभवत्पुनः ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि दक्षिणपादायनमः ४ ॥ ततोविराडजायतविराजोऽअधिपुरुषः सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः वामजानुनेनमः ५ ॥ तस्माद्यज्ञात्सर्वहुतःसम्भृतम्पृषदाज्यम् पशूंस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये दक्षिणजानुनेनमः ६ ॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानियज्ञिरे छंदाꣳसियज्ञिरेतस्माद्यजुस्तस्मादजायत वामोरवेनमः ७ ॥तस्मादश्वाऽअजायंतयेकेचोभयादतः गावोहयज्ञिरे तस्मात्तस्माज्जाताऽअजावयः दक्षिणोरवेनमः ८ ॥ तंयज्ञंवर्हिषिप्रौक्षन्पुरुषंजातमग्रतः तेनदेवाऽअयजंतसाध्याऽऋषयश्चये नाभ्यैनमः ९ ॥ यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् मुखंकिमस्यासीत्किंवाहूकिमूरूपादाऽउच्येते हृदयायनमः१० ॥ ब्राह्मणोस्यमुखमासीद्वाहूराजन्यः कृतः ऊरूतदयद्वैश्यःपद्भ्याꣳ शूद्रोऽअजायत कंठायनमः

चंद्रमामनसोजातश्चक्षोः सूर्य्योऽअजायत श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत मुखायनमः ॥ १२ ॥
नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकांअकल्पयन् शिरसेनमः १३
यत्पुरुषेणहविषादेवायज्ञमतन्वत वसन्तोस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः शिखायैनमः॥ १४॥ सप्ता
स्यासन्परिधयस्त्रिस्सप्तसमिधःकृताः देवायद्यज्ञंतन्वानाऽअवध्नन्पुरुषम्पशुम् कवचायनमः १५॥ यज्ञे
नयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्रपूर्वेसाध्याःसन्तिदेवाः अ
स्त्रायनमः १६॥ अथध्यानं शांताकारंभुजगशयनंपद्मनाभंसुरेशंविश्वाधारंगगनसदृशंमेघवर्णंशुभांगं ल
क्ष्मीकांतंकमलनयनंयोगिभिर्ध्यानगम्यं वंदेविष्णुंभवभयहरंसर्वलोकैकनाथम् १ ॥ ध्येयःसदासवितृमंडलमध्य
वर्त्तीनारायणःसरसिजासनसन्निविष्टः केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः २ ॥ इति
ध्यात्वा पूजामारभेत् आगच्छदेवदेवेशतेजोराशेजगत्पते क्रियमाणांमयापूजांगृहाणसुरसत्तम सहस्रशीर्षेत्या
वाहनं १ ॥ नानारत्नसमायुक्तंकार्त्तस्वरविभूषितं आसनंदेवदेवेशप्रीत्यर्थंप्रतिगृह्यतां पुरुषएवेत्यासनं ३ ॥
पाद्यंगृहाणदेवेशसर्वक्षेमकरंविभो भक्त्यामयार्पितंदेवलोकनाथजगत्पते एतावानस्येतिपाद्यम् ३ ॥ नम
स्तेदेवदेवेशनमस्तेधरणीधर नमस्तेजगदाधारअर्घ्यंनः प्रतिगृह्यताम् त्रिपादूर्ध्वेत्यर्घ्यम् ४ ॥ कर्पूरवासितं
तोयंमंदाकिन्याः समाहृतं आचम्यतांजगन्नाथमयादत्तंहिभक्तितः [ततोविराडित्याचमनम् ५ ॥ अथपंचामृत
स्नानं ॐपयः पृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः पयस्वतीःप्रदिशः सन्तुमह्यम् १ इतिपयःस्नानं
देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् इतिशुद्धस्नानं २ दधिक्राव्णोअकारिषंजि
ष्णोरश्वस्यवाजिनः सुरभिनोमुखाकरत्प्रणऽआयूꣳषितारिषत् इतिदधिस्नानं देवस्यत्वेतिशुद्धस्नानम्

198

अ०२० १८॥

अथघृतस्नानं घृतंघृतपावानः पिवतवसांवसापावानः पिवतांतरिक्षस्यहाविरसिस्वाहा दिशः प्रदिशआदिशो विदिशऽउद्दिशोदिग्भ्यः स्वाहा इतिघृतस्नानं देवस्यत्वेतिशुद्धस्नानं अथमधुस्नानं मधुवाताऽऋतायतेमधुक्षरंतिसिंधवः माध्वीर्न्नः सन्त्वोषधीः मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः मधुद्यौरस्तुनः पितामधुमान्नोवनस्पतिर्मधुमां अस्तुसूर्यः माध्वीर्गावोभवन्तुनः इतिमधुस्नानं देवस्यत्वेति शुद्धस्नानम् स्वादुपवस्वदिव्यायजन्मनेस्वादुरिंद्रायसुहवीतनाम्ने स्वादुर्मित्राय वरुणाय वायवे वृहस्पतयेमधुमांअदाभ्यः इतिशर्करास्नानं देवस्यत्वेतिशुद्धस्नानम् ५ ततः पंचामृतद्रव्यमेकीकृत्य शर्करारससंयुक्तंपयोदधिघृतंमधु पंचामृतंसमानीतंस्नानार्थंपरमेश्वर इतिपंचामृतस्नानं पुनः शुद्धोदकस्नानं तत आपोहिष्ठेत्यादिऋचःकल्पेनपुनःपंचोपचारैःसंपूज्य महाभिषेकं कुर्यात् गंगाचयमुनाचैवनर्मदाचसरस्वती तापीपयोष्णीकृष्णाचताभ्यः स्नानार्थमाहृतम् तोयमेतत्सुखस्पर्शंस्नानीयंप्रतिगृह्यताम् तस्माद्यज्ञात्सर्वहुतः सम्भृतंपृषदाज्यम् पशूंस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये इतिस्नानम ६ सर्वभूषाधिकेसौम्येलोकलज्जानिवारणे मयोपपादितेतुभ्यंवाससीप्रतिगृह्यताम् तस्माद्यज्ञात्सर्वहुतऋचो[illegible]स्त्रं ७ सर्वदेवनमस्तेस्तुत्राहिमांभवसागरात् ब्रह्मसूत्रंसोत्तरीयंगृहाणपरमेश्वर तस्मादश्वाऽअजायंतेतियज्ञोपवीतम् ८ श्रीखंडचंदनंदिव्यंगंधाढ्यंसुमनोहरं विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्रतिगृह्यताम् तंयज्ञंवर्हिषिप्रौक्षन्नितिगंधम् ९ माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यताम् यत्पुरुषंव्यदधुरितिपुष्पम् १० वनस्पतिरसोत्पन्नोगंधाढ्योगंधउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम् व्राह्मणोस्येतिधूपम् ११ आज्यंचवर्त्तिसंयुक्तंवन्हिनायोजितंमया दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहम् चंद्रमामनसोजातइतिदीपम् १२ अन्नंचतुर्विधंस्वादुरसैःषड्भिः समान्वितं

भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यताम् नाभ्याआसीदितिनैवेद्यम् १३ सर्वपापहरंदिव्यंगांगेयंनिर्मलंजलं पानार्थंचमयादत्तगृहाणपुरुषोत्तम पुनराचमनीयं १४ इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि यत्पुरुषेणेतिफलम् १५ पूगीफलंमहाद्दिव्यंनागवल्लीदलैर्युतं कर्पूरैलासमायुक्तंतांवूलंप्रतिगृह्यताम् इतितांवूलं १६ अथदक्षिणा हिरण्यगर्भगर्भस्थंहेमवीजंविभावसोः अनंतपुण्यफलदमतः शांतिंप्रयच्छमे सप्तास्यासन्परिधयस्त्रिःसप्त समिधः कृताः देवायद्यज्ञंतन्वानाऽअवध्नन्पुरुषंपशुम् इतिदक्षिणाद्रव्यम् १७ चंद्रादित्यौच धरणीविद्युदग्निस्तथैवच त्वमेवज्योतिषांज्योतिरार्त्तिक्यंप्रतिगृह्यताम् ॥ १८ ॥ इतिनीराजनम् ॥ नमस्तेपुंडरीकाक्षनमस्तेस्त्वमरप्रिय नमस्तेजगदाधारदेवदेवनमोस्तुते यज्ञेनयज्ञमितिपुष्पांजलिः ॥ १९ ॥ अथान्यानि देवसूक्तानि पठित्वा सहस्रनामस्तवादिभिरपिपुष्पांजलीसमर्पणंकुर्यात् ततःप्रदक्षिणा यानिकानिचपापानिजन्मांतरकृतानिच तानितानिप्रणश्यंतिप्रदक्षिणायाः पदेपदेइति प्रदक्षिणा नमः सर्वहितार्थायजगदाधारहेतवे साष्टांगोयंप्रणामस्तेप्रयत्नेनमयाकृत इतिनमस्कारः यन्मयाभक्तियोगेनपत्रपुष्पंफलंजलं निवेदितंचनैवेद्यंतद्गृहाणानुकंपया इतिसर्वपदार्थसमर्पणम् आवाहनंनजानामिनैवजानामिपूजनं विसर्जनंनजानामित्वंगतिः परमेश्वर एवंपूर्वंपूजांसमाप्य व्रतांतेदक्षिणान्नदानादिभिर्ब्राह्मणान्परितोष्य तैरनुज्ञातोंव्रतपारणंकुर्यात् इतिविष्णुव्रतेषुसामान्यपूजाविधिः अथशिवव्रतेषुसामान्याशिवपूजाविधिः तत्रापिव्रतकर्त्ता कृतानित्यक्रियः पूजोपचारसंचयंकृत्वासंकल्पंकुर्यात् ओमद्येत्यादिसर्वपापक्षयोत्तरधर्मार्थकाममोक्षार्थंसांवसदाशिवप्रसादसिद्ध्यर्थं शिवपूजाव्रतमहंकरिष्ये यथाविधिनाकलशस्थापनंकृत्वा अर्घ्यपात्रस्थापनं विधाय पंचब्रह्ममंत्रन्यासंकुर्यात् स्त्रीशूद्राभ्यांपंचाक्षरन्यासोविधेयः ओंअस्यश्रीशिवपंचाक्षरमंत्रस्य वामदे

वक्षापिरनुष्टुप्छंदः श्रीसदाशिवोदेवतान्यासपूजादौविनियोगः वामदेवऋषयेनमः शिरसि अनुष्टुप्छंदसेनमोमुखे
श्रीसदाशिवोदेवतायैनमोः हृदि सदाशिवप्रीतयेन्यासपूजादौविनियोगः स.ांगेषु १ ॐनंतत्पुरुषायनमो हृदि
मंअघोरायनमः पादयोः शिंसद्योजातायनमोगुह्ये वांवामदेवायनमोमूर्द्धनि यंईशानायनमोमुखे ॐअंगुष्ठाभ्यांन
मः नंतर्जनीभ्यांनमः मंमध्यमाभ्यांनमः शिंअनामिकाभ्यांनमः वांकनिष्ठिकाभ्यांनमः यंकरतलकरपृष्ठाभ्यांनमः
एवंहृदयादिन्यासंकुर्यात् अथध्यानं सूर्यकोटिप्रतीकाशंत्रिनेत्रंचंद्रशेखरं त्रिशूलवज्रसद्धंकपाशां
कुशधरंविभुम् वरदाभयपाणिंचसर्वाभरणभूषितं उमालिंगितवामांगंशांतंध्यायेत्सदाशिवम् इतिध्यानम् अथा
वाहनम् आगच्छत्वंमहादेवउमयासहशंकर ममपूजांगृहाणेमांप्रसन्नोभवसर्वदा सद्योजातंप्रपद्यामीत्यावाहनम्
१ भद्रपीठमिदंदेवनानाभरणभूषितं मयानिवेदितंभक्त्या आसनंप्रतिगृह्यताम् सद्योजातायवैनम इत्यासनम् ॥
२ ॥ पाद्यंगृहाणदेवेशगंधपुष्पाक्षतैर्युतं कुशोदकसमायुक्तंप्रीत्यर्थंप्रतिगृह्यताम् भवेभवेनातिभवेभवस्वमांपाद्यंस
मर्पयामि ॥ ३ ॥ सदाशिवनमस्तेस्तुभक्तानामभयंकर गंधपुष्पाक्षतैर्युक्तंगृहाणार्घ्यंनमोस्तुते भवोद्भवायनमः
अर्घ्यंसमर्पयामि ॥ ४ ॥ गंगाजलंसमानीतंसुवर्णकलशोस्थितं गृहाणाचमनंदेवपार्वत्यासहितप्रभो नमःशि
वायआचमनंसमर्पयामि ॥ ५ ॥ मधुपर्कंगृहाणेमंदधिमध्वाज्यसंयुतं गृह्योक्तेनविधानेनजगदानंदकारक वाम
देवायनमःमधुपर्कंसमर्पयामि ॥ ६ ॥ आप्यायस्वेतिक्षीरस्नानं १ देवस्यत्वेतिशुद्धस्नानम् ॥ २ ॥ घृतंघृतपावान
इतिघृतस्नानं ३ मधुवातेतिमधुस्नानं ४ स्वादुःपवस्वेति शर्करास्नानं ॥ ५ ॥ असौयस्ताम्रोअरुणऽउतबभ्रुःसुमंग
लःयेचैनंरुद्राअभितोदिक्षुश्रिताः सहस्रशोवैषांहेडईमहे शुद्धस्नानं ॥ ६ ॥ पट्टकार्पाससंभूतेनानारागसम
न्विते मयोपपादितेतुभ्यंवाससीप्रतिगृह्यताम् ज्येष्ठायनमःवस्त्रं ॥ ७ ॥ कार्पासनिर्मितंसूत्रंब्रह्मग्रंथिसमन्वितं

भक्त्यादत्तंमयाशंभोगृहाणशशिशेखर श्रेष्ठायनमः यज्ञोपवीतम् ॥ ८ ॥ सुगंधचंदनंदिव्यंकस्तूरीकुंकुमान्वितं मयानिवेदितंस्वामिन्गृहाणजगतीपते कालायनमःगंधम् ॥ ९ ॥ अक्षताःपरमाःशुभ्रारजनीचूर्णमिश्रिताः मयार्पिताग्गृहाणेशसृष्टिस्थित्यंतकारक कलविकरणायनमःअक्षतान्समर्पयामि १० मल्लिकामालतीजातीचंपकःपाटली तथा मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां सर्वभूतदमनायपुष्पाणिसमर्पयामि ॥ ११ ॥ अथांगपूजा सद्योजातायनमः पादौपूजयामि वामदेवायनमः गुल्फौपूजयामि अघोरायनमः जंघेपूजयामि तत्पुरुषायनमः जानुनीपूजयामि ईशानायनमः गुह्यंपूजयामि महादेवायनमः नाभिंपूजयामि विश्वकर्त्रेनमः उदरंपूजयामि सर्वतोमुखायनमः पार्श्वेपूजयामि स्थाणवेनमः स्तनौपूजयामि नीलकंठायनमः कंठंपूजयामि शंभवेनमः नेत्रत्रयंपूजयामि शूलपाणयेनमः श्रोत्रंपूजयामि पिनाकिनेनमः ललाटंपूजयामि शिवायनमः शिरःपूजयामि पशुपतयेनमः शिखांपूजयामि महादेवायनमः सर्वांगंपूजयामि ततअष्टोत्तरशतनामभिर्विल्वपत्राणिसमर्पयेत् ततोरुद्रसूक्तादिभिर्महाभिषेकंकुर्यात् वनस्पतिरसोत्पन्नोगंधाढ्यःसुमनोहरः आघ्रेयःसर्वदेवानां धूपोयंप्रतिगृह्यताम् वलायनमःधूपंसमर्पयामि ॥ १२ ॥ पंचवर्त्तिसमायुक्तंवह्निनाज्वालितंमया दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहम् वलप्रमथनायदीपंसमर्पयामिनमः ॥ १३ ॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं भक्त्यानिवेदितंचारु नैवेद्यंप्रतिगृह्यताम् सर्वभूतदमनायनमःनैवेद्यंसमर्पयामि १४ उत्तरापोशनंहस्तप्रक्षालनंउदकुंभंप्रदास्यामि शीतलोदकपूरितं कर्पूरचंदनाढ्यंचउशीरामृतसंयुतं मनोन्मनायनम आचमनीयंसमर्पयामि ॥ १५ ॥ नानाविधफलश्रेष्ठंपुत्रपौत्रफदप्रदम् सर्वैश्वर्यप्रदंनित्यंगृहाणेष्टफलप्रदमितिफलम् ॥ १६ ॥ हिरण्यगर्भगर्भस्थंहेमवीजंविभावसोःअनंतपुण्यफलदमतःशांतिंप्रयच्छमे इतिदक्षिणा चक्षुष्प्रदंचलोकानांतिमिरस्यनिवारणं

अ०२० १००

आर्तिक्यंकल्पितंभक्त्यागृहाणपरमेश्वर शशिशेखरायनमःनीराजनंसमर्पयामि १७ विश्वेश्वरविरूपाक्ष विश्वरूपसदाशिव शरणंभवभूतेशकरुणाकरशंकर इति पुष्पांजलिंसमर्पयामिनमः १८ हरशंभोमहादेव समस्तसुरवल्लभ शिवशंकरसर्बात्मन्नीलकंठनमोस्तुते २० इतिनमस्कारः ॥ यानिकानिचपापानिजन्मांतरकृतानिच तानितानिप्रणश्यंतिप्रदक्षिणपदेपदे ॥ इतिप्रदक्षिणा २१ नमस्तेपार्वतीनाथनमस्तेभक्तवत्सल ईप्सितंमेफलंदेहिभवान्यानंदवर्धन २२ ॥ इतिप्रार्थना एकादशफलैर्युक्तंवेणुपात्रसमन्वितं वायनंदेवदेवस्यददामिगिरिजापतेः पार्वत्यानिर्मितंश्रेष्ठंस्त्रीणांसौभाग्यदायकं वायनंद्विजवर्यायअतःशांतिंप्रयच्छमे इतिवायनदानम् यस्यस्मृत्याचनामोक्तपातयोयज्ञक्रियादिषु न्यूनंसंपूर्णतांयातिसद्योवंदेमहेश्वरम् अनेनषोडशोपचारपूजनेन भवानीशंकरः प्रीयतामित्युक्त्वापूजनंसमर्पयेत् गच्छगच्छसुरश्रेष्ठभवानीसहितप्रभो कैलासवासिन्देवेशपुनरागमनायच इतिविसर्जनं इतिश्रीशिवव्रतेषु पूजापद्धतिःसमाप्ता अथाष्टोत्तरशतनामानि एभिरेवाशिवपूजनमप्युक्तं ॐशिवायनमः १ ॐमहेश्वरायनमः २ ॐशंभवेनमः ३ ॐपिनाकिनेनमः ४ ॐशशिशेखरायनमः ५ ॐवामदेवायनमः ॥ ६ ॥ ॐविरूपाक्षायनमः ॥ ७ ॥ ॐकपर्दिनेनमः ८ ॐनीललोहितायनमः ॥ ९ ॥ ॐशंकरायनमः ॥ १० ॥ ॐशूलपाणयेनमः ॥ ११ ॥ ॐखट्वांगिनेनमः १२ विष्णुवल्लभायनमः १३ शिपिविष्टायनमः १४ अम्बिकानाथायनमः १५ श्रीकंठाययनमः १६ भक्तवत्सलायनमः १७ भवायनमः १८ शर्वायनमः १९ त्रिलोकेशायनमः २० शितिकंठायनमः २१ कपालभृतेनमः २२ उग्रायनमः २३ कपालिनेनमः २४ कामारयेनमः २५ अंधकासुरसूदनायनमः २६ गंगाधरायनमः २७ ललाटाक्षायेनमः २८ कालकालायनमः २९ कृपानिधयेनमः ३० भीमायनमः ३१

परशुहस्तायनमः ३२ मृगपाणयेनमः ३३ जटाधरायनमः ३४ कैलासवासिनेनमः ३५ कवाचिनेनमः ३६
कठोरायनमः ॥ ३७ ॥ त्रिपुरांतकायनमः ३८ वृषांकायनमः ३९ वृषभारूढायनमः ४० भस्मोद्धूलितविग्रहा
यनमः ४१ सामप्रियायनमः ४२ स्वरमयायनमः ४३ त्रिमूर्त्तयेनमः ४४ अवनीश्वरायनमः ४ सर्वज्ञाय
नमः ४६ परमात्मनेनमः ४७ सोमसूर्याग्निलोचनायनमः ४८ हविषेनमः ४९ यज्ञमयायनमः ५० सोमायनमः ५१
पंचवक्त्रायनमः ५२ सदाशिवायनमः ५३ विश्वेश्वरायनमः ५४ वीरभद्रायनमः ५५ गणनाथायनमः ५६ प्र
जापतयेनमः ५७ हिरण्यरेतसेनमः ५८ दुर्धर्षायनमः ५९ गिरिशायनमः ६० गिरिशायनमः ६१
अनघायनमः ६२ भुजंगभूषणायनमः ६३ भर्गायनमः ६४ गिरिधन्वनेनमः ६५ गि
रिप्रियायनमः ६६ अष्टमूर्त्तयेनमः ६७ अनेकात्मनेनमः ६८ सात्त्विकायनमः ६९ शुद्धविग्रहायनमः ७०
शाश्वतायनमः ७१ खंडपरशवेनमः ७२ अजायनमः ७३ पाशविमोचनायनमः ७४ कृत्तिवाससेनमः ७५
पुरारातयेनमः ७६ भगवतेनमः ७७ प्रमथाधिपायनमः ७८ मृत्युंजयायनमः ७९ सूक्ष्मतनवेनमः ८० जगद्व्या
पिनेनमः ८१ जगद्गुरवेनमः ८२ व्योमकेशायनमः ८३ महासेनजनकायनमः ८४ चारुविक्रमायनमः ८५
रुद्रायनमः ८६ भूतपतयेनमः ८७ स्थाणवेनमः ८८ अहिर्बुध्न्यायनमः ८९ दिगंवरायनमः ९० मृडायनमः ९१
पशुपतयेनमः ९२ देवायनमः ९३ महादेवायनमः ९४ अव्ययायनमः ९५ हरयेनमः ९६ पुष्पदंतभिदेनमः ९७ अव्य
ग्रायनमः ९८ दक्षाध्वरहरायनमः ९९ हरायनमः १०० भगनेत्रभिदेनमः १ अत्युग्रायनमः २ सहस्राक्षायनमः ३ सह
स्रपदेनमः ४ अपवर्गप्रदायनमः ५ अनंतायनमः ६ तारकायनमः ७ परमेश्वरायनमः ८ इत्यष्टोत्तरशतनामपूजनम्
विल्वपत्रैःप्रशस्तैर्वापुष्पैश्चतुलसीदलैः तिलाक्षतैर्यजेद्देवंजीवन्मुक्तोनसंशय इतिफलस्तुतावुक्तत्वात् अथ

पुस्तकालय
गुरुकुल कांगड़ी

व्रतभंगेसंपूर्णताविधिःहेमाद्रौभविष्ये युधिष्ठिरउवाच संपूर्णतामनुष्ठानंव्रतानांवदकेशव कुरुप्रसादंगुह्यार्थमेतन्मेव
क्तुमर्हसि श्रीकृष्णउवाच साधुसाधुमहाभागशृणुराजन्युधिष्ठिर रहस्यानांरहस्यंतेकथयामिव्रतेनघ संपूर्णताक्
तायव्रतत्स्यात्सम्यक्फलप्रदं यच्चीर्णंनरनारीभिर्भवेत्संपूर्णकारकं अवश्यंतत्प्रकर्त्तव्यंसंपूर्णफलकांक्षिभिः किं
चिद्भग्नंप्रमादेनयद्व्रतंव्रतिनांस्थितं तत्संपूर्णंभवेत्सर्वंव्रतेनानेनपांडव उपद्रवेवहुविधेमहामोहादिसंभवे यद्भ
ग्नंकिंचिदेवस्याद्व्रतंविघ्नविनाशकं तत्संपूर्णंभवेत्पार्थसत्यंसत्यंनसंशयः कांचनंरूप्यकंरूपंशिल्पिनातुघटापयेत् भ
ग्नव्रतस्ययोदेवस्तस्यरूपंविनिर्मितं व्रतंस्त्रीपुंसयोश्चैवप्रारब्धंयद्व्रतंकिल नचनिष्पादितंकिंचिद्दैवात्सर्वंतथास्थितं
द्विभुजंपंकजारूढंसौम्यंप्रहसिताननं निष्पादितंशिल्पिनाचतस्मिन्नेवदिनेपुनः व्रतदिनेइत्यर्थः तन्मानेतुपु
नःप्राप्तेब्राह्मणोविधिनागृहे स्नापयेत्पयसादध्नाघृतक्षौररसांवुभिः गंधचंदनपुष्पैश्चपूजांकुर्यात्समाहितः तोय
पूर्णस्यकुंभस्यमुखेविन्यस्यदेवता धूपदीपाक्षतैःपुष्पैर्वस्त्रैर्वहुप्रकारकैः अर्घ्यंप्रदद्यात्तन्नाम्नामंत्रेणानेनपांडव उ
पासनस्यदानस्यप्रायश्चित्तंकृतंजले शरणंवैप्रपन्नाःस्मःकुरुष्वाद्यदयांपुनः प्रसन्नोभवभीतस्यभिन्नाचार्यव्रतस्यच
कुरुप्रसादंसंपूर्णंव्रतंसंजायतांमम यज्ञच्छिद्रंतपःच्छिद्रंयच्छिद्रंव्रतकर्मणि तत्सर्वंत्वत्प्रसादेनसंपूर्णंजायतांपुनः
पूर्वदक्षिणपश्चाच्चउत्तरेषुवलिंहरेत् उपर्य्यधस्तात्सर्वेभ्योदिक्पालेभ्योनमोनमः इदमर्घ्यमिदंपाद्यंतेभ्यस्तेभ्यो
नमोनमः पादौचजानुनीचैवकटिंशीर्षकवक्षसी कुक्षिंतुहृदयंपृष्ठंवाकूचक्षुःसशिरोरुहान् पूजयित्वास्यदेवस्यत
तःपश्चात्क्षमापयेत् पूजितस्त्वंयथाशक्त्यानमस्तेस्तुसुरोत्तम ऐहिकामुष्मिकांचैवकार्यसिद्धिंवदस्वमे एवंक्षमा
पयित्वातंदेवरूपंविधानतः ॥ तन्मूर्त्तिञ्चद्विजातिभ्योविधिवत्प्रतिपादयेत् ॥ स्थित्वापूर्वमुखोविप्रोगृह्णी
याद्दर्भपाणिना ॥ विप्रहस्तेप्रयच्छेत्तुदाताचैवोत्तरामुखः ॥ मंत्रेणानेनकौंतेयसोपवासःप्रयत्नतः

इदंव्रतंमयाखंडंकृतमासीत्पुराद्विज तत्सर्वंपूर्णमेवास्तुतवमूर्त्तिप्रदानतः ब्राह्मणोपिप्रयच्छेतमंत्रेणानेनतद्व्रतं वाक्यंपूर्णमतःपूजाव्रतेनानेनतेपुरा संपूर्णंस्यात्प्रसादेनतवपूर्णामनोरथाः ब्राह्मणायत्प्रभाषंतेतन्ममांतेदिवौकसः सर्वदेवमयाविप्रानतद्वचनमन्यथा जलधिःक्षारतांनीतःपावकःसर्वभक्ष्यतां सहस्रनेत्रःशक्रोपिकृतोविप्रैर्महात्मभिः ब्राह्मणानांतुवचसाब्रह्महत्याविनश्यति अश्वमेधफलंसाग्रंलभ्यतेनात्रसंशयः व्यासवाल्मीकिवचनात्पराशरवशिष्ठयोः नारदस्यभृगोरुक्त्यापूर्णंभवतुतेव्रतं यद्ब्राह्मणास्तुष्टतमावदंतितद्देवताःकर्मभिराचरंति तुष्टेषुतुष्टान्मुनयोवदंतिप्रत्यक्षदेवेषुपरोक्षदेवान् एवंविधविधानेनगृहीत्वाब्राह्मणोव्रजेत् दातातत्प्रेषयेत्सर्वंब्राह्मणस्यगृहेस्वयम् ततःपंचमहायज्ञान्निर्वपेद्भोजनादिकं एवंयःकुरुतेभक्त्याव्रतमेतन्नृपोत्तम तस्यसंपूर्णतांयातितद्व्रतंयत्पुराकृतं खंडंसंपूर्णतांयातिप्रसन्नेव्रतदैवते भग्नानियानिमदमोहवशाद्गृहीत्वाजन्मांतरेष्वपिनरेणगतस्मरेण संपूर्णपूजनपरस्यपुरोभवंतिसर्वव्रतानिपरिपूर्णफलप्रदानि

इतिश्रीभविष्योत्तरपुराणेखंडव्रतसंपूर्णताविधानम्

स्वस्तिश्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेःपादांवुजार्चारतो जीव्यात्पुत्रकलत्रमित्रसहितःसंपालयन्क्ष्मांसदा १ रणवीरसिंहभूपेशकारितेकृत्यसागरे व्रतसामान्यपूजाख्योनवमोरत्नसंग्रहः २ इतिश्रीरणवीरसिंहकृत्यरत्नाकरेनवमोरत्नसंग्रहः ॥ ९ ॥

अथसर्वव्रतेषुसामान्यउद्यापनविधिः पृथ्वीचंद्रोदये नंदिपुराणे कुर्यादुद्यापनंतस्यसमाप्तौयदुदीरितं उद्यापनंविनायत्तुतद्व्रतंनिष्फलंभवेत् यत्रचोद्यापनंनोक्तंव्रतानुगुणतश्चरेत् वित्तानुसारतोदद्यादनुक्तोद्यापनेव्रते गांचैवकांचनंदद्याद्व्रतस्यपरिपूर्त्तये समाप्तावुद्यापनमनुक्तोद्यापनविषयं उक्तोद्यापनेतु आदौमध्येथवाचांतेव्रतस्योद्यापनंभवेदितिवचनात् त्रितयत्रापि व्रतानामुद्यापनंयथासंभवंकार्यम् उद्यापनंविनायत्तुतद्व्रतंनिष्फलंभवेदितिवचनादुद्यापनस्याऽवश्यकता विहिता तत्रादौमंडपप्रमाणंपंचरात्रे कनीयान्दशहस्तः स्यान्मध्यमोद्वादशोमतः ततः षोडशभिर्हस्तैर्मंडपः स्यादिहोत्तमः प्रतिष्ठासारसंग्रहेतु मंडपः स्यात्कलाहस्तः सर्वलक्षणसंयुतः दशद्वादशहस्तोवाद्विद्विवृद्ध्याततःक्रमादिति मंडपनिर्माणप्रकारः पंचरात्रे कुर्याद्वैष्णवयागेषुचतुर्द्वारांश्चमंडपान् सारदारुमयान्स्तंभान्दृढान्कुर्यादृजून्समान् मंडपार्धोच्छ्रितान्वेदसंख्यांश्चूडान्वितांस्तथा पंचमांशान्न्यसेद्भूमावेषसाधारणोविधिः वलिकास्तूर्ध्वतस्तेषांस्तंभद्वादशकंपुनः वाह्यपीठप्रमाणेनतत्रसूत्रविधानतः कल्पयेद्द्विकरंदारुंचतुरंगुलवृद्धितः मध्यमोत्तमयोर्वेदी मंडपस्यात्रिभागतः चतुर्थांशोधितिस्तस्यास्त्रिसप्तपंचमोपिवा नवैकादशहीनांवाइष्टिकाभिः प्रकल्पयेत् इति द्वारदेहल्यावहिर्हस्तमात्रेणद्वारशाखानिखेयाः द्वारेषुकार्याणिचतोरणानिचत्वार्यपिक्षीरवनस्पतीनां हस्तंविहायेत्यादिमात्स्ये व्रतखंडे तद्द्विहस्तंवहिस्त्यक्त्वातोरणानिनिवेशयेदित्युक्तम् मात्स्ये पताकाश्चोक्ताः लोकेशवर्णाः परितः पताकामध्येध्वजः किंकिणिकायुतः स्यादिति लोकपालवर्णास्तु इंद्रः पीतो यमः श्यामोवरुणः स्फटिकप्रभः कुवेरस्तुसुवर्णाभोह्यग्निश्चापिसुवर्णभः तथैवनिर्ऋतिः श्यामोवायुर्धूम्रः प्रशस्यते ईशानस्तुभवेद्रक्तएवंध्यायेदिमान्क्रमात् सप्तहस्ताः पताकाः स्युः सप्तमांशेनविस्तृताः लोकपालानुवर्णेननवमीतुहिनप्रभा पीतरक्तादिवर्णाश्चपंचहस्ताध्वजाः

स्मृताः द्विपंचहस्तैर्दंडैश्चवंशजैःसंयुतास्तथा ध्वजेषुपूर्वादिक्रमेणाष्टदिक्षु लोकेशवाहनानि लिखेत् ॥ तदुक्तंक्रियासागरे मातंगवस्तमहिषासिंहमत्स्येणवाजिनः वृषभंचयथान्यायंध्वजमध्येक्रमाल्लिखेत् इति अथवादिग्गजानष्टावैरावणपुरस्सरान् ध्वजेषुविलिखेदुक्तधातुभिश्चसलक्षणामिति पताकासुचलोकेशानामस्त्राणिलिखेत् तानिच वज्रशक्तिदंडखड्गपाशांकुशगदात्रिशूलाद्यैरायुधैरुपेताः पताकाः क्रमेणकार्य्याः अथकुंडानिभविष्ये वेदिपादांतरेत्यक्त्वाकुंडानिनवपंचवा वेदास्राण्येवतानिस्युर्वर्तुलान्यथवाक्वचित् कुंडकरणाशक्तौस्थंडिलमेवकार्यं तदुक्तंविश्वकर्मशास्त्रे खाताधिकेभवेद्रोगीहीनेधेनुधनक्षयः भार्य्याविनाशनंकुंडंप्रोक्तंयोन्याविवर्जितं अपत्यध्वंसनंप्रोक्तंकुंडंयत्कंठवर्जितं सिद्धांतशेखरे मानहीनेभवेद्व्याधिरधिकेशत्रुवर्धनं योनिहीनेत्वपस्मारो वाग्घानिःकंठवर्जिते तत्रैवस्थंडिलंवापिकुर्वीतिसुसिद्धैःसिकतैःशुभैः हस्तमात्रंप्रविस्तारंसुसमंत्र्यंगुलोच्छ्रितं शारदातिलके नित्यंनैमित्तिकंहोमंस्थंडिलेवासमाचरेत् हस्तमात्रेणतत्कार्य्यंवालुकाभिःसुशोभनम् अथसमिधःब्राह्मशमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भवाः अश्वत्थोदुंबरोबिल्वचंदनस्सरलस्तथा शालश्चदेवदारुश्चखदिरश्चेतियज्ञियाः तदभावेकंटकिवर्जसर्ववनस्पतीनांसमिधःकार्य्याः कर्मप्रदीपे नांगुलादधिकाकार्य्यासमित्स्थूलतया क्वचित् नवियुक्तात्वचाचैवनसंकोचनपाटिता प्रादेशान्नाधिकानोनानतथास्याद्विशाखिका नसपर्णासमित्कार्या होमकर्मविजानता भविष्यपुराणे भूमौस्थितेनपात्रेणविधृतेनचपाणिना वामेनकुरुशार्दूलनांतरिक्षेतुहूयते धनायुर्दाररेखासुसोमतीर्थंतुमध्यमं हवनंतेनकर्तव्यंकर्त्तव्यंपावनंतथा कात्यायनः यवाहुतिर्द्वादशपर्वपूरिकारसादिनाचेस्रुक्पर्वपूरिता दैवेनतीर्थेनचहूयतेहविःस्वांगारिणिस्वार्चिषिसिद्धपावके योनर्चिषिजुहोत्यग्नौव्यंगारिणिचपावके मंदाग्निरामयावीचदरिद्रश्चोपजायते तस्मात्समिद्धेहोतव्यंनासमिद्धेकदाचन आरोग्यमिच्छतायुश्च

श्रियमात्यंतिकींपरां जुहुयाच्चहविर्द्रव्यंपाणिसूर्पस्रुवादिभिः नकुर्य्यादग्निधमनंकदाचिद्व्यजनादिना मुखेनैवधमेदग्निंमुखादग्निरजायत वह्वृचपरिशिष्टे अथोवुधःसधूमेतुजुहुयाच्चहुताशने यजमानोभवेदंधःसपुत्रइतिशुश्रुमइति ग्रंथांतरे होमेमुद्रात्रयंप्रोक्तंमृगीहंसीचशूकरी शूकरीकरसंकोचीहंसीमुक्तकनिष्ठिका मृगीकनिष्ठातर्जन्यौ मुद्रास्तिस्रइतीरिताः शांतिपौष्टिककर्माख्यौमृगीहंस्यौप्रकीर्तितेइति अथादित्यादिग्रहस्थापनं वर्णरूपगुणैर्युक्तान्ग्रहानावाहयेत्तुतान् मात्स्ये देवानांतत्रसंस्थाप्याविंशतिर्द्वादशाधिका आदित्याभिमुखाःसर्वेसाधिप्रत्यधिदेवताः ग्रहाणांदक्षिणेपार्श्वेस्थापयेदधिदेवताः तेषामेवोत्तरेभागेन्यसेत्प्रत्यधिदेवताः विनायकादिस्थापनं ग्रहांतरे इतिसंप्रदायः दक्षिणपश्चिमवायव्योत्तरपूर्वेषुयथाक्रमामित्यन्ये राहुमंदादिनेशानामुत्तरस्यांयथाक्रमम् गणेशदुर्गेवायुंचराहुकेत्वोश्चदक्षिणे आकाशमश्विनौचेतिपंचैतान्स्थापयेद्बुधइति स्कंदपुराणे जन्मभूर्गोत्रमेतेषांजन्मस्थानमुखादिच योऽज्ञात्वाकुरुतेशांतिंग्रहास्तेनावमानिताः तत्रैव उत्पन्नोर्कःकलिंगेषुयमुनायांचचंद्रमाः अंगारकस्तुरेवत्यांमगधायांहिमांशुजः सैंधवेषुगुरुर्जातःशुक्रोभोजकटेतथा शनैश्चरस्तुसौराष्ट्रेराहुर्वैराटिकापुरे अंतर्वेद्यांतथाकेतुरित्येताग्रहभूमयः अथगोत्राणि आदित्यःकाश्यपोगोत्रःआत्रेयश्चंद्रमाभवेत् भारद्वाजोभवेद्भौमस्तथात्रेयश्चसोमजः शक्रपूज्योंगिरोगोत्रःशुक्रोवैभार्गवस्तथा शनिःकाश्यपगोत्रीयोराहुःपैठीनसिस्तथा केतवोजैमिनीयाश्चग्रहालोकहितावहाः अथवर्णानि भानुरंगारकोरक्तौश्वेतौशुक्रनिशाकरौ सोमपुत्रोगुरुश्चैवतावुभौपीतवर्णकौ कृष्णंशनैश्चरंविद्यात्तथाचित्राश्चकेतवः वर्णरूपगुणैर्युक्तान्ग्रहानावाहयेत्तुतान् भास्करंमंडलाकारमर्धचंद्राकृतिंविधुं अंगारकंत्रिकोणंतुवुधंवाणाकृतिंतथा पद्माकारंगुरुंविद्याच्चतुष्कोणंतुभार्गवं दंडाकृतिंशनिंराहुंमकराकारमेवच खड्गाकारंतथाकेतुंस्थापयेदनुपूर्वशः अथस्थानानि मध्येतुभास्करंवि

द्यात्सोमंपूर्वोत्तरेणतु   दक्षिणेतुधरापुत्रंबुधंपूर्वोत्तरेणतु   उत्तरेणगुरुंविद्यात्पूर्वेणैवतुभास्करं शनैश्चरंपश्चिमायांराहुंदक्षिणपश्चिमे   पश्चिमोत्तरतःकेतुंस्थापयेदनुपूर्वशः   आदित्याभिमुखाः सर्वेसाधिप्रत्यधिदेवताः   शुक्रार्कौप्राङ्मुखौज्ञेयौगुरुसौम्यावुदङ्मुखौ   प्रत्यङ्मुखः   शनिःप्रोक्तः शेषादक्षिणतोमुखा इति अथाधिदेवताः प्रत्यधिदेवताश्चमात्स्ये भास्करस्येश्वरंविंद्यादुमांचशशिनस्तथा स्कंदमंगारकस्यापिबुधस्यापिहरिंतथा   ब्रह्माणंचगुरोर्विद्याच्छुक्रस्यापिशचीपतिं   शनैश्चरस्यापियमंराहोःकालंतथैवच   केतूनांचित्रगुप्तंचसर्वेषामधिदेवताः प्रत्यधिदेवताश्चतत्रैव अग्निरापःक्षितिर्विष्णुरिंद्रश्चैंद्रीश्चदेवताः प्रजापतिःसर्पब्रह्माप्रोक्ताःप्रत्यधिदेवताः   अथैषांसमिधः अर्कःपलाशःखदिरोह्यपामार्गोथपिप्पलः   उदुंबरःशमीदूर्वाग्रहाणांसमिधः क्रमात् अथहोमद्रव्यपरिमाणं सिद्धांतशेखरे होमद्रव्यप्रमाणानिकथ्यंतेचयथाक्रमम् कर्षप्रमाणमाज्यंचमधुक्षीरंचतत्समं तंडुलान्नंशुक्तिमात्रंपायसंप्रसृतेःसमं कर्षप्रमाणंभक्ष्याणिलाजामुष्टिमितामता प्रादेशमात्राःसमिधोव्रीहीणामंजलीसमाः तिलसक्तुकणादीनां मृगीमुद्राप्रमाणतः पत्रपुष्पफलादीनांप्रमाणाहुतिरिष्यते   चंद्रश्रीखंडकस्तूरीकुंकुमागुरुकर्दमाः हरिमंथसमाःप्रोक्तागुग्गुलुर्वदरोपमः हरिमंथश्चणकः आहुतीनामिदंमानंकथितंवेदवादिभिः स्यात्रिमूर्धामृगीमुद्राहोमेसर्वफलप्रदेति   मानांतरमत्रशारदातिलकटीकायांपदार्थादर्शे कर्षमात्रमितंहोमेशुक्तिमात्रंपयःस्मृतं उक्तानिपंचगव्यानिशुक्तिमात्राणिसाधुभिः तत्समेदधिदुग्धेन्नग्रासमात्रमुदाहृतं दधिप्रसृतिमात्रंस्याल्लाजाःस्युर्मुष्टिसंमिताः पृथुकास्तत्प्रमाणाःस्युः सक्तवोपितथाविधाः पलार्धंगुडमानंचशर्करापितथाविधा ग्रासार्धमात्रमन्नानामिक्षुःपर्वप्रमाणकः   एवंस्यात्पत्रपुष्पंचतथाधूपादिकल्पयेत् मातुलुंगंचतुःखंडंपनसंदशधाकृतं अष्टधानारिकेलंचचतुर्धाकदलीदलं   द्विधाकृतंफलंबैल्वं

कपित्थंखंडितंद्विधा व्रीहयोमुष्टिमात्राःस्युर्मुद्गमाषायवास्तथा तंडुलाःस्युस्तदर्धांशाःकोद्रवामुष्टिसम्मिताः लवणंशुक्तिमात्रंस्यान्मरिचान्येकविंशतिः घृतस्यकार्षिकोहोमःक्षीरस्यमधुनस्तथा शुक्तिमात्राहुतिर्दध्नः प्रसृतिः पायसस्यतु खंडत्रयंतुमूलानांफलानांस्वप्रमाणतः ग्रासमात्रंतुहोतव्या इतरेषांचतंडुलाः अक्षतास्तुयवाःप्रोक्ताअभावेव्रीहयःस्मृताः तदभावेतुगोधूमानतुखंडिततंडुलाः येषांकेषांचिदन्येषांद्रव्याणामप्यसंभवे सर्वत्राज्यमुपादेयंभारद्वाजमुनेर्मतात् सर्वप्रमाणमाहुत्यापंचांगुलगृहीतयेति तथा इक्षूणांपर्वकंमानंलतानामंगुलिद्वयं चंद्रचंदनकाश्मीरकस्तूरीयक्षकर्दमान् कलापसंमितानेतान्गुग्गुलुंवदरास्थिवत् द्रव्यंस्रुवेणहोतव्यंपाणिनाकठिनंहविः स्रुवपूर्णाद्रवाःप्रोक्ताःकठिनाग्रासमात्रकाः व्रीहयोयवगोधूमप्रियंगुतिलशालयः स्वरूपेणैवहोतव्याइतरेषांचतंडुलाः ॥ अथऋत्विग्वरणं हेमाद्रौमात्स्ये वालाग्निहोत्रिणंविप्रंसुरूपंचगुणान्वितं सपत्नीकंचसंपूज्यभूषयित्वाचभूषणैः पुरोहितंमुख्यकर्मकृत्वान्यांश्चतथार्त्विजः चतुर्विंशद्गुणोपेतान्सपत्नीकान्निमंत्रितान् वृहतांबरसंछन्नान्स्राग्विणःशुचिभूषितान् अंगुलीयकभूषांश्चकर्णवेष्टान्प्रदापयेत् तत्रैवलिंगे वस्त्रयुग्मंतथोष्णीषंकुंडलेकंठभूषणाम् अंगुलीभूषणंचैवमणिवंधस्यभूषणं एतानिचैवसर्वाणिप्रारंभेसर्वकर्मणां पुरोहितायदत्त्वाथऋत्विग्भ्यः संप्रदापयेत् पूर्वोक्तभूषणंसर्वंसोष्णीषंवस्त्रसंयुतं दद्यादेतत्प्रयोक्तृभ्यआच्छादनपटंतथा व्रतानांमधुपर्कमाह तत्रैव विश्वामित्रः संपूज्यमधुपर्केणऋत्विग्भ्यः कर्मकारयेत् अपूज्यकारयन्कर्माकिल्विषेणैवयुज्यते ऋत्विक्संख्यामाहमात्स्ये हेमालंकारिणःकार्य्याःपंचविंशतिऋत्विजः दीक्षयेच्चसमंसर्वानाचार्य्येद्विगुणंभवेदिति द्विगुणयादक्षिणयाचार्य्यंतोषयेदित्यर्थः अत्रकार्यानुसारेणपंचविंशतिः षोडशाष्टौचत्वारोवाऋत्विजोभवंति नवग्रहमखेतुचत्वारऋत्विजः स्कांदे नवग्रहमखेकुर्यादृत्विजश्चतुर

इशुभान् अथवाचैकमभ्यर्च्यविधिनाब्रह्मणासह अत्राचार्यब्रह्मणोर्वरणादिकमावश्यकमितिनिष्कृष्टोर्थः अथसर्वतोभद्रंहेमाद्रौस्कांदे प्रागुदीच्यांगतारेखाःकुर्यादेकोनविंशतिः खंडेंदुस्त्रिपदःकोणेशृंखलाःपंचभिःपदैः एकादशपदावल्लीभद्रंतुनवभिःपदैः चतुर्विंशत्पदावापिपरिधिर्विंशतिःपदा मध्येषोडशभिःकोष्ठैःपद्ममष्टदलंस्मृतं श्वेतेंदुःशृंखलाकृष्णवल्लींनीलेनपूरयेत् भद्रारुणासितावापिपरिधिः पीतवर्णका परिध्यावेष्टितंपद्मंबाह्येसत्वंरजस्तमः तन्मध्येस्थापयेद्देवान्ब्राह्मणांश्चसुरासुरान् इतिसर्वतोभद्रम् अथचतुर्लिंगतोभद्रम् रेखास्त्वष्टादशप्रोक्ताश्चतुर्लिंगसमुद्भवे कोणेंदुस्त्रिपदः श्वेतस्त्रिपदैःकृष्णशृंखलाः वल्लीसप्तपदानीलाभद्रंरक्तंचतुष्पदं भद्रपार्श्वेमहारुद्रंकृष्णमेकादशैःपदैः शिवस्यपार्श्वतोवापिकुर्यात्पंचपदान्शुभान् पदमेकंतथापीतंभद्रवाप्योस्तुमध्यतः शिरसिशृंखलायाश्चकुर्यात्पीतंपदत्रयम् लिंगानांस्कंधतः कोष्ठाविंशतीरक्तवर्णकाः परिधिःपीतवर्णैस्तुपदैःषोडशभिःस्मृता पदैस्तुनवभिः पश्चाद्रक्तंपद्मंसकर्णिकं इतिचतुर्लिंगतोभद्रम् अथाष्टलिंगतोभद्रम् आग्नेये चतुर्विंशतिरालेख्या रेखाःप्राग्दक्षिणायताः ॥ कोणेषुशृंखलाः पंचपदवल्ल्यस्तुपार्श्वतः पदैर्नवभिरालेख्या श्चतुर्भिर्लघुशृंखलाः लघुवल्ल्यःपदैःषड्भिस्ततोष्टादशभिःपदैः कृत्वालिंगानिवाप्यःस्युस्त्रयोदशभिरंतरा ततोवीथिद्वयेनैवपीठंकुर्याद्विचक्षणः तस्याःपदाःपंचपदद्वाराण्यपितथैवच एकाशीतिपदंमध्येपद्मंस्वास्तिकमुच्यते कोणेषुशृंखलाः कार्याःपदैस्त्रिभिरितःपरम् पदैश्चतुर्भिर्दिक्षुस्युर्भद्राण्येषांसमंततः एकादशपदावल्ल्योमध्येष्टदलमालिखेत् पद्मंनवपदंह्येवंलिंगतोभद्रमुच्यते शृंखलाःकृष्णवर्णेनवल्लींनीलेनपूरयेत् रक्तेनशृंखलांलघ्वींवल्लींनीलेनपूरयेत् लिंगानिकृष्णवर्णानिश्वेतेनाप्यथवापिकाः पीठंसंपाद्यश्वेतेनपीतेनद्वारपूरणं मध्येनशृंखलारक्ता वल्लींनीलेनपूरयेत् भद्राणिपीतवर्णानिपीतापंकजकर्णिका दलानिश्वेतवर्णानि

ऋ०र० १०५

यद्वाचित्राणिकारयेत् तिस्रोरेखावहिःकार्याः सितरक्ताःसिताःक्रमात् इत्यष्टलिंगतोभद्रम् अथद्वादशलिंगतोभद्रनिर्माणम् तत्रैव प्रागुदीच्यायतारेखाः षड्विंशत्परिकल्पयेत् पदानिद्वादशशतंपंचविंशतिरेवच खंडेन्दुस्त्रिपदःकोणेशृंखलाःषट्पदैःस्मृताः त्रयोदशपदावल्लीभद्रंतुनवभिःपदैः त्रयोदशपदावापिलिंगमष्टादशैःस्मृतम् लिंगत्रयस्यपंक्तौतुशुभाःकोष्ठाश्चतुर्दश तेषामुपरिपंक्तौतुकोष्ठाःसप्तदशैवतु पूजापांक्तिस्तुविज्ञेयापरितःपरिकल्पिता पूजापंक्त्यंतरापंक्तौकोष्ठाश्चाशीतिसंख्यया परिधिःसतुविज्ञेयोमध्येमंडलयोर्द्वयोः परिध्यंतरकोष्ठेषुसर्वतोभद्रमालिखेत् विशेषश्चात्रविज्ञेयःशृंखलाषट्पदाभवेत् त्रयोदशपदावल्लीभद्रंतुनवभिःपदैः पंचविंशत्पदावापि परिधिःषोडशात्मकः भद्रवाप्यंतरालेतुत्रिपदंचित्रवर्णकं मध्येनवपदंपद्मंकर्णिकाकेसरान्वितं सत्त्वरजस्तमोवर्णाःपरितोमंडलस्यतु त्रयःपरिधयःकार्य्यास्तत्रद्वाराणिकारयेत् सितेंदुःशृंखलाःकृष्णावल्लीनीलाप्रकीर्त्तिता भद्रंचैवारुणंज्ञेयंवापीस्याच्छ्वेतवर्णका लिंगानिकृष्णवर्णानिपार्श्वतोद्वादशैवतु परिधिःपीतवर्णास्यात्कमलंपंचवर्णकं इतिद्वादशलिंगतोभद्रम् ॥ अथैकलिंगतोभद्रंगौरीतिलके तिर्यगूर्ध्वगतारेखाःकार्य्याः स्निग्धास्त्रयोदश कोणेंदुस्त्रिपदःकार्यःशृंखलास्त्रिपदाःस्मृताः वल्लीतुषट्पदानीलाभद्रंरक्तंप्रकल्पयेत् पदैर्द्वादाभिःस्पष्टमुत्तरेपूर्वदक्षिणे पश्चिमायांमहारुद्रअष्टाविंशतिकोष्ठकैः लिंगपार्श्वेतथामूर्ध्निअष्टौकोष्ठाःसपीतकाः लिंगमेकंतथागौर्य्याःस्निग्धतुरक्तमंडलं पूजयेत्तंडुलैःश्वेतैस्तस्यगौरीप्रसीदति इदंचगौरीव्रतेषुपूजनीयं अथसर्वतोभद्रमंडले देवतापूजाक्रमः तत्रायंसंग्रहः कल्पद्रुमे आसनोपरिसंविश्यन्यासजालंविधायच शंखंप्रपूजयेदग्रेगंधपुष्पाक्षतादिभिः कलशवामभागस्थपूजाद्रव्याणिचादरात् विलिखेत्सर्वतोभद्रंवेदिकोपरिसुंदरं सर्वव्रतेसमुदितंसर्वतोभद्रमंडलं तत्रदेवताः मध्येब्रह्माष्टासुदिक्षुसोमाद्याश्चाष्टदेवताः वायुसोमद्वयो

मध्येवसूनष्टौसमर्चयेत् सोमईशानयोर्मध्येरुद्रानेकादशैवतु इंद्रईशानयोर्मध्येआदित्यान्द्वादशैवतु इंद्राग्निमध्येचतथा अश्विनौद्वौप्रपूजयेत् आग्नेययमयोर्मध्येविश्वेदेवान्सपैतृकान् याम्यनैर्ऋतयोर्मध्येसप्तयक्षांश्चपूजयेत् नैर्ऋत्यजलयोर्मध्येनागान्भूतांश्चपूजयेत् आप्यवायव्ययोर्मध्येगंधर्वाप्सरसोयजेत् ॥ ब्रह्मसोमद्वयोर्मध्येमहादेवगणान्यजेत् ॥ स्कंदनंदीवृषंशूलंमहादेवंतथांबिकां ब्रह्मेशानयोर्मध्येदक्षादीन्सप्तपूजयेत् ॥ ब्रह्मेंद्रयोस्तथामध्येदुर्गांविष्णुंतथैवच ॥ ब्रह्माग्निमध्येचतथास्वधांतत्रप्रपूजयेत् ॥ ब्रह्मणोनिर्ऋतेर्मध्येगणेशंतुप्रपूजयेत् वरुणब्रह्मणोर्मध्येअपःसंपूजयेत्ततः मध्येवायोर्ब्रह्मणश्चमरुतःसंप्रपूजयेत् ब्रह्मणःपादमूलेतुमेदिनींपरिपूजयेत् कावेरीनर्मदाचैवयमुनाचसरस्वती गंगाकृष्णातथागोदापूज्याःसप्तचसागराः क्षारक्षीरमधुसर्पिर्मैरेक्षुदधिसंभवाः ब्रह्मयज्ञानमित्याद्यैर्मंत्रैःस्थाप्यास्तुदेवताः गंधपुष्पादिभिःपूज्यादीपान्दद्याच्चसर्वतः सर्वत्रभद्रंयस्मात्तत्सर्वतोभद्रमुच्यते मंडलाद्बहिरस्त्राणिदेवैरिंद्रादिभिःसह वज्रंशूलंगदांशक्तिंदंडंखड्गंतथैवच पाशंध्वजंचांकुशंचगदांचपरिपूजयेत् गौत्तमंचभरद्वाजंविश्वामित्रंचकश्यपं यमदग्निवशिष्ठात्रीनरुंधतियुतान्यजेत् सूर्यादिकान्ग्रहान्सर्वान्मेषादिराशिसंयुतान् माहेंद्रीमथकौमारींब्राह्मींवाराहरूपिणीं चामुडांवैष्णवींदेवींमाहेशींचविनायिकीं वेदमंत्रैःप्रतिष्ठाप्यप्रत्येकंसहपूजयेत् स्थापनंप्रत्येकंकुर्यात् पूजनंसहमिलितोपचारैः कार्यमितिसुकरःपंथाः अथाग्निकार्येकुशंडिकाक्रमोनारदीये कुशाःपरिसमूहायसप्तशाखाःप्रकीर्तिताः गोमयेनोपलिप्येयंतदर्थमितिनारद वंध्यादुष्टाचहीनांगीमृतवत्साचयाभवेत् यज्ञार्थंगोमयंतस्यानाहरेदितिभाषितम् ये भ्रमंतिसदाकाशेपतंगाद्याभयंकराः तेषांप्रहरणार्थायमतंप्रोद्धरणंद्विज स्रुवेणचकुशेनापिकुर्यादुल्लेखनंभुवः अस्थिकंटकशुद्ध्यर्थंब्रह्मणापरिभाषितं आपोदेवगणाःसर्वेतथापितृगणाद्विज तेनाद्भिःप्रोक्षणंप्रोक्तंमुनिभिर्विधि

कोविदैः अग्नेरानयनंप्रोक्तंसौभाग्यस्त्रीभिरेवच शुभदंमृण्मयेपात्रेप्रोक्ष्याद्भिस्तंनिधापयेत् अमृतस्यक्षयंदृष्ट्
वाब्रह्माद्यैःसर्वदैवतैः वेद्यांनिधापितस्तस्मात्सामिद्धभौहुताशनः दक्षिणस्यांदानवाद्याःस्थितायज्ञस्यनारद
तेभ्यःसंरक्षणार्थायब्रह्माणंतद्दिशिन्यसेत् उत्तरेसर्वपात्राणिप्रणीताद्यानिपश्चिमे यजमानात्पूर्वतःस्युर्द्विजाःस
र्वेपिनारद द्यूतेचव्यवहारेचयज्ञकर्मणिचेद्भवेत् कर्त्तोदासीनचित्तस्तत्कर्मनस्यादितिस्थितिः ब्रह्माचार्यौ
स्वशाखौहिकर्त्तव्यौयज्ञकर्मणि ऋत्विजांनियमोनास्तियथालाभंसमर्चयेत् द्वेपवित्रेद्व्यंगुलेस्तःप्रोक्ष
णीचतुरंगुला आज्यस्थालीत्र्यंगुलाच चरुस्थालीषडंगुला द्व्यंगुलंतूपयमनमेकंसमार्जनाकुशं स्रुवंषडंगु
लंप्रोक्तंस्रुचंसार्धत्रयांगुलं प्रादेशमात्राःसमिधःपूर्णपात्रंषडंगुलं अत्रप्रोक्षण्यादिपात्राणां चतुरंगुलादिमानं
मुखविस्तारदैर्घ्यांतःस्थूलत्वादिमानेयथासंभवंवाच्यं पूर्णपात्रंषडंगुलमितिमुखविस्तारेज्ञेयं तत्रतंडुलमानंय
था अष्टमुष्टिभवेत्कुंचःकुंचाष्टकमथाढकं चतुराढकंभवेद्द्रोणःखारीद्रोणचतुष्टयम् अन्यप्रकारोयथा अष्टमुष्टिभवे
त्कुंचः कुंचाअष्टौतुपुष्कलं पुष्कलानिचचत्वारिपूर्णपात्रंविदुर्बुधाः प्रोक्षण्याउत्तरेभागेप्रणीतापात्रमष्टभिः या
निकानिचतीर्थानिसमुद्राःसरितस्तथा प्रणीतायां समासीनास्तस्मात्तांपूरयेज्जलैः वेदिकावस्त्रहीनाचनग्रासंप्रोच्य
तेद्विज परिस्तीर्यततोदर्भैःपरिदध्यादिमांबुधः इंद्रवज्रंविष्णुचक्रंयमतूदंडंत्रिशूलकं दर्भरूपतयात्रीणिपवित्र
च्छेदनानिच प्रोक्षणीचप्रकर्त्तव्याप्रणीतोदकसंयुता नेनातिपुण्यदंकर्मपवित्रमितिकीर्त्तितम् आज्यस्थालीप्रकर्त्त
व्यापत्रमात्रप्रमाणिका कुलालचक्रघटितमासुरंमृण्मयंस्मृतं तदेवहस्तघटितंस्थाल्यादिदैविकंभवेत् स्रुवेच
सर्वकर्माणिशुभान्यप्यशुभानिच तस्यैवपावनार्थंतुवह्नौतापनमीरितं अग्नेहुतेनवैधव्यं मध्येचैवप्रजाक्षयः मू
लेचम्रियतेहोतातेनतापनमीरितम् अग्नौतस्माद्विशुद्ध्यर्थंतद्विचार्यंप्रयत्नतः अग्निस्सूर्यश्चसोमश्चविरंचिरनिलो

यमः स्रुवेषडेतेदेवाःस्युःप्रत्यंगुलमुपाश्रिताः अग्निर्भोगार्थनाशायसूर्योव्याधिकरोभवेत् निष्फलस्तुस्मृतःसोमोविरिंचिः सर्वकामदः अनिलोवृद्धिदः प्रोक्तोयमोमृत्युप्रदोमतः संमार्जनोपयमनंकर्त्तव्यंचकुशद्वयं सर्वतः सर्वशाखंस्यात्पंचशाखंतथापरं श्रीपर्णीचशमीतद्वत्खदिरश्चविकंकतः पलाशश्चैवविज्ञेयाःस्रुवेचैवतथास्रुचे हस्तोन्मितंस्रुवंशस्तंत्रिदशांगलकंस्रुचं विप्राणांचैतदाख्यात मन्येषामंगुलोनकं शूद्राणांपतितानांचखरादीनांचनारद दृष्टिदोषविनाशार्थंपात्राणांप्रोक्षणंस्मृतं अकृतंपूर्णपात्रंतुयज्ञाच्छिद्रंसमुद्भवेत् तस्मिन्पूर्णेकृतेविप्रयज्ञसंपूर्णताभवेत् अष्टमुष्टिभवेत्किंचित्पुष्कलंतच्चतुष्टयं पुष्कलानिचचत्वारिपूर्णपात्रंविदुर्बुधाः होमकालेचसंप्राप्तेनदद्यादशनंक्वचित् दत्तेऽतृप्तोभवेद्वन्हिः शापंदद्याच्चदारुणं आघारौनासिकेप्रोक्तेआज्यभागौचचक्षुषी प्राजापत्यंमुखंप्रोक्तंकटिर्व्याहृतिभिः स्मृता शीर्षहस्तौचपादौचपंचवारुणमीरितं तथास्विष्टकृतंविप्रश्रोत्रेपूर्णाहुतिः स्मृता द्विमुखंचैकहृदयंचतुःश्रोत्रंद्विनासिकं द्विशीर्षकंचषट्नेत्रंपिंगलंसप्तजिव्हकं सव्यभागेत्रिहस्तंचचतुर्हस्तंचदक्षिणे स्रुक्स्रुवौचाक्षमालाचशक्तिर्दक्षिणकेकरे त्रिमेखलंत्रिपादंचघृतपात्रंद्विचामरं मेषारूढंचतुः शृंगंवातादित्यसमप्रभं उपवीतसमायुक्तंजटाकुंडलमंडितम् ज्ञात्वैवमग्निदेहंतुहोमकर्मसमाचरेत् पयोदधिघृतंचैवस्नेहपक्वंतथैवच जुहुयाद्यस्तुहस्तेनसविप्रोब्रह्महाभवेत् यदन्नंपुरुषोश्नातितदन्नंतस्यदेवताः सर्वकामसमृद्ध्यर्थंतिलाधिक्यंहविर्मतम् होमेमुद्रात्रयंप्रोक्तंमृगीहंसीचसूकरी अभिचारेशूकरीस्यान्मृगीहंसीशुभात्मिके सर्वांगुलीभिःक्रोडीस्याद्धंसीमुक्तकनिष्ठिका मध्यमानामिकांगुष्ठैर्मृगीमुद्राप्रकीर्त्तिता एवंप्रमाणयाहुत्यापंचांगुलिगृहीतया दधिमध्वाज्यसंयुक्तैर्ऋत्विग्भिर्जुहुयात्तिलैः कुशास्त्वनामिका सक्ताःकार्य्याःस्युःपुण्यकर्मणि ॥ विनायकः कर्मविघ्नशांत्यर्थेविनियोजितः गणानामाधिपत्येचशिवेनब्रह्मणातथा इत्यादिनाग्रे विनायकशांत्यादिक्रमोऽभिहितः

अप्रकृतत्वान्नेहलिखितः अथानंतरकृत्यंभाविष्योत्तरे रामनामोद्यापने ततोग्निंसंप्रतिष्ठाप्यस्वशाखोक्तविधानतः
विष्णुसूक्तेनहोतव्यंमूलमंत्रेणवापुनः नवग्रहान्सदिक्पालान्मंत्रानुक्त्वातुहोमयेत् पुरुषसूक्तेनहोतव्यंसमिदाज्य
चरुस्तिलाः पूजयित्वाततोवन्हिंवलिंपूर्णाहुतिंतथा श्रेयःसंपाद्यदानंचअभिषेकंसमाचरेत् आचार्यंपूजयेत्पश्चात्सु
वर्णा युतधेनुभिः प्रतिमां दानमंत्रेण आचार्याय निवेदयेत् प्रतिमादानसिध्यर्थंशक्त्यास्वर्णंतुदापयेत्
दानंयद्दक्षिणाहीनंतत्सर्वंनिष्फलंभवेत् ब्राह्मणान्शतसाहस्रंभोजयेन्मधुसर्पिषा पक्वान्नैःपायसैः खाद्यैःकदली
शर्करान्वितैः ऋत्विग्भ्योदक्षिणांदत्वाभूयसींदक्षिणांददेत् तदंतेघृतपात्रंचतिलपात्रंचकांचनं शय्याचवस्त्रदानादि
दशदानंचशक्तितः अशक्तश्चेत्स्वर्णमेवदद्याद्विप्रान्नमेत्पुनः तिलकंधारयेत्पश्चादभिषिंचेत्सपल्लवैः पूर्वमाचा
र्यकृतोऽभिषेकः अत्रचविप्रकृतइतिविवेकः द्विजैस्तथाशिषोदेयानत्वास्तुत्वाविसर्जयेत् इतिश्रीमन्महाराजा
धिराज श्रीरणवीर कारिते व्रतरत्नाकरे धर्मकर्मनिवंधे व्रतोपयुक्ता समान्योद्यापनकृत्यपरिभाषा समाप्ता
अथोद्यापनसामान्यप्रयोगः तत्रादौस्वस्तिवाचनंपुण्याहवाचनंचकृत्वा वृद्धिश्राद्धं गणपतिपूजनं मातृकापूज
नंचकुर्यात् त्रिकांडमंडनः गर्भाधानादिसंस्कारेष्विष्टापूर्त्तादिकर्मसु वृद्धिश्राद्धंपुराकार्य्यंकर्मादौस्वस्तिवाचनं उ
पनयनादिमहत्सुकर्मसु एकविंशत्यहोयज्ञेविवाहेदशवासरान् त्रिषट्चौलोपनयनेनांदीश्राद्धंविधीयत इति
वचनात्पूर्वत्रकार्य्यं स्वल्पकार्य्येषुतदहरेवस्वल्पविधिनाकार्य्यम् अत्रव्रतकर्त्ताएकादश्यादिव्रतोद्यापनंचिकीर्षुःपूर्वे
द्युः कृतहविष्यादिनियमो व्रतदिने प्रातः समुत्थायकृतनित्यक्रियःसन् अहतशुक्लांबरधरःसंप्रक्षालितपाणि
पादोमंडपपश्चिमद्वारसमीपे प्राङ्मुखोवाउदङ्मुखोमहतां ब्राह्मणानामाज्ञामादाय तेभ्योनमस्कृत्यदेवेभ्यश्चति
लकंविधायाचाम्य तूर्यमृदंगादिमंगलवाद्येस्वस्तिवाचनध्वनौ प्रवृत्ते धर्मपत्न्यासह ग्रंथिवंधनंकृत्वा कुश

त्रयतिलयवजलान्यादाय प्रतिज्ञासंकल्पंकुर्यात् ॐतत्सदद्यामुकमासेऽमुकपक्षेऽमुकतिथावमुकवासरःचन्वितायाममुकगोत्रोहममुकशर्माहं सकलपापक्षयपूर्वक श्रीयज्ञपुरुषलक्ष्मीनारायणप्रीतये चैकादश्याद्यमुकव्रतोद्यापनमहंकरिष्येति प्रतिज्ञांविधाय ततःकंकणवंधनंकुर्यात् भद्रंकर्णेभिः शृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवाꣳसस्तनुभिर्व्यसेमदेवहितंयदायुः इत्यनेनग्रंथिवंधनम् ततोब्राह्मणान्संपूज्यस्वस्तिवाचनंकुर्यात् व्यासः संपूज्यगंधमाल्याभिर्ब्राह्मणान्स्वस्तिवाचयेत् आश्वलायनः वैदिकेतांत्रिकेचादौततःपुण्याहइष्यते त्रीनधिकान्ब्राह्मणांस्ताम्बूलादिभिःपरितोष्योदङ्मुखानुपवेश्य पुण्याहंभवंतोब्रुवंत्वितिब्राह्मणान्यजमानस्त्रिःश्रावयेत् ततोब्राह्मणाः पुण्याहं पुण्याहं पुण्याहं तत्रवाक्यं ब्राह्म्यंपुण्यमहोयच्चसृष्ट्युत्पादनकारकं वेदवृक्षोद्भवंपुण्यंतत्पुण्याहंभवत्विति पुनंतुमादेवजनाःपुनंतुमनसाधियः पुनंतुविश्वाभूतानिजातवेदःपुनीहिमां १ भोभोब्राह्मणाअस्ययजमानस्यगृहेकल्याणंभवंतोब्रुवंत्वितित्रिःश्रावयेत् कल्याणं कल्याणं कल्याणं वाक्यंच पृथिव्यामुद्धृतायांतुयत्कल्याणंपुराकृतं ऋषिभिःसिद्धगंधर्वैस्तत्कल्याणंब्रुवंतुनः यथेमांवाचंकल्याणीमावदानिजनेभ्यः ब्रह्मराजन्याभ्याꣳशूद्रायचार्यायचस्वायचारणायच प्रियोदेवानांदक्षिणायैदातुरिहभूयासमयंमेकामःसमृध्यतामुपमादोनमतु २ भोभोब्राह्मणाअस्ययजमानस्यगृहेऋद्धिंभवंतोब्रुवंतुऋद्धिःऋद्धिःऋद्धिः सागरस्यचयाऋद्धिर्महालक्ष्म्यादिभिःकृता संपूर्णासप्रभावाचतामृद्धिंसंब्रुवंतुनः मंत्रः सत्रस्यऋद्धिरस्यगन्मज्योतिरमृताअभूम दिवंपृथिव्याअध्यारुहामाविदामदेवान्स्वर्ज्योतिः क्षत्रियऋद्धिः ३ भोभोब्राह्मणाअस्ययजमानस्यगृहेस्वस्तिभवंतोब्रुवंतु ॐस्वस्ति स्वस्ति स्वस्ति ३ मंत्रः स्वस्तिर्याअविनाशाखापुण्यकल्याणवृद्धिदा विनायकप्रियानित्यंतांस्वस्तिंसंब्रुवंतुनः स्वस्तिनइंद्रोवृद्धश्रवाःस्वस्तिनःपूषा

विश्ववेदाः स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिःस्वस्तिनोवृहस्पतिर्दधातु पयःपृथिव्यांपयऽओषधीषुपयोदिव्यंतरिक्षेपयोधाःपयस्वतीःप्रदिशःसंतुमह्यम् एतच्चब्राह्मणानन्नेन परितोष्य पुण्याहं स्वस्तिऋद्धिरित्योंकारपूर्वकं त्रिस्त्रिरेकैकमाशिषोवाचयित्वेत्यादिनाबौधायनेनोक्तम् यमः पुण्याहवाचनंवेदंब्राह्मणस्यविधीयते एतदेवनिरोंकारंकुर्यात्क्षत्रियवैश्ययोरि ति वह्वृचपरिशिष्टेतु अवनिकृतजानुमंडलः कमलमुकुलसदृशमंजलिंशिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णकलशंधारयित्वा दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिचतेनायुः प्रमाणेन पुण्याहंदीर्घमायुरस्तु शिवाआपःसंतुसौमनस्यमायुष्यमस्तु अक्षतंचारिष्टमस्तु गंधाः पांतु सुमंगल्यंचास्तु अक्षताःपांतु आयुष्यमस्तु पुष्पाणि पांतु सौश्रियमस्तु तांवूलाःपांतु ऐश्वर्यमस्तु दक्षिणाःपांतु आरोग्यमस्तु दीर्घमायुःशांतिःपुष्टिस्तुष्टिःश्रीर्यशोविद्याविनयोवित्तं वहुपुत्रंचायुष्यंतेस्तु यंकृत्वा सर्ववेदयज्ञक्रियारंभाशुभाःप्रवर्त्तंते तमहमोंकारमादितःकृत्वा ऋग्यजुःसमाथर्वाशीर्विचनंवह्वाषिमतंसमनुज्ञातंभवाद्भिरनुज्ञातः पुण्याहंवाचयिष्ये वाच्यताम् भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षिभिर्यजत्राः स्थिरैरंगैस्तुष्टुवाꣳ सस्तनुभिर्व्यसेमदेवाहितंयदायुः १ द्रविणोदाद्रविणतस्तुरस्यद्रविणोदाः समरस्याप्रियंसत् द्रविणोदावीरवतीमिषंतोद्रविणोदारासतदीर्घमायुः २ सवितापश्चात्सवितापुरस्तात्सवितोत्तरात्सविताधस्तात् सवितानःसुवसुसर्वतातिंसवितोरास्मतांदीर्घमायुः ३ नवोनवोभवतिजायमानोन्हांकेतुरुषसामेत्यग्रं भागंदेवेभ्योविदधात्यायन्नश्चंद्रमास्तिरतेदीर्घमायुः ४ उच्चादिविदाक्षिणावंतोअस्युर्येअश्वदासहतेसूर्येण हिरण्यदाअमृतत्वंभजंतेवासोदाः प्रतिरंतआयुः ५ पुण्याहंब्रूयात् व्रतनियमतपः स्वाध्यायक्रतुदमदानविशिष्टानां सर्वेषांब्राह्मणानां मनः समाधीयतां समाहितमनसःस्मःप्रसीदंतुभवंतःप्रसन्नाःस्मःशांतिरस्तु पुष्टिरस्तुतुष्टिरस्तुवृद्धिरस्तुअविघ्नमस्तु आरोग्य

मस्तु आयुष्यमस्तु शिवंकर्मास्तु कर्मसमृद्धिरस्तु पुत्रसमृद्धिरस्तु धनधान्यसमृद्धिरस्तु इष्टसमृद्धिरस्तुअरिष्टनिरसनमस्तुयत्पापंतत्प्रतिहतमस्तु यच्छ्रेयस्तदस्तु उत्तरोत्तरमहरहरभिवृद्धिरस्तु उत्तरोत्तराः क्रियाः शुभाःशोभनाः प्रवर्त्तंते तिथिकरणमुहूर्त्तनक्षत्रसंपदस्तु तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंताम् तिथिकरणमुहूर्त्तनक्षत्रेसग्रहेसदैवतेप्रीयेताम् अग्निपुरोगाविश्वेदेवाः प्रीयंताम् इंद्रपुरोगामरुद्गणाः प्रीयंताम् वशिष्ठपुरोगाऋषिगणाः प्रीयंताम् माहेश्वरीपुरोगामातरः प्रीयंताम् अरुंधतीपुरोगाएकपत्न्यः पतिव्रताः प्रीयंताम् विष्णुपुरोगाः सर्वे देवाः प्रीयंताम् ब्रह्मपुरोगासर्वेवेदाः प्रीयंताम् ब्रह्माचब्राह्मणाश्चप्रीयंताम् श्रीसरस्वत्यौप्रीयेताम् भगवतीकात्यायनीप्रीयताम् भगवतीमाहेश्वरीप्रीयताम् भगवतीऋद्धिकरीप्रीयताम् श्रद्धामेधेप्रीयेताम् भगवतीवृद्धिकरीप्रीयताम् भगवंतौविघ्नविनायकौप्रीयेतां सर्वाः कुलदेवताः प्रीयंताम् हताविष्णुद्विषः हताः परिपंथिनः हताश्चाविघ्नकर्त्तारः शत्रवः पराभवंतु शाम्यंतुघोराणि शाम्यंतु पापानि शाम्यंत्वीतयः शुभानिवर्धंताम् शिवाआपः संतु शिवाअग्नयः संतु शिवाआहुतयःसंतु शिवावनस्पतयःसंतु शिवाअतिथयःसंतु अहोरात्रेशिवेस्याताम् निष्कामेनिष्कामेनः पर्जन्योवर्षतु फलवत्योनओषधयः पच्यंताम् योगक्षेमोनः कल्पताम् शुक्रांगारकबुधबृहस्पतिशनिराहुकेतुसोमसहिताआदित्यपुरोगमाः सर्वे ग्रहाः प्रीयंताम् भगवान्नारायणःप्रीयताम् भगवान्पर्जन्यः प्रीयताम् भगवान्स्वामीमहासेनः प्रीयताम् पुण्याहंवाचयिष्ये वाच्यतां उद्गातेवशकुनेसाम गायसिब्रह्मपुत्रद्ववसवनेषुशंससि वृषेववार्त्तीशिशुमतीरपीत्यासर्वतोनः शकुनेभद्रमावह विश्वतोनः शकुनेभद्रमावह याज्ययायजतिप्रातर्वैयाज्यापुण्यैवलक्ष्मीः पुण्यामेवतल्लक्ष्मींसंभावयति पुण्यांलक्ष्मींसंस्कुरुते यत्पुण्यंनक्षत्रंतद्वत्कुर्वीतोपव्युषंयदावै सूर्यउदेति अथनक्षत्रेउदेति यावतितत्रसूर्योगच्छेत् यत्रजघन्यं

पश्येत तावत्कुर्वीतयत्कारीस्यात् पुण्याहएवकुरुते पुण्याहंभवंतोब्रुवंतु ॐपुण्याहं स्वस्तयेवायुमुपब्रुवामहे
सोमंस्वस्तिभुवनस्ययस्पतिः बृहस्पतिंसर्वगणंस्वस्तये स्वस्तयआदित्यासोभवंतुनः आदित्यउदयनीयः
यथायेवैताःस्वस्त्या प्रयंति यथास्वस्तिमभ्युद्यंतिस्वस्त्येयवेनः प्रयंतिस्वस्त्युद्यंति स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्व
स्तिनःपूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु अष्टौदेवाःवसवःसोम्यासःचतस्रो
देवारजराश्रविष्ठाः तेयज्ञंपांतुरजसःपरस्तात् संवत्सरीणममृतꣳस्वस्तिस्वस्तिभवंतोब्रुवंतु आयुष्मतेस्वस्ति ऋ
ध्यामस्तोमंसनुमामवाजमानोमंत्रंसरथेहोपयातम् यइगेनपक्कंमधुगोपांतराभूतां अश्विनौकाममप्राः सर्वामृद्धि
मृध्नुयामिति तंवेतजसैवपुरस्तात्पर्य्यच्छंदोभिर्मध्यतोक्षरैरुपरिष्टाद्गायत्र्यासर्वतोद्वादशाहं परिभूय सर्वामृद्धिमाध्नो
त्सर्वामृद्धिमृध्नोतियएवंवेद ऋध्यास्महव्यैर्नमसोपसद्यमित्रंदेवंमित्रधेयंनोअस्तु अनूराधान्हविषावर्धयंतःशतंजी
वेमशरदःसवीराःत्रीणित्रीणिवैदेवानामृध्यानित्रीणिछंदासित्रीणिसवनानि त्रयइमेलोकाऋध्यामेवतद्वीर्यएषुलोके
षुप्रतितिष्ठति ऋद्धिंभवंतोब्रुवंतु ऋध्यतां श्रियेजातःश्रियआनिरियायश्रियेवयो जरितृभ्योदधातिश्रियं वसान अ
मृतत्वमायन्भवति सत्यासमियामितद्रौ श्रियएवैनंतच्छ्रियामादधाति संततमृचाषट्कृत्यंसंतत्यैसंधीयते प्रजयाप
शुभिर्यएवंवेद यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत् अमुंचलोकमिदमुतसर्वैं तन्नो तन्नक्षत्रमभिजिद्विजित्यश्रियंदधात्व
हृणीयमानअहेबुध्नियमंत्रेमेगोपाय यमृषयस्त्रयीविदोविदुःऋचःसामानियजूꣳषिसाहिश्रीरमृतासतांश्रीरास्त्विति
भवंतोब्रुवंतु अस्तुश्रीःपुण्याहवाचनसमृद्धिरस्तुभगवान्प्रजापतिः प्रीयताम्ततोनीराचनमभिषेकंचयथाशाखंकारपे
दितिपुण्याहवाचनम् आदावंतेचमध्येचकुर्याद्ब्राह्मणवाचनम् अथपुनःसंकल्पंकुर्यात् ॐतत्सद्ब्रह्मेत्यादिदेशकालौसं
कीर्त्य ममकर्त्तव्यैकादश्यादिव्रतोद्यापनकर्मणोनिर्विघ्नतासिद्ध्यर्थंगणपतिदुर्गाश्रीसहितगौर्य्यादिषोडशमातृकापू

जनाभ्युदयिककलशस्थापनसूर्य्यादिनवग्रहेंद्रादिलोकपालानहंपूजयिष्ये तत्रादौगणपत्यादीनांस्थापनक्रमः ॐगणानांत्वागणपतिꣳहवामहे प्रियाणांत्वाप्रियपतिꣳहवामहे निधीनांत्वानिधिपतिꣳहवामहेवसोममआहमजानिगर्भधमात्वमजासिगर्भधम्ॐगणपतिरसिगणपतेइहागच्छ ॐगजास्यगणनाथत्वंसर्वविघ्नविनाशन लंबोदरसुनेत्रात्रसमागच्छगणाधिप १ गौरिदेविसमागच्छवरदाभयशूलधृक् कुलांबिकेवृषारूढेशांतिकुरुममाध्वरे हिमाद्रितनयांदेवींवरदांभैरवप्रियां लंबोदरस्यजननींगौरीमावाहयाम्यहं एह्येहिनीलोत्पलतुल्यवर्णेश्वेतांबरेप्रोज्ज्वलशूलहस्ते नगेंद्रकन्येभुवनेश्वरित्वंपूजांगृहीतुंमखमस्मदीयं ॐभूर्भुवः स्वर्गौरितभगवति इहागच्छइत्यक्षतैरावाह्यपूजयेत् ॐपद्मेत्वंपद्महस्तासिपद्मनाभसमोपमे पद्मनाभस्यदयितेएहिसौम्येशुभंकुरु पद्माभांपद्महस्तांचपद्मनाभोरसिस्थितां जगत्प्रियांपद्मवासांपद्मामावाहयाम्यहं एह्येहिपद्मेशाशितुल्यवक्रेपंकेरुहस्थेशुभचक्रहस्ते सुरासुरेंद्रैरभिवंदितांघ्रेपूजांगृहीतुंममयज्ञभूमिम् ३ ॐभूर्भुवः पद्मेइहागच्छइत्यावाह्यपूजयेत् ॐपराशरस्यदुहिते वज्रहस्तेभगामिनि शचिदेविहिनोयागेदुष्टारिमथनिःकले दिव्यरूपांविशालाक्षींशचींकुंडलधारिणीं रक्तमुक्ताद्यलंकारांशचीमावाहयाम्यहम् १ प्रतप्तकार्त्तस्वरतुल्यवर्णेगजाधिरूढेनलिनाभनेत्रे सत्रप्रियेप्रोज्ज्वलवज्रहस्तेपूजांगृहीतुंशचिदेविशीघ्रम् ३ ॐभूर्भुवः शचिदेविइहागच्छइत्यावाह्यपूजयेत् ३ मेधेहंसगतासित्वंचित्स्वरूपाहृदिस्थिता आचारादौनमस्तुभ्यमेहिदेविजगत्प्रिये १ विश्वेश्वरींविशालाक्षींमहाबलप्रदायिनीं बुद्धिप्रबोधिनींसौम्यांमेधामावाहयाम्यहं एह्येहिमेधेशुभभूरिवक्रेपीतांबरेपुस्तकपाशहस्ते बुद्धिप्रदेहंससमाधिरूढेपूजांगृहीतुंमखमस्मदीयम् ३ ॐभूर्भुवः मेधेदेवि इहागच्छइत्यावाह्यपूजयेत् ४ सावित्रिसर्वदेवानांब्रह्मादीनांविशेषतः पूजनीयासिदेवित्वमेहियज्ञेशुभंकुरु १ जगत्सृष्टिकरींधात्रींदेवींप्रणवमातृकां वेदगर्भांज्ञानमयींसावित्रींपूजया

म्यहं एह्येहिसावित्रिजगद्विधात्रिब्रह्मप्रियेस्त्रुक्स्त्रुवपाशहस्ते प्रतप्तजांबूनदतुल्यवर्णेपूजांगृहीतुंमखमस्मदीयं
ॐभूर्भुवः स्वः सावित्रिदेविइहागच्छइत्यावाह्यपूजयेत् ५ विजयेविश्वरूपात्वंविश्वात्माविश्वतोमुखी महादं
ष्ट्रेमहाकायेसमागच्छमहेक्षणे १ सर्वास्त्रधारिणींदेवींसर्वाभरणभूषितां सर्वदेवैः स्तुतांरम्यांतांविजयांस्थापया
म्यहम् २ एह्येहिसर्वास्त्रधरेकुमारिसुरासुराणांविजयप्रदात्रि त्रैलोक्यवंद्येशुभरत्नभूषे गृहाणपूजांविज
येनमस्ते ३ ॐभूर्भुवः स्वर्विजयेइहागच्छइत्यावाह्यपूजयेत् ६ जयेदेविसमागच्छजयदेसिंहवाहिनि वज्रा
सिचक्रैर्गदयारिपुंनाशयमेध्वरे सुरारिमथनांदेवींदेवानामभयप्रदां त्रैलोक्यवंदितांदेवींजयामावाहयाम्यहम् २
एह्येहिपंकेरुहलोचनेत्वंजयप्रदेचंचलशक्तिहस्ते ब्रह्मादिदेवैरभिवंद्यमानेजयेत्रसिद्धिंकुरुसर्वदामे ३ ॐभूर्भुवः
स्वर्जयेदेविइहागच्छइत्यावाह्यपूजयेत् ७ देवसेनेसमागच्छदेवतानांपुरोगमे देवाधिदेवीत्वंप्रोक्तानिहंसिरिपुमध्वरे १
मयूरवाहिनींदेवींखड्गशक्तिधनुर्धराम् आवाहयेदेवसेनातारकासुरमर्दिनीम् २ एह्येहिचापासिधरेनघेत्वंमयूरवा
हेकमलायताक्षि इंद्रादिदेवस्थितिहेतुभूतेगृहाणपूजांममदेवसेने ३ ॐभूर्भुवः स्वर्देवसेनेदेविइहागच्छइत्या
वाह्यपूजयेत् ८ स्वधेपितृमनुष्याणामेकात्वंत्रिगुणात्मिके कारणंहदिसर्वेषामेहिदेविममाध्वरम् १ अग्निकांतापि
तृभ्योहिकव्यार्थंयाप्रयच्छति पितृणांतृप्तिदादेवीस्वधामावाहयाम्यहम् २ एह्येहिवैश्वानरवल्लभेत्वंकव्यंपितृभ्यः
सततंददासि स्वर्गाधिवासेशुभशक्तिहस्तेस्वधेत्रनः पाहिमखंनमस्ते ३ ॐभूर्भुवः स्वः स्वधेदेविइहागच्छइ
त्यावाह्यपूजयेत् ९ स्वाहेत्वंलक्षणैर्युक्तादेहियज्ञाभिवांछितं त्वमागच्छाध्वरेदेशंसमस्ताविहितक्रिये १ हविर्गृ
हीत्वासततंदेवेभ्योयाप्रयच्छति तांदिव्यरूपांपरमांस्वाहामावाहयाम्यहम् २ एह्येहिवैश्वानरपत्निदेवितडित्प्रभे
शक्तिधरेकुमारि हस्तेगृहीत्वासुरतृप्तिहेतोस्वाहेप्रसीदमखमस्मदीयम् ३ ॐभूर्भुवःस्वः स्वाहेदेविइहागच्छइत्य

वाह्यपूजयेत् १० ॐभूर्भुवः स्वर्मातरोत्रसमागच्छतलोकमातरोत्रसमागच्छत आवाहयाम्यहंमातृः सर्वदालोकपूजिताः सर्वकल्याणरूपिण्योवरदानैकभूषणाः १ आगच्छतागच्छतमातरोत्रब्राह्मीमुखाः सर्वजनैः प्रपूजिताः वरप्रदादिव्यविभूषणाढ्याः पूजांगृहीतुंममयज्ञभूमिं ॐभूर्भुवः स्वर्मातरोत्रसमागच्छत ११ ॐभूर्भुवः स्वर्लोकमातरइहागच्छतइत्यावाह्यपूजयेत् हृष्टेसंतोषयुक्तासिसौम्याचंद्रमसोदिताः संसेव्याफलदासित्वंविपरीताभयावहा १२ सर्वहर्षकरींदेवींभक्तानामभयंकरीं हर्षोत्फुल्लास्यकमलांहृष्टिमावाहयाम्यहम् १ एह्येहिसर्वाभयदेकुमारिसमस्तलोकप्रियहेतुभूते प्रोत्फुल्लपंकेरुहतुल्यनेत्रेहृष्टेमखंपाहिशिवस्वरूपे ॐभूर्भुवः स्वः हृष्टिदेविइहागच्छ इत्यावाह्यपूजयेत् पुष्टेगर्भविशुद्ध्यर्थंपुष्टिंपोषयसेनृणां रक्षदेविसमागच्छममांगंकमलेक्षणे १ पोषयंतीजगत्सर्वंस्वदेहप्रभवैर्नवैः शाखामूलैः फलैः रत्नैः पुष्टिमावाहयाम्यहम् २ एह्येहिपुष्टेशुभरत्नभूषेरक्तांबरेरक्तविशालनेत्रे भक्तिप्रियेपुष्टिकरीत्रिलोक्याः पूजांगृहीतुंमखमस्मदीयम् ३ ॐभूर्भुवः स्वःपुष्टिदेविइहागच्छइत्यावाह्य पूजयेत् १६ आनंदगुणसंयुक्तेरूपभाग्यसमन्विते तुष्टिदेविसमागच्छमंगलंकुरुमेसदा भावैराराधितांदेवींसदा संतोषशालिनीं प्रसादसुमुखींदेवींतुष्टिमावाहयाम्यहम् २ एह्येहितुष्टेखिललोकवंद्येत्रैलोक्यसंतानविधानदक्षे पीतांबरेशक्तिगदाब्जहस्तेशिवायनः पाहिमखंनमस्ते ॐभूर्भुवः स्वः तुष्टिदेविइहागच्छइत्यावाह्यपूजयेत् १४ आत्मदेविसमागच्छचित्स्वरूपेमायेस्थिते वरादिगुणसंयुक्ताशांतिंकुरुममाध्वरे १ पत्तनेनगरेग्रामेविपिनेवर्त्मनिगृहे नानाजातिकुलेशानींदेवीमावाहयाम्यहम् २ एह्येहिचास्मत्कुलदेवतेत्वंशोभाप्रदेशोभितपादपद्मे कल्याणदे सर्वकुलस्यमातः पूजांगृहीतुंमखमस्मदीयम् ३ ॐभूर्भुवः स्वरात्मकुलदेवतेइहागच्छइत्यावाह्यपूजयेत् १५ इत्येवंगणपतिसहिताः षोडशमातृः प्रत्येकमंत्रैः प्रतिष्ठाप्यादौगणपतिंषोडशोपचारैः पूजयेत् तद्यथा गणेशं

प्रथमंपूज्यततोमात्द्दःप्रपूजयेत् नश्यंतिसर्वदुःखानिकल्याणानिभवंतिहि कृष्णेनभाषितंसर्वैर्देवानांब्रह्मणोंतिके मंगलेषुचयज्ञेषुभक्तिर्यत्रविनायके भूमिर्हलोद्धृताशून्यावीजहीनायथाभवेत् गणयागविहीनश्चतथायज्ञोभविष्यति अथ प्रतिमासगणपतिपूजाक्रमः मार्गेमासेगणपतिः पौषेपूज्योविनायकः गजवक्रस्तथामाघेभालचंद्रश्चफाल्गुने उपेंद्रश्चैत्रमासेतुवैशाखेविघ्ननाशनः ज्येष्ठेशिवसुतःपूज्यआषाढेहरनंदनः हेरंबःश्रावणेपूज्योभाद्रेलंबोदरस्तथा आश्विनेचैकदंतश्चमहावीरश्चकार्तिके विघ्नहाचाधिकेमासिएवंपूज्योगणेश्वरः अथपूजा आवाहयाम्यहंदेवंगणेशंशिवनंदनं व्याघ्रचर्मांबरधरंव्यालयज्ञोपवीतिनं गजवक्रगणाध्यक्षसर्वविघ्नविनाशन अस्मिन्यज्ञेसमागच्छलंबोदरनमोस्तुते गणानांत्वागणपतिंहवामहे इतिमंत्रेण अत्रागच्छजगद्वंद्यसुरराजार्चितेश्वर अनाथनाथसर्वज्ञलोकेशगणनायक इत्यावाहनं मौक्तिकैःपद्मरागैश्चनानारत्नैर्विराजितं रत्नसिंहासनंतत्रस्थीयतांसुरसत्तम इत्यासनं अथध्यानं ध्यायेद्गजाननंदेवंतप्तकांचनसन्निभं चतुर्भुजंमहाकायंसर्वाभरणभूषितं दंतमाद्यकरेदद्याद्द्वितीयेकुलिशंतथा पाशंतृतीयकेदद्याच्चतुर्थेमोदकंन्यसेत् कनकरसदृशवर्णंसर्वलक्ष्मीप्रदंतं गजमुखमरुणाक्षंचंचलत्कर्णयुग्मं दशनकुलिशपाशंमोदकंधारयंतं सुभगचतुरहस्तंनौमिसर्वार्थसिद्ध्यै इतिध्यानम् देवदेवस्वपूजार्थंपात्रंगंधाक्षतैर्युतं गृहाणार्घ्यंमयादत्तंसर्वांसिद्धिंप्रदेहिमे इत्यर्घ्यं गौरीसुतनमस्तुभ्यंगंधपुष्पाक्षतैर्युतं तवपाद्यंमयादत्तंगृहाणप्रणतप्रिय इतिपाद्यं गंगाजलंसमानीतंसुवर्णकलशस्थितं सुगंधनसमायुक्तंसम्यगाचमनंकुरु इत्याचमनम् विश्वेश्वरविशालाक्षसर्वागमविशारद मधुपर्कंगृहाणत्वंमयासंपादितंविभो इतिमधुपर्कं स्नानंपंचामृतंदिव्यंपयोदधिघृतंमधु शर्करांचगृहाणत्वंसिद्ध्यर्थंसुरपूजित इतिपंचामृतम् गंगाजलंसमानीतंसुवर्णकलशस्थितं तोयमेतत्सुखस्पर्शंस्नानार्थंप्रतिगृह्यतां इतिशुद्धो

दकस्नानं रक्तवस्त्रयुगंदेव देवांगसदृशंनवं मयादत्तंगृहाणेदंसर्वप्रदनमोस्तुते इतिवस्त्रं सुजातंब्रह्मसूत्रंचकांचनंचोत्तरीयकं उपवीतंगृहाणेदंभक्तानामार्त्तिनाशन इतियज्ञोपवीतं अनेकरत्नखचितंसर्वाभरणसंयुतं गृहाणभूषणंदेवइष्टांसिद्धिंप्रयच्छमे इत्याभरणं गंधकर्पूरकस्तूरीनानागंधैश्चसंयुतं विलेपनंगृहाणेदंगणाध्यक्षायवैनमः इतिगंधं अक्षतानरुणान्देवसिद्धगंधर्वपूजित मयाहृतानिमान्देवगृहाणसुरसत्तम इत्यक्षताः सुगंधीनिचपुष्पाणिरक्तपत्राणियानिच एकविंशतिपत्राणिगृहाणत्वंविनायक इतिपुष्पाणि पत्राणिच दशांगंगुग्गुलुंधूपंसुगंधंचमनोहरं उमासुतनमस्तुभ्यंगृहाणवरदोभव इतिधूपम् सर्वज्ञसर्ववरदसर्वेषांविदुषांवर गृहाणदीपकंदेवरुद्रप्रियनमोस्तुते इतिदीपम् सघृतंसफलंदेवमोदकंघृतपाचितं नैवेद्यंगृहाणमेदेवनमस्तेविघ्ननाशन इतिनैवेद्यम् सपूगचूर्णंकर्पूरनागवल्लीदलैर्युतं भोगप्रदंश्रीकरंचतांबूलंप्रतिगृह्यतां इतितांबूलम् नीराजनंगृहाणेदंबहुदीपप्रकाशितं अज्ञानतिमिरार्तिघ्ननमस्तेविघ्नवारक इतिनीराजनं इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि इतिफलं हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे इतिदक्षिणा आखुवाहनदेवेशविश्ववंद्यगजानन प्रदक्षिणीकरोमित्वांममत्वंसन्निधौभव इतिप्रदक्षिणा नमस्तेदेवदेवेशनमस्तेविघ्ननाशन साष्टांगोयंप्रणामस्तेमयासम्यक्प्रयोजित इतिनमस्कारः न्यूनातिरिक्तानिपरिस्पुटानियानीहकर्माणिमयाकृतानि क्षम्यानिसर्वाणित्वयागणेशप्रयाहितुष्टःपुनरागमाय इतिविसर्जनम् एवंगणेशंसंपूज्य ॐगौर्यैनमः पद्मायैनमः शच्यैनमः मेधायैनमः सावित्र्यैनमः विजयायैनमः जयायैनमः देवसेनायैनमः स्वधायैनमः स्वाहायैनमः मातृभ्योनमःलोकमातृभ्योनमः हृष्ट्यैनमः पुष्ट्यैनमः आत्मकुलदेवतायैनमः इतिदेवमातृकाः सर्वोपचारैःसंपूज्य ॐभूर्भुवःस्वःगण

पतिसहिताःषोडशमातृकाःपूजिताःस्थक्षम्यतां श्रीर्मयिरमतां ॐरूपंदेहिजयंदेहिभाग्यंभगवतिदेहिमे पुत्रान्देहिधनंदेहिसर्वान्कामान्प्रदेहिमे इति ततोभित्तौउत्तरोत्तरक्रमेणपंचसप्तवारेखाःकुर्यात् अनेनक्रमेण ॐ वसोःपवित्रमसिशतधारंवसोःपवित्रमसिसहस्रधारंदेवस्त्वासवितापुनातु वसोःपवित्रेणशतधारेणसुप्वाकामधुक्षइतिप्रतिष्ठांकृत्वा रक्तसूत्रवस्त्रसहितपंचोपचारैःसंपूज्यप्रार्थयेत् ॐलक्ष्मीःश्रीश्चधृतिर्मेधाप्रजास्वाहासरस्वती सर्वेषुवृद्धिकार्येषुसप्तैताघृतमातरइति अथवा ललिताचउमागौरीअंबिकासलिलाश्रया भगाहीचभगाक्षीचसप्तैताघृतमातरः यद्वा ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा वाराहीचतथेंद्राणीचामुंडाःसप्तमातरः इति मातृपूजाभ्युदयिकप्रयोगः अथाभ्युदयिकश्राद्धं तच्च सपिंडकमपिंडकंवाकार्य्यं तत्रसौकार्य्यायाऽपिंडकमेवकार्य्यं तस्यरूपनारायणीयेविशेषः अग्नौकरणमर्घ्यंचावाहनंचावनेजनं पिंडश्राद्धेप्रकुर्वीतपिंडहीनेनिवर्त्तते यथाच पिंडनिर्वापरहितंयत्रश्राद्धंविधीयते स्वधावाचनलोपोस्तिविकरस्तुनलुप्यते अक्षयंदक्षिणास्वस्तिसौमनस्यंयथास्थितीति अथास्यसंक्षिप्तप्रयोगः ॐमद्यैकादश्यादिव्रतोद्यापनपूर्वांगत्वसांगतासिद्ध्यर्थंआभ्युदयिकश्राद्धमहंकरिष्ये ॐसत्यवसुसंज्ञकाविश्वेदेवा ॐभूर्भुवःस्वःइदंवःपाद्यं मातृपितामहीप्रपितामह्योनांदीमुख्यः ॐभूर्भुवःस्वःइदंवःपाद्यं ॐपितृपितामहप्रपितामहानांदीमुखाः ॐभूर्भुवःस्वइदंवःपाद्यं मातामहप्रमातामहवृद्धप्रमातामहानांदीमुखाः ॐभूर्भुवःस्वःइदंवःपाद्यं इदंसर्वंसव्येनैवकार्य्यं अत्रतिलार्थंस्तुयवैरेवकार्य्यंइतिशास्त्रसंप्रदायः सत्यवसुसंज्ञकानांविश्वेषांदेवानांॐभूर्भुवःस्वइदमासनंसुखासनं नांदीश्राद्धेक्षणौक्रियेतां तथाप्राप्नुतांभवंतौप्राप्नुवावः मातृपितामहीप्रपितामहीनांनांदीमुखीनां ॐभूर्भुवःस्वःइदमासनंसुखासनं नांदीश्राद्धेक्षणौक्रियेतां पितृपितामहप्रपितामहानां नांदीमुखानांॐभूर्भुवःस्वइदमासनंसुखासनं

नांदीश्राद्धे क्षणौक्रियेतां तथा प्राप्नुतांभवंतौप्राप्नुवावः ॐमातामहप्रमातामहवृद्धप्रमातामहानां नांदीमुखानां ॐभूर्भुवःस्वइदमासनंसुखासनंनांदीश्राद्धेक्षणौक्रियेतां तथाप्राप्नुतांभवंतौ प्राप्नुवावः ततोगंधादिदानं अत्रसर्वत्र युग्मब्राह्मणपूजनमतोद्विवचनोल्लेखः कार्यः सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्यॐभूर्भुवःस्वइदंगंधाद्यर्चनं स्वाहासंपद्यतांवृद्धिः मातृपितामहीप्रपितामहीभ्यः ॐभूर्भुवःस्वइदंगंधाद्यर्चनंस्वाहासंपद्यतांवृद्धिः ॐपितृपितामहप्रपितामहेभ्योनांदीमुखेभ्यः ॐभूर्भुवःस्वइदंगंधाद्यर्चनंस्वाहासंपद्यतांवृद्धिः मातामहप्रमातामहवृद्धप्रमातामहेभ्यःसपत्नीकेभ्योनांदीमुखेभ्यः ॐभूर्भुवःस्वइदंगंधाद्यर्चनंस्वाहा संपद्यतांवृद्धिः ततःपरिवेषणंकृत्वा गायत्र्याप्रोक्ष्य ॐपृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेऽमृतंजुहोमिस्वाहा इतिपात्रमालभ्य इदंविष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपाꣳसुरे सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्यइदंयुग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतांवृद्धिः मातृपितामहीप्रपितामहभ्योनांदीमुखभ्यइदंयुग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेणस्वाहा संपद्यतांवृद्धिः पितृपितामहप्रपितामहेभ्योनांदीमुखेभ्य इदंयुग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेणस्वाहा संपद्यतां वृद्धिः मातामहप्रमातामहवृद्धप्रमातामहेभ्योनांदीमुखेभ्यइदंयुग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेणस्वाहासंपद्यतांवृद्धिः ॐस्वस्तिनइंद्रोवृद्धश्रवाःस्वस्तिनः पूषाविश्ववेदाःस्वस्तिनस्तार्क्ष्योअरिष्टनेमिः स्वस्तिनोवृहस्पतिर्दधातु अनेन नांदीश्राद्धेन कर्मांगदेवताः प्रीयंतां अत्र पुरुषसूक्तादिजपःकार्यः नांदीश्राद्धंसुप्रोक्षितमस्तु शिवाआपःसंतु सौमनस्यमस्तु अक्षतंचारिष्टमस्तु नांदीमुख्योमातरःप्रीयंतां नांदीमुखाःपितरःपितामहाःप्रपितामहाःप्रीयंतां नांदीमुखामातामहाःप्रमातामहावृद्धप्रमातामहाःसपत्नीकानांदीमुखाःप्रीयंतां ततआशीःप्रार्थनम् गोत्रंनोवर्धतां दातारोनोभिवर्धंतां वेदाःसंतति

रेवच श्रद्धाचनोमाव्यगमत् वहुदेयंचनोअस्तु अन्नंचनोवहुभवेदतिथींश्चलभेमहि याचितारश्च नः संतु माचयाचिष्मकंचनेति संप्रार्थ्य ततोविप्रैः गोत्रंवोवर्द्धतांदातारोवोभिवर्धंतां वेदाःसंततिरेवच श्रद्धाचवोमाव्यगमत् वहुदेयंचवोअस्तु अन्नंचवोवहुभवेदतिथींश्चलभध्वंयाचितारश्चवःसंतुमाचयाचध्वंकंचनेति प्रत्युक्ते द्राक्षामलकादितन्निष्क्रयत्वेनदक्षिणांदद्यात् ओमद्यैकादश्यादिव्रतोद्यापनांगभूतविश्वेषांदेवानामाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमेफलमूले वनस्पतिदैवते ॥ तन्निष्क्रयभूतामिमां ॥ दाक्षिणां यथानामगोत्राय ॥ ब्राह्मणाय ॥ दातुमहमुत्सृजे ओमद्यकरिष्यमाणैकादश्यादिव्रतोद्यापनांगभूतकृतैतन्मातृपितामही प्रपितामहीनां ॥ नांदीमुखानां ॥ पितृपितामह प्रपितामहानां नांदीमुखानां मातामह ॥ प्रमातामह ॥ वृद्धप्रमातामहानां ॥ नांदीमुखानां ॥ सपत्नीकानामाभ्युदयिकश्राद्धप्रतिष्ठार्थ मिदं द्राक्षामलकादिनिष्क्रयरूपं द्रव्यं यथानामगोत्रेभ्यो ब्राह्मणेभ्योदातुमहमुत्सुजे वाजेवाजेवतवाजिनोधनेषु विप्राअमृताऋतज्ञाअस्य पिवतमादयध्वं यूयंयातस्वस्तिनःसदामेविश्वेदेवाःप्रीयंतामितिविसर्जयेत् ॥ इतिनांदीश्राद्धप्रयोगः ॥ अथोद्यापनप्रयोगः तत्रादावाचार्य्यादिवरणंकुर्य्यात् ओमद्येत्यादिदेशकालौसंकीर्त्यामुकगोत्रोमुकशर्माहंसर्वपापक्षयार्थंचतुर्वर्गफलसिद्ध्यर्थं यथाकालसमाचरितैकादश्यादिव्रतोद्यापनकर्मणि अमुकगोत्रममुकशर्माणंब्राह्मणमाचार्यत्वेनत्वामहंवृणे वृतोस्मीति प्रतिवचनं यथाविहितंकर्मकुरुकरवाणीतिआचार्येणोक्ते ततःप्रर्थना आचार्य्यस्तुयथास्वर्गेशक्रादीनांवृहस्पतिः तथात्वंममयज्ञेस्मिन्भवाचार्य्योद्विजोत्तम मंत्रमूर्तिर्भवान्नाथसंसारोच्छेदकारक देवपूजाविधानार्हांकुरुधर्म्यांगतिंचमे संसारभयभीतेनमयायज्ञःप्रवर्त्तितःप्रारब्धस्त्वत्प्रसादान्मेनिर्विघ्नोयंभवेदिह अथापरंवेदवेत्तारंब्राह्मणंगंधादिभिरभ्यर्च्य ब्रह्मत्वेनवृणुयात् ओमद्यैकादश्यादिव्रतोद्यापनयागकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तु

ममुकगोत्रममुकशर्माणंत्वांब्रह्मत्वेनाहंवृणे यथाचतुर्मुखोब्रह्मासर्वलोकपितामहः तथात्वंममयज्ञेस्मिन्ब्रह्माभव द्विजोत्तम त्वंनोगुरुःपितामातात्वंप्रभुस्त्वंपरायणं त्वत्प्रसादाद्यदेवात्रसर्वंमेस्यात्सुशोभनं आपद्विमोक्षणार्थायकुरुयज्ञमतंद्रितः ऋत्विग्भिःसहितःसर्वैःसंयतैः सुसमाहितैः आचार्य्येणचसंयुक्तःकुरुकर्मयथोदितमितिप्रार्थ्य पूर्वादिदिग्द्वारजापकान्वृणुयात् तत्रमंडपस्यपूर्वद्वारे भूमिदेवायनमः इत्यर्घ्यंदत्त्वा गंधादिभिःसंपूज्यवस्त्रालंकारादिकंहस्तेनगृहीत्वा ॐमद्यास्मिन्नुद्यापनकर्मणिपूर्वद्वारेशांतिपाठार्थंद्वारपालत्वेनत्वामहंवृणे वृतोस्मीतिप्रतिवचनांतेप्रार्थयेत् यजमानः ऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदैवतः अत्रिगोत्रश्चविप्रेंद्रऋत्विक्त्वंममखेभव शांतिपाठंमखेकुरु एवमन्यंविप्रंपूर्वद्वारेजापकत्वेनत्वामहंवृणेप्रार्थनंपूर्ववत् २ ततोमंडपदक्षिणद्वारेशांतिपाठार्थमेकं जापकत्वेनापरं विप्रं वृत्वाप्रार्थयेत् २ कातराक्षोयजुर्वेदस्त्रैष्टुभोविष्णुदैवतःवैशंपायनविप्रेंद्रःशांतिपाठंमखेकुरु ततोमंडपस्यपश्चिमद्वारे सामवेदिनौद्वौविप्रौगंधादिभिःसंपूज्यवृणुयात् शांतिपाठार्थमेकं जापकत्वेनचापरं २ वृत्वा प्रार्थयेत् सामवेदस्तुपिंगाक्षोजागतःशक्रदैवतः भारद्वाजस्तुविप्रेंद्रःशांतिपाठंमखेकुरु २ ऋत्विक्त्वंममखेभव २ ततोमंडपस्योत्तरद्वारेद्वावथर्ववेदिनौविप्रौगंधादिभिःसंपूज्य एकंद्वारपालत्वेन १ अपरंशांतिकाध्यायपाठार्थंवृत्वा प्रार्थयेत् बृहन्नेत्रोथर्ववेदोनुष्टुभोरुद्रदैवतः सुमंतुश्चापिविप्रेंद्रःशांतिपाठंमखेकुरु १ ऋत्विक्त्वंममखेभव २ एवंसर्वत्रद्वौद्वौब्राह्मणौवृत्वासंप्रार्थ्य ततश्चान्यंविद्वांसंविप्रंपूज्योपदेष्टृत्वेनवृत्वा सदस्यत्वेनैकमपरमपि वृत्वा ज्ञाननिष्ठान्कुलीनानन्यानपिवृत्वा सर्वानेवकृतांजलिःप्रार्थयेत् अस्ययागस्य निष्पत्त्यैभवंतोभ्यर्थितामया सुप्रसन्नैस्तुकर्त्तव्यमेतत्कर्मयथोदितं १ अस्मिन्कर्मणियेयेतुवृतागुरुमुखाद्विजाः सावधानाःप्रकुर्वंतुस्वंस्वंकर्मयथोदितं १ ततोवरणक्रमेणमधुपर्केणसर्वेषांविप्राणांयथाशास्त्रंपूजनंकुर्य्यात् आचार्य

ब्राह्मणौस्वगृह्योक्तविधानेनाऽवश्यमेवमधुपर्केणपूजनीयौ मधुपर्कविधानंचतुर्वेदविधानेनपृथक्लिखितं यथासंभवमंत्रयोजनीयं ततोयजमानः सप्तधान्योपरिकलशं आजिघ्रकलशंमह्यात्वेतिवक्ष्यमाणमंत्रैः कलशस्थापनविधिनासंस्थाप्य तदुपरिपूर्णादर्वीतिवक्ष्यमाणमंत्रेणधान्यपूर्णपात्रंन्यस्य तत्रग्रहान्सव्याहतिप्रणवपूर्वकैर्नाममंत्रैरावाह्य ॐभूर्भुवःस्वःसूर्य्यादिनवग्रहान् ब्रह्मवरुणसहितान्सदैवतकान्सपरिवारानहमत्रसंस्थापयामीतिसंस्थाप्यसंपूज्य पुष्पांजलिंदद्यात् ततआचार्य्यो रक्तवस्त्रखंडेदूर्वाक्षतसर्वपदाधिसुवर्णान्वितांपोटलिकांरक्षाविधिमंत्रेण यजमानहस्ते अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् अहींश्चसर्वांजंभयंत सर्वाश्चयातुधान्योधराचीःपरासुव इतिमंत्रेणबध्नीयात् ततोयजमानोयथाविहितंकर्मकुरुध्वमितिसर्वान्साचार्य्यान्ब्राह्मणान्ब्रूयात् तेच स्वंस्वंकर्म करवामइतिब्रूयुः पुनर्यजमानः संसारभयभीतेनह्ययंयज्ञःसुभक्तितः प्रारब्धस्त्वत्प्रसादेननिर्विघ्नोमेभवत्विहेति आचार्य्यंसंप्रार्थ्य आचारादचलग्रंथिंपत्न्यासहविधाय शंखरवेजायमानेसपरिच्छदोजलपूर्णकलशपुरःसरःसाचार्य्यर्त्विग्महामंडपंप्रदक्षिणीकृत्वातंप्रविशेत् ॐभद्रंकर्णेभिःशृणुयामदेवाःभद्रंपश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुरितिमंत्रेण तत्रयजमानाचार्य्यर्त्विजांपश्चिमद्वारेणप्रवेशः यजमानपत्न्यादक्षिणद्वारेणपूर्वद्वारेणमंडपमध्येद्रव्यानयनं दानीयद्रव्यस्यदक्षिणद्वारेण पूजासंभाराणामुत्तरद्वारेण एवंयजमानोमंडपंप्रविश्य महावेद्याःप्राङ्मुखोभद्रासनेसपत्नीकउपविशेत् ततआचार्य्यःपूर्वसंपादितपंचगव्येनापोहिष्ठामयोभुवइत्यृचाकुशेनचमंडपंप्रोक्ष्य अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं सर्वेषामविरोधेनब्रह्मकर्म समारभे १ यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वतः स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु इतिमंत्रेणश्वेतसर्षपविकरणेनभूतोत्सारणंविधाय देवाआयांतुयातुधानाअपयांतु विष्णोदेवयजनंरक्षस्वेतिरक्षांकृत्वा पंचपल्लवा

द्युपेतात्रिसूत्र्या कृणुष्वपाजइत्यादिरक्षोघ्नसूक्तमंत्रेणमंडपंसंवेष्ट्य ब्राह्मणैर्गंधादिकंग्राहयित्वा मंडपमनुमंत्रयेत् वितानेफलपुष्पाक्षतद्रव्याणिक्षिप्त्वा पूर्वादारभ्य मध्यगताश्चतस्रः स्थूणाः पूजयेत् ॐवसुदायैनमः १ ॐभद्रायैनमः२अदित्यैनमः३ नंदायैनमः ४ ॐभूर्भुवःवसुदामावाहयामीत्यावाह्य ॐवसुदायैनमः ५इतिपंचोपचारैः सर्वाएवपूजयेत ततोमंडपाग्नेयकोणादारभ्य ॐभूमिमावाहयामि भूम्यैनमः ६ पूर्वसंध्यायैनमः ७ मध्यसंध्यायैनमः ८ पश्चिमसंध्यायैनमः ९ गायत्र्यैनमः १० वृहत्यैनमः ११ अदित्यैनमः १२ विलग्नायैनमः १३ पौर्णमास्यैनमः १४ सिनीवाल्यैनमः १५ नंदायैनमः १६ मंडपस्यईशानकोणे प्रमथनायैनमः १ देवहूत्यैनमः२ शिवायैनमः ३ लक्ष्म्यैनमः ४ इतिमध्यस्तंभसहिताःकोणस्थूणाःपूजयेत् ततःसर्वेभ्योवंधनेभ्योनम इतिशाखोद्दंधनान्यभिमंत्र्य संपूज्य पश्चिमद्वारेण निर्गत्य पूर्वादितोरणपूजामारभेत् इतिमंडपानुमंत्रणं अथपूर्वे आयाहिवज्रसंकाशपूर्वद्वारेकृताधिप ऋग्वेदाधिपतेनाम्नासुशोभननमोस्तुते इतिद्वारदेवतामालभ्य अश्वत्थतोरणाय नमः ॐअग्निमीडेपुरोहितं यज्ञस्यदेवमृत्विजंहोतारंरत्नधातममित्यालभ्य ऋग्वेदंपूजयेत् प्राचींदिशंसमारभ्यसुदृढंनामतोरणं महावीर्यंमहाकायामिंद्रायुधसमप्रभं अस्मिन्महोत्सवेयज्ञेक्रतूनांप्रवरेशुभे १ एह्येहिअश्वत्थतोरण माल्यवत्पर्वतसहित ऋग्वेदाधिष्ठित इंद्रदैवत्य एनंयज्ञंरक्षसर्वविघ्नान्निवारय ऋग्वेदाधिष्ठिताय अश्वत्थतोरणायनमइतिगंधादिभिःसंपूज्य तस्यत्रिशूलशृंगेषु प्रादक्षिण्येन त्रीनादित्यान्पूजयेत् इंद्रायनमः १ धात्रेनमः २ भगायनमः३इत्यादित्रयंनाममंत्रैःसंपूज्य द्वारशाखयोर्वसुद्वयंपूजयेत् ध्रुवायवसवेनमः अध्वराय वसवेनमः तत्रशृंगपुशाखयोश्चवस्त्राणिवद्ध्वा शाखामूलयोर्धान्यपुंजोपरि वारिपूर्णौरत्नगर्भौवस्त्रयुगाच्छन्नौ प्रशांतशिशिरनामानौकलशौ जातवीजांकुरशरावपिहिताननौ आजिघ्रकलशमितिप्रतिष्ठाप्य प्रशांतकलशायनमः

अ०र० शिशिरकलशायनमः २ इतिगंधादिनासंपूज्य स्रक्चंदनादिनाऽलंकृत्य तत्रराहुबृहस्पती आवाह्य राहवेनमः
११८ बृहस्पतयेनमः २ एवंगंधादिनासंपूज्य दक्षिणतोरणपूजामारभेत् इतिपूर्वतोरणपूजा अथदक्षिणतोरणपूजा
नमस्तेधर्मराजायत्रेतायुगाधिपायच यजुर्वेदाधिदेवायसुभद्रद्वारदाक्षिणे इतिद्वारदेवतामावाह्य औदुंबरंविकटं
नामतोरणंपूजयेत् ओंइषेत्वोर्जेत्वावायवस्थदेवोवः सवितापार्पयतुश्रेष्ठतमायकर्मणे आप्यायध्वमग्न्यादेवभा
गमूर्जस्वतीप्रजापतिरनमीवा अयक्ष्मांमावस्थेतईशतमाद्‌शक्रूरुद्रस्यहेतिः पारितोवृणक्तुध्रुवाआस्मिन्गोपतौ
स्यातबह्वीर्यजमानस्यपशून्पाहि इत्यालभ्य यजुर्वेदंसंपूज्य दक्षिणांदिशमाश्रित्यविकटंनामतोरणं महावीर्यं
महाकायंभिन्नांजनसमप्रभं अस्मिन्महोत्सवेयज्ञेक्रतूनांप्रवरेशुभे एह्येहिऔदुंबरमहातोरण गंधमादनपर्वतस
हितयजुर्वेदाधिष्ठितयमदैवत्य एनं यज्ञं रक्ष सर्वविघ्नान्निवारय यजुर्वेदाधिष्ठितायविकटनाम्ने औदुंबरतोरणायन
मइतिगंधादिनापूजयित्वा शूलशृंगेषुत्रीन् आदित्यान् आदित्यायनमः १ मित्रायनमः २ वरुणायनमः ३ द्वार
शाखयोः सोमायवसवेनमः आप्यायवसवेनमः २ इतिनाममंत्रैर्गंधादिनासंपूज्य शृंगेषुशाखयोश्चवस्त्राणिबद्ध्वा
शाखामूलयोर्धान्यपुंजोपरिवारिपूर्णौपर्जन्याशोकनामानौकलशौ जातबीजांकुरशरावपिहिताननौ आजिघ्रकल
शमित्यादिनाप्रतिष्ठाप्य पर्ज्जन्यायनमः अशोकायनमः एवंगंधादिनाभ्यर्च्य स्रक्चंदनादिभिरलंकृत्य तोरणेसूर्य्य
यनमः१अंगारकायनमइतिगंधादिभिरर्चयेत् इतिदक्षिणतोरणपूजा अथपश्चिमतोरणपूजा ओंनमस्तेकामदेवाय
पश्चिमद्वाराधिपाय सामवेदाधिपत्वंहिनाम्नाकल्याणकारक इतिद्वारदेवतामावाह्य प्लाक्षंसुभीमंनामतोरणं ओंअग्न
आयाहिवीतयेगृणानोहव्यदातयेनिहोतासत्सिबर्हिषीत्यालभ्यसामवेदंपूजयेत् प्रतीचींदिशमाश्रित्यसुभीमंनाम
तोरणं महावीर्यमहाकायंसुवर्णसदृशप्रभं अस्मिन्महोत्सवेयज्ञेक्रतूनांप्रवरेशुभे ओंएह्येहिप्लाक्षतोरणविंध्यपर्वत

सहितसामवेदाधिष्ठितवरुणदैवतएनंयज्ञंरक्ष सर्वविघ्नान्निवारयसामवेदाधिष्ठितायप्लक्षतोरणायनमः इतिगंधादिभिःसंपूज्य त्रिशूलशृंगेषुत्रीन् आदित्यान्संपूजयेत् अर्यम्णेआदित्यायनमः १ अंशवेनमः २ विवस्वतेनमः ३ गंधादिभिरभ्यर्च्य द्वारशाखयोः वसुद्वयंपूजयेत् अनिलायनमः अनलायनमः २ गंधादिभिःसंपूज्य शृंगेषुशाखयोश्चवस्त्राणिवद्ध्वा शाखमूलयोर्धान्यपुंजोपरि भूतसंजीवनअमृतनामानौकलशौ जातवीजांकुरशरावपिहिताननौ आजिघ्रकलशमित्यादिनाप्रतिष्ठाप्य भूतसंजीवनायकलशायनमः अमृतनाम्नेकलशायनमः २ इत्येवं गंधादिभिरभ्यर्च्यस्त्रक्चंदनाऽलंकृतेतोरणे वुधायनमः १ शुक्रायनमः इत्यावाह्यपूजयेत् इतिपश्चिमतोरणपूजा अथोत्तरतोरणपूजा नमस्तेदिव्यरूपायअथर्वाधिपतेप्रभो कलेरधिपतेनाम्नामंगलंचोत्तरासन इतिद्वारदेवतामावाह्य उत्तरांदिशमाश्रित्यसुप्रभंनामतोरणं महावीर्यंमहाकायंशुद्धस्फटिकसन्निभं अस्मिन्महोत्सवेयज्ञेक्रतूनांप्रवरेशुभे वटवृक्षोद्भवंवाटंतोरणं ओंशन्नोदेवीरभिष्टये आपोभवंतुपीतये शंय्योरभिस्त्रवंतुन इत्यालभ्य अथर्ववेदंसंपूज्य ओंएह्येहिअथर्वाधिपतेनैयग्रोधतोरण हिमवत्पर्वतसाहितसोमदैवत्यैएनंयज्ञंरक्षसर्वविघ्नान्निवारय अथर्वाधिष्ठितायन्यग्रोधतोरणायनमः इतिगंधादिभिःसंपूज्यशृंगेषुत्रीन् आदित्यान् त्वष्ट्रेआदित्यायनमः १ सवित्रेनमः २ विष्णवेनमः इतिगंधादिभिरभ्यर्च्य द्वारशाखयोः प्रत्यूषायवसवेनमः १ प्रभासायवसवेनमः २ इतिवसुद्वयंगंधादिनाभ्यर्च्य शृंगेषुशाखयोश्चवस्त्राणिवद्ध्वा शाखामूलयोर्धान्यपुंजोपरिवारिपूर्णौरत्नगर्भौवस्त्रयुगाच्छन्नौ जातवीजांकुरशरावद्वयपिहितमुखौ धनप्रदश्रीप्रदनामानौकलशौ आजिघ्रकलशमित्यादिनासंस्थाप्य धनप्रदायकलशायनमः १ श्रीप्रदायकलशायनमः इतिगंधादिनाभ्यर्च्य स्त्रक्चंदनादिनाऽलंकृत्य सोमंशनिंकेतुंचावाह्यपूजयेत् सोमायनमः शनयेनमः केतवेनमः ३ एवंगंधादिभिःपूजयेत् इत्युत्तरतोरणपूजा सर्वतोरणेषुस्वसजातीयकाष्ठनिर्मितशूलानिधानं सर्वद्वारकलशानामुपरिधृत

पूरितदीपस्थापनंपूजनंच इतितोरणपूजा अथद्वारपूजा तत्रप्रथमं पूर्वद्वारमागत्य आजिघ्रेतिस्थापितेकलशद्वये इंद्रमावाहयेत् एह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरामरेश संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते इत्यावाह्य ॐत्रातारमिंद्रमवितारमिंद्रꣳ हवेहवेसुहवꣳशूरमिंद्रमाह्वयामिशक्रंपुरुहूतमिंद्रꣳ स्वस्तिनोमघवाधात्विंद्र इतिमंत्रेण गंधादिभिःसंपूज्य इंद्रःसुरपतिश्चैव वज्रहस्तोमहावलः शतयागाधिपोदेवस्तस्मैनित्यंनमोनम इतिनमस्कृत्य इंद्रआसांनेताबृहस्पतिर्दक्षिणायज्ञःपुरएतुसोमः देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रमितिपताकामालभ्य योमेदंडःपरापतद्वैहायसोधिभूम्यां तमहंपुनराददेआयुषेब्रह्मवर्चसायेति दंडमालभ्य ॐत्रातारमिंद्रमितिपुनःपठेत् ॐआशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनां संक्रंदनोनिमिषएकवीरः शतꣳसेनाअजयत्साकमिंद्र इतिमंत्राभ्यां पीतौ पताकाध्वजावुच्छ्रयेत् ॐइंद्राय सांगाय सपरिवारायैष सघृतोदनवलिर्नमः ॐभोभो इंद्र इमं सदीपं घृतोदनवलिंगृहाण ममसपरिवारस्य यजमानस्य आयुःकर्त्ता क्षेमकर्त्ता शांतिकर्त्ता वरदोभव लोकेशेमांपताकांचगंधपुष्पादिकंबलिं मया दत्तंगृहीत्वाचपाहियज्ञमिहस्थितः इतिबलिंसमर्पयेत् अनयैवरीत्यातत्तद्देवानुवाकेनसर्वत्रबलिर्देयः ततःशचीपतेगजारूढवज्रहस्तामराधिप पूर्वावकाशंयुष्माभिरक्षणीयंप्रयत्नतः इतिसंप्रार्थ्य तत्रैवकलशद्वये ऐरावतंदिग्गजमप्यावह्यपूजयेत् ऐरावतायदिग्गजायनमः द्वारशाखयोः भूर्लोकायनमः भुवोलोकायनमः २ पुनःआदित्यायनमः सोमायनमः २ ऊर्ध्वोदुंबरेऋग्वेदायनमः १ अधोवास्तुपुरुषायनमः २ इतिसंपूज्य ध्वजेकुमुदायनमः योमेदंडःपरापतद्वैहायसोधिभूम्यां तमहंपुराददेआयुषेब्रह्मणेब्रह्मवर्चसायेति ध्वजदंडमालभ्य दंडेहेतुकभैरवायनमः क्षेत्रपालायनमः ३ एवंनाममंत्रैर्गंधादिभिरभ्यर्च्य ऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदैवतः अत्रिगोत्रश्चविप्रेंद्र

ऋत्विक्त्वंमेमखेभवेति ऋग्वेदंध्यात्वा सांगंसपरिवारंगंधाद्युपचारैःपूजयेत् शैवव्रतोद्यापनेतुपूर्वद्वारे वामभागेनंदिनेनमः दक्षिणभागेमहाकालायनमः इतिद्वारपालावपिसंपूज्य तत्रजपः श्रीसूक्तं १ पावमानंच २ सोमसूक्तं ३ सुमंगलं ४ पौरुषं ५ रुद्रसूक्तंच ६ वामदेव्यंतथैवच ८ अग्निमीलिइत्यादीनेकविंशत्यनुवाकान् ९ तथा ऋग्वेदोक्तंशांतिकाध्यायमिति पूर्वद्वतौब्राह्मणौजपेतां इतिपूर्वद्वारपूजा २ अथाऽऽग्नेयकोणेगत्वा आचम्यएकंकलशंतत्रप्राग्वत्स्थापयित्वा तत्राग्निमावाहयेत् ॐएह्येहिसर्वामरहव्यवाहमुनिप्रवीरैरभितोभिजुष्टः तेजोवतालोकगणेनसार्धंममाध्वरंरक्षकवेनमस्ते १ इत्यग्निमावाह्य ॐअग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे देवांआसादयादिह १ इतिगंधाद्यैरुपचारैःसंपूज्य सर्वदेवमयोदेवोरक्तोवन्हिर्महाबलः सप्तजिव्होमहावीर्योनमोवैश्वानरायते इतिनमस्कृत्य अग्नआयाहिवीतयेगृणानोहव्यदातये निहोतासत्सिबर्हिषि इति रक्तध्वजपताके आलभ्य ॐत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवन्हितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत् ॐअग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवेदेवांआसादयादिह इतीमंमंत्रद्वयमुच्चार्य अग्नयेसांगायसपरिवारायएषदीपोघृतोदनबलिर्नमः भोभोअग्नेएनंसदीपंघृतोदनबलिंगृहाण यजमानस्यशांतिकर्त्ता क्षेमकर्ता तुष्टिकर्त्तावरदोभव इतिबलिंदत्त्वाप्रार्थयेत् नमस्तेअग्निरूपायनमोवैश्वानरायते चंडायचंडरूपायनमस्तेहव्यवाहनइति अत्राग्नेयकोणे पुंडरीकंदिग्गजंपूजयेत् ॐपुंडरीकायनमः १ इतिगंधादिनापूजयेत् इत्याग्नेयकोणपूजा ततो दक्षिणद्वारपूजा अथातोदक्षिणेगत्वाचम्यप्रतिद्वारकलशंपूर्ववत्स्थापितकलशद्वये धर्मराजमावाहयेत् एह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितधर्ममूर्त्ते शुभा[illegible]ानंदशुचामधीशाशिवायनःपाहिमखंमदीयम् १ दंडहस्तो यमोदेवोधर्माध्यक्षोमहाबलः आवाहयेधर्मराजंतस्मैप्रेतपतेनमः इत्यावाह्य ॐअसियमोअस्यादित्योअर्वन्नसि

तृप्तोगुह्येनव्रतेन असिसोमेनसमयाविपृक्तआहुस्तेत्रीणिदिविबंधनानीतिगंधाद्युपचारैःसंपूज्य यमायत्वासूर्यस्यत्वातपसेदेवस्यसवितामध्वानक्तुपृथिव्यासꣳस्पृशस्पाहि इतिपताकालंभः योमेदंडइतिदंडालंभनम् आयंगौःपृश्निरक्रमीदशदन्नातरंपुरःपितरंचप्रयंत्स्वइतिमंत्रेणश्यामध्वजपताके उच्छ्रयेत् सुगन्नुपंथाप्रदिशन्नएहिज्योतिष्मध्येह्यजरन्नआयुः अपैतुमृत्युरमृतम्मआगाद्वैवस्वतोनोअभयंकृणोतु इतिमंत्रंपठित्वा यमायसांगाय एषसदीपमाषभक्तबलिर्नमः भोयमएनंसदीपंमाषभक्तबलिंगृहाण यजमानस्यशांत्यादिकर्त्ताभव एवंमाषभक्तबलिंदत्वाप्रार्थयेत् वैवस्वतमहाबाहोनमस्तेधर्मसाक्षिणे शिवाज्ञापिहितोदेवदिशंरक्षभवानिति तस्मिन्नेवकलशद्वये वामनंदिग्गजंसंपूज्य वामनायनमः १ द्वारशाखयोःस्वर्लोकायनमः १ महर्लोकायनमः २ भौमायनमः १ बुधायनमः २ ऊर्ध्वोदुंबरेयजुर्वेदायनमः १ द्वारशाखयोःगोदावर्य्यैनमः १ कृष्णायैनमः २ उत्तरांगे गणेशायनमः १ श्रियैनमः २ अधोवास्तुपुरुषायनमः ध्वजेपुंडरीकाक्षायनमः योमेदंडइतिदंडमालभ्य तत्राअग्न्यास्यवेतालायनम इतिनाममंत्रैर्गंधादिनासंपूज्य बलिदानांतंविधाय कातराक्षायजुर्वेदस्त्रैष्टु भोविष्णुदैवतः वैशंपायनविप्रेंद्रऋत्विक्त्वंमेमखेभवेति यजुर्वेदंध्यात्वा ईषेत्वोर्जेत्वेतिमंत्रंपठित्वा गंधादिनार्चयेत् ३ शैवोद्यापने दक्षिणद्वारवामे गणेशायनमः दक्षिणभागेवृषभायनम इतिद्वारपालावपिसंपूज्य तत्रजपः आनोभद्रानुवाकश्च १ आशुःशिशानकस्तथा २ यद्देवात्रीणिचपठेत् ३ ततोष्टौचपुनंतुमां ४ अभिधाअसिसप्तैव ५ दीर्घायुस्तेऋचंपठेत् ६ द्यौःशांति ७ रेकाप्यायस्व ८ षट्पयःपृथिव्यामेकया ९ नमोऽस्तुसर्पेभ्यः १० आकृष्णेन ११ देवस्यत्वापृथक्पृथक् १२ नमःशंभव १३ इत्येकोग्निर्देवताक्रमात् १४ त्रातारमिंद्रमित्येका १५ सोमंराजानमेकया १६ अन्नपते १७ महइंद्रः ऋचंवार्चसमग्रकं १८ इतिदक्षिणद्वारपूजा अथनैर्ऋतेगत्वा आचम्य

अर्घंसंस्थाप्य पूर्ववत्स्थापितकलशेनिर्ऋतिमावाहयेत् ओंएह्येहिरक्षोगणनायकस्त्वंविशालवैतालपिशाचसंघैः म
माध्वरंपाहिशुभाधिनाथलोकेश्वरस्त्वंभगवन्नमस्ते १ सर्वप्रेताधिपोदेवोनिर्ऋतिर्नीलविग्रहः खड्गचर्मधरोनित्यंनै
र्ऋतायनमोनम इत्यावाह्य ओंमोषुण इंद्रान्नपृत्सुदेवैरस्तिहिष्मातेषुष्मिन्नवयः महश्चियस्यमीढुषोयव्याहवि
ष्मतोवंदतेगी इतिकृष्णपताकालंभः ओंएषतेनिर्ऋतेभागस्त्वंजुषस्वस्वाहेति कृष्णेध्वजपताकेउच्छ्रयेत् ओंअ
सुन्वंतयजमानमिच्छंस्तेनस्येत्यामन्विहितस्करस्य अन्यमस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु इतिगंधा
दिनानिर्ऋतिपूजनं ओंमोषुणइतिमंत्रंपठित्वा सांगायसपरिवारायनिर्ऋतये इमंकृष्णव्रीह्यन्नंपुराणघृतसहितं
बलिंगृहाण यजमानस्य शांत्यादिकर्त्ताभव इतिबलिंदत्त्वा ध्वजेवामनायदिग्गजायनमः १ योमेदं
डइतिध्वजदंडमालभ्य तत्राग्निजिह्वायक्षेत्रपालायनम इतिगंधादिनाबल्यंतपूजनंकृत्वा निर्ऋतिंखड्गहस्त
चसर्वलोकैकनायकं आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां राक्षसेभ्योहिरक्षार्थंभवानत्रप्रतिष्ठितः निर्वि
घ्नांयज्ञभूमिंत्वंकुरुष्वशवशासन इति निर्ऋतिं संप्रार्थ्य इति नैर्ऋत्यकलशपूजा अथपश्चिमद्वारपूजा
पश्चिमद्वारदेशेपूर्ववत्स्थापितकलशद्वयेवरुणमावाहयेत् एह्येहियादोगणवारिधीनांगणेनपर्जन्यगणेनसार्धंवि
द्याधरेंद्रामरगीयमानपाहित्वमस्मिन्भगवन्नमस्ते पाशहस्तात्मकोदेवोजलराश्यधिपोमहान् निम्नगा
मीतिविख्यातोवरुणायनमोनम इत्यावाह्य ओंतत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः
अहेडमानोवरुणेहवोध्युरुशꣳसमानआयुःप्रमोषीरिति गंधादिना संपूज्य पाशहस्तंचवरुणमंभसांप
तिमीश्वरं आवाहयामियज्ञेस्मिन्वरुणायनमोनम इति नमस्कृत्य ओंइमंमेवरुणश्रुधीहवमद्याचमृड
यत्वामवस्युराचके इति श्वेतपताकामालभ्य ओंउदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳश्लथाय

अथावयमादित्यव्रतेतवानागसोअदितयेस्यामइतिश्वेतौपताकाध्वजावुच्छ्रयेत् ॐत्वन्नोअग्नेवरुणस्यविद्वान् देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् इतिपठित्वा सांगायसपरिवारायवरुणायनवनीतयुतौदनबलिर्नमः भोवरुणइमंबलिंगृहाण यजमानस्यशांत्यादिकर्ताभवेति पूर्ववत्सदीपबलिदानं अपांपतिरितिआपोवैदेवदेवनिगद्यसेशमंनयाशुविघ्नानिनमोमकरवाहन इतिसंप्रार्थ्य तस्मिन्नेव कलशद्वये अंजनंदिग्गजंसंपूज्य अंजनायनमः द्वारशाखयोः जनलोकायनमः १ तपोलोकायनमः २ पुनः वृहस्पतयेनमः १ शुक्रायनमः २ ऊर्ध्वोदुंबरेसामवेदायनमः द्वारशाखयोः नर्मदायैनमः १ ताप्यैनमः २ उत्तरांगे गणेशायनमः १ श्रियैनमः २ अधोवास्तुपुरुषायनमः ध्वजेशंकुकर्णायनमः योमेदंडइतिध्वजदंडमालभ्य तस्मिन् कालायनमः क्षेत्रपालायनम इतिगंधादिबल्यंतंसंपूज्य सामवेदस्तुपिंगाक्षोजागतः शक्रदैवतः भारद्वाजस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव अत्रशैवोद्यापने प्रत्यग्द्वारेवामभागे भृंगीरिटयेनमः दक्षिणेस्कंदायनमः इतिद्वारपालावपिसंपूज्य तत्रजपः इंद्रायसामगायत १ अहस्मिप्रथमजा २ सेतूत्तरा ३ स्वादिष्ठया गायंतित्वांगायत्रिणः ५ कस्यतूनंकतमस्यामृतानां ६ सशुक्रिर्यवृहत्साम १ ज्येष्ठसाम ८ रथंतरं ९ तथाचसामवेदोक्तंशांतिपाठंपठेद्बुधः १० इतिपश्चिमद्वारपूजा अथवायव्यकलशपूजा ततोवायव्येगत्वा आचम्य पूर्ववत्स्थापितकलशेवायुमावाहयेत् एह्येहियज्ञेश्वररक्षणायमृगाधिरूढः सहसिद्धसंघैः प्राणाधिपः कालगतेः सहायगृहाणपूजांभगवन्नमस्ते वायुमाकाशगंदेवंपवनंमेघवाहनं आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां इत्यावाह्य तववायव्रतस्पतेत्वष्टुर्जामातरद्भुत अवाꣳस्यावृणीमहे इतिमंत्रेण गंधाद्युपचारैःसंपूज्य तस्मिन्नेवकलशेपुष्पदंतंदिग्गजमावाह्य पुष्पदंतायनम इतिसंपूज्य आनोनियुद्भिः शतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञं

वायोऽस्मिन्सदनेमादयस्वयूयंस्वास्तिभिः सदान इति पताकालंभः वायोयेतेसहस्रिणोरथासस्तेभिरागहिनियुत्वान्सोमपीतयेइति तववादयवृहतस्पतइतिवा धूम्रौपताकाध्वजावुच्छ्रयेत् आनोनियुद्भिरितिपठित्वा सांगायसपरिवाराय वायवे यवोदनबलिर्नमः भोवायोसदीपंयवोदनबलिंगृहाण यजमानस्यशांत्यादिकर्त्ताभवेतिपूर्ववद्बलिदानं ततोध्वजे सार्वभौमायनम इतिगंधादिभिः संपूज्य योमिदंडइतिध्वजदंडमालभ्य तस्मिन्सर्वनेत्रायक्षेत्रपालायनम इतिगंधादिनासंपूज्य प्राणिनांप्राणरूपोयोमहाबलपराक्रमः महावेगमृगारूढादिशं रक्षप्रभंजन इतिप्रार्थयेत् इतिवायव्यस्तंभपूजा अथोत्तरद्वारपूजा ततउत्तरदेशेगत्वा आचम्य अर्घ्यंसंस्थाप्य पूजासंकल्पंविधाय पूर्ववत्प्रतिद्वारशाखंस्थापितकलशद्वये सोममावाहयेत् एह्येहियज्ञेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्द्धं सर्वौषधीभिः पितृभिः सहैवगृहाणपूजांभगवन्नमस्ते नक्षत्राणांचसर्वेषांसोमोराजाप्रकीर्तितः रत्नांगीचमहाहस्तसोमराजायतेनम इत्यावाह्य उँआप्यायस्वसमेतुतेविश्वतःसोम वृष्ण्यंभवावाजस्यसंगथे इतिगंधादिनासंपूज्य सर्वनक्षत्रमध्येतुसोमोराजाप्रतिष्ठितः तस्मैदेवायसोमायनक्षत्रपतयेनमः उँसोमोधेनुꣳसोमोअर्वंतमाशुꣳसोमोवीरंकर्मण्यंददाति सादन्यंविदथ्यꣳसभेयंपितृश्रवणंयोददाशदस्मै इतिपताकालंभः उँवयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः प्रजावंतः सचेमहि ॥ इतिसुवर्णवर्णेध्वजपताके उच्छ्रयेत् वयꣳसोमेतिमंत्रेणगंधादिनासंपूज्य प्रियंगवबलिंसांगायसपरिवारायसोमायएषप्रैयंगवबलिर्नमः भोसोमइमंसदीपंप्रैयंगवबलिंगृहाण यजमानस्यशांत्यादिकर्त्ताभव इतिबलिंदत्वाप्रार्थयेत् प्रालेयांशोमहारूपनक्षत्राणामधीश्वर ओषधीनांप्रभोरक्षउदीचींत्वंसमाहितइति तस्मिन्नेवकलशेसार्वभौमंदिग्गजमावाह्य सार्वभौमायनम इति नाममंत्रेणसंपूजयेत् ततोद्वारशाखयोः सत्यलोकायनमः ध्रुवलोकायनमः २ पुनःशनैश्चरायनमः

राहुकेतुभ्यांनमः ऊर्ध्वौदुंबरे अथर्ववेदायनमः द्वारशाखयोः वेण्यैनमः पयोष्ण्यैनमः उत्तरांगेगणेशायनमःश्रियेनमः २ अधोवास्तुपुरुषायनमः ध्वजेसुमुखायनमः योमेदंडइतिमंत्रेणध्वजदंडालंभः तस्मिन्नेकपादायक्षेत्रपालायनम इतिनाममंत्रेणगंधादिनापूजयित्वा सुवर्णनयनोथर्वानुष्टुप्छंदस्तथाऋषिः वेदोवैतानगोत्रस्तुऋत्विक्त्वंमेमखेभवेत्यथर्ववेदंध्यात्वा ओंशन्नोदेवीरभीष्टयआपोभवंतुपीतयेशंय्योरभिस्रवंतुनइतिगंधाद्युपचारैः पूजयेत् शैवव्रतोद्यापनेतु उत्तरद्वारे वामभागे उमायैनमः दक्षिणेचंडेश्वरायनमः इतिद्वारपालावपिपूजयेत् तत्रजपः अथर्वांगिरसंचैव १ अथर्वशिरसंतथा २ तथैवशांतिकाध्यायं ३ पठेदुत्तरतः स्थितइत्युत्तरद्वारपूजा अथैशानकलशपूजा ततईशानस्तंभसमीपमागत्य आचम्य पूर्ववत्स्थापितकलशेईशानमावाहयेत् ओंएह्येहिविश्वेश्वरनस्त्रिशूलकपालखट्वांगवरेणसार्धं लोकेशयज्ञेश्वरयज्ञसिद्ध्यैगृहाणपूजांभगवन्नमस्ते सर्वविद्याधिपोदेवईशानोनामनामतः शूलपाणिर्महादेवस्त्रैलोक्यपतयेनम इत्यावाह्य ओंकद्रुद्रायप्रचेतसेमीढुष्टमायतपसे वोचेमशंतमंहृदे इतिगंधादिनासंपूज्य ओंनमः शंभवायचमयोभवायचनमः शंकरायचमयस्करायच नमःशिवायचशिवतरायचेति पताकामालभ्य ओंतमीशानंजगतस्तस्थुषस्पतिं धियंजिन्वमवसेहूमहेवयं पूषानोयथावेदसामसद्वृधरक्षितायुरदब्धः स्वस्तये इतिश्वेतौपताकाध्वजावुच्छ्रयेत् कद्रुद्रायेतिमंत्रंपठित्वा सांगायसपरिवारायेशानायसदीपंगवेधुक्बलिंसमर्पयामि भोईशानइमंसदीपंगवेधुक्बलिंगृहाण यजमानस्यशांत्यादिकर्त्तीभव इतिबलिंदत्त्वाप्रार्थयेत् रक्षणंकुरुमेदेवत्रिनेत्रायत्रिशूलिने वृषध्वजाययज्ञायनक्षत्रपतयेनमइति तस्मिन्नेवकलशेसुप्रतीकंदिग्गजमावाह्य सुप्रतीकायनम इतिसंपूज्य ध्वजेसुप्रतिष्ठितायनमः योमेदंडइतिध्वजदंडमालभ्य तस्मिन्भीमायक्षेत्रपालायनम इतिगंधादिना बल्यंतपूजनंविधायप्रार्थयेत् वृषस्कंधसमारूढं

शूलहस्तंत्रिलोचनं आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतामितीशानकलशपूजा ततोनैर्ऋत्यपश्चिमयोर्मध्ये कल्पिताधःप्रदेशे अनंतमावाहयेत् ॐएह्येहिपातालधरामरेंद्रनागांगनाकिन्नरगीयमान यक्षोरगेंद्रामरलोकसंघैरनंतरक्षाध्वरमस्मदीयम् १ पन्नगाधिपतिर्देवोयोनंतोनीलविग्रहः पातालेवसतेनित्यमनंतायनमोनम इत्यावाह्य ॐनमोस्तुसर्पेभ्योयेकेचपृथिवीमनु येंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनम इतिपताकालंभः ॐतद्विष्णोः परमंपदꣳसदापश्यंतिसूरयः दिवीवचक्षुराततं इतिमेघवर्णांपताकांध्वजावुच्छ्रयेत् आयंगौरितिमंत्रेणवा ॐ विष्णोर्नुकंवीर्य्याणिप्रवोचंयः पार्थिवानिविममेरजाꣳसियोअस्कभायदुत्तरꣳसधस्थंविचक्रमाणस्त्रेधोरुगायोविष्णवेत्वा इतिपठित्वा सांगायसपरिवारायअनंतायएषमाषभक्तबलिर्नमः ॐभोअनंतइमंमाषभक्तबलिंसदीपं गृह्ण यजमानस्यसपरिवारस्यशांत्यादिकर्त्ताभव इतिबलिंदत्वाप्रार्थयेत् योसावनंतरूपेणब्रह्मांडंसचराचरं पुष्पवद्धारयेद्दंतस्मैनित्यंनमोनम इतिनमस्कृत्य अनंतत्वादनंतस्त्वंफणेशाधिपतेहरे त्वयात्ररक्षणंकार्य्यंकृष्णनेत्रायतेनम इतिध्वजे योमेदंडइतिदंडमालभ्य तस्मिन्भैरवायक्षेत्रपालायनम इतिनाममंत्रेण गंधादिबल्यंतंपूजयेदिति इत्यनंतकलशपूजा ततःपूर्वेशानयोर्मध्येकल्पितोर्ध्वप्रदेशेप्राग्वत्स्थापितकलशेब्राह्मणमापादयेत् ॐएह्येहिसर्वाधिपतेसुरेंद्रलोकेनसार्धंपितृदेवताभिः सर्वस्यधातास्यमितप्रभावोरक्षाध्वरंनोभगवन्नमस्ते १ पद्मयोनिश्चतुर्मूर्त्तिर्वेदावासःपितामहः आयाहिब्रह्मलोकात्त्वंतस्मैब्रह्मात्मनेनम इत्यावाह्य ॐब्रह्मयज्ञानंप्रथमं पुरस्ताद्विसीमतःसुरुचोवेनआवः सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः इतिमंत्रेणसंपूज्य यद्देवा देवहेडनंदेवासश्चकृमावयं अग्निर्मातस्मादेनसोविश्वान्मुंचत्वंहसः इतिपताकालंभः ब्रह्मयज्ञानमंत्रेणैवरक्तांपताकाध्वजावुच्छ्रयेत् ततःसांगायसपरिवारायब्रह्मणेपायसबलिंदद्यात् भोब्रह्मन्इमंपायसबलिंगृहाण यजमानस्य

सपरिवारस्य शांत्यादिकर्त्ताभव इतिबलिंदत्त्वाप्रार्थयेत् ब्रह्मयोनिश्चतुर्मूर्तिर्वेदावासःपितामहः यज्ञाध्यक्षचतुर्वक्त्रतस्मैनित्यंनमोनम इतिपठित्वा पितामहजगत्श्रेष्ठकृष्णेशाठ्येमरूपिणे व्योमस्थायनमस्तुभ्यंरक्षस्वेमंमखंप्रभो इतिप्रार्थ्य ध्वजेसुप्रभायनमः योमेदंडइतिध्वजालंभः ध्वजदंडेभूतनाथायक्षेत्रपालायनम इतिगंधादिनाबल्यंतंपूजयेत् इतिब्रह्मपूजा ततआचम्यमंडपस्यमध्ये ब्रह्मसमीपेवा किंकिणीचामरमयूरपिच्छयुतोऽत्युच्चोषोडशहस्तदंडोदशहस्तदंडोवाविचित्रवर्णोमहाध्वजःस्थाप्यः मंत्राः इंद्रस्यवृष्णोवरुणस्यराज्ञ आदित्यानांमरुताꣳशर्धउग्रम् महामनसांभुवनच्यवानांघोषोदेवानांजयतामुदस्थादितिसंस्थाप्य ततः गणानांत्वागणपतिꣳहवामहे इत्यादिमंत्रेणगणपतिंसंपूज्य ॐनमोस्तुरुद्रेभ्योयेदिवियेषांवर्षमिषवःतेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्योनमोऽस्तुतेनोवंतुतेनोमृडयंतुतेनोयंद्विष्मोयश्चनोद्वेष्टितमेषांजंभेदध्म इत्यादिमंत्रत्रयेणदिक्षुविदिक्षुरुद्रान्संस्थाप्य तेभ्योबलिंदत्त्वा ईशानभागेसार्वभौतिकबलिंदद्यात् भूमौत्रिकोणंवृत्तंचतुरस्रंमंडलंविधाय तत्रफलपुष्पाद्युपेतंकृष्णशरादिबलिंनिधायहस्तेजलंगृहीत्वा अयश्चैवतयेलोकाअसुराश्चैवपन्नगाः सपत्नीपरिवाराश्चप्रतिगृह्णंत्विमंबलिं २ येकेचित्त्विहलोकेषुआगताबलिकांक्षिणः तेभ्योबलिंप्रयच्छामिनमस्कृत्यपुनःपुनः ३ बलिंगृह्णंत्विमंदेवाआदित्यावसवस्तथा मरुतोथाश्विनौदेवाःसुपर्णाःपन्नगाग्रहाः असुरायातुधानाश्चपिशाचामातरोनगाः शाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः जंभकाःसिद्धगंधर्वामालाविद्याधराःखगाः दिक्पालालोकपालाश्चयेचविघ्नविनायकाः जगतांशांतिकर्त्तारोब्रह्माद्याश्चसहर्षयः माविघ्नंमाचमेपापंमासंतुपरिपंथिनः सौम्याभवंतुमेतृप्तादेवाभूतगणास्तथा ७ इतिबलिंसमर्पयन्पठेत् अथैवंपूर्वभागेवबलिंदद्यात् त्रैलोक्येयानिभूतानिस्थावराणिचराणिच ब्रह्मविष्णुशिवैःसार्द्धंरक्षांकुर्वंतुतानिमे देवदानवगंधर्वाः

243

यक्षराक्षसपन्नगाः ऋषयोमनवोगावोदेवमातरएवच सर्वेममाध्वरेरक्षांप्रकुर्वंतुमुदान्विताः ब्रह्माविष्णुश्चरुद्रश्चक्षेत्रपालगणैःसह रक्षंतुमंडपंसर्वेघ्नंतुरक्षांसिसर्वत इतिरक्षोघ्नमंत्रान्पठित्वा संक्षेपेणबलिदानंकुर्य्यात् यथा पूर्वदिग्वासिदिक्पतिदिग्भूताधिपदिग्रुद्रादिग्मातृदिक्क्षेत्रपालेभ्योनमः इतिबलिंदत्वा तथैवमंडपदाक्षिणे दक्षिणदिग्वासिदिक्पत्यादिभ्योबलिदानम् २ तथैवपश्चिमादिग्वासिभ्योबलिदानं एवंचोत्तरदिग्वासिसर्वभूतेभ्योबलिदानं एवंसर्वतोबलिदानंविधाय आचम्य मंडपस्यषोडशस्तंभेषुदेवेभ्योनमः वंशेषुकिन्नरेभ्योनमः पृष्ठेषपन्नगेभ्योनमः इतिनमस्कृत्य अथवितानारोपणंपंचरात्रागमे नवेनाचित्रवस्त्रेणवितानंकारयेच्छुभं अथवाशुक्लवस्त्रेणवितानंकारयेदपिउत्तमाधममध्यंतुप्रमाणंतस्यकीर्तितं मंडपस्यप्रमाणेनश्रेष्ठंतस्याद्वितानकं मध्यमंवेदिमात्रंतुकनिष्ठंमंडलस्यतु ततोयजमानःसाचार्य्योहस्तौपादौप्रक्षाल्याचम्य प्राग्द्वारेणमंडपंप्रविश्य दक्षिणद्वारस्य पश्चिमत उपविश्य यथाविहितंकर्मकुरु इत्याचार्य्यंप्रेषयेत् इतिमंडपप्रतिष्ठा ततआचार्य्योमहावेद्युपरिफलपुष्पसेवितंवितानंदत्वा पश्चिमतउपविश्य आचम्य अर्घ्यंसंस्थाप्य प्राणानायम्य महावेद्युपरिसर्वतोभद्रंवाषोडशारंतुमंडलं पंचवर्णैःपूर्वोदितक्रमेणसंपाद्य शैवशाक्तादिव्रतोद्यापनेतुलिंगतोभद्रंसंपादयेत तत्रसर्वसाधारणं चतुर्लिंगतोभद्रं सर्वतोभद्रेदेवस्थापनंकुर्य्यात् ओमद्येहएकादश्यादिव्रतोद्यापनकर्मणिपूर्वांगत्वेनमंडलदेवतानामावाहनं स्थापनंपूजनंचाहंकरिष्ये इतिसंकल्प्य ओंप्रणवस्यब्रह्माऋषिर्दैवीगायत्रीछंदः परमात्मादेवतात्रिव्याहृतीनांविश्वामित्रजमदग्निभरद्वाजाऋषयः गायत्र्युष्णिगनुष्टुप्छंदांस्यग्निवायुसूर्यादेवतामंडलदेवतानामावाहनेविनियोगः तत्रमध्येब्रह्माणंस्थापयेत् ओंब्रह्मयज्ञानमितिगौत्तमोवामदेवऋषिर्ब्रह्मादेवतात्रिष्टुप्छंदः ब्रह्मस्थापनेविनियोगः ओंब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः सुबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसत

श्चविवः ओंब्रह्मणेनमः ब्रह्माणंस्थापयामि ततोमंडलाद्बहिः प्रागादिक्रमेणलोकेशान्स्थापयेत् तत्रप्रथमंपूर्वे वाप्यां ओंत्रातारमिंद्रमितिगौत्तमऋषिः त्रिष्टुप्छंदः इंद्रोदेवता इंद्रावाहनेविनियोगः त्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳशूरमिंद्रमाह्वयामशक्रंपुरुहूतमिंद्रꣳस्वस्तिनोमघवाधात्विंद्रः इंद्रायनमः इंद्रमावाहयेत् २ ततः आग्नेय्यांत्रिपदेखंडेद्वौ त्वन्नोअग्नेइत्यस्यहिरण्यस्तूपऋषि त्रिष्टुप्छंदःअग्निर्देवताअग्न्यावाहनेविनियोगः ओंत्वन्नोऽग्नेवरुणस्यविद्वान् देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवन्हितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् अग्नयेनमः अग्निमावाह्य ततोदक्षिणस्यांवाप्यां यमायत्वेतिविवस्वतऋषिः त्रिष्टुप्छंदः यमोदेवता यमावाहनेविनियोगः ओंयमायत्वामखायत्वासूर्यस्यत्वातपसेदेवस्त्वासवितामध्वानक्तुपृथिव्याःसꣳस्पृशस्पाहि आर्चैरसि शोचिरसितपोसि यमायनमः यममावाहयामि ४ ततोनैर्ऋत्ये त्रिपदे असुन्वंतमयजमानमिच्छस्तेन्यस्येत्यामन्विहितस्करस्य अन्यमस्मदिच्छसातइत्यानमोदेवीनिर्ऋतेतुभ्यमस्तुनिर्ऋतयेनमः निर्ऋतिमावाहयेत् ५ तत्वायामीतिशुनःशेफऋषिःत्रिष्टुप्छंदः वरुणोदेवता वरुणावाहनेविनियोगः ओंतत्वायामिब्रह्मणावंदमानस्तदाशास्ते यजमानोहविर्भिः अहेडमानोवरुणोहवोध्युरुपꣳशमानआयुःप्रमोषीः वरुणायनमः वरुणमावाहयेत् इतिपश्चिमे वाप्यां ततोवायव्येत्रिपदेखंडेद्वौ ओंआनोनियुद्भिरितिप्रजापतिर्ऋषिःत्रिष्टुप्छंदः वायुर्देवता वाय्वावाहनेविनियोगः ओंआनोनियुद्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञं वायोअस्मिन्त्सवनेमादयस्वयूयंयातस्वस्तिभिःसदानः वायवेनमः वायुमावा० ७ ततउत्तरे वाप्यांवयꣳसोमेत्यस्यसुवंधुऋषिर्गायत्रीछंदः सोमोदेवता सोमावाहनेविनियोगः ओंवयꣳसोमव्रतेतवमनस्तनूषुविभ्रतः प्रजावंतः सचेमहि सोमायनमः सोममावा० ८ ततऐशान्यां त्रिपदेखंडेद्वौ तमीशानमित्यस्यगौत्तमऋषिः जगतीछंदः ईशानोदेवता ईशानावाहनेविनियोगः ओंतमीशानंजग

तस्तस्थुषस्पतिंधियंजिन्वमवशेन्हमहेवयं पूषानोयथावेदसामसद्वृधे रक्षितायायुरदब्धःस्वस्तये ईशानाय नमः ९ ततईशानमध्ये भद्रे ओंसुगावोदेवाइत्यस्यप्रजापतिऋषिः त्रिष्टुप्छंदः वसवोदेवता वसूनामावाहने विनियोगः ओंसुगावोदेवाःसदना अकर्म्मजआजग्मेदꣳसवनंजुषाणाः भरमाणाहवमानाहवीꣳष्यस्मेधतवसवोवसूनिस्वाहा वसुभ्योनमः१०इंद्राग्निमध्येभद्रेरुद्रासꣳसृज्येतिप्रजापतिऋषिः त्रिष्टुप्छंदः रुद्रादेवतारुद्राणामावाहनेविनियोगः ओंरुद्राःसꣳसृज्यपृथिवींबृहज्ज्योतिः समिधीरेतेषांभानुरजस्रइच्छुक्रोदेवेषुरोचते रुद्रेभ्योनमः रुद्राना. ११ अग्नियममध्येभद्रे द्वादशादित्यान् यज्ञोदेवानामिति कुत्सऋषिः त्रिष्टुप्छंदः आदित्यादेवता आदित्यानामावाहनेविनियोगः यज्ञोदेवानांप्रत्येतिसुम्नमादित्यासोभवतामृडयंतः आवोर्वाचीसुमतीर्ववृत्यादꣳहोश्चिद्यावावारिवोवितरासदादित्येभ्यस्त्वा द्वादशादित्येभ्योनमः द्वादशादित्याना. १२ यमनिर्ऋतिभद्रेमरुतः मरुतोयस्येति गौत्तमऋषिर्गायत्रीछंदः मरुतोदेवताः मरुतामा. विनियोगः ओंमरुतोयस्याहिक्षये पाथादिवोविमहसःसमुगोपातमोजनः मरुद्भ्योनमः मरुतआवा. १३ निर्ऋतिवरुणयोर्मध्ये भद्रे विश्वान् देवान् ओमासश्चर्षणीत्यस्यमधुच्छंदऋषिः गायत्रीछंदः विश्वेदेवादेवता विश्वेदेवानामावाहनेविनियोगः ओमासश्चर्षणीधृतोविश्वेदेवासआगतदाश्वाꣳसोदाशुषःसुतं विश्वेभ्योदेवेभ्योनमः विश्वान्देवाना. १४ वरुणवायुमध्ये भद्रेसाध्यान्देवान् यज्ञेनयज्ञमितिनारायणऋषिः त्रिष्टुप्छंदः पुरुषोदेवता साध्यानामावाहनेविनियोगः यज्ञेन यज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् तेहनाकंमाहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः इतिसाध्येभ्योनमः साध्याना. १५ वायुसोममध्येभद्रेअश्विनौ यावांकशेत्यस्य मेधातिथिऋषिः यजुर्गायत्रीछंदः अश्विनौ देवता अश्विनोरावाहनेविनियोगः अश्विनौयावांकशामधुमत्यश्विनासूनृतावतितयायज्ञंतिम्मीक्षताम् अश्विना

तेजसाचक्षुःप्राणेनसरस्वतीवीर्य्यंवाचेंद्रोबलेनेंद्रायदधुरिंद्रियं अश्विभ्यांनमः अश्विनाआवाहयामि १६ सोमे
शानमध्येभद्रेस्कंदम् यदक्रंदःप्रथमंजायमानउद्यन्तसमुद्रादुतवापुरीषात् श्येनस्यपक्षाहरिणस्यबाहू उपस्तुत्यं
महिजातंतेअर्वन् स्कंदायनमः वृषभायनमः स्कंदमावाहयामि वृषभमावाहयामि १७ ब्रह्मेंद्रमध्येवल्ल्यांविष्णुं
इदंविष्णुरितिमेधातिथिऋषिः गायत्रीछंदः विष्णुर्देवता विष्णोरावाहनेविनियोगः इदंविष्णुर्विचक्रमेत्रेधानि
दधेपदंसमूढमस्यपाꣳसुरे विष्णवेनमः विष्णुमावाहयामि १८ ब्रह्माग्निमध्येबल्ल्यां गणपतिं गणानांत्वेति
प्रजापतिऋषिः त्रीणियजूꣳषिछंदांसि गणपतिर्देवता गणपत्यावाहनेविनियोगः गणानांत्वागणपतिꣳहवामहे
प्रियाणांत्वाप्रियपतिꣳहवामहे निधीनांत्वानिधिपतिꣳहवामहे वसोममआहमजानिगर्भधमात्वमजासिगर्भधं
गणपतयेनमः गणपतिमा. १९ ब्रह्मयममध्येवल्ल्यां पितॄन् आयांतुनइत्यस्यप्रजापतिऋषिः त्रिष्टुप्छंदः पित
रोदेवता पितॄणामावाहनेविनियोगः ॐआयांतुनःपितरःसोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः अस्मिन्यज्ञेस्वध
यामदंतोधिब्रुवंतुतेवंत्वस्मान् पितृभ्योनमः पितॄनावाहयामि २० ब्रह्मनिर्ऋतिमध्येवल्ल्यां गंधर्वाप्सरसः
ऋताषाडित्यस्यवामदेवऋषिःगायत्रीछंदः गंधर्वाप्सरसोदेवता गंधर्वाप्सरसामावाहनेविनियोगः ॐऋताषाडृ
तधामाग्निर्गंधर्वस्तस्यौषधयोऽप्सरसोमुदोनामताभ्यः गंधर्वाप्सरोभ्योनमः गंधर्वाप्सरसआवाहयामि १२
ब्रह्मवरुणमध्येवल्ल्यां सप्तमातॄः अंबेअंबिकेइत्यस्यप्रजापतिऋषिः अनुष्टुप्छंदः सप्तमातरोदेवताः सप्तमातॄ
णामावाहनेविनियोगः ॐअंबेअंबिकेअंबालिकेनमानयतिकश्चनसमस्त्यश्वकःसुभद्रिकांकांपीलवासिनीं सप्त
मातृभ्योनमः सप्तमातॄरावाहयामि २२ ब्रह्मवायुमध्येवल्ल्यांसर्पान् नमोस्तुसर्पेभ्यइत्यस्यप्रजापतिऋषिः
अनुष्टुप्छंदः सर्पादेवताः सर्पाणामावाहनेविनियोगः ॐनमोस्तुसर्पेभ्योयेकेचपृथिवीमनु येंतरिक्षेयेदिवितेभ्यः

2457

सर्पेभ्योनमः सर्पानामावा. २३ ब्रह्मसोममध्येवल्ल्यांदुर्गां जातवेदसइत्यस्यकश्यपऋषिः त्रिष्टुप्छंदः जातवेदोग्निर्देवतादुर्गावाहनेविनियोगः ॐजातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः सनः पर्षदातिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः दुर्गायैनमः ॐदुर्गामावाहयामि २४ ब्रह्मेशानमध्येवल्ल्यांपंचनदीः पंचनद्यइत्यस्यगृत्समदऋषिः अनुष्टुप्छंदः गंगादिनद्योदेवताः गंगाद्यावाहनेविनियोगः ॐपंचनद्यः सरस्वतीमपियंतिदेवस्रोतसःसरस्वतीतुपंचधासोदेशेभवत्सारित् पंचनदीरावाहयामि २५ ततोमंडलांतः ब्रह्मेशानदलादारभ्यदलाग्राष्टकेषु ऐशान्यांदलाग्रे अदितिर्द्यौरित्यस्य गौत्तमऋषिः त्रिष्टुप्छंदः दक्षाद्यादेवता दक्षाद्यावाहनेविनियोगः ॐअदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः विश्वेदेवाअदितिः पंचजनाऽअदितिर्जातमदितिर्जनित्वं दक्षादिभ्योनमः दक्षादीनामा. २६ पूर्वदलाग्रेपुरुषं सहस्रशीर्षेतिनारायणऋषिः अनुष्टुप्छंदःपुरुषोदेवता पुरुषावाहनेविनियोगः ॐसहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् सभूमिꣳसर्वतःस्पृत्वात्यतिष्ठद्दशांगुलम् पुरुषायनमः पुरुषमावाहयामि २७ आग्नेय्यांजातवेदसइत्यादिना दुर्गायैनमः दुर्गामावाहयामिनमः २८ दक्षिणस्यांदलाग्रेस्वधां उदीरितामित्यस्यशंखऋषिः अनुष्टुप्छंदः स्वधादेवता स्वधावाहनेविनियोगः ॐउदीरितामवरउत्परासउन्मध्यमाः पितरःसौम्यासः असुर्यईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु स्वधायैनमः स्वधामावा. २९ नैर्ऋत्यांदलाग्रेमृत्युं परंमृत्योइत्यस्यकोशिकोऋषिः त्रिष्टुप्छंदः मृत्युर्देवता मृत्योरावाहनेविनियोगः ॐपरंमृत्योअनुपरेहिपंथांयस्तेअन्यइतरोदेवयानात् चक्षुष्मतेशृण्वतेतेब्रवीमिमानः प्रजाꣳरीरिषामोतवीरान् मृत्यवेनमः मृत्युमावाहयामि इतिपश्चिमेदलाग्रे शेषं आयंगौरित्यस्य विश्वेदेवाऋषयः अनुष्टुप्छंदः शेषोदेवता शेषावाहनेविनियोगः ॐआयंगौःपृश्निरक्रमीदसदन्मातरंपुरः पितरंचप्रयंत्स्वः शेषायनमः

शेषमावाह. वायव्यांदलाग्रे इमंमेइत्यस्यशुनःशेफऋषिः गायत्रीछंदः वरुणोदेवता सप्तसागरावाहनेविनियोगः इमंमेवरुण श्रूधीहवमध्ध्याचमृडयत्वामवस्युराचके सप्तसागरेभ्योनमः सप्तसागरानावाहयामि ॥ ३२ ॥ उत्तरेदलाग्रे मरुतः ॥ मरुतोयस्येति गौत्तमऋषिर्गायत्रीछंदः मरुतोदेवता मरुतामावाहनेविनियोगः ॥ मरुतोयस्येतिमंत्रः पूर्ववत् मरुतश्रा. ॥ ३३ ॥ ब्रह्मणःपादमूलेगणपतिं ॥ गणानांत्वेति प्रजापतिऋषिर्यजुःछंदः गणपतिर्देवता गणपत्यावाहने विनियोगः गणानांत्वेति मंत्रः पूर्ववत्पठनीयः गणपतये. गणपतिमा. ॥ ३४ ॥ कर्णिकायांभूमिमावाहयेत् स्योनापृथिवीत्यस्यमेधातिथिर्ऋषिःगायत्रीछंदः पृथिवीदेवता पृथिव्यावाहनेविनियोगः स्योनापृथिवीनोभवानृक्षरानिवेशनीयच्छानःशर्मसप्रथाः पृथिव्यैनमः पृथिवीमावाहयामि ३५ तदुपरिमेरवेनमः मेरुमावाहयामि तत्परितःपूर्वादिक्रमेण पूर्वेऋग्वेदं अग्निमीलेपुरोहितंयज्ञस्यदेवमृत्विजंहोतारंरत्नधातमं ऋग्वेदायनमः ऋग्वेदमावाहयामि ३६ दक्षिणस्यांयजुर्वेदं ओंइषेत्वोर्जेत्वावायवस्थदेवोवःसविताप्रार्प्पयतुश्रेष्ठतमायकर्मण आप्यायध्वमघ्न्याइंद्रायभागंप्रजावतीरनमीवाऽअयक्ष्मामावस्तेनईशतमाघशꣳ सोध्रुवाअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि यजुर्वेदायनमः यजुर्वेदमावाहयामि ३८ ततःपश्चिमेसामवेदम् ओंअग्नआयाहिवीतयेगृणानोहव्यदातये निहोतासत्सुवर्हिषीति सामवेदायनम सामवेदमावाहयामि उत्तरेअथर्ववेदं ओंशन्नोदेवीरभिष्टयआपोभवंतुपीतयेशंय्योरभिस्रवंतुनः अथर्ववेदायनमः अथर्ववेदमावाहयामि ४० मंडलाद्बाह्ये प्रागादिक्रमेणलोकपालायुधानि ८ पूर्वेवज्रायनमः शक्तयेनमः दंडायनमः खड्गायनमः पाशायनमः अंकुशायनमः गदायैनमः त्रिशूलायनमः ४८ इत्यष्टदिक्षुक्रमेणपूज्यानि पुनःपूर्वादितः लोकपालानांवाहनानिअष्टौ ८

ऐरावतायनमः मेषायनमः महिषायनमः प्रेतायनमः मकरायनमः हरिणायनमः शिविकायैनमः वृषभायनमः ५७ पुनःपूर्वादिक्रमेणतद्वाह्ये गौत्तमायनमः भरद्वाजायनमः विश्वामित्रायनमः कश्यपायनमः अत्रयेनमः जमदग्नयेनमः वसिष्ठायनमः अरुंधत्यैनमः तद्वाह्येपूर्वादिक्रमेण आदित्यायनमः सोमायनमः वुधायनमः वृहस्पतयेनमः शुक्रायनमः शनैश्चरायनमः राहवेनमः पूर्वेशांतरालेकेतुभ्योनमः तद्वाह्येपूर्वादिक्रमेण ऐंद्यैनमः कौमार्य्यैनमः व्रह्माण्यैनमः वाराह्यैनमः चामुंडायैनमः माहेश्वर्य्यैनमः वैनायक्यैनमः लिंगतोभद्रेष्वपि एतादेवता अनेनैवक्रमेणावाह्यप्रतिष्ठाप्यपूजनीयाः इयानत्रविशेषः पूर्वे असितांगभैरवायनमः १ आग्नेय्यांरुरुभैरवायनमः २ दक्षिणेचंडभैरवायनमः ३ नैर्ऋत्येक्रोधभैरवायनमः ४ पश्चिमेउन्मत्तभैरवायनमः ५ वायव्येकपालिभैरवायनमः ६ उत्तरेभीषणभैरवायनमः ७ ईशानेसंहारभैरवायनमः ८ पुनःपूर्वादिदिक्षु पूर्वेभवायनमः १ आग्नेय्यांशर्वायनमः २ दक्षिणेपशुपतयेनमः ३ नैर्ऋत्येईशानायनमः ४ पश्चिमेरुद्रायनमः ५ वायव्येउग्रायनमः ६ उत्तरेभीमायनमः ७ ईशानेमहतेनमः ८ पुनःपूर्वादिदिक्षु अनंतायनमः १ वासुकयेनमः २ तक्षायनमः ३ कुलिकायनमः ४ कर्कोटकायनमः ५ शंखपालायनमः ६ कंवलायनमः ७ अश्वतरायनमः ८ ईशानेंद्रयोर्मध्ये ओंशूलायनमः १ इंद्राग्न्योर्मध्येचंद्रमौलयेनमः २ अग्नियमयोर्मध्येचंद्रमसेनमः ३ ओंयमनैर्ऋतयोर्मध्येवृषभध्वजायनमः ४ निर्ऋतिवरुणयोर्मध्येत्रिलोचनायनमः ५ वरुणवाय्वोर्मध्येशक्तिधरायनमः ६ वायुसोमयोर्मध्ये महेश्वरायननः ७ सोमेशानयोर्मध्ये शूलपाणयेनमः ततोवहिः ऐरावतादिवाहनानि ८ तद्वाह्येगौत्तमादिऋषीन् ८ तद्वहिःसूर्यादीन्ग्रहान् ९ पूर्वादिदिक्ष गणेशं दुर्गां २ क्षेत्रपालं महाकालंच ४ पूजयेदिति लिंगतोभ

द्रमंडलेदेवतापूजाविशेषः अथाग्निस्थापनं तद्यथा तत्रादावग्निकार्यार्थं यथोक्तलक्षणंस्थंडिलेविधाय ओमद्येहकर्तव्येस्मिन्नेकादश्यादिव्रतोद्यापनेकर्मांगत्वेनकुंडेस्थंडिलेवा अग्निस्थापनंपूजनंचकरिष्ये इतिसंकल्प्य पंच भूसंस्कारान् कुर्यात् त्रिभिर्दर्भैःस्थंडिलस्यपरिसमूहनंकृत्वा दर्भानैशान्यांत्यक्त्वा गोमयोदकेनोपलेपनम् स्रुवमूलेनांत्ररुल्लेखनं अनामिकांगुष्ठाभ्यां रेखाभ्यःपांशूद्धरणं प्रतिरेखंजलेनाभ्युक्षणम् तत्रकांस्यपात्रेण अग्निस्थापनम् एवंसंक्षिप्तसंस्कारान् विधाय संक्षेपेणैवाग्निपूजांकुर्यात् ॐभूर्भुवःस्वरग्नेइहागच्छइहातिष्ठ अत्र शतमंगलनामावरदोवाग्निःसंपूज्यः अग्नयेनम इतिगंधादिदक्षिणांतपूजांविधाय अग्निंप्रज्वलितंवंदेजातवेदंहुताशनं सुवर्णवर्णममलंसमिद्धंसर्वतोमुख मितिप्रणम्य अथग्रहस्थापनंकुर्यात् ओमद्यैकादश्यादिव्रतोद्यापनकर्मणिकर्मांगत्वेनास्यांवेद्यांसूर्यादिग्रहाणामधिदेवताप्रत्यधिदेवताविनायकादिपंचलोकपालसहितानां स्थापनंपूजनंचकरिष्ये ॐप्रणवस्यपरंब्रह्मऋषिः परमात्माअग्निर्देवता व्याहृतीनांक्रमेणविश्वामित्रजमदग्निभरद्वाजा ऋषयः अग्निवायुसूर्यादेवता गायत्र्युष्णिगनुष्टुप्छंदांसि सूर्यादिग्रहदेवतानांस्थापनंपूजनंचकरिष्ये आकृष्णेतिसूर्यमंत्रस्य हिरण्यस्तूपऋषिः सवितादेवता त्रिष्टुपछंदः सूर्यावाहनेविनियोगः ॐआकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतंमर्त्यंचाहिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॐभूर्भुवःस्वःकलिंगदेशोद्भवकाश्यपगोत्र सूर्यइहागच्छ इहातिष्ठेतिस्थापयेत् इतिमध्ये आग्नेये आप्यायस्वेतिगौतमऋषिः गायत्रीछंदः सोमोदेवता सोमावाहनेविनियोगः आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यंभवावाजस्यसंगथे ॐभूर्भुवःयमुनातीरोद्भव आत्रेय गोत्र अधिदेवताप्रत्यधिदेवता सहितसोम इहागच्छेत्यावाह्य इहातिष्ठेतिस्थापयेत ॐभूर्भुवः अग्निर्मूर्धेतिभौममंत्रस्य विरूपांगिरसऋषिरंगारकोदेवता गायत्रीछंदः भौमावाहनेविनियोगः ॐअग्निर्मूर्धादिवःककुत्पतिः

पृथिव्याअयंअपाꣳरेताꣳसिजिन्वति ॐभूर्भुवःस्वअवंतीसमुद्भवभारद्वाजगोत्र अधिदेवताप्रत्यधिदेवतासहितभौमइहागच्छ ॐउद्बुध्यस्वेतिबुधऋषिःसौम्योबुधोदेवता त्रिष्टुप्छंदः बुधावाहनेविनियोगः उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसꣳसृजेथामयंच अस्मिन्सधस्थेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ॐभूर्भुवःस्वःमगधदेशोद्भवआत्रेयगोत्रअधिदेवताप्रत्यधिदेवतासहितबुधइहागच्छ ॐबृहस्पते इतिमंत्रस्य गृत्समदऋषिः बृहस्पतिर्देवता। त्रिष्टुप्छंदः बृहस्पत्यावाहनेविनियोगः ॐबृहस्पतेअतिअर्य्योअर्हाद्युमद्विभातिक्रतुमज्जनेषु यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधेहिचित्रं ॐभूर्भुवःस्वःसिंधुदेशोद्भव आंगिरसगोत्रअधिदेवताप्रत्यधिदेवतासहितबृहस्पतेइहागच्छ ॐअन्नात्परिस्रुतइतिभरद्वाजऋषिः शुक्रोदेवता द्विपदाविराट्छंदःशुक्रावाहने विनियोगः ॐअन्नात्परिस्रुतोरसंब्रह्मणाव्यपिबत्क्षत्रंपयःसोमंप्रजापति ऋतेनसत्यमिंद्रियंविपानꣳशुक्रमंधसः इंद्रस्यैंद्रियमिदम्पयोमृतंमधु ॐभूर्भुवःस्वःभोजकटदेशोद्भवभार्गवगोत्रअधिदेवताप्रत्यधिदेवतासहितशुक्र इहागच्छ ॐशन्नोदेवीतिशनिमंत्रस्यसिंधुद्वीपऋषिः शनिर्देवत।गायत्रीछंदः शन्यावाहने विनियोगः ॐशन्नोदेवीरभीष्टयआपोभवंतुपीतयेशंय्योरभिस्रवंतुनः ॐभूर्भुवःस्वःसौराष्ट्रदेशोद्भवकाश्यपगोत्रअधिदेवताप्रत्यधिदेवतासहितशनेइहागच्छ ॐकयान इतिमंत्रस्य वामदेवऋषिःराहुर्देवतागायत्रीछंदः राहोरावाहनेविनियोगः ॐकयानश्चित्रआभुवदूतीसदावृधः सखाकयाशचिष्ठयावृतः ॐभूर्भुवः स्वःराटिकापुरोद्भव पैठीनसिगोत्र अधिदेवताप्रत्यधिदेवतासहितराहोइहागच्छइहतिष्ठ केतुंकृण्वन्नितिकेतुनंत्रस्य मधुछंदऋषिः केतवोदेवता केतूनामावाहनेविनियोगः केतुंकृण्वन्नकेतवेपेशोमर्य्याअपेशसेसमुषद्भिरजाथाः ॐभूर्भुवः स्वः अंतर्वेदीसमुद्भवजैमिनिगोत्रअधिदेवताप्रत्यधिदेवतासहितकेतोइहागच्छइहतिष्ठ इतिग्रहा

णांस्थापनंविधाय गंधपुष्पाक्षतैर्यजेत् ओँसूर्यायनमः १ ओँचंद्रमसेनमः २ ओँभौमायनमः ३ ओँबुधायनमः ४ वृहस्पतयेनमः ५ ओँशुक्रायनमः ६ ओँशनैश्चरायनमः ७ ओँराहवेनमः ८ ओँकेतवेनमः ९ इतिनाममंत्रैर्गंधपुष्पाक्षतधूपदीपनैवेद्यदक्षिणावासोभिर्यथासंभवंपूजयेत् अथाधिदेवताः श्वेतपुष्पाक्षतैः क्रमात्सूर्यादीनांदक्षिणतः स्थापयेत् त्र्यंबकमित्यस्यवसिष्ठऋषिः रुद्रोदेवता अनुष्टुप्छंदः रुद्रावाहने विनियोगः ओँत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ओँभूर्भुवःस्व ईश्वरइहागच्छ श्रीश्चतेइत्युत्तरनारायणऋषिः उमादेवता त्रिष्टुप्छंदः उमावाहनेविनियोगः ओँश्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणि रूपमश्विनौव्यात्तं इष्णन्निषाणामुम्मइषाणसर्वलोकम्मइषाण ओँभूर्भुवः स्वउमेइहागच्छ ओँयदक्रंदइतिभार्गवजमदग्निदीर्घतमसऋषयः स्कंदोदेवता त्रिष्टुप्छंदः स्कंदावाहनेविनियोगः ओँयदक्रंदः प्रथमंजायमानउद्यत्समुद्रादुतवापुरीषात् श्येनस्यपक्षाहरिणस्यवाहू उपस्तुत्यंमहीजातंतेअर्वन् ओँभूर्भुवः स्वः स्कंदइहागच्छ ओँविष्णोरराटमितिप्रजापतिऋषिः विष्णुर्देवता यजुः छंदः विष्णोरावाहनेविनियोगः विष्णोरराटमसिविष्णोः स्नप्त्रेस्थोविष्णो स्यूरसि विष्णोर्ध्रुवोसिवैष्णवमसिविष्णवेत्वा ओँभूर्भुवः स्वः विष्णोइहागच्छ. ४ ओँब्रह्मयज्ञानमितिब्रह्माऋषिः त्रिष्टुप्छंदः ब्रह्मादेवता ब्रह्मावाहनेविनियोगः ब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनआवः सुबुध्न्या उपमाअस्यविष्ठाः सतश्चयोनिमसतश्चविव ओँभूर्भुवःस्वः ब्रह्मन् इह। गच्छ. ७ त्रातारमित्यस्यगर्गऋषिरिंद्रोदेवता जगतीछंदः इंद्रावाहनेविनियोगः ओँत्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳशूरमिंद्रमाव्हयामिशक्रं पुरुहूतमिंद्रꣳ स्वस्तिनोमघवाधात्विंद्रः ओँभूर्भुवः स्वः इंद्र इहागच्छ. ६ यमायत्वाइतिभार्गवजमदग्निदीर्घतमसऋषयःत्रिष्टुप्छंदः यमोदेवता यमावाहनेविनियोगः ओँयमाय

त्वांगिरसेस्वाहा स्वाहा घर्मायस्वाहाघर्मापित्रे ऊँभूर्भुवः स्वः यमइहागच्छ. ७ ऊँकार्षीरसिइतिदध्यंगाथर्वण
ऋषिः अनुष्टुप्छंदः कालोदेवता कालावाहनेविनियोगः ऊँकार्षीरसिसमुद्रस्यत्वाक्षित्याउन्नयामि समापो
अद्भिरग्मतसमोषधीभिरोषधीः ऊँभूर्भुवःस्वः कालमावाहयामि कालइहागच्छ- चित्रावसोइतिप्रजापतिर्ऋषिः
जगतीछंदः चित्रगुप्तोदेवता चित्रगुप्तावाहनेविनियोगः ऊँचित्रावसोस्वस्तितेपारमशीय संत्वमग्नेसूर्यस्यव
र्चसागथाः समृषीणास्तुतेन ऊँभूर्भुवः स्वः चित्रगुप्तइहागच्छ- ८ अथप्रत्यधिदेवतानांस्थापनं ऊँअग्निंदूत
मितिविरूपाक्षऋषिःअग्निर्देवता अनुष्टुप्छंदः अग्न्यावाहनेविनियोगः ऊँअग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे
देवांआसादयादिह ऊँभूर्भुवः स्वः अग्नेइहागच्छ.१ ऊँअप्सुमेतिमेधातिथिर्ऋषिः आपोदेवता अनुष्टुप्छंदः
अपामावाहनेविनियोगः ऊँअप्सुमेसोमोअब्रवीदंतविश्वानिभेषजा अग्निंचविश्वसंभवमापश्चविश्वभेषजीः ऊँ
भूर्भुवः स्वआपइहागच्छत २ ऊँस्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः भूमिर्देवता गायत्रीछंदः भूमेरा
वाहनेविनियोगः ऊँस्योनापृथिवीनोभवानृक्षरानिवेशनीयच्छानः शर्मसप्रथा ऊँभूभुर्भुवः स्वः भूमेइहाग
च्छ॰ ३ इदंविष्णुरितिमेधातिथिर्ऋषिः विष्णुर्देवता गायत्रीछंदः विष्णोरावाहनेविनियोगः ऊँइदंविष्णुर्विच
क्रमे त्रेधानिदधेपदं समूढमस्यपांसुरे ऊँभूर्भुवः स्वः विष्णोइहागच्छ. ४ इंद्रश्रेष्ठाणीतिगृत्समदऋषिः इं
द्रोदेवता त्रिष्टुप्छंदः इंद्रावाहनेविनियोगः ऊँइंद्रश्रेष्ठाएिद्रविणानिधेहिचित्तंदक्षस्यसुभगत्वमस्मै ऊँभूर्भुवः
स्वः इंद्रइहागच्छ.५ ऊँइंद्राणीतिवृषाकपिर्ऋषिः इंद्राणीदेवता पंक्तिश्छंदः इद्राण्यावाहनेविनियोगः ऊँइंद्रा
णीमासुनारिषुसुभगामहश्रवं नह्यस्याअपरंनजसामरतेपतिविश्वस्मादिंद्रउत्तरः ऊँभूर्भुवः स्वइंद्राणिइहागच्छ ६
ऊँप्रजापतेरितिहिरण्यगर्भऋषिः प्रजापतिर्देवता त्रिष्टुप्छंदः प्रजापत्यावाहनेविनियोगः ऊँप्रजापतेनत्वदेता

न्यन्योविश्वारूपाणिपरिताबभूव यत्कामास्तेजुहुमस्तन्नोअस्त्वयममुष्यपितावयꣳस्यामपतयोरयीणां ॐभूर्भुवः स्वः प्रजापते इहागच्छ ७ ॐनमोस्तुसर्पेभ्यइतिदेवाऋषयः सर्पादेवता अनुष्टुप्छंदः सर्पाणामावाहनेविनियोगः ॐनमोस्तुसर्पेभ्योयेकेचपृथिवीमनु येअंतरिक्षेयेदिवितेभ्यः सर्पेभ्योनमः ॐभूर्भुवः स्वः सर्पाइहागच्छत ८ ॐब्रह्मयज्ञानमिति प्रजापतिर्ऋषिः ब्रह्मादेवता त्रिष्टुप्छंदः ब्रह्मावाहनेविनियोगः ॐब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनआवः सबुध्न्याउपमाअस्यविष्ठा सतश्चयोनिमसतश्चविवः ॐभूर्भुव स्वः ब्रह्मन्इहागच्छ इहतिष्ठ. ९ इतिप्रत्यधिदेवतानामावाहनंस्थापनंच नाममंत्रैस्सर्वेष.पूजाकार्य्या ईश्वरायनमः ॐउमायैनमः ॐस्कंदायनमः ॐविष्णवेनमः ॐब्रह्मणेनमः ॐइंद्रायनमः ॐयमायनमः ॐकालायनमः ॐचित्रगुप्तायनमः ९ इत्यधिदेवतापूजनम् अथप्रत्यधिदेवतानां ॐअग्नयेनमः ॐअद्भ्योनमः ॐभूम्यैनमः ॐविष्णवेनमः ॐइंद्रायनमः ॐप्रजापतयेनमः ॐसर्पेभ्योनमः ॐब्रह्मणेनमः इतिप्रत्यधिदेवतापूजनं गंधपुष्पाक्षतधूपदीपनैवेद्यदक्षिणांकार्य्यं अथविनायकादिपंचलोकपालानांस्थापनं ॐगणानांत्वेतिप्रजापतिऋषिः गणपतिर्देवता यजुः छंदः गणपत्यावाहनेविनियोगः ॐगणानांत्वागणपतिꣳहवामहे प्रियाणांत्वाप्रियपतिꣳहवामहे निधीनांत्वानिधिपतिꣳहवामहे वसोममआहमजानिगर्भधमात्वमजासिगर्भधम् ॐभूर्भुवः स्वः गणपतेइहागच्छ. ॐअंबेअंबिकेइतिप्रजापतिर्ऋषिः दुर्गादेवता अनुष्टुप्छंदः दुर्गावाहनेविनियोगः ॐअंबेअंबिकेअंबालिके नमानयतिकश्चनसमस्स्यश्वकः सुभद्रिकांकांपीलवासिनीम् ॐभूर्भुवः स्वः दुर्गेइहागच्छ. २ ॐवातोवामनोवातिगंधर्वाऋषयः उष्णिक्छंदः वातोदेवता वाय्वावाहनेविनि॰ ॐवातोवामनोवागंधर्वाः सप्तविष्ठꣳशतिः तेअग्रेश्वमयुञ्जंस्ते अस्मिञ्जवमादधुः ॐभूर्भुवः स्वः वायोइहागच्छ ३ ऊर्ध्वऊषणइतिप्रजापति

ऋषिः अनुष्टुप्छंदः आकाशोदेवता आकाशावाहने विनियोगः ऊर्ध्वऊषणऊतयेतिष्ठादेवोनःसविता ऊर्ध्वोवा
जस्यसनितापदंजिभिर्वाघद्भिर्विह्वयामहे ओंभूर्भुवस्स्वःआकाशइहागच्छ. ४ यावांकशेत्यस्यमेधातिथिर्ऋषिः अ
श्विनौदेवते यजुर्गायत्रीछंदः अश्विनोरावाहनेविनियोगः ओंयावांकशामधुमत्यश्विनासूनृतासोतयायज्ञंमिमि
क्षितम् ओंभूर्भुवःस्वःअश्विनौइहागच्छतं ५ इत्यावाह्यस्थापनंविधाय ओंविनायकायनमः १ ओंदुर्गायैन
मः २ ओंवायवेनमः ३ ओंआकाशायनमः ४ ओंअश्विभ्यांनमः ५ इतिगंधादिदक्षिणांतं पूजयेत् अथसदा
चारप्राप्तमत्रापिदिक्पालस्थापनंलिख्यते पूर्वेत्रातारमिंद्रमितिगार्ग्यऋषिरिंद्रोदेवता त्रिष्टुप्छंदःइंद्रावाहनेविनि
योगःओंत्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳशूरमिंद्रमाह्वयामिशक्रंपुरुहूतमिंद्रꣳस्वस्तिनोमघवाधात्विंद्रः ओं
भूर्भुवःस्वःइंद्रइहागच्छ. १ ओंअग्निंदूतमितिविरूपाक्षऋषिरनुष्टुप्छंदः अग्निर्देवता अग्न्यावाहनेविनियोगः
ओंअग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे देवाँआसादयादिह ओंभूर्भुवःस्वःअग्नेइहागच्छ. २ ओंयमायत्वेतिभार्गवज
मदग्निदीर्घतमसऋषयस्त्रिष्टुप्छंदः यमोदेवता यमावाहनेविनियोगः ओंयमायत्वांगिरस्वतेपितृमतेस्वाहास्वा
हाघर्मायस्वाहाघर्मःपित्रे ओंभूर्भुवःस्वःयमइहागच्छ. ३ ओंएषतेनिर्ऋतइतिवरुणऋषिर्यजुःछंदः निर्ऋतिर्देवता
निर्ऋत्यावाहनेविनियोगः ओंएषतेनिर्ऋतेभागस्त्वंजुषस्वस्वाहाग्निनेत्रेभ्योदेवेभ्यः पुरःसद्भ्यःस्वाहा यमनेत्रेभ्यो
देवेभ्योदक्षिणासद्भ्यःस्वाहा विश्वेदेवनेत्रेभ्योदेवेभ्यःपश्चात्सद्भ्यःस्वाहा मित्रावरुणनेत्रेभ्योदेवेभ्योवामरुन्नेत्रेभ्यो
वादेवेभ्यउत्तरासद्भ्यःस्वाहा सोमनेत्रेभ्योदेवेभ्यउपरिसद्भ्योदेवेभ्यःस्वाहा ओंभूर्भुवःस्वःनिर्ऋतेइहागच्छ. ओंइमंमे
इति शुनःशेफऋषिर्गायत्रीत्रिष्टुप्छंदः वरुणोदेवता वरुणावाहनेविनियोगः ओंइमंमेवरुणश्रुधीहवमद्याचमृडय
त्वामवस्युराचके ओंभूर्भुवःस्वःवरुणइहागच्छ. ५ ओंवातोवामनोवाइतिगंधर्वाऋषयः उष्णिक्छंदः वातोदेवता

पुस्तकालय
गुरुकुल कांगड़ी

वाय्वावाहनेविनियोगः ओंवातेवामनोवागंधर्वाःसप्तविꣳशतिःतेऽग्रेश्वमयुंजंस्तेअस्मिन्जवमादधुः ओंभूर्भुवःस्वः वायोइहागच्छ. ६ ओंवयꣳसोमव्रतेतिवंधुऋषि गायत्रीछंदः कुवेरोदेवता कुवेरावाहनेविनियोगः ओंवयꣳसोमव्रतेतवमनस्तनूषुविभ्रतःप्रजावंतःसचेमहि ओंभूर्भुवःस्वः कुवेरइहागच्छ. ७ ओंतमीशानमितिगौत्तमऋषिर्जगती छंदः ईशानोदेवता ईशानावाहनेविनियोगः ओंतमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयम् पूषानो यथावेदसामशद्वृधेरक्षितापायुरदब्धःस्वस्तये ओंभूर्भुवःस्वःईशानइहागच्छ. ८ ओंब्रह्मयज्ञानमिति ब्रह्माऋषिः त्रिष्टुप्छंदः ब्रह्मादेवता ब्रह्मावाहनेविनियोगः ओंब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः सुबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चऽविवः ओंभूर्भुवःस्वःब्रह्मन्इहागच्छ. ९ ओंनमोस्तुसर्पेभ्यइति देवाऋषयः अनुष्टुप्छंदः सर्पावाहनेविनियोगः ओंनमोस्तुसर्पेभ्योयेकेचपृथिवीमनु येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः ओंभूर्भुवःस्वःअनंतइहागच्छ·१० इतिप्रत्येकमावाह्य प्रतिष्ठाप्य प्रणवादिनमोंतैर्नाममंत्रैः पृथक्पृथक्पूजयेत् ओंइंद्राय नमः १ ओंअग्नयेनमः२ ओंयमायनमः ३ ओंनिर्ऋतयेनमः ४ ओंवरुणायनमः५ ओंवायवेनमः६ ओंकुवेरायनमः ७ ओंईशानायनमः ८ ओंब्रह्मणेनमः ओंअनंतायनमः १० इतिगंधादिदक्षिणादानांतंपूजयेत् प्रार्थना ओंब्रह्मामुरारिस्त्रिपुरांतकारीभानुःशशीभूमिसुतोबुधश्च गुरुश्चशुक्रःशनिराहुकेतवःसलोकपालाःशुभदाभवंतु इतिप्रार्थनानमस्कार: अथकलशस्थापनम् ततोवेदिकाया ईशानदिग्भागे दध्यक्षतविभूषितं चूताश्वत्थवटोदुंवरप्लवपल्लवसंयुक्तं फलवस्त्रयुगान्वितं अंतःप्रक्षिप्तपंचरत्नंशुभंनिर्मलतीर्थवारिपरिपूर्णं सप्तमृत्तिकासर्वौषधिसमेतंदृढं कलशमक्षतानामुपरिस्थापयेत् तत्रक्रमः आपोहिष्ठेतिऋक्त्रयस्यसिंधुद्वीपऋषिर्गायत्रीछंदः आपोदेवता कलशार्चनार्थे भूमिप्रोक्षणेविनियोगः ओंआपोहिष्ठामयोभुवस्तानऊर्जेदधातन महेरणायचक्षसे योवःशिवतमोरसस्तस्यभाजय

तेहनः उशतीरिवमातरः तस्माअरंगमामवो यस्यक्षयायजिन्विथ आपोजनयथाचनः ३ इतिभूमिप्रोक्षणं ओं
महीद्यौःपृथिवीतिमेधातिथिऋषिर्गायत्रीछंदः द्यावापृथिव्यौदेवतेभूमिस्पर्शनेविनियोगः ओंमहीद्यौःपृथिवीचन
इमंयज्ञमिमक्षताम् पिपृतान्नोभरीमभिः २ इतिभूमिस्पर्शनम् ओषधयःसमइतिअथर्वपुत्रभिषगृषिः अनुष्टुप्छंदः
ओषधिर्देवता यवप्रक्षेपणेविनियोगः ओंओषधयःसमवदंतसोमेनसहराज्ञायस्मैकृणोतिब्राह्मणस्तꣳराजन्पारया
मसि इतियवप्रक्षेपः ओंधान्यमसिधिनुहिदेवान्प्राणायत्वोदानायत्वाव्यानायत्वादीर्घायत्वामनुप्रसितिमायुषेधा
न्देवोवःसविताहिरण्यपाणिः प्रतिगृह्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनांपयोसि इतिधान्यप्रक्षेपः ओंआजि
घ्रकलशेतिकुसुरुविंदुऋषिर्महापंक्तिःछंदः गौर्देवता कलशस्थापने विनियोगः ओंआजिघ्रकलशंमह्यात्वा
विशंत्विंदवः पुनरूर्ज्जानिवर्त्तस्वसानःसहस्रंधुक्ष्वोरुधारापयस्वतीः पुनर्माविशताद्रयिः इतिकलशं निधाय
ओंइमंमे गंगे यमुने सरस्वतिशतद्रुस्तोमंसचतापुरुष्ण्या असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुष्वाशिषोम
या इतितीर्थोदकेनपरिपूर्य्य ओंवरुणस्योत्तंभनमसिवरुणस्यस्कंभसर्जनीस्थोवरुणस्यऋतसदन्यसिवरुणस्य
ऋतसदनमसि वरुणस्यऋतसदनमासीद इतिजलेनापूर्य्य ओंगंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरीं
सर्वभूतानांतामिहोपह्वयेश्रियं इतिगंधं याओषधीतिमंत्रस्य अथर्वभिषगृषिरनुष्टुप्छंदः ओषधीर्देवता
सर्वौषधिप्रक्षेपेविनियोगः याओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा मनैनुवभ्रूणामहꣳशतंधामानिसप्तच इति
सर्वौषधिप्रक्षेपः ओषधयःसमवदंतइतिमंत्रेणसर्ववीजानिप्रक्षिपेत् तत्सवितुर्विश्वामित्रऋषिर्गायत्रीछंदः सावि
त्रीदेवता पंचगव्यनिक्षेपेविनियोगः ओंतत्सवितुवरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् इतिपंचग
म् ओंआप्यायस्वेतिगौतमऋषिः सोमोदेवता गायत्रीछंदः क्षीरप्रक्षेपेविनियोगः ओंआप्यायस्वसमेतुते

विश्वतःसोमवृष्ण्यंभवावाजस्यसंगथे इतिक्षीरप्रक्षेपः ओंदधिक्राव्णइत्यस्य दधिक्राव्ण ऋषिः अश्वोदेवता
अनुष्टुप्छंदःदधिप्रक्षेपेवि ०ओंदधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः सुरभिनोमुखाकरत्प्रणआयुꣳषिता
रिषत् इतिदधिप्र०ओंघृतवतीभुवनानामभिश्रियोर्वीपृथ्वीमधुदुघेसुपेशसा द्यावापृथिवीवरुणस्यधर्म्मणा
विष्कभितेअजरेभूरिरेतसा इतिघृतप्रक्षेपः ओंमधुन्वाताइत्यस्यगौतमऋषिः विश्वेदेवादेवता गायत्रीछंदः
मधुप्रक्षेपे वि ० ओंमधुव्वाताऋतायतेमधुक्षरंतिसिंधवः माध्वीर्नःसंत्वोषधीः मधुनक्तमुतोषसोमधुमत्पार्थि
वꣳरजःमधुद्यौरस्तुनःपिता मधुमान्नोवनस्पतिर्मधुमां २ ॥ अस्तुसूर्यःमाध्वीर्गावोभवंतुनः इतिमधुप्रक्षेपः
ओंअपꣳरसमुद्वयसꣳ सूर्येसंतꣳसमाहितं अपांरसस्ययोरसस्तंवोगृह्णाम्युत्तमं उपयामगृहीतोसींद्रायत्वा
जुष्टंगृह्णाम्येषतेयोनिरिंद्रायत्वाजुष्टतमम् इतिशर्कराप्र०ओंकांडात्काडादित्याग्निऋषिरनुष्टुप्छंदः दूर्वादेवता
दूर्वाप्रक्षेपेविनियोगः ओंकांडात्काडात्प्ररोहंतिपरुषःपरुषस्परि एवानोदूर्वेप्रतनुसहस्रेणशतेनच इतिदूर्वाप्रक्षेपः
ओंशरासःकुशरासोदर्भासःसौर्य्याउत्तमोजा अदृष्टावेरिणासर्वैसाकातिजस्यच इतिकुशाप्र. ओंअश्वत्थेवोनि
षदनंपर्णेवोवसतिःकृता गोभाजइत्किलासथयत्सनवथपूरुषं इतिपंचपल्लवप्र. स्योनापृथिवीतिमेधातिथिर्ऋषिः
पृथिवीदेवता गायत्रीछंदः सप्तमृत्तिकाप्रक्षेपे वि. स्योनापृथिवीनोभवान्नृक्षरानिवेशनीयच्छानःशर्मसप्रथाः
इतिमृत्तिकाप्रक्षेपः ओंयाःफलिनीर्याअफलायाअपुष्पायाश्चपुष्पिणीः बृहस्पतिप्रसूतास्तानोमुंचत्वꣳहसः
इतिपूगीफलप्रदानं ओंपरिवाजपतीत्यस्यसोमऋषिः अग्निर्देवता गायत्रीछंदः पंचरत्नप्र. वि- ओंपरिवाजप
तिःकविरग्निर्हव्यान्यक्रमीत्दधद्रत्नानिदाशुषे इतिपंचरत्नानि ओंहिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातः
पतिरेक आसीत् सदाधारपृथिवीं द्यामुतमां कस्मै देवाय हविषा विधेम इति हिरण्यम् ओंसजातो

ज्योतिषासहशर्म्मवरूथमासदत्स्वः वासो अग्नेविश्वरूपꣳसंव्ययस्वविभावसो इतिकलशस्यकंठेवासोवध्नीयात ॐपूर्णादर्विपरापतसुपूर्णापुनरापतवस्नेवविक्रीणावहाइषमूर्जꣳशतक्रतो इतिधान्यपूर्णपात्रंकलशोपरिनिदध्यात् ॐतत्वायामीतिमंत्रस्यशुनःशेफऋषिः त्रिष्टुप्छंदः वरुणोदेवता कलशेवरुणावा० वि० ॐतत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीः इतिकलशेवरुणमावाह्यपूजयेत् तत्रादौगंगादितीर्थानामावाहनं गंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधुकावेरिजलेऽस्मिन्सन्निधिंकुरु१ ॐसर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः इतिगंगाद्यावाहनम् ततःकलशाभिमंत्रणम् कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः मूलेतस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः कुक्षौतुसागराःसप्तसप्तद्वीपावसुंधरा ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः अस्मिन्कलशे ॐवरुणादिदेवताभ्योनमः इतिगंधादिभिःसंपूज्य गंगादितीर्थेभ्योनमः एवंतीर्थानिचसंपूज्य ततःकलशंप्रार्थयेत् ॐदेवदानवसंवादेमथ्यमानेमहोदधौ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं त्वत्तोयेसर्वतीर्थानि देवाःसर्वेत्वयिस्थिताः त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः त्वयितिष्ठंतिसर्वेपियतःकामफलप्रद त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदा इतीशानकलशपूजा अथैवमेवसर्वतोभद्रादिमंडलेपिकलशस्थापनंपूजनंचविधाय तदुपरिदुग्धपूर्णं सौवर्णंराजतंताम्रंमृण्मयान्यतमंलघुकलशंस्थापयेत् तदुपरिव्रतोद्यापनदेवतामूर्तिंस्थापयेत् तस्यामानंच आमापाल्यलपर्यंताकर्तव्याशाठ्यवर्जितैः अंगुष्ठपर्वादारभ्यवितस्त्यवधिकाकृतेति प्रथमंतस्याअग्न्युत्तारणंकुर्यात् तत्रमंत्रः अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच अस्यैसुरत्वमर्चायैमामहेति

चकश्चनेतिप्राणप्रतिष्ठांकुर्यात् ॐअस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुःसामानिछंदांसि प्राणशक्तिर्देवता आंबीजं ह्रींशक्तिः क्रौंकीलकं अस्याम्नतदेवतायाः प्राणप्रतिष्ठायांविनियोगः इतिस्मृत्वान्यासंकुर्यात् ॐब्रह्मविष्णुमहेश्वरऋषिभ्योनमः शिरसि ऋग्यजुःसामछंदेभ्योनमोमुखे प्राणशक्तिदेवतायैनमोहृदये आंबीजायनमोगुह्ये ह्रींशक्तयेनमः पादयोः क्रौंकीलकायनमोनाभौ प्राणप्रतिष्ठापनेविनियोगइतिसर्वांगेव्यापकंकुर्यात् ॐआंह्रींक्रौंअंकंखंगंघंङं पृथिव्यप्तेजोवाय्वाकाशात्मने आंअंगुष्ठाभ्यांनमः ॐआंह्रींक्रौंइंचंछंजंझंञंशब्दस्पर्शरूपरसगंधात्मनेईंतर्जनीभ्यांनमः ॐआंह्रींक्रौंटंठंडंढंणंउंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेऊंमध्यमाभ्यांवषट् ॐआंह्रींक्रौंतंथंदंधंनंएंवाक्पाणिपादपायूपस्थात्मनेऐंअनामिकाभ्यांहुं ॐआंह्रींक्रौंपंफंबंभंमं ॐवचनादानगमनविसर्गानन्दात्मने औंकनिष्ठिकाभ्यांवौषट् ॐआंह्रींक्रौंयंरंलंवंशंषंसंहंलंक्षंअंमनोबुद्ध्यहंकारचित्तविज्ञानात्मनेअःकरतलकरपृष्ठाभ्यांफट् एवमेवहृदयायनमः शिरसेस्वाहा शिखायैवषट् कवचायहुं नेत्रत्रयायवौषट् अस्त्रायफट् इतिपूर्वोक्तन्यासमंत्रैःसहषडंगन्यासमंत्रप्रयोगःकार्यः ध्यानम् रक्तांभोधिस्थपीतोल्लसदरुणसरोजाधिरूढां कराब्जैः पाशंकोदंडमिक्षूद्भवमथगुणमप्यंकुशंपंचबाणान् बिभ्राणासृक्कपालंत्रिनयनविलसत्पीनवक्षोरुहाढ्या देवीबालार्कवर्णाभवतुसुखकरीप्राणशक्तिःपरानः इतिध्यात्वा प्राणप्रतिष्ठामंत्राणिपठेत् ॐआंह्रींक्रौंयंरंलंवंशंषंसंहंलंक्षंःहंसःअमुकदेवस्यप्राणाइहतिष्ठंतु ॐआंह्रींक्रौंयंरंलंवंशंषंसंहंलंक्षंःहंसःअमुकदेवस्यजीवइहतिष्ठतु ॐआंह्रींक्रौंयंरंलंवंशंषंसंहंलंक्षंःहंसः अमुकदेवस्य सर्वेन्द्रियाणि इहतिष्ठन्तु ॐआंह्रींक्रौं यंरंलंवंशंषंसंहंलंक्षंः हंसः अमुकदेवस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणपाणिपादपायूपस्थाइहैवागत्यसुखंचिरंतिष्ठंतुस्वाहा चत्वारिवाणितिऋचंपठेत् अथवा प्राणदाअपानदाइतिपठेत् ततोगर्भाधानादिपंचसंस्कारसिद्ध्यर्थंपंचदश १५

प्रणवावृत्तिंकरिष्ये प्रणवस्यपंचदशावृत्तिंगणनयाकुर्यात् ततोरक्तांभोधिस्थपोत इतिध्यानं
पूर्वोक्तंपठेत् ततःसर्वतोभद्रस्थपूर्णपात्रोपरिसौवर्णंदेवंतत्प्रकाशकमूलमंत्रेण वेदमंत्रेणतद्गायत्र्यावासंस्थाप्यपू
जयेत् तत्रपूजाविधिर्व्रतोद्यापनांगत्वेन पुनर्लिख्यते ॐमद्यैकादशीव्रतोद्यापनांगत्वेन श्रीपरमेश्वरदेवतापू
जामहंकरिष्ये ॐसहस्रशीर्षेत्यावाहनं आगच्छदेवदेवेशतेजोराशेजगत्पते गृहाणार्चांमयादत्तांकृपयापरमेश्वर
१ पुरुषएवेत्यासनम् नानारत्नसमायुक्तंकार्त्तस्वरविभूषितं आसनंदेवदेवेशप्रीत्यर्थंप्रतिगृह्यतां २ एतावान
स्येतिपाद्यम् गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां नमस्तेदेवदेवेशनम
स्तेधरणीधर नमस्तेकमलाकांतअर्घ्यंनःप्रतिगृह्यतां त्रिपादूर्ध्वेत्यर्घ्यं ४ ततोविराडित्याचमनीयं कर्पूरवा
सितंतोयंमंदाकिन्याःसमाहृतं आचम्यतांजगन्नाथमयादत्तंसुभक्तितः ५ यत्पुरुषमित्याचमनम् गंगाचयमुनाचैव
नर्मदाचसरस्वती तापीपयोष्णीरेवाचताभ्यःस्नानार्थमाहृतम् तोयमेतत्सुखस्पर्शंस्नानार्थंप्रतिगृह्यताम् इतिस्ना
नम् पंचामृतंसमानीतंपयोदधिघृतंमधु शर्कराजलसंमिश्रंस्नानार्थंप्रतिगृह्यताम् पंचामृतस्नानम् तंयज्ञमिति
वस्त्रं सर्वभूषाधिकेदेवलोकलज्जानिवारणे मयोपपादितेतुभ्यंवाससीप्रतिगृह्यतां इतिवस्त्रम् तस्माद्यज्ञात्सर्वहुतः
संभृतंपृषदाज्यमिति यज्ञोपवीतं देवदेवनमस्तेस्तुत्राहिमांभवसागरात् ब्रह्मसूत्रंसोत्तरीयंगृहाणसुरसत्तम
तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे. इतिगंधम् श्रीखंडचंदनंदिव्यंगंधाढ्यंसुमनोहरं विलेपनंसुरश्रेष्ठप्रीत्य
र्थंप्रतिगृह्यतां ९ तस्मादश्वाइतिपुष्पं मल्लिकामालतीजातीकेतकीचंपकानिच मयाहृतानिपुष्पाणिपूजार्थंप्रति
गृह्यताम्१० यत्पुरुषमितिधूपम् वनस्पतिरसोद्भूतोगंधाढ्यःसुमनोहरः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां
११ ब्राह्मणोस्येतिदीपम् आज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहं१२ चंद्र

मामनसइतिनैवेद्यम् अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितम् भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यताम् १३ इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि इतिफलम् १४ नाभ्याआसीदितितांबूलम् पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतं कर्पूरादिसमायुक्तंतांबूलंप्रतिगृह्यताम् १५ सप्तास्यासन्नितिदक्षिणा हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे १६ चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच सर्वेषांज्योतिषांज्योतिरार्तिक्यंप्रतिगृह्यतां १७ इतिनीराजनंयज्ञेनयज्ञमिति पुष्पांजलिः नमस्तेपुंडरीकाक्षनमस्तेस्तुसुरप्रिय नमस्तेकमलाकांतवासुदेवनमोस्तुते यानिकानिचपापानिब्रह्महत्यासमानिचतानिसर्वाणिनश्यंतु प्रदक्षिणपदेपदे इतिप्रदक्षिणा अर्घ्योमेगृह्यतांदेवभक्तिंमेह्यचलांकुरु व्रतंसंपूर्णतांयातु सफलाःस्युर्मनोरथाः इति फलपुष्पाक्षतदक्षिणायुतमर्घ्यंप्रदानंकुर्यात् नमःसर्वहितार्थायजगदाधारहेतवे साष्टांगोयंप्रणामस्तेप्रयत्नेनमयाकृतः इतिसाष्टांगप्रणामंकृत्वा आवाहनंनजानामिनैवजानामिपूजनं विसर्जनंनजानामिक्षम्यतांपरमेश्वर इतिप्रार्थना अथहोमःप्रणीतापात्रंपुरतःकृत्वा जलेनापूर्य कुशैराछाद्य ब्रह्मणोमुखमवलोक्य अग्नेरुत्तरतः कुशोपरिनिदध्यात् ततःपरिस्तरणं बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानांतं ब्रह्मणोऽग्निपर्यंतं नैर्ऋत्याद्वायव्यांतं अग्नितःप्रणीतापर्यंतं ततोऽग्नेरुत्तरतः पश्चिमदिशिपवित्रछेदनार्थंकुशत्रयम् पवित्रकरणार्थंसाग्रमनंतरगर्भंकुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली स्रुवसंमार्जनार्थंकुशत्रयं उपयमनार्थंवेणीरूपकुशत्रयं समिधस्तिस्रःपालाश्यः आज्यंस्रुवः षट्पंचाशदुत्तरयजमानमुष्टिशतद्वयावच्छिन्नतंडुलपूर्णपात्रंसंपूज्य पवित्रछेदनकुशान्पूर्वपूर्वदिशिक्रमेणासादनीयानि ततःपवित्रछेदनकुशैःप्रादेशमितेपवित्रकरणं ततःसपवित्रकरेण प्रणीतोदकं त्रिःप्रोक्षणीपात्रेनिधाय अनामिकांगुष्ठाभ्यांद्वेपवित्रेउत्तराग्रेगृहीत्वात्रिरुत्पवनं प्रोक्षणीपात्रस्यस

व्यहस्तकरणं अनामिकांगुष्ठाभ्यांपवित्रेगृहीत्वा त्रिरुदिङ्गनं प्रणीतोदकेनप्रोक्षणीप्रोक्षणं प्रोक्षणीजलेन यथासादितवस्तुसेचनं अग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिधाय आज्यस्थाल्यामाज्यनिर्वापः ततोधिश्रयणं ततोज्वलत्तृणादिनाहविर्वेष्टयित्वा प्रदक्षिणक्रमेणअग्नौतत्प्रक्षेपः इदंपर्य्यग्निकरणं ततःस्रुवप्रतपनंकृत्वा संमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतः इतिस्रुवसंमार्जनं प्रणीतोदकेनाभ्युक्ष्य पुनःप्रतप्य स्रुवंदक्षिणतोनिदध्यात् ततआज्येप्रोक्षणीवदुत्पवनं अवेक्ष्यसत्यपद्रव्ये तन्निरसनं पुनःप्रोक्षिण्युत्पवनं ततआज्यमग्नेरवतार्य्य उपयमनकुशान्वामहस्तेनादाय उत्तिष्ठन् प्रजापतिंमनसाध्यात्वा तूष्णीमग्नौघृताक्ताःसमिधस्तिस्रः प्रक्षिपेत् ततउपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निपर्य्युक्षणं प्रणीतापात्रेपवित्रेनिधाय पातितदक्षिणजानुः कुशेनब्रह्मणान्वारब्धःसमिद्धतमेऽग्नौस्रुवेणाज्याहुतीर्जुहुयात् तत्राघारादारभ्य द्वादशाहुतिषुतत्तदाहुत्यनंतरंस्रुवावस्थितहुतशेषघृतस्यप्रोक्षणीपात्रेप्रक्षेपः ततोहोमः तत्रान्वाधानप्रयोगः देवताः विनायकाद्याइतराअप्यंगदेवता इंद्रादिदिक्पतिदेवताश्चव्रतोद्यापनकर्मणः प्रधानदेवताःसांगसपरिवाराःसमिदाज्यतिलादिहविर्निर्मितंतंत्रेसांगकर्मणासद्योहंयक्ष्ये इतिद्वेसमिधेअग्नौनिःक्षिपेत् तत्रायंप्रयोगः सूर्य्यादिद्वात्रिंशद्देवताभ्यो गृह्योक्ताआघारादिदेवताभ्यःपरिस्तरणादि आज्यसंस्कारानंतरंयजमानोयष्टव्यदेवताहोमीयद्रव्यत्यागंकुर्यात् ओंमद्यसूर्य्यादिदेवताभ्यःप्रायश्चित्ताहुतिदेवताभ्यःस्विष्टकृदग्नयेइदंसंपादितंसमिदाज्यादिद्रव्यंमयात्यक्त मित्यभिलपेत् तत्तदिध्ममादाय ओंप्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा इंद्रायस्वाहा इदमिंद्राय इत्याघारौ ओंअग्नयेस्वाहा इदमग्नये सोमायस्वाहा इदंसोमाय इत्याज्यभागौततोग्रहहोमः ओं

264

आकृष्णेनेतिसूर्यमंत्रस्यहिरण्यस्तूपऋषिःसवितादेवता त्रिष्टुप्छंदः अर्कसमिदाज्यचरुसंपादितद्रव्येणसूर्यप्रीतयेहोमेविनियोगः ओंआकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंचहिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्स्वाहा १०८ इदंसूर्याय अनेनहोमेनश्रीसूर्योदेवताप्रीतोस्तु ततःप्रार्थना सहस्रकिरणःश्रीमान्सप्ताश्वोलोकबांधवः भक्तानांवरदोभानुःप्रीतोभवतुभास्करः१ ओंइमंदेवेतिसोममंत्रस्य गौतमऋषिःद्विपदाविराट्छंदः सोमोदेवतापलाशसमिदादिसंपादितद्रव्येण सोमप्रीतयेहोमेविनियोगः इमंदेवाअसपत्नꣳसुवध्वंमहतेक्षत्रायमहतेज्यैष्ठाय महतेजानराज्यायेंद्रस्येंद्रियाय इदममुष्यपुत्रममुष्यैपुत्रमस्यैविश एषवोमीराजा सोमोस्माकंब्राह्मणानाꣳराजा इदंसोमाय १०८ अनेनहोमेनसोमोदेवताप्रीतोस्तु ओंवृद्धिर्यस्यसितेपक्षेसुराणाममृतंतुयः संपूर्णमंडलोबालःससोमःप्रीयतांमम २ ओंअग्निर्मूर्धेतिभौममंत्रस्यविरूपाक्षऋषिः भौमोदेवता गायत्रीछंदः भौमप्रीतयेखदिरसमिदादिसंपादितद्रव्येणभौमप्रीतयेहोमेविनियोगः ओंअग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयंअपाꣳरेताꣳसिजिन्वतिस्वाहा इदंभौमाय १०८ अनेनहोमेनभौमोदेवताप्रीतोस्तु ओंभूमिपुत्रोमहातेजाबहिरूपीमहाबलः ग्रहाणामधिपःश्रेष्ठःसभौमःप्रीयतांमम ३ ओंउद्बुध्यस्वेतिबुधमंत्रस्यबुधऋषिः त्रिष्टुप्छंदःबुधोदेवताबुधप्रीतये उदुंबरसमिदादिसंपादितद्रव्येणहोमेविनियोगः ओंउद्बुध्यस्वाग्नेप्रतिजागृहीत्व मिष्टापूर्तेसꣳसृजेथामयंच अस्मिन्सधस्थेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदतस्वाहा इदंबुधाय अनेनहोमेनबुधोदेवताप्रीतोस्तु सिंहासनस्थोवरदःकर्णिकारसमद्युतिः खड्गचर्मगदापाणिःसबुधोवरदोस्तुनः ४ बृहस्पतेइतिमंत्रस्यगृत्समदऋषिः बृहस्पतिर्देवता त्रिष्टुप्छंदः बृहस्पतिप्रीतयेअश्वत्थसमिदादिसंपादितद्रव्यहोमेविनियोगः ओंबृहस्पतेअतिअदर्योअर्हाद्युमद्विभातिक्रतुमज्जनेषुयद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधेहिचित्रंस्वाहा १०८ इदंबृहस्पतये अनेनहोमेनबृहस्पतिर्देवता प्रीतोस्तु दंडाक्षसूत्रधारीचकमंडलुधरः

सदा पीतवर्णश्चतुर्बाहुःपातुनोवाक्पतिर्भृशं ५ अन्नात्परिस्रुतेतिशुक्रमंत्रस्यभरद्वाजऋषिर्जगतीछंदः शुक्रोदेवता शुक्रप्रीत्यैउदुंबरसमिदादिसंपादितद्रव्यहोमेविनियोगः अन्नात्परिस्रुतोरसोब्रह्मणाव्यपिवत्क्षत्रंपयःसोमं प्रजापतिःऋतेनसत्यमिंद्रियंविपानꣳशुक्रमंधसः इंद्रस्येंद्रियमिदंपयोऽमृतंमधुस्वाहा १०८ इदंशुक्राय अनेन होमेनशुक्रोदेवताप्रीतोस्तु श्वेतवर्णश्चतुर्बाहुःसाक्षसूत्रकमंडलुः सरस्वत्याःपरंधामशुक्रोभूयाद्वरप्रदः ६ ॐशन्नोदेवीतिशनिमंत्रस्यासिंधुद्वीपऋषिः शनिर्देवता गायत्रीछंदः शनिप्रीतयेशमीसमिदादिसंपादितद्रव्यहोमे विनियोगः शन्नोदेवीरभिष्टय आपोभवंतुपीतयेशंय्योरभिस्रवंतुनः इदंशनैश्चराय १०८ अनेनहोमेनशनिर्देवताप्रीतोस्तु भिन्ननीलांजनप्रख्योवरदोगृध्रवाहनः धनुःशूलशरैर्भीमःसदाशत्रुप्रमर्दनः १ मुनींद्रैर्ऋषिभिः साध्यैर्देवैश्चनमस्कृतः पातुनोर्कसुतःश्रीमान्ग्रहैःसर्वैःप्रपूजितः ७कयानइतिमंत्रस्यवामदेवऋषिः राहुर्देवता गायत्रीछंदः राहुप्रीतये दूर्वासमिदादिसंपादितद्रव्यहोमेविनियोगः ॐकयानश्चित्रआभुवदूतीसदावृधःसखा कयाशचिष्ठयावृता स्वाहा इदंराहवे १०८ अनेनहोमेनराहुर्देवताप्रीतोस्तु चंद्रार्कौग्रसतेयस्तुभीमःपर्वणिपर्वणि राहुःसदानवश्रेष्ठःसर्वदाप्रीयतांमम ८ केतुंकृण्वन्निति केतुमंत्रस्य मधुछंदऋषिः केतवोदेवता गायत्रीछंदः केतुप्रीतयेकुशासमिदादिसंपादितद्रव्यहोमेविनियोगः केतुंकृण्वन्नकेतवेपेशोमर्य्याअपेशसे समुषद्भिरजायथा स्वाहा इदंकेतवे १०८ अनेनहोमेनकेतुर्देवताप्रीतोस्तु पीड्यंतेपीडयायस्यदेवगंधर्वकिन्नराः सकेतुर्धूम्रवर्णाभःप्रीतोभवतुसर्वदा ९ अथाधिदेवतानांनाममंत्रैर्होमःकार्य्यस्तेषांश्रौतमंत्राः स्थापनक्रमेप्राक्लिखितास्तेयथासंभवमत्रापिपठनीयाः ॐरुद्रायस्वाहा १ उमायैस्वाहा २ स्कंदायस्वाहा ३ विष्णवे स्वाहा ४ ब्रह्मणेस्वाहा ५ इंद्रायस्वाहा ६ यमायस्वाहा ७ कालायस्वाहा ८ चित्रगुप्तायस्वाहा ९ अथप्र

त्यधिदेवतानांहोमः ओंअग्नयेस्वाहा १ अद्भ्यःस्वाहा २ पृथिव्यैस्वाहा ३ ओंनारायणायस्वाहः ४ इंद्रायस्वाहा ५ इंद्राण्यैस्वाहा ६ प्रजापतयेस्वाहा ७ सर्पेभ्यःस्वाहा ८ ओंब्रह्मणेस्वाहा ९ श्रौतमंत्राश्चस्थापनक्रमेज्ञेयाः अथविनायकादिपंचलोकपालनाममंत्रैर्होमः ओंविनायकायस्वाहा १ दुर्गायैस्वाहा २ वायवेस्वाहा ३ आकाशायस्वाहा ४ अश्विभ्यांस्वाहा ५ ततोदिक्पालानांनाममंत्रैर्होमः ओंइंद्रायस्वाहाः १ अग्नयेस्वाहा २ यमायस्वाहा ३ निर्ऋतयेस्वाहा ४ वरुणायस्वाहा ५ वायवेस्वाहा ६ सोमायस्वाहा ७ ईशानायस्वाहा ८ ब्रह्मणेस्वाहा ९ अनंतायस्वाहा १० इतिसर्वसाधारणोहोमक्रमः वैष्णवव्रतोद्यापनेषु सहस्रशीर्षापुरुषइत्यादिसूक्तानांप्रतिमंत्रंहोमोविधेयः अष्टाक्षरादिमंत्रेण अंगदेवतापरिवारदेवतानामपिनाममंत्रैर्होमःकार्यः शैवव्रतोद्यापनेषु त्र्यंबकमंत्रेणरुद्रसूक्तादिमंत्रैःशिवपंचाक्षरादिमंत्रैःपरिवारदेवताना अंगदेवतानांचनाममंत्रैर्यथासंभवंहोमकार्य्यंकुर्य्यात् एवमन्येषप्यनुक्तानामपिइष्टदेवतानांमंत्रैस्तदंगदेवतानांनाममंत्रैर्व्रतोद्यापनेषुहोमंकृत्वा सर्वतोभद्रलिंगतोभद्रमंडलदेवतानांनाममंत्रैःश्रौतमंत्रैर्वायथासंभवंहोमंकुर्य्यात् तत्रायंक्रमः ब्रह्मणेनमःस्वाहा १ इंद्रायस्वाहा २ अग्नयेस्वाहा ३ यमायस्वाहा ४ निर्ऋतयेस्वाहा ५ वरुणायस्वाहा ६ वायवेस्वाहा ७ ओंसोमायस्वाहा ८ ईशानायस्वाहा ९ अष्टवसुभ्यःस्वाहा १० एकादशरुद्रेभ्यःस्वहा ११ दुर्गायैस्वाहा १२ गंगादिनदीभ्यःस्वाहा १३ दक्षायस्वाहा १४ नारायणायस्वाहा १५ दुर्गायैस्वाहा १६ स्वधायैस्वाहा १७ मृत्यवेस्वाहा १८ शेषायस्वाहा १९ समुद्रेभ्यःस्वाहा २० मरुद्भ्यःस्वाहा २१ गणपतयेस्वाहा २२ पृथिव्यैस्वाहा२३ मेरवेस्वाहा २४ ऋग्वेदायस्वाहा २५ यजुर्वेदायस्वाहा २६ सामवेदायस्वाहा २७ अथर्ववेदायस्वाहा २८ वज्रायस्वाहा २९

शक्रयैस्वाहा ३० दंडायस्वाहा ३१ खड्गायस्वाहा ३२ पाशायस्वाहा ३३अंकुशायस्वाहा ३४ गदा
यैस्वाहा ३५ त्रिशूलायस्वाहा ३६ ऐरावतायस्वाहा ३७ मेषायस्वाहा ३८ महिषायस्वाहा ३९ प्रेता
यस्वाहा ४० मकरायस्वाहा ४१ एणायस्वाहा ४२ शिविकायैस्वाहा ४३ वृषभायस्वाहा ४४ गौत्त
मायस्वाहा ४५ भारद्वाजायस्वाहा ४६ विश्वामित्रायस्वाहा ४७ जमदग्नयेस्वाहा ४८ अत्रयेस्वाहा ४९
वसिष्ठायस्वाहा ५० अरुंधत्यैस्वाहा ५१ सूर्यायस्वाहा ५२ सोमायस्वाहा ५३ भौमायस्वाहा ५४ बु
धायस्वाहा ५५ गुरवेस्वाहा५६असुरगुरवेस्वाहा ५८ शनैश्चरायस्वाहा ५८ राहवेस्वाहा५९ केतवेस्वाहा
६० ऐंद्र्यैस्वाहा ६१ कौमार्य्यैस्वाहा ६२ ब्राह्म्यैस्वाहा ६३ वाराह्यैस्वाहा ६४ चामुंडायैस्वाहा ६५
वैष्णव्यैस्वाहा ६६ माहेश्वर्य्यैस्वाहा ६७ वैनायक्यैस्वाहा ६८ ओंपश्चतुर्भिश्चतुर्भिश्चद्वाभ्यांपंचभिरेवच
हूयतेचपुनर्द्वाभ्यांतस्मैयज्ञात्मनेनमःस्वाहा ओंभूःस्वाहा ओंभुवःस्वाहा ओंस्वःस्वाहा ओंभूर्भुवःस्वःस्वाहा यं
ज्ञपुरुषायस्वाहा ततओंअग्नयेस्विष्टकृतेस्वाहा ततोयजमानः देवायवायणंनिवेदयेत् अनेनमंत्रेणत्वामेकमाद्यं
पुरुषंपुराणंनारायणंविश्वसृजंयजामहे मयैषसांगोविहितोविधेयो गृहाणहव्यंजगतामधीश शैवोद्यापने सदा
शिवंविश्वसृजंयजामहे एवमन्यव्रतोद्यापनेपि देवतानांहोमःकार्य्यः इतिनिवेद्यातिष्ठेत् ततअग्निंत्रिवारंचतुर्वा
रंवाप्रदक्षिणीकृत्यजानुभ्यांधरणींगत्वाप्रार्थयेत् देवदेवायवेद्यायपरायपरमेष्ठिने कर्त्रेविश्वस्यगोप्त्रेचतस्मैहर्त्रेन
मोनम इतिनत्वा देवायनिवेदितंवायणं मूर्ध्नास्पृष्ट्वाकेशैर्वाइत्युच्चैर्वदेत् वयंवैष्णवावयंशैवाइतिप्रतिवचःश्रु
त्वाहविःशेषमपिदत्वा ओंनमोभगवतेवासुदेवाय ओंनमोभगवतेरुद्राय इतिमंत्रेण स्वयंहविः प्राश्याचम्य प्रा
णायामंकृत्वा ततोयजमान आचार्य्योवा ओंसिद्धयेस्वाहेति अग्नौआज्यंजुहुयात् ततोयजमानः यतइंद्र

भयामहेततोनोअभयंकृधिमघवञ्छग्धित तवन्नऊतिभिर्विद्विषोविमृधोजहीति आत्मानमभिमंत्रयेत ततआचार्यःप्रायश्चित्तादिहोमशेषंसमापयेत् ॐत्वन्नोअग्नेइतिवामदेवऋषिः अग्निवरुणौदेवते त्रिष्टुप्छंदः प्रायश्चित्तहोमेविनियोगः सत्वन्नोइतिवामदेवऋषिः अग्निवरुणौदेवते त्रिष्टुप्छंदः प्रायश्चित्तहोमेविनियोगः ॐअयाश्चाग्नेवामदेवऋषिः अग्निर्देवता त्रिष्टुप्छंदः सर्वप्रायश्चित्तहोमेविनियोगः येतेशतमितिवामदेवऋषिःवरुणःसविताविश्वेमरुतः स्वर्कादेवताः त्रिष्टुप्छंदः सर्वप्रायश्चित्तहोमेविनियोगः उदुत्तमामितिशुनःशेफऋषिः वरुणोदेवता त्रिष्टुप्छंदः सर्वप्रायश्चित्तहोमेविनियोगः १ ॐत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ अवयक्ष्वनोवरुणंरराणोवीहिमृडीकंसुहवोनएधिस्वाहा २ ॐअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्त्वमयाअसि अयानोयज्ञंवहास्ययानोधेहिभेषजंस्वाहा ३ ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशावितताम्महांतः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा इदंवरुणायसवित्रे विष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः ४ ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा ५ इदंवरुणाय ततआचम्य ॐमद्यास्मिन्नेकादश्यादिव्रतोद्यापनहोमकर्मणिकृताकृतावेक्षणरूप ब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रं सदक्षिणंप्रजापतिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणेदक्षिणांदातुमहमुत्सृजे इतिपूर्णपात्रदानसंकल्पः ततःपवित्रंगृहीत्वा ॐसुमित्रियानआपओषधयःसंतु इति प्रणीताजलेनशिरःसंमृज्य ॐदुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मइतिप्रणीताभैशान्यांन्युब्जीकुर्यात ततःपरिस्तरणक्रमेणबर्हिरुत्थाप्यघृताक्तंकृत्वा तस्यहोमः तत्रमंत्रः देवागातुविदोगातुंवित्त्वागातुमितमनसस्पत

इमंदेवयज्ञꣳस्वाहा।वातेधाःस्वाहा इत्यग्नौवर्हिर्होमंकुर्यात् ततोयजमान।आचार्योवा।मंडपस्यमंडलेवाप्रागादिदिक्षु लोकेशानांबलिदानंक्रमेणकुर्यात् पूर्वेत्रातारमिंद्रमितिगर्गऋषिः इंद्रोदेवता।त्रिष्टुप्छंदः इंद्रप्रीत्यर्थे बलिदानेविनियोगः त्रातारमिंद्रमितिइंद्रंसंपूज्य इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायाऽमुंसदीपंमाषभक्तबलिंसमर्पयामिनमः इतिबलिंदत्त्वाभोइंद्रदिशंरक्ष बलिंभक्ष ममसकुटुंबस्यायुःकर्त्ताक्षेमकर्त्ता शुभकर्त्ताशांतिकर्त्तापुष्टिकर्त्तावरदोभव १ आग्नेये अग्निंदूतमिति विरूपऋषिः अग्निर्देवता गायत्रीछंदः अग्निप्रीतये बलिदानेविनियोगः अग्निंदूतमित्यग्निंसंपूज्य अग्नयेसांगायसपरिवाराय०सा०सश०अमुंसदीपंमाषभक्तबलिंस० भोअग्नेदिशंरक्ष बलिंभक्ष ममसपरिवारस्येत्यादिवरदोभव २ याम्येयमायत्वेतिमंत्रस्यार्षादिकंस्मृत्वायमंसंपूज्ययमायसांगायसपरिवारायेत्यादि अमुंसदीपंमाषभक्तबलिंस०भोयमदिशंरक्ष बलिंभक्ष ममसपरिवारस्येत्यादि०वरदोभव ३ एषतेनिर्ऋत्यस्यार्षादिकंस्मृत्वा निर्ऋतिंसंपूज्य निर्ऋतयेसांगायसपरिवारायेत्यादि अमुंसदीपंमाषभक्तबलिंसमर्पयामि भोनिर्ऋतेइमंसदीपंमाषभक्तबलिंभक्ष दिशंरक्ष ममयजमानस्यसपरिवारस्यसकुटुंबस्यायुःकर्त्ता क्षेमकर्त्ताशांतिकर्त्तापुष्टिकर्त्तावरदोभव इमंमेवरुणइतिशुनःशेफऋषिर्वरुणोदेवता यजुःछंदः वरुणप्रीतयेबलिदानेविनि० इमंमेवरुण इतिसंपूज्य वरुणायसांगायसपरिवाराय इमंसदीपंमाषभक्तबलिंस०भोवरुणदिशंरक्ष० ममयजमानस्यायुःकर्त्ता. वरदोभव वायव्ये वातोवामनोवाइत्यस्यार्षादिकंस्मृत्वा वायुंसंपूज्य वायवेसांगायसपरिवाराय सशक्तिकायसायुधाय इमंसदीपंमाषभक्तबलिंसमर्पयामि भोवायोदिशंरक्षबलिंभक्ष ममयजमानस्यसपरिवारस्य आयुःकर्त्ता. वरदोभव- उत्तरेवयꣳसोमइतिसुबंधुऋषिःसोमोदेवता अनुष्टुप्छंदः सोमप्री. बलिदानेवि. वयꣳसोमेतिसंपूज्य सोमायसांगाय. इमंसदीपंमाषभक्तबलिंस. भोसोमदिशंरक्ष बलिंभक्ष मम

यजमानस्यसपरिवारस्यायुः कर्त्ता. वरदोभव. तमीशानमिति गौतमऋषिः ईशानोदे. जगतीछंदः ईशानप्रीतये
बलिदानेवि. तमीशानमितीशानंसंपूज्य ईशानायसांगाय. इमंसदीपंमाषभक्तबलिंस- भोईशानदिशंरक्ष वलिं
भक्ष ममयजमानस्यसपरिवारस्य. आयुःकर्त्ता. वरदोभव ८ नमोस्तुसर्पेभ्यइतिदेवाऋषयः अनंतोदेवता अनु
ष्टुप्छंदः अनंतप्रीतयेबलिदानेवि. अनंतायसांगायस. इमंसदीपंमाषभक्तबलिंस. भोअनंतदिशंरक्ष बलिंभक्ष
ममयजमानस्यायुःकर्त्ता. वरदोभव.९ ब्रह्मयज्ञानमितिप्रजापतिऋषिर्ब्रह्मादेवता यजुश्छंदः ब्रह्मप्रीतये बलिदाने
वि० ब्रह्मयज्ञानमितिसंपूज्य ब्रह्मणेसांगायइमंसदीपंमाषभक्तबलिंसम-भोब्रह्मन्दिशंरक्षबलिंभक्ष ममयजमानस्य
सपरिवारस्यायुःकर्त्ता. वरदोभव- ततोग्रहान् अधिदेवताप्रत्यधिदेवतासहितान् पूर्वोक्तवेदमंत्रैः सप्रणवव्या
हृतित्रयपूर्वकनाममंत्रैर्वासंपूज्य ग्रहेभ्यःसांगेभ्यःसपरिवारेभ्यःसशक्तिकेभ्यःसायुधेभ्योऽधिदेवताप्रत्यधिदेवतास
हितेभ्य इमंसदीपंमाषभक्तबलिनैवेद्यंसमर्पयामि भोभोग्रहा अधिदेवताप्रत्यधिदेवतासहिताः सर्वतोसर्वादिशो
रक्षत बलिंनैवेद्यंभक्षत ममयजमानस्यसपरिवारस्य सकुटुंबस्यायुःकर्त्तारःक्षेमकर्त्तारःशांतिकर्त्तारःपुष्टिकर्त्तारो
भवत एवंविनायकदुर्गावाय्वाकाशाश्विसंज्ञेभ्यः पंचलोकपालेभ्य इमंसदीपंमाषभक्तबलिंसमर्पयामि ममयज
मानस्यायुकर्त्तारःशांतिकर्त्तारोभवत १ क्षेत्रस्यपतिनावयमितिक्षेत्रपालंसंपूज्य सिंदूरकज्जलान्वितंबलिद्रव्यं
सदीपमादाय क्षेत्रपालाय डाकिनीशाकिनीभूतप्रेतपिशाचादिसहिताय इमंसदीपंमाषभक्तबलिंसमर्पयामि
भोक्षेत्रपालइमंसदीपंमाषभक्तबलिंभक्ष ममयजमानस्यसपरिवारस्यायुःकर्त्ताक्षेमकर्त्ताशांतिकर्त्तापुष्टिकर्त्तावरदो
भव इतिबलिदानं ततोयजमानस्यसाचार्यऋत्विक्कर्तृकोभिषेकः सचस्वशाखोक्तवैदिकमंत्रैःपौराणिकमंत्रैश्च
कार्यः अत्रपौराणिकमंत्रायथा सुरास्त्वामभिषिंचंतुब्रह्माविष्णुमहेश्वराः वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः

प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते आखंडलोऽग्निर्भगवान्यमोवैनिर्ऋतिस्तथा वरुणःपवनश्चैवधनाध्यक्षस्तथैवच ब्रह्मणासहितःशेषोदिक्पालाःपांतुमेसदा कीर्त्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियारतिः बुद्धिर्लज्जावपुःशांतिस्तुष्टिः कांतिश्चमातरः एतास्त्वामभिषिंचंतुदेवपत्न्यःसमातरः आदित्यश्चंद्रमाभौमोबुधोजीवःसितोर्कजः ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चतर्पिताः देवदानवगंधर्वायक्षराक्षसपन्नगाः ऋषयोमनवोगावोदेवमातरएवच देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः अस्त्राणिचैवशस्त्राणिराजानोवाहनानिच औषधानिचरत्नानिकालस्यावयवाश्चये सरितःसागराःशैलास्तीर्थानिजलदानदाः एतेत्वामभिषिंचंतुधर्मकामार्थसिद्धये रक्षंतुतेदेवगणाःसमग्रंधर्मैर्मातिं चापिसदादिशंतु कुर्वंतुनाशंसकलारिभीतेर्दिशंतुभोगानखिलांचलक्ष्मीम् इतिसर्वकलशानामीशानकलशस्यचवारिणा पंचपल्लवदूर्वांकुशादिभिर्यजमानस्याभिषेकःकार्य्यः ततःशय्यादानं अष्टदलोपरितिलप्रस्थंनिधाय तस्मिन्स्वास्तीर्णांशय्यांपरिकल्प्य तच्छीर्षदेशेघृतपूर्णंताम्रमयंनिद्राकलशंनिधाय उपरिचसुपूजितंहैमंपुरुषंपुरुषसूक्तेनषोडशोपचारैः पूजितां लक्ष्मीनारायणप्रतिमां निधाय प्रतिज्ञासंकल्पंकुर्यात् ॐतत्सत्अद्येत्यादिदेशकालादिसंकीर्त्यैशास्त्रोक्तविधिनाविहितैकादश्यादिव्रतोद्यापनकर्मणः सांगफलप्राप्त्यर्थंसोपकरणशय्यादानमहंकरिष्ये ततोयथोक्तविधिनालक्ष्मीनारायणपूजांविधाय ततोविप्रवरणं ॐभूमिदेवायनम इति विप्रं पादप्रक्षालनपूर्वकं संपूज्य ॐमद्यैकादश्यादिव्रतोद्यापनसांगफलावाप्तयेशय्यादानप्रतिग्रहार्थंत्वामहंवृणे इतिब्राह्मणंवृणुयात् पात्राप्रामाण्येतु कुशकल्पितविप्रपूजा ॐमद्येत्यादिदेशकालादिसंकीर्त्य ममैकादश्यादिव्रतोद्यापनयज्ञकर्मणि सर्वपापक्षयपूर्वकाप्सरोगणसंसेव्यमानवरुणेंद्रपुरगमनोत्तर षट्षष्टिसहस्त्रवर्षावधिकरणकक्रीडनस्त्रीसहस्त्रसंवरणसहितस्वर्गलोकमहित्वतदुनरषष्टियोजनमंडलेराज्यानंतरं परमशिवैकत्वप्राप्तिकामइमांशय्यामीशा

नादिकोणचतुष्टयस्थापितघृतकुंकुमगोधूमसजलपूर्णकुंभां स्वोच्छीर्षकप्रदेशस्थापितघृतपूर्णनिद्राकलशां हंसालीप्रच्छन्नांशुभगंडोपधानकां प्रच्छादनपटीसप्तधान्यतांबूलादर्शकुंकुमाक्षोटकर्पूरागुरुचंदनदीपिकोपानच्छत्रचामरदंडासनरीतिपात्रकांस्यपात्रताम्रपात्रलोहपात्ररजतमयभाजनजलपात्रादियुतां दंपतीपरिधेयसुवर्णरजतमयमणिगणखचितभूषणसमस्तवस्त्रोपस्करादिसहितां राजोपयोगिराज्यचिन्हैरलंकृतां लक्ष्मीनारायणयज्ञपुरुषप्रीतिकामनयामुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे पात्राप्रामाण्येतु यज्ञपुरुषप्रीत्यर्थंदातुमहमुत्सृजे शय्योपरिस्थितलक्ष्मीनारायणमुद्दिश्यभूमिस्थितकुशकल्पितविष्टरोपरि संकल्पजलमुत्सृजेत् लक्ष्मीनारायणप्रार्थना लक्ष्म्यायथात्वदीयाहिनशून्याक्षीरसागरे शय्याममाप्यशून्यास्तुतथाजन्मनिजन्मनि अशून्यंकृष्णशयनंयथासागरजातया प्रभोममतथाभूयादशून्यंभवसागरे लक्ष्मीनारायणौदेवौयथागौरीगिरीश्वरौ शचीपुरंदरौयुक्तौतथैतौद्विजदंपती ततःशय्यां प्रदक्षिणीकृत्य हिरण्यंदक्षिणां ॐमद्यकृतैतदेकादश्यादिव्रतोद्यापनहोमादिकर्मणःसांगफलार्थंशय्यादानप्रतिष्ठार्थमिदंसुवर्णमग्निदैवतं तन्मौल्यभूतंरजतताम्रमुद्रादिद्रव्यं व्रतोपदेष्ट्रेविप्राय तुभ्यमहंसंप्रददे इतिदानप्रतिष्ठांदद्यात् अथगोदानं ततोयजमानस्तिथ्यादिसंकीर्त्य ॐमद्यकृतस्यैकादश्यादिव्रतोद्यापनहोमादिकर्मणःसांगफलावाप्तये साचार्यऋत्विजोन्यांश्चसद्विप्रान्गोदानतांबूलवस्त्रान्नदानदक्षिणादिभिरहंपूजयिष्ये तत्रप्रधानगोदानमहंकरिष्ये तत्र आचार्य्यं दक्षिणावस्त्रादिभिर्गोदानप्रतिग्रहार्थं त्वामहंवृणे इति संपूज्य ॐमद्यैकादश्यादिव्रतोद्यापनपूर्त्तिकामः श्रीलक्ष्मीनारायणप्रीतयेआचार्य्यायेमांगामहंप्रदास्ये इतिसंकल्पं विधाय गोपूजांकुर्यात् नंदिनी सुनंदा सुमंगलां भद्रकरींगामावाहयामि इत्यावाह्यांगन्यासंकुर्यात् शृंगमूलयोर्ब्रह्मविष्णुभ्यांनमः ललाटेमहादेवायनमः नासावंशेषण्मुखायनमः कर्णयोरश्विभ्यांनमः चक्षुषोश्शशि

भास्कराभ्यांनमः ॥ दंतेषुमरुद्गणेभ्योनमः॥नासिकायांवरुणायनमः॥हुंकारेसरस्वत्यैनमः॥ गंडयोर्यमलाभ्यांनमः ओष्ठयोःसंध्याद्वयायनमः ॥ ग्रीवायांइंद्रायनमः ॥ कुक्षिदेशेछंदेभ्योनमः ॥ उरसिसाध्येभ्योनमः चतुर्षुपादेषुचतुष्पादधर्मायनमः ॥ खुरमध्येषुगंधर्वेभ्योनमः ॥ खुरपार्श्वेषु अप्सरोभ्योनमः पृष्ठेएकादशरुद्रेभ्योनमः ॥ सर्वसंधिषुवसुभ्योनमः ॥ श्रोणितटेपितृभ्योनमः ॥ लांगूलेसोमायनमः वालेषुआदित्यरश्मिभ्योनमः ॥ गोमूत्रेगंगायैनमः ॥ क्षीरेसरस्वत्यैनमः ॥ दध्निनर्मदायैनमः ॥ सर्पिषिहुताशनायनमः॥ गोमयेलक्ष्म्यैनमः॥ रोमसुदेवानामष्टाविंशतिकोटिभ्योनमः॥ उदरेपृथिव्यैनमः॥ पयोधरेषु चतुःसागरेभ्योनमः ततःपूजाक्रमः सौरभेयिसर्वहितेपवित्रेपापनाशिनि गृह्णीष्वेमंमयादत्तंपाद्यंत्रैलोक्यवंदिते इतिपाद्यं ओंभूर्भुवःस्वःरुद्ररूपिण्यैपाद्यंनमः सर्वदेवमयेदेविसर्वतीर्थमयेशुभे गृहाणार्घ्यंमयादत्तंसौरभेयिनमोस्तुते इत्यर्घ्यं देहस्थितासिरुद्राणांशंकरस्यसदाप्रिये धेनुरूपेणसादेविममपापंव्यपोहतु इतिस्नानम् आच्छादनंमयादत्तंगवेसम्यक्सुशोभनं सुरभ्यैसर्वदानेनप्रीयतांपरमेश्वरः इतिवस्त्रं श्रीखंडंचंदनंदिव्यंसर्वगंधैःसमन्वितं विलेपनंसुरश्रेष्ठेगृहाणपरमेश्वरि ततोऽलंकारान्दद्यात् शृंगयोः सुवर्णं नेत्रयोरत्नद्वयं कंठेघंटांपुष्पमालांच सर्वांगेषुपट्टदुकूलम् पृष्ठेताम्रं पुच्छेमुक्ताफलस्रजं कुंकुमकस्तूरिकादिसुगंधितद्रव्याणि सप्तधान्यानि माल्यानिचसुगंधीनिमालत्यादीनियानिच सुरभित्वंजगन्मातःपुष्पाणिप्रतिगृह्यतां इतिपुष्पाणि वनस्पतिरसोदिव्योगंधाढ्योगंधउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतामितिधूपं आज्यंत्रिवर्तिसंयुक्तंवन्हिनायोजितंमया दीपंगृहाणसुरभितुभ्यंभक्त्यासमर्पितम् इतिदीपम् सुरभित्वंजगन्मातादेविविष्णुपदेस्थिता सर्वदेवमयेग्रासंमयादत्तमिमंग्रस सौरभेय्यःसर्वहिताःपवित्राःपापनाशनाः प्रतिगृह्णंत्विमंग्रासंगावस्त्रैलोक्यमातरः

इतिगोग्रासंनैवेद्यं पंचगावःसमुत्पन्नामथ्यमानान्महोदधेः तासांमध्येतुयानंदातस्यैधेन्वैनमोनम इति नमस्कारः हिरण्यगर्भगर्भस्त्वंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे इतिदक्षिणा गावोममाग्रतःसंतुगावो मेसंतुपृष्ठतः सव्यदक्षिणयोर्गावोगवांमध्येवसाम्यहं इतिप्रार्थना ततोविप्रपूजा रुद्ररूपिणेब्राह्मणायनमः एवंसंपूज्य गोदानप्रतिग्रहार्थंत्वामहंवृणे इतिवरणसामग्रींतस्मैदत्त्वासजलतिलकुशाक्षतंगोपुच्छंहस्तेगृहीत्वा ॐमद्यामुकगोत्रोऽमुकशर्माहं सर्वपापक्षयार्थं धर्मार्थकाममोक्षरूपचतुर्विधपुरुषार्थसिद्धये कृतैतदेकादश्यादिव्रतोद्यापनफलप्राप्त्यर्थमिमांगांशृंगादिस्थानेषुसुवर्णाद्यलंकृतांसवत्सांरुद्रदैवतां यथानामगोत्रायब्रह्मणेब्राह्मणायवातुभ्यमहंसंप्रददे इति विप्रहस्तेदद्यात् ॐयज्ञसाधनभूतायाविश्वस्याघौघनाशिनी विश्वरूपधरोदेवःप्रीयतामनयागवेति मंत्रः घृतक्षीरप्रदागावोघृतयोन्योघृतोद्भवाः घृतनद्योघृतावर्त्तास्तामेसंतुसदागृहे घृतंमेहृदयेनित्यंघृतंनाभ्यांप्रतिष्ठितं घृतंमेसर्वतश्चैवघृतमेववहिःस्मृतं ततोदानप्रतिष्ठांदद्यात् ॐमद्यकृतैतद्गोदानसत्सिद्ध्यर्थमिदं दक्षिणाद्रव्यं तुभ्यमहंसंप्रददे इतिदानप्रतिष्ठांदत्त्वा ब्राह्मणं धेनुंच नमस्कृत्वा गोमतींविद्यांपठेत् गावःसुरभयोनित्यंगावोगुग्गुलगंधिकाः गावःप्रतिष्ठाभूतानांगावः स्वस्त्ययनंमहत् अन्नमेवपरंगावोदेवानांहविरुत्तमं पावनंसर्वभूतानांरक्षंतिचवहंतिच हविषामंत्रपूतेनतर्पयंत्यमरान्दिवि ऋषीणामग्निहोत्दृणांगावोहोमे प्रतिष्ठिताः सर्वेषामेवभूतानांगावःशरणमुत्तमं गावःपवित्रंपरमंगावोमंगलमुत्तमं गावःसर्वस्यलोकस्यगावोधन्याःसुवाहनाः नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतं एकत्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठति इतियमोक्तांगोमतींविद्यांजपेत् महाभारतेपि सुरभ्यःसौरभेय्यश्चसरितःसागरंयथा गावःपश्याम्यहंनित्यंगावःपश्यंतुमांसदा गावोस्माकंवयंतासांयतोगाव

स्ततोवयं गावोममाग्रतःसंतुगावोमेसंतुपृष्ठतः ततोयजमानएकादशीव्रतोद्यापने शुक्लैकादश्याःकृष्णैकादश्या उद्यापनेकृते द्वादशकुंभान् यथाविभवंपक्वान्नदक्षिणासहितान् प्रतिमावस्त्रपादुकादिसहितान् उभयैकादशीव्रतोद्यापनेतुचतुर्विंशतिंषड्विंशतिंवाब्राह्मणान्केशवादिदेवस्वरूपान् केशवादिनामभिरेव संपूज्यदद्यात् तत्रमंत्रः पक्वान्नपूरितान्कुंभान्दक्षिणावस्त्रसंयुतान् ददामिद्विजवर्य्येभ्योदेवोमेप्रीयतामिति प्रत्येकंपूजनेतु पक्वान्नपूरितं कुंभंदक्षिणावस्त्रसंयुतं ददामिद्विजवर्य्यायकेशवःप्रीयतामिति शिवरात्र्यादिशैवव्रतोद्यापनेचतुर्दशब्राह्मणान् अजैकपादहिर्बुध्न्योभव श्शर्वउमापतिः रुद्रः पशुपतिः शंभुर्वरदःशिवईश्वरः महादेवोहरोभीमोनामान्यवचतुर्दश इतिप्रत्येकंनामभिः संपूज्यकुंभान्दद्यात् तत्रमंत्र पक्वान्नपूरितान्कुंभान्दक्षिणावस्त्रसंयुतान् ददामिद्विजवर्य्येभ्यः शिवोमेप्रीयतामिति प्रधानकुंभदानेमंत्रविशेषः शंभोप्रसीददेवेशसर्वलोकेश्वरप्रभो तवरूपप्रदानेनमम संतुमनोरथाः ततः पीठं सर्वोपस्करसंयुक्तं सर्वतोभद्रोपरिस्थप्रधानदेवताप्रतिमासहितं पूर्वोक्तमंत्रेणाचार्य्यायदद्यात् ओंतत्सत्अद्यकृतैतदेकादश्यादिव्रतोद्यापनस्य सांगफलावाप्तये इमां प्रधानदेवताप्रतिमा सर्वोपस्करसहितपीठसमन्वितां श्रीपरमेश्वरलक्ष्मीनारायणप्रीत्यर्थं मुमामहेश्वरप्रीतये वा अमुकगोत्रायामुकशर्मणे आचार्यायतुभ्यमहंसंप्रददे ततऋत्विग्भ्योदक्षिणांदद्यात् ओमद्यकृतस्योद्यापनकर्मणः द्वारपालत्वजापकत्वविधेः सांगफलावाप्तये इमांदक्षिणांनानानामगोत्रेभ्योयथासंख्यमृत्विग्भ्योदातुमहमुत्सृजे ततस्तिलपात्रदानं ओमद्यास्मिन्नुद्यापनकर्मणिज्ञाताज्ञातन्यूनातिरिक्तदोषपरिहारार्थमिदंतिलपात्रंप्रजापतिदैवतं सुवर्णादिदक्षिणाद्रव्यसहितममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंप्रददे मंत्रः तिलाः स्वर्णयुतास्तुभ्यंप्रदत्ताह्यघनाशनाः विष्णुप्रीतिकरानित्यमतः शांतिंप्रयच्छमे ततःपूर्णाहुतिंकुर्य्यात् ओंमूर्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छंदः

वैश्वानरोदेवता पूर्णाहुतिहोमेविनियोगः रक्तवस्त्रावृतंपुष्पाक्षतसहितं श्रीफलमादाय ऊँमूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं कविंसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः स्वाहा इदमग्नये ततो वसोःपवित्रमिति वसोर्धारां स्रुवोपरिदद्यात् उँ आयुर्दामग्नेहविषोजुषाणोघृतप्रतीकोघृतयोनिरेधि घृतंपीत्वामभिचारुगव्यं पितेवपुत्ररक्षतादिवमातस्वाहा ततः स्रुवेणभस्मानीय त्र्यायुषकरणमिति स्रुवेणहोमीयवन्हिमंडलात् भस्म गृहीत्वा त्र्यायुषंजमदग्नेः इतिललाटे ॥ १ ॥ कश्यपस्यत्र्यायुषमितिग्रीवायां ॥ २ ॥ यद्देवानांत्र्यायुषमितिदक्षिणांसे ॥ २ ॥ तन्नोअस्तुत्र्यायुषं तत्तेअस्तुत्र्यायुषमिति हृदये ततोद्यौःशांतिरंतरिक्षंशांतिः आपोहिष्ठामयोभुव इत्यादिमंत्रैरत्राप्यभिषेकः ततोयज्ञांतदक्षिणामाचार्य्यायदद्यात् हवनदक्षिणांचब्रह्मणेदद्यात् ततोयजमानोऽग्निंप्रदक्षिणीकृत्य धर्मंदेहिधनंदेहिपुत्रपौत्रांश्चदेहिमे आयुरारोग्यमैश्वर्य्यंदेहिमेहव्यवाहन ॥ १ ॥ श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धियशोबलं आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहन यांतुदेवगणाः सर्वेपूजामादाययाज्ञिकीं इष्टकार्य्यप्रसिद्ध्यर्थंपुनरागमनायच प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुच स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः ॥ १ ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियासुच न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतम् ॥ २ ॥ ततोयजमानः कृतस्योद्यापनकर्मणःसांगतासिध्यर्थंब्राह्मणान्यथाशक्तिपक्वान्नपायसादिभिरहंभोजयिष्ये तथाच यथाशक्तिभूयसींदक्षिणांदातुमहमुत्सृजे कृतेनानेनकर्मणा कर्मांगरूपीश्रीभगवान्परमेश्वरःप्रीयतां ततःसदन्नदक्षिणादानादिभिरन्यानपिशिष्टान्ब्राह्मणान्संतोष्य आशिषोगृहीत्वा व्रतसंपूर्णतांवाचयेत् जपच्छिद्रंतपःछिद्रंयच्छिद्रंव्रतकर्मणि सर्वंभवतुचाच्छिद्रंब्राह्मणानांप्रसादतः १ ब्राह्मणायानिभाषंतेमन्यंतेतानिदेवताःसर्वदेवमयाविप्रानतद्वचनमन्यथा २ ब्राह्मणाजंगमंतीर्थंनिर्मलंपापशोधनं येषांवाक्योदकेनैवशुध्यंतिमलिना

जनाः ३ ब्राह्मणानांतुवचसाब्रह्महत्याविनश्यति सर्वतीर्थाभिषेकश्चतेषांवाक्योदकेनहि ४ उदधिःक्षारतांनीतः
पावकःसर्वभक्ष्यतां सहस्रनेत्रः शक्रोपिकृतोविप्रैर्महात्मभिः ५ व्यासवाल्मीकवचनात्पराशरवशिष्ठयोःनारदस्य
भृगोरुक्त्यासंपूर्णंचास्तुतेव्रतम् ६ उपवासो व्रतंतीर्थंजपहोमादिकंचयत् विप्रैःसंपादितंयस्यसंपन्नंतस्यतत्फलम्
॥ ७ ॥ यद्ब्राह्मणास्तुष्टतमावदंतितद्देवताःकर्माभिराचरंति तुष्टेषुतुष्टान्कवयोवदंतिप्रत्यक्षदेवेषुपरोक्षदेवान्
८ ॥ समस्तसंपत्समवाप्तिहेतवःसमुत्थितापत्कुलधूमकेतवः अपारसंसारसमुद्रसेतवोरक्षंतुमांब्रह्मणपादरेणवः
॥ ९ ॥ आपद्घनध्वांतसहस्रभानवःसमीहितार्थार्पणकामधेनवः समस्ततीर्थांबुपवित्रमूर्तयोरक्षंतुमांब्राह्मणपाद
पांसवः ॥ १० ॥ आधिव्याधिहरंनृणांदुःखदारिद्र्यनाशनं श्रीकीर्त्तिपुष्टिदंवंदेविप्राणांपादपंकजम्॥ ११ ॥
अथनियमविशेषोद्यापनं एकमासंद्विमासंवात्रिमासंचार्धमेवच दिनानिदशपंचत्रिंदिनमेकंदिनार्धकं यत्किंचि
त्स्वीकृतंकृत्यंशाकपत्रादिभोजनं मूलिकामत्स्यमांसादिघृतादिफलानिच तत्सर्वंभक्षयिष्यामिनिवृत्तेव्रतकर्म
णि ततोब्राह्मणैराशिषोदेयाः मंत्रार्थाःसफलाःसंतुपूर्णाःसंतुमनोरथाः शत्रूणांबुद्धिनाशोस्तुमित्राणामुदयोस्तुवः
ततोयजमानः सर्वान्सदन्नदक्षिणादिभिः परितोष्य तैराज्ञतः समहोत्सवंहृष्टोजनैःसहभुंजीत ॥ इतिश्रीरघु
वंशतिलकश्रीरणवीरसिंहकारिते कृत्यरत्नाकरे त्रैवर्णिकानां सर्वव्रतानांसामान्योद्यापनम् ॥

अथशूद्रस्यवर्णत्वाद्वर्णसामान्यधर्मा उच्यंते महाभरतेश्राद्धकर्मतपश्चैवसत्यमक्रोधएवच स्वेषुदारेषुसंतोषःशौचंनि
त्यानसूयता आत्मज्ञानंतितिक्षाचधर्मःसाधारणोनृपेति साधारणधर्मत्वश्रवणात् तत्रादौनिषिद्धधर्माःवेदाक्षरविचा
रेणब्राह्मणीगमनेनच कपिलाक्षीरपानेनशूद्रश्चंडालतांव्रजेदितिपराशरोक्तेः जपस्तपस्तीर्थसेवाप्रव्रज्यामंत्रसा

धनंदेवताराधनंचैवस्त्रीशूद्रपतनानिषडितिमनूक्तेश्च अथशूद्रस्यविहितधर्माश्च शूद्रोवर्णश्चतुर्थोपिवर्णत्वाद्धर्मम
ब्र०र० र्हति वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विनेतिव्यासोक्तेः शूद्रस्तूष्णींजपेन्मौनमास्तेभोगविवर्जित इतिविशे
१३८ षविधानाच्च तथाचास्य देवपूजाव्रतोपवासयज्ञदानशमादिनियमैर्होमतर्पणादिभिश्च रुद्रसायुज्यादिफलाभिधा
नमुक्तं कूर्मपुराणे ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चैवद्विजोत्तम अर्चयंतिमहादेवंयज्ञदानशमादिभिः व्रतोपवास
नियमैर्होमस्वाध्यायतर्पणैः तेषांवैरुद्रसायुज्यंसामीप्यंवातिदुर्लभं सालोक्यताचसारूप्यंजायतेतत्प्रसादतइति
वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विनेति तदुक्तंनिर्णयामृते तथाचातिथितत्त्वेस्कांदे स्वाहाप्रणवसंयुक्तंशूद्रेमं
त्रंददद्द्विजः शूद्रोनिरयमाप्नोति ब्राह्मणःशूद्रतामियात् एवंच पौराणविष्णुसहस्रनामचंडीस्तोत्रादिपाठेप्य
नधिकारः श्रवणमात्राधिकारेण पाठाप्रसक्तेः तथा यइदंशृणुयान्नित्यंयश्चापिपरिकीर्त्तयेत् नाशुभंप्राप्नुयात्किं
चित्सोमुत्रेहचमानवः वेदांतगोब्राह्मणः स्यात्क्षत्रियोविजयीभवेत् वैश्योधनसमृद्धःस्यात्शूद्रःसुखमवाप्नुयात्
इत्यत्रश्रवणस्यपूर्वोपादानप्राधान्यात् शूद्रःश्रवणेनैवेतिशंकराचार्य्यैर्व्याख्यातं किंबहुना शूद्रकर्तृकस्नानश्रा
द्धादौविप्रस्यैवपौराणमंत्रपाठःशूद्रस्यतुश्रवणमात्रं श्रावयेच्चतुरोवर्णान्निषादस्थपतिंयाजयेदितिवत् शृणुयुरित्य
र्थेनशूद्रंप्रतिश्रवणजन्यज्ञानस्यैवकर्मभिर्ग्रहणता पुराणपठनपाठाभावे तत्तन्मंत्रेषुपाठाप्रसंगाच्च वाराहेपि अयमे
वविधिःप्रोक्तःशूद्राणांमंत्रवर्जितः अमंत्रस्यतुशूद्रस्यविप्रोमंत्रेणगृह्यते अतः शूद्रकर्तृकदानश्राद्धादौ अर्थ
प्रकाशनार्थंसर्वत्राविप्रेणमंत्रपाठःकार्य्यइतिशूलपाणिः वैदिकोपि विप्रेणपठनीयइत्याचार्य्यचूडामणिः श्राद्धे
यस्यांशाखायांविप्रस्यमंत्रपाठउक्तः सशूद्रस्यापिश्राव्यःस्यादितिकौमुद्यांमदनपालः अमंत्रस्येतिविशेषणात्
शूद्राणांस्त्रीणांतत्तुल्यानांचेतिशूलपाणिःयत्तुतेनोक्तं मंत्रजन्यनियमादृष्टसिद्धिर्नमस्कारेणैवस्यतोनुज्ञातोनमस्कार

मंत्रइति गौतमोपि कल्पतरुस्तुपौराणकर्मणांस्त्रीशूद्रान्प्रतिविशिष्यविधानात्तेषांचमंत्रविशिष्टानामुत्पत्त्यातथैव विनियोगात्पौराणमंत्रपाठोभवेदेवेत्याह तन्न नमस्कारेणबाधात् अन्येतु देवानांदेवनाम्नातुपितॄणांनामगोत्रतः आवाहनादिकर्त्तव्यंयथाशूद्रेणतच्छृणु इतिभविष्योक्तेः सर्वत्रदेवेभ्योनमः पितृभ्योनमः इतिनाममंत्रमाहुःन मस्कारेणमंत्रेणपंचयज्ञान्नहापयेत् तेनशूद्रकर्त्तृकतुलादानादिष्वपिशूद्रस्यनमस्कारोमंत्रः पौराणस्तुविप्रपठनीयइत्यविरोधः अतोनुमतोस्यनमस्कारमंत्रइति गौत्तमीयेपि अत्रकेचिदाहुः विप्रोमंत्रेणगृह्यते इत्यत्रवैदिको मंत्रोविप्रस्य पौराणस्तुशूद्रपठनीयः नवेदेष्वधिकारोहिकश्चिच्छूद्रस्यविद्यते पुराणेष्वधिकारोमेदर्शितोब्राह्मणैरिति शूलपाणौपाद्मोक्तिः तिथितत्त्वे वैदिकेतरमंत्रपाठशूद्रस्याधिकारः श्रोतव्यमेवशूद्रेणनाध्येतव्यंकदाचन इतितत्पुराणमंत्रपरा नमस्कारेणमंत्रेणेति ब्रह्मक्षत्रविशांचैवमंत्रवत्स्नानमिष्यते तूष्णीमेवतुशूद्रस्यसनमस्कारकंमतइति याज्ञवल्क्येनापि अयमेवविधिःप्रोक्तःशूद्राणांमंत्रवर्जित इत्यनुमतोनमस्कारमंत्रोवैदिकपुराणयोर्निषेधाच्च कूर्मपुराणे नाध्येतव्यमिदंशास्त्रंवृषलस्यचसन्निधाविति पौराणनिषेधनेवेदस्यदूराम्नातत्वात् अध्येतव्यंब्राह्मणेनवैश्येनक्षत्रियेणच श्रोतव्यमेवशूद्रेणनाध्येतव्यंकदाचन श्रौतंस्मार्त्तंचवैधर्मंप्रोक्तमस्मिन्नृपोत्तम तस्मात्शूद्रैर्विनाविप्रंनश्रोतव्यंकदाचनेतिशूलपाणौ पुराणाधिकारे भविष्योक्तेः अतएवविप्रोमंत्रेणगृह्यते इति सर्वार्थपरंनआह्वमंत्रमितिशूलपाणिः नन्वेवं श्रवणविधौ सति श्रावयेच्चतुरोवर्णानित्युक्तेर्द्विजानामपितुलादानादौ श्रवणमेवस्यान्नपाठ इतिचेदत्रब्रूमः अध्येतव्यंब्राह्मणेनवैश्येनक्षत्रियेणच श्रोतव्यमेवशूद्रेणनाध्येतव्यंकदाचनेति एवंव्रतोपवासादावपिशूद्रस्याधिकारः श्रवणविधिसिद्धविषयत्वाद्वैदिकमंत्राभावाच्च प्राच्यास्तु वैश्यशूद्रयोर्द्विरात्राधिकोपवासनिषेधमाहुः वैश्याःशूद्राश्चयेमोहादुपवासंप्रकुर्वते त्रिरात्रंपंचरात्रंवातेषांव्युष्टिर्नविद्यते

इतिहेमाद्रौभविष्योक्तेः नवरात्रेतुभवत्येव ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैरन्यैश्चमानवैः स्त्रीभिश्चकुरुशार्दूलतद्विधान
मिदंशृणु इतिभविष्येशूद्रस्याप्युक्तं एवंप्रायश्चित्तंशूद्रेजपहोमादिरहितंदेयं तस्माच्छूद्रंसमासाद्यसदाधर्मपथे
स्थितं प्रायश्चित्तंप्रदातव्यंजपहोमविवर्जितमितिमिताक्षरायामागिरसोक्तं अत्र जपहोमवर्जंप्रायश्चित्तदानेती
र्थयात्रादौनशूद्रसंबंधविधेरुपसंहारः हविरुभयत्ववद्विशिष्टोद्देशेवाक्यभेदाद्द्विजानांतदभावापत्तेश्च किंतु शूद्रसं
बंधिप्रायश्चित्तोद्देशेनजपहोमवर्जत्वविधिर्न्नोभयतःअत्रकेचित् प्रधानभूतयोर्जपहोमयोर्निषेधोनत्वंगभूतयोः अत
एव महार्णवे लौकिकाग्नौस्त्रीशूद्रयोः प्रायश्चित्तांगभूतव्याहृतिहोमोविप्रद्वारोक्तइत्याहुः तत्र आरंभेसर्वकृच्छ्राणां
समाप्तौचविशेषतः आज्येनैवतुशालाग्नौजुहुयाद्व्याहृतीःपृथक् श्राद्धंकुर्य्याद्व्रतांतेतु गोहिरण्यादिद
क्षिणा। स्त्रीणांहोमोनकर्त्तव्यःपंचगव्यंतथैवचेति जावालिना गृह्याग्निनियमात् नचाग्नेःप्रतिनिधिर
स्तीत्युक्तम् अथशूद्रस्यदेवपूजाधिकारः शिवसर्वस्वेभविष्येच यस्तुपूजयतेलिंगंदेवादिंमांजगत्पतिं. ब्राह्मणःक्ष
त्रियोवैश्यःशूद्रोवामत्परायणःतस्यप्रीतःप्रदास्यामि शुभांलोकाननुत्तमान् पूजात्रस्पर्शरहितात्रिस्थलीसेतौस्त्रीणा
मनुपनीतानांशूद्राणांचनरेश्वर स्थापनेनाधिकारोस्तिविष्णोर्वा शंकरस्यच यःशूद्रःसंस्कृतंलिंगंविष्णुंवापिनमेन्न
रः इहैवात्यंतदुःखानिपश्यत्यामुष्मिकेकिमु शूद्रोवानुपनीतोवानारीवापतितोपिवा केशवंवाशिवंवापिस्पृष्ट्वानर
कमश्नुते अथशूद्रस्यमहादानावप्यधिकारः मात्स्येहिरण्यगर्भदाने नरोवायदिवानारीएनंब्रह्मात्मसंभवं यःकरो
तिमहापुण्यंशृणुतस्यापियत्फलं कामधेनुदानेपि आग्नेये ब्रह्मविट्क्षत्रशूद्राणांकर्त्तव्यायत्नतोनृपेतितथावान्यत्राप्यु
क्तंअधिकारीभवेच्छूद्रःपूर्त्तधर्मेनवैदिके मोक्षधर्मेपिमंत्रवर्ज्जंनदुष्यंतिकुर्वाणाःपौष्टिकींक्रियामितिपंचगव्यविधानेस्त्री
शूद्राणांविकल्पःस्त्रीशूद्रस्यविशुद्ध्यर्थंप्राजापत्यंसमादिशेत्पंचगव्यंतुकुर्वीतस्नात्वापीत्वाशुचिर्भवेत् इतिपराशरोक्तेः

यत्तु पंचगव्यंपिबेच्छूद्रोब्राह्मणस्तुसुरांपिबेत् उभौतौतुल्यकर्माणौपूयाख्येनरकेस्थितौ तत्प्रायश्चित्तंविनाते
नायंविशेषःप्रायश्चित्तरत्नेज्ञेयः एवंपूर्त्तेपि जलाशयोत्सर्गप्रासादप्रतिष्ठांमहादानादिषुशूद्रस्याधिकारः अधि
कारीभवेच्छूद्रःपूर्त्तधर्मेनवैदिके पूर्त्तंचाहहेमाद्रौ मदनरत्ने जातूकर्ण्यः वापीकूपतडागादिदेवतायतनानिच
अन्नदानप्रपादानमारामःपूर्त्तमुच्यते नारदः गृहोपरागेयद्दानंसूर्यसंक्रमणादिषु द्वादश्यादिषुयद्दानं
तत्पूर्त्तत्वमुदाहृतं शंखादिभिरप्येवमुक्तं यत्र महादानादौ शूद्रस्य होमादावधिकारस्तत्रद्वेधागतिः वैदिक
मंत्ररहितंविप्रैः कार्यमित्येकः पक्षः मंत्रवर्ज्जनदुष्यंतिकुर्वाणाःपौष्टिकींक्रियामिति मन्वादिभिरप्येवमु
दाहृतं अन्येत्वाहुः विप्रैर्वैदिकमंत्रैरेवहोमादिकार्यंवक्ष्यमामाणपाराशरोक्तेः माधवीयेप्येवं पौराणमंत्रैस्त्वाचार्य
कर्तृकेषुपाठएव याजमानेषुतेषांश्रवणमात्रमुक्तम् श्रवणविधिजन्यज्ञानस्यैवांगत्वात् वैदिकेतुयाजमानेनमस्कारएव
अनुमतोस्यनमस्कारोमंत्रइतिगौतमोक्तेः व्यासमन्वादिवाक्यान्यप्येतद्विषयाण्येव अस्येतिषष्ठीश्रुत्यातत्संबंधि
त्वात्पौराणोपिविप्रस्यैव अमंत्रस्यतुशूद्रस्यविप्रोमंत्रेणगृह्यते इतिपूर्वोक्तवाराहोक्तेः एवंशूद्रस्याद्भुतरोगशांति
कर्मविपाकतुलादानादावपिस्त्रीशूद्राश्चसधर्माणइतिस्मृतेः अतएवशूद्रकर्त्तृकहोमोविप्रद्वारैवपराशरेणोक्तः त
था दक्षिणार्थंतुयोविप्रःशूद्रस्यजुहुयाद्धविः ब्राह्मणस्तुभवेच्छूद्रः शूद्रस्तुब्राह्मणोभवेदिति अत्रमाधवाचार्यः यो
विप्रः शूद्राद्दक्षिणामादायतदीयंहविः शांतिपुष्ट्यादिसिद्धये वैदकमंत्रैर्जुहोति तत्रविप्रस्यैवदोषः शूद्रस्तु होम
फलंलभेतैवेति व्याचचक्षे एतच्च निर्णयसिंधुशूद्रकमलाकरशूद्रधर्मस्मृतिकौमुद्यादिनिबंधेषुसविस्तरमुक्तमत्रादि
ङ्मात्रमपि तेनसर्वत्रशूद्राणांवैदिकमंत्रहोमेद्वौपक्षौ विप्रद्वारामंत्रकः अमंत्रकोनाम्नाचेति पौराणिकोपिविप्रद्वारा
श्रवणमात्रमित्यस्यप्रागुक्तमेवअथशूद्रस्येष्टापूर्त्तादिकर्मसुगर्भाधानादिसंस्कारेषु महादानव्रतोद्यापनादिकर्म

सु सर्वकर्मांगत्वेन पुण्याहवाचनमाचारानुसारेणोच्यते व्यासः संपूज्यगंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत्
काम्यकर्मणिमांगल्येसंग्रामाद्भुतदर्शने यमः सोंकारंतुद्विजः कुर्यान्निरोंकारंमहीपतिः उपांशुचत्तथावैश्यं
स्वस्तिशूद्रप्रकीर्त्तयेत् तत्र कर्त्तादावाचम्य सुमुखश्चैकदंतश्चेत्यादिविप्रैः पठ्यमानं श्रुत्वा ओमद्येत्यादि
देशकालौ संकीर्त्य अमुकगोत्रोमुकदासोहमात्मनःसर्वपापक्षयसकलाभीष्टप्राप्तिद्वारा श्रीपरमेश्वरप्री
त्यर्थं यथाकालसमाचरितैकादश्यादिव्रतस्य सांगफलाप्तये तदुद्यापनकर्मकरिष्ये तदंगतया गणेशपूजनं
पुण्याहवाचनंचकरिष्ये इति संकल्प्य गणेशं पूजयेद्यथा हेहेरंबत्वमभ्येहि अंबिकात्र्यंबकात्मज सिद्धिबुद्धि
युतत्र्यक्ष सर्वलोकपितःपितः नागास्यनागहारत्वंगणनाथचतुर्भुज भूषितःस्वायुधैर्दिव्यैः पाशांकुशपरश्व
धैःआवाहयामिपूजार्थंरक्षार्थंचममक्रतोः इहागच्छगृहाणत्वंपूजांरक्षचमत्क्रतुमित्यावाह्य षोडशोपचारैःसंपूज्यपात्रे
सफलमर्घ्यमादाय रक्षरक्षगणाध्यक्षत्र्यक्षत्रैलोक्यरक्षक भक्तानामभयंकर्त्तात्राताभवभवार्णवात् द्वैमातुरकृपा
सिंधोषाण्मातुराग्रजप्रभो वरदस्त्वंवरंदेहिवांछितंवांछितार्थद अनेनफलदानेनफलदोभवमेप्रभो इत्यर्घ्यंदत्वाव
क्रतुंडमहाकायेतिप्रार्थयेत् यद्वा विश्वेश्वरायवरदायसुरप्रियायलंबोदरायसकलायजगद्धिताय नागाननाय
सितसर्पविभूषणायगौरीसुतायगणनाथनमोनमस्ते १ भक्तार्त्तिनाशनपरायगणेश्वरायसर्वेश्वरायशुभदायसुरेश्व
राय विद्याधरायविकटायचवामनायभक्तप्रसन्नवरदायनमोनमस्ते २ नमस्तेब्रह्मरूपायविष्णुरूपायतेनमःनमस्ते
रुद्ररूपायकरिरूपायतेनमइतिसंप्रार्थ्यततःस्वाग्रेधान्यराशिद्वयेकलशंसंस्थाप्यतत्रदूर्वापंचपल्लवफलहेमपंचरत्ना
निदत्वाधान्यपूर्णपात्रद्वयं न्यस्य तत्र पाशहस्तंचवरुणमंभसांपतिमीश्वरं आवाहयामियज्ञेस्मिन्पूजेयंप्रति गृह्य
तामितिवरुणमावाह्यसंपूज्यकलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः मूलेतस्यस्थितोब्रह्मामध्येमातृगणास्थिताः

इत्याद्यैःसंप्रार्थ्य मातृदेवोभव पितृदेवोभव आचार्यदेवोभव अतिथिदेवोभव आशिषःप्रार्थयतेएताःसत्याशिषःसंतु अवनिकृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधाय दक्षिणेनपाणिनासुवर्णपूर्णकलशधारयित्वादीर्घांनागानद्योगिरस्त्रीणिविष्णुपदानिच तेनायुःप्रमाणेन पुण्याहंदीर्घनायुरस्तु शिवाआपःसंतु सौमनस्यमस्तुअक्षतंचारिष्टमस्तुगंधाःपांतुसुमंगल्यंचास्तुअक्षताःपांत्वायुष्यमस्तु पुष्पाणिपांतुसौश्रियमस्तुतांबूलानिपांत्वैश्वर्यमस्तु दक्षिणाःपांतुबहुदेयंचास्तु इतिविप्रहस्तेदत्त्वा यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाःशुभाःशोभनाःप्रवर्त्तंते तमहंनत्वाभवद्भिरनुज्ञातः पुण्याहंवाचयिष्ये वाच्यतामितितैरुक्ते माविघ्नंमाचमेपापंमासंतुपरिपंथिनः सौम्याभवंतुसुखिनःसर्वेलोकाःसुखावहाइतिकर्तावदेत् ॥ विप्रास्तथास्त्वित्युक्त्वा करोतुस्वस्तितेब्रह्मास्वस्तिचापिद्विजातयः सरीसृपाश्चयेदुष्टास्तेभ्यस्तेस्वस्तिसर्वदा ययातिर्नहुषश्चैवधुंधुमारोभगीरथः तुभ्यंराजर्षयःसर्वेस्वस्तिकुर्वंतुनित्यशः स्वस्तितेस्तुद्विपादेभ्यश्चतुष्पादेभ्यएवच स्वस्त्यस्त्वपादकेभ्यश्चसूर्यभाः स्वस्तितेसदा स्वाहास्वधाशचीचैवस्वस्तिकुर्वंतुतेसदा लक्ष्मीअरुंधतीचैवस्वस्तितेकुरुतांसदा असितोदेवलश्चैवविश्वामित्रस्तथांगिराः वसिष्ठः काश्यपश्चैवस्वस्तिकुर्वंतुतेसदा धाताविधातालोकेशोदिशश्चसदिगीश्वराः स्वस्तितेसप्रयच्छतुकार्त्तिकेयश्चषण्मुखः विवस्वान्भगवान्स्वस्तिकरोतुतवसर्वदा दिग्गजाश्चैवचत्वारःक्षितिश्चगगनंग्रहाः अधस्ताद्धरणींयोसौनागोधारयतेसदा शेषश्चपन्नगश्रेष्ठःस्वस्तितुभ्यंप्रयच्छतुइतिब्राह्मणावदेयुः ततःकर्त्ताब्राह्मणामनःसमाधीयताम्समाहितमनसःस्मइतितेब्रूयुः प्रसीदंतुभवंतःप्रसन्नाःस्मइत्युक्ते कुंभाज्जलंपातयन्वदेत् शांतिरस्तु पुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तु अविघ्नमस्तु आयुष्यमस्तु आरोग्यमस्तु शिवंकर्मास्तु कर्मसमृद्धिरस्तु पुत्रसमृद्धिरस्तु धनधान्यसमृद्धिरस्तु इष्टसंपदस्तु अनिष्टनिरसनमस्तु यत्पापंतत्प्रतिहतमस्तु यच्छ्रेयस्तदस्तु

ब्र०र० उत्तरेकर्मण्यविघ्नमस्तु उत्तरोत्तराःक्रियाःशुभाःशोभनाःसंपद्यंताम् तिथिकरणमुहूर्तनक्षत्रसंपदस्तु तिथिकरण
१४१ मुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां दुर्गापांचाल्यौप्रीयेतां अग्निपुरोगाविश्वेदेवाःप्रीयंताम् इंद्रपुरोगाःमरुद्गणाः
प्रीयंतांब्रह्मपुरोगाःसर्वेदेवाःप्रीयंतां वसिष्ठपुरोगाऋषिगणाःप्रीयंताम् अरुंधतीपुरोगाःएकपत्न्यःप्रीयंतां ब्रह्मपु
रोगाःसर्वेब्राह्मणाःप्री. श्रीसरस्वत्यौप्रीयेतां श्रद्धामेधेप्रीयेतां भगवतीकात्यायनीप्रीयतां भगवतीमाहेश्वरीप्री-
भगवतीपुष्टिःप्री- भगवतीतुष्टिःप्री- भगवंतौविघ्नविनायकौप्री- भगवान्स्वामीमहासेनःसपत्नीकःससुतःसपार्षदः
सर्वस्थानगतःप्रीयतां सर्वाश्चग्रामदेवताःप्रीयं- सर्वाःकुलदेवताःप्री- सर्वाइष्टदेवताःप्रीयंतांहताब्रह्मद्विषःहताः
परिपंथिनः हताअस्यकर्मणोविघ्नकर्त्तारः शत्रवःपराभवंयांतु शाम्यंतुघोराणि शाम्यंत्वीतयः शुभानिवर्धंता
शिवाआपःसंतु शिवाअग्नयःसंतु शिवाओषधयःसंतु शिवाऋतवःसंतु शिवावनस्पतयःसंतु अहोरात्रेशिवंस्या
त् शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाःसर्वेग्रहाःप्री- भगवान्नारायणःप्री-भगवा
न्पर्जन्यःप्री.पुण्याहकालान्वाचयिष्ये वाच्यताम्ब्रह्मपुण्यमहर्यच्चसृष्ट्युत्पादनकारकं वेदवृक्षोद्भवंनित्यंतत्पुण्याहं
ब्रुवंतुनः दीयंतेयत्रदानानिपूज्यंतेचद्विजातयः दृश्यतेयत्रमांगल्यंतत्पुण्याहंसदास्तुमे भोब्राह्मणाममगृहेस्यकर्मणः
पुण्याहंभवंतोब्रुवंतु त्रिःस्वस्तिपुण्याहमितिविप्राब्रूयुः ततःस्वस्तिर्याचाविनाशस्यापुण्यकल्याणवृद्धिदा विनाय
कप्रियानित्यंतांस्वस्तिंभोब्रुवंतुनः ममगृहेस्वस्तिभवंतोब्रुवंतु आयुष्मतेस्वस्तीतिविप्रः ३ सागरस्यतुयावृद्धि
महालक्ष्म्यादिभिःकृता संपूर्णाचैवचंद्रेयातामृद्धिंभोब्रुवंतुनः ऋध्यतामितित्रिः पृथिव्यामुद्धृतायांतुयत्कल्याणंपुरा
कृतं ऋषिभिःसर्वगंधर्वैस्तत्कल्याणंब्रुवंतुनः ममगृहेकल्याणंभवंतोब्रुवंतु कल्याणंत्रिरितिविप्र; ३ ततः क्षीरोद
धिसमुद्भूतामथ्यमानेमहोदधौ विष्णोश्चैवप्रियानित्यंतांश्रियंभोब्रुवंतुनः श्रीरस्त्वितित्रिर्ब्राह्मणाः३ अस्तुश्रीरिति

तैरुक्ते वर्षशतंपूर्णमस्तु शिवमस्तु वंशाभिवृद्धिरस्तु प्रजापतिःप्रीयतां ततोविप्राःसुरास्त्वामभिषिंचंत्वित्याद्यैः पौराणमंत्रैरभिषिंचेयुः तत्रपत्नीवामे अथानंतरंकरोतु स्वस्तितेब्रह्मेतिपूर्वोक्तैर्यजमानस्यनीराजनम् तिलकमाशीर्वादांश्चदद्युरितिसर्वत्र इतिशूद्रकमलाकरे. कंशूद्रस्य पुण्याहवाचनं अथशूद्रस्यमातृकापूजनं तत्रकर्ता तंडुलपुंजेषुगौरीपद्माशचीमेधासावित्रीविजयाजया देवसेनास्वधास्वाहामातरोलोकमातरःधृतिः पुष्टिस्तथातुष्टिरात्मनःकुलदेवता गणेशेनाधिकाह्येताःवृद्धौपूज्यास्तु षोडश ब्राह्मी माहेश्वरीचैवकौमारीवैष्णवीतथा वाराही चतथेंद्राणीच मुंडा सप्तमातरइतिच गणेशयुतागौर्यादिषोडशमातरोब्राह्म्यादिसप्तमातरश्चसर्वाइहागच्छंतु सुप्रतिष्ठितावरदा भवंतु इत्येवंनामभिःपृथक्पृथगावाह्य षोडशोपचारैःसंपूज्याः ततःकुड्ये घृतेनसप्तधाराःकृत्वा वसुधाराभ्योनमः इत्यावाह्यसंपूज्य ललिताचउमागौरीअंबिकासलिलाशया भगाहीचभगाक्षीचसप्तैताघृतमातरः इति षोडशोपचारैःसंपूज्य ततोनांदीश्राद्धंकुर्यात् अत्रसंकल्पादौ विशेषःसंग्रहे शुभायप्रथमांतेनवृद्धौसंकल्पमाचरेत् नषष्ठ्यायदिवाकुर्यान्महान्दोषोभिजायते अनुसंबंधशब्दानामरूपानामरोगिणां अन्नमाचातिलाद्यैश्चनांदीश्राद्धंचसव्यवत् कारिकाच संबंधनामरूपाणिवर्जयेदत्रकर्मणीति अत्रसत्यवसुसंज्ञकौविश्वेदेवौ तत्स्थानेद्वौविप्रौ मात्रादीनांचप्रत्येकंद्वौद्वौएवंविंशतिर्ब्राह्मणाः यद्वा मात्रादीनांत्रयाणांद्वौद्वौ एवमष्टौ मात्रादीनामिति मातृपितामहीप्रपितामहीनां पितृपितामहप्रपितामहानां मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानांस्थानत्रयेप्रत्येकंद्वौद्वौ विश्वेदेवानांद्वौ एवमष्टावेव अत्रनापसव्यंतिलकार्य्येषुयवाएव स्वधास्थानेस्वाहाशब्दः विप्रादीनां नशूद्रस्यसव्यजानुनिपातनाभावः आमान्नादिदानं प्राङ्मुखएवकुर्य्यात् ऋजुदर्भैःक्रियादूर्वाभिर्वा इत्यादयो विशेषाग्रंथांतरतोज्ञेयाः पिंडदानेकुलाचारदेशाचारतोव्यवस्था भविष्ये पिंडनिर्वपणंकुर्य्यान्नवाकुर्य्यान्नराधिप

वृद्धिश्राद्धेमहावाहोकुलधर्मानवेक्ष्यतु पिंडदानेविशेषोवसिष्ठेनोक्तःदधिकर्कंधुबदरीफलंतच्चूर्णितंतथा एकैकस्मैपिं
ग्र०२० डद्वयंदेयं एकनाम्नापरंतूष्णींदद्यात्पिंडद्वयंबुधःपिंडद्वयदानंवृद्ध्यर्थं यद्वा विवाहव्रतचूडासुवर्षमर्धंतदर्धकं पिंडदानं
१४२ मृदास्नानंनकुर्य्यात्तिलतर्पणमितिपित्रादिक्षयाहश्राद्धातिक्रमदोषपरिहारार्थंदेयंतत्र एकनाम्नापरंतूष्णीमितिपिंड
दानपक्षेअत्रापरोविशेषोरूपनारायणीये अग्नौकरणमर्घ्यंचावाहनंचावनेजनं।पिंडश्राद्धे प्रकुर्वीतपिंडहीनेनिवर्त्तते
यथापिंडनिर्वापरहितं यत्रश्राद्धंविधीयते स्वधावाचनलोपोस्तिविकरस्तुनालिख्यते अक्षय्यदाक्षिणास्वस्तिसौमन
स्ययथास्थितिरितिकर्त्तव्यमेव अथशूद्रस्यापिंडकवृद्धिश्राद्धे संक्षिप्तप्रयोगः सत्यवसुसंज्ञकाविश्वेदेवाइदंवःपाद्यं
मातृपितामहीप्रपितामह्योनांदीमुखाइदंवः पाद्यं २ पितृपितामहप्रपितामहानांदीमुखाइदंवः पाद्यं ३ मातामह
प्रमातामहवृद्धप्रमातामहानांदीमुखाः सपत्नीकाइदंवः पाद्यं इदमासनम् ततोगंधादिदानं एषगंधः इमानि
पुष्पाणि एषधूपःइदमाच्छादनं सत्यवसुसंज्ञकेभ्योविश्वेदेवेभ्यः १ मातृपितामहीप्रपितामहीभ्योनांदीमुखीभ्यः
२ पितृपितामहप्रपितामहेभ्योनांदीमुखेभ्यःमातामहप्रमातामहवृद्धप्रमातामहेभ्योः नांदीमुखेभ्यःसपत्नीकेभ्यः४
इदंगंधाद्यर्चनंसंपद्यतांवृद्धिः इतिस्थानचतुष्टयेयथाक्रमंदत्वा ततः परिवेषणार्थं मंडलमभ्युक्ष्य तत्रपरिवेषणंवि
धायसत्यवसुसंज्ञकविश्वेदेवेभ्यः १ मातृपितामहीप्रपितामहीभ्यो नांदीमुखीभ्यः२पितृपितामहप्रपितामहेभ्यो
नांदीमुखेभ्यः मातामहप्रमातामहवृद्धप्रमातामहेभ्यो नांदीमुखेभ्यः ४ युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरू
पेणसंपद्यताम् वृद्धिरितिस्थानचतुष्टये यथाक्रमंदेयं अत्रान्नंसदक्षिणमेवदेयम् अत्रापिस्वस्तिवाचनमितिसंप्रदा
यः अनेननांदीश्राद्धेनकर्मांगदेवताः प्रीयंतांवृद्धिः नांदीश्राद्धसुप्रोक्षितमस्तु शिवाआपः संतु सौमनस्यमस्तु अ
क्षतंचारिष्टमस्तुनांदीमुख्योमातरःप्रीयंतां नांदीमुखाःपितरःप्रीयंतां नांदीमुखामातामहाःप्रीयंताम् गोत्रंनोवर्धताम्

28.7

दातारोनोभिवर्धंतांवेदःसंततिरेवच श्रद्धाचनोमाव्यगमत् बहुदेयंचनोऽस्तु अन्नंचनोबहुभवेदतिथींश्चलभेमहि याचितारश्चनःसंतुमाचयाचिष्मकंचनेतिसंप्रार्थ्य विप्रैस्तथास्त्वितिवाच्यं गोत्रंनोवर्धताम् वेदःसंततिरेवच श्रद्धाचवोमाव्यगमत्बहुदेयंचवोऽस्तु अन्नंचवोबहुभवेदतिथींश्चलभध्वं याचितारश्चवःसंतु मायाचिध्वंतुकंचनेतिप्रत्युक्तं ततोदक्षिणादानं तद्यथा कृतैतन्नांदीश्राद्धकर्मणःसांगतासिद्ध्यर्थं द्राक्षामलकतन्निःक्रयंवादक्षिणांप्रत्येकंददामि विश्वेदेवाःप्रीयंताम् नांदीमुखादेवताःप्रीयंताम् मातापितामहीचैवतथैवप्रपितामही पितापितामहश्चैवतथैवप्रपितामहः मातामहस्तत्पिताचप्रमातामहकादयः एतेभवंतुसुप्रीताःप्रयच्छंतुचमंगलमिति नत्वाविसर्जयेत् इतिशूद्रस्यवृद्धिश्राद्धम् ॥ अथोद्यापनप्रयोगः सचस्त्रीशूद्रयोःसमानधर्मत्वादवैदिकएवोक्तश्चातः पौराणमंत्रपुरस्कृतोभिधीयते तत्रादौ स्वाचार्योपदिष्टरीत्यासतोरणांवेदिमंडपंवायथाशक्तिसंपाद्योद्यापनसंभृतिंचादाय आसनेउपविश्याचम्यप्रतिज्ञासंकल्पंकुर्यात् देशकालौसंकीर्त्य अमुकगोत्रेमुकदासोहंस्त्रीचेदमुकगोत्रामुकदासीचाहं सर्वपापक्षयपूर्वकसकलाभीष्टप्राप्त्युत्तर विष्णुप्रभृतिस्वाभीष्टदेवताप्रीत्यर्थंयथाविद्याचरितैकादश्यादिव्रतसांगफलावाप्तये तदुद्यापनंकरिष्ये तत्पूर्वांगत्वेनगणेशादिपूजार्थमाचार्यादिवरणंचकरिष्ये अथाचार्यवरणं अद्यास्मिन्नेकादश्यादिव्रतोद्यापनकर्मण्याचार्यत्वेनत्वामहंवृणे आचार्यस्तुयथास्वर्गे शक्रादीनांबृहस्पतिः तथात्वंममयज्ञेस्मिन्भवाचार्योद्विजोत्तमेत्याचार्यंवृणुयात् सतिविभवेचतुर्दिक्षुजापकान्द्वारपालांश्चैवंवृणुयात् ऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदैवतः अत्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव १ काचराक्षोयजुर्वेदस्त्रैष्टुभोविष्णुदैवतः काश्यपेयस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव २ सामवेदस्तुपिंगाक्षोजागतःशक्रदैवतः भारद्वाजस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव ३ बृहन्नेत्रोथर्ववेदोनुष्टुभोरुद्रदैवतःवैशंपायनविप्रेंद्रऋत्विक्

त्वंनेमखेभव ४ यदात्वाचार्यएवैकस्तदाऋत्विगादिवरणंनकुर्य्यात् अथाचार्य्योयजमानस्यवस्त्रफलाम्रातादिकं वद्ध्वा अभिषेकंकृत्वा रक्षामूत्रंकरेवद्ध्वा स्वस्तिवाचनंकृत्वा तिलकंकारयित्वा दूर्वाक्षतादिकंदद्यात् तत्रमंत्रःकरोतुस्वस्तितेब्रह्मास्वस्तिचापिद्विजातयःसरीसृपाश्चयेश्रेष्ठास्तेभ्यस्तेस्वस्तिसर्वदा १ ययातिर्नहुषश्चैवधुंधुमारोभगीरथः तुभ्यंराजर्षयःसर्वेस्वस्तिकुर्वंतुनित्यशः २ स्वस्तितेस्तुद्विपादेभ्यश्चतुष्पादेभ्यएवचस्वस्त्यस्त्वपादकेभ्यश्चतवनित्यंमहामखे ३ स्वाहास्वधाशचीचैवस्वस्तिकुर्वंतुनित्यशःलक्ष्मीररुंधतीचैवकुरुतांस्वस्तितेसदा ४ असितोदेवलश्चैवविश्वामित्रस्तथांगिराः वसिष्ठः कश्यपश्चैवस्वस्तिकुर्वंतुतेसदा ५ धाताविधातालोकेशोदिशश्चसादिगीश्वराः दिग्गजाश्चैवचत्वारः क्षितिश्चसनवग्रहाः ६ स्वस्तितेसंप्रयच्छंतुकार्तिकेयश्चषण्मुखः विवस्वान्भगवांश्चैवकरोतुस्वस्तिसर्वदा ७ अधस्ताद्धरणींयोसौनागोधारयतेसदा शेषश्चपन्नगश्रेष्ठ.स्वस्तितुभ्यंप्रयच्छतु ८ इतिस्वस्तिवाचनम् पठित्वापुष्पाक्षतादिकंसर्वेदद्युः अथ.चार्य्योभूतोत्सारणंकुर्यात् अपसर्पंतुतेभूतायेभूताभुविसंस्थिताः ये भूताविघ्नकर्त्तारस्तेनश्यंतुशिवाज्ञया १ यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वतः स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु अथतोरणपूजनम् पूर्वे सुदंष्ट्रतोरणएनंयज्ञंरक्ष सर्वविघ्नान्निवारयेत्यावाह्य ऋग्वेदाधिष्ठितायसुदंष्ट्रतोरणायनमइतिसंपूज्य दक्षिणेविकटतोरणएनंयज्ञंरक्ष सर्वविघ्नान्निवारयेत्यावाह्य यजुर्वेदाधिष्ठितायविकटतोरणायनम इतिसंपूज्य पश्चिमेसुकर्मतोरण एनंयज्ञंरक्षसर्वविघ्नान्निवारय सामवेदाधिष्ठितायसुकर्मतोरणायनम इतिसंपूज्य उत्तरे सुहोत्रतोरण एनंयज्ञंरक्षसर्वविघ्नान्निवारय द्वारेषुकलशान्संस्थाप्यसंपूज्य सर्वत्रकलशेषुदीपादेयाः ततोद्वारपूजनम् पूर्वद्वारेधात्रेनमः विधात्रेनमः द्वारश्रियैनमः गणपतयेनमः वास्तुपुरुषायनमः दक्षिणेवलायनमः सुवलायनमः द्वारश्रियैनमः गणपतयेनमः वास्तुपुरुषायनमः पश्चिमेजयायनमः विजयायनमः

द्वारश्रियैनमः गणपतयेनमः वास्तुपुरुषायनमःउतर चंडायनमः प्रचंडायनमः द्वारश्रियैनमः गणपतयेनमः वास्तुपुरुषायनमः मंडपपूजायाव्रतोद्यापननिबंधेषु प्रायशोनुक्तत्वाद्वेदमंत्रैरेवानुष्ठेयत्वाच्च स्त्रीशूद्राश्चसधर्माणइत्युक्तिमाश्रित्यात्रपरित्यागउचितः अथसर्वतोभद्रपूजाप्रारभ्यते तद्यथा कारयेत्सर्वतोभद्रंवेदिकोपरिसुंदरं तिर्यगूर्ध्वगतारेखाः कुर्यादिकोनविंशतिः खंडेंदुस्त्रिपदः कोणेशृंखलाः पंचकोष्ठकाः एकादशपदावल्लीभद्रंचनवभिः पदैः चतुर्विंशत्पदावापिपरिधिः विंशाभिः पदैः मध्येषोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतं सितेंदुः शृंखलाकृष्णावल्लीनीलेनपूरयेत् भद्रारुणासितावापिपरिधिः पीतवर्णका शुक्लंवायदिवारक्तंपद्मकार्य्यंसुशोभनं वाह्यांतरादलाःश्वेताः कर्णिका पीतवर्णका खंडेंदुः शृंखलावल्लीवापीभद्रंतुपंचमं परिध्यावेष्टितं पद्मंवाह्येसत्त्वंरजस्तमः सर्वव्रतंसमुद्दिष्टंसर्वतोभद्रमंडलं कारयेत्सर्वधान्यैर्वावर्णकैरुपशोभितं पीतंहारिद्राचूर्णं स्यात्सितंतंडुलसंभवं कौसुंभचूर्णमरुणंकृष्णंदग्धपुलाकजं विल्वादिपत्रैर्हरितमेवंस्यात्पंचवर्णकं तन्मध्येस्थापयेद्देवान्ब्रह्माद्यांश्चसुरासुरान् अथस्थानप्रकारः मध्येब्रह्मातथाष्टासुदिक्षुसोमादिदेवताः वायुसोमद्वयोर्मध्ये वसूनष्टौतुपूजयेत् सोमईशानयोर्मध्येरुद्रानेकादशैवतु इंद्रईशानयोर्मध्येआदित्यान्द्वादशैवतु इंद्राग्निमध्येचतथा अश्विनौपूजजेत्तथा आग्नेययमयोर्मध्येविश्वेदेवान्सपैतृकान् याम्यनैर्ऋतयोर्मध्येसप्तयक्षांश्चपूजयेत् नैर्ऋत्यांवुपयोर्मध्येनागान्भूतांश्चपूजयेत् आप्यवायव्ययोर्मध्येगंधर्वाप्सरसोयजेत् ब्रह्मसोमद्वयोर्मध्येरुद्रानेकादशार्चयेत् स्कंदनंदीवृषंशूलंमहादेवंचपूजयेत् ब्रह्मेशानद्वयोर्मध्येदक्षादीन्सप्तपूजयेत् ब्रह्मांतकादिशोर्मध्येस्वधांचैवप्रपूजयेत् ब्रह्मणोनिर्ऋतेर्मध्येगणपंतुप्रपूजयेत् वरुणब्रह्मणोर्मध्ये अपःसंपूजयेत्तथा मध्येवायोर्ब्रह्मणश्चमरुतः संप्रपूजयेत् ब्रह्मणःपादमूलेतुमेदिनींतत्रपूजयेत् कावेरीनर्मदाचैवयमुनाचसरस्वती गंगाकृष्णातथागोदापूज्याः सप्तचसागराः क्षारक्षीरमधुस्सर्पिर्मैरेक्षुदधिसंभवाः तद्वाह्येचाष्टपत्राणिदिगीशानामनुक्रमात् पत्राणिवाहनानि सप्तर्षयोग्रहा

290

ब्र०र०
१४४

श्चैवमाहेंद्रीप्रमुखाश्चपि अथ स्थापनपूजाक्रमः सर्वतोभद्रमध्ये कर्णिकायां ब्रह्मणेनमः ब्रह्माणमावा
हयामि १ पूर्वेवाप्यांइंद्रायनमः इंद्रमावाहयामि २ आग्नेय्यांखंडेदौशृंखलोपरिअग्नयेनमः अग्निमावा
हयामि २ दक्षिणेवाप्यांयमायनमः यममावाहयामि ३ नैर्ऋत्यांखंडेदौशृंखलोपरिनिर्ऋतयेनम.निर्ऋ
तिमा०४ पश्चिमेवाप्यां वरुणायनमःवरुणमा०५वायव्येखंडेदौशृंखलोपरिवायवेनमः वायुमावाहयामि६ उत्तरेवा
प्यां सोमायनमःसोममा. ७ ईशानेखंडेदौशृंखलोपरि ईशानायनमःईशानमा. ८ ईशानेंद्रमध्ये भद्रवसुभ्योनमः
वसूनावा.९इंद्राग्निमध्येभद्रे रुद्रेभ्योनमःरुद्रानावाहयामि१०अग्नियममध्येभद्रे आदित्येभ्योनमःआदित्या.११
यमनिर्ऋतिमध्येभद्रे मरुद्भ्योनमःमरुतआवा.१२वायुसोममध्ये अश्विभ्यांनमःअश्विनावा१३सोमेशानमध्येस्कंदवृ
षभं१४ततोब्रह्मेंद्रमध्ये वल्यांविष्णवेनमःविष्णुमावाहयामि १५ ब्रह्माग्निमध्ये वल्यांगणपतयेनमः गणपति.१६
ब्रह्मयममध्येवल्यां पितृभ्योनमः पितृना- १७ ब्रह्मनैर्ऋतिमध्येवल्ल्यांगंधर्वाप्सरोभ्योनमःगंधर्वाप्सरसः१८
ब्रह्मवरुणमध्येवल्यां सत्यमातृभ्योनमःसत्यमातृरावाहया- १९ ब्रह्मवायुमध्येवल्यांसर्पेभ्योनमःसर्पानावाहयामि
२०ब्रह्मसोममध्येवल्ल्यांदुर्गायैनमःदुर्गामा२१ब्रह्मेशानमध्येवल्ल्यां गंगादिपंचनदीभ्योनमःपंचनद्यआवा-२२
ततोमंडलांतः पद्मस्याष्टदलेषु ईशानदलेदक्षायनमः दक्षमा.२३पूर्वदले- पुरुषाय- पुरुषमावा. २४ आग्नेयदले
दुर्गामावाह- २५ दक्षिणदलेस्वधायैन- स्वधामा. २६ नैर्ऋतदलेमृत्यवेनमः मृत्युमा- २७ पश्चिमदले
शेषायनमः शेषमा- २८ वायव्यदलेसप्तसागरेभ्योनमः सप्तसागरानावा- २९ उत्तरेमरुद्भ्योनमः मरुतआ,
३० ब्रह्मणःपादमूले गणपतयेनमः गणपतिमा. ३१ कर्णिकायांमध्येपृथिव्यैनमः पृथिवीमा. ३२ मेरवे
नमः मेरुमा ३३ पूर्वेऋग्वेदायनमः ऋग्वेदमा.३४ दक्षिणेयजुर्वेदायनमः यजुर्वेदमा;३५पश्चिमेसामवेदायनमः

सामवेदमा. ३६ उत्तरेअथर्ववेदायनमः अथर्ववेदमा-३७ पूर्वादित : वज्रायनः ३८शक्तयेनमः३९ दंडायनमः ४० खड्गायनमः ४१पाशायनमः अंकुशायनमः ४२ गदायैनमः ४३ शूलायनमः ४४ पुनःपूर्वादितः ऐरावतायनमः ४५ मेषायनमः ४६ महिषायनमः ४७ प्रेतायनमः ४८ मकरायनमः ४९ एणायनमः ५० शिविकायैनमः ५१ वृषभायनमः ५२पुनःपूर्वादितः गौतमायनमः ५३ भरद्वाजायनमः ५४ विश्वामित्रायनमः ५५ कश्यपायनमः ५६ जमदग्नयेनमः ५७ अत्रयेनमः ५८ वाशिष्ठायनमः ५९ अरुंधत्यैनमः ६० पुनःपूर्वादितः आदित्यायनमः ६१ सोमायनमः ६२ भौमायनमः वुधायनमः ६३ गुरवेनमः ६४ शुक्रायनमः ६५ शनयेनमः ६६ राहवेनमः पूर्वेशानयोर्मध्येकेतुभ्योनमः ६७ तद्वाह्यपूर्वादितः ऐंद्रीशक्तयेनमः ६८ कौमार्यैनमः६९ब्रह्माण्यैनमः७० वाराह्यैनमः७१चामुंडायैनमः७२वैष्णव्यैनमः७३ माहेश्वर्यैनमः७४वैनायक्यैनमःइति सर्वदेवतासाधारणंसर्वतोभद्रपूजनं गंधपुष्पाक्षतैर्विधेयम् ।शिवशाक्तिव्रतेषुलिंगतोभद्रमंडलंविशेषेणोक्तम् तस्योद्धारक्रमोलिंगपुराणे रेखास्त्वष्टादशाःकार्य्यालिंगतोभद्रमंडले कोणेंदुस्त्रिपदःश्वेतास्त्रिपदैःकृष्णशृंखला वल्लीसप्तपदानीलाभद्रंरक्तंचतुष्पदं भद्रपार्श्वेमहारुद्रंकृष्णमेकादशैःपदैः शिवस्यपार्श्वतोवापींकुर्य्यात्पंचपदांसितां पदगेकंतथापीतंभद्रवाप्योस्तुमध्यतः शिरसिशृंखलायाश्चकुर्यात्पीतंपदत्रयं ।लिंगानांस्कंदतःकोष्ठाविंशतीरक्तवर्णकः परिधिःपीतवर्णैस्तुपदैःषोडशभिःस्मृता पदैस्तुनवभिर्मध्येरक्तंपद्मंसकर्णिकं अत्रापिसर्वतोभद्रमंडलदेवतापूजनं शक्तिपूजांतंकृत्वा अष्टभैरवानांकार्य्यं पूर्वेअसितांगभैरवायनमः ॥ १ ॥ आग्नेय्यांरुरुभैरवायनमः ॥ २ ॥ दक्षिणेचंडभैरवायनमः३नैर्ऋत्येक्रोधभैरवायनमः४पश्चिमेउन्मत्तभैरवायनमः॥ ५ ॥ वायव्येकपालिभैरवायनमः ॥ ६ ॥ उत्तरेभीषणभैरवायनमः ॥ ७ ॥ ईशानेसंहारभैरवायनमः ॥ ८ ॥ पुनःपूर्वादितः भवायदेवायनमः

॥ १ ॥ शर्वायदेवायनमः२ पशुपतयेदेवायनमः ॥ ३ ॥ ईशानायदेवायनमः ॥ ४ ॥ रुद्रायदेवायनमः ॥ ५ ॥ उग्रायदेवायनमः ॥ ६ ॥ भीमायदेवायनमः ॥ ७ ॥ महतेदेवायनमः ॥ ८ ॥ इतिमंडलदेवतापूजनंकृत्वाव्रतोद्यापनदेवतापूजार्थंकलशस्थापनंकार्य्यं तच्चग्रहवेद्यांग्रहपूजापूर्वकंकार्य्यं अद्यकरिष्यमाणैकादश्यादिव्रतोद्यापनकर्मणोयथोक्तफलप्राप्त्यर्थंसूर्य्यादिनवग्रहाणामधिदेवताप्रत्यधिदेवतासहितानांस्थापनमहंकरिष्ये कलिंगदेशोद्भवकाश्यपगोत्रईश्वराधिदेवताअग्निप्रत्यधिदेवतासहित सूर्य्यइहागच्छ १ यमुनातीरोद्भवआत्रेयसगोत्रउमाधिदेवता आपःप्रत्यधिदेवतासहित चंद्रइहागच्छ ॥ २ ॥ अवंतीसमुद्भवभारद्वाजगोत्रस्कंदाधिदेवताभूमिप्रत्यधिदेवतासहितभौमइहागच्छ ॥ ३ ॥ मगधदेशोद्भवआत्रेयगोत्रविष्णवधिदेवताप्रत्यधिदेवतासहितवुधइहागच्छ ४ सिंधुदेशोद्भवआंगिरसगोत्रब्रह्माधिदेवताइंद्रप्रत्यधिदेवतासहितवृहस्पतेइहागच्छ ॥ ५ ॥ भोजकटदेशोद्भवभार्गवगोत्रइंद्राधिदेवताइंद्राणीप्रत्यधिदेवतासहितशुक्रइहागच्छ ॥६॥ सौराष्ट्रदेशोद्भवकाश्यपगोत्रयमअधिदेवताप्रजापतिप्रत्यधिदेवतासहितशनेइहागच्छ ॥ ७ ॥ राढिकापुरोद्भवपैठीनासिंगोत्रकालाधिदेवतासर्पप्रत्यधिदेवतासहितराहोइहागच्छ ॥ ८ ॥अंतर्वेदीसमुद्भवजैमिनिगोत्रचित्रगुप्तअधिदेवताब्रह्माप्रत्यधिदेवतासहितकेतोइहागच्छ ॥ ९ ॥ आदित्यादिग्रहेभ्यअधिदेवताप्रत्यधिदेवतासहितेभ्योनमः इतिसर्वोपचारैःपूजयेत् अथप्रार्थना आदित्यश्चंद्रमाभौमोवुधोजीवःसितोर्कजः ग्रहाःसर्वेप्रसीदंतुराहुःकेतुश्चपूजिताः १ ततोगणेशादिपंचलोकपालपूजनं शनेरुत्तरभागेगणपतेइहागच्छ१ शनेरुत्तरभागेदुर्गेइहागच्छ ॥ २ ॥ रवेरुत्तरभागेवायोइहागच्छ ३ राहोर्दक्षिणभागेआकाशइहागच्छ ॥ ४ ॥ केतोर्दक्षिणभागेअश्विनौदेवौइहागच्छतां ॥ ५ ॥ गणपतयेनमः १ दुर्गायैनमः ॥ २ ॥ वायवेनमः ॥ ३ ॥ आकाशायनमः ॥ ४ ॥ अश्विभ्यांनमः ॥ ५ ॥ एवंसर्वोपचारैःसंपूज्य

॥ ६ ॥ ततोग्रहमंडलात्पूर्वादितःइंद्रइहागच्छइंद्रायनमः ॥ १ ॥ अग्नेइहागच्छ अग्नयेनमः ॥ २ ॥ यमइहागच्छयमायनमः ३ निर्ऋतेइहागच्छनिर्ऋतयेनमः ४ वरुणइहागच्छवरुणायनमः ५ वायोइहागच्छवायवेनमः ६ सोमइहागच्छसोमायनमः ७ ईशानइहागच्छईशानायनमः ८ ब्रह्मन्इहागच्छब्रह्मणेनमः ९ अनंतइहागच्छ अनंतायनमः १० इत्यावाह्यसर्वोपचारैःसंपूज्यप्रार्थयेत् आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा वरुणःपवनश्चैवधनाध्यक्षःसदाशिवः ब्रह्मणासहितःशेषोदिक्पालाःपांतुसर्वदा इतिसमस्तमंडलदेवतापूजनम् सर्वतोभद्रादिमंडले व्रताधिष्ठातृदेवतापूजार्थंकलशंस्थापयेत् भूम्यैनमइतिभूमिस्पर्शः यवगोधूमधान्यानितिलाः कंगुस्तथैवच श्यामाकाश्चणकाश्चैवसप्तधान्यामितिस्मृतं सप्तधान्येभ्योनमः इतिसप्तधान्यं कलशायनमः इतिकलशस्थापनम् गंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधु कावेरिजलेस्मिन्सन्निधिंकुरु इतितीर्थजलेनापूर्य्य कर्पूरंचंदनंदर्पःकुंकुमंचचतुःसमं सर्वगंधमितिख्यातंसमस्तसुरवल्लभं इतिगंधद्रव्यानिक्षेपः कुष्ठंमांसीहरिद्रेद्वेमुराशैलेयचंदनं वचाचंपकमुस्ताचसर्वौषधिगणःस्मृतः सर्वौषधीभ्योनमः इतिसर्वौषधिनिक्षेपः अश्वत्थोदुंबरःप्लक्षश्चूतन्यग्रोधपल्लवाः पंचपल्लवेभ्योनम इति पंचपल्लवप्रक्षेपः गजाश्वरथ्यवल्मीकसंगमाद्ध्रदगोकुलात् राजद्वारप्रवेशाच्चमृदःसप्तविनिक्षिपेत् उद्धृतासि वराहेणकृष्णेनशतबाहुना मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतमिति सप्तमृत्तिकाभ्योनमः इदंफलंमहादिव्यंसमस्तफलदंमतामितिफलं हिरण्यगर्भगर्भस्त्वंहेमबीजंविभावसोः अनंतपुण्यफलदमतः शांतिंप्रयच्छतु इतिहिरण्यं कनकंकुलिशंनीलंपद्मरागंचमौक्तिकं पंचरत्नमितिख्यातंकलशेषुनियोजयेत् पंचरत्नेभ्योनमः दूर्वासिशतपत्रासिशतमूलाशतांकुरा शतंहरसिपापानिशतमायुःप्रवृद्धये दूर्वायैनमः इतिदूर्वाक्षेपः शरण्यंसर्वलोकानांलज्जायाः

परिरक्षतां यस्मात्सुवस्त्रधारित्वंवासःशांतिंप्रयच्छतु इतिरक्तवस्त्रेणावेष्ट्य पूर्णाशाःपूर्णसंकाशाःपूर्णाःसंतुमनोरथाः पूर्णकुंभस्यपूर्त्यर्थंपूर्णपात्रंप्रदीयते पूर्णपात्रायनमः इतिपूर्णपात्रं कलशोपरिदध्यात् ततः सर्वेसमुद्राः सरितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः वरुणकलशायनमः इतिसर्वोपचारैःसंज्यप्रार्थयेत कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः मूलेतस्यास्थितोब्रह्मामध्येमातृगणाःस्मृताः कुक्षौचसागराःसप्तसप्तद्वीपावसुंधरा देवदानवसंबाधेमथ्यमानेमहादधौ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वधिस्थिताः त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः आदित्यावसवोरुद्राविश्वेदेवाः सपैतृकाः त्वयितिष्ठंतिसर्वेपियतः कामफलप्रदः त्वत्प्रसादादिमंयज्ञंकर्त्तुमीहेजलोद्भव सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदा इतिकलशस्थापनंविधाय शांताकारंभुजगशयनंपद्मनाभंसुरेशमित्यादिविष्णुव्रतेषुध्यानम् कर्पूरगौरंकरुणावतारंसंसारसारंभुजगेंद्रहारं सदावसंतंहृदयारविंदेभवंभवानीसहितंनमामि इतिशिवरात्र्यादिव्रतेषुध्यानम् आगच्छदेवदेवेशतेजोराशेजगत्पते क्रियमाणांमयापूजांगृहाणसुरसत्तम इत्यावाहनं नानारत्नसमायुक्तंकार्तस्वरविभूषितं आसनंदेवदेवेशप्रीत्यर्थंप्रतिगृह्यतां इत्यासनं पाद्यंगृहाणदेवेशसर्वक्षेमकरंप्रभो भक्त्यासमर्पितंदेवलोकनाथनमोस्तुते इतिपाद्यम् नमस्तेदेवदेवेशनमस्तेधरणीधर नमस्तेजगदाधारअर्घ्यंनः प्रतिगृह्यतां इत्यर्घ्यम् कर्पूरवासितंतोयंमंदाकिन्याः समाहृतं आचम्यतांजगन्नाथमयादत्तंहिभक्तितः इत्याचमनम् शर्करारससंयुक्तंपयोदधिघृतंमधु पंचामृतंसमानीतंस्नानार्थंप्रतिगृह्यतां इतिपंचामृतस्नानम् गंगाचयमुनाचैवनर्मदाचसरस्वती तापीपयोष्णीरेवाचताभ्यः स्नानार्थमाहृतं तोयमेतत्सुखस्पर्शंस्नानीयंप्रतिगृह्यतइतिशुद्धस्नानं सर्वभूषाधिकेसौम्येलोकलज्जानिवारणे मयोपपादितेतुभ्यंवाससीप्रतिगृह्यतां इतिवस्त्रं ॥ ८ ॥

सर्वदेवनमस्तेस्तुत्राहिमांभवसागरात् ब्रह्मसूत्रंसोत्तरीयंगृहाणपरमेश्वर इतियज्ञोपवीतस्थाने पीतसूत्रादिकंदेयम् ९ श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरं विलेपनंसुरश्रेष्ठगृहाणपरमेश्वर इतिगंधः१०माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो मयानीतानिपूजार्थंपुष्पाणिप्रतिगृह्यताम् इतिपुष्पाणि ११ वनस्पतिरसोदिव्योगंधाढ्योगंधउत्तमः आघ्रेयः सर्वदेवानांधूपोयंप्रतिगृह्यतां इतिधूपं १२साज्यंत्रिवर्त्तिसंयुक्तंवन्हिनायोजितंमया दीपंगृणदेवेशत्रैलोक्यतिमिरापहं भक्त्यादीपंप्रयच्छामिदेवायपरमात्मने त्राहिमांनरकाद्घोराद्दीपज्योतिर्नमोस्तुते इतिदीपम्१३ अन्नंचतुर्विधंस्वादुरसैः षड्भिःसमन्वितं भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां इतिनैवेद्यम् १४ समस्तदेवदेवेशसर्वतृप्तिकरंपरं अखंडानंदसंपूर्णंपानीयंप्रतिगृह्यतां इतिजलम् १५ इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि इतिफलं१६पूगीफलंमहादिव्यं नागवल्लीदलैर्युतं कर्पूरैलासमायुक्तंताम्बूलंप्रतिगृह्यतांइतितांबूलम्१७हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतः शांतिप्रयच्छमे इतिदक्षिणाद्रव्यम् १८ इंद्रादित्यौचधरणीविद्युदग्निस्त्वमेवच त्वमेवसर्वज्योतींषिआर्त्तिक्यंप्रतिगृह्यताम् इतिनीराजनम् १९ नमस्तेपुंडरीकाक्षनमस्तेस्त्वमराप्रिय नमस्तेजगदाधारदेवदेवनमोस्तुते इतिपुष्पांजलिः २० यानिकानिचपापानि जन्मांतरकृतानिचतानिसर्वाणिनश्यंतुप्रदक्षिणपदेपदे इतिप्रदक्षिणा २१ नमःसर्वहितार्थाय जगदाधारहेतवे साष्टांगोयंप्रणामस्तेप्रयत्नेनमयाकृतः इतिनमस्कारः २२ यन्मयाभक्तिसंयुक्तंपत्रंपुष्पंफलंजलं समर्पितंचनैवेद्यंतद्गृहाणजगत्पते इतिप्रार्थना २३ आवाहनंनजानामिनजानामिविसर्जनम् पूजामहंनजानामिक्षमस्वपरमेश्वर यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं इतिसर्वसाधारणपूजाविधानं अथैकादशीव्रतोद्यापनेकश्चिद्विशेषोभिधीयते अत्रद्वादशमासस्थैश्चतुर्विंशत्येकादशीव्रतदेवतानांमूर्त्तयः

कलशेषुपूज्याः सर्वतोभद्रस्यपरितःप्रागादिक्रमेण अथवा द्वादशकमलादौपूज्याः श्रियासहितायआदिकेशवाय नमः १ रुक्मिणीसहितायकेशवायनमः २ कांत्यासहितायमाधवायनमः ३ मोहिनीसहितायचक्रिणेनमः४ शक्त्यासहितायविष्णवेनमः ५ प्रियासहितायवैकुंठायनमः ६ विभूतिसहितायमधुसूदनायनमः ७ मोहिनीसहितायजनार्दनायनमः ८ इच्छासहितायत्रिविक्रमायनमः ९ लक्ष्मीसहितायउपेंद्रायनमः १० प्रीत्यासहितायवामनायनमः ११ कीर्त्यासहिताययज्ञपुरुषायनः १२ रत्यासहितायश्रीधरायनमः १३ पद्मासहितायवासुदेवायनमः १४ मायासहितायहृषीकेशायनमः १५ प्राप्तिसहितायहरयेनमः १६ राधासहितायपद्मनाभायनमः १७ सुशक्तिसहिताययोगीश्वरायनमः १८ महिमासहितायदामोदरायनमः १९ प्राकाम्यसहितायपुंडरीकाक्षायनमः २० अंजनीसहितायकूर्मायनमः २१ मंगलासहितायपृथ्वीधरायनमः २२ वरदासहितायनृसिंहायनमः २३ शुभासहितायउपेंद्रायनमः २४ सर्वोपचारैर्यथाशक्तिसंपूज्य अथात्रैवचतुर्विंशत्येकादशीनांपूजापिकार्य्या तत्रादौशुक्लाःकृष्णाश्चैकादश्योनाममंत्रैः संपूजयेत् एकादशीवृषस्थातुनीलशुभ्रात्रिशूलिनी ताम्रवर्णारथारूढापात्रखेटासिपंकजा १ एकादशीमृगावृजस्थातुलाकर्त्तरिकायुता सिंहाननारुणगलातुंदिनीलासिनीपरा २ मातेवसर्वबालानामौषधंरोगिणामिव रक्षार्थंसर्वलोकानांनिर्मितैकादशीतिथिरितिध्यात्वा तासांनाममंत्राणि चैत्रकृष्णापापमोचिनी १ चैत्रशुक्लाकामिका २ वैशाखकृष्णावरूथिनी ३ वैशाखशुक्लामोहिनी ४ ज्यैष्ठकृष्णापरा ५ ज्यैष्ठशुक्ला- निर्जला ६ आषाढकृष्णायोगिनी ७ आषाढशुक्लाशायिनी ८ श्रावणकृष्णाकामदा ९ श्रावणशुक्लापुत्रदा १० भाद्रकृष्णाअजा ११ भाद्रशुक्लापद्मा १२ आश्विनकृष्णाइंदिरा १३ आश्विनशुक्लापापांकुशा १४ कार्तिककृष्णारमा १५ कार्त्तिकशुक्लाहरिबोधिनी १६ मार्गकृष्णाउत्पन्ना १७ मार्गशुक्लामो

क्षदा १८ पौषकृष्णासफला १९ पौषशुक्लापुत्रदायिनी २०माघकृष्णा।षट्तिला २१ माघशुक्लाजया २ फाल्गुण
कृष्णाविजया।२३फाल्गुनशुक्लाआमलकी२४एताअपिचतुर्विंशतिकलशेषुनाममंत्रैस्तत्रैवसंपूज्याःततःकृतांजलिर्व
क्ष्यमाणमंत्रैःप्रार्थयेत् धृतोसिभगवान्भक्त्याप्रत्यब्दंयावदत्रतुप्रसीददेवदेवेशसर्वान्कामान्प्रदेहिमे अज्ञानाद्ज्ञान
तोवापिजातंन्यूनाधिकंचयत् दीनस्यममनाथस्त्वंक्षमस्वपुरुषोत्तम एतत्कालंव्रतंचीर्णंभगवन्यन्मयाहरे व्रतंत
त्पूर्णतांयातुत्वत्प्रसादाज्जनार्दन मार्गशीर्षेमयादेवयत्कृतंव्रतमुत्तमं भवेत।तेनमेप्रीतौसजायौकृष्णकेशवौ १ पौषे
मास्यपिदेवेशयद्व्रतंकृतमच्युत तेनानंतःसपत्नीकः प्रीतोनारायणोस्तुमे २ माघेर्चितःसपत्नीकोमाधवश्चाच्यु
तोमया व्रतेनतोषितावद्यप्रीतौस्यातांजनार्दनौ ३ फाल्गुणेयद्व्रतंभक्त्याविहितंतेनमेहरे विश्वेशचक्रिणौदेवौप्री
येतांपापमोक्षदौ ४ चैत्रेवैकुंठविष्णूतौसजायौपूजितौमया येनव्रतेनतेनाद्यसुप्रीतौशर्मयच्छतां ५ जनार्दनश्च
वैशाखेतथैवमधुसूदनः अर्चितौयौमयापूर्वंप्रीतौस्यातांममाद्यतौ ॥ ६ ॥ ज्येष्ठेर्चितौसपत्नीकौमयोपेंद्रत्रिविक्र
मौ तुष्येतांमेकृतेनाद्यदेवेशौसपरिच्छदौ ॥ ७ ॥ आषाढेपूजितौयौतुयज्ञपूरुषवामनौ अद्यमेतौसपत्नीकौसुप्री
तौशर्मयच्छतां ॥ ८ ॥ वासुदेवःश्रीधरश्चश्रावणेयन्मयार्चितौ व्रतेनदेवदेवेशौप्रीतौतौमेद्यकेशवौ ॥ ९ ॥ अ
र्चितौदेवदेवेशौनभस्येमासियौमया तौमेहरिहृषीकेशौप्रीयेतांसपरिच्छदौ ॥ १० ॥ योगीश्वरःसपत्नीकःपद्म
नाभस्तथैवच यौमयाश्वयुजेमासिप्रीयेतामद्यतौमम ११ कार्त्तिकेपुंडरीकाक्षस्तदादामोदरोविभुः अद्यमेतौस
पत्नीकौसुप्रीतौपापशांतिदौ १२ एवंदेवोजगद्योनिश्चतुर्विंशतिरूपधृक् चतुर्विंशत्सपत्नीकःप्रीयतांमेजगत्प्र
भुः मामेस्त्रीत्वंमाचमेदासभावोमामूर्खत्वंमाकुदेशेषुजन्म मिथ्यादृष्टिर्माचमेस्यात्कदाचिज्जातोजातोविष्णुभक्तोभवे
यम् इतिपूजाविधानम् अथहोमविधानम् अत्रशूद्रकर्तृकहोमकार्यं शूद्रकमलाकरादिनिबंधोक्तविवाहसंस्का

शाह्लिस्यते तत्राचार्य्यौहस्तमात्रंस्थंडिलंविधाय स्थंडिलाद्दक्षिणे ब्रह्मासनं दत्त्वा ब्रह्मणोवरणपूजादिकं विधाय यथाचतुर्मुखोब्रह्माइत्यादिसंप्रार्थ्य तमुपवेश्यमृण्मयेपात्रेजलपूर्णेकुशान्विधायोत्तरतः कुशेषु निधायाग्निं दर्भैःपूर्वादितःपरिस्तीर्य्यासादनंकुर्य्यात् त्रीणितृणानिद्वेपवित्रे प्रोक्षणी आज्यस्थालीचरुस्थालीसाग्राः कुशाः उपयमनकुशास्तिस्रःसमिधः स्रुव आज्यंपूर्णपात्रं ततःप्रादेशमात्रेपवित्रेकृत्वा प्रोक्षणींसंस्कृत्य पवित्राभ्यामुत्पूय तत्रतेपवित्रेनिधाय दक्षिणेनसव्यं कृत्वोदिंगनंकृत्वा पात्राणिप्रोक्ष्यनिधायाज्यस्थाल्यांनिरूप्याग्नेर्दक्षिणेधिशृत्य पर्य्यग्निं कृत्वा स्रुवंप्रतप्य कुशैःसंमृज्य प्रोक्षणीभिःप्रोक्ष्य पुनःप्रतप्य दक्षिणेनिधायाज्यमुद्वास्योत्पूयावेक्ष्य स्रुवंनिरस्य पुनःप्रोक्षणीवदुत्पूयावेक्ष्योपयमनकुशानादायाग्नौतिस्रःसमिधोभ्याधायप्रोक्षणीभिःपर्य्युक्ष्ययजमानोन्वारब्धोदक्षिणंजान्वाच्यब्रह्मदक्षिणहस्तेन्वारब्धः स्रुवेणाज्यंजुहुयात् प्रजापतयेनमः इंद्रायनमः इत्याघारौ इदंप्रजापतये इंद्रायनममेति अग्नयेनमः सोमायनम इत्याज्यभागौ अग्नयेनमः वायवेनमः सूर्य्यायनमः अग्निवरुणाभ्यांनमः द्विःअग्नयेवरुणाय सवित्रेविष्णवे विश्वेदेवमरुत्स्वर्केभ्यो वरुणायादित्याय अदितये प्रजापतयेनमः इत्याज्याहुतीर्हुत्वाततोघृताक्तयवतंडुलतिलानांहोमः गणपतयेनमः सूर्य्यायनमः चंद्रमसेनमः भौमायनमः बुधायनमः बृहस्पतयेनमः शुक्रायनमः शनयेनमः राहवेनमः केतुभ्योनमः इत्यादि अत्रब्राह्मणकर्तृकःस्वाहाकर्मप्रयोगः नमोनमइतिशूद्रकर्तृकप्रयोगः शूद्रोवर्णश्चतुर्थोपिवर्णत्वाद्धर्ममर्हति वेदमंत्रस्वधास्वाहावषट्कारादिकंविनेति नृसिंहतापिनीयोक्तवचनात् अधिदेवताहोमः ईश्वरायनमः ॥ १ उमायै स्कंदाय- विष्णवे- ब्रह्मणे. इंद्राय. यमाय. कालाय. चित्रगुप्तायनमः अथप्रत्यधिदेवतायैनमः अग्नये नमः ॥ १ ॥ अद्भ्योनमः पृथिव्यै विष्णवेनमः इंद्रायनमः इंद्राण्यै प्रजापतये सर्पेभ्योनमःब्रह्मणे. पंचलोक

पालनाममंत्रैर्होमः गणपतये दुर्गायै वायवे आकाशाय अश्विभ्यां अथशुक्लैकादशीदेवताहोमः केशवाय नमः माधवाय गोविंदाय विष्णवे मधुसूदनाय त्रिविक्रमाय वामनाय श्रीधराय हृषीकेशाय पद्मनाभाय दामोदराय गरुडध्वजाय अथकृष्णैकादशीदेवताहोमः संकर्षणाय वासुदेवाय प्रद्युम्नाय अनिरुद्धाय पुरुषोत्तमाय अधोक्षजाय नरसिंहाय अच्युताय जनार्दनाय उपेंद्राय हरये कृष्णायनमः एताश्चैकादशीदेवताः घृताक्तपायसेनहोतव्याः केवलाज्येनहोमः स्त्रीचतुःसहस्रसहितायै रुक्मिण्यैनमः स्त्रीचतुःसहस्रसहितायैसत्यभामायैजांबवत्यै स्त्रीचतुःसहस्रसहितायैकालिंद्यैनमः शंखायनमः चक्रायनमः गदायै पद्माय गरुडाय इंद्राय अग्नये यमाय निर्ऋतये वरुणाय वायवे सोमाय ईशानायनमः ततोब्रह्माद्याः सर्वतोभद्रमंडलदेवताः केवलाज्येनहोतव्याः ब्रह्मणेनमः इंद्राय इत्यादिदशलोकपालाः पुनरपिहोतव्याः अष्टवसुभ्योनमः एकादशरुद्रेभ्यः दुर्गायै गंगादिनदीभ्यः दक्षाय नारायणाय दुर्गायै स्वधायै मृत्यवे शेषाय समुद्रेभ्यः मरुद्भ्यः गणपतये ॥ १ पृथिव्यै मेरवे ऋग्वेदाय यजुर्वेदाय सामवेदाय अथर्ववेदाय वज्राय शक्तये दंडाय खड्गाय पाशाय अंकुशाय गदायै त्रिशूलाय ऐरावताय मेघाय महिषाय प्रेताय मकराय मृगाय शिविकायै वृषाय गौतमाय भरद्वाजाय विश्वामित्राय जमदग्नये अत्रये वसिष्ठाय अरुंधत्यै सूर्य्यादिभ्योग्रहेभ्यः ॥ २ ॥ ऐंद्र्यै कौमार्य्यै ब्राह्म्यै वाराह्यै चामुंडायै वैष्णव्यै माहेश्वर्य्यै वैनायिक्यैनमः अग्नयेस्विष्टकृतेनमः संस्रवप्राशनंप्रणीतापवित्राभ्यांमार्जनं तयोरग्नौप्रक्षेपः प्रणीताविमोकः पूर्णपात्रदानं अमंत्रकंपूर्णाहुतिदानं अग्नयेजातवेदसेनमोनमः ततोयजमानोऽग्निमुपतिष्ठेत तत्रमंत्रः त्वामेकमाद्यंपुरुषंपुराणंनारायणंविश्वसृजंयजामहे मयैषसांगोविहितोविधिर्योगृहाणहव्यंजगतामधीश ततोग्निंत्रिःप्रदक्षिणीकृत्य देवमुपतिष्ठेत कृष्णायवासुदे

वायहरयेपरमात्मने शरण्यायाप्रमेयायगोविंदायनमोनमः नमःस्थूलायसूक्ष्मायव्यापकाव्यापकायच अनंता
यजगद्धात्रेब्रह्मणेनंतमूर्त्तये अव्यक्तमायालेशायचिद्रूपायगुणात्मने नमोमूर्त्तायसिद्धायपरायपरमात्मने शरण्या
याप्रमेयायगोविंदायनमोनमः देवदेवायवंद्यायपरायपरमेष्ठिने कर्त्रेविश्वस्यगोप्त्रेचतत्संहर्त्रेनमोनमः इतिस्तु
त्वादेवायवायनंविनिवेदयेत् ततोयजमानस्तिथ्यादिसंकीर्त्य कृतस्यास्यैकादशीव्रतोद्यापनस्यसांगतासिद्ध्यर्थं य
थाविधिनावृतानाचार्य्यादीन् वस्त्रतांबूलदक्षिणादिभिः पूजयिष्ये इतिसंकल्पं विधाय सोपकरणश
य्यादिदानंकुर्य्यात् आचार्य्यायगोदानंदद्यात् तद्यथा अद्यकृतस्यैकादशीव्रतस्यसंपूर्त्तिकामोनारायणप्री
तयेआचार्य्यायगोदानमहंकरिष्ये गवामंगेषुदेवतान्यासंकुर्य्यात् शृंगमूलयोर्ब्रह्मविष्णुभ्यांनमः ललाटेमहा
देवायनमः नासावंशेषण्मुखायनमः कर्णयोरश्विभ्यांनमः चक्षुषोः शशिभास्कराभ्यांनमः दंतेषुवायुभ्यः
नासिकायांवरुणाय हुंकारे सरस्वत्यै गंडयोर्यमलाभ्यां ओष्ठयोः संध्याद्वयाय ग्रीवायां इंद्राय कुक्षि
देशेछंदोभ्योनमः उरसिसाध्येभ्यो- चतुष्पादेषुचतुर्युगधर्मेभ्यो- खुरमध्यो गंधर्वेभ्यो- खुरपार्श्वेषुअप्सरो
भ्यो-पृष्ठेएकादशरुद्रेभ्यो- सर्वसंधिषु वसुभ्यो- श्रोणितटे पितृभ्यो- लांगूलेसोमायवाले ष्वादित्यर
श्मिभ्योनमः गोमूत्रे गंगायै. क्षीरे सरस्वत्यै. दध्नि नर्मदायै. सर्पिषिहुताशनाय. रोमकूपेषुदेवाना
मष्टाविंशतिकोटिभ्यो. उदरेपृथिव्यै. पयोधरेषुचतुःसागरेभ्योन. सौरभेयिसर्वहितेपवित्रेपापनाशिनि गृह्
णीष्वेमंमयादत्तंग्रासंत्रैलोक्यवंदिते सर्वदेवस्वरूपिण्यैनमस्तेरुद्ररूपिणि तवपाद्यंमयादत्तंगृहाणसुरवंदिते सर्व
देवमयेदेविसर्वतीर्थमयेशुभे गृहाणार्घ्यंमयादत्तंसौरभेयिनमोस्तुते देहेस्थितासिरुद्राणांशंकरस्यसदाप्रिये धेनु
रूपेणसादेविममपापंव्यपोहतु आच्छादनंमयादत्तंसम्यक्शुद्धंसुशोभनं सुरभ्यैवस्त्रदानेनप्रीयतांपरमेश्वरः श्री

खंडचंदनंदिव्यंसर्वगंधसमन्वितं गृहाणपरयाभक्त्यामयादत्तंसुरेश्वरि ततोऽलंकारान्दद्यात् माल्यानिचसुगंधीनीतिपुष्पं. वनस्पतिरसोदिव्योधूपम्· आज्यंसद्वर्तिसंयुक्तंदीपं सुरभित्वंजगन्मातर्नित्यंरुद्रपदेस्थिता सर्वदेवमयेग्रासंमयादत्तमिदंग्रस इतिगोग्रासं. पूगीफलंमहादिव्यमितितांबूलं. हिरण्यगर्भेतिदक्षिणा. पंचगावः समुत्पन्नामथ्यमान्महोदधेः तासांमध्येतुयानंदातस्यैधेन्वैनमोनमः इतिनमस्कारः गवोममाग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृदयेसंतुगवांमध्येवसाम्यहं इतिप्रदक्षिणा इतिगोपूजांकृत्वा स्वगोत्रादिकमुच्चार्य्यविप्रस्यापिगोत्रादिकं समुच्चार्य्य इमांगांसवत्सां यथाशक्तिभूषितां एकादशीव्रतोद्यापनपूर्णतासिद्धये श्रीविष्णुप्रीत्यर्थं तुभ्यमहंसंप्रददे इतिसातिलजलकुशयुतंपुच्छंविप्रहस्तेनिः क्षिपेत् नममेतित्यागंकुर्य्यात् यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी विश्वरूपधरोदेवः प्रीयतामनयागवा अनेन गोदानेनश्रीविष्णुः प्रीयतां ततोगोदानसांगतासिद्ध्यर्थं हिरण्यगर्भेतिमंत्रेणसुवर्णंदक्षिणांदद्यात् गावोममाग्रतः संतु इतिमंत्रेणप्रदक्षिणीकृत्याविसर्जयेत् ततोयजमानः शुक्लैकादशीकृष्णैकादश्योरुद्यापनसंपूर्त्तिकामोद्वादशसंख्याकान् ब्राह्मणान् केशवादिद्वादशनामभिः संकर्षणादिद्वादशनामभिश्चयथाविभवं पक्वान्नादिभिः संपूज्य पक्वान्नपूरितान्वस्त्रतांबूलप्रतिमावस्त्रसहितान्द्वादशकलशान् प्रत्येकंविप्रेभ्योदद्यात् तत्रमंत्रः पक्वान्नपूरितंकुंभदक्षिणावस्त्रसंयुतं ददामिद्विजवर्य्यायविष्णुर्मेप्रीयतामिति केशवःप्रीयतामित्यादिमंत्रपाठः प्रत्येकंकलशदानेकार्य्यः ततइदंसोपस्करंपीठं सोपस्करांशय्यांच श्रीलक्ष्मीनारायणप्रतिमांचश्रीमहाविष्णुप्रीतयेतुभ्यमाचार्य्यायसंप्रददे ततआचार्य्यःपीठदेवतामुत्थाप्य ततउद्धृतकलशोदकेन यजमानमभिषिंचेत् अथाभिषेकमंत्राः सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा वरुणः पवनश्चैवधना

ध्यक्षस्तथा शिवः ब्रह्मणासहितः शेषो दिक्पालाः पांतुनेसदा कीर्त्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिः श्रद्धाक्रियारतिः बुद्धिर्लज्जावपुः शांतिः पुष्टिः कांतिश्चमातरः एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः आदित्यश्चंद्रमा भौमो बुधोजीवःसितोर्कजः ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चतर्पिताः देवदानवगंधर्वायक्षराक्षसपन्नगः ऋषयोमनवो गावोदेवमातरएवच देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणा;अस्त्राणिचैवशस्त्राणिशतशोवाहनानिच औषधानि चरत्नानिकालस्यावयवाश्चये सरितःसागराःशैलास्तीर्थानिजलदानदाःएतेत्वामभिषिंचंतुधर्मकामार्थसिद्धये मंत्रार्थाः सफलाःसंतुपूर्णाःसंतुमनोरथाः शत्रूणांबुद्धिनाशोस्तुमित्राणामुदयोस्तुवः इत्याभिषेकांतेस्नातोयजमानःमंत्रहीनंक्रियाहीनंविधिहीनंचयत्कृतं तत्सर्वंक्षम्यतांदेवप्रसीदपरमेश्वर यांतुदेवगणाःसर्वेपूजामादायमामकीं इष्टकामप्रसिद्ध्यर्थंपुनरागमनायच इतिविसर्जनम् ततःकृतस्यकर्मणःसांगतासिद्ध्यर्थंब्राह्मणान्यथासंख्यापरिमितान्यथाशक्तिभोजयिष्ये यथाशक्तिभूयसींदक्षिणांदातुमहमुत्सृजे अनेनकर्मांगस्वरूपी श्रीपरमेश्वरः प्रीयतां ततः सदक्षिणेनसदन्नेनब्राह्मणान्संतोष्य आशिषोगृहीत्वा व्रतसंपूर्णतांवाचयेत् जपाच्छिद्रंतपश्छिद्रंयच्छिद्रंयज्ञकर्मणि सर्वंभवतुचाच्छिद्रंब्राह्मणानांप्रसादत इतिप्रार्थ्य सर्वंभवतुतेच्छिद्रंयज्ञविष्णुप्रसादत इतिवदेयुः ततस्तान्नमस्कृत्याविसर्जयित्वा इष्टजनैःसह समहोत्सवोयजमानोभुंजीत ११ इतिशूद्रकर्तृकएकादश्यादिव्रतोद्यापनप्रयोगः स्वस्ति श्रीरणवीरसिंहधरणीपालोवदान्याग्रणीर्नानाशास्त्रविचारसाररसवित्सद्वृंदसंरक्षकः धर्माधर्मविभागकृद्रघुपतेः पादाब्जपूजारतो जीयात्पुत्रकलत्रमित्रसहितः संपालयन्क्ष्मांचिरम् रणवीरसिंहभूपेशकारितेकृत्यसागरे शूद्रादिव्रतनिष्ठायाअभूद्रत्नसमुच्चयः २ इतिश्रीमत्सूर्यवंशावतंसरघुकुलभूषणश्रीमहाराजरणवीरसिंहकारितेकृत्यरत्नाकरेशूद्रकर्तृकव्रतोद्यापनरत्नसंग्रहः दशमोरत्नसमुच्चयः ॥ १० ॥

(1)

प०|पृ०|पं


॥ श्री श्री श्री श्री श्री महाराजरणवीरसिंहजीवालीजम्बूकश्मीरतिब्बता
श्रीरघुनाथजी
श्रीजानकीजी
पण्डितशावशंकरजी ॥
दं सशिङ्गामल

090
202

गुरुकुल कांगड़ी

प०	पृ०	पं०	सूचिसार
२	१	८	वैशाखकृष्णप्रतिपदिवन्हिपूजा
१	२	६	ज्यैष्ठकृष्णप्रतिपदिश्रीप्राप्तिव्रतम्
१३	१	२	आषाढकृष्णप्रतिपद्यारोग्यव्रतम्
२	१	३	श्रावणकृष्णप्रतिपदिचातुर्मास्यादिव्रतारंभः
२	२	११	भाद्रकृष्णप्रतिपदि मधुपायसलवणफाणितदानम्
४	२	१२	आश्विनकृष्णप्रतिपदि वान्हिपूजनमनंतफलदंचपितृश्राद्धम्
४	२	११	कार्त्तिककृष्णप्रतिपदिका. नियमधारणंवह्निपूजाच
१	१	१६	मार्गकृष्णप्रतिपदि योगविशेषस्तत्रगंगास्नानंसूर्यग्रहणशतपुण्यदम्
१	१	९	पौषकृष्णप्रतिपदिकनकदानंशीलावाप्तिव्रतंच

प०	पृ०	पं०	सूचिसार
२	१	१०	माघकृष्णप्रतिपदि वन्हिपूजनंव्रतारंभश्च
१	२	४	फाल्गुणकृष्णप्रतिपदिवह्निपूजादिकृत्यम्
७	२	८	चैत्रकृष्णप्रतिपदिनैकव्रतादिविधानम्
२	१	१०	वैशाखकृष्णद्वितीया समानकल्पादिस्तत्रश्राद्धमनंतफलदम्
३	२	११	ज्यै-कृष्णाद्वितीयायांब्रह्मवह्निगौरीपूजनम्
१३	१	८	आ०कृष्णाद्वितीयायांब्रह्मपूजनंसुभगागौरीपूजनंच
२	१	९	श्रा.कृ.द्वि.अशून्यशयनव्रतम्
२	२	१५	भा.कृ-द्वि-अशून्यशयनव्रतम्
४	२	१४	आ.कृ.द्वि.ब्रह्मपू.श्राद्धमनंततृप्तिदंच
४	२	११	का.कृ.द्वि-यमपूजा
१	१	१३	पौष.कृ-द्वि-गुरुवारेविधिपूजाकार्या
२	१	११	मा-कृ-द्वि.ब्रह्मपूजातद्व्रतंच
१	२	४	फा.कृ.द्वि.ब्रह्मपूजादिकृत्यम्

पुस्तकालय
गुरुकुल कांगड़ी

प०	पृ०	पं०	सूचिसार
५८	१	३	चै-कृ-द्वि- ब्रह्मणःपूजनंकार्यम्
२	१	११	वै. कृ- तृ- प्रीतिदेव्याःपूजनंकोळप्राशनंच
३	२	५	श्रा- कृ-तृ-कज्जलीसंज्ञातत्रदेवीपूजनंकज्जलादिसौभाग्यवस्तुसुवासिनीभ्योदेयम्
२	२	१६	भा-कृ-तृ-विशालाक्षीयात्रा
५	१	३	आश्वि.कृ-तृ.वृहद्गौरीव्रतंहस्तगौरीव्रतंच
४	२	१	का-कृ-तृ-गौरीव्रतम्
१	२	३	मा-कृ-तृ-सौभाग्यसुंदरीव्रतम्
१	१	१५	पौ,कृ-तृ-गौरीपूजाव्रतंपुष्यस्नानंच
३	१	१४	मा-कृ-तृ.सौभाग्यसुंदरीव्रतंगौरीपूजनंच
१	२	४	फा.कृ.तृ.गौरीपूजादिकृत्यम्
५८	१	३	चै.कृ.तृ. सौभाग्यसुंदरीव्रतांगतयारतिनामकगौरीपूजोदकप्राशनंच
२	१	१२	वै.कृ. च.संकष्टचतुर्थीव्रतंशतपत्राशनंच

प०	पृ०	पं०	सूचिसार
१	१	१३	ज्यै. कृ. च. गणपतिपूजनंतद्व्रतंचंद्रोदयेऽर्घ्यदानमाम्रप्राशनंच
१३	१	९	आ.कृ.च.संकटचतुर्थीव्रतं हरनंदनगणपतिपूजनंचंद्रार्घ्यदानंच
३	२	७	श्रा.कृ-च. सोमकल्पादिःसंकष्टचतुर्थीव्रतविधिश्च
३	१	२	भा.कृ.च.संकष्टचतुर्थीव्रतकथा वहुलाचतुर्थीव्रतंगोपूजातद्दानंच
७	२	४	आ.कृ.च. संकष्टच.व्र.पितृश्राद्धंपंचाशत्कल्पतृप्तिदम्
४	२	१६	का. कृ. च- करकचतुर्थीव्रतंस्त्रीकर्त्तव्यंतत्कथोद्यापनंच
३	२	१५	मा-कृ-च- तिथीशत्वेनगणपतिव्रतंतत्पूजनंच
२	१	१	पौ-कृ-च.मासचतुर्थीव्रतम्

5

प०	पृ०	पं०	सूचिसार
२	१	१६	मा-कृ.च-तिलचतुर्थीव्रतंतत्कथाच
१	२	५	फा-कृ.च.विघ्नविनायकव्रतम्
५८	१	३	चै.कृ-च. संकष्टचतुर्थीव्रतंचंद्रोदयेऽर्घ्यदानंपंचगव्यप्राशनंच
२	१	१३	वै.कृ-पं-नागपूजनम्
१	२	१४	ज्यै.कृ-पं.शंखपालनागपूजनम्
१३	१	१०	आ.कृ.पं-नागपूजाव्रतम्
७	२	३	श्रा- कृ-पं- अन्नव्रतंतत्रापितृदेवाद्यर्थमन्नदानंच
८	१	१	भा.कृ.पं.नागपूजनम्
७	२	५	आ.कृ.पं-श्राद्धंपंचाशत्कल्पसहस्रंतृप्तिदंपितृरूपदेवीपूजाच
६	१	१५	का-कृ-पं.नागपूजाव्रतम्
३	२	१६	मा.कृ-पं.गणेशादिनागपूजा
२	१	३	पौ-कृ.पं.नागपूजनंव्रतंच

प०	पृ०	पं०	सूचिसार
३	२	४	मा-कृ.पं-नागपूजादिव्रतम्
१	२	११	फा-कृ-पं-नागपूजादिकृत्यम्
५८	१	६	चै- कृ-पं-काश्मीरदेशीयदेव्याआर्त्तववर्णनम्
२	१	१३	वै.कृ-ष.स्कंदपूजनंव्रतंच
१	२	१४	ज्यै-कृ.ष-स्कंदकुमारार्चाव्रतंच
१३	१	१०	आ-कृ-ष-गुहनामकस्कंदपूजाव्रतंच
१	२	१३	श्रा-कृ-ष.स्कंदपूजनंव्रतंच
८	१	३	भा.कृ-ष-कुशपलाशव्रतंचंद्रषष्ठीव्रतकथोद्यापनंच
७	२	१०	आ-कृ-ष-श्राद्धंषाष्टिकल्पसहस्रंपितृतृप्तिप्रदंभौमयोगेकपिलाषष्ठीव्रतंतत्कथोद्यापनंच
६	१	१५	का-कृ-ष-स्कंदपूजा
४	१	१	मा.कृ-ष-भविष्योक्तंसूर्यषष्ठीव्रतम्

प०	पृ०	पं०	सूचिसार
२	१	४	पौ-कृ-ष-स्कंदपूजनंव्रतंच
३	२	५	माघ-कृ-ष-विशोकषष्ठीव्रतम्
१	२	१२	फा-कृ.ष-स्कंदपूजादिकृत्यम्
५८	२	९	चै.कृ-ष.एकभक्तादिव्रतंभास्करपूजास्कंदपुराणोक्तकथाच
२	१	१४	वै-कृ.स.सूर्यपूजाव्रतंच
१	२	१४	ज्यै.कृ-स-रव्यर्चनंव्रतंच
१	१	११	आ-कृ-स-निक्षुभार्कसूर्यपूजा
१	२	१४	श्रा-कृ-स-रविपूजाव्रतंच
१२	१	३	भा.कृ-स.शीतलाव्रतंतत्कथाच
१२	१	८	आ-कृ-स-सूर्यपूजाव्रतंच
६	२	१	का-कृ-स-वैकुंठकल्पादिस्तत्रसूर्यपूजनम्
४	१	१	मा-कृ.स-षष्ठीव्रतमेवकार्यम्
२	१	४	पौ-कृ-स-उभयसप्तमीतत्रसूर्यपूजाव्रतंच
४	१	४	मा-कृ-स-सर्वाप्तिनामकव्रतम्

प०	पृ०	पं०	सूचिसार
१	२	१३	फा-कृ-स-अष्टकादिकृत्यम्
५८	२	३	चै,कृ-स-तिथिस्वामित्वेनसूर्यपूजनंव्रतंच
२	१	१४	वै-कृ.अ-शीतलाष्टमीव्रतंतत्पूजनंच
१	२	१५	ज्यै-कृ.अ-त्रिलोचनाख्यशिवपूजा
१	१	१३	आ-कृ-अ-दुर्गापूजाव्रतंच-
१	२	१४	श्रा-कृ-अ-सुगतिप्रदनामकव्रतम्
१४	१	१३	भा-कृ.अ.कृष्णजन्मादिबहुविधसोद्यापनव्रतवर्णनम्
१२	१	११	आ.कृ-अ-माध्यावर्षसंज्ञकंश्राद्धंगयातुल्यफलदम्
६	२	१	का.कृ-अ.पुत्रकामव्रतंदर्भमयहरगौर्योःपूजनमहोईव्रतंच
४	२	१	मा.कृ-अ.कालभैरवोत्पत्तिरनेकविधोपवासादिव्रतविधानंच
२	१	५	पौ-कृ,अ,अष्टकाश्राद्धंरुक्मिण्यष्टमीव्रतंच

प०	पृ०	पं०	सूचिसार
२	१	८	वैशाखकृष्णप्रतिपदिवन्हिपूजा
१	२	६	ज्यैष्ठकृष्णप्रतिपदिश्रीप्राप्तिव्रतम्
१३	१	२	आषाढकृष्णप्रतिपद्यारोग्यव्रतम्
२	१	३	श्रावणकृष्णप्रतिपदिचातुर्मास्यादिव्रतारंभः
२	२	११	भाद्रकृष्णप्रतिपदि मधुपायसलवणफाणितदानम्
४	२	१२	आश्विनकृष्णप्रतिपदि वन्हिपूजनमनंतफलदंचापितृश्राद्धम्
४	२	११	कार्त्तिककृष्णप्रतिपदिका. नियमधारणंवह्निपूजाच
१	१	१६	मार्ग.कृष्णप्रतिपदि योगविशेषरतत्रगंगास्नानंसूर्यग्रहणशतपुण्यदम्
१	१	५	पौषकृष्णप्रतिपदिकनकदानंशीलावाप्तिव्रतंच

प०	पृ०	पं०	सूचिसार
२	१	१०	माघकृष्णप्रतिपदि वन्हिपूजनंव्रतारंभश्च
१	२	४	फाल्गुणकृष्णप्रतिपदिवह्निपूजादिकृत्यम्
७	२	८	चैत्रकृष्णप्रतिपदिनैकव्रतादिविधानम्
२	१	१०	वैशाखकृष्णद्वितीया समानकल्पादिस्तत्रश्राद्धमनंतफलदम्
३	२	११	ज्यै-कृष्णाद्वितीयायांब्रह्मवह्निगौरीपूजनम्
१३	१	८	आ०कृष्णाद्वितीयायांब्रह्मपूजनंसुभगागौरीपूजनंच
२	१	९	श्रा.कृ.द्वि.अशून्यशयनव्रतम्
२	२	१५	भा.कृ-द्वि-अशून्यशयनव्रतम्
४	२	१४	आ.कृ.द्वि.ब्रह्मपू.श्राद्धमनंततृप्तिदंच
४	२	११	का.कृ.द्वि-यमपूजा
१	१	१३	पौष.कृ-द्वि-गुरुवारेविधिपूजाकार्या
२	१	११	मा-कृ-द्वि.ब्रह्मपूजातद्व्रतंच
१	२	४	फा.कृ.द्वि.ब्रह्मपूजादिकृत्यम्

प०	पृ०	पं०	सूचिसार
५८	१	३	चै-कृ-द्वि- ब्रह्मणःपूजनंकार्यम्
२	१	११	वै. कृ- तृ- प्रीतिदेव्याःपूजनंककोलप्राशनंच
३	२	५	श्रा- कृ-तृ-कज्जलीसंज्ञातत्रदेवीपूजनंकज्जलादिसौभाग्यवस्तुसुवासिनीभ्योदेयम्
२	२	१६	भा-कृ-तृ-विशालाक्षीयात्रा
५	१	३	आश्वि.कृ-तृ.वृहद्गौरीव्रतंहस्तगौरीव्रतंच
४	२	१	का-कृ-तृ-गौरीव्रतम्
१	२	३	मा-कृ-तृ-सौभाग्यसुंदरीव्रतम्
१	१	१५	पौ,कृ-तृ-गौरीपूजाव्रतंपुष्यस्नानंच
३	१	१४	मा-कृ-तृ.सौभाग्यसुंदरीव्रतंगौरीपूजनंच
१	२	४	फा.कृ.तृ.गौरीपूजादिकृत्यम्
५८	१	३	चै.कृ.तृ. सौभाग्यसुंदरीव्रतांगतयारतिनामकगौरीपूजोदकप्राशनंच
२	१	१२	वै.कृ. च.संकष्टचतुर्थीव्रतंशतपत्राशनंच

प०	पृ०	पं०	सूचिसार
१	१	१३	ज्यै. कृ. च. गणपतिपूजनंतद्व्रतंचंद्रोदयेऽर्घ्यदानमाम्रप्राशनंच
१३	१	९	आ.कृ.च.संकटचतुर्थीव्रतं हरनंदनगणपतिपूजनंचंद्रार्घ्यदानंच
३	२	७	श्रा.कृ-च. सोमकल्पादिःसंकष्टचतुर्थीव्रतविधिश्च
३	१	२	भा.कृ.च.संकष्टचतुर्थीव्रतकथा वहुलाचतुर्थीव्रतंगोपूजातद्दानंच
७	२	४	आ.कृ.च. संकष्टच.व्र.पितृश्राद्धंपंचाशत्कल्पतृप्तिदम्
४	२	१६	का. कृ. च- करकचतुर्थीव्रतंस्त्रीकर्त्तव्यंतत्कथोद्यापनंच
३	२	१५	मा-कृ-च- तिथीशत्वेनगणपतिव्रतंतत्पूजनंच
२	१	१	पौ-कृ-च.मासचतुर्थीव्रतम्

प०	पृ०	पं०	सूचिसार
२	१	१६	मा-कृ.च-तिलचतुर्थीव्रतंतत्कथाच
१	२	५	फा-कृ.च.विघ्नविनायकव्रतम्
५८	१	३	चै.कृ-च. संकष्टचतुर्थीव्रतंचंद्रोदयेऽर्घ्यदानंपंचगव्यप्राशनंच
२	१	१३	वै.कृ-पं-नागपूजनम्
१	२	१४	ज्यै.कृ-पं.शंखपालनागपूजनम्
१३	१	१०	आ.कृ.पं-नागपूजाव्रतम्
७	२	३	श्रा- कृ-पं- अन्नव्रतंतत्रापितृदेवाद्यर्थमन्नदानंच
८	१	१	भा.कृ·पं.नागपूजनम्
७	२	५	आ.कृ.पं-श्राद्धंपंचाशत्कल्पसहस्रंतृप्तिदंपितृरूपदेवीपूजाच
६	१	१५	का-कृ-पं.नागपूजाव्रतम्
३	२	१६	मा.कृ-पं.गणेशादिनागपूजा
२	१	३	पौ-कृ.पं.नागपूजनंव्रतंच

प०	पृ०	पं०	सूचिसार
३	२	४	मा-कृ·पं-नागपूजादिव्रतम्
१	२	११	फा-कृ-पं-नागपूजादिकृत्यम्
५८	१	६	चै- कृ-पं-काश्मीरदेशीयदेव्याआर्त्तववर्णनम्
२	१	१३	वै .कृ-ष.स्कंदपूजनंव्रतंच
१	२	१४	ज्यै-कृ.ष-स्कंदकुमारार्चाव्रतंच
१३	१	१०	आ-कृ-ष-गुहनामकस्कंदपूजाव्रतंच
१	२	१३	श्रा-कृ-ष.स्कंदपूजनंव्रतंच
८	१	३	भा.कृ-ष-कुशपलाशव्रतंचंद्रषष्ठीव्रतकथोद्यापनंच
७	२	१०	आ-कृ-ष-श्राद्धंषष्टिकल्पसहस्रंपितृतृप्तिप्रदंभौमयोगेकपिलाषष्ठीव्रतंतत्कथोद्यापनंच
६	१	१५	का-कृ-ष-स्कंदपूजा
४	१	१	मा.कृ-ष-भविष्योक्तंसूर्यषष्ठीव्रतम्

प०	पृ०	पं०	सूचिसार
२	१	४	पौ-कृ-ष-स्कंदपूजनंव्रतंच
३	२	९	माघ-कृ-ष-विशोकषष्ठीव्रतम्
१	२	१२	फा-कृ.ष-स्कंदपूजादिकृत्यम्
५८	२	९	चै.कृ-प-एकभक्तादिव्रतंभास्करपूजास्कंदपुराणोक्तकथाच
२	१	१४	वै-कृ.स.सूर्यपूजाव्रतंच
१	२	१४	ज्यै.कृ-स-रव्यर्चनंव्रतंच
१	१	११	आ-कृ-स-निक्षुभार्कसूर्यपूजा
१	२	१४	श्रा-कृ-स-रविपूजाव्रतंच
१२	१	३	भा.कृ-स.शीतलाव्रतंतत्कथाच
१२	१	८	आ-कृ-स-सूर्यपूजाव्रतंच
६	२	१	का-कृ-स-वैकुंठकल्पादिस्तत्रसूर्यपूजनम्
४	१	१	मा-कृ.स-षष्ठीव्रतमेवकार्यम्
२	१	४	पौ-कृ-स-उभयसप्तमीतत्रसूर्यपूजाव्रतंच
४	१	४	मा-कृ-स-सर्वाप्तिनामकव्रतम्

प०	पृ०	पं०	सूचिसार
१	२	१३	फा-कृ-स-अष्टकादिकृत्यम्
५८	२	३	चै,कृ-स-तिथिस्वामित्वेनसूर्यपूजनंव्रतंच
२	१	१४	वै-कृ.अ-शीतलाष्टमीव्रतंतत्पूजनंच
१	२	१५	ज्यै-कृ.अ-त्रिलोचनाख्यशिवपूजा
१	१	१३	आ-कृ-अ-दुर्गापूजाव्रतंच-
१	२	१४	श्रा-कृ-अ-सुगतिप्रदनामकव्रतम्
१४	१	१३	भा-कृ.अ.कृष्णजन्मादिबहुविधसोद्यापनव्रतवर्णनम्
१२	१	११	आ.कृ-अ-माघ्यावर्षसंज्ञकंश्राद्धंगयातुल्यफलदम्
६	२	१	का.कृ-अ.पुत्रकामव्रतंदर्भमयहरगौर्योःपूजनमहोईव्रतंच
४	२	१	मा.कृ-अ.कालभैरवोत्पत्तिरनेकविधोपवासादिव्रतविधानंच
२	१	५	पौ-कृ,अ,अष्टकाश्राद्धंरुक्मिण्यष्टमीव्रतंच

प०	पृ०	पं०	सूचिसार
४	१	८	मा-कृ.अ.मांसेनश्राद्धंकार्यम्
१	२	१३	फा.कृ-अ-पित्राद्यर्थंपिंडनिर्वपणम्
५८	२	४	चै-कृ-अ. रविभौमवारेकाश्यांभैरवयात्रा दुर्गापूजनमशोकाष्टमीव्रतंच शीतलाष्टमीव्रतकथाशीतलाष्टकस्तोत्रम्
२	१	१५	वै-कृ-न-चंडीपूजनंव्रतंच
२	१	१	ज्यै .कृ. न.दुर्गासरस्वतीपूजनंव्रतंच
१	१	१४	आ-कृ.न-ऐंद्रीदुर्गापूजनंव्रतमपि
१	२	१६	श्रा-कृ-न-कौमारीपूजनंव्रतंच
३८	१	१५	भा-कृ.न. गोपालनवमी.विख्यातातत्रवृषभगामिशिवपूजनंदुर्गापूजनंच
२३	१	२	आ· कृ. न.रथनवमीव्रतंभविष्योक्तंबिल्वशाखायांदेवीप्रबोधनंच
७	२	७	का-कृ.न-दुर्गापूजाव्रतंच देवीप्रबोधनंच
५	१	१६	मार्गकृ-न.नक्तव्रतम्

प०	पृ०	पं०	सूचिसार
२	२	८	पौ.कृ-न.नक्तव्रतंदुर्गापूजनंच
४	१	१०	मा-कृ.न.अन्वष्टकाश्राद्धविधानम्
२	१	१	फा-कृ.न-दुर्गापूजादिकृत्यम्
५९	२	१०	चै.कृ-न-वाराहजयंतीव्रतम्
२	२	१	वै-कृ-द.यमपूजादिक्पूजाच
२	१	२	ज्यै-कृ.द-उभयदशमीव्रतंधर्मराजपूजाच
१	२	१	आ-कृ.द-धर्मपूजनंदिशांपूजाव्रतंच
८	१	४	श्रा-कृ.द.यमपूजादिक्पूजाच
३८	१	१६	भा.कृ-द-यमपूजादिक्पूजाच
२५	१	९	आ.कृ.द'यमपूजादिक्पूजाच
७	२	८	का-कृ.द.धर्मराजपूजादिक्पूजाच
३	१	३	पौ-कृ-द.धर्मपूजाच
४	१	११	मा-कृ.द-उद्योतकल्पादिस्तत्र श्राद्धादिवि
२	१	२	फा.कृ-द-धर्मराजपूजनम्
६०	१	९	चै-कृ-द-धर्मराजपूजनंव्रतंच

प०	पृ०	पं०	सूचिसार
२	२	२	वै.कृ.ए-हरिपूजनंव्रतंच
२	१	२	ज्यै.कृ.ए-अपरातत्कथाच
१	२	५	श्रा. कृ.ए. यागिनीतत्कथापुंडरीकाक्षपूजनंच
८	२	३	श्रा-कृ.ए. कामिकाव्रतंस्त्रीभिःकार्यंश्रोतव्याचकथारोहिणीयोगेरोहिणीचंद्रपूजाव्र
३८	२	१	भा.कृ.ए-अजातत्कथाच
२५	१	१३	आ.कृ-ए.इंदिरातत्कथाच
७	२	९	का.कृ-ए.रमातत्कथाच
५	१	१६	मा-कृ.ए.उत्पन्नातत्कथाच
३	१	४	पौ.कृए.सफलातद्व्रतंकथाच
४	१	१२	मा.कृ.ए.षट्तिलातत्कथाच
२	१	३	फा.कृ-ए.विजयातत्कथाच
६०	१	१३	चै.कृ.ए-पापमोचनीतद्व्रतंतत्कथाच
२	२	१	ज्यै.कृ.द्वा-हरिपूजाव्रतंच

प०	पृ०	पं०	सूचिसार
२	२	४	श्रा-कृ-द्वा.तिथिभर्तृत्वेनहरिपूजनम्
९	१	११	श्रा-कृ.द्वा-श्रीधरपूजनंकार्य्यम्
३९	१	४	भा-कृ-द्वा.गोवत्सपूजापिष्टमयगोःपूजाच
२६	१	६	आ-कृ.द्वा.संन्यासिनांमहालयश्राद्धंकार्यं
९	१	१	का-कृ-द्वा.गोवत्सपूजाकथाच
९	१	४	मार्ग-कृ-द्वा- कृत्यविशेषाभावेनैकादशीकृत्यमेव
४	२	१	पौ-कृ-द्वा-संप्राप्तिद्वादशीस्वरूपद्वादशीव्र
५	२	८	मा-कृ.द्वा.तिलद्वादशीव्रतम्
३	१	२	फा-कृ.द्वा-हरिपूजादिकृत्यम्
६१	१	१३	चै.कृ.द्वा-वैराजकल्पादिस्तत्रश्राद्धंमहाफलम्
३	१	५	वै-कृ-त्र-गौरीकल्पादिस्तत्रश्राद्धादिकंवि.
२	२	१	ज्यै-कृ-त्र.वटसावित्रीव्रतारंभः
२	२	४	श्रा.कृ-त्र-कामपूजाव्रतंच

प०	पृ०	पं०	सूचिसार
९	१	१३	श्रा-कृ-त्र.कामत्रयोदशीव्रतंच
३९	१	९	भा.कृ.त्र.कलियुगादिस्तत्रश्राद्धंविधेयम्
२२	२	१२	श्रा.कृ-त्र-गजच्छायायोगः
५१	[illegible]	१६	का.कृ.त्र-यमदीपदानव्रतंपंचाहगोवर्धनपूजनंगोगोपीपूजाहनुमज्जन्मदिनकृत्यं
९	१	५	मार्ग-कृ.त्र.प्रदोषव्रतम्
७	१	१४	पौ.कृ.त्र-पक्षप्रदोषव्रतम्
६	१	६	मा-कृ-त्र.पक्षप्रदोषव्रतम्
३	१	३	फा.कृ-त्र-पक्षप्रदोषव्रतम्
६९	१	१३	चै-कृ-त्र- शतभिषायुतावारुणीशनिवारयुतामहा-शुभयोगवतीमहामहावा
३	१	६	वै.कृ-चतु-मासशिवरात्रिव्रतम्
२	२	३	ज्यै-कृ-च.माहेश्वरकल्पादिस्तत्रश्राद्धंवि
२	२	९	श्रा.कृ.च-मासशिवरात्रिव्रतम्
९	१	१५	श्रा-कृ.च.मासशिवरात्रिव्रतम्

प०	पृ०	पं०	सूचिसार
३९	१	१४	भा-कृ.च-मासशिवरात्रिव्रतम्
२८	१	१	आ. कृ.च-शस्त्रहतानांलक्षकोटिकल्पसहस्रतात्तदैकोद्दिष्ठश्राद्धविधानम्
१३	१	८	का.कृ. च. अनर्कचतुर्दशीतित्रचतुर्दश्यादिद्वितीयांतमभ्यंगस्नानम्
९	१	५	मार्ग.कृ. च.देविकातीर्थप्रादुर्भावस्तत्रस्नानदानादिकमनंतफलदम्
७	१	१५	पौष.कृ-च.मासशिवरात्रिव्रतम्
६	१	७	माघ.कृ-च.यमतर्पणंहोमःकृशरान्नदानंच
३	१	३	फा.कृ.च.शिवरात्रिव्रतम्
६२	१	१२	चै.कृ.च.पिशाचमोचनीभौमवारेणातिप्रशस्ताऽत्राशिवसन्निधौ स्नानदानाद्यनंतफलदंदेविकायात्राच
२	१	६	वै.अ. द्वादशामावस्याफलदायिनीतत्रश्राद्धादीनामवश्यकताऽकरणेप्रत्यवायोक्ति

प०	पृ०	पं०	सूचिसार
			अ
२	२	६	ज्यै.अमा. वटसावित्रीव्रतंसौभाग्यस्थिरतार्थंसौभाग्यस्त्रीभिःकार्यंतत्रयमपू- अरुंधतीपू- सुवासिनीपू.उदकुंभाबुदा.व्यजनदा.चंदनदा.त्रिविक्रमपूजनंच
२	२	११	आ-अमा-वर्षसाध्यंपिष्टमयशूलव्रतम्
९	१	१५	आ-अमा-पितृश्राद्धंदानहोमादिकंचवि-
३९	१	१५	भा- अ-कुशाग्रह-अत्रसमंत्रकंकुशोन्मूलनंसंग्रहश्च
२८	२	२	आ.अमा- गजच्छायायोगस्तत्रश्राद्धमनंतफलदं स्त्रीशूद्रादीनांश्राद्धकरणेऽधिकारश्चश्राद्धकालपठनीयोरुचिस्तवश्च
१४	१	१५	का.अमा.दीपावलिस्तत्कथाकौमुदीव्रतंप्रदोषेदीपप्रज्वालनपूर्वकंलक्ष्मीपूजाप्रलक्ष्मीसूक्तपाठश्चात्रैवव्रतांरातण्यपि

प०	पृ०	पं०	सूचिसार
९	१	१३	मा.अमा.पितृपूजनंगौरीतपोव्रतंच
१	१	१५	पा.अ. अर्धोदययोगःसचपौषमार्गपौर्णमास्योर्मध्यवर्तिदर्शेभवति
२	१	१४	माघाऽमायामर्धोदययोगस्तत्र सपायसकांस्यपात्रसुवर्णादिदानं स्कंदपुराणोक्तमर्धोदयमाहात्म्यंच तिलपर्वतगोशय्यादिदानंच
२६	१	११	फा-अ-मन्वादिस्तत्रश्राद्धदानादिकृत्यम्
६२	२	४	चै.अ.अत्रश्वभ्योऽन्नदानंमहाफलमियमेवसोमभौमजीवशनिवारेणतत्तन्नामवती.भवतियथासोमवारेणसोमावती तत्कथोद्यापनंचतत्रैवलिखितम्
२	१	९	वै-शु-आरोग्यप्रतिपदा तत्रधातृनामकसूर्यपूजाव्रतंचतिथीशत्वेनवन्हिपूजाऽपि
३	२	१४	ज्यै-शु.प्रति.आरोग्यव्रतंवरुणसूर्यपूजा

प०	पृ०	पं०	सूचिसार
			व्रतंचकरवीरव्रतंदशहरागंगापूजारंभश्च
२	२	३	आ.शु-प्रति.आरोग्यप्रति- व्रतंविद्याप्राप्तिव्रतांगतयाब्रह्मपूजनंसूर्यपूजनंच
११	१	१	श्रा.शु-प्रति.आरोग्यव्रतंविल्वरोटकव्रतं-विद्याप्राप्तिव्रतंच
३९	२	४	भा.शु. प्रति.मौनव्रतंशिवार्चनंनाम्नांसहस्रपाठमाहा-मौनव्र.कथाचस्कंदपुराणे
४६	२	१५	आ-शु-प्रति- अशोकव्रतंनवरात्रव्रतारंभश्चविस्तरेणतिथ्यष्टककृत्यंदेवीपूजनंच
२५	२	१५	का.शु-प्रति-बलिपूजनंगोवर्धनपूजनंच
११	१	८	मार्ग-शु.प्रति.धनव्रतम्
७	२	७	पौ.शु.प्रति-भानुपूजैकनक्तव्रतंच
९	२	७	मा.शु.प्रति.वन्हिरूपशिवपूजाव्रतंच
१	२	४	फा,शु.प्रति-वन्हिपूजादिकृत्यम्
१	१	२	चै-शु.प्रति.वत्सरारंभोविधेयोऽत्रयोवासरस्सवर्षस्वामीतत्पूजनं प्रपादानंधर्मघटदानंचव्रतांतरमपि
३	१	१०	वै-शु.द्वि. नीललोहितकल्पादिस्तत्रश्राद्धदानादिकर्त्तव्यंचतुर्मुखरूपसूर्यपू.व्रतंच
४	२	८	ज्यै.शु. द्वि.कलियुगादिरत्रसूर्यपूजासोमपदाप्यस्यानामाऽत्रवेदायध्यननिषेधः
२	२	१६	आ-शु.द्वि. अत्ररथयात्रोत्सवःपुष्यर्क्षयु-ताचेत्तत्रमहाराजयात्रोत्सवोऽपिसर्वपुरेषुकार्य्यः
१२	१	१५	श्रा- शु. द्वि. विश्वकर्मशयनव्रतंश्री-कांतपूजनंच
४०	२	१४	भा.शु-द्वि-शक्राख्यधातृपूजनंनवोदितचंद्रदर्शनेऽर्घ्यदानंच
६५	१	९	आ-शु.द्वि-दानमनंतफलदम्
२६	२	८	का-शु.द्वि-यमद्वितीयाकृत्यम्

प०	पृ०	पं०	सूचिसार
११	१	१०	मा.शु.द्वि.पितृश्राद्धंपूजनंच
७	२	१५	पौ.शु.द्वि.गौरीब्रतंशृंगोदकप्राशनंबालेंदुदर्शनमारोग्यब्रतंच
९	२	९	मा.शु.द्वि.भानुरूपप्रजापतिपूजाब्रतंच
२६	२	८	फा.शु.द्वि.फाल्गुणादिशिवपूजाब्रतंच
२०	१	८	चै.शु. द्वि-द्वादशवर्षात्मकंसशक्तिकब्रह्मपूजनम्
३	१	१२	वै.शु.तृ.गौरीब्रतंदधिप्राशनंगोमयप्राशनंत्रेतायुगादिरपि तत्र नित्यंकाम्यंश्राद्धंच जनार्दनपूजागंगास्नानं तत्पूजनंमोदकदानंचंदनदानमुदकुंभदानमक्षयतृतीयाब्रतं श्रीधरपरशुरामजयंतीअक्षयतृतीयाब्रतेभविष्योत्तराविष्णुधर्मोक्तविधानंकथापूजनम्
४	१	१३	ज्यै.शु.तृ.रंभाब्रतंभविष्योत्तरोक्तंतत्कथा.

प०	पृ०	पं०	सूचिसार
			विधानंचललितादेवीपूजनं सौभाग्यशयनब्रतंघृतप्राशनंमंदारपुष्पाघ्राणंभद्रागौरीपूजनंच
३	१	३	आ.शु-तृ.सश्रीकहरेःपूजनंसस्त्रीकाद्विजपूजनंचसौभाग्यसुंदरीब्रतंगौरीतृतीयाब्रतंच
१३	२	१	श्रा.शु.तृ-स्वर्णगौरीव्रतंतदुद्यापनंचात्रैवाऽनंततृतीयाब्रतंतत्कथाच
४०	२	१६	भा.शु-तृ.वासुदेवप्राप्त्यैपायसदानमत्रैवहरितालिकाव्रतंसविधिपूजनंतत्कथोद्यापनंचात्रैवगौरीश्वरीहस्तगौरीहारितालिकानांब्रतम्
९०	१	१६	आ.शु-तृ.वृहद्गौरीव्रतम्
२८	१	५	का,शु,तृ,विष्णुगौरीब्रतम्
१३	२	१४	मा.शु.तृ.आरभ्यभविष्योत्तरोक्तं रंभाब्रतं

प०	पृ०	पं०	सूचिसार
			तद्विधानंच
७	२	१५	पौ.शु.तृ.ब्रह्मगौरीव्रतम्
९	२	१२	मा.शु.तृ.सौभाग्यसुंदरीपूजा तद्व्रतं भविष्योत्तरोक्ततद्विधानंचइयमेव ललितातृतीया ऽत्रैवरसकल्याणिनीव्रतंगौरीतृतीयाव्रतंचात्रैवगुडलवणादिदानम्
२६	१	१४	फा.शु .तृ -कुलसौख्यदातृतीयाव्रतंभूमिकाव्रतं
२३	२	१२	चै-शु- तृ.बालवैधव्यनाशनंव्रतत्रयंतत्कथोद्यापनंचतत्रैवप्रपंचितम्
५	२	१३	वै. शु- च.अनिरुद्धपूजाव्रतमलाबुपात्रदानंच
६	१	७	ज्यै.शु.च.सतीदेवीव्रतम्
३	१	६	आशु- च.रथंतरकल्पादिस्तत्रकल्पादिगणोक्तंश्राद्धदानादिविधेयम्

प०	पृ०	पं०	सूचिसार
३	२	७	आ-शु-च.सोमकल्पादिस्तत्रसंकष्टचतुर्थीव्रतविधिः पार्थिवगणेशदूर्वागणेशव्रतपूजाविधिस्तत्कथाचंद्रोदयेऽर्घ्यदानंच
४९	२	१४	भा.शु-च-सिद्धिविनायकव्रतविधानंतत्रचंद्रदर्शनतद्दोषपरिहारार्थं स्यमंतकोपाख्यानंआव्यंगीशिवाचतुर्थीव्रतमपिहर्षणीदेवीपूजनंच
९३	२	१०	आ-शु.च- कपर्दीशविनायकव्रतंतत्पूजाविधीकथाच
२८	१	९	का-शु-च-नागव्रतम्
१६	१	१३	मा-शु.च- कृच्छ्रचतुर्थीव्रतमत्रैववर्षचतुष्कसाध्यंसर्वार्थसाधकंवरचतुर्थीव्रतम्
८	१	१	पौ-शु-च-विघ्नेशपूजाव्रतम्
१२	१	१५	मा-शु-च,शांतिचतुर्थीवरदचतुर्थीव्रतम्
२७	१	१६	फा.शु. च.ढुंढिराजव्रतंमंगारचतुर्थीव्रतंत

प०	पृ०	पं०	सूचिसार
			दुद्यापनंतत्कथाचसुखचतुर्थीच
२७	१	१६	चै-शु-च-वासुदेवरू[illegible]गणेशपूजाआश्रमव्रतं कांचनवासुदेवप्रतिमाऽत्रब्राह्मणायदेया
५	२	१४	वै-शु.पं-शिवपूजाव्रतंच
६	१	१०	ज्यै.शु.पं.पितृपूजनंतदर्थश्राद्धदानादिविधेयम्
३	१	६	आ.शु.पं.अत्रदिनेशपूजनंग्रामाद्बहिःपंचवर्णध्वजस्थापनमुपवासव्रतिनाभूमिशयनादिविधेयंवायुपरीक्षणंच
१६	१	१०	श्रा. शु.पं.नागपं-व्रतमत्रद्वारस्योभयतोगोमयलिखितनागपू.वासुकिकुंडस्नानंविधेयमियंमानवकल्पादिरपि
५७	२	३	भा.शु-पं-अत्रपंचवर्णालिखितनागपू. तत्र मंत्रो नागदष्टव्रतंच ऋषिपंचमीव्रतविधि

प०	पृ०	पं०	सूचिसार
			स्तत्कथोद्यापनंच
१०	२	६	आ.शु.प-उपांगललिताव्रतं श्रीसूक्तेनपूजाविधानंतत्कथोद्यापनंचशांतिपंचमीव्रतमपि
२८	१	१३	का.शु.पं.जयापंचमीव्रतम्
१७	२	३	मा-शु.पं-नागपं- अत्रनागपूजाविधानं श्रीपंचमीव्रतंच
८	१	२	पौ.शु-पं.मधुसूदनपूजाव्रतम्
१२	२	६	मा.शु,पं-श्रीपं.व्र,वसन्तपं-व्र- रतिकामयोःपूजा-वसंतोत्सवारंभश्च
३१	२	१४	फा.शु-पं-पितृव्रतंनागपूजनंच
२७	१	३	चै-शु-पं-तृतीयादिपंचम्यंतंश्रीव्रतमपरंवर्षसाध्यंश्रीपंचमीव्रतमत्रचन्द्रपूजनंपृथ्वीपूजनंचइदमेवसौभाग्यव्रतंमत्स्यपं- व्र-कल्पादिरपीयम्

प०	पृ०	पं०	सूचिसार
५	२	१५	वै-शु.ष.स्कंदपूजाव्रतंमातृसौख्यव्रतंच
६	१	१०	ज्यै.शु.ष.स्कंदपुराणोक्तंदिननाथरविपू-
१	२	१४	आ.शु.ष.स्कंदपूजाव्रतंच
१६	२	११	श्रा.शु.ष-स्कंदपूजनं
६२	२	१४	भा.शु-ष-सूर्यषष्ठीयमेवललिताषष्ठीचात्रैवचंपाषष्ठीव्रतंविधेयम्
९८	२	५	आ.शु-ष.बिल्ववृक्षेदेवीबोधनंतच्चनवरात्रप्रकरणेज्ञेयम्
२५	१	६	का. शु- ष.भौमवारेचेत्तदादेवसेनान्वितस्कंदव्रतोत्सवःकार्यः
१९	१	५	मार्ग. शु.ष.मल्लारिपूजोक्ताऽत्रैवफलषष्ठीव्रतमतस्तत्रफलदानंविधेयम्
८	१	४	पौ.शु-ष-विष्णुरूपिसूर्यपूजाव्रतंच
१३	१	१	मा.शु.ष-अरुणाख्याऽत्रारुणपूजनंविधेयम्

प०	पृ०	पं०	सूचिसार
३१	२	१५	फा-शु.ष.पशुपतिपू-व्र.इयमेवदारिद्र्यहरषष्ठीअतोदारिद्र्यपरिहारार्थंव्रतंविधेयम्
२७	२	१६	चै-शु.ष.स्कंदषष्ठीअत्रकुमारपूजनंव्रतंच
५	२	१६	वै-शु-स. गंगाप्रादुर्भावस्ततःपूजनादिव्रतंचविधेयम्
६	१	१२	ज्यै-शु.स.देवेंद्ररविपूजनंव्रतंच
१	२	१५	आ.शु.स. इंद्राख्याविवस्वदाख्यसूर्यपूजनंव्रतंच
१६	२	१३	श्रा.शु-स.अव्यंगस-व्र-कर्पाससूत्रमयसप्तवाहनसूर्यपूजनव्रतंकार्यं पापनाशिसप्तमीव्रतंच
६५	१	८	भा.शु.स-अनंतसप्तमीव्रतंतत्कथाचात्रैवामुक्ताभरणसप्तमीव्रतंतत्कथापूजाच
९८	२	७	आ-शु.स-शुभसप्तमीव्रतमत्रैवमासोपवासव्रतारंभस्तत्प्रयोगश्च

प०	पृ०	पं०	सूचिसार
२९	१	१६	का.शु-स.शाकसप्तमीव्रतंतत्रशाकभक्षणं सुसवर्णशाकदानंचाविधेयम्
२०	२	४	मार्ग.शु-स-मित्रसप्तमीव्रतम्
८	१	६	पौ.शु.स-उभयसप्तमीव्रतम्
१३	२	१	मा-शु-स-अचला.त्रिलोचना.जयंती- रथस-रथांकस-आरोग्यस-विशोक- सिद्धार्थका-हेमंस-विजया-अन्नोदकस. वराटिकास- १२ मन्वादिरपीयमव्रतालकदा-रथदा. विधानंउद्यापनकौमुद्युक्तमचलासप्तविधानंरथसप्तमीकथातद्विधानंच
३२	१	९	फा.शु- स-अर्कपुटव्रतंतत्रार्कपत्रैःसूर्यपू०
२८	१	१६	चै.शु-स-अत्राष्टदलकमलसूर्यपूजनमाग्निप्रतिष्ठापनं तन्नामाभिर्होमउद्यापनंचअत्रैवहिरण्यमर्त्तिगोशय्यादिदानं दमनस-अनोदनस- नामसप्तविष्णुधर्मोक्तंसूर्यपूजनंच
२	१०	१४	वै.शु.अ.शीतलाष्टमीव्रतंतत्पूजनंच
३	१	१६	ज्यै.शु.अ-शुक्लादेवीव्रतपूजनंच
३	२	३	आ.शु.अ- महिषघ्नचंडीपूजाव्रतंचतत्रपु. हरिद्रातोयादिभिरेवकार्यम्
१७	१	५	श्रा-शु-अ-दुर्गाष्टमीतत्पूजाव्रतंच
६८	१	८	भा.शु-अ.ज्येष्ठाष्टमीव्रतं राधाष्टमीव्रतंतत्पूजाविधानंकथानकंचअत्रैवदूर्वाष्ट- दूर्वापू-मंत्रश्च
६७	२	१	आ-शु- अ-तत्कृत्यंअश्वपूजनंलोहाभिसारिकादितत्रविस्तरेणप्रपंचितम्
२९	२	३	का-शु.अ-गोपा ८ तत्रचातुर्वर्ण्येनगोपूजनंकार्यम्
८	१	९	पौशु-अ.दुर्गापूजाव्रतंच
१९	२	१२	मा-शु-अ-भीष्मातत्रभीष्मतर्पणादिविधे-

प०	पृ०	पं०	सूचिसार
			विधेयम्
३३	२	१३	फा-शु.अ.शुक्ला ८ शीतला-बुधाष्ट.सोमाष्ट- अर्काष्ट. अशोकाष्ट. विश्वरूपाष्ट-व्रतं तदुद्यापनच अत्रैव शिवपूजनमपिकार्यम्
२९	१	५	चै.शु-अ.अत्रभवान्याउत्पत्तिरत्राशोककलिकाप्राशनंलोहितनदेस्नानंचात्रैव देव्यामहापूजनंकार्यम्
७	१	४	वै-शु.न.चंडिकादेवीपूजनंव्रतंच
३	१	१६	ज्यै.शु-न.उमादेवीपूजाव्रतंच
३	२	१२	आ-शु.न.ऐरावतनिषण्णैंद्रीदेवीपूजनम्
१७	१	८	श्रा-शु.न-कौमारीदेवीपूजनंव्रतंच
७२	२	४	भा.शु-न.श्रीवृक्ष-नंदानवमीव्रतम्
१०१	२	१०	आ-शु.न-महान- अत्रभद्रकालीव्र-रथन-व्र.उल्कान-व्र.शौर्यव्र-अत्रोत्सवविधानंभगवतीप्रीत्यर्थंशय्यादा.वृषभदा-उभयतोमुखीगोदानंच
२९	२	८	का.शु.न- कृतयुगादिरत्रकूष्मांडदानंतुलसीविवाहादिकृत्यारंभो नगरप्रदक्षिणा तत्कथातुलसीविवाहकथाच
२२	१	४	मार्ग.शु-न.नंदिनीनवमी
८	१	१६	पौ- शु- न. महामायापूजैकभक्तव्रतंचात्र दुर्गास्तवराजपाठोदेवीमंदिरेध्वजारोपणंचविधेयम्
२०	१	५	मा-शु.न.नंदान-तत्रस्नानदानाद्यनंतफलदम्
३५	२	११	फा-शु.न.नंदादिपंचनवमीव्रतानि
२९	२	७	चै.शु. न.रामजयंतीव्रतंतत्रानेकविधव्रतोपयोगिकृत्यम्
७	१	६	वै.शु.द.धर्मराजपूजनंव्रतंदिक्पूजनंचवि

प०	पृ०	पं०	सूचिसार
			धेयम्
६	२	४	ज्यै.शु.द.दशहरागंगापू-दशहरास्तोत्रं.चात्ररामेणसेतुबंधरामेश्वरःप्रतिष्ठापितः
३	२	१४	आ-शु-द-मन्वादिस्तत्रस्नानदानाद्यनंतफलदम्
१७	१	११	श्रा.शु.द.सर्वाशापूर्त्तिदा तद्व्रतम्
७३	१	७	भा-शु-द-दशावतारव्रतविधानम्
७३	१	१३	आ-शु.द-विजयादशमीविधानंविस्तरेण नवरात्रविधानेशमीपूजनंच
३३	२	४	का-शु-द.सार्वभौमव्र.राज्यावाप्तिव्र.ब्रह्मावाप्तिव्रतंच
२२	१	८	मा.शु-द-आरोग्यदशमीव्रतम्
१०	१	१	पौ.शु-द-विश्वेदेवपू-व्र.ईशानकल्पादिरपीयंतत्रदानाद्यनंतफलदम्
२०	१	१०	मा.शु-द-आरोग्यद-धर्मव्रतत्रयं

प०	पृ०	पं०	सूचिसार
३६	१	२	फा.शु-द.आशाद.तत्रयमपूजनंव्रतंच
४७	२	४	चै.शु-द-धर्मराजपू.व्रतंच
९	१	९	वै-शु-ए-मोहिनीतत्कथाच
८	२	८	ज्यै-शु-ए-निर्जलातत्कथाभविष्योत्तरेपुराणसंग्रहेब्रह्मवैवर्त्तेच
४	१	१५	आ-शु-ए-देवशयनीतद्व्रतंभविष्यपद्मपुराणोक्तातत्कथाचमैत्रर्क्षयोगेवासुदेवद्वादशीव्रतमपि देवस्यशयनोत्सवश्चातुर्मास्यव्रतारंभश्च
१७	१	१२	श्रा-शु-ए-पुत्रदा-तद्व्रतंकथाच अत्रैवबुद्धद्वादशीव्रतंपवित्रारोपणंचकार्यं नृसिंहपरि.चर्योक्तपवित्रलक्षणंच
७४	१	७	भा-शु-ए-पद्मा.तत्कथाश्रवणयुताचेद्द्विजया.अत्रैववामनावतारः कटिदानोत्सवस्तत्पूजाविधिश्च

प०	पृ०	पं०	सूचिसार
१०५	१	१२	आ-शु.ए. पापांकुशातत्कथातत्रैवकार्त्तिकस्नानव्रतादीनामारंभो मासोपवासव्रतारंभश्च
३४	१	१४	का.शु.ए.हरिप्रबो- पद्मस्कंदपुराणोक्तातत्कथाचात्रैवभीष्मपंचकव्रतविधानं ध्वजारोपणविधानंच
२२	२	९	मा. शु-ए. मोक्षदातद्व्रतंतत्कथाचात्रैववन्हिपुराणोक्तनामद्वादशीव्र. भविष्योत्तरोक्तंधरणिव्रतंचनारदोक्तंमत्स्यद्वादशीव्रत-पि
१०	१	६	पौ-शु.ए- पुत्रदा.पद्मपुराणोक्तातत्कथामन्वादिरपीयंतत्रदाक्षिणात्यानांमाघस्नानारंभस्तद्विधिश्च
२२	२	१	मा-शु-ए.जया-भैमसेनीअत्रवराहद्वादशीव्रतम्
३७	१	३	फा-शु. ए-आमर्दकी.तत्कथाऽत्रैवमनोरथद्वादशीव्रतंच
४७	२	४	चै.शु.ए- कामदा.तत्कथाचदोलोत्सवःस्त्रीकर्तृकरुक्मिणीयात्राचकार्यासंक्षेपणवास्तुपूजादमनोत्सवश्च
८	१	५	वै-शु.द्वा.जामदग्न्यद्वा. व्रतमत्रैव वासरनक्षत्रसद्योगेनव्यतीपातयोगे माधवपूजा
१३	१	२	ज्यै.शु.द्वा.राघवद्वा.व्र-अत्रयमुनास्नानादिविधेयम्
१५	२	१५	आ.शु-द्वा.विभूतिद्वा.तत्कथा मन्वादिरस्तत्कृत्यंलवणाचलदानंचानुराधायोगे पारणविचारश्च
७७	२	१०	भा-शु.द्वा.श्रवणयोगेव्रतपारणनिषेधः शक्रध्वजोत्थापनंविधेयं वामनपूजाचनदीसंगमलक्षणंतत्स्नानंचोक्तं श्रवणद्वा- कथाच
१०७	२	३	आ.शु-द्वा.पद्मनाभद्वा. तत्रविष्णुमंदिरेदी

प०	पृ०	पं०	सूचिसार
			पदानंतन्माहात्म्यंपुत्रप्राप्तिब्र-त्रिरात्राशोकब्रतंच
४७	१	१५	का-शु-द्वा. अत्रनीराजनविधिस्तच्छांतिकथाचचातुर्मास्यब्रतसमाप्ति वाराहोक्तप्रबोधविधिश्च
२९	२	२	मार्ग-शु-द्वा-नारदपुराणोक्तसाध्यब्रतंद्वादशादित्यब्रतमखंडद्वादशीब्रतं चात्रैवतार.कद्वादशीब्रतम्
१२	१	५	पौ-शु-द्वा-सजन्मद्वादशीगोविंदद्वा.ब्रतंच
२४	१	५	मा.शु-द्वा-तिलद्वादशीभीमद्वाद-तत्कथाच
३८	१	९	फा.शु.द्वा-नृसिंहद्वा-गोविंदद्वासुकृतद्वादब्रतम्
५२	२	१४	चै-शु- द्वा.मदनद्वा-भर्तृद्वादशीवाराहपुराणोक्तावामनद्वादशीब्रतकथाऽत्रैवसंकल्पद्वादशीब्रतम्

प०	पृ०	पं०	सूचिसार
८	२	७	वै.शु-त्र-कामदेवपूजाब्रतंच
१३	२	२	ज्यै-शु.त्र.दौर्भाग्यशमनब्रतम्
१८	२	१२	आ-शु-त्र .उमामहेश्वरब्रतंजयापार्वती:तंच
२८	१	१५	श्रा-शु-त्र- वैधव्यनाशनब्रतंसंतानवर्द्धनब्रतंच
८९	१	४	भा-शु- त्र-गोत्रिरात्रब्रतंसोद्यापनमत्रैवाशोकत्रिरात्रब्रतंच
१०८	१	१६	आ-शु.त्र-त्रिरात्राशोकब्रतम्
४१	१	११	का-शु-त्र. शिवपूजनब्रतंनामाष्टोत्तरशतेनसहस्रदीपदानंच
३२	२	६	मार्ग- शु-त्र.अनंगत्रयोदशीब्रतंभाविष्योत्तरोक्तमप्यन्यत्
१३	१	४	पौ-शु.त्र - अच्युतपूजाब्रतंविप्रायघृतादिदानंच

प०	पृ०	पं०	सूचिसार
२६	१	९	मा.शु.त्र.त्रिरात्रमाघस्नानव्रतारंभः
४१	१	१३	फा-शु-त्र.धनदव्रतम्
५४	२	४	चै.शु-त्र.चद्रनामकमदनपूजाऽजदानंचयमुदानकल्पादिस्तत्कृत्यंच
८	२	९	वै.शु.च-नृसिंहजयंतीव्र-सोद्यापनतत्पूजाविधानंचोंकारेश्वरयात्रागारुडकल्पादिरपोयम्
१३	२	१५	ज्यै.शु.च.पंचतपाख्यंपंचाग्निव्रतम्
२०	१	११	आ.श.च-शिवशयनव्रतम्
२८	२	२	श्रा.शु-च.देवीपवित्रारोपणव्रतम्
९४	२	१३	भा-शु.च.अनंतभगवद्व्रतंतत्पूजाविधानंतत्कथोद्यापनंच नष्टडोरकप्रायश्चितमत्रैवपालिव्र.रंभाव्र-अगस्त्यार्घ्यदानंच
१०९	२	१३	आ.श.च-धर्मराजप्रतिमादानम्
४९	२	११	का.शु. च.वैकुंठचतु.तत्रहरिपूज- ब्रह्मकूर्चव्रतंकाश्यांविश्वेश्वरयात्रापाषाणचतुर्दशीव्रतंच
४२	२	१२	मार्ग.शु-च.मत्स्यपुराणोक्तशिवचतुर्दशीव्रतम्
१३	१	१३	पौ.शु-च-विरूपाक्षशिवव्रतम्
२६	१	८	मा.शु.च-यमतर्पणादिकृत्यम्
			फा.शु-च.देवीपूजामहेश्वरव्रतंच
५५	१	७	चै-शु -च.शिवपूजामहोत्सवोदमनोत्सवश्चकाश्यांपशुपतीश्वरयात्रा नृसिंहपूजाव्रतंतद्दोलोत्सवश्च
१३	२	१०	वै-पौर्णमासी. तत्रवैशाखस्नानव्रतोद्यापनंगोदानादिकृष्णाजिनदानप्रयोगोब्रह्मपुराणदानंच
१३	२	१६	ज्यै. पौ. योगविशेषेणमहाज्यैष्ठीतः जलपूर्णघटच्छत्रतालवृंतचंदनानित्रि

प०	पृ०	पं०	सूचिसार
			क्रमभगवत्प्रीत्यैदेयानि
२०	१	११	आ-पौ-गोपद्मव्र-कोकिलागौरीव्र-तत्पूजाकथोद्यापनं दुर्गाशिवपूजासंन्यासिकृत्यं व्यासपूजाप्रयोगोगजपूजा विष्णुपुराण. घृतधेनुदानंच
२८	२	६	श्रा-पौ. उपाकर्मवि. रक्षाबंधोजयापूर्णिमाव्रतमंत्रैववायुपरीक्षणजलगुडधेनुदानंच
१०८	१	१२	भा-पौ. कृत्यानिउमामहेश्वरव्रतंसोद्यापनंपू-कथानकंलोकपालपू. कदलीव्र-तत्कथाचवटसावित्रीव्र- कथाचभागवतदानंमहालयश्राद्धप्रारंभः
१०९	२	१६	आ. पौ. कांस्यपात्रदानमंत्रैवनवान्नेष्टिःकार्यानिकुंभपूजोत्सवोगृहशोभाचकार्यारुद्रपूजच
५०	२	८	का-पौ- अत्रस्वामिकार्त्तिकदर्शोदीपदानेन त्रिपुरोत्सवादिविधानंकाम्यंवृषोत्सर्गव्रतंमत्स्यावतारस्तुलसीपूजनंतत्प्रयोगश्च तुलसीविवा.तत्कवचपा. धात्रीपू-प्र- उद्यापनंकथात्रिपुरदाहोत्सवमंत्रोमन्वादिरपीयमत्रक्षीरसागरवृषभदा-संतानव्र-राशिव्र-मनोरथव्र-सौभाग्यव्र. कार्त्तिकस्नानसमाप्तिर्गोदानविधिर्भीष्मपंचक व्रतोद्यापनमपि
४४	१	२	मार्ग.पौ. अत्रलवणाढकदा.चंद्रपूजा मृगशिरोनक्षत्रंचे ससुवर्णलवणंचदेयंचंद्रव्रतारंभश्चकार्यः
१३	१	१३	पौ.पौ-लक्ष्मीपू. व्रतंसविधानंपुष्यस्नानंभविष्योत्तरपुराणदानमंत्रैव मकरसंक्रमणे कूर्मपुराणदानंच
२६	१	१०	मा-पौ. तिलकंबलादिदानंतिलपात्रदानंच

28
4
35

श्रीरणवीरस्वामीविजयतेतराम्

प०	पृ०	पं०	सूचिसार
			वृतकंवलविधिर्माघस्नानोद्यापनं ब्रह्मवैवर्तस्कंदपुराणदानंच
४२	२	१	फा- पौ-सूर्यसोमपू. अशोकपू-लक्ष्मीनारायणपूजात्र. होलिकापू-तत्कथातदंतेवसंतमहोत्सवः
५६	१	८	चै.पौ.चित्रायुतामहापू. मंदार्कगुरुवारयोगेमहापुण्यदाऽत्र सर्वदेवानांदमनोत्सवो मन्वादिरपीयमिंद्रपू. निकुंभयात्रातृणमयपिशाचपू- तदनंतरंब्राह्मणभोजनंवाराहपुराणदानंच

निधिपतिशोधितःसूचिसारः
समाप्तः

* * *

प०	पृ०	पं०	सूचिपत्रम्	प०	पृ०	पं०	सूचिपत्रम्
			वायवीयसंहितोक्तंलक्षपुष्पपूजाविधानम्	९४	१	१५	विष्णोर्लक्षवर्त्तिपूजोद्यापनप्रकारः
८७	२	८	अक्षतादिधान्यलक्षपूजाविधानम्	९६	२	८	विष्णोर्लक्षवर्त्तिव्रतोद्यापनम्
८८	१	१३	जलादिधाराभिषेकपूजाविधानम्	९७	१	१०	लक्षदीपदानंअस्योद्यापनंलक्षवदेव
८८	२	१४	शैवागमोक्तलक्षपूजाविधानम्	९७	१	१३	वायुपुराणोक्तंलक्षवर्त्तिव्रतंरुद्रलक्षवर्त्तिव्र.
८९	१	१०	अथोद्यापनम्	९८	१	१	लक्षदीपव्रतोद्यापनप्रयोगः
९०	१	४	अग्निपुराणोक्तलक्षपूजाविधानम्	९८	१	९	फलत्यागव्रतोद्यापनम्
९०	२	८	अथविष्णुलक्षपूजाविधानं सोद्यापनम्	९८	२	१४	पार्थिवलिंगोद्यापनंतत्रकामनाभेदः
९१	१	१५	लक्षतुलसीपूजाव्रतोद्यापनम्	९९	१	५	पार्थिवलिंगपूजाधारस्थानंपूजायांनाममं
९१	२	५	अग्निपुराणोक्तोलक्षपूजाप्रकारयोगः	९९	१	११	कामनापरत्वेनपूजायाएकादशप्रकारः
९२	१	९	इतिविष्णुलक्षपूजोद्यापनम्	९९	२	१५	लिंगसंख्याफलभेदः पूजारंभकालः
९२	१	९	गणेशांविकयोरपिलक्षपूजोद्यापनम्	१००	१	१३	समाप्तिकालः पार्थिवलिंगोद्यापनम्
९२	१	९	लक्षनमस्कारपूजोद्यापनंतस्यप्रयोगः	१०१	१	५	अथोद्यापनप्रयोगः तत्रादौपूजाप्रयोगः
९३	२	३	लक्षप्रदक्षिणाव्रतोद्यापनम्	१०१	१	१४	अत्रमहान्यासःयजुर्वेदमंत्रोक्तपूजा
९४	१	५	अश्वत्थलक्षप्रदक्षिणोद्यापनम्	१०३	१	१५	अथप्राणप्रतिष्ठापूर्वकः पूजाविधिः
९४	१	१४	लक्षवर्त्तिव्रतोद्यापनम्	१०४	२	४	पार्थिवगणेशलक्षव्रतोद्यापनंकामनाभेदः

श्रुत्वादेवोथवामनः प्राहासुरपतिंधुंधुंस्वार्थसिद्धिकरंवचः सोदरेणापिमेभ्रात्राह्रियंतेयस्यसंपदः तस्याक्षमस्य यद्दत्तंकिमन्योनहारिष्यति दासीदासमलंकारंगृहंरत्नपरिच्छदं समर्थेषुद्विजेंद्रेषुप्रयच्छस्वमहाभुज ममप्रमाणमालोक्यमामकंचपदत्रयं संप्रयच्छस्वदैत्येंद्रनाधिकंरक्षितुंक्षमः इत्येवमुक्तेवचनेमहात्मनाविहस्यदैत्याधिपतिःसऋत्विजः प्रादाद्द्विजेंद्रायपदत्रयंतदायदासनान्यंप्रगृहाणकिंचित् क्रमत्रयंसोपिचवीक्ष्यदत्तंमहासुरेंद्रेणविभुर्यशस्वी चक्रेततोलंघयितुंत्रिलोकींत्रैविक्रमंरूपमनंतशक्तिः कृत्वातुरूपंदितिजांश्चहत्वा प्रणम्यचर्षीन्प्रथमक्रमेण महींमहीध्रैःसहितांमहार्णवांचकाररत्नाकरपत्तनैर्युतां भुवंसनाकंत्रिदशाधिवासमृक्षार्कसोमैरभिमंडितंनभः दिवंद्वितीयेनजहारवेगात्क्रमेणदेवप्रियमीप्सुरीश्वरः क्रमंतृतीयंनयदास्यपूरितंतदातिकोपाद्दनुपुंगवस्य पपातपृष्ठेभगवांस्त्रिविक्रमो मेरुप्रमाणेनतुविग्रहेण पततावासुदेवेन दानवोपरिनारद त्रिंशद्योजनसाहस्रंभूमिगर्तंदृढीकृतं ततोदैत्यंसमुत्साद्यतस्मिन्प्राक्षिप्यवेगतः अवर्षत्सिकतावृष्ट्यातंचगर्त्तमपूरयत् ततःस्वर्गंसहस्राक्षोवासुदेवप्रसादतः सुराश्चसर्वैत्रैलोक्यमवापुर्निरुपद्रवाः भगवानपिदैत्येंद्रंप्रक्षिप्यासिकतार्णवे कालिंद्यांरूपमाधायतत्रैवांतरधीयत एवंपुराविष्णुरभूद्धिवामनोधुंधुविजेतुंचत्रिविक्रमोऽभूत् यस्मिन्सदैत्येंद्रसुतोजगाममहाश्रमेपुण्ययुतेसुरर्षे इतिश्रीवामनपुराणेधुंधुपराजयेदेविकामाहात्म्यम् ॥ समाप्तम् ॥ शुभम्भूयात् ॥

तमाः समुत्तारयितुंविप्रंप्राद्रवंतसमाकुलाः सदस्ययजमानश्चऋत्विजोथमहौजसः निमज्जमानमुज्जन्हुंःसर्वे तेवामनंद्विजं समुत्तार्यप्रसन्नास्तेपप्रच्छुःसर्वएवाहि किमर्थंपतितोसीहकेनाक्षिप्तोसिनोवदतेषामाकर्ण्यवचनंकंपमा नोमुहुर्मुहुःप्राहधुंधुपुरोगांस्ताञ्च्छ्रूयतामत्रकारणं ब्राह्मणोगुणवानासीत्प्रभासइतिविश्रुतःसर्वशास्त्रार्थवित्प्राज्ञो गोत्रतश्चापिवारुणिः तस्यपुत्रद्वयंजातंमंदप्रज्ञंसुदुःखितं तत्रज्येष्ठोममभ्राताकनीयानपरस्त्वहं नेत्रभासइति ख्यातोज्येष्ठोभ्राताममासुर ममनामपिताचक्रेगतिभासंतुकौतुकात् रम्यश्चावसथोधुंधोशुभश्चासीत्पितुर्मम विविष्टपगुणैर्युक्तश्चारुरूपोमहासुर ततःकालेनमहताचावयोस्सपितामृतः तस्यौर्ध्वदेहिकंकृत्वागृहमावांसमागतौ ततो मयोक्तःसभ्राताविभजामगृहंवयं तेनोक्तोनैवभवतोविद्यतेभागइत्यहं कुब्जवामनखंजानांभ्रष्टानांश्वित्रिणामपि उन्मत्तानांतथांधानांधनभागोनविद्यते शय्यासनस्थानमात्र स्वेच्छयान्नभुजाक्रिया एतावद्दीयतेचैता न्नार्थभागहरा हितेएवमुक्तेमयासोक्तःकिमर्थंपैतृकाद्गृहात् धनार्धभागमर्हामिनाहंन्यायेनमेवद इत्युक्तवतिवाक्येसौभ्रातामेकोप संयुतः समुत्क्षिप्याक्षिपन्नद्यामस्यामामितिकारणात् ममास्यांनिम्नगायांतुमध्येचप्लुवतोगतः कालःसंवत्सराख्य स्तुयुष्माभिरिहचोद्धृतःकेभवंतस्तुसंप्राप्ताः सस्नेहाबांधवोपमाः कोऽयंचशक्रप्रतिमोदीक्षितोवैमहाभुजः तन्मेसर्वं समाख्याततयाथातथ्यंतपोधनाःमहर्द्धिसंयुतायूयंसानुकंपाश्चमेभृशं तेवामनवचःश्रुत्वाभार्गवाद्विजसत्तमाःप्रोचुर्व यंद्विजाब्रह्मन्गोत्रतश्चापिभार्गवाः असावपिमहातेजाधुन्धुर्नामामहासुरः दाताभोक्ताविभक्ताचदीक्षितोयज्ञक र्मणि इत्येवमुक्त्वादेवेशंवामनंभार्गवास्तदा प्रोचुर्दैत्यपतिंसर्वेवामनार्थकरंवचः दीयतामस्यदैत्येंद्रसर्वोपस्करसं युतं श्रीमदावसथंदास्योरत्नानिविविधानिच इतिद्विजानांवचनंश्रुत्वादैत्यपतिर्वचः प्राहद्विजददामीतियावदि च्छासिवैधनं वासोगृहंहिरण्यंचवाजिनः स्यंदनान्गजान् प्रयच्छाम्यद्यभवतेव्रियतामीहितंविभो तद्वाक्यंदानवपतेः

मेधैःसदक्षिणैः तदागच्छध्वमवनींगच्छामोवसुधाधिपान् जित्वाकुर्मोश्वमेधान्वैकथाकामगुणान्वितान् आहूयं तांचनिधयश्चाज्ञाप्यंतांचगुह्यकाः आमंत्र्यंतांद्विजाःसर्वेप्रयामोदेविकातटं साहिपुण्यासरिच्छ्रेष्ठासर्वसिद्धिकरी शिवा जलंप्राचीनमासाद्यवाजिमेधान्यजामहे इत्थंसुरारिवचनंनिशम्यासुरयाजकः वाढमित्यब्रवीदष्टौनिधीनां संदिदेशसः ततोधुंधुर्देविकायाःप्राचीनेपापनाशने भार्गवेंद्रेणशुक्रेणवाजिमेधायदीक्षितः सदस्याऋत्विजश्चापितत्रासन्भार्गवाद्विजाः शुक्रस्यानुमतेब्रह्मन्शुक्रशिष्याश्चपंडिताः यज्ञभागभुजस्तत्रस्वर्भानुप्रमुखामुने कृताश्चासुरनाथेनशुक्रस्यानुमतेःसुराः ततःप्रवृत्तोयज्ञस्तुसमुत्सृष्टस्तथाहयः हयस्यानुययौश्रीमानासिलोमामहासुरः ततोग्निधूमेनमहीसशैलाव्याप्ताविशंखविदिशश्चपूर्णाः तेनोग्रगंधेनदिवस्पृशेनमरुद्ववौब्रह्मलोकेमहर्षे तंगधमाघ्रायसुर विषण्णाजानंतिधुंधुंहयमेधदीक्षितं ततःशरण्यंशरणंजनार्दनंजग्मुःसशक्राजगतःपरायणं प्रणम्यवरदंदेवंपद्मनाभंजनार्दनं प्रोचुःसर्वेसुरगणाभयगद्गदयागिरा भगवन्देवदेवेशचराचरपरायण विज्ञप्तिःश्रूयतांविष्णोसुराणामार्तिनाशन धुंधुनामासुरपतिर्बलवान्वरबृंहिताः सर्वान्सुरान्विनिर्जित्यत्रैलोक्यमहरद्बली ऋतेपिनाकिनोदेवब्रह्मास्मान्भयतोहरे अतोविवृद्धिमगमद्यथाव्याधिरुपेक्षितः सांप्रतंब्रह्मलोकस्थानमपिजेतुंसमुद्यतः शुक्रस्यमतमास्थायसोश्वमेधायदीक्षितः शतंक्रतूनामिष्ट्वासौब्रह्मलोकंमहासुराः आरोढुमिच्छतिवशीविजेतुंत्रिदशानपि तस्मादकालहीनंतुचिंतयस्वजगद्गुरो उपायंमखविध्वंसेभवामोयेननिर्वृताः श्रुत्वासुराणांवचनंभगवान्मधुसूदनः दत्त्वाभयंमहावाहुःप्रेषयामासशाश्वतः विसृज्यदेवताःसर्वाज्ञात्वाजेयंमहासुरं वंचनायमतिंचक्रेसधुंधोरध्वरस्यवै ततःसकृत्वाभगवान्वामनंरूपमीश्वरः देहंकृत्वानिरालंबंकाष्ठवद्देविकाजले क्षणान्मज्जंस्तथोन्मज्जन्मुक्तकेशोयदृच्छया दृष्टोथदैत्यपतिनादैत्यैश्चान्यैस्तथर्षिभिः ततःकर्मपरित्यज्ययाज्ञियंब्राह्मणो

५

रेतिख्यातःकश्यपस्यौरसःसुतः दनुगर्भसमुद्भूतोमहाबलपराक्रमः ससमाराध्यवरदंब्रह्माणंतपसासुरः अवध्यत्वंसुरैःसर्वैःप्रार्थयत्सतुनारद तद्वरंतस्यचप्रादात्तपसापंकजोद्भवः परितुष्टःसचबलीनिर्जिगायात्रिविष्टपं चतुर्थस्यकलेरादौजित्वादेवान्सवासवान् धुंधुःशक्रत्वमकरोद्धिरण्यकशिपौसति तस्मिन्कालेसबलवान्हिरण्यकशिपुस्ततः चचारमंदरागिरौदैत्यैर्धुंधुःसमाश्रितः ततोसुरायथाकामंविहरंतित्रिविष्टपे ब्रह्मलोकेचत्रिदशाःसंस्थितादुःखसंयुताः ततोमरान्ब्रह्मसदोनिवासिनः श्रुत्वाथधुंधुर्दितिजानुवाचह गच्छामदैत्यावयमग्रजस्यसदोविजेतुंत्रिदशान्सुवक्रान् तेधुंधुवाक्यंतुनिशम्यदैत्याः प्रोचुर्ननोविद्यतिदैत्यपाल गतिर्ययायामपि तामहाजिरंसुदुर्गमोयंपरमोहिमार्गः इतःसहस्रैर्बहुयोजनाख्यैर्लोकोमहर्नाममहर्षिजुष्टः येषांहिदृष्ट्याप्रणवोदितेनदह्यंतिदैत्याःसहसोत्थितेन ततःपरोयोजनकोटिनावैलोकोजनोनामवसंतियत्र गोमातरोस्मासुविनाशकारियासांरजोपीहमहासुरेंद्र ततःपरोयोजनकोटिभिस्तुषड्भिस्तपोनामतपस्विजुष्टः सत्याभिधानोभगवान्निवासोवरप्रदोभूद्भवतोदिवोसौ यस्यवेदध्वनिंश्रुत्वाविकसंतिसदासुराः संकोचंचासुरायांतियत्तुतेषांसधर्मिणः तस्मान्मात्वंमहाबाहोमातिमेतांसमाचर वैराजभुवनंधुंधोदुरारोहंसदान्नृभिः तेषांवचनमाकर्ण्यधुंधुःप्रोवाचदानवान् गंतुकामोस्मिसदनंब्रह्मणोजेतुमीश्वरं कथंतुकर्मणाकेनगम्यतेदानवर्षभाः कथंतत्रसहस्राक्षःसंप्राप्तःसहदैवतैः तेधुंधुनादानवेंद्राःपृष्टाःप्रोचुर्वचोधिपं कर्मतन्नवयंविद्म शुक्रस्तद्वेत्यसंशयं दैत्यानांवचनंश्रुत्वाधुंधुर्दैत्यपुरोहितं पप्रच्छशुक्रंकिंकर्मकृत्वास्त्रष्टुःसदोगतिः ततोऽस्मैकथयामासदैत्याचार्यःकलिप्रिय शक्रस्यचरितंश्रीमत्पुरावृत्तंरिपोः किल शक्रःशतंतुपुण्यानांक्रतूनामयजत्पुरा दैत्येंद्रवाजिमेधानांतेनब्रह्मसदोगतः तद्वाक्यंदानवपतिःश्रुत्वाशुक्रस्यवीर्यवान् यष्टुंतुरंगमेधानांचकारमतिमुत्तमां आमंत्र्यचासुरगुरुंदानवांश्चाप्यनुत्तमान्प्रोवाचाहंयजेयज्ञैरश्व

भक्तिरसाप्लुताः ततःकथंचिदुन्मील्यलोचनानिप्रसुस्रुवुः वाष्पंभक्तिभराक्रांतहृदयामुनिपुंगवाः विन्यस्यमस्त
कंभूमौशिवमेवपरंजगुः ॥ २६ ॥ देवेशंशीघ्रसंतोषंभक्तकल्पमहीरुहं ततस्तंसमानर्चुःसाधुवादपुरस्सरम्
२७ ॥ इतिश्रीपद्मपुराणेपातालखंडे श्रीकृष्णयुधिष्ठिरसंवादेदेविकामाहात्म्यम् संपूर्णम् शुभम्

अथवामनपुराणे सप्तषष्टितमेऽध्याये प्रह्लादतीर्थयात्रायां धुंधुयज्ञप्रस्तावेदेविकाक्षेत्रेत्रिविक्रमप्रादुर्भाववर्णनं
यथा ॥ नारदउवाच ॥ कानितीर्थानिविप्रेंद्रप्रह्लादोथजगामह प्रह्लादतीर्थयात्रांमेसम्यग्व्याख्यातुम
र्हसि पुलस्त्यउवाच ॥ शृणुष्वकथयिष्यामिप्राक्तनींतुकथांविभो प्रह्लादतीर्थयात्रांमेशुद्धांपुण्यप्रदा
यिनीं सत्यज्यमेरुंकनकाचलेंद्रं तीर्थंजगामामरसंघजुष्टं ख्यातंपृथिव्यांशुभदंहिमानसं यत्रास्थितोमत्स्यवपुः
सुधांपिवन् यस्मिंस्तीर्थवरेस्नात्वासंतर्प्यपितृदेवताः संपूज्यचजगन्नाथमच्युतंश्रुतिभिर्युतं उपोष्यभूयः
संपूज्यदेवर्षिपितृमानवान् जगामकच्छपंद्रष्टुंकौशिक्यांपापनाशनं तस्यांस्नात्वामहानद्यांसंपूज्यचजगत्पतिं
समुपोष्यशुचिर्भूत्वादत्वाविप्रेषुदक्षिणां नमस्कृत्यजगन्नाथं थोकूर्मवपुर्धरं ततोजगामकृष्णाख्यंद्रष्टुंवा
जिमुखंप्रभुं तत्रदेवहृदेस्नात्वातर्पयित्वापितृन्सुरान् संपूज्यहयशीर्षंचजगामनजासाह्वयं तत्रदेवंजगन्नाथंगो
विंदंचक्रपाणिनं स्नात्वासंपूज्यविधिवज्जगामयमुनानदीं तस्यांस्नात्वशुचिर्भूत्वासंतर्प्यर्षिसुरान्पितृन् दद
र्शदेवदेवेशंलोकनाथंत्रिविक्रमं ॥ नारदउवाच ॥ सांप्रतंभगवान्विष्णुस्त्रैलोक्याक्रमणंवपुः करिष्यतिजग
त्स्वामीबलेर्बंधनमीश्वरः तत्कथंपूर्वकालेपिविष्णुरासीत्त्रिविक्रमः कस्यवाबंधनविष्णुःकृतवांस्तन्ममेवद
॥ पुलस्त्यउवाच ॥ शृणुष्वतांकथयिष्यामियथंप्रोक्तस्त्रिविक्रमः यस्मिन्कालेसंबभूवयथंचवंचितवानसौ आसीद्धुंधु

रेचयत्पुण्यंस्नानदानजपादिभिः ॥ ५ ॥ दर्शनस्नानपानैश्चमनोवाक्कायकर्मभिः कृतंचहरतेपापंयथागंगा
नसंशयः ॥ ६ ॥ गंगायादेविकायाश्चह्यंतरंनैवविद्यते भेदंयोमन्यतेमूढोरौरवेवसतिध्रुवं ॥ ७ ॥ केशानांयः
वतीसंख्याछिन्नानांजान्हवीतटे तावद्वर्षसहस्राणिस्व लोकेमहीयते ॥ ८ । यावंतिरोमकूपाणिमज्जंतिदावि
केजले तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते ॥ ९ ॥ यस्यास्थीनिचगंगायांक्षिप्यंतेपुण्यकर्मणः समोदते
देवलोकेपुनरावृत्तिदुर्लभे ॥ १० ॥ तथैवदेविकायांच पुष्पाम्येपिचतत्तथा जान्हवीचमहादेवदेहस्पर्शाच्चपा
वनी ॥ ११ ॥ देविकाह्यधिकातस्या याशिवार्धशरीरिणी यथाकनखलेमुक्तिर्मुनिभिः परिकीर्तित
तथैवदेविकायांचप्रोक्तातुहरिमंदरे यावैमुक्तिर्हिकाश्यांचवरणामणिकर्णिके तथैवोत्तरवाहिन्यांदेविकायांमुनी
श्वराः फल्गुतीर्थेनरोयोवैश्राद्धंकुर्याद्विधानतः ॥ १४ ॥ मुच्यंतेपितरस्तस्यगच्छंतिपितृमंडलेतथैवदेबि
कायांचह्युदग्वाहेमुनीश्वराः काश्यांयन्मरणेपुण्यंबिश्वेश्वरसमाधिना तत्पुण्यंसमवाप्नोतिमृतःक्षेत्रउमापतेः
॥ १६ ॥ स्नात्वातुदेविकातीर्थेदृष्ट्वादेवमुमापतिं मृतानांदेविकातीर्थेसंततंचाघकारिणां पापानिविल-
यंयांतिहिमंरविकरैर्यथा मृतःशिवपुरंयांतिमहापातकिनोनराः ॥ १८ ॥ उत्पन्नापार्वतीरूपामानसोत्तरमा
र्गतः तत्रशुद्धेश्वरंनामदेविकातीरमाश्रितं ॥ १९ ॥ महापातकिनःस्नात्वारमंतेचहरेःपुरे शुद्धंषड्योज
नचैवलिंगंभद्रेश्वरंमहत् ॥ २० ॥ तत्रस्नात्वानरःकश्चिद्यमलोकंनपश्यति यइदंशृणुयान्मर्त्योयोवापिप
रिकीर्तयेत् ॥ २१ ॥ संभवंदेविकानद्याःप्रादुर्भावमुमापतेः अश्वमेधादियज्ञानांदानंचददतांतथा ॥ २२ ॥
तत्फलंसमवाप्नोतिनरःसर्वमशेषतः सर्वपापविशुद्धात्मारुद्रलोकंसगच्छति ॥ २३ ॥ श्रीकृष्णउवाच श्रुत्वे
तत्सूतगदितंमुनयःशौनकादयः नमोनमःशिवायेतिप्रोक्त्वामिलितलोचनाः ॥ २४ ॥ विष्णुःशिवःपरंब्रह्मचिरं

7

प्रकीर्त्तिताः उमापतिपुरेनाम्निस्नानांतेमुक्तिदायिनः ॥ ८७ ॥ आद्यमिंद्रेश्वरंनामइंद्रघाटोतिविश्रुतः
इंद्रलोकेवसेत्तत्रस्नानदानान्मुनीश्वराः ॥ ८८ ॥ उमापतिर्द्वितीयंचमुख्यंसर्वेषुलिंगकं स्नापितपंचगव्ये
नचक्रवर्त्तीभवेन्नरः ॥ ८९ ॥ वीरेश्वरंतृतीयंचसदाश्मशानगोचरं शूरश्चबहुवीर्यश्चदृष्टमात्रेणमानवः
वृषभंचततःपूज्यद्वारपालंचपूजयेत् सन्नैवेद्यैर्भक्ष्यभोज्यैश्चंदनेनसुगंधितैः पूजितंसकलंतेनत्रैलोक्यंसचराचरं
खड्गेश्वरंचतुर्थंचालिंगंत्रैलोक्यविश्रुतं ॥ ९० ॥ पूजयेद्विधिवच्चैनंयमलोकंनपश्यति बिल्वकेश्वरकंनाम
पुराद्दक्षिणदिक्स्थितं पंचामृतेनसंपूज्यकोटियज्ञफलंलभेत् षष्ठंभूतेश्वरंनाम्नादेविकातीरसंस्थितं ॥ ९२ ॥
तत्रस्नातुर्नरस्यापिभूतेभ्योनभयंक्वचित् काशीशसैन्यवाहिन्यांदेविकातीरमाश्रितं काश्यांयादृक् फलं
तादृक्दृष्टेलिंगेतुसप्तमे गयेश्वरंह्यष्टमंचालिंगंत्रैलोक्यमोहनं ॥ ९४ ॥ तत्तीर्थेचगयानाम्निपिंडंदद्याद्यथा
क्रमं स्नात्वात्रविधिवद्विप्रागयातोष्टगुणंफलं विख्यातंत्वमरंतीर्थंयत्रशक्रोद्भतेस्थितः गंगायाःस्नानतःपुण्यं
तत्पुण्यंस्नानतोत्रहि उत्तरेइंद्रघाटस्यदक्षिणेचामरांतिके उमापतिमहाक्षेत्रंक्रोशानांतच्चतुष्टयं ॥ ९७ ॥
धनुषांत्रिंशतिःपूर्वेपश्चिमेपिचतत्क्रमः अष्टस्वेतेषुलिंगेषुमुख्यंलिंगमुमापतिः ॥ ९८ ॥ यथाविश्वेश्वरःकाश्य
मुमापतिस्तथापुरे सर्वत्रदेविकातीर्थेक्षेत्रंक्रोशचतुष्टयं ॥ ९९ ॥ कृमिकीटमृतायांतिशिवलोकेसनातनं किंपुनर्मान
वाःपापादुराचारादुराशयः ॥ १०० ॥ यत्रकूपतडागादिसर्वंतीर्थंविशेषतः वाह्लीकान्वर्वरांश्चैवखशान्कीरांश्चम्ले
च्छजान् ॥ १ ॥ शवरान्देविकादृष्ट्वामहापातकिनोभृशं क्रोधादंतर्हिताक्वापिक्वाप्याविर्भवतिस्वयं ॥ २ ॥
व्यक्ताकुत्रापिदययात्रभासेयातिसागरं यांदृष्ट्वामनुजःपाप्मापूतःसंजायतेक्षणात् ॥ ३ ॥ स्पर्शनस्नानपाने
श्काकथाभृगुनंदन सैवगंगासमापुण्याहरदेहसमुद्भवा ॥ ४ ॥ तत्फलंदेविकाद्वारंसंपूर्णंमुनिपुंगवाः गंगा

ते

पुतीर

शिरोनिधायमेदिन्यांबहुभक्तिपुरस्सरं कश्यपोबहुभक्त्याचपूजयित्वामहेश्वरम् ॥ ७३ ॥ संपूज्यगंध
पुष्पाद्यैर्धूपदीपैर्मनोरमैः सद्वारपाललोकेशंप्रणिपत्यह्युमापतिं ॥ ७४ ॥ शंकरंपरमेष्वासंसायुधंसविना
यकं सकुमारंसप्रमथंस्तुतिंचक्रेमरीचिजः ॥ ७५ ॥ कश्यपउवाच सुरासुरशिरोल्लसन्मुकटकोटिजुष्टांघ्रि
पंकजद्वयमुरोल्लसद्भुजगराजहारंहरं जटामुकुटमंडलांतरगवीचिदेवापगं भजेशिवममापतिंशशिकलाधरंशंक
रम् ॥ ७६ ॥ गणाधिपतिसंस्तुतंरतिसहायदाहोज्ज्वलद्विलोचनधरंचकर्तुमविलोललोकत्रयं नगाधिपतिनंदि
नीचकितलोचनालोकितं भजेशिव० ॥ ७७ ॥ सुगंधितादिगंतरेरुचिरपारिजातद्रुम प्रसूननिचयांचितेस्फटिकशै
लसानुस्थले विलोलनयनांचलैःसुरवधूगणैःसेवितं भजेशिव० ॥ ७८ ॥ सुध[illegible]विलोडनावसरजातहाला
हल प्रकालनमहामुदाकुलविकासिगंडस्थलंविरिंचिविहारिवासवादिभिरुपासितंव्याकुलैर्भजेशिव० ॥ ७९ ॥ रमा
मरणपूजितंरुचिरपंकजैर्भक्तितः सहस्रपरिसम्मितैरनुदिनंवरप्राप्तये महासुरविदारणंभुवनमंडलीकारणंभजे
शिव० ॥ ८० ॥ सिताभ्ररुचिवाहनंसितजटापगाधारिणं सितांशुवरशेखरंसितविभूतिचंचत्तनुं सिताभ्रह
सितंशिवंसितजटावितानोत्कटं भजेशिव० ॥ ८१ ॥ जगज्जननधारणंहरणलीलमानंदचित्स्वरूपमखिलार्थदं
सदसदाभासकंशाश्वतम् निरंजनपदंविदुर्यम लंमहापुरुषंभजेशिव० ॥ ८२ ॥ दिवाकरसुतानुजोद्भवभयेनसं
पीडितो महानिरयपातसंशयगदेनचोद्वेजितः भवानलपरिप्लुतःशिवपदाप्तयेत्र्यंबकं भजेशिवमुमापतिंशशि
कलाधरंशंकरम् ॥ ८३ ॥ इत्यभिष्टूयभूमानंशिवंशाश्वतमव्ययं निरंजनंचिदानंदंनिष्कलंसकलंविभुं ॥ ८४
विश्वेश्वरंविश्वयोनिंस्थितिसंहारकारणं कश्यपःपरमप्रीतोधनदस्यागिरिंययौ ॥ ८५ ॥ शिष्यैरनुगतो
मुख्यैर्धौम्यादिभिरलोलुपैः तपश्चकारतत्रापिनिःशब्दंगिरिमाश्रितः ॥ ८६ ॥ चतुष्टयेतुक्रोशानामष्टौलिंगाः

धरोमुने पातालादुत्थितोनागैःशेषादिभिरुपासितः ॥ ५५ ॥ फाल्गुणेकृष्णपक्षस्यचतुर्दश्यांदिनोदये अष्टाद
शद्वापरांतेप्रादुर्भूतामहानदी ॥ ५६ ॥ तद्दिवोपोषणंकृ वाजागरंशिवसन्निधौ संसारमोहस्वप्नांतेसदाजगति
जाग्रति ॥ ५७ ॥ वर्षमध्येद्विजश्रेष्ठासांगान्वेदान्समभ्यसेत् लक्षंगावै प्रसूतास्तुयस्तुदद्यादिनेदिने ॥ ५८ ॥
तत्फलंदेविकातीर्थेमृगेमेषे तुलेरवौ संक्रांतिषुतिसृष्वत्रभूतेच शिवरात्रितः ६९ स्नायाद्योदेविकातीर्थेनपुनर्जन्म
भाग्भवेत् तस्मात्स्नायात्प्रयत्नेनवर्षेवर्षेमुनीश्वराः ॥ सूर्यग्रहेचंद्रग्रहेसहोनासेविशेषतः षष्टितीर्थसहस्राणिति
स्रःकोट्योर्धकोटिका ॥ ६१ ॥ आयांतिदेविकातीर्थेमार्गशीर्षेनसंशयः यत्पुण्यंसर्वतीर्थेषुस्नानदानाक्रियादिजं
॥ ६२ ॥ तत्फलंदेविकातीर्थेस्यादुमापतिसान्निधौ दृष्ट्वातेजोमयंलिंगंशांकरंनागराड्विभुः शेषोननामशीर्षैस्तं
सहस्रपरिसम्मितैः तुष्टावचमहादेवंविश्वयोनिंकृतांजलिः ॥ ६४ ॥ अष्टधा सुस्थानेषुप्रादुर्भूतंयथारविं शे
षउवाच नमामीश्वरंशंकरंचंद्रमौलिंत्रिनेत्रंत्रिलोकेश्वरंशास्त्रमूर्तिम् महादेवमेकंशरण्यंवरेण्यं विभुंविश्वहेतुं
चिदानंदरूपम् ॥ ६५॥ लसत्सर्पहारंवृषाधीशवाहंच जान्हवीवीचिशुभ्रंकपर्दे दधानंनिदानंजयस्यायुधानां
प्रधानंत्रिशूलंपिनाकंचवामे ॥ ६६ ॥ धरांपादपद्मेतवोपस्थ ध्विंधावियच्चोदरंतारकारोमकूपान् रवीं
दूपरेलोचनेवेदवाचस्तवैकस्यरूपंविदुर्विश्वमूर्ते ॥ ६७ ॥ भवत्पादवासोमयादेवदेवाद्भवन्मूर्तिभेदाहृत
श्चक्रपाणेःतदेवास्तुमेनाथगौरीशशंभोनमस्तेनमस्तेप्रसीदप्रसीद ॥ ६८ ॥ सूतउवाच ॥ एवंस्तु
ताभूधरेणसहनागैर्महावलैः तथेत्युक्त्वाविभोलिंगमाविर्भूतंमहीतले ॥ ६९ सूर्यकोटिप्रतीकाशंचंद्रकोटिसम
प्रभं अष्टधाष्टसुस्थानेषुकश्यपेनमहात्मना ॥ ७० ॥ दृष्टेषुदिव्यलिंगेषुक्षणाच्छंभुस्तिरोदधे प्रादुर्भूतेषुलिं
पुतीरमाश्रित्यदेविकं ॥ ७१ ॥ आत्मानंकश्यपोमेनेकृतकृत्यंमुदान्वितःभक्त्यातुतोषदेवेशंभगवंतमुमापतिं७२॥

त: वंसंदिशतस्तस्याशिवस्यपरमाद्भुतम् निश्चक्राममहत्तेजःशरीराद्भृगुनंदन ॥ ३४ ॥ चंद्रकोटिप्रतीकाशंवि
मलंभासयन्दिशः क्षणाद्भुवनारीसागवयासनसंस्थिता ॥ ३५ ॥ चतुर्भुजाशंखचक्रखड्गखेटकधारिणी दि
व्यांबरधरादेवीदिव्यगंधानुलेपना ॥ ३६ ॥ विकसच्चंद्रवदनादिव्याभरणभूषिता दिवौकसस्तुतांदृष्ट्वापारिजा
ततरूद्भवैः ॥ ३७ ॥ हरिचंदनमंदारैस्तथासंतानकस्यच कुसुमैरर्चनंचक्रुर्जयशब्दपुरस्सरं ॥ ३८ ॥ जगुर्गं
धर्वपतयोननृतुश्चाप्सरोगणाः ववुःपुण्यास्तथावाताजघ्नुर्भेर्यश्चह्यानकाः ॥ ३९ ॥ ऋषयस्तुष्टुवुःस्तुत्यावेदमंत्रै
रनेकशः तंदृष्ट्वामहदाश्चर्यंकश्यपोमुनिसत्तमः ॥ ४०॥ तुतोषदेवींप्रणतोभूतलेन्यस्तमस्तक ॥ कश्यपउवाच ॥
जयदेविमहामायेजयशंकरवल्लभे जयदेवासुरगणैर्वंदितांघ्रिसरोरुहे ॥ ४२ ॥ जयचंद्रार्कनयनेजयाद्येजयसर्व
गे त्रिजगत्सृष्टिसंहारकारणेजयमोहिनि ॥ ४३ ॥ त्वंश्रीस्त्वमीश्वरीलज्जात्वंविद्यात्वंधृतिःक्षमा
त्वमग्निस्त्वंरविश्चंद्रस्त्वंपृथ्वीत्वंसरस्वती ॥ ४४ ॥ त्वमापस्त्वंनभोवायुस्त्वमेवपरमेश्वरी ॥ त्वंनि
द्रात्वंपिपासाचत्वंक्षुधात्वंनतिर्मतिः ॥ ४६ ॥ आदिप्रकृतिरेवत्वंजगत्त्रयकृतास्थितिः विश्वरूपाविश्ववंद्या
विश्वेशीचजगत्प्रसूः ॥ ४७ ॥ विश्वानुग्रहकर्त्रीचविश्वसंहारकारिणी प्रसीददेवदेवेशिमयिदासेयतात्मनि ४८
लोकस्यदुष्कृतंभूमौदहदर्शनवन्हिना नाशयस्वमहामायेकृपयाजगदंबिके ॥ ४९ ॥ सूतउवाच ॥ एवंस्तुतात
तोदेवीकश्यपेनमहात्मना रुद्रंप्रदक्षिणीकृत्यतत्रैवांतरधीयत ॥ ५० ॥ क्षणात्सुस्रावसलिलंविमलंशीतलंविभो.
पतितंदेवचरणेजयशब्दपुरस्सरं ॥ ५१ ॥ मार्गशीर्षेसितेपक्षेचतुर्दश्यांदिनोदये अष्टादशेद्वापरांतेप्रादुर्भूतामह
नदी ॥ ५२ ॥ देवदुंदुभयोनेदुर्निपेतुःपुष्पवृष्टयः ववौवायुस्तदाशीतःपुण्यगंधवहःशुचिः ॥ ५२ ॥ अग्नयश्च
द्विजातीनांशांतास्तत्रसमैधत ननृतुश्चाप्सरोव्रातागंधर्वाललितंजगुः ॥ ५४ ॥ तत्कालेशंकरश्चापिलिंगरूप

तस्यास्तीरेभविष्यंतिमदीयायतनानिच प्रादुर्भूतःशूलपाणिस्त्रिपुरारिःसदाशिवः ॥ १३ ॥ शुद्धिर्नाममहा
क्षेत्रंमहापातकनाशनं यत्रदेवीमहागौरिप्रादुर्भूतासहस्त्रधा ॥ १४ ॥ इंद्रमार्गःसोमतीर्थंपुण्यमंबुनिजंतथा
सुवर्णविंबचतथाममैवायतनंतथा ॥ १५ ॥ स्कंदस्यायतनंनामसर्वपापनिसूदनं तस्माद्गिरिवरंमुक्त्वास्थानान्निर्याति
देविका ॥१६॥ तद्गंगाद्वारसदृशंक्षेत्रंपुण्यतमंभवेत् उमापतिरितिख्यातंतथायतनमुत्तमम् ॥१७॥ स्याद्द्वियोजनेवि
प्रहारिमंदिरकंशुभम् तस्यदर्शनमात्रेण पूतोभवति मानवः ॥१८॥ उमापतीतियत्प्रोक्तंतदेवपुरनायकंस्वर्गद्वारंचतत्रै
वरुद्रतीर्थंतथैवच ॥ १९ ॥ पुष्पाभ्रकंचतीर्थंवैतच्चमुक्तिप्रदंनृणां प्रभासेकोटितीर्थंचकामाख्यंकमलापुरे ॥ २०॥
पुष्पन्यासमृषिक्षेत्रेऋषिरूपंचमानद मणिपूरपुरेस्थानंपुण्यंहंसपदंतथा ॥ २१ ॥ तीर्थेष्वेतेषुदेविकयाःक्षेत्रंको
शचतुष्टयं तत्रकूपतडागादिसर्वंतीर्थमशेषतः ॥ २२ ॥ मामकेस्वेषुस्थानेषुयःकुर्यादभिषेचनं देविकासलिलैः
शुद्धैर्मल्लोकेमोदतेचिरम् ॥२३॥ पुष्पंपत्रंफलंतोयंमद्भक्त्यायःप्रयच्छति समलिंगेमुनिश्रेष्ठयात्यसौमत्सलोकताम्
॥ २४ ॥ पुरुषोयदिवानारीमद्भक्तिपरमामुने उपास्तेमांचतत्रस्थांलिंगरूपधरंशिव ॥ २५ ॥ शिवलोकमवाप्नो
तिपुनरावृत्तिदुर्लभं हरिद्वारेमहाक्षेत्रेयत्फलंस्नानदानयोः ॥ २६ ॥ तत्फलंदेविकाद्वारेस्यादुमापतिसन्निधौ
यत्फलंमज्जनेसम्यक्प्रयागेमकरेरवौ ॥ २७ ॥ काश्यांयन्मरणेपुण्यंमुक्तयेशिवयोगत तदेवदेविकाद्वारेस्यादु
मापतिसन्निधौ ॥ २८ ॥ यद्दानेनकुरुक्षेत्रेग्रहणेपुण्यमद्भुतं तदेवदेविकाद्वारेस्यादुमापतिसन्निधौ ॥ २९ ॥ मा
र्कंडेयेपृथूदेचपुष्करेचार्बुदेतथा यत्पितृणांगतिःप्रोक्तातदुमापतिसन्निधौ ॥ ३० ॥ ब्राह्मण क्षत्रियोवैश्यःशूद्रोवा
नरवर्णजः यःस्नातिदेविकातीर्थेसयातिपरमांगतिम् ॥ ३१ ॥ नदानेननयोगेननानियमैर्विविधैर्मखैः नतत्फलमवाप्नो
यत्स्नात्वादेविकाजले ॥ ३२ ॥ यद्दानंतुकुरुक्षेत्रेग्रहणेभास्करेतथा तदेवदेविकाद्वारेस्यादुमापतिसन्निधौ ॥ ३३ ॥

।याचान्येजीवंतिद्विजपुंगवाःकन्याशुल्करताश्चान्येशूद्रवृत्तिरतास्तथा ९३ कन्यायावर्ष.विंशत्याविवाहंचैवकुर्वते
क्षत्रियाश्चौर्यधर्मेणप्रजारक्षाविवर्जिताः ॥ ९४ ॥ सदामिथ्याप्रवक्तारोब्रह्मस्वहरणेरताः वर्णावसांतिसत
तंवृत्तिसंकरमाश्रिताः ॥ ९५ ॥ कदाचिज्जान्हवीतीरान्नलिनसहकश्यपः नागराजेनसंप्राप्तस्तंदेशंस्वेच्छ
याचरन् ॥ ९६ ॥ सदृष्ट्वातत्रलोकस्यधर्मविप्लवमुल्बणं चचारकृपयाविष्टस्तपःपरमदुष्करम् ॥ ९७ ॥
संपूजयन्महादेवंदेवदेवंवृषध्वजं तुतोषतपसातस्यपिनाकीभगवाञ्छिवः ॥ ९८ ॥ कृपयादर्शनेतस्थौसूर्य
कोटिसमद्युतिः उवाचपरमप्रीतःकश्यपंपरिसांत्वयन् ॥ ९९ ॥ वरंवृणीष्वभद्रंतेयत्तेमनसिवर्तते तच्छ्रु
त्वासहसोत्थायकश्यपोभक्तिविह्वलः ॥ १०० ॥ ननामदेवंगौरीशंमनोवाक्कायकर्मभिः तुष्टावगिरिशंदेवं
त्रिपुरघ्नंत्रिलोचनं ॥१॥ सहस्रनामभिर्दिव्यैर्ब्रह्मप्रोक्तैःसनातनैःप्रार्थयामासदेवेशाद्वरंवरदसत्तमात् ॥२॥ कश्य
पउवाच ॥ देवदेवजगन्नाथसुरासुरनमस्कृत स्वच्छंदचरिताशेषलोकनाथमहेश्वर ॥ ३ ॥ परापराणांप
रमत्रिपुरासुरमर्दन शरणंत्वांप्रपन्नोस्मिशरण्यंभक्तवत्सल ॥ ४ ॥ प्रसीददेवदेवेशलोकानुग्रहकारक दुरा
चारप्रसक्तानांनद्भूमिनिवासिनाम् ॥ ५ ॥ चतुर्वर्गविरक्तानां कामक्रोधवशात्मनां स्वाहास्वधावषट्कारस्वा
ध्यायविरतात्मनाम् ॥ ६ ॥ रौरवादिमहादुःखान्मोक्षंचिंतयशंकर परोपकारायमयाप्रार्थितोसिमहेश्वर ॥ ७ ॥
एवमुक्तःकश्यपेनशिरोविन्यस्यभूतले ईश्वरःकृपयाविष्टइदंवचनमब्रवीत् ॥ ८ ॥ ईश्वरउवाच उत्तिष्ठत्वंमुनिश्रेष्ठप
रोपकृतिनांवर वरंददामिसुप्रीतस्तपसाश्रद्धयाचते ॥ ९ ॥ याशक्तिर्मच्छरीरस्थादेवीदेहार्द्धमाश्रिता मदाज्ञांपर
मासाद्यनदीभूत्वानिजांशतः ॥ १० ॥ पुनातुमद्राक्पृथिवींसप्तसागरमेखलाम् परिवृत्यनिजेदेहेपुनर्विश्रांतिमे
ष्यति ॥ ११ ॥ दृष्ट्वामुक्तोभवेत्सद्योजनःपुण्योदकंक्षणात् किंपुनःस्पर्शनस्नानजलपानादिनामुने ॥ १२ ॥

B

देवीदेवेंद्रवंदिता ७३ श्रीपार्वत्युवाच एवंकरिष्येदेवेशवचनंतवसर्वदा किंचिद्विज्ञप्तुमिच्छामितवेशाविरह्यो
मम ७४ भर्त्तस्त्वमंशभागेनमत्तीरेवसशंकर कर्त्तव्याभजमानानांकल्पपादपमंजरी ७५ भवानखण्डब्र
ह्मांडपतिःसन्सततोद्यतः उमापतिरितिख्यातोभवमत्कीर्त्तिवर्द्धनः ७६ तथापुरेश्वरश्चेतिख्यातिमेहिजगतत्रये
त्रिपुरघ्नत्रिलोकेशत्रिलोचनत्रिमूर्त्तिप ७७ तथेत्युक्त्वाशिवेनापिस्वीयांशेनसरिद्वरा कैलासाद्भुवमाविश्यपाव
यंतीवसुन्धराम् ७८ सप्तसागरपर्यंतांपुनःस्वांतनुमाविशत् एषावैदेविकादेवीनदीरूपास्थिताभुवि ॥ ७९
पुनातिसकलांल्लोकान्सर्वतीर्थवरामुने श्रीकृष्णउवाच श्रुत्वैवंशौनकःसूतमुखात्तीर्थवराश्रयं ८० महिमानं
शंकरस्यभक्त्यानिर्भरमानसः प्रणम्यशिरसाशंभुंमनोवाक्कायकर्मभिः ८१ पुनःप्रोवाचहृष्टात्मासर्वज्ञंसूतनंदन
म् शौनकउवाच साधुसाधुमहाभागपितृवन्मधुराक्षरं भाषसेस्फुटमत्यर्थंपुण्यंभुवनमंगलं त्वत्तोऽहंश्रोतुमिच्छामि
परमंरोमहर्षणं ८२ यथादेवीशरीरात्साप्रादुर्भूतामहानदी यथाचशंभुस्तत्तीरेसान्निध्यमकरोद्विभुः ८३ फल
चशंभुपूजायास्तत्रदानादिकंचयत् क्षेत्रस्यपरिमाणंचमाहात्म्यमपिचानघ ८४ कुत्रतत्स्थानममलंकथंप्रादुर
भूच्छिवा कस्मिन्दिनविशेषेतुकस्मिन्मासेतिथौक्षणे ८५ केनरूपेणदेवेशःप्रादुर्भूतःसुरारिहा पार्वतीहितकृ
च्छंभुर्लोकोद्धारणहेतवे ॥ ८६ ॥ एवमुक्तःशौनकेनसूतोवचनमब्रवीत् प्रणम्यदेवदेवेशंशूलपाणिंवृषध्वजं ॥ ८७
सूतउवाच शतद्रुसिंधुनद्योश्चह्यंतरंयत्सुविस्तरं मद्रदेशइतिख्यातोम्लेच्छदेशादनंतरः ॥ ८८ ॥ चतुर्वर्णव्य
वस्थांचवक्ष्यामितवशौनक विप्राःमधुघृतक्षीरलाक्षालवणविक्रयैः ८९ जीवंतितत्रप्रेष्याश्चनिर्वेदानिरपत्रपाः
प्रतिग्रहसमर्थाश्चद्यूतेचौर्येचलंपटाः ॥ ९० ॥ अविचार्यैवसर्वस्माद्गृह्णंतिमदगर्विताः संध्याव्रतविहीनाश्चस्वधा
कारविवर्जिताः ॥ ९१ ॥ स्नानार्चनविहीनाश्चभुंजतेचसदामिषं केचिद्वाणिज्यधर्मेणकेचिल्लुब्धकचेष्टया द्यूतेनसे

सत्यंसत्यंवदाम्यहम् ५२ नद्योजलावगाहेनपावयंतीतराञ्जनान् देविकादर्शनस्पर्शनामसंकीर्तनेनच ५३
पानीयंदाविकंदृष्ट्वास्पृष्ट्वापीत्वावगाह्यच पापंजह्यान्नरःशीघ्रंजीर्णांत्वचमिवोरगः ५४ आप्लुतोदेविकातोयैः
पापंनश्यतितत्क्षणात् तंपुनातिमुनिश्रेष्ठतुषाग्निरिवकांचनम् ५५ तावद्गर्जंतिदानानिवाजिमेधादयोमखाः स्ना
तंनयावद्विमलेदेविकासलिलेनरैः ५६ चंद्रसूर्यग्रहेचैवमार्गशीर्षेमहामुने आसमुद्राःसमायांतिस्नानार्थंदेविकां
द्विज ५७ तेपुदुष्कृतिभिःपुंभिःकृतंयदवगाहनं तत्क्षणादेवशुध्यंतिशुद्धायांतिशिवालयं ५८ सर्वतीर्थेषुयत्पु
ण्यमासमुद्रसरस्सुच तत्फलंदेविकातीर्थेस्नात्वामेषगतेरवौ ५९ विनादानेनतपसाविनातीर्थैर्विनामखैः शिव
लोकमवाप्नोतिदेविकातीर्थमज्जनात् ६० शुभाशुभानांकार्याणांयदन्यत्रफलंस्मृतं तल्लक्षगुणतांयातिदेविका
तीर्थसंगमात् ६१ यःकुर्याद्देविकातीर्थेशुभंवायदिवाशुभं नतस्यपुनरावृत्तिःस्वर्गाद्वानिरयाच्चवा यथादेवेषु
गोविंदोयथातेजस्सुभास्करः वेगवत्सुयथावायुर्यथाब्धिःसलिलाशये ६३ तिलोत्तमात्वप्सरस्सुराजन्येषुशचीप
तिः वेदेषुचयथासामगार्हपत्यंयथाग्निषु ६४ क्षमावत्सुयथापृथ्वीवरदेषुयथाशिवः तथैवसर्वतीर्थेषुदेविकैवविरा
जते ६५ यःस्नातोदेविकातीर्थेनित्यंनियतमानस. विमानवरमारूढोगणकोटिसमन्वितः ६६ अप्सरोन्
त्यगीतेनशिवलोकेमहीयते यावंतोरोमकूपाश्चमज्जतांदाविकेनृणां ६७ जलेप्लुताश्चतावंतिदिव्यवर्षायुतानिच
शिवलोकेभवेद्वासोनाऽत्रकार्याविचारणा तपसापूजितःशंभुःकश्यपेनपुरामुने मद्राणामुपकाराययाचितस्तीर्थमु
त्तमम् ६९ सर्वपापप्रशमनंसर्वतीर्थवरोत्तमम् तच्छ्रुत्वागिरिशोगौरीमुवाचपरिसांत्वयन् ७० त्वमंशे
ननदीभूत्वापुनीहिनिखिलंभुवम् सप्तद्वीपवतींरम्यांसप्तसागरमेखलाम् ७१ मानसोत्तरमार्गेणमेरुमंदरवर्त्म
ना कैलासमेत्यलोलाक्षिस्वतनुंविशशाश्वतीम् ७२ तथेतिवरमादायभर्तुराज्ञांशुचिस्मिता प्रोवाचाविनयप्रव्हा

वँकयथमेहरे ॥ श्रीकृष्णउवाच ॥ साधुसाधुमहाभागपृष्टोऽहंकुंतिनंदन ॥ ३३ ॥ देविकातर्थिमाहात्म्यंपुण्य
पापहरंशुभं एतदेवपुरापृष्टःशौनकंप्राहसूतजः ॥ ३४ ॥ ततेऽहंकीर्तयिष्यामिपुण्यंकीर्तिविवर्धनं ब्रह्मादयोऽपि-
यमनंतगुणप्रवाहंसंपूजयंतिसततंविविधंस्तुवंति पूर्णंविशुद्धमजरंपरमंपरेभ्यस्तस्मैनमोऽस्तुभवजायगजानना
य ॥ ३५ ॥ लोमहर्षणजःसूतःकदाचित्पर्यटन्महीं संप्राप्यनैमिषारण्यंयज्ञायतनमुत्तमम् ॥ ३६ ॥ शौनका
द्यैर्मुदायुक्तैस्तपस्विभिरलंकृतं वेदाध्ययनसंपन्नैःनियमव्रतकर्षितैः ॥ ९७ ॥ चरितब्रह्मचर्यैश्चकृतकृत्यैरलोलु
पैःनानाजनपदाकीर्णंगीतवादित्रनिस्वनम् ॥ ३८ ॥ महामंगलभूयिष्ठमर्थ्यमर्थिसमाकुलं सिद्धचारणसंघातैर्गंध
र्वध्वनिमंडितं ॥ ३९ ॥ सुगंधिहोमधूपेनपवित्रितजगत्त्रयं विवेशसूतोहर्षेणब्रह्मलोकमिवापरम् ॥ ४० ॥
सप्रणम्यऋषीन्सर्वानुपविष्टान्कुशासने आत्मानंश्रावयामासशिरसावनतोभुवि ॥ ४१ ॥ तेतमूचुर्महात्मानोवि
कसन्नयनांबुजाः तदीयवदनोद्भूतकथामृतरसोत्सुकाः४२स्वागतंतेद्विजश्रेष्ठचिराद्दृष्टोऽसिसुव्रत उत्तिष्ठोत्तिष्ठभद्रं
तेपूतंकौशासनंभज ४३ एवंनिशम्यवाक्यानिमुनीनांभावितात्मनां प्रीतस्तदासनंभेजेप्रह्वीभूतःकृतांजलिः ४४
तंप्राहशौनकःप्रीतस्तपस्विजनसेवितः शौनकउवाच केषुकेषुचतीर्थेषुस्नातंपर्यटतामहीं ४५ उषितंकुत्रभवतात्र
तेनचसमाधिना भवान्हिपरमंतीर्थंमतोमेमुनिपुंगव ४६ मुखाद्यस्यपुराणानिसेतिहासानिसर्वतःपुनंतिपापिनोलो
कान्श्रुतानिनियमायथा ४७ गंगातुसर्वशास्त्रेषुत्रिषुलोकेषुविश्रुता काऽन्यागंगासमापुण्यानदीतेज्ञानगोचरा४८
अस्तिवानास्तिवालोकेतत्सर्ववक्तुमर्हसि सूतउवाच प्रणम्यशितिकंठायशंकरायमहात्मने ४९ अरूपबहु
रूपायव्यापिनेचित्स्वरूपिणे परावरायशांतायसर्वज्ञायाशिवायच ५० सृष्टिस्थितिलयानांचकारणायाखिला
मने देविकातीर्थमाहात्म्यंवक्ष्यामिजगतोहितम् ५१ यस्यश्रवणमात्रेणसर्वपापक्षयोनृणां जायतेमुनिशार्दूल

तस्मैदृढंनवंसौधंकारयेद्योनरोत्तमः तस्यपुण्यस्यमाहात्म्यंवक्तुंशेषोऽपिनक्षमः ॥ १४ ॥ मंदिरेविष्णुप्रतिमांस्थाप
यित्वार्चयेत्तुयः तस्याज्ञांसंप्रतीक्षंतेसर्वेब्रह्मादयोऽमराः ॥ १५ ॥ स्तवैरुच्चावचैर्विष्णुंस्तुत्वायःप्रणमेद्भुवि हविष्या
दिनिवेदीचसर्वेष्टफलभाग्भवेत् ॥ १६ ॥ तदुक्तंश्रीभागवते ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
प्रतिष्ठयासार्वभौमंसद्मनाभुवनत्रयं पूजादिनाब्रह्मलोकंत्रिभिर्मत्साम्यतामियात् ॥ १७ ॥ यत्रकुत्रकृतस्यापि
सद्मनःफलमीरितं विष्णुशंकरयोरीशोस्तीर्थेवाचामगोचरं ॥ १८ ॥ श्रीगौरीयत्प्रकृतिरुदितामद्रदेशान्पुनंती
देवींगंगांतुलयतिचयावृद्धयास्वीयकीर्त्या ॥ १९ ॥ विद्वांसोयद्गुणगणमलंकीर्तितुंनोसमर्थाः कामंपापोदयमपह
रेदादिगासानदीनः ॥ २० ॥ गंगयाक्रियतेनित्यंपापोद्धारोमयानकिं एवंनिधायमनसिगौरीजातासरिद्वरा २१
॥ सूतउवाच ॥ इमांश्रीदेविकींपुण्यांकथांयःशृणुयान्नरः कृष्णाननसमुद्भूतांशिवलोकेमहीयते ॥ २२ ॥ लेखयि
त्वाद्विजाग्र्याययोददातिनरोत्तमः सोश्वमेधादिसुरभीदानादिफलभाग्भवेत् ॥ २३ ॥ श्रीकृष्णमुखनिर्गतपुण्यगा
थांशृणोतियोवाचयतीहमर्त्यःश्रीदेविकाभावविभावितात्मासस्सर्वयागादिफलंसमश्नुते॥२४॥संकल्पयित्वाद्विजपुंग
वायसोत्रायुरारोग्यफलंसमश्नुते ॥ २५ ॥ प्रभासेदेविकातीर्थेतपसाक्लिष्टमानसः तीर्थयात्रांगतोराजाधर्मपुत्रो
युधिष्ठिरः॥ २६ ॥ लोमशेनसधौम्येनभ्रातृभिःपरिवारितः ददर्शदेवकीसूनुंकृष्णंबलसमन्वितम् ॥ २७ ॥ प्रद्युम्न
प्रमुखैर्वीरैर्लोकपालैरिवावृतं आयांतंप्रीतिजननंद्वारिकानाथमद्भुतम् ॥ २८ ॥ उत्थायराजासुप्रीतोबलदेवपुरो
गमं उपविष्टंकृतातिथ्यंस्वागतादिसुपूजितम् ॥ २९ ॥ सर्वत्रानामयंराजापप्रच्छचयुधिष्ठिरः सोऽपितंकुशलप्रश्नैः
साधुवादैरपूजयत् ॥ ३० ॥ ततःकथांतरेराजाकृष्णंपप्रच्छकामतः कृष्णकृष्णमहाभागदेविकात्रऽनदीपतिं ॥ ३१
संगताविबुधश्रेष्ठकिंफलंतत्रमज्जताम् प्रादुर्भूताकथंचेयंकुतश्चगिरिगह्वरात् ॥ ३२ ॥ श्रोतुकामोऽस्मिदेवेशस

7

18

॥ श्रीरघुनाथोजयति ॥

॥ श्रीउमापतयेनमः ॥

उमोमेशंनमस्कृत्यदेविकायामहाफलं ऋषिभिर्बहुधागीतंसंक्षेपाद्वर्णयाम्यहम् ॥ १ ॥ विलोक्यमद्रदेशी
यान्जनान्पापौघसंयुतान् तेषामुद्धारणार्थायगौरीजातासरिद्वरा ॥ २ ॥ शिवोऽगादष्टमूर्त्तित्वंकृपयाभक्तव
त्सलः पुरमंडलमध्यस्थःपुरमंडलसंज्ञकः ॥ ३ ॥ तस्मादुमात्मकंतीर्थंदेविकासंज्ञितंमहत् गंगादिसर्वतीर्थानां
स्नानतोयत्फलंभवेत् ॥ ४ ॥ तत्फलंकोटिगुणितंदेविकाम्भुनिमज्जतां पानाच्चदर्शनात्पुंसांजायतेवाञ्छितंफलं
॥ ५ ॥ उपोदग्वाहिनीतीर्थंगयाख्यंशंभुनाकृतं गयासुरस्यपादोऽत्रस्थापितोलोकमुक्तये ॥ ६ ॥ किंगयादिषुती
र्थेषुश्राद्धदानैःसुविस्तरैः अत्रश्राद्धंप्रकुर्वाणःपितृंस्तारयतेक्षणात् ॥ ७ ॥ शिवोविष्णुप्रियोनित्यंविष्णुश्चशिव
वल्लभः अतस्तन्मंदिरंकार्य्यंसर्वैंच्छितफलेप्सुभिः ॥ ८ ॥ शिवस्यमंदिरंसौधंकारयेद्योनरोत्तमः तदर्चांसंप्रतिष्ठा
प्यपूजयेत्प्रणमेन्मुदा ॥ ९ ॥ राजसूयसहस्रस्यवाजिमेधशतस्यच यत्फलंवेदनिर्णीतंसतुतत्फलभाग्भवेत् ॥ १० ॥
शिवेतिद्व्यक्षरंनामयस्यपापहरंपरं पुष्पोद्यानानिरम्याणिपूजायात्रोत्सवाश्रितान् क्षेत्रापणपुरग्रामान्दत्त्वाशिव
रूपतामियात् ॥ १२ ॥ विष्णुःसर्वात्मकोदेवोविष्णुःसर्वजनाप्रियः नामसंकीर्त्तनाद्विष्णोःपूजनाच्चमहत्फलम् १३

७

७

सूचिपत्रम्

प०	पृ०	पं०	
१	१	१	तत्रादौमंगलाचरणम्
१	१	६	हिरण्यगर्भाविर्भावादिरविरघुवंश्यानं
२	१	४	कलियुगेमालदेवप्रभृतिव- यानं
२	१	१५	श्रीगुलाबसिंहमहाराजव.
२	२	१५	श्रीमहाराजरणवीरस्यप्रतापैश्वर्यागुणादिवर्णनम्
३	२	७	कृत्यरत्नाकरविधानार्थमाज्ञाप्रदानादिव.
३	२	१३	अथग्रन्थानुक्रमणिका
४	१	१०	धर्मनिरूपणं धर्मप्रमाणधर्मप्रणेतृवचनंच
४	२	४	श्रुतिस्मृतिपुराणधर्मशास्त्रशीलवर्णनं
५	१	१३	धर्मकर्मोपयोगिपरिभाषाप्रदर्शनं
५	२	१६	यज्ञोपवीत विधिः
६	१	१२	यज्ञोपवीते नसहवस्त्र.
८	१	१२	धर्मरत्नसमुच्चय कालरूपनिर्णय धर्मरत्नसमुद्रकानिरूपणम्

सूचिपत्रम्

प०	पृ०	पं०	
५	२	४	कालस्यसूक्ष्मस्थूलभेदेनद्वैविध्यम्
५	१	२	तस्यैवपुनःसंवत्सरादिभेदेनषाड्विध्यम्
९	१	४	संवत्सरनिर्णयःप्रभवादिषष्टिभेदात्मकः
९	२	१६	अथायननिरूपणंतत्रवसंतादिषठृतव-
१०	२	११	मासनिर्णयः
११	२	१	अथमलमासनिर्णयः सचद्विविधोऽधिमासःक्षयमासश्च
१४	२	१	अधिमासलक्षणम्
१५	१	६	क्षयमासलक्षणम्
१५	२	६	अथद्विसंक्रान्तिकश्चिद्विशेष
१५	२	६	तत्रकर्तव्याऽकर्तव्यनिर्णय
२४	२	१२	अथसंक्रान्तिनिर्णयः
२५	१	४	तत्रपुण्यकालनिर्णयः

रतत्रध्यानं

नंच

नंच

नंच

ध्यानंच

तिथयः

20

॥१॥

प०	पृ०	पं०	सूचिपत्रम्
२५	१	५	तत्रस्नानदानादिकमुक्तम्
२५	१	१२	तदकरणेदोषः
२६	२	३	अयनादिसंक्रांतिषुपुण्यकालविशेषनिर्ण
२८	१	३	रात्रौस्नानदानादिनिषेधविधिनिर्णयः
२८	१	९	चंद्रादीनामपिराशिसंक्रमेपुण्यघटिकानि
२८	२	३	अथसंक्रांतिषुविशेषदानानि
२९	१		मेषसंक्रांतिपुरुषचक्रम् तुलासंक्रांतिपुरु
			षचक्रं मकरसं. पुरुष-
			कर्कसं- पु. मि- कं. ध- मी- सं- पु
			वृ. सिं वृ- कं संक्रांतिपुरुषचक्र
			म्
२९	१	१	उत्तरायणपुरुषः दक्षिणायनसंक्र
२९	१	५	षडशीतिपुरुषः विष्णुपदीपुरु
२९	२		त्रिकोणचक्रसंक्रमणं
३०	१	२	चंद्रपुरुषफलं
३०	१	७	सूर्यादीनांगोचरफलानि दा

५५

५६

ानि

प०	पृ०	पं०	सूचिपत्रम्
३१	२	४	पक्षनिर्णयोदिवसनिर्णयश्च
३१	२	७	अथसामान्यतस्तिथिनिर्ण
३३	१	६	तिथियुग्मनिर्णयः
३३	१	१३	खर्वदर्पहिंसारूपंतिथिल
३३	२	२	शुक्लकृष्णपक्षय्र ह्यति निर्णयः
३४	२	७	अथैकभक्तकालनिर्णयः
३५	२	१४	अथनक्तकालनिर्णयः
३७	२	१३	अयाचितकालनिर्णयःखं तिथिनिर्णयश्च
३८	२	७	नक्षत्रव्रततिथिनिर्णयः
३९	१	१४	अथप्रतिपदादिसामान्यनिर्णयः
३९	२	२	शुक्ल कृष्णप्रतिपदोर्ध्यानम्
	२	१	अथद्वितीयासामान्य निर्णयस्तद्ध्यानंच
			अथतृतीयासामान्यनिर्णयस्तृतीयाद्ध्य
			्यानम्

॥ २

21

प०	पृ०	पं०	सूचिपत्रम्
४१	२	६	चतुर्थीसामान्यनिर्णयः चतुर्थीद्वयध्यानं
४२	१	१४	पंचमीसामान्यनिर्णये पंचमीद्वयध्यानं
४३	१	३	षष्ठीसामान्यनिर्णये षष्ठीद्वयध्यानं
४३	२	१४	सप्तमीसामान्यनिर्णये सप्तमीद्वयध्यानं
४४	१	१५	अष्टमीसामान्यनिर्णये अष्टमीद्वयध्यानं
४५	२	१	नवमीसामान्यनिर्णये नवमीद्वयध्यानं
४५	२	१०	दशमीसामान्यनिर्णये दशमीद्वयध्यानं
४६	१	१३	एकादशीसामान्यनिर्णये ए- द्वयध्यानं
४६	१	१५	एकादशीमाहः॰ तत्रोपवासोद्विधानित्यो काम्यश्च
४७	२	१३	उपवासनिषेधः तत्रविशेषः
४८	१	१०	अथैकादशीनिर्णयः साचशुद्धाविद्धाच
४८	२	११	दशमीवेधस्त्रिविधः
४८	२	११	तत्रारुणोदयवेधेवैष्णवविषयः

प०	पृ०	पं०	सूचिपत्रम्
५१	२	१३	अथकाम्यव्रतविधिःअथव्रतघ्नानि
५२	१	१	तत्रवर्ज्यानि प्रायश्चित्तमुक्तं
५२	१	५	उपवासेदंतधावननिषेधः १
५२	१	८	एकादश्यांश्राद्ध प्राप्तौव्यवस्था २
५२	१	१५	अथव्रतघ्नान्याह
५२	२	१६	एतद्व्रतंसूतकेपिकार्यम्
५३	१	६	अथप्रसंगादष्टौमहाद्वादश्यः
५३	२	१४	पंचमोरत्नसंग्रहः
५३	२	१४	अथद्वादशीसामान्यनिर्णयस्तत्रध्यानं
५४	१	६	त्रयोदशीसामान्यनिर्णयस्तद्ध्यानंच
५४	२	९	चतुर्दशीसामान्यनिर्णयस्तद्ध्यानंच
५५	१	९	पौर्णमासीसामान्यनिर्णयस्तद्ध्यानंच
५५	२	११	अमावास्यासामान्यनिर्णयस्तद्ध्यानंच
५६	२	५	तिथिसामान्यप्रसंगात्कल्पादितिथयः

प०	पृ०	पं०	सूचिपत्रम्
५७	१	१	कल्पादितिथीनांविशेषनिर्णयस्तत्रश्राद्धं
५७	२	२	अथमन्वादितिथ्यादयस्तत्रश्राद्धमुक्तं
५७	२	१०	युगांतदिवसास्तत्रापिश्राद्धमुक्तम्
५७	२	१२	अथपर्वणिसमुद्रस्नानविधानम्
५८	२	३	अथश्राद्धापामावास्यानिर्णीयते
५९	२	२	तत्रश्राद्धकालनिर्णयः
६०	२	६	अथप्रसंगात्क्षयाहश्राद्धकालनिर्णयः
६०	२	१४	क्षयाहश्राद्धमेकोद्दिष्टं पार्वणंच
६१	१	१	तत्रैकोद्दिष्टश्राद्धकालः पार्वणश्राद्धकाल.
६३	१	१२	एतत्क्षयाहश्राद्धंरविग्रहणादिनेपिकार्यं
६३	१	१२	तत्रश्राद्धभोक्तुर्दोषःदातुश्चमहाफलं
६६	१	६	अमायांक्षयाहश्राद्धंचेत्पार्वणकंकर्त्तव्यं
६६	१	१०	श्राद्धकरणाभावेपिंडदानमात्रम्
६६	१	१५	अत्राप्यशक्ता उपवासः
६६	२	२	अथेष्टिकालोनिर्णीयते प्रकृतिकालनि-

प०	पृ०	पं०	सचिपत्रम्
७२	१	५	अथविकृतिकालनिर्णयः
७५	१	१५	अथपक्षादिकर्मविधिः
७५	२	१५	अथामापितृपक्षमृतानांक्षयाहेव्यवस्था
७६	१	२	तत्रापिक्षयाहपार्वणैकोद्दिष्टव्यवस्था
७७	१	१५	अथग्रहणकालनिर्णयः
७७	२	३	तत्रस्नानदानादिमहाफलमुक्तम्
७७	२	१०	चंद्रग्रहकोटिगुणं रविग्रहे दशकोटिगुणं
७८	१	१०	ग्रहणेतीर्थविशेषे०
७८	१	१३	तत्रापिमासविशेषेण विशेषः
७८	१	१४	ग्रहणेस्नानंदानंश्राद्धंचावश्यकं
७८	२	३	रविवारेसोमवारेचतयोर्ग्रहणेचूडामणियो
७८	२	५	ग्रहणाशौचेस्नानदानाद्यावश्यकं
७८	२	११	ग्रहणकालेसर्ववर्णानांसूतकाशौचं
७८	२	१३	अत्रपक्कमन्नंत्याज्यंस्नेहपक्कमन्नं
८१	१	१	जलंचकुशैरंतरितंशुद्धमेव

प०	पृ०	पं०	सूचिपत्रम्
७९	१	३	अन्नश्राद्धमावश्यकमकरणेदोषः
७९	१	१२	आमश्राद्धं हेमश्राद्धंचकार्य्यं
८०	१	४	जननमरणाशौचापवादः
			सर्वंगंगासमंतोयं सर्वेद्विजाःपात्रभूताः
८०	२	८	स्पर्शकालेदेवानांपितृणांचदानकालः
८०	२	९	मध्यकालेमनुष्याणां मोक्षकालेराक्षसानां
८२	२	७	अत्रभोजनंनकार्य्यंमुक्तिंज्ञात्वाभोजनं
८३	१	४	बालादीनांतुयाममात्रंपूर्वंयाममात्रंनिषेधः
	२	४	तदन्येषांतुयामत्रयं यामचतुष्टयंचनिषेधः
	२	१०	अत्रोपवासव्रतंपुत्रवद्गृहरितनउपवासाभावःवेधकालानि
८४	२	७	चंद्रग्रस्तास्तेतूत्तरदिनेसंध्याहोमादौनदो.
८४	२	१५	ग्रहणेकुरुक्षेत्रादौप्रतिग्रहेप्रायश्चित्तमुक्तं
८५	२	८	जन्मराश्यादौग्रहणेगोचरवशेनानिष्टफलं
८६	१	३	तत्रशांतिविधानं नागदानं सर्वौषधिस्ना

प०	पृ०	पं०	सूचिपत्रम्
८७	१	९	समस्तपर्वानिर्णयरत्नसमुच्चयः
८७	२	३	अथव्रतस्वरूपं व्रतप्रशंसा व्रतजिज्ञासा
८८	१	७	व्रताधिकारिणः स्त्रियोभर्त्राद्यनुमत्याधिकारिण
८८	२	१६	व्रतभेदःव्रताधिकारिधर्माः
८९	१	६	तेषांवर्ज्यावर्ज्यनिर्णयःदंतकाष्ठनिबंधः
९०	२	६	उपवासस्वरूपं आचमनं द्विराचमनं
९१	१	१२	दक्षिणहस्तेब्राह्मादितीर्थानिप्रणवादिमंत्रः
९१	२	४	दैवकार्य्यादौपूर्वान्हादिकालः
९१	२	८	व्रतत्यागादौप्रायश्चित्तं व्रतारंभेसंकल्पः
९२	१	४	व्रतारंभकालः भद्राविचारः
९२	१	१४	प्रतिमास्वरूपं कुशपवित्रं होमाहुतिमानं
९२	२	७	द्रव्यप्रतिनिधयः देवतामंत्रविचारः
९२	२	११	व्रतोद्यापनानुक्तौ दानविभागनिर्णयः
९३	१	२	कलशलक्षणं पंचरत्नानि महारत्नानि

प०	पृ०	पं०	सूचिपत्रम्
९३	१	१३	सौभाग्याष्टकं पंचगव्यं पंचामृतं मानंच
९३	२	८	सप्तधान्यं अष्टादशधान्यानि सुवर्णादि
९४	१	१	सर्वधातुगणः अष्टांगोर्घ्यः पंचरजांसि
९४	१	७	कंकणौषधयःसप्तमृदः सर्वौषध्यः सर्ववी.
९४	१	१२	यक्षकर्दमःसर्वगंधाः शक्तिगंधाष्टकं विष्णुगंधाष्टकादिनि.
९४	१	१५	शैवगंधाष्टकं गणेशगंधाष्टकं
९४	२	३	अमृताह्वयधूपःदशांगधूपः व्रतेसूतकाः
९४	२	१४	तत्रव्रतारंभसमाप्तिनि.रजस्वलाव्रतवि-
९५	१	१	उपवासासमर्थप्रतिविचारः भार्यापुत्रा.
९५	१	१०	पित्राद्यर्थेव्रतकर्त्तुः शतगुणफलं
९५	२	५	काम्याव्रतेनप्रातिविधिः व्रतरत्नसमुच्चयः
९५	२	१३	सर्वव्रतेषुसाधारणपूजायां उपचाराः
९६	१	२	अष्टत्रिंशत् ३८ षोडश १६ दशोपचारः
९६	१	४	पंचोपचाराःविष्ण्वादिपूजाअक्षतादिनिर्ण

प०	पृ०	पं०	सूचिपत्रम्
९६	१	९	उद्वर्त्तनंआचमनंप्रतिमादौनित्यस्नानं
९६	२	१	महाभिषेकः आवाहनादिमुद्राः
९६	२	१०	सर्वव्रतेषुसामान्यपूजापद्धतिः पुरुषसूक्तं
९७	२	४	पुरुषसूक्तेनदेवपूजाशिवव्रतेषुचनाम
९९	१	१३	शिवव्रतेसाधारणपूजाशिवाष्टोत्तरशत
१०१	२	१	व्रतभंगपूर्णताविधिःनवमोरत्नसंग्रहः
१०२	२	१	सर्वव्रतेषुसामान्योद्यापनविधिः मंडपषः निर्माण
१०२	२	१२	तत्रपताकाध्वजाश्चकुंडनिर्माण तत्रदा
१०३	१	८	स्थंडिलनिर्माणं समिधामानादिआहुतिमानं ड वतानां
१०३	२	३	होममुद्रात्रयं ग्रहणांस्थापनाआदिदे
१०३	२	११	ग्रहाणांगोत्रस्थानान्यधिदेवताप्रत्यधिदेवतास्थापनम्
१०४	१	४	अथग्रहाणामाधिपः होमद्रव्यमानम्

प०	पृ०	पं०	सूचीपत्रम्
१०४	१	७	समिधामानं पुनर्होमद्रव्यमानं
१०४	२	८	आचार्यवरणं ऋत्विग्वरणं ब्रह्मवरणं
१०४	२	१६	नवग्रहमखेचत्वारोऋत्विजः
१०५	१	१	अथसर्वतोभद्रमंडलं चतुर्लिंगतोभद्रं
१०५	२	१	अथद्वादशलिंगतोभद्रं
१०५	२	१०	एकलिंगतोभद्रं सर्वतोभद्रादौदेवताक्रमः
१०६	१	१३	अथाग्निकार्यंतत्रकुशंडिकाक्रमोनारदीये
१०७	२	१	अथानंतरकृत्यं रामनाथोद्यापनप्रकारात्
१०७	२	९	इत्युद्यापनसामान्यपरिभाषा
१०७	२	१०	अथोद्यापनसामान्यप्रयोगः तत्रपुण्याहवाचनं
१०९	२	१५	गणेशमातृकापूजा
११२	२	७	आभ्युदयिकश्राद्धप्रयोगः
११३	२	१०	अथोद्यापनविधानं तत्रादावाचार्यवरणं
११४	२	१	ऋत्विजावरणविधानं वरणक्रमेण

प०	पृ०	पं०	सूचीपत्रम्
			मधुपर्कदानम्
११४	२	१२	मंडपानुमंत्रणं तोरणपूजनं अथद्वारपूजा
११५	१	४	इंद्रादिलोकपालानांदशदिक्षुपूजनक्रमः
११६	२	९	ततोबलिदानं इतिमंडपप्रतिष्ठा
१२१	१	११	अथसर्वतोभद्रेदेवतास्थापनप्रयोगः
१२४	२	१	संक्षेपेणाग्निस्थापनग्रहस्था. लोकपाल-
१२७	२	१३	कलशस्थापनविधानंप्रतिमाया मग्न्युत्तारणं
१२९	२	१२	प्राणप्रतिष्ठाषोडशोपचारपूजाक्रमःब्रह्मपू.
१३०	२	१०	होमार्थमग्निस्थापनं कुशंडिकाप्रयोगः
१३१	१	९	अन्वाधानं ततोग्रहहोमः अधिदेवतादानानि
१३२	२	१०	सर्वतोभद्रदेवतानांनाममंत्रैर्होमः
१३३	२	२	प्रायश्चित्ताहुतिहोमः पूर्णपात्रदानं
१३४	१	२	बलिदानप्रयोगः अथाभिषेकः

प०	पृ०	पं०	सूचीपत्रम्
१३५	१	८	ततःशय्यादानं ततोगोदानं तिलपात्रदानं
१३७	२	१६	अत्रपूर्णाहुतिहोमः अग्निविसर्जनम्
१३७	२	९	मंडलदेवताविसर्जनं आछिद्रग्रहणं
१३८	१	१२	इति त्रैवर्णिकानांसामान्योद्यापनविधानं
१३८	१	१३	अथ शूद्रादीनामुद्यापनप्रयोगोविधीयते
१३८	२	१	शूद्रस्यधर्मकर्माधिकारनिर्णयः
१३८	२	५	अमंत्रकोदेवपूजाधिकारःमहादानाधिका.
१३८	२	१०	शूद्रस्यब्राह्मणद्वारापौराणमंत्राधिकारः
१४०	२	१	शूद्रस्याचारानुसारेणपुण्याहवाचनं
१४२	१	३	स्वस्तिवाचनं मातृपूजनम्
१४२	१	९	शूद्रस्यनांदीश्राद्धं तत्रापिंडकःसंक्षिप्तश्र
१४३	१	७	अथशूद्रस्यपौराणमंत्रैरुद्यापनप्रयोगः
१४३	१	११	आचार्यवरणंब्रह्मवरणं ऋत्विगादिवरणं
१४३	२	२	स्वस्तिवाचनं तोरणपू॰ सर्वतोभद्रपू.
१४५	२	३	ग्रहस्थापनं कलशस्थापनम्
१४६	२	८	व्रताधिष्ठातृदेवता पूजनं इतिसर्वव्रतसाधारणपू-
१४७	१	१६	अथैकादशीव्रतोद्यापनं देवतापूजनेविशे.
१४८	१	१६	अथहोमविधानं पूर्णपात्रदानं पूर्णाहुतिरमंत्रका
१४९	२	६	गोदानं केशवादिमूर्त्तिदानं अभिषेकः
१५०	२	६	देवताविसर्जनं व्रतसंपूर्णतावाचनम्
१५०	२	१२	इतिशूद्रकर्तृकसर्वव्रतसाधारणविधानं
१५०	२	१६	शूद्रव्रतनिष्ठा कृत्यरत्नसंग्रहः

प०	पृ०	पं०	सूचिपत्रम्
			अथचैत्रमासः
१	१	२	चैत्रशुक्लप्रतिपदिसंवत्सरारंभः कार्य्य अत्रयोवारः सवर्षेशः
१	१	१०	अत्रतैलाभ्यंगोनित्यःवर्षेशपूजासवर्षेशः
१	१	१५	वासंतनवरात्रप्रारंभः प्रपादानं धर्मघटदानं
१	२	१०	ब्रह्मणःपूजाअस्यांकल्पभेदेनमत्स्यावता.
१	२	१२	अथविशेषेणसंवत्सरारंभविधिर्निरूपितः
२	१	१	अत्रमहाशांतिः कार्य्या साचनिर्णीयते
४	१	१२	महाशांतिप्रयोगः
१७	२	७	अस्यांतिलकव्रतारंभःतत्रनातुर्नामभिःपू.
१८	१	१६	तिलकव्रतकथा अत्रैवारोग्यप्राप्तिव्रतंवर्षसाध्यं
१९	१	४	अस्योद्यापनं तत्रद्वादशनामभिर्द्वादशकलशेषुसूर्यपूजा

प०	पृ०	पं०	सूचिपत्रम्
१९	२	३	अथास्यामेवविद्याप्राप्तिव्रतंविष्णुधर्मोक्त.
१९	२	५	तत्राष्टदलेषुवेदानांपुराणादीनांचपूजनं
१९	२	१०	गरुडपुराणोक्तंविद्याप्राप्तिव्रतम्
२०	१	८	चैत्रशुक्लद्वितीयायांसशक्तिकब्रह्मपूजनं द्वादशवर्षात्मकम्
२०	१	१२	तत्रैव उमापूजाव्रतं बालेंदुदर्शनव्रतंप्रतिमासंवर्षसाध्यं
२०	२	९	सर्वासुशुक्लद्वितीयासुचंद्रार्घ्यदानम्
२१	१	२	अत्रैवनेत्रव्रतंवर्षसाध्यं नासत्यदस्त्रयोर्मूर्त्तिपूजाच
२१	१	११	चैत्रशुक्लतृतीयायांगौरीपूजाव्रतंसौभाग्यगौरीपूजनं
२१	१	१५	द्वादशधेनुपूजादानंद्वादशवर्षात्मकं
२१	२	१	अत्रैवसौभाग्यशयनव्रतंवर्षसाध्यंशुक्लतृतीयायां

गुरुकुल कांगड़ी

प०	पृ०	पं०	सूचिपत्रम्
२१	२	१५	सौभाग्याष्टकदानंद्वादशनामभिः प्रत्येकतृतीयापूजनं
२१	२	१५	प्रत्येकंप्राशनविधानंसौवर्णमूर्त्तिदानंसोद्यापनं
२२	१	११	अत्रैवगौरीदोलोत्सवः इयंमन्वादिश्राद्धं
२२	२	२	अत्रैवश्रीरामदोलोत्सवः
२३	२	१५	चैत्रेभाद्रपदेमाघेचशुक्लतृतीयायांगौरीव्र.
२४	२	२	तृतीयात्रयेप्रत्येकंविशेषविधानंअथकथा
२४	२	१२	अत्रैवअरुंधतीतृतीयाव्रतंसौभाग्यवती.
२६	१	५	अस्याःकथाउद्यापनंचबालवैधव्यनाशनं
२६	२	१६	चैत्रशुक्लचतुर्थ्यांवासुदेवरूपिगणेशपूजा
२७	१	२	आश्रमव्रतंकांचनंवासुदेवंब्राह्मणायदद्या,
२७	१	३	चैत्रशुक्लपंचम्यांतृतीयादिपंचम्यंतंश्रीव्रतं
२७	२	१	वर्षसाध्यमपरंश्रीपंचमीव्रतं
२७	२	३	अस्यामेवचंद्रपूजनंपृथ्वीपूजनंच

प०	पृ०	पं०	सुचिपत्रम्
२७	२	७	अत्रसौभाग्यव्रतंइदमेवमत्स्यपंचमीव्रतं
२७	२	१२	इयंकल्पादिः
२७	२	१६	चैत्रशुक्लषष्ठ्यांकुमारपूजाव्रतंइयंस्कंदषष्ठी
२८	१	१६	चैत्रशुक्लसप्तम्यामष्टदलकमलसूर्यपूजा
२८	२	४	अग्निंप्रतिष्ठाप्यसूर्य्यनामभिर्होमः अस्योद्यापनं
२८	२	९	हिरण्यमूर्त्तिगोशय्यादिदानं
२८	२	१०	दमनसप्तमीव्रतम् अनोदनसप्तमीव्रतं
२८	२	१४	नामसप्तमीव्रतं विष्णुधर्मोत्तरोक्तंसूर्य.
२९	१	५	चैत्रशुक्लाष्टम्यांभवान्याउत्पत्तिः
२९	१	८	अशोककलिकाप्राशनंलोहितनदेस्नानं
२९	२	३	अस्यामेवाष्टम्यांदेव्यामहापूजाकार्या
२९	२	७	चैत्रशुक्लनवम्यांरामजयंतीव्रतं
३०	२	१०	रामनामालेखनोद्यापनंतस्यप्रयोगः
३१	१	५	रामनवमीमहिमाव्रतमहिमानित्यत्वकथ.

प०	पृ०	पं०	सूचिपत्रम्
३१	२	१२	शुद्धविद्धरामनवमीनिर्णयःवैष्णवलक्षणं
			तत्रादावष्टमीकृत्यंनवमीकृत्यंच
३३	१	१४	श्रीराममूर्त्ति लक्षणं सर्वतोभद्र मंडलपूजामंत्रः
३६	१	९	अथव्रतपद्धतिःकलशस्थापनं
३६	२	१६	केशवादिमातृकान्यासः
३८	१	९	शंखस्थापनं पीठपूजा सान्निधानं
४०	१	५	सर्वोपचारपूजाविधानं रामनवमी पूजा.
४१	२	४	अथदशमीकृत्यं तत्रहोमविधानं
४५	२	४	श्रीरामप्रतिमादानं शरणविधानं च
४५	२	१२	अकिंचनोद्यापनविधानम्
४६	१	८	श्रीरामनामाष्टोत्तरशतस्तोत्रं
४७	१	६	अस्यामेवकालोत्तरोक्तंमातृकाव्रतं
			अत्रभद्रकालीव्रतं चतुः षष्टियोगिनीपूजा
४७	२	४	चैत्रशुक्लदशम्यांधर्मराजपूजाव्रतम्

प०	पृ०	पं०	सूचिपत्रम्
			चैत्रशुक्लैकादश्यांदोलोत्सवः कार्यः
			इयंकामदैकादशीतस्याकथा
४९	१	६	अस्यांस्त्रीभिरुक्मिणीयात्राकार्य्या
			अस्यांसंक्षेपतोवास्तुपूजोक्ता अत्रापिदमनोत्सवः
४९	२	१६	चैत्रशुक्लैकादश्यांदमनोत्सवः
५२	२	१४	अत्रयमनद्वादशीव्रत भर्तृद्वादशीव्रतम्
५४	१	७	वाराहेधरणीव्रतेषुवामनद्वादशीव्रतकथा
			अत्रैवसंकल्पद्वादशीव्रतम्
५४	२	४	चैत्रशुक्लत्रयोदश्यांचंद्रनात्मकमदनपूजा.
			अजदानं इयंचोदानकल्पादिस्तत्कृत्यंच
५५	१	७	चैत्रशुक्ल चतुर्दश्यांशिवपूजामहोत्सवः
५५	२	७	अत्रापिदमनोत्सवःकाश्यांपशुपतीश्वरया
५६	१	५	नृसिंहपूजाव्रतं नरसिंहस्यदोलोत्सवः
५६	१	८	चैत्रपौर्णमासीचित्रायुतामहाचैत्र्युक्ता

प०	पृ०	पं०	सूचिपत्रम्
५६	१	८	मंदार्कगुरुवारयोगेसहापुण्यदोक्ता
५६	१	१०	अत्रसर्वदेवानांदमनोत्सवः इयंमन्वादि षट्नवतिश्राद्धगणेपठितानास्ति
५६	२	५	अस्यांमिंद्रपूजोक्तानिकुंभयात्राच तृणमयपिशाचंसंपूज्यब्राह्मणान्भोजयेत्
५६	२	११	महाचैत्रीलक्षणअत्रवाराहपुराणदानंच
५६	२	१६	अथचैत्रमासीयशुक्लपक्षकृत्यानि.
५७	१	४	अस्यांसौरमासाभिप्रायेण.
			मीनसंक्रांतिपुण्यकालनिर्णयः
५७	१	१२	चैत्रशुक्लप्रतिपदायांशुपचंस्पृष्ट्वास्नानंका-
५७	२	३	नक्तव्रतारंभोविप्रवस्त्रशयनासनानिदेया.
			अत्रमासेगंधाद्यनुलेपनवस्त्रादिदानं
५७	२	८	आनंदव्रतंदधिक्षीरघृतादित्यागगौरीव्रतं नक्तभोजनंशाल्याद्यन्नदानं प्रपादानं धर्मघटदानं इयंप्रतिपदानारसिंहकल्पा.

प०	पृ०	पं०	सूचिपत्रम्
५८	१	२	अत्रमल्लनटादीनांनृत्योत्सवदर्शनं
५८	१	३	चैत्रकृष्णद्वितीयायांतिथिपत्वेनब्रह्मणः पूजाकार्या
			चैत्रकृष्णतृतीयायांसौभाग्यसुंदरीव्रतांगत्वेनरतिनामकगौरीपूजाउदकप्राशनं
			चैत्रकृष्णचतुर्थ्यांसंकष्टचतुर्थीव्रतम्
			चंद्रोदयेअर्घ्यदानं पंचगव्यप्राशनम्
५८	१	६	चैत्रकृष्णपंचम्यांकाश्मीरदेवीरजस्वला भवति
			शिलामयीदेवीव्रतं अभ्यंगंगोरसंचत्रिदिनंवर्ज्यं
५८	२	७	कृष्णाष्टम्यांदेवींद्विजैः स्नाप्यगंधादिभिः त्रिकोणाकारपिष्टपाकैःशालिभक्तशाकैर्नै. तंत्रीवाद्यश्रवणंदेवीनैवेद्यप्राशनं
५८	२	९	चैत्रकृष्णषष्ठ्यामेकभक्तादिव्रतेनभास्करपूजाकथास्कांदे

प०	पृ०	पं०	सूचिपत्रम्
५८	२	१	अथात्रषष्ठीमात्रेकाश्यांलोलार्कयात्रा षष्ठ्यांपूजागुहस्यचेति
५८	२	३	चैत्रकृष्णसप्तम्यांतिथित्वेनसूर्यपूजाव्रतं
५८	२	४	चैत्रकृष्णाष्टम्यांरविभौमवारेकाश्यांभैरवदुर्गापूजाच अत्रसोमाष्टमीव्रतंसोमशिवा.
५८	२	८	सर्वास्वष्टमीषुअशोकाष्टमीव्रतं
५८	२	१०	भविष्योत्तरोक्तंचंडिकाव्रतं अस्योद्यापनं
५८	२	१६	विष्णुधर्मोत्तरोक्तंसंतानाष्टमीव्रतम्
५९	१	१	शीतलाष्टमीव्रतकथा शीतलाष्टकंस्तोत्रं
५९	२	१०	चैत्रकृष्णनवम्यांवाराहजयंतीव्रतं
६०	१	९	चैत्रकृष्णदशम्यांधर्मराजपूजाव्रतम्
६०	१	१३	चैत्रकृष्णैकादशीपापमोचनीव्रतकथा
६१	१	१३	चैत्रकृष्णाद्वादशीवैराजकल्पादितत्रश्राद्धं
६१	१	१३	चैत्रकृष्णत्रयोदशीशतभिषानक्षत्रयुतावा-
६१	१	१५	शनिवारयुतामहावारुणीशुभयोगवती

प०	पृ०	पं०	सूचिपत्रम्
६१	२	३	महामहावारुणीअत्रसप्तसागरदानप्रयो.
६२	१	१२	चैत्रकृष्णचतुर्दशीपिशाचमोचनी अस्यांशिवसन्निधौस्नानंभौमवारेणातिप्रशस्ता
६२	१	१६	अत्रस्नुहीविटपर्य्युतारक्तापताकाधवलितकलशोपरिकृतागृहोपरिस्थाप्या
६२	२	१	अस्यांनिशायांनिकुंभपूजाबलिदानंपुंश्चलीनृत्यदर्शनं
६२	२	४	चैत्रामावास्यायांसारमेयेभ्योन्नदानं
६२	२	६	इयंमन्वादिभौमवारेणभौमावास्यागुरुवाजीवामावास्याशनिवारेमंदामावास्यासोमवारेण
६३	१	७	सोमवत्यमावास्याकथासोमवत्युद्यापनप्रयोगः
६६	२	१	अत्रव्रतं पितृव्रतं पयोव्रतम्

चैत्रकृत्यरत्नसमुच्चयय:

प०	पृ०	पं०	सूचिपत्रम्
			वैशाखमासः
१	१	१	अथवैशाखमासकृत्यानिर्णयः
		१	मेषसंक्रमेपराःपूर्वाचदशघटिकाःपुण्या
		३	वैशाखेधर्मघटादिदानंतीर्थेस्नानं
		३	तिलतर्पणंमधुसूदनपूजनं एकभक्तम्
		५	पुष्पलवणवर्जनं नक्तभोजनं
		६	दध्योदनदानं गोष्ठशयनंब्रह्मचर्य्यं
		९	माधवपूजनंतिलैर्होमः नृसिंहपूजनं
		११	सिद्धार्थकैर्होमःवैशाख्यांत्रिरात्रव्रतम्
		११	ज्ञानावाप्तिकरव्रतं प्रातःस्नानं
		१४	अत्रसौरोमासःग्राह्यःबहिःस्नानं
२	१	८	तस्योद्यापनंवैशाख्यांपौर्णिमायां
			वैशाखकृष्णप्रतिपदायास्तिथि पत्वेनवह्निपूजा
		१०	वैशाखकृष्णद्वितीयासमानकल्पादिः

प०	पृ०	पं०	सूचिपत्रम्
		११	अत्रतिथिपत्वेनब्रह्मपूजाव्रतम्
		११	वैशाखकृष्णतृतीयायांप्रीतिदेव्यापूजनं कंकोलप्राशनम्
		१२	वैशाखकृष्णचतुर्थ्यांसंकष्टचतुर्थीव्रतंशतपत्राशनम्
		१३	वैशाखकृष्णपंचम्यांनागपूजनं
		१३	वैशाखकृष्णषष्ठ्यांस्कंदपूजाव्रतम्
		१४	वैशाखकृष्णसप्तम्यांसूर्यपूजाव्रतम्
		१४	वैशाखकृष्णाष्टम्यांशीतलाष्टमी व्रतंचंडीपू
		१५	वैशाखकृष्णनवम्यांचंडीपूजाव्रतं
२	२	१	वैशाखकृष्णदशम्यांमार्गादितउभयदशमीव्रतं
		१	दिशांपूजनंधर्मराजपूजनंच
		२	वैशाखकृष्णैकादश्यांहरिपूजाव्रतम्
३	१	५	वैशाखकृष्णत्रयोदश्यांगौरीकल्पादियक्षदोषव्रतम्

प०	पृ०	पं०	सूचीपत्रम्
		६	वैशाखकृष्णचतुर्दश्यांमासशिवरात्रिव्रतं
		७	वैशाखमावास्यायांद्वादशामावास्याकृत्यं
		८	तत्रश्राद्धदानाद्यवश्यंविधेयमकरणेप्रत्य
			वायः
		९	वैशाखशुक्लप्रतिपदायांआरोग्यप्रतिपदा
		१०	धातृनामकसूर्यपूजाव्रतम्
		१०	तिथिपत्वेनवह्निपूजापि
		१०	वैशाखशुक्लद्वितीयायांनीललोहितकल्पा.
		११	तत्रकल्पादित्वेनश्राद्धदानादिविधेयं
		११	चतुर्मुखरूपसूर्यपूजाव्रतं
		१२	वैशाखशुक्लतृतीयायांगौरीव्रतांगत्वेनगौ
३	२	२	रीव्रतं
			उमादेवीपूजादधिप्राशनंगोमयप्राशनं
		३	इयंतृतीयात्रेतायुगादिश्राद्धनित्यकाम्यच
४	१	३	अस्यांजनार्दनपूजागंगास्नानंगंगादिपू.

प०	पृ०	पं०	सूचीपत्रम्
		७	यवैर्होमः वारिदानं मोदकदानं चंदनदानं
४	२	७	उदककुंभदानं अक्षयतृतीयाव्रतंश्रीधरपू.
		१२	युगादिकृत्यं समुद्रस्नानं परशुरामजयंती.
		९	अक्षयतृतीयाव्रतविधानंकथाभविष्योत्तरे
			विष्णुधर्मोत्तरेच
५	२	१३	वैशाखशुक्लचतुर्थ्यां अनिरुद्धपूजाव्रतं
		१३	अलाबुपात्रदानं
		१४	वैशाखशुक्लपंचम्यांशिवपूजाव्रतम्
		१५	वैशाखशुक्लषष्ठ्यांस्कंदपूजाव्रतंमातृसौख्यं
		१६	वैशाखशुक्लसप्तम्यांगंगोत्पत्तिगंगापूजा
			दिव्रतम्
६	१	४	कमलसप्तमीव्रतंनिंबसप्तमी शर्करास
			प्तमीव्रतम्
६	२	१४	वैशाखशुक्लाष्टम्यांअपराजितादेवीपूजाव्र.
७	१	४	वैशाखशुक्लनवम्यांचंडिकादेवीपूजाव्रतं

प०	पृ०	पं०	सूचीपत्रम्
७	१	६	वैशाखशुक्लदशम्यांधर्मराजपूजाव्रतं दिशांपूजाच
७	१	९	वैशाखशुक्लैकादश्यामोहिनीकथा
८	१	५	वैशाखशुक्लद्वादश्यांधरणीव्रतेपुजामदग्न्यद्वादशीव्रतं
८	२	२	अत्रवारनक्षत्रसद्योगेनव्यतीपातयोगेमाधवपूजा
८	२	७	वैशाखशुक्लत्रयोदश्यांकामदेवपूजाव्रतं
८	२	९	वैशाखशुक्लचतुर्दश्यांनृसिंहजयंतीव्रतंक.
९	१	१५	सोद्यापनंनृसिंहपूजाविधान ओंकारेश्वरयात्रागारुडकल्पादिः
१३	२	४	वैशाखपौर्णिमायांवैशाखस्नानव्रतोद्यापनंगोदानादि
१६	२	१०	कृष्णाजिनदानप्रयोगःब्रह्मपुराणदानम्
			वैशाखकृत्यरत्नसमुच्चयः

अथ ज्येष्ठमासः

प०	पृ०	पं०	सूचीपत्रम्
१	१	१	अथज्येष्ठमासकृत्यनिर्णयः
१	१	१	तत्रवृषसंक्रांतौपूर्वाःषोडशनाड्यःपुण्याः
१	१	२	अथमासकृत्यमेकभक्तव्रतं श्रीप्राप्तिव्रतं
१	२	५	जलस्थविष्णुपूजाव्रतं श्रीप्राप्तिव्रतं
१	२	६	ज्येष्ठकृष्णप्रतिपदायांश्रीप्राप्तिव्रतारंभः वन्हिपूजाच
३	२	११	ज्येष्ठाद्वितीयायांवान्हिब्रह्मपूजाव्रतं ज्येष्ठकृष्णाद्वितीयायांगौरीव्रतांगत्वेनधृतिपूजनं
१	२	१२	शतावरीप्राशनं
१	२	१३	ज्येष्ठकृष्णचतुर्थ्यांआसचतुर्थिगणेशव्रतं चंद्रोदयेअर्घ्यदानंघृतप्राशनं
१	२	१४	ज्येष्ठकृष्णपंचम्यांशंखपालनागपूजनं

प०	पृ०	पं०	सूचिपत्रम्
		१४	ज्येष्ठकृष्णषष्ठ्यांस्कंदकुमारपूजाव्रतं
		१४	ज्येष्ठकृष्णसप्तम्यांसूर्यपूजाव्रतं
		१५	ज्येष्ठकृष्णाष्टम्यांत्रिलोचनाख्याशिवपूजा.
२	१	१	ज्येष्ठकृष्णनवम्यांदुर्गासरस्वतीपूजाव्रतं
		२	ज्येष्ठकृष्णदशम्यांउभयदशमीव्रतं धर्मरा
		२	ज्येष्ठकृष्णैकादशीअपराकथा (जपूजा
२	२	१	ज्येष्ठकृष्णद्वादश्यांहरिपूजाव्रतम्
२	२	१	ज्येष्ठकृष्णत्रयोदश्यांवटसावित्रीव्रतारंभः
२	२	३	ज्येष्ठचतुर्दशीमाहेश्वरकल्पादिः
२	२	४	अस्यामुमादेवीजन्मकृत्यं
२	२	६	ज्येष्ठामावास्यायांवटसावित्रीव्रतं
		७	स्थिरसौभाग्यास्त्रीभिःकार्य्यं
		९	अथव्रतविधिःसावित्रीपूजनं
३	१	५	यमपूजनंअरुंधतींसंपूज्यभोजनं
३	१	११	सुवासिनीपूजनंअत्रपंचाग्निसाधनव्रतम्

प०	पृ०	पं०	सूचिपत्रम्
३	२	९	तत्रसप्ताहसाध्यं अशक्तस्य शक्तस्यमाससाध्यम्
३	२	११	उदकुंभांबुदानं तालवृंतदानं चंदनदानं त्रिविक्रपूजनम्
		१४	ज्येष्ठशुक्लप्रतिपदायांआरोग्यव्रतंवरुणा-
		१५	सूर्यपूजाव्रतं करवीरव्रतं दशहरागंगापूजारंभः
४	१	८	ज्येष्ठशुक्लद्वितीयायांभानुपूजाइयंकलिज.
४	१	१२	इयंसोमपदाअत्रवेदाध्ययननिषेधः
		१३	ज्येष्ठशुक्लतृतीयायांरंभाव्रतमुक्तं
	२	१	तस्याःकथाविधानंचभविष्योत्तरे
५	१	१५	अस्योद्यापनं तत्रगृहदानप्रयोगः
६	१	६	अस्यांसौभाग्यंशयनव्रतं ललितादेवीपू.
		६	घृतप्राशनं मंदारपुष्पाघ्राणं भद्रागौरीः
		७	ज्येष्ठशुक्लचतुर्थ्यांसतीदेवीव्रतं

प०	पृ०	पं०	सूचिपत्रम्
		१०	ज्येष्ठशुक्लपंचम्यांपितृपूजनमुक्तं
		११	ज्येष्ठशुक्लषष्ठ्यां दिननाथरविपूजनं स्कंदपू
	१	१२	ज्येष्ठशुक्लसप्तम्यांरविदेवइंद्रपूजाव्रतं
		१३	ज्येष्ठशुक्लाष्टम्यांशुक्लादेवीपूजाव्रतं
		१६	ज्येष्ठशुक्लनवम्यांउमादेवीपूजाव्रतं
६	२	४	ज्येष्ठशुक्लदशम्यांदशहरागंगापूजाव्रतं
		५	दशहरायोगविशेषउक्तः
७	१	७	दशविधपापानिकाशीखंडोक्तानि
७	१	१३	दशहरादशमीपूजाविधानं दशहरास्तोत्रं
८	२	६	अस्यांसेतुबंधरामेश्वरप्रतिष्ठा
८	२	८	ज्येष्ठशुक्लैकादशीनिर्जलाकथाभविष्योत्त-
९	२	१३	पुराणसंग्रहं ब्रह्मवैवर्त्तंच
११	१	७	अभ्रजलधेनुदानप्रयोगः
१२	१	१४	घृतधेनुदानप्रयोगः (ना-
१३	१	२	धरणीव्रतेपुराघवद्द्वादशीव्रतं अस्यांमु

प०	पृ०	पं०	सूचिपत्रम्
१३	२	२	ज्येष्ठशुक्लत्रयोदश्यांदौर्भाग्यशमनव्रतम्
१३	२	१५	ज्येष्ठशुक्लचतुर्दश्यांपंचतपाख्यंपंचाग्निव्र.
		१६	ज्येष्ठपौर्णमासीयोगविशेषेणमहाज्येष्ठी
१४	१	३	अत्रकुंभांबुदानंछत्रदानंतालवृंतचंदनंच
		३	त्रिविक्रमप्रीत्यैदेयं
		११	अथास्यांवटसावित्रीव्रतविधानंतत्रपूजा.
१५	१	३	अस्याःकथास्कांदे
१९	२	६	वर्षसाध्यंसावित्रीव्रतंसोद्यापनं
२१	२	११	अस्यांपुत्रकामव्रतं विल्वात्रिरात्रव्रतं अत्र
			दानविशेषःपद्मपुराणेदानम्

इतिज्येष्ठमासकृत्यरत्नसमुच्चयः

प०	पृ०	पं०	सूचिपत्रम्
१	१	१	आषाढमासकृत्यनिर्णयः
१	१	२	मिथुनसंक्रांतेःपराः षोडशघटिकाःपुण्यः
	१	३	आषाढमासेएकभक्तव्रतं
	१	४	बहुधान्यव्रतंमासमात्रसाध्यं
		६	रूपावाप्तिव्रतंभोगावाप्तिव्रतम्

प०	पृ०	पं०	सूचिपत्रम्
		७	आपाढकृष्णप्रतिपदायामारोग्यव्रतम्
		७	माधवाख्यसूर्यपूजाव्रतम्
		८	आपाढकृष्णद्वितीयायांब्रह्मपूजाव्रतम्
		८	आषाढकृष्णद्वितीयायांगौरीव्रतांगत्वे
			नसुभगागौरीपूजाइयमाग्नेयकल्पादिः
		९	आपाढकृष्णचतुर्थ्यांसंकटचतुर्थीव्रतं
		९	हरनंदनगणपतिपूजनं चंद्रार्घ्यदानं
		१०	आपाढकृष्णपंचम्यांनागपूजाव्रतम्
		१०	आ॰ कृ॰ षष्ठ्यांग्रहनामकस्कंदपूजाव्रतम्
		११	आ. कृ. सप्तम्यामिक्षुभार्कसूर्यपूजा
		१३	आ- कृ. अष्टम्यांमासदुर्गाव्रतम्
		१४	आ. कृ- नवम्यांऐंद्रीदुर्गापूजाव्रतम्
१	२	१	आ. कृ. दशम्यांधर्मपूजादिशांपूजा.व्र.
		५	आ- कृष्णैकादश्यांयोगिन्येकादशीव्रतं
		७	अस्याः कथापद्मपुराणेपुंडरीकाक्षपूजनं

प०	पृ०	पं०	सूचिपत्रम्
२	२	४	आषाढकृष्णद्वादश्यांतिथिपत्वेनहरिपू.
		४	आ. कृष्णत्रयोदश्यांकामपूज व्रतं
	२	९	आ.-कृ-चतुर्दश्यांमासशिवरात्रिव्रतम्
२	२	११	आ. मावास्यायांशूलव्रतंवर्षसाध्यम्
		१२	पिष्टमयशूलदानंब्रह्महत्यादिपापनाशनं
		१२	दारिद्यनाशनंशिवलोकप्रदंच
		१३	आ. शुक्लप्रतिपदायामारोग्यप्रतिपद्व्रतं
		१३	विद्याप्राप्तिव्रतांगत्वेनब्रह्मपूजनंसूर्यपूज.
		१६	आषा- शुक्लद्वितीयायांरथयात्रोत्सवः
३	१	१	पुष्यर्क्षसंयुतायांमहाराजयात्रोत्सवः सर्व
			पुरेषुकार्यः
३	१	३	आ॰शु॰ तृतीयायांसश्रीकहरेःपू-
		४	सश्रीकद्विजपूजनं
		५	सौभाग्यसुंदरीव्रतं
		५	गौरीतृतीयाव्रतं

प०	पृ०	पं०	सूचिपत्रम्
		६	आषाढशुक्लचतुर्थीरथंतरकल्पादिः
		६	तस्यांकल्पादिगणोक्तश्राद्धदानादिकं
		६	आषाढशुक्लपंचम्यांअष्टदिनेशपूजनं
		७	ग्रामाद्बहिःपंचवर्णध्वजास्थापनं
		१०	सोपवासेनभूमिशयनंकृत्वास्वप्नफलज्ञानं
		११	तत्रचालीउत्सवोलोकप्रसिद्धः वायुपरीक्ष.
		१४	आ.शुक्लषष्ठ्यांस्कंदपूजाव्रतं
		१४	शिवोमासहितस्कंदपूजनंउपवासोविद्धे-
		१५	आषाढशु.सप्तम्यांइंद्राक्षरविपूजाव्रतं
३	२	१	तत्रापिसोपवासेनवर्तुलमंडलेसूर्यपूजा.
	२	२	अत्रैवविवस्वदाख्यसूर्यस्यपूजाकार्या
	२	३	आषाढशु. ष्टम्यांमहिषघ्नीचंडीपूजाव्रतं
	२	६	अत्रहारिद्रातोयादिभिर्देवीपूजनंकार्यं
	२	१२	आ.शु.नवम्यांऐरावणस्थितैंद्रीदेवीपूजनं
		१४	आ.शु.दशमीमन्वादितत्रस्नानदानादि

प०	पृ०	पं०	सूचिपत्रम्
४	१	१५	आ.शुक्लैकादशीदेवशयनीव्रतं
		७	अस्याःकथाभविष्येपाद्मेच अत्रमैत्रर्क्षेवासुदेवद्वादशीव्रतं
६	२	१०	देवस्यशयनोत्सवःचातुर्मास्यव्रतनियमा
१०	२	१	स्वापनमहोत्सवप्रयोगः रामचंद्रस्तात्र
११	१	२	चातुर्मास्यव्रतारंभस्यकालांतरंतत्र वर्ज्या·
१२	२	११	शंखचक्रादिमुद्राधारणनिर्णयः
१५	२	१५	विभूतिद्वादशीव्रतंपुनरस्याःकथामन्वादि. कृत्यंलवणाचलदानं
१८	१	५	अत्रानुराधायोगेपारणविचारः धारणपारणव्रतम्
१८	२	१२	आ·शु-त्रयोदश्यांउमामाहेश्वरव्रतंजयापार्वती .तम्
२०	१	१०	आ-शु-चतुर्दश्यांशिवशयनम्
२०	१	११	आ- पौ. गोपद्मव्रतंकोकिलाव्रतपूजाकथाउद्यापनं

प०	पृ०	पं०	सूचिपत्रम्
२७	१	३	आ-पौर्णिमास्यांदुर्गाशिवपूजाचसन्यासिनांकृत्यम्
२८	१	१२	व्यासपूजाप्रयोगः गजपूजा विष्णुपुराणदानं घृतधेनुदानम्

इतिआषाढमासकृत्यरत्नसमुच्चयः

श्रावणमासः (नि.

प०	पृ०	पं०	सूचीपत्रम्
१	१	१	श्रावणमासकृत्यनिर्णयःकर्कसंक्रांतिपुण्य
		७	याम्यायनस्याविशेषतःपुण्यकालनिर्णयः
		११	अत्रनदीनांरजोदोषनिर्णयः तत्रस्नानादिनिषेधः
१	२	६	गंगादिमहानदीषुतदपवादःग्रामभोगेप्यपवादः
		१३	श्रावणमासादिचतुष्टये घृतधेन्वादिदानविशेषः
२	१	३	चातुर्मास्येप्रातःस्नानशीलारोग्यव्रतं
		७	श्रावणमासे एकभक्तव्रतं कृष्णप्रतिपदादिप्रारंभः
		९	श्रावणकृष्णद्वितीयायामशून्यशयनव्रतं
३	१	१६	इदंचश्रावणादिमासचतुष्टयेकार्यं
३	२	४	श्रावणकृष्णतृतीयायांकज्जलीव्रतं
		६	अस्यामेवश्रावणर्क्षयुतायांविष्णुपूजाव्रतं
		७	श्रावणकृष्णचतुर्थीसोमकल्यादि
		८	अत्रसंकष्टचतुर्थीव्रतविधिः
४	२	१०	पार्थिवगणेशपूजाविधिअत्रहेमहस्तिदा.
५	२	३	अत्रदूर्वागणपतिपूजाविधिः
६	१	१०	संकष्टचतुर्थीव्रतकथा चंद्रोदयेऽर्घ्यदानं
७	२	३	श्रावणकृष्णपंचम्यां अन्नव्रतम्
		४	अत्रसर्वस्नानानि सायंकालेजलेनाष्ठव्यप्रातर्देयानि

प०	पृ०	पं०	सूचिपत्रम्
		६	अस्यांशिवपूजाव्रतं इयंमानवकल्पादिः
		१०	अत्रैवस्नुहीविटपेमनसादेवीपूजा
		१३	श्रावणकृष्णषष्ठ्यांस्कंदपूजाव्रतम्
		१४	श्रावणसप्तम्यांरविपूजाव्रतम्
		१४	श्रावणकृष्णाष्टम्यांसुगतिप्रदव्रतम्
		१६	श्रावणकृष्णनवम्यांकौमारीपूजाव्रतम्
८	१	४	श्रा·कृ-दशम्यांयमपूजादिशांपूजाच
		६	श्र·कृ·एकादश्यांरोहिणीयोगेरोहिणीचंद्रपूजाव्रतम्
८	२	३	श्रावणकृष्णैकादशीकामिकाकथास्त्रीभिःकार्य्या
९	१	११	अत्रश्रीधरपूजाद्वादश्यामपिकार्य्या
९	१	१३	श्रावणकृष्णत्रयोदश्यांकामत्रयोदशीव्रतं
९	१	१५	श्रावणकृष्णचतुर्दश्यांमासशिवचतुर्दशीव्र
९	१	१५	श्रावणामावास्यायांपितृश्राद्धदानहोमादिकंवपिठेराव्रतं देवीपूजाच
११	१	१	श्रा.शुक्लप्रतिपदायांविल्वरोटकव्रतं
१२	१	३	आरोग्यव्रतं विद्याप्राप्तिव्रतम्
१२	१	५	श्रा.शु.द्वितीयायांविश्वकर्मशयनं
१२	१	६	अत्राशोकशयनव्रतं श्रीकांतपूजनं
१२	१	८	श्रा-शु-तृतीयायांस्वर्णगौरीव्रतोद्यापनं
१३	२	१	अथकथा इयंमधुस्रवेतिख्याता
१४	१	७	अत्रैवअनंततृतीयाव्रतं कथाच
१५	१	६	श्रा. शु. चतुर्थीदूर्वागणपतिपूजनं
१६	१	१०	श्रा.शु.पंचम्यांनागपंचमीव्रतम्
१६	१	१४	अत्रद्वारस्योभयत्तागोमयालिखितनागपू·
१६	२	५	अश्यांवासुकिकुंडस्नानं इयंमानवकल्पा.
१६	२	११	श्रावणशु- षष्ठ्यांस्कंदपूजनम्
१६	२	१३	श्र·शु-सप्तम्यांअव्यंगसप्तमीव्रतं
१६	२	१४	सप्तवाहनसूर्यपूजनंकार्पाससूत्रमयसूर्य·

प०	पृ०	पं०	सूचीपत्रम्
१७	१	२	पापनाशिनीसप्तमीव्रतम्
१७	१	५	श्रा.शुक्लाष्टमीदुर्गाष्टमीपूजाव्रतम्
१७	१	८	श्रा:शु.नवम्यांकौमारीदेवीपूजाव्रतम्
१७	१	११	श्रा·शु·दशम्यांसर्वाशापूर्त्तिदाव्रतम्
१७	१	१२	श्रा-शुक्लैकादश्यांपुत्रदैकादशीव्रतकथा
१८	१	१२	अस्यामेवबुद्धद्वादशीव्रतं अत्रपवित्रारोपणमुक्तम्
१८	२	४	अत्रब्रह्मपुराणीयंशैवागमोक्तं पवित्रारोपणम्
२०	२	३	नृसिंहपरिचर्य्योक्तं पवित्रारोपणं पवित्रलक्षणम्
२३	२	७	अथसर्वसाधारणपवित्रारोपणप्रयोगः
२६	२	१	संक्षिप्तपवित्रारोपणविधिः
२८	१	१५	श्रावणशुक्लत्रयोदश्यांवैधव्यवारणव्रतं
२८	१	१५	संतानवर्धनव्रतम्

प०	पृ०	पं०	सूचीपत्रम्
२८	२	२	श्रा-शु.चतुर्दश्यांदेवीपवित्रारोपणम्
२८	२	६	श्रावणपूर्णिमायां उपाकर्मविधानम्
२८	२	१३	अत्ररक्षाबंधनविधानउपाकर्मकालःउत्स.
४०	२	१०	उपाकर्मप्रयोगःसमाप्तः
४३	१	१६	जयापूर्णिमाव्रतं जलधेनुदानम्
४३	२	९	अत्रश्रावण्यांवायुपुराणदानम् गुडधेनुदा.
			इतिश्रावणमासकृत्यरत्नसमुच्चयः

भाद्रमासः

प०	पृ०	पं०	सूचीपत्रम्
१	१	१	अथभाद्रपदमासकृत्यनिर्णयः
		१	सिंहसंक्रांतौपराः षोडशनाड्यः पुण्यका.
		३	सिंहसंक्रमणेससुवर्णछत्रदानम्
		४	अस्यांकलियुगस्यान्तादिनं युगान्तश्राद्धं
		५	विंशतिदिनात्मकंतुलसीदोरकव्रतम्

प०	पृ०	पं०	सूचीपत्रम्
		९	तुलसीकवचं तुलसीव्रतकथा
२	२	६	सिंहार्कैगोप्रसवेअमृताशांतिकार्य्या
		११	भाद्रकृष्णप्रतिपदायांमधुपायसदानंलव.
		१३	फाणितदानम्
		१५	भाद्रकृष्णद्वितीयायां अशून्यशयनव्रतं
		१६	भाद्रकृष्णतृतीयायां विशालाक्षीयात्रा
३	१	२	भाद्रकृष्णचतुर्थ्यांसंकष्टचतुर्थीव्रतकथा
७	२	१२	बहुलाचतुर्थीव्रतं गोपूजनंदानंच
८	१	१	भाद्रकृष्णपंचम्यांनागानांपूजा
		३	भा-कृ·षष्ठ्यां कुशपलाशव्रतम्हलषष्ठीव्रत
		६	चंद्रषष्ठीव्रतकथा उद्यापनप्रयोगः
१२	१	३	भा·कृ·सप्तम्यांशीतलाव्रतंकथाच
१३	१	४	शीतलामंत्रविधानं शीतलाकवचं
१४	१	११	अस्यामेवपुत्रप्राप्तिव्रतम्
१४	१	१३	भा-कृष्णाष्टम्यांदशाफलव्रतविधिः कथाच

प०	पृ०	पं०	सूचिपत्रम्
१६	१	६	कृष्णजन्माष्टमीव्रतनिर्णयःजयंतीनिर्णयः
२२	२	११	अथजन्माष्टमीव्रतेकृत्यप्रयोगः
२४	२	११	पुण्याहवाचनं मातृकापूजा नांदीश्राद्धं
२५	२	१३	षष्ठीपूजनं जातकर्मनामकर्मचअष्टमीकृत्यं
२७	२	८	पारणनिर्णयः जन्माष्टमीव्रतकथाभविष्ये
३०	२	१४	पद्मपुराणोक्ताकथाभविष्यपुराणोक्तमुद्या.
३४	१	१०	अथस्मृतिकौस्तुभोक्तमुद्यापनम्
३५	१	२	जन्माष्टमीव्रतेपूजाविधानं उद्यापनविधा-
३६	२	१	अग्निपुराणोक्तंजयंतीव्रतकथा नक्तंच
३७	१	१५	उद्यापनकौमुद्युक्तमुद्यापनविधानम्
३८	१	१२	अस्यामेवउमामहेश्वरव्रतंकालाष्टमीव्रतंच
३८	१	१५	भा. कृ-नवमीगोपालनवमीप्रसिद्धा
३८	१	१५	तत्रगोगामीशिवपूजाव्रतं दुर्गापूजनंच
३८	१	१६	भा.कृ.दशम्यांयमपूजादिशांपूजाच
३८	२	१	भा. कृष्णैकादशी अजा कथा

प०	पृ०	पं०	सूचिपत्रम्
३९	१	४	भा.कृ.द्वादशीगोवत्सपूजापिष्टमय्यागोपू-
३९	१	९	भा.कृ. त्रयोदश्यांकलियुगादितत्रश्राद्धं
३९	१	१४	भा.कृ.चतुर्दश्यां मासशिवरात्रिव्रतंशिवार्च
३९	१	१५	भाद्रामावास्यायांकुशासंग्रहः तत्र मंत्रः पिठोरव्रतम्
३९	२	४	भा.शु-प्रतिपदायांमौनव्रतं शिवार्चनम्
३९	२	७	नाम्नांसहस्रेमहातमाख्यं व्रतंतस्यकथा
३९	२	७	मौनव्रतकथास्कंदपुराणे
४०	२	१४	भा-शु-द्वितीयायांशाकाख्यधातृपूजा आचारादभिनवोदित चंद्रदर्शनेअर्घ्यदानं
४०	२	१६	भा.शु. तृतीयायांवासुदेवप्राप्त्यैपायसदा.
४१	२	८	अस्यांहरितालिकाव्रतेपूजाविधिः
४२	२	६	हरितालिकाव्रतकथा (व्रतं
४६	२	३	हरितालिकाव्रतोद्यापनप्रयोगः गौरीश्वरी
४७	२	१६	अत्रैवहस्तगौरीव्रतम् हरिकालीव्रतम्

प०	पृ०	पं०	सूचिपत्रम्
४९	२	१४	भा.शु.चतुर्थ्यांसिद्धिविनायकव्रतविधानं
५१	२	५	अत्रचंद्रदर्शनाविशेषः तत्रमंत्रविधानं
५१	२	९	स्यमंतकोपाख्यानम्
५७	१	१२	शिवाचतुर्थीव्रतं हर्षाणीदेवपूजाव्रतम्
५७	२	३	भा.शु.पंचम्यांपंचवर्णलिखितनागपूजा
५७	२	६	नागपू.मंत्रःआलिख्यपंचमीयेनागदष्टव्रतं
५७	२	१३	अस्यामेवनागपंचमीव्रतंऋषपंचमीव्रतवि
६२	१	३	अस्याःकथासमाप्ता अथोद्यापनविधिः
६२	२	१४	भाद्रशुक्लषष्ठीसूर्यषष्ठीइयमेवललिताषष्ठी
६२	२	१६	अस्यामेवचंपाषष्ठव्रतम्
६५	१	८	भा.शु.सप्तम्यां अनंतसप्तमीव्रतंतस्यक.
६५	१	१६	अत्रैवआमुक्ताभरणसप्तमीव्रतंकथापूजा.
६८	१	८	भा-शुक्लाष्टम्यांजेष्ठाष्टमीव्रतंराधाष्टमीव्रतं.
६९	२	१५	अत्रज्येष्ठाष्टमीपूजाविधानं कथानकंच
७१	१	१४	अत्रैवदूर्वाष्टमीव्रतं दूर्वापूजनमंत्रः
७२	२	४	भाद्रशुक्लनवम्यां श्रीवृक्षनवमीव्रतम्

म१३॥

प०	पृ०	पं०	सूचिपत्रम्
७२	२	१६	नंदानवमीव्रतम्
७३	१	७	भा.शु-दशम्यांदशावतारव्रतविधानं
७४	१	७	भा.शुक्लैकादशीपद्माख्या तस्याःकथा
७५	१	८	अस्यामेवश्रवणयुतायांविजयैकादशीक·
७६	१	३	श्रवणयुतायामेकादश्यांवामनावतारः कटिदानोत्सवः
७६	१	१०	वामनावतारपूजाविधानंदध्योदनदानं
७७	१	१२	वाराहेधरणीव्रतेकल्किद्वादशीव्रतम्
७७	२	४	अत्रैवभगवतः कटिदानोत्सवः
		१०	भाद्रशुक्लद्वादश्यांश्रवणयोगेव्रतपारणे निषेधःतत्रायंनिर्णयःत्रिधाविभक्तश्रवणमध्यभागयोगेपारणंनकार्यमिति
७८	१	३	अत्रैवद्वादश्यांश्रवणयोगेशक्रध्वजोत्थाप
७८	२	८	अथश्रवणद्वादशीव्रतनिर्णयः अत्रापिवामनपूजा

प०	पृ०	पं०	सूचिपत्रम्
८०	२	९	अस्यांबुधयोगेनदीसंगमस्नानमुक्तं
		१३	नदीसंगमा अप्यत्रोक्ताः भविष्योत्तरेश्रवणद्वादशीकथा
८१	२	८	वामनपुराणोक्ताश्रवणद्वादशीकथा
८३	१	१४	अन्याभविष्योत्तरोक्ताश्रवणद्वादशीकथा
८४	२	१४	अथोद्यापनं अस्यप्रयोगः
८६	२	३	अथाग्नेयभविष्योत्तरोक्तोवामनजयंतीपू·
८८	१	११	अस्यामेव अदितियोगद्वादशीव्रतम्
८८	२	१६	अथात्रैवदुग्धत्यागव्रतारंभः
८९	१	४	अथभाद्रशुक्लत्रयोदश्यांगोत्रिरात्रव्रतम्
९०	१	८	गुर्जराचारप्राप्तगोत्रिरात्रव्रतं
९२	२	४	अस्योद्यापनं अत्रैवाशोकात्रिरात्रव्रतम्
९४	२	१२	भा·शु·चतुर्दश्यामनंतव्रतम्
९५	१	८	अनंतचतुर्दशीव्रत निर्णय अनंत पूजाविधिः

प०	पृ०	पं०	सूचिपत्रम्
९७	२	२	अनंतव्रतकथा अथोद्यापनम्
१०२	१	७	नष्टडोरकप्रायश्चित्तं अथापरमनंतव्रतोद्यापनम्
१०४	२	१	अथात्रैवपालाव्रतं अत्रैवरंभाव्रतम्
१०५	१	९	अगस्त्यार्घ्यदानम्
१०८	१	१२	अथभाद्रपौर्णमासीकृत्यानि
१०८	२	७	अत्रादौउमामहेश्वरव्रतम् सोद्यापनंपूजाकथानकम्
११२	२	१	अस्यामेवलोकपालपूजनंकन्यागतेर्केश.
११२	२	५	अस्यामेवभाद्रपूर्णिमायांकदलीव्रतं तत्र
११३	२	२	अथकथा (पू.
११४	२	८	अत्रैवपूर्णिमायांसुवासिन्योवटसावित्रींकु
	२	८	वटसावित्रिव्रतकथा
११८	१	३	अत्रैववारुणव्रतारंभःकन्यागतेर्केकार्यः
	१	७	अस्यांभाद्रपौर्णिमायांभागवतदानम्

प०	पृ०	पं०	सूचिपत्रम्
		११	अत्रैवमहालयश्राद्धप्रारंभःकार्य्यः
११८	१	११	तत्रसपिंडकाभ्युदयिकश्राद्धंनांदीमुखानांकार्यम्
११८	१	१६	अथसपिंडकाभ्युदयिकश्राद्धप्रयोगः
१२१	२	१०	अथसंकल्पश्राद्धप्रयोगः
१२४	१	१६	अथातिसंक्षिप्तसंकल्पप्रयोगः
१२४	२	१३	अथप्रसंगात्नित्यश्राद्धप्रयोगः
१२५	२	५	**इतिभाद्रमासकृत्यरत्नसमुच्चयः**
१	१	१	अथाश्विनमासकृत्यानुक्रमः गोवस्त्रादिदा॰
		२	कन्यासंक्रमेपराःषोडशघटिकाःपुण्याः
		२	अश्विनोःप्रीत्यैघृतदानंपद्मनाभप्रीत्यैदधिताम्रायसादिदानम्
		४	धान्यपर्वतदानम्
		४	सुवर्णवस्त्रादिदानम्
		७	एकभक्तव्रतंग्रहणेसातिसरयूतीर्थेपुण्यं

प०	पृ०	पं०	सूचिपत्रम्
		८	मांसभोजनवर्जनव्रतंएवंसौरमासकृत्यम्
		१०	अथमहालयनिर्णयःसचाश्विनकृष्णपक्षः
		११	कन्यास्थार्केमहापुण्यःतेनविनापिनित्यः
		१२	आषाढीमारभ्यपंचमःअधिमासेपातेसप्त.
		१५	अत्रश्राद्धकरणेअमावास्यांताःषट्पक्षाः
१	२	४	एषांव्यवस्थाशक्ताशक्तविषयाः
२	१	११	मृताहातिथिपक्षोमुख्योत्यावश्यकः
२	२	३	अत्रश्राद्धार्हादेवताः
		६	पार्वणैकोद्दिष्टश्राद्धव्यवस्था
३	२	१३	जीवत्पितृकस्यकर्तव्यतानिर्णयःश्राद्धतर्पणम्
४	२	११	अथमहालयपक्षेप्रतिदिनकृत्यानि
		१२	अथाश्विनकृष्णप्रतिपदायांवन्हिपूजनं
		१३	महालयश्राद्धंपितृणांदशसहस्रकल्पतृप्तिप्रदम्

प०	पृ०	पं०	सूचिपत्रम्
		१४	द्वितीयायांब्रह्मपूजनंश्राद्धंविंशतिकल्पसहस्रतृप्तिदम्
५	१	३	आश्विनकृष्णतृतीयायांबृहद्गौरीव्रतम्
	१	३	सोद्यापनंहस्तस्थेर्केहस्तगौरीव्रतंचात्रैव
		४	बृहद्गौरीव्रतपूजातस्याःकथाउद्यापनंच
७	२	४	आश्विनकृष्णचतुर्थ्यांसंकष्टचतुर्थीव्रतं अत्रश्राद्धंपि.चत्वारिंशत्कल्पसहस्रतृप्ति.
		५	आ.कृ-पंचम्यांपंचाशत्कल्पसहस्रतृप्ति
		८	अत्रपंचम्यांपितृरूपादेवीपूजाप्युक्ता
		१०	आ.कृ-षष्ठ्यांश्राद्धंषष्टिकल्पसहस्रतृप्तिदं
		१२	अस्यांरोहिणीव्यतीपातभौमयोगेकपिलाषष्ठीव्रतम्
८	१	८	कपिलाषष्ठीपूजाकथाकपिलाषष्ठीव्रतोद्या.
१०	२	१३	कपिलाषष्ठीव्रतोद्यापनप्रयोगःतत्पुरुषक.
१२	१	८	आ.कृ.सप्तम्यांसूर्यपूजाव्रतम्

प०	पृ०	पं०	सूचीपत्रम्
			अत्रमहालयश्राद्धं सप्ततिकल्पसहस्रतृ-
		११	आ. कृष्णाष्टम्यांमाध्यावार्षिकंश्राद्धम्
		१३	गयाश्राद्धतुल्यफलदम्
१२	२	१	अत्रमहालयश्राद्धंअशीतिकल्पसहस्रतृ-
		३	अस्यामेवाष्टम्यां पुत्रीयव्रतम्
		५	अत्रैवमहालक्ष्मीव्रतं भाद्रशुक्लाष्टम्यांप्रारंभणीयम्
		१५	महालक्ष्मीव्रतनिर्णयः व्रतविधिः
१५	१	२	महालक्ष्मीव्रतकथा स्कंदपुराणे
१६	१	४	भविष्योत्तरोक्तंमहालक्ष्मीव्रतं पूजाविधिः
१९	१	१३	अस्योद्यापनं व्रतोद्यापनकौमुद्याम्
१९	२	४	अथागमोक्तोमहालक्ष्मीव्रतविधिः
		१०	श्रीसूक्तेनमहालक्ष्मीपूजाविधिः
२२	१	१३	नारदीयपुराणोक्तं महालक्ष्मीव्रतम्
२२	२	११	अत्रैवाशोकाष्टमीव्रतं इयंशिवाष्टमीप्रोक्ता

प०	पृ०	पं०	सूचीपत्रम्
२३	१	२	आश्विनकृष्णनवम्यांरथनवमीव्रतंभावि.
		१३	अस्यांमहालयश्राद्धमशीतिकल्पसहस्रतृ
		१४	मातृनवमीश्राद्धंजीवत्पितृकेणापिकार्यं
२४	१	३	अत्रसुवासिन्योपिभोजनीयाः
			महालयश्राद्धंनवतिकल्पसहस्रतृप्ति-
		९	अस्यामेवविल्वशाखायांदेवीप्रबोधनम्
		१६	अत्रहस्तादित्येखंजनदर्शनम्
२५	१	८	आश्विनकृष्णदशम्यांयमपूजादिशांपूजाव्रतम्
		८	महालश्राद्धंशतसहस्रकल्पतृप्तिदम्
		९	आश्विनकृष्णपक्षेइंदिरैकादशीव्रतम्
		१३	अत्रमहालयश्राद्धंद्विशतकल्पसहस्रतृप्ति
		१३	इंदिरैकादशीकथा
२६	१	६	आश्विनकृष्णद्वादश्यांसंन्यासिनांमहालयश्राद्धम्

॥१५॥

प०	पृ०	पं०	सूचिपत्रम्
		११	अत्रमहालयश्राद्धं पट्शतकल्पसहस्रतृ-
		१२	आश्विनकृष्णत्रयोदश्यांगजछायायोगः
२७	२	१	अत्रमघायुक्तायांत्रयोदश्यांपिंडदानअन्यत्रनिषेधः
			महालयश्राद्धंसहस्रकल्पतृप्तिदम्
२७	२	१०	इयंचकल्पांतरेद्वापरयुगादिसमाम्नाता
		१२	अत्रपिंडदानानिषेधव्यवस्थोक्ता
२८	१	१	आश्विनकृष्णचतुर्दश्यांशस्त्रहतानांश्राद्धं
२८	२	१	तच्चैकोदिष्टं महालयश्राद्धंलक्षकोटिकल्पसहस्रतृप्तिदम्
		२	आश्विनअमायांगजछायायोगः
		५	अत्रमहालयश्राद्धंअनंतकल्पसहस्रतृप्ति.
		१६	अथस्त्रीकर्तृकपार्वणश्राद्धविधिः
३१	२	१४	अथस्त्रीकर्तृकैकोदिष्टश्राद्धविधिः
३३	२	५	शूद्रस्यपार्वणश्राद्धप्रयोगः

प०	पृ०	पं०	सूचीपत्रम्
३६	२	९	शूद्रस्यैकोद्दिष्टप्रयोगः
३७	२	९	श्राद्धकालेपठनीयोरुचिस्तवः
३८	१	१	मातृनवम्यांमातृवर्गस्यषोडशीश्राद्धक्रम
४१	१	१	अमावास्यामविज्ञातपितृमात्रानामगोत्रस्यएकाहपक्षमाश्रित्यापिंडदानमात्रं
४१	२	१५	तच्चषोडशीक्रमेणैवकार्य्यं तस्यप्रयोगः
४२	१	१६	महालयश्राद्धमाहात्म्ययस्कांदेसेतुनाहा
४६	२	४	आश्विनशुक्लप्रतिपादिमातामहस्यमहालयश्राद्धम्
			दौहित्रेणकार्यंतच्चजीवत्पितृकेणापिकर्य्यं-
		१३	इतिमहालयश्राद्धनिर्णयः समाप्तः
		१५	आश्विनशुक्लप्रतिपदायां अशोकव्रतंनवरात्रारंभः
		१६	अशोकव्रतंनारदीये भविष्योत्तरेच
४७	२	१०	अथनवरात्रनिर्णयः

प०	पृ०	पं०	सूचीपत्रम्
५०	२	२	अथविस्तरेणनवरात्रकृत्यंतत्रदेवीपूजाप्र-
५२	१	४	नवरात्रव्रतस्यसप्तपंचत्रिरात्रपक्षाः
५२	१	१३	अत्रोपवासैकभक्तनक्तादिप्रतिदिनव्यव.
५२	२	१६	कलशोपरिदेवीमूर्तिस्थापनंप्रतिमालक्ष.
५३	२	१२	अथपूजाविधिःगणपतिपूजादिक्रमः
५४	१	१५	कलशस्थापनंस्वस्तिवाचनंदेवीध्यानं
५६	१	७	अग्न्युत्तारणंप्राणप्रतिष्ठ.अग्निसूक्तंउपचा
५७	१		दुर्गास्तुतिःसंक्षिप्तपूजाअखंडदीपदानं
५८	१	१४	चंडीपाठविधिःपुरश्चरणक्रमःपाठक्रमः
५९	१	७	शतचंडीविधानंसहस्रचंडीविधानंकुमारी
६०	१	२	कन्यालक्षणंकन्यापूजामंत्राःवेदपारायणं
६१	१	१४	वलिदानंबलिदानविधानंखड्गपूजामंत्रः
६३	१	५	संक्षिप्तवलिदानविधिः महिषवलिदानमं.
६३	२	१०	अथदुर्गायात्रास्त्रीव्रतेविशेषःसूतकेपूजा निर्णयः

प०	पृ०	पं०	सूचिपत्रम्
६५	१		आश्विनशुक्लद्वितीयायांदानस्यानंतफलं
६५	१	९	पंचम्यामुपांगललिताव्रतंसरस्वतीपूजा
६५	१	१२	अत्रमूलानक्षत्रेसरस्वतीपूजाश्रवणेविस-
६५	२	१	आश्विनशुक्लषष्ठ्यांविल्वशाखायां देवीबोधनम
६५	२	१५	विल्वतरुबोधनक्रमः
६६	१	१४	सप्तम्यादिदिनत्रयक्रमःसप्तमीपूजावि-
६७	२	१	अष्टमीकृत्यअश्वपूजनंलोहाभिसारिकं
६७	२	१४	स्वातिनक्षत्रेअश्वपूजनमुक्तं
६८	१	१६	वाजिनीराजनहोमप्रयोगःऋग्वेदेनामं.
६९	१	२	यजुःशाखीयमंत्राःछत्रादिपूजनमंत्राः
७०	२	१३	छत्रस्यचामरस्यखड्गमंत्रःकटारमंत्रः
७१	१	४	छुरिकामंत्रः कवचमंत्रः चर्ममंत्रः
७१	१	८	चापमंत्र.शक्तिमंत्रःकुंतमंत्रः
७१	१	१२	आग्नेयंत्रमंत्रःपाशमंत्रःपरशुमंत्रः

प०	पृ०	पं०	सूचिपत्रम्
७१	१	१४	ध्वजामंत्रःपताकामंत्रः कनकदंडमंत्रः
७१	२	८	दुंदुभिमंत्रःशंखमंत्रःसिंहासनमंत्रः
७१	२	१४	अश्वमंत्रःशिविकामंत्रःरथपूजामंत्रः
७२	१	१०	गजमंत्रःअष्टम्यांरात्रौबलिदानम्
७२	२	७	तत्रचतुष्षष्टियोगिनीनांनाममंत्राः
७३	२	११	नवमीकृत्यम्
७४	२	१३	नवरात्रपारणानिर्णयः
७५	१	११	दशमीकृत्यं विसर्जनंइयमेवविजयदशमी
७६	१	१०	प्रस्थानविधिःशमीपूजनम्
७७	१	१५	अपराजितापूजाक्रमःविजयप्रस्थानोत्स-
७८	२	३	दुर्गाशतनामस्तोत्रंनवरात्रव्रतोद्यापनक्र
७९	२	४	आश्विनशुक्लप्रतिपदमारभ्यश्रीसूक्तवि.
			लक्ष्मीहृदयस्तोत्रं नारायणहृदयस्तोत्रम्
८३	१	१५	लक्ष्मीसूक्तपूजाविधानं श्रीसूक्तयंत्रोद्धारः
८४	२	८	अथपूजाप्रयोगःपीठपूजाउपचारपूजा

प०	पृ०	पं०	सूचिपत्रम्
८७	२	९	अष्टोत्तरशतनामपूजा आवरणपूजा
८९	१	२	विष्णुधर्मोत्तरेश्रीसूक्तविधानंश्रीसूक्तपाः
९०	१	११	इतिनवरात्रविधानप्रकरणम्
९०	१	१४	आश्विनशुक्लपक्षावसिष्टकृत्यम्
९०	१	१५	आ-शु.द्वितीयायांदानस्यानंतफलव्रतं
९०	१	१६	आ-शु.तृतीयायामपिबृहद्गौरीव्रतमुक्तं
९०	२	७	आ.शु.चतुर्थ्यांकपर्दीशविनायकव्रतम्
९०	२	१०	व्रतविधिःपूजाविधिःकथाच
९०	२	६	आ.शु-पंचम्यां उपांगललिताव्रतं
९४	१	१	श्रीसूक्तेनपूजाविधानं कथा
९७	२	९	अथास्योद्यापनप्रयोगः शांतिपंचमीव्रतं
९८	१	१५	आ.शु.पक्षेमूलनक्षत्रेपुस्तकेषुसरस्वतीप.
९८	२	५	आ-शु.षष्ठ्यांविल्ववृक्षेदेवीबोधनम्
९८	२	५	तत्रनवरात्रप्रकरणे
९८	२	७	आश्विन.शु.सप्तम्यांशुभसप्तमीव्रतम्

प०	पृ०	पं०	सूचिपत्रम्
९९	१	२	सप्तम्यादिदिनत्रयव्रतंनवरात्रविधानं
९९	१	५	महाष्टमीनिर्णयः
१००	२	१०	महानवमीकृत्यनिर्णयः
१०१	२	१०	अस्यामेवनवम्यांभद्रकालीव्रतं
१०२	२	६	महानवम्यामुत्सवविधानं
१०३	१	२	अत्रैवरथनवमीव्रतंभगवतीप्रीत्यर्थंशय्या
१०३	१	७	वृषभदानं उपयतोमुखीगोदानं
१०३	१	११	शौर्य्यव्रतं उल्कानवमीव्रतं
१०३	१	१३	आ.शु.दशमीविजयादशमीविधानं
१०४	१	२	नवरात्रविधानेशमीपूजनंतत्रैव
१०४	२	९	प्रस्थानविधानंव्याख्यास्यामः
१०४	२	१४	अत्रदिशांपूजनमंत्राः पुरोधसापठनीयाः
१०५	१	१०	अत्रखंजरीटदर्शनं
१०५	१	१२	आ-शुक्लैकादशीपापांकुशाकथा (कार्य्य
१०६	१	५	इमामारभ्यकार्त्तिकस्नानव्रतादीनामारंभः

प०	पृ०	पं०	सूचिपत्रम्
१०६	१	८	अत्रैवमासोपवासव्रतारंभःतस्यप्रयोगः
१०७	२	३	आश्विनशुक्लद्वादश्यांपद्मनाभद्वादशीव्रतं
		१२	विष्णुमंदिरेदीपदानंदीपदानमाहात्म्यं
			पुत्रप्राप्तिव्रतं त्रिरात्राशोकव्रतं
१०८	१	१६	अस्यामेवविशोकद्वादशीव्रतंत्रयोदश्यां
१०९	२	१३	आश्विनशुक्लचतुर्दश्यांधर्मराजप्रतिमादा.
१०९	२	१६	आश्विनपूर्णिमायांकांस्यपात्रदानं
११०	१	२	अत्रयोगविशेषेणमहाश्विनीपौर्णमासी
११०	१	५	आश्वयुज्यांआग्रयणविधानंनवान्नेष्टिका.
११०	२		अस्यांनिकुंभपूजोत्सवःगृहशोभाकार्य्या
			रुद्रपूजा
१११	१	१	सुरभीपूजावरुणपूजामंगलालंभनादिका
१११	१	१०	ततः प्रभृतिषण्मासांतंगृहेष्वग्निरक्षाखंडा
			कार्य्या
१११	१	११	अस्यामेवकोजागरव्रतंतत्रलक्ष्मीपूजा

प०	पृ०	पं०	सूचिपत्रम्
११२	१	३	रात्रौजागरणंकोजागरव्रतकथा
११२	१	५	अथास्योद्यापनप्रयोगः
११२	२	४	अस्यांगजनीराजनंवाजिनीराजनंचकार्य्यं
११२	२	५	अस्यांनारदीयपुराणदानं सप्तधेनुदानं
११२	२	७	तुलासंक्रांतौघृतधेनुवामनपुराणदानम्
			इत्याश्विनमासकृत्यरत्नसमुच्चयः
१	१	१	कार्त्तिकमासकृत्यनिर्णयः
१	१	१	तुलासंक्रमेपूर्वाःपराश्चघटिकापुण्याः
१	१	५	अत्रविष्णुव्रतप्रशंसा
		८	कार्त्तिकस्नानंआश्विनशुक्लैकादशीमारभ्य
		९	दाक्षिणात्यमते अन्यमतेषु आश्विनीमारभ्योक्तम्

प०	पृ०	पं०	सूचिपत्रम्
१	२	२	कार्त्तिकस्नानं कुरुक्षेत्रगंगादिषुकोटिगुणं.
		३	मथुरायामतिदुर्लभं काशीस्थविंदुतीर्थेमो.
		६	स्नानमंत्रःकाशीखंडे अर्घ्यमंत्रोपि
		११	मालाधारणं तुलस्याः धात्र्यश्च पुष्पनिवेदनंचातिपुण्यकरम्
२	१	५	धात्रीतरुछायायांदेवपूजनंरसधेनुदानं
२	१	१०	द्विदलादिवर्जनव्रतानि मांसवर्जनव्रतं
२	१	१६	गंगायमुनसंगमेग्रहणफलंदीपदानं देवालयादौ
३	१	११	आकाशदीपदानंएकभक्तव्रतंकार्त्तिक-
४	१	१२	जयावाप्तिव्रतं कृच्छ्रव्रतंदेवीव्रतं
४	२	११	कार्त्तिककृष्णप्रतिपदायांकार्त्तिक नियमधारणंवन्हिपूजाच
४	२	१२	द्वितीयायांयमपूजा तृतीयायांगौरीव्रतं
४	२	१	कार्त्तिकचतुर्थ्यांदशरथराज्ञःपूजादुर्गा-

प०	पृ०	पं०	सूचिपत्रम्
४	२	१६	अस्यामेवकरकचतुर्थीव्रतंतत्रस्त्रीणामेवाधिकारः
५	१	६	करकचतुर्थीकथा अस्योद्यापनम्
६	१	१५	का.कृ-पंच-नागपूजाव्रतं षष्ठ्यांस्कंदपू-
६	२	१	का.कृ.सप्त·वैकुंठकल्पादितत्रसूर्यपूजा
६	२	३	का.कृष्णाष्टम्यांपुत्रकामव्रतंहरिगौर्योर्दर्भमयेरूपेपूजनम्
६	२	५	इदमपिकारकाख्या चतुर्थीवदत्रापिकृत्यं
६	२	६	अस्यामेवअहोईदेवीपूजाव्रतं तत्रकथावि·
७	२	७	का-कृ·नवम्यांदुर्गापूजाव्रतम्
७	२	८	का.कृ,दशम्यांधर्मराजपूजादिशांपूजा
७	२	९	का-कृष्णैकादशीरमातस्याःकथा
९	१	१	का.कृ.द्वादश्यांगोवत्सपूजाकथा
११	२	१४	इयंनीराजनद्वादशीअत्रगवांपूजनंनीराज
११	२	१६	का.कृ.त्रयोदश्यांयमदीपदानव्रतंपंचाह·

प०	पृ०	पं०	सूचिपत्रम्
१२	१	४	अस्यामेवगोत्रिरात्रव्रतंसस्त्रीककृष्णपूजनं
१२	१	११	गोवर्धनपूजनं गवांगोपीनांचपूजनं
१३	१	८	का·कृ· चतुर्दश्यांअनर्कचतुर्दशीकृत्यं
१३	२	४	तत्राभ्यंगस्नानं चतुर्दश्यादिद्वितीयांतंस्वातियोगेश्वर्यं
१४	१	५	अथस्नानविधिः यमतर्पणं
१४	१	१४	यमायदीपदानं प्रदोषसमयेकार्य्यं
१४	२	३	प्रेतेभ्योदीपदानं तत्रमंत्रः
१४	२	१०	इयंभौमवारेचित्रायांचमहाफला
१४	२	१३	अस्यांहनुमतोजन्मदिनकृत्यं
१४	२	१५	का-अमावास्यायां दीपावलिकृत्यं
१५	१	१	अत्रापिस्वातियोगेअभ्यंगस्नानं
१५	१	८	अथदीपावलीकृत्यकथा कौमुदीव्रतमुक्तं
		१०	सुखसुप्तिकाकृत्यं प्रदोषदीपदानपूर्वकं
		१४	लक्ष्मीपूजाप्रयोगः लक्ष्मीसूक्तंपठेत्

प०	पृ०	पं०	सूचिपत्रम्
१८	१	५	अत्रदीपश्राद्धप्रयोगः अत्रस्वातिसंपातयोगः
१८	२	८	तस्यशांतिनीराजनविधिनाकार्यः
		११	अत्रकेदारगौरीव्रतं पूजाविधानं कथाच
२०	१	१०	दीपावलीकथा मार्गपातीविधानं कौमुदीमहोत्सवः
२४	२	३	प्रातर्द्यूतक्रीडनादिकं तैलाभ्यंगोपि
२५	२	१५	कार्तिकशुक्लप्रतिपदायांबलिपूजा गोवर्धनपूजाच
२६	२	८	का. शु. द्वितीयायमद्वितीयाकृत्यं
२८	१	५	का. शु. तृतीयायां विष्णुगौरीव्रतं
		९	का- शु. च. नागव्रतं
		१३	का. शु. पं. जयापंचमीव्रतं
२९	१	६	का- शु. ष.भौमवारेदेवसेनान्वितस्कंदपूजोत्सवः

प०	पृ०	पं०	सूचिपत्रम्
२९	१	१६	का.शु.स.शाकसप्तमीव्रतं
२९	२	३	का.शु-अ-गोपाष्टमी तत्रगोपूजा
		८	का-शु-न.कृतयुगादि अत्रकूष्मांडपानं
३०	१	५	तुलसीकृत्यारंभः नगरप्रदक्षिणाकथा
३१	१	२	तुलसीविवाहप्रयोगःतुलसीविवाहकथा
३३	२	४	का-शु.द.सार्वभौमव्रतं राज्यावाप्तिव्रतं
३४	१	१०	ब्रह्मावाप्तिव्रतंम्
३४	१	१४	का-शुक्लैकादशीहरिप्रबोधिनीकथापाद्मे
३५	२	८	स्कंदपुराणोक्ताकथायोगीश्वरद्वादशीव्रतं
			प्रबोधैकादशीकृत्यम्
३९	१	२	रामार्चनचंद्रिकोक्तःप्रबोधिनीप्रकारः
४१	१	९	प्रबोधकालनिर्णयः
४१	२	१५	अथैकादश्यादिपूर्णिमांतंभीष्मपंचकव्रतं
		१५	पाद्मेकार्त्तिकमाहात्म्यं भीष्मपंचकविधा०
४२	१	१३	भविष्योत्तरोक्तंभीष्मपंचकव्रतविधानं

प॰	पृ॰	पं॰	सूचिपत्रम्
४५	१	१२	भीष्मपंचकोपाख्यानं समाप्तम्
		१३	अत्रध्वजारोपणविधानं अथैतत्प्रयोगः
४६	२	७	भीष्मपंचकव्रतविधानप्रयोगः
४७	१	१५	कार्त्ति.शु-द्वादश्यांनीराजनविधानं
४७	२	११	अत्रापिनीराजनशांतिकथा (विधिः
४८	२	१५	चातुर्मास्यव्रतसमापनंवाराहोक्तः प्रवोध
४९	१	११	का.शु-त्रयो॰शिवपूजनव्रतम् १०००
४९	१	१२	अष्टोत्तरनामाभिः सहस्रदीपदानंच
४९	२	११	का॰शु.चतु॰वैकुंठचतुर्दशीहरिपूजनं
४९	२	१४	अत्रब्रह्मकूर्चव्रतं काश्यांविश्वेश्वरयात्रा
५०	२	४	अत्रपाषाणचतुर्दशीव्रतम्
५०	२	८	कार्तिकपौर्णमास्यां कार्त्तिकेयदर्शनं
५०	२	९	का:पौर्ण-दीपदानेनत्रिपुरोत्सवादिविधा-
५०	२	१६	अत्रकाम्यंवृषोत्सर्गव्रतं कल्पांतरीयोम त्स्यावतारः

प॰	पृ॰	पं॰	सूचिपत्रम्
५१	१	२	आचारप्राप्ततुलसीपूजनं अथप्रयोगः
५१	१	८	तुलसीविवाहप्रयोगः तुलसीकवचपाठः
५२	२	१	अत्रैवधात्रीपूजाप्रयोगः धात्रीपूजोद्या॰
५३	१	११	ध.त्रीमाहात्म्यकथात्रिपुरदाहोत्सवमंत्रः
५५	२	७	अत्रकार्त्तिकेयदर्शनं मन्वादि
५६	१	२	क्षीरसागरदानं वृषदानम्
५६	२	८	संतानव्रतं राशिव्रतम्
५६	२	१२	कृत्तिकाव्रतंमनोरथपूर्णिमाव्रतंसौभाग्यव्र.
५७	१	७	कार्त्तिकव्रतोद्यापनं कार्त्तिकस्नानं पुनरत्रा-
६२	२	६	कपिदानविधानम्
६३	१	३	गोदानविधानं अत्रैवभीष्मपंचकव्रतोद्या- पनमपि
६४	२	४	अत्रमार्कंडेयपुराणदानम्
६४	२	५	सुवर्णगजदानं इतिकार्त्तिकोद्यापनम्
६४	२	४	एवंचातुर्मास्यव्रतोद्यापनमपिज्ञेयम्

56

प१९॥

प०	पृ०	पं०	सूचीपत्रम्
			इतिकार्त्तिकमासकृत्यरत्नसमुच्चयः
१	१	१	अथमार्गमासव्रतनिरूपणम्
१	१	८	विष्णुपूजाव्रतम्
१	१	१०	दानविशेषनिरूपणम्
१	१	१२	व्रतविशेषनिरूपणम्
१	१	१४	अत्रतीर्थविशेषनिरूपणम्
१	१	१६	अत्रकृष्णप्रातिपदायांयोगविशेषनिरूपणं
१	२	३	अत्रतृतीयामारभ्यसौभाग्यसुंदरीव्रतं
२	१	१	नक्तव्रतमाहात्म्यनिरूपणम्
२	१	१०	उक्तव्रतस्योद्यापनविधिः
३	२	१५	मार्गकृ. चतुर्थ्यांतिथिपत्वेनगणेशपूजाव्रतंसंकष्टचतुर्थीविधिनाकार्य्यम्
३	२	१६	मार्गकृष्णपंचम्यांतिथिपत्वेनगणेशादयोनागाःपूज्याः

प०	पृ०	पं०	सूचीपत्रम्
४	१	१	अथमार्गकृष्णषष्ठ्यांसूर्यषष्ठीव्रतंभविष्यो.
४	१	१६	मार्गकृष्णसप्तम्यामप्येवंव्रतंकार्य्यं
४	२	१	मार्गकृष्णाष्टम्यांकालभैरवोत्पत्तिः
४	२	२	तस्यामुपवासादिकार्य्यम्
४	२	५	अत्रपूजोपवासजागरणानिप्रधानानि
४	२	९	अस्यामेवाष्टम्यामनघाष्टमीव्रतम्
४	२	१४	कृष्णाष्टम्यांघृतप्राशनम्
५	१	१६	मा-कृ-नवम्यांसामान्यनिर्णयोक्तंमार्गकृष्णैकादशीउत्पन्नाख्यामहाभारते
८	१	१३	अस्यामेवमार्गकृष्णैकादश्यांवैतरणीव्रतं
९	१	४	मार्गकृष्णद्वादश्यांकृत्यविशेषाभावादेकादशीकृत्यमेवात्रकार्य्यम्
९	१	५	मार्गकृष्णत्रयोदश्यांत्रयोदशीप्रदोषव्रतं
९	१	५	मार्गकृष्णचतुर्दश्यांदेविकातीर्थावतारउ.
९	१	७	अस्यामेवचतुर्दश्यांदेविकायात्रा

प०	पृ०	पं०	सूचीपत्रम्
९	१	१३	मार्गमायांपितृपूजोक्ता
९	१	१४	अस्यामेवमार्गमायांगौरीतपोव्रतं
१०	१	१५	इदमेवमहाव्रतापरनामधेयंकालिकापुरा
११	१	८	अथमार्गशुक्लप्रतिपदायांधनव्रतम्
११	१	१०	मार्गशुक्लद्वितीयायांश्राद्धंपितृपूजनंच
११	१	११	मा. शु. तृतीयायांश्राद्धेनापितृपूजनामिति
११	१	१२	मा. शु-तृतीयायांहरगौरीव्रतम्
११	१	१३	अथहरगौरीव्रतकथा
१२	१	४	अस्यामेवभविष्योत्तरपुराणोक्तमावियोग-
१३	२	१४	मा-शु. तृतीयायामारभ्यभविष्योत्तरोक्तंर-
१५	१	७	मार्गशुक्लचतुर्थ्यांहरिगणपतिव्रतं (भाव्रत
१५	२	५	अथभविष्यपुराणोक्तंगणेशचतुर्थीव्रतं
१५	२	१६	अथगणपतिस्तोत्रम्
१६	१	१३	अस्यामेवमार्गशुक्लचतुर्थ्यांकृच्छ्रचतुर्थीव्रतं
१७	१	८	अस्यामेववर्षचतुष्टयसाध्यंसर्वार्थसाधकं वरचतुर्थीव्रतम्

प०	पृ०	पं०	सूचिपत्रम्
१७	२	३	अथमार्गपंचम्यांनागपूजोक्ता
१८	२	१	अथमार्गशुक्लपंचम्यांश्रीपंचमीव्रतं
१९	१	५	मार्गशुक्लषष्ठ्यांमल्लारिपूजोक्ता
१९	१	८	अत्रचंपाषष्ठीयोगः
२०	१	६	अत्रैवफलषष्ठीव्रतम्
२०	२	४	मा-शु.सप्तम्यांमित्रसप्तमीव्रतं
२२	१	४	मार्गशुक्लनवमीनंदिनीनवमी
२२	१	८	मार्गशुक्लदशम्यांआरोग्यदशमीव्रतं
२२	२	९	मार्गशुक्लैकादशीमोक्षदा
२२	२	१२	अस्याःकथा
२४	१	२	अस्यामेवैकादश्यांवह्निपुराणोक्तंसुनामद्वादशीव्रतम्
२६	२	१३	अथैकादशीव्रतोद्यापनम्
२८	१	७	अथभविष्योत्तरोक्तंधरणीव्रतम्
२९	२	१	धरणीव्रतेषुमत्स्यद्वादशीव्रतंनारदीये

प०	पृ०	पं०	सूचिपत्रम्
२९	२	२	द्वादश्यांमार्गशुक्लायांसाध्यव्रतम्
२९	२	१५	इतिनारदीयेमार्गशुक्लद्वादश्यांसाध्यव्रतंद्वादशादित्यव्रतं अखंडद्वादशीव्रतं अथास्यामेवतारकद्वादशीव्रतम्
३१	१	७	अस्यामेवमल्लद्वादशीव्रतम्
३१	२	१३	अथास्यामेवारण्यद्वादशीव्रतम्
३२	२	६	मार्गशुक्लत्रयोदश्यामनंगत्रयोदशीव्रतं
३४	१	१३	अथापरमनंगत्रयोदशीव्रतंभविष्योत्तरे
३६	१	६	अथप्रदोषव्रतानि तत्रादौप्रदोषमहिमा
३६	१	१५	अथास्यनिर्णयः
३६	२	१५	अथपक्षप्रदोषविधिः
३८	२	१६	अथकेदारखंडोक्तशनिप्रदोषव्रतम्
४१	१	७	अथनिर्णयामृतस्कंदपुराणोक्तंशन्यादिवारयुक्तंप्रदोषव्रतम्
४१	२	७	सोमवारेणयुक्तायामपियस्यांकस्यांचित्त्रयोदश्यांप्रदोषादौशिवपूजोक्ता
४१	२	८	अथनृसिंहपुराणोक्तंनृसिंहत्रयोदशीव्रतं
४१	२	११	अथकूर्मपुराणोक्तंत्रिलोचनत्रयोदशीव्रतं
४१	२	११	अथकामत्रयोदशीव्रतंहेमाद्रौ
४२	१	१	अथवाराहपुराणोक्तं महावुधसंज्ञंत्रयोदशीव्रतम्
४२	१	११	अथसौरपुराणोक्तंशिवत्रयोदशीव्रतम्
४२	१	१३	अथमार्गशीर्षादिमासत्रयोदश्यांवर्षसाध्यंयमादर्शनव्रतम्
४२	२	१३	अथमार्गशीर्षशुक्लचतुर्दश्यामारभ्यमत्स्यपुराणोक्तंशिवचतुर्दशीव्रतम्
४३	२	१२	मार्गशुक्लचतुर्दश्यांएकभक्तव्रतम्
		१५	अस्यामेवपिशाचमोचनतीर्थेश्राद्धमुक्तं
४४	१	२	अथपौर्णमास्यांलवणाढकदानमुक्तं
		३	अस्यांचंद्रपूजोक्ता

सूचिपत्रम्

प०	पृ०	पं	
		७	अस्यामेवमृगशिरोनक्षत्रयुक्तायांसुवर्णलवणंचदेयम्
		१२	अस्यामेवचंद्रव्रतारंभःकार्यः
४४	२	४	अथवतिशीपौर्णिमोच्यते
		७	अथपूजाविधिः
४५	१	१५	अथकथा

॥ इतिमार्गमासकृत्यरत्नसमुच्चयः ॥

प०	पृ०	पं	
१	१	१	पौषमासानुक्रमः वस्त्रपानादिदानम्
		२	धनुःसंक्रमे पराःषोडशघट्यःपुण्याः
		२	एकभक्तव्रतं प्रासादगृहादिदानम्
		५	शीलावाप्तिव्रतं कनकदानं पौ॰कृ.प्रतिपदायम्
		१०	पुष्पफलादिदानं नक्तव्रतंच नर्मदास्नानं

सूचिपत्रम्

प०	पृ०	पं०	
		१३	पौषकृष्णद्वितीयायांगुरुवारयोगविधिपू.
		१५	पौ.कृ.तृ.गौरीपूजव्रतपुष्यर्क्षेपुष्यस्नानं
२	१	१	पौ.कृ.च.मासचतुर्थीव्रतम्
		३	पौ.कृ॰पं. नागपूजाव्रतम्
		४	पौ.कृ.ष.पूजागुहस्येति स्कंदपूजाव्रतम्
		५	पौ.कृ-स. भास्करंचेतिउभयसप्तमीव्रतम्
		५	पौ.कृ.अ.अष्टकाश्राद्धम्
२	२	७	अत्ररुक्मण्यष्टमीव्रतम्
		८	पौ.कृ-न.नक्तभोजनंदुर्गापूजाव्रतम्
३	१	२	पौ॰कृ-द॰अंतकस्यचेतियमपूजाव्रतं इयंअघोरकल्पादिः
		४	पौ.कृ.एकादश्यांसफलैकादशीव्रतकथा
४	२	१	पौ.कृ.द्वा.संप्राप्तिद्वादशीव्रतम्
		१३	अस्यामेवस्वरूपद्वादशीव्रतम्
५	१	१४	पौषकृष्णत्रयोदश्यांपक्षप्रदोषव्रतम्
		१५	पौषकृ-चतुर्दश्यांमासशिवरात्रिव्रतम्

प०	पृ०	पं०	सूचिपत्रम्
		१५	पौषामावास्यायां अर्द्धोदययोगउक्तः
७	२	१	सचपौषमाघपौर्णमास्योर्मध्यवर्त्ति दर्शोभवति
७	२	७	पौ.शुक्लप्रतिपदायांभानुपूजाएकभक्तव्र.
७	२	८	पौ-शु.द्वि.गौरीव्रतं शृंगोदकप्राशनम्
७	२	९	बालेंदुदर्शनं आरोग्यव्रतम्
७	२	१५	पौ.शु.तृ. ब्रह्मगौरीव्रतम्
८	१	१	पौ.शु.च-विघ्नशपूजाव्रतम्
८	१	२	पौशु.पं.मधुसूदनपूजाव्रतम्
८	१	४	पौशु-ष.विष्णुरूपीसूर्यपूजाव्रतम्
८	१	६	पौ.शु.स-उभयसप्तमीव्रतम्
८	१	९	पौ.शुक्लाष्टम्यांदुर्गापूजाव्रतम्
८	१	१६	पौ.शु.न.महामायापूजाव्रतंएकभक्तं
८	२	१०	अत्रदुर्गास्तवराजस्तोत्रम्

प०	पृ०	पं०	सूचिपत्रम्
९	२	१६	अथाश्वध्वजारोपनवमीव्रतं देवीमंदिरेध्वजारोपणम् (ल्पा-
१०	१	१	पौ-शु·द·विश्वेदेवानांपूजाव्रतंईशानक
१०	१	६	पौ-शुक्लैकादशीपुत्रदाकथापद्मपुराणे
११	१	१४	इयंमन्वादिरपि
११	१	१४	अस्यांदाक्षिणात्यानांमाघस्नानारंभः
११	१	८	माघस्नानावधिः
१२	१	५	पौ.शु.द्वा-सुजन्मद्वादशीव्रतम्
१२	२	४	अस्यामेवगोविदद्वादशीव्रतम्
१३	१	३	पौ-शु·त्रयोदश्यां अच्युतपूजाव्रतम्
१३	१	४	विप्रायघृतादिदानम्
१३	१	६	पौ-शु.च-विरूदाक्षव्रतम्
१३	१	१३	पौ.पूर्णिमायांलक्ष्मीपूजाव्रतंपुष्यस्नानम्
१३	२	१०	अत्रेशानव्रतं पुष्पस्नानविधानं पुष्पस्नानं कालिकापुराणेवाराहीसंहिता·

प०	पृ०	पं०	सूचिपत्रम्
१४	१	३	अत्रभविष्योत्तरपुराणादानम्
१७	२	३	अत्रैवमकरसंक्रांतौकूर्मपुराणदानम्

॥ इतिपौषमासकृत्यरत्नसमुच्चयः

प०	पृ०	पं०	सूचिपत्रम्
१	१	१	अथमाघमासकृत्यानुक्रमः
१	१	२	मकरसंक्रमेपराश्चत्वारिंशत्घटिकाःपुण्यं
१	१	२	अत्राग्नितृप्तयेदारुदानंतैलैरवस्त्रानादिक
१	१	७	तिलतैलेनदीपदानंतिलधेनुदानं तिलहो.
१	१	१२	अत्रमूलकभक्षणनिषेधः तिलदानम् (म:
२	१	४	माघस्नानविधानं अत्रव्रतानि नक्तव्रतं प्रयागमा-
२	१	१०	माघ कृष्णप्रतिपदायांवह्निपूजनंव्रतारंभः
		११	मा·कृ-द्वि·ब्रह्मपूजाव्रतम्
		१४	मा-कृ·तृ-सौभाग्यसुंदरीव्रतं गौरीपूजनं

प०	पृ०	पं०	सूचिपत्रम्
		१६	मा-कृ·च·तिलचतुर्थीव्रतम्
			सकष्टचतुर्थीव्रतकथा
३	२	४	मा·कृ·पं·नागपूजादिव्रतम्
		५	मा·कृ-ष·विशोकषष्ठीव्रतम्
४	१	४	मा·कृ-सप्तम्यांसर्वाप्तिव्रतम्
		८	मा·कृष्णाष्टम्यांमांसेनश्राद्धम्
		९	अत्रकृष्णाष्टमीव्रतम्
		१०	मा-कृ-न-अन्वष्टकाश्राद्धम्
		११	मा·कृ-द·उद्योतकल्पादिधर्मराजपूजनं
		१२	मा.कृष्णैकाशीपट्तिलाकथाच
५	२	८	मा·कृष्णातिलद्वादशीव्रतम्
६	१	६	मा·कृ-त्रयोदश्यांपक्षप्रदोषव्रतम्
		७	मा·कृ-चतुर्दश्यांयमतर्पणादिकृत्यं
		८	तर्पणमंत्रोक्तनामभिर्होमः कृशरान्नदानं
		१३	अस्यांतारारात्रिव्रतं शिवरात्रिवत्कार्यं

प०	पृ०	पं०	सूचिपत्रम्
		१४	माघामावास्यायां अर्धोदययोगः
६	२	४	तत्रसपायसकांस्यपात्रसुवर्णादिदानं
		१५	अर्धोदयव्रतमाहात्म्यं स्कंदपुराणे
७	२	४	अर्धोदयव्रतपूजाविधानप्रयोगःहोमविधि
८	२	१	अस्यसंक्षिप्तप्रयोगःतिलपर्वतत्रयस्य
		४	देवतात्रयपूजा तिलपर्वतदानम्
			गोदानंशय्यादिदानम्
९	१	१३	अस्यांसावित्रीसहितब्रह्मपूजाविधानं
९	२	१	इयंद्वापरयुगादि अत्रयुगादिश्राद्धादिकृ.
		३	छत्रोपानहदानम्
		७	माघशु.प्रतिपदायांवन्हिरूपशिवपूजाव्र.
		९	मा.शु.द्वि.भानुरूपप्रजापतिपूजाव्रतम्
		१२	मा.शु.तृ.सौभाग्यसुंदरीपूजाव्रतम्
		१४	अस्याविधानंभविष्योत्तरे ललितातृतीया
११	१	१	अत्रैवरसकल्याणिनीव्रतम्

प०	पृ०	पं०	सूचिपत्रम्
११	२	८	गौरीतृतीयाव्रतंच गुडलवणादिदानम्
११	२	१२	मा.शु.च.कुंदचतुर्थीव्रतम्
		१५	गौरीचतुर्थीव्रतंच कुंदचतुर्थीव्रतंच
१२	१	१५	शांतिचतुर्थीव्रतंवरदाचतुर्थीव्रत
१२	२	६	मा.शु.पं.श्रीपंचमीव्रतं वसंतपंचमीव्रतं
१२	२	७	रतिकामयोःपूजा वसंतोत्सवारंभः
१३	१	१	मा.शु.ष.अरुणाख्या तस्यामरुणपूजनं
१३	१	३	इयंमंदारषष्ठीच तत्रसूर्यपूजादिकृत्यं
१३	२	१	मा.शु.स.अचलास. त्रिलोचनाजयंती
१३	२	९	अचलासप्तमीनिर्णयः अत्रस्नानादिवि.
१४	२	५	अत्रतालकदानं रथदानविधानंच
१४	२	८	इयंमन्वादि.लोलार्कस्नानं काशीखंडे
१४	२	१०	अत्रपद्मकयोगउक्तःअचलासप्तमीव्रतक.
१५	२	९	अचलासप्तमीविधानमुद्यापनकौमुद्याम्
१६	१	५	रथसप्तमीकथा रथसप्तमीविधानम्

प०	पृ०	पं०	सूचिपत्रम्
१७	२	१०	रथांकसप्तमीविधानं आरोग्यसप्तमीव्रतं
१८	१	१२	विशोकसप्तमीव्र.सिद्धार्थकाहेमसप्तमीव्र.
१९	१	१५	विजयासप्त-व्रतं अनोदकसप्तमीव्रतं वराटिकासप्तमीव्रतम्
१९	२	१२	मा-शु.भीष्माष्टमी तत्रभीष्मतर्पणादिकृ-
२०	१	५	मा-शु.नंदानवमीतत्रस्नानदानाद्यनंतफ-
२०	१	६	मा-शु.दशम्यामांगिरसदेवतापूजादिकृ·
२०	१	१०	आरोग्यदशमीव्रतं घर्मव्रतत्रयं घर्मव्रतं विश्वव्रतम्
२१	१	४	दशादित्यव्रतं दशापूजनम्
२२	२	१	मा.शु.एका. जया भीमसेनी अत्रबाराहद्वादशीव्रतम्
२४	१	८	मा-शु-तिलद्वादशी भीमद्वादशीकथा
२६	१	५	मा.शु-त्रयोदश्यांत्रिरात्रमाघस्नानव्रतारं-
२६	१	८	मा-शु-च-यमतर्पणादिकृत्यम्

प०	पृ०	पं०	सूचिपत्रम्
२६	१	१०	माघपूर्णिमायांतिलकंबलादिदानंतिलपात्रदानंच
२८	२	१३	घृतकंबलविधानम्
२९	१	१	माघस्नानोद्यापनं अस्यांब्रह्मवैवर्त्तदानं स्कंदपुराणदानंच
२९	१	७	॥ इतिमाघमासकृत्यरत्नसमुच्चयः ॥
१	१	१	अथफाल्गुणमासकृत्यानुक्रमः
१	१	१	कुंभार्केषोडशपूर्वाघघ्नःपुण्याःगोजलान्नादिदानम्
१	१	३	पिष्टमयीदेवमूर्त्तिपूजाएकभक्तव्रतंप्रियंगु.
१	१	७	षष्ठ्यादिदिनत्रयव्रतं एकभक्तव्रतं व्रीहिगोवस्त्रादिदानम्
१	१	१२	माघस्नानवदत्रापिस्नानं

प०	पृ०	पं०	सूचिपत्रम्
१	२	४	फाल्गुनकृष्णप्रति.वन्हिपूजादिकृत्यम्
		४	द्वितीयायांब्रह्मपूजादिकृत्यम्
		४	तृतीयायांगौरीपूजादिकृत्यम्
		५	फा.कृ.चतुर्थ्यांविघ्नविनायकव्रतम्
		११	फा.कृ.पं.नागपूजादिकृत्यम्
		१२	फा-कृ.ष.स्कंकपूजाकृत्यम्
		१३	फा.कृ.सप्तम्यष्टम्योरष्टकादिकृत्यम्
		१३	फा.कृष्णाष्टम्यांपित्रादिभ्य.पिंडनिर्वपणा
२	१	१	फा.कृ-न-दुर्गापूजादिकृत्यम्
		२	फा-कृ.द-मंतकस्येतिधर्मपूजाकृत्यम्
		३	फा-कृ-विजयैकादशीकथा
३	१	२	फा.कृ-द्वादश्यांहरिपूजादिकृत्यम्
		३	फा.कृ.त्रयोदश्यांपक्षप्रदोषव्रतम्
		३	फा.कृ-चतुर्दश्यांशिवरात्रिव्रतम्
		४	शिवरात्रस्वरूपम्

प०	पृ०	पं०	सूचीपत्रम्
४	१	११	अथशिवरात्रितिथिनिर्णयः
५	२	१२	अथपारणानिर्णयः
६	१	११	अत्रावश्यकर्तव्यतापूजोपयोगिप्रसंगः
६	२	१	लिंगपूजायांफलविशेषनिर्णयः
६	२	१६	पार्थिवलिंगसंख्यानिर्णयः
७	२	१४	पार्थिवपूजाविधानेमंत्रादिनिरूपणं
९	१	२	पंचसूत्रलिंगविधानम्
९	२	८	शिवपूजामधिकृत्यपंचगव्यादिफलं
१०	१	३	विल्वपत्रपुष्पधूपनैवेद्यादिपूजाफलनिर्ण.
११	१	३	शिवनिर्माल्यग्राह्याग्राह्यविचारः
११	२	१५	अथरुद्राक्षधारणानिर्णयःरु- मंत्रनिर्णयः
१२	२	३	अथशिवपूजाप्रयोगःतत्रश्रीकंठादिन्या.
१४	१	१३	अत्रमुद्राप्रदर्शनपूर्वकमावाहनादिपू-
१५	१	१२	पार्थिवपूजाविधिः
१६	२	२	आवरणपूजानिशायामचतुष्टयेऽर्घ्यदानम्

प०	पृ०	पं०	सूचीपत्रम्
१८	१	१४	वार्षिकाशिवरात्रिकथाशिवयोगयुक्ता
१९	१	८	स्कंदपुराणोक्ताशिवरात्रिकथा
२०	२	१२	वार्षिकशिवरात्रिव्रतोद्यापनप्रयोगः
२३	१	१	मासशिवरात्रिनिर्णयः
२३	१	११	अन्यावार्षिकशिवरात्रिकथा
२६	१	११	फाल्गुनामावास्याकृत्यं इयंमन्वादिः
२६	२	५	फा.शु.प्रतिपदायांधूलिधूसरशिवपूजा.
२६	२	८	फा-शु-द्वि- फाल्गुनादिशिवपूजाव्रतम्
६२	२	१४	फा. शु- कुलसौख्यदातृतीयाव्रतंभूमिका।
२६	२	१६	भूषिकातृतीयाव्रतम् (तृ-
२७	१	१६	फा.शु-च. ढुंढिराजव्रतं अंगारचतुर्थीव्र-
			अंगारचतुर्थ्युद्यापनं सुखचतुर्थी
२७	२	६	अंगारकचतुर्थीकथा
२९	१	११	एवंगणपतिचतुर्थीव्रतं यमचतुर्थीव्रतम्
२९	१	१५	फाल्गुनादिचातुर्मास्यचतुर्थीव्रतम्

प०	पृ०	पं०	सूचिपत्रम्
२९	१	१६	अविघ्नविनायकव्रतं गणपतिसामान्यच.
३०	२	६	वर्षसाध्यंगणेशचतुर्थीव्र.स्नपनचतुर्थीव्र-
३१	२	१४	फा-शु-पं- पितृव्रतंनागपूजनंच
३१	२	१५	फा-शु-ष-पशुपतिपूजाव्रतंदारिद्र्यहरषष्ठी.
३२	१	९	फा.शु.स.पर्कपुटव्रतंत्रिवर्गेष्टदासप्तमीव्र.
३२	१	१६	कामदासप्तमीव्रतं सप्तमीस्नपनव्रतंसौर.
			व्रतंच कल्पासप्तमीव्रतम
३३	२	१३	फा.शु-अ- शिवपूजनं शीतलाष्टमीव्रतम्-
३४	१	१४	बुधाष्टमीव्रतं बुधाष्टमीव्रतोद्यापनं सोमा-
			ष्टमीव्रतम्
३५	१	१०	अर्काष्टमीव्रतं शुक्लाष्टमीव्रतंअशोकाष्टमीव्र
३५	१	५	विश्वरूपाष्टमीव्रतं अष्टमीव्रतोद्यापनम्
३५	२	११	फा-शु.न- नंदादिपंचनवमीव्रतानि
३६	१	२	फा.शु.द-आशादशमीव्रतं यमपूजनव्रतं
३७	१	३	फा.शु-आमर्दकयैकादशीव्रतकथामनोरथ

प०	पृ०	पं०	सूचीपत्रम्
			द्वादशीव्रतम्
३८	१	९	गोविंदद्वादशीव्रतम् नृसिंहद्वादशीव्रतंसुकृतद्वादशीव्रतम्
४१	१	१३	फा-शु-त्रयोदश्यांधनदव्रतम्
४२	१	८	फा.शु-चतुर्दश्यांदुर्गापूजामाहेश्वरव्रतंच
४२	२	१	फा-पूर्णिमायांसूर्यसोमपूजा अशोकव्रतम्
४२	२	१६	लक्ष्मीनारायणपूजाव्रतम्
४३	१	१३	होलिकापूर्णिमानिर्णयः होलिकापूजा-
४५	१	९	होलिकाकथाफाल्गुनीपूर्णिमांतेवसंतमहोत्सवः
४६	२	३	आयुर्व्रतं देवीव्रतं कूर्चव्रतं द्वादशपूर्णासुतीर्थविशेषाः
४७	१	३	अत्रलिंगपुराणदानं तिलधेनुदानंच
४७	१	८	इतिफाल्गुनमासकृत्यरत्नसमुच्चयः

प॰	पृ॰	पं॰	सूचिपत्रम्
१	१	१	अथमलमासादि प्रकीर्णव्रतानामनुक्रमः
१	१	१	मलमासव्रतंभविष्योत्तरे मलमासव्रतोद्यापनकथा
२	२	९	देवीपुराणोक्तं मलमासकथानकं
२	२	७	मलमासव्रतविधानं पद्मपुराणे
३	२	१५	मलमासमंत्रजपविधानंपुरुषोत्तमोपाख्या
४	१	८	व्रतविधिः मलमासे देवास्त्रयस्त्रिंशत्
५	१	७	मलमासव्रतोद्यापनं अत्रातिथिध्यानानि
६	१	३	आधिमासे शुक्लैकादशीकथा
६	२	१	आधिमासे कृष्णैकादशीकथा मलमासव्रतोद्यापनम्
७	१	१४	प्रकीर्णव्रतेषुएकादशीकल्पः ध्वजारोपणं
१०	२	१	वर्षसाध्यपंचाहैकादशीव्रतं हरिपंचकव्रतं
११	१	६	ध्वजारोपणप्रयोगः विष्णुपंचकव्रतपूजावि
१२	२	५	मासोपवासव्रतविधानम्

प॰	पृ॰	पं॰	सूचिपत्रम्
१३	१	११	अथैकादशीव्रतमाहात्म्यम्
१५	२	८	त्रिस्पृशैकादशीमाहात्म्य
१७	२	७	नित्यैकादशीव्रतम्
२३	२	५	अग्निप्रियाचतुर्दशीव्रतम्
२५	२	९	साधारणपूर्णिमाव्रतम्
२६	२	३१	प्रतिपदादितिथिकृत्यविशेषः
२८	१	१६	प्रतिपदादितिथिदेवतापूजामंत्राः
३१	१	११	इतिमलमासादिप्रकीर्णकृत्यरत्नसमुच्चयः
३१	१	११	अथसंक्रांतिव्रतनुक्रमः
३१	१	१२	धान्यसंक्रांतिव्रतं १ रूपसंक्रांतिव्रतं २
३२	१	८	भोगसंक्रांतिव्रतं ३ लवणसंक्रांतिव्रतं
३२	२	१०	तेजःसंक्रांतिव्रतं ५ सौभाग्यसंक्रांतिव्रतं
३३	१	९	तांबूलसंक्रांतिद्वयं ८ मनोरथसंक्रांतिव्र.
३४	१	११	विशोकसंक्रांतिव्रतं १० आयुःसंक्रांतिव्रतं
३४	२	७	धनसंक्रांतिव्रतं १२ आज्ञासंक्रांतिव्रतं १

प०	पृ०	पं	सूचिपत्रम्
३५	१	२	अपापसंक्रांतिव्रत १४ कीर्त्तिसंक्रांतिव्रतं,
३५	१	१६	दक्षिणायनसंक्रांतौ शीलव्रतं १५
३५	२	२	उत्तरायणसंक्रांतौ राज्यव्रतम् १६
		५	उत्तरायणेघृतस्नपनव्रतम् १७
		७	वृंताकत्यागव्रतं अस्योद्यापनविधिः
३६	१	४	शत्रुनाशनव्रतं भौमव्रतम्
३६	२	७	अथसंक्रांत्युद्यापनम्
३७	१	८	अथ रविवारव्रतानि आदित्यवारव्रतविधिः
३९	२	५	अस्योद्यापनप्रयोगः
४०	१	१५	आदित्यपीडाशांतिव्रतंआदित्यहृदयस्तोत्रंयुद्धकांडे
४२	२	१६	अपरंसूर्याष्टोत्तरशतनामस्तोत्रंवनपर्वणि
४३	१	१५	आदित्यनक्तव्रतविधिः
४४	१	१	सोमवारव्रतानिसोमपीडाशांतिःसोमन.

प०	पृ०	पं०	सूचिपत्रम्
४४	१	९	चंद्रस्तोत्रशिवप्रीतिकरसोमवारव्रतं स्कंदपुराणे
४५	२	५	वर्षसाध्यं सोमवारव्रतम्
४७	२	५	सोमवारनक्ते सामान्यपूजाक्रमः
४८	२	१५	सोमवारव्रतोद्यापनविधिः
४९	२	२	प्रभासखंडोक्तं सोद्यापनं सोमवारव्रतं
५१	२	३	श्रावणमासेसोमवारे केदारनाथपूजनं
५१	२	५	अभिनवचंद्रार्घ्यदानविधिः
५१	२	१५	अथभौमवारव्रतानि भौमवारे भौमपूजा.
५२	१	१३	भौमयंत्रोद्धारः पूजाप्रयोगः
५४	२	३	भौमवारव्रतकथा
५५	२	१०	अस्योद्यापनविधिः प्रकारांतरेण भौमव्रतोद्यापनम्
५८	२	७	मंगलागौरीव्रतविधानं मंगलागौरीकथा उद्यापनंच

प॰	पृ॰	पं॰	सूचिपत्रम्
५९	१	३	वुधवारव्रतं वुधशांतिः वुधस्तोत्रम्
५९	१	१३	गुरुवारव्रतं गुरुशांतिः गुरुस्तोत्रम्
६०	२	२	शुक्रवारव्रतं शुक्रशांतिः शुक्रस्तोत्रम्
६१	१	११	श्रावणेशुक्रवारे वरलक्ष्मीव्रतं पूजाकथा उद्यापनंच
६२	५	६	शनिवारव्रतानि शनिराहुकेतूनांशांति-
६४	१	५	शनिव्रतकथा दशरथकृतंशनिस्तोत्रम्
६६	१	८	शन्यष्टकं शनिनामशतिः
६६	२	१६	शनिपूजाविधानं सोद्यापनंशनिनक्षवि-
६७	२	१५	सूर्यारुणोक्तं शनिपूजाविधानम्
६८	१	१४	राहुकेतुपूजाविधानं राहुस्तोत्रंकेतुस्तोत्रं
६८	२	१०	तिथिनक्षत्रयोगेन सूर्यादिवारव्रतानि
६९	१	९	नक्षत्रदेवतानांपूजाव्रतानि नक्षत्रपुरुषव्र.
६९	२	१६	विष्णोर्नक्षत्रपुरुषव्रतम्
७१	२	१०	शैवनक्षत्रपुरुषव्रतं सौरनक्षत्रव्रतमपिदं

प०	पृ०	पं०	सूचीपत्रम्
७२	२	८	अथयोगव्रतानि एषांपूजोद्यापनादिक्रमेणैव
७२	२	१४	व्यतीपातव्रतम्
७४	१	२	व्यतीपातव्रतां तरंसोद्यापनम्
७५	२	११	व्यतीपातयोगेब्रह्मांडपुराणदानम्
७५	२	१३	ववादिकरणव्रतानि प्रत्येकंसप्तसप्तक्रमेणोपवासादिविधिनाविधायअष्टमव्रतेउद्यापनंकार्य्यम्
७६	१	४	अत्रविशेषतोभद्राव्रतंकथाउद्यापनंच
७७	१	११	प्रकारांतरेणसोद्यापनंभद्राव्रतंरत्नसमुच्च.
७८	१	१	मत्स्यपुराणोक्तानिषष्ठीव्रतानि
८०	२	५	भविष्योत्तरोक्तानिपंचाशीतिव्रतानि
८४	२	१६	विष्कुंभादियोगेषुप्रत्येकदानविधानम्
८५	१	१२	अथवेश्याविलासिनीनांव्रतंरत्नसमुच्चयः
८९	१	१	अथलक्षपूजाविधानानुक्रमः

प०	पृ०	पं०	सूचिपत्रम्
			वायवीयसंहितोक्तलक्षपुष्पपूजाविधानम्
८७	२	८	अक्षतादिधान्यलक्षपूजाविधानम्
८८	१	१३	जलादिधाराभिषेकपूजाविधानम्
८८	२	१४	शैवागमोक्तलक्षपूजाविधानम्
८९	१	१०	अथोद्यापनम्
९०	१	४	अग्निपुराणोक्तलक्षपूजाविधानम्
९०	२	८	अथविष्णुलक्षपूजाविधानं सोद्यापनम्
९१	१	१५	लक्षतुलसीपूजाव्रतोद्यापनम्
९१	२	५	अग्निपुराणोक्तोलक्षपूजाप्रकारयोगः
९२	१	९	इतिविष्णुलक्षपूजोद्यापनम्
९२	१	९	गणेशांविकयोरपिलक्षपूजोद्यापनम्
९२	१	९	लक्षनमस्कारपूजोद्यापनेतस्यप्रयोगः
९३	२	३	लक्षप्रदक्षिणाव्रतोद्यापनम्
९४	१	५	अश्वत्थलक्षप्रदक्षिणोद्यापनम्
९४	१	१४	लक्षवर्त्तिव्रतोद्यापनम्

प०	पृ०	पं०	सूचिपत्रम्
९४	१	१५	विष्णोर्लक्षवर्त्तिपूजोद्यापनप्रकारः
९६	२	८	विष्णोर्लक्षवर्त्तिव्रतोद्यापनम्
९७	१	१०	लक्षदीपदानंअस्योद्यापनंलक्षवदेव
९७	१	१३	वायुपुराणोक्तंलक्षवर्त्तिव्रतंरुद्रलक्षवर्त्तिव्र.
९८	१	१	लक्षदीपव्रतोद्यापनप्रयोगः
९८	१	९	फलत्यागव्रतोद्यापनम्
९८	२	१४	पार्थिवलिंगोद्यापनंतत्रकामनाभेदः
९९	१	५	पार्थिवलिंगपूजाधारस्थानंपूजायांनाममं
९९	१	११	कामनापरत्वेनपूजायाएकादशप्रकारः
९९	२	१५	लिंगसंख्याफलभेदः पूजारंभकालः
१००	१	१३	समाप्तिकालः पार्थिवलिंगोद्यापनम्
१०१	१	५	अथोद्यापनप्रयोगः तत्रादौपूजाप्रयोगः
१०१	१	१४	अत्रमहान्यासःयजुर्वेदमंत्रोक्तपूजा
१०३	१	१५	अथप्राणप्रतिष्ठापूर्वकः पूजाविधिः
१०४	२	४	पार्थिवगणेशलक्षव्रतोद्यापनंकामनाभेदः